CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३५८५

॥ अथ आत्मपुराणे प्रथमाध्याय प्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः॥ ॥ पुरा किल बौद्धादिभिः प्रवर्तितेन वेदविरुद्धेन मतेन विदूषिताशयतया परित्यज्य वैदिकं पंथानमवैदिकेन
कदध्वना प्रवर्तमानैर्जनैः संकुलतया कथावशेषवैदिकपथमखिलं भूवलयं पर्यालोच्याकारणकरुणानिधिरंविकारमणोबौद्धादिप्रसा
रितकापथोच्छेदपूर्वकं वैदिकं मार्गमव्याहतं स्वाज्ञापथेऽवतारितेन सेनान्या कुमारिलभट्टरूपेणावतरता प्रावीवृतत्. तेन च कर्मण
एव परमपुरुषार्थतां निश्चिन्वता सकलोपनिषद्भागानां कर्तृपुरुषस्तावकत्वेनार्थवादत्वमुद्घोषयताऽव्युच्छिन्नः कर्ममार्गएव व्यातन्य
त. तावताप्यपरितुष्यन् विद्याधीशोमहेशः स्वयमेव तन्मतनिराचिकीर्षया श्रीमच्छंकराचार्यरूपेणाविर्भूयोपनिषदां ब्रह्मसूत्राणां
च तात्पर्यसारं तत्तद्भाष्यप्रणयनेनाविष्कुर्वन् कर्मणां चित्तशुद्धिद्वारा मोक्षसाधनीभूतात्मज्ञानांगत्वं निर्णीयोपनिषदामर्थवादत्वं च नि
रस्य निरर्गलं ज्ञानमार्गमतिष्ठिपत्. बहुलीचकार चैतन्मतं सुरेश्वराचार्यानंदगिरिप्रभृतिभिः स्वग्रंथव्याख्यातृभिः शिष्यैः एवं भगवता
श्रीशंकरेण सकलजगद्बुद्धिधीर्षया प्रकाशितेप्युपनिषत्तात्पर्यावधारणोपाये कलिकालमालिन्यवशादुत्तरोत्तरं मलिनशेमुषीकतयो
पनिषत्तात्पर्यमसंदिग्धमनवबुध्यमानानप्यायासासहान्मंदाधिकारिणआलोच्यानायासेनासंदिग्धतत्तात्पर्यबोधनसमुदितकरुणानिग
मागमपारावारपारीणाः परापरविद्याधीशतया श्रीदक्षिणामूर्त्यपरमूर्तयः स्वाविर्भावेण द्रविडान्ववायमलंकृत्याखिलं दक्षिणदिङ्मं
डलमवतंसयंतस्तात्पर्यबोधिन्यभिधां भगवद्गीताविवृतिं कौषीतकि, तलवकार, मांडूक्याद्युपनिषत्सु दीपिकाख्यां व्याख्यां सूत्रदीपिका
भिधां ब्रह्मसूत्रवृत्तिं च विरचितवंतो "नमःश्रीशंकरानंदगुरुपादांबुजन्मने" इति श्रीमद्विद्यारण्यमुनिभिः पंचदश्यारंभे स्वगुरुत्वेन
नमनकर्मीकृताः श्रीशंकरानंदभगवंतोयतिवर्यामुक्तमुमुक्षुविषयिसाधारण्येन मनोरंजनाय पुराणविधया तत्तत्कथोपबृंहणपूर्व
कमुपनिषद्रत्नघटितं तत्सारार्थप्रकाशकमात्मपुराणमष्टादशाध्यायात्मकं गुरुशिष्यसंवादमुखेन प्राणैषुः एतत्प्रणयनं च "इदं
गुरुःस्वशिष्यायकावेरीतीरवासिने उक्तवान्श्रद्दधानायस्नेहादेवचकेवलात्" इत्यष्टादशाध्यायस्थद्विचत्वारिंशदधिकपंचशततम
श्लोकटीकायां "अस्यग्रंथस्योऽत्पत्तिदेशमाहइदंगुरुरिति" इत्यवतरणग्रंथानुरोधेन कावेरीतीरे चक्रुरिति प्रतीयते. एतदुप
रिच काशीतः पश्चिमदिग्विराजमाननिखिलभूमंडलमंडनभूतातिरम्यकाश्मीरमंडलालंकारतापन्नजंब्वभिधराजधान्यवाग्दिग्विभाग
विलसद्व्यासगंगासन्नदीसंनिकृष्टवभराभिधपुरीनिवासिनोऽनेकभेदभिन्नसारस्वतद्विजान्ववायांतर्गतसमशाखमुणीहाराभिधजात्यंतर्गतं
दत्तनामधेयं कुलं नयनवेदवसुभू १८४२ मितवैक्रमाब्दगतपौषशुक्लद्वादश्यधिकरणकेन स्वीयेन जनुषालंकुर्वंतस्तत्रैव पंडितदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लारामाभिधनिजपितृचरणनिकटे किंचिदधीत्यानुमानतोजन्मतः पंचविंशे वत्सरे गृहान्निर्गत्य श्रीकाशीक्षेत्रं निवासायाध्ययनायच
रोचयंतस्तत्रागत्याहोबलशास्त्रिश्रीविश्वेश्वराश्रमयतिवर्यप्रभृतिभ्यः पूर्वोत्तरमीमांसाव्याकरणतर्कपातंजलसांख्यप्रभृतिसकलशास्त्राण्य
धीत्य सकरुणमनंतानंतेवासिनस्तत्तदभिलषितविद्याधनवितरणेन यथाशक्ति वसुप्रतिपादनेन याचकजनांश्च परिपूर्णमनोरथान्
कुर्वंतोविदुषां मध्ये पदवाक्यप्रमाणपारावारदर्शित्वपदवीमनुभवंतः काशीनिवासमेवाऽऽवसानमंगीकुर्वंतः काकारामेतिनाम्ना विख्या
ताः संख्यावतां मुख्यतमारामकृष्णाभिख्याः कृतिनः श्रीकाशीक्षेत्रप्रसिद्धश्रीवृद्धकालेश्वरनिकटवर्तिमठनिवासिनां निखिलवाङ्मय
निधानभूतानां वेदांतोपदेशेन जनोद्धरणे बद्धपरिकराणां श्रीमद्विश्वेश्वराश्रमयतिवर्याणां निजगुरूणामात्मपुराणव्याख्यानविषयि
णीमाज्ञां स्वशिरःशेखरभूतां विधाय मूलमात्रोपलब्धावपि फलरसास्वादानुपलब्धिवदुक्तपुराणमूललाभेपि तत्तात्पर्यसाराननुभवं मन्य
मानास्तत्परिशीलनफलभूताखंडब्रह्मानंदसुखसाक्षात्कारोपलंभिकां सत्पसवाख्यां व्याख्यां निरमासिषुः एते च पादोनशतवर्षावधि
विश्वेश्वरराजधानीनिवाससौख्यमनुभूयऋषिवसुधानंदभू १९१७ मितवैक्रमाब्दगताधिकाश्विनशुक्लाष्टम्यांपरब्रह्मसामरस्यं समपद्यंत.
टीकानिर्माणकालस्तु तैरेव "बाणनागाहिविधुभि १८८५ मिते वर्षेर्कविक्रमात्" इत्यादिना टीकासमाप्तौ प्रदर्शितोवगंतव्यः
मूलनिर्माणकालस्त्वनुपलब्धत्वान्नोक्तः ॥ ॥ तमिमं ग्रंथं निर्माणसमयप्रभृति अद्ययावदनंकनवशात् प्रायशोरसिकजनानामा
किंचन्याल्लेखनक्रयादिव्यापारराहित्याच्च पुस्तकदौर्लभ्यप्रयुक्तप्रचारशैथिल्येनावकरपतितचिंतामणिदशामापन्नवंतमालोच्य दूयमानम
नोभिः श्रीमदानंदाभिधैर्यतिवर्यैः सत्परीक्षकद्वारा चिंतामणिस्वरूपप्रकटनवदंकनेन पुस्तकसौलभ्यसंपादनद्वारा एतद्ग्रंथस्वरूपप्रका
शनेन भवितव्यमिति स्वमनोऽभिलषितं प्रतिबोधितेन सूर्यरामतनूभवेन मनसुखरामाभिधेन प्रेरिताः नागरद्विजजातीया जीर्णदुर्गा
भिधराजधानीनिवासिनस्तदधिपतिवितीर्णमुख्यामात्यपदवीमधिरूढावेदांतशास्त्ररहस्यपूर्णवेत्तारोझालापदांकिताः संपद्रामतनुजनुषो
गोकुलजीशर्माणःतथा भावनगरराजधानीवास्तव्यास्तदधीशप्रदत्तोपमंत्रिपदमलंकुर्वंतः परमविवेकिनः परमानंददासांगसंभूताः श्या
मलदासशर्माणश्च श्रीमद्यतिवर्यमनोरथान्पूरयंतस्तत्प्रेरितमनसुखप्रेरणां सुदामनगरीवास्तव्यवेदान्तशास्त्रपारदर्शिजीवनरामतनुज जय
कृष्णसूरिदत्तोत्तेजनंच सफलयंतः पूर्वोक्तग्रंथस्याप्रचारदौर्भाग्यं परिहरंतोनिष्किंचनरसिकविद्वज्जनाननुगृण्हंतः केवलं लोकोपकार
बुद्ध्या स्वीयद्रव्यव्ययं कुर्वंतइमं ग्रंथं श्रीकाशीक्षेत्रवासिनृसिंहभारतीयतिसकाशादेकमपरं चोत्तेजकजयकृष्णसूरिसकाशादित्येवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुस्तकद्वयं संपाद्य श्रीनासिकक्षेत्रनिवासिभिर्नारायणतनुजनुर्भिः खाडिल्करोपाभिधैरात्माराम (आपा) शास्त्रिभिः शोधयित्वा मुं
बईपत्तनविराजमानगणपतकृष्णाजीमुद्रायंत्रालये तदध्यक्षेणात्मारामकान्होबाभिख्येन मुद्राक्षरैरंकयंतिस्म तेन चैतत्पुराणप्रतिपाद्यप्र
मेयभूतः सर्वांतरात्मा भगवान्विद्याधीशईशानः प्रसादमामुवन्नंकयितुरखंडानंतानंदात्मसुखसाक्षात्कारं वितनुतादितिशिवम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनुक्रमणिका.

प्रकरणानि	अध्यायाः
ऐतरेयोपनिषदर्थनिरूपणं	१
कौषीतक्युपनिषत्सारार्थप्रकाशः	
इंद्रप्रतर्दनाख्यानं	२
गार्ग्याजातशत्रुसंवादः	३
बृहदारण्यकसारार्थप्रकाशः	
मधुकांडसारार्थप्रकाशः	४
याज्ञवल्क्यकांडसारार्थप्रकाशेऋषियाज्ञवल्क्यसंवादः	५
याज्ञ०कां०शेयाज्ञवल्क्यजनकसंवादः	६
खिलकांडसारार्थप्रकाशेयाज्ञवल्क्यमैत्रेयीसंवादः	७
श्वेताश्वतरोपनिषत्सारार्थप्रकाश स्तत्रश्वेताश्वतरसंन्यासिसंवादः	८
काठकोपनिषत्सारार्थप्रकाशस्तत्रयमनचिकेतसोःसंवादः	९
तैत्तिरीयोपनिषत्सारार्थप्रकाशः	
आनंदवल्लीभृगुवल्लीनारायणीयव्याख्यानं	१०

प्रकरणानि	अध्यायाः
जाबाल गर्भ ब्रह्म परमहंस हंस आरुणेय क्षुरिका अमृतनाद महत् आत्मप्रबोध कैवल्याख्यानामेकादशोपनिषदांसारार्थप्रकाशः	११
छांदोग्यसारार्थप्रकाशः	
आरुणिश्वेतकेतुसंवादः	१२
सनत्कुमारनारदसंवादः	१३
प्रजापतींद्रविरोचनाख्यायिका	१४
तलवकारोपनिषत्सारार्थप्रकाशः	१५
मुंडकोपनिषत्सारार्थप्रकाश स्तत्रांगिरःशौनकसंवादः	१६
प्रश्नोपनिषत्सारार्थप्रकाशस्तत्रपिप्पलादसुकेशसंवादः	१७
नृसिंहपूर्वोत्तरतापनीयसारार्थप्रका शइशावास्यसारार्थप्रकाशश्च	१८

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशायनमः ॥ ॥ मंगलपद्यव्याख्या दानधर्मेषुरहस्यप्रकरणेहरिहरयोरभेदइत्युपाख्यायते नारदादयोमुनयोनारायणस्य भगवतोदर्शनायसमागताःसभाजिताःस्थितास्तदानारायणस्यमुखादकस्मान्निर्गत्यतेजसाहिमालयोदग्धः तदाचकितान्मुनीन्दृष्ट्वाभगवतादृष्टोहिमालयस्तथाभूतोऽभवत् अथभगवतामुनयःपृष्टाःकिंचिच्चित्रंयद्भवद्भिर्दृष्टंतच्छ्राव्यतामिति ततस्तैर्नारदोनियुक्तःश्रावयामास कदाचिद्धिमालयेभगवान्शिवःस्थितोऽभूत्तदापार्वतीपृष्ठतआगत्यनेत्रद्वयंपिदधे अथांधीभूतेलोकेहरस्यविकासिततृतीयनेत्रेणहिमालयोदग्धः पुनःपार्वत्यांचकितायांहरेणदृष्टस्तथाभूतोभवदिति ॥ तथाचयदीयादृक्शैलेशस्यहिमालयस्यांतोद्भवयोर्निर्माणेएकाऽसहायाशक्ताइत्यर्थकःप्रथमपादोहरौहरेपिसमन्वितः ॥ द्वितीयपादस्तुहरिपक्षेआकाशीयायाआकाशसंबंधिन्याआभायाःश्यामायाभरणेनललितोमनोहरोविग्रहोयस्येति हरपक्षेतुकाशस्येयंकाशीया यद्वा काशींयांतीतिकाशीयाः विच् तेषांभाभरणंज्ञानप्रकाशपूरणंललितंईप्सितंप्रयोजनंयस्य ललईप्सायां एतादृशोलीलाविग्रहोयस्येति ॥ उत्तरार्धेतुहरिपक्षेरामइतिविशेष्यपदं मालंकरणेनलक्ष्मीरूपभूषणेनपरमउत्कृष्टशोभः ॥ हरपक्षेरामाचासौउमाचेतिविग्रहः यद्वा रामचंद्रेणउमयाचकृतंयदलंकरणंतेनपरमइति अथवारामचंद्रोमयोःप्रेम्णाअलंकरणेतत्परइत्यर्थः ॥ वैशेषिकादिमतेनतटस्थतयाप्रतिपादनात्प्रवासमिवनीतस्तत्सखीभिःपार्वतीलक्ष्मीसंज्ञकब्रह्मविद्यासखीभिःश्रुतिभिःस्वांतागारेधीगुहायांनिरुद्धःप्रसाद्येवानीतःस्वात्मतयाबोधितः शेषंस्पष्टम् ॥ १ ॥ द्वितीयपद्येआवरणरूपांतरायभंजिकावृत्तिर्गणपतिस्त्वतेरुपमानं फलचितूहनुमतृस्फूर्तैः कार्यस्यघटादेःसाधकत्वात् शेषंस्पष्टम् ॥ २ ॥ तृतीयपद्येअदितिरुपमानंगुरुदयोपमेयातयोःसाधारणधर्मस्तुदेवप्रसवकारणत्वमुपमानेप्रसिद्धं उपमेयपक्षेदेवाःशमादिशास्त्रविहितवृत्तिरूपास्तद्धेतुत्वम् द्वितीयःसाधारणधर्मोभगवत्कर्तृकश्रुतिभूषणकरणकव्यापारजन्यप्रीतिशालित्वं तत्तूपमानेप्रसिद्धम् श्रुत्योःकर्णयोर्भूषणेताभ्यामितिषष्ठीसमासाश्रयणात् श्रीकृष्णेनभौमासुरंनिहत्यकुंडलप्रत्यर्पणात् ॥ उपमेयेतुमयानुकूलेननभस्वतेरितमितिवदताभगवतासर्वफलप्रदात्राप्रवृत्तिनिवृत्तिशास्त्ररूपसामग्रीसंघटनेनसंप्रीणितासहायतांनीताइत्यर्थः श्रुतीपूर्वोत्तरकाण्डेएवभूषणेइतिकर्मधारयाश्रयणात् ॥ क्षेमहेतुत्वंतुमातुर्दयायाश्चप्रसिद्धमेव ॥ ३ ॥ तुर्येपद्येकूटपदेनयंत्रंयाह्यं कूटंपूर्द्वारयंत्रयोरितिहैमः ॥ तत्तुतालाइतिप्रसिद्धम् ॥ विविक्षतःप्रवेशमिच्छतः शेषंस्पष्टम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीरामचंद्रायनमः ॥ ॥ श्रीकाशीविश्वेश्वराभ्यांनमः ॥ श्रीगणेशायनमः ॥ श्रीहनुमतेनमः ॥ श्रीगुरुभ्योनमः ॥ ॐनमः शैलेशान्तो
द्भवविरचनेदृग्यदीयालमेकाकाशीयाभाभरणललितोविग्रहोभातियस्य ॥ रामोमालंकरणपरमस्तत्सखीभिर्निरुद्धःस्वान्तागारेश्रुति
भिरवताच्छंकरोदेवदेवः ॥ १ ॥ चिन्तांनिहन्तिखलुयस्यमहान्तरायंस्फूर्त्तिंविकासयतियस्यसमस्तकार्यम् वृत्तिर्यथाथफलचिच्चयथा
नुमस्तंद्वैमातुरंचकुलदैवतमाञ्जनेयम् ॥ २ ॥ येषांकृपासकलदेवगणंप्रसूतेसंप्रीणिताभगवताश्रुतिभूषणाभ्याम् क्षेमंतनोत्यदितिवत्प्रणतो
स्म्यहंतान्विश्वेश्वराश्रमगुरून्पितातपादान् ॥ ३ ॥ रत्नानियत्रोपनिषन्मयानिकोशेसमस्तान्यपिशेरतेस्मिन् विविक्षतःकूटविघाटनायकृ
पागुरूणांममकुञ्चिकास्ति ॥ ४ ॥ अथात्रभगवान्शङ्करानन्दमुनिर्गुणोपसंहारन्यायेनाधिकारिणांयावद्यत्रयच्चमननोपयोगितद्दर्शनपूर्व
कंसमस्तोपनिषदोव्याचिख्यासुरधिकारिणंसूचयन्ऋग्वेदप्राथम्येनऐतरेयोपबृंहणमादावारभते तत्रप्रथममधिकारिलक्षणंबोधयन्नौ
त्सर्गिकंगुरुशिष्यसंवादमवतारयति ईशेत्यादिना जीवेश्वरभेदः जीवजगद्भेदः ईशजगद्भेदः जीवानांपरस्परंभेदः जगतःपरस्परभेदः इति

ईशानीशादिभेदेनव्याकुलंसकलंजगत् ॥ निरीक्ष्यश्रोत्रियःकश्चिच्छ्रुतार्थग्रहणक्षमः ॥ १ ॥

पंचविधभेदज्ञानात्मिकयाकार्याविद्ययासकलंजगत्कर्तृभोक्तृरूपंजीवजातंव्याकुलंकारणोपाधीश्वरात्प्रशासितुर्भयेनाभिनिवेशाख्य
क्लेशेनव्याप्तं यउदरमन्तरंकुरुतेअथतस्यभयंभवतीतिश्रुतेः निरीक्ष्यआलोच्य ऐतननित्यानित्यवस्तुविवेकःसूचितः कश्चित्श्रोत्रियःवि
धिवदधीतवेदवेदांगः श्रुतार्थग्रहणक्षमःमेधावान्श्रद्धावांश्च एतेननित्यानित्यवस्तुविवेकश्रद्धाभ्यांमध्यवर्तीनिअंगानिसंदंशन्यायेनसंगृ
हीतानि प्रमेयंतुनाम्नैवस्फुटीकृतम् यथा आत्मापुराणःपुरुषःपुराणःपुरुषस्त्वयम् आत्मेत्यात्म[2]पुराणस्यनाम्नामेयंप्रदर्शितम् ॥ संबंधःप्र
सिद्धइति ननुमंगलानाचरणान्मूलकृतेःसदाचारविरोधइतिचेदत्रोच्यते त्रीण्यत्रमंगलानि बहिःकृतमेकंमगणप्रयोगात्मकं द्वितीयंभग
वत्पादैरिवभाष्यारंभेऽयमध्यासोमिथ्येतिभवितुमर्हतीतिशुद्धंतत्त्वंमंगलायस्मृतंतथैतैरपिभेदस्यहेयतयाप्रतिपादनादहेयतत्त्वानुस्मरणरूपं
तृतीयंमंगलंकृतमितिसर्वंसमंजसम् ॥ १ ॥

१ भिन्नशाखागतानांगुणानामंगानांविशेषणानांवाएकबुद्ध्युपारोहणंगुणोपसंहारः

२ पुराणःपुरुषोयज्ञइत्यमरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकदेति करुणाक्रांतचित्तःकरुणयाव्याप्तमनाः एतेनशुद्धांतःकरणतयामुमुक्षासूचिता विचारस्वरूपमाह अहोइति महागसांवधसाधनेनशूलेनदेहत्रयाभिमानलक्षणसंसारतादात्म्यंप्राप्तेनसर्वदेहिनःक्लेशिताः ॥२॥ साधर्म्यमाह कामादीति शवव्याप्तत्वेनदिवाकाकसेवितत्वनक्तंवटकरंजकत्वंचउपमानेसिद्धं उपमेयेतुउड्डीयोड्डीयपतद्भिःकाकैःप्रसुप्ताद्यवस्थावतांकामादीनांसाम्यंप्रछन्नभोक्तृभिर्वटकैर्नारीणांच अत्यंताभिनिविष्टत्वात् श्रांतपादप्रहारन्यायेनतद्विनोदहेतुत्वंबोध्यम् संसारशूलेनेतिपरिणामालंकारः उपमानशूलस्यउपमेयतादात्म्यापत्तिंविनाप्राणित्वावच्छिन्नकर्मकक्लेशनक्रियान्वयासंभवात् मयूरव्यंसकादित्वात्समासः ॥ ३ ॥ सगुरुमेवाभिगच्छेदितिश्रुतिमनुरुध्याह इतिसंचिन्त्येति प्रश्नस्वरूपमाह कथमिति अज्ञानमेवलोहमयस्तदंगंशरीरंयस्यततृ मृद्घटइतिवत्सामानाधिकरण्यं ॥४॥ गुणत्रयेति गुणत्रयात्मकशिखात्रययुक्तं तस्माउपसन्नायेत्यादिश्रुतिमनुरुध्याह एवमुक्तइति एवमुक्तोगुरुःएषपन्थाइत्यादिवाक्येनऐतरेयशाखायां

एकदाकरुणाक्रांतचित्तएतद्यचिंतयत् ॥ अहोसंसारशूलेनक्लेशिताःसर्वदेहिनः॥ २॥ कामादिकाकवासेननारीवटकविनोदिना॥ कथमस्माद्भवेन्नैवभीतिःसर्वनृणामिह ॥ ३ ॥ इतिसंचिन्त्यमतिमान्स्वगुरुंपरिपृच्छति॥ कथमज्ञानलोहाङ्गंतीक्ष्णसंसारशूलकम् ॥ ४ ॥ गुणत्रयत्रिशाखाग्र्यमतिक्रम्यव्रजेत्पुमान्॥ एवमुक्तोगुरुःप्राहस्वशिष्यंकरुणानिधिः॥ ५॥ ज्ञानमज्ञाननाशायनियतंसाधनंत्विति॥ संसारशूलमखिलंवटककाकादिसेवितम्॥ ६ ॥

पठितेनोत्तरमाह वाक्यस्वरूपंयथा एषपंथाएतत्कर्मएतद्ब्रह्मएतत्सत्यंतस्मान्नप्रमाद्येत्तन्नातीयान्नह्यत्यायन्पूर्वेयेत्यायंस्तेपराबभूवुः तदुक्तमृषिणाप्रजाहतिस्रोअत्यायमीयुरितियावैताइमाःप्रजास्तिस्रोअत्यायमायंस्तानिइमानिवयांसिवंगावगधाश्चोरपादाइति एतदुपबृंहणं अष्टचत्वारिंशत्तमश्लोकंयावद्बोध्यम् ॥ ५॥ तत्रादौएषपन्थाइतिभागस्यार्थमुपबृंहयति सार्द्धैस्त्रिभिः पथेगताविति धातोरिनिप्रत्ययेऔणादिकेसतिपथिन्शब्दोनिष्पन्नः तथाचपथ्यतेगम्यतेइष्टदेशादिअनेनेतिपन्थाःतादृशंतुज्ञानमेव दुःखनाशकत्वेनसर्वाभीप्सिताज्ञाननाशहेतुत्वादित्याह ज्ञानमिति तुशब्दःकारकव्यापारनैरपेक्ष्यरूपवैलक्षण्यार्थकः इतिशब्दोहेतौ तथाचयतोज्ञानमज्ञाननाशायनियतमितरविलक्षणंचसाधनंतस्मात्तदेवपथिन्शब्दार्थइत्यर्थः ननुसंसारशूलनिवृत्तिसाधनंपृच्छतेकिमज्ञाननिवृत्तिसाधनोपदेशेनेत्यतआह संसारेति॥

१ प्रसुप्तास्तत्त्वलीनानांतन्ववस्थाश्चयोगिनां विच्छिन्नोदाररूपाश्चक्लेशाविषयसंगिनां२यथानिन्दतेनापिपादप्रहारेणश्रांतस्तुष्यतितद्वत् ३वनगाव्वृक्षाओषधयःउरःपादाःस.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तविशेषणविशिष्टंसंसारशूलंमायिनईश्वरस्यमाययाभातं मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमितिश्रुतेः नतुमायाऽज्ञानभिन्ना लोकेपिऐंद्रजालिकमंत्रौषधादिभिर्द्रष्टृणामज्ञानक्षोभेनैवतत्तदाकारेणऐंद्रजालिकस्यदर्शनान्मायाज्ञानमेवेतीरितंमायाचतमोरूपेतिनृसिंहतापनीयश्रुतौ आकरेषुच ननुलौकिकज्ञानेसत्यपिसंसारशूलनिवृत्त्यदर्शनात्कथमुक्तंसंगच्छतेइत्यतआह ज्ञानमिति ज्ञावबोधनइतिस्मृतेरवस्थितस्याधिष्ठानस्यबोधनंयथावत्स्फूर्तिर्ज्ञानंतादृशंतुवेदांतप्रमाणजन्यमेव तत्रयथावत्प्रमेयस्यभानात् इदमेवप्रमाणस्यप्रमेयतंत्रत्वं इतरद्यथावत्प्रमेयभानरहितमज्ञानंबोध्यम् ॥ ७ ॥ एतदेवव्यतिरेकमुखेनाह नहीति नहिसन्निपातवताभिलपितंदोषप्रयुक्तंभेरीशब्दज्ञानंप्रमाणमितिव्यवहरंतीत्यर्थः॥ ८ ॥फलितंदर्शयन्मार्गत्वोपपादकदर्शनायआह संसारशूलमिति मुक्तिमंडपस्यसर्वाधारतयासन्निहितत्वद्योतनायगमधातोर्ज्ञानार्थपर्यवसानसूचनायचसप्तमीप्रयुक्ता एतत्कर्मेतिभागंव्याचष्टे कर्तव्यमिति एतद्विज्ञानंश्रवणाद्यनुष्ठानद्वारा

मायिनोमाययाभातंमायाऽज्ञानमितीरितम्॥ ज्ञानंवेदांतविज्ञानमज्ञानमितरत्पुनः॥ ७॥ नहिभ्रांतस्यविज्ञानंलोकेपिज्ञानमिष्यते॥ अतोब्रह्माहमस्मीतिबोधोमार्गोत्रसंमतः ॥ ८ ॥ संसारशूलंसंत्यज्यगच्छतांमुक्तिमंडपे॥ कर्तव्यमेतद्विज्ञानमात्माज्ञानापनुत्तये ॥ ९ ॥ नचान्यदग्निष्टोमादिदेहकारागृहप्रदम्॥ आत्मबोधोबृहत्तस्मादुक्ताज्ञानविनाशनात्॥ १० ॥ प्रापणाच्चात्मरूपस्यब्रह्मणोभेदशून्यतः॥ घटस्तिष्ठतिनान्यत्रवर्तमानःस्थितोभुवि॥ ११ ॥

कर्तव्यंसंपादनीयमतएतत्कर्मेत्यर्थः ॥ ९ ॥ सर्ववाक्यंसावधारणमितिन्यायेनैतद्व्यावर्त्यमाह नचान्यदिति काम्यंकर्ममुमुक्षोर्नकर्तव्यंभोगान्यथानुपपत्त्यातदुपयोगिदेहबंधहेतुत्वादित्यर्थः एतद्ब्रह्मेत्यंशंव्याचष्टे आत्मबोधइति सर्वोत्कृष्टंहिबृहद्ब्रह्म बृहिधातोरर्थानुगमात् साधनस्यबृहत्त्वंतुसमूलदुःखनाशकत्वंनिरतिशयाविनाश्यानंदप्रापकत्वंच तयोराद्यमाह उक्ताज्ञानविनाशनादिति ॥ १० ॥ द्वितीयमाह प्रापणादिति भेदशून्यस्यभूम्नोब्रह्मणआत्मरूपस्यप्रापणादित्यर्थः सार्वविभक्तिकस्तसिः योवैभूमातत्सुखंनाल्पेसुखमस्तीतिश्रुत्यनुरोधेनत्रिविधपरिच्छेदराहित्यात्मकभूमस्वरूपत्वप्रतिपादनायाल्पत्वात्मकत्रिविधपरिच्छेदमुदाहरणेनस्पष्टयति घटइति अत्यंताभावप्रतियोगित्वंदेशपरिच्छेदः यथाभुविवर्त्तमानोघटोन्यत्रदेशेनतिष्ठतिअत्यंताभाववानित्यर्थः ॥ ११ ॥

१ अवधारणेनैवकारार्थेनान्वितमन्यथानिश्चयरूपप्रमाऽजनकत्वेनप्रमाणत्वाभावापातात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नासीदिति प्रागभावध्वंसप्रतियोगित्वंकालपरिच्छेदः यथावर्तमानोघटःपुरानासीत् पश्चाच्चनभविष्यतीति अन्योन्याभावप्रतियोगित्वं वस्तुपरिच्छेदः यथाघटोन्यत्पटादिन ततोभिन्नइतियावत् इदंजगत् घटघटभिन्नात्मकमित्यनुभवाद्भेदःस्फुटइत्यर्थः ॥ १२ ॥ अद्वितीयेसर्वात्मनिब्रह्मणितदन्यतिरेकमाह इतित्रिधेति तत्रायमात्माब्रह्मेतिवाक्यंसंवादयति ब्रह्मात्माहमिति ॥ १३ ॥ तस्मादेतादृशब्रह्मप्रापकत्वात्ज्ञानेब्रह्मपदप्रयोगउपपन्नइत्याह तस्यमेइति एतत्सत्यमित्यंशंव्याचष्टेसप्तभिः यथाब्रह्मेति ॥ १४ ॥ सत्यशब्दस्यारोपेणज्ञानेवृत्तिरितिबोधनायसत्यशब्दस्यमुख्यार्थमाह आदाविति कालत्रयेपिनिर्विकारंकूटस्थनित्यंयत्तादृशंसत्यशब्देनसत्यंज्ञानमित्यादिवाक्यगतेनप्रोक्तंतत्तुमत्तःशोधिताहमर्थात्सर्वांतरादन्यज्जडंविकारिनसंभवतीत्यर्थः ॥ १५ ॥ एवंश्रुतिप्रसिद्धंसत्यशब्दार्थमुक्त्वालोकप्रसिद्ध्यापितदेवाभिनयति अपिचेति यत्रास्तीतिप्रतीतिविषयत्वमस्तिशब्दवाच्यत्वंवाससदर्थःसतांप्रमाणानामर्थः सत्प्रमाणमर्हतीतिविग्रह

नासीत्पुरानपश्चाच्चभविष्यतिकथंचन॥ अयंघटोनचान्यत्स्यात्घटाघटमिदंजगत् ॥ १२ ॥ इतित्रिधापरिच्छेदोब्रह्मण्यात्मस्वरूपके॥ नविद्येतयतस्तस्मात्ब्रह्मात्माहमितीरितः॥ १३ ॥ तस्यमेगमकंज्ञानंब्रह्मेत्याहश्रुतिःस्वयम्॥ यथाब्रह्मतथासत्यमिदंज्ञानमिहोदितं॥ १४॥ आदावंतेचमध्येचयत्स्वरूपंनसंत्यजेत्॥सत्यंतत्तादृशंप्रोक्तंमत्तोन्यत्तादृशंनहि॥ १५॥ अपिचास्तीतिविज्ञानशब्दयोर्विषयोमतः॥सदर्थःसत्यतातेनममधीशब्दरूपिणः॥ १६ ॥ यथावाक्यंजनस्यात्रसत्यार्थगमकंहितत्॥एवंसत्यमिदंज्ञानंममसत्यस्यबोधकम्॥ १७॥

वतोयत्प्रत्ययांतस्यसत्यशब्दस्यापिसएवार्थोमतः लौकिकपरीक्षकैरसतोज्ञानविषयत्वासंभवात् सचापातदर्शिनांदृष्टौनानारूपः वस्तुतस्तु प्रकाशाबहवोदीपाःसंतुरात्रौगृहेगृहे दिनेऽप्रकाशतांयांतिभानावेकत्रभास्वतिइतिन्यायेनअस्तीत्येवोपलब्धव्यइत्यादिप्रमाणोदयेसत्यताममैवसर्वांतरस्य कीदृशस्य धीशब्दरूपिणः धीशब्दौरूपयितुंविषयिणोविषयनिरूप्यत्वाद्रूपवंतौकर्त्तुंशीलंयस्यसतथातस्य तथाचोक्तं अस्तिभातिप्रियंरूपंनामचेत्यंशपंचकं आद्यंत्रयंब्रह्मरूपंमायारूपंततोद्वयमिति ॥ १६ ॥ एवंसत्यशब्दमुख्यार्थमुक्त्वाऽऽरोपेणज्ञानेवृत्तिदृष्टांतपूर्वकमाह यथावाक्यमिति यथालोकेआप्तवाक्यंसत्यमितिव्यवह्रियतेसत्यार्थबोधकत्वात् एवमेतत्सत्यमितिवाक्येसत्यपदंज्ञानेप्रयुक्तं ब्रह्मज्ञानस्यपरमार्थसत्यप्रापकत्वादित्यर्थः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपरब्रह्ममुख्यार्थकस्यसत्यशब्दस्यारोपेणप्रवृत्तिरुपपादिताऽधुनाकार्यब्रह्मपरस्यसत्यशब्दस्यासन्नेवास्यशत्रुर्भवतीत्यर्थकश्रुत्याशत्व
सत्तासंपादकध्यानकस्यारोपेणज्ञानेप्रवृत्तिमाह असत्यस्येति यथाकार्यब्रह्महिरण्यगर्भःसत्यशब्दवाच्योविनष्टशत्रुरेवंज्ञानमपिविनष्टस
विलासाज्ञानशत्रुकमतोयुक्ताऽत्रज्ञानेसत्यशब्दस्यसादृश्येनवृत्तिरितिभावः॥ १८॥ ननुहिरण्यगर्भस्यअनागतवर्त्तमानातीतकल्पेष्वेकत्वा
॥ ३॥ देकविधैश्वर्यवत्वाच्चशत्रुषुअसच्छब्दप्रयोगःसंभवति ज्ञानशत्रोरज्ञानस्यानादेरतीतवर्तमानकालसंबंधित्वात्तत्कार्याणांचवर्त्तमानकाल
संबंधित्वात्कथमसत्त्वमतआह आदाविति यद्यत्कालाव्यापितत्तदसत् यथावंध्यासुतइतिव्याप्तिशरीरं लाघवात् नतुकालत्रयाव्यापित्वं
कालद्वयाव्यापित्वंवानिवेश्यंगौरवात् एवंचाज्ञानस्यभविष्यत्कालाव्यापित्वात्तत्कार्याणांचातीतानागतकालाव्यापित्वादसत्वंसत्ताराहि
त्यंसिद्धमितिभावः ॥ १९ ॥ किंचाज्ञानंसविलासमसदपरोक्षभानराहित्यादित्यनुमानांतरमतोन्यदार्त्तमितिश्रुत्यनुगृहीतंसूचयति नचाप
रोक्षमिति यद्वत्तस्यवंध्यासुतस्यापरोक्षंभानंनस्यान्नसंभवेत्तथास्यसविलासाज्ञानस्येत्यर्थः ननुआत्मभानमादायस्फुरणंसविलासाज्ञाने

असत्यस्यविनाशाद्वासत्यमेतदिहोच्यते॥ नहिज्ञानस्यसत्तायामात्माज्ञानंननश्यति॥ १८॥ आदौपश्चादस
त्वाद्धिमध्येप्येतदसत्स्मृतम्॥ नचकालद्वयाव्याप्तोमध्येवंध्यासुतोस्तिहि ॥ १९॥ नचापरोक्षंभानंस्यात्तस्य
यद्वत्तथास्यहि॥ नस्वप्रसिद्धेःसिद्धिःस्यादनयोर्विषमाक्वचित्॥ २०॥

विशेषइतिचेदऽस्त्वयंविशेषोमध्यमंप्रति श्रुतितात्पर्यविदमुत्तमंप्रतितुनविशेषइत्याह नस्वप्रसिद्धेरिति स्वेनात्मनाप्रसिद्धिर्यस्यसस्वप्रसि
द्धिरात्मा ल्यबूलोपेपंचमी तथाचस्वप्रसिद्धिंस्वप्रकाशमात्मानमाश्रित्यसिद्धिरनयोरज्ञानवंध्यासुतयोर्विषमानकिंतुसमैवयद्यात्मनःसत्ता
प्रकाशाभ्यामज्ञानंसदितिव्यवह्रियतेतर्हिवंध्यासुतोपितथाव्यवह्रियतां नहिपरधनेनकश्चिद्धनीतिव्यवह्रियते नचासतस्तदाश्रितत्वम
पि सदसतोःसंबंधासंभवात् तदुक्तं तुच्छानिर्वचनीयाचवास्तवीचेत्यसौत्रिधा ज्ञेयामायात्रिभिर्बोधैःश्रौतयौक्तिकलौकिकैः यद्वा ननुस्फु
टोवंध्यासुतसविलासाज्ञानयोर्भेदः वंध्यासुतोऽसन्निति प्रतीयतेऽज्ञानंतुसदितियदिकश्चिद्ब्रूयात्तत्राह नस्वप्रसिद्धेरिति अनयोर्वंध्यासुता ॥ ३॥
ज्ञानयोरसत्सदाकारेणयाविषमासिद्धिःस्फूर्तिःसापिस्वप्रसिद्धेस्तयोःस्वरूपभूतप्रकाशाद्धेतोर्नचिद्भिन्नत्वेनजडत्वात्किंत्वात्मसत्ताप्रकाश
बलादेव तथात्मैवैकःसन्नेतौतुअसत्तयासमावेवेतिभावः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्यमंप्रत्यप्याह आनंदात्मनीति यद्यध्यासंमन्यसेतदापिअध्यस्तस्याधिष्ठानाभेदासंभवादद्वैतनिष्ठारूपामपवाददृष्टिमालंबस्वेतिभावः
तस्मान्नप्रमाद्येदित्यंशंव्याचष्टे अहमिति ब्रह्मात्मबोधःपूर्वपुण्यस्यपरिपाकात्प्रतिबंधनिरासपूर्वकंसामग्रीसंपादनात्मकात्जातश्चेदित्यन्व
यः ॥ २१ ॥ जातइति अन्यद्भेदव्याप्तंनज्ञातुंयोग्यंप्रमादापातात् मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतितीश्रुतेः ननुसतिफलेकु
तोनज्ञेयं दृश्यतेहिराज्यादिलोभेनसंग्रामादौमृत्युभयेपिप्रवृत्तिरतआह तदैक्यमिति विषयेणविषयिणोलक्षणात्तदैक्यंब्रह्मात्मैक्यज्ञानं
प्रमोदमेतस्यैवानन्दस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुतिबोधितंनिरतिशयानंदंकरोतिव्यंजयतीत्यर्थः अतःसम्राजावराटिकार्जन
वत्प्रमादोनकार्यइतिभावः तज्जातीयादित्यंशंव्याचष्टे उक्तमिति तद्वेदांतजन्यज्ञानमतिअतिक्रम्यनइयान्नगच्छेदितिश्रुतिपदार्थः ॥२२॥
गमनकर्मदर्शयति अन्यदिति साधनजातंजन्यफलहेतुभूतंलौकिकवैदिककर्मजातंहियतःअयंमोक्षार्थीतच्चबंधकारणमिति नात्यायन्पू

आनंदात्मनिचाध्यासेभेदबुद्धिस्ततोन्मृषा॥ अहंब्रह्मास्मिबोधश्चेत्पुण्यपुंजविपाकतः॥ २१ ॥ जातस्ततोन्यत्
नज्ञेयंतदैक्यंहिप्रमोदकृत्॥ उक्तंवेदांतविज्ञानमतिक्रम्यनचव्रजेत्॥ २२॥ अन्यत्साधनजातंहिमोक्षार्थीबं
धकारणम्॥ सच्चिदानंदमात्मानमीशानमिममद्वयम्॥ २३॥ अतिक्रम्यगतायेतेपरिभूतास्तुदेहिनः॥ अ
त्रचोदाहरन्तीममितिहासंपुरातनं॥ २४॥

वैंइत्यंशोपबृंहणस्यापराश्चप्रजाइत्यारभ्यकरिष्यमाणत्वाद्येऽत्यायं
स्तेपरावभूवुरित्यंशंव्याचष्टे सच्चिदानंदमिति सच्चिदानंदस्वरूपंआत्मानंसर्वान्तरंत्रिविधपरिच्छेदराहित्याददि्वतीयंइमंसाक्षादपरोक्षमज्ञा
नेसतिईशानंसर्वनियंतारमाज्ञोल्लंघिनांभयप्रदंसर्ववेदप्रतिपाद्यम् ॥ २३ ॥ अतिक्रम्येति एतादृशमतिक्रम्ययेगतास्तेपरिभूताइत्यन्वयः ई
श्वरातिक्रमोनामतन्निश्वसितत्वेनतदाज्ञारूपवेदार्थाननुष्ठानम् लोकेपियोयदाज्ञामुल्लंघतेसतमतिक्रामतीतिव्यवन्ह्रियते वेदार्थाननुष्ठान
मेवचज्ञानातिक्रमः तत्साधनतन्निष्ठान्यतरानाचरणात् यथाधर्मंतत्साधनंचाननुतिष्ठन्धर्ममतिक्रामतीतिव्यवन्ह्रियते इत्याशयेनईश्व
रातिक्रमएवपरिभवकारणत्वेनमूलउक्तः परिभवस्तुतामसयोनिप्राप्तिः तदुक्तंभगवद्गीतासु तानहंद्विषतःक्रूरान्संसारेषुनराधमान् क्षिपा
म्यजस्रमशुभानासुरीष्वेवयोनिषुइति देहिनोदेहाभिमानवंतः अत्रेतिहासमवतारयति अत्रेति ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋषीणामिति निःश्रेयससाधनस्यलक्षणभूतंऋषिप्रजासंबंधिसंवादरूपमितीतिहासविशेषणम् अतींद्रियंतर्कागोचरमागमार्थंद्रष्टुंशीलंये
षांतेतथा सुमप्रबुद्धन्यायेनाधिगतवेदार्थाइत्यर्थः जितानिबाह्यानिआंतराणिचइंद्रियाणियैस्तेतथा एतेनशमदमानुष्ठानंबोध्यते ॥ २५ ॥
यथोपपन्नेति उपरताःसहिष्णवइतितितिक्षावंतःआत्मविज्ञानसंपन्नाःसाक्षात्कृतात्मतत्त्वाः तेषांतनुस्थितौप्रयोजनंदर्शयति लोकानुग्रह
कारिणइति ॥ २६ ॥ आत्मेतिएतादृशाआचार्यलक्षणोपेताःशुद्धसात्विकाःसनकाद्याःसृष्टिकारिणाब्रह्मणापुराप्रथमंसृष्टाःतेचपश्चा
त्सृष्टास्त्रिविधाःप्रजानिःश्रेयससाधनज्ञानवर्जितादृष्ट्वोचुरित्यन्वयः ॥ २७ ॥ इदमिति दैवमोहितादैवेनपूर्वसंस्कारेणश्रुतिस्मृतिषुमृत्युप्र
कृतिस्वभावपदैर्व्यवहृतेनमोहिताविवेकहीनाः ॥ २८ ॥ अनादृत्येति अन्यत्साधनंकर्मरूपं तत्रतासुप्रजासुतिस्रस्तामस्योऽधममध्यमो

ऋषीणांचप्रजानांचसंवादंसाधनंप्रति ॥ अतींद्रियार्थद्रष्टारोजितबाह्यांतरेंद्रियाः ॥ २५ ॥ यथोपपन्नलाभे
नसंतुष्टाश्चसहिष्णवः ॥ आत्मविज्ञानसंपन्नालोकानुग्रहकारिणः ॥ २६ ॥ सनकाद्याःपुरासृष्टाब्रह्मणासृ
ष्टिकारिणा ॥ सुखार्थिनीःप्रजादृष्ट्वासाधनज्ञानवर्जिताः ॥ २७ ॥ इदमूचुःकृपाविष्टाज्ञानंवःसुखसाधनं ॥
तेषांतद्वचनंश्रुत्वाप्रजास्तादैवमोहिताः ॥ २८ ॥ अनादृत्यगताःसर्वाःसुखार्थंसाधनांतरं ॥ तत्रतिस्रःप्रजामू
ढानवेदोक्तंचमेनिरे ॥ २९ ॥ साधनंप्रज्ञयैवैताःशब्दाद्येवाभिमेनिरे ॥ शब्दादिसेवनात्तासांमनोवाक्कायदो
षतः ॥ ३० ॥ नभोभूभूबिलावासस्त्रिधाकायोव्यजायत ॥ मानुषैरुपभोग्योयंवध्यश्छेद्यश्चनित्यशः ॥ ३१ ॥

त्तमाः पापःपापेनभवतीतिश्रुतेः पापवासितावेदोक्तंनमेनिरे ॥ २९ ॥ साधनमिति एताःप्रजाःप्रज्ञयापूर्वजन्माभ्यस्तानुभवोत्थसंस्कार
जातयाबुद्ध्याशब्दादिविषयजातमेवसुखसाधनंमेनिरेसंकल्पविषयंचक्रुः यत्क्रतुर्भवतितत्कर्मकुरुतेइतिश्रुत्युक्तन्यायेनशब्दादिसेवनेकृ
तेसतिमनोवाक्कायेषुदोषउत्पन्नः मनोदोषाःपरद्रव्याभिलाषादयः वाग्दोषानिष्ठुरत्वादयः कायदोषाःस्तेयादयस्तेभ्यः ॥ ३० ॥ नभइति
नभोवासःपक्ष्यादिः भूवासःवृक्षादिः भूबिलावासःसर्पादिरित्येवंत्रिविधःकायस्तेषांव्यजायत कीदृशस्त्रिविधोपिकायोमानुषैरुपभोग्यो
वध्यश्छेद्यश्च प्रसिद्धमेतत् ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहस्तेति तथाअहस्तपादवागादिःव्यवस्थयासुखहीनोऽतिदुःखितश्च व्यवस्थांस्फुटयतिसार्द्धेन पक्षिणोहस्तहीनाः पादपास्तुअधींद्रियाः अल्पार्थेनञ् अल्पानिअस्फुटानिधींद्रियाणिज्ञानेंद्रियाणियेषामित्यर्थः अतोनपुराणांतरविरोधः अपिशब्देनकर्मेंद्रियहीनाः ॥ ॥ ३२ ॥ वाचेति उभयेपिग्राम्याआरण्याश्चपशवोविशदयावाचाहीनाअवाचएव नञोल्पार्थतायाउक्तत्वात् सर्पाद्याःपादादिहीनाःप्रसिद्धाः अत्रतामसाःएतायोनीःप्रामुवन्तीत्येतावद्विवक्षितंनतुमनोवाक्कर्मणांयोनीनांचक्रमोविवक्षितइतिमन्वादिस्मृतिविरोधः ॥ ३३ ॥ नात्यायन्पूर्वैइत्यंशेनसात्विकानांगतिमाख्यातुंराजसानांसात्विकानांचप्रकृतिदर्शयति अपराश्चेति अपराःप्रजावेदोक्तकर्मरूपंसाधनं निजमात्मनाकर्त्तव्यमभिमेनिरेअंगीचक्रुः कीदृश्यः अतिक्रांतात्मसाधनाः आत्मानंसाधयतिस्वराजंसम्राजमिहैवनिष्पादयतीतिआ

अहस्तपादवागादिःसुखहीनोतिदुःखितः॥ पक्षिणोहस्तहीनास्तेऽधींद्रियाअपिपादपाः॥ ३२ ॥ वाचाविशदयाहीनाःपशवस्तूभयेपिहि ॥ पादादिहीनाःसर्पाद्याःप्रसिद्धाःसर्वदेहिनाम्॥ ३३ ॥ अपराश्चप्रजाःकाश्चिदतिक्रांतात्मसाधनाः ॥ वेदोक्तंसाधनंसर्वंनिजंकर्माभिमेनिरे ॥ ३४ ॥ उपासनंचवह्न्यर्कवाय्वाद्यात्मस्वरूपिणाम्॥ उक्थादिशब्दबोध्यानांदेवतानांचसर्वशः॥ ३५ ॥

त्मसाधनंवेदांतप्रमाणजंज्ञानं स्वितध्यतेरपारलौकिकइत्यात्वम् नंद्यादित्वाल्ल्युः अतिक्रांतमात्मसाधनंयाभिस्तास्तथा ॥ ३४ ॥ उपासनमिति उपासनंचवेदोक्तंनिजंस्वकर्त्तव्यंमेनिरे केषां उक्थादिशब्दबोध्यानां आदिपदेनसंवर्गादिपदग्रहः उक्थादिशब्दार्थानामित्यर्थः कीदृशानामुक्थादिशब्दबोध्यानां वन्ह्यर्कवाय्वाद्यात्मस्वरूपिणाम् वन्ह्यर्कवायवआद्याआत्मानोयस्यसवन्ह्यर्कवाय्वाद्यात्माप्राणः सत्रेधात्मानंव्यकुरुतेतिश्रुतेः तदंशभूतानांसर्वशःदेवतानांच उत्तिष्ठतिअनेनसर्वमित्युक्थःप्राणः संहरणक्तिस्वस्मिन्विलापयतीतिसंवर्गः स एव यद्वावन्ह्यर्कवायवश्चआद्यात्माचेतिद्वंद्वः वन्ह्यर्केतिविराजोवायुपदेनसूत्रात्मनआद्यात्मेतिदहरविद्यादिविषयस्यकारणोपाधेरीश्वरस्यग्रहःशेषंसमानम् ॥ ३५ ॥

१ शरीरजैःकर्मदोषैर्यातिस्थावरतांनरः॥ वाचकैःपक्षिमृगतांमानसैरंत्यजातितां.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रापीति अत्रापिकर्मोपासनानुष्ठानेपिप्रजानांद्वैधंद्विधाद्वयमापन्नम् फलभेदतः भिन्नफलबोधकवाक्यद्वैधमालोच्येत्यर्थः ल्यब्लोपे
पंचमी द्वैधंस्फुटयति काश्चिद्राजस्यःप्रजाःदर्शपूर्णमासाभ्यांयजेतस्वर्गकामइत्यादिवाक्यान्येवालोच्यरजसागुंडजिव्हिकान्यायमनवधा
र्यस्वर्गाद्यर्थंकर्मोपासनेचक्रुरित्यर्थः याभगवद्गीतासुयामिमांपुष्पितामित्यत्रोक्ताः ॥ ३६ ॥ चक्रुरिति पराःसात्विक्यःप्रजाएवंवक्ष्यमा
णप्रकारेणविविदिषासंबंधबोधकंतमेतंवेदानुवचनेनब्राह्मणाविविदिषन्तियज्ञेनदानेनतपसानाशकेनेतिवाक्यंविचार्यकर्मोपासनेजग्मुः
प्रापुःचक्रुरितियावत् तेषांविचारस्वरूपमाह सार्द्धैकादशभिः सनकाद्यैर्नोस्मभ्यंपरंनिःश्रेयसकरंसाधनंज्ञानमुक्तं तत्रनोधिकारोनास्ती
त्युत्तरेणान्वयः ॥ ३७ ॥ ज्ञानमिति वाक्यार्थज्ञानाधिकाराभावेपदार्थज्ञानाभावंहेतुमाह सशास्त्रप्रसिद्धः यआत्मात्वंपदलक्ष्यः परंब्र

अत्रापिद्वैधमापन्नंप्रजानांफलभेदतः॥ स्वर्गादिसुखसिद्ध्यर्थंवैदिकेज्ञानकर्मणी ॥ ३६ ॥ चक्रुःकाश्चित्परा
जग्मुर्विचार्यैवंपरस्परम् ॥ सनकाद्यैर्वेदविद्भिरुक्तंनःसाधनंपरम् ॥ ३७ ॥ ज्ञानंतत्राधिकारोस्तिनकथंचननो
धुना ॥ सयश्चात्मापरंब्रह्मयज्ज्ञानंसुखसाधनं ॥ ३८ ॥ अतोदेहादिसंघातादस्माभिर्नपृथक्कृतः ॥ वेदविद्भोपि
पूर्वेभ्यःपित्रादिभ्यःकथंचन ॥ ३९ ॥ बुद्धिमद्भिर्नचास्माभिःस्वयंबुद्ध्यावधारितः ॥ मनसाकल्पितोनापिमन
श्चारविशारदैः ॥ ४० ॥ घ्राणादिभिर्नवाघ्रातःकुतश्चिद्देहमंदिरे ॥ चक्षुरादिभिरप्येषदृष्टःस्वप्नेपिनैवहि ॥ ४१ ॥
प्रज्ञेत्यादिश्रुतेर्वाक्यैर्विज्ञातोनिर्गुणोनच ॥ अस्माभिश्चस्वशिष्येभ्योनोपदिष्टोस्तिनिर्गुणः ॥ ४२ ॥

ह्मतत्पदलक्ष्यः यज्ज्ञानंसुखसाधनंससंघातान्नपृथक्कृतइत्युत्तरेणान्वयः ॥ ३८ ॥ अतइति पृथक्करणंलक्षणज्ञानाधीनंलक्षणज्ञानंचत
स्यलौकिकप्रमाणागोचरत्वान्नजातमित्याहुः वेदविद्भोपिपित्रादिभ्यःपूर्वेभ्योहेतुभ्यस्तद्वाक्येननावधारितः ॥ ३९ ॥ बुद्धिमद्भिरिति बु
द्ध्यानावधारितः मनश्चारविशारदैःमनःप्रवृत्तिकुशलैर्मनसापिनकल्पितः ॥ ४० ॥ घ्राणादिभिरिति घ्राणमादिःकारणंयासांवृत्तीनांताघ्रा
णादयस्ताभिः एवंचक्षुरादिभिरिति शेषंस्पष्टम् ॥ ४१ ॥ ननुप्रमाणांतरागोचरत्वेपिप्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मेत्यादिवाक्यान्निर्धार्यतामत
आहुः प्रज्ञेत्यादीति किमिदंसगुणपरंनिर्गुणपरंवेतिसंशयप्रतिबंधात्तदपिकर्त्तुंनशक्तुमइतिभावः यदिकश्चिद्ब्रूयाद्भवंतोज्ञात्वागोपायंतीति
तंप्रत्याहुः अस्माभिरिति ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युतेतिप्रसिद्धेर्नैवंशंक्यमितिभावः ॥ ४२ ॥

१ मथमालीढमधवः पिबंतिकटुभेषजमित्याकारं

र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कियत्तर्हिभवद्भिर्ज्ञातमित्यतआहुः किंत्विति स्थूलदेहात्पृथग्भूतःकर्तापुण्यपापफलभुगात्मास्तीत्येतावन्मात्रंजानीमः अत्रश्रोतामंताविज्ञाताद्रष्टादेष्टाघोष्टासर्वेषांभूतानामान्तरःपुरुषइतिश्रुतिरप्यनुकूलाभातीत्याहुः श्रोतेत्यादि ॥ ४३ ॥ तर्हिगुरूपसत्तिर्निर्णयायक्रियतामितिशंकितेवैराग्याभावात्तत्रापिनास्माकमधिकारइत्याहुः नविरागमिति कवषस्यापत्यानि शुभ्रादिभ्यश्चेतिढक् कावषेयामुनयआंतराग्निहोत्रविदःअन्यदग्निहोत्रमग्निहोत्रांतरंबाह्याग्निहोत्रंतस्माद्यथाविरागंप्राप्ताएवंवयंयागाध्ययनकर्मसुनविरागंप्राप्ताः वैयधिकरण्येनदृष्टांतः अंतराग्निहोत्रंचवाक्प्राणयोर्व्यापारेपरस्परविलयनचिंतनात्मकंकौषीतकिशाखायांप्रसिद्धं॥ ४४॥यद्येवंकर्मैवस्वर्गाद्यर्थंकर्तव्यमितिचेत्तर्हिजन्मवैफल्यापातः नचेदवेदीन्महतीविनष्टिरितिश्रुतेरित्याहुः शरीरमितिसार्धद्वयेन सर्वेषांदेहिनांशरीरंब्रह्मबोधार्थंनिर्मितमित्यन्वयः तत्रहेतुर्यतइत्यादि पादस्याग्रमंगुलीपंचकात्मकंप्रपदंतस्याग्रंनखाग्ररूपंप्रपदाग्रंतदारभ्य ल्यब्लोपेपंचमी ॥ ४५॥ ऊरूदरोरःस्थाने

किंतुदेहात्पृथग्भूतःपुण्यापुण्यफलोपभुक् ॥ अस्त्यात्मेतितथाश्रोतामंतेत्यादिश्रुतिर्जगौ ॥ ४३ ॥ नविरागं वयंप्राप्तायागाध्ययनकर्मसु ॥ मुनयःकावषेयावाअग्निहोत्रांतराद्यथा ॥ ४४ ॥ शरीरंब्रह्मबोधार्थंसर्वेषामिहदेहिनाम् ॥ निर्मितंयतएतस्मिन्प्रपदाग्रात्शिरोवधि ॥ ४५ ॥ ऊरूदरोरःस्थानेषुप्रविष्टंतदितिश्रुतिः ॥ तत्रापिपौरुषोदेहःसंपन्नाखिलसाधनः ॥ ४६ ॥ विशदात्मावबोधायस्यादाविरितिहिश्रुतिः ॥ कर्त्तव्यंहितमस्मभ्यंतैश्चोक्तंश्रुतिसंमतम् ॥ ४७॥

ष्विति गुहांतःप्रविष्टदीपस्योत्तरोत्तरंप्रकाशाधिक्यंद्वारतःप्रकाशाल्पत्वंप्रसिद्धंतथात्मनोहृदयादावुपलब्ध्याधिक्याभिप्रायेणसर्वगतस्याप्यात्मनःउत्क्रांतिप्रवेशयोःप्राणोपाधिकत्वंप्राणस्यचपादाग्रमारभ्यप्रवेशःस्फुटीकरिष्यतेतदभिप्रायेणवापादाग्रमारभ्यप्रवेशोक्तिः श्रुतिःसएषइहप्रविष्टआनखाग्रेभ्यइत्याकारा ब्रह्मरंध्रद्वाराप्रवेशाभिप्रायस्तुवक्ष्यते तत्रापीति तत्रदेहेषुपौरुषोदेहःविशदात्मावबोधायस्पष्टात्मज्ञानायइत्युत्तरेणान्वयः यतःसंपन्नान्यखिलानिआचार्यशास्त्रादिरूपाणिसाधनानियत्रसतथा ॥ ४६ ॥ विशदेति अत्राविरपरोक्षःस्यात्इतिइत्यर्थकाहियतःश्रुतिःपुरुषत्वेचाविस्तरामात्माइत्याकारा तर्हियदत्रशरीरेसंपाद्यंतदन्विष्यतामतआहुः कर्तव्यमिति श्रुतेःसंमतंहितंचयत्कर्तव्यंतदस्मभ्यंतैःसनकाद्यैरुक्तम् ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तददतिक्रमः किंकृतोतआहुः अशक्यमिति नास्माभिरतिक्रमःकृतः किंतुकथमस्माकमत्राधिकारःस्यादितिचिंतयाइहागताःतूष्णींचिंत यास्तब्धवाचः ततश्चिंतयास्पृतात्तमेतमित्यादिवाक्यात् अधिकारसंपत्त्यैअधिक्रियतेफलेनसंबध्यतेऽनेनेत्यधिकारःसाधनचतुष्टयंतस्यसं पत्तिःकल्मषाल्पकप्रतिबंधराहित्यंतदर्थंज्ञानकर्मणीउपासनकर्मणीकुर्महे पापानिहिशुभप्रवृत्तिप्रतिबंधकानिसत्कर्माणिचतन्निवर्तका नि तथाचश्रुतिस्मृती पापःपापेनभवतीति कषायपक्तिःकर्माणिज्ञानंचपरमागतिः कषायेकर्मभिःपक्केततोज्ञानंप्रवर्ततइति एतावतानात्या यन्नित्यंशोव्याख्यातः पूर्वैसनकादयोनात्यायन् तन्निष्ठाएवबभूवुरित्यप्यर्थोऽनुसंधेयः ॥ ४८ ॥ अथाधिकारिसिद्धिपूर्वकमुपनिषद्व्या ख्यामवतारयति इतिसंचिंत्येत्यादिपंचभिः स्पष्टम् ॥ ४९ ॥ मुमुक्षवइति तत्समानाःशमदमादयोहिजीवन्मुक्तानांलक्षणानिमुमुक्षूणांच

अशक्यंचेति विज्ञायतूष्णीमिहसमागताः॥ ततोधिकारसंपत्त्यैकुर्महेज्ञानकर्मणी॥ ४८॥ इतिसंचिंत्यसंच कुस्ताःप्रजाज्ञानकर्मणी ॥ ततोविशुद्धहृदयाःप्राप्यैतानृषिसत्तमान्॥ ४९ ॥ मुमुक्षवस्तत्समानाआत्मज्ञा नविवर्जिताः॥ स्वाशयंत्वखिलंतेभ्यऊचिरेब्रह्मबुद्धये॥५०॥ तेपितद्वचनंश्रुत्वाकृपयापरयावृताः॥ सर्वज्ञा आत्मबुद्ध्यर्थमिदंवचनमब्रुवन्॥ ५१॥ वयंवक्तुंकथंशक्ताअवाङ्मनसगोचरं॥ सच्चिदानंदमात्मानंज्ञातुंवा यूयमीदृशाः॥५२॥ तथापिशास्त्रसिद्धेनव्यवहारेणबोधुना॥ वक्ष्यामःपरमात्मानंराजानमिवबंदिनः॥५३॥

साधनरूपाणि तदुक्तं बुद्धाद्वैतसतत्त्वस्यअद्वेष्टृत्वादयोगुणाः अयत्नतोभवंत्यस्यनतुसाधनरूपिणइति विशेषमाह आत्मज्ञानेति स्वाशयं सोहंभगवःशोचामितंमांभगवान्शोकस्यपारंतारयत्वितिश्रुतिसिद्धम् शेषंस्पष्टम् ॥ ५० ॥ तेपीति तेषामुपदेशेप्रवृत्तौहेतुमाह कृपयेति स्पष्टम् ॥५१॥ वयमिति कोअद्धावेदकइहप्रावोचदितिश्रुतेः जातिगुणक्रियानाम्नांतत्रासंभवात्मनोवचसोःसाक्षात्तत्रप्रवृत्तिर्नसंभवती तिभावः ॥ ५२ ॥ कातर्ह्यस्माकंगतिरतआहुः तथापीति शास्त्रसिद्धेनअध्यारोपापवादाभ्यांनिष्प्रपंचंप्रपंच्यतेइतिन्यायसिद्धेनव्यवहारे णलक्षणयाबोधनात्मकेन दृष्टांतः राजानमिति यथासुप्तंराजानंबंदिनोबोधयंतितथाज्ञाननिद्रासुप्तंवस्तुतःशुद्धमात्मानंवेदांतास्तात्पर्य रीत्याबोधयंतीत्यर्थः ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुकथंशुद्धमात्मानंबोधयंतितस्यसविशेषत्वेनप्रत्यक्षादिसिद्धत्वादितिचेन्न सविशेषत्वस्यमायिकत्वादितिबोधयितुंप्रवृत्तमात्मेत्यादिवा
क्यंव्याख्यातुमारभमाणस्तत्रात्मनःसर्वदासत्त्वात्सृष्टेःपूर्वंसत्त्वकथनमनुपपन्नमित्याशंक्यतदभिप्रायंस्फुटयन्व्यवहारकालिकविलक्षण
मारोपाधिष्ठानत्वयोग्यंयदात्मस्वरूपंतत्परत्वमात्मशब्दस्यदर्शयति शब्दबोधावितिषड्भिः हेप्राज्ञाःअहमित्याकारकौतथानाहमित्याका
रकौशब्दबोधौलौकिकैस्तथावादिभिर्द्विधादृष्टौतथानयोःशब्दबोधयोरर्थद्वैधंदृष्टमित्यन्वयः आंतरमर्थमहमितिशब्दबोधाभ्यामर्थादवि
वेचिताभ्यांव्यवहरंतिभ्रांतास्तथाबाह्यंसर्वंनाहमितिशब्दबोधाभ्यांयथोक्ताभ्यांव्यवहरंतीत्यर्थः ॥ ५४ ॥ नकेवलमहंनाहंविषयाइयंग
तिःकिंतु सर्वोलौकिकोव्यवहारोभ्रांतिरूपइतिदर्शयति घटइतिद्वाभ्याम् लौकिकोलोकप्रसिद्धोयोयंघटइत्यादिकोव्यवहारःसोपिशब्द

शब्दबोधौद्विधादृष्टौलौकिकैर्वादिभिस्तथा॥ अहंनाहमितिप्राज्ञाअर्थद्वैधंतथानयोः॥ ५४॥ घटइत्यादिको
योयंव्यवहारोत्रलौकिकः॥ शब्दप्रत्ययबोध्यात्मास्यात्सोप्येतद्विवर्जिते॥ ५५॥ वाचिशब्दोहृदिज्ञानमर्थोभू
म्यादिसंस्थितः॥ कथंसशब्दबोधात्माभवेद्भ्रांतिंविनानृणाम्॥ ५६॥

प्रत्ययबोध्यात्मास्यादित्यन्वयः शब्दश्चप्रत्ययश्च
बोध्यश्चशब्दप्रत्ययबोध्याःशब्दज्ञानार्थास्तेआत्माशरीरंघनीभूतंरूपंयस्यसतथा आत्मायत्नोधृतिर्बुद्धिःस्वभावोब्रह्मवर्ष्मचेत्यमरः वर्ष्म
शरीरं तथाहि कोयमर्थइतिपृष्टेघटइत्युत्तरंलौकिकाददतितथाकिंज्ञानंघटइतिकःशब्दोघटइत्येकरूपमुत्तरम् एतमविविक्तंव्यवहारंयोग
सूत्रमप्यनुवदति शब्दार्थप्रत्ययानामितरेतराविवेकात्संकरइति एतद्विवर्जितेएतेनसंकरेणभ्रांतिसिद्धेनविवर्जितेवस्तुनियोयंलौकिकोव्य
वहारइत्यन्वयः ॥ ५५ ॥ ननुव्यवहारस्यकुतोभ्रांतित्वमितिचेत्विचारासहत्वादित्याह वाचीति वाचिशब्दस्तिष्ठति हृद्यंतःकरणेज्ञानं
तिष्ठति अर्थोभूम्यादौस्थितः सोर्थःशब्दबोधात्माभ्रांतिंविनाकथंस्यादित्यर्थः एवंसतिभिन्नाधिकरणानांतादात्म्यंभ्रांतिंविनाकथंनिर्वह
तीतिभावः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दार्थप्रत्ययानांतादात्म्यस्वीकारेव्याघातोप्यायातीत्याह शब्दबोधावपीति यदायदिशब्दबोधावपिअर्थस्यप्रकाशकौसंतौतयोःशब्द
बोधयोरर्थौप्रकाश्यौस्यातांतदातौस्वस्मात्पृथक्स्यातां प्रकाश्यप्रकाशकयोर्हिभेदोदृष्टः यथाएकसंबंधिज्ञानमपरसंबंधिस्मारकमितिन्या
येनपितृस्मारकौसुतौपितुर्भिन्नौ तथाचप्रकाशकयोःशब्दबोधयोःप्रकाश्यार्थरूपत्वेऽर्थस्यवातद्रूपत्वेस्वस्माद्भेदापत्तिः साचनोपपद्यतइ
तिभावः यद्वाशब्दबोधयोरर्थाद्भेदंप्रकारान्तरेणोदाहरति शब्दबोधाविति यदायस्मिन्कालेशब्दःशब्दस्यार्थोभवतियथानुकरणशब्दस्या
नुकार्यशब्दः बोधस्यचबोधोयदार्थः यथान्यायमतेऽनुव्यवसायस्यव्यवसायः तदापितयोर्भेदएवस्फुटः तथाचार्थात्तयोर्भेदोविवेकिना
सुज्ञातइतिभावः ॥ ५७ ॥ एवमुपपादितमर्थंप्रकृतेनिवेशयति अहंशब्दप्रत्यययोरिति अहमित्याकारकस्यशब्दस्यज्ञानस्यचताभ्यामवि
विक्तआत्मांऽऽतरभावोव्यवहारेविषयोमतः विशेषेणसिनोतितादात्म्येनबध्नातीतिविषयः षिञ्बंधनेपचाद्यच् तथाऽनात्माशब्दबोधावि

शब्दबोधावपियदास्यातामर्थौतदातयोः॥ पृथगेवभवेतांतौयथाभिन्नौपितुःसुतौ॥ ५७॥ अहंशब्दप्रत्यय
योरात्माविषयईरितः॥ व्यवहारेतथानात्मात्वनहंशब्दबोधयोः॥५८॥शब्दबोधौविधूयैकोयोर्थोहंशब्दबोध
योः॥ सएवजगदुत्पत्तेःपूर्वमासीन्महेश्वरः ॥ ५९ ॥ नशब्दबोधौनाऽनात्मानिस्तमाभास्करोयथा॥ दिवसेदि
वसेभानौतमोयद्वल्लयंव्रजेत्॥ सदानंदात्मनितथाजगदेतद्विलीयते ॥ ६० ॥

विक्तःअनहंशब्दबोधयोर्विषयोमतइति ॥ ५८ ॥ एतादृशसंकीर्णरूपवैलक्षण्यद्योतकासीदयशब्दसाहचर्यात्शुद्धाद्वितीयतत्त्वपरआ
त्मशब्दइत्याह शब्दबोधाविति औपाधिकोह्यात्मनिभेदः एवंचअहंशब्दबोधयोर्योऽर्थःशब्दबोधौविहायएकोभेदवर्जितोवशिष्यतेइति
शेषः सएवात्रवाक्येप्रतिपाद्यइत्याह सएवेतिसार्धेन महेश्वरः भेदराहित्यान्महत्त्वंसर्वशक्तत्वादीश्वरत्वंबोध्यम् ॥ ५९ ॥ एवशब्दार्थाविधा
रणव्यावर्त्यमाह नशब्दबोधाविति लोकप्रसिद्धौशब्दबोधौअनात्माचनासन्नित्यर्थः दृष्टांतः भास्करोयथोपचयापचयधर्मिभावरूपंत
मोविरोधात्संभक्ष्यतमसातत्प्रयुक्तपिशाचादिभिश्चवियुक्तोदिनेविराजतेएवमात्मान्तर्सिहःकारणत्वात्स्वकार्यंसर्वंस्वस्मिन्विलाप्याद्विती
योवतिष्ठतेइतिभावः दृष्टांतंविवृणोति दिवसेइतित्रिभिः सदानंदात्मनीति अयमेवकारणात्माछांदोग्येसत्पदेनव्यवहृतः तैत्तिरीयेआनं
दपदेन अत्रत्वात्मपदेन वेदांतानामैकमत्यादितिभावः ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशास्विति अस्यशास्त्रस्यसंयमिमुख्याधिकारिकत्वाद्दिनंप्रलयोपमानत्वेनरात्रिःसर्गोपमानत्वेनचवर्णिता यथोक्तंगीतासु यानिशासर्वभूतानांतस्यांजागर्तिसंयमी यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेरिति दिवाकरमभिभूयेतिव्याप्यव्यापकभावद्योतीक्त्वाप्रत्ययः मुखंव्यादायस्वपितीतिवत् यथायदाशयनंतदास्यमुखव्यादानंतथायदातमउत्पत्तिस्तदाविरोधाद्भास्करादर्शनमिति उत्पद्यतेइत्यत्रमूलकारणादविद्याख्यादितिशेषः तमसोप्याकाशादिवन्मूलकारणजन्यत्वस्यविद्युदादिवझटितिप्रादुर्भावस्यविवरणकारैरुपपादितत्वादिति॥ ६१॥तमःसाम्यंदार्ष्टांतिकेस्फुटयति सच्चिदानंदमिति अस्तिभातिप्रियमितिसूर्यवत्स्पष्टमप्यात्मानंतमोवदभिभूयाच्छाद्यैवजगद्विजायतेइत्यनुषंगः यतोविलक्षणं सच्चिदानंदात्मपदार्थवैलक्षण्यंचतुर्भिःपदैर्दर्शयति असदित्यादि ॥ ६२ ॥ सूर्योलयमात्रेदृष्टांतउक्तोनहिसतमसोविवर्तोपादानमतोविवर्तोपादानंदृष्टांतमाह रज्जुरेवेति पूर्वार्द्धंस्पष्टं तथानंदात्मैवपुरासीत् अनात्मातुआत्मोत्पत्तेर्निजोत्पतेःपु

निशासुयद्वत्सर्वासुत्थ्यभिभूयदिवाकरम्॥ तमउत्पद्यतेतद्वज्जगदेतद्विजायते॥ ६१ ॥ सच्चिदानंदमात्मानमभिभूयविलक्षणम्॥ असज्जडंदुःखरूपमनात्मवपुरेवहि॥ ६२ ॥ रज्जुरेवयथासर्पःसर्पोत्पतेःपुरास्थिता॥ आनंदात्मातथाऽनात्मानात्मोत्पतेःपुरास्थितः॥६३॥ यथासुसुप्तःपुरुषोवासनाकोटिगर्भिणीम्॥ पश्यन्नविद्यामप्येतांनजानात्यात्मनःपृथक्॥६४॥ आनंदात्मापिचतथामायांविश्वैकगर्भिणीम्॥ आत्मनोनपृथग्वेत्तिमायावीसमहेश्वरः॥ ६५॥

रान्नस्थितोभूदित्यन्वयः ॥ ६३ ॥ ननुकार्यप्रयुक्तद्वैतराहित्येपिमायाऽव्याकृतादिसंज्ञककारणप्रयुक्तंद्वैतंस्थितमेवेत्याशंक्यसद्भावाभावोनिरूप्यतेइतिन्यायेनसताद्वैतंवाच्यं कीदृशंचमायायाःसत्त्वमिष्यते पृथक्स्फूर्तिर्वाप्रमाणसिद्धत्वंवानाद्यइत्याह यथासुसुप्तइतिद्वाभ्यां यथासुप्तःपुरुषोवासनाकोटिगर्भिणीमविद्यांपश्यन्नप्येतामात्मनःपृथङ्नजानातीत्यन्वयः वासनानांकोटयोऽसंख्यातावासनाइतियावत् ताभिर्गर्भिणींतद्रूपगर्भवतीमित्यर्थः प्रकृत्यादित्वात्तृतीयांतत्वेनसमासः वर्षापायेमंडूकानांसूक्ष्मावस्थारूपसंस्कारवतीयथामृत्तथाजाग्रत्स्वप्नपदार्थसंस्कारवत्सौषुप्तमज्ञानमितिभावः ॥ ६४ ॥ एवंव्यष्ट्युपाधिकजीवेसाधितमर्थंसमष्ट्युपाधिकेदार्ष्टांतिकेदर्शयति आनंदात्मेति भूमरूपत्वेनानंदरूपः विश्वैकगर्भिणीएकएकतामापन्नःअव्याकृतइतियावत् तादृशोगर्भोऽस्याअस्तीतिएकगर्भिणीविश्वेनसर्वजगताएकगर्भिणीविश्वैकगर्भिणीतांतथा शेषंस्पष्टम् ॥ ६५ ॥

१ प्रतियोग्यनुयोगिभ्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नद्वितीयःतस्यांप्रमाणाभावादित्याह अपिमायेतिसार्धत्रिभिः मायेत्याकारामायायाःसिद्धिरपिस्फूर्तिरपिस्वतःमायातएवप्रमाणनैरपेक्ष्येणेष्यतेविवेककुशलैरितिशेषः तदुक्तंवार्त्तिककारैः अविद्यास्तीत्यविद्यायामेवास्त्वित्वंप्रकल्प्यते ब्रह्मदृष्ट्यात्वविद्येयंनासीदस्तिभविष्यतीति ॥ ६६ ॥ प्रमाणाभ्युपगमेपिकिंप्रमाणंसुषुप्तिरूपायामविद्यायांमतंभवता प्रत्यक्षंवानुमानंवाऽऽगमोवाऽन्यद्वा तत्राद्येसुप्तपुरुषस्यप्रत्यक्षंतत्रक्रमतेअन्यपुरुषस्यवा उभयमपिनसंभवतीत्याह सुषुप्तइति सुषुप्तःस्वयंतांनजानातीत्यन्वयः इंद्रियजन्यंहिज्ञानंप्रत्यक्षमितिव्यवहरंतिवादिनः सुषुप्तस्येंद्रियाणितुलीनानीतिकथंतांजानीयादिति जागरूकोन्योपितांनवेत्तिअयोग्यत्वादित्यर्थः साक्षिप्रत्य

अपिमायेतिमायायाःस्वतःसिद्धिरिहेष्यते॥ सुषुप्तस्ययथासुप्तिःसुप्त्यैवेहप्रसिद्ध्यति ॥ ६६ ॥ सुषुप्तोनचतांवेत्तिस्वयंकरणसंक्षयात्॥ नचान्योजागरूकोपितस्यसाविषयोनहि ॥ ६७॥ करणानामचेष्टायानसालिंगमुदीरिता॥ व्यभिचारित्वतोयस्मात्स्वप्नादावपिदर्शनात्॥ ६८॥

क्षापादनंतुसाक्षिणःसत्यग्रहणनियमाभावेनाविश्वासात्साक्षित्वस्यज्ञानघटितत्वेनपूर्वश्लोकोक्तस्वतःसिद्धिरूपेष्टापत्त्यावासमाधेयं ॥ ॥ ६७ ॥ नद्वितीयइत्याह करणानामिति अयंसुषुप्तिमान्निंद्रियचेष्टाहीनत्वात्संमतवदित्यनुमानंभवताविधेयंतत्तुनसंभवति यस्मात्याकरणानामचेष्टाहेतुत्वेनोदीरितासानलिंगंनहेतुः कुतः व्यभिचारित्वात् अव्यभिचरितःसंबंधोहिव्याप्तिः तांविनाकथंहेतुतेतिभावः व्यभिचारःकुतःसिद्धइत्यतआह स्वप्नादावपीति आदिपदेनसमाधिग्रहः स्वप्नादौसुषुप्तिभिन्नेअचेष्टायादर्शनात्साध्याभाववद्वृत्तित्वरूपोव्यभिचारःस्फुटइतिभावः ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नतृतीयइत्याह नचतस्यामिति तुशब्दोवैलक्षण्यार्थः विलक्षणमपौरुषेयंशास्त्रंतस्यांनप्रमाणंपुरुषेणार्थ्यतेइष्यतेइतिपुरुषार्थःफलंतदभावादित्यर्थः आगमोपिपौरुषेयोऽपौरुषेयोवा नाद्यः तस्यप्रत्यक्षादिदर्शितेवस्तुनिप्रवृत्तेस्तन्निरासेननिरस्तत्वात् नद्वितीयः यत्परःशब्दःसशब्दार्थइतिन्यायेनयत्रतात्पर्यंसवेदार्थोवाच्यः तत्तुषड्विधलिंगावसेयं तत्रउपक्रमोपसंहाराभ्यासार्थवादास्त्रयःप्रमेयशेषशब्दप्रमाणनिष्ठाःअपूर्वत्वाबाधितत्त्वफलवत्त्वानिप्रमेयनिष्ठानिप्रधानानि तत्रापिप्रवृत्तौप्रेक्षावद्भिर्जिज्ञासितत्वात्फलवत्त्वंप्रधानं तदज्ञानप्रतिपादनेनास्तीतिभावः किंपरंतर्हिमायाचाविद्याचस्वयमेवभवतीत्यादिशास्त्रमतआह तस्मादितितस्मादेतत्प्रतिपादनेफलाभावादेतांशास्त्रंमायेत्यादिवचःसंघैरनुवदतीत्यन्वयः कीदृशीं स्वतःसिद्धां अनन्यलभ्यःशब्दार्थइतिन्यायात्प्रतिपादनानर्हां सुदुर्लभांदीपेनांधकारवत्प्रमाणेनदुर्दर्शां अनुवादप्रयोजनंफलवत्संनिधावफलंतदंगमितिन्यायेनाह आनंदात्मावबुद्धये सृष्ट्यादिवाक्यानिहिअद्वैतबुद्ध्यवतारणद्वाराऐ

नचतस्यांप्रमाणंहिशास्त्रंत्वपुरुषार्थतः ॥ तस्मादनुवदत्येतांस्वतःसिद्धांसुदुर्लभाम् ॥ मायेत्यादिवचःसंघैरानंदात्मावबुद्धये ॥ ६९ ॥ अतःसमायोप्यात्मायंनिर्मायइवसंलये ॥ सतमस्कोयथाभानुर्दिवसेनिस्तमाइव ॥ ७० ॥ एवंस्थितस्तदादेवःपूर्वसंस्कारसंस्कृतः ॥ वासनानांसमुद्बोधात्पर्यालोचयदीश्वरः ॥ ७१ ॥

क्यबोधकवाक्यशेषाणीतिभावः नचतुर्थः अचिन्त्यशक्तेरविद्यायाःकेनचित्सादृश्याभावेनोपमानासंभवात् भ्रमसिद्धेःकार्यैःस्वसजातीयस्यैवार्थापत्त्यासाधनात् अनुपलब्धिस्तुतस्यभावरूपत्वाद्दूरापास्तेत्यवधेयम् ॥ ६९ ॥ फलितमाह अतःसमायइति संप्रलयेलये दृष्टांतः सतमस्कोयथाभानुरिति मूलाविद्यायास्तमःकारणत्वाद्भानोस्तत्कार्यतमोमात्रविरोधित्वात्कारणाकारतमोविशिष्टोपिभानुःस्वतंत्रतमोराहित्यान्निस्तमाव्यवह्रियतेतथाव्यापारात्मकस्वातंत्र्यरहितमायाविशिष्टोप्यात्मानिर्मायइतिचोक्तइत्यर्थः एतेनमिषत्व्यापारवदन्यत्नाभूदित्यर्थकंविजातीयभेदाभावपरंद्वितीयंवाक्यंव्याख्यातमिति ॥ ७० ॥ सऐक्षतेत्यादिवाक्यंव्याचष्टे एवंस्थितइतिद्वाभ्यांपूर्वसंस्कारसंस्कृतःपूर्वकल्पेषुयत्स्रष्टव्यविषयालोचनंमायापरिणामरूपमीक्षणसंज्ञंकृतंतत्संस्कारव्याप्तः वासनानांतेषामेवसंस्काराणांसमुद्बोधात्सृष्टिकालोद्बुद्धप्राण्यदृष्टकृतात्कार्योन्मुखत्वात् पर्यालोचयत्आलोचनंस्रष्टव्यतत्प्रकारविषयंमायावृत्तिरूपमीक्षणंकृतवानित्यर्थः ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आलोचनप्रकारमाह इत्थंमयीति भूतान्याकाशादीनिभौतिकंसांतर्विशेषंब्रह्मांडंतद्रूपेणधृष्णोतिप्रगल्भंभवतिज्ञानविषयीभवतीतियाव
त् तद्भूतभौतिकरूपधृक् एतादृशंसर्वमपिअव्यक्तमस्पष्टनामरूपमव्याकृतसंज्ञकंमयिकारणोपाधौस्थितं इत्थंस्पष्टवत्कृत्वेमांलोकत्रयीं
स्वर्गाकाशभूलोकात्मिकांस्रक्ष्येइत्यर्थः अत्रजलप्रधानैर्महरादिलोकैस्तदाधारस्वर्गस्यैकतांविवक्षित्वाश्रुतावाऽप्पदार्थपातालैर्मरपदार्थ
भूलोकस्यचैकतांविवक्षित्वाआदित्यकिरणप्रधानत्वेनमरीचिपदार्थमाकाशमादायलोकत्रयीमित्युक्तमितिश्रुत्यविरोधः॥ ७२॥सइमानि
तिव्याकुरुते इतिसंकल्प्येतिसार्धेन अप्स्वंडमिति अग्निहोत्राहुतिपरिणामजलप्रधानेषुसूक्ष्मपंचभूतेषुहिरण्यगर्भशरीरभूतेषुकार्यतया
स्थितमंडंब्रह्मांडंविराजशरीरमुदपादयज्जनितवानित्यर्थः आत्मनःस्वस्मात्सदात्मकादव्यतिरिक्तंस्वकीयसत्ताहीनमित्यर्थः तस्यसमष्टितां

इत्थंमयिस्थितंसर्वंभूतभौतिकरूपधृक्॥ अस्पष्टंस्पष्टवत्कृत्वास्रक्ष्येलोकत्रयीमिमां ॥ ७२॥ इतिसंकल्प्यवि
श्वात्मासत्यसंकल्पईश्वरः॥ भूरादिलोकसहितमप्स्वंडमुदपादयत्॥ आत्मनोव्यतिरिक्तंतन्नामरूपक्रियात्म
कम्॥ ७३ ॥ सृष्ट्वासर्वंजगद्देवोमायावीबालकोयथा ॥ इदमालोचनंचक्रेसर्वज्ञःसर्वशक्तिभृत् ॥ ७४ ॥ इ
मानिपंचभूतानित्विदमंडंचनीरगम्॥ अत्रस्थिताइमेलोकाभूर्भुवःस्वरितीरिताः॥ ७५॥ अचेतनमिदंसर्वं
विनश्येत्क्षणमात्रतः॥ स्वामिहीनंगृहंयद्वन्मृतस्येवकलेवरम् ॥ ७६ ॥

स्फुटयति नामेति नामशब्दप्रपंचः रूपमर्थप्रपंचः क्रियाएतयोःकारणंकर्मप्रपंचः कर्मफलत्वान्नामरूपयोः नामरूपक्रियाआत्माशरीरं
यस्यतत्तथा ॥ ७३ ॥ तत्रलोकपालसृष्टिपरंतस्यमुखमित्यादिआपइत्यंतंवाक्यंसार्द्धैकादशभिःश्लोकैर्व्याकरिष्यंस्तदनुकूलेक्षणपरं
व्याकुरुते सृष्ट्वेत्यादित्रिभिः सर्वज्ञःसर्वशक्तिर्देवइदंवक्ष्यमाणश्लोकद्वयोक्तमालोचनंचक्रेइत्यन्वयः दृष्टांतः मायावीबालकइति जन्मौ
षधमंत्रतपःसमाधिजाःसिद्धयइतियोगसूत्राज्जन्मतएवमाययानेकभावनिर्माणशक्तिमानसुरादिर्यथाबालकतयारागद्वेषौविनास्वभा
वान्निर्माणेप्रवर्ततेतद्वदीशोपीत्यर्थः तदुक्तंभगवताव्यासेन लोकवत्तुलीलाकैवल्यमिति केवलमेवकैवल्यंलोकवद्राजवत्केवललीलैवेश ॥ १ ॥
स्यसृष्टिरितिसूत्रार्थः गौडपादैरप्युक्तं ईशस्यैवस्वभावोयमाप्तकामस्यकास्पृहेति॥ ७४ ॥ इमानीति नीरगंजलप्रधानपञ्चभूतगतम् शेषं
स्पष्टम्॥ ७५॥ अचेतनमिति स्फुटम्॥ ७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिसंचिंत्येति प्रथमंछिद्रोत्पत्तावुपपत्तिमाह लोकपालानांस्रष्ट्यर्थमिति लोक्यतएभिरितिकरणव्युत्पत्त्यालोकपदार्थवागादिकरणनि रूप्यंहिलोकपालत्वं करणत्वंचकार्यनिरूप्यं कार्यारंभस्तुगोलकमंतराकरणैर्दुःसम्पादः इत्थंयावताविनानुपपत्तिस्तत्सर्वंकल्प्यतइतिन्या याच्छिद्राणिससर्जेत्यर्थः जगत्पिताजगतःपितृवद्योगक्षेमनिर्वाहकः॥ ७७॥मुखच्छिद्रादिति मुखच्छिद्रंगोलकंप्राप्यशब्दव्यवहारिणीवा गूजाताप्रादुर्भूतेत्यर्थः पूर्वंस्वकारणादुत्पन्नापीतिशेषः एवमग्रेपि कर्मेंद्रियाणिहिअपंचीकृतभूतराजसांशेभ्योज्ञानेंद्रियाणितुसात्विकांशे भ्यःपूर्वमुत्पन्नानीतितत्रगोलकएवसन्निहितोवह्निर्देवोभूतसात्विकांशोत्पन्नःसंजातःप्रादुर्भूतः कीदृशः वैदिकानिकर्माणिकरोतिनिर्वाह यतीतितथा यद्वावैदिकंकर्मअग्न्युपासनंतद्भावप्रापकंपूर्वकल्पेकृतवान्सतथा वह्निभावित्वाद्वन्हिर्यजमानःसंजातःदेवभावरूपंफलंप्राप्त

इतिसंचिंत्यतत्रैवच्छिद्राणिविविधानितु॥ चकारलोकपालानांस्रष्ट्यर्थंसजगत्पिता॥ ७७॥ मुखच्छिद्रादि यंजातावाक्शब्दव्यवहारिणी॥ तत्रैवतस्याःसंजातोवन्हिर्वैदिककर्मकृत् ॥ ७८॥ नासिकाच्छिद्रतोघ्राणं घ्राणादेवप्रभंजनः॥अक्षिच्छिद्रादिदंचक्षुश्चक्षुषोभगवान्रविः॥ ७९॥ कर्णच्छिद्रादिदंश्रोत्रंश्रोत्राज्जाताइ माद्दिशः॥ अतिसूक्ष्माण्यनंतानिदेहेसर्वत्रयानिहि॥ ८०॥ छिद्राणितेभ्यःसंजातात्वक्देहंव्याप्यसंस्थिता॥ तस्याःशरीरेलोमानिकेशाश्चापिहिजज्ञिरे॥ ८१॥ लोमभ्यश्चसकेशेभ्यःस्थावराःसर्वएवहि॥ जाताःसर्वोप कारायक्लेशभाजस्त्वहर्निशम्॥ ८२॥

इत्यर्थः तथाचश्रुतिः अग्निर्वाअकामयतदेवानामहमन्नादोभूयासंसएतमग्नयेकृत्तिकाभ्यःपुरोडाशमष्टाकपालंनिर्वपदिति एवमग्रेपिक रणदेवोपासकास्तद्भावंप्राप्ताइतिबोध्यम्॥ ७८॥ नासिकाच्छिद्रतइति प्रभंजनोवायुरुक्तोर्थः॥ ७९॥ कर्णच्छिद्रादिति पूर्वार्धंस्पष्टम् यानिदेहेसूक्ष्माणिच्छिद्राणितेभ्योदेहंव्याप्यसंस्थितात्वक्स्पर्शनेंद्रियगोलकचर्मरूपासंजाताइत्युत्तरेणान्वयः॥८०॥ छिद्राणीति लोमा निकेशाश्चजज्ञिरे लोमकेशसहकृतंस्पर्शनेंद्रियमुत्पन्नमित्यर्थः॥ ८१॥ लोमभ्यश्चेतिं तेभ्यःस्पर्शनेंद्रियसहकृतेभ्यःसर्वेओषध्यादिभेद भिन्नाःस्थावराजातास्तत्सहकृतोवायुर्देवतोत्पन्नेत्यर्थः गंधोपाधिर्वायुर्घ्राणदेवता स्थावरोपाधिस्तुस्पर्शनेंद्रियदेवतेतिविभागः॥ ८२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचच्छिद्रमिति पंचपूर्वादिक्रमेणमध्येचप्राणाद्युपासनस्थानानिच्छिद्राणियस्मिंस्तत्तथा अंतरिति अंतराकाशेनदहराख्येनावच्छेकत याश्रितम् हृदयंहृदयपदेनश्रुतौविवक्षितंगोलकंजातंतस्मान्मनइंद्रियंजातमिति ॥ ८३ ॥ मनसइति नाभिच्छिद्रादितिनाभिछिद्रंगोल कंतस्मात्प्राणभेदोबाह्यवायोराचमनहेतुरपानः पूर्वभूतानांमिलितराजसांशोत्पन्नोजातःप्रादुर्भूतोऽतिदुःसहो दुःखेनसोढुंशक्यः अतएव प्राणायामस्यदुष्करत्वं ॥ ८४ ॥ तस्यापानत्वंनिर्वक्ति मुखागतमिति अन्नंपानंअपनयतिअधोनयतीत्यपानइतिविग्रहः तद्देवतामाह अपानतइति ॥८५॥ अपानस्यमृत्युजनकत्वंलोकप्रसिद्ध्युक्त्यासंभावयति अन्नदोषमिति स्पष्टम् ॥ ८६ ॥ शिश्नच्छिद्रादिति उपस्थ च्छिद्रंगोलकंततोरेतः तत्सहचरितमुपस्थेंद्रियंजातमित्यर्थः पंचमाहुतिसाधनंद्युपर्जन्यभूमिपुरुषयोषिद्रूपाःपंचाग्नयः श्रद्धासोमवर्षान्नरे तांसिजीवसंपृक्तान्याहुतयःपंचाग्निविद्यायांप्रसिद्धाः तत्रपंचमाहुतेःसाधनंघटकंरेतःप्रसिद्धंश्रुतावित्यर्थः पुनःकीदृशं जरायुजांडजान्दे

पंचच्छिद्रंमांसपद्ममंतराकाशसंश्रितम्॥ हृदयंनामतज्जातंतस्माज्जातमिदंमनः॥ ८३ ॥ मनसश्चंद्रमाजा तोजगदानंदकारकः॥ नाभिच्छिद्रादयंजातःप्राणभेदोतिदुःसहः ॥ ८४ ॥ मुखागतमिदंयस्मादन्नपानंच सर्वशः॥ अंतर्देहेपनयतिततोपानोयमीरितः ॥ अपानतोमहानेषमृत्युर्जनभयंकरः॥ ८५ ॥ अन्नदोषंवि नानैवम्रियंतेप्राणिनःक्वचित्॥ अन्नंचैषग्रसत्यस्मादपानान्मृत्युरीरितः॥ ८६ ॥ शिश्नच्छिद्रादिदंरेतःपंचमा हुतिसाधनम्॥ जरायुजांडजांस्तन्वच्छरीरस्यचकारणम्॥ रेतसोपिचनीराणिब्रह्मांडांतःस्थितानिहि॥८७ नाभिच्छिद्रादपानोयोमृत्योर्जनकईरितः॥ सगुदच्छिद्रतोज्ञेयःसपायुर्मित्रपूर्वकः॥ ८८॥

हांस्तन्वद्विस्तारयल्लोकेपिप्रसिद्धमिति ननुरेतसासाहचर्यसंबंधेनोपस्थेंद्रियोपलक्षणंनसंभवतिह्युपस्थेसाहचर्यभंगादतआह शरीरस्येति षाट्कौशिकशरीरस्यकारणमत्ररेतःपदेनविवक्षितमतोनदोषइति तत्रत्वगसृङ्मांसानिमातृंशात्स्नाय्वऽस्थिमज्जानःपितृंशादितिषट्कोशाः रेतसइति नीराणिनीरप्रधानपंचभूतशरीरःप्रजापतिर्देवउत्पन्नइत्यर्थः ॥ ८७॥ एवमापइत्यंतंवाक्यंव्याख्यायतस्यस्ववर्तिपदैरुपलक्षणेन गुणोपसंहारन्यायेनचशेषकरणदेवसृष्टिपरत्वंदर्शयति नाभिच्छिद्रादितिसार्धैःसप्तभिः योऽपानउक्तःसगुदच्छिद्रतोज्ञेयःस्पष्टोभवति अ तोहेतोःसोऽपानोवायुःपायुरिंद्रियंभवति मित्रपूर्वकःमित्रसंज्ञःपूर्वःप्रथमचिंत्योदेवोयस्यसतथा उपासनासुहिप्रथममधिदैवचिंतनंपश्चा दध्यात्मचिंतनमितिक्रमःप्रसिद्धः तथाचापानपदेनसदैवंपायुरिंद्रियमुपलक्षितमितिभावः ॥ ८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घ्राणादिति घ्राणंप्राप्यस्वयंनिर्गंधोपिवायुःसगंधोभवेत् यद्वा घ्राणाद्धेतोःसगंधोवायुःस्यादनुभूयेतेत्यर्थः विषयेणविषयिणोलक्षणात् ते नहेतुनासाभूमिःस्मृता घ्राणंपृथिवी तत्त्वेनगर्भोपनिषदादिषुस्मृतिषुचप्रसिद्धमितियावत् सेतिस्त्रीत्वंविधेयापेक्षया तदुक्तंकैयटेन उद्देश्य विधेययोरेकतामापादयंतिसर्वनामानिकामचारेणतत्तल्लिंगमुपाददतेइति सगंधेनवायुनापृथिवीदेवतोपलक्षितेतिभावः त्वचइति त्वचो लोमानियान्युक्तानितानिसकंपानिप्रसिद्धानि ततोवायुजन्यकंपशालिलोमाभिधानात् इत्थंनिर्णयोभवति कथंलोमभिःस्पर्शनेंद्रियस हकृतैःसहत्वचोगोलकान्मरुद्वायुर्देवोजातइत्युत्तरार्धेनान्वयः ॥ ८९ ॥ लोमभिरिति दिशइतिलक्षणैक्यंहिपदार्थाभेदप्रयोजकं आव रणविरोध्यवकाशरूपंलक्षणंचदिगाकाशयोरभिन्नमित्याशयेनताआकाशइतीरिताः श्रुतिषुस्मृतिषुचेतिशेषः ॥ ९० ॥ अंतःकरणमिति चेतनस्यउपाधीद्वौतत्रविज्ञानशक्तिरूपंमनोऽहंकारबुद्धिचित्तात्मकंसमष्टितयाहिरण्यगर्भत्वोपाधिभूतमंतःकरणमाद्यं द्वितीयस्तुप्राणःक्रि

घ्राणाद्वायुःसगंधःस्याद्भूमिस्तेनहिसास्मृता ॥ त्वचोलोमानितानिस्युःसकंपानिततोमरुत् ॥ ८९ ॥ लोमभिः सहितोजातस्त्वचइत्थंविनिर्णयः ॥ दिशोवकाशरूपत्वात्ताआकाशइतीरिताः ॥ ९० ॥ अंतःकरणमुक्तंहिम नस्तेनाखिलंजगत् ॥ बुद्ध्यहंकारचित्ताख्यंतत्रजातंनिगद्यते ॥ ९१ ॥

याशक्तिः तथाचायमर्थः अंतःकरणंचतुर्विधंमनोत्रश्रुतौमनःपदेनग्राह्यमित्यर्थः तत्रहेतुंश्रौतींप्रसिद्धिंदर्शयति तेनहिमनसाऽखिलंजगदु त्पन्नमुक्तम् तथाचश्रुतिः असतोऽधिमनोऽसृजत मनःप्रजापतिमसृजत्प्रजापतिःप्रजाअसृजततदिदंसर्वंमनस्येवप्रतिष्ठितमिति असतोव्या कृतात् मनोहिरण्यगर्भः प्रजापतिर्विराडितिश्रुतिपदार्थः नन्वेवंकारणतयाप्रधानंमनःकथंकार्यभूतेविराट्शरीरेशेषतात्मकांतःकरणताम श्नुतेइतिचेत्तथादर्शनादित्यवेहि उपादानंहिजातेकार्येप्रायउपसर्जनतयाभासते यथासदाकाशमित्यनुभवेकारणंसद्वस्तुसत्तारूपेण य थावाइदंरजतमित्यत्रइदंतयापुरोवर्तिवस्तुरजतेइति फलितमाह बुद्धीत्यादि तत्रमनःप्रादुर्भावेउक्तेसतिबुध्यहंकारचित्ताख्यमितरांशत्र यमपिजातंनिगद्यते उक्तप्रायमित्यर्थः मनसाबुध्यहंकारचित्तान्युपलक्षितानिइतिभावः ॥ ९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंमनोदेवतयाबुत्ध्यहंकारचित्तदेवताउपलक्षिताइत्याह ब्रह्मेति अपानपदेनचक्रियाशक्तिर्नानाविधःप्राणोलक्षितइत्याह अपानेति ॥ १२ ॥ एवमेकगोलकतासंबंधेनवागिंद्रियेणरसनेंद्रियमुपलक्षितंतद्देवतयाचरसनदेवतेत्याह वाचेति कौषीतक्याद्युक्तहस्तपादेंद्रियसृष्टिमुपसंहारेणाह छिद्राणीति हस्तपादाधिपत्यसूचकनामानौइंद्रोपेंद्रदेवावपिजनितावित्याह हस्ताभ्यामिति त्रयाणांजगतांलोकानां नाथःबलेनासुरान्निहत्यईश्वरइतिसतथा बलवत्कर्मचहस्तनिष्ठं आहुश्चलौकिकायद्बलवत्कर्मतदिंद्रस्येति त्रयोविक्रमाःपादन्यासालो

ब्रह्मारुद्रोमहेशश्चचंद्रशब्देनलक्षिताः ॥ अपानशब्दतःप्राणोनानावृत्तिश्चलक्षितः ॥ १२ ॥ वाचापिरसनं तद्वदग्निनापिजलाधिपः ॥ छिद्राण्येवंविनिर्मायहस्तौपादौचसृष्टवान् ॥ हस्ताभ्यांत्रिजगन्नाथंपद्भ्यांचैवत्रिविक्रमम् ॥ १३ ॥ एवंदेहेहिवैराजेमुखादिषुयथोदितम् ॥ सृष्टवान्देवताःसर्वावागाद्याःसमहेश्वरः ॥ १४ ॥

काक्रमणसमर्थायस्यसतथा ॥ १३ ॥ एवमन्याअपिदेवताउपलक्षणीयाइतिबोधयन्प्रकृतवाक्यव्याख्यानमुपसंहरति एवमिति यथोदितंउदितंवेदशब्दमनतिक्रम्य तदनुसारेणेत्यर्थः तथाचश्रुतिः एतइतिवैप्रजापतिर्देवानसृजतेत्याद्या सन्निहितवाचकंवेदस्थंएतइतिपदमालोच्यतदर्थतयाकरणसन्निहितादेवताःसृत्वाताःससर्जेतिश्रुत्यर्थः शेषंस्पष्टम् ॥ १४ ॥ ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथताएताइत्यादिकंडिकांदेवानामध्यात्मभावेनव्यष्टिशरीरेप्रवेशप्रतिपादिकांद्वाविंशतिभिरुपबृंहयन्नादौतदुपयोगितयाकर्मोपास्ति फलंदेवभावोपिदुःखानुविद्धइत्यभिप्रायेणचक्षुत्पिपासोत्पत्तिप्रतिपादकंभागंचतुर्भिर्व्याकुर्वन्विराड्देहमर्णवत्वेननिरूपयति अनंतेतित्रिभिः विराड्देहाभिन्नोर्णवोविराड्देहार्णवः रूपकोपयोगिसमानधर्मानाह कोटीनांस्वांशभूतानांदेवानांव्याप्यतयासंबंधीनिअनंतकोटीयोजनानिअगणितकोटिसंख्याकानियोजनानिविस्तृतःअपरिच्छिन्नइतियावत्देवानांविभुत्वेचएतेसर्वएवसमाःसर्वेअनंताइतिश्रुतिर्मानं तेषांविभूनामपिप्राण्यदृष्टवशेनप्रोद्भूतव्यष्टिशरीरेकरणेष्वभिमानस्यप्रादुर्भावतिरोभावावित्यग्रेनिर्णयोभविष्यति कोटिशब्दस्यांशपरत्वेमानंतुकोटिरस्त्रौचचापाग्रेसंख्याभेदप्रकर्षयोरितिविश्वः कोणरूपास्त्रिवाचककोटिशब्दस्यावयवपरत्वंसंभवत्येवेति समुद्रपक्षेकोटीनामावृत्त्यायाअंनतकोटयस्तास्तत्परिमितानिप्रलयकालेगणकाभावादीश्वरस्यतद्गणनेप्रयोजनाभावाच्चासंख्यातानियोजनानिविस्तृतइत्यर्थः अनन्तकोटिकोटीनामितिपाठेऽनन्तकोटिगुणितानामनेककोटीनांसंख्यानांसंख्येयतयासंबंधीनियोजनानिविस्तृतइत्यर्थोबोध्यः पुनःकीदृशः लोकात्लोकानत्तिस्वस्मिन्नंतर्भावयतीतितथासर्वलोकशरीरइतियावत् समुद्रपक्षेसर्वलोकाऽऽप्लावकइत्यर्थः यद्वादर्शनादित्यर्थः तच्चविराट्पक्षेऽहंसर्वात्माविराडस्मीत्याकारकनिश्चयरूपमुत्तरविशेषणस्थभयेऽवधित्वेनान्वेति समुद्रपक्षेत्ववलोकनरूपहेतुतयेतिबोध्यम् पुनःकी० प्राणिनामिति निंदायामिनिः भूम[1]निंदाप्रशंसास्वितिवाक्यात् तथाचनिंदितःपरिछिन्नतयाभासमानःप्राणोयेषांतेप्राणिनःपरिच्छिन्नदृष्टयस्तेषांभयंकरः तेहिबालाइवापरिच्छिन्नभावाद्बिभ्यति हिशब्दःप्रसिद्धिद्योती तथाचसूचितंगौडपादाचार्यैः अस्पर्शयोगोनामैषदुर्दर्शःसर्वयोगिभिः योगिनोबिभ्यतिह्यस्मादभयेभयदर्शिनइति समुद्रपक्षेतुस्फुटम् ॥ १५ ॥ महाभूतेति महाभूतान्येवजलानियस्मिन्सतथा सप्तयुक्ताःसप्तसप्तसप्तचतुर्दशइतियावत् तेचतेलोकाएवोर्मिमालायस्मिन्सतथा जरायुजांडजस्वेदजोद्भिज्जतयाचतुर्विधायेशरीरौघास्तएवशुक्तिशंखास्तैर्विभूषितः अत्रसादृश्यातिशयेनमहाभूतानांजलानांचाभेदविवक्षायांयथामहाभूताभिन्नजलवत्वंविराट्शरीरस्यतथासमुद्रस्यापि एवत्तमुतरत्रापिबोध्यम् ॥ १६ ॥

अनंतकोटीःकोटीनांयोजनानिसविस्तृतः ॥ विराड्देहार्णवोलोकाप्राणिनांहिभयंकरः ॥ १५ ॥ महाभूतजलःसप्तसप्तलोकोर्मिमालकः ॥ चतुर्विधशरीरौघशुक्तिशंखविभूषितः ॥ १६ ॥

---

१ भूमनिन्दाप्रशंसासुनित्ययोगेऽतिशायने संबंधेस्तिविवक्षायांभवंतिमतुबादयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कामक्रोधेति कामक्रोधादयएवस्ववासनामयैस्तंतुभिर्बध्वासंसारसिंधौमज्जकत्वान्नक्रास्तेषामाश्रयः कर्मबंधनःसमुद्रेहिबंधनानिनाना विधानि कानिचित्पारगमनप्रतिबंधकानि यथाहनुमतश्छायाग्राह्मसुरादीनि कानिचित्तरणप्रतिबंधकानि यथाजलभ्रमादीनि कानि चिद्बहिर्निःसरणप्रतिबंधकानि यथाग्राहमुखादीनि तथाविधानिसंचितागामिप्रारब्धलक्षणानिकर्माण्येवबंधनानियत्रसतथा शेषंस्पष्ट म् अन्नदोषाणांविराट्समष्टिशरीरेसंबंधोव्यष्टिद्वारावोध्योनतुसाक्षात् अन्यथानहवैदेवान्पापंगच्छतीतिश्रुतिविरोधापत्तेः पापंपापफल मशुभमित्यर्थः ॥ ९७॥ एतस्मिन्निति क्षुत्पिपासापरिश्रांताईश्वरेणविराट्शरीरेस्रष्टाभ्यामशनायापिपासाभ्यांतदंशत्वेनग्लानाः यथामा नुषशरीरेक्षुत्पिपासोदयेसर्वेंद्रियाणिव्याकुलानिभवंतितद्वदित्यर्थः एतादृशास्तेदेवाविराट्शरीरतर्पणक्षममन्नपानमपश्यंतःस्वंजनकमी

कामक्रोधादिनक्राणामाकरःकर्मबंधनः ॥ त्वगादिधातुदुर्गंधोविण्मूत्रमलसंश्रयः ॥ ९७ ॥ एतस्मिन्पति ताएतावागाद्याःसर्वदेवताः ॥ क्षुत्पिपासापरिश्रांताजनकंस्वमथाब्रुवन् ॥ ९८ ॥ अयंसर्वात्मकोदेहोविराजो भवताकृतः ॥ नैतस्माद्व्यतिरिक्तंभोअन्नंपानंचदृश्यते ॥ ९९ ॥ नभोक्तव्यंनपातव्यमस्माकमिहदृश्यते ॥ ततो न्यंभगवन्देहंस्रजास्मभ्यंहितायवै ॥ यत्रस्थितावयंस्यामस्त्वन्नपानस्यभागिनः ॥ १०० ॥ इत्युक्तेसहिगो देहंचकारजनकोविभुः ॥ नतस्मिन्प्रीतिरेतेषामभूदन्नाद्यऽदर्शनात् ॥ १०१ ॥ पुनःसुतानांप्रीत्यर्थंदेवोऽश्वमु दपादयत् ॥ तत्रापिनाभवत्प्रीतिर्हस्तादीनामभावतः ॥ १०२ ॥ एवंनानाविधान्देहांस्तदर्थंसस्रजेप्रभुः ॥ न चतेषामभूत्प्रीतिर्मानुषंसोऽस्रजत्ततः ॥ १०३ ॥

श्वरमब्रुवन्निति ॥ ९८ ॥ तद्वाक्यरूपंश्रुत्यंशंव्याचष्टे अयमितिद्वाभ्यां स्पष्टम् ॥ ९९ ॥ नभोक्तव्यमिति अन्यंदेहंस्वल्पेनतृप्यंतंतर्पयंतं चस्रजउत्पादय तदेवाहुः यत्रस्थिताइति ॥ १००॥ ताभ्योगामानयदित्यादिव्याचष्टे इत्युक्तेइत्यादिपादोनत्रिभिः गोदेहंदृष्ट्वाप्रीत्यभावे हेतुरन्नाद्यदर्शनादिति अन्नमादिःकारणंबुद्धिःकर्मचसम्प्रान्नब्राह्मणेप्रोक्तंतददर्शनात् गवादिशरीरेहिपूर्वकृतमेवभुज्यतेनतुनूतनबुद्धिकर्म हेतुरन्नाद्यदर्शनादिति णीसंपादयितुंशक्यंइतिप्रसिद्धम् ॥ १०१ ॥ पुनरिति हस्तादीनामित्यादिपदेनआंतरबाह्यज्ञानकर्मसाधनानांग्रहः ॥ १०२ ॥ श्रुतौगवा श्वानयनमुत्पादनरूपमेकोनचतुरशीतिलक्षयोन्युत्पादनोपलक्षणमित्याशयेनाह एवमिति तदर्थंदेवप्रीत्यर्थं ताभ्यःपुरुषमित्यंशंचतुर्थ पादेनव्याचष्टे मानुषमिति ॥ १०३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताअब्रुन्निति व्याकुरुते तंदृष्ट्वेति तंमानुषंसृष्टंदृष्ट्वातेदेवाःप्रीताअभवन् तथाहृष्टाःसंतइत्थेवंजनकमब्रुवन् इतिकिं हेतात बतेतिहर्षे एतत्सु कृतं तस्यव्याख्यानंभवताकृतमिति भवतास्वयंकृतंनतुभृत्यद्वाराकारितम् कुशलस्तक्षादिर्हियत्स्वयंकरोतितदतिरमणीयंभवतियद्भृत्येन कारयतितदपकृष्टमितिप्रसिद्धम तथाचस्वकृतशब्देपृषोदरादित्वेनस्वयंशब्दस्यसुइत्यादेशेसुकृतमितिसिद्धमितिभावः ॥ १०४ ॥ तदेव वाक्यंप्रमाणांतरसंवाददर्शनायश्रुत्यापुनरनूदितंव्याचष्टे उचितमितित्रिभिः एतदीश्वरेणस्वयंकृतत्वंपुरुषेउचितंसंबद्धं नत्विदमसंबद्धमुक्त मित्यर्थः तत्रहेतुतयाससाधनज्ञानक्रियासंपत्तिमाह यतःपुमान्ज्ञात्वावक्तीति ज्ञात्वेतिज्ञानेंद्रियसंपत्तिरुक्तावक्तिइतिकर्मेन्द्रियसंपत्तिर्बो धिता ननुवानरादिशरीरेपिसर्वेन्द्रियजंज्ञानमस्तीत्यतोविशेषमाह चक्षुरादीति क्रियासुव्यापारेषु मानुषभिन्नानांहींद्रियसंयोगेप्यज्ञानं निःशेषतोननिवर्ततइतिभावः प्रमत्तादावव्याप्तिवारणायप्रायइतिपदम् ॥ १०५ ॥ एवंप्रत्यक्षज्ञानसंपत्तिंदर्शयित्वापरोक्षज्ञानमप्यस्मिन् स्फुटयति इहामुत्रेति इहामुत्रसुखंचायंवेत्तिऐहिकमामुष्मिकंसुखंचकारात्तत्साधनंचायंवेत्ति श्वोतीतंश्वस्त्यमनागतेन्हिभवंचवेत्तिसाध

तंदृष्ट्वातेभवन्प्रीतास्तांतैतत्सुकृतंबत ॥ भवताकृतमित्येवंदृष्टाजनकमब्रुवन् ॥ १०४ ॥ उचितंपुरुषेह्येतज्ज्ञा त्वावक्तियतःपुमान् ॥ चक्षुरादिक्रियास्वेवप्रायोऽज्ञानविवर्जितः ॥ १०५ ॥ इहामुत्रसुखंचायंह्यःश्वस्त्यमपि संगतम् ॥ कर्तव्यंचाप्यकर्तव्यंवेत्तिसर्वंप्रमाणतः ॥ १०६ ॥ अत्रचाविस्तरामात्मावेदवाक्यात्प्रकाशते ॥ अ त्रतादेवताःसर्वाःसंतोषमवमेनिरे ॥ १०७ ॥

नज्ञानायसाधनविद्भिःसंगतंसंबंधप्रकारंचवेत्ति विद्वद्भिःसहसंगतेकृतेकर्तव्यमकर्तव्यंविहितंप्रतिषिद्धंचसर्वंप्रमाणतोवेत्तीत्यर्थः ॥ १०६ ॥ एवमंगयोग्यतांस्फुटीकृत्यसर्वतःप्रधानब्रह्मविद्यायोग्यत्वमाह अत्रचेति चिद्रूपेणभासमानोपिसत्यत्वानंदत्वाद्वयत्वादिरूपेणभासतइत्य र्थः एतेनपुरुषत्वेचाविस्तरामात्मासहिप्रज्ञानेनसंपन्नतमोविज्ञातंवदति विज्ञातंपश्यतिवेदश्वस्तनंवेदलोकालोकौमर्त्येनामृतमीप्सत्येवंसंप न्नतमोपीतरेषांपशूनामशनायापिपासेएवाभिज्ञानमितिश्रुतिरर्थतःसकलासंगृहीता अत्रेहामुत्रपदेलोकालोकपदाभ्यांसमानार्थे श्वोऽ नागतेन्हिभवमित्यर्थकंश्वस्त्यपदंश्वस्तनपदेन शेषपदानितुश्रुत्यासाक्षादुपलक्षणतयाचबोधितमर्थंप्रतिपादयंतीतिबोध्यम् सर्वदेवानांयु गपद्धर्षजननमेवतस्येश्वरेणस्वयंकृतत्वंसाधयतीत्याशयेनाह अत्रताइति अवमेनिरेअनुभूतवंतइत्यर्थःयद्वाऽनेकशरीराणिअभीष्टसाध नाक्षमाण्यवलोक्योद्योगपरित्यागलक्षणंसंतोषमंगीकृत्यस्थिताःसंतोदेवाःपुरुषउत्पन्नेतंसंतोषमवमेनिरेअनादृतवंतः हर्षेणेष्टसिद्धौसोद्यो गाजाताइत्यर्थः ॥ १०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंडिकाशेषंव्याकुरुते एवंतुष्टेष्वित्यादिना तुष्टेषुहर्षेणाज्ञामनुष्ठानायप्रतीक्षमाणेषुपुत्रेषुसत्सुएतान्पिताउवाचआज्ञापयत् आज्ञामभिन
यति स्वंस्वमिति स्वनियम्यकरणद्वारेणस्वकीयंस्वकीयंस्थानंगोलकंप्रविशतव्यष्टिशरीरेप्रवेशंकुरुतेत्यर्थः ननुइंद्रियार्हैस्थानेकथमस्माकं
व्यापकानांप्रवेशइंद्रियैरेवार्थसिद्धौव्यर्थश्चातआह स्वस्मिन्नित्यादि आत्मीयवाचीस्वशब्दः आत्मीयेइंद्रियेभेदंपृथग्भावंनैरपेक्ष्यमिति
यावत् तंविहायमूषायांधातवइवएकलोलीभावलक्षणमभिमानंकृत्वाप्रविशतेत्यर्थः अयंभावः परस्परनिरपेक्षकारकत्वंसमुच्चयविरोधि
तत्त्वत्रनास्ति तथाहि चक्षुर्विनाप्रकाशरूपःसूर्योनसिध्यतितंविनाचक्षूरूपग्रहणासमर्थत्वान्नसिध्यति तथास्वकीयनिरूप्यंस्वामित्वंतन्नि
रूप्यंचस्वत्वं एवंशरीरेऊष्महेतुमग्निंविनावाग्वक्तुमक्षमावाचंविनातटस्थेनाग्निःशरीरेदुर्ज्ञेयःयद्वावाचोऽग्नेरुत्पन्नत्वाद्वाचंविनाग्निरुपलब्धुं
नशक्यः अग्नेश्चवागुत्पत्तेस्तंविनावाग्दुर्लभेतिएतदग्रेस्फुटीभविष्यति एवमन्यदप्यूह्यं तथाचमिलित्वाप्रवेशोयुक्तएवेतिभावः ॥१०८॥इ

एवंतुष्टेषुपुत्रेषुपिताप्येतानुवाचह ॥ स्वंस्वंस्थानंप्रविशतस्वस्मिन्भेदंविहायवै ॥ १०८ ॥ इत्युक्तेतेतथाचक्रुर्देवाःसर्वेस्वयंभुवा ॥ अग्निर्वागात्मतांप्राप्यमुखच्छिद्रेव्यवस्थितः ॥ १०९ ॥ अपांनाथोरसनतांप्राप्यजिह्वाग्रतोऽभवत् ॥ वायुर्गंधंप्राप्यनेताघ्राणंभूत्वाप्यथाविशत् ॥ ११० ॥ नासिकाविवरंतद्वदक्ष्णोरपिदिवाकरः ॥ चक्षुरिंद्रियतांप्राप्यदिक्श्रोत्रंकर्णयोस्तथा ॥ १११ ॥

त्युक्तेइति स्वयंभुवाईश्वरेणअग्निर्वागधिष्ठातृदेवतावागात्मतांपूर्वोत्पन्नयावाचातादात्म्यरूपमेकलोलीभावंप्राप्यमुखगोलकेस्थितः स्थि
तिलब्धवानित्यर्थः एवंसतिव्यष्टिशरीरेअधिदैवाध्यात्माधिभूतभेदेनत्रैविध्यंसंपन्नं तत्रदेवंविराजमधिकृत्याधारंकृत्वास्थितंवागादींद्रिय
विशेषंस्वशरीरवदभिमन्यमानमग्न्यादिदेवरूपमधिदैवम् तथाविग्रहेणात्मनिअहमितिभासमानेशरीरेवर्तमानंकरणरूपंतत्परिच्छिन्नमध्या
त्मं तथाभूतेषुवर्तमानंविषयरूपमधिभूतमिति एवमर्थोविभागश्चेतरेंद्रियवाक्येष्वपिबोध्यः एतत्परस्परसापेक्षंत्रैविध्यमपोद्यस्वतःसिद्धमा
त्मतत्त्वमुत्तरत्रनिर्णेष्यतेइति ॥१०९॥ अपांनाथइति वरुणःरसनयातादात्म्यंतत्राभिमानंप्राप्यजिह्वाग्रतोजिह्वाग्रगोलकेअभवत्स्थितो
भूदिति सार्वविभक्तिकस्तसिः गंधंप्राप्यतंघ्राणदेशंप्रतिनेतागंधविशिष्टइतियावत् एतादृशोवायुर्घ्राणंभूत्वाविशत्नासिकाविवरमित्युत्तरे
णान्वयः ॥ ११० ॥ नासिकाविवरमिति दिवाकरःचक्षुरिंद्रियतांप्राप्याक्ष्णोरविशत् दिक्श्रोत्रंभूत्वाकर्णयोरविशदित्यन्वयः ॥ १११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थावराइति व्याख्यातम् ॥ ११२ ॥ नाभिच्छिद्रमिति स्फुटम् तथैवशिश्नच्छिद्रेताःपूर्वोक्ताआपःप्रजापतिरूपाःप्रविष्टाइत्युत्तरेणान्वयः ॥ ११३ ॥ आपइति इतिहिश्रुतिःएतावतादेवानांप्रवेशःसाक्षादत्रकंडिकायामुक्तःअन्येषांतूपलक्षितइत्यर्थः उपलक्षणत्वंस्फुटयति एवमन्याइति अध्यात्ममधिदैवमितिसप्तम्याअर्थःभावः तथाचाध्यात्मेइंद्रियेअधिदैवेदेवतायांचवर्त्तमानोयोभेदःपृथग्भावस्तेनवर्जिताइंद्रियेणतादात्म्यवत्यःस्वंस्वंस्थानंन्यविक्षतप्रविष्टाइत्यर्थः ॥ ११४ ॥ एवंस्थानेष्विति अशनायापिपासेदेवतेस्वाप्रजानांस्थानलाभंदृष्ट्वास्थानमयाचेतांयाचितवत्यौ तयोरितिपदमुत्तरान्वयि ॥ ११५ ॥ स्थानांतरमिति तयोरशनायापिपासयोःपूर्वदेवताक्रांतस्थानाद

स्थावराअपिलोमानिभूत्वोक्तास्त्वचमाविशन् ॥ चंद्रमाश्चमनोभूत्वाहृदयंप्राविशत्तथा ॥ ११२ ॥ नाभिच्छिद्रंपुरोक्तंयन्मृत्युस्तत्रसमाविशत् ॥ उक्तापानस्वरूपःसन्शिश्नच्छिद्रेतथैवहि ॥ ११३ ॥ आपोरेतःस्वरूपास्ताःप्रविष्टाइतिहिश्रुतिः ॥ एवमन्याअपितथादेवताभेदवर्जिताः ॥ अध्यात्ममधिदैवंचस्वंस्वंस्थानंन्यविक्षत ॥ ११४ ॥ एवंस्थानेषुदत्तेषुपित्रातासांयथार्हतः ॥ अशनायापिपासेर्चायाचेतांस्थानकंतयोः ॥ ११५ ॥ स्थानांतरमदृष्ट्वासदेवतास्वेवदत्तवान् ॥ तयोःस्थानंहविस्तेनदत्तंताभ्यस्तयोर्भवेत् ॥ ११६ ॥

न्यत्स्थानमदृष्ट्वातास्वेवाध्यात्माधिदैवभेदभिन्नासुदेवतासुस्थानंदत्तवान् देवतातृप्त्यैवयुवांतृप्तेभवतमित्युक्तवानितिभावः तेनेश्वरेणैवंतयोःस्थानकरणेनेदानीमप्येवंदृश्यते यत्ताभ्योदेवताभ्योदत्तंहविःअधिदैवरूपाभ्यःपुरोडाशादिरूपंअध्यात्मरूपाभ्योविषयरूपंतद्धविःतयोरशनायापिपासयोःकामनारूपयोरुभयविधदेवनिष्ठयोरुपशमरूपतृप्तिकरंभवेदित्यर्थः देवताभ्योहविषिदत्तेतासांतृष्णापिपासेशाम्यतः अध्यात्मंविषयरूपेहविषिदत्तेतत्कालमशनायापिपासेशाम्यतइवेतीयमेवतयोस्तृप्तिरितिभावः ॥ ११६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रेदंबोध्यम् वागादिइंद्रियेभ्योदेवसृष्टिप्रतिपादनेऽयंश्रुतेरभिप्रायः येपूर्वंविराडुपासनयाविराड्भावंप्राप्तास्तेकरणैःसहप्रलयेलीनाःपुनः सृष्ट्यादावीश्वरेणविराट्शरीरेसृष्टेस्वस्वगोलकेषुतेषांकरणानिप्रादुर्भूतानितानिचव्यष्टिशरीरकृतस्यावच्छेदस्यपूर्वमेवोपासनात्मकज्ञाने नभंगादव्यापकदेवभावेनपरिणतानीति अग्निर्वाग्भूत्वामुखंप्राविशदित्यादिश्रुतेस्तुदेवेभ्यइंद्रियोत्पत्तिप्रतिपादिकायाएषोभिप्रायः व्यष्टिशरीरेप्रोद्भूतानामवच्छिन्नानामिंद्रियाणांकार्याक्षमाणामभिमानलक्षणतादात्म्येनदेवैस्तेषांसमर्थत्वापादनंयत्तैवदेवेभ्यस्तेषामुत्पत्तिरिति पातंजलमताच्चौपनिषदमतेयंविशेषः यद्योगमतेइंद्रियाण्यपिविभूनिप्राण्यदृष्टवशेनतेषांशरीरेवृत्त्युद्भवाभिभवौ एतेषामुत्पत्तिमतेतुदेवाएवविभवः इंद्रियाणितुपरिच्छिन्नानिउक्तांतिप्रतिपादकश्रुत्यादिभ्यइत्यवधेयम् एवंदेवानामिंद्रियाणांचोत्पत्तिमभिधायतेषांप्रवृत्तिहेतुभूतयोरशनायापिपासयोश्चसृष्टिंप्रतिपाद्यअथान्नसृष्टिप्रतिपादिकांसईक्षतेमेन्वित्यादिकांतृतीयकंडिकांसंक्षेपेणव्याकरोति एवंस्थाना

एवंस्थानानिदत्वासतेषामन्नार्थिनांप्रभुः॥ तैरनुक्तोपिजनकइदमत्रव्यचिंतयत्॥११७॥इमेलोकालोकपालाःक्षुधितास्तनयामम॥ एषामर्थेसृजाम्यन्नमितिसंचिंत्यसोसृजत्॥ ११८॥ अद्भ्योत्पन्नंबहुविधमुपायैर्विविधैर्विभुः॥ तत्रवागादयःसर्वादेवतानाभ्रुवन्हितत्॥ ११९॥

निदत्वेत्यादिचतुर्भिः प्रभुःपरमेश्वरःएवंतेभ्यःस्थानानिदत्वातेषामन्नार्थिनामुपकारायतैरनुक्तोपीदमग्रिमश्लोकोक्तंव्यचिंतयद्विचारंकृतवान् अनुक्तस्यहितचिंतनेप्रवृत्तौहेतुर्जनकइति जनकोहिस्वभावादेवसुतयोगक्षेमयोश्चिंतनेप्रवर्त्ततइतिप्रसिद्धमितिभावः ॥ ११७॥ इमेलोकाइति इतिसंचिंत्यविविधैरुपायैरन्नमसृजदितिउत्तरेणान्वयः इतरत्स्पष्टम्॥११८॥ अद्भ्यइति घटस्यमृद्वदन्नस्योपादानंदर्शयति अद्भ्यइति आपोजलप्रधानानिपंचभूतानितेभ्यइत्यर्थउक्तः अन्नविशेषणंबहुविधमिति नानायोनिवर्तिनांप्राणिनांयस्ययस्ययद्यदुचितं यथामानुषादीनांव्रीहितृणादिस्थावरात्मकमन्नंसिंहादीनांमृगादिरूपंजंगमंसर्पादीनांवायुमूषकादिरूपमितिनानाविधमिति ईश्वरस्याभिन्ननिमित्तोपादानतांसूचयति विभुरिति तत्रेति तत्रान्नेउत्पन्नेसतिइदंगृह्णीतइतीश्वरेणाज्ञप्ताअपिवागादयस्तदन्नंप्राणभेदंप्राणवृत्तिरूपमपानंवहिर्देशान्मुखबिलेनांतरागच्छंतंवायुविशेषमपानसंज्ञंविनानाभ्रुवन्नग्रहीतुंशक्ताबभूवुरित्युत्तरान्वयेनार्थः ॥ ११९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनापानमिति तेनेश्वराज्ञयास्वयमादायकरणरूपदेवताभ्योऽन्नस्यविभज्यदानेनहेतुनाऽऽसांदेवतानामीश्वरःप्राणोज्येष्ठश्चश्रेष्ठश्चेत्यादि श्रुतौअयंप्राणःकथ्यते तथान्नजीवनइत्यर्थकान्नायुःपदेनप्रकृतश्रुतौशाखांतरेचसाक्षादन्नादपदेनकथ्यते अन्नमासमन्ताद्ददातिअन्नमाद त्तइतिद्विधाविग्रहसंभवादितिभावः ॥ १२० ॥एवंकर्तृत्वभोक्तृत्वोपाधेर्वागादिप्राणांतस्याध्यारोपितस्यतदभिमानलक्षणसंसाराश्रयत्वंन संभवतिजडत्वात् बंधमोक्षयोश्चसामानाधिकरण्याच्चेत्याशयेनसंसारयोग्यात्मस्वरूपनिर्धारणपरंकथमिदंमदृतेइत्यादिवाक्यमुपबृंहय तितथापीत्यादिचतुर्दशभिः यद्यपिसअन्नादत्वेनसकलेंद्रियैराश्रितोऽन्नादानव्यापारेकरणांतरनिरपेक्षःकारणंचतथापिसन्निधिमात्रे णप्रयोजकमात्मानंसर्वांतरंविनाकुठारादिवन्नेष्टेनसमर्थोभवतीत्यर्थः अशनायापिपासयोरपिजडत्वादितिभावः प्राणंविनाकुणपवदा त्मानंविनाप्राणोपिकुत्सितइतिद्योतनायकःप्रत्ययः इतिविज्ञायेतिस्पष्टम् ॥ १२१ ॥ विचाराकारमाह मामृतेइति एतत्सवायुकंसूत्रव द्धारकक्रियाशक्तिमत्प्राणयुक्तमपिजातंप्रादुर्भूतमेतदधिदैवादिभेदशालिजगत्मांप्रकाशरूपंविनाकथंस्यात् प्रकाशनिरपेक्षंचप्रादुर्भावा

विनाऽपानंप्राणभेदंतेनासामयमीश्वरः॥ प्राणोऽन्नादस्ततोवायुभेदोयंकथ्यतेश्रुतौ॥ १२० ॥ तथापिनवि नात्मानमीष्टेऽन्नंसोप्यपानकः॥ इतिविज्ञायजनकस्तैरनुक्तोव्यचिंतयत्॥ १२१ ॥ मामृतेकथमेतस्याज्जग ज्जातंसवायुकम्॥ नप्रकाशंविनाकिंचिद्विद्यमानंप्रसिध्यति ॥ १२२ ॥ नत्वन्नाद्यमितिज्ञानंविनाऽत्त्राद्यं प्रसिध्यति॥ नत्वंधकारेलोकोयंवेत्तिकिंचित्कदाचन॥ अंधकारंचजानातिनविनाचक्षुषीजनः॥ १२३ ॥

त्मकप्रकाशविशिष्टंचेतिवचोव्याहतं पितामेबालब्रह्मचारीतिवाक्यवदितिभावः एतदेवस्फुटयति नप्रकाशंविनेति॥ १२२॥ एवंचयद्य ज्जडंतत्प्रकाशसापेक्षमितिव्याप्तिःफलिता तामुदाहरणेनस्पष्टयति नत्वन्नाद्यमिति अन्नमपानाख्यप्राणकरणकव्यापारविषयःआद्यंप्र थमभावियस्यवागादिकरणकव्यापारविषयवक्तव्यादिविषयजातस्यतदन्नाद्यं अत्ताप्राणविशिष्टत्वेनभोक्ताप्रकाशरूपआत्मासआ द्यःप्रथमोयस्यवक्तृद्रष्टृश्रोतृप्रभृतेरात्मभेदजातस्यसोत्ताद्यः एकस्यैवात्मनोवदन्वाक्पश्यन्चक्षुःशृण्वन्श्रोत्रमित्यादिश्रुत्याकरणोपाधि भिर्भेदप्रतिपादनात् तथाचइदमन्नमदनीयमिदंवक्तव्यमिदंद्रष्टव्यमित्याद्याकारंज्ञानमत्तृप्रभृतिप्रकाशकंविनानप्रसिध्यतीत्यर्थः ॥ तत्र लौकिकंदृष्टांतमाह नत्वंधकारइति किंचिद्रूपादिमद्घटादि नन्वंधकारेएवभवदुक्तव्याप्तेर्भंगइत्याशंक्यतस्यापिचक्षुःप्रकाशसापेक्ष त्वान्नैवमित्याहांधकारमिति ॥ १२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुअंधकारस्यप्रकाशापेक्षत्वेकिंमानमित्याशंक्यानुमानमित्याह यथाघटादीति यथाघटादिग्रहणेघटादिभ्योन्यःसूर्यादिप्रकाशःसा
धनंतथातमसोन्यश्चक्षुःसंबंधीप्रकाशस्तमसोग्रहेसाधनंस्यादित्यन्वयः तथाचांधकारःप्रकाशसापेक्षोजडत्वाद्घटादिवदित्यनुमानंफ
लितमितिवोध्यम् ॥ १२४ ॥ एवंव्याप्तिंप्रसाध्यचक्षुरादिजन्यांतःकरणवृत्तीनांप्रकाशत्वेपिजडत्वादात्मप्रकाशसापेक्षत्वमात्मनःसा
॥ १५ ॥ धनायदर्शयति चक्षुरादीति क्रियतेइतिपूर्वार्धान्वयि ननुसूर्यादिप्रकाशेनान्यथासिद्धिरतआह नघटेनेत्यादि तथाचयथाघटेनविषय
त्वात्सूर्योभासयितुंनशक्यस्तथाविषयभूतेनसूर्यादिनापिचक्षुरादीतिभावः विषयग्रहणेसहायतारूपमनुग्रहंसूर्यादिदेवःकरोतीत्यन्यत्
एवंचचक्षुरादिप्रकाशः प्रकाशांतरसापेक्षःजडत्वात्व्यतिरेकआत्मवदित्यनुमानंफलितं तादृशप्रकाशस्यचान्यस्यासंभवात्परिशेषेणात्म
सिद्धिरितिध्येयम् ॥ १२५ ॥ ननुचक्षुरादिप्रकाशःप्रकाशांतरानपेक्षःप्रकाशत्वात्प्रदीपवदितिसत्प्रतिपक्षइतिआशंक्यमण्यादिषुव्यभि
चारित्वेनदुष्टत्वात्प्रतिपक्षत्वंनसंभवतीत्याह नचप्रदीपवदिति नापेक्षतेइतिअनपेक्षणः नंद्यादित्वाल्ल्युः सजातीयस्यानपेक्षणःसजाती

यथाघटादिग्रहणेप्रकाशोन्योहिसाधनम्॥ चक्षुषोपिप्रकाशःस्यात्तमसोन्यस्तथाग्रहे॥ १२४॥ चक्षुरादिप्र
काशानांप्रकाशेनप्रकाशनम्॥ क्रियतेनघटेनात्ररविरेषप्रकाशते॥ १२५ ॥ नचप्रदीपवत्सर्वःसजातीया
नपेक्षणः॥ मण्यादिषुतथाऽदृष्टिर्विद्यतेसर्ववादिनाम् ॥ १२६॥ ततःस्वल्पत्वबाहुल्येग्राह्यग्रहणकारणे॥ प्र
काशेनसजातित्वंबहुत्वंचमयिस्थितम्॥ १२७॥

यानपेक्षणः सर्वःप्रकाशःसजातीयानपेक्षइतिनियमोनच कुतः मण्यादिषुप्रकाशेषुतथासाहचर्येणहेतुसाध्ययोःसर्ववादिभिरदृष्टेरदर्श
नादित्यर्थः॥१२६॥ ननुप्रकाशत्वाविशेषेपिकेनविशेषेणप्रकाशस्यप्रकाशापेक्षेतिसुहृद्भावेनपृच्छंतंप्रत्याह ततइति ग्राह्यग्रहणेतिभावप्र
धानोनिर्देशःतथाचप्रकाशत्वाविशेषेपिस्वल्पत्वबाहुल्येपरिच्छिन्नत्वव्यापकत्वेग्राह्यग्रहणत्वयोःप्रकाश्यत्वप्रकाशकत्वयोःकारणेप्रयोज
केव्याप्यइतियावत् यद्यत्परिच्छिन्नंतत्तत्प्रकाश्यंयथादीपप्रकाशापेक्षयापरिच्छिन्नंमण्यादि यद्यद्व्यापकप्रकाशरूपंततत्प्रकाशकंयथा
दीपादीतिव्याप्तिःसिद्धेतिभावः प्रकाशप्रकाशकत्वव्याप्यंयत्प्रकाशत्वेसतिव्यापकत्वंतद्वानात्मेत्युपनयंसूचयति प्रकाशेनेति प्रकाशेन ॥ १५ ॥
सजातित्वंसमानजातिमत्वंप्रकाशत्वमित्यर्थः बहुत्वंभूमपदार्थः व्यापकत्वं उभयंमयिशोधिताहंपदार्थेआत्मनिस्थितं ज्योतिर्ब्राह्मणभू
मब्राह्मणादिश्रुतिभिर्विद्वदनुभवेनचप्रसिद्धमित्यर्थः ॥ १२७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंव्याप्तिपक्षधर्मतयोःसिद्धौसत्यामनुमानंदर्शयति स्वल्पत्वादिति स्वातिरिक्तसर्वप्रकाशिन्यपिबुद्धिर्मयादृश्याप्रकाश्यास्यादितिप्रतिज्ञा स्वल्पत्वात्परिच्छिन्नत्वादितिहेतुः उदाहरणंदर्शयति यद्वदिति तयाबुध्याहिरण्यगर्भोपाधित्वेनव्यापकयासत्वप्राधान्येनप्रकाशरूपयाभानाभानात्मकंसूर्यादिरूपंघटादिरूपंचजगत्यथादृश्यंतद्वदित्यर्थः ॥ १२८ ॥ ननुश्रुत्योक्तमपिभूमरूपंचेतसिनावतरतिअसंभावनाप्रतिबंधादित्यतस्तद्वारणायत्रिविधपरिच्छेदासंभवरूपंतर्कंस्फुटयति अहमित्यादिचतुर्भिः यथागोव्यक्तिरूपदेशपरिच्छिन्नागोत्वजातिस्तथाहंकेनापिदेशेनावच्छिन्नोनभवामिमांविनेतरदेशीयानांसत्ताप्रकाशानिर्वाहादितिभावः कालपरिच्छेदाभावमाह नाहंकालेपीति व्यतिरेकेदृष्टांतः यथाभावीअनागतःअस्तिवर्त्तमानःमृतोऽतीतः एतेयथाकालावच्छिन्नास्तथानाहमित्यर्थः॥ १२९॥ भेदरूपवस्तुपरिच्छेदाभावमाह मत्तइति सदसदित्युभयाकारकंशब्दंधियंचगतंविषयत्वेनतयोर्भासमानंकिंचिदपिमत्तःपृथक्नास्ति व्यतिरेकेदृष्टांतः यथाघ

स्वल्पत्वादेवदृश्यास्याद्बुद्धिःसर्वप्रकाशिनी॥ मयायद्वत्तयादृश्यंभानाभानात्मकंजगत् ॥ १२८ ॥ अहंनकुत्रचिद्देशेस्थितोस्मिगविगोत्ववत्॥ नाहंकालेपिकस्मिंश्चिद्भाव्यस्तिचमृतोयथा॥ १२९॥ मत्तोस्तिनपृथक्किंचित्सदसच्छब्दधीगतम् ॥ यथाघटात्पृथग्भूमिर्वंध्यापुत्रश्चलभ्यते ॥ १३० ॥ मय्येवंसकलंविश्वंदेशकालादिरूपकम्॥ नामरूपक्रियाव्याप्तमध्यस्तंस्रजिसर्पवत्॥ तथाभूमाहमेकोत्रमत्तोनान्योस्तिकश्चन॥ १३१॥

टादिति भूमिःसदाकारशब्दधीगतावंध्यापुत्रश्चासदाकारशब्दधीगतोयथाघटात्पृथगेवंनमत्तःकिंचिदित्यर्थः ॥ १३० ॥ ननुचिज्जडभेदोलौकिकप्रमाणसिद्धइत्याशंक्यतेषांस्वमगतप्रमाणवन्नातोन्यदार्त्तमितिश्रुतिबाधितभेदसाधनेशक्तिरित्याशयेनप्रपंचनिरूपितद्वैताभावेतस्याध्यस्तत्वंहेतुमाह मय्येवेति स्पष्टम् फलितमाह तथाभूमेति भूमाव्यापकः बहोर्भूरादेशः इमनिच्प्रत्ययः भवितृप्रधानोनिर्देशः उपसर्जनीभूतंयद्विशेषणंतद्विशिष्टाभिधायकंपदंयदाविशेषणंप्राधान्येनाभिधत्तेतदाभावप्रधानोनिर्देशइतिव्यवहारः यथागोत्वविशिष्टवाचकगोशब्दस्यनित्योगौरितिवाक्येगोत्वमात्राभिधाने यदातुभावप्रत्ययांतःप्राधान्येनविशेषणाभिधानशीलःशब्दोभावप्रत्ययार्थमुपसर्जनीकृत्यविशिष्टंपुनरभिधत्तेतदाभवितृप्रधानोनिर्देशइतिव्यवहारः यथाप्रकृतोभूमशब्दोऽयंहिइमनिजंतत्वेनव्यापकत्वबहुत्ववाचकोपिप्रकृतेव्यापकस्वरूपवाचकइतिबोध्यं ॥ १३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुभेदांतराभावेपिघटस्यस्वधर्मेभ्योरूपादिभ्यइवसुखसत्वप्रकाशेभ्योभेदआत्मनःस्यादेवतथाचागतोवस्तुपरिच्छेदइत्यतआह सुखस त्वप्रकाशाइति सुखमानंदःसत्त्वंसत्ताप्रकाशश्चित् एतेचेद्यदिमत्तःसर्वातराद्भिन्नाःस्युस्तदातेसुखसत्त्वप्रकाशास्तेनस्युः सुखत्वादिभ्यएव च्युताःस्युरित्यर्थः तथाहि सुखंयदिभूम्नआत्मनोभिन्नंस्यात्तदावस्तुपरिच्छेदेनभूमरूपहानात्सुखत्वादेवच्युतंस्यात् योवैभूमेत्यादिश्रुतेः एवंसत्वमप्यात्मनःप्रकाशात्मकाद्भिद्यमानमसत्स्यात्साधकाभावात्प्रकाशोपिसद्रूपादात्मनोभिद्यमानोसत्स्यात्त्रयाणामेकात्मकत्वेतुनको पिदोषइतिभावः नन्वेवंसतिकथंधर्मधर्मिभेदव्यवहारइत्याशंक्यधर्मधर्मिभावोनगवाश्ववदत्यन्तभिन्नयोर्नापिघटकलशवदत्यन्ताभिन्न योस्तस्माद्भेदाभेदोभयसापेक्षेणापिव्यवहारेणाभेदेपारमार्थिकेलब्धेपितादृशभेदस्यालाभात्सबद्धमुक्तमहीपालन्यायेनकल्पितभेदेना पितुष्यतीतिगृहाण नचकल्पितेनसद्वितीयत्वं नहिगृहेस्वपन्स्वभेदृष्टराजमंडलःसद्वितीयइतिव्यवह्रियतेप्रामाणिकैरित्याशयेनाह अ ध्यस्तत्वेनेति यदितेऽध्यस्तामत्तोभिन्नाव्यवह्रतास्तदारज्जुसर्पादिसमाः संतोनभेदप्रयोजकाः अध्यस्तत्वात् परमार्थतस्तुसुखसत्त्वप्रकाशा अहमेवमत्स्वरूपभूताएवेत्यर्थः तथाचोक्तंविवरणकारैः आनंदोविषयानुभवोनित्यत्वंचेतिसंतिधर्माअभिन्नत्वेपिपृथगिवावभासंतइति॥

सुखसत्त्वप्रकाशाश्चेत्भिन्नामत्तोनतेपिते॥ अध्यस्तत्वेनसर्पादिसमास्तस्मादहंहिते ॥ १३२॥ तस्मात्प्रका शनंयुक्तंमयासर्वस्यवस्तुनः॥ तेजसोऽतेजसोवापिममनान्येनवस्तुना॥ १३३॥ अतोहमस्यदेहादेर्जडदुः खासदात्मनः॥ सच्चिदानंदतांकुर्वन्प्रवेक्ष्यामिकलेवरम् ॥ १३४ ॥

॥ १३२ ॥ ज्योतिर्ब्राह्मणार्थोपसंहारेणनिगम यति तस्मादिति तस्मात्व्यापकत्वेसतिप्रकाशत्वान्मयैवसर्वस्यवस्तुनस्तेजोऽतेजोरूपस्यजडस्यप्रकाशनंयुक्तं ममतुसर्वप्रकाशकस्यघटे नसूर्यस्येवान्येनप्रकाशनंनयुक्तं विषयस्यविषयिप्रकाशनाशक्तेरित्यर्थः ॥ १३३ ॥ एतादृशविचारस्यप्रकृतोपयोगंदर्शयति अतोह मिति अतःपूर्वोक्तयुक्त्यासर्वस्यजडसंघातस्यमदधीनसिद्धिकत्वेनमच्छेषत्वात्अहंकलेवरंप्रवेक्ष्यामि किमर्थं जडदुःखासदात्मनोदे हादेःस्वतादात्म्याध्यासात्सच्चिदानंदतांकुर्वन्कर्तुमित्यर्थः कुर्वन्निति शतृप्रत्ययोलक्षणहेत्वोःक्रियायाइतिसूत्रेणहेतौबोध्यः फलस्यापि हेतुत्वादर्जयन्वसतीतिवत् अत्रेदंविवेचनीयं अयंचतुर्दशश्लोकोक्तोविचारस्तथाग्रिमवाक्यव्याख्यानेवक्ष्यमाणश्चएतद्द्वयंजीवेनसंभव ति जीवस्यैवंविचारेकृतकृत्यत्वेनप्रवेशानुपपत्तेः किंचसृष्टिस्थितिप्रलयप्रवेशानुग्रहास्तत्पदार्थेश्वरलक्षणानीतिसिद्धांतः तस्मादनादेर पिजीवस्येशप्रतिबिंबरूपस्योपाधिप्रवेशात्पूर्वमस्फुटतयाकारणोपाधीश्वरतादात्म्येनेश्वरनिष्ठोयंविचारस्तत्रजीवेऽभेदमादायबुद्धेस्तत्त्वा वतारणायश्रुत्याव्यवह्रतइतिनविरोधः जीवत्वबाधहेतुस्तुविचारःअवस्थात्रयदर्शनानंतरंवक्ष्यमाणोबोध्यइति ॥ १३४ ॥ ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवेशस्यद्वेप्रयोजनेभोगोऽपवर्गश्च अपवर्गश्चस्वरूपज्ञानमपवृज्यतेनेनेतिव्युत्पत्तेः तत्रभोक्तृत्वोपयोगिचित्स्वरूपविचारःपूर्वमुक्तः अथ यत्संकल्पयतितत्करोतीतिन्यायेनद्वितीयप्रयोजनोपयोगिविचारसूचकंकंतरेणप्रपद्यइत्यादिकोहमित्यंतंवाक्यमुपबृंहयति इतिसंचित्ये त्यादिसप्तत्रिंशच्छ्लोकैः पूर्वार्द्धंस्पष्टं चिंताकारमाह द्वारमित्यादि चेतनस्यहिज्ञानशक्तिःक्रियाशक्तिश्चेतिद्वावुपाधीतत्रसत्त्वप्रधानोमाया परिणामोवाबुद्धिर्वाचित्प्रतिबिंबग्राहितयाज्ञानशक्तिरितिव्यवह्रियते तत्रज्ञानेंद्रियाणिज्ञानशक्तिप्रपंचःकर्मेंद्रियाणितुक्रियाशक्तेरित्य न्यत्रविस्तरः तथाचमेज्ञानशक्तेरालोचनप्रधानज्ञानशक्त्युपाधिकस्ययोग्यंकिंद्वारंभवेदित्यर्थः व्यापकस्योपाधिमंतराप्रवेशानुपपत्तेरि तिभावः पूर्वंसदैवतबुद्धेःप्रतिबिंबरहितायाःप्रवेशउक्तःइदानींतुप्रतिबिंबविशिष्टबुद्धेश्चेतनोपाधितयेतिविशेषः ॥ १३५ ॥ ननुयेनकेना पिमार्गेणप्रवेशोविधेयइतिचेज्जडत्वेनमार्गदोषमपश्यतःक्रियाशक्तेःप्राणस्यैवसयोग्योनतुममसर्वोत्कृष्टस्येत्याह प्रपदाग्रेणेतिद्वाभ्यां पाद स्याग्रंप्रपदंतस्याग्रंतेनमार्गेणसर्वतोऽधस्तनेनप्राणआविष्टवान् तत्रहेतुगर्भविशेषणंक्रियाशक्तिरिति दृश्यतेचमूर्छयाजडानांचेतनारंभेपा

इतिसंचिंत्यदेवोसौपुनश्चिंतामवापह॥ द्वारमत्रप्रवेशेमेज्ञानशक्तेर्भवेद्धिकिं॥ १३५॥ प्रपदाग्रेणपूर्वंहिक्रि याशक्तिःप्रविष्टवान्॥ नहिचेष्टापिमांहित्वाजडानांरथवद्भवेत् ॥ १३६॥ ज्ञानशक्तिस्ततोऽद्याहंकथमात्मा नमीश्वरम्॥ अविचार्यप्रवेक्ष्यामीत्येवंपुनरचिंतयत्॥ १३७॥ इदंविचारयामासस्वात्मनोत्रबुभुत्सया॥ दे होनात्मावैदिकानांसुप्रसिद्धोपिहेतुभिः॥ १३८॥

दायेप्रथमंक्रियेति इदमन्यद्वाराणामपिभृत्यप्रवेशार्हाणांस्वप्रवेशायोग्यत्वेउपलक्षणं स्वस्यज्ञानशक्तेःसर्वोत्कृष्टत्वेनेश्वरस्यतन्मार्गप्रवे शानर्हत्वसूचनायस्वस्मिन्विशेषंसूचयति नहिचेष्टेति स्पष्टम् ॥ १३६ ॥ ज्ञानशक्तित्वादेवविचारांतरमपिविधेयमित्याह ज्ञानशक्तिरि ति यतोहंज्ञानशक्तिस्ततोयोग्यमार्गमिवेश्वरमात्मानमविचार्यकथंप्रवेक्ष्यामिकिंतुस्वरूपमपिविचार्यप्रवेशोयुक्तइत्थंपुनरचिंतयद्विचारां तरंकृतवानित्यर्थः ॥ १३७ ॥ आत्मविचारस्वरूपमवतार्यप्रपंचयति इदमित्यादिना ननुकिमर्थंविचारः देहस्यानात्मत्वेनप्रसिद्धत्वादि तिचेत्सत्यं वेदतात्पर्यवतांकुशलानांविचारापेक्षाभावेपिमंदधियांनृणामुपकारायविचारआरभ्यतएवेत्याह देहोनात्मेति यद्यपिवैदिकानां दृष्टौदेहोनात्माप्रसिद्धस्तथापिनृणांकृतेदृश्यत्वादिभिर्हेतुभिरात्मज्ञैर्दर्शयितुंशक्यइत्युत्तरार्द्धेनान्वयः देहोनात्मादृश्यत्वाज्जडत्वात्परिच्छिन्न त्वाच्चव्यतिरेकेआत्मवदित्यनुमानंबोध्यम् ॥ १३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृश्यत्वादिभिरिति पूर्वार्द्धंव्याख्यातं आदिपदसूचितमनिर्वचनीयत्वंस्फुटयितुमाह अपिदेहइत्यादि अपिनाहेत्वंतरमप्युच्यतइत्यर्थः अत्रानुभवगोचरेकोनामदेहः ननुप्रसिद्धएवसंघातइतिचेदापातप्रसिद्धेरकिञ्चित्करत्वान्न्यायाऽविरुद्धाप्रसिद्धिर्वाच्या तथाचसंहननंपरस्परमिलनंपरस्परंसंबंधइत्यागतं सचसंबंधःसमानानामेववाच्यःयोग्यंयोग्येनसंबध्यतेइतिन्यायादित्याशयेनेंद्रियत्वादिधर्मैःसजातीयानांसंघातान्त्रिभिर्दर्शयिष्यन्संघातविभागेविवेकविशिष्टानुभवंहेतुतयाह संघातेऽवगतेइति अवगतेविविच्यदृष्टेसतीत्युत्तरश्लोकत्रयार्थैहेतुत्वेनान्वेति॥ १३९॥ ज्ञानेति वर्ततइतिपंचतादौयोज्यं ज्ञानेंद्रियाणांपंचताश्रोत्रत्वक्चक्षुर्घ्राणरसनभेदात् कर्मेंद्रियाणांवाक्प्राणिपादपायूपस्थभेदात् प्राणानांप्राणापानव्यानोदानसमानभेदात् त्वगादीनांसप्ततात्वगसृङ्मांसमेदोस्थिमज्जारेतोभेदात् त्रितापुनरित्युत्तरान्वयि॥ १४० ॥ दोषाणामिति कफवातपित्तात्मनांदोषाणांत्रितात्रित्वंवर्तते विण्मूत्रयोर्द्वित्वंवर्तते स्वेदपूययोरागंतुकद्रवयोर्द्वित्वंवर्तते ॥ १४१ ॥ आनंत्यमिति समुदायिनामपरिमेयत्वादपरिमेयःकेशलोमादेःसंघातइत्यर्थः अस्मिन्संघातसमुदायेकोनामसंघातोदेहः ए

दृश्यत्वादिभिरात्मज्ञैःशक्योदर्शयितुंनृणां॥ अपिदेहोत्रकोनामसंघातेऽवगतेसति॥१३९॥ ज्ञानकर्मेंद्रियप्राणभूतानांपंचतापुनः॥ सप्तताचत्वगादीनांधातूनांचत्रितापुनः॥ १४०॥ दोषाणामपिवाताख्यकफपित्तात्मनामिह॥ विण्मूत्रयोस्तथाद्वित्वंतद्वत्स्वेदाख्यपूययोः॥१४१॥ आनंत्यंकेशलोमादेर्वर्ततेऽत्रपृथक्पृथक्॥ अस्मिन्कोनामदेहःस्यात्समुदायोनवस्तुसन्॥ १४२॥ सकिंतेभ्योविभिन्नःस्यादथवासमुदायिनः॥ आद्येत्वदर्शनंपूर्वमुक्तमेवहिदूषणम्॥ एकैकस्मिन्नदृष्टत्वाद्द्वितीयोनोपपद्यते॥ १४३॥

तेषांसंघातानांसंघातोवाप्रत्येकंवाएतेसंघाताः नोभयमपीत्याह समुदायइति वस्तुसन्वास्तवःनिर्वक्तुंशक्यइतियावत् तादृशोनभवतीत्यर्थः॥ १४२ ॥ समुदायस्यद्विविधस्यानिर्वचनीयत्वंस्फुटयति सकिमितिसार्धेन ससमुदायस्तेभ्यःसमुदायिभ्योमहासमुदायावांतरसमुदायान्यतरघटकेभ्योभिन्नोवाथवासमुदायिनःसमुदायघटकस्वरूपाभिन्नएववेत्यर्थः भिन्नत्वपक्षेदोषमाह आद्येत्विति समुदायिभ्यःसमुदायोभिन्नइत्यत्रपूर्वमुक्तंनवत्रिंशदधिकशततमेश्लोकेयदुक्तंन्यायाविरुद्धाप्रसिद्धिर्वाच्येत्याकारंतदेवदूषणंप्रसंजनीयमित्यर्थः यथान्यायानुसारेणसजातीयसंघातादन्योविजातीयसंघातोनसंभवतिएवंसमुदायिनामपेक्षाबुद्धिविशेषविषयस्वरूपभिन्नःसमुदायोनसंभवतीतिभावः समुदाय्यऽभिन्नत्वपक्षेदोषमाह एकैकस्मिन्निति एकैकस्मिन्नवांतरसमुदायेवातद्घटकप्रत्येकेंद्रियादिस्वरूपेवासमुदायव्यवहारस्यदेहव्यवहारस्यचादर्शनाद्द्वितीयःपक्षःसमुदायिभ्यःसमुदायोऽभिन्नइत्याकारोपिनसंभवतीत्यर्थः ॥ १४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुनप्रत्येकस्वरूपंनचतदतिरिक्तःसमुदायोभ्युपगम्यतेकिंतुमिलितास्तएवेत्यतआह सर्वेतेइति सर्वेतेसमुदायिनोमिलिताःसंतःससमुदाय स्यादितिचेत्तथाचपुनरुक्त्यापत्तिरित्यर्थः पुनरुक्तिस्पष्टयति सर्वेषामिति सर्वेषांसमुदायिनांयन्मेलनमेकबुद्ध्याविषयीकरणरूपंसमुदाय इतिस्थितिर्मर्यादासर्वतंत्रसिद्धांतः तथाचमिलितामेलनरूपसमुदायविशिष्टाःसमुदायइत्यागतं तर्हिदेवदत्तोधनीजातइत्यत्रयथाविशेष्ये बाधाज्जातत्वस्यधनेन्वयस्तथान्वयेसमुदायःसमुदायइतिलब्धंतदापुनरुक्तिःस्पष्टेतिभावः॥१४४॥ तर्हिमेलनमेवसमुदायोस्त्वित्याशंक्याह मेलनमिति मेलनंसंबंधरूपमित्युक्तं तन्मेलनंसमवायस्थानेमीमांसकैरभिषिक्तंयत्तादात्म्यंभेदसहिष्णुरभेदस्तादात्म्यमितिलक्षितंतदभिमतंपरंवा नाद्यइत्याह तादात्म्येइति तादात्म्यस्थलेभेदाभेदयोर्वास्तवयोःसमुच्चयासंभवान्निरपेक्षत्वेनाभेदोवास्तवोभेदःकल्पितइतिसिद्धांतःतथाचवास्तवैक्येनमेलनंदुर्घटंभवेत्तथाचव्याघातापत्तिरितिभावः॥१४५॥अपरपक्षंनिराचष्टे अपरमिति बुधइतिशेषः स्पष्टार्थं सं

सर्वेतेमिलिताःसस्यात्तथाचपुनरुक्तता॥ सर्वेषांमेलनंनामसमुदायइतिस्थितिः॥ १४४ ॥ मेलनंनामसंबंधस्तादात्म्यमथवापरम्॥ तादात्म्येसतिचैक्येनमेलनंदुर्घटंभवेत्॥ १४५ ॥ अपरंनहिसंबंधशब्दार्थंलभतेक्वचित्॥समोबंधेस्तथाकोर्थःकथनीयंत्वयाऽधुना ॥ १४६॥ सम्यक्त्वंसंध्वनेरर्थोबंधेश्चैवापिबंधनम्॥ नचैतमपिपश्यामोविनातेवचनंक्वचित्॥ १४७॥

योगस्यसंयुक्तस्वरूपातिरिक्तस्याननुभवेनप्राभाकरैरेवविकल्पमात्रत्वोक्तेःसमवायस्यचसंबंध्यतिरिक्तस्यांगीकारेतस्यचसंबंधमंतरास्थित्यसंभवात्तदर्थंसंबंधांतरांगीकारेऽनवस्थापातात्सनिरस्तः किंचवृक्षसमुदायोवनमित्यादौसंयोगसमवाययोरनुपलंभश्चेतिभावः किंचसंबंधशब्दावयवार्थासंभवेनसंबंधनिरूपणासंभवात्संबंधरूपःसमुदायोनवक्तुंशक्यइत्याशयेनाह समोबंधेरिति संबन्धशब्देसमःसमित्युपसर्गस्यबंधेर्बंधधातोश्चकोर्थइतिपृष्टेत्वयावक्तव्यमित्यर्थः ॥ १४६ ॥ सम्यक्त्वमिति संध्वनेःसंशब्दस्यसम्यक्त्वमर्थःबन्धेश्चापिबंधनमित्येवत्वयावक्तव्यमर्थांतरासंभवादित्यर्थः एतमपितेवचनंविनाक्वचित्सांसारिकेवस्तुनिनपश्यामःकिंतुत्वद्वचनएव तथाचसंबंधशब्दार्थबोधोलौकिकोविकल्पमात्रंसंबंधरूपःसमुदायस्तुसुतरामितिभावः ॥ १४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवस्फुटयति कालत्रयइतिचतुर्भिः नपर्यैतिनपरिणमतेनान्यथाभवतीत्यर्थः पर्यैतिचेदमिति प्रतिक्षणपरिणामिनोहिसर्वेभावाऋते चितिशक्तेरितिसांख्यसिद्धांतादतोन्यदार्तमितिश्रुतेश्चेतिभावः ॥ १४८ ॥ बंधनंचेति उभयोर्बध्यमानयोर्यद्बंधनंतत्ताभ्यांपृथग्भूतंदृष्टंयथारज्जोर्भिन्नत्वेनदृष्टयोरुभयोर्गवोस्ताभ्यांपृथग्भूतारज्जुरित्यन्वयः ॥ १४९ ॥ अपिमूर्तमिति मूर्तंघनावयवंतद्बंधनंलोकेदृष्टं व्यतिरेकेदृष्टांतः आकाशेनेति स्पष्टम् ॥ १५० ॥ नचदेहेइति तथारज्ज्वादिवन्मूर्तं शेषंस्पष्टम् ॥ १५१ ॥ एवंसंघातोदेहइतिपक्षंनिराकृत्यसंघातघटकानामिंद्रियादीनामनात्मत्वंबोधयति तस्मादित्यादिना आत्मबोधनेजिज्ञासुंप्रतिआत्मबोधनेकर्त्तव्येइंद्रियादीनामनात्मत्वेविद्वदनुभवंतावदाह इंद्रियादेरिति आत्मताहिसर्वांतरतासाचसाक्षिभास्यतयाततोघटादिवद्बाह्यत्वेनेंद्रियादेर्नसंभवतीतिभावः यद्यपींद्रियत्वेनरू

कालत्रयेनपर्यैतितत्सम्यगितिगीयते ॥ पर्यैतिचेदंसकलंजडत्वाद्रज्जुसर्पवत् ॥ १४८ ॥ बंधनंचतथादृष्टमुभयोर्बध्यमानयोः॥ पृथग्भूतंयथारज्जुर्दृष्टयोरुभयोर्गवोः ॥ १४९॥ अपिमूर्तंचतद्दृष्टंनामूर्तंक्वापिबंधनम्॥ आकाशेननबध्यंतेघटस्तंभपटादयः ॥ १५० ॥ नचदेहेतथाकिंचित्तत्त्वानामिहबंधनम् ॥ दृश्यतेतेनसंबंधशब्दार्थोनास्तिकश्चन ॥ १५१ ॥ तस्मादेकैकशस्त्वेतद्विचार्यस्वात्मबोधने ॥ इंद्रियादेर्नचाप्यत्रदृश्यतेत्वात्मताक्वचित् ॥ १५२ ॥ देहस्येवाप्यनात्मत्वमिंद्रियादेःसुनिश्चितम् ॥ अचैतन्यमपिप्राप्तंमान्यतेतेषुसर्वतः ॥ १५३ ॥ अचेतनानांव्यापारेस्वातंत्र्यंनास्तिकुत्रचित् ॥ रथादयोनगच्छंतिगवादीन्परिहायहि ॥ १५४ ॥

पेणनेंद्रियाणांसाक्षिप्रत्यक्षंतथापिपश्यामिजिघ्रामीत्याद्याकारेणप्रसिद्धमेवेति ॥ १५२ ॥ अनुमानमपिदर्शयति देहस्येवेति इंद्रियादिरनात्मादृश्यत्वादिभ्योदेहवदित्यनुमानस्वरूपं ननुकर्तृत्वमात्मलक्षणंशैवशास्त्रेप्रसिद्धंकर्तृत्वंचस्वातंत्र्यंतच्चेंद्रियादीनांव्यापारेस्फुटमित्याशंक्यस्वातंत्र्यव्यापकचैतन्याभावंव्याप्याभावदर्शनायाह अचैतन्यमिति सर्वतःसर्वेषु सार्वविभक्तिकस्तसिः तथाचमामात्मानंविनाम त्तादात्म्याध्यासंविनातेपुप्राणादिष्विंद्रियांतेषुसर्वेष्वचैतन्यंप्राप्तंकथंन्विदंमदृतेइतिव्याख्यानेतथापिनविनात्मानमित्यादिग्रंथेननिर्णीतमित्यर्थः॥ १५३ ॥ चैतन्यनिवृत्तौतद्व्याप्यस्वातंत्र्यस्यापिनिवृत्तिरितिदर्शयति अचेतनानामिति तत्रप्रसिद्धोदृष्टांतः रथादयइति स्फुटम् ॥ १५४ ॥ ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतस्तल्लक्षणमपिआत्मन्येवपर्यवस्यतीत्याह व्यापाराइति तेनमांविनासर्वेषांचैतन्यप्रयुक्तस्वातंत्र्याभावेनइंद्रियानिंद्रियस्यइंद्रियत्वे नानिंद्रियत्वेनप्राणत्वादिनाप्रसिद्धस्यवागादेःकरणस्ययेक्रियात्मकाव्यापाराःप्राणकर्मेंद्रियसंबंधिनोयेचज्ञानात्मकाव्यापाराअंतःकरणज्ञानेंद्रियसंबंधिनस्तेसर्वेमत्कृतामयैवसन्निधिमात्रेणप्रयुक्ताइतिपर्यवस्यतीत्यर्थः ॥ १५५॥ स्वव्यापारेस्वतंत्रत्वंसर्वत्राप्यस्तिकारके इतिश्रीहर्षोक्तरीत्यावागादीनांस्वस्वव्यापारेस्वतंत्रत्वाभ्युपगमेपितेषामात्मत्वंनसंभवति आत्माहिसर्वत्रसन्निहितउच्यते अततिसातत्येनगच्छतिसर्वत्रसन्निधत्तइतिव्युत्पत्तेस्तच्चस्वव्यापारपरेषुनसंभवतीत्याह यद्यपीति क्वचिद्वदनादिरूपायांव्यापृतौव्यापारेअमीषांवागादीनांस्वातंत्र्यंयद्यप्यभ्युपगम्येततथापिइतरव्यापारेनक्षमाअभ्युपगंतुमपिनक्षमाइत्यर्थः तथाचदुर्लभमेषामात्मत्वमितिभावः ॥ १५६॥ एतदेवप्रपंचयति वदनेत्याद्यष्टभिः शब्दोच्चारणग्रहणगमनमलोत्सर्गानंदाःक्रमेणवाक्पाणिपादपायूपस्थानांव्यापाराः नन्वन्येपिकुतो

व्यापारास्तेनवागादेर्मत्कृताएवसर्वतः॥ क्रियाज्ञानात्मकायेस्युरिंद्रियानिंद्रियस्यहि॥ १५५॥ यद्यपिस्यादमीषांहिस्वातंत्र्यंव्यापृतौक्वचित्॥ वागादीनांतथाप्येतेनान्यव्यापृतिषुक्षमाः॥ १५६॥ वदनादानगतयोविसर्गानंदकावपि॥ कर्मेंद्रियाणांव्यापाराःप्रत्येकंनियतायतः॥ १५७॥ दर्शनश्रवणघ्राणरसनस्पर्शनानि च॥ ज्ञानेंद्रियाणांव्यापारानियतास्तेपिपूर्ववत्॥ १५८॥ प्राणस्यापिगतिश्चित्रानानाभेदायतोभवेत्॥ जीवनंतत्कृतंचेतिनासावन्यस्यकारणम्॥ १५९॥

नस्युरतआह यतःप्रत्येकंनियताःआधिकारिकेषुराज्ञैवमयासर्वाधिपतिनाव्यवस्थापिताःससेतुर्विधरणइत्यादिश्रुतिभ्यः तथाचतेषांव्यापारनियमएवमांसर्वात्मानंशेषिणंबोधयतीतिभावः एवमग्रेपि ॥ १५७ ॥ दर्शनेति ज्ञानेंद्रियाणांचक्षुःश्रोत्रघ्राणरसनत्वगाख्यानां शेषं स्पष्टम् ॥ १५८ ॥ प्राणस्यासाधारणंकार्यमाह प्राणस्येति पूर्ववदित्यनुषज्यते प्राणस्यापिपूर्ववद्व्यापारोनियतः कथं यतःप्राणनापाननादिभेदेननानाविधाश्चित्राअन्नपानयोःसूक्ष्मनाडीच्छिद्रेषुव्यवस्थापकतयाऽद्भुतागतिःक्रियाएकंकार्यंभवेत् तस्यसचिवस्थानीयतांसूचयितुंद्वितीयंकार्यमपिदर्शयति जीवनमिति चकारोभिन्नक्रमः जीवनंचतत्कृतमित्यन्वयः जीवनंप्राणधारणंतच्चप्राणोत्क्रमणेस्थातुमशक्तानांप्राणशरणीकरणेनलब्धप्राणसंज्ञानांवागादीनांस्थितिहेतुत्वमितिप्राणेंद्रियसंवादब्राह्मणेस्पष्टम् इतिव्यापारद्वयंविहायान्यस्यव्यापारस्यासौप्राणःकारणंनभवतीत्यर्थः ॥ १५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संकल्पेति संकल्पःइंद्रियविषयस्यप्रकारान्वेषणं ज्ञानंनिश्चयः अहंकारोऽभिमानः चेतनमनुसंधानं एतानिमनोबुत्ध्यहंकारचित्तानांनि
यताव्यापाराइत्यर्थः ॥ १६० ॥ एवंकरणव्यापारमभिधायप्रसंगेनभूतानांविषयाणांचव्यापारान्दर्शयति धारणमितिद्वाभ्यां धारणंपा
त्रवद्धृतादेःस्थितिहेतुत्वं पाकआमत्वनिवर्तनं व्यूहनंसंकोचविकासादिभेदेनविविधंऊहनंक्रिया अवकाशतास्थितौप्रसरणेचानुकूलत्वं
यतएवोक्तंवाचस्पतिमिश्रैर्यद्याकाशंनाभविष्यत्तदान्योन्यसंपीडितानिभूतानिनसूचीभिरप्यभेत्स्यंतेति एतेपृथिव्यप्तेजोवाय्वाकाशानां
नियतव्यापाराः नन्वन्येपिमोक्षधर्मादौपृथिव्यादिव्यापाराउक्ताअतआह नचेतरदिति तेचैतेषामेवावांतरविशेषाइतिभावः ॥ १६१ ॥
शब्दस्पर्शेति शब्दादिविषयाणामियमेवव्यापृतिर्व्यापारः यत्श्रोत्रादींद्रियाणामात्मनःस्वभावस्यदर्शनंस्फुटीकरणमित्यर्थः आत्मायत्नो
धृतिर्बुद्धिःस्वभावोब्रह्मवर्ष्मचेतिकोशउक्तः इंद्रियाणांहिस्वभावोबंधकत्वरूपंग्रहत्वंतच्चविषयसंबंधमंतरानस्फुटीभवति अतएवविषया
णामतिग्रहत्वमुक्तमार्तभागब्राह्मणेइतिभावः ॥ १६२ ॥ ननुअन्यस्यस्वातंत्र्यासंभवेपिविज्ञानशक्तितयासर्वज्ञोपाधेर्बुद्धेरात्मत्वमुक्तलक्ष

संकल्पज्ञानाहंकारचेतनान्येवसर्वतः॥ अंतःकरणरूपाद्धिमनआदेश्चतुष्टयात्॥ १६० ॥ धारणंक्लेदनंपाको
व्यूहनंचावकाशता ॥ पृथिव्यादिमहाभूतकार्यमेतन्नचेतरत् ॥ १६१ ॥ शब्दस्पर्शरूपरसगंधानांव्यापृति
स्त्वियम्॥ श्रोत्रत्वङ्नेत्ररसनघ्राणानामात्मदर्शनम्॥ १६२ ॥ बुद्धेर्यद्यपिसार्वज्ञ्यमन्याधीनंतथापिहि॥ अ
ज्ञतापिचतस्यायतद्दृष्टास्माभिर्हिसर्वदा ॥ १६३ ॥

णमस्त्वित्याशंक्याह बुद्धेरिति सार्वज्ञ्यंसर्वज्ञस्यभावंसर्वज्ञोपाधित्वमितियावत् तद्यद्यपिबुद्धेःप्रसिद्धंतथापिसात्मत्वंनार्हतियतः तत्सर्ववि
षयकत्वरूपंसार्वज्ञ्यमन्याधीनमित्यर्थः अयंभावः एकश्चिद्धातुर्विश्वप्रकाशकोज्ञानपदस्यमुख्योर्थः बुद्धिस्तुस्वलेपेनघटकुड्यादीन्ज
लंयथाप्रतिबिंबयोग्यान्करोतिएवंपदार्थान्स्वसंबंधेनचित्प्रतिबिंबग्रहणयोग्यान्कुर्वतीआवरणंचाऽभिभवंतीस्वयंचतत्प्रतिबिंबंगृह्णंतीज्ञा
नपदस्यगौणोर्थः तथाचसूर्यादिप्रतिबिंबविशिष्टतयाकुड्यादिभासकस्यापिदर्पणस्ययथानप्रकाशरूपत्वंतथाबुद्धेरपीति अन्यथातस्या
जडायाःप्रकाशरूपत्वेपिशिलांतरगतदीपसहस्रवत्साक्षिणंविनासिद्धेर्दुर्लभत्वादिति एवंचबुद्धेर्मत्संनिधौसर्वशक्तत्वेपिश्रीकृष्णवियुक्तार्जु
नवन्मांविनाऽशक्तत्वान्नात्मत्वमितिभावः एतदेवदर्शयति अज्ञतापीति अज्ञतापिजडतापितस्याअस्माभिर्मयासर्वांतरेणविषयाकारेण
परिणतायाभासनाद्दृष्टानिर्णीतेत्यर्थः अस्माभिरितिअस्मदोर्द्वयोश्चेतिसूत्रेणबहुवचनंसर्वोत्कृष्टज्ञानशक्तिभासकतयात्मनोनिरतिशयो
त्कर्षंव्यंजयति ॥ १६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंज्ञानशक्तेरनात्मत्वंदर्शयित्वाक्रियाशक्तेःप्राणस्यतत्पूर्वंसाधितमपितत्रश्रुतिंदर्शयितुमनुवदति जीवनस्येति यद्यपिअसुःप्राणःस्वयं जीवनस्यहेतुः तथाआत्मापिइंद्रियापेक्षयान्तरोपितथापिमद्बलान्मत्कर्त्तृकात्तस्यसंवरणात्सन्निधिमात्रेणाङ्गीकारादेवतस्यजीवनहेतुत्व मात्मत्वंचातोनासावपिमुख्यमात्मत्वमर्हतीतिभावः बलशब्दोबलसंवरणेइतिधातोर्निवृत्तप्रेषणात्ण्यंतादेरचिसाधुः यद्वामद्बलान्मत्साम र्थ्यादित्यर्थः हियतः अत्रार्थेतैत्तिरीयश्रुतिरितिशेषः॥ १६४ ॥ तांश्रुतिंपठति नप्राणेनेति प्राणापानौनजीवनप्रयोजकौकिंतुसन्निधिमा त्रेणतयोःप्रवर्तकोनियामकश्चयआत्मासएवेतिश्रुत्यर्थः॥ १६५ ॥ फलितमाह ततएकैकशइति तेषांपूर्वोक्तानांवागादीनांप्रत्येकमात्म त्वासंभवेउषस्तब्राह्मणोक्तलक्षणासंभवमपिहेतुतयाह आत्मेति सर्वेषामर्थानांप्राणादीनांहेतुःप्रयोजकःयएतान्सन्निधिमात्रेणप्रवर्तयति यदर्थमेतेप्रवर्ततेचसआत्मास्यात् यःप्राणेनप्राणितीत्यादिलक्षणसंभवात् अन्यत्रतुतदसंभवमाह नैतेइति॥१६६॥अथवागादयःपरार्थाः

जीवनस्यचहेतुःस्यादात्मायद्यप्यसुःस्वयम् ॥ तथापिमद्बलादेवजीवनेहेतुरत्रहि ॥ १६४॥ नप्राणेननापा नेनमर्त्योजीवतिकश्चन॥ अपरेणतुजीवंतियस्मिन्नेतावुपाश्रितौ॥ १६५ ॥ ततएकैकशस्तेषांनात्मतास्या त्कथंचन॥ आत्मासर्वार्थहेतुःस्यान्नैतेसर्वार्थकारणम् ॥ १६६॥ पदार्थानांगृहादीनांसंहतत्वेनहेतुना ॥ अ नात्मतामयादृष्टाकथमेष्वात्मताभम॥ १६७॥ वागादयोनहिस्वार्थाःप्रत्येकंमिलिताअपि ॥ अतोनाहमिमे सर्वैकथमेकैकशोस्म्यमी॥ १६८॥

संहतत्वात्गृहादिवदित्यनुमानंशेषित्वेनात्मबोधकंइतरेषामनात्मत्वसूचकंचकेनश्रुत्यनुगृहीतमाह पदार्थानामिति संहतत्वेनसंहत्येतरै र्मिलित्वाकार्यकारित्वेनेत्यर्थः यद्वासंघातरूपत्वेनेत्यर्थः तत्राद्यार्थेवागादयःप्रत्येकंपक्षः गृहास्याऽऽद्यःकारणानितेषामित्यर्थेनस्तंभकु ड्यादीनांदृष्टांतत्वं द्वितीयार्थेवागादिसंघातस्यपक्षता संघातरूपगृहादीनांचदृष्टांततेतिविवेकः एषुपरार्थेषुममानन्यशेषस्यात्मतास्वरूप ताकथंनकथमप्येतेमत्स्वरूपीभवितुमर्हाइतिभावः ॥ १६७ ॥ एवंसंहतत्वस्यहेतोर्गृहादिसपक्षेसत्वंवागादिपक्षेसत्वमात्मनोविपक्षाद्व्या वृत्तिश्चदर्शिताअबाधितत्वमसत्प्रतिपक्षत्वंचदर्शयति वागादयइति वागादयःप्रत्येकंस्तंभकुड्यादिवत्स्वार्थानभवंतिमिलिताअपिगृहादिव न्नस्वार्थाअन्यथाकरणत्वलक्षणात्स्वरूपादेवतेच्यवेयुः हिशब्दःप्रसिद्धिद्योतकः अतोबाधंप्रत्यनुमानंवक्तुंनकोपिशक्तइतिभावः फलि तमाह अतोनाहमिमेइति यदासर्वेमिलिताअपिमत्स्वरूपतांनार्हंतितदाकिमुतप्रत्येकमित्यर्थः॥ १६८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंसतिएतेसर्वेंतवेश्वरस्यभृत्यत्वादेवशब्दोच्चारणादिकार्यमनियुक्ताअपिभवद्वयेनकरिष्यंत्येवाकिंतवप्रवेशेनेत्याशंक्य सत्यं अन्यका
र्यसंपादनेपियन्ममशेषित्वेनमहावाक्यप्रतिपाद्याखंडैकरसत्वेनचज्ञानंतदन्यैर्दुःसंपादत्वेनमयैवप्रविश्यविधेयमितियदिवाचेत्यादिभाग
तात्पर्यंदर्शयन्नाह एतेचेति एतेस्वकार्य्यारंभकाअपिमामांतरंत्वंपदार्थत्वेननविजानंतिसर्वस्यकारणंतत्पदार्थमपिमांनजानंतिकिमुतवा
क्यार्थत्वेन अतोहमेवप्रविश्यकोहमितिचिंतये प्रवेशस्यस्वरूपंस्पष्टयति एतैरभिन्नतामिति अहंवच्मिजिघ्रामीत्याद्यभिमानएवप्रवेशः
प्रतिबिंबावच्छेदपदव्यवहार्यइतिभावः ॥ १६९ ॥ ननुविचारितप्रायमात्मतत्त्वमधुनैवनिर्धार्यतांकिंविषमसंसारेप्रवेशेनअन्योपकाराय
प्रवेशस्तूपकार्याणांजडत्वाद्विफलइतिचेत्कार्याणिप्रतिबध्नंतीचिकीर्षान्यत्रजायतेइतिन्यायेनप्रवेशेच्छाकालेविचारांतरंविफलत्वेननवि

एतेचनविजानंतिमांसर्वस्यापिकारणम् ॥ एतैरभिन्नतांप्राप्यकोहमस्मीतिचिंतये ॥ १६९ ॥ अस्तुवायाद
शस्तादृक्किंकृत्वाचिंतयानया ॥ प्रविश्यैषांसुखंदत्वाप्रतिपत्स्येनिजंवपुः ॥ १७० ॥ इतिसंचिंत्यविश्वात्माप्र
वेशायकलेवरे ॥ आत्मचिंतांविहायैवद्वारमेवव्यलोकयत् ॥ १७१ ॥

धेयमित्याह अस्तुवेति यादृशोममात्मातादृशोस्तुअनयाएतत्कालिकयात्मचिंतयाकृत्वाचिंतयाविफलत्वेनकृत्वाचिन्तासमानयाकिंन
किमपिप्रयोजनमित्यर्थः कृत्वाचिंताभ्युपगम्यवादः यथायदिवेतरथाब्रह्मचर्यादेवप्रव्रजेदित्यादिजाबालश्रुतिःसंन्यासविधायिकानस्या
दित्यभ्युपगम्यपरामर्शंजैमिनिरित्याद्यधिकरणंप्रवर्तितं यथावेहैवषट्पंचाशदधिकशततमेश्लोकेचेतनमन्तराशक्तानांकरणानांस्वव्यापा
रेस्वातंत्र्यमभ्युपगम्यान्यव्यापाराक्षमत्वाभिधानंसाकृत्वाचिंताविफलत्वेनप्रसिद्धा आक्षेपेचापवादेचप्राप्त्यांलक्षणकर्मणि प्रयोजनंनव
क्तव्यंयच्चकृत्वाप्रवर्त्ततेइतिवचनात् तद्वदियमपीतिभावः अतःप्रवेशस्यप्रयोजनद्वयमेवालोचनीयमालोचितमित्याह प्रविश्येति प्रति
पत्स्येनिर्णेष्यामि शेषंस्पष्टम् ॥ १७० ॥ कतरेणप्रपद्येइत्यंशस्यकोहमित्यंतवाक्यादौनिर्देशेनद्वारचिंतायाःप्राधान्यंसूचितंस्पष्टयति
इतिसंचिंत्येति स्पष्टं ॥ १७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सएतमेवसीमानमित्यादिनांदनमित्यंतंवाक्यंव्याचष्टे सदेवइत्यादिसार्धपंचभिः ससर्वदेवानांजनकःपितादेवःपरमेश्वरोभृत्त्यप्रवेशमार्गं स्यानुचितमालोच्यतांमूर्धसीमानमात्मसन्निधिमात्रेणविदार्यात्रशरीरेसमाविशदित्यन्वयः सीम्नःप्रसित्ध्यर्थंविशेषणद्वयम् कपालत्रय मध्यगांकपालानांत्रयाणिनवेतियावत् तेषांमध्यगां नवकपालंवैशिरइतिमुखविशिष्टस्यशिरस्त्वप्रतिपादकश्रुतेः यद्वा कपालानांवामद क्षिणपुरतोभवानांमध्यंमूर्धकपालंतद्गतमित्यर्थः द्वौगंडौचकपालानिचत्वारिइतियाज्ञवल्क्यस्मृतेः वस्तुतस्तुएतमितिश्रुतिगतपदेलोकप्र सिद्धिरेवविवक्षिता तथाचकुशस्यमुंडितेशिरसिअनुभूयमानंयत्कपालत्रयंवामदक्षिणमध्यरूपंतस्यमध्येगच्छतितिष्ठतीतिसातथातामि त्यर्थः उपलक्षणांतरमाह सीमंतिनीनांनारीणांसीमंतेकेशविभागेनृणांविदितांपुरतस्त्यकेशविभागरेखायत्रसमाप्तेतियावत् ॥ १७२ ॥ त तइति ततःपरमात्मनोर्ध्वमार्गेणप्रविष्टत्वान्मनुष्यमात्रस्यसर्वमनुष्याणांपुरीशरीरंद्वारवतीप्रशस्तद्वारवत्त्वात्स्मृतामता प्रसिद्धद्वारवत्यासा धर्म्यमाह अस्यामिति यस्मादयंसाक्षादपरोक्षःकृष्णः कृषिर्भूवाचकःशब्दोनश्चनिर्वृतिवाचकः तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयतेइति

सदेवोदेवजनकःकपालत्रयमध्यगां॥ सीमंतिनीनांसीमंतेसीमांतांविदितांनृणां॥ आत्मसन्निधिमात्रेण विदार्यात्रसमाविशत्॥ १७२॥ ततोमनुष्यमात्रस्यपुरीद्वारवतीस्मृता॥ अस्यांयस्मादयंकृष्णःपुराणःपुरुषो विशत्॥ १७३॥ ऊर्ध्वभागेततोद्वारंविद्वद्भिःकीर्त्यतेबुधैः॥ विदार्यमस्तकंयस्मात्पुरीमेषसमाविशत्॥ १७४॥

लक्षितः सदानंदात्मापुराणःपुरुषोविशत् प्रसिद्धायांद्वारवत्यामपिप्रवर्षणाद्गिरेरुत्प्लुत्याऽऽकाशरूपोर्ध्वमार्गेणश्रीकृष्णःप्रथमंप्रविष्टइति सू चितंचैतद्भागवतेजरासंधात्पलायनप्रस्तावे मात्रंकार्त्स्न्येवधारणेइत्यमरः पुरंपुरेशरीरेचेतिविश्वः अत्रमनुष्यमात्रस्येतिपुरुषत्वेचाविस्त रामात्मेतिश्रुतिमनुसृत्योक्तमन्येषामुपलक्षणंवोध्यम् ॥ १७२ ॥ ननुनववैपुरुषेप्राणानाभिर्वैदशमीत्यादिश्रुतौनवद्वारेपुरइत्यादिस्मृतौचे दंद्वारंनप्रसिद्धंकथमनेनद्वारवतीत्युच्यतेअतआह ऊर्ध्वभागइति यतःपरमेश्वरेणमूर्धानंविदार्यनिष्पादितंततः शिरसऊर्ध्वभागेद्वारंविद्व द्भिरुपासकैर्विद्वतिसंज्ञकंकीर्त्यते तयोर्ध्वमायन्नमृतत्वमेतीतिश्रुतेः लोकेपिबुधैःकुशलैःकीर्त्यते शिरसिकटुतैलादिधारणेतदीयरसानुभवा त्अतोबुधैर्विद्वद्भिरितिनपौनरुक्त्यं मूढैस्तुश्रीकृष्णस्तद्द्वारंचदुर्ज्ञेयमितिभावः श्रुतौस्मृतौचभृत्यद्वारैःसहेश्वरप्रवेशद्वारमसमत्वान्नगणितमि तिबोध्यम् ॥ १७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वारेणेति योगिनोनेनद्वारेणनिर्गत्ययतोऽर्चिषमेवअर्चिराद्यभिमानिदेवतोपलक्षितंदेवयानमार्गमेवक्रममुक्तिदंसंभवंतिप्रामुवंतिभूप्रामावि
तिधातोर्णिच्सन्नियोगेनैवात्मनेपदित्वात्साधु तेनहेतुनेदंद्वारंनांदनंनंद्यतेआनंदोलभ्यतेऽनेनेतिनंदनंनंदनमेवनांदनं प्रज्ञादित्वादण्स्वार्थि
कः ध्रुवंनिश्चितं तयोर्ध्वमायन्नितिश्रुतेः इंद्रोपवनंतुदुःखमिश्रत्वात्संदिग्धनंदनत्वकमितिभावः॥ १७५॥ इंद्रोपवनेनसाम्यंस्पष्टयति यथैवे
ति यथास्वर्गिणांनंदनवनंसुखहेतुस्तथाइदंद्वारंमोक्षंगच्छतामिति हिप्रसिद्धंश्रुतौमूर्ध्न्याधायात्मनःप्राणानित्यादिगीतासुच॥ १७६॥एवंजी
वरूपेणपरमात्मनःशरीरेप्रवेशमभिधायतस्योपाध्यभिमानप्रयुक्तसंसारप्रदर्शकंतस्यत्रयइत्यादिस्वमाइत्यंतंवाक्यंव्याचष्टे पुरमित्यादिप
श्चात्रिंशद्भिः प्रसिद्धैर्नवभिर्नाभ्यामूर्धद्वारेणचएकादशद्वारंपुरंप्राप्यायमात्मेंद्रोयतोदेवराट्करणदेवप्रभुःआत्मवासार्थंत्रीन्प्रासादान्चकार
त्रीन्गणयति चक्षुष्येकमिति चक्षुरिंद्रियगोलकेप्रथमंद्वितीयंचित्तेचित्तस्थानेहृदयकमलदलेष्वितियावत् तृतीयंहृदयाब्जकेतदंतरित्य

द्वारेणानेननिर्गत्ययोगिनोर्चिषमेवहि ॥ संभवंतियतस्तेननांदनंस्यादिदंध्रुवम् ॥ १७५ ॥ यथैवस्वर्गिणांस्व
र्गेगच्छतांनंदनंवनम् ॥ सुखहेतुस्तथामुक्तौगच्छतामिदमेवहि ॥ १७६ ॥ पुरमेकादशद्वारंप्राप्येंद्रोदेवराडय
म् ॥ प्रासादानात्मवासार्थंतत्रत्रीन्सचकारह ॥ चक्षुष्येकंपरंचित्तेतृतीयंहृदयाब्जके ॥ १७७॥ त्रिष्वप्येतेषु
शयनंप्राप्येंद्रोजाययासह ॥ पश्यत्येषत्रिधास्वप्नानात्मज्ञानविवर्जितः ॥ १७८ ॥ यदाबाह्यार्थभोगार्थंकर्मा
दत्तेनिरंजनः ॥ अनादिमाययातस्मिन्कालेद्वेधाप्रजायते ॥ १७९ ॥

र्थः॥ १७७॥ त्रिष्वप्येतेष्विति एतेषुत्रिषुप्रासादेषुशयनमहंकारलक्षणांशय्यां शय्यामहंद्वादशमेकआहुरितिभागवतात् तांप्राप्येंद्रआत्मा
जाययास्वप्रतिबिंबरूपगर्भधारिण्याविज्ञानशक्तिरूपयाभोग्ययासहितोजाग्रत्स्वप्नसुषुप्तिभेदेनत्रिविधान्स्वप्नान्पश्यति ननुकथमेतेत्रयो
पिस्वप्नाअतआह आत्मज्ञानविवर्जितइति योहियथावत्पश्यतिसजाग्रदित्युच्यतेऽयंत्वात्मानमेवविस्मरन्कथंजाग्रदुच्येतअतोयदनेना
ज्ञाननिद्रागतेनदृश्यतेसस्वप्नएवेतिभावः ॥ १७८ ॥ तत्रजाग्रत्संज्ञंस्वप्नंप्रपंचयति यदेत्यादिना बाह्यार्थाःस्थूलभोग्यास्तेषांभोगार्थंभो
गनिमित्तभूतंकर्मधर्माधर्मरूपंवस्तुतोनिरंजनःशुद्धोपिअनादिमाययाऽज्ञानेनादत्तेऽध्यासादंगीकरोतितस्मिन्कालेजाग्रदवस्थासंज्ञेद्वेधाप्र
जायतेश्लोकोक्तप्रकारेण ॥ १७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीपुंसरूपइति भगवान्षड्गुणसंपन्नः ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः ज्ञानवैराग्ययोश्चैवषण्णांभगइतीगनाइत्युक्तगुणसंपन्नः समष्टिरुपेणवैश्वानरउपास्योवामदक्षिणनेत्रयोःस्त्रीपुंसरूपोभोक्तृभोग्याकारस्तत्रदक्षिणनेत्रस्थंरूपमधिकप्रकाशबलवत्वाद्भोक्तापुमानितिविवक्षितः वामनेत्रस्थंतुतद्विपरीतत्वाद्भोग्यास्त्रीतिउपास्याइतिकूर्चब्राह्मणेस्पष्टम् पुरुषस्यस्त्रीक्षात्प्रकाश्याबुद्धिरेवेतिसाजायापदार्थतयाव्याख्यातेतिबोध्यम् एतादृशोभगवान्व्यष्टिरूपेणपरिच्छिन्नमात्मानंमन्यमानइंद्रियगणमधिष्ठायएवंवक्ष्यमाणप्रकारेणभोगान्कर्मफलस्वीकारान्प्रपद्यते प्राप्नोतीत्यर्थः भोगःसुखेस्त्र्यादिभृताविस्यमरः भृतिःस्वीकारः ॥ १८० ॥ तत्रनानाविधंबाह्यभोगंतावदाह जातोहमितिषड्भिः अहंयतोजातोऽयंमेजनकःपिताइयंमेजननीइमेभ्रातरइतिइदंपदान्वयोविपरिणामेनसर्वत्रबोध्यः शेषंस्पष्टम् ॥ १८१ ॥

स्त्रीपुंसरूपोभगवान्वामदक्षिणनेत्रयोः॥ अधिष्ठायेंद्रियगणमेवंभोगान्प्रपद्यते॥ १८०॥ जातोहंजनकोयंमेजननीभ्रातरस्तथा॥भगिन्योबांधवाभृत्यादाराःपुत्राश्चपुत्रिकाः॥ १८१॥मित्राणिशत्रवस्तद्वदुदासीनानियामकाः॥ऋत्विजोगुरवस्तद्वत्स्त्रीपुंसौचनपुंसकं॥ १८२॥गृहाणिभूमयोधान्यंहिरण्यंपशवस्तथा॥ वस्त्राण्याभरणंतद्वत्शय्याद्येतत्सुशोभनम्॥ अशोभनंचबहुलमल्पमाराच्चदूरगम्॥ १८३॥ इमेशब्दाइमेस्पर्शाइमेगंधाइमेरसाः॥रूपाणिचतथेमानिवक्तव्यानितथैवहि॥आदेयानिचगम्यानित्वानंदाःसविसर्गकाः॥ १८४॥ सुखायैतेपरेचैवदुःखायेतिचमन्यते॥ सुखंदुःखंतथैवैतदासीदस्तिभविष्यति॥ १८५॥ पुमानहंतथास्त्रीवानपुंसकमथापिवा॥मनुष्योहंपशुर्वाहमहमस्मिजरायुजः॥स्वेदजोहंतथोद्भिज्जोत्वंडजोस्म्यथवापुनः॥ १८६॥

मित्राणीति मित्राणिउपकारिणः शत्रवोऽपकारिणः उभयविलक्षणाउदासीनाः नियामकामर्यादायांस्थापकाःपितृउपाध्यायराजादयः ऋत्विजोयागेवरणीयाः शेषंस्फुटम् ॥ १८२ ॥ एवंचेतनशरीरेषुभोगान्दर्शयित्वाजडेष्वाह गृहाणीति विशेषेणबंधहेतुंभोगमाह एतत्सुशोभनंरमणीयमेवमशोभनमिति अल्पंबहुलं आरात्समीपं शेषंस्पष्टम् ॥ १८३ ॥ ज्ञानकर्मेंद्रियविषयभोगमाह इमेशब्दाइति आदेयानिपाणिग्राह्याणि स्फुटम् ॥ १८४ ॥ यद्द्वाराविषयाबंधकास्तंभोगमाह सुखायैतेइति एतेसुखायसुखार्थाएवंदुःखायेति विषयफलभोगमाह सुखंदुःखमिति कालभोगमाह आसीदित्यादि ॥ १८५ ॥ एवंस्वामित्वाध्यासरूपंबाह्यंभोगंसफलमभिधायधर्माध्यासविशिष्टतादात्म्याध्यासरूपंशरीरभोगमाह पुमानहमिति स्फुटम् ॥ १८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्नजातानिति तद्वत्शरीरगानन्नजातांस्तत्तदाहारपरिणामभूतान्सर्वान्विशेषानात्मतयावेत्तिमन्यतेस्वयास्वाश्रितयामाययैवनवस्तुतःय तोऽनंतःत्रिविधपरिच्छेदशून्यः ॥१८७॥ शरीरधर्माध्यासंप्रपंचयति एवमित्यादिना बालोहंवृद्धोहमित्यहंशब्दस्यसर्वत्रसंबंधः बालत्ववृद्धत्वाभ्यांयुवत्वमपिउपलक्षितं पीडितोरुग्णः पुण्यात्माशास्त्रविहिताचरणवान् पापात्मानिषिद्धाचारः आचारःक्रियासाचशरीरधर्मः ॥ १८८ ॥ वर्णाश्रमाध्यासमाह एवंविप्रइति स्फुटम् ॥ १८९ ॥ अत्रापीति अत्रवर्णाश्रमाध्यासेसतितत्प्रयुक्तानवांतरजातितद्धर्मतत्तद्देशाचारान्बहुधादेहधर्मानात्मनिमन्यते इंद्रियधर्माध्यासंधर्म्यध्यासव्याप्यंदर्शयति एवमिति अहंसम्यग्दर्शीअहंमंददर्शीत्याद्याकारेण परकीयचित्तवर्त्तींद्रियाध्यासेहेतुंस्फुटयति काणोस्मीति यन्मनसाध्यायतितद्वाचावदतीतिश्रुतेर्वचनादध्यासोनुमेयइतिभावः ॥१९०॥

अन्नजातानन्नंतोऽन्यान्भेदांस्तद्वत्शरीरगान्॥ सर्वानात्मतयावेत्तिशयानोमाययास्वया ॥ १८७॥ एवंबालस्तथावृद्धःपीडितोनीरुजोपिवा ॥ रूपीकुरूपीपुण्यात्मापापइत्यादिमन्यते॥ १८८॥ एवंविप्रस्तथाराजा वैश्यःशूद्रोथवापिहि ॥एवंबटुर्गृहीतद्वद्वनीभिक्षुरथापिवा॥ १८९ ॥ अत्रापिबहुधादेहधर्मानात्मनिमन्यते॥ एवमिंद्रियसाकल्यंवैकल्यंचापिमन्यते॥ काणोस्मीत्यादिवचनैःप्रकटीकुरुतेभृशम्॥ १९० ॥ एकंदेहंसमाश्रित्यतत्परंनाभिमन्यते॥ अहमेतादृशोनान्योनान्येंप्येतादृशाअहं ॥ १९१ ॥

नम्रमदेहेंद्रियादितादात्म्याभिमानइतियदिकश्चिद्वदेत्तंप्रतिअपरिच्छिन्नमात्मानंपरिच्छिन्नतयामन्वानःकथमेवंब्रवीषीत्युत्तरंसूचयन्नाह एकमिति एकंकंचिद्देहंसमाश्रित्याभिमन्यतत्परंतस्माद्देहाद्भिन्नंनाभिमन्यतेऽभिमानविषयंनकरोति अनेनहिसर्वात्मास्मीतिसर्वत्राभिमानोविधेयः तदात्मानमेवावेत् अहंब्रह्मास्मीत्यादिश्रुतेः तन्नकरोतिकिन्तुभेददृष्टिमेवकरोतीतिभावः भेददृष्टेराकारमभिनयति अहमेतादृश इति एतादृशईदृग्जात्यादिविशिष्टोहंनान्यएतद्भिन्नजात्यादिविशिष्टोनभवामिकिंतुतद्भिन्नएवेत्यर्थः एतादृशास्तत्तज्जात्यादिविशिष्टायेन्येतेऽहंनकिंतुतेमद्भिन्नाएवेतियावत् ॥ १९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुद्धात्मप्रतिपादकाहंशब्दएवदेहादौप्रयुज्यमानोऽहंगौरइत्यादिज्ञानानांभ्रमत्वमावेदयति परत्रपरशब्दप्रयोगस्यारोपव्याप्यत्वादित्याह अन्यइति तत्त्वतोवस्तुतः एकार्थाभ्यां एकःकेवलःसर्वांतरात्माअर्थोऽभिधेयःफलरूपंप्रयोजनंचययोरहंशब्दबोधयोस्तावेकार्थौताभ्यां अहमितिशब्दस्यशुद्धात्मैवाभिधेयःअहमित्याकारकबोधस्यचवृत्तिरूपस्यसएवफलमिवफलमितिएतादृशाभ्यामहंशब्दबोधाभ्यामयमात्मार्थत्वेनअन्यः ईदृशोपिअहंशब्दबोधयोर्भिन्नार्थंनानाविधंदेहादिरूपमर्थंमन्यतेतत्राहंशब्दंप्रयुंक्तेअहमितिअभिमन्यतेच यत आत्मबोधेनरहितः तथाचस्फुटमस्यभ्रांतत्वमितिभावः ॥ १९२॥ एवमात्मन्युपाधितादात्म्याध्यासप्रयुक्तंभेददर्शनमभिधायतत्प्रयुक्तंबाह्यगोचरंभेददर्शनमाह पित्रादिकमिति इदंदेवदत्तमित्रादिसंज्ञंमेपितृमात्रादिकंनचेतरत्तद्भिन्नंतुमेपित्रादिकंनभवतीत्यर्थः तथेदंगृहादिकंमेमदीयंइतरत्तुन इदंदेवालयनदीतीरादिसर्वलोकस्यसाधारणमित्यादिभेदान्अज्ञाननिद्रासुप्तःस्वप्नवत्पश्यतीत्यर्थः ॥ १९३ ॥ अकारण

अन्योहंशब्दबोधाभ्यामेकार्थाभ्यांचतत्त्वतः ॥ भिन्नार्थमात्मबोधेनरहितःप्रतिपद्यते ॥ १९२॥ पित्रादिकमिदंमेस्यादिदंमेपिनचेतरत्॥ इदंसर्वस्यलोकस्यशयानइतिपश्यति ॥ १९३॥ अकारणंक्वचिच्छोकंहर्षंवा प्रतिपद्यते॥क्षुत्पिपासेप्राणधर्मावात्मन्येवाभिमन्यते ॥ १९४॥ कामादिकान्मनोधर्मान्मत्वात्मन्येषतप्यते॥ असंगोनिर्गुणोऽनंतआनंदात्माचिदात्मकः ॥ १९५ ॥ भूतभौतिकजातंयत्तत्रनानाविधांधियम्॥ कुर्वाणोविविधंदुःखंसुखंवाप्रतिपद्यते॥ १९६॥

मिति अप्रशस्तमनिर्वचनीयंकारणंयस्यतत्तथा तदुक्तंमहाभारते हर्षस्थानसहस्राणिशोकस्थानशतानिच दिवसेदिवसेमूढमाविशंतिन पंडितमिति प्राणतादात्म्याध्याससूचकंतद्धर्माध्यासमाह क्षुत्पिपासेइति ॥ १९४ ॥ मनसोपितमाह कामादिकानिति कामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेतिश्रुत्युक्तान्धर्मान्आत्मनिमत्त्वातप्यते वस्तुतएषएतादृशइत्याह असंगइत्यादि ॥ १९५ ॥ भूतभौतिकजातमिति भूतानिआकाशादीनिभौतिकानिस्थावरादीनितेषांजातंसमूहस्तत्रनानाविधांइदंसमीचीनमिदमसमीचीनमित्याद्याकारांधियंकुर्वाणोविविधंसुखंदुःखंवाप्रतिआभिमुख्येनइहैवपद्यतेप्राप्नोति भेददर्शनमुख्यफलंतुजन्ममृतिप्रवाहः मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतीतिश्रुतेरितिभावः ॥ १९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यापारानिति द्वयात्मनांज्ञानकर्मसाधनत्वेनद्विविधानां शेषंस्पष्टम् ॥ १९७ ॥ एवंजाग्रद्ज्ञानानामध्यासत्वेव्याख्येयश्रुतौतत्रस्वप्नपद प्रयोगउपपन्नइत्याह ततइत्यादित्रिभिः ततोजाग्रद्ज्ञानानामध्यासव्याप्तत्वात् नित्यंसदासच्चिदानंदरूपिणोनंतस्यचात्मनोयदिदंजागरणंतत्स्वप्नएव कुतः स्वप्नलक्षणयोगतः प्रबोधाभावेसतिमिथ्यावस्तुदर्शनंहिस्वप्नलक्षणंतदत्रापिवर्त्ततेआत्मबोधाभावाद्दृश्यमानस्यमिथ्यात्वाच्चेत्यर्थः ॥१९८॥ एतदेवस्फुटयति योयथेति यःकश्चित्यथावर्ततेसकलेंद्रियादिसामग्रीसंपन्नोपिवर्त्तमानश्चेत्यदिसएवतत्त्वंवस्तुयाथात्म्यंनपश्यतिकिंतुविपरीतधियाऽऽविष्टोभवतितदाशयानइत्येवव्यवह्रियतेलोकेतदज्ञानंचस्वप्नइति तथाचविपरीतदर्शनंस्वप्नलक्षणंलब्धंतच्चप्रकृतेपीतिभावः ॥१९९॥ तदेवाह आनंदात्मापीति तादृक्त्वात्विपरीतधियाविष्टत्वात् अतोजागरणंयत्स्वप्नइत्युच्यतेतादिंद्रिया

व्यापारान्विविधांस्तेषामिंद्रियाणांद्वयात्मनाम्॥ भूतानांभौतिकानांचस्वात्मन्येवाभिमन्यते ॥ १९७॥ ततोजागरणंस्वप्नःसच्चिदानंदरूपिणः ॥ अनंतस्यात्मनोनित्यंस्वप्नलक्षणयोगतः ॥ १९८ ॥ योयथावर्ततेलोकेसचेत्तत्त्वंनपश्यति॥ विपरीतधियाविष्टःसशयानइतीरितः ॥ १९९ ॥ आनंदात्मापितादृक्त्वाच्छयानइति कथ्यते॥ करणानांनोपरमात्स्वप्नोजागरणंभवेत्॥ २०० ॥ एवंजागरणेस्वप्नान्दृष्ट्वाबहुविधान्विभुः ॥ इंद्राणीसहितःश्रीमान्मनःप्रासादमाविशत् ॥ २०१ ॥ अनंतभवसंभूतवासनावासितंमनः ॥ तत्तत्कर्मानुसारेणस्वात्मानंदर्शयत्सदा ॥ २०२ ॥

णामुपरमात्इंद्रियोपरमसाधर्म्येणनकिंतुविपरीतदर्शनलक्षणंसाधर्म्यमादायैवेतिभावः ॥ २०० ॥ एवंजाग्रदवस्थांमिथ्यारूपांप्रपंच्यस्वप्नावस्थांप्रपंचयति एवंजागरणइत्यादिनवभिः मनःप्रासादमुक्तलक्षणंद्वितीयं व्याख्यातमन्यत् ॥२०१ ॥ तत्रोक्तलक्षणेंद्रेंद्राण्योःपुरतोमनोनटवन्नानारूपाणिदर्शयतीत्याह अनंतेति मनःस्वात्मानंस्वकीयंनानाविधंरूपंतत्तत्कर्मानुसारेणदर्शयद्वर्ततेइतिशेषः ज्ञानाकारेणविषयाकारेणचपरिणमतइतियावत् तस्यएतादृशनिर्माणसामर्थ्यसूचकंविशेषणमनंतेति अनंतभवेषुजन्मसुसंभूताज्ञानकर्मवासनास्ताभिर्वासितंसंस्कृतं नकेवलंस्वप्नावस्थायामेवमनःस्वात्मदर्शकंकिंतुजाग्रत्यपीत्याह सदेतिउक्तमेतत् यदात्मनःसाक्षाद्भोग्यंमनएवान्यत्तुतद्द्वारेति ॥ २०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसिद्धजाग्रतःस्वप्नावस्थायाविशेषमाह ज्ञानेति ज्ञानेंद्रियकर्मेंद्रियरहितः सवासनःजाग्रद्वासनाविशिष्टः मानसंमनःप्रयुक्तंवासनाचित्रंवासनाकार्यंचित्रमद्भुतंकूर्चब्राह्मणेत्रविविक्ततरपदेनोक्तंनाट्यंपश्यतिकर्मगःस्वप्नभोगप्रदकर्मविशिष्टइत्यर्थः अत्रमतद्वयंबोध्यं मनएव स्वप्नेविषयतज्ज्ञानाकारेणपरिणमतइत्येकं द्वितीयंत्वज्ञानंतत्तदाकारेणपरिणमतेमनोनिष्ठवासनाअनुसृत्यइत्येतावान्मनसउपयोगः आत्मातुभासकएवेति किंचकर्तृत्वभोक्तृत्वोपाधिर्बुद्धिरिंद्राणीत्वेनकरणंमनस्तुनटत्वेनेहविवक्ष्यतेइत्यपिध्येयम् देवपदेनचसएवसमष्टिरूपेणहिरण्यगर्भोव्यष्टिरूपेणतुतैजसइतिसूचितम् ॥ २०३ ॥ उपरतेंद्रियत्वंजाग्रतोविशेषमभिधायविशेषांतरमपिदर्शयति तत्रात्मनीति तत्रस्वप्नावस्थायांनियतंघटोघटएवनपटइत्येवंस्वरूपनियमःसिंहोवनएवेत्यादिदेशनियमःसूर्यदर्शनंदिनएवेत्यादिःकालनियमोमृदएवघटइत्यादिनिमित्तनियमएतादृशनियमविशिष्टंयथाभवतितथास्वात्मनिदृश्येपुरोवर्तिनिचभावान्नपश्यतिकिंत्वनियतमेवेत्यर्थः तत्र

ज्ञानकर्मेंद्रियैःशून्यस्तत्रदेवःसवासनः॥ मानसंवासनाचित्रंविलोकयतिकर्मगः॥ २०३॥ तत्रात्मनितथा दृश्येनियतंनैवपश्यति॥ तत्रदृश्योगजःक्वापितरुर्भवतितत्क्षणात्॥ २०४॥ तरुश्चपर्वतःक्वापिपर्वतश्चक्वचित्तृणम्॥ एवंद्रष्टाक्वचिद्विप्रःशूद्रोभवतितत्क्षणात्॥ २०५॥ क्वचित्पशुःक्वचिद्देवोमहाराजःक्वचित्क्षणात्॥ देशकालादिनियमोनात्रकश्चिद्विद्यते॥ २०६॥ नाडीनांविवरेस्वल्पेपश्यत्येषमहोदधिं॥ मेरुंचाप्यथवासप्तद्वीपामेतांवसुंधरां॥ २०७॥ रात्रौचशयनेपश्येद्वासरंसदिवाकरम्॥ क्वचिच्चभारतेवर्षेचंद्रार्कौनापिभक्षयेत्॥ अनेनैवशरीरेणसंकल्पात्कुरुतेरथं॥ २०८॥

तावद्दृश्येनियमाभावंप्रपंचयति तत्रदृश्यइति स्फुटम् ॥ २०४ ॥ तरुरिति आत्मस्वरूपेनियमाभावंदर्शयति एवमिति ॥ २०५ ॥ क्वचित्पशुरिति नियमांतराभावंदर्शयितुंप्रतिजानीते देशेति ॥ २०६ ॥ देशनियमाभावंस्फुटयति नाडीनामिति स्वप्नवहानांनाडीनांसूक्ष्माणामंतस्तिष्ठंस्तत्रैवमहोदध्यादींस्त्रीन्विकल्पेनपश्यति तथाचक्कदेशनियमइति ॥ २०७ ॥ कालनियमाभावंदर्शयति रात्रौचेति शयनेशय्यायांस्थितइतिशेषः निमित्तनियमाभावमाह क्वचिच्चेति भारतेवर्षेखंडेस्थितःसन्ननेनैवशरीरेणचंद्रार्कौनापिपुरुषोपिभक्षयेत् भक्षणनिमित्तंहिभक्ष्यस्यसंनिहितत्वंमुखापेक्षयास्वल्पत्वंचभोक्तुःसामर्थ्यंचतत्सर्वमत्रनास्तीतिस्फुटम् अन्यदुदाहरणमाह संकल्पादिति रथस्यसाधनंतक्षकाष्ठवास्यादितदनपेक्ष्यसंकल्पमात्राद्रथंकुरुते अथरथानित्यादिश्रुतेः तथाचक्कनियमइतिभावः ॥ २०८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अस्यश्रुतिगतस्वप्नपदविवक्षितंमिथ्यात्वंदर्शयति अतोनास्यति वेदवादिभिःस्वप्नावस्थाप्रतिपादकश्रुतितात्पर्यविद्भिःसूत्रकारादिभिः त
थाचसूत्रं मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति मायामात्रंनत्वत्रपरमार्थगंधोपि देशकालादिनियमःकार्त्स्न्यंतेनकार्त्स्न्येनेति
भाष्योक्तसूत्रपदार्थः॥२०९॥अथतृतीयंस्वप्नंसुषुप्त्यवस्थारूपमाहत्रिभिः इंद्रइति एनंस्वप्नं अविलोक्यवेति जाग्रदनंतरंस्वप्नंविलोक्यैवसु
षुप्तिरितिनियमादर्शनादितिभावः हार्दंहृदवच्छिन्नाकाशरूपंतृतीयंप्रासादमिति ॥ २१० ॥ तत्रेति तत्रहृदयाकाशेएनामिद्राणींभोग्य
रूपांसंपरिष्वज्यानयासहगताभेदःप्राप्ताभेदोभवतीतिशेषः तत्रभोक्तृभोग्यभावोनभासतेइतिभावः नन्वज्ञानरूपंभोग्यंतत्रास्त्येवेत्यतआ
ह मायेति जवनिकावत्स्वकार्यवर्गाच्छादिकांमायांसमष्टिव्यष्टिरूपांपश्यन्नपिसाक्षिणमंतराज्ञानसिद्ध्यनुपपत्तेर्नकिंचिदवेदिषमितिप

अतोनास्यविनामायांकारणंलभ्यतेक्वचित्॥ स्वप्नोमायामयस्तेनकथ्यतेवेदवादिभिः॥ २०९ ॥ इंद्रएनंवि
लोक्यैवक्वचित्तमविलोक्यवा ॥ इंद्राण्यासहितःशीघ्रंहार्दंप्रासादमाव्रजत् ॥ २१० ॥ तत्रैनांसंपरिष्वज्यग
ताभेदोऽनयासह ॥ मायाजवनिकांपश्यंस्तामप्येषनपश्यति ॥ नैवात्मानंचिदानंदंविशेषज्ञानशून्यतः ॥
॥ २११ ॥ आत्मनोनवलोकेनस्वरूपाज्ञानसत्वतः॥ अविद्यायाश्चसत्त्वेनस्वप्नएषोपिकीर्तितः ॥ २१२ ॥

रामर्शानुपपत्तेश्चसंभाव्यदर्शनोपिस्फुटंनपश्यति अतोभोक्तृभोग्ययोरेकीभावस्तत्रोक्तइतिभावः समष्टिरूपेणेश्वरोव्यष्टिरूपेणप्राज्ञइत्य
पिबोध्यम् ननुमायाजवनिकायाःस्फुटत्वाभावेप्रतिबंधकाभावात्स्वरूपंजानीयात्तथाचसुषुप्तिमात्रेणमोक्षापत्तिरतआह नैवात्मानमि
ति तत्रहेतुः विशेषेति तथाचप्रतिबंधकाभावेपिशास्त्राचार्यादिसामग्र्यभावान्नस्वरूपप्रमेतिभावः ॥ २११ ॥ श्रुत्युक्तस्वप्नपदमत्रापिसंग
मयति आत्मनइति स्वरूपाज्ञानसत्वहेतोःआत्मनोनवलोकेनाप्रबोधेनास्फुटायाअविद्यायाश्चमिथ्याभूतायाःसाक्षिभास्यायाःसत्त्वेनए
षोपिस्वप्नःसुषुप्तिरपिस्वप्नःश्रुतौकीर्तितः प्रबोधाभावेसतिमिथ्यावस्तुदर्शनंस्वप्नइतिलक्षणयोगादितिभावः ॥ २१२ ॥ ॥२४॥

CC-0. In Public Domain. Digitization by eGangotri

एवमध्यारोपपरंश्रुतिग्रंथंव्याख्यायापवादपरंसजातइत्यादिवावदिषदित्यंतंव्याचष्टे त्रिस्वप्नइत्यादिसप्तभिश्लोकैः तत्रतावत्श्रुतिगतसइ तिपदार्थभूतंपूर्वोक्तमनूद्यविचारमवतारयति त्रयोजाग्रत्स्वप्नसुषुप्तिरूपाउक्तलक्षणाःस्वप्नाःयस्यसतथात्रयोगृहाश्चक्षुर्हृदयकमलतदंत राकाशरूपावक्ष्यमाणाःपितृशरीरंमातृशरीरंपुनःपितृशरीरमित्याकारावायस्यसतथा एवमहंममाभिमानप्रयुक्तनानादुःखप्रहारैरपिप्रबो धमलभमानः देवोद्योतनात्मकः जातपदार्थमाह जनिगतइति ननुकूटस्थनित्यस्यकीदृशंजन्मेत्यतआह अहंममाभिमानीति निर्विशेष प्रकाशरूपस्याहमित्याद्यभिमानएवोत्पत्तिरितिभावः तथाचमैत्रेयीब्राह्मणेप्युक्तंसएषभूतेभ्यःसमुत्थायेति ननुदेवस्यकथमभिमानल क्षणाप्युत्पत्तिरतउक्तंद्वारेत्यादि तथाचययामाययाव्यापकस्यप्रवेशःप्रयुक्तस्तयैवाभिमानोपीतिकिमनुपपन्नमितिभावः सएवंचिरंप्र सुप्तःकृपावशेनगुरुणाकर्णेवेदांतमहाभेर्यांप्रबोधायताड्यमानायांप्रबुध्यमानःसन्इदंवक्ष्यमाणंऐक्षतआलोचनंकृतवानित्यर्थः॥२१३॥ आलोचनस्वरूपमाह अहंजातइत्यादिना येभ्यस्तानीतिचअध्याहार्यं तथाचयेभ्योहंजातोविशेषरूपेणप्रादुर्भूतस्तानीमानिभूतानि

त्रिस्वप्नस्त्रिगृहोदेवएवंद्वारवतीस्थितः॥ अहंममाभिमानीसऐक्षतेदंजनिंगतः॥ २१३॥ अहंजातइमानीह भूतानिविविधानिच॥ जडान्यजडरूपाणिभोक्तृभोग्यस्वरूपतः॥२१४॥ आकाशादीनिभोग्यानिस्थावरैर्जं गमैरपि॥ स्थावराणांजंगमानांभोक्तृतानियतानहि॥ २१५॥ जलदानादिभिर्भोग्याःस्थावरैर्जंगमायतः॥ स्थावराणांहिभोग्यत्वंप्रसिद्धंजंगमैर्नृणां॥ २१६॥

पंचाकाशादीनिममषष्ठस्योपाधिभूतानिचजातानिसंति कीदृशानि विविधानिशरीराद्यवांतरभेदेनविविधानि संक्षेपतस्तुद्विविधानिइत्य तआह जडानीति भोक्तृभोग्यस्वरूपतः तृतीयार्थेतसिः भोग्येनरूपेणजडानिभोक्तृरूपेणचाजडानीत्यर्थः आत्मनिवस्तुतोभोक्तृत्वस्या संभवात्तदुपाधौप्रक्षिप्यैवमुक्तं तच्चभोक्तृत्वंभूतेभ्योजीर्णन्यासवत्तेषांसत्तयासहोपादीयमानमात्मनोद्वितीयत्वंसाधयिष्यतीत्याशयः ॥ २१४ ॥ भूतानांभोग्यभोक्तृरूपतांस्फुटयतिद्वाभ्यां आकाशादीनीति तत्राकाशादीनिबाह्यरूपाणिस्थावरजंगमकर्तृकभोगकर्मतयैव प्रसिद्धानि स्थावरजंगमानांपरस्परंयोभोक्तृभोग्यभावःसनियतोनकिंतुकदाचित्स्थावराभोक्तारःजंगमाभोग्याःकदाचित्जंगमाभोक्ता रःस्थावराभोग्याइत्यर्थः उपकार्यत्वंभोक्तृत्वमुपकारकत्वंचभोग्यत्वमिहविवक्षितम्॥ २१५॥ एतदेवाह जलदानादिरिभिति जलदाना दिभिर्जलप्रसेकरक्षणादिभिरुपकुर्वंतोजंगमाःस्थावरैर्वृक्षादिभिर्भोग्याःछायाकाष्ठादिभिरुपकुर्वंतःस्थावराश्चजंगमैर्मनुष्यादिभिरितिप्र सिद्धमित्यर्थः ॥ २१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभोक्तृतयाभोग्यतयाचप्रपंचस्यवर्गद्वैविध्यमुपपाद्यतच्चरूपद्वयमपिविचार्यमाणंमत्स्वरूपेपर्यवस्यत्पृथक्सत्तालक्षणं प्रपंचस्यस्वातं
त्र्यमादायममाद्वितीयत्वंबोधयतीत्याह भोक्तृतेत्यादित्रिभिः भोक्तृताहिभुजिधात्वर्थभोगाश्रयताभोगश्चोपकारसाधनत्वेनज्ञानं यथारा
जोपकरणानिभुंक्ते तान्युपकारसाधनत्वेनसाक्षात्कुरुतेइत्यर्थः बुद्धिवृत्तिपर्यंतंसर्वंचेतनस्योपकरणमेवाभिव्यक्तिलक्षणोपकारसाधन
त्वात् अभिव्यक्तचेतनस्वरूपंतुभोक्तृभोग्यभावाभ्यांवर्जितमेव सुखदुःखसाक्षात्कारोभोगइतिलौकिकवाक्यस्याप्यत्रैवार्थेपर्यवसानं सु
खदुःखतक्रियायामितिधातोरच्प्रत्ययेनसुखादिसाधानत्वेनसाक्षात्कारइत्यर्थलाभात् भोग्यतातुतादृशज्ञानविषयत्वं विषयताचचित्ता
दात्म्यरूपा यथाघटोज्ञातइत्यस्यघटाकारवृत्त्यभिव्यक्तचैतन्याभिन्नसत्ताकइत्यर्थः एवंचविषयतापिकल्पितत्वमंतरानोपपद्यतेइत्याश
येनाययंथः पदार्थस्तुभोक्तृताउक्तलक्षणाजडस्यावरणरूपस्यविरोधान्नोपपद्यते भुजेर्भुजिधात्वर्थरूपायाःक्रियायाःकर्तृत्वंस्वातंत्र्यल
क्षणंयतोनोपपद्यतेनसंभवतीति ॥२१७॥ उक्तमिति अचेतनानांव्यापारेस्वातंत्र्यंनास्तिकुत्रचिदित्यादिग्रंथेनेतिशेषः तर्हिभोग्यत्वमेवा

भोक्तृताजडरूपस्यसर्वथानोपपद्यते ॥ भुजेःक्रियायाःकर्तृत्वंनजडस्योपपद्यते ॥ २१७॥ उक्तमेतन्मयैवादौ
कुतस्तस्याःफलस्यहि ॥ भुजेःफलंप्रकाशःस्यात्प्रकाशोहंनचेतरः ॥ इतरस्यप्रकाशत्वंमद्योगादितिचोदित
म् ॥२१८॥ तस्मादहंप्रकाशःस्यांसर्वेषामिहदेहिनाम् ॥ मयानरहितंकिंचित्स्वतंत्रंवचनंवदेत् ॥ २१९॥

स्तुइत्यतआह कुतइत्यादि तस्याभुजेर्वृत्तिरूपायाःफलस्याभिव्यक्तचैतन्यरूपस्यतादात्म्यरूपमाश्रयत्वमितिशेषः कुतःकथंसंभवेन्नक
थमपीत्यर्थः अघटितघटनापटीयसीविचारासहाचमायापूर्वसंबंधोपपादिकाआसीत्साचविचारकालेपलायितेतिभावः एतदेवस्फुट
यति भुजेरिति भुजेरंतःकरणवृत्तिरूपायाःफलमिवफलंप्रकाशश्चैतन्यरूपःसचाहमेव [तमेवभांतमित्यादिश्रुतेः यथाप्रकाशयत्येकइ
त्यादिस्मृतेश्च नन्वंतःकरणस्यवृत्तिरपिप्रकाशइतिचेद्वत्तोत्तरमेतदित्याह इतरस्येति बुद्धेर्यद्यपिसार्वज्ञ्यमित्यत्रोक्तंस्पष्टीकृतमित्यर्थः
॥२१८॥ फलितंदर्शयन्वावदिषदित्यंतंवाक्यमर्थतोव्याचष्टे तस्मादिति सर्वेषांदेहिनांसमष्टिव्यष्टिरूपाणामहमेकःप्रकाशः सर्वंचदृश्य
मुत्पन्नंमदधीनं तथाचेहप्रपंचेकिंमद्भिन्नंवावदिषत् लेट् वदेत् महाराजसभायांसभास्थवत्स्वतंत्रंवाक्यमप्युच्चारयेदित्यर्थकंवाक्यंव्या
ख्यातमितिभावः ॥ २१९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यवाक्यस्यमद्भिन्नंकिंचिदपिकश्चिदपिकिंवदेत्निरूपयितुंशक्नुयादपितुनतस्यानिर्वचनीयत्वादित्यर्थोपिसंभवतितंविस्तरेणवक्तुमुपक्रमते अप्यनंतेइत्यादिना अपिनाअर्थांतरमप्युच्यतेइत्यर्थः मयिशोधिताहमर्थेनंतेत्रिविधपरिच्छेदहीनेसर्वःप्रपंचःभोक्तृभोग्यरूपोमदज्ञानप्रयुक्तत्वाद्रज्जुसर्पवत्कल्पितइतिशेषः तथाचतस्यभिन्नत्वेनप्रतिपादनंदुःशकमितिभावः ॥ २२० ॥ संग्रहेणोक्तमनिर्वचनीयत्वंविस्तरेणापिस्फुटयति अध्यस्तेइत्यादिना अध्यस्तेप्रपंचेश्रुतिवचनादभ्युपगतेपितस्यस्वरूपादिकमपिविचार्यंअसंभावनावारणाय यथाश्रुत्याचार्याभ्यांबलेनाहंस्वीकारितइत्यनुतापोमाभूदितिभावः किंप्रपंचोनामरूपक्रियाणांसमुदायरूपोवात्रयंवा इदंनामरूपंकर्मचेतिश्रुतेः किंवाप्रत्येकरूपः तत्रनाद्यइत्याह नामेत्यादि॥२२१॥तत्रसंकितेभ्योविभिन्नःस्यादित्यादिनापूर्वमुक्तंदूषणगणंहेतुतयास्मारयति समुदायइति समुदायिभ्योभिन्नत्वपक्षेऽदर्शनं अभिन्नत्वपक्षेप्रत्येकंसमुदायव्यवहारापत्तिरित्यादिदूषणमुक्तं अत्रनामादिसमुदायप

अप्यनंतेमयिसदाभोक्तृभोग्यस्वरूपधृक् ॥ मदज्ञानसमुत्थत्वात्प्रपंचोरज्जुसर्पवत्॥ २२० ॥ अध्यस्तेपिचकोनामप्रपंचइतिचिंत्यतां ॥ नामरूपक्रियाणांहिसमुदायात्मकोनच ॥ २२१ ॥ समुदायोनभिन्नःस्यान्नाप्यभिन्नइतीरितम्॥ समुदायिभ्यएतद्धिपुनरत्रविचिंत्यताम्॥ २२२॥ नामरूपक्रियाःकिंस्युर्नामरूपक्रियात्मिकाः॥ अतद्रूपेऽप्रपंचत्वंतासामेवप्रसज्यते॥ २२३ ॥ तद्रूपत्वेपिकिंस्वित्स्यात्तासांप्रत्येकमेवहि ॥ त्र्यात्मकत्वमथापिस्यादेकैकंचैकरूपकम्॥ २२४॥

क्षएवपुनर्विचिंत्यतांवक्ष्यमाणविधयाविकल्पांतरंक्रियतामित्यर्थः ॥ २२२॥ विकल्पाकारमभिनयति नामरूपक्रियाइति नामवाक्कार्यंरूपमिंद्रियगोचरःक्रियापूर्वापरीभूतात्मिकाताःनामरूपक्रियाःसमुदायोयासांप्रपंचउच्यते किमेताअपिनामरूपक्रियात्मिकाउतनेति किंशब्दस्यविकल्पेकिंकिमूतचेतिकोशाद्विकल्पार्थकत्वेननिषेधपक्षोऽध्याहृतः अल्पदूषणकत्वादन्त्यपक्षंतावन्निराचष्टे अतद्रूपइति भावप्रधानोनिर्देशः तथाचनामरूपक्रियाणामतद्रूपत्वेनामरूपक्रियात्मकत्वाभावेतासामप्रपंचत्वंप्रपंचबाह्यत्वंप्रसज्यते तथाचप्रपंचरूपाणांप्रपंचबाह्यत्वेव्याघातःश्रुतिविरोधश्चेतिभावः ॥ २२३॥ अथाद्यपक्षंदूषयितुंविकल्पयति तद्रूपत्वेपीति नामरूपक्रियाणांतद्रूपत्वेनामादिरूपत्वेस्वीकृतेपीदंवक्तव्यंकिंतासांनामरूपक्रियाणांप्रत्येकंत्र्यात्मकत्वंनामरूपक्रियासमुदायरूपत्वंकिंवाएकैकमेकरूपंकिंनामनामात्मकमेवरूपंरूपात्मकमेवक्रियाक्रियात्मिकैवेत्यर्थः ॥ २२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्येकंत्रयात्मकत्वपक्षेदोषानाह आद्येइति आद्यपक्षेऽदर्शनंप्रत्येकंत्रिस्वरूपताऽनुभवाभावः एकंप्रथमंदूषणंगृहाणेतिशेषः नहिनामनामात्मकंरूपात्मकंक्रियात्मकंचदृश्यतेइत्यर्थः द्वितीयमाह अनवस्थादिचापरंदूषणमिति अनवस्थाआदिःकारणंप्रयोजकंयस्यदूषणद्वंदस्य तद्दूषणद्वंदमपरंद्वितीयंदूषणमित्यर्थः अयंभावः तादात्म्यंद्विविधंसमवायस्थानेऽभिष्रिक्तमितरच्च तत्राद्येभेदःकल्पितोऽभेदोवास्तवइत्युक्तं द्वितीयेतुदूरस्थवृक्षादौप्रसिद्धेभेदोवास्तवोऽभेदस्तुकल्पितइतिविशेषः तथाचवाचिस्थितस्यनाम्नोयथाघटेनतादात्म्येभेदोवास्तवस्तद्वदत्र नाम्निनामतादात्म्याभ्युपगमेउद्देश्यनाम्नःसकाशाद्विधेयनाम्नोभेदांगीकारेतेनापिनाम्नानामतादात्म्यवताभवितव्यमितितत्रान्यन्नामतत्रान्यदित्यनवस्था एवंरूपक्रिययोःपरैर्भिन्नत्वेनस्वीकृतयोस्तादात्म्येपि नन्वनवस्थायामिष्टापत्तिरितिचेत्तर्हिउत्तरोत्तरागंतुकनाम्नैवनामप्रयुक्तव्यवहारेसिद्धेपूर्वपूर्वनाम्नोवैयर्थ्यरूपोलोपएकंदूषणमनेकनामविशिष्टेघटेकेननाम्नाऽयंव्यवहारोजनितइतिविनिगमनाभावो द्वितीयं एकत्रानंतनामावगाहिप्रमाणाभावस्तृतीयमप्यापद्येतेति तथाचोक्तंखंडनकृद्भिः प्राग्लोपाविनिगम्यत्वप्रमाणापगमैर्भवेत् अ

आद्येऽदर्शनमेवैकमनवस्थादिचापरम् ॥ दूषणंमूलहीनंचकल्पनंमानहानतः॥ २२५॥ एकैकात्मकतायां स्यादिदमेवहिदूषणम् ॥ नियमोऽनियमोवापिनशक्योवक्तुमंजसा॥ २२६॥ अपिकिंनामकिंरूपंकाक्रियेयमिहोच्यते॥ शब्दोनामेतिचेत्स्यात्सकोयमित्येवरूप्यताम्॥ २२७॥

नवस्थितिमास्थातुरचिकित्स्यात्रिदोषतेति तृतीयंदूषणमाह मूलहीनंकल्पनमिति प्रत्येकंनामादित्रितयात्मकमितितेकल्पनंमूलहीनं कुतो मानहानतः मानैरस्यार्थस्यत्यागादुपेक्षणादितियावत् नह्यत्रप्रत्यक्षादिनवाश्रुतिः साहीदंविश्वंत्रयात्मकमित्येतावदाह नतुप्रत्येकंत्रयात्मकमितिवक्तुंशक्यंयावद्वचनंवाचनिकमितिन्यायादितिभावः॥ २२५ ॥एकैकात्मकमितिद्वितीयेप्युक्तविधमनवस्थादिदूषणमतिदिशति एकैकात्मतायामिति व्याख्यातप्रायम् किंचनामनामात्मकमेवेतिनियमोवक्तुमशक्यः तस्यश्रोत्रविषयत्वेनरूपत्वस्यापिसंभवात्पूर्वापरीभूततयाक्रियात्मकत्वस्याप्युपपत्तेः अनियमोपिवक्तुमनुचितः नामत्वेनैवव्यवह्रियमाणत्वादित्याह नियमइति एतेनैवप्रपंचोनामादित्रयसमुदायात्मकोनवेतिविकल्पेंऽत्याकोटिरपिसमाहिताद्रष्टव्या॥ २२६॥ अथनामादीनामेवदुर्निरूपत्वात्तत्समुदायादिरूपत्वंप्रपंचस्यदुर्निरूपमित्याह अपिकिंनामेति स्पष्टम् तत्रनामविचारयति शब्दइतिं शब्दोनामस्यादितिचेत्सोयंशब्दएवकइतिरूप्यतामित्यन्वयः रूप्यतांरूपवान्लक्षणवान्क्रियतांतस्यलक्षणंवक्तव्यमित्यर्थः॥ २२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपृष्टेप्रतिवाद्युक्तलक्षणनिरसनपूर्वकंशब्दात्मकनामानिर्वचनीयत्वंसाधयति स्वस्मिन्नित्यादिसार्धपंचभिः स्वस्मिन्विषयेस्वबुद्धिजनकः स्वपदाभ्यांशब्दोग्राह्यः बुद्धिपदेनचज्ञानं तयोर्विषयतासंबंधेनयोजनकःकारणंसशब्दः दृश्यतेहिउत्पन्नःशब्दः अयंशब्दइत्याकारकशब्दबुद्धीजनयन् यथाघटःस्वविषयकेघटइत्याकारकेशब्दबुद्धीजनयतितद्वत् शब्दस्यसविषयकत्वंयाचितमंडनन्यायेनज्ञानद्वारेत्यन्यत् तथाचस्वविषयकशब्दबुद्धिजनकत्वंशब्दलक्षणमितिचेत्तर्हिवंध्यासुतादावलीकेऽतिव्याप्तिरित्याह वंध्यासुतोपिसइति असतोवंध्यासुतादेर्द्धर्मीतरानभ्युपगमेपिअननुभावकानुपाख्यादिशब्दवृत्तिविषयत्वंविकल्पज्ञानविषयत्वमत्यंताभावप्रतियोगित्वंचेत्येतेधर्मास्तांत्रिकैरभ्युपगम्यंतएवेत्युक्तमद्वैतसिद्धिव्याख्यानेमिथ्यात्वनिरुक्तौब्रह्मानंदैः मूलकारैरपीदंवक्ष्यतेशब्दबुद्धीअसत्वेपीतिश्लोकेन तथाचविषयतासंबंधेनवंध्यासुतइत्याकारकशब्दबुद्धीस्वस्मिन्जनयति वंध्यासुतेऽतिव्याप्तिरितिलक्षणांतरंशंकते अर्थेति सदर्थविषयकज्ञानहेतुत्वंशब्दत्वं नाऽलीकेऽतिव्याप्तिः तस्यासत्वादिति अस्यलक्षणस्यध्वनिरूपेशब्देऽर्थविषयकबोधाजनकेअव्याप्तिमाह नध्वनिस्तथेति अत्र

स्वस्मिन्स्वबुद्धिजनकःसचेद्वंध्यासुतोपिसः ॥ अर्थविज्ञानजनकश्चेदसौनध्वनिस्तथा ॥ २२८ ॥ वर्णात्मकोपिनियतःसर्वेषांज्ञानकारणम् ॥ नासौयतोनजनयेद्बधिरादौधियंक्वचित् ॥ २२९ ॥ नचेंद्रियस्यसंबंधात् ज्ञानहेतुरितीरिते ॥ स्वस्तितस्मैभवेद्यस्मात्धूमोप्येवंनृणामिह ॥ १३० ॥

लक्षणेदोषांतरसंभवेपिपुरःस्फूर्तिकत्वेनप्राधान्यादव्याप्तिरेवोक्तेतिध्येयम् ॥ २२८ ॥ ननुवर्णतादात्म्येनार्थबोधजनकत्वंशब्दलक्षणमस्तु अस्यनध्वनावव्याप्तिः ध्वनेरपिवर्णव्यंजकस्यमीमांसकमतेवर्णतादात्म्यात्यथाजातिव्यंजकव्यक्तेर्जात्यातादात्म्यंतद्वदित्याशंक्यकिमुक्तविधयासर्वेषांबोधजनकत्वंलक्षणंकिवायदीयेंद्रियेणसंवंधस्तंप्रत्येवेतिविकल्प्यतत्रनाद्यइत्याह वर्णात्मकइति असौशब्दोवर्णात्मकोपिनियतःनियमविशिष्टःसन्सर्वेषांज्ञानकारणंनभवतियतःक्वचिद्बधिरादौधियंनजनयेदित्यन्वयः आदिपदेनसुप्तमूर्च्छितप्रमत्तरुग्णपरिग्रहः ॥ २२९ ॥ द्वितीयमनूद्यातिव्याप्त्यादूषयति नचेंद्रियस्येति वर्णात्मकत्वेसतींद्रियसंबंधाद्ज्ञानहेतुःशब्दःइतित्वयालक्षणेईरितेसत्यपितस्मैशब्दायस्वस्तिखंडनभयात्संरक्षणंनचभवेदित्यन्वयः कुतोयतोधूमोप्येवंस्ववाचकेशब्दतादात्म्यवत्वेसत्येवसतींद्रियसंबंधान्नृणांवन्ह्यादिज्ञानहेतुः तथाचतत्रातिव्याप्तिरितिभावः ॥ २३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्विद्रियपदेनश्रोत्रमेवविवक्षितमतोनधूमेऽतिव्याप्तिरित्याशंक्यतथापिशब्दत्वजातावतिव्याप्तिरित्याह नचश्रोत्रस्येति श्रोत्रस्यसंबंधो ग्राह्यत्वरूपोविशेषःधूमादिनिष्ठेंद्रियसंबंधाद्विलक्षणः तस्यशब्दसंरक्षणस्यकारणंप्रयोजकंनचसंभवति तत्रहेतुः तस्मिन्नित्यादि हियस्मात्तस्मिन्शब्देनुगतेसर्वत्रतादात्म्यसंबंधेनवर्त्तमानेधर्मेजातिरूपेपिअसौविशेषोस्तिकीदृशः अवारितःकेनापिरोद्धुमशक्यः तथाचस्फुटाऽतिव्याप्तिरितिभावः अत्रयद्यपिगुणपदनिवेशेजातावतिव्याप्तिर्नसंभवतितथापिगुणत्वानिर्वचनीयत्वस्याकाशनिर्वचनप्रसंगेवक्ष्यमाणत्वात्श्रोत्रग्राह्यत्वांशोदूषितइतिध्येयम्॥२३१॥ ननुजातिव्यक्त्योस्तादात्म्याज्जातेरपिनामत्वमस्त्वितीष्टापत्तिमाशंक्याह अस्यतत्वेइति अस्यानुगतधर्मस्यजातिरूपस्यतत्वेशब्दात्मकनामत्वेस्वीकृतेसतितस्यशब्दस्यरूपंस्वरूपंरूपत्वंरूपभावमाप्नुयात् इंद्रियग्राह्यत्वेनहिजात्यादिकंरूपत्वेनश्रुतौविवक्षितम् अधुनाशब्दनिष्ठजातेरपिनामत्वाभ्युपगमेनामरूपयोर्भेदव्यवहारलोपापत्तिरितिभावः ननुजातिरनुग

नचश्रोत्रस्यसंबंधोविशेषस्तस्यकारणम्॥ तस्मिन्ननुगतेधर्मेंप्यस्यसावप्यवारितः॥ २३१ ॥ अस्यतत्त्वे ध्रुवंतस्यरूपंरूपत्वमाप्नुयात्॥ यथाककारेकत्वंस्यात्शब्देवाशब्दतायथा॥ तथाघटादिषुप्रायोदृश्यतेनामसंगतिः॥२३२॥यथानामतथारूपक्रियेअपिसुदुर्भणे॥ अपिक्रियानरूपेणविहीनागृह्यतेक्वचित्॥ २३३॥ यथाघटेनहीनानगृह्यतेपृथुबुध्नता॥ ततोनेयंपृथग्रूपारूपरूपवदीरिता॥ २३४॥

ताशब्दस्त्वननुगतइतिस्पष्टोभेदइत्याशंकावारणायशब्दस्याप्यनुगमंसर्वत्रदर्शयति यथाककारेइति शब्दसंगतिःशब्दसंबंधः तथाचरूपात्पृथक्नामनिर्वक्तुमशक्यमितिभावः॥ २३२॥ एवंनाम्नोऽनिर्वचनीयत्वंप्रसाध्यरूपक्रिययोरपितदतिदिशति यथानामेति सुदुर्भणेदुःखेनभणितुंनिर्वक्तुंशक्येतत्रक्रियायाउक्तलक्षणरूपाद्यदिभेदंकश्चिद्विवेकेनानुभवगोचरंकुर्वीततदालक्षणमपिप्रणयेत्तदेवतुनसंभवतीत्याह अपिक्रियेति॥ २३३॥ दृष्टांतमाह यथाघटेनेति पृथुबुध्नतापृथुर्विशालोबुध्नोमूलभागोयस्यसपृथुबुध्नः बुध्नपदमुदरोपलक्षणं परिशेषात्स्वल्पमुखः तस्यभावस्तत्ता तथाचयथाघटस्वरूपंपृथुबुध्नताघटात्पृथक्नानुभूयतेतथापूर्वापरीभूतदंडादिस्वरूपाक्रियेतिभावः मूलंबुध्नोंघ्रिरस्त्रियामित्यमरः फलितमाह ततइति रूपरूपवत्रूपस्यस्वरूपवत् यथारूपंरूपान्नपृथक्तद्वदित्यर्थः॥ २३४॥

नामसंगतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथनामतःपृथगनिर्वचनीयतांरूपस्यस्फुटयति रूपंहीति यस्मात्सकलंरूपमिंद्रियगोचरात्मकंनामतोनामपक्षपातिनींधियंजनयेत्तस्मात्तद्रूपंवस्तुतोवास्तवंनस्यात्किंतुविकल्पमात्रंतदित्यर्थः वाचारंभणमित्यादिश्रुतिरप्यनुकूला ज्ञानस्यनामपक्षपातित्वंहरिणाप्युक्तं नसोस्ति प्रत्ययोलोकेयःशब्दानुगमादृते अनुविद्धमिवज्ञानंसर्वंशब्देनभासतेइति नामतइतितसिर्देवाअर्जुनतोभवन्नितिवद्बोध्यः तत्रदृष्टांतः नरइत्यादि पर्वतशृंगवत्स्थूलंशृंगंशिरएवातउक्तंतीक्ष्णायेति ॥ २३५ ॥ ननुअलीकेनृशृंगवंध्यासुतादौअस्तीत्याकारकंज्ञानंनास्तिअस्तितुरूपेऽतःकथंसाम्यमुच्यतेइत्यतआह नचास्तीति तत्रनृशृंगादौ उदाहरणमाह अस्तीति वंध्यासुतोस्तिएवंइत्याकारकोऽसौप्रत्ययःनरिपुरुषेनास्तिइतिनंकिंतुअस्त्येव सांख्यैर्विकल्परूपस्यनैयायिकादिभिराहार्यज्ञानरूपस्यस्वीकारादितिभावः॥ २३६ ॥ ननुरूपज्ञानवंध्या

रूपंहिसकलंयस्मात्जनयेन्नामतोधियम् ॥ तस्मान्नवस्तुतस्तत्स्यान्नरेतीक्ष्णाग्रशृंगवत्॥ २३५ ॥ नचास्ति प्रत्ययस्तत्रजायमानोनिवार्यते॥ अस्तिवंध्यासुतोनैवंप्रत्ययोनरिनास्त्यसौ॥ २३६ ॥नचासाविंद्रियैर्जन्यइत्येतद्भावकारणं॥ नह्निगंधधियःक्वापिचक्षुरादिस्तुकारणम्॥ २३७॥अथैकेंद्रियबोध्यत्वंगंधादेर्नासतस्तथा॥ तर्ह्यस्तुनरिशृंगस्यमनसाबोधनंतव॥ २३८॥

सुतज्ञानयोर्नसाम्यमिंद्रियजन्यत्वतदजन्यत्वाभ्यांविशेषादित्याशंक्यकिंसर्वेंद्रियजन्यत्वंविशेषःकिंवाएकैकेंद्रियजन्यत्वमितिविकल्प्य तत्रनाद्यइत्याह नचासाविति असौरूपप्रत्ययः इत्येतत्सर्वेंद्रियजन्यज्ञानविषयत्वंभावकारणंसत्ताप्रयोजकोविशेषइतिनचवक्तव्यम् हियतोगंधधियश्चक्षुरादिःकारणंनकिंतुघ्राणमेव तथाचविशेषकल्पनेनरूपसत्तांसाधयितुमिच्छतस्तवगंधादिसत्तापिगताएवंचवृद्धिमिच्छतोमूलहानिरितिभावः ॥ २३७॥ द्वितीयंविशेषमनूद्यवंध्यासुतेपितस्यसत्वमाह अथैकेंद्रियेति गंधादेरस्तीतिशेषः तर्हिएतस्मिन्विशेषेऽभ्युपगतेसति तवैवमतेमनसेंद्रियेणनृशृंगस्यबोधनमस्तुकःप्रतिबध्नातित्वंचकिमपलपसि एवंचायमपिविशेषोनास्तीतिभावः ॥ २३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुमनसइंद्रियपारतंत्र्यंवंध्यासुतज्ञानेप्रतिबंधकमित्याशंक्यतत्पारतंत्र्यस्यकादाचित्कत्वेनसुखादिज्ञानान्यनेकानिसाधयतोमनसोवं ध्यासुतज्ञानेकोभारइत्याशयेनाह नहीति नेत्राद्यगम्यत्वेसतिसुखदुःखयोर्ग्रहोनइतिनहिकिंतुमनसातेगृह्येतेएवेत्यर्थः तथाचवंध्यासुतो नरेश्रृंगमपिज्ञायतामितिशेषः ननुकथमसद्ज्ञायेतेत्यत्राह दुःखमित्यादि वाशब्दइवार्थेयथावैरिणिवर्तमानंदुःखंसुखरूपेणासदपिसुख मितिज्ञायतेतद्वदिदमपिज्ञायतां प्रसिद्धंहिलोकेवैरीदुःखितोपिसुखीतिमन्यतेइति॥२३९॥एवंसतिरूपंनाममात्रमितिलोकप्रसिद्धमव्यति रेकंदृष्ट्वापिनिश्चीयतेइत्याह प्रवृत्त्यादाविति प्रवृत्त्यादौप्रवृत्तिपूर्वकालेइच्छाद्वाराप्रवृत्तिकारणीभूतोयोबोधोविचारवतांसशब्दंविनाना स्तिकिंतुशब्दावगाह्येवदृष्टोऽतःसहोपलंभान्नामरूपयोरभेदःसिद्धइतिभावः प्रपंचव्यापिकानांनामरूपक्रियाणामनिर्वचनीयत्वविचार

॥२८॥

नहिनेत्राद्यगम्यत्वेनग्रहःसुखदुःखयोः॥वंध्यासुतोनरेश्रृंगंदुःखंवैरिणिवासुखम्॥ २३९ ॥प्रवृत्त्यादावृते शब्दंनबोधोस्तिविचारिणां॥एवंशब्दादयःसर्वेसंतिनैवनिरूपिताः॥ २४० ॥नचतद्व्यतिरिक्तानिसंतिभूता निवैक्वचित् ॥ तथाहिनभइत्येतत्किंनामभवतोमतम् ॥ २४१ ॥ अवकाशस्त्वसौकस्माद्भवेद्वंध्यासुतोन ते॥नचशब्दगुणत्वेनतस्यवंध्यासुताद्भिदा॥ २४२ ॥

मुपसंहरति एवमिति स्पष्टं॥२४०॥अथतद्व्याप्यपंचभूतानामनिर्वचनीयत्वंस्फुटयितुमुपक्रमते नचतद्व्यतिरिक्तानीति ताभ्योनामरूपक्रि याभ्यःपृथग्भूतानीत्यर्थः तत्रज्येष्ठमाकाशंविचारयति तथाहीति किंकिंस्वरूपमित्यर्थः॥२४१॥नन्ववकाशरूपआकाशःप्रसिद्धएवेत्या शंक्यएवंसत्यावरणाभावाधिकरणंयत्किंचिदस्तितदाकाशमितिलक्षणमागतंतच्चवंध्यासुतेपिगच्छति अलीकेपिअभावसंबंधस्यतांत्रिकैः स्वीकृतत्वादित्याशयेनाह अवकाशइति तेतवकल्पनाविषयआकाशोऽवकाशरूपश्चेत्तर्हिवंध्यासुतएवकस्मान्नावकाशोभवेत् तस्याप्य वकाशत्वसंभवादितिभावः शब्दगुणकत्वेनविशेषमाशंक्यतद्विघटनंप्रतिजानीते नचेति ॥ २४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुतयाभिन्नस्याभिन्नस्यवागुणत्वासंभवमाह गुणोहीति गुणिनोभिन्नश्चेद्गुणस्तर्हितस्यगुणिनोगुणोनमतःनसंमतः भिन्नत्वेनप्रसिद्ध योर्गुणगुणिभावादर्शनात् उदाहरणं यथेति घटाद्भिन्नःपटःघटस्यघटः घट्यतेउपसर्जनीभूयोपकुरुतेइतिघटोगुणस्तथाभूतोनस्यात् तथाऽभिन्नोपिनगुणःस्यात् यद्वत्यथा गंधस्यगुणस्यतस्माद्भिन्नोगंधोगुणइतिनव्यवह्रियतेइत्यर्थः कल्पितभेदेनगुणगुणिभावस्तुयादृशो यक्षस्तादृशोबलिरितिन्यायेनकल्पितमेवाकाशंसाधयेन्नपरमार्थमितिभावः ॥२४२॥ ननुपरमार्थयोर्भेदाभेदयोःसमुच्चयःसांख्यादिसंमतोस्त्वित्याशंक्याह भेदाभेदाविति न्यायचक्षुषाविरुद्धयोर्नसमावेशइतिन्यायानुगृहीतबुद्धिनेत्रेण दुराग्रहेणसत्वेसमावेशेस्वीकृतेतुतयोर्भे

गुणोहिगुणिनोभिन्नोनासौतस्यगुणोमतः ॥ यथाघटात्पटोभिन्नोघटस्यनघटोभवेत् ॥ अभिन्नोपिगुणोनस्याद्गुणोयद्वद्गुणोनहि ॥ २४३ ॥ भेदाभेदौनकुत्रापिदृश्येतेन्यायचक्षुषा ॥ सत्वेतयोर्द्वयोर्दोषउक्तस्तवबलाद्भवेत् ॥ २४४ ॥ अपिभेदस्तथाभेदोवस्तुनीचेद्वथावचः ॥ इदंभिन्नमभिन्नंवावस्तुनीइतिनोचितम् ॥ २४५ ॥ नघटोघटइत्येवंपटोवापटइत्यपि ॥ उच्यतेपुनरुक्तेनदोषेणाकुलितंक्वचित् ॥ २४६ ॥

दाभेदयोःप्रत्येकंयोदोषोवर्णितःसतवबलाद्भवेदापद्येतेत्यर्थः यथाप्रत्येकम्मृगयादिव्यसनदोषोव्यसनद्वयांगीकारेइतिभावः ॥ २४४ ॥ किंचयदाभेदाभेदयोरेवानिर्वचनीयत्वंतदाकिमुततन्निर्वाह्यानामित्याशयेनभेदाभेदौकिंवस्तुनःस्वरूपमेवकिंवाततःपृथगितिविकल्प्यतत्रनाद्यइत्याह अपिभेदइति वस्तुनीवस्तुस्वरूपाभिन्नेइतिचेत्तर्हिइदंतेवचोवृथाव्यर्थंसमाधानासमर्थमितियावत् तत्रपुनरुक्तिप्रसंगंहेतुमाह इदंभिन्नमित्यादि तथासतीत्यादिःतथासतीदंफलंवृक्षाद्भिन्नं इदंद्रव्यंसतोऽभिन्नंतेइमेवस्तुनीइतिवाक्यंनोचितंस्यात् भिन्नाभिन्नवस्तुपदानांप्रवृत्तिनिमित्तभेदाभावाद्घटःकलशइतिवाक्यवदितिभावः ॥ २४५ ॥ पुनरुक्तिंदृष्टांतेनस्पष्टयति नघटइति स्पष्टम् ॥ २४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भेदाभेदयोःपृथक्स्वरूपेद्वितीयपक्षेपिभेदाभेदधारास्वीकारेऽनवस्थादोषभयेनप्रथमभेदाभेदनिर्वाहार्थंस्वीकृतयोर्भेदाभेदयोर्वस्तुमात्रत्वमेववक्तव्यंतथाचप्रथमभेदातिक्रमेणभेदांतरप्रतिपादनेव्यर्थःप्रयासइत्याह भेदाभेदप्रसित्ध्यर्थमिति परौप्रथमभिन्नौयदाब्रूषेतदायत्किंचित्तेवचनंतद्बकबंधनंस्यादित्यन्वयः यथाकश्चिद्बकंग्रहीतुमिच्छन्नेवमुपायंकल्पयेत् अस्यआतपेस्थितस्यमत्स्यैकाग्रचेतसःशिरसिनवनीतंप्रक्षिपामितस्मिन्द्रवीभूतेनेत्रयोःपतितेंधीभूतमेनंवध्नामीतितथैवचतंबध्नीयात्तस्यप्रयासोयथाव्यर्थस्तस्यशिरसिनवनीतप्रक्षेपायसमीपगमनकालएवबंधसंभवात् तथातवभेदाभेदान्तरंकल्पयित्वापुनर्वस्तुस्वरूपतामभ्युपगच्छतइतिभावः ॥ २४७ ॥ एवंगुणत्वानिर्वचनी

भेदाभेदप्रसिद्ध्यर्थंभेदाभेदौपरौयदा ॥ ब्रूषेकिंचित्तदातत्स्याद्वचनंबकबंधनम् ॥ २४७ ॥ वाय्वग्निवारिभूमीनामेवमेवगुणानहि ॥ तदभावेचतासांस्याद्वंध्यापुत्रसमानता ॥ २४८ ॥ अपिदोषादिमूढानांनभोनैवावकाशकृत् ॥ नवायुःस्पर्शकृन्नापिवन्हिःपाकादिकारणम् ॥ २४९ ॥ नतृषांशमयेन्नीरंपृथिवीनैवधारयेत् ॥ एवमन्येपुधर्मेषुव्यभिचारोमहानिह ॥ २५० ॥ दृश्यंतेतेनभूतानिस्वप्नभूतसमानिह ॥ नभआदीनिभूतानियदाऽसंतितदाकथं ॥ तज्जःप्रपंचःसत्यःस्याद्वंध्यासुतसुतोयथा ॥ २५१ ॥

यत्वेनाकाशमिथ्यात्वसिद्धावन्यत्रापितदतिदेशेनाह वाय्वग्नीति गुणंविनागुणिमिथ्यात्वंचवायुनात्हृतगंधाभूःसलिलत्वायकल्पतेइत्यादिनापुराणेस्पष्टम् ॥ २४८ ॥ किंचाकाशादीनामवकाशदानादिकंयल्लोकप्रसिद्धंलक्षणंतत्किंसर्वान्प्रतिकिंवायंकंचित्प्रतितत्राद्येसंभवंस्पष्टयति अपिदोषादीतिद्वाभ्यां दोषोधातुवैषम्यं आदिपदेनयोनिस्वभावादिपरिग्रहः तैर्मूढानांजडीकृतानामित्यर्थः ॥ २४९॥ नतृषामिति व्यभिचारःसर्वत्राननुगमरूपः शेषंस्पष्टम् ॥ २५० ॥ द्वितीयेदृष्टिसमसत्ताकत्वेनस्वप्नपदार्थवन्मिथ्यात्वंप्रबोधेअसत्वंचस्पष्टमित्याह दृश्यंतइति पंचभूतमिथ्यात्वेसिद्धेतत्कार्यप्रपंचस्यमिथ्यात्वंसुतरांसिद्धमित्याह नभआदीनीति असंतिसत्ताहीनानि वंध्यासुतस्यालीकत्वात्तत्कार्यतत्पुत्रोयथाऽसंभाव्यसत्ताकस्तद्वदित्यर्थः शेषंस्पष्टम् ॥ २५१ ॥ ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपंचभूतानांसकार्याणामात्मातिरेकेणासत्त्वंप्रतिपाद्यतत्कारणतयाप्रसिद्धायामायायाअज्ञानप्रकृत्यादिपदैःप्रसिद्धायाअपितथात्वंव क्तुंकिमायायाःकार्यान्यथानुपपत्त्यासिद्धिःकिंवाश्रुत्याकिमथवाऽनुभवादितितत्रनप्रथमइत्याह प्रपंचस्येति ततउक्तविधयाऽसत्त्वात्दृ ष्टांतोनहीति ननुलोकेभूमिस्थोनटःकथमसद्रूपांतरमाकाशारूढंदर्शयति कथंवाघटोत्कचादयोऽसतीःसेनानिर्मिमाणाःश्रूयंतइति हासेऽतआह सतामिति मायाविमुख्यानांसतामेवजन्मनानारूपेणप्रादुर्भावोमाययानिमित्तभूतयादृष्टंनतुमायातत्रपरिणाम्युपादा नंकिंतुमायाविषयीभूतोमायाव्यात्मैवतत्तद्रूपेणआसतेइत्युक्तमेव तथाचनासज्जननेतस्याःसामर्थ्यंदृष्टंयेनसास्वतंत्राकल्प्येतेतिभावः ॥ ॥ २५२ ॥ द्वितीयंनिराचष्टे मायायाइति अस्तीतिभावप्रधानोनिर्देशः अस्तित्वंस्थितिः श्रूयते मायांतुप्रकृतिंविद्यादित्यादिवाक्यैरिति

प्रपंचस्यततोजन्ममाययापिनसंभवेत्॥ नहिवंध्यातनूजस्यमाययापिजनिर्भवेत्॥ सतांमायाविमुख्यानांज न्मदृष्टंहिमायया॥ २५२ ॥ मायायाअपिविश्वस्यजनिनाशास्तिहेतुता॥ श्रूयतेसापिनास्त्येवमायायाअप्य सत्वतः॥ २५३ ॥ सच्चिदानंदरूपंस्वंयदासौनावगच्छति ॥ तदेमांकल्पयत्येषशिशुःस्वंराक्षसंयथा॥ २५४ ॥ शयानोबालकःक्वापिस्वदेहज्ञानवर्जितः ॥ स्वदेहंराक्षसंमत्वाबिभेत्याकुलितेन्द्रियः॥ २५५ ॥ आनंदात्माह मप्येवंसच्चिद्रूपंनिजंवपुः॥ विस्मृत्यैनांकल्पितवानात्मनैवात्मनिस्वयम्॥ २५६ ॥

शेषः साजनिनाशास्तिहेतुतापिनास्त्येवतदाश्रयभूतायामायायाअप्यसत्वादित्यर्थः श्रुत्यातुसाऽद्वैतेबुध्यवतारणायानूदितैवेतिभावः ॥ २५३ ॥ नतृतीयः विचारविमुक्तप्रमत्ताद्यनुभवस्याकिंचित्करत्वाद्विचारसहकृतप्रमारूपानुभवागमनेतुतस्याःपलायनादित्याह सच्चि दानंदरूपमिति स्वमात्मानंअसावविवेक्यात्मानावगच्छतिनानुसंधत्तेतदेमांएषनित्यापरोक्षःकल्पयतिअहमज्ञइत्यादिमन्यते विचारकाले ऽविवेकिदशायाःपरोक्षत्वादसावितिप्रयोगः दृष्टांतः शिशुरिति ॥ २५४ ॥ दृष्टांतंस्फुटयति शयानइति स्पष्टम्॥ २५५ ॥ दार्ष्टांति केउपसंहरति आनंदात्मेति एवमहमानंदात्माभूमासच्चिद्रूपंनिजंवपुःस्वरूपंविस्मृत्यैनांमायांकल्पितवानस्मीतिशेषः आत्मनैवविवर्त्तो पादानभूततयाश्रयेणात्मनिस्वविषयिकां स्वयमितिपदेनेतरनिरपेक्षतासूचिता विस्मृत्येतिपदेन विस्मरणस्यापितत्प्रयुक्ततयातस्याअनादि तासूचिता ॥ २५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइति एषामयिनास्त्येव तत्रहेतुगर्भंविशेषणं निर्द्वयेत्यादि अद्वयेद्वितीयावकाशोबाधितइतिभावः तर्हिकथमस्याभानम
तआह नैषेत्यादि तथाचाज्ञातेमय्येवमायादिपदैर्व्यवहारइतिभावः ॥२५७॥ ननुशब्दज्ञानयोर्बलेनस्वतंत्रैवमायाकुतोनस्यादित्याशंक्य
स्यादेवंयदिशब्दोज्ञानंचप्रमाणरूपेस्यातामिमेतुनतथेत्याह शब्दबुद्धीइति वस्तुनोऽसत्त्वेपीत्यन्वयः मानताप्रमाणवत्त्वविषयसाधनक्षम
ता अत्रयद्वक्तव्यंतच्छब्दनिरूपणेउक्तमिति ॥ २५८ ॥ नन्वेवंप्रबुद्धेनभवतासम्राजाशेषकार्याधिकृतेषुसत्तापहरणेनदंडितेष्वपिलोकवि
प्लवहेतूशब्दोमंत्रिस्थानीयाबुद्धिश्चदंडनीयावित्याशंक्यतर्हिशब्दस्योपमर्दितत्वाद्बुद्धिमेवविचारदंडेनप्रहरामीत्याह अपिशब्दइति श्लोका
दावपिशब्दोवाक्यान्तरारम्भसूचकःप्रायोबोध्यः उदितंनामविचारे केयंकिंस्वरूपाकिंबोधरूपाऽबोधरूपावांऽत्येघटादिसमायास्तस्या
नस्वातंत्र्यशंका आद्येपिसबोधोधर्मरूपोवासर्वाधिष्ठानधर्मिरूपोवा यदिधर्मरूपस्तदातस्यबुद्धिरूपतापिसंभाव्येत द्वितीयेतुबोधस्यम

ततएषापिनास्त्येवमयिनिर्द्वयरूपिणि ॥ नैषामत्तोविभिन्नास्तिबालकादिवराक्षसः ॥ २५७ ॥ शब्दबुद्धीअ
सत्त्वेपिभवेतांवस्तुनोयतः ॥ वंध्यासुतेहिदृष्टत्वान्नैतयोर्मानताततः ॥ २५८ ॥ अपिशब्दोत्रनास्त्येतदुदितंहिम
यापुरा ॥ बुद्धिश्चनामकेयंस्यादिदंतावद्विचार्यतां ॥ २५९ ॥ यदिबोधोघटादेःस्यात्घटादिस्तर्हिचेतनः ॥ त
थात्वेचपरापेक्षास्फुरणेनास्यसंभवेत् ॥ १६० ॥ विपर्ययःप्रसज्येतप्रसिद्धौभोक्तृभोग्ययोः ॥ बुद्धिमान्हि
भवेद्भोक्ताघटादिश्चतथैवसः ॥ २६१ ॥

त्स्वरूपत्वात्स्वातंत्र्यक्षमंबुद्धेःस्वरूपमेवदुर्वचमितिनिर्णयायेदंवक्ष्यमाणंबोधस्वरूपमेवतावत्प्रथमंविचार्यतां बोधस्वरूपनिर्णयेनैवबुद्धे
रपिगतिः स्फुटीभविष्यतीतिभावः ॥ २५९॥ तत्रतावद्बोधस्यधर्मरूपतापक्षेइदंविचार्यं किंबोधोविषयधर्मःकिंवाज्ञानकरणेंद्रियधर्मःकिं
वाऽऽत्मधर्मःकिंवाबुद्धेरेवेतिविकल्प्यतत्रनाद्यइत्याह यदिबोधइतिद्वाभ्यां यदिबोधोघटादेर्विषयस्यधर्मःस्यात्तर्हिघटादिश्चेतनःस्याद्बो
धस्यैवचेतनत्वप्रयोजकत्वात् इष्टापत्तौदोषमाह तथात्वइति तथात्वेचेतनत्वेऽस्यघटादेःस्फुरणेभानेपरापेक्षानस्यात्दृश्यतेचपरापेक्षाऽतो
नघटादिधर्मोबोधइत्यर्थः ॥ २६० ॥ दोषांतरमाह विपर्ययइति भोग्यस्यघटादेर्भोक्तृत्वेनप्रसिद्धिःस्यात्परिशेषादन्यस्यभोग्यतयेत्यर्थः
तदुपपादयतिबुद्धिमानिति बुद्धिमान्बोधवान्हिभोक्तोक्तलक्षणभोगाश्रयोभवेत्संभवेत् घटादिरपितथैवबोधवानेवेत्यर्थः ॥ २६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयंनिराचष्टे नचेंद्रियाणामित्यादिषड्भिः इंद्रियाणिहिबोधस्यावरणाभिभावकांतःकरणवृत्त्युत्पादकतयोपकरणानि उपकरणानांतु सामर्थ्यनियमोदृष्टः यथासुखोपकरणानांवैदिकानांलौकिकानांचयेनयेनयावद्यावदावरणाभिभावकमुत्पाद्यतेतावत्तावत्फलमाविर्भवतीतिनत्वभिव्यंग्यंलब्ध्वतस्तथानियमोदृष्टोब्रह्मविदायुगपत्सर्वानन्दानुभवात् तथाचायमर्थः अयंबोधइंद्रियाणांचधर्मोनयतःक्वचिन्नियतोदृश्यते यदीमानिस्वयंबोधधर्मकाणिस्युस्तदासर्वंप्रकाशयेयुः नचावरणेनव्यवस्था जडेष्वावरणाभावादावरणस्यप्रकाशरूपबोधसामानाधिकरण्याभावाच्च आत्मनितुबोधरूपआवरणमित्यन्यत् नियमंस्पष्टयतिनहीत्यादि चक्षुःशब्दंनजानातिकिंतुरूपमेव इतरत् श्रोत्रंरूपंनजानातिकिंतुशब्दमेवेति अतोज्ञायतेनैषांधर्मोबोधःकिंतुएतानितदभिव्यक्त्युपकरणानिव्यवस्थाशालित्वादितिभावः यद्वा नि

नचेंद्रियाणांबोधोयंदृश्यतेनियतःक्वचित्॥ नहिचक्षुर्विजानातिशब्दंरूपंतथेतरत्॥ २६२॥ अपिक्वापिपुरःपश्चाच्चक्षूरूपंनबोधयेत्॥ तथाश्रोत्रादिकंक्वापिशब्दाद्यपिनबोधयेत्॥ २६३॥ अपिबोधःकथंनामभवेदिंद्रियगोधुना॥ नहींद्रियेषुकुत्रापिबोधःकिंत्वर्थगोहिसः॥ २६४॥

यतःयत्रेंद्रियंतत्रबोधइत्येतादृशव्याप्तिनिरूपणशालीसन्बोधइंद्रियसंबंधीक्वचिन्नदृश्यतेअतोनतेषांधर्मः योयस्यधर्मोभवतिससदातत्रदृश्यतेयथावन्हावुष्णस्पर्शः शब्दस्तुमीमांसकमतेनित्योभिव्यंजकाऽसांनिध्यान्नदृश्यतेइत्यन्यत् नियमाभावंस्फुटयति नहीत्यादि शब्दसान्निध्येवधिराणांचक्षुःसत्वेपिनबोधोदृष्टएवमन्धानांरूपसान्निध्येपि तथाचएतान्युपकरणान्येवनबोधधर्मकाणीतिभावः॥२६२॥ अपिक्वापीति क्वापिकस्मिंश्चिद्देशेमनोनवधानकालेवाचक्षुःपुरःस्थितंपश्चाद्वागतंरूपंनबोधयेत् तथाश्रोत्रादिकंस्वविषयं एषाव्यवस्थाबोधधर्मकत्वबोधपक्षेनोपपद्यते उपपद्यतेतुउपकरणत्वपक्षे उपकरणस्यप्रयोजकाधीनत्वादितिभावः ॥ २६३ ॥ इंद्रियधर्मत्वपक्षएवदोषांतरमाह अपिबोधइतिद्वाभ्यां बोधोहिस्फुरणात्मासचघटःस्फुरतीत्याद्यनुभवेनविषयसंबंधोभातिइंद्रियेषुपरोक्षेषुतुस्थितौकिमानमितिभावः ॥ २६४॥

आत्मस्वरूपानंद.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुनैयायिकादिनयेयथात्मस्थितोबोधोघटादीन्विषयीकरोतितथेंद्रियगोपिकरिष्यतिसंबंधिद्वयस्वरूपात्मिकाया विषयतायाःसंबंधत्व संभवादितिचेन्मैवंवोचस्तेषांभावानवबोधादित्याह यद्यन्यत्रेति यद्यन्यत्रस्थितोबोधोन्यद्वस्तुप्रकाशयेत्तर्हिघटस्थितोघटाकारवृत्त्याऽभिव्यक्तस्तादात्म्यसंबंधेनघटेस्थितोबोधःकस्मात्पटंनप्रकाशयेत् नचसंबंधाभावः इत्याह यथेति यथाकथंचित्संबंधत्वदभिमतविषयतारूपंकोवारयेत् तस्मान्नैयायिकादिभिर्बौद्धादीनामनधिकारिणांपुरतोगौणीविषयताऽऽविष्कृतातेषामंतरभिमतातुअभिव्यक्तचित्तादात्म्यरूपाऽतिप्रसंगहीनाद्वैतबोधोपयोगिनीहप्रपंच्यतेइतिभावः यदाहुरुदयनाचार्याः नग्राह्यभेदमवधूयधियोऽस्तिवृत्तिस्तद्बाधकेबलिनिवेदनयेजयश्रीः नोचेदचिन्त्यमिदमीदृशमेवविश्वंतथ्यंतथागतमतस्यतुकोवकाशइति दीधितिकारोप्याह न्यायमधीतेसर्वस्तनुतेकुतुकान्निवंधमप्यत्र अस्यतुकिमपिरहस्यंकेचनवैजानतेसुधियइति ॥ २६५ ॥ अत्रैवदोषांतरमाह अपिसंबंधसाम्येहीति चक्षुर्निष्ठबोधेनघटादिभानस्वीकारेभवन्मतेचक्षुषोयथाघटादिनासंयोगरूपःसंबंधस्तथाघटनिष्ठरूपवद्रसादिनापिसंयुक्तसमवायलक्षणसंबंधसंभवात्तस्यघटस्यरसादिकंकस्मान्नोस्मान्प्रतिनभातीतिवक्तव्यं अस्मन्मतेतुयदाकारवृत्त्यभिव्यक्तचित्तादात्म्यरूपाविषयतायत्रतस्यैवभानमितिव्यवस्थावक्तुंशक्यतइतिभावः ॥ २६६ ॥ इंद्रियेषुज्ञानाभावमुपपत्तिदर्शयन्नुपसंहरति ततइति ततोन्यनिष्ठस्यान्योपकारकत्वासंभवात्संभवेवातिप्रसंगापाताच्चचेद्यदिघटादिसंस्थोघटादिसंबद्धोबोधःस्यात्तदातेनबोधेनतेषांघटादीनांप्रकाशनंभवतिउपपद्यतेपरंतुतस्यघटादिभिरधिष्ठानत्वेनतादात्म्यलक्षणएवसंबंधोवाच्यः असौबोधोऽत्रघटादिषुधर्मत्वेननतिष्ठतितेषांभोक्तृत्वप्रसंगादित्येतत्प्रागुदीरितं यदिबोधोघटादेरित्यादिनोक्तमित्यर्थः ॥ २६७ ॥

यद्यन्यत्रस्थितोबोधोवस्त्वन्यद्धिप्रकाशयेत् ॥ बोधोघटस्थितःकस्मात्पटंनैवप्रकाशयेत् ॥ यथाकथंचिदत्रापिसंबंधंकोनिवारयेत् ॥ २६५ ॥ अपिसंबंधसाम्येहिचक्षुषस्तुघटादिना ॥ कस्माद्रसादिकंतस्यबोधेनप्रतिभातिनः ॥ २६६ ॥ ततोघटादिसंस्थश्चेद्बोधस्तेनप्रकाशनम् ॥ तेषांभवतिनात्रासावित्येतत्प्रागुदीरितम् ॥ २६७ ॥

अभिप्रायः नास्तिकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मधर्मोबोधइतितृतीयंपक्षंनिराचष्टे अतएवेति अतोन्योपकारकत्वाभावापातादेवमपिआत्मन्यपिधर्मरूपतयाबोधोनवर्ततइत्यर्थः ननुमास्त्वन्योपकारआत्मनस्तुव्यवहारायात्मधर्मोबोधोस्त्वित्यतआह ममतेनाप्रतीतितइति यदिममधर्मोबोधस्तदाममततोभिन्नस्यजडत्वमापद्येत नचघटादिवन्मयिबोधेनोपकारःशक्यः घटादीनांबोधेकल्पितानामधिष्ठानत्वेनप्रकाशनेपिममनिरधिष्ठानत्वाद्बोधस्यममाधिष्ठानत्वेचतस्यैवात्मत्वापातात् मद्भिन्नस्यधर्मरूपबोधस्यप्रकाशरूपत्वेपिपुत्रपांडित्येनपितृपांडित्यवन्ममतेनप्रतीतिर्नस्यादितिभावः बुद्धिधर्मोबोधइतिचतुर्थंनिराचष्टे नबुद्धेरिति बुद्धेरपिधर्मोबोधोनसंभवतियस्मात्साबुद्धिर्बोधादव्यतिरेकिणीपृथग्भावोव्यतिरेकस्तद्रहिता बोधतादात्म्येनहिसाबुद्धिर्ज्ञानपदव्यवहारपदवीमारूढा बोधस्यधर्मतयाततःपृथग्भावस्वीकारेतुसाज्ञानत्वाद्भ्रश्येदितिभावः ॥२६८॥ एवंसतितस्याघटादिसमत्वापत्तिरित्याह अपिबुद्धेरिति बुद्धेर्धर्मोयदाबोधस्तदेयंबुद्धिस्ततोबोधात्पृथग्भिन्नासतीकाकिंस्वरूपा अधुना

अतएवनमय्येषममतेनाप्रतीतितः ॥ नबुद्धेरपिसायस्माद्बोधादव्यतिरेकिणी ॥ २६८ ॥ अपिबुद्धेर्यदाबोधस्तद्वाकेयंततःपृथक् ॥ अबोधरूपतःसापिघटादेर्नविशिष्यते ॥ २६९ ॥ अपिबोधोजगत्येकोप्यथवानेकएवसः ॥ एकत्वेवासनामानस्मृत्यादीनांभिदाकुतः ॥ २७० ॥ अनेकत्वेपितस्यस्याद्भेदःकइतिरूप्यतां ॥ बोधाद्बोधांतरेभेदोनभवेद्बोधरूपतः ॥ २७१ ॥

बोधभिन्नत्वादेवबोधरूपावक्तुंनशक्या परिशेषादबोधरूपत्वांगीकारेतस्याघटादिसमत्वेनमयिकल्पितायामदधीनसिद्धिकत्वेनस्वातंत्र्यशंकेतिसिद्धंमदिष्टमित्याशयेनाह अबोधरूपतइति भावप्रधानोनिर्देशः स्पष्टम् ॥ २६९ ॥ ननुबुद्धिरपिबोधात्मिकास्तुबोधानामनेकत्वादित्याशंकावारणायबोधस्यात्मैकस्वरूपतावधारणायचबोधस्वरूपेविचारांतरमारभते अपिबोधइति एकत्वपक्षेज्ञानभेदव्यवहारानुपपत्तिंसमाधास्यमानांदोषतयाप्रसंजयति एकत्वेइति वासनाःसंस्काराः तेचविनश्यदवस्थज्ञानजाताःप्रतियोगिभेदाधीनभेदाः मानपदेनभावव्युत्पत्त्याकरणव्युत्पत्त्याचप्रमाणांफलानांतद्भेदाधीनभेदकानांप्रमाणानांचग्रहः स्मृतिःप्रसिद्धा आदिपदेनाप्रमाणग्रहणम् ॥ २७० ॥ अनेकत्वेपीति अनेकत्वपक्षेपिइतिरूप्यतांविचार्यतां इतिकिं तस्यबोधस्यभेदःकःकीदृशः किंस्वरूपप्रयुक्तःकिंवोपाधिप्रयुक्तः तत्रनाद्यइत्याह बोधादिति बोधांतरेबोधरूपेऽवकाशेभेदोनस्यान्नतिष्ठेत् कुतोबोधरूपतः बोधस्वरूपाविशेषादित्यर्थः ॥ २७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयइष्टापत्तिमाह अबोधरूपतइति अबोधरूपादुपाधेर्हेतोश्चेद्भेदस्तर्हिउपधेयबोधगतोनभवेत् उपाधिनिष्ठभेदस्यतत्रारोपेणभानोप पत्तेर्बोधोपाधिबुद्धेश्चज्ञानत्वपदवीदानेनसंस्कारादिभेदनिर्वाहाच्च नचारोपितंस्वरूपंस्पृशतीतिवाच्यं मृगतृष्णयामरुभूमेरार्द्रीकरणादर्श नादितिभावः उपाधिभेदेनोपधेयस्वरूपभेदाभावेदृष्टांतमाह घटादेरिति स्पष्टम् ॥ २७२ ॥ किंचबोधभेदांगीकारेतेचबोधाःपरस्परसा पेक्षानिरपेक्षावा अंत्येएकेनैवसर्वनिर्वाहात्किंभेदेन आद्येतुप्रकाश्यस्याबोधत्वापत्तिंस्फुटयति अपिबोधइति बोधोयदिस्वभानायबोधां तरमपेक्षतेतर्हिअसौअबोधएव तत्रानुमानंदर्शयति नायमिति अयमितरसापेक्षोबोधोनबोधःबोधत्वाभाववान् तत्रहेतुः बोधशून्यतःभा नशून्यत्वात्घटवदिति॥ २७३॥ एवंबोधस्यैकतांप्रसाध्यतस्यस्वयंप्रकाशतांसाधयितुमिदंविचार्यं किमज्ञातःससर्वव्यवहारकारणंज्ञातो वातत्रनाद्यइत्याह अपिबोधइति अज्ञातत्वमपिज्ञानविषयत्वाभावरूपंद्विविधं स्वयंप्रकाशतारूपंवाजडत्वेसतिचित्संबंधहीनत्वंवा तत्रप्र थमस्यसिद्धांततातृतीयश्लोकेवक्ष्यते द्वितीयमिहश्लोकेनिरस्यति तथाचायमर्थः अयमेकतयासाधितोबोधोऽज्ञातःसन्व्यवहारस्यकार्य

अबोधरूपतोभेदेनभवेद्बोधगोहिसः॥ घटादेर्नहिभेदेननभोनानाविधंभवेत्॥२७२॥ अपिबोधस्त्वबोधोसौ बोधांतरमपेक्षते ॥ यदिनायंभवेद्बोधोघटवद्बोधशून्यतः ॥ २७३ ॥ अपिबोधोनचाज्ञातोव्यवहारस्यकार णम्॥ यथाघटस्तथाचायमबोधोघटवद्भवेत्॥ २७४ ॥ बोधबोधेभवेन्नूनमनवस्थादिकंपरम्॥ अबोधेज गदांध्यंचतस्मान्नासौविचारिते॥ २७५॥ सचेत्स्वयंप्रकाशःस्यादहमेवनचापरः ॥ तथाचानित्यतानैवम मसत्तैकरूपिणः॥ २७६ ॥

स्यकारणंयथाघटोऽज्ञातोपिजलाद्याधारहेतुस्तद्वन्न तथाचायमबोधोजडत्वेनबोधशून्यःसन्घटसमोभवेदिति॥२७४॥ ज्ञातत्वपक्षेपूर्वदो षसमुच्चितंदोषमाह बोधबोधइति बोधस्यबोधेज्ञातत्वपक्षेऽबोधरूपत्वापत्तिदोषापेक्षयापरंद्वितीयमनवस्थादिकंचबोध्यमित्यर्थः एतत्सा धकस्यापिज्ञातस्यैवसाधनक्षमत्वादेवतत्साधकस्यापीतिभावः ननुबोधवोधोनैवास्त्वित्यतआह अबोधइति तस्मादान्ध्यापत्तिभयादसौ अबोधोनाभ्युपेयइतिशेषः विचारितइतिपदमुत्तरान्वयि ॥ २७५ ॥ ननुप्रकारांतरासंभवात्तस्यस्वयंप्रकाशतामभ्युपगच्छामीतिचेदोमि त्याह सचेदिति विचारितेसतिसोऽद्वितीयोबोधःस्वयंप्रकाशएवमुक्तिपथमवतरतीतिचेत्तर्हिस्यादेवमस्तुइत्यर्थः ननुतवतादृशस्यतस्यां गीकारेकोलाभइतिचेत्तस्यमद्भिन्नत्वेमद्दृश्यतयास्वप्रकाशताहानिभयेनमत्स्वरूपांतःप्रवेशेभूमानंदलाभइत्याह अहमेवेति ननुभूमानं दलाभेपितस्यक्षेमचिंताऽवशिष्यतइतिचेन्नेत्याह तथाचेति स्पष्टम् ॥ २७६ ॥ ॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमानंदेनित्यताभावमेवस्फुटयति आदाविति अनित्यलक्षणंपूर्वार्धे अहंसर्वदास्मितस्मान्नानित्यइतिशेषः सर्वदासत्वमेवकुतइत्यतआह अहमेवेति यद्यहंनस्यांतर्हिकःस्यादितराभावादितिभावः ॥२७७॥ एवमनित्यत्वाभावेवस्तुपरिच्छेदाभावंहेतुतयाऽभिधायतत्रदेशकालपरिच्छेदाभावौतथात्वेनाह यदेकत्रेति यद्वस्तुएकत्रकारणरूपेऽन्यत्रवादेशेकालेवास्याद्वर्तेततद्वस्तुतस्मादाकारात्तथाजगतश्चभिन्नंस्यात्व्यवच्छिद्येत तेनभेदेनचविकारत्वसाधनद्वाराघटवदनित्यत्वंस्यादनुमीयेतबलात्व्याप्तिपक्षधर्मतारूपात् यावद्विकारंतुविभागोलोकवदितिसूत्रात् विभागोभेदोविकारत्वस्यकार्यत्वस्यव्याप्यइतिसूत्रार्थः मयितुकुत्रचिद्वृत्तित्वाभावादनित्यत्वसंभावनानास्तीत्याह अहमिति ॥ २७८ ॥ किंचदेशकालावेवस्वसंबद्धपदार्थैःसहमामाधारंकुरुतःश्रुतिश्चसभूमाकुत्रस्थितःस्वेमहिम्नीत्याकाराममाधारनिषेधनपरा तथापियेममाधारंकल्पयंतितेकिंमिथ्याभियोगदोषान्नबिभ्यतिइत्याह अपिदेशइति ताभ्यांदेशकालाभ्यां तयोर्देशकालयोः सत्त्वंकार्यात्मनास्फुटत्वमसत्त्वंकारणात्मनाऽस्फुटत्वं तत्तस्मात्सर्वस्यमदाधारकत्वात् अत्रदेशादौ शेषंस्पष्टम् ॥२७९ ॥ नानाविधप्रपंचस्याद्विती

आदावंतेचयन्नास्तितदनित्यमितीरितम् ॥ अस्म्यहंसर्वदायस्मादहमेवनचापरः ॥ २७७ ॥ यदेकत्रभवेत्तत्स्यादाधाराज्जगतोपिच ॥ भिन्नंतेनाप्यनित्यत्वंतस्यस्यात्घटवद्बलात् ॥ अहंनकुत्रचित्तेनममकस्मादनित्यता ॥ २७८ ॥ अपिदेशस्तथाकालस्ताभ्यामुत्पादितंचयत् ॥ तयोःस्थितंजडंसर्वंसदसत्त्वादिधर्मभृत् ॥ मय्येवतदहंनात्रकुत्राप्यस्मिव्यवस्थितः ॥ २७९ ॥ यथामणिगणाःसूत्रेपृथिव्यांपांसवोयथा ॥ अब्धौयद्वद्धिनीराणिवन्हौवातमउद्धृतम् ॥ २८० ॥

यात्मनिआधारेस्थितौनानादृष्टांतानाह यथामणिगणाइतिद्वाभ्यां तत्रस्थूलप्रपंचस्यसूत्रात्मनिवृत्तौदृष्टांतःप्रथमः द्वितीयस्तुसूक्ष्मप्रपंचस्यकारणेईश्वरोपाधौवृत्तौ यथापांसवोरेणवःपृथिवीसामान्यस्यविशेषाःपृथिवीसामान्येस्थितास्तद्वन्मयिसतिकारणेसूक्ष्मशरीराणिइत्यर्थः तृतीयस्तुशक्तिरूपाणामव्याकृतानांब्रह्मणिनामरूपेविहायस्थितौ यथानद्यःस्यन्दमानाःसमुद्रेइत्यादिश्रुत्यनुरोधात् चतुर्थस्तुभावाद्वैतमतेपंचमप्रकाराऽविद्यानिवृत्तिपक्षेवाप्रपंचाभावोऽविद्यानिवृत्तिश्चपृग्भूताब्रह्मणितिष्ठतीतिस्वीकारात् तयोःस्थितौदृष्टांतः उद्धृतंऊर्ध्वंधृतं दीपादिशिखाग्रेभासमानंतमःश्यामतारूपंयथावन्हौस्थितंतद्वदित्यर्थः यद्वातमसउद्धृतंउत्कर्षेणहृतंहरणं भावेक्तः ध्वंसइतियावत् सयथावन्हौभावरूपेसामानाधिकरण्येनपृक्स्थितइत्यर्थः अथवाजडत्वेनविलक्षणस्यापिसृज्यस्यसर्गकालेधारणेऊर्ध्वंतमोदधानोऽग्निर्दृष्टांतइति ॥ २८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वायाविति स्थितिकालेधारणेदृष्टांतोयं गंधश्चतृणानिचतेषांसमाहारोगंधतृणं प्रलयेधारणेदृष्टांतस्तुअकाशः प्रावृषिप्रादुर्भूयकालांतरेप्रलीयस्थितस्यमेघस्यधारणात् एवमात्मनस्तत्पदार्थतयाप्रपंचधारकत्वंस्फुटीकृत्यत्वंपदार्थतयाजीवत्वकर्तृत्वादिधारणेदृष्टांतत्रयमाह यथासुहृदीत्यादिना स्वात्मनिबालकशरीरेरक्षस्त्वंराक्षसत्वमधस्तादुक्तं अथवाविवेकवतांदृष्ट्यात्मनःसकलप्रपंचधारणेदृष्टांतत्रयमिदमितिबोध्यम् ॥ २८१ ॥ एवमात्मनःसच्चिदद्वितीयतायामनावृतायांसत्यांनिरतिशयानंदोमयालब्धःस्वयंचोपनतोदुःखाभावइत्याह स्वप्रकाशेति ननुतवसर्वात्मकस्यजगतिवर्त्तमानेनदुःखेनकथंनसंबंधइत्याशंक्यममसच्चिदानंदघनस्यस्वरूपविचारेजगतएवजडस्यबाधादित्याशयेनाह नहीत्यादि जातुकदाचिदपिक्वचिद्देशेजगत्यपिदुःखंनास्ति तत्रहेतुः नहिदुःखमिति हियस्माद्दुःखपदार्थएवत्रैकालिकात्यंताभावप्रतियोगीएतदेवकथमतआह जायमानमिति दुःखंहिजायमानंजन्यंप्रसिद्धं जन्यत्वंचजडत्वव्याप्यंजडस्यचमयिचिद्घनेनावकाशइतिकथंकश्चिदपिदुःखसत्त्वंप्रतिपादयेदितिभावः ॥ २८२ ॥ नन्वेवंसतिसुखेपिदुःखन्यायःप्रसक्तइत्यतोवैलक्षण्यंसुखेस्फुटयति

वायौयद्वद्गंधतृणंयथानभसिवाघनः॥ यथासुहृदिदुष्टत्वंदुर्जनेसाधुतायथा॥यथास्वात्मनिरक्षस्त्वंमय्येवंसकलंजगत्॥ २८१॥स्वप्रकाशसुखंचाहंनदुःखंमयिकिंचन॥नहिदुःखंजगत्यस्मिन्नजातुविद्यतेक्वचित्॥जायमानंजडंदृश्यंजडंनमयिवस्तुतः॥ २८२॥सुखंनैवंजायमानंदृश्यतेक्वापितत्त्वतः॥जातंचेदसुखंतस्याद्दुःखवज्जन्मयोगतः॥ २८३॥नहिवैषयिकंनामसुखंकिंचनविद्यते॥किंतुदुःखेहिविभ्रांत्यासुखधीर्जायतेनृणां॥ २८४

सुखंनैवमितिएवंदुःखवत्सुखंजायमानमुत्पत्तिमत्केनापितत्त्वतोनदृष्टमितिमूढास्तुसुकृतविपाकसमयेअंतःकरणवृत्तिमानंदात्मप्रतिबिंबग्राहिणींसुखमितिमत्वाजायमानतामनुभवंतुनामेतिभावः ननुसावृत्तिरेवास्तुमुख्यंसुखमितिचेन्न मानविरोधादित्याह जातमिति जन्यंदुःखात्मकंजनिमत्त्वाद्दुःखवदित्यनुमानं नाल्पेसुखमस्तीतिश्रुतिश्चात्रबाधिकेतिभावः ॥२८३॥ एवंवावदिषदित्यंतवाक्यतात्पर्यार्थंप्रपंचबाधपूर्वकंसच्चिदद्वितीयानंदात्मज्ञानंप्रपंच्यतदुत्तरवाक्यंफलपर्यवसायिस्वरूपसाक्षात्काराभिनयपरंव्याख्यातुंतन्निष्ठोपयोगिवैराग्यायविषयसुखदुःखरूपतांस्फुटयति ऊनत्रिंशच्छ्लोकैः किंविषयफलंसुखंतत्साधनत्वेनविषयाएववासुखपदार्थइतिविकल्प्यतत्रनाद्यइत्याह नहिवैषयिकमिति वैषयिकंविषयेभ्यआगतंतत्फलं कथंतर्हितथाव्यवहारोऽतआह किंत्विति दुःखेत्रिगुणांतःकरणपरिणामरूपेसुखमित्याकारानृणांधीर्जायतेतस्याहेतुस्तुपूर्वभ्रमःसंस्कारद्वारेतिसापिभ्रमइतिसूचयति विभ्रांत्येति ॥ २८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नद्वितीयः अयोग्यत्वेनभ्रमनिर्वाह्यत्वादितिवक्तुंप्रधानमल्लनिबर्हणन्यायमभिप्रेत्यकामसुखस्यभ्रमनिर्वाह्यतांतावत्स्पष्टयति नहिचर्म
णीत्यादिना मांसलेप्रचुरमांसवति पिच्छिलेस्निग्धे विण्मूत्रगंधानांसंघातोयत्रतथाभूते एतादृशेमंडूकादिचर्मणिउपमानेनारीयोनौचवि
शेषोनास्ति भ्रांतेर्गतिस्त्वनिर्वाच्येत्याह विनाभ्रांतिमिति अश्लीलपदप्रयोगोत्रप्रस्तावेवैराग्यद्वाराशांतरसपोषकत्वान्नदोषः तथाचोक्तंम
म्मटेन वक्राद्यौचित्यवशाद्दोषोपिगुणइति उदाहृतंचप्रकाशकृतायथाशमकथासु उत्तानोच्छूनमंडूकपाटितोदरसंनिभे क्लेदिनिस्त्रीव्रणेस
क्तिरकृमेःकस्यजायतेइति॥ २८५ ॥स्तनयोरिति स्त्रीणांस्तनयोः तथानृणांपुरुषाणांस्फिजोःकटिगतमांसपिंडयोर्भिदानास्ति विनाभ्रां
तिमित्यनुषज्यते शेषंस्पष्टम् ॥ २८६॥ नपुंसकानामिति धियंकल्पनाम् वधूनांनारीणाम् स्फुटम् ॥ २८७॥ भेदाभ्युपगमेपिकितत्त्वानांभे

नहिचर्मणिदुर्गंधेमांसलेरुधिरोक्षिते॥ विण्मूत्रगंधसंघातेमृदुस्पर्शेपिपिच्छिले॥ नारीयोनौचभेदोस्तिवि
नाभ्रांतिंनृणामिह ॥ २८५ ॥ स्तनयोश्चस्फिजोर्नृणांनिर्लोम्नोर्नास्तिवैभिदा ॥ अनिर्गतश्मश्रुमुखंपुंसांस्त्री
णांचवैसमम्॥ २८६॥ नपुंसकानांस्त्रीणांचनास्तिभेदोविनाधियं॥ पुरुषाणांवधूनांचशरीरेकापिनोभिदा
॥२८७॥ चतुर्विंशतितत्त्वानांसमुदायःशरीरकम्॥ जंतुमात्रस्यतत्त्वेतद्गुरैवास्माभिरीरितम्॥ २८८ ॥ सर्वे
षांहृदयेचाहमहंप्रत्ययशब्दयोः॥ अनाधारःसर्वगश्चिदानंदात्माव्यवस्थितः॥ २८९ ॥ एवंव्यवस्थिततत्त्वेका
मग्रहवशंगताः॥ पुरुषाश्चस्त्रियश्चेतिकल्पयित्वापरस्परम्॥ पिबंतिलालांमुखजांमलांश्चाददतेपिच॥ २९० ॥

दः किंवाऽऽत्मनइतिविकल्प्यतत्रनाद्यइत्याह चतुर्विंशतीति दशेंद्रियाणिभूतानिपंचप्राणास्तथैवच अंतःकरणचतुष्कंचएवंचतुर्विंशति
तत्त्वानिएतेषांसमुदायःतत्प्रसिद्धंजंतुमात्रस्यशरीरमित्येतद्गुरैवापिदहेइत्यादिनाऽस्माभिरीरितमिति ॥ २८८ ॥ नद्वितीयइत्याह सर्व
षामिति सर्वेषांहृदयेचाहंव्यवस्थितःअभिव्यक्तः कीदृशः अहंप्रत्ययशब्दयोर्विषयतावाच्यतात्मकसंबंधाभ्यांसंबंधीतिशेषः अनाधारइ
त्यादिस्पष्टम् ॥ २८९॥ एवमिति एवमुक्तविधयातत्त्वेआत्मानात्मनोःस्वरूपेव्यवस्थितेतत्त्वाधिक्यभयादिवविशेषमनंगीकृत्यस्थितेसत्य
पिकामरूपग्रहस्यग्रहवदुन्मादादिहेतोर्वशंगताः पुरुषाःस्त्रियश्चइयंस्त्रीअयंपुरुषइत्येवंकल्पयित्वापरस्परंमुखजांलालांपिबंतिमलांश्चगृह्णं
तीत्यर्थः वसाशुक्रमसृङ्मज्जाकर्णविण्मूत्रविण्नखाः श्लेष्माश्रुदूषिकास्वेदोद्वादशैतेनृणांमलाः ॥ २९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आस्फालयंतीति आस्फालयंतिगात्राणिअभिघाताख्यसंयोगवंतिकुर्वंतीत्यर्थः कर्तृविशेषणं उन्मादेति दृष्टांतद्वयमाह मेषाइत्यादिना कीदृशाःपिशाचाः हरस्यशंभोर्विनोदकाहासजननोद्यताः॥२९१॥एवंहीति एवंकुर्वतांतेषांगात्रेभ्योंगेभ्यःकामोनिर्गतोभवतिकर्हिचिन्नै वनिर्गच्छतीत्यन्वयः कामःस्मरेच्छयोरेतसिचेतिकोशात् कामस्यरेतोरूपेणनिर्गमनेहेतुमुत्प्रेक्षते हृदिहसन्निवेति शरीरांतःस्थितदेवसभाम ध्यगतःकामःशंभुप्रीत्यर्थमिवारब्धनाट्यप्रयुक्तंजनानांवैकृतमीक्षित्वाहास्यवेगादिवनिर्गच्छतीति दृश्यंतेहिसभायामागतहास्यवेगासहने बहिर्गच्छंतोन्यथाचतत्रैवतिष्ठंतइति एतेनकामशास्त्रस्यलालाप्रभृतीन्भावानधरामृतादिपदैरभिदधतोलोकभ्रांत्यनुवादरूपोपहासेनलो कानांवैराग्यजननेपरमतात्पर्यमितिसूचितं प्रसिद्धमेतत् भ्रांत्यनुवादंश्रुत्वाविवेकिनस्ततोविरज्यंतइति॥२९२॥ननुमास्तुतत्रसुखरूपःपुरु

आस्फालयंतिचान्योन्यंगात्राण्युन्मादद्दूषिताः॥ मेषाइवपिशाचावायद्वद्धरविनोदकाः॥ २९१ ॥ एवंहिकु र्वतामेषांहृदिकामोहसन्निव॥ गात्रेभ्योनिर्गतोनैवविनिर्गछतिकर्हिचित्॥ २९२ ॥ ग्रहाविष्टायथाक्वापिग्र होद्रेकात्परस्परम्॥ ताडयंतिस्फिजोमत्ताःसंमुखाविमुखाअपि॥२९३॥ संप्राप्यतुश्रमंपश्चादासतेसुखिताइ व॥ अनिर्मुक्तग्रहास्तद्वत्कामिनःसर्वजंतवः॥ २९४॥ नहिमैथुनधर्मेणकामनाशःक्वचिद्भवेत्॥ नहिकामे विनष्टेपिप्रवृत्तिस्तत्रदृश्यते॥ २९५॥

षार्थःकामोपशांतिरूपोदुःखध्वंसस्तुस्फुटइत्याशंक्यनान्यसाधनमन्यत्रक्षमतइतिन्यायाच्छ्रममात्रसाधनस्यकुतोदुःखध्वंसहेतुत्वमित्या ह ग्रहाविष्टाइत्यादिपंचभिः यथाग्रहाविष्टाग्रहोद्रेकात्ग्रहसंबंधिबलान्मत्ताविकृतचित्ताःसंतःपरस्परंसंमुखाअभिमुखाविमुखाःपराङ्मु खाश्चस्फिजःकटिप्रोथान्ताडयंति ॥२९३॥ संप्राप्येति तेएवश्रमंप्राप्यअनिर्मुक्तग्रहाअपिसुखिताइवासतेसुखप्राप्तवन्निर्व्यापारास्तिष्ठं तितद्वत्कामिनोपिअनिर्मुक्तकामग्रहाःसंतःश्रमेणसुखितवदवभासंतइत्यर्थः ॥ २९४ ॥ तत्रययातिवाक्यंस्मारयति नहीति तथाचोक्तंय यातिना नजातुकामःकामानामुपभोगेनशाम्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्धतेइति किंच प्रवृत्तिरेवेच्छाकार्यंस्वकारणस्यानिवृ त्तिंदर्शयतीतिव्यतिरेकमुखेनाह नहिकामइति येषांकामोविनष्टस्तेषांतुपुनःप्रवृत्तिर्नदृष्टाऽतःप्रवृत्तिरेवकामलिंगमितिभावः ॥ २९५ ॥ ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसंसारिणोपिकामनाशवंतोनिवृत्तिमत्वादितिसत्प्रतिपक्षइतिचेन्न निवृत्तेःकामनाशाभाववत्वेननिश्चितेषुमल्लादिष्वपिवर्त्तमानत्वेनव्यभिचारित्वादित्याह किंत्विति द्वाभ्यां नचफललाभेननिवृत्तिरितिशंक्यं लब्धफलानांसाधनोपेक्षादर्शनादत्रतुतद्व्यतिरेकादितिसूचयितुमुक्तं सुखंनैवात्रकिंचनेति ॥ २९६ ॥ दृष्टांतेनव्यभिचारंस्फुटयति मल्लयोरिति ग्राम्यधर्मैरते स्पष्टम् ॥ २९७ ॥ एवंग्राम्यधर्मादौवस्तुतःसुखाभावेपिविपर्ययेणदुःखमेवसुखमितिमन्यमानंप्रत्येवंवाच्यंयदन्यथापित्वदभिमतसुखलाभेकिमर्थोयमनर्थसार्थकरआरंभाडंबरः अर्क्केचेन्मधुविंदेतकिमर्थंपर्वतंव्रजेदितिन्यायादित्याशयेनाह रेतसइति तावद्विण्मूत्रयोर्विसर्गेपिविद्यतेइत्यन्वयः कीदृशंतत् नात्यधिकं किंचिदधिकं अनुतापाभावादितिभावः ननुरतजन्यंसुखंकथंविसर्गमात्रंजनयेदतआह रतशब्दइति अत्रविण्मूत्रप्रतियोगिकेविसर्गेकिं

किंतुयावत्श्रमंतत्रप्रवर्ततेपरस्परम् ॥ श्रांताअपिनिवर्ततेसुखंनैवात्रकिंचन ॥ २९६ ॥ मल्लयोर्युध्यतोर्यद्वत्श्रमोत्पत्तौनिवर्तनम् ॥ स्त्रीपुंसयोर्ग्राम्यधर्मेतद्वन्नात्रास्तिवैसुखम् ॥ २९७ ॥ रेतसोनिर्गमेयावत्सुखंतावद्विद्यते ॥ विण्मूत्रयोर्विसर्गेपिततोनात्यधिकंपुनः ॥ रतशब्दोविसर्गेत्रत्वयाकिंनप्रयुज्यते ॥ २९८ ॥ अपिवायोःसशब्दस्यविसर्गेस्तिहियत्सुखं ॥ नतद्देववधूमात्रसंपर्केपिहिविद्यते ॥ कस्मात्तदर्थंयागादिश्रांतैर्नक्रियतेधुना ॥ २९९ ॥ अपिनामसुखंचेत्स्यान्नारीननरमाव्रजेत् ॥ नरोप्येवंततोनात्रसुखंदेहेस्तिकस्यचित् ॥ ३०० ॥

न्नप्रयुज्यते अत्रापिप्रयोगेकिंबाधकमित्यर्थः सुखानुकूलव्यापारत्वंप्रवृत्तिनिमित्तमादायैवहिकोशकारैर्निधुवनंरतमित्यादौरतशब्दःप्रयुक्तस्त्वयापितदनतिक्रमादितिभावः ॥ २९८ ॥ किंचैतादृशसुखस्यातिसौलभ्यात्तत्कामनयाचरणेननकर्माणिवंचनीयानितेषामंतःकरणशुद्धौविनियोगार्हत्वादभिनिवेशेनतत्कामनयैवाचरणेतुप्रतिबंदीसमाधेयात्वयेत्याह अपिवायोरिति वायोरपानाख्यस्य मात्रशब्दः कार्त्स्न्यार्थकः संपर्कःसंयोगः यागादियागदानप्रभृति शेषंस्पष्टम् ॥ २९९ ॥ किंचसुखस्यविषयजन्यत्वाभ्युपगमेकिंस्त्रीपुंसयोःशरीरंकारणंकिंवातयोर्योगःकिंवाप्रजोत्पत्तिःकिमथवासजातीयप्रजोत्पत्तिरितिविकल्प्यतत्रनाद्यइत्याह अपिनामेति देहेसुखंनामप्रसिद्धं स्यादुत्पद्येतचेत्तर्हिनारीननरंव्रजेत् एवंनरोपिननारींव्रजेत् फलितमाह ततइत्यादि ॥ ३०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नद्वितीयइत्याह स्त्रीपुंसयोरिति रत्यंतेग्राम्यधर्मांते तयोःस्त्रीपुंसयोः संतापायअनुतापाय अतएवोक्तंशिष्टैः भोजनांतेश्मशानांतेमैथुनांतेचयामतिः सामतिःसर्वदाचेत्स्यान्नरोनारायणोभवेदिति ॥ २०१ ॥ नतृतीयइत्याह नचप्रजायाइति मत्कुणकीटःप्रसिद्धः आदिपदेनयूकादिपरिग्रहः तेषामपिप्रकर्षेणजनिशालित्वेनप्रजापदार्थत्वाविशेषादितिभावः यद्येवंस्यात्तर्ह्युत्तमाश्रमस्थैरप्यनुभूयेतप्रजासुखमितिसूचनायनइतिपदंप्रयुक्तमिति ॥ २०२ ॥ नचतुर्थइत्याह नवेति समानजातीयत्वंमनुष्यत्वादिना प्रतिकूलायाःप्रजायाःपीडाहेतुत्वंप्रसिद्धं अनुकूलायाअपियोगक्षेमचिंताद्वारेत्यवधेयम् ॥ २०३ ॥ एवंकामसुखहेतुतयाऽभिमतानांकारणतामयोग्यत्वव्यभिचारादिभिर्निरस्याथरसनाविषयस्यापिकारणत्वायोग्यतांस्फुटयति एवमन्नोदकेइति अन्नंचोदकंचान्नोदके पूर्वार्द्धेप्रतिज्ञाउत्तरार्द्धेव्यभिचा

स्त्रीपुंसयोर्नयोगोपिसुखकारणमिष्यते॥ रत्यंतेसतयोरेवसंतापाययतोभवेत्॥ २०१॥ नचप्रजायाउत्पत्तौसुखंभवतिकर्हिंचित् ॥ कस्मान्मत्कुणकीटादेरुत्पादान्नसुखंहिनः॥ २०२ ॥ नवासमानजातीयसमुत्पादात्सुखंभवेत्॥ प्रजावंतोहिदृश्यंतेप्रजयापीडिताःस्वया॥ २०३ ॥ एवमन्नोदकेनैवसुखकारणमीरितम्॥ भुक्तपीतांतएतेहियतोदुःखस्यकारणम्॥ २०४ ॥ यथाहिज्वलतोवन्हेर्भवेत्काष्ठस्यसंचयः ॥ क्षिप्तस्तत्रक्षणंप्रौढज्वालानांविनिवारणम्॥ २०५ ॥ यथावासरसंदेशंवायोरुक्षंहिकुर्वतः ॥ क्षणंतद्वारणोपायस्तत्रनीरावसेचनम्॥ २०६॥

रस्रूपोहेतुःकारणत्वाभावेदर्शितः भुक्तंचपीतंचतेतयोरंते भावेक्तः भोजनपानांतेहिपरिवेषणांसहनादेननिवारयंतस्तत्रदुःखसाधनताज्ञानाधीनंद्वेषंसूचयंतीतिप्रसिद्धमेवमन्यदप्युदाहरणमूह्यम् ॥ २०४ ॥ कथंतर्हिलौकिकाःसुखहेतुतामन्नोदकयोर्व्यवहरंतीत्याशंक्यक्षुत्तृषयोःसहनक्षमतांभ्रांत्यासुखमित्यभिमन्यतज्जनकतयेतिगृहाणेत्याह यथाहीत्यादिपंचभिः यथाकाष्ठसंचयःवन्हिपुंजेक्षिप्तःसन्ज्वलतोवन्हेःप्रौढज्वालानांविनिवारणमुपशमसाधनंभवेदित्येकोदृष्टांतः ॥ २०५ ॥ द्वितीयंदृष्टांतमाह यथावेति सरसंरसेनसहितमार्द्रमितियावत् ईदृशंदेशंस्थलविशेषमंगनप्रभृतिरुक्षंकुर्वतोवायोः षष्ठीचानादरइतिषष्ठी रुक्षंकुर्वंतंवायुमनादृत्ययन्नीरावसेचनंतत्तद्वारणोपायःरुक्षीकरणवारणोपायःक्षणंयथाभवतीत्यर्थः ॥ २०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्ष्टांतिकमाह एवमितिद्विभिः जठरगौशरीरांतःस्थितावेतौअग्निप्राणौजंतूनांक्षुत्पिपासेजनयतइत्यन्वयः अत्रप्राणस्यापोमयःप्राणइतिश्रुत्युक्तजलतादात्म्यादापएवतदशितंनयंतइतिश्रुतेःक्षुद्धेतुत्वं तेजएवतत्पीतंनयतेइतिश्रुतेर्वन्हेस्तृषाहेतुत्वमितिबोध्यम् ॥ २०७॥अन्नोदकाभ्यामिति नृभिर्देहस्यांतःक्षिप्ताभ्यामन्नोदकाभ्यांकरणाभ्यांक्षुत्पिपासयोःक्षांतिःसहनंयथाकथंचित्सुकरासुखेनकर्तुंशक्यास्यादित्यन्वयः॥२०८॥क्षुत्तृषोरितिस्पष्टम् ॥२०९॥ एतन्न्यायमन्यत्राप्यतिदिशति एवंशब्दादीति सुखस्यवस्तुगतिस्फुटयति किंत्विति औत्सुक्यस्याभिलाषप्रयुक्तचित्तचांचल्यस्यक्षणंनिवृत्तिर्जायतेतामेवचित्तदशांमूढाःसुखमितिमन्यंते बुधास्तुएवंजानंति चित्तस्यनिर्मलस्यापिकामनाभिश्चलत्वदशायामात्मप्रतिबिंबग्रहणायोग्यस्याभिलाषाशांतौसत्यांयस्यपरमानंदात्मनःप्रतिबिंबेनसुखवद्भानंसएवमुख्यंसुखमिति इत्थंचमूढाःक्षणिकसुखाविद्वांसस्तुनित्यानंदाइतिसिद्धम् ॥ २१०॥ फलितमाह ततोनेति दुःखेषुहेयतयादुःखरूपांतःकरणप

एवंजठरगावेतावग्निप्राणावहर्निशम् ॥ क्षुत्पिपासेजनयतोजंतूनामनिवारितौ ॥ २०७ ॥ अन्नोदकाभ्यां क्षिप्ताभ्यांदेहस्यांतःक्षणंनृभिः ॥ यथाकथंचित्सुकराक्षांतिःस्यात्क्षुत्पिपासयोः ॥ २०८ ॥ क्षुत्तृषोःक्षणमात्रंयाशांतिःप्राणाग्निरोधनात् ॥ तस्यांसुखमितिभ्रांतावदंत्यल्पधियोनराः ॥ २०९ ॥ एवंशब्दादिलाभेपिसुखंनैवप्रजायते ॥ किंतुस्वात्मनऔत्सुक्यनिवृत्तिःस्यात्क्षणंनृणाम् ॥ २१० ॥ ततोनजायतेकिंचित्सुखंविषयतोनृणाम् ॥ किंतुदुःखेषुसुखधीःक्रियतेभ्रांतबुद्धिभिः ॥ २११ ॥ जनिनाशाल्पताद्याश्चदोषाविषयजान्नृणाम् ॥ फलेतस्मिन्कथंनामसुखधीर्धीमतांभवेत् ॥ २१२ ॥

रिणामेषु स्फुटमन्यत्॥२११॥तस्यसुखत्वासंभवंप्रकारांतरेणाप्याह जनिनाशाल्पताद्याइति तस्मिन्फलेधीपरिणामरूपेफलेजनिनाशाल्पताद्याउत्पत्तिध्वंसपरिच्छिन्नत्वाद्याः आद्यपदेनपरिणामादिग्रहःएतेदोषाःसंति कीदृशादोषाविषयजाविषयेभ्योजाताःप्रादुर्भूताः स्रक्चंदनादिविषयसंबंधजन्मादिभिस्तत्प्रयुक्तसुखजन्मादेःसुज्ञानत्वात् विषयजेइतिपाठेतुफलविशेषणंस्फुटम् एवंचधीमतांविवेकिनांनृणांतस्मिन्सुखधीःकथंस्यात्सानसंभवतीत्यर्थः सुखपदेहिव्युत्पाद्यमानेशोभनानिप्रसन्नानिखानिइंद्रियगोलकानियेनेत्यर्थोलभ्यते विषयसुखेविचार्यमाणेतुमनोगोलकंहृदयमेवदोषचितयातप्तंभवतीतिकथंतत्सुखंस्यादितिभावः तथाचात्रभगवतःपतंजलेःसूत्रं परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्चदुःखमेवसर्वंविवेकिनइति ॥ २१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसांसारिकसुखस्यदुःखरूपतांप्रतिपाद्यप्रकृतविचारस्यआत्मस्वरूपानंदस्यपरिपूर्णताबोधकतयाप्रकृतोपयोगंदर्शयन्सएतमेवेत्याद्यप श्यदित्यंतंवाक्यमात्मानंततमंपूर्णतमंमहावाक्यार्थभूतंसाक्षात्कृतवानित्यर्थकंव्याचष्टे ततोनेत्यादिषोडशभिः ततउक्तयुक्तेः यत्सुखंतन्न जायतेयच्चजायतेतद्दुःखमेवेतिपूर्वार्द्धार्थः ततःसुखस्यजन्मादिविकाररराहित्यात्आनंदात्माऽऽनंदरूपोहंस्यां कीदृशः सत्प्रकाशैकरूपवान् भावप्रधानोनिर्देशः सत्प्रकाशैकत्वैःरूपवान् सत्प्रकाशैकत्वानिममस्वरूपलक्षणानितद्बोधकैःसर्वमहावाक्यगतपदैरहमेवप्रतिपाद्यः स्या मितिसंभावनायांलिङ् लक्षणैक्यात्तत्त्वंपदार्थयोरैक्यंमयाबाधकादर्शनात्संभाव्यतेयद्यत्रानुपपत्तिकश्चेन्मन्यतेसस्वाशयंप्रकाशयत्विति भावः ॥ ३१२ ॥ नन्वनुपपत्त्यंतराभावेपित्वत्प्रतिपादकसदादिशब्दप्रवृत्तिनिमित्तभेदएवतवस्वगतभेदमापादयिष्यतितथाचकथंतवतत तमत्वमितिचेन्न लोकेप्यनेकपदप्रतिपाद्यवस्तुनोभेदादर्शनेनतादृशनियमादर्शनादित्याह नहीतिद्वाभ्यां नामांतरैर्भिन्नपदैःसमीरणात्

॥३६॥

ततोनजायतेकिंचित्सुखंक्वापिकथंचन॥ आनंदात्माततोहंस्यांसत्प्रकाशैकरूपवान् ॥ ३१३॥ नहिप्रकाश सुखयोःसत्तायाअपिभेदधीः॥ जायतेधीमतांक्वापिनामांतरसमीरणात्॥ ३१४ ॥ पितापुत्रःपतिर्भ्रातायथैकस्मिन्नरेपृथक्॥ शब्दास्तद्वदिमेशब्दाःसदाद्यामयिकीर्तिताः॥ ३१५ ॥ असन्नाहंभवाम्यस्मात्सच्छब्दो मयिवर्तते॥ नहिवंध्यासुतस्येवरूपंममकथंचन॥ ३१६॥ जडंनाहंभवाम्यस्मात्प्रकाशाख्यामयिस्थिता॥ घटादेरिवमेरूपंनान्यबोध्यंकथंचन ॥ ३१७॥ दुःखंनाहंभवाम्यस्मात्सुखशब्दोपिविद्यते ॥ प्रतिकूलोऽन्यशेषोवानाहिःस्त्र्यादिःसकथ्यते ॥ ३१८ ॥

प्रतिपादनात् सत्तादीनांभेदधीर्विवेकिनांनजायतेइत्यर्थः ॥ ३१४ ॥ अत्रदृष्टांतमाह पितेति दार्ष्टांतिकमाहं तद्वदिति ॥ ३१५ ॥ यदा लोकेधर्मिसमानसत्ताकेतरनिरूपितधर्मभेदोनधर्मिभेदमापादयतितदाकिमुतकल्पितेतरव्यावृत्तिरूपप्रवृत्तिनिमित्तभेदइत्याशयेनसदादि शब्दानामसदादिव्यावृत्तिपरत्वंस्फुटयति असन्नाहमित्यादिना अहमसन्नभवामिकिंत्वसद्विलक्षणः अस्मात् ल्यब्लोपेपंचमी इममर्थ मादायसच्छब्दोमयिवर्त्ततेप्रवर्त्तते असद्वैलक्षण्यंस्पष्टयति नहीति एवमुत्तरत्रापि ॥३१६ ॥ जडंनाहमिति अन्यबोध्यंपरप्रकाश्यं स्फुट मन्यत् ॥ ३१७ ॥ दुःखंनाहमिति योभावःप्रतिकूलोभवतियथाहिःसर्प्पःयोवाअन्यशेषोऽन्यार्थोयथास्त्र्यादिःससुखपदेननकथ्यतेकिंतु सद्दुःखपदार्थएव तद्वैलक्षण्यबोधनायमयिसुखशब्दःप्रवृत्तइत्यर्थः ॥ ३१८ ॥ ॥३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतंन्यायमन्यत्राप्यतिदिशति एवमिति अहमनात्माकस्यापिस्वरूपभिन्नोनभवामीतिबोधनायात्मशब्दोमयिवर्ततइतिदिशावोध्यमित्यर्थः आदिपदेनैकाद्वितीयास्थूलानण्वह्रस्वादिशब्दग्रहः एतावांस्तुविशेषः सदादिशब्दाविधिमुखेनप्रथमंबोधयित्वापश्चाद्व्यावृत्तिंबोधयंति अद्वितीयादिशब्दास्तुसाक्षाद्व्यावृत्तिप्रतिपाद्यार्थात्स्वरूपमिति ननुकियंतिपदानिविचारकालउपसंहार्याणीतिजिज्ञासापूरणायात्मानंविशिनष्टि सच्चिदानंदेत्यादि तथाचेदृशंप्रमेयंयावद्भिःपदैर्निश्चीयतेतावंतिउपसंहार्याणीतिभावः ॥ ३१९ ॥ एवंसदादिपदानांव्यावृत्तिपरत्वेनाविरोधंप्रतिपाद्याथयुक्तितोपिसदादिशब्दार्थानांभेदोनसंभवतीत्याह नप्रकाशइत्यादिना प्रकाशस्यसुखाद्भेदोनसंभवतिसुखाद्भेदेहिप्रतिकूलत्वंदुःखवतत्साधनसर्पादिवत्स्यात् अथवापरैःसुखसाधनत्वाभिमतललनादिवदन्यशेषःस्यादित्यर्थः सप्रकाशस्तु

एवमात्मादिशब्दाश्चवर्त्ततेमयिसर्वदा॥ सच्चिदानंदरूपेस्मिन्सर्वभेदविवर्जिते ॥ ३१९ ॥ नप्रकाशःसुखादन्यःप्रतिकूलस्तथाभवेत्॥ अन्यशेषोथवायद्वत्सर्प्पोवाललनादिकम् ॥ अनुकूलतमत्वेनस्वात्मनोनोभयंहिसः॥३२०॥नात्माप्रकाशरूपात्स्यादन्योसौसर्वबोधवित्॥ तथात्वेघटवत्सस्यादनात्मात्मानतादृशः॥३२१॥

भयंप्रतिकूलोऽन्यशेषोवान तत्रहेतुरनुकूलतमत्वेन तत्रानुकूलत्वंस्रक्चंदनादेःप्रसिद्धं अनुकूलतरत्वंसुखत्वाभिमतांतःकरणवृत्तेः अनुकूलतमत्वंतुतत्प्रकाशस्यात्मस्वरूपभूतस्यभासमानानन्दस्यपुरुषार्थतयातदुपपादकत्वादतोनोभयंप्रकाशेसंभवतीतिभावः ॥ ३२० ॥ ननुमास्तुसुखप्रकाशयोर्भेदस्तयोर्धर्म्यात्मातुततःपृथगस्त्वित्याशंक्यतयोरात्माभेदेऽनुमानंदर्शयित्वाविपक्षेपूर्वंप्रपंचितंदोषंप्रसंजयति नात्मेति आत्माप्रकाशरूपात्प्रकाशस्वरूपाद्भिन्नोनेतिप्रतिज्ञा तत्रकेवलव्यतिरेकिहेतुगर्भंविशेषणंसर्वेत्यादि सर्वेषांबोधानांधीवृत्तीनांप्रकाशकइतितदर्थः यत्रप्रकाशभेदाभावाभावस्तत्रनसर्वबोधवित्त्वंयथाबुद्ध्यादीत्युदाहरणं तदनुकूलंतर्कमाह तथात्वइत्यादिना तथात्वेप्रकाशभिन्नत्वेसआत्माप्रकाश्यत्वेनानात्मास्यात्यथाघटः आत्मातुतादृशोनभवतीत्यर्थः ॥ ३२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पूर्वमुक्तेप्रकाशस्यसुखादभेदेयुक्तिसुखस्यतदभेदसाधनमुखेनस्फुटयति सुखंचेति स्पष्टम्॥३२१॥ननुप्रकाशमानतादीपेनघटस्येवभिन्ने
नप्रकाशेनापिसंभवतीत्याशंक्यतथास्वीकारेदोषमाह स्वातिरेकीति स्वस्मादतिरेकोभेदोयस्यतथाभूतेनप्रकाशेनसुखंप्रकाश्यंनभवेन्नसंभ
वेत् तत्रव्यतिरेकेदृष्टांतः अहिरज्ज्वादिवदिति अहिःप्रातिभासिकत्वेनप्रसिद्धः रज्जुस्तुव्यावहारिकत्वेन तौआदीयेषांप्रातिभासिकानांव्या
॥३७॥ वहारिकाणांचतेतथातद्वत् तेषांदृश्यानांकल्पितचित्तादात्म्येनविषयतयाभानसंभवेपियोवैभूमातत्सुखमितिश्रुतेर्भूमरूपसुखस्यसर्वात्म
कस्यकल्पितत्वंनसंभवतिशून्यवादापत्तेर्निरधिष्ठानभ्रमायोगाच्चेतिभावः तस्मात्सुखमेवावबोधनं सुखप्रकाशयोरभेदएवेत्यर्थः॥३२२॥

सुखंचनप्रकाशेनव्यतिरिक्तंकथंचन॥ नह्यप्रकाशमानस्यसुखस्यसुखतेष्यते ॥ ३२२ ॥ स्वातिरेकिप्रका
शेनप्रकाश्यंनसुखंभवेत्॥ अहिरज्ज्वादिवत्तस्मात्सुखमेवावबोधनम्॥३२३॥ आत्मासुखप्रकाशाभ्यांभि
न्नोनैवकथंचन ॥ सुखप्रकाशयोर्भेदेऽनात्मताघटवद्भवेत् ॥ ३२४ ॥ आत्मानंदप्रकाशाश्चनसत्ताव्यतिरे
किणः॥ व्यतिरेकेभवेत्तेषांवंध्यासुतसमानता॥३२५॥ आनंदात्मप्रकाशेभ्यःसत्तानव्यतिरेकिणी॥ व्यति
रेकेभवेदेषाघटवन्नात्मरूपिणी॥ ३२६॥

एवंप्रकाशानंदयोरभेदेसिद्धेसाधितप्रकाशाभेदस्यात्मनःसुखादभेदःसिद्धस्तदभिन्नाभिन्नस्यतदभिन्नत्वमितिन्यायादित्याह आत्मासुख
प्रकाशाभ्यामिति प्रकाशपदंदृष्टांतार्थं यथाप्रकाशादभिन्नस्तथासुखादपीत्यर्थः प्रकाशाभिन्नसुखाद्भेदेतुजडत्वात्घटवदनात्मत्वंस्यादि
त्याह सुखेत्यादि स्पष्टम्॥३२४॥सिद्धाभेदानामात्मानंदप्रकाशानांसत्पदार्थादभेदंसाधयति आत्मानंदेति यदेवसर्वाधिष्ठानंस्वस्मिन्कल्पि
तेषुसंसर्गाध्यासेनप्रकारतयाभासमानंसत्पैरैस्तत्त्वानवबोधात्सत्ताजातिरित्यभिमतंसएवसत्पदार्थइतिसूचनायसत्तापदंप्रयुक्तं विपक्षेदंड ॥३७॥
माह व्यतिरेकइति सतोभिन्नमसदितिप्रसिद्धेरितिभावः ॥ ३२५ ॥ एवंसत्तायास्तेभ्योभेदेदुःखत्वानात्मत्वजडत्वानामापत्त्याघटादिस
मत्वापत्तिरित्याह आनंदात्मेति स्पष्टम् ॥ ३२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनात्मत्वेकोदोषइत्यतआह अनात्मत्वइति आत्माहिस्वरूपं तद्भिन्नत्वेस्वरूपबहिष्कारादसत्त्वापत्तिरितिभावः फलितमाह तस्मादिति परःपुमान्तत्पदार्थः सामानाधिकरण्येनवाक्यार्थानुभवःसूचितः ॥३२७॥ एवंचत्रिविधपरिच्छेदराहित्यादनंतपदार्थाभेदोपिसिद्धइत्याह अनंतइति अतएवसर्वाधिष्ठानत्वंममैवासीदित्याह उक्तइति उक्तेउक्तरूपे तथाचसर्वशब्दानांसर्वज्ञानानांविषयप्रदातृत्वेनाहमेवोपजीव्यइत्याह सदसदिति सदसच्छब्दौकार्यकारणवाचकौ शेषंस्पष्टम् ॥३२८॥पूर्ववाक्यार्थमनुवदन्निदमदर्शमित्यंशंकथमविषयस्यात्मनोदर्शनकर्मत्वमितिशंकांनिराकुर्वन्व्याचष्टे ततएवेति यतःसर्वेशब्दाःसर्वाणिचज्ञानानिमद्गोचरावरणनिवृत्त्यामदभिव्यक्तिसंपादनेनवा मदेकगोचराणि जडेष्वावरणकृत्याभावान्मदतिरेकेणतेषां दुर्निरूप्यत्वाच्च ततएवउपपादितसंबंधाद्वेदांतवाक्यात्तज्जन्यबोधतोवृत्तिरूपाद

अनात्मत्वेचसापिस्याद्वंध्यापुत्रसमाबलात् ॥ तस्मात्सच्चित्स्वरूपोहमानंदात्मापरःपुमान् ॥ ३२७ ॥ अनंतोदेशकालादिभेदगंधविवर्जितः ॥ उक्तेमयियतोविश्वमध्यस्तंस्रजिसर्पवत्॥ सदसद्देशकालादिशब्दप्रत्ययगोचरः ॥ ३२८ ॥ ततएवाहमात्मानंदृष्टवानस्मिबोधतः॥ अत्यंतविस्तृततमंयदर्थंदेहमागतः॥ ३२९॥ इदंयस्मादयंदेवोदृष्टवानात्मबोधतः॥ इदंद्रनामातेनाभूदानंदात्मापरःपुमान् ॥ ३३० ॥

विषयमपिआत्मानमहंदृष्टवानतोस्मिकृतकृत्योहमहोइत्यर्थः अत्रास्मीतिपदमहंपदेनाक्षेपादपिप्रतीयमानंनिरर्थकंसतिकृतकृत्यत्वेलाक्षणिकंसदाश्चर्यं व्यंजयति आश्चर्यत्वोपपादकमात्मविशेषणंविस्तृततममिति ततमंपरिपूर्णमित्यर्थः अनादिकालादारभ्यपरिच्छिन्नमात्मानंमन्यमानस्यपरिपूर्णात्मज्ञानात्किमन्यच्चित्रमितिभावः कृतकृत्यत्वोपपादकंविशेषणंयदर्थमित्यादि यदर्थमतिसंकटेप्रवेशःकृतस्तदयसिद्धमितःकिमन्यत्कृतकृत्यत्वमित्याशयः॥३२९॥ तस्मादिदंद्रइत्यादिदेवाइत्यंतंवाक्यंव्याचष्टे इदंयस्मादितिचतुर्भिः इदमस्तुसन्निकृष्टमित्युक्तेरिदंशब्दोऽपरोक्षवाचकोदर्शनक्रियाविशेषणं तथाचायंदेवआत्मायस्मादात्मबोधतःआत्मसंबंधिनोगुरुवेदांतवाक्यजन्यज्ञानादिदमपरोक्षंयथाभवतितथास्वरूपंदृष्टवान्तेनहेतुनाइदंद्रसंज्ञकःसन्आनंदात्मापरःपुमानभूद्ब्रह्मविद्ब्रह्मैवभवतीतिश्रुतेः इदंपदपूर्वकदृशधातोर्ईट्प्रत्ययेसतीदंद्रनामनिष्पत्तिर्बोध्या ॥ ३३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यव्यवहारस्तुइंद्रपदेनैवकार्यइत्याह इदंद्रमिति तमेतमिदंद्रंसंतंसुराःदेवावन्ह्याद्यादेवभाविनोमनुष्यावाइंद्रमितिपरोक्षंनामकृत्वोचिरे कथिवंतः नाम्नःपरोक्षत्वंरूपांतरकरणेनस्वरूपाच्छादनं हियस्मादेतेदेवाःप्रत्यक्षमुक्तपरोक्षविपरीतंनामग्रहंद्विषंति दृश्यतेहिमहतामाचार्या दिपदैरभिधानेप्रसादःसाक्षाद्देवदत्तादिपदाभिधानेतुद्वेषइति एतेनयदादेवाःप्रत्यक्षंद्विषन्तिकिमुततदापरमेश्वरइतिसूचितम् नारायणादि नामग्रहेतुअनेकप्रत्यक्षश्रुतिविहितेनायंन्यायः अर्थवादगतलिंगस्यश्रुतितोदुर्बलत्वादित्यवधेयं ॥ २३१ ॥ परोक्षप्रियाइति ततोदेवैःपर मेश्वरस्येंद्रपदेनव्यवहारात्तेनस्वयमपिप्रत्यक्षाभिधानद्वेषेणचवन्ह्याद्यादेवाःपूज्याःपरोक्षप्रियाःकथितान्नृभिर्विवेकिभिः व्याख्येयश्रुति गतमिवपदंप्रसिद्धिद्योतकंहिपदंचव्याकुर्वन्नैहलौकिकेषुसन्मार्गवर्तिलोकरूपेषुदेवेषुनियमत्वेनपरोक्षप्रित्वस्यानुगममाह देवव्रतमिति नि

इदंद्रंसंतमेतंतमिंद्रमित्यूचिरेसुराः॥ प्रत्यक्षंहिद्विषंत्येतेपूज्यनामग्रहंयतः ॥२३१ ॥ परोक्षप्रियास्ततस्तेनव न्ह्याद्याःकथितान्नृभिः॥ देवव्रतंसदार्येषुदृश्यतेत्वधुनान्नृषु ॥ २३२॥ पित्राचार्यादिनामानिनवदंतिनराःक्व चित्॥ एवंनार्योपिपत्यादेर्भाषंतेनामनैवहि ॥ किंतुनामांतरेणैवव्यवहारंप्रकुर्वते ॥ २३३ ॥ एवमात्माप्र वद्धोत्रकथितोत्थ्यधिकारिणः ॥शब्दप्रत्ययबोध्योयंनैवंरूपःस्वरूपतः॥ २३४॥

यमोव्रतमित्यमरः आर्येषुनृषुदेवव्रतमधुनापिदृश्यतेइत्यन्वयः॥२३२॥उदाहरति पित्राचार्येति स्पष्टम्॥२३३॥एवमैतरेयचतुर्थाध्यायंस नकाद्युपदेशविधयाव्याख्यायपूर्वोक्ततात्पर्यप्रदर्शनपूर्वकमुत्तराध्यायमवतारयति इतिहासघटकैरेवमात्मेत्यादिभिर्विंशतिश्लोकैः सन कादयोऽधिकारिणःप्रत्यूचुःभोऽत्रात्मज्ञानेऽधिकारिणःएवंतथापिशास्त्रसिद्धेनेत्यादित्रिपंचाशत्तमश्लोकप्रतिज्ञातेनाध्यारोपापवादन्या येनैतावताग्रंथेनभवद्भ्यआत्माकथितः कीदृशः शब्दप्रत्ययाभ्यांवेदांतवाक्यतज्जन्यवृत्त्यात्मकज्ञानाभ्यांविषयीकृतः अन्यथाशब्दार्थज्ञा नतादात्म्याध्यासव्याप्यशब्दप्रवृत्त्यनुपपत्तेर्भवद्भिस्तुसआत्मास्वरूपतएवंरूपोविषयरूपोनबोध्यःकिंतुवेदांततात्पर्यज्ञानद्वारेणाऽविषयत यैवावसेयःभृंगयाहिकान्यायेनतुतंकोपिनिर्देष्टुंनार्हतीतिभावः ॥ २३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुभवंतःशक्ताःसाक्षादेवतंबोधयंत्वितिशंकामालक्ष्याह्नः कोनामैनमिति एनंपूर्वप्रतिपादितंमहात्मानमद्वितीयमात्मानंउदीरितामध्यारो पापवादात्मिकांमायांविनाकोवावदेत्कोवाश्रृणुयादित्यन्वयः तस्याविषयस्यविषयतयाऽभिधानेऽप्रमाणत्वापत्तिरित्याशयेनयतोवाचो निवर्तंतइतितैत्तिरीयश्रुतिंस्मारयति अवाङ्मनसगोचरमिति केनवाक्यमत्रार्थेपठति अविज्ञातमित्यादि विजानतांतत्त्वविदामविज्ञातमिति मतं तस्याविषयत्वात् अविजानतांवुत्थ्याद्यात्मदर्शिनांभ्रांतानांमतेतुतद्ब्रह्मविज्ञातमितिप्रसिद्धं बुध्यादेर्ज्ञानविषयत्वादितितदर्थः शक्त्या ऽभिधानंतुशक्तेःशक्यनिरूप्यत्वेनदत्तोत्तरमितिभावः ॥३३५॥ विषयबोधनसामग्र्याऽविषयतत्त्वस्यतात्पर्येणबोधनमेवदुष्करतयापरमा श्चर्यमितिवुत्थ्यध्वमितिसूचयितुमाश्चर्योऽस्यवक्ताकुशलोऽस्यलब्धाश्चर्योज्ञाताकुशलानुशिष्टइतिकठवाक्यमर्थतःपठति आश्चर्योऽस्येति द्वाभ्यां वागविषयस्यवाचाबोधनादस्याद्वितीयात्मनोवक्ताऽऽश्चर्यः अतींद्रियस्यश्रवणेनश्रुताम्नायतात्पर्यावधारणरूपेणविषयीकरणा

कोनामैनंमहात्मानमवाङ्मनसगोचरम् ॥ अविज्ञातंविजानतांविज्ञातमविजानतां ॥ वदेद्वाश्रृणुयाद्वापि विनामायामुदीरिताम् ॥ ३३५॥ आश्चर्योऽस्यभवेद्वक्तावक्तिवाचामगोचरम् ॥ श्रोतापिचतथाश्चर्यःश्रृणो तींद्रियदूरगम्॥ ३३६॥ लब्धाश्चर्यतमोभूयःकुशलेनानुशासनात् ॥ आत्मनोमनसोगम्यंसाक्षात्तंकुरुतेक थम्॥ ३३७॥ ततोभवंतोयुक्तिज्ञावेदवादरतास्तथा॥ बुध्यास्वयाविमृश्यैनंसंगच्छतदिशानया॥ ३३८॥

च्छ्रोताश्रुतौलब्धृपदेनोक्तः आश्चर्यइत्यर्थः ॥ ३३६ ॥ लब्धेति आत्मनोज्ञानमेवप्राप्तिरितिसूचनायज्ञातेतिवक्तव्येलब्धेत्युक्तं कुशले नाचार्येणानुशासनादयमात्मनोलब्धासाक्षात्कर्त्तासआश्चर्यतमोऽत्याश्चर्यः वदनश्रवणयोराश्चर्यतायाःसाक्षात्कारेणफलेनैवजायमा नेनस्फुटीकरणात् अन्यथानिरर्थकवक्तृश्रोतॄणांप्रायशोदृष्टेःकाश्चर्यतेतिभावः लब्धुराश्चर्यतांस्पष्टयति मनसइत्यादि मनसोऽगम्यस्य संस्कृतमनसागोचरीकरणंचित्रमित्यर्थः॥३३७॥ ततइति ततइतोयेऽस्माभिर्वक्तुमशक्यत्वादनयादिशाविषयाऽऽत्मतत्त्वंसंगच्छतसंप्राप्नुत अस्माभिस्तुदिक्प्रदर्शनमात्रंकृतं यथारामेश्वरंप्रतियियासवेदक्षिणादिक्प्रदर्श्यतेतद्वदित्यर्थः ननुकथंतर्हितद्वयंप्राप्नुमइत्यतोयुक्तिज्ञाइति यतोभवंतोयुक्तिज्ञाःसंतिततोमननेनासंभावनांनिराकृत्यजानीतेतिभावः अपूर्वैकथंयुक्तिप्रसरइत्यतउक्तंवेदवादरताइति यथाधर्मोऽपू र्वोपिमीमांसान्यायैरवधारितस्तथायमपिनिर्धार्यतामितिभावः तथाचोक्तंवाशिष्ठे उपदेशक्रमोरामव्यवस्थामात्रपालनम् ज्ञप्तेस्तुकारणं शुद्धाशिष्यप्रज्ञैवकेवलेति ॥ ३३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मननादपिपुरस्ताद्वैराग्यदृढीकारेयत्नोविधेयइत्याहुः नचाविरक्तैरिति योग्यंयोग्येनसंबध्यतेइतिन्यायादविरक्तैःसविषयैरविषयोमहेश्व
रःकथंज्ञेयःस्यादितिभावः अर्थस्तुस्फुटः ॥ ३३९ ॥ वैराग्यमेवकथंद्रढयितव्यमतआहुः विरक्तेरपीति प्रीतिकारिणःसुखसाधनतयाम
तस्यवस्तुजातस्यसर्वस्यवस्तुनोयन्नितरांदोषावलोकनंसएवविरक्तेरुपायः सचनहिवैषयिकंनामेत्यादिनोक्तः ॥३४०॥ इत्यादिश्येति म
॥ ३९॥ हात्मानःसनकाद्याः लोकानांशोकमपहर्तुंशीलंयेषांतेतथा पश्यतामधिकारिणां अनादरेषष्ठी तान्पश्यतःपुनःप्रष्टुमिच्छतोऽनादृत्येत्य
र्थः ॥ ३४१ ॥ गतेष्विति तेद्विजाअधिकारिणःसंहृष्टमनसः दुर्लभगुरुलाभात् ॥ ३४२ ॥ एतादृशागुरवोदुर्लभाअपिमिलितायद्वैरा

नचाऽविरक्तैर्विज्ञातुंसुशक्योसौमहेश्वरः॥ तस्माद्विरक्तिंभोधीराःसंपादयतमाचिरम्॥ ३३९॥ विरक्तेरपि
चोपायउक्तोदोषावलोकनम्॥ सर्वस्यवस्तुजातस्यनितरांप्रीतिकारिणः॥ ३४०॥ इत्यादिश्यमहात्मानोलो
कशोकापहारिणः॥ तत्रांतर्दधिरेसर्वेपश्यतामधिकारिणाम्॥ ३४१॥ गतेषुतेषुसर्वेषुसनकादिषुतेद्विजाः॥
संहृष्टमनसःसर्वेइदमूचुःपरस्परं॥ ३४२॥ अहोभाग्यमहोभाग्यमस्माकमधिकारिणाम्॥ अभवन्गुरवो
येषांसनकाद्यामुनीश्वराः ॥ ३४३॥ सर्वभूतसमाएतेकामक्रोधविवर्जिताः॥ अंतर्बहिश्वरानॄणांयद्वदेषप्र
भंजनः॥ ३४४॥ परोपकारनिरताःस्वयंक्लेशसहिष्णवः॥ मौनिनःपरदोषेषुदोषलेशविवर्जिताः॥ ३४५॥
आत्मविज्ञानसंपन्नाःशरत्सागरसन्निभाः॥ निश्चलाविमलात्मानःपूर्णेंदुसमवर्चसः॥ ३४६॥

ग्यंविनाऽस्माकंज्ञानोत्पादेनक्षमावभूवुस्तद्वैराग्यमेवतावत्संपादनीयमित्याशयेनगुरुमहिमानंवर्णयंति अहोभाग्यमिति स्पष्टम् ॥३४३॥
सर्वभूतसमाइति विषमेष्वपिसर्वेषुभूतेषुसमाः प्रभंजनोवायुः॥ ३४४ ॥ परोपकारेति परदोषेषुमौनिनइत्यन्वयः स्वयंचसर्वदोषविवर्जि ॥३९॥
ताः॥ ३४५॥ अप्रतिपत्तिविप्रतिपत्तिविप्रलिप्सादिपुरुषदोषविवर्जिताइमेइत्याहुः आत्मविज्ञानेति शरदृतुकालिकसागरवदक्षुब्धाः मो
क्षधर्मेषुवृत्रेंद्रसंवादेशुद्धसात्विकतयाशुक्लवर्णत्वेननिरूपिताइतिसूचनायविशेषणंपूर्णेंदुसमवर्चसइति वर्चःपदंकांतिवाचकं ॥ ३४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतैरिति एतैरेतादृशैः अस्माकंहितायआदिष्टंउपदिष्टंबधिरान्प्रतिश्रावितंगीतमिवव्यर्थतांप्राप्तमस्मद्दोषादितिशेषः ॥ ३४७ ॥ व्यर्थता यांहेतुंफलपर्यंतबोधाजननंदर्शयंति आत्मबोधइति आत्मसाक्षात्कारःकोपिनजातःपरंतुएतेषांवचनाद्वाक्यार्थगोचरंपरोक्षज्ञानमात्रंस मुत्पन्नं तत्रदृष्टांतः अध्ययनेयथाव्युत्पन्नानामापाततः अर्थगोचरंज्ञानंयथाजायतेतद्वदित्यर्थः॥३४८॥ मधुररसानुभवहेतुरपिगुडोयथा पित्तोद्रेकिणांतिक्तानुभवंजनयतितद्वत्प्रमाजनकेनाप्येतेषांवाक्येनास्मद्दोषात्संशयोजनितइत्याहुः यष्टारइति यष्टारोयागकर्तारःभोक्ता रस्तत्फलस्येतिशेषः एतादृशावयंके उक्ताद्वितीयात्मरूपतातुनसंभाव्यतइत्याहुः अनात्मरूपिणइति इतिइत्याकारकः आपतितःप्राप्तः ॥३४९॥ भ्रमतीहेति इहतदुक्तेभ्रमतिनावतिष्ठते असंभावनामभिनयंति मुक्तात्मानःकथंवयमिति वयंकर्तृभोक्तृरूपाः नन्वहंशब्दस्यल

एतैरस्माकमादिष्टमात्मज्ञानंमहात्मभिः॥तत्सर्वंव्यर्थतांप्राप्तंबधिरेष्विवगीतकम्॥ ३४७ ॥ आत्मबोधोन कोप्यत्रसंजातोवचनात्परम्॥ज्ञानमात्रंसमुत्पन्नंवाक्यार्थेध्ययनेयथा॥ ३४८॥ यष्टारश्चापिभोक्तारोवयंके ऽनात्मरूपिणः॥इतिसंशयएवायमस्मानापतितोमहान्॥ ३४९ ॥ भ्रमतीहमनोस्माकंमुक्तात्मानःकथंव यं॥नत्वहंशब्दबोधाभ्यांलक्षिताःस्मःकथंचन॥अतोत्राप्रतिपत्तिर्नोजायतेसुदृढाद्विजाः॥३५०॥विज्ञायै वंमाहात्मनोमतिमंतःसमूचिरे॥अनुक्ताअपिचोपायंविरक्तिंज्ञानसिद्धये॥ ३५१ ॥ विरक्तावपिचोपायंदो पालोकंहिवस्तुनः॥ विचारयतभोस्तस्मात्कोदोषोत्रशरीरके॥ ३५२ ॥ इतिसंचिंत्यतेसर्वेएतान्दोषान्प्रपेदि रे॥ मिलिताहिमहात्मानःकृतात्मानोऽग्निहोत्रिणः॥ ३५३ ॥

क्षणयाशुद्धंप्रतिपद्यध्वमित्यतआहुः नहीत्यादि मुख्यार्थेऽनुपपत्तिरेवबाह्यप्रवणेचेतसिनावतरतीतिभावः फलितमाह अतइति अत्रप्रमेये अप्रतिपत्तिरसंभावना ॥ ३५० ॥ अतएवतैःसर्वज्ञैर्वैराग्यरूपउपायउपदिष्टइत्याहुः विज्ञायैवमिति महात्मानःसनकाद्याःएवंउक्तवि धामसंभावनांविज्ञायानुक्ताअपिअपृष्टाअपिज्ञानसिद्धयेउपायंविरक्तिमूचिरेइत्यन्वयः ॥ ३५१ ॥ विरक्तावपीति पूर्वार्द्धेऊचिरइत्यनुषं गः उत्तरार्धेतस्मादित्यादिः शेषंस्पष्टम् ॥ ३५२ ॥ इतिसंचिंत्येति एतान्वक्ष्यमाणान्पंचमाध्यायेनश्रुत्यर्थाभ्यांप्रतिपादितान् तेषांविचारे योग्यतासूचनायविशेषणानिमहात्मानइत्यादीनि कृतात्मानःपरिष्कृतांतःकरणाः अग्निहोत्रिणइतिवक्ष्यमाणोपयोग्यपि ॥ ३५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमेभिर्विंशतिश्लोकैःपंचमाध्यायसंगतिंप्रदर्श्यथाविद्ययासंसरतोजीवस्योपाधितादात्म्येननानादुर्दशाप्रदर्शकंपंचमाध्यायंव्याकुर्वन्पुरुषेहवाअयमादितोगर्भइत्यादिवाक्यंतावद्व्याचष्टे सायमित्यादिचतुस्त्रिंशत्श्लोकैः अत्रायमितिपदेनसंसारीउपाधितःपृथगात्मानमबुध्यमानःआहुतीनांसूक्ष्मावस्थारूपादृष्टसंपृक्तसूक्ष्मशरीरेणपरलोकगमनागमनशालिनातादात्म्याध्यासवान्जीवोविवक्षितइतिबोधयितुंपंचाग्निविद्यावाक्यप्रसिद्धांतथातेइमेआहुतीउत्क्रामतस्तेअंतरिक्षमाविशतइत्याद्यग्निहोत्रप्रकरणगतवाक्यप्रसिद्धांचाहुतिंसंपृक्तस्यगतागतिंप्रकटयतिचतुर्भिः सायंप्रातर्हुतेतेअग्निहोत्राहुतीउभे कीदृश्यौतेआहुती अप्प्रायेजलप्रधानदुग्धादिपरिणामतयाजलप्रधानेहोमानंतरंसूक्ष्मरूपेणाग्नेःसकाशादाकाशमागतेप्राप्ते तेअंतरिक्षमाविशतइतिश्रुतेरित्यर्थः ॥ ३५४ ॥ आत्मनेति पुनःकीदृश्यौतेउभे

सायंप्रातर्हुतेत्वेतेअग्निहोत्राहुतीउभे॥ अप्प्रायेसूक्ष्मतांप्राप्तेअग्नेराकाशमागते॥ ३५४ ॥ आत्मनाव्यापिनास्माकंसदासर्वत्रसंयुते ॥ असौस्वर्गायलोकायस्वाहेत्यंत्याहुतिस्तथा॥ अस्मान्गृहीत्वानिर्यातिद्युपर्जन्यधरानरान् ॥ ३५५॥

आहुती अस्माकंकर्मिणांप्रमातॄणामात्मनाजीवेनव्यापकेनसंबद्धे एकजीववादाभिप्रायेणआत्मनेत्येकवचनं अत्राहुत्योःसूक्ष्मतयाकारणाज्ञानतादात्म्येनजीवोपाधित्वंकार्याकारपरिणतयोस्तुप्रमात्रुपाधित्वमितिबोध्यम् एवमंतरिक्षगतेसायंप्रातराहुतीतथाअसौस्वर्गायलोकायस्वाहाइतिमंत्रेणहुताअंत्याअंतेप्रेतशरीरदाहकालेभवातृतीयाचाहुतिः एतास्तिस्रआहुतयःअस्मान्कर्मिणोगृहीत्वाक्रमेणपंचाग्नीनांमध्येप्रथमंद्युलोकंसोमरूपंस्वर्लोकमग्निंततःसुकृतोपभोगानंतरंपर्जन्यमेघंद्वितीयमग्निंततोवृष्टिद्वाराधरांपृथिवींतृतीयमग्निंततोन्नद्वारानरंपुरुषंचतुर्थमग्निंप्राप्नुवंतीत्यर्थः अत्राहुतीनांस्वातंत्र्याभिधानंकर्मप्राधान्यवादिकर्मिदृष्ट्यानुवादितेइमेआहुतीइत्यादिश्रुत्यनुसारेण वस्तुतस्तुकरणाभिमानिदेवानांतत्रतत्रनयनेस्वातंत्र्यंबोध्यंपंचाग्निविद्यावाक्यादिति ॥ ३५५ ॥ ॥४०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रस्वर्लोकाद्भूमिलोकंप्रतिपर्जन्यद्वारागमनेऽयमवांतरोविशेषोबोध्यइत्याह जीवइतिद्वाभ्याम् कश्चिज्जीवःक्रमेणप्रोद्भूतसुकृतदुष्कृतकः सचप्रथमंसुकृतीप्रोद्भूतसुकृतोभोगेनसुकृतक्षयेस्वर्गात्परिभ्रष्टोभवति पुनर्दुष्कृतीप्रोद्भूतदुष्कृतोयमयातनाभोगानंतरंनरकाच्चपरिभ्रष्टःस न्ततस्तदनंतरंरमणीयचरणारमणीयांयोनिमापद्यंतेकपूयचरणाःकपूयांयोनिमापद्यंतेइतिश्रुत्युक्तप्रकारेणनिजकर्मानुसारतस्तत्कालेप्रा दुर्भूतकर्मानुरासात्नानाविधानांजंतूनांयोनीःप्राप्नोति अनिच्छयास्वातंत्र्यराहित्येनेत्यर्थः ॥ ३५६ ॥ केवलसुकृतभोगवतस्तुस्वर्गा न्नरकयोनिव्यवधानंविनैवभूलोकप्राप्तिरित्याह सुकृतीति सएतंलोकमायातिइत्यन्वयः कीदृशंलोकमन्नाद्यपूरितं अन्नंचतदाद्यंचते नपूरितं ओषधिद्वारान्नंभूत्वाआद्यरूपेणभक्ष्यरूपेणभक्षकंयातीतिभावः यद्वाअन्नस्याद्याःकारणीभूताओषधयस्ताभिःपूरितं अत्ताद्ये

जीवःस्वर्गात्परिभ्रष्टःसुकृतीदुष्कृतीपुनः ॥ नरकाच्चततोभूयोनिजकर्मानुसारतः॥ नानाविधानांजंतूनांयो नीःप्राप्नोत्यनिच्छया॥ ३५६॥ सुकृतीसुकृतंसर्वंस्वर्गेलोकेऽनुभूयसः॥ वृष्ट्यासहैतमायातिलोकमन्नाद्यपूरि तम्॥ ३५७॥ उभाभ्यांपुण्यपापाभ्यामन्नेनसहमूर्छितः ॥ देहेरेतःसिचोंतःसप्रविशत्यवशःपुनः॥ ३५८॥ रज्जुबद्धोघटोयद्वत्कूपेप्रविशतिक्षणात्॥ कर्मबद्धस्तथाजंतुःपितुर्देहंसमाविशेत्॥ ३५९॥ राजभृत्यैर्यथादो षीशृंखलाबद्धगात्रकः ॥ कारागृहंप्रवेश्येतहृतसर्वस्वबांधवः॥ ३६०॥ एवंजंतुःस्वकर्माख्यशृंखलाभिःसुयं त्रितः॥ नीयतेपितृगात्रांतर्देकाकीत्यक्तबांधवः॥ ३६१ ॥

तिपाठेअत्तारश्चआद्यमन्नंचतैःपूरितमित्यर्थः ॥ ३५७ ॥ एतावताश्रुतिगतायमितिपदार्थंव्याख्यायपुरुषगर्भताप्रतिपादनोपयोगिनं पुरुषशरीरेतस्यप्रवेशमाह उभाभ्यामिति उभाभ्यांपुण्यपापाभ्यांमानुषशरीरप्राप्तिनिमित्ताभ्यांप्रयुक्तः तथाअन्नेनसहमूर्छितः मूर्छा मोहसमुच्छ्राययोरितिधातोःकर्तरिक्तः अन्नेनसहौषधिभ्योवृद्धिप्राप्तःएकलोलीभावंगतइतियावत् यद्वामूर्छितःमूढःसन्अन्नेनसहरेतः सिचोरेतसःसेचकस्यपुरुषस्यदेहेंतःसविशति अवशःपरतंत्रः ॥ ३५८ ॥ तत्रदृष्टांतमाह रज्जुबद्धइति स्पष्टम् ॥ ३५९ ॥ दृष्टांतांतरमा ह राजभृत्यैरिति दोषीकृतापराधः ॥ ३६० ॥ दार्ष्टांतिकमाह एवंजंतुरिति नीयतेईश्वरप्रयुक्तैःकरणाभिमानिदेवैरितिशेषः ॥ ३६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवेष्टव्यपितृशरीरमेवालोचनेभयहेतुतयादुःखदमित्याह अंधकूपइवेति निवीतःव्याप्तः शरीरिणःजंतोः ॥ ३६२ ॥ पितृदेहस्यकृमिगणैरंधकूपसाम्येपिवन्हिवायुकृतोपद्रवात्ततोविशेषोपीत्याह जाठरइतिद्वाभ्यां तंजंतुं कारास्थंबंधनागारगतं किंकराःराजपुरुषाः ॥ ३६३ ॥ संशोषयतीति महागिरौहिमालये अत्रतस्यजंतोर्मूर्छितत्वेपिवैराग्यायतथावर्णनमुचितमव अतोवैखलुदुर्निष्प्रपतरमितिश्रुत्यनुसारात् अतःअन्नभावदुःखेननिष्प्रपतितुंनिष्क्रमितुंशक्यमितिलुप्ततकारकश्रुत्यर्थः ॥ ३६४ ॥ अथगर्भतांसाधर्म्येणोपपादयति क्षुत्पिपासेति स्त्रीसमंस्वकंस्वीयंपितरंआस्ययोनिच्छिद्रेणअलोमकत्वेनयोनिसमानमुखच्छिद्रेणगच्छतिप्रविशति समुखाच्चयोनेर्हस्ताभ्यांचाग्निमसृजत्तस्मादेतदुभयमलोमकमंतरतोऽलोमकाहियोनिरितिश्रुतिरलोमकत्वेनसाम्येमूलं कामजार्तिमत्यागर्भार्थिन्याचस्त्रिया

अंधकूपइवाभातिपितुर्देहःशरीरिणः ॥ सर्पोपमैःकृमिगणैर्निवीतोतिभयंकरैः ॥ ३६२ ॥ जाठरोजातवेदाश्च पितुस्तंजठरंगतम् ॥ संतापयतिकारास्थंधनार्थैकिंकरायथा ॥ ३६३ ॥ संशोषयतितंप्राणःपितुर्जठरगंभृशम् ॥ व्याधितंदुर्बलंयद्वन्महावातोमहागिरौ ॥ ३६४ ॥ क्षुत्पिपासार्तिसंपन्नंपितरंस्त्रीसमंस्वकम् ॥ अन्नगर्भार्थिनंत्वास्ययोनिच्छिद्रेणगच्छति ॥ ३६५ ॥ कालःपुमान्पिताचास्यपितामातातथाभवेत् ॥ संयोगस्त्वनयोर्ग्राम्यधर्मोगर्भस्यकारणम् ॥ ३६६ ॥ जननीजठरेयावद्दुःखंसोनुभविष्यति ॥ तावदेवसमाप्नोतिजंतुर्जठरगःपितुः ॥ ३६७ ॥

साम्योपपादकंपितुर्विशेषणद्वयं क्षुत्तृषोरन्नपानकामनारूपत्वात् जीवप्रविष्टान्नस्यचगर्भवद्दिष्यमाणत्वादिति ॥ ३६५ ॥ ननुपितुःस्त्रीसमत्वेगर्भाधायकःपुमान्तद्व्यापारश्चवक्तव्यइत्यतआह कालइति कालःकलयतामहमितिस्मृतेःकालईश्वरोमायोपाधिःसर्वस्रष्टापुमान्पिताचास्यजीवस्यभवेत् तथाएवंसतिपितालौकिकोमाताभवेत् अनयोःकालपित्रोःसंयोगःसंबंधःगर्भकारणत्वेनग्राम्यधर्मसमोबोध्यइति ॥ ३६६ ॥ एवंसाधर्म्यान्नैर्गर्भतामुपपाद्यदुःखलाभेनापिसाम्यंदर्शयितुंप्रतिजानीते जननीजठरइति तावदेवनन्यूनमित्यर्थः तत्राष्टममासादौचेतनालाभेजन्मांतरस्मृत्यादिनादुःखभूयस्त्वमत्रतुदंतचर्वणादिनाधातुप्रवेशेनचतद्भूयस्त्वमितिसाम्यमेवेतिभावः ॥ ३६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवस्पष्टीकरोति मुखमेषइत्यादिना एषोन्नतादात्म्यशालीजंतुः पुरःप्रथमंमुखंप्राप्यदंतैर्भिन्नानिआत्मसंबंधीनिगात्रणियस्यसतथा भूतः मुखसंबंधिदुर्गंधेनावृतमाक्रांतंघ्राणंयस्यएवंभूतश्श्वसन्कथंचित्खेदेनगलविवरंगच्छेदित्यर्थः॥ ३६८॥ कंठविवरेक्लेशंस्फुटयति कंठइति स्वल्पमार्गेकंठेजंतुरतिदुःखितकृमिवच्चेष्टतेइत्यन्वयः तत्रहेतुतयाविशेषणानियोज्यानि श्लेष्माविलःकफव्याप्तः॥ ३६९॥ दृष्टांतमाह गरुडस्येति स्पष्टम्॥ ३७० ॥ एवंकंठप्रांतगतकफस्थानरूपकफाश्रयप्राप्तिदुःखमभिधायततोधस्तनपित्ताशयप्राप्तिदुःखंदर्शयति कंठात्कथंचिदिति योनियंत्रोपमात्योनियंत्रसमानादित्यर्थः एतेनयत्स्त्रीगर्भेप्रसवकालेदुःखमनुभूयतेतदत्रप्रवेशकालइतिसूचितम् ततोनि

मुखमेषपुरःप्राप्यदंतैर्भिन्नात्मगात्रकः ॥ मुखगंधावृतघ्राणःकथंचित्कंठमाव्रजेत्॥ ३६८ ॥ कंठेश्लेष्माविलःस्वल्पमार्गेव्याकुलितेंद्रियः ॥ कृमिवच्चेष्टतेजंतुःशक्तिहीनोतिदुःखितः ॥ ३६९ ॥ गरुडस्यमुखेमत्स्योयद्वच्चलतिसर्वतः॥ आत्मनोमुक्तिमिच्छन्सन्नेवंकंठेजनःसदा॥ ३७०॥ कंठात्कथंचिन्निर्मुक्तोयोनियंत्रोपमात्पुमान् ॥ पित्तेविष्ठारसाकारेत्हृदिदेशेपतत्यसौ ॥ ३७१ ॥ यथातैलेसुसंतप्तेत्वचमुत्पाद्यनिःक्षिपेत् ॥ श्लेष्माशयादयंपित्तमेवंपततिदुःखितः ॥ ३७२ ॥ पित्तात्प्राणाग्निसंतप्तादितश्चेतश्चधावतः ॥ मर्कटादिवदुःखानिप्राप्नोत्येषजनोत्हृदि ॥ ३७३ ॥ अधःक्वचित्क्वचिच्चोर्ध्वंक्वचित्तिर्यक्क्वचित्पुनः॥ पित्तएवैतिगतिमांस्तप्ततैलेयथाजलं ॥ ३७४ ॥ एवंपित्ताशयेस्थित्वापुनरायातिमारुतम् ॥ पुरीतद्दुर्गमध्यस्थंनाभिपर्वतनिर्गतम्॥ ३७५॥

र्मुक्तःपित्तेत्हृदिदेशेस्थितेपतति कीदृशेपित्तेविष्ठारसाकारेविष्ठाद्रवसमानाकारे ॥ ३७१ ॥ तद्दुःखेदृष्टांतमाह यथातैलइति उत्पाद्यउद्धृत्यदूरीकृत्येतियावत् पततियोगंप्राप्नोति ॥ ३७२ ॥ पित्तादिति प्राणेनउदराग्निनाचसंतप्तात्प्राणाग्न्यभिघातेनमर्कटवद्धावतश्चपित्ताद्धेतोः तंप्राप्येतिवा त्हृदिदेशेएषजनोदुःखानिप्राप्नोतीति ॥ ३७३ ॥ अधइति एतिभ्रमति ॥ ३७४॥ एवमिति मारुतंवाताश्रयं पुरीतदंत्रंतदात्मकदुर्गमध्यगतं नाभीति नाभिरूपात्पर्वतान्निर्गतं पर्वतेभ्योहिगुहामुखैर्वायुर्निर्गच्छतीतिप्रसिद्धम ॥ ३७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वास्याभिरिति तत्रान्नस्यपाकायवायुनाशोषणपूर्वकंविकीर्णभावःक्रियतेसोत्रकाष्ठतक्षणसाधनवास्याकरणकच्छेदनत्वेनोत्प्रेक्षितः यद्यप्याशयाअष्टावायुर्वेदउक्तास्तथाप्यत्रत्रयएवदर्शिताउपयोगादिति ॥३७६॥ वायुनान्नविकिरणफलंजठराग्निप्राप्तिंदर्शयति तस्मिन्निति अग्निसमस्पर्शेजाठराग्निसन्निधानादितिशेषः कालात्कंचित्कालमनुभूय ॥ ३७७ ॥ तत्रेति पाकोरूपांतरापत्तिः तेनपाकेन ततःपाकात् तस्मिन्नन्नेत्रिधाभूतेउत्तममध्यमाधमभावंगतेसतितत्रोत्तमभागेमनोरूपेणपरिणतेऽधमभागेपुरीषतांचगतेसतिमध्यमभागतःमध्यमभागरूपेणअसौजीवस्त्वगादिरूपतांगच्छतीत्युत्तरेणान्वयः अत्रान्नमशितंत्रेधाविभज्यतेइत्याद्याछांदोग्यषष्ठगताश्रुतिरनुसंधेया॥३७८॥ त्वगसृगिति तत्रायंक्रमोबोध्यइत्याह पूर्वपूर्वमिति पूर्वंप्रथममन्नरसोभूत्वाततोधातूनांमध्येपूर्वपूर्वंप्राप्यसमानानुग्रहात्समानाख्यवायुब

वास्याभिरिवसर्वांगैश्छिन्नैर्विह्वलितेंद्रियः॥ वाताशयेनिपततितृणंयद्वत्प्रभंजने ॥ ३७६ ॥ तस्मिन्नग्निसमस्पर्शेवायौरुक्षेतिदुःसहे ॥ स्थित्वाकालात्प्रयात्येषजाठरंजातवेदसम् ॥ ३७७ ॥ तत्रपाकोस्यभवतिध्रियतेनचतेनसः॥ त्रिधाभूतेततस्तस्मिन्नन्नेमध्यमभागतः॥ ३७८॥ त्वगसृङ्मांसमेदोऽस्थिमज्जारूपाणिगच्छति॥ पूर्वपूर्वंततःप्राप्यपरंपरमतोव्रजेत्॥ पूर्वमन्नरसोभूत्वासमानानुग्रहात्पुमान्॥३७९॥ एकैकस्मिन्यदत्रास्यदुःखंतद्दुःसहंभृशं॥ किमुषड्धातुदुःखानिदुःसहानिनृणामिह ॥ ३८० ॥ केशाग्रशतभागेभ्यःसूक्ष्मानाड्यःसहस्रशः ॥ अयमन्नरसोभूत्वाताभिर्धावतिवैत्वचम् ॥ शरीरव्यापिनींसर्वकेशलोमावृतांबहिः ॥ ३८१ ॥ आसांप्रवेशेगमनेनिर्गमेचत्वचस्तथा ॥ प्राप्तौभवतियद्दुःखंतत्स्मृतौमोहएतिनः॥३८२॥

लात्परंपरंव्रजेदित्यन्वयः ॥३७९॥ ननुतथाभावेप्रकृतेकिमागतमतआह एकैकस्मिन्निति अस्यजंतोरेकैकस्मिन्अत्रधातुप्रवेशेयदादुःसहदुःखंसंभाव्यतेतदाकिमुतसर्वसमुच्चयेइत्यर्थः दुःखवर्णनंतुप्रकृतमेवेतिभावः ॥ ३८० ॥ एतदेवप्रपंचयंस्त्वक्प्रवेशदुःखंस्फुटयति केशाग्रेतिद्वाभ्याम् सहस्रशःद्वासप्ततिसहस्राणिहृदयादभिनिःसृतानाड्यइत्यादिस्मृतौप्रसिद्धाःताभिस्त्वचंधावति प्रथममितिशेषः कीदृशींत्वचं शरीरव्यापिनींतथाबहिःकेशलोमावृतामिति ॥ ३८१॥ आसामिति आसांनाडीनांप्रवेशेतन्मार्गेणगमनेताभ्योनिर्गमेचतथात्वचःप्राप्तौयद्दुःखंभवतितत्स्मृतौसत्यांनोऽस्मान्प्रतिमोहोवैचित्यमेतिप्राप्नोतीत्यर्थः ॥ ३८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वचोरुधिरप्राप्तिदुःखमाह त्वचइति अयंस्पष्टः भीरूणांभयशीलानां ॥ ३८३॥ मांसप्रवेशदुःखंस्फुटयति ततोमांसमिति सुनिबिडमति घनंशाल्मलीवृक्षपुष्पसमवर्णएतीत्यनुषंगः तत्रसंभावितांप्रवेष्टुर्दशांविशेषणैर्दर्शयति मूर्छितइत्यादिना ॥ ३८४ ॥ चतुर्थधातुप्रवेश माह ततोमेदइति ततोमांसान्निपतितःसन्मेदोव्रजेदित्यन्वयः कीदृशंमेदः चूर्णेत्यादि वर्णेनगोधूमादिचूर्णसमं निपतनेहेतूवन्हिप्राणौ आयुर्वेदेरुधिरादिमध्येप्यग्निस्थितिप्रतिपादनेनवन्हेश्चलनहेतुत्वमविरुद्धं तप्यमानजलादौदर्शनात् घृतवत् घृतंयथाचूर्णंप्रविशतितद्वत् ॥३८५॥ पंचमधातुप्रवेशंदर्शयति ततःशरीरेति तदनंतरंशरीरात्मकगृहस्यस्थूणानिभान्यनेकधाषष्ट्यधिकशतत्रयसंख्ययास्मृतौगणिता न्यस्थीनिपुंगर्भस्थोजंतुर्याति कथं यथामृत्काष्ठसमूहमिति ॥ ३८६ ॥ षष्ठधातुप्राप्तिमाह अस्थामिति तेषामस्थ्नामंतःस्थितांसाररूपि

त्वचोरुधिरमायातिलाक्षारससमंहिसः॥ दर्शनेयस्यमोहोयंभीरूणामिहदृश्यते॥३८३॥ ततोमांसंसुनिबिडं शाल्मलीसुमनःसमम्॥ मूर्छितश्चक्वचिद्भीतःक्वचिद्विह्वलितेक्षणः॥३८४॥ ततोमेदोतिधवलंचूर्णकूटसमंपुनः॥ मांसान्निपतितोवन्हिप्राणाभ्यांघृतवद्व्रजेत्॥३८५॥ ततःशरीरशालायाःस्थूणाभूतान्यनेकधा॥ अस्थीनियातिगर्भस्थोमृद्यथादारुसंचयम् ॥ ३८६॥ अस्थ्नामंतस्ततस्तेषांमज्जानंसाररूपिणीम्॥ प्रयातिकाष्ठगं यद्वन्नीरमंतःशनैःशनैः॥ ३८७॥ एवंस्थितेथकालेनकामवन्हिःपितुर्यदा॥ हृदियातितदामज्जासारंमुंचति सर्वतः॥३८८॥ आमस्तकंतथापादमंगादंगाद्धिसर्वतः॥ मज्जारसोविनिर्यातिदुःसहोजनकेनसः॥३८९॥

र्णीसाररेतोरूपचरमधातुंरूपवंतंकर्त्तुंशीलंयस्यास्तांतथामज्जानंशनैःशनैर्याति किमिव काष्ठलग्नजलवत् ॥ ३८७॥ एवंजीवस्यपुंशरीरेगर्भतोपपादकंप्रवेशमभिधायतत्रतस्यरेतोरूपेणगर्भवत्स्थितिप्रतिपादकंयदेतद्रेतइत्यादिविभर्तीत्यंतंव्याचष्टे एवंस्थितेइत्यादिसप्ताऽधिकपंचाशद्भिः एवमुक्तविधयामज्जासाररूपेणजीवेस्थितेसतिकालेननिमित्तेनकामवन्हिःतापकत्वेनद्रावकत्वेनचवन्हिसमःकामःहृदिमनसियातिप्रादुर्भवति मज्जाकर्त्री ॥ ३८८ ॥ सर्वतइतिविवृणोति आमस्तकमिति अभिविधावाङ् आपादमितिच्छेदः तस्यसन्निहितप्रसवकगर्भवन्नानोपद्रवकारितांप्रपंचयितुंप्रतिजानीते दुःसहइति ॥ ३८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रदृष्टांतमाह दशमेइति ॥ ३९० ॥ दृष्टांतांतरमाह आर्द्रइति आर्द्रोद्रावणार्हरसः कोटरोवृक्षांतश्छिद्रं वह्निमितिपूर्वार्धान्वयि ॥ ३९१ ॥ तृतीयंनिदर्शनंदर्शयति यथाभिचारेति अभिचारोनामशत्रुणाकृतमदृष्टद्वारातत्शत्रुबाधकंकर्मतेनदुष्टस्यप्रकृतिविपरिणामंगतस्य दार्ष्टांतिकेमनःपदेनतदायतनंचरमधातुर्ग्राह्यः ॥ ३९२ ॥ नारीगर्भस्यचालकःप्रसूतिहेतुर्वायुः अत्रतुकामोवायुसखइत्यवांतरविशेषेपिमातुरंतरस्थिरत्वंव्यामोहकत्वंचसमानमित्याह मज्जारसइति मज्जाशब्दष्टाबंतोपि मज्जोक्तामज्जयासहेतिद्विरूपकोशात् निर्गतोद्भुतः पाररसःपारदः ॥ ३९३ ॥ तस्यव्यामोहकत्वंव्यामोहकार्यविपर्ययप्रदर्शनेनस्पष्टयति श्लेष्मणइति दृष्टांतेमधुरताकारेणपरिणाम्यज्ञानस्यकफोद्रेकःक्षोभ

दशमेमासियद्वत्स्यात्गर्भिण्यादुःसहस्तथा ॥ गर्भएषप्रथमतोजनकेनापिदुःसहः ॥ ३९० आर्द्रोवनस्पतिर्यद्वत्सहतेनहिकोटरे ॥ वह्नितथास्यजनकःसहतेनकथंचन ॥ ३९१ ॥ यथाभिचारदुष्टस्यनमनोनिश्चलंभवेत् ॥ एवंकामाग्नितापेननभवेन्निश्चलंमनः ॥ ३९२ ॥ मज्जारसोरेतइतिकामाग्निर्निर्गतःसदा ॥ स्थितिंनकुरुतेक्वापिदेहेपाररसोयथा ॥ ३९३ ॥ श्लेष्मणस्तुसमुद्रेकाद्यथामधुरतांव्रजेत् ॥ निंबादिःकामजोद्रेकान्नारीदेहस्तथासुखं ॥ ३९४ ॥ मुखंदुर्गंधनीराढ्यंचंद्रवद्भातिकामिनः ॥ अक्षिणीमलसंपूर्णेपद्मपत्रोपमेयथा ॥ ३९५ ॥ कटाक्षावामनेत्राणांनरकग्राममार्गणाः ॥ पुष्पाणीवप्रमत्तस्यकामिनोभांतिसर्वदा ॥ ३९६ ॥ नासिकाश्लेष्मणोमार्गःपयोवद्भातिकामिनः ॥ अधरःपायुसदृशोमधुरोभातिकामिनः ॥ ३९७ ॥ केशास्तमःसमाअस्यानेत्राप्यायनकारिणः ॥ मांसग्रंथीस्तनौतद्वद्धेमकुंभौसुपूरितौ ॥ अमृतेनैवनिर्भातःकामिनोनिजदोषतः ॥ ३९८

कःप्रकृतेतुकामकृतोरेतउद्रेकइति सुखमितिपदमभेदाध्यवसानेनतत्साधनेप्रयुक्तं ॥ ३९४ ॥ विपर्ययमेवप्रपंचेनदर्शयति मुखमित्यादिसप्तभिः दुर्गंधेननीरेणाढ्यंहर्षविरोधिग्लानिजननार्हं आल्हादकत्वलक्षणचंद्रसाधर्म्यानर्हमितियावत् एवमुत्तरत्रापिविशेषणभावोबोध्यः ॥ ३९५ ॥ कटाक्षाइति नरकग्रामस्यनरकसमूहस्यजनकतयासंबंधिनोमार्गणाविषलिप्तबाणाःस्मृतौदुर्गतिहेतुतयाप्रसिद्धाः एतेपितत्समाः हर्षहेतुपुष्पसमत्वंनार्हंतीतिभावः ॥ ३९६ ॥ नासिकेति पयोवत्दुग्धवत् ॥ ३९७ ॥ केशाइति तमोंधकारस्तद्वत्श्यामतयानेत्रशक्तिप्रमोषार्हाः आप्यायनंतृप्तिः मांसग्रंथीइति अमृतेनसुपूरितौइत्यन्वयः निर्भातःभासेतेइत्यर्थः ॥ ३९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदरमिति मांसलंप्रचुरमांसं तद्विपरीतंनिर्मांसं शुनांसूकराणांचोदरसमानं सदायदायदादोषोदयस्तदातदेत्यर्थः॥३९९॥स्फिजाविति कटिमांसपिंडात्मकौस्फिजौपायुरूपनद्यास्तीरसमानेपीवरेचइदंरम्यंजघनमित्याकारेणभासेतेइत्यर्थः स्फिक्शब्दःस्त्रीलिंगः॥४००॥भगंदरेति स्फुटं॥४०१॥ एवमूर्वादिकाविति ऊरूआदीऊर्ध्वदेशतयाघटकौययोस्तौतथा पादशब्देनाचऊरुप्रभृतिर्नखाग्रपर्यंतोऽपरकायोविवक्षितः॥४०२॥ नकेवलंकामोवायुसखतयापुंगर्भचालकत्वेनपुंमात्रेविविधविकारेहेतुःकिंतुपुंगर्भेणाधारीकरिष्यमाणायाःस्त्रियोपीत्याह पुरुषस्येति अमृततांअमृतवत्प्रियतां ॥४०३॥ कामोदोषःऔत्सर्गिककार्यप्रतिबंधकत्वात्विपरीतकार्यारंभकत्वाच्च यत्रयत्रैतद्वेत्वन्यतर

उदरंमांसलंचास्यानिर्मांसमथवापुनः॥ श्वसूकरोदराकारंविण्मूत्राद्यालयःपरम् ॥ भातिकामग्रहार्तस्यसदानंदस्यकारणम्॥ ३९९॥ स्फिजौपायुनदीतीरभूतेविष्ठानुलेपिते॥ पीवरेजघनंरम्यंनिर्भातइतिकामिनः॥४००॥ भगंदरसमायोनिर्मूत्रगंधविदूषिता ॥ कामिनःस्वर्गसदृशीप्रतिभातिविमोहतः॥ ४०१॥ एवमूर्वादिकौपादावस्थिस्थूणौचमांसलौ॥ स्वर्णरंभासमौभातःकामिनोनिजदोषतः॥ ४०२॥ पुरुषस्ययथाकामान्नारीभात्यमृतोपमा॥ नार्याअपितथाकामात्पुमानमृततांव्रजेत्॥४०३॥ एवंकामाग्निजेपित्तेकामिनःकुपितेसति॥ वेत्तिधर्मंनचाधर्मंरात्रिंवावासरंतथा॥४०४॥ आत्मानंचपरंचैवसुहृन्मित्रादिकंतथा॥ पश्यन्नप्यंधवत्सस्यात्शृण्वन्सबधिरोपमः॥४०५॥

त्त्वदोषत्वं यथापित्तेशंखश्वेतिमभानप्रतिबंधके यथावादग्धवेत्रबीजेकदलीजनकेइत्यनुमानमभिप्रेत्यपूर्वंमुखादौचंद्रादिभ्रमजनकत्वप्रदर्शनेनांत्यहेतोरुपपादितत्वादाद्यहेतुंस्पष्टीकुर्वन्सर्वप्रमाकरणशक्तिप्रतिबंधंप्रदर्शयन्नाह एवंकामाग्निजइति एवमुक्तविधयाविपरीतज्ञानजननेनकामाग्निजेततःप्रादुर्भूतेपित्तेपित्तवदुन्मादादिहेतौपुंगर्भेकुपितेविरुद्धकार्यमारभमाणेसतियोग्यकार्यप्रतिबंधोपिदृश्यतइतिशेषः यतःप्रमाणैर्धर्मादिज्ञानेजननीयेपितदानजन्यतइत्याह वेत्तीत्यादि ॥ ४०४ ॥ आत्मानमिति पूर्वार्द्धंपूर्वान्वयि सुहृत्प्रत्युपकारानपेक्षःमित्रंस्नेहवान् स्पष्टदोषेष्वपिनार्यवयवेषुदोषादर्शनाच्चक्षुरादिज्ञानेंद्रियशक्तिप्रतिबंधंदर्शयति पश्यन्नपीत्यादिना ॥ ४०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिघ्रन्निवेति दुर्गंधंजिघ्रन्नपि घ्राणरोगिवन्नजिघ्रतीत्यर्थः रसयन्नपिरसनयाव्याप्रियमाणोपिरसनंविनायथाकश्चिद्भवतितद्वद्दृश्यतेइति शेषः स्पृशन्नपित्वग्दोषीवभवति कर्मेंद्रियवैकल्यंस्पष्टयति वक्तीत्यादिना पंडितोपिजडोयथावक्तितथावक्तीति ॥ ४०६ ॥ आदत्तेइति कुणिर्हस्तरोगीतद्वत्संकुचितहस्तइ तियावत् शेषंस्पष्टम्॥४०७॥उदरस्येति पायुव्यापारप्रतिबंधोत्रद्विधा उदरस्याध्मानेमलविसर्गाकांक्षा जनकेसत्यपिनीरोगोप्ययंकामीनविसर्जयेदित्येकः द्वितीयस्तु अथवेत्यादिनोक्तः मुंचन्नपिमलोत्सर्गंकुर्वन्नपितत्फलशरीरमलदर्शनोत्थ वैराग्याभावान्नमुंचतीवेति ॥४०८॥ बलैश्वर्यप्रभुत्वानांप्रतिबंधंदर्शयति सप्राणइति सप्राणोबलवानपिनष्टबलोभवतिभूतिरैश्वर्यंसंपदि तियावत् तद्वानपिदरिद्रइवेति प्रभुश्चेत्यादिस्पष्टम् उदाहरणमपिप्रसिद्धं ॥ ४०९ ॥ अंतःकरणचतुष्टयव्यापारप्रतिबंधंस्फुटयति बुद्धिमा

जिघ्रन्निवघ्राणदोषीरसयन्रसनांविना॥ त्वग्दोषीवस्पृशन्वक्तिपंडितोपिजडोयथा॥ ४०६॥ आदत्तेकुणिवत्सर्वंपाणिमानपिकामभृत्॥पादयोरप्यवैकल्येपंगुवद्यातिसर्वतः॥४०७॥ उदरस्याप्यथाध्मानेपायुनानविसर्जयेत्॥ नीरोगोप्यथवाक्वापिमुंचन्नपिनमुंचति॥ ४०८॥ सप्राणोपिमृतप्राणोदरिद्रइवभूतिमान्॥ प्रभुश्चभृत्त्यवद्भातिकामग्रहसमावृतः ॥ ४०९ ॥ बुद्धिमानपिदुर्बुद्धिःसमनानिर्मनाइव॥ निरहंकारवद्भातिसाहंकारस्वरूपवान्॥ अचित्तइवचित्तेस्मिन्स्थितेकामीप्रजायते॥ ४१०॥ एवंशोच्यतमामेतामवस्थांसद्भिर्गर्हिताम्॥ प्रयातिगर्भधृक्कामीकामज्वरवशोनरः॥ ४११॥ सतदाललनांनेत्रैःपिबत्यविरतंसदा॥ कर्णाभ्यामपितामेवश्रृणोत्येकाग्रमानसः॥ ४१२॥

नपीति ॥ ४१०॥ फलितमाह एवमिति शोच्यतमांशोचितुंपश्चात्तापगोचरीकर्तुंयोग्यां अतएवसद्भिःसुधीभिर्विगर्हिताम् ॥ ४११ ॥ नन्वेवंकामेनइतरत्रसर्वेंद्रियव्यापारप्रतिबंधःकिमर्थंक्रियतेइतिचेच्छृणु महामोहोहिप्रत्यगात्मानंमोहनिगडैर्बध्वास्वयंराज्यंचिकीर्षतितेन चविवेकाद्बिभ्यताकामःप्रधानमंत्रित्वेऽभिषिक्तःसचप्रभुंमहामोहमाश्वासयन्निवेदंनिवेदयति श्रीमद्भिःकुतस्त्रस्यतेयत्रविवेकाशासपुरुषो मयावीभत्सेपिनारीदेहेसहेंद्रियैःसकलैःप्रवणःक्रियतेइतियत्प्रतिज्ञातंतत्परिपूरणायेति एतदभिप्रायेणकामिनःसर्वेंद्रियव्यापारंकामिनी संज्ञकेसंघातेदर्शयति सतदेत्याद्यष्टभिः पिबतिपेयदुग्धादिवच्चक्षुर्द्वारांतःप्रवेशयतीवेत्यर्थः तांश्रृणोति तच्छब्दस्यापिसंघातांतर्भावविवक्ष णादितिभावः एवमुत्तरत्रापिबोध्यम् ॥ ४१२ ॥ ॥४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिघ्रतीति स्फुटम्॥४१३॥स्पृशत्येनामिति आदृतः आदिकर्मणिकर्त्तरिक्तः आदरंकुर्वन्नित्यर्थः एवंज्ञानेंद्रियतत्परत्वंप्रदर्श्यकर्मेंद्रियाणां दर्शयति वक्तीत्यादिना ॥४१४॥ आदत्तइति स्फुटम्॥४१५॥पायुव्यापारनिवर्त्तितस्याशक्यत्वाद्दर्शयतिउपहासाय प्रवर्त्ततइति वायुने तिपूर्वाधान्वयि अस्मात्पायुसंबंधिनः ॥४१६॥ अंतःकरणचतुष्टयव्यापारंदर्शयति मनसेति प्रमिणोतिनिश्चिनोति॥४१७॥ चिंतयतीति योगारुरुक्षुर्विशुद्धधिषणश्चनरोयद्वद्विष्णुंचिंतयतितथाएषकामीललनांचिंतयतीत्यन्वयः ॥४१८॥ आत्मानमिति मनुतेअभिमन्यते त त्रहेतुः यतइत्यादि॥४१९॥नन्वेवंभावेकोदोषइतिचेत्तिष्टंतुश्रुतिस्मृत्यभियुक्तप्रसिद्धादोषालौकिकानेवतावदवधारयेत्याशयेननरस्यसतः

जिघ्रत्येतामयंकामीघ्राणेनाकुलितेंद्रियः॥ आस्वादयत्यमुष्याःसरसंरसनयामुहुः॥४१३॥स्पृशत्येनांसर्व गात्रैःस्पर्शेनेनादृतोहिसः॥वक्तिचैतांसुखकरींवचनेनसकामभृत्॥४१४॥ आदत्तेचतथैवेनांहस्ताभ्यामा दृतोमुहुः॥गच्छत्येनामयंकामीपद्भ्यांदेवगुरूपमाम्॥४१५॥प्रवर्ततेत्वयंकामीविसर्जयितुमप्यमूम्॥पा युनाकिंत्वशक्यत्वात्कर्मणोस्मान्निवर्तते ॥४१६॥ मनसापिस्मरत्येषललनांनिजदैववत्॥धियापिप्रमि णोत्येनामात्मानमिवयोगभृत्॥ ४१७॥ चिंतयत्येषललनांकामीविष्णुमहर्निशम्॥योगारुरुक्षुर्यद्वत्सवि शुद्धधिषणोनरः ॥ ४१८॥ आत्मानमपितामेवमनुतेकामदीपनात्॥ यतोनयाभर्त्सितोपितामेवबहुमन्य ते॥४१९॥साप्येनंकामुकंस्वस्यक्रीडामृगसमंनरम्॥नर्तयत्यनिशंदीनंनरोयद्वद्धिमर्कटम्॥४२०॥क्वचि देनंमानयतिविविधैरुपचारकैः॥भर्त्सयत्यपिकुत्रापिकर्णबाणैःसुदुःसहैः॥४२१॥

क्रीडामृगत्वलाभइत्यादीन्नारीपारतंत्र्यप्रयुक्तान्दोषान्दर्शयितुंतदुपयुक्तान्नारीदोषान्स्पष्टयति साप्येनमित्यादिषोडशभिः सानारीनर्तय तिस्वाभिप्रायानुसारेणचालयति एतेननार्यानस्त्रीस्वातंत्र्यमर्हतीत्यादिनिषेधोल्लंघित्वरूपोदोषःसूचितः ॥ ४२० ॥ तमेवदोषंस्फुटयन्नन वस्थितस्वभावतांदर्शयति क्वचिदितित्रिभिः उपचारकैः स्वार्थकः सेवाप्रकारैरित्यर्थः कर्णबाणैःकर्णवत्प्रत्यक्षपुरवशूकयुक्तबाणसमैःसुदुः सहैरत्यंतंसोढुमशक्यैर्वाक्यैरितिशेषः ॥ ४२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहेति पादत्रयेणैकंवाक्यं कापिएनंकामुकंकस्त्वंत्वंकोभवसिनजानेत्वामितीरयेदितिचतुर्थपादार्थः॥४२२॥ कुरुतेइति स्फुटम् ॥४२३॥
देहेति पादत्रयेणैकंवाक्यं कापिसुप्तंस्वकीयंपतिंनिपातयेत्घातयेदिति ॥ ४२४ ॥ एवमिति पत्यादिभिः पतिप्रभृतिप्र
पुरुषांतरेतिचतुर्भिःसाहसरूपंदोषंप्रपंचयति कापिसुप्तंस्वकीयंपतिंनिपातयेत्घातयेदिति ॥ ४२४ ॥ एवमिति पत्यादिभिः पतिप्रभृतिप्र
योज्यकर्तृभिः स्वानिष्टान्स्वस्यद्वेषविषयान् साध्वीतथात्वेनप्रसिद्धापि तथाचासतीनांकिमुवाच्यमितिभावः ॥४२५॥ तान्वेति तान्स्वा
निष्टान्अन्यैःपरपुरुषैः वाशब्देनासतीत्वंद्योत्यते स्नेहंआगताईषद्गता स्नेहस्येषद्भावंस्फुटयति क्वचिदित्यादिना॥४२६॥ साधूनपीति वि
डंवयतिमिथ्याभिशापेनोपहासयोग्यान्करोतीत्यर्थः पितरमित्यादिस्फुटम् ॥ ४२७ ॥ तस्याःसंगद्वारालोकद्वयदुःखहेतुतैवमहान्दोषइ

देहप्राणेभ्यएतेभ्योनाथत्वमधिकोमम ॥ इतिकापिवदत्येनंकाप्येनंकस्त्वमीरयेत्॥ ४२२ ॥ कुरुतेवचनंका
पिकापिनैवकरोतिसा॥ याचतेद्रविणंकापिस्वयंकापिप्रयच्छति॥ ४२३ ॥ पुरुषांतरसंसक्ताकापिसुप्तंनिपा
तयेत्॥ पतिंस्वकीयंकुत्रापिवंचयेद्वचनादिना॥ ४२४ ॥ एवंपत्यादिभिश्चान्यान्स्वानिष्टान्पुरुषानपि ॥ घात
यत्यात्मनोनारीसाध्वीत्वायतनेष्विह ॥ ४२५ ॥ तान्वान्यैर्हिबलोपेतैर्घातयेत्स्नेहमागता ॥ क्वचित्परस्यसं
केतंकृत्वान्यस्मैप्रदर्शयेत्॥ ४२६ ॥ साधूनपिक्वचिन्नारीविडंबयतिसंसदि॥ पितरंभ्रातरंपुत्रंब्राह्मणंवाबहु
श्रुतम्॥ अप्यल्पेहिस्वकार्येसावधूर्हंतिनसंशयः ॥४२७॥ संगेवध्वाभवेद्दुःखमिहजन्मनिनिश्चितम्॥ मृत
स्यनरकस्तद्वत्कोस्याःसंगंसमाचरेत्॥४२८॥ आसक्तावाविरक्तावावधूर्हंतिनसंशयः॥ आसक्तायदिसास्व
स्यतदान्यस्त्रीगमादिना॥ कुपिताविषदानादिप्रयोगेणनिपातयेत्॥ ४२९ ॥ यदान्यस्यतदास्वस्यमात्रादिद्वा
रतोनरम्॥ निपातयतिसानारीलोकद्वयभयंकरी॥ ४३० ॥

त्याह संगेइति संगेआसक्ततारूपेसति निश्चितंप्रसिद्धं नरकःप्रसिद्धःस्त्रीभावनाप्राप्तिरूपश्च ॥ ४२८ ॥ राजप्रभृतयोविरक्ताएवघ्नंति डा
किनीतुअनुरक्तैव नारीतूभयथेतिमहान्दोषइत्याह आसक्तेति तत्राद्यंस्फुटयति आसक्तायदीति यदिसानारीअसक्तास्वस्यस्वकीयाभव
तितदान्यस्त्रीगमनादिनाकुपितासतीविषादिनामारयेदिति ॥ ४२९ ॥ यदान्यस्येति यदान्यस्यपरकीयाआसक्तास्यादित्यनुषंगः तदा
सास्वकीयसंबधिद्वारेणहंतीति प्रसिद्धमेतत् व्यभिचारिणीमातृप्रभृतयोयतंतेपरपुरुषंहंतुमिति ॥४३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथस्वकीयापरकीयाभेदेनविरक्तायाविविधदुःखहेतुतांस्फुटयंस्तत्राद्यायाश्चरितमाह विरक्ताहीतित्रिभिः सास्वकलत्वेसतिविरक्ता ॥ ४३१ ॥ कार्यांतरमिति समुत्पाद्यदर्शयित्वा ॥ ४३२ ॥ जानीयादिति जानीयात्परपुरुषगमनमितिशेषः सातंस्वयंहंति अशक्ताचे दन्यैर्घातयतीत्यन्वयः ॥ ४३३ ॥ विरक्तपरकीयाचरितमाह परस्यत्विति स्फुटम् ॥ ४३४ ॥ दृष्टदोषानुपसंहरति एवमिति स्फुटम् ॥ ४३५ ॥ अनवस्थितस्वभावत्वादिभिर्दोषैः कामुकंप्रतिदुःखहेतुताननार्याएवकिंतुकामुकींप्रतिनरस्यापीत्याह यद्वदिति एतादृशदोषशालिन्या नार्याअपिदुःखहेतुत्वेननारीत्वमेतावद्दोषशालित्वंवाप्रयोजकमकामितायास्तथादुःखहेतुताऽदर्शनात् तादृशनारीत्वरहितपुरुषस्यापिस

विरक्ताहियदास्वस्यसैनंकामज्वरातुरम् ॥ एकांतेविविधैर्वाक्यैर्भर्त्सयित्वानचाव्रजेत् ॥ ४३१ ॥ कार्यांतरंस मुत्पाद्यव्रजेद्वापुरुषांतरम् ॥ एनंकामातुरंत्यक्त्वाशयनेस्वैरचारिणी ॥ ४३२ ॥ जानीयाद्यदिचेद्भर्तावलवान्नि शिसाहितम् ॥ हंतिस्वयमशक्ताचेदन्यैर्वाघातयत्यपि ॥ ४३३ ॥ परस्यतुविरक्ताचेत्सद्योमरणकारणम् ॥ ए कांतेमांयाचितवानित्युक्त्वामारयेन्नरम् ॥ ४३४ ॥ एवंनारीषुदोषाहिसंतिस्वासुपरासुच ॥ अनंताह्यनुभूयं तेकामिभिस्तेत्वहर्निशम् ॥ ४३५ ॥ यद्वन्नारीदुःखकरीकामिनःपुरुषस्यहि ॥ नार्याअपिचकामिन्याःपुमान् दुःखकरस्तथा ॥ ४३६ ॥ ततोदुःखकरःकामोननारीननरोपिच ॥ एवंविज्ञायमतिमान्कामंशत्रुमिमंत्यजेत् ॥ ४३७ ॥ संकल्पाज्जायतेकामःसंकल्पोगुणबोधनात् ॥ गुणबोधस्यनाशःस्याद्दोषाणामवलोकनात् ॥ ४३८ ॥

कामनारींप्रतिदुःखदत्वदर्शनाच्च तस्मादनन्यथासिद्धान्वयव्यतिरेकशालित्वात्तद्धेतोरितिन्यायाच्चकामएवदुःखहेतुरितिभावः ॥ ४३६ ॥ उक्तव्याप्तिदर्शनेनसंभाविताथीनिश्रुतियुक्त्यभियुक्तवाक्यानिस्मारयति ततइति तथाचश्रुतिः काममयएवायंपुरुषइत्याद्या स्मृतिरपि कामएषक्रोधएषइत्याद्या कामकिंकरतांप्राप्यजनोनोकस्यकिंकरः एकंकामंपरित्यज्यजनोसौकस्यकिंकरइत्यभियुक्तवचनंच फलि तमाह एवमिति ॥ ४३७ ॥ ननुकथंकामोहेयइत्याशंक्यतन्मूलनिकृंतनेनेतिवक्तुंतन्मूलपरंपरांतन्निवृत्त्युपायंचाह संकल्पादिति संकल्पो रमणीयत्वाध्यासः गुणबोधोरमणीयत्वप्रयोजकगुणाध्यासः दोषाणामुक्तलक्षणानाम् ॥ ४३८ ॥

१ तद्धेतोरेवास्तुहेतुत्वंकिंतेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषावलोकस्यगुणबोधविरोधित्वंहेयत्यागपूर्वकंवस्तुयाथात्म्यदर्शनेनगुणबोधमूलमोहविघटकतयादर्शयति दोषाणामिति दोषाणाम
वलोकेनमोहोविनश्यतीत्यन्वयः मोहस्यावरणशक्तिमाह जगदांध्यकृदिति विक्षेपशक्तिंदर्शयति अतत्त्वइत्यादि अतस्मिंस्तद्धर्महीनेचत
त्तद्धर्माध्यासहेतुरित्यर्थः पुनःकीदृशोमोहः तृष्णायाःविस्तृतकामस्यविटपिनोबीजसमानः एतेनकामतरोर्गुणबोधोंकुरःसंकल्पोमूलम
॥ ४६ ॥ ज्ञातआत्माचविवर्तोपादानंक्षेत्रमितिसूचितम् ॥ ४३९ ॥ ततःकिमतआह तस्मिन्निति तस्मिन्मोहेनष्टेकामःस्वयंपृथङ्निवृत्तिसाध
नयत्नानपेक्षोनश्यतिअंकुरद्वारामूलप्रयोजकबीजाभावेपादपइवेतिरागात्मककामनिवृत्तौद्वेषनिवृत्तिःसहैवभवतिनांतरीयकत्वादित्या

दोषाणामवलोकेनमोहोयंजगदांध्यकृत्॥ अतत्त्वेतत्त्वधीहेतुस्तृष्णाबीजंविनश्यति॥ ४३९॥ तस्मिन्नष्टेस्व
यंकामोनिर्मूलइवपादपः॥ विनश्यतिक्षणादस्मिन्नष्टेक्रोधोपिनश्यति॥ ४४०॥ इच्छाविघातेसत्येषक्रोधो
द्वेषाभिधोनृणाम्॥ जायतेनिच्छतःकेनक्रोधउत्पद्यतेपुनः ॥ ४४१ ॥ विवेकवह्निनादग्धेकामक्रोधेसमूल
के॥ संसारेभगवानेषआनंदात्माप्रसीदति॥ ४४२॥ कामजानामितेमूलंसंकल्पात्किलजायसे॥ संकल्पेतु
मयात्यक्तेकथंत्वंमयिजायसे॥ ४४३॥

ह अस्मिन्नित्यादि ॥ ४४० ॥ क्रोधनाशस्यकामनाशनियतत्वेउपपत्तिंदर्शयति इच्छाविघातइति इच्छाकामएवकेनचिद्विघातेप्रतिरो
धेकृतेसतिक्रोधोजायतेक्रोधरूपेणपरिणमतइत्यर्थः अनिच्छतइच्छामकुर्वतः ॥ ४४१ ॥ नन्वेवंकामेजितेकिंभवतीत्यतआह विवेकेति
कामेतिसमाहारद्वंद्वः संसारेइहैवशरीरेएषभगवानात्मामहावाक्यार्थः प्रसीदतिप्रादुर्भवतिइति एतमर्थंश्रुतिरपिदर्शयति यदासर्वेप्रमुच्यं
तेकामायेस्यहृदिश्रिताः अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुतेइति ॥ ४४२ ॥ अयमेवकामहानोपायइत्यत्रस्मृतिवाक्यंपठति कामेति ॥ ४६ ॥
उक्तोर्थः ॥ ४४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिविज्ञानेति इतिशब्देनपूर्वोक्ताकामस्यानर्थमूलतातन्निवृत्त्युपायश्वपरामृश्यते अयंपूर्वोक्तोगर्भीरेतोमयगर्भयुतः विज्ञानशून्यत्वेहेतुः
कामग्रहेति विज्ञानाभावेहेत्वंतरणाप्याह प्राचेति बृहदारण्यकेऽष्टमाध्यायेचतुर्थब्राह्मणेवाजपेयदृष्टिर्ग्राम्यधर्मेविहिता तत्रचनारीरहस्यां
गेसोमाभिषवणफलकभावनापुरुषरहस्यांगेचोपलभावनोक्तातदभिप्रायेणप्राचेतिविशेषणं तथाचप्राचाग्राव्णासोमाभिषवोपलदृष्टिवि
षयेणमेहनेनअहिनेवसर्पसमानेनदष्टोदंशफलंव्यामोहंनीतःसन्नकिंचनवेत्तिनजानातीत्यर्थः ॥४४४॥ तद्यदेत्यादिप्रथममित्यंतंव्याचष्टे
कामग्रहेतिचतुर्दशभिः उपस्थाहेरितिकर्तरिषष्ठी उपस्थाहिनाभक्षणात्दंशनादित्यर्थः मोक्तुंत्यक्तुं ॥ ४४५ ॥ आत्मनइति आत्मनःशरी

इतिविज्ञानशून्योयंगर्भीकामग्रहाकुलः॥ प्राचाग्राव्णाहिनेवात्रदष्टोवेत्तिनकिंचन॥४४४॥ कामग्रहसमा
वेशादुपस्थाहेश्चभक्षणात्॥ रेतोगर्भेणखिन्नःसन्गर्भंतंमोक्तुमिच्छति ॥ ४४५ ॥ आत्मनःसारमात्मानंस
र्वांगेभ्यःपृथक्कृतम्॥ वोढुंशक्तोयदानायंनारीयोनौतदाक्षिपेत्॥ ४४६॥ प्राचोग्राव्णोविनिर्गत्यतेजोस्या
त्मस्वरूपकम्॥ निषेक्तुर्योनिमायातिवध्वास्तद्ग्राम्यधर्मतः ॥ ४४७॥ यथाभारातुरोजंतुस्त्यक्तेभारेसुखीभवे
त्॥ गर्भसंत्यागतोगर्भीतद्वत्सुखमवाप्नुयात्॥ ४४८ ॥ ग्रहाविष्टोयथाजंतुर्ग्रहनिर्गमतःसुखम्॥ अवाप्नोति
तथागर्भीरेतसोनिर्गमात्सुखम्॥ ४४९॥ अजीर्णमशनंयद्वत्कृत्वाप्राणांतमापदम्॥ निर्गच्छतितथारेतोब
लक्षयकरंनृणां॥४५०॥अतीसारोयथानॄणांसर्वतेजोपहारकः॥रेतसोनिर्गमस्तद्वद्बलवीर्यापहारकः॥४५१॥

रस्यसारमतएवात्मानंरेतोरूपंसर्वांगेभ्यःपृथक्कृतंयदावोढुंनशक्तोभवतितदानारीयोनौक्षिपेदिति ॥ ४४६ ॥ प्राचोग्राव्णोविनिर्गत्येति अ
स्यनिषेक्तुःआत्मस्वरूपकं स्वल्पार्थेकः स्वल्पंस्वरूपंतेजोरेतोवध्वाःस्त्रियाःयोनिमायातीत्यन्वयः॥४४७॥तस्यनिर्गमंस्त्रीगर्भनिर्गमवन्मातुः
सुखत्वाभिमतहेतुतयादृष्टांताभ्यामाह यथेतिद्वाभ्यां स्पष्टम् ॥ ४४८ ॥ ग्रहाविष्टइति ग्रहःपिशाचादिः ॥ ४४९ ॥ वस्तुतस्तुरेतोनिर्गमे
महतीहानिरितिदर्शयति अजीर्णमिति अजीर्णमपरिपक्वमशनंभुक्तान्नंप्राणांतंयथाभवतितथाऽऽपदंकृत्वानिर्गच्छतितथारेतोनिर्गच्छति
अजीर्णान्नरेतसोर्निर्गच्छतोःसाधर्म्यमाह बलेत्यादि ॥४५०॥ दृष्टांतांतरमाह अतीसारइति स्फुटम् ॥ ४५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेतोनिर्गमेहानिंस्फुटयंस्तद्व्यतिरेकरूपब्रह्मचर्यफलंदर्शयति अस्येति पुंसामितिकर्तरिषष्ठी अस्यरेतसःअवस्थानतोनिरोधात् सप्तमधातुरूपरेतसओजःसंज्ञाष्टमीदशाभवति ओजोनामपीतवर्णंत्वद्गतंजीवनिवासभूतंवासिष्ठादौप्रसिद्धम् तत्फलमाह ययेत्यादि ॥ ४५२ ॥ फलांतराण्याह अस्येति अस्यरेतसःसम्यक्स्थापनेजराभावोमृत्युपरिभवोबलोत्कर्षश्चफलानिबोध्यानि ॥ ४५३॥ यएतंब्रह्मचर्येणानुविंदतितेषामेवैषब्रह्मलोकइतिश्रुतिमनुरुध्याह परलोकइति परलोकेब्रह्मचारिणांब्रह्मलोकेभवतिअधस्तान्मानुषेलोकेविपुलाकीर्तिश्चभवतितेनतेषांब्रह्मचारिणांलोकद्वयंसिद्धंभवेदिति ॥ ४५४ ॥ अस्येति अस्यरेतसोबंधनतोनिरोधविशेषात्नृणांमध्येयोगाः अर्शआ

अस्यावस्थानतःपुंसामोजोनामाष्टमीदशा ॥ भवत्ययंययाजंतुस्तेजस्वीसनहिजीवति ॥ ४५२ ॥ अस्यसंस्थापनेनृणांजरावैरूप्यकारिणी ॥ मृत्युश्चनभवेत्शीघ्रंबलंचेहननश्यति ॥ ४५३ ॥ परलोकेब्रह्मलोकअधस्ताद्ब्रह्मचारिणां ॥ कीर्तिश्चविपुलालोकद्वयंतेषांभवेत्सदा ॥ ४५४ ॥ अस्यबंधनतोयोगाःखेचरत्वंवदंतिहि ॥ ऐश्वर्यंचाष्टधानृणामणिमादिकमेवहि ॥ ४५५ ॥ यथेक्षुदंडोनिःसारःपीडितस्तद्वदेवहि ॥ पुमान्भवतिनिःसारोवधूबाहुनिपीडनात् ॥ ४५६ ॥ आत्मनश्चोद्धृतंतेजस्तस्यामेषनिषिंचति ॥ आयुर्बलकरंमूढोमोहितोमाययास्वया ॥ ४५७ ॥ एवमस्यनिषिक्तस्यरेतसोयोनिमंडले ॥ नृगर्भनिर्गमाख्यंतत्प्रथमंजन्मगद्यते ॥ ४५८ ॥

द्यच् योगविदःखेचरत्वमाकाशगमनक्षमत्वंप्राप्नुवंतितथाऽणिमाद्यैश्वर्यंव्रजन्तीति ॥ ४५५ ॥ एवंव्यतिरेकद्वारासूचितांरेतोविसर्गेहानिंसाक्षादप्याह यथेक्षुदण्डइति यथापीडितइक्षुदंडोनिस्सारोभवतितद्वत्पुमान्वधूबाहुनिपीडनान्निःसारोभवतीत्यन्वयः ॥ ४५६ ॥ कथमित्यतआह आत्मनइति आत्मनःउद्धृतंप्रगल्भं उद्धृतमितिपाठेअंगादंगान्निःसृतं आयुर्बलकरमपितेजएषमूढोविपरीतदर्शीतस्यांवध्वांनिषिंचतित्यजति यतःस्वाश्रितमाययामोहितआवृतइति ॥ ४५७ ॥ एवमिति रेतसःतत्संपिंडितजीवस्य वक्ष्यमाणजन्मद्वयापेक्षयाप्रथमंजन्मबोध्यमिति ॥ ४५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्स्त्रियाइत्यादिभवतीत्यंतंव्याचष्टे योनावित्यादिसप्तभिः योनौगतएषजंतुर्नानाविधाःसहस्रशोवस्थाःप्राप्नोतीत्यन्वयः कीदृशीरवस्थाः दुःखशोकानांसहस्रैःप्रत्येकंव्याप्ताइतिशेषः वीप्सायांशस् पुनःकीदृशीःगर्भोपनिषदिप्रोक्ताःगर्भोपनिषदुक्तासुअवस्थासुकाश्चित्संगर्भभावेवर्णिताः स्त्रीगर्भांतर्भोग्यास्तुइतोयेनवमश्लोकमारभ्यवक्ष्यंतेशुक्रशोणितसंयोगानंतरंअग्निपित्तवाय्वाशयक्रमेणत्हृदयदेशप्राप्तिपर्यंतभवास्तुइहैवानुसंधेयाः एतेनमातृशरीरतादात्म्यापत्त्यास्तनादिवत्तांगर्भोनहिनस्तीतिसूचितम्॥४५९॥पतिर्जायांप्रविशतिगर्भोभूत्वासमातरं तस्यांपुनर्नवोभूत्वादशमेमासिजायतेइतिमंत्रमर्थतःपठन्जायायाःपतिपाल्यत्वंभावयितव्यापदार्थमाह यस्मादिति यस्मादेषगर्भभृत्गर्भाधायकःपुमान्गर्भरूपेणवधूगर्भेप्रविशतिअतएवहेतोरियंजायारक्षणीयायतआत्मनःआत्माभिमानविषयशरीरसारस्यपुमंशस्यरक्षि

योनौनानाविधावस्थादुःखशोकसहस्रशः॥ गर्भोपनिषदिप्रोक्ताःप्राप्नोत्येषसहस्रशः॥ ४५९ ॥ यस्मादेषवधूगर्भेगर्भरूपेणगर्भभृत्॥ प्रविशत्यतएवेयंरक्षणीयात्मरक्षिका॥ ४६०॥ वस्त्रैर्धान्यैश्चवसुभिर्दोहदाकांक्षितैरपि॥ प्रदानेनतथान्यैश्चयानैर्नानाविधैस्तथा॥ ४६१ ॥ स्नानशय्यासनाद्यैश्चव्यापारोपरमैरपि॥ औषधादेश्चसेवातोदुष्टस्यचविवर्जनैः॥ ४६२॥ अपिलोकेनयोदृष्टउपकारकरेजने॥ उपकारकरोदृष्टोदुर्जनोपिचवैजनः॥४६३॥ इयंचोपकरोत्यस्यगर्भिणोगर्भधारणात्॥ यतोस्यदुःखदंरेतःस्वात्मन्येवानयाधृतं॥४६४॥

केति॥४६०॥कैःसाधनैरक्षणीयाऽतस्तानिदर्शयति वस्त्रैरितिद्वाभ्यां वसुभिर्धनैर्दोहदाकांक्षितैर्दोहदोगर्भलक्षणेअभिलाषेइतिहैमः तथाचदोहदेनचतुर्थमासादौत्हृदयदेशगतगर्भप्रयुक्तगर्भिणीसंबंध्यभिलाषेणविषयीकृतैःपदार्थैरित्यर्थः तद्दानेहिदोषउक्तःसुश्रुते येषुयेष्विन्द्रियार्थेषुदौत्हृदेचावमानना प्रजायेतसुतस्यार्तिस्तस्मिंस्तस्मिंस्तदिंद्रियेइति दौत्हृदेउक्तविधयाद्वित्हृदयगर्भिणीछायां द्वित्हृदयशब्दस्य दुत्हृद्भावःपृषोदरादित्वाद्विति शेषंस्फुटम्॥४६१॥स्नानेति उपरमोनिवृत्तिर्दुष्टस्यापथ्यस्य॥४६२॥तस्याःपालनंन्याय्यमपीत्याह अपिलोकइति लोकेऽयंनयोन्यायःमर्यादेतियावत् दृष्टः कोसौनयः यद्दुर्जनोपिजनःउपकारकरेजनेउपकारकरोदृष्टइति ॥ ४६३ ॥ तंनयंप्रकृतेयोजयति इयमिति इयंजाया अस्यंगर्भिणःरेतोगर्भवतः ॥ ४६४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमेवमंत्रार्थहेतुतयास्मारयति अप्यस्येति अस्यगर्भिणीजायाजननीभवतीत्यन्वयः तत्रहेतुस्तत्प्रवेशतइत्यादि ॥ ४६५ ॥ तंस्त्रीत्यादिविभर्तीत्यंतंव्याचष्टे निषेकेति निषेकोगर्भाधानं आर्तवंरजःतेनैकतांतादात्म्यंगतंपुमंशमितिशेषः दधातिधारयतिपोषयतिचेत्यर्थः ॥४६६॥ श्रुतौस्त्रीकर्तृकगर्भधारणोक्त्यासूचितानिदुःखानिवक्तुमुपक्रमते योनिप्रवेशइति योनिःप्रवेशसाधनद्वारंयस्यतत्तथातस्मिन्जठरेतानि दुःखानिपोषयंत्याजनन्याअन्येनवादुर्निवार्याणीतिभावः ॥ ४६७ ॥ तद्दुःखनिवृत्तौकउपायइतिचेत्ब्रह्मज्ञानमेवेत्याह एतदिति एतद्दुःखंगर्भदुःखं सर्वोमुमुक्षुःब्रह्मज्ञानाधिकारलब्धयेचधर्मंकरोतीत्याह करोतीति अव्यग्रोऽनलसः ॥ ४६८॥ किंविधंगर्भदुःखमतआह दुः

अप्यस्यजननीजायागर्भिणस्तत्प्रवेशतः ॥ यस्मात्पुनर्नवोभूत्वातस्यामेषप्रजायते ॥ ४६५॥ निषेककालमारभ्यस्वार्तवेनैकतांगतम् ॥ स्वदेहवद्दधात्येषायावद्योनिविनिर्गमम् ॥ ४६६॥ योनिप्रवेशेजठरेकृमिविष्ठादिदूषिते ॥ अनुभूयातिदुःखानियोनिद्वाराद्बहिर्व्रजेत् ॥ ४६७॥ एतद्दुःखभयात्सर्वोब्रह्मज्ञानंसमिच्छति ॥ करोतिधर्ममव्यग्रःशास्त्रोक्तंसर्वदापुमान् ॥ ४६८ ॥ दुःखंहिमरणेनॄणांनरकानुभवेतथा ॥ प्रसिद्धंतत्कोटिकोटिगुणितंयोनियंत्रके ॥ ४६९ ॥ निर्गमश्चप्रवेशश्चमरणार्तिशतैःसमः ॥ योनौमातुरुदरेवासोनरकावासतोधिकः ॥ ४७० ॥ तत्रदुःखान्यनंतानिप्राप्यंतेदेहधारिभिः ॥ उक्तान्यपिहियान्यत्रसंमोहंजनयंतिनः ॥४७१॥ विष्ठामूत्रगृहेवासात्पूयाऽसृक्चर्चितांतरे ॥ कफपित्तादिचित्राढ्येमांसभित्तौसुदुःसहे ॥ ४७२ ॥ कृमिसर्पशताकीर्णेव्याधिवृश्चिकपूरिते ॥ मातृप्राणमहावातविनिःसारितबंधने ॥ ४७३ ॥

खमिति प्रसिद्धमितिपूर्वान्वयि ॥ ४६९ ॥ निर्गमश्चेति तत्रेतिशेषः आर्तिःपीडा ॥ ४७० ॥ तत्रेति तत्रमातुरुदरे अत्रआधानकालेपि संमोहंविव्हलतां ॥ ४७१ ॥ गर्भदुःखोत्कर्षंसंभावयति विष्ठेति विष्ठामूत्रगृहेजनन्युदरेवासात्यद्दुःखंतदिदंदुःसहमितितृतीयेनान्वयः तस्यदुष्टगृहसाम्योपपादकानिविशेषणानिदश पूयासृग्भ्यांचर्चितंलिप्तंअंतरंमध्यंयस्यतस्मिन् नानावर्णकफादिधातुमयैश्चित्रैराढ्ये मांसमयीभित्तिःकुड्यंयस्यतस्मिन् अतएवसुदुःसहे ॥ ४७२ ॥ कृमीति उदरकृमयएवसर्पास्तेषांशतैराकीर्णे व्याधयएववृश्चिकास्तैःपूरिते मातृप्राणमहावायुनाविनिःसारितानिचालितानिबंधनानिनाडीरज्जवोयस्यतस्मिन् तृणांगारतुल्येइतियावत् ॥ ४७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंतरिति अंतर्वन्हिर्जाठरोयस्यातएवार्धदग्धेक्षुत्कालेउदरदाहात् संकीर्णःसंकुचितःस्वस्यगर्भस्यावकाशोयत्रतस्मिन् कीदृशंदुःखं विवेकिनांश्रवणमननशालिनांप्रसिद्धंनिश्चयगोचरः विशेषतस्तुयोग्यनुभवगम्यंतदित्याह स्मर्यतेइति जातीःपूर्वजन्मानिस्मरंतीतिजातिस्मरायोगिनस्तैरिति ॥४७४॥ अस्माभिस्तुवर्णयितुमशक्यानिगर्भदुःखानीत्याह गर्भेति दिङ्मात्रमुपलक्षणमात्रं ॥ ४७५ ॥ गर्भोपनिषदेति स्फुटम् ॥ ४७६ ॥ तत्रप्राधान्येनकानिचिद्दुःखसाधनान्यनुवदति अत्रेति अत्रगर्भे अज्ञानंमूर्छा पूर्वंप्रथमं अष्टौमासानितियावत् कीदृगज्ञानं सर्वाणिदुःखानिकरेयस्यहस्तामलकवत्स्पष्टदुःखं मूर्छाहिदुःखावधिः क्षुदिति स्वस्यमातुश्चक्षुत्पिपासाभ्यांजातःसंतापः अनीश्वरत्वमसामर्थ्यं॥४७७॥अनेकेति भवोजन्म नवममासेस्मृत्वाहिएवंवदति आहाराविविधाभुक्ताःपीताश्वविविधाःस्तनाः मातरोविविधादृष्टाःपितरःसुहृदस्तथा यदियोन्याःप्रमुच्येयंतत्प्रपद्येमहेश्वरमिति जनन्यादेति संबाधःपीडावक्ष्यमाणा॥४७८॥ अथजननीदुःखंजननकालेजायमानजंतुदुःखंचस्फुटयितुंसोयएवेत्यादिवाक्यगतजन्मपदार्थमाह एवमित्यादिसप्तभिः एवंनानाविधैर्दुखैःपरिभूतमेनंप्रभंजनोवहिर्द्वारंनयतीतिपष्ठेनान्वयः कलिलादीति एकरात्रेणकलिलंसप्तरात्रेणवुद्बुदमर्धमासेनपिंडंमासेनकाठिन्यंमासद्वयेनशिरस्तृतीयमासेनपादप्रदेशश्चतुर्थेनांगुलीजठरकटिप्रदेशाःपंचमेनपृष्ठवंशःषष्ठेनमुखनासिकाक्षिश्रोत्राणिसप्तमेनजीवसंयोगोअष्टमेनसर्वांगपरिपूर्तिर्नवमेनज्ञानपूर्णतयापूर्वजातिस्मृतिरितिगर्भोपनिषदुक्तप्रकारेणसंपन्नाःपरिपूर्णाअवयवायस्यतमिति ॥ ४७९ ॥

अंतर्वन्हावर्धदग्धेसंकीर्णस्वावकाशके॥ सुदुःसहमिदंदुःखंप्रसिद्धंहिविवेकिनां ॥ स्मर्यतेपिचकैश्चिद्धिनरैर्जातिस्मरैरिह॥ ४७४ ॥ गर्भदुःखान्यनंतानिनशक्यानिकथंचन ॥ वक्तुंजन्मशतेनापिदिङ्मात्रमुदितंतव ॥ ४७५ ॥ गर्भोपनिषदाप्येवंदिङ्मात्रंतस्यकथ्यते ॥ साकल्येनचकोनामवक्तुमीष्टेकथंचन॥४७६॥ अत्राज्ञानंभवेत्पूर्वंसर्वदुःखकरंनृणां ॥ क्षुत्पिपासोत्थसंतापोनीश्वरत्वंचदेहके ॥ ४७७॥ अनेकभवदुःखानांस्मृतिश्चातीवदुःसहा ॥ जनन्याअपिसंबाधःसर्वपापकरोहिसः ॥ ४७८॥ एवंनानाविधैर्दुःखैःपरिभूतंप्रभंजनः॥ कलिलादिक्रमेणैवसंपन्नावयवंनरम्॥ ४७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यक्तेति त्यक्तंगर्भासनंकुंडलीकृतपृष्ठग्रीवत्वेसतिसंकुचितपाणिपादत्वेचसतिकुक्षिन्यस्तशिरस्कत्वरूपंयेनसतथातं कालेप्रसूतिसंनिधि कालेजरायुरूपेणपटेनवर्जितंत्यक्तमिति ॥ ४८० ॥ पाणिभ्यामिति भेदायेतिभाववचनाश्चेतितुमर्थेघञ् तथाचपाण्यादिभिर्जननीजठरभेदायजननीजठरंभेत्तुमिवांतःसमुत्थितमुद्यतमित्यर्थः ॥ ४८१ ॥ कुक्षाविति पुनःकीदृशं जननीकुक्षिहृदययोनियंत्रेषुअनियतभ्रमणं कपिसममर्भकंस्वल्पशरीरम् ॥४८२॥ स्वशरीरइति पुनःकी० स्वशरीरेस्वशरीरमध्येविनिःक्षिप्यकृतमधोदेशेमस्तकंयेनसतथातं विनिःक्षेपकर्मतापिमस्तकस्यैव जननीमित्यादिस्फुटम् ॥ ४८३ ॥ विक्रोशंतमिति सर्पेणग्रस्तमंडूकवद्भृशंविक्रोशंतम् द्वाराद्बहिर्बहिर्द्वारं नयते

त्यक्तगर्भासनंकालेजरायुपटवर्जितम् ॥ इतश्चेतश्चधावंतंमंडूकसदृशंशिशुम् ॥ ४८० ॥ पाणिभ्यामपिपादाभ्यांगात्रस्यचलनेनच ॥ जननीजठरस्यांतर्भेदायेवसमुत्थितम् ॥ ४८१ ॥ कुक्षौकदाचिद्धावंतंकदाचिद्धृदयेपिच ॥ जनन्यायोनियंत्रेपिमर्कटोपममर्भकम् ॥ ४८२ ॥ स्वशरीरेविनिःक्षिप्यकृताधोदेशमस्तकम् ॥ जननींबहुधाक्लेशैःक्लेशयंतंजुगुप्सितम् ॥ ४८३ ॥ विक्रोशंतंचसर्पेणग्रस्तमंडूकवद्भृशम् ॥ बहिर्द्वारंनयत्येनंभुजगोमूषकंयथा ॥ ४८४ ॥ क्रकचाग्रसहस्रेभ्यःकर्कशाद्योनियंत्रकात् ॥ स्वल्पच्छिद्राद्विनिष्क्रम्यभूमौपतति कीटवत् ॥ ४८५ ॥ व्रणेभृशंप्रकुपितेसकीटेयादृशीव्यथा ॥ ततोधिकतमास्त्रीणांयोनियंत्रेगतेर्भके ॥ ४८६ ॥ यद्वदंतःस्थितेसर्पेजठरस्यव्रणेभवेत् ॥ दुःखंतद्वद्गर्भिणीनांगर्भधारणतोभवेत् ॥ ४८७ ॥ पूतिव्रणविभेदेन सर्पादेर्निर्गमेहियत् ॥ सुखंभवतिनारीणांगर्भमोक्षेपितत्सुखम् ॥ ४८८ ॥ मलमूत्रनिरोधेनदुःखंयावन्नृणांभवेत् ॥ ततोधिकतमंदुःखंस्त्रीणांगर्भस्यधारणे ॥ ४८९ ॥

द्विकर्मकत्वं ॥४८४ ॥ क्रकचेति क्रकचःकाष्ठविदारणसाधनम् स्फुटम् ॥४८५॥ जननीसंबाधंस्पष्टयति व्रणइत्यादिदशभिः प्रकुपितेपरिपाकातिशयंगतेव्रणेसकीटेकीटव्याप्तेसतियादृशीव्यथाभवति ततइत्यादिस्फुटं ॥४८६॥ गर्भधारणदुःखेदृष्टांतमाह यद्वदिति जठरस्यांतर्व्रणे सर्पेस्थितेसतियद्वद्दुःखमित्यन्वयः ॥४८७॥ व्यतिरेकेणापितदाह पूतीति पूयपूरिततयादुर्गंधिव्रणस्यविभेदेनविदारणेनततःसर्पादेः कीटस्यनिर्गमेयत्सुखंदुःखाभावोभवतितन्नारीणांगर्भमोक्षेपीति ॥ ४८८ ॥ दृष्टांतांतरमाह मलेति ॥ ४८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवव्यतिरेकेणाह सुखमिति तयोर्मलमूत्रयोः ॥ ४९० ॥ अभूतोपमयागर्भप्रतिबंधदुःखंसंभावयति विंशतीतिद्वाभ्याम् श्वसन्श्वासयुतः परिणाहोविशालता ॥ ४९१ ॥ धारणंप्रतिबंधः तस्यतादृशकृमेः ॥ ४९२ ॥ जनन्याःप्रसवदुःखमभिनयति विनिर्गमेइति तस्य तादृशकृमेरस्माकंपुरुषाणांपायुमार्गाद्विनिर्गमेयावद्दुःखमापतेत्प्रसज्येतततावद्गर्भिण्याःप्रसवेइत्यर्थः ॥ ४९३ ॥ जायमानजंतोर्दुःखंस्फुटयति षोडशांगुलकेति षोडशांगुलकंछिद्रंमध्यावकाशोयस्यतादृशंवर्त्तुलंकंकचंयदिभवेत्तन्मध्येनचास्माकंनिर्गमोभवेत्तत्कालीनदुःखसमंजायमानस्यदुःखमिति ॥ ४९४ ॥ गर्भदुःखवर्णनमुपसंहरति एवमिति समातृकस्यमात्रासहितस्य गर्भांतर्गर्भमध्ये निःसरणेग

सुखंयथाविसर्गेस्यात्तयोश्चिरनिरुद्धयोः॥ गर्भिण्यागर्भमोक्षेपितथातज्जायतेसुखं॥ ४९० ॥ विंशत्यंगुलमात्रश्चेद्दीर्घःसास्थिःकृमिःश्वसन्॥ वितस्तिमात्रोविस्ताराक्तावांश्चपरिणाहतः ॥ ४९१ ॥ अस्माकंजठरे यावत्तस्यावस्थानतोभवेत्॥ दुःखंतावद्भवेत्स्त्रीणांगर्भधारणतःसदा ॥ ४९२॥ विनिर्गमेपायुमार्गाद्यावदस्माकमापतेत्॥ दुःखंतस्यभवेत्तावद्गर्भिण्यागर्भमोक्षणात्॥ ४९३ ॥ षोडशांगुलकच्छिद्राद्वर्तुलात्क्रकचाद्यथा॥ निर्गमेनोभवेद्दुःखंतथाजंतोश्चगर्भतः॥४९४॥ एवमेतदनौपम्यंदुःखंजंतोःप्रजायते॥ समातृकस्य गर्भांतस्तद्वन्निःसरणेपिच ॥४९५॥ एवमेषविनिष्क्रांतोलोकसंततिहेतुतः॥ गर्भात्स्वदर्शनेनैवपितुरानंददोभवेत्॥ ४९६॥ तंकुमारंपिताजातमंकेवास्वस्यवाभुवि॥ संस्थाप्यजातकर्मादिकुरुतेहृष्टमानसः॥ ४९७॥ यदिदंसक्रियाजातंकुरुतेस्वकुमारके॥ तत्सर्वंस्वस्यजनकःकुरुतेनात्रसंशयः॥ ४९८॥

र्भान्निर्गमे ॥ ४९५ ॥ सोयएवेत्यादिप्रतिनिधीयतेइत्यंतंव्याचष्टे एवमेषइति एषगर्भस्थःपितुरात्मागर्भाद्विनिष्क्रांतःप्रादुर्भूतः किमर्थं लोकसंततिहेतुतःलोकानांसंतत्यैप्रवाहाविच्छेदाय अतएवसःस्वदर्शनेनपितुरानंददोभवेदिति ॥ ४९६ ॥ तंकुमारमिति पितातंजातंकुमारंस्वस्यांकेभुविवासंस्थाप्यसंस्कुरुतेइति ॥ ४९७ ॥ यदिदमिति यदिदंसक्रियाणांसंस्काराणांजातंवृंदं श्रुतिगताग्रपदद्वयमध्येप्रथमाग्रपदसूचितंगर्भसंबंधियच्चजन्मकालवाचिद्वितीयाग्रपदोत्तराधिपदसूचितंजन्मोत्तरभावितत्सर्वंसंस्कारजातंस्वस्यैवजनकःकुरुते संघातादात्मनः पृथग्भावाज्ञानादित्युक्तं ॥ ४९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रेस्वपदप्रयोगेहेतुतयापतिर्जायामित्याद्युक्तमंत्रार्थंस्मारयति यस्मादिति सएषपिताविनियोक्ष्यमाणस्यसंस्कारान्संस्कारफलंविनियोगंदर्शयन्पितृकार्यकरत्वरूपंपितृप्रतिनिधित्वंस्पष्टयति पौत्रादिनेति पित्राकार्याप्रजासंततिमेवस्तुतःपौत्रादिरूपेणतनुतेइत्यर्थः॥४९९॥ स्वर्गस्यापीति पुत्रःसन्मार्गवर्ती अयंलोकःपुत्रेणजय्यइतिश्रुतिमनुरुध्याह किंचेति विद्याकर्मपुत्रैर्जय्यानांदेवपितृमनुष्यलोकानांमध्ये

॥५०॥ ऽस्यमनुष्यलोकस्यकारणंसाधकःपुत्रः तत्रहेतुः तस्येत्यादि विजयोवशीकारः एतेनएतल्लोकजयायपुत्रोनमोक्षाय नप्रजयानधनेनेत्यादिश्रुतिविरोधादितिसूचितम् एतदिति एतन्मातृतोजन्मपितृजन्मापेक्षयाद्वितीयंजन्म तृतीयंतूत्तरत्रवक्ष्यते॥५००॥ एतादृशंजन्मलब्ध्वा परमपुरुषार्थःसाधनीयोनवृथाक्षुद्रकामायवंचनीयमितिप्रसंगसंगत्यादर्शयति अनेनेति अनेनमानुषेणजन्मनाइतरस्यपामरस्यापिस्वर्गोगम्यतेबुध्यतेसत्संगादिभिरित्यर्थः इतरःपामरोभिन्नइतिविश्वः यद्वास्वर्गःपरलोकःअनास्थायोतिअपिशब्दात्स्वस्यगम्यतेअनुमीयते

यस्मात्पुनर्नवोभूत्वाजायायांजायतेहिसः॥ पौत्रादिनाप्रजातंतुरनेनचवितन्यते॥ ४९९॥ स्वर्गस्यापिभवेद्धेतुःपुत्रःकिंचास्यकारणम्॥ लोकस्यतस्यविजयःप्रजासंततितोयतः॥ एतदस्यभवेज्जन्मद्वितीयंपितृजन्मतः॥ ५००॥ अनेनजन्मनास्वर्गइतरस्यापिगम्यते॥ दुर्लभंवतमानुष्यंजन्मकोटिशतैरपि॥ अपिदेवाइदंजन्मसमिच्छंतिहिसर्वदा॥ ५०१॥ तत्रापिभारतेवर्षेभवेच्चेदधिकारकृत्॥ अचिकित्सस्यभैषज्यंभवेद्दोषाष्टकस्यहि॥ ५०२॥

इतरश्चेतिपाठेस्वर्गोलोकइतरश्चलोकोलभ्यतेइत्यर्थः सर्वलोकसाधनमिदंजन्मेतिभावः दुर्लभमित्यादिस्फुटं अपिदेवाइति देवाअपीदंसमिच्छंतीत्यन्वयः वस्तुतस्तुपुण्येभ्यःपुण्यानिसंतिकर्माणिकर्तुमेवपित्रापुत्रःप्रतिनिधिःक्रियतेइतिश्रुत्यंशार्थंस्फुटयितुमाह अनेनेति अनेनपितुरात्मभूतस्यपुत्रस्यजन्मनासत्कर्महेतुनाइतरस्यपितुरपिस्वर्गोलक्ष्यतेकिमुतस्वस्य अत्रचपुण्यान्येवविधेयानीत्याहुः दुर्लभमित्यादिना॥ ५०१॥ तत्रापिअंतर्भूतसर्वकर्मफलंसर्वानर्थनिवृत्तिसाधनंब्रह्मात्मविज्ञानमेवसंपाद्यं नचेदवेदीन्महतीविनष्टिरितिश्रुतेरित्याह तत्रापीति अधिकारंसाधनचतुष्टयंकरोतिसंपादयतितथाईदृशंजन्मचेत्स्यात्तदाअचिकित्सस्यदुष्करापनयनसाधनस्यदोषाष्टकस्यसंसारज्वरोपद्रवाष्टकसमस्यवक्ष्यमाणस्यभैषज्यंब्रह्मविद्याद्वारानिवृत्तिसाधनंभवेदिति॥ ५०२॥ ॥५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषाष्टकंदर्शयति इच्छेति मोहोऽविद्या देहिनांत्रैगुण्याभिमानिनां ॥ ५०२ ॥ तत्रेच्छानुगमंदर्शयति सात्विकाइति ॥ ५०४ ॥ द्वेषा नुगममाह विषयानित्ति शुद्धानूसज्जनान् ॥ ५०५ ॥ भयानुगमंस्फुटयति सात्विकस्येति मोहात्प्रमादात् ॥ ५०६ ॥ सात्विकस्यात्मन इति सात्विकस्यात्मनोऽज्ञानंवर्तततेजिज्ञासादर्शनादितिशेषः ॥ ५०७ ॥ क्षुत्तृण्निद्रानुगममाह क्षुदिति एकरूपतःसमानरूपेणसात्विक त्वादिप्रयुक्तविशेषनैरपेक्ष्येणेतियावत् विण्मूत्रबाधांस्थावरपर्युदासेनाह स्थावरेति ॥ ५०८ ॥ वस्तुतःस्थावरेष्वपिविण्मूत्रबाधानुगम इत्याह अथवेति ध्रुवानिश्चिता निर्यासश्चिक्कणवृक्षरसोगुग्गुलुप्रभृतिः ॥ ५०९ ॥ पूर्वोक्तमनुवदन्दोषाष्टकजयसाधनंदर्शयति इतीति ब्र

इच्छाद्वेषोभयंमोहःक्षुत्तृण्निद्रातथैवच ॥ विण्मूत्रबाधाचेत्येतदचिकित्स्यंहिदेहिनाम् ॥ ५०३ ॥ सात्विका मोक्षमिच्छंतिराजसाविषयानपि ॥ तामसाविषयानेवनेच्छाशून्योस्तिकश्चन ॥ ५०४ ॥ विषयान्सात्विकोद्वे ष्टिराजसोवैरिणोपिच ॥ तामसोवैरिणःशुद्धानितिद्वेषात्मकंजगत् ॥ ५०५ ॥ सात्विकस्यभयंमोहाद्राजस स्यप्रमादपि ॥ तामसस्यचराजादेःकेवलादितिभीर्नृषु ॥ ५०६ ॥ सात्विकस्यात्मनोऽज्ञानंविद्यादेराजसस्य च ॥ तामसस्यचसर्वत्रमोहएवंव्यवस्थितः ॥ ५०७ ॥ क्षुत्तृण्निद्राश्चसर्वेषांभूतानामेकरूपतः ॥ स्थावरव्य तिरिक्तानांबाधाविण्मूत्रयोरपि ॥ ५०८ ॥ अथवासर्वजंतूनांबाधाविण्मूत्रयोर्ध्रुवा ॥ स्थावराअपिदृश्यंतेय तोनिर्यासमोक्षिणः ॥ ५०९ ॥ इतिदोषाष्टकंसर्वैरचिकित्स्यंहिदेहिभिः ॥ विनाब्रह्मात्मताज्ञानंदेहित्वाभावका रणम् ॥ ५१० ॥ स्वेदजश्चांडजोवापिजंतुर्वास्याज्जरायुजः ॥ उद्भिज्जोपिनसंत्यज्यदोषाष्टकमिदंस्थितः ॥ ५११ ॥ एवमेतद्धिमानुष्यंदोषाष्टकजयायहि ॥ भवत्येवंस्थितेमंदास्तेनैवविजितानराः ॥ ५१२ ॥

ह्मात्मताज्ञानंविनाअचिकित्स्यमित्यन्वयः ब्रह्मात्मताज्ञानस्यतन्निवर्त्तकत्वेहेतुगर्भंविशेषणम् देहित्वेति देहित्वस्यत्रैगुण्याभिमानस्या भावकारणंमशकानांधूमवन्निवृत्तिसाधनमिति ॥ ५१० ॥ दोषाष्टकानुगमनंपुनर्द्रढयति स्वेदजश्चेति ॥ ५११ ॥ दोषाष्टकवर्णनंप्रकृते योजयति एवमिति एवमुक्तविधयाब्रह्मविद्याधिकारसंपादनद्वाराएतन्मानुष्यंदोषाष्टकजयायभवति हिप्रसिद्धमेतत् एवंस्थितेनिर्णीतेपि मंदानरास्तेनैवदोषाष्टकेनविजितावशीकृताः ॥ ५१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृणांदोषाष्टकविजयप्रदर्शनमुखेनबाल्ययौवनवार्द्धक्यानिनिरूपयिष्यन्बाल्येतदनुगममाह तथाहीति तथाहिदोषानुगमःप्रदर्श्यतेइ त्यर्थः स्तन्येच्छया इच्छाक्षुत्तृड्रूपास्पष्टेतिभावः॥ ५१३ ॥ इतइति इतःस्तनपानेच्छादुःखमारभ्ययानिदुःखानिप्रामोतितानिसर्वाणि एतदंतानिएतस्मिन्दोषाष्टकेकारणत्वपर्यवसानंयेषांतानितथाभूतान्येवेति उत्तरोत्तरदोषाष्टकंप्रतिपूर्वपूर्वसंस्काराणांहेतुतामाह दोषाष्ट केति विदूषितःसंस्कृतः॥५१४॥ इच्छाद्वेषदुःखप्रयोजकमशक्तत्वंदर्शयति यथेति नांगानांप्रभुर्यथेच्छंप्रवर्त्तनशक्तोनभवेदिति॥५१५॥

तथाहिजातमात्रोयंस्तन्यमिच्छतिमानवः॥ कुर्वन्नानाविधान्शब्दान्शयानोधरणीतले॥ ५१३॥इतआ रभ्यदुःखानित्येतदंतानिनित्यशः॥ प्राप्नोत्येषजनोमंदोदोषाष्टकविदूषितः॥५१४॥ यथागर्भेतथाबालोनां गानांहिप्रभुर्भवेत्॥ शक्तोभवतिनैवायंमत्कुणादेर्निवारणे॥ ५१५॥ कंडूतावप्यशक्तोयमंगानामातुरोभृश म्॥ नेच्छयात्यन्नपानादिप्राप्नोत्येषोतिदुःखितः ॥५१६॥ अवैशद्येनकंठस्यवदन्नपिवदेन्नसः॥ उच्चैःस्वरे णजननीमाव्हयत्येवदुःखितः॥ श्रुत्वावाक्यंतथैवापितत्रायात्यथवानवा ॥ ५१७॥ एवंविण्मूत्रलेपेनमुख लालादिनापिच ॥दिग्धमंगंसुतस्यैषाप्रक्षालयतिवानवा॥ ५१८ ॥ वृथाहसत्ययंबालोबिभेतिचतथावृ था ॥ रोदित्येषवृथातद्वद्विष्ठाद्यप्यत्तिमोहितः॥ ५१९ ॥ वक्तुंगंतुंतथादातुमिच्छत्येषपुनःपुनः॥ नशक्नो तिततःक्लेशंमहांतंप्रतिपद्यते ॥ ५२० ॥ जननींजनकंवापिभ्रातरंवापिराक्षसम्॥ पिशाचींवाप्यऽभेदेन बालोजानातिमोहितः॥ ५२१ ॥

कंडूताविति कंडूतौकंडूयने ॥ ५१६ ॥ अवैशद्येनेति कंठस्यअवैशद्येनवाग्वादिनीनाड्याःकफव्याप्तत्वकृतेनवदन्नपिनवदेत्विफलत्वा दिति किंचिद्वैशद्येजातेप्याह उच्चैरिति आव्हयतिआकारयति श्रुत्वेत्यादेःसात्वित्यादिः॥५१७॥ द्वेषप्रयोजकंमालिन्यंदर्शयति एवमि ति दिग्धंक्लिन्नं एषाजननी॥ ५१८ ॥ भयमोहयोःप्रयोजकमव्यवस्थितस्वभावत्वंदर्शयति वृथेति अत्तिभक्षयति ॥ ५१९॥ इच्छादुः खमभिनयति वक्तुमिति ॥ ५२० ॥ मोहंस्फुटयति जननीमिति स्फुटम्॥ ५२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति यद्यपिबाल्यमापंचमाब्दादितिश्रीधरैरेकादशेव्याख्यातंतथाप्यत्रोत्तरश्लोकानुगुण्यादाषोडशाब्दाद्बाल्यावस्थांव्यापिकांविव क्षित्वादंतजननप्रभृत्यवस्थातद्व्याप्याकौमारीविवक्ष्यतेअवस्थात्रितयस्यविवक्षणादितिग्रंथकर्त्तुराशयोलक्ष्यते तत्रैवबाल्यएव अवांत रांव्याप्यां ॥ ५२२ ॥ जानुभ्यामिति शनैःशनैरित्यनेनत्वरयाजिगमिषायामपितदपूर्त्याइच्छादुःखंसूचितं एवमुत्तरत्रापिदुःखहेतुदोषा नुगमऊह्यः अपिचेति अशक्त्योच्चार्यमाणत्वादर्थांतरंविवक्षितार्थाद्भिन्नमर्थंप्राप्तंबोधयदितियावत् एतादृशंवर्णसमूहंवदति ॥ ५२३ ॥

एवंबाल्येसदुःखानिकोटिशोप्यनुभूयच ॥ तत्रैवावांतरावस्थांकौमारींप्रतिपद्यते ॥ ५२२ ॥ जानुभ्यामपिह स्ताभ्यांगच्छत्येषशनैःशनैः ॥ अपिचार्थांतरप्राप्तंवर्णजातंवदत्यसौ ॥ ५२३ ॥ श्ववत्शंकितएवायंस्वगृहादि प्रवेशने ॥ सर्वेभ्यश्चबिभेत्येषमात्रादिभ्योविमोहितः ॥ ५२४ ॥ इंगितादिनवेत्त्येषपशोरप्यधमस्तथा ॥ अथ कालेनपञ्चांसव्रजत्यत्यंतचंचलः ॥ वक्तिवाचाविशदयाहितंस्वस्मैनवेत्त्यसौ ॥ ५२५ ॥ पितृभ्यामपिचा न्येनबंधुनाहितकारिणा ॥ बालेनबलिनावापिताड्यतेभर्त्स्यतेहिसः ॥ ५२६ ॥ श्ववदेषतथायातिस्थानात्स्था नांतरंप्रति ॥ उन्मत्तवत्समादत्तेवक्तिचायंतथैवहि ॥ ५२७ ॥ धूलिधूसरसर्वांगःश्रमेणमहतावृतः ॥ स्नेहद्रो हौतथैवायंबालैरन्यैःकरोतिहि ॥ ५२८ ॥ गृहेस्वेऽविद्यमानंचयाचतेराजवच्छिशुः ॥ तदलाभेनभुंक्तेसौकदा चिच्चप्ररोदिति ॥ ५२९ ॥ एवंनानाविधंदुःखंकौमारेत्वनुभूयसः ॥ यौवनंदुःखकोटीनामाकरंप्रतिपद्यते ॥ ॥ ५३० ॥ अत्रस्त्रीपुंसभेदेनदुःखानिविविधानिसः ॥ प्राप्नोत्यनीश्वरोजंतुःकर्मपाशवशंगतः ॥ ५३१ ॥

श्ववदिति श्वाकुक्कुरः शंकितःशंकाव्याप्तः ॥ ५२४ ॥ इंगितेति इंगितमभिप्रायसूचिकाअंगचेष्टा अथेति विशदयास्पष्टया तथापिस्व हितंनवेत्ति ॥ ५२५ ॥ पितृभ्यामिति भर्त्स्यतेदुर्वाचाधर्ष्यते ॥ ५२६ ॥ श्ववदिति ॥ ५२७ ॥ धूलीति ॥ ५२८ ॥ गृहइति अविद्यमा नमितिच्छेदः ॥ ५२९ ॥ यौवनावस्थांदोषाष्टकशालितयावर्णयितुमुपक्रमते एवमिति आकरमुद्भवस्थानम् ॥ ५३० ॥ अत्रेति अत्रयौ वनेसजंतुःस्त्रीपुंसभेदेनस्त्रीभावेनपुंभावेनचावच्छिन्नानिदुःखानिप्राप्नोतीत्यन्वयः यतोऽनीश्वरः अनीशयाशोचतिमुह्यमानइतिश्रुतेः अ नीशयाअसामर्थ्येन ॥ ५३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रनारीभावदुःखंस्पष्टयति जंतुरितिचतुर्भिः पत्यादितःपतिप्रभृतिबांधवेभ्यः ॥ ५३२ ॥ पुरुषाणामिति वधूंनारीम् ॥ ५३३ ॥ पत्यादिभिरिति एषप्रायोदृश्यमानोवधूजनःपत्यादिभिःकुलेनवानिरुद्धःअपरःकश्चिदेवधर्मलोपेनालोचितेननिरुद्धःसन्शृंखलाबंधन वद्धवत्कालंनयेदिति ॥ ५३४ ॥ नार्याःश्वतुरःप्रधानदुःखहेतून्दर्शयति पुरुषाणामिति अनिच्छयाअरोचनेन॥५३५॥ पुंसोयौवनस्थं

॥५२॥ स्यदुःखंस्फुटयति पुरुषस्येति यमादितःयमःप्रसिद्धःआदिपदेनेश्वरः यमोवैवस्वतोराजायस्तवैषस्थितोहृदीत्यत्रोक्तस्तद्विदश्वगृह्यते धी

जंतुर्भवतिचेन्नारीतदापत्यादितोभयम्॥ अस्वातंत्र्यंतथानित्यंव्यापारश्चमहान्गृहे ॥ ५३२॥ पुरुषाणांयथै वेच्छाकामिनांहिवधूंप्रति॥ एवंवधूजनस्यापिकामिनंपुरुषंप्रति ॥ ५३३॥ पत्यादिभिःकुलेनैषधर्मलोपेन चापरः॥ निरुद्धःस्त्रीजनःकालंश्रृंखलाबद्धवन्नयेत्॥५३४॥ पुरुषाणामसंप्राप्याप्राप्तानामप्यनिच्छया॥ पु त्रेच्छयापिगर्भेणनारीदुःखार्णवेपतेत्॥ ५३५॥ पुरुषस्यसदाभीतिःशास्त्रज्ञस्ययमादितः॥ पित्रादिभ्यश्चमू ढस्यराजादिभ्यश्चधीमतः ॥ ५३६ ॥ अस्वातंत्र्यंचपुंसःस्याद्धनादिरहितस्यहि॥ वध्वायथायौवनेस्यात्प्रा स्यप्राप्त्योर्नरस्यहि ॥ ५३७॥ यौवनंप्रथमोदोषोनराणांकर्मवर्तिनाम्॥ तत्रापिचकुलंविद्याधनंचेतित्रिदो षता॥५३८॥ कुलविद्याधनोत्थेहित्रिदोषेयौवनज्वरे॥ नपश्यामःप्रतीकारंमरणादपरंनृणाम् ॥ ५३९ ॥ यौवनज्वरसंमूढोजंतुर्गायतिवल्गति॥हसत्यपिक्षिपत्यन्यान्वृद्धान्पितृसमानपि॥ ५४० ॥

मतोव्यापारकुशलस्य ॥ ५३६ ॥ अस्वातंत्र्यमिति अस्वातंत्र्यंपराधीनता वध्वायथेति इच्छानिच्छाप्रयुक्तंदुःखमितिशेषः ॥ ५३७ ॥ यौवनमिति प्रथमोदोषोज्वरसमःप्रधानदोषः त्रिदोषताकुपितधातुत्रयसमाइत्यर्थः ॥ ५३८ ॥ कुलेति कुलविद्याधनैर्मदजनकैरुत्तिष्ठ तिअनर्थायोद्यतंभवतीतितत्तथातस्मिन्यौवनज्वरेसतिप्रतीकारंतच्छमौषधंनपश्यामः ॥ ५३९ ॥ सन्निपातज्वरसाम्यंयौवनस्यप्रपंच ॥५२॥
यति यौवनेति संमूढोऽनवस्थितचित्तः वल्गतिविविधागतीर्दर्शयतिक्षिपतिमत्तगजवत्पातयतीति ॥ ५४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युत्ध्यतीति अनुदात्तेत्वलक्षणात्मनेपदस्यानित्यत्वात्साधु आस्फोटयतियुत्ध्यमानंविशीर्णंकरोति स्फुटिर्विशरणे दुर्दांतोनिरंकुशःदुश्चेष्ट इति ॥५४१॥ एवमिति कार्याकार्यंविहितप्रतिषिद्धं समाहारद्वंद्वः ॥५४२॥ वधूजनेति मानसस्यांतरंतर्मानसंवधूजनेनगृहीतमंतर्मानसं यस्यसतथातस्य स्वंधनं शास्त्रमुत्क्रम्यवर्त्तमानस्यएतादृशस्यजंतोरयंजरावधिर्महान्कालोयातीतिद्वयोरन्वयः ॥ ५४३ ॥ गृहेति यौवन स्थमंडूकसमं अभ्येतिउपसर्पति ॥ ५४४ ॥ अहर्निशमिति चिंतयादूतीसमयावृतंआर्त्तंकामार्त्तसमं श्वित्रंश्वेतकुष्ठंतद्वती ॥ ५४५ ॥ त

युद्ध्यत्यास्फोटयत्युच्चैर्नृत्यत्यपिचधावति ॥ अहंकरोतिदुर्दांतःश्वसित्येषमुहुर्मुहुः ॥ दुश्चेष्टाविविधाएवंयौव नेकुरुतेपुमान् ॥ ५४१ ॥ एवंहिकुर्वतस्तस्यजंतोर्यौवनवर्तिनः ॥ यौवनेत्वमतिहीनस्यकार्याकार्यमजानतः ॥५४२॥ वधूजनगृहीतांतर्मानसस्यदुरात्मनः ॥ परस्वस्यापहारार्थंनित्यमुत्कंठितस्यच ॥ उच्छास्त्रवर्तिनः शीघ्रंकालोयातिमहानयं ॥ ५४३ ॥ गृहक्षेत्रकलत्रादावासक्तंदुर्धियंनरम् ॥ युवमंडूकमभ्येतिकालसर्पो तिदारुणः ॥ ५४४ ॥ अहर्निशंहिदुःखानामाकरंचिंतयावृतं ॥ युवानमार्त्तमभ्येतिपिशाचीश्वित्रिणीजरा ॥५४५॥तस्याःसंगमदुष्टोयंश्वेतोभवतिसर्वतः॥ कुरूपःशक्तिहीनश्चदुःखशोकसमावृतः ॥ ५४६॥ अपि विस्मृतशीलःसन्पात्रंपरिभवस्यच॥ भवत्यहर्निशंमंदःकासश्वासाकुलाननः॥५४७॥ तदाकृतान्यनेकानि दुष्कृतानिसयौवने॥ स्मरन्निंदतिचात्मानंकष्टंबतमयाकृतं॥५४८॥ पुत्रादयोपितन्नैवमन्यंतेजरठंजनाः॥ अपिविद्याधनैर्युक्तंकिमुमूर्खंचनिर्धनं ॥ ५४९॥ यामवस्थांपुराबाल्येप्राप्तवांस्तांपुनर्जनः ॥ प्राप्नोतिवृद्ध तांप्राप्यनिंदयासहितामिह ॥ ५५० ॥ बालंनैवविनिंदंतिशक्तिहीनंमलावृतं ॥ वृद्धंतुतामसंदृष्ट्वानिंदंतिप्रा कृताजनाः ॥ ५५१ ॥

स्याइति तस्याःजरायाः ॥ ५४६ ॥ अपीति परिभवस्यानादरस्यपात्रंभवति ॥ ५४७ ॥ तदेति यौवनेकृतानीत्यन्वयः ॥ ५४८ ॥ पुत्रा दयइति मन्यंतेआद्रियंते ॥ ५४९ ॥ यामिति यामवस्थांपारतंत्र्यलक्षणांबाल्येप्राप्तवान्तामेवावस्थांवृद्धतांप्राप्यपुनःप्राप्नोति निंदा मात्रंतुविशेषइति ॥ ५५० ॥ निंदासाहित्यंस्फुटयति बालमिति तामसंमालिन्यादितमोगुणलक्षणवंतं प्राकृताःपामराः ॥ ५५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ ५५२ ॥ इच्छाहीति अशक्तितःइंद्रियसंक्षयान्नकिंचिद्विषयंप्रामोतीत्यन्वयः ॥ ५५३ ॥ स्नेहश्चेति उभौस्नेहद्वेषौकार्ये उपकारापकारात्मकेक्षमौनेति ॥ ५५४ ॥ एतावतामंथेनसोस्यायमित्यादिप्रतिनिधीयतेइत्यंतमंशंपुण्यानिकर्त्तुंपुत्रःपित्रेहलोकेप्रति निधिरवस्थाप्यतेइत्यर्थपरतयाव्याकुर्वतामंथकृताप्रसंगानुप्रसंगेनबाल्ययौवनवार्द्धकानिप्रदर्शितानि अथतमेवश्रुत्यंशंपुण्येभ्यइतिहेतु पंचम्यंतंमत्वाव्याकरोति यौवनेइतित्रिभिः ततःपुत्रमस्मिन्लोकेसंस्थाप्यजनकोमुमूर्षतिमर्तुमिच्छतीतितृतीयेनान्वयः कीदृशंपुत्रमात्म नोजनकस्यद्वितीयंदेहम् पुनःकीदृशं नानाविधेभ्योदेवाराधनादिभेदभिन्नेभ्यःपुण्येभ्योहेतुभ्यःप्राप्तम् ॥ ५५५ ॥ पित्रास्वयंकर्त्तव्येषु अध्ययनादिकर्मसुपुत्रोनियोज्यतेइत्याकारंप्रतिनिधीयतेइतिपदार्थंस्पष्टयति वेदेति षष्ठ्यंतानांकर्त्तारमित्युत्तरार्धपदेनान्वयः तथाचवे

एवंनानाविधंदुःखंजंतुःसर्वोपिसर्वदा॥ वृद्धत्वेसमवाप्नोतिकालपाशवशंगतः॥ ५५२॥ इच्छाहिमहतीवृ द्धेविषयाप्तावशक्तितः॥ नकिंचिद्विषयंवृद्धःप्राप्नोतींद्रियसंक्षयात्॥५५३॥ स्नेहश्चवृद्धस्यतथावर्द्धतेस्वजनं प्रति॥ दुर्जनंप्रतिद्वेषश्चनचकार्येक्षमावुभौ॥ ५५४॥ यौवनेजनितंपुत्रंद्वितीयंदेहमात्मनः॥ नानाविधेभ्यः पुण्येभ्यःप्राप्तंसंसारसागरे॥ ५५५॥ वेदाध्ययनयज्ञानांभूतानांहिसुखस्यच॥ स्वयंसामिकृतस्यापिस्वेनवा प्यकृतस्यच॥५५६॥कर्तारंमानुषेलोकेप्रतिभूसदृशंद्विजं॥ ततःसंस्थाप्यजनकोमुमूर्षतिजरावृतः॥५५७॥ परलोकयियासायांवृद्धस्यायंमहान्रथः॥ कालसारथिनासज्जीक्रियतेसूक्ष्मदेहकः॥ ५५८॥

दाध्ययनयज्ञानांपित्राकर्तव्यानांकर्त्तारं तथाभूतानांपंचयज्ञैस्तर्पणीयानांसुखस्यकर्त्तारं अपिचस्वयंपित्रासामिअर्द्धंयत्कृतंकूपतटा कादितस्यकर्त्तारंस्वेनवानयत्कृतंतस्यापिकर्त्तारमित्यर्थः ॥ ५५६ ॥ कर्त्तारमिति प्रतिभवतितत्कार्येनतद्वद्भवतीतिप्रतिभूः यथाव्यवहा रेप्रतिभूःस्वासन्निधौस्वकार्यकरःस्थाप्यतेतत्समं द्विजमितिवेदाध्ययनाद्युपक्रमानुरोधेनोक्तं ततोऽवस्थात्रयभोगानंतरंमुमूर्षतिमर्तुमिच्छ ति यतोजरयावृतः ॥ ५५७ ॥ अथास्यायमित्यादिप्रैतीत्यंतमष्टाचत्वारिंशद्भिर्व्याकरिष्यंस्तदर्थंयथाऽनःसुसमाहितमुत्सर्जद्यायादिति बृहदारण्यकषष्ठगतवाक्यार्थमुपसंहरति परलोकेतिद्वाभ्याम् वृद्धस्यपरलोकयियासायांगमनेच्छायांसत्यांअयंसूक्ष्मदेहरूपोमहान्रथः कालरूपेणसारथिनासज्जीक्रियतेसामग्रीसंपन्नःक्रियतइत्यर्थः ॥ ५५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रथत्वमुपादयति पुण्येति पुण्यपापेएवरथांगेचक्रेताभ्यामाढ्यः दुःखमेवपाथेयंपथिभोग्यंशंबलापरपर्यायंतेनपूरितः प्राणाःप्राणप्रधानें द्रियाण्येवदुष्टाश्वास्तैर्युतः बुद्धिरूपेणकाष्ठेनरचितः कासश्वासयोरोघःप्रवाहःसएवघोषोदूरेश्रूयमाणध्वनिस्तेनसंपन्नः हिक्काप्रसि द्धातयादुष्टंयथाभवतितथामार्गेशब्दनःशब्दकरः नंद्यादित्वाह्युः ॥ ५५९ ॥ वृद्धत्वेनेति सजंतुःयस्यरथःसज्जीकृतः हातुंत्यक्तुं यतो मोहितःअध्यासग्रस्तः ॥ ५६० ॥ तदेति तदामरणसन्निधौ उद्वेगःक्षोभः वेपथुःकंपः ॥ ५६१ ॥ तदातंरक्षितुंकोपिनशक्नोतीत्याह बां धवाइति परिवृत्त्यवेष्टयित्वा दृष्टांतमाह हिंसेति सामिहिंसितमर्द्धहिंसितं हन्यमानमितियावत् तेयथारक्षितुमशक्तास्तद्वदिति ॥ ५६२ ॥

पुण्यपापरथांगाढ्योदुःखपाथेयपूरितः ॥ प्राणदुष्टहयैर्युक्तोबुद्धिकाष्ठविनिर्मितः ॥ कासश्वासौघघोषाढ्योहि क्कादुर्मार्गशब्दनः ॥ ५५९ ॥ वृद्धत्वेनातिदुःखानिसएवमनुभूयहि ॥ शरीरंदुःखनिकरंहातुंनेच्छतिमोहितः ॥ ५६० ॥ तदापुत्रकलत्रादीन्स्मरत्येषोतिदुःखितः ॥ त्रासश्चमरणोद्वेगान्महान्वेपथुरुद्भवेत् ॥ ५६१ ॥ बां धवाअपितेसर्वेतिष्ठंतिपरिवृत्यहि ॥ हिंसास्थानगतायद्वत्पशवःसामिहिंसितं ॥ ५६२ ॥ द्वासप्ततिसहस्राणि वृश्चिकाएकहेलया ॥ यथादशंतिगात्रेषुपुच्छैःसूच्यग्रसन्निभैः ॥ तथातज्जायतेदुःखंमुमूर्षोर्देहमोचने ॥ ५६३ ॥ हस्तौपादौक्षिपंतंचभूमिष्ठंगतचेतनम् ॥ स्वजनास्तंहिशोचंतिकाकाःकाकंयथातुरम् ॥ ५६४ ॥ ग्रामसूकर वत्शब्दान्मुंचंतंमृत्युलुब्धकः ॥ बध्वानयतितंदूरेबांधवानामदर्शनम् ॥ ५६५ ॥ कालपाशवशंप्राप्तोजंतुर्न गमनेक्षमः ॥ वागुराभिरिवाबद्धःकपोतइवदीनधीः ॥ ५६६ ॥

तत्कालभवदुःखमुपमयास्पष्टयति द्वासप्ततीति द्व्यधिकसप्ततिसहस्रपरिमितावृश्चिकाश्चेदेकहेलयाएकव्यापारेणएकदैवेतियावत्पुच्छैर्दशे युस्तज्जन्यदुःखसमंतावन्नाडीकदेहान्निष्क्रमणेदुःखमित्यर्थः ॥ ५६३ ॥ हस्ताविति क्षिपंतंविशस्तपशुवत्त्वरयाचालयंतं आतुरंबंधनादि नादुःखितं एतावदेवतेषांशक्यमितिभावः ॥ ५६४ ॥ मृत्युरूपोलुब्धकोव्याधस्तंदूरेनयति कीदृशंतं नीयमानग्रामसूकरवत्शब्दान्मुं चंतंक्रोशंतमितियावत् बांधवानामदर्शनंयथाभवतितथेतिनयनक्रियाविशेषणम् ॥ ५६५ ॥ कालेति जंतुर्दीनधीःकपोतइवभवतीति शेषः यतोगमनेयथेच्छयाव्यापारेनक्षमः तत्रहेतुः कालेत्यादि ॥ ५६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपकांतरमाह पुत्रेति पुत्रक्षेत्राद्यैहलौकिकभोग्यजातमेवबडिशंप्रच्छन्नंस्वभक्षकवधसाधनंतद्भक्षणायमर्त्यलोकात्मकन्हृदमुपागतंजंतुरूपमत्स्यंमृत्युरूपोधीवरोहंतिइति भक्षधातोर्भोगार्थेपिप्रयोगस्तंदेवाभक्षयंतीत्यादिश्रुतिप्रसिद्धःश्लेषस्यरूपकांगस्यानुकूलः तंस्वर्गगतंदेवाभक्षयंतिभोगसाधनंकुर्वंतीतिश्रुत्यर्थः ऐतेनाहंताममताहीनानांविदुषांनमृत्युरितिसूचितम॥ ५६७॥ मुमूर्षुमिति मृगपोतोमृगबालकस्तत्समं ज्वरादिव्याधिरूपेणबाणेन मृगयुर्व्याधः॥ ५६८॥प्रस्विन्नेति प्रस्विन्नंग्लानंमुखंयस्यतं हिक्कानांशतेनअसंख्यातहिक्काभिरिति यावत् समावृतमाक्रांतं ईदृशंदृष्ट्वापिमृत्युर्दयांनप्राप्नोति यतोनिष्ठुराशयः लोकेपिक्रूराशयादीनेषुनानुगृह्णंतीतिप्रसिद्धम मृत्युपक्षेनिष्ठुरायांप्रजाहननरूपायांवृत्तौप्रजापतेराग्रहात्शेतेधिकृतोभवतीतिनिष्ठुराशयइत्यर्थः प्रसिद्धमेतन्मोक्षधर्मेषु एतदधिकारनिवृत्तयेअनेकार्बुदसमास्तपस्यतेऽपिमृत्यवेएतमधिकारंप्रजापतिर्ददाविति ॥ ५६९ ॥ हापुत्रेति इतिइत्थंशब्दगणंमुंचंतंजंतुरूपंपांथंकालश्चोरइवहंतीति ॥५७०॥श्लेष्मेति श्लेष्माकफः कालस्यस्वकार्यंजननमरणसामानाधिकरण्यसंरक्षणं सूनापशुवधस्थानंतस्यप्रभुरध्यक्षः मेषमेडकमिवेति ॥ ५७१ ॥ बांधवेष्विति क्रोशतोबांधवाननादृत्यएनंजंतुंनयंतियमकिंकराः दृष्टांतोयथेत्यादि ॥ ५७२ ॥द्वासप्ततीति नाड्योहिस्वांतर्गतंप्राणंधारयंत्यस्तंवध्नंतीवतद्बंधनंमृत्युनाच्छिद्यते॥ ५७३॥ मृत्युरिति मृत्युर्दैवःकालेनायुरंत्यक्षणेनकुठारेणअस्यजंतोरंगबंधनंअंगैःप्राणसंबंधमनायासेनच्छिनत्ति आनयासेनच्छेदनेदृष्टांतः यथेति हालिकः हलवहनकर्त्ताक्षेत्ररक्षायैसकंटकवृक्षच्छेत्तृत्वेनप्रसिद्धः ॥५७४॥

पुत्रक्षेत्रादिबडिशंभक्षणार्थमुपागतम् ॥ जंतुमत्स्यंनयत्येषमृत्युधीवरउग्रधीः ॥ ५६७ ॥ मुमूर्षुंमृगपोताभं
संसारवनमध्यगं॥हंतिव्याधिशरेणैवमृगयुःकालसंज्ञकः ॥ ५६८ ॥प्रस्विन्नवदनंदीनंहिक्काशतसमावृतं ॥
निरीक्ष्यकरुणामेतिनमृत्युर्निष्ठुराशयः॥ ५६९॥ हापुत्रहाकलत्रेतिभृशंशब्दसहस्रकम् ॥ मुंचंतंचोरवत्का
लोजंतुंपांथंनिहंत्यसौ॥ ५७० ॥ श्लेष्मावरुद्धकंठंतंभूरिघुर्घुरशब्दकं ॥ हंतिकालःस्वकार्यार्थीमेषंसूनाप्रभु
र्यथा॥ ५७१ ॥ बांधवेषुभृशंशब्दान्मुंचत्सुयमकिंकराः॥ नयंत्येनंयथाराजभृत्याजातापराधकम्॥५७२॥
द्वासप्ततिसहस्राणांनाडीनामिहबंधनम्॥ शरीरेच्छिद्यतेतस्यमृत्युनाजनघातिना॥ ५७३ ॥ मृत्युःकालकुठा
रेणच्छिनत्त्यस्यांगबंधनम्॥ यथाप्रकुपितः कश्चिद्धालिकःकदलीवनम्॥ ५७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादाग्रादिति पादाग्रमारभ्यमृत्युनाप्रयोजककर्त्राकालेनबंधच्छेदकर्त्राप्रयोज्येनवेदनाःपीडाःकार्यंतेइति ॥ ५७५ ॥ मरणकालि कदुःखमुपमानैरभिनयति कोट्यर्धेत्यादिपंचभिः एतावत्यः सूच्यःशरीरेयुगपद्भग्नायादृशंदुःखंकुर्युस्तावदत्रबोध्यमित्यर्थः ॥ ५७६ ॥ ककचैरिति जीवतोंगानांच्छेदादित्यन्वयः ॥ ५७७ ॥ पादाग्रादिति जीवतस्त्वचउत्पाटनेइतिसंबंधः ॥ ५७८ ॥ तप्तेति जीवतामिति पूर्वान्वयि ॥ ५७९ ॥ नवानामिति छिद्राणांप्राणद्वाराणांरोधात्प्रतिबंधात्यादृग्दुःखंतादृग्दुःखंस्मृतौसंभाव्यतेतस्मादधिकंचेति

पादाग्रात्केशपर्यंतंसर्वतोरोमकूपके॥ कार्यंतेवेदनास्तत्रमृत्युनादुःसहान्नृणाम् ॥ ५७५ ॥ कोट्यर्धसहिता स्तिस्रःकोट्यःसूच्यःसुतीक्ष्णकाः॥ यादृक्शरीरिणःकुर्युस्तादृग्दुःखंमृतौनृणाम् ॥ ५७६ ॥ ककचैर्बहुधाच्छे दादंगानांजीवतोयथा ॥ तथाभवतितद्दुःखंमरणेसर्वदेहिनः॥ ५७७ ॥ पादाग्रात्केशपर्यंतंत्वचउत्पाटनेय था॥ जीवतोहिभवेद्दुःखंतथादुःखंमृतौनृणाम्॥ ५७८ ॥ तप्ततैलप्रवेशेनदुःखंयादृङ्नृणांभवेत् ॥ जीवतां तादृगेवात्रदुःखंस्यान्मरणेनृणाम् ॥ ५७९ ॥ नवानामपिच्छिद्राणांरोधाद्यादृङ्नृणांभवेत्॥ दुःखंतादृङ्मृ तौतस्माद्भवेद्वाप्यधिकंपुनः ॥ ५८० ॥ एवमेतदनौपम्यंदुःखंदुर्मार्गवर्तिनाम् ॥ यथानरकजंदुःखंतादृग्वा पिततोधिकम् ॥ ५८१ ॥ मुमूर्षुर्मूर्छामभ्येतिक्कचित्क्कापिप्रबुध्यते॥ बिभेतिचभृशंदृष्ट्वादारुणान्यमकिंक रान् ॥ ५८२ ॥ विण्मूत्रेचक्कचिन्मुंचेदश्रूण्यपिचवाक्कचित् ॥ क्कचिच्छब्दंमहानादंदृष्ट्वासौयमकिंकरान्॥ ॥ ५८३ ॥ अतिदीर्घान्करालास्यान्कालान्बर्बरकेशकान् ॥ कशापाशादिहस्तांस्तान्दृष्ट्वावेपथुमान्भवेत् ५८४ ॥ मुखेनफेनंवमतिमलान्मुंचतिसर्वतः॥ भयप्राप्तमनाजंतुर्दृष्ट्वातान्यमकिंकरान्॥ ५८५॥

॥ ५८० ॥ एवमिति दुर्मार्गवर्तिनांपापिनांयथानरकदुःखंतादृगत्रभवतिततोधिकंचेति ॥ ५८१ ॥ मुमूर्षुरिति क्कचित्क्षणेइतिशेषः ॥ ५८२ ॥ विण्मूत्रेइति नादोध्वनिः ॥ ५८३ ॥ अतिदीर्घानिति बर्बरःकेशविन्यासेइतिविश्वः भयप्रदविन्यासशालिकेशयुतान् क शाअश्वादिताडनसाधनतयाप्रसिद्धा तान्यमकिंकरान् वेपथुःकंपः ॥ ५८४ ॥ मुखेनेति स्पष्टं ॥ ५८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तएनमिति तेयमस्यभटाःपुरतःसंमुखआगत्यएनंपूर्वोक्तंपापिनंआदौप्रथमंभर्त्सयंति वक्ष्यमाणविधयादुर्वाक्यैर्विरध्यंतीत्यर्थः पश्चान्न यंतीत्यादिपदेनव्यज्यते भर्त्सनवाक्यान्याह धिकूत्वामित्यादिना स्वात्मानंविपरीतदर्शनेनहंतिअसंतमिवकुरुतेइतिसतथातं तथाचोक्तं भागवते नृदेहमाद्यंसुलभमित्यादि एतदेवस्फुटयति येनेति अस्मिन्मानुषे स्वहितंनिःश्रेयसात्मकंमुख्यंअभ्युदयात्मकंगौणमिति॥ ५८६॥ आत्महननप्रयोजकंदर्शयंति अयंशत्रुरिति इत्यादिबुद्धिरूपेणमोहेनविपर्ययेणभवतापूर्वसंस्कारैर्जायमानेनभवान्वंचितःप्रतारितः त्व याशास्त्ररूपसुहृदुक्त्याप्रमादोनजितइतिभावः ॥ ५८७ ॥ एवंचप्रमादशत्रोर्विनाशसामग्रीसन्निधानंलब्ध्वापितमविनाशितवतस्त्वैव

तएनंभर्त्सयंत्यादावागत्यपुरतोभटाः ॥ धिकूत्वांमनुष्यदेहस्थंपापिनंस्वात्मघातकम् ॥ येनत्वयाशरीरेस्मि न्नकृतंस्वहितंक्वचित् ॥ ५८६ ॥ अयंशत्रुरिदंमित्रमुदासीनस्त्वयंमम ॥ इत्यादिबुद्धिमोहेनभवतावंचितोभ वान् ॥ ५८७ ॥ शत्रुस्त्वमेवभवतोनान्यःकोपिहिविद्यते ॥ येनत्वयानैवकृतमात्मनोबंधमोचनम् ॥ ५८८ ॥ आत्मनःप्रतिकूलंयःकर्मणामनसागिरा ॥ परस्यकुरुतेस्वस्यसोत्रशत्रुरितीरितः ॥ ५८९ ॥ जीवतोबलिनो भीतिःपरपीडाकरस्यहि ॥ जंतोर्मृतस्यचास्मत्तःकस्तांकुर्वीतबुद्धिमान् ॥ ५९० ॥

स्वशत्रुतेत्याहुः शत्रुरिति भवतस्तव गीतास्वप्युक्तं अनात्मनस्तुशत्रुत्वेवर्तेतात्मैवशत्रुवदिति ॥ ५८८ ॥ एतदेवस्पष्टयति आत्मनइति य दात्मनःप्रतिकूलमपमानादिभासतेतदेवपरस्यपरत्वेनाभिमतस्ययःकुरुतेसमूढःस्वस्यशत्रुरित्युक्तः अत्रविवेकिव्यवहारे ॥ ५८९ ॥ अ तोभेदबुद्धिरनर्थकारित्वान्नकार्या सर्वंतंपरादाद्योन्यत्रात्मनःसर्वंवेदेतिश्रुतेरित्याहुः जंतोरिति परपीडाकरस्यजंतोर्जीवतस्तुबलिनःस काशाद्भीतिर्मृतस्यतुअस्मत्तोयमकिंकरेभ्योभीतिरतस्तांभेदबुद्ध्यापरपीडांकःकुर्वीतेति ॥ ५९० ॥

१ सर्वपदार्थजातंतंनरंस्वरूपच्युतंकरोति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजपुरुषाहिअपराधंस्मारयित्वाकृतागसंवध्वानयंतीतिप्रसिद्धंतथैतेपिभेदवुद्धिरूपमपराधंस्मारयित्वामहानर्थहेतुंदेहात्माभिमानंशुद्धात्मविस्मृत्याकृतंस्मारयंतस्तदनौचित्यार्थंदेहदोषांस्तत्रात्माभिमानस्याऽनर्थकरत्वंतज्जन्यानर्थंचदर्शयंति पित्रोरितित्रिभिः पित्रोर्मातापित्रोः उच्चारोमलम् एषमानुषादिः तदुक्तं यदंतरस्यदेहस्यबहिःस्याच्चतदेवचेत् दंडग्रहावारयेयुःशुनःकाकांश्चमानवाइति॥ ५९१॥विनाशीचेति षट्देहविशेषणानि कृतघ्नःशतंवर्षाणिसेवितोपिजहातीति परिणामोऽन्यथाभावस्तदवांतरभेदसहस्रवान् स्वार्थस्यपुमर्थस्याभिमानद्वाराविनाशकः ॥ ५९२॥ इममिति समाश्रित्यआत्माभिमानगोचरीकृत्य दुष्कृतमितिजातिपरोनिर्देशः तदुक्तंभगवताव्यासेन सर्वाशुचिनिधानस्यकृतघ्नस्यविनाशिनः शरीरकस्यापिकृतेमूढाःपापानिकुर्वतइति एतद्दुःखानिएतस्यदुष्कृतस्यकार्यभूतानिदुःखानि

पित्रोरुच्चारएषस्याद्देहःसर्वशरीरिणाम्॥ प्रत्यक्षोमूत्रविष्ठादिपूरितोतिजुगुप्सितः॥ ५९१ ॥ विनाशीचकृतघ्नश्चपरिणामसहस्रवान्॥ अस्वाधीनःसदादुःखकारीस्वार्थविनाशकः ॥ ५९२ ॥ इमंदेहंसमाश्रित्यभवतादुष्कृतंकृतम्॥ एतद्दुःखान्यनंतानिप्राप्स्यंतित्वामहर्निशम्॥ ५९३ ॥ देहोपभोगसिध्यर्थंपुत्रदारधनादिकम्॥ आश्रित्यभवताकिंचिन्नकृतंसुकृतंवत ॥ ५९४ ॥ अपिक्लेशोहिभवतिसुकृतस्यसमर्जने ॥ स्वल्पःसोपिनचात्रास्तिपरमात्मविचिंतने ॥ ५९५ ॥ अपिचेन्निर्गुणंब्रह्मज्ञातुंनैवभवानक्षमः ॥ कस्मादुपासनंतस्यनकृतंसुखदंत्वया॥ ५९६॥

॥ ५९३ ॥ अहंत्वाभिमानकृतममत्वाभिमानरूपमपराधंविहिताकरणप्रतिषिद्धाचरणहेतुंस्मारयंति देहोपभोगेति आश्रित्यममत्वाभिमानगोचरीकृत्य वतेतिखेदे सुकृतंनकृतंदुःष्कृतंचकृतमितिशेषः ॥ ५९४ ॥ स्मर्तव्यःसततंविष्णुर्विस्मर्तव्योनजातुचित् सर्वेविधिनिषेधाःस्युरेतयोरेवकिंकराइतिविष्णुपुराणोक्तरीत्यापरमात्मनऐक्यज्ञानरूपंमुख्यस्मरणंतस्य स्वरूपभूतत्वेनातिसुकरंकुतोनकृतमितिमहत्तवागइत्याहुः अपिक्लेशइति सुकृतार्जनेस्वल्पःक्लेशःशरीराद्यायासोपिभवति आत्मबोधेतुसोपिनेतितस्यसाक्षादपरोक्षत्वादिति वदंतिहिशिष्टाः कुसुममर्दनादप्यात्मबोधसुकरतामिति ॥ ५९५ ॥ मुख्याशक्तौगौणमपित्वयानानुष्ठितमित्याहुः अपिचेदिति ॥ ५९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपासनाशक्तावपिद्रव्यव्ययायासादिसाध्यादधर्मादतिसुकरंधर्मार्जनमेवकुतोनकृतमित्याहुः अपिपापकृतइति स्वर्गदेसुकृतेनामकीर्तनादिरूपे ॥ ५९७॥ तिष्ठतुबाह्योपकरणसापेक्षःप्रयासः मनोमात्राधीनःक्षणमात्रानुष्ठानेपिमहाफलःस्वात्मचिंतनात्मकोपिकुतोनकृतइत्याहुः परदोषाइति यद्वत्त्वयासावधानेनपरदोषाःसर्वदैवनिश्चितानिर्णीतास्तथात्मक्षणमात्रंकुतोननिश्चितइत्यन्वयः क्षणमात्रात्मचिंतनफलमप्युक्तं स्नातंतेनसमस्ततीर्थसलिलेदत्ताचसर्वावनिर्यज्ञानांचकृतंसहस्रमखिलादेवाश्चसंपूजिताः संसाराच्चसमुद्धृताःस्वपितरस्त्रैलोक्यपूज्योप्यसौयस्यब्रह्मविचारणेक्षणमपिस्थैर्यंमनःप्राप्नुयादिति क्षणमेकंक्रतुशतस्येतिश्रुतिरपि ॥ ५९८ ॥ यदित्वंस्थावरवन्निरुद्यमोऽभूस्तर्हित्वांनेत्थमुपालभेमहित्वंतुशक्तःसन्निषिद्धमनुपदिष्टमपिकृतवान्विहितंतुस्वल्पमपिनानुष्ठितवानितिदंड्योसीत्याहुः यथेति

॥५६॥

अपिपापकृतोयावत्क्लेशस्तेसमभूदिह॥ तस्यलेशोपिसुकृतेनभवेत्स्वर्गदेनृणाम्॥ ५९७ ॥ परदोषास्त्वयायद्वत्सावधानेननिश्चिताः॥ सर्वदैवतथात्माकिंक्षणमात्रंननिश्चितः॥ ५९८॥ यथापरविनाशार्थमुद्यमोभवताकृतः॥ तथास्वल्पोपिकस्मान्नस्वर्गमोक्षकृतेकृतः ॥ ५९९॥ इदंत्वयाकृतंपापमेकांतेबलतस्त्विदम्॥ इतितेमर्मसदृशंपापंसर्वेवदंतिहि॥ अपिचैवंवदंत्येनंपापिनंस्ववशंगतम्॥ ६०० ॥ मत्तोनबलवान्कश्चिल्लोकेस्मिन्विद्यतेपुमान्॥ एवंप्रवृत्तंकोवामांशिक्षयेदितिदुर्धिया॥ ६०१ ॥

परस्यशत्रोर्विनाशार्थं स्वर्गमोक्षयोःकृतेसिद्धये कुतोभावेक्विप् कस्मान्नकृतइति ॥ ५९९ ॥ लौकिकशास्तृभ्योराजादिभ्योगोपितंवाप्रकाशंवासर्वंतेकृतंसाक्षिभ्योविद्मइत्याहुः इदमिति इदंपापंत्वयैकांतेकृतंइदंतुबलतःप्रकाशंकृतमितितेपापंसर्वेआदित्यादयःसाक्षिणोवदंति हिप्रसिद्धमेतत् यथाहुः आदित्यचंद्रावनिलोनलश्चद्यौर्भूमिरापोहृदयंयमश्च अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमिति कीदृशंपापंमर्मसदृशं मर्माण्यपिभिद्यमानानिदुःखयंतिपापमपिभिद्यमानंप्रकाश्यमानंदुःखयतीतिसाम्यं अपिचैवमिति किंचतेयमकिंकराःस्ववशंप्राप्तंपापिनमेवंवक्ष्यमाणविधयापिवदंतीति ॥ ६०० ॥ पुनर्यद्वदंतितदाह मत्तइतिषड्भिः अहंबलीकोवाममशिक्षकइत्याकारयादुर्धियादुर्बुद्ध्याबहुशोविचार्येत्युत्तरेणान्वयः ॥ ६०१ ॥ ॥५६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचार्येति दुर्विचारंकृत्वादर्पाद्भवान्पापकर्मणिप्रवृत्तः उज्झितमर्यादः उज्झितात्यक्तामर्यादायेनसतथा लोकेति लोकैःशोच्यइतियावत् जीवन्मृतत्वादितिभावः भागवतेप्युक्तं सएषजीवन्खलुसंपरेतोवर्तेतयोत्यंतनृशंसितेनेति ॥ ६०२ ॥ तस्येति तस्योक्तविशेषणवतः दुर्धियोलोकोपद्रवकारिणश्चतेशासितारोदंडयितारोवयमिति ॥ ६०३ ॥ त्वत्कृतमिति वयंयमकिंकराःत्वत्कृतंसकलंदुष्कृतंविघ्नः कीदृशंदुष्कृतं वासरादिभिःकर्मणांसाक्षिभिर्यमसभायांश्रावितंनिवेदितम् ॥ ६०४ ॥ वासरादिश्रावितत्वमेवप्रपंचयंति वासरेणेति ससूर्येणदिनेनदिवसेभवत्कृतंकथितं निश्यनुष्ठितंतुचंद्रादिनाराज्याचकथितं आदिपदेनआदित्यचंद्रावित्यादिमनुश्लोकोक्ताअत्रानुक्ताग्रह्यंते संध्ययोरिति संध्ययोःसायंप्रातरालकयोःकृतंसंध्याभ्यांकथितं सर्वदासर्वत्रकालेयद्यत्त्वयाकृतंतद्भूतपंचकैरुक्तं भूतानांप्रत्येकंपंचका

विचार्यवहुशोदर्पात्प्रवृत्तःपापकर्मणि॥ भवानुज्झितमर्यादोलोकशोककरःसदा॥६०२॥ तस्यतेदुर्धियो नित्यंलोकोपद्रवकारिणः॥ शासितारोवयंप्राप्तास्त्वत्तोपिवलवत्तमाः॥ ६०३॥ त्वत्कृतंसकलंविघ्नोदुष्कृतं यमकिंकराः॥ वासरादिभिरत्यर्थंश्रावितंयमसंसदि॥ ६०४ ॥ वासरेणससूर्येणकथितंदिवसेकृतम् ॥ चंद्रादिनातथाराज्याकथितंनिश्यनुष्ठितम्॥ संध्ययोरपिसंध्याभ्यांसर्वदाभूतपंचकैः॥६०५॥वासराद्यायमचराःसर्वैःसहचराःसदा॥ त्वादृशायान्नजानंतिमोहितादेवमायया॥६०६॥ इत्यादिवचनान्युक्त्वावध्वापाशैःसुदारुणैः॥ कशादिभिश्चसंताड्यनयंतियमकिंकराः ॥६०७॥ तस्मिन्द्वारवतीनाथेपुर्यास्तस्यागतेसति ॥ रथेनकालयुक्तेनक्षणमात्रादनंतरम्॥ ६०८॥

निस्वसंवंधेनपंचीकृतत्वात्तैरिति यद्वापंचयंतिस्वसंवंधेनविस्तारयंतीतिपंचकाःभूताभिमानिदेवास्तैरित्यर्थः ॥६०५॥ ननुमयारहसिकृतं कथंवासराद्यैर्ज्ञातमतआहुः वासराद्याइति यमचराःयमस्यराज्ञश्चरागूढपुरुषाः सर्वैःप्राणिभिःसहचराविचरंतः ॥ ६०६॥ इत्यादीति स्पष्टम्॥६०७॥ अथास्माल्लोकादुत्क्रम्यपुनर्जायमानस्तृतीयंजन्मानुभवतीत्यर्थकंसइतइत्यादिजन्मेत्यंतंवाक्यंव्याकरिष्यन्नुत्यक्तशरीरदशांतद्वंधुदशाउत्क्रांतस्यपारलौकिकींदशाश्चवर्णयति तस्मिन्नित्यादिऊनत्रिंशत्श्लोकैः तस्मिन्द्वारवतीनाथेप्रवेशयंथोक्तरीत्यादेहरूपद्वारवतीपतौपुरुषेतस्यादेहद्वारवत्याःपुर्याःसकाशात्क्षणमात्राद्गतेसति केन कालसारथियुक्तेनरथेनसूक्ष्मदेहात्मना अनंतरमग्निसागरःतांपुरींअदर्शनंनयतीत्युत्तरेणान्वयः ॥ ६०८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरीमिति स्वदत्तांस्वेनाग्निनाद्युपर्जन्यभूमिपुरुषयोषारूपेणदत्तां विस्तृतत्वेनाग्निसागरयोःसाम्यं ॥ ६०९ ॥ यदेति एनांपुरीम् ॥६१०॥ क्लेशेनेति यथाप्रसिद्धद्वारवतीनाथेगतेसतिअवशिष्टासार्जुनाअर्जुनेनपार्थेनसहिताबंधुताबंधुसमूहःदुर्जनाभीरैर्हृतंवध्वादिपरिग्रहंरोद्धुं क्षितुंनशशाकतथात्रश्लेषबलेनसाम्यं तथाहि उक्रांतस्यद्वारवतीपतेःसंबंधिवध्वादिदुर्जनरूपैराभीरैर्हृतंपुरःसंमुखेपिरोद्धुंक्लेशेनापिप्रा र्थितावंधुतानशक्नोति कीदृशीवंधुता सार्जुना तृणमर्जुनमित्यमरः गृहीततृणा तृणच्छेदनेनसंबंधपरित्यागशीलेतियावत् यद्वा सार्जुना अर्जुनेननेत्ररोगेणसहिता यतःपश्यंत्यपिनपश्यतीति अर्जुनंतुतृणेनेत्रगदेचेतिविश्वः॥६११॥ प्रसंगात्तत्तद्वारनिर्गमनफलंदर्शयति येनेति

पुरींद्वारवतींसर्वांस्वदत्तामग्निसागरः॥ अदर्शनंनयत्येषसर्वेषामिहदेहिनाम् ॥ ६०९ ॥ यदाद्वारवतीनाथो जहात्येनांयदृच्छया॥ तदातिशोभनाप्येषाविधवेवनशोभते ॥ ६१० ॥ क्लेशेनापिनशक्नोतिसार्जुनाबंधुता पुरः॥ वध्वादिदुर्जनाभीरैर्हृतंरोद्धुंकथंचन ॥ ६११ ॥ येनद्वारेणसंप्राप्तःपुरींद्वारवतींप्रभुः॥ तेनैवचेद्व्रजेद्ब्रह्म लोकंपातिनसंशयः ॥ ६१२ ॥ चक्षुरादिभिरुक्रम्यसुकृतीस्वर्गमेत्यसौ ॥ अपरोदुष्कृतंकृत्वाप्रयातियमसा दनम् ॥ ६१३ ॥ यंविनानैवदाराद्याभुंजतेकवलंपुरा॥ अदंत्यस्मिन्गतेसर्वआकंठंस्वादुबांधवाः ॥ ६१४ ॥ यंपुराशयनेशुभ्रेमृदौकेशादिवर्जिते॥ शाययंतिक्षिपंत्येनंज्वलितेजातवेदसि ॥ ६१५ ॥ यंपुरामृदुलस्पर्शा गंधपुष्पकराअपि॥ स्पृशंतोभयमायांतिकाष्ठैस्तीक्ष्णैःस्पृशंतितम् ॥ ६१६ ॥ वाजिनावाशिबिकयायंगजेन रथेनवा॥ नयंतितंनयंत्येतेबध्वाकाष्ठेनकाष्ठवत्॥६१७॥

येनद्वारेणैकादशेनअधस्तादुक्तेनसंप्राप्तःप्रविष्टः नसंशयः शतंचैकाइत्यादिश्रुतेः मूर्ध्न्याधायात्मनःप्राणमित्यादिस्मृतश्चेति ॥६१२॥चक्षु रादिभिरिति सुकृतीचेदितिशेषः अपरःसुकृतिभिन्नः दुष्कृतंपुरतःकृत्वाचक्षुरादिभिरप्युत्क्रामन्यमसादनंयातीति तथाचैकादशद्वारभिन्न द्वारोत्क्रमणेसुकृतदुष्कृतयोर्यत्प्रबलंतदधीनागतिरिति ॥६१३॥तद्धूंधूनांदशाःस्फुटयति यंविनेत्यादिना दाराद्याःबांधवाःपुराजीवनकाले यंविनाकवलमपिग्रासमपिनभुंजतेअस्मिन्परलोकंगतेसतिआकंठंस्वादुअदंतीत्यन्वयः ॥ ६१४ ॥ यमिति शाययंतिस्वापयंति जातवेद सिवन्हौ ॥ ६१५ ॥ यंपुरामृदुलेति कोमलहस्तस्पर्शकाः तंचितागतम् ॥६१६ ॥वाजिनेति वाजिनाश्वेन शिबिकानृयानं ॥ ६१७ ॥ ॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंगलैरिति वादित्रैःपटहादिवाद्यैः ॥ ६१८ ॥ यस्याग्रतइति एतेबंधुजनाः ॥ ६१९ ॥ पुत्रेति एषसर्वंत्यक्त्वाप्रयातिविरक्तस्तुपुनर्नव्र जेत्एकवारमेवगच्छेदिति नसपुनरावर्ततइतिश्रुतेः अयंतुविनावैराग्यंपुनःपुनरेवंगच्छतिम्रियतेइतिभावः ॥ ६२० ॥ यंविनाक्षणमात्र मिति निर्वृताःसुखिताआशयायेषांतेतथा ॥ ६२१ ॥ यःपुरेति जनानांवक्त्राण्येवाब्जानितद्विकासनेभास्करः सुरोपमोदेवसमः तस्यसं दर्शनेस्पर्शनेचस्नानंप्रकुर्वते ॥ ६२२ ॥ पादाग्रादिति यस्यपादाग्रान्निःसृतंनीरंमूर्द्धनिबिभ्रतिधारयंतिजनास्तस्यसंस्पर्शतःस्नानंप्रकुर्व

मंगलैरपिवादित्रैःप्रयाणंकुरुतेहियः॥ सप्रयात्यधुनास्त्रीणांसशोकैरोदनैःसह ॥ ६१८ ॥ यस्याग्रतोनयंत्ये तेदधिलाजादिमंगलम्॥ तएवतस्यपुरतोनयंत्यग्निंसधूमकम् ॥ ६१९ ॥ पुत्रभार्यादिकंपूर्वंयःक्षणंनविमुं चति॥ त्यक्त्वासर्वंप्रयात्येषविरक्तोनपुनर्व्रजेत् ॥ ६२० ॥ यंविनाक्षणमात्रंहिनपुरास्थातुमीशते॥ तंविना बांधवाःसर्वआसतेनिर्वृताशयाः ॥ ६२१ ॥ यःपुराजनवक्त्राब्जभास्करोऽभूत्सुरोपमः॥ तस्यसंदर्शनेस्नानं स्पर्शनेचप्रकुर्वते॥ ६२२ ॥ पादाग्रान्निर्गतंयस्यनीरंमूर्द्धनिबिभ्रति॥ तस्यसंस्पर्शतःस्नानंस्पर्शनैवप्रकुर्वते ॥ ६२३ ॥ एवंप्रत्यक्षदोषेपिजनःसंसारशूलके॥ पतितोवेत्तिनोदुःखंमोहितोदेवमायया ॥ ६२४॥ एवंश रीरंसंत्यज्यगच्छत्येषोऽतिदुःखितः॥ क्षुत्पिपासापरिश्रांतोभर्त्सितोयमकिंकरैः ॥ ६२५ ॥ अनेकशतकोटी नांयोजनानियमालयम्॥ स्वल्पेनैवहिकालेननीयतेयमकिंकरैः॥ ६२६॥ पाशबद्धोयथाच्छागस्ताडितश्च कशादिभिः॥ नीयतेराजभृत्याद्यैर्बलादेवमसावपि॥ ६२७॥ अत्रदुःखान्यनेकानिमृतानांयमशासनात्॥ भवंतितानिकोनामवक्तुंश्रोतुंचवाक्षमः॥ ६२८॥

ते वशतस्तुस्पर्शनैवप्रकुर्वतेइति ॥६२३ ॥ फलितमाह एवमिति नोवेत्तिनगणयति ॥ ६२४ ॥ पारलौकिकींदशाःस्फुटयति एवंशरीर मिति ॥ ६२५ ॥ अनेकेति योजनानिविस्तृतंयमालयंयमकिंकरैरेषस्वल्पेनकालेननीयतेइत्यन्वयः ॥ ६२६ ॥ दृष्टांतमाह पाशबद्ध इति छागोऽजः एवमसौजंतुः ॥ ६२७ ॥ अत्रेति अत्रयमालये ॥ ६२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दंष्ट्रिणामिति स्पष्टम् ॥ ६२९॥ चोराश्चेति दुष्कृतात्भोग्याद्धेतोः ॥ ६३० ॥ पूयेति ॥६३१ ॥ वन्हीति इलापृथ्वी एतेषांतथावायोश्च कारादाकाशतमसोश्चविकारतोनरकरूपेणपरिणामात् ॥ ६३२ ॥ अनेकेति ॥ ६३३ ॥ ननुतेनरकाअपिवर्णनीयाअतआह प्रसिद्धाइति परजन्मनिमानुषजन्मतोभिन्नजन्मनि ॥ ६३४॥ दुःष्कृतगतिमुपसंहरति एवंसनारकमिति कालतःकालानुसारतः बीजतामन्नभावं एतंमानुषं॥६३५॥सुकृतिनोगतिमाह सुकृतीति सुकृतांतेसुकृतभोगांते पर्जन्यधारयापूर्वोक्तनीत्या ॥६३६॥ सइतइत्यादिवाक्यंव्याचष्टे

दंष्ट्रिणांसूकरादीनांकाकगृध्रादिपक्षिणाम् ॥ उपद्रवोमहान्मार्गेयमराजपुरस्यहि ॥ ६२९ ॥ चोराश्चशतशस्तत्रघ्नंतितंराक्षसोपमाः ॥ शस्त्रैर्नानाविधैर्नैवम्रियतेसोपिदुष्कृतात् ॥ ६३० ॥ पूयविष्ठादिपूर्णानांनदीनामपिलंघनम् ॥ निमज्जनंचतत्रैवक्वचिन्नक्रादितोभयम् ॥६३१॥ वन्हिशस्त्रजलेलानांवायोश्चापिविकारतः॥ यमालयेहिनरकादुःखदाःपापकारिणाम् ॥ ६३२॥ अनेककल्पपर्यंतमसिपत्रवनादिषु॥ क्रूरेषुनरकेष्वेव दुःखान्याप्नोतिदुष्कृती ॥ ६३३ ॥ प्रसिद्धानरकास्तेहिपुराणेषुविपश्चितः ॥ भृशंदुःखकरांनृणांपापिनांपरजन्मनि ॥ ६३४ ॥ एवंसनारकंदुःखमनुभूयाथकालतः ॥ दुष्कृतीबीजतांप्राप्यलोकमेतंपुनर्व्रजेत् ॥ ६३५॥ सुकृतीचतथास्वर्गेप्यनुभूयसुखंमहत् ॥ सुकृतांतेपतत्यस्मिन्लोकेपर्जन्यधारया ॥ ६३६॥ अमुंलोकंहिसंप्राप्यपूर्ववत्पुण्यपापतः॥ जायतेविविधोजंतुःपितृमात्रादितःसदा ॥ ६३७ ॥ जातस्यास्यतृतीयंस्याज्जन्मपुत्रमपेक्ष्यहि ॥ उक्तंजन्मद्वयंचैवंघटीयंत्रमिवाव्रजेत् ॥ ६३८ ॥

अमुमिति अमुंमानुषं पूर्ववत्अन्नभावेन पुण्यपापानुसारेणपुनःपितृमातृद्वाराजायतइति ॥६३७॥ जातस्येति पुत्रमपेक्ष्यतद्रूपेणोक्तजन्मद्वयमपेक्ष्येदंपितुर्जन्मतृतीयंवक्तव्यंकिमितिपितृरूपेणतृतीयमुक्तमितिशंकामभिप्रायाविष्करणेनवारयति उक्तमिति उक्तंजन्मद्वयंचकारात्तृतीयंजन्मचएतत्त्रयंघटीयंत्रमिवेतिसूचनायतथोक्तिः एवंहिपुत्रस्यापितृतीयंजन्मबोधितमेवेतिश्रुत्याशयः ॥ ६३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतमाशयंस्फुटीकुरुते मृतइत्यादिना तत्त्वज्ञानंविनाजन्मधारानविच्छिद्यतइतिभावः ॥ ६३९ ॥ वाराइति यथारवींद्वारज्ञगुरुसितशनिवारधारानविच्छिद्यतेतथाऽज्ञस्यजन्मादयोपि ॥ ६४० ॥ नैरंतर्येदृष्टांतांतरमाह यथेति भावंपरिणामम् जंतुरविवेकी ॥ ६४१ ॥ प्रतिक्षणपरिणामिनोहिसर्वेभावाऋतेचितिशक्तेरितिसिद्धांतात्परिणममानोपाधितादात्म्याभिमानवतांनिरंतरेजनिमृतीइतिसूचकंलक्षणार्थशतृप्रत्ययांतंप्रयन्निति पदंदृष्टांतेनव्याकरोति तमइतिद्वाभ्याम् यथातमोंधकारस्तेजोदीपादिलक्षणंसंप्राप्यास्तंव्यवहाराभावरूपंलयंप्रयातितथामृतिर्मरणावस्थाजनिमुत्तरदेहाभिमानालिकांप्राप्यैवसमाप्ताभतीति यद्यपिदेवयानपितृयानप्रतिपादकश्रुत्यादिभ्योलोकांतरेगत्वाजन्मलाभोनिर्धारितस्तथापिसविज्ञानोभवतीत्यादिश्रुतेर्मरणकालेभाविशरीराकारंविज्ञानंजायतेतदेवशरीरां

मृतोजातःशिशुस्तद्वद्युवावृद्धःपुनर्मृतः ॥ जंतुर्भ्रमतिसंसारेयावदात्मावबोधनम् ॥ ६३९॥ वारायथाभास्करादेर्वर्ततेच्छेदवर्जिताः॥ एवंजन्मादयोभावाजंतूनांछेदवर्जिताः ॥ ६४०॥ यथाप्राप्यनवंवासःपूर्ववासःपरित्यजेत् ॥ एवंजंतुःपरंभावंप्राप्यपूर्वंपरित्यजेत् ॥ ६४१ ॥ तमोयथाप्रयात्येतत्तेजःसंप्राप्यवैतथा॥ मृतिर्जनिंहिसंप्राप्यस्वयमस्तंप्रयातिहि॥ ६४२॥ तेजसस्तमसोवापियद्वदेकंनसंत्यजेत्॥ जगदेवंनरंमंदंमृतिर्वाजनिरेववा॥ ६४३ ॥ तस्मादेतत्समग्रंहिदुःखंदेहादिकंनृणाम् ॥ विनानंदात्मविज्ञानंदुःखकारणनाशनम्॥ ६४४॥

तरग्रहणमित्यभिप्रायेणनैरंतर्यव्यपदेशः ॥ ६४२॥ ननुतयोरस्तुनैरंतर्यंचेतनस्यकिमतआह तेजसइति तेजसस्तमसश्चानयोरेकमन्यतरद्यथाजगन्मानुषादिलोकंनत्यजेत्एवंमंदमज्ञंकार्यकारणाज्ञानशालिनंनरंपुरुषंवस्तुतःपरिपूर्णमपिमृतिजन्मनोरन्यतरन्नजहातीत्यज्ञस्यतत्संगोदुर्वारइत्यर्थः ॥ ६४३ ॥ योयंनानानर्थसंकुलःसंसारोदर्शितःसपूर्वप्रपंचिताद्वितीयानंदात्मप्रबोधेस्वमवद्विलीयतेइत्यभिनीयमंत्रेणदर्शितमित्यर्थकंतदुक्तमित्यादिवाक्यंव्याचष्टे तस्मादिति तस्मान्मंदत्वस्यसंसारव्याप्यत्वात्एतत्समग्रंदुःखमानंदात्मविज्ञानंविनैवतदुदयात्प्रागेवप्रतिभातीतिशेषः कीदृशंदुःखं देहादिकंदेहाःकारणादिशरीराणितत्प्रभृति आदिपदेनतदवस्थाजाग्रदादयोगर्भप्रवेशादयाजन्मत्रयलक्षणाश्चग्राह्याः कीदृशमात्मज्ञानं दुःखानांकारणस्यप्रयोजकस्याज्ञानस्यविरोधिइति ॥ ६४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथगर्भेनुइत्यादिमंत्रश्रौतार्थतात्पर्यार्थौप्रदर्शयन्व्याकरोति एवंतेषामित्यादिना एवमादिवचइत्यतःपूर्वग्रंथेन एवंपुंगर्भप्रवेशग्रंथमारभ्यप्रदर्शितप्रकारेणतेषांसनकादिशिष्याणामधिकारिणांदोषविचारेप्रवृत्तेसतितत्फलभूतायांविरक्तौचजातायांसत्यांस्वात्मनिविरक्तिफलभूतविचारगोचरीकर्तुमिष्टेप्यविचारितेसतिपरंतुविचारारंभायसनकादिमुनिजेउपदेशेस्मृतिपथमानीतेचसतितेषामधिकारिणामन्यतमोवामदेवोममारहेतिद्वयोरन्वयः ॥ ६४५ ॥ उपदेशइति व्याख्यातम् ॥ ६४६ ॥ सहीति सवामदेवःश्रवणेजातेपिजन्मांतरारंभककर्मरूपभाविप्रतिबंधेनमननादिविरोधिनानसाक्षात्कृतआत्मायेनसतथातस्यभावस्तस्मान्मातुर्गर्भेपुंगर्भभावद्वाराप्रविष्टवान् प्रविष्टश्चगर्भेनवमासान्शयनमवस्थितिंप्राप्तः तथाभावेहेतुंदर्शयति पूर्वेति तत्त्वसाक्षात्कारेहिज्ञानकर्मसंस्कारादग्धबीजभावतांयांतिसचास्यप्रति

एवंतेषांप्रवृत्तेस्मिन्विचारेप्यधिकारिणाम् ॥ विरक्तावपिजातायांस्वात्मन्यप्यविचारिते ॥ ६४५ ॥ उपदेशेस्मृतिपथमानीतेमुनिजेसति ॥ तेषामन्यतमःकश्चिद्वामदेवोममारह ॥ ६४६ ॥ सत्यसाक्षात्कृतात्मत्वाद्गर्भेमातुःप्रविष्टवान् ॥ गर्भेसशयनंप्राप्तःपूर्वसंस्कारसंस्कृतः ॥ ६४७ ॥ नवमेमासिसंपन्नेबोधेजातीःस्मरत्ययं ॥ जंतुःसर्वोपितस्मिन्हिकालएषप्रबुद्धवान् ॥ ६४८ ॥ प्रबुत्ध्यचमुनीन्सर्वान्स्वसखीनधिकारिणः ॥ इदंतत्रस्थितोवाक्यमुक्तवानात्मवित्तमः ॥ ६४९ ॥

बंधान्नजातइतिभावः ॥ ६४७ ॥ नवमेमासीति बोधेसंपन्नेनियतिवशादुत्पन्नेसतिअयंसर्वोपिजंतुःपूर्वाजातीर्जन्मानिस्मरतीतिगर्भोपनिषदादौप्रसिद्धं वामदेवेविशेषमाह तस्मिन्निति एषवामदेवःप्रबुद्धवान्पूर्वजातिस्मृतिकालेप्रतिबंधकदुरितशांतौसनकाद्युक्तस्मृत्यामननिदिध्यासनसंपत्त्यानंदात्मानंसाक्षात्कृतवानित्यर्थः ॥ ६४८ ॥ प्रबुत्ध्यचेति प्रबुत्ध्याऽऽनंदात्मानंसाक्षात्कृत्यतत्रगर्भएवस्थितःसन्निदंक्ष्यमाणंवाक्यंस्वसखीन्यैःसहश्रवणंसंसारदुःखालोचनंचकृतवांस्तानेवमुनीनधिकारिणःप्रतिउक्तवान् यतआत्मवित्तमःअतिशयेनात्मविदिति ॥ ६४९ ॥ ॥५९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहमिति भवतांयुष्माकमन्यतमोऽहमितः पूर्वजन्मनिपरिच्छिन्नदेहात्माभिमानेनाल्पतमः अत्यंतंपरिच्छिन्नः स्थितोऽभूवमितिशेषः इदानीं विद्यावस्थायामेकोऽद्वितीयोऽहमेवास्मीत्येवकारव्यावर्त्यमाह नान्यमिति अन्यंपृथग्भूतं तथाचश्रुतिः यत्रत्वस्यसर्वमात्मैवाभूदित्यादि ॥ ६५०॥ स्वस्यसर्वात्मतांदर्शयति मयेत्यादिना प्रदिशोऽग्न्यादिकोणाः मनुःस्वायंभुवादिरहमेवासमिति तथाऽऽदित्यः कीदृशोमहेश्वरः बुद्धिप्रेरकत्वादिति लोकपालाइति प्रभवःशक्तिसंपन्नाःसर्वेलोकपालाइंद्राद्याअहमेव ॥ ६५१ ॥ नकेवलमुत्कृष्टाएवमदात्मानःकिंतुब्रह्मदाशाब्रह्मेमेकितवाइत्यादिश्रुतिभ्योपकृष्टाअपीत्याह स्वेदजानीतिद्वाभ्यां स्पष्टम्॥६५२॥ब्रह्माद्याइति ब्रह्मपदेनादिजीवस्यहिरण्यगर्भस्यग्रहः अनेकेति नानाविधकर्मशालिनः कर्मधारयान्नमत्वर्थीयइतिनियमस्तुप्रायिकः अस्तुब्वतइतिभाष्योक्तेः तन्नियमाभ्युपगमे

अहंहिभवतांपूर्वजन्मन्यल्पतमःस्थितः॥ इदानीमहमेवात्रनान्यंपश्यामिकंचन ॥ ६५०॥ मयासर्वादिशः पूर्णाःप्रदिशश्चनभस्तथा॥मनुःपूर्वमहंतद्वत्सूर्य्योऽप्याऽऽसंमहेश्वरः॥ लोकपालास्तथासर्वेमद्रूपाःप्रभवोपिहि ॥६५१॥स्वेदजानितथायानिद्युद्भिज्जान्यंडजानिच॥जरायुजानिभूतानिमत्तोनान्यानिकानिचित्॥६५२॥ ब्रह्माद्याःस्थावरांतायेजंतवोनेककर्मिणः॥ तेसर्वेममदेहाःस्युरानंदात्मस्वरूपिणः॥ ६५३॥ जायतेऽस्तिविवृद्धश्चपरिणाम्यथनाशवान्॥ विनष्टश्चापिदेहोयंसेंद्रियोनाहमत्रहि ॥ ३५४ ॥ अहंजानामिदेवानांवागादीनामनेकशः॥ जन्मानिनममैकंचसुखंदुःखंचयच्छति॥ ६५५॥

तुअविद्यमानमज्ञानेनावृतमेकंतत्त्वंयेषांतेऽनेकास्तेचतेकर्मिणश्चेतिविग्रहः तेजंतवोममानंदात्मस्वरूपिणआनंदाभिन्नात्मनास्वरूपिणः प्रकृत्यादित्वात्तृतीयान्तंपूर्वपदं देहाःरूपाणीति ॥ ६५३ ॥ तथात्वेषड्भावविकारप्रसक्तिनिषेधति जायतेइति नाशवानपक्षयवान्इति भावविकारवान्सेंद्रियोदेहएवनाहं कुतइत्यतआह अत्रहीति यतोत्रसाक्षादपरोक्षेमयितेकल्पिताः नहिकल्पितधर्माअधिष्ठानंस्पृशंतीति भावः ॥ ६५४॥ अहमिति वागादीनांदेवानामनेकशःविश्वानिसर्वाणिजन्मानिजानामितेषांमध्येएकमपिममतेभ्यःपृथग्भूतस्यसुखंदुःखंचनयच्छतिददातिकरोतीतियावत् ॥ ६५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्राध्यासाभावंहेतुतयाह इदानीमिति इदानींवागाद्याःसुराःअध्यात्माधिदैवभेदभिन्नामांसर्वसाक्षिणंपूर्ववन्नस्पृशंति तत्रहेतुगर्भंविशेषणं आत्मेति तथाचकथंतदीयाजन्मादयोविकृतंकुर्युरितिभावः॥६५६॥ शतंमेत्याद्यंशंव्याकरोति कारागृहेति कारागृहसमाबहवःपुर्यश्चतुरशीतिलक्षशरीराणिआसन्निितिशेषः कीदृश्यः क्लेशकारिणाऽयसालोहवद्दुर्भेद्येनकृष्णेनचाज्ञानेननिर्मिताःमद्बंधनप्रयोजनकाः॥६५७॥अज्ञानलोहमयपुरीणांबंधकत्वंस्फुटयन्नधःश्येनइत्याद्यंशंव्याकरोति यथेत्यादित्रिभिः यथालोकेमहाकायंश्येनंक्रौंचादिघातकत्वेनप्रसिद्धंबलिष्ठत्वेनपाशकैःकुत्सितैःपाशैर्दुःखेनग्रहीतुंशक्यमायसैःपुरैःपंजररूपैरुंधंतितथाऽज्ञानलोहमय्यस्ताःसर्वाःपुरोमामद्वितीयत्वेसतिसर्वांतरत्वेनदुर्ग्रहंअरक्षन्परिच्छेदाभिमानरूपपाशैर्निरोधंनीतवत्यइत्यर्थः॥६५८॥ अहमिति अहंतानेतानज्ञानपाशान्विपर्य-

इदानीमात्मविज्ञानसंपन्नंसर्वसाक्षिणम्॥ नस्पृशंतीहवागाद्याःसशरीराइमेसुराः ॥ ६५६॥ कारागृहसमाःपूर्वमयसाक्लेशकारिणा॥ निर्मितावहवःपुर्योममबंधनहेतवः॥ ६५७॥ यथाश्येनंमहाकायंदुर्ग्रहंपाशकैरपि॥ एवंमांदुर्ग्रहंसर्वास्ताअरक्षन्समंततः ॥ ६५८ ॥अहमज्ञानपाशांस्तान्कामक्रोधादिकीलकान्॥ सपुरान्ब्रह्मविज्ञानतुंडेनैनान्व्यनाशयं॥ ६५९॥ यथागृहेनिरुद्धःसन्श्येनोवज्रसमाननः॥ अधोभित्त्वाविनिर्गच्छेत्तद्वदेताअहंपुरः॥ ६६०॥

यरूपपाशान्सपुरान्पूर्भिःसहितान्ब्रह्मविज्ञानरूपेणतुंडेनचंचुनाव्यनाशयंखंडितवानस्मि कीदृशानज्ञानपाशान् कामक्रोधादिरूपाणि कीलकानिदृढत्वहेतुशंकवोयेषांतेतथातानिति ॥६५९॥ यथागृहइति यथागृहेनिरुद्धःश्येनोदुर्भेदभेदकत्वेनवज्रसमंहीरकसममाननंमुखंयस्यसतथा. अधःपंजराधोदेशंभित्त्वाविनिर्गच्छेत्तथाहमेताःपुरोऽधोभित्त्वाजवसावेगेननिर्गतोस्मीति अत्रसर्वशरीररूपपुराणामधोदेशःसत्सामान्यंइदंरजतमितिभ्रमेपिभासमानेदंपदार्थवदाधारसंज्ञकं तस्यभेदनंनामप्रमाटत्त्याऽऽवरणांशविमोकः एतदभिप्रायेणोक्तंवार्त्तिककारैः अपामार्गलतेवासौविषमोहिभवभ्रमः प्रत्यग्दृशांविमोक्षायनिबंधायबहिर्दृशामिति ॥६६०॥ ॥६०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंमंत्रस्यश्रौतार्थंप्रपंच्यतात्पर्यार्थंप्रपंचयति भवतामित्यादिना यद्देहपुत्रादौविरक्तिरूपंभवतामात्मविज्ञानकारणमुक्तं सनकाद्यैरितिशेषः एतद्विरक्तेःकारणत्वंविनिश्चितंमयाफलदर्शनेननिर्धारितम् ॥ ६६१ ॥ फलजनकतामेवाह ममेति यस्मान्ममेदंवक्ष्यमाणस्वरूपंज्ञानंजातंतत्रमुख्यःप्रयोजकस्तुगुरोरनुग्रहइत्याह सनकादेःप्रसादतइति प्रतिबंधापगमस्तुद्वारमित्याह मरणेसतीति मरणकालमुपलक्षयति विचारेइति विचारोपलक्षितकालइत्यर्थः कीदृशेविचारे युष्माकंसमानेयुष्माभिःसहानुष्ठितेइतियावत् भवतांप्रतिबंधवशादनुत्पत्तावपिनकारणत्वापकर्षइतिभावः ॥ ६६२ ॥ ज्ञानस्वरूपंप्रपंचयति नाहमित्यादिना द्वितीयाद्धिभयंद्वितीयत्वंतुस्रजिकल्पितफणिनःस्रजइवमत्तःसर्वस्यनसंभवतिअतोऽद्वितीयोस्मीतिभावः ॥ ६६३ ॥ अमृतोस्मीत्युपपादयति किंकरिष्यतीति मृत्युर्मेममाधेयतयासंबंधिमन्निष्ठमितियावत् किंस्वव्यापारजन्यफलंकरिष्यतिनकिमपीति कीदृशस्यमे मृत्योरात्मस्वरूपिणःआत्मभूतस्य आत्मभूतस्यकर्मत्वेकर्मकर्तृत्वविरोधंदर्शयति नहीति असौमृत्युःईष्टेशक्तोभवति तस्यहदेवानाऽभूत्याईशतआत्माहितेषांभवतीतिश्रुतेरिति ॥ ६६४ ॥ किंच मृत्युर्जन्मादिव्याप्यःजन्मादिकंचदेहत्वव्याप्यं मयितुअकायमव्रणमित्यादिश्रुतिभ्योदेहविविक्तेदेहत्वलक्षणव्यापकनिवृत्तौतद्व्याप्यनिवृत्तिर्न्यायसिद्धाइतिवदन्विजरोस्मीत्यपिदर्शयति अपिमृत्युरिति मृत्युप्रभृतिनमेकिंचिद्यस्मादेतत्सर्वंदेहेदृश्यतइत्यन्वयः ॥ ६६५ ॥ विशोकोस्मीतिप्रपंचयति अन्यस्येति तादृशःसुखदुःखोपलक्षितशोकमोहवान् एतत्सुखादिकम् ॥ ६६६ ॥

भवतामात्मविज्ञानकारणंकथितंपुरा॥ विरक्तिर्देहपुत्रादौयदेतद्धिविनिश्चितम् ॥ ६६१ ॥ ममयस्मादिदंज्ञानंसनकादेःप्रसादतः॥ जातंविचारेयुष्माकंसमानेमरणेसति ॥ ६६२ ॥ नाहंबिभेमिसंसारान्नकालान्नापिमृत्युतः॥ सर्वमेतन्मयियतःस्थितंस्रजियथाफणी ॥ ६६३ ॥ किंकरिष्यतिमेमृत्युर्मृत्योरात्मस्वरूपिणः॥ नह्यसावाऽऽत्मनात्मानंहंतुमीष्टेकथंचन॥ ६६४॥ अपिमृत्युस्तथाजन्मबाल्यंयौवनमेववा॥ जरावापिनमेकिंचिद्देहेयस्माद्धिदृश्यते॥ ६६५॥ अन्यस्यसुखदुःखाभ्यांनान्योभवतितादृशः॥ अन्योहंदेहतस्तस्माल्कस्मादेतद्भवेन्मम॥ ६६६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुदोषाष्टकेसतिकथंविशोकतेत्याशंक्यतस्यसाक्षिभास्यमनःप्रभृतिधर्मत्वान्नतद्भासकेसाक्षिणिप्रसंगः नहिपंकमालिन्यंरविंस्पृशतीत्याह दोषाष्टकमिति इदंइच्छाद्वेषभयमोहक्षुत्तृण्निद्राविण्मूत्रबाधाचेत्युक्तंदोषाष्टकंमांसुखरूपकमात्मानंकथंचननस्पृशेत् तत्रहेतुगर्भमात्मविशेषणं मनआदिभ्योऽन्यमिति तत्रेच्छाद्वेषभयमोहामनोधर्माः क्षुत्तृषौप्राणस्य निद्राइंद्रियाणां विण्मूत्रबाधाशरीरस्येतिमनआदिभिन्नंकथंदोषाष्टकंस्पृशेदितिभावः ॥ ६६७ ॥ एतदेवनवभिःप्रपंचयन्निच्छायास्तावन्मनोधर्मतामाह मोक्षइति मोक्षःस्वर्गःतथा इहस्थितंवैषयिकंसुखं एतत्त्रयंयथाक्रमंसात्विकंराजसंतामसंचमनएवेच्छतिअहंतुनिस्त्रैगुण्योनतदिच्छामि आप्तकाममात्मकाममकाममित्यादिश्रुतयोपिइच्छानिषेधंतीत्याशयेनात्मविशेषणमाह आनंदरूपभृदिति ॥ ६६८ ॥ द्वेषस्यापित्रिविधविषयस्यत्रिगुणमनोधर्मतामाह अज्ञानमिति अन्यैर्देहलौकिकंप्रतिकूलवेदनीयं सज्जनाअपितामसस्यतथेतिनपूर्वविरोधः ॥ ६६९ ॥ आनंदरूपतापिद्वेषाभाव

दोषाष्टकमिदंनित्यंनस्पृशेद्धिकथंचन ॥ आत्मानंमनआदिभ्योमामन्यंसुखरूपकम् ॥ ६६७ ॥ मोक्षःस्वर्गस्तथाचान्यत्सुखजातमिहस्थितम् ॥ मनइच्छतिनाहंतदिच्छाम्यानंदरूपभृत् ॥ ६६८ ॥ अज्ञानंनरकंवापिदुःखंचान्यत्ससाधनम् ॥ मनएवहितद्वेष्टिनाहंद्वेष्मिकथंचन ॥ ६६९ ॥ अनाप्तकामोभिन्नोयःसद्वेष्टिनपुनःपरः ॥ अहंसर्वस्वरूपःसन्कस्माद्द्वेष्मीहकिंचन ॥ ६७० ॥ भयमोहौचमनसोनमेस्यातांकथंचन ॥ अद्वितीयस्यसर्वात्मबोधैकवपुरात्मनः ॥ ६७१ ॥ योद्वितीयंविजानातिप्रतिकूलकरंतथा ॥ सएवहिजनोलोकेविमुह्यतिबिभेतिच ॥ ६७२ ॥

हेतुरित्याह अनाप्तकामइति भिन्नोभेददर्शी परःअभेददर्शी ॥ ६७० ॥ भयमोहयोर्मनोधर्मत्वमात्मधर्मत्वासंभवहेतुप्रदर्शनेनस्फुटयति भयेति मनसोधर्मावितिशेषः नमेधर्मौ तथाचाहंनतयोर्धर्मीत्यर्थादागतं तत्रचहेतुभूतेआत्मविशेषणेइतिनहेतुसाध्ययोर्वैय्यधिकरण्यं भयाभावेऽद्वितीयत्वंहेतुःमोहाभावेचचिन्मात्रत्वं सर्वात्माचासौबोधः सर्वात्मबोधःएकंचतद्वपुःस्वरूपंतदेकवपुः सर्वात्मबोधएकवपुर्यस्यसतथासचासावात्माचतस्येतिविग्रहः अत्रमहावाक्यार्थसूचनान्निरावरणत्वंबोधितंतच्चमोहप्रयोजकतमोविरोधिइति ॥ ६७१ ॥ किंच विषादात्मकमोहस्यभयस्यचभिन्नत्वेनज्ञानेप्रतिकूलकारणत्वज्ञानंहेतुस्तच्चप्रयिनास्तीत्याह योद्वितीयमितिद्वाभ्यां यःकश्चित्द्वितीयंजानातितथातमेवद्वितीयंप्रतिकूलकरंजानातीतियोजना सएवेत्यादिस्पष्टम् ॥ ६७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाहमिति अहंतु द्वितीयमेवनजानामि तस्यप्रतिकूलत्वादिज्ञानाभावोव्यापकभेदज्ञानाभावादेवसिद्धइत्याशयेनाह शत्रुमित्यादि परमु दासीनम् अकारणौउक्तकारणहीनौ॥६७३॥ क्षुत्पिपासयोःप्राणधर्मत्वादात्मन्यसंभवमाह क्षुधेति एतेक्षुधातृषेसंगतेसंबद्धेमेप्राणशून्य स्यमास्यातांनसंभवतइत्यर्थः ॥६७४॥ निद्रायाधर्मिप्रदर्शनपूर्वकमात्मनिव्यतिरेकमाह निद्राचेति निद्राहिकारणेलयरूपासाचमनसः क्वापियदास्वप्नंनपश्यतितदैवप्रसिद्धा इंद्रियाणांतुनित्यमेवस्वप्नदर्शनेऽदर्शनेच ममत्वजस्यमनसइंद्रियेभ्यश्चभिन्नस्यनसासंभवतीत्याह इंद्रियादीति ॥६७५॥ अष्टमंदोषंश्रुतिसिद्धंशरीरभेदवत्त्वान्निरस्यति विण्मूत्रेति॥६७६॥ नन्वद्वितीयामृताजाजरविशोकत्वैर्निषेधमुखेनै वात्मानंकिमभिदधासिसखिभ्योऽस्मभ्यंविधिमुखेनश्रृंगग्राहिकान्यायेनप्रदर्शयेत्याशंकांवारयन्नविषयतामाह वचसामिति यदेतद्भव

नाहंद्वितीयंजानामिशत्रुंमित्रंतथापरम्॥ तस्यमेकेनवास्यातांभयमोहावकारणौ॥ ६७३ ॥क्षुधातृषाच तद्वन्मेप्राणशून्यस्यकर्हिचित्॥ मास्यातांयतएतेद्वेदृश्येतेप्राणसंगते॥ ६७४ ॥ निद्राचमनसःक्वापिवागादे र्नित्यमेवहि॥ इंद्रियादिविहीनस्यममकेनभवेद्विसा ॥ ६७५ ॥ विण्मूत्रबाधादेहस्यनाशरीरस्यकर्हिचित्॥ अकायोह्यव्रणश्चाहंममकेनभवेद्विसा॥ ६७६॥ वचसांव्यवहारेणभवतामेतदीरितम्॥ मयास्वात्मस्वरूपं तन्नेदृशंवस्तुतःक्वचित् ॥ ६७७॥ इंद्रियैरखिलैर्गम्यंनैतद्बाह्यैस्तथांतरैः॥ धीवृत्तेरप्यविद्यायाःसाक्षिभूतमव स्थितम्॥ ६७८॥

तांहितायवचसांव्यवहारेणस्वात्मस्वरूपमीरितंतद्वस्तुतईदृशंइदंप्रत्ययगोचरनिभंविषयरूपंवस्तुतोनभवतीत्यन्वयः निषेधवाक्यान्यपि तात्पर्यवृत्त्यैवबोधयंतीतिभावः॥६७७॥अविषयतामेवस्फुटयति इंद्रियैरिति एतदात्मतत्त्वमखिलैर्बाह्यैरिंद्रियैश्चक्षुराद्यैर्गम्यंन तथाआंत रैर्मनोबुद्धिचित्ताहंकारैर्गम्यंनेति ननुवेदांतवाक्यजन्यबुद्धिवृत्तेर्विषयोभविष्यत्येवतथाजडगोचरायाअविद्यायाश्चेत्याशंक्याह धीवृत्ते रित्यादि ब्रह्माकारवृत्तेश्चिद्भास्यत्वमेवविषयत्वं तदुक्तंयोगभाष्ये नचपुरुषप्रत्ययेनबुद्धिसत्वात्मनापुरुषोदृश्यतेपुरुषएवतंप्रत्ययंस्वात्मा वलंबनंपश्यतीतिविज्ञातारमरेकेनविजानीयादितिपरंतुबुद्धिवृत्तिस्तस्यविषयत्वस्यानुपयोगिन्यपिप्रतियोगित्वेनोपचाराद्व्यवह्रियतेएव मविद्यायामपिबोध्यं ॥ ६७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधिरूपेोपदेशानामप्यार्थिकेतरव्यावृत्तिबोधेनैवप्रसरलाभइत्याशयेनविधिरूपेणविशेषणद्वयमाह आनंदात्मेति दुःखाऽनात्मासज्जडानेकविलक्षणमित्यर्थः तादृशस्वभावत्वेत्रिविधपरिच्छेदराहित्यलक्षणमद्वितीयत्वमुपक्रमोक्तंहेतुतयोपसंहरति देशेति रूरूपंवत्त गंधोलेशः ॥ ६७९ ॥ अतइति अतोममैतादृशज्ञानजनकत्वेनगुरूपदेशस्यज्ञानंप्रतिपरिपुष्कलकारणतायानिर्धारणादुदाहृतमुपदिष्टंअवगच्छंतुजानंतुएनमानंदात्मान नचास्माकमपिभाविप्रतिबंधभयाद्विचारेप्रवृत्तिर्दुःशकाइतिवाच्यम् भाविप्रतिबंधस्यादृष्टरूपस्यदृष्टद्वारेणैवप्रतिरोधकत्वान्नादृष्टंदृष्टमंतराकरोतीतिन्यायात् तदभावस्तुवर्तमानप्रतिबंधाभावेनसुज्ञानः तदुक्तं नदेवादंडमादायरक्षंतिपशुपालवत् यंहिरक्षितुमिच्छंतिबुद्ध्यासंयोजयंतितमिति तस्मात्प्रतिबंधोवर्त्तमानोविषयासक्तिलक्षणः प्रज्ञामांद्यंकतर्कश्चविपर्ययदुराग्रहइतिवर्त्तमानप्रतिबंधपरिहारेणविचारयतेतिभावः ॥ ६८० ॥ विचाराप्रवृत्तिरेवप्रतिबंधलक्षणंतांपरिहरतअन्यथापुनर्जन्मप्रसंगादित्याह अ

आनंदात्मस्वरूपंसत्प्रकाशैकस्वभावकम्॥ देशकालस्वरूपोत्थभेदगंधविवर्जितम्॥६७९॥अतोभवंतोमुनयःसनकाद्यैरुदाहृतम्॥ विचार्यस्वयमेवैनमवगच्छंतुमाचिरम्॥ ६८०॥ अतोत्रभवतांमद्वन्माभूज्जन्मांतरंक्वचित्॥ अहंहिममदृष्ट्यास्मिदेहादिपरिवर्जितः॥ अधुनाभवतांदृष्ट्यागर्भेतिष्ठामिसंकटे॥ ६८१॥ यादृगेवपुरास्माभिर्गर्भेदुःखंविचारितम्॥ अधुनानुभवाम्येतत्तावद्द्वापिततोधिकम्॥ ६८२॥ तथापिममसर्वात्मबोधपूर्णेंदुसेवया॥ दुःसहोगर्भचंडांशुःसंतापंनकरोतिहि ॥ ६८३॥ एवमादिवचस्तूक्त्वामुनीनांप्रत्ययायहि॥ वामदेवोविनिर्गम्यगर्भाल्लोकमिमंययौ॥ ६८४॥

तोत्रेति अत्रसंसारे ननुविचारेप्रवर्त्तामहेपरंतुतवतत्त्वविदोपिगर्भवासदुःखमालोच्यफलेसंशयःप्रवृत्तिंप्रतिबध्नातीत्याशंक्यस्वदृष्ट्यादुःखाभावमाह अहमिति आदिनाइंद्रियादीनांतद्धर्मदुःखादीनांचग्रहः ॥ ६८१ ॥ प्रारब्धनाशात्प्रतिभासनाशइत्यादिश्रुतेःप्रारब्धेनभासमानत्वेपिबाधितत्वेनस्वप्नदुःखवन्नव्यामोहकत्वमित्याह यादृगेवेतिद्वाभ्यां अस्माभिःसनकादिशिष्यैर्मिलितैः ॥ ६८२ ॥ तथापीति सर्वात्मबोधएवपूर्णेंदुस्तस्यसेवयागर्भएवचंडांशुर्ग्रीष्ममध्यान्हार्कः ॥ ६८३ ॥सएवमित्यादिसमभवदित्यंतंवाक्यंज्ञानस्याव्यभिचारिफलत्वाद्वामदेवेनतत्फलंलब्धमित्यर्थकंव्याचष्टे एवमादीतित्रिभिः प्रत्ययोविश्वासःश्रद्धातिशयरूपः गर्भान्निष्क्रम्येतिसंबंधः इदंप्रत्यक्षागमसिद्धंभूप्रभृतिसत्यलोकांतंययौतत्रविचचार ॥ ६८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनकादीति जीवन्मुक्तः लोकद्वयाद्गतानिवृत्तास्पृहेच्छायस्यसतथा निर्वाणमंतम् ॥ ६८५ ॥ इहेति इहमानुषे अमुत्रस्वर्गेअतिनिर्मलः पुण्यानामप्युपभोगेनक्षपितत्वात् अत्रयद्यपिभाष्यकारैरिदंवाक्यंमूर्द्धस्वर्गशब्दयोःकदाचिदप्यधोभावशून्यपरमार्थवस्तुपरत्वमादायविदेहमोक्षपरतयाव्याख्यातंतथाप्येतैर्ब्रह्मविदोलोकेपिनिरतिशयोत्कर्षइतिसूचनेप्रवृत्तिविशेषकरत्वलोभेनजीवन्मुक्तिपरतयापिव्याख्यातमित्यविरोधः ॥ ६८६ ॥ एवमैतरेयपंचमंव्याख्यायषष्ठंव्याख्यातुंशिष्टाधिकारिणांविचारेप्रवर्त्तकंवामदेवेफलदर्शनेनाधिकारिणामुत्कंठातिशयंवैराग्यदार्ढ्यंचवर्णयति वामदेवस्येत्यादिसप्तदशभिः विस्मयाविष्टाआश्चर्यदर्शनेनद्भुतचित्ताअब्रुवन् परस्परमितिशेषः॥ ६८७॥

सनकादिसमःसोपिलोकद्वयगतस्पृहः ॥ आरब्धकर्मनिर्वाणंकुर्वन्नुद्यमवर्जितः ॥ ६८५ ॥ इहामुत्रचसंप्राप्तान्भोगान्भुक्त्वातिनिर्मलः॥ आरब्धकर्मणोनाशेत्वमृतंब्रह्मसोभवत् ॥ ६८६॥ वामदेवस्यवचनंगर्भस्थस्यमहात्मनः ॥ श्रुत्वानेविस्मयाविष्टाअब्रुवन्नधिकारिणः ॥ ६८७॥ अहोअयंवामदेवोनिर्गतोस्मत्समूहतः॥ गोभ्यःपंकेनिमग्नेभ्योयथागौःपुण्यकर्मतः॥ ६८८॥ पाशैर्वापिनिबद्धेभ्यःपक्षिभ्यःक्वचिदंडजः॥ यथाप्रयातितान्हित्वावामदेवस्तथाहिनः॥ कामक्रोधादिभिर्बद्धान्हित्वासर्वान्गतोधुना॥ ६८९॥ यथाराष्ट्रादिभंगेषुस्वबंधून्परिहायहि॥ निःस्नेहोयातिमनुजस्तद्वदेवगतोधुना ॥ ६९० ॥ यद्वत्पांथेषुगच्छत्सुनिधिंकश्चिदवाप्नुयात्॥ वामदेवस्तथास्मासुलब्धवान्स्वात्मबोधनम् ॥ ६९१ ॥

तेषांवाक्यान्युत्कंठासूचकानिनिबध्नाति अहोइत्यादिना तत्रदृष्टांतः पंकमग्नगोसमूहात्पुण्यविशेषेणैकोनिर्गच्छन्गौरित्याह गोभ्यइति ॥ ६८८॥ दृष्टांतांतराणिदर्शयति पाशैरित्यादिपंचभिः तथानोस्मान्हित्वावामदेवोगतइति ॥ ६८९ ॥ यथेति राष्ट्रादीनांभंगेषुउपद्रवेपुप्रसक्तेषु आदिपदेननगरादिग्रहः स्वबंधून्मोहेनराष्ट्रादीनत्यजतःपरिहायनिःस्नेहोगच्छतियथातथावामदेवोगतइति ॥ ६९० ॥ यद्वदिति पांथेषुगच्छत्सुकश्चिदन्यतमः निधिंभूमिगतंधनम् ॥ ६९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुशुश्रूषणइति गुरुशुश्रूषणेप्रवृत्तानांबहूनांमध्येकश्चिदेवविद्यांप्राप्नोतितथास्माकमयंवामदेवः अतःसएवपुमान्पुरुषोवयंतुफलालाभात्क्लीवनिभाइतिभावः ॥ ६९२ ॥ मंत्रादीनामिति बहुषुजपादौप्रवृत्तेषु एकस्यान्यतमस्यमहात्मनोवामदेवस्य ॥ ६९३ ॥ मृगाणामिति मृगयुव्रातेनव्याधसमूहेनवृतानांसर्वतोनिरुद्धानांमध्यात्कश्चिदेवयातिक्षेमेणेतिशेषः ॥ ६९४ ॥ अहोइति अत्रसर्वसामग्रीसंपन्नेपिलोकेस्थितानामितिशेषः ॥ ६९५ ॥ तस्यचगर्भसंकटेस्थितस्याप्यस्मद्बोधनप्रवृत्तौकरुणैवप्रयोजिकानस्नेहइत्याहुः अस्मानिति स्नेहेनचेदुपदेशेप्रवृत्तिःस्यात्तर्हिबहिर्गत्वाबंधूनप्युपदिशेदितितत्कालेअस्मदुपदेशेप्रयोजनंतुविचारितगर्भदुःखसंवादोज्ञानबलेनदुःखस्यसुसहताबोधनंन्वेतिकरुणयैवतस्यप्रवृत्तिरितिभावः ॥ ६९६ ॥ स्नेहाभावंस्फुटयति बंधूनिति यतोसौवामदेवोजातमात्रएवक्वापिवंध्य

गुरुशुश्रूषणेयद्वद्बहूनांकश्चिदेवहि ॥ प्राप्नोतिमहतींविद्यांतथास्माकमयंपुमान् ॥ ६९२ ॥ मंत्रादीनांयथा सिद्धिर्बहुष्वेकस्यजायते ॥ अस्मद्विचारजासिद्धिस्तथाजातामहात्मनः ॥ ६९३ ॥ मृगाणांमृगयुव्रातवृतानांकश्चिदेवहि ॥ यातितद्वद्वामदेवोगतोस्माकंचदुःखिनां ॥ ६९४ ॥ अहोअस्यमहत्पुण्यंवामदेवस्यधीमतः ॥ गर्भेस्थितस्ययज्ज्ञानंजातंनास्माकमत्रहि ॥ ६९५ ॥ अस्मान्गर्भस्थितोवाक्यमुक्तवान्नबहिर्गतः ॥ तेनमन्यामहेनास्यस्नेहःकिंतुकृपैवहि ॥ ६९६ ॥ बंधून्सर्वानुपेक्ष्यासौपितरंमातरंतथा ॥ जातमात्रोगतःक्वापि जडोन्मत्तपिशाचवत् ॥ ६९७ ॥ अहोवयंव्यतिक्रांतकालाःकिंचिदबोधनाः ॥ हितंस्वेभ्योयतोनात्मविज्ञानमिहसाधितम् ॥ ६९८ ॥

लक्षितदेशेगतः तेननास्यस्नेहइत्यनुषंगः किंकृत्वा बंधूनित्यादि बध्नंतिस्नेहेनेतिबंधवः ब्राह्मणपरिव्राजकन्यायेनपित्रोःपृथङ्निर्देशः अलक्षितगमनेदृष्टांतोजडेत्यादि द्वंद्वःकर्मधारयोवा ॥ ६९७ ॥ अत्रतत्त्वज्ञानाऽऽपदीर्ष्यादेर्निर्वेदःस्वावमाननमित्युक्तलक्षणोनिर्वेदउत्कंठापरिपोषितःप्रतिपिपादयिषितस्तद्धेतुरीर्ष्यापूर्वंदर्शितातत्स्वरूपंस्वावमानंदर्शयति अहोइत्यादिना अहोवयंकिंचित्स्मक्लीबवदवमानपात्रंस्मयतोव्यतिक्रांतकालाःव्यर्थंगतसमयाः एतत्कुतइत्यतआहुरबोधनाइति नंद्यादित्वाल्ल्युः अज्ञाइत्यर्थः ननुस्वर्गादिसाधनविदांकथमज्ञत्वंमुख्यस्वहिताज्ञानादित्याहुः हितमित्यादि यतःस्वेभ्योहितमात्मज्ञानरूपंनसाधितमित्यन्वयः स्वेभ्यइतिपदमात्मवाचकंहितपदयोगेनषष्ठ्यर्थंचतुर्थ्यंतं ॥ ६९८ ॥ ॥६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुतत्त्वज्ञानंहिततममितिवक्तव्यमितिचेत्स्यादेवंयदिविवेकिदृष्ट्याहितपदप्रयोगार्हंस्वर्गादिकंस्यात्तस्यतुदुःखत्वैवद्दुःखमेवसर्वंविवेकिन इतिभगवत्पतंजल्युक्तेरित्याशयेनाहुः दुःखानीति अत्रसंसारेस्वर्गलोकेपिअण्वपिस्वल्पमपिसुखंनलब्धमिति ॥ ६९९ ॥ स्वर्गस्यस न्निपातज्वरसाम्यंदोषत्रयवत्तयाआहुः तत्रेति सातिशयत्वपारतंत्र्यपतनानिईर्ष्याभयशोकहेतुतयात्रयोदोषाः ॥ ७०० ॥ स्वात्माव माननरूपोनिर्वेदोलोकेद्विधादृष्टः मयाहितंकिनाचरितमित्येकः असाधुव्यर्थानिष्टजनकान्यतरत्किमाचरितमित्याकारोऽपरस्तत्राद्य उक्तोद्वितीयमाह भूमेरित्यादित्रिभिः भूमेःभूमिलोकंविहायस्वर्गंसंचरामोगच्छामस्ततःस्वर्गाद्भूमिंततःपुनस्तंस्वर्गंकचिद्दुष्कृतोदयेनरक मित्युपर्यधःसंचरामः पारावतसमाःकपोतसमाः अत्रकपोतोभ्रमणांशेदृष्टांतः कपोतभ्रमणस्यद्रष्टृहर्षजनकत्वेप्यस्मद्भ्रमणस्यमहात्म

दुःखानिविविधान्यत्रभुक्तानिशतशोपिहि॥ अस्माभिःस्वर्गलोकेपिसुखंनैवाऽणमण्वपि॥ ६९९॥ तत्रैश्व र्यंसातिशयंदेवानांवशवर्त्तिता॥ पतनंचतथास्वर्गेह्यचिकित्स्यात्रिदोषता॥ ७००॥ भूमेःस्वर्गंततोभूमिंपुन स्तंनरकंक्वचित्॥ उपर्यधःसंचरामःपारावतसमावयम्॥ ७०१॥ यथापारावतींदृष्ट्वानभःस्थःसभुवंपतेत्॥ भूमिष्ठश्चनभःक्वापिदिशोपिचदिगंतरम्॥ ७०२॥ एवंविषयतृष्णार्तावयमुच्चावचानिच॥ शरीराणिहिसं प्राप्ताःदुःखशोककराणिहि॥ ७०३॥ एवंविचार्यतेसर्वेमीमांसामात्मबोधिनीं॥ चक्रुरुत्पन्नवैराग्याजातश्र द्धागुरूत्तरे॥ ७०४॥

नांशोकहेतुत्वेनव्यतिरेकस्यापिविवक्षितत्वादिति ॥ ७०१ ॥ दृष्टांतंस्पष्टयति यथेति नभस्थःआकाशगतःसःपारावतःपतेत्गच्छेत् ॥ ७०२ ॥ दार्ष्टांतिकेयोजयति एवमिति अत्रपारावतीसमाःविषयाः देवादिस्थावरांतशरीराणिपतनकर्मदेशसमानि साम्योपपादकोध र्मोदुःखेत्यादिनोक्तः कपोतंप्रत्यपिभूम्यादेस्तथात्वात् ॥ ७०३ ॥ एवमात्मविचारश्रद्धातिशयप्रयोजकंवैराग्यमुपवर्ण्यविचारारंभप्रति पादकंकोयमित्यादिउपास्महइत्यंतंव्याचष्टे एवमितिद्वाभ्यां विचार्यवैराग्योपयोगिनंविचारंकृत्वाउत्पन्नवैराग्याःगुरूत्तरेगुरुभिःसनका द्यैर्दत्तउत्तरेउपदेशेजातश्रद्धाश्चसंतःआत्मबोधिनीमीमांसांविचारंचक्रुरिति ॥ ७०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रद्धाप्रयुक्तगुरुवाक्यस्मरणानुकूलांचितामभिनयति कोयमिति एवंचितायांकृतायांतेषांवाक्यस्मृतिर्जातेतिध्वन्यते ॥ ७०५ ॥ उपदेशे स्मृतेचतत्प्रदर्शितौद्वौभावौस्मृतौ उपलभ्यतोपलंभकरणताभ्यांप्रसिद्धोर्जडोभावःकार्यकरणात्मैकः उपलब्धाचद्वितीयोयस्यमूर्द्धद्वारेणप्रवेशउक्तः तयोःकआत्मेत्यर्थकंकतरइत्यादिषडक्षरंवाक्यंव्याचष्टे देहइति इंद्रियाणामांतरबाह्यकरणानांग्रामेणसमूहेनसहितोयंदेहःसंघातएकःप्रतीयतेकिमयमात्माकिंवाशास्त्रतोयःसम्यक्प्रतीयतेउपलब्धासच्चिदानंदाद्वयरूपोऽपरोभावःसआत्मेत्यर्थः ॥ ७०६ ॥ तत्र प्रथमकोटिघटकदेहस्यानात्मतांस्फुटयति देहस्येत्याद्यष्टभिः देहोनात्माजन्मादिमत्त्वात्घटवदितिपादत्रयार्थः विपक्षेकृतनाशाकृताभ्या

कोयमात्माद्विजश्रेष्ठायंवयंज्ञातुमुद्यताः ॥ गुरुभिश्चोपदिष्टाःस्मोवामदेवेनचाधुना ॥ ७०५ ॥ देहोयंसेंद्रियग्रामएकस्तावत्प्रतीयते ॥ शास्त्रतश्चापरःकश्चित्कोनयोरात्मशब्दभाक् ॥ ७०६ ॥ देहस्यनात्मतायुक्ताजनिमृत्यादियोगतः ॥ घटवत्स्वात्मनस्तत्त्वेकःकुर्यादुद्यमंनरः ॥ ७०७ ॥ जातस्यहिध्रुवोनाशोनष्टस्यास्तिनकिंचन ॥ पुण्यंवापातकंवापिव्यर्थवेदोदितंततः ॥ ७०८ ॥ अपिदेहस्यनैक्यंहिदृश्यतेबालवृद्धयोः ॥ ततोलोकेपिकर्मस्याद्व्यर्थयत्क्रियतेधुना ॥ ७०९ ॥ नह्यन्यःकुरुतेकर्मफलमन्यश्चविंदति ॥ विनास्वाम्यादिसंबंधंनचासौबालवृद्धयोः ॥ ७१० ॥

गमप्रसंगलक्षणंतर्कमाह स्वात्मनइति स्वात्मनस्तत्त्वेदेहरूपत्वेउद्यमंवेदार्थानुष्ठानगोचरंकोनरःकुर्यात् आमुष्मिकफलभोक्तुरभावादिति भावः ॥ ७०७ ॥ चतुर्थपादार्थंस्फुटयति जातस्येतित्रिभिः स्पष्टम् ॥ ७०८ ॥ नकेवलंशास्त्रोक्तकर्मणामेववैयर्थ्यरूपोदोषःकिंतुलौकिककर्मणामपि तत्रापिबालादिकृताध्ययनादिफलस्ययुववृद्धाभ्यांभोगायोग्यत्वादवस्थाभेदेनशरीरात्मनोभिन्नत्वादित्याह अपिदेहस्येति स्पष्टम् ॥ ७०९ ॥ व्यर्थत्वंस्पष्टयति नहीति अन्यकृतफलमप्यन्योभुंक्तेयथासेवककृतयुद्धफलंराजा यथावापितृकृतवैश्वानरेष्टिफलंपुत्रः पुत्रकृतगयाश्राद्धफलंचपिता परंतुतत्रस्वामित्वपुत्रत्वपितृत्वाद्यन्यतरःसंबंधःप्रयोजकइहतुसोपिनास्तीत्याह विनेति ॥ ७१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच देहस्यात्मत्वेबालवृद्धात्मैक्यानुसंधानंनस्यात्भिन्नयोस्तथाननुभवादित्याह अपिदेहात्मतायामितिद्वाभ्यां अयमुत्तरार्द्धोक्तः ॥७११॥ भेदइति स्नेहस्यापितथानुभवानुपपादकत्वसूचनायपितृपुत्रदृष्टांतः एतेनबालदृष्टंवृद्धोनस्मरेत् अन्यदृष्टस्यान्येनस्मरणायोगा दतिप्रसंगोपिसूचितः ॥ ७१२ ॥ देहस्यानात्मतायामनुमानांतरमाह अपिदेहोजडइति देहोनात्माजडत्वात् घटवत् विपक्षेदोषमाह सा म्येपीति जडत्वेनघटसाम्येपियदिदेहस्यचैतन्यमिष्यतेतर्हिघटस्यापितत्स्यादित्यर्थः ॥ ७१४ ॥ नन्विंद्रियाधारतादेहस्यघटाद्विशेषस्ततो देहएवचेतनोनघटइतिचेन्न घटस्यापिविषयत्वेनेंद्रियाधाररूपाद्याधारत्वेनेंद्रियाधारत्वात् परंपरयाधारोप्याधारएव अन्यथापर्यंकेश यानःप्रासादेशेतेइतिनव्यवह्रियेतेत्याशयेनपरमतानुवादपूर्वकंनिराचष्टे इंद्रियेति आसनानांचैलाजिनकुशानांसमाधारःस्थंडिलरू पःआसनादिःआसनेष्वादिःप्रथमगण्यःकिंनकिंतुआसनमेव समेशुचौशर्करावह्निवालुकाविवर्जितेइत्यादिश्रुतौदेशस्यापितथात्वबोध

अपिदेहात्मतायांस्यान्नायंबोधःकथंचन॥ योहंबालःपुरावृद्धःसएवास्म्यधुनास्थितः॥ ७११॥ भेदःप्रत्यक्ष तोयस्माद्दृश्यतेबालवृद्धयोः॥ भिन्नयोरेकताज्ञानंनयथापितृपुत्रयोः॥ ७१२॥ अपिदेहोजडोनस्याच्चेतनो घटवत्सदा॥ साम्येपियदिचैतन्यंदेहस्यनघटस्यकिम्॥ ७१३॥ इंद्रियाधारतानास्तिघटस्येतिमतंयदि॥ आसनानांसमाधारआसनादिस्तथानकिम्॥ ७१४॥ अपींद्रियाणांचैतन्यंप्रत्येकंनहिदृश्यते॥ अंधादीनां यतोज्ञानंशब्दादौविद्यतेस्फुटम्॥ ७१५॥ रूपाज्ञानंचनास्त्यत्रशब्दादेरूपबोधनात्॥ एवमोष्ठादिचलना च्छब्दज्ञानंचजायते॥ ७१६॥

नात् तथेंद्रियाणांविषयतयाधारभूतरूपाद्याधारोघटोपिकथंनेंद्रियाधारस्तथाचतस्यापिचैतन्यापत्तिरितिभावः ॥ ७१४ ॥ किंचेंद्रि याधारतयादेहस्यचैतन्यंप्रत्याशातदाभवेद्यदिइंद्रियाणांचैतन्यंविकल्पंसहेततदेवतुनास्ति तथाहि किमेकैकमिंद्रियंचक्षुराद्यन्यतरच्चे तनंकिंवातेषांसमुदायः तत्रनाद्यइत्याह अपींद्रियाणामिति यदिचक्षुरेवप्रत्येकपदेनगृह्यतेतदांधस्यकिमपिज्ञानंनस्यात्नचतथादृश्यते एवंबधिरादावपिबोध्यमितिव्यभिचारमाह अंधादीनामिति ॥ ७१५ ॥ नचरूपज्ञानमंधस्यनास्तीतिवाच्यम् शब्दस्वरूपस्यैवरूपत्वात् अन्यथाप्रपंचबहिर्भावापातइत्यर्थस्यनामरूपक्रियाःकिंस्युरित्यादिनाप्रपंचितत्वादित्याह रूपाज्ञानमिति एवंश्रोत्रादिकंविनापिज्ञानं दृश्यतइतिसोदाहरणमाह एवमिति आदिपदेनपृष्ठसंयुक्तकरस्याक्षरलेखकस्यग्रहः ॥ ७१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचचक्षुरादेरन्यतरस्यचेतनत्वेतस्यैवप्रधानत्वंवाच्यंस्यात्तत्तुनवक्तुंशक्यंविनिगमनाविरहादित्याह अपींद्रियाणामिति ॥७१७॥ समु
दायइंद्रियाणामात्मेतिपक्षमनूद्यनिरस्यति सर्वेषामिति यथासहस्रतंतुकपटादेकतंत्वपायेसहस्रतंतुकपटोनश्यतीतिनैयायिकामन्यंतेत
थैकेंद्रियापायेतत्समुदायरूपआत्मानष्टइतिदेहस्यनिरात्मकत्वापत्तिरित्यर्थः देहशब्दःक्लीबोपि देहःक्लीबपुंसोरित्यमरोक्तेः ॥ ७१८ ॥
ननुयथाग्रामेप्रधानपुरुषायेसंतितेषुमृतेषुप्रधानपुरुषतावशिष्टेषुतिष्ठतितद्वदत्राप्येकेंद्रियनाशेऽवशिष्टेष्विंद्रियेष्वात्मतास्यादित्याशंक्यदृ
ष्टांतेपूर्ववद्व्यवहारोदृश्यतेइहतुपूर्ववद्विषयदर्शनरूपव्यवहाराभावान्नैवमित्याह नचेति यद्वद्ग्रामेमृतेभ्योऽवशिष्टामहाजनाःप्रधानपुरुषा
व्यवह्रियंतेतद्वदवशिष्टानींद्रियाण्यात्मानइतिनचवाच्यं तथासतिपूर्ववद्विषयावाप्तिःस्यादसौतुनदृश्यतेइत्यन्वयः ॥ ७१९ ॥ दृष्टांतेतुपू

अपींद्रियाणामात्मत्वेप्रत्येकंनात्मताभवेत् ॥ प्रधानगुणभावोयंसमानांनोपपद्यते ॥ ७१७ ॥ सर्वेषामा
त्मताचेत्स्यादेकस्मिन्विगतेसति ॥ निरात्मकमिदंदेहंभवेन्नैवंचदृश्यते ॥ ७१८ ॥ नचावशिष्टान्यात्मानोग्रामे
यद्वन्महाजनाः ॥ पूर्ववद्विषयावाप्तिर्भवेन्नासौहिदृश्यते ॥ ७१९ ॥ नह्येकस्मिन्मृतेग्रामेविषयावाप्तिसंक्षयः ॥
प्रत्युतक्वचिदाधिक्यंविषयेष्विहदृश्यते ॥ ७२० ॥ हानिश्चेत्कुत्रचिद्दृष्टानैवासौनियतायतः ॥ एवमंधेपिकस्मा
न्नरूपसाक्षात्क्रियाक्वचित् ॥ ७२१ ॥ इंद्रियेभ्यःपरश्चेत्स्यादात्मास्वेंद्रियसाधनः ॥ करणानामभावाद्वियुक्तं
तस्मिन्नदर्शनम् ॥ ७२२ ॥

र्ववद्व्यवहारोदृश्यतइत्याह नहीति विषयोविवादविषयस्तस्यावाप्तिर्निर्णयायोपस्थितिस्तस्याहानिर्नहिदृश्यतेप्रत्युतविपरीतंक्वचित्प्रधा
नपुरुषाणांशिष्टताधिक्येआधिक्यंग्रामांतरविषयेष्वपिनिर्णयरूपमिहदृष्टांतेदृश्यते ॥ ७२० ॥ ननुदृष्टांतेकुत्रचिद्धानिरपिदृश्यतइतिचेत्त
र्ह्यत्रापितत्साम्याभ्युपगमेकेषांचिदंधानांदर्शनापत्तिरित्याह एवमिति कुत्रचिद्धानिर्दृष्टाचेत्तथाप्यसौव्यवहारहानिर्नियतायतोनदृष्टात
तएवतवनेष्टव्यवस्थासाधिकाक्वचिदंधेरूपज्ञानापत्तेरित्यर्थः ॥ ७२१ ॥इंद्रियेभ्यःपृथगात्मस्वीकारेतुव्यवस्थोपपद्यतेइत्याह इंद्रियेभ्यइ
ति स्वानिस्वकीयानिइंद्रियाणिसाधनानिविषयदर्शनोपकरणानियस्यात्मनःसतथातस्मिन्आत्मनिअदर्शनंविषयाणामितिशेषः ७२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपकरणनाशेउपकरणवतस्तदुपकरणभिन्नत्वेनतदुपकरणनाशेनाविनष्टस्यतदुपकरणसाध्यक्रियाभावोदृष्टइत्युदाहरति नहीति प्रदीपेविलोकनोपकरणेनष्टेचक्षुष्मानपरःपुमान्मण्यादिकंनविलोकयतिनसम्यक्पश्यतिनचपुंसोपिनाशःप्रदीपभिन्नत्वादित्याह विनाशेन विवर्जितइति ॥ ७२३ ॥ नन्वस्तुतर्हिप्रदीपसाम्यमिंद्रियाणांतदुपकार्योदेहएवचात्मेत्याशंक्यतवमतेप्रदीपविनाशेप्रदीपांतरवच्चक्षुर्नाशेचक्षुरंतरंसंपाद्येत नचादृष्टरूपकारणवैकल्यात्तथानशक्यतेइतिवाच्यं भवन्मतेऽदृष्टकारणजन्मांतराभावादित्युत्तरश्लोकेनवक्तुमास्तिकमते प्रदीपवदुपादानंनसंभवतिअदृष्टपारतंत्र्याभ्युपगमादित्याह नचेति परंविद्यमानेभ्योभिन्नंपूर्वपरदेहत्यागोपादानयोर्मध्येमूर्छाभ्युपगमादपिनेयमापत्तिरास्तिकमतेइतिसूचयति शरीरेति ॥ ७२४॥ येषामिति येषांचार्वाकाणांमतेइतिशेषः ॥७२५॥ नकेवलमयंदेहात्मवादे

नहिप्रदीपेनष्टेस्मिंश्चक्षुष्मानपरःपुमान्॥ विलोकयतिमण्यादिविनाशेनविवर्जितः॥ ७२३ ॥ नचप्रदीपवच्छक्यमिंद्रियंहिपरंनृभिः॥ आदातुंकर्मवशगैःशरीरांतरचारिभिः ॥ ७२४॥ येषांतुनभवेदात्माशरीरादपरोनृणाम्॥ इंद्रियांतरमादातुंशक्यंतैर्हिप्रदीपवत् ॥ ७२५॥ ग्रामेयद्वन्मृतेतस्मिन्समर्थैर्हिमहाजनाः॥ समर्थमपरंतस्यकार्यआददतेक्षणात्॥ ७२६॥ यथाप्रजाश्चराजानंपूर्वस्मिन्हिमृतेसति ॥ स्वीकुर्युरपरंतद्वदिंद्रियाणींद्रियांतरम्॥ ७२७॥ ऐकमत्यंनचेत्तेषांक्रियाकाचिन्नसिद्ध्यति॥ ग्रामादौनभवेत्कार्यमैकमत्यंविनाक्वचित्॥७२८॥इंद्रियाणांनचैतन्यंतेनसंभाव्यतेक्वचित्॥ किंतुव्यापारमात्रंहिरूपादीन्प्रतिदृश्यते॥७२९॥

एवप्रसंगःकिंतुइंद्रियात्मवादेपिजन्माभावेनादृष्टकारणनैरपेक्ष्याद्विनष्टशिष्टेंद्रियैस्तादृशस्यसंपादनापत्तेरितिसदृष्टांतमाह ग्रामइतिद्वाभ्यां॥ ७२६॥ यथेति स्पष्टं॥ ७२७॥ नन्विंद्रियाणिकुर्युरेवैवंयद्येकमत्यंस्यादितिचेत्तर्हिभिन्नात्मनामिंद्रियाणामैकमत्याभावेदर्शनादिक्रियापिनस्यादितिसदृष्टांतमाह ऐकमत्यमिति ऐकमत्यंसमाननिश्चयः ॥ ७२८ ॥ फलितमाह इंद्रियाणामिति तेनेष्टानुपपत्त्यनिष्टप्रसंगरूपतर्केणसंभाव्यतेबुद्धावारोहयितुंशक्यतेकिंतुरूपादीन्प्रतींद्रियाणांव्यापारएवदृश्यतेप्रकाशकत्वंतुकस्यचिदन्यस्यैवतेनैतानिकरणान्येवनत्वात्मानइति ॥ ७२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचचेतनाधारत्वेनदेहस्यघटाद्विशेषउक्तोनिरस्तइत्याह चेतनेति तेनशरीराधिकरणकानामिंद्रियाणांचेतनत्वाभावोपपादनेन ७३० ननुयथागुडदधिसंयोगेपीनसस्यनाशशक्तिरभिव्यज्यतेयथाचतांबूलेखादिरादियुतेरागशक्तिरेवंभूतसमुदायेशरीरेज्ञानशक्तिःसैवचघटाद्विशेषइत्याशंक्यघटेपितथाभावान्नैवंवक्तुंशक्यमित्याह नजायतइति एतत्भूतपंचकं नजायतेचैतन्यमितिशेषः ॥ ७३१ ॥ घटेवाय्वभावमाशंक्यनिराचष्टे नचेति घटेवायोरभावोस्तीतिनवाच्यं यतःसर्वत्रनभसिवायवःस्तिमिताःसंतितच्चनभोघटेप्यस्तीत्यन्वयः स्तिमिताआर्द्रचूर्णवत्परस्परमिलितावयवाः अतएवशब्दनित्यत्ववादिनोमीमांसकाआहुः वक्तृमुखोद्गताहिवायवीयाःसंयोगविभागाःप्रसरंतःस्तिमितवाय्वपसारणेनशब्दंव्यंजयंतितदभावात्सतोपिशब्दस्याग्रहणमिति नभस्वानितिनामापिवायोराकाशेननित्ययोगमाख्याति अनुभूयतेचव्यजनचालनेनघनीभावापचयइति ॥ ७३२॥ प्रत्यक्षमात्रप्रमाणवादिनंप्रतिप्रत्यक्षविरोधमप्युदाहरति अपिसंयोगतइति

चेतनाधारतातेनदेहस्यास्तिनकाचन॥ ततोघटस्यदेहस्यवैषम्यंकेनतेभवेत्॥७३०॥ नजायतेत्रचैतन्यंभूतपंचकमेलनात्॥ घटेपिमिलितंत्वेतत्कस्मात्तत्रनजायते॥७३१॥ नचवायोरभावोस्तिस्तिमितावायवोयतः॥ संतिसर्वत्रनभसितन्नभोस्तिघटेपिहि॥७३२॥ अपिसंयोगतोवायोर्दृश्यतेनचचेतना॥ घटेमृतेतथादेहेतस्माद्यत्किंचिदीरितं॥७३३॥ चेतनानांसमाधाराद्गौणीतस्यात्मतामता॥ इंद्रियाणांनचैतन्यंनातस्तेष्वपिसाभवेत्॥७३४॥ हृदयेयद्यपिज्ञानंदृश्यतेसर्वदेहिनाम्॥ तथापिदेहवत्तस्यनात्मतामांसरूपतः॥७३५॥

घटेतथामृतेदेहेवायोःसंयोगतोपिव्यजनादिनाविहिताच्चेतनाज्ञानंनदृश्यतेतस्मादेतद्भूतमिलनेनचैतन्यलाभपरमीरितंत्वद्वचनंयत्किंचित्तुच्छमित्यर्थः तस्माच्छरीरस्यनमुख्यात्मतेतिसिद्धम् ॥ ७३३ ॥ इंद्रियाणांचैतन्याभावप्रतिपादनफलंचशरीरस्यतदाधारतयागौणात्मतानिरासः इंद्रियाणांचमुख्यात्मतानिरासइत्याह चेतनानामिति समाधारात्धारणात्तस्यदेहस्यगौणीआत्मतामताचेत्सापिदुर्लभायतइंद्रियाणांनचैतन्यंमतंतेषुइंद्रियेष्वपिसात्मतानभवेदिति ॥ ७३४ ॥ चार्वाकाश्चतुर्विधाःदेहेंद्रियमनःप्राणात्मवादभेदात्तत्राद्यौनिरस्तौतृतीयमतेचमनःपदेनमनोनिवासोहृदयदेशोविवक्षितःप्रत्यक्षमात्रप्रमाणकत्वादितितंनिरस्यति हृदयइति हृदयदेशोऽनात्मामांसरूपत्वात्मृतशरीरवदितिप्रयोगः ॥ ७३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणात्मवादिनंप्रत्याह प्राणोपीति नन्वदर्शनेनमृत्युप्रयोजकत्वमात्मलक्षणमितिचेन्न अदर्शनंहिप्रत्यक्षमात्रप्रमाणकेनप्रत्यक्षाविषयत्व मेववाच्यं तथाचस्थावरप्राणेव्याप्तिरित्याह प्राणस्येति प्राणस्यादर्शनान्नृणांमृत्युर्नियतोभवेदितिप्राणात्मत्वोपपादनायनवाच्यं यतःस्था वराणांतस्यप्राणस्यादर्शनेपिक्वचिन्मृत्युर्नदृष्टइति ॥ ७३६ ॥ जंगमप्राणेपिएतल्लक्षणस्यनानुगमइत्याह जंगमेष्वपीति तेजंगमाः तत्रमू र्च्छादौ ततःउक्तलक्षणस्याप्यनुपपत्तेः॥७३७॥अथनिर्गमेणमृत्युप्रयोजकत्वमित्यस्तुलक्षणमितिचेन्न तथापिजठराग्नौव्यभिचारादित्या ह निर्गमादिति वन्हेरपिनिर्गमइत्यन्वयः नचेष्टापत्तिः प्रतिज्ञाहान्यापत्तेरित्याह भवतामित्यादिना तस्यवन्हेः ॥७३८ ॥ नचप्राणनिर्ग मःप्रत्यक्षत्वेनविशेषयितुंशक्यः अनुमेयतयावन्हिनिर्गमेनसमत्वादित्याह निर्गमोहीति यथाप्राणस्यनिर्गमोऽस्पर्शान्नासिकाद्यग्रधृतह

प्राणोपिनभवेदात्मावायुत्वाद्बाह्यवायुवत् ॥ प्राणस्यादर्शनान्नैवमृत्युःस्यान्नियतोनृणाम् ॥ ७३६॥ स्था वराणांभवेन्मृत्युर्नतस्यादर्शनेक्वचित्॥जंगमेष्वपिमूर्च्छादौप्राणःक्वापिनलभ्यते॥ म्रियंतेनैवतेतत्रप्राणोना त्माभवेत्ततः ॥ ७३७॥ निर्गमाद्यस्यमृत्युःस्यात्सआत्मेतिवृथावचः॥ अपिनिर्गमतोवन्हेर्मृत्युर्दृष्टोहिदेहिना म्॥ भवतांनात्मतातस्यप्राणआत्मेतिवादिनाम् ॥ ७३८॥ निर्गमोहियथास्पर्शात्प्राणस्येहानुमीयते॥ त थाग्नेरपिसंस्पर्शाच्छीतलादनुमीयते ॥ ७३९॥ अग्निप्राणौनचस्यातामात्मानेकात्मताभवेत्॥ तथात्वेसा चनोयुक्ताप्रत्यभिज्ञाद्यभावतः॥७४०॥ अपिमृत्युःसदादृष्टोनिर्गमेरुधिरस्यहि॥ तवतस्यात्मतानेष्टाप्राणव न्यात्मवादिनः॥ ७४१॥

स्तादिनास्पर्शाभावज्ञानादनुमीयतेतथाग्नेरपिनिर्गमःशीतलात्स्पर्शादनुमीयतेइति प्रयोगस्त्वेवं एतच्छरीरात्प्राणोनिष्क्रांतः योग्यत्वेस त्यनुपलभ्यमानस्पर्शकत्वात् . व्यतिरेकेजीवत्प्राणवत् इदंशरीरं निष्क्रांताग्निकं शीतलस्पर्शकत्वात्व्यतिरेकेजीवच्छरीरवत्॥७३९॥ अ ग्निप्राणसमुदायोऽस्त्वात्मेत्याशंक्यनिराचष्टे अग्निप्राणाविति अग्निप्राणौद्वौसमुदायभावेनैकआत्मानचस्यात् समुदायदुर्निरूपतायाः प्र पंचितत्वात् किंतुतथात्वेतथाभावांगीकारेऽनेकात्मताआत्मनोद्वित्वंस्यात् नचेष्टापत्तिरित्याह साचेत्यादिना साऽनेकात्मतानयोग्या प्रत्य भिज्ञाद्यभावापातात् नान्यदृष्टंस्मरत्यन्यइतिन्यायात् आदिपदेनयएवाहमद्राक्षंसएवस्पृशामीत्याद्यनुसंधानंगृह्यते॥ ७४०॥ किंच निर्ग मेनमृत्युप्रयोजकत्वंलक्षणंरुधिरेऽतिव्याप्तमित्याह अपिमृत्युरितिद्वाभ्यां तवप्राणवन्ह्योरात्मत्ववादिनस्तस्यरुधिरस्यात्मतानेष्टेति॥७४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुधिरस्येति एवंसतिउक्तलक्षणांगीकारेसतितवमतेरुधिरस्यात्मत्वंसमापतेत्प्रसज्येत नचतस्यात्मत्वेनसंग्रहःकर्त्तुंशक्यस्तद्विनापिक्वचिज्जीवनदर्शनादित्याह प्राणिनइति दोषेणरुधिरशोषहेतुनादुष्टाविकृतिंनीताअरुधिराअपिजीवंतिक्वचिद्देशेकालेवा यथामूर्छिताद्याः यथावाहिरण्यकशिपुस्तपस्यन्नस्थिशेषः ॥ ७४२ ॥ किंच प्राणाग्निरुधिराणांत्रयाणामनात्मत्वंजडत्वेनप्रसाध्यं नचजडत्वंस्वरूपासिद्धं शरीराद्बहिःस्थितानांप्राणादीनांजाड्यस्यस्पष्टत्वादित्याह प्राणेति ॥ ७४३ ॥ अथांतःकरणमात्मानात्मत्वाभ्यांविचारयति मनइति चत्वारोऽन्तःकरणभेदानात्माऽऽत्मबहुत्वापातात् बहुत्वांगीकारेचपूर्वोक्तप्रत्यभिज्ञाद्यनुपपत्त्यापत्तिरिति ॥ ७४४ ॥ ननुमनआद्यन्यतमस्यात्मत्वमस्त्वित्याशंकांनिराकुर्वन्येनवापश्यतीत्यादिवाक्यस्यभाष्योक्तार्थहेतुतयाह एकैकशइति एतेषांमनआदीनामेकैकस्यान्यतमस्या

रुधिरस्यतवात्मत्वमेवंसतिसमापतेत्॥ प्राणिनोदोषदुष्टाहिजीवंत्यरुधिराःक्वचित्॥ ७४२॥ प्राणाग्निरुधिराणांस्याज्जडानांनात्मताक्वचित्॥ दृश्यतेत्रत्रयाणांहिबहिर्जाड्यंस्फुटंनृभिः॥ ७४३॥ मनोबुद्धिस्तथाचित्तमहंकारश्चनक्वचित्॥ आत्मावहुत्वतस्तत्रप्रत्यभिज्ञाद्यभावतः॥ ७४४॥ एकैकशोपिनैतेषामात्मताकरणत्वतः॥ नहींद्रियाणामात्मत्वंप्रदीपादेरथापिवा॥ ७४५॥ कर्तृत्वेपिचनास्येतिनियतिःकेनचित्क्वचित्॥ वक्तुंशक्यायतःसाम्यंचतुर्णामिहविद्यते॥ ७४६॥

पिशब्दात्समुदायस्यात्मतान कुतः करणत्वतः अंतःकरणंहिचतुर्धापिचक्षुरादिद्वारानिर्गतवृत्तिभिरावरणाभिभावकत्वेनोपरागसंपादनेनवाचिद्धातोर्विषयप्रकाशउपकरणंतत्कथमात्माभवेत् उपकरणस्यात्मत्वेचइंद्रियाणांप्रदीपादेश्चात्मत्वापत्तिरित्याह नहीति ॥ ७४५ ॥ ननुकिमर्थंमनआदीनामुपलंभकरणत्वमभ्युपगम्यते उपलंभकर्तृत्वमेवास्त्विइत्याशंकांनिरस्यति कर्तृत्वेपीति उपलंभकर्तृत्वेस्वीक्रियमाणेअस्यैवमनसोवाहंकारादेर्वाइतिनियतिर्नियमहेतुयुक्तिःकेनचित्क्वचिद्वक्तुंनशक्याविनिगमनाविरहात् सएवकुतइत्यतआह यत इत्यादि यतश्चतुर्णांमनोबुद्ध्यहंकाराणांपरस्परांभिद्रियैश्चजडत्वेनसाम्यंदृश्यतेतथाचानेकात्मतापत्तिर्जडानामात्मत्वेव्याघातश्चेतिभावः ॥ ७४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचमनआदीनामात्मत्ववादीप्रष्टव्यः किमनोबुध्यहंकारचित्तशब्दाश्चत्वारआत्मानःकिंवामनःप्रभृतिशब्दजन्याअर्थाकाराश्चतस्रोवृत्तयःकिमथवामनआदिशब्दानांचत्वारोर्थाआत्मानःतत्रनाद्यद्वितीयौ शब्दतज्जन्यवृत्तीनामर्थप्रकाशार्थतयाशेषत्वेनशेषिरूपात्मत्वायोगादित्याह अपिशब्दाइति मनआदेरंतःकरणचतुष्टयस्यवाचकशब्दास्तथासार्थाअर्थैःसहिताबोधाश्चतुर्विधाःसंति शब्दबोधार्थानांप्रत्येकंचतुर्विधत्वमित्यर्थः तत्रशब्दानांबोधानांचात्मतानहिवक्तुंशक्या शेषत्वादितिशेषः ॥ ७४७ ॥ परिशेषादर्थेष्वेवविचारमवतारयति तथापीति तथापिशब्दतज्जन्यवृत्त्योरनात्मत्वेपिअर्थाअवशिष्टाः कुतः इष्टत्वतःईप्सिततमत्वात् अर्थोहिबोध्यःसचबोद्धुर्बोधकरणैर्बोधक्रियायाचफलाश्रयत्वेनेप्सितोभवनीत्यतःप्रधानत्वादर्थाविचार्याः विचारस्वरूपमाह किंतेइति किंतेअर्थाजडाःकिमुतान्येचेतनाः तत्रजडत्वेजडभागस्यपदार्थत्वेजडत्वस्यपरिच्छेदव्याप्यत्वात्परिच्छेदस्यचानित्यत्वव्याप्यत्वादनात्मतैवभवेद्यथाघटेइति ॥ ७४८ ॥ अनेकजडानामात्मत्वेप्रत्यभिज्ञाद्यनुपपत्तिर्व्याघातश्चेत्याह उक्तदोषतइति ननुनजडत्वंपरिच्छिन्नत्वव्याप्यं अतएवाकाशादयोनित्याइत्याशंकांनिराचष्टे कालेति तेषामपिस्वोपादानैकदेशवृत्तित्वेनपरिच्छिन्नत्वादनित्यत्वाच्च ॥ ७४९ ॥ विभुत्वाभ्युपगमेप्याह अपीति परैरपिभेदप्रतियोगित्वरूपोवस्तुपरिच्छेदोभ्युपेयतेतथाचयावद्विकारमितिन्यायात्कार्यत्वेनानित्यत्वमिति ॥ ७५० ॥ परिच्छिन्नत्वस्यानित्यत्वनिरूपितव्याप्तिग्रहोपयोगिसाहचर्यग्रहमभिनयति वस्तुनेति वस्तुपरिच्छेदइत्यस्यायमर्थोवस्तुनापटादिनाइतोघटाद्भिन्नतयाकल्पितेनास्यघटस्यपरमार्थतःपूर्णस्यच्छेदनंभेदप्रतियोगितयाकल्पनारूपंविद्यते एवंदेशकालपरिच्छेदइत्यस्यदेशकालाभ्यांकल्पिताभ्यामत्यंताभावप्रतियोगितायाःप्रागभावध्वंसप्रतियोगितायावाकल्पनारूपंछेदनंविद्यते वस्तुतोऽत्रवस्तुनिमानसंभ्रमंकल्पनारूपंविनाभेदोऽणुरपिनविद्यतेइति तथाचविवेकिनांपरिच्छेदेनसहकल्पितत्वमनित्यतारूपमुपलभ्यतेअज्ञानांधानांतुवृत्तमन्यदितिभावः ॥ ७५१ ॥

अपिशब्दास्तथाबोधाःसार्थाअपिचतुर्विधाः॥ मनआदेस्तुशब्दानांबोधानामात्मतानहि ॥ ७४७ ॥ तथापीष्टत्वतोप्यर्थाःशिष्यंतेतान्विचारय॥ किंतेजडाउतान्येस्युर्जडत्वेनात्मताभवेत्॥ ७४८॥ परिच्छेदादनित्यत्वाद्घटवच्चोक्तदोषतः॥ कालाकाशादयोप्येतेजडानित्यानतुक्वचित् ॥ ७४९ ॥ अपिवस्तुपरिच्छेदस्तेषुतिष्ठतिवादिनाम्॥ अनित्यत्वंतथात्वेस्यात्परिच्छिन्नत्वहेतुतः॥ ७५० ॥ वस्तुनावापिदेशेनकालेनाप्यथच्छेदनम्॥ विद्यतेनहिभेदोत्रविनास्वंमानसंभ्रमम्॥ ७५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयेद्वितीयपक्षइष्टापत्तिंदर्शयति अथान्यइति अथतेमनआदिपदार्थाअन्येजडभिन्नास्तर्हिप्रकाशरूपावक्तव्यास्तथाचानंदात्मसदा
त्मकाःआनंदात्मसद्रूपाःस्युः प्रकाशस्यदुर्ग्राह्यभेदतयापरिपूर्णत्वेनानंदरूपत्वात् तादृशानंदस्यचसर्वांतरत्वेनतद्भावस्यसाक्षिणमंतराऽसि
द्धेश्चेति तथात्वेपिभेदःकुतोनस्यादितिमूढशंकामालक्ष्यभेदाभावंप्रतिजानीते भेदोत्रेति अत्रमनआदिपदार्थानांसदानंदात्माभिन्नप्रकाश
रूपत्वेसतितेषांसदादिस्वरूपाणांभेदोनभवेत् भेदहेतोरभावादुर्वचत्वादितियावत् ॥ ७५२ ॥ किमेषांस्वरूपाणांसतःसतोभेदआनंद
स्यानंदाद्भेदइत्येवंभेदआपाद्यतेकिंवापरस्परमितिविकल्प्यतत्रनाद्यइत्याह सदानंदेति सदानंदप्रकाशानामात्मनश्चएषांचतुर्णामात्मनः
स्वरूपाद्भिदानदृश्यते यथालोकेपटादिवस्तुनःस्वस्यस्वरूपस्यस्वस्मात्स्वरूपादिति ॥७५३॥ द्वितीयंनिरस्यति नप्रकाशइत्यादिना अन्य

अथान्येतेप्रकाशाःस्युरानंदात्मसदात्मकाः॥ भेदोत्रनभवेत्तेषांभेदहेतोरभावतः॥७५२॥ सदानंदप्रकाशा
नामात्मनश्चात्मनोभिदा॥ नदृश्यतेयथालोकेस्वस्यस्वस्माद्धिवस्तुनः॥ ७५३॥ नप्रकाशःसुखादन्यःप्रतिकू
लोजडोभवेत्॥ नसुखंबोधतोभिन्नमज्ञानमसुखंयतः॥७५४॥ नसत्तासुखबोधाभ्यांभिन्नास्यादसतःपृथ
क्॥ असुखज्ञानरूपत्वेकोभेदःसदसत्त्वयोः ॥ ७५५॥ सुखबोधौनचस्यातांभिन्नौसत्तास्वरूपतः॥ असत्त्वे
चतयोर्वंध्यापुत्रादस्तिकुतोभिदा ॥ ७५६ ॥ सदानंदप्रकाशेभ्योनात्माभिन्नःकथंचन॥ तथात्वेऽसदनानंदा
ज्ञानानिस्युस्तवात्मनः॥ ७५७ ॥

त्वेप्रतिकूलत्वेनजडत्वापत्तिरित्यर्थः सुखस्यबोधाद्भिन्नत्वेऽभासमानत्वेनासुखत्वापत्तिर्भासमानसुखस्यैवपुरुषार्थत्वादिति ॥ ७५४ ॥
नसत्तेति सत्तासुखबोधाभ्यांभिन्नाचेत्तर्हिअसतःपृथङ्नस्यात्किंतुअसद्रूपैवस्यात् एवंचसत्तायाअसुखज्ञानरूपत्वेसुखज्ञानभिन्नरूपत्वे
तस्याएवासत्त्वात्सदसत्त्वयोर्जगतिभेदोनस्यादिति ॥ ७५५ ॥ सुखबोधाविति स्पष्टम् ॥ ७५६ ॥ सदानंदेति आत्मासदानंदप्रकाशे
भ्योनभिन्नः तथात्वेअत्मनःसदानंदप्रकाशेभ्योभिन्नत्वांगीकारेतवमतेआत्मनःअसदनानंदाज्ञानानिस्युः भावप्रधानोनिर्देशः तथाचाऽ
सत्त्वानानंदत्वाज्ञानत्वानिस्युरित्यर्थः अज्ञानत्वंप्रकाशत्वविरोध्यावरणत्वं ॥ ७५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्कस्यविपर्ययपर्यवसायितांदर्शयन्नात्मनोऽसत्वानानंदत्वाज्ञानत्वानिनसंतीत्याह नास्तिनेति सर्वदेहिनामात्मानास्तिनकिंत्वस्त्येवप्र तिकूलोनकिंत्वनुकूलः नजडःकिंतुप्रकाशः अत्राशंकमानंप्रतिव्याघातंसूचयन्नात्मसत्त्वादावनुभवंदर्शयति यतइत्यादिना यतआ त्माहमस्मीत्याकारेणतथास्वानुकूलःप्रतिकूलविलक्षणःकदाप्यप्रियोनभवामीत्याकारेणविदन्जानन्स्फुरन्भामीत्याकारेणसदाभासतेइ तिशेषः ॥७५८॥ एवंविचारयतांतेषामधिकारिणामात्मनोऽनंतत्वस्फूर्तिमपिजातामभिनयति आत्मेति भोसखायःआत्मेतितथाहमिति अनंतस्यात्मनोज्ञानंयतःसर्वस्यप्राणिजातस्यदृश्यतइति आत्मपदार्थोहियच्चाप्नोतियदादत्तेयच्चात्तिविषयानिह यच्चास्यसंततोभावस्त स्मादात्मेतिकथ्यतइतिनिरुक्तः कीदृशंज्ञानं संदेहादिविवर्जितमिति अतएवाहमस्मिनवेतिनाहमस्मीतिवानकश्चिद्वदतीति ॥ ७५९ ॥ अतएवेति अतःआत्मनःसदानंदप्रकाशरूपत्वेसत्यनंतत्वादेवसदानंदप्रकाशाःआत्मनोनभिन्नाः तत्रहेतुमात्मभिन्नेसदादिबुद्ध्यभावमाह

नास्तिनप्रतिकूलोननजडःसर्वदेहिनाम् ॥ आत्मायतोहमस्मीतिस्वानुकूलोविदन्सदा ॥ ७५८ ॥ आत्माहमि त्यनंतस्यदृश्यतेज्ञानमात्मनः ॥ सर्वस्यप्राणिमात्रस्यसंदेहादिविवर्जितम् ॥ ७५९ ॥ अतएवनभिन्नाःस्युः सदानंदप्रकाशकाः ॥ नरशृंगाहिकुड्यादौनैवंधीर्दृश्यतेयतः ॥ ७६० ॥ नचास्तिकारणंकिंचिद्दृश्यतेस्वात्म नःपृथक् ॥ नहिलोकोजडोनामविद्यतेस्वधियंविना ॥ ७६१ ॥

नरेति यदिसदादिपदार्थाआत्मभिन्नाःस्युस्तर्हिआत्मभिन्नतयामतेषुनृशृंगसर्पकुड्येषुयथाक्रमंसदानंदप्रकाशबुद्धयःस्युरित्यर्थः॥७६०॥ ननुकथमात्मनोऽनंतत्वंजडवस्तुकृतपरिच्छेदादित्याशंक्यजडस्यात्ममात्रकारणत्वादात्मनःपृथक्स्फूर्तिराहित्याच्चभिन्नत्वंदुर्वचमित्याह नचास्तीति कारणंआत्मनःपृथक्किंचिन्नास्ति तथात्वेकारणस्यनिःस्वरूपतापत्तेः आत्मनएवेदंसर्वमित्यादिश्रुतेश्च नचात्मनःपृथक्किंचि दृश्यते कथमित्यतआह नहीति लोक्यतेइतिलोकोविषयोघटादिर्जडोनामजडत्वेनप्रसिद्धःस्वधियंस्वस्यंआत्मनोधियंभानंविनानविद्य तेकिंतुप्रकाशरूपात्मभानपूर्विकैवविषयस्फूर्तिरित्यर्थः तथाचयथाघटोमृत्कारणकोमृदुपलंभपूर्वकोपलंभशालीचनमृदःपृथक्तथात्म नःप्रपंचइतिभावः ॥ ७६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुयद्यात्मनोभिन्नंनकिंचित्तर्हिसृष्टिश्रुतयःकथंकारणतामाहुरित्याशंक्याद्वैतेबुद्ध्यवतारणायतथाहुः नचतासांतत्रतात्पर्यमितिबोधय
नूजडंस्वयमुत्पद्येतेतिशंकामपिवारयति स्वयमिति कार्यपूर्वक्षणवृत्तित्वरूपकारणत्वस्यतदुत्तरक्षणवृत्तित्वरूपकार्यत्वस्यसहभावविरो
धादिति नन्वज्ञानात्स्वस्यस्वंप्रतिहेतुतास्त्वित्यतआह अज्ञानादिति अज्ञानादपियारज्ज्वादेर्हेतुतासापिसर्पादिकंप्रत्येवनरज्जोरज्जुंप्रतीति
अतोवस्तुतोऽजमेवतत्त्वमिति तदुक्तंगौडपादैः एतत्तदुत्तमंसत्यंयत्रकिंचिन्नजायतेइति ॥ ७६२ ॥ एवंवस्तुपरिच्छेदंनिरस्यदेशकालपरि
च्छेदाभावमप्याह नचात्मेति गोव्यक्तिरूपेदेशेगोत्वंयथातिष्ठतितद्वत्कुत्रचिद्देशेनस्थितइत्यर्थः तत्रोक्तलक्षणात्मभिन्नाधारस्यसिद्ध्ययो
गंहेतुमाह आधारोहीति एतेनकालपरिछेदाभावोप्युपलक्षितः॥ ७६ ३॥ननुयदीदृशमात्मतत्त्वंतर्हिकथंप्रपंचभानमतआह ततइति सदस

स्वयंस्वस्यनहेतुःस्यात्पदार्थःकोपिकुत्रचित्॥ अज्ञानादपिरज्ज्वादेःसर्पादेरेवहेतुता ॥ ७६२॥ नचात्माकुत्र
चिद्देशेस्थितोस्तिगविगोत्ववत्॥ आधारोहिप्रकाशेनविनानैवप्रसिध्यति ॥ ७६३॥ ततोदेशश्चकालश्चव
स्तुयत्सदसद्वपुः॥ अध्यस्तंसर्वमेवैतत्प्रकाशेशर्वरीसमम् ॥ ७६४॥ दृश्यतेमोहतोस्माकमानंदात्मप्रकाश
तः॥शयानानांयथामोहात्स्वप्नेसदसदात्मकम्॥ ७६५॥ ततोऽनंतत्वमायातंसदानंदात्मरूपिणः॥ प्रकाश
स्ययतश्छेदस्त्रिधास्मिन्नैवविद्यते ॥ ७६६ ॥ एषदेवःपुरासर्गउपदिष्टोमहात्मभिः॥ गुरुभिश्चाधुनास्मभ्यंवा
मदेवेनचेरितः ॥ ७६७॥ अस्यजिज्ञासयास्माकंसमाजोयंमहानिह॥ अंतःकरणभेदानांविकल्पेनात्रनि
श्चितः॥ ७६८॥

द्वपुःअनिर्वचनीयंयद्वस्तुआकाशादिअध्यस्तंकल्पितं कीदृशं प्रकाशेमध्यान्हार्केशर्वरीसमंघूककल्पितरात्रिनिभं॥ ७६ ४॥दृश्यतेइति ए
तादृशंसर्वमस्माकंमोहतोदृश्यते मोहेनाप्यात्मप्रकाशांशोनाच्छादयितुंशक्यइतिदर्शयति आनंदात्मेति दृष्टांतमाह शयानानामिति
॥ ७६ ५ ॥ फलितमाह ततइति ततःउक्तयुक्तिकदंबात् सदानंदात्मरूपिणःप्रकाशस्यानंदत्वमायातंसिद्धमितियावत् यतोस्मिन्प्रकाशे
त्रिधापरिच्छेदोनवर्त्ततेइत्यन्वयः ॥ ७६ ६ ॥ एतावदेवसर्वशास्त्रमेयमित्याह एषइति एषसर्वांतरोऽद्वितीयोदेवःगुरुभिःसनकाद्यैःपुरास
र्गेपूर्वस्त्रष्टावस्मभ्यमुपदिष्टः तथावामदेवेनेरितोबोधितः ॥ ७६ ७ ॥ अस्येति पूर्वार्धंस्पष्टम् अंतःकरणेति विकल्पेनविचारेणद्वारभूतेनवि ॥ ६९ ॥
निश्चितोऽयमात्मेत्युत्तरेणान्वयः ॥ ७६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमात्मेति ईरितमस्माभिर्विचारारंभेउक्तं स्पष्टमन्यत् ॥ ७६९ ॥ अत्रेदंप्रघट्टकतात्पर्यमनुसंधेयं येनवापश्यतीत्यादेर्यदेतदित्यंतस्य वाक्यस्ययेनचक्षुरादिरूपपरिणतेनदर्शनादिव्यापारंकरोतितदुपलब्धिकरणमनात्मेतिश्रौतोर्थस्तमनुसंदधतामधिकारिणांचिद्याभांतःकर णस्वरूपस्यजडांशविमोकेनानुसंधानात्तस्यैववाक्यस्यतात्पर्यार्थोप्यवगतः तत्स्वरूपंचतदुपलब्धिकरणंयदर्थंसप्रकाशोविचार्यमाणः सदानंदात्मासर्वांतरोद्वितीयश्चसाक्षादपरोक्षआत्मेतिसएषद्विविधोऽर्थःपूर्वग्रंथेनदर्शितः अथहृदयमित्यादिनामधेयानीत्यन्तंवाक्यंषड्विश तिश्लोकैर्व्याचिख्यासुर्भूमिकामारचयति यतोंतरित्यादित्रिभिः आनंदात्माअपरिच्छेदोनंतश्चसत्प्रकाशःपुमान्यतोंतःकरणोपाधिर्हृदये ऽवलोकितस्तस्मादित्युत्तरेणान्वयः यतोस्माकमुक्तात्मदर्शनेंतःकरणंसवृत्तिकमुपाधित्वेनस्वोपहितचित्स्मारकत्याद्धृदयंचदेशतयोपकृत वदित्यर्थः ॥ ७७० ॥ तस्मादिति अत्रेतिपदस्यदेहलीदीपन्यायेनोभयत्रसंबंधः तस्माद्धृदयांतःकरणयोरात्मोपलब्धिसाधनत्वस्यनिर्णी तत्वात् अत्रहृदयांतःकरणयोर्वर्त्तमानानिहृदयादीनिअनेकशःअनेकानिनामानि अत्रहृदयांतःकरणयोःस्वोपलब्ध्याधारतासंबंधेन

अयमात्मायदर्थंहिकोयमात्मेतिचेरितम्॥ अस्माभिःकृतकृत्याःस्मोवयंसर्वैत्रसंगताः॥ ७६९॥ यतोंतःकर णोपाधिर्यस्माभिर्हृदयेपुमान्॥ आनंदात्मापरिच्छेदःसत्प्रकाशोवलोकितः ॥ ७७० ॥ तस्मादस्यात्रनामा निदास्यामःसंगतावयं॥ अवाङ्मनसगम्यस्यहृदयादीन्यनेकशः॥ ७७१ ॥

स्वोपाधितासंबंधेनवर्तमानस्यास्यावाङ्मनसगम्यस्याप्यात्मनःअस्मैइतियावत् दास्यामःसमर्पयामइत्यर्थः संबंधत्वेनसंप्रदानत्वस्यवि वक्षयाषष्ठी एवंनामार्पणेकृतेचहृदयादीनांवाचारंभणश्रुत्यानाममात्रात्मकानांनाम्नांब्रह्मार्पणेनकृतज्ञतासिद्धिः तात्स्थ्यात्ताच्छब्द्यमि तिन्यायानुसरणंफलतीति यद्वायतोंतरित्यादिश्लोकयोरेवमर्थः यतोस्माभिःसच्चिदानंदलक्षणःपुमान्हृदयेऽहंकारादिरूपेसवृत्तिकेंतः करणेविचार्यमाणेऽवलोकितःसाक्षात्कृतः ननुकथंशबलवाचकाहंकारादिपदार्थालोचनेशुद्धोपलब्धिरतोहेतुगर्भविशेषणं अंतःकरणो पाधिरिति अंतःकरणंहिप्रकाशात्मकार्थवाचकाहंकारादिपदानांशक्तिविषयतायामयोग्यंसत्श्रोत्रपदप्रवृत्तौकर्णशष्कुलीवदुपाधिभा वमवलंबते उपाधित्वंचकार्यानन्वयित्वेसतिवर्तमानत्वेचसतिव्यावर्तकत्वं तथाचांतःकरणस्योपाधितानुसंधानद्वारास्माकंशुद्धोपलब्धि रितिभावः तस्मादिति तस्मादुक्तविधयाहंकारादिवाचकहृदयादिपदानामस्मद्दृष्ट्याशुद्धेपर्यवसानात् अत्रांतःकरणेप्रसिद्धानिहृदयादी न्यनेकशोनामान्यवाङ्मनसगम्यस्याप्यस्यशुद्धात्मनः दास्यामस्तत्रप्रयुक्तान्कुर्मइतियावत् ॥ ७७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुशुद्धात्मन्यवाङ्मनसगम्येशबलेप्रसिद्धनाम्नांप्रयोगरूपःप्रयासःकिमर्थइत्याशंक्यावशिष्टाधिकारिणःप्रत्यस्माभिरुपाधिविमोकेना त्मासाक्षात्कृतोभवद्भिरप्येवंबुध्यतामित्युपदेशार्थइत्याहुः एतैरिति एतैर्हृदयाद्यैर्नामभिःसर्वैरधिकारिभिर्यथाऽस्मद्वदुपाधिनिर्मोकेनगम्ये तएतदर्थंनामानिदास्यामइतिपूर्वेणसंबंधः नंचायमुपायोपदेशोऽनपेक्षिताभिधानरूपः संसाररूपशूलरोगार्त्तैस्तन्निवृत्त्युपायस्यापेक्षित त्वात् एतदुपेयात्मलाभस्यसर्वदुःखाभावरूपत्वाच्चेत्यभिप्रायेणाधिकारिणामात्मनश्चविशेषणेइति ॥ ७७२ ॥ तत्रहृदयपदस्याहंकारे प्रसिद्धस्यापिशुद्धात्मनिपर्यवसानेएवमेवार्थःफलितइत्याह उपासनादिति उपासनाद्दहरविद्यादिरूपात्विचारात्पंचकोशलोचनादिरू पात्हृदिहृत्कमलेबुद्धिगुहायांवाऽयमपरोक्षःसन्यतोलभ्यतेपरमात्माततएवंरूपार्थपर्यवसानात्हृदयमित्याकारिकाअधुनानंदात्मरूपि णउपाधिविविक्तात्मनःसंज्ञास्त्विति ॥ ७७३ ॥ उक्तविधमनःपदार्थमाह मनुतेइति यस्मादेषआत्मासकलंविश्वंप्रपंचंमनुतेऽव

एतैर्नामभिरात्मायमस्मद्वद्गम्यतेयथा॥ सर्वैःसंसारशूलार्तैःसर्वदुःखविवर्जितः ॥ ७७२ ॥ उपासनाद्विचा राच्चहृद्ययंलभ्यतेयतः॥ ततोहृदयमित्यस्तुसंज्ञानंदात्मरूपिणः ॥ ७७३ ॥ मनुतेसकलंविश्वंस्वप्रकाशाद्वयं ततः॥ मन्यतेपिचसर्वैर्हितस्मादेषमनःस्मृतः ॥ ७७४॥ स्वात्मन्यध्यस्तमखिलःसकलंसदसद्यतः॥ सम्यग् जानातितस्मात्स्यात्संज्ञानमितिनामवान्॥ ७७५॥ आज्ञयैवास्यवर्ततेवागग्न्याद्याश्चदेवताः॥ तस्मादाज्ञा ननामाऽयमानंदात्माभविष्यति॥ ७७६॥

बोधयतिअधिष्ठानतयाप्रकाशयतियस्माच्चततोधिष्ठानतयाप्रकाशनादेवसकलंस्वप्रकाशाद्वयमात्मानंमन्यतेजानाति तदात्मानमेवावे दहंब्रह्मास्मीत्यादिश्रुतेः यतश्चसर्वैर्मुमुक्षुभिर्मन्यतेमननेनावधार्यतेतस्मान्मनइत्येषस्मृतइति ॥ ७७४ ॥ अथसंज्ञानपदंचेतनारूपसप्र तिबिंबांतःकरणवृत्तिवाचिप्रसिद्धमप्युपाधिविविक्तस्वरूपपरंसदेवमर्थकंभवतीत्याह स्वात्मनीति यतःस्वात्मन्यध्यस्तंसंकलंसदसदनिर्व चनीयंएषआत्माअखिलःपरिपूर्णःसम्यग्विजानातितस्मात्संज्ञानमितिनामवान्स्यादिति ॥ ७७५ ॥ प्रभुरस्मीत्याकारकचिच्छबलवृत्ति वाचकमाज्ञानपदमात्मपरतयाव्याकरोति आज्ञयेति यस्मादस्यात्मनआज्ञयासन्निधिरूपयाऽधिदैवादिभेदभिन्नावागग्न्याद्यादेवताःप्र वर्ततेतस्मादाज्ञाननामाभविष्यति विमतंप्रत्यपिस्फुटोभविष्यतीतिलृट्प्रयोगाशयः ॥ ७७६ ॥ ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवहारोपयोगिचतुःषष्टिकलादिज्ञानेप्रसिद्धंविज्ञानपदमात्मपरतयाव्याचष्टे आत्मानमिति यतोजडाजडविभागतःजडाजडयोर्भेद मालोच्यतत्पूर्वकमात्मानंपरमनात्मानंच विशेषेणातिशयेनजानातितद्विज्ञानमितिनाम्नोच्यतेइति ॥ ७७७ ॥ नवनवोन्मेषशालिशब लवृत्तिविशेषवाचिप्रज्ञानपदंशुद्धपरतयाव्याचष्टे प्रकृष्टमिति प्रकृष्टंसर्वभासकत्वेनेतिशेषः ईदृशमात्मस्वरूपमहमस्मीत्याकारेणयतआ नंदात्माजानातितस्मात्प्रज्ञानमित्युच्यतेइति ॥७७८ ॥ ज्ञातस्याविस्मरणशालिबुद्धिवृत्तिविशेषस्य चित्शबलस्यवाचकंमेधापदमात्मपर तयाव्याचष्टे आत्मानमिति इतरदनात्मरूपं बुद्धंज्ञातंयतोनविस्मरतितेनेत्यादिस्फुटम् ॥ ७७९॥ इंद्रियद्वारानिष्क्रांतवृत्तिवाचकंदृष्टिपदं

आत्मानंचपरंचापिजडाजडविभागतः॥ विशेषेणैवजानातिविज्ञानंतेनकथ्यते॥ ७७७॥ प्रकृष्टमात्मनोरू पमहमस्मीतिसर्वदा॥ आनंदात्माप्रजानातिप्रज्ञानमितितेनसः ॥ ७७८॥ आत्मानमितरद्वापिबुद्धंविस्मर तीहन॥ तेनमेधेतिनाम्नायमानंदात्मानिगद्यते॥ ७७९॥ अनेनचक्षुषासर्वोजंतुःपश्यतिसर्वतः॥ तेनदृष्टिस माख्यानमानंदात्मासमाप्तवान्॥ ७८० ॥ दधातिसर्वदेहान्सप्रविश्यांतर्गृहंयथा॥ स्तंभस्तेनधृतिर्नामास्वानं दात्मनिदृश्यते ॥ ७८१ ॥ सेतुवद्विदधात्येषमर्यादांलोकधारिणीं ॥ वर्णाश्रमादिजातानांतेनचासौधृतिः स्मृतः॥ ७८२॥

शुद्धपरतयाव्याचष्टे अनेनेति अनेनात्मरूपेणाविलुप्तेनचक्षुषासर्वोजंतुःसर्वतःसर्वंयतःपश्यतितेनदृष्टिरित्याकारकंसमाख्यानंनामानं दात्मासमाप्तवान्लब्धवानित्यर्थः ॥ ७८० ॥ धैर्यरूपचित्शबलवृत्तिपरंधृतिपदमात्मपरतयाव्याकरोति दधातीति गृहस्यांतरंतर्गृहंत प्रविश्ययथास्तंभोधारयतितथासर्वदेहान्प्रविश्यसआत्मादधातितेनधृतिर्संज्ञइति ॥ ७८१ ॥ प्रकारांतरेणधृतिशब्दमात्मनिर्संगमयतिसे तुवदिति यथामृद्दार्वादिनिर्मितःसेतुःक्षेत्रमर्यादांविदधातितथैषआत्मावर्णाश्रमादिजातानां आदिपदेनतत्कर्मणांग्रहः मर्यादांविदधाति कीदृशींमर्यादां लोकानांकर्मफलानामसंकरलक्षणधारणशीलां तेनवानिमित्तेनधृतिरिति सएषसेतुर्विधरणइत्यादिश्रुतेरिति ॥ ७८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्कात्मकमननवाचिमतिपदमात्मनिसंगमयति मिनोतीति यद्वत्प्रस्थंमानपात्रविशेषोयवान्मिनोतिस्वस्मिन्प्रक्षिपतिपरिच्छिनत्तीतिया
वत् यथावास्रक्मालावच्छिन्नंचैतन्यंस्वस्मिन्कल्पितान्सर्पादीन्तथायमात्माविश्वंमिनोतिपरिच्छिनत्तितेनमतिरितिसंज्ञकइत्यर्थः कल्पि
तस्याधिष्ठानरूपदेशपरिच्छिन्नत्वान्मानक्रियाकर्मत्वंप्रसिद्धमेव डुमिञ्प्रक्षेपणेइतिप्रक्षेपणार्थस्यमिनोतेःपरिमाणार्थेप्रयोगोपिनीचैःस
दोमिनुयादित्यादौप्रसिद्धः अस्मिन्कल्पेमतिशब्दोमिनोतेर्डतिप्रत्ययेउणादौव्युत्पाद्यः संज्ञात्वात् एवंकर्तृसाधनाधृतिप्रभृतयइति॥७८३॥
प्रकारांतरेणमतिशब्दार्थमाह सर्वेति प्रमिणोतिसम्यक्निश्चिनोति ॥ ७८४ ॥ मनसईषाहिंसाआदानंवा ईषगतिहिंसाऽऽदानेष्विति स्म
रणात्मनोनियमनशक्तिशालिचित्शबलवृत्तिविशेषवाचिमनीषापदमात्मनिसंगमयति इदंमेइति यतोयमात्माइदंमेमाभूदिदंभूयादिति

मिनोतिसकलंविश्वंप्रस्थंयद्वद्यवानिह ॥ स्रग्यथावापिसर्पादीन्मतिस्तेनायमीरितः ॥७८३॥ सर्वप्राणिस्थि
तश्चायंप्रमिणोतिहिताहितम् ॥ तेनवामतिनामायमानंदात्मानिगद्यते ॥ ७८४ ॥ इदंमेभूदिदंमाचेत्येतस्य
मनसोयतः ॥ इष्टेनियंतुमित्यस्मान्मनीषेत्ययमीरितः ॥ ७८५॥ देहेंद्रियांतःकरणतमसांहिप्रकाशनात् ॥
ज्योतिर्जूतिरितिप्रोक्तआनंदात्मामहात्मभिः ॥ ७८६ ॥ जूर्तिर्जूतिर्भवेद्वापिसाचलोकेत्रिदुःखधीः ॥ सापि
चात्मनएवस्यान्नामयस्मात्प्रकाशकृत् ॥ ७८७॥ द्युतिरेषात्रजूतिर्वापरोक्षेणास्यसाभिधा ॥ यस्मादात्मप्र
काशेनयुज्यतेसकलंजगत् ॥ ७८८ ॥

शेषः इत्याकारस्यमनसोनियंतुंनियमनेईष्टेशक्तोभवतिअस्मान्मनीषेत्युक्तइति ॥ ७८५ ॥ विषादाख्यचिच्छबलवृत्तिवाचकंजूतिपद
मात्मपरत्वेसतियादृशार्थकंभवतितद्दर्शयति देहेंद्रियेति तमोऽज्ञानमेतेषांप्रकाशनाज्ज्योतीरूपआत्माज्योतिरितिवक्तव्येजूतिरितिप्रो
क्तःपरोक्षणेतिशेषः ॥ ७८६ ॥ प्रकारांतरेणास्यार्थमाह जूर्तिरिति यद्वाजूर्तिर्जूतिर्भवेत् इदंद्रपदस्थानेइंद्रपदवज्जूर्तिरितिवक्तव्येजूतिरि
तिवदंतीत्यर्थः साचजूर्तिश्चत्रिदुःखधीअध्यात्मादिदुःखानुभवउच्यतेइतिशेषः दुःखस्याप्यात्मनैवप्रकाशनादिदमपिपरमात्मनएवोपप
द्यतेसर्वभासकत्वादित्याह सापीति सापिज्वरधातोःक्तिनिज्वरत्वरेत्यादिनोठिचव्युत्पन्नजूर्तिपदस्ययत्परोक्षंरूपंजूतिरप्यात्मनएवनाम ॥७१॥
यस्मात्सएवप्रकाशकृदिति ॥ ७८७॥ अथवाद्युतिपदंजूतिरितिपरोक्षाकारेणनामास्तुइत्याह द्युतिरिति संभवतिचेदमित्याह यस्मा
दिति ॥ ७८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मरणरूपचित्शबलवृत्तिवाचकस्मृतिपदमात्मनिसंगमयति आत्मेति यथाजननीअपत्यानिस्मरतिइतितेननिमित्तेनसआत्मास्मृतिरित्यु
क्तइति॥ ७८९ ॥ सविकल्पकज्ञानेरूढंसंकल्पपदंसम्यक्कल्पयत्यवस्थात्रयमितिव्युत्पत्त्यात्मनिसंगमयति आत्माजागरणमिति ॥ ७९० ॥
उत्कटेच्छायांप्रवृत्तिजनिकायांप्रसिद्धंक्रतुपदमप्यात्मनियोजयति क्रतुरिति ॥ ७९१ ॥ प्रकारांतरेणसंगमयति ज्ञानवानिति करोती
तिक्रतुरितिव्युत्पत्त्याउपादानगोचरज्ञानवान्क्रतुपदार्थोत्रप्रकृतेऽस्तु तथात्वमपीक्षणश्रुतेरात्मनिसंभवतीत्याह यतइत्यादिना ॥ ७९२ ॥
अथक्रियाशक्त्युपाधिकेप्राणापानप्रेरकेवात्मनिप्राणेप्रसिद्धोऽसुशब्दोप्युपपन्नइत्याह असुरिति असुरितिप्राणःसमुद्दिष्टोलोके आत्मा
पियतस्तदुपाधिःक्रियाकरःसंनिधिनाक्रियाप्रयोजकस्तस्मादसुनामाऽस्त्विति ॥ ७९३ ॥ चिच्छबलेच्छावृत्तिवाचकंकामपदमात्मनिसं

आत्मायस्मात्स्मरत्येतन्मामृतेस्यात्कथंत्विति॥ अपत्यानीवजननीस्मृतिस्तेनसईरितः ॥ ७८९ ॥ आत्माजा
गरणंस्वप्नंसुषुप्तंचेतिसत्रिधा॥ संकल्पयतितेनायंसंकल्पइतिगद्यते॥ ७९० ॥ क्रतुरिच्छाविशेषोयमात्माभ
वतुसर्वदा॥ इच्छयैवास्यजातंयज्जगदेतच्चराचरम् ॥ ७९१ ॥ ज्ञानवान्क्रतुरस्त्वत्रयतआत्मेक्षणादिदम्॥
जातंतेनक्रतुःप्रोक्तआनंदात्मामनीषिभिः॥ ७९२॥ असुःप्राणःसमुद्दिष्टस्तदुपाधिःक्रियाकरः॥ भवत्यात्मा
यतस्तस्मादसुरेषनिगद्यते॥ ७९३॥ कामोनामभवेल्लोकइच्छामात्रंसुखार्थिनाम्॥ कामनामाभवत्येषआ
नंदात्माप्रकाशवान्॥ ७९४॥ स्त्रीसंगमाभिलाषोयंवशोयस्मादयंपुमान् ॥ प्रजायतेततोभूयाद्वशनामाप्य
सौपरः॥ ७९५॥ एवमेतानिनामानिह्रद्यंतःकरणस्यहि॥ तत्रास्माभिरयंदृष्टआनंदात्मापरःपुमान् ॥ ७९६॥

गमयति कामोनामेति प्रकाशवान्मतइतिशेषः ॥ ७९४ ॥ वशकांतावितिधातुप्रकृतिकवशपदंजननशक्तकामवाचकमात्मनिसंगमय
ति स्त्रीसंगमेति स्त्रीसंगमाभिलाषोयंवशइत्युक्तस्तत्रप्रजनश्चास्मिकंदर्पइतिगीतावाक्यंस्मारयति यस्मादयंपुमान्जायतेइति ततइत्यादि
स्फुटम् ॥ ७९५ ॥ एवंलक्षणयाह्रदयादिपदानांशुद्धात्मपरत्वेयादृगर्थोभवतिसप्रदर्शितःअथलक्षणामूलंमुख्यार्थसंबंधंस्फुटयन्नामधेय
पदंवागौणमित्यपिसूचयति एवमेतानीतिद्वाभ्यां एतानिह्रदयादीनिनामानिह्रदिवर्तमानस्यांतःकरणस्यप्रसिद्धानीतिशेषः तत्रांतःकरणे
अस्माभिरधिकारिभिरानंदात्मादृष्टइति ॥ ७९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततइति ततोंतःकरणस्यसद्वृत्तिकस्यविचार्यमाणस्यतदुपलब्धिसाधनत्वाद्यान्यंतःकरणेनामानितान्यस्यात्मनोबोधायहितानिसमर्पिता
नि दधातेरूपं यद्वायान्यंतःकरणेरूपाणीतिशेषः तान्यस्यात्मनोनामधेयानिहितानिसमर्पितानीत्यर्थः लोकेनामधेयमपिस्वार्थस्मा
रकं अंतःकरणरूपाण्यपितत्स्मारकाणीतिसादृश्यान्नामधेयपदेनतान्युक्तानीतिभावः एतदेवाह बुद्धिमद्भिरिति यतोत्रांतःकरणेसुविचा
रितेसत्ययमात्मादृश्यतेततोंतःकरणरूपाणांनामधेयतयोक्तिरुचितेतिभावः ॥ ७९७ ॥ एवंसद्वृत्तिकांतःकरणसाक्षितयात्वंपदार्थत्वेना
त्मादर्शितः अथतत्पदार्थतयातत्प्रतिपादनपरमेषब्रह्मेत्यादिव्याकर्तुंसंगतिसूचयति अंतःकरणेति अंतःकरणनाम्नांलक्षणावाचोयुक्तिरपि
आत्मस्वरूपापरिचयेनैवदत्तावकाशा तत्परिचयेतुसर्वाणिनामानिसर्वेशब्दाश्चविषयांतरालाभात्तत्रैवपर्यवस्यंति तथाचांतःकरणना
म्नामवयुत्यानुवादन्यायेनतत्रप्रयोगइतिभावः एतेनपूर्वग्रंथोक्तसर्वांतरत्वेनाद्वितीयतांविनानुपपद्यमानेनसूचितामद्वितीयतांस्फुटयितुमु

ततोंतःकरणेयानिनामान्यस्यहितानिवै ॥ बुद्धिमद्भिर्यतोत्रायंदृश्यतेसुविचारिते ॥ ७९७ ॥ अंतःकरणना
मानिसर्वात्मनिमहेश्वरे ॥ उपपन्नानिनैवास्मात्पदार्थोन्योस्तिकश्चन ॥ ७९८ ॥ आनंदात्मापरंब्रह्मनामरूप
विवर्जितम् ॥ अव्याकृतंचजगतःप्रागवस्थास्वरूपभृत् ॥ ७९९ ॥ हिरण्यगर्भोप्येषस्याद्विराजोजनकःप्र
भुः॥विराडप्येषएवस्यात्सर्वलोकशरीरभृत्॥ ८०० ॥

त्तरोग्रंथइतिसंगतिरपिसूचिता सर्वमानवेद्यताचवार्तिककृद्भिरुक्ता अतोनुभवएवैकोविषयोऽज्ञातलक्षणः अक्षादीनांस्वतःसिद्धोय
त्रतेषांप्रमाणताइति सर्वनामाभिधेयताचससर्वनामाचसविश्वरूपइतिविष्णुपुराणादिप्रसिद्धा श्रुतयस्तुपदार्थशोधनपराअत्रानुकूलाइ
तिसर्वंसुस्थम् ॥ ७९८ ॥ तत्रतावदैक्यसामानाधिकरण्येनसजातीयभेदवारकमेषब्रह्मेत्यादिएषसर्वेदेवाइत्यंतंव्याकुर्वन्शुद्धमायाशबल
हिरण्यगर्भविराड्भेदेनचतुर्विधब्रह्मपदार्थेनोक्तात्मनऐक्यमाह आनंदात्मेतिद्वाभ्यां आनंदात्मैवोक्तःपरंब्रह्मेत्यर्थः एवमुत्तरत्रअव्याकृतं
मायाशबलमीश्वरत्वेनप्रसिद्धंप्रागवस्थाकारणत्वं ॥ ७९९ ॥ हिरण्यगर्भइति हिरण्यगर्भःसूक्ष्मसमष्ट्युपाधिः विराजःस्थूलसमष्ट्युपा
धेर्जनकःकारणम् ॥ ८०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इंद्रशब्दस्यइंद्रोमायाभिरित्यादिश्रुतिप्रसिद्धमर्थंतथालोकपालान्यतमरूपंचदर्शयित्वातेनैक्यमाह विराजइति समष्टिव्यष्टिशरीरेएको भोक्ताश्रौतइंद्रोप्येषः तथाजगन्नाथःप्रसिद्धेंद्रोप्येषइत्यर्थः॥८०१॥ मरीच्यादिरिति मरीचिःकश्यपपितातत्प्रभृतिःप्रजापतिरेषएवेति आदिपदेनात्र्यादीनांदक्षादीनांचग्रहः॥८०२॥ वागग्न्याद्याइति तेदेवाआनंदात्मैवेति तत्रदृष्टांतः स्वप्नेति यथास्वप्नदृष्टाःस्वप्नेऽस्माभिर्भिन्नतयाकल्पिताः प्रमातारोवयमेवतथाएतेपीत्यर्थः॥ ८०३॥ अथविजातीयभेदंबाधसामानाधिकरण्येननिषेधयदिमानीत्यादिस्थावरमित्यंतंवाक्यंव्याचष्टे पृथिव्यापइतित्रिभिः इमानिसर्वशरीरोपादानतयाप्रसिद्धानि॥ ८०४॥ उद्भिज्जानीति स्वेदाज्जातानिस्वेदजानिदंशादीनि भूतानिप्राणिशरीराणिचतुर्विधान्यपिस्थावरजंगमत्वाभ्यांद्विविधानि चकाराद्बीजेतरपदोक्तस्यकारणत्वेनकार्यत्वेनचोक्तद्वैविध्य

विराजस्तद्वदस्माकंशरीरेसर्वदेहिनाम्॥ त्रिलोक्याःसमधिष्ठाताभोक्तासर्वप्रकाशवान्॥ इंद्रोप्येषजगन्नाथोनास्माद्न्योस्तिसकचित्॥८०१॥ मरीच्यादिःप्रजानांस्यात्पतिर्यःकश्चिदत्रहि॥ आनंदात्मैवसर्वःस्यान्नास्मादन्योस्तिकश्चन॥८०२॥ वागग्न्याद्याश्चयेकेचिद्देवादेहादिसंश्रिताः॥ आनंदात्मैवतेसर्वेंस्वप्नदृष्टायथावयं॥८०३॥पृथिव्यापस्तथातेजोवायुराकाशमेवच॥इमानिपंचभूतानिनास्माद्न्यानिसंतिहि॥८०४॥ उद्भिज्जानितथास्वेदाज्जातान्यंडोद्भवानिच॥ जरायुजानिभूतानिस्थावराणिचराणिच॥८०५॥ नास्माद्न्यानिविद्यंतेआनंदात्मस्वरूपिणः॥सदसद्वस्तुनान्यत्स्यादानंदात्मस्वरूपतः॥८०६॥ उष्णताचप्रकाशश्चनभिन्नमग्नितोयथा॥ तथानभिन्नंसदसदानंदात्मस्वरूपतः॥८०७॥स्निग्धताचद्रवत्वंचनान्येनीराद्यथातथा॥ इमेसदसतीनान्येआनंदात्मस्वरूपतः॥८०८॥ काठिन्यंचैवगंधश्चनभिन्नौवसुधात्मनः॥यथातथासदसतीआनंदात्मस्वरूपतः॥८०९॥

स्यपरिग्रहः सर्पादिशरीराणिहिपूर्वस्यकार्याणिउत्तरस्यचकारणानीतिप्रसिद्धं इमेद्वैविध्येक्षुद्रपर्यंतानामितिश्रुतौक्षुद्रमिश्राणीत्युक्तं इवशब्दस्त्वनर्थकइति॥ ८०५॥ नास्मादिति एतानिआनंदात्मस्वरूपिणोऽन्यानिनविद्यंतेइत्यन्वयः सर्वपदार्थमाह सदसद्वस्त्विति स्थूलंसूक्ष्मंचययत्तत्सर्वमित्यर्थः॥ ८०६॥ इममर्थंमंदानांबुद्ध्यारूढंकर्त्तुंदृष्टांतैरुपपादयति उष्णतेत्यादिनाअस्माभिर्यानीत्यतःपूर्वग्रंथेन सदसन्नामरूपात्मकःप्रपंचः आनंदात्मस्वरूपंसत्ताप्रकाशःआनंदश्चअस्तिभातिप्रियमितिचप्रसिद्धं॥ ८०७॥ स्निग्धतेति॥ ८०८॥ काठिन्यमिति वसुधात्मनःपृथ्वीस्वरूपात्॥ ८०९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथेति ॥ ८१० ॥ यथासुषिरतेति सुषिरताऽवकाशः ॥ ८११ ॥ यथासर्वेति तमोघूककल्पितं ॥ ८१२ ॥ अमूर्तेइति मूर्तत्वंघनीभाव स्तद्रहिते ॥८१३ ॥ कदाचिदिति यथायद्विविधंमेघादिदृश्यतेतन्नभस्येवनभोभिन्नाधिकरणकंन तत्रचनिषित्ध्यमानंमिथ्येतिनिश्चितमे वमात्मनिजगदिति ॥ ८१४ ॥ मायावीति दारकोबालः उक्तार्थमेतत् ॥८१५ ॥ मदिरेति असतींभित्तिकांकुड्यनिभमावरणम्॥८१६॥ यथास्वाशयेति स्वाशयदोषःस्वचित्तदोषः पित्रादौपितृप्रभृत्यामे ॥ ८१७ ॥ यथाशयानइति शयानःस्वप्नंपश्यन्नात्मनएकत्वंनपश्य

यथास्पर्शक्रियेवायोर्भिन्नेस्तोनैवंकर्हिचित्॥ तद्वदेतेसदसतीआनंदात्मस्वरूपतः॥८१०॥ यथासुषिरताश द्वावाकाशादपरौनहि॥ तद्वदेतेसदसतीआनंदात्मस्वरूपतः ॥ ८११ ॥ यथासर्वगतेभानोःप्रकाशेदोषवर्जि ते॥ तमस्तद्वदिदंविश्वमानंदात्मन्यलौकिके॥८१२॥ अमूर्तेयद्वदाकाशेमूर्तंमेघादितिष्ठति॥ आनंदात्मप्रका शेस्तितद्वज्जडमिदंजगत्॥ ८१३॥ कदाचिद्वापिकिंचिद्वाकेनचिद्दृश्यतेयथा॥ मेघादिकंनभस्येवमानंदात्म न्यदोजगत्॥८१४॥मायावीदारकोयद्वच्चेष्टतेव्यर्थमेवहि॥ आनंदात्मापितद्वद्धिचेष्टतेव्यर्थमेवहि॥८१५॥ मदिरामदमंदाक्षःपुरःपश्यतिभित्तिकां॥ असतींतद्वदेवेदमानंदात्मापिपश्यति ॥८१६॥ यथास्वाशयदोषे णपित्रादौदोषवर्जिते ॥ दोषंविलोकयेत्कश्चित्तद्वदात्मात्मनात्मनि॥ ८१७॥ यथाशयानःपुरुषोनवेत्त्येकत्व मात्मनः॥ एवंस्वप्नत्रयंपश्यन्नाऽनंदात्मापिवेत्तितत्॥८१८॥नलिकाभ्रमणेयद्वन्नलिकादत्तपादकः॥ शुको भ्रमत्यबद्धोपिबंधवानितिबोधतः॥८१९॥ एकोनंतःसत्प्रकाशआनंदोस्मीत्यबोधतः॥ संसारशूलेभ्रमति तद्वदेवपरःपुमान्॥८२०॥ कमलस्ययथागर्भेभ्रमरोगंधलोभतः॥ दुःखंप्राणांतमाप्नोतिस्वात्माविषयतस्त था॥८२१॥ यथाविभ्रांतधीःश्रीमान्विस्मृत्यस्वंहितादृशं॥लोकेदारिद्र्यमाप्नोतिव्यर्थमेवातिदुःखदं॥८२२॥

तितद्वदानंदात्मापिनपश्यतीति ॥ ८१८ ॥ नलिकेति नलिकारज्जुनामध्येप्रोताशुकबंधनसाधनमितिप्रसिद्धा बोधतःभ्रमात् ॥८१९॥ एतद्दार्ष्टांतिकमाह एकइति ॥ ८२० ॥ दृष्टांतांतरमाह कमलस्येति गर्भेबद्धइतिशेषः दुःखंरात्रिर्गमिष्यतिभविष्यतिचेत्यादिपद्यप्रसिद्धं ॥ ८२१ ॥ यथाविभ्रांतधीरिति यथाकश्चित्श्रीमान्विभ्रांतधीःसन्स्वमात्मानंतादृशंश्रीमंतंविस्मृत्यदरिद्रोस्मीतिमन्यतेइति॥८२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्वदिति तद्वत् भ्रांतधनिकवत् आत्माप्रभुरपिनिजंरूपंत्यक्त्वाविस्मृत्यसुखार्थंदीनदशांकर्तृत्वादिसंसाररूपांप्राप्नोतीति ॥ ८२३ ॥ यद्वदिति यद्वत्सर्वगुणोपेतोपिपुमान्कयाचित्स्वैरिण्यापुंश्चल्यामोहितःकार्मणेनवशीकृतोदैन्यंगच्छेत्तथात्मामाययेति ॥ ८२४ ॥ यथेति यथालोकत्रयीनाथोपिइंद्रःकामेनकामिनीपरतंत्रोभूत्वाकामस्यदेवत्वेनस्वस्यचदेवाधिपतित्वेनस्वस्मिन्विद्यमानयापितन्नियमनशक्त्यातांकामिनींननियंतुंशक्तोभवतितथात्मास्वाश्रितत्वेनस्वनियम्यांमायामिति ॥ ८२५ ॥ प्रियेति प्रियेणपुत्रादिनाकृतेऽधिक्षेपेअनादरेदोषेपियथासौपुत्रादिप्रियदर्शीदोषंतस्यदोषत्वंनवेत्तितथात्मामायादोषमिति॥ ८२६ ॥ भारेति भारश्रृंगोनाममृगविशेषःसउच्चप्रदेशा

तद्वदात्मानिजंरूपंसुखोदधिसमंमहत् ॥ त्यक्त्वासुखार्थमभ्येतिदशांदीनतमांप्रभुः ॥ ८२३ ॥ यद्वत्सर्वगुणोपेतःकयाचिन्मोहितःपुमान् ॥ स्वैरिण्यादीनतामेतिमाययात्मातथाकृतः ॥ ८२४ ॥ यथालोकत्रयीनाथःकामिनींननियच्छति ॥ तद्वत्सर्वनियंतापिमायांनैवनियच्छति ॥ ८२५ ॥ प्रियपुत्राद्यधिक्षेपेदोषंयद्वन्नवेत्त्यसौ ॥ दोषंतथापुमानेषमायादोषंनपश्यति ॥ ८२६ ॥ भारश्रृंगोमृगोयद्वद्भारंश्रृंगोत्थितंयथा ॥ हृष्टोवहतिमायायाभारंतद्वदयंपुमान् ॥ ८२७ ॥ यथादुर्जनसंपर्कात्साधुर्भवतिदूषितः ॥ एवंमायासमाश्लेषादात्माभवतिदूषितः ॥ ८२८ ॥ यथादुर्जनदृष्ट्यास्यान्निर्दोषेपीहदोषता ॥ एवंमायादृशापुंसिसंसारोऽनेकदोषभाक् ॥ ८२९ ॥ यथाजनस्थितंराजादुःखमात्मनिमन्यते ॥ एवंजडेस्थितंदुःखमात्मन्येवाभिमन्यते ॥ ८३० ॥ यथाशयानेपुरुषेएकस्मिन्हेतुवर्जिते ॥ अकस्मादेवनिखिलंजायतेभूतभौतिकम् ॥ ८३१ ॥ एवंपुराणेपुरुषेमाययापिविवर्जिते ॥ जायतेसकलंत्वेतद्विश्वंसदसदात्मकम् ॥ ८३२ ॥

त्पतनूश्रृंगैःप्रथमंभुवंस्पृशतीतिप्रसिद्धःसयथामूढःश्रृंगभारंहर्षेणैववहतितथात्मामायाभारमिति ॥ ८२७ ॥ यथादुर्जनेति स्पष्टम् ॥ ८२८ ॥ यथादुर्जनदृष्ट्येति दोषितादोषवत्ता मायादृशाअज्ञदृष्ट्या पुंसिआत्मनि ॥ ८२९ ॥ यथाजनेति यथाराजाजनस्थितंप्रजागतंदुःखंस्वस्मिन्मन्यतेआत्मीयत्वाभिमानात्तथात्माजडेंतःकरणेस्थितंदुःखंस्वस्मिन्निति ॥ ८३० ॥ यथाशयानेइति हेतुवर्जितेरथादिनिर्मितिसामग्रीहीने ॥ ८३१ ॥ एवमिति ॥ ८३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथास्वमेइति ॥ ८३३ ॥ यथास्वमादिति विबुद्धस्यलब्धजागरस्यवेदनमभिनयति नमेइत्यादिना ॥ ८३४ ॥ एवमिति एवंस्वमात्प्रबोधइवजाग्रदाद्यवस्थारूपत्रिस्वमलक्षणसंसारात्प्रबोधेऽसुखंदुःखंनश्यतीति ॥ ८३५ ॥ अस्मादिति ब्रह्मवेदनरूपंबोधनंजागरणंजातमिति ॥ ८३६ ॥ एवमात्मनःप्रतिपादितायांतत्पदार्थावच्छेदकभूतायामद्वितीयतायामुपपत्तिप्रदर्शनपरंतत्प्रज्ञेत्यादिप्रतिष्ठेत्यंतंवाक्यंव्याचष्टे अस्माभिरित्याद्येकत्रिंशच्छ्लोकैः यान्यस्माभिर्बुद्धिनामान्यंतःकरणनामानिब्रह्मणोदत्तानिसमर्पितानितेषुमध्येप्रज्ञेतिनामातिशोभनमिति यद्यपिप्रज्ञेतिनामत्हृदयादिनामसुनोद्दिष्टंतथापिप्रज्ञाननाम्नउद्दिष्टत्वेआतश्चोपसर्गइतिभावार्थकाङ्प्रत्ययांतत्वेनतत्समानार्थंप्रज्ञान

यथास्वप्नेत्वथादुःखंस्वयंस्वस्यप्रयच्छति ॥ एवंजागरणेप्यात्माव्यर्थमेवप्रयच्छति ॥ ८३३ ॥ यथास्वप्नाद्विबुद्धस्यस्वप्नदुःखक्षयोभवेत् ॥ वेत्तिचैतन्नमेदुःखमासीन्नास्तिनभाव्यपि ॥ ८३४ ॥ एवंत्रिस्वप्नसंसारात्प्रबोधेक्षीयतेऽसुखम् ॥ वेत्तिचात्मानमेदुःखमासीन्नास्तिनभाव्यपि ॥ ८३५ ॥ अस्मात्त्रिस्वप्नसंसाराद्बोधनंब्रह्मवेदनम् ॥ जातमंस्माकमेतस्मादहोपुण्यतमावयं ॥ ८३६ ॥ अस्माभिर्यानिदत्तानिब्रह्मणोविविधानिहि ॥ बुद्धिनामानितेष्वत्रप्रज्ञानामातिशोभनम् ॥ ८३७ ॥ यतोज्ञप्तिःप्रकाशःस्यात्प्रकर्षोभेदशून्यता ॥ स्वसजातिविजात्यात्माभेदोयस्यांनसंविदि ॥ ८३८ ॥ तस्मात्प्रज्ञानशब्देनप्रकाशात्मायमीरितः ॥ ब्रह्मादिस्थावरांतानांदेहेकाष्ठेग्निवत्स्थितः ॥ ८३९ ॥

मप्युद्दिष्टमेवेतिभावः ॥ ८३७ ॥ ननुकथमस्यनाम्नोऽतिशोभनत्वमित्याशंक्यआत्मयाथात्म्यबोधनादित्याह यतइति यतोधातुनाप्रकाश उच्यतेप्रशब्देनचत्रिविधभेदशून्यतारूपःप्रकर्षोद्योत्यतेयथाब्रह्मशब्दोनिरतिशयमहत्त्वपरस्तद्वदिति एतादृशावयवार्थकंचप्रज्ञापदं महावाक्यात्तांसंविदमाह यस्यांसंविदिस्वसजातिविजात्यात्माभेदोनततोऽतिशोभनमेतन्नामेतिसंबंधः स्वंस्वरूपंचसजातिःसजातीयश्चविजातिःविजातीयश्चतेआत्मानिरूपकतयाशरीरंयस्यभेदस्यसतथेति ॥ ८३८ ॥ एतदभिप्रायमेवप्रज्ञानमितिनामपूर्वमुक्तमुत्तरत्रचवाक्ये इत्याह तस्मादिति तस्यविश्वनिर्वाहकतांनेत्रपदेनवक्तुंसर्वत्रस्थितिमाह ब्रह्मादीति ॥ ८३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थावरमिति भूतंपृथिव्यादिभौतिकंतत्कार्यंचस्थावरादिर्यत्किंचित्सर्वंप्रज्ञानेत्रंप्रज्ञोक्तलक्षणानेत्रंनिर्वाहकंयस्यतत्तथा नीयतेप्राप्यतेऽनेनेतिनेत्रमितिभाष्यमिति तत्रदृष्टांतः यथाऽस्मदादिशरीराणिमांसनेत्राणिमांसमयनेत्रेविनाऽसंतिअप्रशस्तानितद्वदिति उक्तप्रज्ञाया निर्वाहकत्वेननेत्रसाम्येपिउपादानतयानिर्वाहकत्वंव्यतिरेकोपिबोध्यइत्याह प्रतिष्ठितमिति ईरितंब्रह्मपुच्छंप्रतिष्ठेत्यादिश्रुतिषु॥८४०॥ तस्यभासासर्वमिदंविभातीतिश्रुतिमनुरुध्योक्तमर्थंस्फुटयति अपीति यस्त्रिलोक्याजठरेंतःस्थितःसूर्येंदुवन्हिमुख्यानांप्रकाशः कीदृशः लोकेलोकावभासकइत्येवमीरितः सोपिप्रज्ञानेत्रइत्यन्वयः॥८४१॥ तत्रोक्तप्रज्ञाभानमंतराभानाभावंहेतुमाह नहीति उक्तप्रज्ञारूपांदृशं विनाप्रकाशस्यापिसौरादेःकिंभानंस्यादपितुनैवेत्यर्थः नह्यसाक्षिकंकिंचित्सिध्यति साक्षिप्रतिपादकताप्रज्ञापदस्योक्तेतिभावः अयम

स्थावरंजंगमंवापियत्किंचिद्भूतभौतिकम्॥ प्रज्ञानेत्रंहितत्सर्वंमांसनेत्रायथावयं॥ प्रतिष्ठितंजगत्सर्वंप्रकाशेब्रह्मणीरितम्॥ ८४०॥ अपिप्रकाशोयःकश्चित्त्रिलोक्याजठरेस्थितः॥ सूर्येंदुवन्हिमुख्यानांलोकइत्येवमीरितः॥ लोकावभासकःसोपिप्रज्ञानेत्रउदाहृतः॥ ८४१॥ नहिप्रज्ञादृशंहित्वाप्रकाशस्यप्रकाशनं॥ नोक्तंपरोक्षमेतत्स्यात्सर्वानुभवसंश्रितं॥ कदाचित्कुत्रचित्किंचिद्वस्तुसर्वोपिवेत्तियत्॥ ८४२॥ स्थावराणांहिविज्ञानंदृश्यतेसुखदुःखयोः॥ अस्मद्वद्दिद्यतेतेषांवृद्धिहान्यादिकंयतः॥ ८४३॥ स्थावराहिजलान्याप्ययथाकालंसुशोभनान्॥ स्वदेहान्बिभ्रतोदृष्टास्तेनतेसुखिनःस्थिताः॥ ८४४॥

र्थःसर्वानुभवसिद्धइत्याह नोक्तमिति एतत्सर्वस्यजडस्यप्रज्ञानेत्रत्वंयदुक्तंतत्परोक्षंधर्मादिवत्परोक्षमानवेद्यमेवनकिंतुसर्वानुभवसंश्रितं एतदेवकथमतआह कदाचिदिति यद्यस्मात्सर्वोपिप्रमाताकदाचित्कुत्रचित्किंचिद्वस्तुवेत्त्येव तथाचयद्यस्यसिद्धंतदुक्तप्रज्ञाव्याप्तमेवसिद्धं उक्तप्रज्ञयाऽसंबद्धंसिद्धमितिवदतोव्याघातइतिभावः अतएवोक्तंविवरणकारैः सर्वंहिवस्तुज्ञाततयाऽज्ञाततयावासाक्षिचैतन्यस्यविषयइति सर्वत्रचिदन्वयेमृदनुगतघटस्यमृन्मात्रत्ववद्विश्वस्यचिन्मात्रत्वमितिभावः॥८४२॥ सर्वोपिवेत्तीत्युक्तं चित्प्रकाशस्यसर्वत्रानुगमंद्रढयितुंस्थावरेषुतावत्साधयति स्थावराणामिति तत्रानुमानंदर्शयति अस्मद्वदिति स्थावराःसुखादिज्ञानवंतःवृद्ध्यादिमत्त्वादस्मदादिवदिति ॥८४३॥एतदेवस्फुटयति स्थावराहीति सुशोभनान्स्वदेहान्बिभ्रतोधारयंतः तेनसुखज्ञानकार्यवृद्धिमत्त्वेनसुखिनःसुखज्ञानवंतः॥८४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूलेति मूलघातोजटाच्छेदः आदिनाऽतिशीतसंसर्गादिग्रहः तेनगतस्नेहाःशुष्काइतियावत् तथादुर्भगानिःश्रीकाश्वसंतः पतनादिकृतःप तनादिशालिनोदृष्टाइति ॥ ८४५ ॥ अस्मद्वदितिदृष्टांतंस्फुटयति अन्नेति यथास्मदादेर्यथाकालमन्नपानादिसंप्राप्यासुखंसंप्राप्यमनोर मावृद्धिर्भवति॥ ८४६ ॥ तथेति तथास्मदादेरेवशस्त्रप्रहारादेर्हेतोर्दुःसहांवेदनांसंप्राप्यक्षयोहानिःस्यात्तथैवस्थावराणांक्षयवृद्धीइति एते नपर्वतानांपृथिव्यादीनांचाभिमानिचेतनानुमानंसूचितम् ॥८४७॥ पशुष्वपितंदर्शयति पशूनामिति उभयेषांग्राम्याणामारण्यानांचानु कूलेहरिततृणपूर्णपाण्युपलंभादौसतिप्रवृत्तिर्दृष्टाविपर्ययेदंडहस्तप्रतिकूलदर्शनेनिवृत्तिश्चदृश्यतेइतितेनैतेपशवोमनुजैःसमाइति॥८४८॥

मूलघातादिनातद्वद्गतस्नेहाहिदुर्भगाः॥ पतनादिकृतोदृष्टास्तेनैतेदुःखिनःस्थिताः ॥ ८४५ ॥ अन्नपानादिसं प्राप्यायथाकालंसुखंयथा ॥ संप्राप्यवृद्धिर्भवतित्यस्मदादेर्मनोरमा ॥८४६॥ तथाशस्त्रप्रहारादेर्दुःसहांप्रा प्यवेदनाम् ॥ क्षयःस्यात्स्थावराणांचक्षयवृद्धीतथैवच ॥ ८४७॥ पशूनामुभयेषांस्यादनुकूलेविपर्यये ॥ प्र वृत्तिश्चनिवृत्तिश्चतेनैतेमनुजैःसमाः॥ ८४८॥ जंगमानांहिसर्वेषांव्यवहारःसमोयतः॥ पिपीलिकादयोप्य स्मात्सुखदुःखोपभोगिनः ॥ ८४९ ॥ मुनीनामपिदेवानांब्रह्मादीनांहिशास्त्रतः॥ अनुमानाच्चगम्येतसुखदुः खोपभोगिता॥ ८५० ॥ सुखदुःखोपभोगोयःसाप्रज्ञेतिप्रकीर्तिता॥ नचक्रियात्रकाचिद्धिसुखेदुःखेचदृश्य ते॥ ८५१ ॥ यावदुत्पद्यतेनैवसुखंवादुःखमेववा ॥ तावदेवक्रियाःसर्वाःकुर्वतेकारणान्यपि ॥ ८५२ ॥ य थातृप्तौचजातायांकारकैर्नभुजिक्रिया॥ क्रियतेसत्तयातस्याविद्यमानैरपिस्वयं॥ ८५३॥

पिपीलिकादावप्यतिदिशति जंगमानामिति अस्मात्अनुकूलप्रतिकूललाभात्प्रवृत्त्यादेः ॥ ८४९ ॥ मुनीनामिति मुनीनांवशिष्ठादीनांत थाब्रह्मादीनांदेवानांशास्त्रतस्तथानुमानाच्चचेतनत्वलिंगकात्सुखदुःखान्यतमभोगोज्ञेयः ॥ ८५० ॥ तथासतिप्रकृतेकिमागतमतआह सुखेति साप्रज्ञाप्रकाशरूपैव नात्रक्रियागंधोपीत्याह नचेति ॥ ८५१ ॥ प्रत्युतक्रियोपरमोदृश्यतइतिव्यतिरेकमुखेनाह यावदिति या वत्सुखंदुःखंफलंनोत्पद्यतेतावदेवकारणानिक्रियाःकुर्वतेइत्यन्वयः ॥ ८५२ ॥ फलोत्पत्तौतुक्रियोपरमइत्यत्रदृष्टांतमाह यथेति यथातृ प्तौजातायांविद्यमानैरपिकारकैःकर्त्रादिभिर्भुजिक्रियानक्रियते तत्रहेतुः तस्याःसत्तयातस्यांतृप्तेःसत्तयानिष्पत्त्येतियावत् ॥ ८५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्ष्टान्तिकमाह एवंसुखइति स्पष्टम् ॥ ८५४ ॥ एवंप्रज्ञायाःस्वरूपंदर्शयित्वातस्याःप्रज्ञेयंप्रतिउपादानतयानेत्रतांस्फुटयति सुखेति नोऽस्माकंभोक्तॄणांसुखदुःखेप्रज्ञयाविरहितेनजायेतेनवाकदाचित्क्वचित्विद्येतेयतस्तेप्रज्ञातोविविक्तेसतिशशशृंगाभेइति॥ ८५५॥ एवंस्वकीयसुखदुःखयोःप्रज्ञामात्रतांनिश्चित्यतद्दृष्टांतेनपरकीयसुखदुःखयोरपितथात्वंनिर्धार्यंसुखत्वदुःखत्वरूपहेतुभ्यामित्याह यथास्माकमिति॥ ८५६॥ तद्दृष्टांतेनचान्यत्रप्रज्ञामात्रतावधार्येत्याह प्रज्ञामात्रेइति तेउक्तेसर्वभोक्तृसंबंधिनीसुखदुःखेयथाप्रज्ञामात्रेप्रज्ञातिरिक्तस्वरूपहीनेतथासदसतीयावत्कार्यकारणेप्रज्ञामात्रे कुतः तस्यांप्रज्ञायांसत्यामेवभासमानायामेवप्रकाशनात्स्फुरणात् ॥ ८५७ ॥ दृश्यंप्रज्ञापरिणामइतिभ्रममपाकर्त्तुंविवर्त्तोपादानंदृष्टांतमाह रज्ज्वामिति यथारज्ज्वांसत्यांभासमानसर्पोरज्जोःपृथक्कृतश्चेत्तर्हिनस्यात्शशशृंगसमो

एवंसुखेचदुःखेचजातेतत्कारणैर्नच ॥ क्रियतेहिक्रियानामविद्यमानैस्तुसर्वतः ॥ ८५४ ॥ सुखदुःखेचजायेतेप्रज्ञाविरहितेनहि ॥ विद्येतेशशशृंगाभेकदाचित्क्वापिवात्रनः ॥ ८५५ ॥ यथास्माकंतथान्येषांसर्वेषामिह देहिनाम् ॥ प्रज्ञैवसुखदुःखेतेसुखदुःखत्वहेतुतः ॥ ८५६ ॥ प्रज्ञामात्रेयथोक्तेतेसुखदुःखेतथैवहि ॥ प्रज्ञामात्रेसदसतीतस्यांसत्यांप्रकाशनात् ॥ ८५७ ॥ रज्ज्वांसत्यांयथासर्पोभासमानःपृथक्कृतः ॥ नस्यात्सुखादिकं तद्वत्प्रज्ञातोनपृथग्भवेत् ॥ ८५८ ॥ प्रज्ञाबुद्धिःप्रकाशाख्याजडासापिजडेतरम् ॥ सुखादिवदपेक्षेतप्रकाशं स्वप्रकाशकम् ॥ ८५९ ॥ तस्मादालोकमात्रायांप्रज्ञावागुपचारतः ॥ यथाप्रकाशेभान्वादेरुपचारात्प्रकाशगीः ॥ ८६० ॥

भवेत्तद्वत्प्रज्ञातःपृथक्सुखादिकंप्रपंचोनभवेत् असन्नेवभवेदितियावत् ॥ ८५८ ॥ ननुकिंबुद्धिरियंप्रज्ञेतिकस्यचिद्भ्रमंप्रोपसर्गार्थप्रकर्षानुपपत्त्यानिरस्यति प्रज्ञेति याबुद्धिःप्रकाशाख्याप्रकाशत्वेनलोकेप्रसिद्धासापिजडेतरंस्वप्रकाशप्रकाशमपेक्षेताऽतोपकृष्टत्वात्सानमुख्या प्रज्ञा शिलामध्यगतसहस्रदीपवत्साक्षिणमंतरासिद्धेर्दुर्वचत्वादितिभावः ॥ ८५९ ॥ बुद्धौतुप्रज्ञापदंगौणमित्याह तस्मादिति आलोकमात्रायांआलोकस्यभूतानांसात्विकांशगणस्यप्रकाशस्यमात्रायांकार्यतयालेशभूतायां यद्वाऽऽलोकस्याल्पप्रकाशस्यप्रतिबिंबतयालेशेचिदाभासेबुद्धिविशिष्टेप्रज्ञापदमुपचारादिति दृष्टांतमाह यथेति स्त्रियांमात्रात्रुटिःपुंसिलवलेशकणाणवइत्यमरः ॥ ८६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह तथेति तथातथासतिअन्यत्रसमन्वयाभावेसतिआनंदात्मनिप्रज्ञाशब्दोमुख्यइति तत्रहेतुगर्भेविशेषणेबोध्येइति अत्रप्रज्ञा पदमानंदात्मनिमुख्यमितिवदतांग्रंथकृतामयमाशयः व्यवहारेहिभाट्टनयइत्यभ्युपगमः भट्टमतेचजातौशक्तिः जातिश्चप्रतिबिंबविशिष्ट वृत्तीनांबिंबमेव अतएवविवरणकारैरपिज्ञानादिपदानांमुख्यावृत्तिःशुद्धेदर्शिता नचावाङ्मनसगम्यत्वप्रतिपादकश्रुतिविरोधः तस्याःश्रुते र्मनोविषयविषयकवाग्विषयत्वनिषेधपरत्वात् अथविशिष्टवाचकपदानांशुद्धेलक्षणयैववृत्तिरितिवादिनांसंक्षेपशारीरककृतांमतेतुमुख्ये त्यस्यप्रशस्ततत्त्वज्ञानोपयोगित्वादित्यर्थइति यतएवमिति यतउक्तयुक्तेः एवंप्रज्ञाशब्दस्यानंदात्मनिमुख्यत्वंततएवाशयात्श्रुत्याएवंकथ्य तेएवंकथं लोकोदृश्यवर्गःप्रज्ञानेत्रइति नहिसबुद्धिनिर्वाह्यः बुद्धेःस्वसिद्धयेपरापेक्षायाउक्तत्वादानंदात्मनात्वभिन्ननिमित्तोपादानेननि

तथासर्वप्रकाशानांप्रकाशेभेदवर्जिते ॥ आनंदात्मनिशब्दोयंमुख्यःप्रज्ञेतिसंभवेत् ॥ यतएवंततःप्रज्ञानेत्रो लोकोपिकथ्यते ॥ ८६१ ॥ भूतभौतिकजातस्यमाययासहितस्यच ॥ प्रपंचस्यास्यसर्वस्यसदासदसदात्मनः ॥ ८६२ ॥ प्रज्ञानेत्रंस्वप्रकाशप्रकाशेनप्रकाशनात् ॥ यतस्ततःप्रतिष्ठासाहेतौकार्यंस्थितंयतः ॥ ८६३ ॥ अ व्यक्तनामरूपाभ्यामादावंतेचसंस्थितं ॥ मध्येचताभ्यांव्यक्ताभ्यांप्रज्ञायांसकलंजगत् ॥ ८६४ ॥ यथाविशु द्धेनभसिगंधर्वनगरादिकम् ॥ यथावात्मनिबालस्यदुःखदंराक्षसादिकम् ॥ ८६५ ॥

र्वाह्यइतिभावः ॥८६१॥ प्रज्ञानेत्रइतिवाक्यार्थंसहेतुकमनुवदन्प्रज्ञानस्यप्रतिष्ठात्वंस्फुटयति भूतेतिचतुर्भिः यतोमायासहितभूतभौतिक जातरूपस्यसर्वस्यप्रपंचस्य कीदृशस्य सदसदात्मनःस्थूलसूक्ष्मात्मकस्य स्वप्रकाशप्रकाशेनस्वरूपेणप्रकाशनात्प्रज्ञोक्तलक्षणानेत्रंनिर्वा हिकाभवतितत:सैवलोकस्यप्रतिष्ठाऽऽधारः उपादानस्यमृदादेरुपादेयघटाद्याधारत्वंलोकेपिसिद्धमित्याह हेतौकार्यंस्थितंयतइति हेतौ उपादानेइतिद्वयोरर्थः ॥ ८६२॥८६३॥ हेतौकार्य्यस्यस्थितत्वमभिनयति अव्यक्तेति आदौसृष्टेःपूर्वंअंतेविनाशानंतरंचसकलंजगत्अ व्यक्ताभ्यामस्पष्टाभ्यांनामरूपाभ्यांप्रज्ञायांस्थितंमध्येचसृष्टिकालेव्यक्ताभ्यांताभ्यांनामरूपाभ्यांस्थितमिति घटादीनामपिमृदाद्युपहि तमात्मचैतन्यमेवोपादानमित्याकरेस्पष्टमिति॥८६४॥तत्रापिविवर्तोपादानतैवेतिदृष्टांताभ्यांस्पष्टयति यथेति आत्मनिमनसि ॥८६५॥ ॥७६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यंव्याचष्टे प्रज्ञानमिति अतःप्रज्ञानपदपर्यायप्रज्ञापदस्योक्तार्थपरत्वादेवएतत्साक्षादपरोक्षंप्रज्ञानंब्रह्मेत्याहुर्मनीषिणोवेदांतविदइ ति ब्रह्मपदार्थमाह नहीति यत्किंचित्सदसत्तत्सर्वंअस्मात्प्रज्ञापदार्थात्प्रज्ञानात्अधिकंपृथग्नविद्यतेतस्माद्ब्रह्मपदप्रयोगमर्हतीति ॥८६६॥ नन्वेकमेवपदंशुद्धतांबोधयिष्यतिकिंपदद्वयात्मकेनवाक्येनेतिचेन्न पदमात्रस्यस्मारकत्वेनैकंपदंविशिष्टमर्थमपिस्मारयेत् वाक्यभावेतुसा मानाधिकरण्येनपदांतरार्थैकतांलब्धुंतदनुकूलमेवस्मारयेदितिविशेषादित्याशयेनब्रह्मपदसमानाधिकृतेनप्रज्ञानपदेनयादृशोर्थोबोधित स्तमाह देशइतिद्वाभ्यां योयंदेशः कालश्चयच्चतदवच्छिन्नंभावाभावरूपंवस्तुजातंतत्सर्वंप्रज्ञयासर्वांतरचैतन्येनव्याप्तमिति अत्रदृष्टांतः यथापर्णानिपत्राणिशंकुनाद्वंतेनव्याप्तानितद्वदिति ॥ ८६७ ॥ दृष्टांतांतरमाह पातालमिति पातालंभूतलंदिवमंतरिक्षंस्वर्गंवाततस्त्रिलो

प्रज्ञानमतएवैतद्ब्रह्मेत्याहुर्मनीषिणः॥ नह्यस्मादधिकंकिंचित्सदसद्वापिविद्यते ॥८६६॥ देशःकालस्तथा वस्तुभावाभावस्वरूपकम्॥ तत्सर्वंप्रज्ञयाव्याप्तंपर्णानीवचशंकुना॥८६७॥ पातालंभूतलंवापिदिवंवावा ह्यमेवच ॥ तिष्ठत्येकंनभोवाप्यप्रज्ञैवसकलंजगत्॥८६८॥ गंधर्वनगरंमेघोनीलिमादिकमेववा॥नभएव यथातद्वत्प्रज्ञैवैतज्जडाजडम्॥८६९॥एवंविचारतःसोयमधिकारिजनःप्रभुः॥वामदेववदेतद्धिशरीरादिज हौधिया॥८७०॥अभिमानंपरित्यज्यशरीरेसपरिष्करे॥ आरब्धकर्मनिर्वाणंकुर्वन्भोगानवापसः॥८७१॥

क्यावाह्यदेशंचव्याप्ययथानभस्तिष्ठतितथाप्रज्ञैवसकलंव्याप्यतिष्ठतीति सर्वांतरंवस्तुप्रज्ञानपदार्थइतिभावः ॥८६८॥ तत्समानाधिकृतेन ब्रह्मपदेनचतस्याद्वितीयतानिर्विशेषतारूपाबोध्यतेइत्याह गंधर्वेति यथाकाशेकल्पितंगंधर्वनगरादिकमाकाशमेवतत्रकल्पितंतुनैवास्ति तथाप्रज्ञायांकल्पितंविश्वंप्रज्ञैवास्तिकल्पितंजडाजडंविशेषरूपमशेषंप्रज्ञामात्रमित्यर्थोब्रह्मपदप्रसादलभ्यइति ॥ ८६९ ॥ सएतेनेत्यादिसं भवदित्यंतंव्याकरोति एवमित्यादित्रिभिः सवामदेववाक्यतोविचारेप्रवृत्तेऽधिकारिजनःप्रभुःसाधनसंपत्त्यासमर्थःएतच्छरीरादिधियावि वेकेनजहौत्यक्तवान् ॥ ८७० ॥ अभिमानमिति परिष्करउपकरणंगृहादितत्सहितेशरीरेऽभिमानमहंकारममकारात्मकंपरित्यज्यारब्धक र्मणांनिर्वाणमंतंकुर्वन् हेतौशता तदर्थमितियावत् भोगानवापजीवन्मुक्तोविजहारेतियावत् ॥ ८७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनंदेति आनंदात्माहमस्मीत्याकारेणाविर्भवद्यत्प्रज्ञामात्रैकरूपंप्रज्ञामात्रंचतदेकरूपमद्वयवस्तुतद्विभर्तिनिरंतरमनुसंदधातीतिसतथाइ
त्यधिकारिजनविशेषणं विदेहमोक्षमाह स्वात्मनीति ॥ ८७२ ॥ ऐतरेयव्याख्यामुपसंहरन्नैतरेयपदव्युत्पत्तिंसूचयन्नयमर्थोऽधिकारिभि
स्तत्परैरवधार्यइतिदर्शयति अपौरुषेयैरित्यादिना अपौरुषेयैः पुरुषेणार्थंदृष्ट्वानिर्मितानिपूर्वानुपूर्वीनिरपेक्षोच्चारणकानिभारतादीनिपौ
रुषेयाणितद्विलक्षणैर्वचनैरात्मावेत्याद्यैरयमितिहासइतरासंज्ञकायाअपत्येनऋषिणादौईरितस्तपसाअनुस्मृत्यप्रकाशितः कीदृशेनइतरा
याःसुतेन एषपंथाइत्यादिवाक्यंप्रथमंप्रकाशयता तद्वाक्यस्वरूपंचतुर्थश्लोकव्याख्यायांदर्शितम् ॥ ८७३ ॥ तद्वाक्यंपूर्वंविस्तरेणव्याख्या
तमपिसुखबोधायसंक्षिप्तार्थमर्थतःपठति अयंमार्गइति यद्ब्रह्मणोवेदनंअयमेवमार्गस्तथेदमेवकर्मावश्यंसंपाद्यंतथेदमेवब्रह्मसत्यंचतत्प्राप
कत्वादितिअस्मात्प्रमादोनकार्यइति ॥ ८७४ ॥ नचेति ब्रह्मणोवेदनमतिक्रम्यसाधनांतरंप्रतिनगंतव्यमिति अस्येति अस्यब्रह्मवेदन

आनंदात्माहमस्मीतिप्रज्ञामात्रैकरूपभृत् ॥ स्वात्मनिस्वर्गरूपेऽभूदमृतोवामदेववत् ॥ ८७२ ॥ अपौरुषेयैर्व
चनैरितिहासोयमीरितः ॥ इतरायाःसुतेनादावेषइत्यादिवादिना ॥ ८७३ ॥ अयंमार्गस्तथाकर्मब्रह्मसत्यंच
वेदनम् ॥ ब्रह्मणोनप्रमादोस्मात्करणीयःकथंचन ॥ ८७४ ॥ नचातिक्रम्यगंतव्यंवेदनंसाधनांतरम् ॥ अस्य
येऽतिक्रमंचक्रुःपराभूताहिदुर्धियः ॥ संसारसुभटेनैवतेसर्वेविजिताःक्षणात् ॥ ८७५ ॥ इत्यस्मिन्वचनेनॄणां
विश्वासायमहामुनिः ॥ उदाजहारमतिमानितिहासमिमंशुभम् ॥ ८७६ ॥

स्यातिक्रममुपेक्षारूपंयेचक्रुस्तेदुर्धियःपराभूताःपराभवंगताइति ननुपराभवःप्रतिद्वंद्विनःसकाशाद्भवतिअत्रकःप्रतिद्वंद्वीत्याशंक्ययउदरमं
तरंकुरुतेथतस्यभयंभवतीत्यादिश्रुतेर्मायोपाधिरीश्वरोयमराजवदज्ञानांभयहेतुर्मायाकार्यसंसारश्चाभिमानलक्षणोयमकिंकरवत्पराभव
करइत्याह संसारेति संसारएवसुभटोमहाबलोयोधस्तेनतेऽतिक्रमणशीलाःक्षणेनविजिताइति ॥ ८७५ ॥ तद्वाक्यानुवादप्रयोजनंदर्श
यति इत्यस्मिन्निति इत्यस्मिन्वाक्येप्रथमंप्रकाशितेकेचिदित्थंशंकितवंतः ननुभवदुक्तमपिब्रह्मवेदनस्यमार्गत्वादिकंनास्मद्बुद्धाववतरती
ति तेषांनॄणामेतद्वाक्यार्थेविश्वासायविश्वासंश्रद्धांजनयितुमितिहासंउदाजहारउदाहरणवत्प्रकटीकृतवानिति उदाहृतेचशंकानिवर्तते ॥७७॥
वामदेवादीन्प्रतिज्ञानस्यसत्यब्रह्मप्राप्तिसाधनताभिधानेनमार्गत्वादीनांनिर्णयात् ॥ ८७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्मत्रयनैरंतर्यप्रतिपादनेनचातिक्रमशालिनांपराभवोप्यत्रदर्शितइत्याह अस्यार्थमिति अस्येतिहासस्यार्थंप्रमेयंयेमनुजामानुषंवपुर्ल ब्ध्वापिनजानंतितान्संसारसुभटोयमभटवत्हन्यात्व्यथयेत् लौकिकोदृष्टांतः मृगयुर्व्याधः ॥८७७॥ कथंहन्यादितिप्रकारजिज्ञासाया मेतैःकृत्वेत्यन्वययोग्यांस्तृतीययानिर्दिशतियमयातनासाम्यंचबोधयति पितृमातुरुदरेइत्यादिषड्भिः सप्तधातवएवगर्तास्तत्रनिपातनैः गर्भ स्थस्यविण्मूत्रसंसर्गएवलेपस्तैःजराय्वस्थ्यादिभिरंतर्गतस्यवेष्टनरूपैर्बंधनैः निरयेप्येतेपदार्थाःप्रसिद्धाः॥८७८॥कृमीतिउदरकृमयएवना गास्तन्मयैःपाशैः तथादुःसहैर्जठरभवैर्वाताग्निभ्यांजनितैस्तापैः सूचीमुखनिरयसाम्यंबोधयति उपस्थेति॥८७९॥ अनेकेति अनेकजन्म नांस्मृतिर्दुःखातिशयायमूर्छयालविस्मृतिश्चनिरयेपिगर्भगतस्यचेतिसाम्यं बाल्यदुःखानांनिरयसमतांदर्शयति अशक्तीति ॥८८०॥ क्री डेति बालपक्षेक्रीडानामप्राप्तिरध्यापकादिभ्योभीतिश्चप्रसिद्धा निरयेपिस्वर्गवासिनांयाःक्रीडादुःखातिशयायस्मृतिपथमवतरंत्यस्तासा

अस्यार्थंयेनजानंतिमनुजास्ताननेकशः ॥ संसारसुभटोहन्याद्यथात्रमृगयुर्मृगान् ॥ ८७७ ॥ पितृमातुरुदरेस प्तधातुगर्तनिपातनैः ॥ विण्मूत्रादिकृतैर्लेपैर्जराय्वस्थ्यादिबंधनैः ॥ ८७८ ॥ कृम्याख्यनागपाशैश्चदुःसहैर्जठ रोद्भवैः ॥ वाताग्निजनितैस्तापैरुपस्थच्छिद्रनिर्गमैः ॥ ८७९ ॥ अनेकजन्मसंस्मृत्याविस्मृत्याचात्मनस्तथा ॥ अशक्तिपारतंत्र्याभ्यांविण्मूत्रादेश्चभक्षणैः ॥ ८८० ॥ क्रीडानामनवाप्त्याचगुरुमात्रादिभीतितः ॥ पंचबा णकृतैश्चित्रैर्विचित्रैश्चभ्रमैरपि ॥ ८८१ ॥

मप्राप्त्यादुःखं तथागुर्वीयामात्रादिभीतिस्तयाचेति अत्रपक्षेमातृशब्दोमीञ्हिंसायामितिधातोस्तृचिमीनातिमिनोतीत्यात्वेचव्युत्पन्नो हिंसकवचनः आदिपदेनतदुपकरणग्रहः यौवनदुःखानांतत्साम्यमाह पंचेति पंचबाणेनकामेनकृतैश्चित्रैर्नारीमूर्तैश्चित्तभूमौलिखनैः तथाविचित्रैर्नानाविधैर्भ्रमैर्भ्रमणैःकृतंदुःखंप्रसिद्धं निरयपक्षेतुप्रत्यालीढादिस्थानभेदात्पंचविधानिचबाणकृतानितत्तथा मयूरव्यंसका दित्वात्समासः यद्वानाराचादिभेदात्पंचविधैर्बाणैःकृतानीतिविग्रहः एतादृशानिचित्राणिआश्चर्याणितैः यमदूताहिदुष्कृतिशरीराणिल क्षीकृत्यबाणप्रहरणाभ्यासंकुर्वंतीतिपुराणेप्रसिद्धम् विविधंभ्रामयंतीतिचेति आलेख्याश्चर्ययोश्चित्रमिति तथास्यात्प्रत्यालीढमालीढ मित्यादिस्थानपंचकमित्यमरः आदिपदेनसमपदविशाखमंडलानांधनुर्वित्पादन्यासभेदानांग्रहः ॥ ८८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वार्द्धकादिदुःखानांनिरयसाम्यमाह श्वित्रिणीति श्वित्रिणीजरातत्संगमकृतैर्दोषैरोगाद्यैः निरयपक्षेकुष्ठिसंसर्गात्तद्व्रजालाभःप्रसिद्धएव कालेति कालएवसर्पस्तेनग्रसनं निरयपक्षेतुकालाःश्यामाश्चतेसर्पास्तैर्ग्रसनानितैरिति तथायमकिंकरैरुक्तवाक्यैरिति॥ ८८२ ॥ नरकदुःखान्याह नानेति घनादिजैःघनःपृथ्वी आदिपदेनजलादिग्रहः पृथिव्यादिमयनरकदुःखैरित्यर्थः तदुक्तंयोगभाष्ये घनसलिलानलानिलाकाशतमःप्रतिष्ठाःमहाकालांऽबरीषरौरवमहारौरवकालसूत्रतामिस्रांधतामिस्रामहानरकभूमयइति धनादिजैरितिपाठेसिंहावलोकनन्यायेनयौवनदुःखानांवर्णनं कामनाद्वाराधनादिभ्योजातैर्युद्धादौनानाशस्त्रादिसंपातरूपैर्वैषम्यैरित्यन्वयः निरयेपिवैषम्यानिधनादिकामनाफलभूतान्येवेत्यवधेयं स्वर्गादिपतनैरवीचिनिरयसमैः अत्रमानुषेलोकेदेहाद्यवाप्तितः तदर्थंपुनःपित्रादिदेहसमावेशैश्चेति संसा

श्वित्रिणीसंगमोत्थैस्तैर्दोषैर्नानाविधैस्तथा ॥ कालसर्पग्रसनतस्तथैवयमकिंकरैः ॥ ८८२ ॥ नानाशस्त्रादिसंपातैर्वैषम्यैश्चघनादिजैः ॥ स्वर्गादिपतनैस्तद्वदत्रदेहाद्यवाप्तितः ॥ पुनःपित्रादिदेहेषुसमावेशैःसुदारुणैः ॥ ८८३ ॥ एवंसंसारसुभटोजंतूनजंतुकसन्निभान् ॥ अधऊर्ध्वंतथादिक्षुविदिक्ष्वपिचसंक्षिपन् ॥ ८८४ ॥ पितृमातृप्रवेशाद्यैस्तुदंस्तैर्विविधायुधैः ॥ निपातयत्यमून्दीनानात्मज्ञानविवर्जितान् ॥ ८८५ ॥

रभटोहन्यादितिसंबंधः ॥ ८८३ ॥ संसारस्यसुभटत्वमप्येतदुपनिषदर्थाज्ञानप्रयुक्तमेवेत्याह एवमितिद्वाभ्यां एवमुक्तविधयासंसारसुभटोऽमूनजंतून्निपातयतिप्रतिमल्लवत्पराभवति किंकुर्वन् अधऊर्ध्वंतथादिक्षुविदिक्षुचसम्यक्क्षिपन् नानायोनिनयनमेवचसंसारमल्लस्यनियुद्धविशेषइतिभावः पुनःकिंकुर्वन् तैःपूर्वोक्तैःपितृमातृशरीरप्रवेशादिरूपैर्विविधायुधैस्तुदन्व्यथयन् जंतूनांनिपातनेचसंसारमल्लस्यनक्लेशलेशोपीतिसूचनायजंतूनांविशेषणानि जंतुकाःक्षुद्रजंतवोयूकादयस्तत्संनिभान् तत्रहेतुर्दीनानिति तत्रापिहेतुरात्मज्ञानेति अज्ञानमेवजीवानांबाधयोग्यत्वेसंसारस्यबाधकत्वेचप्रयोजकमितिभावः ॥ ८८४ ॥ ८८५ ॥ ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वेतदर्थावधीरणेकोहेतुरितिचेद्वैराग्यमेव वैराग्यंपरमेतस्यमोक्षस्यपरमोऽवधिरितिसिद्धांतादित्यभिप्रायेणाह संसारेति संसारसुभटप्रोत्थान्दुःसहान्स्वपराभवान्येविजानंतितद्विज्ञानफलंपरवैराग्यमासादयंतितएवास्यवेदांतस्यसुनिश्चितमर्थंविजानंति अर्थेज्ञातेचतएवसुभटाःसंसारस्तुक्षुद्रजंतुवदनायासेनप्रतिक्षेपपात्रतांगतइतिभावः ॥ ८८६ ॥ नन्वयमर्थोब्रह्मात्मैकत्वलक्षणःकथंनिश्चयगोचरोभवेदन्यवेदांतानामर्थांतरपरत्वसंभावनयाप्रतिबंधादितिचेन्न सर्ववेदांतानांगतिसामान्यात् तदेवकथमितिचेच्छृणुक्रमेणेत्याशयेनऋग्वेदब्राह्मणोपनिषत्तयाउपस्थितायाःकौषीतक्युपनिषदोव्याख्यामुपन्यस्यति इतितेइति स्पष्टम् ऋषिसंबंधोवेदस्यप्रवचननिमित्तः संज्ञाचप्रव

संसारसुभटप्रोत्थान्दुःसहान्स्वपराभवान् ॥ सुभटायेविजानंतिअर्थमस्यसुनिश्चितम् ॥ ८८६ ॥ इतितेज्ञानमाख्यातमैतरेयसमीरितम् ॥ कौषीतक्युक्तमखिलमिदानींश्रोतुमर्हसि ॥ ८८७ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणश्रीशंकरानंदभगवताविरचितेउपनिषद्रत्नेआत्मपुराणेऐतरेयार्थप्रकाशोनामप्रथमोऽध्यायः ॥ १ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

चनादितिजैमिनिसूत्रात् प्रवचनंप्रथमंप्रकाशनमित्यन्यत्रविस्तरः ॥ ८८७ ॥ समाप्तिवाक्येउपनिषद्रत्नेइतिपदस्यउपनिषदोरत्नानियत्रकोशसमेतत्तथेतिविग्रहः टीकानामतुसत्प्रसवाइति सतांगुरूणांप्रसवोभ्यनुज्ञानंप्रारंभेयस्याइत्यर्थसमन्वयात् श्रीशंकरानंदमुनेःप्रबंधः श्रीशंकराचार्यमतानुगामी श्रीशंकरेष्टेविद्दतिंगतःपुरेश्रीशंकरोनुग्रहमातनोतु इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतौआत्मपुराणटीकायांसत्प्रसवाख्यायांप्रथमोऽध्यायः ॥ १ ॥ ग्रंथसंख्या ४२००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे प्रथमोऽध्यायःसमाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे द्वितीयाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ नमस्तस्मैभगवतेपरमानन्दरूपिणे उपाधिपरिहाणेनयःसर्वत्रप्रकाशते ॥ १ ॥ अथकौषीतक्युपनिषदंव्याचिख्यासुस्तत्रप्रथमद्वितीयाध्याययोःसगुणविद्यापरयोस्तात्पर्यस्योपासनंचवन्सर्केत्यादिनोपासनानांनिर्गुणविद्याधिकारसंपादकतानिरूपणेनदर्शितप्रायत्वाज्ज्ञेयस्वरूपप्रदर्शनपरप्रतर्दनोहवैइत्यादितृतीयाध्यायव्याख्यांतावदारभते इदमित्यादिना इदंवक्ष्यमाणेंद्रप्रतर्दनाख्यायिकाप्रकाशितंज्ञानंजन्मकोटिशतायुतैर्दुर्लभमपिपुरुषव्याघ्रैःपुरुषश्रेष्ठैर्गुरुशुश्रूषणादिनाप्राप्यतइत्यन्वयः आदिपदेनश्रद्धादिग्रहः ॥ १ ॥ नातइति अतोज्ञानान्मनुष्यस्यहिततमंनास्तियतइदंज्ञानंसुखावाप्त्यैसमूलस्यदुःखस्यविनाशनेचसाधनमिति॥२॥ अत्रेति ॥३॥

श्रीः॥इदंसुदुर्लभंज्ञानंजन्मकोटिशतायुतैः॥ प्राप्यतेपुरुषव्याघ्रैर्गुरुशुश्रूषणादिना॥१॥नातोहिततमंकिंचिन्मनुष्यायास्तिसाधनम्॥ सुखावाप्त्यैसमूलस्यदुःखस्यचविनाशने॥२॥ अत्रचोदाहरंतीममितिहासंपुरातनम्॥ प्रतर्दनस्यसंवादंदेवराजेनवैपुरा॥३॥ आसीत्प्रतर्दनोनामदिवोदाससुतोमहान्॥ काशीश्वरोजितामित्रःक्षत्रधर्मरतःसदा॥४॥ जिगायशत्रूनखिलान्धर्मतःसनराधिपः॥ देवान्जेतुंजगामाथस्वर्गंदेवेंद्रपालितम्॥५॥ एकाकीधनुरादायस्वर्गद्वारिस्थितोहिसः॥ इंद्रायप्रेषयामासदूतंवाक्यार्थकोविदं॥६॥ भवान्देवेंद्रइत्युक्तोमनुजेंद्रस्त्वहंतथा॥इंद्रतानोभयोर्युक्तात्यर्थशून्यत्वहेतुतः॥७॥

आसीदिति दिवोदाससंज्ञस्यकाशिराजस्यसुतः जिताअमित्राःशत्रवआंतराबाह्याश्चयेनसतथा ॥ ४ ॥ जिगायेति जिगायजितवान् धर्मतःधर्मयुद्धेन अथमानुषलोकजयानंतरंदेवान्जेतुंस्वर्गंजगामेति ॥ ५ ॥ एकाकीति इंद्रायइंद्रंबोधयितुंदूतंप्रेषयामाससंदेशवाक्यंश्रावयेत्याकारप्रेषणाविषयंचकार ॥ ६ ॥ संदेशवाक्यमभिनयति भवानितिचतुर्भिः हेदेववरभवान्देवेंद्रइतिलोकैर्यद्यप्युक्तस्तथाहंमनुजेंद्रइतितथापिउभयोर्देवेंद्रमनुजेंद्रपदार्थयोर्घटिकाइंद्रतानयुक्तानमुख्या कुतोर्थशून्यत्वात् इदिपरमैश्वर्येइतिधातोरर्थाननुगमात् ऐश्वर्यस्यपरमत्वंहिसाम्यातिशयराहित्यंतत्त्वेकत्रैवसंभवतितथाचदेवमनुजावच्छिन्नैश्वर्यवाचित्वेइंद्रतायागौणत्वंस्पष्टमितिभावः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादहमिद्रतायागौणतायाःपरिहारार्थंभूमिस्थान्राज्ञोभवद्भिन्नान्जित्वात्वांजेतुमागतोस्मीत्याह जिताइति ॥ ८ ॥ युद्धार्थमिति सबलोवाएकाकीवायुद्धार्थंसमाव्रज अथवामांप्रतिममपुरतःपराजितोहमित्याकारंवाक्यंवदेति ॥ ९ ॥ धनुरिति धनुरेवद्वितीयंसहायभृतं यस्यसतथानाम्नाप्रतर्दनोहंभवामि एनंमांविचार्यौचितंयोग्यंसमाचरइति ॥ १० ॥ एवमुक्तइति वर्चस्तेजः सुधर्मादेवसभा इदमिदंचोवाचवचनमितियावद्वक्ष्यमाणमुक्तवान् ॥ ११ ॥ दूतउवाच लोकानामित्यादिना स्पष्टम् ॥ १२ ॥ अस्तीति अस्तिकाशीतिनाम्नाप्रसि

जिताःसर्वैमयाभूमौराजानोदीप्ततेजसः ॥ भवंतमेकंहित्वातस्त्वामिहास्मिसमागतः ॥ ८॥ युद्धार्थंसबलः शीघ्रमेकाकीवासमाव्रज ॥ पराजितोहमित्येवंवाक्यंवावदमांप्रति ॥ ९॥ धनुर्द्वितीयोभवतःप्रियंधामसमागतः ॥ प्रतर्दनोहमेनंत्वंविचार्यौचितमाचर ॥ १० ॥ एवमुक्तस्ततोदूतोदेवेंद्रंसूर्यवर्चसम् ॥ सुधर्मायांस्थितं देवैर्वृतंनत्वोक्तवानिदम् ॥ ११ ॥ लोकानांलोकपालानांसर्वेषामेकएवहि ॥ नाथस्त्वंभगवान्किंचित्त्वांहि विज्ञापयाम्यहं ॥ १२॥ अस्तिभूमौमहान्देशःकाशीनामांकितःशुभः ॥ उत्कंठितेवयंयातिस्वर्धुनीभवतांनदी ॥ १३ ॥ तस्यास्तीरेपुरीरम्यात्रिशूलस्योपरिस्थिता ॥ पिनाकपाणेःसततंस्वर्गस्यापितिरस्करी ॥ १४ ॥

द्धोदेशः शुभःस्वर्गादपिरमणीयः तद्देशस्यरमणीयतांचस्वर्धुन्याःस्वर्गमुपेक्ष्यतत्रसोत्कंठंगमनमेवसूचयतीत्याह उत्कंठितेवेति भवतांदेवानां ॥ १३ ॥ तस्याइति तस्याःस्वर्धुन्यास्तीरेरम्यापुरीवर्तते कीदृशी पिनाकपाणेर्भगवतस्त्रिशूलस्योपरिस्थिता पुनःकीदृशी स्वर्गस्यापितिरस्करीतिरस्करणशीला कुज्ञोहेत्विति टः ॥ १४ ॥ ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृमिरिति यस्यामित्युत्तरश्लोकादनुषज्यते तथाचयस्यांमृतोजरायुजत्वादिनाचतुर्विधोपिजंतुस्त्रिनेत्रत्वमुपैतीत्यन्वयः सचजन्तुःकृम्या दिक्षुद्रजन्तुरूपस्तामसोवाभवतुबहुश्रुतःब्राह्मणरूपःसात्विकोवाभवतुतदपेक्षयाफलेविशेषोनास्तीतिपूर्वार्द्धाशयः कृमिर्निरस्थिःकीटः सास्थिःपतंगोदीपविरोधीप्रसिद्धः त्रिनेत्रत्वंशिवत्वं सविशेषरूपेत्रिनेत्रत्वंप्रसिद्धं निर्विशेषरूपेचत्रीणिस्थूलसूक्ष्मकारणानिसमष्टिव्यष्टि रूपाणिनेत्राणिप्रापकाणिविचारद्वारायस्यतत्तुरीयंतत्त्वमितिविग्रहेणबोध्यम् तथाचश्रुतिःप्राणाग्निहोत्रोपनिषदि वाराणस्यांमृतोवापि इदंवाब्रह्मयःपेठत् एकेनजन्मनाचैवध्रुवंमोक्षमवाप्नुयादिति तथाजाबालतापनीयमोक्षधर्माश्वमेधपर्वसुमत्स्यादिपुराणपाराशराद्युपपु राणसनत्कुमारसंहितादिषुदेदीप्यमानेकाशीमहिमसूर्येसंदिहानएवस्वदृष्टिदोषमावेदयतीत्यलम् ॥ १५ ॥ यस्यामिति यस्यांपुर्यांभगवा

कृमिःकीटःपतंगोवाब्राह्मणोवाबहुश्रुतः॥ मृतश्चतुर्विधोजंतुस्त्रिनेत्रत्वमुपैतिहि ॥ १५॥ यस्यांवसतिसर्वा त्माभगवान्भूतभावनः॥ भवानीहृदयाब्जेंदुमध्यमोधवलप्रभः ॥ १६ ॥ भवद्भिरखिलैर्देवैर्मौलिरत्नपदां शुभिः॥ नमद्भिःसर्वदाहर्षान्नीराजितपदांबुजः ॥ १७॥

न्सर्वज्ञःपरमेश्वरोलीलाविग्रहेणतारकोपदेष्टावसति कीदृशः सर्वात्मासर्वांतरः भूतभावनःभूतस्यकार्यमात्रस्यजनकःअद्वितीयइतियावत् पुनःकीदृशः भवानीहृदयाब्जस्यइंदुमध्यमःसूर्यः इंदुमध्येमाकांतिःप्रतिबिंबितायस्येतिविग्रहः सूर्यप्रतिबिंबेनैवचंद्रकलावर्द्धतइतिज्यो तिःशास्त्रेप्रसिद्धम् धवलप्रभःकर्पूरगौरः धवलप्रभुरितिपाठेधवलस्यमहोक्षस्यपतिरित्यर्थः धवलःसुंदरेसितेमहोक्षेचेतिविश्वः ॥ १६ ॥ भवद्भिरिति पुनःकीदृशोभगवान् भवद्भिरखिलैर्देवैर्नमद्भिःकर्त्तृभिर्मौलिस्थितानियानिरत्नपदानिरत्नस्थानभूतानिभूषणानितेषामंशुभिः किरणैरारात्तिक्यदीपनिभैर्नीराजितेपदांबुजेयस्यसतथा ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुनयइति येचमुनयःस्मृत्यादिप्रणेतारोयेचवेदाश्चत्वारःप्रसिद्धास्तेसर्वेयंभगवंतंबहुधावर्णयंति कंकेइव राजानंबंदिनश्चारणाइव यथा कालंस्तावकावंदिनःकीर्तिगायकाश्चारणाइतिभेदः कृतोपकारत्वंदृष्टांतेधनदानादिनाप्रसिद्धं दार्ष्टांतिकेतुमुनीनांतपःफललाभोज्ञानला भश्च वेदानांकृतोपकारत्वंप्रामाण्यलाभः यदिकर्मफलप्रदःपरमार्थरूपोभगवान्नस्यात्तर्हिकंप्रतिपाद्यवेदाःप्रमाणतांलभेरन्निति ॥ १८ ॥ यस्येति शतवारमनंतवारमस्मिन्जगतिसंसारेभवंतिप्रादुर्भवंतिनभवंतितिरोभवंतीत्यर्थः ॥ १९ ॥ तपइति यंपरमेश्वरमुद्दिश्यहिमवत्तन यादेवीउग्रंतपश्चकार कीदृशी नारीणांप्रथमा पुनःकीदृशी प्रथमावधूःपूर्वजन्मन्यपिसतीरूपेणभगवतोजायेतिप्रथमापदस्योभयत्रसंबं

मुनयोयेचवेदाश्चबहुधावर्णयंतियम् ॥ कृतोपकाराराजानंबंदिनश्चारणाइव ॥ १८ ॥ यस्यभ्रूभंगमात्रेणब्र ह्माद्याःसकलाःसुराः ॥ शतवारंजगत्यस्मिन्भवंतिनभवंतिच ॥ १९ ॥ तपउग्रंचचारादौयमुद्दिश्यमहेश्वरम् ॥ हिमवत्तनयादेवीनारीणांप्रथमावधूः ॥ २० ॥ सेनानीश्चगणेशश्चयस्यपुत्रौमहाबलौ ॥ प्रमथायस्यसैन्या निजयकाशीनिसर्वतः ॥ २१ ॥ यन्नामग्रहणाज्जंतुःप्राप्नुयान्नभवापदम् ॥ यस्यपादार्चनात्सिद्धिःस्वेप्सिता जायतेनृणां ॥ २२ ॥ निस्पृहोयःसदादेवोब्रह्मांडविषयभ्रमे ॥ आत्मबोधोदधिःस्वच्छोयोगिनांप्रथमोगुरुः ॥ २३ ॥ यस्मादेतज्जगत्सर्वंजायतेयत्रलीयते ॥ तिष्ठत्यपिचकोनामवर्णयेत्तद्गुणान्पुमान् ॥ २४ ॥

धेनार्थः आदौप्रधानेप्रथमस्त्रिष्वित्यमरः ॥ २० ॥ सेनानीश्चेति सेनानीःस्कंदः प्रमथागणायस्यसैन्यानि कीदृशानि जयकाशीनिजये नकाशंतेशोभंतेइतितानितथा ॥ २१ ॥ यन्नामेति भवरूपामापदंभवापदं तदुक्तंशिवपुराणे महादेवमहादेवमहादेवेतियोवदेत् एकेनैवत्र वेन्मुक्तिर्द्वाभ्यांशंभुर्ऋणीभवेदिति स्वेप्सितास्वेनपूजकेनईप्सिताप्राप्तुमिष्टा ॥ २२ ॥ निस्पृहइति योदेवोब्रह्मांडवृत्तिविषयाणांभ्रमेमिथ्या ज्ञानात्मकेभोगेनिस्पृहः आत्मेति आत्मज्ञानसिंधुः योगिनांचित्तनिरोधमभ्यस्यतामाद्योगुरुः सपूर्वेषामपिगुरुः कालेनानवच्छेदादिति योगसूत्रात् ॥ २३ ॥ यस्मादिति अपिचयत्रतिष्ठतिइति तस्यगुणान्कोवर्णयेत्वर्णयितुंशक्नुयात् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंनवभिरेतादृशोभगवान्यस्यांवसतीत्युत्कर्षमभिधायसाक्षात्तामाह यस्याइति सप्तानांमुक्तिदात्रीणांपुरीणांमध्येयस्याःपुर्याःअधिकंसौभाग्यंसर्वैरपिजंतुभिर्भोगमोक्षयोःसुलभत्वाद्दृश्यते इतरासांतुकैश्चिदेवेतिविशेषः ॥ २५ ॥ नैतयेति हेदेवाएतयाशंभुपुर्यासमाभवताममरावतीनामपुर्यपिनभवति पातभयशालित्वेननाम्नोगौणत्वात् तथाभोगैरेवप्रसिद्धानागानांभोगवतीनामपुर्यपिकिमुतान्येति ॥ २६ ॥ तस्यानामनिर्वक्ति गंगायाइति काशतेदेदीप्यतेइतिकाशी तत्रहेतुत्रयं गंगाकर्तृकंसेवनंमहादेववासःसौभाग्यप्रकटताचेति ॥ २७ ॥ तस्याइति तस्याःपुर्याः सत्यसंधःसत्यप्रतिज्ञः ॥ २८ ॥ चतुरंगेति हस्त्यश्वरथपादातंसेनांगंस्याच्चतुष्टयमित्यमरः सोयंदिवोदा

यस्याःसौभाग्यमधिकंपुरीणामिहदृश्यते॥ सप्तानांमुक्तिदात्रीणांसर्वैरपिचजंतुभिः॥ २५॥ नैतयाहिसमादेवाभवताममरावती॥ भोगवत्यपिनागानांकानामान्याभवेत्समा॥ २६॥ गंगायाःसेवनान्नित्यंमहादेवस्यवासतः॥ सौभाग्यस्यचकाशेनकाशीत्येषाभवत्पुरी॥ २७॥ तस्याःप्रभुर्जितामित्रोदिवोदासइतिस्मृतः॥ ब्रह्मण्यःसत्यसंधश्चक्षत्रधर्मरतःसदा॥ २८॥ चतुरंगबलोपेतःस्वयंचातिबलोनृपः॥ भवतांविदितःसोयंज्वाल्यत्रैवतिष्ठति॥ २९॥ तस्यपुत्रोपिमतिमान्प्रतर्दनइतिश्रुतः॥ पूर्वजैःसदृशःसर्वैर्गुणैर्भूतदयापरः॥ ३०॥ अस्यसंतिमहानागाःपर्वताइवकोटिशः॥ अनेकलक्षणोपेतावाजिनोपिरवेरिव॥ ३१॥ रथाअपिमहाघोषाःपुरारेरिवयुध्यतः॥ पादाताःस्वसमाःसंतिपरार्द्धाधिकसंख्यया॥ ३२॥ अप्रमादीसदाशास्त्रेमाययाचविवर्जितः॥ अस्त्राण्यसौविजानातिप्रयुंक्तेनैवकुत्रचित्॥ ३३॥

सोभवतांदेवानांविदितः यतोयज्वायागपरः अत्रकाश्यां ॥ २९ ॥ तस्येति तस्यदिवोदासस्यपूर्वजैःपितृपितामहैः ॥ ३० ॥ अस्येति अस्यप्रतर्दनस्यमहानागामहागजाःपर्वतनिभाःसंति तथा रविवाजिनिभाःसुलक्षणावाजिनोपिसंति ॥ ३१ ॥ रथाइति युध्यतःपुरारेःरथसदृशामहाघोषारथाश्वसंति पदातयस्त्वसंख्याताःस्वेनप्रतर्दनेनसमाः ॥ ३२ ॥ अप्रमादीति शस्त्रेशस्त्रविद्यायां माययाच्छलेन असौप्रतर्दनः यद्यपिअस्त्राणिविज्ञानातितथापिनप्रयुंक्ते ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयपादार्थंप्रपंचयति संधानमिति अस्त्राणांसंधानंप्रयोगं विसर्गनिर्मोक्षं स्थितिमर्यादां अस्त्राणिनप्रयोज्यानिहीनकार्येकथंचनेत्यादि नोक्तां संहृतिमुपसंहारंचवेत्तीति ॥ ३४ ॥ प्रयुंक्तेनैवकुत्रचिदितिस्फुटयति अस्त्रेणेतिद्वाभ्याम् अभिचारेणशत्रुमरणकामनयाकृतेनश्ये नादिनायोवधस्तस्मात् ॥ ३५ ॥ इतीति ॥ ३६ ॥ नायमिति तेनरिपुणाप्रथमतोऽताडितोनहंतीति ताडितोपिपंचाशद्वर्षादधिकायुषंषो

संधानंचविसर्गंचस्थितिंतद्वच्चसंहृतिम्॥ अस्त्राणांवेत्तिसर्वेषांमहादेवप्रसादतः ॥ ३४॥ अस्त्रेणनिहतोजंतुर्नमयानिहतोभवेत्॥ अभिचारवधात्कस्माद्विशेषोस्त्रेणघातने ॥ ३५ ॥ इतिसंचिंत्यसततंरिपुमस्त्रैर्नहंत्यसौ॥ रिपूणामिच्छयायुद्धंददात्येवहिसर्वदा ॥ ३६ ॥ नायंप्रथमतोहंतिरिपुंतेनस्यताडितः॥ ताडितोपिनपंचाशद्वर्षादत्यदधिकंक्कचित्॥ ३७॥ ऊनषोडशवर्षंचवीरव्रतमुपाश्रितः॥ कुतोभीतातुरादीनिनिहन्याद्धर्मविद्विसः॥ ३८॥ विजित्यवसुधांकृत्स्नामेकदासपुरेनिजे ॥ भवंतंक्षत्रधर्मेणवर्तमानमिहाश्टणोत्॥ ३९॥ ब्राह्मणाअपिदेवाश्वगावःसवृषभाअपि ॥ नावमान्याःसदातेनव्रतमेतन्महात्मनः ॥ ४० ॥ अन्यच्चास्यव्रतंराज्ञःक्षत्रधर्मरतान्सदा ॥ देवान्विप्रान्पितॄन्वापिजेष्याम्यात्मबलोद्धतान्॥ ४१ ॥ एवंहिव्रतिनस्तस्यमुनयोनारदादयः॥ समागताःप्रसंगेनकदाचिदिदमूचिरे॥ ४२ ॥ राजभ्यःक्षत्रधर्मेणबलिनःसकलाःसुराः॥ नहितैःसमरेयोद्धुमसुराअपिदानवाः ॥ दैत्याअपितुशक्ताःस्युःकिंपुनर्मनुजाइमे॥ ४३ ॥ एकमप्यत्रकोनामजयेदिंद्रंशचीपतिम्॥ किंपुनःसबलंलोकपालैरपिसमावृतम्॥ ४४ ॥

डशवर्षान्न्यूनायुषंचनहंतियतोवीराणांव्रतंनियमंश्रितः मूर्छितंनैवविकलंनाशस्त्रंनान्ययोधिनं पलायमानंशरणंगतंनैवचाहिंसयेदित्यादिनाधनुर्वेदोक्तंश्रितः ॥ ३७ ॥ ३८ ॥ विजित्येति भवंतंदेवराजं ॥ ३९ ॥ ब्राह्मणाइति एतदपीतिशेषः ॥ ४० ॥ अन्यदिति आत्मबलेनउद्धतान्सगर्वान् ॥ ४१ ॥ एवमिति ॥ ४२ ॥ राजभ्यइति ॥ ४३ ॥ एकमिति एकमसहायं सबलंससैन्यम् ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वेति पौरुषेणउत्साहेन ॥४५॥ आगत्येति समभूमौसमेदेशे प्राहिणोत्प्रेषितवान्॥४६॥इदमिति तदुदीरितंप्रतर्दनोक्तम् ॥ ४७ ॥ श्रुत्वेतिसाहसमपरंनामयस्यएतादृशेनाभयस्वरूपेणास्यप्रतर्दनस्यपौरुषेणचविस्मितः साहसंतुदमेदुष्करकर्मणीतिहैमः ॥ ४८ ॥ देवैरिति सहसाअविमृश्यैव॥४९॥तंदेवैरिति॥५०॥ दृष्ट्वेति निघ्नंतुताडयंतु हेशक्रत्वंचप्रहरेतिशेषः ततोयुष्मत्कर्तृकप्रहरणानन्तरं ॥५१॥ इत्युक्तेइति

श्रुत्वेत्यादिवचांस्येषस्थित्वाचव्रतमात्मनः ॥ पौरुषेणैववायोद्धुमेकाकीससमागतः ॥ ४५ ॥ आगत्यास्याःपुरोद्वारिसमभूमौसवर्तते ॥ प्राहिणोच्चात्रमांदूतंदेवराजंप्रतीश्वरः ॥ ४६ ॥ इदंचोवाचवचनमित्युक्त्वातदुर्दारितम् ॥ देवराजायसकलंदूतस्तत्रन्यवेदयत् ॥ ४७॥ श्रुत्वादूतस्यवचनंदेवराजोतिविस्मितः ॥ साहसापरनाम्नास्यपौरुषेणाभयात्मना ॥ ४८ ॥ देवैश्चसहितःसोपिक्षत्रधर्मरतःप्रभुः ॥ संक्रुद्धःसहसापुर्यानिर्जगामबलान्वितः ॥ ४९ ॥ तंदेवैःसहितंदृष्ट्वास्वयुद्धार्थमुपागतं ॥ नचचालततःस्थानात्स्मयमानःप्रतर्दनः ॥५० ॥ दृष्ट्वातंवचनंचेदमुवाचचशचीपतिम् ॥ मांशस्त्रैर्विविधैस्तीक्ष्णैर्निघ्नंतुसकलाःसुराः ॥ शक्रत्वंचततोहंवोहनिष्यामिशितैःशरैः ॥ ५१ ॥ इत्युक्तेसकलादेवाःसशक्राःक्रोधमूर्छिताः ॥ कुंडलव्यूहतस्तंहिपरिवव्रुःसमंततः ॥ घ्नतवध्नीतचैवैनमित्यूचुश्चपरस्परम् ॥ ५२ ॥ वादित्राणांहिचित्राणांसिंहनादविमिश्रिताः ॥ शब्दाःशंखरवांतास्तेप्रादुरासन्सहस्रशः ॥ ५३ ॥ शस्त्रवर्षंचतेसर्वेसशक्रामुमुचुस्तदा ॥ तोयदाइवसंक्रुद्धाःपर्वताभेप्रतर्दने ॥ ५४ ॥ प्रतर्दनोपिसर्वेषांशस्त्रैर्भिन्नात्मगात्रकः ॥ सर्वान्जघानसहसापंचन्यूनैःशरोत्करैः ॥ ५५ ॥

कुंडलाकारेणव्यूहेनसैन्यन्यासेन क्रोधोमूर्छितोयेषांतेतथापरिवव्रुर्वेष्टयामासुः ॥ ५२ ॥ वादित्राणामिति शंखरवांताःशंखनादपर्यंताः ॥ ५३ ॥ शस्त्रवर्षमिति ॥५४ ॥ प्रतर्दनोपीति सर्वेषांदेवानांशस्त्रैर्भिन्नात्मविद्धस्वरूपंगात्रंवपुर्यस्यसतथा पंचबाणान्यूनानतुततोन्यूनाःसमूहिनोयेपुतादृशैःशरोत्करैःशरसमूहैर्जघानेति ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुजयोरिति भुजादावविद्धोनदृश्यतेंकिंतुसर्वेंविद्धाः॥ ५६॥आयुधानीति भुजेषुबाणप्रयुक्तायाव्यथातयार्त्तानां॥ ५७॥ बाणानामिति स
हस्राक्षस्तुबाणानांसहस्रेणविद्धः अतिबलिनाप्रतर्दनेन ॥ ५८॥ सर्वानिति विज्यंविगताऽवतारिताज्यागुणोयस्यतादृशम्॥ ५९॥ युद्धमिति
पौरुषमुत्साहं प्रतर्दनस्येतिशेषः ॥ ६० ॥ इंद्रोक्तिमाह प्रतर्दनेतिद्वाभ्याम् ॥ ६१॥ युद्धपौरुषयोरितरवैलक्षण्यंतोषहेतुतोपपत्तयेपूर्वोत्त
रार्द्धाभ्यांदर्शयति एकाकीति ॥ ६२ ॥ इत्युक्तइति ॥ ६३ ॥ उक्तमिति व्रतंबलोद्धतानूजेष्यामीतिप्रतिज्ञारूपं तेनत्वयाप्रतर्दनेनसामरोऽ

भुजयोःस्तनयोश्चैवललाटफलकेतथा॥ सुरःकश्चिदविद्धोत्रदेवसैन्येनदृश्यते ॥ ५६ ॥ आयुधानिचसर्वेषां
न्यपतन्भूमिमंडले॥ भुजबाणव्यथार्तानांसेंद्राणामसुरद्रुहां ॥ ५७ ॥ बाणानांहिशतैर्विद्धःकश्चित्पंचाशता
वरः॥ सहस्राक्षःसहस्रेणविद्धोतिबलिनातदा ॥ ५८ ॥ सर्वांस्तानमरान्दृष्ट्वाभूमौनिपतितायुधान्॥ प्रतर्द
नोधनुःस्वीयंविज्यमत्रचकारह॥ ५९ ॥ युद्धमेतन्महद्दृष्ट्वासाहसाख्यंचपौरुषं॥ विस्मयाविष्टहृदयइंद्रऊचे
प्रतर्दनम्॥ ६० ॥ प्रतर्दनवराभीष्टंवरमद्यददाम्यहम्॥ तुष्टोस्मिभवतोयुद्धपौरुषाभ्यांमहीपते॥ ६१ ॥ एका
कीकइहस्वर्गेमांजेतुंसामरंप्रभुः॥ कोवादेवान्मयासार्धंसशल्यान्कुरुतेक्षणात्॥ ६२॥ इत्युक्तेदेवराजेनतदा
तत्रप्रतर्दनः॥ निपत्यदंडवद्भूमाविदंवचनमूचिवान्॥ ६३॥ उक्तंयद्भवतावाक्यंसामरोहंजितस्त्वया॥ व्रतं
मेपूरितंतेनभवताशक्रसर्वथा॥ ६४॥ अपराधंक्षमस्वत्वंममबालस्यदुर्धियः॥ पुष्पैरपिनताड्यायेतेशरैस्ता
डितायतः॥ ६५ ॥ भवंतःपूज्यपूज्यामेसर्वेसाधुविचेष्टिताः ॥ भवंतःसात्विकादेवामानुषोराजसोस्म्यहम्
॥ ६६॥ ततोरजःसमुद्रेकात्पापमेतन्मयाकृतम्॥ सात्विकत्वेनभवतावरंदातुमिहोद्यतम्॥ ६७॥

हंजितइतिवाक्याभिधानेन ॥ ६४ ॥ अपराधमिति तथापीत्यादिः अपराधमभिनयति पुष्पैरिति पुष्पाण्यपियत्रअत्यादरेणसमर्पणी
यानीत्यर्थः ॥ ६५ ॥ भवंतइति पूज्यैर्मत्पितृप्रभृतिभिःपूज्याः तथाचममनितरांपूज्याइत्यर्थः उत्तरार्द्धार्थंप्रपंचयति भवंतःसात्विका ॥४॥
इत्यादिना ॥ ६६ ॥ ततइति सात्विकत्वेनेति उद्यतं भावेक्तः तथाचभवतेंद्रेणसात्विकतयावरंदातुंउद्यमःकृतइत्यर्थः ॥ ६७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैषम्याभावमभिनयति साधूनामिति समेब्रह्मणिचित्तमनुसंधानरूपंयेषामीदृशानांसाधूनांधीर्विषमाअयंस्वःपरश्चेत्याकारानभवति इ यंव्याप्तिश्चभवतोवरदानोद्यमंदृष्ट्वामयानिर्णीतेत्याह वरमिति॥६८॥ प्रायइति हेइंद्रभवादृशाःप्रायोबाहुल्येनपुरुषोत्तमाएवभवंति किं तेषांलक्षणमतआहोपकारमित्यादि केचिदपकारिणिशापाद्यपिददतेइत्यभिप्रायेणप्रायःपदम् ॥ ६९॥ अपकारिष्विति अपकारिष्वपि भूतेषुयेउपकारिणोभवंतितैःपुरुषैःस्तंभनिभैस्त्रिलोकीविधृता तत्प्रभावादेवत्रिलोकीस्थितेतियावत् तत्रहेतुरूपंत्रिलोक्याविशेषणंयज्ञमंड लीति यज्ञसमूहात्मिका कार्यकारणयोरभेदात् उपकारोहिसर्वयज्ञात्मकोपकारात्परोधर्मइत्यादिश्रुतेः सचयज्ञपरिणामात्मिकांत्रिलोकीं

साधूनांसमचित्तानांविषमानास्तिधीःक्वचित्॥ वरंददासियस्त्वंहिमय्येवमपकारिणि॥ ६८ ॥ प्रायोभवादृ शाःसर्वेलोकेस्मिन्पुरुषोत्तमाः॥ उपकारंहिकुर्वंतिमादृशेयेऽपकारिणि ॥ ६९ ॥ अपकारिषुभूतेषुयेभवंत्युप कारिणः॥ तैःस्तंभैर्विधृतासर्वात्रिलोकीयज्ञमंडली॥ ७०॥ उपकारेषूपकारान्प्रायःसर्वेपिकुर्वते॥ अपकारे षूपकारंत्वादृशाःकेपिकुर्वते॥ ७१ ॥ अहंहिरजसाविष्टोवेद्मिस्वस्मैहिताहितम्॥ नैवयस्माद्भवंतंहियोद्धुम त्रागतोधुना॥ ७२ ॥ महतागजयूथेनमशकोयद्वदाव्रजेत्॥ योद्धुंतद्वदहंशक्रभवद्भिर्योद्धुमागतः॥ ७३॥ अतएतादृशोहंहिकिंवृणेहितमात्मने ॥ त्वमेवत्रिजगन्नाथयत्स्याद्धिततमंसदा ॥ मत्र्यंमानुषरूपायतत्त्वय च्छार्तिनाशनम्॥ ७४॥

धारयितुमर्हतीतिभावः ॥७०॥ उपकारेष्विति उपकारापकारशब्दौमत्वर्थीयाच्प्रत्ययांतौ केपिविरलाः॥ ७१॥ अहमिति अहंयतोरज साविष्टोव्याप्तस्तस्मात्स्वस्यहिताहितंनैववेद्मि भवंतंप्रतियुद्धार्थमागमनमेवममाबोधंदर्शयतीत्याह भवंतमिति॥७२॥स्वस्यहिताहितज्ञाना भावंदृष्टांतेनस्फुटयति महतेति महतागजयूथेनयोद्धुंयद्वन्मशकआव्रजेदागच्छेत्तथाहमिति ॥ ७३ ॥ अतइति अतोहेतोरेतादृशोहित ज्ञानहीनोहमात्मनेहितंकिंवृणेप्रार्थयामि तस्मात्हेत्रिजगन्नाथमत्र्यंमानुषरूपायतद्धिततममार्तिनाशकरूपंस्यात्तत्त्वयमेवालोच्यप्रय च्छेति ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति नवैवरोवरस्मैइतिव्याख्येयश्रुतिवाक्येवरशब्दःपरशब्दसमानार्थइतिदर्शयंस्तद्याचष्टे अयाचितमिति कश्चित्परःपरस्मैअन्यस्मै अयाचितंवरंस्वधियैवनप्रयच्छतितथासतितस्यदत्तस्यवरत्वमेवहीयेत व्रियतेयाच्यतेइतिवरपदव्युत्पत्तेः ततोहेप्रतर्दनत्वमेवदृणीष्वेति ॥ ७५ ॥ एवमुक्तःपुनरिति न्यायसहितंयुक्तिसहितंवचनंसत्यवादिनमिद्रंप्रत्युवाचेति ॥७६॥ सत्यमिति हेशक्रयत्त्वयैतल्लौकिकन्यायानुवादकंवचउक्तंतत्सत्यमबाधितमेवलोके परंतुतद्विषमेषुभेददर्शिष्वेववर्त्ततेसमन्वितंभवति भवादृशेसमचित्तेतुनयुज्यतेइति ॥ ७७ ॥ भवतस्तुसमदर्शितामयावरदानोद्यमादेवनिर्णीतेत्याह त्वांविनेति ॥ ७८ ॥ फलितमाह ततइति यदित्वयामेदेयोवरःप्रतिज्ञातस्तर्हिस्वया

एवमुक्तोव्ययंशक्रःप्रतर्दनमथाब्रवीत्॥ अयाचितंवरंकश्चित्स्वधियानैवयच्छति ॥ परस्मैततएवत्वंदृणीष्वैवप्रतर्दन॥ ७५॥ एवमुक्तःपुनःशक्रंबुद्धिमान्सप्रतर्दनः॥ उवाचन्यायसहितंवचनंसत्यवादिनम्॥७६॥ सत्यमेतत्त्वयाशक्रयदुक्तमधुनावचः॥ किंतुतद्विषमेष्वेववर्ततेनभवादृशे॥ ७७॥ त्वांविनात्रहिकोनामरिपवेदुष्टचेतसे॥ वरंदद्यादतोनूनंभवान्नविषमःक्वचित्॥ ७८॥ततस्त्वयावरोदेयःप्रतिज्ञातोस्तिमेयदि॥ देहिमह्यंहिततमंबुद्ध्वाधिषणयास्वया ॥ ७९ ॥ वरःश्रेष्ठइतिप्रोक्तःश्रेष्ठोहिततमोभवेत्॥ तन्नवेद्मितताेऽज्ञानाद्याचितोनवरोभवेत्॥ ८० ॥ इत्युक्तेभगवानिंद्रःपुनस्तोषमुपागतः ॥ प्रतर्दनस्यसंवीक्ष्यचातुरींबुद्धिजामिमाम्॥ ८१ ॥

धिषणयैवहिततमंबुद्ध्वानिर्णीयमह्यंदेहीति ॥ ७९॥ रूढिर्योगाद्बलीयसीतिन्यायमाश्रित्याह वरइति श्रेष्ठःपदार्थोहिवरइतिरूढ्याप्रोक्तः श्रेष्ठोनामहिततमः अहंतुतंहिततमंनवेद्मिततोऽज्ञानाद्यदियाचितस्तर्हिअवरोऽश्रेष्ठःस्यात्तथाचभवतोवरदानप्रतिज्ञाहानिःस्यात्तस्माद्भवतैवात्मनःप्रतिज्ञापरिपालनायवरोदेयइतिभावः ॥ ८० ॥ इत्युक्तेइति प्रतर्दनस्यबुद्धिजांचातुरींवीक्ष्येंद्रस्तुष्टइति ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुयदींद्रस्तुष्टस्तर्हितस्यतोषोविद्यादानप्रयोजकस्तथाचेंद्रःसत्यान्नचचालेत्यर्थकमथोखल्विंद्रःसत्यादित्यादिवाक्यंकथमुपपद्येततद्धि प्रतिबंधकेप्रसक्तेपिसत्यसंरक्षणायेंद्रोविद्यांददावितितात्पर्यकमित्याशंक्यविद्यावाक्यस्मृतिःप्रतिबंधिकासीदितिवक्ष्यमाणःषोडशभिर्वि द्यावाक्यमनुवदंस्तत्रविद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टेहमस्मि असूयकायानृजवेशठायनमादद्यावीर्यवतीयथास्यामितिश्रु तिमर्थतःपठति ब्रह्मविद्येतिसप्तभिः ब्रह्मविद्यातदभिमानिनीदेवताऽतिसंखिन्नाऽनधिकारिषुप्राप्तिभयेनोद्विग्नासतीब्राह्मणंययौगत्वाचे दमाहेतिशेषः ब्राह्मणपदस्यार्थोब्रह्मिष्ठमिति अतिशयेनब्रह्मवांस्तद्बोधवानितिब्रह्मिष्टस्तं विन्मतोरितिलुक् हेब्राह्मणत्वंमांसर्वजनसेवित

ब्रह्मविद्यातिसंखिन्नाब्रह्मिष्ठंब्राह्मणंययौ ॥ वारांगनासमानांहिमाकृथाःसर्वसेविताम्॥ ८२॥ गोपायमां सदैवत्वंकुलजामिवयोषितम्॥शेवधिस्त्वक्षयस्तेऽहमिहलोकेपरत्रच ॥ ८३॥ अथैवंचेदशक्तोसिकर्तुंमद्व चनंद्विज ॥ जनोपकारनिरतोवदान्योतिकृपावृतः ॥ ८४ ॥ तथापिगुणहीनायनमांदद्याःकथंचन ॥ स्वसु तामिवरूपाढ्यांपुरुषेविगतस्पृहे॥ ८५॥ एतेऽगुणाममसदाब्रह्मन्नत्यंतदुःखदाः ॥ निंदागुणवतांतद्वत्सर्वदा ऽऽर्जवशून्यता ॥ ८६ ॥ इंद्रियाधीनतानित्यंस्त्रीसंगोप्यविनीतता ॥ कर्मणामनसावाचागुरौभक्तिविवर्ज नं ॥ ८७ ॥

त्वेनवारांगनयापण्ययोषितासमानांमाकुर्विति ॥ ८२ ॥ गोपायेति किंतुकुलांगनामिवमांगोपायरक्षरहस्यांकुर्वितियावत् यतोहंतव लोकद्वयोपकारिकाक्षयनिधिसमास्मीति ॥८३॥ अथैवमिति अथेतिपक्षांतरे चेयदिएवमुक्तंमद्वचोऽनुष्ठातुमशक्तोसि तत्रहेतुगर्भंविशे षणत्रयं वदान्यत्वंबहुप्रदत्वं ॥ ८४॥ तथापिममविद्यायादानेतवप्रवृत्तावपिशमादिरहितायमांनदेहि यथागुणाढ्यांस्वसुतांक्लीबेनकश्चि द्ददातितद्वदिति ॥ ८५॥ एतइति एतेवक्ष्यमाणाअगुणादोषाहेब्रह्मन्नममातिप्रतिकूलाः दोषानाह निंदेति गुणवतांनिंदादोषारोपालिका ऽसूया आर्जवंकौटिल्यराहित्यंतच्छून्यताकौटिल्यं ॥ ८६ ॥ चतुर्विधंधूर्त्ततारूपंशठतादोषमाह इंद्रियेति अविनीतताऽनम्रत्वं विव र्जनंराहित्यम्॥ ८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवमाद्याइति दोषाइतिशेषः येषांस्युस्तेभ्योदातुंमांवर्जयनिवृत्तोभव एवंकुर्वतोविद्यायारहस्यतांपात्रेदानंवाऽऽचरतस्तेसर्वेष्टदावीर्यवत्यस्मीतिअन्यथातुवंध्येति ॥ ८८ ॥ अथपंचभिःश्लोकैःयःसंतृणत्त्यवितथेनकर्णौतमोहरन्नमृतंसंप्रयच्छन् तंविद्यात्पितरंमातरंचतस्मैनद्रुह्येत्कृतमस्यजानन्निितिवाक्यंविद्यामुखेनार्थतःपठति अपिन्यायमिति हेद्विजअत्रदोषवतेविद्यानदयेतिविषयेन्यायंउपजीव्यंनविहन्यादितियुक्तियुक्तंवदामिकेवलंतवोपकारायैवनवदामीति यइति योगुरुरीश्वरैःसमर्थैरप्यादित्याद्यैर्दुर्भेद्यंस्वस्यशिष्यस्यहृदिवर्तमानमज्ञानतमःस्तोमंनाशयेत् कस्मात्सत्यादवितथादात्मबोधाद्धेतोस्तथात्वंब्रह्मभवसीत्यादिमहावाक्यरूपंवचोमृतंपाययेत् ॥ ८९ ॥ कर्णौइति किंकुर्वन्वचोमृतंपापयेत् कर्णौअदुःखभाजौकुर्वन्अदुःखंदुःखध्वंसंभजतःप्राप्नुतइतितौतथा तथाआसमंताद्युक्तिभिरपिबोधनंकुर्वन् सएव

एवमाद्याहियेषांस्युस्तेभ्योवर्जयमांसदा ॥ एवंहिकुर्वतोनित्यंकामधेनुरिवास्मिते ॥ वंध्यान्यथाभविष्यामि
लतेवफलवर्जिता ॥ ८८ ॥ अपिन्यायंवदाम्यत्रनोपकारायतेद्विज ॥ योनाशयेद्धिदुर्भेद्यमादित्याद्यैरपीश्वरैः
॥ ८९ ॥ तमःस्तोमंहृदिस्वस्यसत्यादेवात्मबोधनात् ॥ ब्रह्मत्वंभवसीत्यादिपाययेच्चवचोमृतम् ॥ ९० ॥ कर्णा
वदुःखभाजौचकुर्वन्नाबोधनंसदा ॥ सएवास्यपितातद्वन्माताचात्रनचापरौ ॥ यतोस्यसंततौपातात्सर्वंदुः
खंविनश्यति ॥ ९१ ॥ अन्ययोःसंततौपित्रोर्दुःखंपुत्रस्यजायते ॥ यस्यनैवप्रतीकारउक्तायाःसंततेःपरः ॥ ९२ ॥

गुरुरस्याधिकारिणःपितामाताच नित्यशरीरस्यब्रह्मात्मरूपस्यव्यंजकत्वात् नचापरौलौकिकशरीरकर्तारौ तत्रहेतुमाह यतइति यतोऽस्यगुरोःसंततौविद्यासंप्रदायेपातात्प्रवेशात्सर्वंदुःखंविनश्यतीति पारक्षणेमानपूजायामितिधातुभ्यांतृच्प्रत्ययेनलोपेचनिष्पन्नौपितृमातृशब्दौसंसारभयाद्रक्षकेस्वाराज्यपदप्रदानेनपूजकेचब्रह्मविद्याप्रदेगुरावेवसम्यक्संगच्छेतेइतिभावः ॥ ९१ ॥ अन्ययोरिति अन्ययोर्लौकिकयोःपित्रोःसंततौपातात्पुत्रस्यतादृशंसंसारलक्षणंदुःखंजायते यस्यदुःखस्यप्रतीकारोनिवृत्त्युपायउक्तायागुरुसंबंधिसंततेर्विद्यासंप्रदायरूपायाःसकाशात्परोभिन्नोनकिंतुसएवेति ॥ ९२ ॥

१ संयोजयति.

CC-0. In Public Domain. Digitization by eGangotri

तत इति ततउपजीव्यत्वात्‌ब्रह्मात्मबोधस्यदात्रेऽतएवपित्रेमात्रेचगुरवेशरीरवाङ्मनोभिर्नद्रुह्येत्‌ द्रोहमनिष्टचिंतनंनकुर्यादिति असूय कादयस्तुद्रुह्यंतितस्मात्तेभ्योविद्यानदेयेतिभावः ॥ ९२ ॥ एतदिति एतत्पूर्वंयदुक्तंतद्ब्रह्मविद्याप्रदंगुरुंप्रतिमुख्यवृत्त्योक्तं वेदस्त्वाचार्यदेवो भवेत्यादिरूपःसर्वार्थानांलौकिकानामपिशिक्षासुयोगुरुस्तत्परमप्येतद्वाक्यंमन्यतेअभिप्रैतीति ॥ ९४॥ अतएवलौकिकविद्यागुरुष्वपि तथाशिष्टाचारस्तथाचरतामनाचरतांचफलान्वयव्यतिरेकौचदृश्येतेइत्याह अध्यापिताइति लोकेपियेयेनाध्यापितास्तेतंस्वगुरुंमन्यंतेइ ति तथायथैतेशिष्यागुरौवर्ततेविद्यापितेषुशिष्येषुतथावर्ततेफलंददातीतिप्रसिद्धम ॥ ९५ ॥ फलितमाहविद्या गुरुभक्तइतिद्वाभ्यां तत उक्तनियमात्‌ यःशिष्योगुरुभक्तस्तथाविद्यायाःश्रवणेआदृतःश्रद्धावानूअप्रमादीसावधानश्चमेधावीधारणाशालिमतिकःस्त्रीविवर्जितो ब्रह्मचर्यवांश्चस्यात्‌ यदिचमेविद्यायारक्षकोरक्षाकरोभवेत्तर्हिहेद्विजसत्तमतस्मैशिष्यायेमांब्रह्मवियांब्रूयाः यदितेवक्तुमुपदेष्टुमिच्छा

ततोब्रह्मात्मबोधस्यदात्रेपित्रेसदैवहि ॥ नद्रुह्येद्गुरवेतस्मैकर्मणामनसागिरा॥ ९३॥ एतन्मयात्रकथितंब्र ह्मविद्याप्रदेगुरौ॥ वेदःसर्वार्थशिक्षासुगुरवेतद्धिमन्यते ॥ ९४॥ अध्यापिताहियेशिष्यामन्यंतेतेगुरुंस्वकं॥ गुरौयथैतेवर्ततेतथाविद्यापितेष्विह॥ ९५॥ गुरुभक्तस्ततोयःस्याद्विद्यायाःश्रवणेतथा ॥ आदृतस्त्वप्रमादी चमेधावीस्त्रीविवर्जितः॥ ९६॥ ब्रूयास्त्वंयदितेवक्तुमिच्छास्याद्विजसत्तम॥ ब्रह्मविद्यामिमांतस्मैरक्षकोय दिमेभवेत्‌॥ ९७॥इतिविद्यावचःस्मृत्वासंशयंपरमंगतः॥ सत्यपाशाभिबद्धःसन्निंद्रःसत्यात्मरूपधृक्‌॥ ९८॥

भवेदितिद्वयोःसंबंधः ॥ ९६ ॥ ९७ ॥ एवंविद्यावाक्यंषोडशभिःप्रपंच्यतत्स्मरणस्यप्रतिज्ञयापाशवद्वशीकृतेंद्रनिष्ठसंशयजनकंत याक्षणमात्रंप्रतिबंधकतामाह इतिविद्येति सत्यपाशाभिबद्धःसन्नपींद्रइतिविद्यावचःस्मृत्वासंशयंगतोभूदित्यन्वयः संशयाकारस्तु किमस्मैविद्यानदेयादेयावेति तथापींद्रःसत्याच्चचालसत्यरूपत्वादित्यर्थकंहींद्रइत्यंतंवाक्यंव्याकुर्वन्निंद्रंविशिनष्टि सत्यात्मेति सत्यं शास्त्रप्रतिपाद्यात्मकंरूपंधर्मस्वरूपंतेनधृष्णोतिप्रगल्भोभवतीतिसतथेतिबृहदारण्यकभाष्यानुसारेणार्थः तथाचधर्ममर्यादास्थापकस्यपर मधर्मसत्याच्चलनंनयुक्तमितिभावः यद्वासत्येनपरमार्थेनात्मनारूपेणप्रजापत्युपदेशाल्लब्धेनतत्त्वज्ञानविषयेणप्रगल्भतइति तथाचानृता दिप्रयोजकाऽविद्यायास्तत्त्वज्ञानेननष्टत्वादिंद्रस्यसत्याच्चलनंनसंभवतीतिभावः ॥ ९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसंशयप्रयुक्तंविचारमभिनयन्नदेयेतिपूर्वपक्षकोटिंदर्शयति नायमिति अयंप्रतर्दनोविद्योक्तैः सर्वैर्गुणैर्युक्तोनभवतितस्मान्नदेयेति प्राप्तं ननुप्राणाग्निहोत्रनिष्ठयाशुद्धांतःकरणत्वादयंगुणवानेवेत्याशंक्याह यद्यपीति रिपुर्वैरी ॥ ९९ ॥ देयाविद्येतिसिद्धांतकोटिमादत्ते अथवेतित्रिभिः मद्वरात्प्रमवरमालोच्येतिल्यब्लोपेपंचमी भाजनंपात्रं ॥ १०० ॥ बहुनेति स्पष्टं॥ १०१॥ तत्रहेतुतयाप्रतिज्ञायाःपूरणीयत्वमाह वरमिति यस्माद्वरंतेददामीतिमयाईरितंप्रतिज्ञातंतस्मात्तदुक्तमात्मविद्यादानेनसत्यंकुर्वेइति इतिइत्थंसत्यात्मकधर्मस्यप्राबल्यं संचिन्त्येंद्रःप्रतर्दनमुवाचेति अयमत्रसिद्धांतकोटेराशयः यद्यपिविद्यावाक्यंश्रुतिरूपंप्रबलमपिगृहस्थतयामध्यमाधिकारिलाभेनसावकाशं ददानीतिप्रतिज्ञायास्तुस्मृतिवाक्यैरपिनानृतंवदेदित्यादिभिर्निर्णीतावश्यकर्त्तव्यतायानिरवकाशत्वादानर्थक्यप्रतिहतानांविपरीतंबला

नायंसर्वैर्गुणैर्युक्तोविद्योक्तैर्हिप्रतर्दनः॥ यद्यप्यस्मिन्गुणाःसंतितथाप्येषरिपुर्हिनः॥ ९९ ॥ अथवारिपुतानेनपरित्यक्तात्रमद्वरात्॥ ततःसर्वगुणोपेतोविद्यायाभाजनंभवेत्॥ १०० ॥ बहुनाकिंविचारेणगुणीवाप्यगुणस्त्वयम्॥ विद्यांहिततमामस्मैकथयिष्यामिसर्वथा ॥ १०१ ॥ वरंददामितेयस्मादितिपूर्वंमयेरितम्॥ सत्यंतत्सर्वथाकुर्वेआत्मविद्याप्रदानतः ॥ इतिसंचिंत्यभगवानूचेशक्रःप्रतर्दनं ॥ १०२ ॥ मामेवसर्वजगतामात्मानंबुद्धिसाक्षिणम्॥ नभोवद्बहिरंतश्चव्याप्यसर्वमवस्थितम्॥ १०३॥ स्वप्नदृष्टसमैःसर्वप्रपंचैरहितंशिवं॥ देशकालस्वरूपाख्यभेदत्रयविवर्जितम्॥ १०४॥

बलमितिन्यायेनप्राबल्यमिति ॥१०२॥ अथतंहेंद्रउवाचेत्यादिविजानीयादित्यंतंवाक्यंव्याकरोति मामेवेत्यादिपंचविंशतिश्लोकैः मामेवहेप्रतर्दनविजानीहीतिचतुर्थेनान्वयः शास्त्रदृष्ट्यातूपदेशोवामदेववदितिन्यायेनएकशतवर्षब्रह्मचर्यतोषितप्रजापत्युपदेशजन्याद्वितीयात्मज्ञानेस्थित्वेंद्रउपदिदेशयथावामदेवोगर्भेस्थतसनकाद्युपदेशजन्यज्ञानेस्थित्वासर्वात्मभावप्रतिपादकान्मंत्रानुवाचतद्वदित्यर्थकेनमामितिपदमद्वितीयात्मार्थकमित्याशयेनमामितिपदार्थंविशिनष्टि सर्वजगतामात्मानमित्यादिना अद्वयमित्यर्थः बुद्धिसाक्षिणंसर्वांतरमिति यावत् एतत्स्फुटयति नभोवदित्यादिना ॥ १०३ ॥ स्वप्नेति सर्वैःस्थूलसूक्ष्मकारणरूपैःप्रपंचैर्वस्तुतोरहितंयतस्तेप्रपंचाःस्वप्नदृष्टसमाइति ॥ ७ ॥
अतएवशिवंतुरीयं देशेनकालेनस्वरूपेणवस्तुनाचाख्यानिरूपणंयस्यतादृशेनभेदत्रयेणवर्जितमिति ॥ १०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसजातीति स्वेनस्वरूपेणसजातिनाविजातिनाविजातीयेनचआख्यायेषांस्वगतादिभेदानांतैस्वसजातिविजात्याख्यभेदास्तद्रूपबीजानांप्रादुर्भावेनाग्निवद्दाहकं तदेवकुतइत्यतआह अधिष्ठानमिति समस्तस्यसदसदात्मनःप्रपंचस्याधिष्ठानं कथं यथारज्जुःसर्पादेरिति अधिष्ठानस्यचज्ञानेनकल्पितदाहकत्वंप्रसिद्धं अतएकं अज्ञानेचेश्वरमिति तुभ्यंमनुष्यायइदमेवज्ञानंहिततममतिशयेनहितमिति ॥ १०५ ॥ ॥ १०६ ॥ श्रुतिगतैवकारार्थमाह नसुखमिति स्वर्गगतंकर्मफलंतथोपासनफलंब्रह्मलोकगतंचसुखंसाधनैःसहितंमनुष्येभ्योहितंनविद्यते बंधहेतुत्वादितिभावः ॥ १०७ ॥ यदानुश्रविकसुखस्यहितत्वंदुर्लभंतदैहिकस्यकिमुवक्तव्यमित्याह कुतइति ॥ १०८ ॥ लोकद्वयोक्तेर्थे

स्वसजातिविजात्याख्यभेदबीजविभावसुम्॥अधिष्ठानंसमस्तस्यसदासदसदात्मनः॥१०५॥प्रपंचस्ययथा रज्जुःसर्पादेरेकमीश्वरम्॥ प्रतर्दनविजानीहितुभ्यंहिततमंत्विदम्॥ १०६॥ नसुखंस्वर्गगंतद्वद्ब्रह्मलोकस्थितं परम्॥ ससाधनंमनुष्येभ्यःकदाचिद्विद्यतेहितम्॥ १०७॥ कुतोमनुष्यलोकादौस्थितंनश्वरमल्पकं॥ हितंभवेन्मनुष्येभ्योवनितादिसमुद्भवं ॥ १०८॥ कदलीस्तंभवत्सर्वोदेहःसारविवर्जितः॥ जलबुद्बुदवच्चापिविनश्यत्येषतत्क्षणात्॥ १०९॥ अस्मिन्यत्साधनैःसाध्यंसुखंतद्दुःखमेवहि ॥ आनंदात्मानमेवैकमिंद्रंमांपरिहाय च॥ ११०॥ ततोहितंजगत्यस्मिन्नास्तिकिंचित्कदाचन ॥ कुतोहिततरंवास्यादाशाहिततमंप्रति॥ १११॥ तथापिनरदेवादेःसुखंहितमितीरितम्॥ विरागस्तस्यलोकेस्मिन्ज्ञेयोहिततरस्ततः॥ ११२॥

हेतुमाह कदलीतिद्वाभ्यां देहएवनिःसारोविनश्वरश्चतदाश्रितसुखस्यभंगुरतरस्यशोकहेतुतयादुःखतास्पष्टा तस्मादानंदात्मैवेंद्रपदार्थएकोहिततमइतिश्लोकद्वयभावः अस्मिन्शरीरे परिहायत्यक्त्वा॥१०९॥११०॥ फलितमाह ततइति हितमेवयदाजगतिनास्तितदाहिततरहिततमयोःकासद्भावंप्रत्याशेत्यर्थः ॥१११ ॥ ननुयदिजगतिहितंनास्तितर्हिकथंज्ञानेहिततममितितमप्रत्ययप्रयोगइत्याशंक्ययथाकल्पितशरीरत्रयापेक्षयाशुद्धंतुरीयमित्युच्यतेतथाभ्रमसिद्धहितायपेक्षयेत्याह तथापीति लौकिकराजादिसुखंहितमितिमतंततोविरागस्तुहिततरस्ततोहिततमत्वंज्ञानस्योपपादयिष्यतेइति ॥ ११२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुतथापिऐहलौकिकंसुखंहितमस्तुआमुष्मिकंतूत्कृष्टत्वाद्धिततरमित्याशंक्यकिंस्वरूपतःसुखस्यविशेषःकिंवासाधनतइतिविकल्प्यतत्र
नन्विती
नाद्यइत्याह ब्रह्मलोकइति ब्रह्मलोकादौविषयजन्यसुखेविशेषोनास्ति अनुकूलत्वादिरूपाविशेषादितिशेषः ॥ ११३ ॥
यइत्याह आहारइति सर्वत्रब्रह्मलोकादौआहारदेहेंद्रियाणांललनादीनांचसत्वंमनोरमत्वंचाविशिष्टं नहिरंकःस्वाहारादौनतुष्यतीतिभा
वः नचामुष्मिकसुखेपारतंत्र्यंनास्तीतिवाच्यं राजादिसेवाफलवद्देवाराधनफलस्यपारतंत्र्यनियमादित्याह पारतंत्र्यमिति॥ ११४ ॥ कैमु
त्यन्यायंसूचयन्पारतंत्र्यमुदाहरति ब्रह्मेति ब्रह्माहिरण्यगर्भः परमेश्वरोंतर्यामी अहमिंद्रः सातिशयत्वेनापिसर्वलोकसुखस्यसाम्यमित्या
ह सुखस्येति ॥ ११५ ॥ सातिशयतामुदाहरति परेति यश्चतुर्मुखस्यहिरण्यगर्भस्यानंदःप्रसिद्धःसपरब्रह्मणआनंदाच्छतांशेनन्यूनइति

ब्रह्मलोकेतथास्वर्गेमानुषेवानविद्यते ॥ विशेषःकोहिराजेंद्रसुखेविषयजेसदा ॥ ११३ ॥ आहारोस्तिहिस
र्वत्रविविधःसर्वदेहिनाम् ॥ देहाश्चसेंद्रियास्तद्वल्ललनाश्चमनोरमाः ॥ पारतंत्र्यंचसर्वत्रविद्यतेसर्वदेहिनां
॥ ११४ ॥ ब्रह्मामहेश्वराधीनस्तथाहंब्रह्मणोपिच ॥ सुखस्यातिशयोदृष्टःसर्वलोकस्थितस्यहि ॥ ११५ ॥ परब्र
ह्मणआनंदान्न्यूनोसौशतभागतः ॥ चतुर्मुखस्ययोनामस्वानंदोस्त्यधिकोधुना ॥ ११६ ॥ चतुर्मुखस्यचानंदा
न्ममन्यूनतमस्तथा ॥ अयुतांशेनचानंदःकोन्योन्यूनोभवेन्नच ॥ ११७ ॥ भवतांजायतेयद्वल्ललनालिंगनात्सु
खं ॥ सुखंतद्वन्ममाप्येतद्ब्रह्मणोपीश्वरस्यहि ॥ ११८ ॥ माभूदिदंकदाचिद्धिसुखंदुःखकरंमम ॥ एवंभूतोविरा
गोयंतस्माद्धिततरोमतः ॥ ११९ ॥

॥ ११६ ॥ चतुर्मुखस्येति ममेंद्रस्यानंदःहिरण्यगर्भानंदाच्छतांशन्यूनप्रजापत्यानंदात्शतांशन्यूनत्वादयुतांशत्वेनन्यूनः तथाचान्येषां
किमुवाच्यमिति ॥ ११७ ॥ भवतामिति भवतांमनुष्याणांयद्वद्यथाविधंललनालिंगनजन्यंसुखंजायतेप्रादुर्भवतितद्वन्ममेंद्रस्यतथाहि
रण्यगर्भेश्वरयोरिति तथाचवैषयिकसुखेविशेषाभावात्तत्रतरप्प्रत्ययोनप्रयोगमर्हतीतिभावः ॥ ११८ ॥ अथविरागस्वरूपंदर्शयित्वातस्य
हिततरत्वंप्रतिजानीते माभूदिति इदंविषयजन्यं अतएवभङ्गुरत्वेनदुःखदंचयत्सुखंतन्माभूदित्येवंभूतएवमाकारोविरागस्तस्माद्वैषयिकसु
खाद्धिततरइति ॥ ११९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरागस्योत्कर्षं विषयसुखादुपपादयति विनश्यतीति वैषयिकसुखमौत्सुक्यनिवृत्तिमात्ररूपमितिप्रथमेऽध्यायेप्रपंचितं तथाचतृष्णारूप दुःखाभावत्वेनवैषयिकसुखविरागयोर्हितत्वसाम्येपिवैषयिकसुखंजन्मानंतरमपचीयतएव विरागसुखंतूपचीयतएव उपचीयमानधनादे रपचीयमानादुत्कर्षःप्रसिद्धएवेतिभावः सर्वंविषयेभ्योजातंसत्सुखंघटवद्विनश्यत्यपचीयते विरागस्तुसत्पुरुषस्यमंदभिन्नस्यजातःसन्ना शंनैतिनप्राप्नोतिकिंतुवर्द्धतएवेत्यर्थः ॥ १२० ॥ विशेषांतरमाह छर्दितइतिद्वाभ्यां यथावांतान्नादिविषयकविरागेदोषधीमात्रंकारणंत द्वदत्रविषयेभ्योविरागे तस्मादांतरसाधनमात्रापेक्षत्वाद्विरागोंतरंगोलघुश्च विषयसुखंतुबाह्यबहुवित्तव्ययाऽऽयाससाध्यत्वाद्बहिरंगंगुरुचे तिस्पष्टोविरागस्योत्कर्षइतिभावः ॥ १२१ ॥ साधनांतरेति यद्वद्वैषयिकेसुखेसाधनांतरंवित्तव्ययादिविद्यतेतथात्रविरागेऽतोदोषधियः

विनश्यतियतःसर्वंसुखजातंयथाघटः॥ नाशंनैतिविरागोयंजातःसत्पुरुषस्यहि॥ १२०॥ छर्दितेवाथविष्ठा यांदोषधीरेवकारणम्॥ विरागेतद्वदत्रापिदोषधीरेवकारणम्॥ १२१ ॥ साधनांतरमत्रातोयद्वद्वैषयिकेसु खे॥ नविद्यतेततोप्येषनृभ्योहिततरोमतः ॥ १२२॥ अयंमत्तःसुखीनाहमेतद्वःसुखसाधनं॥ इतिवैषम्यवि ज्ञानवन्हिर्दहतिसर्वदा॥ १२३ ॥ जंतूनूजातस्पृहान्सर्वान्ज्ञात्वावैषयिकेसुखे ॥ विरागोनास्त्यसौयस्मात्त स्माद्धिततरोहिसः॥ १२४॥

सकाशात्साधनांतरंनविद्यतेततोंतरंगत्वाल्लघुत्वाच्चअपिशब्दात्पूर्वश्लोकोक्तोपचीयमानत्वाच्चएषविरागोनृणांहिततरइति ॥ १२२॥ किं च विषयसुखसहस्रैरनाश्यस्यदैन्यस्यनाशकत्वात्स्पष्टोविरागस्योत्कर्षइत्याह अयमितिद्वाभ्यां अयंमत्सजातीयादिर्मत्तोमदपेक्षयासु खीअहंतुनभवामिएतद्धनपशुप्रभृतिसुखसाधनंवोयुष्माकमेववर्त्ततेनममेतीत्याकारंवैषम्यरूपविज्ञानमेववन्हिःसर्वान्जंतून्दहतीत्युत्तरे णान्वयः ॥ १२३ ॥ जंतूनिति कीदृशान्जंतून् वैषयिकेसुखेजातस्पृहान् अथदैन्यवन्हेरुपद्रवोलोकानांकुतोहेतोर्यस्माज्ज्ञात्वाविषयदो षांस्तेभ्योविरागोनास्तितस्मादर्थसंनिधानसंनिधानयोरनर्थतदभावप्रयोजकत्वात्सविरागोहिततरइतिसिद्धम् ॥ १२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथततोप्युत्कृष्टत्वादात्मज्ञानस्यहिततमत्वमाह अस्मादितित्रिभिः अस्माद्विरागात् सविशेषणंविशेषणैरद्वितीयत्वादिभिःसहितंतदव
गाहीतियावत् विरागस्यमूलाज्ञानानुच्छेदकत्वाद्भ्रमसंस्कारेभ्योभयंननिवर्तते तत्त्वज्ञानेतुसंस्कारैर्जनितोपिभ्रमोऽकिंचित्करइतिस्पष्टो
विशेषइत्याह उत्पन्नमिति यन्ममज्ञानमुत्पन्नंसदनेकवासनाभिःकार्यद्वारापिननाशयितुंशक्यमित्यर्थः आकारतोनर्थमूलोच्छेदकत्वा
च्चज्ञानस्योत्कर्षमाह आनंदात्मेति ॥ १२५॥ अंतरंगतयाप्युत्कर्षंविरागाज्ज्ञानस्यदर्शयति विरागइति स्वरूपानंदभानप्रतिबंधकदुःखनि
वर्तनेविरागोहेतुर्भवतिनैवसाक्षात्सुखभाने इदंज्ञानंतुअत्रसुखसाक्षात्कारे तस्मात्साक्षादुपकारकत्वाज्ज्ञानंहिततममितिफलितमाह म

अस्माद्धिततमंज्ञेयंज्ञानंमेसविशेषणम् ॥ उत्पन्नंनविनश्येद्यद्वासनाशतकोटिभिः ॥ आनंदात्माहमस्मीति
स्वात्मन्यज्ञाननाशनम् ॥ १२५ ॥ विरागोदुःखसंत्यागेहेतुर्भवतिनैवहि ॥ सुखबोधइदंत्वत्रतस्माद्धिततमं
स्मृतम् ॥ मज्ज्ञानादपरंतस्मान्मन्येहिततमंनहि ॥ १२६ ॥ मज्ज्ञानतोनपापानिस्पृशंतीहकदाचन ॥ भ्रूणंया
निप्रसिद्धानिब्रह्महत्यादिकानिच ॥ अनेकदुःखकर्तॄणिदेहिनांकल्पकोटिषु ॥ १२७॥ स्तुतिमात्रंनचैतत्त्वंम
न्येथाबोधनस्यहि ॥ बोधप्रसादात्पापानिममकान्यपिनाभवन् ॥ १२८ ॥ शृणुलोकत्रयीराज्येस्थितोहंरक्ष
णायहि ॥ स्वस्यतद्वत्त्रिलोक्याश्चपापान्यकरवंतथा ॥ १२९ ॥ अभूत्पुरोहितोस्माकंकदाचिद्वेदवित्तमः ॥ वि
श्वरूपइतिख्यातस्त्वष्टुःसतनयोमहान् ॥ १३० ॥

ज्ज्ञानादिति ॥ १२६ ॥ त्रिशीर्षाणमित्यादिव्याचष्टे मज्ज्ञानतइत्यादिना ॥१२७॥ स्तुतिमात्रमिति एतत्सर्वपापनिवारकत्वाभिधानंस्तु
तिमात्रमर्थवादमात्रंबाधितार्थमितियावत् नमन्येथानजानीहिकिंतुतथ्यमेवजानीहि तत्रहेतुंमयाज्ञानानंतरंपापनिवृत्तिफलस्यानुभूत
त्वादित्याह बोधेति बोधस्यप्रसादादनुग्रहात्प्रभावादितियावत् ॥ १२८ ॥ शृण्विति शृणुएतद्विस्तरेणेतिशेषः अहंत्रिलोकीराज्येस्थितः ॥ ९ ॥
सन्स्वस्यात्मनोरक्षणायतथात्रिलोकीरक्षणायबहूनिपापान्यकरवंकृतवानस्मीत्यर्थः तथापिमेरोमापिनच्छिन्नमितिवक्ष्यमाणेनसंबंधः
॥ १२९ ॥ तत्रत्वाष्ट्रवधंप्रपंचयति अभूदित्यादिना त्वष्टुर्देवविशेषस्य ॥ १३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैत्यानामिति पुनःकीदृशः कुत्रचिद्भुविकस्मिंश्चित्स्थानेदैत्यभगिनीगर्भाद्रुत्पन्नः भूःपृथिव्यांस्थानमात्रेइतिविश्वः तस्यविश्वरूपस्यगुणत्रयंगुणत्रयस्वभावंविशेषेणपृथक्पृथक्भजंतीतितानितथा॥ १३१॥ तुर्यपादार्थंस्फुटयति सात्विकेनेति सात्विकेनशीर्षेण एषविश्वरूपः सोमंपिबति कीदृशः देवाननुव्रतोऽनुगतः नित्यसापेक्षत्वादेकदेशान्वयाद्द्वितीया भूगतःमनुष्यः ॥ १३२ ॥ ऋत्विगिति सविश्वरूपः ऋत्विग्याजकोभूत्वाकस्मिंश्चिद्यज्ञेविततेसतिदेवेभ्यःस्पष्टमुच्चस्वरेणअसुरेभ्यस्तुशनैर्मंदस्वरेणभागान्प्रयच्छतिददातितेषांमातृपक्षत्वादिति ॥ १३३ ॥ नन्वसुरेभ्योपिप्रत्यक्षमेवकुतोनददातीत्याशंक्यभागानर्हेभ्योदानमेवमेवदृष्टंलोकेपीत्याह प्रत्यक्षएवेति प्रशस्तःस्वामित्वादि

दैत्यानांभगिनीगर्भाद्रुत्पन्नोभुविकुत्रचित्॥ त्रीणिशीर्षाणितस्यासन्गुणत्रयविभांजिच ॥ १३१ ॥ सात्विकेनपिबत्येषसोमंदेवाननुव्रतः॥ तामसेनतथैवायंसुरांदैत्यानुगोपिबत्॥ राजसेनतथैवात्तित्वन्नंयद्वद्विभूगतः॥ १३२॥ ऋत्विग्भूत्वाकदाचित्सकस्मिंश्चिद्विततेसति॥ यज्ञेभागान्हिदेवेभ्यःस्पष्टमेवप्रयच्छति॥ असुरेभ्यःशनैःस्वस्यमातृपक्षेभ्यएवच॥ १३३॥ प्रत्यक्षएवसर्वेषांभागिनांभागआपतेत्॥ ग्रामादौबाधकस्यात्रपरोक्षंयात्यभागिनः॥ १३४॥ परोक्षंदीयमानेहिशनैर्बलमुपागतः॥ ग्रामाद्यपहरेच्चैतान्पतीन्हन्यादभागभाक्॥ १३५॥

नान्याय्योभागोयेषांतेभागिनोराजभूस्वामिप्रभृतयस्तद्भिन्नाःस्वामित्वादवरोपितालुंठनाद्युपजीविनोऽभागिनोग्रामादौ आदिपदेनदेशादिग्रहः तथाचग्रामादौयोभागिनांभागःससर्वेषांप्रत्यक्षएवापतेत्आगच्छेत् अभागिनःप्रतितुयदिभागोयातितर्हिबाधकस्यदंडयितृराजादेःपरोक्षमेवअज्ञातमेवयथाभवतितथायातीत्यन्वयः ॥ १३४ ॥ तादृशंदानंचस्वामिनोऽनर्थकरमित्याह परोक्षमिति एवंपरोक्षंप्रच्छन्नंयथाभवतितथाभागेदीयमानेसतिअभागभाक्भागायोग्यःशत्रुःशनैः क्रमेणबलंसामर्थ्यंप्राप्तःसन्पतीन्ग्रामादिस्वामिनोहन्याद्ग्रामादिकंचहरेदित्येतादृशोऽनर्थोभवतीतिभावः ॥ १३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिसंचिंत्येति इतिश्लोकद्वयेनोक्तमर्थंसंचिंत्यतस्यविश्वरूपस्यकर्त्तुःदेवानांतद्द्रुहामसुराणांचप्रत्यक्षपरोक्षरूपेणसंबंधिनींदानक्रियांदृष्ट्वाचविश्वरूपेपुरोहितेइमांश्लोकचतुष्टयेनवक्ष्यमाणांधियंमतिमनुप्राप्तोऽभूवमितिशेषः अत्रदर्शनचिंतनयोरर्थवशात्पौर्वापर्यंबोध्यम् ॥ १३६ ॥ तांबुद्धिमभिनयति राज्ञामिति एतादृशःपरहितैषीपुरोहितोराज्ञांराष्ट्रस्यचघातंकुर्यात् तस्मादयंदुरात्मावधमेवसमर्हतीति ॥ १३७ ॥ दुरात्मतांस्फुटयति अहमिति निहतोघातमिवनीतः तत्रहेतुः रिपुभ्यइति ॥ १३८ ॥ इतश्चदुरात्मायमित्याह योयस्येति सोन्नदातातस्यान्नभोक्तुःआत्माशरीरमिवमतः एषविश्वरूपोमह्यंयजमानायद्रुह्यन्नात्मनेद्रुह्यतिअस्मादात्मद्रोहिणोऽपरःकःपापवान्मतः ॥ १३९ ॥ फलितमाह तस्मादिति अपिपदस्यवेदविदमित्यादिभिस्त्रिभिर्द्वितीयांतैःसंबंधः ॥ १४० ॥ इतिबुद्धिमिति इतिचतुर्भि

इतिसंचिंत्यदृष्ट्वाहंतस्यदानक्रियामिमां॥प्रत्यक्षंचपरोक्षंचदेवानांतद्द्रुहामपि॥ इमांधियमनुप्राप्तोविश्वरूपे पुरोहिते॥ १३६॥ राज्ञामेतादृशोनूनंघातंकुर्यात्पुरोहितः॥ राष्ट्रस्यचदुरात्मायंवधमेवसमर्हति॥ १३७॥ अहंविश्वासमापन्नोनिहतोस्म्यधुनामुना॥ रिपुभ्योमेददात्येषयज्ञभागान्यतःशनैः॥ १३८॥ योयस्यान्नंसमश्नातिसतस्यात्माप्रकीर्तितः॥ आत्मनेद्रुह्यतिह्येषपापोस्मात्कतमःस्मृतः॥ १३९॥ तस्मादेनंदुराचारंमद्घातायसमुद्यतम्॥ अपिवेदविदंविप्रंनिहन्मिस्वपुरोहितम्॥ १४०॥ इतिबुद्धिमिमांप्राप्तोवज्रेणशतपर्वणा॥ शिरांस्यच्छिनदंतस्यसर्वाणिसुरसंसदि॥ १४१॥ वर्णाश्रमाचाररतानुत्तमाश्रमिणस्तथा॥ आत्मास्माकमयंशक्रइतिज्ञानविवर्जितान्॥ १४२ ॥

रुक्ता शतंपर्वाणिधारारूपाणियस्यतत्तथातेनअच्छिनदंछिन्नवानस्मि तस्यविश्वरूपस्य सुरसंसदिदेवसभायाम्॥ १४१ ॥ अथरुत्वेदांतवाक्यंनास्तिमुखेयेषांतादृशान्यतीन्वनश्वभ्योदत्तवानस्मीत्यर्थकमरुन्मुखानित्यादिवाक्यमुपबृंहयति वर्णेत्यादिनाअन्येपिवेदविद्वांसइत्यतःप्राक्तनेनग्रंथेन वर्णाश्रमयोराचारेरतांस्तत्परान् एतेनपारमहंस्यालाभःसूचितः उत्तमोंत्यआश्रमोयेषांतेतथातान् यद्वाउत्तमाश्वतेआश्रमिणइति विशिष्टविशेषणस्योत्तमत्वस्यसविशेषणेहीतिन्यायेनाश्रमेपर्यवसानं अयंशक्रइंद्रः कूर्चब्राह्मणाद्युक्तरीत्यास्माकंयतीनामात्मैवेत्याकारज्ञानहीनान् ॥ १४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदाचिदिति कदाचित्क्वचिद्देशेकोटिशोमिलितांस्तादृशानूयतीनहमिंद्रोऽपृच्छंपृष्टवानस्मि तदाइमेसर्वेभवंतःकेभवंतीतिमयोक्तेसति अथतेयतयोमांप्रतिवक्ष्यमाणंवचोऽवदन् ॥ १४३ ॥ तद्वाक्यमाह वर्णाश्रमेति ऊचुःवक्ष्यमाणवाक्येनपृष्टवंतः दैवंफलाभिमुखंकर्म ॥ १४४॥ कस्त्वमिति अधिक्षेपोऽनादरोक्तिः कृपयाकथंचिद्बोधिताभवंत्वित्याकारयाआविष्टोव्याप्तोऽहं इदंवक्ष्यमाणंवचः ॥ १४५ ॥ अहंहीति अहंहिभवतांयतीनांविश्रुतःश्रुतौप्रसिद्धइत्युक्तंमयेतिशेषः मूर्खाःकर्ममीमांसायाअपितात्पर्यानभिज्ञत्वात् कर्मानुष्ठानकालेक मैंवसद्गुणंसत्फलंदास्यतिनतुदेवतासंभावनयाकर्मवैगुण्यंविधेयमित्यभिप्रायेणहिदेवताविग्रहादिकंफलदेवतयोश्चेत्यधिकरणेनिराकृतं व स्तुतस्तुवार्तिककारादिभिर्विशुद्धज्ञानदेहायेत्यादिमंगलाचरणात् इत्याहनास्तिक्यनिराकरिष्णुरात्मास्तितांभाष्यकृदत्रयुक्त्या दृढत्वमेत द्विषयःप्रबोधःप्रयातिवेदांतनिषेवणेनेत्याद्यभिधानाच्चदेवताविग्रहादिकंवेदांतप्रामाण्यंचतेषामभिप्रेतमेवेत्यलं॥ १४६ ॥ साधिक्षेपमिति

कदाचिदहमापृच्छंमिलितान्कोटिशःक्वचित् ॥ केभवंतइमेसर्वइत्युक्तेमामथावदन्॥ १४३॥ वर्णाश्रमाचार रताःसर्वेहियतयोवयम् ॥ इत्युक्तामुनयोप्येतेमामूचुर्दैवमोहिताः ॥ १४४॥ कस्त्वमत्रयतीनस्मान्प्रष्टुंसर्वा न्समागतः॥ इत्यधिक्षेपसदृशंवाक्यंतेषामहंतदा ॥ श्रुत्वापिकृपयाविष्टइदंतानब्रुवंयतीन् ॥ १४५ ॥ अहंहि भवतामात्माविंद्रइत्येवविश्रुतः ॥ इत्युक्तेजहसुःसर्वेमूर्खाःपंडितमानिनः ॥ १४६ ॥ साधिक्षेपंचमांसर्वेऊ चुस्तेदैवमोहिताः ॥ त्वंहिविग्रहवानत्रकथमिंद्रोभविष्यसि ॥ १४७ ॥ इंद्रोनामेंद्रशब्दार्थौहित्वानान्योस्तिक श्चन ॥ इंद्रोऽतिथिसमोनैवयागेनोदृष्टिमागतः ॥ १४८ ॥

साधिक्षेपंयथाभवतितथामांप्रतितेसर्वेयतयऊचुर्देवतादिनिराकरणवाक्यंवेदांतविरुद्धमुक्तवंतः तद्वाक्यमभिनयति त्वंहीत्यादिना वि ग्रहवत्त्वात्कथंतवेंद्रत्वमित्यर्थः ॥ १४७ ॥ ननुकाममेंद्रत्वेऽनुपपत्तिरित्यतआह इंद्रोनामेति इंद्रेत्याकारकंशब्दंतदर्थंचहित्वान्यःकश्च नेंद्रोनास्ति तत्राद्येकथंतवार्थरूपस्येंद्रत्वंद्वितीयेपिकिमिंद्रपदार्थोविग्रहादिमान्देवताविशेषःकिंवात्वयोक्तोऽस्मदादीनांसर्वेषामात्मेत्येवं रूपः तत्रनाद्यइत्याहुः इंद्रोऽतिथिसमइत्यादिना विग्रहोहविषांभोगऐश्वर्यंचप्रसन्नताफलप्रदानमित्येतत्पंचकंविग्रहादिकमित्युक्तवि ग्रहादिपुप्रथमेनविग्रहेणयुतायदिदेवताऽस्यात्तर्हिइंद्रोदेवताऽतिथिवद्यागेसमागतादृश्येतनैवतुदृश्यतेतस्मादनुपलब्धिबाधितंदेवताविशे षणंविग्रहइति ॥ १४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 हविषांभोगंनिराचक्षते देवतायैइति देवतायैत्यक्तंहविःसादेवताऽतिथिवन्नात्तिनभुंक्ते ननुभोजनाभावेपिसारमादत्तइत्याशंक्याह्राप्यनु
पलब्धिविरोधंदृष्टांतेनाहुः नैषेति एषादेवताभ्रमरीवान्नस्यनिवेदितस्यसारंनादत्ते यतोगणेशायदत्तामोदकाःसारतांनजहुर्नत्यक्तवंतः त
 थाचव्यभिचारःस्पष्टइतिभावः ॥ १४९ ॥ ऐश्वर्यंनिराकुर्वन्ति ऐश्वर्यमिति ऐश्वर्यंहिस्वामित्वंममत्वरूपंवानानायज्ञेषुगमनायनानारू
पधारणशक्तत्वंवाउभयथापितस्यारागित्वंप्रसक्तंतथाचनानारूपधारिण्यारागिण्याचवारांगनयासमत्वात्तांदेवतांकःपूजयेत् ॥ १५० ॥
प्रसन्नतारूपंविशेषणंनिराकुर्वन्ति एषेति एषादेवताकिंकर्मणिकृतेसतिप्रसादमेतिअकृतेवा कृतेचेत्तर्हिदेवतायाःसकाशान्नोस्माकंमनु
ष्याणांकोविशेषोभेदःस्यात् वयमपिहिसेवारूपेकर्मणिकृतेसतिप्रसादंप्राप्नुमइतिभावः अकृतेकर्मणिप्रसादस्तुनकुत्रापिदृष्टइतिप्रसादनि

देवतायैहविस्त्यक्तंनात्तिसातिथिवत्क्वचित् ॥ नैषामधुकरीवात्तिसारमन्नस्यकर्हिचित् ॥ मोदकाहिगणेशस्य
जहुर्दत्तानसारतां ॥ १४९ ॥ ऐश्वर्यंयदितस्याःस्याद्रागिणीसाभवेत्ततः ॥ वारांगनेवकोनामपूजयेत्तामनिं
दितः ॥ १५० ॥ एषाप्रसादमभ्येतिकिंकर्मण्यकृतेपिहि ॥ कृतेचेद्देवतायाःस्याद्विशेषःकश्चनोधुना ॥ १५१ ॥
अपिचात्मात्रकर्तास्याद्भोक्तातद्वदमूर्तकः ॥ सर्वेषांप्राणिनामेषांभिन्नोदुःखादिभाजनं ॥ प्रत्यक्षस्त्वंकथंस्व
स्मादेकोनेकस्वरूपधृक् ॥ १५२ ॥ इत्यादिकुत्सितावाक्यंकुतर्कबहुलंतथा ॥ साधिक्षेपंचसंप्रोच्यचक्रुःको
पंचतेमयि ॥ १५३ ॥

रासेनैवतत्प्रयुक्तंफलप्रदानंनिरस्तंवेदितव्यम् ॥ १५१ ॥ एवंविग्रहादिमतीदेवतेंद्रपदार्थइतिपक्षंनिरस्यसर्वात्मेंद्रइतिपक्षंनिराकरोति अपि
चेति सर्वेषांप्राणिनामात्माप्रतिशरीरंभिन्नोन्यायादिनयेमतः कीदृशः कर्ताभोक्ताऽमूर्त्तोविभुर्दुःखादिपात्रंप्रत्यक्षोहमितिप्रत्यक्षगोचरश्च
त्वंतुस्वस्मादस्मदात्मनएकोभिन्नःसन्ननेकरूपधृक्सर्वाभिन्नरूपःकथमिति एकोन्यार्थेइत्यमरः यद्वात्वंएकोऽद्वितीयःसन्स्वस्मादात्मीयप्र
भावात्कथमनेकरूपधृगिति तथाचार्थस्येंद्रत्वासंभवात्शब्दमयीदेवतैवेंद्रइतित्वंकथमिद्रइतिभावः ॥ १५२ ॥ इत्यादीति तेकुत्सिताइ
त्यादिकुतर्कबहुलंसाधिक्षेपंचसंप्रोच्यमयिकोपंचक्रुः ॥ १५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषामिति तेषांयतीनांबहिर्मुखत्वंवचसोनैष्ठुर्यंक्रूरत्वंविनाकारणंकोपंचदृष्ट्वापुनरवदमुक्तवानिति ॥ १५४ ॥ देवतेति हेयतीश्वरादेवता विग्रहादीनामभावेतथात्मनोवस्तुभेदेप्रतिशरीरंस्वरूपभेदेतथाममेंद्रस्यानात्मत्वेआत्मभिन्नत्वेचयदिवेदवाक्यानिमानंसंतितर्हिंभवंतोब्रुवं त्विति ॥ १५५॥ एवमुक्तइति मयैवमुक्तेसतिएतेमूढाअत्रदेवताविग्रहाभावादौएकामपिऋचंनोचिरेकीदृशीमपिऋचमन्यार्थामन्यशेष भूतामन्यार्थवादरूपामपियथायज्ञशालाद्वारविधानार्थवादेवाक्यंकोहितद्वेदयद्यमुष्मिन्लोकेस्याद्वानवेतिवाक्यंनस्वर्गनिराकरणपरंकिं त्वतीकाशसंज्ञद्वारविधिपरंतत्समापिऋकूनतेषांमुखान्निर्गतेत्यर्थः ॥ १५६ ॥ पृष्टाइति तेयतयःपुनर्मयाकृपयापृष्टाःसंतःमांनिंदित्वाग च्छगच्छेतिमह्यमवदन् तदभिधानमपिनमुखेनकिंतुहस्तसंज्ञयाहस्तचेष्टयाछोटिकामुद्रयेतियावत् ॥ १५७ ॥ ततइति त्रिलोक्यारक्षण

तेषांबहिर्मुखत्वंचनैष्ठुर्यंवचसोपिच ॥ कारणेनविनाकोपंमयितद्वत्सुदारुणम् ॥ विलोक्यपुनरेवाहंकृपावि ष्टोऽवदंयतीन् ॥ १५४ ॥ देवताविग्रहादीनामभावेचात्मनस्तथा ॥ वस्तुभेदेममाप्येवमनात्मत्वेयतीश्वराः ॥ वेदवाक्यानिमानंचेत्संतितानिवदंत्विह ॥ १५५ ॥ एवमुक्तेपुनर्मूढाःकोपाकुलितमानसाः ॥ एकामप्यृचमत्रै तेत्वन्यार्थामपिनोचिरे ॥ १५६ ॥ पृष्टानिंदित्वामत्यंतेभ्रुकुटीकुटिलाननाः ॥ अवदन्गच्छगच्छेतिसर्वेतेहस्त संज्ञया ॥ १५७ ॥ ततस्त्रिलोकीरक्षार्थमुद्यतोहंसुरेश्वरः ॥ व्यचिंतयंस्वमनसाकिमेषूचितमत्रहि ॥ १५८ ॥ आत्मावलोकनार्थायशांतिदांत्यादिसंयुतः ॥ संन्यसेत्सर्वकर्माणिश्रुतिस्त्वेवमुवाचह ॥ १५९ ॥ संन्यस्यसर्व कर्माणिवेदांतार्थविचारणा ॥ गुरूपदेशतःकार्यातर्केणध्यानतोपिच ॥ १६० ॥

मधर्माद्भयाच्चपालनंतदर्थमुद्यतःसुरेश्वरःबाह्यांतरासुरविरोधीईदृशोहंमनसाव्यचिंतयम् चिंतास्वरूपमाह किमिति एषुएतादृशेषुयतिषु अत्रकर्तव्यसंशयेकिमुचितंकिमुपेक्षादंडोवानाद्यस्त्रिलोकीरक्षकत्वादिविशेषणविरोधात् अंत्यस्तुअपराधनिर्णयाधीनइतिभावः ॥ १५८ तत्रापराधंनिर्णेतुंकिमेषांसंन्यासोयोग्योनवेतिविचारयन्संन्यासतत्कर्तव्यतत्फलप्रतिपादिकाःश्रुतीरर्थतःपठति आत्मेतित्रिभिः आत्मा वलोकनमात्मसाक्षात्कारः श्रुतिः आत्मानमेवलोकमिच्छंतःप्रव्रजंतीत्याद्याशांतोदांतइत्याद्याच ॥ १५९ ॥ आत्मावारेद्रष्टव्यःश्रोतव्यइ तिश्रुत्यर्थमाह संन्यस्येति सर्वकर्माणिसंन्यस्यवेदांतार्थविचारणैवकार्या कैर्गुरूपदेशतर्कध्यानैःश्रवणमनननिदिध्यासनपदानांक्रमे णवाच्यैरित्यर्थः ॥ १६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलबोधिकाब्रह्मसंस्थोमृतत्वमेतीत्याद्याश्रुतीरनुसंदधाति एवमिति एवंसंन्यासवेदांतविचारयोःकृतयोर्यस्यविवेकिनोऽद्वितीयादिलक्षणमद्विषयिकासाक्षात्कृतिर्भवेत्सएतत्संसारलक्षणंदुःखंनाप्नुयात् एतेषांतूक्तश्रुतिप्राप्तःसंन्यासोनदृश्यतइतिभावः ॥ १६१ ॥ व्रतीभूत्वागृहीभवेत् गृहीभूत्वावनीभवेत् वनीभूत्वाप्रव्रजेदितिश्रुत्यनुसारित्वमाशंक्यनिराकरोति क्रमप्राप्तश्चेति यःक्रमप्राप्तःआश्रमक्रमविधाय

॥१२॥ कश्रुत्यनुसारीसआयुषोवर्षाणांसप्तत्याअनंतरंयोग्यइतिसोप्येषुनास्तीत्याह युवानइति पूर्वोक्तश्रुत्यनुसारित्वाभावेहेतूनाह आत्मेत्यादिना ॥ १६२ ॥ अविनीताइति विनयेनजितेंद्रियत्वेननीत्यावाहीनाः यतःक्रोधशत्रुवशाअतएवदुर्धियः तत्रहेतुः शृण्वंतीति मत्संहितोपदेष्टे ॥ १६३ ॥ हितोपदेशकंप्रतिद्वेषेदृष्टांतः प्रज्ञावतइति यथासंनिहितमरणकाःसद्वैद्यायद्विषंतितद्वदित्यर्थः ननुतथापित्वयाक्षंतव्यं

एवंममाद्वितीयस्यचिदानंदात्मरूपिणः॥ साक्षात्कृतिर्भवेद्यस्यदुःखंनैतत्समाप्नुयात्॥ १६१ ॥ क्रमप्राप्तश्च संन्यासःसप्तत्याःस्यादनंतरम्॥ युवानःसर्वएवैतेआत्मज्ञानविवर्जिताः॥ १६२॥ अविनीताःक्रोधशत्रोर्वशंप्राप्ताहिदुर्धियः॥ शृण्वंतिनहितंमूढाअपिमत्यंद्विषंतिच॥ १६३॥ प्रज्ञावतेपिभिषजेयथालोकेमुमूर्षवः॥ मदुक्तंतेनकुर्वंतिकस्यकुर्युरिमेऽधमाः॥ १६४॥ सुदुःसहानधिक्षेपान्सोढ्वातेषांदुरात्मनां॥ बोधाययन्मयापृष्टंप्रमाणंतच्चनेरितम्॥ १६५॥ ममैवमाशयःपूर्वमिमेकिंचिद्विवेदिकम्॥ वाक्यंहिकथयिष्यंतितेनैवैतान्विबोधये॥ १६६॥ एतेचमयिसंजातकोपाःकारणशून्यतः॥ नजानंतिचमानानिकुतर्कांश्चवदंतिहि॥ १६७॥

तेषांश्रेयस्तूपदेशकांतराद्भविष्यतीत्याशंक्याह मदुक्तमिति यदीमेमदुक्तंनकुर्वंतितर्हिकेनोपदिष्टंकुर्युरिति ॥ १६४ ॥ स्वस्योपदेष्ट्रंतरेभ्योविशेषंदयातिशयरूपंसूचयंस्तेषांश्रुत्यतिक्रमरूपापराधादन्यमपराधंचदर्शयति सुदुःसहानिति दुःखेनसोढुंशक्यान्सोढ्वामर्षयित्वामयायत्प्रमाणंपृष्टंतदप्येतैर्नोक्तमिति ॥ १६५ ॥ त्वयापीदृशाःकिमर्थंपृष्टाइत्याशंक्याह ममैवमिति पूर्वमित्यनंतरमासीदितिशेषः तेनैवएतदुक्तवाक्येनैव एतान्यतीन् ॥ १६६ ॥ तेषांविरुद्धाचरणांतराण्यपराधरूपाणिदर्शयति एतेचेति कारणशून्यतइतिसार्वविभक्तिकस्तसिः ॥१२॥
तथाचक्रोधकारणशून्येमयिक्रोधःप्रमाणज्ञानाभावःकुतर्काभिधानंचैषामपराधाः ॥ १६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृष्टेनसाधुनासर्वेभ्यउत्तरंदेयमितिन्यायातिक्रमश्चैषामपराधइत्याह वक्तव्यमिति तात्पर्येणतत्परतयापृच्छतिप्रश्नंकुर्वतिअंत्यजादिचतु ष्टयान्यतरस्मिन्नपियुक्तंयोग्यमुत्तरंवक्तव्यमितिनयः एतेतुमयासुरेश्वरेणापिपृष्टामौनिनइति ॥ १६८ ॥ जन्मवैफल्यसंपादनंचापराध इत्याह इमेनेति एतेनकर्मयोग्याःसंन्यस्तत्वात् नालंज्ञानार्हाःविरागाभावात् विरागाभावस्तुकोपाज्ज्ञातइति सा विरक्तिः ॥ १६९ ॥ अ थकोपस्यविरागाभावहेतुतांस्फुटयितुंदुःखनिवर्त्तकतयाहिततरत्वेनोक्ताद्विरागाद्विपरीतस्वभावतांतस्याह जन्मेति ततःजन्मनःवीतरागज न्मादर्शनाज्जन्महेतुःकामःकष्टतरइति सक्रोधः एतेषुयतिषु ॥ १७० ॥ क्रोधस्यकामात्कृष्टतमतांस्फुटयति विपाकइति कामस्यकार्यंदुः

वक्तव्यंसाधुनायुक्तमंत्यजेवाथवैरिणि॥ पतितेपिदुराचारेतात्पर्येणेहपृच्छति ॥ मयापृष्टाइमेसर्वएवंमौनंस माश्रिताः ॥ १६८ ॥ इमेनकर्मयोग्याःस्युःसंन्यस्तत्वाद्विदुर्धियः ॥ विरक्तिर्नैवचापन्नाःकोपेसतिकुतोहिसा ॥ १६९ ॥ जन्मकष्टंनृणामेतत्कामःकष्टतरस्ततः ॥ क्रोधःकष्टतमस्तस्मात्सएतेषुसमाश्रितः॥ १७० ॥ विपा केदुःखंकामस्यनाधुनासर्वदेहिनाम् ॥ विपाकेप्यधुनाक्रोधःसर्वदादुःखदःस्मृतः ॥ १७१ ॥ जायतेयत्रसक्रो धस्तंदहेदेषसर्वतः ॥ विषयंचक्वचित्क्रोधःसफलोनिर्दहेदयम् ॥ १७२ ॥ चतुर्विधानांभूतानांक्रोधाद्भवतिहिं सनम् ॥ कर्मणामनसावाचाकस्तंक्रोधंसमाश्रयेत् ॥ नाशयत्येषवैकीर्तिंस्फीतांरोगइवत्वचम् ॥ १७३ ॥

खंविपाकेपरिणामएवनाधुनाकामवर्त्तमानतादशायां क्रोधस्तुविपाकेवर्त्तमानकालेचसर्वदेहिनांदुःखदइति ॥ १७१ ॥ कामआश्रयस्यै वदुःखदःक्रोधस्तुविषयस्यापीतिविशेषांतरमाह जायतेइति यत्राश्रये तमाश्रयंसर्वतःसमंतात्दहेत्तापयेत् विषयमाश्रयभिन्नं सफलः फलेनपरताडनादिनासहितः ॥ १७२ ॥ कामोराजसःसृष्टिहेतुत्वात्क्रोधस्तुतामसोंतकरत्वादितिस्पष्टमस्यकष्टतमत्वमित्याह चतुरिति श रीरवाङ्मनोव्यापारैर्यच्चतुर्विधप्राणिहिंसनंतद्यतःक्रोधाद्भवतितंहिंसाहेतुंक्रोधंकआश्रयेदितिविशेषांतरमाह नाशयतीति दानादिजन्यां स्फीतांविश्वव्याप्तामपिकीर्तिमेकदेशेवर्त्तमानःक्रोधःश्वित्ररोगस्त्वचमिवनाशयतीति ॥ १७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्गनरकौप्रतिविरोधितांहेतुतांचक्रमेणाह स्वर्गादितिद्वाभ्यां स्वर्गहेतुस्तपोदानादिरुपचारात्स्वर्गस्तस्मादेषक्रोधोनिःसारयतितेनसंबंधं नाशयतीतियावत् निरुद्धवेगस्तुशक्नोतीहैवेतिगीतावाक्यादताद्दशोपील्यतोविशिनष्टि सफलइति सफलस्यानर्थकरत्वेदृष्टांतः सफलइति यथादुर्जनःसफलःराजगृहप्रवेशरूपफलंप्राप्तःसन्फलदंप्रवेशस्यकारयितारंराजमंदिरान्निःसारयतितद्वदिति दार्ष्टांतिकेपिताडनादिनाक्रोधंसफलंकुर्वाणःफलदोबोध्यइति ॥ १७४ ॥ अश्ववारमिति अश्वंवृणुतेइतिअश्ववारःअश्वारोहः कर्मण्यण् ॥१७५॥ फलितमाह सुखार्थिनइति नियंतव्योनिरोद्धव्यः॥ १७६ ॥ दृष्टांतांतरमाह 'यथेति विश्वंसर्वमभ्युदयनिःश्रेयसहेतुंविनिर्दहेत्फलजननशक्तिहीनंकुर्यात् ॥ १७७ ॥ कोपस्यविरागविरुद्धरागात्मककामव्याप्यतयापिविरागाभावानुमितिहेतुतामभिव्यनक्ति यथाशाद्वलतेतिद्वा

स्वर्गान्निःसारयत्येषसंजातःसफलोनृणां ॥ सफलोदुर्जनोयद्वत्फलदंराजमंदिरात् ॥ १७४ ॥ अश्ववारंयथा दुष्टोवाजीगर्तेनिपातयेत् ॥ एवंक्रोधोपिनरकेनरमाशुनिपातयेत् ॥ १७५ ॥ सुखार्थिनस्ततःपुंसोनास्तिकोपसमोरिपुः ॥ ततःकोपोनियंतव्यःकामादप्यतिकष्टदः ॥ १७६ ॥ यथावन्हिर्महान्दीप्तःशुष्कमार्द्रंचनिर्दहेत् ॥ एवंकोपोत्रसंजातोविश्वमेतद्विनिर्दहेत् ॥ १७७ ॥ यथाशाद्वलताभावोवृक्षेवन्हेर्विलोकनात् ॥ दूरेस्थितस्य सहसापुंसोनिश्चितमाव्रजेत् ॥ किंचिद्विरक्तिलेशोपिकोपालोकेननिश्चितः ॥ १७८ ॥ इच्छाविघातंनविनाकोपोदेहिषुजायते ॥ अनुत्पादेनचेच्छायाविघातःक्वापिदृश्यते ॥ १७९ ॥ नस्त्रीव्यतिकरापेक्षामात्रंकामउदीरितः ॥ किंतुकामोभवेदिच्छामात्रमत्रशरीरिणाम् ॥ १८० ॥

भ्यां यथावृक्षनिष्ठःशाद्वलतायाःसरसतायाअभावोवन्हेर्हेतोर्ज्ञानाद्दूरस्थपुरुषनिश्चयविषयोभवेत्तथाकोपालोकेसतिविरक्तिलेशोपिननिश्चितःकिंतुविरक्तेरभावएवनिश्चितोभवति ॥ १७८ ॥ तत्रोपपत्तिमाह इच्छेति विहन्यमानाइच्छैवहिक्रोधात्मनापरिणमते विघातोनामफलप्रतिबंधः सचाजातस्याप्रसिद्धः नहिवंध्यासुतराज्यंकश्चित्प्रतिबध्नातिइत्युच्यते प्रसक्तंहिप्रतिषिध्यतेइतिन्यायादिति तथाचकोपेसतिइच्छासत्वाद्विरागाभावःस्पष्टइतिभावः ॥ १७९ ॥ कामपदार्थंप्रकृतोपयोगिनमाह नस्त्रीति व्यतिकरःसंबंधः अपेक्षाइच्छा इच्छामात्रंसर्वापीच्छा ॥ १८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामक्रोधयोरुभयोर्विरक्त्याविरोधमाह तावुभाविति ॥ १८१ ॥ ननुकथमचिकित्स्यावित्युक्तंमुमुक्षुभिःकृतायाश्चिकित्सायादर्श नादित्याशंक्यएषुतदुपायासंभवादित्याह अप्युपायइति अनयोःकामक्रोधयोर्निवर्तकउपायोपिदृष्टःससतांसुधियांसेवापरिप्रश्नाद्या त्मकसंसर्गरूपः एतेतुमयेंद्रेणसतामात्मविदांमुख्येनवदनमपिनकुर्वंतीति ॥ १८२ ॥ विरागाभावेचैषांसंन्यासोऽयोग्यइत्याह अविरक्ते ष्विति अविरक्तेष्वेषुसंन्यासात्किंफलंनकिमपिप्रत्युतविपरीतंअनेनसंन्यासेनतनुमानिनांदेहाभिमानिनांपतनंभवेदिति ॥ १८३ ॥ अवि रक्तानांसंन्यासफलाभावंस्फुटयति गुरूनिति विविदिषासंन्यासस्यफलंगुरुमुखात्तत्त्वनिश्चयः एषांतुतन्नास्तिविविदिषाभावात् विद्वत्सं न्यासफलाशातुविद्याभावेनतत्संन्यासाभावादेवदूरापास्तेत्याह स्वयमिति ममशब्दोत्रविभक्तिप्रतिरूपकमव्ययं तथाचममसंन्यासस्या

तावुभौयदिविद्येतेकामक्रोधौदुरासदौ॥ अचिकित्स्यौकथंत्वेषाविरक्तिःसंभवेदिह॥ १८१ ॥ अप्युपायोन योदृष्टोयत्संसर्गःसतामिह॥ सतामग्रेसरेणैतेमयानैववदंत्यपि ॥ १८२ ॥ अविरक्तेषुकिंनामन्यासात्स्यात्फ लमेषुहि॥ प्रत्युतानेनपतनंभवेद्धितनुमानिनाम्॥ १८३ ॥ गुरूनेतेनगच्छंतिमूर्खाःपंडितमानिनः॥ स्वयं चनविजानंतिममसंन्याससंभवम्॥ १८४॥ कामक्रोधाद्यरिगणंसम्यक्संछिद्यसर्वदा ॥ सकारणमहंब्रह्मे तीत्थंविज्ञानहेतिना ॥ १८५ ॥ नितरामासनंस्वस्यपुनरावृत्तिवर्जितम् ॥ यदेतत्सहिसंन्यासस्तर्हिनैतेषुवि द्यते ॥ १८६ ॥

त्मीयसंन्यासस्यसंभवमुपपत्तिंकिमस्मासुसंन्यासपदार्थउपपन्नोनवेत्याकारेणनजानंतिकिमधिकंज्ञास्यंतीतिभावः ॥ १८४ ॥ तत्रविद्व त्संन्याससमन्वितंसंन्यासपदार्थमुक्त्वाऽविरक्तेषुतदभावमाह कामेतिद्वाभ्यां यथाप्रादेशंविपरिलिखतीत्यत्रविइत्युपसर्गोमानक्रियाक्षेपी तथात्रसंन्यासपदेसंशब्दश्छिदिक्रियामाक्षिपति तथाचाहंब्रह्मेत्याकारविज्ञानरूपशस्त्रेणसकारणंसमूलंकामादिरिपुगणंसंछिद्यइतिसंप दार्थः न्यासःनितरामासआसनंस्थितिः निपदार्थातिशयमभिनयति पुनरावृत्तिवर्जितमिति तथाचकर्मफलविलक्षणज्ञानफलब्रह्मभावे नावस्थानमित्यागतं यद्यदिएतदुक्तविधमासनंसंन्यासस्तर्हिएतेष्वविद्वत्स्वविरक्तेषुचसनविद्यतेइति ॥ १८५ ॥ १८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विविदिषासंन्याससंग्रहायप्रकारांतरेणसंन्यासपदार्थमाह अथवेति अत्रपक्षेसमुपसर्गेणत्यागक्रियाक्षेपः तथाचसमित्यस्यकोर्थः गम्यं
क्रियालभ्यंससाधनंफलजातमिहामुत्रचवर्तमानंधियासंत्यज्यततोविरज्यन्यासःनितरामासनं कुत्रगुरुसमीपे किमर्थमात्मविज्ञानस्यसं
तत्यै तदुक्तविधमासनमप्येषुनास्तीति ॥ १८७ ॥ उक्तविधावन्वर्थसंन्यासावेवमोक्षहेतूनिष्कामतालक्षणव्यापारलाभात् यदासर्वेप्रमु
च्यंतइतिश्रुत्यनुसारात् आश्रममात्रंत्वतिप्रसंगान्नमुक्तिहेतुरित्याह नहीति ननुयःकामक्रोधौवशीकर्तुंनशक्नुयात्सकिंकुर्यादित्याशंक्याह
सर्वात्मनेति सर्वात्मनाकामक्रोधविवर्जनस्याशक्यत्वेपिहेत्वंतरादपिमोक्षोभवति किंतद्धेत्वंतरं साधुशास्त्रसमाश्रयः साधुःसज्जनःशास्त्रंच

अथवासंधियागम्यंफलजातंससाधनम् ॥ इहामुत्रचसंत्यज्यनितरामासनंगुरौ ॥ आत्मविज्ञानसंतत्यैतद
प्येषुनविद्यते ॥ १८७ ॥ नहिसंन्यासतोमुक्तिर्नटानांसाकुतोनहि ॥ किंतुसर्वाभिलाषस्यकोपस्यचविवर्जना
त् ॥ सर्वात्मनाप्यशक्यत्वेसाधुशास्त्रसमाश्रयात् ॥ १८८ ॥ कालुष्यंहियथाहन्यान्नीराणांहिशरच्छनैः ॥ काम
क्रोधौतथादीप्तौसाधुशास्त्रेहतःशनैः ॥ १८९ ॥ दुर्दांतोहियथावाजीकालेनदममाव्रजेत् ॥ शिक्ष्यमाणोनरैस्त
ज्ज्ञैःशिक्षाभेदैरनेकशः ॥ १९० ॥ दुर्दांतंमनएवंहिकामक्रोधवशंगतम् ॥ गुरुशास्त्रैःशिक्ष्यमाणंदांतंभवति
कालतः ॥ १९१ ॥ आशानैतेषुसाप्यस्तिनित्यंपंडितमानिषु ॥ अनादृतवचःस्वात्मबोधशून्येषुकर्मिषु ॥ १९२ ॥

तयोःसम्यगाश्रयणात् ॥ १८८ ॥ सत्संगशास्त्रयोरपिपरंपरयामोक्षजननेनिष्कामतासंपादनमेवव्यापारइत्याह कालुष्यमितित्रिभिः य
थाशरदृतुर्नीराणांकालुष्यंमालिन्यंहन्यात्तथासत्संगशास्त्रेकामादिचित्तमलंहतःनिवर्तयतः ॥ १८९ ॥ तत्रदृष्टांतमाह दुर्दांतइति दुर्गतंही
नंदांतंदमनंयस्यसतथादुष्टइतियावत् तादृशोवाजीअश्वःतज्ज्ञैःशिक्षाविधिज्ञैर्नरैःशिक्षाविशेषैःशिक्ष्यमाणोयथादमंदोषराहित्यंप्राप्नुयात्
॥ १९० ॥ दार्ष्टांतिकमाह दुर्दांतमिति ॥ १९१ ॥ आशेति एतेषुयतिषुसापिसाधुशास्त्रसमाश्रयेणमोक्षसंपादनविषयापिआशासंभाव
नानास्ति तत्रहेतुभूतानिविशेषणानि अनादृतंगुरुवेदांतवचोयैस्तेतथातेषु ॥ १९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मिणामिति कर्मिणांसमतेःपूर्वंसंन्यासोनविहितःकिंतुपूर्वमपिस्वात्मावबोधार्थमेवविहितः यतोयदित्यादिश्रुतिवचोज्ञानकारणस्यैवैराग्यस्यसंन्यासनिमित्ततावोधकंभवति यदहरेवविरजेत्तदहरेवप्रव्रजेदितिश्रुतिः यदीत्यादिपाठेयदिवेतरथाब्रह्मचर्यादेवप्रव्रजेदित्याद्याश्रुतिर्बोध्या इतरथापरवैराग्यसत्वेइत्यर्थः ॥१९३॥ आत्मेति श्रुतौआत्मानमेवलोकमित्याद्यायामुक्तायां तंआत्मानात्मविवेकं वार्तिककृद्भिरप्युक्तं प्रत्यक्तत्वविवेकायसंन्यासःसर्वकर्मणां श्रुत्याविधीयतेयस्मात्तत्त्यागीपतितोभवेदिति॥ १९४ ॥ क्रमप्राप्तेत्विति ब्रह्मलोककामस्यसमत्यूर्ध्वंक्रमसंन्यासेधिकारइत्यर्थः अन्येषामात्मबोधार्थेनक्रमप्राप्तेनचसंन्यासेनहीनानांसंन्यासिनां उभयमभ्युदयनिश्रेयसरूपं ॥ १९५ ॥ ननुकिमप्येषामुभयभ्रंशउच्यतेअहिंसादिप्रधानयतिधर्मस्यमहाफलत्वेनप्रसिद्धत्वादंततोयोगभ्रष्टगतिर्नकेनाप्यपह्नुता

कर्मिणांनहिसंन्यासोविहितःसमतिंविना॥ किंतुस्वात्मावबोधार्थंयदित्यादिवचोभवेत्॥ १९३॥ आत्मानात्मविवेकार्थंसंन्यासोविहितःश्रुतौ॥ नैतेकुर्वंतितंमंदाःपतितास्तेनहेतुना॥ १९४॥ क्रमप्राप्तेतुसंन्यासेसंन्यासाद्ब्रह्मलोकगाः॥ अन्येषामुभयभ्रंशःस्वात्मबोधविवर्जनात्॥ १९५॥ यद्यप्येतेसदाचाराश्चतुर्थाश्रमसंश्रयाः॥ विप्रास्तथापिदुर्दांताःशासकाभावतोधुना॥ १९६॥ नैतेषांगुरुरस्तीहनियच्छेद्यइमान्बलात्॥ नैतेहिस्वात्मनात्मानंप्रभविष्यंतिकर्हिचित्॥ १९७॥ नियंतुंयन्मयाप्युक्तावेदार्थेनधियंदधुः॥ शास्याराज्ञादुरात्मानोराजाहंजगतोपिच॥ १९८॥

इत्याशंक्यतथाप्येषांवेदांतविरुद्धमतेभिनिवेशेनधर्मातिक्रमाद्दंडयतैवेत्याह यद्यपीति यद्यप्येतेसदाचारादिभिरुत्कृष्टास्तथाप्यधुनामयासंव्यवहारकालेदुर्दांताद्दुर्दांताऽश्ववन्मार्गातिक्रमशीलाःसंति शासकस्यशिक्षयितुरभावात् तथाचमयैवशासनीयाइतिभावः॥ १९६॥शासकांतराभावंस्पष्टयति नैतेषामिति यएतान्नियच्छेत्नियंतुंमार्गेस्थापयितुंशक्नुयात्तादृशोगुरुर्नास्ति तथैतेस्वात्मनास्वयमेवात्मानंनियंतुंमार्गेस्थापयितुंनप्रभविष्यंतिनसमर्थाभविष्यंति यद्यतोमयासुरेश्वरेणाप्युक्ताःसंतोवेदार्थेधियंनदधुरेकाग्रांनकृतवंतस्ततोज्ञातमेषांमनोनियमनेसामर्थ्यमिति एतादृशाश्वराज्ञाशास्याः राजत्वंतुत्रिलोकीनिरूपितंमय्येवतस्मान्मयैवशास्याइतिभावः॥ १९७ ॥ १९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंदंड्यत्वेनिर्णीतेसतिएभ्यःकिमाकारोदेयोदंडइतिविचारयति नचैषामिति वित्तादानरूपोवधोनैषांदंडोवित्ताभावात् नापिमुंडनरूपः सिद्धत्वादित्यर्थः ॥ १९९ ॥ देशान्निःसारणरूपस्त्वसंभवीत्याह देशादिति स्पष्टम् ॥ २०० ॥ अमीषामिति यद्येतेसशरीरास्त्रिलोक्याव हिर्गंतुंशक्ताःस्युस्तर्हिदेशनिःसारणरूपमेषांदंडंकुर्यां एषांतुबहिर्गतिरेवनास्तीतिततस्तस्मात्शरीरदंडादेषामपरोदंडोनास्तीति॥ २०१॥इति संचिंत्येति आत्मावलोकनार्थायेत्यारभ्योक्तप्रकारेणसंचिंत्यशब्देनवेदांतशब्देनशून्यमाननंमुखंयेषांतेतथातान्यतीन्विपिनेहत्वाशाला वृकेभ्यःश्वभ्योऽदांदत्तवानस्मियतोलोकेरक्षकः शालावृकाःकपिक्रोष्टुश्वानइत्यमरः ॥ २०२ ॥ तैत्तिरीयशाखायांयतीनामद्यमानानां शीर्षाणिपरापतन्तानिखर्जूराअभवन्नित्यादिकारीरीष्टिविध्यर्थवादोक्तंकथाशेषमुपन्यस्यति यतीनामिति शालावृकैरद्यमानानांभक्ष्य

नचैषांवित्तमस्त्यत्रयदाऽऽदानाद्वधोभवेत्॥ मुंडिताहिस्वयंतस्मादमीषांनवधोपितत्॥ १९९॥ देशान्निःसा रणंप्राप्तंदेशोयंसकलोमम॥ कथंनिःसारयिष्यामिविनादेहविमोचनं॥ २००॥ अमीषांविद्यतेनैवत्रिलोक्या श्चबहिर्गतिः॥ त्रिलोकीचसमग्रामेवधान्नास्त्यपरस्ततः॥ २०१ ॥ इतिसंचिंत्यतान्सर्वान्शब्दशून्याननान्य तीन्॥ शालावृकेभ्योविपिनेहत्वाऽदांलोकरक्षकः॥ २०२ ॥ यतीनामद्यमानानांशालावृकशतैस्ततः॥ मस्त कान्यऽपतन्भूमावनाद्यान्यस्थिरूपतः॥ २०३॥ शालावृकास्तुमांसानितेषांदक्षिणभागतः॥ आदन्नुत्तरवे द्यास्तेकर्मिणांदर्शनायहि॥ २०४॥ कर्मनैवपरित्याज्यंविरागेणविनाक्वचित्॥ त्यागेचैषाभवेन्नूनमवस्थादुष्ट चेतसाम्॥ २०५॥ तेषांशीर्षाणिखर्जूरायतीनामभवंस्ततः॥ खर्जूराणांहियःसारोरसऊर्ध्वमुपागतः॥ २०६॥

माणानांयानिमस्तकान्यासंस्तानिवनभूमावेवापतन्पतितान्यासन् यतोऽस्थिरूपत्वादनाद्यानिअत्तुमयोग्यानीति॥ २०३ ॥ शालावृका इति तेषांमांसानितुउत्तरवेद्यांयागभूमेर्दक्षिणभागेआनीयअंतर्यामितयामत्प्रयुक्ताःशालावृकाआदन्भक्षितवंतः कस्मै कर्मिणःप्रतिदर्श नाय ॥ २०४ ॥ दर्शनेनचकर्मिणःप्रतियद्बोधितंतदभिनयति कर्मेति विरागेणविनाकर्मनत्याज्यंत्यज्यतेचेत्तर्हिदुष्टचेतसामेषाएतादृ शीअवस्थादशाप्रभोःकोपात्स्यादिति ॥ २०५ ॥ तेषामिति तेषांयतीनांयानिवनेपतितानिशीर्षाण्यासंस्तानिखर्जूराकारेणपरिणता न्यभवन् ततस्तदनंतरंखर्जूराणांयःसारभूतोरसःसऊर्ध्वमूर्ध्वभागंगतोभूदिति ॥ २०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करीराणीति सरसोभूमौपतितःसन्प्रसिद्धवंशांकुररूपेणपरिणतः वंशांकुरेकरीरोऽस्त्रीतिमेदिनी कीदृशानिकरीराणि सौम्यानिअनुग्राणि शांतानीतियावत् सौम्यंबुधेमनोज्ञेचेतिविश्वः सौम्यत्वादेवदेवताप्रसादातिशयहेतुत्वादाहुतिसाधनम् कथंकरीराणांसौम्यत्वमित्याशंक्यतदुपपादयति यतइत्यादिना यतःपरंपरयाकरीराणांकारणभूतायतयःस्वभावात्क्रोधवर्जिताआसन्नितिशेषः ॥ २०७ ॥ ननुतेषां यतीनांसक्रोधत्वात्कथंक्रोधवर्जितत्वमित्याशंक्याह देहेति देहत्यागाद्देहत्यागरूपदंडाद्धतःक्रोधःपापमयोयेषांतेतथेति तथाचदोषे त्रिलोकीराजेनदंडाद्धृतेसतितेस्वभावभूतसौम्यतायामेवस्थिताइतिभावः करीरेषुतदीयासौम्यताकथमागतेत्यतआह ऊर्ध्वेत्यादि तेषांरेतसऊर्ध्ववहनलक्षणस्वभावस्यशिरसिस्थितस्यापिस्वभावानपायात्तत्प्रयुक्तशिरोरूपशरीरोर्ध्वभागात्खर्जूराजाताः कीदृशाःखर्जूराःदश

करीराण्यभवंस्तानिसौम्यान्याहुतिसाधनं॥ यतःसंन्यासिनःसौम्याःस्वभावात्क्रोधवर्जिताः॥ २०७॥ देहत्यागाद्धतक्रोधाऊर्ध्वरेतस्त्वहेतुतः॥ ऊर्ध्वभागात्शिरोरूपाद्दशमद्वाररूपकाः॥ २०८॥ खर्जूरास्तत्रसंजातास्तेषुरेतश्चिरंधृतम्॥ साररूपंतुसौम्यंतत्करीराणीतिकीर्तितम्॥ २०९॥ आहुत्यात्वनयाहंहिप्रीतःसर्वात्मकःपुमान्॥ वृष्टिंसौम्यतमांसर्वजंतूनामुपकारिणीं॥ २१०॥ करोमितेचयतयोगतदेहामहाधियः॥ देहांतरेणमामेवप्राप्ताःक्रोधादिवर्जिताः॥ २११॥

मद्वाररूपाः तन्मयाइतियावत् तेषुदशमद्वारेषुयच्चिरंधृतंसुसौम्यंकामाग्निकृतक्षोभराहित्यादत्यंतंशांतंचरेतस्तदेवखर्जूररसभावक्रमेणकरीरतांगतमितिकीर्तितंतैत्तिरीयशाखायांकारीरीष्टिप्रकरणइतिशेषः ॥ २०८ ॥ २०९ ॥ आहुत्येति अनयाऽतिसौम्ययाकरीराहुत्याहमिंद्रःसर्वात्मकःप्रीतःसन्वृष्टिंकरोमीत्युत्तरश्लोकादनुषंगः कीदृशींवृष्टिंसौम्यतमां यतयोहिसौम्यास्तद्रेतःपरिणामकरीराणिसौम्यतराणितत्परिणामत्वाद्वृष्टिःसौम्यतमेति ॥ २१० ॥ करोमीति ननुतेषांयतीनांकागतिरित्यतउक्तं तेचेत्यादि तेयतयोदंडेनशुद्धाःसंतःशरीरांतरेज्ञानंलब्ध्वामांप्राप्ताइति ॥ २११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यासेति पूर्वंतेषांदुरदृष्टात्सत्संप्रदायोनलब्धआसीद्दंडेनप्रतिबंधकापगमेतुव्यासनारायणादिसंबंधिनीयाविद्यासंततिर्विद्यावंशस्तंपतितुं प्राप्तुंशीलंयेषांतादृशाःसंतःअहंब्रह्मेतिविज्ञानेनविध्वस्तमखिलंतामसंतमःप्रयुक्तंयेषामेतादृशाः व्यासोब्रह्मसूत्रकृत् नारायणोबदरिकाश्रमस्थेभ्योनारदादिभ्योविद्यासंप्रदायप्रवर्त्तकोविष्णोर्लीलाविग्रहः आदिपदेननारदादयइति ॥ २१२ ॥ उक्तमर्थंप्रकृतेयोजयति नकेवलमिति केवलंविश्वरूपएवनहतःकिंतुब्राह्मणत्वादिविशिष्टायतयश्चवेदांतहीनत्वापराधाद्धताः वेदःकर्मकांडः शापानुग्रहकारिणोयोगबलात् ॥ २१३ ॥ बह्वीरित्यादिकालखंजानित्यंतंव्याचष्टे अन्येपीतित्रिभिः अन्येपिकोटिशोदैत्यानिहताः कीदृशाः वेदविद्यादिशालिनःप्रल्हादपुत्रादयः मयेन्द्रेणसमाः मत्तइंद्रात् ॥ २१४ ॥ तत्कृताइति तैर्दैत्यैःकृताःप्रयुक्तामहामायास्तथातेषामलौकिकंचित्रंवीर्यं

||१६||

व्यासनारायणादीनांविद्यासंततिपातिनः ॥ अहंब्रह्मेतिविज्ञानविध्वस्ताखिलतामसाः ॥ २१२ ॥ नकेवलं विश्वरूपोब्राह्मणायतयस्तथा ॥ निहतावेदविद्वांसःशापानुग्रहकारिणः ॥ २१३ ॥ अन्येपिवेदविद्वांसोबलिनोमायिनस्तथा ॥ निहताःकोटिशोदैत्याःप्रह्लादतनयादयः ॥ बलेनमत्समास्तेहिमत्तोवाभ्यधिकाइमे ॥ २१४ ॥ तत्कृताश्चमहामायामायिनामपिमोहिनीः ॥ अलौकिकंतथावीर्यंतेषामादित्यवर्चसाम् ॥ अतिक्रम्यात्मविज्ञानाद्व्यहनंदैत्ययूथपान् ॥ २१५ ॥ दिविप्रल्हादनामांकान्पौलोमांश्चविहायसि ॥ कालकाख्यांस्तथाभूमौ हतवानहमासुरान् ॥ २१६ ॥ ब्रह्मघ्नस्ययतिघ्नस्यदैत्यानांघातकस्यच ॥ लोमापिनविनष्टंमेशापेनापिशिरेण वा ॥ २१७ ॥

चात्मविज्ञानबलादतिक्रम्यागणयित्वातान्व्यहनंहतवानस्मीति कीदृशीर्मायाः मायिनांमयादीनामपिमोहिनीर्विस्मयजनिकाः ॥ २१५ ॥ दिवीति दिविस्वर्गलोकेप्रल्हादनामाअंकंचिन्हमुपलक्षणंयेषांतेतथाप्रल्हादसंबंधिनइतियावत् एतादृशान्आसुरान्असुरान् प्रज्ञादित्वात्स्वार्थेऽण् हतवानस्मि तथा विहायसिअंतरिक्षलोकेपौलोमान्पुलोमायावैश्वानराख्यदानवसुतायाअपत्यभूतान्हतवानस्मि कालकयापुलोमाभिगिन्यामात्राआख्यानिरूपणंयेषांकालखंजानांतेतथातान् कालखंज्यानितिपाठःसाधुः भुविलोकेहतवानित्यतृणमितिश्रुतिपदस्यार्थः ॥ २१६ ॥ ब्रह्मघ्नस्येति श्रुतिगततस्येतिपदस्यार्थःपूर्वार्धेनोक्तः शापेनेत्यतःपूर्वंतेषामितिशेषः श्रुतिगतामीयतेतिपदस्यार्थोविनष्टमिति ॥ २१७ ॥ ||१६||

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपेति अपकीर्तिर्नजाताप्रत्युतविपरीतंकीर्तिःप्रशंसैवजाताइति ॥ २१८ ॥ कीर्त्तिमभिनयति आत्मेति आत्मविज्ञानसंपन्नःसन्निन्द्रो लोकवेदनिषिद्धानिकृतवानित्येवमित्याकाराकीर्तिरभूदितिपूर्वेणसंबंधः ॥ २१९ ॥ लोमापिनविनष्टमित्युक्तमेवस्फुटयति शापाइतिच तुर्भिः द्विजोत्तमानांशापादैत्यानामस्त्राणिमायाःशस्त्राणिचममलोम्नोपिहिंसांनचक्रुः ततश्चमेज्ञानेनब्रह्मभूतस्यव्यथाकुतःस्यादितिचतु र्णामन्वयः कीदृशाःशापाः प्रतीकारविवर्जिताअमोघाइतियावत् कीदृशान्यस्त्राणि तादृशानिप्रतीकारविवर्जितानि कीदृश्योमायाः म यस्यमायाचार्यस्यापिविमोहिकाविस्मयजनिकाःकीदृशानिशस्त्राणि शूरत्वादिविशिष्टैरपिदैत्यैःप्रेषितानिनिर्मुक्तानि मृत्योरास्येनसमा

अपकीर्तिर्नमेकापिलोकेभूत्क्रूरकर्मणः ॥ प्रत्युतात्राभवत्कीर्तिःकीर्तनीयामहात्मभिः ॥ २१८ ॥ आत्मवि ज्ञानसंपन्नःकृतवान्हिसहस्रशः ॥ लोकवेदनिषिद्धानिकर्माण्येवंप्रतर्दन ॥ २१९ ॥ शापाद्विजोत्तमानांयेप्र तीकारविवर्जिताः ॥ ब्रह्मास्त्रादीनिचास्त्राणितादृशानिसहस्रशः ॥ २२० ॥ मायाश्चदैत्यभेदानांमयस्यापिवि मोहिकाः ॥ शस्त्राणिदितिजैःशूरैर्मत्तोधिकबलैरपि ॥ २२१ ॥ प्रेषितानिभृशंक्रुद्धैर्मृत्युवक्रसमान्यपि ॥ मेरु मंदरभेदीनिनानाभेदान्यनेकशः ॥ २२२ ॥ हिंसांलोम्नोपिनोचक्रुःकुतःस्यान्मेव्यथाततः ॥ २२३ ॥ यथाम मस्वविज्ञानान्नाभूल्लोकद्वयेपिहि ॥ हिंसातथैवचान्यस्यमज्ज्ञानान्नैवजायते ॥ २२४ ॥ लोकवेदनिषिद्धेनदु ष्करेणापिकर्मणा ॥ पितृमातृवधेनापिसुवर्णस्तेयतोपिवा ॥ २२५ ॥

नि थामेरुमंदरादिपर्वतानामपिभेदनसमर्थानीति ॥ २२० ॥ २२१ ॥ २२२ ॥ २२३ ॥ नचैतन्ममैवसामर्थ्यंकिंतुएतादृशज्ञानवतोयस्यक स्यापीत्यर्थकंयोमामित्यादिपितृवधेनेत्यंतवाक्यंव्याचष्टे यथेत्यादिषड्भिः यथाममेंद्रस्यस्वविज्ञानादात्मतत्त्वस्यसम्यग्ज्ञानाल्लोकद्वयेऐ हिकामुष्मिकरूपेहिंसाहानिरूपानाभूत्तथान्यस्यापिमज्ज्ञानान्ममस्वरूपस्यज्ञानाद्धिंसानजायतेइति ॥ २२४ ॥ अथयानिहानिजनकत याप्रसिद्धानिकर्माणितानितृतीययापंचम्याचनिर्दिशति लोकेति लोकवेदनिषिद्धेनातएवदुःष्करेणहानिंकरत्वाद्दुःखेनकर्तुंशक्येनक र्मणापिहिंसानजायतइतिपूर्वेणसंबंधः एवमुत्तरत्रापि सुवर्णस्यकर्षप्रभृतिपरिमाणपरिमितकांचनस्यस्तेयेनचौर्येण ॥ २२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रूणवधेनेतिव्याचष्टे श्रोत्रियस्येति सूत्रप्रवचनाध्यायीभ्रूणइतिबौधायनसूत्रस्यवेदाध्ययनानंतरंसूत्रभाष्याध्यायीभ्रूणसंज्ञइत्यर्थक स्यानुसारेणभ्रूणपदार्थःपूर्वार्द्धेनोक्तः श्रोत्रियस्यद्विजेंद्रस्यवधेनेत्यन्वयः द्विजेंद्रत्वेहेतुगर्भविशेषणं गुणोदधिसमस्येति गुणाःप्रवचनां ताविद्याः वाशब्दोभिन्नक्रमोगर्भस्येत्यस्याऽग्रेबोध्यः अविज्ञातस्येत्यपिगर्भविशेषणमध्याहार्यं हत्वागर्भमविज्ञातमेतदेवव्रतंचरेदितिम नूक्त्यनुसारि तथाचसप्तममासादौपूर्णदेहोपियोगर्भोऽविज्ञातोलक्षणैःपुंस्त्वादिनानिर्णेतुमशक्यस्तस्यवधेनचेत्यर्थः गर्भोभ्रूणइत्यमरः भ्रू णोगर्भिण्यांश्रोत्रियद्विजे गर्भेऽर्भकेचेतिहैमः अथाततायिनमायांतमपिवेदांतपारगं जिघांसंतंजिघांसीतनतेनभ्रूणहाभवेदितिव्यासेन ब्राह्मणेवेदांतपारगेभ्रूणपदप्रयोगमालक्ष्याह राज्याद्यर्हस्यधीमतोवावधेनेति सर्वस्वंब्राह्मणोर्हतीतिवचनात्ब्रह्मविदोराज्याद्यर्पणार्हत्वम्

श्रोत्रियस्यद्विजेंद्रस्यगुणोदधिसमस्यवा ॥ पूर्णदेहस्यगर्भस्यराज्याद्यर्हस्यधीमतः ॥ स्वकीयस्यचवातस्माद्दु
ष्करेणवधेनवा ॥ २२६ ॥ विप्रस्यवात्रिवर्णस्यसुरापानोत्थितेनवा ॥ निजांवाजननींकामाद्गाम्यधर्मसमा
गमात् ॥ २२७ ॥ संवत्सरंवासंसर्गाद्ब्रह्महत्यादिकारिभिः ॥ चतुर्भिःकर्मचंडालैःपतितैःपापहेतुभिः ॥ २२८ ॥

स्वकीयस्यसुहृदइत्यर्थः कृत्वाचैवसुहृद्वधमितिमनुनासुहृद्वधस्यब्रह्महत्यासाम्याभिधानात् तस्माल्लोकवेदविरोधाद्दुःशकेनवधेनवेति त थाचसुहृदपिभ्रूणपदस्यगौणोर्थइतिभावः ॥ २२६ ॥ श्रुत्युक्तपापानामुपलक्षणतामभिप्रेत्याह विप्रस्येति विप्रस्यसुरापानोत्थितेनपा पेन यस्यकायगतंब्रह्ममद्येनाप्लाव्यतेसकृत् तस्यव्यपैतिब्राह्मण्यंशूद्रत्वंचसगच्छतीतिमनूक्तेः त्रिवर्णस्यवातेनपापेन सुरावैमलमाख्यातं पाप्माचमलमुच्यते तस्माद्ब्राह्मणराजन्यौवैश्यश्चनसुरांपिबेदितिमनूक्तेः गुरुतल्पगतामाह निजामिति निजांजननींप्रतिकामाद्धेतोर्ग्रा म्यधर्मरूपसमागमात्पापेनवेतिपूर्ववत्संबंधः ॥ २२७ ॥ पंचमंतत्संसर्गरूपंमहापापमाह संवत्सरमिति ब्रह्महत्यादिकारिभिश्चतुर्भिर्ब्रह्म हसुरापस्तेनगुरुतल्पगरूपैःकर्मणाचंडालैरतएवपतितैःस्वसंसर्गिणांचपापहेतुभिरेतैःसहसंवत्सरंसंवत्सरपर्यंतंसंसर्गात्एकशय्यासनादिरू पात् ॥ २२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमन्यैरिति एवमन्यैरपिपातकैर्महापापसमतयोक्तैःशरणागतघातादिभिः उपपातकैर्गोवधादिभिः संकरीकरणैः खराश्वोष्ट्रमृगेभाना मजाविकवधस्तथा संकरीकरणंज्ञेयंमीनाहिमहिषस्यचेत्युक्तैः आदिनाजातिभ्रंशकरादिग्रहः यथा ब्राह्मणस्यरुजःकृत्याघ्रातिरघ्रेयमद्ययोः जैह्म्यंपुंसिचमैथुन्यंजातिभ्रंशकरंस्मृतम् निंदितेभ्योधनादानंवाणिज्यंशूद्रसेवनम् अपात्रीकरणंज्ञेयमसभ्यस्यचभाषणमिति कृमिकीटवयोहत्यामद्यानुगतभोजनम् फलैधःकुसुमस्तेयमधैर्यंचमलावहमिति अघ्रेयंलशुनादि जैह्म्यंकौटिल्यं मद्यानुगतंमद्येनसहैकपिटकादावानीतमिति ॥ २२९ ॥ कंडिकाशेषंव्याकरोति अपिवेति ममेंद्रस्ययआत्मास्वरूपमद्वितीयात्मरूपंतस्यमदात्मतयासएवाहमस्मीत्याकारेणविज्ञानमनुभवस्तेनसंपन्नस्यब्रह्मविदःपापेच्छोरपिपापंचिकीर्षोरपिमुखात्कांतिःश्रुतिगतनीलपदेनोक्तानापैतिनदूरीभवति इतरेषांतुपापाचरणेमुखकान्तिर्दूरीभवतीतिप्रत्यक्षइवब्रह्मविद्योत्कर्षइतिभावः ॥ २३० ॥ उक्तसूचितंसर्वमान्यतालक्षणंप्रभावांतरमप्या

एवमन्यैर्महाक्रूरैःपातकैश्चोपपातकैः ॥ संकरीकरणाद्यैश्चलोकद्वयविनिंदितैः ॥ २२९ ॥ अपिवाप्यात्मविज्ञानसंपन्नस्यममात्मनः ॥ पापेच्छोरपिनापैतिमुखकांतिःकदाचन ॥ २३० ॥ राजवंध्यादयस्तद्वज्ज्ञात्वास्यैतांधियंसदा ॥ पापेच्छानिरतंतद्वन्महापापौघकारिणं ॥ २३१ ॥ नत्यजंतिनभिंदंतिनैवशिक्षांचकुर्वते ॥ प्रत्युताधिकमेवैनमाद्रियंतेतिविस्मिताः ॥ २३२ ॥ नहिसर्वात्मविज्ञातुरन्यःकश्चनविद्यते ॥ नानिष्टंकुरुतेस्वस्यस्वात्माकस्यापिदेहिनः ॥ राजादीनामयंस्वात्मातेनास्मिन्नुचितंत्विदम् ॥ २३३ ॥ एवंहिततमंज्ञानंश्रुत्वाशक्रस्यधीमतः ॥ इंगितैरेवपप्रच्छशक्रंसोपिप्रतर्दनः ॥ २३४ ॥

ह राजेतिद्वाभ्यां राजादयोवंध्वादयश्चास्यविदुषःएतांसाम्येस्थितांधियंदृष्ट्वातंविद्वांसंपापेच्छानिरतंतथामहापापकारिणमपिनत्यजंतिनवहिष्कुर्वंतिनभिंदंतिभेदंशारीरंदंडंनप्रापयंतिनैवशिक्षांप्रकुर्वते वाचापीतिशेषः प्रत्युतेत्यादिस्फुटम् ॥ २३१ ॥ २३२ ॥ तस्यहदेवाश्वनाभूत्याईशतेआत्माहितेषांभवतीतिश्रुतिमनुरुध्योक्तार्थोपपत्तिमाह नहीति सर्वात्मविदपेक्षयाभेदःकुत्रापिवस्तुनिनास्ति तस्यसर्वात्मत्वात् तथाकस्यापिदेहिनःस्वात्मास्वस्यात्मनोनिष्टंनकुरुतेइतिप्रसिद्धं तथाचायंविद्वान्राजादीनांसर्वेषामात्मासंपन्नस्तेनात्मत्वेनास्मिन्विदुषिइदंअपकाराकरणंआदरातिशयकरणंचसर्वेषामुचितमिति ॥ २३३ ॥ अथद्वितीयांकंडिकांव्याख्यातुंभूमिकामाह एवंहिततममित्यादिनाप्राणोभवाम्यहंराजन्नित्यतःपूर्वतनेनपंथेन शक्रस्यमुखादितिशेषः इंगितानिअभिप्रायसूचकचेष्टारूपाणितैः ॥ २३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इंगितमभिनयति विस्मयेति विस्मयेनविस्मयकार्येणविकासादिनाआविष्टंव्याप्तंवदनंयस्यसतथासप्रतर्दनःसाधुकृतार्थोस्मीत्याकारकंअसाधुविरोधसंशयाद्यावेदकंवावाक्यंतमिंद्रंप्रतिनोक्तवानिति एतेनइष्टानिष्टयोर्दर्शनेनजन्याकर्तव्यानवधारणात्मिकाजडतासूचिता तदुक्तं अप्रतिपत्तिर्जडतास्यादिष्टानिष्टदर्शनश्रुतिभिः अनिमिषनयननिरीक्षणतूर्णींभावादयस्तत्रेति प्रकृतेइष्टदर्शनंश्रुतप्रभावतत्त्वज्ञानंदानेइंद्रस्यवरेणवशीकृतत्वालोचनं अनिष्टदर्शनंचमामेवेतिवाक्यगतास्मच्छब्दस्यानेकार्थतालोचनजन्यसंशयस्याभिलापेबुद्धिमांद्यप्रादुर्भावात्मकदोषालोचनरूपं तथाचजडतायाइंगितैःप्रकटनेनसंशयोपींद्रायप्रतर्दनेनप्रकाशितः अयमाशयउत्तरश्लोकैःस्फुटीभविष्यतीति॥ १२५॥ तंस्तब्धमिति स्तब्धेनजडेनसदृशं जडतालिंगानांकृत्रिमत्वादितिभावः इदंवक्ष्यमाणं॥१२६॥ इंद्रविचारमभिनयति

विस्मयाविष्टवदनःसम्यगुत्फुल्ललोचनः॥ नोक्तवान्प्रतिवाक्यंतंसशक्रंसाध्वसाधुवा॥ २३५॥ तंस्तब्धसदृशं दृष्ट्वासर्वज्ञःसशचीपतिः॥ इतितज्ज्ञःस्वमनसाव्यचिंतयदिदंप्रभुः॥ २३६॥ प्रतर्दनःस्वमनसाचिंतयत्त्येवमत्रहि॥ इंद्रेणस्वात्मविज्ञानमुक्तंहिततमंस्फुटम्॥ २३७॥ तत्स्तुतिंकुर्वतास्वस्यपापास्पर्शश्चदर्शितः॥ दृष्टांतायथामेस्याद्विश्वासोस्मिन्नलौकिके॥ २३८॥ तथापिविषयेमेऽस्यसंदेहोवर्ततेधुना॥ मांजानीहीतियत्प्रोक्तंमत्यमिंद्रेणबोधनम्॥ तत्रास्मच्छब्दबोधाभ्यामर्थःकोविषयीकृतः॥ २३९॥ इंद्रोयंदेवतारूपःसहस्राक्षःपुरोमम॥ वज्रपाणिःशचीनाथःसुरार्चितपदांबुजः॥ २४०॥

प्रतर्दनइत्यादिना अयंप्रतर्दनःएवंवक्ष्यमाणप्रकारेणस्वमनसाचिंतयति अथप्रतर्दनचिंतामिंद्रोभिनयति इंद्रेणेत्यादिना ॥२३७॥ तत्स्तुतिमिति तस्यात्मविज्ञानस्यस्तुतिंकुर्वताऽनेनेंद्रेणस्वस्यात्मनःइंद्रस्यपापासंबंधोदर्शितः कस्मै दृष्टांतायतत्रदृष्टांतंवक्तुं यथायेनसदृष्टांततयाभिधानरूपेणप्रकारेणमेप्रतर्दनस्यास्मिंस्तत्त्वज्ञानफलेऽलौकिकेलोकाप्रसिद्धेविश्वासोभवेदिति॥ २३८ ॥ तथापीति तथापिज्ञानस्यहिततमत्वादौनिर्णीतेपिअस्येंद्रप्रोक्तज्ञानस्यविषयेमेसंशयोस्तिकिंविषयकमिदंज्ञानमेतादृशफलकमिति एतदेवस्फुटयति मामिति बोधनंज्ञानजनकंमांजानीहीत्याकारकंवाक्यंयदिंद्रेणमह्यंप्रतर्दनायप्रोक्तंतत्रवाक्येमामितिशब्देनतज्जन्यबोधेनचकोवार्थोविषयीकृतोभवेत् किंदेवताविग्रहोवातदभिमानीजीवोवातत्साक्षीवेति॥२३९॥एतंसंशयमभिनयति इंद्रोयमितिद्वाभ्याम् ममपुरःस्थितइतिशेषः ॥२४०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमयमिति अयंदेवताविग्रहोवास्मत्पदार्थःकिवान्यः बाह्यव्यावर्तनायान्यपदार्थविशेषणंदेहांतरात्मेति देहांतरआत्मास्वरूपंयस्यसतथा अन्यत्वपक्षेपिकोटिद्वयंदर्शयति.सोपीति सःदेहांतरोऽन्योपिकीदृशः किंवागादिकरणविशिष्टःकिंवाकेवलइति तत्राद्याकोटिरस्मच्छब्दस्यवक्तावेत्यनेनोक्ता द्वितीयातुततोन्योवेति ततोविशिष्टात् अन्यस्यसंभावनार्थैविशेषणंबोधनइति नंद्यादित्वात्कर्तरिल्युः प्रकाशकइत्यर्थः जडोपाधिविशिष्टेनस्वप्रकाशनासंभवात्ततोन्योपिकश्चित्प्रकाशकःसंभाव्यतइतिभावः एवंचोक्तत्रिकोटिकःसंशयःफलितः ॥२४१॥इत्यादीति इत्यादिभिश्चिंताभिर्व्याकुलितंव्याकुलतांनीतंमानसंयस्यसतथा आदिपदेनसंशयकोटिष्वाद्ययोःपरिच्छिन्नज्ञानादपरिच्छिन्नफलानुपपत्तिरंत्यायांकोटौज्ञानविषयत्वानुपपत्तिरित्यादिदोषचिंताग्रहः संशयप्रकाशनाप्रकाशनयोर्गुणदोषचिंतायाश्चग्रहः एतादृशोप्ययंप्रतर्दनोमांप्रतिनकिंचिद्वक्ति तत्रहेतुर्धीधनत्वेनेति धीरेवधनंधनवत्परिपाल्याइष्टसाधनंवायस्यसतथातस्यभावस्तत्त्वंते

किमयंवास्यदेहांतरात्मान्यःसोपिकीदृशः ॥ अस्मच्छब्दस्यवक्तावाततोन्योवापिबोधनः ॥ २४१ ॥ इत्यादिचिंताकुलितमानसोयंप्रतर्दनः ॥ धीधनत्वेनमांनैववक्तिकिंचिन्नराधिपः ॥ २४२ ॥ इंद्रोमदर्थंवृतवान्वरंहिततमंस्वयम् ॥ मयोक्तस्तेनमेनात्रवक्तव्यंविद्यतेक्वचित् ॥ २४३ ॥ इतिसंचिंत्यराजायंनपृच्छतिनभाषते ॥ कृतार्थइत्यसंपन्नविज्ञानत्वात्प्रतर्दनः ॥ २४४ ॥ ततोमयैववक्तव्यमपृष्टेनापिभूभुजे ॥ यावदस्यनसंदेहोबोधेहिततमेभवेत् ॥ २४५ ॥

नतथाचबुद्धिमतांबुध्यपकर्षसूचिकाक्रियानरोचतेइतिभावः ॥२४२॥ययाबुध्याप्रतर्दनेनमौनंकृतंतामिंद्रोनुसंदधाति इंद्रइति मयाउक्तस्त्वमेववृणीष्वेतिप्रयुक्तःसन्निंद्रःस्वयमेवमदर्थंहिततमंवरंवृतवान्प्रतिश्रुत्यप्रकाशितवान्इतियावत् तेनइंद्रस्यवरप्रदानवशीकृतत्वेनअत्रसंदिग्धेपिविषयेमेममवक्तव्यंप्रष्टव्यंनास्ति स्वयमेवसत्यसंरक्षणायसंशयमप्यपाकरिष्यतीतिभावः ॥ २४३॥ इतिसंचिंत्येति इतिसंचिंत्यायंप्रतर्दनोराजात्रनपृच्छतिनवाकृतार्थोस्मीतिभाषते एवमभाषणेहेतुः असंपन्नविज्ञानत्वादिति असंपन्नमवधारणरूपतालक्षणसंपत्तिमप्राप्तंज्ञानंयस्यसतथातत्त्वात् तथाचधीधनःसन्नसंपन्नेज्ञानेकथंकृतार्थोस्मीतिब्रूयादितिभावः ॥२४४ ॥ एवंप्रतर्दनाभिप्रायमिंद्रोवधार्यस्वकर्त्तव्यमालोचयति ततइति ततएतन्मौनाभिप्रायस्यज्ञातत्वात्अपृष्टेनापिमयैवास्मैभूभुजेराज्ञेवक्तव्यं निरूपणावधिमाह यावदिति अस्यराज्ञोबोधेअसंदेहःसंदेहाभावोयावद्भवेत्तावद्वक्तव्यमेवेति ॥ २४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्तव्यत्वेपिकिंसाक्षादयमात्मावक्तव्यःकिंवाउपाधिद्वारातत्रनाद्योऽसंभवादित्याह आनंदात्मेति अयमात्माऽलौकिकत्वेनावाङ्मनस गोचरत्वान्मयानसाक्षाद्वक्तुंशक्योनचाऽनेनज्ञातुंशक्यइति ॥ २४६ ॥ द्वितीयेपक्षेप्राप्तेविप्रकृष्टमुपाध्यंतरमुपेक्ष्यतत्प्रत्यासन्नौप्राणप्रज्ञारूपोपाधीएवालंब्यैनंबोधयामीत्याह ततोज्ञानेति ज्ञानशक्तिक्रियाशक्तिरूपेलौकिकेलोकप्रसिद्धेचप्राणप्रज्ञेउपाधीआश्रित्यालौकिकंस्वात्मानमस्मैबोधयामीत्यन्वयः ॥ २४७ ॥ प्राणप्रज्ञयोरेवोपन्यासेहेतुमुपाध्यंतराद्विशेषंदर्शयति प्राणप्रज्ञेइति एतेप्राणप्रज्ञेद्वेविहायदेहादिकंनतिष्ठतिप्राणप्रज्ञयोःसत्वेचतिष्ठतीतिस्पष्टमन्वयव्यतिरेकाभ्यामितरसत्वासत्वप्रयोजकत्वंप्राणप्रज्ञयोरित्यर्थः अयंभावः आत्मवुबोधयिषयासउपाधिरुपन्यासमर्हतियत्रोपन्यस्यमानेबोधसौकर्यंलाघवंचभवेत् भवतिचान्वयव्यतिरेकाभ्यामितरसत्वासत्व

आनंदात्मामयानायमवाङ्मनसगोचरः ॥ वक्तुंशक्योनचानेनज्ञातुमप्यत्यलौकिकः ॥ २४६ ॥ ततोज्ञानक्रियाशक्तीप्राणप्रज्ञेहिलौकिके ॥ आश्रित्याहंस्वमात्मानंकथयिष्याम्यलौकिकं ॥ २४७॥ प्राणप्रज्ञेविहायैतेनदेहादीहतिष्ठति ॥ क्रियाशक्तिस्तथाप्राणोनतिष्ठतिधियंविना॥ २४८॥ स्थावरेषुयतोनैषदृश्यतेबुद्धिवर्जनात् ॥ प्राणंविनातथाबुद्धिर्नदृष्टाहिघटादिषु ॥ २४९ ॥

प्रयोजकत्वरूपात्मलक्षणेनप्राणप्रज्ञयोरात्मबुद्धाववतारितायांतयोःप्रवर्तकेमुख्यात्मनिपरिचयःप्राणप्रज्ञापदयोःसाक्षात्प्रवर्तकतयासन्निहितेलक्षणायांचलाघवं इतरोपाध्युपन्यासेतुतदंतर्गतप्राणादिद्वारात्मपरिचयःपरंपरासंबंधरूपलक्षणागौरवंचस्यादिति ननुप्राणप्रज्ञयोःपरस्परव्यतिरेकेपिसत्वात्कथमुक्तमात्मलक्षणमनयोरवतार्यतइत्याशंक्यतयोरव्यतिरेकंदर्शयति क्रियेत्यादिना धियंप्रज्ञां ॥ २४८ ॥ यत्रप्रज्ञाभावस्तत्रप्राणाभावइत्यत्रदृष्टांतमाह स्थावरेष्विति नदृश्यतेप्रत्यक्षोनभवति प्ररोहादिनातत्रप्राणानुमानेतुलतानामुच्चदेशान्वेषणादिलिंगेनप्रज्ञानुमानमप्यविशिष्टं सुप्तौतुप्रज्ञायाःसूक्ष्मरूपेणावस्थानमेवेतिभावः यत्रप्राणाभावस्तत्रप्रज्ञाभावइतिसदृष्टांतमाह प्राणमिति ॥ २४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणप्रज्ञयोःस्वप्रवर्तकमुख्यात्मपरिचयेहेतुतांदर्शयति बुद्धिश्चेति बुद्धिःस्वात्मनःस्वस्वरूपात्परंभिन्नमपेक्षतेजडरूपत्वात् यथास्तंभःस्वभानस्थितिप्रवृत्तीनांसिद्धयेपरंदीपादिकमपेक्षतेतद्वदित्यनुमानंपादत्रयार्थः प्रकाशमितिविशेषणंतुप्रकृताभिप्रायं ततःपरापेक्षत्वात्प्राणेनसदृशीति तथाचप्राणप्रज्ञयोरुक्ततर्केणात्मनिपरिचयहेतुताप्रसिद्धैवेतिभावः॥ २५० ॥ अथलक्षणालाघवंस्फुटयितुंप्राणप्रज्ञाशब्दयोर्मुख्यार्थप्रकृतेमुख्यार्थबाधंचदर्शयति अंतर्वायुरितिचतुर्भिः शरीरांतर्गतोवायुःप्रकर्षेणचलतितस्मात्प्राणइत्येतस्यांतर्वायोर्नाम प्रकर्षेणअनितिचलतीत्यर्थसमन्वयात् यस्माच्चधीःप्रकर्षेणजानातितस्मात्प्रज्ञेत्येतस्यानामेति कीदृशंनाम देहिनामात्मज्ञानहीनानामपिप्रसिद्धमितिशेषः ॥२५१॥ वस्तुतस्तुमुख्यार्थोऽनयोर्बाधितइत्यभिप्रेत्यप्राणशब्दार्थस्यबाधंतावदाह वस्तुतइति वस्तुतोजडानांस्वयमेवच

बुद्धिश्चजडरूपाहिप्रकाशंस्वात्मनःपरम्॥ अपेक्षतेयथास्तम्भःप्राणेनसदृशीततः॥ २५० ॥ अंतर्वायुःप्रचलतिप्रजानातितथैवधीः ॥ प्राणःप्रज्ञेतिवैतस्मादेतयोर्नामदेहिनाम् ॥ २५१ ॥ वस्तुतश्चलनंनैवजडानांदृश्यतेक्वचित्॥ रथादयोयथानैवदृश्यंतेस्वयमेवहि॥ २५२ ॥ अश्वादींश्चेतनान्हित्वाचलंतःकर्हिचित्क्वचित्॥ प्रकर्षस्तत्रकेनस्यान्मूलाभावात्तुहेतुतः ॥ २५३ ॥ ज्ञप्तिश्चनजडेक्वापिदृश्यतेहिघटादिके ॥ प्रकर्षश्चजडेज्ञप्तेर्दूरापास्तःसदैवहि॥ २५४ ॥

लनंनदृश्यतेयथारथादयोजडाअश्वादींश्चेतनान्हित्वास्वयमेवचलंतःसंतःकर्हिचित्क्वचिच्चनदृश्यंते एवंसतिप्राणशब्दांतर्गतान्धात्वर्थश्चलनमेवजडेंतर्वायौनोपपद्यतेतर्हितत्रचलनेप्रकर्षःप्रशब्दार्थःकेनहेतुनास्यादुपपद्येतअपितुनस्यादेव कस्मान्मूलाभावरूपाद्धेतोःयथामूलधनेसतितस्यवृद्धिरूपःप्रकर्षोपिसंभाव्येतनेतरथातथाचलनसामान्यरूपमूलस्याभावात्प्रकर्षोवृद्धिसमोदुर्वचइतिभावः मूलाभावत्वहेतुतइतिपाठेप्रकर्षोवृद्धिसमःमूलेनसंबध्येतअंतर्वायौतुमूलाभावत्वंमूलसमस्यचलनस्यसोपपत्तिकस्याभावत्वंवर्त्ततेऽभावस्याधिकरणात्मकत्वाभ्युपगमात् तस्माद्धेतोरित्यर्थः ॥२५२ ॥२५३ ॥ प्रज्ञापदार्थबाधंबुद्धौदर्शयति ज्ञप्तिश्चेति प्रज्ञापदार्थांतर्गतज्ञाधात्वर्थोज्ञप्तिःप्रकाशोघटादिकेबुद्धिपर्यंतेजडेबाधितःप्रकर्षस्तुनितरामित्यर्थः ॥ २५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माल्लक्षणयाप्राणशब्दआत्मनिपर्यवस्यतीत्याह तस्मादिति तस्माद्यस्यचेतनस्यसन्निधौसतिअस्यप्रत्यक्षाद्युपस्थापितस्यजडस्यदेहेंद्रियादिरूपस्यतथावायोश्चइदंचलनंप्रकर्षेणजायतेसचेतनएवप्राणपदार्थइत्यन्वयः प्रकर्षेणानयतिचेष्टयतेइतिव्युत्पत्तेः प्रकर्षश्चचालनस्यानायाससाध्यत्वं यद्वाप्रकृष्टचलनशालिषुशक्तःप्राणशब्दःप्रयोजकेगौणइति ॥ २५५ ॥ प्रज्ञापदस्यापितथात्वमाह प्रकाशयतीति यःसर्वंप्रकाशयतिसचेतनःज्ञप्तिःप्रज्ञापदघटकज्ञाधात्वर्थोभवेत् आत्मानंयतःप्रकाशयतितस्मात्प्रकर्षेणज्ञप्तिःप्रज्ञापदार्थोभवेत् चकारएवकारार्थः सर्वंप्रकाशयतीत्यत्रहेतुः जडजातप्रकाशनादिति जडजातस्यजडसामान्यस्य गौणप्रकाशोवुद्धिस्तुस्वात्मकजडमपिनप्रकाशयतीतिप्रसिद्धम् ॥२५६ ॥ आत्मानंचेत्येतदुपपादयति स्वसजातीति आत्मनःसजातीयादिभेदराहित्येनपरस्यप्रकाश्यस्यदुर्वचत्वा

तस्माद्यत्संनिधावस्यजडस्येदंविजायते॥ प्रकर्षेणतथावायोःसप्राणश्चेतनोभवेत्॥ २५५॥ प्रकाशयतियः सर्वंसज्ज्ञप्तिश्चेतनःस्मृतः॥ आत्मानंचप्रकर्षेणजडजातप्रकाशनात्॥ २५६॥ स्वसजातिविजात्युत्थभेदाभावेनहेतुना॥ स्वप्रकाशेनचात्मानमात्माजानातिनापरः॥ २५७॥ प्राणप्रज्ञाभिधेयोहमानंदात्मानचापरः॥ ततएवेतिसंचिंत्यशक्रोराजानमुक्तवान्॥ २५८॥ प्राणोभवाम्यहंराजन्क्रियायाःकारणंपरं॥ प्रज्ञावपुःस्वप्रकाशःसर्वभेदविवर्जितः॥ २५९॥ तंमांज्ञानक्रियाहेतुंभेदशून्यंस्वयंप्रभुं॥ आयुष्करंस्वयंमृत्युशून्यंत्वदुपदेशकम्॥ २६०॥

त्स्वप्रकाशेनयदात्माप्रकाशयतितदात्मानमेवप्रकाशयति एतादृशश्चान्योनास्तीत्यर्थः ॥ २५७ ॥ फलितमाह प्राणेति अभिधेयःप्रतिपाद्यः ततउक्तानुपपत्तेः इतिसंचित्यमनसिनिधायद्वितीयकंडिकाव्याख्यामारभते शक्रइत्यादिना शक्रइंद्रः राजानंप्रतर्दनम् ॥२५८॥ प्राणोभवामीति परंप्रकृष्टंक्रियायाःयतःकारणमस्मिततःप्राणोस्मि प्रज्ञावपुःप्रज्ञारूपोप्यस्मि यतःस्वप्रकाशोभेदवर्जितश्चेति ॥२५९॥ तंमामिति तंमां तत्पदार्थमभिनयति ज्ञानक्रियाहेतुंज्ञानानांक्रियाणांचसन्निधिमात्रेणसाधकंभेदशून्यंस्वयंप्रभंचेति आयुरितिविशेषणस्योक्तात्मपरत्वाद्योर्थस्तमाह आयुष्करमिति जीवनप्रयोजकममृतपदार्थमाह स्वयंमृत्युशून्यमिति मामितिपदार्थमाह त्वदुपदेशकं त्वदुपदेशकेनानेनदेवतारूपेणोपलक्षितम् ॥ २६० ॥ ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतादृशंमामितिअनेनप्रकारेणउपास्स्वउपासनावद्विजातीयप्रत्ययतिरस्कारेणसजातीप्रत्ययधारागोचरंकुर्विंतिव्याकुर्वन्नाह प्रत्ययानिति मयोक्तंप्रज्ञाप्राणाऽऽयुरमृतपदैःप्रतिपादितंमद्रूपंमुहुर्विचार्यअपरान्विजातीयगोचरान्प्रत्ययान्बोधान्हित्वामदेकविषयैर्मानसेवर्त्तमानैर्बोधैर्विद्धिअपरोक्षंकुरु कथं घटवत् यथाघटोधारावाहिकज्ञानविषयःक्रियतेतद्वदिति तत्परोभवेतियावत् एवंश्लोकत्रयेणोपास्स्वेत्यन्तवाक्यस्यप्राणादिपदलक्षणयालभ्यइन्द्रविवक्षितोर्थउक्तः शक्तिलभ्यस्तुप्राणप्रज्ञात्माऽऽयुरमृतमस्मीत्याकारेणोपास्स्वेत्याकारएव उपाध्युपन्यासस्यापिलक्ष्यप्राप्तिसाधनतायाउक्तेरित्यवधेयम् ॥ २६१ ॥ पूर्ववाक्यंदृष्ट्वाइत्थंसंदिह्यते किंप्राणप्रज्ञायुरमृतानिसमप्रधानान्यहंपदार्थेनान्वितानिभवंतिकिंवाप्राणपदार्थेविशेषणीभूयइतराणितत्रान्वयंतीति प्राणपदार्थेविशेषणीभावेपिकीदृशीविशेषणताकिंभेदघटितामनोब्रह्मेत्युपासीतेत्यत्रमनसितद्भिन्नस्यब्रह्मणइवकिंवाभेदेनब्रह्मणिसत्यत्वादेरिवेत्येतत्संशयवारकंप्राणोवाआयुरित्यादिस्वर्गेलोकेइत्यंतंवाक्यंव्याचष्टे आयुरित्याद्यष्टभिः आयुरमृतमित्याकारकंयद्विशेषणद्वयमुक्तंतद्विशेषणद्वयंपुरुषाद्दंडोयथाभिन्नस्तथाऽऽयुः

प्रत्ययानपरान्हित्वाविचार्योक्तंमयामुहुः॥ मदेकविषयैर्बोधैर्घटवद्विद्धिमानसे ॥ २६१ ॥ आयुस्तथामृतंयत्तेद्वयमुक्तंविशेषणम् ॥ नतत्प्राणाद्विभिन्नंत्वंजानीथादंडवन्नरात्॥ २६२ ॥ यथाकाशोनभःप्रोक्तंनभोप्याकाशमेवहि॥ तथायुरमृतंप्राणःप्राणआयुरनश्वरम्॥ २६३ ॥ नचात्रव्यर्थताशंक्यापुनरुक्तत्वहेतुतः॥ यतोजीवतिलोकेस्मिन्प्राणेनप्राणभृज्जनः॥ २६४॥

प्राणाद्भिन्नंनभवतिकिंत्वभिन्नमेवेति तथाचप्राणआयुरमृतापेक्षयाप्रधानंअभेदेनचविशेषणतेतिसिद्धं ॥ २६२ ॥ अभेदंपर्यायशब्दार्थदृष्टांतेनस्फुटयति यथेति यथाकाशनभःपदार्थयोरभेदस्तथायुरमृतपदार्थयोःप्राणशब्दार्थेनाभेदइति अनश्वरममृतम् ॥ २६३ ॥ पर्यायद्वयवदऽन्यतमवैयर्थ्यमाशंक्यसत्यज्ञानादिशब्दवत्प्रवृत्तिनिमित्तभेदान्नैवमित्याह नचात्रेति अत्रआयुरमृतपदयोःप्राणपदेनसहप्रयोगेपुनरुक्तत्वरूपाद्धेतोर्व्यर्थतानशंक्या ताभ्यामर्थविशेषावगतेरितिशेषः कथमितिचेच्छृणु यतःप्राणभृज्जनःप्राणेनैवशरीरेस्थितेनजीवतीत्युच्यतेजीवनप्रयोजकश्चभावआयुःपदार्थोलोकेपितथाशरीरपातानंतरंस्वर्गरूपंमोक्षरूपंवामुष्मिकफलममृतंप्राणेनैवजनोव्रजेत् विद्ययामृतमश्नुते अपामसोमममृताअभूमेत्युक्तंकर्मविद्ययोःफलंदेवभावोह्यमृतंसचप्राणान्नातिरिच्यतेइति ततएतादृशविशेषबोधकत्वादमृतायुःशब्दाभ्यांप्राणउक्तइति ॥ २६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २६५ ॥ प्रज्ञारूपविशेषणेतुप्राणेनसमप्रधानभावरूपंविशेषमाह प्रज्ञेति प्रज्ञारूपंविशेषणंतुप्राणभेदविवर्जितेमय्येवसाक्षादन्वितमितिशेषः प्राणभेदोविवर्जितोयेनसतथातस्मिन् यथाप्राणःक्रियाशक्तिरुपाधिरभेदेनमयांगीकृतस्तथाप्रज्ञापीत्यर्थः प्रज्ञायाविज्ञानशक्तितयास्वरूपलाभप्रयोजकता तत्रहेतुतयाह यतइति यतोहंप्रज्ञयापिप्राप्योभवामि कथमितिचेच्छृणु अहंप्रज्ञयैवएतादृशंसद्वपुःसत्यंव्यावहारिकंअसद्वपुःसंकल्पमात्रशरीरंप्रातिभासिकंवावेद्मि तथाचसापिकरणतयामामुपलक्षयतीतिभावः ॥ २६६ ॥ प्राणोपाधेरायूरूपेणामृतरूपेणचोपासनस्यफलमाह उपास्तेपीति .योमांप्राणमायुरितिरूपेणोपास्तेसशतंसंवत्सरंजीवति तथामृतमितिरूपेणयःप्राणमुपास्तेसोऽविच्युतमक्षयंश्रुतावक्षितिशब्देनोक्तंस्वर्गलोकंगच्छेदिति उभयेनविशेषणद्वयेनविशिष्टात्प्राणोपासनाददउक्तंशतसंवत्सरंजीवनस्वर्गलोकरूपंफलद्वयंभवेदिति ॥ २६७ ॥ २६८ ॥ यदाप्राणविशिष्टस्यममोक्तोपासनादीदृशफलंतदायदर्थमुपाधिरुपन्यस्तस्तद्विज्ञानफलंकिमुवाच्यमित्याह किंपुनरिति अत्रशुद्धविज्ञाने ॥ २६९ ॥ अथतद्धैकइत्याद्यनुप्राणंतीत्यंतंवाक्यंव्याकरोति एवमित्याद्यष्टादशभिः एवंप्राणोस्मीत्येकवचनप्रयोगादिभिःनिजेरूपेमुख्यप्राणात्मकतयावर्णितेसतितस्मिन्प्राणस्यैवनिजरूपतयाकथनेकारणंप्रयोजकंप्रतर्दनःपप्रच्छ यतइंगितानिअभिप्रायसूचिकाःक्रियाःप्रयोक्तुंजानातीति ॥ २७० ॥ प्रतर्दनप्रश्नमभिनयति भगवन्नित्यादिना एकस्यप्राणस्यप्राधान्यपरंभवद्वाक्यंश्रुत्वाप्राणानामनियतप्राधान्यपरंमुनिवाक्यंस्मृत्वाचविप्रतिपत्तेःसंशयोभवतिकुत्रात्मबुद्धिःकर्त्तव्येति ॥ २७१ ॥

तथाशरीरसंपातेस्वर्गमोक्षामृतंव्रजेत्॥ ततोऽमृतायुःशब्दाभ्यांप्राणआत्मामयेरितः॥ २६५॥ प्रज्ञाविशेषणंचैवप्राणभेदविवर्जिते॥ यतोहंप्रज्ञयाप्राप्योवेद्म्येतत्सदसद्वपुः॥ २६६॥ उपास्तेपिचमांयोहिप्राणमायुःसजीवति॥ शतसंवत्सरंशाजन्नमृतंचतथैवहि॥ २६७॥ यउपास्तेसगच्छेद्धिस्वर्गलोकमविच्युतम्॥ उभयोपासनात्तद्वत्फलद्वयमदोभवेत्॥ २६८॥ किंपुनर्निर्विशेषंयत्सर्वाध्यासविवर्जितम्॥ विजानातिप्रयात्यत्रसआयुरमृतंपुमान्॥ २६९॥ एवंशक्रेणकथितेप्राणरूपेनिजेसति॥ पप्रच्छकारणंतस्मिन्निंगितज्ञःप्रतर्दनः॥ २७०॥ भगवन्संशयःकश्चिन्ममचेतसिवर्तते॥ मुनीनांवचनंस्मृत्वावाक्यंश्रुत्वातवापिहि॥ २७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुनिवाक्यमवतारयति केचिदिति ॥ २७२ ॥ तद्वाक्यमभिनयति प्राणेत्यादिचतुर्भिः सप्राणानांप्राणैरंतर्वायुभिःसहितानांसर्वेषामिंद्रियाणांसमःसाधारणोयंप्राणशब्दः नत्वन्यतमस्यैववाचकइत्यर्थः प्रकर्षेणप्रधानीभावेनानितिस्वव्यापारंकुरुतेइतियोगार्थस्यसर्वत्राविशेषणादितिभावः अविशेषमेवदर्शयति नचैतेषामिति॥२७३॥.एकस्यैवप्रधानतेतिनियमाभावेउपपत्तिमाह एकतामिति वाचोनामकार्यंचक्षुषोदर्शनंकार्यमित्येवंनामादिकार्यरूपेणभिन्नाअपिवागाद्याःस्वस्वकार्येएकतामेकभावंश्रुतावेकभूयपदेनोक्तांप्रामुवंति दृष्टांतयति ग्रामइति कार्यार्थेएकस्यविवाहादिकार्यार्थेइयुःप्रामुयुः ॥ २७४ ॥ अत्रैकतान्यव्यापारेस्वव्यापाराकरणरूपैवेतिदर्शयति वदंत्यामिति वाचिनामवदंत्यांसत्यांचक्षुराद्याएतेप्राणाःस्वव्यापारंनकुर्वते तथानेत्रेपश्यतिसतिअन्येनिजंव्यापारंनकुर्वतइति ॥ २७५ ॥ एवमि

केचिद्धिमुनयःशक्रसभायामागताममम॥ कदाचिदूचिरेवाक्यंप्रसंगाद्वेदवित्तमाः॥२७२॥ प्राणशब्दोहिसर्वेषामिंद्रियाणांस्मृतःसमः॥ सप्राणानांनचैतेषांनियतास्तिप्रधानता॥ २७३॥ एकतांप्रतिपद्यंतेभिन्नानामादिकार्यतः॥ ग्रामेमहाजनायद्वत्कार्यार्थेत्वेकतामियुः ॥ १७४॥ वदंत्यांनामवाच्येतेचक्षुराद्यानकुर्वते॥ व्यापारंहितथानेत्रेपश्यत्यन्येनिजंचन॥ १७५ ॥ एवंप्राणेषुसर्वेषुवरस्येवास्तिनैवहि॥ गुणप्रधानभावोयंनियतोतःसमाइमे॥ २७६॥ सर्वेसमाअनंताश्चश्रुत्यापिकथितायतः॥ तर्कतोपिनचैतेषांवैषम्यंविद्यतेक्वचित्॥ २७७॥ वाचावदन्यतःकश्चिच्चक्षुषानैवपश्यति॥ तथानेत्रेणसंपश्यन्नैववक्तिकथंचन॥ २७८ ॥ एवंप्राणेषुसर्वेषुयुगपन्नास्तिहिक्रिया॥ किंत्वेकस्मिन्नुपरतेव्यापारंकुरुतेपरः॥ २७९॥

ति वरस्ययथास्वविवाहेप्राधान्यंपरविवाहेतुतस्यैववरस्यगुणत्वंतद्वदेषांगुणप्रधानभावोनियतोनभवति फलितमाह अतइति ॥२७६ ॥ साम्येएतेसर्वएवसमाःसर्वेऽनंताइतिबृहदारण्यकश्रुतिसंवादयति सर्वइति नकेवलंश्रुत्यैवसाम्यमुक्तंकिंतुतर्कसहकृतानुभवादपितथेत्याह तर्कतइति ॥ २७७ ॥ तर्कसहकृतानुभवंस्फुटयति वाचेति क्रमेणप्राधान्यंसर्वेषामनुभूयतेइतिभावः यदिवैषम्यंस्यात्तर्हिवाग्व्यापारेगुणभूतस्यचक्षुषःस्वभावत्यागायोगात्कदाचिदपिप्राधान्यंनस्यादितितर्कः॥ २७८ ॥ एवमिति एवंवाक्चक्षुषोरिव एकस्मिन्वागादौउपरतेसमाप्तव्यापारेसतिपरस्तद्भिन्नश्चक्षुरादिः ॥ २७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वकरणव्यापारायुगपदनुभूयंतइतिशंकते वदन्निति सार्धचतुर्भिः वदन्सन्नहंनेत्रादिव्यापारंकरोमीतिचतुर्णांसंबंधः ॥ २८० ॥ ॥ २८१ ॥ विसृजेइति विसृजेविसर्गंकरोमि प्राणिमिश्वासादिक्रियांकरोमि मनसेत्युत्तरान्वयि ॥ २८२ ॥ मनसासंकल्पयामिनाम जात्यादिविशिष्टतयाजानामि चित्तेनतुसामान्यरूपेणवेद्मि धियासुखदुःखेदेहकेवर्त्तमानेविशेषरूपेणसामान्यरूपेणचवेद्मीति॥२८३॥

एकेति अनुभूयंतेइतिशेषः तथाचकथंतेषांक्रमिकप्राधान्यरूपहेतुनासाम्यमुच्यतेइतिभावः उत्तरयति एककालाभिमानोयमिति शीघ्रत्वप्रयुक्तकालाप्रतीतिमतोजायमानत्वादेककालतानिश्चयोभ्रमइत्यर्थः ॥ २८४ ॥ कालाप्रतीतिंदृष्टांतेनस्पष्टयति यथेतिद्वाभ्यां यथा

वदन्नेत्रेणपश्यामिश्रोत्रेणचशृणोम्यहम् ॥ जिघ्रामिघ्राणतस्त्वद्वत्स्पर्शनेनस्पृशामिच ॥ २८० ॥ रसनाद्रसयाम्येवपाणिभ्यामाददेतथा ॥ पद्भ्यांगच्छामिशिश्नेनतद्वदानंदयाम्यहं ॥ २८१ ॥ विसृजेपायुनातद्वत्प्राणेन प्राणिमीहच ॥ अहंकारेणचैवाहंकरोमिमनसातथा ॥ २८२ ॥ संकल्पयामिचित्तेनसामान्येनैववेद्म्यहम् ॥ सुखदुःखेधियातद्वद्विशेषेणापिदेहके ॥ २८३ ॥ एककालमिमेसर्वेव्यापाराःकरणेषुहि ॥ एककालाभिमानोयंतेषुकालाप्रतीतितः ॥ २८४ ॥ यथापद्मपलाशानामाधाराधेयभावतः ॥ स्थितानामप्यनंतानांसूक्ष्मसूच्यभिवेधने ॥ २८५ ॥ दलेदलेप्रभिन्नोयंकालोनैवप्रतीयते ॥ तथैवव्यापृतौकालःप्राणानांनैककालता ॥ ॥ २८६ ॥ एवंप्राणेषुसर्वेषुसमेष्वसमताकुतः ॥ एकस्मिन्नेवयत्तस्मिन्नात्मबुद्धिस्त्वयेरिता ॥ २८७ ॥ आत्मबुद्धावथैकस्मिन्वक्तुकामःसकारणं ॥ अंगीचकारतद्वाक्यमेवमेवेतिदेवराट् ॥ २८८ ॥

नंतानांपद्मपत्राणामूर्ध्वाधोभावेनावस्थितानांसूक्ष्मसूच्यभिवेधनेक्रियमाणेप्रतिदलंभिन्नोपिकालोनलक्ष्यतेतथैवप्राणानांव्यापृतावपि कालोनलक्ष्यते तस्मात्करणव्यापाराणामेककालतानास्तीति ॥ २८५ ॥ २८६ ॥ प्रतर्दनःपूर्वपक्षंनिगमयति एवमिति एवमुक्तनीत्याप्राणेषुसर्वेषुसमेषुसत्सुअसमताएकस्यैवप्राधान्यरूपाकुतःकारणात् यद्यस्मादेकस्मिन्नेवात्मबुद्धिविधानमिति ॥ १८७ ॥ एवमुक्तेत दित्यादिद्वितीयकंडिकाशेषंव्याकरोति आत्मेतिचतुर्भिः एकस्मिन्प्राणेआत्मबुद्धावुक्तायांकारणंप्रयोजकंवक्तुकामोदेवराडिंद्रस्तस्यप्रतर्दनस्यवाक्यंएवमेवेतिवाक्येनांगीचकारअंगीकारपूर्वकमुत्तरंददावित्यर्थः ॥ २८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तरमभिनयति अस्त्येवेति हेराजन्इहामुत्रचजीवनंलोकद्वयस्थितिहेतुत्वंएतदेवनिःश्रेयसमित्युच्यते एतन्निःश्रेयसंप्राणेनिःश्रेयसात्मनोममोपाधावस्त्येवनत्वासीद्वविष्यतिवागादौतुतन्निःश्रेयसंनैवास्ति एतदेवतत्रआत्मबुद्धौकारणंप्रयोजकमिति एतन्निःश्रेयसाभावरूपमेववागादौवैषम्यमिति ॥ २८९ ॥ तर्हिऋषिवाक्यविरोधइतिचेन्न मुख्यप्राणव्यतिरिक्तेषुसावकाशत्वादित्याह गुणेति गुणप्रधानभावोनियतोनेतियदुक्तंतन्मुख्यप्राणव्यापारादपरेषुव्यापारेषुबोध्यम् ॥ २९० ॥ तत्रहेतुतयाप्राणसंवादायुक्तमर्थमाह व्यापारोपरमेइति प्राणस्यव्यापारोपरमेसतिकापिक्रियानदृश्यतेइतिप्रसिद्धम् व्याख्येयश्रुतौप्राणानामितिबहुवचनंप्राणनापाननादिवृत्तिभेदाभिप्रा

अस्त्येवकारणंराजन्निहामुत्रचजीवनम् ॥ निःश्रेयसाख्यंप्राणेस्मिन्वागादिष्वस्तिनैवतत् ॥ एतदेवहिवैषम्यं वागादेर्नापरंकचित् ॥ २८९ ॥ गुणप्रधानभावोयंनियतोनैवविद्यते ॥ यदुक्तंतदपिप्राणव्यापारादपरेषुहि ॥ २९० ॥ व्यापारोपरमेनैवप्राणस्यास्तिक्रियाक्वचित् ॥ काचित्कदाचिद्वाप्यत्रकथंचिच्चप्रतर्दन ॥ २९१ ॥ वाक्पाणिपादपायूनामुपस्थस्यतथैवच ॥ त्वक्चक्षुःश्रोत्ररसनाघ्राणानामपिवाविना ॥ व्यापारान्मिलितानां वाप्यन्यथावास्तिजीवनं ॥ २९२ ॥ मूकाश्चकुणयस्तद्वत्पंगवोरुद्धवायुकाः ॥ ब्रह्मचर्यरतास्तद्वत्कुष्ठिनोनेत्रवर्जिताः ॥ २९३ ॥ बधिरारसनाघ्राणदोषिणोपीहजंतवः ॥ अंतःकरणशून्याश्चजडोन्मत्तादयोपिहि ॥ २९४ ॥ जीवंतिनविनाप्राणव्यापारंकेपिकर्हिचित् ॥ प्राणस्तेनाहमस्मीतिप्रतर्दनमयेरितम् ॥ २९५ ॥

येणेति ॥ २९१ ॥ जीवतीत्यादितृतीयकंडिकायाएवंपश्यामइत्यंतंवाक्यंवागादिकंविनापिजीवनंदृश्यतेयथामूकादिष्वित्यर्थकंव्याकरोति वाक्पाणीतिचतुर्भिः वागादीनामेकैकस्यव्यापाराद्विनापिजीवनंदृश्यतेवाअथवातेषांसमुदितानांव्यापाराद्विनापिजीवनंदृश्यतेइत्यन्वयः ॥ २९२ ॥ तत्रोदाहरणम् मूकाइति पूर्वश्लोकोक्तेंद्रियाणांक्रमेणव्यापारहीनामूकादयोघ्राणदोषिपर्यंताबोध्याः रुद्धोवायुरपानोयेषांतेतथा जडोन्मत्तादयस्त्वंतःकरणहीनाःप्रसिद्धाः ॥ २९३ ॥ २९४ ॥ जीवंतीति प्राणव्यापारंविनाकेपिजंतवःकदाचिदपिनजीवंतीत्युच्यंते तेनेतरेभ्योविशेषेणप्राणमेवोपाधितयास्वीकृत्यप्राणोहमस्मीतितुभ्यंमयोपदिष्टमिति ॥ २९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवश्रुत्यंतरेप्राणस्योक्थत्वेनोपासनंविहितमित्यर्थकमथखलुइत्यादिसर्वाप्तिरित्यंतंवाक्यंव्याकरोति मृतप्रायमिति इंद्रियैश्छिद्रैस्त द्गोलकैश्वसहितमपिमृतप्रायंदेहंमूर्छितादिशरीरंउत्थापयतितेनउत्थापनेनैवनिमित्तेनउक्थनाम्नायंप्राणउपास्यउक्तइति उक्थमितिरू पंउत्पूर्वकात्स्थाधातोरंतर्भावितण्यर्थात्कप्रत्ययेछांदसम् ॥ २९६ ॥ अतएवप्राणस्यसर्वात्मभावेनानंदतारूपासर्वाप्तिरित्याह उक्थमिति उक्थमितिप्राणस्यनामपूर्वमुत्थानतोभवति ण्यर्थानंतर्भावेउत्तिष्ठतिकारणत्वात्सर्वेभ्यःपूर्वंप्रकाशतेइतिव्युत्पत्तेः यच्चपूर्वोत्थितंतल्लोकेपि श्रेष्ठंप्रसिद्धं यथाहिरण्यगर्भादि साचश्रेष्ठताप्राणेप्राणोपलक्षितेऽद्वितीयात्मनिपर्यवस्यति हिततमत्वात् अतएवप्राणोस्मीतिमयातुभ्यमु पदिष्टमित्याह सोहमिति सोहंप्राणःहिततमाआत्मत्वेनधीर्ज्ञानंयस्यसतथा ॥ २९७ ॥ पूर्वंप्राणप्रज्ञयोरद्वितीयत्वेनसर्वांतरत्वेनचपरमार्थ वस्तुनोबोधकत्वात्तत्वंपदार्थोपाधिभूतयोःसमप्राधान्यमुक्तमथतयोर्लक्ष्यैक्यप्रतिपादकंयोवैप्राणइत्यादिवाक्यंव्याकरोति प्रज्ञात्मत्व

मृतप्रायमिमंदेहंसेंद्रियच्छिद्रदैवतम् ॥ आसंनाच्छयनात्स्थानादुत्थापयतिवैयतः ॥ प्राणस्तेनोक्थनामायं ज्ञातव्योवेदवादिभिः ॥ २९६ ॥ उक्थमुत्थानतःपूर्वंश्रेष्ठंपूर्वोत्थितंभवेत् ॥ श्रेष्ठोहिततमःप्राणःसोहंहिततमा त्मधीः ॥ २९७ ॥ प्रज्ञात्मत्वंनचाप्यस्यकदाचिद्योगतोभवेत् ॥ प्रज्ञयानेत्रवागादेर्यथास्यादुपचारतः ॥ २९८ ॥ भेदोऽमृतायुषोर्यद्वत्प्राणस्यचनविद्यते ॥ प्राणप्रज्ञानयोरेवंभेदःक्वापिनविद्यते ॥ २९९ ॥ प्राणप्रज्ञेप्रसिद्धेये लौकिकेसर्वदेहिनाम् ॥ खट्वांगवन्नलभ्येतेअपितेक्वापिवैपृथक् ॥ ३०० ॥ अस्मिन्जंगममात्रस्यशरीरेसहि तेस्थिते ॥ जीवनेमरणेतद्वत्सहोत्क्रामतएवते ॥ ३०१ ॥

मितिपंचभिः यथानेत्रादेर्ज्ञानेंद्रियस्यवागादेःकर्मेंद्रियस्यचकदाचिद्वृत्तिरूपेणप्रज्ञयायोगादौपचारिकंप्रज्ञात्मत्वंतद्वदस्यप्राणस्यनगौणंप्र ज्ञात्मत्वं ॥ २९८ ॥ किंतुमुख्यमेवप्राणस्यप्रज्ञात्मत्वमित्याह भेदइति यथायुरमृतयोःप्राणेनभेदाभावउक्तएवंप्रज्ञायाअपीत्यर्थः लक्ष्यै क्यादितिभावः ॥ २९९ ॥ लक्ष्यैक्यंकैमुत्यन्यायेनापिद्रढयितुंप्राणप्रज्ञापदवाच्ययोरुपाध्योरपिभेदःपृथग्भावरूपोनदृश्यतइत्याह प्राणे तिद्वाभ्याम् येलौकिकेंतर्वायुबुद्धिरूपेप्राणप्रज्ञेतेअपिखट्वांगपादचतुष्टयवत्पृथक्परस्परपरिहारेणनलभ्येतेनदृश्येतेइति ॥ ३०० ॥ किंतु सहभूतेएवदृश्येतेइत्याह अस्मिन्निति अस्मिन्सर्वजंगमशरीरेजीवनकालेसहितेस्थितेसतीप्राणप्रज्ञेमरणकालेसहैवोत्क्रामतऊर्ध्वंगच्छत इतिप्रसिद्धमितिशेषः ॥ ३०१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैमुत्यन्यायमभिनयति यतइति यतोलौकिकयोःप्राणप्रज्ञयोरपिभिदानास्तितर्हिमयिकुतोभिदास्यात्सिध्येत् तत्रप्रमाणाभावासंभव योःसूचकेविशेषणेअलौकिकेएकस्मिन्निति ॥३०२॥ तस्यैवेत्यादिवाक्यंव्याकरोति अन्वयेति अन्वयःसुषुप्त्यादावनुगमः व्यतिरेकइत रेषांतत्रलयरूपः ताभ्यांप्राणस्यैवात्मताभवेत्निश्चितेतिशेषः अन्वयव्यतिरेकयोर्विषयद्वयमाह सुप्ताविति ॥३०३॥ श्रुतौदृष्टिपदंदृष्टिसा धनेऽन्वयव्यतिरेकानुसंधानेलाक्षणिकमितिदर्शयति इदमिति इदमन्वयादिचिंतनरूपंस्मृतिसुप्तिभ्यांविषयतासंबंधेनसमुत्थितंसत्प्राणा त्मभावरूपस्यवस्तुनोवेदांतप्रमेयस्यदर्शनायसाक्षात्काराय भवेदिति ॥३०४॥ सुषुप्तौतावदन्वयव्यतिरेकस्फुटीकरणाययत्रैतदित्यादिलो काइत्यंतंवाक्यंव्याकरोति यत्रायमितिनवभिः यत्रयस्यामवस्थायामयंप्रसिद्धःपुरुषःस्थूलसूक्ष्माभिमानीजीवःसुप्तःशयनंगतःसन्कं चनकमपिस्वमंजाग्रद्वासनाकार्यंपदार्थजातंनवेत्तितदाप्राणात्मनिप्राणरूपेप्राणोपाधिकइतियावत् एतादृशेदेवेपरमात्मनिएकधाएके

यतोलौकिकयोःप्राणप्रज्ञयोर्नास्तिवैभिदा॥ ततोऽलौकिकएकस्मिन्मयिकेनभवेदिह॥ ३०२॥ अन्वयव्य तिरेकाभ्यांप्राणस्यैवात्मताभवेत्॥ सुप्तौस्मृतौचतावेतौकर्तुंशक्यौमहात्मभिः॥ ३०३॥ इदमेवहिविज्ञानंस्मृ तिसुप्तिसमुत्थितम्॥ दर्शनायभवेन्नृणांप्राणात्मत्वस्यवस्तुनः॥ ३०४॥ यत्रायंपुरुषःसुप्तःस्वप्नंवेत्तिनकंच न॥ प्राणात्मनितदादेवएकधैवावतिष्ठते॥ ३०५॥ कर्मज्ञानेंद्रियैस्तद्वदंतःकरणकेनच॥ एतेषांविषयैर्ना पिभेदोयस्मात्प्रतीयते॥३०६॥ अयंहिकरणग्रामःप्राणोपाधौमयीश्वरे॥ प्रत्येकमात्मविषयैःसहसुप्तौप्रली यते॥ ३०७॥ ततएकत्वमेवात्रममप्राणस्वरूपिणः॥ सर्वप्रकारोभेदोयंविलीनोमयिसर्वथा॥ ३०८॥

नप्रकारेणाभेदरूपेणैवावतिष्ठते स्वमजाग्रतोरुपाधिप्रयुक्तभेदवास्तवाभेदरूपंप्रकारद्वयमासीदत्रत्वभेदएवशिष्यतेइत्यर्थः ॥ ३०५॥ एव कारार्थंस्फुटयन्भेदाभावेहेतुतयाह कर्मेति कर्मेंद्रियैर्ज्ञानेंद्रियैरंतःकरणेनचतथैतेषांकर्मेंद्रियादीनांविषयैश्चोपाधितयाप्रयुक्तोयोभेदः सयस्मान्नप्रतीयतेतस्मादेकधैवेत्युक्तमुपपन्नमितिपूर्वेणसंबंधः ॥ ३०६॥ उपाधिप्रयुक्तभेदाभावेउपाधिलयंहेतुत्वेनदर्शयति अयंहीति अयंवागादिःकरणग्रामःआत्मीयैर्नामादिविषयैःसहसुप्तिकालेप्राणोपाधौमयीश्वरेलीयतइत्यन्वयः ॥३०७॥ आत्मनिसर्वलयप्रतिपादन फलमद्वितीयत्वमभिनीयदर्शयति ततइति यतोवास्तवोभेदःस्वरूपमहिम्नैवनिरस्तऔपाधिकोप्युपाधिलयादित्येवंसर्वप्रकारोपिभेदोम यिविलीनस्ततोममैकत्वमेवसिद्धमिति कीदृशस्यमम प्राणस्वरूपिणःप्राणोपलक्षितस्वरूपस्येति ॥ ३०८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लयाधारत्वप्रदर्शनेनोपादानत्वेबोधितेपिकर्त्ताकश्चिदन्यःस्यादितिशंकावारणेनाभिन्ननिमित्तोपादानतांबोधयितुमुत्पत्तिकारणतामपि दर्शयति प्रबोधेति प्रबोधकालेजाग्रतिएतेवागादयोन्यतोनजायंतेकिंतुमत्तःप्राणात्मनएवजायंतेतस्माद्ब्रह्मलक्षणयोगात्प्राणपदार्थोहंवेदांतवेद्यरूपोस्मीत्यर्थः॥३०९॥लयोक्तिवत्सृष्ट्युक्तेरप्यद्वितीयतायांपर्यवसानंदर्शयति जायमानाइति मत्तःप्राणात्मनोजायमानाःप्राणामत्सकाशान्मृदोघटवत्कथंचिदपिभिन्नानस्युरिति॥३१०॥ननुयदिनभिन्नास्तर्हिकथंभिन्नाइवदृश्यंतेइत्यतआह किंत्विति रूपाणिविभूतयःमहिमानएवैतइत्यादिश्रुतेः एतेदेवभेदाइतिश्रुतिपदार्थः ननुविभूतीनांविभूतिमतोभेदाभावात्कथंततोजन्मेत्यतआह अभेदेपीति॥३११॥दृष्टांतंस्फुटयति ज्वलतइति प्रबुद्धात्प्रबोधंजागरणंप्राप्तात् प्राणाइंद्रियाणि॥३१२॥इंद्रियेभ्यइति ततइंद्रियोत्पत्तेरनंतरंइंद्रियेभ्योऽधिष्ठे

प्रबोधकालेनैवैतेजायंतेन्यतएवहि॥ मत्तःप्राणात्मनस्तस्मात्प्राणात्माहंप्रतर्दन॥ ३०९॥ जायमानास्तथा प्राणाज्ज्ञानकर्मेंद्रियात्मकाः॥ मत्तःप्राणात्मनोभिन्नानस्युरेतेकथंचन॥३१०॥ किंत्विमेममरूपाणिजायंते मत्तएवहि॥ अभेदेपिजनिर्दृष्टायथाग्नेर्ज्वलतःकणाः॥ ३११॥ ज्वलतोमहतोवन्हेःप्रजायंतेकणायथा॥ प्रबुद्धात्प्राणतोमत्तःप्राणाअपितथैवहि॥३१२॥ इंद्रियेभ्यस्ततोदेवाअग्न्याद्याअपिजज्ञिरे॥ अग्न्यादिभ्यश्चसंजाताविषयालोकशब्दिताः॥ ३१३॥ सुषुप्तेनहिवागादिनामादिसहितंक्वचित्॥ दृश्यतेतेनचान्येनप्राणस्त्वन्येनदृश्यते॥३१४॥यद्यस्मिन्सतिलभ्यंतत्तत्रैवचनलभ्यते॥ तत्तस्यकार्यंविज्ञेयंमृदोयद्वद्घटादिकं॥ ३१५॥

येभ्योदेवास्तदधिष्ठातारोऽग्न्यादयोजाताअग्न्यादिदेवेभ्योविषयानामाद्याजाताः कीदृशाविषयाः श्रुतिगतेनलोकशब्देनोक्ताः लोक्यंतेप्रकाश्यंतइतिव्युत्पत्तेः ॥३१३॥ एवंयत्रेत्यादिवाक्यार्थंप्रदर्श्यएतद्वाक्यमूलकंदृष्टिसृष्टिवादंस्फुटयन्नुक्तमर्थंतर्केणापिसंभावयति सुषुप्तेइत्यादिना सुषुप्तेसुषुप्त्यवस्थायांनामादिविषयसहितंवागादिकरणजातंतेनसुप्तपुरुषेणवाअन्येनसुप्तभिन्नेनकेनचिद्वानदृश्यतेप्राणस्त्वन्येनसुप्तभिन्नेनदृश्यतेइत्यविवादमितिशेषः ॥३१४॥ तथाचप्राणकार्यतावागादीनामायातीतिदर्शयितुंयद्यदन्वयप्रयुक्तभानयोगितत्तस्यकार्यमितिकार्यलक्षणंसोदाहरणमाह यद्यस्मिन्नितिद्वाभ्यां यथामृद्वस्तुनिसतिलभ्यंदृश्यंघटादिकंतत्रमृद्वस्तुनिसत्येवनलभ्यतेतद्घटादिकंतस्यमृद्वस्तुनोव्यापकस्यकार्यमिति ॥३१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानमात्रनिवेशेआलोकादिकार्यतायारूपादौप्रसंगात्सत्तापिलक्षणेनिवेश्याइत्याशयेनाह नसत्तेति यस्येतिशेषःपूर्वार्द्धे॥ ३१६॥तल्लक्षणंतुप्रकृतेपीत्याह करणानामिति करणग्रामोपिसुषुप्तौप्राणेसत्येवनदृश्यतेप्रबोधेचप्राणेसत्येवअन्यस्मात्प्राणभिन्नान्नजायतेकिंतुप्राणादेव जायतेसत्तांलभतेतस्मात्सकरणग्रामोऽस्यप्राणस्यकार्यमितिसिद्धम्॥ ३१७॥ तथाचप्राणेकार्यलयाभिधानमुपपन्नमित्याह सुषुप्ताविति यस्मात्सुषुप्तौकरणग्रामोविषयैःसहनैवलभ्यतेदृश्यतेतस्माददर्शनादेवज्ञायतेकरणग्रामःकारणेलीनोध्वस्तघटवत् प्रध्वस्तोघटोयथाकारणेलीनोभवतितद्वदिति ॥ ३१८ ॥ नन्वस्त्विंद्रियलयस्तथापींद्रियलयेतद्भिन्नानांविषयाणांलयःकथंसंभाव्येतेत्याशंक्यतत्रोपपत्तिमाह तदभावइति तेषामिंद्रियाणामभावेतदीयइंद्रियसंबंधीयोविषयोनामादिःसकथंस्यात्कथंसत्तायोगीभवेत् नकथंचिदपितस्यसत्तासंभा

नसत्तालभ्यतेऽन्यस्माद्यस्मिन्सत्येवलभ्यते॥ तत्तस्यकार्यंविज्ञेयंतंतूनांहियथापटः॥ ३१६॥ करणानांसमूहोपिप्राणेसतिनदृश्यते॥ प्राणेसत्येवनान्यस्माज्जायतेकार्यमस्यसः॥ ३१७॥ सुषुप्तौकरणग्रामोलभ्यतेविषयैःसह॥ नैवतस्मादयंलीनःप्रध्वस्तघटवत्तदा॥ ३१८॥ तदभावेकथंसस्यात्तदीयोविषयोहियः॥ नप्रदीपंविनातस्यप्रभालोकेनदृश्यते॥ ३१९॥ योहियत्रविलीयेतनिर्गच्छतिततोहिसः॥ अग्नौयथाकणोलीनोप्यग्नेरेवविनिःसरेत्॥ ३२०॥ नचान्यैःकणवत्प्राणान्निःसरन्नुपलभ्यते॥ इंद्रियग्रामएतस्मात्सएवांतोविनिःसरेत्॥ ३२१॥

करणग्रामः प्राणात्

व्यतइत्यर्थः तत्रनिदर्शनमाह नप्रदीपमिति प्रदीपंविनाप्रदीपकार्यभूताप्रभालोकेनजनेननदृश्यतेयथातथाध्यात्माधिदैवकरणकार्यभूता विषयाःकरणाभावेकथमुपलभ्येरन्निति॥ ३१९॥ तथालयाधारादुत्पत्तिरपिसंभाव्यतइत्याह योहीति स्पष्टम्॥ ३२०॥ननुकणोजायमानोविलीनात्कणाद्यथाभिन्नस्तथाकरणग्रामोपिविलीनाद्भिन्नोस्त्वित्याशंक्यमानाभावान्मैवमित्याह नचान्यइतिद्वाभ्याम् यथाग्नेःकणोनिस्सरन्विलीनकणादन्यउपलभ्यतेतद्वत्प्राणान्निस्सरन्करणग्रामोविलीनादन्योभेदशालीनोपलभ्यते एतस्माद्भेदावगाहिप्रत्यक्षाभावाद्धेतोःसएवयोविलीनःसएवकरणग्रामोऽतःप्राणाद्विनिःसरेत् तथाचभेदेप्रत्यक्षप्रमाणंनेतिभावः ॥ ३२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाप्यनुमानमित्याह नचेति तस्यजायमानेंद्रियग्रामस्यविलीनापेक्षयाऽन्यताभेदोऽनुमानादपिनभवेन्नसित्ध्येत् भेदव्याप्यलिंगानुपल
ब्धेरितिभावः ननुविलीनत्वलिंगेनातीतस्यवर्तमानाद्भेदमनुमायतद्विरुद्धधर्मरूपलिंगेनवर्तमानेभेदोनुमास्यतइत्याशंक्यविलीनत्वस्यधू
लिप्रच्छादितेघटेभेदाभाववतिव्यभिचारित्वान्नैवमित्याह धूलीति॥३२२॥ननुधूलिप्रच्छादितघटादेःकथंविलीनत्वमित्याशंक्यादर्शनाद
न्यस्यविलयपदार्थस्यदुर्वचत्वादित्याह नचादर्शनेति प्रबोधकालेऽदृष्टानांस्वप्नपदार्थानांविलीनत्वस्यव्यवहारादितिभावः ननुप्रातिभा
सिकेऽदर्शनेविलीनत्वव्यवहारात्तथात्वाभ्युपगमेपिव्यावहारिकेतथानाङ्गीकर्तुंशक्यमितिशंकते नहीति अदृष्टाःस्वस्यपुत्राद्याःविलीयंते
विलीनव्यवहारगोचराभवंतीतिनहिदृष्टमितिशेषः तथाचकथंभवदुक्तंसंभाव्येतेतिभावः॥३२३॥प्रातिभासिकत्वेपिविलीनत्वव्यवहारा
भावप्रयोजकऐक्यभ्रमोवक्ष्यतइतिमनसिनिधायासंभावनाप्रयोजकमनिष्टप्रसंगंसिद्धांतीपृच्छति तदेति तदाऽदर्शनकालेतेषांबंध्वादी
नांलयोऽस्तुपुनर्दर्शनकालेजनिरुत्पत्तिरस्तुकमनिष्टप्रसंगंपश्यसीति ननुमृतानांपुनरुत्पत्त्यापत्तिस्तवमतेइत्याशंक्यनिषेधंप्रतिजानीते नैव

नचानुमानतस्तस्यविलीनादन्यताभवेत्॥ धूलिपुंजेविलीनस्यघटादेरन्यतानच॥ ३२२॥ नचादर्शनमात्रा
त्स्यादन्योहिविलयःक्वचित्॥ नह्यदृष्टाविलीयंतेपुत्राद्याःस्वस्यकस्यचित्॥ ३२३॥ तदातेषांलयोभूयाद्दर्शने
स्तुपुनर्जनिः॥ नैवंमृतानामुत्पत्तिःप्रसज्ज्येतकथंचन॥ जीवतोपियतःक्वापिपुनर्नैवास्तिदर्शनम्॥ ३२४॥ दे
शांतरगतौदृश्याःपुत्राद्यानमृतास्तथा॥ अत्राप्येवहिदृश्यंतेक्वापिस्वप्नेमृताअपि॥ ३२५॥ ततोहंजातइत्येषा
पुत्रादीनांहिविद्यते॥ बुद्धिरस्मान्नजायंतेपुत्राद्याःसतिदर्शने॥ ३२६॥

मिति नमरणंपुनर्दर्शनप्रयोजकंनवाजीवनंकिंत्वन्यदेवदृष्टादृष्टसामग्रीसंनिधानमितिमनसिनिधायजीवतोपिपुनर्दर्शननियमभंगमाह
जीवतइति क्वापिदूरेदेशगमादौ॥३२४॥ननुदूरदेशस्थानांदूरदेशंगत्वादर्शनंसंभवतीतिजीवनंदर्शनप्रयोजकमेवेतिशंकित्वातर्हिमरणमपि
प्रयोजकमस्तुकादाचित्कस्वप्नेमृतानामपिदर्शनादित्याह देशांतरेति तस्माददृष्टादिसामग्र्येवपुनर्दर्शनादिनियामिकेतिनकाचिदनुपपत्ति
रितिभावः॥३२५॥ शंकते ततइति येलोकेजायमानाःपुत्रादयस्तेषामित्येषाइत्याकाराबुद्धिर्विद्यतेनियमेनदृष्टा इतिकिं ततःदेवदत्ता
देःपितुःसकाशादहंयज्ञदत्तादिसंज्ञोजातइतितथाचततोऽहंजातइत्याकारिकाबुद्धिर्जन्मव्यापिकाऽस्मादुक्तबुद्धेर्जन्मव्यापकत्वात् दृष्टिस्र
ष्टिवादिनांभवदुक्तरीत्यादर्शनेपुत्राद्यानजायंते व्यापकाभावेव्याप्याभावस्यन्याय्यत्वात् यदिजायेरंस्तर्हिवयमस्माज्जाताइतिमन्येरन्
तथामतेरभावान्नजायंतइत्यर्थः॥ ३२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टिसृष्टिवादीउत्तरयति यतइति जातोहमितिवुद्धेर्जन्मव्यापकत्वंसाहचर्यदर्शनादवधार्यं साहचर्यंतुघटेजन्मसत्वेपितादृशबुद्धेरदर्शनाद्दु र्वचमितिपूर्वार्द्धाशयः ननुघटद्रष्टुःपुरुषस्यजातोऽयमितिवुद्धिरस्त्येवेतिचेदस्तुनामतथापिघटनिष्ठजन्मनोद्रष्टृनिष्ठबुद्धेश्चवैयधिकरण्यग्रह स्यव्याप्तिज्ञानप्रतिवंधकस्यांकितिरोधायकमुक्तमित्याह किंतुतद्द्रष्टुरेवैषेति तस्मादुक्तबुद्धेर्व्यापकत्वस्यदुर्वचत्वादिदमुक्तंबुद्धेर्व्यापकत्वा लंबनेनदृष्टिसृष्टेराक्षेपपरंभवद्वचोव्यर्थमिति॥ ३२७॥ ननुजडेषुतथावुत्ध्यभावेपिचेतनाजायमानाजातोहमितिमन्यंतएवेतिचेतनोत्पत्ते रियंवुद्धिर्व्यापिकैवेत्याशंक्याह चेतनाअपीति उत्पत्तिमात्रानंतरंचेतनेष्वपिवयंजाताइत्याकारिकावुद्धिर्नदृष्टाकिंतुमातृपितृप्रभृति वचनादिनिमित्तवशात्तथावुद्धिर्दृश्यतेइत्यव्यापिकैवततोजडाजडविभागस्यधीःकुशकाशवत्त्वयास्मत्पक्षाक्षेपायालंव्यमानाव्यर्थाइति ॥ ३२८ ॥ चेतनाःप्रजायंतइतिवाक्यमेवव्याहतमित्याह अपीति इत्येषाइत्याकाराभ्रांतिस्तुदोषरूपोपाधिपरतंत्रानव्यापकतांसाधयि

यतोघटेपिनैवास्तिजातोहमितिधीःक्वचित् ॥ किंतुतद्द्रष्टुरेवैषातस्माद्व्यर्थमिदंवचः ॥ ३२७॥ चेतनाअपिनै वात्रजानंत्युत्पत्तिमात्रतः॥ वयंजातास्ततोव्यर्थाजडाजडविभागधीः॥ ३२८॥ अपिकुत्रापिचैतन्यंजगत्य स्मिन्नजायते ॥ देहेजातेपुमान्जातइत्येषाभ्रांतिधीर्नृणाम्॥ ३२९॥ प्रादुर्भावोजनेश्चार्थःसस्याद्दर्शनमेव हि॥ प्रादुर्वभूवसवितेत्यादौदर्शनमीरितम्॥ ३३०॥ नचैवंजातकर्मादिप्रसज्ज्येतक्षणेक्षणे॥ बालस्ययौव नेकस्माद्भवतोपिनचापतेत्॥ ३३१ ॥ भवतोपिनचैकत्वंबालयौवनदेहयोः॥ देहभेदेहितद्दृष्टंयथातेतनयां तरे॥ ३३२॥

तुमलमितिभावः दृष्टिसृष्टिवादिनोपाधीनामेवसृष्टेरभ्युपगमाच्चेतनोत्पत्तेराक्षेपोऽनुक्तोपालंभइत्यपिबोध्यम् ॥ ३२९ ॥ किंचजनिधा त्वर्थालोचनादपिदृष्टिसृष्टिपक्षःसित्ध्यतीत्याह प्रादुर्भावइति सप्रादुर्भावोदर्शनरूपएवेतिदृष्टिरेवसृष्टरित्यस्मन्मतसिद्धिरितिभावः प्रादु र्भावपदस्यदर्शनरूपार्थेप्रयोगंदर्शयति प्रादुरिति ॥ ३३० ॥ ननुदृष्टिसृष्टिमतेप्रतिदर्शनंपुत्राद्युत्पत्तौजातकर्माद्यापत्तिरित्याशंक्ययथा युवशरीरस्यवालशरीरात्परिमाणादिनास्फुटभेदस्योत्पत्तावपिभवन्मतेनसंस्कारापत्तिस्तथामन्मतेपीत्याह नचैवमिति आपतेत्प्रसज्ज्येत ॥ ३३१॥परमतेसमदोषप्रसंगंस्फुटयति भवतोपीति देहभेदेसतिचतज्जातकर्मादिदृष्टंयथापुत्रांतरेजातेइति तथाचयत्रोभयोःसमोदोषइ तिन्यायेनतुष्यतुभवानितिभावः ॥ ३३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभेदाभावंस्फुटयति अभेदइति पटयोः ह्रस्वदीर्घयोरितिशेषः ॥ ३३३ ॥ एवंदोषसाम्यंप्रदर्श्यपरिहारसाम्यमपिदर्शयति प्रत्यभिज्ञे ति संस्कारसहकृतप्रत्यक्षसामग्रीजन्यंज्ञानंतदेवेदमित्याद्याकारकंप्रत्यभिज्ञा सायदास्वस्यदेहवतोजायतेतदात्मनोधर्मादैक्यादभेदाध्या सेनदेहआरोपितात्वाच्या यदातुअपरस्यदेवदत्तादिसंज्ञदेहवतःसकाशाद्भिन्नस्ययज्ञदत्तादेःप्रत्यभिज्ञाजायतेतदातदीयाद्यज्ञदत्तादिसंबं धिनोविश्वासादयंपूर्वदेहाद्भिन्नोनभवतीत्याद्यभिमानरूपादेववाच्याइत्युभयोःसमःपरिहारः ॥ ३३४ ॥ ननुतवैवायंपरिहारः ममम ते तुआरंभकस्यावयवसंयोगस्यैकत्वात्प्रत्यभिज्ञेतिनित्यसंयोगांगीकर्तृनैयायिकैकदेशिमतेनाशंक्यआरंभकपदेनकारणमात्रविवक्षणेशुक्र शोणितादिकारणैक्यात्प्रत्यभिज्ञास्त्वितिवाशंक्यपरिहरति आरंभकस्येति पूर्वार्धंस्पष्टं तत्रव्यभिचारंदर्शयति स्तंभयोरिति एकइष्टका संयोगरूपोहेतुर्ययोरितिप्रथमशंकासमाधानपक्षेऽर्थः द्वितीयशंकासमाधानपक्षेतुएकःएककाष्ठरूपएकपाषाणरूपोवाहेतुर्ययोरित्यर्थः

अभेदोनैवयुक्तोयंबालयौवनदेहयोः॥ विभिन्नपरिमाणादेर्दर्शनात्पटयोरिव॥३३३॥ प्रत्यभिज्ञाचदेहेस्मिन्स्वस्यस्वात्मनऐक्यतः॥ अपरस्यतुविश्वासात्तदीयादेवजायते॥ ३३४॥आरंभकस्यचाभेदात्प्रत्यभिज्ञानसंभवेत्॥ स्तंभयोरेकहेत्वोर्नप्रत्यभिज्ञास्तिकर्हिचित्॥ ३३५॥ नचस्तंभादिविषयेनैषास्यादुक्तहेतुतः॥ विश्वासादात्मनस्तत्रसंभवेद्देहवत्सदा॥३३६॥ कारणानुगमोप्येषबालयौवनदेहयोः॥ कोयतोनैवविद्येतेतेउभेशुक्रशोणिते॥ ३३७॥

॥ ३३५ ॥ ननुदृष्टिसृष्टिपक्षेसएवायंस्तंभइत्यादिप्रत्यभिज्ञानिर्वाहःकथं तत्रात्मनोभेदनिश्चयेनात्मनिष्ठैक्यारोपेणनिर्वाहस्यदुर्वचत्वा दित्याशंक्यमास्तुप्रथमोहेतुर्द्वितीयस्तुविश्वासलक्षणोजागर्त्तीत्याह नचेति स्तंभादिषुउक्तहेतोरात्मैक्याध्यासरूपात्प्रत्यभिज्ञानस्यान्नोप पद्येतेतिनचशंक्यं यतोद्रष्टुरात्मनोविश्वासरूपाद्धेतोःसासंभवेदेव यथादेवदत्तदेहेयज्ञदत्तादेःप्रत्यभिज्ञोक्तातद्वदित्यर्थः॥ ३३६॥ बालयु वशरीरयोःकारणानुगमोपिभवतादुर्निरूपइत्याह कारणेति बाल्ययौवनावस्थाश्रययोर्देहयोःकारणस्यभवन्मतस्यानुगमःकः नकोप्यु पपद्यतइत्यर्थः यतस्तेभवदभिमतेशरीरकारणेशुक्रशोणितेअंकुरोत्पत्तौसत्यांबीजवन्नविद्येतेविनष्टेइतियावत् अस्मन्मतानुसारेणबीजा द्यवच्छिन्नचैतन्यंमायाशबलंसत्पदवाच्यंकारणमभ्युपैषिचेत्तर्हितत्रकल्पितस्यसपदार्थवद्दृष्टिसृष्टिरेवपर्यवस्यतीति तस्यसतःप्रत्यभिज्ञा निर्वाहकत्वंतुनवाच्यंसर्वत्रैक्यधीप्रसंगादितिभावः ॥ ३३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुअवयवसंस्थानरूपकारणैक्यालंबनाप्रत्यभिज्ञाभविष्यतीत्याशंकांनिराचष्टे नैवेति अवयवानांसंस्थानंरचनाविशेषःकारणमेवनसं भवति दुर्भणत्वाद्दुर्निरूपत्वात् कथमितिचेच्छृणु परमाणवएवत्वयावयवत्वेनवाच्याः द्व्यणुकादीनांतत्समुदायरूपाणांतत्समवेतरूपाणांवा समुदायसमवाययोःप्रथमाध्यायोक्तविधयानिरासेननिरस्तत्वात् परमाणूनांचकारणत्वेनप्रत्यक्षंप्रमाणंनवातन्मूलकमनुमानादीत्याश येनाह नप्रत्यक्षाइति दृग्गताश्चक्षुर्गोचरेगताअणवोयथानप्रत्यक्षास्तथादेहाद्यारंभकाअपीत्यर्थः श्रुतिस्तुअण्व्योधानाइत्याद्यादुर्लक्ष्यंचै तन्यमेवाणुपदेनप्रतिपादयतीतिभावः ॥ ३३८ ॥ परमाणूनांकारणत्वेबाधकंचवर्त्ततइत्याह नचैतैरिति एतैःपरमाणुभिःसंस्थानंसंस्थान वत्कार्यं तत्रहेतुमाह तेषामिति जडैरालोचनाभावाद्रचनादुष्करा परमाणूनांचेतनत्वाभ्युपगमेतुबहूनांचेतनानांभिन्नाभिप्रायत्वादेक

नैवावयवसंस्थानंकारणंदुर्भणत्वतः॥ नप्रत्यक्षाअवयवाःसूक्ष्मत्वाद्दृग्गताणुवत्॥३३८॥ नचैतैश्चितंकिं चित्संस्थानमिहविद्यते॥तेषांजडबहुत्वाभ्यांरचनानुपपत्तितः॥ ३३९॥ संस्थानमपिनैवैकंबालयौवनदेह योः॥विद्यतेतस्यचैकत्वेनस्यान्मानादिभेदधीः॥३४०॥माषराशेर्हिमाषाणांनिर्गमेपिसमागमे॥संस्थानस्यै कतांनैवमन्यंतेस्थलरक्षकाः॥३४१॥ युवदेहजनौयद्वत्संस्कृतिर्नैवतेभवेत्॥ एवंमेदर्शनाज्जातेपुत्रादौनैवसं स्क्रिया॥ ३४२॥ जातोयमितिधीस्तत्रयौवनेचेन्नविद्यते॥सममत्रापिदृष्टेषुपुत्रादिषुनसास्तियत्॥३४३॥

कार्यरचनानुपपत्तिः ब्रह्मणःकारणतात्वस्मदुक्तरीत्यैवेतिभावः ॥ ३३९॥ स्थूलावयवाभ्युपगमेपिप्रकृतेसंस्थानैक्यंनास्तीत्याह संस्थान मपीति संस्थानमपिएकंनविद्यतेतस्यसंस्थानस्यैकत्वेसतिमानादीनांपरिमाणपराक्रमादीनांभेदधीर्नस्यादिति ॥ ३४० ॥ अवयवोपच यापचययोःसंस्थानैक्यंनास्तीत्यत्रोदाहरणमाह माषेति माषराशेःसकाशान्माषाणांनिर्गमेसतितत्रतेषांसमागमेवाराशिसंस्थानस्यैकतां नमन्यंतेस्थलस्यमाषराशिस्थानस्यरक्षकाइतिप्रसिद्धम् ॥ ३४१ ॥ फलितमाह युवेति युवदेहस्ययौवनशालिदेहस्यजनौसत्यांतमतेय थासंस्कृतिर्जातकर्माद्यानएवंममापीति ॥ ३४२ ॥ यदितत्रजातोयमितिबुद्धेरभावान्नसंस्कारापत्तिस्तर्हिमत्पक्षेपिसमंसमाधानमित्या ह जातोयमिति साजातोयमितिबुद्धिः ॥ ३४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाजन्मप्रयुक्तसंस्कारापत्तेःसमंसमाधानंतथाऽदर्शनात्मकमरणप्रयुक्तदाहादिप्रसंगस्यसमंसमाधानमित्याह अदर्शनेइति ॥३४४॥ साम्यंस्फुटयति नदृश्यतेइतिद्वाभ्यां यथायौवनेसतिबालशरीरंनदृश्यतेतथाबहिष्ठत्वेसतिबहिर्गतत्वेसतिबंधुतानदृश्यते अदर्शनमेवचनाशोनशअदर्शनेइतिधात्वर्थानुगमात् ॥३४५॥ अथैकेति अथेतिपक्षांतरे अत्रबहिर्गतेपुत्रादौएकबुद्धिरेकत्वावगाहिनीबुद्धिरस्तीतिबालयौवनदेहाद्विशेषंचेद्दूषेतर्हिसाबालयौवनदेहेष्वपिसएवायमितिबुद्धिर्दाहादिप्रसंगप्रतिबंधिकासमैवमानसंमनोनिष्ठंदुराग्रहंविना तथाचससमेवसमाधानमिति ॥ ३४६ ॥ एवमदर्शनेनमरणेसतिशोकप्रसंगस्यापिसमाधानंसममित्याह बालेति बालदेहेमृतेसतियथास्वस्यतद्देहवतःपरस्यचतत्पितृप्रभृतेःशोकोनभवतिसएवायमित्यभिमानात्तथाप्रकृतेपीति ॥ ३४७ ॥ नन्वदर्शनस्यमरणत्वेनमृतावयमितिपुन

अदर्शनेपिमरणेवन्हिदाहादिनापतेत् ॥ यथाबालशरीरस्यभवतोयौवनेनहि ॥ ३४४ ॥ नदृश्यतेयथाबालशरीरंयौवनेसति ॥ तथैवचबहिष्ठत्वेपुत्रादिर्नैवदृश्यते ॥३४५॥ अथैकबुद्धिरत्रास्तिपुत्रादौसासमातव ॥ बालयौवनदेहेपिविनामानसमाग्रहम् ॥ ३४६ ॥ बालदेहेगतेयद्वत्शोकःस्वस्यपरस्यन ॥ अदर्शनेनमरणेपुत्रादेरपिवैतथा ॥ ३४७ ॥ नमृतावयमित्येवंयदितेदर्शनेपुनः ॥ वदंतितर्हिदेहोपियूनएवंवदत्ययम् ॥ ३४८ ॥ अन्यथापरिमाणादिभेदाद्देहेस्फुटायदि ॥ कालभेदेहिपुत्रादौकेनासौविनिवार्यते ॥ ३४९ ॥

दृष्टानांवाक्येनविरोधइत्याशंक्यसाम्येनसमाधत्ते नमृताइति यदितेपुत्रादयःपुनर्दर्शनेसतिनमृतावयमित्येवंवदंतिइतितद्वाक्यविरोधशंकसेतर्हियूनोदेहेप्राप्तेसतिबालदेहेगतेचसतिअयंपुरुषएवंनमृतोहमितिवदतितत्रापितद्वाक्यविरोधेनबाल्यनिवृत्तेरभावमंगीकुरु यदिचबालयुवशरीरभेदाज्ञानरूपदोषशालिवक्तृकत्वात्तद्वाक्यमप्रमाणमितिमन्यसेतर्हिप्रकृतेपितथामन्यस्वेतिभावः ॥ ३४८ ॥ पूर्वापरभेदज्ञानप्रतिबंधकोदोषोऽवश्यमभ्युपेयस्त्वयापीत्याह अन्यथेति अन्यथातादृशदोषानभ्युपगमेस्फुटाआपदोरोगादिलक्षणायस्मिन्नेतादृशेदेहेकालभेदनिमित्तकानांपरिमाणादीनांभेदात्पुत्रादावसौशोकोमृतधीर्वाकेननिवार्यतेति ॥ ३४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भेदोविद्यतेभेदधीस्तुदोषेणप्रतिबद्धेतिदृष्टांतदार्ष्टांतिकयोःस्फुटयति कालेतिद्वाभ्यां यथातवमतेपिकालभेदेसतियुवबालशरीरयोरभेदोन विद्यतेतद्वन्ममतेपूर्वोत्तरयोर्बोधयोर्विषयभूतपुत्रादीनामभेदोनेति ॥ ३५० ॥ बालदेहइति यद्वत् उक्तदोषबलात् ॥ ३५१ ॥ तिष्ठतु दृष्टिसृष्टावन्यदुदाहरणंजन्ममरणेएवात्रोदाहरणमित्याह अपीति येलोकेसर्वदेहिनांप्रसिद्धेजनिमृतीतेअपिविज्ञानमात्रेणैवप्रसिद्धेकार्य करत्वरूपंलौकिकसत्त्वंप्राप्ते अन्यस्मात् ज्ञानभिन्नात्कारणात्तुनसत्वंप्राप्तेइति ॥ ३५२ ॥ जन्ममरणयोर्ज्ञातसत्त्वंस्फुटयति जातमितिद्वाभ्यां ॥ ३५३ ॥ स्वयमिति अयंजनःस्वयमपियज्जन्ममरणप्रयुक्तेसुखदुःखेसमाप्नुयात्तदप्येवमेव अन्यवचनादिनातज्ज्ञानादेवेत्यर्थः

कालाभेदेनचाभेदोयुवबालशरीरयोः ॥ भवेत्तद्वद्धिपुत्रादौपूर्वोत्तरविबोधयोः ॥ ३५० ॥ बालदेहेगतेयद्वन्न्व तधीर्नैवजायते ॥ अदर्शनेपिपुत्रादेर्मृतधीस्तद्वदेवन ॥ ३५१ ॥ अपिलोकेजनिमृतीप्रसिद्धेयेहिदेहिनां ॥ ते पिविज्ञानमात्रेणप्रसिद्धेनान्यकारणात् ॥ ३५२ ॥ जातंवापिमृतंवापियावज्जानातिनैवहि ॥ तावद्वर्षशतैर्वापिहर्षशोकौनगच्छति ॥ ३५३ ॥ स्वयमप्येवमेवायंसुखदुःखेसमाप्नुयात् ॥ अविज्ञानेतयोर्नैवस्यातांते कस्यचित्क्वचित् ॥ ३५४ ॥ अप्येतेस्वस्यनस्यातांप्रत्यक्षेप्राणिनःक्वचित् ॥ किंतुमात्रादिवचनादनुमानात्तयो र्हिधीः ॥ ३५५ ॥ कोहियोनेर्विनिर्याणेमूर्छाप्राप्तःशरीरभाक् ॥ योनिनिर्गमनंस्वस्यप्रत्यक्षीकर्तुमर्हति ॥ ३५६ ॥ एवंविशेषविज्ञानविलोपेप्राणनिर्गमे ॥ कोनाममरणंस्वस्यप्रत्यक्षेणावगच्छति ॥ ३५७ ॥

जनिमृत्योरज्ञानेतुतेसुखदुःखेकस्यचिदपिनैवस्यातामितिप्रसिद्धमितिशेषः ॥ ३५४ ॥ किंचलौकिकंजन्ममरणंचमूर्छावशेनस्वयंद्रष्टुम शक्यत्वात्परवचनादिनैवत्वयामंतव्यंतथाचपरमात्मवदेवाक्याद्दर्शनादर्शनयोर्जनिमृतीकुतोनाभ्युपैषीत्याह अप्येतइतिचतुर्भिः एते जनिमृतीकस्यापिप्राणिनःप्रत्यक्षसिद्धेनभवतःकिंतुमातृप्रभृतीनांवाक्यादनुमानाद्वातयोर्जनिमृत्योर्धीर्भवति ॥ ३५५ ॥ तत्रजन्मनःप्र त्यक्षत्वासंभवंदर्शयति कोहीति विनिर्याणेनिर्गमनकाले ॥ ३५६ ॥ मरणस्यापिप्रत्यक्षत्वासंभवमाह एवमिति प्राणनिर्गमेतत्कालेवि शेषाकारविज्ञानानांलोपेसतिमरणंकःसाक्षात्कर्तुंशक्नुयादिति ॥ ३५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतइति अतःस्वप्रत्यक्षासंभवात्शब्दादिविज्ञानादिरूपप्रमाणादेवजनिस्मृतीयथात्वयाबुद्धेज्ञातेतथाशास्त्रस्यव्याख्येयश्रुतिरूपस्यविज्ञा
नाद्दर्शनादर्शनरूपेजनिम्रतीस्थितेसिद्धेइत्यर्थः ॥ ३५८ ॥ ननुभवतादृष्टिस्रष्ट्युपपत्तयोबाह्येषुपुत्रादिविषयेष्वेवकुतःप्रपंचिताइंद्रियेषुदे
वेषुचकुतोनदर्शिताइत्याशंक्यइंद्रियाणांदेवानांचपरोक्षतयातत्रविरोधिप्रत्यभिज्ञाऽनवताराद्वाक्यश्रवणमात्राद्दृष्टिसृष्टिःसंभाव्यतेबाह्यवि
षयेषुतुप्रत्यभिज्ञागनिर्दर्शनीयेतिविषयेषुतत्प्रपंचःकृतइत्यभिप्रायंस्फुटयति प्रत्यभिज्ञेत्यादिचतुर्भिः करणग्रामःसंश्रयोविषयतयाश्रयो
यस्यास्तादृशीप्रत्यभिज्ञाचनास्ति कुतोऽनुपलब्धेरित्याह तदेवेति मामकेंद्रियंचक्षुर्यथापूर्वमासीत्तदेवतथाविधमेवैतर्हिवर्ततइत्येवमाका

अतःशब्दादिविज्ञानाद्बुद्धेजनिम्रतीयथा ॥ तद्वत्शास्त्रस्यविज्ञानाद्दर्शनादर्शनेस्थिते ॥ ३५८ ॥ प्रत्यभिज्ञाच
नैवास्तिकरणग्रामसंश्रया ॥ तदेवचक्षुरेतर्हियथासीन्मामकेंद्रियम् ॥ एवंनकस्यचिद्बुद्धिरिंद्रियेषूपलभ्यते ॥
॥ ३५९ ॥ अपिप्रत्यक्षतानास्तिसदैवेंद्रियसंश्रया ॥ प्रत्यभिज्ञाकुतस्तत्रयतःप्रत्यक्षगाहिसा ॥ ३६० ॥ इंद्रि
याणामधिष्ठात्र्योवन्ह्याद्याअपिदेवताः ॥ प्रत्यक्षानयतस्तेनतासामिंद्रियतुल्यता ॥ ३६१ ॥ विषयालोक
शब्देनकथितास्तेसुतादयः ॥ दर्शनादर्शनेतेषांजन्मनाशौसमीरिते ॥ ३६२ ॥

राबुद्धिरिंद्रियगोचराकस्यचिदपिजनस्यनोपलभ्यतेइति ॥ ३५९ ॥ इंद्रियाणामतींद्रियत्वाच्चसंस्कारसहकृतेंद्रियजन्यज्ञानरूपाप्रत्य
भिज्ञानसंभवतीत्याह अपीति इंद्रियसंश्रयाइंद्रियनिष्ठा तत्रइंद्रियेषु प्रत्यक्षगाप्रक्षवस्तुगतासाप्रत्यभिज्ञा ॥ ३६० ॥ एवंतद्देवेष्वपिनप्रत्य
भिज्ञेत्याह इंद्रियाणामिति इंद्रियाणामधिष्ठात्र्योवन्ह्याद्यादेवताअपियतोनप्रत्यक्षास्तेनप्रत्यक्षत्वाभावेनहेतुनातासांदेवतानांप्रत्यभिज्ञा
विषयत्वाभावेनसाधर्म्येणेंद्रियतुल्यतेति ॥ ३६१ ॥ विषयाइति विषयास्तुश्रुतिगतेनलोकशब्देनोक्तालोक्यंतेप्रत्यक्षज्ञानेनविषयीक्रि
यंतइतियोगार्थसमन्वयात्तेतुसुतादिरूपाःप्रदर्शितास्तेषांदर्शनमेवजन्माऽदर्शनमेवचनाशइतिसम्यगुपपत्तिपूर्वकमीरितंप्रत्यभिज्ञादिवि ॥२८॥
रोधपरिहारायेतिभावः ॥ ३६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुतौलोकशब्दप्रयोगेणचयोहियत्पश्यतिसतत्करोतीतिसूचनाज्जडमात्रस्यदृष्टिसृष्टिरभिमता उपपद्यतेचेदंपरोक्षभावानामपींद्रियादी नांस्वाभिमानिदेवादिप्रत्यक्षत्वात्तथाचतुल्यन्यायाद्भौतिकवद्भूतानामपिदृष्टिसृष्टिरभ्युपेयेत्याह भौतिकमिति तथाचायंप्रयोगः भूतपंच कंदर्शनादर्शनयोर्जन्मविनाशप्रतियोगिजडत्वादनात्मत्वाद्वाभौतिकवदिति नचानादिषु जीवईशोविशुद्धाचिद्विभागश्चतयोर्द्वयोः अवि द्यातच्चितोर्योगःषडस्माकमनादयइत्युक्तेषुव्यभिचारः तत्रापिजडांशस्यकल्पितत्वेनयावत्प्रतिभासमवस्थितेःप्रतिभासानादितयैवानादि त्वाभ्युपगमादिति चैतन्यस्यसर्वोपाधिष्वेकत्वात्तत्सत्तैवकल्पितानांसत्तेत्यत्रपर्यवसानान्नकश्चिद्विरोधइतिसर्वंसमंजसम् ॥ ३६३ ॥ भौतिकवदेवचप्रत्यभिज्ञादिविरोधपरिहारोपिवोध्यइत्याह प्रत्यभिज्ञेति प्रागुदाहृताउपपादिता अस्याःप्रत्यभिज्ञायाःसंस्थानमवय वाश्चकारणंनसंभवंतीत्यपिप्रागुदाहृतमित्यन्वयः ॥ ३६४ ॥ कर्मणांधर्माधर्मरूपाणांमायायादुर्घटकारिण्याःसर्वव्यवस्थोपपादक त्वाच्चनकाचिद्दृष्टिसृष्टिमतेनुपपत्तिरितिदर्शयितुंकर्मणांकारणत्वंतावच्छंकापूर्वकमवतारयति नचेति दृष्टिसृष्टिमतेऽदर्शनस्यैवनाशत्वाद

भौतिकंयद्वदेवेदंजायतेचविनश्यति ॥ भूतपंचकमप्येवंजडत्वादात्मभेदतः ॥ ३६३ ॥ प्रत्यभिज्ञापिसर्वत्रदे हवत्प्रागुदाहृता ॥ नसंस्थानंनावयवाअस्याःकारणमित्यपि ॥ ३६४ ॥ नचनीरविनाशेस्यात्तेजसस्तत्रवैज निः ॥ पुंसोबाल्यविनाशेकिंयुवावानभवेद्भवान् ॥ कर्मतत्रनिमित्तंचेत्तदत्रापिसमंमम ॥ ३६५ ॥ महाभूतज नौनैवकर्मकारणमिष्यते ॥ भवतोप्येतदप्यात्माऽज्ञानमाविष्कृतंत्वया ॥ ३६६ ॥

दृष्टस्यतडागादिस्थजलस्यनाशेसतितत्रनष्टजलदेशेतेजसोजलविरुद्धस्यजनिःस्यादितिनचशंक्यमितिपूर्वार्द्धार्थः इमांचशंकांपूर्वपक्षी हृदयेव्याप्तिमनालोच्यैवकृतवान् नहियत्रजलाभावस्तत्रतेजोजन्मनिनियमआकाशदेशादौव्यभिचारात् तथाचाहृदयवचसामहृ दयमेवोत्तरमितिन्यायेनतथाविधमेवोत्तरंददातिसिद्धांती पुंसइति कस्यचित्पुंसोबाल्यावस्थानाशेतद्विरुद्धंयौवनंत्वयिकुतोनजायतेइ त्यर्थः एवंप्रतिरुद्धोवादीकर्मणोपिसृष्टिंप्रतिकारणतेत्यनुस्मृत्याह कर्मेति तत्रयौवनसृष्टौ तथाचमयापिकर्मणांनिमित्तत्वंस्वीकृतमेवेत्याह सिद्धांती तदत्रापिसमंममेति अत्रदृष्टिसृष्टौतत्कर्माश्रयणेनव्यवस्थोपपादनंममापिसमं मयापिसुकरमित्यर्थः ॥ ३६५ ॥ शंकते महा भूतेति भवतोदृष्टिसृष्टिवादिनोमतेमहाभूतानांजनौकर्मकारणंनभवतिकिंतुभौतिकानामेवभोगोपकरणानांसृष्टाविति सिद्धांत्याह एत दिति एतच्छंकारूपेणपरिणतमात्मीयाज्ञानमेवत्वयाशंकमानेनप्रकटीकृतंनशंकितमित्यर्थः ॥ ३६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदज्ञात्वापूर्वपक्षिणाशंकितंतंश्रुतिस्मृतिन्यायसिद्धमर्थंकर्मापेक्ष्यात्मनःसृष्ट्यादिकारणत्वरूपंदर्शयति यतइति यतइतिश्रुत्यादिसिद्धमितिशेषः इतिकिं जगतोयोनिरभिन्ननिमित्तोपादानंप्राणात्माकारणोपाधिकःकर्मवासितःकर्मणांसूक्ष्मावस्थारूपादृष्टसापेक्षएवसृष्ट्यादिकरोतीति तथाचसप्तान्नब्राह्मणं सप्तान्नानिमेधयातपसाऽजनयत्पितेति सप्तान्नपदेनकार्यमात्रसंग्रहइतितत्रैवस्पष्टम् तपसाकर्मणावैषम्यनैर्घृण्येनसापेक्षत्वादितिन्यायः स्मृतयश्चपुराणरूपाः ॥ ३६७ ॥ ननुकर्मणोजन्यमात्रकारणत्वंनसंभवतिप्रथमसृष्टौकर्मणोनिमित्तत्वासंभवादित्याशंक्याह संसारस्येति तथाचपूर्वपूर्वकर्मनिमित्तिकोत्तरोत्तरासृष्टिरितिभावः ॥ ३६८ ॥ ननुकर्मणैवसर्वनिर्वाहेसतिमायास्वीकारोव्यर्थइत्याशंक्याह कर्मेति मायाव्यर्थतानवक्तुंशक्यादृश्यमात्रनिर्वाहकत्वात् कथमेतदितिचेत्कर्मण्येवतावन्निर्वाहकत्वंमायायाःपश्यतुभवानित्याह कर्मणोपीति नियतिर्व्यवस्था ॥ ३६९ ॥ अनुपपत्तिंस्फुटयन्मायायाःसर्वनिर्वाहकत्वंसर्वानुभवारूढंकरोति इदमिति यथाकार्त्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वामिदर्शनं सप्तजन्मसुविप्रःस्याद्धनाढ्योवेदपारगइत्याद्युक्तमिदंक

यतोहिजगतोयोनिःप्राणात्माकर्मवासितः ॥ भूतभौतिकजातंहिसृजत्यत्तिचसर्वदा ॥ ३६७ ॥ संसारस्यनकस्यापिप्राथम्यमिहविद्यते ॥ अनादित्वान्नचाप्यंतोविनामोक्षेणविद्यते ॥ ३६८ ॥ कर्मकारणपक्षेहिमायाव्यर्थतानहि ॥ कर्मणोपिविनामायांनियतिर्नोपपद्यते ॥ ३६९ ॥ इदंकर्मकुतोस्यैवशरीरस्यसुखस्यच ॥ कारणंनपरस्येतिनास्तिचोद्यप्रतिक्रिया ॥ ३७० ॥ नजानामीतिमायायावाचकंशब्दबोधकं ॥ हित्वातस्मादियंमायासार्थादुर्घटकारिणी ॥ ३७१ ॥

र्मास्यैवब्राह्मणदेहस्यधनाढ्यत्वप्रयुक्तसुखस्यैवचकारणमपरस्यब्राह्मणदेहभिन्नस्यशरीरस्यदुःखस्यचकारणंनभवतीत्येतत्कुतःकिमत्रनियामकमितिचोद्यस्यप्रतिक्रियापरिहारःनजानामीतिमायायाःवाचकंशब्दरूपंबोधकंहित्वानास्तिकिंतुनजानामीतिशब्दप्रयोगएवोत्तरं तथाचसर्वानुभवसिद्धायामायायाअशक्योऽपन्हवइतिभावः फलितमाह तस्मादिति तस्मात्सर्वनिर्वाहकत्वादियंदुर्घटकारिणीमायासार्थान व्यर्थाइत्यर्थः ननुनजानामीतिशब्दःकथंभावरूपाज्ञानवाचकःज्ञानाभावबोधकत्वादितिचेत्किंयत्किंचिद्ज्ञानाभावंप्रतिपादयतिकिंवाज्ञानसामान्याभावं नाद्यः पटज्ञानकालेपिघटज्ञानाभावमादायनजानामीतिप्रतीतिप्रसंगात् नद्वितीयः अभावज्ञानेप्रतियोग्यनुयोगिभाननियमेनज्ञानसामान्याभावस्यदुर्वचत्वात्सामान्याभावस्ययावद्विशेषविरोधित्वात् तस्मान्नजानामीत्यत्रनञःप्रकृत्यर्थान्वयेनज्ञाधातोर्ज्ञानविरोधिभावपरत्वमेवेत्यन्यत्रविस्तरः ॥ ३७० ॥ ३७१ ॥ ॥२९॥

१ अन्नंक्षीरंदर्शपूर्णमासौमनोवाणोप्राणाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायायादुर्घटकारित्वंस्फुटीकुर्वंस्तस्यादुर्घटकार्यांतरोपलक्षणमेकंदुर्घटंकार्यमादर्शयति स्वभावाद्याइति स्वभावाद्याःस्वभावकालप्रभृतयोयेचार्वाकादिपक्षास्तान्सर्वानयंखण्डनतर्करूपोराक्षसराजइमांमायारूपांजननींविनाकुतःसहायादत्तिभक्षयतिकिंतुमायाजननीप्रसादादेवात्ति विज्ञमतस्यखंडयितुमशक्यत्वात्तमःप्रभवचार्वाकादिमतखंडनकालेखंडनतर्कराक्षसस्यखंडनीयमतानांचजननीमायानजानामीतिरूपेणचार्वाकादिचित्तप्रादुर्भावरूपकरेणचार्वाकादिमतान्यादायेवकनिष्ठपुत्रायखंडनतर्कराक्षसराजायअशनमिवददातीतिमायायाःखंडनजयसंपादनरूपंदुर्घटंकर्मपश्यतेतिभावः चार्वाकादिमतानामज्ञानमूलत्वेमानंचयावेदबाह्याःस्मृतयोयाश्चतासांप्रवृत्तयः सर्वास्तानिष्फलाःप्रेत्यतमोमूलाहिताःस्मृताइतिस्मृतिः ॥ ३७२ ॥ परमतखंडनकालेस्वरक्षणरूपंचदुर्घटंमायायाःकर्मेत्याह

स्वभावाद्याहियेपक्षास्तान्सर्वानत्तिसर्वदा॥ कुतोराक्षसराजोयंविनास्वांजननीमिमाम्॥ ३७२॥ दुर्घटत्वमपिस्वस्यधर्मभूतंनलक्षयेत्॥ कुतोराक्षसराजस्यस्पर्धानास्यैहिविद्यते ॥ ३७३ ॥

दुर्घटत्वमिति मायाजननीस्वस्यात्मनोधर्मभूतंदुर्घटत्वमपिनलक्षयेत् खंडनतर्कराक्षसराजाद्गोपयेदितियावत् यदितुलक्षयेत्तर्हितदपिराक्षसराजोभक्षयेदेवराक्षसानांस्वकुलभक्षकत्वप्रसिद्धेरित्याह कुतइति राक्षसराजस्यअस्यैजनन्यैजननींप्रत्यपिस्पर्द्धाकुतोनजायतेकिंतुजायतएवराक्षसत्वादेवेति तथाचपरमतपृथग्भावेनप्रच्छन्नेवराक्षसराजमुपसर्पतिप्रायोमाया यदातद्दृष्टिगोचरीभवतितदातामपिराक्षसराजोभक्षयत्येवेतिभावः तदुक्तंखंडनकृद्भिः अभीष्टसिद्धावपिखंडनानामखंडिराज्ञामिवनैवमाज्ञा तत्तानिकस्मान्नयथावदेवसैद्धांतिकेप्यध्वनियोजयध्वमिति अस्यार्थः अभीष्टस्यपरमतनिरासस्यसिद्धावपिखंडनतर्काणांराजनिभानामाज्ञाप्रभुशक्तिर्नकेनचिदखंडिखंडितातत्तस्मात्तानिखंडनानियदिसिद्धांतस्वीकृतमायादिपदार्थंखंडयितुमुद्यतानिस्युस्तर्हिनवारणीयानीति ॥ ३७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुनजानामीतिवचनस्यचोद्यप्रतिक्रियात्वंयदुक्तंतदनुपपन्नंनिरर्थकत्वेनानुत्तरत्वादितिचेन्न सर्वत्रोत्तराणांदृष्टस्यफलस्यपूर्वपक्षिमूकतासंपादनरूपस्यात्रापिसद्भावादित्याह नजानामीति नजानामीतिवचनंकुतोहेतोर्निरर्थकंस्यान्नकुतोपीत्यर्थः तत्रहेतुतयावादिमूकतासंपादनरूपंफलंदर्शयति नहीति कुतइत्यग्रेइतीतिशेषः मानंसमाश्रितएवहिप्रायोवादोद्यतोभवतिसचाज्ञेषुवयमत्राज्ञाइतिवदत्सुकुतइतिनब्रूतेकुतस्तवाज्ञानमितिनपृच्छति अज्ञानस्यपर्यनुयोगायोग्यत्वप्रसिद्धेः किंतुमौनमेवकरोतीतिभावः ॥ ३७४ ॥ ननुअज्ञानरूपदोषालंबनेनवादिविजयोपिपराजयनिभइतिचेत्सत्यं आत्माज्ञानस्यदोषत्वमेव नचेदिहावेदीन्महतीविनष्टिरित्यादिश्रुतेः प्रपंचस्यतुमुमुक्षोर्विस्मरणीयत्वात्तदज्ञानंगुणएवेत्याशयेनाह जन्मादीति नृणामात्माज्ञानांधानां अयंभावः आत्मज्ञानेसर्वस्यज्ञातत्वात्प्रपंच

नजानामीतिवचनंकुतःस्याद्धिनिरर्थकम्॥ नह्यज्ञेषुकुतःकश्चिद्ब्रूतेमानंसमाश्रितः॥ ३७४ ॥ जन्मादिविषयेनृणामज्ञतानैवदूषणम्॥ अंधस्यहिनदोषोस्तिरूपाज्ञानेकथंचन॥ ३७५॥ आनंदात्माप्रकाशैकस्वभावोद्वयवर्जितः॥ असंगोनिर्गुणोऽनंतोविक्रियादेरनाश्रयः॥३७६॥ आवाङ्मनसगम्योपिविश्वमेतदजीजनत्॥ विचित्रंविविधाकारमचिंत्यानंतशक्तिकम्॥ ३७७॥ विलक्षणंप्रमाणादिभेदभिन्नमनेकधा॥इतिकोनामवैवक्तुंविज्ञातुंचप्रभुर्भवेत्॥ ३७८॥ यस्मिन्नेकैकमप्यत्रप्रमाणशतकोटिभिः॥ नज्ञायतेस्वरूपेणतथाधर्मादिनापिच ॥ ३७९॥ जानीमोवयमित्येवंबुद्धिर्येषांमहात्मनाम् ॥ तेपृष्टाःप्रवदंत्वत्रघटमेकंमहाधियः ॥ ३८० ॥

स्योपेक्षणीयत्वाच्चविशेषाज्ञानमदोषआत्माज्ञानेतुकर्दमलिप्तस्यधूलिलेपवज्जन्माद्यज्ञानमदोषइति ॥ ३७५ ॥ प्रपंचस्यानिर्वचनीयत्वेनविशेषतोज्ञातुमशक्यत्वाच्चतदज्ञानमदोषइतिसूचयितुंप्रपंचोत्पत्तेस्तर्कायोग्यत्वमाह आनंदात्मेतित्रिभिः आनंदात्मैकरसोऽद्वितीयआत्माविचित्रत्वादिविशेषणकंविश्वंकथमनेकधाजनयदितिपृष्टेवक्तुंसमाधातुंतदसंभवेविज्ञातुमपिवाकःप्रभुःसमर्थोभवेदितित्रयाणांसंबंधः ॥ ३७६ ॥ ३७७ ॥ ३७८ ॥ जगतोऽचिंत्यशक्तितांस्फुटयति यस्मिन्निति यस्मिन्विश्वस्वरूपेएकैकमपिवस्तुअनेकप्रमाणैरपिकिमस्यस्वरूपंकियंतोस्यधर्माःकियंतोवयवाइत्येवंनज्ञायतेतद्विश्वंसमग्रंवक्तुंकःशक्नुयादिति ॥ ३७९ ॥ जानीमइति वयंविश्वंजानीमइतियेषामभिमानस्तेस्माकंपुरतःपृष्टाःसंतएकंपुरोवर्त्तिनंघटंनिरूपयंत्विति ॥ ३८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतद्घटस्यनिरूपणंनामतत्स्वरूपस्यतदितरव्यावृत्तेर्व्यावृत्तिप्रयोजकधर्मस्यचनिरूपणमितिमत्वास्वरूपादिकंपृच्छति घटइति घटःकोय मितिपुरोवृत्तिघटस्यस्वरूपप्रश्नः अयंघटोऽघटःघटभिन्नएवकुतोनभवति तथाचास्यकथमितरव्यावृत्तिरितिव्यावृत्तिप्रश्नः एतद्घटस्येत रव्यावृत्तिप्रयोजकधर्मोपिचक्षुरादिसंबंधएववक्तव्यः जात्यादेस्तथात्वस्यनिरसिष्यमाणत्वात् सचनेत्रादिसंबंधोऽस्यैवघटस्यास्तिपरस्य एतद्भिन्नस्यनेत्यत्रैवकिंनियामकं इदंपदार्थपुरोवर्तित्वस्यघटत्वस्यचविवादारूढत्वेतन्नियम्यैंद्रियसंबंधस्यव्यावर्तकतयाऽऽश्रयितुमश क्यत्वादित्याशयेनधर्मप्रश्नःनेत्राद्यैरिति ॥ ३८१ ॥ अथघटस्वरूपसाधनायवादिनावक्तव्यत्वेनसंभावितानिलक्षणानिव्यभिचारेणदूष यति अयमित्यादिना अयमितिनिर्देशयोग्यत्वंलक्षणंचेत्तद्दृश्यमात्रेऽतिप्रसंगि इदंपदस्यपराग्भाववाचकत्वात् घटपदप्रयोगयोग्यत्वंल क्षणंतर्हिघटांतरेऽतिप्रसंगः॥३८२॥अघटव्यावृत्तिरूपघटत्वशालीघटइतिनास्तिकमतेनलक्षणमाशंक्यतदसंभवमाह यथेति तादृशलक्ष

घटःकोयंकुतोवास्याद्घटोयमघटोनहि॥ कस्मादस्यहिसंबंधोनेत्राद्यैरपरस्यन॥ ३८१॥ अयमित्येषनिर्देशः सर्वस्यास्तिहिवस्तुनः॥ घटइत्यपिनिर्देशोविद्यतेहिघटांतरे॥ ३८२॥ यथाघटेघटाभावःपटेप्येवंसविद्यते॥ कुतोघटःपटोनस्यात्पटोवापिघटोनकिम्॥ ३८३ ॥ नेत्राद्यैर्विद्यतेयावत्संबंधोत्रघटस्यहि॥ यादृगेवहिसंबंधःपरस्यापिसतैःसमः ॥ ३८४॥

णार्थमघटस्तावन्निरूपणीयः घटभेदएवचतल्लक्षणंवाच्यं घटभेदनिर्णयश्चघटस्वरूपनिर्णयाधीनस्तदनिर्णयेचघटाभावोघटभेदरूपोय थाभवदभिमतेघटेसंदिग्धरूपेणवर्ततेएवमेवपटेपिविद्यते पटएवघटःकिंनस्यादितिशंकायाअनिवर्तितत्वात् एतादृशाघटव्यावृत्तस्यघट त्वेतुघटःपटःकुतोनस्यात्पटोवाघटःकुतोनस्यादितिघटनिरूपणाधीनाऽघटव्यावृत्तिरूपंघटलक्षणमात्माश्रययस्तमितिभावः ॥ ३८३ ॥ एवमिंद्रियभिन्नत्वेसतिएतद्घटेंद्रियसंबंधनिरूपकत्वमप्यलक्षणमित्याह नेत्राद्यैरिति अत्रदेशेवर्तमानस्यघटस्यनेत्राद्यैःसहसंबंधोया वद्यत्क्षणावच्छिन्नोयादृगेवचसंयोगादिरूपोविद्यतेपरस्यापिएतद्घटभिन्नस्यापितत्समीपस्थस्यससमः तत्रसंबंधेएतत्स्वरूपस्यनिवेशस्तु स्वरूपनिर्णयाधीनइत्युक्तमितिभावः ॥३८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदकेति उदकानयनेशक्तत्वंघटत्वंत्वयाभिमतंचेत्तर्हिघटांतरस्यएतद्घटभिन्नस्यपटस्यपात्रांतरस्यवाजलानयनसमर्थस्यएतल्लक्षणंविद्य
तेतथाचायंघटःसघटांतरादिरूपःकुतोनस्यादितिउद्देश्यापेक्षयापुंस्त्वं ॥ ३८५ ॥ उदकाहरणंचायमिति उदकाहरणमपिक्रियात्वेनकार
कमात्रंपूर्वकारणसजातीयमपेक्षते यथापचिक्रियाग्नित्वेनपूर्वाग्निसजातीयमग्निमेवंचपार्थिवत्वेनपृथिवीविकारत्वेनपूर्वघटसजातीयो
॥३१॥ ऽयंपुरोवर्त्तीउदकाहरणकरःपटएवकुतोनभवतीत्यर्थः ॥ ३८६॥ नन्वस्यपटत्वेघटत्वाभावापत्तिःस्यादित्याशंक्यकिंघटत्वभावेपटत्वाभा
वोनास्तितथाचैकस्याभावेऽऽवश्यमंगीकर्तव्येविनाप्रमाणंघटत्वमभ्युपगम्यपटत्वाभावांगीकरणमयुक्तमित्याह घटस्येति घटस्यपटत्वंन

उदकाहरणेशक्तोघटोयमितिचेन्मतम्॥ घटांतरादेरेतत्स्यात्कुतःसोयंघटोनहि ॥ ३८५॥ उदकाहरणंचायं
कुरुतेनपटःकुतः ॥ पार्थिवत्वंहिसामान्यंविद्यतेतूभयोर्यतः॥ ३८६ ॥ घटस्यनपटत्वंचेद्घटत्वंचपटस्यन॥ द्व
योरन्यतरासत्वेपक्षपातःकुतोघटे॥ ३८७॥ उदकाहरणेशक्तोघटश्चेच्छिद्रघटोभवेत्॥ सच्छिद्रादौघटेनस्याद्घ
टोयमितिधीःक्वचित्॥ ३८८॥ उदकाहरणाभावेतच्छक्तिर्नैवगम्यते॥ आपाकादिस्थितेकुंभेघटधीस्तेकथं
भवेत्॥ ३८९ ॥ उदकाहरणेशक्तमपिभांडादिकंयद्धु॥ विद्यतेतत्कुतोनस्याद्घटधीशब्दभाक्तदा ॥ ३९० ॥

स्यादितिचेद्ब्रूषेतर्हिपटस्यघटत्वमपिनस्यादेव एवंघटत्वपटत्वयोरन्यतरांगीकारेऽन्यतरस्याभावेस्वीकार्यत्वेनसमानेअयंघटएवेत्यभिमा
नेकस्तेपक्षपातोदुराग्रहइत्यर्थः॥३८७॥ उदकाहरणेशक्तइति उदकाहरणेशक्तिमान्योघटःसएवघटःघटतेशक्तोभवतीतियोगस्यैवलक्ष
णत्वादितिचेद्ब्रवीषितर्हिसच्छिद्रघटादौघटधीर्नस्यात्सातुभवतीत्यव्याप्तिः ॥ ३८८ ॥ किंच शक्तेःकार्यानुमेयत्वात्कार्यारंभात्पूर्वमसिद्ध ॥३१॥
यातयालक्षणभूतयाघटधीर्नस्यात्सापिदृश्यतइत्यलक्षणमेतदित्याहोदकाहरणाभावइति आपाकोघटपाकस्थानं ॥ ३८९॥ अत्रलक्षणे
पात्रांतरेष्वतिव्याप्तिश्चेत्याह उदकाहरणेशक्तमपीति तद्भांडादिकं तदाएतादृशलक्षणकरणे ॥ ३९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटत्वजातिमान्घटइतिलक्षणमाशंक्यतत्रघटत्वजातिःसर्वगतापरिच्छिन्नावेतिविकल्प्यआद्येऽतिप्रसंगंदर्शयति घटत्वेति जातेःसर्वगतत्वेसतिघटत्वजातेर्योगएतादृशव्यक्तिष्वेवनान्यास्वितिनियमोवक्तुमशक्यः तथासतिसघटत्वजातियोगःपटेनापिस्यात् बलाद्विभुत्वसामर्थ्यादन्यथाविभुत्वंव्याहतंस्यादित्यर्थः॥ ३९१॥ विभोःसर्वगतत्वेदृष्टांतमाह आकाशइति आकाशोघटसंबद्धःसन्कदाचिदपिपटेनसहनयोगभाक्असंबद्धोनभवतीतिंकिंतुसंबद्धएव अतोविभुत्वपक्षेकुत्रचित्संबंधःकुत्रचिन्नेतिव्यवस्थानुपपत्तेः तस्याजातेःस्थितिरेकदेशाएकोदेशोयस्यास्तादृश्येवत्वयावाच्याभवेत् तथाचपरिच्छिन्नत्वकल्पःसमागतइत्यर्थः॥ ३९२॥अपरिच्छिन्नपक्षंदूषयति असर्वगेतिचतुर्भिः साजातिरसर्वगासतीघटमेवव्रजेदितिकुतोनियमः नचसास्वकीयाव्यक्तीरालोच्यतत्रैवगच्छेदितिवक्तुंशक्यं आलोचनस्यजडेबाधात् किंच परिच्छिन्नपरिमाणरूपमूर्त्तत्वशालिद्रव्यत्वस्यक्रियाव्यापकस्याभावाज्जातौगमनंदुर्वचमित्याह अपिमूर्तमिति वादिनांवैशेषिका

घटत्वजातियोगोपिनियंतुंनैवशक्यते॥ जातेःसर्वगतत्वेस्यात्पटेनापिबलाद्विसः॥ ३९१ ॥ आकाशोघटसंबद्धःपटेनासौनयोगभाक्॥ नकदाचिदतस्तस्याएकदेशास्थितिर्भवेत्॥ ३९२ ॥ असर्वगाजडाकेनघटमेवव्रजेद्विसा॥ अपिमूर्तंतथाद्रव्यंवादिनांगतिमद्भवेत्॥ अमूर्ताद्रव्यरूपेयंकुतोयात्याश्रयंविना॥ ३९३ ॥ घटादन्योनतस्याःस्यादाश्रयोतोऽघटागमे॥ कथमेषासमागच्छेदहोव्यसनमागतम्॥ ३९४ ॥

दीनांमतेयन्मूर्तंद्रव्यंतदेवगतिमद्भवेत् इयंतुअमूर्तभावरूपाआश्रयंविनाकथंघटंयाति अमूर्तगुणादीनांगमनव्यवहारस्याश्रयगमनोपाधिकत्वप्रसिद्धेः तदाश्रयस्यव्यक्त्यंतरस्यव्यक्त्यंतरगमनंतुबाधितमितिभावः॥ ३९३॥ ननुघटादन्यस्तस्याआश्रयोभविष्यतितेनचसहागमिष्यतीत्याशंक्यानुपलब्धिविरोधान्नैवमित्याह घटादिति तस्याजातेर्घटादन्यआश्रयस्तुनस्यादेवानुपलब्धेः अतोहेतोरघटागमेआश्रयस्यघटाभिन्नस्यजायमानव्यक्तावागमस्यागमनस्याभावेप्येषाजातिःकथमागच्छेदित्याकारचिंतारूपंव्यसनंविपदपरपर्यायमागतं तस्यानिरंशत्वादवयवद्वाराप्यागमनंनसंभवतिपूर्वाश्रयपरित्यागानुपलब्धेश्चागमनानुपपत्तिरितिभावः तदुक्तं नायातिनचतत्रासीन्नास्तिपश्चान्नचांशवत् जहातिपूर्वंनाधारमहोव्यसनसंततिरिति ॥ ३९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदाहृतश्लोकेनचतत्रासीदित्यंशंस्फुटयति घटइति घटउत्पद्यमानेपिसत्येषाजातिःप्रादुर्भावायतत्रैवस्थिताऽऽसीदितिनसंभवेन्नोपपद्येत कुतःकारणस्यआश्रयस्थितिरूपस्यप्रयोजकस्यघटोत्पत्तेःपूर्वमभावादित्यर्थः सचकारणाभावोजातेपिघटेकस्मान्नकिंत्वस्त्येव अन्यत्र स्थितायाजायमानव्यक्तावागमनप्रयोजकाश्रयागमनाभावस्योक्तत्वादितिभावः॥३९५॥ ननुघटेनसहोत्पद्यतांजातिरित्याशंक्यतथास तिजातित्वाभावापत्तिः यत्रयत्रोत्पद्यमानत्वंतत्रतत्रजातित्वाभावोयथाश्यामरूपादाविति नियमदृष्टेरित्याह घटेनसहेति ॥ ३९६ ॥ जा तिंदूषयितुंप्रकारांतरेणविकल्पयति अपिसेति साजातिरभावरूपाभावरूपावा अभावरूपत्वपक्षेपिकोऽभावस्तद्रूपंतस्याजातेःस्वरूपमि तिवक्तव्यम्॥३९७॥ कोभावइतिसूचितमभावभेदंदर्शयति अभावइति वादिभिरभावोद्विविधःप्रोक्तः अनित्योनित्यश्च प्रागभावध्वंसा न्यतररूपोऽनित्यः भेदात्यंताभावान्यतररूपश्चनित्यः तत्रप्रागभावस्यजातिस्वरूपत्वेव्यक्तिविशेषसंबंधनियमोनस्यात् यतःप्रागभावेइ

घटउत्पद्यमानेपिनैषातत्रैवसंभवेत्॥ कारणाभावतःकस्मात्तत्रजातेघटेपिन॥३९५॥ घटेनसहनैषापिजा यतेश्यामतादिवत्॥ तथात्वेसानजातिःस्यात्श्यामतादिर्यथागुणः॥ ३९६॥ अपिसाऽभावरूपास्यादथवा भावरूपिणी॥ अभावत्वेचकोऽभावस्तद्रूपमितिकथ्यताम्॥ ३९७॥ अभावोद्विविधःप्रोक्तोऽनित्योनित्यश्च वादिभिः॥ अनित्यःप्रागभावःस्यात्सकस्येतिननिश्चयः॥ ३९८॥ अर्थस्येतितदुत्पत्तौजातेर्नाशःसुनिश्चि तः॥ नित्योपिजायमानश्चेन्नित्योसौघटवन्नहि॥ ३९९॥ अपरस्यापिनित्यस्यकुतोयोगोघटेनकिं॥ कस्मा च्चनपटेनेहवैषम्येनास्तिकारणम्॥ ४००॥

तिननिश्चयः इतिकिं सप्रागभावःकस्यअर्थस्यपदार्थस्यसंबंधीति नहिप्रागभावस्यप्रतियोगिविशेषेणसंबंधेकिंचिन्नियामकंवक्तुंशक्यं तथाप्रतियोग्युत्पत्तिनाश्यस्यप्रागभावस्यजातिस्वरूपत्वेसतिजातेर्नाशःसुनिश्चितोभवेदिति एतौदोषौध्वंसरूपत्वपक्षेपिसमानाविति सूच यन्नित्याभावरूपाजातिरितिपक्षेनित्यपदेनध्वंसव्यावृत्तिशंकापूर्वकमाह नित्योपीति नित्योपिअभावोजातिस्वरूपत्वेनविवक्षितोजाय मानोऽजायमानोवाऽऽद्येतस्यनित्यत्वंघटवन्नहिसंभवतीत्यजायमानोऽत्यंताभावादिरेवजातिस्वरूपतयावाच्यस्तत्रदोषमाह अपरस्येति अपरस्याजायमानस्यापिनित्यस्यात्यंताभावादेर्घटेनैवजातिरूपतयाकिंयोगःपटेनापियोगःकस्मान्नभवतीतिपर्यनुयोगेसतिसमाधातु मशक्येवैषम्येकुत्रचिदवस्थितिरूपेकारणंनिमित्तंनास्तीतिननित्याभावस्यापिजातिस्वरूपत्वमितित्रयाणामर्थः॥ ३९८॥३९९॥४००॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमभावरूपाजातिरितिपक्षंनिरस्यभावरूपेतिपक्षंप्रत्याह भावइति भावत्वपक्षेपिसाजातिर्नित्याऽनित्यावातत्रानित्यत्वंकथंचननस्यान्नोपपद्येतयतोऽभाववत्अभावव्याप्तं अनित्यत्वेस्वीकृतेएकघटाभावेतस्याअभावोपिस्वीकार्यःस्यात्तथाचसर्वदेशेषुघटाभावबुद्धिप्रसंगइतिभावः नित्यत्वंचेज्जातेर्ब्रूषेतर्हितस्याःकस्माद्धेतोर्नित्यतेतिपृष्टेसतिनित्यताप्रयोजकंत्वयावाच्यमिति॥४०१॥ ननुविनाशकारणाभावोनित्यताप्रयोजकइतिचेत्सत्यं सतुअद्वितीयात्मन्येववर्त्ततेऽत्रजातौतुभ्रमादेवतवभासतइत्याह विनाशेति यदिवस्तुतोजातिर्नित्यास्यात्तर्हिआश्रितनित्यतायाआश्रयनित्यताधीनत्वाद्घटेपिविनाशकारणाभावःस्यात्सतुनास्तीत्याह कस्मादिति एषविनाशकारणाभावः॥ ४०२ ॥ त्वत्सम्मतेव्यास्यैवानित्याश्रितानामनित्यत्वंसिद्धमित्याह आश्रितानामिति भावकार्यतयाघटेदृष्टाऽनित्यताइतिशेषः तस्याजातेस्तन्निष्ठायाःकेननिवार्यते ॥ ४०३ ॥ घटत्वजातेरभ्युपगमेपितदभ्युगपगमफलंलक्षणत्वेनेतरव्यावृत्तिसिद्धिरूपंनसंभवतीत्याह

भावेप्यभाववन्नस्यादनित्यत्वंकथंचन॥ नित्यतायांचसानित्याकस्मादितिहिकथ्यतां॥४०१॥ विनाशकारणाभावोभवतैवात्रकल्पितः॥ कस्मादेषघटेनस्यात्तस्याआश्रयरूपके॥ ४०२॥ आश्रितानामनित्यत्वंत्वयैवांगीकृतंयतः॥ कार्येभावेघटेदृष्टातस्याःकेननिवार्यते॥ ४०३॥ यादृशंतादृशंवास्तुघटत्वंकिमनेननः॥ आहोभिन्नंपटत्वाद्धिकुतइत्यत्रतद्वद॥ ४०४॥ घटाश्रयत्वादितिचेदहोमोहोमहानयम्॥ यदसिद्धमसिद्धेनसाध्यतेभवताधुना॥ ४०५॥

यादृशमितिद्वाभ्यां यादृशंतादृशंवाघटत्वमस्तुतथाप्यनेनाभ्युगपगतेनघटत्वेननोस्माकंकिंफलमिति नन्वितरभेदानुमितिरेवफलमितिचेत्स्यादेवैतत्फलंयदिघटस्यविपक्षव्यावृत्त्यात्मकंहेतुरूपंस्यात् विपक्षव्यावृत्तिश्चविपक्षधर्मपटत्वादिभेदरूपेति घटत्वस्यपटत्वाद्भेदेहेतुर्वाच्यइत्याह आहोइति आहोइत्यव्ययंवितर्के इत्यत्रप्रश्नेतदुत्तरंवदेति ॥४०४॥ घटेति घटत्वंपटत्वाद्भिन्नंघटाश्रयत्वात्घटरूपवदितिचेद्ब्रूषेतर्हिअहोविवेकसामग्रीसन्निधानेपिस्थितत्वादाश्चर्यरूपस्तवमहानयंमोहःप्रमादः तमभिनयति यदिति यद्यस्मादसिद्धेनसंदिग्धत्वात्स्वरूपासिद्धेनहेतुनापटाश्रयत्वेनासिद्धंसाध्यंभेदरूपंसाध्यते निश्चितेनहेतुनाहिसाध्यंसाधनीयंघटएवघटत्वमिति घटाश्रयत्वनिश्चयोहिनाययावज्ज्ञातः घटस्वरूपस्यानिर्णयेतन्निरूपिताश्रयतायानिर्णेतुमशक्यत्वादितिभावः ॥ ४०५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंघटशब्दवाच्यत्वंघटइतिबुद्धिविषयत्वंवाघटस्यलक्षणंनसंभवतीत्याह एवमिति यथाघटत्वंनलक्षणमेवंघटशब्दधियोविषयतापिघटस्यलक्षणंनस्यादित्यन्वयः तत्रविषयतासामान्यंवालक्षणंविषयताविशेषोवानाद्यइत्याह विषयइति यथाघटोविषयस्तथापटादिरपियतोविषयस्तथाचातिप्रसंगःस्पष्टः नद्वितीयोपि घटशब्दधीनिरूपिताघटनिष्ठाविषयताहिलक्षणत्वेनवाच्यासाचपरैःसंबंधिद्वयस्वरूपालिकांज्ञानजन्यफलाश्रयत्वरूपांवाविषयतामभ्युपगच्छद्भिर्घटस्वरूपनिर्धारणंविनादुर्वचेति सिद्धांतसिद्धाचित्तादात्म्यरूपाविषयतातुअज्ञानजन्यत्वव्याप्यकल्पितत्वसित्ध्यधीनेतिभावः ॥ ४०६ ॥ असिद्धेनासिद्धस्यसाधनरूपोदोषोप्यत्रस्थितएवेत्याह विषयइति कोयंविषयपदार्थइत्यत्रार्थेमयापृष्टेसतिभवतायथाघटस्वरूपंननिर्धारितंएवंविषयपदार्थस्वरूपमतिप्रसंगपरिहारेणननिर्धारयितुंशक्यं घटीयाविषयतापटीयाकुतोनभवतीत्याक्षेपस्यापरिहारात् तथाचतादृशविषयतयाघटसाधनमसिद्धेनासिद्धसाधनमेवेतिभावः ॥ ४०७ ॥

एवंविषयतानस्याद्घटशब्दधियोरपि ॥ घटस्यविषयोयस्मात्पटादिश्चघटोयथा ॥ ४०६ ॥ विषयःकोयमित्यत्रपृष्टेसतिघटोयथा ॥ नज्ञातोविषयोप्येवंभवतानावधार्यते ॥ ४०७ ॥ विषयेनियतानैवकाचिदर्थक्रियास्तिहि ॥ नजातिर्नचधीशब्दौतस्यैवाऽसिद्धितोऽधुना ॥ ४०८ ॥ उदकाहरणादीनामपिसत्वेघटेनच ॥ अयंघटस्त्वयामह्यंकथितोस्तिकथंचन ॥ ४०९ ॥

अवधारणाभावेतद्व्याप्यलिंगालाभंहेतुतयाह विषयेइति विषयेनियताविषयत्वव्याप्याकाचिदपिअर्थक्रियाअर्थस्यफलस्यनिष्पत्तिर्यथावन्हेर्दाहक्रियातद्वन्नास्ति नचज्ञानमेवविषयताफलं विषयतायाज्ञानात्पूर्वमसिद्धेः तस्यविषयस्यैवनियताजातिरपिनवाच्यानचतन्नियतौधीशब्दौनिरूपयितुंशक्यौ कुतः अधुनापिपर्यनुयोगकालेअसिद्धितःअसिद्धत्वात् अतिप्रसंगशंकाविषेणमूर्छितत्वादितियावत् अभिमानमात्रेणान्यदासत्वंतुयुद्धकालेप्रच्छन्नीभवद्योधवदकिंचित्करमितिभावः ॥ ४०८ ॥ किंचयत्रोदकाहरणादयोलोकप्रसिद्धाहेतवोलब्धास्तस्यघटस्यापिनिर्धारणंयस्यभवतोदुष्करमासीत्तस्यतेविषयनिर्धारणदुष्करताकिमुवाच्येत्याह उदकेति उदकाहरणादीनांसत्वेप्ययंघटोमह्यंत्वयानचकथितइतिसंबंधः ॥ ४०९ ॥ ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुपृथुवुध्नोदरादिरूपाकृतिर्घटस्यलक्षणमस्त्वितिचेन्नाऽतिव्याप्तेरित्याह पृथ्विति बुध्नोमूलंउदरंमध्यंचवुध्नोदरे पृथुनीवुध्नोदरेपरिशेषा न्मुखंस्वल्पंयत्रतादृशआकारोप्यस्यपुरोवर्तिनोघटस्यनियामकइतरव्यवच्छेदेननिर्धारकोनसंभवति यतःसर्वेपिभवदभिमतघटास्तादृ शाकारवंतोदृश्यंतइतीदमपिपुरोवर्तिमात्रलक्षणंनसंभवतीतिभावः ॥ ४१० ॥ एतद्देशवृत्तित्वमेतत्कालवृत्तित्वंवाघटस्यनलक्षणमेतद्देशका लवृत्तीनामन्येषामपिभावेनातिव्याप्तेरित्याह देशेति एवंपूर्वोक्तलक्षणवत् अस्यघटस्य एतादृशाएतद्देशकालसंबद्धाः परमतेदिक्काल योःसर्वाधारताभ्युपगमात् घटदेशेप्यन्यपदार्थानांसद्भावादितिभावः ॥ ४११ ॥ तस्मादनिर्वचनीयत्वेनाज्ञानोपादानकोघटः नचघटो पादानमज्ञानंनानुभूयतेइतिवाच्यं तदननुभवेनजानामीत्युत्तरस्यवक्तुमशक्यत्वादित्याह किंचेत्यादिना योयोघटःकेनचित्कथ्यतेत्व

पृथुबुध्नोदरादिःस्यादाकारोपिनियामकः ॥ नघटस्यास्यदृश्यंतेयतःसर्वेपितादृशाः ॥ ४१० ॥ देशकालादिकं चैवंनस्यादस्यनियामकं ॥ यतएतादृशाभावाःसंतिलोकेसहस्रशः ॥ ४११ ॥ किंचयोयोघटोनामकथ्यतेके नचित्त्वया ॥ ज्ञायतेचमयातत्रकुतइत्युदितेसति ॥ ४१२ ॥ नजानामीतिवचनात्कोपाद्वादुष्टचेतनात् ॥ उत्त रंनान्यदीक्षेतभवतोप्यभिमानिनः ॥ ४१३ ॥ एकंघटंयतोनैवंशक्तावक्तुंकथंचन ॥ कुतोविश्वमिदंकृत्स्नंभ वंतोवक्तुमीशते ॥ ४१४ ॥ भवतामपिसर्वेषामज्ञानमभिमानिनां ॥ मदुक्तेःसहकारित्वात्पुरतोभातिसर्व तः ॥ ४१५ ॥

याभिमानमात्रेणज्ञायतेवातत्रघटइतिकथनेज्ञानेचकुतइत्याकारेणनियामकेमयोदितेपृष्टेसतिनजानामीतिवचनंवावदिष्यसिकोपंवाक रिष्यसिइतोन्यदुत्तरमभिमानिनोपिभवतोनेक्ष्यतेनचद्रष्टुंसंभाव्यते तत्रकोपंविनायदुत्तरदानायतवचित्तेभासतेतदेवाज्ञानंघटोपादानमि तिद्वयोरर्थः ॥ ४१२ ॥ ४१३ ॥ घटोदाहरणस्योपलक्षणत्वात्एवंनीत्यासर्वप्रपंचकारणमज्ञानमवधार्यमित्याह एकमिति स्पष्टम् ॥ ४१४ ॥ ननुमायांतुप्रकृतिंविद्यादित्यादिश्रुतिभ्योपिजगतोमायोपादानकत्वनिश्चयसंभवात्किंतवानयाघटखंडनवाचोयुक्त्याइतिचेत्सत्यंतथापि येषांवुद्धिदोषेणश्रुत्यर्थेऽसंभावनातान्प्रत्यपिमदुक्तिःसहकारीभूयमुखंदर्पणमिवाज्ञानमनुभावयतीत्याह भवतामिति सर्वेषांभवतामभि मानिनामपिअज्ञानंपुरतइवभातिकस्मान्मदुक्तेःसहकारित्वादित्यन्वयः ॥ ४१५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनिर्वाच्यत्वमेवास्यप्रपंचस्यमायिकत्वमावेदयति सुदुर्घटमिति यस्मात्समग्रंविश्वंनिरूपयितुंसुदुर्घटमशक्यंतस्मादज्ञानादुत्थितंभवेदि
ति तदुक्तं यथासतोजनिर्नैवमसतोपिजनिर्नच जन्यत्वमेवजन्यस्यमायिकत्वसमर्पकमिति ॥ ४१६ ॥ दृष्टंचमायिकानांनिरूपणसम
र्थज्ञानाविषयत्वमित्याह नहीति लोकेपिमायाविनामैंद्रजालिकादीनांसकार्यांमायांकश्चनापिपश्यन्नपिनवेत्तिननिरूपणसमर्थज्ञान
॥३४॥ विपयीकरोतितथाविश्वंकश्चननजानातीति ॥ ४१७ ॥ स्वप्नवदसंभावितदेशादिसंबंधभानाच्चविश्वस्यमायामयत्वमितिदर्शयति स्वप्ने
इति यथारात्रौस्वप्नेमथुरोपवनेमथुरायाउपवनेस्थितःसन्सूर्यग्रहणसंयुक्तंसागरंनिजेह्रदयेपश्येत् कीदृशंसागरमसंभावितदेशकालादि
संबद्धं एवमयंमूढएतच्चराचरंपश्यतीति ॥ ४१८ ॥ एतच्चाज्ञानंनस्वतंत्रंकारणं किंत्वीश्वरस्यशक्तिभूतत्वात्तत्परतंत्रमित्याह मायैषेति

सुदुर्घटमिदंयस्मान्निरूपयितुमंजसा ॥ विश्वंसमग्रंतस्मात्तदज्ञानादुत्थितंभवेत् ॥ ४१६ ॥ नहिमायाविनां मायांसकार्यांवेत्तिकश्चन ॥ पश्यन्नपितथाविश्वंजानातिहिनकश्चन ॥ ४१७ ॥ स्वप्नेपश्येद्यथारात्रौसागरंह्रदयेनिजे ॥ सूर्यग्रहणसंयुक्तंमथुरोपवनेस्थितः ॥ असंभावितदेशादिमेवमेतच्चराचरम् ॥ ४१८ ॥ मायैषात स्यदेवस्ययोऽवाङ्मनसगोचरः ॥ यादृशंतादृशंत्वस्याःकार्यमेतच्चराचरम् ॥ ४१९ ॥ सर्पस्ययद्विपादानांवि न्यासान्नभसिस्थितान् ॥ अंधोऽवलोकयेत्तद्वत्श्रृणुयाद्बधिरोपिहि ॥ अनेडमूकवचनंतादृग्विश्वस्यबोधनम् ॥ ४२० ॥ अतोमायाविनस्तस्यमहेशस्यविचेष्टितम् ॥ नकोपिकिंचिज्ज्ञानातिविनाहंकारमात्मनः ॥ ४२१ ॥

एषाऽज्ञानत्वेनोक्तादेवस्यएकोदेवइत्यादिश्रुतिप्रसिद्धस्याविषयत्वेनज्ञेयस्यहियतोयादृशंतादृशमनिर्वचनीयमतोस्यामायायाएतज्जग
त्कार्यमिति ॥ ४१९ ॥ तस्यंदेवस्यज्ञानवतांप्रपंचस्यतुच्छतयाभानात्तदज्ञानवतामेवचप्रपंचभानादज्ञानमूलत्वंस्पष्टमित्यभिप्राये
णालीकभानंप्रपंचभानेदृष्टांतीकरोति सर्पस्येति सर्पस्यनभसिगच्छतःपादविन्यासचिन्हानियथांधोऽवलोकयेत्यथावाऽनेडमूकवचनं
वधिरःश्रृणुयात्तादृशंविज्ञदृष्ट्याप्रपंचविज्ञानमिति ॥ ४२० ॥ प्रपंचदर्शनमेवाज्ञानलिंगमित्याह अतइति अतोवस्तुतोऽसत्वेपिप्रपंच
स्यभासमानत्वाद्योमन्यतेऽहंमायाविचेष्टितंजानामीतितस्याभिमानमात्रमित्याह विनेति ॥ ४२१ ॥ ॥३४॥

१ अनेडमूकस्तुवक्तुंश्रोतुमशिक्षितेइत्यमरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवस्त्रध्यादिविषयेऽज्ञतानैवदूषणमित्युक्तमित्याह एवंभूतइति अस्मिन्मायाविचेष्टितेएवंभूतेऽतिदुर्बोधेसतिसर्वेषांजगत्तत्त्वगोचरमज्ञानमुचितमेवेति ॥ ४२२ ॥ ममकुत्रापिनाज्ञानमितिवादिनोदुराग्रहंकैमुत्यन्यायेनखंडयति अपियत्रेति यत्रसांनिध्यादात्मबुद्धिरपिकृतातस्यशरीरस्यापितत्त्वमविदुषोबाह्यगोचरमज्ञानंकिमुवाच्यमित्यर्थः ॥ ४२३ ॥ देहादप्यांतराणामिंद्रियाणामज्ञानमनुसंधायाज्ञतांस्वस्यप्रत्येतुभवानित्याह यैरितिद्वाभ्याम् यैरिंद्रियैरयंजनोविविधानऽनेकशोव्यापारान्कुरुते कुतः स्वात्मधीबोधात्तेषुस्वात्मधीरूपंबोधमासाद्य कीदृशान्व्यापारान्नरकादेर्हेतुभूतान् तत्रमोक्षहेतुत्वंचित्तशुद्धिद्वाराबोध्यं तानींद्रियाण्यपियोनपश्यंतिसइदंरूपेणवेद्यत्वाद

एवंभूतेऽतिदुर्बोधेह्यस्मिन्मायाविचेष्टिते ॥ जगत्यज्ञानमुचितंसर्वेषामिहदेहिनाम् ॥ ४२२ ॥ अपियत्रात्मधीर्जाताशरीरेस्यशरीरिणः ॥ नपश्यतितदप्येषकुतोन्यमवलोकयेत् ॥ ४२३ ॥ यैरिंद्रियैरयंशश्वत्व्यापारान्विविधानपि ॥ नरकस्वर्गमोक्षादेर्हेतुभूताननेकशः ॥ ४२४ ॥ कुरुतेस्वात्मधीबोधात्तानप्येषनपश्यति ॥ कुतोवलोकयेद्विश्वंस्वाऽन्यरूपमवस्थितम् ॥ ४२५ ॥ सुखदुःखेममेत्येवंधियाकुर्वन्प्रवर्तनम् ॥ ममशब्दार्थमप्येषनजानातिकुतोपरम् ॥ ४२६ ॥ पूर्वजन्मनिकिंमेभूदागामिन्यपिभाविकिं ॥ इतियोवेत्तिनस्वस्यजानीयात्सकथंपरम् ॥ ४२७ ॥ अनुभूतान्यपिस्वेनकृत्स्नशोनस्मरेद्धियः ॥ आगामिचनजानीयाज्ज्ञानीयात्सकथंपरम् ॥ ४२८ ॥

न्यरूपमवस्थितंविश्वंकुतोवलोकयेदितिद्वयोःसंबंधः ॥ ४२४ ॥ ४२५ ॥ इंद्रियेभ्योप्यांतरार्थबोधकस्याभ्यस्यमानस्यचास्मच्छब्दस्याप्यर्थंयोनजानातितस्यविज्ञानाभिमानोव्यर्थेत्याह सुखेति ममसुखंभूयान्ममदुःखंमाभूदित्येवमाकारयाधियाप्रवर्त्तनंकुर्वन्नेषजनोममशब्दार्थमपिनजानातिसोऽपरंकुतोजानीयादिति ॥ ४२६ ॥ अस्मच्छब्दार्थवत्तत्संबंध्यज्ञानमपिदर्शयति पूर्वेति मेमत्संबंधिइतिपूर्वार्द्धोक्तप्रकारेणस्वस्यात्मनःसंबंध्यपियोनवेत्तिसपरमन्यत्कथंजानीयादित्यन्वयः ॥ ४२७ ॥ किंच योज्ञातान्यपिविस्मरतितस्याज्ञानेकःसंशयइत्याह अनुभूतानीति कृत्स्नशःकृत्स्नानीत्यर्थः बह्वल्पार्थादितिशस् ॥ ४२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंजीवानामज्ञानप्रचुरत्वेसतिप्रत्यक्षस्यदुष्टकरणजन्यत्वेनाभासत्वात्प्रत्यक्षविरोधेनवेदार्थेऽसंभावनानकार्यैतिवक्तुंलोकेशब्दस्यप्राधान्यंदर्शयति अर्थेष्विति अस्मादज्ञानप्राचुर्यादेवहेतोरिरितिलोकईरितं इतिकिं अतींद्रियेष्वर्थेषुअतीतव्यवहारकुलाचारादिषुप्रत्यक्षंकारणंसाधकंनभवतिकिंतुपितृप्रभृत्याप्तवचनमेवप्रमाणमिति तथाचोक्तविधयाघटादिस्वरूपस्यापींद्रियैर्निर्णेतुमशक्यत्वेनातींद्रियत्वात्तत्रापिशब्दएवदृष्टिस्तद्ध्यादिवादीप्रमाणमितिभावः ॥ ४२९ ॥ यदिकश्चिल्लौकिकोब्रूयान्नास्मत्पित्रादयोदृष्टिस्तद्ध्यादिवदंतीतितंप्रत्येवंवदेन्मावदंतुतेषांपरमगुरुर्वेदस्तुवदतीत्याशयेनाह पुरुषाइति येषांवचनंलोकेप्रमाणंतेपिमन्वाद्याःपुरुषावेदवाक्येनज्ञानंलब्धवंतः यथास्माभिर्वेदवाक्यादात्मज्ञानंलब्धंतथामन्वादिभिरितींद्रस्यवक्तुरुक्तिः ननुवेदेनकुतोज्ञातमतआह वेदस्येति वेदपुरुषस्यज्ञानंतुवेदेनैवनत्वन्येन

अर्थेष्वतींद्रियेष्वस्मात्प्रत्यक्षंनैवकारणं ॥ किंतुपित्रादिवचनंप्रमाणंलोकईरितम् ॥ ४२९ ॥ पुरुषास्तेपिवेदेनज्ञातवंतोस्मदादिवत् ॥ वेदस्यवेदेनैवस्याद्रूपंयस्मादपौरुषम् ॥ ४३० ॥ तस्मादस्यनचापेक्षाभवेत्पुरुषवत्सदा ॥ तस्मादेवयदस्माकंकथयेद्वेदईश्वरः ॥ राजशासनवत्तद्धिग्राह्यमस्माभिरादृतैः ॥ ४३१ ॥

केनचिदित्यर्थः यतोवेदपुरुषस्यरूपंशरीरंवेदात्मकमपौरुषंभवतिपुरुषेणबुद्धिपूर्वकंनिर्मितंनभवतिकिंतुनिःश्वसितवत्पूर्वसमानरूपेणप्रादुर्भूतमित्यर्थः अस्यमहतोभूतस्यनिःश्वसितमेतद्यदृग्वेदइत्यादिश्रुतेः ब्रह्मस्वयंभ्वभ्यानर्षदितिचश्रुतिः अभ्यानर्षत्ऋषिसंप्रदायेनप्रादुरभवदित्यर्थः वेदाभिमानिपुरुषसत्वेमानंचवार्तिकंयथा शब्दब्रह्मेतियच्चेदंशास्त्रंवेदाख्यमुच्यते तदप्यधिष्ठितंसर्वमेकेनपरमात्मनेति ॥ ४३० ॥ तस्मादिति यस्मादपौरुषमस्यरूपंतस्मादेवास्यवेदस्यज्ञानायस्ववाक्यप्रामाण्यायवापरापेक्षाइतरपुरुषाणांयथाभवतितथानास्तितस्मात्परमेश्वरोयमितिभावः तस्मादेवहेतोर्वेदरूपईश्वरोयदस्माकमधिकारिणांकर्त्तव्यत्वेनकथयेदुपदिशेत्तदस्माभिरादृतैरादरंश्रद्धातिशयरूपंकुर्वाणैराजाज्ञावद्ग्राह्यमंगीकर्त्तव्यमित्यर्थः ॥ ४३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंचप्रकृतव्याख्येयश्रुतिरूपेणवेदपुरुषेणोक्तमर्थमसंभावनांपरिहृत्यग्रहीतुंशृणुतेत्याह असाविति असौवेदःसुप्तेसुषुप्तिकालेमरणकाले चमनआदेःकरणजातस्यप्राणएवोपसंहर्तेतिप्राह कीदृशस्यमनआदेः जीवोपाधितयाजीवात्मसंज्ञस्य तथाप्रबोधेजागरणकालेजन्मकाले चतस्मादेवप्राणाद्विलीनस्यैवमनआदेःपुनर्जनिंचनोऽस्मान्प्रतिप्राहउपदिशति तदपिअनुग्रहमात्रेणेत्याह पित्रादिभ्यइति यतोवेदःप्रत्यु पकारानपेक्षत्वेनपित्रादिभ्योपिपरमोनृणांसुहृदितिद्वयोरर्थः ॥४३२॥ ४३३ ॥ अस्माकमस्माद्वेदात्परोहितकृन्नास्तीत्याह अस्मिन्निति मायामयेमायाप्रचुरेऽतएववाग्बुद्ध्योरगोचरेवक्तुंचिंतयितुमशक्येचास्मिन्प्रपंचेस्थितानामस्माकमुपकारायंवेदोयद्वदतितत्सर्वथैवास्माकं पथ्यं निःश्रेयसप्राप्तिसाधनमितियावत् ॥ ४३४ ॥ तत्रदोषशंकांवारयति अस्येति अस्यवेदपुरुषस्याव्याहतविज्ञानत्वात्सूर्यदर्शनायप्र

असौचसुप्तेमरणेप्राणएवोपसंहर्तिम् ॥ मनआदेस्तुजीवात्मनामधेयस्यसर्वदा ॥ ४३२ ॥ प्रबोधेचजनौत द्वत्तस्मादेवपुनर्जनिम् ॥ विलीनस्यैवनःप्राहपित्रादिभ्यःसुहृन्नृणाम् ॥ ४३३ ॥ अस्मिन्मायामयेकार्यैवाग्बु द्ध्योरप्यगोचरे ॥ यद्वदत्ययमस्माकंपथ्यंतत्सर्वथैवहि ॥ ४३४ ॥ अस्याव्याहतविज्ञानरूपत्वादज्ञतानहि ॥ नदोषःकोपियस्मात्सवेदोवेदनमेवहि ॥ ४३५ ॥ वेदनंनजडंप्रोक्तंपरिच्छिन्नंचकर्हिचित् ॥ आनंदात्माततः प्राणोवेदएषप्रकीर्तितः ॥ ४३६ ॥

वृत्तंचक्षुर्यथाप्रतिघातंगच्छतितथाअव्याहतंप्रतिघातशून्यंविज्ञानंयस्यएतादृशत्वादज्ञताकुत्रचिदपिविषयेऽज्ञानंनास्तिअज्ञताभावेचा ज्ञताप्रयुक्तादोषाभ्रमःप्रमादोविप्रलिप्साचवंचनेच्छारूपाइत्याद्याःकुतःस्युः अस्यनिरावरणज्ञानतांवेदइतिनामैवाख्यातीत्याह यस्मादि ति यस्माद्वेदनमेवशुद्धंज्ञानमेववेदपदार्थइत्यर्थः चित्प्राधान्येनवेदस्तदेराकरेषुप्रपंचितत्वात्तदभिमानिनोपिपरमेश्वररूपत्वोक्तेरितिभावः ॥ ४३५ ॥ वेदनरूपत्वेब्रह्मरूपतांस्फुटयति वेदनमिति वेदनस्यजडत्वंपरिच्छिन्नत्वंचमानाभावान्नसंभवतीतिप्रथमाध्यायेप्रपंचितं तथा चपूर्णत्वेनचिद्रूपत्वेनचानंदात्मायःप्राणोपाधिरीश्वरउक्तःसएववेदः अतएवशब्दब्रह्मेतिप्रसिद्धिश्चेतिभावः ॥ ४३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदाएवंवेदःपरमेश्वरस्तदातंप्रतिदूरेविरोधोद्भावनमत्रभवतैवकथंनोक्तमित्याकारकप्रश्नरूपःपर्यनुयोगोपिदुष्करइत्याह कस्तमिति तं सर्वज्ञंपर्यनुयोक्तुमप्यन्यःकःपुमान्प्रभुःशक्तोभवेत्नकोपीति तत्रहेतुमज्ञानांधत्वंसूचयन्दृष्टांतमाह चक्षुष्मंतमिति रूपस्यभेदनेभेदाख्यानप्रसंगेयथांधश्चक्षुःशालित्वेनविशेषज्ञंपितृत्वेनमान्यंचपर्यनुयोक्तुंनशक्तस्तद्वदित्यर्थः नचबहवोमिलित्वापर्यनुयोक्ष्यंतीतिशंक्यंशतमप्यंधानामेकेनसुचक्षुषानसममितिन्यायात्पर्यनुयोगकर्तृतायाश्चसमेष्वेवदृष्टेरितिभावः ॥ ४३७ ॥ तस्मादस्माभिरेतावदेवकर्तव्यमित्याह तस्मादिति तस्माज्जीवानांतत्पर्यनुयोगाद्ययोग्यत्वात्तदुक्तविज्ञानेतेनवेदेनोक्तस्यार्थस्यविशेषेणावधारणेयावद्बुद्धिःप्रधावतिप्रसर्पतितत्पराभवतीतियावत् तस्यबुद्धिप्रधावनस्यसिद्ध्यर्थमस्माभिःप्रयत्नतोयतितव्यंसावधानैर्भवितव्यमित्यर्थः ॥ ४३८ ॥ ज्ञात्वा

कस्तंपर्यनुयोक्तुंस्यात्प्रभुरन्यःपुमानिह॥ चक्षुष्मंतंस्वजनकंयथांधोरूपभेदने॥४३७॥ तस्मात्तदुक्तविज्ञाने यावद्बुद्धिःप्रधावति॥ तावत्तस्यप्रसिद्ध्यर्थंयतितव्यंप्रयत्नतः॥४३८॥ धर्मात्मनोयथाराज्ञःपितुर्वाऽतिहितस्यच॥ वचनंनपरित्याज्यंतथावेदस्यशासनम्॥४३९॥ श्रोत्रावेदस्यविज्ञानात्सुषुप्ताविंद्रियादिकम्॥ प्राणेविलीयतेतद्वदुत्थानेजायतेततः॥४४०॥ प्रलीयतेयथासुप्तौप्राणेस्मिन्निंद्रियादिकम्॥ मरणेपितथाप्राणएतदेवंप्रलीयते॥४४१॥ उत्थानेप्राणतोयद्वत्सर्वमेतत्प्रजायते॥ जन्मन्यपितथाप्राणादिदंसर्वंप्रजायते॥४४२॥

चतन्निष्ठैर्भवितव्यमित्याह धर्मात्मनइति श्रोत्रेत्युत्तरश्लोकादपकृष्यते तथाचधर्मिष्ठराजवाक्यवदतिहितपितृवाक्यवच्चवेदस्यशासनंश्रोत्रानपरित्याज्यमित्यन्वयः॥ ४३९॥ फलितमाह श्रोत्रेति वेदसंबंधिविज्ञानाच्चायमर्थःसिद्धः तमर्थमभिनयति सुषुप्ताविल्यादिना आदिपदेनविषयाणांव्यापाराणांचग्रहः उत्थानेजागरणे ॥ ४४० ॥ प्रसिद्धसुप्तिवन्महासुषुप्तितयाप्रसिद्धेमरणेपिलयोदयौवोध्यावित्याह प्रलीयतेइतिद्वाभ्यां तथात्वंस्पष्टयति प्राणइति प्राणेएतदिंद्रियादिकंएवंसुप्तावुक्तक्रमेणप्रलीयतइतिचतुर्थपादार्थः ॥ ४४१ ॥ उत्थानइति जन्मनिपुनर्जन्मकाले ॥ ४४२ ॥ ॥३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंयत्रेत्यादिवाक्यार्थंसविस्तरमुपवर्ण्याथतस्यैषासिद्धिरित्यादिसहोत्क्रामतइत्यंतंवाक्यंव्याकरोति तस्यप्राणस्येत्यादिषोडशभिः तस्यपूर्वमद्वितीयतयावर्णितस्यप्राणस्यप्राणोपाधेर्देवस्यएषावक्ष्यमाणासिद्धिःसिद्धेर्निश्चयस्यसाधनंमरणेअन्वयव्यतिरेकानुसंधानरूपमुक्तमित्यर्थः सिद्धिशब्दस्यसिद्धिसाधनेलक्षणयावृत्तिंसदृष्टांतमाह यथेत्यादि यथाभूमिष्ठस्यनिधानस्यनिधेरंजनेनसिद्धौसत्यामंजनंसिद्धिरित्युच्यतेतथामरणकालेऽन्वयव्यतिरेकाभ्यामनुसंधीयमानाभ्यांप्राणएवसर्वात्माऽस्तीत्येषोर्थःसित्ध्यतिनिश्चितोभवतिअस्माद्धेतोर्वक्ष्यमाणमन्वयव्यतिरेकज्ञानंसिद्धिरित्युक्तमितिद्वयोरर्थः ॥ ३४३ ॥ ३४४ ॥ व्याध्यादिनेति यदायत्रावस्थायांपुमान्मनुष्यत्वादिनाप्रसिद्धोव्याध्यादिनाऽसह्यंदुःखंप्राप्नुयात् आतुरोभवेदितियावत् अथमुमूर्षुर्भवतिततोबलशून्यत्वात्श्रुतावाबल्यपदेनोक्तंबलशून्यत्त्वंप्राप्य

तस्यप्राणस्यदेवस्यह्येषासिद्धिरुदीरिता॥ यथासिद्धिर्निधानस्यभूमिष्ठस्यांजनेनच ॥ ४४३ ॥ अन्वयव्यतिरेकाभ्यांमरणेप्राणएवहि ॥ सिद्ध्यत्यस्माद्वक्ष्यमाणंज्ञानंसिद्धिरितीरितम्॥ ४४४ ॥ व्याध्यादिनायदादुःखमसह्यंप्राप्नुयात्पुमान्॥ मुमूर्षुर्बलशून्यत्वात्शक्तोवक्तुंनचैवहि ॥ ४४५ ॥ एवंभूतांतदावीक्ष्यदशांदीनतमामिमाम्॥ बांधवाःपरिवृत्त्यैनंपृच्छंत्यातुरचेतसः॥ ४४६ ॥ जानासिमांप्रियंपुत्रंमांजानास्यपितेप्रियम्॥ एवमादिसउक्तोपियदाकाष्ठसमःपुमान्॥ नजानातितदाह्युत्तउत्क्रांतज्ञानएवहि॥ ४४७ ॥ यद्यनुत्क्रांतविज्ञानःश्रृणुयाच्चावलोकयेत्॥ वदेद्वापूर्ववन्नायंतादृक्तस्मादचित्तकः ॥ ४४८ ॥ अस्मिन्नवसरेसर्वेवागाद्याःकरणाभिधाः॥ स्वैःस्वैस्तैर्विषयैःसार्धंलीयंतेप्राणएवते ॥ ४४९ ॥

वक्तुमपिनशक्तोभवतिसंमूढोभवतीतियावत् ॥ ४४५ ॥ एवमिति परिवृत्त्यवेष्टयित्वास्थिताइतिशेषः वक्ष्यमाणप्रकारेणपृच्छंति ॥ ४४६ ॥ जानासीति मांप्रियंपुत्रंजानासिमांतिप्रियंसुहृदंजानासीत्येवमादिकंप्रश्नवाक्यंउक्तःश्राविततोपिमुमूर्षुर्यदानजानातितदातेसमीपस्थाःपुत्रादयएवमाहुः एवंकथं यदयमुत्क्रांतज्ञानोजातः उत्क्रांतंगतंज्ञानंश्रुतौचित्तपदेनोक्तंयस्यसतथा ॥ ४४७ ॥ यदीति यद्यनुत्क्रान्तज्ञानोभवेत्तर्हिपूर्ववत्श्रवणादिकंकुर्यात्अयंतुतादृक्पूर्ववत्श्रवणादिकर्त्तानभवतितस्मादचित्तकउत्क्रांतज्ञानएवेति ॥ ४४८ ॥ अस्मिन्निति अस्मिन्नवसरेज्ञानोत्क्रमणव्यवहारकालेसर्वेवागाद्याःस्वविषयैःसहप्राणएवलीयंतेइति ॥ ४४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तैर्वागाद्यैर्लीनैःसहैवशरीरांतरंगच्छतितत्रचप्राणात्सर्वेवागाद्याजायंतेइत्याह यदायमिति यथासुप्तःप्रबुद्धोभवतिएवंयदामृतःपुमान्पुनर्जनिमान्भूयात्तदाप्राणादेवइमेवागाद्याःससुतादयःसुतादिभिर्बाह्यैर्विषयैःसहजायंतेइत्यर्थः ॥ ४५०॥ ननुमरणकालेपिवागादयोभोगंकुतोनप्रयच्छंतीतिशंकांवारयति मरणेति स्वामिनःपुंसःकार्यकरणाभिमानिनोजीवस्ययेपूर्वंभृत्यवत्स्थितावागादयआसंस्तेएनंपुमांसंमरणावसरेऽसमर्थंसंतंत्यजंतितदर्थविषयव्यापाराद्उपरम्यभोगंनप्रयच्छंतीतियावत् यथाऽसमर्थंराजानंप्रजास्त्यजंतितद्वदिति ॥४५१॥ दृष्टांतांतरमाह अलब्धेति नलब्धंवित्तंयैरेतादृशाभृत्याःसंग्राममूर्द्धनिसंग्रामस्यमस्तकसमेप्रधानकालेयथात्यजंतितथावागाद्याआत्मत्वाभिमानलक्षणंवित्तमप्राप्तामरणकालेत्यजंतीति ॥ ४५२ ॥ ननुवाचंविनापिनामव्यवहारोघ्राणंविनापिगंधव्यवहारइत्येवंकरणव्यवहाराअन्यतोपिकुतश्चित्स्युरितिचेन्नान्यसाध्यव्यवहारस्यान्येनादर्शनादितिसोदाहरणमाह यथावैश्यस्येति यथावैश्यजात्यानगरस्य

यदायंजनिमान्भूयात्पुमान्सुप्तप्रबुद्धवत्॥ ततःप्राणादिमेप्राणाजायंतेससुतादयः ॥ ४५० ॥ मरणावसरे पुंसःस्वामिनोभृत्यवत्स्थिताः ॥ त्यजंत्येनंयथानाथमसमर्थंप्रजाइमे ॥ ४५१ ॥ अलब्धवित्तकायद्वद्भटाःसंग्राममूर्धनि॥ त्यजंतिस्वामिनंतद्वद्वागाद्यामरणेध्रुवम्॥ ४५२॥ यथावैश्यस्यसंत्यागेपत्तनेनापणादिकं॥ एवं वागादिसंत्यागान्नरिणोवचनादिकम्॥ ४५३॥ रिपुणातिबलिष्ठेनप्रभौविनिहतेयथा ॥ संश्रयंतिभटाःस्वामिभक्ताअन्यंप्रभोःप्रभुम्॥ ४५४ ॥ एवमेतेसविषयादेवाःकरणसंयुताः॥ शरीरेपतितेदेहनाथंप्राणंसमाययुः॥ ४५५॥

सम्यक्त्यागेकृतेसतिपत्तनेतत्रनगरेआपणादिकंवैश्यजातिसाध्यंवाणिज्यादिकंनदृश्यतेएवंवागादिभिःसंत्यागाद्धेतोर्नरिपुरुषेवचनादिकंनोदृश्यतइति एतेनवागादिकंस्वस्वविषयमभिविसृज्यतेत्यजतितद्विनाचतत्कार्यंदुर्लभमित्यर्थकंवागेवेत्यादिपर्यायचतुष्टयंव्याख्यातम् ॥ ४५३ ॥ तत्रदेहेऽनुपलभ्यमानावागाद्याःकुत्रयांतीतिचेत्प्राणएवेत्याह रिपुणेति स्वल्पदेशाधिपतेःसामंतस्यसम्राट्कार्याययुत्ध्यमानस्यभृत्याःस्वामिनिसामंतेबलिष्ठेनरिपुणानिहतेसतिअन्यपार्श्वेजिगमिषंतोपिस्वामिभक्तत्वात्प्रभोःसामंतस्यप्रभुमेवश्रयंति ॥४५४॥ एवमिति एवमेतेवागाद्याःयःसम्राट्स्थानीयप्राणसामंतनिभोमनुष्योहमित्यादिरूपेणकार्यकरणाभिमानीजीवस्तस्यभृत्यायमानाःवागाद्याःस्वामिनिशरीरतादात्म्यापन्नेपतितेमूर्छितेसतिदेहस्यसर्वसंघातस्यपरमनाथंप्राणमेवसमाययुःप्राप्ताइति ॥ ४५५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितंदर्शयतिअन्वयेति प्राणसत्वेसर्वस्यसत्वंतदुत्क्रमणेतदभावइत्येवमाकाराभ्यामन्वयव्यतिरेकाभ्यांप्राणस्यसर्वात्मिः सर्वस्यस्वस्मिन्विलापनरूपात्मिरत्रवाक्येइष्टा तस्मात्प्राणतोभिन्नंकिंचिदपिनास्तीतिसिद्धं॥ ४५६॥अस्मान्मरणोदाहरणात्प्राणप्रज्ञयोरभेदोपिसिद्धइत्याह प्राणेति एकदासहैवोत्क्रांतेर्वासाच्चयत्प्राणप्रज्ञयोरैक्यमुक्तंतदपिस्थितमिति कुतः प्राणोत्क्रमणेज्ञानमस्योत्क्रांतमितिपार्श्वस्थानांव्यवहारप्रदर्शनादितिभावः ॥ ४५७ ॥ उपाध्योःप्राणप्रज्ञयोरद्वितीयत्वेचतदुपलक्षितस्याद्वितीयत्वंसुबोधमितिदर्शयितुंप्राणप्रज्ञयोर्लक्ष्यमभिनयति यथाप्राणोत्रेति स्पष्टम्॥४५८ ॥ तत्रप्राणस्याद्वितीयतास्फुटीकृताऽथप्रज्ञायाअद्वितीयतास्फुटीकरणपरमथयथाऽस्यैइत्यादिश्रुतिगंथंव्याकुर्वन्प्रज्ञावाक्यार्थमाह संविदेकेति संवित्प्रज्ञापदलक्ष्यार्थरूपावस्तुतएकापियथायेनप्रकारेणोपाधेर्बहुधाभवनरूपेणबहुधाबहु

अन्वयव्यतिरेकाभ्यामेवंसर्वात्मिरिष्यते॥प्राणतोनैवतस्मात्स्याद्विभिन्नंकिंचिदत्रहि॥४५६॥प्राणप्रज्ञानयोरैक्यमेकदोत्क्रांतिवासतः॥ यदुक्तंतत्स्थितंयस्माद्प्राणेनास्तिवेदनम् ॥ ४५७॥ यथाप्राणोत्रनश्वासमात्रंकिंतुपरःपुमान्॥ तथाप्रज्ञापिनोबुद्धिःकिंतुसंवित्स्वयंप्रभा ॥ ४५८ ॥ संविदेकायथाभूयाद्बहुधाप्येकधातथा॥ शृणुराजन्हिवक्ष्यामितंत्वमेकाग्रमानसः ॥ ४५९ ॥ पंचज्ञानेंद्रियाण्येवपंचकर्मेंद्रियाणिच ॥ देहोंतःकरणंचेतिद्वादशात्रविभेदकाः॥ प्रज्ञायाविषयैःस्वैःस्वैर्व्यापारैर्विषयीकृतैः ॥ ४६० ॥ नामादानगतित्यागसुखाख्याविषयाइह॥ कर्मेंद्रियाणांकथिताःप्रज्ञाभेदकृताइमे॥ ४६१ ॥

विधेवभवेत्तथाबहुधाभासमानापुनरेकधायथाभवेत्तंप्रकारंवक्ष्यामित्वमेकाग्रमानसःसन्शृण्विति ॥ ४५९ ॥ अथप्रज्ञाबहुधाभवनविधाप्रदर्शकस्यवागेवेत्यादेःकामाःपरस्तात्प्रतिविहिताभूतमात्रेत्यंतस्यवाक्यार्थमाह पंचेत्यादिसप्तभिः अत्रश्रुतौज्ञानेंद्रियाणिकर्मेंद्रियाणिदेहःअंतःकरणंचएतानिप्रज्ञायाविभेदकानिविवक्षितानि कैर्भेदकानि विषयैः कीदृशैर्विषयैः स्वैःस्वैर्व्यापारैर्विर्षयीकृतैर्व्यात्मैरित्यर्थः तत्रत्वचोर्देहेपायोश्चोपस्थेंऽतर्भावंविवक्षित्वादशैवोक्तानीत्यवधेयम्॥४६०॥ एतेषांविषयान्दर्शयति नामेतित्रिभिः नामचादानंग्रहणंचश्रुतौकर्मपदोक्तंगतिश्चश्रुतौइत्यापदेनोक्तात्यागश्चांतर्भावाभिप्राप्रायेणानुक्तःसुखंचश्रुतौआनंदरतिप्रजातिपदैरुक्तं इमेक्रमेणकर्मेंद्रियविषयाः कीदृशाः प्रज्ञाभेदेनइंद्रियावच्छिन्नप्रज्ञाभागेनकृताःकल्पिताः दृष्टिसृष्टेरुक्तत्वादिति ॥ ४६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्देति शब्दादयोज्ञानेंद्रियैरादृताःआदरेणगृहीताविषयाः तत्रस्पर्शस्यसुखदुःखयोरंतर्भावोविवक्षितइतिबोध्यं ॥ ४६२ ॥ देहस्येति देहरूपकरणस्यसुखदुःखेविषयौ देहाद्बहिस्तयोरनुपलब्धेरितिभावः अंतःकरणस्यकामाइच्छाविशेषाआदिपदेनसंकल्पादयोविषयाःश्रुताःश्रुतौभूतमात्रापदेनोक्ताः भूतानांपृथिव्यादीनांमात्रालेशाइतितदर्थः ॥ ४६३ ॥ एतैःप्रज्ञायाविभागेदृष्टांतमाह यथेति यथाद्वादशगोपालाःसुपयस्विनींप्रचुरदुग्धांशीलेनकामधेनुसमांचएकांगांदुहंतितद्विकारंपयस्ततःपृथक्कुर्वंति किमर्थंस्वार्थस्यस्वप्रयोजनस्यसिद्ध्यर्थं एवंतेवागाद्याःप्रज्ञामेकामदूदुहन् चिदाभासत्वेनप्रसिद्धान्प्रज्ञाभागान्पृथक्कृतवंतइत्यर्थः अदूदुहदित्यस्यादूहूमितिविपरिणा

शब्दस्पर्शंरूपरसगंधाज्ञानेंद्रियादृताः॥ विषयानियतास्तेहिप्रसिद्धालोकवेदयोः॥ ४६२ ॥ देहस्यविषयावेतेसुखदुःखेइहेरिते॥ तथांतःकरणस्यापिकामाद्याविषयाःश्रुताः॥ ४६३ ॥ यथाद्वादशगोपालागामेकांसुपयस्विनीं॥ कामधेनुसमांसर्वेदुहंतिमिलिताअपि॥ स्वार्थसिद्ध्यर्थमेवंतेवागाद्याअप्यदूदुहन्॥ ४६४ ॥ शिखांवन्हेर्यथाभिन्नांकाष्ठैर्द्वादशभिस्त्विह॥ भिन्नांवदंतिमनुजास्तद्वदेतैरिमांवयम्॥ ४६५ ॥ यथाद्वादशभिर्दीपैःप्रकाशाविषयेष्विह॥ प्रजायंतेद्वादशधातथाभूतेषुबोधनम्॥ ४६६ ॥

मःश्रुतौ ॥ ४६४ ॥ एकस्याःप्रज्ञायाःउपाधिवशादनेकधाभावेदृष्टांतमाह शिखामिति यथावन्हिशिखामेकांद्वादशभिःकाष्ठैरुपाधिभिर्भिन्नांमनुजावदंतितद्वदिमांप्रज्ञामेतैर्वागाद्यैर्भिन्नीकृतांवयमौपनिषदावदामइत्यर्थः ॥ ४६५ ॥ येनयेनेंद्रियेणयोयःप्रज्ञाभागःपृथक्कृतस्तत्तदिंद्रियविषयस्तेनतेनप्रकाश्यतइतिश्रुतिगतप्रतिविहितापदार्थंदर्शयति यथाद्वादशभिरिति यथाद्वादशभिर्दीपैर्द्वादशधाद्वादशप्रकाराःप्रकाशाविषयेषुगृहादिदेशेषुजायंतेतथाद्वादशभिर्वागाद्यैर्भूतेषुभूतमात्रारूपेषुविषयेषुएकंबोधनंप्रज्ञास्वरूपंद्वादशधाजायते द्वादशरूपैर्विषयान्प्रकाशयतीत्यर्थः ॥ ४६६ ॥ ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथप्रज्ञायाअविभागप्रदर्शनपरंप्रज्ञयावाचमित्यादिध्यानान्याप्नोतीत्यंतंवाक्यंव्याकरोति इदमिति इदंसर्वंज्ञानकर्मेंद्रियात्मकंकरणवृंदं शरीरेणबुद्ध्याचसहितंतद्द्वादशविधंयदुक्तंतत्प्रज्ञयातादात्म्यंवक्तास्मिद्रष्टास्मिश्रोतास्मीत्याद्यभिमानरूपंश्रुतौसमारोहणत्वेनोक्तंसमागतं प्राप्तंसदेवस्वंस्वंस्वकीयंस्वकीयंनामादिकंविषयंप्राप्नोतिप्रज्ञांविनातुनप्राप्नोतीति तथाचप्रज्ञांविनाइंद्रियाभावादिंद्रियाभावेचविषयाभावात्विषयाणामिंद्रियमात्रत्वादिंद्रियाणांचप्रज्ञामात्ररूपत्वात्सिद्धःप्रज्ञायाअविभागः यथाघटानांमृन्मात्रत्वेमृदइतिभावः॥४६७॥ ननु वागादयःप्रज्ञानिरपेक्षाएवकुतोनविषयंप्रकाशयेयुरितिचेन्न सत्यपिविषयसंबंधेप्रज्ञांविनाप्रकाशव्यतिरेकस्यसर्वानुभवसिद्धत्वादितिन हिप्रज्ञायेतेत्यादिपर्यायदशकेनोक्तमर्थमाह ज्ञानेतिद्वाभ्यां ज्ञानेंद्रियकर्मेंद्रियशरीरधिषणापदवाच्यांतःकरणरूपाणिद्वादशकरणानिप्र

इदंद्वादशधासर्वंज्ञानकर्मेंद्रियात्मकम्॥शरीरंबुद्धिसहितंप्रज्ञातादात्म्यमागतम्॥स्वंस्वंविषयमाप्नोतिप्रज्ञाविरहितंनहि॥४६७॥ज्ञानकर्मेंद्रियाणीहशरीरंधिषणातथा॥प्रज्ञाबलेनजानंतिस्वबलेननकिंचन॥४६८॥ यतोभवंतिवक्तारोनाज्ञासिष्मवयंत्विदम्॥ उक्तंदृष्टंसुखंबुद्धमासीदन्यमनोननः॥ ४६९॥ विषयाद्वादशैवैतेकरणैःसंगताअपि॥प्रज्ञाविरहितायस्मात्प्रतीयंतेनकर्हिचित्॥ ४७०॥

ज्ञायाबलेनैवजानंतिस्वबलेनस्वसामर्थ्येनतुनकिंचिज्जानंतिप्रज्ञायाअपायेविषयप्रकाशादर्शनादिति ॥४६८॥ अत्रार्थेलोकानुभवमभिनयति यतइति यतएववक्तारोभवंतिदृश्यंते एवंकथमुक्तमपिनामनाज्ञासिष्मनवयंज्ञातवंतः यतोनोस्माकंमनश्चित्तादात्म्यापन्नप्रज्ञारूपमत्रउक्तेनामनिनासीदिति एवंचक्षुषादृष्टमासीत्शरीरेणसुखंबुद्धमासीत्तथापिमनसोन्यत्रभावान्नाज्ञासिष्मेति उपलक्षणंचैतदन्येषां तथाचश्रुत्यंतरं अन्यत्रमनाअभूवंनाश्रौषमित्यादि तथाचेंद्रियव्यापारेपिप्रज्ञायाश्चित्प्रतिबिंबग्राहिण्याव्यतिरेकेप्रकाशव्यतिरेकःसर्वानुभवसिद्धः अन्यथातथाभिलाषानुपपत्तेरितिभावः ॥ ४६९ ॥ उक्तार्थफलंप्रज्ञायाअविभागमद्वितीयतारूपमभिनीयदर्शयति विषयाइतिद्वाभ्यां एतेनामाद्याद्वादशविषयाःकरणैःसंगताःसंबद्धाअपिप्रज्ञाविरहिताःप्रज्ञांविनानप्रतीयंतेयथामृदंविनाघटादयोविकारा इति ॥ ४७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततइति ततोयद्यद्भानव्याप्यभानकंतत्ततोनभिन्नंयथाघटादयोमृदइतिनियमात्करणानांविषयाणांचप्रज्ञामात्रत्वात्प्रज्ञाएकरूपैवेतिसिद्धं नचप्राणभेदशंकापि सहोत्क्रमणादिनातदभेदस्योक्तत्वादित्याह प्राणतादात्म्यमागतेति ननुकेयंप्रज्ञायस्यांऐकरूप्यमुच्यतेइत्यतआह अन्वयेति यास्वीयान्वयव्यतिरेकाभ्यांकरणानांविबोधिनीसामर्थ्याधानकरीप्रसिद्धेति ॥ ४७१ ॥ ननुउक्तरीत्याप्रज्ञायाःसर्वात्मत्वेवागादयोपिसविषयास्तस्याएवरूपाणीतितेष्वात्मत्वबुद्धौकोदोषइतिचेन्न तेषांप्रज्ञास्वरूपत्वेपिअकृत्स्नरूपत्वात्यत्कृत्स्नंप्रज्ञास्वरूपमिंद्रियाद्यनवच्छिन्नंतत्रैवप्राणोस्मिप्रज्ञात्मेत्युक्तविधयाऽहंबुद्धिःकर्त्तव्याइत्यर्थकस्यनवाचमित्यादेर्मंतारंविद्यादित्यंतस्यवाक्यस्यार्थमाह प्राणेति ततःप्रज्ञायाःसर्वात्मकत्वाभिधानाद्वागादयोप्यात्मत्वेनवेद्याइत्याकारकस्तेसंदेहोमाभवतुकिंतुप्राणप्रज्ञास्वरूपंपूर्णमेवमांविद्धि पूर्णरूपाभिव्यक्तिहेतुश्चोपाधिविमोकइत्यभिप्रायेणविशिनष्टि वक्तारमिति वक्ताहिवाग्रूपकरणविशिष्टएवाख्यायतेयथाच्छिदा

ततःप्रज्ञैवैकरूपाप्राणंतादात्म्यमागता॥ अन्वयव्यतिरेकाभ्यांकरणानांविबोधिनी॥४७१॥ प्राणप्रज्ञास्वरूपंमांततोविद्धिप्रतर्दन॥ मातेभवतुसंदेहोवक्तारंवाग्विवर्जितम्॥ ४७२॥ एवंद्वादशधायोयंकरणग्रामईरितः॥ तत्रसर्वत्रकर्तारंकरणग्रामवर्जितम्॥ ४७३॥ करणंद्वादशविधंव्यापारेणात्मनस्तथा॥ सहितंवेत्तियःप्राणस्तंमांजानीहिनापरं॥ ४७४॥

करणवास्यादिविशिष्टएवतक्षाच्छेत्तेतिवाचोऽवच्छेदिकायाविवर्जनेतुवक्ताव्यापकप्राणप्रज्ञारूपएवावशिष्यतेइतिप्राणप्रज्ञारूपएवाहंवेद्यइत्युक्तमितिभावः ॥ ४७२ ॥ एवंविषयेभ्यःकरणांतरेभ्यश्चविविच्यावशिष्टंरूपमात्मत्वेनजानीयादित्याह एवमिति एवंरीत्याद्वादशधायःकरणग्रामउक्तस्तेनविशिष्टंकर्त्तारंसंतंकरणग्रामवर्जितंकृत्वावशिष्टंजानीयादिति ॥ ४७३ ॥ एवंप्राणपदमद्वितीयार्थपरंप्रज्ञापदंचसर्वांतरार्थपरंदर्शिततंतयोःपदयोस्त्रिविधपरिच्छेदशून्यात्मकाखंडार्थपरत्वंसामानाधिकरण्यलभ्यंस्फुटीकर्त्तुंप्रपंचमिथ्यात्वदर्शकस्यतावाइत्यादेर्नानेत्यंतस्यवाक्यस्यार्थंचतुर्दशभिर्निरूपयंस्तत्रैकेनश्लोकेनोपाध्युपलक्ष्यस्यस्वरूपंभृंगग्राहिकान्यायेनदर्शयति करणमिति आत्मनःकरणस्यव्यापारेणविषयगोचरेणवदनदर्शनादिरूपेणसहितंसविषयंचकरणद्वंद्वंद्वादशविधंसर्वप्रपंचरूपंयोवेत्तिप्रकाशयतिप्राणःप्राणोपलक्षितकारणत्वोपलक्षितस्तंमांजानीहीति ॥ ४७४ ॥ ॥३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नतुतस्याद्वितीयताकथं प्रकाश्यात्प्रकाशकस्यभेदादितिचेन्न प्रकाश्यस्यभिन्नत्वेनदुर्निरूपत्वादित्याह करणमिति द्वादशविधंकरणंप्रज्ञामात्राशब्दितंतथातस्यद्वादशविधकरणस्यविषयोपितावान्द्वादशविधःएतद्द्वयंकरणविषयरूपंअन्योन्यंपरस्परमपिभिन्नंनसंभवति एतादृशस्यास्यद्वयस्यप्रज्ञाभेदस्तुकुतःस्यात् अधिष्ठानभूतप्रज्ञयाभेदोत्यंतंदुर्निरूपःसापेक्षत्वेनमिथ्यात्वादित्यर्थः ॥ ४७५ ॥ विषयकरणयोः सापेक्षतांस्फुटयति विषयइतिपंचभिः योभूतमात्रात्मकोद्वादशविधोविषयःअसौनिर्विषयोविषयपदंभावप्राधनंविषयत्वेनहीनोनसिंध्येत्किंतुविषयत्वरूपेणैवसिध्येत् विषयत्वंतुनिरूपकत्वेनकरणसापेक्षमिति भूतमात्राविषयरूपाःप्रज्ञामात्राधीनाइत्यागतं तथाताद्द

करणंद्वादशविधंतावांश्चविषयोपिहि ॥ भिन्नंनान्योन्यमप्येतत्प्रज्ञयास्यकुतोभिदा ॥ ४७५ ॥ विषयोद्वादशविधोभूतमात्रात्मकोहियः ॥ (करणग्राममाश्रित्यससिद्धोनान्यथाक्वचित् ॥ एवंहिकरणग्रामःप्रज्ञामात्रात्मकोहियः ॥ १ ॥) नासौनिर्विषयःसिध्येत्करणंनास्तितादृशम् ॥ ४७६ ॥ करणंविषयोवापियद्येकोनापरोभवेत् ॥ तस्यतत्त्वंविहन्येतद्यन्यापेक्षमिदंद्वयम् ॥ ४७७ ॥ पुत्रःपितेतिसंज्ञेयंनाभावेपितृपुत्रयोः ॥ यथातथैवसंज्ञेयंविषयःकरणंत्विदम् ॥ ४७८ ॥ विषयःकरणापेक्षःकरणंविषयंतथा ॥ अपेक्षतेयतस्तेननान्याभावात्परंभवेत् ॥ ४७९ ॥

शंनिर्विषयंविषयानपेक्षंकरणंनास्ति करणमित्युक्तेकस्येतिविषयापेक्षणादिति प्रज्ञामात्राभूतमात्राश्रिताइत्यर्थः ॥ ४७६ ॥ करणंविषयइति करणंविषयइत्यनयोर्मध्येयद्येकएवकरणंवाविषयोवाभवेत् अपरोद्वितीयस्तुनभवेत्तर्हितस्यकेवलस्यकरणस्यविषयस्यतत्त्वंकरणत्वंविषयत्वंवाविहन्येतविघातंप्राप्नुयात् निरूपकाभावेनिरूप्याभावात् अतइदंद्वयंकरणविषयरूपंपरस्परसापेक्षमिति ॥ ४७७ ॥ तत्रदृष्टांतमाह पुत्रइति पितृपुत्रयोरन्यतरस्याप्यभावेपितापुत्रइतिसंज्ञाद्वयंयथानदृश्यतेतथाकरणंविषयइतिसंज्ञेइत्यर्थः ॥ ४७८ ॥ विषयःकरणेति विषयःकरणसापेक्षःकरणंतुविषयापेक्षमित्यन्यतरस्याभावेपरंद्वितीयमपिनभवेदिति ॥ ४७९ ॥

१ अयंश्लोकःकाशीस्थपुस्तकेदृष्टत्वादत्रांकितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुश्रुतौभूतमात्रारूपेषुविषयेषुदशसंख्योक्तातथाकरणेषु ग्रंथकृताचद्वादशेतिकथमुक्तमित्याशंक्यअंतर्भावाभिप्रायेणदशेत्युक्तमितिस
माधानसंभवेपिवक्ष्यमाणनेम्यरादृष्टांतानुगुण्यायबहिरिंद्रियाणिबाह्यविषयानेवचविवक्षित्वादशत्वाभिधानमितिसमाधानमाह शरी
रमिति शरीरंतथांतःकरणमित्येतदांतरार्थबोधकत्वादांतरंकरणद्वयंविहायतथासुखदुःखरूपंशरीरविषयंधीपदार्थज्ञातव्यसहितकामसं
॥४०॥ कल्पादिरूपमंतःकरणविषयंचविहायबाह्येंद्रियपरंबाह्यार्थपरंचश्रुतिसंबंधिदशेतिसंख्यावचनंबोध्यमित्यर्थः तथासतिबाह्यविषयाणांने
मिनिभानामरावन्मध्येभासमानेषुबहिरिंद्रियेष्वाश्रितत्वाभिधानंसुबोधंभविष्यतीतिभावः ग्रंथकृतातुआंतरोपिविषयःकरणापेक्षयाब
हिष्ठेनैवभासतेइतिमत्वाद्वादशेत्युक्तमित्यवधेयम् ॥ ४८० ॥ नन्वस्तुकरणानांविषयाणांचपरस्परापेक्षत्वंतथापिपरस्परापेक्षयैवस्व
रूपलाभसिद्धौसत्ताभानयोःकृतेतृतीयानपेक्षणात्तेषांसत्ताभाननिर्वाहकत्वेनात्मानसिध्येदित्याशंक्यपरस्परापेक्षाणांस्वानपेक्षतृतीया

शरीरमंतःकरणंविहायकरणद्वयम् ॥ सुखदुःखेतथाबुद्धिकामाद्यांश्चविहायहि ॥ दशेतिवचनंज्ञेयंश्रुतेर्बाह्येंद्रियार्थयोः ॥ ४८० ॥ सापेक्षाणिनसिद्ध्यंतित्यन्योन्यापेक्षयैवहि ॥ किंत्वन्यनिरपेक्षंतमाश्रित्यैनामवाप्नुयुः ॥ ४८१ ॥ रज्जुसर्पधियौयद्वत्सापेक्षेनैवसिद्ध्यतः ॥ अन्योन्यंरज्जुमेवैकामनपेक्षांविहायहि ॥ ४८२ ॥

पेक्षानियमंदर्शयति सापेक्षाणीतिद्वाभ्यां यानियानिसापेक्षाणिवस्तूनितानितान्यन्योन्यापेक्षयैवनसिध्यंतिसिद्धिंसत्ताभानरूपांन
लभंतेकिंत्वितरानपेक्षंतंस्वातिरिक्तंकंचिद्भावमपेक्ष्यैवैनांस्वरूपसिद्धिमवाप्नुयुःप्राप्नुयुरित्यर्थः ॥ ४८१ ॥ तत्रोदाहरणमाह रज्जुसर्पेति
यथाअयंसर्पइतिभ्रमेइदंपदार्थोरज्जुर्विशेष्यतयाभासतेसर्पस्तुप्रकारतया सर्पोयमितिभानेतुविपर्ययेण तथाचरज्जुसर्पयोःप्रकारताविशे
ष्यशालिनीधियौविशेषणविशेष्यतयासापेक्षविषयत्वेनसापेक्षतयाप्रसिद्धेतेधियौरज्जुस्वरूपंनिरपेक्षंविहायानपेक्ष्यअन्योन्यंअन्योन्ये
नैवनसिध्यतःकिंतुरज्जुस्वरूपंशुद्धमपेक्ष्यैवसिध्यतइत्यर्थः एवंप्रकृतेपिसापेक्षैःकरणैर्विषयैश्चस्वसिद्धयेऽपेक्ष्यमाणआत्मासिद्धस्तेषांसा ॥४०॥
पेक्षत्वेनमिथ्यात्वंचेतिभावः ॥ ४८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्सापेक्षंनानाभिन्नंनभवतिइत्यर्थकंव्याख्येयश्रुतिवाक्यशेषमनुमानविधयाव्याकरोति विषयाइतिपंचभिः करणैःसहविषयायेउक्तास्तेपरस्परमाश्रयाच्चनभिन्नाइतिप्रतिज्ञासदैवसापेक्षत्वादितिहेतुः ॥ ४८३ ॥ सापेक्षमिति यद्यत्सापेक्षंतत्तन्मिथःपरस्परंआश्रयाच्चकथंचनभिन्नंनभवतियथोक्तरज्जुसर्पज्ञानादिकंस्वयंपरस्परंरज्जुतोरज्जुस्वरूपाच्चाश्रयान्नभिन्नभिन्नमित्युदाहरणम् ॥ ४८४ ॥ यदिविषयाः करणेभ्योभिन्नाःस्युस्तर्हिनिःस्वरूपाःस्युः मिथ्याभूतानांज्ञातसतांज्ञानात्पृथक्सत्तासंभवादितितर्कंसूचयन्करणपदंकरणावच्छिन्नप्रज्ञाभागपरमितिदर्शयति विषयाःसर्वइति सर्वेएतेविषयाःस्वज्ञानात्पृथक्भिन्नानभवंत्येव यथारज्जुसर्पविज्ञानात्फणीरज्जुसर्पौनान्यइति सर्वेएवेत्युक्त्याकरणेष्वपियोविषयांशःसोप्येवमितिसूचितम् ॥ ४८५ ॥ एवंप्रज्ञापदार्थंचित्शबलवृत्तिरूपंविषयाःश्रिताइत्युक्तमथप्रज्ञा

विषयाःकरणैःसार्धंनभिन्नास्तेपरस्परं ॥ आश्रयाच्चसहैवैतेसापेक्षत्वेनहेतुना ॥ ४८३ ॥ सापेक्षंनमिथोभिन्नंनाश्रयाच्चकथंचन ॥ सर्पज्ञानादिकंयद्वत्स्वयंवारज्जुतोपिवा ॥ ४८४ ॥ विषयाःसर्वएवैतेस्वज्ञानान्नपृथक्क्वचित् ॥ रज्जुसर्पस्यविज्ञानाद्यथानान्योस्त्यसौफणी ॥ ४८५ ॥ करणादुत्थितानीहजडानिकरणैःसह ॥ विषयाश्रयभूतानिविज्ञानानितुदेहिनाम् ॥ ४८६ ॥ विज्ञानद्रष्टृतःप्राणान्नभिन्नानीतिकर्हिचित् ॥ स्वप्नविज्ञानवद्द्रष्टाप्राज्ञःप्राणस्ततोस्तिहि ॥ ४८७ ॥

पदार्थंचिज्जडग्रंथिरूपंविवेकसूच्याविमुच्यतत्रजडांशवृत्तिरूपंज्ञानंविषयाणामाश्रयभूतंस्वभासकचितोऽनवच्छिन्नायानिरपेक्षाश्रयत्वेनोक्तायाःसकाशान्नभिन्नमित्याह करणादितिद्वाभ्यां यतःकरणादुत्थितानिअतएवनित्यचिद्रूपज्ञानविलक्षणत्वेनजडानिवृत्तिरूपाणिदेहिनांविज्ञानानि कीदृशानि करणैःसहवर्तमानानि तदवच्छिन्नत्वात् पुनःकीदृशानि विषयाणामाश्रयभूतानि शुद्धचितोऽसंगत्वेनशबलप्रज्ञापदार्थनिष्ठायाविषयनिरूपिताश्रयतायाःसविशेषणेहीतिन्यायेनविशेषणेपर्यवसानादितिभावः ॥ ४८६ ॥ विज्ञानेति तानिजडविज्ञानानिसर्वविज्ञानानांद्रष्टुःप्रकाशकात्प्राणपदलक्ष्यार्थान्नभिन्नानि यथास्वप्नविज्ञानानिसविषयाणिद्रष्टुःसाक्षिणोनभिन्नानितद्वत् फलितमाह द्रष्टेति तस्माद्यःसर्वद्रष्टाप्राज्ञःप्रज्ञोपलक्षितःप्राणःप्राणोपलक्षितश्चसएवास्तिनतुततोद्वितीयमस्तीतिसिद्धं ॥ ४८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तार्थस्यदृष्टांतेनस्फुटीकरणपरंतद्यथेत्यादिव्याकरोति चक्रस्येति यथालोकेरथचक्रस्यारेषुतिर्यक्काष्ठेषुनेमिर्भूमिस्पृक्वलयाकारकाष्ठरूपःप्रतिष्ठितस्तानाश्रितः तेऽरास्तुनाभौचक्रमध्यकाष्ठेऽक्षाधारच्छिद्रवतिप्रतिष्ठिताः सनाभिस्तुकुत्रापिनप्रतिष्ठितःकिंतुसर्वाधारः ४८८ ॥ दार्ष्टांतिकमाह विषयाइति विषयानेमिनिभाः करणेषुअरनिभेषु मयिनाभिनिभे॥४८९॥नाभिसाम्यमेवस्फुटयति विषयेंद्रियेतिविषयाःकार्यरूपाः इंद्रियाणिकरणरूपाणि तथात्रकार्यकरणरूपस्यसर्वस्यसंसारचक्रस्यनाभिरहंनान्यआश्रयोयस्यसतथा भावप्रधानोनिर्देशः तथाचानन्याश्रयत्वाद्धेतुतःसाधर्म्यादित्यर्थः॥४९०॥ दृष्टांतेतटस्थस्यनाभेःसंयोगमात्रेणाधारत्वंममतुविवर्तरूपप्रपंचस्यसत्ताभान

चक्रस्यारेषुलोकेस्मिन्नेमिर्यद्वत्प्रतिष्ठितः॥ नाभावराःस्थितानैवनाभिःकुत्रापिसंस्थितः ॥ ४८८ ॥ विषयाः करणेष्वेवंकरणानिमयीश्वरे॥ प्राणेप्रज्ञास्वरूपेस्मिन्नहंक्वापिनसंश्रितः॥ ४८९ ॥ विषयेंद्रियरूपस्यविश्वचक्रस्यसर्वदा॥ अहंनाभिरितिप्रोक्तोत्यनन्याश्रयहेतुतः ॥ ४९० ॥ विषयोविषयीचेतिद्वयंसंसारईरितः॥ अस्यसर्वस्यविज्ञाताप्रज्ञाप्राणोहमीरितः ॥ ४९१ ॥ मत्तःप्राणात्मनःप्राज्ञादिदंसर्वंविनिर्गतम्॥ सदसद्रूपकं विश्वंयत्रमुह्यंतिसूरयः॥ मय्यस्तिचतथांतेपिलयमेष्यतिमय्यदः॥ ४९२॥ यथैकस्माच्छिरोरैवस्वसृष्टिस्थितिलयाःसदा॥ राक्षसस्यभवंत्येवंमत्तोविश्वस्यसर्वदा॥४९३॥ एकस्मिन्नेवनभसिसर्वभेदविवर्जिते॥ यथाभेदाःप्रतीयंतेमयिभेदास्तथाइमे ॥ ४९४ ॥

प्रयोजकत्वलक्षणाभिन्ननिमित्तोपादानतयाधारत्वमितिविशेषोपिबोध्यइत्याह विषयोविषयीतिद्वाभ्यां विषयोनामादिर्विषयीचकरणतयोक्तःसमष्टिव्यष्टिरूपःएतावानेवसंसारस्तस्यविज्ञाताभासकोहमिति ॥४९१॥ मत्तइति प्राज्ञात्प्रज्ञाकार्यरूपाउपाधिभूतानित्यातुस्वरूपभूतास्यास्तीतिप्राज्ञस्तस्मात् सूरयोपीतिशेषः अदःविश्वम् ॥ ४९२ ॥ विवर्त्तोपादानतायादृष्टांतमाह यथेति राक्षसस्यस्वशरीरेकल्पितस्य ॥ ४९३ ॥ जडप्रपंचेअखंडचितोभेदेनभानेदृष्टांतमाह एकस्मिन्निति इमेनानाप्रमातृरूपाः ॥ ४९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयंभेदोपिपराग्दृशामुपाधिदर्शिनामेवभासतेप्रत्यग्दृशामुपाधिमुपेक्षमाणानांतुनभासतइतिसूचयन्दृष्टांतांतरमाह पटइति यथाचित्राधारेपटेसमेउन्नतत्वावनतत्वादिहीनेपिरंगनिर्मितप्रासादादिरूपचित्रस्यदृष्टौसत्यांविषमाउन्नतत्वावगाहिनीधीर्नृणांभवतिपटस्वरूपमेवानुसंदधतांतुनसा एवंमयिसमेपिविश्वस्योपाधेर्दृष्टौसत्यामेवभेदधीरितरथातुनेति तदुक्तंवार्तिककृद्भिः अपामार्गलतेवासौविषमोहिभवभ्रमः प्रत्यग्दृशांविमोक्षायनिबंधायबहिर्दृशामिति ॥ ४९५ ॥ नाभिस्थानीयस्यात्मनःप्राणादिविशेषणानिश्रुतौदत्तानितेषामर्थमाह चतुर्विधानामित्यादिना यतःसर्वेषांजीवननिमित्तमहमस्मीतितेननिमित्तेनप्राणेतिशब्दस्यतज्जन्यबुद्धेश्चसमाश्रयोविषयोहंभवामि प्राणयतिजीवयतीतिव्युत्पत्तेः नतुवायुविशेषेरूढस्यप्राणशब्दस्ययत्प्रवृत्तिनिमित्तंजातिविशेषस्तदाश्रयत्वेन यतोहमप्राणोवायुविशे

पटेसमेयथाचित्रदृष्टौविषमधीर्भवेत् ॥ एवंमयिसमेप्राणेविश्वदृष्टौविभेदधीः ॥ ४९५ ॥ चतुर्विधानांभूतानांजीवनंमत्तएवहि ॥ तेनाऽप्राणोप्यहंप्राणशब्दबुद्धिसमाश्रयः ॥ ४९६ ॥ नप्राणेननापानेनमर्त्योजीवतिकश्चन ॥ प्रज्ञयैवतुजीवंतियस्यामेतावुपाश्रितौ ॥ ४९७ ॥ ज्ञानकर्मेंद्रियगणंसांतःकरणदेहकं ॥ प्रजानात्यात्मरूपःसन्प्रज्ञातेनाहमीरितः ॥ ४९८ ॥ मज्ज्ञप्तौसकलंविश्वंभातिनान्येनहेतुना ॥ तेनप्रज्ञेतिनामाहमुदितोवेदवादिभिः ॥ ४९९ ॥ देशकालस्वरूपाख्यभेदत्रयविवर्जनात् ॥ स्वप्रकाशस्वभावाच्चप्रज्ञाहंवाप्रतर्दन ॥ ५०० ॥

षात्मकजडप्राणाद्भिन्नश्चिद्रूपइत्यर्थः ॥ ४९६ ॥ ननुचिद्रूपस्यकथंजीवनहेतुत्वमपीतिशंकांतैत्तिरीयवाक्येननिरस्यति नप्राणेनेति प्रज्ञयाऽविलुप्तचिताश्रुतिगताऽपरपदोक्तयाउपाश्रितौसन्निधिमात्रेणप्रवर्त्तितौ ॥ ४९७ ॥ प्रज्ञाविशेषणार्थमाह ज्ञानेति प्रकृष्टंज्ञानंहिप्रज्ञा प्रकर्षश्चसर्वभासकत्वरूपः सचमय्यात्मरूपेणसाक्षिरूपेणसर्वभासकेवर्त्ततेतेननिमित्तेनप्रज्ञेत्युक्तोस्मीत्यर्थः ॥ ४९८ ॥ सर्वोपजीव्यत्वलक्षणंप्रकर्षंप्रशब्दार्थमभिप्रेत्यार्थान्तरमाह मज्ज्ञप्ताविति मज्ज्ञप्तौसत्यामेवसर्वंविश्वंभातिनस्वीयप्रकाशेन तस्यभासासर्वमिदंविभातीतिश्रुतेः तेनवाप्रज्ञानामाहमिति ॥ ४९९ ॥ अपरिच्छिन्नत्वलक्षणंस्वप्रकाशत्वलक्षणंवाप्रकर्षंप्रशब्दार्थमभिप्रेत्यार्थान्तरमाह देशेति देशकालस्वरूपैराख्यानिरूपणंयस्यतादृशस्यभेदत्रयस्यविवर्जनात्स्वप्रकाशत्वाद्वाप्रज्ञास्मीति ॥ ५०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकेऽधिष्ठानत्वंपरारूपाणांशुक्तिकारज्जुप्रभृतीनामेवप्रसिद्धंनतुप्रत्यग्वस्तुनः ममतुज्ञानरूपस्यप्रत्यग्वस्तुनोपिसर्वाधिष्ठानत्वमितिलौकि
काधिष्ठानेभ्योजडेभ्योवैलक्षण्यरूपंप्रकर्षंप्रशब्दार्थमभिप्रेत्यार्थान्तरंदर्शयति अथवेति लोकेरज्ज्वादिरूपाध्यासानांसमाश्रयाअधिष्ठा
नानीतियावत् तेप्रत्यग्रूपाज्ज्ञानाद्भिन्नाःपराञ्चःअहन्तुतथाज्ञानाद्भिन्नोनास्मिकिन्तुज्ञानरूपएवसर्वाधिष्ठानमस्मितेनविशेषेणवाप्रज्ञेत्यु
क्तइत्यर्थः रजतादीनामपिशुक्त्यवच्छिन्नचैतन्यमेवाधिष्ठानमितितुलोकानजानंतीतिभावः ॥ ५०१ ॥ प्राज्ञेतिपाठान्तरमभिप्रेत्याह स्व
सजातीति सजातीयादिहीनस्यात्मनःस्वरूपभूतयाप्रज्ञयानित्ययुक्तत्वादहंप्राणःप्राज्ञइतीरितः प्रज्ञाश्रद्धार्चाभ्योणइतिमत्वर्थीयस्यणस्य
नित्ययोगेपिसम्भवादिति ॥ ५०२ ॥ आत्मपदार्थमाह योयमित्यादिपंचभिः योयमविलुप्तप्रज्ञायोगीप्राज्ञःपरःपुमांस्तुभ्यंमयाप्राणःप्रा

अथवाज्ञानतोभिन्नाअध्यासानांसमाश्रयाः ॥ रज्ज्वादयस्तथानाहंतेनप्रज्ञेतिकीर्तितः ॥ ५०१ ॥ स्वसजा
तिविजातीयवर्जितात्मस्वरूपया ॥ प्रज्ञयानित्ययुक्तत्वात्प्राणःप्राज्ञोहमीरितः ॥ ५०२ ॥ योयंप्राज्ञोमयातुभ्यं
कथितोह्यसकृत्पुमान् ॥ प्राणःप्राज्ञःसआत्मातेस्थावरस्यचरस्यच ॥ ५०३ ॥ अस्मद्धीशब्दगम्योयमस्मद्धी
शब्दवर्जितः ॥ एकएवजगत्यस्मिन्नभोवद्भेदवर्जितः ॥ ५०४ ॥ नभसोनभइत्येवनानाधिकरणेष्वपि ॥ ए
कंनामयथातद्वदात्मेत्येकंममात्मनः ॥ ५०५ ॥

णोपाधिकःप्राज्ञःप्रज्ञोपाधिकश्चासकृत्कथितोबोधितःसतेआत्मावास्तवंस्वरूपंनकेवलंतवैवकिन्तुसर्वस्यस्थावरस्यचरस्यचेति ॥ ५०३ ॥
सर्वान्तरत्वमादायात्मशब्दोत्रवर्त्ततेइतिदर्शयन्नकवचनार्थमप्याह अस्मदिति अहमित्याकारयाधियाहमितिशब्देनचान्तरभावाभिमुख
त्वेनायंगम्यतेउपलक्ष्यतेनतुसाक्षाद्विषयीक्रियते अहमितिधियस्तद्भास्यत्वादहमितिशब्दस्यचविशिष्टेशक्तत्वादितिभावः उपलक्षणभू
ताभ्यामहंधीशब्दाभ्यांवर्जितोऽसंस्पृष्टः उत्तरार्द्धंस्पष्टम् ॥ ५०४ ॥ यथाहमितिहिरण्यगर्भस्यनामैकरूप्येणसर्वशरीरेष्वभिव्यज्यमानं
हिरण्यगर्भस्यैकतांसूचयतीतिबृहदारण्यकेप्रोक्तंतथात्मेतिनाममैकत्वमितिनभोदृष्टान्तेनैवाह नभसइति यःसर्वाधिकरणेषुघटमठादि
षूपाधिषुनभइत्याकारमेकमेवनामतद्वन्ममात्मनःस्वरूपस्यात्मेत्येकमेवनामेति ॥ ५०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुयद्येकमात्मतत्त्वंतर्हिकथंवहुधाभावोभासतेइत्याशंक्याविद्यारूपदोषादेवेतिस्वप्नदृष्टांतेनाह स्वप्नेइति यथास्वप्नेसुखदुःखादिभागिन आत्मानःप्रमातारएकेनदोषवलात्कल्पितास्तद्वदिमेजायतिभासमानाःकल्पितावस्तुतस्तुनभिन्नाइति ॥ ५०६ ॥ एतदेवस्पष्टयति एक एवेति स्वप्नेपिदेहाएवकल्पितास्तेषामात्मातुपूर्वसिद्धएवभवतितद्वदत्रापीतिभावः ॥ ५०७ ॥ आनंदपदार्थंनिरूपयति अनुकूलेतिचतुर्द शभिः अनुकूलस्वभावःअनुकूलैकस्वरूपः सर्वेषामतिशयेनप्रियत्वात् लोकेभोग्याभावाःप्रियास्तज्जन्यंसुखंतुप्रियतरं आत्मातुसर्वशे षित्वात्प्रियतमइतिहेतोरानंदइत्युक्तइति आत्मनःसर्वशेषितांस्फुटयति आत्मार्थमिति सर्वोजंतुःसुखादिकंयदिच्छतितदात्मार्थमेवेच्छ

स्वप्नेयथाहिवहवःसुखदुःखादिभागिनः॥ आत्मानस्तद्वदेवेमेनभिन्नावस्तुतःक्वचित्॥ ५०६॥ एकएवयथा स्वप्नेनानादेहात्मतांव्रजेत्॥ प्रतर्दनतथैकोहंत्वमन्येपिचजंतवः॥ ५०७॥ अनुकूलस्वभावोहंसर्वप्रियतम त्वतः॥ आत्मार्थंसर्वएवायंजंतुरिच्छतिसर्वदा॥ सुखादिकंतदर्थंनस्वात्मानंकर्हिचित्क्वचित्॥ ५०८॥ नंदः सुखंसमाख्यातंमदुक्तोक्तिसमाम्निकृत्॥ आनंदात्माततोहंहिनिःसीमसुखरूपभृत्॥ ५०९॥ प्रजापतेःशतंये स्युरानंदाःशतवत्सरम्॥ आनंदवारिधेस्तेपिममस्युर्हिकणोपमाः॥ ५१०॥

ति वैरिसंवंधित्वेनाभिमतसुखेकामनाऽदर्शनादिति तदर्थंसुखाद्यर्थंतुकर्हिचिदप्यात्मानंनेच्छति अतःसुखादीनामप्यात्मार्थत्वेनकाम्यमा नत्वात्सर्वशेषितात्मनःसिद्धेतिभावः ॥ ५०८ ॥ आसमंतात्स्थितोयोनंदःसुखंमानुषानंदत्वादितारतम्यपर्यवसानभूमिःसआनंदइत्यभिप्रे त्याह नंदइति मयेश्वरेणनिःश्वसितवदुक्तोवेदस्तस्ययाउक्तयोमानुषानंदादिप्रतिपादिकास्तासांसमाम्निकृत् यत्रताःसमाप्ताइत्यर्थः ए तादृशोहमानंदात्मेति ॥ ५०९ ॥ मानुषपितृगंधर्वकर्मदेवाऽऽजानजदेवप्रजापतिहिरण्यगर्भानंदाःशतगुणोत्तराउक्तास्तत्रप्रजापत्यानं दाःशतगुणीकृताहिरण्यगर्भानंदरूपाअपिमेलेशःकिमुतान्येइत्याह प्रजापतेरिति ॥ ५१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्त्वहेतुतयाएषह्येवानंदयातीतिवाक्यार्थंसूचयति सुखानीति येशब्दस्पर्शरसादयोविषयाःसुखानिप्रयच्छंतीतिसुखप्रदत्वेनव्यवह्रियंते तेपिमामेवईश्वरंभूमानंप्रयच्छंतीतिव्यवहार्यामममैवसुखरूपत्वादितिभावः ननुकथंभवतोनानासुखात्मत्वंतेषुभवल्लक्षणानुपलब्धेरित्याशं क्यविशिनष्टि मत्प्राप्तीति ममयावेदांतवाक्यात्प्राप्तिस्तयाप्रकटीकृतंस्फुटतांनीतमित्यर्थः तथाचयेषांममस्वरूपेपरिचयस्तेसर्वसुखेषुउपा

॥४३॥ धिपरिहारेणममसत्यज्ञानादिलक्षणानिपश्यंत्येवमूढानांत्वज्ञानमेवोत्तरमितिभावः एषपरमात्मैवहियतोलोकानानंदयतिस्वरूपेणानंदव तःकरोतितस्मादानंदरूपोयथागुडःस्वसंसृष्टान्मधुरान्कुर्वन्मधुरइतिभूमिकोक्तश्रुत्यर्थः॥५११॥ एतमर्थंदृष्टांतेनस्पष्टयति यथेति अनुष्णा शीतोपिवायुर्यथासमुद्रसंसर्गीसन्नृणांभ्रांतानांशीतदःस्मृतः वस्तुतःसमुद्रस्यैवकणरूपेणशीतकरत्वात् एवमस्तिभातिप्रियमित्युक्तरूपस्य

सुखानियेप्रयच्छंतिशब्दस्पर्शरसादयः॥ तेपिमामेवमत्प्राप्तिप्रकटीकृतमीश्वरम्॥५११॥यथासमुद्रजो वायुःशीतदोत्रनृणांस्मृतः॥एवंमत्स्पर्शिनस्तेपिविषयाःसुखदाःस्मृताः॥५१२॥ सुखैकरूपःसर्वेषांबुद्धि साक्षीमहेश्वरः॥ प्रज्ञाप्राणोहमेतस्ययदाऽज्ञानंनृणांभवेत्॥५१३॥तदावृतात्मरूपास्तेजंतवोविषयार्थिनः॥ आप्नुवंतिमहद्दुःखंतत्त्वंवेत्सिप्रतर्दन॥५१४॥ विषयप्राप्तितस्तेषांदुःखमेतद्विनश्यति॥ विनष्टदुःखाधिष णाक्षणंभवतिनिश्चला॥५१५॥

ममतादात्म्यलक्षणस्पर्शवंतोविषयाःसुखदाइतिमूढैरेवस्मृताः सुखांशस्यमद्रूपत्वादितिभावः॥५१२॥ननुतवैवसुखरूपत्वेसर्वदाकुतोनसुख भानंविषयाःसुखप्रदाइतिलोकभ्रमेचकिंबीजमितिशंकाद्वयंनिरस्यति सुखैकेतिपंचभिः एतस्यसुखैकरूपत्वादिनोक्तस्यमद्रूपस्याज्ञानं यदाभवेत्तदेत्युत्तरेणान्वयः॥५१३॥ तदेति तदात्माऽज्ञानकालेआवृतंअज्ञानगततमसाछादितमात्मरूपंयेषांतेतथा एतेनसर्वदासुखरूपत्वे नाभानेहेतुरुक्तः तादृशाजंतवोरजसाविषयार्थिनःसंतोमहद्दुःखंप्राप्नुवंति तदात्मतत्त्वंवेत्सिअधुनामदुपदेशात्साक्षात्करोषि यद्वातदज्ञान जंदुःखंत्वंवेत्सिस्मरसीत्यर्थः॥५१४॥ विषयेति पुण्यकर्मविपाकेनकाम्यमानस्यविषयस्यप्राप्तेर्हेतोस्तेषांजनानांएतदिच्छारूपेणपरिणतं ॥४३॥ रजोमयंदुःखंविनश्यतितदातेषांधिषणाबुद्धिर्विनष्टदुःखाशांतरजस्कासतीक्षणमात्रंसत्वगुणोदयान्निश्चलाभवतीति॥५१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावदिति यावत्पराअन्येच्छानजायतेतावद्बुद्धिःसुखैकरूपेवभाति कीदृशीबुद्धिः मयानंदरूपेणसर्वात्मस्वरूपिणाव्याप्तासूर्येणदर्पणवदनुप्रविष्टा अतएवबाह्यार्थनिःस्पृहा कीदृशीइच्छा दुःखकरीदुःखवर्द्धनशीलेति॥५१६॥ सुखव्याप्तत्वेनसुखरूपलाभेदृष्टांतमाह अयःपिंडइति अयोलोहं सुखंभवेत् सुखरूपाभवेदित्यर्थः एतेनतांबुद्धेरवस्थामेवसुखमितिमत्वातस्याअवस्थायाविषयप्राप्त्यन्वयव्यतिरेकौचदृष्ट्वाविषयाःसुखप्रदाइत्यज्ञजनैर्व्यवह्रियंतइतिदर्शितं॥५१७॥नन्वेतादृशबुद्ध्यवस्थायाएवलौकिकसुखत्वेलौकिकसुखानामविशेषापत्तिरित्याशंक्ययथानैर्मल्यतारतम्याद्दर्पणस्यप्रतिबिंबग्रहणेविशेषस्तथाबुद्धेःसत्वगुणात्मिकायाःसत्वनैर्मल्यानुसारेणात्मनःसुखरूपस्यप्रतिबिंबग्रहणेइतिसदृष्टांतमाह समुद्रांतरितिद्वाभ्यां यथासर्षपकणश्छिद्रेणबिलेनसहितःसमुद्रेपिस्थितःस्वबिलपरिमितमेवजलंगृह्णा

यावन्नजायतेजंतोरिच्छादुःखकरीपरा॥ तावद्बुद्धिर्मयानंदरूपेणात्मस्वरूपिणा॥ व्याप्तासुखैकरूपेवभातिबाह्यार्थनिस्पृहा॥ ५१६॥ अयःपिंडोयथावह्निव्याप्तोभातिहिताद्दशः॥ प्रतर्दनतथाबुद्धिर्मयाव्याप्तासुखंभवेत्॥ ५१७॥ समुद्रांतःस्थितोराजन्सछिद्रःसर्षपोयथा॥ स्वप्रमाणेनगृह्णातिनीरंनैवाधिकंक्वचित्॥ ५१८॥ एवंविषयजाबुद्धिर्मय्यनंतसुखोदधौ॥ पतितामांहिगृह्णातिस्वसमानंसुखप्रदम्॥ ५१९॥ सुखेक्षुतादिजेप्येवमंगजाड्यादिमोचने॥ तत्रापीच्छानुमातव्यातद्रोधेस्तिस्फुटाहिसा॥ ५२०॥

ति॥५१८॥ एवमिति एवंमय्यनंतसुखोदधौपतितापिविषयजाबुद्धिःस्वसमानंस्वरूपेणसत्त्वगुणेनतारतम्यावस्थितेनसमानमेवमांगृह्णातिस्वस्मिन्प्रतिबिंबितंकरोतीतियावत् कीदृशंमां सुखप्रदमिति॥ ५१९॥ सर्वेषांलौकिकसुखानामिच्छोपशमाभिव्यंग्यत्वमिच्छोपशमस्यचपुनरिच्छोदयात्क्षणभंगुरत्वेनानित्यत्वंचसमानमित्याह सुखइति क्षुतंछिक्कातत्प्रभृतिजन्यतयाप्रसिद्धेसुखेपिएवंक्षणभंगुरेच्छोपशमाभिव्यंग्यत्वादिकंसमानमित्यर्थः ननुछिक्कासुखस्थलेइच्छानप्रसिद्धाइत्यतआह अंगेत्यादि तत्रछिक्काजन्यसुखस्थलेपिअंगजाड्यादिमोचनविषयिकाममपीनसादिजन्यमंगजाड्यंनिवर्ततामित्याकारिकेच्छासुखरूपकार्यलिंगेनैवानुमातव्या नकेवलमनुमानमेवतत्रेच्छायाःकिंतुसाक्षिप्रत्यक्षसिद्धत्वमपीत्याह तद्रोधेइति तस्याश्छिक्कायारोधेसाइच्छास्फुटाअनुभूयमानैवास्तीत्यर्थः॥ ५२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह एवमिति एवमिच्छोपशमद्वाराभिव्यक्तिरीत्यासचतवस्वरूपमेवेत्याह आनंदात्मेति ॥ ५२१ ॥ अजरामृतविशेषणेव्याचष्टे एवंभूतस्येति एवंभूतस्यपरिपूर्णानंदरूपंजानतोदेहोऽवच्छेदकतयानास्ति अध्यासमूलाविद्यायाअभावादितिभावः तदभावेदेहाभावेतन्निष्ठजरामरणेकुतःस्यातामिति॥ ५२२॥नसाधुनाकर्मणाभूयानित्यादिव्याकरोति नचतेइतित्रिभिः विज्ञानंयज्ञंतनुते कर्माणितनुतेपिचेतिश्रुतेर्धर्माधर्मयोस्तत्कारणयत्नस्यचाश्रयभूताबुद्धिरेवतावत्तवनास्ति कीदृशस्यतव तस्याबुद्धेःसाक्षिरूपस्य नहिलोकेपिसाक्ष्यंसाक्षिणंस्पृशतीति तदभावात्तस्याबुद्धेरभावादकर्तुस्तवपुण्यपातकेकथंस्यातामिति ॥ ५२३॥ तयोरिति तयोःपुण्यपापयोरभावेसतिइहामुत्रवालोकेफलोपभाक्फलभोक्ताकेनहेतुनाभवेदितिनकेनापीति फलोपभोगिनएवचऐश्वर्यस्यकर्मफलस्याधिक्यन्यूनताभ्यांवृद्धिन्हा

एवंसर्वशरीरेषुसुखदोहंनचापरः॥ आनंदात्मात्वमेवैषप्रतर्दननसंशयः॥ ५२१ ॥ एवंभूतस्यनैवास्तितवदेहःकथंचन॥ तदभावात्कथंतस्यधर्मौस्यातांजरामृती॥ ५२२॥ नचतेबुद्धिरप्यस्तितस्याःसाक्षिस्वरूपिणः॥ तदभावात्कथंस्यातामकर्तुःपुण्यपातके॥ ५२३ ॥तयोरभावेकेनत्वमिहामुत्रफलोपभाक् ॥ आधिक्यन्यूनताभ्यांस्तऐश्वर्यस्यहिसर्वदा॥ ५२४॥ फलोपभोगिनोनित्यंवृद्धिन्हासौप्रतर्दन ॥ अभोक्तुस्तवकेनैतौस्यातांराजन्नकारणौ॥ ५२५॥ सर्वसाक्षीमयायस्त्वंमद्रूपइहकीर्तितः॥ सत्वंकर्मपराधीनोनासिक्वापिकथंचन॥ कारयस्येवबुद्ध्यादीन्किंतुत्वंपुण्यपातके॥ ५२६॥ पुण्यंतंकारयस्येषयंस्वर्गंनेतुमिच्छसि॥ पातकंचाधिकंतंयंनरकंनेतुमिच्छसि॥ ५२७॥

सौभूयस्त्वकनीयस्त्वरूपौस्यातां तवतुअकर्तृत्वादभोक्तुरेतौवृद्धिन्हासौकथंस्यातामिति ॥ ५२४ ॥ ५२५ ॥ एवंज्ञाततत्त्वंप्रतर्दनंस्वाराज्यपदेस्थापयित्वातस्मिन्नंतर्यामिणोधर्मान्व्यपदिशन्एषह्येवसाधुकारयतीत्यादिवाक्यंव्याकरोति सर्वेति यस्त्वंसर्वसाक्षीसर्वांतरोमद्रूपोममेश्वरस्यरूपमद्वयत्वंतदेवरूपंयस्यएतादृशोवर्णितोसिसत्वंकर्मपराधीनोनासिकिंतुबुद्ध्यादीन्पुण्यंपातकंचकारयसिकुर्वतःसन्निधिमात्रेणप्रेरयसीति ॥ ५२६ ॥ तत्रव्यवस्थामाह पुण्यमिति एषत्वमीश्वरोयंस्वर्गंनेतुमिच्छसितंपुण्यंसाधुकर्मकारयसियंतुनरकंनेतुमिच्छसितमधिकंपापंकारयसीति ॥ ५२७ ॥ ॥४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्थिकमर्थमाह पुण्यपापेचेति तंदेहिनंपुण्यपापेउभेकारयसियंमानुषलोकंनेतुमिच्छसीति नचवैषम्यनैर्घृण्यप्रसंगः पुण्यःपुण्येनभव तीतिश्रुतेःपूर्वकर्मापेक्षयाप्रवर्तनादित्याह सर्वदृगिति सर्वज्ञत्वात्पूर्वकर्मणामपिद्रष्टेत्यर्थः फलितमाह अतइति मद्वपुर्मद्रूपः॥५२८॥ लोक पालेतिविशेषणस्यार्थमाह यएषइति जगत्सर्वंलोकंपासिपालयसिमातृवदिति॥५२९॥लोकाधिपतिविशेषणस्यार्थमाह अधिष्ठायेति सर्वंजगत्स्वकीयत्वेनाधिष्ठायाभिमन्येतियावत् सर्वान्विविधैर्भोगैरहर्निशंपासितर्पयसीति कइव स्वामीव यथालोकेगृहस्वामीबंधून्वि विधैर्भोगैस्तर्पयतितद्वदित्यर्थः यतस्त्वंदेवराट्देवानामग्न्यादीनांशमादिमतांवाराट्राजेति॥५३०॥ लोकेशविशेषणस्यार्थमाह एषसर्वा

पुण्यपापेचतद्बद्धिकारयस्यपिदेहिनं॥ तंयंमानुषलोकंत्वंनेतुमिच्छसिसर्वदृक्॥ अतःकर्मपराधीनःकथंभव सिमद्वपुः॥५२८॥ यएषत्वंमयाप्रोक्तःसाक्षीसर्वनियामकः॥ एषएवजगत्पासिमातृवद्दीनवत्सलः॥ ५२९ अधिष्ठायतथासर्वंस्वकीयत्वेनदेवराट्॥ स्वामीचविविधैर्भोगैःपासिसर्वानहर्निशं॥ ५३०॥ एषसर्वान्हिशू रादीन्मर्यादासेतुभेदकान्॥ राजेवस्वबलेनैवनियच्छसिमहेश्वरः॥ ५३१॥ समःसर्वेषुभूतेषुस्थावरेषुचरेषु च॥ महाभूतोपमोदेवआत्मातेकथितोमया॥एवंमामात्मरूपेणविजानीहिप्रतर्दन॥५३२॥एतद्धिततमंमम न्येमनुष्यायनचापरम्॥एवंहिततमंप्राहत्यात्मज्ञानंशतक्रतुः॥प्रतर्दनायसर्वज्ञःसत्यपाशवशंगतः॥५३३॥ प्रतर्दनोपितंनत्वाशक्रतुल्यपराक्रमः॥ अनुज्ञातोथशक्रेणजगामस्वपुरंप्रति॥ ५३४॥ प्रारब्धकर्मनिर्वाणं कुर्वन्नानाविधांश्रियम्॥ उपभुज्यास्यदेहस्यपातेशक्रमवापसः॥ ५३५॥

निति मर्यादायाःपुण्यवंतःस्वर्गंगच्छंतिपापिनोनरकमित्यादिरूपायाःस्वकृतायायेसेतवःमृद्दार्वादिमयःसेतुर्यथाजलानांविधारकस्तद्वये विधारकावेदब्राह्मणादयस्तेषांयेभेदकाविरोधिनःशूराआदिपदेनमायाविनश्वतान्स्वबलेनैवराजवन्नियच्छसिदमंप्रापयसि॥ ५३१॥ अध्यायांतिमवाक्यार्थमाह समइति महाभूतमाकाशम्॥ ५३२॥ एतन्निरूपणेवरपूर्त्तिंदर्शयति एतदिति कथाशेषंपूरयति एवमित्या दिना॥५३३॥प्रतर्दनोपीति॥ ५३४॥ प्रारब्धेति प्रारब्धस्यनिर्वाणंसमाप्तिंकुर्वन्तदर्थमितियावत् श्रियमुपभुज्यअस्यवर्तमानस्यदेहस्य पातेसतिशक्रंइंद्रस्यपारमार्थिकंस्वरूपंब्रह्मभावंविदेहमोक्षमितियावत् अवापप्राप्तवानिति॥ ५३५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतज्ज्ञानस्यदौर्लभ्यमाह एवमिति कीदृशमेतज्ज्ञानं महद्भिःप्रतर्दननिभैरधिकारिभिर्महतोवरात्महद्भ्यइंद्रादिभ्योगुरुभ्यःप्राप्तं किंतज्ज्ञानं यदिदंतवशिष्यस्यपुरतोमयागुरुणाकथितमिति ॥ ५२६ ॥ शिष्यस्योत्तराध्यायजिज्ञासामुत्थापयन्नुक्तात्मज्ञानस्यव्यतिरेकेमहाहानिप्रयोजकतामाह अस्येति अस्यात्मतत्त्वस्याज्ञानाद्येगुरवस्तेशिष्यतांप्राप्नुवंति एतज्ज्ञानवंतःशिष्यास्तुगुरुतांयांतीति एतज्ज्ञानेशिष्याणांगुरुत्वसंभवंदर्शयति गुरुत्वमिति गुरुज्ञानसमाश्रयादेवहिमुख्यंगुरुत्वमित्यर्थः ॥५२७॥ ननुज्ञानस्यैवगुरुत्वंकथमित्याशंक्यतदुपपादयति ज्ञानस्येतिद्वाभ्यां यज्ज्ञानस्यगौरवंमहत्त्वंतदस्यैवास्माज्ज्ञानादपरस्यतुतन्नैवविद्यते अतएवच्छांदोग्यश्रुत्याज्ञानस्यसमादक्षिणानास्तीत्युक्तमित्याह गुर्वीयमिति इयंवसुधागुर्वीप्रसिद्धाज्ञानमपिगुरुततइयंवसुधाज्ञानस्यदक्षिणाभवेदितिसंभावनामात्रंवस्तुतोनैवसमाभवेदिति तथाचश्रुतिः यद्यप्यस्मैइमामद्भिःपरिगृहीतांप्रयच्छेदेतदेवततोभूयइति अस्मैज्ञानदाय इमांवसुधां एतत्ज्ञानं ततःसाब्धिवसुधा

एवंहिततमंज्ञानंमहद्भिर्महतोवरात्॥ महद्भ्यःप्राप्तमेतत्तद्यदिदंकथितंतव ॥५२६॥ अस्याज्ञानाद्धिगुरवःशिष्यतांप्राप्नुवंतिहि॥ गुरुत्वंहियतोलोकेगुरुज्ञानसमाश्रयात्॥५२७॥ ज्ञानस्यगौरवंनास्मादपरस्यहिविद्यते॥ गुर्वीयंवसुधातस्माद्दक्षिणास्यभवेन्नवा ॥५२८॥ गुरुशब्दोहिलोकेस्यादधिकार्थस्यवाचकः॥ सर्वस्मादधिकोस्त्यात्मातदीयंचततोगुरुः॥५२९॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणश्रीशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेकौषीतकीसारार्थप्रकाशेइंद्रप्रतर्दनाख्यानंनामद्वितीयोऽध्यायः॥ २॥ ॥छ॥ ॥छ॥

याः भूयोधिकमितिश्रुतिपदार्थः॥५२८॥ उपपत्तिमभिनयति गुरुशब्दइति गुरुशब्दोहिअधिकस्यमहतोवाचकः तथाचविश्वप्रकाशः गुरुर्महतिचान्यवदिति महत्त्वंतुपरमात्मन्येवपर्यवसितमतःसएवगुरुस्तदीयंचयत्तदपिततस्तत्संबंधादेवगुरुमहदिति परमात्मसंबंधस्तुयथाऽसाधारणंतत्स्वरूपंनिष्प्रकारकतयावगाहमानेनज्ञानेनसहविद्यतेतथानान्येनकेनचित् अन्यत्रविशिष्टरूपेणैवसंबंधाद्यद्यपिसंप्रदायविदांमतेऽज्ञानमपिशुद्धविषयकंतथापितत्पृथुज्येष्ठभ्रातृनिषादवदप्रशस्तंततोवेदांतजन्यंतज्ज्ञानभेवेतरापेक्षयागुरुतेनतद्वंतोपीतिभावः॥५२९॥ योसौपंचमुखाविर्भूःप्रज्ञयासमुपाश्रितः विश्वचक्रस्यनाभिश्वसदेवःप्रीतिमश्नुताम् इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलाराममसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्य कृतौआत्मपुराणटीकायांसत्प्रसवाख्यायांद्वितीयोऽध्यायः समाप्तः ॥ २ ॥ ग्रंथसंख्या ॥ २२०० ॥ ॥छ॥ ॥छ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे द्वितीयोऽध्यायःसमाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे तृतीयोऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः जीवाःसर्वेपियंप्राप्यसुभावानंदसीमगाः भवंतिपरमात्मानंवेदवेद्यंस्मरामितम् ॥ १॥ पूर्वाध्यायेप्राणोपाधिकआत्मो क्तःसचोपाधिविवेकासमर्थैनदुर्ज्ञेयोऽतस्तस्यात्मनःप्राणाद्विविच्यबोधनपरंकौषीतकिब्राह्मणचतुर्थाध्यायंव्याचिख्यासुरस्याज्ञानाद्विगुर वइत्युपन्यासेनोत्थापितांशिष्यजिज्ञासांप्रश्नमुखेनाभिनयति एवमितिसप्तभिः संशयेनाविष्टंव्याप्तंहृदयंयस्यसतथा इदंवक्ष्यमाणं ॥ १ ॥ श्रुतपूर्वमनुवदति भगवन्निितिद्वाभ्यां ऐतरेयमैतरेयोपनिषत्प्रकाश्यंज्ञानंसेतिहासंसमीरितमितिसंबंधः ॥ २ ॥ इंद्रेति तदेवज्ञान मिंद्रप्रतर्दनाख्यानेनदृढीकृतंसन्मह्यंकथितं यस्माच्चातोऽन्यद्धिततमंनास्ति एतेनहिततमस्यदृढीकृत्याअभिधानेनकृतकृत्योस्मीति ॥ ३॥ किंत्विति काचिज्जिज्ञासावर्त्ततइतिशेषः संशयरूपोभ्रमरोमद्धृदयरूपंकमलंचालयतिक्षुब्धंकरोति कीदृशः भवद्वाक्यरूपाद्वायोरुत्थि

श्री ॥ एवंहिततमंज्ञानंश्रुत्वाशिष्योतिविस्मितः ॥ संशयाविष्टहृदयःपप्रच्छेदंगुरुंप्रति ॥ १ ॥ भगवन्भवता ज्ञानमैतरेयंसमीरितम् ॥ सेतिहासंहिसंसारशूलातिक्रमकारणम् ॥ २ ॥ इंद्रप्रतर्दनाख्यानेतदेवसुदृढीकृत म् ॥ नातोहिततमंयस्मादुक्तरीत्यास्तिकिंचन ॥ मत्यंकथितमेतेनकृतकृत्योस्मिसंप्रति ॥ ३ ॥ किंतुमद्धृदयां भोजंसंशयभ्रमरोमुहुः ॥ चालत्युत्थितोयस्माद्भवतोवाक्यमारुतात् ॥ ४ ॥ भवतागुरवःशिष्याअस्याज्ञाना द्भवंतिते ॥ इत्थमीरितमेतद्धिदुर्घटंप्रतिभातिमे ॥ ५ ॥ त्वयाहिततमज्ञानस्तुतिरेषाकृताथवा ॥ वृत्तमेतत्क्वचि त्पूर्वमदृष्टमधरोत्तरम् ॥ ६ ॥

तः प्रसिद्धंह्येतद्यद्वायुवेगादुड्डीयमानोभ्रमरःकमलंचालयतीति ॥ ४ ॥ संशयहेतुंवाक्यंस्मारयति भवतेति गुरवोप्यस्याज्ञानात्शिष्याभ वंतीतिभवतोक्तं एतच्चममदुर्घटंदुःखेनघटयितुमुपपादयितुंशक्यंप्रतिभाति अतःसंशयोभवतीतिभावः ॥ ५॥ ननुमदुक्तेर्थेकथंतवसन्छि प्यस्यसंशयइत्याशंक्यभवद्वाक्यस्यऐदंपर्यानिश्चयादित्याह त्वयेति किमेषाज्ञानस्यस्तुतिरेवकृताअथवाएतदधरोत्तरं भावप्रधानोनिर्दे शः अधरस्याधोभावांर्हस्योत्तरत्वमुन्नतपदलाभरूपंक्वचित्पूर्ववृत्तंसिद्धमासीत्तदेवोक्तंमयात्वेतददृष्टमिति तथाचममातींद्रियार्थेमानस्य भवद्वाक्यस्यकिमिदंस्तुतिमात्रपरंतत्त्वाख्यानपरंवेतितात्पर्यसंशयादनिश्चायकत्वेममसंशयउपपन्नइतिभावः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभवद्वाक्यानिश्वायकत्वेयन्मयोक्तंदुर्घटंश्रतिभातिमेइतितदुपपन्नमितिसूचयन्ननुपपत्तिसदृष्टांतमाह पादत्रमिति पादंत्रायतेइतिपादत्रमुपानत् शीर्ष्णिशिरसि मौलिःकिरीटं मौलिःकिरीटेधम्मिल्लेइतिविश्वः गुरुविषयकंगुरुत्वंशिष्याःकेनाप्नुवंति नकोपिहेतुस्तत्रसंभाव्यतइत्यर्थः ॥ ७॥ भवच्छिष्यस्यममायंसंशयोभवतैववेदोक्तत्वाभिधानेनपरिहार्यइत्याह अतइति प्रवृत्तंवर्णितमितियावत् वेदार्थनिर्णयप्रसंगाद्वेदेष्वित्युक्तं ॥ ८॥ गुरुवाक्यमवतारयति एवमिति तदभिनयति नैषेति वृत्तंभूतम् वेदोक्तत्वंस्फुटयति कौषीतकिरिति एतन्नामाशाखाप्रवर्त्तकःतथाएषदिवाकरश्ववाजसनेयोपदेष्टाइदमुक्तवानिति ॥ ९ ॥ एतत्स्पष्टयति कौषीतकिस्तपइति कौषीतकिर्नामऋषिर्मंत्रदर्शनंमंत्रस्यदर्शनसामर्थ्यरूपमृषित्वंप्राप्तःसन्ननुग्रहेणद्विजातीन्प्रतिस्वनामांकितांशाखांप्रोक्तवान् तस्यामिदमुक्तमितिशेषः ॥ १० ॥

पादत्रंहिकथंशीर्ष्णिमौलिधारिणिवर्तते ॥ शिष्याःकेनगुरुत्वंहिगुरावेवाप्नुवंत्यमी ॥ ७॥ अतोस्तियदिवेदेषुप्रवृत्तमधरोत्तरम् ॥ तत्त्वंकथयनान्योमांभवतोबोधयेत्पुमान् ॥ ८ ॥ एवमुक्तोगुरुःशिष्यंप्रत्युवाचातितुष्टधीः ॥ नैषास्तुतिर्मयोक्तातेकिंतुवृत्तमिदंपुरा ॥ कौषीतकिरुवाचेदंतद्वदेषदिवाकरः ॥ ९॥ कौषीतकिस्तपस्त्वाप्राप्तवान्मंत्रदर्शनम् ॥ लोकानुग्रहकामोयंद्विजातीन्प्रत्युवाचह ॥ १० ॥ सवितापितथाचायंयाज्ञवल्क्येनतोषितः ॥ मधुकांडउवाचेदंलोकानुग्रहकारकः ॥ ११ ॥ वर्णिनःसकलाःशिष्यागुरवोत्रब्राह्मणाःस्मृताः ॥ ज्ञानार्थंब्राह्मणःशिष्योराज्ञोभूदितिविश्रुतं ॥ १२ ॥ अत्रचोदाहरंतीममितिहासंपुरातनम् ॥ ब्राह्मणस्यहिसंवादंराज्ञाशांतेनतंशृणु ॥ १३ ॥ गर्गाणांगोत्रजःकश्चिद्बलाकइतिविश्रुतः ॥ ब्राह्मणोवेदवेदांगपारगोधर्मसंस्थितः ॥ १४ ॥

सवितेति सवितासूर्यःभक्त्यायाज्ञवल्क्येनतोषितःसंस्तस्मैशुक्लानियजूंष्युपदिशंस्तत्रमधुकांडेइदमुक्तवानिति बृहदारण्यकंहिकांडचतुष्टयात्मकंतत्रप्रथमाध्यायद्वयंप्रवर्ग्यकांडःतृतीयचतुर्थाध्यायौमधुकांडस्ततःपरंयाज्ञवल्क्यकांडःखिलकांडश्वेतितत्रमधुकांडघटकेचतुर्थाध्यायेबालाक्यऽजातशत्रुसंवादेइदमुक्तमित्यर्थः ॥ ११ ॥ इदंपदार्थमाह वर्णिनइति सकलावर्णिनःसर्वेवर्णाइतियावत् ब्राह्मणाएवगुरवइतिप्रसिद्धंतथाप्यात्मज्ञानार्थंब्राह्मणोराज्ञःशिष्योभूदितिविश्रुतंकौषीतकिबृहदारण्यकचतुर्थाध्याययोःप्रसिद्धमित्यर्थः ॥ १२ ॥ ॥ १ ॥
अत्रचेति शांतेनउपशमवता ॥ १३॥ अथहगार्ग्यइत्यादिव्याकरोति गर्गाणामित्यादिना ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्येति तस्यबलाकस्यपुत्रोबालाकिःतादृशःवेदवेदांगइत्यनूचानपदार्थः धर्मेसंस्थितिस्तुतस्यमदवशान्नाभूदितिहेतुगर्भैर्विशेषणैर्दर्शयति लालितइत्यादिना लालितपदेनधनमदःसूचितः एवमेवमाकारासदर्पाधीर्यस्यसतथा ॥ १५ ॥ सदिशामिति सबालाकिः इमानूवक्ष्यमाणान् उशीनरानिति हिमस्यहिमालयस्यसेतोःसेतुबंधस्यचमध्यगानपरांश्चदेशानूचचारेत्यनुषंगः ॥ १६ ॥ स्फीतेति स्फीताप्रख्याताकीर्तिर्यस्यसतथेतिश्रुतिगतसंस्पष्टपदार्थः सर्वज्ञआत्मव्यतिरिक्तसर्ववित् यतःप्राणमेवात्मानंमन्यमानः वाग्मीप्रशस्तवाक् ॥ १७ ॥ निवसन्निति तेषुउशीनरादिषु जिगायजितवान् ॥ १८ ॥ काशीति दृप्तःसदर्पः गार्ग्योबालाकिः परानुत्कृष्टान् ॥ १९ ॥ त्रैवर्णिकाइति

तस्यपुत्रोभवत्कश्चित्तादृशोलालितोयुवा ॥ अहंविद्याधिकोनान्योमत्तएवंसदर्पधीः ॥ १५ ॥ सदिशांविजयं कुर्वंश्चचारविषयानिमान् ॥ उशीनरांस्तथामत्स्यान्कुरून्पंचालकानपि ॥ काशीन्विदेहानपरान्हिमसेत्वोश्चमध्यगान् ॥ १६ ॥ स्फीतकीर्तिःसमेधावीस्वात्मबोधविवर्जितः ॥ सर्वज्ञःप्राणमात्मानंमन्यमानश्चवाग्म्यपि ॥ १७ निवसंस्तेषुदेशेषुजिगायात्मबलेनसः ॥ त्रैवर्णिकाननेकांश्चग्रामेषुनगरेषुच ॥ १८ ॥ काशीनामांकितेदेशे कदाचिद्गार्ग्यआगमत् ॥ दृप्तोविद्याधिकोविप्रोजेतुंत्रैवर्णिकान्परान् ॥ १९ ॥ त्रैवर्णिकाजितास्तत्रतेनतेराजवर्जिताः ॥ राजानंजेतुकामःसतमप्येषजगामह ॥ २० ॥ काशीश्वरोतिधर्मात्मायोग्रणीर्ब्रह्मवादिनाम् ॥ विनीतःसत्यसंधश्चसतांशुश्रूषणेरतः ॥ २१ ॥ बलाधिक्यान्नतस्यास्तिजातःशत्रुःपुमान्भुवि ॥ तेनसंज्ञामसौप्राप्तोऽजातशत्रुरितीश्वरः ॥ २२ ॥ शत्रौमित्रेतथोपेक्ष्येस्वदेहेचक्रमावपि ॥ नयस्यविषमाबुद्धिःस्वप्नेप्यस्तिमहीभृतः ॥ २३ ॥ तमेकदासभासंस्थंजेतुकामोद्विजोत्तमः ॥ काश्यमागत्यसहसावचनंत्विदमुक्तवान् ॥ २४ ॥

तंराजानंजगामोपगतः ॥ २० ॥ राजानंविशिनष्टि काशीश्वरइति अग्रणीर्मुख्यः सत्येसंधास्थितिर्यस्यसतथा संधास्थितौप्रतिज्ञायामितिविश्वः ॥ २१ ॥ तन्नामव्युत्पत्तिमाह बलेति तेनशत्रोरजातत्वेनासौकाशिराजःअजातशत्रुरितिसंज्ञांप्राप्तः ॥ २२ ॥ आंतरशत्र्वभावादपितादृशंनामोचितमित्याह शत्राविति व्यापिकायाविषमबुद्धेरभावात्तद्व्याप्यानांरागद्वेषादीनामभावोन्यायसिद्धइतिभावः ॥ २३ ॥ तमिति तंराजानं जेतुकामः तुंकाममनसोरपीतिमलोपः सहसाअविचार्य ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अजातेति अत्रसंसारे॥२५॥इत्थमिति मत्सरेणपरोत्कर्षासहनरूपेणहीनः इदंवक्ष्यमाणम् ॥२६॥गार्ग्येति तेनभवद्वाक्येनामृतवृष्टिसमेन ममकर्णविविरेद्वेअपिशीतलेगतसंतापेकृतेइति ॥२७॥ निर्वृतिमिति त्वद्वाक्येनमेहृदयंनिर्वृतिंसुखातिशयंनीतम् तत्रदृष्टांतः यथानष्टपुत्रस्यदेशांतरगमनादिनाऽदर्शनगतपुत्रकस्यमुमूर्षोःसन्निहितमरणस्यधनिनोवृद्धस्यतत्कालागतपुत्रगिराहृदयंनिर्वृतिमेति ॥२८॥ ब्रह्मतत्त्वप्रकाशनप्रतिज्ञारूपंभवद्वाक्यंदौर्लभ्यान्ममातिहर्षहेतुरितिवक्तुंतस्यदौर्लभ्यमाह आयांतीतिद्वाभ्यां धीरेवधनवत्परिपाल्यायेषांतेतथा आगत्यचचित्राणिविस्मयजनकानिस्वकर्माणिदर्शयंति कुतः वेदपाठात्तथार्थतः ल्यब्लोपेपंचमी वेदस्यपाठंविधायअर्थंप्रकाश्यचे

अजातशत्रवेतुभ्यमज्ञायात्रनिमज्जते ॥ वदामिब्रह्मयत्तत्त्वंसावधानमनाःशृणु॥ २५ ॥ इत्थंगार्ग्यवचः श्रुत्वाराजानिर्मत्सरःस्वयम्॥ उत्पन्नहर्षःसहसावचनंत्विदमुक्तवान्॥ २६॥ गार्ग्ययद्भवताप्रोक्तंवचनंनिष्प्रसंगकम्॥ तेनमेकर्णविविरेकृतेवृष्ट्येवशीतले॥ २७॥ निर्वृतिंहृदयंमेद्यप्राप्तंपुत्रगिरायथा॥ नष्टपुत्रस्यवृद्धस्यमुमूर्षोर्धनिनोभुवि॥ २८॥ आयांतिशतशोविप्राःसभायांममधीधनाः॥ दर्शयंत्यपिचित्राणिवेदपाठात्तथार्थतः॥ २९॥ वदंतिविविधाविद्याःस्पष्टाजातेप्रशंसने॥ पृष्टाअपिवदंत्येतेब्रह्मविद्यांनकर्हिचित्॥ प्रसिद्धाःस्थविराःसर्वेमिलिताश्चसहस्रशः॥ ३०॥ बालोभवानेकएवनपृष्टःकेनचित्तथा॥ प्रसंगेनविनायस्मादिदंवचनमुक्तवान्॥ ब्रह्मतुभ्यंवदानीतितेनतुष्टोस्म्यहंतव॥ ३१॥ भवान्वदतुमेब्रह्मभावाकिंतुत्वयेदृशम्॥ ईरितंतस्यवाक्यस्यनिष्क्रयोयंमयाकृतः॥ ३२॥

त्यर्थः ॥२९॥ वदंतीति तथास्पष्टाःप्रसिद्धाविविधाविद्याश्चवदंति ब्रह्मात्मविद्यायास्तुप्रशंसनेजातेपिपृष्टाअपिचतांनवदंति नचतेषांब्रह्मवित्त्वेनाप्रसिद्धिः अनौचित्यमसहायत्वंवाऽनभिधानेकारणमासीदितिबोधयितुंविप्रान्विशिनष्टि प्रसिद्धाइत्यादिविशेषणत्रयेण॥३०॥ त्वयातूक्तविशेषणव्यतिरेकेपितथोक्तत्वादहंतुष्टोस्मीत्याह बालइति इदंब्रह्मेत्यादिवाक्यं तेनतवविशिष्टकर्मणातुष्टोस्मीति ॥३१॥ तिष्ठत्वर्थएतादृशवाक्यमात्रस्येयंदक्षिणामयासज्जीकृतेत्याह भवानिति निष्क्रयोदक्षिणा अयंवक्ष्यमाणः ॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्क्रयस्यरूपंदेयत्वेनदर्शयति घटोध्नीनामिति घटवदूधआपीनंयासांतास्तथातासां नारीप्रजानांवत्सीप्रसवानां सौम्यवर्चसांअनुग्रते जस्तांसुशीलानामितियावत् सद्यःप्रसवानंतरमेवद्वितीयंप्रजननंगर्भंप्राप्नानांप्रतिवर्षप्रसूयमानानामितियावत् एतादृशांगवांसहस्रंशुभलक्षणकंतेतुभ्यंब्रह्मवच्मीतिभाषिणेददामीति ॥ ३३ ॥ इत्युक्तेति हृष्टचेतनःप्रसन्नमनाः अभिप्रायेणेति असौनरेश्वरोऽमुनाऽऽशयेनगोसहस्रंदत्तवान् ॥ ३४ ॥ राज्ञोभिप्रायमभिनयति अजातेतित्रिभिः मामजातशत्रुंसर्वगुणमज्ञात्वैवइमेजनाजनकंप्रतिप्रयांतियदिमांजानीयुस्तर्हिनगच्छेयुरेवेतिभावः ॥ २५ ॥ धनस्येति कीदृशाइमेजनाः व्यर्थमेवमाकारंविमोहंगताः एवंकथं यत्जनकएवधनस्यब्रह्म

घटोध्नीनांगवांनारीप्रजानांसौम्यवर्चसां ॥ सद्योद्वितीयंप्रजनंप्राप्तानांशुभलक्षणम् ॥ सहस्रंतेददाम्यद्यब्रह्मवच्मीतिभाषिणे ॥ ३३ ॥ इत्युक्त्वास्माअदाद्राजासहस्रंसगवांततः ॥ यथाशास्त्रंसुवर्णादिसहितंहृष्टचेतनः ॥ अभिप्रायेणामुनासौगार्ग्यायादान्नरेश्वरः ॥ ३४ ॥ अजातशत्रुंधर्मज्ञंवदान्यंब्रह्मवादिनम् ॥ अज्ञात्वेमेप्रयांत्येनंजनकंमिथिलेश्वरम् ॥ ३५ ॥ धनस्यब्रह्मविद्यायाअपिदातापितेवसः ॥ श्रोतातस्याश्चजनकएवंव्यर्थंविमोहिताः ॥ ३६ ॥ यतोहंब्रह्मविद्यायावचनेपिददाम्यदः ॥ गवांसहस्रंजनकस्तूपदेशेददातिसः ॥ ३७ ॥ इत्यविज्ञायगार्ग्योपिराज्ञोभिप्रायमल्पधीः ॥ आर्तमेनंहिमन्वानोब्रह्मवक्तुंप्रचक्रमे ॥ ३८ ॥

विद्यायाश्वपितेवदाताश्रोताचेति पितायथाधनंददातिपुत्राधीतंचशृणोतितद्वदित्यर्थः श्रुतौजनकपदस्याभ्यासादेकंजनकपदंपितृपरमुपमानतयाव्याख्यातमितिबोध्यम् ॥ ३६ ॥ विमोहितत्वंचजनानांमांततोधिकमज्ञात्वाजनकंप्रतिधावनादितिसूचयितुंस्वस्याधिक्यंदर्शयति यतइति वचनेप्रकाशनप्रतिज्ञामात्रेपिजातेसतिगवांसहस्रंददामिसजनकस्तूपदेशेजातेसतिपश्चाद्ददातीतिस्पष्टोविशेषइतिभावः ॥ ३७ ॥ इत्यविज्ञायेति इतिश्लोकत्रयेणवर्णितंराज्ञोऽभिप्रायमल्पधीत्वादविज्ञायैवगार्ग्योबालाकिर्ब्रह्मापरंयथाज्ञातंवक्तुमुपदेष्टुमुपचक्रमेप्रारेभे कीदृशोगार्ग्यः एनंराजानंआर्तंजिज्ञासयाव्याकुलंमन्यमानः अनेनतत्त्वजिज्ञासयाएतदुपायनंदत्तमतोस्यजिज्ञासापूरणीयेतिभ्रमंप्राप्तःसन्नित्यर्थः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथद्वितीयकंडिकामारभ्यसप्तदशकंडिकार्थंसंगृह्णाह अध्यात्ममितिषड्भिः अध्यात्मंव्यष्टिरूपधृक्अधिदैवंसमष्टिरूपधृक्चसविशेषंब्रह्मप्राणरूपंयथाज्ञातंबालाकिरुक्तवांस्तदपिअव्याकृतपर्यंतंअव्याकृतंपर्यंतेपरस्ताद्यस्यतत् अव्याकृतादप्यपरमेवावददित्यर्थः निर्गुणंतु नतस्यपरतरत्वादितिभावः ॥ ३९॥ यद्यदिति बालाकिर्यद्यदवदत्राजातत्तन्निराकरोत् किंकुर्वन् एतन्मयाज्ञातत्वान्नोपदेष्टव्यमितिसूचनायमामाऽत्रसंवादंकुर्वितिवदन्सन्तथाहस्तौवारणमुद्रयाचालयन्सन्निति ॥ ४० ॥ आदित्येति आदित्यचंद्रविद्युतःप्रसिद्धाः स्तनयित्नुर्मेघमंडलशब्दः नभआकाशं मरुद्वायुः अग्निः आपः इमेऽष्टौअधिदैवतंदैवतेविराट्शरीरेघटकतयास्थिताःब्रह्मपुरुषाःअपरब्रह्मणोविभूतिरूपाणांपुरुषाणांशरीरभूताः तथाचैतेषुअष्टसुअष्टौउपास्यानिब्रह्मस्वरूपाणिउक्तानीत्यर्थः ॥ ४१ ॥ अध्यात्ममिति अध्यात्मंआत्म

अध्यात्ममधिदैवंचसमष्टिव्यष्टिरूपधृक्॥ ब्रह्माव्याकृतपर्यंतमुक्तवान्निर्गुणंनतु॥ ३९ ॥ यद्यद्वदतिबालाकी राजातत्तन्निराकरोत्॥ वदन्मामेतिहस्तौचचालयन्सन्नृपोत्तमः॥ ४० ॥ आदित्यचंद्रौविद्युच्चस्तनयित्नुर्नभो मरुत्॥ अग्निरापइमेब्रह्मपुरुषाअधिदैवतम्॥ ४१ ॥ अध्यात्मंचतथादर्शोदिग्रूपंश्रोत्रमेवच॥ गच्छंतमनु शब्दश्चछायात्मापुरुषाकृतिः॥ ४२ ॥ स्थूलंशरीरंतद्वच्चसूक्ष्मंप्राज्ञइतीरितम् ॥ दक्षसव्याक्षिसंस्थौचत्वष्टा वष्टावुदीरिताः ॥ ४३ ॥

निव्यष्टिशरीरेस्थिताःएतेऽष्टौपूर्ववद्ब्रह्मपुरुषाउक्ताः एतेके आदर्शःदर्पणाद्युज्वलंप्रतिबिंबग्राहकंवस्तु १ दिग्रूपंश्रोत्रंश्रुतौप्रतिश्रुत्पदेनोक्तं २ गच्छंतंवेगेनेचलंतंपुरुषमनुतस्यपश्चाद्योऽयंध्वनिरूपःशब्दः ३ पुरुषाकृतिपुरुषसमानाकारंछायास्वरूपंच ४ स्थूलंशरीरंशरीरपदेनैवोक्तं ५ तथासूक्ष्मंशरीरंप्राज्ञइतीरितंसुषुप्त्यंतर्गतस्वप्नदर्शनसाधनत्वेननस्वममाचरतीतिवाक्येप्राज्ञपदप्रयोगार्हत्वेनविवक्षितं ६ दक्षिणनेत्रस्थःसूक्ष्मशरीराकारः ७ वामनेत्रस्थश्च ८ एवमष्टावष्टौअधिदैवमध्यात्मंचब्रह्मपुरुषाउक्ताइत्येतावदत्रविवक्षितंक्रमस्तुतेषांपुरुषाणां ॥ ३ ॥
विशेषणरूपागुणास्तेषांगुणानांचिंतनजन्यफलानिचश्रुतेरेवबोध्यानीति ॥ ४२ ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गार्ग्येणेति गार्ग्येणषोडशपुरुषाअस्यराज्ञउपास्यतयोक्ताअहमेतान्पुरुषानादित्यादिस्थितानुपासेत्वमप्युपास्वेत्येवमुपदिष्टाः राजातु तान्पुरुषानुपास्यत्वेननिराकरोत्नैतेममोपास्यत्वेनोपदेष्टव्यायतोमयाज्ञाताउपासिताश्चात्रतवोपदेशःसिद्धसाधनमित्युतररूपंनिराकरणं कृतवान् कीदृशान्पुरुषान् बालाकेःपुरुषविशेषणज्ञानात्तत्फलज्ञानाच्चयोभिमानस्तन्निराकरणायातिष्ठादिगुणत्वेनोक्तानुक्तान्वारंवाररराज्ञावर्णितान् तत्रातीत्यऐश्वर्येणसर्वमतिक्रम्यतिष्ठतीत्यतिष्ठाइदमादित्यपुरुषस्यविशेषणं आदिपदेनबृहत्पांडुरवासाइत्यादिविशेषणानांजलप्रधानचंद्रमयसुषुम्नातादात्म्येनलब्धानामस्यैवविशेषणानांतथान्नस्यात्मेत्यादीनांचंद्रादिविशेषणानांचग्रहः ॥ ४४ ॥ ततउहेत्यादिइतिहोवाचबालाकिरित्यंतंवाक्यंव्याकरोति आदित्यादिस्थितानित्यष्टभिः आदित्यादिगतान्षोडशपुरुषान्ब्रह्मदृष्ट्याब्रह्मबुध्योपास्यत्वेनस्वयंबालाकिनाप्रोक्तान्राज्ञानिराकृतान्वीक्ष्यबालाकिस्तस्यराज्ञःसभामध्येचोरवत्तूष्णीमवाङ्मुखश्चासीत् किदृशोबाला

गार्ग्येणराज्ञोऽस्योपास्याराज्ञातान्क्रमतोखिलान्॥ अतिष्ठादिगुणत्वेनस्युक्तानुक्तान्निराकरोत्॥ ४४॥ आदित्यादिस्थितानेवंपुरुषानपिषोडश ॥ ब्रह्मदृष्ट्यास्वयंप्रोक्तान्राज्ञावीक्ष्यनिराकृतान्॥ ४५ ॥ अतःपरमजानानोब्रह्मात्मानंसनिर्गुणम्॥ अपप्रतिज्ञोबालाकिःपरिम्लानमुखांबुजः ॥ चोरवत्तत्सभामध्येतूष्णीमासीदवाङ्मुखः॥४६॥कुलविद्याधनमदैर्मत्तंब्राह्मणबालकम्॥ नानात्रैवर्णिकजनतिरस्कारगतश्रियम्॥ ४७॥ अजातशत्रुस्तंवीक्ष्यशरन्मेघाभगर्जनम्॥ मदंसांत्वयितुंराजातस्यपापकरंतथा ॥ इदंवचनमाहोच्चैःसभायांनिर्घृणोयथा॥ ४८॥

किः अतःपरंब्रह्मात्मानंकारणोपाधिकंवस्तुतोनिर्गुणमजानानःअविद्वान्सन् पुनःकीदृशः अपप्रतिज्ञोऽपगताहानिंगताप्रतिज्ञायस्यसतथा अतएवपरिम्लानमुखांबुजइतिद्वयोरर्थः ॥ ४५ ॥ ४६ ॥ कुलेति कुलमभिजनःविद्याचधनंचएतैर्मदैर्मदरूपेणपरिणतैर्मत्तंसमदं तदुक्तं विद्यामदोधनमदस्तथैवाभिजनोमदः एतेमदामदांधानांतएवहिसतांदमाइति मदकृतेननानात्रैवर्णिकजनतिरस्कारेणैवगतानष्टाश्रीःकांतिर्यस्यसतथातं अतएवशरत्कालिकमेघगर्जनाभंव्यर्थंगर्जनंयस्यसतथातं एतादृशंब्राह्मणबालकंवीक्ष्यतस्यबालाकेःपापकरंपापस्यपरापमानरूपस्यप्रयोजकंमदंसांत्वयितुंइदंवचनंसभायामुच्चैराह कीदृशोराजा निर्घृणोयथाअंतःसदयोपिबहिर्निर्घृणवद्भासमान इतिद्वयोरर्थः ॥ ४७ ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजवाक्यमभिनयति रेवालाकेइतित्रिभिः किंपदंश्रुतिगतनुपदार्थंवितर्कमाह रेवालाकेविप्रकिंतवएतावदेवज्ञानंकिंवाधिकमप्यस्ति की दृशस्यतव त्रैवर्णिकानांआक्षेपंतिरस्कारंकर्त्तुंशीलंयस्यएतादृशस्य पुनःकीदृशस्य दुष्टधियः॥४९॥ विप्राइति त्वदधिकज्ञानाअपिविप्रा अत्रसभायांसंतिपरंतुत्वद्वत्त्वमिवत्वदन्यएकोपिमदविमोहितोनास्तीत्यन्वयः॥५०॥ ततइति स्पष्टम् ॥५१॥ एतावदेवेति हेराजेंद्रएतावदे वब्रह्मस्वरूपंमह्यंगुरुभिरुदितमुपदिष्टमासीत् तेनाधिकानुपदेशेनएतस्मान्निरूपितात्कार्यंब्रह्मणोऽधिकंनजानेइति ॥ ५२ ॥ बृहदारण्यक चतुर्थाध्यायस्यप्रथमब्राह्मणेनैतावताविदितंभवतीत्युक्तंतदर्थमाह एवमिति एतद्वक्ष्यमाणंउदैरयत्उक्तवान् ॥५३॥मृषावैइत्यादिवाक्या र्थंप्रपंचयति पुत्रैरितित्रयोदशभिः पुत्रादिभिरपिस्ववचःस्ववचनंरक्षणीयं यदिपुत्रादयोपित्यज्यमानाःस्ववचनरक्षणेसाधनंस्युस्तदापिस्व

रेवालाकेशिशोविप्रज्ञानमेतावदेवकिं॥ तवत्रैवर्णिकाक्षेपकारिणोदुष्टचेतसः॥ ४९॥ विप्रास्त्वदधिकज्ञा नाअत्रसंतिसहस्रशः॥ सभायांममनैकोपित्वद्वदन्योविमोहितः॥५०॥ ततोयद्यस्तितेकिंचिज्ज्ञानमभ्यधि कंपुनः॥ तद्वदेत्येवमुक्तःसबालाकिरिदमुक्तवान्॥ ५१॥ एतावदेवराजेंद्रमह्यंब्रह्मोदितंपुरा॥ तेनाहंनाधिकं जानेएतस्माद्ब्रह्मणःक्वचित्॥ ५२॥ एवमुक्तेतदाराजावाक्यमेतदुदैरयत्॥ ब्रह्मनैतावतागार्ग्यविदितंकेनचि द्भवेत्॥ ५३॥ पुत्रैर्दारैर्धनैर्वापिनानाविधाविभूतिभिः॥ रक्षणीयंहिवचनंनानृतात्पातकंपरम्॥ ५४॥ मृषा वादीजगत्यस्मिन्कर्मचांडालईरितः॥ विशेषतोहिगुर्वादिसन्निधौस्ववशोहियः॥ ५५॥ अकारणंहियोवा क्यंमृषाब्रूयान्नराधमः॥ तस्यजिह्वांनिकृंततिसंदंशैर्यमकिंकराः॥ ५६॥

वचनंरक्षणीयंसत्यंकर्त्तव्यमितियावत् यतोऽनृतात्परंपातकंनास्ति तदुक्तंमनुना अन्यथासंतमात्मानंयोन्यथासत्सुभाषते सपापकृत्तमो लोकेस्तेनआत्मापहारकः वाच्यार्थानियताःसर्वेवाङ्मूलावाग्विनिःसृता तांतुयस्तेनयेद्वाचंससर्वस्तेयकृन्नरइति स्तेनयेद्यभिचरितार्थांब्रू यादित्यर्थः॥५४॥ मृषेति कर्मणाचांडालःश्वपचादिस्तुजात्येतिविशेषः यस्तुस्ववशःस्वतंत्रःसन्गुरूणामादिपदग्राह्यराजादीनांचसन्निधौ मृषावादीसविशेषतश्चांडालइति ॥ ५५ ॥ अकारणमिति अकारणं वर्णिनांहिवधोयत्रतत्रसाक्ष्यनृतंवदेदित्यादिशास्त्रबोधितंकारणंवि नायोमिथ्यावदतितस्यजिव्हांयमकिंकराःसंदंशैर्निकृंततिच्छिंदंति संदंशोदुर्ग्रहस्यग्रहणसाधनंस्वर्णकाराद्युपकरणेषुप्रसिद्धः ॥ ५६ ॥ ॥४॥

पित्राहं.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपीति लोकेयेऽधमाःप्रसिद्धास्तेषुगण्यमानेषुप्रथमगण्योऽधमःसयोमिथ्यावदतीति ॥ ५७ ॥ अग्न्यादीनामिति अग्निप्रभृतीनांदेवानां गुरूणांवाराज्ञांवासन्निधौयोऽनृतंवक्तितंराजाहन्यादेवेति ॥ ५८ ॥ ब्राह्मणत्वादिति हेपापतवदैहिकोवधःशारीरोदंडोमयानकृतस्तवब्राह्मणत्वात् कीदृशेनमया धर्मज्ञेनसदाधर्मनिष्ठेनसभायांचविशेषतस्तत्रधर्मेसावधानेनेति तथाचमनुः अक्षतोब्राह्मणोव्रजेदिति नारदोपि वधादृतेब्राह्मणस्यनवधंब्राह्मणोर्हतीति ॥ ५९ ॥ ननुकेनागसामयिदंडप्रसक्तिरित्याशंक्यत्वत्कृतोजनोपद्रवएवयेनादृष्टद्वारातवप्रतिज्ञाहतेत्याह मिथ्येति मिथ्याप्रतिज्ञस्त्वंजातः यतोब्रह्मोपदिशामीतित्वयाप्रतिज्ञातंतच्चतवप्रतिज्ञातंनसिद्धंजनोपद्रवकारित्वादिति ॥ ६० ॥ ज

अपिप्रसिद्धालोकेस्मिन्नधमाःपुरुषाहिये ॥ अधमःप्रथमस्तेषुयोऽनृतंवक्तिमानवः ॥ ५७ ॥ अग्न्यादीनांगुरूणांचराज्ञांवासन्निधौहियः ॥ अनृतंवक्तितंपापंहन्यादेवाविचारयन् ॥ ५८ ॥ ब्राह्मणत्वान्नतेपापदैहिकोत्रवधःकृतः ॥ धर्मज्ञेनमयाराज्ञासभायांचविशेषतः ॥ ५९ ॥ मिथ्याप्रतिज्ञस्त्वंजातोब्रह्मवच्मीतियत्त्वया ॥ प्रतिज्ञातंनतत्सिद्धंजनोपद्रवकारिणः ॥ ६० ॥ साधूनांसमचित्तानांब्राह्मणानांविशेषतः ॥ कर्मणामनसावाचापीडांयःकुरुतेऽधमः ॥ सूर्यादयःसदातस्यघ्नंतिसर्वान्मनोरथान् ॥ ६१ ॥ भूतानांकुरुतेयोत्रसुखंवादुःखमेववा ॥ आत्मनःकुरुतेसर्वमिहलोकेपरत्रच ॥ ६२ ॥ विद्यादिमदमोहेनभवतात्रतिरस्कृताः ॥ बहवःसाधवस्तत्वांफलमद्यसमागतम् ॥ ६३ ॥ अद्यप्रभृतिमाऽतस्त्वंमृषावादंकुथाःक्वचित् ॥ ब्रह्मतेहंब्रवाणीतियथामामुक्तवानिह ॥ ६४ ॥

नोपद्रववशात्स्वकीयकरणदेवताएवतस्येष्टंघ्नंतीत्याह कर्मणेति सूर्यादयश्चक्षुरादिदेवताः ॥ ६१ ॥ न्याय्याचपरापकारिणोऽनिष्टप्रसक्तिरित्याह भूतानामिति योहिस्वशिरःपरशिरोबुध्याताडयतिसपीडितएवभवतिएवमात्मनोऽनतिरिक्तानिभूतानिपरबुध्यापीडयन्कथंनदुःखितोभवेदितिभावः ॥ ६२ ॥ भवानपितादृशइत्याह विद्यादीति विद्यादिमदजन्यमोहेनकरणेनभवताकर्त्राबहवःसाधवस्तिरस्कृतास्तत्स्मात्साधुतिरस्काराद्धेतोर्जन्यंफलंत्वामद्यप्राप्तमिति ॥ ६३ ॥ अद्येति अतएतादृशफलदर्शनात्अद्यप्रभृतिब्रह्मतेहंब्रवाणीत्याकारंमृषावादंयथामाकुथाः यथामृषावादंमांप्रत्युक्तवानसीति ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुरिति आत्मवतांपुरुषार्थादनपेतानांवश्यें द्रियाणामितियावत् ईदृशानांसर्वदेहिनांगुरुरेवशास्ताअनुशासकः अविप्रःक्षत्रियादिस्तुन शासकः अविप्रस्यविद्योपदेशेऽनधिकाराद्विद्यातिरिक्तस्यचात्मवद्भिरनपेक्षितत्वादिति ब्राह्मणानांतुक्षत्रियाद्यशास्यत्वेब्राह्मणत्वजाति विशेषहेतुरित्यर्थः तवतुउन्मार्गवर्तित्वेनात्मवत्त्वाभावान्मयाशासनंकृतमितिभावः ॥ ६५ ॥ तवदंडोप्येवंविचार्यमयाकृतइत्याह दंड्या

॥५॥ इति दुरात्मानउक्तात्मवद्विपरीताधर्माच्चलिताइतियावत् तेराज्ञादंड्याइत्यर्थकमेकंशास्त्रं यथा नादंड्योनामराज्ञोस्तिधर्माद्विचलितःस्व कादित्यादि ब्राह्मणानैवदंड्याइत्यर्थकमपरं यथा अक्षतोब्राह्मणोव्रजेदिति तत्शास्त्रद्वयंसमाश्रित्योत्सर्गापवादन्यायेनव्यवस्थाप्यतेतव भर्त्सनमेवकृतमिति तथाहि धिग्दंडस्त्वथवाग्दंडोधनदंडःशरीरदंडश्चेतिचतुर्विधदंडेषुचतुर्थस्यद्वितीयशास्त्रेणबाधात्तृतीयस्यानौचित्यात्प्रथ

गुरुरात्मवतांशास्ताबालाकेसर्वदेहिनाम्॥ विशेषतोब्राह्मणानामविप्रःशासकोनहि॥ ६५ ॥ दंड्याराज्ञादुरा त्मानोब्राह्मणानैवचेतिहि॥ शास्त्रद्वयंसमाश्रित्यभर्त्सनंतेकृतंमया॥ ६६॥ उत्तमेभ्योऽधमेभ्योवाराज्ञावाच्यं हितंसदा॥ एतच्छास्त्रंसमाश्रित्यहितंतेवच्मितच्छृणु॥ ६७॥ षोडशानांत्वदुक्तानांपुरुषाणांमहात्मनाम्॥ क र्ताविश्वस्यचाप्यस्यज्ञातव्योभवतासदा॥ ६८ ॥ गुरूपदेशतस्तस्माद्गुरूंगच्छात्रमाचिरम्॥ विद्यादिमदएष त्वामन्यथानरकंनयेत्॥ ६९ ॥

मयोरनुष्ठानमिति॥ ६६॥ उत्तमेभ्यइति सर्वेभ्योराज्ञाहितमुपदेष्टव्यमित्यर्थकंशास्त्रमालंब्यतुभ्यंहितमुपदिशामीत्यर्थः तथाचमनुः प्रजानां पालनंदानमित्यादिक्षत्रधर्मानुपदिशति तत्रपालनंहितोपदेशःउपदेशातिक्रमेदंडःवृत्तिपरिकल्पनंप्रतिपक्षिभ्यस्त्राणंचेतिनानाविधमतो हितोपदेशोमयाक्रियतेइतिभावः ॥ ६७॥ योवैबालाकएतेषामितिवाक्यार्थमाह षोडशानामिति त्वदुक्तानांषोडशपुरुषाणांयःकर्त्ता जनकः तिष्ठंतुपुरुषाःसर्वस्यास्यजगतोपियःकर्त्तायस्यसर्वंकार्यंश्रुतौकर्मपदेनोक्तंसएवपुरुषेणज्ञातव्यइति ॥ ६८ ॥ नैषातर्केणमतिराप ॥५॥
नेयेत्यादिश्रुतेर्गुरूपदेशादेवसज्ञेयइत्याह गुरूपदेशतइति अन्यथागुरूपदेशात्तज्ज्ञानासंपादने नरकंजन्ममरणप्रबंधरूपम् ॥ ६९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मेति सएवमदुक्तोजगत्कर्त्तैवअद्वितीयपरस्यब्रह्मशब्दस्यतज्जन्यधियश्चगम्योगोचरइत्यर्थः तत्रहेतुत्वेनब्रह्मलक्षणंस्मारयति सृष्टीति तस्यताटस्थ्यंवारयति जगच्चयइति ॥ ७० ॥ ततउहेत्यादिवाक्यंव्याकरोति इतिराजवचइति महद्विचारक्षमंमनोयस्यसतथाएतादृशः सबालाकिरमुनावक्ष्यमाणेनाभिप्रायेणएनमजातशत्रुमेवगुरुत्वेनगुरुभावेनजगामनिश्चितवान् ॥ ७१॥ बालाक्यभिप्रायमावेदयति गुरुरितिद्वाविंशतिश्लोकैः लोकेयःकश्चिदप्येतादृशःसधर्मतोन्यायतोगुरुःस्मृतः धर्मोन्यायेइतिविश्वः एतादृशःकीदृशः गरीयसःस्वज्ञातुर्गुरुत्वाधायकत्वादतिगुरुभूतस्यात्मतत्त्वादेर्दर्शकःप्रकाशकः तथालघीयसःस्वाश्रयस्यलघुत्वाधायकत्वेनातिलघोर्मदादेर्घातकोनिवर्तकश्चेति तथाचस्वसंसृष्टंमधुरंकुर्वन्स्वरसविपरीतंरसंचाभिभवनूगुडादिर्न्याय्यमधुरताकस्तथास्यराज्ञोगुरुतापिन्याय्येतिभावः ॥७२॥ तत्र

ब्रह्मशब्दधियोर्गम्यःसएवेहनचापरः॥ सृष्टिस्थित्यंतहेतुर्योजगतोस्यजगच्चयः ॥७० ॥इतिराजवचःश्रुत्वा गतदर्पोमहामनाः॥ अभिप्रायेणामुनैनंगुरुत्वेनजगामसः॥ ७१॥ गुरुर्गरीयसोर्थस्यदर्शकोधर्मतःस्मृतः॥ यःकश्चिदखिलेलोकेघातकोपिलघीयसः॥ ७२॥ विद्याधनकुलाख्योयंमदोमेनरकप्रदः॥ लघीयान्यस्यसंसर्गादभवंलघुरीदृशः॥ ७३॥ असावनेननिहतोऽलघुदुःखकरोमम॥ अनादृतोपितेनासावभूद्राजागुरुर्मम॥ ७४॥ परित्यज्ययदायामिगुरुमन्यमहंतदा॥ भविष्यामिकृतघ्नोत्रततएनंव्रजाम्यहम्॥ ७५॥

लघीयसोघातकत्वंस्पष्टयति विद्येतिद्वाभ्यां विद्याचधनंचकुलंचएतैराख्यानिरूपणंयस्यईदृशोमदोलघीयानतिलघुःयस्यमदस्यसंपर्कादहमीदृशःसत्सभायामनादृतरूपोलघुर्लाघवंगतोभूवमिति ॥ ७३ ॥ असाविति असौममालघुदुःखकरोमदःअनेनराज्ञानिहतस्तेन लघीयसोहननेनगुरुलक्षणेनासौराजागुरुरभूदिति कीदृशोमदोऽनेनराज्ञाऽनादृतः चित्तभूमौजायमानोविवेकेनप्रतिरुद्धइत्यर्थः तथाच परेषांमदहरःस्वयंनिर्मदश्चायंकथंनगुरुतामर्हतीतिभावः ॥७४॥ परित्यज्येति एनंराजानंगुरुत्वप्रयोजकव्यापारंकृतवंतंपरित्यज्याहंयद्यन्यंयामिअन्यत्रगुरुत्वंभावयामितदाकृतघ्नोभविष्यामिकृतंव्यापारंहंतिविफलयतीतिकृतघ्नःएतादृशःस्यामिति तथाचतस्मैनद्रुह्येत्कृतमस्यजानन्नितिनिषेधोल्लंघनप्रयुक्तोदोषःस्यादवज्ञानरूपद्रोहापत्तेरितिभावः ॥ ७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गरीयसोर्थस्यदर्शकत्वमप्यत्रेतिदर्शयति अपिचात्रेति अत्रलोके द्रष्टैवदर्शकोभवतीतिभावः ॥ ७६ ॥ ननुनतवपूर्वगुरवोपिब्रह्मजानंती त्याशंक्ययदितेऽज्ञास्यंस्तर्हिमह्यंप्राणप्रियायोपादेक्ष्यन्उपदेशाभावाज्ज्ञायतेतेयथावन्नविदंतीत्याह गुरवइति ॥ ७७ ॥ तर्हिगुरुभ्योऽन्यान्ब्रह्मविज्ञानायोपगच्छेत्याशंक्यतेषांमच्छिष्यतांगतत्वान्नजिज्ञासयागमनार्हतेत्याह त्रैवर्णिकानितिद्वाभ्याम्॥ ७८ ॥ एतदन्येइति एतस्माद्राज्ञइतरेममशिष्यतामगमन्प्राप्तास्ततःशिष्यतांगतत्वात्तेभ्यस्त्रैवर्णिकेभ्यःकेनहेतुनाब्रह्मविद्यांलप्स्येप्राप्तोभविष्यामि तेषांमत्तोऽधिकज्ञत्वमेवहितेभ्योविद्यालाभेहेतुःस्यात्मच्छिष्यतांगतत्वेनचाधिकज्ञतायाअभावोनिर्णीतइतिभावः ॥ ७९ ॥ अस्माद्राज्ञस्तुब्रह्मविद्यालाभःसंभाव्यतेइतिदर्शयति राजायमिति अयंराजामानुषोपिगुणैर्देवसमः वाऽथवातेभ्योदेवेभ्यःसमधिकोभवति तत्रहेतुमाह यतइ

अपिचात्रयथाराजाऽजातशत्रुर्महामनाः॥ ब्रह्मवेत्तिस्फुटंतद्वन्नान्योजानातिमानवः॥ ७६ ॥ गुरवोमेस्वयं यावज्ज्ञातवंतोमहाधियः॥ प्राणप्रियायतत्सर्वंमह्यमेतेसमादिशन्॥ ७७॥ त्रैवर्णिकानहंचान्यान्हिमसेत्वो श्रमध्यगान्॥ स्फीतकीर्तीन्विजित्यात्रराजानंजेतुमागतः॥ ७८ ॥ एतदन्येततःसर्वेशिष्यतामगमन्मम॥ लप्स्येतेभ्यस्ततःकेनब्रह्मविद्यांसुदुर्लभाम्॥ ७९ ॥ राजायंदेवसदृशस्तेभ्योवाप्यधिकोयतः॥ ब्रह्मविद्यांविजानातिपरेभ्यश्चप्रयच्छति॥ ८० ॥ देवादेववधूवक्रमद्यपानविमोहिताः॥ जानंतोपिनजानंतिमद्यपाइवभूमिगाः॥ ८१ ॥ अयंचैतादृशींलक्ष्मींप्राप्तोपिमुनिवत्स्थितः॥ हर्षशोकौनचस्तोस्यप्रियाप्रियसमागमे॥ ८२॥

त्यादि ब्रह्मविद्यांविजानातिअप्रमत्तोधारयतिपरेभ्योऽधिकारिभ्यःप्रयच्छतिचेति ॥ ८० ॥ देवेभ्यआधिक्यंस्फुटयितुंदेवानांभोगव्यासंगरूपमपकर्षमाह देवाइति देवाजानंतोपिनजानंतियतोदेववधूनांवक्राण्येवदर्शनरूपयानेनमादकत्वान्मद्यंतत्पानेनविमोहिताः तथा चभोगलिप्साप्रतिबद्धेनज्ञानेनस्वरूपनिष्ठतायाअसंपादनाज्जानंतोपिनजानंतीत्युक्तमितिभावः विफलज्ञानानजानंतीत्येवव्यवहार्याइत्यत्रदृष्टांतः मद्यपाइवभूमिगाइति भूलोकगताःसुरापायथेत्यर्थः ॥ ८१ ॥ राज्ञोविशेषंस्फुटयति अयमिति मुनिवत्परमहंसयतिवत् मुनिवत्स्थितिमभिनयति हर्षेत्यादिना ॥ ८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हर्षशोकाभावेरागद्वेषाभावंहेतुत्वेनाह पुत्राइति द्वेषिणिद्वेषशीले कामेति अयमेकएवकामक्रोधविहीनोनचापरः एतत्समःकामक्रोधहीनोमयानदृष्टइतियावत् ॥ ८३ ॥ तत्रकामहीनतांप्रपंचयति यतइतिचतुर्भिः ब्रह्मतेवच्मीतिवादिनेमह्यंगवांसहस्रंयतोऽदाद्दत्तवान् एतेनहेतुनाज्ञायतेयदस्मिन्राज्ञिकामोनास्तीति ॥ ८४ ॥ ननुब्रह्मवादिनेदानंकथंकामाभावेहेतुरित्याशंक्ययथाधूमव्यापकवन्हिविरुद्धंजलंन्हदादौधूमाभावानुमितिहेतुस्तथाकामव्यापकापात्रदानविरुद्धत्वात्पात्रदानंकामाभावेहेतुर्व्यापकविरुद्धस्यव्याप्याभावहेतुतायान्याय्यत्वादित्याशयेनाह कामिनइतिद्वाभ्यां कामिनोहिकामिनीभ्यःकामिनीपृष्ठगामिभ्यःकामिनीकिंकरेभ्योवानटेभ्योवाकामिन्यनुकारिभ्योमुद्रिकाणांसहस्राणिशतानिचदद्युरिति अपात्रत्वसूचनायषष्ठीप्रयोगः ॥ ८५ ॥ ब्रह्मेति तेकामिनःब्रह्मवादिभ्यः

पुत्राश्चशत्रवस्तद्वत्समाअस्यमहीभृतः॥ यतोनकुरुतेद्वेषंद्वेषिण्यपिमहायशाः॥ कामक्रोधविहीनोयमेकएव नचापरः॥ ८३॥ यतोमेब्रह्मवच्मीतिवादिनेऽदात्सहस्रकम्॥ गवामेतेननास्त्यस्मिन्कामःकोपिनसंशयः॥ ॥ ८४॥ कामिनःकामिनीनांवाकामिनीपृष्ठगामिनां॥ नटानांचापिदद्युस्तेसहस्राणिशतानिच॥८५॥ ब्रह्मवादरतेभ्यस्तेनापिपंचवराटकान्॥ दद्युस्तस्मैवदद्भ्योवापरेभ्यस्तुकथंपुनः॥८६॥ ततःकामकृतंदोषंजानात्येषमहीपतिः॥ दोषज्ञोमदनस्यस्यान्निष्कामोनिश्चितंपुमान्॥ ८७॥

पंचवराटकानपिनदद्युः कीदृशेभ्योब्रह्मवादिभ्यः तस्मैकामिनेवदद्भ्यःउपदिशद्भ्योपि वाशब्दोप्यर्थः परेभ्योऽनुपदिशद्भ्यस्तुपुनःकथंदद्युः अनुपदिशद्भ्योदानवार्त्तापिदुर्लभेत्यर्थः ॥ ८६ ॥ फलितमाह ततइति ततःपात्रेदानप्रवृत्तेरेवज्ञायतइतिशेषः किंज्ञायतइत्यतआह कामेत्यादि एषमहीपतिःकामकृतंदोषंजानाति यश्चपुमान्मदनस्यकामस्यदोषज्ञःसएवनिश्चितंनिष्कामोभवतीति कामकृतोदोषश्च मृगयाऽक्षादिवास्वमः[1]परिवादः[2]स्त्रियोमदः तौर्यत्रिकं[3]वृथाट्याचकामजोदशकोगणइतिमनूक्तः कामएषक्रोधएषइतिभगवद्गीतायुक्तःसंसारसंततिलक्षणोवाबोध्यः ॥ ८७ ॥

---

१ दोषकथनं. २ नृत्यं गीतं वाद्यंच. ३ वृथाभ्रमणं.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रोधविहीनतांस्फुटयति कृतेतिद्वाभ्यां क्रोधनोहिपुरुषःकृतोऽपकारोयस्यएतादृशःसन्स्वस्मिन्शरीरेपरस्मिन्वाक्रोधफलंदर्शयति अस्मिन्नृपतौतुकृतापकारेपिसतिक्रोधःक्रोधफलंकापिनदृश्यतइति एतदेवाभिनयति आगत्येति यस्मान्मयाऽज्ञेनात्रसभायामागत्यास्यद्युमणेरिवसूर्यसदृशस्यब्रह्मविदुषोब्रह्मविदोराज्ञोहेलनमवज्ञाकृताइति ॥ ८८ ॥ अवज्ञातइति एवमवज्ञातोप्ययंभूपतिर्मह्यंहितमिच्छतितितःकृतापकारस्यापिहितप्रवृत्तेरस्यक्रोधोनैवास्तीति ॥ ८९ ॥ कामक्रोधाभावादेवास्यब्रह्मवित्त्वंनिश्चितमित्याह कामक्रोधाविति ब्रह्मविदंहित्वावर्जयित्वासर्वस्यजंतोर्हृदिकामक्रोधौप्रतिष्ठितौइत्थंमयागुरुशास्त्रात्श्रुतम् गुरुश्चशास्त्रंचतयोःसमाहारोगुरुशास्त्रंतस्मात्गुरुमुखात्तथाशास्त्रात् योऽकामोनिष्कामआत्मकामइत्यादेरात्मकामतांनिष्कामतायांहेतुतयाब्रुवतइत्यर्थः ॥ ९० ॥ तस्मादेतंराजानंहि

कृतापकारेनृपतौक्रोधःक्वापिनदृश्यते ॥ आगत्यात्रकृतंयस्मात्सभायांहेलनंमया ॥ अज्ञेनब्रह्मविदुषोराज्ञो
स्यद्युमणेरिव ॥ ८८ ॥ अवज्ञातोप्ययंमह्यंहितमिच्छतिभूपतिः ॥ क्रोधस्ततोस्यनैवास्तिलोकद्वयभयंकरः
॥ ८९ ॥ कामक्रोधौचसर्वस्यहृदिजंतोःप्रतिष्ठितौ ॥ हित्वाब्रह्मविदंत्वित्थंगुरुशास्त्राच्छ्रुतंमया ॥ ९० ॥ अप्रत्य
क्षाअपिसुरास्तपोभिर्बहुभिर्नृणाम् ॥ जन्मन्यस्मिन्भवंत्येतेदृश्याजन्मांतरेथवा ॥ ९१ ॥ ब्रह्मनिष्ठेषुकश्चित्स्या
देकःसोपिहिराजसः ॥ वदेन्मह्यंनवाब्रूयान्मोहयेद्वावरांतरात् ॥ ९२ ॥ सुरेभ्यस्त्वपरेसर्वेजंतवोब्राह्मणादयः ॥
मत्तोन्यूनात्मविज्ञानास्तस्मादेनंव्रजाम्यहम् ॥ ९३ ॥ इतिसंचिंत्यबालाकिर्गतपापोमहामनाः ॥ श्रोत्रियोब्र
ह्मविद्यार्थंसमित्पाणिस्तमभ्ययात् ॥ ९४ ॥

त्वाब्रह्मविद्यार्थमन्यत्रनगंतव्यमितिदर्शयितुंदेवेभ्योज्ञानलाभःसंदिग्धइत्याह अप्रत्यक्षाइतिद्वाभ्यां यतःसुराअतप्ततपसामप्रत्यक्षाःसंतितद्दर्शनायबहुभिस्तपोभिःकृतैरप्यस्मिन्जन्मनिदृश्याःप्रत्यक्षाभवेयुर्जन्मांतरेवेतिसंशयः ॥ ९१ ॥ ब्रह्मेति प्रत्यक्षत्वेपिब्रह्मनिष्ठेषुएकःप्रथमंगण्यःकश्चिदेवविरलएवदेवःस्यादितिसोपिमिलितःसन्भोगप्राचुर्येणराजसोमह्ममुपदिशेन्नवोपदिशेद्वरांतरंदत्वामोहयेद्वाइतिविद्यालाभेसंशयइति ॥ ९२ ॥ देवभिन्नास्तुमत्तोन्यूनविज्ञानकत्वान्नोपगंतव्याइत्याह सुरेभ्यइति तस्मादितरत्रज्ञानलाभसंशयात् एनंअजातशत्रुं ॥ ९३ ॥ एवंश्रुतिगतस्योहेतिपदस्यार्थंवितर्कमभिनीयपरिशिष्टंव्याचष्टे इतिसंचिंत्येति गतपापःनिर्भर्त्सनदंडेनशुद्धः तंराजानं अभिअभिमुखमयात् ॥ ९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्तेइति हस्तेसमिधंगृहीत्वेतिसमित्पाणिपदार्थः गर्भाष्टमःगर्भकालादष्टमवर्षावच्छिन्नः अष्टवर्षइतियावत् एतादृशस्त्रैवर्णिकःपुमान् बालोगुरुमेत्यशिष्योहंमांशाधीतिवदतिएवंराजानमागत्यबालाकिर्वाक्यंजिज्ञासयोपगच्छामितंशाधीत्याकारंश्रुतावुपायानीत्युक्तमब्रवीदिति॥ ९५॥दर्शयन्निति किंकुर्वन्बालाकिरेवमब्रवीत्इतिदर्शयन् इतिकिं अस्मिंल्लोकेयोब्रह्मविद्ययाधिकःसएवगुरुः अपरस्तुविद्यांतरेषुबृहस्पतिसमोपिशिष्यएवेति ॥ ९६ ॥ तंहोवाचेत्यादेर्ज्ञपयिष्यामीत्यंतस्यवाक्यस्यार्थंप्रपंचयति इत्थमित्येकविंशतिश्लोकैः इत्थंविनीतंत्यक्तगर्वंगार्ग्यंनिरीक्ष्यविनयान्वितःप्रणतोसौराजाप्रांजलिर्बद्धांजलिःसन्नासनतउत्थायेदंवक्ष्यमाणंवचनंप्राहेति ॥ ९७ ॥ गुरवइति

हस्तेगृहीत्वासमिधोयथागर्भाष्टमःपुमान्॥ त्रैवर्णिकोवदत्येत्यशिष्योहंशाधिमामिति ॥ एवंराजानमागत्य बालाकिर्वाक्यमब्रवीत्॥ ९५ ॥ दर्शयन्नितिलोकेस्मिन्ब्रह्मविद्याधिकोगुरुः॥ यःकश्चिदपरःशिष्यःस्वयंसाक्षाद्बृहस्पतिः॥ ९६ ॥ इत्थंगार्ग्यंनिरीक्ष्यासौविनीतंविनयान्वितः॥ उत्थायासनतःप्राहप्रांजलिर्वचनंत्विदम् ॥ ९७॥ गुरवोब्राह्मणाजात्याविधात्रात्रैवनिर्मिताः॥ स्वभावेनापरेशिष्याःक्षत्रियाद्याश्चवर्णिनः॥ ९८ ॥ तर्हिकिंब्राह्मणोभूत्वाकर्मेदंप्रतिलोमकं ॥ आत्मनःशिष्यतामत्रक्षत्रियेमयिवांछसि॥ ९९॥ अपिमद्वचनाद्ब्रह्मन्जातकोपइदंवत॥ कृतवानसिभीतोवाबाल्यादज्ञानभावतः॥ १०० ॥

अत्रसर्गेविधात्राब्रह्मणाब्राह्मणाजात्यैवगुरवोनिर्मिताः अपरेक्षत्रियाद्यावर्णिनःस्वभावेनशिष्यानिर्मिताइति तथाचमनुः उत्तमांगोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैवधारणात् सर्वस्यैवास्यसर्गस्यधर्मतोब्राह्मणःप्रभुरिति ॥ ९८ ॥ तर्हीति तर्हितथासतित्वंब्राह्मणोभूत्वाक्षत्रियेमयिआत्मनःशिष्यतारूपंप्रतिलोमंविपरीतंकर्मकिंवांछसि कुतस्तवविपरीतकर्मणीच्छेत्यर्थः ॥ ९९॥ तत्रहेतून्वितर्कयतिअपीतिमद्वचनादपिजातकोपःसन्निदंप्रतिलोमंकृतवानसि हितोपदेष्टुर्वचनात्कोपोनोचितइत्यपिनासूच्यते भीतःभयाद्वाबाल्याद्वा कीदृशाद्बाल्यादज्ञानभावतः अज्ञानंभावःस्वभावोयस्यतत्तथातस्मात् ॥ १०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रकोपश्चेदत्रहेतुस्तर्हिक्षमयानिवर्त्तनीयइतिक्षमायोग्यतांदर्शयन्प्रार्थयते क्षमस्वेतिचतुर्भिः यन्मयाराजधर्मंसमाश्रित्यतेतुभ्यंकटुकंवाक्यमीरितंतत्क्षमस्व ब्राह्मणस्यगुरुत्वंस्फुटयन्शिष्यवदात्मानंविशिनष्टि बालेनाकृतबुद्धिनेति अकृताआगमाचार्यसत्संगादिभिरपरिपक्वाबुद्धिर्यस्यसतथातेन ॥ १०१ ॥ कटुवाक्याभिधानेप्रयोजकंनिवेदयति मदेति भवान्मदत्रयस्यविद्याधनकुलाख्यस्यपराधीनोमयाबहुजनमुखाच्छ्रुतःस्वयंदृष्टश्चतेनापराधनिर्णयेनएतत्कटुकाभिधानंभवतःशिक्षार्थंकृतमिति ॥ १०२ ॥ राजधर्मवाक्यार्थमभिनयति ब्राह्मणाइति शास्त्रस्वरूपंतूक्तं ॥ १०३ ॥ भवद्भिर्ब्राह्मणैरेवोपदिष्टेदुर्लक्ष्येधर्मेममप्रमादंपश्यसिचेत्तथापिक्षमस्वाहंतुभवत्क्षोभंदृष्ट्वास्मादुद्विग्नोस्मीत्याह प्रसीदेति तेनब्राह्मणैरुपदिष्टस्यैवमयाचरणेनममाज्ञस्योपरिप्रसीदेति अमुंराजसंबंधिनम् ॥ १०४॥ द्वितीयोनुचिताचर

क्षमस्वत्वंमयायत्तेकटुकंवाक्यमीरितम् ॥ राजधर्मंसमाश्रित्यबालेनाकृतबुद्धिना ॥ १०१ ॥ मदत्रयपराधीनोभवान्बहुजनान्मया ॥ श्रुतोदृष्टश्चतेनैतन्शिक्षार्थंभवतःकृतम् ॥ १०२ ॥ ब्राह्मणाअपिनिर्भर्त्स्यादुराचारामहीभुजा ॥ दृढंपरीक्ष्यविज्ञाताइतिशास्त्रंमयाश्रुतम् ॥ १०३ ॥ प्रसीदाज्ञस्यविप्रेंद्रतेनपंडितमानिनः ॥ ममधिक्ष्मांतथाराज्यंधर्मंक्रूरतमंत्वऽमुम् ॥ १०४ ॥ भीतिश्चतवमाविप्रभूयान्मत्तःकथंचन ॥ महापराधिनंचाहंनहन्मिप्राणिनंक्वचित् ॥ १०५ ॥ चोरेभ्योपिचवित्तानिदत्त्वाचौर्यान्निवर्तये ॥ तावतापिचयेपापान्निवर्त्तंतेनमोहिताः ॥ निःसारयामितान्देशात्स्वकीयात्पापकारिणः ॥ १०६ ॥ अथैवमप्यशक्यत्वेललाटेश्वपदेनतान् ॥ अंकयाम्यथचेत्कुर्युश्छेदयाम्यंगमेवहि ॥ हस्तयोःपादयोरेकमष्टमेहन्मितान्नरान् ॥ १०७ ॥

णहेतुर्भयरूपोयःशंकितस्तंवारयति भीतिश्चेतिपंचभिः मत्तोभीतिस्तवमाभूयात्यतोमहापराधिनमपिप्राणिनंप्रायोनहन्मीति ॥ १०५ ॥ प्रायेणाहननमभिनयति चोरेभ्यइति प्रथमेऽपराधेवित्तदानेनचौर्यान्निवर्त्तनंकरोमिद्वितीयेदेशान्निःसारणमिति ॥ १०६ ॥ अथैवमिति अथएवमपिदेशान्निरसारणेकृतेपितेषांचौर्यत्यागस्याशक्यत्वेसतितृतीयेऽपराधेइतियावत् तान्तृतीयापराधिनःललाटेशुनःपदेनलोहमयेनतप्तेनांकयामि अथचतुर्थादिकमपराधंचेत्कुर्युस्तर्हिवामदक्षिणहस्तयोर्वामदक्षिणपादयोश्चैकमन्यतरंछेदयामि. एवंसप्तमापराधपर्यंतंव्यवस्थायांसत्यामप्यष्टमंचेत्कुर्युस्तदाहन्मीति ॥ १०७ ॥

॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युद्धेपिधर्मेणैवहन्मीत्याह युद्धायेति युद्धाययुद्धंकर्तुंअभिमुखःसावधानोयुवाचसन्मांशस्त्रेणपूर्वंयोहन्यात्तमेकंयुद्धेहन्मिनापरमुक्तविशेषणहीनमित्यर्थः ॥ १०८ ॥ भवतस्तुशंकैवनोचितेत्याह कुतइति स्वस्थःक्षोभहीनः गतज्वरोगतसंतापः ॥ १०९ ॥ प्रतिलोममिति कर्मेतिशेषः अज्ञानरूपबाल्यनिवृत्त्यैचेदेवंकरोषितथापिगुरून्गच्छतेतुभ्यंनमोस्तु ॥ ११० ॥ एवमिति एवमुक्तोबालाकिर्नागमत्किंतु चिंतालज्जयोःसूचनायाधोवदनत्वेनश्वासादिवैशिष्ट्यरूपातुरत्वेनविशिष्टःपादाग्रेणभूमिंलिखन्सरेखांकुर्वंस्तस्थावेवेति इंगितज्ञइति इंगितैर्भाववेत्ताऽजातशत्रुर्वक्ष्यमाणविधयापुनरुक्तवान् तत्राधोवदनत्वभूलेखनाभ्यांलिंगाभ्यांक्षत्रियपादग्रहणोद्यमरूपशास्त्रविरुद्धाचरणजन्यालज्जाज्ञाता श्वासादेश्चकथमन्यतोज्ञानंलप्स्यइतिचिंताचज्ञाता तथाचोक्तं दुराचारादिभिर्व्रीडाधार्ष्ट्याभावोभिधीयते वस्त्रांगुलीयकस्पर्शभूरेखाधोमुखादिकृदिति चिंताध्यानंहितानाप्तेःशून्यताश्वासतापकृदितिच ॥ १११ ॥ तत्रलज्जादुःखंचितानिवृत्त्योप

युद्धायाभिमुखोयोमांहन्यात्पूर्वंयुवापुमान् ॥ सावधानःसुशस्त्रेणतमेकंहन्मिनापरम् ॥ १०८ ॥ कुतोद्विजोत्तमंहन्यामवध्यंसर्वदेहिभिः ॥ इतिविज्ञायविप्रेंद्रस्वस्थोभवगतज्वरः ॥ १०९ ॥ प्रतिलोमंकृथामात्वंलोकद्वयविनिंदितम् ॥ यथागतंप्रयाहित्वंगुरून्वाव्रजतेनमः ॥ ११० ॥ एवमुक्तोथबालाकिरधोवदनआतुरः ॥ नागमन्निःश्वसंस्तस्थौभूमिंपादाग्रतोलिखन् ॥ इंगितज्ञोऽजातशत्रुर्बालाकिंपुनरुक्तवान् ॥ १११ ॥ प्रतिलोममिदंविप्रब्राह्मणःक्षत्रियंव्रजेत् ॥ ब्रह्ममेवक्ष्यतीत्येवमभिप्रायेणधार्मिकः ॥ ११२ ॥ याजनाध्यापनंचैवविशुद्धाच्चप्रतिग्रहः ॥ ब्राह्मणस्यैवकर्मैतत्क्षत्रियस्यनकर्हिचित् ॥ ११३ ॥

शांतंभविष्यतीतिमत्वाबालाकिंचितितंविद्यालाभप्रकारमपवदन्प्रकारांतरंदर्शयति प्रतिलोममितिषड्भिः इदंविपरीतरूपंकर्ममन्ये इदंकिंयद्ब्राह्मणउत्तमवर्णःक्षत्रियमधमवर्णमयंमह्यंवक्ष्यत्युपदेक्ष्यतीत्यभिप्रायेणव्रजेत्दीक्षायैउपगच्छेत् कीदृशोब्राह्मणः धार्मिकःस्वंधर्मंचरतिआसेवतइतिसतथा अधार्मिकस्तुशूद्रवत् नानुतिष्ठतियःपूर्वांनोपास्तेयश्चपश्चिमां सशूद्रवद्बहिष्कार्यःसर्वस्माद्द्विजकर्मणइतिमनूक्तेः द्विजकर्मणःसत्कारादेरितितद्व्याख्यातारः ॥ ११२ ॥ क्षत्रियस्यचब्राह्मणदीक्षणमनुचितमित्याह याजनेति याजना ण्यासश्चंथेतियुच् विशुद्धादपतितात् एतत्त्रयंब्राह्मणस्यैवविहितमितिशेषः क्षत्रियस्ययजनाध्ययनदानैर्ब्राह्मणसमानकर्मणोपियाजनादिकंनकर्हिचिद्विहितमिति ॥ ११३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यापनेइति यस्यक्षत्रियस्याध्यापनेनाधिकारःसउपनेताउपनयनस्याचार्यत्वफलकस्यविधिवदात्मसमीपनयनरूपस्यकर्ताकिंथंभवेदिति अष्टवर्षंब्राह्मणमुपनयीततमध्यापयीतेत्यादिश्रुतौउपनयनस्यअध्यापनसमानकर्तृकत्वेनविधानादितिभावः ॥ ११४ ॥ तथा पितुर्भ्यंदानविधयावक्ष्यामीत्याह व्रतमिति ममेदंव्रतंनियमः इदंकिं यद्ब्राह्मणेभ्यःप्राणरूपंयाचितमपिददामिकिमुतान्यदिति ॥ ११५॥ गुरवेपीति ततउक्तनियमवशात्ब्राह्मणत्वेनगुरवेपितुभ्यंयाचकायात्मनोविद्यांविज्ञापयाम्येवददाम्येवनतुतांप्राणेभ्योगरीयसीमनुसंधाय वंचयिष्यामीत्यर्थः ॥ ११६ ॥ दातृयाचकेति आवयोर्दातृयाचकत्वलक्षणःसंबंधोभूयादितिगुरुशिष्यतारूपस्तुमाभूयादिति अतएतस्मात्तवविद्यालाभोपायाच्चिन्तिताद्धेतोस्त्वंतच्छृणुयत्तुभ्यंविज्ञापयामिबोधयामीति ॥ ११७ ॥ तंहप्राणावित्यादिकमुत्तस्थावित्यंतंवाक्यं

अध्यापनेधिकारोस्तियस्यनैवकथंहिसः॥ उपनेताभवेल्लोकेक्षत्रियोधमवर्णभाक्॥ ११४॥ व्रतंचममविप्रेंद्रब्राह्मणेभ्यःसदैवहि॥ ददामियाचितंप्राणान्किमुदारादिकंपरम्॥ ११५॥ गुरवेपितत्तस्तुभ्यमहंविज्ञापयामिभोः॥ याचकायात्मनोविद्यांप्राणेभ्योपिगरीयसीम्॥ ११६॥ दातृयाचकसंबंधोनावयोर्गुरुशिष्यता॥ भूयादतःशृणुत्वंतत्तुभ्यंविज्ञापयामियत्॥ ११७॥ इत्युक्त्वाऽजातशत्रुस्तंप्रणम्यात्मनआसने॥ संस्थाप्याथस्वयंभूमावुपविश्येदमुक्तवान्॥ ११८॥ प्राणादिभ्यःसमस्तेभ्योव्यतिरिक्तोमहेश्वरः॥ आनंदात्मास्वप्रकाशोगार्ग्यब्रह्मेतिविद्धितं॥ ११९॥ इत्युक्तेजातविश्वासंगार्ग्यंबोधयितुंनृपः॥ अन्वयव्यतिरेकाभ्यामुत्तस्थौस्वयमासनात्॥ १२०॥

व्याकरोति इत्युक्त्वेत्यादित्रयोदशभिः श्रुतेःप्रथमांशेनपाणावाभिमुख्येनात्यादरेणगृहीत्वेत्यर्थकेनसूचितमत्यादरंतावद्दर्शयति तंबालाकिंप्रणम्यात्मनआसनेराजासनेसंस्थाप्यउपवेश्यस्वयंतुराजाभूमौनीचासनेउपविश्यइदमुत्तरश्लोकमयंवाक्यमुक्तवानिति ॥ ११८॥ प्राणादिभ्यइति प्राणादिभ्योजडेभ्योव्यतिरिक्तस्त्रिविधपरिच्छेदहीनईश्वरःस्वप्रकाशानंदरूपःसर्वात्मायोस्तितमेवब्रह्मपदार्थंविद्धीति॥ ११९ ॥ इत्युक्तइति इतिवाक्येराज्ञोक्तेसतिजातोविश्वासउत्कटकोटिकसंशयात्मकसंभावनात्वेनप्रसिद्धोयस्यएतादृशंगार्ग्यमन्वयव्यतिरेकाभ्यांबोधयितुंसनिश्चयंकर्तुंस्वयमासनादुत्तस्थाविति ॥ १२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्येति तस्यबालाकेर्महासनादवतरतोमानाधिक्यायराजसत्तमोऽजातशत्रुःस्वकरंदत्वारहस्यार्थबोधनायसभांत्यक्त्वाबालाकिनासहांतःपुरंविवेशेति॥१२१॥ तत्रेति तत्रांतःपुरेद्वारिद्वारदेशेसुप्तोनिःश्वसन्प्राणमात्रव्यापारवांस्तिष्ठतिस्मेतितदंतिकेबालाकिनासहतस्थाविति ॥ १२२ ॥ अजातेति तत्रस्थित्वात्मत्वेनबालाक्यभिमतप्राणस्यानात्मतास्फुटीकरणायगार्ग्यप्रसिद्धैर्गार्ग्येणसम्यग्ज्ञातैर्नादपूरितैरुच्चैरुच्चारितैश्चप्राणस्यनामभिरेवसुप्तंपुरुषमामंत्रयत्संबोधितवानित्यर्थः ॥ १२३ ॥ प्राणस्यसर्वदेवतारूपस्यनामान्यभिनयति आदित्येति आदित्यचंद्रमसौरूपेयस्यप्राणस्यसतथातत्संबोधनंहेआदित्यचंद्रमोरूप हेबृहन्नभ्यधिक पांडुरंशुक्लवर्णंयन्नीरंतद्गच्छतिआश्रयते आपोमयःप्राणइतिश्रुतेः तत्संबोधनंहेपांडुरनीरगेति उपरिअधोविभागेनवाससाउत्तरीयांतरीयरूपेणएकेनयथापुरुषःसंवीतोभवतितद्वन्नीरे

तस्यदत्वाकरंस्वस्यराजवद्राजसत्तमः॥ परित्यज्यसभामंतःपुरमेषविवेशह॥ १२१ ॥ तत्रकश्चित्पुमान्सुप्तोद्वारितिष्ठतिनिःश्वसन्॥ गार्ग्येणसहितस्तस्थौराजातस्यसमीपतः॥ १२२ ॥ अजातशत्रुःपुरुषमामंत्रयदनेकधा॥ गार्ग्यप्रसिद्धैःप्राणस्यनामभिर्नादपूरितैः ॥ १२३॥ आदित्यचंद्रमोरूपबृहत्पांडुरनीरग॥ उपर्यधोविभागेनवासोवन्नीरसंवृत॥ प्रियदर्शनसोमाख्यराजन्दीप्तसहस्रभाक्॥ १२४ ॥ एवमामंत्रितःप्राणोदेवतानामभिस्तदा॥ अभोक्तृत्वाज्जागरूकोनाबुद्ध्यतकथंचन ॥ १२५ ॥ घटबुध्नोदराकारपृथोजलविधारण॥ इत्यादिनामभिर्बोध्यःस्वंनवेत्तियथाघटः॥ अचेतनत्वात्प्राणोपिनैवमात्मानमण्वपि॥ १२६॥

णसंवृत हेप्रियदर्शन हेसोमाख्यसोमनामक हेब्राह्मणानांराजन् हेदीप्तसहस्रभाक्असंख्यातदेवतारूपकिरणशालिन् ॥ १२४ ॥ एवमिति एवंदेवतानामभिःप्राणस्यसमष्टिरूपप्रतिपादकैर्नामभिरामंत्रितःसंबोधितोपिप्राणोनाबुध्यतनप्रबोधंप्राप्तः कुतः अभोक्तृत्वात्अचेतनत्वेनभोगाश्रयतानर्हत्वात् यदिप्राणएवचेतनत्वव्याप्यभोक्तृत्ववान्स्यात्तर्हिस्वकीयंनामबुध्वाप्रबुध्येतेतिभावः नचप्राणस्याप्रबोधेसुप्तिःप्रयोजिका श्वासादिस्वव्यापारारूढत्वेनसुप्तेर्दुर्वचत्वादितिदर्शयितुंप्राणंविशिनष्टि जागरूकइति ॥ १२५ ॥ अचेतनत्वादबोधंसदृष्टांतमाह घटेति हेघटबुध्नोदरयोर्मूलमध्ययोराकारःपृथुर्विशालोयस्यसतथातत्संबोधनंहेबुध्नोदराकारपृथोहेजलविधारणंजलधारकइत्यादिनामभिर्बोध्यःसंबोधयितुमिष्टोपिघटःस्वमात्मानंयथानवेत्तिअचेतनत्वात् एवंघटवत्प्राणआत्मानंअण्वपिकिंचिदपिनवेत्तिस्मेति ॥ १२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततःकिमतआह दोधूयमानइति यतःप्राणोदोधूयमानःस्वव्यापारंकंपनरूपमतिशयेनकुर्वाणोभूपालेनराज्ञासंबोधितोपिनावैत्नज्ञातवान्ततःअबोधादेवहेतोस्तस्यप्राणस्यानात्मताबालाकिनानिश्चितासीदिति ॥ १२७ ॥ एवंप्राणस्यानात्मताबोधनेपिशुद्धात्मनःसाक्षाद्बोधयितुमशक्यत्वात्स्थूलारुंधतीन्यायेनशुद्धात्मबोधनायविशिष्टरूपेभोक्तरिआत्मबुद्धिमवतारयितुमुपायांतरंचकारेत्याह बालाकिनेऽथेति अथबालाकिनेभोक्तारंदर्शयितुमिदमीश्वरोराजाचकार इदंकिं यत्स्वकीयेनकरेणअस्यसुप्तस्यकरंपेषयामासगाढंन्यपीडयदिति यच्चपरेणप्रयोज्यकर्त्रापुरुषेणएतंसुप्तंयष्ट्यायष्टिकयाघातयत्ताडितंकृतवानिति ॥ १२८ ॥ यष्टीति यष्टिघातपाणिपेषणरूपहेतुद्वयात्संजातावेदनापीडायस्यएतादृशोभोक्तासुखदुःखयोरनुभवितापुरुषउत्तस्थौपीडानुभवेनप्रबोधंप्राप कीदृशः दीप्तःक्रोधेनज्वलन्निवेति दीप्तौदृष्टांतः भस्मापायेभस्मनोपनयेऽपहारेकृतेसतियथानलइति ॥ १२९ ॥ एवमुत्तस्थावित्यंतंव्याख्यायतद्भावमभिनयन्नुत्तरश्रुतिमं

दोधूयमानोपिभृशंनावैद्भूपालबोधितः॥ अनात्मताततस्तस्यघटस्येवविनिश्चिता॥ १२७॥ बालाकिनेऽथ भोक्तारंदर्शयन्नकरोदिदम्॥ स्वकीयेनकरेणास्यपेषयामासवैकरम्॥ भृशंतथापरेणैनंयष्ट्याघातयदीश्वरः ॥ १२८॥ यष्टिघातात्पाणिपेषाद्भोक्तासंजातवेदनः॥ उत्तस्थौसतदादीप्तोभस्मापायेयथानलः॥ १२९॥ करणग्रामसहितंभोक्तारंज्ञातवानसौ ॥ बालाकिर्नततोभिन्नंबुद्धिसाक्षिणमीश्वरम्॥ १३०॥ भुजिक्रियानभुक्तिःस्यात्क्रियायादुःखरूपतः॥ हस्तास्यादौचसत्त्वेननैषाभोक्तरिनिश्चिता॥ १३१॥

थमवतारयति करणेतिद्वाविंशतिश्लोकैः एतावतानिदर्शनेनबालाकिःसोपाधिकमेवभोक्तारंज्ञातवान् ततोभोक्तुर्भिन्नंशुद्धंनज्ञातवानित्यर्थः॥ १३० ॥ ननुशुद्धस्यैवभोक्तृत्वंकुतोनस्यादित्याशंकांवारयितुंभोक्तृपदप्रवृत्तिनिमित्तभूतांभुक्तिंनिरूपयति भुजिक्रियेतिद्वाभ्यां भुजिधात्वर्थयोःफलव्यापारयोर्मध्येभुजिक्रियाव्यापाररूपानभुक्तिर्नभोक्तृपदप्रवृत्तिनिमित्ततार्हा तत्रहेतुंनियमेनभोक्तरिसत्वाभावमाह नैषाभोक्तरिनिश्चितेति एषाभुजिक्रियाभोक्तरिनिश्चितानियमेनोपलभ्यमानानभवतितत्रासतीतियावत् नियमाभावेहेतूअव्याप्त्यतिव्याप्तीदर्शयति मध्यपादद्वयेन कष्टंकर्मेतिन्यायेनक्रियायादुःखरूपत्वात्भोक्तृत्वस्यसुखेनापिनिरूपितत्वादव्याप्तिः भोक्तृत्वानधिकरणेषुदंतमुखजिह्वादिषुक्रियायावर्तमानत्वेनचातिव्याप्तिरितिभावः ॥ १३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यपीति यद्यपिभुजिधातोःफलत्वेनार्थभूतातृप्तिरेषाप्रवृत्तिनिमित्तभूताभुक्तिःस्यात्तथापिअयंविशेषोऽवधार्यइतिशेषः यतःफलैस्तृप्तः पितॄनताप्सींदित्यादिप्रयोगवशात्तृप्तेःपुष्टिस्तुष्टिरितिद्विरूपेप्रसिद्धे नचपुष्टितुष्टिशब्दयोःपर्यायत्वं यथाश्नतःस्युस्तुष्टिःपुष्टिःक्षुदपायोनुघासमितिभागवतैकादशेसहप्रयोगात् तत्रपुष्ट्याख्यातृप्तिःइयंभुक्तिर्नैरिता तत्रहेतुंभुजिक्रियावदतिप्रसंगमेवदर्शयति लेपनेनेति कुड्येभोक्तृत्वाभावेपिपुष्टेर्दर्शनादित्यर्थः परिशेषात्सुखदुःखात्मिकातुष्टिस्तृप्तेःस्वरूपभूताभुक्तिरित्याह सुखेति विद्यारण्यैरप्युक्तं सुखदुःखाभिमानाख्योविकारोभोगइष्यतेइति ॥१३२॥ तत्रदुःखस्यभोगशब्दार्थांतर्भावउपचारादितिवक्तुंमुख्यार्थतायाअसंभवमाह दुःखमिति त्रिभिः दुःखंलोकेक्कचिदपिमुख्यंभोगशब्देनवाच्यंनभवति तत्रहेतुंतथाव्यवहाराभावमाह स्रग्विणमिति स्रग्विणंस्रग्जन्यसुखशालिनमे

यद्यप्येषाभवेत्तृप्तिर्नपुष्ट्याख्येयमीरिता ॥ लेपनेनयतःकुड्यंपुष्टंभवतिनित्यशः ॥ सुखदुःखेततोज्ञेयेतुष्ट्याख्येभुक्तिशब्दिते ॥ १३२ ॥ दुःखंनभोगशब्दाख्यंमुख्यंलोकेस्तिकुत्रचित् ॥ स्रग्विणंभोगिनंप्राहुर्नशूलस्थंयतोनरं ॥ १३३ ॥ कस्मैचिदपिनैवात्ररोचतेदुःखमण्वपि ॥ तेनतृप्तिश्चनैवस्यादरुचौतृप्तताकुतः ॥ १३४ ॥ अनुकूलेभुज्यमानेआवृत्तौचसुखोदयः ॥ तृप्तिरित्युच्यतेलोकेप्रतिकूलेकथंहिसा ॥ १३५ ॥

वनरंयतोलोकाभोगिनंप्राहुः शूलस्थंशूलारोहदुःखमनुभवंतंनतथाहुरिति॥ १३३ ॥ ननुमास्तुसुखरूपतयादुःखस्यभोगशब्दार्हत्वंसुखजनकतयातुस्यादित्याशंक्यनतथापीत्याह कस्मैचिदिति अत्रलोकेदुःखंकस्मैचिदपिअण्वपिनरोचतेनकस्यापिप्रीतिजनयतीतियावत् दुःखेनप्रीतिजननाभावेतस्यतृप्तिजनकत्वमपिदुर्वचंतृप्तेःप्रीत्यात्मकतुष्टिरूपतायादर्शितत्वादित्याह तेनेति तेनदुःखेन अरुचौप्रीत्यनुकूलव्यापाररूपरुच्यभावेदुःखगतेसतितेनदुःखेनतृप्तताकुतःस्यात्कारणाभावेकार्याभावस्यन्याय्यत्वादितिभावः ॥ १३४॥ सामान्याप्रयोजकस्यविशेषाप्रयोजकत्वमितिन्यायादपिदुःखस्यतृप्त्यप्रयोजकत्वमितिदर्शयितुंतृप्तेःप्रीतिविशेषतामाह अनुकूलइति अनुकूलेभुज्यमानेसतिभोगस्यावृत्तौपौनःपुन्यरूपायांसत्यांयःसुखोदयःउदितंसुखमितियावत् सातृप्तिरित्युच्यतेसातृप्तिःप्रतिकूलेकथंस्यादिति ॥१३५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइति ततःमुख्यत्वासंभवात् उपचारःसादृश्येनप्रवृत्तिः इहव्यवहारे उपचारेबीजमाह सुखेति पुंसिभोक्तरि अतिशयंचित्त परिणामविशेषंदर्पादिरूपं सादुःखावाप्तिः अतोऽतिशयाधायकत्वरूपसाधर्म्यात् ॥ १३६ ॥ एतादृशभुक्त्याश्रयस्यभोक्तुर्ज्ञानमात्रेणनकृत कृत्यतेतिहेतोर्ज्ञापयिष्याम्येवेतिप्रतिज्ञातवतोराज्ञोवक्तव्यमवशिष्यतएवेतिसूचयन्नुक्तभोक्तृत्वस्यशुद्धेऽसंभवमाध्यासिकत्वंकल्पितस्यत स्यकल्पितमेवाश्रयंचदर्शयति पुंसीत्यादिना योयंभुक्तिसंज्ञःसुखदुःखसमागमकालिकोऽतिशयःपुंसिविशिष्टरूपेदृष्टःअहंसुखीत्यादि रूपेणानुभूयमानःसआनंदात्मनिअद्वितीयेअसंगेचात्मनिस्वरूपतःस्वरूपमालोच्यकथंस्यात्संभवेत् अद्वयादिरूपेआत्मनिपरिच्छिन्ना दिरूपस्यभोक्तृत्वस्यनकथंचिदपिसंभवइतियावत् ॥ १३७ ॥ कथंतर्हिभोक्तृत्वस्यात्मनिभानोपपत्तिरितिचेदध्यासादित्याह स्वयमिति पूर्वार्द्धोक्तेआनंदात्मनिभोक्तृत्वमध्यासाद्विनाऽध्यासमंतरेणनकल्पतेनोपपद्यतइति अध्यासस्त्वतस्मिंस्तद्बुद्धिरित्युक्तलक्षणःकार्याविद्या

ततोदुःखस्यभोग्यत्वमुपचारादिहोच्यते ॥ सुखावाप्तिर्यथापुंसिकुरुतेऽतिशयंतदा ॥ दुःखावाप्तिस्तथासाऽतो भुक्तिरित्युच्यतेजनैः ॥ १३६ ॥ पुंसियोतिशयोदृष्टःसुखदुःखसमागमे ॥ आनंदात्मनिचासंगेकथंसस्यात्स्व रूपतः ॥ १३७ ॥ स्वयंप्रकाशचैतन्येकार्यकारणवर्जिते ॥ आनंदात्मनिनाध्यासाद्विनाकेनापिकल्पते ॥ १३८ ॥ स्वसजातिविजात्युत्थभेदत्रयविवर्जिते ॥ आनंदात्मनिमायाऽतःकल्पितावेदवादिभिः ॥ १३९ ॥ द्विस्वभा वाहिसादृष्टाविक्षेपावृतिकारिणी ॥ आवृतिःसर्वदासिद्धाविनानंदात्मबोधनम् ॥ १४० ॥

त्वेनप्रसिद्धः ॥ १३८ ॥ अध्यासान्यथानुपपत्त्यैवचमायादिपदवाच्यमज्ञानमभ्युपगतमित्याह स्वसजातीति स्वश्चसजातिश्चविजा तिश्चेतिस्वसजातिविजातयस्तेभ्यउत्तिष्ठतिनिरूपितंभवतीतिस्वसजातिविजात्युत्थंएतादृशंयद्भेदत्रयंतेनविवर्जितेआनंदात्मनिअतोऽध्या सानुपपत्तेरेवमायाकल्पितावेदवादिभिरित्यनेनबंधमोक्षादिश्रुतार्थापत्तिरप्यज्ञानेमानमितिसूचितम् कल्पितेतिपदेनचमिथ्याभूताध्यासो पपादनायकल्पमानामिथ्याभूतैवकल्पतेयादृशोयक्षस्तादृशोबलिरितिन्यायादितिसूचितम् ॥ १३९ ॥ भोक्तृत्वाद्यध्यासोपपादकंतस्याः स्वभावद्वयमाह द्विस्वभावेति सामायायतोविक्षेपावरणयोःकरणशीलाऽतोद्विस्वभावाद्वौविक्षेपावरणशक्तिरूपौस्वभावौयस्याएतादृशी दृष्टादृष्टार्थानुपपत्त्याकल्पिता तत्रावृतिर्मायास्वभावप्रयुक्तासर्वदासुषुप्त्याद्यवस्थात्रयेपिसिद्धासाक्षिप्रत्यक्षेणेतिशेषः कीदृशीआवृतिः आनंदात्मबोधनंविनावर्त्तमानाआत्मबोधैकनिवर्त्याइतियावत् ॥ १४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयस्वभावप्रयुक्तंविक्षेपंविभजते विक्षेपइति तत्रजागरणंभूतानांप्रसिद्धं कीदृशंजागरणं बुद्धिजीवनंबुद्धिर्जीवनंधारणंयस्यबुद्ध्याश्रितमितियावत् जीवनंवर्त्तनेनीरेप्राणधारणयोरपीतिविश्वः ॥ १४१ ॥ जाग्रल्लक्षणमाह यत्रेति बाह्याःस्थूलविषयाः स्वप्नलक्षणमाह स्वप्नइति मात्रपदेनइंद्रियव्यावृत्तिः ॥ १४२ ॥ एवमध्याससामग्रींप्रदर्श्यभोगस्यात्मन्यध्यासेनभासमानतयोक्तस्यमुख्यमाश्रयंनिर्धारयति सुखेतित्रिभिः सुखादिकृतोतिशयःपरिणामविशेषःस्वप्नेपिदृष्टः अयमतिशयःस्वप्नेयत्रयन्निष्ठस्तत्रैवजागरणेपिमंतव्यः ॥ १४३ ॥ अंतरिति भोगसंज्ञस्यातिशयस्याश्रयतायोग्यंस्वप्नेमनएव तत्रहेतुमाह इंद्रियाणामिति शुद्धात्मनोऽसंगत्वाच्चेत्यपिबोध्यम् ॥ १४४ ॥ सुखदुःखातिशयवदिति तेनान्यस्यभोगाश्रयतायोग्यस्याभावेनमनएवतदाश्रयत्वेनमतंचेत्तर्हिजाग्रत्यपितदेवास्त्विति अन्यथास्वप्नजा

विक्षेपोद्विविधःप्रोक्तःस्वप्नोजारगणंत्विति॥ सुप्रसिद्धंजागरणंभूतानांबुद्धिजीवनम्॥१४१॥ यत्रायंव्यवहारःस्यादिंद्रियैर्बाह्यचारिभिः॥ स्वप्नःसंस्कारजोज्ञेयोमनोमात्रैकहेतुकः॥ १४२॥ सुखदुःखकृतोदृष्टःस्वप्नेप्यतिशयोनृणाम्॥ स्वप्नेयत्रैवदृष्टोयंतत्रजागरणेपिच ॥ १४३॥ अंतःकरणमात्रंहिस्वप्नेतिष्ठतिनापरम्॥ इंद्रियाणांविलीनत्वात्प्राणस्याचेतनत्त्वतः॥ १४४॥ सुखदुःखातिशयवत्स्वप्नेतेनमनोमतम्॥ ततोजागरणेपिस्यात्तदेवातिशयास्पदम्॥ अन्यथाशयनोत्थानेप्रत्यभिज्ञानसंभवेत्॥१४५॥ यद्यप्यचेतनंतत्स्यात्प्राणादेराद्दिमद्ध्रुवं॥ तथाप्यस्यप्रकाशत्वंविद्यतेनापरस्यहि॥ १४६॥ जडतायांसमानायांप्रदीपघटयोरिह॥ प्रदीपेनैवदृश्यःस्याद्घटस्तेननदीपकः॥ १४७॥

यतोभोगस्यभिन्नाश्रयत्वाभ्युपगमेप्रत्यभिज्ञायएवाहंस्वप्नेसाम्राज्यसुखमन्वभूवंसएवाहमेकांतवाससुखमनुभवामीत्याद्याकाराभोक्त्रैक्यावगाहिनीनोपपद्येतेति ॥ १४५ ॥ ननुमनसोपिप्राणवज्जडत्वात्कथंभोगाश्रयतायोग्यत्वमित्याशंक्यविशेषंदर्शयति यद्यपीति तन्मनःयतःप्राणादेःप्राणकारणाद्भूतसूक्ष्मरूपादादिमत्लब्धजन्मकंतथाप्यस्यमनसःप्रकाशत्वमभ्युपगंतव्यं दर्शनबलात् अपरस्यप्राणादेस्तुनप्रकाशत्वमिति ॥ १४६ ॥ जडत्वेप्यवांतरविशेषेदृष्टांतमाह जडतायामिति प्रदीपघटयोर्जडतायांसमानायामपिप्रदीपेनैवघटोदृश्यःप्रकाश्यःतेनघटेनदीपस्तुनप्रकाश्यइतिसर्वैर्मतंतद्वदिति ॥ १४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुमनसोजडस्यापिप्रकाशकत्वाभ्युपगमे बाह्यमतापत्तिरित्याशंक्यनवयंस्वतंत्रांमनसःप्रकाशतांमन्महेकिंतुचित्प्रतिबिंबसापेक्षां पूर्वंप्रदर्शिताप्रकाशतातुप्रतिबिंबग्रहणयोग्यतारूपैवेत्याह नचेति मानसोपिप्रकाशोवृत्तिरूपश्चैतन्यंचिदाभासमनपेक्ष्यनप्रकाशयतिकिंत्वपेक्ष्यैवतेनचिदाभासापेक्षणेनायंमनसःप्रकाशोजडतांजहातिचेतनायमानोभवति नःऔपनिषदानांमतेइतिशेषः एतेनसर्वदाज्ञानापत्तिश्चपरास्तेत्याह ततइति ततश्चैतन्यापेक्षाभ्युपगमादेवांतःकरणंनानाविधज्ञानशालिउक्तमिति तथाचयोगसूत्रं तदुपरागापेक्षत्वाच्चित्तस्यवस्तुज्ञाताज्ञातमिति अयंभावः यद्यंतःकरणंस्वभावतश्चिद्रूपंस्यात्तर्हिएकविधज्ञानमेवस्यात् परापेक्षत्वेतुयदायदाइच्छादिविलक्षणाचित्प्रतिबिंबग्रहणक्षमावृत्तिर्जायतेतदैवसज्ज्ञानंभवतीतिनानाविधज्ञानतोपपद्यतेइति॥१४८॥ तत्रस्थइति तत्रांतःकरणेतिष्ठतिआविद्यकसंबंधेनसंबद्धोभवतीतिसतथाईदृशःपरमात्माविज्ञानमयशब्दितोभवति प्रकृतवचनेमयट् विज्ञानमंतःकरणंप्रकृतंसुखदुःखाद्यन्वयेप्रधानंयस्यसतथाईदृगर्थकविज्ञानमयशब्दभाग्भवतीत्यर्थः तथाएषतत्रस्थःपरमात्मायतोदेहादिकंपूरयतिचिदाभासरूपेणाप्याययतितस्मा

नचानपेक्ष्यचैतन्यंप्रकाशोमानसोपिहि॥प्रकाशयतितेनायंजडतांचजहातिनः॥ ततोनानाविधज्ञानमंतःकरणमीरितम् ॥ १४८ ॥ तत्रस्थःपरमात्मायंविज्ञानमयशब्दितः ॥ पूरयत्येषदेहादितस्मात्पुरुषइत्यपि ॥ १४९ ॥ यद्वद्दुःखंसुखंतद्वज्जडत्वाद्यैर्हिकारणैः ॥ नविद्यतेजायमानमानंदात्मनिकिंचन॥ १५० ॥ स्वयंप्रकाशमात्मानंबुबोधयिषुरीश्वरः॥पुरुषंविज्ञानमयमितिबुद्ध्यासपृष्टवान्॥१५१॥

त्पुरुषइत्यपिशब्दितोभवति पूरीआप्यायनेइत्यस्मादौणादिकोबाहुलकात्कुषन् ॥ १४९॥ यद्वदिति वस्तुतस्तुआनंदात्मनिआनंदरूपेआत्मनियद्वद्दुःखंनविद्यतेनसंभवतितद्वज्जायमानंजन्यमंतःकरणवृत्तिरूपंसुखमपिनविद्यतेजडत्वादिभ्योहेतुभ्यः तथाचप्रयोगः जन्यसुखमात्मनिनविद्यतेजडत्वात्परिच्छिन्नत्वाद्दृश्यत्वाच्चदुःखवदिति निष्कलंनिष्क्रियंशांतमित्यादिश्रुतयोप्यनुसंधेयाः अत्रफलभूतसुखदुःखयोर्निरासेतत्साधनानामर्थान्निरासात्कार्यकरणवर्जितआत्मेतिसूचितं ॥१५०॥ स्वयमिति स्वयंप्रकाशमात्मानंविज्ञानमयस्यपारमार्थिकंरूपंबुबोधयिषुर्बोधयितुमिच्छन्नीश्वरोराजाऽजातशत्रुर्विज्ञानमयंपृष्टवान्विज्ञानमयगोचरान्प्रश्नांश्चकार कया इतिबुद्ध्या इत्येकविंशतिश्लोकैरुक्तेनाभिप्रायेणेत्यर्थः बालाकिनाज्ञातोपिभोक्ताविज्ञानमयोंऽतःकरणात्मनोरन्योन्याध्यासेनसिद्धरूपत्वान्मिथ्यात्मातस्यपारमार्थिकंरूपमस्मैप्रतिज्ञाबद्धेनावश्यंमयाबोधनीयमित्यभिप्रायस्वरूपम ॥ १५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैषएतद्बालाकेइत्यादिप्रश्नवाक्यंसाभिप्रायंव्याकरोति पुरुषइतिपंचभिः यएषविज्ञानमयःपुरुषःप्राणाद्विलक्षणःसएवभोक्तृत्वेनत्वयासु प्तोत्थापनव्यापारेणावगतोबुद्धः अथैतत्त्वयावक्तव्यं अयंप्रभुर्भोक्ताक्वकस्मिन्देशेस्थितःसन्शयनमकरोत्कृतवानितिप्रथमःप्रश्नः तथा शयनंकुत्रकिमाधारकमितिद्वितीयः अयंपुमान्कुतआगात्जागरणमागतवानितितृतीयः अत्रविज्ञानमयइतिविशेषणंबृहदारण्यकचतु र्थाध्यायप्रथमब्राह्मणादुपसंहृतमितिबोध्यम्॥१५२॥तेषांप्रश्नानांलौकिकदृष्ट्याप्रसक्तांभेदबुद्धिंबाधित्वातत्त्वप्रदर्शनार्थत्वमितिसूचयि तुंलौकिकदृष्ट्यनुसारेणप्रश्नविषयस्यसंदिग्धत्वमाह स्वस्मिन्निति लोकेशयानःशयनंकुर्वन्पुरुषःकदाचित्स्वस्मिन्स्वाश्रितोभवेत् यथाति ष्ठन्शयानःकदाचित्परस्मिन्शय्यादिरूपेपराश्रितोभवतीतिशयानाधारगोचरःसंशयःप्रसिद्धः नचैतत्संशयनिवृत्त्याशयनाधारगोचरःसं शयोनिवर्तते शयनाधारस्यशयानाधारात्पृथक्त्वेनापिलोकेप्रसिद्धेरतएवचद्वितीयःप्रश्नःपृथक्कृतइतिसूचयन्शयनाधारगोचरंसंशयमा

पुरुषोविज्ञानमयोभोक्तेत्यवगतस्त्वया॥ प्राणाद्विलक्षणःक्वायमकरोच्छयनंप्रभुः ॥ शयनंचतथाकुत्रकुत श्चागादयंपुमान्॥ १५२॥ स्वस्मिन्वापिपरस्मिन्वाशयानःपुरुषोभवेत्॥ शयानोयत्रतत्रैवशयनंचापरत्रवा ॥ ५३ ॥ मंचकेहिशयानस्यपुरुषस्यांतरंनृभिः॥ कथ्यतेशयनंतेनशयनंपृथगीरितम्॥ १५४॥ मंचकेहिश यानःसन्नागच्छतिततोनहि ॥ किंतुतस्मात्समुत्थायगृहेस्थित्वागृहाद्बहिः ॥ आगच्छतिततोयुक्तंकुतइत्यादि भाषणम्॥ १५५॥

ह शयानइति शयनकर्त्तामंचकादिरूपयदाधारकःशयनमपितदाधारमित्यपिलोकेप्रसिद्धं अपरत्रशयानाधारादपराश्रितमित्यपिप्रसि द्धमित्यर्थः॥१५३॥अपरत्रवेत्येतत्स्पष्टयति मंचकेहीति हियतोमंचकेशयानस्यपुरुषस्ययदंतरंमंचकांतर्धायकंतूलकादितदेवशयनंशय नाधारोनृभिःकथ्यतेव्यवह्रियतेतेनएतादृशलोकव्यवहारदर्शनेनशयनंशयनाधाररूपंपृथगीरितंपृष्टमित्यर्थः॥१५४॥ ननुतथापितृतीयः प्रश्नःकिमर्थः शयनाधारनिर्णयेनैवागमनावधेर्निर्णयसंभवादितिचेन्न लोकेइतरथापिप्रसिद्धेरित्याह मंचकेहिशयानइति मंचकेशयानः सन्पुरुषस्ततोमंचकादागच्छतीतिलोकेनहिव्यवह्रियतेकिंतुतस्मान्मंचकात्समुत्थायगृहेस्थित्वागृहाद्बहिरागच्छतीतिव्यवह्रियतेततःश यनाधारादागमनावधेःपृथक्त्वेनप्रसिद्धेःकुतइत्यादिकंकुतआगतवानित्याकारंतृतीयप्रश्नरूपंभाषणंयुक्तंयोग्यमेवेत्यर्थः ॥ १५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तविधयाभेददर्शिमूढदृष्ट्याप्राप्तांबुद्धिमपाकृत्यराज्ञाप्रश्नैर्बुबोधयिषितमर्थंसंगृह्णाह शयानमिति शयानंशयनकर्तुःस्वरूपंकेवलांतःकरणविशिष्टरूपंदेहाद्यात्मदर्शिभिरज्ञातंतंगार्ग्यंबालाकिंबोधयितुंतथाशयनं परिच्छिन्नस्यपूर्णेनतादात्म्यंशयनंभवेत् साहंकारस्यजगतो विलयःसुप्तिरुच्यतेइतिविज्ञानमयजगद्भ्यांनिरूपणभेदेनद्विविधंयत्शयनसुप्तिपदाभ्यांविद्यारण्यैर्व्यवहृतंवक्ष्यमाणस्वप्नसुषुप्तिभेदेनवा द्विविधंतच्चबोधयितुंतस्यद्विविधशयनस्यागतेरागमनस्यचानयोराधारकावधीन्आधारकौचावधिश्चतेतथाताान् अज्ञातेकप्रत्ययः तत्र विज्ञानमयशयनाधारःपरमात्माविज्ञानमयस्यपरमार्थतःस्वरूपभूतःजगन्निरूपितशयनाधारोपिपरमात्मैवाज्ञानविशिष्टःवक्ष्यमाणभेदपक्षेस्वमाधारोनाड्यःसुषुप्ताधारःपरमात्मेति शयनाधारएवागमनावधिरित्येतानर्थांश्चबोधयितुंराजाएतत्प्रश्नत्रयंगार्ग्यंप्रत्युवाचेत्यर्थः ॥ १५६ ॥ ततउहेत्यादियतएतदगादित्यंतवाक्यार्थमाह गार्ग्योपीति अयंगार्ग्यस्तंराज्ञस्त्रिविधंप्रश्नंगहनार्थंदुरवगाह्यार्थकंस्वात्ममनसि

शयानंशयनंतस्यागतेश्चाधारकावधीन्॥ तंचबोधयितुंराजागार्ग्यमेतद्धिपृष्टवान्॥ १५६॥ गार्ग्योपिगहनार्थंतंप्रश्नंस्वात्ममनस्ययम्॥ विचार्यबहुधानैवप्रत्यपद्यतकिंचन॥ १५७॥ ततोराजाऽजातशत्रुरनूद्यवचनंनिजम्॥ अदादुत्तरमेतद्धिसर्वसंशयभेदकम्॥ १५८॥ बालाकेशयनंद्वैधंपुरुषस्यास्तिसर्वदा॥ एषांबाह्येंद्रियाणांहिशब्दादिविषयंसदा॥ स्वीकृत्ययातिविज्ञानंमानसेनैवतेनसः॥ १५९॥

स्वीयचित्तेबहुधाविचार्यकिंचनाप्युत्तरंनैवप्रत्यपद्यतनविज्ञातवान् ॥ १५७॥ ततइति ततोबालाक्यप्रबोधंनिरीक्ष्यापिप्रतिज्ञाबद्धोराजा स्वयमेवोत्तरमदात् किंकृत्वा निजंवचनंप्रश्नत्रयरूपमनूद्यपुनःपठित्वा कीदृशमुत्तरं सर्वसंशयभेदकमिति ॥ १५८ ॥ अथशयानस्य स्वरूपंकेवलांतःकरणविशिष्टात्मकंस्वप्नावस्थायांस्पष्टंबोधयितुंस्वप्नसुषुप्तिभेदेनद्वैविध्यंराजाप्रतिजानीते बालाकेइति द्वैधंप्रकारद्वयं तत्रस्वप्नःसुषुप्तिद्वारभूतोनिरूप्यतेइतिशेषः तत्रबृहदारण्यकचतुर्थस्यप्रथमब्राह्मणात् यएषविज्ञानमयःपुरुषस्तदेषांप्राणानांविज्ञानेनविज्ञानमादायेतिवाक्यमुपसंहृत्यव्याचष्टे एषामिति जाग्रत्कालेहिमानसेनमनस्यविभक्तेनचिदाभासलक्षणेनविज्ञानेनाभिमानाकारेणेंद्रियेभ्योविज्ञानंस्वस्वविषयसामर्थ्यरूपमात्माददातितेनचचक्षुर्मयःश्रोत्रमयेत्यादिसंज्ञोभवति शयनाभिमुख्येतुतेनमानसेनविज्ञानेनैव एषांबाह्येंद्रियाणांशब्दादिविषयकंविज्ञानसामर्थ्यंस्वीकृत्यसमादायैवशयनंयातिप्राप्नोतीति ॥ १५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञानेति तदातस्मिन्निंद्रियसामर्थ्योपसंहारकालेकेवलंविज्ञानमयशब्दवाच्योभवतिचक्षुर्मयादिसंज्ञाःपरित्यजतीतियावत् तदाचविविक्तंभोक्तुःशयानस्यस्वरूपंभवतीतिभावः अथहितानामेत्यादितासुतदाभवतीत्यंतंवाक्यंशाखांतरवाक्योपसंहारपूर्वकंव्याकरोति अयमित्यादिना अयंविज्ञानमयोभोक्ताअत्रस्वमसंज्ञप्रथमशयनेनाडीषुहितासंज्ञासुशेतेशयनंकरोतिप्रकृतश्रुत्यनुसारात् हृदयेवा यएषोंतर्हृदयआकाशस्तस्मिन्शेतेइतिवाजसनेयकेऽजातशत्रुब्राह्मणंगतश्रुत्यंतरात् तत्राकाशस्यपरमात्मलक्षणस्यद्वितीयशयनाधारतायावक्ष्यमाणत्वेनहृदयंस्वमाधारइतिभावः पुरीनतिवा ताभिःप्रत्यवसृत्यपुरीततिशेतेइतितत्रत्यश्रुत्यंतरात् एतेषांप्रासादेशेतेपर्यंकेशेतेइतिन्यायेन समुच्चयएव वाशब्दस्तुनानाशाखावाक्यानुसाराभिप्रायकइत्याकरेषुविस्तरः ॥ १६० ॥ तत्रहृदयपदार्थमाह प्राणिनामिति उदरंचउ

विज्ञानमयशब्दोयंभोक्ताभवतिवैतदा॥ अयंशेतेत्रनाडीषुहृदयेवापुरीतति॥ १६०॥ प्राणिनामिहसर्वेषां सच्छिद्रेउदरोरसी॥ देहांतरेतयोःसंधावस्तिपद्ममधोमुखम्॥ हृदयंनामतत्प्रोक्तंहृद्यस्यायतनंपरं॥ १६१॥ परितोहृदयस्यास्यकृमिपुंजनिभंमहत्॥ गोलकाकारमंत्राख्यंपुरीतदितिगीयते ॥ १६२ ॥ उदरस्यविभेदे हिद्रष्टुंशक्यंस्वयंहितत्॥ स्वस्यमांसेननेत्रेणहृदयंनात्मनस्तथा॥ १६३॥ केशःसहस्रधाभिन्नोयावान्भवति मानतः॥ मानेनतावतानाड्योहृदयेसंत्यनेकशः॥ १५४॥ प्रथमग्रंथितोयद्वज्जालेसूत्राण्यनेकशः॥ निर्गच्छंतितथानाड्योहृदयादिहनिर्गताः॥ १६५॥

रश्चतेसच्छिद्रेभवतः तयोरुदरोरसोःसंधिदेशेयत्पद्मंमांसमयमन्यत्रप्रसिद्धंतत्हृदयंनामतस्यचहृदयसंज्ञकचित्तस्यमुख्यायतनत्वात् चित्तस्यैवमुख्यहृदयपदवाच्यतातुहृद्ययमितिछांदोग्येआत्मोपलब्धिसाधनत्वस्यप्रवृत्तिनिमित्ततयाभिधानादितिभावः ॥ १६१ ॥ पुरीततोलक्षणमाह परितइति अस्योक्तलक्षणस्यहृदयस्यपरितःसमंतायद्वेष्टनचर्म कीदृशं कृमिराशिनिभंगोलकाकारमंत्रसंज्ञंचतत्पुरीतदित्युच्यते ॥ १६२ ॥ उदरस्येति तत्सवेष्टनंहृदयंहियतउदरस्यविभेदेविदारणेसतिस्वयंद्रष्टुंशक्यं अतएवस्वकीयमांसमयनेत्रेणआत्मनोहृदयंनद्रष्टुंशक्यंकिंतुपरस्यैवमांसमयनेत्रेणद्रष्टुंशक्यमिति ॥ १६३ ॥ अथनाडीर्वर्णयति केशइत्याद्यष्टभिः भिन्नोविभक्तःसमानतोमानेनयावान्भवतितावतामानेनपरिच्छिन्नाअनेकशोनाड्यःसंतीति ॥ १६४ ॥ तत्रदृष्टांतः प्रथमेति स्पष्टम् ॥ १६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तदेकंशतंनाडीनांतासांशतंशतमेकैकस्याद्वासप्ततिर्द्वासप्ततिःप्रतिशाखानाडीसहस्राणीतिप्रश्नवाक्यानुसारेणनाडीसंख्यामाह हृदयेतिद्वि भिः पूर्वंप्रथमंत्हृदयद्रुमादेकाधिकंनाडीशतंनिर्गतमुदितं कीदृशंनाडीशतं स्कंधसदृशं यतइतरनाडीनांमूलभूतंकारणमिति॥१६६॥ एकैक स्मिन्निति एकैकस्मिन्नुक्तनाडीशतान्यतमरूपेस्कंधेस्कंधेप्रौढशाखानिभंनाडीनांशतंशतंजातमिति कीदृशीनांनाडीनां दिव्यवर्चसामलौ किकानां॥१६७॥ प्रौढेति तस्मिन्स्कंधजाततयोक्तेप्रौढशाखारूपेएकैकस्मिन्व्द्यधिकसप्ततिसहस्राणिनाडीरूपाःस्वल्पशाखाजाताः सं कलनेसंख्यास्वरूपंतुद्वासप्ततिकोटयोद्वासप्ततिलक्षाणिदशसहस्रंचशतद्वयंचएकाचभवतीतिप्रश्नभाष्यटीकोक्तंबोध्यम् ॥ १६८ ॥ प्रकृ तवाक्यमादत्ते पिंगलेनेति पिंगलःकपिलेन्यवदितिविश्वः रसेनान्नस्येतिशेषः पीतेनेति स्फुटमन्यत्॥१६९॥रसानामिति रसानांसूक्ष्मता

हृदयद्रुमतःपूर्वंशतमेकाधिकंबहिः॥ निर्गतंकंदसदृशंनाडीनांमूलकारणं॥ १६६॥ एकैकस्मिन्हिनाडीनांस्कं धेस्कंधेशतंशतं॥ प्रौढशाखात्मकंजातंनाडीनांदिव्यवर्चसां ॥ १६७॥ प्रौढशाखात्मकेतस्मिन्नेकैकस्मिन्न लौकिके॥ द्वासप्ततिसहस्राणिनाडीशाखाःप्रजज्ञिरे॥१६८॥ पिंगलेनरसेनैवपूर्णाःकाश्चिद्धिनाडिकाः॥ शु क्लेनकाश्चिदपराःकृष्णेनैवप्रपूरिताः॥ पीतेनकाश्चिदन्यास्तुलोहितेनरसेनहि॥ १६९॥ रसानांसूक्ष्मतादृष्ट्वा मुह्यतीवमनोमम ॥ आसामंतश्चरंत्येतेतस्मात्तेषुहिकाभवेत्॥ १७० ॥ हृदयान्निर्गताएताव्याप्यतिष्ठंतिस र्वतः॥ आपादमस्तकंदेहंयथापर्णंहिशंकवः॥ १७१ ॥ इंद्रियाणिगृहीत्वांतस्ततोयातियदामनः॥ कर्मपाश निबद्धंसद्वासनाकोटिवासितं॥ कर्मकर्तृविभेदेनस्थितंपुरुषवीक्षितम्॥ १७२ ॥

मालोच्यमेमनोमुह्यतिव्याकुलीभवति यतएतेरसास्तासांसूक्ष्मतमनाडीनामंतश्चरंतितस्मात्तेषुरसेषुकाकीदृशीसूक्ष्मताभवेदिति ॥ १७० ॥ हृदयादितिएतानाड्योहृदयान्निर्गत्यदेहमापादमस्तकंव्याप्यतिष्ठंति कथं यथापर्णंप्रत्येकंव्याप्यशंकवोवृंतरूपास्तिष्ठंतितथेति॥ १७१ ॥ तानियदेत्यादीत्युच्चावचंनिगच्छतीत्यंतवाक्यानिमनोगृहीतमित्यंशस्यव्याख्यास्यमानत्वेनतद्भिन्नानिबृहदारण्यकचतुर्थस्यप्रथमब्राह्म णगतानिअर्थतःसंगृह्णाति इंद्रियाणीतिपंचभिः इंद्रियाणिघ्राणादीनिगृहीत्वाउपसंहृत्यततः सार्वविभक्तिकस्तसिः तासांनाडीनामं तर्यदामनोयातितदेत्युत्तरेणसंबंधः मनोविशेषणानिकर्मपाशनिबद्धमित्यादीनि कर्मदृश्यंरथादिकर्ताद्रष्टाक्रियाचतदाकारवृत्तिरूपाएत त्रिपुटीरूपेणस्थितंपुरुषेणसाक्षिणाभासितम् ॥ १७२ ॥ ॥१४॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेति शयानःपुरुषोविज्ञानमयोलोकान्कर्मफलानिमायायाबलेनविलोकयेत्पश्येत् कीदृशान्लोकान् पूर्वदृष्टैर्लोकैःसरूपकान्समानरूपान् एतेनतेहास्यलोकाइत्यंशोव्याख्यातः॥ १७३॥ कथमित्याकांक्षायामाह भिक्षुकइति श्रुतावुतपदमप्यर्थकंइवपदंचमिथ्यात्वसूचकमितिबोध्यम् ब्राह्मणशब्दात्पूर्वस्यमहाशब्दस्यलोकेगर्हितत्वेपिच्छंदसिबाहुलकान्नतथात्वमितिच ॥१७४॥ ब्रह्मेति ब्रह्माहिरण्यगर्भःस्ववृत्त्येतिशेषः विट्चरोग्रामसूकरः॥१७५॥एवमिति स्पष्टम्॥१७६॥एतत्प्रकरणस्यात्मनःपरिशुद्धत्वबोधनेतात्पर्यान्मिथ्याभूतस्वमसाम्यंजागरणस्यदर्शयति यथेतिचतुर्भिः मायामयदर्शनंस्वप्नेनसमंजागरणेइत्युत्तरार्द्धार्थः ॥१७७ ॥आत्मतत्त्वाज्ञानंदुर्घटदर्शनंचसममित्या

तदाशयानःपुरुषःपूर्वदृष्टसरूपकान्॥ मायाबलेननिखिलानिहलोकान्विलोकयेत्॥ १७३॥ भिक्षुकोपिमहाराजोभवतीहकदाचन॥पुल्कसोपिकदाचित्तुमहाविप्रोभवेदयम्॥१७४॥ ब्रह्मापिस्थावरःक्वापिविट्चरोवाकृमिर्भवेत्॥ स्थावरोवाकृमिर्वापिक्वचिद्भूयात्पितामहः॥१७५॥एवमुच्चावचंदेहंस्वप्नेप्राप्नोतिदेहभाक्॥ तत्तत्कर्मानुसारेणमाययापरिमोहितः॥ १७६॥ यथास्वप्नंतथागार्ग्यविद्धिजागरणंत्विदम्॥ माययादृश्यतेस्वप्नेतथाजागरणेपिच॥ १७७॥ अज्ञानंस्वात्मनःस्वप्नेतथाजागरणेपिच ॥ दुर्घटंदृश्यतेस्वप्नेदृष्टंजागरणेतथा॥ १७८॥ जडानामेकरूपत्वेभेदोदीर्घाऽघकारणम्॥ पार्थिवत्वंयतोदृष्टंधनवस्त्रतृणेष्विह॥ १७९॥ करोतिविषमंकार्यंकरणंनैवदृश्यते ॥एकएवशयानःसन्स्वप्नेभेदान्प्रपश्यति॥ आनंदात्मातथैवैकोभेदान्जागरणेपिच॥ १८०॥

ह अज्ञानमिति स्फुटम्॥१७८॥ननुस्वप्नपदार्थेभ्योजाग्रत्पदार्थानांदीर्घत्वादिलक्षणोभेदोपिदृश्यतेऽतआह जडानामिति जडानांपृथिवीत्वाद्यवांतरसामान्यरूपेणसत्तारूपमहासामान्यरूपेणचएकरूपत्वेसतिदीर्घादि भावप्रधानोनिर्देशः दीर्घत्वादिलक्षणोभेदःअकारणंवस्तुनोभेदनेऽप्रयोजकः विशेषाणांसामान्येकल्पितत्वेनमृगतृष्णानदीवद्धर्मिसंस्पर्शाभावादितिभावः वाचारंभणमित्यादिश्रुतिरप्यत्रानुकूलेति एतेनतदुपाधिकआत्मभेदःप्रत्युक्तः एकरूपतामभिनयति पार्थिवत्वमिति॥१७९॥विषमकार्यकरणत्वंविचारासहोपकरणकत्वंचस्वप्नेनसममित्याह करोतीति यथामृतमयश्चंद्रोविरहिणस्तापयतीत्याद्युदाहरणंबोध्यं वस्तुतएकस्यानेकदर्शित्वंसममित्याह एकइति॥१८०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शयनकर्त्तुर्विज्ञानमयस्यात्रावस्थायांस्पष्टतामभिनयति प्राणादिति पुरःस्थूलशरीररूपपुरस्यतस्यप्राणरूपभृत्यस्यांतर्यामीअंतस्थःसन्प्रेरकोभोक्तातत:प्राणादन्योमहाराजवन्महान्भासतेइतिशेषः ॥ १८१ ॥ तत्रदृष्टांतपरंबृहदारण्यकचतुर्थाध्यायप्रथमब्राह्मणवाक्यंसयथामहाराजइत्यादिकंव्याकरोति यथेतिद्वाभ्याम् यथादेशाधिपतिर्महाराजःकुतश्चित्कुतुकादिनिमित्तादेकंभृत्यंपुररक्षायांसंस्थाप्यस्वदेशेजनपदनिवासिभिःसहभ्रमेत् ॥ १८२ ॥ इंद्रियाणीति एवंभोक्तापिइंद्रियाणिगृहीत्वासमनस्कःकलेवरेयदृच्छयायथेच्छंव्रजतिपरिवर्तते नानाविषयदर्शनलक्षणंभ्रमणंकरोतीत्यर्थः ॥ १८३ ॥ अथप्रायोवाजसनेयकगतसुषुप्तिपरवाक्यानामर्थंसंगृह्णन्शयानंशयनमित्यत्रशयनपदेनविवक्षितांसुषुप्तिंस्वमापेक्षयाद्वितीयशयनत्वेनाह यदाचेत्यादिना यदाचतन्मनोविलीयतेकारणाज्ञानोपाधौविलयंक्षयंगच्छतितदादेवःउपाधिपरिच्छिन्नआत्माद्वितीयंशयनंपरिपूर्णतालक्षणंव्रजेत् कीदृशंमनः विज्ञानमयशब्दप्रवृत्तेःकारणं पुनः

प्राणादन्योमयाभोक्तास्वप्नेस्मिन्कथितःस्फुटः ॥ यतःप्राणःपुरोरक्षांकुरुतेराजभृत्यवत् ॥ तस्यांतर्यामीभोक्तान्योमहाराजसमोमहान् ॥ १८१ ॥ यथाजनपदाध्यक्षोमहाराजःकुतश्चन ॥ सर्वैर्जानपदैःसार्धंस्वदेशेसर्वतोव्रजेत् ॥ १८२ ॥ इंद्रियाणिसमादायसमनस्कःकलेवरे ॥ एवमेवात्रभोक्तापिव्रजत्येषयदृच्छया ॥ १८३ ॥ यदाचतन्मनोवश्यंविज्ञानमयशब्दकृत् ॥ विलीयतेतदादेवोद्वितीयंशयनंव्रजेत् ॥ १८४ ॥ नाडीभिरुक्तरूपाभिःपुरीतद्वेष्टितंमहत् ॥ हृदयांबुजमध्यस्थमात्माकाशंव्रजत्यसौ ॥ १८५ ॥ सेंद्रियंचमनोत्यत्रलीयतेशयनेसदा ॥ यथाविलीयतेनीरेसामुद्रेलवणंघनम् ॥ १८६ ॥

कीदृशंअंतर्यामिणोऽधीनं अवश्यमितिच्छेदेविज्ञानमयस्यानधीनमित्यर्थः ॥ १८४ ॥ तदाधारमाहद्वाभ्यां नाडीभिरिति उक्तरूपाभिर्नाडीभिर्द्वारभूताभिःपुरीतद्वेष्टितंहृदयांबुजमध्यस्थंचआत्मरूपाकाशमसौविज्ञानमयोव्रजति उपाधिकृतपरिच्छेदंविहायपरिपूर्णभावंव्रजति आत्माकाशस्यहृदयादिवेष्टनप्रयुक्तापरिच्छिन्नतानेतिसूचनायतद्विशिनष्टि महदिति यावान्वाअयमाकाशस्तावानेषोंतर्हृदयआकाशइत्यादिच्छांदोग्यश्रुतेः तथाचात्मैवविज्ञानमयस्यशयनाधारइतिभावः ॥ १८५ ॥ मनआदिजडवर्गलयाधारोप्ययमेवात्माऽज्ञानविशिष्टइत्याह सेंद्रियमिति अत्रात्माकाशेशयनेसुषुप्तिकालेकार्यस्यकारणेलयेदृष्टांतः यथेति समुद्रजलमेवघनीभूतंलवणमासीत्तद्यथापुनर्नीरंभवेत्तद्वदिति ॥ १८६ ॥ ॥ १५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्तलयेनतत्कार्यलयेदृष्टांतः चित्रमिति मनसानिर्मितंचित्रंसकार्यैंद्रियरूपंमनश्चित्रं इहउक्ते ॥ १८७ ॥ ननुकथंसुषुप्तेऽद्वितीयताऽज्ञानस्यावशेषादितिचेत्सत्यंतथापितस्यस्फुटतयाभानाभावादसत्प्रायत्वमित्यभिप्रायेणतथाप्रिययास्त्रियासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरमित्यादिवाक्यार्थमाह पांथइतिचतुर्भिः पांथःप्रवासाद्गृहमागतः परिष्वक्तआलिंगितः द्यष्टषोडश माघेमासे सौधांतरेहर्म्यांतरे ॥ १८८ ॥ आनंदेति स्पष्टम् ॥ १८९ ॥ एवमिति आनंदभुक्चैतन्यदीप्ताभिरज्ञानवृत्तिभिरानंदानुभवितादेवोविज्ञानमयःआकाशशब्दितेआत्मनिआगत्यतादात्म्यंलब्ध्वाआत्मनिस्वस्मिन्स्थितामपिमायांनवेत्तीति ॥ १९० ॥ मायायाएवस्फुटतयादर्शनाभावेतत्कार्यदर्शनाभावःकैमुत्यन्यायसिद्धइत्याह कुतइति तस्यामायायाः तथाउक्तप्रकारेणपरिष्वक्तःश्रुतौप्राज्ञशब्दितेनपरमात्मनातादात्म्यलक्ष

चित्रंयथाविलीयेतपटेसंकोचमागते ॥ एवमेवविलीनंतन्मनश्चित्रमिहात्मनि ॥ १८७ ॥ पांथःकामीपरिष्वक्तःप्रिययाद्व्यष्टवर्षया ॥ माघेसौधांतरेसुप्तोयथावेत्तिनकिंचन ॥ १८८ ॥ आनंदपरिपूर्णःसन्सुरतस्यांतकर्मणि ॥ आत्मानंचप्रियांचैवपश्यन्नेवनपश्यति ॥ १८९ ॥ एवमानंदभुग्देवआत्मन्याकाशशब्दिते ॥ आगत्यचनवेत्त्येषमायामप्यात्मनिस्थिताम् ॥ १९० ॥ कुतःस्वप्नादिकंतस्याःकार्यंलीनस्वरूपकम् ॥ अन्यत्किंचिद्विजानीयात्परिष्वक्तस्तथापुमान् ॥ १९१ ॥ स्तनंधयोयथामात्रापायितस्तनमागलम् ॥ यूकादिरहितेतद्वत्शायितश्चम्रदौशुचौ ॥ १९२ ॥ आसनेपरमानंदंप्राप्यवेत्तिनकिंचन ॥ पश्यन्नपिसमीपस्थान्नपश्यतिहसन्हिसः १९३ ॥

णमालिंगनंगतः ॥ १९१ ॥ सुषुप्तिकालेविशेषाभिमानलक्षणदुःखपरिहारेणनिरतिशयानंदप्राप्तौदृष्टांतांत्रयोवाजसनेयकउक्ताःकुमारोमहाराजोमहाब्राह्मणश्चेतितत्रकुमारदृष्टांतंविशदयति स्तनंधयइतित्रिभिः यैर्दोषैर्बालस्यविशेषज्ञानप्रसक्तिस्तद्वारकाणिविशेषणानि स्तनंधयःस्तन्यमात्रभुक्बालःमात्राआगलंगलपर्यंतंस्तनंपायितःस्तन्यपानंनीतःसन्तथायूकादिरहितेम्रदौकोमलेशुचौनिर्मलेचासनेपर्यंकिकायांशायितश्चसन्यथापरमानंदंप्राप्यकिंचनापिनवेत्ति हियतःसबालःहसन्हासेनानंदंसूचयन्समीपस्थान्पश्यन्नपिनपश्यतीवेतिद्वयोरन्वयः अत्रपरमानंदपदमतिघ्नीपदेनातिशयेनदुःखंहंतीत्यर्थकतयानन्दपरमकाष्ठाभिधायकेनसमानार्थमिति ॥ १९२ ॥ १९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्ष्टांतिकमाह एवमिति तृप्तआनंदपरमकाष्ठांगतःअतएवगतार्तिकोगतदुःखोभोक्ताविज्ञानमयइमांमायांपश्यन्नपिनपश्यतीति॥ १९४॥
महाराजदृष्टांतंस्फुटयति उदयास्तमयावितिषड्भिः राज्ञोपिविशेषणानियैश्चित्तविक्षेपोभवतितादृशलिप्सादिदोषवारकाणिदृढःस्थू
लोबलवांश्च ॥ १९५ ॥ नीरोगइति लावण्यमंगेषूज्ज्वलता कीर्तिमान्धर्मसंपन्नत्वान्नरकभयशून्यः मूर्खतादुःखहीनतामाह वे
॥१६॥ देति ॥ १९६ ॥ मनोनुकूलेति मनोनुकूलललनायूथेनकर्त्रातूर्यवादित्रघोषेणमधुरेणगीतेनचकरणेनपरिसेवितः ॥ १९७ ॥ जयेति
द्विजेंद्राणांतथाचारणवंदिनांजयाशीर्भिःपरिसेवितः पुत्रैश्चपरिसेवितः चारणाबंदिविशेषाः बंदिनस्त्वमलप्रज्ञाःप्रस्तावसदृशोक्तयः

एवमस्मिन्दिशयनेभोक्तात्प्तोगतार्तिकः॥ मायामिमांहिसंपश्यन्नपश्यतिकदाचन॥ १९४॥ उदयास्तमयौ
यावत्तावदाप्तइमांभुवम्॥ वित्तैर्बहुविधैःपूर्णामसपत्नांदृढोयुवा॥ १९५॥ नीरोगोबलसंपन्नोरूपलावण्य
संयुतः॥ कीर्तिमान्धर्मसंपन्नोवेदवेदांगपारगः॥ १९६॥ मनोनुकूलललनायूथेनपरिसेवितः॥ तूर्यवादित्र
घोषेणगीतेनमधुरेणच॥ १९७॥ जयाशीर्भिर्द्विजेंद्राणांतथाचारणवंदिनाम्॥ स्वसमानगुणैःपुत्रैःपितृभ
क्तिपरैरपि॥ १९८॥ एवंसर्वगुणोपेतोमहाराजोयथासुखम्॥ प्राप्नुयाद्भोगसंप्राप्त्यासुषुप्तोपितथापुमान्
॥ १९९॥ महाराजोयथादुःखंनजानातीहकिंचन॥ सुषुप्तोपितथानैतद्वेत्तिविक्षेपशून्यतः॥ २००॥ इंद्रिया
णियथाजित्वाबाह्यान्याभ्यंतराणिच॥ इच्छामात्रंपरित्यज्यप्राप्तंप्राप्तंभजन्सदा॥ २०१॥ कर्मणामनसावा
चापरैरपकृतोपिसन्॥ जानन्नपिचतेभ्योनद्वेष्टितेषूपकारकृत्॥ २०२॥ आत्मनःप्रतिकूलंयःपरस्यकुरुतेपु
मान्॥ कर्मणामनसावाचाकर्तुरेवभवेद्धितत्॥ २०३॥

॥ १९८ ॥ एवमिति भोगानांसम्यक्प्राप्त्या ॥ १९९ ॥ दुःखज्ञानाभावेनापिमहाराजसमतामाह महाराजइति स्पष्टम्॥ २०० ॥ म
हाब्राह्मणदृष्टांतंप्रपंचयति इंद्रियाणीतिचतुर्दशभिः ब्राह्मणस्यमहत्त्वंयैर्विशेषणैर्भवतितानिदर्शयति यथाशब्दस्यतथेतित्रयोदशेगतेन
संबंधः इंद्रियाणिजित्वानिष्कामःसन्प्राप्तंप्राप्तंप्रारब्धफलंभजन्सेवमानः ॥ २०१ ॥ कर्मणेति कर्मणाशरीरव्यापारेण परैःअपकृतःकृ
तापराधःसन् तदपकारंजानन्नपिचतेभ्योऽपकारिभ्योनद्वेष्टिकिंतुतेषूपकारकृदेवभवतीति ॥ २०२ ॥ एतादृशोययाबुद्ध्याभवतितामभि ॥१६॥
नयति आत्मनइतिद्वाभ्यां आत्मनोयत्प्रतिकूलंभासतेतद्यःपरस्यकुरुतेकर्मादिभिस्तत्प्रतिकूलंकर्तुरेवभवतिप्राप्नोति ॥ २०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदाभवतीत्याकांक्षायामाह इदानीमिति इदानींजीवद्दशायांवादेहेपतितेपरलोकेवेत्यर्थः एवमनुकूलमपिस्वस्मिन्परीक्षितंसत्परस्यकृतंचेदपिकर्त्तारंभजतइत्येवमाकारांबुद्धिंसमाश्रितः ॥ २०४ ॥ वेदार्थस्येति समग्रस्यवेदार्थस्यवेत्ता परनिंदकत्वाभाववान् स्वदोषेष्वेवदृष्टिर्यस्यसतथा कुसंगहीनश्चेति ॥ २०५॥ जडमिति जडमात्रंविनाशिअजडमेवचशाश्वतंनित्यंएवंनित्यानित्यविवेकवान् ऊहापोहयोः पूर्वपक्षसिद्धांततर्कयोःकुशलः ॥ २०६ ॥ अन्नेति छर्दितंवांतं तेषुविषयेषु इहामुत्रभोगविरागवानितियावत् ॥२०७॥ सुखेति सशरीरस्यदेहद्वयेनाध्यासलक्षणसंबंधशालिनोदेहिनःप्राणिमात्रस्यसुखदुःखेनियतेअवश्यंभाविनी नहवैसशरीरस्येत्यादिश्रुतेः इतिविज्ञानेन देहद्वयात्मकसंसारान्मुमुक्षुर्यतोदेहदोषवित् ॥ २०८ ॥ मोक्षसाधनंज्ञानमेवदृष्ट्वातत्साधनसंन्यासपूर्वकश्रवणादिकर्त्तेत्याह सशिखमिति

इदानींवापिदेहेस्मिन्पतितेवानसंशयः ॥ अनुकूलमपित्येवमितिबुद्धिंसमाश्रितः ॥ २०४ ॥ वेदार्थस्यसमग्रस्यवेत्तानपरनिंदकः ॥ स्वदोषदृष्टिःसततंदुष्टसंगविवर्जितः ॥ २०५ ॥ जडंविनश्वरंतद्वदजडंशाश्वतंपुनः ॥ एवंविवेकसंपन्नऊहापोहविशारदः ॥ २०६ ॥ अन्नपानानिचित्राणिललनाश्चमनोरमाः ॥ शब्दादीन्विषयांश्चान्याल्लोकद्वयगतानपि ॥ छर्दितान्नसमान्पश्यंस्तेषुनेच्छापरःसदा ॥ २०७ ॥ सुखदुःखेसुनियतेसशरीरस्यदेहिनः ॥ इतिविज्ञानसंपन्नोमुमुक्षुर्देहदोषवित् ॥ २०८ ॥ सशिखंवपनंकृत्वापरित्यज्यान्यमाश्रमम् ॥ सपरिष्करमादायतुरीयंमोक्षसाधनम् ॥ २०९ ॥ आश्रमंज्ञानसंपन्नंगुरुमेत्यविधानतः ॥ वेदवाक्यानिश्रुत्वाथगुरुवक्त्रारविंदतः ॥ २१० ॥

शास्त्रोक्तविधिनासशिखमुंडनंकृत्वाऽन्यंत्रयाणांवानप्रस्थांतानामन्यतममाश्रमंविहायपरिष्करैर्दंडाद्युपकरणैःसहितंतुरीयमाश्रमंमोक्षसाधनमादायगृहीत्वाअथब्रह्मनिष्ठंगुरुंविधिवदुपेत्याथतस्यगुरोर्मुखांबुजात्सार्थानिवेदवाक्यानिश्रुत्वातेषांवाक्यानांस्वार्थपरत्वेउपपत्तिंचशारीरकेप्रपंचितांमनसाविचार्यएतादृशंश्रवणंसंपाद्येतियावत् अथतत्त्वमस्यादिवाक्यार्थबोधेपांडित्यंश्रवणाभ्यासंपरित्यज्यरागद्वेषराहित्येनजडबालपिशाचवद्भावरूपंमननंसंपाद्याथमनसएकाग्रतालक्षणंनिदिध्यासनंश्रुतौमौनशब्दोदितंसंपाद्य तथाचश्रुतिः तस्माद्ब्राह्मणःपांडित्यंनिर्विद्यबाल्येनतिष्ठासेद्बाल्यंपांडित्यंनिर्विद्याथमुनिरिति तिष्ठासेत्स्थातुमिच्छेत् अथोक्तसाधनफलभूतामहंब्रह्मेत्याकारांवाक्यार्थसाक्षात्कृतिमुपेयिवान्प्राप्तइतिचतुर्णामर्थः ॥ २०९ ॥ २१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २११ ॥ २१२ ॥ आनंदात्मेति अयमुक्तविधोब्राह्मणेषुमहान्श्रेष्ठतमः मौनंचामौनंचनिर्विद्याथब्राह्मणइत्यादिश्रुतिप्रसिद्धत्वात् पुराणेऽप्युक्तं मय्यर्पितात्मनःपुंसोमयिसंन्यस्तकर्मणः नपश्यामिपरंभूतमकर्तुःसमदर्शनादिति सयथाआनंदसंज्ञंपूर्णात्मसुखंप्राप्तोभवति तथेत्यादिस्पष्टम् ॥ २१३ ॥ रागद्वेषाद्यात्मकानर्थरूपसंसाराभावोपिसुषुप्तेमहाब्राह्मणेचसमइत्याह रागेति ॥ २१४ ॥ अथव्याख्यातश्रुतिग्रंथस्यतात्पर्यार्थंस्पष्टयति शयानस्येत्यादिषट्चत्वारिंशश्लोकैः शयानस्यशयनकर्त्तुस्तथासुप्तेःशयनस्यचाश्रयआधारोयःप्रथमद्वितीयप्रश्नाभ्यांपृष्टःसत्हृदयाकाशएवत्हृदयोपलक्षितःपरमात्मरूपाकाशएवनान्यइति शयनस्वरूपमपिएतदेवयत्विज्ञानमयस्यत्हृदयाकाशभावउपाधेश्चत्हृदयाकाशेलयउक्तइति ॥ २१५ ॥ आधाररूपबोधनेनचत्वंपदार्थविज्ञानमयस्यतत्पदार्थपरमात्मनैक्यंबुबोधयिषितमितिदर्शयति भोक्तेति यस्तुभ्यंबालाकयेमयाभोक्ताविज्ञानमयोघटकाशसमःप्रोक्तःसमहाकाशसमत्हृदयाकाशरूपएवसएतत्सर्व

सार्थानिमनसातेषामुपपत्तिंविचार्यच॥ परित्यज्यचपांडित्यंतत्त्वमस्यादिबोधने॥ २११॥ एकाग्रंमनआपाद्यजडबालपिशाचवत्॥ अहंब्रह्मेतिवाक्यार्थसाक्षात्कृतिमुपेयिवान्॥ २१२॥ आनंदात्मसुखंप्राप्तोब्राह्मणेषुमहानयं॥ तथासुषुप्तःपुरुषःसुखमभ्येतिनित्यशः॥ २१३॥ रागद्वेषाद्योदोषाःसर्वानर्थकरायथा॥नविद्यंतेमहाविप्रेसुषुप्तेपितथानहि॥ २१४॥ शयानस्यतथासुप्तेर्हृदयाकाशएवहि॥ आश्रयोनपरःकश्चित्शयनंचैतदेवहि॥ २१५॥ भोक्तायस्तेमयाप्रोक्तोहृदयाकाशएवसः॥ आसमंतादयंयस्मात्काशतेदेहधारिषु॥२१६॥ मामन्यंचनजानामीत्यज्ञत्वेनमहेश्वरः॥ सुखमस्वाप्समितिवाकाशतेसर्वदेहिषु॥ आकाशवदभिन्नोतोममतेप्यपरस्यच॥ २१७॥

संसारधर्मातीतंरूपंसुषुप्तावुपाधिलयेतुभ्यंदर्शितमितियावत्हृदयाकाशस्याद्वितीयतारूपांपरमात्मतांस्पष्टयन्नाकाशपदस्यावयवार्थेनतत्रवृत्तिमाह आसमंतादिति यस्मादयंत्हृदयोपलक्षितःपरमात्माआसमंतादधिव्याप्यकाशतेदीप्यतेतस्मादाकाशइत्युक्तइतिशेषः ॥ २१६ ॥ समंतात्काशनमेवाभिनयति मामिति मामात्मानमन्यंचनजानामीत्याकारेणाज्ञत्वेनाज्ञानाश्रयत्वेनरूपेणअहंसुखमस्वाप्समितिसुषुप्तिसाक्षित्वेनवामहेश्वरःआत्मामदीयोऽन्यदीयोवाभासते अतोस्मात्समंताद्भासनरूपहेतोराकाशवदभिन्नएकरूपइत्यर्थः तथाचप्रयोगः आत्माएकरूपउपाधिपरामर्शमंतरेणानुपलभ्यमानभेदत्वादाकाशवदिति एतेनाकाशपदस्यभूताकाशेरूढत्वाभ्युपगमत्वेपिअत्रगौणवृत्तिसंभवान्नकोपिदोषइतिभावः ॥ २१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यात्मनःसर्वदैकरूपत्वेपिसुषुप्ताधारतयाप्रदर्शनंतुउपाधिविविक्ततयाप्रदर्शनार्थमेवेत्यभिप्रायमावेदयति विज्ञानमयतेति स्वप्नजाग्रतोःसविलासांतःकरणसंबंधरूपाविज्ञानमयताभेदकारणंसुषुप्तेतुतस्यविज्ञानशब्दवाच्यसविलासांतःकरणस्यविनाशेसतिकेनभेदोनिरूपणीयोनकेनापि यथाघटाद्युपाधिनाशेनभसोनभेदइतिद्वयोरर्थः॥ २१८॥ २१९ ॥ सुप्तावुपाधिनाशमभिनयति सुप्ताविति हृदयाकाशभेदकामनसासहितावागादयःसर्वेहृदयाकाशेलीयंतइति ॥२२० ॥ ननुसुप्तौशिष्यमाणाज्ञानमेवभेदकमस्त्वित्याशंक्यकिमावरणरूपेणज्ञानस्यभेदकत्वंविक्षेपरूपेणवानाद्यस्तत्रैवभेदाननुभवात्नद्वितीयःकार्यरूपविक्षेपस्यसुप्तौलयादित्याह सुप्तौयद्यपीतिद्वाभ्यां अज्ञानमावरणं विक्षेपयोर्विक्षेपरूपयोरुपाध्योरेवभेदःयथादेवदत्तयज्ञदत्तौभिन्नावित्यत्रदेवदत्तयज्ञदत्तोपाधीएवप्रतियोग्यनुयोगितयाभेदनि

विज्ञानमयतास्वप्नेतद्वज्जागरणेपिच॥ हृदयाकाशरूपस्यविद्यतेभेदकारणं॥ २१८॥ सुप्तेतस्यविनाशेहिभेदःकेनहिसंभवेत्॥ घटादीनांविनाशेकिंभेदोनभसितिष्ठति ॥ २१९॥ सुप्तौवागादयःसर्वेमनसासहिताइमे ॥ हृदयाकाशेलीयंतेहृदयाकाशभेदकाः ॥ २२० ॥ सुप्तौयद्यपिमायेयमात्माज्ञानस्वरूपिणी ॥ अस्तिनैषातथाप्यत्रभवेद्भेदस्यकारणम्॥ २२१॥ अज्ञानेनहिभेदोस्तिसर्वेषामिहदेहिनाम्॥ किंतुविक्षेपयोर्भेदःसुप्तौसचविलीयते॥ २२२॥ यथातिबहुलेरात्रौतमस्यभ्रोद्भवादिकम्॥ वर्षासुलीयतेतद्वदात्माज्ञानइदंजगत्॥ २२३॥ यथातस्मिन्नपगतेभानुनिर्गमनादिना॥ नष्टप्रायंतदैवैतत्तस्मादेवविनिःसरेत्॥ २२४॥ हृदयाकाशतोप्येवंजगदेतत्प्रजायते॥ कर्मण्युद्भूतएकस्मिन्स्वप्नेजागरणेपिवा॥ २२५॥

रूपकौ सुप्तौतुसचविक्षेपोविलीयतइति॥२२१॥२२२॥ सुषुप्तौकार्यवर्गलयेदृष्टांतमाह यथेति यथावर्षासुरात्रावतिबहुलेतमसिसतिअभ्रोद्भवादिकंउद्भवदभ्रादिकं कृदभिहितोभावोद्रव्यवत्प्रकाशतइतिन्यायात् जायमानंमेघादिकंविलीयते तत्रतमसिलयंगच्छतितिथेदंजगत्सुप्तावात्माज्ञानेविलीयतइति॥२२३ ॥ यथातस्मिन्निति यथादृष्टांतेतस्मिंस्तमसिभानुनिर्गमनादिनापगतेभिभूतेसतितदैवतत्क्षणमेवएतदभ्रादिकंतस्मादभिभूततमसएवविनिःसरेत्प्रादुर्भवेत् एवंहृदयाकाशादज्ञानशवलादेतज्जगत्स्वप्नेजागरणेवाप्रजायते कस्मिन्सति स्वप्नजाग्रद्भोगप्रदकर्मणोरेकस्मिन्नन्यतरत्रउद्भूतेसतीत्यन्वयः ॥ २२४ ॥ २२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मनिमित्तांव्यवस्थामेवाभिनयति स्वमादिति कदाचित्स्वमानंतरंजागरणंगच्छतिकदाचित्तुसुषुप्तानंतरं एवमयेपि ॥२२६॥ उक्तरीत्या कर्मणोव्यवस्थामात्रहेतुत्वेपिसंसारंप्रतिमुख्यप्रयोजकत्वमज्ञानस्यैवेत्याह आत्माज्ञानादिति अस्मिन्नपरोक्षे अन्यत्रआमुष्मिके आव्रजेतुप्रामुयात् ॥ २२७ ॥ क्रीडाकंदुकदृष्टांतंस्फुटयति यष्टीति गोपबालैर्यष्टिप्रहारेणनभसिक्षिप्तःकंदुकःपतंश्चपुनस्ताडितोयथानेकत्रभ्रमति ॥ २२८ ॥ एवमिति चित्रैर्नानाविधफलप्रदैः जीवन्नविद्ययाजीवभावंगच्छन्सन् ॥ २२९॥ कर्मनिमित्तकानवस्थितत्वेदृष्टांतांतराणिदर्शयति वायुनेतित्रिभिः देहेपीत्यनंतरमवस्थात्रयगतिरिरितिशेषः ॥ २३० ॥ भ्राम्यतेइति स्पष्टम् ॥ २३१ ॥ यथेति जाग्रद्वद्वर्त्तमा

स्वप्नाज्जागरणंयातिसुषुप्तादपिवाप्रभुः॥ एवंजागरणात्स्वप्नंसुषुप्तंवापिसव्रजेत्॥ कदाचित्स्वप्नतःसुप्तिंव्रजेज्जागरणंचवा॥ २२६॥ आत्माज्ञानादयंदेवःक्रीडाकंदुकवत्सदा॥ अस्मिन्देहेतथान्यत्रत्व्यवस्थात्रयमाव्रजेत्॥ २२७॥ यष्टिहस्तैर्यथागोपैःक्षिप्तोनभसिकंदुकः॥ दिक्षुभूमौतथाकाशेधावत्येषनिरंतरम्॥ २२८॥ एवंपूर्वकृतैश्चित्रैःकर्मभिर्जगदीश्वरः॥ स्वप्नेजागरणेसुप्तौजीवन्धावतिनित्यशः॥ २२९॥ वायुनानीयमानस्यतूलस्यनगतिःस्थिरा॥ यथातथात्रदेहेपिनस्थिराकर्मवायुना॥ २३०॥ भ्राम्यतेवायुनायद्वत्खेसर्वामेघमंडली॥ तद्वद्देहादिकास्तृष्टिर्भ्राम्यतेकर्मवायुना॥ २३१॥ यथाजलप्रवाहेणकाष्ठमुच्चावचस्थले॥ पात्यतेजंतुरप्येवंयोनिष्वायातिकर्मतः॥ २३२॥ देवोवामानवोवायंकृमिर्वास्थावरोपिवा॥ भवत्युच्चावचेस्थानेकाष्ठंयद्वद्विनीरगम्॥ २३३॥ सर्वत्रैवमवस्थास्ताज्ञातव्याबुद्धिजीविषु॥ अवस्थात्रयनिर्मुक्तंसत्वंकिंचिन्नविद्यते॥२३४॥ अस्वप्नतापिदेवानांज्ञेयास्यादुपचारतः॥ देवानांप्रथमोयस्मात्शेतेशेषगतोहरिः॥ २३५॥

नदेहआमुष्मिकदेहास्तुत्वमवदितिसूचयितुंयोनिष्वित्युक्तं ॥ २३२ ॥ योनिष्वित्युक्तंविशदयति देवइति उत्तरार्द्धस्यइत्येवमित्यादिः ॥२३३॥उक्तावस्थानांसर्वत्रानुगमएवेत्याह सर्वत्रेति बुद्धिजीविषुसांतःकरणेषु॥२३४॥ ननुदेवानामस्वप्नसंज्ञयाप्रसिद्धत्वात्कथंतेष्ववस्थात्रयांनुगमइत्याशंक्यअनुदराकन्येतिवन्नञोऽल्पार्थतायाअपिदृष्टेमैवमित्याह अस्वप्नतेतिद्वाभ्यां उपचारतः अस्वप्नपदघटकनञोभावार्थस्यवाधेनाल्पत्वरूपगौणार्थपरत्वादित्यर्थः मुख्यार्थस्तुवक्तुमशक्यः यस्माद्देवानामाद्योभगवान्विणुरप्यवस्थात्रयानुगमसूचनायलीलाविग्रहेणशेषशयनलीलामंगीकरोतीति ॥ २३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अल्पतामभिनयति यथेति ॥२३६॥ एवमिति एवमुक्तविधयातस्यविज्ञानमयस्यसदाजागरणंभवेत् कीदृशस्यतस्य सुषुप्तस्यहृदयाकाशरूपिणःसुषुप्तेहृदयाकाशरूपपरमात्मभावंगतस्यजागरणनिमित्तंतूक्तोस्यजाग्रद्भोगप्रदकर्मणउद्भवोविपाकाभिमुखतारूपइति॥२३७॥ ननुवाजसनेयानुसारेणहृदयाकाशेऽद्वितीयात्मनिलयस्यवर्णनेपिप्राणाख्येयकौषीतकिवाक्येनविरोधःअत्रप्राणएवैकधाभवतीतिप्राणेलयाभिधानादितिचेन्न सुप्तपुरुषाभिप्रायेणनकिंचिदवेदिषमितिपरामर्शरूपेणपरमात्मनिलयाभिधानेपिलौकिकानांप्राणशेषतांमन्यमानानामभिप्रायानुसारेणप्राणेलयाभिधानाविरोधादित्याशयंस्पष्टयति सुप्तावितित्रिभिः सुप्तौश्वासात्मकंप्राणंविनासर्वंकार्यंविलीयते तेनप्राणस्यलौकिकदृशावशेषेणप्राणशब्दोलक्षणयाहृदयाकाशेईरितःप्रकृतश्रुतौप्रयुक्तइत्यर्थः ॥ २३८ ॥ तथाचप्रकृतवाक्यस्यैवम

यथाक्षणेक्षणेस्वप्नंपश्यंतिमनुजादयः॥ नैवंदेवास्ततस्तेस्युरस्वप्नानान्यथाक्वचित्॥ २३६॥ एवंतस्यसुषुप्तस्यहृदयाकाशरूपिणः॥ उद्भवेकर्मणोप्यस्यसदाजागरणंभवेत्॥ २३७॥ सुप्तौविलीयतेसर्वंकार्यंश्वासात्मकंविना॥ प्राणंतेनप्राणशब्दोहृदयाकाशईरितः॥ २३८॥ प्राणेस्मिन्हृदयाकाशेसर्वभेदविवर्जिते॥ कार्यकारणसंघातएकतांयात्यदर्शनात्॥ २३९॥ सुषुप्तौनहिलभ्यंतेवागाद्याविषयैःसह॥ मनोंतास्ततएवैतेप्राणेलीनास्तदाभवन्॥ २४०॥ हृदयाकाशसंप्राप्तोविज्ञानमयएवहि॥ नाधाराधेयभेदेनतमाप्नोतिकदाचन॥ २४१॥ गृहाकाशेघटाकाशोगत्वाघटविभेदतः॥ संबंधंयादृशंगच्छेत्तादृशंपुरुषोत्रहि॥ २४२॥

र्थइत्याह प्राणइति प्राणपदलक्ष्यार्थेहृदयाकाशेस्थूलसूक्ष्मप्रपंचोलीयते दर्शनाभावाद्दृष्टिस्सृष्टेःपूर्वाध्यायेप्रदर्शितत्वादिति ॥ २३९ ॥ अदर्शनमभिनयति सुषुप्ताविति मनोंतामनःपर्यंतावागाद्याःसुप्तौसहविषयैर्नलभ्यंतेअतएवप्राणेलीनाउच्यंतेइतिशेषः॥२४०॥एकधाभवतीत्यंशस्यतात्पर्यमाह हृदयाकाशेतिद्वाभ्यां हृदयाकाशंप्राप्तोविज्ञानमयएवइंद्रियादिव्यतिरिक्तस्तंहृदयाकाशंआधाराधेयभेदघटितसंबंधेननाप्नोतिकिंत्वेकतामेवगच्छति इंद्रियादिकंतुभेदसहिष्णुमभेदंतादात्म्यंगच्छतीत्यर्थः॥ २४१॥ एकतापत्तौदृष्टांतमाह गृहाकाश इति गृहाकाशेघटाकाशोगत्वाघटस्फुटनानंतरंयादृशमेकतालक्षणंसंबंधंगच्छेत्तादृशंसंबंधंपुरुषोविज्ञानमयोत्रहृदयाकाशेसुप्तिकालेउपाधिसंबंधंविहायगच्छतीति ॥ २४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमात्मनोत्हृदयाकाशव्यवहारेप्रयोजकंसंबंधविशेषंदर्शयन्दृष्टांतंदार्ष्टांतिकेसंगमयति यावदितिद्वाभ्यां शरीरमरणपर्यंतंपुरुषःपरमात्मा हृदयेंतर्यामिरूपेणविशेषसंनिहितोस्ति अंतर्यामिब्राह्मणादिश्रुतिभ्यईश्वरःसर्वभूतानांहृद्देशेर्जुनतिष्ठतीत्यादिस्मृतिभ्यश्च सपुरुषोगृहाकाशसमस्तस्यनगमनागमनेइति ॥ २४३ ॥ घटेति एषउक्तएवात्मामनसिव्यवस्थितःप्रतिबिंबितःसन्घटाकाशवद्गमनागमनेभजतीत्यर्थः गमनागमनमितिसमाहारद्वंद्वः ॥ २४४ ॥ अथोक्तार्थमुपपादयन्नंतर्यामितयाहृदयेस्थितिंवक्ष्यमाणोपयोगायानुवदति यद्यपीति यद्यप्यात्माकाशवद्देहस्यसमष्टिव्यष्टिरूपस्यांतर्बहिरवस्थितस्तथाप्यत्रात्मनिहृदयावच्छेदेनांतर्यामितारूपोतिशयोस्तिप्रसिद्धइति ॥ २४५ ॥ उक्तांतर्यामिनियम्यमनसःकरणांतरेभ्योविशेषंप्रतिबिंबग्रहणाद्युपयोगिनंदर्शयति सुखेतिषड्भिः देहोहिभोगार्थःभोगस्तुप्रकाशरूपउक्तःसचविषयप्रकाशइंद्रियरूपकरणाधीनःसकलकरणनियामकत्वान्मनसःस्पष्टोव्यतिरेकइति ॥ २४६ ॥ करणनियामक

॥१९॥

यावच्छरीरमरणंपुरुषोत्हृदयेस्तिहि ॥ गृहाकाशसमस्तस्यगमनागमनेनहि ॥ २४३ ॥ घटाकाशसमोज्ञेयो मनस्येषव्यवस्थितः ॥ गमनागमनंतस्यभवेन्नित्यंमनःकृतम् ॥ २४४ ॥ यद्यप्याकाशसदृशोबहिरंतरवस्थितः ॥ देहस्यात्मातथाप्यत्रहृदयेतिशयोस्तिहि ॥ २४५ ॥ सुखदुःखोपभोगार्थंजंतोर्देहोत्रजायते ॥ उपभोगः प्रकाशःस्यात्प्रकाशःकरणैर्भवेत् ॥ अंतःकरणमेवैकंकरणानांनियामकम् ॥ २४६ ॥ अमूनिनविदंत्यर्थंयतोव्यापारवंत्यपि ॥ तदाचित्तेनजानीमःपराधीनानिसर्वथा ॥ २४७ ॥ यथाकाष्ठकृतानांस्युर्दशानांवाजिनामपि ॥ सूत्राण्येकत्रबद्धानिनानास्थाननिवासिनां ॥ २४८ ॥

तैवकुतइत्यतआह अमूनीति अमूनिचक्षुरादिकरणानिव्यापारवंत्यपिसंतिचित्तसंबंधंविनार्थंविषयंस्वंस्वंनविदंतिनजानंतितदावयमेतज्जानीमोयच्चित्तेनतानिपराधीनानि चित्तेनेतिप्रकृत्यादित्वात्तृतीया तथाचचित्तरूपंयत्परंतदधीनानीत्यर्थः ॥ २४७ ॥ मनसःकरणनियामकतांदृष्टांतेनविशदयति यथेतिचतुर्भिः लोकप्रसिद्धमेषक्रीडनकवत्यदिकाष्ठनिर्मितादशवाजिनोऽश्वानानास्थाननिवासिनोदीर्घकाष्ठेकृतनानाविधायतनाःस्युस्तेषांचपादबद्धानिदीर्घकाष्ठमध्यच्छिद्रद्वाराएकत्रनलिकायामधःस्थायांबद्धानिप्रोतानिस्युस्तथादेहेदीर्घकाष्ठसमेज्ञानेंद्रियकर्मेंद्रियरूपाणांवाजिनामाकर्षणसूत्राणिवायुमयानिनाडीरूपच्छिद्रद्वाराहृदयेनलिकानिभेप्रोतानिसंति कीदृशानिसूत्राणि स्वयंभुवापरमेश्वरेणमाययानिर्मितानीतिद्वयोरर्थः ॥ २४८ ॥ ॥१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २४९ ॥ बालकइति दृष्टांतेयथाबालकःपितुरंकस्थःपित्रायाहितसूत्रःसंस्तान्काष्ठमयान्हयानश्वान्व्यापारयेत्चालयेत् एवंबालकव द्बालकमज्ञंमनःअंतर्यामिणःपितुरंकस्थंतेनयाहितसूत्रंसत्तानिज्ञानकर्मेंद्रियाणिअपिशब्दाद्वायुमयसूत्राणिचव्यापारयतीति बालको ऽज्ञेइतिविश्वः ॥ २५० ॥ अंतर्यामिरूपपितुरंकोपमितंदेशंदर्शयति आश्रित्येति ह्रदयांभोजदेशमाश्रित्यतानिव्यापारयतीतिपूर्वेणसंबं धः दिक्चतुष्टयेमध्येचपंचच्छिद्राणियत्रह्रदयांभोजेतत्तथा अनेकानिनाडीरूपाणिविवराणिसूक्ष्मच्छिद्राणियत्रतत् वायुमयसूत्रा णामाधारमिति ॥ २५१ ॥ एवंमनसःकरणांतरेभ्यउत्कर्षप्रदर्शनेनतस्यसत्वातिशयःसूचितस्तस्यसत्वातिशयस्यप्रतिबिंबविशेषेचितो गृहाकाशसमतोपपादकेउपयोगंदृष्टांतेनाह सावित्रमितिचतुर्भिः यथासावित्रंसूर्यसंबंधितेजःस्वभावादेकरूपतयासर्वत्रस्थितंतथापि

नलिकायांतथादेहेज्ञानकर्मात्मनामपि ॥ सूत्राणिह्रदयेसंतिनिर्मितानिस्वयंभुवा ॥ २४९ ॥ बालकोहियथा सूत्रैर्व्यापारयतितान्हयान् ॥ मनोबालकमप्येवंव्यापारयतितान्यपि ॥ २५० ॥ आश्रित्यह्रदयांभोजंपंचछि द्रमधोमुखं ॥ अनेकनाडीविवरंवायुसूत्रसमाश्रयम् ॥ २५१ ॥ सावित्रंहियथातेजःसर्वदेहेष्ववस्थितम् ॥ एकरूपंतथाप्यस्यभेदोदृष्टोमहानिह ॥ २५२ ॥ कुसूलेदर्पणेतद्वत्कृपाणेचमणावपि ॥ सूर्यकांतेचतत्रस्थंदाह पाकादिकृद्भवेत् ॥ २५३ ॥ एवंदेहेतथाप्राणेकर्मज्ञानात्मकेषुच ॥ बहिर्बुद्धौचसर्वत्रतिष्ठत्यात्मैकरूपधृक् ॥ २५४ ॥ तथापिमनसिस्थित्वाभोक्ताभवतिसप्रभुः ॥ सूर्यकांतमणौयद्वत्स्थित्वादहतिभास्करः ॥ स्थित्वां तःकरणेतद्वदात्मासंसृतिमाप्नुयात् ॥ २५५ ॥

तस्यसावित्रतेजसःकुसूलाद्युपाधिवशाद्भेदोविशेषोदृष्टइति ॥ २५२ ॥ उत्तरोत्तरमभिव्यक्त्याधिक्यहेतूनुपाधीनूगणयति कुसूलइति कुसू लेधातुमयान्नकोष्ठकेस्वल्पसावित्रतेजसोभिव्यक्तिस्ततोधिकादर्पणेततःकृपाणेततोमणौसर्वतःसूर्यकांते यतस्तत्रसूर्यकांतेस्थितंसावित्रंते जोदाहादिकंकरोतीति ॥ २५३ ॥ एवमिति कुसूलदर्पणकृपाणमणिसमेषुदेहप्राणकर्मेंद्रियज्ञानेंद्रियेषुसूर्यकांतसमबुद्धौचात्मापेक्षयाबाह्या यांतिष्ठतिप्रतिबिंबितोभवति कीदृशआत्मा स्वतःसर्वत्रैकरूपइनि ॥ २५४ ॥ तथापीति तथापिसर्वत्रबिंबितत्वेपिमनसिबुद्धिशब्देनोक्तेंतः करणेस्थित्वैवभोक्ताभवति एतत्स्फुटयति सूर्येति सूर्यकांतसंज्ञेमणौस्थितोभास्करोयथादाहकर्त्ताभवतितथांतःकरणेस्थितआत्मासंसृ तिकर्तृत्वभोक्तृत्वादिरूपामाप्नुयात् घटाकाशवदिहामुत्रगामीभवतीतियावत् ॥ २५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथघटाकाशसमविज्ञानमयस्योपाधेर्घटसमायाबुद्धेर्गृहाकाशोपाधिगृहसमहृदयेस्थितिलयरूपंभंगंचोपपादयति बुद्धिश्चेत्यष्टभिः बुद्धिरुक्तांतःकरणंसर्वसूत्राधारेहृदयेंभोजरूपेतिष्ठतिगृहवद्वसतिचक्षुरादिदेशंतुबुद्धिवृत्तिरूपेणप्रवासमिवगच्छतीतियावत् ततोहृदयस्य स्वोपाधिबुद्धेर्निवासस्थानत्वात्पुरुषोविज्ञानमयोदक्षिणनेत्रादिदेशात्तत्रहृदयेसुषुप्तिकालेव्रजेदागच्छेदुपाधिपरतंत्रत्वादित्यर्थः २५६ ॥ इतस्ततःपरिवृत्त्यबुद्धेर्हृदयदेशागमनेदृष्टांतमाह पशवइति नाशानाशौक्षयोदयौसमौकृत्वा हानिमपिउदयसमांमत्वेतियावत् एवंमत्वा पशवोमनुष्यावास्वदेशंप्रतियथायांतितथाबुद्धिर्हृदयाब्जमिति ॥ २५७ ॥ जंतवइति यथानिजंदेशंगतानांजंतूनांकदाचित्सुखंकदाचिद्दुःखंवाभवतिएवंहृदयकमलगताबुद्धिःसुखदुःखेभजति हृदयदेशएवसुखदुःखयोरनुभवादितिभावः ॥ २५८॥ देहइति नखाग्रपर्यंतो

बुद्धिश्चहृदयेनित्यंसर्वसूत्रविधारिणि ॥ तिष्ठत्येषाततस्तत्रसुषुप्तौपुरुषोव्रजेत् ॥ २५६ ॥ पशवोवामनुष्यावा देशंयांतियथानिजम् ॥ नाशानाशौसमौकृत्वाबुद्धिस्तद्वद्धृदंबुजे ॥ २५७॥ जंतवोहिनिजेदेशेभवेयुःसुखिनोगताः॥ कदाचिद्दुःखिनोपिस्युरेवंबुद्धिर्हृदंबुजे ॥ २५८ ॥ देहःसकरणग्रामःपुरीतच्चशिरस्तथा ॥ बुद्धेर्विदेशइत्युक्तोमुक्त्वैकंहृदयांबुजम् ॥ २५९ ॥ स्वप्नजागरणोद्भूतेप्रक्षीणेकर्मणीयदा ॥ तदातत्रगताबुद्धिर्मूर्छिताभवतिक्षणात् ॥ २६० ॥ दृढांमूर्छांयथाप्राप्तःपुरुषोमृतउच्यते ॥ मूर्छिताबुद्धिरप्येवंविलीनेत्यत्रगीयते ॥ २६१ ॥

देहःसेंद्रियगोलकः पुरीतदुक्ता शिरश्चएतानिबुद्धेःपरदेशसमानिहृदयांबुजंतुस्वदेशइतियावत् ॥ २५९ ॥ अथबुद्धेर्घटविभेदसमंलयमभिनयति स्वप्नेति स्वप्नजागरणार्थंयेउद्भूतेफलाभिमुखतांगतेकर्मणीतियदाप्रक्षीणेभवतस्तदातत्रहृदयकमलमध्यवर्तिन्याकाशेदहराख्येमायाशबलेगतासतीबुद्धिर्मूर्छाकारणलयरूपांप्राप्ताभवतीति एतेनहृदयकमलदलादिदेशोबुद्धेःस्वप्नादिस्थानमेवेतिसूचितम् ॥ २६० ॥ तत्त्वज्ञानात्पूर्वंकारणेसूक्ष्मतयास्थितिरेवलयः औपनिषदमतेनिरन्वयनाशानभ्युपगमात् लोकेपितथाव्यवहारदर्शनाच्चेत्याह दृढामिति. लोकेमूर्छितस्यमृतव्यवहारोयथाएवंमूर्छितबुद्धेरत्रवेदांतेविलीनेतिव्यवहारइत्यर्थः ॥ २६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयांतराकाशेबुद्धेर्लयेदृष्टांतमाह यथानभइति अत्यंतसूक्ष्मस्यशाल्मल्यादितूलस्याकाशेलयोव्यवन्हियतेएवंहृदयांतराकाशगाबुद्धिर्लीनेत्युक्तावेदेगृहीतंमनइतिवाजसनेयकेमनःसर्वैर्ध्यानैःसहाप्येतीतिप्रकृतश्रुतौचेत्यर्थः ॥२६२॥ उक्तबुद्धिलयंप्रतिपित्तेनद्वारनिरोधात्मकोहृदयकमलसंकोचोपिहेतुरितिदृष्टांतेनदर्शयति यथापटस्येति पटचित्रंपटांतर्गतंचित्रंप्रलीयतेलीनमितिव्यवन्हियते ॥२६३॥ सयदाप्रतिबुध्यतइत्यादेर्लौकाइत्यंतस्यार्थमाह एवंसइतिषड्भिः सपुरुषोविज्ञानमयोवस्तुतःपरःपरमात्मरूपएवमुक्तविधयाशयित्वाउपाधिलयद्वारापूर्णभावरूपंशयनमनुभूयजाग्रद्भोगप्रदकर्मणःपश्चात्प्राकृतस्यउद्भूतौप्रादुर्भावेसतिसदाजागरणंयातीति ॥ २६४ ॥ तंतुनाभइति तंतुनाभोलूतासंज्ञःकीटोयथापरंसाधनमनपेक्ष्यतंतून्सृजतिएवंशयनादुत्थितःपुमान्प्राणादीन्सृजतीत्यर्थः ॥ २६५॥ यथा

यथानभोगतंतूलंसूक्ष्मंलीनमितीरितम्॥ एवंहृदयगाबुद्धिर्वेदेलीनेतिकीर्तिता ॥ २६२॥ यथापटस्यसंकोचात्पटचित्रंप्रलीयते॥ एवंहृदयसंकोचाद्बुद्धिर्लीनेतिगीयते॥ २६३॥ एवंसहृदयाकाशेशयित्वापुरुषःपरः॥ उद्भूतौकर्मणःपश्चाद्यातिजागरणंतदा॥ २६४॥ तंतुनाभोयथाजंतुस्तंतून्सृजतिभूरिशः॥ अनपेक्ष्यपरंकिंचित्तथासावुत्थितःपुमान्॥ २६५॥ यथाज्वलन्महावन्हिःकणकानात्मरूपकान्॥ शयनादुत्थितोप्येवंसृजत्यात्मेंद्रियादिकम्॥ २६६॥ उत्थितोहृदयाकाशात्प्राणान्बुद्धिंसृजत्ययम्॥ ज्ञानकर्मेंद्रियैःसार्धंव्यापारैर्विविधैरपि॥ २६७॥ इंद्रियेभ्यस्ततोदेवावन्ह्याद्याअधिदैवतं॥ जायंतेततएवैतेलोकाविषयसंवृताः॥ २६८॥

ज्वलन्निति यथामहान्वन्हिर्ज्वलन्सन्कणकान्सृजतिएवमात्मेंद्रियादिकंसृजति कीदृशान्कणकानात्मरूपकान् अल्पार्थेकन्प्रत्ययः रूपमाकारश्लेषयोरपीतिविश्वः क्वचित्स्वार्थिकालिंगवचनान्यतिक्रामंतीतिवचनात्पुंस्त्वं तथाचात्मनःस्वल्पाकारानित्यर्थः ॥२६६॥ उत्थितइति अयंविज्ञानमयोहृदयाकाशादुत्थितःसन्प्राणान्सृजति प्राणपदार्थमाह बुद्धिमित्यादिना ज्ञानकर्मेंद्रियैःसव्यापारैःसहिताबुद्धिः श्रुतिगतप्राणपदार्थइतिभावः अत्रवाय्वात्मकप्राणस्यसुप्तपुरुषदृष्ट्यालयस्यसिद्धांतितत्वात्तस्यापिप्राणशब्देनसंग्रहोबोध्यः ॥२६७॥ इंद्रियेभ्यइति इंद्रियेभ्योदेवसृष्टेराशयःप्रथमाध्यायेदर्शितः अधिदैवतंदैवतेविराजिकरणतयावर्तमानावन्ह्याद्यादेवाइंद्रियेभ्योजायंते ततोदेवेभ्यएतेविषयैःसंवृताःसहितालोकाःसंजायंतइति ॥ २६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यमिति एवंसर्वदेहिसंबंधिनामिंद्रियाणांतथामहात्मनामिंद्रियदेवानांलोकानांचनित्यंजनिम्रतीबोध्येइत्यन्वयः ॥ २६९ ॥ अयमर्थोनसंभाव्यतइत्याशंक्यद्वितीयाध्यायेप्रपंचितंसमाधानमधिकयुक्त्यभिधानायानुवदति अविश्वासइति शास्त्रस्यवेदस्यार्थेऽविश्वासोनकर्त्तव्यः अविश्वासोहिप्रमाणांतरविरोधात्संभवतिविरोधश्चसमानविषययोःप्रसिद्धः अत्रतुशास्त्रविषयेप्रमाणांतरस्याप्रवृत्तेःसविरोधोदुर्वचइत्याह अर्थेत्विति॥ २७०॥शास्त्रविषयेमानांतरस्याप्रवृत्तिंविशदयति प्रत्यक्षस्येतिषड्भिः अत्रशास्त्रविषयेस्वर्गापूर्वदेवतादौप्रत्यक्षस्यप्रमाणेषुज्येष्ठस्यबाधोऽभावःप्रायशोनृभिर्दृश्यतेनवयमेतत्प्रत्यक्षेणपश्यामइत्याकारेणानुभूयते योगिव्यावृत्तयेप्रायःपदं योगिप्रत्यक्षविशेषस्यापिशास्त्रानुकूलाचरणेनजायमानस्यनपूर्वसिद्धशास्त्रसमानविषयत्वंशास्त्रस्यानुवादकताप्रयोजकंवक्तुंशक्यमितिभावः अनुमानस्यतथात्वंनिरस्यति अनुमानमिति अनुमानंहिस्वंस्वोपयोगिव्याप्त्यादिग्राहकतयास्वसंबंधिप्रत्यक्षादिकमपेक्ष्योपजीव्यैवजायतेअन्यथा

नित्यंजनिम्रतीएवमिंद्रियाणांमहात्मनाम् ॥ देवानांचसलोकानांसर्वेषामिहदेहिनाम् ॥ २६९ ॥ अविश्वासोनकर्तव्यःशास्त्रार्थेपंडितैःसदा ॥ अर्थेत्वतींद्रियेयस्मान्मानंशास्त्राद्दृतेनहि ॥ २७० ॥ प्रत्यक्षस्यचबाधोत्रदृश्यतेप्रायशोनृभिः॥अनुमानंचमानंस्वंसमपेक्ष्यैवजायते॥अन्यथानानुमानत्वंभवेत्तस्यकथंचन॥ २७१॥ अक्षमक्षंप्रतियदाप्रत्यक्षंजायतेनृणां ॥ सर्ववस्तुषुतन्नैकंतदामानंहितद्भवेत् ॥ २७२॥

प्रमाणांतरस्यप्रथमवृत्तिमनपेक्ष्यप्रवर्तमानत्वेतस्यानुमानस्यानुमानत्वमनुमानशब्दवाच्यत्वंनभवेत् मानमनुगतमनुमानमित्यवयवार्थासमन्वयादित्यर्थः अत्रानुमानशब्देअत्यादयःक्रांताद्यर्थेद्वितीययेतिसमासोविवक्षितः अयंभावः अतींद्रियेर्थेप्रमाणांतरसापेक्षस्यानुमानस्यप्रत्यक्षापेक्षावाप्रवृत्तिःशास्त्रापेक्षावा नाद्यः प्रत्यक्षस्यबाधोक्त्यानिरस्तत्वात् नद्वितीयः पूर्वसिद्धशास्त्रापेक्षयाप्रवृत्तस्यशास्त्रनिष्ठानुवादकताधायकत्वानुपपत्तेरिति ॥ २७१॥ प्रत्यक्षस्यस्वल्पविषयाप्रसिद्धेरपिशास्त्रविषयेतत्प्रसरोवक्तुमशक्यइत्याशयेनप्रत्यक्षस्यविषयेषुसंकुचवृत्तितामाह अक्षमितिद्वाभ्यां अक्षमक्षंप्रतियज्जायतेतत्प्रत्यक्षमितिव्युत्पत्तिकेनप्रतिपरिसमनुभ्योक्ष्णइत्यचूप्रत्ययांतेनप्रत्यक्षशब्देनाभिधेयंप्रत्यक्षज्ञानंप्रतींद्रियंपृथक्पृथक्जायतेइतियदानिश्चितंतदासर्ववस्तुषुतत्प्रत्यक्षंमानंएकंनभवेत्किंत्वनेकंचक्षुरादिकरणभेदाच्चाक्षुषरासनादिसंज्ञमेवभवेदितितस्यचचक्षुराद्ययोग्येशास्त्रार्थेनावकाशइतिभावः ॥ २७२ ॥ ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्निकर्षापेक्षतयापिप्रत्यक्षस्यसंकुचद्वृत्तितेत्याह अपिस्वस्येति स्वस्यकस्यचिन्नमातुःकस्मिंश्चिद्वस्तुनितद्योगइंद्रिययोगोपियदास्या त्तदापिपरस्यतद्भिन्नस्यतत्प्रत्यक्षंनभवतीतिप्रसिद्धंतथाचेंद्रिययोगेष्वपिनप्रत्यक्षस्यस्वतंत्राद्वृत्तिः अतींद्रियवस्तुनितुकिंवक्तव्यमितिशेषः नचवेदेपिश्रवणादिकमपेक्ष्यज्ञानजनकेसमानोयंदोषइतिवाच्यं सूर्यवद्भासकस्यवेदस्यप्रमाजननेऽन्यानपेक्षत्वात् श्रवणमननादीनांतुमंद दृष्टेरंजनवत्बुद्धिसंस्कारमात्रत्वात् चक्षुरादीनांतुदीपवत्सामर्थ्यमेवस्वल्पमेवविशेषादिति ॥ २७३ ॥ दोषवत्वेनप्रसिद्धेश्चप्रत्यक्षस्यननि र्दोषवेदसमानविषयतेत्याह अपिदोषेति केवलमागमनिरपेक्षंयत्प्रत्यक्षंतद्दोषकलाशून्यंदोषलेशहीनंनसंभवेत् यतइंद्रियदोषाणामंधत्व बधिरत्वादीनामध्यक्षेणनिदर्शनंनिश्चयइत्यर्थः ॥ २७४ ॥ प्रत्यक्षस्याल्पविषयताभिधानफलमाह अनुमानमिति तत्रातींद्रियेर्थेमूल

अपिस्वस्ययदैवस्यात्तद्योगोपिहिवस्तुनि॥ तदापरस्यतन्नापिकिमतींद्रियवस्तुनि॥ २७३॥ अपिदोषकला शून्यंनाध्यक्षंकेवलंभवेत्॥ यतोक्षगतदोषाणामध्यक्षेणनिदर्शनम्॥ २७४॥ अनुमानंनतत्रस्यान्मूलाभा वात्कथंचन॥ अनुमानविभेदायेत्व्यर्थापत्त्यादयःकथं॥ मानमत्रभवेयुस्तेभिन्नानस्वयमेवहि॥ २७५॥ अ नुमानाद्द्विभिन्नत्वमस्तुतेषामथापिते॥ निदर्शनमुपाश्रित्यतोषयंतिकंचिन्नरं॥ निदर्शनंचप्रत्यक्षंप्रत्यक्षंच निराकृतम्॥ २७६॥ अतोयंभगवान्वेदःसर्वदोषविवर्जितः॥ यद्वक्तितत्परिग्राह्यंराजशासनवत्सदा॥ २७७॥

स्यप्रत्यक्षस्याभावादनुमानंकथंचनापिनस्यादिति नन्वर्थापत्त्यादीनामस्तुप्रवृत्तिरितिचेत्तेकिमनुमानादभिन्नाभिन्नावानाद्यइत्याह अनु मानविभेदाइति येऽर्थापत्त्यादयोनुमानभेदास्तेत्रशास्त्रविषयेकथंमानंभवेयुः यतस्तेर्थापत्त्यादयःस्वयमनुमानाद्भिन्नाएवनभवंति अनु मानाभेदेहिअनुमानदोषास्तेषुप्राप्ताएवेतिभावः॥ २७५॥ नद्वितीयइत्याह अनुमानादिति तेषामर्थापत्त्यादीनामनुमानाद्भिन्नत्वमस्तुअथा पिएवमपितेस्वतंत्राःप्रमांनजनयंतिंकिंतुनिदर्शनंदृष्टांतमाश्रित्यपुरुषस्यबालस्येवकंचित्परितोषमात्रंजनयंति निदर्शनंतुप्रत्यक्षेंऽतर्भूतंप्रत्य क्षंतुनिरस्तमेवे ति ॥ २७६ ॥ फलितमाह अतइति अतःप्रमाणांतराविषयबोधकत्वादिति ॥ २७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविश्वासनिरासमुपसंहरति इंद्रियाणामिति अयंवेदःप्रकृतश्रुतिरूपःप्रतिदिनंइंद्रियाणांसदैवतानांसविषयाणांचसृष्टिंजागरादौसंहारं चशयनेप्राह ततःप्रभुणावेदेनोक्तत्वादेवात्रार्थेविश्वासंश्रद्धांहेगार्ग्यबालाकेव्रजधेहीत्यर्थः॥२७८॥सएषप्राणइत्यादिद्वितीयानखेभ्यइ त्यंतंवाक्यंतात्पर्यतोव्याकरोति आकाशेइतिदशभिः अनवच्छिन्नेचिदाकाशेआनंदात्मरूपेऽनुपपत्तिपूर्णेऽनुपपत्तिमतींपरिच्छिन्नत्वदृष्टिं माकृथामाकुरुष्व ननुकोममपरिच्छिन्नत्वदृष्टेःप्रसंगहेतुरतआकाशंविशिनष्टि स्वात्मदेहगेसुप्तोत्थापनादिवाक्यैर्देहवर्तितयोक्ते यएषोंत र्हृदयआकाशइतिवाजसनेयवाक्येनहृदयच्छिद्रगततयाचोक्ते तथाचैतादृशवाक्यानिदृष्ट्वाकस्यचिन्मंदमतेर्वागाद्यवच्छिन्नमपिमत्वा वक्तास्मिश्रोतास्मीत्याद्याकाराभ्रांतिरात्मनिप्रसज्यतेतांव्यावर्त्तयितुंसएषइत्यादिवाक्यमितिभावः॥ २७९॥ एतमभिप्रायमेवविशदय

इंद्रियाणामयंप्राहसृष्टिंसंहृतिमेवच॥ दिनेदिनेततोगार्ग्यविश्वासंव्रजसर्वदा॥ २७८॥ आकाशेनुपपत्तिं त्वंमाकृथाःस्वात्मदेहगे॥ हृदयाकाशगेप्येवमानंदात्मस्वरूपिणि॥ २७९॥ आकाशरूपआत्मायंवागादौच व्यवस्थितः॥ एकैकत्रयथाकाशःसशरावघटादिषु॥ अकृत्स्नमेनमात्मानंमावगच्छकदाचन॥ २८०॥ न चात्रहृदयांभोजेएकदेशेव्यवस्थितः॥ क्षुरोयथानापितस्यक्षुरपात्रेक्वचित्स्थितः॥ २८१॥ किंतुसर्वत्रजंतू नांबहिरंतरवस्थितम्॥ मनइंद्रियदेहादौकाष्ठेग्निमिवविद्धितम्॥ २८२॥

ति आकाशरूपइति अयमाकाशरूपआत्मावागादौएकैकत्रप्रत्येकमपिस्थितः यथाशरावेमृन्मयपानपात्रेघटादिषुचतद्वत् एनंवागाद्य वच्छिन्नमपिमूढाआत्मतयामन्यंतेत्वंतुतथानावगच्छेतिबोधयितुमग्निक्षुरदृष्टांतावुच्येतेइतिशेषः॥ २८०॥ ननुदृष्टांतयोरपिपरिच्छिन्नदृ ष्टिपरत्वंकिंनस्यादितिमंदाशंकांवारयितुंदृष्टांतेनविवक्षितार्थंदर्शयति नचात्रेत्यादिना यथाक्षुरोनापितस्यक्षुरपात्रेश्रुतिगतक्षुरधानपदेना धिकरणसाधनेनोक्तेक्वचिदेकदेशेस्थितस्तथात्रहृदयांभोजएकदेशेव्यवस्थितत्वेनात्मानविवक्षितइतिशेषः॥२८१॥ कथंविवक्षितइत्यत आह किंत्विति यथासर्वत्रस्थितमप्यग्निंकाष्ठउपलब्धियोग्यताभिप्रायेणकाष्ठेस्थितंजानंतितथासर्वत्रस्थितमात्मानंमनइंद्रियदेहादावु पलब्धियोग्यतयास्थितंविद्धीतिविवक्षितमिति॥ २८२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्स्फुटयन्क्षुरदृष्टांताशयमाह अयंहीतिद्वाभ्यां अयमात्मायद्धृदयांभोजनिष्ठबुद्धिरूपेएकदेशेनिरूपितः तन्निरूपणममुनैवाभिप्रायेणबोध्यं अमुनाकेन यत्क्षुरधानेनापितपात्रेक्षुरस्येवतत्रबुद्धावात्मनःप्रकाशःशीघ्रमुपलब्धिरुपजायते कस्माद्बुद्धेर्विशुद्धरूपत्वेनाभिव्यक्तिहेतुत्वादिति तत्रबुद्धावेवात्मानान्यत्रेत्यवगमायतुनतथोक्तइतिद्वयोःसंबंधः ॥ २८३ ॥ २८४ ॥ एवंहृदयेविशेषव्याप्तिप्रदर्शकंक्षुरदृष्टांतंव्याकृत्यशरीरेतदपेक्षयापकृष्टसामान्यव्याप्तिप्रदर्शकंद्वितीयंश्रुतिगतविश्वंभरपदोक्ताग्निदृष्टांतंविशदयति चतुर्विधानीतिचतुर्भिः अतउक्ताभिव्यक्त्यभिप्रायादेवमहेश्वरइत्युक्तइतिशेषः इतिकिं यच्चतुर्विधानिजरायुजादीनिदेहानिउत्पाद्यआनखाग्राच्चैतन्यरूपेणतेषुव्याप्तिमकरोदिति देहःक्लीवपुंसोरित्यमरः ॥ २८५ ॥ तत्रदृष्टांतमाह यथेति यथासर्वगतोपिवन्हिर्विशेषमालोच्यकाष्ठेष्वस्तीतिव्यवह्रियते एवमात्मापिचैतन्यप्रयुक्तंविशेषमालोच्यदेहेऽस्तीतिव्यवह्रियतइत्यर्थः ॥२८६॥ दृष्टांतदार्ष्टांतिकयोर्विशेषपदार्थमुपलब्धि

अयंहिहृदयांभोजेबुद्धावात्मानिरूपितः ॥ क्षुरधानादिदृष्टांतैरेकदेशेमहेश्वरः ॥ २८३ ॥ बुद्धेर्विशुद्धरूपत्वात्स्वकाशस्तत्रजायते ॥ अभिप्रायेणामुनैवतत्रनावगमायहि ॥ २८४ ॥ चतुर्विधान्यतोदेहान्युत्पाद्यायंमहेश्वरः ॥ चैतन्यव्याप्तिमकरोदाऽनखाग्राद्धिसर्वतः ॥ २८५ ॥ यथासर्वगतोवन्हिःकाष्ठेष्वस्तिविशेषतः ॥ एवंसर्वेषुदेहेषुसोस्तिबोधविशेषतः ॥ २८६ ॥ यथासर्वगतोवन्हिःकाष्ठेष्वेवोपलभ्यते ॥ ततःकाष्ठेप्रविष्टोयंकथ्यतेलौकिकैरिह ॥ २८७ ॥ एवमाकाशआत्मायंचैतन्येनोपलभ्यते ॥ आनखाग्राच्छरीरेषुप्रविष्टस्तेनकथ्यते ॥ ॥ २८८ ॥ मनइंद्रियदेहादौसंघातेविक्रियास्तिहि ॥ प्रज्ञाकापिनतस्मिन्हिहित्वाप्राज्ञंमहेश्वरम् ॥ २८९ ॥

योग्यतारूपमभिनयति यथासर्वेतिद्वाभ्यां काष्ठेषुअरणीप्रभृतिषुश्रुतौविश्वंभरकुलायपदोक्तेषु कुलायपदंनीडवाचकं ततःकाष्ठेषूपलब्धियोग्यत्वादेव ॥ २८७ ॥ एवमिति आकाशःपरिपूर्णआत्माचैतन्यरूपेणदेहेयतउपलभ्यतेतेनतत्रप्रविष्टइत्युक्तइति ॥ २८८ ॥ एवमुपाधिभ्योविवेचितआत्मैवसर्वेश्वरइतिबोधनेतत्त्वंपदार्थस्यस्वराड्भावेव्यवस्थापनपरंतमेतमित्यादिआत्मानंभुंजंत्यंतंवाक्यंव्याचष्टे मनइत्यादिद्वादशभिः मनइंद्रियदेहादिरूपेसंघातेविक्रियापरिणामिताप्रसिद्धैवतस्मिन्परिणामिनिमृदादिसमेप्रज्ञाकापिमुख्यागौणीवानवक्तुंशक्यायद्यपिचैतन्याविवेककालेतेषुगौणीआध्यासिकीप्रज्ञाऽऽसीद्विवेककालेतुसापिगतेत्याह हित्वेति प्राज्ञंस्वरूपभूतयाप्रज्ञयानित्ययुक्तंमहेश्वरंहित्वाविविच्येत्यर्थः ॥ २८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुबुद्धिरूपाप्रज्ञातेष्वस्तीत्याशंक्यांकितयाभवतितस्याबुद्धेरपिजडत्वादित्याह अज्ञेति अतःचिद्यतिरिक्तस्यजडत्वादेवमनइंद्रियदेहादौ जडेसर्वविकाराश्रयेयाकाचित्प्रकृताबुद्धिरूपाप्रज्ञास्तिसाप्यज्ञैवजडैव परिणामित्वाविशेषादितिभावः ॥ २९० ॥ यथात्मव्यतिरिक्तेषु ज्ञानंनास्तिएवंसुखमपिनास्तीत्याह एवमिति एतेषुआत्मव्यतिरिक्तेषु ॥ २९१ ॥ एवंसुखज्ञानाभ्यांराहित्येमनआदीनांनिश्चितेसतियत्ते षुज्ञानंसुखंवाभासतेतत्सर्वमात्मप्रसादलभ्यमित्याह सुखेति सुखरूपःप्रकाशरूपश्चायमानंदात्मापूर्णआत्मास्वतःसुखज्ञानाभ्यांवर्जिता न्मनःप्रभृतीन्स्वात्मसंपत्त्यास्वीयसुखादिसंपदाकरणभूतयासुखभागिनोज्ञानभागिनश्चकरोति यथाधनिकःस्वाश्रितानित्यर्थः ॥ २९२ ॥ एवंतात्पर्यार्थंप्रदर्श्यतत्रवाक्यंसमन्वितंकरोति एतमिति एतंस्वात्मसंपत्त्यापरान्सुखज्ञानभागिनःकुर्वाणमात्मानमानंदात्मकरूपत्वात्स

अज्ञातःप्रकृताप्रज्ञायाकाचिदिहलभ्यते ॥ मनइंद्रियदेहादौजडेसर्वविकारिणि ॥ २९० ॥ एवंसुखंचनैतेषु किंचिदस्तिकदाचन ॥ हित्वाप्राणंमहेशानमानंदात्मस्वरूपिणम् ॥ २९१ ॥ सुखप्रकाशरूपोयमानंदात्माम हेश्वरः ॥ मनइंद्रियदेहादीन्सुखज्ञानविवर्जितान् ॥ कुरुतेस्वात्मसंपत्त्यासुखज्ञानविभागिनः ॥ २९२ ॥ एतं सर्वप्रियतमंप्रज्ञानंदात्मरूपिणं ॥ नित्यबोधेनजानंतमनुजानंतिदेवताः ॥ २९३ ॥ सम्यग्वाविपरीतंवाजा नंतंधनिनंयथा ॥ अनुजानंतिमनुजास्तदीयाःसर्वतःस्थिताः ॥ २९४ ॥ धनिनंनविहायैतेस्वयंकृत्वापिकुर्व ते ॥ निश्चयंकार्यमुत्पन्नमनुजानंत्यतस्त्विमे ॥ २९५ ॥

र्वप्रियतमंदेवताअध्यात्माधिदैवभिन्नावागाद्याअनुसृत्यजानंतिव्यवसायंलभंतेनस्वतंत्राः सामर्थ्यहीनत्वादितिभावः ॥ २९३ ॥ तत्रदृ ष्टांतभागंविवृणुते सम्यगितिद्वाभ्यां यथाधनिनंअनेकैरुपजीव्यत्वेनप्रशस्तधनवंतंप्रकृतेर्भावप्रधानत्वेनश्रेष्ठत्ववद्वाचकश्रेष्ठिपदेनश्रुतिगते नोक्तंप्रभुंतदीयास्तत्संबंधिनःश्रुतौस्वपदेनोक्तास्तस्यसर्वतःपरिपार्श्वेस्थितामनुजास्तमनुसृत्यजानंतिनिश्चयंकुर्वंतेइत्यर्थः ॥ २९४ ॥ ननुबाह्यकार्येआश्रितानांप्रभुपरतंत्रत्वेपिनिश्चयेकथंपरतंत्रताइत्याशंक्यप्रभुनिश्चयंविनाआश्रितनिश्चयस्याकार्यक्षमत्वेनाऽसत्प्रायत्वा दित्याह धनिनमिति एतेआश्रितमनुजाःकार्यविशेषानुकूलंनिश्चयंस्वयंकृत्वापिधनिनंविहायोपेक्ष्यउत्पन्नंप्रसक्तमपिकार्यंनकुर्वंतेकिं तुधनिकनिश्चयंप्रतीक्षंतेऽतस्तेषांनिश्चयस्याकार्यक्षमत्वादिमेआश्रिताधनिनमनुजानंतीतिव्यवह्रियंतेइतिसंबंधः ॥ २९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्ष्टांतिकेयोजयति तथैवेति तथावागाद्यादेवामिलिताःसमुदिताःसंतःअपिशब्दात्प्रत्येकंवास्थिताःयदिदंकार्यमवश्यकर्तव्यमिदमकार्यमितिआदिपदेनइदंवक्तव्यमिदमवक्तव्यमित्यादिरूपेणजानंतितत्सर्वंपरमात्मानमनुसृत्यैवजानतेइत्यन्वयः अत्रदृष्टांतेआश्रितानांधनिकज्ञानात्पृथक्ज्ञानानिदार्ष्टांतिकेतुआत्मज्ञानमेववागाद्यवच्छिन्नंनानेव तस्यभासासर्वमिदंविभातीतिश्रुत्यंतरात् इतिविशेषसत्वेपिअनुजानंतीतिपदेनद्विविधज्ञानसंग्रहात्श्लेषेणसाम्यमितिबोध्यम् ॥ २९६ ॥ एवंज्ञानेप्राधान्यबोधकंदृष्टांतंविशदीकृत्यभोगेसुखसाक्षात्काररूपेप्राधान्यप्रदर्शकंतथथेत्यादिनोक्तंदृष्टांतंविशदयति सुखीति यथासुखीबहुविधभोगसाधनसंपन्नोवैश्योवणिक्भृत्यप्रभृतिस्वकीयजनैःसहैवभुंक्तेनतुकेवलः चोरादिभयात् एवमात्मापीति अत्रापिपूर्ववत्श्लेषेणसाम्यंबोध्यं एतद्दृष्टांतेनात्मनउपहितस्यैवभोक्तृतानतुकेवलस्येतिसूचितम् ॥ २९७ ॥ भोक्तृत्वस्यमिथ्यात्वंस्फुटयितुंवागादीनामपिकेवलानांनभोक्तृत्वमितिप्रदर्शकंयथावास्त्वाइत्यंशंविवृणोति

तथैवपरमात्मानंजानंतमनुजानते ॥ कार्याकार्यादिकंसर्वंवागाद्यामिलिताअपि ॥ २९६ ॥ सुखीवैश्योयथाभुंक्तेभृत्याद्यैःस्वजनैःसह ॥ एवमात्मापिविषयान्भुंक्तेवागादिभिःसह ॥ २९७ ॥ वैश्यस्यपुत्रावैश्येनविनायद्वन्नभुंजते ॥ वागाद्याअपितद्वत्तेआत्मनासहभुंजते ॥ २९८ ॥ एवंहिहृदयाकाशःप्रोक्तःप्राज्ञोमहेश्वरः ॥ संघातेनैकतांप्राप्तोदुर्ज्ञेयोधीधनैरपि ॥ २९९ ॥

वैश्यस्येति वैश्यस्यधनिनःपुत्ररूपाःसंबंधिनोयथावैश्यंविनाअन्नंनभुंजते तद्वत्तेवागाद्याअपिआत्मनासहैवभुंजतेकेवलास्तुनभोक्तारइतियावत् तथाचभोक्तृत्वस्यवास्तवाश्रयालाभान्मिथ्यात्वंस्फुटमितिभावः अत्रव्याख्येयश्रुतेरत्रार्थेसमन्वयस्तुस्वकीयायद्भुंजंतितद्धनिनमेवधनद्वाराभोग्यभावमापन्नंभुंजंतितितंविनातुतेषांनभोक्तृत्वमित्यर्थेनबोध्यमिति ॥ २९८ ॥ ननुभोक्तृत्वरूपेणोपसंहारेआत्मनःप्रतिपादनंकिमर्थमितिचेत्तटस्थत्ववारणेनमहावाक्यार्थसूचनायेत्याह एवमितिद्वाभ्यां एवमुक्तान्वयव्यतिरेकाभ्यामभिधानेनहृदयाकाशःशुद्धतयायउक्तःसएवमहेश्वरःसर्वसंघाताधिपतिरितिप्रोक्तोभवति अन्यथातुअयमात्मासंघातेनएकतांतादात्म्याध्यासंप्राप्तःसन्बुद्धिमद्भिरपिदुर्ज्ञेयइति अयमर्थः श्रुतावपितमेतमितितत्पदेनहृदयाकाशंपरामृश्यप्राधान्यविधानेनसूचितमितिबोध्यः ॥ २९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यदुर्ज्ञेयतांतवमहामतेर्विभ्रमएवस्फुटयतीत्याह ततइति ततोदुर्ज्ञेयत्वात् ननुसंघातेदुर्ज्ञेयश्चेदात्मातर्हिसंघाताद्बहिःकुत्रचिन्निरूपणी
यस्तत्रैवाहंप्रणिधास्यामीत्याशंकांवारयति माकुथाइत्यादिना त्वमन्यत्रविज्ञानायाण्वपियथाभवतितथाखेदंखेदप्रदमुत्साहंमाकुथाः
तत्रहेतुंन्यायविरोधंदर्शयति कोग्निमिति इंधनसंसृष्टमुपलब्धिस्थानभूतेनेंधनेनसंबद्धमग्निंविहायान्यंतदसंस्पृष्टंकःप्रतिपद्यतेप्राप्नोतिनको
॥२४॥ पीतियावत् तथाचाग्नेरिंधनवदात्मनउपलब्धिस्थानंसंघातंविहायतदन्वेषणंव्यर्थमितिभावः तदुक्तंभागवतेपि त्वामात्मानंपरंमत्वापरमात्मान
मेवच आत्मापुनर्बहिर्मृग्यआहोऽज्ञजनताज्ञतेति ॥३००॥ प्रश्नत्रयेणोक्तमर्थजातंसंगृह्णाति हृदयाकाशइति हृदयाकाशएवसर्वस्यात्मा
शयनस्यशयानस्यचाधारतयोक्तः आगच्छतश्चागमनस्यावधितयोक्तइति॥३०१॥शयानादिस्वरूपमभिनयति शयानइति शयनशब्द

ततोगार्ग्याऽसिविभ्रांतोमाकुथाःखेदमण्वपि ॥ कोग्निमिंधनसंसृष्टंविहायान्यंप्रपद्यते॥ ३०० ॥ हृदयाका
शआत्मायमाधारोवधिरेवच ॥ शयनस्यशयानस्यतद्वदागच्छतोपिच ॥ ३०१ ॥ शयानःकरणग्रामःशय
नंबुद्धिसंश्रयम् ॥ आगंतापिसएवस्यात्सर्वोधिषणयासह ॥ स्वप्नंजागरणंवापिप्रोक्तमागमनंबुधैः ॥ ३०२
प्राणप्रज्ञेमयायस्त्वंहृदयाकाशरूपधृक् ॥ उक्तःप्रतर्दनायेममादाविंद्रोजगादह ॥ ३०३॥

स्यकारणलयपरत्वात्स्वमसंज्ञशयनस्यकर्त्ताकरणग्रामोबुद्धिव्यतिरिक्तः द्वितीयंसुषुप्तिसंज्ञंशयनंतुबुद्धिसंश्रयंबुद्ध्याश्रितंतत्कर्तृत्वंबुद्धेरे
वेतियावत् यद्यपिपूर्वंविज्ञानमयस्यकर्तृत्वमुक्तंतथापिविज्ञानमयशब्दस्यबुद्धिविशिष्टचिद्वाचकत्वेनविशेष्येकर्तृत्वबाधेविशेषणेपर्यव
सानस्यसविशेषणेहीतिन्यायसिद्धत्वादेवमुक्तमितिबोध्यम एवंसतिआगंताआगमनकर्त्तापिसकरणग्रामएवबुद्धिसहितोबोध्यइति
॥३०२॥अध्यायद्वयोक्तज्ञानस्यफलंपूर्वमिंद्रेणलब्धमितिप्रदर्शकंसयावदित्यादिवाक्यंव्याकर्त्तुंपूर्वाध्यायेनैकवाक्यतांदर्शयति. प्राणेति
प्राणश्चप्रज्ञाचतयोःसमाहारःप्राणप्रज्ञंतस्मिन्प्राणप्रज्ञेउपाधौहृदयाकाशरूपआत्मायस्तेमयोक्तः सुषुप्तौलोकदृष्ट्याप्राणावशेषात्प्राणोपा ॥२४॥
धिकस्यविज्ञानमयविशेषणेनवृत्त्युपाधिकस्यचाऽभिधानात् इममेवात्मानमादौपूर्वमिंद्रउवाचेति ॥ ३०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदिति एतस्यात्मनःप्रजापत्युपदेशाद्यद्विज्ञानंतद्बलेनमहानिंद्रःपूर्वंपुराअसुरान्जिगायजितवान् तथान्यायवर्जितान्ब्राह्मणान्त्वाष्ट्रादीन्यतींश्चहतवान् न्यायवर्जितइतिप्रथमांतपाठेउत्तरत्रासुरहननकर्त्रासंबंधः छलेनतेषांहननस्यपूर्वाध्यायउक्तेरिति ॥ ३०४॥ हत्वेति भूरादिभेदेनजाग्रदादिभेदेनवात्रिविधोलोकस्त्रिलोकस्तस्यसदोपद्रवकरणशीलानसुरान्हत्वासर्वेषांदेवानामतीवश्रेष्ठतांप्राप्तःश्रेष्ठतामभिनयति निरपेक्षइति युद्धादिरूपकार्येइतरनिरपेक्षःबलिनांप्रथमगण्यश्चबभूवेत्युत्तरादपकर्षः ॥ ३०५ ॥ बभूवेति यतोबलनाम्नोऽसुरस्यभेदकइत्यपिपूर्वत्रैवहेतुतयासंबध्यते स्वेनराजतेइतिस्वराट्तस्यभावइतिव्युत्पत्तिकस्वाराज्यपदार्थंसंगृह्णाति राजमानइत्यादिना ॥ ३०६॥ आधिपत्यपदार्थमुपादत्ते अपेक्षेति इतरानपेक्षःस्वामीअधिष्ठायपालयितेत्यर्थः तथाइत्यादिचरमवाक्यंव्याकरोति शक्रइति शक्रोयथा

एतद्विज्ञानतःपूर्वंजिगायेंद्रोऽसुरान्महान् ॥ ब्राह्मणांश्चयतींस्तद्वद्धतवान्न्यायवर्जितान्॥ ३०४॥ हत्वासुरांस्त्रिलोकस्यसदोपद्रवकारिणः॥ देवानामपिसर्वेषांश्रेष्ठश्चातीवदेवराट् ॥ निरपेक्षःसदाकार्येयुद्धादौप्रथमोबली॥ ३०५॥ बभूवबलभित्पूर्वंराजमानःस्वतेजसा॥ गुणकीर्त्यादिभिर्युक्तोदेवानांप्रथमोभवत्॥ ३०६॥ अपेक्षारहितश्चैवस्वामीशक्रोयथातथा॥ अपरोप्यात्मविज्ञानाद्भवत्येवनसंशयः॥ ३०७॥ इंद्रोयावदिदंज्ञानंनाप्तवांस्तावदेवहि॥ असुराःपरिभूयैनंत्रिलोक्याःपतयोऽभवन्॥ ३०८॥ कौषीतकिरिदंवाक्यमुक्त्वातूष्णींबभूवह॥ सत्यस्यसत्यमित्येतद्ब्रह्मनामेतिसार्थकम्॥ नोक्तवान्भगवान्सूर्यःसर्वमेतदुवाचह॥ ३०९॥

श्रेष्ठत्वादिमानभवत्तथान्योप्युक्तविधात्मज्ञानाद्भवतीति ॥ ३०७ ॥ सयावदितिप्रथमांशंविवृणुते इंद्रइति इंद्रस्यप्रजापतेरुक्तात्मज्ञानलाभात्पूर्वमेवासुरास्तंजित्वात्रिलोकीराज्यंकृतवंतः ज्ञानानंतरंतुइंद्रएवाधिपतिरभवदितियावत् ॥ ३०८ ॥ पदद्वयाभ्यासेनसूचितामुपनिषत्समाप्तिंदर्शयन्नुत्तराध्यायजिज्ञासांशिष्यस्योत्थापयति कौषीतकिरितित्रिभिः इदंवेदेऽत्यंतमभ्यस्तंवाक्यमुक्त्वातूर्ष्णीभावंमौनंजगामेति कस्यकथनप्रसंगेमौनंकृतमतआह सत्यस्येति ब्रह्मनिरूपणानंतरंतस्यरहस्यंनामापिवक्तव्यमासीत्तच्चसत्यस्यसत्यमित्याकारंसत्यस्यस्थूलसूक्ष्मप्रपंचस्यप्राणस्वरूपस्यसत्यमधिष्ठानभूतंपारमार्थिकंरूपमित्यर्थकमेतन्नोक्तवान् तर्हिएतन्नामसहितंब्रह्मनिरूपणंकेनकृतमतआह भगवानिति वाजसनेयकेइतिशेषः ॥ ३०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वपदार्थंविशदयति अजातेति पूर्वार्द्धेनकस्मैप्राहातआह मुनयेइति कीदृशमेतदात्मबोधनंआत्मबोधसाधनमिति ॥ ३१० ॥ कौषीतकिब्राह्मणोपनिषदोध्यायचतुष्टयप्रतिपाद्यप्रदर्शनपूर्वकंमौनेकारणमाह पर्यंकेति प्रथमेऽध्यायेसांगोपांगेप्राणरूपपर्यंकेस्थितस्यब्रह्मण उपासनरूपाविद्योक्ताद्वितीयेप्राणविद्याःसांगाः कथितास्तृतीयचतुर्थयोस्तुव्याख्यातविधयानिर्गुणब्रह्मविद्यानिरूपिताइत्येवंपर्यंकप्राण विद्यायाएतदंताएषाअजातशत्रुप्रोक्ताविद्याअंतेयासामेतादृशीर्विद्याःसमुदीरयन्सन्कौषीतकिःशाखाप्रवक्ताइंद्राद्भयेनउपरामंसमाप्तिं

अजातशत्रुणाप्रोक्तमनुक्तंचकृपान्वितः॥ मुनयेयाज्ञवल्क्यायस्वशिष्यायात्मबोधनम्॥ ३१०॥ पर्यंकप्राण विद्यायाएतदंताउदीरयन्॥ कौषीतकिस्ततोभीतइंद्रादुपरराम ह॥ ३११ ॥ इतिश्रीपरमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणश्रीशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेकौषीतकिसारार्थप्रकाशे गार्ग्याजातशत्रुसंवादोनामतृतीयोऽध्यायःसमाप्तः॥ ३॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

कृतवान् एतदुत्तराध्यायेस्फुटीभविष्यतीत्यलं ॥ ३११ ॥ ज्ञानात्सुखाच्चसर्वत्रसान्निध्यंयस्यभासते सर्वांतरायदेवायतस्मैपूर्णात्मनेनमः ॥ १ ॥ इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतौआत्मपुराणटीकायांसत्प्रसवाख्यायांतृतीयोध्यायःसमाप्तः॥ ॥ अध्याय ॥ ३ ॥ ॥ ग्रंथसंख्या ॥ १३०० ॥ ॥ श्रीकृष्णार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे तृतीयोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे चतुर्थोऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥नमःपूर्णायदेवायवेदाचार्यादिरूपिणे यस्यांतरस्यांतरायगणंशमयतिस्मृतिः॥ १॥ एवमृग्वेदोपनिषदौव्याख्यायाथयजुर्वेदोपषेनिंदामर्थंसन्नभिरध्यायैःप्रपञ्चयिष्यंस्तत्रत्रिभिर्बृहदारण्यकार्थंस्फुटयितुंतत्रशिष्यजिज्ञासांपूर्वमुत्थापितांदर्शयति एवमितिचित्रिभिः उक्तमाख्यानंश्रुत्वाऽतिविस्मितःसन्शिष्यआदित्येनयाज्ञवल्क्यायकथितांविद्यांप्रष्टुकामोपितांसाक्षान्नापृच्छत्किंतुइंद्रात्कौषीतकिर्भीतइतिगुरुमुखात्श्रुत्वासंशयाविष्टहृदयःसन्निदंभयनिमित्तमेवपप्रच्छयतोतिबुद्धिमान्भयनिमित्ताभिधानद्वारैवैतेसर्वंवदिष्यंतीतितिगुरूणामाशयविदितिद्वयोःसंबंधः ॥ १॥ २ ॥ प्रश्नमभिनयति इंद्रइति हेब्रह्मन्इंद्रःकिंक्रूरंकर्माऽकरोत् यतइंद्रकृतात्क्रूरकर्मणोहेतो

श्री॥ एवंविचित्रमाख्यानंश्रुत्वाशिष्योतिविस्मितः॥ आदित्यकथितांविद्यांप्रष्टुकामोविहायतां॥ १ ॥ इंद्रात्कौषीतकिर्भीतइतिश्रुत्वातिबुद्धिमान्॥ संशयाविष्टहृदयःपप्रच्छेदंगुरुंप्रति ॥ २ ॥ इंद्रःकिमकरोद्ब्रह्मन्यतःकौषीतकेर्भयं ॥इंद्राद्भूद्विचित्रंतत्श्रोतुमिच्छाम्यहंगुरो॥ ३ ॥ एवमुक्तेगुरुश्चित्रांकथांमंत्रसमीरिताम् ॥ वक्तुकामोथवेदोक्तांसस्मारगुरुपद्धतिम्॥ ४॥

रिंद्रसकाशाद्भयंकौषीतकिसंज्ञस्यमुनेरभूदिति तद्विचित्रमाख्यानंश्रोतुमिच्छामीति ॥३॥ उत्तरमवतारयति एवमिति उक्तेपृष्टेसतिचित्रामद्भुतांमंत्रेणवंशव्याख्यानानंतरंप्रदर्शयिष्यमाणस्वरूपकेणसमीरितांस्फुटमभिहितांदध्यङ्ङश्वींद्रसंबंधिनींकथांवक्तुकामोगुरुर्वेदोक्तांमधुकांडयाज्ञवल्क्यकांडखिलकांडानामंतेषुकीर्तितांगुरुपद्धतिविद्यावंशपर्वाणांपरंपरांसस्मार तत्स्मरणस्याध्ययनांगतायाभाष्यकारेरुक्तेःतथाचमधुकांडवंशब्राह्मणेभाष्यं मंत्रश्चायंस्वाध्यायार्थोजपार्थश्चेति अयंब्राह्मणरूपःवंशस्वाध्यायःस्वाधीनोच्चारणक्षमत्वेसत्यध्ययनंजपश्चप्रत्यहमावृत्तिरितितद्व्याख्यातारः मधुकाण्डादिस्वरूपंतुपूर्वाध्यायेदर्शितं ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रवंशेषुमधुकांडयाज्ञवल्क्यकांडयोरंत्यौपुंल्लिंगनामघटितत्वात्पुंवंशावित्याख्यायेते अंत्यस्तुस्त्रीनामघटितत्वात्स्त्रीवंशइतितत्रांत्यस्यस वांतेकीर्तनेनसर्वोपकारकतासूचनात्प्राधान्यंसर्वसंमतंवंशत्रयवर्तिनामृषीणामभेदंकेचिद्वदंतिकेचिच्च भेदंतत्राभेदस्यप्रतियोगिसापेक्षाद्भे दादभ्यर्हितत्वेनैकस्यब्रह्मणएवाचार्यमूर्त्यावस्थानस्यसिद्धांतितत्वेनचाभेदपक्षेणतावद्वंशंव्याकुर्वन्स्त्रीवंश्यानामासुरिपर्यंतानामासुरिपर्यं तैरितरवंश्यैर्बहुभिरभेदोभूयसामनुग्रहोन्याय्यइतिन्यायेनसंप्रदायेनचयथायथासिद्धस्तथातथादर्शयति पौतिमाषीत्यादिना पूतिमाष स्यापत्यंस्त्रीपौतिमाषी यञंतान्ङीप् एषासर्वेषांनोस्माकंविद्याधिकारिजनानांजननीमातृसमागुरुजननीत्वात् तदेवाह यस्याइति यस्याः पौतिमाष्याःपुत्रःस्त्रीवंशस्यादौपौतिमाषीपुत्रपदेनोक्तः पुंवंशयोश्चपौतिमाष्यपदेनोक्तः लोकेद्विजेभ्योमधुकांडाद्युक्तंज्ञानंददाविति पौति माष्यपदेदौहित्रेऽपत्यत्वोपचारेणयञ्बोध्यः ॥ ५ ॥ एतमिति एतंपौतिमाषीपुत्रंवंशब्राह्मणेषुप्रथमांततयैवोक्तमारभ्यउत्तरोत्तरंयेगुरवः पंचम्यंततयावंशेषूक्तावंशपर्वनिभाब्रह्माहिरण्यगर्भस्तत्पर्यंतास्तांस्तेशिष्यायकथयामिततस्तेषांश्रवणात्प्रतिबंधकदुरितोपशमेनसर्वमर्थं

पौतिमाषीजगत्यस्मिन्सर्वेषांजननीहिनः॥ यस्याःपुत्रोपिदुष्प्रापमदाज्ज्ञानंद्विजन्मनाम्॥ ५॥ एतमारभ्य सर्वांस्तान्गुरून्ब्रह्मावधीन्हिते॥ कथयामिततःसर्वंज्ञातुंशक्तोभविष्यसि॥ ६॥ सहिकात्यायनीपुत्राद्विद्यांगौ पवनादगात्॥ भारद्वाज्यास्तुतनयःपौतिमाष्योपरोभवत्॥ तस्माद्गौपवनःसर्वांविद्यामेतामवाप्तवान्॥ ७॥

ज्ञातुंशक्तोभविष्यसि तदनुसंधानस्यस्वाध्यायार्थतायाउक्तेः यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मन इतिश्रुतेश्चेतिभावः ॥ ६ ॥ सहीति सपौतिमाषीपुत्रःस्त्रीवंशेकात्यायनीपुत्रपदोक्तात्पुंवंशयोर्गौपवनपदोक्ताद्गुरोर्विद्यामगात्प्राप्तइत्यर्थः एवमग्रेपिपुत्रपर्यायांतंनामस्त्रीवंशगतमितरत्तुपुंवशगतमितिबोध्यम् भारद्वाज्याइतिउक्तोगौपवनःकात्यायनीपुत्रोभारद्वाजीपुत्राभिन्ना त्पौतिमाष्यात्पूर्वोक्तपौतिमाष्यभिन्नादेतांविद्यांप्राप्तइत्यर्थः अत्रयद्यपिस्त्रीवंशेकात्यायनीपुत्रस्यगुरुर्गौतमीपुत्रस्तस्यगुरुर्भारद्वाजीपुत्रइ तिप्रायःपुस्तकेषुपठ्यतेतथापिपुंवंशयोर्गौतमीपुत्रस्यसमसंख्याकनामांतरानुपलंभाद्विद्यमाननाम्नांसरूपाणांबहूनामभेदस्यएवमेवाभि धानेसुबोधतामपिसंधायगुरोःपरमगुरोश्चाभेदस्यलोकेपिप्रसिद्धत्वात्सर्वेषामेकरूपतायाउपसंहारेवक्ष्यमाणत्वाच्चकात्यायनीपुत्रानंतरं भारद्वाजीपुत्रएवोक्तइतिबोध्यं एवमेववक्ष्यमाणंकौशिकीपुत्रेतच्छिष्यकात्यायनीपुत्रांतर्भावोमंतव्यः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाराशरीसुतइति भारद्वाजीसुतःपौतिमाप्यस्तुपाराशरीसुताद्गौपवनात्पूर्वोक्तगौपवनभिन्नादिमांविद्यांसंप्राप्तइति ॥ ८ ॥ औपस्वस्तीति उपस्वस्तेर्गोत्रापत्यंस्त्रीऔपस्वस्ती अणंतात्ङीप् तस्याःपुत्रःकौशिकइतिपुंवंशयोर्यःप्रसिद्धस्तस्मात्पाराशरीसुतोविद्यांप्राप्तवान् ॥ ९ ॥ पाराशरीति उक्तःकौशिकस्तुअपरपाराशरीसुतात्कौंडिन्यनाम्नोविद्यांप्राप्तइति ॥ १० ॥ कौशिकीतनयइति पाराशरीसुतःकौंडिन्यस्तुकौशिकीपुत्रात्शांडिल्याद्विद्यांप्राप्तइति अत्रकौशिकीपुत्रेकात्यायनीपुत्रांतर्भावउक्तः ॥ ११ ॥ शांडिल्यस्येति उक्तस्यकौशिकीतनयाभिन्नशांडिल्यस्यकौशिकोगौतमश्चएतौद्वौपुंवंशोक्तौगुरूअभूतां स्त्रीवंशेतुकौशिकआलंबीपुत्रत्वेनोक्तः गौतमस्तुवैयाघ्रपदीपुत्रत्वेनोक्तः

पाराशरीसुतःकश्चित्पुनर्गौपवनोपरः ॥ अभूत्तस्मात्समाप्तोसौभारद्वाजीसुतस्त्विमाम् ॥ ८ ॥ औपस्वस्तीसुतःकश्चित्कौशिकोनामवैद्विजः ॥ तस्माद्गौपवनोविद्यांप्राप्तवानखिलामिमाम् ॥ ९ ॥ पाराशरीसुतःकश्चित्कौंडिन्योनामतोभवत् ॥ कौशिकस्तुततोविद्यांप्राप्तवानखिलामिमां ॥ १० ॥ कौशिकीतनयःकश्चित्शांडिल्योनामतोभवत् ॥ कौंडिन्यस्ततएवेमांविद्यामधिजगामह ॥ ११ ॥ शांडिल्यस्यगुरूस्यातामुभौकौशिकगौतमौ ॥ आलंब्याश्चतथावैयाघ्रपद्यास्तनयौहितौ ॥ १२ ॥ आलंब्यास्तनयोयोसौकौशिकोनामविश्रुतः ॥ ब्रह्मप्रसादतःसोयंविद्यामेतामवाप्तवान् ॥ १३ ॥ वैयाघ्रपद्यास्तनयोगौतमोनामनामतः ॥ कापीपुत्रादाग्निवेश्यात्काण्वीपुत्राच्चलब्ध्वान् ॥ १४ ॥ काण्वीपुत्रःकौशिकवल्लुब्ध्वान्हिस्वयंभुवः ॥ उग्रेणतपसात्यर्थंपरितोष्यमहेश्वरम् ॥ १५ ॥

व्याघ्रपदोगोत्रापत्यंस्त्रीवैयाघ्रपदी यञंतान्ङीप्ऐजागमश्च ॥ १२ ॥ आलंब्याइति आलंबीपुत्रःकौशिकस्तुतपसाराधितब्रह्मानुग्रहादेवविद्यांप्राप्तइत्यर्थः ॥ १३ ॥ वैयाघ्रपद्याइति वैयाघ्रपदीपुत्रोयोगौतमोनामसनामतआग्निवेश्यात्कापीपुत्राभिन्नात्तथाकाण्वीपुत्राद्विद्यांप्राप्तः काण्वीपुत्राभेदयोग्यःपुंवंशयोर्नास्तीतिनोक्तः कपेर्गोत्रापत्यंस्त्रीकापी यञन्तान्ङीप् ॥ १४ ॥ काण्वीति काण्वीपुत्रस्तुस्वयंभुवोब्रह्मणएवविद्यांप्राप्तः किंकृत्वा तपसापरमेश्वरमाराध्य ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २॥ आत्रेयीति काषीपुत्रआग्निवेश्यस्तुआत्रेयीपुत्राभिन्नादानभिम्लातात्शांडिल्याच्चद्वाभ्यांगुरुभ्यामिमांविद्यांप्राप्तइत्यर्थः शांडिल्याभे दयोग्यःस्त्रीवंशेनास्तीतिनोक्तइतिबोध्यम् ॥ १६॥ शांडिल्यइति आनभिम्लातशांडिल्ययोरन्यतरःशांडिल्यस्तुब्रह्माणमीश्वरंमुक्त्वाऽन्य स्माद्विद्यांनाप्तवानिति ॥ १७ ॥ आनभिम्लातइति अयंमहानात्रेयीपुत्रआनभिम्लातएवयाज्ञवल्क्यकांडेगोत्रतोगार्ग्यइतीरितःसन् भिन्नादानभिम्लाताद्गौतमीतनयाभिन्नाद्याज्ञवल्क्यकांडेगार्ग्यपदोक्तादिमांविद्यांप्राप्तः गार्ग्योगौतमीतनयआनभिम्लातस्तुभारद्वाजी सुताभिन्नाद्गौतमादिमांविद्यांप्राप्तइतीतिद्वयोःसंबंधः अत्रतृतीयानभिम्लातोद्वितीयेन्तर्भावितइतिबोध्यं ॥ १८ ॥ १९ ॥ पाराशर्याइ ति भारद्वाजीसुतोगौतमस्तुपाराशरीपुत्राभिन्नात्सैतवात्प्राचीनयोग्याच्चआभ्यांमधुकांडोक्ताभ्यामिमांविद्यांप्राप्तः चतुर्थपादस्योत्तरश्लो

आत्रेयीपुत्रतःप्राप्तआनभिम्लाततस्त्विमाम्॥ शांडिल्याच्चाग्निवेश्योयंक्लेशेनमहताद्विजः॥ १६॥ शांडिल्यो जन्मतःसिद्धःकाण्वीतनयवन्महान्॥ अन्यस्मान्नाप्तवान्विद्यांमुक्त्वाब्रह्माणमीश्वरम्॥ १७॥ आनभिम्ला तएवायंगार्ग्योगोत्रतईरितः॥ गौतमीतनयाद्भिन्नादानभिम्लाततस्त्विमाम्॥ १८॥ गार्ग्याद्विप्राप्तवान्विद्या मात्रेयीतनयोमहान्॥ भारद्वाजीसुताद्गार्ग्योगौतमादाप्तवानिमाम्॥ १९ ॥ पाराशर्यास्तनयतःसैतवाद्गौत मस्त्विमाम्॥ प्राचीनयोग्यतश्चापतावुभौचसहोदरौ ॥ २० ॥ वात्सीपुत्रादिमांविद्यांलब्ध्वंतौतपस्विनौ ॥ पाराशर्यायणाख्याद्विपाराशर्यान्महात्मनः॥ २१ ॥ पाराशरीतनयतःपाराशर्योमहामनाः॥ भारद्वाजादिमां विद्यांप्राप्तोगार्ग्यायणाख्यतः॥ २२॥ वार्कारुणीतनयतस्तद्वदुद्दालकायनात्॥ भारद्वाजाद्गौतमाच्चप्राप्तोगा र्ग्यायणस्त्विमाम्॥ २३॥

केनसंबंधः॥२०॥ वात्सीति तौसैतवप्राचीनयोग्यौतुतपस्विनौसोदरभ्रातरौवात्सीपुत्रादिमांविद्यांप्राप्तौ कीदृशाद्वात्सीपुत्रात् मधुकांडेपा राशर्यपदोक्तात्याज्ञवल्क्यकांडेपाराशर्यायणपदेनोक्तादित्यर्थः ॥ २१ ॥ पाराशरीतनयतइति पाराशर्यायणाख्यःपाराशर्यस्तुपारा शरीपुत्राद्विद्यांप्राप्तः कीदृशात्पाराशरीपुत्रात् मधुकांडेभारद्वाजपदोक्ताद्याज्ञवल्क्यकांडेगार्ग्यायणसंज्ञात्॥ २२ ॥ वार्कारुणीति भारद्वा जोगार्ग्यायणस्तुवार्कारुणीपुत्रात्तथागौत्तमाद्वाभ्यांविद्यांप्राप्तः कीदृशाद्वार्कारुणीपुत्रात् याज्ञवल्क्यकांडेउद्दालकायनपदोक्तान्मधुकां ॥ २॥ डेभारद्वाजपदेनोक्तादिति वृकारुणस्यगोत्रापत्यंस्त्रीवार्कारुणी ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भारद्वाजस्त्विति गार्ग्यायणगुरुद्वयमध्येभारद्वाजस्तुसाक्षाद्ब्रह्मणएवविद्यांप्राप्तः द्वितीयोगुरुर्गौतमस्तुअपरवार्कारुणीपुत्राद्याज्ञवल्क्य कांडेजाबालायनेतिशब्दितान्मधुकांडेभारद्वाजपदोक्ताद्विद्यांप्राप्तः ॥ २४ ॥ आर्तेति गौतमगुरुर्भारद्वाजस्तुआर्तभागीपुत्राद्याज्ञ वल्क्यकांडेमाध्यंदिनायनशब्देनोक्तान्मधुकांडेपाराशर्यपदोक्तादिमांविद्यांप्राप्तः ॥ २५ ॥ माध्यंदिनायनइति उक्तोमाध्यंदिनाय नस्तुशौंगीपुत्राद्याज्ञवल्क्यकांडेसौकरायणेतिप्रोक्तात्तेजस्विनोमुनेर्विद्यांप्राप्तः मधुकांडेतुतत्तुल्यसंख्योनास्तीतिनोक्तः ॥ २६ ॥ सांकृ तीति अयंशौंगीतनयःसौकरायणस्तुसांकृतीपुत्रात्काषायणाद्याज्ञवल्क्यकांडीयादेवेमांविद्यांप्राप्तः ॥ २७ ॥ आलंबायनीति महान्मु

भारद्वाजस्त्विमांविद्यांब्रह्मणःप्राप्तवान्मुनिः॥ वार्कारुण्यास्तनयतोजाबालायनशब्दितात्॥ भारद्वाजाद्गौत माख्योविद्यांप्रापमहामुनिः॥ २४॥ आर्तभागीतनयतःप्राप्तोमाध्यंदिनायनात्॥ पाराशर्यादिमांविद्यांभार द्वाजोमहामुनिः॥ २५॥ माध्यंदिनायनःप्राप्तःशौंगीतनयतस्त्विमाम्॥ सौकरायणसंज्ञाद्धिमुनेःसंदीप्ततेज सः॥ २६॥ सांकृतीतनयात्प्राप्तोविद्यांकाषायणादिमाम्॥ सौकरायणसंज्ञोयंमुनिर्धर्मविशारदः॥ २७॥ आलंबायनीतनयात्सायकायनशब्दितात्॥ बैजवापायनात्प्राप्तोमुनिःकाषायणोमहान्॥ २८॥ आलंबीत नयात्प्राप्तोविद्यांतांकौशिकायनेः॥ बैजवापायनाख्यस्तुमुनिधर्मपरायणः॥ २९॥ जायंतीतनयात्प्राप्तोवि द्यांतांघृतकौशिकात्॥ कौशिकायनिरित्युक्तोमुनिर्धर्मरतःसदा॥ ३०॥ मांडूकायनीतनयात्पाराशर्यायणा भिधात्॥ घृतकौशिकनामायंविद्यामेतामवाप्तवान्॥ ३१॥

निःकाषायणस्तुआलंबायनीपुत्राद्याज्ञवल्क्यीयेसायकायनशब्दितान्मधुकांडेबैजवापायनसंज्ञिताद्विद्यांप्राप्तः ॥ २८ ॥ आलंबी ति बैजवापायनाख्यस्तुमुनिःआलंबीतनयाभिधानात्कौशिकायनेःपुंवंशयोरुक्ताद्विद्यांप्राप्तः ॥ २९ ॥ जायंतीति कौशिकायनिर्मु निस्तुपुंवंशयोर्घृतकौशिकपदोक्ताज्जायंतीपुत्राद्विद्यांप्राप्तः इतःप्रभृतिपुंवंशयोर्नामानिपरस्परंसमानरूपाणिबोध्यानीति ॥ ३० ॥ मांडू कायनीति मांडूकायनीपुत्राभिन्नात्पाराशर्यायणसंज्ञाद्घृतकौशिकोविद्यांप्राप्तः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मांडूकीति पाराशर्यायणाख्यस्तुमांडूकीपुत्राभिन्नात्पाराशर्याख्याद्विद्यांप्राप्तः ॥ ३२ ॥ शांडिलीति पाराशर्यस्तुशांडिलीतनयाभिन्ना
ज्जातूकर्ण्यात्प्राप्तोविद्यामिति ॥ ३३ ॥ राथीतरीति जातूकर्ण्यस्तुगुरुद्वयाद्विद्यांप्राप्तः गुरुद्वयंतुराथीतरीतनयाभिन्नआसुरायणएकःया
स्कोद्वितीयइति ॥ ३४ ॥ यास्कइति तयोर्मध्येयास्कस्तुसाक्षात्स्वयंभुवःसकाशादेवविद्यांप्राप्तः वर्णितालंबीतनयकौशिकवदिति द्विती
॥३॥ यआसुरायणस्तुभालुकीतनयाभिन्नात्त्रैवणिसंज्ञात्तांप्राप्तइति ॥ ३५ ॥ अथस्त्रीवंशेअधिकान्षट्परस्परमभेदस्फुटीकरणायासुरायणे
निवेशयति क्रौंचिकीतिचतुर्भिः भालुकीतनयस्त्रैवणिःक्रौंचिकीपुत्राभ्यांविद्यांप्राप्तः तौक्रौंचिकीपुत्रावुभौवैदभृतीपुत्रात्प्राप्तौ ॥ ३६ ॥

मांडूकीपुत्रतःप्राप्तःपाराशर्यान्महामुनेः ॥ पाराशर्यायणाख्योयंविद्यामेतामनन्यधीः ॥ ३२ ॥ शांडिलीतनयात्प्राप्तोजातूकर्ण्यान्महात्मनः ॥ पाराशर्यइमांविद्यांदुर्लभांमनुजैर्भुवि ॥ ३३ ॥ राथीतरीतनयतआसुरायणसंज्ञितात् ॥ यास्काच्चप्राप्तवान्विद्यांजातूकर्ण्योमहामुनिः ॥ ३४ ॥ यास्कःकौशिकवद्विद्यांप्राप्तवान्सस्वयंभुवः ॥ भालुकीतनयात्प्राप्तस्त्रैवणेरासुरायणः ॥ ३५ ॥ क्रौंचिकीतनयाभ्यांहिभालुकीतनयोप्ययं ॥ प्राप्तवांस्तावुभौविद्यांप्राप्तौवैदभृतीसुतात् ॥ ३६ ॥ प्राप्तोवैदभृतीपुत्रःकार्षकेयीसुतादिमां ॥ कार्षकेयीसुतोप्येतांप्राप्तवान्बहुदुःखतः ॥ प्राचीनयोगीतनयात्सर्वशास्त्रविशारदात् ॥ ३७ ॥ प्राचीनयोगीतनयःसांजीवीतनयाद्गात् ॥ सांजीवीतनयोप्येनांप्राश्नीपुत्रादवाप्तवान् ॥ स्त्रीवंशेप्रथितादंतेस्थितादासुरिवासिनः ॥ ३८ ॥

प्राप्तइति वैदभृतीपुत्रःकार्षकेयीपुत्रात्प्राप्तः कार्षकेयीपुत्रःप्राचीनयोगीपुत्राद्विद्यांप्राप्तइति कृषिकस्यापत्यंस्त्रीकार्षकेयी शुभ्रादित्वाड्ढ
क् प्राचीनयोगीतियञंतान्ङीप् ॥ ३७ ॥ प्राचीनेति प्राचीनयोगीतनयःसांजीवीतनयाद्विद्यांप्राप्तः सांजीवीतनयस्तुएतांविद्यांप्रा
श्नीपुत्रात्प्राप्तः कीदृशात्प्राश्नीपुत्रात् स्त्रीवंशेस्त्रीनामघटितपरंपरायामंतेस्थितत्वेनप्रसिद्धात् प्राश्नीपुत्रपदाभ्यासेनांतेस्थितेःसूचनादिति ॥३॥
भावःपुनःकीदृशात् असुरिवासिनः आसुरिसंज्ञेदेशविशेषेगुरौवावसनेनासुरिवासीतिनामांतरशालिनः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राश्नीपुत्रोथेति प्राश्नीपुत्रस्तुआसुरायणाद्विद्यांप्राप्तः कोसावासुरायणइतिचेत् योराथीतरीतनयोजातूकर्ण्यस्यगुरुस्त्रैवणेश्चशिष्यउक्तः सएवेतिगृहाणेत्यर्थः ननुत्रैवणिगुरुपरंपरावर्तिनःप्राश्नीपुत्रस्यत्रैवणिशिष्यात्कथंविद्याग्रहणसंभवइतिचेन्न दृश्यतेहिकृताध्ययनानामपिकुतश्चिन्निमित्ताद्विस्मरणेसंशयोत्पादेवापुनर्विद्याग्रहणं यथामहाभारतेगदापर्वणिद्वादशाब्दिकदुर्भिक्षाद्विस्मृतविद्यानांसारस्वतात्सरस्वतीप्रसादजीविनोभ्यस्तविद्यादिति ॥ ३९ ॥ त्रैवणिरिति आसुरायणगुरुस्त्रैवणिरौपजंधनिसंज्ञान्मुनेरपिविद्यांप्राप्तः औपजंधनिस्तुआसुरेर्वंशत्रयेपिसमानाकाराप्राप्तः कीदृशोयमासुरिः यतःयमासुरिमारभ्याधस्तनवंशस्यभेदोनानारूपतालक्षणोभवतिज्ञायते विषयेणविषयिणोलक्षणात् कीदृशोभेदः असमाधेयरूपभाक् समाधातुमशक्यस्यरूपमाकारंसादृश्यमितियावत् तद्भजतीतिसतथा रूपमाका

प्राश्नीपुत्रोथधर्मात्माप्राप्तवानासुरायणात्॥ जातूकर्ण्यस्यगुरुतस्त्रैवणेःशिष्यरूपिणः॥ ३९ ॥ त्रैवणिःप्राप्तवान्विद्यामौपजंधनितोमुनेः॥ औपजंधनिरप्याप्तआसुरेर्यतएवहि॥ भेदोभवतिवंशस्यत्वसमाधेयरूपभाक्॥ ४० ॥ पौतिमाषीतनयतःस्त्रीवंशंपृथगेवहि ॥ वर्णयंतिमहात्मानःकेचिदेकमथापरे॥ ४१ ॥ पुंवंशेऽपिविभिन्नत्वमाग्निवेश्याद्वदंतिहि॥ कौशिकायनिपर्यंतंकेचित्केचिदभिन्नताम्॥ ४२ ॥ सर्वथाऽभिन्नतैवस्यादत्रस्त्रीपुंसवंशयोः॥ अतःपुंवंशमेवेममधुनाकथयामिते॥ ४३ ॥

रश्लोकयोरपीतिविश्वः अस्माभिस्तुयथासंप्रदायंसमाहितइतिभावः ॥ ४० ॥ आसुरिपर्यंतानांवैरूप्यंसंख्यावैषम्यंचदृष्ट्वाकेचिद्भेदंवदंतिसारूप्यभूयस्त्वदर्शिनोऽपरेतुअभेदमेवेत्याह पौतिमाषीति पौतिमाषीतनयमारभ्यस्त्रीवंशंकेचिन्महात्मानःपृथग्वर्णयंति अपरेतुएकमेवेति ॥ ४१ ॥ पुंवंशेपीति केचित्पुंवंशयोरपिआग्निवेश्यमारभ्यकौशिकायनिपर्यंतंपरस्परंनाम्नांवैरूप्यंदृष्ट्वाविभिन्नत्वंवदंति आग्निवेश्यात्पूर्वतनेपुकौशिकायनेःपरतनेपुत्वभेदमाहुरितियावत् केचित्त्वेकस्यापिनामद्वयसंभवादिकमालोच्यतत्राप्यभेदमेवाहुरित्यर्थः ॥ ४२ ॥ सर्वथेति मतभेदप्रयुक्तैःसर्वैःप्रकारैरप्यत्रआसुरौस्त्रीवंशपुंवंशयोरभेदएव आसुरेरनंतरंतुभेदोदुर्वचइतियावत् अतआसुरिंप्राप्यवंशत्रयाभेदसिद्धेःपुंवंशमेवतुभ्यमधुनाकथयामिइतोयेपुंवंशयोरेकतायामविवादस्फुटीकरणायपुंवंशमित्येकवचनप्रयोगः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुकांडयाज्ञवल्क्यकांडांत्ययोःपुंवंशयोरासुरिमारभ्यप्रश्नपर्यंतंवंशंकीर्तयति भारद्वाजादितिदशभिः उक्तआसुरिर्भारद्वाजाद्विद्यांप्राप्तः भारद्वाजस्तुआत्रेयात्प्राप्तः आत्रेयोमांटिसंज्ञात्सचगौतमात् एवमग्रेपिपंचम्यंतोगुरुःप्रथमांतश्चशिष्योबोध्यः ॥ ४४ ॥ गौतमइति गौतमोऽपरगौतमात् सचवात्स्यःशांडिल्यतः शांडिल्यःकैशोर्याभिन्नात्काप्यात् काप्यःकैशोर्योपिकुमारहारितेतिसंज्ञकात् सकुमारहारितोपि गालवात् ॥ ४५ ॥ प्राप्तइति विदर्भीकौंडिन्यसंज्ञकाद्गालवःप्राप्तः वत्सनयाच्चासौवाभ्रवोवत्सनयाद्वाभ्रवस्तस्माद्विदर्भीकौंडिन्योविद्यां सम्यगाप्तवान् ॥ ४६ ॥ वाभ्रवोपीति वत्सनयाद्बाभ्रवोपिसौभरीतिनामांतरशालिनःपथःपथिसंज्ञकात्प्राप्तः सौभरिःपंथाअपिअपास्यसं

भारद्वाजादासुरिस्तुभारद्वाजोप्यवाप्तवान् ॥ आत्रेयादयमात्रेयोमांटेर्मांटिस्तुगौतमात् ॥ ४४ ॥ गौतमोगौतमात्सोपिवात्स्याच्छांडिल्यतःसच ॥ शांडिल्योपिचकैशोर्यात्काप्यात्काप्योप्यवाप्तवान् ॥ कुमारहारिताख्यात्सगालवाद्दीप्ततेजसः ॥ ४५ ॥ प्राप्तोविदर्भीकौंडिन्याद्गालवोवेदवित्तमः ॥ वत्सनयाद्बाभ्रवतःकौंडिन्योपिसमाप्तवान् ॥ ४६ ॥ बाभ्रवोपिचसंप्राप्तःपथःसौभरिसंज्ञितात् ॥ पंथाअपास्यांगिरसादाभूतेस्त्वाष्ट्रतोपिसः ॥ ४७ ॥ अपास्यस्तुविश्वरूपात्त्वाष्ट्रादाभूतिसंज्ञकः ॥ विश्वरूपःपुनस्त्वाष्ट्रोह्यश्विभ्यांप्राप्तवानिमां ॥ ययोर्निमित्तेभगवानिंद्रःक्षोभंचकारह ॥ ४८ ॥ आथर्वणादिमौप्राप्तौदधीचःशक्रदेशिकात् ॥ दैवादथर्वणोप्येपदध्यङ्ङाथर्वणोपिच ॥ ४९ ॥ दैवोथर्वापुनःप्राप्तोम्रत्योःप्राध्वंसनाद्विसः ॥ म्रत्युःप्रध्वंसनात्प्राप्तोविद्यांप्रध्वंसनोपिच ॥ एकर्षेस्त्वेकर्षिःप्राप्तोविप्रचित्तेरिमांमहान् ॥ ५० ॥

ज्ञकादांगिरसात् सआंगिरसः अपास्यइत्युत्तरादपकर्षः त्वाष्ट्रात्त्वष्टुरपत्यादाभूतिसंज्ञकाद्विद्यांप्राप्तइति ॥ ४७ ॥ अपास्यइति अपास्यइतिपूर्वान्वितमुक्तं तुशब्दोभिन्नक्रमः आभूतिसंज्ञस्त्वाष्ट्रस्तुविश्वरूपसंज्ञात्त्वाष्ट्रात् विश्वरूपस्त्वाष्ट्रस्तुअश्विभ्यां ययोरश्विनोरुपदेशेनिमित्तेसतिइंद्रोवक्ष्यमाणविधयाक्षोभंजगामेति ॥ ४८ ॥ आथर्वणादिति अथर्वणोऽपत्याद्दधीचोदध्यङ्संज्ञकात्शक्रदेशिकादिंद्रगुरोः सकाशादिमावश्विनौविद्यांप्राप्तौ दध्यङ्ङाथर्वणोपिदैवाद्देवापत्यादथर्वणःप्राप्तः ॥ ४९ ॥ दैवइति दैवोथर्वातुप्राध्वंसनेतिनामांतरशालिनोम्रत्युसंज्ञकात् प्राध्वंसनोम्रत्युस्तुप्रध्वंसनसंज्ञात्प्राप्तः प्रध्वंसनसंज्ञस्तुएकर्षिसंज्ञात् एकर्षिस्तुविप्रचित्तिसंज्ञात् ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तोव्यष्टेरिति विप्रचित्तिर्व्यष्टिसंज्ञात् व्यष्टिसंज्ञःसनारुसंज्ञात् सनार्वाख्यःसनारुसंज्ञःससनातनात् सनातनस्तुसनकात् ॥ ५१ ॥ परमेष्ठिनइति ससनकःपरमेष्ठिनोविराजःसकाशात् परमेष्ठीतुब्रह्मणोहिरण्यगर्भात् हिरण्यगर्भस्यजीवकोटिनिवेशाभिप्रायेणकेचिद्वेदांताःप्रवृत्ताःकेचित्वीश्वरकोटिनिवेशाभिप्रायेणेतिस्फुटममुंयजामुंयजेतिवाक्यभाष्ये तत्रेदंवाक्यमीश्वरकोटिनिवेशाभिप्रायेणैवप्रवृत्तमित्याह अतइति अतोब्रह्मणःस्वयंभूरूपात्परमयेवक्तानास्तीति ॥ ५२॥ वंशांत्यवाक्यंव्याचष्टे नमइति तस्मैस्वयंभुवेब्रह्मणेसर्वदैवनमोस्तु कीदृशाय सर्वस्यजगतस्तथावेदाख्यकद्रुमस्यमूलभूताय उपसंहरति एषइति ल्यब्लोपेपंचमी स्त्रीवंशाभेदपक्षमादायपुंवंशउक्तइत्यर्थः॥ ५३॥ एवमभेदपक्षेणवंशत्रयंव्याख्यायभेदपक्षेणस्त्रीवंशव्याख्यानंप्रतिजानीते स्त्रीवंशइति पुंवंशयोःसारूप्यभूयस्त्वेनाभेदांगीकारेपिस्त्रीवंशेसं

प्राप्तोव्यष्टेर्विप्रचित्तिर्व्यष्टिःप्राप्तःसनारुतः॥ सनातनात्सनार्वाख्यःसनकात्तुसनातनः॥ ५१ ॥ परमेष्ठिनःससनकोब्रह्मणःपरमेष्ठ्यपि ॥ अतःपरंनवक्तास्तिब्रह्मणोहिस्वयंभुवः ॥ ५२ ॥ नमोस्तुब्रह्मणेतस्मैसर्वदैवस्वयंभुवे॥ मूलभूतायजगतस्तथावेदद्रुमस्यच॥ एषपुंवंशउदितःस्त्रीवंशाभेदतस्तव॥ ५३ ॥ स्त्रीवंशेसर्वथाभेदःसम्यगित्येवभातिनः॥ ततोभेदेननारीणांवंशमुक्तंनिशामय॥ ५४ ॥ ब्रह्मास्वयंभूर्योयंतेपुंवंशांतेसमीरितः॥ तस्माप्रजापतिःप्राप्तोविद्यामेतांसुदुर्लभाम्॥५५॥ प्रजापतेस्तुसंप्राप्तःकावषेयस्तुरोमुनिः॥ तस्माद्यज्ञवचानामराजस्तंबायनोमुनिः॥ ५६॥

ख्याभेदात्प्रकरणभेदाद्रूपभेदाच्चभेदएवसम्यग्योग्यइतिनश्चेतसिप्रतिभातिततोभेदस्ययोग्यत्वात्भेदेनवर्णितंनारीणांवंशंनिशामयश्रृण्विति॥ ५४॥ पूर्वपौतिमाष्यमारभ्योत्तरोत्तरंगुरुनिर्देशक्रमेणासुरिपर्यंतांशःस्त्रीवंशस्यव्याख्यातोथपरमगुरुंब्रह्माणमारभ्याधोधःशिष्यपरंपरांसांजीवीपुत्रपर्यंतांदर्शयन्समानमासांजीवीत्यतःपरमंशंव्याकरोति ब्रह्मेतिपंचभिः यःपुंवंशांतेस्वयंभूर्ब्रह्मासमीरितउक्तस्तस्माद्ब्रह्मणःप्रजापतिर्विराट्एतांविद्यांप्राप्तइति ॥ ५५ ॥ प्रजापतेरिति प्रजापतेस्तुसकाशात्कावषेयःकवषायाअपत्यंतुरेतिसंज्ञकोमुनिःप्राप्तस्तस्मात्तुरात्कावषेयात्यज्ञवचःसंज्ञकोराजस्तंबायनःराजस्तंबस्ययुवापत्यरूपःप्राप्तः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततःकुश्रिरिति ततोयज्ञवचसःकुश्रिसंज्ञःप्राप्तः एवमग्रेपि तस्मात्शांडिल्याद्वामकक्षायणसंज्ञः तस्मान्माहित्थीतिसंज्ञकः ॥ ५७ ॥ माहित्थेरिति माहित्थेःकौत्सःकौत्सान्मांडव्योमांडव्यान्मांडूकायनिसंज्ञस्ततोमांडूकायनेःसांजीवीपुत्रःप्राप्तइत्यर्थः ॥ ५८ ॥ सांजीवीति सांजीवीतनयस्यवंशपरंपराधोधःक्रमेणपौतिमाषीपुत्रांतायोक्तासैवविज्ञेयापरंतुपुमाख्यांस्त्रीनामाऽघटितांपौतिमाष्यगौपवनादिसंज्ञांपरिहृत्यज्ञेया अयमत्रपक्षेविशेषइतिशेषः अंतर्भावंचपरिहायेत्यपिबोध्यम् ॥ ५९ ॥ समानमासांजीवीत्यतःपूर्वतनमवशिष्टभागंव्याकुर्वन्नादित्यादपिपरमगुरोःप्रवृत्तांसांजीवीपुत्रपर्यंतांशिष्यपरंपरांपूर्ववन्निर्दिशति स्त्रीवंशेपुनरित्येकादशभिः स्त्रीवंशस्यमूलंस्वयंभूर्ब्रह्मरूपमेकमुक्तंततोन्यदपिमूलंमनीषिणःप्राहुः किंतदित्याकांक्षायामाह यस्येत्यादि यस्यादित्यदेवस्यस्वरूपभूतंभर्गस्तेजस्तद्वेदांतप्रसिद्धंमहात्म

ततःकुश्रिस्ततोवात्स्योवात्स्यात्शांडिल्यसंज्ञितः ॥ वामकक्षायणस्तस्मात्तस्मान्माहित्थिसंज्ञितः॥५७॥ माहित्थेःकौत्सनामाप्तःकौत्सान्मांडव्यसंज्ञितः॥ मांडूकायनिर्मांडव्यात्सांजीवीतनयस्ततः॥५८॥ सांजीवीतनयस्यादावुक्ताशिष्यपरंपरा॥ स्त्रीनाम्नासैवविज्ञेयापुमाख्यांपरिहायहि ॥ ५९ ॥ स्त्रीवंशेपुनरन्यच्चमूलमाहुर्मनीषिणः॥ यस्यदेवस्यभर्गस्तद्वरणीयंमहात्मभिः ॥ ध्यायेमेतिधियोयोनःप्रचोदयतिनित्यशः ॥६०॥ आपोज्योतिस्तथाब्रह्मभूर्भुवःस्वारसोमृतं॥ ओंकारनामाभगवानादित्योमूलमीरितः॥ ६१ ॥

भिःसंसारभीरुभिर्वरणीयंसम्यग्भजनीयं कथंभजनीयमित्यतआह तंध्यायेमेति विजातीयवृत्तितिरस्कारेणसजातीयवृत्तिसंतानगोचरंकुर्मइति तंकं योऽस्माकंधियोवृत्तीरंतर्यामीसन्धर्मादिषुचोदयतिप्रेरयति तस्यसर्वात्मतामाह आपइति योब्रह्माव्याकृतोपाधिर्ब्रह्मरूपःअथापःहिरण्यगर्भोपाधिभूतापंचीकृतभूतरूपःततोज्योतिर्वैश्वानरात्मकःभूरादिपदत्रयवाच्यलोकवेदावस्थादेवत्रयात्मकःरसःसारभूतःयद्वावासंतरसवन्नानावस्थाविकासहेतुः अमृतंज्ञातोमोक्षहेतुः अध्यात्ममधिदैवंचतत्ध्यानप्रकारोयोगयाज्ञवल्क्येनोक्तः रविमध्येस्थितःसोमःसोममध्येहुताशनः तेजोमध्येस्थितंसत्यंसत्यमध्येस्थितोच्युतइति अतएवसार्द्धत्रिमात्रप्रणववाच्यः एवंसशिरस्कसावित्रीप्रतिपाद्यःसभगवानादित्योपिनाममात्रेणभिन्नोमूलतयोक्तः स्वारसइतिरेफलोपेनदीर्घइतिद्वयोरर्थः ॥ ६० ॥ ६१ ॥ ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदित्यादिति तस्मादादित्याद्दंभिणीसंज्ञादेवताविद्यांप्राप्ता तस्याअंभिण्याःसकाशात्सर्वेषामास्यगतावागभिमानिनीदेवताप्राप्तावाचःस काशात्तुनैध्रुविर्निध्रुवस्यापत्यंयःकश्यपःसप्राप्तः नैध्रुवेःकश्यपात्तुशिल्पेतिनामांतरशालीकश्यपःप्राप्तएवमुत्तरत्रापि ॥ ६२ ॥ कश्यपइति शिल्पात्कश्यपात्हरितःकश्यपःप्राप्तः हरितात्कश्यपाद्वार्षगणोवृषगणस्यापत्यंयोऽसितनामासविद्यांप्राप्तः असिताद्वार्षगणाज्जिह्वावानि तिविख्यातोबाध्योगनामाप्राप्तः ततोजिह्वावतोबाध्योगाद्वाजश्रवःसंज्ञोमुनिःप्राप्तइति ॥ ६३ ॥ वाजश्रवसइति वाजश्रवसःकुश्रिसंज्ञः कुश्रितःउपवेशिसंज्ञ उपवेशेस्तुविद्यांसंप्राप्तादरुणसंज्ञादुद्दालकोमुनिःसंप्राप्तइति तथाचोपवेशिशिष्योऽरुणःअरुणशिष्यउद्दालकइत्य

आदित्याद्दंभिणीप्राप्तातस्यावाक्सर्ववक्त्रगा॥ कश्यपोनैध्रुविर्वाचोनैध्रुवेःशिल्पकश्यपः॥ ६२ ॥ कश्यपोह रितःशिल्पात्प्राप्तोवार्षगणोऽसितः॥ हरितात्कश्यपाद्विद्यांबाध्योगश्चासितात्तथा॥ जिह्वावानितिविख्यातस्त तोवाजश्रवामुनिः॥ ६३॥ वाजश्रवसश्चकुश्रिरुपवेशिश्चकुश्रितः॥ उपवेशेस्तुसंप्राप्तान्मुनिरुद्दालकोरुणा त्॥ ६४ ॥ याज्ञवल्क्यस्ततःप्राप्तोयाज्ञवल्क्यात्तथासुरिः॥ आसुरायणनामापिप्राप्तवानासुरेस्त्वयम्॥ ६५॥ आसुरायणतःप्राप्तःप्राश्नीपुत्रोमहामुनिः॥ मांडूकायनिशिष्योयःसांजीवीपुत्रईरितः॥ सएवपुनरप्येतांप्रा श्नीपुत्रादवाप्तवान्॥ ६६॥ पौतिमाषीसुतांतायेस्त्रीनामांताउदीरिताः॥ प्राचीनयोगीपुत्राद्याःसर्वेपुन्नामव र्जिताः॥ सांजीवीतनयस्यैषाज्ञेयाशिष्यपरंपरा॥ ६७॥

र्थः॥ ६४ ॥ याज्ञवल्क्यइति ततउद्दालकाद्याज्ञवल्क्यःसंप्राप्तः याज्ञवल्क्यादासुरिरासुरेरासुरायणइति ॥ ६५ ॥ आसुरायणतइति असु रायणात्प्राश्नीपुत्रःएतस्मात्प्राश्नीपुत्रात्ससांजीवीपुत्रोऽवाप्तवान् सकः यःस्वयंभुवःप्रस्तुतविद्यासंप्रदायेमांडूकायनेःशिष्यउक्तइति ॥ ६६॥ पौतिमाषीतिविपर्ययेणप्राचीनयोगीपुत्राद्याःपौतिमाषीसुतपर्यंतायेउक्ताः कीदृशाः स्त्रीनामांताःसत्स्त्रीणांमातॄणांनामभिरंतामनोहराः प्रशंसांगताइतियावत् अंतःप्रांतेंतिकेनाशेस्वरूपेऽतिमनोहरेइतिविश्वः तेसर्वेपुन्नामवर्जिताश्चकार्याएषापौतिमाषीसुतांतरूपासांजीवी तनयस्यशिष्यपरंपराज्ञेयेति ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विधेति आदित्यात्स्वयंभुवश्च विनिर्गताप्रवृत्ताविद्याद्विधासतीसांजीवीतनयंप्राप्यैकतांगतेति ॥ ६८ ॥ लोकेनदीयथेतिदृष्टांतंस्फुटयति श्रृंगेति॥ ६९॥दार्ष्टांतिकेयोजयति ब्रह्मेति ब्रह्मणःसूर्याच्चद्व्यवधिकनिर्गमेणअन्यवद्ब्रासमानाइयंविद्यारूपानदीसांजीवीपुत्रंप्राप्यशिष्यद्वैधंशिष्यसंबंधिनींद्विरूपतामितियावत् जहौत्यक्तवतीति ॥ ७० ॥ एवंस्त्रीवंशंभेदपक्षेणव्याकृत्यात्रपक्षेपुंवंशयोर्यावत्सारूप्यंयावच्चवैरूप्यंतदभिनयति पौतिमाष्यमित्येकादशभिः मधुनःकांडेबृहदारण्यकस्यतृतीयचतुर्थाध्यायात्मकेयाज्ञवल्क्यस्यकांडेचपंचमषष्ठाध्यायरूपेऽयंवंशःपौतिमाष्यमारभ्यस्वयंभूब्रह्मपर्यंतःसमानःसमानाकारःप्रायेणेतिशेषः ॥ ७१ ॥ तत्सारूप्यमाग्निवेश्यकौशिकायन्योरंतरालवर्त्ति

द्विधाविनिर्गताविद्यात्यादित्याच्चस्वयंभुवः॥ सांजीवीतनयेत्वैक्यंप्रापालोकेनदीयथा॥ ६८॥ श्रृंगद्वयाद्विनिर्गम्यपर्वतस्ययथानदी ॥ कियद्दूरंसमागत्यक्वचिदैकेवजायते॥ ६९॥ब्रह्मसूर्यविनिर्यातात्यन्यविद्यानदीतथा॥ सांजीवीतनयंप्राप्यशिष्यद्वैधंजहावियम्॥ ७० ॥ पौतिमाष्यंसमारभ्ययावद्ब्रह्माणमीश्वरम्॥ समानोमधुनःकांडयाज्ञवल्क्यस्यचाप्ययम्॥ ७१ ॥ मधुकांडेतुवंशस्यत्वाग्निवेश्यादियंभिदा॥ शांडिल्याख्यानभिम्लातावाग्निवेश्यस्यद्वौगुरू ॥ ७२ ॥ आनभिम्लातनाम्नोपित्वानभिम्लाततोगुरुः ॥ तस्यापिगौतमस्तस्यगुरूस्यातामिमौमुनी ॥ ७३ ॥ सैतवप्राचीनयोग्यौपाराशर्यस्ततोगुरुः ॥ पाराशर्यस्यतुमुनेर्भारद्वाजोमुनिर्गुरुः ॥ ७४ ॥

पुनास्तीतिवैरूप्यंतत्रावतिष्ठतइतिवक्तुंतावन्मधुकांडयोर्विशेषस्तमाह मधुकांडेत्विति पंचभिः आग्निवेश्यात्तदनंतरंइयंवक्ष्यमाणाभिदाविशेषइत्यर्थः मधुकांडेकीर्तितस्यआग्निवेश्यस्यद्वौगुरूएकःशांडिल्योद्वितीयआनभिम्लातइति ॥ ७२ ॥ आनभिम्लातेति तयोर्मध्येआनभिम्लातनाम्नोगुरुरपिअपरआनभिम्लातइतिशेषः सकीदृशः भिन्नादानभिम्लातातूलब्धविद्यइत्यपिशेषः तथाचानभिम्लातस्यगुरुरपिआनभिम्लातस्यगुरुरपरआनभिम्लातइत्यर्थः तस्यतृतीयानभिम्लातस्यगौतमोगुरुस्तस्यगौतमस्येमौउत्तरश्लोकोक्तौसैतवप्राचीनयोग्यसंज्ञौमुनीगुरूइत्यर्थः ॥ ७३ ॥ सैतवेति ततस्तयोःसैतवप्राचीनयोग्ययोर्गुरुःपाराशर्यःपाराशर्यस्यगुरुर्भारद्वाजइति ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भारद्वाजस्येति तस्यास्यपाराशर्यगुरोर्भारद्वाजस्यापरोभारद्वाजोगौतमश्चेतिद्वौगुरूतयोर्मध्येगौतमनाम्नोगुरुररपरोभारद्वाजइति ॥ ७५॥ भारद्वाजस्यतुगुरुरिति गौतमगुरोर्भारद्वाजस्यापरपाराशर्योगुरुः तस्यपाराशर्यस्यबैजवापायनः तस्यबैजवापायनस्यकौशिकायनिर्गुरुरिति ॥ ७६ ॥ याज्ञवल्क्यकांडीयंविशेषमाह याज्ञवल्क्यस्येतिचतुर्भिः आग्निवेश्यगुरुर्गार्ग्यस्तस्यगार्ग्यस्यापरोगार्ग्योगुरुः तस्यापरगार्ग्यस्यगुरुर्गौतमस्तस्यसैतवइति ॥ ७७ ॥ पाराशर्यायणइति तस्यगौतमगुरोःसैतवस्यपाराशर्यायणोगुरुः तस्यपाराशर्यायणस्यगा

भारद्वाजस्यतस्यास्यभारद्वाजाख्यगौतमौ ॥ गुरुर्गौतमनाम्नोपिभारद्वाजोऽपरोभवत् ॥ ७५ ॥ भारद्वाजस्यतु गुरुःपाराशर्यइतीरितः ॥ बैजवापायनस्तस्यतस्यस्यात्कौशिकायनिः ॥ ७६ ॥ याज्ञवल्क्यस्यकांडेतुभेदोयस्तं निशामय ॥ आग्निवेश्याख्यस्यगुरुर्गार्ग्यस्तस्यापरोभवत् ॥ गार्ग्यस्तस्यापिचगुरुर्गौतमस्तस्यसैतवः ॥ ७७ ॥ पाराशर्यायणस्तस्यसैतवस्यगुरुर्मतः ॥ तस्यगार्ग्यायणस्तस्यगुरुरुद्दालकायनः ॥ ७८ ॥ जाबालायननामाभूद्गुरुस्तस्यमहात्मनः ॥ माध्यंदिनायनस्तस्यतस्याभूत्सौकरायणः ॥ ७९ ॥ सौकरायणनाम्नोपिगुरुःकाषायणोभवत् ॥ सायकायनएतस्यतस्याभूत्कौशिकायनिः ॥ ८० ॥ एषएवविशेषोत्रकांडयोर्नापरोस्तिहि ॥ कांडभेदादयंवंशस्त्रिविधःकैश्चदीरितः ॥ अपरैःकल्पभेदेनकथितोमुनिसत्तमैः ॥ ८१ ॥

र्ग्यायणस्तस्यगार्ग्यायणस्योद्दालकायनः ॥ ७८ ॥ जाबालायनेति तस्योद्दालकायनस्यगुरुर्जाबालायनस्तस्यजाबालायनस्यमाध्यंदिनायनस्तस्यमाध्यंदिनायनस्यसौकरायणः ॥ ७९ ॥ सौकरायणनाम्नइति पूर्वार्द्धंस्पष्टम् एतस्यकाषायणस्यसायकायनस्तस्यसायकायनस्यकौशिकायनिरिति ॥ ८० ॥ एषएवेति कांडयोर्मध्ययाज्ञवल्क्यसंबंधिनोरुक्तस्यपुंवंशस्यविशेषएषएवएतावानेव एतावद्विशेषादेवचकेचिद्भेदमाहुरितिशेषः केचित्त्वेकएवायंवंशःकांडत्रयांतेपुकीर्तितःसन्कांडोपाधिकंभेदंगतइत्याहुः अपरेतुकल्पभेदादस्यभेदइत्याहुरिति ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धांतकोटिमाह अभेदमिति अपरंत्वधुनार्थेस्यादितिविश्वः तथाचापरमधुनासिद्धांतदशायामितियावत् केचिद्भाष्यकारादयोवेदार्थ स्याद्वैतस्यदर्शनशीलाअभेदमेवप्राहुः तथाचभाष्यं तच्चैतद्ब्रह्मप्रजापतिप्रबंधपरंपरयाऽऽगत्यास्मासुप्रविस्तृतमिति नन्वभेदपक्षेएकवारंकीर्त नेनैवसर्वेष्टसिद्धौत्रिधाकीर्त्तनंकिमर्थमतआह नामेति यथैकएवप्राणोज्येष्ठश्रेष्ठादिगुणभेदेनार्चितनाद्भिन्नफलप्रदस्तथैकःपुरुषःपरमा त्मातत्तन्नामधेयभेदेनभिन्नइवनानाफलानिददातीतिप्रसिद्धं तथाचमधुकांडांतेविशिष्टानुपूर्वीकःकीर्तितोवंशआगमप्रधानमधुविद्या प्रतिबंधकमदृष्टंशमयतियाज्ञवल्क्यकांडांत्यस्तुउपपत्तिप्रधानविद्याप्रतिबंधकमंत्यस्तुसर्वविद्याप्रतिबंधकमित्युक्तं अपरेइतिपाठेपिपरेपूर्व पक्षिणस्तेभ्योभिन्नाअपरेसिद्धांतिनइत्यर्थः ॥ ८२ ॥ नन्वेवंसतिस्त्रीवंशेसर्वथाभेदःसम्यगितिसंप्रदायादिभेदेनभेदःकथमुक्तोतआह स्त्रीवंशइति स्त्रीवंशेपियोभेदोविशेषःसोपिनात्यंतभेदप्रयोजकः एतदेवस्फुटयति कौशिकेति यथाकौशिकायनेराग्निवेश्यस्यचमध्ये

अभेदमपरंप्राहुःकेचिद्वेदार्थदर्शिनः॥ नामधेयविभेदोयंपुरुषेनास्तिवैभिदा॥ ८२॥ स्त्रीवंशेपिचभेदोयःसो पिनात्यंतभेदकृत्॥ कौशिकायन्याग्निवेश्यमध्येवंशद्वयंयथा॥ ८३॥ पुरुषाअधिकाःक्कापिक्कचिन्न्यूनाउदा हृताः॥ गुरुद्वयंक्कचित्क्कापिसंप्रदायद्वयंतथा॥ ८४॥ आदित्योपिनभिन्नोहिब्रह्मणोपिस्वयंभुवः॥ परमेष्ठ्या द्यानततोभेदोज्ञेयोपिसोपिच ॥ ८५॥ सांजीवीपुत्रतःसाम्यंश्रुतिराहस्वयंयतः॥ आपौतिमाषीतनयंभेदोवं शेषुतेनन॥ ८६॥

वंशद्वयंवंशभेदव्यवहारप्रयोजकंनामभेदादिनात्यंतभेदकृत्तथान्यूनाधिकपुरुषाभिधानंक्कचिद्गुरुद्वयाभिधानंसंप्रदायद्वयाभिधानंचना त्यंतभेदकृत् धर्मिणएकत्वेप्रबलप्रमाणेननिश्चितेधर्मभेदःप्रतिहत्यधर्मेष्वेवपर्यवस्यतीतिद्वयोर्भावः ॥ ८३ ॥ ८४ ॥ वस्तुतःसंप्रदाय भेदोपिनास्तीत्याह आदित्यइति हियतःआदित्योब्रह्मणोनभिन्नः सावित्र्यासर्वात्मतयाउक्तत्वादितिभावः एवंस्वयंभुवःसकाशात्परमे ष्ठ्याद्यानभिन्नाइतिसंबंधः विराजोज्ञानेनतद्भावंप्राप्तानामृषीणांचानौपाधिकभेदस्यदुर्वचत्वादितिभावः फलितमाह ततइति ततोनाम मात्रेभेदोधर्मिणितुसोभेदएवज्ञेयइत्यर्थः ॥ ८५ ॥ ब्रह्मणआरभ्यसांजीवीपुत्रपर्यंतंवंशोवाजसनेयिपंचदशशाखासुसमानाकारइत्यर्थि कासमानमासांजीवीपुत्रादितिश्रुतिरप्यभेदपक्षेऽनुकूलेत्याह सांजीवीति सांजीवीपुत्रमारभ्यब्रह्मपर्यंतमुक्ताश्रुतिःसाम्यंसमानाकारतां यतआह तेनप्रायोऽभेदाभिधानेनपौतिमाषीपुत्रांतंभेदोनकिंत्वभेदएवेत्यर्थः ॥ ८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवातिष्ठतुभेदाभेदविचारः एतावतांगुरूणांस्मरणमवश्यंकर्त्तव्यमित्येतावद्विवक्षितमित्याह भेदइति स्मर्तव्याइतिशेषः अपरेयजुर्वेद भिन्नेवेदेतुनस्मर्तव्याइत्यर्थः नतुअपरइतिगुरुविशेषणं माध्यंदिनादौअधिकानामप्यभिधानात् यद्वायजुर्वेदब्रह्मविद्यायाएतेएवसंप्रदायप्रवर्त्तकाःस्मर्तव्याइत्यर्थः अधिकास्तुकर्मकांडज्ञानेउपयुक्ताइतिभावः ॥ ८७ ॥ सर्वेषांस्मरणाशक्तौपौतिमाष्योवश्यंस्मरणीयइत्याह सर्वथैवेति अस्माकंमानवलोकवर्तिनांद्विजानांगुरुःपौतिमाष्योज्ञेयः अत्रलोकेतेनैवविद्याप्रवर्तनादित्युक्तं कीदृशःपौतिमाष्यः स्त्रीपुंसयोरुभयोरपिवंशयोःश्रुतइतिशेषः ॥ ८८ ॥ उपसंहरति वंशइति त्वत्पृष्टंवक्तुमेवात्रप्रकरणेएषवंशःसमाख्यातः हियस्मादस्मिन्वंशेभवंतीचित्राऽद्भुताकथामयाश्रुता कीदृशेवंशे पौरुषेपुरुषाणांमहाप्रभावाणामयंपौरुषस्तस्मिन् तस्येदमित्यण् ॥ ८९ ॥ एवंमंगलार्थमादौवंशब्राह्मणार्थंप्रदर्श्याथबृहदारण्यकतृतीयचतुर्थाध्यायरूपमधुकांडार्थबुद्धिसौकर्यायेतिहासविधयादर्शयितुमितिहासमव

भेदोवायदिवाऽभेदःसर्वथागुरवस्त्विमे ॥ यजुर्वेदेसमाख्याताविद्यायानापरेक्वचित् ॥ ८७ ॥ सर्वथैवगुरुर्ज्ञेयोह्यस्माकंतुद्विजन्मनाम् ॥ स्त्रीपुंसयोःपौतिमाष्योवंशयोरुभयोरपि ॥ ८८ ॥ वंशएषसमाख्यातस्त्वत्पृष्टंवक्तुमत्रहि ॥ पौरुषेस्मिन्यतोवंशेकथाचित्राश्रुतामया ॥ ८९ ॥ ऋषिणाकेनचित्प्रोक्तमितिहासमिमंश्शृणु ॥ इंद्राश्विनांमर्मरूपमश्विनौवीक्ष्यकोपतः ॥ ९० ॥ ऋषिःकश्चित्पुराप्राप्तोह्यश्विनौकार्यगौरवात् ॥ अवज्ञातस्तस्ताभ्यामूचेतौकुपितोहिसः ॥ ९१ ॥

तारयति ऋषिणेति भोशिष्यत्वमिममध्यायांतंयावत्प्रपंच्यमानमितिहासंश्शृणु कीदृशं केनचिदृषिणामंत्रदर्शिनाश्विनौवीक्ष्यकोपतः प्रोक्तं पुनःकीदृशं इंद्रस्याश्विनौचतेषांमर्मरूपंरहस्यव्यवहारप्रकाशकमितियावत् ॥ ९० ॥ एतदितिहाससूचकौतद्वान्नरासनयइत्यादिकौद्वौमंत्रौचतुर्थाध्यायांतिमधुब्राह्मणानंतरंपठितौतत्रतयोःप्रथमस्यपूर्वार्द्धार्थंइदंवैतरित्यादिपूर्ववाक्यार्थसहितमेतद्वृत्तंजानन्कश्चिदृषिरश्विनौप्रत्युक्तवान्हेनरानराकारावश्विनौसनयेविद्यालाभायवांयुवयोर्दंश्हसःकर्मउग्ररूपंआविःकृणोमिप्रकटीकरोमितन्यतुर्मेघोवृष्टिनद्टिमिवेत्याकारंत्रिभिर्दर्शयन्कोपतइत्युक्तंस्फुटयति ऋषिरिति कस्मैचित्कार्यायाश्विनोःसमीपंगतःकश्चिदृषिस्ताभ्यामश्विभ्यांप्रत्याख्यानेनावज्ञातःसंस्ततोऽवज्ञारूपहेतोःकुपितश्चसन्निदमुवाचेति यद्यप्यत्रभाष्यकारैर्ऋषिर्मंत्रइतिव्याख्यातंतथापिमंत्रमंत्रदृशोरभेदस्तैर्विवक्षितइत्यविरोधः ॥ ९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्विनाविति हेअश्विनौअहंयुवयोःपापतमंकर्मयुवाभ्यांयद्रहसिकृतंतज्ज्ञानेयुवांमोहितौगर्ववशात्कर्तव्यानवधानवंतौसंतौममैतत्कार्यं चेन्नकरिष्यतस्तर्हिघनाघनोमेघोयथावृष्टिंप्रकटीकुरुतेतथाहंयुवयोर्दुष्कृतंकर्मप्रकटंकरिष्यामीतिद्वयोःसंबंधः ॥ १२ ॥ १३ ॥ एवंमंत्र पूर्वार्धार्थेनेतिहासमुत्थाप्यप्रथममंत्रोत्तरार्धंद्वितीयमंत्रश्चव्याख्याक्रमप्राप्तमधुब्राह्मणव्याख्यानानंतरमेवव्याख्यास्यतेइतिमनसिनिधा

यमूलव्याख्यारंभोपयोगिनींकथांतावत्षडधिकशतश्लोकैःप्रपंचयति एवमुक्ताविल्यादिना एवमृषिणाप्रोक्तौमहात्मानौमहानुअविद्या कृतपरिच्छेदमतीतःआत्माययोस्तौतथायतोदीर्घदर्शिनौविद्वांसौएतादृशावश्विनौतंकुपितमृषिंप्रत्यूचतुः किंकृत्वा तिमत्वा इतिकिं यद नेनावयोरुग्रकर्माविष्करणंतदावयोःकीर्त्तिरूपमेवेति अज्ञस्यदुष्कृतकर्माविष्करणेहितस्यभाविदुर्गतिसूचनेननिंदाभवतिमहात्मनांतूग्रं

अश्विनौयुवयोर्जानेकर्मपापतमंकृतम्॥ घनाघनोमहावृष्टिंप्रकटीकुरुतेयथा ॥ १२॥ प्रकटंदुष्कृतंकर्मक रिष्यामितथाप्यहम्॥ करिष्यतोयदानैतत्कार्यंमेमोहितौयुवाम्॥ १३ ॥ एवमुक्तौमहात्मानावश्विनौदीर्घद र्शिनौ॥ आवयोःकीर्तिरेवेतिमत्वेत्थंप्रोचतुर्मुनिम्॥१४॥ आवाभ्यांकिंकृतंकर्मदुष्कृतंक्रूरवत्कथं॥ केनवा पिनिमित्तेनतन्नौवर्णयभोमुने॥१५॥ रहस्यमावयोश्चेत्त्वंसम्यग्वक्ष्यसिमानद॥ करिष्यावस्ततःकार्यंत्वदीयं नानृतंहिनौ॥१६॥ इत्युक्तेमुनिरप्यात्मकार्यार्थीसर्ववित्तमः॥तदीयंकर्मनिखिलंसनिमित्तंतयोर्जगौ॥१७॥

कर्मअहोएषांविद्याप्रभावोयदेतैःकृतेनैतादृशेनकर्मणालोमापिनच्छिन्नंयथेंद्रकृतेनविश्वरूपपतिवधादिनेतिप्रशंसामेवगमयतीतिभावः ॥ १४ ॥ अश्विनावूचतुः आवाभ्यामितिद्वाभ्यां आवाभ्यांक्रूरजनवत्किंदुष्कृतंकृतंकथंवाकृतंकेननिमित्तेनवाकृतंतत्सर्वंनौआवयोः पुरतोवर्णयेति ॥ १५ ॥ रहस्यमिति आवयोःरहस्यंगुप्तंकर्मसम्यक्चेद्वक्ष्यसिवदिष्यसिततोरहस्याभिधानानंतरंत्वदीयंकार्यंकरिष्या

वःनौआवयोरेतद्वाक्यमनृतंनकिंतुसत्यमेवेति ॥ १६ ॥ इत्युक्तइति इतिइत्थंअश्विभ्यामुक्तेसतिआत्मीयकार्यसिद्धिकामोमुनिस्तदी यंतयोरश्विनोःसंबंधिकर्मनिखिलंनिमित्तेनसहितंतयोरश्विनोःपुरतोजगौउक्तवानिति ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋषिरादितआरभ्यतद्वृत्तमनुकीर्तयति परमेष्ठिनमितिअध्यायान्तंयावद्ग्रंथेन ब्रह्मणःशिष्यंपरमेष्ठिनमारभ्यपौतिमाष्यपर्यंतःशिष्यैश्चित्रश्चयोयंमधुकांडांतेवर्णितोविद्यावंशोऽनेकधाप्रवृत्तस्तस्मिन्पुंवंशेपुंवंशतयाप्रसिद्धेब्रह्मणोऽधःक्रमेणसंख्ययायोद्वादशोदध्यङ्ङाथर्वणइतिप्रसिद्धोदैवस्याथर्वणःशिष्योयुवयोर्गुरुर्ब्रह्मविद्यासंपन्नोमधुकांडार्थविच्चसमुनिर्युवांप्रतिवेदंपाठतःसमध्याप्ययुवयोरविरक्तयोरयोग्यंवेदांतभागार्थंविहायकर्मकांडार्थमात्रमब्रवीदितित्रयाणांसंबंधः ॥ ९८ ॥ ९९ ॥ १०० ॥ ऊचथुरिति युवांतंदधीचआथर्वणात्प्राप्तंवेदंयथाधीतंयथाश्रुतंचत्वाष्ट्रायविश्वरूपायोचथुरुक्तवंतौसोपिविश्वरूपःअन्यस्मैआभूतयेत्वाष्ट्रायसोपिआभूतिस्त्वाष्ट्रोऽपास्याया

परमेष्ठिनमारभ्यपौतिमाष्यावधिर्महान्॥ विद्यावंशःप्रवृत्तोयंचित्रःशिष्यैरनेकधा॥ ९८ ॥ ब्रह्मणोद्वादशोयस्तुदध्यङ्ङाथर्वणःस्मृतः ॥ पुंवंशेथर्वणःशिष्योदैवस्ययुवयोर्गुरुः ॥ ९९ ॥ ब्रह्मविद्याभिसंपन्नोमधुकांडार्थविन्मुनिः॥ युवांवेदंसमध्याप्यकर्मकांडार्थमब्रवीत्॥ वेदांतार्थंविहायैवयुवयोरविरक्तयोः॥ १०० ॥ ऊचथुश्चयुवांतंहियथाधीतंयथाश्रुतं ॥ त्वाष्ट्रायविश्वरूपायत्वन्यस्मैसोपिसोपिच॥ १०१ ॥ एवंपरंपराप्राप्तापौतिमाष्येत्वियंपरा ॥ विद्यासापौतिमाष्योभूद्गुरुःसर्वद्विजन्मनाम्॥ १०२॥ दध्यङ्ङाथर्वणःपूर्वंब्रह्मज्ञानान्महायशाः॥ संप्रदायंप्रवर्त्यैवंक्काप्यवात्सीत्कृताश्रमः॥ १०३॥ देवानामसुराणांचमनुष्याणामपिद्विजः॥ समोभूत्वातदातत्रनिवसन्नकरोत्सुखम्॥ १०४॥

ङ्गिरसायोवाचेति गुरोरक्षरग्रहणमध्ययनंश्रवणंतुतात्पर्यावधारणमितिभेदः ॥ १०१ ॥ एवमिति एवंविधयापरंपरयाइयंसाप्रसिद्धापराउत्कृष्टाविद्यापौतिमाष्येप्राप्तास्पौतिमाष्योनृलोकवर्तिनांद्विजानांगुरुरभूदिति ॥ १०२ ॥ दध्यङ्ङिति एवंसंप्रदायंप्रवर्त्यब्रह्मज्ञानहेतुकंमहद्यशःप्राप्तोदध्यङ्ङाथर्वणःक्कापिदेशेकृताश्रमःसन्नवात्सीद्वासंकृतवानिति ॥ १०३ ॥ देवानामिति समःपक्षपातहीनतयाउपकारकोभूत्वातत्राश्रमेनिवसन्देवादीनांसुखमकरोत्सुखप्रदोऽभूदितियावत् ॥ १०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मैइति यस्मैयादृशायाधिकारिणेयद्यत्फलंस्वर्गपशुपुत्रवैरिमरणादिरूपंरोचतेतस्मैतत्तत्फलंसोपायमादिशत्अस्मिन्यागादिरूपेउपाये कृतेइदंफलंभवतीत्युपदिष्टवान् तेषांपृच्छतांहितकाम्ययातत्रत्यांस्तेषुफलेषुभाविनःसुखदुःखकरानुदर्कानुत्तराणिफलान्यपिबहून्बहुवि धानुपादिशत् अस्मिन्यागेकृतेस्वर्गोभविष्यतिपरंतुपातादिदुःखंसत्कुलेजन्मादिचभविष्यति अस्मिन्यागेकृतेशत्रुमरणंभविष्यतितदनं तरंनरकोपिभविष्यति अस्मिन्कृतेचित्तशुद्धिस्तदनंतरंचज्ञानाधिकारलाभइत्यादिविधयोपदिष्टवानित्यर्थः ॥ १०५ ॥ ब्रह्मेति ब्रह्म विद्याकामान्जनान्प्रतितुएवंवक्तिस्मयद्यूयमधिकारंसाधनचतुष्टयसंपत्तिरूपंसंपादयततत्संपत्तेरनंतरमिमांब्रह्मविद्यांवक्ष्यामिउपदेक्ष्या मीति ॥ १०६ ॥ एवमिति एवंउक्तविधयातस्मिन्दधीचिव्यवस्थयावर्त्तमानेसतिअस्यमहात्मनःकीर्तिःसर्वत्रप्रसृतवतीत्यर्थः ॥ १०७॥

यस्मैयद्रोचतेतस्मैफलंसोपायमादिशत्॥ उदर्कानपितत्रत्यान्सुखदुःखकरान्बहून्॥ १०५॥ ब्रह्मविद्यार्थि नःपुंसएवंवक्तिद्विजोत्तमः॥ अधिकारंसाधयतपश्चाद्वक्ष्यामिवस्त्विमां ॥ १०६॥ एवंव्यवस्थितेतस्मिन्न गमत्कीर्तिरस्यहि॥ लोकत्रयींदिशश्चैवप्रदिशोपिमहात्मनः॥ १०७॥ तत्रापियुवयोःस्नेहस्तस्यभूयानभून्मु नेः॥ बाल्यमारभ्यशिष्यौचयुवांतस्यमहात्मनः॥ १०८॥ युवयोर्विषयासक्तिंवीक्ष्यासौयाचितोपिहि॥ ना दात्पूर्णात्मनोविद्यामधिकारविवर्जनात्॥ १०९ ॥ अकालेहियथावृष्टिर्यथादीपोदिवाकरे ॥ अन्नंयथात्व जीर्णेस्याद्दत्तंवापिगतस्पृहे॥ ११०॥ अधिकारंविनातद्वद्धिफलंब्रह्मबोधनम्॥ एवंवदन्मुनिर्नित्यमिच्छता मधिकारिणाम्॥ १११ ॥

तत्रापीति हेअश्विनौतत्रसमत्वेनवर्त्तमानत्वेपितस्यदधीचोमहात्मनःस्नेहोयुवयोर्विषयेभूयानधिकोऽभूद्यतोयुवांतस्यबाल्यमारभ्यशि ष्याविति ॥ १०८ ॥ युवयोरिति एवंस्नेहाधिक्येपिभवद्भ्यांयाचितोपिचयुवयोर्विषयासक्तिंवीक्ष्यासौदध्यङ्ङाथर्वणःपूर्णात्मनोविद्यांना ऽदात्नदत्तवान्युवयोस्तत्राधिकाराभावादिति ॥ १०९ ॥ अकालेहीति कीदृशोमुनिःअधिकारिणामधिकारमिच्छतांजनानामधिका रसंपादनेतत्परतांसंपादयितुमेवंनित्यंवदन् एवंकथं अकालेवृष्टिः सूर्यस्यपुरःप्रकाशायनिहितोदीपः अजीर्णेपूर्वान्नेअन्नंभुक्तं देयवस्तु निस्पृहाहीनेदत्तंच एतानियथाविफलानितथाधिकारंविनाब्रह्मवेदनमितिद्वयोःसंबंधः ॥ ११० ॥ १११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थंमुनौवर्तमानेसतिभवतोरिंद्रेणद्वेषःकुतश्चिन्निमित्ताज्जातइत्याह रूपेति क्वचिन्निमित्तेसतियुवांदेवराजस्यावज्ञांकृतवंतौयतोरूपादिभिर्गर्विताविति ॥ ११२ ॥ यज्ञभागमिति अवज्ञांदृष्ट्वाइंद्रोयुवयोर्यज्ञभागंनिवारितवान् निवारणमभिनयति अपूताविति एतावश्विनौयतोभिषजौचिकित्सकौपूर्वजन्मनिनराधमौचास्तामतोऽपूतावशुद्धौअशुद्धत्वादेवानयोर्यज्ञेयोभागआश्विनग्रहादिरूपःसोऽद्यारभ्यमाभूदियमेवमाकारात्रिलोक्यांममाज्ञेति ॥ ११३ ॥ सुराणामिति देवादीनांसंमुखेइंद्रेणैवमुक्तेसतियुवयोर्यज्ञभागःसर्वेभ्योयज्ञेभ्योऽगात्निवृत्तइत्यर्थः ॥ ११४ ॥ युवामिति एवमनेनप्रकारेणदुर्दांतत्वाद्यज्ञभागहीनौयुवांसंतप्तौसंतौस्वगुरुंदध्यंचमाथर्वणंप्राप्यपुनर्यज्ञभागलाभायोपायंपृष्टवंताविति ॥ ११५ ॥ गुरोरग्रेऽश्विनोर्वाक्यगणमभिनयति शक्रेणेतिदशभिः अद्येंद्रेणआवयोर्यज्ञभागोहृतोनिवारितस्तत्रावयोःकिंकर्त्तुंयोग्यंतत्कथयेति ॥ ११६ ॥ आवयोःसामर्थ्यंतावच्छ्रोतव्यमित्याशयेनाहथुः आवामित्यादिना सामरंशक्रमपियोधयितुंयुद्धेनतर्पयितुमितियावत् आवांशक्तौस्वोयद्याहवेतवाज्ञास्यादिति ॥ ११७ ॥ आवयोरेकोपिब्रह्मादीन्सपरिकरान्जेतुंशक्तःकिमुतसहिताविल्याह ब्रह्माणमिति ॥ ११८ ॥ शक्तत्वेहेतुमाहथुः आवयोरिति यतआवयोःशस्त्राद्यैर्मरणंनमृतजीविन्याविद्ययासहितत्वादिति ॥ ११९ ॥

रूपविद्याऽभिसंपन्नौतरुणौयुद्धदुर्मदौ॥ अवज्ञांदेवराजस्यचक्रातेक्वचिदेवहि॥ ११२॥ यज्ञभागंसुरेंद्रोपि
युवयोर्विन्यवारयत्॥अपूतौभिषजावेतौभूतपूर्वंनराधमौ॥यज्ञभागोनयोर्माभून्ममाज्ञेयंजगत्त्रये॥ ११३॥
सुराणांचमुनीनांचसमक्षंत्व्येवमीरिते ॥ शक्रेणयज्ञभागोऽगाद्युवयोःसर्वयज्ञतः ॥ ११४॥ युवामेवंसुदु
र्दांतौयज्ञभागविवर्जितौ॥ संतप्तौस्वगुरुंप्राप्यभागार्थंपर्यपृच्छतम्॥ ११५॥शक्रेणाद्यसभामध्येयज्ञभागो
हृतोगुरो॥ आवयोःकिंतुयुक्तंनौकथयत्वंमहामुने ॥ ११६॥ आवांयोधयितुंशक्तौशक्रंसामरमाहवे॥ अनु
ज्ञातस्तवगुरोसंदेहंमाकृथाःक्वचित्॥ ११७॥ ब्रह्माणंवामहेशंवाहरिंशक्रमथापिवा॥ एकएवावयोर्जेतुंश
क्तोलोकत्रयीवृतम्॥ ११८॥ आवयोर्मरणंनैवशस्त्रैरस्त्रैश्चदारुणैः॥ व्याध्यादिभिर्यतश्चावांजानीवोमृतजी
वनीम्॥ ११९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभावांतरमाहथुः मायाश्चेति देवादिप्रयुक्तामायाश्चावांनस्पृशंतितथाविषाणिजंगमानिसर्पादिसंबंधीनिस्थिराणिस्थावराणिकालकूटादीनिप्रत्येकंविचित्राणिनस्पृशंति॥१२०॥औषधानीति शत्रुभिःप्रयुक्तानिक्रूरौषधानिमंत्राश्चनस्पृशंतितथाभूतानिपिशाचाश्चनस्पृशंतिद्विजोत्तमैःप्रयुक्ताअभिचाराःशत्रुमरणहेतवःश्येनाद्यायागाःशापाश्चनस्पृशंतीति ॥१२१॥श्लोकद्वयोक्तेऽर्थेहेतुमाहथुः आवामिति प्रतीकारंनिवर्तनोपायमावांजानीवः यतस्त्वदनुग्रहात्स्वभावाच्चसिद्धिशालित्वेनसर्वाधिकौ ॥१२२॥ एवंस्वीयांपरैरजेयतामभिधायपरेषांयुद्धंविनाप्यौषधमंत्रादिप्रयोगमात्रेणमारणादिकंकर्तुंशक्तौस्वइत्याहथुः एकौषधेति स्वर्गेवहंत्यागंगायाःसलिलस्यमध्येएकस्यौषधस्यप्रक्षेपमात्रेणदेवैःसहितमिंद्रंक्षणादावांमारयावइति ॥ १२३ ॥ उच्चाटयावइति उच्चाटयावःउद्विग्नचित्तंकुर्वः स्वर्गात्क्षितौवापातयावः

मायाश्चनस्पृशंत्यावांसुरासुरनरैःकृताः ॥ विषाणिचविचित्राणिजंगमानिस्थिराणिच॥ १२० ॥ औषधानिचमंत्राश्चतथाभूतपिशाचकाः ॥ अभिचाराश्चशापाश्चप्रयुक्ताश्चद्विजोत्तमैः ॥ १२१ ॥ आवांसर्वप्रतीकारंजानीवोमुनिसत्तम॥ त्वत्प्रसादात्स्वभावाच्चसिद्धौसर्वाधिकौयतः ॥ १२२ ॥ एकौषधप्रयोगेणस्वर्धुनीनीरमध्यतः॥ सामरंदेवराजंतंमारयावःक्षणान्मुने॥ १२३॥उच्चाटयावःस्वर्गाद्वापातयावःक्षितावपि॥ मोहयावःक्षणाद्वैतंदिगंतरगतिंगतम्॥ १२४ ॥उत्पादयावःकामंवासामरस्यशचीपतेः॥ मर्त्यलोकवधूनांवामुनीनांवातिमोहतः॥ १२५॥ एवमादिवचःपूगैर्भवद्भ्यामात्मनोबलम् ॥ उक्तंदधीचःपुरतोगुरोर्विश्वासकारणम्॥ १२६॥

एतेनस्तंभनंसूचितं आकाशेउड्डीयमानानांपक्ष्यादीनामुड्डयनशक्तिस्तंभेनभूमौपातप्रसिद्धेरिति अथवाएतंसामरंदेवराजंदिगंतरगतिंगतंदिशांमध्येभ्रमंतंमोहयावःमोहितंकुर्वः मोहवशादन्यदिशिप्रस्थितमन्यदिग्गतंकुर्वइतियावत्॥ १२४॥वशीकरणक्षमतामाहथुः उत्पादयावइति अतिमोहतइतिल्यब्लोपेपंचमी अप्सरस्सुदेवानांमुनीनांचकामःपुराणादौप्रसिद्धः आवांतुसामरस्यशचीपतेर्वामुनीनांवाऽतिमोहंसंपाद्यअधमानांमर्त्यलोकवधूनामेवसंबंधिनंकाममभिलाषमुत्पादयावइति अत्रद्वितीयोवाशब्दएवार्थेबोध्यः वास्याद्विकल्पोपमयोरेवार्थेपिसमुच्चयेइतिविश्वात् प्रथमतृतीययोस्तुसमुच्चयवाचितेतिविशेषः॥१२५॥ एवमादीति एवमादिवाक्यसमूहैरात्मीयंबलंदधीचोगुरोः ॥१०॥
पुरतोविश्वासायोक्तमिति ॥ १२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सविचार्येति सभवतांगुरुर्विचार्ययुवांप्रतिवचनमब्रवीत् हेअश्विनौयुवांशत्रुतापिनौभूत्वाक्रोधसंज्ञस्यांतरशत्रोर्वशंमायातंमाप्राप्तौभवत मिति ॥१२७॥ क्रोधस्यशत्रुतांस्फुटयति नशक्रइति शक्रोयुवयोःशत्रुर्नभवतिकिंतुवांयुवयोःशत्रुरेषक्रोधएव हिनिश्चयेन ननुकःक्रोधस्यापराधइतिचेदनर्थेप्रभोरिंद्रस्यवधेप्रवर्तनमेवतावदवधार्यतामित्याह शक्रमिति इतःपूर्वमिंद्रंजेतुंयुवयोर्मनोनाभवदिदानींतुजातमत्रकोहेतुरितिक्रोधस्यशत्रुताविकाशकंकुतोनयुवाभ्यांचित्यतेइति ॥ १२८ ॥ येनसामर्थ्येनकामक्रोधयोःशत्रुराजयोरिंद्रियरूपान्किंकरान्जित्वाकामक्रोधौनिरुत्ध्ययुवांदेवभावमापन्नावधुनातत्सामर्थ्यंक्वगतमित्याह इंद्रियाणीति॥१२९॥ अहंत्वेवंमन्येयज्जितपूर्वाःक्रोधराजस्येंद्रियरूपाःकिंकराःपूर्ववैरंस्मरंतःसंतोयुवांहंतुंस्वर्गेप्यागताइत्याह क्रोधेति ॥ १३० ॥ इंद्रमिति आंतरशत्रोःक्रोधस्यजयाभावे

सविचार्यचिरंपश्चाद्युवांवचनमब्रवीत्॥क्रोधशत्रोर्वशंयातंमायुवांशत्रुतापिनौ॥१२७॥नशक्रोयुवयोः शत्रुःशत्रुर्वामेषएवंहि ॥शक्रंजेतुंपुराकस्माद्युवयोर्नाभवन्मनः॥इदानींकेनवाजातमितिकस्मान्नचिंत्यते ॥१२८॥इंद्रियाणिपुराजित्वाकामक्रोधादिकिंकरान्॥ युवांदेवत्वमापन्नौदुर्लभंसर्वदेहिभिः॥अधुनातौ कथंक्रोधशत्रोर्वशमुपागतौ॥ १२९॥ क्रोधराजंसमाश्रित्यनूनमिंद्रियकिंकराः॥पूर्ववैरस्मृतिंप्राप्ताहंतुंवा मगमन्दिवि ॥ १३० ॥ इंद्रंजेतुंकथंस्यातांयुवांशक्ताविहाधुना॥क्रोधशत्रुर्हतोनैवयुवयोर्हतयोर्हतिः ॥ ॥१३१॥कामशत्रुहतौदस्राायुवांबलविवर्जितौ॥वाक्सायकैःसभामध्येशक्रेणनिहतौभृशम्॥१३२॥कस्माच्छक्रःपुरावज्ञांनाकरोद्युवयोःप्रभुः॥कस्माद्दिदानीमकरोदितिबुद्धिविवर्जितौ॥ १३३॥शक्रंजेतुंसमर्थौतौकथंधीमत्पुरोगमम्॥ कामेनैकेनदुःसाध्यायुवयोर्लघुताकृता॥ अधुनाक्रोधसहितःसतुकिंनकरिष्यति॥ १३४

इंद्रंजेतुंयुवयोःकाशक्तिरिति किंच इंद्रेणयुवयोर्वाक्सायकैर्याहतिस्ताडनाकृतासापूर्वंकामेनहतयोरेवकृता॥१३१॥ चतुर्थपादार्थंस्फुटयति कामेति निष्कामस्यतुविद्ययासर्वात्मभूतस्यकोऽपकर्तेतिभावः॥१३२॥कामस्याप्यनर्थहेतुतान्वयव्यतिरेकाभ्यामवसेया युवांतुतद्विवेकहीनावित्याह कस्मादिति कीदृशौयुवां इतिबुद्धिविवर्जितौ इतिकिं कस्मादित्यादि॥१३३॥यदाएकेनकामेनयुवयोरीदृशंलघुत्वंकृतंतदाधीमतामग्रगण्यत्वेनगुरुतरमिंद्रंजेष्यथइतिकाप्रत्याशेत्याह शक्रमिति दुष्टंसाध्यंफलंयस्याःसातथा इदानींतुयुवयोःपूर्वंहंतासकामःक्रोधेनपुत्रेणापिसहितःसन्किंनकरिष्यतिअपितुसर्वमनर्थंकरिष्यतीति ॥१३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामक्रोधयोःशत्रुतामेवस्फुटयति कामक्रोधाविति तौकामक्रोधौविहायोपेक्ष्यपरंतद्भिन्नंयोजयेत्जेतुंप्रवर्तेतेतियावत् समंदः ॥१३५॥ सामर्थ्यमस्तिचेत्तावेवतावज्जेयावित्याह युवयोरिति जयतंयुवामितिशेषः ॥ १३६ ॥ कामस्यमहाबलतामभिनयति कामेनेति जगदीश्वराअपिलीलाविग्रहेणकामलीलांदधानाःकामस्यजगत्यनुगमंदर्शयंतीतिभावः अपरेत्विति अपरेऽमराःकामस्यपुरतःकिंगणनीयायतोनारीक्रीडामृगाइति ॥ १३७ ॥ फलितमाहपंचेति ॥ १३८ ॥ कामादपिप्रबलस्यक्रोधस्यजयेविशेषतोयत्नोविधेयोयतस्तेनकामजयिनोपिमुनयःप्रायोजीयमानादृश्यंतइत्याह जयंतीति ॥ १३९ ॥ तस्माद्भवतोःशक्तिश्चेत्तावेवजेयावित्याह पितृपुत्राविनिद्वाभ्यां पि

कामक्रोधौमहाशत्रूदेहिनांसहजावुभौ ॥ तौविहायपरंशत्रुंयोजयेत्सतुमंदधीः ॥ १३५ ॥ युवयोर्यदिसामर्थ्यंजेतुंशत्रून्हिविद्यते ॥ जयतंदुर्जयौशत्रूकामक्रोधौमहाबलौ ॥ १३६ ॥ कामेनविजितोब्रह्माकामेनविजितोहरः ॥ कामेनविजितोविष्णुःशक्रःकामेननिर्जितः ॥ अपरेत्वमराःकिन्नुनारीक्रीडामृगाहिये ॥ १३७ ॥ पंचबाणस्ततोजेयःशत्रुरस्तिहिदेहिनाम् ॥ युवाभ्यांचजितोनायंकिंतुतेनयुवांजितौ ॥ १३८ ॥ जयंतिमुनयःकेचित्पंचबाणंकथंचन ॥ तदीयंतनयंक्रोधंशक्ताजेतुंनतेपिहि ॥ १३९ ॥ पितृपुत्रौमहावीर्यौकामक्रोधौदुरासदौ ॥ विजित्यसकलंविश्वंवर्तेतेजयकाशिनौ ॥ १४० ॥ युवांयदिबलोपेतौमानिनौशत्रुकर्षिणौ ॥ जित्वेमौजयतंशक्रंसामरंबलदर्पितम् ॥ १४१ ॥ इत्येवमादिवचनैःक्रोधशांतिकरैर्मुनिः ॥ उक्तवान्नैवसंशांतौयुवांक्रोधाग्निदीपितौ ॥ १४२ ॥ यदातदामुनिःसामभेदौत्यक्त्वाऽतिबुद्धिमान् ॥ उपप्रदानमारेभेयुवयोःक्रोधदीप्तयोः ॥ १४३ ॥

ताकामःपुत्रःक्रोधएतौदुरासदौदुःखेनासत्तुंउपसर्पितुंशक्यौशूराविितियावत्जयेनकाशितुंशीलंययोस्तौतथा ॥ १४० ॥ युवामिति शत्रून्कर्षुतापयितुमितियावत्शीलंययोस्तौतथाईदृशौयदियुवांतर्हिइमौकामक्रोधौजित्वाइंद्रंजेतुमुत्साहंकुरुतमिति ॥ १४१ ॥ इत्येवमिति इत्यादिकैःक्रोधोपशामकैर्वाक्यैर्मुनिर्युवयोर्गुरुरुक्तवान्वैरनिवृत्तिमुपदिष्टवांस्तथापियुवांक्रोधाग्निदीपितौयदानशांतौतदासमुनिः सामप्रियवचनैःक्रोधोपशमनरूपं भेदःप्रकृतेक्रोधशत्रुपक्षपाताद्विश्लिष्यात्मीयपक्षेसमतात्मकेस्थापनरूपः ईदृशौसामभेदौविहाययुवयोरुपप्रदानमारब्धवान् उपप्रदानंनामदानस्यसंनिहितमिष्टद्रव्यदानप्रतिज्ञारूपमितिद्वयोरर्थः ॥ १४२ ॥ १४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुनेर्द्रव्यंतुविद्यारूपमेवेतितद्दानेवैरनिवृत्तयेप्रतिजानीते सर्वेति एतेनवक्ष्यमाणविद्यायाअधिकार्यपिसूचितः ॥ १४४ ॥ एवमुक्ता विति एवंगुरुणाप्रोक्तावपियुवांतंगुरुंप्रतीत्थमुक्तवंतौ इत्थंकथं हेगुरोअयंकालःसामदानभेदानांनास्तिसाधिकारेविद्यादानंतुप्रतिज्ञातं पूर्वमेवेतिनतल्लोभेनापिवैरंत्यजावस्तस्मादिदंजेतुमाज्ञापयैवेतिद्वयोरर्थः ॥ १४५ ॥ १४६ ॥ एवमुक्तइति एवंभवद्भ्यामुक्तेसतियुवयो गुरुर्दंडरूपंराजप्रयुक्तदंडेनभयद्वाराधर्मेप्रवर्त्तकेनसमानाकारंवचोऽब्रवीत् युवयोर्हितकामत्वादिति ॥ १४७ ॥ दंडरूपंवचनमभिनय ति पंचानामितिविंशतिश्लोकैः पंचानांप्राणिनामपिभर्त्तापालकोयःकश्चिदपिजंतुर्भवतिपंचभूतपतौतस्मिन्नाकाशादिपंचभूतशरीरस्ये

सर्वभूतैर्युवांवैरंत्यजथोऽथयदातदा ॥ ब्रह्मविद्यांचिरंप्रार्थ्यांदास्याम्येवनसंशयः ॥ १४४ ॥ एवमुक्तोयुवांको पदीप्तौतंप्रोचथुर्गुरुम् ॥ नैवसाम्नोगुरोकालोनभेदस्यास्तिसंप्रति ॥ १४५ ॥ दानस्यचयतःपूर्वमसकृत्कथितंत्व या ॥ अधिकारेहिसंपन्नेदास्याम्येवनसंशयः ॥ आज्ञापयक्षणात्शक्रंजेष्यावोनात्रसंशयः ॥ १४६ ॥ एवमुक्ते गुरुर्दंडरूपंवचनमुक्तवान् ॥ युवयोर्हितकामःसन्सर्वभूतसमोमुनिः ॥ १४७ ॥ पंचानामपियोभर्ताजंतुर्भव तिकश्चन ॥ ईश्वरःसहिविज्ञेयःपंचभूतात्मकःपुमान् ॥ यस्तंहंतीहहन्यात्ससेश्वरंभूतपंचकम् ॥ १४८ ॥ यस्मा दुपकृतःकश्चिद्धंतिचेत्तंनराधमः ॥ सहन्यात्पितरंस्वस्यजननींचकुलैःसह ॥ १४९ ॥ अंधतामिस्रनामायो नरकोनरकाधिपः ॥ प्राणिनेनिवसंत्यत्रस्वामिद्रोहपरायणाः ॥ १५० ॥

श्वरस्यसंपत्तिसंज्ञाऽभेदभावनाकर्त्तव्यातंपंचानांभर्त्तारंप्राणिनमपियोहन्यात्ससेश्वरसमष्टिभूतपंचकहननप्रत्यवायंप्राप्नुयात् भर्त्तुर्हननेत दुपकार्याणामपिहननात्किमुतेंद्रस्यसर्वलोकभर्तुर्हननेइतिभावः ॥ १४८ ॥ उपजीव्यस्यप्रभोर्हननेकृतघ्नेनास्तिनिष्कृतिरित्यादिवचने भ्यःप्रायश्चित्तैरपरिहार्यःकृतघ्नतादोषोप्यापततीत्याह यस्मादिति यःकश्चिद्यस्माडुपकारंलब्धवान्सउपकृतस्तमुपकारिणंहंतिचेत्तर्हिस्व वंश्यैरनेकैःसहमातृपित्रोर्हननप्रत्यवायंप्राप्नुयादिति ॥ १४९ ॥ सकांगतिंगच्छतीत्यतआह अंधेति नरकाधिपःनरकराजः तमःप्रचुर त्वादंधतामिस्रसंज्ञःतत्रतेयांतीति ॥ १५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मघ्नादपिचिरंतत्रवसंतीत्याह कल्पेति ॥ १५१ ॥ अपिभूमेरिति भूमेरेकदेशमपियःपालयतिसराजत्वादवध्यःप्रसिद्धःकिमुतेंद्रस्त्रिलो
कीपतिरिति ॥ १५२॥ किंच येषांलोकपालानामिंद्रादीनामंशसंबंधाद्राज्ञोऽवध्यतातेषांसाक्षादवध्यताकिमुवक्तव्येत्याह लोकेति लो
कपालावपुषियस्यसतथातस्यभावोलोकपालवपुष्कत्वंतस्मात् ॥ १५३ ॥ अपिचभूमिनिरूपितंयेषांपूज्यतारूपंदेवत्वंतेपिब्राह्मणाअ
वध्याःकिमुतसर्वत्रयेदेवाइत्याह भूदेवाइति ॥ १५४ ॥ ब्राह्मणानामवध्यत्वेराजवद्देवसंबंधोपिप्रयोजकस्तथाचसएवकैमुत्यन्यायइ
त्याह यावंत्यइति स्वर्गेयावंत्योदेवताअमूःएताःसर्वाब्राह्मणस्यवपुषिशरीरेवसंतितेनसविप्रोऽवध्यःकिमुतसाक्षात्तादेवताइति देवविदुषः

कल्पकोटिसहस्रांतेब्रह्महानरकार्णवात्॥ मुच्यतेनैवमुच्येतस्वामिद्रोहपरोजनः॥ १५१ ॥ अपिभूमेःखंडमा
त्रंपालयेद्यस्तुदेहभाक्॥ सराजानैववध्यःस्याद्दशंप्राप्तोपिवैरिणां ॥ १५२॥ लोकपालवपुष्कत्वात्राजाऽव
ध्योहिदेहिनां॥ लोकपालाःकथंनामवध्याःस्वर्गनिवासिनः॥ १५३॥ भूदेवाब्राह्मणानैववधमर्हंतिकर्हिचि
त्॥ देवाइमेकथंनामवध्याःस्युःस्वर्गवासिनः॥ १५४ ॥यावंत्योदेवताःस्वर्गेब्राह्मणस्यवपुष्यमूः ॥ वसंतिदेव
विदुषोविप्रोवध्योनतेनसः॥ देवतानिखिलाःस्वर्गेवधमर्हंतिकेनताः॥ १५५॥ गवांवाब्राह्मणानांवादेवता
नांचयोधमः॥ लोकोपकारिणांतद्वद्राज्ञांधर्मात्मनामपि॥ १५६॥ कर्मणामनसावाचाकुरुतेहिंसनंहिंसः॥ न
रकान्नविमुच्येतकल्पकोटिशतैरपि॥ १५७॥ लोकपालांस्तथादेवानहत्वाशक्रमाहवे॥ हंतुंशक्तोहिकोनामदे
वोवादानवोथवा॥ १५८॥इंद्रमग्निंयमंरक्षोवरुणंचप्रभंजनम्॥धनेशमीश्वरंशेषंब्रह्माणंचजयेद्धिकः५९॥

देवानूतत्प्रतिपादकमंत्रानूजानतः ॥१५५॥गोब्राह्मणदेवतानांधर्मिष्ठनृपाणांचाऽपकारेयत्फलंतद्दर्शयति गवामितिद्वाभ्यां स्पष्टं॥१५६ ॥
॥ १५७ ॥ किंचशिरसागिरिभेदनवदशक्यइंद्रजयोलोकपालादिजयपूर्वकत्वादिंद्रजयस्येत्याह लोकपालानिति ॥ १५८ ॥ दशलो
कपालान्दुर्जयान्दर्शयति इंद्रमिति इंद्रादयोष्टौक्रमेणपूर्वादिदिक्पतयः ब्रह्माऊर्ध्वदिक्पतिः शेषोधोदिक्पतिः अत्रेंद्रस्यविग्रहविशेषः
पूर्वदिक्पतिः विष्णोरिवपादेंद्रियाधिपतिरितिबोध्यम् ॥ १५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युवयोरपिबलमेतेषामिंद्रादीनामनुग्रहेणतेषांकोपेतुक्षयुवयोःसामर्थ्यमित्याह एतेषामिति ॥ १६० ॥ किंचयुवांद्वौआदित्यादयोद्वादशादिसंख्यगणास्तान्कथंजेष्यथेत्याह आदित्याइति ॥ १६१ ॥ इंद्रेणयुद्धेचसर्वएतेपुरतोभविष्यंतितस्यसर्वाधिपतित्वादित्याह लोकपालाइतिद्वाभ्यां अनुयांतिअनुसृत्यवर्ततइति ॥ १६२ ॥ ब्रह्मेति विष्णुरुपेंद्रसंज्ञःपंचभूतानितदभिमानिदेवाः सोमश्चंद्रः नक्षत्राणितारकाश्चतेषांसमाहारस्तथा ॥ १६३ ॥ अपिचयुद्धप्रसक्तावपिसमैर्योद्धव्यंनाधिकैरिंद्रस्तुबलेनबुध्यासहायैश्चभवद्भ्यामधिकइत्याह संयामइति ॥ १६४ ॥ इंद्रस्यसहायैराधिक्यंस्फुटयति भवतोरिति भवतोरश्विनोर्यावत्सामर्थ्यंतावद्देवानांमध्येएकैकस्यसर्वस्याप्यस्ति एते

एतेषांसंप्रसादेनयुवयोर्हिबलंस्मृतम् ॥ विमुखत्वेपुनस्तेषांयुवांकाष्ठसमौमतौ ॥ १६० ॥ आदित्यावसवोरुद्रामरुतःसाध्यसंयुताः ॥ विज्ञेयास्तेमहात्मानोयुवाभ्यांकेनहेतुना ॥ १६१ ॥ लोकपालाइमेदेवामुनयःसिद्धचारणाः ॥ अन्यान्यपिहिभूतानिशक्रमेवानुयांतिहि ॥ १६२ ॥ ब्रह्माविष्णुस्तथारुद्रःशक्तयोविविधाअपि ॥ भूतानिपंचसोमश्चग्रहानक्षत्रतारकं ॥ अन्यच्चसकलंविश्वंशक्रमेवसमाश्रितम् ॥ १६३ ॥ संग्रामःसर्वदाकार्यःसमेनविषमैर्नच ॥ भवद्भ्यामधिकःशक्रोबलबुद्धिसहायकैः ॥ १६४ ॥ भवतोर्यावदत्रास्तिवीर्यंतावत्सुरेष्वपि ॥ एकैकस्यैवसर्वस्यदेवमात्रस्यविद्यते ॥ १६५ ॥ एकैकोपिसमर्थोयंसृष्टिस्थित्यंतकर्मणि ॥ जगतःस्वर्गवासीयोदेवःशक्रसमीपगः ॥ १६६ ॥ कारणंस्वर्गपातस्यद्वेषःस्वर्गउदीरितः ॥ त्यजथोद्वेषमेतेषुयुवांस्वर्गार्थिनौयदि ॥ १६७ ॥ इत्येवमादिवचनैरिहामुत्रभयंकरैः ॥ नानोपपत्तिसहितैर्गुरुणादंडितौयुवां ॥ १६८ ॥

सर्वेएवसमाः सर्वेऽनंताइतिश्रुतेः ॥ १६५ ॥ प्रत्येकदेवसामर्थ्यमभिनयति एकैकइति इंद्रांतिकवासीएकैकोपिदेवोजगतःसर्गादिकरणेशक्तइति ॥ १६६ ॥ स्वर्गात्पातस्यलक्षणभूतत्वाच्चद्वेषोहेयइत्याह कारणमिति स्वर्गेस्वर्गवासिदेवेषुयोद्वेषःसराजसत्वेनतापकत्वात् अमृतमयस्वर्गशरीरद्रावकत्वात्स्वर्गपातहेतुर्बुधैरुक्तः पुण्यफलेस्वर्गेद्वेषस्यपापफलस्यासमावेशाद्वा तस्माद्वृद्धिमिच्छतोमूलहानिरितिन्यायापातात्स्वर्गस्यापिहानिकरोद्वेषोहेयइति ॥ १६७ ॥ रहस्यविकासकोमुनिराह इत्येवमिति इत्यादिभिर्लोकद्वयेभयप्रदर्शकैर्वाक्यैःसयुक्तिकैर्युवांगुरुणादंडं नीतौ ॥ १६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यज्ञेति तथापियज्ञभागापहारात्सभायामिंद्रकृतमानभंगाच्चदुःखितौसंतौयुवांतस्यगुरोर्वाक्यंकर्णयोःपतितमपिनदध्रातेनांगीचक्रतुरिति यावत् ॥ १६९ ॥ ऊचतुरिति युवांभूयस्तंगुरुंप्रत्येवमूचतुर्मरणादिकंयद्भवतितद्भवतुयुद्धमेवकरिष्यावहेतत्समादिशाज्ञापयेति ॥ १७० ॥ युवयोरिति ततोयुवयोर्मनोनिष्ठमभिप्रायंपुनर्यज्ञभागलाभःकथंस्यादित्येवमाकारंज्ञात्वायज्ञभागस्यप्रकर्षेणअनायासेनसिद्धयेउपायं विवक्षुर्गुरुःपुनरुवाचह ॥ १७१ ॥ सुकरमुपायांतरंविवक्षुर्युद्धंतावन्निंदति पुष्पैरितिसप्तभिः पुष्पकरणकमपियुद्धमप्रशस्तंशस्त्रकरण कस्याप्रशस्तताकिमुवाच्यायतएतेयुद्धदोषाःसंति एतेके विजयसंशयः १ श्रेष्ठपुरुषाणांक्षयस्यावश्यंभाविता २ युद्धागतोव्रणंबांधव

यज्ञभागाऽपगमनात्सभायांमानसंक्षयात् ॥ दुःखितौनैववाक्यंतद्दध्रातेकर्णरंध्रयोः ॥ १६९ ॥ ऊचतुश्चयुवांभूयोदुःखितौहिगुरुंप्रति ॥ मरणंनरकोवानौभवेद्युद्धंसमादिश ॥ १७० ॥ युवयोर्मानसंभावंविज्ञायकरुणावतः ॥ यज्ञभागप्रसिद्ध्यर्थंगुरुःपुनरुवाचह ॥ १७१ ॥ पुष्पैरपिनयोद्धव्यंतीक्ष्णैःशस्त्रैस्तुकिंपुनः ॥ संदेहोविजयेध्रौव्यंप्रधानपुरुषक्षये ॥ १७२ ॥ अक्षतश्चापरिक्षीणबांधवोनजयंव्रजेत् ॥ पराजयेचतावत्स्याद्यशस्त्वधिकंत्विह ॥ १७३ ॥ मरणेनरकोयत्रजीवनेपियशःक्षयः ॥ वरंक्षत्रियकस्यापितस्माद्युद्धात्पलायनम् ॥ १७४ ॥ विप्राणांबांधवानांवादेवतानांचसंक्षयः ॥ यत्रयुद्धेभवेत्तत्रधीमान्कुर्यान्नमानसम् ॥ १७५ ॥ असारेस्मिन्हिसंसारेदुःखपूरितजीविते ॥ अक्षिपक्ष्मप्रचलनसमानेजीवितेपुमान् ॥ १७६ ॥ कुर्वीतसततंस्वस्मैहितंनापरमण्वपि ॥ नहितंयुद्धमुद्दिष्टंदेवैर्लोकद्वयेपिहि ॥ १७७ ॥

क्षयंचविनाजयंनगच्छतीति ३ पराजयेपरमनिंदेति ४ चतुर्थइतिद्वयोरर्थः ॥ १७३ ॥ अधर्मयुद्धंलोकद्वयेऽनिष्टकरंक्षत्रियेणापिपरित्याज्यमित्याह मरणेइति ॥ १७४ ॥ अधर्मयुद्धमभिनीयनिषेधति विप्राणामिति ॥ १७५ ॥ किंचक्षणभंगुरेसंसारेदुर्लभमधिकारिदेहं प्राप्यहिततमंतत्त्वज्ञानंसाधनीयंनतद्विपरीतंयुद्धादीत्याह असारइतिद्वाभ्यां दुःखैःपूरितंजीवितंजीवनकालोयत्र अक्षिपक्ष्मणोःप्रचलनेननिमेषेणसमंजीवितंयत्रएतादृशेसंसारेस्वहितमेवकुर्वीतनान्यत् युद्धंतुदेवैर्दैवसंपदायुक्तैर्हितंनप्रोक्तमितिद्वयोःसंबंधः ॥ १७६ ॥ १७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हियुद्धशास्त्रवैयर्थ्यमतस्तत्कालंदर्शयति अयुद्धइति यत्रकालेएवंजानीयात् यद्युद्धेयुद्धाभावेमरणंनिश्चितंयुद्धेतुजीवनस्यसंशयः स्यादपिजीवनमित्याकारः तत्रकालेयुद्धंकुर्यात् युवयोस्त्वेषयुद्धकालोनागतः अन्यथापीष्टसिद्धेरितिभावः॥ १७८॥ तर्हिकिंकर्त्तव्यमितिचेद्धुत्ध्यान्वेष्टव्यउपायइतिवक्तुंबुद्धेःपराक्रमादुत्कर्षंदर्शयति शस्त्रमितिद्वाभ्यां शस्त्रंमुक्तंप्रयुक्तंसत्एकंशत्रुंनिहंतिजयति कदाचित्तंनैव हंतिइत्यपिसंभाव्यते उपायान्वेषिणीबुद्धिस्तुधीमतामुक्ताप्रयुक्तासतीसकलंविश्वंनिहन्याज्जयेदितियावत् ॥ १७९ ॥ जंतुरिति जंतुर्यानर्थानुपायेभ्योहेतुभ्यःसाधयतितान्पराक्रमात्साधयितुंनशक्नुयात् यथापराक्रमेणयुद्धादिरूपेणाशक्योब्रह्मलोकजयोहिरण्यगर्भोपासनारूपोपायेनशक्यःकर्तुमितिप्रसिद्धं ॥ १८० ॥ ननुयुद्धातिरिक्तमुपायंनजानीवइतिचेत्तर्हिश्रूयतामित्याह उपायमिति तेनोपाय

अयुद्धेमरणंयत्रयुद्धेजीवितसंशयः॥ तत्रयुद्धंनयुवयोःकालएषसमागतः॥१७८॥शस्त्रंमुक्तंनिहंत्येकमथवातंचनैवहि॥ निहन्यात्सकलंविश्वंबुद्धिर्मुक्तात्रधीमता॥१७९॥ जंतुर्नानाविधानर्थान्साधयेद्यानुपायतः॥ पराक्रमान्नतान्कोपिसाधयेज्जन्मकोटिभिः ॥ १८० ॥ उपायंतेनवक्ष्यामियज्ञभागप्रसिद्धये॥ युवयोर्युद्ध्यतोर्नायंप्राप्तुंशक्यःकथंचन॥ १८१॥ शर्यातिर्नामभूपालोयष्टुमेषसमुद्यतः॥ होतारंच्यवनंस्वस्यजामातरमथावृणोत्॥ मनसानेत्रहीनत्वात्संदिग्धश्चास्तिसर्वदा॥१८२॥ सुकन्यानामकन्यास्यबाल्यात्क्वापिवनेगता॥ सूर्यंपश्यंमुनिंसात्रच्यवनंतापसोत्तमम्॥ वल्मीकावृतदेहंतंचक्षुर्मात्रप्रकाशनम् ॥ १८३ ॥

स्यदुष्करकरणेपिशक्तत्वेनयज्ञभागलाभोपायंवक्ष्यामि यतोयंयज्ञभागोयुवयोर्युद्धान्नप्राप्तुंशक्यइति ॥ १८१ ॥ उपायमभिनयति शर्यातिरितिपंचभिः शर्यातिर्नामराजायागायोद्यतोवर्त्ततेसचस्वस्यजामातरंच्यवनंनाममुनिंहोतृत्वेनऋग्वेदोक्तकर्मकर्त्तृत्वेनमनसाऽवृणोद्वृतवान्यागेएनंहोतारंकरिष्येइतिसंकल्पितवान्परंतुजामातुर्नेत्रहीनतामालोच्यकथमार्त्विज्यंकरिष्यतीतिसंदिग्धोस्तीति ॥१८२ ॥ ननुकथंशर्यातेर्जामाताच्यवनःकथंवानेत्रहीनइतिशंकाद्वयंवारयति सुकन्येतित्रिभिः अस्यशर्यातेःसुकन्येतिसंज्ञिकाकन्यापित्रासहकुत्रचिद्वनेगतासतीसूर्यंपश्यंसूर्यमीक्षमाणंचिरस्थित्यावल्मीकावृतदेहंचक्षुर्मात्रप्रकाशनंयस्यएतादृशंतापसोत्तमंच्यवनंमुनिंदृष्ट्वाकिमिदमित्याकारयाधियाभूमिच्छिद्रगतेच्यवनस्यनेत्रेकेनचित्तृणेनबाल्याद्बिभेदहेतिद्वयोःसंबंधः ॥ १८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १८४ ॥ निर्गमादिति ततोरुधिरस्यनिर्गमान्मुनिंज्ञात्वाउद्विग्नंभीतंमानसंयस्यएतादृशोसाजातस्यच्यवनस्यांधत्वोपयोगिशुश्रूषणंकर्तुं तांसुकन्याख्यांकन्यांनेत्रहीनायतस्मैमुनयेसंप्रार्थ्यदत्तवानित्यन्वयः ॥ १८५ ॥ च्यवनइति एवंच्यवनोनेत्रहीनोवृद्धश्चवर्ततेसचेद्युवाभ्यांनेत्रवान्युवाचक्रियतेतर्हिसवांयुवाभ्यांयज्ञभागंदास्यतीति ॥ १८६ ॥ रहस्यप्रकाशकोमुनिराह एवमिति एवंगुरुणोक्तेसतिभवद्भ्यामश्विभ्यांसच्यवनोमुनिस्तथायुवानेत्रवांश्चकृतस्तेनच्यवनेनापियुवयोर्यज्ञभागोबलेनदत्तइतिभागवतेनवमेविस्तरः ॥ १८७ ॥ एवंस्थितेइति एवंयुवयोर्वृत्तेस्थितेसिद्धेसतियुवयोर्गुरोराथर्वणस्यदधीचआश्रमंकदाचिदिंद्रआगतः ॥ १८८ ॥ तेनापीति तेनभवतोर्गुरुणा

दृष्ट्वाकिमिदमित्येवंधियाभूबिलसंस्थिते॥ तृणेनकेनचिन्नेत्रेच्यवनस्यबिभेदह॥ १८४॥ निर्गमाद्रुधिरस्या सौराजाज्ञात्वामुनिंतदा॥ अंधशुश्रूषणार्थंतांतस्यकन्यांहिदत्तवान्॥ मुनयेनेत्रहीनायसंप्रार्थ्योद्विग्नमानसः ॥ १८५॥ च्यवनोनेत्रहीनश्चवृद्धश्चेन्नेत्रवान्युवा॥ युवाभ्यांक्रियतेवांसयज्ञभागंप्रदास्यति॥ १८६॥ एवमुक्तेभवद्भ्यांचतथैवसत्कृतोमुनिः॥ दत्तस्तेनापियुवयोर्यज्ञभागोमहात्मना॥ १८७॥ एवंस्थितेकदाचित्तुशक्रआश्रमआगतः॥ आथर्वणस्ययुवयोर्गुरोःसर्वहितस्यसः॥ १८८॥ तेनापिसत्कृतातिथ्यउपविष्टोयथासुखम्॥ कथानानाविधाःकृत्वाहृष्टचित्तःशचीपतिः॥ १८९॥ एवंभवद्गुरुःप्राहसंतुष्टंदेवताप्रभुम्॥ करोम्यतिथयेकिंतेत्रिलोकीपतयेप्रियं॥ १९०॥ एवमुक्तस्तमाहेंद्रःकुरुषेयदिमेप्रियं॥ मत्यंविद्यांवदैकांत्वंदुर्लभांसर्वजंतुभिः॥ १९१॥ एवमुक्तेतुशक्रेणदध्यङ्ङाथर्वणोमुनिः॥ संशयंपरमंप्राप्तःकन्यायाजनकोयथा॥ १९२॥

सइइंद्रःकृतातिथ्यःसन्यथासुखमुपविष्टोनानाविधाःकथाःकृत्वाहृष्टचित्तोजातइति ॥ १८९ ॥ एवमिति संतुष्टंदेवराजमेवंभवतोर्गुरुःप्राह एवंकथं तेऽतिथयेत्रिलोकीपतयेत्वांत्रिलोकीपतिंप्रीणयितुंकिंप्रियंसंपादयामीति ॥ १९० ॥ एवमुक्तइति एवमुक्तइंद्रस्तंभवद्गुरुमेवंप्राह एवंकथं यदिमेप्रियंकुरुषेतर्हिसर्वैर्दुर्लभांविद्यांवदेति ॥ १९१ ॥ एवमुक्तेत्विति एवमिंद्रेणोक्तेसतिभवद्गुरुःपरंसंशयंप्राप्तोयथाकन्यापितेति ॥ १९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टांतंस्फुटयति कस्मैचिदिति यथाकन्यापिताकस्मैचित्तेतुभ्यंकन्यांददामीत्युक्त्वाथयस्मैकन्यादातुंप्रतिज्ञातातस्यगुणहीनतामालोक्यन दद्यांदद्यांवाइत्याकारेसंशयेपतितोभवेदिति ॥ १९३ ॥ दार्ष्टांतिकेयोजयति एवमिति एवमेषदध्यङ्ङाथर्वणोपिइंद्रायेष्टंदातुंप्रतिज्ञातवान् देवराट्तुगुरुभक्त्यादिहीनत्वेनतादृशोविद्यादानयोग्योनभवतीतिसमुनिःसंशयंप्राप्तइति ॥१९४॥ एकतइति ततःसमुनिराथर्वणःइतिनद द्यांदद्यांवेत्याकारयोर्द्वयोरपिपक्षयोर्दोषमालोच्यसंशयंप्राप्तः इतिकथं एकतःएकस्मिन्पक्षेनिषेधरूपेऽनृतंदोषः एकतोविधिरूपेपक्षेविद्या निष्फलतेति ॥१९५॥ तथाप्यनृतदोषप्राबल्यंविचार्यप्रतर्दनायेंद्रवत्सत्यपाशबद्धोवक्तुमुपचक्रमइत्याह विद्येति सदध्यङ्मुनिः॥१९६॥ दध्यङ्ङाथर्वणोमुनिरुवाच शक्रेति हेशक्रदस्रावश्विनौमेशिष्यौतौतवत्वयापिविदितौ कस्यचवर्त्तमानेइतिषष्ठी ताभ्यांप्रियशिष्याभ्यांसं

कस्मैचित्तेददामीतिह्युक्त्वाकन्यांयथापिता॥ गुणहीनत्वमालोक्यसंशयेपतितोभवेत्॥१९३॥ एवमेषोपि शक्रायप्रोक्तवान्नचतादृशः॥ गुरुभक्तिविरक्त्यादिवर्जितत्वेनदेवराट्॥१९४॥ एकतोवचनंमिथ्याभवेद्वि द्यातथैकतः॥ निष्फलाचेतिसंदेहंपरमंप्राप्तवान्मुनिः॥ १९५॥ विद्यानिष्फलतायांहिदोषस्तादृङ्नसंभवेत्॥ मिथ्यावचसियादृक्स्यादितिसंचिंत्यसोवदत्॥ १९६ ॥ शक्रदस्रौहिमेशिष्यौविदितौतौसदातव॥ ताभ्यां संप्रार्थ्यमानोपिनादामेतांकथंचन॥ तामेतांकथयिष्यामिविद्यामत्यंतदुर्लभाम्॥१९७॥ मुख्योविद्येतिश ब्दोऽस्यांनान्यस्यांतुकथंचन॥ विविधंवासनाजालमूलमज्ञानमुत्कटं॥ द्यतिसर्वात्मनायस्मात्तस्माद्विद्येति गीयते॥१९८॥ विशेषेणाहमस्मीतिचानंदात्मानमव्ययम्॥ द्याद्वाद्योतयेद्वाऽतोविद्यैषापरिगीयते॥१९९॥

प्रार्थ्यमानोपियामेतांविद्यांनादांनदत्तवानस्मितामेतांविद्यामतिदुर्लभांतिकथयामीति ॥१९७॥ यथासुखशब्दस्यमुख्यार्थत्वाद्भूमानंदोदु र्लभस्तथेयमित्याह मुख्यइति अस्यांवक्ष्यमाणायां तदर्थंविद्याशब्दंव्युत्पादयति विविधमिति विविधंमूलाज्ञानरूपैरनेकविधंवासना जालानांमूलभूतमुत्कटंभयप्रदमज्ञानंसर्वात्मनानिःशेषेणयस्मात्द्यतिखंडयतितस्माद्विद्येत्युक्ता विपूर्वात्खंडनार्थाद्दोधातोर्ड्यप्रत्ययेऔ णादिकेसाधुः॥१९८॥ ददातेर्द्युतेर्वातस्मिन्प्रत्ययेसाधुरित्याह विशेषेणेति अव्ययमानंदात्मानंविशेषेणददातिअधिकारिणःकरामलकवद धीनंकरोति अथवाद्योतयतिअपरोक्षयतितस्माद्विद्येति इतरविद्यासुअज्ञानस्याभिभवमात्रंकुर्वाणासुगौणोविद्याशब्दइतियावत्॥१९९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेंद्रायोपदेशविधयामधुकांडस्यनिर्गुणविद्योपयोगिवाक्यानांमधुब्राह्मणपर्यंतानामर्थंदिदर्शयिषुःप्रथमंसमस्तोपनिषदर्थप्रदर्शकस्यमंगलार्थस्यचखिलकांडादौपठितस्यपूर्णमदःपूर्णमिदमित्यादेर्मंत्रस्यार्थमभिनयति पूरयतीतिपंचभिः अयंसमस्तोपनिषत्प्रतिपाद्यःसाक्षादपरोक्षोब्रह्मसंज्ञःपुरुषोयस्मादखिलंविश्वंस्वात्मनास्वस्वरूपेणसच्चिदानंदात्मकेनपूरयतिव्याप्नोतीतियावत्तस्मात्सपुमान्पूर्णसंज्ञांगतइत्यर्थः तथाचपूरयतेःकर्तरिक्तप्रत्ययेश्वीदितोनिष्ठायामितीडभावेणिलोपेचपूर्णशब्दोव्युत्पन्नइति॥ २०० ॥परोक्षमिति यत्परोक्षमसच्छब्दधीभ्यांगम्यंतत्पदार्थभूतंमंत्रेऽदःशब्देनोक्तंयच्चप्रत्यक्षंसच्छब्दधीभ्यांगम्यंत्वंपदार्थभूतंतदुभयंस्वीयेनवास्तवेनपरमात्मरूपेणपूर्णमेवव्यापकमेवेतिबुध्यस्वेत्यर्थः एतेनमंत्रस्यप्रथमपादोव्याख्यातः ॥ २०१ ॥ ननूपाधौपारोक्ष्यापारोक्ष्याभ्यांद्विविधेभेदकेजाग्रतिकथमपरिच्छिन्नत्वलक्षणापूर्णतेत्याशंक्योपाधेरुपादानात्पूर्णादव्यतिरेकमाह पूर्णादिति उत्पत्तिस्थितिलयेषुपूर्णंपरित्यज्यनवर्त्ततेतस्मादेतद्विश्वमुपाधिरूपंपूर्णमेवेतिपादत्रयार्थः एतेनमंत्रस्यद्वितीयपादोव्याख्यातः तत्रहिउदच्यतेइतिपदस्योद्गच्छतीत्यर्थः मंत्रोत्तरार्धार्थमाह अंतइति वस्तुतःपरिपूर्णस्योपाधेःकल्पितरूपस्यांतेबाधेऽधिष्ठानविवेकलक्षणेकृतेसतिपूर्णमेवावशिष्येतइति ॥ २०२ ॥ अत्रदृष्टांतमाह नभसइति॥ २०३ ॥ उपाधिबाधेनपूर्णमात्रावशेषोविद्वदनुभवसिद्धइत्याह आकाशेति तमुक्तपुरुषं महांतःशुद्धांतःकरणाः ॥ २०४ ॥ तर्हियथानुभवंसपुरुषोमह्यंवर्णनीयइतिइंद्राकांक्षामालक्ष्यतस्यवागाद्यविषयत्वेनयथावद्वक्तुमशक्यत्वादध्यारोपापवादन्यायेनैवनिरूपणमित्याह असंगेइतिसप्तभिः समाश्रित्याध्यारोप्य ॥ २०५ ॥

पूरयत्यखिलंविश्वंपुरुषोब्रह्मसंज्ञितः ॥ स्वात्मनैवततःसोयंपूर्णनामाभवत्पुमान् ॥ २०० ॥ परोक्षंयच्चकिंचित्तेप्रत्यक्षंवाशचीपते ॥ सदसच्छब्दधीगम्यंपूर्णमेवावधारय ॥ २०१ ॥ पूर्णादुत्पद्यतेचैतत्पूर्णेसंप्रतिवर्तते ॥ पूर्णेविलीयतेचांतेपूर्णमेवावशिष्यते ॥ २०२ ॥ नभसोजायतेतद्वन्मेघोनभसिवर्तते ॥ विलीयतेनभस्यंतेनभएवावशिष्यते ॥ २०३ ॥ आकाशसदृशंपूर्णंसर्वदैकस्वभावकम् ॥ ज्ञानानंदात्मरूपंतंमहांतोब्राह्मणाविदुः ॥ २०४ ॥ असंगेनिर्गुणेपुंसिसृष्टिस्थित्यंतवर्जिते ॥ सृष्ट्यादिकंसमाश्रित्यगुरवोबोधयंतितं ॥ २०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुमविषयतांदर्शयति गम्यतेइति सोयमात्मावहिश्चरैर्बाह्यैश्चक्षुरादिभिर्नगम्यतेआंतरैर्वामनआदिभिर्नगम्यतेऽन्यतस्तेभ्योभिन्नाद्वा नगम्यतेस्वयमेवबोधरूपत्वादिति ॥ २०६ ॥ एतादृशइति एतादृशेऽसंगत्वादिनाउक्तेपुंसिसृष्ट्यादिकंतटस्थलक्षणतयाविवक्षितंकथं स्यादुपपद्येतेत्येवमाकाराबुद्धिर्येषामेतादृशैर्विद्वद्भिर्गुरुभिर्मायानामपदार्थःपरिकल्प्यतेसामायानुभूयमानादज्ञानान्नार्थांतरमित्युक्तंप्रथ मेध्याये ॥ २०७ ॥ सामायापितस्यस्वरूपंसर्वथानावृणोतितद्भास्यत्वादन्यथास्मिभामिकदाप्यप्रियोनभवामीत्यादिरूपेणंभानंन स्यादित्याशयेनाह अयमिति अयमुक्तःपुरुषःस्वप्रकाशैनैकेनाखंडेनबोधेनरूपेणसर्वधियांसाक्षाद्द्रष्टाआनंदरूपःसदास्वातिरिक्तनि रूपितेनभेदेनवर्जितइति ॥ २०८ ॥ एवंस्वतःसिद्धस्यापिनिरूपणाशक्तौकैमुत्यन्यायमाह अनुभूतइतिद्वाभ्यां यथाशब्दादौविषयेऽनु

गम्यतेनैवमात्मायमांतरैःसबहिश्चरैः॥ करणैर्वान्यतोवापिस्वयंबोधस्वरूपतः॥ २०६॥ एतादृशेचसृष्ट्यादि कथंस्यादितिबुद्धिभिः॥ मायानामतदज्ञानरूपात्रपरिकल्प्यते॥ २०७॥ अयंसर्वधियांसाक्षीस्वप्रकाशैकबो धतः॥ आनंदात्मासदास्वाऽन्यभेदगंधविवर्जितः॥ २०८॥ अनुभूतेहिविषयेशब्दादौयदिकश्चन॥ अन्यस्मै स्वसुखंब्रूयाद्दृष्टान्तीकृत्यकिंचन॥ तथातथैवपूर्णंचशक्रविप्रैरुदीर्यते॥ २०९॥ यथानुभूतंनैवात्रवक्तुंशक्यं कथंचन॥ यदासुखंविषयजंकिमुपूर्णमलौकिकम्॥ २१०॥ अतोमयापिकेनापिप्रकारेणोच्यतेधुना॥ तु भ्यंतंपक्वबुद्धिःसन्स्वयंचावगमिष्यसि॥ २११॥ अनादाविहसंसारेनियतौरात्रिवासरौ॥ यथातथैवजगतः सृष्टिनाशौसुनिश्चितौ॥ २१२॥ रात्रिवासरयोःसंधिर्लोकेसंध्यायथेरिता॥ तथास्थितिःसमाख्यातासंधिः सृष्टिविनाशयोः॥ २१३॥

भूतेसतिजायमानंस्वकीयंसुखंयदिकश्चनान्यस्मैब्रूयात्तदाकिंचनपदार्थांतरंदृष्टांतीकृत्यैवब्रूयान्नतुविशेषतःशृंगग्राहिकान्यायेनवदेदिति यावत् दार्ष्टांतिकमाह तथेति ॥ २०९ ॥ कैमुत्यंस्फुटयति यथानुभूतमिति यदाविषयजंसुखमपियथानुभूतंतथानैववक्तुंशक्यंतदापूर्ण स्यालौकिकस्यवक्तुमशक्यताकिमुवाच्येति ॥ २१० ॥ फलितमाह अतइति परिपक्वाशुद्धाबुद्धिर्यस्यसतथा ॥ २११ ॥ तत्रअध्यारो पंप्रपंचयति अनादाविति अनादावनिदंप्रथमेऽत्रसंसारेयथारात्रिदिवसयोःप्रवाहःसंततस्तथासृष्टिप्रलययोरित्यर्थः सृष्टिरधिष्ठानावर णप्रयोजकत्वाद्रात्र्योपमितेत्युक्तं ॥२१२॥ तयोर्मध्यगतत्वात्स्थितिसंध्ययोपमिनोति रात्रीति ॥ २१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुकांडीयाध्यायांतगतत्रयंवाइदंनामरूपंकर्मचेत्यादिवाक्यानुसारेणसृष्ट्यादिप्रतियोगिनोजगतःस्वरूपंदर्शयति सर्वमेतदितिचतुर्भिः हेशक्रएतत्सर्वंजगन्नामादित्रयात्मकमित्यर्थः तत्रानुगतंनामादित्रयमुदाहरति अस्यजगतोविश्वशब्दादिकंनाम आदिपदेनलोकोदृश्य मित्यादिग्रहः पंचभूतानिभौतिकानितद्विकाराश्वएतेषांसमाहारात्मकमस्यरूपं सृष्ट्यादिरूपास्तुसर्वस्यजगतःक्रियाइति॥२१४॥असाधा रणंनामादित्रयमुदाहरति घटादिकमिति घटस्यघटःकुंभइत्यादिकंनामप्रसिद्धं वर्तुलंपृथुबुध्नोदरात्मकंरूपं जलानयनादिकाःक्रियाः एवंविधयापटादिष्वपिनामादित्रयात्मकत्वंबोध्यम् ॥२१५॥ नामादीनांवस्तुनातादात्म्यंस्फुटयति अवस्थायाइतिद्वाभ्यां यतोनूतनत्वपुराणत्वादिवक्रियापिध्रौव्यप्रच्यवात्मिकावस्तुनोऽवस्थाविशेषएव तस्माद्वस्तुनःस्वरूपात्क्रियानामपदार्थोनभिन्नइत्यर्थः ॥ २१६ ॥ नामेति पटघटादेरूपंतन्नाममात्रेणनिरूप्यं यतोविचारेक्रियमाणेतद्वस्तुनोरूपंनामातिरिक्तंनास्तिनदृश्यते तस्मात्कार्यंविकारमात्रंनामात्मकं

सर्वमेतज्जगच्छक्रनामरूपक्रियात्मकं॥ विश्वमित्यादिनामास्यरूपंस्याद्भूतभौतिकं॥ सृष्टिस्थितिलयास्तस्य क्रियाःप्रोक्तामनीषिभिः॥ २१४ ॥ घटादिकंघटस्योक्तंनामरूपंचवर्तुलम्॥ जलाहरणमुद्दिष्टंक्रियैवंसर्ववस्तुषु ॥ २१५ ॥ अवस्थायाविशेषःस्याद्वस्तुनोऽत्रक्रियायतः ॥ तस्मान्नरूपतोभिन्नाक्रियानामात्रविद्यते ॥२१६॥नाममात्रेणरूपंस्याद्विचारेनास्तितद्यतः॥ तस्मान्नामात्मकंकार्यंनाम्नोनान्यद्धिवस्तुसत्॥एकमेतत्त्रयंसर्वंनामरूपक्रियात्मकम्॥२१७॥ नामादिनैवभिन्नंस्यात्कारणात्स्वात्मनस्तथा॥कार्यत्वेनयथासर्पोरज्जोर्भिन्नोनविद्यते॥२१८॥इदंसर्वंजगच्छक्रब्रह्मपूर्णमभूत्पुरा॥मेघादिकंयथाकाशंमेघाद्युत्पत्तितःपुरा२१९॥

हियस्मान्नाम्नोऽन्यद्विविक्तंवस्तुघटादिसन्निर्वचनीयंनास्तीत्यर्थः फलितमाह एकमिति एतद्वर्णितंनामादिरूपंत्रयंएकंपरस्परमभिन्नमित्यर्थः ॥२१७॥ अत्राद्वितीयात्मबोधनायाध्यारोप्यंद्वयंकार्यंकारणत्वंचेतितत्रकार्यस्वरूपंदर्शितं अथोपादानकारणतांसंभावयितुमुक्तकार्यस्यतत्रात्मन्यभेदंदर्शयति नामादीति नामादित्रयात्मकंकार्यंयथापरस्परमभिन्नं तथास्वात्मनःस्वस्यकार्यस्यवास्तवस्वरूपात्कारणादभिन्नंकार्यत्वात् यद्यदुपादानकंकार्यंतत्ततोऽभिन्नंयथारज्जोःसर्पइति वाचारंभणमित्यादिश्रुतिरप्यत्रानुकूला ॥ २१८ ॥ एवंसंभावितांकारणतामुक्तपूर्णपुरुषेयोजयन्कारणपरवाक्यानांतद्धेदंतर्ह्यव्याकृतमासीदित्यादीनांतात्पर्यंदर्शयति इदमितिषड्भिः इदंनामाद्यात्मकंसर्वंजगत्पुरासृष्टेःपूर्वंपूर्णमद्वितीयंब्रह्मैवाभूदितिश्रुतावुक्तं यथामेघाद्युत्पत्तेःपुरामेघादिकमाकाशेकल्पितमाकाशमात्रमेवासीदित्युच्यतेतद्वदिति ॥ २१९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामरूपात्मकमिति सृष्टेःपुराब्रह्ममात्रतयावस्थितंविश्वमवगम्यज्ञात्वाकारणतांविनाब्रह्मणिविश्वावस्थानानुपपत्त्याकारणतानिर्वाहिकां मायामत्रब्रह्मणितेविद्वांसःकल्पयंतीति ॥ २२० ॥ सामायाप्यज्ञातब्रह्मणोनार्थांतरमितिदर्शयन्नाह मायेति शुद्धेऽनुपपन्नस्यकारणत्व स्यप्रसिद्धयेउपपत्तयेविशेषणतयामायायाअभिधायकैरव्याकृतादिशब्दैस्तद्ब्रह्मव्यवहरंतीति ॥ २२१ ॥ मायाशबलाभिधायकानूश ब्दानूवेदांतेषुप्रसिद्धान्दर्शयति अव्याकृतमिति अत्रमायीअधीश्वरईशःकारणमितिशब्दाःश्वेताश्वतरादौप्रसिद्धाः इतरेत्वत्रैवकांडत्रये इति देवंपरमितिशेषः ॥ २२२॥ तत्राव्याकृतपदार्थमाह जगतइति अव्यक्तेअस्फुटे ॥ २२३ ॥ तस्यसर्वकारणतामभिनयति तस्मिन्निति निरपेक्षेपितस्मिन्परेपुंसिअव्याकृतोपाधौस्थितंसमग्रंनामाद्यात्मकंजगत्पुनर्जायतेनभसःसकाशान्मेघमंडलवदिति ॥ २२४ ॥ एवंपरमे

नामरूपात्मकंविश्वंब्रह्ममात्रव्यवस्थितं॥ अवगम्यात्रविद्वांसोमायांतेकल्पयंतिहि॥ २२० ॥ मायाभिधाय कैःशब्दैरवाङ्मनसगोचरं॥ कारणत्वप्रसिद्ध्यर्थंतत्तेव्यवहरंतिहि॥ २२१॥ अव्याकृतंतथाकाशमक्षरंमाय्य धीश्वरः॥ अंतर्यामीतथेशाख्यःकारणंब्रह्मपूर्णकम्॥ इत्यादिनामभिर्देवंवदंतिव्यवहारिणः॥ २२२॥ जग तोस्यसमग्रस्यत्वव्यक्तेनामरूपके॥ भवतःप्रागवस्थायांतेनाव्याकृतमीरितम्॥ २२३॥ तस्मिन्नव्याकृतेपुं सिसर्वापेक्षाविवर्जिते॥स्थितंजगत्समग्रंतत्पुनरेवप्रजायते॥ नामरूपात्मकंयद्वन्नभसोमेघमंडलं॥ २२४॥ भूतानिपंचचमनइंद्रियाणितथैवच॥ प्राणाःपंचचसूक्ष्मंततूशरीरमितिगीयते॥ २२५॥ हिरण्यगर्भएषस्याद त्रमानीमहेश्वरः॥अस्यसूत्रंतथामृत्युरशनायाप्रभंजनः॥स्वयंभूरीशइत्यादिसंज्ञास्ताब्राह्मणैःकृताः॥ २२६॥

श्वरस्यकारणोपाधेःस्वरूपंप्रदर्श्याथकार्यब्रह्मतयाप्रसिद्धस्यहिरण्यगर्भस्यस्वरूपप्रदर्शकानांमृत्युनैवेदमावृतमासीदित्यादिवाक्यानांतात्प र्यमाह भूतानीतिचतुर्दशभिः भूतेंद्रियप्राणानांप्रत्येकंपंचकानिमनश्चैतत्समुदायरूपंषोडशकलंसूक्ष्मंशरीरमित्युच्यतइति ॥ २२५॥ हिरण्ये ति अत्रसमष्टिसूक्ष्मशरीरेमानीअभिमान्युक्तः कारणोपाधिर्महेश्वरएवहिरण्यगर्भसंज्ञोभवति अस्यहिरण्यगर्भस्यसूत्रादयःसंज्ञाःब्राह्मणै र्वेदविद्भिःकृतावेदप्रसिद्धाइतियावत् तत्रसूत्रसंज्ञाकुसुमानांसूत्रवत्सर्वलोकानांविधारकत्वात् अशनेच्छोपलक्षितबुद्ध्युपाधिकत्वादश नायासंज्ञा अतएवमृत्युसंज्ञा योहियंभक्षितुमिच्छतिसतंहंतीतिलोकप्रसिद्धेः प्राणोपाधित्वात्प्रभंजनसंज्ञा स्वयंभवनात्स्वयंभूरिति महैश्व र्ययोगादीशइतिसंज्ञा आदिपदेनापरब्रह्मेत्यादिसंज्ञाग्रहः ॥ २२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अस्येति अस्यहिरण्यगर्भस्यरूपंसुदुर्लक्ष्यंसूक्ष्ममितियावत् नानावर्णंवक्ष्यमाणहरिद्राकंबलेंद्रगोपाद्युपमितवर्णशालि सूक्ष्मोपाधिकत्वा
न्नानाविधमितिवार्थः नानाविधत्वमभिनयति महेश्वरइत्यादिना उपाधिशुध्यतिशयादस्येश्वरकोटिनिवेशपक्षेमहेश्वरोप्यस्यरूपंइंद्रि
यादिकंच विषयाःसूक्ष्माइतिशेषः धीरंतःकरणं ॥ २२७ ॥ कारणोपाधिरीश्वरोबीजमिवविश्वकारणमयंहिरण्यगर्भस्त्वंकुरवदित्याह
॥१७॥ अयमिति अयंहिरण्यगर्भः अस्यस्वमनिभःसर्वप्रपंचइति ॥ २२८ ॥ नन्वस्यजीवत्वंविनाकथंस्वमदर्शित्वमित्याशंक्यविवक्षाभेदेनत
स्मिन्जीवत्वमीश्वरत्वंचोभयंसंमतमित्याह आत्मानमिति एषहिरण्यगर्भउपाधिप्राधान्यविवक्षायामात्मस्वरूपमविदन्ननुसंदधानःसन्
जीवइतिसदोच्यतेचित्प्राधान्यविवक्षायांत्वयंहिरण्यगर्भस्तमात्मानंसदैवजानातीत्यतःपरमात्मेत्युच्यतइत्यर्थः अयंभावः पूर्वकल्पेहिर

अस्यरूपंसुदुर्लक्ष्यंनानावर्णंमहेश्वरः॥इंद्रियाणितथाप्राणाविषयाश्चतथैवधीः॥ २२७॥ अयंसमग्रभूता
नांभौतिकानांचकारणं॥ अस्यस्वप्नःसमग्रंस्याद्विश्वमेतन्महात्मनः॥ २२८॥ आत्मानमविदन्नेषजीवोभ
वतिनित्यशः॥ जानातितंसदैवायंपरमात्मेतिगीयते॥ २२९॥ अयंजडाजडंविश्वमयंदेवाःसवासवाः॥ दि
शोयंप्रदिशश्चायमधऊर्ध्वमयंतथा॥ २३०॥ एतस्यैवजगत्स्रष्टिर्नापरस्यकदाचन॥ अयंविश्वमिदंसर्वंसृ
जत्यत्तिचपातिच॥ महाभूतैःसमंदेवोमायावीबालकोयथा॥ २३१॥ एतस्मादधिकोनान्योजगत्यस्मिन्हि
विद्यते॥ कुतःसमोभवेदस्यपुंसःसर्वाधिकस्यहि॥ २३२॥

ण्यगर्भोपासनयाहिरण्यगर्भभावंप्राप्नुवतामनुग्रहायपरमात्मैवतद्रूपेणावतिष्ठतेइतिवस्तुस्थितिः तथाचयथाभारतेद्रौपदीविवाहेपंचेंद्रोपा
ख्यानेपांडवेषुदेवांशाअदेवांशाश्चसमुच्चिताउक्तास्तथात्रहिरण्यगर्भेभूतपूर्वोपाध्यभिमानशालिजीवांशप्राधान्यविवक्षायांजीवव्यवहा
रइतरथातुपरमात्मव्यवहारइति ॥ २२९ ॥ अस्यपरमात्मतांस्फुटीकुर्वन्सर्वात्मतामाह अयमिति अयंहिरण्यगर्भः प्रदिशःकोणाः
॥ २३० ॥ अस्यपरमात्मत्वविवक्षयैवपरमात्मनोधर्मान्जगज्जन्मादिकारणत्वादीनस्मिन्निवेशयति एतस्यैवेत्यष्टभिः एतस्यएतत्कर्तृ
कैवजगत्स्रष्टिरितिमायाविबालकवन्महाभूतैःसहितंविश्वमयमेवसृजतीत्यादि ॥ २३१ ॥ निरतिशयैश्वर्यंदर्शयति एतस्मादिति सर्वा ॥१७॥
धिकत्वादेवसमोपिनास्ति सतिसमेसर्वाधिकत्वानुपपत्तेरित्युत्तरार्धार्थः ॥ २३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंतर्यामितांदर्शयति कारयतीति यथालोकेइष्टान्प्रियान्भृत्यान्साध्वसाधुनीसम्यगऽसम्यग्रूपेकर्मणीयथारुचिकुर्वाणान्राजादिःप्रेरय तितथायंसर्वजंतून्विहितनिषिद्धेकुर्वाणान्प्रेरयतीति इष्टभृत्यदृष्टांतेनतेषुद्वेषाभावःसूच्यते ॥ २३३ ॥ तत्रव्यवस्थामाह यानितिद्वा भ्यां ॥ २३४ ॥ २३५ ॥ कामानुरूपफलप्रदत्वमाह राजेति वैषम्याभावमाह इच्छेति तेषांजंतूनांयत्रयत्रेच्छातत्रैवयतःप्रवर्त्तयति तेनतदिच्छानुसरणेननविषमइति ॥ २३६ ॥ अनिष्टफलानांनरकादीनांतच्छुत्ध्यर्थमेवप्रदानाच्चननिर्घृणइतिसदृष्टांतमाह जननीति भू तानामित्यनंतरंतेनेतिशेषः ॥ २३७ ॥ ईक्षणंस्रष्टव्यालोचनरूपंयच्छुतंतदप्यस्यधर्मइत्याह विचार्येति विचार्यईक्षित्वा एनंस्वयंभुवं

कारयत्येषएवैतान्जंतून्नानाशरीरगान्॥ भृत्यानिष्टानिवसदाकर्मणीसाध्वसाधुनी॥ २३३॥ यानयंनरकं नेतुंसमिच्छतिमहेश्वरः॥ एतान्कारयतिस्वामीपापंकर्मैवकेवलम् ॥ २३४॥ स्वर्गंनेतुंहियानिच्छेत्कारये त्पुण्यमेवतान् ॥ मनुष्यजातिंनेष्यन्सकारयेत्पुण्यपातके ॥ २३५ ॥ राजेवायंफलंदद्यात्कर्मणोःसाध्वसाधु नोः॥ इच्छानुसारतस्तेषांकारयत्येषकर्मणी॥ विषमस्तेननैवायंसर्वभूताधिपोमहान्॥ २३६॥ जननीजन कोवापिसुखदुःखेयथैवहि॥ ददातितद्वद्भगवान्भूतानांनिर्घृणोनहि॥ २३७॥ विचार्यैषजगत्सर्वंसृजत्यत्ति चपातिच॥ नचस्रष्टापरोस्त्येनंविनात्मानंस्वयंभुवं॥ २३८॥ उत्पाद्यस्थूलभूतानिभगवान्भूतभावनः॥ नीरे षुस्वात्मनोवीर्यंसहसैवसमाक्षिपत्॥ २३९॥

सर्वात्मानंविनापरएतद्भिन्नःस्रष्टानास्तीति ॥ २३८ ॥ अथब्रह्मांडोत्पत्तिद्वाराविराडुत्पत्तिप्रतिपादकानामाद्योवाअर्कइत्यादिवाक्याना मर्थंसंगृह्णाति उत्पाद्येतिपंचभिः भूतानिभावयतिवर्द्धयतीतिसतथा नंद्यादित्वाल्ल्युः यद्वाभूतमतीतकल्पभवंसृष्टिप्रकारंभावयत्यनुस्मृत वेदेनानुसंदधातीतिसतथाएतादृशोभगवान्हिरण्यगर्भोजलप्रधानानिपंचभूतानिसृष्ट्वातत्रजलेषुआत्मीयंवीर्यंशक्तिरूपंउपासकानुष्ठित कर्मोपासनयोःसूक्ष्मपरिणाममयंसमाक्षिपत्प्रक्षिप्तवान्स्वकीयस्थूलशरीरात्मकविराडारंभोन्मुखंकृतवानितियावत् मनुरप्येवमाह अप एवससर्जादौतासुवीर्यमवासृजदिति ॥ २३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिप्तमिति तेनभगवताक्षिप्तंतद्वीर्यंजलानामुपरिस्थितंकुर्वद्बीजवदुच्छूनतांगतमितियावत् तदादधिमंडोपमंजातं साऽवस्थायदपांशरआसीदितिश्रुतौशरपदेनोक्ता अथघनंगाढंकाठिन्यमभवत्प्राप्तमित्यर्थः भूप्राप्तौचौरादिकोणिज्विनिर्मुक्तःपरस्मैपदीत्युक्तम् ॥ २४० ॥ कठिनेति सातत्संघातावस्थाइयंप्रत्यक्षापृथिवीसंपन्ना सापृथिवीअधुनारूक्षापरुषादृश्यतेनिर्गतसारत्वात् कोसौसारोयोऽस्याःसकाशान्निर्गतइत्यतआह तस्याइति तस्याःपृथिव्याःसारःसम्यगुद्भूतःस्पष्टःसन्ब्रह्मांडगोलकरूपोऽभवदिति ॥ २४१ ॥ कुक्कुटेति कीदृशोगोलकः कुक्कुटांडनिभः भूरादिलोकसप्तकस्याधारश्च संस्थितिरित्यधिकरणेक्तिन् सगोलकःअण्डोत्पत्तेःपुरासंवत्सरव्यवहाराभावात्पश्चाद्भावीयःसंवत्सरस्तावंतंकालंसमंततःसर्वतःस्थितेषुनीरेषुआसीदवसदित्यर्थः अत्रब्राह्ममानेनसंवत्सरोबोध्यः पुराणेषुसहस्रसंवत्सरो

क्षिप्तंतेनहितद्वीर्यंनीराणामुपरिस्थितम् ॥ दधिमंडोपमंकालात्काठिन्यमभवद्घनं ॥ २४० ॥ कठिनापृथिवीसेयंरूक्षासादृश्यतेधुना ॥ तस्याःसारःसमुद्भूतोगोलकोभून्महानयं ॥ २४१ ॥ कुक्कुटांडसमाकारःसप्तलोकस्यसंस्थितिः ॥ अनुसंवत्सरंकालंनीरेष्वासीत्समंततः ॥ २४२ ॥ शुष्कालाबुसमोनित्यंवायुनाभ्याहतोभृशं ॥ सतुसंवत्सरेपूर्णेविभिन्नःकुक्कुटांडवत् ॥ तदंतःपुरुषोजज्ञेसप्तलोकशरीरभृत् ॥ २४३ ॥ इदंसर्वंपुमानेवभूतंभाविस्थितंचयत् ॥ एषभोगस्यमोक्षस्यसर्वदेष्टमहेश्वरः ॥ अन्नेनवर्धयत्येषस्थावराणिचराणिच ॥ २४४ ॥

क्तिरितरमानाभिप्रायेत्यविरोधः ॥ २४२ ॥ शुष्केति सगोलकःशुष्कतुंबीफलसमोवायुनाभृशंताडितःसन्संवत्सरेपूर्णेसतिकुक्कुटांडवद्विभिन्नोविदीर्णस्तस्यमध्येसप्तलोकमयशरीरोविराट्पुरुषोजज्ञेप्रादुर्भूतइत्यर्थः ॥ २४३ ॥ यथाध्यात्मंप्राज्ञतैजसविश्वाएकात्मानएवमधिदैवमीश्वरहिरण्यगर्भविराजइतिस्पष्टयितुंषोडशर्चस्यपुरुषसूक्तस्यात्रविराजिसमन्वयंसप्तदशभिर्दर्शयंस्तत्रार्थक्रमेणद्वितीयायाऋचःपुरुषएवेदमित्यादिकायाआरभ्यार्थंदर्शयति इदमित्यादिना भूतंभाविस्थितंवर्त्तमानंचयदिदंसर्वंतदेषविराडात्मकःपुरुषएव एषपुरुषोभोगस्यस्वर्गादिसुखस्यआपेक्षिकामृतस्यमोक्षस्यमुख्यामृतस्यचसर्वदाईष्टेप्रदानसमर्थःप्रभुरितियावत् यतोयमेवान्नेनचराचराणिभूतानिवर्द्धयति एतेनश्रुतौरोहतिपदमंतर्भावितण्यर्थमितिदर्शितम् ॥ २४४ ॥ ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयायाऋचोर्थमाह वक्ष्यमाणइतिद्वाभ्यां एतत्परिमाणोवक्ष्यमाणोस्यमहिमाविभूतिर्बोध्यः महिमानमभिनयति पादइति सर्वाणिविश्वानिभूतानितदीयमहिम्नएकःपादोंशइतियावत् परिशिष्टपादत्रयवान्महिमातुतस्यात्मनिदिवीतिपदेनोक्तेद्योतनात्मकेस्वरूपएवतिष्ठतीति ॥ २४५ ॥ अस्याद्वितीयपादार्थमाह महिमेति यथालोकेसेनापत्यादिरूपमहिम्नःसकाशान्महिमाश्रयोविभूतिमान्राजादिरधिकःप्रसिद्धस्तथास्यपुरुषस्यमहिम्नःसकाशादयंपुमानधिकइति ॥ २४६ ॥ चतुर्थीमृचंव्याकुर्वंस्तत्रपूर्वार्धंमहिम्नःपादत्रयविशिष्टःपुरुषउपरिष्टात्स्थितस्तस्यैकःपादःसर्वभूतात्मकोत्रव्यवहारभूमौस्थितइत्यर्थकंव्याख्यातप्रायंमत्वाउत्तरार्धार्थमाह मार्गेति वेदपूर्वोत्तरकांडयोः

वक्ष्यमाणोस्यमहिमाविज्ञेयःसर्वदात्मभिः ॥ पादःसर्वाणिभूतानित्रिपादात्मनितिष्ठति ॥ २४५ ॥ महिमाश्रयभूतोयोमहिम्नःसोधिकोयथा ॥ तथैवास्यमहिम्नोपिपुमानभ्यधिकोमतः ॥ २४६ ॥ मार्गद्वयस्यकर्तायंवैदिकस्यसदाप्रभुः ॥ प्रवृत्तेश्चनिवृत्तेश्चस्वर्गमोक्षपुरेप्रति ॥ २४७ ॥ अयमभ्यधिकोयस्मात्सर्वस्माद्भौतिकात्मनः तस्माद्विराडितिप्रोक्तोविशेषाद्राजतेयतः ॥ २४८ ॥ अधिष्ठायपुरःसर्वाःस्थिरजंगमदेहिनाम् ॥ पूरयत्यात्मनायस्मादतोयमधिपूरुषः ॥ २४९ ॥ सर्वस्मादधिकःसोयंब्रह्मांडांतःस्थितःपुमान् ॥ तस्यकार्यमिदंसर्वंगिरिदेहधरादिकं ॥ २५० ॥

प्रसिद्धस्यक्रमेणसकामनिष्कामाधिकारिकस्यप्रवृत्तिनिवृत्तिरूपस्यमार्गद्वयस्यायमेवपुरुषःकर्त्ताप्रवर्तकः कीदृशस्यमार्गद्वयस्य अशनेनभोगेनसहितंस्वर्गरूपंपुरंतद्विपरीतंमोक्षरूपंपुरंचप्रतिअभिलक्ष्यक्रमेणप्रसृतस्येतिशेषः तथाचस्वर्गमोक्षरूपेणप्रत्यक्पराग्भावेनावस्थानात्सर्वत्रव्याप्तिस्तृतीयपादार्थउपलक्षितइति ॥ २४७ ॥ पंचम्याऋचोर्थमाह अयमितित्रिभिः यस्मादयंसर्वभौतिकप्रपंचादधिकस्तस्माद्धेतोर्विराट्संज्ञोजातः तद्व्युत्पत्तिमाह विशेषादिति ॥ २४८ ॥ अधिदैवविराड्भावानंतरंसर्वाध्यात्मभावेनावस्थानाच्चाधिपूरुषसंज्ञोजातइतिव्युत्पत्तिंदर्शयन्नाह अधिष्ठायेति ॥ २४९ ॥ पूर्वपश्चिममध्यमेषुदेशेषुकालेषुचसर्वत्रातिरिक्तोधिकोभवदित्याकारमुत्तरार्द्धार्थमाह सर्वस्मादिति तत्रहेतुंसर्वकारणत्वमाह तस्येति धरापृथिवी ॥ २५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मादेवपुरुषाद्यज्ञरूपाद्दधिमिश्रिताज्यात्मकपृषदाज्यप्रभृतिहविःपशवोवेदाश्छंदांसिचजातानीत्याकारंषष्ठ्यादितिस्रणामृचामर्थंसंकल्प्याह अयंयज्ञइति अयमेवपुमान्यज्ञरूपःऋगादीनांहेतुःकारणंतथाअस्मादेवविराजोगायत्र्यादीनिच्छंदांसिअजश्छागस्तत्प्रभृतयोग्राम्यारण्यपशवश्चजाताइति ॥ २५१ ॥ एतेनसर्वोपादानादस्मात्पुरुषादतिरिक्तपशोरलाभेनपूर्वंदेवाऋषयश्चएतमेवपशुंकल्पयित्वाएतमेवपूजितवंतइत्यर्थिकानवमीऋक्व्याख्यातप्रायेतिमत्वादशम्यादीनांचतस्रणामृचामर्थमाह इंद्रश्चेति इंद्रोदेवराजोऽग्निश्चएतौदेवौविप्राश्चमुखाज्जाताः क्षत्रियादेवेष्विंद्रवरुणादयोमानवाश्चबाहुभ्यां ऊरुदेशाद्वैश्याःदेवेषुगणशालिनोविश्वेदेवादयोमानवाश्चजाताःयद्यपींद्रोदेवक्षत्रेष्वेवचतुर्थब्राह्मणेपठितस्तथापितस्याग्निसमुच्चितस्यब्राह्मणत्वसूचनायमुखादग्निस्तथेन्द्रश्चप्राणाद्वायुरजायतेतितैत्तिरीयशाखापुरुषसूक्तवाक्यानुसारेणमुखादुत्पत्तिरुक्तेतिबोध्यम् ॥ २५२ ॥ भूमिरिति भूमिःपूषसंज्ञोदेवशूद्रोमानवशूद्राश्चपद्भ्यांजाता :शेषं

अयंयज्ञःपुमान्हेतुरृक्साम‍यजुषांतथा॥ छंदांस्यपिचसर्वाणिगायत्र्यादीनिजज्ञिरे॥ अस्मादजादयश्चापि विराजःपुरुषोत्तमात् ॥ २५१ ॥ इंद्रश्चाग्निश्चविप्राश्चमुखतोस्यविनिर्गताः ॥ क्षत्रियाबाहुतस्तद्वदूर्वोर्वैश्याश्चजज्ञिरे ॥ २५२ ॥ भूमिःशूद्रास्तथापद्भ्यांजाताअस्यमहात्मनः॥ चंद्रमामनसोजातोनेत्रात्तद्वद्दिवाकरः॥२५३॥ प्राणात्प्रभंजनोजातोनाभेस्तुगगनंमहत्॥ मस्तकात्स्वर्गलोकोयंश्रोत्राज्जाताइमादिशः॥ एवमन्येपिपुंसोस्माज्जातालोकामहात्मनः॥ २५४॥ द्रव्याणिचतथाकालोवसंताद्यात्मकोमहान्॥ देवतायजमानोवाक्रियावाऽतःपरानहि॥२५५॥ सहस्रमस्तकोदेवःसहस्रेंद्रियवानपि॥ भूतभौतिकजातंसआवृत्त्यात्मापरःस्थितः ॥ २५६ ॥

स्पष्टम् ॥ २५३ ॥ प्राणादिति उक्तानामुपलक्षणत्वमभिप्रेत्याह एवमिति लोकशब्दस्यकर्मकरणव्युत्पत्त्याविषयाणांदेवानांचग्रहः ॥ २५३ ॥ चतुर्दशीपंचदश्योश्चार्थंसंगृह्णाति द्रव्याणीति द्रव्याणिआज्यादीनितत्तादात्म्यापन्नवसंतादिरूपःकालःएतदुपलक्षितादेवतायजमानोवाक्रियाकर्मवाअतःपुरुषात्पराभिन्नानेति ॥ २५५ ॥ उक्तःपुरुषोहृदयेध्येयइत्यर्थविधायकत्वादधुनाप्रथमायाऋचोर्थमाह सहस्रेति वृत्तौसहस्रशब्दोऽसंख्यातवचनः यानिलोकेमस्तकादीनितान्यस्यैवेत्यतःसहस्रमस्तकः एवमग्रेपि सपुरुषोभूतानिभौतिकानिचसर्वाणिआवृत्याभिव्याप्यस्थितःसंनिहितः दशांगुलपरिमितेहृदयेइतिशेषः अत्रवृत्वापदस्यार्थआवृत्त्येत्युक्तः भूमिपदंचभूतोपलक्षणमितिदर्शितम् ॥ २५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यहृदयेसन्निधानेचवेदाहमेतंपुरुषमितिश्रुत्यनुसारिणंस्वानुभवंदर्शयति बुद्धीति एतस्माद्दृश्यवर्गात्तमोरूपात्परतःपरस्तात्स्थितंबुद्धिसाक्षिणंस्वप्रकाशंनिरावरणंचात्मानमहंवेदसाक्षात्करोमीति ॥ २५७ ॥ सर्वाणिरूपाणिविचित्यधीरोनामानिकृत्वाभिवदन्यदास्तेइतिश्रुतिमपिसंवादयति नामेति कृत्वेतिविचित्यपदस्यार्थः वदन्अभिवदनादिव्यवहारंकुर्वन्इहहृदयआस्तेसंनिहितइत्यर्थः तवापिप्रतिबंधक्षयेतदपरोक्षंभविष्यतीत्याह शक्रेति हेशक्रयमात्मानंधातुर्ब्रह्मणोमुखादेकशतवर्षब्रह्मचर्यानंतरंभवानपिअपरोक्षीकरिष्यतेइति॥२५८॥ षोडशीमृचंव्याकरोति दिशइति यतोऽयमेवदिगादिरूपत्वात्सोपकरणयज्ञरूपस्ततस्तेनएतत्पुरुषात्मकेनयज्ञेनतमेतंपुरुषंयेयक्ष्यंतेपूजयिष्यंतितेमहात्मानस्तेनयज्ञेनपूर्वैःपूर्वैर्धर्मशब्दव्यवहृतेनसाधनेनतस्यविराजःशिरोरूपंस्वर्गंयास्यंतियत्रपूर्वेयज्ञकर्त्तारोगताइतिशेषः

बुद्धिसाक्षिणमात्मानमेतस्मात्परतःस्थितम्॥ स्वप्रकाशमहंवेदसर्वाज्ञानविवर्जितम्॥ २५७॥ नामरूपात्मकंसर्वंकृत्वाऽऽस्तेयोवदन्निह॥ शक्रयंधात्टवदनात्सम्यग्विज्ञास्यतेभवान्॥ २५८॥दिशोपिप्रदिशस्तद्वदधऊर्ध्वंसएवहि॥ यतस्ततोत्रयज्ञेनयक्ष्यंतेतेनतंद्विजाः॥ धर्मशब्देनतेनैतेस्वर्गंयास्यंतितच्छिरः॥ २५९॥ पुंसोस्यमूर्धास्वर्गःस्याच्चंद्रसूर्यौचचक्षुषी॥ प्राणःप्रभंजनःप्रोक्तोमध्यदेहोंतरिक्षकं॥ २६०॥ जलानिविविधान्यस्यमूत्राशयउदीरितः॥ भूलोकस्तुसमग्रोयंपादावस्यप्रकीर्तितौ ॥ २६१ ॥ वक्रमाहवनीयस्तुहृदयंचतथैवहि॥ योगार्हपत्यनामास्याद्दक्षिणाग्निर्मनोमतं॥ २६२॥ उरोवेदिस्तथादर्भालोमजातमुरःस्थितं॥ ओषध्योवनस्पतयःशेषाःकेशाःशरीरगाः॥ २६३॥

अत्रयास्यंतीतिसचंतेतिपदस्यार्थः एवंपुरुषसूक्तसमन्वयप्रदर्शनेनविराजःसकाशाद्वेदादिसृष्टिप्रतिपादकानिप्रथमाध्यायवाक्यानिप्रायोव्याख्यातप्रायाणीतिबोध्यम् ॥ २५९ ॥ अयमेवपुरुषोवैश्वानरविद्यायांमूर्द्धैवसुतेजातइत्यादिवाक्येनप्रतिपादितइत्याह पुंसइतिचतुर्भिः प्राणोमुखनासिकावर्त्तीप्रसिद्धःसतस्यवायुः अंतरिक्षलोकोदेहमध्यम्॥ २६०॥ जलानीति मूत्राशयोबस्तिः॥२६१॥वक्रमिति आहवनीयनामाऽग्निस्तस्यमुखं गार्हपत्यनामाऽग्निस्तस्यहृदयं दक्षिणाग्निनामाऽग्निस्तस्यमनइति॥२६२॥ उरइति यायागेवेदिःसंस्कृताभूमिःसातस्योरोवक्षः कुशास्तुलोमानि शेषालोमभिन्नाःकेशाओषधिवनस्पतिरूपाः एवमुपासकेनस्वशरीरेध्येयोयमितिभावः॥२६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह किंबहूक्तेनेति अद्यअधुनेतियावत् अत्रास्मिन्लोके नास्तिनदृश्यते सविराट्॥ २६४ ॥ एवंहिरण्यगर्भविराजोःपरमैश्वर्यमुपासनाकर्मणोःफलोत्कर्षावधिभूतंप्रदर्शितं अथतत्रक्षुधाभयंकामवैक्लव्यमित्यादिदोषप्रतिपादकानितंजातमभिव्यादादित्यादिवाक्यानिव्याख्येयानिदोषाभिधानंचमुमुक्षूणांतत्रवैराग्यायक्षुधाभिधानंतुहिरण्यगर्भस्यभोक्तृत्वेनोपासनंविराजश्चान्नत्वेनेतिविधानाया
॥२०॥ पिभवतीत्येतत्सर्वमभिसंधायक्षुधावाक्यार्थंतावदाह एवंभूतमिति एवंवर्णितंविराजंपुत्रंवीक्ष्यक्षुधाशालित्वादेवमृत्युसंज्ञोहिरण्यगर्भस्तंपुत्रमत्तुंभक्षितुंमुखंव्यात्तंप्रसृतंकृतवानिति ॥ २६५ ॥ ननुकथंपुत्रादनेच्छाभगवतोहिरण्यगर्भस्यजातेत्याशंक्यांवारयितुंक्षुधायाअनर्थ

किंबहूक्तेनशक्राद्यसंक्षेपेणावधारय॥ यदस्तियच्चनास्त्यत्रतत्सर्वंसमहेश्वरः॥ २६४ ॥ एवंभूतंसुतंवीक्ष्यमृत्युःक्षुत्पीडितोभृशं ॥ हिरण्यगर्भोवदनमत्तुंव्यात्तमथाकरोत्॥ २६५॥ अहोक्षुधापिशाचीयंमतिभ्रंशंनकस्यहि॥ कुरुतेयदयंदेवःसुतमत्तुंसमुद्यतः॥२६६॥ अस्मिन्समग्रसंसारेक्षुधारोगोऽतिदुःसहः॥ यस्यनास्तिप्रतीकारोविनान्नस्यहिभक्षणात्॥२६७॥ पुत्रस्यमरणेदुःखंनिःसीमंजायतेयतः॥ ततोधिकतमंदुःखंक्षुधाजंनास्तिसंशयः॥ २६८ ॥ यस्माद्धिरण्यगर्भोयंक्षुधादुःखप्रशांतये ॥ सुतस्यमरणाद्दुःखंतिरस्कृत्यप्रवर्तते ॥ २६९ ॥ पितृमातृगुरुभ्रातृपुत्रमित्रकलत्रकम्॥ क्षुधातुरोहिनस्यत्रनिर्घृणोराक्षसोयतः॥ २७० ॥ सत्यंशौचंश्रियोधैर्यंबलंवीर्यंपराक्रमम्॥ यशोधर्मादिकांश्चान्यान्गुणान्हंतिक्षुधाक्षणात्॥ २७१॥ बुभुक्षितोनिष्करुणःसद्यएवविजायते॥ श्वबद्धर्त्सयतिस्वीयान्यतोभार्यादिकानयं॥ २७२ ॥

कारित्वंदर्शयति अहोइतिषोडशभिः अहोविस्मयकरीक्षुधारूपापिशाचीकस्यबुद्धिभ्रंशंनकुरुतेयतोयंदेवोहिरण्यगर्भःसुतादनेसमुद्यतः कृतइति ॥ २६६ ॥ अस्मिन्निति स्पष्टम् ॥ २६७॥ पुत्रस्येति क्षुधयैतादृशंवैक्लव्यंसंभाव्यतेयतःपुत्रस्यमरणेयद्दुःखंततोधिकतमंक्षुधादुःखमिति ॥ २६८॥ तत्रहिरण्यगर्भएवोदाहरणमित्याह यस्मादिति मरणाद्यद्दुःखंतत्तिरस्कृत्याऽगणयित्वाप्रवर्ततेऽत्तुमितिशेषः॥२६९॥
अधुनाप्येवंदृश्यतेइत्याह पित्रिति अत्रलोके ॥२७०॥ सत्यमिति बलंशारीरं वीर्यंमानसं पराक्रमोयुद्धादिशक्तिः चकारेणदयादियहः ॥२०॥
॥ २७१ ॥ गुणहंतृत्वंस्फुटयति बुभुक्षितइति क्षुधितःकरुणयाहीनोभवतियतःस्वीयान्भार्यादिकान्शुनइवतिरस्करोतीति॥२७२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्याइति अस्याःक्षुधायाश्चित्रंबलंयतएतान्सत्यादीन्गुणानूदोषांश्चप्रबलतयाप्रसिद्धान्निद्रादीनेषाहंतिजयतीति अतिबलतयादोषविजयाच्चतस्यामहादोषत्वंपर्यवस्यतीतिभावः ॥ २७३ ॥ तत्रनिद्राक्रोधयोर्जयंदर्शयति मृदाविति क्षुधितःकोमलशय्यायामपिनिद्रांनगच्छति तथान्नदातरितिरस्कुर्वत्यपिक्रोधंनैवयातीतिप्रसिद्धं चित्तापहारिणीरित्यस्योत्तरत्रान्वयः ॥ २७४ ॥ कामजेतृत्वमाह पीनोन्नतेतिद्वाभ्यां यतःक्षुधितोयुवाप्याभिःसीमंतिनीभिरालिंगितोप्येताःसीमंतिनीर्नेच्छति चित्तापहारिणीरित्यादीनिद्वितीयाबहुवचनानि सीमंतिनीविशेषणानिबोध्यानि भाषंतीर्मृदुबिंबोष्ठीरितिपाठःसाधुः ॥ २७५ ॥ २७६ ॥ लोभजयमाह हिरण्यमिति ॥ २७७ ॥ त्रयाणां

अस्याबलमहोचित्रंदृश्यतेसर्वदेहिषु॥यतएषानिहंत्येतान्गुणान्दोषांश्चकृत्स्नशः॥ २७३॥मृदौशुचौशयानोपि यतोनिद्रांनगच्छति॥क्षुधितःक्रोधमायातिनैवचित्तापहारिणीः॥ २७४॥पीनोन्नतकुचान्मृद्वीःपृथुश्रोणीःसुमध्यमाः॥ चंद्राननाश्चषष्ठवर्षामनोनेत्रसुखप्रदाः॥ २७५॥ बिंबोष्ठीर्मृदुभाषिण्योनीलालकविराजिताः॥सीमंतिनीरप्सरोभिःसमानाःकाममोहिताः॥नेच्छत्यालिंगितोप्याभिःक्षुधितोबालवद्युवा॥ २७६॥हिरण्यंचपशून्वापिधान्यंभूमिमथापिवा॥लोकत्रयींवित्तपूर्णांक्षुधितोनेच्छतिकचित्॥ २७७॥ कामःक्रोधस्तथालोभोजितलोकत्रयाइमे॥ क्षुधापिशाचीभयतःक्वापियांतिविभीतवत्॥ २७८॥कामादयोयदाशूराःप्रापिताहिदशामिमां॥ तदातैर्विजितायेस्युर्वराकाहिगुणाइमे॥ २७९॥ कामादीनांपुरःस्थातुमेकस्यापिभवंतिन॥गुणाःसत्यादयस्तेहिकामाद्याःक्षुधयाजिताः॥ २८०॥इयंसर्वाधिकालोकेक्षुधानामापिदुःसहा॥अनयापरिभूतःसन्नत्तुमैच्छत्सुतंस्वकं॥ २८१॥एवंप्रवृत्तंजनकंविदारितमुखंसुतः॥निरीक्ष्यभयमापन्नःशब्दंभाणितिसोकरोत् २८२

कामादीनांमहाबलानांविजयमभिनयति कामइति जितंलोकत्रयंयैस्तेतथा॥ ७८॥ कामादिभ्योहीनबलानांगुणानांविजयेकैमुत्यमभिनयति कामादयइति ॥ २७९॥ गुणानांकामादिभ्योहीनबलतांस्फुटयति कामादीनामिति सत्यादयोगुणाःकामादीनांमध्येएकस्यान्यतमस्यापिपुरोयेयुद्धेस्थातुंक्षमानभंवतितेकामाद्याअपिक्षुधयाजिताइति ॥ २८० ॥ फलितमाह इयमिति उत्तरार्धेदेवइतिशेषः॥ २८१ ॥ एवंहिरण्यगर्भेजीवकोटिपक्षपातीक्षुधादोषोदर्शितोऽथप्रजापतिसंज्ञेविराजितादृशस्यैवभयस्यार्थाद्दर्शकंसभाणित्याद्यंशंव्याकरोति एवंप्रवृत्तमिति एवमत्तुंप्रवृत्तंप्रसारितमुखंचपितरंविलोक्यभयंप्राप्तःसुतोविराड्भाणित्याकारंशब्दमकरोदिति ॥ २८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनसंस्कारद्वाराविराज्यपिभयंजनितंतंदेहाभिमानंसकारणंनिंदति अहोइतिदशभिः अहोआश्चर्यरूपःअनिर्वचनीयत्वात् पापतमोजी वतएवांधतामिस्रादिसंज्ञकेभयेपातनात् एतादृशःप्राणिनांदेहाभिमानः एतत्स्पष्टयति क्षुधितंपितरमपिदृष्ट्वासुतोपिसन्यतोदेहाभिमानात् भीतोभयवानभूदिति ॥ २८३ ॥ धर्मप्रतिबंधकत्वाच्चदेहाभिमानःपापरूपइत्याह भक्षयिष्यंतीति यद्यपिअदःशरीरंश्वानोभक्षयिष्यन्ती तिसर्वथाजानातितथाप्यधुनाजीवद्दशायांजनकायापिदेहदानात्मकंधर्मंनकरोतियतोदेहाभिमानरूपात्प्रतिबंधकात्तस्यपापरूपतायां कःसंशयः ॥ २८४ ॥ ननुदेहाभिमानादन्यदत्रदेहदानेप्रतिबंधकंभविष्यतीतिचेत्किमनिष्टसाधनताज्ञानंवावैफल्यज्ञानंवा नाद्यः न्या सवत्परकीयस्यैवपरेणयथेष्टविनियोगेकृतेप्रत्यर्पयितुरनिष्टासंभवादितिपरकीयतांस्पष्टयन्नाह एतस्येति एतस्यजनकस्यवीर्यपरिणामेन

॥ २१ ॥

अहोपापतमोदेहाऽभिमानःप्राणिनामिह॥ क्षुधितंजनकंदृष्ट्वायतोभीतःसुतोभवत्॥ २८३ ॥ भक्षयिष्यंत्य दःश्वानःसर्वथास्वात्मनिर्गमे॥ तथापिनाधुनादेहंजनकायापियच्छति॥ २८४॥ एतस्यवीर्यपाकेनजायते तदयंयदि॥ भक्षयेत्प्रतिकूलंकिंभवेदत्रहिदेहिनः॥ २८५ ॥ परोपकारोदेहेनभवेच्चेत्किमतःपरं॥ देहिनःकर णीयंस्याज्जातंदेहफलंयतः॥ २८६॥ अन्नाद्यऽन्यशरीराणांददत्स्वर्गंसमाप्नुयात्॥ किमुस्वात्मशरीरस्यदान तोनफलंव्रजेत्॥ २८७ ॥ यस्मैकस्मैचयत्किंचिद्दत्वास्वेष्टंफलंभवेत्॥ पित्रेस्वस्यस्वदेहंहिदत्वाकिंनामनाप्नु यात्॥ २८८ ॥

इदंशरीरंजायतेतच्छरीरंइत्थमात्मीयमयंजनकोयदिभक्षयेत्तर्हिदेहिनोदृथादेहाभिमानिनःकिंप्रतिकूलंस्यान्नकिंचिदपि देहस्यपरकीय त्वादेवेतिभावः ॥ २८५ ॥ नद्वितीयइत्याह परोपकारइति चेद्यदिदेहेनपरोपकारोभवेज्जायेततर्ह्यतःपरोपकारात्परमधिकंकिंकरणीयम वशिष्यतेनकिञ्चिदपिदेहफलस्यजातत्वादिति ॥२८६॥ देहदानस्यफलवत्त्वंकैमुत्येनाह अन्नादीति अन्यशरीराणांपरकीयशरीराणामुप कारकमन्नादिकंददत्प्रयच्छन्सन्स्वर्गंगच्छेत् एवंसतिस्वात्मनःशरीरस्यैवदानेकिमुफलंवाच्यमिति॥ २८७॥कैमुत्यन्यायमेवप्रकारांतरेणाह यस्मैइति यस्मैकस्मैचिदविज्ञातायापियत्किंचिदन्नादिकमपिदत्वास्वेष्टफलंलभतेस्वस्यपित्रेस्वदेहस्यैवदानेफलंकिमुवाच्यमिति॥ २८८॥ ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्धावलंबनत्वाच्चदेहाभिमानःपापइत्याशयेनाह विण्मूत्रादीति मलसंघातेशरीरेचेदहंमतिःक्रियतेतर्हिंबाह्येशरीराद्बहिःपतितेपितत्र मलेक्रियतांनोचेदत्रापिएवमस्त्वित्यनौचित्यमस्तत्वाद्देहाभिमानःपापइत्यर्थः ॥ २८९ ॥ अथवाकार्याविद्यारूपदेहाभिमानस्यापिय त्कारणंमायाविद्यादिशब्दवाच्यंतदेवसर्वानर्थप्रयोजकमित्याह मायेति अनयामाययामायाश्रयोविराट्संज्ञःपुमान्यस्माद्विमोहितस्त स्मात्पूर्वोक्तंयुक्तमेवेति ॥ २९० ॥ कथंविमोहितोऽतआह अस्वकीयमिति अस्वकीयत्वादिविशेषणकमपिदेहंपित्रेपिविराट्यन्नादा न्नदत्तवांस्तन्मोहादेवेति आस्थास्थिरत्वनिश्चयः ॥ २९१ ॥ यदाएतेनकार्यकारणताभ्यांद्विविधेनमोहेनविराज्यपिभयरूपोनर्थोजनि तस्तदान्यत्रतज्जननंकिमुवाच्यमित्याह अहोइति अयंद्विविधोविमोहःकस्यविदुषोपिकिमयुक्तंनकारयेत्नप्रयुंजीतेति यत्यतःपित्रेपि

विण्मूत्रादिमलानांहिसंचयोदेहईरितः॥अस्मिन्नहंमतिश्चेत्स्याद्बाह्येकस्मान्नसाभवेत्॥ २८९॥मायामहे श्वरस्यैषामायिनामपिमोहिनी॥अनयामोहितोयस्माद्विराण्मायाश्रयःपुमान्॥ २९०॥अस्वकीयमिदंदेहं दुर्गंधमशुचिक्षणात्॥नश्वरंघटवन्नात्मरूपमास्थाविवर्जितं॥ नादाद्विमोहितःपित्रेक्षुधितायविराट्पुमान् ॥ २९१॥अहोविमोहःकस्यायंविदुषोपिनकारयेत्॥ किन्नामपित्रेनादाद्यत्सुतःस्वंक्षुधितायच॥ २९२॥भा णित्येवविसृष्टायाविराजावाग्विभीतितः॥ वर्णध्वनिस्वरूपासावागासीत्सर्वदेहिनाम् ॥ २९३ ॥ हिरण्यग र्भोभगवान्क्षुधयापीडितस्तदा॥प्रवृत्तोप्यत्तुमेवामुंनादद्विद्वानयंयतः॥ २९४॥ अहोविद्यानकस्येयमुपका रंकरोतिन॥सुतहत्यांप्रवृत्तोयमनयाविनिवारितः॥ २९५॥ अकार्यंकुर्वतःपुंसोदीनांदीनतमांदशां॥प्राप्त स्यापिभवेन्नित्यंविद्याधर्मकरीहिसा॥ २९६॥

क्षुधितायसुतःस्वमात्मशरीरंनअदात्नदत्तवानिति ॥ २९२ ॥ भाणिति भाणित्याकारायावाग्विभीतितःभयात्विराजाविसृष्टाप्रकटी कृतासासर्वदेहिसंबंधिवैखरीवागासीदिति कीदृशी वर्णालिकाध्वन्यात्मिकाचेति ॥२९३॥ ततःकिंवृत्तमतआह हिरण्येति हिरण्यगर्भोऽ त्तुंप्रवृत्तोप्यमुंविराजंसुतंनादत्नभक्षितवान्यतोयंविद्वान्विद्यावलेननिवृत्तइतियावत् ॥ २९४ ॥ विद्यायाअनर्थनिवारकत्वंयुक्तमेवेत्या ह अहोविद्येति सुतस्यहतिर्हननंतस्यां अयंहिरण्यगर्भः ॥ २९५ ॥ विद्यांप्रशंसति अकार्यमितिपंचभिः अकार्यंकुर्वतोपिदीनांदीनतमां वादशांप्राप्तस्यापिपुंसोविद्याधर्मकरीधर्महेतुर्भवति धर्मशब्दःसुखतत्साधनसमुदायेलाक्षणिकः ॥ २९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्ययेति प्राप्तंदुस्तरमपिआपद्रूपंसमुद्रंलोकद्वयहानिकरंयशोनाशनंचविद्ययातरतीति ॥ २९७ ॥ विद्याहीति विद्येवसर्वेषांमातायतो
नयाविद्ययाजातःप्रादुर्भूतःपुमान्सर्वत्रसुखीति ॥ २९८ ॥ विद्याहिधनमिति स्पष्टम् ॥ २९९ ॥ क्षुधयेति क्षुधादिभिर्हन्यमानोपिपु
मांस्तर्हितस्मिन्कालेक्षुधादिरूपान्वैरिणोविद्यारूपेणशस्त्रेणैवजयेदिति ॥ ३०० ॥ धातारमिति यस्याउक्तविधयामाहात्म्यंदर्शितंसा
विद्याक्षुधयामर्यादाभेदनोद्यतंधातारंहिरण्यगर्भंत्द्दयदेशएत्यप्राप्यइदंवचःप्राह इदंकिं हेमृत्योत्वंसुतंहंतुंनार्हसीति ॥ ३०१ ॥ तत्रहेतुं
लोकसंग्रहस्यकर्त्तव्यत्वमाह भवानिति तांमर्यादाम् ॥ ३०२ ॥ लोकानांमर्यादास्थापकाभवादृशाभवादृशानांतुमर्यादायांस्थापिका

विद्ययातरतिप्राप्तंदुस्तरंस्वापदर्णवं ॥ लोकद्वयक्षकरंस्फीतकीर्तिविनाशनम् ॥ २९७ ॥ विद्याहिसर्वजंतूनां
जननीनापरास्मृता ॥ जातोनयापुमान्यस्माद्वच्छेल्लोकद्वयेसुखम् ॥ २९८ ॥ विद्याहिधनमुद्दिष्टमक्षयंसर्वदेहि
नाम् ॥ वृद्धिंप्रयातिदानेनमृतंचनविमुंचति ॥ २९९ ॥ क्षुधयाकामतोवाथक्रोधलोभादिभिःपुमान् ॥ हन्य
मानोजयेत्तर्हिविद्याशस्त्रेणवैरिणः ॥ ३०० ॥ धातारंक्षुधयाभिन्नमर्यादंत्द्दिचैत्यसा ॥ इदमाहनमृत्योत्वंसुतं
भोक्तुंसमर्हसि ॥ ३०१ ॥ भवान्सर्वगुरुर्लोकमर्यादांयदिभेत्स्यति ॥ अतःपरंकथंतांहिपालयेयुःपरेजनाः
॥ ३०२ ॥ लोकेनियामकःकश्चित्त्वादृशानांमहात्मनां ॥ नविद्यतेविनैकांमांहृदयेतवसंश्रितां ॥ ३०३ ॥ सुत
स्यभक्षणान्मृत्योतवलोकद्वयेपिहि ॥ यशोधर्मस्वरूपंतत्सुखमेतद्विनश्यति ॥ ३०४ ॥ माकृथाःपातकंमृत्यो
चांडालैरपिनिंदितं ॥ क्षुधार्ताअपिचांडालाःसुतान्नादंतिकर्हिचित् ॥ ३०५ ॥

हंविद्यैवेत्यतोमयैवमुक्तमित्याह लोकइति एकांत्वद्धृदयनिवासिनींमांविनात्वादृशानांनियामकोन्योनास्तीति ॥ ३०३ ॥ स्ववचनोल्लं
घनेदोषमाहविद्या सुतस्येति हेमृत्योसुतस्यभक्षणाल्लोकद्वयेपिप्रसृतंतत्प्रसिद्धंयशस्तथाएतत्प्रत्यक्षंपुत्रसुखंचविनश्यति कीदृशंयशोधर्म
स्वरूपंधर्मपरिणामभूतमितियावत् ॥ ३०४ ॥ अतिनिंदितत्वाच्चमैवमित्याह माकृथाइति सुतभक्षणात्मकंपातकंमाकुरु कीदृशं पातकं
चांडालैरपिशब्दात्पशुभिश्चगर्हितं तन्निंदितत्वंतेषांतत्राप्रवृत्तेर्निश्चितमित्याह क्षुधार्ताअपीति सुतान्नअदंतिनभक्षयंतीति ॥ ३०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पशूनामत्राऽप्रवृत्तिमभिनयति येपीति येपशवःकामेनविमोहिताःसंतोजननीमपिस्वसारमपिचगच्छंतितेपिसुतान्नादंतीति॥ ३०६॥इत्यादीति इत्यादिकंविचारंहृदयेप्रादुर्भूतयाविघ्यासहकृत्वान्यवर्ततनिवृत्तोऽभवत् कीदृशोमृत्युः जातंजातमुत्पन्नमुत्पन्नमत्तुकामोपि आदिपदेनसस्यांकुरसमस्यास्यैवादनेऽन्नाल्पतास्यात्स्थितौतुचिरमनुवर्तमानस्यान्नस्यलाभोभविष्यतीत्यादिविचारपरिग्रहः जातंजातमितिवीप्सयाविराजासृज्यमानेष्वपिमृत्योरदनेच्छाविचारेणतन्निवृत्तिश्चसूचिता॥३०७॥ ततःकिंवृत्तमतआह तस्मैइति तस्मैविराजेतनयायआत्मज्ञानंदत्वातथासृष्ट्यादिहेतुभूतान्वेदान्दत्वाअसौपिताहिरण्यगर्भोंतर्धानंगतः॥३०८॥ मृत्युजइति मृत्योःसुतोविराडेवएकाकीएकलःस्थितःसन्पितरमदृष्ट्वाक्षणंभयंप्राप्तः यथाअजनेजनरहितेदेशेबालोभीतिंगच्छतितद्वदिति॥३०९॥ क्षणमिति क्षणमितिपूर्वान्वयि पश्चाद्विचारेणतांभीतिंजहौत्यक्तवान् विचारेणभयत्यागेभयकारणबाधंद्वारमाह ब्रह्मेति यदिब्रह्मामद्भिन्नंस्यात्तदासद्वितीयतापत्त्याअद्वि

येपिगच्छंतिजननींस्वसारंचविमोहिताः॥ कामेनपशवस्तेपिसुतान्नादंतिकर्हिचित्॥३०६॥इत्यादिविघ्यासार्धंविचार्यहृदयेनिजे॥ अत्तुकामःक्षुधार्तोयंजातंजातंन्यवर्तत॥३०७॥ तस्मैदत्वात्मविज्ञानंवेदान्सृष्ट्यादिहेतुकान्॥ उक्त्वाचतनयायासौतत्रैवांतर्दधेपिता॥३०८॥ मृत्युजःपुरुषाकारोविराडेकाक्यवस्थितः॥ अदृष्ट्वापितरंभीतिमगाद्बालोऽजनेयथा॥३०९॥ क्षणंविचार्यपश्चात्सजहौभीतिंपरःपुमान्॥ ब्रह्मदृष्ट्यास्वदृष्ट्याचभेददृष्टेरदर्शनात्॥३१०॥ स्वात्मनःप्रतिकूलंहिभिन्नमन्यंयदाधिया॥ प्रपद्यतेतदासर्वोभयमेतिनसंशयः॥३११॥धियमेतांयदाजह्यान्नतदाभयमाव्रजेत्॥ यथातथैवभगवान्विराण्निर्भयतामगात्॥३१२॥

तीयतालक्षणंस्वरूपंजह्यात्एवमात्मामद्भिन्नश्चेत्स्यादनात्मैवतदास्यादित्थंब्रह्मात्मपदार्थयोर्दृष्ट्यालोचनेनभेददृष्टेरदर्शनाल्लोपाद्बाधादितियावत् तथाचपदार्थद्वयेप्यालोचितेपरस्यविनाशहेतोरदर्शनेनतद्दर्शननिमित्तकस्वोच्छेददर्शनात्मकंभयंजहाविति॥ ३१० ॥ भेददृष्टेर्भयकारणतांस्फुटयति स्वात्मनइति प्रतिकूलंसर्पादिकंभिन्नंलोकेभिन्नतयाभिमतमपियदास्वात्मनोऽन्यधियाप्रपद्यतेनिश्चिनोतितदैवसर्वोजनोभयमेतिप्राप्नोतीतिभेददृष्टेर्भयव्यापकताप्रसिद्धा॥ ३११ ॥ धियमिति एतांभेदावगाहिनींधियंयदाजह्यात्तदानभयंगच्छेदितियथालोकेपिप्रसिद्धंतथाविराडपिभेददृष्टिबाधनेननिर्भयोभवदिति एतेनश्लोकत्रयेणचतुर्थब्राह्मणगतस्यसोबिभेदित्यादेःसाक्षाद्भयप्रदर्शकस्यविघ्यातन्निवृत्तिचप्रतिपादयतोवाक्यस्यार्थोदर्शितः॥ ३१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थब्राह्मणगतस्यसवैनैवरेमेइत्यादेःकंडिकाद्वयस्यकामवैक्लव्यप्रतिपादकस्यार्थमाह तथापीत्यूनविंशतिश्लोकैः यद्यपिविद्ययाभयं निवृत्तंतथापितस्यविराजःकामिनःसृज्यप्राणिकर्मवशादुत्पन्नकामात्मकदोषशालिनःअणुस्वल्पमपिसुखंनाभूत् कामदोषेणसुखभानप्रतिबंधेजननीयेद्वारमाह शून्यएवेति यथालोकेकामिनःकामुकस्ययुवतीनामभावेवामभागावच्छिन्नःसमग्रआकाशःशून्यतयाभासतेतथाविराजोपिसआकाशःशून्यतयामतोभूदिति एकत्रांशेशून्यताभिमानजननंसर्वकामनासुप्रसिद्धं यथापशुकामोगृहांगणात्मकाकाशंशून्यंमन्यतेपुत्रकामोंऽकाकाशंधनकामःकोशाकाशं एवमन्यत्रापि निष्कामस्तुपूर्णमेवात्मानंमन्यतइतिबोध्यमिति ॥ ३१३ ॥ कंदर्पेति कंदर्पःकामस्तद्रूपेणसर्पेणसंदष्टःशून्यतयाभिमानात्मकेनतद्विशेषेणव्याप्तइतियावत् एतादृशोविराडेतदचिंतयत् एतत्किं अस्यव्यापकदेहस्यभोगाक्षमत्वात्तत्समर्थंदेहांतरंस्रक्ष्यामीति ॥ ३१४ ॥ इतिसंचिंत्येति इत्थंसंचिंत्यसृज्यप्राणिनांकर्मभिःप्रचोदितोभगवान

तथापिनैवतस्याभूत्कामिनःसुखमण्वपि ॥ शून्यएवसमग्रोभूदाकाशोवामभागगः ॥ कामिनोहियथालोकेयुवतीनामभावतः ॥ ३१३ ॥ कंदर्पसर्पसंदष्टोविराडेतदचिंतयत् ॥ स्रक्ष्याम्यन्यमहंदेहमात्मनःसुखकारणम् ॥ अयंसर्वात्मकोदेहोभोक्तुंभोगान्नचक्षमः ॥ ३१४ ॥ इतिसंचिंत्यभगवान्प्राणिकर्मप्रचोदितः ॥ पंचबाणप्रभिन्नांगोदेहमन्यमथासृजत् ॥ ३१५ ॥ विराडजनयत्सत्यसंकल्पःशुक्तिकापुटम् ॥ यादृशंतादृशंदेहंस्त्रीपुंसात्मकमीश्वरः ॥ ३१६ ॥ हिरण्यगर्भोदेहोयंविराड्वासर्वदेहभृत् ॥ एतौस्त्रीपुरुषावेतावेतावेवनपुंसकम् ॥ एतौनानाशरीराणिस्थावराणिचराणिच ॥ ३१७ ॥

न्यंदेहमसृजत् कीदृशोभगवान् पंचबाणेनकामेनविद्धमनाः ॥ ३१५ ॥ विराडिति ईश्वरत्वात्सत्यसंकल्पोविराड्यादृशंशुक्तिकयोःसंपुटंमिलितयोराकारविशेषोभवतितादृशंदेहमजनयदिति पुनःकीदृशं स्त्रीपुंसात्मकंसंसक्तस्त्रीपुरुषरूपमिति पुटशब्दस्यटोपधत्वात्पुंस्त्वार्हस्यनपुंसकेपिप्रयोगोदृश्यते यथाभागवते बिलेबतोरुक्रमविक्रमान्येनशृण्वतःकर्णपुटेनरस्येति अतएवोक्तंलिंगमशिष्यमित्यादि॥ ३१६ विराजास्रष्टेषुउक्तदेहप्रभृतिदेहेषुईश्वरहिरण्यगर्भविराजांत्रयाणांसमष्टितयातादात्म्यंबोध्यमितिवक्तुंहिरण्यगर्भविराजोस्तावदाह हिरण्यगर्भइति अयंस्त्रीपुंसात्मकोदेहःहिरण्यगर्भरूपोविराड्रूपोपिचमंतव्यः वाशब्दःसमुच्चये उभयोःसर्वदेहभृत्त्वादस्यचसूक्ष्मस्थूलसमुदायात्मकत्वादितिभावः उभयोःसर्वदेहभृत्त्वमभिनयति एताविति एतौहिरण्यगर्भविराजौस्त्रीलोकेयावत्स्त्रीशरीरंतदेतन्मयंपुरुषोवापुरुषशरीरमप्येतन्मयंनपुंसकशरीरमप्येतन्मयमित्यर्थः तथैतावेवस्थावरादिरूपाविति ॥ ३१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयाणांतदाह हिरण्यगर्भःसर्वेषामिति सर्वप्राणिनांसमष्टिसूक्ष्मरूपोहिरण्यगर्भःस्थूलसमष्टिरूपोविराट्तृतीयंसमष्टिशरीरंतुकारणोपाधिकेश्वररूपमित्यर्थः ॥ ३१८ ॥ उक्तंशरीरंतुसमष्टेर्विराजोदेहांतरत्वात्समष्टिकोटावेवगणनीयंनव्यष्टिमात्रमितिविशेषंदर्शयन्नाह स्त्रीपुंसेति यत्स्त्रीपुंसात्मकंवपुरादिष्टमुक्तंतत्कामिनोविराजएवदेहमन्यद्देहांतरमितियावत् ततोदेहादेषाप्रत्यक्षादिसिद्धासर्वास्सृष्टिर्जातेति ॥ ३१९ ॥ ततःसर्वसृष्टिप्रपंचयन्नाह अर्द्धेति अर्द्धनारीशरीरंयस्मिन्नेतादृशंतंदेहंदृष्ट्वाविराट्द्विधाचकारशुक्तिसंपुटंकीटइवेति॥३२०॥ शकलेइति तस्ययेद्वेशकलेखंडौतौकाममोहितस्त्रीपुरुषरूपौजातौतत्रपुमान्स्वायंभुवोमनुर्ज्ञेयःस्त्रीतुशतरूपासंज्ञातत्पत्नीज्ञेया शतमसं

हिरण्यगर्भःसर्वेषांसूक्ष्मंदेहमुदाहृतः॥ विराट्स्थूलंचविद्वद्भिस्तृतीयंकारणंस्मृतम्॥ ३१८ ॥ स्त्रीपुंसवपुरादिष्टंविराजःकामिनोहियत्॥ देहमन्यत्ततःसर्वासृष्टिरेषाव्यजायत॥ ३१९ ॥ अर्धनारीशरीरंतंनिरीक्ष्यपरमेश्वरः॥ द्विधाचकारभगवान्कीटःशुक्तिपुटंयथा॥ ३२०॥ शकलेद्वेसमाख्यातेस्त्रीपुंसौकाममोहितौ॥ स्वायंभुवःपुमान्ज्ञेयःशतरूपातथावधूः॥ ३२१ ॥ आभ्यांहिमानवीसृष्टिरुपन्नाविविधाभुवि ॥ भाविकर्मानुसारेणवधूरेतदचिंतयत्॥ ३२२॥ अयंममपितावास्याद्भ्रातावाधर्मतःपुमान्॥ अनेनाहंकथंयामिस्वैरिणीवविनिंदिता॥ ३२३ ॥ पुमानेषनजानातिधर्मकामविमोहितः॥ अहंकस्मान्नजानामिधर्मंस्वर्गप्रदंसदा॥ ३२४॥ पुरुषाःप्रायशोदीनाःकामार्त्ताधर्मभेदकाः॥ नवध्वंस्तदहंकस्मान्नजानाम्यात्मनोहितं॥ ३२५॥

ख्यातानिवक्ष्यमाणविधयारूपाणियस्याःसातथा ॥ ३२१ ॥ आभ्यामिति आभ्यांमनुशतरूपाभ्यांमानवीमनुसंबंधितयाप्रसिद्धासृष्टिर्मनुष्यसृष्टिरितियावत् साप्रथममजायतेति ततोभाविनांप्राणिनांकर्मानुसारेणवधूःशतरूपैतद्वक्ष्यमाणमचिंतयदिति॥ ३२२ ॥ तच्चिंतामभिनयति अयंममेति अयंपुमान्मनुर्विराडभेदालोचनेममपितास्यात्सहोत्पन्नत्वालोचनेतुभ्रातावास्यादित्यतोऽनेनसहगमनंविनिंदितंस्वैरिणीवन्ममानुचितमिति ॥ ३२३ ॥ पुमानिति यद्यप्येषपुमान्धर्मंनजानातितथापिमयासज्ञेयः ॥ ३२४ ॥ तत्रहेतुंस्त्रीणांकामाधिक्येपिधीरत्वप्रसिद्धिमाह पुरुषाइति कामार्त्ताःपुरुषाएवप्रायशोदीनाधर्मोल्लंघकाश्चभवंतिवध्वस्तुनथानभवंतीतितत्तस्मादहमात्मनोहितंकुतोनचिंतयामीति ॥ ३२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादीति स्फुटं॥ ३२६॥ पुरुषइति अयंपुरुषोनिवारितोपिकामसंतप्तत्वान्मदुक्तंनैवांगीकरिष्यत्यतोरूपांतरग्रहणेनांतर्धानंव्रजामीति ॥ ३२७॥ इतिसंचिंत्येति एवमालोच्यसानारीशतरूपागोरूपाजातातदापुमान्मनुरपिवृषभरूपोभूत् तत्रनिमित्तकारणंस्रज्यानांकर्माणी ति अत्रउभाभ्यामित्थंगोजातिरूपग्रहणेकृतेसतिलोकत्रयगतागावोजाताइति ॥ ३२८ ॥ एवमन्यत्रापिशतरूपयावडवादिरूपग्रहणे कृतेमनुनापितत्तज्जातीयपुंरूपग्रहणात्तत्तज्जातीयशरीराणिजनितानीतिबोध्यमित्याह एवमश्वादीतिद्वाभ्यां ॥३२९॥ एवमिति स्थावरे
ष्वपिवल्ल्यादौस्त्रीत्वव्यवहारःवृक्षादौचपुंस्त्वव्यवहारःप्रसिद्धः तथाचस्थावरंजंगमंवास्त्रीपुंसात्मकमिदंविश्वमेवंजातमित्यन्वयः ॥३३०॥

इत्यादिबहुशोनारीचिंतयित्वामनोगतम्॥ उपायंचिंतयामासपुरुषस्यनिवारणे॥ ३२६॥ पुरुषःकामसंभ्रांतोमयानैवनिवारितः॥ करिष्यत्यतएवाहमंतर्द्धानंव्रजाम्यतः ॥ ३२७॥ इतिसंचिंत्यसानारीगौरभूदृषभःपुमान्॥ तत्क्षणादभवत्सोपिभाविकर्मप्रचोदितः॥ अत्रगावःसमुत्पन्नालोकत्रयगताहियाः ॥ ३२८॥ एवमश्वादिरूपेषुयत्रयत्रगतावधूः॥ तत्तज्जातिःपुमान्भूत्वातत्रतत्रगतःपुमान्॥ ३२९॥ एवंसर्वमिदंजातंस्त्रीपुंसात्मकमेवहि॥ प्राणिजातंस्थिरंचैवजंगमंचमहीतले॥ ३३०॥ एवमेषपुरश्चक्रेद्विपदोपिचतुष्पदः॥ पदहीनामहेशानोलोकत्रयगताहियाः॥ ३३१॥ सएषजगतःस्रष्टाकारणंमृत्युरीश्वरः॥ विराड्विवेशसर्वासुपुरीष्वात्मस्वरूपधृक्॥ ३३२॥

एवंचयद्व्याख्यास्यमानेमधुकांडांतगतेपुरश्चक्रेद्विपदइत्यादिमंत्रेद्विपदादिशरीरात्मकपुरीनिर्माणमुक्तंतदित्थमुपपन्नमित्याह एवमेषइति एषमहेशानःएवंद्विपदादिरूपाःपुरश्चक्रे द्वौद्वौपादौयासुतास्तथा एवंचतुष्पदइति पदहीनाःपादरहिताउरगादिरूपाः॥ ३३१॥ एवंनामरूपात्मकोपाध्यध्यारोपपराणिसृष्टिवाक्यानिव्याख्यातानिअथपरमात्मनस्तटस्थत्वभ्रमवारणद्वारातत्रजीवत्वाध्यारोपपरस्यप्रवेशवाक्यस्यसएषइहप्रविष्टइत्यादेरर्थमाह सएषजगतइति यःपरमात्माव्याकृतादिपदवाच्यमायामनुप्रविष्टोजगत्स्रष्टाकारणमितिचोक्तस्ततःसूक्ष्मसमष्टिमनुप्रविष्टोमृत्युरित्यादिपदैरुक्तःस्थूलसमष्टिमनुप्रविष्टोविराडित्युक्तःसएषएवत्रिविधईश्वरःसर्वासुव्यष्टिभूतासुपुरीषुप्रविवेश.
तत्रहेतुगर्भंविशेषणं आत्मेत्यादि यदिसनप्रविशेत्तर्हिपुर्योनिरात्मकाःस्युस्तदितरस्यात्मनोऽभावादितिभावः॥ ३३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याव्याकृताद्युपाधीनामंतरंतरनुप्रवेशेदृष्टांतमाह महाकाशइति यथाचमहाकाशोमठेऽनुप्रविष्टोमठाकाशोभवति समठाकाशोपिमठांतरगृहेऽपवरकसंज्ञेनुप्रविष्टोऽपवरकाकाशोभवति सोप्यपवरकाकाशोघटेऽनुप्रविष्टोघटाकाशोभवति तद्वदीश्वरःसुखविग्रहवान्सुखरूपोजंतूनांप्रतिदेहंचैतन्यरूपेणापादमामस्तकमनुप्रविष्टइतिद्वयोरन्वयः अत्रमठोव्याकृतोपमानंअंतर्गृहंतुसूक्ष्मस्थूलोपाध्योर्घटोव्यष्टिशरीराणामितिविवेकः ॥ ३३३ ॥ ३३४ ॥ अस्यप्रवेशउपाधिस्थतयायदुपलंभनंसांप्रदायिकैराभासपदेनोक्तंतन्मात्ररूपोनचगृहादाविवान्नसंयोगादिरूपइतिसूचयितुंवस्तुतस्तत्रवृत्तितानियामकसंबंधाभावंसदृष्टांतमाह यथाकाशइति यथाकाशोघटेवर्त्तमानतयाभ्रांतैर्व्यवन्हियमाणोपिवस्तुतस्तत्रनविद्यतेएवमत्रात्मेति ॥ ३३५ ॥ तस्यप्रविष्टव्यवहारेउपाध्यारोपएवप्रयोजकइतिसदृष्टांतमाह घटेइति पूर्वसि

महाकाशोमठाकाशेसोप्यांतरगृहेपुनः ॥ घटेसोपिचयद्वत्स्यात्प्रविष्टस्तद्वदीश्वरः ॥ ३३३ ॥ चैतन्यरूपतोनित्यसुखविग्रहवानयम् ॥ आपादमस्तकंदेहंजंतूनांसंगवर्जितः ॥ ३३४ ॥ यथाकाशोघटाकाशेवर्तमानोनविद्यते ॥ एवमेषपुमानेपुवर्तमानोनविद्यते ॥ ३३५ ॥ घटेजातेयथाकाशःप्रविष्टोगीयतेजनैः ॥ तथाशरीरेसंजातेप्रविष्टइतिगीयते ॥ ३३६ ॥ यथासर्वगतोभानोःप्रकाशोलभ्यतेक्वचित् ॥ दाहादिहेतुरेवंसद्धृदयेलभ्यतेपुमान् ॥ ३३७ ॥ नापितस्ययथापात्रेक्षुराधारेऽतिविस्तृते ॥ लभ्यतेऽत्रक्षुरःक्वापिदेहेद्धृदितथापुमान् ॥ ३३८ ॥ यथासर्वगतोवन्हिःकाष्ठेष्वेवोपलभ्यते ॥ एवंसर्वगतोप्यात्मादेहेष्वेवोपलभ्यते ॥ ३३९ ॥ तारतम्यंयथादृष्टंवन्हेःकाष्ठगतस्यहि ॥ सर्वदेहस्थितस्यापितारतम्यंतथात्मनः ॥ ३४० ॥

द्धएवाकाशोघटस्यावच्छेदकस्योत्पत्त्यातत्रप्रविष्टइत्युच्यतेतथात्मेति ॥ ३३६ ॥ एवंशरीरप्रविष्टत्वेपिहृदयेविशेषतःप्रवेशइतिप्रदर्शकंश्रुतिगतंक्षुरदृष्टांतंव्याकरोति यथासर्वगतइतिद्वाभ्यां यथासूर्यप्रकाशःसर्वगतोपिक्वचिदेवसूर्यकांतादौप्रविष्टःसन्दाहादिहेतुरेवमात्माहृदयेस्थितइति ॥ ३३७ ॥ नापितस्येति यथानापितस्यविस्तृतेक्षुराधारेपात्रेक्वापिएकदेशेक्षुरःशीघ्रंलभ्यतेतथात्मादेहनिष्ठेहृदयइति ॥ ३३८ ॥ देहेसामान्यव्याप्तिदर्शकंद्वितीयमग्निदृष्टांतंविवृणुते यथासर्वेतिपंचभिः ॥ ३३९ ॥ एतेनदृष्टांतेनउत्कृष्टत्वापकृष्टत्वलक्षणंतारतम्यमप्यौपाधिकमितिदर्शितमित्याह तारतम्यमिति ॥ ३४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वगतत्वेसर्वत्रोपलब्धिः स्यादितिशंकाप्यनेनदृष्टांतेनसमाहितेत्याह मथनेनेति श्रुतिःश्रवणंतत्प्रभृत्युपायेन ॥ ३४१ ॥ उपाधिधर्मभाक्त्व
मुपाधिवशान्नानारूपत्वंचानेनदृष्टांतेनदर्शितमित्याह यथावन्हिरितिद्वाभ्याम् ॥ ३४२ ॥ ३४३ ॥ ननुभासमानआत्मनिकथमेवमध्या
रोपइतिचेदज्ञानेनतस्यसम्यग्भानप्रतिबंधादित्याह विद्यमानइति यथारात्रौसूक्ष्मरूपेणविद्यमानोपिसवितुःप्रकाशस्तमसाभिभूतत्वान्नप्र
काशतेतथाविद्यमानोप्ययमात्माअज्ञानेसतिनप्रकाशतइति ॥ ३४४ ॥ ननुप्रकाशरूपेकथमावरणसंभवइत्याशंकावारणायदृष्टांतमाह
प्रकाशमिति यथादिवसेनिबिडंतमोराहुरूपंप्रकाशरूपमादित्यमाश्रयेत् तद्भास्यत्वात् तथात्राज्ञानमिति अधुनाविद्यातःपूर्वदशायां
॥ ३४५ ॥ उक्ताध्यारोपहेयताप्रतिपादकस्यतंनपश्यंतीत्यादेरेकैकेनभवतीत्यंतस्यवाक्यस्यार्थमाह उद्योतइतिचतुर्दशभिः यथाउद्योते

मथनेनयथाक्वापिकाष्ठेवह्निःप्रजायते ॥ श्रुत्यादिनातथात्मायंदेहेक्वाप्युपलभ्यते ॥ ३४१ ॥ यथावन्हिर्महान
ल्पःकाष्ठभेदैःप्रजायते ॥ एवमेषमहानल्पःपुमान्देहविभेदतः ॥ ३४२ ॥ यथेंधनस्यभेदेनप्रकाशोविविधो
भवेत् ॥ तथाकरणभेदेनभेदोनानाविधोभवेत् ॥ ३४३ ॥ विद्यमानोयथारात्रौप्रकाशोनप्रकाशते ॥ विद्यमा
नस्तथाऽत्मायमज्ञानेनप्रकाशते ॥ ३४४ ॥ प्रकाशमाश्रयेद्यद्वद्दिवसेनिबिडंतमः ॥ तद्वदात्मानमाश्रित्याज्ञ
ज्ञानंवर्ततेधुना ॥ ३४५ ॥ उद्योतेद्युमणौचैवप्रकाशत्वंसमंसदा ॥ तथापिद्युमणिःकृत्स्नःप्रकाशोनापरोयथा ॥
तथाघ्राणादिकरणेप्रकाशोऽकृत्स्नईरितः ॥ ३४६ ॥ प्रत्येकंकृत्स्नएवायंतथाहंविषयोमतः ॥ अकृत्स्नत्वेनवा
गादौतन्नपश्यंतिसूरयः ॥ ३४७ ॥

सूर्यस्यातपैकदेशेद्युमणौसूर्येचप्रकाशत्वंयद्यपिसमंतथापिकृत्स्नःपूर्णप्रकाशोद्युमणिरेवगण्यतेनापरः तथाघ्राणादिरूपेकरणेतदवच्छिन्न
तयावर्त्तमानश्चित्प्रकाशोऽकृत्स्नोऽपरिपूर्णउक्तइति ॥ ३४६ ॥ ननुवस्तुतःपूर्णस्यकल्पितावच्छेदेननपूर्णताक्षतिरितिचेत्सत्यं तथापिविपरी
ताभिमानःसंसारेपातयत्येवेतिनिश्चित्यबुधाःपरिच्छिन्नदृष्टिंत्यजंतीत्याह प्रत्येकमिति यद्यपिप्रत्येकंवागादौवर्त्तमानोप्ययमात्मावस्तु
तःकृत्स्नएवतथापितथावागादिरूपेणाहमितिज्ञानस्यवागहमित्याकारकस्यविषयःसन्नकृत्स्नत्वेनापूर्णत्वेनैवमतस्तमकृत्स्नंपरिच्छिन्नंसूर
योविद्वांसोनपश्यंतीति ॥ ३४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यवागादिरूपस्याकृत्स्नतांस्फुटयति वागादीनीति यथैकस्यदेवदत्तस्यपाचकपाठकादीनिनामानितत्तत्कर्मनिमित्तकान्येवनस्वरूपतः स्वरूपमात्रमालोच्यनभवंतितानिचाकृत्स्नस्यैवोपस्थापकानि पाकक्रियाविशिष्टस्योपस्थापनेपाठक्रियाविशिष्टस्यानुपस्थापनात् एवं वागादीनिनामानिबोध्यानीति वागादिशब्दानांतत्तत्कर्मनिमित्तकतामभिनयति वदन्नित्यादिना वदनरूपंव्यापारंकुर्वन्देवोवागित्युक्तः तथाकरणेनानुष्ठानरूपव्यापारेणकरइत्याकारिकांसंज्ञांप्राप्तः ॥ ३४८ ॥ ननुपाण्योरादानंव्यापारःप्रसिद्धःकथंकरणंव्यापारतयोक्तमित्यतआह कुर्वन्निति यतःकुर्वन्नेवसव्यापारोभवन्नेवसन्घटादिमादत्तेगृह्णातिअतआदानादिव्यापकंकरणमेवप्रवृत्तिनिमित्ततयोक्तमितिशेषः यस्मात्पदेःपदधातोर्गतिकर्मत्वंगतिरूपक्रियावाचकत्वंततोगतिकुर्वन्देवःपादइतिपदेनोक्तः ॥ ३४९ ॥ पालनादिति विसृज्यतेत्यज्यतेइतिविसर्गोमलंतस्यमोचनद्वारापालनंकुर्वन्पायुरित्युक्तः विसर्गमोक्षस्यजीवनहेतुत्वमन्वयव्यतिरेकसिद्धमित्याह विसर्गेति

वागादीनिचनामानिकर्मणानस्वरूपतः॥ वदन्वाक्कथितोदेवःकरणेनकरेतिच॥ ३४८॥ कुर्वन्नेवयतःसर्वमादत्तेचघटादिकम्॥ पदेस्तुगतिकर्मत्वंयस्मात्पादस्ततोभवत्॥ ३४९ ॥ पालनात्पायुरुद्दिष्टोविसर्गस्येह मोचनात्॥ विसर्गमोक्षरहितानहिजीवंतिजंतवः॥३५०॥ आनंदोहिप्रशंसायाहेतुःशंसेरियंस्मृता॥ अर्थःशिश्नंततोलोकेआनंदस्यैकहेतुतः ॥ ३५१ ॥ उपतिष्ठतिवासर्वंपुण्यापुण्यफलंसदा॥ जंतूनांतेनविज्ञेयमुपस्थइतिनामतत्॥ ३५२ ॥ जिघ्रन्घ्राणमयंदेवश्चष्टेचक्षुस्तथाभवन्॥ शृण्वन्श्रोत्रंहिरसयन्रसनंपरिकीर्तितः ॥ स्पर्शनंहिस्पृशन्नेषएवंनामान्यवाप्नुयात्॥ ३५३॥

॥ ३५० ॥ आनंदइति आनंदोऽनुभूयमानःप्रशंसायाःस्वजनकस्यस्तुतेर्हेतुःप्रयोजकइति इतिप्रसिद्धं तथाचप्रशंसापदंप्रशंसाहेतावानंदेउपचरितं साप्रशंसातुशंसेर्धातोरर्थः ततःशंसतिप्रशंसतिआनंदंजनयतीतिव्युत्पत्त्याशिश्नःपदार्थोदेवोजातआनंदहेतुत्वादिति शंसुधातोर्नप्रत्ययेउपधाकारयोरित्वेंऽत्यस्यतालव्यत्वेचशिश्नशब्दःसाधुः ॥ ३५१ ॥ उपतिष्ठतीति उपपूर्वकतिष्ठतेःसमीपस्थितिवचनत्वादूर्ध्वरेतसांज्ञानफलमोक्षाधिकारात् अधोरेतस्कत्वेनजंतूनांपुण्यपापयोः फलभोगाधिकारीसन्उपस्थइतिनामभजतीत्यर्थः॥ ३५२॥कर्मेंद्रियसंज्ञासंबंधतादात्म्याध्यासमूलकमभिधायतथाज्ञानेंद्रियसंज्ञासंबंधमाह जिघ्रन्निति जिघ्रन्गंधमुपाददानोघ्राणसंज्ञोभवति चष्टेव्यक्तंकथयति दृष्टस्यनिःशंकमभिधानप्रसिद्धेः तथाभवन्दर्शनेनव्यक्तमभिधानसमर्थोभवंश्चक्षुरित्युक्तः शृण्वन्नित्यादिस्पष्टम् ॥ ३५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणसंज्ञांव्युत्पादयति देहेति देहरूपेयंत्रेप्रकर्षेणाननूचलन्सन्प्राणइत्युक्तः ॥ ३५४ ॥ अंतःकरणचतुष्टयसंज्ञायोगमाह मनुतेइतिचतुर्भिः विश्वंजगद्भावापन्नमात्मानंसकलंमनुतेविकल्पयतियतस्ततोमनःसंज्ञः ॥ ३५५ ॥ दधातीति स्वस्यांगर्भधारकस्त्रीसमेस्वरूपेवासनारूपेणसकलमतीतानागतवर्तमानात्मकंविश्वंयतोदधातिधारयतिततोधीरित्युक्तः॥ ३५६॥चित्तिरिति चित्तिरनुसंधानाख्याचित्संवलितावृत्तिःसंविदितिप्रसिद्धाततःसंवित्संज्ञवेदनरूपात्कर्मणोनिमित्ताच्चित्तमित्युक्तः ॥३५७॥ अहमिति सोहमस्मीत्यग्रेव्याहरदितिश्रुतेर्विराजाप्रथममुच्चरितत्वादहमित्याकारकंनामसर्वसाधारणं यतोधुनापिकोसीत्यादिनापृष्टोजनोऽहंदेवदत्तइत्याद्युत्तरयन्नहंशब्दंपूर्वमभिदधानोदृश्यतेइत्यर्थः ॥ ३५८ ॥ अकृत्स्नवर्णनमुपसंहरति एवमिति एवमेतानिअकृत्स्नोपस्थापकानिनामान्युक्तानितथान्यान्यपिदेवमानुषा

देहयंत्रेसदायस्मात्प्रकर्षेणचलत्ययं ॥ उत्तमश्चायमेतस्मात्प्राणएषोभिधीयते ॥ ३५४ ॥ मनुतेसकलंयस्माद्विश्वमात्मानमव्ययं ॥ तस्मान्मनइतिख्यातिमगाद्ब्रह्मस्वरूपधृक् ॥ ३५५ ॥ दधातिनिखिलंस्वस्यांवासनारूपतोयतः ॥ धीरित्येषततोदेवःकथितोवेदवादिभिः ॥ ३५६ ॥ चित्तिःसंविदितिख्यातासंविद्वेदनकर्मतः ॥ चित्तमेपसदाज्ञेयःसर्वज्ञःपुरुषोत्तमः ॥ ३५७ ॥ अहमित्यात्मनोनामजंतुमात्रस्यकथ्यते ॥ पृष्टमात्रोयतःपूर्वंमानवोऽहंकरोत्ययं ॥ ३५८ ॥ एवमेतानिनामानितथान्यान्यपिकोटिशः ॥ अकृत्स्नएषनज्ञेयःकिंतुकृत्स्नोमनीषिभिः ॥ ३५९ ॥ कृत्स्नआत्मेतिविज्ञेयःसंततोयंनभोयथा ॥ नात्रकश्चिद्विभेदोस्तिस्वान्योत्थःकर्हिचित्क्वचित् ॥ ३६० ॥

सुरादीनिकोटिशःअकृत्स्नरूपस्याभिधायकानिद्रष्टव्यानितद्वाच्योऽकृत्स्नस्तुमनीषिभिर्नज्ञेयइति ॥ ३५९ ॥ उक्ताध्यारोपमेवकारेणापोद्यकृत्स्नरूपाभिनयपरस्यात्मेत्यादेर्विद्यासूत्रभूतस्यवाक्यस्यार्थमाह कृत्स्नआत्मेतिपंचभिः आत्मेतिपदमत्रावर्तते तथाचयथाउपाधिकल्पिताभेदाःप्रतिबिंबरूपाःसूर्येबिंबभूतेएकतांगताएवंयत्रात्मनिनिरूपिताविशेषाएकतांगच्छन्तिसकृत्स्नआत्माआत्मेत्युपास्यः इतिशब्दोऽविषयेतत्रात्मशब्दोप्युपचरितइतिद्योतयति तस्यकृत्स्नतांस्फुटयति संततइत्यादिना यथाघटाकाशादिविशेषेषुनभःसंततंतथायमिति अत्रात्मनिस्वोत्थःस्वगतःअन्योत्थःसजातीयादिनिरूपितश्चभेदोनास्तीति ॥ ३६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रानुपलब्धिंहेतुतयाह आत्मधीति यस्मादात्मेत्याकारकयोर्धीशब्दयोर्विषयःसंस्तेनभेदेनविवर्जितोऽनुभूयते आत्मेतिरूपेणदृष्टेभेदोनोपलभ्यतेइतियावत् फलितमाह आत्मेत्येवेति तस्मात्सर्वांतरबोधकेनात्मशब्देनलक्षणयातत्समानार्थेनाहंशब्देनवासविज्ञेयइति एतेनात्रवाक्येउपासीतेतिपदंप्रमारूपविज्ञानपरमितिसूचितं ॥ ३६१ ॥ नन्वनेकप्रमातॄणांतत्राहंशब्दप्रयोगभेदात्तत्रभेदःस्याद्देहवदित्याशंकांदृष्टांतेनवारयति एकस्मिन्निति-यद्वदेकस्मिन्नपिघटेऽनेकैरपिवक्तृभिर्जंतुभिर्घटइत्येवसमानरूपेणोच्यतेतत्रचवक्तॄणांभेदेपिवस्तुनोघटस्यनभेदःसंभवतीति तथाचवक्तव्यभेदाधीनप्रयोगभेदोव्यभिचारीतिभावः ॥ ३६२॥ अत्रापिप्रयोगैकरूप्यंदर्शयति अहमिति अत्रलोकेपिसर्वेजंतवोऽहमित्येवात्मानंयतोवदंतिततएकएवज्ञेयइति कीदृशमात्मानं यद्वन्नभस्तद्वदेकरूपेणस्थितमिति ॥ ३६३॥ नभोदृष्टांतंस्फुटय

आत्मधीशब्दयोर्यस्माद्विषयस्तद्विवर्जितः ॥ आत्मेत्येवसविज्ञेयोप्यहमस्मीतिजंतुभिः ॥ ३६१ ॥ एकस्मिन्हिघटेयद्वद्घटइत्येवजंतुभिः ॥ उच्यतेवक्तृभेदेनवस्तुभेदोनसंभवेत् ॥ ३६२ ॥ अहमित्येवचात्मानंजंतवोत्रवदंतिहि ॥ ततएकःसविज्ञेयआत्मायद्वन्नभःस्थितं ॥ ३६३ ॥ गृहेमठेघटेचास्यनभसोनयथाभिदा ॥ नभोधीशब्दगम्यस्यत्वेवंशब्दात्मनोभिदा ॥ ३६४ ॥ प्रापणीयमदोरूपंयदात्मेतिमयेरितम् ॥ नान्यत्शब्दादिकंलोकेप्राप्त्यर्हंस्यात्कदाचन ॥ ३६५ ॥ ग्रहेयोग्यःसुखोदर्कःपदार्थोगीयतेवुधैः ॥ विषयानसुखोदर्काःप्राप्त्यर्हाःस्युःकथंनुते ॥ ३६६ ॥

ति ग्रहइति यथाघटाद्युपाधिकस्यनभसोघटाकाशादिरूपेणभेदेपिनभइत्याकारकधीशब्दाभ्यांगम्यस्यभिदाभेदोन एवंशब्दात्मनःशब्दआत्मेत्याकारकःप्रतिपादकोयस्यशब्दात्मातस्यात्मशब्दार्थस्येतियावत् एतादृशस्यात्मनोऽपिनभेदइत्यर्थः ॥ ३६४ ॥ तदेतत्पदनीयमित्यादेःश्लोकंविंदतइत्यंतस्यवाक्यस्यार्थमाह प्रापणीयमित्यष्टभिः यदात्मेतिशब्दगम्यंरूपंमयेरितंअदएतदेवाधिकारिभिःप्रापणीयंज्ञानलक्षणप्राप्तेर्विषयतांनेयमितियावत् अतोऽन्यच्छब्दादिकंनप्राप्तव्यमिति ॥ ३६५ ॥ अन्यस्यांप्राप्तव्यत्वेउपपत्तिमाह ग्रहइति सुखमुदर्कउत्तरंफलंयस्यएतादृशएवपदार्थोग्रहेग्रहणेयोग्योबुधैरुक्तः विषयास्तुनतथेत्याह विषयाइति ॥ ३६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयाणांदुःखोदर्कत्वाद्धेयत्वेसतिविषयभोगसाधनंस्थूलसूक्ष्मकारणसंज्ञंशरीरत्रयमपिहेयमितिसिद्धमित्याह विषयप्राप्तीति साज्ञानमज्ञानेनकारणशरीरेणसहितंस्थूलंसूक्ष्मंचशरीरं अतएवदुःखोदर्कविषयप्राप्तिहेतुत्वादेवनप्राप्त्यर्हमिति ॥ ३६७ ॥ एवंकारणशरीरपर्यंतंदृश्यंपरिहायैतत्संघातांतर्वर्तिन्यात्मस्वरूपेसच्चिदानंदतयापरिचितेसतिसर्वत्रतत्परिचयोभवतीत्यस्मिन्नर्थेपददृष्टांतंविवृणुते अभिन्नेनेति यथागोर्वृषभस्याभिन्नेनाखंडितेनपदाचरणांकितदेशेनेतियावत् तेनतंगांविंदति एवमत्रसंघातेवागाद्यवच्छेदकैरभिन्नेनाखंडितेनात्मनापरिचितेनसुखरूपिणंभूमानमात्मानंलभतेपरिचिनोतीत्यर्थः ॥ ३६८ ॥ एतदेवस्फुटयति गोपदांकामिति गोःपदेनांकोयस्यामीदृशींभुवंभूमिखंडंदृष्ट्वात्रैवदेशेगौर्गतापरत्रएतद्भिन्नेनगताइत्येवंविज्ञायनिश्चित्यतस्मिन्पदांकवतिमार्गेशनैर्व्रजन्सगौरन्वेषकैर्लभ्यते ॥ ३६९ ॥

विषयप्राप्तिहेतुःस्यात्स्थूलंसूक्ष्मंशरीरकं॥ साज्ञानमतएवैतन्नप्राप्त्यर्हंकथंचन॥ ३६७ ॥ अभिन्नेनपदायद्वद्गोर्गामेतेनविंदति॥ अभिन्नेनात्मनात्मानंलभतेसुखरूपिणम्॥ ३६८ ॥ गोपदांकांभुवंदृष्ट्वागौर्गतात्रपरत्रन॥ विज्ञायलभ्यतेयद्वत्तस्मिन्मार्गेशनैर्व्रजन्॥ ३६९ ॥ पदनीयंतथात्मस्थमानंदात्मानमेत्यसः॥ सर्वभूतस्थितंतादृग्रूपंतंलभतेऽमुना ॥ ३७० ॥ आत्मनापदरूपेणनिजचेतोध्वचारिणा॥ स्थावरंजंगमंसर्वंलभतेस्वात्मरूपतः॥ ३७१ ॥ आत्मलाभात्परोलाभोलोकेनास्तीहकश्चन॥ यशःकीर्त्यादिकंतेनलब्धंफल्ग्वेवजायते॥ ३७२ ॥

दार्ष्टांतिकेयोजयति पदनीयमितिद्वाभ्यां तथापदनीयंप्राप्तव्यतयोक्तमात्मस्थंसंघातांतर्वर्तिनमानंदरूपमात्मानंपदांकस्थानीयमेत्यप्राप्यामुनापरिचितेनसर्वभूतेषुस्थितंतादृक्स्वरूपंसच्चिदानंदलक्षणमात्मानंलभतेसाक्षात्कुरुतेइति ॥ ३७० ॥ आत्मनेति निजचित्तरूपेऽध्वनिसाक्षितयाप्रचरणशीलेनात्मनापदरूपेणपदांकसमेननिश्चितेनस्थावरादिकंसर्वंसच्चिदानंदात्मतयानिश्चिनोतीति ॥ ३७१ ॥ तस्यपरमफलरूपतामाह आत्मलाभादिति आत्मलाभस्यनिरतिशयत्वात्तेनात्मलाभेनतदपेक्षयाफल्गुयशआदिकंलब्धमेवभवतिज्ञानफलेसर्वांतर्भावादितिभावः ॥ ३७२ ॥ ॥ २७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यत्परिहृत्योक्तात्मतत्त्वनिष्ठैवकार्येत्यर्थपरायास्तदेतत्प्रेयइत्यादिकंडिकायाअर्थंनिरूपयति आत्मापीत्यष्टादशभिः आत्माप्रियइत्युक्तःपुत्रादिकमपिप्रियमुक्तमनयोःप्रिययोर्मध्येनिरुपाधिकप्रेमास्पदत्वेननिश्चितंयथाभवतितथाप्रियत्वातिशयादात्माप्रेयान्सोपाधिप्रेमास्पदत्वादात्मभिन्नंसुतादिकंतुतथानेति ॥ ३७३ ॥ पुत्रादेःसोपाधिकप्रेमविषयतांस्फुटयति पुत्रेति पुत्रादेर्याप्रियतासास्वात्मार्थंस्वोपकारायैवमता अन्यथापुत्राद्यर्थत्वेपुत्रत्वाद्यविशेषाद्वैरिपुत्रादेःसाप्रियताकुतोनस्यादिति फलितमाह आनंदात्मनइति अतोमुख्यप्रियत्वात् भूयानभ्यधिकइतियावत् ॥ ३७४ ॥ नकेवलंबाह्यानांपुत्रादीनामेवसोपाधिकप्रेमविषयत्वंकिंतुसंघातवर्तिनांप्राणादीनामपीतिसूचयितुं तेषांपुत्रादिवद्बाह्यतांस्फुटयन्नात्मनःसर्वांतरत्वमाह इंद्रियाणीतित्रिभिः अत्रदृश्यवर्गेविषयेभ्योबाह्येभ्यःस्थूलशरीराकारपरिणतेभ्यश्चइंद्रियाणिप्राणविशिष्टान्यांतराणिअंतर्भवानिएतेभ्योमनःसंकल्पविकल्पात्मकमांतरंततोपिवहिर्मुखनिश्चयात्मिकाबुद्धिरिति ॥ ३७५ ॥

आत्मापिप्रियउद्दिष्टःप्रियंपुत्रादिकंयथा ॥ अनयोर्निश्चितंप्रेयानात्मानान्यत्सुतादिकं ॥ ३७३ ॥ पुत्रवित्तकलत्रादेःस्वात्मार्थंप्रियतामता ॥ अन्यथावैरिणःकस्मात्पुत्रादेःसानसंभवेत् ॥ आनंदात्मनएवातोलाभोभूयानुदाहृतः ॥ ३७४ ॥ इंद्रियाण्यांतराण्यत्रविषयेभ्योहिदेहिनां ॥ आंतरंमनएतेभ्योबुद्धिस्तस्मादिहांतरा ॥ ३७५ ॥ बुद्धेरथांतरोजीवोगतोहंतामतिस्थितिम् ॥ अस्मात्परंसदाज्ञेयमव्यक्तंकारणंहियत् ॥ ३७६ ॥ आंतरस्तुततोज्ञेयआनंदात्मामनीषिभिः ॥ नातोंतरतमंलोकेविद्यतेवस्तुकिंचन ॥ ३७७ ॥ विषयानिंद्रियैर्वेत्तिमनसाचेंद्रियाण्यपि ॥ मनःसंशयरूपंतद्धियानिश्चितयापिच ॥ ३७८ ॥

बुद्धेरिति ततोबुद्धेरपिजीवआंतरः जीवस्वरूपमाह गतइति अहंतावगाहिन्यांप्रत्यक्प्रवणायामहमित्याकारायांमतौविषयतयास्थितिंगतः अहंकारविशिष्टइतियावत् अस्मादहंकारविशिष्टरूपाज्जीवादपिपरमांतरमव्यक्तमव्याकृतादिशब्दवाच्यंकारणमज्ञानंयत्सुषुप्त्यादिप्रसिद्धंतदिति ॥ ३७६ ॥ आंतरस्त्विति ततोऽव्यक्तात्शुद्धात्माआंतरःयत्रांतरत्वतारतम्यंविश्रांतमिति ॥ ३७७ ॥ उक्तार्थेऽसंभावनांवारयन्यथाघटद्रष्टाघटादांतरस्तथैतेषामांतरत्वंपरिचेयमित्याह विषयानितित्रिभिः अयमात्माइंद्रियविशिष्टःसन्विषयान्वेत्तिततोवेत्तृविशेषणत्वेनेंद्रियाणामांतरत्वंस्फुटमेवमयेपि मनोविशिष्टइंद्रियाणिवेत्तिपश्यामिजिघ्रामिवेति अथसंशयरूपंमनस्तुनिश्चितंनिश्चयरूपाद्वृत्तिरस्त्यस्यामित्यर्शआद्यचिनिश्चितानिश्चयवृत्तिमतीबुद्धिस्तयापश्यतिअत्रसंदिहानोस्मीति ॥ ३७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धियमिति उक्तनिश्चयरूपांधियमपिधीयुक्तेनअहंकाराख्यबुद्धिवृत्तियुक्तेनजीवरूपेणपश्यतिअहंनिश्चिनोमीति अथोक्तधीयुक्तंजीवमपिकारणात्मनाकारणाज्ञानोपाधिकसाक्षिरूपेणपश्यति अज्ञानंतुस्वप्रकाशेनस्वरूपेणैवेति ॥३७९॥ फलितमाह आनंदात्मेति ततउक्तविधयात्मनिआंतरत्वतारतम्यविश्रांतेःसर्वेषामात्मैवसर्वांतरःसर्वांतरत्वाच्चसएवानंदात्माआनंदरूपत्वाच्चसएवपुत्रादिभ्यःकारणांतेभ्यःप्रियःविवेकदशायामितरत्रदुःखत्वनिर्णयादतिशयवाचीतमवादिप्रत्ययोपिनप्रयोक्तुंशक्यतेइतिभावः ॥ ३८० ॥ ननुमुख्यप्रियत्वस्यात्मन्येवसंभवेपिगौणप्रियत्वस्येतरत्रापिसंभवात्कथमात्मैवप्रियइत्यवधारणमित्याशंक्यात्मेतरस्यातोन्यदार्तमित्यादिश्रुतेर्विनाशित्वेनतस्यगौणप्रेम्णोप्यनर्हत्वादुक्तमवधारणमुपपन्नमित्याशयेनाह प्रियमिति यस्मात्परंसर्वांतरात्मभिन्नंदेहादिकंयःप्रियमितिब्रूयात्तस्यास्यमनुजस्य

धियंधीयुक्तरूपेणधीयुक्तंकारणात्मना ॥ कारणंचस्वरूपेणस्वप्रकाशेनसर्वदा ॥ ३७९ ॥ आनंदात्माततोलोकेसर्वांतरतमःस्मृतः ॥ पुत्रादिभ्यःप्रियश्चैवस्थिराणांचचरात्मनां ॥ ३८० ॥ प्रियंयस्मात्परंब्रूयाद्देहपुत्रधनादियः ॥ मनुजस्यास्यसर्वंतद्रोत्स्यत्येवनसंशयः ॥ आनंदात्माकदाचित्सनरोत्स्यतिस्वरूपतः ॥ ३८१ ॥ तस्मादन्यन्नवक्तव्यंप्रियंहिविदुषःपुरः ॥ यदिब्रूयात्क्षणादस्यरोत्स्यतीदंनसंशयः ॥ ३८२ ॥

तद्देहादिकंरोत्स्यतिरोधंगमिष्यति रोधोनामावरणंतच्चकारणेनकार्यग्रासात्मकविनाशरूपंतथाचविनंक्ष्यतीत्यर्थः एतादृशेचप्रेमनयुक्तमितिभावः आत्मातुस्वरूपेणकदाचिन्नविनंक्ष्यतीतितत्रैवप्रेम्णोयुक्तत्वात्सएवप्रियइतिभावः ॥ ३८१ ॥ इत्थमात्मनएवप्रियत्वेपारमार्थिकेऽन्यस्यचप्रियाभासत्वेसतियथारजततत्त्वविदःसमीपेरंगरूपंमिथ्यारजतंमूढेनरजतमित्युच्यमानंतत्त्वविदोऽनृतमसहमानस्यरंगमिदमितिवचनाद्विनश्यतितथात्मेतरप्रियस्यविनाशभयात्प्रियात्मविदःसमीपेआत्मेतरत्प्रियंनवक्तव्यमित्याह तस्मादिति तस्मादात्मेतरस्यविनाशित्वेसत्यप्रियत्वात्विदुषःप्रियात्मविदःपुरःसमीपआत्मनोऽन्यत्प्रियंनवक्तव्यं वदनेऽनर्थप्रसंगमाह यदीति मूढोक्तमनृतमसहमानोविद्वान्यदिइदंतवप्रियंविनाशीत्येवंब्रूयात्तर्हितत्प्रियंक्षणाद्रोत्स्यत्येवेति ॥ ३८२ ॥ ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंविदुषोवचनमात्रेणात्मेतरप्रियनाशइत्यतआह ईशइति यतःप्रियात्मवित्तत्त्वज्ञत्वादनृतंवाग्व्यापारेणनाशयितुमीशःसमर्थस्तस्माद्धेतोरित्यर्थः एवंयदिपदाध्याहारेणईश्वरोहीत्यंतस्यार्थोदर्शितः अथेश्वरपदस्यपरमेश्वरपरतांगृहीत्वाविदुषोपेक्षाशीलेनतथाऽनभिधानेपिदोषोभवतीत्याह सन्निधावित्यादिना तस्यविदुषःसंनिधौसमीपदेशेऽनृतंनवदेत् कुतः यद्यतःसविद्वान्अब्रुवन्नपिफलंदद्यात् तदेवकुतः यद्यतोहेतोःपुण्यपापयोःफलप्रदईशईश्वरः ब्रह्मविद्ब्रह्मैवभवतीतिश्रुतेः तथाचगंगातीरादिवद्विद्वत्संनिहितदेशस्यकृतपुण्यपापयोरुत्कर्षाधायकत्वादुत्कृष्टपुण्यपापानामिहैवफलमितिप्रसिद्धेर्ननैर्घृण्यदोषप्रसंगोपीतिभावः ॥३८३॥ ब्रह्मवित्संनिधेःपुण्यपापयोःशीघ्रफलप्रदत्वरूपोत्कर्षाधायकत्वेकैमुत्यन्यायमाह अल्पानामपीति यदिअल्पानांस्थावरत्वादिनापकर्षशालिनामपिदेवानांसंनिधौअनृतंवदेत्तर्हितेदेवा

ईशःप्रियात्मवित्तस्मात्संनिधौतस्यनानृतं ॥ वदेत्सयत्फलंदद्याद्यदीशःपुण्यपापयोः ॥ ३८३ ॥ अल्पानामपिदेवानांसंनिधावनृतंयदि ॥ वदेत्तेपिफलंदद्युरवदंतोपिभूरिशः ॥ वदन्विद्वान्कुतोनायंतत्फलंहिप्रदास्यति ॥ ३८४ ॥ यथारोधःप्रियस्यस्यादरोधोपितथैवहि ॥ सत्यवादफलंलोकेदेवानांसंनिधौयथा ॥ ३८५ ॥ एकैकोपिफलंदद्याद्देवःस्थावररूपभाक् ॥ जंगमोयंवदन्विद्वान्सर्वदेवःकथंतुन ॥ ३८६ ॥ ततोयोलोकएतस्मिन्माययातिविमोहितः ॥ पुत्राद्यरोधमिच्छन्सोप्यात्मानंहिप्रियंसदा ॥ उपासीतापिचेद्ध्यातुंशक्तोनमनुजोभवेत् ॥ ३८७ ॥

अवदंतोपिफलंददतिकिमुतसर्वदेवात्मकःसवाग्व्यापारश्चविद्वानिति ॥३८४॥ एवंसतिविदुषोयेआत्मैवप्रियमितिसत्याभिधानेइष्टसिद्धिरपिभवतीत्याह यथेति यथाऽनृताभिधानेप्रियस्यरोधोविनाशःस्यात्तथासत्याभिधानस्यफलंप्रियस्यपुत्रादेररोधोपिभवेदिति ॥३८५॥ दृष्टांतंस्फुटयति एकैकोपीति सर्वदेवःसर्वदेवात्मकः ॥ ३८६ ॥ ततइति ततःप्रियात्मविदुषईश्वरत्वदर्शनात्तत्प्रियत्वाभिधानेपीष्टफलदर्शनाच्चसोपिमनुजआत्मानंप्रियरूपेणोपासीत सकः योमाययातिविमोहितःवैराग्याभावेनात्मनःप्रमारूपविज्ञानेऽनधिकृतइतियावत् पुत्रादिरूपप्रियाणामरोधंकामयमानश्चेति ननुतादृशउपासनमपिकथंकुर्यादतआह अपिचेदिति चेद्यदिध्यातुमपिभावनासंतानंकर्त्तुमपिनशक्तोभवेत्तथापिकुर्यादेवेति तथाचावश्यकंकार्यांतरंयथाहठेनापिकरोतितथोपासनमपिकार्यमितिभावः ॥ ३८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुप्रमारूपविज्ञानादुपासनस्यकोभेदइत्यतस्तत्स्वरूपंदर्शयति उपासनमितिद्वाभ्यां यद्विज्ञानंसतिविद्यमानेऽसतिअविद्यमानेवावस्तुनिगुरुशास्त्रादिवाक्यमात्राधीनंवस्तुस्वरूपावरणभंगोदासीनमितियावत् एतादृशंमानसवृत्तिरूपंजायतेजातेचतत्रज्ञानेविश्वासमात्रेणउपदिष्टार्थविषयकानांतत्सजातीयानांप्रत्ययानांधीवृत्तीनांप्रवाहतोविजातीनामन्याकाराणांप्रत्ययानांवर्जनंतदेतावदुपासनमित्युक्तमितिद्वयोरर्थः एतेनउक्तज्ञानस्यवस्तुस्वरूपावरणभंजकत्वेवस्तुसौंदर्याच्चतत्रचेतसःस्थिरत्वेप्रमारूपत्वमितिसूचितं ॥ ३८८ ॥ ३८९ ॥ प्रमारूपप्रियात्मविज्ञानस्यफलमाह प्रियानंदात्मेति प्रियत्वेनानंदरूपस्यात्मनोविज्ञानात्सम्यङ्निश्चयात्तुविद्वान्सर्वदेववपुःपुमान्सर्वात्मभूतईश्वरोभवतिहेशक्रअत्रार्थेनविचार्यंनसंशयइतियावत् ॥ ३९० ॥ तदाहुरित्यादेःसर्वमभवदित्यंतस्यार्थंप्रपंचयति अत्रतेइत्यादिद्वि

उपासनंहितत्प्रोक्तंगुरुशास्त्रादिवाक्यतः॥जायतेयद्धिविज्ञानंसत्यसत्यपिवस्तुनि॥ ३८८॥ विश्वासमात्रतो नृणांप्रत्ययानांप्रवाहतः॥ उपदिष्टेसजातीनांविजातीनांचवर्जनम्॥ ३८९॥ प्रियानंदात्मविज्ञानात्सर्वदेववपुःपुमान्॥ विद्वान्भवतिनैवात्रविचार्यंशक्रकर्हिचित्॥ ३९०॥ अत्रतेकथयिष्यामिपुरावृत्तंविचारतः॥ अनेकेषांसमाजेयद्ब्राह्मणानांमहात्मनां ॥ ३९१॥ ब्राह्मणामिलिताआसन्वेदवेदांगपारगाः॥ एकदाक्वापि कस्मिंश्चिन्निमित्तेसमुपस्थिते ॥ ३९२ ॥ तत्रनानाकथावृत्तालोकवेदसमाश्रयाः॥ तत्रैषापिकथाक्वापिप्रसंगेसत्यभूत्तदा॥ तत्रकेचिन्महात्मानएवमाहुर्द्विजोत्तमान्॥ ३९३॥ मानवाःसर्वभावाप्तिंवदंतिब्रह्मविद्यया॥ ब्रह्मकिंज्ञातवद्येनतदभूत्सर्वमेवहि॥ ३९४॥

षष्टिश्लोकैः अत्रआत्मविज्ञानात्सर्वात्मभावलाभइत्यस्मिन्नर्थेतेतुभ्यमिद्रायपुरातनंवृत्तंवृत्तांतंकथयिष्यामि कीदृशंवृत्तं यदनेकेषांमहात्मनांब्राह्मणानांसमाजेविचारतोनिष्पन्नमितिशेषः ॥३९१॥ ब्राह्मणाइति॥३९२॥ तत्रेति तत्रसमाजे कथाःवाक्यप्रबंधाः प्रवृत्ताःनिष्पन्नाः समाश्रयोविषयः एषावक्ष्यमाणा तत्रकेचिन्महात्मानएवंद्विजोत्तमानाहुःपप्रच्छुः ॥ ३९३॥ प्रश्नमभिनयति मानवाइतिचतुर्भिः मानवाविद्याधिकारिणोब्रह्मणोविद्ययाज्ञानेनसर्वात्मभावलाभंवदंतितत्रैवंविचार्यते यस्यब्रह्मणोविद्ययासर्वात्मभावःफलंतद्ब्रह्मापिकिंकिंचिज्ज्ञात्वासर्वात्मभूतं अज्ञात्वैववा आद्येतन्निरूपणीयंब्रह्मकिंज्ञातवत् येनयद्विषयकज्ञानेनसर्वंसर्वात्मकमभूदिति ॥ ३९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयमनूद्यदूषयति विप्राइति हेविप्रायदितद्ब्रह्मनज्ञात्वाज्ञानंविनैवसर्वरूपमभूत्तर्हिंनराअपिसर्वदातीतादिकालेषुअज्ञानादेवसर्वेस्युः सर्वात्मभूताःस्युः किंब्रह्मविद्यार्थंप्रयासेनेत्यर्थः ॥ ३९५ ॥ आद्येअन्यस्यविज्ञानाद्ब्रह्मसर्वात्मभूतमात्मनएववातत्रनाद्यइत्याहुः ब्रह्मान्यस्येति यदित्वस्मादन्यस्यज्ञानाद्ब्रह्मसर्वमभवत्तदातेनान्यविषयकज्ञानेनैवब्रह्मवत्तेमानवाअपितत्सर्वेस्युः अनयावेदांतप्रसिद्धयाऐक्ये नब्रह्मविषयकयाविद्ययाकिंप्रयोजनमिति ॥ ३९६॥ द्वितीयेदोषमाहुः ब्रह्मचेदिति चेद्यदिब्रह्मस्वात्मविज्ञानादेवसर्वभावंसमाप्नवत्प्राप्तं तर्हिंनृणामपियथास्वंआत्मविज्ञानादेवसर्वभावाप्तिःस्यात्तथापिसाप्रकृताब्रह्मविद्याव्यर्थेति आत्मभेदंमत्वैषाकोटिरितिबोध्यम् ॥ ३९७॥ सिद्धांतमवतारयति एवमिति एवंविचारकैर्विचारंकुर्वाणैःपृष्टाःशास्त्रतात्पर्यविदोब्राह्मणाउत्तरंददुः किंकृत्वा पूर्वोक्तपक्षाणांमध्येऽज्ञानप

विप्रायदिनतज्ज्ञात्वाब्रह्माभूत्सर्वमेवहि ॥ अज्ञानात्सर्वदैवस्युःसर्वमेवनराअपि ॥ ३९५॥ ब्रह्मान्यस्ययदिज्ञानात्सर्वमेवाभवत्तदा॥ संतुतेनैवतत्तेकिमनयाब्रह्मविद्यया॥ ३९६॥ ब्रह्मचेत्स्वात्मविज्ञानात्सर्वभावंसमाप्नवत्॥ नृणामप्यात्मविज्ञानात्स्याद्व्यर्थासातथापिहि॥३९७॥ एवंविचारकैःपृष्टाब्राह्मणाःशास्त्रकोविदाः अज्ञानमन्यविज्ञानंपरित्यज्योत्तरंददुः॥ ३९८ ॥ नाज्ञंब्रह्मनचान्यस्यविज्ञानसहितंचतत्॥ किंतुस्वात्मनएवैतज्ज्ञानात्सर्वात्मतांगतं॥ ३९९॥ सर्वात्मतासमाप्त्यर्थंविज्ञेयोमानवैरपि॥ स्वात्मानैवहितद्भिन्नंजंतोःकस्यचिदात्मनः॥ ४००॥

क्षमन्यविज्ञानपक्षंचपरित्यज्येति ॥ ३९८ ॥ आत्मब्रह्मपदार्थगतोभेदोनास्तीत्याशयेनसिद्धांतमभिनयति नाज्ञमित्यादिना ब्रह्माज्ञमज्ञानविशिष्टंसन्नसर्वात्मतांप्राप्तंतथान्यविषयकविज्ञानविशिष्टंनसर्वात्मतांगतंकिंतुस्वात्मनएवब्रह्मात्मपदाभ्यामुक्तस्यविज्ञानात्सर्वात्मतांगतमिति अत्रब्रह्मैवस्वस्मिन्कल्पितेनाज्ञानेनविद्याधिकारीभूत्वात्मविद्ययासर्वात्मभावंगतमित्यस्यार्थस्यप्रपंचोभाष्येद्रष्टव्यः ॥ ३९९ ॥ सर्वात्मेति एवमात्मनएवज्ञानस्यसर्वात्मतालाभप्रयोजकत्वेमानवैरपिसर्वात्मतासमाप्त्यर्थमात्मैवविज्ञेयः ननुब्रह्मविज्ञानंविनाकथमात्मज्ञानमात्रेणसर्वभावइत्याशंकांब्रह्मात्मपदार्थयोरैक्यस्फोरणेनवारयति नैवेत्यादिना हियस्मात्तद्ब्रह्मकस्यचिदपिजंतोरात्मनःसकाशान्नैवभिन्नमिति ॥ ४०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुतयाब्रह्मात्मपदयोःसमानार्थतामाह बृहंतमिति ब्रह्मणोवाचकःशब्दोब्रह्मेत्याकारकोबृहंतंत्रिविधपरिच्छेदशून्यमर्थमाहप्रतिपादयति तथात्मनोपिशब्दआत्मेत्याकारकःसर्वांतरत्वेनतमेवार्थमाह ततइमौब्रह्मात्मशब्दौपाणिकरादिपर्यायशब्दवत्समानार्थावित्यर्थः ॥ ४०१ ॥ पर्यायताशंकांप्रवृत्तिनिमित्तरूपद्वारभेदप्रदर्शनेनवारयन्समानार्थतांस्फुटयति बृहत्यतीइति बृहतिर्बृहवृद्धावितिधातुःअतिःसातत्यार्थकोऽतधातुश्चएतौपरिच्छेदहीनत्वेनसमानेऽर्थेपर्यवसन्नौ यतोबृहतेर्वचोबृहतिघटितंब्रह्मपदमधिकरूपमर्थमाह तथाअततेर्वचआत्मपदंसंततमांतरतयाव्यापकमाहेति ॥ ४०२ ॥ उभयोःपदयोरद्वितीयतायांपर्यवसानंदर्शयति सर्वाधिक्यमितित्रिभिः हियतःअश्वाद्गजोबृहन्नित्यादिप्रयोगेष्वश्वाद्यवधिवशात्परिच्छिन्नमहत्त्वबोधकत्वेपिसंकोचकंविनाबृहतेःसर्वाधिक्यरूपएवमुख्योर्थः सर्वाधि

बृहंतंब्रह्मणःशब्दःप्राहार्थंत्वात्मनोपिच॥ शब्दस्ततोनभिन्नार्थाविमौपाणिकरोक्तिवत्॥ ४०१ ॥ बृहत्यतीसमानार्थौनिश्चितौपदवेदिभिः॥ बृहतेस्त्वधिकंप्राहसततंत्वऽततेर्वचः ॥ ४०२॥ सर्वाधिक्यंहिमुख्यार्थोबृहतेर्नापरःक्वचित्॥ सर्वाभिन्नोभवेत्सोर्थोभेदेनैषप्रसिद्ध्यति॥ ४०३ ॥ अतिःसर्वेषुदेशेषुकालेषुसत्स्वऽसत्सुच॥ अभिन्नंसंतमाहातोनभिन्नाऽर्थौबृहत्यती॥ ४०४ ॥ देशेनापिचकालेनसतावाप्यसतापिवा॥ भिन्नोमुख्योभवेन्नार्थोंह्यधिकःसर्वगोपिवा ॥ ४०५॥ यथानभसिभेदोयंतज्ज्ञैरभ्रादिकैःकृतः ॥ तथाब्रह्मणिभेदोपितज्ज्ञैःसदसदात्मकैः ॥ ४०६ ॥

क्यंचत्रिविधपरिच्छेदहीनत्वात्मकत्वात्सर्वाभिन्नतारूपं कुतश्चिदपिभेदेसतिएषसर्वाभिन्नतारूपोर्थोनसिध्यतिनज्ञानपथमारोहतीत्यर्थः ॥ ४०३॥ अतिरिति सत्सुस्थूलेषुअसत्सुसूक्ष्मेषुअभिन्नंसंतमभिन्नतयावर्त्तमानमसंकुचितोऽतिरतिधातुघटितमात्मपदमाह अतउभयोर्ब्रह्मात्मपदयोःसमानार्थतेत्यर्थः ॥ ४०४ ॥ देशेनेति अधिकोब्रह्मपदार्थःसर्वगआत्मपदार्थश्चदेशादिभिर्भिन्नश्चेत्तर्हिमुख्योनस्यात् महाराजपदार्थोमंडलेश्वररूपइवगौणएवस्यादितियावत् ॥ ४०५ ॥ भेदस्यकल्पिततयावाचारंभणमात्रविकारौपाधिकत्वेनगौणत्वाच्चब्रह्मात्मपदयोरखंडपरतेतिदर्शयति यथेतिचतुर्भिः यथातज्ज्ञैर्नभसोजातैर्मेघविद्युत्प्रभृतिभिर्नभसिअखंडेभेदःकृतस्तथातज्ज्ञैर्ब्रह्मविवर्त्तैःस्थूलसूक्ष्मैर्ब्रह्मणिभेदइति ॥ ४०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समष्टिव्यष्टिरूपोपाधिकृतकल्पितपरिच्छेदेदृष्टांतमाह गंधर्वेति यथादौप्रथमंकल्पितेनगंधर्वनगरेणाकाशस्यभेदस्ततस्तत्रगंधर्वनगरांतर्गतैःप्रासादैर्भेदस्ततस्तत्रप्रासादेष्वंतस्थितैरन्यैर्गृहैरपवरकाख्यैर्भेदस्ततोत्रगृहेषुस्थितैर्घटादिपदार्थैर्भेदोमायामयएवमात्मनिपंचमहाभूतैस्तदंतर्वर्तिस्थूलसूक्ष्मदेहैस्तदंतर्वर्तिप्राणाद्यैश्चमायामयोभेदइति कीदृशैःस्थूलैर्देहैश्चरस्थावरसंज्ञैरितित्रयाणामर्थः ॥ ४०७ ॥ ४०८ ॥ ॥ ४०९ ॥ फलितमाह आत्मनइतिद्वाभ्यां ब्रह्मात्मनोरैक्याद्ब्रह्मविद्यारूपेणैकेनसाधनेनसर्वात्मताप्राप्तिरितियन्मनुष्यामन्यंतेतत्सत्यमेव यतोब्रह्मकारणादिसमष्टिव्यष्ट्युपाधिकंपूर्वंपूर्वंब्रह्मज्ञानात्सर्वात्मकमभूदिति ॥४१०॥ ४११ ॥ पूर्णस्यापिस्वरूपविस्मृतौदृष्टांतमाह महा

गंधर्वनगरेणादौप्रासादैस्तत्रसंस्थितैः ॥ तत्रस्थितैरन्यगृहैःपदार्थैश्चात्रसंस्थितैः ॥ ४०७॥ यथानभसिभेदोयंमाययैवप्रजायते॥ एवमात्मनिभेदोपिमाययैवप्रजायते ॥ ४०८॥ आदौपंचमहाभूतैःस्थूलैःसूक्ष्मैश्चदेहकैः॥ प्राणबुध्यादिभिश्चापिचरस्थावरशब्दितैः॥४०९॥ आत्मनोब्रह्मणोयस्माद्भेदःकोपिनविद्यते॥ ततःसर्वात्मताप्राप्तिरेकयाब्रह्मविद्यया॥ ४१०॥ मनुष्यायद्विमन्यंतेनानृतंतत्कदाचन॥ ब्रह्मज्ञानाद्यतोब्रह्मसर्वमेतदभूत्पुरा ॥ ४११॥ महाराजोयथासुप्तोवेत्तिनात्मानमीश्वरम्॥ एवंमायावृतंब्रह्मवेत्तिनात्मानमंजसा॥ ॥४१२॥ यथाविशुद्धआकाशेनिर्भेदेभेदकारणम्॥ धूमाभ्रपवनादिस्यादेवंमायांतरात्मनि॥ ४१३॥ यथातमोनिशाकालेप्रकाशंनिरुणद्धिहि॥ एवंसंसारकालेपिमायास्वात्मप्रकाशकम्॥ ४१४॥ वाहीकस्ययथाऽज्ञातंपरसेनादिवर्तते॥ तद्दर्शनेनिवृत्तंचेत्पुनर्नैवप्रजायते ॥ ४१५॥

राजइति यथामहाराजश्चक्रवर्तीसुप्तःसन्नात्मानमीश्वरंमहाराजंनवेत्तितथाब्रह्मापिमायावशादात्मानमिति समष्ट्युपाधिकनिर्दिष्टविशेषतुकारणोपाधिसंस्थमित्यादिनावक्ष्यतीतिबोध्यं ॥४१२ ॥ आवरिकामायैवविक्षेपशक्त्यासविलासासतीभेदकारणमपिभवतीतिसदृष्टांतमाह यथाविशुद्धइति ॥ ४१३॥ उक्ताज्ञानस्यजडेआवरणवैयर्थ्याच्चिन्मात्रविषयतांसदृष्टांतमाह यथातमइति प्रकाशंचाक्षुषादिरूपं ॥ ४१४ ॥ उक्ताज्ञानस्यानादितांदृष्टांतेनस्फुटयति वाहीकस्येतिद्वाभ्यां यथावाहीकस्यअरण्यवेष्टितग्रामवासिनःकस्यचित्शत्रुराजसेनातत्कर्तृकंलुंठनादिकंचकीदृशंभवतीत्येवंपरसेनादिकमज्ञातंवर्ततेकदाचित्तद्दर्शनेसतिनिवृत्तमज्ञानंपुनर्नजायतेइति ॥४१५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंब्रह्मणीति एवमस्मिन्नात्मरूपेब्रह्मणिअनादिउत्पत्तिहीनमेवाज्ञानंवर्त्ततेतद्यदाब्रह्मज्ञानान्नष्टंतदारभ्यपुनर्नजायतेइति ॥ ४१६ ॥ उक्ताज्ञानस्याभावरूपतांवारयति अज्ञानमितिषड्भिः हेविप्राअज्ञानंज्ञानाभावरूपंनभवति यतःआत्माआत्मरूपःप्रकाशएवज्ञानं अत आत्मनोऽपरंजडंबुद्ध्यादितुनज्ञानंजडत्वादिति आत्मनोऽभावस्तुसाधकाभावादयुक्तइतिभावः ॥ ४१७ ॥ कथंतर्हिअंतःकरणवृत्तौज्ञानव्यवहारइतिचेदुपचारादित्याह जडइति प्रकाशकृताचित्तादात्म्याध्यासकृतेत्यर्थः दृष्टांतःस्फुटः ॥ ४१८ ॥ ननुमास्तुजडस्यप्रकाशतातथापिप्रकाशरूपात्मनोधर्मःप्रकाशांतरमस्तुतदभावश्चाज्ञानमितिशंकांजडत्वादिप्रसक्त्यावारयति प्रकाशइति आत्मभिन्नप्रकाशाभ्युपगमेयावद्विकारंतुविभागइतिन्यायेनविकारत्वात्द्वयोरपिजडत्वंप्रसज्येतेति इष्टापत्तौतुघटतद्गतशुक्लरूपयोरिवजडत्वादनात्मत्वप्रस

एवंब्रह्मण्यनाद्यस्मिन्नज्ञानंवर्ततेयदा ॥ ब्रह्मविज्ञानतोनष्टंपुनर्नैवप्रजायते ॥ ४१६ ॥ अज्ञानंनभवेद्विप्राज्ञानाभावःकथंचन ॥ यतोज्ञानंप्रकाशःस्यादात्मातोनापरंजडम् ॥ ४१७ ॥ जडेप्रकाशतायेयंसाप्रकाशकृता भवेत् ॥ दग्धृत्वमायसेपिंडेयथावह्निकृतंभवेत् ॥ ४१८ ॥ प्रकाशोनात्मनोभिन्नोभेदेजाड्यंद्वयोरपि ॥ जडयोर्नात्मतादृष्टायथात्रघटशुक्लयोः ॥ ४१९ ॥ नभिन्नंहिसुखंताभ्यांभेदेत्रिष्वप्यनात्मता ॥ यथान्यदेहगौरत्वदीपानांहिप्रतीतितः ॥ ४२० ॥ अन्यतोबोध्यमानेहिस्यात्प्रकाशेऽप्रकाशता ॥ यथादीपेत्रनेत्रेणप्रकाश्येजडता स्फुटा ॥ ४२१ ॥

क्तिरित्यर्थः ॥ ४१९ ॥ आत्मनआनंदरूपतांस्फुटयितुमुक्तन्यायंसुखेऽप्यतिदिशति नभिन्नमिति ताभ्यामात्मप्रकाशपदार्थाभ्यांसुखं नभिन्नं भेदेस्वीकृतेहित्रिषुआत्मप्रकाशसुखपदार्थेष्वपिअनात्मतास्यान्नकेवलमन्यतरस्यैवेत्यर्थः त्रयाणांभेदशालिनामनात्मत्वेदृष्टांतमाह यथेति यथापरकीयदेहस्यतद्गतगौरत्वस्यतत्प्रकाशकदीपस्यचएषांभिन्नानामनात्मताप्रतीत्यानुभवेनसिद्धातद्वदिति ॥ ४२० ॥ किंचप्रकाशरूपेआत्मनिप्रकाशाभ्युपगमोजडभानायआत्मभानायवा नाद्यः आत्मप्रकाशेनैवनिर्वाहात् अंत्येऽनवस्थापादिकाजडत्वापत्तिरित्याह अन्यतइति प्रकाशेऽन्येनबोध्यमानेस्वीकृतेसत्यप्रकाशताजडतैवस्यात् चाक्षुषवृत्त्यवच्छिन्नचिद्भास्यदीपवदिति तथाचप्रकाशस्यप्रकाशांतरभास्यत्वनियमेऽनवस्थापत्तिरितिभावः ॥ ४२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइति ततउक्तयुक्तेःअयमानंदरूपआत्मास्वयंप्रकाशःप्रकाशांतरानपेक्षप्रकाशःसर्वभासकत्वाच्चसदैवसन्सद्रूपस्तस्यचाभावोऽसाक्षिकोनांगीकर्तुंशक्यतेयेनतदभावोऽज्ञानंस्यादितिभावः नन्वात्माशून्यरूपोस्तुतद्धर्मश्चप्रकाशइत्याशंकांव्याघातेनवारयति असतीति असतिशून्येनरशृंगवदात्मतानसंभवति अधिष्ठानत्वाद्यनुपपत्तेःसर्वत्रासदवगाहिप्रतीत्यापत्तेश्चेति ॥ ४२२ ॥ एवमज्ञानस्याभावरूपताऽसंभवाद्भावरूपत्वंप्रदर्श्यतन्निवृत्त्यासफलांब्रह्मविद्यांनिरूपयति स्वयंप्रकाशस्येति स्वयंप्रकाशस्यसद्रूपस्यआनंदाभिन्नात्मनास्वरूपवतःअतएवभेदशून्यस्यवस्तुनोविद्यातदाकाराचित्संवलितावृत्तिर्ब्रह्मविद्येत्युक्ता ॥ ४२३ ॥ एतांविद्यांविनात्मभूतमपिब्रह्मसंसारान्नरक्षति सएनंमविदितोनभुनक्तीतिश्रुतेरित्याह संतमिति सच्चिदानंदाद्वयरूपमेनमात्मानंमाययावृतंब्रह्मकर्तृहियतोब्रह्मरूपेणाविर्भूय

ततःस्वयंप्रकाशोयमानंदात्मासदैवसन्॥ असत्येवात्मतानस्यान्नरशृंगेयथानसा॥ ४२२॥ स्वयंप्रकाशस्य सतआनंदात्मस्वरूपिणः॥ भेदशून्यस्ययाविद्याब्रह्मविद्येतिसोच्यते॥ ४२३॥ संतंस्वयंप्रकाशंतमानंदात्मानमद्वयम्॥ अनादिमाययाब्रह्मरूपेणब्रह्मनत्वभवेत्॥ ४२४॥ कारणोपाधिसंस्थंतत्तथामृत्युशरीरगं॥ वेदांतार्थपरिज्ञानात्स्वयमेवव्यबुध्यत॥ ४२५॥ यथाशयानोमनुजोजलवृक्षविवर्जिते॥ चतुर्विधप्राणिजातैरहितेवायुनापिच॥ ४२६॥ स्वप्नान्नानाविधान्पश्यन्नज्ञानेनसमावृतः ॥ सर्वविज्ञानशून्योवास्वयमेवविबुध्यते॥ ४२७॥

नअवेत्नरक्षेत् तस्मान्मायानिवर्त्तकब्रह्मविद्यार्थंयत्नोविधेयइतिभावः ॥४२४ ॥ समष्ट्युपाधिकनिष्ठंविशेषमाह कारणोपाधीति तद्ब्रह्मकारणाज्ञानसमष्ट्युपाधिकमीश्वरसंज्ञंसत्तथामृत्युसंज्ञहिरण्यगर्भशरीरगतंसत्स्वयमेवोपदेशंविनावेदांतार्थानुसंधानात्व्यबुध्यतउक्तांविद्यांप्राप्तमित्यर्थः तत्रापिकारणाज्ञानस्यसंक्षेपशारीरकोक्तरीत्याहमज्ञइत्यहंकाराऽरोहमंतरेणावरणाख्यव्यामोहकारणत्वाभावादीश्वरेचाहंकाराभावात्सर्वज्ञतयानिःश्वसिततुल्यवेदानुसंधानंसदैव हिरण्यगर्भस्यतुकार्याभिमानात्किंचिदावरणमनुभूयस्मृतवेदार्थानुसंधानमितिविशेषोबोध्यः ॥ ४२५ ॥ स्वयंविबोधेदृष्टांतमाह यथेतिद्वाभ्यां यथाभयव्यथाशब्दनोदनाद्वाराजागरणनिमित्तैर्जलादिभीरहितेउत्कृष्टदेशेसुप्तोमनुष्यःस्वप्नान्पश्यन्गाढंसुप्तोवापरेणानुत्थापितःस्वयंविबुध्यतेजागरणंलभतेइतिद्वयोरर्थः ॥ ४२६ ॥ ४२७ ॥

१ सआत्माअविदितःअज्ञातःसन्एनंअज्ञंनभुनक्तिनपालयति आनंदस्वरूपाविर्भावेणजन्मप्रवाहान्नरक्षेदित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्ष्टांतिकेयोजयति तथेति तथाकारणसमष्टिसूक्ष्मसमष्टिरूपोपाधिद्वयस्थोपिब्रह्मात्मपदार्थःपरःपुरुषआत्मनैवस्वयमेवआत्मविज्ञानादा त्मविद्यालाभादात्मानंप्रतिपद्यतेप्राप्नोति ॥४२८॥ ननूक्तविधयासर्वज्ञस्याप्युपाधिद्वयस्थस्यपरमेश्वरस्यकथंसृष्ट्यादिकारणत्वंव्यापारा भावादित्याशंकांसोपाधिकेऽस्त्येवकर्मेतिप्रदर्शयन्निवारयति शयानइति शयानेस्वप्नमान्पश्यतिगाढंसुप्तेवाव्यष्ट्युपाधिकेपुंसिपुरुषेयादृशंकर्म स्वप्नपदार्थसृष्टिबीजभूताज्ञानानुभवःसन्निधिमात्रेणप्राणधारणमित्यादिरूपंवर्ततेतथापरमेश्वरेपिसमष्ट्युपाधिकेबोध्यमित्यर्थः ॥४२९॥ उपाधिविमुक्तेतुनिर्गुणत्वान्नकुत्रचिदपिकर्मेत्याह सुषुप्तेइति यथास्वप्नसुषुप्त्योरुपाधिविविक्तेनिर्गुणेपुरुषेनकिंचिदपिकर्मतथाकारणो पाधिकेसूक्ष्मसमष्ट्युपाधिकेसूत्रसंज्ञेवातद्विविक्तेनिर्गुणेतत्कर्मनेति ॥ ४३० ॥ उक्तब्रह्मविद्यायाःसर्वज्ञताप्रयोजिकायाधारणमपिईश्वर

॥३२॥ तथोपाधिद्वयस्थोपिब्रह्मात्मापुरुषःपरः ॥ आत्मनैवात्मविज्ञानादात्मानंप्रतिपद्यते ॥ ४२८ ॥ शयानेयादृशं कर्मतादृशंपरमेश्वरे ॥ उपाधिद्वयसंस्थेपिविद्यतेनात्रसंशयः ॥४२९॥ सुषुप्तेवायथास्वप्नेनिर्गुणेपुंसिकर्मन॥ कारणेवाथवासूत्रेनिर्गुणेतन्नविद्यते ॥४३०॥ अन्तःकरणभोगार्थंयद्वदत्रप्रबुध्यते ॥ तथाजीवात्मभोगार्थं देवएषप्रबुध्यते ॥ ४३१ ॥ प्रबुध्यगुरवोयद्वत्प्रवर्ततेसुखायनः ॥ उपाधिद्वयसंस्थःसन्नीश्वरोपितथैवसः ॥ ॥ ४३२ ॥ आश्रमान्हियथादद्युर्नानाक्लेशकरानपि ॥ सुखायैवतथैषोपिदद्याद्देहेंद्रियादिकं ॥ ४३३ ॥

स्यनित्यमुक्तस्यपरार्थमेवेत्याह अंतरिति यद्वदत्रव्यष्टिसंघातेअभोक्तुःपुरुषस्यप्रबोधोजागरणमन्तःकरणनिष्ठस्थूलभोगार्थंतथादेवस्यप रमेश्वरस्यप्रबोधोजीवानांभोगार्थइत्यर्थः ॥ ४३१ ॥ ईश्वरस्यसृष्ट्यादिप्रवृत्तिःपरार्थैवेतिसदृष्टांतमाह प्रबुध्येति यथालोकेगुरवःप्रबुध्य प्रकृष्टंबोधंलब्ध्वास्वार्थनिरपेक्षाःसंतोनःशिष्याणांसुखायैवप्रवर्ततेतथेश्वरोपिजीवानांभोगायेति ॥ ४३२ ॥ यद्येवंकथंतर्हिदेहकारा गृहेषुजीवान्पातयतीतिशंकामपिदृष्टांतेनवारयति आश्रमानिति यथादृष्टनानाक्लेशशालिनोप्याश्रमान्ब्रह्मचर्यादिधर्मान्गुरवःशिष्ये भ्योदिशंति सचोपदेशःशिष्याणांशुद्धिद्वारासुखायैवभवतितथेश्वरोप्यवश्यभोक्तव्यकर्मणांभोगायअपवर्गायचजीवेभ्योदेहादिकंदिश तीत्यर्थः ॥ ४३२ ॥ ॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्युदयनिःश्रेयससाधनंचवेदादिरूपेणोपदिशतियदनुतिष्ठंतोजीवाःसुखिनःस्युरित्याह गुरूक्तमिति यथागुरूक्तंपालयन्यथावदनुतिष्ठन्शिष्यउदर्कउत्तरफलकालेसुखीभवेत्तथेश्वरोक्तमपीति ॥ ४३४ ॥ ननुद्वैतभानविरोधिन्याविद्ययानित्यमुक्तईश्वरःकथंसृष्ट्यादिकरोतीतिशंकामपिदृष्टांतेनपरिहरति एकएवेतिद्वाभ्यां यथाएकएवशयानोब्रह्मविदपिस्वप्नभोगप्रदप्रारब्धकर्मवशात्स्वप्नेविश्वंसृजतेतथेश्वरोपि एतावांस्तुविशेषः ब्रह्मविदःसृष्टिप्रवृत्तौस्वयंकृतपूर्वाणिकर्माणिप्रयोजकानिईश्वरस्यतुजीवसंबंधीन्येवेतिद्वयोरर्थः ॥४३५॥४३६॥ उक्तमेवस्फुटयति अलुप्तेति यथाब्रह्मविद्याभ्यासेनालुप्तब्रह्मबोधोब्रह्मवित्त्वादेवनिष्कामश्चविद्वान्पुरुषःशयनेस्वप्नरूपेसंवीक्ष्यसम्यगालो

गुरूक्तंपालयन्शिष्योयथोदर्केसुखंव्रजेत् ॥ ईश्वरोक्तंतथादेहीकुर्वन्सुखमवाप्नुयात् ॥ ४३४ ॥ एकएवशयानःसन्ब्रह्मात्मानंविदन्नपि ॥ पुरुषःसृजतेस्वप्नेविश्वमेतच्चराचरम् ॥ ४३५ ॥ माययैवयथातद्वदीश्वरोप्येकएवहि ॥ जानन्नात्मानमखिलंसृजतेभूतभौतिकम् ॥ ४३६ ॥ अलुप्तब्रह्मबोधःसन्नाप्तकामोयथापुमान् ॥ लीलयैवचसंवीक्ष्यसृजतेशयनेथतत् ॥ ४३७ ॥ एवमेषजगत्स्रष्टाप्राप्तकामोविदन्नपि ॥ ईक्षित्वासकलंविश्वंसृजतेभूतभौतिकम् ॥ ४३८ ॥ यथास्वप्नदशायांसविद्वान्स्वप्नंविलोकयन् ॥ आत्मानंचतथास्वप्नंनभेदेनप्रपश्यति ॥ ४३९ ॥ अहंहिसकलंविश्वंपश्यामिशयनंगतः ॥ मदात्मकमितिज्ञानेनचस्वप्नोविलीयते ॥ ४४० ॥

च्यलीलामात्रेणानायासेनरथादीन्सृजतेएवंपरमेश्वरोपिनित्यमुक्तःप्राण्यदृष्टवशादीक्षणपूर्वकंजगत्सृजतीतिद्वयोरर्थः ॥ ४३७ ॥ ४३८ ॥ ननुशुक्तितत्त्वज्ञानेनरजतमिवसमष्ट्युपाधेरीश्वरस्यब्रह्मात्मविज्ञानेनविश्वंकुतोननिवर्ततइतिशंकापिब्रह्मवित्स्वप्नदृष्टांतेनपरिहृतेत्याह यथास्वप्नेतित्रिभिः यथासोऽलुप्तप्रबोधोविद्वान्स्वप्नंविलोकयन्सन्नात्मानंतथास्वप्नंस्वप्नदृष्टपदार्थजातंचभेदेननपश्यति तस्यचइतिज्ञानेपिस्वप्नोनलीयते इतिकिं अहंशयनंगतःसन्सकलंविश्वंमदात्मकंअहमेवात्मास्वरूपंयस्यएतादृशंपश्यामीतिद्वयोःसंबंधः ॥ ४३९ ॥ ४४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्वदिति तथाब्रह्मईश्वरःसंसारेनिर्वाह्यतयास्थितेप्यानंदरूपमात्मानमद्वयंपश्यति अदःदृश्यंस्थूलसूक्ष्मात्मकमात्मनोभिन्नंनपश्यति अस्येश्वरस्यइदंसर्वमदात्मकमित्याकारकज्ञानेप्येतद्विश्वंनलीयतेइति अत्रदृष्टांतदार्ष्टांतिकयोःस्वीयपरकीयकर्मणामपिस्थितिहेतुतोक्तानविस्मर्तव्या ॥ ४४१ ॥ एवमैकात्म्यसिद्धांतेसतिकल्पितबंधमोक्षव्यवस्थापिविद्वत्स्वप्नदृष्टांतेनोपपादनीयेत्याह विदुषइतिद्वाभ्यां यथाअलुप्तंब्रह्मात्मविज्ञानंयस्मिन्नेतादृशेविदुषोब्रह्मविदःस्वप्नेस्वप्नावलोकिताःस्वप्नकल्पिताःकेचिज्जीवाःप्रमातारःअस्यविदुषोविदेहमोक्षंविनापिविमुच्यंतेमुक्ततयामन्यंतेतेभ्योन्येसंसारस्थितिप्रयोजकाबद्धाःसंतितत्त्वेनमन्यंतेइति ॥ ४४२ ॥ एवमिति एवमीश्वरेअमुक्तेसंसारनिर्वाहकत्वेनस्थितेपिकल्पितावंधमोक्षव्यवस्थाबोध्येत्यर्थः ॥ ४४३ ॥ परमार्थतस्तुबंधमोक्षादिकंदृष्टांतेदार्ष्टांतिकेचनास्ति ननिरो

तद्वद्ब्रह्मापिसंसारेआनंदात्मानमद्वयम् ॥ नपश्यत्यात्मनोभिन्नमदःसदसदात्मकम् ॥ अहमेवेदमित्यस्यज्ञानेप्येतन्नलीयते ॥ ४४१ ॥ विदुषोऽलुप्तविज्ञानेस्वप्नेस्वप्नावलोकिताः ॥ केचिज्जीवाःप्रमुच्यंतेल्यस्यमुक्तिंविनापिहि ॥ अन्येबद्धाश्चसंत्यत्रस्वप्नसंस्थितिहेतवः ॥ ४४२ ॥ एवमीशेप्यमुक्तेपिमुच्यंतेत्रमुमुक्षवः ॥ बद्धाश्चकेचिद्वर्तंतेसंसारस्थितिहेतवः ॥ ४४३ ॥ अलुप्तात्मावबोधस्यस्वप्नेयद्वन्नविद्यते ॥ बंधमोक्षादिकंकिंचित्पश्यतोत्रजडाजडम् ॥ ४४४ ॥ नापितेनप्रदृश्यानांबंधमुक्तिजुषामपि ॥ विचारेसतिजीवानांभिन्नाभिन्नधियामपि ॥ ४४५ ॥ विचारेसतिनैवंस्याद्बंधमोक्षादिकंसदा ॥ ईश्वरस्यनजीवानांबंधमुक्तीप्रधावताम् ॥ ४४६ ॥

धोनचोत्पत्तिरित्यादिश्रुतेरित्याह अलुप्तात्मेतित्रिभिः यथाऽलुप्तात्मविज्ञानकस्यविदुषःस्वप्नेजडाजडरूपंविश्वंपश्यतोप्यत्रात्मनिकिंचिद्बंधमोक्षादिकंनवर्त्ततेवस्तुतोबंधाभावादेवेति ॥ ४४४ ॥ नापीति नकेवलंविदुषएवबंधाद्यभावःअपितुतेनस्वप्नदृशायेकल्पिताएतेभिन्नदृशोबंधभाजःएतेऽभिन्नदृशोमोक्षभाजइतिपरमार्थविचारेक्रियमाणेतेषामपिबंधादिकंनविद्यतेआत्मनोनित्यमुक्तस्यैकत्वादेवेति ॥ ४४५ ॥ विचारेइति एवंविद्वत्स्वप्नवद्वस्तुविचारेक्रियमाणेईश्वरस्यनबंधमोक्षादिकंनवाजीवानां कीदृशानां बंधमुक्तीबंधंमोक्षंचप्रतिधावतांशीघ्रंसाधनैर्गच्छतामिति ॥ ४४६ ॥ ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुपरमार्थतोयदिबंधाद्यभावस्तर्हिशास्त्रस्यवैयर्थ्यमापततिमितिचेन्नाज्ञान्प्रतिसार्थक्यादितिस्वप्नदृष्टांतेनैवाह स्वप्नइति यथास्वप्नेबहव उपदिष्टार्थानुष्ठानेनाभ्युदयनिःश्रेयसेप्रामुवंतोदृश्यंतेतान्प्रत्युपदेशस्यनवैयर्थ्यं तथाजागरणेपिशास्त्रंवेदःआदिपदेनस्मृत्यादयस्तेषांनैववैयर्थ्यंविद्यतेअज्ञानामधिकारिणांलाभादिति ॥ ४४७॥ विदुषःप्रतितुशास्त्रादिवैयर्थ्यमिष्टमेवेत्याह स्वप्नेयथैवेतिद्वाभ्यां यथाउक्तस्वप्नेस्वमद्रष्टारंविद्वांसंप्रत्युपदेशस्यवैयर्थ्यमेवतथान्येचयेजीवन्मुक्ततयाकल्पितादेहिनस्तान्प्रतिचोपदेशस्यवैयर्थ्यमेव निवर्त्याज्ञानाभावात् तथाजागरणेप्यात्मज्ञानवतःपुंसःपुरुषान्प्रतितथामहेश्वरंचप्रतिशास्त्रादेर्वैयर्थ्यमिष्टमेवेतिद्वयोःसंबंधः ॥४४८॥ ४४९॥ वस्तुतस्तुनशास्त्रस्यवैयर्थ्यं तद्धिशास्त्रस्यसर्वान्प्रतिप्रवृत्तौस्यात्शास्त्रंतुयथोत्सर्गोऽपवादविषयंपरित्यज्यप्रवर्ततेतथानधिकारिणःपरित्यज्यैवप्रवर्ततेइत्याशयेनस

स्वप्नेयथोपदेशस्यवैयर्थ्यंनैवविद्यते ॥ बहून्प्रतितथाचापिशास्त्रादेश्चनविद्यते ॥ ४४७॥ स्वप्नेयथैवविद्वांसं स्वप्नद्रष्टारमेवहि ॥ उपदेशस्यवैयर्थ्यमुक्तानन्यांश्चदेहिनः ॥ ४४८ ॥ तथाजागरणेपिस्यात्शास्त्रादेर्व्यर्थतासदा ॥ आत्मज्ञानवतःपुंसोप्यपेक्ष्यचमहेश्वरं ॥ ४४९ ॥ सर्वाधिकारताचात्रनैकस्यापिहिविद्यते ॥ वैश्यस्तोमोयथाव्यर्थोराजविप्रावपेक्ष्यहि ॥ ४५० ॥ वैश्येषुचनसर्वेषुत्वर्थित्वादिविशेषणात् ॥ वैश्यानपेक्ष्यवैश्यःस्यात्कृतार्थोनान्यथाक्वचित् ॥ ४५१ ॥ विज्ञेयाःसार्थकास्त्येवंबृहस्पतिसवादयः ॥ मोक्षशास्त्रंतथैवस्यात्सार्थकंज्ञानवर्जिते ॥ ४५२ ॥

र्वसंमतंसर्वत्राधिकाराभावंप्रतिपादयति सर्वाधिकारतेति सर्वत्राधिकारःफलार्थमनुष्ठेयतारूपोयस्यतत्सर्वाधिकारंतस्यभावःसर्वाधिकारताप्रएकस्यापिकस्यचिदपिशास्त्रस्यनास्ति हियतोवैश्यस्तोमनामायागविशेषोवैश्याधिकारिकत्वाद्राजानंब्राह्मणंचापेक्ष्यव्यर्थएवेति ॥ ४५० ॥ वैश्येष्विति वैश्येष्वपिनसर्वेषुवैश्यस्तोमःसफलःकिंतुअर्थित्वंफलकामत्वमादिपदेनशक्तत्वंपातित्यादिदोषराहित्यंचगृह्यते एतादृशविशेषणवतोवैश्यानपेक्ष्यैवसफलः अर्थित्वादिमान्वैश्यस्तुवैश्यस्तोमेनकृतार्थःस्यादेव इयंव्यवस्थाक्वचिदप्यन्यथानभवतीति ॥ ४५१ ॥ विज्ञेयाइति यतएवंवैश्यस्तोमवदेवब्राह्मणाद्यधिकारिकाएवबृहस्पतिसवादयः आदिपदेनराजसूयादयःएतेसार्थकाज्ञेयाः तथामोक्षशास्त्रमपिसाधनचतुष्टयसंपन्नेज्ञानवर्जितेजिज्ञासौसार्थकमिति ॥ ४५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योयोदेवानामित्यादिवाक्यार्थमाह ब्रह्मसर्वात्मतामितिदशभिः ब्रह्मकारणसूक्ष्मसमष्ट्युपाधिकंयथाब्रह्मविद्ययासर्वात्मभावंप्राप्तंतथास्थूलसमष्ट्युपाधिकोविराट्तत्प्रभृतिर्मन्वादिरपिविद्ययासर्वात्मतांप्राप्तः कश्चित्तुप्राप्स्यन्प्राप्तोभविष्यतीतियावत् अपरोऽधुनाप्राप्तइति ॥४५३॥एवंब्रह्मविद्यायाःफलेविशेषाभावेप्युत्पत्तौविशेषंदर्शयति क्वचिदितित्रिभिः क्वचिद्विराट्कपिलसनत्कुमारादौस्वभावतःनिसर्गादागंतुकनिमित्तमनपेक्ष्यैवेतियावत् ब्रह्मविद्याजायते यथापक्षिणामाकाशगमनकौशलंमत्स्यादीनांनीरगमनकौशलंचजन्मतएवप्रभवतितद्वदिति तत्रविराड्विषयिका ज्ञानमप्रतिघंयस्यवैराग्यंचजगत्पतेः ऐश्वर्यंचैवधर्मश्चसहसिद्धंचतुष्टयमितिस्मृतिः अप्रतिघंकुतश्चिदपिप्रतिघातशून्यंसर्वविषयकमितियावत् ऋषिंप्रसूतंकपिलंयस्तमग्रेज्ञानैर्बिभर्तिजायमानमित्याद्याश्रुतिःकपिलविषया एवमन्यत्रापिमानंबो

ब्रह्मसर्वात्मतांप्राप्तंयथैवब्रह्मविद्यया ॥ विराडादिस्तथाप्राप्तःप्राप्स्यन्प्राप्नोतिचापरः ॥ ४५३॥ क्वचित्स्वभावतोविद्याभवेद्यद्वद्विहायसि॥ पक्षिणांगमनंनीरेमत्स्यानांवापिजन्मतः॥ ४५४॥ पूर्वपुण्यविपाकेनक्वचिदेषाप्रजायते॥ यशआदिसुखंयद्वज्जायतेयौवनादिषु॥ ४५५॥ गुरुशास्त्रोपदेशेनसर्वेषामेवजायते॥ नेत्राभ्यांहियथैवस्याद्रूपज्ञानमनिंदितम्॥ ४५६॥ स्वयंभातायदाविद्यायदावाकर्मजाभवेत्॥ तत्रापिप्रथमंशास्त्रंभातिपश्चादियंततः॥४५७॥

ध्यं ॥ ४५४ ॥ पूर्वेति क्वचिद्वामदेववाल्मीक्यादौदेशकालनिमित्तवशाभिव्यक्तफलाभिमुखपूर्वपुण्यतोविद्याजायते यथायौवनादिकालेपुण्यविपाकात्यशोधनपुत्रादिसुखंजायतेतद्वदिति ॥ ४५५ ॥ गुर्विति गुरुशास्त्रोपदेशउपदिष्टंशास्त्रमितियावत् कृदभिहितइतिन्यायात् सर्वेषांज्ञानकारणं रूपज्ञानंप्रतिचक्षुर्वदिति॥४५६॥ ननुकथंशास्त्रस्यविद्याकारणतापूर्वोक्तेषुव्यभिचारादतआह स्वयमिति स्वयंभातास्वभावजन्याकर्मजापूर्वपुण्यपरिपाकजावायदाविद्यातत्रापिशास्त्रंविद्यातःप्रथमंभातिपक्षिणामाकाशगमनोपयोगिपक्षवत् स्वभावतएवेत्याद्यवधारणंतुशास्त्रलाभेदृष्टमध्ययनादिरूपंसाधनंवारयतीतिभावः ॥ ४५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमव्यभिचारेचवाक्यतात्पर्यावधारणरूपश्रवणस्यश्रोतव्यइत्यादिश्रुतिसिद्धाकारणताउपपन्नेत्याह ब्रह्मविद्येति ततोऽव्यभिचारात्सर्वेषुपक्षेषुक्वचित्स्वभावइत्यादिनोक्तेषुत्रिषुश्रवणरूपउपायस्तृप्तिंप्रतिभोजनवन्नियतःव्यापकइत्यर्थः ॥ ४५८ ॥ ब्रह्मविद्यास्वरूपमभिनयति ब्रह्मेति बृहतेर्धातोरतेश्चस्वारस्यात्सर्वाधिकसर्वांतररूपोब्रह्मात्मशब्दयोरर्थउक्तः सएवार्थोब्रह्मात्मशब्दाभ्यांतज्जन्यबुद्धिभ्यामपिविनिर्मुक्तःसन्नहंशब्दवाच्यार्थांतर्गतजडांशहीनोहंभवामीतीयमेवमाकाराब्रह्मविद्याविज्ञैरुक्तेति ॥ ४५९ ॥ इयंविद्याउत्पन्नासतीफलप्रदानेजात्यादिकंनापेक्षतेइत्याह अनयेतित्रिभिः अनयाविद्ययायथाब्रह्मसर्वात्मकमभूत्तथान्योपियःकश्चित्सर्वात्मकोभवत्येवेति ॥ ४६० ॥ मानवइति स्पष्टम् ॥ ४६१ ॥ ब्रह्मेति भगवद्गीतास्वप्युक्तं बहवोज्ञानतपसापूतामद्भावमागताइति ॥ ४६२ ॥ उक्तविद्याफलेवामदेवानु

ब्रह्मविद्यासमुत्पत्तावुपायःश्रवणंततः॥ नियतःसर्वपक्षेषुतृप्तौयद्वद्धिभोजनम् ॥ ४५८ ॥ ब्रह्मात्मशब्दधीशून्यउक्तोयोबृहतेरतेः ॥ अर्थोभवामिनान्योहंशब्दधीविषयोजडः ॥ ब्रह्मविद्येयमाख्याताविप्रैःसूक्ष्मार्थदर्शिभिः ॥ ४५९ ॥ अनयाहियथाब्रह्मसर्वात्मकमभूद्धितत् ॥ सर्वात्मकस्तथान्योपिस्यात्तथैवनसंशयः ॥ ४६० ॥ मानवोवामुनिर्वापिदेवोवादानवोथवा ॥ धीमानन्योपियःकश्चिद्ब्रह्मस्याद्ब्रह्मविद्यया ॥ ४६१ ॥ ब्रह्मसर्वात्मकंप्राप्ताबहवोत्रद्विजोत्तमाः ॥ असुरामुनयःसर्वेब्रह्मास्मीत्यात्मबोधनात् ॥ ४६२ ॥ परोक्षंनेदमस्माकंसर्वेषांब्रह्मवेदिनाम् ॥ वामदेवःस्थितोगर्भेकश्चिदस्मासुसद्विजः ॥ ४६३ ॥ अनुग्रहार्थमस्माकंविश्वासंजनयन्निदम् ॥ अस्मान्प्रत्यब्रवीद्वाक्यंपश्यन्सर्वात्मतामिमाम् ॥ ४६४ ॥ ब्राह्मणाःशृणुतात्रैतद्विश्वासायवदामियत् ॥ युष्मभ्यंब्रह्मविद्यायाहेतौप्राप्तासमाप्यतां ॥ ४६५ ॥

भवोपिमानमित्यर्थपरस्यतद्वैतदित्यादेरर्थमाह परोक्षमिति इदंविद्याफलंसर्वेषांब्रह्मवेदिनांपरोक्षंनभवतिकिंतुविद्योत्तरक्षणएवोपलभ्यतइति यतोस्माकमन्यतमोगर्भएवविद्याफलंसर्वात्मतारूपंपश्यन्सन्नस्माकमनुग्रहार्थंविद्याफलेविश्वासंजनयन्निदंवक्ष्यमाणंवाक्यमस्मान्प्रत्यब्रवीदितिद्वयोरन्वयः ॥ ४६३ ॥ ४६४ ॥ वामदेवउवाच ब्राह्मणाइतित्रयोदशभिः भोब्राह्मणायदहंयुष्मभ्यंवदामितन्मत्तंनिर्धिप्राप्ताःसंतोयूयंशृणुत कस्मैवदामि ब्रह्मविद्यायाःहेतौफलेविश्वासाय फलस्यहेतुत्वमध्ययनेनवसतीत्यादौप्रसिद्धं किंकृत्वावदामि तांविद्यांसम्यक्प्रतिबंधराहित्यंयथास्यात्तथाआप्यलब्ध्वेत्यर्थः ॥ ४६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वामदेवइति अहंभवतांदृष्ट्याभवतांमध्येकश्चिदन्यतमोवामदेवनामात्यक्तपूर्वशरीरःसन्संप्रतिअधुनागर्भेतिष्ठामि स्वदृष्ट्यातुसर्वात्मास्मीतिभावः॥ ४६६॥ भवतांममेति पूर्वशरीरेममभवतांचसनकादिमहात्मभिःकृतउपदेशःसमआसीत् तदानींसर्वेवयंविषयांधधियःसंतोहृदयस्थमपिस्वमात्मानंनदृष्टवंतः यथाजन्मांधाःकरेपिस्थितमुज्ज्वलंमणिंनपश्यंतितद्वदितिद्वयोरन्वयः॥४६७॥४६८॥ तेनेति तेनप्रतिबंधवशादात्मसाक्षात्कारालाभरूपेणदोषेणमेअदोदेहरूपंकारागृहंजातंतद्देहकारागृहंभवतांयथामाभून्नभवेत्तथाबोधेयतध्वमिति॥ ४६९ ॥ नचविद्याफलेसंशयोमयानुभूतत्वादित्याह ब्रह्मविद्येति सदासर्वकालेषुनतुकृतयुगादावेवेतिनियमः तत्रभवतांविश्वासार्थमहंविद्याफलंसर्वात्मतांवक्ष्येइति ॥ ४७०॥ वामदेवसूक्ताद्यऋकूत्रयार्थमाह अहंमनुरितिसप्तभिः मनुःस्वायंभुवादिरहमेवाभूवंतथासूर्योहमेवतथाक

वामदेवोभवद्दृष्ट्यागर्भेतिष्ठामिसंप्रति॥ त्यक्तपूर्वशरीरःसन्भवतांकश्चिदेवहि॥ ४६६ ॥ भवतांममचाप्यासीदुपदेशोमहात्मनां॥ विषयांधधियःसर्वेदृष्टवंतोनकिंचन॥ ४६७॥ हृदयस्थंस्वमात्मानंजात्यंधाःस्वकरेयथा॥ नपश्यंतिमणिंसंतमादित्यसमवर्चसं ॥ ४६८॥ तेनदोषेणमेदेहकारागृहमदःपरम्॥ जातंतद्भवतांमाभूद्यतध्वंस्वात्मबोधने॥ ४६९॥ ब्रह्मविद्यासमुत्पत्तौसदासर्वात्मताभवेत्॥ विश्वासार्थमहंवक्ष्येप्राप्तांसर्वात्मतांद्विजाः॥ ४७० ॥ अहंमनुस्तथासूर्यःकक्षीवानप्यहंमुनिः॥ अतींद्रियार्थद्रष्टृत्वात्प्रसिद्धोब्राह्मणोहियः॥ ४७१ ॥ शुक्लानांदीप्तिभाजांस्यांकुत्संगोप्यमहंसदा॥ अहंसंसारचक्रेस्मिन्जातोगच्छामिसर्वदा॥ नितरांयोनिसाहस्रमुच्चावचगतंहियन्॥ ४७२॥

क्षीवान्नाम्नाप्रसिद्धोमुनिरप्यहमेवेति ॥ ४७१ ॥ कुत्समार्जुनेयमित्यंशस्यार्थमाह शुक्लानामिति शुक्लानामर्जुनपदोक्तानांदीप्तिमतांसूर्यादीनांयत्कुत्संकुत्सपदार्थमाह गोप्यमिति तमेवभांतमित्यादिश्रुतेरादित्याभासकमपियत्तत्त्वमादित्याद्यैर्व्यवहारभूमौप्रकाशकतयाप्रसिद्धैरपावृतमिवतदहमस्मीति एतेनतत्पदार्थभावोदर्शितः अथऋक्षेइतिपदेनआत्मनेपदगत्यर्थऋजिधातोर्लेडुत्तमपुरुषैकवचनप्रयोगरूपेणत्वंपदवाच्यजीवरूपतामाह अहंसंसारेति अहमेवास्मिन्संसारमंडलेजातउपाधिजन्मनाजन्माभिमानीसन्नुच्चावचलोकगतयोनिसहस्रंनितरांगच्छामीति ॥ ४७२ ॥ ॥३५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहंकविरित्याद्यंशस्यार्थमाह क्रांतेति क्रांताप्रस्तताद्दृष्टिर्यस्यसतथाउशनाशुक्रः अहंभूमिमदामाद्यायेत्यर्थमाह जामदग्न्येति जामदग्न्यः परशुरामः सर्वज्येष्ठायआद्यायकश्यपायअदांदत्तवानस्मीति ॥ ४७३ ॥ अहंवृष्टिंदाशुषेमर्त्यायेत्यर्थमाह अहंचतुर्विधायेति चतुर्विधाय जरायुजादिरूपायकर्मकारिणेदाश्वधात्वर्थदानादिकर्मकृतेजंतवेमेघःसनूवृष्टिंददामीति कीदृशींवृष्टिं सम्यगऽसम्यग्रूपेणसुकृतदुष्कृतफल नानाशरीरोत्पत्तिनिमित्तत्वेनवासुखदुःखदां॥ ४७४॥अहमपोअनवाइत्यर्थमाह अंतरिति न्यवयवोलोकस्त्रिलोकस्तस्यांतःस्थावहिस्था श्वएताअपोजलानिनयामिआकृष्टाःकरोमि वैश्वानरादिरूपतयांऽतर्बहिःस्थितसूर्यात्मनेति ॥ ४७५ ॥ वशानाममदेवासोनुकेतमाय न्नित्यर्थमाह मामेवेति वशकांतौवशानारक्षामिछंतःशक्राद्यादेवामामेवमहेश्वररूपंशरणंगताअन्नमिच्छंतोबालाजननीमिवेति॥ ४७६॥ अहंपुरइत्याद्यृगर्धार्थमाह शंवरस्येति मंदमनायासेनस्यतिअसुरान्हंतीतिमंदसानःस्वामिकार्तिकेयस्तद्रूपःसंस्तारकासुरपक्षपातिशंव

क्रांतदृष्टिरहंतद्वदुशनाभार्गवोहियः॥ जामदग्न्यवपुर्भूत्वासर्वज्येष्ठायवैपुरा॥ कश्यपायक्षितिंसर्वामदांवित्ते नपूरिताम्॥ ४७३॥ अहंचतुर्विधायास्मैजंतवेकर्मकारिणे॥ वृष्टिंददामिमेघःसन्सुखदुःखप्रदांसदा॥ ४७४॥ अंतर्बहिश्चरोनित्यमहंसूर्यस्वरूपधृक्॥ अंतर्बहिस्त्रिलोकस्थानयाम्येताअपःसदा ॥ ४७५ ॥ मामेवशरणं प्राप्ताःशक्राद्याःसर्वदेवताः ॥ दैत्याभिभूताजननींयथाबालाःक्षुधार्दिताः ॥ ४७६ ॥ शंबरस्यासुरेंद्रस्यनव तीस्तुनवाधिकाः॥ मायाभयंकरीर्नित्यंदेवतानांदुरात्मनः॥ व्यधमंतारकोयद्वत्तमएतद्दुरासदं॥ ४७७॥ इ त्यादिनाहिभोविप्राःस्वात्मनःसर्वभावतां॥ वामदेवोवदत्यंतःस्मृतौनोवर्ततेधुना॥ ४७८॥

रस्यनवाधिकनवतिसंख्यामायामयीःपुरःदेवभयंकरीर्व्यधमंव्यनाशयमितियावत् यथातारकःप्रणवएतद्वाद्दुरासदंतमोविधमतितद्वदि ति इयंकथागणेशपुराणेस्पष्टा ॥ ४७७ ॥ इत्यादिनेति आदिपदेनशततममित्यादिशेषस्यदैवोदासिप्रतर्दनाद्भीतंहतकुलशतसंख्यापूरणं वीतहव्यमाश्रमेप्रविष्टंभृगुरूपोहंब्राह्मणजातौप्रावेशयंजिघांसवेप्रतर्दनायनात्राश्रमेऽब्राह्मणोस्तीत्यभिधानात् प्रतर्दनेएतादृशंसामर्थ्यंकु तइत्यतआह दिवोदासमिति यद्यतःदिवोदासंवीतहव्यकुल्येभ्योभीतंशरणागतंभारद्वाजरूपोहमावंरक्षितवानस्मिपुत्रकामेष्ट्याप्रतर्दना ख्यपुत्रप्रदानादित्याद्यर्थकस्ययहः इत्यादिनावाक्यगणेनवामदेवआत्मनःसर्वभावतांवदति वर्त्तमानसामीप्येलट् तच्चनोऽस्माकंस्मृतौअं तःस्मृतिमध्येविषयितासंबंधेनवर्त्ततइति ॥ ४७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिहासमुपसंहरन्फलितंदर्शयति एवंतेइति तेसमुदिताविप्राब्रह्मात्मबोधविचारेएवमकथयन्निति तस्माद्यःकश्चिदपिदेवादिरूपोविद्वान्स सर्वात्मरूपोभवत्येवेत्यर्थः ॥ ४७९ ॥ उक्तविद्याफलंदेवैरपिप्रतिबद्धुंनशक्यमितिप्रदर्शकस्यतस्यहनदेवाइत्यादिवाक्यस्यार्थमाह त्वदाद्याइतिदशभिः हेशक्रत्वत्प्रभृतयोदेवाअपिएनंविद्वांसंनियंतुमाज्ञोल्लंघनेअभूतिप्रदर्शनेनवशेस्थापयितुमितियावत् नेशतेनसमर्थाः तत्र हेतुंव्याघातमाह भवंतइति भवंतोदेवाहियतःस्वमात्मानंनियंतुंनशक्ताः नह्यग्निरात्मानंदहतीतिप्रसिद्धम् ॥ ४८० ॥ नन्वात्मनोनियम्यत्वाभावेपिविदुषःकथंतथात्वमितिचेद्विद्वानपिविद्ययासर्वात्मभूतत्वाद्भवतामात्मैवेत्याह भवतामिति नन्वात्माऽऽतरोभवतिविद्वांस्तुस्वदेहावच्छिन्नःकंथमस्माकमात्मेतिशंकांदृष्टांतेनवारयति नचेति यथाकाशोघटाद्युपाधिविमुक्तःसन्कस्यचिदपिहृदयदेशेनास्तीतिनकिंत्वस्त्येव तथाविद्ययाबाधिताविद्यकपरिच्छेदोविद्वानपिसर्वांतःस्थत्वात्सर्वात्मेति ॥ ४८१ ॥ एवंविदुषआत्मत्वेचतदनिष्टप्रवृत्तिःस्वशि

एवंतेकथयन्विप्राःशक्रब्रह्मात्मबोधने॥ अथापिब्रह्मवित्तस्मात्सर्वात्मैवप्रजायते॥ यःकश्चिदपिदेवोवादानवोमनुजोथवा॥४७९॥त्वदाद्याअपिशक्रैनंनियंतुंनेशतेसद॥भवंतोनस्वमात्मानंनियंतुंप्रभवोयतः॥४८०
भवतांसर्वदेवानामात्माब्रह्मविदीरितः॥ सर्वात्मत्वान्नचाकाशःकस्यचिद्धृदयेनहि॥ ४८१ ॥ अस्ययत्प्रतिकूलंस्याद्भवद्भिःकृतमण्वपि ॥ भवतामेवतत्सर्वंभवेन्नाल्पंचतस्यतत्॥ ४८२ ॥स्मेराननंयथावीक्ष्यदर्पणे स्वस्यबालकः॥तस्यानिष्टंविधास्यन्सस्वात्मनःकुरुतेपुरः॥पश्चात्तस्यनचैतेनजायतेदुःखमण्वपि॥ ४८३॥

रस्ताडनप्रवृत्तिवत्स्वानिष्टहेतुरेवेत्याह अस्ययदिति अस्यविदुषःप्रतिकूलंतथाभिमतंयद्भवद्भिरणुस्वल्पमपिकृतंतत्सर्वंभवतामेवसंबंधिजायतेतस्यविदुषोऽसंगस्यानिष्टमल्पमपिसंबंधिनजायतेइति ॥ ४८२ ॥ उक्तंविशदयन्सर्वेषांविद्वानसंगंरूपंवास्तवंकर्तृत्वभोक्तृत्वाद्यभिमानिरूपंतुद्वितीयंससंगमाविद्यकंतत्रयोग्यंयोग्येनसंबध्यतेइतिन्यायेनअसंगरूपोद्देशेनप्रयुक्तमपिप्रतिकूलंससंगरूपएवनिविशतेइत्यत्र दृष्टांतमाह स्मेराननमितिद्वाभ्यां यथाबालःस्मेरंमंदहासयुक्तंस्वस्याननंदर्पणासंग्यपिदर्पणेसक्तंमत्वातस्यदर्पणसंगितयाऽभिमतस्यमुखस्यानिष्टंविकृततारूपंविधास्यन्करिष्यन्चिकीर्षन्नितियावत् पुरःप्रथमंस्वस्यात्मनस्तथाभिमतसंघातस्यतद्विकृततारूपमनिष्टंकुरुतेपश्चात्तस्यदर्पणेदृश्यमानस्यमुखस्यकुरुते एतावतादर्पणेदृश्यमानस्यासंगस्यमुखस्यनकिंचिदनिष्टंजायतेकिंतुबालस्याभिमानिकेकर्तृत्वादिमतिससंगरूपएवससाधनंसोपकरणंदुःखंजायतेइतिद्वयोरर्थः ॥ ४८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४८४ ॥ दार्ष्टांतिकमाह असंगेति तथाविदुषोनिःसंगस्यतदनिष्टंनजायतेभवतामेवतुकर्तृत्वाद्यभिमानिनांतज्जायते दुःखसाधनक्रियावत्त्वेनयोग्यत्वादित्यर्थः ॥ ४८५ ॥ नन्वस्मदभिन्नस्यापिविदुषोनदुःखंजायतेऽस्माकमेवतुजायतेइत्यत्रकिंनियामकमितिचेदुपाधिस्थत्वाभिमानलक्षणंप्रतिबिंबत्वमेवोपाधेःप्रतिबिंबपक्षपातित्वादित्याह अलंकारादितित्रिभिः यथाबिंबभूतशरीरालंकारापकाराभ्यांप्रतिबिंबस्यतथात्वंतथाविदुषोब्रह्मभूतस्यबिंबत्वाज्जीवानांचप्रतिबिंबत्वाज्जीवैःकृतंसुखादिकंजीवैरेवसंबध्यतेइतित्रयाणामर्थः भागवतेप्युक्तं नैवात्मनःप्रभुरलंनिजलाभपूर्णोमानंजनादविदुषःकरुणोवृणीते यद्यज्जनोभगवतेविदधीतमानंतच्चात्मनेप्रतिमुखस्ययथामुखश्रीरिति

दर्पणेदृश्यमानस्यमुखस्यासंगरूपिणः ॥ कर्तुरेवहितत्सर्वंभवेद्दुःखंससाधनम् ॥ ४८४ ॥ असंगरूपिणस्तद्वद्विदुषोविद्यतेनहि ॥ अनिष्टंकिंतुभवतांभोक्तृत्वात्स्यात्ससाधनं ॥ ४८५ ॥ अलंकारात्शरीरेस्वेभवत्येषोप्यलंकृतः ॥ तिरस्काराच्छरीरस्यप्रतिबिंबस्तिरस्कृतः ॥ ४८६ ॥ यथातथैवभवतांविद्वान्बिंबमुदाहृतः ॥ भवंतःप्रतिबिंबानिनीरेयद्दत्त्वभाकृतः ॥ ४८७ ॥ भवंतोयद्धिकुर्वंतिशक्रास्यविदुषःसदा ॥ भवतामेवतत्सर्वंसुखंदुःखंनसंशयः ॥ ४८८ ॥ जलेनपांसुनावापिच्छादयेद्योदिवाकरम् ॥ तस्यैवाच्छादकंभूयात्तद्दव्यंनात्रसंशयः ॥ ४८९ ॥ आत्मनोव्यतिरिक्तंयेदेवमेतदुपासते ॥ भवंतोहिनियंतारस्तेषांशक्रनसंशयः ॥ ४९० ॥

मुखेबिंबेश्रीःकृतासतीप्रतिमुखस्यप्रतिबिंबस्यसंबंधिनीभवतीतितुर्यपादार्थः ॥ ४८६ ॥ ४८७ ॥ ४८८ ॥ मुखस्यबिंबस्यालंकारादिसंसर्गेपिविदुषोनसंसर्गलेशोप्यतस्तत्पूजनादिकंपूजकात्मानंप्रत्येवसफलंभवतीतिदृष्टांतेनाह जलेनेति पांसुर्धूलिः तस्याच्छादकस्यैवेति ॥ ४८९ ॥ एवंसफलंविद्यास्वरूपंदर्शितमथाविद्यास्वरूपादिप्रदर्शकस्यअथयोन्यामित्यादेर्विद्युरित्यंतस्यवाक्यस्यार्थमाह आत्मनइत्येकादशभिः एतत्प्रसिद्धंयथाभवतितथायेआत्मनःसकाशाद्भिन्नंमत्वादेवताजातमुपासतेतेषांभेददर्शनलक्षणाविद्याशालिनांभवंतोनियंतारःप्रभवःहेशक्रेति ॥ ४९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तविधाज्ञानशालिनःपशुत्वंनिरूपयति अज्ञानजेतित्रिभिः अज्ञानरूपमृत्काष्ठोपादानिकास्वयंभुवापरमेश्वरेणनिर्मिताइयंसंसृतिरूपा महतीशालावर्तते कीदृशी भेददर्शिरूपाणांगवांवासस्थानमितिशेषः कीदृशानांभेददर्शिगवां अत्रव्यवहारभूमौभवतांदेवादीनामुपजीव्यानांहव्यकव्यादिरूपवृत्तिप्रदत्वेनाश्रयभूतानामित्यर्थः ॥ ४९१ ॥ कामेति तत्रशालायांकामक्रोधादिरूपाःस्थूणाःश्रांताभारेणव्याकुलाइवस्थिताःसंतितासुकामादिरूपस्थूणासुएकाविधिनिषेधात्मकवेदलक्षणवाग्रूपातंतिर्दीर्घरज्जुर्बद्धावर्तते कामिनएवकर्माधिकारात् निष्कामस्यतुब्रह्मवित्त्वान्नविधिकैंकर्यमितिभावः॥४९२॥तत्रेति तत्रवाग्लक्षणदीर्घरज्जौअधिकार्युपस्थापकब्राह्मणादिनामानिदामानि प्रतिपशुनिवेशिस्वल्परज्जुभूतानिवर्ततइति तथाचश्रुत्यंतरं तस्यवागेवतंतिर्नामानिदामानीत्यादि तेषुदामसुबहूनामज्ञपशूनांबद्धत्वेपियागदानादिकारिगृहस्थरूपोऽज्ञस्तुहेशक्रभवतांदेवादीनांकामधेनुसमइति॥ ४९३ ॥ कामधेनुसमत्वमुपपादयति एकएवेति यतोयंसनूया

अज्ञानजामहाशालागवांभेददृशामियं॥ भवतामुपजीव्यानांनिर्मितात्रस्वयंभुवा॥ ४९१ ॥ कामक्रोधादयःस्थूणास्तत्रश्रांताःसहस्रशः॥ तास्वेकैवनिबद्धेयंवाक्तंतिःसुदृढाभृशं ॥ ४९२ ॥ तत्रनामानिदामानिपशूनांबंधनानिच॥ कामधेनुसमस्त्वज्ञोभवतांशक्रसर्वदा॥ ४९३॥ एकएवयतोऽज्ञोयंसर्वान्वःपातिनाकभाक्॥ पितॄन्मुनींश्चमनुजान्प्राणिनोऽन्यांश्चसन्गृही॥ स्वधास्वाहाहंतकारप्रमुखैर्नित्यमेवसः॥४९४॥ मनुजानामनेकेस्युःपशवोमनुजःसतु॥ एकैकस्यापिभवतामेकएवपशुस्त्वयं॥ ४९५॥ चोरादिहरणाद्दुःखंपशोरेकस्यजायते॥ नरस्यकिमुवक्तव्यंसर्वेषांहरणेसति ॥ ४९६ ॥ सर्वेषांहरणेयावद्भवेद्दुःखंकुटुंबिनः॥ भवतांतावदेवस्यान्नरस्याज्ञाननाशने॥ ४९७॥

गादिकारिगृस्थरूपोऽज्ञोनाकभाक्स्वर्गार्हःवोयुष्मान्देवान्स्वाहाकारेण पितॄन्स्वधाकारेणमुनीन्स्वाध्यायेनअतिथीन्हंतकारेणान्यान्प्राणिनोबलिप्रभृतिकर्मणापातीत्यर्थः अथोअयमात्मासर्वेषांभूतानांलोकइत्यादिश्रुतेः॥ ४९४ ॥ अज्ञइत्येकवचनतात्पर्यंदर्शयति मनुजानामिति मनुजानामेकैकस्यापिअनेकेबहवःपशवःस्युः भवतांदेवादीनांतुसतुसद्गृहस्थरूपोमनुजएकएवपशुः कामधेनुवत्सर्वोपकारकइत्यर्थः ॥ ४९५ ॥ एकस्मिन्नेवेत्याद्यंशस्यार्थमाह चोरादीनिपंचभिः यथाबद्धपशुकस्यनरस्यचोरादिकर्तृकैकपशुहरणेपिदुःखंकिमुतसर्वेषांहरणेसति तत्रसर्वेषांपशूनांहरणेयादृशंदुःखंनरस्यजायतेतादृशंदुःखंसर्वपशुस्थानीयस्यनरस्यमनुष्यस्याज्ञाननाशनरूपेहरणेसतिदेवादीनांजायतेइतिद्वयोरर्थः॥ ४९६ ॥४९७॥ ॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपद्रवमिति यथाइतस्ततोधावतांपशुहारिणांचोराणामुपद्रवमिष्टसिद्धिप्रतिबंधोपायंनानाविधंयत्ताःसावधानाःसंतोनराःकुर्युस्तद्वद्ब्रह्मवंतोदेवाअपिब्रह्मविद्याकामनयाब्रह्मचर्यादिसेविनामुपद्रवंबुद्धिविपर्ययात्मकंयथाशक्तिकुर्वंतेइतिद्वयोरन्वयः अत्रायंश्रुतेराशयोभाष्यकारैःकाकुस्वरसूचितोदर्शितः तस्मान्मुमुक्षुर्विद्याकामःश्रद्धादिसंपन्नोदेवाद्याराधनपरोभवेद्यथातेसद्बुद्धिप्रदानेनप्रतिबंधाद्रक्षेयुरितितदुक्तं नदेवादंडमादायरक्षंतिपशुपालवत् यंहिरक्षितुमिच्छंतिबुद्ध्यासंयोजयंतितमिति देवपराङ्मुखानांहिविघ्नप्राचुर्यंदृश्यते तदुक्तं प्रमादिनोबहिश्चित्ताःपिशुनाःकलहोत्सुकाः संन्यासिनोपिदृश्यंतेदेवसंदूषिताशयाइति विद्यासिद्ध्यनंतरंतुनकाचित्प्रतिबंधाशंकाज्ञानसमकालंसर्वात्मभावादितिपूर्वमुक्तं ॥ ४९८ ॥ ४९९ ॥ नराणामिति यद्वत्पशुहारिणःपाटच्चराश्चौरायेऽवध्याहंतुमशक्यास्तेन

उपद्रवंयथाकुर्युश्चोराणांपशुहारिणां ॥ अहर्निशंनरायत्ताइतश्चेतश्चधावतां ॥ ४९८ ॥ ब्रह्मविद्यार्थिनांतद्वद्ब्रह्मचर्यादिसेविनां ॥ उपद्रवंभवंतोपियथाशक्तिप्रकुर्वते ॥ ४९९ ॥ नराणामप्रियायद्वदवध्याःपशुहारिणः ॥ पाटच्चरास्तथैवैतेविद्वांसोभवतामपि ॥ ५०० ॥ तस्मादयंसर्वदेवरूपःशक्रतथैवहि ॥ देवेभ्योभ्यधिकोनास्यसंनिधावनृतंवदेत् ॥ ५०१ ॥ पुत्रादेःप्रियमात्मानमज्ञात्वायोम्रियतेव्रजेत् ॥ आनंदात्मप्रकाशेनसोपितंपालयेन्नच ॥ ५०२ ॥

राणामप्रियास्तथाएतेविद्वांसोभवतांदेवादीनामप्रियाइति अत्राप्यात्मभूतानांविदुषामप्रियत्वानुपपत्तेर्नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनामित्यादिशास्त्रोल्लंघिनामेवविदुषांदेवद्वेषविषयत्वं तत्रापिसविशेषणेहीतिन्यायाद्विशेषणांशएवद्वेषइतितात्पर्यंबोध्यम् ॥ ५०० ॥ फलितमाह तस्मादिति तस्माद्विद्यालाभात्पूर्वंविघ्नसंभवेपिविद्याफलस्यदेवैरपिप्रतिबद्धुमशक्यत्वात्अयंविद्वान्सर्वात्मभूतत्वात्सर्वदेवरूपस्तथाब्रह्मभूतत्वाद्देवेभ्योऽधिकश्चास्यविदुषःसंनिधावनृतमात्मेतरप्रियरूपंनवदेदितियदुक्तंतदुपपन्नमिति ॥ ५०१ ॥ अथयोहवाइत्यादिकंडिकायाअर्थमाह पुत्रादेरितिसप्तभिः पुत्रादेःसकाशात्प्रियमात्मानमज्ञात्वैवयोम्रियतेतस्यस्वरूपभूतोपिसआत्माअज्ञातःसन्नानंदरूपाविर्भावेणतमज्ञंनपालयेत्जन्मप्रवाहान्नरक्षेदिति ॥ ५०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अज्ञातआत्मानरक्षतीत्यत्रदृष्टांतमाह अनधीतइति यथागुरुपुस्तकादिद्वारासन्निहितोपिवेदःअनधीतःसन्स्वस्वरूपप्रकाशेननद्विजंपावयतिनपूतंकरोति यथावान्यत्सुकृतंयागादिरूपंकर्मज्ञातमपिनकृतमननुष्ठितंसन्नफलायप्रभवतितथात्माप्यज्ञातइति ॥ ५०३ ॥ अज्ञात्वेति एनमात्मानमज्ञात्वाअश्वमेधादिकंमहदपिकर्मकृतंसत्फलरूपेणक्षीणंभूत्वादुःखमेवददातीति ततोनित्यानंदमिच्छताआत्मज्ञानेयत्नःकर्तव्यइतिभावः ॥ ५०४॥ उपास्तइति ज्ञानाशक्तौउपासनमपिवरं उपासकोज्ञानस्योपासनस्यकर्मणश्चप्रसादेनप्रभावेणहिचित्तशुद्धिद्वाराइहब्रह्मलोकेवाकालंप्रतीक्ष्यविद्यांप्राप्नुयादिति ॥ ५०५ ॥ अवांतरंफलमुपासनस्याह संसारेपीति सउपासकउपासनोत्कर्षानुसारेणहिरण्यगर्भसाम्यपर्यंतमैश्वर्यंलभतेइत्यर्थः ॥ ५०६ ॥ ऐश्वर्यमभिनयति यद्यदिति हिरण्यगर्भवदिच्छामात्रेणकामितंसृजते

अनधीतोयथावेदःस्वप्रकाशाद्विजोत्तमं ॥ नपावयेत्तथाचान्यत्सुकृतंनकृतंचतत् ॥५०३॥ अज्ञात्वाचैनमात्मानमश्वमेधादिकंयदि ॥ कुरुतेतदपिक्षीणंपुनर्दुःखंप्रयच्छति ॥ ५०४ ॥ उपास्तेयोपिचात्मानमशक्तोज्ञातुमंजसा ॥ ज्ञानकर्मप्रसादेनकालाद्विद्यांसमाप्नुयात् ॥ ५०५ ॥ संसारेपिवसन्सोयंनानैश्वर्यसमावृतः ॥ हिरण्यगर्भेणसमःसवाभूयात्कदाचन ॥ ५०६ ॥ यद्यत्कामयतेतत्तत्सृजतेजगदीश्वरः ॥ हिरण्यगर्भोत्रयथाज्ञानकर्मप्रसादतः ॥ ५०७ ॥ ब्रह्मास्मीत्यनयाबुद्ध्यासाक्षाद्यःकुरुतेपुमान् ॥ तस्यसर्वमिदंहेयंवांतंशक्रयथातव ॥ ५०८ ॥ इतोन्यद्योविजानातिनासावात्मज्ञईरितः ॥ यथादृप्तोत्रबालाकिर्गार्ग्योहिविदितस्तव ॥ ५०९ ॥ अजातशत्रुशिष्योभूद्गुरुत्वेनसमागतः ॥ तांकथांत्वंचजानीषेकाश्यांवृत्तांमहीतले ॥ ततःशक्रनविज्ञेयमन्यत्किंचित्कदाचन ॥ ५१० ॥

इति ॥ ५०७ ॥ ब्रह्मवित्त्वीश्वररूपेणसर्वंसृजन्नपिनकिंचित्कामयतेइतिविशेषमाह ब्रह्मास्मीति ब्रह्मास्मीत्याकारयाबुद्ध्यायआत्मानंसाक्षात्कुरुतेतस्यविदुषइदंसर्वंदृश्यजातंहेयमेवहेशक्रयथातवदेवराजत्वाभिमानिनोवांतान्नंहेयमिति ॥ ५०८ ॥ अथचतुर्थाध्यायतात्पर्यप्रदर्शनमुपक्रममाणोयदात्मब्राह्मणेतृतीयाध्यायगतेविधिमुखेनप्रदर्शितंतत्त्वमेतदेवमूर्त्तामूर्तब्राह्मणेनिषेधमुखेनोच्यतेइतिसूचयन्नजातशत्रुब्राह्मणंव्याख्यातमितिदर्शयति इतोन्यदितिद्वाभ्यां इतोविधिमुखेनवर्णितात्मस्वरूपादन्यत्प्राणादिरूपंयआत्मत्वेनजानातिअसावनात्मज्ञएवबालाकिवदितिमहीतलेप्रसिद्धमितिशेषः फलितमाह ततइति ॥ ५०९ ॥ ५१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथमूर्तामूर्तब्राह्मणतात्पर्यार्थमभिनीयदर्शयति इंद्रियैरितिचतुर्भिः यास्थूलदेहेऽभिमानिनइंद्रियैःस्थूलार्थानामुपलब्धिर्जागरणसंज्ञोक्तातत्सर्वंजाग्रत्रिपुटीरूपंसाक्षिभास्यत्वेनदृश्यत्वाद्घटवदनात्मैवेत्यर्थः ॥ ५११ ॥ स्वप्नेपीति स्वप्नेपियन्मानसंमनोविकारभूतंत्रिपुटीरूपंतन्मात्रमित्युक्तं तथाचभगवद्व्याससूत्रं मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति तदपिगंधर्वनगरोपमत्वाज्जनिमृत्युयोगाच्चानात्मेतिज्ञेयमिति ॥ ५१२ ॥ नाडीभिरिति यःपुरीतद्रूपदुर्गमध्यगतेहृदयेनाडीद्वारेणगत्वाऽज्ञोभवतिसोपितेनाज्ञानविशिष्टत्वेनाज्ञत्वाच्चिद्भिन्नत्वाद्घटवदनात्मामुख्यात्मभिन्नइत्युक्तः विशिष्टकेवलयोर्भेदादितिभावः तर्हिकिंस्वरूपआत्मेतिपृच्छति किन्त्विति उत्तरयति स्वप्रका

इंद्रियैरुपलब्धिर्यास्थूलार्थानांप्रकीर्तिता ॥ स्थूलदेहेनतत्सर्वंभवेदात्मायथाघटः ॥ ५११ ॥ स्वप्नेपिमानसंयत्स्यान्मायामात्रंतदीरितम् ॥ देशकालाद्यभावेनगंधर्वनगरोपमं ॥ तदप्यनात्मेतिज्ञेयंजनिमृत्योश्चयोगतः ॥ ५१२ ॥ नाडीभिर्हृदयेगत्वापुरीतद्दुर्गमध्यगे ॥ अज्ञोभवतियःसोपितेनानात्मासमीरितः ॥ अज्ञत्वाद्घटवत्किंतुस्वप्रकाशवपुर्हिसः ॥ ५१३ ॥ सुषुप्तेहृदयेयोत्रयश्चस्वप्नेपिमानसे ॥ देहेजागरणेयोपिसआत्माशक्रकथ्यते ॥ ५१४ ॥ ज्ञानकर्मेंद्रियाण्यस्यत्वंतःकरणमप्यदः ॥ जायंतेचविलीयंतेजंतोःसुप्तेर्गमागमे ॥ ५१५ ॥ प्राणोयद्यपिनैवायंलीयतेजायतेचनः ॥ सुप्तौतेनभवेत्सत्यस्तथाप्यस्मादसौपरः ॥ ५१६ ॥

शेति सहिनिश्चयेनस्वप्रकाशरूपइत्यर्थः ॥ ५१३ ॥ सुषुप्तइति यःसुषुप्तावस्थायांहृदयेकीर्तितःस्वप्नकालेतुमानसेमनसिकीर्तितःजागरणेतुस्थूलदेहेकीर्तितःसआत्मात्रप्रकरणेहेशक्रकथ्यतेनिषेधमुखेननिरूप्यतेइत्यर्थः ॥ ५१४ ॥ अथप्रतिपाद्यस्यब्रह्मणःसार्थकंनामयत्कौषीतकिनेंद्रभयान्नोक्तमित्युक्तंतत्तावद्दर्शयति ज्ञानेतिचतुर्भिः सांतःकरणज्ञानेंद्रियकर्मेंद्रियाणांसुप्तेर्गमेंऽतेआगमेआदौचयथोक्तमुत्पत्तिविनाशशालित्वमतएषामसत्यतास्पष्टेतिभावः ॥ ५१५ ॥ प्राणइति यद्यपिप्राणःसुप्तौनलीयतेऽतएवतदंतेनजायतेइतिसत्यःतथापिअस्मात्प्राणादसावात्मापरःपरमार्थसत्यत्वेनोत्कृष्टः ॥ ५१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणोजडइति प्राणोहियतोजडोऽनात्माचातएवापरोपकृष्टः एवंसतिसत्यस्यसत्यइतिनामात्मनःसिद्धमिति ॥ ५१७ ॥ प्राणावाइत्यादिश्रु त्यनुसारिणींनामव्युत्पत्तिमाह सत्यमिति भूतभौतिकसमुदायःसप्राणत्वाच्छत्रिणोयांतीतिवत्प्राणपदार्थःसत्यस्तस्यविवर्तोपादानत्वात्पु रुषःसत्यसत्यइत्युक्तइति ॥ ५१८ ॥ नन्वनृतस्यप्राणभूतभौतिकसमुदायस्यकथंसत्यपदार्थतेत्याशंकांवारयन्मूर्तामूर्तब्राह्मणकंडिकापंच कस्यार्थमाह प्रत्यक्षेतिदशभिः नीरूपस्यापिब्रह्मणःप्रतिपत्त्युपायभूतेद्वेरूपेतत्राद्यंरूपंचतुर्विशेषणकंतत्रप्रत्यक्षयोग्यत्वेनलोकप्रसिद्धत्वा त्सदित्युच्यतेपरिच्छिन्नत्वात्स्थितिमदित्युच्यतेदृश्यमानावयवरचनाविशेषशालित्वान्मूर्तमित्युच्यतेसंदृष्टनाशकत्वान्मर्त्यमित्युच्यतेइत्यर्थः ॥ ५१९ ॥तस्यैतस्येति तस्यैतस्याद्यरूपस्यसमुक्तस्यसतःस्थितत्वादिरूपेणवर्णितस्यसवितृमंडलेसारोगोरसेनवनीतवत्प्रधानमुक्तःसर्वरूपा

प्राणोजडस्तथानात्माततएवापरःस्मृतः ॥ सत्यस्यसत्यइत्येतदस्यनामततोभवत् ॥ ५१७ ॥ सत्यंवेदेसमुद्दिष्टंसप्राणंभूतभौतिकम् ॥ तस्यायंकारणंयस्मात्सत्यसत्यस्ततःपुमान् ॥ ५१८ ॥ प्रत्यक्षयोग्यंलोकेस्मिन्प्रसिद्धंस्थितिमत्तथा ॥ मूर्तंसंदृष्टनाशंचसदित्येतद्धिगीयते ॥ ५१९ ॥ तस्यैतस्यसमुक्तस्यसतःसारउदाहृतः ॥ मंडलंसवितुर्योयंतापात्मापुरुषःपरः ॥ ५२० ॥ परोक्षंशास्त्रगम्यंयत्प्रसिद्धंगतिमत्तथा ॥ अदृष्टनाशंतज्ज्ञेयंत्यच्छब्देनसमीरितं ॥ ५२१ ॥ अस्यत्यस्यसमुक्तस्यसवितुर्मंडलेपुमान् ॥ सारउक्तोत्रविद्वद्भिरधिदेवसमाश्रयात् ॥ ५२२ ॥

भिव्यंजकत्वादिति किंतन्मंडलमतआह योयमिति योयमपरोक्षस्तापात्मातपनस्वभावःपरःपुरुषःपरमेश्वरविग्रहःप्रसिद्धइत्यर्थः ॥ ५२० ॥ द्वितीयरूपमपिचतुर्विशेषणकत्वेनदर्शयति परोक्षमिति यद्द्वितीयंरूपंतत्परोक्षत्वेनशास्त्रमात्रगम्यत्वात्त्यच्छब्देनोक्तंज्ञेयंव्यापकत्वाद्गतिम दित्युक्तंतथाअदृष्टसंनिवेशकत्वादमूर्तमितिअदृष्टनाशकत्वादमृतमित्युक्तमिति ॥ ५२१ ॥ अस्यत्यस्येति अस्यसमुक्तस्यवर्णितस्यत्यस्य त्यच्छब्दार्थस्यसारःसूर्यमंडलांतर्वर्त्तीलिंगसमष्टिरूपोहिरण्यगर्भाख्यःपुरुषउक्तः तच्छरीरारंभायसूक्ष्मभूतस्रष्टेरितिभावः एवमधिदैवंरूपद्वयंदर्शितमित्यर्थः अत्रसवाएषपुरुषोऽन्नरसमयइत्यादिश्रुतौयथान्नमयकोशेपुरुषशब्दप्रयोगस्तथासूक्ष्मशरीरेबोध्यः ॥ ५२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यात्ममपिरूपद्वयंदर्शयति अध्यात्मेपीति अध्यात्मेऽत्रसंघातेपिस्थितयोर्द्वयोरूपयोः पूर्ववत्सारभावोबोध्यः तदेवाभिनयति सत्पदार्थस्यसारश्चक्षुरात्मकोबोध्यः शश्वद्वैरेतसःसिक्तस्यचक्षुषीएवप्रथमंसंभवतइतिश्रुतेश्चक्षुषःप्राधान्यादितिभावः तथादक्षिणेक्षणिविशेषेणवर्तमानःपरःस्थूलापेक्षयाश्रेष्ठःपुमान्सूक्ष्मव्यष्टिरूपस्यच्छब्दार्थस्यसूक्ष्मस्यसारोबोध्यः पूर्ववदिति इतोरूपद्वयादन्यद्भूतपंचकमसारमिति ॥ ५२३ ॥ सत्पदस्यत्यत्पदस्यचार्थाविभिनीयदर्शयति पृथिवीति पृथिव्यादित्रयंप्रत्यक्षत्वात्सदित्युक्तंवाय्वाकाशौतुपरोक्षत्वात्त्यदिति एतेनसच्चत्यच्चसत्यमितिव्युत्पत्त्यासत्यशब्दस्यानृतेपिप्रयोगउपपन्नइतिसूचितं ॥ ५२४ ॥ स्थूलव्यष्टिसमष्ट्योरभेदंसाराभेदमुखेनाह मंडलमिति सवितुर्मंडलंतथापुरुषस्यदक्षिणंचक्षुश्चएतद्द्वयमभिन्नमेवमूर्तंभूतत्रयात्मकत्वाविशेषादिति ॥ ५२५ ॥ एवंसूक्ष्माभेदोपिबोध्य

अध्यात्मेपिचसारत्वंविज्ञेयंपूर्ववद्द्वयोः ॥ चक्षुःसारःसतोज्ञेयोदक्षिणेक्षण्ययंपरः ॥ पुमांस्त्यस्यचसारःस्यादसारंभूतपंचकम् ॥ ५२३ ॥ पृथिव्यापस्तथातेजःसदित्येतदुदाहृतं ॥ वायुस्तथांतरिक्षंचत्यदित्येतदिहोच्यते ॥ ५२४ ॥ मंडलंसवितुश्चक्षुःपुरुषस्यापिदक्षिणं ॥ एकमेवसमुद्दिष्टंमूर्तंभूतत्रयात्मकम् ॥ ५२५ ॥ मंडलेसवितुर्योऽयंयश्चायंदक्षिणेक्षणि ॥ अमूर्तएकएवायंपुमानात्मेत्युदाहृतः ॥ ५२६ ॥ वाय्वाकाशौसुसूक्ष्मौतौविद्येतेभूजलाग्निषु ॥ पंचीकरणतस्तेनस्थूलंदेहमिदंस्मृतं ॥ ५२७ ॥ खवाय्वोरपिविद्यंतेसूक्ष्मास्तेभूजलाग्नयः ॥ तेनसूक्ष्ममिदंदेहममूर्तःपुरुषःस्मृतः ॥ ५२८ ॥ सूक्ष्मदेहस्यरूपाणिवासनाजान्यनेकशः ॥ विद्यंतेकानिचित्तानिशक्रवक्ष्यामितेऽधुना ॥ ५२९ ॥

इत्याह मंडलेइति स्थूलांतरत्वादात्मेत्युक्तःअमूर्तःपुरुषउभयत्रैकएवेत्यर्थः ॥ ५२६ ॥ ननूक्तविधयास्थूलस्यभूतत्रयात्मकत्वेसूक्ष्मस्यभूतद्वयात्मकत्वेचशरीरत्वंनस्यात्पंचात्मकंपंचगुणमित्यादिश्रुत्याशरीरस्यपांचभौतिकत्वप्रसिद्धेरितिशंकांवारयन्शरीरत्वंसाधयति वाय्वाकाशाविति द्वाभ्यां पंचीकरणबलेनवाय्वाकाशयोःस्थूलेपिवर्तमानत्वात्स्थूलस्यदेहत्वमित्यर्थः ॥ ५२७ ॥ खवाय्वोरिति सूक्ष्मारंभकयोःखवाय्वोःसूक्ष्मरूपेणपृथिव्यादीनामपिवर्तमानत्वादमूर्तःपुरुषःसूक्ष्मदेहसंज्ञकोबोध्यइति ॥ ५२८ ॥ षष्ठकंडिकायाअर्थमाह सूक्ष्मेत्यादिना तत्रदेहद्वयमध्येसूक्ष्मदेहस्यतार्किकाणामात्मत्वप्रकारकभ्रमविषयस्यपूर्वपूर्ववासनाजन्यानिनानाविधानिरूपाणिविद्यंतेतेषुकानिचिद्रूपाणिशृण्विति ॥ ५२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिद्रेति हरिद्रयारूषितं रूषभूषायां रक्तमितियावत् तादृशवस्त्रसमरूपःकापिपुरुषोरजसाभवति यथानार्यादिदर्शनकालेइति कापिकुत्रचित्श्वेतकंबलसमाकारःपुरुषोभवतियथापर्वतकंबलईषत्पांडुः पुरुषश्वतद्वत्सत्वेनश्रद्धादिमानूरजसाचरोषादिमानपीतियावत् ॥ ५३० ॥ इंद्रेति इंद्रगोपोवर्षाकालिकोजंतुविशेषस्तद्वदत्यंतरक्तरूपोभवति यथाएकांतेस्थितोपिरजसोऽतिशयेनविषयस्मरणपरः कचिच्चाग्नेर्ज्वालायथाप्रकाशमानादहंतीचतत्समरूपोभवति यथासत्वगुणेनविद्यावानपिराजसेर्ष्यादिनापरेषांदुःखकरइति॥ ५३१॥सितांभोजमिति यथाश्वेतकमलंस्वभावतःशुद्धत्वकोमलत्वादिमद्भवतितथाविधःकचित्पुरुषोजन्मनैवशमादिमानूभवतीति कचिदुत्कृष्टसत्ववशाद्विद्युद्दीप्तिवत्सर्वभासकज्ञानवानूभवतियथाहिरण्यगर्भः सहसिद्धंचतुष्टयमितिवचनात् ॥ ५३२ ॥ हिरण्यगर्भवत्सर्वज्ञतापिस

हरिद्रारूषितंवस्त्रंयादृशंतादृशःपुमान्॥ कापिकापिभवेत्सोयंयथाश्वेतोत्रकंबलः॥ ५३०॥ इंद्रगोपोयथारक्तस्तथाकापिभवेत्पुमान्॥ अग्नेरर्चिर्यथादीप्तापुमानेषतथाकचित्॥ ५३१॥सितांभोजंयथाशुभ्रंमृदुलंचतथा पुमान्॥ कचित्कचिच्चपुरुषोविद्युद्दीप्तिसमोभवेत्॥ ५३२॥ विद्युद्दीप्तिसमानाश्रीरस्यपुंसउपासनात्॥ रागिणोजायतेशक्ररागःशस्तोनकर्हिचित्॥ ५३३॥ एवमादीनिरूपाणिशक्रसंतिसहस्रशः॥ तानिवक्तुंनशक्तोहंश्रुतिश्चापिमहात्मनः॥ ५३४॥ अविद्याकार्यमखिलंस्थूलसूक्ष्मात्मकंद्वयं॥अस्मिन्ननुगताविद्यातंतवोत्रपटेयथा॥ ५३५॥ स्थूलंसूक्ष्मंचसाविद्यमितियत्कथितंमया॥नतदात्मेतिविज्ञेयंदृश्यत्वेनघटोयथा॥५३६॥

कामोपासनफलत्वेनानित्यतादिदोषशालित्वान्मुमुक्षुभिर्नकामनीयेत्याह विद्युद्दीप्तीति रागिणःसकामस्यपुंसःसाजायतेरागःकामस्तुकस्यापिविषयस्यनयुक्तोनयोग्यः स्वरूपानंदप्रतिबंधकत्वादितिभावः ॥ ५३३ ॥ एवंज्ञानकर्मवासनाभिव्यक्तगुणवशान्नानाविधान्यमूर्तपुरुषस्यरूपाणिसर्वाणिमयाश्रुत्याचनगणयितुंशक्यानीत्याह एवमादीनीति॥ ५३४ ॥ एवंवर्णितस्यरूपद्वयस्यनिषेधयोग्यतांस्फुटयन्नज्ञानप्रयुक्ततामाह अविद्येति अस्मिन्द्वयेऽनुगतातादात्म्येनसंबद्धा ॥ ५३५ ॥ निषेधांशंव्याचष्टे स्थूलमिति स्थूलंसूक्ष्ममविद्याचैतत्त्रयमपिनात्मादृश्यत्वात्घटवदितिप्रथमनकारार्थइतिभावः ॥ ५३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयनकारार्थमाह सर्वस्येति सर्वस्यकार्यकारणरूपस्ययोनिषेधोऽभावोमयाकृतःप्रकाशितःसोपिनात्माअभावस्यप्रतियोगिसमानयोगक्षेमत्वादिति नहिशुक्तिरजताभावःसत्यइतिभावः एवंनकारद्वयार्थंग्रंथकृदेवस्फुटीकरिष्यतीति ॥ ५३७ ॥ नेतीत्यस्मादन्यदधिकमादेशनंब्रह्मणोनास्तीत्यर्थकस्यनहीत्याद्यंशस्यार्थमाह एतदिति आदेशनमुपदेशप्रकारः गुरोर्गुरुकर्तृकमिति ॥ ५३८ ॥ अस्यादेशस्यमुख्यतांचतुश्चत्वारिंशच्छ्लोकैःप्रपंचयन्ब्रह्मवित्संप्रदायप्रसिद्धतांतावदाह आदिश्यतइति अयंपरआत्माभावरूपजडभिन्नत्वेनरूपेणनेतिनेतीतिवाक्येनैवसदादिश्यतेइत्यन्वयः सर्वदेत्युत्तरान्वयि ॥ ५३९ ॥ आत्मनएतद्भिन्नोपदेशायोग्यत्वाच्चायमुपदेशोमुख्यइत्याह अवा

सर्वस्यास्यनिषेधोयःकार्यकारणवस्तुनः॥ इत्थंमयाकृतःसोपिनात्माशक्रकदाचन॥ ५३७॥ एतदादेशनंमुख्यंशक्रानंदात्मरूपिणः॥ नास्मादभ्यधिकंकिंचिदस्त्यत्रादेशनंगुरोः॥ ५३८॥ आदिश्यतेहिगुरुभिरयमात्मासदापरः॥ भावाभावजडादन्योनेतिनेतीतिसर्वदा॥ ५३९॥ अवाङ्मनसगम्योयंनवक्तुंशक्यतेयतः॥ अतद्व्युदासतस्तस्मादात्मायमुपदिश्यते॥ ५४०॥ ब्रह्मास्मीतिचयोबोधःकथितःशक्रतेपुरा॥ अयंशब्दानुवेधेनजायतेनतुकेवलः॥ ५४१॥ अपिबोधेत्रदृष्टोयंभेदस्तत्त्वंपदार्थयोः॥ पारोक्ष्यदुःखिताभ्यांसवाक्येनविनिवार्यते॥ मुख्यार्थस्यपरित्यागाल्लक्षणायाःसमाश्रयात्॥ ५४२॥

ङ्मनसेति वक्तुंविधिमुखेनाभिधातुं अतस्यात्मभिन्नस्यंव्युदासोनिषेधस्ततएवसर्वदाअयमात्मोपदिश्यतेइति ॥ ५४० ॥ अस्योत्कर्षंस्फुटयन्विधिमुखोपदेशस्यापकर्षमभिनयति ब्रह्मास्मीत्यादिना अयंविधिमुखेनबोधःशब्दस्यानुवेधेनानुगमेनविशिष्टएवजायतेसचावाङ्मनसगम्येबाधितइतिभावः ॥ ५४१॥ तत्रक्लेशान्तरंदर्शयति अपीति अत्रविधिमुखेनप्रवृत्तेबोधेपारोक्ष्यदुःखिताभ्यांतत्त्वंपदवाच्यार्थगताभ्यांदृष्टोभेदःसजहदजहल्लक्षणाश्रयणाद्वारणीयइतिक्लेशः ॥ ५४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचविधिमुखेनबोधेऽनुमानापेक्षागौरवंचेत्याह त्वंपदार्थस्येति त्वंपदार्थस्यसच्चिदानंदलक्षणस्ययथाधिकारिस्वरूपोऽभेदोभेदाभाव स्तथाजंतुमात्रेसर्वत्रस्थितात्मनितत्पदार्थेपिभेदाभावइत्यर्थसाधकानुमानस्यापिसहकारितासंभावनार्थमपेक्षणीयेतिक्लेशः अनुमानस्व रूपंतुत्वंपदार्थःपरमात्मनोनभिद्यतेसच्चिदानंदलक्षणत्वादधिकार्यात्मवदिति जडेमोक्षाधिकारबाधात्परमात्मैवोपाध्यनुप्रविष्टोधिकारीति प्रपंचितमाकरेषु ॥ ५४३ ॥ नकेवलमेकमनुमानंतदापेक्ष्यंकिंतुपदार्थशोधनायदेहादिव्यावृत्तयेबहूनीत्याह व्युदासइति जडस्यदेहादि रूपस्यव्युदासोव्यावृत्तिः ॥ ५४४॥ ननुमंतव्यइतिमननविधानात्तद्गौरवंसहिष्यतेइतिचेत्तथापिनिषेधवाक्यंविनाननिस्तारइतिवक्तुमनु मानस्येतरसापेक्षतांपूर्वोक्तामनुवदति अनुमानस्येति अनुमानस्यमानांतरापेक्षाभवत्येवान्यथानुमानत्वहान्यापत्तिः यतोनुमानंस्वतंत्रं नभवेत् मानमनुप्रवर्ततेइत्यनुमानमित्युक्तत्वादिति स्वातंत्र्येनिरर्थकत्वाच्च मानानुग्रहोहितर्करूपानुमानस्यफलमितिभावइतिद्वयोरर्थः

त्वंपदार्थस्ययद्वत्स्यादभेदोत्यधिकारिणि ॥ अभेदस्तद्वदेवस्याज्जंतुमात्रस्थितात्मनि ॥ इत्येतदनुमानस्याप्यपे क्षासहकारिता॥५४३॥व्युदासश्चजडस्यायमपेक्ष्योबहुधापुनः॥तदर्थमनुमानंस्यादपेक्ष्यंपुनरेवहि॥५४४॥ अनुमानस्यचापेक्षाभवेन्मानांतरस्यच ॥ अन्यथानानुमानत्वंस्वतंत्रंनभवेत्सदा ॥ ५४५॥ प्रवर्ततेमानम नुत्यनुमानंतदीरितं॥स्वातंत्र्येणभवेन्नामनिरर्थकमिदंयथा॥५४६॥प्रत्यक्षंनभवेन्मूलमस्यक्कापिकदाच न॥नहिप्रत्यक्षतोदृष्टमनात्मत्वंघटादिषु॥५४७॥

॥ ५४५ ॥ ५४६ ॥ प्रकृतात्मानात्मगोचरानुमानानांश्रुतिनैरपेक्ष्यरूपेणस्वातंत्र्येणनिरर्थकत्वंयथेतिपदेनप्रदर्शनीयतयाप्रतिज्ञातंस्फुट यति प्रत्यक्षमितिदशभिः प्रमाहियथार्थनिश्चयात्मिकाप्रमाणफलंतच्चप्रकृतानुमानेननजनयितुंशक्यं अनुमानस्यद्वेअंगेव्याप्तिःपक्षधर्म ताचेतिप्रसिद्धव्याप्तिरूपांगवैकल्येनदौर्बल्यात् तच्चअनात्मत्वरूपसाध्यस्यजडत्वादिरूपहेतूनांचसाहचर्यस्यप्रत्यक्षेणग्रहीतुमशक्यत्वात्त देतदुक्तंप्रत्यक्षमिति अक्षरार्थस्तुअस्यदेहाद्यनात्मतासाधकानुमानगणस्यव्याप्तिग्राहकतयामूलभूतंप्रत्यक्षंनसंभवति यतःक्कापिकदापि वाजडादिषुभावप्रधाननिर्देशेनजडत्वादिषुहेतुषुसत्सुअनात्मत्वमात्मभेदरूपंप्रत्यक्षेनदृष्टमिति प्रत्यक्षस्यघटादिसत्वमात्रावगाहित्वात्प्रति योग्यात्मनोविषयीकरणमंतरातद्भेदस्यदुर्ग्रहत्वादितिभावः ॥ ५४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनःप्रत्यक्षविषयत्वाभ्युगमेपिविपक्षबाधकाभावेनव्याप्तिर्दुर्ग्रहेत्याह घटस्येति जडत्वेनदेहानात्मतासाधनेदृष्टांतस्यघटस्यानात्मता यद्यपिदृष्टातथापिसाऽनात्मतातस्यघटस्यैवभवतादस्तुततोन्यस्यदेहस्यमाभूदितिकेनचिद्विपक्षोद्भावनेकृतेसतिबाधकंकिंचिन्नदृश्यतेइत्यर्थः ॥ ५४८ ॥ एतद्दृष्टांतेनस्पष्टयति घटेइति यथाघटेस्तंभतानदृष्टाघटत्वावगाहिप्रत्यक्षेणनगृहीतातथापिसास्तंभान्ननिवर्ततेकिंतुतत्रवर्ततएव एवंघटेआत्मतामास्तुसाआत्मनिदेहेऽस्तुइत्यत्रकिंबाधकमितिवक्तव्यमितिशेषः॥५४९॥ननुदेहोयद्यात्मास्यात्तर्हिजडोनस्यादितितर्कएवविपक्षबाधकइतिचेन्न विरोधमूलकस्यास्यतर्कस्यदेहस्यात्मतास्वभावइतिवादिनश्चार्वाकस्यपुरतोऽकिंचित्करत्वात् नहिजडत्वंपदार्थस्वभावंविपरीतंकरोति घटेविद्यमानेनजडत्वेनघटस्याघटतायाअसंपादनादित्याह जाड्येति दृश्येतिभावप्रधानोनिर्देशः घटकुड्यादिरूपिणोवस्तुनःस्वभावमन्यथयितुमन्यथाकर्त्तुमेतेजाड्यदृश्यत्वादयोनशक्ताइतिसंबंधः तथाचदेहस्यात्मतालक्षणंस्वभावंकथमन्यथा

घटस्यानात्मतादृष्टासातस्यभवतात्सदा ॥ माभूदन्यस्यसायस्माद्बाधकंनात्रदृश्यते ॥ ५४८ ॥ घटेनस्तंभतादृष्टानसास्तंभान्निवर्तते ॥ तद्वद्घटादिगामाभूदात्मतासास्तुचात्मनि ॥ ५४९ ॥ जाड्यदृश्यादयोनैवस्वभावंवस्तुनःक्वचित् ॥ एतेऽन्यथयितुंशक्ताघटकुड्यादिरूपिणः ॥ ५५० ॥ सत्वंयथासमग्रेषुवर्ततेवादिनोमते ॥ तथापिनैवतत्कुर्याद्वस्तुनोत्रविपर्ययम् ॥ ५५१ ॥ जाड्यदृश्यादयस्तद्वदात्मानात्मस्वरूपगाः ॥ संतुकिंवादिनश्छिन्नंयेनस्युर्नात्मगाहिते ॥ ५५२ ॥ अपिनात्मनिवर्ततेचक्षुरादीनिसर्वथा ॥ तेनायंमनसाग्राह्योविज्ञेयोवादिभिःपुमान् ॥ ५५३ ॥

कुर्युरितिभावः ॥५५०॥ जाड्यादीनांवस्तुस्वभावाविरोधित्वेदृष्टांतमाह सत्वमिति यथासत्वंसत्ताजातिःसर्वत्रवर्त्तमानाकस्यचिद्वस्तुनोविपर्ययंस्वभावान्यथात्वंनकरोतीति ॥५५१॥ दार्ष्टांतिकेयोजयति जाड्यदृश्यादयइति तद्वत्सत्ववज्जाड्यादयोप्यात्मनिअनात्मनिचसंतुवर्तताम् अत्रएवमभ्युपगमेवादिनःश्रुतिनिरपेक्षोक्तानुमानप्रयोक्तुःकिंकार्यकारणभावादिच्छिन्नंभग्नंभवति येनकार्यकारणभावादिभंगभयेनतेजाड्यादयआत्मगानस्युरित्युच्यतेति वन्हिविनाधूमाभ्युपगमेतयोःकार्यकारणभावभंगवदत्रनकिंचिद्बाधकमितिभावः ॥५५२॥ नन्वात्मनश्चेतनत्वेनानुभवात्तद्विरोधेनजडस्यात्मतानमंतुंशक्यतेइतिचेत्किमत्रात्मनश्चेतनत्वेनानुभवेकरणंवहिरिंद्रियाणिमनोवा तत्रनाद्यः वहिरिंद्रियविरोधादित्याह अपिनेति अंत्यपक्षंदूषयितुमनुवदति तेनेति विज्ञेयोमंतव्यः ॥ ५५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मानसमहमित्याकारकंज्ञानमात्मनःसत्वमात्रंसाधयिष्यतिनतुतस्यचैतन्यादिकंतत्रौदासीन्यात्तथाचजाड्यमबाधितंस्थितमेवस्यादित्या ह गृह्णातीति परमतेपिइंद्रियाणांमध्येएकमन्यतमंमनोऽहमित्याकारेणैवात्मानंगृह्णातितत्राहमित्याकारेणात्मग्रहणेप्यात्मनोजाड्यंकेन निवर्तितनकेनापि जाड्यविरुद्धचैतन्यानवगाहनादितिभावः ॥५५४॥ ननुजानामीतिज्ञानमात्मनश्चैतन्यमवगाहतेइतिचेन्नास्यमनःसंव लितात्मविषयकत्वेनशुद्धात्मधर्मविषयकत्वानवधारणादित्याह जानामीति अन्यस्यमनसः तत्रदृष्टांतमाह यथेति॥५५५॥ प्रत्यक्षेणात्म नश्चेतनस्यैवाग्रहणेतस्यविभुत्वादिरूपेणग्रहणेकाप्रत्याशेत्याह आत्मनइति यदाऽऽत्मनश्चेतनत्वेनरूपेणापिप्रत्यक्षंनास्तितदासर्वगतत्वादौ परोक्षतयापरैरप्यभिमतेप्रत्यक्षंकुतःस्यादिति ॥५५६॥ एवंश्रुतिंविनामूलांतरमलभमानंविधिमुखप्रवृत्तवाक्यसाहाय्यायप्रवृत्तमनुमानंप

गृह्णातिचमनस्त्वेकमहमित्येवनापरम् ॥ तत्रकेननिवर्तेतजाड्यमस्यात्मनोधुना ॥ ५५४ ॥ जानामीतिचयो बोधःसस्यादन्यस्ययोगतः ॥ यथातांबूलयोगेनमुखेस्याद्रक्तिमानृणां ॥ ५५५ ॥ आत्मनश्चेतनत्वेनप्रत्यक्षं नैवविद्यते ॥ कुतःसर्वगतत्वादौयस्यानित्यंपरोक्षता॥५५६॥ अनुमानंकथंतत्रमूलाभावात्प्रवर्तते ॥ आगम स्ततएवास्यमृग्योमूलंमनीषिभिः॥सत्यंज्ञानंतथानंतंब्रह्मेत्यादिर्हिसस्मृतः॥५५७॥तस्यापिवाऽसदज्ञानपरि च्छेदव्युदासतः॥ आनंदइतिवास्यापिदुःखस्यैवव्युदासतः॥इष्टाप्रवृत्तिर्विदुषांनभिन्नार्थेकथंचन॥५५८॥

रिवृत्त्यश्रुतिवाक्यमेवशरणीकुरुतेइत्याह अनुमानमिति तत्रात्मनिर्णये अस्यानुमानस्य किंतत्श्रुतिवाक्यमनुमानस्यमूलभूतमितिचेत्पदा र्थशोधकाऽवान्तरवाक्यरूपमित्याह सत्यमिति समनुरूपानुमानस्यमूलभूतःआगमःसत्यमित्यादिरूपोबोध्यइत्यर्थः॥५५७॥ वस्तुतस्तुतद पिसत्यमित्यादिवाक्यंनेतीतिवाक्यस्वभावमितरव्यावृत्त्याबोधनरूपमालंब्यैवाऽखंडंबोधयत्तन्निषेधमुखोपदेशप्राधान्यंद्योतयतीत्याश येनाह तस्यापिवेति वाऽथवातस्यसत्यमित्यादिवाक्यस्यापिअभिन्नएकस्मिन्नखंडेर्थेकथंचनलक्षणयाप्रवृत्तिर्विद्वद्भिरिष्टासंमता केनद्वा रेण असदज्ञानपरिच्छेदानांव्युदासेनव्यावृत्त्या तत्रसत्पदमसद्व्यावृत्त्याज्ञानपदमज्ञानव्यावृत्त्याअनंतपदंपरिच्छेदव्यावृत्त्याब्रह्मणिपर्यव स्यति तथानंदोब्रह्मेतिवाक्यगतमानंदपदंदुःखव्यावृत्त्याशुद्धेपर्यवस्यतीत्यर्थः ॥ ५५८ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वेवंनिषेधमुखेनप्रवृत्तिःशास्त्रेणकिमर्थमाश्रीयतेइतिचेत्प्रमेयानुसरणेनप्रामाण्यलाभायाविशिष्टस्यविशिष्टतयाबोधनेहिअप्रामाण्यं स्यादित्याशयेनप्रमेयस्यब्रह्मपदार्थस्यस्वरूपमभिनयति एकमिति एकमित्यादिपदत्रयेणस्वगतादिभेदान्निरस्यभूमरूपेणस्वेमहिम्निप्रतिष्ठितंयत्तद्ब्रह्मेतिबोध्यमित्यन्वयः स्वेमहिम्नीतिइतराश्रयतावारकं यथास्वयंदासास्तपस्विनइतीतरदासव्यावृत्तिपरमितिबोध्यम् ॥ ५५९॥

नन्वेतादृशंब्रह्मलोकेऽप्रसिद्धंकथंशास्त्रेणबोध्यतेपदार्थप्रसिद्धेर्वाक्यार्थबोधहेतुत्वादित्याशंकांदृष्टांतेनपरिहरंस्तस्यशास्त्रमात्रवेद्यतामाह शास्त्रतइति उक्तलक्षणंब्रह्मालौकिकमपियतःशास्त्रादेवगम्यतेततःशास्त्रस्याप्रामाण्यप्रयोजकैरबोधकत्वसांशयिकत्वगृहीतग्राहित्वबाधितार्थत्वैर्हीनत्वेनविश्वासाद्विश्रंभात्तेनब्रह्मविवेकिभिर्ज्ञेयमवधार्यमिति यथाऽलौकिकोपियूपपदार्थोयूपंतक्षतियूपमष्टाश्रीकरोतीत्यादिवाक्यवशात्संस्कारविशेषविशिष्टकाष्ठरूपोवधार्यते आदिपदेनसंस्कारविशेषविशिष्टाग्निरूपाहवनीयादिग्रहः तथाब्रह्मापिसत्यमित्यादि

एकमेवाद्वयंब्रह्मस्वसजातिविजातिजान् ॥ भेदान्व्युदस्यसततंस्वेमहिम्निप्रतिष्ठितम् ॥ ५५९ ॥ शास्त्रतोऽवगतंयस्माद्यूपादिवदलौकिकम् ॥ ततःशास्त्रस्यविश्वासाद्ब्रह्मज्ञेयंमनीषिभिः ॥ ५६० ॥ शास्त्रंचात्रप्रवृत्तंसत्प्रवृत्तिंकुरुतेद्विधा ॥ विधानेननिषेधेनलोकदृष्टिसमाश्रयात् ॥ ५६१ ॥ शृंगग्राहिकयायद्विबोधयेत्तद्विधायकम् यथालोकेकरेतेस्तिफलमित्यादिभाषणं ॥ ५६२ ॥

वाक्यादवधार्यतेइति ॥ ५६० ॥ सत्यमित्यादिवाक्यस्यप्रथमंयाविशिष्टवाचकपदैर्ब्रह्माभिधानेप्रवृत्तिस्तावन्मात्रेणविधिशास्त्रत्वव्यवहारः प्रमेयमनुसृत्यतुइदमपिनिषेधशास्त्रतांभजतइतिदर्शयितुंशास्त्रप्रवृत्तिद्वैविध्यंदर्शयति शास्त्रमिति अत्रात्मनिप्रवृत्तंसच्छास्त्रंविधानेनसाक्षाद्बोधनरूपव्यापारेणइतरनिषेधरूपव्यापारेणचद्विविधांप्रवृत्तिंकुरुते लोकदृष्टिसमाश्रयात् यथाकालवासनयायुतंशिष्यंबोधयितुंसदेवसोम्येदमग्रआसीदित्यत्रायइत्यभिधानंतथाविधाननिषेधाभ्यांद्वाभ्यामपिप्रकाराभ्यांदृष्टिप्राप्तवतोलोकाननुरुध्येतियावत् ॥ ५६१ ॥

तत्रविधायकशास्त्रस्यलक्षणंलौकिकमुदाहरणंचाह शृंगेति शृंगस्यग्रहणंयस्यांक्रियायांसाशृंगग्राहिका संज्ञायामितिण्वुल् यथागोव्रजेकामदीयागौरितिगोपःपृष्टःशृंगंगृहीत्वागांप्रदर्शयेत्तथाबोधकंशास्त्रंविधायकमुच्यते यथाहस्तेतवामलकमिति ॥ ५६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनितुएवंप्रवृत्तमपिशास्त्रंतदयोग्यतामालक्ष्यव्यावृत्तिपरतामालंबतइत्याह नचैवमिति एवमभिगमयितुंबोधयितुंयोग्योऽभिगम्यो नचात्माभवतिअवाङ्मनसगोचरत्वात् अतस्तत्सत्यंज्ञानमित्यादिरूपंविधायकंशास्त्रमपिस्वस्मिन्नात्मनिइतरव्यावृत्तिमुखेनैवप्रवर्त्ततेइति ॥ ५६३ ॥ निषेधकंशास्त्रंलक्षयति निषेधकमिति यच्छास्त्रंप्रकृतान्प्रस्तुतान्लक्ष्यरूपतयाभ्रांतैरभिमतान्प्रतियोगितयापेक्ष्यप्रवर्त्तमानं एतान्प्रकृतान्निषिध्यपरिशेषाल्लक्ष्यंबोधयेत्तन्निषेधकमुच्यतेइति प्रसक्तप्रतिषेधेन्यत्राप्रसंगात्शिष्यमाणेसंप्रत्ययःपरिशेषइति॥ ५६४॥निषेधकंशास्त्रंलोकउदाहरति महाराजमितिदशभिः यथाआरामगतंस्वसमानवेषैश्छत्रादिहस्तैर्वृतंचमहाराजमज्ञात्वाकश्चिन्मूढःप्रत्ययिनं

नचैवमभिगम्योयमवाङ्मनसगोचरः॥ आत्मातस्तदपिस्वस्मिन्व्यावृत्त्यैवप्रवर्तते॥ ५६३॥ निषेधकंतुय च्छास्त्रंप्रकृतान्समपेक्ष्यतत्॥ प्रवर्ततेनिषिध्यैतान्परिशेषात्प्रबोधयेत्॥५६४॥ महाराजंयथाकश्चिदारामस्थं डिलस्थितं॥स्वसमानैर्वृतंपुंभिश्छत्रचामरशोभितैः॥ अज्ञात्वामूढधीर्बालःपृच्छेत्प्रत्ययिनंनरम्॥ ५६५॥ बुबोधयिषुरेषोपिमूढंतंबालकंपुमान्॥ अयमित्येवनप्राहबाह्यबुद्धिविशारदः॥ ५६६॥ अयमित्येवचेदेनं वक्ष्याम्येषोत्रमूढधीः॥ गृह्णीयात्पुरुषंचान्यंतद्वच्छत्रादिकंचवा॥ ५६७॥ इत्थंविचार्यतंप्राहनैतेवृक्षामहीप तिः॥नाश्वानकरिणस्तद्वन्नरथानपदातयः॥५६८॥नानायुधधरायेत्रस्थंडिलस्यसमीपगाः॥नतूर्याण्यपिचि त्राणिसच्छत्राणिनचामराः॥५६९॥ नचतूर्यादिहस्तायेपुरुषाश्चवधूगणाः॥ ननीलकंचुकोराजानचायंपीत कंचुकः॥ ५७०॥ नरक्तकंचुकस्तद्वन्नचचित्रांबरोपिहि॥ नस्वर्णकरवालोयंनहेमधनुराश्रितः॥ ५७१॥

विश्वस्तंनरंपृच्छेदित्यन्वयः॥ ५६५॥ बुबोधयिषुरिति एषप्रत्ययीनरस्तंमूढंबुबोधयिषुर्बोधयितुमिच्छन्नयंराजेतिनब्रवीति यतोबाह्यानां पामराणांबुद्धिवृत्तस्यसाक्षादभिधानविपरीतग्राहित्वरूपस्यविशारदोऽभिज्ञः॥ ५६६॥ बाह्यबुद्धिविशारदतांविशदयति अयमिति एनं प्रत्येषराजेतियदिवक्ष्यामितर्हिराजपार्श्वगतमन्यंपुरुषंछत्रादिकमेववाराजतयामन्येतमूढधीत्वादिति॥ ५६७॥ इत्थमिति सबुबोधयि षुर्नरस्तस्मैमूढायएवंप्राह एवंकथं एतेवृक्षामहीपतिर्नभवंतिएतेऽश्वाअपिमहीपतिर्नभवंति एवमग्रेपि॥५६८॥ नानेति पूर्वार्द्धेनकारस्यानुषंगः॥ ५६९॥ नचेति स्पष्टम् ५७०॥ नरक्तेति करवालःखड्गः हेमपृष्ठकधनुषाआश्रितः॥ ४७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येवमिति परान्भिन्नान्॥५७२॥ इतरव्यावर्तकत्वेपिपरिशिष्टस्यभासनेनशब्दस्यव्यापारइत्याह महाराजमिति बालोमहाराजंसर्ववि लक्षणमध्यक्षेणैवजानाति सर्वविलक्षणतार्थंविशेषणानिसुवर्णांगमित्यादीनि सुवर्णाङ्गंशोभनवर्णशाल्यंगकंपुरस्यवारवधूनांगणिकानां हस्ताएवपंकजानितत्रप्रचारिभिश्चामररूपहंसैःसेवितं स्फुटमन्यदितिद्वयोरर्थः ॥ ५७३ ॥ ५७४ ॥ दार्ष्टांतिकेयोजयति एवमितिद्वा भ्यां एवंतन्निषेधशास्त्रमात्मनोविलक्षणान्नानाभावान्निषेधतिव्यावर्त्तयति आत्मानंचपरिशेषयतीत्यर्थः ॥ ५७५ ॥ ततआत्मास्वयमे वभासतइत्याह शास्त्रेणेति आत्मनैवस्वयमेव ॥ ५७६ ॥ निषेधवाक्योत्कर्षमुपपादितंनिगमयति अयमेवेति उत्तरार्द्धस्यान्यथेत्या

इत्येवमादिवचनैर्महाराजात्परान्नरान्॥ निराकरोतिबालोपिपरिशिष्टंप्रपद्यते॥ ५७२॥ महाराजंसुवर्णांगं श्वेतच्छत्रविभूषितम्॥ पतद्भिरुत्पतद्भिश्चचामरैर्हंससंनिभैः॥५७३॥ पुरवारवधूहस्तपंकजौघप्रचारिभिः॥ सेवितंविलसत्श्वेतदुकूलंदिव्यवर्चसम्॥ अध्यक्षेणैवजानातिबालःसर्वविलक्षणं ॥ ५७४॥ एवंनानावि धाभावानात्मनोत्रविलक्षणान्॥ निषेधयतितच्छास्त्रमात्मनःपरिशेषकृत्॥ ५७५॥ शास्त्रेणचनिषिद्धेषु तेपुसर्वेष्वनात्मसु॥ परिशिष्टंतमात्मानमात्मनैवप्रपद्यते॥ ५७६॥ अयमेवहिसम्यक्स्यादुपायःस्वात्मबोध ने॥ भावाभावविनिर्मुक्तमात्मानंकोहिबोधयेत्॥ ५७७॥ अवाङ्मनसगम्यंकोमनसाप्रतिपद्यते॥ वाक्यार्थ भूतमात्मानमवाक्यार्थैकरूपिणं॥ ५७८॥ यदासर्वंनिषिद्ध्येतयत्स्यात्सदसदात्मकं॥ प्रकाशतेतदादेवआनं दात्मास्वयंप्रभः॥ ५७९॥

दिः ॥ ५७७॥ यन्मनसाध्यायतितद्वाचावदतीतिनियमान्मनोविषयत्वसाक्षादबोधनीयत्वेहेतूकरोति अवाङ्मनसेति तमात्मानंमनसाकः प्रतिपद्यतेविषयीकरोति कीदृशं महावाक्यानांतात्पर्यार्थभूतंजात्यादिहीनत्वात्साक्षात्शब्दसमुदायप्रतिपाद्यताहीनमित्यर्थः ॥ ५७८ ॥ अवाक्यार्थस्यापिनिषेधवाक्यव्यापारानंतरंस्वयमेवभाननियममात्राच्चतस्यवाक्यार्थत्वेनव्यवहारइत्याह यदेति सदसदात्मकंभावाभा वरूपं प्रकाशतेस्वयमेवेतिशेषः ॥ ५७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निषेधवाक्यस्यात्मभानउपयोगेदृष्टांतमाह यथेति यथादीपस्यभानप्रतिबंधकतमोपनयनएवव्यापारोघटादिदर्शनेतुचाक्षुषःपुरुषःस्व तंत्रएवेतिभावः निःसारयेन्निवर्त्तयेत् ततःप्रतिबंधकापनयादित्यर्थः ॥ ५८० ॥ दार्ष्टांतिकमाह भावेति भावाभावरूपंकार्यकारणरूपंवा द्वैतंनात्मेतियदाशास्त्रंबोधयेत्तदास्वयमेवाधिकारीआत्मानंबुद्ध्यतेइत्यन्वयः ॥ ५८१॥ फलितमाह निषेधइति तस्मादात्मबोधार्थंनिषेधरू पएवादेशउपदेशःपरमःश्रेष्ठोयतस्तत्रनिषेधरूपआदेशेकस्यचित्पदार्थशोधनस्यानुमानादेर्वापेक्षानास्तीति॥५८२॥ ननुमूर्त्तामूर्तयोःश्रुति गतयोर्नञ्द्वयेननिषेधेपियद्यतोन्यत्किंचिज्जडंस्यात्तर्हितत्तादात्म्याध्यासादात्मभानंनस्यादितिशंकांवारयति इयदेवेति इयदेतावदेवज

यथादीपःसमागम्यतमोनेत्रनिरोधकम् ॥ निःसारयेत्ततोनेत्रंवस्तुजातंप्रपद्यते ॥ ५८० ॥ भावाभावात्मकंत तद्वत्कार्यकारणरूपधृक् ॥ नात्मेतिबोधयेच्छास्त्रमात्मानंबुद्ध्यतेस्वयं ॥ ५८१ ॥ निषेधएवतस्मात्स्यादादेशःप रमःसदा ॥ आत्मबोधेयतस्तत्रनापेक्षाकस्यचिद्भवेत् ॥ ५८२ ॥ इयदेवजडंप्रोक्तंमूर्तामूर्तंसकारणं ॥ यदभा वेविभावश्चस्वात्मनोयंनचापरम् ॥ ५८३ ॥ नकारएकोभावाख्यंस्थिरंयत्कार्यकारणं ॥ तंनिषेधतिचान्योपि द्वयाभावमनात्मकम् ॥ ५८४ ॥ भावाभावौयदास्वस्मान्निर्गतौजडरूपिणौ ॥ तदानंदात्मकोबोधःस्वप्रकाशोऽ वतिष्ठते ॥ ५८५ ॥ इंधनेऽपगतेवन्हिर्यथातिष्ठतिरूपतः ॥ तथात्मापिगतेतस्मिन्भावाभावात्मकेजडे ॥ ५८६ ॥

डंयत्सकारणंमूर्तामूर्तमितिअधिकंतुनास्तिसकारणमूर्त्तामूर्त्तव्यतिरेकमात्रेणात्मपरिचयस्यविद्वदनुभवसिद्धत्वादित्याह यदभावइति यतः सकारणस्यमूर्त्तामूर्त्तस्यअभावेव्यतिरेकेकृतेसत्यात्मनोयमपरोक्षोविभावःपरिचयोदृश्यते विभावःस्यात्परिचयइतिविश्वः ॥ ५८३ ॥ एतत्स्फुटयन्पूर्वंसूचितांनकारयोजनांदर्शयति नकारएकइति कारणपर्यंतंभावमेकोनञ्निषेधयतिपरस्तुतदभावमित्यर्थः ॥ ५८४ ॥ उभयोर्निषेधेआत्मपरिचयंदर्शयति भावाभावाविति स्पष्टम् ॥ ५८५ ॥ अत्रदृष्टांतमाह इंधनेइति यथाविशेषभावप्रयोजकेइंधनेऽप गतेदग्धेसतिवन्हिःसामान्यरूपेणावतिष्ठतेतथातस्मिन्जडेगतेसत्यात्मास्वेनसच्चिदानंदात्मनावतिष्ठतेभासतइतियावत् ॥ ४८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनोरूपमुपलक्षयति अहंत्वमिति अहंत्वादिरूपोमूर्त्तामूर्त्तोपाधिप्रयुक्तोभेदोयत्रस्वरूपेनास्तीत्यर्थः ॥ ५८७ ॥ अथब्रह्मात्मविद्यायानिगमभूतंमधुब्राह्मणमेकादशभिरवतारयंस्तत्रसूचयिष्यमाणमिदमनुमानं जगत्एककार्यंपरस्परोपकारकत्वात्एकमातृजपुत्रवदिति तत्रव्यावर्तनीयभेदमौपाधिकंदर्शयति एकस्मिन्निति यथाधूमेनविद्युताघनाघनैर्मेघैश्चआकाशेकल्पितसंबंधैराकाशस्यभेदःक्रियते तथात्मनिजंतवःस्थूलसूक्ष्मशरीराणिभेदंकुर्युरिति ॥ ५८८ ॥ दृष्टांतेधूमादीनामाकाशोपादानकत्वाभावेपिदार्ष्टांतिकेउपाधीनामात्मोपादानकत्वमस्तीतिविशेषंसूचयन्कथमात्मनःकारणतेतिशंकावारणायासंगस्याप्यात्मनोमायाशबलस्यमूर्त्तामूर्त्तविवर्त्तोपादानतासंभवतीत्याह मूर्तेति मूर्तंस्थूलममूर्तंसूक्ष्ममेतदात्मकमिदंदृश्यंमायाप्रयुक्तमतएवनवास्तवमिति मायायाःसविलासायामिथ्यात्वंलोकेपिप्रसिद्धमित्याह मायाचेति मायाविनानिर्मिताप्रयुक्ता ॥ ५८९ ॥ चतुर्थपादार्थंविशदयति मूर्तामूर्त्तमिति यथालोकेमूर्त्तामूर्त्तंस्थूलसूक्ष्म

अहंत्वंदृश्यमेतच्चतथान्येपिचजंतवः ॥ मूर्तामूर्तविभेदोयंशक्रनात्मनिविद्यते ॥ ५८७ ॥ एकस्मिन्हियथाकाशेधूमविद्युद्घनाघनाः ॥ भेदंनानाविधंकुर्युस्तद्वदात्मनिजंतवः ॥ ५८८ ॥ मूर्तामूर्तमिदंविद्धिमायाकार्यंनवस्तुतः ॥ मायाचनहिसत्यासालोकेमायाविनिर्मिता ॥ ५८९ ॥ मूर्तामूर्तंयथालोकइंद्रजालंप्रतीयते ॥ इंद्रजालंतथैवैतदिंद्रेणैवविनिर्मितम् ॥ ५९० ॥ इंद्रोयोदृष्टवान्पूर्वमिंद्रएवप्रतीयते ॥ नत्वंशक्रयतोजातोमूर्तामूर्तवपुस्ततः ॥ ५९१ ॥

पदार्थरूपमिंद्रजालमैंद्रजालिकनिर्मितंप्रतीयेततथाएतन्मूर्त्तामूर्त्तमिंद्रेणनिर्मितमिंद्रजालमिति जालोदंभानाययोरितिहेमचंद्रः दंभश्चमिथ्याकृतिः इंद्रस्यमायाविनोजालमिंद्रजालमिति लिङ्गमशिष्यमित्याद्युक्तेःक्लीवत्वं ॥ ५९० ॥ दार्ष्टांतिकेऽहमेवेंद्रइतिमन्यमानंप्रत्याह इंद्रइति इंद्रःसएवात्रविवक्षितोयःपूर्वंसर्वात्मनात्मानंदृष्टवान् इदंदृष्टवानितिव्युत्पत्तेःसमन्वयात् परमैश्वर्यवाचकत्वेपींद्रपदस्यब्रह्मात्मविद्येवसमन्वयइत्याह इंद्रएवेति यतोब्रह्मात्मवित्सर्वज्ञत्वादिशालित्वादिंद्रःपरमैश्वर्यवानेवप्रतीयतेप्रसिद्धः तथाचब्रह्मैवमुक्तोपसृप्यमज्ञातमत्रेंद्रपदार्थोजगत्कारणमितिभावः त्वंतुमूर्त्तामूर्त्तदेहद्वयाभिमानित्वेनतत्कार्यत्वान्नेंद्रपदार्हइत्याह नत्वमिति हेशक्रत्वमिंद्रोनभवसियतोमूर्त्तामूर्त्तशरीरतादात्म्याध्यासात्ततोजातस्तत्कार्यमसीत्यर्थः ॥ ५९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंतर्हिममेंद्रत्वप्रसिद्धिरतआह इंद्रत्वमिति यत्त्वयींद्रत्वंलोकामन्यंतेतदस्मदादेरपकृष्टैश्वर्यस्यापेक्षयैव यतस्तवास्मदादिभ्योमहदैश्वर्य मस्तीति ॥५९२॥ विवेकदृष्ट्यातुब्रह्मात्मविदीश्वरएवेंद्रः कार्योपाधिगतमुत्कर्षादिकंत्वभिमानमात्रं सच्चिदानंदरूपात्मनस्तादात्म्येनकीटा दिशरीराणामपिप्रियत्वाविशेषादापेक्षिकैश्वर्यादीनामपिमन्यमानत्वादात्मविवेकेतुदेवशरीराणामपिदुःखत्वादिरूपेणभानादित्याशयेंना विद्ययादेहाभिमानदशायामिंद्रस्यशुनश्चऐश्वर्यादिनासाम्यमाह ऐश्वर्यइत्यादिना हेशक्रयथातवऐश्वर्येत्रिलोकीप्रभुत्वेतथादेवराजश रीरेभोग्यायांत्रिलोक्यांचस्वर्गवधूजनेचरमणीयत्वबुद्ध्यातवरागआसक्तिरस्तितथाशुनोप्यैश्वर्यादौरागोस्तीति ॥ ५९३ ॥ नचशुनआ सक्तियोग्यमैश्वर्यादिकंनास्तीतिवाच्यम् आपेक्षिकस्यसत्वादित्याह शुनोपीति मृदुलःकोमलः ॥ ५९४ ॥ वधूनामिति हेशक्रतवइह

इंद्रत्वंत्वयियल्लोकावदंत्येतदपेक्षया॥ अस्मदादेर्यतस्तेस्तित्वैश्वर्यंमहदत्रहि॥५९२॥ ऐश्वर्येत्रशरीरेवात्रिलो क्यांवावधूजने॥ रागोमहान्यथातेस्तितथास्तीहशुनोपिच॥५९३॥ शुनोपिमहदैश्वर्यमस्तिकीटाद्यपेक्षया॥ अस्तिदेहोपिमृदुलःसूकरादेरपेक्षया॥५९४॥ वधूनांयादृशीप्रीतिस्तवशक्रेहविद्यते॥ शुनोपितादृशीप्रीतिः शुनीनांविद्यतेभुवि॥५९५॥ यथामृतंप्रियंतुभ्यंतथावांतंशुनोपिच ॥ उपकारिणिसंतोषंयथाशक्रप्रयास्य रं॥ एवंस्वामिनिसंतोषंश्वापिगच्छतिनित्यशः॥ ५९६॥ अपकारिणिकोपंत्वंयासिशक्रयथातथा॥ श्वापि यातिमुखंकृत्वाविवृतंदंतदर्शकः॥५९७॥ उपकारमहंकुर्वेत्रिलोक्याःप्रतिपालनात्॥ सर्वस्यश्वानचतथामा मंस्थाइत्थमणवपि॥५९८॥

शरीरेयादृशीवधूनांप्रीतिस्तादृशीप्रीतिःशुनःशरीरेशुनीनामपिविद्यते तथाचकमनीयशरीरतापिसमेतिभावः ॥ ५९५ ॥ भोज्येरुचिसा म्यमप्याह यथेति प्रियंरोचकं तुभ्यंतव वांतंछर्दितं आत्मत्वाभिमतशरीरानुकूलेरागसाम्यमाह उपकारिणीति संतोषंप्रीतिं प्रयासिप्रा मोषि अरंभृशं एवंस्वामिनिउपकारकेश्वापीति ॥ ५९६ ॥ प्रतिकूलेद्वेषोपिसमइत्याह अपकारिणीति तथाप्रतिकूलेकोपंश्वापियाति यतोमुखंविवृतंविकासितंविकृतंकृत्वादंतदर्शकइतिसंबंधः ॥ ५९७ ॥ उपकारकत्वेनाहमुत्कृष्टइत्यभिमानोपित्वयानकार्यइत्याह उप कारमिति इतिमामंस्थाइत्यभिमानंमाकुर्विति ॥ ५९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुतयामधुब्राह्मणस्यचतुर्दशकण्डिकापर्यंतस्यार्थंसंक्षेपेणाह पृथिव्यापइतिषड्भिः पृथिवीस्थूलरूपातदभिमानिसूक्ष्मशरीरात्मिकादेवताचतेजोमयादिपदत्रयार्थभूताप्रथमकण्डिकायामुक्ता तथाआपोजलानितदभिमानिसूक्ष्मात्मिकादेवताचद्वितीयकण्डिकायामुक्ता एवमग्रेपिकण्डिकाक्रमोबोध्यः मेघःश्रुतौस्तनयित्नुपदेनोक्तः नभआकाशः धर्मोयागादिजन्यादृष्टरूपःशुभफलात्मककार्यद्वाराप्रत्यक्षइवेति ॥ ५९९ ॥ सत्येति सत्यंयथार्थवाक्यादिरूपोऽनुष्ठीयमानोधर्मः अनयोर्धर्मसत्ययोरपिप्रत्येकंस्थूलंसूक्ष्मंचमूर्तिद्वयं आकाशमूर्त्तिवत्तदीयास्थूलामूर्तिरपिनदृश्यतेइतिचबोध्यम् एवंमनुष्यत्वादिजातिश्चद्विरूपा तथाचतुर्दश्यांकण्डिकायामात्मपदेनोक्तंपौरुषंपरिपूर्णस्य

पृथिव्यापस्तथावन्हिर्वायुःसूर्यस्तथादिशः ॥ चंद्रोविद्युत्तथामेघोनभोधर्मस्तथैवच ॥ ५९९ ॥ सत्यवाक्यंमनुष्यादिजातिःपौरुषमेवच ॥ देहद्वयंमनोबुद्धिःप्राणादिकमिदंतथा ॥ ६०० ॥ उपकारंकरोत्यस्यसर्वःसर्वस्यसर्वदा ॥ श्वापिसर्वस्यभूम्यादेरुपकारंकरोतिहि ॥ ६०१ ॥ शुनःसर्वेपिचैवैतेविशेषःकेनतेभवेत् ॥ माकुथास्त्वंततोगर्वमुपकारकृतंसदा ॥ ६०२ ॥

एकस्यपुरुषस्यसंबंधिमनोबुद्धिप्राणप्रभृतिरूपंदेहद्वयंवैराजहैरण्यगर्भंचद्वितीयात्मपदेनोक्तश्चिदाभासश्चेत्यपिबोध्यम् ॥ ६०० ॥ उपकारमिति एषसर्वःपृथिव्यादिपदार्थोऽस्यसर्वस्यप्राणिजातस्यश्रुतौभूतपदोक्तस्योपकारंकरोति भूतैर्दृष्टादृष्टद्वाराऽऽरब्धत्वात् श्रुतौमधुशब्दोहिदृष्टादृष्टद्वारारब्धत्वप्रयुक्तोपकारकतावाचकइतिभावः तथाश्वाऽपिश्वप्रभृतिप्राणिनांस्थूलसूक्ष्माख्यंशरीरद्वयमपिउक्तपृथिव्यादीनामुपकारंकरोति पृथिव्यादीनांदृष्टादृष्टद्वारारंभकत्वादितिभावः ॥ ६०१ ॥ शुनइति शुनःश्वप्रभृतेःप्राणिजातस्य एतेपृथिव्यादयः फलितमाह विशेषइत्यादिना ॥ ६०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपरस्परोपकारकत्वेचएकमातृजपुत्रवदेककार्यत्वनिश्चयेयस्यमायाशबलस्येदंसर्वंकार्यंसएवैकःसर्वत्रतादात्म्येनानुप्रविष्टउपकारक
इतिसिद्धमित्याह उपकारंनेतिद्वाभ्यां कोपिपृथिव्यादिः प्राणिविशेषोवाकिंशब्दार्थः किंचिदल्पमपि कस्तर्ह्युपकारकइत्यतआह किं
त्वित्यादिना योमयातुभ्यंनेतीत्यादिनोपदिष्टएषएवपरःपुमान्पृथिव्यादिकार्येतिष्ठंस्तादात्म्येनानुगतःसन्विनाशरहितोऽमृतःस्वयंप्रकाश
श्चपरोब्रह्मत्वेनसर्वोत्कृष्टःसर्वोपकारकइतिद्वयोरर्थः अनेनश्लोकद्वयेनायमेवसइत्यादिरंशःसर्वकण्डिकांतगतोव्याख्यातः ॥ ६०३ ॥
॥ ६०४ ॥ उक्तंपरस्परोपकारकत्वंविशदयति पृथिव्यामितित्रयोदशभिः सपरःपुरुषःपृथिव्यांवर्त्तमानःसन्सर्वप्राणिनांभोगसाधनानि
शरीराणिकुरुतेइतिप्राणिनःप्रतिपृथिव्युपकारिका तथाशरीरस्थःसर्वप्राणिरूपःसन्नाधारंविनाभोगासंभवादाधारभूतभूमेर्दृष्टादृष्टान्यतम

उपकारंनकस्यापिकोपिकिंचित्करोतिहि ॥ किंतुयोयंमयादिष्टोनेतिनेतीतितेपुमान्॥ ६०३॥ एषएवपृथि
व्यादौस्थावरेजंगमेपिच॥ तिष्ठन्विनाशरहितःस्वयंभातःपरःपुमान्॥ ६०४॥ पृथिव्यांवर्तमानःसन्शरीरंकु
रुतेहिसः॥ शरीरस्थश्चभूमेःसकरोत्युपचयंपुमान्॥ ६०५ ॥ जलेतिष्ठन्हिजंतूनांरेतसोवृद्धिमीश्वरः॥ रेतस्य
यमपांवृद्धिंकुरुतेदेहरूपतः ॥ ६०६ ॥

द्वाराउपचयंवृद्धिंकरोति तथाचपृथिव्यास्वारंभकत्वेनस्वार्थानांप्राणिनांसृष्टेःप्राणिभिश्चस्वारंभिकायाभूमेःस्वार्थमेवसृष्टेःपरस्परकार्य
त्वंपरस्परभोग्यत्वंचतत्रजडांशप्राधान्येनकार्यत्वंभोग्यत्वंचचित्प्राधान्येनभोक्तृत्वंच तत्फलंचोक्तविधानुमानेनैकात्म्यसिद्धिरेवमग्रेपिबो
ध्यम् ॥ ६०५ ॥ जलइति ईश्वरोजलरूपःप्राणिनांदेहेषुरेतसःशुक्रस्यवृद्धिंकरोति आपोरेतोभूत्वाप्राविशन्नित्यैतरेयश्रुतेः एवमग्रेपिअ
धिदैवरूपाणामध्यात्मरूपोपबृंहकत्वेऐतरेयश्रुतयोऽनुसंधेयाः प्राणिरेतःस्थितःकार्यदेहरूपेणजलारंभकदृष्टादृष्टव्यापारोत्पादनद्वाराज
लवृद्धिंकरोतीतिपूर्ववत्सर्वंबोध्यमिति इयमुपकारविधाइहाग्रेपिप्रकारांतराणामुपलक्षणमिति ॥ ६०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वन्हाविति वन्हौतिष्ठन्नीश्वरःप्राणिनांवागिंद्रियप्रवर्तनद्वारेणधातुपाकादिद्वारेणवाप्राणिनःप्रत्युपकरोति प्राणिनांवाचितिष्ठंश्चमंत्रोच्चारणादिनाहवनीयाद्युत्यादिकामुपस्क्रियांसंस्कृतिंकुरुतेइति पृथिवीरीत्योपकारस्तुसर्वत्राविशिष्टएवेतिचबोध्यम् वायाविति वायौतिष्ठन्सर्वेषांप्राणप्रयुक्तांक्रियांप्रवर्त्तयति वायुनिरोधस्थलेप्राणनिरोधानुभवात् तथातत्रप्राणेषुतिष्ठन्नस्यवायोःप्रवर्त्तनंकरोति प्राण्यदृष्टैर्वायोरंभादित्युक्तप्रायम्॥६०७॥ सूर्येइति सूर्यस्थःसर्वप्राणिनांदृष्टिप्रवर्त्तयन्नुपकारकः प्राणिदृष्टिस्थश्चसूर्योयमितिज्ञानद्वारासूर्योपकारकोदृष्टिस्तृष्टिसिद्धांतात्॥६०८॥ दिक्ष्विति दिक्षुस्थितःसन्सर्वप्राणिश्रोत्राणांदिगंशभूतानामनुग्राहकः श्रोत्रस्थश्चदिशामुपस्क्रियांसंस्कृतिंभेर्यादिजन्यशब्देनकृतांप्रतिध्वनिरूपांश्रुतौप्रतिश्रुत्पदेनोक्तांजानाति प्रतिध्वनिबलादेवहिविशेषतःपूर्वादिदिशोज्ञायंतेइतिप्रतिध्वनिज्ञानद्वा

वन्हौवाचःप्रवृत्तिंसतिष्ठन्पाकादिकंतथा॥मंत्राद्युच्चारणाद्वापितिष्ठन्वन्हेरुपस्क्रियां॥वायौतिष्ठन्क्रियांप्राणैः
स्तत्रवास्यप्रवर्तनं॥६०७॥ सूर्यैतिष्ठन्हिनेत्राणामुपकारकरःपुमान्॥ नेत्रेसूर्यंचजानन्संस्तमप्युपकरोतिसः
॥ ६०८ ॥ दिक्षुस्थित्वाचकर्णानामनुग्रहकरोभवेत्॥ कर्णयोरपिसंस्थित्वादिशांजानात्युपस्क्रियां ॥६०९॥
चंद्रएषपुमान्स्थित्वामनःसर्वंप्रवर्तयेत्॥ मनस्येषव्यवस्थायचंद्रंसंप्रतिपद्यते ॥६१०॥ विद्युत्येषपुमान्स्थि
त्वातमःस्तोमंनिहंतिहि॥ तैजसेचपुमान्स्थित्वाविद्युतःप्रतिपद्यते॥६११॥ घनाघनेप्ययंस्थित्वासशब्दोल्हा
दकोनृणां॥ जंतूनामपिशब्देसौस्थित्वातंबहुमन्यते॥ ६१२॥

राश्रोत्रस्यदिशःप्रत्युपकारकत्वंयुक्तमिति एवंचंद्रस्यमनःप्रवर्तकत्वेनोपकारकत्वंमनसश्चसंकल्पैश्चंद्रलोकवृंहककर्मद्वाराऽऽल्हादकस्यचंद्रस्यसाधकत्वेनवाउपकारकत्वंबोध्यमितिद्वयोरर्थः॥६०९॥६१०॥ विद्युतीति अधिदैवंविद्युतिस्थितःसन्परःपुरुषःसकलप्राणिनांतमःपुंजंहंति सकलप्राणिनामध्यात्मंतैजसेत्वग्गतोज्वलतारूपतेजोभिमानिनिस्थितःसन्सर्वतोव्याप्तंविद्युतःप्रकाशंप्रतिपद्यतेजानातीतिसूर्येवर्णितन्यायेनोपकारकताबोध्या ॥ ६११ ॥ घनाघनेइति घनाघनेमेघेस्थित्वासशब्दोगर्जिताख्येनशब्देनसहितःसन्नृणांभूतानामाल्हादकोहर्षजनकोभवति तथानृणामध्यात्मंध्वनिरूपेशब्देस्थितःसंस्तंमेघंबहुप्रशस्ततयामन्यते यथामुखगतालालाबाह्यरसास्वादेहेतुस्तथांतर्ध्वनिर्बाह्यशब्दग्रहणेइतिपूर्ववदुपकारकताबोध्या ॥ ६१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नभसीति अधिदैवमाकाशेस्थितःसर्वप्राणिनांहृदयच्छिद्रप्रदानेनोपकारकः हृदयाकाशस्थितश्चसर्वव्यापकरूपतयाऽऽकाशंजानातीति तस्यसाधकत्वेनोपकारकता अतएवसांप्रदायिकाःसाक्षिभास्यंनभइत्याहुः साक्षिणश्चहृदयेविशेषतोवस्थानमिति ॥ ६१३ ॥ धर्मेइति धर्मरूपःसन्सर्वस्यसुखप्रदत्वेनोपकारकः धार्मिकनररूपेणधर्ममुत्पादयन्धर्मंप्रत्युपकारकइतिस्पष्टमिति ॥ ६१४ ॥ सत्येति सत्यवाक्यरूपःयथावदर्थबोधनेनोपकारकस्तथासत्यंवाक्यंयस्यतादृशेनरेस्थित्वासत्यवाक्यमुत्पादयतीत्यपिस्पष्टंपरोपकारकत्वमिति ॥ ६१५ ॥ मानुषेइति मानुषत्वब्राह्मणत्वादिजातिरूपःसन्परमेश्वरोधिकारसंपादनद्वाराजात्यभिमानिनांसुखप्रदत्वेनोपकारकः तत्तद्व्यक्तिस्थितश्चाभिमानेनजातिसाधयन्दृष्टिसृष्टिन्यायेनोपकारकइति ॥ ६१६ ॥ पूर्वसंग्रहवाक्येपौरुषपदेनोक्तस्यसर्वसंघातस्यसर्वप्राणिबुद्धिप्रतिबि

नभस्येषव्यवस्थायहृदिच्छिद्रंप्रयच्छति ॥ हार्देछिद्रेस्थितोदेवोनभोजानातिसर्वगं ॥ ६१३ ॥ धर्मेस्थित्वानराणांससुखंयच्छतिसर्वदा ॥ धार्मिकेषुनरेष्वेषस्थित्वाधर्मंकरोतिच ॥ ६१४ ॥ सत्यवाक्येपुमान्स्थित्वासम्यगर्थंनिवेदयेत् ॥ सत्यवाक्येनरेस्थित्वासत्यवाक्यंवदेत्तथा ॥ ६१५ ॥ मानुषेपिचजात्यादौस्थित्वादद्यात्सुखंनृणां ॥ मानुषेवपुषिस्थित्वामानुषंसचगच्छति ॥ ६१६ ॥ देहेंद्रियमनःप्राणसंघातेबुद्धिपालिते ॥ स्थित्वाजनिमृतीतस्यकुरुतेसर्वदेश्वरः ॥ ६१७ ॥ बुद्धेःसर्वप्रचारेषुस्थित्वातांविषयैःसह ॥ अवगच्छतिजंतूनामात्मातेपिशुनोपिच ॥ ६१८ ॥

बितचिदाभासस्यचविज्ञानमयपदोक्तस्यपरस्परोपकारकतांदर्शयति देहेंद्रियेतिद्वाभ्यां देहादिसंघातेबुद्धिपालितेबुद्धिप्रधानकेबुद्धिपर्यंतइतियावत् स्थित्वातस्यविज्ञानमयस्यजन्मादिकंकरोति बुद्ध्यादिरूपोपाधीनांधर्मैर्विज्ञानमयंधर्मवंतंकरोतीतिविज्ञानमयंप्रतिसंघातस्योपकारकता उपाधिधर्माध्यासेनैवहिभोक्तृत्वंतच्चाविद्यादशायांसुखवदवभासतइतिप्रसिद्धमितिभावः ॥ ६१७ ॥ बुद्धेरिति बुद्धेःप्रचारेषुवृत्तिसंज्ञपरिणामेषुस्थितःसंस्तांबुद्धिंविषयैःसहावगच्छतिभासयतीतिविज्ञानमयस्यसंघातंप्रत्युपकारकतातंविज्ञानमयंतत्पदार्थेनिवेशयति आत्मेति एतादृशआत्मातेशक्रस्यापिशुनोप्यविशिष्टइत्यर्थः ॥ ६१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्परोपकारेदृष्टांतमाह माक्षिकस्येति यथामाक्षिकरसोमक्षिकाश्चपरस्परमुपकार्योपकारकभावमापन्नाइत्यर्थः ॥ ६१९ ॥ दार्ष्टांति
कमाह एवमिति एवंपृथिव्यादिरूपंजगन्मण्डलंयंप्रत्युपकुरुतेतदुपकृतंतस्यउपकारकस्यउपकुरुतेउपकारंकरोति यथालोकेपिप्रभुर्वेत
नेनभृत्यानुपकृतान्करोतिभृत्याश्चसेवयातमुपकुर्वंतीतिप्रसिद्धम् ॥ ६२० ॥ उक्ताश्चोपकाराउपलक्षणमवांतरभेदानांबहुत्वादित्याह उ
पकाराइति दिङ्मात्रेणनिदर्शनमात्रेण प्रकृत्यादित्वात्तृतीया एतत्स्पष्टीकृतंवार्तिककृद्भिः सर्वंसर्वस्यकार्यंस्यात्सर्वःसर्वस्यभोजकः इत्ये
षामधुविद्यात्रैवैषम्यक्लेशहारिणीति ॥ ६२१॥ उक्तानामुदाहरणत्वेसतियत्फलितंतदाह भूम्यादिकमिति पृथिव्यादिकंसर्वंप्रत्येकमात्मनः
स्वस्वरूपादन्यस्यसर्वस्योपकारंकरोति यथापृथिवीस्वातिरिक्तस्यजलादेरप्युपकारिकापंचीकरणादिविधयापरिपोषकत्वात्तथान्यत्पृ

माक्षिकस्यरसोयद्वन्मक्षिकोपकृतःपुरा ॥ उपकारंमक्षिकाणांकुरुतेसर्वदैवहि ॥ ६१९ ॥ एवमेवजगच्चक्रंपृ
थिव्यादिकमत्रहि ॥ यस्योपकुरुतेतद्धितस्योपकुरुतेपुनः ॥ ६२० ॥ उपकाराश्चभूम्यादेर्दिङ्मात्रेणसमीरि
ताः ॥ एतेत्र्येकैकशःसंतिलक्षशःकोटिशस्तथा ॥ ६२१ ॥ भूम्यादिकमिदंसर्वंसर्वस्यान्यस्यचात्मनः ॥ उपका
रंकरोत्येवत्र्येकस्यान्यत्तथाखिलम् ॥ उपकारकरस्तत्रसर्वत्रात्मासमीरितः ॥ ६२२ ॥ तेजसास्वप्रकाशेनभ्राज
मानोमृतोपमः ॥ जरावामरणंवापिविद्यतेस्यनकर्हिचित् ॥ ६२३ ॥ अयमेवसआत्मायोहृदयेसर्वदेहिनां ॥
नानाबुद्धिप्रचाराणांसाक्षीसंगविवर्जितः ॥ ६२४ ॥

थिवीभिन्नंसर्वमेकस्यपृथिवीस्वरूपस्योपकारकं एवमन्यत्रापीति परस्परोपकारकाणांचैकात्मकत्वस्यएकशरीरावयवेषुदृष्टत्वात्सर्वत्रै
कात्मकत्वंसिद्धमित्याह उपकारकरइति समीरितः अत्रब्राह्मणेइतिशेषः ॥ ६२२ ॥ तेजोमयत्वादिविशेषणैःपृथिव्यादिसूक्ष्मशरीरविशि
ष्टपरत्वेआपेक्षिकार्थपरत्वाद्विभ्यद्भिःसएवात्माप्रतिपाद्यतेइत्याशयेनशुद्धात्मपरत्वंतेजोमयादिपदद्वयस्याह तेजसेति स्वरूपभूतप्रकाशा
त्मकेनतेजसाभ्राजमानः श्रुतौस्वार्थिकोमयडितिभावः आमृतोपमःअमृतेदेवलोकप्रसिद्धेउपमाउपमितिर्यस्यसतथापरमामृतइतियावत्
तदेवाह जरेति मरणाभावेनेतराभावोपिबोधितइतिभावः ॥ ६२३ ॥ अयमेवसइत्यादेरर्थमुपबृंहयति अयमितिपंचभिः सर्वदेहिनां
हृदयेवर्णितइतिशेषः कथमित्यतआह नानेत्यादि ॥ ६२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयंभिन्नाअप्युपाधयस्तंभेत्तुंनालमित्याह समइति समएकरूपःहेशक्रतेतवआत्माशुनश्चात्मापरमेश्वरइति ॥ ६२५ ॥ भिन्नोपाधिगत
स्याप्यभेदेदृष्टांतमाह यथेति घटाद्युपाधिनिष्ठोभेदोयथानभआकाशंनस्पृशतितथात्मानमित्यर्थः ॥ ६२६॥ अयमेवपूर्वंब्रह्मात्मतयाव
र्णितइत्याह निर्भेदइतिद्वाभ्यां स्पष्टम् ॥६२७ ॥६२८ ॥ सवाअयमित्यादिवाक्यार्थमाह सएवेति सवर्णितआत्मैवसर्वस्याधिष्ठायवशी
॥४८॥ कृत्यपालकः तवत्वधिपतित्वमभिमानमात्रमित्याह नत्वमिति तत्रहेतुतयाकार्याभिमानेननियम्यकोटिप्रविष्टत्वमाह तवापीति हियतए
पआत्मातवदेवराजशरीराभिमानिनोऽत्रव्यवहारभूमौनियामकोंतर्यंतेत्यर्थः ॥ ६२९॥ राजेतिपदस्यार्थमाह एषएवहीति एषएवसर्वेषां
मध्यमोमध्येभवः मध्येमाकांतिर्यस्य तस्यभासासर्वमिदंविभातीतिश्रुतेः एतादृशःसन्दीप्यतेराजते रविवदिति त्वंतुराजानभवसितदधिष्ठा

समोयंसर्वदेहेषुस्थावरेषुचरेषुच ॥ शक्रतेपितथात्मेतिशुनोपिपरमेश्वरः ॥ ६२५ ॥ यथानभसिनैवास्तिभे
दोघटमठादिगः ॥ तथानात्मनिभेदोस्तिशक्रनानाशरीरगे ॥ ६२६ ॥ निर्भेदोयःपुमानुक्तोत्दृदयेसर्वदेहिनां ॥
जरामरणशून्योयंब्रह्मसर्वात्मकंपरं ॥ ६२७॥ अयमेवात्मविज्ञानात्सर्वमेवाभवत्पुमान् ॥ ब्रह्मात्मायःपुरोक्त
स्तेब्राह्मणानांविचारतः ॥ ६२८॥ सएवसर्वभूतानामधिष्ठायचपालकः ॥ नत्वंशक्रतवाप्येषत्वधिष्ठायात्र
पालकः ॥ ६२९ ॥ एषएवहिसर्वेषांभूतानांमध्यमःपुमान् ॥ दीप्यतेरविवन्नत्वंकिंतुतेनैवराजसे ॥ ६३० ॥
रथचक्रस्ययद्वद्धिनेमिनाभ्योस्तुमध्यगाः ॥ अरानैतेस्वतंत्राःस्युरुभयत्रप्रतिष्ठिताः ॥ ६३१ ॥ एवंविश्वंसम
ग्रंस्यान्मध्येध्यात्माधिदैवयोः ॥ उपकारायसर्वत्रस्थितयोरात्मरूपयोः ॥ ६३२ ॥

नभासकत्वादित्यर्थः ॥ ६३० ॥ परस्परोपकारकस्यपृथिव्यादिजगच्चक्रस्यसापेक्षत्वेएकात्मकत्वेचदृष्टांतंस्फुटयति रथेतिचतुर्भिः यद्वद्र
थचक्रस्यावयवभूतयोर्नेमिनाभिसंज्ञयोःकाष्ठयोर्मध्यगतायेअरास्तिर्यक्काष्ठरूपाएतेअराःस्वतंत्राःस्वाधीनानभवंतिकिंतुउभयत्रनेमौना
भौचप्रतिष्ठिताः सापेक्षवृत्तयइत्यर्थः ॥ ६३१ ॥ एवमिति एवंसर्वंजगदध्यात्ममधिदैवंस्थितयोरात्मनःस्वरूपयोरंशयोःपृथिव्यादिव
र्तिसूक्ष्माभिमानिनोर्मध्येवर्ततेतयोरधीनंवर्ततेइतियावत् यथासर्वभूतशरीराणिपृथिवीचअरानिभानिपृथिव्यभिमान्यात्मांशंनेमिनिभं ॥४८॥
शरीराभिमानिनमात्मांशंनाभिनिभंचाश्रितानि एवमन्यत्रापिबोध्यं कीदृशयोरात्मरूपयोरुपकारायसर्वत्रपृथिव्यादौवर्णितविधया
स्थितयोरिति ॥ ६३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकमेवेति दृष्टांतेयथाएकमेवशिशिपादिकाष्ठंनेमिस्वरूपंनाभिस्वरूपमरास्वरूपंचबिभ्रत्सदुपकार्यभावमुपकारकभावमादिपदेनाधारा
धेयभावादिकंगच्छति भूतलेइदंप्रसिद्धमितिशेषः ॥ ६३३॥ एकएवेति एवमेकआत्मैवाधिदैवादिभावंतदभिमानिपुरुषभावंचगतःसन्सर्व
त्रोपकारकः तवपृथिव्यादेश्चउपकारकताअभिमानमात्रमित्यर्थः॥ ६३४॥उपकारकस्यचात्मनएकरूपत्वादुत्कृष्टोपाधावेवायमुपकारक
इत्यभिमानोव्यथेत्याह उपकारमिति ॥ ६३५॥ वर्णितमात्मैक्यंनिगमयति किमिति बहुनोक्तेनकिंफलंनकिमपिततःसंक्षेपेणतत्त्वंनिश्चि
नु किमवधारयामीत्यतआह समइति ममचक्षुषेःसात्विकस्यतेदेवराजस्यराजसस्यशुनस्तामसस्यचात्मासमएकरूपइति ॥ ६३६ ॥ तदु
पाधीनामुत्कर्षापकर्षौतुदृष्टिभेदेनसर्वत्रप्रतिष्ठिताविति दर्शयति निंदयामइतिद्वाभ्यां यथावयंदेवमनुष्यादयःशुनोजन्मकष्टमितिनिंदया

एकमेवयथाकाष्ठंनेमिनाभ्यादिरूपभृत्॥उपकार्योपकारादिभेदंगच्छतिभूतले॥६३३॥एकएवतथात्मायम
धिदैवादिभेदभाक्॥तत्रस्थितश्चसर्वेषामुपकारंकरोतिहि॥नत्वंशक्रनभूम्यादिर्ह्युपकारकरंस्मृतम्॥६३४॥
उपकारंकरोत्येषयथातेहृदयेस्थितः॥ शुनोपिभगवांस्तद्वत्कुरुतेतद्धृदयेस्थितः ॥ ६३५ ॥ किंबहूक्तेनदेवेंद्रसं
क्षेपेणावधारय॥समःसंसारआत्माचममतेपिशुनोपिच॥६३६॥निंदयामोवयंयद्वत्कष्टंजन्मशुनोधुना॥
अस्माकंचतथैवैतेनिंदंतिब्रह्मवादिनः॥६३७॥उत्कृष्टतायथास्माकंस्वदेहेशक्रविद्यते॥शुनोपिचस्वदेहेसा
तादृश्येवहिवर्तते॥६३८॥ततोदेहंतथास्वर्गमप्सरोगणमंडितम्॥अभिमानंबहिस्त्याज्यंविध्यात्मानंस्वमा
त्मना॥६३९॥श्वविष्ठासदृशोदेहःशक्रसर्वशरीरिणां॥हेयोधियापरित्यक्तेतस्मिन्नात्माप्रकाशते॥६४०॥

मस्तथास्माकंजन्मब्रह्मवादिनःसंसाराद्विरक्तानिंदंतीति ॥ ६३७ ॥ आत्मतादात्म्याध्यासात्तुसर्वदेहेष्वुत्कृष्टताभासतइत्याह उत्कृष्टतेति
यथावयंस्वस्वदेहमुत्कृष्टंमन्यामहेतथाश्वापिस्वदेहंसर्वोत्कृष्टंमन्यतइत्यर्थः ॥ ६३८ ॥ तस्माद्यत्संबंधाद्देहादिकंरमणीयतयाभासतेसआ
त्मैवोपादेयोऽन्यत्सर्वंहेयमित्याह ततइति हित्वेतिशेषः ततस्त्वंदेहंहित्वातथाप्सरोगणयुतंस्वर्गंचहित्वा अलमवयुत्यानुवादेनबहिर्यावद्दृश्य
गोचरमतएवानर्थरूपत्वात्त्याज्यमभिमानंहित्वात्मानंस्वयमेवविद्धीतिसंबंधः ॥ ६३९ ॥ तत्रापिदेहाभिमानःप्रथमंपरित्याज्यः साक्षादा
त्मज्ञानप्रतिबंधकत्वाद्देहाभिमाननिवृत्तौबाह्यगोचरममत्वनिवृत्तेःपृथक्साधनानपेक्षत्वादित्याह श्वेतिद्वाभ्यां अन्यत्रकाकविष्ठयाहेयमु
पमितमत्रश्वविष्ठयेति हेयोऽभिमानादवतार्यः तस्मिन्देहे ॥ ६४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरीरइति देहेहंबुद्धित्यागेकृतेसत्यन्यत्रममताशालिबुद्धेर्हेतोर्यद्दुःखंतत्समूलंसहेतुकंनश्यतीत्यर्थः ॥ ६४१ ॥ एवंमधुब्राह्मणांतमधुका
ण्डप्रतिपाद्याब्रह्मविद्यानिरूपिताअथतत्स्तुत्यर्थइदंवैतदित्यादिर्ग्रंथोव्याख्यातव्यस्तत्रप्रथमवाक्यस्यवैशब्देनस्मारितायादध्यङ्हवाइत्या
दिकायाःप्रवर्ग्यकाण्डगतायाभाष्येऽनूदिताख्यायिकायाउपबृंहणउपोद्घातभूतस्यकोपंतेनेतरस्मैउक्तविद्यादाननिवारणंततोदधीचस्तूष्णी
मवस्थानंचपंचाशच्छ्लोकैर्दर्शयिष्यन्निद्रायदधीचउपदेशानुवादमश्विनोरहस्यज्ञऋषिरुपसंहरति इत्यादीति दध्यङ्ङाथर्वणःशक्रंप्रतिइ
त्यादिकंआदिपदेनब्रह्मविद्योपकारकाणांप्राणादिविद्यानांग्रहः बहुशःबहुविधमर्थजातमब्रवीत् कीदृशोदध्यङ् श्रोतारमविरक्तंजाना

शरीरेहंधियस्त्यागेत्वन्यत्रममताधियः ॥ दुःखंसमूलंदेवेंद्रनाशमाप्नोतिदेहिनः ॥ ६४१ ॥ इत्यादिबहुशःश
क्रंदध्यङ्ङाथर्वणोब्रवीत् ॥ अविरक्तंप्रजानानःसत्यपाशवशंगतः ॥ ६४२ ॥ आथर्वणादिमांवाणीमानंदामृ
तपूरितां ॥ शक्रःश्रुत्वाऽतिरागांधःकोपमेवजगामह ॥ ६४३ ॥ दयालुनायथाकश्चित्क्षुधितोतिभुजंगमः ॥
पायितःपयएतस्मिन्क्रोधंप्राणहरंव्रजेत् ॥ श्रीमदांधस्तथाशक्रोमनसैवमचिंतयत् ॥ ६४४ ॥ अयंद्विजोत्त
मोनूनमसुरैरिहचोदितः ॥ राज्यत्यागायमेयस्माद्बुद्धिमेषप्रयच्छति ॥ ६४५ ॥ अहोनिष्ठुरभाषित्वंचित्रमस्य
दुरात्मनः ॥ शुनाममसमानत्वंकुरुतेसर्वथायतः ॥ ६४६ ॥

नोपिसत्यवशेनवदनेप्रवृत्तइति ॥ ६४२ ॥ आनंददायिकापिमुनिवाणीइंद्रस्यदेहादिरागरूपदोषेणकोपहेतुर्जातेत्याह आथर्वणादिति
॥ ६४३ ॥ मोदसाधनस्यरोषसाधनत्वेदृष्टांतमाह दयालुनेति यथादयालुनाकश्चिदतिक्षुधितोभुजंगमःपयःपायितोदुग्धपानंनीतःस
न्नपिक्रोधंव्रजेदिति तथाश्रीमदांधइंद्रोहितोपदेशंश्रुत्वापिजातेनकोपेनएवंवक्ष्यमाणेनप्रकारेणाचिंतयदिति ॥ ६४४ ॥ तत्रेंद्रस्यकोप
जांविपरीतकल्पनामनुवदति अयमित्येकादशभिः अयंद्विजोत्तमोप्यसुरैःप्रेषितइतिमन्ये ममराज्यादुच्चाटकत्वादित्यर्थः ॥ ६४५ ॥
वस्तुतस्तुनोत्तमःअयुक्तभाषित्वादित्याह अहोइति ॥ ६४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसादृश्यस्यायुक्ततांस्फुटयति ब्रह्मेति ब्रह्महत्याफलभूतशरीरः श्वसूकरखरोष्ट्राणांगोऽजाविमृगपक्षिणां चांडालपुष्कसानांचब्रह्महायोनिमृच्छतीतिस्मृतेः निंदितःस्पर्शेस्नानप्रयोजकत्वात् विट्पुरीषमाशनमशनसाधनंयस्यसतथा तस्येदमित्यण् ईदृशःश्वाकअहंकेति कीदृशोहं अश्वमेधाद्यसंख्ययागानांयोगीकर्त्तादेवतात्वेनप्रयोजकश्च कारीतिपाठेकरणंकर्तृप्रयोजकव्यापारसाधारणंकारःसोस्यास्तीतिकारी॥ ६४७॥क्वचेति यज्ञैरपिदुर्लभंदेववधूगात्रंक्वशुनीनांगात्रंक्व एवंसतियेनसाधर्म्येणायंमुनिस्तादेववधूस्ताभिःशुनीभिःसमाःकरोतितत्किमितिनज्ञायतेइतिशेषः॥ ६४८ ॥ अहमिति अहंवज्रहस्तःसर्वंलोकंनियंतुंवशेस्थापयितुमेकएवसमर्थोस्मि एतादृशस्यशुनासाधर्म्यंकेन

ब्रह्महत्याकरःक्वायंनिंदितःश्वाविडाशनः ॥ अश्वमेधसहस्राणांयोगीक्वाहंसुरेश्वरः॥ ६४७॥ क्वचदेववधूगात्रंयज्ञैरपिसुदुर्लभम्॥ शुनीनांक्वचयेनायंसमास्ताभिःकरोतिताः॥६४८॥ अहंवज्रधरोविश्वंनियंतुमेकएवहि॥ समर्थस्तस्यमेकेनशुनास्यात्सदृशंवपुः॥६४९॥ तस्माद्द्वेषोऽसुरःकश्चिदत्रस्वर्गजिघृक्षया॥ तापसंवपुरास्थायबुद्धिभ्रंशार्थमागतः॥ ममापिदेवतानांचयाज्ञिकानांचवर्णिनां॥ ६५०॥ वाग्मीवाकविरेषस्यादसुराणांगुरुर्मुनिः॥ पुत्रयोःकश्चिदेषस्यात्तस्यतौधीधनौश्रुतौ॥६५१॥ किमनेनाधुनैवाहमधमंतापसब्रुवं॥ हन्मिवास्थानतोवास्मात्सद्योनिःसारयाम्यमुं॥ ६५२ ॥ अद्यचैवंकृतेकीर्तिर्ममनाशंगमिष्यति॥ उपायतस्ततस्त्वेनंघातयामिद्विजाधमम्॥ ६५३॥

धर्मेणोक्तमिति॥ ६४९॥ तस्मादिति तस्मादयुक्तभाषित्वाद्द्वेषविप्रवेषोऽसुरःकश्चिदस्ति कीदृशः स्वर्गग्रहणेच्छयाममदेवानांयागाधिकारिणामन्येषांचबुद्धिभ्रंशार्थमागतइति ॥ ६५० ॥ ब्राह्मणत्वेप्ययंदैत्यगुरुःस्यात्तत्सुतयोःशंडामर्कयोरन्यतरोवास्यादित्याह वाग्मीति कविःशुक्रः तौशुक्रपुत्रौधीधनत्वेनयतःप्रसिद्धाविति॥ ६५१ ॥ किमनेनेति अनेनास्यब्राह्मणत्वादिविचारेणकिं सव्यर्थइतियावत् अहमेनंतापसब्रुवंआत्मानंतापसत्वेनख्यापयंतमधुनैवहन्मिअस्मात्स्थानान्निःसारयामिवाइति ॥ ६५२ ॥ किंचिद्विचार्यतथापित्वरानविधेयेत्याह अद्येति अद्यैवएवंकरणेकीर्तिनाशभयादुपायेनैवायंदंड्यइत्याह उपायतइति ॥ ६५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच पूर्वमप्यनेनाश्विनोर्मत्तोविमुखीकरणरूपापराधस्यकृतत्वादयंकंटकभूतोदंड्यएवेत्याह अनेनेति मोहितौबुद्धिभ्रमंनीतौ॥ ६५४॥ उपायमभिनयति आज्ञामिति ततस्त्वरयादंडेकीर्तिहानेः अस्यमुनेर्ब्रह्मविद्यायाअसमीरणेऽनुपदेशेआज्ञांददामितस्याअतिक्रमेकृतेतुदंडयिष्यामीति॥६५५॥अथेंद्रकर्तृकमितरत्रब्रह्मविद्योपदेशनिवारणंदर्शयति इतिसंचिंत्येतिद्वाभ्यां युवयोरश्विनोः आहरिष्यामिअपनेष्यामि॥६५६॥६५७॥अथमुनेर्विचारेणतूष्णींभावेऽवस्थानंदर्शयति इत्युक्तेइत्यादिना इतिइत्थमिंद्रेणोक्तेदध्यङ्ङाथर्वणोमुनिःकार्यंकृतमेव इष्टसिद्धिमेवमनुतेस्मेतियावत् यतोमहान्अतोनचुकोपकिंतुत्दृष्टचेताएवेंद्रेबभूवेति॥६५८॥तत्रयादृशविचारेणमुनिनाहर्षोधृतस्तमभिनयति ममेतिद्वादशभिः

अनेनममदेवौतावश्विनौधीधनावुभौ ॥ मोहितौकंटकस्तस्माच्छेद्यएषमयाधमः ॥ ६५४ ॥ आज्ञामस्यततोदास्येब्रह्मविद्याऽसमीरणे ॥ अतिक्रमेकृतेपश्चाद्घातयिष्याम्यमुंद्विजम् ॥ ६५५ ॥ इतिसंचिंत्यदेवेंद्रोरागांधधिषणस्तदा ॥ कोपादाज्ञापयामासततोसौयुवयोर्गुरुं ॥ ६५६ ॥ अद्यप्रभृतिचेद्विप्रविद्यामन्यस्यवक्ष्यसि ॥ आहरिष्याम्यहंसद्यःशिरस्तेब्रह्मवादिनः ॥ ६५७ ॥ इत्युक्तेसमुनिःस्वस्यकार्यंमेनेकृतंमहान् ॥ नकोपंप्राप्तवानृशक्रेत्दृष्टचेतामहामनाः ॥ ६५८ ॥ ममनिष्ठुरतानास्मिन्लोकेक्कापिभविष्यति ॥ अपात्रेचतथादानंविद्यायानभविष्यति ॥ ६५९ ॥ अहोशक्रेणशिष्येणदत्तामेगुरुदक्षिणा ॥ इतःपरंनवक्ष्यामियदहंदुर्धियामिमां ॥ ६६० ॥ कामक्रोधाभिभूतेभ्योदत्तापिविफलाभवेत् ॥ विद्यादत्तायथाधेनुश्चांडालायफलायन ॥ ६६१ ॥ स्वसुतारूपसंपन्नायौवनाभिमुखायथा ॥ दत्तापंढायविफलातथेयंदुर्धियेसदा ॥ ६६२ ॥

इंद्राज्ञानुष्ठानेममदोषद्वयपरिहाररूपमिष्टंसिद्ध्यति तत्रोपदेशेनिष्ठुरताएकोदोषः विद्यायाअपात्रेदानंचद्वितीयइति ॥ ६५९ ॥ अहोइति इयमिंद्रदत्ताज्ञाममगुरुदक्षिणावदनुकूलैवयतआज्ञारूपहेतोरहमिमांविद्यांदुर्धियांपुरतोनवक्ष्यामीति ॥ ६० ॥ अनधिकारिषुविद्यादानदोषंस्फुटयति कामेति रागादिमज्झोदत्तापिविद्याविफलाचांडालायदत्ताधेनुरिवेति ॥ ६६१ ॥ अत्रदृष्टांतांतरमाह स्वसुतेति षंढायक्लीबायइयंविद्या ॥ ६६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशांतायेति अशांतायब्रह्मविद्यादानेविद्यायावैफल्यरूपोघातः श्रोतुरुभयधंशः वक्तुश्चद्वेषलाभइति तथाचोक्तंभारते यश्चाधर्मेणवैब्रूयाद्यश्चाधर्मेणपृच्छति तयोरन्यतरःप्रैति विद्वेषंवाधिगच्छतीति तंश्रोतारं ॥ ६६३ ॥ इतइति इतउक्ताज्ञादिरूपादिंद्रप्रसादान्ममतदनधिकार्युपदेशप्रयोज्यंपापंशांतंप्रसंगानर्हतयानिश्चितं तत्प्रसंगेहेतुगर्भंविशेषणं लोकेति स्याद्यात्रायापनेयानेगतौचेतिविश्वः तथाचशिष्टलोकानांगतौमार्गेऽभ्यागतसंमानरूपेपरस्यतत्परस्य गतिर्मार्गेदशायांचेतिविश्वः प्रकारांतरेणतुनममपापप्रसक्तिरितिद्योतयितुंतापसस्यमुनेरित्युक्तमिति ॥ ६६४ ॥ प्रकारांतरेणपापप्रसंगाभावंस्पष्टयितुंब्रह्मविद्ययापूर्णकामस्यमेनकुत्रचिद्रागइत्याह किंचेति ममविदुषोमनुजाद्यैःकिंसाध्यं कीदृशैर्बहिश्चरैर्विषयप्रवणचित्तैरतएवसंगेननानाभेदबुद्धीनांबीजैःकारणैर्दुरासदैर्विवेकबुद्ध्याक्रम्यदुःखेनचित्तभूमेर्बहिर्निःसार्यैरितियावत् ॥ ६६५॥ तत्रभेदानुभवस्यपरिणामदुःखतामाह अयमिति इहव्यवहारभूमौयोयोजंतुर्यद्यदनुभवतितत्तत्सदृशमेव

अशांतायहियोदद्याद्विद्यांस्नेहादिमोहितः॥ आत्मानंचतथाविद्यांतंचहन्यात्सपापधीः॥ ६६३ ॥ इतःपरंहितत्पापंशांतंशक्रप्रसादतः॥ लोकयात्रापरस्याद्यंतापसस्यमुनेर्मम ॥ ६६४ ॥ किंचमेमनुजैर्वापिदानवैर्वाबहिश्चरैः॥ ममात्मविदुषोनेकभेदबीजैर्दुरासदैः॥ ६६५ ॥ अयंनानाविधोजंतुर्योयोनुभवतीहयत्॥ स्वप्नेस्मृतौचतत्सर्ववासनाजंप्रपद्यते॥ ६६६ ॥ अयमेवचसंसारोममयद्ब्रह्मदेशनम्॥ देहमन्यंसमाप्स्यामिनूनंवासनयानय॥ ६६७॥ अहंगुरुरयंशिष्यइतिमेभेदधीःकुतः॥ विनामायामतोहंस्यांप्राकृतैःप्राणिभिःसमः॥ ६६८॥

सर्वंविषयजातमनुभूतार्थवासनाजन्यंस्वप्नइवस्मृतिकालेपिप्राप्नोतीत्यर्थः ॥ ६६६ ॥ ममतुभेदज्ञानप्रसक्तेर्द्वारांतराभावेपिविद्योपदेशप्रवृत्तिरूपंद्वारमस्तीत्याह अयमेवेति संसारोभेदज्ञानद्वारासंसारहेतुरयमेवयद्ब्रह्मणोदेशनमुपदेशः नूनमितिशंकायां किमियंभेदवासनामापिदेहांतरंकरिष्यतीत्यर्थः ॥ ६६७ ॥ ननुभेदबुद्धेःकुतोजन्मान्तरहेतुतेतिचेदविद्याव्याप्यत्वादित्याह अहंगुरुरिति गुरुत्वाद्यवगाहिनीभेदबुद्धिरप्यद्वितीयात्मनिवस्तुतोऽनुपपद्यमानासतीस्वप्रयोजकंमायालेशंसूचयतीतिभावः मायांविनाभेदधीःकुतःस्यादित्यन्वयः अतोऽविद्याकार्यभेदधीदर्शनरूपाद्धेतोरहंप्राकृतैःपामरैःसमःस्यांभवेयमित्यर्थः अतएवभाष्यकारैर्विदुषामपिव्यवहारेपश्वाद्यविशेषउक्तःपश्वादिभिश्चाविशेषादिति ॥ ६६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहंममेतिभेददर्शनेस्थितेचसर्वात्मभावरूपामुक्तिःकथंवक्तुंशक्येत्याह अहंममेति अहंममेत्याकारकेयेशब्दज्ञानेतद्रूपंबंधनंयावन्ननिवर्त्ततेतावद्देहरूपात्कारागारान्निर्गमःकथंस्यादिति ॥ ६६९ ॥ तस्मान्मयापिमनोनाशवासनाक्षयाभ्यासोऽपेक्षितएवतत्रचउपायोपदेशपरंपरयाप्रयोजकोगुरुरिंद्रस्तुसाक्षादेवतत्प्रयोजकः विद्योपदेशायैवव्युत्थानयोग्यचित्तंमांप्रतिपुनरुपदिशतस्तेशिरश्छेत्स्यामीत्यभिधानादतोगुरोरप्यधिकंमान्यइत्याह दैवइति दैवोथर्वावंशब्राह्मणोक्तस्ततोपिगुरुर्मान्यः यतोमामुपदेशव्याजेनबहिश्चित्तंसंतंनिहंतुमुद्यतः हंतुंप्रतिज्ञांकृतवानित्यर्थः ॥ ६७० ॥ एवंविचारेणसक्षमांकृतवानित्याह इत्यादीति अपकारिण्यपीतिशेषः ॥ ६७१ ॥ ननुतथापींद्रस्यायुक्तकर्मणःफलभूतःशापःकुतोनदत्तइतिचेद्विद्याप्रवृत्तानांशिक्षार्थमितिगृहाणेतिसूचयितुंयादृशविचारेणशापोनदत्तस्तंविचारमभिनयति सर्पाणामितिदशभिः यदिज्ञानिनोप्यपकारिणिकृतापराधेकोपंकुर्वंतितदासर्पादितिर्यग्भ्यःप्रतिकारकर्तृभ्योविदुषांविद्याप्रयुक्तःको

अहंममेतियावत्स्याच्छब्दज्ञानाख्यबंधनं॥ कुतोनिःसरणंतावद्देहकारागृहाद्भवेत्॥६६९॥ दैवोथर्वाममगुरुस्ततोप्येषगुरुर्मतः॥ शक्रोयस्माद्बहिश्चित्तंमांनिहंतुमिहोद्यतः॥६७०॥ इत्यादिबहुशोदध्यङ्विचार्येत्थंदयेनिजे॥ संतोषंपरमंप्रापतस्मिन्शक्रेऽपकारिणि॥ ६७१ ॥ सर्पाणांचशुनांवाकोविशेषोविदुषांभवेत्॥ अपकारिणिचेत्कोपंकुर्वंतिज्ञानिनोपिच॥ ६७२॥ अपकारिणियेकोपंनकुर्वंतिमहाधियः॥ उपकारंचकुर्वंतिविद्वांसस्तेनचेतरे॥ ६७३ ॥ अपिकोपःकुतःकार्योविद्वद्भिरपकारिणि॥ अपकारोजडेचेत्स्यात्किमायातिमहात्मनः॥ ६७४॥ स्वहस्तेनयथाहस्तंपादंवाताडयेत्पुमान्॥ एकएवतथादेहाद्देहमन्यंविनाशयेत्॥ ६७५॥

विशेषइति ॥ ६७२ ॥ कीदृशास्तर्हिविद्वांसइत्यतआह अपकारिणीति स्फुटम् ॥ ६७३ ॥ किंचकूटस्थंनित्यमात्मानंजानतःकोपोनोपपत्तिसहते तथाहि किमात्मनोऽपकारेकुप्यतिजडस्यवानाद्यःकूटस्थेनविकारासंबंधादित्याह अपीति नद्वितीयइत्याह अपकारोजडइति अस्तुजडेऽपकारस्तेनजडभिन्नस्यात्मनःकिमनिष्टमायातंप्राप्तंनकिंचिदपीति नहिपाषाणेनपाषाणघातेचेतनस्यकिंचिद्दुःखमितिभावः ॥ ६७४ ॥ अथजडस्यापिशरीरसंघातस्यात्मशेषत्वात्शेषापकारेशेषिणआत्मनःकोपउचितएवराजपुरुषापकारेराज्ञइवेतिशंकांमधुब्राह्मणसिद्धांतानुसारिदृष्टांतेनापाकरोति स्वहस्तेनेति यथाएकशरीरेहस्तेनहस्तांतरताडनेकोपोनभवति कुतः यतएकएवआत्मेतितथाएकदेहाद्देहांतरस्यविनाशनेप्रहारादिरूपेसत्यपिविदुषांकोपोनयुक्तः एकात्मकत्वस्यशास्त्रयुक्त्यनुभवैःसिद्धत्वादितिभावः ६७५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवस्फुटयति अत्रेति अत्रदेहांतरेणदेहांतरापकारेविदुषःकथंकोपःस्यात् तत्रहेतुगर्भंविशेषणे सर्वदेहिनःसर्वदेहाःशेषभूताःसंत्यस्यसतथायतआत्मभूतस्यानात्मभावमपोह्यात्मयाथात्म्यमनुभवतः तथाजडस्यशेषत्वेनदर्शनेपिस्वात्मनएवसर्वजडशेषित्वात्स्वांगन्यायेननकोपसंभवइतिभावः ॥ ६७६ ॥ तस्माद्यआत्मवित्सनकोपंकरिष्यतियस्तुकरिष्यतिसनात्मविदित्याह भूतैरिति भूतैःप्राणिभिरपकृतस्ताडनादिकंनीतःसन्यःकुप्यतिसआत्महाअनात्मन्यात्माभिमानात् अतएवनास्तिकःआस्तिकत्वेहिवेदांतैर्निर्णीतात्मैकतायानप्रमाद्येदितिभावः प्रमादलिंगंदर्शयति भूतहिंसकइति नह्यात्मैकत्वदर्शीभूतानिहंतुंशक्नोतीतिभावः॥ ६७७ ॥ तिष्ठत्वात्मतत्त्वदर्शनंयोलोकप्रसिद्धसुखदुःखयोःपुण्यपापकार्यतामपिनिश्चिनुयात्तस्यापिकोपोनयुक्तः दुःखोदयेमत्पापेनैवदुःखंजनितमितिबुद्ध्याकोपपरिहारसंभवा

अत्रकोपःकथंनामविदुषःसर्वदेहिनः॥ आत्मभूतस्यजायेतपुंसोहस्त्यांतरेयथा॥ ६७६॥ भूतैरपकृतोयस्तु क्रुद्ध्यतीहनराधमः॥ आत्महासचविज्ञेयोनास्तिकोभूतहिंसकः॥ ६७७॥ पुण्यापुण्यनिमित्तंतत्सुखदुःखंससाधनं॥ जानातिचेत्कुतःकुप्येदात्मनस्त्वपकारिणि ॥ ६७८ ॥ एतादृशःकथंनामविद्वान्स्याद्भारवाहकः॥ शास्त्रभारंवहत्येषमृद्भारंगर्दभोयथा॥ ६७९॥ अल्पंवाश्रृणुयाच्छास्त्रंनवाकिंचिन्नरोत्तमः॥ द्रुह्येन्नैवचभूतेभ्योयःससर्वविदीरितः॥ ६८०॥ कर्मणामनसावाचाभूतद्रोहपरोनरः॥ नयातिसुखमेतैःसइहलोकेपरत्रच॥ ६८१॥

दित्याह पुण्येति साधनैरिष्टानिष्टपदार्थरूपोपकरणैःसहितंसुखादिकंपुण्यादिहेतुकमितिजानन्नपिकथंकुप्येदिति॥ ६७८ ॥ यस्तुशास्त्रादिनाज्ञात्वापिकुप्यतिसोज्ञएवज्ञेयइत्याह एतादृशइति एतादृशःकोपकर्त्ताकथंविद्वानित्युच्येत विद्यावान्हिविद्वान् कोपनेतुनविद्यास्पर्शः विद्याफलादर्शनादतःस्वानुपकारकविद्यांधारयन्सभारवाहकोवक्तव्यः एतदेवस्पष्टयति शास्त्रेति॥ ६७९॥यस्तुशास्त्रप्रपंचंविनाप्यात्मैक्यंसर्वत्रपश्यतिससर्वशास्त्रार्थविदित्याह अल्पमिति द्रोहोजिघांसा तदुक्तंभारते आत्मानंचेद्विजानीयात्सर्वभूतगुहाशयं श्लोकेनयदिवार्द्धेनक्षीणंतस्यप्रयोजनं क्षीणंसमाप्तंसिद्धमितियावत् गीतासुच आत्मौपम्येनसर्वत्रसमंपश्यतियोर्जुन सुखंवायदिवादुःखंसयोगीपरमोमतइति ॥ ६८०॥ द्रोहस्यानर्थकारितांदर्शयति कर्मणेति एतैर्द्रोहैःप्रतिबंधकैःस्वात्मभूतमपिसुखंनयातिनलभतेलोकद्वयेपीति ॥ ६८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविचारेणस्वात्मानंदप्रवणचित्तत्वादिंद्रायशापोनदत्तइत्याह इत्यादीति ॥ ६८२ ॥ प्रत्युतैवमाह उवाचचेति एवमेवकरवाणि एवंत्व दुक्तानुसारेणअंतर्मुखएवभवेयमित्यर्थः अतिक्रमेत्वदाज्ञायाइतिशेषः ॥ ६८३ ॥ उक्ताज्ञानुष्ठानंतुमदिष्टापत्तिभूतंतवस्वर्गादागतस्याति थेरिष्टसिध्यर्थंतुमयाकिमनुष्ठेयमित्याह अतिथिस्त्वमिति ॥ ६८४ ॥ अहंत्वदिष्टसाधनायसर्वथोद्यतोस्मीत्याह वित्तेनेति ॥ ६८५ ॥ ततःकिंजातमतआह एवमुक्तेइति प्रकृतिंस्वभावं ॥ ६८६ ॥ इंद्रवाक्यमनुवदति उपद्रवमितिचतुर्भिः विप्रर्षभस्यविप्रधर्माननुतिष्ठतो

इत्यादिमनसाधीमान्विचार्यानंदनिर्भरः ॥ समर्थोपिनशक्रायशापंदातुंमनोदधे ॥ ६८२ ॥ उवाचचपुनःश क्रंकरवाण्येवमेवतु ॥ अतिक्रमेकृतेच्छिंधिशिरोमेपाकशासन ॥ ६८३ ॥ अतिथिस्त्वंसदापूज्योममदेवा धिपोमहान्॥ तुभ्यंप्रियंकिमद्याहंकरोमिस्वर्गवासिने॥ ६८४॥ वित्तेनवपुषावापियेनकेनापितेप्रियम्॥ तदहं साधयिष्यामिमाकृथाःसंशयंक्वचित्॥ ६८५॥ एवमुक्तेथशक्रोपिभीतोयमितिचिंतयन्॥ सात्विकींप्रकृतिं प्राप्तोवाक्यमेतदुवाचह ॥ ६८६॥ उपद्रवंनकुर्वेहमपिविप्रर्षभस्यभोः॥ साधोस्तुभवतःकेनकरिष्यामिद्वि जोत्तम ॥ ६८७॥ विश्वरूपादयोविप्रानिहतायतयस्तथा॥ दुरात्मानोविचार्यैवनतुकोपवशान्मया॥ ६८८ अतिक्रमंममाज्ञायामाकृथाब्राह्मणोत्तम ॥ विश्वरूपादिमार्गंत्वमेवंनैवप्रयास्यसि ॥ ६८९ ॥ अपेक्षितंत्व याविप्रकृतंमद्वचनात्पुरा॥ करणीयंततोनास्तिस्वस्तितेस्तुव्रजाम्यहं॥ ६९० ॥ इत्युक्त्वाथगतःशक्रोमुनिस्तत्रै वसंस्थितः॥ गुरुर्वांहियथापूर्वंह्रदोगाधजलोयथा॥ ६९१ ॥

ब्राह्मणस्यापि भवांस्तुतत्रापिसाधुःसर्वोपकारकइतित्वदुपद्रवपराङ्मुखस्यममकिमुवाच्यमित्यर्थः॥ ६८७॥ पूर्वमपियेमयादंडितास्तेपिदुष्ट चित्ततांज्ञात्वैवदंडिताइत्याह विश्वरूपादयइति ॥ ६८८ ॥ फलितमाह अतिक्रममिति मार्गंशिरश्छेदयोग्यतारूपं ॥ ६८९ ॥ यदुक्तम पेक्षितंब्रूहीतितत्तुत्वयामद्वचनाद्विद्योपदेशप्रवृत्तेननिष्पादितमित्याह अपेक्षितमिति ॥ ६९० ॥ उपोद्घातंसमापयति इत्युक्त्वेति वांयु वयोर्गुरुर्मुनिस्तुपूर्णह्रदवदक्षुब्धस्तत्रस्थितइति ॥ ६९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननूक्तविद्यायाइंद्रस्यक्षोभहेतुत्वात्कथमिंद्रेणोक्तमपेक्षितंत्वयापूरितमितीमामाशंकांवारयन्दधीचामुनिनाप्रवर्ग्यकांडयोःसमययोरिंद्रं प्रतिश्रावितत्वात्तत्रनिर्विशेषात्मविद्याव्यतिरिक्तंसर्वमिंद्रेणगृहीतमित्याह ब्रह्मेतिद्वाभ्यां इमांमधुब्राह्मणेननिगमनंनीतांतथाप्रवर्ग्यकांडेआख्यानिरूपणंयस्यास्तादृशींप्रवर्ग्यकर्मांगभूतमधुविद्यारूपां तथाकर्माणिप्रवर्ग्यादीनितथाश्वादेःअश्वमेधीयोऽश्वोग्निर्वाविराड्रूपः आदिपदेनहिरण्यगर्भादिग्रहः तद्वोचराण्युपासनानितथाविविधांस्रष्टिंचहेदस्रौयुवयोर्गुरुःशक्रायप्रोवाचशक्रश्चब्रह्मविद्यांविनातत्सर्वमग्रहीदितियुक्तोऽपेक्षितपदप्रयोगइंद्रस्येतिद्वयोरर्थः ॥ ६१२ ॥ ६१२ ॥ एवंकृतोपोद्घातांप्रग्र्यकांडगतांकथांद्यशीतिश्लोकैरूपबृहयंस्तस्याश्वानुवादकौद्वौमंत्रौतत्रैकःसनरासनयेइत्यादिकःयस्यपूर्वार्द्धार्थइदंवैतदित्यादिवाक्यार्थेनसहितइतिहासोत्थापनायवंशव्याख्या

ब्रह्मविद्यामिमांसर्वांप्रवर्ग्याख्यांतथैवच ॥ कर्माण्युपासनाजालमश्वादेर्विविधांतथा ॥ स्रष्टिंचप्रोक्तवान्दस्रौशक्राययुवयोर्गुरुः॥ ६१२ ॥ शक्रोपिगुरुणादिष्टंयुवयोरग्रहीत्तदा ॥ ब्रह्मविद्यांविहायैवसर्वमेवमहामनाः ॥ ६१३ ॥ एवंस्थितेयुवांकालात्परिपक्वात्ममानसौ ॥ विरक्तौब्रह्मविद्यार्थंप्राप्तौतंमुनिपुंगवम् ॥ ॥ ६१४ ॥ आगत्यचतमब्रूतामावांविद्यार्थिनौगुरो ॥ अधिकारंहिसंपाद्यप्राप्तौतेचरणांबुजम् ॥ ६१५ ॥ अधिकारेहिसंप्राप्तेयुवयोर्ब्रह्मवेदनम् ॥ वक्ष्यामीतित्वयापूर्वंप्रतिज्ञातंगुरोसदा ॥ सत्यंतत्कुरुभोविप्रमानृतंत्वयितिष्ठतु ॥ ६१६ ॥

नानंतरंदर्शितःपरिशिष्टस्योत्तरार्द्धस्यतद्वांइत्यादिद्वितीयमंत्रस्यचार्थःकथोपबृंहणेनैवोपबृंहितोभविष्यतीतिमनसिनिधायतत्रदध्यङ्मुनिराभ्यामश्विभ्यांमधुविद्यामुक्तवानित्येतावदर्थकोभागोवक्ष्यमाणार्थप्रतिज्ञारूपस्तत्रहेतुभूतस्यतदेतयोःप्रियंधामेत्यंशस्यतन्मधुतत्त्वमश्विनोःप्रेमास्पदमासीदित्यर्थकस्यतात्पर्यार्थमश्विनोःश्रद्धातिशयरूपंस्फुटयति एवमितित्रिभिः एवंवर्णितविधयातूष्णींभावेनमुनौदधीचिस्थितेसतिहेअश्विनौतदंतिकंप्राप्तौ कीदृशौ कालात्परिपक्वात्मनीशुद्धरूपेमानसेययोस्तौतथाअतएवविरक्ताविति ॥ ६१४ ॥ आगत्येति तंगुरुं स्पष्टम् ॥ ६१५ ॥ भवताचैवंप्रतिज्ञातंपूर्वमित्याहथुः अधिकारइति ॥ ६१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतदैवैनयोःएतेनोपगच्छतीत्यंशंतन्मधुतत्त्वमेनयोरश्विनोर्दातुमेतेन विचारेणोपगमनंकृतवानित्यर्थकमुपबृंहयन्मुनेर्दधीचःसंशयपूर्वकंनिश्चयमभिनयति युवाभ्यामितिसप्तभिः यतएकतउपदेशपक्षेमरणंनिश्चितं अन्यतोऽनुपदेशपक्षेऽनृतप्रसक्तिरतःपरमंसंशयंगतइतिसम्बन्धः तत्रदृष्टांतः गोचक्रेति यथाशकटेनाक्रांतःपुरुषःअग्रतोगमनेगवांवृषभाणांपादाक्रमणभयंपृष्ठतोगमनेचक्राक्रमणभयमित्यालोच्यविवेकीसंशयंगच्छतितद्वदित्यर्थः ॥६९७॥ संशयमिति पूर्वार्द्धंस्पष्टं अनृतान्मरणंवरमित्युत्तरार्द्धार्थः॥६९८॥ तत्रमरणदुःखादनृतदुःस्यगौरवंवक्तुंमरणदुःखस्यानृतदुःखादपकर्षंलाघवरूपंदर्शयति निश्चितमिति तन्मरणकालिकंदुःखंयत्किंचिन्निमितजन्यंजंतोरावश्यकमिति तथामरणस्यजातंप्रतिव्यापकत्वेनबहुशोऽनुभूतत्वान्नासह्यतारूपउत्कर्षइतिभावः ॥ ६९९ ॥ नचेंद्रवज्रजन्यत्वेनोत्कर्षस्तस्या

युवाभ्यामेवमुक्तःससंशयंपरमंगतः ॥ मरणंत्वेकतःस्वस्यत्वन्यतोऽनृतभाषणम् ॥ गोचक्रमध्यगोयद्वद्द्विधान्संशयमाव्रजेत् ॥६९७॥ संशयंपरमंप्राप्यसइमंनिश्चयंगतः ॥ वरंमेमरणंमाभूदनृतंवचनंक्वचित् ॥६९८॥ निश्चितंजंतुमात्रस्यजातस्यमरणंसदा ॥ अवश्यंभावितदुःखंनृणांकेनापिहेतुना ॥६९९॥ व्याधिर्वाप्यथवा सर्पश्चोरोवाव्याघ्रएववा ॥ विषमग्निर्जलंवापिशत्रुर्वाऽजीर्णमेववा ॥ ७०० ॥ निमित्तंमरणेकिंचिदेतादृक् देहिनोभवेत् ॥ तेषामन्यतमंत्स्येतत्शक्रोमेमरणंप्रति ॥ ७०१ ॥ असत्यवादिनोमेस्यान्नरकोभूरिदुःखदः ॥ कल्पकोटिसहस्रांतेयस्यनास्तिप्रतिक्रिया ॥ ७०२ ॥ जीवन्मृतःपुमान्ज्ञेयोयोऽनृतंवक्तिमोहतः ॥ अत्रनिंदंति मनुजाम्तश्चनरकंव्रजेत् ॥ ७०३ ॥

पिप्रसिद्धनिमित्तांतर्गतत्वादित्याह व्याधिरितिद्वाभ्यां अजीर्णंपरिपाकमप्राप्तमन्नंजलंवा एतादृक्व्याध्यादिविधंकिंचिन्मरणेनिमित्तंभवतिएवंसतिशक्रोयन्मेमरणंप्रतिनिमित्तंभवेदेतदपितेषामन्यतमंमिंद्रवज्रस्यदिव्याग्निरूपत्वादितिभावः ॥ ७०० ॥७०१ ॥ अनृतदुःखस्यलोकद्वयेप्यसह्यतारूपमुत्कर्षमाह असत्येतिद्वाभ्यां मेअनृतदोषंजानतः ज्ञातकृतकर्मणःफलाधिक्यस्यस्मृतिषुप्रसिद्धत्वादितिभावः उत्तरार्द्धस्यचिरभोग्यत्वेतात्पर्यं ॥ ७०२ ॥ जीवन्मृतइति मोहोदेहाद्यभिनिवेशः एतेनमुनेरनृतफलभयप्रदर्शनेनविधीनामधिकारःसकामस्यनिषेधाधिकारस्तुनिष्कामानामपिप्रवृत्तमात्रस्यनिषेधवाक्येषूद्देश्यत्वादितिवाचस्पतिनाप्रपंचितःसिद्धांतःसूचितः ॥ ७०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहोवाचेंद्रेणवाइत्यादेरुपमनेप्यइत्यंतस्यांशस्यार्थमुपबृंहयति इत्यादीतिपंचाशताश्लोकैः सयुवयोर्गुरुरित्यादिकमर्थजातंमनोगतंवा चानुच्चारितंयथाभवतितथाचिंतयित्वायुवांप्रतिवक्ष्यमाणविधयाबभाषेइत्यन्वयः ॥ ७०४ ॥ दधीचोमुनेर्वचनमभिनयति व्याहृतमि त्यादिना मयाबाल्यतोबालभावमारभ्यनानृतमुक्तंस्थाविरेवृद्धत्वेतदनृतंकथमुच्येतेतितथापिमनसाचिंतितंशंकितंकिंचिदनृतस्यकारणं प्रयोजकंवक्ष्यामीति ॥ ७०५ ॥ तच्चकारणमत्रापिमहतीचिंतेत्यादिनावक्ष्यतेतदुपयोगिनंस्वकीयपूर्ववृत्तांतमश्विनौप्रतिश्रावयति अह मित्यादिना अहंवांयुवाभ्यांदेवादीनांसर्वेषामुपकारकत्वेनविदितइत्यर्थः ॥ ७०६ ॥ क्षपयन्निति कीदृशोहं प्रियसमागमेनपुण्यम

इत्यादिबहुधाविप्रश्चिंतयित्वामनोगतम् ॥ युवांप्रतिबभाषेसयुवयोर्गुरुरात्मवान् ॥ ७०४ ॥ व्याहृतंनानृतं पूर्वमश्विनौबाल्यतोपिवा ॥ मयाकथमिदानींतत्स्थाविरेव्याहरिष्यते ॥ चिंतितंयन्मयाकिंचिद्वक्ष्याम्यत्रापि कारणं ॥ ७०५ ॥ अहंवांविदितःशश्वदुपकारकरोमुनिः ॥ देवासुरमनुष्याणामन्येषामपिदेहिनाम् ॥ ७०६ ॥ क्षपयन्पुण्यपापेस्वेप्रियाप्रियसमागमात् ॥ हर्षंचैवविषादंचविहायसमतांगतः ॥ ७०७ ॥ शत्रुर्मित्रमुदासी नोबंधुर्द्वेष्योपिमध्यमः ॥ नकश्चिद्विद्यतेमेत्रसर्वत्रसमदर्शिनः ॥ ७०८ ॥ स्वदेहेस्थावरेचैवजंगमेवाखिले पिहि ॥ श्वदेहेब्राह्मणेदेहेसर्वत्राहंसमःस्थितः ॥ ७०९ ॥ पुमानहंतथास्त्रीचनपुंसकमहंतथा ॥ महाभूतानिपं चापिभौतिकंसकलंत्वहम् ॥ ७१० ॥ अहंमनुरहंसूर्यश्चंद्रोहंवन्हिरप्यहम् ॥ ज्योतींषिचसमग्राणिभूर्भुवःस्व र्महर्जनः ॥ तपःसत्यंसपातालमहमेवनसंशयः ॥ ७११ ॥

प्रियसमागमेनपापंचप्रारब्धरूपंक्षपयन्भोगेनसमापयन्हर्षशोकौविहायसमतायांस्थितइति ॥ ७०७ ॥ समतामेवस्फुटयति शत्रुरिति द्वाभ्यां तत्रशत्रुरपकारंविनापिस्वभावादपकारकरः मित्रमुपकारमनपेक्ष्योपकर्ता उदासीनउपेक्षकः बंधुःसंबंधेनोपकारकः द्वेष्योऽपका रमपेक्ष्यापकर्ता मध्यमोमध्यस्थोविवदमानयोर्द्वयोरपिहितैषी एतेममनसंतीत्यर्थः ॥ ७०८ ॥ स्वदेहइति स्वेअस्मिन्ब्राह्मणदेहेतथाऽ खिलेस्थावरेजंगमेचदेहेतथाशुनोदेहेतथाब्राह्मणेब्रह्मणोहिरण्यगर्भस्यसंबंधिनिदेहेऽहंसमोस्मीति ॥ ७०९ ॥ साम्येहेतुतयासर्वात्मभावं दर्शयति पुमानितिचतुर्भिः तत्रद्वयंनिगदव्याख्यातम् ॥ ७१० ॥ ७११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वात्मतापिविवर्तोपादानतयेत्याह सदसदिति सदसत्स्थूलंसूक्ष्मंचसर्वंमत्तोनभिन्नं स्वमद्रष्टुःस्वमदृश्यवदित्यर्थः ॥ ७१२ ॥ ब्रह्मांडोदुंबरेति ब्रह्मांडरूपोदुंबरगतानांजरायुजादिचतुर्विधशरीरिणामुत्कृष्टापकृष्टानांसर्वेषामहमात्मायतोहंकारेणपरिच्छेदकेनमुक्तइति ॥ ७१३ ॥ अहंकारविमुक्तत्वेहेतुतयाविद्यावलात्सविलासाज्ञानराहित्यमाह नमेकामइति मायापिविकाराणांप्रयोजिकामेनास्ति यतोहंसर्वभेदरहितब्रह्मत्वेनात्मानंदृष्टवानस्मीत्यर्थः ॥ ७१४ ॥ ममात्मैवाज्ञातोजगज्जन्मादिकारणमित्याह उत्पादयामीति स्पष्टम् ॥ ७१५ ॥ तत्रदृष्टांतमाह ऊर्णनाभिरिति यथोर्णनाभिःकीटःस्वात्मनैवस्वशरीरेतरापेक्षामंतरेणैवतंतुसृष्ट्यादिकंकरोतितथाहमपिकरोमिपरंतुअमूर्तत्व

सदसद्वस्तुजातंयन्मत्तोनान्यद्धितद्भवेत्॥ स्वप्नदृष्टंयथासर्वंस्वप्नद्रष्टुर्नचापरम् ॥ ७१२॥ ब्रह्मांडोदुंबरस्थानांच
तुर्विधशरीरिणाम् ॥ उच्चावचानामात्माहमहंकारविवर्जितः ॥ ७१३॥ नमेकामस्तथाक्रोधोलोभाद्याश्चकु
तोमम ॥ नचमायापियेनाहंसर्वभेदविवर्जितः ॥ ७१४ ॥ उत्पादयाम्यहंसर्वंजगज्जातमनेकधा॥ स्थापया
मिचतत्सर्वंसंहरामिचलीलया ॥ ७१५॥ ऊर्णनाभिर्यथातंतूंस्रृजत्यत्तिचपातिच ॥ स्वात्मनैवतथैवाहममू
र्तःसंगवर्जितः ॥ ७१६ ॥ भिन्नानैवचविद्यंतेसंहारस्थितिसृष्टयः ॥ मत्तःस्वप्नदृशोयद्वत्स्वप्नेदृश्यस्यवस्तुनः
॥ ७१७॥ एवंस्थितस्यकस्मिंश्चित्कालेशक्रउपागतः॥ आश्रमंजगदीशोयमनुग्रहकरोमम ॥ ७१८ ॥ सम
यापूजितःपूज्योयथाशक्तिमहेश्वरः ॥ अतिथिःप्रार्थितःकिंतेकरवाणिप्रियंवद ॥ ७१९ ॥ एवमुक्तेसमांप्राह
विद्यायाऽत्यंतदुर्लभा॥ मत्यंप्रयच्छतांविप्रप्रियंचेन्मेकरिष्यसि ॥ ७२० ॥

मनवयवत्वमसंगत्वंचमयिविशेषइति ॥ ७१६ ॥ विवर्त्तोपादानताचोर्णनाभेर्ममविशेषइत्याह भिन्नानैवेति यथास्वमप्रपंचसृष्ट्यादयःस्वमदृशःपुरुषान्नभिन्नास्तथामत्तोजगतइति ॥ ७१७ ॥ एवमिति एवंब्रह्मनिष्ठतयावस्थितस्यममाश्रमंकदाचिदिंद्रोनुग्रहेणागतइति ॥ ७१८ ॥ समयेति सइंद्रोमयापूजितोथचकिंतेप्रियंकरवाणीतिपृष्टश्चेति ॥ ७१९ ॥ एवमुक्तइति एवंमयोक्तेसतिसइंद्रोदुर्लभांब्रह्मविद्यामेवयाचितवानिति ॥ ७२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्तेमयेति एवंतेनेंद्रेणोक्तेसतितस्मैइंद्रायमधुकांडप्रतिपाद्याद्दुर्लभाचब्रह्मविद्यैवोक्तानापराअपरविषयिकेति यतइतिपदस्योत्तरेणसंबंधः ॥ ७२१ ॥ विद्यायादौर्लभ्यमितरसौलभ्यप्रदर्शनेनस्फुटयति सुलभइति यतःस्वर्गेनरकेवावर्त्तमानोविषयउत्कृष्टेऽपकृष्टेवादेशेजातानांकर्मिणांदेहिनांसुलभः अनादौसंसारेऽननुभूतपूर्वोनास्तीतियावत् ब्रह्मविद्यातुसंसारदर्शनरूपलिंगेनज्ञायतेयन्नलब्धपूर्वेतिसैवदुर्लभेतिभावः ॥ ७२२ ॥ एतदेवस्फुटयति आत्मनइति अविद्यादशायांयद्यदात्मभिन्नंसाधनैःसाध्यमभिमतंतत्सर्वंविहितनिषिद्धत्वाभ्यांप्रत्येकंद्विविधाभ्यांविद्याकर्मभ्यांमानसशारीरव्यापाररूपाभ्यांनदुर्लभमिति ॥ ७२३॥ नचाभ्युदयसाधनभूतेज्ञानकर्मणीअपिदुर्लभेतयोरपिवह्वशोज्ञायमानत्वादनुष्ठीयमानत्वाच्चेत्याह बहवइति ज्ञानंमानसंकर्मउपासनात्वेनप्रसिद्धं कर्मेष्टपूर्तादिरूपं कीदृशेद्वे अपिज्ञानकर्म

एवमुक्तेमयातस्मैमधुकांडार्थसंयुता ॥ ब्रह्मविद्यैवदत्तासादुर्लभानापरायतः ॥ ७२१ ॥ सुलभोविषयःस्वर्गेनरकेपिचदेहिनाम् ॥ ब्रह्मलोकेचविष्ठायांजातानांकर्मिणामिह ॥ ७२२ ॥ आत्मनोव्यतिरिक्तंहिप्राप्यतेयेनकेनचित् ॥ विद्ययाकर्मणावापिदुर्लभंनैवतत्स्मृतं ॥ ७२३ ॥ बहवोब्राह्मणायत्रजानंतिज्ञानकर्मणी ॥ ब्रह्मलोकादिसंप्राप्तौहेतुभूतेनदुर्लभे ॥ ७२४ ॥ ब्रह्मलोकेचविष्ठायांशरीरंप्राणिनांध्रुवं ॥ शरीरिणांसुखंयत्स्यादात्मज्ञानविवर्जितं ॥ विषयेंद्रियसंप्राप्त्यातत्सर्वत्रसमंस्मृतम् ॥ ७२५ ॥

णीब्रह्मलोकादिहेतुभूतेअतोनदुर्लभेइति ब्रह्मविदोदौर्लभ्यंतुमनुष्याणांसहस्रेष्वित्यादिनाभगवद्गीतासुप्रदर्शितमितिभावः ॥ ७२४ ॥ लोकेदुर्लभतातस्यप्रसिद्धायत्सजातीयंनलभ्यतेऽन्यथातत्तद्व्यक्तिरूपेणदेशांतरादावर्त्तमानानांघटादीनामपिदौर्लभ्यापत्तेः तथाचशरीरत्वादिनासजातीयानांशरीरादिसाधनानामाध्यासिकसुखादिरूपफलानांचसर्वत्रसाम्यात्कुत्रसांसारिकेदौर्लभ्यं ब्रह्मविद्यायास्तुसविलासाज्ञानध्वंसरूपायाःकिंचिदपिसजातीयंनास्तीतिसैवदुर्लभेत्याशयेनशरीरादिसमतामात्मैक्यज्ञानोपयोगिनींप्रतिपादयति ब्रह्मलोकइत्यष्टादशभिः ब्रह्मलोकादौशरीरंविनाभोगोनास्तीतिप्रसिद्धं तत्रचशरीरिणामात्मज्ञानंविनाविषयेंद्रियसंयोगजन्यंयत्सुखंतत्सर्वत्रसमविशिष्टमित्यर्थः ॥ ७२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंस्थूलशरीरसाम्यंप्रतिपाद्यसूक्ष्मशरीरसाम्यंसर्वत्रदर्शयति श्रोत्रमितित्रिभिः श्रोत्रादीनिज्ञानेंद्रियाणिवागादीनिकर्मेंद्रियाणिअंतःकरणचतुष्टयंप्राणाश्चएतेसूक्ष्मशरीरावयवाःप्रायशोजंगमेषुसमतयाप्रसिद्धाएव कुत्रचिद्विषमाअभिव्यक्तितारतम्येनवर्त्तमानाअपिभासंतइतियावत् इतिद्वयोरर्थः ॥ ७२६ ॥ ७२७ ॥ स्थावरेष्विति एतेवागादयःप्राणांताःस्थावरेष्वपिवर्तंते तथाहि मोक्षधर्मेषु तस्माज्जिघ्रंतिपादपाइत्यादिनाइंद्रियसत्वंस्थावरेषुप्रतिपादितंपरंतुतत्राभिव्यक्तिःस्फुटतानास्तीतिविशेषः ततःसर्वेंद्रियसत्वात्तेस्थावराअपिजंगमाइति ॥ ७२८ ॥ नन्वनभिव्यक्तेंद्रियाणांस्थावराणांकथमभिव्यक्तेंद्रियैर्जंगमैःसाम्यमितिचेन्न व्यापारराहित्यरूपायाअनभिव्यक्तेर्जंगमेंद्रियेष्वपिदृश्यमानत्वेनवैलक्षण्यप्रयोजकत्वादित्याशयेनजंगमेष्वपियत्किंचिदिंद्रियव्यापारकालइंद्रियांतराणांव्यापारराहित्यंदर्शयति गृहे

श्रोत्रंत्वक्चक्षुषीजिह्वाघ्राणाख्यंचतथेंद्रियं ॥ वाक्पाणिपायुचरणशिश्नाख्यानींद्रियाणिच ॥ ७२६ ॥ अंतःकरणसंयुक्ताःप्राणाअपिशरीरिणां ॥ प्रायशोजंगमानांस्युःसमानाविषमाःक्वचित् ॥ ७२७ ॥ स्थावरेष्वपिविद्यंतेत्व्यभिव्यक्तिविवर्जिताः ॥ एतएवततस्तेपिजंगमैःसदृशाःस्मृताः ॥ ७२८ ॥ गृहमध्येस्थितोयद्वत्पुमान्बाह्यार्थवेदनं ॥ मनसाश्रोत्रयुक्तेनकुरुतेनेंद्रियैःपरैः ॥ ७२९ ॥ एवंन्यूनेंद्रियाणांस्याज्ज्ञानंनेंद्रियवर्जनात् ॥ आवृत्तान्येववर्तंतेतेषामन्येंद्रियाणिच ॥ ७३० ॥ एकस्थानस्थितान्येवक्वचित्कार्याणिकुर्वते ॥ पन्नगस्ययथाचक्षुर्गोलकेश्रोत्रचक्षुषी ॥ ७३१ ॥

ति यथागृहांतःस्थःपुरुषोबाह्यार्थमश्वादिकंश्रोत्रेणशब्दरूपलिंगग्राहकेणमनसानुमितिव्यापारकेणयन्निश्चिनोतितत्रचनेंद्रियांतरव्यापारइत्यर्थः ॥ ७२९ ॥ एवमिति एवंगृहमध्यस्थवत्न्यूनेंद्रियाणांबधिरादीनांस्थावराणांवायज्ज्ञानंतदिंद्रियवर्जनादिंद्रियैर्विनानभवतिकिंतुतेषांन्यूनेंद्रियाणामभिव्यक्तेंद्रियभिन्नानींद्रियाणिआवृत्तानिस्वव्यापारेभ्योनिवृत्तान्येववर्तंतइतिबोद्धव्यमित्यर्थः ॥ ७३० ॥ नचकुत्रचिद्गोलकादर्शनादिंद्रियाभावोबोध्यःपरगोलकेपिइंद्रियांतरस्यदर्शनादित्याह एकस्थानेति पन्नगस्यसर्पस्य तथाचसर्वत्रेंद्रियसत्वेनकिंचिद्बाधकमितिभावः ॥ ७३१ ॥ ॥५५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंकरणसाम्यंप्रतिपाद्यतत्फलयोःसुखदुःखयोरपिसाम्यंदर्शयति एकेत्यादिना एकमनेकंवाऽभिव्यक्तमिंद्रियंयेषांतेषांयत्सुखंदुःखंवा जायतेतन्मनोनिष्ठमेवजायतेनान्यनिष्ठमिति तच्चमानसंमनसिभवंसुखंदुःखमेकेंद्रियव्यापाराद्वाभवतुअनेकेंद्रियव्यापाराद्वाभवतुतयोः स्वरूपेणकोपिविशेषइतिद्वयोरर्थः ॥७३२ ॥७३३॥ सुखदुःखसाम्येहेतुंतत्प्रयोजकरागद्वेषसाम्यमाह यत्रेति इंद्रियैरर्थनीयेषुविषयेषुम ध्येयत्रविषयेयस्यदेहिनोरागइच्छातत्रप्राप्तेसुखमेवंयत्रद्वेषस्तत्रदुःखमिति सचरागोयथोत्कृष्टानांस्वशरीरादौतथानिकृष्टानामपिस्वशरी रादौवर्त्ततइतिभावः ॥ ७३४ ॥ यस्ययत्ररागस्तस्यतत्रसुखमित्येतत्स्फुटयति जायतेइतित्रिभिः यस्यप्राणिहिंसनेमृगयादौतथागीतश्र

एकानेकेंद्रियाणांस्यात्सुखंवादुःखमेवच ॥ जंगमानांस्थिराणांचमनस्येवनसंशयः ॥ ७३२ ॥ एकेंद्रियात्प्र जातेस्मिंस्तथानेकेंद्रियादपि ॥ नसुखेनापिदुःखेस्तिभेदःकोपीहमानसे ॥ ७३३ ॥ यत्रयस्यभवेद्रागोद्वेषो वाविषयेषुहि ॥ इंद्रियार्थेषुतत्प्राप्तौसुखदुःखेसमेस्मृते॥ ७३४॥ जायतेव्यसनंयस्यजीवानांहिंसनंप्रति ॥ गी तस्यवातदाप्तौहिसुखंयादृक्प्रजायते ॥ ललनालिंगनेपिस्यात्तादृगेवहिकामिनः ॥ ७३५ ॥ कामिनोयादृगेव स्याद्वधूनांप्राप्तितःसुखं ॥ पुत्रार्थिनस्तादृगेवपुत्रप्राप्तौप्रजायते ॥ ७३६ ॥ पुत्रिणोयादृगेवस्यात्पुत्रप्राप्तौसुखं हृदि ॥ अन्नलाभात्क्षुधार्तस्यतादृगेवप्रजायते ॥ ७३७॥ अनिष्टलाभतोप्येवंदुःखंज्ञेयंसमंसदा ॥ एकानेकें द्रियैर्दस्रौमानसेजायतेहियत् ॥ ७३८ ॥ विष्ठायांयादृशंदुःखमसह्यंजायतेकृमेः ॥ तादृशंब्रह्मलोकेपिमरणा दौप्रजायते॥ ७३९॥ उत्पद्यतेसुखंयादृक्ब्रह्मणःपरमेष्ठिनः॥विष्ठाकृमेस्तादृगेवस्याद्योगादिंद्रियार्थयोः ७४०

वणेवाव्यसनमासक्तिरूपंजायतेतस्यतदाप्तौमृगयादेरेवलाभेयादृशंसुखंजायतेतादृशमेवसुखंललनाकामस्यललनाप्राप्तौजायतेइत्यर्थः ॥७३५॥कामिनइति स्पष्टम्॥७३६॥पुत्रिणइति स्पष्टम् ॥७३७॥द्वेषप्रयुक्तदुःखसाम्यंस्पष्टयति अनिष्टेति हेदस्रौअश्विनौएकानेकेंद्रियै रनिष्टलाभतोयन्मानसेदुःखंजायतेतदप्येवंसुखवदेवसमंसमानाकारंज्ञेयमित्यन्वयः ॥ ७३८ ॥ तदुदाहरति विष्ठायामिति विष्ठायांजात स्यकृमेर्मरणादिकालेयादृशमसह्यंदुःखंजायतेतादृशमेवब्रह्मलोकादावपिमरणादौजायतेइति ॥ ७३९ ॥ सिंहावलोकनन्यायेनसुखसा म्यमुदाहरति उत्पद्यतेइति रागसाम्यादितिशेषः ॥ ७४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचवाह्मपरिग्रहैरपिविशेषस्तेषामपिकल्पितानांसर्वत्रसंभवादित्याह विट्कुमेरिति ब्रह्मणोहिरण्यगर्भस्य अनयोःपरमोत्कृष्टतयाऽपर मोत्कृष्टतयाचप्रसिद्धयोःकेनधर्मेणविशेषइति॥७४१॥ हर्षशोकप्रयोजकौउपचयापचयावपितयोःसमावित्याह जायतेइति एवंसंसार मूलंदेहाभिमानोपितयोःसमइत्याह सुखदुःखकरमिति नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्तीतिश्रुतेः तस्मादशरीरताप्रयोजिका ब्रह्मविद्यैवदुर्लभेतिसिद्धमितिभावः॥ ७४२ ॥ इत्यादीति हेअश्विनौइत्याद्यर्थजातंविद्यादुर्लभतोपपादकंविचिंत्याथएनांब्रह्मविद्यां दुर्लभविद्यांयाचकायशक्रायअतिथयेऽब्रुवमितिसंबंधः॥ ७४३ ॥ श्रुत्वेति सोपिशक्रःश्रुत्वाद्रुष्टंकुपितंचित्तंयस्यतादृशःसन्मेमह्यंगुरुद

विट्कुमेरपिसंत्येवत्यन्नंदाराःसुतास्तथा॥ब्रह्मणोपिविशेषःस्यादनयोःकेनहेतुना॥ ७४१ ॥जायतेम्रियते ब्रह्माविट्कुमिश्चतथैवहि॥सुखदुःखकरंतद्वत्सदेहत्वंसमंद्वयोः॥ ७४२ ॥ इत्यादिमनसास्वेनविचिंत्यैनाम थाब्रुवम्॥ सुदुर्लभांब्रह्मविद्यांशक्रायातिथयेऽश्विनौ॥ ७४३ ॥श्रुत्वाऽदाद्रुष्टचित्तःसन्सोपिमेगुरुदक्षिणां॥ इतःपरंब्रह्मविद्यांकस्मैचिन्मावदद्विज॥स्नेहादिनायदावक्तातदाछेद्मीहतेशिरः॥ ७४४ ॥ अंगीकृतंमयाप्ये तत्तथेतिवचनात्तदा॥अतश्चिंतामहंप्राप्तःकार्येस्मिन्दुर्घटेधुना॥ ७४५ ॥ युवयोर्वचनंदत्तंब्रह्मविद्यासमीर णे॥मयातथैवशक्रायतदभावेसमीरितम्॥ ७४६॥ नवक्ष्यामीतिनियतंनशक्रायसमीरितम्॥ किंतुवक्ष्या मिचेत्त्वंमेशिरश्छिधिमहाबल॥ ७४७॥

क्षिणामदात् तामभिनयति इतइत्यादिना स्नेहादिनाआदिपदेनभयादिग्रहः वक्तावक्ष्यतिभवानितिशेषः॥ ७४४ ॥ अङ्गीकृतमिति एतदिंद्रोक्तं अस्मिन्युवांप्रत्युपदेशरूपेकार्येवक्ष्यमाणविधयादुर्घटेचिंताममास्तीति॥ ७४५ ॥ नन्विंद्रेणनिषिद्धस्यकार्यतैवकथमित्या शंक्योपदेशेप्रवृत्तौमेप्रतिबंधकंनास्तीत्याह युवयोरितिपंचभिः युवयोर्विद्योपदेशेवचनंदत्तमेवतथाशक्रायतस्योपदेशस्याभावेतद्वचनमु क्तंतन्नियतंनवक्ष्यामीत्याकारकंनोक्तंकिंतुवक्ष्यामिचेत्त्वंमेशिरश्छिंधीत्याकारमेवोक्तमितिद्वयोःसंबंधः॥ ७४६ ॥ ७४७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतादृशेचवचनेयद्यहंमृत्युभीरुःस्यांतर्हिनप्रवर्त्तेयमेवम्मृत्योरप्यधिकतयामतादनृतादेवभीरुरहंकथमुपदेशेनप्रवर्तेयमित्याह वक्ष्याम्येवे
ति यतोवक्ष्याम्येवेत्याकारेणयुवाभ्यामुदितंततःसत्यस्यपरिपाल्यत्वान्मरणभयहीनःसन्वांयुवांप्रतिविद्यांवक्ष्यामीति ॥ ७४८ ॥ तत्र
हेतुतयामरणाद्भीतेरनौचित्यमाह केनचिदिति नियताअवश्यंभाविनी तत्रयत्यदिदेवराजोममम्मृत्योःकारणंभवेत्तद्दुर्लभं सत्यंरक्षन्दध्य
ङ्ङाथर्वणोदेवराजादपिनभीतइतिमद्यशःपरिपोषकत्वादितिभावः ॥ ७४९ ॥ अनृतस्यात्यंतानौचित्यमाह सर्वस्वेति सर्वस्यस्वस्यधन
स्यहरणं ॥ ७५० ॥ एवंकृतियोग्यतामुपदेशस्योक्त्वाऽथदुर्घटतामाह अत्रैवेतित्रिभिः अत्रवक्ष्यमाणविधयाप्रवृत्तस्यापिपुनरनृतभाषण

वक्ष्याम्येवेतिसततंयुवाभ्यामीरितंमया॥ततोवक्ष्यामिवांविद्यांमरणाद्भीतिवर्जितः॥७४८॥केनचिद्दिनि
मित्तेनजातस्यनियतामृतिः॥दुर्लभंकारणंमृत्योर्देवराजोममाद्ययत्॥ ७४९॥सर्वस्वहरणंश्रेयोदारापुत्रस
मर्पणं॥ मरणंचनतुश्रेयोमिथ्यावाक्यस्यभाषणम्॥ ७५०॥ अत्रैवमहतीचिंतामिथ्यावाक्यस्यभाषणे॥
ब्रह्मविद्यांयुवाभ्यांचेत्प्रवृत्तेवक्तुमश्विनौ॥शक्रस्तदैवशिरसश्छेदंकुर्यान्नसंशयः॥ ७५१॥केनवक्ष्यामितां
विद्यांशिरोहीनोयुवांप्रति॥पुनर्मिथ्यैवमेवाक्यंभविष्यतिसुदारुणं॥अपप्रतिज्ञोनरकेयास्याम्यज्ञानकारणे
॥७५२॥इत्येवममचिंताद्यवर्ततेकापिनापरा॥बुद्धिमंतौयुवांतस्माद्वदतंकिंकरोम्यहम्॥७५३॥इत्युक्ते
स्वार्थलोभाद्व्यावूचथुस्तंयुवांगुरुं॥माभूच्छक्रादियंभीतिर्गुरोर्दुर्दांतचेतसः॥७५४॥अंगसंधानकरणींजा
नीवोमृतजीवनीं॥विफलंवज्रमेवस्यात्शक्रेणापिनिपातितं ॥७५५॥

प्रसंगेमहतीचिंतास्ति तामभिनयति ब्रह्मेत्यादिना स्पष्टम् ॥ ७५१ ॥ केनेति केनशिरसातांवक्ष्यामीति अज्ञानव्यामोहकारणंफलंयस्य
तादृशेनरके ॥ ७५२ ॥ फलितमाह इत्येवेति यतोबुद्धिमंतौअतोयुवामपिकर्तव्यंवदतमिति ॥ ७५३ ॥ अथतौहोचतुरित्यादिप्रतिद
धतुरित्यंतंकथाशेषमुपबृंहयति इत्युक्तइत्यादिद्वाविंशतिश्लोकैः इतिगुरुणोक्तेसतिहअश्विनौयुवांस्वार्थलोभेनआढ्यौव्याप्तचित्तौसंतौ
तंगुरुंप्रतिइत्थमुचथुः इत्थंकथमतआह माभूदित्यादि दुर्दांतचेतसःशक्रादियमुक्तविधाभीतिरस्मद्गुरोर्माभूत् यतआवांमृतजीवनींविद्यां
जानीवः ययावज्रमेवविफलंस्यादितिद्वयोःसंबंधः ॥ ७५४ ॥ ७५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैफल्यमिति चेद्यदितस्येंद्रवज्रस्यामोघतयाप्रसिद्धस्यतद्विरुद्धंवैफल्यंमोघत्वंभवताइष्टंचिकीर्षतंनभवतितर्हिआवामुपायांतरंकरिष्याव इति ॥ ७५६॥ उपायांतरंनिरूपयतः अश्वोयमितिद्वाभ्यां अयंसंनिहितःकश्चिदश्वोदृश्यतेतस्याश्वस्यशिरस्तवापिचशिरोदृश्यते एवंसति आवामेतेद्वेअपिमस्तकेशिरसीविर्ययेणविनिमयेनस्थापयावः तवशिरोऽश्वग्रीवायामश्वशिरस्तवग्रीवायांचनिदध्वइतियावत् ततस्त्वम श्वमुखेनावामुपदिशेत्यर्थः ॥ ७५७ ॥ शक्रेणेति तस्मिंस्तवग्रीवानिहितेऽश्वशिरसिब्रह्मणोवक्तरिउपदेशकेइंद्रेणच्छिन्नेसतियथापूर्वमश्व शिरोश्वग्रीवायांतवशिरस्त्वद्ग्रीवायामावांस्थापयावइति ॥ ७५८ ॥ एवंकृतेएतानिफलानिभविष्यंतीत्याहथुः एवमिति अश्वोभवांश्च

वैफल्यंतस्यचेन्नेष्टंभवताब्राह्मणोत्तम ॥ आवामुपायमपरंकरिष्यावोत्रतंशृणु ॥ ७५६ ॥ अश्वोयंदृश्यतेत स्यशिरस्तद्वत्तवापिच ॥ छित्वाविपर्ययेणैतेस्थापयावोत्रमस्तके ॥ आवामश्वस्यशिरसाब्रह्मविद्यांसमीरय ॥ ७५७॥ शक्रेणतस्मिन्संछिन्नेब्रह्मवक्तरिमस्तके॥ स्थापयावोयथापूर्वमावांहिशिरसीउभे॥ ७५८॥ एव मश्वोपिमरणंनगच्छेच्चभवानपि॥ आवयोर्गुरुहिंसाचभवतोभूतहिंसनम्॥ मिथ्यावादश्चमरणंनभवेद्ब्राह्म णोत्तम॥ ७५९॥ अंगीचकारत्द्दष्टःसन्नेवमुक्तेगुरुस्तदा॥ सर्वभूतसमोविप्रोयुवयोःस्वार्थलुब्धयोः॥७६०॥ अंगीकृतेथवाक्येस्मिन्गुरुणाहितकारिणा॥ निर्दयौक्रूरकर्माणौयुवांशस्त्रधरावुभौ॥ ७६१ ॥ पशोरिवगु रोस्तस्यशिरश्छित्वामहात्मनः॥ अश्वस्यशिरसासार्धंसंचक्राथेविपर्ययं॥ ७६२॥

मरणंनगच्छेदित्येकंफलं आवयोर्गुरुहिंसानभवेदितिद्वितीयं तथाभवतोऽभूतमयुक्तंहिंसनं अपमृत्युरितियावत् इंद्राशनिमृत्योरपमृत्युत्वे नस्मृतिषुप्रसिद्धत्वादिति सनभवेदितितृतीयं तथाभवतोमरणंमरणरूपतयामतोमिथ्यावादश्चनभवेदितिचतुर्थमित्यर्थः युक्तेक्ष्मादाद्यतेभूत मित्यमरः॥७५९॥ अंगीचकारेति एवंयुवाभ्यामुक्तेसतियुवयोःस्वार्थलुब्धयोर्गुरुर्दृष्टःसन्नंगीचकारयतःसर्वभूतसमः॥७६०॥ अंगीकृतइ ति एवंगुरुणांगीकृतेसतियुवांनिर्दयत्वादिविशिष्टौगुरोःशिरश्छित्वाअश्वस्यशिरसासहविपर्ययंचक्राथेइतिद्वयोःसंबंधः॥ ७६१॥७६२॥ ॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आथर्वणइति आथर्वणोयुवयोर्गुरुर्हयग्रीवःसन्प्रवर्ग्यकांडोक्तानिप्रवर्ग्यादिकर्माणित्वाष्ट्रंमधुचप्रवर्ग्यांगमुक्त्वातद्वन्मधुकांडोक्तमश्वाद्युपासनमुक्त्वाएवंशुद्धांतःकरणेनमुमुक्षुणाहेयंकर्मोपासनंचउक्त्वाब्रह्मविद्यांद्वितीयमंत्रेगोप्यार्थककक्ष्यपदेनोक्तांसमैरयदुपदिदेशयामिंद्रायोक्तवानितिद्वयोरर्थः ॥ ७६३ ॥ ७६४ ॥ उत्तराध्यायोत्थापककांक्षाजनकमाथर्वणवाक्यमनुवदति उवाचचेतिनवभिः समतिमान्दध्यङ्मुनिर्ब्रह्मविद्यायांप्रवर्तनेसंप्रदायप्रवृत्तिविषयकमिदंवाक्यमप्युवाच इदंकिमतआह इतइत्यादि हेअश्विनौइतःपरंमत्कर्तृकोपदेशादुत्तरकालेसाब्रह्मविद्याशंकितेवकथंप्रस्तताभविष्यतीत्याकारकशंकाविषयतामिवगता साका यायुवयोर्वंशेविश्वरूपादियुष्म

आथर्वणोहयग्रीवस्तदैवयुवयोर्गुरुः ॥ प्रवर्ग्यादीनिकर्माणितद्वदश्वाद्युपासनं ॥ ७६३ ॥ हेयंहिवद्धोक्तासब्रह्मविद्यांसमैरयत् ॥ शक्राययामुवाचादावाश्रमेऽतिथयेमुनिः ॥ ७६४ ॥ उवाचचेदंमतिमान्ब्रह्मविद्याप्रवर्तने ॥ इतःपरंब्रह्मविद्यावंशेयायुवयोःस्थिता ॥ ७६५ ॥ तथास्त्रीपुंसयोस्तद्वद्बह्वृचानांमहात्मनां ॥ कौषीतक्यादिकानांस्यात्शंकितेवकुलेश्रुता ॥ ७६६ ॥ इंद्रोयंवज्रपाणिःसन्मांहंतुंनभसिस्थितः ॥ उक्तायांब्रह्मविद्यायांसमग्रायाममुंद्विजं ॥ घातयामीतिसंकल्पात्स्ववाक्यंपरिपालयन् ॥ ७६७ ॥ मद्वचेद्ब्रह्मविद्यांत्वमन्यस्मैकथयिष्यसि ॥ समग्रांततएवाहंहरिष्यामिशिरस्तव ॥ ७६८ ॥ इतिवाक्यंनिजंशक्रःपालयन्नयशोभिया ॥ नभःस्थितोधुनामांसघातयिष्यतिदेवराट् ॥ ७६९ ॥ हतेमयित्रिलोकीस्थाब्राह्मणाभयमागताः ॥ ब्रह्मविद्यांनवक्ष्यंतिपुत्रायापिप्रियायच ॥ ७७० ॥

च्छिष्यपरंपरात्मकेमधुकांडांतेकीर्तितेश्रुता तथायास्त्रीवंशेखिलकांडांतगतेश्रुतातथापुंवंशेयाज्ञवल्क्यकांडान्तगतेश्रुता तथाबह्वृचानामृग्वेदविदांकौषीतक्यादीनांकुलेश्रुतेतिद्वयोःसंबंधः ॥ ७६५ ॥ ७६६ ॥ विद्यायाःशंकितत्वेहेतुमाह इंद्रोयमितिपंचभिः यतइंद्रोयंसमग्रायांविद्यायामुक्तायांसत्याममुंद्विजंघातयामिवज्रहतंकरोमीत्याकारकसंकल्पान्नभसिस्थितःस्ववाक्यपरिपालनायेति हेतौशतृप्रत्ययः ॥ ७६७ ॥ स्ववाक्यंपरिपालयन्नितिस्पष्टीकरोति मद्वदितिद्वाभ्यां मद्वत्मह्यंयथासमयाउपदिष्टातथेत्यर्थः ॥ ७६८ ॥ इतिवाक्यमिति अयशसोऽनृतप्रयुक्ताद्भियाभयेन ॥ ७६९ ॥ हतेमयीति मयिएवंहतेसतिकेचिद्विप्राभीताःसंतःपुत्रायापिनवक्ष्यन्तीति ॥ ७७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामीति केचित्कौषीतक्यादयःसामिअर्द्धमसमग्रामितियावत् वक्ष्यंति केचित्तुएकैकस्यैवशिष्यस्यपुरतःप्रवक्ष्यंति किंकृत्वा इंद्राद्दुर्भयंदु
र्गतमीषद्भयमागम्यप्राप्य भयस्येषद्भावेहेतुमाह कुलेति विद्यावंशदेवस्यपरमात्मनःप्रसादंतपःप्रभृत्युपायेनसंपाद्य ल्यब्लोपेपञ्चमी तथाचे
श्वरानुगृहीताअपिउपदेशकालेइंद्राद्भीताभविष्यंतीतिभावः इंद्रादभयमितिपाठेकुलदेवप्रसादतइंद्रादभयंभयाभावमासाद्यराजमानंया
॥५८॥ ज्ञवल्क्यमित्युत्तरेणसंबंधः॥७७१॥उक्तस्येंद्रभीत्योपदेशसंकोचस्यपर्युदासोयाज्ञवल्क्येबोध्यइत्याह याज्ञवल्क्यमिति याज्ञवल्क्यमेकंद्वि
जंविहायउक्तोपदेशसंकोचोबोध्यइतिसंबंधः कीदृशंयाज्ञवल्क्यं वाजसनेयसंज्ञकंतद्व्युत्पत्तिस्तुवाजैःकेसरैःसनिर्दानंयजुषांयस्यसवा
जसनिरश्वरूपधरःसूर्यःपुराणेवर्णितः सवाजसनिर्भक्तिःसेव्योऽस्येतिसवाजसनेयः नद्यादिभ्योढगितिशैषिकोढक् तत्रहेतुगर्भविशेषणंसू
र्यशिष्यमिति अतएवमहात्मानमित्यादि ॥ ७७२ ॥ यजूंषीति तेनोक्तेनयाज्ञवल्क्योत्कर्षेणइमानिकाण्वादिपंचदशशाखारूपाणियजूं

सामिवक्ष्यंतिवैकेचित्कौषीतकिमुखाद्दिजाः॥एकैकस्यैववाकेचित्प्रवक्ष्यंतिद्विजोत्तमाः॥इंद्राद्दुर्भयमागम्य
कुलदेवप्रसादतः ॥ ७७१ ॥ याज्ञवल्क्यंविहायैकंद्विजंवाजसनेयकम् ॥ सूर्यशिष्यंमहात्मानंसूर्यवद्दीप्ततेज
सं॥ ७७२॥ यजूंषिश्वेतरूपाणितेनेमानिमहीतले ॥ याज्ञवल्क्यस्यनामैकंधारयिष्यंतिसर्वतः॥ ७७३ ॥इ
तिब्रुवाणस्यमुनेर्हयग्रीवस्यदेवराट्॥ शिरोन्यपातयद्भूमौवज्रेणशतपर्वणा ॥ ७७४ ॥ तच्छिरःपतितंदृष्ट्वा
वाजिनस्तुगुरोःशिरः॥समाहृत्ययथापूर्वंचक्राथेगुरुवाजिनोः॥ ७७५॥

षिशुक्लवर्णानितैत्तिरीयसंज्ञककृष्णयजुर्भ्योविलक्षणानीतियावत् एतानिमहीतलेयाज्ञवल्क्यस्यैकंनामधारयिष्यंतिप्रसिद्धिरूपांपुष्टिने
ष्यंति पंचदशशाखाध्यायिषुवाजसनेयिपदप्रसिद्धेरितिभावः ॥ ७७३ ॥ इतिब्रुवाणस्येति शतंपर्वाणिग्रंथयोयत्रतत्तथातेन ॥७७४॥
तच्छिरइति तद्गुरुग्रीवायांस्थापितंवाजिशिरःपतितंदृष्ट्वावाजिनःसकाशाद्गुरोःशिरःसमाहृत्यानीयगुरुवाजिनोःशिरसीयथापूर्वंयुवांच
क्राथेविन्यस्तवंतावित्यर्थः अनयाकथयैतत्सूचितंभवतियदिंद्ररक्षितेयंविद्याऽश्विभ्यामपिमहतायत्नेनलब्धात्यन्तदुर्लभेति अपिचमं
त्रयोरर्थश्चप्रदर्शितः तत्रप्रथमेएतावान्विशेषः ईमित्यनर्थकोनिपातः यत्प्रोवाचेत्यन्वयः द्वितीयमंत्रेतुप्रत्यैरयतंप्रापितवंतौ ऋतायन्सत्यं
पालयन् त्वाष्ट्रंआदित्यस्ययज्ञपुरुषशिरस्त्वेनज्ञानरूपंमधु यदाख्यायिकायज्ञपुरुषस्यशिरोवल्मीकजंतुभक्षितज्याकधनुष्कोट्याछिन्नंत ॥५८॥
त्संधानायाश्विनौदेवैःप्रार्थितावित्यादिरूपाप्रवर्ग्यकांडेगतायच्चकक्ष्यंगोप्यंमधुब्राह्मणोक्तंतदुभयंप्रोक्तवानित्यर्थः ॥ ७७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंप्रवर्ग्यकांडोक्तकथानुवादकयोर्मंत्रयोरर्थोंदर्शितः अथसकलमधुकांडतात्पर्यार्थप्रदर्शकंपुरश्चक्रेइत्यादिमृग्ब्राह्मणसमुदायरूपंग्रंथं व्याकुर्वन्नसंदतमित्यंतस्यतावदर्थमाह ब्रह्मविद्यामित्यष्टभिः हेअश्विनौयागुरुणावांयुवाभ्यांब्रह्मविद्यादत्तायत्कामनयायुवाभ्यांगुरुद्रोहःकृतस्तांयुवयोःस्मृत्यर्थंसंक्षेपेणवदामीति ॥ ७७६ ॥ जगदिति जगतोऽभिन्ननिमित्तोपादानभूतःपरमात्मामहाराजवन्महापुरसमंसमष्टिशरीरंतावच्चक्रेकृतवानिति ॥ ७७७ ॥ ततोव्यष्टिशरीररूपाणिस्वल्पपुराणिकृतवानित्याह चतुष्पदइति चत्वारःपादायासांतास्तथापुरःशरीररूपपुराणि एवमग्रेपि ॥ ७७८ ॥ स्थूलास्विति आसुपूर्षुयथापक्षीनीडेप्रविशन्संकुचद्रूपोभूत्वाप्रविशतितथापरिच्छेदाभि

ब्रह्मविद्यांचगुरुणादत्तामेतांवदामिवां ॥ अश्विनौस्मृतिसिद्ध्यर्थंयुवयोर्हिगुरुद्रुहोः ॥ ७७६ ॥ जगत्कारणभूतोयमात्मासर्वशरीरिणां ॥ महाराजोपमश्चक्रेशरीरंहिपुरोपमम् ॥ ७७७ ॥ चतुष्पदःपुरश्चक्रेद्विपदोपिमहेश्वरः ॥ त्रिपदश्चैकचरणात्यपदाअपिकाश्चन ॥ ७७८ ॥ स्थूलास्वासुयथापक्षीसूक्ष्मात्सूक्ष्मशरीरभाक् ॥ एवमेवायमात्मापिप्रवेशमकरोद्विभुः ॥ ७७९ ॥ पुरियस्मादयंशेतएतांचैषप्रपूरयन् ॥ स्वव्याप्त्यातत एवायंपुरुषःपरईरितः ॥ ७८० ॥ अनेनपुरुषेणैतत्सर्वमेवसमावृतं ॥ अंतर्बहिश्चनभसायद्वद्विश्वंसमावृतं ॥ ७८१ ॥ ओतप्रोतोयथातंतौपटस्तिष्ठतिसर्वदा ॥ एवमेवजगत्सर्वमात्मन्येवप्रतिष्ठितम् ॥ ७८२ ॥

मानलक्षणंसूक्ष्मात्सूक्ष्ममतिसूक्ष्मंरूपंभजन्सन्प्रवेशमकरोदिति ॥ ७७९ ॥ पुरुषपदार्थंद्विधाह पुरीति यस्मादयमात्मा पुरीतिजातावेकवचनं सर्वासुपूर्षुशेतेवसतिततःपुरुषईरितः पुरूशब्दोपपदाद्वसधातोरौणादिकेकप्रत्ययेसंप्रसारणेचसाधुः अथवाएतांपुरंस्वव्याप्त्यापूरयेदिति पुरुषः पृधातोरौणादिकःकुषन्प्रत्ययइति ॥ ७८० ॥ एतंपुरुषमुपाधयःपरिच्छेत्तुंनालमित्याह अनेनेति अनेनपुरुषेणांतर्बहिरवस्थितेनएतत्सर्वंविश्वमाकाशेनेवव्याप्तमिति ॥ ७८१ ॥ आंतरत्वेनव्याप्तौदृष्टांतमाह ओतेति तंतावित्यपिजातावेकत्वं यथासंततैस्तिर्यग्भूतैश्चतंतुभिर्व्याप्तओतःप्रोतश्चपटस्तंतुपुआंतरेपुस्थितस्तथाविवर्त्तोपादानेआत्मनिविश्वंस्थितमिति ॥ ७८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सवाअयमित्यंशस्यार्थंदर्शयति सएवेति योत्रपूर्षुप्रवेशकृन्छुद्धःसएवयुवयोर्ममवान्यस्यवासर्वेषांत्वद्देशेविशेषेणभासमानोस्ति मध्येभासमानस्यप्रवेष्टुरभेदेदृष्टांतः घटेषुप्रविश्यावस्थितंजलमिति ॥ ७८३ ॥ अथरूपंरूपमित्यादेरनुशासनमित्यंतस्यार्थमेवंसयुवयोरित्यतःपूर्वतनेनग्रंथेनोपबृंहयन्नुक्तंदृष्टांतमुपाधिसारूप्यपरतयातावन्निरूपयति एकरूपमिति यथास्वतएकरूपमपिजलंस्थूलत्वादिमतोघटाननुरुध्यतथातथाकीर्त्यतेइतित्रयाणांसंबंधः स्थूलंविशालं तद्विपरीतंसूक्ष्मं तत्रघटेवन्ह्यादिनासंतप्तेजलमपितथा॥ ७८४ ॥ शीतलेइतिस्पष्टं ॥ ७८५ ॥ वाय्विति वायुनाचालकेनयुक्तेघटेतज्जलंचलंभवति तद्विपरीतेघटेनिश्चलमिति सूर्यप्रकाशयुक्तेघटेतज्जलंप्रभाभृद्भास्वरमिति तामसेतमसांधकारेणव्याप्तेघटेतज्जलंतथेति ॥ ७८६ ॥ दार्ष्टांतिकेयोजयति एवमिति एवमात्मापिस्थूलत्वादिभेदैर्यादृशंयादृशं

सएवायंपुरायोत्रप्रवेशमकरोद्धृदि ॥ युवयोर्ममवान्यस्यपयोयद्वद्घटेष्विह॥ ७८३॥ एकरूपंपयःस्थूलेघटेस्थूलंप्रकीर्तितम्॥ सूक्ष्मेसूक्ष्मंचसंतप्तेसंतप्तंतत्रकीर्त्यते ॥ ७८४ ॥ शीतलेशीतलंयद्वद्रजोयुक्तेरजस्वलम्॥ सुगंधेचसुगंधंतद्दुर्गंधंचपरत्रहि॥ ७८५॥ वायुयुक्तेचलंतद्वन्निश्चलंवायुवर्जिते॥ सूर्ययुक्तेप्रभाभृत्तत्तामसेतामसंपुनः॥ ७८६॥ एवमात्मापियादृक्स्यात्शरीरंतादृशोभवेत्॥ स्थूलःसूक्ष्मोजडोधीमान्श्रीमान्निर्धनएवच॥ उत्कृष्टश्चनिकृष्टश्चसुखीदुःखीतथैवच॥ ७८७॥ इत्यादीन्बहुधाधर्माननुपाधेरेवमन्यते॥ आत्माह्येषविमूढःसन्कामीवचवधूगुणान्॥ ७८८॥ प्रियाचिंतासमाविष्टाभवेच्चेत्कामिनोपिहि॥ चिंताविष्टचलच्चित्तश्चलतीवसकामुकः॥ ७८९॥ एवंबुद्धिशरीरादिधर्मिधर्मविवर्जितः॥ अनादिमाययामूढआत्मास्वात्मनिमन्यते॥ ७९०॥

शरीरंतत्रतादृशोभवति एवंभावएवचास्यप्रतिरूपपदेनश्रुतावुक्तइतिभावः उपाधिसारूप्यमभिनयति स्थूलइत्यादिना॥ ७८७ ॥ इत्यादीनिति इत्यादीनुपाधेरेवधर्मान्स्वधर्मतयाआत्मामन्यतेयतोविमूढः अत्रैवापरोदृष्टांतः कामिन्याधर्मान्हर्षशोकादीनात्मनिमन्यमानःकामीति ॥ ७८८ ॥ कामिदृष्टांतंविशदयति प्रियेति कामिनःप्रियाचेद्यदिचिंतयासमाविष्टाव्याप्ताभवतितदासकामीचिताविष्टंचलच्चचित्तंयस्यएतादृशःसंश्चलतीवेतिव्यवह्रियतेइति ॥ ७८९ ॥ दार्ष्टांतिके एवमिति एवंमायामूढआत्माबुद्ध्यादिधर्मानात्मनिमन्यते कीदृशः बुद्धिशरीरादयोधर्मिणोयेषांतादृशैधर्मैर्विवर्जितः ॥ ७९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तार्थेसमन्वितायाःसर्वाणिरूपाणिविचित्त्येत्यादिकायाःश्रुतेरर्थंसंगृह्णाति भौतिकानीतिद्वाभ्यां भौतिकानिशरीरादीनितत्कारणानि भूतानिचश्रुतौरूपपदेनोक्तानिसृष्ट्वासंचितानिकृत्वातत्रसृष्टेषुएकतांतादात्म्याभिमानंगतःसन्शब्दप्रपंचंचसृष्ट्वाप्रकटीकृत्यसृष्टानांनामानिविदधेकृतवानिति ॥ ७९१ ॥ वाचेति वाचेतींद्रियांतराणामप्युपलक्षणं तथाचवागादींद्रियैस्तथावचसोवागिंद्रियादेःप्रेरकयाबुद्ध्याचैक्यंप्राप्यवदनादिव्यवहारंकुर्वंस्त्वद्रूपोमद्रूपोन्यरूपश्चमहेश्वरोविद्यतेइति ॥ ७९२ ॥ एवमध्यारोपितस्यापवादार्थमयमस्यनानाभावःशास्त्राचार्यादिभेदद्वाराबुद्ध्यभिव्यक्तरूपेणस्वरूपस्यव्याख्यानायश्रुतौप्रतिचक्षणपदोक्तायबोध्यइत्याह यःसएवेति सउपाधितादात्म्यापन्नोवर्णितःसएवस्वरूपेणभेदलेशैरपिवर्जितःसन्यद्भिदामसृजत्तत्स्वस्वरूपस्यदर्शनायैवेति कीदृशस्यस्वरूपस्य ऐंद्रस्यइंद्रस्यसर्वात्मदर्शिनःपरमेश्वरस्यसंबंधिनः ॥ ७९३ ॥ इंद्रपदार्थमैतरेयेवर्णितंस्मारयति सृष्ट्वेति समग्रंजगत्सृष्ट्वाइदंविश्वमात्मदृशाआत्मदृष्ट्यात्मत्वेनयतोदृष्टवांस्तेनेंद्रसंज्ञोजातइति ॥ ७९४ ॥ नानाभावोपाधीनांबाधयोग्यतांवक्तुंमायामयत्वमाह माययेति एकरूपआत्माआत्मनोमाययाबहुरूपयाबहुरूपोभूत् यथालोकेएकरूपोमायावीऐंद्रजालिकोगजादिबहुरूपोभवतीति ॥ ७९५ ॥ भेदस्यमायामयत्वंद्रढयितुंप्रकारांतरेणानुपपत्तिमाह अन्यदित्यादिदशभिः समर्थोपिनरोऽन्यदन्यस्वभावकंवस्तुअन्यस्वभावतांनेतुंनशक्नुयात्किंतुधीमान्नरस्तस्यैवधर्मिणःकनकादेर्विशेषंकुंडलादिरूपंकुरुतेआविर्भावंनयतीत्यर्थः ॥ ७९६ ॥

भौतिकानिसभूतानिसृष्ट्वातत्रैकतांगतः॥ सृष्ट्वाशब्दप्रपंचंचनामानिविदधेप्रभुः॥७९१॥वाचावचःप्रेरकयाधियाचैक्यंसमाप्यसः॥ विद्यतेत्वमहंतद्वदन्योप्येषमहेश्वरः ॥ ७९२ ॥ यःसएवस्वरूपेणभेदगंधविवर्जितः॥ऐंद्रस्यस्वस्वरूपस्यदर्शनायासृजद्भिदां॥७९३॥सृष्ट्वाजगत्समग्रंसइदमात्मदृशापुमान्॥दृष्टवान्येनतेनाभूदिंद्रनामापरःपुमान्॥७९४॥ माययाबहुरूपोभूदात्मनोबहुरूपया॥ मायावीचैकरूपःसन्हस्तिव्याघ्रादिरूपभाक्॥ ७९५॥ अन्यदन्यात्मतांनेतुंसमर्थोपिनशक्नुयात्॥ किंतुतस्मिन्विशेषंहिकुरुतेधीधनोनरः॥७९६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यस्यान्यात्मतायाअकरणेदृष्टांतद्वयमाह हेमीति यथाकारूणांशिल्पिनांशतमपितंतुमयसूत्रस्यसुवर्णभावंकर्त्तुंनशक्नोतितथाकुंभकाराणांसहस्रंकाष्ठस्यमृद्भावंकर्तुंनशक्नोतीति ॥ ७९७ ॥ ननुयद्यन्यद्वस्तुअन्यन्नभवतिकथंतर्हिधातुविद्याविदस्ताम्रादिकंस्वर्णादिभावंनयंतःप्रसिद्धाइत्यतआह धात्विति धातुवादेनधातुमारणादिप्रतिपादकशास्त्रानुसारेणयेधातौताम्रादौआशुशीघ्रंधातुतांधात्वंतररूपतांकुर्वंतितेप्येतांधात्वंतरतांशशशृंगवदसतींनकारयंति प्राकृतेथैंणिच् नकुर्वंतीत्यर्थः असदुत्पत्तौविशेषाभावाच्छशशृंगादेरप्युत्पत्त्यापत्तिः नासतोविद्यतेभावइत्यादिस्मृतिविरोधश्चस्यादितिभावः ॥ ७९८ ॥ कथंतर्हिधातुवादिनोऽसदुत्पत्तिमन्यंतेइतिचेद्भ्रमादित्याह किंत्विति किंतुतस्यैवताम्रादेर्यत्पूर्वरूपंरक्तिमादिकंतस्यसंक्षयात्तिरोभावात्परंपूर्वरूपभिन्नंपीतिमादिकंयज्जायतेप्रादुर्भवतितत्रधर्म्यभेदेपिधर्मांतरोत्पत्तौसत्यांतेषांधातुवादिनामन्यदिदमित्याकारकोभ्रमोभवतीति ॥ ७९९ ॥ तस्माद्धर्मीमृदादिरूपोनकदाचिदन्यथाभवति धर्मैःपिंडघटादिभिरागमापायिभिस्तादात्म्यमात्रेणान्यथाभावव्यवहारंभजतइत्याह ततइति ततउक्तयुक्तेः यन्मृत्सुवर्णादिरूपंवस्तुस्वभावोयादृशमस्तितत्तादृशमेवसदास्तिकालांतरेप्यन्यथानभवति तर्हिदंडादिकारकवैयर्थ्यमतआह विशेषमिति किंतुतद्वस्तुरूपंविशेषंपिंडादिधर्मात्मकंकारकैर्गच्छतीतिनकारकवैयर्थ्यंनवाव्यवहारानुपपत्तिरितिभावः ॥ ८०० ॥ उक्तंविशेषंसांख्यादयउत्पत्तेःपूर्वमपिसंतंतथावस्तुस्वभावेनवास्तवभेदाभेदशालिनंचमन्यंतेतथानमंतव्यमितिसूचयन्वक्ष्यमाणमायामयत्वोपपत्तयेतस्यवस्तुस्वभावाद्बहिर्भावमाह विशेषइतिचतुर्भिः उक्तोविशेषोवस्तुनःस्वभावोनभवतीतिप्रज्ञा तत्रहेतुंव्यापकत्वाभावमाह अस्येति अस्यविशेषस्यतस्यवस्तुनःस्वभावत्वेसतितद्वस्तुतदपायेविशेषापायेनभवेन्नदृश्येतेति विषयेणविषयिणोलक्षणात् दृश्यतेतुघटभावंविनापिपृथिवीत्यव्यापकोघटोनपृथिवीस्वभावइतियावत् ॥ ८०१ ॥

हेमीकर्तुंनशक्नोतिसूत्रंकारुशतंतदा ॥ काष्ठमेकंमृदंतद्वत्कुंभकारसहस्रकम् ॥ ७९७ ॥ धातुवादेनयेधातौकारयंत्याशुधातुतां ॥ कारयंतिनतेप्येतामसतींतत्रकर्हिचित् ॥ ७९८ ॥ किंतुतस्यैवपूर्वस्यरूपादेःसंक्षयात्परम् ॥ रूपादिजायतेतत्रतेषामन्यदितिभ्रमः ॥ ७९९ ॥ ततोयद्यादृशंरूपंतादृशंतन्नचान्यथा ॥ कालांतरेपिभवति विशेषंकिंतुगच्छति ॥ ८०० ॥ विशेषोवस्तुनोनायंस्वभावःक्वापिकस्यचित् ॥ अस्यतस्यस्वभावत्वेतदपायेनतद्भवेत् ॥ ८०१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्स्फुटयति प्रकाशत्वस्येति यद्वत्तेजःस्वभावस्यप्रकाशस्यापायेऽपगमेसतितेजसोप्यपायोदृश्यतेतद्वद्विशेषस्यवस्तुस्वभावत्वेविशेषापायेवस्तुनोऽपायःस्यादिति ॥८०२॥ नचैवंदृश्यतइतिसोदाहरणमाह अपायेहीति हियतोविशेषस्यापायेसतिएषवस्तुनोऽपायोऽत्रलोकेपि नदृश्यतेयतोघनसंज्ञकमूर्तत्वस्वभावापृथ्वीमृत्पिंडभावमपनीयघटीकृताघटभावंनीतासतीपिंडाख्यविशेषापगमेपिस्वस्वभावंमूर्तत्वंनजहातिनत्यजतीतिप्रसिद्धं पृथिव्यामूर्त्तस्वभावताचमूर्तिर्भूमिःस्नेहोजलमित्यादिनायोगभाष्येउक्ता ॥ ८०३ ॥ एवंचसांख्याभिमतंवस्तुसत्वेविशेषसत्वंनिरस्तमित्याह ततइति ततःवस्तुसत्वेप्यदर्शनात्विशेषआगंताआगमनशीलःनिमित्ततंत्रइतियावत् सर्वत्रबोध्यः आगंतुकश्चपूर्वसिद्धस्यवस्तुनःकथंस्वभावःस्यात् नह्यागंतुकंव्याघ्रत्वंमायाविनःस्वभावःस्वरूपमिति ॥ ८०४ ॥ एवंविशेषस्यस्वभावाद्बहिर्भावंप्रसाध्यतस्यमायामयत्वंस्फुटयन्सदसद्भ्यांवैलक्षण्यमाह विशेषइति सविशेषोयदिवस्तुवत्सन्स्यात्तर्हिवस्तुस्वभाववन्नापेया

प्रकाशत्वस्ययद्वत्स्यादपायेतेजसःसदा ॥ अपायस्तद्वदेवस्यादपायोवस्तुनःसदा॥ ८०२॥ अपायेहिविशेषस्यनैवमेषोत्रदृश्यते॥ घटीकृतायतःपृथ्वीमूर्तत्वंनजहातिसा॥ ८०३॥ ततोविशेषोविज्ञेयआगंतासर्ववस्तुषु॥ आगतोनस्वभावःस्यात्कोपिकस्यापिवस्तुनः॥ हस्तित्वंनस्वभावःस्याद्यथामायाविनोऽधुना॥८०४॥ विशेषोवस्तुसंश्चेत्स्यान्नापेयात्सस्वभाववत्॥ अपैतिचततोऽसन्स्यात्संश्चैवंयत्प्रतीयते॥ ८०५॥ इंद्रियाणांहिसंयोगेनरिशृंगंनदृश्यते॥ ननथायंततोमायातस्यहेतुःप्रकल्पिता॥ ८०६॥ अत्यंतासतएवास्यप्रतीतिर्यानसंभवेत्॥ इंद्रियैस्तन्निमित्तस्यसंज्ञामायेतिकीर्तिता ॥ ८०७॥

न्नवाध्येतपरंतुसविशेषोऽपैतिबाध्यतेएवततोऽसन्सद्विलक्षणःस्यात्तथासन्नसद्विलक्षणश्चस्यात् यत्यतःएवंसद्रूपेणप्रतीयतेइति ॥८०५॥ योहिअसन्भवतिसनप्रतीतिविषयोभवतियथानरशृंगमित्याह इंद्रियाणामिति असन्नृशृंगमिंद्रियसंयोगेननदृश्यतेइतिप्रसिद्धं अयंविशेषस्तुतथानृशृंगवद्भानाविषयोनभवतिततःसदसद्विलक्षणत्वेनमिथ्यात्वात्तस्यविशेषस्यहेतुतयामायाकल्पितेति ॥८०६॥ विशेषनिमित्तभूतांमायांनिरूपयति अत्यंतासतइतिदशभिः अस्यविशेषस्यवस्तुतोऽत्यंतासतएवयाप्रतीतिर्दृष्टिरसंभवंतीअनुपपत्तिशालिनीतन्निमित्तस्यासदर्थप्रतीतेर्यन्निमित्तस्यमायेतिसंज्ञोक्ता सनिमित्तस्येतिपाठेसनिमित्ततयाप्रसिद्धस्यवस्तुतोऽत्यंतासतःशुक्तिरूप्यादेर्ययाप्रतीतिःसैवमायेतिकार्यद्वारेणमायालक्षणंवोध्यमिति ॥ ८०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुअत्यंतासन्नपिविशेषोभावविषयोभवतिनतुनरश्रृंगमित्यत्रकिंनियामकमितिचेन्मायैवेत्याह असिद्धेइति ननुश्रृंगस्यविशेषस्यचभेदे सर्वथाऽसिद्धेऽनुपपन्नेपिसत्येषनृश्रृंगविशेषयोर्भेदोमाययैवाघटितघटनापटीयस्याकल्प्यतेउपपत्तिमिवनीयते नकेवलंविशेषोऽसतस्तद्भेदश्चएतद्वयमेवमाययाकल्प्यतेकिंतुएषामायापिमाययैवकल्प्यतेअसत्वाविशेषादिति तदुक्तंअविद्यायामिहासित्वाअविद्यास्तीतिकल्प्यते ब्रह्मदृष्ट्यात्वविद्येयंनासीदस्तिभविष्यतीति ॥ ८०८॥ एतत्स्फुटयति गुहायामिति गुहायांव्याघ्रवत्प्रमाणैरनुपलभ्यत्वेनासतीमायामाययैवकल्पितेति ॥ ८०९ ॥ मायासाधिकांप्रतीतिंनिदर्शयति असतइति अस्यशुक्तिरूप्यात्मकविशेषस्यासतोनृश्रृंगादेःसकाशात्कुतोभेदइतिपृष्टेसतियाऽज्ञानांधीर्नजानीमइत्यादिरूपासैवदुर्घटत्वात्स्वप्रकाशात्मनिमायामायासाधिकेत्यर्थः ॥ ८१० ॥ अस्यादुर्घटत्वंदर्श

असिद्धेसर्वथाभेदेनरश्रृंगविशेषयोः॥कल्प्यतेमाययैवैषमायाप्येषाऽसतीपुनः॥८०८॥ गुहायांव्याघ्रवन्नात्रमायानामास्तिकाचन॥शशश्रृंगसमाप्येषाकल्पितामाययैवहि॥८०९॥ असतोस्यकुतोभेदइत्युक्तेयाऽज्ञधीर्भवेत्॥ सैवमायेतिविद्वद्भिःकीर्तितादुर्घटासदा॥८१०॥ नविद्यतेस्वयंचैषाभवेद्भेदेपिकारणम्॥ आवृणोतिचनोज्ञानंमायायागमनात्ततः॥८११॥ आनंदात्मातुसोऽसंगःस्वप्रकाशैकरूपभृत्॥ स्वसजातिविजात्युत्थभेदगंधविवर्जितः॥८१२॥

यन्मायापदस्यचतुर्विधास्यांप्रवृत्तिरितिसूचयति नविद्यतइति याएषास्वयंनविद्यतेऽतोमाया माशब्दस्यनिषेधवाचित्वाद्यामाकालत्रयेपिनास्तीत्यर्थसमन्वयात् तथायतोभेदेकार्यकारणादिरूपेकारणंहेतुर्भवतिततोमाया मामानेइतिधातोरौणादिकेयप्रत्ययेसाधु मिमीतेवस्तुपरिच्छेदसंज्ञंभेदंकुरुतेइतिमायाइत्यर्थसमन्वयात् तथानोऽस्माकंस्वरूपभूतंज्ञानमावृणोतिततोमाया डुमिञ्प्रक्षेपेइत्यतःपूर्ववद्यप्रत्ययेसाधु मिनोतिस्वरूपप्रकाशंप्रक्षिपतिआवरणलक्षणंपरिभवंनयतीत्यर्थसमन्वयात् तुरीयमर्थंदर्शयति गमनात्ततइति ततोज्ञानाद्धेतोर्गमनादपसरणाच्चमाया मयाप्रमयायातीतिमायाइत्यर्थसमन्वयादित्यर्थः ॥ ८११ ॥ उक्तंव्युत्पत्तिचतुष्टयंपंचभिर्विशदंकुर्वंस्तत्रनविद्यतेस्वयंचैषाइत्येतद्दर्शयति आनंदात्मेति यतआत्माऽसंगचिदानंदाद्वितीयरूपएववर्ततेतत्रकुतोमायायाःसंभवइतिभावः ॥ ८१२ ॥ ॥६१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेद्भेदेपिकारणमित्येतद्दर्शयति एवमिति एवंस्वभावोवर्णितानंदादिस्वभावोप्यात्माजगतःकारणमभूत्तथाजगदाकाशादिप्रपंचरूपोपि यतोऽभूत्ततोहेतोस्तत्रवर्णितरूपेप्यात्मनिवैदिकैर्मायाकल्पिता ॥ ८१३ ॥ तुरीयांव्युत्पत्तिंविशदयति जगज्जनाविति त्रिभिः यदायतोवा इमानिभूतानिजायंतइत्यादिशास्त्राज्जगतोजनिस्थितिसंहारेषुतटस्थलक्षणभूतेषुयोगःसमाधिःक्रियतेतथाजगत्यपिअस्तिभातिप्रियंरूप मित्याद्यनुसारेणनामरूपेपरिहृत्यसमाधिःक्रियतेतथाउक्तात्मनिसच्चिदानन्दरूपेस्वरूपलक्षणपरशास्त्रानुसारान्महावाक्यानुसाराद्वाय दासमाधिःपरिनिष्ठताप्रमेतियावत् क्रियतएवंयोगेक्रियमाणेमायाऽऽशुशीघ्रंयातिनिवर्त्ततेसूर्येतमोवदित्यर्थः तथाचप्रमयापसरणंप्रमा तःपूर्वंब्रह्मात्मस्वरूपावरणंचसिद्धमितिभावः ॥ ८१४ ॥ अज्ञानमिति ततएवप्रमानिवर्त्यत्वादेवएतदज्ञानंवेदवादिभिर्मायेतिकथितं अ ज्ञानस्यबाधयोग्यतायांहेतुगर्भंविशेषणं आत्मनोब्रह्मरूपिणोविशेषभावइति निर्विशेषस्यब्रह्मात्मनोविशेषभावरूपमित्यर्थः तथाच

एवंस्वभावोजगतःकारणंजगदप्यभूत्॥यतस्ततोबुद्धिमद्भिर्मायातत्रापिकल्पिता॥८१३॥ जगज्जनौस्थितौ वापिसंहृतौवाजगत्यपि ॥ उक्तात्मनितथायोगेआशुयातितमोयथा ॥ ८१४ ॥ अज्ञानंततएवैतदात्मनो ब्रह्मरूपिणः॥ विशेषभावोमायेतिकथितंवेदवादिभिः ॥ ८१५ ॥ मादृशोबुद्धिमान्दसौयत्रयत्रकरोतिमां ॥ तत्रतत्रनजानातिमायेत्येषाततोभवेत् ॥ ८१६ ॥ मानामनंतरूपत्वादेकासाबहुरूपिणी ॥ बभूवतेनमाया भिरिंद्रोसौचेष्टतेसदा ॥ ८१७ ॥

कथंनबाध्यतेतिभावः ॥ ८१५ ॥ तुरीयव्युत्पत्तौविद्वदनुभवंसंवादयति मादृशइति बुद्धिमान्विवेकीयत्रयत्रमांप्रमांकरोतितत्रदीपेनां धकारमिवमायांयतोनजानातिनपश्यतिततोमायेतिसंज्ञातुरीयव्युत्पत्त्यासमन्वितेति ॥ ८१६ ॥ सामायालाघवेनमायांतुप्रकृतिंविद्या दितिश्रुत्यनुसारेणचएकैवकल्प्यते प्रकृतश्रुतौमायाभिरितिबहुवचनंतुव्यावहारिकसाधारणप्रमाव्यक्तिभेदेननिवर्त्यतूलावस्थादिपदवा च्यांशभेदाभिप्रायेणेत्याह मानामिति मानांप्रमाणानांघटादिरूपानेकविधोपाध्यवच्छिन्नचैतन्यगोचराज्ञानविरोधिनीनामनंतत्वात्सा मायाएकापिबहुरूपिणीबभूव एवंमायापदार्थंप्रपंचेनोपपाद्यवाक्यार्थमाह तेनेत्यादिना तेनोक्तविधयामायायास्तद्बहुत्वस्यचोपपन्नत्वे नएकोदेवोमायाभिश्चेष्टतेनानारूपभावलक्षणांचेष्टांकुरुते सदाकालत्रयेपीत्यर्थउपपन्नइतिशेषः ॥ ८१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायथैवात्मनोनेकरूपतानवस्तुतइत्यत्र विद्वदनुभवमपिसंवादयति एकेति वस्तुतएकरूपोपिदेवोमाययानटवद्बहुरूपोऽभूदित्येवंसर्वविद्वद्भिर्बादरायणादिभिःकथ्यते कीदृशैः भ्रष्टमायैर्भ्रष्टाप्रमयानिवृत्तामायायेषांतेतथातैः ॥ ८१८ ॥ तस्यनानारूपतांयदभिदधतिबुधास्तदेकरूपतामध्यारोपापवादन्यायेनस्फुटयितुमेवनतुतेषांनानारूपतायांतात्पर्यं नानारूपताद्यभिधानप्रकारास्तूपेयप्रतिपत्त्यर्थाउपायाअव्यवस्थिताइतिन्यायेनानियताइतिसूचनेनवक्ष्यमाणेंद्रियवृत्त्युपाधिभेदाध्यारोपेपौनरुक्त्यशंकांवारयति विशेषानितिचतुर्भिः एतेआत्मनिरूपणेप्रवृत्ताविद्वांसोलौकिकविविधप्रमाणैःसिद्धानूभेदान्वदंतिअनुवदंति तेषांव्याख्यानकौशलंदर्शयति पदेति ॥ ८१९ ॥ कारणइति तत्रकारणेलौकिकप्रमाणानांकुंठतांमंदप्रसरतामालोच्यतेमहाधियःसर्वव्यवहारोपपादिकामेकांमायामेवकारणतयाकल्पयंतिन

एकरूपोपिदेवोसौनानारूपोयथानटः॥ विद्वद्भिःकथ्यतेसर्वैर्भ्रष्टमायैर्महात्मभिः॥ ८१८॥ विशेषान्हिवदंत्येतेकार्यकारणसंश्रयात्॥ प्रमाणैर्विविधैर्विप्राःपदवाक्यविशारदाः ॥ ८१९ ॥ कारणेकुंठतांदृष्ट्वाप्रमाणानांमहाधियः॥ कल्पयंत्यत्रतेमायांव्यवहारप्रसिद्धये ॥ ८२० ॥ हेतुमेकंविधायैतेप्रमाणकुशलाद्विजाः॥ सर्वमेववदंत्येतत्शिष्यबुद्धिविवृद्धये॥ ८२१ ॥ देहभेदोदधीचातोयुवयोर्वर्णितःपुरा ॥ आत्मनोभिन्नताहेतुस्तथान्योपिमहात्मना॥ तत्रेंद्रियकृतोभेदएवंतेनसमीरितः ॥ ८२२॥ यथास्वर्गगतेंद्रस्यमायाभिर्बहुरूपिणः॥ रथेषुवाजिनोयुक्ताविघ्नंतेवायुवेगिनः ॥ ८२३॥

तुकार्यभेदवत्कारणभेदंनानारूपतार्थमनुवदंति वर्णनस्यलोकव्युत्पादनार्थत्वाल्लोकानांचकारणभेदौदासीन्यादितिभावः॥ ८२० ॥ हेतुमिति तस्माद्धेतुंमायारूपंकारणमेकमेवविधायमनसिकृत्वा यद्वाहेतुंफलमद्वैतबोधरूपमेकमुद्देश्यंकृत्वासर्वमेवाध्यारोपप्रकारभेदंवदंति नानाप्रकारकथनफलंशिष्यबुद्धिविवृद्धिरिति ॥ ८२१ ॥ फलितमाह देहेति अतउक्ताभिप्रायेणदधीचाथर्वणेनदेहभेदआत्मभेदारोपहेतूरूपंरूपमित्यादिवाक्येनयुवयोःप्रबोधार्थंवर्णितः तथान्योपिविषयेंद्रियादिभेदस्तुल्यन्यायेनसूचितइति तत्रेति तत्रसूचितभेदानांमध्येइंद्रियकृतोभेदएवंवक्ष्यमाणप्रकारेणयुक्ताइत्यादिवाक्येनदर्शितः ॥ ८२२ ॥ तत्रदृष्टांततावदाह यथेति यथाप्रसिद्धेंद्रस्यत्रिलोकीगतनानाकार्यार्थंनानारूपधारिणोरथेषुनानाविधामहावेगिनोऽश्वायुक्ताःसंलग्नाःसंति ॥ ८२३ ॥ ॥ ६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति एवंसंसारगतस्यात्मरूपेंद्रस्यदेहरूपेषुरथेषुयुक्ताइंद्रियरूपाअश्वाःश्रुतौहरिषदोक्ताःसंति अतिबलाअतिदुर्जयाः॥८२४॥देहइति एकत्रापिदेहेइंद्रियाणांप्रत्येकंवृत्तिभेदाद्दशकेदशसंख्यापरिमितेगणेशतंभेदाएवंशतेंतर्गताःसहस्रंभेदास्तथासहस्रेऽयुतमिति ॥८२५॥ एवमिति एवमवांतरभेदैरनंताइंद्रियाश्वाअंतःकरणस्यवृत्तीर्भिन्दानाअंतःकरणेप्रतिबिंबितस्यात्मनोभेदकाइत्यर्थः संवंधाइतिपाठः॥८२६॥ एवमध्यारोपितस्येंद्रियभेदस्यायंवाइत्यादिनोक्तमपवादंदर्शयति भेदैरिति देवआत्मायैर्भेदैर्भिद्यतेतत्सकलाश्रयस्तेषांसकलानांभेदकानांसप्रपंचेंद्रियाणामाश्रयोविवर्तोपादानतयाधिष्ठानमित्यर्थः अतएवनेतिनेतीतिकल्पितनिरासेनसर्वभेदविमुक्तोऽवधारितइति एतेनश्रु

एवंसंसृतिगेंद्रस्यनानादेहरथेष्वपि॥इंद्रियाश्वाश्चविद्यंतेयुक्ताअतिबलाइमे॥८२४॥ देहएकत्रसंख्याताद शकेदशकेशतं॥शतेसहस्रंतद्वत्स्यात्सहस्रेप्ययुतंतथा॥८२५॥एवमेतेत्वसंख्याताइंद्रियाश्वाःशरीरिणां॥ अंतःकरणसंवंधाआत्मनोभेदहेतवः॥८२६॥ भेदैर्यैर्भिद्यतेदेवआत्मातत्सकलाश्रयः॥सर्वभेदविनिर्मु क्तोनेतिनेत्यवधारितः॥८२७॥भेदैर्नविद्यतेवस्तुतद्ब्रह्मेत्यवधारितम्॥पूर्वापरादिदेशेनकालेनचविवर्जित म्॥अंतर्बहिःस्वभावेनवस्तुनाचविवर्जितम्॥८२८॥ एकमेवाद्वितीयंयत्सोयमात्माशरीरिणाम्॥ अहंब्र ह्मेतिवाक्येनविज्ञेयोब्रह्मरूपभृत्॥८२९॥एषोनुभवतिश्रीमान्सर्वमेवमहेश्वरः॥सर्वात्मासर्वधीसाक्षीस्वप्र काशसुखात्मकः॥८३०॥

तौअयमितिपदार्थस्यात्मनश्चवाधासामानाधिकरण्यमितिसूचितं ॥ ८२७ ॥ एवंत्वंपदार्थंपरिशोध्यतत्पदार्थपरिशोधकस्यतदेतदित्यादेरर्थमाह भेदैर्नेति यद्वस्तुभेदैर्नभिद्यतेतद्ब्रह्मेत्यवधारितंपूर्वमपीतिशेषः कीदृशंब्रह्म पूर्वादिरूपेणदेशेनकालेनचवर्जितं तथाऽन्तःस्वभावेन बाह्यस्वभावेनचपदार्थजातेनवर्जितमिति ॥ ८२८ ॥ सामानाधिकरण्येनवाक्यार्थंस्फुटयन्महावाक्यमप्यभिनयति एकमिति स्पष्टम् ॥ ८२९ ॥ ननुकोयमात्मेतिपृच्छतांमंदानामनुग्रहायसर्वानुभवितेत्याह एषइति अनुभवतिद्रष्टृश्रोत्रादिरूपेणेतिशेषः ॥ ८३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवमश्विनोरहस्यज्ञऋषिरितिहासंसमापयति एवमिति हेअश्विनौसदध्यङ्एवंयुवांपुरस्कृत्यसर्वाधिकारिणःप्रतिब्रह्मणोऽनुशासनंकृ
तवानिति ॥ ८३१ ॥ एवमिति उक्तेरहस्यविदेतिशेषः ॥ ८३२ ॥ त्वयायत्कौषीतकेर्भयनिमित्तंपृष्टमासीत्तत्समाहितमितिशिष्यंप्र
त्याहगुरुः एवमाथर्वणमिति स्वपदेनेंद्रोग्राह्यः ॥ ८३३ ॥ उपसंहरति विचित्रमिति ॥ ८३४ ॥ उपाधिपरिहाणेनयःसर्वत्रप्रकाशते

एवंसयुवयोर्दध्यङ्कृतवाननुशासनम् ॥ आनंदात्मस्वरूपस्यब्रह्मणोबोधरूपिणः ॥ ८३१ ॥ एवमुक्तेऽतिसं
हृष्टावश्विनौजातकौतुकौ ॥ प्रणम्यतंमहात्मानमृषिंसर्वार्थदर्शिनं ॥ चक्रतुस्तस्यतत्कार्यंयदर्थमयमागतः
॥ ८३२ ॥ एवमाथर्वणंदृष्ट्वानिहतंस्वोपकारिणं ॥ इंद्रेणभीतिमगमद्द्विजःकौषीतकिस्ततः ॥ ८३३ ॥ विचित्र
मिदमाख्यानंकथितंतवसुव्रत ॥ मंत्रैरितंपुनःकिंत्वंश्रोतुमिच्छसितद्वद ॥ ८३४ ॥ इतिश्रीमत्परमहंसपरिव्रा
जकाचार्यानंदात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेबृहदारण्यकमधुकां
डसारार्थप्रकाशकऋष्यश्विसंवादोनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥छ॥ ॥छ॥ ॥छ॥

सर्वानुभविनादेवोराजतेचित्तमंदिरे ॥ १ ॥ इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनुजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्य
पादानुगृहीतस्यकृतौआत्मपुराणटीकायांसत्प्रसवाख्यायांचतुर्थोध्यायः ॥ ४ ॥ ग्रंथसंख्या ३१०० ॥छ॥ ॥छ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे चतुर्थोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे पंचमाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ सर्वात्मतोपपत्त्यापियस्यैवपरमात्मनः ॥ सिद्धांतंपरमेशानंवंदेप्रत्यूहशांतये ॥ १ ॥ एवंप्रभ्वाज्ञानिभाऽऽगमप्रधानस्यमधुकांडस्यार्थोदर्शितः अथसुहृदुपदेशनिभोपपत्तिप्रधानस्ययाज्ञवल्क्यकांडस्यार्थमध्यायद्वयेननिरूपयन्पंचमाध्यायार्थेशिष्यंजिज्ञासांपूर्वाध्यायेउत्थापितामभिनयति इत्थमितिनवभिः स्पष्टम् ॥ १ ॥ तत्रस्वस्यमेधावितांसूचयन्शिष्यःश्रुतपूर्वमनुवदति भगवन्नितिषड्भिः स्फुटम् ॥ २ ॥ कौषीतकिरिति यज्ज्ञानंयस्यसत्यसत्यस्यज्ञानंकौषीतकिस्तत्याजइंद्रभीत्यानोचेतत्सत्यसत्यंत्वयादध्यङ्श्विसंवादरूपकथांतरेणोक्तमिति ॥ ३ ॥ वंशश्चेति वंशश्चायमुदाहृतइतिलिङ्गविपरिणामेनसंबंधः कीदृशोवंशः स्वयंभुवंतथात्रयीरूपादित्यंचोपक्रम्यपौतिमाष्यपर्यंतंख्यातः ईदृशोयंविद्यावंशोद्विमूलः द्वेस्वयंभ्वादित्यरूपेमूलेयस्यसतथा त्रिपर्वात्रिविधानिपर्वाणिशिष्या

श्रीगणेशायनमः॥ ॥इत्थमाख्यातमाकर्ण्यशिष्यःपरमविस्मितः॥प्रष्टुकामःपुनःकिंचिद्गुरुंप्राहकृतांजलिः ॥ १ ॥ भगवन्नैतरेयस्यतथाकौषीतकेर्मुनेः॥ नानाख्यानसमायुक्तमात्मज्ञानंत्वयेरितं॥ २॥ कौषीतकिश्चतत्याजयज्ज्ञानंतदपित्वया॥ कथांतरच्छलेनैवसत्यसत्यमुदाहृतम्॥ ३॥ वंशश्चायंमहान्ख्यातउपक्रम्यस्वयंभुवम्॥ आदित्यंचत्रयीरूपंपौतिमाष्यांतमीदृशः॥ द्विमूलश्चत्रिपर्वाचस्त्रियाःपुंसोरयंमहान्॥ ४॥ त्रिपर्वण्यपिवंशेस्मिन्द्विमूलेबहवस्त्वया॥ पुरुषाःकथिताभिन्नाअभिन्नाअपिकेचन॥ ५॥ तेषुशिष्यस्तुदैवस्यदीप्तस्याथर्वणोमुनेः॥ दध्यङ्ङाथर्वणःख्यातोमधुकांडोपदेशकः॥ देवेंद्रस्यचदौरात्म्यमश्विनोरर्थितापिच॥ ६॥

चार्यरूपाणियस्मिन्सतथा यतएकंपर्वस्त्रियाःस्त्रीसंबंधिनामजातेनघटितं पर्वद्वयंतुपुंसोर्मधुयाज्ञवल्क्यकांडांतरूपस्थानभेदभिन्नपुन्नामजातघटितमित्यर्थः त्रिपर्वणीति अस्मिन्द्विमूलेत्रिपर्वणिचवंशेकेचित्पुरुषाभिन्नाविरूपनामकाःकेचिदभिन्नाःसरूपनामकास्त्वयाकथिताः ॥ ५ ॥ तेष्विति तेषुवंशस्थपुरुषेष्वन्यतमस्यदैवस्याथर्वणोमुनेर्दीप्तस्यतेजस्विनःशिष्योदध्यङ्ङाथर्वणःख्यातःप्रोक्तोयोश्विभ्यामिंद्रायचमधुकांडोपदेशकइति तथादेवेंद्रस्यदौरात्म्यंहितोपदेशेकोपरूपमुक्तंतथाश्विनोरर्थिताउग्रकर्मप्रवर्त्तिकालिप्साप्रोक्तेति ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति तत्रेंद्रकोपादिनिमित्तकेस्वमस्तकेच्छिद्यमानेसतिदध्यङ्ङ्हयग्रीवःसन्याज्ञवल्क्यंब्रह्मविद्यावक्तारमिंद्रादभीतंचोचे कीदृशंयाज्ञव
ल्क्यं रवेःशिष्यमतएववर्णितनीत्यावाजसनेयकं ॥ ७ ॥ नकेवलंदधीचैवयाज्ञवल्क्योमहाप्रभावत्वेनवर्णितःकिंतुतत्रभवताभवतापीत्याह
अजातशत्रोरिति अजातशत्रोर्गार्ग्येणबलाकिनासंवादेगततृतीयाध्यायेत्वयापिसवितापितथाप्राहेत्यादिश्लोकेनोक्तइत्यर्थः ॥ ८ ॥ एव
मनूद्यपृच्छति तेनेति तेनयाज्ञवल्क्येनकस्मैब्रह्मविद्यादत्ताकथंवादत्तासाविद्यावाकीदृशीतिप्रश्नत्रयम् ॥ ९ ॥ गुरोरुत्तरमवतारयति एवमि
ति स्फुटम् ॥ १० ॥ तत्रयाज्ञवल्क्यस्येश्वरानुग्रहान्महाप्रभावतांजनकस्यतद्दिदृक्षांचोपोद्घाततयानिरूपयति याज्ञवल्क्यइत्यादिभिरष्टावि
शतिश्लोकैः याज्ञवल्क्योवैशंपायनादधीतंवेदंपरित्यज्योद्विग्नःसन्नतिघोरेणतपसापरमेश्वरमतोषयदितिशेषः कीदृशमादित्यमंडलावासं

तत्रदध्यङ्ङ्हयग्रीवश्छिद्यमानेस्वमस्तके ॥ याज्ञवल्क्यंरवेःशिष्यमूचेवाजसनेयकम् ॥ वक्तारंब्रह्मविद्याया
अभीतंशक्रतोपिच ॥ ७ ॥ अजातशत्रोःसंवादेगार्ग्येणोक्तस्त्वयापिच ॥ प्राप्तविद्योयमादित्याद्याज्ञवल्क्यो
महामुनिः ॥ ८ ॥ तेनकस्मैकथंवापिब्रह्मविद्यासमर्पिता ॥ कीदृशीचेतिवाब्रह्मन्श्रोतुमिच्छाम्यहंगुरो ॥ ९ ॥
एवमुक्तेतिसंहृष्टोगुरुःशिष्यमथाब्रवीत् ॥ शृणुचित्रामहंवक्ष्येकथांवेदसमीरिताम् ॥ १० ॥ याज्ञवल्क्योथघो
रेणतपसापरमेश्वरं ॥ आदित्यमंडलावासंनामरूपक्रियात्मकम् ॥ ११ ॥ सुवर्णसदृशंदेवंकेशेषुचनखेषुच ॥
एकरूपंहिसर्वत्रहित्वानेत्रेविलोहिते ॥ १२ ॥

यएषोंतरादित्येपुरुषोदृश्यतइत्यादिच्छांदोग्यश्रुतेः अन्तस्तद्धर्मोपदेशादितिन्यायाच्च तथाचसर्वज्ञपरमेश्वरोपासनात्सर्वज्ञतालाभोयाज्ञव
ल्क्यस्योचितः मंडलवाचकादित्यादिपदानांतदंतस्थेलक्षणाचेतिभावः आदित्यांतस्थपुरुषस्यसर्वात्मतामाह नामेति त्रयंवाइदंनाम
रूपंकर्मचेतिश्रुतेः विश्वस्वरूपभूतनामादित्रितयात्मकमिति यद्वा सर्वपाप्मविनिर्मोकाभिधायकेनउदितिश्रुतिप्रसिद्धनाम्नावक्ष्यमाणरूप
क्रियाभ्यांचयुक्तमित्यर्थेनसविशेषतासूचिता ॥ ११ ॥ तस्यदेवस्यभक्तानुग्रहार्थंरूपमाप्रणखात्सर्वएवसुवर्णइत्यादिश्रुतिप्रतिपादितंदर्श
यति सुवर्णेति नेत्रयोरतिरक्तपुंडरीकाकारत्वान्नेत्रेविहायसर्वांगेषुस्वर्णवर्णमित्यर्थः ॥ १२ ॥ ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यच्छांदोग्योक्तांसर्वेशनरूपांक्रियांदर्शयति अमुष्मादिति योदेवःअमुष्मादादित्यपुरुषाद्येपरेउपरितनालोकायेचचाक्षुषाच्चक्षुर्वर्तिनस्त दीयरूपादर्वाचोऽधस्तनालोकाः संदंशन्यायेनमध्यवर्तिनश्चयेलोकास्तेषांसर्वेषांलोकवर्तिजनानांसंबंधिनांकामानांकाम्यमानपदार्था नामीष्टेईशोभवतिप्रदातेतियावत् यतएकएववदेवोऽध्यात्मंचक्षुषिअधिदैवमादित्यमंडलेचस्थितइति ॥ १३ ॥ अयमेवदेवःसूक्ष्मसमष्ट्यु पाधिकत्वेनहिरण्यगर्भःकारणोपाधिकत्वेनेश्वरइतिचश्रुतावुक्तइत्याह योजीवेति योदेवोजीवघनइतिपदघटितेअत्रवेदेसएतस्माज्जीवघ नात्परात्परंपुरिशयंपुरुषमीक्षतेइतिप्रश्नवाक्यरूपेजीवसमष्टिवाचकजीवघनपदेनहिरण्यगर्भतयाततःपरमीक्षणीयेश्वरतयाचवैदिकैःपठ्य तेइत्यर्थः अयमेवदेवोऽस्यमहतोभूतस्यनिःश्वसितमेतद्यदृग्वेदइत्यादिश्रुतौवेदयोनित्वेनोच्यतइत्याह यस्मादिति स्पष्टं ॥ १४ ॥ सैषा त्रय्येवविद्यातपतीत्यादिश्रुत्यनुसारेणतस्यवेदत्रयात्मकतामाह ऋग्भिरिति ऋग्वेदरूपेणादित्यपुरुषःपूर्वाह्णेत्रिधाविभक्तदिवसप्रथमभा

अमुष्माद्येपरेलोकाअर्वांचोयेचचाक्षुषात् ॥ ईष्टेतेषांसकामानामध्यात्मंभेदवर्जितः ॥ १३ ॥ योजीवघनइ त्यत्रपठ्यतेवेदवादिभिः ॥ यस्माद्विनिःसृतावेदाःश्वासाइवमहात्मनः ॥ १४ ॥ ऋग्भिस्तपतिपूर्वाह्णेयजुर्भिश्चा पिमध्यतः ॥ सायान्हेसामभिःशश्वदथर्वांगिरसासमं ॥ १५ ॥ वेदद्विरेफैरचितेरक्तशुक्लासितात्मभिः ॥ चित्र रूपेमधुन्यास्तेफलदःसर्वकर्मणाम् ॥ १६ ॥ कर्मपुष्परसोयस्मिन्नित्यमेवप्रधावति ॥ विमुंचतिचयोदेवोदृ ष्टिंसर्वस्यकारणम् ॥ १७ ॥

गेतपतिप्रकाशयतितथामध्यतोमध्यान्हेयजुर्भिःतथासायान्हेतृतीयभागेऽथर्वांगिरसैर्युक्तैःसामभिस्तपतीति ॥ १५ ॥ तथायमेवदेवश्छां दोग्येतृतीयप्रपाठकेमधुविद्यायांनिरूपितइत्याह वेदेतिद्वाभ्यां योदेवःसर्वकर्मफलप्रदआदित्यरूपेमधुनिप्रसिद्धमधुवद्वस्वादिदेवानांमो दहेतौआस्तेतिष्ठति कीदृशेआदित्यरूपमधुनि विचित्ररूपेरक्तशुक्लकृष्णातिकृष्णगुह्यात्मकपंचरूपोपपन्ने पुनःकीदृशे यथाक्रमंरक्तादिरू पैर्ऋग्यजुस्सामाथर्वांगिरसोपनिषदात्मकवेदरूपैर्द्विरेफैर्भ्रमरैरचिते यथामधुमक्षिकाःपुष्पेभ्योरसमाहृत्यमधुदेशंनयंतितथाऋगादिवेदभ्र मरायागादिकर्मरूपपुष्पेपुमंत्ररूपेणगत्वाकर्मणांसूक्ष्मावस्थात्मकमदृष्टसंज्ञंरसंनयंति तदेतदुक्तं कर्मपुष्परसोयत्रनित्यमेवप्रधावतीति य त्रादित्यमधुनिप्रधावतिगच्छति नकेवलंवस्वादिदेवानामेवमोदहेतुरपितुदृष्टिद्वारासर्वेषामित्याह विमुंचतीति तदुक्तमग्नौप्रास्ताहुतिःसम्य गादित्यमुपतिष्ठति आदित्याज्जायतेदृष्टिर्दृष्टेरन्नंततःप्रजाइति ॥ १६ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वहिश्चरइति तथायआदित्यपुरुषःसर्वेषांवहिश्चरोवहिर्वर्त्तमानःप्राणः तथाचप्रश्नश्रुतिः प्राणःप्रजानामुदयत्येषसूर्यइति तथायमेवपु रुषोंतर्यामिब्राह्मणेंऽतर्यामित्वेननिरूपितइत्याह स्थिराणामिति ॥ १८ ॥ यस्तमिति योयाज्ञवल्क्यस्तंवर्णितमीश्वरमाराध्यसंतुष्टादस्मा त्सर्वगुरोर्देवादादित्यांतरस्थाद्वेदांश्चतुरोऽवाप्तवान् यज्ञमितिपाठेयंदेवंज्ञंसर्वज्ञमाराध्यसंतुष्टादस्माद्वेदानवाप्तवान्याज्ञवल्क्यइतिशेषः यज्ञ

॥ २ ॥ मितिपाठेवर्णितरूपंयज्ञंविष्णुं यज्ञोवैविष्णुरितिश्रुतेः आराध्यतस्मात्तुष्टाद्वेदानवाप्तवानितिसंबंधः ॥ १९ ॥ प्राप्येति एवंवेदान्प्रा प्ययाज्ञवल्क्यमुनिश्चतुर्णांवेदानामर्थिनोऽधिजिगांसून्शिष्यानुपनिन्येऽध्ययनांगमुपनयनसंस्कारंप्रापितवानित्यर्थः ॥ २० ॥ चतुर्धे ति तस्यमुनेःशिष्यगणमंडलीऋगाद्यध्येतव्यवेदभेदेनचतुर्विधादृश्यतेइति ॥ २१ ॥ चतुर्मंडलेति चतुर्विधशिष्यमंडलमध्यस्थोमुनिःसू

वहिश्चरोहियःप्राणःसर्वेषामिहदेहिनां ॥ स्थिराणांजंगमानांचब्रह्मादीनांहृदिस्थितः ॥ १८ ॥ यस्तमाराध्यसं तुष्टाद्देवाद्वेदानवाप्तवान् ॥ आदित्यमंडलस्थानादस्मात्सर्वगरीयसः ॥ १९ ॥ प्राप्यवेदान्मुनिःसर्वान्गृहस्था श्रमधर्मवान् ॥ चतुर्वेदार्थिनःशिष्यानुपनिन्येमहामनाः ॥ २० ॥ चतुर्धादृश्यतेतस्यमुनेःशिष्यौघमंडली ॥ अ ध्यापनरतस्यैषायाज्ञवल्क्यस्यधीमतः ॥ २१ ॥ चतुर्मंडलमध्यस्थोराजतेमुनिभास्करः ॥ दिशांमंडलमध्य स्थोयथायंभगवान्रविः ॥ २२ ॥ कीर्तिवारांगनातस्यसर्वान्विद्वद्भुजंगमान् ॥ लोकत्रयीस्थितान्प्राप्तातेषांहृ दयतापदा ॥ २३ ॥

र्यवद्राजतेस्मेति याज्ञवल्क्यस्यचतुर्वेदवित्त्वेलिंगंचव्याख्यास्यमानेगवामाश्रमंप्रतिउत्कालनवाक्येशिष्यस्यसामाध्यायित्वेनसंबोधनम् ॥ २२ ॥ याज्ञवल्क्यस्यकीर्त्तिमसंवृतचारित्वेनदिव्यवारांगनात्वेननिरूपयति कीर्तीतिद्वादशभिः तस्ययाज्ञवल्क्यस्यकीर्तिरूपावारांगना त्रिलोकीगतान्सर्वान्विद्वद्भुजंगमान्कीर्तेर्गुणख्यातिरूपायावारांगनात्वेतस्याविवेकेनआस्वादनरूपभोगशालिनांविदुषांसहृदयत्वेनप्रसि द्धानांभुजंगोगणिकापतिरितिहैमकोशानुसारेणभुजंगत्वंविवक्ष्यते तथाचविद्वांसएवभुजंगास्तान्प्राप्ताइति कीदृशी तेषांसहृदयानांहृद यस्यतापदाद्राविकासंतापिकावेत्यर्थः तप्तंतप्तेनसंवध्यतेइत्यादिवाक्येषुअभिकांक्षारूपंद्रवणमपिधातोरर्थःप्रसिद्धः लोकेपिवारांगना ॥ २ ॥ नांस्वविशेषाभिज्ञजनोपस्थानंतद्धृदयतापकत्वंचप्रसिद्धमिति ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रसायेषांविदुषांत्दयेद्रावणाख्यंतापंकृतवतीतान्दर्शयति एतामिति एतांयाज्ञवल्क्यकीर्तिंवारांगनांकेचिज्जनकाद्याविद्वांसस्त्रैवर्णिकै लौंहितशुक्लकृष्णवर्णशालिगुणत्रयाभिमानिभिर्जनैराश्वलाद्यैर्वार्यमाणाअपिबुभुजिरेआस्वादितवंतः यतःपुण्यात्मानः मुदितयायोग सूत्रप्रसिद्धयादूत्येवतद्वशीकृताइतिभावः ननुकथंनिवारिताअपिवारांगनायांरताअतआह महाधियःकीर्तेर्दिव्यत्वेननिषेधानर्हत्वंपूर्वमं गीकृतायामुदितायाअपरित्याज्यत्वंपुरुषार्थप्रदायास्तत्त्वजिज्ञासासख्याअनुसरणीयत्वंचालोचयंतीमहतीधीर्येषांतेतथा तथाचस्त्रीवशा निषेधंनगणयंतीतिलोकेपिप्रसिद्धमितिभावः॥ २४॥ अथयेषांसासंतापदासीत्तेषांवृत्तमाह अस्यतामिति अस्ययाज्ञवल्क्यस्यतांकीर्ति वारांगनांमृदुलांकोमलांजनकराजादिमनोहारिणीमितियावत् एवंविधांवीक्ष्यकेचिदाश्वलाद्याअसूयालयतांअसूययालयःसंश्लेषोये

एतांबुभुजिरेकेचित्पुण्यात्मानोमहाधियः॥ जनकाद्यावार्यमाणाःसदात्रैवर्णिकैर्नरैः॥ २४॥ अस्यतांमृदु लांवीक्ष्यत्वसूयालयतांगताः॥ निंदावधूंपिशाचींतांजज्ञिरेकीर्तिदूषिकाम्॥ २५॥ आदित्यादाप्तवान्विद्यां याज्ञवल्क्योमहामुनिः॥वक्रेणनविनाकस्मादेनामत्रवदत्ययम्॥ २६॥ आदित्यस्यरथेस्थित्वाविद्याधीता मुनायदि॥ अधीतेकेननैवायंस्थित्वाप्रौढेविभावसौ॥ २७॥

षांतेषांभावस्तत्तातांगताःसंतोनिंदारूपांवधूंवधूवत्तद्रहस्यचारिणींकृष्णवर्णत्वेनपिशाचीतुल्यांशुक्लवर्णायाःकीर्तेर्दूषणोयतांजज्ञिरेजनित वंतइत्यर्थः लयोविलासेसंश्लेषेइतिविश्वः अयंभावः यथालोकेवारांगनासक्तंराजादिकंततोनिवर्तयितुंनूतनांवधूंवोढव्यांजनयेयुस्त थायाज्ञवल्क्यंद्विषद्भिर्निंदावधूरसूयासंगेनजनितातथापिनिंदावध्वाउद्वेजकरूपत्वंतैर्नालोचितमित्यहोतेनीतिशास्त्रतत्त्वमपिनजानंतीति ॥ २५॥ जनकराजपुरोहितादिकृतांनिंदामभिनयति आदित्यादित्यष्टभिः यद्ययंलौकिकगुरोर्विद्यांनाप्तःकिंत्वलौकिकादादित्याद्गुरोःप्रा प्तस्तदाअलौकिकत्वादेवमुखंविनैवविद्यांकुतोनपाठयतीत्यर्थः॥ २६॥ आदित्यस्येति किंचादित्यस्यरथेस्थित्वामुनायाज्ञवल्क्येनविद्या धीताइतियद्युच्यतेतदायंप्रौढेप्रज्वलितेविभावसौअग्नौस्थित्वाकुतोनपठतीति विभावसुर्दिनमणौहारभेदेचपावकेइतिविश्वः॥ २७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्योतिर्मात्रमिति किंचज्योतिर्मात्रंतेजःपुंजमात्ररूपआदित्योयद्यस्मैयाज्ञवल्क्यायवेदमुक्तवांस्तर्हितादृशोवह्निरपिकुतोनवेदमुपदिशती ति॥ २८ ॥ तपसेति यद्युच्यतेसातुष्टादित्यदेवताशरीरिणीसत्यस्माउपदिदेशेतितर्हिसादेवताशरीरिणीवध्वादिवत्कथंनित्यास्यादिति अनि

॥३॥ त्यत्वेअस्मदादिभ्यःकोस्याविशेषइतिभावः ॥ २९ ॥ ततइति ततोस्यवेदलाभेउपपत्त्यभावादयंयाज्ञवल्क्यःस्वकल्पितंवाक्यंवैदिकस्वरव र्णादिसाम्येनपठन्नयंवेदइतिप्रसिद्धंकृत्वाऽस्मानल्पज्ञान्मोहयतीति ॥ ३० ॥ वेदलक्षणमाहुः वर्णानामिति संप्रदायानुसारेणस्वरादिवि शिष्टायावर्णानुपूर्वीपरिपाटीसैववेदस्ततोन्यन्नटवाक्यसममिति संप्रदायस्तुनास्यलोकेप्रसिद्धइतिभावः॥ ३१ ॥ किंचवेदांतरविज्ञोभ

ज्योतिर्मात्रंयदादित्यउक्तवान्वेदमंडलीं॥ ज्योतिर्मात्रवपुर्वह्निर्नाधुनाकेनवक्त्यसौ॥ २८॥ तपसातोषमाया ताप्रत्यक्षायदिदेवता॥ शरीरिणीकथंनित्याभवेदेषायथावधूः॥ २९॥ ततोयंस्वेच्छयाकिंचित्स्वरवर्णानुका रतः॥ वेदइत्येवकृत्वानोमोहयत्यल्पमानसान्॥३०॥वर्णानामानुपूर्वीयासंप्रदायानुसारतः ॥ सवेदइतिवि ज्ञेयोत्यपरंनटभाषणम्॥ ३१॥ कंपितानिसदाब्रूतेयजूंष्येषनटोयथा॥ पदवर्णक्रमैस्तद्वद्धिहीनान्यतिसाह सी॥ ३२॥ यजुर्वेदंचयोनैववेत्त्यधीतंस्वयंपुरा॥ वेदविप्लावकःसोयंजानीयादपरान्कथम्॥ ३३॥इत्यादि निंदावचनैरसूयासहचारिणः॥ कीर्तिवारांगनांरोद्धुंप्रवृत्तानेशतेपिते ॥ ३४॥

वतुनामयाज्ञवल्क्यस्तथापित्तैत्तिरीयादिप्रसिद्धक्रमादिविलक्षणत्वान्नयजूंष्येषपठतीत्याहुः कंपितानीति एषयाज्ञवल्क्यःकंपितानिहस्त कंपयुक्तानितथाप्रसिद्धपदादिमर्यादाहीनानियजूंषिनटवत्पठतीति अतएवातिसाहसीअतिशयेनसाहसीअविमृश्यकर्ता॥ ३२॥ किंचो पपातकेषुगणितेनाधीतनाशनेनयुक्तोयमित्याहुः यजुरिति स्वयंपुरावैशंपायनादधीतंयजुर्वेदंनैवयोवेत्तिअतोवेदस्यविप्लावकोविस्मर्ता ॥३॥ अपरान्वेदान्स्वयंकथंजानीयादिति ॥ ३३॥ इत्यादीति असूययानिंदाजनन्यासहिताःकेचिदित्यादि निंदावचनैर्वचनपदेनरूपकोपयो गिवाग्दानमपिसूच्यते कीर्तिवारांगनांरोद्धुंप्रवृत्ताअपिनेशतेनसमर्थाअभूवन्निति॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याज्ञवल्क्यस्यक्षमाशीलतामाह याज्ञवल्क्योपीतिद्वाभ्यां प्रचारःप्रवृत्तिः उत्तरार्द्धेअपीतिशेषः ज्ञानात्ज्ञानप्रभावात् ॥ ३५ ॥ प्रावृट्कालेइति प्रावृट्कालिकमेघवदात्मश्लाघांगर्जननिभामकुर्वन्नेवयाज्ञवल्क्यःसार्थान्सर्वांस्तथापूर्ववदेवाहापाठयत् तान्निंदकान्प्रतिक्वचित्किंचिदपिनोचेइति अनेनकीर्तियोग्यतासूचिता ॥३६॥ उक्तरूपकस्यतात्पर्यार्थंदर्शयति जनकइतिद्वाभ्यां जनकःकीर्तिंश्रुत्वायाज्ञवल्क्यंदिदृक्षतेद्रष्टुमिच्छतिस्मेति ॥ ३७ ॥ पुरोहितादयइति एनंदर्शनोद्यतंराजानंविषयांतरप्रवर्त्तनादिरूपैरुपायैर्निन्दयाचपुरोहितादयोनिरुंधंतिस्मेति ॥ ३८ ॥ जनकोहवेत्यादिप्रथमकंडिकार्थमुपबृंहयति राजापीत्यादिनाशास्त्रोक्तागाइत्यतःपूर्वतनग्रंथेन तेषांपुरोहि

याज्ञवल्क्योपिमतिमान्सर्वबुद्धिप्रचारवित्॥ स्वयंजानंस्तथाशृण्वन्ज्ञानादास्तेहसन्निव ॥ ३५॥ प्रावृट्कालेयथामेघोवर्षत्येवनगर्जति॥ वेदान्सर्वांस्तथैवाहसार्थान्नोचेचतान्क्वचित्॥३६॥ जनकोपिमहीपालोविदेहेपुवसन्सदा॥ मिथिलाधिपतिर्नित्यंयाज्ञवल्क्यंदिदृक्षते॥३७॥ पुरोहितादयस्त्वेनमाश्वलप्रमुखाद्विजाः॥ निरुंधंतिसदोपायैर्विविधैर्निंदयापिच॥३८॥ राजापिबुद्धिमांस्तेषांमतंविज्ञायधार्मिकः॥ आप्तांस्त्रैवर्णिकान्सर्वान्ब्राह्मणानयनेऽदिशत् ॥ ३९ ॥ तेपिभृत्यास्तथाचक्रुर्गत्वादेशाननेकशः॥ समानयन्सशिष्यांस्तान्विप्रान्वेदार्थकोविदान्॥ याज्ञवल्क्येनसहितान्कुरुपांचालकानपि॥ ४० ॥ वेदध्वनिर्महानासीत्तस्यराज्ञोनिवेशने॥ त्रैवर्णिकजनौघस्यकर्णदावाग्निहारकः ॥ ४१ ॥ आश्वलस्तत्रहोतागाज्जनकस्यास्यभूभुजः॥ आर्तभागस्तथाविप्रोजरत्कारुसुतोमहान्॥ ४२ ॥

तादीनांमतंदुरभिप्रायंज्ञात्वायाज्ञवल्क्यदिदृक्षयाउपायांतरंचिकीर्षन्नाज्ञाकारिणस्त्रैवर्णिकानाप्तान्विश्वस्तान्प्रतिमयायागश्चिकीर्षितस्तदर्थंसर्वतोब्राह्मणानाकारयतेत्यदिशदाज्ञांदत्तवानिति ॥ ३९ ॥ तेपीति तेविश्वस्ताराजभृत्याअनेकदेशेभ्योब्राह्मणानानयंतःकुरुपांचालदेशवासिनोपिविप्रांस्तद्देशवासियाज्ञवल्क्येनसहितानानीतवंतइति ॥ ४० ॥ वेदेति तेषामागमनेसतिजनकराजगृहेमहान्वेदध्वनिरासीत् कीदृशः शूद्रातिरिक्तजनानांसुखदइति ॥ ४१ ॥ तेषुप्रधानभूतान्दर्शयति आश्वलइतिपंचभिः आश्वलनामाजनकस्यहोताऋग्वेदोक्तकर्मकर्त्ताआगात्आगतः तथाजरत्कारुपुत्रआर्त्तभागनामा ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुज्युरिति तथाभुज्युनामालाह्यायनिर्लह्यनामकस्यापत्यंलाह्यस्तस्यापत्यंलाह्यायनिरागतः तिकादित्वात्फिञ् तथाचाक्रायणश्चक्रना
मकस्ययुवापत्यमुषस्तनामाऽऽगतः तथाकौषीतकेयःकुषीतकस्यापत्यं शुभ्रादित्वाड्ढक् कहोलनामाऽऽगतः तथागार्गीस्त्रीब्रह्मवादिनीब्रह्म
निष्ठातथाआरुणिररुणस्यापत्यमुद्दालकनामागतः यःश्रुतौगार्ग्याउक्तेःप्रश्नपरंपरारूपायामध्येवदन्याज्ञवल्क्यंपृच्छन्निरूपयिष्यतइति
॥४॥ शेषइतिद्वयोरर्थः ॥ ४३ ॥ ४४ ॥ शाकल्यश्चेति शकलस्यापत्यंशाकल्योविदग्धसंज्ञश्चागतः कीदृशोवावदूकोऽतिवादीअतिमानीयाज्ञ
वल्क्यस्यसदाद्वेष्टाचेति ॥ ४५ ॥ याज्ञवल्क्यश्चेति याज्ञवल्क्यश्चसशिष्यआगतः ॥ ४६ ॥ अन्येचउक्तानुक्ताःसशिष्याआगताइ

भुज्युर्लाह्यायनिस्तद्वदुषस्तोब्राह्मणोत्तमः ॥ चाक्रायणश्चसर्वज्ञःकहोलोपिद्विजोत्तमः ॥ ४३ ॥ कोषीतकेय
श्चतथास्त्रीगार्गीब्रह्मवादिनी ॥ उद्दालकश्चारुणिर्योगार्ग्युक्तेर्मध्यतोवदत् ॥ ४४ ॥ शाकल्यश्चविदग्धाख्यो
वावदूकोतिमानभाक् ॥ याज्ञवल्क्याययोद्वेष्टिसर्वदापापमोहितः ॥ ४५ ॥ याज्ञवल्क्यश्चमतिमांश्चतुर्वेदवि
शारदैः ॥ बहुभिःसंवृतःशिष्यैर्भास्करोभगणैरिव ॥ ४६ ॥ आश्वलाद्याश्चमुनयःशिष्यैःस्वैःस्वैःसमावृताः ॥
अन्येचशिष्यसहितामिलिताःकोटिशोभवन् ॥ ४७ ॥ याज्ञवल्क्यागमोपायंकृतवांस्तैरवेक्षितः ॥ प्रसंगेकुत्र
चिद्विप्रानिदमाहकृतांजलिः ॥ पुरोहितमुखान्सर्वान्सभायांसंस्थितोनृपः ॥ ४८ ॥ यष्टुमिच्छाम्यहंविप्रायज्ञै
स्तैर्भूरिदक्षिणैः ॥ अनुजानंतुमांसर्वेघोषयिष्याम्यहंदिशः ॥ ४९ ॥

त्याह आश्वलायाइति मिलिताःसंघीभूताअभूवन् ॥ ४७ ॥ याज्ञवल्क्यागमोपायमिति एवंजनकोराजातैर्याज्ञवल्क्यंद्विषद्भिःपुरोहि
ताद्यैरवेक्षितोपितद्दर्शनप्रतिबंधेसावधानैःप्रायोदृष्टिगोचरीकृतोपियाज्ञवल्क्यागमोपायंकृतवान्सन्कुत्रचित्प्रसंगेसमवेतान्द्विजानिदंवा
क्यंसभायामाह इदंकिं हेविप्राअहंभूरिदक्षिणैरश्वमेधाद्यैर्यज्ञैर्देवान्यष्टुमिच्छामितत्रभवंतोऽनुजानंतु अहंदिशोघोषयिष्यामियज्ञारंभसू ॥४॥
चकडिंडिमशब्देनपूरयिष्यामीति इतिराज्ञोक्तेसतितैर्विप्रैराजाऽऽज्ञातःयष्टुमारभ्यतेतिशेषइतिद्वयोरर्थः ॥ ४८ ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति तत्रयागदेशेतेष्वभ्यागतेषुब्राह्मणेषूपविष्टेषुसत्सुसर्वज्ञेषुएतेषुसर्वेषुज्ञेषुमध्येकोवाऽतिशयेनानूचानःसांगवेदार्थविदित्याकाराजनकस्यबुभुत्साजिज्ञासाऽभूदिति ॥ ५० ॥ जिज्ञासामेवाभिनयति सर्वइति स्पष्टम् ॥ ५१॥ तत्राधिकनिर्णयोपायंराजाचिंतयति एतदित्यादिना एतत्सर्वाधिक्यंब्राह्मणोत्तमेवर्तमानंकथंविज्ञेयंनिर्णेयं तत्राप्तवक्तुर्दुर्लभत्वात्प्रश्नोनाभ्युपायइत्याह कस्मैचिदिति सपृष्टः स्वमनोगतंचित्तानुकूलं ॥ ५२ ॥ तत्ररागद्वेषाभ्यांप्रायोविपरीताभिधानंदर्शयति यस्येतिद्वाभ्यां द्वेषेसतिबृहस्पतिप्रभृतीनपिनिंदंतीति ॥५३॥ यस्ययत्रेति रागेसतिअक्षरस्ययदेकंकेवलमर्थानवगाहिज्ञानंतेनापिहीनंस्तुवंतीति ॥ ५४ ॥ तर्हिउदासीनंपृच्छेत्याशंकांनिर्णयासिद्ध्यावार

तत्रतेषूपविष्टेषुब्राह्मणेषुमहात्मसु ॥ सर्वज्ञेषुबुभुत्साभूदनूचानतमंप्रति ॥ ५० ॥ सर्वएतेमहात्मानोवेदवेदांगपारगाः ॥ सदाचाराःसशिष्याश्चत्वेषुकोभ्यधिकोद्विजः ॥ ५१ ॥ एतत्कथंहिविज्ञेयमाधिक्यंब्राह्मणोत्तमे ॥ कस्मैचिच्चेदहंप्रष्टासब्रूयात्स्वमनोगतम् ॥ ५२ ॥ यस्ययत्रभवेद्द्वेषःसतंनिंदेद्द्विसर्वथा ॥ अपिदेवंगुरुंचैवब्रह्माणंवास्वयंभुवम् ॥ ५३ ॥ यस्ययत्रभवेत्स्नेहस्तंस्तुवीतससर्वथा ॥ अप्यक्षरैकविज्ञानरहितंहालिकोपमम् ॥ ५४ ॥ उदासीनोनजानातिगुणान्दोषांश्चकस्यचित् ॥ तद्वक्रतःस्वयंज्ञातेनिर्णयोमेभविष्यति ॥ ५५ ॥ पृच्छामिचेदमून्विप्रान्प्रत्येकमहमेवहि ॥ तथापिनिर्णयोनस्यात्स्वस्यकोन्यूनतांवदेत् ॥ ५६ ॥ अथनानाविधैश्चोद्यैरमूनज्ञास्याम्यहंयदि ॥ तथापिकुपितादद्युःशापंमेब्राह्मणोत्तमाः ॥ ५७ ॥

यति उदासीनइति उदासीनस्याधिक्यव्याप्यगुणानांतदभावव्याप्यदोषाणांचज्ञानाभावात्तन्मुखादाधिक्यनिर्णयासिद्धिरिति अथत्वमेवोदासीनंप्रतिगुणदोषौश्रावयित्वाधिकंपृच्छेतिचेत्तर्हिसिद्धसाधनमित्याह तद्वक्रतइति तस्यउदासीनस्यवक्रतोयोमेनिर्णयोभविष्यतिसस्वयंज्ञातएवभविष्यतिनत्वज्ञाते यैर्मत्तःश्रुतैर्गुणैरुदासीनेनाधिक्यंज्ञेयंतैर्गुणैर्लिंगभूतैरहमेवकुतोनजानीयामितिभावः ॥ ५५ ॥ प्रत्येकंप्रश्नपक्षंदूषयति पृच्छामीति स्पष्टम् ॥ ५६ ॥ ननुदुरवगाह्यमर्थंतावत्पृच्छतत्रचयःसम्यक्तरंवदिष्यतितमधिकंजानीहीतिविकल्पमनिष्टप्रसक्त्यादूषयति अथेति चोद्यैःप्रश्नैः ज्ञास्यामिनिर्णेष्यामि मेमस्तं ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह विवादमिति ततउपायांतरस्यासंभवादेषांब्राह्मणानांपरस्परंविवादमेवकारयित्वाआधिक्यस्यनिर्णयंकरोमिविलोकयन्प्रत्यक्षगोचरीकुर्वन्सन्निति ॥ ५८ ॥ अथविवादोपायंराजालोचयन्साक्षाद्विवदध्वमितिप्रेरणातुबलवदनिष्टहेतुत्वान्नकार्येत्याह कुरुध्वमिति ॥ ५९ ॥ तर्हिकिंकर्त्तव्यमतआह ततइति एतेब्राह्मणाः अनुक्तेकुरुध्वमित्यादिवाक्यइत्यनुषंगः विवदेरन्विवादंकुर्युस्तथोपायंकुर्वे इति ॥ ६० ॥ सचोपायःपणत्वेनापर्यंतंधननिधानमेवेतिसिद्धांतयितुंतदुपपत्तयेधनस्यविवादोपयोगिक्षोभहेतुतामाह विषयइति बहुलोविषयोविषयभोगसाधनंधनमितियावत् सकस्यनक्षोभकः यतोब्रह्मविदांब्रह्मसंस्थपदेनछांदोग्यश्रुतौप्रसिद्धानांयतीनामपिचित्त

॥५॥

विवादंततएवैषांकारयित्वात्रसंसदि ॥ करोमिनिश्चयंतेषामाधिक्यस्यविलोकयन् ॥ ५८ ॥ कुरुध्वंब्राह्मणा अद्यविवादमितिचेदमून् ॥ वदामिकुपिताःकुर्युर्भस्मतांममदुर्धियः ॥ ५९ ॥ ततएतेमयानुक्तेस्वयमेवयथा द्विजाः ॥ विवदेरंस्तथाकुर्वउपायंब्राह्मणान्प्रति ॥ ६० ॥ विषयोबहुलःकस्यचेतःसंक्षोभदोनहि ॥ अपिब्रह्म विदांचित्तंक्षोभयेत्किंकुटुंबिनां ॥ ६१ ॥ द्रव्येणजायतेकामःक्रोधोद्रव्येणजायते ॥ द्रव्येणजायतेलोभोमो होद्रव्येणजायते ॥ ६२ ॥ निष्किंचनस्यकःकामोनित्यंक्षुत्पीडितस्यहि ॥ अन्नंयावत्प्रियादद्याद्दद्मितावदहंस्व यं ॥ दरिद्रइतिसंचिंत्यस्त्रीमुखंनविलोकयेत् ॥ ६३ ॥ दरिद्रंपुरुषंदृष्ट्वानार्यःकामातुराअपि ॥ स्प्रष्टुंनेच्छंतिकुण पंयद्वत्कृमिविदूषितम् ॥ ६४ ॥

क्षोभकःकिमुतान्येषामिति ॥ ६१ ॥ तत्रद्रव्यस्यक्षोभहेतुत्वेद्वारभूतंकामादिचतुष्टयंद्रव्यजन्यतयादर्शयति द्रव्येणेति ॥ ६२ ॥ तत्रद्रव्यस्यकामहेतुतांस्फुटयन्द्रव्यव्यतिरेकेकामव्यतिरेकंदर्शयति निष्किंचनस्येतिचतुर्भिः क्षुत्पीडितस्यनिष्किंचनस्यकःकामोनकोपीति यतो दरिद्रइतिसंचिंत्यस्त्रीमुखंनपश्यति इतिकिं यावदन्नंप्रियाविवाहादिसंपादिताऽऽदद्यात्भोजनार्थंगृह्णीयात्तावदहमेवाग्निप्रियायाअन्नंकुतोदास्यामीति ॥ ६३ ॥ स्त्रियोपितंनकामयंतेइत्याह दरिद्रंपुरुषमिति कुणपंशवम् ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दरिद्रेस्त्रीणांविरागंकैमुत्येनस्पष्टयति ब्राह्मादिभ्यइति ब्राह्मोविवाहआहूयदीयतेशक्त्यलंकृताइत्यादिनाब्राह्मादिविवाहायाज्ञवल्क्यादि स्मृतिषुप्रसिद्धास्तेभ्योहेतुभ्यःप्राप्तापिपतिव्रतापिनारीक्षुधयातुरासतीदरिद्रस्यभर्तुर्मृतिमिच्छतीति ॥ ६५॥ दारिद्र्यमिति श्रीमदांधतानि वर्तकंधर्मरूपनिधानस्यदर्शकंचदारिद्र्यंसिद्धांजनमिति यतोजननीवत्कासुचिदपिनारीषुकामनांनकरोतिअन्नमात्रमिच्छतिचेति ॥६६॥ दरिद्रेकोपाभावंस्फुटयति विवेकीवेतिपञ्चभिः ॥६७॥ पुराकृतानामिति एवंविचार्यदरिद्रःपापंनकुरुते एवंकथं अहंपुराकृतानांपापानां

ब्राह्मादिभ्योविवाहेभ्यःप्राप्तानारीपतिव्रता ॥ भर्तुर्दरिद्रस्यमृतिंवांछतिक्षुधयार्दिता ॥६५॥ दारिद्र्यमंजनंप्रोक्तंनराणांधर्मदर्शने ॥ दरिद्रःकासुचित्कामंनकुर्याज्जननीष्विव ॥ अन्नमेकंविहायाऽयंकिंचिन्नेच्छतिकर्हिचित् ॥ ६६ ॥ विवेकीवदरिद्रोयंकोपंनकुरुतेक्वचित् ॥ राजादिभयतोनित्यंधर्मराजभयात्तथा ॥ ६७॥ पुराकृतानांपापानांफलमेतत्समाप्तवान् ॥ दारिद्र्यंनामकिंनामभूयस्तस्मात्परंभवेत् ॥ ६८ ॥ जनन्याअपिजायायाःपुत्रादीनांतथैवच ॥ दरिद्रोलंघनीयःस्यान्महापापीवसर्वदा ॥ ६९ ॥ इतःपरंदरिद्रत्वहेतुभूतंहिपातकं ॥ पश्यन्फलंकथंकुर्यात्सर्पस्येवात्रलंघनं ॥ विचार्यैवंदरिद्रोयंकुरुतेपातकंनहि ॥ ७० ॥ दरिद्रोधर्मविज्ञानगंधेनरहितोपियः ॥ नसोपिकुरुतेपापंधर्मज्ञःकिंपुनःपुमान् ॥ ७१ ॥ परदारान्परद्रव्यंभीतस्तस्मान्नचेच्छति ॥ क्षुधयापीडितश्चायंतुष्यत्यल्पेनसर्वदा ॥ ७२ ॥

फलंदारिद्र्यरूपंसमाप्तवान्प्राप्तोस्मिततोदारिद्र्यात्परमधिकंभूयःपुनःकिंपापफलंस्यादितियतोजनन्यादीनामपिदरिद्रोऽनादरणीयःस्यात् महापापिवदिति इतःपरमुक्तावस्थाप्राप्त्यनंतरमपिफलंपश्यन्नहंदरिद्रत्वहेतुभूतंपापंकथंकुर्यां सर्पंमृत्युहेतुभूतंदृष्ट्वापिकोलंघयेदितित्रयाणांसंबंधः उक्तविचारेणमोहाभावोपिदर्शितः ॥६८ ॥६९ ॥ ७० ॥ अत्रापिकैमुत्यमाह दरिद्रइति गंधोलेशः पापंहिंसादिरूपं ॥ ७१ ॥ लोभाभावमपिदरिद्रेदर्शयति परेति तस्मात्परस्मात् अयंदरिद्रःक्षुत्पीडितोप्यल्पेनतुष्यतीति ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंधनव्यतिरेकेदोषाणांव्यतिरेकमभिधायाथधनान्वयेदोषान्वयंदर्शयति समर्थइति समर्थोधनीमदांधःसन्स्वबलेनराजादिकमवजाना तिनगणयति ततःसर्वदोषभागूभवतीतिभावः॥७३॥ तत्रमोहस्यफलंलोकद्वयेप्यनर्थप्राप्तिंदर्शयति असत्यमिति परदारिकादिषुप्रसिद्धमी दृशंदुःखमिति ॥ ७४ ॥ समर्थेलोभंस्फुटयति लोभश्चेतित्रिभिः जातवेदसाऽग्निना अग्निसाधर्म्यमुत्तरार्द्धेनोक्तमिति ॥ ७५ ॥ उत्तरोत्तरे च्छामुदाहरति पृथिवीमिति॥७६॥लोभमोहयोःसमुच्चितयोःकार्यंसमर्थेदर्शयति समर्थइति लोभेनपरार्थंहृत्वासर्वशोच्यतामापन्नोपिय त्परानुपहसतितन्नराधमतांविनानघटतेइति॥७७॥ समर्थस्यमोहमभिनयति समर्थोमोहमितिद्वाभ्यां स्वात्मानंतथास्वात्मनोहितकारिणं

समर्थःश्रीमदांधोयंराजानंदेवतांगुरुं॥ अवजानातिसहसास्वात्मनोबलमाश्रितः॥७३॥ असत्यंदुःखमाप्नो तिलोकद्वयभयंकरम्॥ कीर्तिहानिंचधिग्वादंसद्योगच्छतिमोहितः ॥ ७४ ॥ लोभश्चास्मिन्समर्थेस्यात्सदृशो जातवेदसा॥ यावद्यावदवाप्नोतिततोभूयःसइच्छति॥७५॥ पृथिवींधनपूर्णांचेदिमांसागरमेखलां॥ प्राप्नो तिपुनरप्येषस्वर्गमिच्छतिनित्यशः॥ ७६ ॥ समर्थःस्वात्मलोभेनपरदारधनादिकम्॥ हृत्वाचोपहसत्यन्यान्स र्वशोच्योनराधमः॥ ७७॥ समर्थोमोहमापन्नोनजानातिहिताहितम्॥ स्वात्मानंद्वेष्टिचैवायंस्वात्मनोहितका रिणं॥ ७८ ॥ मातरंपितरंपुत्रान्ब्राह्मणांश्चबहुश्रुतान्॥ कर्मणामनसावाचासमर्थोहंतिमोहतः॥ ७९ ॥ दरि द्रस्यनलोभोस्तिनमोहश्चमहात्मनः॥ इत्थमेषविचार्यैवसुखंतिष्ठतिनिश्चलः॥ ८०॥ मत्स्यंकोपिकदाचिद्वाया चमानायनित्यशः॥ नदद्यादन्नमात्रंचकिमर्थंकांक्षयाम्यहं॥ ८१ ॥

चद्वेष्ट्येवेतिसंबंधः स्वात्मद्वेषोमूढस्यभगवद्गीतास्वप्युक्तः अनात्मनस्तुशत्रुत्वेवर्त्तेतात्मैवशत्रुवदिति॥ ७८॥ हितकारिषुद्वेषमभिनयति मा तरमिति मोहतःपूज्यानामपकार्यत्वेनदर्शनात्मकात् ॥ ७९ ॥ दरिद्रेउक्तदोषाभावइत्याह दरिद्रस्येति एषदरिद्रइत्थमुत्तरश्लोकद्वयो क्तप्रकारेणविचार्यनिश्चलउद्यममकुर्वन्सुखंतिष्ठति ॥ ८० ॥ इत्थंपदार्थप्रकारमभिनयति मत्स्यमितिद्वाभ्यां मत्स्यंयाचमानायापिकोपिअ न्नमात्रमपिनदद्यादतःकामनाव्यर्थैतिविचारोलोभनिवर्तकः ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहनिवर्तकंविचारमाह इयमिति मातृप्रभृतीनामाज्ञामयावश्यमनुष्ठेयेत्यर्थः ॥ ८२ ॥ फलितमाह ततइति ॥ ८३ ॥ एवंधनस्यक्षोभहेतुतायस्योपायस्यविवक्षयावर्णितातमुपायंसफलमभिनयति ततोधनमिति अपर्यंतमतिप्रचुरमितियावत् अधिकायाधिकंनिर्णेतुंपणीकृतंद्यूतेलापितद्रव्यभावंनीतंधनंमहात्मनेविप्रायस्थापयामीति ॥ ८४ ॥ तत्फलमाह अधिकेनेति अस्मिन्पणीकृतेधने ॥ ८५ ॥ नन्वेवंविप्राणांक्षोभहेतोस्तवपापप्रसक्तिरित्याशंक्याह नचैवमिति राज्ञांधर्मोनीत्याभीष्टसाधनं तमेवप्रकृतेयोजयति उपायेनेति क्षोभस्तुविप्राणांस्वदोषप्रयुक्तोनमत्कृतइतिभावः ॥ ८६ ॥ सर्वाधिकस्यविप्रस्यमयापात्रतयाभिप्रेतत्वाच्चापात्रदानप्रयुक्तपरंपरयापिमेदोषप्रसंगोन

इयंमातापिताचाथबांधवोहितकृत्तथा॥ एतेमत्यंवदेयुर्यत्करणीयंमयाहितत्॥ ८२॥ ततोधनेनसर्वेस्युःकामक्रोधादयोभुवि॥ अपिब्रह्मविदांकिंतुनराणांतुबहिर्दृशाम्॥ ८३॥ ततोधनमपर्यंतमधिकायपणीकृतम्॥ सभायांस्थापयिष्यामिब्राह्मणायमहात्मने ॥ ८४ ॥ अधिकेनगृहीतेस्मिन्नपरेक्रोधमूर्छिताः॥ सर्वएवकरिष्यंतिविवादंस्वयमेवहि॥ ८५॥ नचैवंममपापंस्याद्राज्ञांधर्मेकृतेमया ॥ उपायेनैवविज्ञेयोराज्ञासर्वाधिकोद्विजः॥ ८६॥ नचैवंधनतःपापंतस्यविप्रस्यसंभवेत्॥ सर्वाधिकोधनंप्राप्यपापंकुर्यात्कथंत्वयं॥ ८७॥ अपिसर्वाधिकोनूनमेषवाजसनेयकः ॥ सूर्यशिष्योमहाभागोयाज्ञवल्क्योमुनीश्वरः॥ ८८॥ नास्यकामोनचक्रोधोलोभोमोहोनचास्यवै॥ अस्यगर्वोपिनैवास्तियतस्तिष्ठतिमौनतः॥ ८९॥ धनंनायंस्वकामायस्वीकरिष्यतिकर्हिचित्॥ अनुग्रहमयोविप्रःप्रायएतान्हिजेष्यति॥ ९० ॥

भविष्यतीत्याह नचैवमिति एवमुक्तविधयाधनतोधनमादायतस्यसर्वाधिकस्यविप्रस्यपापमपिनभवेत् पापप्रयोजकसदोषत्वविरोधिनःसर्वाधिकत्वादेवसर्वाधिकःकथंपापंकुर्यादिति ॥ ८७ ॥ नकेवलंसर्वाधिकस्यानर्थप्रयोजकदोषाभावोनुमेयएवकिंतुयोत्रसंसदिसर्वाधिकतयासंभावितोयाज्ञवल्क्यस्तस्यसर्वदोषराहित्यंप्रत्यक्षायमाणमित्याह अपीतिद्वाभ्यां स्पष्टम् ॥ ८८ ॥ ८९ ॥ तर्हिवीतरागोयंत्वदर्पितंधनमपिकथंग्रहीष्यतीत्याशंक्यपरोपकारायेत्याह धनंनायमितिद्वाभ्यां अयंयाज्ञवल्क्यः स्वकामायस्वोपभोगाय अनुग्रहमयःप्रचुरानुग्रहः प्रायइत्युत्प्रेक्षायां तथाचएवंसंभाव्यतेयदयंमुनिरनुग्रहेणैवधनंस्वीकृत्यैतान्विप्रान्जेष्यतीत्यर्थः ॥ ९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपकारपरतांस्फुटयति यद्येतदिति अस्यधनंशरीरंचपरार्थमित्यर्थः ॥ ९१ ॥ अस्यधनस्वीकारादिप्रयोजकोनुग्रहोपिप्राधान्येनमद्विषयकएवेतिदर्शयति अस्येति यथापामरोलिप्सयाभूभृतंराजानंपश्येत्तद्वद्यन्मांयाज्ञवल्क्योनिरीक्षतेततोज्ञायतेअस्यमयिमहान्स्नेहोनुग्रहः स्निग्धदृष्टेरनुग्रहलिप्सयोरन्यतरव्याप्यत्वाल्लिप्सायावीतरागेबाधादितिभावः ॥ ९२ ॥ अस्यचवीतरागत्वंक्षोभाभावादिनालक्ष्यतइति वक्तुंक्षोभेनिमित्तंदर्शयति मनसीति एनंयाज्ञवल्क्यंमनसिनिधायजेतुकामाइतियावत् ईदृशागर्विताब्राह्मणाःपरस्परंहसंतःसंतोदुरुत्तराणिदुरवगाह्यान्युत्तराणियेषामीदृशानिवाक्यानिभाषंतइति ॥ ९३ ॥ एषयाज्ञवल्क्यस्तुनक्षोभंगच्छतीत्याह अज्ञवदिति वचनानितेषामितिशेषः स्पष्टम् ॥ ९४ ॥ इत्यादीति इत्यादिकंविचारंकृत्वागवांसहस्रंतथानिष्काणांदीनाराणांचत्वारिंशत्सहस्राणिसदसिनिदधौस्थापि

यद्येतद्धनजातंस्यादस्यहस्तेमहामुनेः॥ भूतानामुपकारायशरीरेणसमंसदा॥ ९१ ॥ अस्यस्नेहोमयिमहान्विद्यतेयंपुनःपुनः॥ निरीक्षतेयथाकश्चित्पामरोभूभृतंजनः॥ ९२ ॥ मनस्येनंविधायैतेब्राह्मणागर्वमागताः॥ दुरुत्तराणिभाषंतेहसंतइतरेतरम्॥ ९३ ॥ अज्ञवच्चैषविप्रेंद्रःशृणोतिवचनानिन॥ शृण्वन्नपिवचःकिंचिद्भाषतेनजडोयथा॥ ९४ ॥ इत्यादिबहुधाराजाचिंतयित्वामनोगतं॥ कामधेनुसमानानांसहस्रंनिदधौगवाम् चत्वारिंशत्सहस्राणिनिष्काणामपिभूपतिः॥ ९५ ॥ शृंगेशृंगेगवांराजानिष्काणांविंशतिंहिसः॥ प्रत्येकंद्विसहस्रेषुशृंगेष्वर्पितवांस्तदा॥ ९६ ॥

तवानिति पले दीनारेपिचनिष्कइत्यमरः ॥ ९५ ॥ दीनाराणांचत्वारिंशत्सहस्रत्वेहेतुमाह शृंगेइति हियतःसहस्रसंख्याकानांगवांद्विसहस्रसंख्याकेषुशृंगेषुसत्सुप्रत्येकंशृंगेशृंगेनिष्काणांदीनाराणांश्रुतौकर्षचतुष्टयात्मकस्यपलस्यपादतयाप्रतिपादितानांविंशतिंश्रुतौद्विरावृत्तदशपदोक्तांबबंधेति तथाचसहस्रद्वयस्यविंशत्यागुणनेउक्तसंख्यासिद्धिरितिभावः अत्रयद्यपिभाष्यकारैःश्रुतिगतदशदशपदद्वित्वंवीप्साभिप्रायेणव्याख्यातंपंचपंचपादाएकैकत्रशृंगेबद्धाइत्युक्तेः तत्रचदशसहस्राणिनिष्कसंख्याभवतितथाप्यनेनग्रंथकृताउपाख्यानेषुनात्यंतमाग्रहइतिशबरस्वामिवचनानुसारेणजनकौदार्यातिशयप्रकटनायचदशदशेतिपदंविंशतिपरतयाव्याख्यातमितिबोध्यं ॥ ९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतान्होवाचेत्यादिद्वितीयकंडिकार्थमुपबृंहयति शास्त्रोक्ताइत्यष्टाविंशतिश्लोकैः शास्त्रेयथोत्तमकल्पेउक्तास्तथाविधास्तागाःसंस्था प्यब्राह्मणान्प्रतीदंजनकउक्तवानिति इदंकिं योभवतांमध्येश्रेष्ठोब्रह्मवित्सएतागाःस्वाश्रमंप्रतिनयत्विति ॥ ९७ ॥ एवमिति एवंजनकेनो क्तेसतिसर्वेविप्रास्तूष्णीमधोमुखाःस्थिताःसंतएतान्समवेतान्द्विजानतिक्रांतुंविद्याधिक्येनाभिभूयप्रगल्भीभवितुंनशेकुर्नसमर्थाबभूवुरित्य र्थः ॥ ९८ ॥ तूष्णीमिति तेषुब्राह्मणेषुतूष्णींभूयस्थितेषुसत्सुयाज्ञवल्क्यःसामवेदपाठिनंशिष्यंप्रत्युवाच ॥ ९९ ॥ सामेति हेसामाध्यायिन् त्वमेतागानोस्माकंगृहेशीघ्रंनय किंकृत्वा इतिविघुष्य डिंडिमशब्दवत्स्फुटंकथयित्वा इति किं याज्ञवल्क्योब्रह्मिष्ठोऽतिशयेनब्रह्मवित्तयाब्र

शास्त्रोक्तागाश्चसंस्थाप्यब्राह्मणानिदमब्रवीत् ॥ भवतांब्रह्मविच्छ्रेष्ठोयःसएतानयत्विति ॥ ९७ ॥ एवमुक्तेथ
विप्रेंद्राःसर्वेतूष्णीमवस्थिताः ॥ अधोमुखाअतिक्रांतुंशेकुर्नैतान्द्विजोत्तमान् ॥ ९८ ॥ तूष्णींभूतेषुतेष्वेषया
ज्ञवल्क्योभ्यभाषत ॥ साम्नामध्ययनेयुक्तंशिष्यंस्वोक्तार्थकारिणं ॥ ९९ ॥ सामाध्यायिन्गृहेनोगानयशीघ्रंवि
घुष्यच ॥ ब्रह्मिष्ठोयाज्ञवल्क्योगानयतीतिद्विजन्मनां ॥ १०० ॥ सामाध्यायीप्रोक्तकारीशिष्यस्तस्यमुनेस्ततः ॥
तथैवकृतवान्यद्वद्गुरुणोक्तंमहात्मना ॥ १०१ ॥ ततोगोषुविनीतासुब्रह्मिष्ठेनद्विजन्मना ॥ चुक्रुधुःसकलावि
प्रानानादेशसमागताः ॥ १०२ ॥ अतुलंप्रापसंतोषंजनकोमिथिलेश्वरः ॥ युगपद्याज्ञवल्क्योभूत्सुखदुःखक
रस्तदा ॥ १०३ ॥ दर्शयन्सर्वभूतानांसुखदुःखेनवस्तुनि ॥ किंतुस्वस्यैवमनसिस्निग्धेद्विष्टेचसर्वदा ॥ १०४ ॥

ह्मवान्गानयतीति ॥ १०० ॥ सामाध्यायीति तस्यमुनेःप्रोक्तकारीसामाध्यायीशिष्योयथागुरुणोक्तंतथैवकृतवानिति ॥ १०१ ॥ ततइ ति विनीतासुशिष्यद्वाराआश्रमंप्रतिप्रेषितासुसतीषुविप्राःक्रोधंप्रापुः ॥ १०२ ॥ अतुलमिति जनकस्त्वभीष्टसिद्धिंमत्वानितरांतोषंप्राप्तः एवंसतियाज्ञवल्क्योयुगपत्समकालमेवजनकस्यब्राह्मणानांचसुखदुःखप्रदोभूदिति ॥ १०३ ॥ दर्शयन्निति किंकुर्वन्याज्ञवल्क्यःसुख दुःखप्रदोभूदितिदर्शयन् इतिकिं यत्सांख्याआहुर्वस्तुनिविषयस्वरूपेसुखदुःखेवर्त्तेतेइतितथानमतव्यंकिंतुस्वस्यमनस्येवतेवर्तेते तत्रस्नि ग्धेस्नेहशालिनिचित्तेसुखंयथाजनकस्य तथाद्विष्टेद्वेषशालिनिचित्तेदुःखंयथाब्राह्मणानामिति ॥ १०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखदुःखयोर्मनोनिष्ठत्वेकल्पनाजन्यत्वंहेतुमाह कल्पनातइति कल्पनारमणीयत्वाद्यवगाहीसंकल्पस्ततएवसुखदुःखेजायेते यतःअका
रणेवाह्यकारणहीने तदुदाहरति महेति यथाप्राणिशून्येमहावनेस्वमानसादेववीतरागाणांसुखंरागिणांदुःखंचजायतेइति ॥ १०५ ॥ अ
थविप्राणांदुःखप्रयुक्तंकोपमभिनयति चलितानीतित्रिभिः याअधराअधस्तनादंतपंक्तिःसामुखस्यांतःप्रविष्टाऊर्ध्वदंतपंक्त्याअधरस्या
क्रमणादिति ॥ १०६ ॥ कोपावेशस्यभूतावेशसाम्यमाह केचिदिति लोहितेनरुधिरेणपूरितैरिवनेत्रैरश्रूणिमुमुचुः ॥ १०७ ॥ शब्दश्चेति
पर्वणिपूर्णिमायां ॥ १०८ ॥ धिगिति महाशालाः महतीःशालाअध्यापनगृहाणिधिगिति ॥ १०९ ॥ विद्येति विद्याविविधाःविदं

कल्पनातःप्रजायेतेसुखदुःखेअकारणे ॥ महावनेयथाजंतोःप्राणिशून्येस्वमानसात् ॥ १०५ ॥ चलितान्या
सनान्येषांश्मश्रूणिचचकंपिरे ॥ अधरादंतपंक्तिर्याप्रविष्टाऽऽस्येद्विजन्मनां ॥ १०६ ॥ केचिदश्रूणिमुमुचुर्नेत्रै
र्लोहितपूरितैः ॥ जहसुःकेचिदेवामीउन्मत्तसदृशाद्विजाः ॥ १०७ ॥ शब्दश्चाभून्महांस्तत्रविप्राणांयज्ञमंडपे ॥
क्षोभोयथासमुद्रस्यपर्वकालेउपागते ॥ १०८ ॥ धिक्कुलानिमहाशालाअस्माकंधिक्कजीवितं ॥ गुरुशुश्रूषणं
धिग्धिग्धिग्वेदाध्ययनंतथा ॥ १०९ ॥ विद्याविदस्तथाशिष्यान्कीर्तिनोधिग्धिगेवहि ॥ एकएवयतोविप्रोत्य
वजानातिनोखिलान् ॥ ११० ॥ इत्यादिवादिनोविप्रानालोच्यचविचार्यच ॥ प्रष्टुमभ्याययौकोपात्स्खलन्नि
वहसन्निव ॥ आगत्यचमुनिंशांतंभर्त्सयन्निदमब्रवीत् ॥ १११ ॥ याज्ञवल्क्यदुराचाररेरेवाजसनेयक ॥ अ
शुश्रूषितविप्रेंद्रगुरुपादांबुजद्वयं ॥ ११२ ॥

तिजानंतीतिविद्याविदः एतादृशान्शिष्यान्धिगिति सर्वत्रहेतुः एकएवेत्यादिः अवजानातिअतिक्रामति ॥ ११० ॥ इत्यादीति एवं
वदतोविप्रानालोच्यकोपात्स्खलन्निवहसन्निवचअभ्याययौआगत्यचशांतंयाज्ञवल्क्यंप्रतीदंवक्ष्यमाणमुक्तवान् आश्वलनामाइतिशेषः
॥ १११ ॥ याज्ञवल्क्येति अशुश्रूषितंसम्यगसेवितंविप्रेंद्रस्यप्रसिद्धविप्ररूपस्यगुरोःपादांबुजद्वयंयेनसतथा अनेनवैशंपायनसंप्रदायत्या
गोध्वनितः ॥ ११२ ॥ ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्माकमिति किमस्माकंब्राह्मणानांत्वमेवाधिकोसितदपितवाधिक्यंगर्वलोभाभ्यामेवनविद्ययाइति कीदृशानामस्माकं ब्रह्मकल्पानांहिरण्यगर्भसमानांमहात्मनांगर्वादिहीनानांउपशमशीलानांचतुर्दशादिविद्यानांविदुषांतर्कस्यमननस्यसिद्धये अंगानिवेदाश्चत्वारोमीमांसा न्यायविस्तरः पुराणंधर्मशास्त्रंचविद्याएताश्चतुर्दश आयुर्वेदोधनुर्वेदोगांधर्वंचेत्यनुक्रमात् अर्थशास्त्रंतथेत्येताविद्याअष्टादशस्मृताः इति द्वयोरर्थः ॥ ११३ ॥ ११४ ॥ निर्लज्जइति कोवानिर्लज्जःसन्पंडितोनभूयादिति तत्रत्वमेवोदाहरणमित्याह ब्रह्मिष्ठइति ॥ ११५ ॥ त

अस्माकंब्रह्मकल्पानांब्राह्मणानांमहात्मनां ॥ गर्वलोभादिदोषौघवर्जितानांशमात्मनां ॥ ११३ ॥ चतुर्दशादिविद्यानांवेत्तॄणांतर्कसिद्धये ॥ त्वमेवैकोधिकोजातोगर्वलोभाधिकोधमः ॥ ११४ ॥ निर्लज्जःपंडितोभूयान्नकोनाममहीतले ॥ ब्रह्मिष्ठोयत्त्वमस्माकंमुनीनांब्रह्मवादिनां ॥ ११५ ॥ कुलेजातान्महावीर्यान्पन्नगान्कःपदास्पृशेत् ॥ कालकूटंविषंकोवाभक्षयेद्योगवर्जितः ॥ ११६ ॥ मुष्टिनाज्वलितंवह्निंबध्वाकःस्वगृहंनयेत् ॥ कःकोपयेदिमान्विप्रान्नानादेशसमागतान् ॥ मुक्त्वात्वांगर्वलोभाढ्यंदुर्विनीतंद्विजाधमम् ॥ ११७ ॥ एकैकोपिदहेद्विश्वंकुपितोब्राह्मणोत्तमः ॥ नानादेशाइमेसर्वेकिंपुनस्त्वांद्विजाधमम् ॥ ११८ ॥ इत्यादिभिस्तुवाक्शल्यैःकर्णरंध्रप्रताडितः ॥ आश्वलेनतदाविप्रोयाज्ञवल्क्योमहायशाः ॥ ११९ ॥ गिरिर्जलधरैर्यद्वद्वद्रुपाषाणवृष्टिभिः ॥ जगामाल्पंचनक्षोभंहसन्निदमुवाचह ॥ १२० ॥

त्ववादादौप्रसिद्धंवाचाधर्षणंनिदर्शयति कुलेइति कुलीनान्पन्नगान्वासुक्यादीन्कःपदापादेनस्पृशेत् शंभुवद्योगहीनःकालकूटंकःपिबेत् ज्वलितंवह्निंमुष्टिनाकोबध्वानयेत् कोवाइमान्विप्रांस्त्वांविनाकोपयेत् वाक्यार्थयोःसदृशयोरैक्यारोपोनिदर्शनेतिलक्षितोनिदर्शनालंकारः ॥ ११६ ॥ ११७ ॥ एकैकोपीति स्पष्टम् ॥ ११८ ॥ इत्यादिभिरिति इत्यादिवाक्यरूपशल्यैःकर्णच्छिद्रद्वाराआश्वलेनताडितोपियाज्ञवल्क्योमेघैःपाषाणवृष्ट्याताडितगिरिवन्नक्षुब्धःप्रत्युतहसन्सन्निदंवक्ष्यमाणश्लोकचतुष्टयात्मकंवाक्यमुवाचेतिद्वयोरर्थः ॥ ११९ ॥ १२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनौद्धत्यंब्रह्मविदोलिङ्गमितिसूचयन्याज्ञवल्क्यआह ब्रह्मिष्ठइतिचतुर्भिः हेआश्वलअत्रब्राह्मणसमवायेयोयोब्रह्मिष्ठतयाधिकोभवेत्त स्मैतस्मैवयंनमस्कुर्मः ॥ १२१ ॥ तर्हिगावःकुतोहृताइतिचेद्गोषुकामनोदयादित्याह हेम्नेति सुवर्णसहितागाःसंवीक्ष्यतास्वभिलाषात्का मनातस्तागावोमयाहृतास्तत्रकिमर्थंब्राह्मणाःकुप्यंतीति ॥ १२२ ॥ यदिब्राह्मणानांस्वंकिंचिद्ध्रियेततर्हितेकुप्यंतुनाममयातुराज्ञादत्तं हृतमतोऽयुक्तःकोपइत्याह राजेति ॥ १२३ ॥ नाप्यहंब्राह्मणेभ्योराजकर्तृकदानस्यप्रतिबंधकोयेनतेकुप्येयुरित्याह एतेपीति यदिमद्व द्धनार्थिनएतेब्राह्मणास्तर्हितेपिप्रतिगृह्णंतुत्वमपिचप्रतिगृह्णीष्वराजाचबहुलधनोऽस्तुयुष्मभ्यंददातुचनाहंवारयेइति ॥ १२४ ॥ एवमुक्त आश्वलोघृताहुत्यावन्हिवत्पुनरपिक्षुब्धःसंस्ततोयाज्ञवल्क्येनब्रह्मिष्ठस्यनमस्कार्यतायोक्तातांमनसिनिधायतंयाज्ञवल्क्यंप्रतिवादायवादं

ब्रह्मिष्ठोत्रभवेद्योयोत्यधिकोब्राह्मणोत्तमः॥ तस्मैतस्मैनमस्कुर्मोवयमाश्वलसर्वदा ॥ १२१ ॥ हेम्नात्रसहि तागावोदृष्टास्तास्त्वभिलाषतः ॥ हृतामयाकुतोविप्राःकोपंकुर्वंत्यकारणं ॥ १२२ ॥ राजादातात्यहंहर्तागवां केनद्विजन्मनां ॥ कोपोनिष्कारणेजातोवदाश्वलमहामुने ॥ १२३ ॥ एतेप्येवंप्रगृह्णंतुराज्ञोस्तुबहुलंधनं ॥ मद्व द्धनार्थिनश्चेत्स्युस्त्वंवाश्वलयथासुखं॥ १२४॥ एवमुक्तस्ततःक्षुब्धःपुनरप्याश्वलोमुनिः॥ घृताहुत्यायथावन्हि र्वादायोवाचतंमुनिम्॥ १२५॥ याज्ञवल्क्येतिसंबोध्यत्वादावष्टावथाकरोत् ॥ प्रश्नांस्तत्रापिचत्वारोऽतिमो क्षाःसंपदोपरे ॥ १२६ ॥

कर्तुमुवाचेतिसंबंधः ॥ १२५॥ अथाश्वलप्रश्नोत्तररूपस्यकण्डिकाष्टकस्यार्थंसंगृह्णाति याज्ञवल्क्येतिचतुर्भिः आश्वलःसर्वप्रश्नानामा दौयाज्ञवल्क्येतिसंबोध्यअष्टौप्रश्नानकरोत् तत्रतेषुमध्येचत्वारःप्रश्नाअतिमोक्षाःमोक्षःकर्मिणांजनानांवागादीनामध्यात्मपरिच्छेदलक्ष णस्यमृत्योर्निवृत्तिसाधनंज्ञानंफलत्वेनततोप्युत्कृष्टावागादीनामग्न्यादिभावप्राप्तिरतिमोक्षस्तद्विषयकत्वात्प्रश्नाअप्यतिमोक्षाइति अपरे चत्वारःप्रश्नाःसंपदःसंपद्विषयकाः संपन्नामनिकृष्टेकिंचित्साम्येनउत्कृष्टदृष्टिः यथाश्राद्धेअन्नेऽमृतदृष्टिर्ब्राह्मणेविष्णुदृष्टिःसापिकर्मस मृद्धिकरी इत्यष्टावपिप्रश्नाःकर्मसंबंधिनएवेति ॥ १२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रातिमोक्षविषयकंडिकाचतुष्टयस्यप्रश्नभागानामर्थंसंगृह्णाति व्याप्तमिति हेयाज्ञवल्क्यसर्वमृत्विगादिसाधनैःसंपन्नमपिकर्माग्निहोत्रादिकंमृत्युनाप्रमादरूपेणपरिच्छेदहेतुनाव्याप्तमेव यद्यपिशास्त्रोक्तानुष्ठानेनाशास्त्रीयाइंद्रियादिवृत्तयोनिवृत्तास्तथापिपरिच्छेदोज्ञानंविनाननिवर्ततइतिभावः अदःपरिच्छिन्नंसर्वंत्यक्त्वा तृन्प्रत्ययः एतत्त्यागशीलः अपरिच्छिन्नफलगामीतियावत् ईदृशोयजमानःकथंकेनज्ञानलक्षणप्रकारेणभवेदितिप्रथमःप्रश्नः तथाऽहोरात्ररूपकालेनसर्वंपरिच्छिन्नंतदतिक्रमःकेनज्ञानेनेतिद्वितीयः तथाशुक्लकृष्णपक्षरूपकालेनसर्वंपरिच्छिन्नंतदतिक्रमःकथमितितृतीयः तथाएतंदेहंत्यक्त्वानिराश्रयेनिरालंबनेआकाशेगच्छन्यजमानःकेनसाधनेनयायात्गच्छेदितिचतुर्थइत्यर्थः ॥ १२७ ॥ प्रश्नचतुष्टयस्ययथाक्रममुत्तराणिदर्शयन्नुक्तकण्डिकाचतुष्टयस्योत्तरभागार्थंसंगृह्णाति इत्युक्तइति

व्याप्तंहिमृत्युनासर्वमन्हाराभ्यातथैवच॥ पक्षाभ्यांशुक्लकृष्णाभ्यामदस्त्यक्ताकथंभवेत् ॥ यजमानस्तथायायाल्केनखेऽत्रनिराश्रये॥ १२७॥ इत्युक्तेक्रमतःप्राहचतुर्णामुत्तरंमुनिः ॥ वाक्चक्षुःप्राणमनसामधिदैवात्मनाद्विज॥ होत्रावाध्वर्युणातद्वदुद्गात्राब्रह्मणापिच॥ १२८ ॥

इत्याश्वलेनोक्तेपृष्टेसतिचतुर्णांप्रश्नानामुत्तरजातंक्रमेणमुनिर्याज्ञवल्क्यआहस्म कथमितिचेच्छृणु अध्यात्मंयायजमानस्यवाक्तस्याअधिदैवंरूपमग्निस्तस्याएवाधियज्ञंयज्ञेवर्त्तमानंरूपं होतानामऋग्वेदवित्ऋत्विक् एतेषांत्रयाणामभेदावगाहिनीअहमधिदैवाग्न्यात्मकयजमानवाग्रूपोऽग्निरित्याकाराहोत्राक्रियमाणादृष्टिर्यजमानस्यप्रथमोक्तमृत्योस्तरणसाधनमेवमितरदपीतिभावः तथाचवाक्चक्षुःप्राणानामधिदैवरूपेणाग्निसूर्यवाय्वात्मकेनयथाक्रममैक्यमनुसंदधानेनहोत्राअध्वर्युणाउद्गात्राचऋत्विजायजमानउक्तमृत्युप्रभृतित्रयकृतंपरिच्छेदत्रयंतरति तथामनश्चंद्रात्मैक्यंपश्यताब्रह्मणावेदत्रयविदाऋत्विजातज्ज्ञानप्रभावेणाकाशेसालंबनोगच्छतीत्यर्थः अध्वर्यूद्गातृहोतारोयजुःसामर्ग्विदःक्रमादित्यमरः ॥ १२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथहोत्रादीनांचतुर्णांसंपद्रूपज्ञानविधायकस्यकंडिकाचतुष्टयस्यार्थंसंगृह्णाति चतुर्णामिति अयंयाज्ञवल्क्यःपूर्ववत्पृष्टःसंश्चतुर्णांहोत्रादीनांकर्तव्यानिसंपद्रूपाणिसफलानिकर्माणितिसृभिरित्यादिश्रुतिभिर्यथेनउवाचेतिसंबंधः तत्रकतिभिःऋग्जातिभिःकिंरूपेणचितिताभिर्होताकर्मकुर्वन्नूंकिंफलंसाधयतीतिप्रश्नोत्तरंयाज्यापुरोनुवाक्याशस्यासंज्ञाभिः यजेतिप्रैषानंतरंपठ्यमानायाज्या अनुब्रूहीतिप्रैषानंतरंपठ्यमानाअनुवाक्या एकनिःश्वासेनपठ्यमानाशस्याइतिलक्षिताभिःत्रित्वरूपसाम्येनत्रिलोकीरूपतयाहोत्रादृष्टाभिःसर्वप्राण्यात्मकंलोकत्रयंयजमानस्यसाधयतीति एवमध्वर्युणाहुतासुआहुतिषुउज्वलत्वसशब्दत्वाधोगामित्वैस्त्रिविधासुउज्वलत्वादिसाधर्म्येणदेवपितृमनुष्यलोकत्वेनाध्वर्युणादृष्टाभिस्तल्लोकत्रयजयःफलमितिद्वितीयमुत्तरं तथोद्गात्रागीयमानासुपूर्वोक्तयाज्याद्यृक्षुप्राणापानव्यानरूपतयाक्रमेणोद्गात्रादृष्टासुसतीषुभूरादिलोकत्रयजयःफलमितिचतुर्थमुत्तरं एवंब्रह्मणाध्यानमात्रव्यापारकेणानंतवृत्तिकत्वसाम्येनविश्वेदेवत

चतुर्णामपिकर्माणिप्रत्येकंसफलानिच ॥ संपद्रूपाण्युवाचासौतिसृभिस्त्वेवमादिना ॥ १२९ ॥ अष्टौप्रश्नान्विधायैवंसहोतोपरराम॥ अशक्तोलज्जितःपश्यन्नार्तभागमुखंमुहुः॥ १३० ॥ आर्तभागोऽथहैनंसजारत्कारवोमुनिः॥ याज्ञवल्क्येतिसंबोध्यप्रश्नंदुर्भेदमल्पकैः ॥ १३१ ॥ ग्रहाअतिग्रहास्तद्वत्कतिसंख्याउदीरिताः॥ उक्तइत्थमुवाचाष्टौद्वयेवाजसनेयकः ॥ १३२ ॥

यामनसिचिंत्यमानेऽनंतफलजयोयजमानस्यभवतीतिदक्षिणयाकीर्तैःऋत्विग्भिःकृतस्यकर्मणःफलस्ययजमानगामित्वादितिश्रुतौतृतीयमुत्तरमिति ॥ १२९ ॥ आश्वलब्राह्मणार्थमुपसंहरति अष्टाविति सआश्वलउतयाज्ञवल्क्यस्याजेयतामनुसंदधानउपरराम्हप्रश्नव्यापारान्निवृत्ते मयाऽजितमार्तभागःकथंस्विदेनंजयत्वित्याशयेनार्तभागमुखंपश्यन्निति ॥ १३० ॥ अथार्तभागप्रश्नपंचकतत्समाधानात्मकस्यद्वितीयब्राह्मणस्यार्थंपंचाशच्छ्लोकैःप्रदर्शयंस्तत्रप्रथमप्रश्नसमाधानस्यनवकंडिकामयस्यार्थंपूर्वोक्तोदेवताभावरूपोमोक्षोप्यापेक्षकःग्रहातिग्रहलक्षणमृत्युग्रस्तत्वादितिसूचकंनिबध्नाति आर्तभागइतिपंचदशभिः अथजारत्कारवआर्तभागएनंयाज्ञवल्क्यंयाज्ञवल्क्येतिसंबोध्यअल्पकैर्मंदमतिभिर्दुर्भेदंदुःसमाधानंप्रश्नमाहइत्यन्वयः ॥ १३१ ॥ संग्रहेणप्रश्नोत्तरेपूर्वोत्तरार्धाभ्यामभिनयति ग्रहाइतिग्रहाणामतिग्रहणांचकासंख्येतिपूर्वार्द्धार्थः एवमुक्तःपृष्टोवाजसनेयकोयाज्ञवल्क्यइत्थमुवाच इत्थंकथं द्वयेपिअष्टौग्रहाअष्टौअतिग्रहाअप्यष्टौइत्युत्तरार्धार्थः ॥ १३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्तभागोहीति आर्तभागइमंयाज्ञवल्क्यंप्रतिइतिपुनःसग्रहान्ग्रहैःसहितानतिग्रहान्संपृष्टवान् इतिकिंतेग्रहाअतिग्रहाश्चकेकिंस्वरूपाइति॥१२३॥याज्ञवल्क्योग्रहाणांस्वरूपमाह घ्राणमिति घ्राणादींद्रियाणिजीवस्यबंधकत्वाद्ग्राहाइत्युच्यंते अष्टत्वेतूपपत्तिर्वक्ष्यतेइति १२४॥ केवलानामिंद्रियाणांबंधकत्वमपियदधीनंतान्विषयानतिग्रहत्वेनदर्शयति गंधइति घ्राणादीनांक्रमेणविषयागंधाद्याः कामइच्छाकर्मक्रिया ॥१२५॥ उक्तानांग्रहत्वमतिग्रहत्वंचोपपादयति समुद्रइत्यादिना ग्रहैर्मकरादिरूपैः अतिग्राहैस्तिमिंगिलाद्यैः॥१२६॥ दार्ष्टांतिके योजयति तथेति भक्ष्यतेस्वाधीनीक्रियते तथास्वविषयरूपैरतिग्रहैरिंद्रियाणिभक्ष्यंते पुंबंधनक्रियायांस्वाधीनीक्रियंतइत्यर्थः॥१२७॥

आर्तभागोह्यथाहैनंसजारत्कारवोमुनिः ॥ पुनःकेतइतीमंसग्रहान्संपृष्टवान्मुनिः॥ १२३॥ घ्राणंवाग्रसना चक्षुःश्रोत्रंपंचममीरितम् ॥ मनोहस्तौत्वगित्यष्टौग्रहाउक्तामनीषिभिः ॥ १२४ ॥ गंधोनामरसोरूपंशब्दः कामोपिकर्मच॥अतिग्रहाइमेस्पर्शसहिताविषयामताः॥ १२५ ॥ समुद्रेपतितोयद्वद्भक्ष्यतेत्रग्रहैर्नरः॥ तेचाप्यन्यैरतिग्राहैर्गृह्यंतेभ्यधिकैर्यथा॥१२६॥ तथासंसारगोजंतुरिंद्रियैर्भक्ष्यतेग्रहैः ॥इंद्रियाणिस्वविषयैर्भक्ष्यतेतान्यतिग्रहैः॥ १२७ ॥ गृह्णंतिपुरुषंह्येतेमार्जारोमूषकंयथा ॥ इंद्रियाणिचगंधाद्यामत्स्यहेवजलाशयात् ॥ १२८ ॥ ग्रहाविष्टोयथाजंतुर्नपश्यतिहिताहितम् ॥ इंद्रियाश्रयवानेवंनपश्यतिहिताहितम् ॥ १२९ ॥ मकरोहियथावद्धोनरस्याभिमुखंव्रजेत्॥ अनिच्छन्नपिहंतुंसग्रहोतिग्रहमागतः॥ १४० ॥ घ्राणादीनींद्रियाण्येवं गंधाद्यैर्विषयैःसदा॥ ग्रहाअतिग्रहैरेतैर्गृहीतायांतिसर्वतः ॥ १४१ ॥

एतदेवस्फुटयति गृह्णंतीति हियतःप्रसिद्धमेतत् एतेइंद्रियग्रहाः तानिइंद्रियाणिचगंधाद्याविषयागृह्णंति यथामत्स्यहाधीवरोजलाशयान्जलनिवासिनोमत्स्यान्गृह्णातितद्वदिति ॥ १२८ ॥ ग्रहशब्दोहैमकोशेपूतनादिबालग्रहवाचकोप्युक्तइतस्तत्साम्यमप्याह ग्रहाविष्टइति इंद्रियाश्रयवान्इंद्रियप्रधानः ॥ १२९॥विषयाणामतिग्रहत्वेऽभूतोपमामाह मकरइति यथामकरःकेनचिद्बद्धोबत्ध्वेवप्रेरितःसन्स्वयमनिच्छन्नपिहंतुंनरस्याभिमुखंगच्छेत्तदासग्रहोमकरःअतिग्रहंस्वप्रेरकरूपमागतःप्राप्तःसन्दृष्टांतइतिशेषः ॥ १४० ॥ दार्ष्टांतिकमाह घ्राणादीनीति एवंघ्राणादींद्रियरूपाग्रहाएतैर्गंधादिविषयरूपैरतिग्रहैर्गृहीताःसंतःसर्वतोयांतिपुंसोबंधायप्रवर्ततइत्यर्थः ॥१४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतेषामष्टत्वेउपपत्तिमाह एकादशेतिचतुर्भिः यद्यपिसांतःकरणज्ञानकर्मेंद्रियाणिएकादशप्रसिद्धानिएवंतद्विषयाअपि तथापिप्राधा न्यादष्टावित्युक्तमित्यर्थः अथवात्वग्घस्तयोरुक्तांतर्गतयोःपरिशिष्टानांपादपायूपस्थानामंतर्भावविवक्षयातथोक्तमित्याह त्वग्घस्तयो रिति मुनेर्याज्ञवल्क्यस्य मतोऽभिप्रेतः ॥ १४२ ॥ तत्रोपस्थस्यत्वच्यंतर्भावंस्पष्टयति सर्वेति यद्योषित्समागमात्शिश्नेउपस्थेसुखंजायते तत्त्वचःसर्वदेहस्थितत्वेनस्पर्शजत्वात्त्वचैवजन्यतेऽतउपस्थस्यतत्रांतर्भावइतिशेषः ॥ १४३ ॥ पायुपादयोश्वहस्तेक्रियाहेतुत्वसाम्याद्ध स्तेंतर्भावइत्याह पद्भ्यामिति कर्मजातंगमनरूपंमलोत्सर्गरूपंच हस्तवाक्यात्हस्तौवैग्रहइत्यादिश्रुतिरूपात् ॥ १४४ ॥ हस्तेंतर्भावेउपप त्त्यंतरमाह पाय्विति अथवापाय्वादीनांनाडीबंधस्यसाम्यमभिप्रेत्यहस्तेपायुपादयोरंतर्भावउक्तः नाडीबंधसाम्येहेतुः विसर्गेति विसृ

एकादशग्रहास्तद्वत्तावंतःस्युरतिग्रहाः ॥ यद्यप्येतेतथाप्यष्टौप्रधानाइहकीर्तिताः ॥ त्वग्घस्तयोर्वैतरेषामंत र्भावोमतोमुनेः ॥ १४२ ॥ सर्वदेहस्थितत्वेनत्वचोयोषित्समागमात् ॥ जायतेयत्सुखंशिश्नेस्पर्शजत्वात्त्वचा हितत् ॥ १४३ ॥ पद्भ्यांचपायुनाचैवकर्मजातंप्रजायते ॥ पायुपादावतोहस्तवाक्याद्गुक्तसमौमतौ ॥ १४४ ॥ पायुपादकराणांवानाडीनांबंधनंसमं ॥ विसर्गमोक्षेचगतौकरयोश्चलनंयतः ॥ १४५ ॥ एवमुक्तेपुनःप्रश्न मार्तभागश्वकारह ॥ याज्ञवल्क्येतिसंबोध्यसर्वज्ञंमुनिसत्तमं ॥ १४६ ॥ जडाजडमिदंविश्वमन्नंमृत्योःसमी रितं ॥ मृत्युरन्नंतुयस्याःस्याद्भवेत्सादेवतात्रका ॥ १४७ ॥ याज्ञवल्क्यइदंप्राहत्यापःसादेवतामता ॥ यतःसर्वा दनोवन्हिरद्यतेऽयंजलैःसदा ॥ १४८ ॥

ज्यतेइतिविसर्गोमलंतस्यमोक्षेपायुव्यापारेगमनेपादव्यापारेचक्रियमाणेयतःकरयोश्चलनंस्थूलंसूक्ष्मंवाआकुंचनप्रसारणादिरूपंयतोभ वतिततोज्ञायतेनाडीबंधःसमः ॥ १४५ ॥ अथद्वितीयप्रश्नोत्तररूपायादशमकंडिकायाअर्थमाह एवमितित्रिभिः स्पष्टम् ॥ १४६ ॥ त त्रप्रश्नमभिनयति जडेति हिरण्यगर्भेपिक्षुत्कामादीनांवर्णितत्वेनोक्तग्रहातिग्रहलक्षणमृत्युनासर्वोलोकोऽन्नवत्क्रोडीकृतः तस्यमृत्योरप्य त्ताकश्चिदस्तिनवा यद्यस्तितर्ह्यनवस्थानास्तिचेन्मोक्षार्थंयत्नोव्यर्थइतिभावः ॥ १४७ ॥ याज्ञवल्क्योदृष्टांतेनपरिहरति याज्ञवल्क्यइति सामृत्योर्भक्षिकादेवताजलदृष्टांतेनास्तीतिसंभाव्यतां यतःसर्वभक्षकोपिवन्हिर्जलैर्भक्ष्यतेइतिप्रसिद्धं तथाचोक्तमृत्योरग्निवत्तापकस्यात्ता तत्त्वज्ञानात्मकःसुधापूरोस्तीत्येवंसिद्धांतः नचानवस्था कतकरेणुवत्स्वयमुपरमादितिभावः ॥ १४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतृतीयप्रश्नोत्तररूपायाएकादशकंडिकायाअर्थमाह इत्युक्तेइतिसप्तभिः उक्तेसमाहिते एनंयाज्ञवल्क्यं गुह्यंगूढाभिप्रायकं अयंहि प्रष्टुरभिप्रायः उक्तंतत्त्वज्ञानस्यमृत्युभक्षकत्वंतदानिश्चितंभवेद्यदिब्रह्मविदिकश्चिद्विशेषोदृश्येतसचकथंलोकविरोधादिति ॥ १४९ ॥ उक्ताभिप्रायेणप्रश्नमभिनयति ब्रह्मवादीतिद्वाभ्यां ब्रह्मवादीब्रह्मापरोक्षवान्यदादेहंत्यजतितदातथाज्ञवत्तस्यशरीरात्प्राणाउत्क्रामंतिऊर्ध्वंगच्छंतिनवा तथाचेदुत्क्रामंतिचेत्तर्हिसविद्वानपिअज्ञवल्लोकांतरेशरीरभागेवस्यान्नचेदुत्क्रामंतितर्हिप्राणानांस्थितौसत्यांकेनहेतुनासविद्वान्म्रियतेइतिव्यवह्रियते नहिस्थितप्राणंमृतमितिलोकाव्यवहरंतीतिद्वयोरर्थः ॥ १५० ॥ १५१ ॥ एवमिति एवंपृष्टेसतिमुनिर्याज्ञवल्क्यइदंप्राह इदंकिं विदुषःप्रारब्धक्षयेप्राणानांशरीरांतरेवनाशोविलयोभवतिनोत्क्रमणं उत्क्रमहेतूनामविद्याकामकर्मणामभावादिति

इत्युक्तेपुनरप्येनमार्तभागोह्यपृच्छत ॥ याज्ञवल्क्येतिसंबोध्यगुह्यमर्थंमहामुनिः ॥ १४९ ॥ ब्रह्मवादीयदादेहंजह्यात्किंतस्यतेसदा ॥ प्राणायथामृतौजंतोरुत्क्रामंतिशरीरतः ॥ १५० ॥ उत्क्रामंतितथैवास्यतथाचेत्सशरीरभाक् ॥ स्यादज्ञवन्नचेत्केनम्रियतेप्राणसंस्थितौ ॥ १५१ ॥ एवमुक्तेमुनिःप्राहप्राणानामंतरेवहि ॥ नाशस्तस्मात्पुनर्देहीनस्यान्नाप्यमृतःपुमान् ॥ १५२ ॥ प्राणानांविलयेहेतुमुवाचाध्मानकारणं ॥ उच्छूनत्वंहिदेहस्यजीवतोदृश्यतेनतत् ॥ १५३ ॥ मृतःशेतेपृथुर्भूत्वादेहोभेरीसमोयतः ॥ लीनाःप्राणास्ततोयस्मादेषावस्थानजीवतः ॥ १५४ ॥

भावः अयमेवचाज्ञाद्विशेषइत्याह तस्मादिति तस्मात्प्राणानामंतर्विलयाद्विद्वान्पुमान्पुनर्देहवान्नस्यात् नापिलोकविरोधइत्याह नाप्यमृतइति मृङ्धातोरर्थोहिप्राणसंबंधहानिःसाचांतर्विलयेनापिभवतीतिमृतव्यवहारोयुक्तएवेतिभावः ॥ १५२ ॥ प्राणानामिति विदुषःप्राणाअंतर्विलीनाइतिकुतोनिश्चितमितिशंकावारकंहेतुंदेहस्योच्छूनत्वंशोथशालित्वरूपंप्राहस्मयाज्ञवल्क्यः कीदृशमुच्छूनत्वमाध्मानकारणं आध्मानंवायोरंतःपूरणंतत्कारणंयस्यतत्तथा उच्छूनत्वस्यमरणलिंगत्वोपपादिकांव्यतिरेकव्याप्तिमाह जीवतइति तदुच्छूनत्वंजीवनावस्थायांनदृश्यतेइति ॥ १५३ ॥ एतत्स्फुटयति मृतइति यतोमृतोदेहोधनंजयाख्यवायुनापृथुर्भूत्वाभेरीवद्दृश्यमानःशेतेततोज्ञायतेप्राणालीनाइति यतएषाईदृशीअवस्थाजीवतोनासीदिति ॥ १५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननूक्रांत्यभावेकिंप्रमाणमतआह उत्क्रांताश्चेति तस्यविदुषः शास्त्रमेवमेवास्यपरिद्रष्टुरिमाःषोडशकलाःपुरुषायणाःपुरुषंप्राप्यास्तंगच्छंती
त्यादिश्रुतिरूपं श्रुत्यर्थस्तु यथानद्यःसमुद्रेलीयंतेएवमिमाःषोडशकलाएकादशेंद्रियपंचप्राणरूपाःपरिद्रष्टुर्ब्रह्मविदःसंबंधिन्यःपुरुषाय
णाअधिष्ठानभूतेपुरुषेप्रतीयमानाःपुरुषंप्राप्यलीयंतइति ननूक्रांतिस्वीकारेकोदोषइत्यतआह उत्क्रांतेष्विति उत्क्रांतिस्वीकारेपुनर्देहांतर
प्रसंगोदेहिनस्तुमोक्षोवक्तुंनशक्यइति नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्तीत्यादिश्रुतेरिति ॥ १५५ ॥ चतुर्थप्रश्नोत्तररूपाया
द्वादशकंडिकायाअर्थमाह यदेतिचतुर्भिः आर्तभागोयाज्ञवल्क्येतिसंबोध्येमंप्रश्नंचक्रे इमंकं यदायंपूर्वोक्तोविद्वान्म्रियतेविदेहमुक्तिभ
जतेतदाएनंकिंनत्यजतीत्यन्वयः जीवन्मुक्तिवत्सावशेषोद्वैतलयःकिंवानिरवशेषइतिप्रष्टुरभिप्रायः ॥ १५६ ॥ एवंपृष्टोयाज्ञवल्क्यो
विद्वद्दृष्ट्यानाममात्रंशिष्यतेइत्युक्तवानित्याह एवमुक्तइति एनंमुक्तं ॥ १५७ ॥ नाम्नोलोकदृष्ट्याशिष्यमाणत्वंस्फुटयति मुक्ताइति य

उत्क्रांताश्चनतस्येमेप्राणाःशास्त्रप्रमाणतः॥ उत्क्रांतेषुध्रुवंदेहीभवेन्मोक्षोनदेहिनः॥१५५॥ यदाऽयंम्रियतेवि
द्वान्जहात्येनंतदानकिं॥ याज्ञवल्क्येतिसंबोध्यप्रश्नंचक्रइमंपुनः॥१५६॥ एवमुक्तोमुनिःप्राहलोकबुद्ध्यनुसा
रतः॥ नामैकंनजहात्येनंवामदेवादिनामवत्॥१५७॥ मुक्तायद्यप्यसंदेहान्नामरूपक्रियात्मभिः॥ मुक्तिभा
जांतथाप्येतेनामगृह्णंतिलौकिकाः॥१५८॥ अनंतंनामविज्ञेयंयतोमुक्तंचनत्यजेत्॥ विश्वेदेवसमंतस्यज्ञा
नात्तादृक्फलंभवेत्॥१५९॥ज्ञानिनंपरिपृच्छ्यैवंपप्रच्छाज्ञानिनंपुनः॥ याज्ञवल्क्येतिसंबोध्यसजारत्कारवो
मुनिः॥१६०॥

द्यपिमुक्तिभाजःपुरुषानामरूपक्रियात्मकैर्भेदजातैर्निःसंशयंमुक्तास्तथाप्येतेलौकिकाजनामुक्तिभाजांवामदेवादिरूपंनामगृह्णंत्येवेतिप्र
सिद्धम् ॥ १५८ ॥ एवंमोक्षेपिलोकदृष्ट्यावशिष्यमाणत्वादनंतेनाम्निअनंततयाप्रसिद्धानांविश्वेदेवानामभेदेचिंतितेऽनंतफलयोगोभव
तीतिप्रसंगेनश्रुत्योक्तमनुवदति अनंतमिति तस्यविश्वेदेवाभिन्ननाम्नोज्ञानाद्ध्यानात् तादृगनंतम् ॥ १५९ ॥ एवंविदुषोब्रह्मभावरू
पोमोक्षोयस्यज्ञानाग्निनादाहाद्भवतियस्यचसत्वेनाज्ञानांग्रहातियहलक्षणमृत्योःपुनःपुनःप्राप्तिस्तस्यकर्मणःस्वरूपनिर्णयपरायाःपंचमप्र
श्नोत्तररूपायास्त्रयोदशकंडिकायाअर्थमाह ज्ञानिनमित्यूनविंशतिश्लोकैः ज्ञानिनंपरिपृच्छ्यज्ञानिविषयकंप्रश्नंकृत्वाथाज्ञविषयकंप्र ॥१२॥
श्नंकृतवान्जारत्कारवआर्तभागः ॥ १६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नमभिनयति मुमूर्षोरितित्रिभिः जंतुमात्रस्यसर्वस्यापिदेहिनोमुमूर्षोर्मरणाभिमुखस्याध्यात्मिकावागादयोयदाधिदैवमग्न्यादिभावं प्राप्नुवंतिदैवैरनधिष्ठिताभवंतीतियावत् देवानधिष्ठितत्वरूपएववागादीनांतत्रलयइत्याकरेषुप्रपञ्चितत्वादिति तदाह एषोऽज्ञोजंतुःक्वसंभवतिआमुष्मिकंफलंकिमाश्रितोभुंक्तेइतितृतीयेनसंबंधः प्राणोवायुदेवतांव्रजति नेत्रमादित्यंव्रजति एवमग्रेपि ॥ १६१ ॥ मनइति शरीरंपृथिवीदेवतांव्रजति तथाशरीरांतरस्थितआकाशोवाह्याकाशरूपांदेवतांव्रजति कीदृशआंतराकाशःआत्मशब्दाख्यः श्रुतौआत्मशब्देनाख्यानिरूपणंयस्यसतथा॥ १६२॥ओषधीरिति लोममात्रंसर्वाणिलोमानिओषधीर्देवताःप्रतिव्रजंति तद्वत्केशावनस्पतिरूपदेवताःप्रतिव्रजंति लोहितरेतसीजलरूपेवाह्यजलरूपदेवतासुव्रजंतीति॥ १६३॥याज्ञवल्क्यइति एवंपृष्टोयाज्ञवल्क्यःप्रश्नंरहस्यार्थकंमत्वासंसदिउत्तरं

मुमूर्षोर्जंतुमात्रस्ययदावागग्निमाव्रजेत् ॥ प्राणोवातंतथादित्यंनेत्रंश्रोत्रंदिशस्तथा ॥ १६१ ॥ मनश्चंद्रंशरीरंचपृथिवीमंतरास्थितः ॥ आकाशआत्मशब्दाख्योवाह्यमाकाशमेतिच ॥ १६२ ॥ ओषधीर्लोममात्रंचकेशास्तद्वद्वनस्पतीन् ॥ लोहितंचतथारेतोव्रजत्यप्सुमृतेसति ॥ तदाक्वसंभवत्येषजंतुर्ज्ञानविवर्जितः ॥ १६३ ॥ याज्ञवल्क्योतिगोप्यार्थंप्रश्नंमत्वानसंसदि ॥ उक्तवान्किंतुहस्तेतंगृहीत्वैकांतगोब्रवीत् ॥ १६४ ॥ जानात्याबालगोपालंसर्वएवयतोजनः ॥ मृतःकर्मानुसारेणप्रयातिनियतंपुमान् ॥ १६५ ॥ प्रश्नस्यतुच्छतामाभूदुत्तरस्यतथैवच ॥ इतिसंचिंत्यमतिमानेकांतेवाक्यमब्रवीत् ॥ १६६ ॥ अमुनायेकृतेपूर्वंदेहिनापुण्यपातके ॥ तयोरेववसत्येषमृतोजीवन्यथाधुना ॥ १६७ ॥

नोक्तवान्किंतुतमार्त्तभागंहस्तेगृहीत्वाएकांतदेशेगत्वाउत्तरमब्रवीदिति॥ १६४॥ ननुकर्मनिरूपणंकिंवक्ष्यमाणब्रह्मविद्यानिरूपणादपिरहस्यंयदर्थमेकांतेधावितमित्यस्वरसंमनसिनिधायप्रकारांतरेणएकांतगमनाभिप्रायमाह जानातीतिद्वाभ्यां आबालंआचगोपालंसर्वोलोकएतज्जानाति एतत्किं मृतःपुमान्नियतंव्यवस्थितफलंकर्मानुसारेणप्रयातीति ॥ १६५॥ प्रश्नस्येति एतादृशार्थविषयकत्वेनप्रश्नोत्तरयोस्तुच्छतासिद्धसाधनत्वेनानादरणीयतामाभूदित्यभिप्रेत्यवाएकांतेवाक्यमुक्तवानिति॥ १६६॥उत्तरमभिनयति अमुनेत्यादिना अमुनादेहिनायेपूर्वंपुण्यपापेकृतेतयोस्तदाश्रितएवमृतोजंतुर्वसति जीवनावस्थायामिवतस्यभोगारंभेपुण्यपापेएवप्रधानकारणेइतियावत्॥ १६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवस्फुटयति पापीति पुण्यंपुण्यफलंदेवभावादिकं सुखदुःखकरंमानुषादि ॥ १६८ ॥ नाधिकइति जीवःस्वरूपेणाधिक्यादिहीनोपि कर्मवशेनतत्तद्रूपोभवतीत्यर्थः ॥ १६९ ॥ तदुदाहरति पुण्यात्मेति पुण्यात्मापुण्यस्वभावः अधिकतांहिरण्यगर्भभावतांपुण्यकारितारूपां वा न्यूनत्वंस्थावरांतंपापकारित्वरूपंवा मिश्रिताभ्यांमिश्रितंफलमिति ॥ १७० ॥ फलानामवांतरविशेषेषुपुण्यपापयोरवांतरविशेषान्प्र योजकतयाह कर्मणेति कर्मणाशरीरव्यापारेण तथाचशरीरादिभिर्यत्परस्यसुखादिकंकरोतितैरेवतथासुखादिकंविदतइत्यर्थः ॥ १७१ ॥ तद्विशेषहेतून्देशादीन्दर्शयति यस्मिन्निति यस्मिन्यादृशेदेशेकालेवायेननिमित्तेनवायेननयेनप्रकारेणवायावद्यत्परिमाणंयादृशमुत्कृष्टं निकृष्टंवायेनशरीरेणवायच्चपरस्यसुखंदुःखंवायःपुमान्करोति यद्वयाइतिपाठेयादृशावस्थावानित्यर्थः सभूयःपुनस्तत्तत्फलंतन्निमि

पापीनरकमभ्येतिपुण्यात्मापुण्यमेवच ॥ पुण्यपापकरोजंतुःसुखदुःखकरंवपुः ॥ १६८ ॥ नाधिकोनसमोवा पिनन्यूनोपिचविद्यते ॥ जंतुःकिंतुभवेदेवंस्वकर्मवशमागतः ॥ १६९ ॥ पुण्यात्माधिकतांयातिपापोन्यूनत्व मेवच ॥ पापपुण्यवतस्तद्वत्सुखंदुःखंनिरंतरं ॥ १७० ॥ कर्मणामनसावाचासुखंवादुःखमेवच ॥ करोतियत्प रस्यायंलभतेतन्नसंशयः ॥ १७१ ॥ यस्मिन्देशेयदाकालेनिमित्तेननयेनवा ॥ यावद्वियादृशंयेनवपुषायच्च यःपुमान् ॥ १७२ ॥ करोतितत्ततोभूयःस्वयमुक्तविशेषणं ॥ सुखंदुःखंनिमित्तंवातयोराप्नोतिवैसदा ॥ १७३ समंसर्वत्रविज्ञेयंसुखंवादुःखमेववा ॥ निमित्तेनसमंकर्तुरिहदेहांतरेथवा ॥ १७४ ॥ देशकालादियोगेनको टिकोटिगुणंभवेत् ॥ वर्षासुबीजसंपन्नाःसुक्षेत्रेशालयोयथा ॥ १७५ ॥ वार्धुषेर्वृद्धिमभ्येतिधनधान्यादिसं चयः ॥ दिनेदिनेयथातद्वत्पुण्यपापेचदेहिनः ॥ १७६ ॥

त्तंदेहादिकंचोक्तविशेषणंकर्मकालिकदेशादिसजातीयदेशादिविशिष्टंप्राप्नोतीतिद्वयोःसंबंधः ॥ १७२ ॥ १७३ ॥ फलितमाह सममि ति कर्त्तुःकर्मिणःइहलोकेदेहांतरेवासमुपजायमानंसुखादिरूपंफलंनिमित्तेनकर्मणासमंज्ञेयं यादृशविशेषणकंकर्मतादृशविशेषणकंफ लंलभतेइतियावत् ॥ १७४ ॥ कुत्रचिद्वाराणस्यादिदेशेसूर्यग्रहणादिकालेवाब्राह्मणोपकारादिनिमित्तेवाकृतस्यस्वल्पकर्मणोपिमहत्फ लंभवतीतिसदृष्टांतमाह देशेति बीजंसंपन्नंसम्यगुप्तंयेषांतेतथा ॥ १७५ ॥ एवमज्ञस्यकर्मवृद्धिरवश्यंभवतीत्यत्रदृष्टांतांतरमाह वार्धुषेरि ति वार्द्धुषिर्वृद्ध्येधनप्रयोक्तातस्ययथाधनंवर्द्धतेतथादेहाभिमानिनःकर्मेत्यर्थः ॥ १७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मानुष्ठानानंतरंसूक्ष्मभावंगतस्यापिकर्मणोमहाफलारंभेदृष्टांतमाह वटेति यथालोकेसूक्ष्मापिवटस्यधानाबीजंमहतोवटस्यहेतुर्भवति तथामहतोःसुखदुःखयोःपुण्यपापेइति ॥ १७७॥ इत्यादीति इतियाज्ञवल्क्येनोक्तेतौपरस्परंशशंसतुस्तुष्टुवतुरिति ॥ १७८॥ ताभ्यांचकर्मैवफलकालेपिव्याप्रियमाणत्वात्कालादिभ्यःप्राधान्येनवर्णितमित्याह प्रश्नोत्तराभ्यामिति एतयोःप्रश्नोत्तरयोः अर्थंविषयं ॥ १७९ ॥ आर्त्तभागब्राह्मणव्याख्यानमुपसंहरति आर्त्तभागइति ॥ १८० ॥ अथपूर्ववर्णितकर्मफलोत्कर्षावधिप्रतिपादकस्यभुज्युप्रश्नोत्तररूपस्यतृतीयब्राह्मणस्यकंडिकाद्वयात्मकस्यार्थंदर्शयति याज्ञवल्क्येतीतिचतुर्विंशतिश्लोकैः ततोभुज्युनामालाह्यायनिर्लह्यस्यापत्यत्वेनप्रसिद्धएनंयाज्ञवल्क्यंजित्वास्थितंनाम्नासंबोध्यालौकिकंलोकेऽप्रसिद्धमर्थंपप्रच्छयतोदुष्टाभिसंधिर्दुष्टाभिप्रायः ॥ १८१ ॥ तत्र

वटधानायथालोकेवटस्यमहतोभवेत् ॥ हेतुरेवंपुण्यपापेमहतोःसुखदुःखयोः ॥ १७७॥ इत्यादिवचनस्यांत आर्तभागोमहामुनिः ॥ याज्ञवल्क्यंशशंसाथयाज्ञवल्क्योपितंमुनिं ॥ १७८॥ प्रश्नोत्तराभ्यांविप्रेंद्रावूचतुःकर्मकेवलं ॥ शशंसतुस्तथान्योन्यमेतयोरर्थमादृतौ ॥ १७९ ॥ आर्तभागोमुनिस्तत्रप्रश्नादुपरराम ह ॥ भुज्युंलाह्यायनिंदृष्ट्वास्मयमानोव्यवस्थितः ॥ १८० ॥ याज्ञवल्क्येतिसंबोध्यलाह्यायनिरवस्थितं ॥ भुज्युर्दुष्टाभिसंधिःसन्पप्रच्छैनमलौकिकम् ॥ १८१ ॥ मद्रदेशस्थिताःपूर्वंवेदाध्ययनतत्पराः॥ पतंजलस्यकाप्यस्यदृष्टवंतोगृहेऽद्भुतं॥ १८२ ॥ तस्यकन्यागृहीताभूद्गंधर्वेणाग्निनैकदा॥ तमपृच्छामकोसीतिवयंसर्वेसमागताः ॥ १८३॥ सुधन्वांऽऽगिरसोस्मीतिसोब्रवीन्नोद्विजोत्तमान् ॥ तमपृच्छामलोकानामंतान्गंधर्वपुंगवम् ॥ १८४॥

भुज्युर्मयादेवमुखादयमर्थोविदितइतिसूचनेनयाज्ञवल्क्यात्स्वोत्कर्षंसूचयन्पूर्ववृत्तंश्रावयित्वापृच्छति मद्रेतिचतुर्भिः वयंवेदाध्ययनाय मद्रदेशेविचरंतःसंतःपतंजलनामकस्यकपिगोत्रस्यविप्रवरस्यगृहेऽद्भुतंवृत्तंदृष्टवंतइति ॥ १८२ ॥ तस्येति तस्यपतंजलस्यकन्याएकदा अग्निनाउपास्यदैवतेनभूतवद्गृहीताआविष्टाभूत् कीदृशेनाग्निना श्रुतौगंधर्वशब्दोक्तेन गंधर्वशब्दोहिकोशेऽश्ववाचकतयाप्रसिद्धोऽश्वसमानाकारतयाव्याख्यायमानोपनिषत्प्रथमाध्यायेवर्णितेग्नावपिवर्ततइतिभावः तमग्निंप्रतिनामनिगोत्रेचपृष्टेतेनचसुधन्वेतिनामतःआंगिरसोगोत्रेणास्मीत्युक्तेऽथलोकानांकर्मफलानामंतान्प्रान्तान्स्वरूपाणिवयमपृच्छामपृष्टवंतइति अंतःप्रांतेंऽतिकेनाशेस्वरूपेऽतिमनोहरे इतिविश्वः ॥ १८३ ॥ १८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पारिक्षिताइति तेनगंधर्वैणइतिलोकानांमानेउक्तेउत्तरितेसतिअस्मिन्नर्थेपुनर्वयंपृष्टवंतः इतिकिं पारिक्षितायत्रगच्छंतितत्रकर्मफलाना
मंतःस्थितोनिश्चितः ततोधिकंकर्मफलंनास्तीतियावत् पारिक्षितपदव्युत्पत्तितुग्रंथकृदेववक्ष्यतीति ॥ १८५ ॥ पारिक्षिताःस्थिताःकुत्रे
ति तेपारिक्षिताएवकुत्रस्थिताइत्यस्माभिरुक्तेपुनःपृष्टेसतिसगंधर्वोनोस्मभ्यंपारिक्षितानांगतिस्थानमवददिति हेयाज्ञवल्क्याधुनात्वंवदत
त्स्थानंकितदवांतरलोकानांमानंकितेतत्स्थानगामिनःपारिक्षिताश्वकेकिंस्वरूपाइति इत्युक्तइत्थंपृष्टेसतिएतत्सर्वंयाज्ञवल्क्यउदैरयत्संक्षे
पेणविस्तरेणचोक्तवानित्यर्थः ॥ १८६ ॥ तत्रसंक्षेपाभिधानप्रयोजकंसूचयन्याज्ञवल्क्योभुज्युंतावदुपालभते गंधर्वैणेति एतत्स्थानादि
कंतुभ्यंगंधर्वैणोक्तंत्वंजानन्सन्समाजेकिंपृच्छसि समाजेऽस्यप्रश्नोऽयुक्तःयतोदेवगुह्यंदेवसंबंधिरहस्यमिति तथाचज्ञातत्वंदेवगुह्यत्वंचवि

पारिक्षिताःस्थितायत्रलोकांतस्तत्रसंस्थितः ॥ इत्युक्तेलोकमानेस्मिन्नपृच्छामपुनर्वयं ॥१८५॥ पारिक्षिताः
स्थिताःकुत्रेत्युक्तेस्थानंसनोवदत् ॥ तत्स्थानंकिंचमानंकिंलोकानांकिंचतेवद ॥ इत्युक्तेयाज्ञवल्क्योपिसर्वमेत
दुदैरयत् ॥ १८६ ॥ गंधर्वैणेरितंपूर्वंतुभ्यमेतत्पुनःकथं ॥ देवगुह्यंसमाजेस्मिन्जानन्सन्विप्रपृच्छसि ॥ १८७ ॥
विश्वासायवदाम्येतत्तुभ्यंसंक्षेपतोधुना ॥ अश्वमेधकृतोयत्रभुंजंतिनृपपुंगवाः ॥ अगच्छन्भवतापृष्टास्तत्र
पारिक्षिताअपि ॥ १८८ ॥ एवमुक्तेप्यविश्वासाल्लात्यायनिरभाषत ॥ अश्वमेधकृतःकुत्रयांतीतिवदभोमुने
॥ १८९ ॥ इत्युक्तेयाज्ञवल्क्योपिविस्पष्टंजनसंसदि ॥ उक्तवान्देवतागुह्यंभुज्यौपापंनिधायसः ॥ १९० ॥

विश्वासायेति तथापितवविश्वासायगुह्यत्वसंरक्षणायचसंक्षेपेणाधुनावदामि सोपास
स्तरेणानभिधानेनिमित्तमितिभावः ॥ १८७ ॥ अत्रयेसोपासनाश्वमेधकृतस्तेएवपारि
नाश्वमेधकृतोजनाःसोपासनाऽश्वमेधफलंयत्रभुंजंतितत्रत्वत्पृष्टाःपारिक्षिताअगच्छन्गताइति
क्षिताइतिगुह्यत्वसंरक्षणायनोक्तमितिबोध्यम् ॥ १८८ ॥ एवमुक्तइति एवंयाज्ञवल्क्येनोक्तेपियाज्ञवल्क्यसर्वज्ञतायामविश्वासाद्भुज्युः
पुनरपृच्छदश्वमेधकृतःकुत्रयांतीति ॥ १८९ ॥ इतिपृष्टोयाज्ञवल्क्यःसमाजेरहस्यार्थप्रकाशनपापंपुनःपृच्छतोभुज्योरेवनममेतिमत्वा
विस्तरेणवक्तुमुपचक्रमेइत्याह इत्युक्तइति ॥ १९० ॥

CC-0. In Public Domain. Digitization by eGangotri

ननुतथापिलोकानांमानमेवसविस्तरंयाज्ञवल्क्येनोच्यमानंश्रुतौदृश्यतेनत्वश्वमेधकृतएवपारिक्षिताइत्यर्थस्यसव्युत्पत्तिकमभिधानंतत्र किंप्रयोजकमितिचेत्प्रसिद्धत्वाभिमानएवेतिव्युत्पत्तिंदर्शयन्नाहग्रंथकृत् वित्तेति समुद्रांतापृथिवीयेषांवशेस्तितेऽश्वमेधयाजिनःपरिक्षित यइतिपदेनोक्ताः परितःसर्वतःक्षितिर्येषामितिव्युत्पत्तेः परिक्षितिशब्दात्प्रज्ञादित्वात्स्वार्थिकेणिपारिक्षिताइत्यपितन्नाम एवमश्वमेधयाजिनःपारिक्षितत्वेनसयाज्ञवल्क्योनोचेनोक्तवानतोलोकमानमेवाब्रवीदिति ॥ १९१ ॥ तत्रसर्वकर्मणांभोगस्थानंवैराजंशरीरंभूलोकत्वेनवर्णयंस्तत्परिमाणंदर्शयति जंबूद्वीपइतिषड्भिः ईरितःपुराणेइतिशेषः तावान्लक्षयोजनएवतस्यजंबूद्वीपस्यमेखलावद्वेष्टकःक्षाराब्धिः ॥ १९२ ॥ जंबूद्वीपःसमुद्रेणेति यद्वज्जंबूद्वीपःसमुद्रेणवेष्टितएवंसलवणसागरोपिषड्भिःप्लक्षादिद्वीपैःससागरैरिक्षुरसोदाद्यसागरसहितैर्वेष्टि

वित्तपूर्णाक्षितिर्येषामस्तिसागरमेखला ॥ परिक्षितयइत्येतेउक्ताःपारिक्षिताअपि ॥ स्पष्टाइतिनतानूचेलोकमानंतुसोब्रवीत् ॥ १९१ ॥ जंबूद्वीपःसमग्रोयमीरितोलक्षयोजनः ॥ तावांस्तन्मेखलाभूतोवर्ततेलवणोदधिः ॥ १९२ ॥ जंबूद्वीपःसमुद्रेणवृतोयद्वद्विवर्तते ॥ ससागरस्तथाद्वीपैर्वृतःषड्भिःससागरैः ॥ १९३ ॥ द्वीपानांससमुद्राणांस्थितानांपरिवृत्त्यहि ॥ अन्योन्यमावृतात्तस्माद्द्विगुणंद्विगुणंबहिः ॥ १९४ ॥ परिमाणममीषांयन्मिलितानांप्रकीर्तितम् ॥ तावदेवतुविज्ञेयंभूमेःशुद्धोदकाद्बहिः ॥ १९५ ॥

तइति ॥ १९३ ॥ द्वीपानामिति एवंससमुद्राणांद्वीपानांपूर्वंपूर्वंपरिवृत्त्यवेष्टयित्वास्थितानांमध्येआवृतात्तस्मात्पूर्वस्मात्पूर्वस्माद्बहिरुत्तरोत्तरंद्विगुणंद्विगुणंवोध्यमितिशेषः यथालक्षयोजनात्क्षारोदविशिष्टाज्जंबूद्वीपात्द्विलक्षयोजनात्द्विगुणइक्षुरसोदविशिष्टःप्लक्षश्चतुर्लक्षयोजनएवमग्रेपि तथाप्लक्षद्वीपावृतात्क्षारोदात्रिलक्षयोजनात्द्विगुणइक्षुरसोदःशाल्मलिद्वीपविशिष्टएवमग्रेपीति ॥ १९४ ॥ परिमाणमिति अमीषांससमुद्रद्वीपानांयावत्परिमाणं कोटिद्वयंत्रिपंचाशल्लक्षाणिचततःपरं पंचाशच्चसहस्राणिसप्तद्वीपाःससागराइतिशैवागमेप्रसिद्धम् तावच्छुद्धोदकात्परस्ताद्भूमेःपरिमाणंवोध्यमिति तदनन्तरमेकोनचत्वारिंशल्लक्षोत्तरकोट्यष्टकपरिमितास्वर्णभूमिरप्यस्तीत्यपिशैवागमानुरोधेनवोध्यं ॥ १९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रेति अत्रपूर्वश्लोकोक्तदेशेशैलेंद्रोलोकालोकनामामंडलाकारस्तिष्ठतितदंतस्तस्यलोकालोकस्यांतर्मध्येतत्प्रावृतदेशमध्यवर्त्तिमानसोत्तरमूर्द्धनीतियावत् अहोरात्रभ्रमणेनभास्करोगच्छति मानसोत्तरपरिमंडलपरिमाणंतुयोजनानांलक्षोत्तरसार्धनवकोटयइतिपुराणानुरोध्यर्थः॥१९६॥ अहोरात्रेणेतिअहोरात्रेणयावंतंयत्परिमाणकंदेशंमानसोत्तरपरिमंडलरूपमादित्यःपरिक्रामतिश्रुतौतावान्देशोदेवरथान्हाशब्देनोक्तः देवस्यसूर्यस्यरथेनान्हाऽहोरात्रेणभोग्यत्वात्सचदेशोद्वात्रिंशद्गुणितोयावान्भवेत्तावान्देशोरविकिरणव्याप्तोबुधैर्भूर्भूमिरित्युक्तःश्रुत्यातुलोकइत्युक्तः लोक्यतेकर्मफलंभुज्यतेऽत्रेतिव्युत्पत्तेरित्यर्थः॥१९७॥ इतःपरमुपासकैरेवगम्योलोकशब्देनश्रुत्योक्तोयोदेशस्तमाह भूर्लोकेति भूर्लोकपदाभ्यांवर्णितोविराट्शरीरात्मकोयोदेशःसस्थंडिलसमस्तस्यसमंताद्भित्तिसमावरणत्वेनप्रसिद्धाभूमिर्द्विगुणावर्ते

अत्रतिष्ठतिशैलेंद्रोदुर्गवत्सर्वतोभुवः॥ तदंतर्भास्करोगच्छेदहोरात्रेणसर्वदा॥ १९६॥ अहोरात्रेणयावंतंदेशंगच्छतिभास्करः॥द्वात्रिंशद्गुणितःसोयंभूर्लोकःकथितोबुधैः॥ १९७॥ भूर्लोकस्थंडिलाद्बाह्याद्द्विगुणावरणस्यभूः॥ द्विगुणोभूमितस्तस्याःसमुद्रस्तांपरिस्थितः॥ १९८॥ क्षुरधारासमःसंधीरूप्यहेमकटाहयोः॥ मक्षिकापत्रवद्वायंसूक्ष्मस्तिष्ठतितत्रसः॥१९९॥ देवैर्नानाविधैरेतेनीयंतेस्वबलेनच॥ अश्वमेधकृतोयेतेपृष्टाःपारिक्षितास्त्वया॥ २००॥

तेतस्याआवरणभूमेर्द्विगुणस्तांभूमिंपरिवेष्ट्यस्थितःसमुद्रोवर्ततेयंपौराणिकाघनोदमितिवदंति॥ १९८॥ क्षुरेति घनोदात्परोब्रह्मांडोयस्यैकःकपालोरजतमयोद्वितीयःसुवर्णमयस्तयोःसंधिस्तुक्षुरधारावत्तीक्ष्णोमक्षिकापक्षवद्वासूक्ष्मःसोयमेतादृशःसंधिस्तत्रब्रह्मांडाद्बहिर्गमनमार्गेतिष्ठतीत्यर्थः अत्रघनोदोब्रह्माण्डाद्बहिरितिपुराणाद्ब्रह्मांडस्यासमंतात्तुसन्निविष्टोमृतोदधिःसमंताद्घनतोयेनधार्यमाणःसतिष्ठतीत्यादिरूपात्प्रतीयते श्रुत्यातुब्रह्माण्डादंतरिति तयोर्विरोधस्तुसांप्रदायिकैरित्थंसमाहितः पुराणंबाध्यतेश्रुत्याध्यानार्थावाश्रुतिर्मताइति विरोधेत्वनपेक्षंस्यादितिन्यायेनप्रत्यक्षश्रुतिविरोधेनुमानंस्मृतिरूपमनपेक्षमग्राह्यमित्यर्थकेनपुराणंबाध्यमथवाहिरण्यगर्भोपासकैरेतावच्छरीरमात्मनोध्येयमित्यत्रश्रुतेस्तात्पर्यमितितदर्थः॥ १९९॥ देवैरिति हेभुज्योयेत्वयापारिक्षितपदेनोक्ताःसोपासनाश्वमेधकृतःपृष्टास्तेदेहत्यागानंतरंनानाविधैर्देवैःस्वबलेनोपासनाबलेनचघनोदपर्यंतंनीयंतइति॥ २००॥ ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्वमेधंविनापियेकेवलहिरण्यगर्भोपासकास्तेपिपारिक्षिताइतिसूचयितुंपारिक्षितपदस्यव्युत्पत्त्यंतरंसूचयति अश्वमेधेति एतेसोपासनाश्वमेधकृतःअश्वमेधफलंप्राप्ताःसंतःपारिक्षिताइत्युक्ताः नकेवलंतएवकिंतुअश्वस्तदाकारोग्निःप्रथमाध्यायोक्तआदिपदेनहिरण्यगर्भस्तदुपासनावंतःसर्वेपिद्विजाःपारिक्षितामताः परितःक्षीयतेदुरितमनेनेतिपरिक्षिदश्वमेधः ब्रह्मविद्याश्वमेधाभ्यांनपरंपुण्यपापयोरितिस्मृतेः तादृशीउपासनाचपरिक्षित्तद्वंतेदिनःपारिक्षिताइतिव्युत्पत्तेरिति ॥ २०१ ॥ अतिसूक्ष्मइति तत्रब्रह्मांडकटाहसंधिगतेऽतिसूक्ष्मेमार्गेशक्रोऽश्वमेधदेवताविराड्रूपोग्निःसोपिगंतुंनशक्तस्ततःपरेभिन्नादेवानशक्ताइतिकिमुवाच्यं यतस्तेघनोदस्यापरतएवस्थिताःस्युर्घनोदमपितर्तुंनशक्ताइतियावत् ॥ २०२॥ तर्हितेपारिक्षिताःकथंब्रह्मांडपारंगच्छंतीत्यतआह इंद्रइति इंद्रोविराट्रूपक्षिरूपोभूत्वातान्पारिक्षितान्घनोदंसंतार्यविहायसिआकाशेस्थितायवायवेहिरण्यगर्भरूपायदत्वास्वयंनिवृत्तोभवतीति ॥२०३॥ वायुरिति वायुस्तान्पारिक्षितान्सूक्ष्मतांनीत्वानि

अश्वमेधफलंचैतेप्राप्ताःपारिक्षितामताः ॥ अश्वाद्युपासनाज्ज्ञानाद्द्विजाःसर्वेपिसत्तमाः ॥ २०१ ॥ अतिसूक्ष्मेतदामार्गेतत्रशक्रोपिनप्रभुः॥ किंतुदेवाःपरेयेस्युर्घनोदाऽपरतःस्थिताः॥ २०२॥ इंद्रःपक्षिवपुर्भूत्वाघनोदंतान्विहायसि॥ संतार्यवायवेदत्वास्वयंतस्मान्न्यवर्तत ॥ २०३ ॥ वायुस्तान्सूक्ष्मतांनीत्वाक्षिप्त्वादेहेनिजेततः॥ संधौकटाहयोर्दत्वान्यधाद्ब्रह्मांडतोबहिः॥ अश्वमेधकृतोयत्रगताःपूर्वेमहाधियः॥ २०४॥ भुज्युर्लाह्यायनिःप्रश्नादवापोपरतिंततः॥ उषस्तस्यकहोलस्यमध्यगोविस्मयाकुलः॥ २०५॥ भुज्योरुपरतिंदृष्वाततश्चाक्रायणोमुनिः॥ उषस्तोयाज्ञवल्क्येतिसंबोध्यैनंस्मपृच्छति ॥ २०६॥

जेदेहेक्षिप्त्वास्वतादात्म्यंगतान्कृत्वेतियावत् कटाहयोःसंधिमार्गेणब्रह्मांडाद्बहिष्करोतिपूर्वेप्युपासकायत्रगताइति तथाचपारिक्षिताहिरण्यगर्भरूपेणब्रह्मांडादंतर्बहिश्चाभिव्याप्यावतिष्ठंतइतिभावः ॥ २०४ ॥ उपसंहरति भुज्युरिति एवंयथागंधर्वेणोक्तंतथैवयाज्ञवल्क्येनोक्तंश्रुत्वाविस्मितोभुज्युःप्रश्नादुपरतः कीदृशः उषस्तस्यचाक्रायणस्यकहोलस्यकौषीतकेयस्यचमध्यगतः तौवादायनोदयन्निवेत्यर्थः ॥२०५॥ एवंसोपासनकर्मणांफलोत्कर्षोहिरण्यगर्भभावावधिर्दर्शितस्तत्रचोक्तमृत्युसंबंधमालोच्यविरक्तस्यापिमोक्षेप्रवृत्तिस्तदासंभवेद्यदिसंघातविलक्षणोमोक्षयोग्यआत्मासंभाव्येतेत्यतस्तादृशात्मनिर्णयपरस्यकंडिकाद्वयात्मकस्योषस्तब्राह्मणस्यार्थंदर्शयति भुज्योरुपरतिमित्यूनविंशतिश्लोकैः भुज्योःप्रश्नान्निवृत्तिंदृष्ट्वाचाक्रायणश्चक्रनामकस्ययुवापत्यमुषस्तोयाज्ञवल्क्येतिसंबोध्यपृच्छतिस्मेति ॥२०६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नमभिनयति उपचारेणेतिसार्धद्वाभ्यां घटादयोजडाहिवन्हिव्याप्तलोहपिंडवद्वृत्त्यभिव्यक्तचित्संबंधाद्भासंतइत्यतोगौणंतेषामपरोक्षं स्वप्रकाशत्वात्तद्विपरीतंसाक्षादपरोक्षपदाभ्यांश्रुत्योक्तंब्रह्मैवसर्वांतरत्वादात्मेतिसर्वशास्त्राणिवदंतितन्नसंभाव्यतइतिशेषः ॥ २०७ ॥ कुतो नसंभाव्यतइत्यतआह सर्वांतरत्वमिति सर्वांतरत्वंब्रह्मत्वमद्वयत्वरूपंचयदात्मनउच्यतेतदुभयमास्तांतिष्ठतुआलोचयितुमनर्हमितियावत् तयोर्धर्मिण्येवसंशयादितिभावः तत्रहेतुमाह आत्मेति यतआत्माशरीरादिसंघाताद्विलक्षणएवनस्यान्नसंभाव्यतइत्यर्थः ॥ २०८ ॥ म त्स्यमिति यद्यस्तिसंघातविलक्षणआत्मातर्हिमह्यंव्याचक्ष्वयथाऽपरोक्षतास्यात्तथानिरूपययेनतवकौशलंजानीयामिति एवंपृष्टोयाज्ञव ल्क्यःस्वरूपत्वेनहस्तामलकादप्यव्यवहितेआत्मनिअसंभावनैवानुचितेत्यत्यन्ताव्यवहितवाचकैतच्छब्दप्रयोगेणसूचयन्नेषउक्तविशेषण

उपचारेणरहितंप्रत्यक्षंस्वप्रकाशनात्॥ ब्रह्मैवात्मेतिशास्त्राणिसर्वस्मादंतरंजगुः॥ २०७॥ सर्वांतरत्वंब्रह्मत्वं द्वयमास्तामिहात्मनः॥ आत्मानतुशरीरादिसंघातात्स्याद्विलक्षणः ॥ २०८॥ मह्यंव्याचक्ष्वतेनाहंज्ञास्येतेबु द्धिकौशलम्॥ इत्युक्तोयाज्ञवल्क्यस्तमेषआत्मेत्युवाचह ॥ २०९॥ कतमोयाज्ञवल्क्येतिपुनःपृष्टउवाचतं॥ तवप्राणंतथापानमुदानंव्यानमेवच ॥ २१० ॥ व्यापारयतिदेहस्यमध्यगःसूत्रधारवत्॥ सर्वांतरःसदेहादि संघातात्स्याद्विलक्षणः॥ २११ ॥

आत्माइत्येतन्मात्रमाहस्मेत्यर्थः ॥ २०९ ॥ कतमइति एवमंतर्मुखश्चेदयमुषस्तस्तर्ह्येषआत्मेत्येतावतोत्तरेणैवतोषमेष्यतीत्याशयेनया ज्ञवल्क्येनतथोक्तेपिसतुबहिर्मुखत्वात्संदिग्धःपुनःपृष्टवान्हेयाज्ञवल्क्यसआत्माकतमइति किंस्थूलंदेहंकिंवासूक्ष्मंकिंवासाक्षी नाद्योपरि च्छिन्नत्वेनसर्वांतरत्वव्याघातात् नांत्यस्तत्त्वेमानाभावादितिप्रष्टुराशयः एवंपृष्टोयाज्ञवल्क्यःप्रष्टुःस्वानुभवप्रदर्शनेऽनधिकारितामालोच्य तदनुग्रहायानुमानंसाक्षिणिप्रदर्शयन्निदमाह इदंकिं यस्तवप्रणापानादीनांसूत्रधारवत्प्रवर्तकःसउक्तलक्षणआत्मेति सामान्यतोदृष्टानु मानस्वरूपंतुप्राणादिनियन्तातद्भिन्नस्तत्प्रवर्तकत्वात्योयत्प्रवर्तकःसतद्भिन्नोयथासूत्रधारइति नचानुमानप्रदर्शनेऽप्रमेयत्वविरोधः परासं भावनानिवृत्तिमात्रेऽनुमानस्यव्यापारादितिभावः इतिद्वयोरर्थः॥ २१० ॥ २११ ॥ ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतेसूत्रधारपदार्थंदर्शयित्वातत्रसाध्यस्यनियम्यभेदस्यसत्वंदर्शयति मर्कटानामिति मर्कटानांसूत्रैश्चालकोनर्तकोयोबालकःसोत्रसूत्रधारतयाविवक्षितः बालपदप्रक्षेपस्त्वज्ञानविशिष्टात्मनोदार्ष्टांतिकत्वसूचनाय सचयथामहाजनैःप्रेक्षकैर्मर्कटेभ्यःपृथग्भूतोदृष्टइत्यर्थः ॥ २१२ ॥ दार्ष्टांतिकमाह तथेति पूर्वार्धंस्पष्टम् एवंमंदानुग्रहाभिप्रायेणयाज्ञवल्क्येनानुमानेदर्शितेप्यभिप्रायमविदित्वाउषस्तउपहसन्निवपुनःपप्रच्छेत्युत्तरार्द्धार्थः ॥ २१३ ॥ पुनःप्रश्नमभिनयति याज्ञवल्क्येतिसार्धैस्त्रिभिः हेयाज्ञवल्क्यमयास्पष्टतयावर्णनीयत्वेनपृष्टोप्यात्मात्वयास्पष्टोनोक्तोऽतोऽधुनास्पष्टंवर्णययथागौरश्वश्चपृष्टःशृंगादौगृहीत्वाप्रदर्श्यतेतद्वदिति ॥ २१४ ॥ आम्रान्पृष्टःकोविदारानाचष्टे इतिन्यायेनगवाश्वदृष्टान्तस्यप्रकारान्तरयोजनेनोपहासंव्यंजयितुंमत्पृष्टादन्यथात्वयोक्तमित्याह आत्मेति मयासंघाताद्विलक्षणआत्मा

मर्कटानांयथासूत्रैश्चालकोबालकोमतः ॥ सूत्रधारःपृथग्दृष्टोमर्कटेभ्योमहाजनैः ॥ २१२ ॥ तथासर्वांतरोप्यात्मादेहादिभ्यःपृथक्सदा ॥ एवमुक्तउषस्तोपिपुनःपप्रच्छतंमुनिम् ॥ २१३ ॥ याज्ञवल्क्यत्वयानायंविस्पष्टःकथितोमम ॥ यथासौगौरसावश्वएवंस्पष्टंसमीरय ॥ २१४ ॥ आत्माविलक्षणःपृष्टःसंघाताद्धिमयाधुना ॥ व्यापारकारकःकश्चित्त्वयामेत्रसमीरितः ॥ २१५ ॥ व्यापारकारकस्तावत्संघातोत्रप्रतीयते ॥ विरुद्धमुत्तरंतेनगोप्रश्नेश्वस्ययादृशम् ॥ २१६ ॥ ततउक्तस्वरूपंत्वंकरामलकवद्वद ॥ इत्युक्तेयाज्ञवल्क्योपिस्मयमानस्तमब्रवीत् ॥ २१७ ॥ यंत्वंपृच्छसिसंघाताद्वदात्मानंविलक्षणं ॥ एषआत्मातवप्रष्टुरहंबुद्ध्यागतस्त्वया ॥ २१८ ॥

कथंस्पष्टइतिपृष्टस्त्वयात्वस्तिकश्चित्प्राणादिव्यापारकारकइत्येतावन्मात्राकारेणोक्तइति ॥ २१५ ॥ निर्व्यापारस्यलोकेप्रयोजकत्वाप्रसिद्धेस्त्वदुक्तलक्षणहेतुरनात्मत्वव्याप्यत्वाद्विरुद्धइत्याह व्यापारेति तथाचगविपृष्टेऽश्वप्रदर्शनमिवआत्मप्रश्नेऽनात्मप्रदर्शनंत्वयाकृतमिति चतुर्थपादार्थः ॥ २१६ ॥ फलितमाह ततइति एवंसोपहासंपृष्टोपियाज्ञवल्क्योगांभीर्येणस्मयमानोमंदंहसन्नेवोवाचेति ॥ २१७ ॥ साक्षादपरोक्षतामयाप्रथममेवैतच्छब्दप्रयोगेणदर्शितातत्रतवमंदतामालोच्यत्वनुमानंदर्शितमितिसूचयितुंयाज्ञवल्क्येनएषइत्यादिवाक्यंपुनःपठितंतदर्थमाह यंत्वमिति संघाताद्विलक्षणमात्मानंवदेतियत्त्वंपृच्छसिसतवप्रष्टुरप्यात्माएषसुतरामपरोक्षः यतस्त्वयापिअहंबुद्ध्यागतःअहमाकारवृत्त्याविषयीक्रियमाणइत्यर्थः ॥ २१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्तेइति इतियाज्ञवल्क्येनोक्तेप्यहंप्रत्ययविषयत्वस्यबहुषुदर्शनाद्बुद्ध्यादीनांमध्येकतमोसावितिनज्ञायतेऽतःपृथक्कृत्यदर्शयेतिपुनरुष स्तःपप्रच्छेत्यर्थः ॥ २१९ ॥ उषस्तमिति एवंपृष्टोयाज्ञवल्क्यइदमाह इदंकिं याविद्वदनुभवसिद्धातस्यापरोक्षतातत्त्वेननिरूपणेनवाग्र हःकिंवाघटादिवदिंद्रियविषयत्वरूपापरोक्षत्वेन आद्येविद्वांसोयथातंनिरूपयंतितथामयोक्तोपित्वयाबहिर्मुखत्वान्नद्रष्टुंशक्यइत्यर्थः ॥ २२० ॥ नद्वितीयस्तस्याविषयस्वभावत्वादित्याह बुद्ध्येति योयंनित्यापरोक्षआत्माबुद्ध्यास्वबिंबग्राहिण्यानानेंद्रियद्वारेणप्रसरंत्या सहितःसर्वंजानातितांबुद्धिंचस्वयमेवभासयतिएवंतस्याबुद्धेर्द्रष्टारंतंकेनत्वंपश्यसिविषयीकरोषि नकिंचित्करणजातंतंविषयीकर्तुंशक्नो तीतियावत् ॥ २२१ ॥ सेंद्रियबुद्धेःसाक्षिभास्यायास्तद्भासनेनशक्तिरितिसदृष्टांतमाह घटोपलंभकमिति यथाघटप्रकाशकंचक्षुर्घटेन

इत्युक्तेकतमःसोयंबुद्ध्यादिष्वितितंवद ॥ उषस्तएवंपप्रच्छयाज्ञवल्क्यंमहामुनिम् ॥ २१९ ॥ उषस्तंयाज्ञव ल्क्योपिवाक्यमेतदभाषत ॥ उक्तोपिनमयाशक्यस्त्वयाद्रष्टुंकथंचन ॥ २२० ॥ बुद्ध्यासर्वंविजानातियतो यंभूतभौतिकं ॥ बुद्धिंचतस्याद्रष्टारंकेनपश्यसितद्वद ॥ २२१ ॥ घटोपलंभकंनेत्रंनघटेनोपलभ्यते ॥ यथात थात्रबुद्धीनांद्रष्टाताभिर्नलभ्यते ॥ २२२ ॥ बाह्यांतरविभेदानामिंद्रियाणांहियाधियः ॥ तासांद्रष्टात्रताभि र्योनदृश्यस्त्वेषआंतरः ॥ आत्मातवविनाशेनवर्जितोतोविलक्षणः ॥ २२३ ॥ एतस्माद्व्यतिरिक्तंयद्देहबुद्धींद्रि यादिकम् ॥ विनाशितज्जडत्वेनजन्मयोगियथाघटः ॥ २२४ ॥

नप्रकाश्यतेतथाबुद्धीनांतत्तदिंद्रियसंबंधेनदृष्टिश्रुतिघ्रात्यादिसंज्ञानांद्रष्टाप्रकाशकआत्माताभिर्बुद्धिभिर्नदृश्यतेइति ॥ २२२ ॥ एतत्स्फुटय ति बाह्येति बाह्यांतरविषयकत्वेनभिन्नानामिंद्रियाणांसंबंधेनदृष्टिश्रुत्यादिसंज्ञायाधियोबुद्धिवृत्तयस्तासांयोद्रष्टाभासकोऽतएवताभि रप्रकाश्यःसतवात्मासर्वांतरोविनाशहीनःअतःसंघाताद्विलक्षणइति ॥ २२३ ॥ ननुतथापितद्भिन्नंबुद्ध्यादिसत्यमसत्यंवा आद्येकथंसर्वां तरइत्युक्तं नहिघटःपटस्यांतरः अंत्येपिकथंसर्वपदप्रयोगःसर्वस्याभावादित्याशंकांयथारज्जौकल्पितानामुरगजलधारादंडादीनांरज्जुरांतर स्तद्वदेतद्द्रष्टव्यमित्याशयेनपरिहरति एतस्मादिति एतद्भिन्नंसर्वंजडत्वाज्जन्मनाशरूपार्तिमत् अतःकल्पितमितियावत् ॥ २२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उषस्तब्राह्मणार्थमुपसंहरति बुद्धिमानयमिति अयंयाज्ञवल्क्योबुद्धिमानित्येवंविज्ञायनिश्चित्योषस्तोमौनंचक्रेइति ॥ २२५ ॥ एवंबंधमोक्षयोग्यःसंघातविलक्षणआत्माउषस्तब्राह्मणेनिर्धारितोऽथतस्यमोक्षोयेनब्रह्मात्मैकत्वविज्ञानेनभवतितस्यससाधनस्यनिरूपणपरंयत्कहोलब्राह्मणंतस्यार्थःप्रदर्श्यते कौषीतकेयइत्यादिसप्तचत्वारिंशच्छ्लोकैः अथकुषीतकस्यापत्यंकहोलनामातंयाज्ञवल्क्यमपृच्छत् किंक्त्वा यउषस्तेनपृष्टआत्मातद्विषयकएवममप्रश्नइतिसूचयितुमुषस्तोक्तंयत्साक्षादित्यादिवाक्यमनूद्यपुनःपठित्वाप्रश्नाशयमभिनयति आत्मेति अयमात्माब्रह्मभावंगतःकथंभवेदिति ॥ २२६ ॥ ब्रह्मभावासंभवेहेतुंतयोर्वैधर्म्यमाह आत्मेति अयमेतत्संघातप्रकाशकआत्माक्षुत्पिपासेशोकमोहौजरामृत्यूषडूर्मयइतिप्रसिद्धषडूर्मिलक्षणसंसारधर्मकोऽनुभूयतेब्रह्मतुषडूर्मिरहितंश्रूयतेऽनयोविरुद्धधर्मिणोस्तादात्म्यं

बुद्धिमानयमित्येवविज्ञायोषस्तआत्मवान्॥ कहोलस्यसमीपस्थःप्रश्नादुपरराम्ह॥ २२५॥ कौषीतकेयोमतिमान्कहोलस्तमभाषत॥ उषस्तोक्तमनूद्येत्थमात्माब्रह्मकथंभवेत्॥ २२६॥ आत्मासंसारधर्मायंक्षुधितश्चपिपासितः॥ शोकमोहसमाविष्टोजायतेम्रियतेतथा॥ २२७॥ षडूर्मिरहितंब्रह्मतादात्म्यंह्यनयोःकथं॥ इत्युक्तेयाज्ञवल्क्योपितमाहमुनिपुंगवम्॥ २२८॥ षडूर्मयोनसंत्यत्रप्राणबुद्धिशरीरगाः॥ आत्मन्येतेनसब्रह्मकथ्यतेवेदवादिभिः॥ २२९॥ आत्मज्ञानवतांपुंसांसंसारोनैवबाधकः॥ कुतआत्मनएषस्यात्सर्वदाब्रह्मरूपिणः॥ २३०॥

भेदसहिष्णुरभेदइत्युक्तलक्षणमपिनसंभवतिकुतऐक्यमिति तथाचप्रत्यक्षविरुद्धमात्मनोब्रह्मत्वमितिप्रष्टुराशयः एवंपृष्टोयाज्ञवल्क्यआहस्मेतिद्वयोरर्थः ॥२२७ ॥२२८ ॥ स्यादेवप्रत्यक्षविरोधोययात्माक्षुत्पिपासाधर्मिप्राणरूपःशोकमोहधर्म्यंतःकरणरूपोवाजरामृत्युधर्मिशरीररूपोवाभवेत्सतुएषांप्रकाशकएवप्रकाश्यधर्माश्चप्रकाशकंनस्पृशंतीतिप्रसिद्धमादित्यादावतऐक्यबोधकस्यवेदांतप्रमाणराजस्यस्वार्थप्रकाशनेनकेनचिन्मानांतरेणविरोधइत्याशयेनोत्तरयति षडूर्मयइति प्राणबुद्धिशरीरगाःषडूर्मयःअत्रात्मनिनसंतिएतेनहेतुनासआत्मासंसारधर्मराहित्यरूपब्रह्मलक्षणशालित्वाद्ब्रह्मैवेतिवेदविद्भिःकथ्यतेइत्यर्थः॥ २२९॥आत्मनिसंसारधर्माभावेकैमुत्यमाह आत्मज्ञानेति अविद्यालेशेनभासमानोपिसंसारआत्मविदांबंधप्रसवलक्षणांबाधांकर्तुंयदानशक्तस्तदाकिमुवक्तव्यमात्मनःसंसारधर्मराहित्यइत्यर्थः॥ २३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतादृशात्मज्ञानस्यविक्षेपपरिहारेणदृष्टद्वारोपकारकमंगंसंन्यासइत्याह असंसारिणमिति एतंपूर्वार्द्धेनानूदितमेतद्ब्राह्मणउक्तंतंबुद्धिसाक्षि तयाउषस्तब्राह्मणवर्णितमात्मानंविज्ञायगतैषणाःपरित्यक्तकामाःसंतःपूर्वेवामदेवादयःप्रव्रजंतिस्मसंन्यस्तवंतइत्यर्थः ॥ २३१ ॥ तत्रैषणायाःस्वरूपभेदावाह सुतइतित्रिभिः लोकेकामनानामनेकविधत्वेप्यनुमतानित्रीणिरूपाणिईरितानिश्रुतौ तत्रैकंरूपंसुतोभवत्वित्याकारंपुत्रैषणात्वंयेनदारसंग्रहादौप्रवर्तते द्वितीयंवित्तैषणात्वं वित्तमपिद्विविधंदैवंमानुषंच तत्रदैवंदेवलोकजयसाधनमुपासनात्मकज्ञानं मानुषंतु मनुष्यलोकभोगसाधनंपशुहिरण्यादि तृतीयंलोकैषणात्वंलोकपदेनचदेवमनुष्यलोकवर्तिसुखंगृह्यतेइत्यर्थः ॥ २३२ ॥ वस्तुतस्तुद्वै

असंसारिणमात्मानंब्रह्माभिन्नंनिरंजनम् ॥ बुद्धिसाक्षिणमेतंतंविज्ञायात्रद्विजोत्तमाः ॥ वामदेवसमाःपूर्वं प्रव्रजंतिगतैषणाः ॥ २३१ ॥ सुतोभवतुमेतद्वद्वित्तंदैवंचमानुषम् ॥ सुखंलोकद्वयंचैतदेषणात्रयमीरितम् ॥ २३२ ॥ पितुःपुत्रोभवेद्वित्तंयथाक्षेत्रंयथापशुः ॥ वित्तंचसुखदंतद्वदिहलोकेपरत्रच ॥ २३३ ॥ ततःसुखस्य तद्वत्स्यात्तद्धेतोश्चैषणाद्वयं ॥ एषणाद्वैतमेवात्रवस्तुतःसर्वदेहिनाम् ॥ २३४ ॥

एवसकलकामनानुगतेरूपेइत्याह पितुरितिद्वाभ्यां यथाक्षेत्रंपशुर्गवादिश्चएतल्लोकभोगसाधनत्वाद्वित्तमितिप्रसिद्धंतथापुत्रोपिपितुर्वित्तमेव पुत्रेणजय्योयंलोकइतिश्रुतेरेतल्लोकजयसाधनत्वात् वित्तपदंचइहलोकेपरलोकेवायत्सुखदंसुखसाधनंतत्रप्रसिद्धं तथाचवित्तैषणात्वेनसकलसुखसाधनैषणानांसंग्रहः अतएवश्रुतौपुत्रैषणावित्तैषणयोरभेदउक्तइतिभावः लोकैषणापदेनचसकलफलकामनानांसंग्रहः लोकपदस्यसुखपरतायाःपूर्वश्लोकउक्तत्वात् तस्मादेषणानामनुगतरूपालोचनायांद्वैतंद्वित्वमेवेतिद्वयोरर्थः ॥ १३३ ॥१३४ ॥ ॥ १८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषणाद्वित्वेलोकानुभवमप्यनुकूलयति इच्छत्यपीति यतःसर्वोजनःप्रथमंफलभूतंसुखमेवेच्छतिफलस्यसाक्षाद्यत्नासाध्यतामालोच्यत त्साधनमपीच्छतीत्येषणाद्वित्वमुपपन्नमेवेतिशेषः एतदभिप्रायेणैवश्रुतौवित्तैषणालोकैषणयोरभेदउक्तइतिभावः अस्त्वेवंतथापिविद्वांसो यदेषणापरित्यागंकुर्वंतितत्रकोहेतुरितिचेदेषणामूलभूताविद्याहानिरेवेत्याह सुखंचेति योवैभूमातत्सुखमित्यादिश्रुतेरात्मन्येवसुखंना न्यत्र अयंतुपुरुषस्यचैतन्यमितिवन्निर्देशः यतःसर्वंसांसारिकपदार्थजातमुदर्केपरिणामेदुःखदंतथाचअज्ञाएवएषणाभाजइतिद्वयोरर्थः ॥ २३५ ॥ २३६ ॥ सांसारिकपदार्थानांदुःखरूपतांप्रपंचयति जननीत्यष्टादशभिः याजंतूनांजननीस्तन्यदानादिनासुखकारिणी

इच्छत्यपियतःसर्वःसुखमस्त्वितिनापरं॥ सुखंचात्मन्यसंसारेसर्वानंदातिशायिनि॥२३५॥ स्वप्रकाशेसति प्रज्ञेसर्वभेदविवर्जिते॥ नापरत्रयतःसर्वमुदर्केदुःखदंस्मृतम्॥ २३६॥ जननीसर्वजंतूनांप्रसिद्धासुखका रिणी॥ स्तन्यदानात्तथाशश्वद्रक्षणाद्भूर्यपायतः ॥ २३७॥ मलाद्यपनयात्तद्वच्चित्रात्स्नेहादिलौकिकात् ॥ को पतोमरणाद्वासादद्याद्दुःखंसुदुःसहं ॥ २३८॥ जनन्यामरणंबाल्येदाराणांयौवनेतथा ॥ वार्धकेतनयानांच वज्रपातसमंस्मृतम्॥ २३९॥ नाग्नेःप्रवेशनेदुःखंछेदनेवपुषोनच॥ जीवतःशूलसंक्षेपेभृगोर्वापतनेनहि ॥ २४०॥ तादृशंदुःसहंदुःखंनान्यस्मादपिकारणात्॥ जनन्यादिमृतौदुःखंबाल्यादौजायतेयथा॥ २४१॥

त्वेनप्रसिद्धासापिकोपमरणाभ्यांदुःखंदद्यादितिद्वयोःसंबंधः स्तन्यंपयः भूरिभ्योबहुविधेभ्यःअपायेभ्यःअपायहेतुभ्योजलाग्न्यादिभ्यो रक्षणात् चित्रादद्भुतात्स्नेहादिलौकिकात् स्नेहआदिःकारणंयस्यतादृशाल्लौकिकात्मुखचुंबनादिरूपादित्यपिद्वयोरर्थः ॥ २३७ ॥ ॥ २३८ ॥ तत्रजनन्यामरणाद्दुःखदत्वंतुल्ययोगितयास्फुटयति जनन्याइति स्पष्टं ॥ १३९ ॥ उक्तदुःखस्योत्कर्षंस्फुटयति नाग्नेरिति द्वाभ्यां शूलसंक्षेपेशूलोपरिनिधाने भृगोःपर्वतोच्चदेशात्॥ १४० ॥ तादृशमिति स्पष्टम्॥ २४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जननीन्यायमन्यत्राप्यतिदिशति॥२४२॥प्रियाणीति नचवियोगोवारयितुंशक्यइत्याह वियोगइति अचिकित्स्येनप्रतिकर्तुमशक्येनयेन केनचिन्निमित्तेनसंयुक्तानांवियोगोऽवश्यंभावीत्यन्वयः निमित्तस्याचिकित्स्यत्वेहेतुगर्भंविशेषणं कालेति रोगवच्छरीरपरिणामहेतुत्वाद्रोगसमेनकालेनप्रयुक्तेनेत्यर्थः ॥ २४३ ॥ एवंप्रियत्वाभिमतानांदुःखदत्वमुपपादितं अप्रियाणांतुदुःखदत्वंप्रसिद्धमेवेत्याह अप्रियाणिचेति दहंतितापयंति अमुंदेहाभिमानिनम्॥२४४॥जननीप्रभृतिचेतनेषूक्तंन्यायंजडेष्वप्यतिदिशति चेतनानीति चेतनवज्जडान्यपिवस्तूनि प्रीतिकराणिचेद्वियोगेनअप्रीतिकराणिचेद्योगेनअविरतान्विरागहीनान्शलभान्पावकवद्दहंतितापयंतीत्यर्थः ॥२४५॥ सांसारिकभावा

प्रियाणिसर्वभूतानिपित्रादीनिजनस्यहि॥ वियोगेदुःखमत्यर्थंजनयंतिसुदुःसहम्॥ २४२॥ वियोगःसर्वथाभावीसंयोगेसतिदेहिनां॥ अचिकित्स्यनिमित्तेनकालरोगकृतेनहि॥ २४३॥ अप्रियाणिचभूतानिसंयोगेनदहंत्यमुम्॥ अग्निर्यथास्वसंयुक्तंसर्वमेवदहत्ययम्॥ २४४॥ चेतनानियथातद्वज्जडान्यपिचसर्वदा॥ जंतून्योगवियोगाभ्यांप्रीत्यप्रीतिकराणिच॥ दहंत्यविरतान्शश्वच्छलभान्पावकोयथा॥ २४५॥ पुत्राविता निलोकाश्चशरीरंचसबांधवम्॥ एतेदुःखकराःसर्वेदृश्यंतेसर्वजंतुभिः॥ २४६॥ यद्यत्कर्तुंप्रवृत्तःसन्नशक्याद्विनिवर्तते॥ इच्छयासहितस्तत्तद्दुःखमुक्तंमनीषिभिः॥ २४७॥ प्रवृत्तिंकुरुतेशश्वदुपकारापकारयोः॥ शत्रुमित्रार्थमत्रायमशक्त्याविनिवर्तते॥ २४८॥

नांदुःखहेतुतारागांधताहीनैःसर्वैरनुभूयतेइत्याह पुत्राइति एतेपूर्वार्द्धोपदर्शिताः ॥ २४६ ॥ तत्रापिविहन्यमानाइच्छैवदुःखप्रयोजिकेत्याह यद्यदिति इच्छयासहितोजंतुर्यद्यत्कर्तुंप्रवृत्तःसन्यस्मादशक्याद्विनिवर्त्ततेतत्तद्दुःखकरत्वाद्दुःखमित्युक्तमित्यर्थः ॥ २४७ ॥ तदुदाहरति प्रवृत्तिमिति अयंलोकःप्रायःशत्रूणामपकारायमित्राणामुपकारायचप्रवृत्तिंकुरुतेतत्रचाशक्त्यैवततोनिवर्त्ततेइतिप्रसिद्धमितिशेषः ॥ २४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रचेच्छायाःप्रयोजकमहंममाध्यासरूपंविपर्ययज्ञानंतथेच्छाकार्यंदुःखस्वरूपंचाह शरीरेति सेयमशक्येच्छाकर्त्तुमशक्येप्यर्थेइच्छा क्वचिच्छरीरेंद्रियजाशरीराध्यासजाइंद्रियाध्यासजावाक्वापिकुत्रचित्सुतादिविषयकममत्वाध्यासजाअहंममाभिमानेनाशक्येच्छामपि कुर्वंतीतियावत् एवंसतिइच्छावधेःकुड्यादश्वःपततीत्यत्रआरोढुमशक्यंकुड्यंयथावधिर्विभागाश्रयत्वात्तथाइच्छास्वकार्यद्वारायमारोढुमशक्तासोशक्यपदार्थइच्छावधिर्बुद्धिकृतमपादानंतस्माज्जातोयइच्छायावैयर्थ्यालकोविघातस्तद्रूपंमहद्दुःखमित्यर्थः विहन्यमानेच्छैवदुःखरूपेणपरिणमतेइतियावत् ॥ २४९ ॥ एवमनर्थप्रयोजकाःशरीरादयइच्छाप्रयोजकंचतेषामननुकूलतयावस्थानंसर्वत्रसममित्याह शरीरेंद्रियेति तेचशरीरादयोहिरण्यगर्भभावपर्यंतंसर्वत्रसंतितेचसर्वदास्वाधीनाअनुकूलरूपानसंतीत्यपिप्रसिद्धमितिशेषःत

शरीरेंद्रियजासेयंक्वचित्क्वापिसुतादिजा॥ अशक्येच्छाविघातःस्याद्दुःखमिच्छावधेर्महत्॥ २४९॥ शरीरेंद्रियपुत्राद्याब्रह्मणोपीश्वरस्यवा॥ भवंतिसर्वथासर्वेस्वाधीनानैवसर्वदा॥ ततोदुःखंसमुद्दिष्टइमेसर्वेशरीरिणां ॥ २५० ॥ सुखत्वंविद्यतेनैववस्तुनःकस्यचित्क्वचित्॥ व्यभिचाराद्यतोदृष्टाहेतुतासुखदुःखयोः॥ पर्यायेणच वस्तूनांसर्वेषांसर्वदेहिभिः॥ २५१ ॥ यत्रापिसुखहेतुर्हिदृष्टंतत्रापिनास्यतत् ॥ आत्मरूपंसुखंयस्माद्धेतुभ्योनजनिंव्रजेत्॥ २५२॥

तःसर्वथानुकूलत्वाभावादिमेशरीराद्याःसर्वेपिदुःखमित्युक्ताः॥ २५०॥ एवमनात्मनिदुःखत्वमुक्त्वासुखत्वव्यतिरेकमपितेषांस्फुटयति सुखत्वमिति कस्यचिदपिवस्तुनःसुखत्वंनैवविद्यते कुतः सुखत्वंविनाप्यवस्थानरूपाद्व्यभिचारात् व्यभिचारेपिकिंमानमितिचेल्लोकानुभवएवेत्याह यतोदृष्टेत्यादि यदेववस्तुसुखदंतदेवकालांतरेदुःखदमित्येवंसर्वजंतुभिःसर्वेषांवस्तूनांपर्यायेणपरिपाट्याअनियमेनेतियावत् सुखदुःखयोर्जनकतादृष्टेति ॥२५१॥ तत्रापिपदार्थानांयासुखहेतुतादृष्टिःसाभ्रमएवेत्याह यत्रापीति यत्रदेशेकालेवाकश्चित्पदार्थःसुखहेतुर्मतस्तत्रापितत्सुखमस्यसुखहेतुतयाभिमतपदार्थस्यकार्यतयानदृष्टंप्रमाणेननगृहीतं मानाभावएवकुतइतिचेदानन्दोब्रह्मेत्यादिश्रुतेःसुखस्यात्मरूपत्वेनाजन्यत्वादित्यर्थः ॥ २५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिचसुखंजन्यंस्यात्तर्हिदुःखरूपमेवस्यादित्याह जायमानमिति सुखंयदिजायमानंस्यात्तर्हिदुःखमेवस्यात् आत्मनोभिन्नरूपत्वात् य
त्रयत्रात्मभिन्नत्वंतग्रतत्रदुःखत्वमित्यत्रलोकसिद्धदृष्टांतमाह पुंसइति यथावैरिसुखंसुखत्वेनज्ञातमप्यात्मभिन्नत्वेनदृष्टंसद्दुःखत्वेनलो
कैरनुभूयतेइतिप्रसिद्धम् ॥ २५३ ॥ कथंतर्हिविषयेषुसुखजनकत्वानुभवोलोकानामितिचेत्सुखाभिव्यंजकांतःकरणवृत्त्युत्पत्तेस्तत्रारो
पादित्याह ततइति यथाखद्योतैर्व्यापकस्याकाशस्यकिंचिदवच्छेदेनाभिव्यक्तिःक्रियतेतद्वत्सुखसाधनत्वाभिमतैर्व्यापकात्मस्वरूपस्यसु
खस्यतदभिमुखवृत्त्युत्पादनद्वाराकिंचिदभिव्यक्तिःक्रियतेइत्यर्थः तस्मात्पूर्णात्मानंदार्थिनएषणाःपरित्यजंतीतियदुक्तंतदुपपन्नमेवेतिभा
वः ॥ २५४ ॥ एवमात्मज्ञानस्यफलभूतःसाधनभूतश्चसंन्यासएषणापरित्यागात्मकवैराग्यसहितोनिरूपितः अथात्मज्ञानोत्पत्तौदृष्टद्वा
रोपकारकाणांश्रवणमननिदिध्यासनानांविधायकस्यतस्माद्ब्राह्मणइत्यादिग्रन्थस्यार्थमाह प्ररूढेतिसप्तदशभिः तत्रार्थक्रमेणचतुर्णामे

जायमानंभवेद्दुःखमात्मनोभिन्नरूपतः॥ पुंसोवैरिसुखंयद्वज्ज्ञातमप्यसुखंभवेत्॥ २५३॥ ततोभिव्यक्तिरेवा
स्यसुखस्यात्मस्वरूपिणः॥ कारणैर्लेशतोयद्वत्खद्योतैर्नभसोनिशि ॥ २५४ ॥ प्ररूढेंद्रियतानूनंदुःखहेतुर्द्विजैः
स्मृता॥ अप्ररूढेंद्रियोयस्माद्बालोदुःखंनगच्छति ॥ २५५॥ अप्ररूढेंद्रियस्तस्माद्बालवन्निवसेन्मुनिः॥ सुखै
षणांविहायायंस्वप्रकाशसुखोदधिः ॥ २५६॥ ब्राह्मणोजातविज्ञानःपदवाक्यार्थकोविदः॥ जानन्दुःखैकहे
तुत्वमन्वयव्यतिरेकतः॥ सर्वैषणासमेतस्यशरीरस्यास्यनाशिनः ॥ २५७॥

वसंबंधः ब्राह्मणोवक्ष्यमाणलक्षणस्वप्रकाशसुखोदधिरूपंब्राह्मणभावमिच्छन्वेदांतवाक्याज्जातविज्ञानस्तत्रापिपदार्थवाक्यार्थकोवि
दत्वलक्षणंपांडित्यंप्राप्यविनाशिनःसर्वविकारशालिनोऽस्यशरीरस्यसंघातस्याऽऽसंगद्वारासर्वैषणाजनकस्यान्वयव्यतिरेकाभ्यांदुःखहेतु
तांजानन्विषयसुखैषणांविहायबालवन्निवसेत् बहिर्मुखस्यहिवेदांतार्थमननंनोपपद्यतेऽयंतुबालवद्भावरूपंमननंकुर्यादितियावत् तत्र
बाल्येनसाम्यमप्ररूढेंद्रियत्वंप्ररूढत्वंरागद्वेषाभ्यांविषयप्रवणत्वंतद्रहितेंद्रियकत्वरूपं एतदेवबालसादृश्यंप्रकृतोपयोगाद्ग्राह्यमितिसूचयितुं
प्ररूढेंद्रियतेत्याद्युक्तमितिभाष्यानुरोध्यर्थः ग्रंथकृतातुबालवद्भावोयत्प्रथमंनिर्दिष्टस्तत्रायंभावः जिज्ञासुर्वेदांतश्रवणादपिपूर्वंरागद्वेषराहि
त्यरूपंबालभावमभ्यसेदिति ॥ २५५ ॥ २५६ ॥ २५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निदिध्यासनविधायकस्याथमुनिरित्यंतस्यश्रुतिभागस्यार्थंदर्शयति गुरूपदेशादिति गुरूपदेशात्संजातविज्ञानःरागद्वेषविवर्जितत्वरूपमप्ररूढेंद्रियत्वंश्रुतौबाल्यपदोक्तंतथास्वात्मनोयद्विज्ञानंवेदांततात्पर्यविषयत्वेनावधारणंश्रुतौपांडित्यपदोक्तंतच्चप्राप्यध्यानेनिदिध्यासनेमननेनाऽसंभावनानिवृत्तौयत्फलभूतंज्ञानंतद्रूपेतत्परोभवेदित्यर्थः निर्भयइतिपदस्योत्तरेणसंबंधः ॥२५८॥ अथमौनंचेत्यादेरथब्राह्मणइत्यंतस्यार्थंनिदिध्यासनस्वरूपप्रदर्शनपूर्वकमभिनयति अवाङ्मनसेतिद्वाभ्यां वाङ्मनसपदेनवाङ्मनसविषयभूतंदृश्यजातंलक्ष्यतेतद्विलक्षणरूपःअतएवस्वयंप्रभःस्वजात्यादिभेदराहित्येनानंदरूपोनिर्भयश्चाहमित्येवमाकारेमननेनिदिध्यासनेनिष्ठायस्यसतथा उक्तनिदिध्यासनात्मकंमुनेरुत्तमाश्रमिणःकर्मतदाश्रितःसन्बाल्यपांडित्ययोःश्रुतौअमौनपदोक्तयोर्मौनस्यनिदिध्यासनस्यचाभिज्ञआदरनैरंतर्यसत्कारैरा

गुरूपदेशात्संजातविज्ञानोध्यानतत्परः॥ अप्ररूढेंद्रियत्वंतद्रागद्वेषविवर्जितम्॥ स्वात्मविज्ञानपांडित्यसहितं प्राप्यनिर्भयः॥ २५८॥ अवाङ्मनसरूपोहमानंदात्मास्वयंप्रभः॥ स्वसजातिविजात्युत्थभेदत्रयविवर्जितः ॥ २५९॥ एवंमनननिष्ठःसन्मुनिकर्मसमाश्रितः॥ बाल्यपांडित्यमौनानामभिज्ञोब्राह्मणोमतः॥ २६०॥ बाल्यपांडित्यमौनानिविहायोक्तानिकेनसः॥ ब्रह्मात्माब्राह्मणोभूयादुपायेनापरेणहि॥ २६१॥ रागद्वेषादिराहित्यंगुरुशास्त्रोपदेशनम्॥ स्वयंचावगमस्तद्वत्तर्कतोध्यानतस्तथा॥ २६२॥ बाल्यपांडित्यमौनानिकथितानि मनीषिभिः॥ साधनानिफलंतद्वद्ब्राह्मणोब्रह्मबोधधृक्॥ २६३॥

सेवकोब्राह्मणोब्रह्मभावहेतुब्रह्मविद्याशालीमतइति ब्रह्मशब्दाद्वेदेत्यर्थेऽण्प्रत्ययइतिद्वयोरर्थः॥२५९॥२६०॥ सब्राह्मणःकेनेत्यंशस्यार्थमुपायांतरप्रश्नरूपमभिनयति बाल्येति ब्रह्मविद्ब्रह्मैवभवतीतिश्रुत्यंतरात् ब्रह्मात्माब्राह्मणः ब्रह्मभावरूपंब्राह्मण्यमितियावत् एतदुक्तेभ्योऽपरेणकेनोपायेनस्यात् यद्यस्त्युपायांतरंतर्हितदपिवाच्यमितिभावः ॥ २६१॥ अथयेनस्यादित्यादेरुत्तरस्यार्थमभिनेतुंतदाशयंदर्शयति रागेतिसार्द्धैस्त्रिभिः रागद्वेषादिराहित्यरूपंबाल्यंगुरुशास्त्रोपदेशनरूपंपांडित्यंतर्कतोविचारेणध्यानेनवास्वरूपसाक्षात्काररूपंमौनंचएतान्येवसाधनानि एषांफलंतुब्रह्मवित्त्वरूपंब्राह्मण्यमितिद्वयोरर्थः॥ २६२॥ २६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणत्वप्रयोजकंब्रह्मबोधमभिनीयसएवप्रकृतेब्राह्मणपदप्रवृत्तिनिमित्तमितिदर्शयति स्वप्रकाशेति स्वप्रकाशंसाक्षादपरोक्षंयदुषस्तब्रा ह्मणेआत्मनोरूपमुक्तंतदेवसुखात्मकंब्रह्मनामरूपात्मकद्वैतविवर्जितत्वात्तस्यबोद्धृबोद्धव्यादित्रिपुटीरहितान्निर्विकल्पकाज्ज्ञानान्निमि त्ताद्विद्वान्ब्राह्मणइत्युक्तः ॥ २६४॥ उपायांतरतइति बाल्यादिभिन्नादुपायात्सोयंवर्णितोब्राह्मणोनभवतिकिंतुतएवबाल्यादयउपायाइ तिपूर्वार्द्धार्थः एवमाशयमुपवर्ण्योत्तरमभिनयति अस्तुवेति उक्ताभिप्रायेणश्रुतावेवमुत्तरितं एवंकथं येनकेनोपायेनायंब्राह्मणईदृशोव र्णितलक्षणोऽस्तुसंपद्यतामत्रसाधनेषुममाग्रहोहठोनास्तीति ॥ २६५॥ साधनाऽऽग्रहाभावंदृष्टांतेनस्पष्टयति पारमिति नदीपारगमनरूपं फलंसेतुनाउडुपादिनावासिद्ध्यतिचेत्कोनावएवोपादानेहठंकुर्यादित्यर्थः ॥२६६॥ उक्तस्योत्तरस्यपर्यवसानंवर्णिताशयेदर्शयितुंदृष्टांतमु

स्वप्रकाशसुखंब्रह्मनामरूपविवर्जितम् ॥ बोद्धृबोध्यादिराहित्याज्ज्ञाताब्राह्मणईरितः ॥ २६४॥ उपायांतरतः सोयंनभवेद्धिकदाचन ॥ अस्तुवायेनतेनायमीदृशोनाग्रहोमम ॥ २६५॥ पारंनावापिगंतव्यंनद्याःसेत्वादि नापितत् ॥ गम्यतेचेत्किमर्थंस्यादादानंनावएवहि ॥ २६६ ॥ महावेगागाधजलाविस्तीर्णाचेद्भवेन्नदी ॥ नौ रेवोपायउद्दिष्टःसेत्वादिस्तत्रनापरः ॥ २६७॥ यथातथात्रबाल्यादिरुपायोनापरोभवेत् ॥ ब्राह्मणत्वेयतोनेदृ ग्ब्राह्मण्यंप्राप्यतेनरैः ॥ २६८ ॥

पन्यस्यति महावेगेति यदामहावेगत्वागाधत्वविस्तीर्णत्वैर्हेतुभिःसेत्वादिनादुस्तरानदीभवतितदानौरेवतरणोपायइति ॥२६७॥ वर्णिताश येदृष्टांतंयोजयति यथेति यथामहावेगत्वादिशालिनद्युत्तारेनौरेवोपायस्तथात्रब्राह्मणत्वेबाल्यादिरेवोपायः यतईदृग्ब्राह्मण्यंनरैरुपायांत रेणनप्राप्यतेदुर्लभमितियावत् अयंभावः भवदप्युपायांतरंहिरण्यगर्भाद्युपासनरूपमश्वमेधाद्युत्कृष्टकर्मरूपंवाभवेत् तत्सर्वंकालविलंबा दिदोषग्रस्तंब्रह्मबोधोत्पत्तौबाल्यादिसापेक्षमेवद्वैतदर्शनादुद्विग्नेनातिशुद्धांतःकरणेनानुष्ठातुमशक्यंच तत्रधावनानंतरमपिफलमेतावदेवा तएवमुक्तमिति ॥ २६८ ॥ ॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथातोऽन्यदार्त्तमित्यंशस्य अतोबाल्यादिरूपसाधनकदंबादन्यत्सांसारिकमवस्थाजातमार्त्तमार्तिग्रस्तमित्यर्थमभिप्रेत्याह कामेति कामक्रोधादिमत्तयाबाल्यहीनोगुर्वादेर्गुरुप्रभृतेरुपदेशहीनत्वेन पांडित्यवर्जितोमननादिहीनत्वेनमौनवर्जितोविषयलंपटत्वेनएषणाव्युत्थानहीनईदृशोपिब्राह्मणोवर्णितब्राह्मणत्वंप्राप्तःकस्यदेवादेरपिलोकेवर्त्ततेनकुत्राप्यस्तीतियावत् ॥ २६९ ॥ फलितमाह अन्नादानमिति अन्नादानंभक्षणंयथातृप्तेर्नियतउपायस्तथाबाल्यादिब्राह्मणत्वइत्यर्थः अतएवहिरण्यगर्भस्यापिमहावाक्यस्यक्षणमनुसंधानेनैवस्वात्मसाक्षात्कारोत्पत्तिरुक्ता योगिनोपिमहावाक्यसमानार्थकप्रणवार्थानुसंधानेनैवात्मानंसाक्षात्कुर्वंतीतिप्रसिद्धमितिभावः ॥ २७०॥ उपसंहरति एवमुक्तेइति ॥ २७१ ॥ अथात्मनःसर्वांतरत्वविनिर्णयपरस्याक्षरब्राह्मणांतग्रंथस्यार्थंप्रदर्शयंस्तत्रादौगार्गीब्राह्मणस्यार्थमभिनयति गार्गीतित्रयोविंशतिश्लोकैः गार्गीनाम्नावाचक्नवीवचक्नुसंज्ञकस्यकन्यासाप्रसिद्धायाज्ञवल्क्येतिसंबोध्यमुनींद्रंपप्रच्छ कीदृशीतर्केणकर्कशातर्कप्रधानायाधीर्ज्ञानंतदेवधनंयस्याःसातथा किंकृत्वापप्रच्छ पंचावयवयाप्रतिज्ञादिपंचावयवावगाहिन्याधियानुमानंसमाश्रित्येति॥२७२ ॥अनुमानंपंचावयवमभिनीयप्रश्नाकारमाह कार्यमितिद्वाभ्यां विमतंकार्यंकारणेनव्यापकेनसूक्ष्मेणचोपादानेनव्याप्तंबहिरावृतं ऊतंचअंतरनुप्रविष्टंचेतिप्रतिज्ञा कार्यत्वादितिहेतुः तंतावितिजातावेकवचनं तंत्वाश्रितःतैरोतःप्रोतोंऽतर्बहिर्व्याप्तःपटोयथेति दृष्टांतः ॥ २७३ ॥

कामक्रोधादिसहितउपदेशविवर्जितः॥ गुर्वादेर्मननध्यानशून्योविषयलंपटः॥ ईदृशोब्राह्मणःकस्यलोकेतंदर्शयाधुना ॥ २६९॥ अन्नादानंयथातृप्तावुपायोनियतस्त्विह॥ ब्राह्मणत्वेतथैवस्याद्बाल्याद्येवहिसाधनम् ॥ २७०॥ एवमुक्तेकहोलोपिप्रश्नाद्दुपरराम ह॥ निरीक्ष्यगार्गींधर्मात्मास्वात्मनःपुरतःस्थितां॥ २७१ ॥ गार्गीवाचक्नवीसाथपप्रच्छमुनिपुंगवम्॥ याज्ञवल्क्येतिसंबोध्यतर्ककर्कशधीधना॥ अनुमानंसमाश्रित्यपंचावयवयाधिया॥ २७२ ॥ कार्यंहिकारणव्याप्तमूतंचैवसदाभवेत्॥ कार्यत्वाद्धियथातंतौओतःप्रोतःपटःसदा ॥ २७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मांडमिति ब्रह्मांडपदंमनुष्यलोकेवर्तमानसकलपार्थिवधातुपरं तथाचसकलमिदंपार्थिवमपिस्थावरजंगमैःसहकारणव्याप्तत्वव्याप्य कार्यत्ववदित्युपनयः तस्मात्पृथिवीकारणत्वेनप्रसिद्धास्वप्सुस्थितंताभिरोतंप्रोतंचवर्ततइतिनिगमनं अन्यथासक्तुमुष्टिवद्विशीर्येतेत्यनुकूलस्तर्कोपिबोध्यः एवंपृथिव्यांकारणव्याप्तत्वनिश्चयेसतितद्दृष्टांतेनाद्भिरपिकार्यत्वात्कुत्रचिदोतप्रोताभिर्भवितव्यं तथाचापःकुत्रौतप्रोतावर्तंतइतिप्रथमप्रश्नइत्यर्थः ॥ २७४ ॥ गार्गीति एवंपृष्टोयाज्ञवल्क्यस्तांस्त्रियंप्रतिहेगार्गिवायावापओतप्रोताइतिप्राहस्म तत्रजलोपादानत्वेनप्रसिद्धंतेजोविहायवायोर्जलोपादानत्वाभिधानेहेतुमाह यद्यपीत्यादिना यद्यप्यत्रऔपनिषदमतेअपांहेतुरुपादानकारणंतेजइतिप्रसिद्धमतस्तदेवजलाधारत्वेनवर्णनीयंतथापिलोकेतेजसोवन्ह्यादिरूपस्यकाष्ठादिरूपइंधनएवोपलब्धिर्नान्यत्र इंधनस्थितवन्हे

ब्रह्मांडंसकलंतद्वदपिकार्यमुदीरितम् ॥ ओतप्रोतमतोप्स्वेवस्थावरैर्जंगमैःसह ॥ आपओतास्तथाप्रोताः कुत्रेत्येतत्समीरय ॥ २७४ ॥ गार्गिवायाविति प्राहयाज्ञवल्क्योपितांस्त्रियं ॥ यद्यपिस्यादपामत्रहेतुस्तेजस्तथापिहि ॥ तेजसस्त्विंधनेलब्धिर्नान्यत्रास्तीहकर्हिचित् ॥ २७५ ॥ इंधनेनविनावन्हिर्जलाधारोनलभ्यते ॥ शास्त्रमेकंविहायातस्त्यक्त्वावायुमथाब्रवीत् ॥ २७६ ॥ वायुंतथांतरिक्षाख्यलोकंतद्वत्परानपि ॥ लोकान्गंधर्वजातीनांसूर्याचंद्रमसोरपि ॥ २७७ ॥ नक्षत्रदेवदेवेंद्रप्राजापत्यात्मनामपि ॥ पप्रच्छपूर्ववद्गार्गीस्थानंप्रत्येकमेवसा ॥ २७८ ॥

स्तुनिर्धूमस्यजलविरोधितैवप्रसिद्धानतुजलोपादानताइत्यतस्तथोक्तमितिभावः ॥ २७५ ॥ उक्तंस्फुटयति इंधनेनेति इंधनविमुक्तोवन्हिर्जलोपादानतयाशास्त्रंविनानप्रसिद्धः आर्द्रेंधनसंपृक्तस्यधूमसंपर्कद्वाराजलकारणत्वंत्वार्द्रेंधनगतजलेपिसंदिग्धमितिभावः इत्याशयेनतेजस्त्यक्त्वावायुंजलाधारत्वेनाब्रवीदिति नतुप्रमेयविरोधः परमकारणस्यस्वकार्यकार्याधारतायाःकैमुत्यन्यायसिद्धत्वादितिभावः ॥ २७६ ॥ वायुमिति एवंदत्तोत्तरागार्गीवायुप्रभृतीन्प्रत्येकमनूद्यवायुःकुत्रौतप्रोतःअंतरिक्षलोकाःकुत्रौतप्रोताइत्येवमाद्याकारेणपूर्वपूर्वस्योत्तरोत्तरंस्थानमुपादानभूतमाधारंपप्रच्छ लोकानितिपदस्यगंधर्वादिभिर्नक्षत्रादिभिश्चप्रत्येकंसंबंधोद्रष्टव्यः लोकानितिबहुवचनंचपंचभूतसमुदायात्मकत्वेनोद्भूतावयवभेदविवक्षयाज्ञेयमितिद्वयोरर्थः ॥ २७७ ॥ २७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तरोत्तरमिति मुनिर्याज्ञवल्क्यस्तुएतेषांवाय्वादीनांगणितानांमध्यउत्तरोत्तरमाश्रयत्वेनोपादानत्वेनाब्रवीत् तत्रवाय्वाधारत्वेनोक्तस्यां तरिक्षलोकस्यस्वरूपमाह स्थूलेति यददोऽवकाशरूपेणलोकेप्रसिद्धंस्थूलाकाशमस्तितदेवअंतरिक्षलोकपदेनोक्तमित्यर्थः ॥ २७९ ॥ गंधर्वलोकादिपदानामर्थमाह गंधर्वाद्याइति गंधर्वलोकप्रभृतयइंद्रलोकपर्यंताःशब्दाभूतानामुत्तरोत्तरंसूक्ष्मावस्थानांवाचकाइत्यर्थः तथाचांतरिक्षाकारपरिणतभूतेभ्यःसूक्ष्माण्यंतरिक्षलोकंसर्वतःपरिवेष्ट्यस्थितानिचगंधर्वशरीरारंभकाणिभूतानिसंतितानिपरिवेष्ट्यस्थितानिसूर्यलोकारंभकाणिभूतानिततःसूक्ष्माणिच एवमग्रेपीतिनिष्कर्षः ॥ २८० ॥ सूक्ष्मतायास्तारतम्यमभिनयति अपेक्षयेति गंधर्वलोकमारभ्यइंद्रांताइंद्रलोकपर्यंताःषडमूरेताभूतावस्थाःपूर्वपूर्वापेक्षयासूक्ष्माअप्युत्तरोत्तरापेक्षयास्थूलाएवबोध्याः यथागंधर्वलोकापेक्षयासू

उत्तरोत्तरमेतेषामाश्रयंचाब्रवीन्मुनिः॥स्थूलाकाशमदोलोकेत्वंतरिक्षाख्यईरितः॥२७९॥गंधर्वाद्यास्तथालोकाइंद्रलोकांतगाअपि॥अवस्थाअत्रविज्ञेयाःसूक्ष्माभूतेषुकाश्चन॥२८०॥अपेक्षयाहिपूर्वस्यसूक्ष्माअप्युत्तरस्यच॥ अपेक्षयाभवन्स्थूलाइंद्रांताःषडमूःसदा॥ २८१ ॥ इंद्रोविराड्वपुर्ज्ञेयइदंयोदृष्टवान्प्रभुः॥ सर्वमेतद्यतोविश्वंविराड्वपुषितिष्ठति ॥ २८२ ॥ ब्रह्मांडगोलकाद्बाह्यःप्रजापतिरितीरितः॥ पारिक्षितास्तुयंप्रापाःसूत्रात्मानंमहेश्वरं ॥ २८३ ॥

क्ष्माअपिसूर्यलोकाश्चंद्रलोकापेक्षयास्थूलाएवमग्रेपि ॥ २८१ ॥ अत्रेदंबोध्यं भाष्यकारैर्यद्यपींद्रपदार्थस्त्रिलोकीपतिः प्रजापतिपदार्थश्चविराट्ब्रह्मलोकपदार्थश्चांडारंभकानिभूतान्युक्तानितर्कमर्यादयाप्रश्नानर्हत्वंचसूत्रात्मनियथाश्रुतिव्याख्यातंतथाप्यैतैर्निर्गुणविद्याप्रधानैर्भाष्यकृद्व्याख्यानेयत्कैमुत्यन्यायसूचितंशुद्धात्मनस्तर्कमर्यादयाप्रश्नानर्हत्वंतत्रैवगार्गीब्राह्मणेपर्यवसानंदर्शयितुंतदनुकूलाइंद्रप्रजापतिब्रह्मलोकशब्दानामर्थाःप्रतिपाद्यंते इंद्रइतित्रिभिः अत्रइंद्रपदार्थोविराड्रूपोबोध्यः इदंसर्वमात्मत्वेनदृष्टवानितिव्युत्पत्तेःपूर्वमुक्तत्वात् संभवतिचेयंव्युत्पत्तिस्तत्रैवेतिदर्शयन्नाह सर्वमेतदिति ॥ २८२ ॥ प्रजापतिपदार्थमाह ब्रह्मांडेति ब्रह्मांडगोलकाद्बहिरपिस्थितःसूत्रात्मात्रप्रजापतिपदार्थः पारिक्षितायंप्रापाभुज्युप्रश्नेवर्णिताइति ॥ २८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मलोकपदार्थमाह अस्येति अस्यसूत्रात्मनोऽव्याकृतंमायाज्ञानमित्यादिपदवाच्यत्वेनप्रसिद्धंयत्सर्वकारणंतदेवप्रतिष्ठाआधारः तदेवचात्रब्रह्मलोकपदार्थः कीदृशंतत् समष्टिरूपेणैकंव्यष्टिरूपैरनेकंचेत्यर्थः ॥ २८४॥ आत्मनस्तर्कमर्यादयाप्रश्नायोग्यतांस्फुटयन्नाह ओतप्रोतमित्यादिना गार्गीएतन्नव्यधारयत्नविचारितवती एतत्किं तत्कारणमव्याकृतमात्मरूपेवर्त्तमानमप्यनुमानैर्नगम्यते कुतः तदनुकूलव्याप्तेर्लिंगस्यचाभावात् सएवकुतइतिचेच्छृणु कार्यकारणेव्याप्तमित्याकारैवव्याप्तिरुक्ताकार्यत्वमेवचालिंगमुक्तंतदुभयमव्याकृताश्रयत्वेनात्मज्ञानेनोपयुज्यते अव्याकृतस्याकार्यत्वादात्मनश्चकार्यकारणोभयविलक्षणत्वादिति वस्तुतस्तुसूत्रात्मापिनानुमानगम्यः अनुमानस्यदृष्टानुरोधेनैवप्रवृत्तेः अतएवब्रह्मांडाद्बहिःसूत्रात्मास्तीतिकुत्रचिदपितार्किकैर्नलिखितमित्यपिबोध्यम् ॥ २८५ ॥ अविचार्यैवेति गार्गीउक्तंविचारमकृत्वैवआग्रहतस्तर्कपक्षपातेनमुनिंप्रतिइतीदृशंइत्याकारंप्रश्नंकृतवती इदृशंकीदृशं हेयाज्ञवल्क्यब्रह्मलोकाअव्याकृ

अस्याव्याकृतमेवस्याःप्रतिष्ठासर्वकारणं ॥ ब्रह्मलोकवचोगम्यमेकानेकात्मकंहितत् ॥ २८४ ॥ ओतप्रोतंसदाकार्यकारणेनैवकारणम् ॥ मायाख्यमात्मरूपेस्मिन्ननुमानैर्नगम्यते ॥ व्याप्तिलिंगाद्यभावेननैतद्गार्गीव्यधारयत् ॥ २८५ ॥ अविचार्यैवपप्रच्छमुनिमाग्रहतोहिसा ॥ कस्मिन्नोतास्तथाप्रोताब्रह्मलोकाइतीदृशं ॥ २८६ ॥ याज्ञवल्क्यस्तयापृष्टएवंसमुनिपुंगवः ॥ अर्थंशास्त्रैकसंगम्यमनुमानेनमौर्ख्यतः ॥ उवाचतांतदागार्गीमतिप्रश्नंवृथाकृथाः ॥ २८७ ॥ आश्रयोनानुमानेनगम्यतेकेनचित्क्वचित् ॥ अनुमानादियंनैवप्रष्टव्याद्देवतात्वया ॥ २८८ ॥

तद्रूपाःकुत्रौतप्रोताइति ॥ २८६ ॥ याज्ञवल्क्यइति मुनिपुंगवोमुनिश्रेष्ठोयाज्ञवल्क्यस्तयागार्ग्याएवंशास्त्रमात्रवेद्यमर्थमात्मतत्त्वरूपंमौर्ख्यादनुमानरीत्यापृष्टःसंस्तांगार्गीप्रतीदमुवाच इदंकिं हेगार्गित्वमतिप्रश्नंप्रष्टव्यस्यात्मनःप्रश्नमर्यादामागमेनैवप्रष्टव्यत्वरूपामतिक्रांतंप्रश्नंवृथाऽकृथाःकृतवत्यसीत्यर्थः अत्रपृष्टइतिगुणकर्मणिक्तप्रत्ययेमुख्यकर्मणोर्थस्यानुक्तत्वाद्द्वितीयाइति ॥ २८७ ॥ अतिप्रश्नायोग्यतांश्रुतावनतिप्रश्न्यपदोक्तांस्फुटयति आश्रयइति आश्रयःसर्वाधिष्ठानमात्माऽनुमानेनयतोनगम्यतेअतइयमात्मरूपादेवताऽनुमानविधयानप्रष्टव्याइति आश्रयपदप्रयोगेचायमभिप्रायः यदापेक्षिकाश्रयताशालिनीसूत्राव्याकृतेअपिनानुमाननिर्णेयेकिमुतसर्वाधिष्ठानमात्मेति ॥ २८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदीति तथापियदिमानसान्मनोनिष्ठादुराग्रहादतिप्रश्नंकरिष्यसितर्हितेमूर्द्धापतिष्यतीति ॥ २८९ ॥ परमोत्कृष्टमपकृष्टेनसमंपश्यतोऽन
र्थोभवतीत्येतद्दृष्टांताभ्यांस्फुटयति अस्त्रमितिचतुर्भिः यथार्जुनकरस्थंपाशुपतास्त्रमिदमन्यशरसममस्त्रत्वात्शरांतरवदित्यनुमानेनशरांत
रैःसमीकर्तुंनशक्यंसमीक्रियेतेचेत्तर्हितत्पाशुपतास्त्रंतस्यविपरीतदर्शिनःशिरोनिकृत्यच्छित्वानिपातयेदितिद्वयोरर्थः॥ २९० ॥ २९१ ॥
द्वितीयंदृष्टांतमाह यथाभिचारेति यथाथर्वांगिरसामथर्ववेदोत्पन्नानामभिचारमंत्राणांतत्राप्यलमत्यर्थंकोपिनोदुर्वासःप्रभृतेर्द्देदिस्थाना
मनुमानबलेनप्राकृतवर्णैःसाम्यंनेतुरभिमंतुर्मूढस्यमूर्द्धाभूमौविशीर्णःसन्पतति दार्ष्टांतिकेयोजयति एवमिति द्वयोरर्थः॥२९२॥२९३॥ उ
पसंहरति एवमुक्तेति एवमुक्तंश्रुत्वाऽतिभयेनव्याकुलासाएषागार्गीआरुणिंअरुणस्यापत्यमुद्दालकनामानमगमत् वादायप्रेरयितुंतत्समी

यदिपृच्छसिमूर्धातेनिपतिष्यतिभूतले॥ मानसादाग्रहाद्गार्गिविचाररहितासती॥ २८९॥ अस्त्रंपाशुपतंयद्व
त्करस्थंफाल्गुनस्यहि॥ अनुमानाच्छरैरन्यैःसमीकर्तुंनशक्यते॥ २९० ॥ आग्रहादनुमानेनसमतांकुरुतेय
दा॥ तदातस्यशिरःसद्यस्तन्निकृत्त्यनिपातयेत्॥ २९१ ॥ यथाभिचारमंत्राणामथर्वांगिरसामलं॥ कोपिनो
वात्द्वदिस्थानामनुमानसमाश्रयात्॥२९२॥ वर्णैःसमानतांनेतुर्मूर्धाभूमौविशीर्यते ॥ एवंतवापिगार्गिस्या
द्देवतातिक्रमाद्ध्रुवं॥ २९३॥ एवमुक्तातिभीतासाकर्तव्यंनव्यधारयत्॥ अगमत्सहसाविप्रमेषोद्दालकमारु
णिम् ॥ २९४ ॥ उद्दालकोभृशंक्षुब्धोयाज्ञवल्क्यंस्मपृच्छति॥ याज्ञवल्क्येतिसंबोध्यगोप्यार्थंदेवतोदितम्
॥ २९५॥ मद्रदेशेवयंपूर्वंपतंचलगृहेस्थिताः ॥ यज्ञवाक्यान्यधीयानाबहवोब्रह्मचारिणः ॥२९६॥

पेतस्थावित्यर्थः ॥ २९४ ॥ अथसूत्रात्मांतर्यामिणोरपितत्त्वमागमविधयैवविज्ञेयमितिप्रदर्शनपूर्वकंतत्स्वरूपनिरूपकंसप्तमब्राह्मणमेक
त्रिंशच्छ्लोकैर्व्याकुर्वन्नादौतयोरागमवेद्यतावोधिकायाःप्रथमकंडिकायाअर्थमितिहासविधयानिरूपयति उद्दालकइतिचतुर्दशभिः उ
द्दालकोदेवतोदितंदेवतयागंधर्वेणस्वस्माउपदिष्टंगोप्यमर्थंयाज्ञवल्क्यंप्रतिपृच्छतिस्मेतिसंबंधः ॥ २९५ ॥ उद्दालकःस्वस्यदेवोपदिष्टार्थवि
त्त्वेनाधिक्यंसूचयितुंभुज्युवत्पूर्ववृत्तमाह मद्रेत्यादिना वयंबहवोब्रह्मचारिणोयज्ञवाक्यानियज्ञप्रतिपादकानिवेदवाक्यान्यधीयानाःपठं
तःसंतोमद्रदेशेपतंचलनामकस्यकपिगोत्रकस्यविप्रवरस्यगृहेस्थिताइति ॥ २९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतंचलस्येति तस्यपतंचलस्यभार्यागंधर्वेणाग्निनाऽऽविष्टासीत्तदाएतंगंधर्वंसर्वैर्वयंगुरुणासहापृच्छामत्वंकोसीति ॥ २९७ ॥ सोब्रवीदिति सगंधर्वःस्त्रीवपुःस्थितोऽस्मद्गुरोर्भार्याशरीरेस्थितःसगुरून्गुरुसहितान्ब्राह्मणान्प्रतीदमब्रवीत् इदंकिं आथर्वणोगोत्रतःकबंधोनामतोलोकप्रसिद्धोगंधर्वोहंभवतामुपकारायागतश्चेति अत्रकेनजलेनबंधःपरिवेष्टनंवासाधारतयायस्यसतथेतिकबंधपदस्याग्नौसमन्वयोबोध्यः ॥ २९८ ॥ एवमुक्तेति एवमुक्त्वापुनरेतद्वक्ष्यमाणंवाक्यंसगंधर्वःकपिगोत्रायास्मद्गुरवेउक्तवान् ॥२९९॥ तद्वाक्यमभिनयति काप्येति हे काप्यपतंचलत्वंतत्सूत्रंजानासियेनेदंसर्वंजगद्बद्धंमालाकुसुमवद्धृतं जगत्स्वरूपमाह लोकेत्यादिना प्रत्यक्षपरोक्षभेदेनलोकद्वित्वंविवक्षितं कीदृशंलोकद्वयं भूतानामाधारभूतमितिशेषः तद्गतानिभूतानिचेति॥ ३०० ॥ नाहमिति एवंपृष्टोनोस्माकंगुरुरेवंप्राह एवंकथं अहंयत्स

पतंचलस्यभार्यासीद्गंधर्ववशमागता॥ अपृच्छामैतमागम्यकोसीतिगुरुणासह॥ २९७॥ सोब्रवीद्ब्राह्मणान स्मान्सगुरून्स्त्रीवपुःस्थितः॥ आथर्वणःकबंधोहंगंधर्वोलोकविश्रुतः॥ उपकारायसंप्राप्तोगुरोश्चब्रह्मचारिणाम्॥ २९८ ॥ एवमुक्त्वापुनर्वाक्यमेतद्गंधर्वउक्तवान्॥ गुरुंपतंचलंकाप्यमस्माभिःपरिवारितं ॥ २९९॥ काप्यजानासिसूत्रंत्वंयेनबद्धमिदंजगत्॥ लोकद्वयंचभूतानांभूतानिनिखिलानिच ॥ ३०० ॥ नाहंजानामित त्सूत्रंनिमित्तंप्राहनोगुरुः॥ पुनरप्याहगंधर्वोह्यस्माभिःसहितंगुरुम्॥ ३०१ ॥ अंतर्यामिणमीशानंकाप्यजानातिकिंभवान्॥ इत्युक्तेनेतितंप्राहगंधर्वंपूर्ववद्गुरुः॥ ३०२॥ एवमुक्तःपुनःप्राहगंधर्वःकृपयान्वितः॥ काप्यसूत्रंमयापृष्टमंतर्यामिणमेवच॥ योवेत्तिसकलंविश्वंवेत्तिसोत्रनसंशयः॥ ३०३॥ सब्रह्माणंतथालोकान्देवान्वेदांस्तथापरान्॥ प्राणिनःपंचभूतानिस्वात्मानंसर्वमेवच॥जानातिनात्रसंदेहइत्युक्तोभयमब्रवीत्॥ ३०४॥

र्वलोकस्यधारणेनिमित्तंसूत्रंतन्नजानामीति ततःसगंधर्वःपुनरस्मद्गुरुमाह ॥ ३०१ ॥ अंतरिति हेकाप्यसूत्राज्ञानेप्यंतर्यामिणंभवान् किंवेत्तीतिगंधर्वेणोक्तेप्यस्मद्गुरुर्नजानामीत्येवाहस्मेति ॥ ३०२ ॥ एवमुक्तइति एवमुक्तोस्मद्गुरुणास्वाज्ञानावेदनेनदत्तोत्तरःसगंधर्वःपुनःसूत्रांतर्यामिणोर्ज्ञानोत्कर्षंप्राहस्म कथमित्यतआह काप्येति हेकाप्यमयापृष्टंसूत्रमंतर्यामिणंचयोवेत्तिससर्वज्ञइत्यर्थः ॥ ३०३ ॥ सब्रह्माणमिति सब्रह्माणंपरमात्मानंवेत्तितथालोकान्भूरादिकान्तथासर्वान्देवादीन्जानातिनात्रसंशयः इतिप्रभावमुक्त्वाउभयंसूत्रमंतर्यामिणंचसशिष्यायास्मद्गुरवेऽब्रवीत् ॥ ३०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जानामीति एवंदेवोपदेशेनाहंतद्द्वयंसूत्रांतर्यामिरूपंजानामिभवांस्तुतद्द्वयमजानन्सन्ब्राह्मणानांस्वभूतागाःसर्वागृहीतवान्आश्रमंप्रतिप्रेषयिताभविष्यसितर्हितेशिरःपातोभविष्यतीति॥ ३०५॥ इत्युक्तेइति इंतिउद्दालकेनगौतमेनोक्तेसतियाज्ञवल्क्यस्तंप्रतीदमाह इदांकिं यद्गंधर्वस्तुभ्यमुक्तवांस्तद्द्वयमहंवेदेति॥३०६॥ इत्युक्तेकोपेति एवंयाज्ञवल्क्येनोक्तेसतिसकोपंवाक्यंगौतमआहस्म तद्वाक्यमभिनयतिवेदेत्यादिना अहंवेदवेदजानामिजानामिइत्याकारंवचनमज्ञवद्भाषसेनतुतत्सूत्रांतर्यामिस्वरूपंकथयसिस्पष्टंनिरूपयस्यतोऽज्ञोसि योहिजानन्भवतिसएवंवेदेत्येतावन्मात्रंनवदेदिति॥३०७॥ यदीति स्पष्टम्॥३०८॥याज्ञवल्क्यःप्राणप्रधानत्वेनवायुरूपंसूक्ष्मशरीरंसमष्टिव्यष्टिरूपंसू

जानामितद्द्वयंचाहंतदजानन्भवान्यदि॥ ब्राह्मणानांहिगाःसर्वाअज्ञानेनगृहीतवान्॥ तदासद्यःशिरःपातोभवतोद्यभविष्यति॥३०५॥इत्युक्तेयाज्ञवल्क्योपितमाहोद्दालकंमुनिं॥ वेदाहंतद्द्वयंयत्तुगंधर्वस्तुभ्यमुक्तवान्॥ ३०६॥इत्युक्तेकोपसहितंगौतमोवाक्यमब्रवीत्॥ वेदवेदेतिवचनंभाषसेपामरोयथा॥ नतुतत्कथयस्यज्ञजानन्नेवंनसंवदेत्॥ ३०७॥ यदिजानासितद्ब्रूहिकिमर्थंगर्जनंवृथा॥ इत्युक्तेयाज्ञवल्क्योपिगौतमंवाक्यमब्रवीत्॥ ३०८॥ वायुरेवहितत्सूत्रंसर्वबंधनकारणम्॥ अयंलोकस्तथान्यश्चभूतानिनिखिलान्यपि॥ वायुनैवनिबद्धानितंतुभिस्तुपटोयथा॥ ३०९॥ यतःसूत्रमयंवायुस्ततएवास्यनिर्गमे॥ अंगानांशीर्णतांप्राहुर्मृतंदृष्ट्वामनीषिणः॥ ३१०॥ अंगीचकारतद्वाक्यमेवमेवेतिवाक्यतः॥ अंतर्यामिणमात्मानंयाज्ञवल्क्यवदाधुना॥ ३११॥

त्रत्वेनाह वायुरेवेति यत्त्वयापृष्टंसर्वबंधनकारणंसूत्रंतद्वायुरूपमेव यतोवायुनाप्राणात्मनाधिदैवमध्यात्मंचस्थितेनसर्वलोकादिकंनिबद्धंधारितंदृश्यते॥ ३०९॥ तत्रलोकप्रसिद्धामुपपत्तिमाह यतइति यतोयंवायुःसूत्रंसूत्रवद्विधारकस्ततएवास्यवायोर्निर्गमेमृतंदृष्ट्वामृतस्यांगानांशीर्णतांसूत्राकर्षणेकुसुमवद्विशकलिततांशिथिलतामितियावत् प्राहुर्वर्णयंतीत्यर्थः॥ ३१०॥ अंगीचकारेति एवमुक्तंश्रुत्वागौतमस्तुयाज्ञवल्क्यवाक्यमेवमेवेतिवाक्यमभिधायांगीचकारअंतर्यामिणंवर्णयेत्युवाचचेति एतेनद्वितीयकण्डिकार्थोदर्शितः॥ ३११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याज्ञवल्क्येनैकविंशतिकंडिकाभिर्निरूपितमंतर्यामिणमुक्तस्यसूत्रस्यनियमेनचालकरूपंप्रतिपादयति पृथिव्यामितित्रयोदशभिः योदेवोऽधिदैवंदेवेषुनिरूपणप्रस्तावेपृथिव्यादिषुद्वादशसुश्रुत्यानिरूपितःसोंतर्यामीतिषष्ठेनसंबंधः अनिलेवायौ दिविस्वर्गे चंद्रतारकेचंद्रतारकसमाहारे आकाशेभूते अंतरिक्षपदेनतुभुवर्लोकग्रहइत्यपुनरुक्तता तमस्यंधकारे कीदृशोदेवः प्राज्ञःसर्वज्ञः॥३१२॥ अधिभूतमिति तथाअधिभूतंनिरूप्यमाणोयोदेवःस्थावरेषुचरेषुचभूतेषुनिरूपितस्तथाध्यात्मंप्राणाद्यष्टसुनिरूपितः विज्ञानंबुद्धिः रेतउपस्थेंद्रियं॥३१३॥ एकविंशतीति एवमेकविंशतिप्रकारासंस्थाव्यवस्थायेषामीदृशेषुस्थानेषुयःपुमांस्तिष्ठन्नेतेभ्यःपृथिव्यादिस्थानेभ्योभिन्नोवर्त्ततेयथागृहपतिर्गृहाद्भिन्नः एतेनश्रुतिगतांतरशब्दस्यभेदरूपाऽर्थपरतादर्शिता संस्थानाशेव्यवस्थायामितिहेमचंद्रः अंतरमवकाशावधिपरिधानांत

पृथिव्यामप्सुचैवाग्नावंतरिक्षेऽनिलेदिवि॥ आदित्येचतथादिक्षुदेवोयश्चंद्रतारके॥ आकाशेतमसिप्राज्ञस्तेजस्यास्तेधिदैवतं॥ ३१२॥ अधिभूतंहिसर्वेषुस्थावरेषुचरेषुच॥ अध्यात्मंचतथाप्राणेवाचिचक्षुषिसर्वदा॥ श्रोत्रेमनसिसर्वात्मात्वचिविज्ञानरेतसोः॥ ३१३॥ एकविंशतिसंस्थेषुतिष्ठन्स्थानेषुयःपुमान्॥ एतेभ्योभिन्नएवायंगृहाद्यद्वद्गृहीपुमान्॥ ३१४॥ एतानिनविदुस्तद्वदेनंस्वत्वदयेस्थितम्॥ शरीरंयस्यचैतानिपृथिव्यादीनिसर्वदा॥ यथास्माकंवपुःप्रोक्तंशुक्रशोणितसंभवं॥ ३१५॥ पृथिव्याद्यभिमानानिचेतनानिसमंततः॥ सर्वाण्येवयएतानिनियच्छतिमहेश्वरः॥ व्यापारेषुनिजेष्वेकोराजाभृत्यान्यथाभुवि॥ ३१६॥ अंतर्याम्येषआत्मातेयंत्वंगौतमपृच्छसि॥ विवर्जितःसदात्र्यमरणादिषडूर्मिभिः॥ ३१७॥

र्धिभेदतादर्थ्येइत्यमरः॥३१४॥ एतानीति एतानिपृथिव्यादीनियंस्वांतःस्थितंनविदुर्नजानंति यस्तुएतानिनियंतुंशरीरांतराणिनोपादत्ते किंतुयथास्माकंजीवानांशुक्रशोणितमयंशरीरंतद्वत्तस्यपृथिव्यादीन्येवशरीरभूतानीति॥३१५॥ पृथिव्याद्यभिमानानीति पृथिव्यादीनिआत्मत्वेनाभिमन्यमानानिचेतनानिलिंगरूपाणिएतानिलक्षणयापृथिव्यादिपदार्थभूतानिसर्वाणिनानाव्यापारेषुराजाभृत्यानिवयोमहेश्वरोमायाधिपतिर्नियच्छतिनियमेनप्रवर्त्तयति॥३१६॥ अंतरिति सएषोंतर्यामीतवाप्यात्माहेगौतमयंपृच्छसीति अमृतपदार्थमाह विवर्जितइति योमरणोपलक्षितषडूर्मिभिर्विवर्जितः क्षुधातृषाशोकमोहौजन्ममृत्यूषडूर्मयइति॥३१७॥ ॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकविंशतीति एवंतंनियामकमंतर्यामिणंपरमदेवंयाज्ञवल्क्यएकविंशतिवारंपृथिव्यादिषुस्थितमुक्तवानिति ॥ ३१८ ॥ अंत्यकण्डिकागतस्यादृष्टोद्रष्टाइत्यादेरर्थमाह एवमुक्त्वेत्यादिना एवमंतर्यामिणमुक्त्वाप्रतिपाद्यतस्यान्याननुक्तान्धर्मानदृष्टत्वादीनुवाच कीदृशान्धर्मान् सर्वधर्माणामभावाभिव्यंजकान् कीदृशोयाज्ञवल्क्यः नेतीत्याकारंमंत्रमंतर्यामिणोदेवस्यप्रादुर्भावप्रयोजकंसमाश्रितः तन्निष्ठइतियावत् ॥ ३१९ ॥ तान्धर्मानभिनयति नेत्रैरित्यादिना एषदेवोज्ञानिनांप्रशस्तज्ञानशालिनामपिनेत्रैश्चक्षुर्भिरयथावन्नदृष्टोनविषयीकृतोऽतोऽदृष्टत्वंतस्यधर्मएवमग्रेपि स्वयंतुसर्वस्यद्रष्टाएवमग्रेपीति तथादृष्टिश्रुत्यादिपदार्थभूतानांबुद्धिवृत्तीनांप्रकाशकत्वाद्द्रष्टाइत्यादिपदैरुक्त

एकविंशतिवारंसउक्तवान्मुनिसत्तमः॥ पृथिव्यादिषुदेवेशंप्रत्येकंतन्नियामकम् ॥ ३१८॥ एवमुक्त्वाथतस्यान्यान्सर्वधर्मनिषेधकान्॥ धर्मानुवाचधर्मज्ञोनेतिमंत्रंसमाश्रितः॥ ३१९॥ नेत्रैर्नानाविधैरेषनदृष्टोज्ञानिनामपि॥ श्रोत्रैश्चनश्रुतस्तद्वन्मनोभिर्नमतःपुमान् ॥ ३२० ॥ बुद्धिभिश्चविशुद्धाभिर्नविज्ञातःकथंचन॥ द्रष्टाश्रोतातथामंताविज्ञाताजगदीश्वरः॥ दृष्टेःश्रुतेर्मतेस्तद्वद्विज्ञातेरपिसर्वदा ॥ ३२१ ॥ सर्वेंद्रियाणांव्यापारमेषवेत्तिमहेश्वरः॥ बाह्यमाभ्यंतरंवापिनेंद्रियंवेत्त्यमुंसदा ॥ ३२२ ॥ अंतर्यामिणएतस्मात्पृथिव्यादिषुसंस्थितात्॥ द्रष्टाश्रोतातथामंताविज्ञाताचास्तिनापरः॥ ३२३॥ आत्मातएषएवातोनापरोगौतमास्तिहि ॥ एतस्मादपरंयत्तुतद्विनाशिजडत्वतः॥ उद्दालकस्ततोविप्रःप्रश्नादुपरराम ह ॥ ३२४॥

इतिद्वयोरर्थः ॥ ३२० ॥ ३२१ ॥ उक्तमेवस्फुटयति सर्वेंद्रियाणामिति एषसर्वेंद्रियव्यापारंवेत्तिएनंत्विंद्रियाणिनविषयीकुर्वंतीत्यर्थः ॥ ३२२ ॥ अंतर्यामिणइति एतस्मादंतर्यामिणःसर्वत्रस्थितादन्योद्रष्ट्रादिरूपचेतनोनास्तिकिंत्वयमेवसर्वत्रद्रष्ट्रादिरूपइत्यर्थः ॥ ३२३ ॥ आत्मेति अतस्तद्भिन्नस्यद्रष्ट्रादेरभावात्तवएषएवात्मा सचाद्वितीयइत्याह एतस्मादिति एतद्भिन्नंजडत्वाद्विनाशिविद्याबाध्यंतुच्छमिति यावत् सप्तमब्राह्मणार्थमुपसंहरति उद्दालकइति ॥ ३२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मयाथात्म्यवेदकस्याष्टमब्राह्मणस्यार्थंत्र्यूनश्लोकशतेनोपबृंहयंस्तत्रप्रथमकंडिकाया अर्थमभिनयति गार्गीतिचतुर्भिः ततउद्दालको परमानंतरंवचक्नुसुतागार्गीएतद्वचोविप्रान्प्रत्युवाच एतत्किं हेअत्रसंगताःसमवेताविप्राभगवंतःपूजाशालिनोयूयमिदंमद्वचःश्रृणुत इदं किं अहमिमंयाज्ञवल्क्यंप्रतिद्वावर्नौदितौप्रश्नौपृच्छामीति ॥ ३२५ ॥ ताविति तौमत्प्रश्नावयंयाज्ञवल्क्योमहाशयोमहामतिर्वक्ष्यतिचे त्तर्ह्यमुंजेतुंयुष्माकमन्यतमःकोपिकोपिप्रजापतिसदृशोपिनक्षमोभवेदिति कीदृशममुं ब्रह्मोद्यंब्रह्मवक्तारं छांदसत्वात्कर्त्तरिक्यप् दृष्टांतः स्पष्टः फलितमाह अनुजानंत्विति इतिद्वयोरर्थः ॥ ३२६ ॥ ३२७ ॥ ब्राह्मणानुज्ञाप्रार्थनेहेतुमाह शापादिति कश्चित्प्रश्नोद्यतोमांपृ च्छंतींस्त्रियंमत्वामाशपेदितिशंकाविष्टासतीगार्गीविप्राज्ञांप्रार्थितवतीयतोतिशयेनधीधनाधीशालिनी ततोलब्धविप्राज्ञासतीयाज्ञवल्क्य

गार्गीवाचक्नवीविप्रांस्ततएतदुवाचसा ॥ हंतविप्रावचोमेऽद्यभगवंतोत्रसंगताः ॥ श्रृणुताहमिमंविप्राःपृच्छामिद्वावनिंदितौ ॥ ३२५ ॥ तौचेद्वक्ष्यतिविप्रोयंयाज्ञवल्क्योमहाशयः ॥ कदाचित्कोपिनैवामुंजेतुंयुष्मासुसंभवेत् ॥ ३२६ ॥ ब्रह्मोद्यंब्राह्मणंकोपिखद्योतेषुयथारविं ॥ अनुजानंतुमांतस्मात्सर्वएवद्विजोत्तमाः ॥ ३२७ ॥ शापाद्भीतातदागार्गीब्राह्मणानुमतिंमुहुः ॥ प्रार्थयामासपृच्छेतिलब्धानुज्ञातिधीधना ॥ पप्रच्छयाज्ञवल्क्यंतमिदमाभाष्यसंसदि ॥ ३२८ ॥ प्रसिद्धासर्वलोकेषुगार्गीवाचक्नवीत्यहम् ॥ प्रायोबुद्ध्याधिकालोकेपुरुषेभ्योपियोषितः ॥ ३२९ ॥ साहसेनचधैर्येणरागतःक्रोधतोपिच ॥ तासांमांप्रथमांविद्धिसरस्वत्यासमांधिया ॥ ३३० ॥

माभाष्यसंबोध्यइदंपप्रच्छ ॥ ३२८ ॥ द्वितीयकंडिकार्थंचतुर्विंशत्योपबृंहयन्समयोर्विवादइतिन्यायमनुरुध्यसर्वज्ञेनयाज्ञवल्क्येनस्व स्यवादयोग्यतायागार्ग्यहंपदप्रयोगेणसूचितातामभिनयति प्रसिद्धेत्याद्यष्टादशभिः हेमुनेभवानपिप्रसिद्धोऽहमपिप्रसिद्धागार्गीति य दिभवान्बुद्ध्याधिकस्तत्त्वंमय्यपिसंभाव्यतेइत्याह प्रायइति पुरुषापेक्षयाबुद्ध्याधिक्यंयोषितांप्रसिद्धं बुद्धिश्चासांचतुर्गुणाइतिप्रसिद्धेः ॥ ३२९ ॥ साहसेनेति साहसादिचतुष्टयेनचाधिकाइत्यनुषंगः साहसमविवेकः रागःकामः तासांबुद्ध्यादिनिरूपिताधिक्यशालिनीनां मध्येप्रथमांप्रथमगुणेनबुद्ध्याप्रथमगणनीयांमांविद्धियतोधियासरस्वतीसमां ॥ ३३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुकासौतववुद्धिर्ययात्वमाधिक्यमभिमन्यसइतिचेत्तत्त्वधीरेवेत्याह अहमिति हेविप्रेन्द्रअहमेतत्त्वव्यतिरिक्तंजगदपौरुषंपौरुषेणपुरुषस्यभावेनकर्मणावाहीनंपश्यामि किंतत्पौरुषमितिचेत्सर्वात्मभावदर्शनमेवेत्याशयेनाह नपुंसकमिति नपुंसकादिभेदभिन्नंसर्वंजगदहमेवेतिबाधासामानाधिकरण्येनज्ञानमेवपौरुषमिति॥ ३३१॥ उक्तपौरुषव्यतिरेकेनपुंसकत्वंस्त्रीत्वंवापर्यवस्यतीत्याह नपुंसकइतिचतुर्भिः स पुमानपिनपुंसकोज्ञेयः आत्मनोपिज्ञानेऽशक्तस्यहिपौरुषंदुर्वचमित्यर्थः ॥३३२ ॥ उक्तज्ञानहीनस्यस्त्रीत्वंस्पष्टयति अयमेवेति अयमज्ञः पुमानेवयोषित्पारतंत्र्येणस्त्रीसमत्वादित्यर्थः ॥ ३३२ ॥ स्त्रीत्वेपिवारांगनासमोऽज्ञइत्याह कामेति कामक्रोधादयएवभुजगावेश्यापतय

अहंपश्यामिविप्रेंद्रजगदेतदपौरुषं॥ नपुंसकमहंतद्वदहंस्त्रीचपुमानहम् ॥ ३३१॥ नपुंसकःपुमानज्ञेयोयोनवेत्तिहृदिस्थितं॥ पुरुषंस्वप्रकाशंतमानंदात्मानमव्ययम्॥ ३३२ ॥ अयमेवपुमान्योषिन्नाहंपीनपयोधरा॥ यतःस्वस्मात्परस्तस्यपतिरस्तिस्त्रियायथा ॥ ३३३ ॥ कामक्रोधादिभिस्तद्वद्भुजगैर्भुज्यतेपुमान्॥ अज्ञोवारांगनातुल्योनाहमेवंकथंचन॥ ३३४॥ अज्ञोगर्भंदधात्यत्रधातुंसप्तममातुरः॥ कालेनपुरुषेणासौसंयुक्तालल नायथा॥३३५॥ नाहमस्मिन्वयस्यग्रद्दुःसहेयौवनेवरे॥ वर्तमानास्थितायूनांमध्यएमीहविक्रियां॥३३६॥ नग्नाहंभवतांमध्येस्थितास्म्येकांतगायथा ॥ निरीक्षंतेनमांविप्राविक्रियाभीरवःस्वयं ॥ पश्यंत्यहममून्सर्वान्स्पृशाम्यात्मकरादिभिः ॥ ३३७ ॥

स्तैर्वारांगनाभूतोऽज्ञःसंभुज्यतेस्वस्ववृत्तिदशायामाक्रम्यतइतियावत् स्वस्मिंस्तद्यतिरेकमाह नाहमिति ॥ ३३४ ॥ गर्भधारयितृत्वमप्यज्ञेस्त्रीसाम्यमित्याह अज्ञइति सप्तमोधातूरेतोरूपस्तदात्मकंगर्भंकालरूपपुरुषसंयुक्तासौअज्ञरूपास्त्रीचतुर्थाग्निभूतापंचमाग्नियोषावदधाति अत्रसंसारे पुरुषेहवाअयमादितोगर्भोभवतिइत्याद्यैतरेयश्रुतेः एतदर्थप्रपंचःप्रथमेध्यायेगतइति ॥ ३३५ ॥ स्वस्मिन्दोषप्रयोजकदेहाभिमानमूलनिवृत्त्याउक्तलक्षणस्त्रीत्वव्यतिरेकंस्फुटयति नाहमिति वरयौवनरूपेवयस्यवस्थायांवर्त्तमानापियूनांमध्येस्थितापिचविक्रियांनएमिप्राप्नोमि ॥ ३३६ ॥ नग्नेति स्पष्टम् ॥ ३३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुशास्त्रदृष्ट्यात्वयिस्त्रीत्वाभावेपिलोकदृष्ट्यातुस्यादितिचेन्न स्त्रीशब्दावयवार्थसमन्वयाभावादितिवक्तुंतद्व्युत्पत्तिमाह ततइति स्त्यायतेः स्त्यैशब्दसंघातयोरितिप्रसिद्धधातोर्ड्ट्प्रत्ययांतस्यार्थंयाधारयतिसैवलोकेपिस्त्रीतिवाच्या अहंत्वेवमुक्तविधानास्मितेनवधूःस्त्रीकथंस्यामिति ॥ ३३७ ॥ कोसौस्त्यायतेरर्थइतिवीक्षायामाह स्त्यायतेरिति यद्यपिशब्देसंघातेचपृथक्पृथक्शक्तिरुक्ताऽतएवसंहन्येतेशुक्रशोणितेऽस्यामितिस्त्रीशब्दव्युत्पत्तिमाहुर्वृद्धास्तथाप्येतैःसापेक्षार्थसंघातेप्रतियोगितयाशब्दस्यैवसंनिहितस्यान्वयोयोग्यइतिमत्वाशब्दसंघातइत्येकवचनंप्रयुक्तमितिबोध्यं केषांशब्दानांसंघातःस्त्रीशब्दार्थइत्याकांक्षायामविवेकिप्रयुज्यमानानहंममाभिमानविषयवाचकान्श

ततःस्त्रीनामसाज्ञेयास्त्यायतेरर्थधारिणी ॥ यालोकेनाहमेवंस्यांकथंतेनवधूरहं ॥ ३३८ ॥ स्त्यायतेःशब्दसंघातःस्मृतोर्थोत्रमनीषिभिः ॥ अहंवधूःसमीचीनायुवतिःसुपयोधरा ॥ ३३९ ॥ कामिनीमत्समानाकाविद्यतेत्रनितंबिनी ॥ अयंममपतिःपुत्रस्तद्वदेषासुतातथा ॥ धनंधान्यंगृहेमेस्तिवंध्याचाहंकुटुंबिनी ॥ ३४० ॥ इत्यादिशब्दसंघातःस्त्यायत्यर्थउदाहृतः ॥ मायापिशाचीसंपर्कादात्मनोबोधशून्यतः ॥ सयेषुवर्ततेतेस्युःस्त्रियोत्रमुनिसत्तम ॥ ३४१ ॥ आत्मबोधेनयेपूर्णाःपुरुषास्तउदाहृताः ॥ यादृशास्तादृशाःसंतुशरीरेणद्विजोत्तम ॥ ३४२ ॥ यथानटःपुमान्भूयाद्योषितांहृदयंगमः ॥ क्षणेनललनावास्यान्नरधैर्यविनाशिनी ॥ ३४३ ॥ एवसेषपुमानेकआनंदात्मामहेश्वरः ॥ पुंसोवायोषितोवापिगृह्णातिवपुरिच्छया ॥ ३४४ ॥

ब्दान्दर्शयति अहमित्यादिना स्पष्टं ॥ ३३९ ॥ ३४० ॥ स्त्रीशब्दार्थनिरूपणंनिगमयति इत्यादीति उदाहृतोबुधैरितिशेषः सचमायापिशाचीयोगेनात्मबोधहीनत्वाद्येषुप्राणिष्वस्तितेषांस्त्रीत्वंबोध्यमित्यर्थः ॥ ३४१ ॥ स्वस्मिन्पुरुषत्वमावेदयितुंलक्षयति आत्मेति ये प्रमातारआत्मबोधेनपूर्णास्तेपुरुषाउदाहृताः सवाएषपुरुषःसर्वासुपूर्षुइतिश्रुत्येतिशेषः तेचशरीरेणयादृशास्तादृशाःसंतुनकाचित्क्षतिरिति बहुत्वमुपाधिदृष्ट्यावोध्यम् ॥ ३४२ ॥ कल्पितेनरूपभेदेनवास्तवैक्यस्यनक्षतिरितिसदृष्टांतंबोधयति यथेतिद्वाभ्यां यथास्त्रीपुंवेशैर्नटस्यनान्यथाभावस्तथात्मनोपीतिद्वयोरर्थः ॥ ३४३ ॥ ३४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकस्यमाययानानाभावेऽपरंदृष्टांतमाह पुमानिति वाजीअश्वः एषजाग्रतिदृश्यमानः ॥ ३४५ ॥ फलितमाह ततइति ततआत्मबोधलक्षणपौरुषशालित्वात् सर्वज्ञरूपाप्रशस्तासर्वज्ञा सर्वज्ञतायाःप्राशस्त्यमापेक्षिकत्वराहित्यं एतादृश्यहंद्वौप्रश्नरूपबाणौवाग्द्वियरूपकोदंडेनिधायत्वांहंतुमागतास्मितत्त्वयावादरूपयुद्धायस्थैर्यंवाकर्तव्यंअवनतिर्वाकार्येतिद्वयोरर्थः ॥ ३४६ ॥ ३४७ ॥ श्रौतंदृष्टांतभागंव्याकरोति दिवइतित्रिभिः काशिराजस्यदिवोदास्यसुतःक्षत्रधर्मेणोयाणांपूर्वजानांपितामहादीनांसमानधर्माअतएवशक्रेणयोद्धुकामःप्रतर्दनोजनकोवाशत्रूणामभिमुखेसंग्रामेसुवर्णादिभूषितमात्मनःकोदंडंज्ययागुणेनहीनमधिकृष्टज्याकंकृत्वातथाऽऽकर्णमाकृष्टंकृत्वासशरहस्तःसन्शत्रून्व्यथयितुंतानुपतिष्ठतीतित्रयाणामर्थः ॥ ३४८ ॥ ३४९ ॥ ३५० ॥ दार्ष्टांतिकमाह उपस्थितास्मीति इतिगार्ग्याउक्तेसति ब्रूहिपृच्छ ॥ ३५१ ॥ तृतीयकंडिकार्थमाह एवमितित्रिभिः तर्काभिमानंपरित्यज्यागमविधयागार्ग्याकृतंप्रश्नमभिनयति दिवइत्यादिना यत्सूत्रात्मस्वरूपंदिवऊर्ध्वांडकपालादूर्ध्वमुपरिष्टात्स्थितमुदितमागमिकैः तथाभुवोधोंडकपालादधस्तात्स्थितमुदितं तथाद्यावापृथिव्योरंडकपालयोर्मध्येचस्थितमुदितं अतीतानागतवर्तमानात्मकसर्वप्रपंचात्मकंचोदितंतत्कुत्रौतप्रोतंवर्ततइतिद्वयोरर्थः ॥ ३५२ ॥ ३५३ ॥

पुमान्स्त्रीकुंजरोवाजीत्यादिभेदोत्रमायया॥ स्वप्नेयद्वद्भवेत्पुंसस्तद्वदेषोत्थुदात्ततः॥ ३४५॥ ततःसर्वज्ञरूपात्वांललनादेहमास्थिता॥ ब्राह्मणानांविजेतारंविप्रंसर्वज्ञमानिनम्॥ ३४६॥ उभाभ्यांप्रश्नबाणाभ्यांवाक्कोदंडेनिधायतौ॥ हंतुमभ्यागतास्थैर्यंभजवाऽवनतिंव्रज॥ ३४७॥ दिवोदाससुतोयद्वदुग्रपूर्वजधर्मवान्॥ क्षत्रधर्मरतःशक्रंयोद्धुकामःप्रतर्दनः॥ ३४८॥ जनकोवाविदेहोत्रस्वशत्रून्प्रतिसंगरे॥ सुवर्णमणिरत्नादिभूषंकोदंडमात्मनः॥ ३४९॥ ज्याहीनंसहसाधिज्यंकृत्वाथाकर्णपूरितं॥ तीक्ष्णलोहौशरौहस्तेगृहीत्वाचातिकोपनः॥ सपत्नानांव्यथाहेतुरुपतिष्ठतिवीर्यवान्॥ ३५०॥ उपस्थितास्मितद्वत्त्वांप्रश्नाभ्यांधैर्यमास्थिता॥ तौप्रश्नौब्रूहिमत्स्यंत्वंयदिजानासितौद्विज॥ इत्युक्तेब्रूहिगार्गीतियाज्ञवल्क्योवचोब्रवीत्॥ ३५१॥ एवमुक्तामुनिंप्राहगार्गीवाचक्नवीवचः॥ दिवोयदूर्ध्वमुदितमर्वाग्यच्चभुवस्तथा॥ ३५२॥ द्यावापृथिव्योर्यन्मध्येभूतंभाविभवच्चयत्॥ कस्मिन्नेतद्भवेदोतंप्रोतंचमुनिसत्तम॥ ३५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वेवंभंग्यागार्ग्याकिंपृष्टमित्याकांक्षायामाह ब्रह्मेति पूर्वंहिसूत्राव्याकृताश्रयांस्तर्केणप्रश्नायोग्यान्निश्चितवतीगार्गीत्यतआगमविधया तन्निश्चयमिच्छंतीप्रजापतिपदोक्तसूत्रेणसंलग्नान्आधारतयासंबद्धान्ब्रह्मलोकान्अव्याकृतरूपतयावर्णितानेवपुनःपप्रच्छ किंकृत्वा पूर्वपरिपाटीत्यागसूचनायशब्दभेदंविधाय ल्यब्लोपेपंचमी तत्रहेतुरागमसंश्रयइति अत्रशब्दभेदश्चसूत्रंप्रजापतिपदेनाननूद्यदिवोयदूर्ध्वमित्यादिवाक्येनानुवादरूपः तत्रचसूत्रमपिमयातर्कागम्यत्वेनावधारितमितिसूचनमपिप्रयोजकं तदेतदुक्तंनतुसूत्रविवर्जितानिति ॥ ३५४ ॥ तुर्यकंडिकार्थमाह एवंपृष्टइतिद्वाभ्यां अस्यागार्ग्यावाक्यंयदूर्ध्वमित्यादिकमनूद्यतद्वत्पठित्वाउत्तरमभिनयति कार्यमिति एतद्यदूर्ध्वमित्यादिनादर्शितंसूत्रात्मरूपंकार्यंयत्त्वयेरितमनूदितंतत्कारणस्यआवरणविक्षेपरूपशक्तिद्वयशालिनोविक्षेपरूपंमतं एतेविक्षेपाश्चकार्यरूपाः

ब्रह्मलोकान्पुनःशब्दभेदादागमसंश्रयात्॥ पप्रच्छसूत्रसंलग्नान्नतुसूत्रविवर्जितान्॥ ३५४ ॥ एवंपृष्टोमुनिर्वाक्यमनूद्यास्यावचोब्रवीत्॥ कार्यंकारणविक्षेपरूपमेतत्त्वयेरितम्॥ ३५५॥ कारणस्यसदैवैतेतिष्ठंत्यावरणात्मनि ॥ आकाशेकारणेगार्गिसदाव्याकृतरूपिणि ॥ ३५६॥ एवमुक्ताथगार्गीतंनमस्कृत्यवचोब्रवीत् ॥ धारयस्वमनोविप्रपरप्रश्नोत्तरायमे ॥ पृच्छगार्गीतितामाहपुनर्वाक्यंद्विजोत्तम ॥ ३५७॥ एवमुक्तातत्तोगार्गीपप्रच्छोक्तंपुनर्द्विजं॥ उत्तरंचपुनःप्राहपूर्वोक्तंसावधारणं॥ ३५८ ॥

कारणस्यावरणभूतेआत्मनिस्वरूपेतिष्ठंतीतिप्रसिद्धमितिशेषः एतेइतिबहुवचनंव्याप्तिसूचनाय किंतत्सूत्रकारणमतआह आकाशइति अव्याकृताकाशतयाप्रसिद्धेकारणेमूलाज्ञानेसूत्रंतिष्ठतीतिद्वयोरर्थः ॥ ३५५॥३५६॥ पंचमकंडिकार्थमाह एवमुक्ताथेति कारणतत्त्वंदुर्वचमपित्वयोक्तमितिसूचनायनमस्कृतिः परंद्वितीयं स्फुटमन्यत् ॥ ३५७॥ षष्ठसप्तमयोःकंडिकयोरर्थमाह एवमुक्तातत्इतिपंचभिः एवमुक्तागार्गीद्वितीयप्रश्नंचिकीर्षन्तीतावत्पूर्वमुक्तमेवपृष्टमेवपुनःपप्रच्छ पूर्वोक्तमुत्तरमेवचमुनिराहस्मेति अवधारणवाचकैवपदप्रयोगमात्रंचाधिकंकृतवानित्यर्थः ॥ ३५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यैवप्रश्नस्यपुनःकरणेगार्ग्याःकोभिप्रायइत्यतआह गृहमिति गार्गीएतन्मनसिनिधायपुनःपप्रच्छ एतत्किं यथागृहंनकेवलंस्तंभाश्रितं किंतुकुड्याश्रितमपितथासूत्रात्माप्यव्याकृताकाशेतथापरत्रान्यस्मिन्कुत्रचिदपिकिंतिष्ठतीति ॥ ३५९ ॥ उत्तरस्यपूर्वोक्तस्यैवदानेयआशयस्तमाह याज्ञवल्क्योपीतिद्वाभ्यां याज्ञवल्क्योप्येतन्मनसिनिधायोत्तरमुक्तवान् एतत्किं यथामेघस्यकेवलोभूताकाशआधारस्तथा सूत्रात्मनोऽव्याकृताकाशइतिद्वयोःसंबंधः ॥ ३६० ॥ ३६१ ॥ शिष्टांशार्थमाह याज्ञवल्क्येनेति सोयमव्याकृतसंज्ञकआकाशःकुत्रौतप्रोतइति अत्रायंगार्ग्याशयः अव्याकृताधिष्ठानमात्मतत्त्वंवागगोचरंयदिनवदिष्यतितदाकथनप्रकाराबोधरूपमप्रतिभासंज्ञंनिग्रहस्था

गृहंस्तंभेषुकुड्येषुयथातिष्ठतिकिंतथा ॥ तथाकाशेपरत्रापियाज्ञवल्क्यात्रतिष्ठति ॥ एतन्निधायमनसागार्गी पप्रच्छतंपुनः ॥ ३५९ ॥ याज्ञवल्क्योपिनैवंतदुभयत्रव्यवस्थितं ॥ किंतुमेघोयथाकाशेकेवलेत्रप्रतिष्ठितः ॥ ३६० ॥ केवलेतद्वदाकाशेकारणेतद्व्यवस्थितं ॥ एवंमनसिसंधायपुनरुत्तरमभ्यधात् ॥ ३६१ ॥ याज्ञवल्क्येनकथितउत्तरेसावधारणे ॥ याज्ञवल्क्यंपुनर्गार्गीपप्रच्छमुनिपुंगवम् ॥ याज्ञवल्क्याऽयमाकाशओतप्रोतश्चकुत्रसः ॥ ३६२ ॥ एवमुक्तउवाचैतामक्षरेस्मिन्प्रतिष्ठितः ॥ प्रत्यक्षेसर्वलोकानांबुद्धिसाक्षिणिचात्मनि ॥ ३६३ ॥ यत्रस्थितोयमाकाशएतदेवतदक्षरम् ॥ आत्मरूपंसुखंव्याप्तंविनाशरहितंतथा ॥ ३६४ ॥

नमेपयास्यति यदितुवदिष्यतितदाविप्रतिपत्तिसंज्ञंविरुद्धाभिधानरूपंतद्यास्यतीति पराजयहेतुर्निग्रहस्थानम् ॥ ३६२ ॥ अष्टमकंडिकार्थमाह एवमुक्तउवाचेत्याद्येकादशभिः किमाश्रयतयात्वत्पृष्टोऽव्याकृताकाशस्तस्मिन्सर्वसाक्षितयासाक्षादपरोक्षात्मरूपेऽक्षरेतिष्ठतीत्यर्थः ॥ ३६३ ॥ कथमात्मनएवाक्षरत्वमित्यतआह यत्रेति अयमव्याकृताकाशोमूलाज्ञानरूपोयत्रतिष्ठतितदेवाक्षरमुक्तं अज्ञानाधारश्चशुद्धात्मैव तदुक्तं आश्रयत्वविषयत्वभागिनीनिर्विभागचितिरेवकेवलेति किंच अश्नुतेव्याप्नोतीतिवानक्षरतीतिवाऽक्षरपदस्यव्युत्पत्त्याप्यात्मनएवाक्षरत्वमित्याह आत्मेति आत्मनःस्वरूपभूतंसुखंयतोव्याप्तंविनाशलक्षणक्षरत्वहीनंचातआत्मनएवाक्षरत्वमिति ॥ ३६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाक्षरात्मनःस्वरूपमतन्निरसनेननिरूपयन्प्रतिपत्तिविप्रतिपत्तिंचनिराकरोति नस्थूलमित्यादिना घटोयथाबिल्वाद्यपेक्षयास्थूलः पर्वताद्यपेक्षयाचसूक्ष्मस्तद्वद्ययत्स्थूलंसूक्ष्मंवातद्विलक्षणमितिपूर्वार्द्धार्थः तृणवद्यद्धस्वंतालवद्यच्चदीर्घंतद्विलक्षणमित्युत्तरार्द्धार्थः एवमग्रेपिबोध्यम् ॥ ३६५ ॥ नलोहितमिति वन्हिवद्रक्तवर्णाच्चविलक्षणंतथाछायासदृशभूमिवत्कृष्णाद्विलक्षणमिति ॥ ३६६ ॥ तमालेति तमालश्यामलतयानेत्ररोधकृत्तमःसदृशंयत्तद्विलक्षणं गतिवर्जितत्वाद्वायोश्छिद्रवर्जितत्वादाकाशाद्विलक्षणं ॥ ३६७ ॥ श्रुतौतेजोव्यावृत्तयेऽसंगपदमित्याशयेनाह नचतेजइति मूर्तत्वेनससंगंहितेजःअक्षरंतुतद्विलक्षणमिति द्रवोरसस्तद्धीनत्वान्नजलं गंधहीनत्वान्नभूमिरिति ॥ ३६८ ॥ श्रुतौचक्षुःश्रोत्राभ्यांज्ञानेंद्रियाणिवाचाचकर्मेंद्रियाण्युपलक्षितानिनज्ञातत्तादात्म्यंनिषिद्ध्यतइत्याशयेनाह नचेति अ

नस्थूलंनतुतत्सूक्ष्मंघटवत्तद्धिसर्वदा॥ नह्रस्वंनचदीर्घंतद्दृश्यतेतृणतालवत् ॥ ३६५॥ नलोहितंयथावन्हिःस्नेहवन्नजलोपमम् ॥ नच्छायासदृशंयद्वद्भूमिःकृष्णाप्रतीयते ॥ ३६६ ॥ तमालश्यामलंनैवतमोवन्नेत्ररोधकं ॥ नवाय्वाकाशरूपंतद्गतिच्छिद्रविवर्जितम् ॥ ३६७॥ नचतेजःस्वरूपंतदमूर्तंसंगवर्जितम् ॥ नजलंनचभूमिश्चद्रवगंधविवर्जितात् ॥ ३६८ ॥ नचज्ञानेंद्रियाण्यस्यनचकर्मेंद्रियाण्यपि ॥ नमनोनापितेजोवद्बुद्धिःसर्वप्रकाशिका॥ ३६९॥ नचाहंकारचित्तेस्तोव्यंतःकरणरूपके॥ नप्राणोनमुखाख्यंचशरीरंसूक्ष्मसंज्ञितं॥ ३७०॥ मात्रानैवचतस्यास्तियाविद्येतिप्रकीर्तिता ॥ मंतारमेकंसायस्मान्मातिमात्राततःस्मृता ॥ ३७१ ॥

स्याक्षरस्यस्वरूपमितिशेषः अंतःकरणरूपतांनिषेधति नमनइति श्रुतौतेजःपदेनप्रकाशकतयातत्सदृशीबुद्धिर्विवक्ष्यतेइतिभावः॥ ३६९॥ मनोबुद्धिभ्यामहंकारश्चित्तंचोपलक्षितमित्याह नचाहमिति तथाक्रियाशक्तिरूपःप्राणोपिनास्यस्वरूपमितिशेषः तथामोक्षावधिस्थायित्वेनलोकद्वयगामित्वात्स्थूलशरीरापेक्षयाप्रधानमतएवमुखशब्देनश्रुतौविवक्षितंसूक्ष्मशरीरमपिनास्येत्यर्थः ॥ ३७० ॥ अमात्रपदार्थमाह मात्रेति मीयतेऽद्वितीयोपिमंताआत्मापरिच्छिद्यतेजीवेश्वरादिभेदंनीयतेऽनयेतिव्युत्पत्त्यामात्रानामअविद्याकारणशरीरंतद्वर्जितमित्यर्थः ॥ ३७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंतरिति यदितदांतरमेवस्यात्तदाबाह्यंकःपश्येत्यदिचबाह्यमेवतदांतरंकःपश्येत्पश्यतिचैतदक्षरंलोकस्यांतरंबाह्यंचातःसर्वसाक्षित्वादंतर्बा ह्यभावविहीनं एतेनत्वंपदलक्ष्यार्थतादर्शितानतदश्नातीत्यादिनाचभोक्तृभोग्यभावराहित्यप्रतिपादनेनतत्पदलक्ष्यार्थतादर्शितेत्याह अ भोक्तित्युत्तरार्द्धेन ॥ ३७२ ॥ फलितमाह यथेति तथाचवस्तुतःसर्वपरिच्छेदहीनमितिभावः ॥ ३७३ ॥ एवमागमविधयावर्णितम प्यक्षरस्वरूपंयस्यचेतसिनावतरतितदनुग्रहायांतर्यामिविषयकाणिलिंगानिश्रुत्यादर्शितानि मायोपाधिकेंऽतर्यामिणिपरिचितेह्यन्तर्या मिलक्षणानामुपलक्षणत्वेनाक्षरमपिपरिचितंभवतीत्याशयेनतानिलिंगानिदर्शयति अक्षरस्यास्येति जगतोव्यवहारप्रवर्तकौसूर्यचंद्रौ

अंतर्बाह्यविहीनंतत्सर्वसाक्षिस्वरूपकं॥ अभोक्तृतदभोग्यंचपरमात्मस्वरूपभृत्॥३७२॥ यथानभसिमेघौ घोविप्रकाशेतमोयथा॥स्रजिसर्पोयथाध्यस्तःसर्वमेतत्तथाक्षरे ॥ ३७३॥ अक्षरस्यास्यगार्ग्येतौप्रवर्तेतेप्र शासने॥ सूर्याचंद्रमसौदीप्तौजगतोस्यनियामकौ ॥ ३७४॥ द्यावापृथिव्यौचतथासर्वभूतविधारिके॥ विधृ तेतिष्ठतोगार्गिबालकेनेववाससी ॥ ३७५॥ कालएषतथात्युग्रोनिमेषादिर्महान्प्रभुः॥ संवत्सरांतोभूतानां हिताहितकरोस्तिहि॥ ३७६॥ श्वेतेभ्यःपर्वतेभ्योयाजाताःसर्वदिशोगताः ॥ नद्योनानाविधागार्गिस्यंदंतेसु खदान्नृणां॥ ३७७॥

अस्याक्षरस्यप्रशासनेआज्ञायांवर्त्तेतेनियतप्रवृत्तिकत्वाद्भृत्यवदिति ॥ ३७४ ॥ एवंद्यावापृथिव्यावपिगुरुत्वादिसत्वेपिपतनादिविरहाल्के नचिद्विधृतेनियमेनधारितेवस्त्रादिवदित्याह द्यावेति ॥ ३७५ ॥ कालएषइति तथाएषप्रसिद्धःकालोनिमेषमुहूर्त्तादिसंवत्सरांतरूपोरा जनियुक्तोयदेशाधिपसमःसर्वेषांभावानामायुरादिकंपरिगणयन्वर्त्ततेयत्तदप्यक्षरस्यप्रशासितुःसत्त्वेलिंगमितिशेषः ॥ ३७६ ॥ श्वेतेभ्य इति अत्रश्वेतशब्दश्छत्रिणोयांतीत्यत्रच्छत्रिशब्दवत्श्वेताश्वेतसमुदायेवर्त्तते तथाचहिमालयादिपर्वतेभ्यःप्रभूतागंगादिनद्योयांयांदिशं प्रतिप्रवृत्तास्तांतांदिशमेवप्रतिअद्ययावत्प्रवर्तमानानियताःस्यंदंतेयत्तदपिप्रशासितुर्लिंगमिति ॥ ३७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददतइति ददतोदानंकुर्वतोजनान्मनुष्याःप्रामाणिकाअपियत्सम्यक्प्रशंसापूर्वकमाश्रयंतेतदपिप्रशासितुर्लिंगमन्यथाद्यूतादिव्यसनेषुव्यथाव्ययंकुर्वतउपेक्षमाणाःशिष्टाःशास्त्रोक्तदानकर्तॄनपिकथंननिंदेयुःकथंचाश्रयेयुः यदीश्वरंतत्फलप्रदातारंनपश्येयुरितिभावः एवंजुह्वतोहोमोपलक्षितंयागंकुर्वाणान्देवाःसमाश्रिताराजानंवृत्तिकांक्षिणइवाश्रिताः अन्यथापिजीवनेशक्ताइतिशेषः एवंस्वधाकारंकुर्वतःश्रुतिगतदर्वीपदोपलक्षितदर्वीहोमादिपित्र्यकर्मकारिणोजनान्पितरःश्रिताः तथाचदेवपितॄणांहव्यकव्यार्थित्वेनमनुष्याधीनतारूपहीनवृत्तिभाक्त्वंप्रशासितारंकल्पयतीतिभावः दर्वीहोमोनामएकयाऋचाक्रियमाणोहोमः यागस्तुयाज्यापुरोनुवाक्यासंज्ञऋग्द्वयेनहोमइत्यन्य

ददतोजुह्वतस्तद्वत्स्वधाकारंचकुर्वतः॥ मनुष्याअमरास्तद्वत्पितरश्चसमाश्रिताः॥ ३७८ ॥ एवमेतज्जगत्सर्वमक्षरस्यप्रशासने॥ गार्गितिष्ठतियत्रायमाकाशःस्थितईरितः ॥ ३७९ ॥ वर्षपूगान्बहूनेनमज्ञात्वायदिकुर्वते॥ यागहोमतपोमुख्यंकर्मतत्क्षीयतेक्षणात्॥ ३८०॥ अनेनैवशरीरेणनज्ञात्वायोमृतिंव्रजेत्॥ सशोच्यःसर्वभूतानांकौलेयःक्रिमियुग्यथा॥ ३८१॥ विज्ञायाक्षरमेतद्योव्रजेदस्माच्छरीरतः॥ कृतकृत्यश्चलोकेस्मिन्ब्राह्मणोब्रह्मवित्तमः॥ ३८२॥

त्रविस्तरः ॥ ३७८ ॥ फलितमाह एवमिति एवंश्लोकपंचकोक्तप्रकारेण ॥ ३७९ ॥ किंच येनप्रभुणामदज्ञानेसर्वंकर्मअंतवदस्त्विति नियमःकृतस्तस्यप्रभोःसत्वेनासंभावनायुक्तेत्याह वर्षेति एनमक्षरंप्रशासितारमजानताबहुकालंकृताअपियागादयःक्षयिष्णुफलाभवंतीत्यर्थः ॥ ३८०॥ एतदज्ञानमेवचकृपणत्वस्यशोच्यताप्रयोजकस्यलक्षणमित्याह अनेनेति अनेनपुरुषरूपेणशरीरेणएतदक्षरंनज्ञात्वायोमृतःसकौलेयःश्वाकृमियुतस्तद्वत्शोच्यः॥ ३८१ ॥ एतद्विज्ञानाच्चामृतोभवतीत्याह विज्ञायेति सएवचकहोलंप्रतिवर्णितविधोब्राह्मणइतिचतुर्थपादार्थः ॥ ३८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वक्षरस्यविज्ञानसाधनजातमपिमुनिनाकुतोनोक्तमित्याशंकांद्विधासमाधत्ते विज्ञानोपायइतिद्वाभ्यां एतस्याक्षरस्यविज्ञानोपायभूतं कामादिवर्जनरूपंबाल्यंश्रवणरूपंपांडित्यंतथामननध्यानोभयरूपंमौनंचएतत्रितयंकहोलंप्रत्युक्तमेवगार्ग्यापिचश्रुतमित्थंमत्वाइत्याशयेनअत्रगार्गींप्रतिबोधनकालेपुनःपुनर्नोक्तवानितियोजना यद्यपिभाष्यकारैःपांडित्यबाल्यमौनानिश्रवणमनननिदिध्यासनरूपत्वेनव्याख्यातानिश्रवणानंतरमेवरागादिपरित्यागात्मकंबाल्यंसंभवतीत्याशयात् ग्रंथकृतातुउत्कटविविदिषायामपिबाल्यंसंभवतीत्याशयेनार्थक्रमेणबाल्यस्यपूर्वंनिर्देशोमननस्यचमौनेनिवेशःकृतः अतएवकहोलब्राह्मणव्याख्यानेमौनस्वरूपंग्रंथकृतैवमुक्तंस्वयंचावगमस्तस्यतर्कतोध्यानतोथवेतिबोध्यम ॥ ३८३ ॥ शंकायांद्वितीयंसमाधानंवदन्वृद्धकुमारीवरवाक्यन्यायेनेहापिसाधनजातमुक्तप्रायमेवेत्याह साक्षात्कारेति ब्राह्मणोहिब्रह्मविदुक्तस्तस्यविशेषणंभावप्रत्ययेनाभिधेयंसाक्षात्काररूपब्रह्मविद्यात्मकंफलमेवब्राह्मण्यं फलस्यच

विज्ञानोपायएतस्यबाल्यंकामादिवर्जनं ॥ पांडित्यंश्रवणंध्यानंमौनंमननमीरितं ॥ कहोलंप्रतिमत्वेत्थंपुनरत्रनचोक्तवान् ॥ ३८३ ॥ साक्षात्कारसमाख्येनब्राह्मण्येनफलेनतत् ॥ अविनाभावसंबंधाद्गार्गीतामुक्तवान्मुनिः ॥ ब्राह्मणोक्त्याकहोलाययदादावुक्तवान्स्वयम् ॥ ३८४ ॥ यउक्तोगौतमायादौद्वितीयप्रश्ननिर्णये ॥ अंतर्यामीतदैवैतदक्षरंनापरंततः ॥ एतदर्थमपृष्टत्वादुक्तवान्मुनिसत्तमः ॥ ३८५ ॥

साधनजातेनाविनाभावोव्याप्यव्यापकभावरूपःसंबंधोवर्ततएवातोयथाकाचिद्वृद्धाकुमारीवरंब्रूहीतींद्रेणोक्तासुतामेकांस्यपात्र्याक्षीरंभुंजीरन्नितिवचनभंग्यासर्वमिष्टजातंवृतवतीतथाब्राह्मण्यस्यफलस्योक्त्यामुनिस्तत्साधनजातमपिगार्गींप्रत्युक्तवान् यत्कहोलायादौपूर्वमुक्तवानित्यर्थः एतेनदशमकंडिकांतंयावद्व्याख्यातम् ॥ ३८४ ॥ अथैकादश्याःकंडिकायाअर्थंत्रिभिःसंगृह्णन्तत्रजायमानांशंकांनन्वंतर्यामिब्राह्मणांतगतवाक्यसमानाकारंवाक्यमपृष्टेनापिमुनिनाकथमुक्तमित्याकारांवारयति यउक्तइति शुद्धआत्माअक्षरमित्युच्यतेसएवमायोपाधिःसृष्टिस्थितिसंहृतिनियमनप्रवेशान्कुर्वन्नंतर्यामीत्युच्यते एतदर्थसूचनायपुनरुक्तिरित्यर्थः सूत्रप्रश्नापेक्षयाअंतर्यामिप्रश्नस्यद्वितीयत्वम् ॥ ३८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वस्येति स्वयंचक्षुराद्यविषयोपिसर्वसाक्षीतिविज्ञात्रान्तभागस्यार्थः नान्यदतोस्तिद्रष्टृइत्यादिग्रंथेनचद्रष्टृश्रोत्रादिरूपतयाप्रसिद्धस्यजीवस्वरूपस्यततोभेदोनिराकृतइतिभावः कुड्याद्घटोयथापरोभिन्नस्तथाजीवोऽस्मान्नभिन्नइतिदृष्टांतार्थः ॥ ३८६ ॥ एतस्मिन्निति अयंसाक्षिप्रत्यक्षसिद्धआत्मावरणरूपआकाशःअस्यस्थूलसूक्ष्मात्मकस्यविक्षेपस्ययःकारणंसउक्तेऽक्षरेप्रतिष्ठितइतिसंबंधः ॥ ३८७ ॥ द्वादश्याःकंडिकायाअर्थमुपबृंहयति श्रुत्वेतित्रयस्त्रिंशच्छ्लोकैः याज्ञवल्क्यरूपाद्घनाघनान्मेघादुत्थितंवाक्यरूपममृतंकर्णयोर्दावाग्नेःसंतापस्यहारकमतएवाद्भुतंश्रुत्वाश्रोत्रपुटेनगृहीत्वागार्गीप्रसन्नाविप्रानिदमाहेतिद्वयोरन्वयः ॥ ३८८ ॥ ३८९ ॥ गार्गीवाक्यमभिनयति ब्राह्म

सर्वस्यास्यहितत्साक्षीसर्वैर्दृश्यैर्नगम्यते ॥ जीवोपिनपरस्तस्माद्स्तिकुड्याद्घटोयथा ॥ ३८६ ॥ एतस्मिन्नक्षरे गार्गिसदाकाशःप्रतिष्ठितः ॥ आत्मावरणरूपोयंविक्षेपस्यास्यकारणम् ॥ ३८७ ॥ श्रुत्वेदमद्भुतंगार्गीयाज्ञवल्क्याद्घनाघनात् ॥ वाक्यामृतंतदाकर्णदावाग्निपरिहारकृत् ॥ ३८८ ॥ आनंदपूर्णनयनासमुत्थिततनूरुहा ॥ प्रसन्नमानसाविप्रानिदमाहकृपान्विता ॥ ३८९ ॥ ब्राह्मणाःशृणुतेदंमेपक्षपातविवर्जितम् ॥ वचनंयत्सभामध्येवक्ष्याम्यात्ममनोगतं ॥ ३९० ॥ पुरुषाबहवोदृष्टाःप्रासादाधवलाइव ॥ धुरंधरसमाःकेचित्केचिच्छुकनिभाननाः ॥ ३९१ ॥ केचित्पद्मपलाशाक्षाअंधैर्हिसदृशास्तथा ॥ नेत्राभिरामाअपरेचित्रेषुलिखितायथा ॥ ३९२ ॥

णाइत्यादिना हेब्राह्मणाइदंमेवचनंशृणुत कीदृशं पक्षपातहीनंआत्ममनोगतंचआत्मीयमनसिआलोचनरूपेणस्थितं इदंकिं यत्सभामध्येवक्ष्यामीति ॥ ३९० ॥ याज्ञवल्क्यएवपुरुषइतिवक्तुंतत्त्वज्ञानहीनत्वेनेतरान्निंदति पुरुषाइति यद्यपिबहवोबहुविधाःपुरुषादृष्टास्तथापियाज्ञवल्क्यसमोनदृष्टइतिवक्ष्यमाणेनसंबंधः तथाहि केचिद्धवलप्रासादवद्दूरतोरमणीयाअपितमोतिशयाज्जडाएवदृष्टाः तथाकेचिद्धुरंधरैर्भारवाहकैर्वृषभादिभिःसमाः ब्राह्मशास्त्रार्थस्यस्वयमनुपयोगात् केचित्तुशुकसारिकादिवद्वाचापरचित्तहारित्वेपिस्वभाषितस्यार्थमजानानादृष्टाइति ॥ ३९१ ॥ केचिदिति केचित्पद्मदलाक्षाअपिअंधादृष्टावस्तुतत्वादर्शनात् केचिद्रमणीयदर्शनाअपिचित्रलिखितवत्कार्याक्षमाएवेति ॥ ३९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टाःकेचिदिति केचित्तुलोकदृष्ट्यामहाभागाःसदसिसदुपदेशकत्वात्सहसाआपातमाह्लादकारिणोपिरहस्यसदुपदेशकत्वादुदर्कैपरिणामे दुःखवीजभूतादृष्टाः अतएवकुपथ्यभोजनसमाइत्यर्थः॥३९३॥ व्याघ्रेणेति केचिद्व्याघ्रवत्पराभिभवपराः केचिच्चमदिरामत्तकपिवदतिचपलाअज्ञानरूपमदिरापानमत्तत्वाद्दृष्टाइति ॥३९४॥ कामेति केचित्कामस्यशत्रोर्वशंगतादृष्टाः केचित्क्रोधस्यकेचिन्मोहस्येति येपिशास्त्रोक्तवृत्तिशालित्वेनसुरादेवाइतिद्वयाहवैप्राजापत्याइतिश्रुत्यनुसारित्वेनप्रसिद्धावेदवेदांगपारगास्तेपित्रैवर्णिकाःसत्वादिगुणत्रयप्रयुक्तरागशालिनएवदृष्टाः नतुगुणातीतत्वंकुत्रचिद्दृष्टमितिभावः अतएवभगवतोक्तं नतदस्तिपृथिव्यांवादिविदेवेषुवापुनः सत्वंप्रकृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैरिति ॥ ३९५ ॥ उक्तार्थेत्रिगुणाज्ञाननिद्रायाअनुत्थानंहेतुतयाह स्वप्नेइति यतएषांसुराणांस्वप्नजागरणयोर्विशेषोनदृष्टः जागरणस्यहिस्वप्नान्निद्रामध्यगतादयमेवविशेषोयन्निद्राविरोधित्वं तच्चैषांत्रैगुण्याभिमानिनांनास्ति एषांबोधेनाज्ञानोच्छेदस्या

दृष्टाःकेचिन्महाभागाःसहसाह्लादकारिणः॥ उदर्केदुःखवीजानिकुपथ्याशनसन्निभाः॥ ३९३॥ व्याघ्रेणसदृशाःकेचित्केचिन्मर्कटसन्निभाः॥ अज्ञानमदिरापानविमूढधिषणास्तथा॥३९४॥ कामक्रोधादिशत्रूणांकेचित्तत्रवशंगताः ॥ त्रैवर्णिकाःसुरास्तद्वद्वेदवेदांगपारगाः ॥ ३९५ ॥ स्वप्नेजागरणेचैषांवैषम्यंनावलोकितम्॥ आदावंतेसदाजंतुरज्ञानेनसमावृतः॥ मध्येत्रैवर्णिकानांस्याद्देवानामपिबोधनम् ॥ ३९६॥ विदुषांपदवाक्यादिसप्रमाणतयाक्वचित्॥ क्वचिद्बुद्धिर्विवृद्धैवनैवात्मविषयेक्वचित्॥ ३९७॥

करणादितिभावः उक्तमाशयंस्फुटयति आदाविति यतोयंजंतुरादौपूर्वजन्मनोवाजागरणाद्वाअज्ञाननिद्रयावृतःप्रसिद्धः अंतेचतयोरुत्तरत्रचप्रसिद्धः तथासदाऽऽवृतोज्ञेयइतिशेषः यतस्त्रैवर्णिकानांदेवानामुक्तलक्षणानांयद्बोधनंतत्पदार्थविषयकोबोधःसोप्यज्ञाननिद्रायामध्यमएवस्यान्नत्वंते लौकिकप्रमाणैर्हिमूलाज्ञानस्याभिभवमात्रंक्रियतेनतूच्छेदइतिसिद्धांतस्यप्रतिष्ठितत्वादितिभावः ॥ ३९६ ॥ उक्तार्थेहेतुतयातेषांसर्वाधिष्ठानप्रत्यगात्मपरत्वाभावमाह विदुषामिति यद्यपिलोकेपदवाक्यादिविदुषांपदंवाक्यंआदिपदग्राह्यंप्रमाणंधर्ममर्यादांचजानतांसप्रमाणतयापदादिस्वरूपेप्रमाणभूतैर्व्याकरणमीमांसान्यायधर्मशास्त्रैःसहिततयाक्वचित्क्वचिद्विषयेबुद्धिर्विवृद्धादृष्टातथाप्यात्मनोविषयेदेशेउपलब्धिस्थानभूतेवेदांतशास्त्रेइतियावत् तद्बुद्धेर्विवृद्धिस्तत्परतानदृष्टेतिशेषः ॥ ३९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनइति आत्मशास्त्रेयेषांज्ञानंदृष्टंतदपिप्रायोऽसमग्रंदृष्टंसमग्रत्वेपिप्रतिबंधकवशात्कार्यंमूलाज्ञानोच्छेदरूपंकर्तुमसमर्थंदृष्टमित्यर्थः
॥३९८॥ समग्रत्वेपिज्ञानस्यकार्यारंभेप्रतिबंधकस्वरूपंसदृष्टांतंनिरूपयति यथाभ्रष्टाइत्यादिना यथाग्निसंयोगरूपप्रतिबंधकवशाद्भ्रष्टश
क्तयोधानाबीजानिफलंजनयितुंनशक्ताएवंकामक्रोधादिप्रतिबंधकसमानाधिकरणंज्ञानमपिनफलदमित्यर्थः ॥ ३९९ ॥ कामाद्यपे
क्षयापिप्रतिबंधकतायामहंकारोऽग्रगण्यइत्याह अहंकारइति संसारएवकारागृहंजीवानांबंधनालयस्तस्यविधारणेपतनप्रतिबंधेहेतुभू
तोमूलस्तंभरूपोऽहंकारोमतस्ततस्तमाश्रित्यपरेकोणस्तंभादिभूताःकामक्रोधादयोमताइति॥४००॥उक्तंस्फुटयति मूलेति स्पष्टम्॥४०१॥
अहंकारस्यसर्वत्रानुगमंसमवेतविप्रोदाहरणेनाह नपश्यामीति अहंकारःसर्वजंतुषुप्रतिष्ठितः यतएतेविप्राःकामादीनांमध्येएकेनद्वाभ्यां

आत्मनोविषयेयेषांज्ञानमस्तिमहात्मनां ॥ असमग्रंसमग्रंचनतुकार्यक्षमंक्वचित्॥ ३९८॥ यथाभ्रष्टाःस्थि
ताधानानफलायकथंचन॥ एवंकामादिचित्तानांज्ञानंनफलदंक्वचित्॥ ३९९॥ अहंकारोत्रसंसारकारागृह
विधारणे॥ मूलस्तंभस्ततःकामक्रोधाद्याश्चपरेस्मृताः ॥ ४०० ॥ मूलस्तंभेस्थितेशालानंनश्यतियथातथा॥
अहंकारेस्थितेनाशंसंसारोपिनगच्छति ॥ ४०१ ॥ नपश्यामिक्वचिज्जंतुमहंकारविवर्जितं॥ कामाद्यन्यतमे
नैतेद्वाभ्यांवाबहुभिश्चवा॥ दृश्यंतेरहिताविप्रानाहंकारविवर्जिताः ॥ ४०२ ॥ कामाद्याःशत्रवःसर्वेभवंति
विदिताअमी॥ शास्त्रात्स्वानुभवाद्विप्राअहंकारविवर्जिताः ॥ ४०३ ॥ अहंकारात्सुखंनास्मिँल्लोकेप्राप्नोति
कर्हिचित् ॥ अमुंदोषंसमाश्रित्यभ्रांतोभवतितत्क्षणात्॥ ४०४॥ अवजानातिपितरंमातरंदेवतामपि॥ बां
धवानपिमित्राणिब्राह्मणांश्चबहुश्रुतान्॥ ४०५॥

बहुभिर्दोषैर्हीनाअप्यहंकारविवर्जितानदृश्यंतेइत्यर्थः ॥ ४०२ ॥ अहंकारस्यपरमदोषतांविशदयन्मित्राकारंशत्रुवदयमनिष्टंकुर्वन्न
पिनलक्ष्यतइत्याह कामाद्याइति हेविप्राःकामादीनांशत्रुत्वंशास्त्रतोवाअन्वयव्यतिरेकसहकृतस्वानुभवाद्वाविदितंपरीक्षितमपिप्रायोभव
ति अहंकारस्यशत्रुत्वंत्वधीतशास्त्रैरपिनज्ञायतेतेष्वप्यहंकारदर्शनादित्यर्थः ॥ ४०३ ॥ तत्प्रयुक्तमनर्थमभिनयति अहंकारादिति एत
ल्लोकेपिदुःखप्रदोहंकारः तथाहि अमुमहंकाररूपंदोषमघसमंसमाश्रित्यभ्रांतोविपरीतदर्शीभवतिविपरीतदर्शीसंश्चपितृप्रभृतीनवजाना ॥३२॥
तिअनादृतान्करोतीतिद्वयोरर्थः ॥ ४०४ ॥ ४०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालेति तथाकृष्णवर्णसर्पसमान्राज्ञोप्यवजानाति तथाप्रसुप्तसर्पसमान्महाबुद्धींस्त्रैवर्णिकानप्यवजानातीत्यनुषंगः ॥ ४०६ ॥ ततःकिं भवतीत्यतआह अवजानन्निति सदाएवंनिखिलानवजानन्सन्नेषजंतुःसद्यःशीघ्रमेवफलतिफलवान्भवति फलशब्दादर्शआद्यजंतात्किप् ततश्चात्रैवलोकेप्राणांतदुःखसमंदुःखमाप्नुयात् अवज्ञाजन्यात्प्रत्यवायाद्दुष्कृताच्चपरत्रपरलोकेपिरौरवंतत्समंजन्ममरणप्रबंधंचप्राप्नोतीत्यर्थः ॥ ४०७ ॥ एतादृशोहंकारःसर्वदोषाणांयोव्यापकःसोऽपियदायाज्ञवल्क्येनास्तितदातद्व्याप्यानांकामादीनांकासंभावनेत्याह यतइति येकामादयःस्वस्मिन्स्वकीयेअन्यस्मिन्परकीयेचसतिअहंकारवशाद्भासमानाएवभवंतीतिचतुर्थपादार्थः फलितमाह पुरुषइति ॥ ४०८ ॥ पूरणात्पुरुषइतिव्युत्पादितश्रौतप्रसिद्धोप्ययमेवपुरुषइत्याह अनेनेति अनेनब्रह्मविद्ययासर्वात्मभूतेनयाज्ञवल्क्येन त्वयाऽय

कालसर्पसमान्राज्ञःप्रसुप्तानिवपन्नगान् ॥ अनेकबुद्धिसंपन्नांस्तद्वत्त्रैवर्णिकानपि ॥ ४०६ ॥ अवजानन्सदैवंसनिखिलान्स्थिरजंगमान् ॥ सद्यएवफलत्येषदुःखंप्राणांतमाप्नुयात् ॥ प्रत्यवायात्परत्रापिनरकंरौरवंव्रजेत् ॥ ४०७ ॥ यतोहंकारदोषोपियाज्ञवल्क्येनदृश्यते ॥ कुतःकामादयोन्यस्मिन्स्वस्मिन्सत्येवसंतिये ॥ पुरुषोयाज्ञवल्क्योयंत्रिलोक्यांनास्तिचापरः ॥ ४०८ ॥ अनेनपूर्णमखिलंविश्वंसदसदात्मकं ॥ एकएवपुमान्लोकेविद्यतेनापरःक्वचित् ॥ दृष्टःशास्त्रान्मयाविप्राआंतरानुभवादपि ॥ ४०९ ॥ मांसजाभ्यांननेत्राभ्यांशक्योसौद्रष्टुमंजसा ॥ इतिवाक्यंश्रुतेर्यत्तन्मन्येसत्यमिवस्थितं ॥ ४१० ॥ आभ्यामेवचनेत्राभ्यांपश्यामिपुरतःस्थितं ॥ पुरुषंयाज्ञवल्क्याख्यमेनंवाजसनेयकम् ॥ ४११ ॥

मेवंभूतःकथंज्ञातइत्याकांक्षायामाह दृष्टइति मयाशास्त्रानुभवाभ्यामस्यस्वरूपंविज्ञातमित्यर्थः ॥ ४०९ ॥ इदानीमिदमाश्चर्यंपश्यतेत्याह मांसजाभ्यामितिद्वाभ्यां नचक्षुषागृह्यतेनापिवाचाइत्यादिश्रुतेःसमानार्थंयदितिवाक्यं इतिकिं असौपुरुषोमांसनेत्राभ्यांनदृश्यतेइति तदिदानींसत्यमिवअसत्यतांभ्रांतिगोचरतामपिस्पृशत्स्थितं यतोहंमांसजनेत्राभ्यामेनंयाज्ञवल्क्यंपुरुषंपश्यामीतिद्वयोःसंबंधः वस्तुतस्तुश्रुतिवाक्यंसत्यमेव मांसनेत्रैर्भवद्भिरेतत्तत्त्वादर्शनात् प्रत्यभिज्ञायामतीतांशग्रहणेसंस्कारस्येवएतत्तत्त्वदर्शनेमदीयशास्त्रांतरानुभवयोरेव व्यापारात् शास्त्रांतरानुभवमांसनेत्राणांत्रयाणामेकलोलीभावविवक्षयानेत्रदृश्यताभिधानेप्यविरोधादितिभावः ॥ ४१० ॥ ४११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्संबंधिनःसर्वेकृतार्थाइत्याह धन्यइति ॥ ४१२॥ तस्मादेतत्साम्यमन्यत्रनास्तीत्याह नानेनेति स्पष्टम् ॥ ४१३॥ तस्मात्क्षीरोदधिसमे
चंदनसमेचास्मिन्विवादरूपंमथनंमाकुरुतेत्याह माकुद्धमिति ॥ ४१४ ॥ अतिमथनेकृतेयथाक्षीराब्धेर्विषंचंदनाच्चवन्हिर्जायतेतद्वद्भवतां
विनाशकःशापोमास्माज्जायतामित्याह कालकूटमिति ॥ ४१५ ॥ तर्हिकिंकुर्मइत्याकांक्षायामाह अहंकारमिति स्पष्टम् ॥ ४१६ ॥ ए
तस्यनमस्कारेणार्चनेसर्वाभीष्टसिद्धिस्तस्मादात्मज्ञंह्यर्चयेद्भूतिकामइत्याथर्वणश्रुतेरितिवक्तुंप्रस्तुतविचारारंभजनितदुष्कृतस्यप्रायश्चित्त
मप्येतन्नमस्क्रियैवेत्याह उपक्रांतइतिपादोनत्रिभिःश्लोकैः उपक्रांतःप्रारब्धः विज्ञानवादिनाविज्ञानेनवस्तुतत्वापरोक्षेणसाधनभूतेनवा

धन्योस्यजनकस्तद्वज्जननीचवसुंधरा ॥ राजाहंचतथाविप्राःसभाचानेनमंडिता ॥ ४१२ ॥ नानेनसदृशःक
श्चिदासीदस्तिभविष्यति ॥ पुमान्जगतिविप्रेंद्राजंतुरन्यःकथंभवेत् ॥ ४१३ ॥ माकुद्धंमथनंविप्राःशीतलेचंद
नोपमे ॥ क्षीरोदधौयाज्ञवल्क्येत्यस्मिन्वाजसनेयके ॥ ४१४ ॥ कालकूटंविषंमाभूद्वन्हिर्वाविश्वदाहकः ॥ क्षी
रोदधिसमादस्मान्मुनीशाद्धरिचंदनात् ॥ ४१५ ॥ अहंकारंततोविप्रालोकद्वयविनाशनं ॥ परित्यज्यसभाम
ध्येनमस्कुर्वंत्वमुंगुरुम् ॥ ४१६ ॥ उपक्रांतोविवादोयंवृथास्माभिरबोधतः ॥ याज्ञवल्क्येनविज्ञानवादिनां
तेसुदुःखदः ॥ ४१७ ॥ उल्लङ्घनार्थमस्माभिःपदास्पृष्टोमुनीश्वरः ॥ ज्ञानवारांनिधिस्तस्यमुक्तिःपापस्यभोद्वि
जाः ॥ ४१८ ॥ एतस्मैयाज्ञवल्क्यायसततंयानमस्क्रिया ॥ विद्यतेनपराकाचिदिहामुत्रसुखप्रदा ॥ ४१९ ॥
ब्रह्मोघंब्राह्मणंनैनंकदाचित्कोपिजेष्यति ॥ किमुयुष्मासुविप्रेंद्रादेवैरप्येषदुर्जयः ॥ ४२० ॥ इत्युक्त्वावनताभू
त्वागार्गीवाचक्नवीतदा ॥ याज्ञवल्क्यायमुनयेप्रश्नाद्धुपरराम ह ॥ ४२१ ॥

दकर्त्रायाज्ञवल्क्येनसहअस्माभिःपरोक्षज्ञैः लोकेपिपरोक्षापरोक्षदर्शिनोर्विवादोनुचितत्वेनप्रसिद्धइतिभावः अंतेपरिणामे ॥ ४१७ ॥ उ
ल्लंघनार्थमिति अयंमुनिर्ज्ञानसिंधुरस्माभिःप्रतिवादिभिरुल्लंघनार्थंपदास्पृष्टःपादस्पर्शमिववादित्वंनीतस्तत्प्रयुक्तपापस्यमुक्तिःप्रायश्चित्त
भूताएतत्प्रीत्यर्थंनमस्क्रियैवेतिद्वयोःसंबंधः कीदृशीनमस्क्रिया आथर्वणश्रुतेर्लोकद्वयहितावहेति ॥४१८॥४१९॥ एतज्जयाऽऽशांतुदूरतः ॥३३॥
परिहरध्वमित्याह ब्रह्मोघमिति व्याख्यातप्रायम् ॥४२०॥ अष्टमब्राह्मणार्थमुपसंहरति इत्युक्त्वेति याज्ञवल्क्यायतंप्रीणयितुम् ॥४२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथनवमब्राह्मणस्योक्तात्मनोविभूतिव्यापनपूर्वकंस्वरूपनिर्धारणपरस्यार्थमध्यायांतंयावद्ग्रंथेननिरूपयन्वक्ष्यमाणोपयोगायविदग्धस्यदौरात्म्यंतावत्प्रपंचयति गार्गीवाक्यपयइत्याद्यष्टचत्वारिंशच्छ्लोकैः ततोगार्ग्यावाक्यरूपंपयःक्षीरंसर्वैर्द्विजैःश्रोत्रपात्रैःपीतंतेनविमुक्ताहंकाररूपपित्तविकाराःसंतोयाज्ञवल्क्यायशारीरादिकांप्रणतिंयथारुचिचक्रुः तेषुविदग्धाख्यएकःशाकलगोत्रःउक्तंनचकार यतःकालेनसंनिहितमृत्युनाविपर्यस्ततरमतिरितिद्वयोरर्थः ॥४२२ ॥४२३ ॥ विविधाभिरिति नक्षत्रंसूचकंभाव्यर्थबोधकंयेषांतेसज्ज्योतिर्विदःकालांतरेभाविनींदशामालोच्यविविधंयाज्ञवल्क्यासूयाभिर्दग्धोभविष्यतीतियोगार्थंमनसिनिधायविदग्धइतितस्यनामचक्रुः कीदृशंनामरूढ्यासमुदायशक्त्यापांडित्यस्यनैपुण्यस्यप्रकाशकत्वेनमातापित्रोःसुखप्रदमितिद्वयोरर्थः ॥ ४२४ ॥ ४२५ ॥ असंभवतिरूढ्यर्थेयोगा

गार्गीवाक्यपयःपीतंसर्वैस्तैर्ब्राह्मणोत्तमैः ॥ प्रणेमुःशिरसाकेचिन्मनसान्येपरेगिरा ॥ ४२२ ॥ याज्ञवल्क्यायमुनयेब्रह्मोद्यायमहात्मने ॥ विहायैकंविदग्धाख्यंशाकल्यंकालमोहितं ॥ ४२३ ॥ विविधाभिरसूयाभिर्याज्ञवल्क्यस्यकालतः ॥ दग्धोभविष्यतीत्येवंज्ञात्वानक्षत्रसूचकाः ॥ ४२४ ॥ विदग्धइतितस्यैतन्नामचक्रुर्महाधियः ॥ रूढ्यापांडित्यकथनंपित्रोःसुखकरंतदा ॥ ४२५ ॥ पयोयथाभुजंगानांविषवृद्धिंप्रयच्छति ॥ कृतवद्वचनंगार्ग्याविदग्धस्यतथैवहि ॥ ४२६ ॥ आदित्यात्प्राप्तविद्योयंयाज्ञवल्क्योयदाश्रुतः ॥ असूययातदारभ्यदग्धोविविधयाद्विजः ॥ ४२७ ॥ आदित्याद्याज्ञवल्क्योयंशुक्लंयजुरवाप्तवान् ॥ एवंप्रसंगतोवाक्यंविदग्धश्चेच्छृणोत्ययं ॥ ४२८ ॥ तदातंभाषतेविप्रोवचनंकर्णकर्कशम् ॥ रक्तमाथर्वणंसोमात्कांडमेषसमाप्तवान् ॥ इत्येवमादिकठिनंभाषतेहर्निशंजनान् ॥ ४२९ ॥

र्थप्रसरोध्रुवइतिन्यायेनापितत्रयोगार्थोग्राह्यः हितकरस्यापिगार्गीवचनस्यशाकल्येप्रतिकूलतादर्शनेननैपुण्याभावनिश्चयादित्याशयेनाह पयइति गार्ग्यावचनंविदग्धस्यतथैवकोपविषस्यवृद्धिकृतवदित्युत्तरार्द्धान्वयः ॥ ४२६ ॥ योगार्थस्यसंभवोस्तीत्याह आदित्यादिति द्विजःशाकल्यः॥४२७॥ असूयामभिनयति आदित्याद्याज्ञेतिद्वाभ्यां शुक्लंयजुरादित्याद्याज्ञवल्क्यःप्राप्तइतिवचोयदायंविदग्धःशृणोतितदातंयाज्ञवल्क्यमुद्दिश्यवक्तॄन्जनान्प्रतिइत्येवमादिकठिनंवचउपहसन्भाषते इतिकिं एषयाज्ञवल्क्यःसोमाच्चंद्रमसोरक्तवर्णमथर्ववेदकांडंप्राप्तवानिति आदिपदेनहरितमृक्कांडंभौमादित्यादियहइतिद्वयोरर्थः ॥ ४२८ ॥ ४२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवज्ञयेति असूयामसहद्भिर्लोकैर्विवादायप्रेरितोप्यवज्ञयामत्समोनास्तीत्यभिधानप्रयोजिकयायाज्ञवल्क्येन विवादायापिनायातीति ॥४३०॥स्पर्द्धयातुसदादस्तत इत्याह अर्जुनायेति नमुचिर्दानवः॥४३१॥नन्वीर्ष्याकुलेन विदग्धेनजनकसभायांप्रथममेवकुतोनपृष्टमिति शंकांवारयति याज्ञवल्क्येनहीतिपंचभिः यदायाज्ञवल्क्येनगावोह्रतास्तदातत्रसमागतोपिविदग्धइत्थंविचार्यस्मयमानोमंदंहसनूव्यव स्थितःइत्थंकथं अहोऽस्ययाज्ञवल्क्यस्यगवाहरणरूपंसाहसमविमृश्यकृतिः किंतुयदनेनब्राह्मणानांपरोक्षेआदित्यशिष्यतादिविडंबनरूपं पापंकृतंतस्यफलमेतत्साहसप्रवृत्तिरूपेणागतमितिद्वयोरर्थः ॥ ४३२ ॥ ४३३ ॥ लोकेइति यदस्याद्ययावल्लोकेजीवनमासीत्तदधुनागतं

अवज्ञयानचायातिविवादायापिकुत्रचित् ॥ याज्ञवल्क्येनमुनिनासूर्यशिष्येणधीमता ॥ ४३० ॥ अर्जुनाय यथाकर्णःशक्रायनमुचिर्यथा ॥ विदग्धोयाज्ञवल्क्यायतथासंस्पर्द्धतेसदा ॥ ४३१ ॥ याज्ञवल्क्येनहियदाह्र तागावःसमागताः ॥ विदग्धःस्मयमानःसंस्तदातत्रव्यवस्थितः ॥ ४३२ ॥ इत्थंविचार्यमतिमानहोसाहस मस्यकिं॥ब्राह्मणानांपरोक्षंयदेषएवंविडंबनम् ॥ कुरुतेकर्मणस्तस्यफलमेतत्समागतम् ॥ ४३३ ॥ लोकेय ज्जीवनंपूर्वमस्यासीत्तद्गतंखलु ॥ अस्माभिरप्यवज्ञातोजीवताद्भंडवद्द्विजः ॥ ४३४ ॥ तदप्ययंनजानातिरूपं पापविमोहितः॥एकस्यापिपुरःशक्तःस्थातुंनायंकथंचन॥बालस्यापिचविप्रस्यकथमेषांमहात्मनां ॥४३५॥ इत्यादिबहुधाविप्रःशाकल्योमनसास्वयं ॥ विचार्यासीत्पुरातूष्णींगर्वपर्वतमाश्रितः ॥ ४३६ ॥

समाप्तमितिज्ञायतइतिशेषः यतोस्माभिरपिशब्दादन्यैश्चद्विजैरितिबुद्ध्योपेक्षितोऽजीवत् इतिकिं अयंद्विजोविडंबनपरोभंडवज्जीवतादिति ॥ ४३४ ॥ ब्राह्मणानांपुरतस्तुविडंबनंननिर्वहतियथाभास्वतःपुरतोनीहारइत्याशयेनाह तदपीति तत्प्रसिद्धंब्राह्मणानांरूपंनीहारविरोध्या दित्यरूपसममेषयाज्ञवल्क्योनजानातियतःपापमोहितः अन्यथायेषांमध्येएकस्यबालस्यापितेजइन्द्रेणाप्यसह्यंतेषांपुरतःकथमेवंकुर्या दित्यर्थः॥ ४३५ ॥ इत्यादीति स्पष्टम् ॥ ४३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मकल्पानिति यदातुब्रह्मणासमामुनयोजितादृष्टास्तथागार्ग्याःप्रणतिर्याज्ञवल्क्येदृष्टातदापादाहतसर्पवत्कोपाकुलोभृकुटीकुटिलललाटोनिःश्वसंश्चविदग्धोदैवंमनसाधिग्दैवमित्येवंनिंदितवान्मृतपुत्रकवदितिद्वयोःसंबंधः भृकुटीतिशब्दोयद्यपिपाणिनीयेनसिद्ध्यतितथापि चंडीपाठेभगवद्व्यासप्रयुक्तत्वात्साधुः अतएवोक्तंमल्लिनाथेन यान्युज्जहारमाहेशाद्व्यासोव्याकरणार्णवात् तानिकिंपदरत्नानिमांतिपाणिनिगोष्पदेइति ॥ ४३७ ॥ ४३८ ॥ किंच इत्येवंचिंतितवानित्याह अधीतस्येति अध्ययनादिबलान्यभिभूयदैवबलमेवोत्कृष्टत्वाद्बलपदंभजतेइत्यर्थः ॥ ४३८ ॥ नूनमिति निमेषादिरूपःकालःसर्वहरःसर्वेषामन्यथाभावकारकोदुरत्ययोदुःखेनात्येतुमुल्लंघयितुंशक्य

ब्रह्मकल्पान्मुनीन्दृष्ट्वाजितान्गार्ग्यांश्चसंनतिं॥ कोपाकुलितनेत्रःसन्पादाहतइवोरगः ॥ ४३७ ॥ भृकुटीकुटिलंकृत्वाललाटंनिःश्वसन्मुहुः॥ मनसागर्हयामासदैवंमृतसुतोयथा ॥ ४३८ ॥ अधीतस्यबलंनैवनकुलस्यबलंतथा॥ मंत्रादेर्नबलंज्ञेयमहोदैवबलंबलं ॥ ४३९॥ नूनंसत्यंवचोजातंलोकानामैतिहासिकं॥ निमेषादिःसर्वहरःकालएषदुरत्ययः॥४४०॥ ब्रह्मणासदृशाविप्रादुर्धियाकेनचिज्जिताः ॥ पाखंडिनायथाविप्राबालकागुरुवर्जिताः ॥ ४४१ ॥ भवतीहसदानूनमवश्यंभवितव्यता ॥ उपायानांसहस्राणियस्यनास्तिप्रतिक्रिया ॥ ४४२ ॥ कृपणोयाज्ञवल्क्योयमेषवाजसनेयकः॥ क्वचकेमेहसर्वज्ञाब्रह्मकल्पामुनीश्वराः॥ ४४३॥ ममैवयशसैवाथकालएषसमागतः॥ पूर्वान्निर्जितवानेषजेष्याम्येनमहंद्विजम्॥ ४४४॥

श्चेत्येतदितिहासेप्रसिद्धंवचोद्यसत्यंजातमिति ॥ ४४० ॥ दैवबलस्योत्कृष्टत्वेकालस्यदुरत्ययत्वेचहेतुमाह ब्रह्मणेति यतइमेविप्राब्रह्मणासमाअपिकेनचिदप्रसिद्धेनदुर्धियायाज्ञवल्क्येनजिताः यथापाखंडिनागुरुहीनाविप्रबालाजीयेरन्निति ॥ ४४१ ॥ भवतीति भवितव्यतेतिभवितृप्रधानोनिर्देशः तथाचयद्भवितव्यंतदवश्यंभवतीतिसंबंधः यस्यभवितव्यस्यउपायसहस्रमपिप्रतिक्रियाप्रतिरोधसाधनंनास्तीत्यर्थः ॥४४२॥ याज्ञवल्क्यजयस्यभवितव्यताऽभावेकास्यजययोग्यतेत्याह कृपणइति हइतिखेदे कृपणोयाज्ञवल्क्यःक्वइमेसर्वज्ञामुनयश्चकेति ॥ ४४३ ॥ ममैवेति अथवाममैवयशोवर्द्धयितुमेषकालोयद्येनंसर्वजेतारंजयेयमिति ॥ ४४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादीति स्पष्टम् ॥ ४४५ ॥ गार्ग्येति भाविनमर्थंविजानंत्यागार्ग्यायद्धितंकीर्तितंतदनयावक्ष्यमाणयाधियासहितंसंयुक्तंयथाभवति तथातिरस्कृत्यप्रष्टुंप्रवृत्तइत्यन्वयः ॥ ४४६॥ गार्गीविषयांविदग्धस्यदुर्भावनामभिनयति इयमित्यादिना मुष्करेषुप्रशस्तांडवत्सुकामुकेष्वितियावत् सस्पृहा ऊषशुषिमुष्कमधोरइतिरप्रत्ययः ॥ ४४७ ॥ एतेमुनयस्त्वेतत्स्पृहणीयानभवंतीत्याह सदाचाराइतिद्वाभ्यां स्पष्टौ ॥ ४४८ ॥ ४४९ ॥ याज्ञवल्क्यस्तुतथेत्याह विटेति विटःषिङ्गः विटस्तुमूखकेखदिरेलवणेषिङ्गेइतिहेमचंद्रः विप्लावकोऽन्यथाक

इत्यादिमनसाभूयश्चिंतयित्वाद्विजोत्तमः ॥ विदग्धःप्रष्टुमारेभेयाज्ञवल्क्यंमुनीश्वरं ॥ ४४५ ॥ गार्ग्याभाव्यर्थ विज्ञानवत्यायत्कीर्तितंहितम् ॥ तिरस्कृत्यप्रवृत्तस्तदनयासहितंधिया ॥ ४४६ ॥ इयंकुमारीयुवतिर्ब्राह्मणानां गृहाद्बहिः ॥ निर्गतास्वैरिणीनित्यंमुष्करेषुधृतस्पृहा ॥ ४४७ ॥ सदाचाराइमेसर्वेसभास्थायेद्विजोत्तमाः ॥ इमां नग्नांनचेक्षंतेतस्यांकुर्युःस्पृहांकुतः ॥ ४४८ ॥ स्नानशौचरतानित्यंजटाश्मश्रुविधारिणः ॥ तापसाधमनीव्याप्तदेहावृद्धसमाद्विजाः ॥ ४४९ ॥ विटवेषोयुवास्निग्धोमुष्करोदेहपोषकः ॥ वेदविप्लावकोभंडोयाज्ञवल्क्योतिकामुकः ॥ योनिंवक्त्रंस्तनौह्यस्यावीक्षतेपापचक्षुषा ॥ ४५० ॥ आगतस्यास्यपश्यामउभयत्रव्यवस्थितां ॥ दृशंराजनिवामोरौवाचक्नव्यांचसंसदं ॥ ४५१ ॥ गुरुपादार्चनपराःशिक्षिताब्राह्मणाःपरे ॥ वर्ततेशतशःसर्वे नासाग्रन्यस्तलोचनाः ॥ ४५२ ॥ हेमयोषित्कृतेतेनसभायामागतोधमः ॥ याज्ञवल्क्योनविद्यायाःप्रकाशार्थंसमागतः ॥ ४५३ ॥ स्वैरिणीस्वैरिणंवेत्तितांस्वैरीस्वैरिणींपुनः ॥ अनुभूतंहिजानातिसर्वःसर्वंनचेतरत् ॥ ४५४ ॥ जलेयद्वद्विजानातिमत्स्योमीनंगतागतं ॥ बाल्यादारभ्यगार्गीयंस्वैरिणीकामचारिणी ॥ ४५५ ॥

र्ता ह्रियतः ॥ ४५० ॥ आगतस्येति अस्ययाज्ञवल्क्यस्यसंसदंसभामागतस्योभयत्रराजनिजनकेगार्ग्यांचसंसक्तांदृष्टिंपश्यामइत्यन्वयः ॥ ४५१ ॥ अन्येत्वीदृशानभवंतीत्याह गुर्विति ॥ ४५२ ॥ हेमेति सुवर्णार्थंयोषिदर्थंचसभामागतः ॥ ४५३ ॥ स्वसमानजातीयंसर्वः परिचिनोतीत्याह स्वैरिणीति स्वैरिणीव्यभिचारिणी तांस्वैरिणींस्वैरीपुरुषोवेत्तिपुनःशब्दोऽप्यर्थः तत्रहेतुरनुभूतमिति ॥ ४५४ ॥ अनुभूतस्यपरिचयेदृष्टांतमाह जलेइति गतागतंगमनागमनशालिनंमीनं गार्ग्यपिस्वैरिण्येवेत्याह बाल्यादिति ॥ ४५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वैरिणीत्वेकुलांगनाचरितव्यतिरेकंहेतूकरोति भर्त्तारमितिद्वाभ्यां कुलस्त्रियोभर्त्रादीन्विहायवेश्मनोदेहल्याअतिक्रमंनकुर्वंति इयंतुस्त्री सतीपुरुषान्वीक्षमाणालोकत्रयंचरतीतिद्वयोरन्वयः॥४५६॥४५७॥अनयास्वसमोयाज्ञवल्क्यएवदृष्टइतिवक्तुमाह अस्मिन्निति तेएतेस्वैरिणःपुरुषास्त्रेतायुगेकलिवन्नवर्त्तंतेयतोवर्णाश्रमधर्मरहितोनकोप्यस्तीति॥४५८॥गृहिणइति यतःपुत्रकामागृहिणोपिकृतावेवनिजान्दारान्व्रजंतीत्यन्वयः॥४५९॥ऊर्ध्वेति परेगृहस्थभिन्नाआश्रमिणऊर्ध्वरेतसएव अंत्यजाःश्वपचाः परेउत्कृष्टाः॥४६०॥ देवाद्याइति स्पष्टम्

भर्तारंतनयंवापिभ्रातरंवासहोदरं॥ मातुलंश्वशुरंवास्वंसाध्वींवाललनांपरां ॥ ४५६॥ हित्वानातिक्रमंकुर्युर्देहल्यावेश्मनःसदा॥ कुलस्त्रियःस्त्रीयंत्वेकायातिलोकत्रयंवधूः॥ स्वैरिणःपुरुषाँल्लोकेवीक्ष्यमाणाततस्ततः ॥ ॥ ४५७॥ अस्मिंस्त्रेतायुगेनैतेवर्ततेतेयथाकलौ॥ अनाश्रमीनावर्णीस्यात्कोपिकुत्रापिभूतले ॥ ४५८॥ गृहिणःपुत्रकामास्तेकृतौदारान्निजानपि॥ व्रजंतितेपुनैवाशागमनेपरयोषितः॥ ४५९॥ ऊर्ध्वरेतस्तयानैवव्रजंत्याश्रमिणोपरे॥ अंत्यजाअपिदारान्स्वान्हित्वानेच्छंतियोषितं॥ त्रेतायुगेन्यललनामिच्छेयुःकिंपरेजनाः ॥ ४६० ॥ देवाद्यामानवीमेतांनस्पृशंतिकथंचन ॥ पशवोनैवगच्छंतिविजातीयांवधूंक्वचित्॥ ४६१ ॥ इयंकामातुरानित्यंनग्नाभूत्वापुरःस्थिता॥ पुरुषाणामिमेसर्वइक्षंतेतांनकर्हिचित्॥ ४६२ ॥ पापमेकममुंहित्वाकलिजातसमंनरं ॥ मुष्करंयाज्ञवल्क्याख्यंयुवानंनटवस्थितं ॥ ४६३ ॥ निरीक्ष्यैनंदुरात्मानंस्वैरिणंस्वैरिणीस्वयं ॥ ब्रह्मविद्याजतस्त्वेनमेकांतेगंतुमुद्यता॥ स्वैरिणीमतमास्थायकुरुतेपादवंदनम्॥ ४६४॥ ब्राह्मणानांतथाराज्ञःपश्यतांसर्वदेहिनां॥ अहंव्यभिचरिष्यामिप्रच्छाद्येतिव्यवस्थिता॥ ४६५॥ स्तुतिमस्यकरोत्येषाभूयोभूयोद्विजन्मनां॥ पुरतस्तेपिसंभ्रांताःस्वैरिण्यावाक्यमोहिताः॥ ४६६॥

॥४६१॥इयमिति पुरुषाणांपुरःस्थिता तामिमेसभ्याःसर्वेयाज्ञवल्क्यंकलियुगजातसमंविनानेक्षंतइतिद्वयोःसंबंधः॥४६२॥४६३॥निरीक्ष्यैनमिति एनंस्वैरिणंनिरीक्ष्यइयमेकांतेगंतुमुद्यतास्वैरिणीनांमतंकौशलमास्थायास्यपादवंदनंकुरुते ब्रह्मविद्याजतःअयंब्रह्मविदितिप्रख्यापनव्याजेनेत्यर्थः ॥४६४॥ ब्राह्मणानामिति अहंब्राह्मणादीनांपश्यतामपिप्रच्छाद्यस्वकौशलेनैंद्रजालिकवदेषांदृष्टिप्रतिबध्यव्यभिचरिष्यामीतिनिश्चयेनव्यवस्थितैषागार्गीअस्ययाज्ञवल्क्यस्यस्तुतिंद्विजन्मनांपुरतःकरोतितेपिसंभ्रांताःसंपन्नाइतिद्वयोःसंबंधः॥४६५॥४६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मात्मनामिति पुरोगंताअग्रगण्योराजापिमोहितः यतोगार्गीवाक्यादस्मैनमस्कुरुतेइति ॥ ४६७॥ इत्यादीति इत्यादिकंकल्पयन्निति शेषः यतःकालपाशेनमोहितः द्विजोत्तमोपिहितामपिगार्गीमवज्ञायदीप्तंवन्हिंशलभवद्याज्ञवल्क्यमुल्लंघयितुमुद्यतोभवदितिद्वयोरन्वयः ॥ ४६८ ॥ ४६९ ॥ एवंविदग्धस्ययाज्ञवल्क्यद्वेषंवक्ष्यमाणोपयोगायप्रपंच्याथतयोःप्रश्नोत्तररूपाणांसप्तदशकण्डिकानामर्थंसंक्षिप्याह याज्ञवल्क्येतीतिद्वाभ्यां ततःसविदग्धआग्रहमन्यैरजितमपिजेष्याम्येवैनमित्याकारंहठमुपाश्रितःसन्कतिदेवाइत्याद्याकारैर्बहुभिःप्रश्नैर्देवानामंतर्यामिनियम्यसूत्रात्मविभूतीनांसंख्यांपप्रच्छ एषयाज्ञवल्क्योपितावद्भिःप्रश्नसमसंख्यैरुत्तरैरवांतरभेदशालिप्रत्युत्तरंसमाधानमभाषतेत्यर्थः ॥४७०॥ विस्तरादिति तच्चप्रत्युत्तरमितिअनेनप्रकारेणसंक्षेपविशिष्टविस्तरमादाय ल्यब्लोपेपंचमी अभाषत इतिकिं विस्तरमादायवैश्वदेवाख्यस्यशस्त्रस्यऋग्वेदप्रसिद्धस्यगानवर्जितस्तुतिरूपस्यसंबंधिनीयानिवित्देवतासंख्यावाचकमंत्रपदसमुदायरूपातस्याघटकानियानिपदानित्रयश्चत्री चेत्यादीनितदुक्तसंख्ययाषडधिकत्रिशताधिकत्रिसहस्ररूपयाआनंत्योपलक्षणभूतयाप्रत्यभाषतसंक्षेपात्तुवस्वाद्यात्मकत्रयस्त्रिंशदाद्यात्मनाप्रवृत्तादंतर्भावात्तमादायाध्यर्द्धपदोक्तस्यवाय्ववायोरंतर्भावस्थानंप्राणोयस्यसर्वेदेवाविभूतयः सएवैकोदेवइत्यभाषत तथाष्टौप्रश्नान्पृथिव्येवयस्यायतनमित्यादिनाकृतान्परान्पूर्वोक्तभिन्नानिमान्बुद्धिस्थान्शाकल्येनदुराग्रहेण कृतानभाषतेत्यनुषंगःसमादधावित्यर्थः अत्रायंसंक्षेपाभिप्रायः नवकण्डिकानामर्थोनिगदेनैवस्पष्टः पृथिव्येवेत्याद्यष्टानामर्थस्त्वष्टावायतनानीत्यादिवाक्यव्याख्यानेनव्याख्यातोभविष्यतीति ॥ ४७१ ॥

धर्मात्मनांपुरोगंताराजाप्येषविमोहितः॥ स्वैरिणेस्वैरिणीवाक्याद्यन्नमस्कुरुतेस्वयं॥४६७॥ इत्यादिकालपाशेनमोहितःसद्विजोत्तमः॥ अवज्ञायहितांगार्गींसर्वदाब्रह्मचारिणीं॥४६८॥ ज्ञानोदधिंयाज्ञवल्क्यमुल्लंघयितुमास्थितः॥ महावन्हिंयथादीप्तंशलभोनाशआगते॥४६९॥ याज्ञवल्क्येतिसंबोध्यसंख्यांदेवगतांहि सः॥ पप्रच्छबहुभिःप्रश्नैराग्रहंसमुपाश्रितः॥ तावद्भिरुत्तरैरेषप्रत्युत्तरमभाषत॥ ४७०॥ विस्तराद्वैश्वदेवस्य निविदःपदसंख्यया॥ संक्षेपात्प्राणएवैकइतिसंक्षेपविस्तरात्॥ अष्टौप्रश्नान्परांश्चेमान्शाकल्येनाग्रहात्कृतान्॥४७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टादश्याःकंडिकायाअर्थमुपबृंहयति अनंतरमुवाचेत्यादिंत्रिशच्छ्लोकैः तदनंतरंशाकल्येतिगोत्रप्रत्ययांततयाकुलस्यगोत्रस्याभिधायकेननाम्नाशाकल्यंसंबोध्यइदंवक्ष्यमाणंवचउवाच कीदृशंशाकल्यं कृष्णसर्पमुखप्राप्तमंडूकवत्कालवशं अतएवमूढधियमिति ॥ ४७२ ॥ कुलनाम्नासंबोधनाशयंस्फुटयति नैवमिति पूर्वजाःपितृप्रभृतयस्तथापरेऽन्येपिब्राह्मणाऋषिवंश्यास्तथावर्णिनोब्रह्मचारिणोविद्यावंश्यास्तथान्येपिमनुजामनोर्वंशजाएवंत्वद्वद्द्वेषंनचक्रुस्त्वंतुमयिद्वेषंकिमर्थंकरोषि हेविप्रममविप्रस्यद्वेषेणसूचितंतेमरणंमाभूदितीच्छामीतिशेषइतिद्वयोरर्थः॥ ४७३॥ ४७४॥त्वन्मरणंनकेवलंतवानिष्टंकिंतुत्वद्बांधवानामपीत्याह पित्रिति यथामदीयानांपित्रादीनांमयिप्रेमेतिशेषः तथा

अनंतरमुवाचेदंशाकल्यंमूढचेतनं ॥ कालसर्पमुखप्राप्तमंडूकसदृशंतदा ॥ शाकल्येतिचसंबोध्यकुलनाम्ना द्विजोत्तमं ॥ ४७२ ॥ नैवंतेपूर्वजाश्चक्रुर्द्वेषंकुत्राप्यकारणं ॥ नब्राह्मणाःपरेनैववर्णिनोमनुजानच ॥ ४७३ ॥ किमर्थंव्यर्थमत्यर्थंद्वेषंमयिकरोषिभोः ॥ माभूत्तेमरणंविप्रद्वेषिणोममसर्वदा ॥ ४७४ ॥ पितृमातृसुतादीनां मदीयानांयथामयि ॥ त्वदीयानांत्वयितथातेषांमाभूदिहाप्रियं॥ ४७५॥ सूर्याल्लब्धामयाविद्यातेजसादुःसहा यतः॥ मावजानीहितांविप्रधक्ष्यतित्वांक्षणादियं ॥ ४७६ ॥ आदित्यात्प्राप्तविद्योहंयदागांपृथिवीतलं॥ तदा मांसविताप्राहहृष्टचित्तःसुरोत्तमः ॥ ४७७ ॥ अवज्ञास्यतियोविद्यांमयादत्तांस्थितांत्वयि ॥ भस्मसात्तमहं सद्यःकरिष्यामिनसंशयः ॥ ४७८ ॥ एवमुक्तेमयादित्यःप्रार्थितोबहुधाप्रभुः ॥ वरैर्नानाविधैःपश्चादवधिंसो करोत्त्विमं ॥ ४७९ ॥

त्वदीयानांत्वयिवर्ततेइहत्वन्मरणेतेषामप्रियंमाभूदितिसंबंधः ॥ ४७५ ॥ ब्रह्मद्वेषस्यसर्वत्रानिष्टसाधनत्वेपियाज्ञवल्क्यःस्वद्वेषस्यविशेषतोऽनर्थजनकत्वेहेतुंदर्शयति सूर्यादित्यष्टभिः इयंसूर्यलब्धाविद्यावज्ञातासतीत्वांक्षणाद्धक्ष्यतिदग्धंकरिष्यतीतिचतुर्थपादार्थः ॥ ४७६ ॥ आदित्यादिति यदासूर्याद्विद्यांप्राप्याहंपृथिवीतलमागामागमंतदागमनकालेसवितासूर्योमामित्याह इतिकिं योमयादत्तांविद्यामवज्ञास्यतिनमानयिष्यतितमहंभस्मसात्करिष्यामीतिद्वयोःसंबंधः ॥ ४७७ ॥ ४७८ ॥ एवमुक्तेइति एवमुक्तेसतिनानाप्रकारैर्वरैःकस्यचिदपिभस्मीभावोमाभवत्वित्यर्थपरवाक्यरूपैरादित्योमयाप्रार्थितोऽभूत्ततःसआदित्यइममवधिंकृतवानिति ॥ ४७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमंकमित्याकांक्षायामवधिमभिनयति समक्षमितिद्वाभ्यां हेविप्रयःसमक्षंसंमुखेविंशतिवारंत्वामवज्ञास्यतितस्यविनाशकंशापंत्वज्जि
व्हायांस्थित्वाऽहंदास्यामियेनसभस्मीभविष्यतीतिद्वयोःसंबंधः दृश्यतेचात्रनवमब्राह्मणेविंशतिवारंविदग्धप्रयुक्तंयाज्ञवल्क्येतिसंबोधन
रूपमवज्ञानमितिभावः ॥ ४८० ॥ ४८१ ॥ इतःपरमिति इतःपरंवरत्वेनप्रार्थनेपिएतादृशोक्तानंतरमहंभयेनपुनःप्रार्थनातउपारमंनि
वृत्तोऽभवम् तस्मात्त्वंमोहवशेनहइतिखेदेमत्स्वंमाद्विष्ठाःमयिद्वेषंमाकुर्वित्यर्थः ॥ ४८२ ॥ मद्गुरुमिति अहंचभवंतंकालमोहितमेवजा
नेयतस्त्वंमद्गुरुंसवितारंप्रसिद्धतममपिपापप्रतिबंधान्नजानासीति॥४८३॥त्वत्कृतइति आदित्यस्यसमीरणवचनमनुस्मृत्य ल्यब्लोपेपंचमी

समक्षंतवयोविप्रयदाविंशतिसंख्यया॥ अवज्ञास्यतितस्याहंदुर्धियःपापकारिणः ॥४८०॥ स्थित्वात्वदीय
जिव्हायांशापंदास्यामिदारुणं॥ येनभस्मीभवेत्सद्योवज्ञानान्मद्विरोधतः॥ ४८१ ॥ इतःपरमहंभीतःप्रार्थना
तउपारमम्॥ मात्वंमोहवशंप्राप्तोमत्स्वंद्विष्ठाहनित्यशः ॥ ४८२ ॥ मद्गुरुंसवितारंचपापान्नैवावगच्छसि ॥
जानेहंचभवंतंतंद्वेषिणंकालमोहितम्॥ ४८३ ॥ त्वत्कृतेजायतेचिंताममादित्यसमीरणात्॥ नाहंद्वेष्मिकदा
चित्तुभवतेपापकारिणे॥ ४८४ ॥ मयियद्वत्त्वयितथायतोन्यत्रापिसंस्थितः॥ अहमेववसाम्यत्रस्थावरेषुच
रेषुच॥ ४८५॥ अहंसर्वमिदंविश्वंसृष्टिस्थित्यंतसंस्थितं ॥ मत्तएवचसृष्ट्याद्याजगतोद्वयरूपिणः॥ ४८६॥

त्वत्कृतेत्वदर्थंकास्यगतिर्भविष्यतीत्याकाराचिंताजायतेभवतीत्यर्थः द्वेषस्यमन्निष्ठतांतुमासंभावयेत्याह नाहमिति पापकारिणेपीतिशेषः
॥४८४॥ द्वेषाभावेदोषबीजदाहिकायाब्रह्मविद्यायाःसत्वंहेतुमभिप्रेत्यविद्यामभिनयति मयीतिसार्द्धत्रिभिः मयिएतच्छरीरेयद्वत्संस्थि
तोस्मितद्वत्त्वयित्वच्छरीरेअन्यत्रापिचयतःसंस्थितोस्मिततःसर्वत्रस्थावरादावहमेववसामि तथाचसर्वांतरोहमित्यर्थः॥ ४८५॥ अहमिति
सृष्टिस्थित्यंतेषुसंस्थितंसंबद्धमितियावत् इदंसर्वंविश्वंजगदहमेवयतोमत्तएवजगतःसृष्ट्याद्याःश्रुतिप्रसिद्धाः तथाचाद्वयोस्मीति॥ ४८६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखेति आदिपदेनअशनायापिपासादिकंग्राह्यं अतएवमत्संबंधितयाऽभिमतस्यशरीरस्यविनाशेस्थितौवाममातिशयोविशेषोनास्ति घटाद्युपाधिनाशस्थित्योर्नभसआकाशस्ययथासोतिशयोनास्तीति यतोमय्यद्वितीयेसर्वक्रियाकारकत्वाभावइत्याह नाहमिति हन्मीतिसर्वक्रियोपलक्षणमितिद्वयोरर्थः॥ ४८७॥ ४८८॥ यथामदीयंस्वरूपमुक्तविधंवेदांतेषुसिद्धंतथातवाप्यस्तिपरंतुत्वंकम्यादिसमताऽऽपादकेनाज्ञानेनप्रमत्तोसियेनमत्संद्वेक्षीत्याह अज्ञानेनेति ज्ञानमद्वितीयज्ञानात्मकमात्मस्वरूपमज्ञानेनाच्छादितंतवकमिनिभस्ययेनाज्ञानप्रभावेणात्मापन्हवलक्षणपापकारिभिर्मनुजैस्तुल्यंमामात्मयाथात्म्यविदंमन्यसेइति ॥ ४८९ ॥ अथयाज्ञवल्क्योविदग्धस्यभाविनींदुर्दशांत्रिकाल

सुखदुःखादिकंद्वंद्वंममनैवास्तिकर्हिचित् ॥ शरीरस्यविनाशेमेस्थितौनातिशयोमम ॥ ४८७॥ घटादीनांयथानाशेस्थितौवानभसोनसः ॥ नाहंहन्मिनमांहन्युःसर्वदासर्वजंतवः ॥ ४८८॥ अज्ञानेनावृतंज्ञानंतवयद्वल्कमेरिह ॥ तेनमांमनुजैस्तुल्यंमन्यसेपापकारिभिः ॥ ४८९॥ पापाग्निनाप्रदग्धंत्वांमाशोचंतुजनाइमे ॥ मारोदीद्भवतोजायासर्वाभरणवर्जिता ॥ निर्लज्जाबांधवान्दृष्ट्वादीनास्याविधवासती ॥ ४९०॥ मित्राणिबांधवामातेपुत्राद्याःशोकसागरे ॥ पतंतुवैरिणोमातेसंतोषावगमंत्विह ॥ ४९१ ॥ धर्मराजपुरंमात्वंविलोकयसुदुःखितः ॥ क्षुत्पिपासापरिश्रांतःप्रेतोभूत्वातिदुःखितः ॥ ४९२ ॥ काकवद्बलिभुङ्मात्वंभूयाब्राह्मणसत्तम ॥ तत्तगात्रोभ्रष्टंदीनःपिबमात्वंतिलोदकं ॥ ४९३॥ अयंचमृदुलोदेहोमाभूदग्नेःशुनोपिवा ॥ तवशिष्यान्विहायैतानेकाकीमाव्रजाधुना ॥ ४९४॥

ज्ञतयाऽनुसंधायानुग्रहाविष्टःसामास्त्वित्याह पापाग्निनेतिसप्तभिः पापेनब्रह्मविद्वेषलक्षणेनप्रदग्धंप्रसिद्धाग्नितोप्यधिकंतापितंत्वांलोकामाशोचंतु तथाभवतोजायाबांधवान्दृष्ट्वानिर्लज्जादीनमुखीचसतीमारोदीदिति ॥ ४९० ॥ मित्राणीति मित्राणिबांधवाश्चतेशोकसागरेमापतंतु तथावैरिणःसंतोषावगमंसंतोषप्राप्तिमाव्रजंत्विितिशेषः ॥ ४९१ ॥ धर्मेति त्वंप्रेतोभूत्वाधर्मराजपुरंमाविलोकयेति ॥ ४९२ ॥ काकेति बलिर्निवापरूपः ॥ ४९३ ॥ अयमिति अयंतवदेहोग्नेःशुनोवाभक्ष्योमाभूदिति तथाशिष्यान्विहायैकाकीमापरलोकंव्रजेति ॥ ४९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेकेति अनेकेषुकालेषुउद्दीपकसंनिधिरूपेषुसंजातःप्रादुर्भूतोब्रह्मणोब्रह्मविदयाब्रह्मभूतस्यममयोद्वेषरूपःपादपस्तवचित्तभूमौवर्तमा नःसतेकारस्करफलसमंफलंमाददातु कारस्करशब्दःपारस्करादित्वात्सुटिनिष्पन्नोयद्यपित्रिकांडशेषेवृक्षसामान्यवाचकउक्तस्तथापिप्रकृ तेकारोवधेनिश्चयेचेतिविश्वात्कारंवधंकरोतीतिव्युत्पत्त्याभल्लातकवाचकः तत्फलोत्कर्षस्याशुभंफलंवृक्षायुर्वेदउक्तं आम्रैःक्षेमंभल्लात कैर्भयमिति साक्षादपिभल्लातकफलानामनर्थकरत्वंलोकेप्रसिद्धमितिदृष्टांतता॥ ४९५॥मातवेति हेविप्रेंद्रतवास्थीनिचोररूपाअंत्यजाश्चां डालामास्पृशंतु तथाऽस्मिन्मद्रूपेऽग्नौत्वंशलभवन्मापत कीदृशेमद्रूपेऽग्नौ आदित्यजिव्हे आदित्योजिव्हायांसंनिहितोयस्यसतथातस्मिन्

अनेककालसंजातोब्रह्मविद्वेषपादपः॥ प्रयच्छतुफलंमातेकारस्करफलोपमम्॥ ४९५॥ मातवास्थीनिवि प्रेंद्रत्वंत्यजाःसंस्पृशंत्विह॥ माग्नावादित्यजिव्हेस्मिन्पतत्वंशलभोयथा॥ ४९६॥ भोजायथामहोखायांमहां तंजातवेदसं॥ अशक्ताःस्वकरैःस्प्रष्टुंज्वलंतंसुदुरासदम्॥ ४९७॥ दर्वीलोहमयींकृत्वाप्रौढामंगारधारिणीं॥ दीर्घदंडांस्पृशंत्येनंतयानैवनिजैःकरैः॥ ४९८॥ प्रस्तोभयंतियेकेचिद्ब्राह्मणास्त्वांसभासदः॥ कुर्वंतिबुद्धिसं युक्तास्त्वांतथांगारधारिणं॥ ४९९॥

॥ ४९६ ॥ एवमार्थिकमर्थंप्रपंच्यश्रौतमर्थंविशदयति भोजाइतिपंचभिः भोजशब्दोत्रभोजयंतिधानादिकमितिव्युत्पत्त्यापचाद्यजंतो भ्राष्ट्रोपजीविपरोमहोखाशब्दश्चभ्राष्ट्रपरोविवक्षितः तथाचयथाभोजाभ्राष्ट्रिकामहोखायांभ्राष्ट्रेस्थितंज्वलंतंवन्हिंस्प्रष्टुमशक्ताःसंतोदीर्घ काष्ठमयदंडशालिन्यादर्व्यैवस्पृशंतीतिद्वयोरर्थः॥ ४९७॥ ४९८॥ प्रस्तोभयंतीति तथायेत्वांप्रस्तोभयंतिवादायोत्साहयंतितेबुद्धिमंतः स्वरक्षणकुशलास्त्वामंगारधारिणंकुर्वंति अंगारधारकपात्रवत्पुरतःकुर्वंतीत्यर्थः तथाचब्राह्मणैरपिहंतव्यत्वेनमतोसिपरंतुदह्यमानमात्मानं ॥३८॥ नबुद्ध्यसेइतिभावः अंगारावक्षेपणमितिपदस्यअवक्षीयंतेबलात्कारेणधार्यंतेऽत्रेतिव्युत्पत्त्याऽधिकरणेल्युट्श्रुतौबोध्यः॥ ४९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टांतसाम्यंविशदयति अहमिति अहमग्निज्वालककाष्ठरूपः मद्गुरुरादित्योमज्जिव्हासन्निहितोग्निरूपः इयंसभावर्णितोखारूपा विप्राव र्णितभोजरूपाः त्वंतुकाष्ठमयदर्वीरूपआदित्याग्निविधारणायब्राह्मणैःकृतोसि तत्रेदमतिचित्रंयच्चेतनोऽप्यात्मानंदह्यमानंनजानासीतिद्व योरर्थः ॥५०० ॥ ५०१ ॥ एवमुक्तोपिविदग्धोविपरीतमेवमेनेइत्याह एवमित्यष्टभिः स्पष्टम् ॥ ५०२ ॥ तत्रदृष्टांतमाह मुमूर्षुरिति पात कीपातकोदयेनपातकोद्यतः पापःपापेनकर्मणेतिश्रुतेः सनिवारकायगुरवेयथाद्वेष्टि शेषंस्फुटम् ॥५०३ ॥ ५०४ ॥ विदग्धोययाबुद्ध्यापु नःपुनर्द्वेष्टिस्सतांबुद्धिमभिनयति जनयतीत्यादिना एषयाज्ञवल्क्योबालानांयथाभयंजनयेत्तथाममभयंजनयतिमांसर्वज्ञंनिर्भयंचनजा

अहंकाष्ठानिसूर्योयंगुरुर्मेज्वलितोऽनलः ॥ उखासभासमुद्दिष्टाभोजाएतेसभासदः ॥ ५०० ॥ त्वंचकाष्ठमयं पात्रमादित्याग्नेर्विधारणे ॥ कृतोसिब्राह्मणैर्नैवमात्मानमवगच्छसि ॥ ५०१ ॥ एवमुक्तोविदग्धोथयाज्ञव ल्क्येनधीमता ॥ कालपाशावृतोद्वेषंचक्रेसोप्यधिकंपुनः ॥ ५०२ ॥ मुमूर्षुर्हियथाद्वेष्टिसुहृदेभिषजेतथा ॥ गत श्रीकोयथाराजाऽमात्यायहितकारिणे ॥५०३॥ भाग्यहीनोयथाराज्ञेगुरवेपातकीयथा ॥ विदग्धोयाज्ञवल्क्या यतथाद्वेष्टिपुनःपुनः ॥ ५०४ ॥ जनयत्येषमेभीतिंशिशूनामिवमंदधीः ॥ सर्वज्ञंमांनजानातिसर्वतोभयव र्जितम् ॥ ५०५ ॥ ग्रामेषुनगरेष्वेषखेटखर्वटकेष्वपि ॥ काष्ठादिषुयथाबालगोपाललननादिषु ॥ मध्यगोभा षतेतद्वदत्राप्येषप्रभाषते ॥५०६॥ अस्यचेद्गुरुरादित्योद्वेषिणंमांहिधक्ष्यति ॥ इतःपूर्वंकुतोनायंदग्धवान्किम यंजडः ॥५०७॥ शब्दार्थौनविहायात्रदेवतानामविद्यते ॥ विद्यमानापिसाकर्महित्वाकिंचित्करोतिन ॥५०८॥

नातीति ॥ ५०५ ॥ ग्रामेष्विति यथाग्रामादिषुकाष्ठादिजडानांबालादिमूढानांचमध्यगोभाषेततथात्रसभायामप्येषनिःशंकंभाषते त त्रखेटाःकर्षकाणांग्रामाः खर्वटाःपर्वतग्रामाः ॥५०६॥ अस्यचेदिति अस्ययाज्ञवल्क्यस्यगुरुरादित्योयदिममदहनसमर्थोऽभविष्यत्तर्हिइ तःपूर्वमपिद्वेषिणंमांकुतोनाधक्ष्यदिति वस्तुतस्त्वयमादित्यःकिंकिंकर्तुंशक्तोयतोजडः ॥ ५०७ ॥ जडत्वमुपपादयति शब्दार्थाविति यतः शब्दमयीदेवतेतिपक्षेशब्दस्याकाशगुणस्यजडत्वंप्रसिद्धं अर्थस्यतेजोमयमंडलस्यापितथात्वंप्रसिद्धं शब्दार्थाभ्यांभिन्नातुदेवतानविद्यते सत्वेपिकर्मनिरपेक्षाकिंचित्कर्तुंनशक्ताममतुदुष्कर्महीनस्यकिंकरिष्यतीत्यर्थः ॥ ५०८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यादित्यशिष्यत्वंदुर्घटमनयोःसंबंधस्यदुर्घटत्वादित्याह क्वायमिति अयंयाज्ञवल्क्योविटसमोभूमिस्थःक्वनभःस्थआदित्यश्चकेति इत्यादिविपरीतंचिंतयित्वाअसौविदग्धोयाज्ञवल्क्यस्यावज्ञामकरोदिति॥५०९॥ एकोनविंशकंडिकाया अर्थमाह याज्ञवल्क्येतिसंबोध्येतिचतुर्भिः ततःपरंकोपमुपागतोविदग्धएनंयाज्ञवल्क्यंयाज्ञवल्क्येतिसंबोध्यइदंवचनमाह॥५१०॥इदंपदेनोक्तंवचनमभिनयति कुर्विंतिद्वाभ्यां भवान्यत्कुरुपांचालदेशवासिनोब्राह्मणान्जितवान् ब्रह्मस्वहरणोद्यतोब्राह्मणधनापहारीचतज्जन्यदुष्कृतेनभाविष्वनेकशरीरेषुनिर्जलारण्यदेशवृत्तिब्रह्मराक्षसत्वलाभयोग्यःसोयमेवंविधस्त्वंससाहसःसाहसेनअविमृश्यकृतब्राह्मणावज्ञारूपेणसहवर्तमानःस्विदिति वितर्केकिंब्र

क्वायंविटःक्वचैषस्यादद्यादित्योनभसिस्थितः॥ इत्यादिचिंतयित्वाऽसाववज्ञामकरोत्पुनः॥५०९॥ याज्ञवल्क्येतिसंबोध्यकोपंपरमुपागतः॥ इदंवचनमाहैनंयाज्ञवल्क्यंमुनीश्वरम्॥ ५१०॥ कुरुपांचालदेशस्थान्ब्राह्मणान्जितवान्भवान्॥ भाव्यनेकशरीरेषुभवितानब्रह्मराक्षसः॥ ५११॥ अरण्येनिर्जलेदेशेब्रह्मस्वहरणोद्यतः॥ सोयंससाहसःकिंस्विद्ब्रह्मजानासितद्वद॥ ५१२॥ याज्ञवल्क्योपिसर्वात्माब्रह्मवित्त्वंप्रदर्शयन्॥ दिशोवेदेतितंप्राहविदग्धंपापमोहितं॥५१३॥ पप्रच्छपुनरप्येषदेवतादिदिशांतथा॥ देवतानांप्रतिष्ठानमिंद्रियाणांतथैवच॥ विषयाणांससर्वेषांयाज्ञवल्क्योप्युवाचतत्॥ ५१४॥

ह्मजानासिकाब्रह्मविद्यासफलासाक्षात्कृतायद्बलेनैवंविप्रानवजानासीतिद्वयोरर्थः ॥५११॥५१२ ॥ याज्ञवल्क्योपीति एवमुक्तोयाज्ञवल्क्योपिजनकेनब्रह्मविदेवगोभिरभिप्रेतोऽतोममगवामुत्कालनेनदोषइतिसूचनायब्रह्मवित्त्वंप्रकटयन्सन्निति विदग्धंप्रतिप्राह इतिकिं अहंसदेवाःसप्रतिष्ठाश्चदिशोवेदसप्रपंचमात्मतत्त्वपर्यवसायिचदिग्विषयंज्ञानंममास्तीति ॥५१३॥ अथकण्डिकापञ्चकस्यार्थंसप्तत्रिंशच्छ्लोकैरुपबृंहयंस्तत्रश्रौतमर्थंसंकलय्यदर्शयति पप्रच्छेत्यष्टभिः एषविदग्धोदिशांपूर्वदक्षिणपश्चिमोत्तरोर्ध्वरूपाणांदेवतादिकंपप्रच्छ आदिपदग्राह्यमाह देवतानामिति प्रतिष्ठानंकारणं तथाचोत्तरोत्तरंदेवतादीनांकारणंपप्रच्छेत्यर्थः याज्ञवल्क्यस्तत्पृष्टंसर्वमुवाचेति ॥ ५१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथमुवाचेत्याकांक्षायामाह आदित्यइत्यादि पूर्वादिक्रमेणचतसृणांदिशामादित्यादयश्चत्वारोदेवाः ऊर्ध्वदिशश्चध्रुवापदोक्तायाःप्रकाश भूयिष्ठायाअग्निर्देवता एवंदिगभिमानिदेवरूपेणावस्थितोहमित्यर्थः ॥ ५१५ ॥ अथदेवानांकिंकारणमित्याकांक्षायांहिरण्यगर्भोपासन याहिरण्यगर्भभाविनोयान्याध्यात्मंचक्षुरादींद्रियाणितान्येवादित्यादिरूपेणपरिणामित्वात्तत्कारणानीत्याह नेत्रेइति आदित्यदेवोनेत्रेच क्षुरिन्द्रियेप्रतिष्ठितः यमस्तुश्रोत्रेप्रतिष्ठितः ननुश्रुतौपितृयाणप्राप्यचंद्रलोकस्ययमाधीनस्ययज्ञसाध्यत्वाभिप्रायेणयज्ञेयमःप्रतिष्ठितइत्यु क्तंकथमुच्यतेश्रोत्रेइतीतिचेत् शृणु श्रुतौयज्ञपदेनपरलोकजयसाधनक्षमायज्ञावस्थोच्यतेसाचयद्विनानोपपद्यतेतस्यापियज्ञपदार्थेनिवेशो वक्तव्यइत्यतोविद्वान्यजेदितिनियमेनाश्रुतपूर्वकाण्डस्ययागेऽप्रवृत्तेःश्रोत्रस्यापितत्प्रवेशस्तत्रचहेतुभूतंश्रोत्रस्यविशेषणद्वयं यज्ञवचसां ग्राहकत्वाद्वायज्ञसहकारित्वाद्वाश्रोत्रस्ययज्ञपदार्थेप्रवेशइतितदर्थः एवंवरुणोरसनेंद्रियेप्रतिष्ठितः कीदृशेरसनेन्द्रिये दिव्यभावेदिव्योदेव

आदित्योथयमस्तद्वद्वरुणःसोमएवच ॥ अग्निश्चेतिहिपंचानांदिशांदेवोभवाम्यहं ॥ ५१५ ॥ नेत्रेयज्ञवचोग्रा हिश्रोत्रेवासहकारिणि ॥ रसनेदिव्यभावेचक्षीणदोषेमनस्यपि ॥ वागिंद्रियेक्रमाद्देवाआदित्याद्याःप्रतिष्ठि ताः ॥ ५१६ ॥ प्रतिष्ठाचक्षुषोज्ञेयारूपेषुविविधेष्विह ॥ यज्ञशब्दस्यवेदस्यत्वर्थोत्रद्विविधःस्मृतः ॥ ५१७ ॥ वाक्कायमनसांपूर्वक्लेशःकर्मात्मकोहियः ॥ अत्रप्रतिष्ठितोज्ञेयोयज्ञोवेदउदीरितः ॥ ५१८ ॥

तात्मकउक्तविग्रयाभावःपरिणामोयस्यसतथातस्मिन् श्रुतौचजलीयेन्द्रियमेवाप्पदेनोक्तमितिभावः एवंसोमोदेवोमनसिप्रतिष्ठितः श्रुतौ चदीक्षापदेनयागांगव्रतविशेषनिर्वाहकंमनएवविवक्षितं एतत्सूचनायैवक्षीणदोषइतिमनोविशेषणमितिभावः वागिंद्रियेचाग्निःप्रतिष्ठितः पूर्ववदित्यर्थः ॥ ५१६ ॥ अथेंद्रियाणांविषयरूपंकारणंश्रुतौप्रतिष्ठापदेनोक्तमाह प्रतिष्ठेति चक्षुरिंद्रियस्यप्रतिष्ठाकार्यतयास्थितिःरूपेषु शुक्लादिषुज्ञेया विषयैःस्वप्रकाशनायेंद्रियस्यारंभात् तथायज्ञशब्दस्ययज्ञशब्दार्थप्रविष्टतयाविवक्षितस्यवेदस्यश्रोत्रगृह्यमाणपूर्वकाण्ड स्यद्विविधोर्थःप्रतिपाद्यतयाविषयःस्मृतःप्रसिद्धः ॥ ५१७ ॥ तद्वैविध्यमाह वागितिसार्धेन तत्रप्रथमोवागादिक्लेशात्मकोव्यापाररूपोयोवे दार्थःसश्रुतौदक्षिणापदेनदक्षिणयाऋत्विग्भ्यःक्रेतव्यार्थवृत्तिकेनोक्तस्तस्मिन्यज्ञोवेदोक्तःप्रतिष्ठितः तन्मयत्वाद्यज्ञस्येत्यर्थः ॥ ५१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आस्तिक्यमिति द्वितीयवेदार्थभूतमास्तिक्यंश्रद्धयादेयमित्यादिश्रुतिप्रसिद्धश्रद्धारूपंतत्रप्रथमवेदार्थभूतंकर्मप्रतिष्ठितं अतएवगीतासूक्तं
अश्रद्धयाहुतंदत्तमित्यादि तथाचचक्षूरूपेष्विवश्रोत्रंप्रथमश्रोतव्यवेदोक्तकर्मसुप्रतिष्ठितंकर्माणिचश्रद्धायामितिभावः यतोध्यात्मरेत
एवाधिदैवंरसरूपंरसगुणकजलरूपंसंपन्नमतोरसनेंद्रियरूपाआपस्तत्ररेतसिप्रतिष्ठिताःश्रुतावुक्ताइतिशेषः ॥ ५१९ ॥ मनसइति क्षीणदो
षस्यमनसःश्रुतौदीक्षापदोक्तस्ययथासत्येऽबाधितेर्थैविषयेऔत्सर्गिकीस्थितिरुक्तातथातत्रसत्येर्थैवाचोपिस्थितिरुक्तप्रायैव यन्मनसाध्या
यतितद्वाचावदतीतिश्रुतेः वाङ्मनसयोःसमानविषयत्वस्यसिद्धत्वात् एतेनपञ्चमकण्डिकायांवागिंद्रियस्यविषयेप्रतिष्ठानोक्तेतिन्यून
ताशंकानिरस्तेत्याह तेनेत्यादिना तेनवाग्विषयस्योक्तप्रायत्वेनवागिंद्रियस्यहृदयतोभिन्नंकारणंश्रुतौनोक्तंकिंतुहृदयमेवकारणमुक्तमि
त्यर्थः ॥ ५२० ॥ हृदयमिति हृदयंतुसर्वेषांस्थानानामुक्तानामिंद्रियाणांविषयाणांचतथास्थानिनांदेवानांचएकमेवस्थितिहेतुःकार

आस्तिक्यंहिद्वितीयंस्यात्तस्मिन्कर्मप्रतिष्ठितं ॥ रसरूपंयतोरेतस्तत्रापोरसनात्मिकाः ॥ ५१९ ॥ मनसःक्षीण
दोपस्ययथार्थैस्थितिरीरिता ॥ सत्येवाचोपितत्रैवतेनवागिंद्रियस्यन ॥ उक्तंहृदयतोभिन्नंप्रतिष्ठाकारणंतदा
॥ ५२० ॥ हृदयंस्थितिहेतुःस्यात्सर्वेषामेकमेवहि ॥ समुद्रइवनीराणांस्थानानांस्थानिनामपि ॥ ५२१ ॥ भि
त्तौयथाभवेच्चित्रंचित्रेवर्णाःसितादयः ॥ वर्णेषुद्रव्यजातंस्याद्दुग्धांजनमुखंसदा ॥ प्रतिष्ठितंभवेत्सर्वंभित्तावे
वचसंश्रितम् ॥ ५२२ ॥ एवंसाक्षाद्धृदंभोजेस्यात्परंपरयापिच ॥ दिगादिकमिदंविश्वमादित्यादिस्वरूपधृ
क् ॥ ५२३ ॥

णंस्यात् यथासर्वनीराणांसमुद्रइति अत्रहृदयपदेनहृदयेसन्निहितोमायाशबलब्रह्मरूपोंतर्यामीविवक्षितः
तस्यचमनोद्वारेणसकलजगत्कारणत्वंश्रुत्यंतरेप्युक्तं असतोधिमनोसृजतमनःप्रजापतिमसृजतप्रजापतिःप्रजाअसृजतततदिदंसर्वंमनस्येव
प्रतिष्ठितमिति असतोऽव्याकृतोपाधिकात् मनोहिरण्यगर्भः प्रजापतिर्विराडितिश्रुतिपदार्थः ॥ ५२१ ॥ एवंश्रौतार्थमभिधायआर्थिकम
र्थंसदृष्टांतंप्रपञ्चयति भित्तावित्यादिना यथालोकेभित्तौकुड्येचित्रंरेखामात्रंदेवतामूर्त्यादिरूपंप्रतिष्ठितंभवेत् तत्रचश्वेतादयोवर्णाःप्रतिष्ठि
ताभवेयुस्तेषुवर्णेषुचदेवतामुखादावर्पितंदुग्धादिकंप्रतिष्ठितंभवेत्व्यवह्रियेत वस्तुतस्तुतत्सर्वंचित्रादिकंभित्त्याश्रितमेवेति ॥ ५२२ ॥ एव
मिति एवंहृदंभोऽजावच्छिन्नेपरमात्मनिइदंविश्वंदिगादिकमादित्यादिदेवतारूपंचसाक्षात्किंचित्परंपरयाचप्रतिष्ठितंतत्रसद्धास्तिकमन्तःक
रणंसाक्षादन्यत्परम्परयेत्यर्थः ॥ ५२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तदृष्टांतेनसमानधर्मान्विशदयति भित्तेरित्यादिना मृदाचित्राधारकुड्यलेपेयथाचित्रमदर्शनंयातितथाविचारकालेविश्वरूपंचित्रमित्यर्थः ब्रह्मज्ञानमेवमृत्तयालेपात् ॥ ५२४ ॥ यथादृष्टांतेभित्तिःसमाचित्रंतुनतोन्नतंतथात्रउत्कर्षापकर्षवद्विश्वंसमेत्हृदयावच्छिन्नेआत्मनिकल्पितमित्याह समायामिति ॥५२५॥ दृष्टांतेयथानानाविधारागाश्चित्रपरिपोषकास्तथात्रविपर्ययरूपाबोधाबोद्धाइत्याह वर्णैरिति ॥ ५२६ ॥ अत्रचचित्रकारस्थानीयानेकवासनासंस्कृताबुद्धिर्बोद्धव्येत्याह चित्रकारइति ॥ ५२७॥ विश्वचित्रनिर्माणेबुद्धेःप्रकारान्तरेणापिहेतुतांदर्शयन्हृदयस्यबुद्धेश्चद्वयोरेवान्वयव्यतिरेकाभ्यांकारणतेत्याह काष्ठादीतिद्वाभ्यां बिम्बपदेनात्रचित्रकाराणामुपकरणविशेषश्छायाइतिभाषायांप्रसिद्धोग्राह्यः तथाचकाष्ठादिनिर्मितंचित्रांगस्यचित्रोपायस्यरागस्यधारकंचबिंबंसहसाबलेनसंघट्टितंयथास्वसं

भित्तेर्यथामृदालेपाच्चित्रंनाशंप्रयातिहि॥ ब्रह्मज्ञानमृदालेपाद्धार्दंचित्रंचनश्यति ॥ ५२४॥ समायामेवभित्तौस्याच्चित्रंविषमरूपधृक्॥ समेहृदितथैवैतद्विषमंविश्वचित्रकम्॥ ५२५॥ वर्णैर्नानाविधैर्यद्वद्भित्तौचित्रंविरच्यते॥ अज्ञानजैस्तथाबोधैर्हृदिचित्रंविरच्यते ॥ ५२६ ॥ चित्रकारोयथाचित्रंभित्तौलिखतिसर्वदा॥ हृदिबुद्धिस्तथाविश्वचित्रंलिखतिनित्यशः ॥ ५२७॥ काष्ठादिरचितंयद्वद्बिंबंचित्रांगधारकं ॥ सहसारचयेद्भित्तौचित्रंसंनिधिमात्रतः ॥ ५२८॥ चित्ररूपंतथाभित्तिर्बिंबसन्निधिमात्रतः ॥ रचयत्यनिशंनृणांहृदिचित्रंजगन्मयम्॥ ५२९॥ पुनःपुनर्मृदोलेपेयथानैवप्रतीयते॥ चित्रंस्वल्पंचभित्तौतद्विद्यमानंसदेवहि॥ ५३०॥ एवंपुनःपुनर्ब्रह्मविज्ञानेनविलेपनात् ॥ विश्वंचित्रंस्वहृदयेविद्यमानंनदृश्यते॥ ५३१॥

निकर्षमात्रेणभित्तौचित्रंरचयेदितिबिम्बस्यान्वयव्यतिरेकाभ्यांकारणताप्रसिद्धेतिशेषः बिम्बंगात्रांतिकोपायेइतिविश्वः ॥५२८ ॥ चित्ररूपमिति तथाभित्तिरपिबिम्बस्यसन्निधिमात्रेणचित्रस्यरूपमाकारमन्वयव्यतिरेकाभ्यांरचयतीत्यपिप्रसिद्धं भित्त्यभावेहिचित्रंकुत्रस्यात् एवंविधंजगन्मयंचित्रंहृदिमायाशवलचिद्रूपेभित्तिभूतेनानावासनान्वितबुद्धिबिम्बनिर्मितमित्यर्थः ॥५२९ ॥ अस्यविश्वचित्रस्यनिःशेषंनिवृत्तिर्मायाशबलस्यभित्तिस्थानीयस्यविशेषणनिवृत्त्यानिवृत्तौप्रारब्धान्तोपलक्षितायामेवभवति जीवन्मुक्तिदशायांतुविचारकालेऽदर्शनमात्रंभवतीतिदृष्टांतानुरोधेनाह पुनरितिद्वाभ्यां यथाचित्रोपरिमृत्तिकायाःपुनःपुनर्लेपेकृतेभित्तौस्वल्पंलेशमात्रेणावस्थितमपिचित्रंबहिर्नदृश्यतेतथाब्रह्मज्ञानरूपमृदोविलेपनात्प्रारब्धपर्यन्तंलेशमात्रेणहृदयेविद्यमानमपिविश्वचित्रंसमाध्यादिकालेनदृश्यतेइतिद्वयोरर्थः ॥ ५३० ॥ ५३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यादर्शनेतुमायाविचित्रकरसमायाबुद्धेर्विलयएवप्रयोजकइतिदर्शयितुंबुद्धेस्तन्निर्माणेप्राधान्यमाह यथेति मायाविनाहेतुभूतेनचि
त्रंनानारूपंयथादृश्यते तथाबुद्ध्याहेतुभूतयाप्रपञ्चइति ॥ ५३२ ॥ बुद्धेःप्राधान्यव्युत्पादनफलंदर्शयति मायाविनीति यथाकाशेजडचे
तनात्मकचित्रकर्त्तरिमायाविनिर्मितेसतिव्यग्रतांकार्यांतरासक्ततांगतेवासतितच्चित्रंनदृश्यतेएवंबुद्धौरोगादिनानष्टायांसुप्तायांवाआत्मनि
 स्थितायांसमाहितायांवाहृदयगतंविश्वरूपंचित्रंनदृश्यतेइतिद्वयोःसंबंधः ॥ ५३३ ॥ ५३४ ॥ नभइति यथामायाविनिर्मितंनभःस्थंचि
त्रंमायाविस्वरूपमेवततोमायाविस्वरूपाद्भिन्नंकालत्रयेपिनास्तितथाहृदयेस्थितंविश्वरूपंबुद्धिरेवततोबुद्धिस्वरूपाद्भिन्नंकालत्रयेपिनेति

यथामायाविनाकाशेचित्रंसैन्यंप्रदृश्यते ॥ एवंबुद्ध्यास्वहृदयेविश्वमेतत्प्रदृश्यते ॥ ५३२ ॥ मायाविनिर्मितेयद्व
त्सुप्तेवाव्यग्रतांगते ॥ नभःस्थितंनतद्दृश्यंचित्रमेतज्जडाजडम् ॥ ५३३ ॥ एवंबुद्धौविनष्टायांसुप्तायांवानिजा
त्मनि ॥ स्थितायांचित्रमेतद्धिहृदिस्थंनोपलभ्यते ॥ ५३४ ॥ नभःस्थितंयथाचित्रंमायाव्येवततोपरम् ॥ का
लत्रयेपिनैवैतदासीदस्तिभविष्यति ॥ ५३५ ॥ हृदिस्थितंतथाविश्वंचित्रंबुद्धिर्नचापरम् ॥ कालत्रयेपिनैवै
तदासीदस्तिभविष्यति ॥ ५३६ ॥ तमोयथानभस्येतद्दृश्यतेतमसैवहि ॥ हृद्यात्मनितथाबुद्धिर्बुद्ध्यैवैषाप्रती
यते ॥ ५३७ ॥ यथाविशुद्धआकाशेप्रकाशेननदृश्यते ॥ निरीक्ष्यमाणंचतमोनेत्रैर्दोषविवर्जितैः ॥ ५३८ ॥ हृ
द्यात्मनितथाशुद्धेबुद्धिरेषासकारणा ॥ आत्मविज्ञानतोदृश्यानभवेद्धिकदाचन ॥ ५३९ ॥

द्वयोःसंबंधः॥५३५॥५३६॥साचबुद्धिःस्वस्यापिविश्वचित्रांतर्गतस्यभानप्रयोजिका नचात्माश्रयः अविद्यायामेवचासित्वाऽविद्यास्तीति
कल्प्यते ब्रह्मदृष्ट्यात्वविद्येयंनासीदस्तिभविष्यतीतिवार्त्तिकोक्तविधयाऽविद्यायाइवाऽनिर्वचनीयत्वेनादोषत्वादित्याशयेनतत्सदृष्टांतमाह
तमइति यथाकाशस्थितोंऽधकारोंधकारेणैवदृश्यतेनतुतेजसा तेनविरोधात् तथाहृदयावच्छिन्नात्मनिवर्त्तमानाबुद्धिर्बुद्धिकालएवदृश्य
तेइति ॥ ५३७ ॥ उक्तमर्थंव्यतिरेकेणस्फुटयति यथेति यथासूर्यादिप्रकाशेनविशुद्धआकाशेतमोनदृश्यतेनिर्दोषदृग्भिः तथात्मविज्ञाने
नशुद्धेनिरावरणेआत्मनिसतिबुद्धिर्नदृश्याभवेदितिद्वयोरर्थः ॥ ५३८ ॥ ५३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वेवंसतिप्रमाणस्पर्शमसहंत्याबुद्धेरसत्वमागतंतथाचतयाकथंव्यवहाराःसाध्यंतइत्याशंकांदृष्टांतेनपरिहरति शशेति यथाशशशृंगमसदपिस्वशब्दाद्विकल्पात्मकंज्ञानंजनयतितथाबुद्धिःकार्यैःकारणेनचसहासद्रूपाविबोधंविविधंबोधंविपर्ययात्मकंकरोतीति ॥ ५४० ॥ ननुबुद्धेरसत्त्वेपितत्कारणमज्ञानंसद्भविष्यतियत्सर्वानर्थवीजमितिचेन्न यादृशोयक्षस्तादृशोबलिरितिन्यायेनतस्याप्यसत्वादित्याशयेनासतोप्यनर्थजनकत्वेदृष्टांतमाह सर्पेइति यथाकेचिद्भीरवोऽसत्यपिसर्पेसर्पशब्दमात्रेणमक्षिकाशनभ्रमइवशंकाविषात्प्राणान्मुंचंति ॥ ५४१ ॥ दार्ष्टांतिकमाह असत्येवेति स्पष्टम् ॥५४२॥वस्तुतोऽसतोप्यज्ञानस्यविविधप्रपंचनिर्माणसामर्थ्यंस्वमेपरीक्षितमित्याह एकएवेति॥५४३॥ एवंविद्वद्दृष्ट्याअसदप्यज्ञानंत्वादृशानांदुराग्रहिणांवज्राचलवद्दुर्भेदत्वेनस्थितंयद्वशाद्धृदयस्थोप्यात्मानभासतेइत्याह अंधइति यथांधःक

शशशृंगंयथाशब्दात्स्वविज्ञानकरंभवेत्॥ कार्यकारणसंयुक्ताबुद्धिरेवंविबोधकृत्॥ ५४० ॥ सर्पेऽसतियथाकेचित्प्राणान्मुंचंतिजंतवः॥ शंकाविषात्सर्पशब्दश्रवणेनभयातुराः॥ ५४१ ॥ असत्येवतथाज्ञानेबुद्धिदेहादिकारणे॥ सुखदुःखकरंघोरंसंसारंयांतिमानवाः॥ ५४२ ॥ एकएवयथासुप्तोबहुधाजायतेपुमान्॥ एकएवतथाविद्यावशादात्मापिजायते॥ ५४३॥ अंधोयथानिधिंस्पृष्ट्वाकरेणापिनविंदति॥ विदग्धत्वादृशाएनंनविदुर्हृदयेस्थितम्॥ ५४४॥ अज्ञानाद्दृश्यसंसारचित्रस्याश्रयईरितः॥ हृदयंकिंविदग्धान्यत्प्रष्टुमिच्छसितद्वद॥ ५४५॥ एवमुक्तेप्यसौमूढःप्रश्नान्नोपरतिंगतः॥ मंडूकसदृशःकालसर्पाह्वानकरींगिरम्॥ विससर्जततोयाज्ञवल्क्योभूदतिदुःखितः॥ ५४६॥

रसंस्पृष्टमपिनिधिंनविंदतितथात्वादृशाद्धृदयस्थमप्यात्मानमिति ॥ ५४४ ॥ उपसंहरति अज्ञानादिति अज्ञानाद्दृश्यंयत्संसाररूपंचित्रंतस्याश्रयभूतंतत्त्वंदिग्विज्ञानमुखेनत्वदयत्वेनोक्तंकिमन्यच्छ्रोतुमिच्छसीति ॥ ५४५॥ कस्मिन्नुहृदयंप्रतिष्ठितमितिप्रश्नमवतारयति एवमुक्तेपीतिचतुर्भिः एवंदिग्विज्ञानमुखेनात्मतत्त्वेयाज्ञवल्क्यमुनिनोक्तेपिसत्यसौविदग्धोमूढउक्तेप्यप्रसरन्मतिःप्रश्नादनुपरतःसन्यथामण्डूकःकृष्णसर्पस्याह्वानस्याकारणस्यहेतुभूतांगिरंवाचमुत्सृजतितथाकालरूपसर्पस्याह्वानकरींगिरंपुनःप्रश्नरूपामुत्ससर्जततस्तंतादृशंवीक्ष्यकरुणयायाज्ञवल्क्योऽतिदुःखितोभूदिति ॥ ५४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अहोइति अहोइतिखेदे अस्यदुर्धियोमृतिःसमीपेप्राप्तायतोस्मैशापंदातुंममजिह्वायांस्थातुंसवितासूर्योमंडलादवतरत्यतोममैषाजिह्वाएत
द्विनाशकंशापंदास्यतीतिसंचिंत्ययाज्ञवल्क्यःकृपाविष्टःसन्कथंस्विदस्यमरणंमाभूदितिचिंतयन्नेवव्यवस्थितइतित्रयाणांसंबंधः ॥५४७॥
॥ ५४८ ॥ ५४९ ॥ विदग्धोपीति मुमूर्षुर्मरिष्यतीत्याकारकशंकाविषयोमूढधीश्चविदग्धइतिपप्रच्छ इतिकिं तद्विश्वरूपंचित्रधारकत्वे
नवर्णितंहृदयंकुत्रप्रतिष्ठितंकिमाश्रयकमितियावत् ॥ ५५० ॥ पंचविंशतितम्याःकण्डिकायाअर्थमाह अहल्लिकेतिसप्तभिः एवंपृष्टोया
ज्ञवल्क्योविदग्धमहल्लिकेतिनामांतरेणसंबोध्यवक्ष्यमाणमुत्तरमभाषत अस्यनाम्नोव्युत्पत्तिर्वार्तिककृद्भिर्यद्यपिएवमुक्ता अहनिलीयते
रात्रौचप्रादुर्भवतीत्यहल्लिकःप्रेतभावित्वात्तत्संबोधनं तथाअहन्शब्दनकारस्यरेफादेशेरलयोःसावर्ण्याल्लकारपाठेसंज्ञायांकन्प्रत्ययेकेण

अहोअस्यमृतिःप्राप्तासमीपेदुर्धियोधुना ॥ मण्डलादुत्तरत्येषपुमाँल्लोहितलोचनः ॥ ५४७ ॥ सवितामम
जिह्वायांस्थातुंवेदत्रयात्मकः ॥ अतःपरवशाजिह्वाशापमेषाप्रदास्यति ॥ ममयेनभवेदेषभस्मीभूतःक्षणा
द्द्विजः ॥ ५४८ ॥ इतिसंचिंत्यमनसाकृपयापरयान्वितः ॥ प्रश्नेस्मिन्मरणंमाभूदित्येवैषव्यवस्थितः ॥ ५४९ ॥
विदग्धोपिमुमूर्षुःसन्पुनःपप्रच्छमूढधीः ॥ हृदयंकुत्रतद्विश्वचित्रधृक्समवस्थितम् ॥ ५५० ॥ अहल्लिकेति
संबोध्ययाज्ञवल्क्योप्यभाषत ॥ नामांतरेणयस्मात्त्वंलीयसेहनिसंशयात् ॥ ५५१ ॥ अथवाहृदयेनायंरहितो
ऽहल्लिकःस्मृतः ॥ इतःपरंहिकोनामपृच्छेद्धीमान्पुमानिह ॥ अत्रापियदयंप्रश्नंकुरुतेऽहृदयस्ततः ॥ ५५२ ॥

इतिईकारस्यह्रस्वइतितद्व्याख्यातृभिरुक्तं तथाप्येतैःसंभवाभिप्रायेणार्थांतराण्यपिप्रदर्श्यंते तत्रप्रथमोर्थश्चतुर्थपादेनोक्तः यस्मात्त्वमहनि
अहर्वत्प्रकाशभूयिष्ठेपिमदुक्तेर्थेसंशयाल्लीयसेलययोग्योभवसिसंशयात्माविनश्यतीतिस्मृतेस्तस्मादहल्लिकेत्युक्तोसीतितदर्थः अत्रसाध
निकासैवेति ॥ ५५१ ॥ द्वितीयमर्थमाह अथवेति योहिसूक्ष्मावधारणकुशलःससहृदयइत्युच्यतेअयंतुतद्विपरीतत्वादहृदयस्ततोहल्लिके
त्युक्तः हल्लविकसनेइत्यस्माद्धलंतान्मत्वर्थेन्प्रत्ययेहल्लिशब्दोविकाशशालिहृदयवाचीतद्रहितस्तथेतिभावः कथमस्यविवेकराहित्यमि
त्यतआह इतःपरमित्यादि इतःपरंस्पष्टोक्तेरनंतरमपिकःपृच्छेदयंतुविदग्धःपृच्छतिततोऽहृदयोविवेकरहितइत्यर्थः ॥ ५५२ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतामेवव्युत्पत्तिमादायतृतीयमर्थमाह अथवापतितइति अथवादेहेपतितेसतियन्मांसमयंत्हृदयंग्रामसिंहाःश्वानोऽग्युर्भक्षयेयुस्तदेवत्वया बुद्धंमद्विवक्षितःपरमात्मरूपोत्हृदयपदार्थोनवुद्धइत्याशयेनात्हृदयोविदग्धोऽहल्लिकेत्युक्तः तथाचाविद्यमानमज्ञातंहल्लिहृदयंपरमात्मरूपंयेनसतथाइत्यर्थः ॥ ५५३ ॥ पदांतरैरपिनिर्ब्रूयादितियास्कोक्तिमनुरुध्यचतुर्थमर्थमाह अह्नामिति देवःसूर्यः तेमोहेनपृच्छतः अत्रसदसि तथाचअहस्तत्कर्त्तादित्योलियंनाशंकरिष्यतीतिव्युत्पत्तिकेनाहल्लिकनाम्नासंबोध्येदमुत्तरमाहेतिसंबंधः ॥ ५५४ ॥ उत्तरमभिनयति मय्येवेति एतद्विश्वचित्रधारकंत्हृदयंत्वयामांसखण्डत्वेनयन्मतंतन्मयिमत्सूक्ष्मशरीरेप्रतिष्ठितंयतोमदीयंसूक्ष्मंशरीरंविनास्थूलंनस्थितिंव्रजेत्तत्स्थूलंविनाचसूक्ष्मंनस्थितिंव्रजेदितिप्रसिद्धमेवेति॥ ५५५॥ सूक्ष्मादिति सूक्ष्माच्छरीरात्स्थूलमन्यत्रापितिष्ठतीतिनमंतव्यंय

अथवापतितेदेहेत्हृदयंपृथिवीस्थितम् ॥ ग्रामसिंहाःसमद्युर्यत्ततोऽत्हृदयईरितः ॥ ५५३ ॥ अह्नांवाकारकोदेवोलयंतेत्रकरिष्यति ॥ अहल्लिकेतिनाम्नातमिदमाहमुनीश्वरः ॥ ५५४ ॥ मय्येवस्थितमेतद्धित्हृदयंचित्रधारकं ॥ मच्छरीरंविनानैवस्थूलंसूक्ष्मंस्थितिंव्रजेत् ॥ ५५५ ॥ सूक्ष्माच्छरीरतोयर्हिस्थूलंदेहंपृथक्भवेत् ॥ हृदयेनसमंतर्हिश्वानएतदद्दंतिहि ॥ पक्षिणःखंडशःकृत्वानयेयुर्वासमंततः ॥ ५५६ ॥ अतोऽस्मच्छब्दसंयुक्तंसूक्ष्मंदेहमुदीरितम् ॥ स्थानंस्थूलस्यदेहस्यत्हृदयेनसहैवहि ॥ ५५७ ॥ हृदयंपरमात्माख्यमविज्ञाययथापुरा ॥ पृष्टवांस्तद्वदेवार्यपुनःपप्रच्छमंदधीः ॥ ५५८ ॥

तोयर्हिसूक्ष्माच्छरीरात्स्थूलंपृथग्वियुक्तंभवेच्चेत्तर्हित्हृदयेनत्वदभिमतेनसहितमेतच्छरीरंश्वानःअदंतिभक्षयंति पक्षिणश्चखण्डंखण्डंकृत्वानयेयुरिति ॥ ५५६ ॥ अतइति अतउक्ताभिप्रायेणसूक्ष्मंदेहंस्थूलस्यत्हृदयेनसहैववर्तमानस्यस्थानमित्युक्तमित्यन्वयः कीदृशंसूक्ष्मं अस्मच्छब्दसंयुक्तं श्रुतिगतास्मच्छब्देनविवक्षितमित्यर्थः॥ ५५७ ॥ अथषड्विंशतितम्याःकण्डिकायाअर्थमष्टपंचाशताश्लोकैरुपबृंहयंस्तत्रसमानेइत्यंतभागस्यार्थमाह त्हृदयमितिचतुर्भिः याज्ञवल्क्येनत्हृदयपदेनत्हृदयमितिव्युत्पत्त्यापरमात्मोक्तइत्यविज्ञाययथापूर्वंत्हृदयाश्रयंपृष्टवांस्तथापुनराधारविषयकंप्रश्नंकृतवानित्यर्थः ॥ ५५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थूलमिति स्थूलसूक्ष्मदेहौयावन्योन्यमाश्रितौश्रुतिगतयुष्मदात्मशब्दाभ्यांकीर्तितौतौकुत्रप्रतिष्ठितावित्याकारंप्रश्नंविदग्धःकृतवानित्यर्थः द्विजइत्युत्तरान्वयि ॥५५९॥ प्राणइति ततोद्विजोयाज्ञवल्क्यस्तंविदग्धंप्रतिशरीरद्वयमूर्ध्ववृत्त्यात्मकेप्राणेस्थितमित्याह ततःसोपिविदग्धः प्राणःकुत्रेतिपृष्टवांस्तदुत्तरमपानेधोवृत्तिरूपइति ॥ ५६० ॥ अपानःक्वेति प्रथमेनचतुर्थेनचसपदेनविदग्धइतरैस्तुयाज्ञवल्क्योग्राह्यः व्यानःप्राणापानयोःसंधिःश्रृंखलासमःउदानस्तत्रकीलसमइतिसमानस्तुसूत्रवच्छरीरधारकइतिविवेकः ॥ ५६१ ॥ अथयाज्ञवल्क्यतात्पर्यविषयीभूतमात्मस्वरूपंसएषनेतीत्यादिश्रुत्यासंवादरूपाद्युत्थायनिरूपितंतद्विदग्धेननबुद्धमितिवक्तुंव्याख्यावाक्येषुयाज्ञवल्क्याभिप्रेतार्थविपरीतार्थोयोयोविदग्धेनगृहीतस्तंदर्शयति हृदयमितिसप्तभिः याज्ञवल्क्येनदिग्विज्ञानवाक्येषुहृदयपदेनपरमात्मैवोक्तः हृदिबु

स्थूलंसूक्ष्मंचदेहंतदाश्रयाश्रयिकीर्तितम् ॥ प्रतिष्ठितंहिकुत्रेतिपप्रच्छेदंपुनर्द्विजः ॥ ५५९ ॥ प्राणइत्याहतंसोपिप्राणःकुत्रेतिपृष्टवान् ॥ अपानइतितंप्राहशाकल्यंबुद्धिवर्जितम् ॥ ५६० ॥ अपानःक्वेतिसोपृच्छद्व्यानेसोप्याहधीधनः ॥ व्यानःकुत्रेतिसंपृष्टउदानइतिसोब्रवीत् ॥ उदानःक्वेतिसप्राहसमानेसोप्यभाषत ॥ ५६१ ॥ हृदयंयाज्ञवल्क्येनपरमात्मासमीरितः ॥ जंतूनामखिलानांयदास्तेहृद्यमीश्वरः ॥ तस्याधारोमांसखंडोज्ञातस्तेनद्विजन्मना ॥ ५६२ ॥ अस्मच्छब्दोप्यहंकारविषयःशब्दबोधयोः ॥ अनाश्रयःसआत्मोक्तोयाज्ञवल्क्येनधीमता ॥ सूक्ष्मोदेहोविदग्धेनज्ञातोबुद्धिविवर्जनात् ॥ ५६३ ॥ प्राणःप्राज्ञःसमुद्दिष्टोयाज्ञवल्क्येनधीमता ॥ अपानाद्यैस्तथाशब्दैःसएवपरमेश्वरः ॥ ५६४ ॥

द्धावयमपरोक्षस्तत्साक्षित्वादित्याशयादित्यर्थः तस्येति तेनविदग्धेनतुतस्यांतःकरणस्याधारोमांसखण्डएवज्ञातोऽतएवतदाश्रयंपृष्टवानन्यथासभूमाकुत्रप्रतिष्ठितःस्वेमहिम्नीतिश्रुतिविरुद्धंहृदयपदार्थपरमात्माधारंकथंपृच्छेदितिभावः ॥ ५६२ ॥ अस्मच्छब्दइति तथाहृदयाश्रयप्रश्नोत्तरवाक्येऽस्मच्छब्दोऽस्मच्छब्दार्थभूतःसआत्मायाज्ञवल्क्येनोक्तः सकः यःशब्दस्यबोधस्यचाऽनाश्रयोऽविषयःसन्नहंकारविषयःअहमितिप्रतीतौभासमानइत्यर्थः विदग्धेनत्वस्मच्छब्दार्थतयासूक्ष्मशरीरमेवबुद्धमिति एतेनपूर्वसूक्ष्मशरीरत्वेनव्याख्यानमपिविदग्धबुद्ध्यनुरोधेनकृतमितिसूचितम् ॥ ५६३ ॥ प्राणइति याज्ञवल्क्येनप्राणपदेनापानादिपदैश्चमायोपाधिस्तत्प्रवर्तकःपरमात्मैवलक्षणया उक्तः ॥ ५६४ ॥

॥४३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणादिपदानांपरमात्मनिलक्षणाप्रयोजकंप्राणादिप्रेरकत्वरूपंसंबंधमाह अनितिरिति प्राणादिघटकोऽनितिरनधातुश्चलनार्थकःप्रसिद्ध स्तच्चलनंतुसन्निधिमात्रेणप्रेरकादात्मनएवहेतोर्जायतइति ॥ ५६५॥ प्राणादिशब्दपंचकेउपसर्गाणांद्योत्यार्थानाह प्रकर्षश्चेति प्रकर्षोना साद्युन्नतदेशसंबंधः अपकर्षोऽधःसंबंधः विशेषःप्राणापानयोर्निरोधोधनुराकर्षणादौप्रसिद्धः शेषंस्फुटम् भेदाविशेषणानि ॥ ५६६ ॥ शाकल्यइति शाकल्यस्तुवाच्यार्थभूतानूवायुभेदानेवप्रतिपेदे अतएवोत्तरोत्तरंकुत्रकुत्रेतिपप्रच्छेति ॥ ५६७ ॥ समानइति अंतेनिरूपि तत्वात्सर्वेषांभूतानांवर्णितानामाश्रयःसमानोवायुरूपएवेतिशाकल्येनबुद्धःपरंत्वयंवायुर्याज्ञवल्क्येननोक्तः ॥ ५६८ ॥ याज्ञवल्क्येनस

अनितिःकथितोलोकेचलनार्थोमनीषिभिः ॥ चलनंसर्वजंतूनांप्राज्ञादेवप्रजायते ॥ ५६५ ॥ प्रकर्षश्चापक र्षश्चविशेषश्चोर्ध्वतापिवा ॥ सम्यक्त्वंचेतिभेदाःस्युश्चलनस्यास्यसर्वतः ॥ ५६६ ॥ शाकल्योवायुभेदांस्तान्प्रा णादीन्प्रतिपद्यहि ॥ पप्रच्छकुत्रकुत्रेतिमुमूर्षुर्बुद्धिवर्जितः ॥ ५६७ ॥ समानःसर्वभूतानामाश्रयोवायुरेवहि ॥ शाकल्यावगतोनायंयाज्ञवल्क्यसमीरितः ॥ ५६८ ॥ किंतुसर्वात्मकोदेवआनंदात्मामहेश्वरः ॥ नेतिनेतिवचो गम्यःस्थूलसूक्ष्मविवर्जितः ॥ ५६९ ॥ भावाभावधियायुक्तोभावाभावविवर्जितः ॥ स्वसजातिविजात्युत्थ परिच्छेदविवर्जितः ॥ ५७० ॥ आत्मागृह्योत्रबुद्ध्याद्यैःकरणैर्नकथंचन ॥ अतोनगृह्यतेसर्वैःप्राणिभिःसमहे श्वरः ॥ ५७१ ॥

मानपदार्थःकिमाकारकोविवक्षितइतिचेद्वायोरन्तर्यामिरूपेणयोनियन्तासविवक्षितइतिवदन्सएषनेतीत्यादिश्रुत्यर्थमाह किंत्वितिषड्भिः किंतुसर्वात्मकोदेवोयाज्ञवल्क्यसमीरितःकीदृशइत्याकांक्षायामानंदात्मेत्यादि नञ्द्वयेनस्थूलसूक्ष्मप्रपंचयोर्निषेधइतिभावः ॥ ५६९ ॥ भावाभावेति अथवाअविद्यादशायांनानाविधभावाभावावगाहिबुद्ध्यायुक्तोविषयीकृतोपिनञ्द्वयेनवीप्सयासर्वभावाभावविवर्जितो वोध्यतइति तथाचाद्वयत्वसिद्धिरित्याह स्वेति ॥ ५७० ॥ आत्मेति आत्मासर्वांतरः कथंतर्हिकरणैर्नदृश्यतइत्यतआह गृह्यइति यतोग्रही तुमयोग्योऽतःप्राणिभिःकरणैःकृत्वानगृह्यते योग्यतानियतत्वात्करणानामितिभावः ॥ ५७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशीर्यपदेनचवस्त्रादिवत्कालपरिच्छेदोऽन्यथाभावरूपोवावार्यतेइत्याह कालेनेति ॥ ५७२॥ असंगपदार्थमाह आकाशइति ॥५७३॥ नित्यमुक्ततापतिपादकस्यासितइत्यायंशस्यार्थमाह अबद्धइति व्यथादुःखसंबंधः यतोपिनाशायोग्यस्तस्मान्नकेनचिद्धिंस्यतेश्रुतिगत रिषधात्वर्थभूतांहिंसांनैति तथाचामृतरूपइति ॥ ५७४ ॥ एवंबहुशःपृष्टेनयाज्ञवल्क्येनैतान्यष्टावायतनानीत्यादिवाक्येनविदग्धंप्रत्येकः

॥४४॥ प्रश्नःकृतस्तमवतारयति एषएवेति एषशाकल्योवर्णितमालानमज्ञानसंयुतत्वान्नजानाति एषवृथाब्रह्मविदास्पर्द्धतेइत्ययमर्थोयथास्पष्टो भवेदेवमादित्यएवशिष्यस्यजिव्हायांस्थित्वाविदग्धंप्रतिपप्रच्छ किमर्थं समयंविंशतिवारंमदुक्तविद्यावज्ञातामयाशापेनधक्ष्यतइतिवर्णि तांप्रतिज्ञांप्रतिपालयन् तदर्थमित्यर्थः ॥ ५७५ ॥ तदुपयोगायपृथिव्येवेत्यादिकण्डिकाष्टकस्यपूर्वमव्याख्यातस्यार्थंसंगृह्णाति पृथिवीति

कालेनापिनशीर्योयमतएवनशीर्यते॥यथावस्त्रंहिकालेनपुराणंशीर्यतेभुवि॥५७२॥ आकाशोहियथाऽसं गोजलादिषुतथैवहि॥ आत्माबुद्ध्यादिभिस्तेनसंगंनोपैतिकर्हिचित्॥ ५७३॥ अबद्धःसर्वदायस्मात्तस्मान्न व्यथतेपिच॥ विनाशरहितस्तेनहिंस्यतेनैवकेनचित्॥५७४॥ एषएवनजानातिशाकल्योऽज्ञानसंयुतः॥ एवं पप्रच्छजिह्वायांस्थित्वादित्यस्तदामुनेः॥ याज्ञवल्क्यस्यशिष्यस्यसमयंप्रतिपालयन्॥ ५७५॥ पृथिवीचत थाकामोरूपाण्याकाशएवच॥ तमोरूपाणिचापश्चरेतश्चायतनानिहि॥ ५७६॥

चतुर्भिः अत्रप्राणस्यैकदेवत्वेनोक्तस्याष्टौविभूतयःशारीरादिसंज्ञाश्चतुर्थश्लोकेगणितास्तेषामायतनानिनिवासभूमयःपृथिव्यादिरूपाय थासंख्यंबोध्याइतिसंबंधः तथाहि तत्रपृथिवीशरीरेयन्मातृजंकोशत्रयंत्वङ्मांसरुधिरात्मकंतद्रूपाशारीरसंज्ञकपुरुषायतनं तथाकामःस्त्री संगमाभिलाषरूपःकाममयसंज्ञपुरुषस्यायतनं रूपाणिशुक्लादीन्यादित्यपुरुषस्यायतनं आकाशःश्रोत्रपुरुषस्य कीदृशस्य प्रातिश्रुत्कस्य प्रतिश्रुतौप्रतिध्वनौविशेषेणाभिव्यक्तस्य तमोंधकारश्छायामयस्यपुरुषस्यायतनं रूपाणिभास्वराण्यादर्शप्रतिबिंबग्राहिपदार्थेस्थितस्यप्र ॥४४॥ तिबिंबसंज्ञपुरुषस्यायतनं आपोजलानिअबूनिष्ठपुरुषस्यायतनं रेतःशुक्रमुपस्थेंद्रियमितियावत् पुत्रसंज्ञपुरुषस्यायतनमित्यर्थः॥५७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तक्रमेणैवशारीरादिपुरुषाणांचक्षुष्ट्वेनध्येयानूपदार्थानाह अग्निश्चेति अग्न्यादयोष्टौशारीरादिपुरुषाणांलोकाश्चक्षूंषिउदाहृताःपृथिव्येवेत्यादिकण्डिकाष्टकेक्रमेणोक्ताः तत्राग्निचक्षुःश्रोत्रपदार्थाःप्रसिद्धाः हृदयपदेनबुद्धिर्ग्राह्याइति ॥ ५७७ ॥ शारीरादिपुरुषाणांदेवतापदेनोक्तानिकारणानियथासंख्यंबोध्यान्याह अमृतमिति अमृतमाहारजःपरिणामःशारीरपुरुषस्यकारणं स्त्रियःकाममयस्य सत्यंचक्षुरिंद्रियमधिदैवस्यादित्यपुरुषस्यकारणं अध्यात्मेंद्रियाणामधिदैवात्मनापरिणामात् दिशोऽधिदैवात्मिकाअध्यात्मंस्थितस्यश्रौत्रपुरुषस्यकारणंदेवतानामध्यात्मरूपेणावस्थानात् एवंमृत्युर्देवोऽध्यात्मरूपस्यच्छायामयपुरुषस्यकारणं तथाऽसुःप्राणोबलरूपेणनिघर्षणादिनादर्पणादेःप्रतिबिंबयोग्यताकरणात्प्रतिबिंबपुरुषस्यकारणं वरुणोवृष्टिजलरूपोभूमिस्थजलवासिपुरुषस्यकारणंपुत्राख्यपुरुषस्यप्रजापति

अग्निश्चहृदयंचक्षुःश्रोत्रंहृदयचक्षुषी॥ हृदयंहृदयंचेतिलोकाअष्टावुदाहृताः ॥ ५७७॥ अमृतंचस्त्रियःसत्यं दिशोमृत्युरसुस्तथा ॥ वरुणःसप्तमोदेवोत्यष्टमस्तुप्रजापतिः ॥ ५७८॥ शारीरोयंकाममयआदित्येपुरुषस्तथा॥ प्रातिश्रुत्कोहियःश्रौत्रस्तथाछायामयोऽपरः ॥ आदर्शेचतथायोप्सुपुत्राख्यःपुरुषोष्टमः॥ ५७९॥ एतान्यायतनान्यष्टौलोकान्देवांश्चपूरुषान् ॥ संप्राप्यैतत्स्वरूपेणस्थित्वानिर्वहतीश्वरः॥ तंतवोहियथाप्राप्यपटंतंनिर्वहंतिते ॥५८० ॥

रूपस्थेंद्रियदेवताकारणमित्यर्थः अत्रेदंबोध्यं श्रुतौवदेतिपदस्यपृच्छेत्यर्थः सर्वेषांदेवानांमनोलोकपदोक्तेनसर्वव्यवहारसाधनप्रकाशत्वेनध्येयमिति॥ ५७८॥ देवानभिनयति शारीरइति व्याख्यातम् ॥ ५७९॥ एनमुपोद्घातत्वेनशिष्टकण्डिकाष्टकस्यार्थमभिधायएतानीत्यादिवाक्यार्थमुपबृंहयति एतानीत्यादिना एतानिवर्णितानिअष्टावायतनानितथाष्टौलोकान्तथादेवान्कारणरूपान्तथापुरुषान्एतान्सर्वान्संप्राप्यकारणत्वेनानुप्रविश्यतत्तद्रूपेणस्थित्वाचनिर्वहतिलोकव्यवहारक्षमान्करोतिईश्वरःपरमात्माइतिप्रसिद्धंवेदांतेष्वितिशेषः उक्ताष्टकचतुष्टयमुपलक्षणंसकलकार्यवर्गस्येत्यपिबोध्यम् कार्येष्वनुप्रविश्यकारणमेवसर्वंनिर्वहतीत्यत्रदृष्टांतमाह तंतवइति तथाचव्याससूत्रंसंज्ञामूर्तिकॢप्तिस्तुत्रिवृत्कुर्वतउपदेशात् त्रिवृत्कुर्वतःपरमात्मनएवेयंकृतिर्यन्नामरूपकल्पना तस्यैवसर्वकारणत्वेनोपदेशादित्यर्थः॥ ५८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंश्रुतिगतनिरुह्येतिपदार्थंप्रदर्श्यप्रत्यूह्येतिपदार्थमाह पुनरिति अयंपुमान्ईश्वरःपुनरुपसंहारकालेदिगादिक्रमतःदिशःस्ववर्त्तिपदार्थैःस
हिताःसूर्यादिदेवेषूपसंहृत्यतानिन्द्रियेषुइंद्रियाणिविषयेषुविषयान्हृदयेतच्चशरीरद्वयेतत्प्राणादावित्युक्तक्रमेणसमानपर्यंतंनीत्वाउपसंहृ
त्यप्रतिकूलंवहतिकार्यभाववपरीतंप्रत्यग्रूपेणावतिष्ठतेइत्यर्थः ॥ ५८१ ॥ अत्रदृष्टांतमाह पटमिति यथातंतवःपटंस्वकार्यंपटरूपात्प्रच्या
व्यतद्धीनंकृत्वाकेवलंकारणमात्ररूपेण स्थिताःप्रतिकूलंवहंतीतिव्यवह्रियंतेतद्वदित्यर्थः ॥ ५८२ ॥ एवमिति एवंगतश्लोकत्रयोक्तप्रका
रेणएतान्आयतनलोकदेवपुरुषात्मकचतुष्टयाष्टकादिपदार्थान्निरुह्यप्रत्यूह्यचइमानुपाधींस्तद्धर्मांश्चात्यक्रामदुल्लंघितवान्कार्यत्वकारण

पुनःस्वात्मतयासर्वान्दिगादिक्रमतःपुमान् ॥ समानांतमिमान्नीत्वाप्रतिकूलंवहत्ययं ॥ ५८१ ॥ पटंयथास्वरू
पाद्विप्रच्याव्यैतेत्रतंतवः ॥ कारणात्मतयास्थित्वाप्रतिकूलंवहंतिते ॥ ५८२ ॥ एवमेतान्निरुह्यैषप्रत्यूह्यचम
हेश्वरः ॥ अत्यक्रामदिमान्सर्वान्नभोयद्वद्घटादिकान् ॥ ५८३ ॥ अंतर्बहिःस्थितोविश्वंव्याप्यसर्वात्मकःपुमा
न् ॥ केवलोपनिषन्मानगम्योनपरमानतः ॥ ५८४ ॥ तंत्वांपृच्छामिपुरुषमेकवारमहंवद ॥ बहुवारंत्वयापृष्टं
तुभ्यमुक्तंमयायतः ॥ ५८५ ॥ नचेदत्रजनाकीर्णेपुरेतीर्थविवर्जिते ॥ कृष्णपक्षेपर्वरात्रावऽस्यांतेदक्षिणाय
ने ॥ पतिष्यतिशिरोभूमौगतप्राणस्यदुर्धियः ॥ ५८६ ॥ अस्थीन्यपिनतेगेहंप्राप्स्यंत्यत्यंतविद्विषः ॥ ममचोरा
स्तुचांडालाहरिष्यंत्यर्धमार्गतः ॥ ५८७ ॥

त्वहीनेस्वरूपएवस्थितइत्यर्थः यथानभोघटादिस्थितिकालेंतर्बहिर्भावेनव्यवहृतमप्युपाधिपरित्यागेंतर्बाह्यभावपरित्यागात्मकमतिक्र
मणंकरोतितद्वद्यःसर्वमतिक्रम्यपरिपूर्णोवस्थितःकेवलोपनिषद्रूपप्रमाणेनैवगम्योरसनयारसवत्परेणोपनिषद्भिन्नमानेननगम्यश्चतंपुरुषंते
तुभ्यंविदग्धायैकवारमहंपृच्छामितत्स्वरूपंत्वंवदयतस्त्वत्पृष्टंमयाबहुवारमुक्तमितित्रयाणामर्थः ॥ ५८३ ॥ ५८४ ॥ ५८५ ॥ नचेदिति
नचेद्वदिष्यसितर्हितेशिरोऽत्राशुभेदेशेऽशुभेकालेचभूमौपतिष्यतीतिसंबंधः ॥ ५८६ ॥ अस्थीनीति तेऽस्थीन्यपिगेहंनप्राप्स्यंतिकीदृशस्य
ते ममब्रह्मविद्रूपस्यात्यन्तद्वेषकारिणः यतश्चोरभूताश्चंडालाअर्धमार्गेहरिष्यंतीति ॥ ५८७ ॥ ॥४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतादृशःशापोयाज्ञवल्क्येननदत्तस्तत्रक्रोधादिबीजदाहात्किंतुजगन्मर्यादापालकेनसकलकर्मफलप्रदेनादित्यात्मनेश्वरेणैवेत्याह याज्ञवल्क्येति ॥ ५८८ ॥ एवमुक्तइति एवमुक्तेसतिविदग्धोऽनात्मवित्त्वात्तूष्णीमेवस्थितस्तदनंतरंतस्यविदग्धस्यमनःसकलेंद्रियाध्यक्षंवागिंद्रियंचइतरेंद्रियैःसहोत्क्रान्तंशरीरादित्यर्थः ॥ ५८९ ॥ पुरेइति तत्रपुरेसभारूपेअशुभेदेशेदक्षिणायनकृष्णपक्षरात्रिरूपेऽशुभेकालेच शापेनशिरोन्यतपत्यथानमुचेरसुरस्यदेवान्जित्वास्वर्गवासिनःशिरोवज्रेणेति ॥ ५९० ॥ हाहेति श्लोकद्वयंनिगदव्याख्यातम् ॥ ५९१ ॥ ॥ ५९२ ॥ प्रादुरिति ततःसभास्थितजनानांमुखेभ्यउद्गताएषावक्ष्यमाणावाक्प्रादुरासीत्तामभिनयति अहोइत्यादिना अनेनविदग्धेन

याज्ञवल्क्यवचस्येवंस्थित्वासौसवितापुमान् ॥ अभाषतभृशंक्रुद्धःसृष्टिस्थित्यंतकारणम् ॥ ५८८ ॥ एवमुक्ते यथाकल्पआत्मज्ञानविवर्जितः ॥ तूष्णींस्थितोमनस्तस्यवाग्वृत्तिःसहसागता ॥ ५८९ ॥ पुरेराजगृहेऽनेकजनकोटिनिषेविते ॥ सभायांनिशिमूर्धाचन्यपतद्भूतलेतदा ॥ सद्योवज्रहतोयद्वन्नमुचेःस्वर्गवासिनः ॥ ५९० ॥ हाहेतिशब्दःसुमहान्विदग्धेपतितेत्वभूत् ॥ जगामक्षोभमतुलमखिलाराजमंडली ॥ रुरुदुस्तस्यशिष्यायेबांधवाश्चद्विजोत्तमाः ॥ ५९१ ॥ विदग्धंपतितंभूमौदृष्ट्वाधिग्धिग्वदंतिहि ॥ सभास्थिताजनाःसर्वेद्विजाबालाःस्त्रियोपिहि ॥ ५९२ ॥ प्रादुरासीत्तथैषावाक्सभावक्त्रसमीरिता ॥ अहोफलमनेनैतत्प्राप्तमद्यसुदुःसहं ॥ ब्रह्मविद्वेषवृक्षस्यकारस्करसमस्यतु ॥ ५९३ ॥ अयंसर्वगुणोपेतोदोषेणैकेनघातितः ॥ ब्रह्मविद्वेषसंज्ञेनदुःसहेनाद्भुतेनच ॥ ५९४ ॥ एकएवयथावन्हिर्दहेद्विश्वंचराचरम् ॥ ब्रह्मविजानतःपुंसोद्वेषएकस्तथैवहि ॥ गुणराशिंदहेत्सर्वंसंशयोनात्रविद्यते ॥ ५९५ ॥ विद्वत्तमोविदग्धोयंगुणानामाकरस्तथा ॥ क्षणमात्रेणनिर्दग्धोब्रह्मविद्वेषवन्हिना ॥ ५९६ ॥

कारस्करसमस्यब्रह्मविद्वेषरूपवृक्षस्यफलंप्राप्तमिति कारस्करपदार्थस्त्रिकांडशेषानुरोधीदर्शितः प्रपंचसारेतुकुचलाइतिप्रसिद्धेवृक्षेप्रयुक्तः तस्यविषरूपताप्रसिद्धैवेतिदृष्टांततोपपन्नाइति ॥ ५९३ ॥ अयमिति अयंसर्वगुणोप्येकेनप्रबलेनाद्भुतसामर्थ्येनब्रह्मविद्वेषरूपेणदोषेण घातितस्ततःसनकर्त्तव्यइति ॥ ५९४ ॥ ब्रह्मविद्वेषस्यदुःसहत्वंस्फुटीक्रियते एकएवेति ब्रह्मविजानतोब्रह्मविदोद्वेषस्तथावन्हिवत्सकलगुणान्दहेद्विफलंकुर्यादितियावत् ॥ ५९५ ॥ अत्रचोदाहरणंविदग्धएवेत्याह विद्वत्तमइति विद्वत्तमोबहुविद्यासुकुशलः ॥ ५९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मविद्वेषस्यकार्याद्भुतत्वकथनेनाद्भुतत्वंस्फुटीक्रियते संभाव्यतेइति संभावनाशंका ॥ ५९७ ॥ दशामिति यदायंसर्वगुणाढ्योपिब्रह्मविद्वेषेणएतांदुर्गतिंप्राप्तस्तदेतरस्तेनकःकांदुर्गतिंनप्राप्नुयादिति ॥ ५९८ ॥ ब्रह्मेति ब्रह्मविदोब्रह्मभावप्रतिपादिकाब्रह्मवित्परमाप्नोतीत्याकारा श्रुतिःसत्येयंअबाधितार्थतयानुभूता यतोजीवैःकर्त्तुमशक्यमचिंत्यशक्तेःपरमात्मनःकर्मविदग्धस्यनानाविद्याशालिनोदंडनंयाज्ञवल्क्ये ब्रह्मविदिदृष्टमित्यर्थः ॥ ५९९ ॥ किंचब्रह्मवित्सर्वभावमाप्नोतीत्यर्थिकायोयोदेवानामित्याद्याव्याख्याताश्रुतिरपिसत्यादृष्टायतोब्रह्मविदोयाज्ञल्क्यस्यशत्रौहतेस्वशत्रुनाशइवसर्वजनानांहर्षोजातः यतश्चपरकृतिदूषकाअपिजनायाज्ञवल्क्यकृतिंननिंदति नह्येतद्याज्ञव

संभाव्यतेयथानैवसागरस्येहशोषणम् ॥ संभाव्यतेतथानास्यमरणंब्रह्मशापतः ॥ ५९७ ॥ दशामेतामयंप्राप्तोयदाब्राह्मणसत्तमः ॥ ब्रह्मविद्वेषपापेनतदाकःकांनचाप्नुयात् ॥ ५९८ ॥ ब्रह्मवित्परमाप्नोतिसत्येयंशाश्वती श्रुतिः ॥ विदग्धंहिनिहन्यात्कोविनाब्रह्मपरंसदा ॥ ५९९ ॥ सर्वात्माब्रह्मविन्नूनंपरोक्षंनोनचास्तितत् ॥ विदग्धेनिहतेयस्मात्सुखमस्तिशरीरिणाम् ॥ ६०० ॥ शत्रौस्वस्यहतेयद्वत्सुखमाप्नोतिदेहभाक् ॥ विदग्धेनिहते तद्वज्जनएषसुखंगतः ॥ ६०१ ॥ विदग्धमेवनिंदंतिजनाःसर्वेनचेतरम् ॥ हंतारंयाज्ञवल्क्याख्यंसर्वात्मायंततोमुनिः ॥ ६०२ ॥ ब्रह्महत्याकृतापुंसोदद्याज्जन्मांतरेफलम् ॥ ब्रह्मविद्वेषएतस्मिन्फलंजन्मनियच्छति ॥ जन्मांतरेपिशाकल्येदृष्टमेतद्यतोधुना ॥ ६०३ ॥ वरशय्यासनार्होयंदेशेदेहोत्रभूतले ॥ पांसुनागुंठितोयद्वत्पिशाचोन्मत्तदेहकः ॥ ६०४ ॥ कृष्णपक्षेपर्वरात्रौनिर्गतोदक्षिणायने ॥ शाकल्यःशापतोनूनंनरकंहिप्रयास्यति ॥ ६०५ ॥

ल्क्यस्यसर्वात्मभावंविनाघटतेइत्याह सर्वात्मेतित्रिभिः नोस्माकंतत्प्रथमपादोक्तंपरोक्षंनकिंतुअपरोक्षमेवेत्यर्थः शेषंस्फुटम् ॥ ६०० ॥ ॥ ६०१ ॥ ६०२ ॥ ब्रह्मविदोद्वेषइतरब्रह्महत्यायाअप्यधिकोलोकद्वयेपिदुष्टफलदर्शनादित्याह ब्रह्महत्येति ब्रह्महत्याजन्मांतरएवदुष्फलदाप्रायइतिशेषः तद्वेषस्तुइहजन्मनिजन्मांतरेचदुष्फलदः अत्रोदाहरणंशाकल्यइत्यर्थः ॥ ६०३ ॥ शाकल्यस्येहैवयद्दुष्फलंतदभिनयति वरेति अत्रतीर्थभिन्नेदेशे उत्तरार्द्धेदृश्यतेइतिशेषः ॥ ६०४ ॥ जन्मांतरानर्थस्तुदुर्देशकालमरणेनानुमीयतइत्याहुः कृष्णेति पर्व अमावास्या निर्गतोमृतः ॥ ६०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यदुष्फलदमज्ञानमपिद्वेषादेवास्माभिर्निश्चितमित्याहुः अहोइति द्विष्टवान्द्वेषविषयंकृतवान् ॥ ६०६ ॥ अनेनेति अनेनविदग्धेनपा तिताइतिपदस्यसर्वैःसप्तम्यंतैर्विपरिणामेनसंबंधः ॥ ६०७ ॥ अहोइति स्फुटम् ॥ ६०८ ॥ इत्यादीति वर्णिनश्चातुर्वर्णिकाः शसंमुस्तुष्टुवुः ॥६०९॥ ततःकिंजातमतआह अमंत्रेति अमंत्रेलौकिकेग्नौअमुंविदग्धंदग्ध्वातदीयास्थीनिगृहंनेतुंयदाशिष्याःपुराद्बहिःप्रस्थितास्तदादरे णश्रद्धयायुतैःशिष्यैरस्थीनिदुकूलेस्थापितानितानितुराजभीत्याचौरैश्चांडालैःकांश्चित्शिष्यानस्थीनिनयमानान्हत्वाहृतानि कीदृशैः

अहोअस्यविमूढत्वंशाकल्यस्यातिदुर्धियः ॥ याज्ञवल्क्यंमुनिंयस्माद्विष्टवान्व्यर्थमेवहि ॥ ६०६ ॥ अनेनपा तिताःसर्वेबांधवाःशोकसागरे ॥ आत्मापिनरकेजायाविधवानांगणेपिच ॥ भूमौदेहोपिपापाग्नौसुकृतंचपु राकृतं ॥ ६०७ ॥ अहोलोकद्वयभ्रंशंकस्यनायंकरोतिहि ॥ ब्रह्मविद्वेषतोजातोदुःसहोवडवानलः ॥ ६०८ ॥ इत्यादिवादिनःसर्वेयाज्ञवल्क्यंमहाधियम् ॥ शशंसुर्वर्णिनस्तत्रगार्ग्याराज्ञाचसंयुताः ॥ ६०९ ॥ अमंत्राग्ना वमुंदग्ध्वातस्यास्थीनिगृहंप्रति ॥ शिष्यानेतुंयदामार्गेप्रस्थिताःपुरतोबहिः ॥ ६१० ॥ दुकूलेस्थापितान्यस्य त्यस्थीन्यादरसंयुतैः ॥ चांडालजातिभिश्चौरैस्तदातानिहृतानिवै ॥ ६११ ॥ सुवर्णमन्यमानैस्तैराजभीतैःसमु त्सुकैः ॥ हत्वाशिष्यानमून्कांश्चिदस्थिहारान्सुनिर्घृणैः ॥ ६१२ ॥ शाकल्येनिहतेतस्मिन्शब्देचोपरतेसति ॥ उवाचब्राह्मणान्सर्वान्याज्ञवल्क्योमहायशाः ॥ ६१३ ॥ ब्राह्मणाभगवंतोयेनानादेश्याःसमागताः ॥ मदीयंव चनंसर्वेशृणुताऽद्यमहाधियः ॥ ६१४ ॥ योवःकामयतेप्रष्टुंसमांपृच्छतुभूसुरः ॥ यस्तुकामयतेतंवापृच्छामि ब्राह्मणोत्तमम् ॥ ६१५ ॥

समुत्सुकैर्लुब्धैरितित्रयाणांसंबंधः ॥ ६१० ॥ ६११ ॥ ६१२ ॥ सप्तविंशतितमकण्डिकार्थमाह शाकल्यइतिपंचभिः महायशाःब्रह्मत्वंब्रा ह्मणानुमतिमनासाद्यनीयमानमनर्थायस्यादितिलोकान्शिक्षयितुंविजयेपिब्राह्मणानुमतिसंपादनपरत्वात् स्फुटमन्यत् ॥ ६१३ ॥ ब्राह्म णान्प्रतियाज्ञवल्क्यवचनमभिनयति ब्राह्मणाइति हेब्राह्मणाभगवंतोमान्याः नानादेश्याः दिगादित्वाद्यत् ॥ ६१४ ॥ योवइति भूसुरो ब्राह्मणः युष्माकंमध्येयोमांप्रष्टुमिच्छतिसपृच्छतु यदिवामत्प्रश्नंसमाधातुमिच्छतितर्हितमहंपृच्छामीति ॥ ६१५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृच्छतात्रेति अथवासर्वेमांपृच्छतअहंवासर्वान्पृच्छामीति ॥ ६१६ ॥ एवमिति एवमुक्तेपिसर्वेविप्रास्तंब्रह्मवादिनंप्रष्टुंतत्पृष्टंवक्तुंसमाधातुंवानेशतेस्मप्रगल्भानबभूवुः यतएतेशाकल्यदशांवीक्ष्यतूष्णींभूताः ॥ ६१७ ॥ पूर्वंनेतिनेतीतिनिषेधमुखेनप्रतिपादितस्यात्मनोविधिमुखेनप्रतिपादिकायाअंत्यकण्डिकायाअर्थमाह पृष्टवानित्यादिनाआंतग्रंथेन तांस्तूष्णींभूतानपिसर्वान्ब्राह्मणान्प्रतिमुनिर्याज्ञवल्क्यः स्वज्ञानप्रकर्षप्रकटनायमंत्रैःश्लोकरूपैःपृष्टवान् यतःप्रथमःप्रथमगण्योमंत्रवित्वेदवित् कीदृशान्ब्राह्मणान्मंत्रविदइति ॥ ६१८ ॥ तत्र प्रश्नवाक्यार्थमभिनयति वनस्पतिरित्यष्टादशभिः अश्वत्थःपिप्पलस्तत्प्रभृतिर्वनस्पतिर्विनापुष्पंफलग्राहीवृक्षोयथालोकेप्रसिद्धस्तथैवै

पृच्छतात्रहियेकेचिद्ब्राह्मणाःसर्वएववा ॥ अहंपृच्छामिवासर्वान्युष्मानत्रसमागतान् ॥ ६१६ ॥ एवमुक्ते तदाविप्रानेशतेब्रह्मवादिनम् ॥ प्रष्टुंवक्तुंचतत्पृष्टंसर्वज्ञसदृशाअपि ॥ तूष्णींभूतानिरीक्ष्यैतेशाकल्यंनष्टचेतसम् ॥ ६१७ ॥ पृष्टवान्याज्ञवल्क्योथब्राह्मणान्स्वयमेवहि ॥ मंत्रैर्मंत्रविदःसर्वान्मंत्रवित्प्रथमोमुनिः ॥ ६१८ ॥ वनस्पतिर्यथावृक्षोमृषालोकेप्रतीयते ॥ अश्वत्थादिस्तथैवैषमृषादेहःप्रतीयते ॥ ६१९ ॥ यथावृक्षस्यपत्राणि लोमान्येवंशरीरिणः ॥ कठिनाबाह्यतस्त्वग्यावृक्षस्योत्पाटिकाहिसा ॥ यथातथात्रपुंसोपित्वगुक्ताबाह्यतःस्थिता ॥ ६२० ॥ पुरुषस्ययथारक्तंत्वचएवविनिःसरेत् ॥ उत्पटःश्वेतवसनसदृशस्त्वांतरस्त्वचः ॥ ६२१ ॥ एवंकुठारनिहतेवृक्षेरक्तोपमोरसः ॥ उत्पटश्वविनिर्यातित्वचउत्पाटिकात्मनः ॥ ६२२ ॥

षमनुष्यादिर्मृषाभूतोदेहःप्रतीयतइत्येतदमृषासत्यमेवनात्रसंशयइत्यर्थः ॥ ६१९ ॥ साम्यमभिनयति यथेतिसप्तभिः वृक्षस्यपत्रसमान्यस्यशरीरिणोलोमानितथायावाह्याकठिनात्वक्साश्रुतौउत्पाटिकाशब्देनोक्तासायथावृक्षस्यतथास्यपुंसोपिप्रसिद्धेत्यर्थः ॥ ६२० ॥ पुरुषस्येति यथापुरुषस्यनिर्भिन्नायास्त्वचःसकाशाद्रक्तमुत्पटश्चनिस्सरतिप्रादुर्भवतीति उत्पटपदार्थमाह श्वेतेति श्वेतवस्त्रसमोयस्त्वचआंतरोभागःसउत्पटइतिश्रुतावुक्तइत्यर्थः ॥ ६२१ ॥ एवमिति एवंपुरुषवद्वृक्षेकुठारनिहतेसतिरक्तसमोरसस्तथाउत्पटश्ववर्णितउत्पाटिकात्मनउत्पाटिकासंज्ञायाबाह्यत्वचःसकाशान्निर्यातीति ॥ ६२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनःसर्वेषुस्वस्मिन्नारोपितेषुसत्तादिप्रदत्वादपितदाश्रितत्वमज्ञानस्येतिसदृष्टांतमाह लोकइति धनिकमुपकारकमितिशेषः अज्ञान मितिच्छेदः स्पष्टमन्यत् ॥ ६४४ ॥ अथविज्ञानानंदपदयोःसामानाधिकरण्यसूचितंविज्ञानानंदयोरैक्यमुपपादयति आनंदइतिदशभिः लोकेपिविज्ञानभिन्नमानंदस्वरूपंनदृष्टं यतःसुखमित्याकारकंज्ञानंविनाआनंदस्यसंभवःसत्तादिलाभोनकुत्राप्यस्तीत्यर्थः तथाचज्ञान विमुक्तसुखस्वरूपस्यादर्शनाल्लौकिकमपिसुखमात्मरूपमेव विषयतयाभानंतुवृत्त्युपाधिकमितिभावः ॥ ६४५ ॥ ननुदुःखमपितथास्त्विति तिशंकांवारयति नैवमिति एवंसुखवद्दुःखमपिविज्ञानात्माभिन्नमस्त्वितिनशंक्यं यतोस्यदुःखस्यसत्त्वेसदात्मरूपत्वेकिंचिन्मानंप्रत्यक्षा दिकंनदृश्यते नहिकश्चिदहंदुःखमित्यनुभवति आनंदस्यत्वात्मरूपत्वेप्रकृतश्रुतिरूपःप्रमाणराजोस्तीति ॥ ६४६ ॥ यद्यपीति अलब्धला

लोकेयोनिर्धनोदृष्टआश्रयेद्धनिकंहिसः॥ दुःखात्मकंतथाऽज्ञानमानंदंज्ञानमाश्रयेत्॥ ६४४॥ आनंदोहिन विज्ञानादन्योलोकेपिदृश्यते॥ इदंसुखमितिज्ञानंविनानानंदसंभवः ॥ ६४५॥ नैवंदुःखंयतोनास्यसत्वेमा नंहिदृश्यते॥ आनंदस्यतुसत्वेस्तिमानंश्रुतिरिहाधुना ॥ ६४६ ॥ यद्यप्येतेसदातुल्ययोगक्षेमेउदीरिते॥ सुख दुःखेतथाप्येषविशेषोनैजकोस्त्यपि ॥ ६४७॥ सुखमिच्छतिसर्वोपिभूयादेतत्सदामम॥ इत्थंदुःखंतथाद्वेष्टि माभूदेतत्कदापिमे॥ ६४८॥

भोयोगः लब्धप्रतिपालनंचक्षेमः यद्यपिसुखदुःखेतुल्ययोगक्षेमतयासर्वतंत्रेपूक्ते तथाचसुखस्यात्मस्वरूपतांगीकारेदुःखस्यापिसांगीका र्या अन्यथातुल्ययोगक्षेमताप्रसिद्धिर्नोपपद्येतेतिशंका तामेतांशंकांनहिदृष्टेनुपपन्नंनामेतिन्यायेनवारयन्साप्रसिद्धिःसुखाकारवृत्तेरेवो त्पत्तिनाशादिसाम्यप्रतिपादनपरेतिदर्शयति तथापीति तथाप्येषवक्ष्यमाणोविशेषोपिसुखदुःखयोरस्ति कीदृशोविशेषोनैजकः निजः असाधारणःनिजएवनैजःमूढैरज्ञातोनैजोनैजकः ॥ ६४७ ॥ सुखदुःखयोर्नैजंविशेषंदर्शयति सुखमितित्रिभिः सर्वोपिजनइत्थंसुखमि च्छति इत्थंकथं एतत्सुखंसदाममभूयादिति तथाएतद्दुःखंकदापिमेमाभूदितिदुःखंद्वेष्टीति ॥ ६४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वेतावताकोविशेषःसुखेलब्धइतिचेदनुकूलत्वेसतिस्वरूपोयोन्यत्रनिरुपाधिकेच्छाविषयत्वेनप्रसिद्धइत्याह इत्थमिति इत्थंभूयादेत त्सदाममेत्याकारेणेच्छायत्रयद्विषयिकाभवेदेतद्वस्तुअनुकूलमनुकूलत्वेनव्यवहार्य्यंस्वशब्दभाक्स्वशब्देनव्यवहार्यंचभवति भूयादेतदित्यं शेनानुकूलत्वंममेत्यंशेनचस्वशब्दार्हत्वंहिसूचितमितिभावः परंतद्विपरीतंतुप्रतिकूलमितिनस्वंस्वशब्दानर्हमितिचव्यवह्रियते ननुसर्वस्या त्मनिकल्पितत्वेनाऽऽत्ममात्रत्वेप्रतिकूलत्वादिकंकथंभासतेइतिचेदविद्याबलादितिसूचयन्प्रतिकूलत्वोदाहरणमाह लोकेइति लोकेसुख रूपेणेष्टमपिसुखंयदावैरिसंबंधमात्रेणप्रतिकूलंदृश्यतेतदासाक्षात्परत्वेनैवकल्पितस्यप्रतिकूलत्वादिकंकिमुवाच्यमितिभावः वैरिसुखेतथा प्रतिकूलत्वादिकंदृष्टमित्यर्थः ॥ ६४९ ॥ ननुस्वशब्दभाक्त्वमात्रंसुखस्यविशेषोवक्तव्यःकिमितिइष्यमाणत्वात्मकानुकूलत्वेनस्वपदार्थो विशेषितइतिशंकांवारयन्ननुकूलपदकृत्यमाह वैरीति वैरीचदुःखंचएतेअपिसंबंधशब्देनस्ववैरीस्वदुःखमित्येवमात्मसंबंधेनशब्दनंप्रतिपा दनंययोस्तेतथाएतादृशेस्यातांतथापितयोर्वैरिदुःखयोरात्मसंबंधित्वेनेष्यमाणत्वंनदृश्यतेइत्यतस्तद्व्यावृत्तयेअनुकूलपदप्रयोगइतिभावः

इत्थंयस्मिन्भवेदेतदनुकूलंस्वशब्दभाक्॥ प्रतिकूलंपरंनस्वंलोकेवैरिसुखेतथा॥ ६४९॥ वैरिदुःखेअपिसदा स्यातांसंबंधशब्दने॥ तथापिनात्मसंबंधंतयोरिच्छतिकर्हिचित्॥ ६५० ॥ कारकाणामभावेनशेषेसंबंधधी भ्रमः॥ संबंधेऽविद्यमानेपियथास्वस्यस्वयंतथा॥ ६५१ ॥

॥ ६५० ॥ ननुअनुकूलत्वेसतिस्वत्वरूपोयःसुखस्यविशेषउक्तस्तत्रस्वपदार्थःकः आत्मीयत्वमात्मत्वंवा आद्येकथमात्मरूपता अंत्ये कथंलोकाआत्मीयत्वेनसुखमिच्छंतिकथंवासुखंममभूयादितिषष्ठीप्रयोगइत्याशंक्यअंत्यपक्षमंगीकुर्वंस्तत्रोपपत्तिमाह कारकाणामिति सुखस्यात्मरूपत्वेनभेदघटितेसंबंधेऽविद्यमानेपिसुखस्याजन्यत्वात्कारकाणांद्वितीयादिविभक्तिप्रयोजकानामभावेनपरिशेषेणशेषेशेषा र्थकषष्ठीविभक्तौप्रयुज्यमानायांसंबंधधीर्याजायतेसाभ्रमोविकल्परूपेतियावत् तदुक्तं अत्यंतासत्यपिह्यर्थेज्ञानंशब्दःकरोतिहीति श ब्दज्ञानानुपातीवस्तुशून्योविकल्पइतिच तत्रदृष्टांतःस्वस्येति यथास्वस्यस्वयमुपकरोतीतिप्रयोगेआत्मनिभेदाभावेपिशब्दबलात्स्वस्वयंप दार्थयोर्भेदोभासतेतद्वन्ममसुखमित्यत्रापीत्यर्थः तथाचसुखात्मनोरभेदएव लोकाअपिकथमिदंसुखंममात्मैवस्यादित्येवेच्छंतिपरंतुतेसु खस्यात्मतामजानंतःसुखात्मप्रतिबिंबयाहिवृत्तिद्वाराएतत्संबंधंलब्ध्वासुखमात्मीयत्वेनाभिमन्यमानाएवतुष्यंतीतिभावः ॥ ६५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाचवृक्षस्यत्वङ्निर्भेदेरसोत्पटयोनिर्गमस्तथापुरुषस्यरक्तोत्पटयोस्तथाचसाम्यंदृढमित्याह एवंपुंसइति ॥ ६२३ ॥ कुठारेति यानि कुठारच्छेदेनवृक्षसकाशात्शकलानिखंडानिनिर्गच्छंतितान्यस्यपुंसोमांसखंडसमानीति ॥ ६२४ ॥ वृक्षेइति यावृक्षांतःस्थिताःशिरानाड्योमिलिताःसत्योग्रंथिकारिकास्ताःश्रुतौक्रिनाटपदोक्ताः तच्चकिनाटंयथावृक्षशरीरेतथापुंसोपिशरीरेस्यात् यतःपुंसःशिरःप्रभृत्यंगेषुसूक्ष्माणांनाडीनांमेलनंसंघातोग्रंथिनिभोदृश्यतेइति ॥ ६२५ ॥ अस्थीनीति यथायद्वत्पुंसःशरीरेअस्थीनिसंतितथावृक्षांतर्दारूणिसारसंज्ञानिप्रसिद्धानि तथामज्जाअस्थ्नामंतर्गतोरसःसयथापुंसस्तथातरोर्वृक्षस्यापि तस्यवृक्षेपुंसिचनामांतरकृतोभेदोनास्तिइत्यर्थः ॥ ६२६ ॥

एवंपुंसस्त्वचश्छेदेरक्तंचोत्पटिकापिच ॥ निर्गच्छतिबहिस्तेनतुल्यतावृक्षदेहयोः ॥ ६२३ ॥ कुठारच्छेदतोयांतिशकलानिवनस्पतेः ॥ विनिर्गच्छंतितान्यस्यपुंसोमांसोपमानिहि ॥ ६२४ ॥ वृक्षेत्वंतःशिराःस्थैर्यसहितास्ग्रंथिकारिकाः ॥ यथातथैवपुंसःस्यात्किनाटंग्रंथिसन्निभं ॥ शिरआदिषुसूक्ष्माणांनाडीनांमेलनंभवेत् ॥६२५॥ अस्थीनिपुंसियद्वत्स्युर्दारूण्यंतरतस्तथा ॥ वृक्षेमज्ज्ञानभेदोस्तिमज्जापुंसस्तरोरपि ॥६२६॥ पुरुषस्यापिवृक्षस्यतुल्यमेतदुदीरितम् ॥ विशेषोयंकुतोविप्राःकथयंतुमहाधियः ॥ ६२७॥ प्ररोहतितरुश्छिन्नोमूलान्नवतरःपुनः ॥ देहश्छिन्नःपुनर्मूलाज्जायतेनपुनर्नवः ॥६२८॥ जीवतोजायतेरेतोयस्मात्तस्मान्नरेतसः ॥ ततोमूलंकिमस्यास्तिपुंसोवृक्षसधर्मणः ॥ ६२९ ॥

एवमुपपादितंसाम्यमनूद्यशंकते पुरुषस्येति अयंवक्ष्यमाणः ॥ ६२७ ॥ अयंपदोक्तंविशेषमाह प्ररोहतीति वृक्षश्छिन्नोपिदृश्यमानान्मूलात्प्ररोहन्पुनरंकुरंलभमानोदृष्टः देहस्तुपुनर्दृश्यमानान्मूलान्नवतरत्वेनजायमानोनदृश्यते भवितव्यंचास्यापिमूलेनकेनचित् तद्ब्रूतेत्यर्थः ॥ ६२८ ॥ जीवतइति रेतोरूपान्मूलाद्देहोजायतइतिनवक्तव्यंयस्माद्रेतोजीवतःप्राणान्धारयतोधर्मोदृश्यतेमयातुच्छिन्नदेहपदेनसर्वकार्यवर्गाभावशालिन्यवस्थोच्यतेतस्यांतुसुषुप्तप्रलयादिसंज्ञायांरेतआधारभूतंपित्रादिशरीरंनोपलभ्यत्तइतिभावः ततोदृश्यमानमूलस्यवक्तुमशक्यत्वात् अस्यवृक्षसधर्मणःवृक्षसमस्यपुंसः तदुपलक्षितस्यसर्वजगतइतियावत् किंमूलमिति ॥ ६२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति अथशब्दःपक्षांतरपरिग्रहे तथाचयथाश्वत्थोदृश्यमानंमूलंविनापिवृक्षांतरोपरिवंदारूपेणजायमानोधानाभ्योबीजेभ्यउद्भवन्दृष्टस्तथाएषदेहोवृक्षमूलसमंमूलंविनापिजायतेइतिचेत्तर्ह्यस्यकिमस्यबीजसमंकारणमितिशेषः ॥ ६३० ॥ तस्माद्वृक्षस्यमूलसमंबीजसमंवा देहादिरूपजगतःकारणंवक्तव्यमित्याह मूलेति स्विदितिवितर्के वितर्कस्यफलंतुयथावृक्षोच्छेदेचिकीर्षितेतन्मूलबीजयोश्छेददाहाभ्यां नाशःक्रियतेतथास्यापिमूलादिनिर्णयेअसंगशस्त्रेणच्छित्वातत्त्वज्ञानाग्निनादग्ध्वाचतन्नाशस्यसुकरतारूपंश्रुतिसूचितंबोध्यं अयंभावोगीतासुऊर्ध्वमूलमित्यादिनास्फुटीकृतः ॥ ६३१ ॥ अत्रस्वभाववादिनश्चार्वाकस्यमतंनिराकरोति जातइति ननुयोजातःसजातएवसनपुन

अथमूलंनचात्रास्तितथाप्येषप्रजायते ॥ नवोभूत्वायथाश्वत्थोधानाभ्योमूलवर्जितः ॥ ६३० ॥ मूलबीजसमंकिंस्विन्मर्त्यस्यास्यहिकारणं ॥ मृत्युनागतदेहस्यनवोदेहोयतोभवेत् ॥ ६३१ ॥ जातोनजायतेयस्मात्तेनादृष्टमकारणम् ॥ जातस्यैवयतस्तस्मादजातेदृश्यतेनहि ॥ नरशृंगेनतद्दृष्टंसदाजन्मविवर्जिते ॥ ६३२ ॥

र्जायतेकिंत्वपूर्वएवस्वभावतःप्रादुर्भवतितत्रकिंमूलविचारेणेतिप्रथमपदेनशंका तदुत्तरंनेति नैवंवाच्यमित्यर्थः तत्रकृतनाशाकृताभ्यागमप्रसंगंदोषमाह यस्मादित्यादिना यस्मात्तेनाजातस्यैवोत्पत्तिस्वीकर्तृमतेनादृष्टंधर्माधर्मात्मकमकारणमप्रयोजकंव्यर्थमितियावत् एतादृशं स्यात् नचैतदिष्टमितिशेषः कथंतर्ह्यदृष्टस्यसाफल्यंनिर्वहतीत्यतआह जातस्यैवेति यःपूर्वंजातःसएवपुनर्जायतइतिस्वीकारेहिअदृष्टरूपकारणस्यतत्कार्याणांचसामानाधिकरण्यंनिर्वहतिनासतउत्पत्तौ यतोऽसताकार्येणनादृष्टस्यसद्रूपस्यसंबंधोभवतीतिभावः तददृष्टंपूर्वंजातस्यैवधर्मःस्यादुपपद्येतयतोऽजातेकदाचिदप्यननुभूतोत्पत्तिकेवर्त्तमानंनदृश्यतेयथानृशृंगेइत्यर्थः ॥ ६३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वस्तुतर्हिशरीरादृष्टयोर्बीजांकुरवत्कार्यकारणभावः नचानवस्थादोषः अनादित्वस्यतद्दोषाङ्कुशत्वेनसिद्धांतितत्वादित्याशंकांवारयति शरीरेणेतिद्वाभ्यां शरीरादृष्टयोर्बीजांकुरवत्परस्परापेक्षयायाएषाकार्यकारणसंगतिःकार्यकारणभावसंबंधःसोऽनादित्वाददुष्टइतिनवाच्यं तत्रहेतुर्दृष्टांतवैषम्यरूपोयतइत्यादिनोक्तः यतएतस्यांदृष्टांतभूतायांबीजांकुरयोःपरंपरायांपृथिवीबीजांकुरयोर्धर्मयोर्धर्मिभूतानुगताद्दृश्यतेदार्ष्टांतिकेतुनकिंचिद्दृश्यतेइत्यर्थः अयंभावः सत्यमनादिरनवस्थानदोषायययदिसाप्रामाणिकीस्यात् प्रामाणिकीहिदृष्टांते तत्रधर्मयोःकार्यकारणभावनिर्वाहकस्यपृथिवीरूपधर्मिणःप्रत्यक्षादिसिद्धत्वात् दार्ष्टांतिकेतुदेहादृष्टयोर्धर्मीनलौकिकमानसिद्धः एवमपितत्स्वीकारेंधपरंपरादोषापत्तिरितिद्वयोरर्थः ॥ ६३३ ॥ ६३४ ॥ फलितमाह अदृष्टेति एवंप्रकारांतरेणानुपपत्तौसत्यामदृष्टदेहयोःकार्यका

शरीरेणविनानैतददृष्टंजायतेक्वचित्॥ अदृष्टेनविनानैतत्शरीरंचद्विजोत्तमाः॥ ६३३ ॥ बीजांकुरादिवन्नैषा
कार्यकारणसंगतिः॥अनादिर्यतएतस्यांपृथिव्यनुगतास्तिहि॥६३४॥ अदृष्टदेहयोःकिंचिद्वर्ततेनुगतंद्विजाः॥
कारणंमूलभूतंतत्पृच्छाम्यद्यसमागतान्॥ ६३५ ॥ अदृष्टदेहयोर्हेतुःकोन्वेनंजनयेत्पुनः॥ परित्यक्तापुरादृष्टश
रीरंवृक्षवन्नरम् ॥ ६३६ ॥एवंपृष्टास्तदाविप्राःकारणंनप्रपेदिरे॥ विज्ञानंजडवर्गस्यसदासदसदात्मनः॥
आनंदंदुःखतोभिन्नंहेम्नोदातुःपरायणम्॥ ६३७ ॥

रणयोर्धर्मितयानुगतंकिंचित्कारणंवैदेकमानसिद्धमस्ति यदेवसर्वजगतोमूलभूतंतस्यस्वरूपंलक्षणंचसमस्तान्ब्राह्मणान्प्रतिपृच्छामीति ॥ ६३५॥ उक्तप्रश्नस्यैवनिष्कर्षमाह अदृष्टदेहयोरिति अदृष्टदेहयोर्हेतुरुपादानभूतःकोनुएनंनरंवृक्षसमंजनयितुंशक्तोस्तिपुरापुरातनमदृष्टंशरीरंचवर्णितदोषंवर्जयित्वासहेतुर्वक्तव्यइति ॥ ६३६ ॥ एवमिति एवंपृष्टाद्विजाजगतःकारणंनप्रपेदिरेनज्ञातवंतः तन्निरूपणंचदूरनिरस्तमितिपराजितावभूवुरितिभावः श्रुतिस्त्वधिकारिणांहितायजगत्कारणस्यस्वरूपतटस्थलक्षणेवदतीत्याह विज्ञानमिति विज्ञानानंदौस्वरूपलक्षणं हेम्नोरातिपदोक्तस्यदातुःपरायणत्वंफलप्रदानेप्रतिभूसमत्वंसर्यादाविधारकत्वमितियावत् तत्तटस्थलक्षणमिति विवेकः ॥ ६३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंश्रुतिसिद्धेकारणेसतिशरीरस्यवृक्षसाम्यंसम्यगुपपन्नमस्यापिबीजसमस्यसूक्ष्मशरीरस्यक्षेत्रस्थानीयस्यचकारणाज्ञानस्यलाभादित्या
ह वृक्षस्येतिद्वाभ्यां यथावृक्षस्यसमूलस्यनाशेऽप्यत्रपुनर्वृक्षोत्पत्तौबीजानिकारणंभवंतितथापुंसःस्थूलशरीरनाशेपिसूक्ष्मंशरीरंकारणंभवे
दिति ॥ ६३८॥ बीजानामिति यथाबीजानामपिनाशेऽदर्शनेसतिभूमिस्तिष्ठतितथासूक्ष्मशरीरनाशेप्यज्ञानंसुषुप्तप्रलययोरवशिष्यतइत्य
 र्थः ॥ ६३९ ॥ नन्वेतत्साम्यमुक्तलक्षणपरमात्मनोऽनभ्युपगमेपिकथंनोपपद्येतेतिशंकांपंचभिर्वारयन्सूक्ष्मस्यस्वोत्पत्तौपरमात्मापेक्षांताव
द्दर्शयति अदृष्टमितिद्वाभ्यां यथाबीजानांवृक्षस्यभवनेतत्तद्वृक्षाकारपरिणामेकारणंव्यवस्थापकंनिमित्तमदृष्टंप्रत्यक्षादिप्रमाणैरविषयीकृ
तमेवंसूक्ष्मशरीरस्यस्थूलरूपेणपरिणामेपिव्यवस्थापकंतथेत्यर्थः तथाचव्यवस्थापकतयासूक्ष्मशरीरस्यपरमात्मापेक्षेतिभावः ॥६४०॥ न

वृक्षस्यमूलतोनाशेभवेदत्रहिकारणम् ॥ बीजानितद्वदस्यापिपुंसःसूक्ष्मशरीरकम् ॥ ६३८॥ बीजानांहिय
थानाशेतिष्ठेद्भूमिःसदातथा॥ सुप्तौसूक्ष्मस्यदेहस्यनाशेऽज्ञानंव्यवस्थितं॥६३९॥ अदृष्टंकारणंयद्वद्वृक्षस्यभ
वनेसदा॥ बीजानांसूक्ष्मदेहस्यतद्वत्स्थूलजनौहितत् ॥६४०॥ पृथिव्यांबीजलाभेहिकारणंबीजसंस्कृतिः॥
अज्ञानस्यापिसूक्ष्मत्वेकारणंसूक्ष्मसंस्कृतिः॥ ६४१॥ पृथिवीयद्वदेवैषासर्वापिनभसिस्थिता ॥ अज्ञानंतद्व
देवैतद्विज्ञानात्मन्यवस्थितम्॥ ६४२ ॥ अमूर्तेयद्वदाकाशेदृश्यतेमूर्तसंश्रयः॥ विज्ञानेतद्वदेवस्यादज्ञानस्य
समाश्रयः॥ ६४३॥

केवलंसूक्ष्मस्योक्तविधयैवपरमात्मनोऽपेक्षाकिंतुसूक्ष्मनिमित्तानांसंस्काराणामालोचकत्वलक्षणकर्तृत्वेनापीत्याह पृथिव्यामिति यथा
पृथिव्यांपतितानांबीजानांकार्यद्वारालाभेज्ञानेकारणंप्रयोजिकाबीजानांसंस्कृतिःसंस्कारभावेनावस्थानमितियावत् एवंकारणस्याज्ञा
नस्यसूक्ष्मत्वेतत्तत्सूक्ष्मशरीराकारपरिणामेप्रयोजिकासूक्ष्मशरीराणांसंस्कृतिरिति तेचसंस्काराईश्वरातिरिक्तेनदुर्ज्ञेयाइतिभावः ॥६४१॥
अथाज्ञानस्यपरमात्मापेक्षांदर्शयति पृथिवीतित्रिभिः यथासर्वावकाशदेनभसिपृथिवीस्थितातथाचिद्रूपेआत्मन्यज्ञानंस्थितमिति नहि
जडेऽज्ञानंस्थातुमर्हतिपश्चाद्भावित्वात्तत्रावरणकृत्याभावाच्चेतिभावः ॥ ६४२ ॥ एतत्स्फुटयति अमूर्तेइति अमूर्तेघनीभावहीने संश्रय
समाश्रयशब्दावत्रस्थितिवाचकौ ॥ ६४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तविचारफलमाह स्वशब्दइति तस्मात्सुखेयःस्वशब्दोदृष्टःप्रयुज्यमानःअसौस्वीयेआत्मीयरूपार्थेवर्तमानोनभविष्यतिकिंत्वात्मरूपार्थेएवेत्यर्थः तत्रोपपत्तिमप्याह तथाचेति तथासतिसुखवृत्तिस्वशब्दस्यात्मरूपार्थपरत्वेसतिसुखात्मनःसंबंधस्तादात्म्यरूपोनित्यःस्यात् तथाचसदात्मनिनिरतिशयप्रेमोपपत्तिरितिभावः ॥ ६५२ ॥ एतदेवव्यतिरेकेणद्रढयति अनित्यइति यद्यात्मनस्सुखसंबंधोऽनित्यःस्यात्तदाकदाचिदात्मनिप्रतिकूलताद्वेषविषयतापिभवेत्सातुकदापिकस्यचिदपिनदृश्यतइति ॥ ६५३ ॥ ननुसंबंधस्यनित्यत्वेपिभेदघटितसमवायरूपत्वमस्त्वित्याशंकांवारयति नित्येचेति नित्येसंबंधेन्विष्यमाणेसुखात्मनोःकल्पिताकल्पितभेदाभेदात्मकंतादात्म्यमेववक्तव्यंनापरोभेदघटितःसमवायः यतोनेतिनेतीतिश्रुतिरात्मनोन्यंभिन्नंवस्तुजातमपाकरोदिति ॥ ६५४ ॥ आत्मनइति आत्मनइतिपदंपूर्वान्वयित्वे

स्वशब्दोयःसुखेदृष्टोनासौस्वीयेभविष्यति ॥ तथाचसतिसंबंधोभवेन्नित्यंसुखात्मनोः ॥ ६५२ ॥ अनित्येसतिसंबंधआत्मनःप्रतिकूलता ॥ भवेन्नदृश्यतेचैषाप्राणिनःकर्हिचित्क्वचित् ॥ ६५३ ॥ नित्येचसतिसंबंधेतादात्म्यान्नापरोभवेत् ॥ संबंधोनेतिनेतीतिश्रुतिरन्यमपाकरोत् ॥ ६५४ ॥ आत्मनस्ततएवैतद्विज्ञानंनात्मनःपृथक् ॥ पृथक्त्वेबुद्धिविज्ञानंसदृशंतज्जडंभवेत् ॥ ६५५ ॥ जडानांहिपरापेक्षानियतात्रघटादिषु ॥ परापेक्षमविज्ञानंघटादिवददोभवेत् ॥ ६५६ ॥

नव्याख्यातम् ततएवनेतिनेतीतिश्रुतिभयादेवविज्ञानमपिनात्मनोभिन्नंतत्समवेतमितिमंतव्यंकिंत्वात्मरूपमेव एतेनार्शआद्यजंतत्वकल्पनापरास्ता नकेवलंश्रुतिभयादेवविज्ञानस्यात्मरूपताकिंतूपपत्तेरपीत्याह पृथक्त्वइति विज्ञानस्यपृथक्त्वेस्वीक्रियमाणेतद्वदात्मलक्षणभूतमपिविज्ञानंजडंस्याद्यथाबुद्धिरूपंगौणंज्ञानमित्यर्थः ॥ ६५५ ॥ तथाचानवस्थाविज्ञानत्वत्यागश्चदोषःस्यादित्याह जडानामिति जडानांस्वनिर्वाहायपरापेक्षानियताअवश्यंभाविनीदृष्टायथाघटे तथाचोत्तरोत्तरंविज्ञानकल्पनायामनवस्था किंचपरापेक्षाणांघटादीनामविज्ञानत्वस्यविज्ञानभिन्नत्वस्यदर्शनाददआत्मलक्षणभूतंविज्ञानमपिअविज्ञानंभवेदतःस्वप्रकाशात्मरूपमेवेष्टव्यमित्यर्थः ॥ ६५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मप्रयोगतात्पर्यमाह विज्ञानानंदेतित्रिभिः विज्ञानाभिन्नानंदरूपोयआत्मासस्सर्वजडवर्गकल्पितत्वस्फुटीकरणायब्रह्मपदेनोक्तइतिकथं ब्रह्मपदप्रयोगेणाध्यस्तत्वंस्फुटीक्रियतइतिचेदित्थं ब्रह्मशब्दस्त्रिविधपरिच्छेदहीनत्वलक्षणनिरतिशयमहत्त्वप्रतिपादकः यदिजडजातंसत्यं स्यात्तदातन्निष्ठान्योन्याभावप्रतियोगित्वलक्षणवस्तुपरिच्छेदापत्तिःस्यादित्यतःस्वबोध्यभिन्नस्यमिथ्यात्वंबोधयतीति ॥ ६५७॥ तत्रसजातीयभेदस्यौपाधिकत्वेनाध्यस्तत्वंदृष्टांतत्वेनस्फुटयति यथैकस्मिन्निति यथैकमेवशारीरंनभस्तत्रकर्णनासाद्युपाधिभिर्भेदकल्पनातथैकस्मिन्नेवब्रह्मण्यज्ञानाद्युपाधिभिर्भेदकल्पनेति ॥ ६५८ ॥ विजातीयभेदस्याध्यस्तत्वमुपाधीनामध्यस्तत्वबोधनद्वारासदृष्टांतमाह असन्नेवेति यथाकाशेमायाविनानिर्मितेमायामयवपुषिउपाधौसतिमायिनोयआकाशादौभेदस्तत्रमायाविनिवाऽऽकाशादेर्भेदःसोऽसन्नेव उ

विज्ञानानंदरूपोयमात्माब्रह्मगिरोच्यते॥ अध्यस्तत्वप्रसिद्ध्यर्थंजडजातस्यसर्वतः ॥ ६५७॥ यथैकस्मिन्नभस्येषाकर्णनासादिकल्पना॥ ब्रह्मण्येवमिहैकस्मिन्नज्ञानादिप्रकल्पना॥ ६५८ ॥ असन्नेवयथाभेदोमायावपुषिमायिनः॥ तत्रवानभसोयद्वद्ब्रह्मण्येवंहिसस्मृतः ॥ ६५९॥ इदंविशुद्धंचैतन्यसुखंब्रह्मनकारणं॥ किंतुमायासमेतंतत्सर्वज्ञंसर्वशक्तिच॥ ६६० ॥ एतद्दर्शयितुंवेदोवदान्यानांपरायणम् ॥ कर्मणांफलदानेचदेहकारणमब्रवीत्॥ ६६१ ॥

पाधेरपिकल्पितत्वात्तथाज्ञानाद्युपाधीनांकल्पितत्वात्तत्प्रयुक्तोभेदोब्रह्मण्यसन्नेवेतिस्वगतभेदस्याध्यस्तताविज्ञानानंदैकरसत्वप्रतिपादनेनसूचितेत्यपिबोध्यम् ॥ ६५९ ॥ रातेर्दातुःपरायणमित्युक्तेस्तात्पर्यमाहेदमितित्रिभिः इदंनिरूपितंविज्ञानानंदैकरसंयद्ब्रह्मतद्विशुद्धंजगतःकारणंनभवतिकिंतुमायोपाधिकंसर्वज्ञत्वादिशाल्येवसत्कारणमेतत्तात्पर्यंदर्शयितुंवेदःप्रकृताश्रुतिरेवमब्रवीत् एवंकथं वदान्यानां धनदानपराणांसंबंधीनियानिकर्माणितेषांफलदानेयत्परायणंप्रतिभूसमंजगद्विधारकंतद्देहस्यतत्प्रभृतिजगतःकारणमितिद्वयोरर्थः नहिशुद्धस्यकर्मफलदत्वमितिभावः ॥ ६६० ॥ ६६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमालंबनवाचकेपरायणशब्देपरपदप्रयोगाशयमाह तत्रापीति तत्रापिमायायाअपिकारणबोधनायमायाशबलस्यकारणत्वोक्तावपिइयमनुपपत्तिर्भासते इयंका यन्मायाचैतन्यसत्तांविनाआत्मानमपिधारयितुमशक्ताकथंप्रपंचनिर्वाहेशक्तास्यादिति एतस्याअनुपपत्तेरनुसंधानेनजडस्यावरणात्मनोमायासंज्ञस्याहेतुतांअनुपपन्नांहेतुतांमत्वावेदोयत्केवलंब्रह्मतदेवपरायणमित्यब्रवीत् तस्यैवाधिष्ठानत्वेनसर्वनिर्वाहकत्वादितिभावः ॥ ६६२ ॥ शुद्धस्यब्रह्मणोनकेवलंमायायाअधिष्ठानत्वेनपरायणत्वंकिंतुमुक्तंप्रत्यपिपरायणमित्याह अनेनेति एवमत्रान्वयः तत्केवलंब्रह्मतस्यापिविदुषःपरायणं तस्यकस्य यस्तिष्ठमानस्यतद्विदइत्यनेनश्रुतिवचसाइत्थंप्रतिपादितइतिशेषः इ

तत्राप्यहेतुतांमत्वाजडस्यावरणात्मनः ॥ परायणंपरंब्रह्मप्रोक्तवान्केवलंहियत् ॥ ६६२ ॥ अनेनवचसावेदतिष्ठमानस्यतद्विदः ॥ आत्मानंयःप्रकाश्यास्तेब्रह्मचर्यादिसाधनः ॥ ब्रह्माहमितितस्यापिस्यात्तद्ब्रह्मपरायणम् ॥ ६६३ ॥ ब्रह्मविज्ञानमानंदंकर्मणांफलदातृच ॥ ब्रह्मवित्स्वात्मरूपंचनविदुःकारणंद्विजाः ॥ ६६४ ॥ याज्ञवल्क्येनपृष्टास्तेकोन्वेनंजनयेदिति ॥ अस्माभिस्तुमहाभागश्रुतंवेदस्यवाक्यतः ॥ ६६५ ॥

त्थंकथं योब्रह्मचर्यादिसाधनसंपन्नःसन्ब्रह्माहमित्यात्मानंप्रकाश्यनिरावरणंकृत्वाआस्तेब्रह्माहमितिवेदचेति अत्रतिष्ठमानस्येत्यात्मनेपदंप्रकाशनस्थेयाख्ययोरितिसूत्रेणेतिसूचयितुंप्रकाश्यास्तेइतितदर्थउक्तः ब्रह्माहमितिवेदेतितद्विदइतिपदस्यार्थउक्तइतिविवेकः॥ ६६३॥ प्रकृतवाक्यस्यसंपिण्डितमर्थमाह ब्रह्मेति यद्ब्रह्मविज्ञानानंदरूपंमायोपाधिकंकर्मणांफलदातृकेवलंतुब्रह्मविदःस्वात्मभूतंचतदेवजगतःकारणमित्येवंद्विजानविदुः कीदृशाः कोनुएनंजनयेदितियाज्ञवल्क्येनपृष्टाः अस्माभिस्तुअधिकारिभिःकेवलमनुग्रहेणवदतोवेदस्यवाक्यात्श्रुतमितिद्वयोःसंबंधः ॥ ६६४ ॥ ६६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिहासमुपसंहरन्नुत्तराध्यायजिज्ञासामुत्थापयति एवमितित्रिभिः याज्ञवल्क्योधीमंतापुरतःस्थितोऽग्रगण्यःगवांछलेनगवामाश्रमंप्रति
प्रेषणरूपनिमित्तव्याजेनब्राह्मणान्सर्वान्जित्वाविदग्धंदग्ध्वाचजनकायउत्सुकायश्रद्धालवेज्ञानमुपदिष्टवानितित्रयाणांसंबंधः ॥६६६॥

एवंमहानुभावःसएषवाजसनेयकः ॥ याज्ञवल्क्यःसूर्यशिष्योधीमतांहिपुरःस्थितः ॥ ६६६ ॥ गवांछलेनजि
त्वैवंब्राह्मणान्पृथिवीगतान् ॥ विदग्धंभस्मसात्कृत्वाब्रह्मविद्वेषकारिणम् ॥ ६६७ ॥ मिथिलापतयेराज्ञेजन
कायोत्सुकायहि ॥ सूर्योक्तंदिष्टवान्ज्ञानंयत्स्वयंपृष्टवान्द्विजान् ॥ ६६८ ॥ इतिश्रीमत्परमहंसपरिव्राजका
चार्यानंदात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेबृहदारण्यकेयाज्ञवल्क्य
कांडसारार्थप्रकाशेऋषियाज्ञवल्क्यसंवादोनामपंचमोध्यायः ॥ ५ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ६६७ ॥ ६६८ ॥ अज्ञानामपिविज्ञानांयएकोसिपरायणम् सच्चिदानंदरूपायसर्वज्ञायेशतेनमः ॥इतिश्रीदत्तकुलतिलककृष्णचंद्रात्म
जदिलारामसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतौआत्मपुराणटीकायांसत्प्रसवाख्यायांपंचमोऽध्यायः ॥ ५ ॥
ग्रंथसंख्या ॥ २५५० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे पंचमोऽध्यायःसमाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे षष्ठाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः यःषष्ठःपञ्चभूतानिसंवर्धयतिरश्मिभिः मुनिनावर्णितःषष्ठेसषष्ठेनःप्रसीदतु अस्यार्थः यःपरमात्मासिद्धांतेषष्ठतत्त्वात्मको रश्मिभिःसत्ताद्यंशैस्तत्त्वांतराणिवर्धयतिसमुनिनायाज्ञवल्क्येनारण्यकषष्ठाध्यायेवर्णितोनोधिकारिणामिन्द्रियपंचकापेक्षयाषष्ठेंतःकरणेअत्राध्यायेवाप्रसीदतुआविरस्तुइति ॥ अथजिज्ञासोःशिष्यस्यप्रश्नंतत्समाधानप्रतिज्ञांचगुरोर्वर्णयति एवमितिसप्तभिः ॥ १ ॥ श्रुतंसंक्षेपेणानुवदति भगवन्निति ॥२ ॥ तदेवविस्तरेणानुवदन् प्रथमाद्यध्यायचतुष्टयार्थंसंवादचतुष्टयेनाह अधिकारीति ॥ ३ ॥ पंचमाध्या

श्रीगणेशायनमः॥ एवंगुरुमुखाच्छ्रुत्वाशिष्योनानाविधाःकथाः॥ आत्मविज्ञानसंबद्धाःपप्रच्छस्वगुरुंपुनः ॥१॥ भगवन्भवताख्यातमैतरेयसमीरितं॥ ज्ञानंकौषीतकिप्रोक्तंतथादित्यसमीरितं ॥ इतिहासैस्तथाख्यानैः सहितंविविधैरपि ॥ २॥ अधिकारिजनाख्यानंतद्वदैंद्रप्रतर्दनम् ॥ अजातशत्रुगार्ग्याख्यंदध्यङ्ङाथर्वणंतथा ॥ ३ ॥ आख्यानंयाज्ञवल्क्यस्यविप्रसंवादरूपभृत्॥ विविधंचात्मविज्ञानमत्रसर्वत्रकीर्तितम्॥ ४॥ यदुक्तं याज्ञवल्क्येनजनकायमहीभुजे॥ ज्ञानंतच्छ्रोतुमिच्छामिभगवंस्त्वत्प्रसादतः ॥ ५॥ एवमुक्तेगुरुःप्राहशिष्यं स्नेहसमन्वितः॥ जनकाययथाज्ञानंयाज्ञवल्क्योयदुक्तवान्॥६॥ शृणुवक्ष्यामितत्सर्वमुक्तवान्यन्मुनीश्वरः॥ जनकायस्वशिष्याययाज्ञवल्क्योव्यगाधधीः॥ ७॥ शाकल्येनिधनंप्राप्तेब्राह्मणेषुजितेष्वथ॥ व्युष्टायामपिशर्वर्यामुदितेरविमंडले ॥ ८ ॥ वादित्रैर्विविधैस्तद्वद्वंदिभिर्मधुरस्वरैः ॥ अप्सरःसदृशस्त्रीभिर्नानानीराजनैरपि ॥ ९ ॥ मुक्तनिद्रोमहाराजःकृतपौर्वाह्णिकक्रियः॥ ब्राह्मणानांचवृद्धानांपरिगृह्यजयाशिषः॥ १०॥ वादित्राणांविचित्राणांघोषैर्गांधर्वमिश्रितैः॥ सर्वालंकारसंपन्नोव्यगादेषसभांप्रति॥ ११॥ प्रवालमणिरत्नौघहैमराजतनिर्मितां॥ सुधर्मासदृशींभाभिर्भासयंतींदिशोदश॥ १२॥

यार्थमनुवदति आख्यानमिति ॥ ४ ॥ यदुक्तमित्यादित्रयंस्पष्टम् ॥ ५ ॥ ६ ॥ ७ ॥ तत्रप्रथमकंडिकार्थमुपबृंहयति शाकल्यइत्यादिसप्तत्रिशच्छ्लोकैः व्युष्टायांप्रभातभावंप्राप्तायां एवंसतिवादित्राद्यैर्मुक्तनिद्रोराजाजनकोब्राह्मणाद्याशिषःपरिगृह्यवाद्यघोषैरुपलक्षितःसभामगादितिचतुर्णांसंबंधः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ सभांविशिनष्टि प्रवालेति ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्रइति तस्यांसभायांजनकोराजाउपविष्टवान् ॥ १३ ॥ कालइति अस्मिन्राज्ञःसदस्युपवेशनोपलक्षितेकालेतत्रराजसदसियाज्ञव
ल्क्यआगतः किंकृत्वा शिरोविशिष्टगायत्रीमंत्रेणस्वगुरुमादित्यमाराध्यपौर्वाह्णिकीःपूर्वाह्णेविहिताःक्रियाःसमाप्यचेतिद्वयोरर्थः ॥१४॥
॥ १५ ॥ तमिति ॥ १६ ॥ प्रवालेति विद्रुमादिविभूषितंमृदुलमासनमदाच्चेति ॥ १७ ॥ उपविष्टइति तत्रासनेउपविष्टोमुनीराजानंस
भ्यांश्चैवमन्वजानात्आज्ञप्तवान् एवंकथं वर्णिभिस्त्रैवर्णिकैःराज्ञाचस्वस्वासनेषूपविश्यतामिति ॥ १८ ॥ इत्युक्तेइति ॥ १९ ॥ अतिथि

चित्रेसिंहासनेतस्यामासांचक्रेजनेश्वरः॥ विदेहोजनकोधीमांस्त्रैवर्णिकजनैर्वृतः॥ १३॥ कालेस्मिन्नागत
स्तत्रसूर्यशिष्योमहायशाः॥ आराध्यस्वगुरुंदेवंसावित्र्याशिरसासह॥ १४॥ पौर्वाह्णिकीःक्रियाःकृत्वाशि
ष्यैःसर्वैःसमावृतः॥ चतुर्वेदार्थिभिर्याज्ञवल्क्योवाजसनेयकः ॥ १५ ॥ तमागतंतदाराजात्रैवर्णिकजनैर्वृ
तः॥ अभ्युत्थानार्घ्यपाद्याद्यैरर्चयामासधर्मवित्॥ १६॥ प्रवालमणिरत्नौघमंडितंकनकोद्भवं॥ आसनंमृदु
लंचादात्मुक्तादामविभूषितम्॥ १७॥ उपविष्टस्तदातस्मिन्नासनेमुनिसत्तमः॥ अन्वजानात्सराजानंसर्वां
स्त्रैवर्णिकानपि॥ वर्णिभिश्चतथाराज्ञास्वासनेषूपविश्यताम्॥ १८॥ इत्युक्तेराजसहितावर्णिनोहृष्टचेतसः॥
स्वासनेषूपविष्टास्तेनमस्कृत्यमुनीश्वरम्॥ १९॥ अतिथिंमाननीयंतंराजाविनयसंयुतः॥ उवाचेदंनमस्कृत्य
धर्मयुक्तंतदावचः॥ २०॥ ब्राह्मणाएवलोकेस्मिन्दैवंनापरमीरितम्॥ प्रभवंतियतस्त्वेतेसृष्टिस्थित्यंतकर्म
णि॥ २१॥ देवानामपिकिंचान्यज्जंतूनांदेहधारिणां॥ परमात्मायथाशक्तस्तथैवैतेद्विजोत्तमाः॥ २२॥ सर्व
भूतसमाःशांतादांताविगतमत्सराः॥आप्तकामामहात्मानोभूतानुग्रहचेष्टिताः॥ विचरंतिमहीमेतांव्याजंकिं
चिद्विधायहि॥ २३॥

मिति तंयाज्ञवल्क्यंमानार्हमतिथिंप्रतिइदंवक्ष्यमाणंवचोब्रवीत्
कीदृशं धर्मयुक्तं वाक्चतुर्थींचसूनृतेतिधर्मशास्त्रेणविहितं ॥ २० ॥ राजवाक्यमभिनयति ब्राह्मणाइत्यादिना अत्रलोकेब्राह्मणाएव
परमदैवतंयतएतेदेवानामपिसृष्ट्यादौप्रभवंतिशक्ताभवंतिपरमात्मवत्किमुतान्यजंतूनामितिद्वयोरर्थः ॥ २१ ॥ २२ ॥ सर्वेति सर्वभूतसम
त्वादिनापूर्णकामाअपिभूतानुग्रहायैवविचरंति विचरणहेतुंपृष्टाश्चप्रयोजनांतरंप्रख्यापयंतीत्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याजंस्फुटयति पश्विति केचित्पृष्टाःपश्वादिलाभायचरामइतिवदन्तिकेचित्तुसत्संवादेनतत्त्वनिर्णयायचरामइतिवदन्तीत्यर्थः ॥ २४ ॥ अहंत्वेवंमन्येइत्याह भूपतीनिति संसाराब्धौमज्जतोभूपतीनुद्दिधीर्षवउद्धर्तुमिच्छंतएवभवादृशाश्चरंतीति ॥ २५ ॥ तत्रापिभवतःसुतरां निष्कामस्यमदुपकारायैवागमनमित्याह सूर्येतिद्वाभ्यां भवान्यतःसूर्यशिष्योज्ञानानंदरूपात्मगोचरेणविज्ञानेनापरोक्षानुभवेनसंपन्नो ऽतएवगतैषणश्चातस्तवलोकेकिंकार्यंप्रयोजनमस्तिनकिंचिदपितथापिमदुद्धरणमेवप्रयोजनमितिद्वयोरर्थः ॥ २६ ॥ २७ ॥ संसारदुःखमभिनयति अस्थीति अस्थीन्येवस्थूणाभूतानियत्रएतादृशंदुर्गंधंदेहमहंबुद्ध्यागृहीत्वाश्वेवस्थितोस्मीति ॥ २८ ॥ श्वदृष्टांतंस्फुटयति

पशुधान्यादिलाभाख्यंव्याजंसंपाद्यकेचन ॥ तत्त्वनिर्णयसंज्ञंचकेचित्तद्वन्महाधियः॥ २४॥ भूपतीन्मज्जतो गाधसंसारजलधिस्थितान्॥ उद्दिधीर्षवआयांतियाज्ञवल्क्यभवादृशाः॥ २५॥ सूर्यशिष्योभवान्किंतेकार्यं लोकत्रयेस्तिहि॥ ज्ञानानंदात्मविज्ञानएषणात्रयवर्जितः॥ २६॥ एकंकार्यमहंमन्येभवतोदीनवत्सल॥ अस्मिन्संसारपंकेमांसीदंतंत्रातुमागतः॥ २७॥ अस्थिस्थूणमिमंदेहंदुर्गंधंसुजुगुप्सितम्॥ अहंधियागृहीत्वाहंश्ववदत्रव्यवस्थितः॥ २८॥ जुगुप्सितशरीरस्थःकृमिकीटसमावृतः॥ कर्णपुच्छादिविकलोव्याधिभिःपरिपूरितः॥ २९॥ विष्ठादिग्धंयथाशुष्कमस्थिकिंचिन्निधायहि॥ दंतपंक्तौपरैर्वैरंबलिभिःकुरुतेश्वभिः॥ ततो दुःखंसमाप्नोतिप्राणांतंसुखवर्जितम्॥ ३०॥ अहमेवंमुनेदेहंगृहीत्वाराज्यकामुकः॥ स्थितोस्मिसुखलेशेन वर्जितोदुःखभाजनम्॥ ३१॥ क्षुधयापीडितोनित्यमग्निभूतान्यहंमुने॥ स्थावराणिचराण्यत्रपुरुषादोयथा नरान्॥ ३२॥

जुगुप्सितेतिद्वाभ्यां यथारुग्णःसकृमिःश्वाऽसदस्थिदंतेषुधृत्वाबहुभिर्वैरंकुर्वन्महादुःखमाप्नोतीतिद्वयोरर्थः ॥ २९ ॥ ३० ॥ दार्ष्टांतिके योजयति अहमिति ॥ ३१ ॥ स्वस्यदुःखभाजनतांसर्वव्यवहाराणांदुःखात्मतानिरूपेणेनविशदयति क्षुधयेतिनवभिः अहंक्षुधार्त्तःसन् स्थावराणिव्रीह्यादिरूपाणिचराणिनांतरीयकभक्षणानिघुनादीनिमृगादिरूपाणिवाअग्निभक्षयामिरक्षोवत् तथाचाभक्षणेक्षुद्दुःखंभक्षणे तुरक्षःसाम्यलाभोदुःखमेवमग्रेपिबोध्यमिति भोगेपरिणामादिदुःखमप्यनुसंधेयं ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामेति नारीकुणपंमृतशरीरसमंनारीशरीरं प्रेतंमृतशरीरं ॥ ३३ ॥ स्थावराणामिति स्थावराणांचंदनादीनांगात्रंघृष्ट्वादुर्गंधेस्वशरीरेस्था
पयामि तत्रदृष्टांतमाह निर्घृणइत्यादिना ॥३४॥ अहमिति अत्रापिअहननेमृगयारूपव्यसनंदुःखंहननेतुराक्षससाम्यमुक्तमेवेति ॥३५॥
तैलेति अत्रापिप्रजाभ्योद्रव्याऽनादानेलिप्सादुःखंबोध्यं यंत्रतःयंत्रेण ॥ ३६ ॥ नराणामिति करभाउष्ट्राः नरादीनांस्कंधान्पृष्ठानिचस्व
 स्यसोपकरणस्यभारेणबाधेपीडयामि तत्रोपजातगडुरोगवदित्यर्थः साम्यंपूर्ववत् ॥ ३७ ॥ अधइति स्पष्टम् ॥ ३८ ॥ रक्षयामीति अत्र
राज्येस्थितं ॥ ३९ ॥ पुत्रेति शोच्यस्तत्त्वविद्भिरयमज्ञःकांगतिंगमिष्यतीत्याकारेणशोचनीयः क्षुधादिदुःखमालोच्यभोगदशांराक्षसादिसा

कामग्रहसमाविष्टोनारीकुणपमाश्रये॥प्रेतंयथाश्मशानेषुपिशाचोदाहवर्जितम्॥३३॥स्थावराणामहंगात्रं
सुगंधंगंधलोभतः॥घर्षयित्वात्रदुर्गंधेस्थापयामिकलेवरे॥निर्घृणोत्रयथाकश्चिद्राक्षसोनरगात्रकम्॥३४॥
अहंहन्मिवृथाजंतून्मृगयायांविमोहितः॥तृणपर्णाशिनःशांतान्मुनीन्यद्वद्विराक्षसः॥३५॥तैलकारोयथातै
लंतिलान्निष्पीड्ययंत्रतः॥गृह्णातितद्वदेवाहंप्रजानांद्रव्यमाददे॥३६॥नराणांचगजानांचकरभाणांचवाजि
नाम्॥स्कंधपृष्ठानिबाधेहंरोगोयद्वद्विदुःसहः॥३७॥अधःस्थितेषुसर्वेषुवर्णिषूच्चासनंभजे॥प्रासादशिखरंय
द्वत्काकःकर्णोपतापनः॥३८॥रक्षयाम्यहमत्रस्थंद्रव्यंनानाविधंमुने॥महानिधिंयथासर्पःकोपसंरक्तलोच
नः॥३९॥पुत्रभार्यादिसंसक्तोयथायंग्रामसूकरः॥तथाहंमुनिशार्दूलशोच्यःशोच्यतमोधुना॥४०॥दुःखत्रय
त्रिशाखेस्मिन्स्वात्माज्ञानसमुत्थिते॥संसारशूलेपतितंमांपातुंत्वमिहार्हसि॥४१॥कथयाद्यमुनेव्याजंकिंत
आगमनेभवेत्॥राज्ञःपशूनवाप्स्यामिबहूनेवमुदीर्यकिं॥इहागतोसिसर्वेषांपुरतोद्विजसत्तम॥४२॥

म्यापादिकामालोच्यतुशोच्यतमः ॥ ४० ॥ एवंयस्यतत्त्वज्ञानस्यव्यतिरेकेनिकृष्टैरविशेषस्तस्यतत्त्वज्ञानस्योपदेशेनमामुद्धरेत्याशयेना
ह दुःखेति अध्यात्मादिदुःखत्रयमेवत्रिशाखंशाखात्रयंयस्यएतादृशेऽज्ञानरूपलोहजेसंसारशूलेपतितंमांत्रातुमेवागतोसीति ॥ ४१ ॥ ए
वमागमनाभिप्रायोमयाज्ञातएवव्याजंतुद्विधाप्रसिद्धंनिरूपयेत्याह कथयेतिद्वाभ्यां सर्वेषांप्रष्टॄणांपुरतएवमुदीर्यकिमागतोसि एवंकथं
राज्ञोबहून्पशूनवाप्स्यामीति ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयंव्याजमभिनयति अथवेति ज्ञानशुद्धिःसंवादेननिर्णयभावः समागाआगतोसि ॥ ४३ ॥ एवमिति एवंपृष्टोयाज्ञवल्क्योजनकंराजानंहेसम्राडितिसंबोध्यपशुलाभज्ञानशुद्धिरूपमुभयंप्रयोजनमित्युक्तवानित्यर्थः ॥४४॥ अथद्वितीयादिषण्णामृचामर्थंसंकलय्यदर्शयन्सगुणब्रह्मोपासनंवक्ष्यमाणनिर्गुणविद्यासाधनमितिसूचयति एवमुक्तेतिदशभिः एवमुभयमित्याकारेणोक्त्वापुनरेवमुक्तवान् एवंकथं हेमहीपतेइतःपूर्वंविप्रः जातावेकवचनं तुभ्यंविवेकिनेयद्यज्ज्ञानमुपदिष्टवांस्तद्यदिरहस्यंनभवतितदाश्रावय श्रुत्वाचपुनरहंवक्ष्यामीत्यर्थः ॥४५॥ एवमुक्तइति एवंपृष्टोराजास्वस्मैयदनेकधामुन्यंतरेणनानासंज्ञकेनयद्यदुपदिष्टंज्ञानंतद्याज्ञवल्क्यायाहश्रावयामास ॥ ४६ ॥

अथवाज्ञानशुद्ध्यर्थंराज्ञोयास्याम्यहंसभां ॥एवमुक्त्वासमागास्त्वंयाज्ञवल्क्यमुनीश्वर॥४३॥एवमुक्तेसराजानमुभयंत्विति चोक्तवान्॥ सम्राडितिहिसंबोध्यजनकंमिथिलेश्वरम् ॥ ४४ ॥ एवमुक्त्वाचतंप्राहपुनरेवमुनीश्वरः॥ तुभ्यंबुद्धिमतेविप्रोयज्ज्ञानंकश्चिदब्रवीत्॥ तदहंश्रोतुमिच्छामिनचेद्गोप्यंमहीपते ॥ ४५॥ एवमुक्तोमुनिंप्राहयाज्ञवल्क्यंमहीपतिः॥ स्वात्मनेमुनिराहान्योविज्ञानंयदनेकधा ॥ ४६॥ जित्वाशैलिनिनामायस्तद्वत्शौल्वायनःपुनः॥ उदङ्काख्यस्तथावर्कुर्वार्ष्णिस्तद्वत्परोमुनिः॥ ४७॥ गर्दभीविपीतसंज्ञोभारद्वाजइतीरितः॥ जाबालःसत्यकामश्चविदग्धोयोस्मृतोधुना॥ ४८॥ एतेवैमुनयोविप्रषड्ब्रह्माण्यवदन्हिमे॥ वाग्घ्राणचक्षुःश्रोत्राणिमनोहृदयमेवच॥ ४९॥

पूर्वोपदेष्टृणामृषीणांषण्णांनामान्याह जित्वेति जित्वानाम्नाशिलिनसंज्ञकापत्यतयाशैलिनसंज्ञकश्चप्रथमः शुल्बसंज्ञकस्ययुवापत्यमुदङ्कसंज्ञोद्वितीयः वृष्णेरपत्यंवर्कुसंज्ञस्तृतीयः भारद्वाजगोत्रोगर्दभीविपीतसंज्ञश्चतुर्थः जबालायाःपुत्रःसत्यकामःपंचमः विदग्धःशाकल्यःषष्ठइतिद्वयोरर्थः॥ ४७॥ ४८ ॥ एतेइति हेविप्रएतेवर्णितनामकाःषट्षड्ब्रह्माणिसगुणब्रह्मणोरूपाणिवागाद्यात्मकान्यवदन्नुउक्तवंतइत्यर्थः अत्रेदंबोध्यम् वागादिशब्दाःक्रमेणदेवतानामग्निवायुसूर्यदिक्चंद्रप्रजापतीनांलक्षकाः उपासनंचसर्वेषांसमुच्चयेनैव देवान्प्राप्नोतीतिवह्न्देवभावप्राप्तेःफलस्योक्तेरिति ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 इत्युक्तेइति इत्युक्तेसत्यसौयाज्ञवल्क्यस्तानूवागादिदेवान्सर्वजगन्निर्वाहकत्वेनब्रह्मत्वेनोपास्यत्वायप्रशस्यतावतैवसंतोषवारणायतेषुए
कपात्त्वेनपादहीनत्वेनशैलिनिप्रभृतीनामुपदेशेषुन्यूनतामुक्त्वाथशैलिन्याद्यैरनुक्तंप्रत्येकंपादत्रयमुक्तवानित्यर्थः ॥ ५० ॥ वागादिदेवता
रूपएकःपादोदर्शितएवंशिष्टंपादत्रयंदर्शयति प्रत्येकमाश्रयमिति प्रथमपादरूपाणांवागादिदेवतानामाश्रयंकारणत्वेनाधारभूतंवागा
॥ ३ ॥ द्याध्यात्मिकमिद्रियंद्वितीयपादत्वेनोक्तवान् अथापरंतृतीयंपादंतुसर्वाश्रयमव्याकृताकाशादिपदैःप्रसिद्धमत्रश्रुतौप्रतिष्ठापदेनोक्तमुक्तवा
न् चतुर्थःपादस्तूपनिषद्रूपः उपनिषत्पदेनात्ररहस्यंनामोच्यते तानिचवागादिनामानिक्रमेणप्रज्ञाप्रियंसत्यमनंतमानंदःस्थितिरित्याका

इत्युक्तेतान्प्रशस्यासावेकपात्त्वेनषट्स्वपि ॥ न्यूनतामभिधायात्रपादत्रयमथाब्रवीत् ॥ ५० ॥ प्रत्येकमाश्रयं तद्वत्सर्वाश्रयमथापरम् ॥ षट्सूपनिषदःप्राहयाज्ञवल्क्यःफलैःसमम् ॥ ५१ ॥ एकैकस्मिन्नभिहितेचतुष्पादि महात्मना ॥ ब्रह्मण्युवाचराजामुंदातुंसगुरुदक्षिणाम् ॥ ५२ ॥ यस्मिन्हस्तिसमानोस्तिवृषभस्तत्सहस्रकम् ॥ तरुणीनांगवांतेहंदास्यामिगुरुदक्षिणां ॥ ५३ ॥ षड्वारमेवमुक्तोपिप्रत्युवाचमुनीश्वरः ॥ षड्वारंनाकृतार्थस्यशिष्यस्यगुरुदक्षिणा ॥ स्वीकार्याभवतीत्येवंपितामामुपदिष्टवान् ॥ ५४ ॥

राणिबोध्यानि तदुपासनफलानिचश्रुतावुक्तानीति अत्रप्रथमपादचिंतनेहिरण्यगर्भस्यस्मृतिर्द्वितीयेविराजस्तृतीयेईश्वरस्यचतुर्थेतुरी
यस्येतिप्रयोजनमपिबोद्ध्यमिति ॥ ५१ ॥ एकैकस्मिन्निति एवंवागादिरूपैश्चतुष्पादिपादचतुष्टयशालिनिब्रह्मणिषड्वारंमहात्मनाया
ज्ञवल्क्येनोक्तेसतिसजनकोगुरुदक्षिणांदातुमेवमुवाच एवंकथं हस्तिसमानऋषभयुक्तंगोसहस्रंतेगुरुदक्षिणांददामीतिद्वयोरर्थः ॥ ५२ ॥ ॥ ३ ॥
॥ ५३ ॥ षड्वारमिति एवंगुरुदक्षिणावाक्यंषड्वारमुक्तोयाज्ञवल्क्योमुनिःषड्वारमेवैवमाह एवंकथं यावच्छिष्यःकृतार्थोनभवतितावद्गुरुद
क्षिणानग्राह्येतिपितुरुपदेशमनुस्मृत्यनंगृह्णामीति एतेनोपासनामात्रज्ञानेनकृतार्थतानभवतीतिसूचितं ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मज्ञाने चित्तैकाग्र्यद्वारा उपकारकोपासनपरस्य प्रथमब्राह्मणस्यार्थं प्रदर्श्य द्वितीयस्य विस्तरेणार्थमुपबृंहयंस्तत्र प्रथमकंडिकाया अधिकारिलक्षणपराया अर्थं निरूपयति एवंतमितिपंचत्रिंशच्छ्लोकैः एवंनिर्लोभंस्वस्यानुग्रहकरंचमुनिंवीक्ष्यातिचकितोराजायस्यज्ञानेन कृतार्थताभवतितज्जिज्ञासमानःश्रुतौकूर्चपदोक्तंसिंहासनंत्यक्त्वादंडवत्प्रणम्यएतद्वक्ष्यमाणंवचआहेतिद्वयोरन्वयः ॥ ५५॥ ५६॥ राज्ञोजिज्ञासावाक्यमभिनयति याज्ञवल्क्येतिपञ्चभिः हेमुनेतुभ्यंनमोस्तु मामंधंसंसारकाननपतितंमार्गंपृच्छंतंचप्रतिमार्गंशाधिशिक्षयेति ॥ ५७ ॥ संसारस्योग्रकाननसाम्यंविशेषणैःस्फुटयति कंदर्पेतिद्वाभ्यां कंदर्पएवसर्पस्तेननानारूपेणव्याप्तेनार्यएवगर्तास्तैर्दुर्गमेइंद्रियरूपैर्व्यैर्जुष्टे अहंकारसिंहेनशब्दितेक्रोधएवआग्नेयास्त्रवन्हिस्तेननिर्दग्धाःचित्तभूमिरूपशाद्वलदेशोगुणरूपाःपादपाश्वयत्रएतादृशेसंसारकाननेइति

एवंतंलोभरहितंयाज्ञवल्क्यंमुनीश्वरं ॥ निरीक्ष्यानुग्रहकरंस्वस्यराजातिविस्मितः ॥ ५५ ॥ सिंहासनंपरित्यज्य भूमौस्थित्वाकृतांजलिः ॥ दंडवत्प्रणतोभूत्वामुनिमेतदभाषत ॥ ५६ ॥ याज्ञवल्क्यमुनेनित्यंनमस्तेस्तुमहामुने ॥ मामंधसदृशंशाधिमार्गमावृत्तिवर्जितम् ॥ पृच्छंतमज्ञंपतितंघोरेसंसारकानने ॥ ५७ ॥ कंदर्पसर्पसंवीतेनारीगर्तसमाकुले ॥ अनेककरणग्रामव्यककोटिनिषेविते ॥ ५८ ॥ अहंकारमहासिंहनादपूर्णदिगंतरे ॥ क्रोधास्त्रवह्निनिर्दग्धसर्वशाद्वलपादपे ॥ ५९ ॥ मनःकौलेयकंहस्तेगृहीत्वामृत्युलुब्धकः ॥ कालेधनुषिसंधायजराव्याध्यादिकान्शरान् ॥ मुक्त्वात्रबाधतेसर्वान्जंतून्काननवासिनः ॥ ६० ॥ यावत्प्राणहरोबाणोममनायातितावता ॥ शाधिशीघ्रंविलंबस्यनायंकालोमुनीश्वर ॥ ६१ ॥ एवमुक्तेकृपाविष्टोदयालुःसनिसर्गतः ॥ याज्ञवल्क्यस्तमाहेदंराजानमधिकारिणम् ॥ ६२ ॥

द्वयोरर्थः ॥ ५८ ॥ ५९ ॥ तत्रपरमभयप्रदंमृत्युंव्याधत्वेननिरूपयति मनइति मनोरूपःश्वायस्याधीनएतादृशोमृत्युरूपोव्याधःक्षणलवाद्यात्मककालरूपेधनुषिजराव्याध्यादिरूपान्शरान्संधायमुंचन्जंतून्मृगान्निघ्नन्क्रीडते तस्यचबाणोमदभिमुखंयावन्नायातितावत्त्वरितंशाधिइतिद्वयोरर्थः ॥ ६० ॥ ६१ ॥ एवमुक्तइति एवमुक्तःप्रार्थितोनिसर्गतःस्वभावेनदयालुत्वात्कृपाव्याप्तचित्तोराजानमधिकारिणंपरीक्षमाणइदंवक्ष्यमाणंवचआहेति यद्ययंकुतर्कादिनापृच्छतितदाश्रद्धामांद्यान्नाधिकारितायदात्वज्ञानात्तदाश्रद्धोत्कर्षादुत्तमइत्याशयोमुनेरितिबोध्यम् ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुनिवाक्यमभिनयति मार्गइतिसप्तभिः हेराजन्भवतापृष्टोमार्गस्तावद्वक्तुंनशक्यतेयावत्त्वदिष्टंगंतव्यंनज्ञायते तस्मात्त्वमादौस्वाभिमतंगंतव्यंनिरूपयेतिभावः ॥ ६२ ॥ त्वयाविज्ञातानिकर्माणिउपासनानिचसत्त्वशुद्धिद्वाराकस्यचिद्गंतव्यस्यप्राप्तिसाधनान्येवतैःप्राप्यंजानासिचेद्वदेत्याह राजन्नितिचतुर्भिः हेराजन्यथादूरंमार्गंगच्छन्जनःस्थलेरथंजलेनावंचगतिसाधनतयाआददीतगृह्णीयात्तथाभवानुपनिषदोरहस्यानिनामानितदुपलक्षितान्युपासनानीतियावत्उपाददातीतिसंबंधः ॥ ६४ ॥ वागादिषड्ब्रह्मणांनामानिदर्शयति प्रज्ञेति इष्टप्राप्तिसाधनत्वेनरथनौभ्यांसदृशस्तुल्यास्तवैताइति ॥ ६५ ॥ आढ्यइति एतैःसाधनैराढ्यःसम्पन्नःअतएवदेवसंपच्छालित्वाद्देववन्मान्यः

मार्गोत्रभवतापृष्टःशक्योवक्तुंमयानहि ॥ अविज्ञायहिगंतव्यंयत्स्यादभिमतंतव ॥ ६३ ॥ राजन्जनोयथागच्छन्दूरंमार्गंस्थलेजले ॥ आददीतरथंनावंतथोपनिषदोभवान् ॥ ६४ ॥ प्रज्ञा[1]प्रिये[2]तथा[3]सत्यम[4]नंता[5]नंदं[6]कौस्थितिः ॥ रथनौसदृशश्चैताःसर्वोपनिषदस्तव ॥ ६५ ॥ आढ्यएतागृहीत्वात्वंलोकेसुरवदर्चितः ॥ अधीतवेदोविज्ञातरहस्योधीधनोमहान् ॥ ६६ ॥ इतःशरीरतोमुक्ताशरीरंकुत्रयास्यसि ॥ तत्त्वंकथयगंतव्यंपश्चान्मार्गंवदाम्यहम् ॥ ६७ ॥ एषपंथाविदेहानांकोशलानामयंतथा ॥ आनर्तानामयंतद्वत्त्रिगर्तानामयंपरः ॥ ६८ ॥ इत्यादिकथनेयद्वद्दिङ्मात्रमिहकथ्यते ॥ गंतव्याज्ञानतस्तस्मादुक्तंनोक्तसमंतथा ॥ तथामाभवताद्राजंस्ततोगंतव्यमीरय ॥ ६९ ॥ इत्युक्तेयाज्ञवल्क्येनराजातंप्राहधर्मवित् ॥ नाहंजानामिगंतव्यंस्वात्मनापिपरेणच ॥ ७० ॥

अधीतोवेदःपूर्वकांडरूपोयेननानाऋषिभ्योज्ञातानिरहस्यान्युपासनानियेनसतथामहामतिर्महत्त्वेनलोकेप्रसिद्धश्चएतादृशस्त्वमितःशरीरतइत्यस्यार्थइदंशरीरंमुक्त्वाकुत्रयास्यसीतिकथयतच्छुत्वामार्गोमयासम्यग्वक्तव्यइतिद्वयोरर्थः ॥ ६६ ॥ ६७ ॥ गंतव्याज्ञानेतुअनेकधादिङ्मात्रेणमार्गाभिधानंव्यर्थमितिलौकिकदृष्टांतेनाह एषइति यथाविदेहादिदेशानांदिङ्मात्रेणोक्तोपिमार्गोऽनुक्तसमोविशेषाज्ञानेनविशेषानभिधानात्तथामास्तुइत्यतोगंतव्यंनिरूपयेतिद्वयोःसंबंधः ॥ ६८ ॥ ६९ ॥ एवमुक्तोराजास्वस्यदृढांजिज्ञासांश्रद्धांचावेदयन्नाह इत्युक्तेइतिद्वादशभिः मयावापरेणवाधिकारिणायद्गंतव्यंसाधनैस्तत्त्वंतदहंनजानामीति ॥ ७० ॥

१ वाक् २घ्राणं ३चक्षुः ४श्रोत्रं ५मनः ६त्वदयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मतत्त्वेस्वस्यात्यंतमज्ञतांदर्शयितुंदृष्टांतमाह भगवन्निति हेभगवन्तत्रसर्पादिव्याप्तत्वेनप्रसिद्धेवनेएतादृशोंधोयथाभवेत्तादृगहंपृच्छा मीतिद्वितीयेनसंबंधः वैदेशिकःविकटदेशेवर्त्तमानः दिङ्मूढःदिग्भ्रांतः दयापरंदेशवृत्तज्ञंपृच्छन् आतुरश्चेत्यंधविशेषणानि ॥ ७१ ॥ ७२ ॥ राजास्वाविद्यामेवाभिनयति आगतोस्मीत्यादिना कुतःसिन्धुतुल्याल्लवणखिल्यतुल्यआगतोस्मीत्येतन्नजानामीतिसुषुप्त्याद्यवस्थागता त्मस्वरूपाबोधोदर्शितः तथायत्स्वयमनुभूतमतीतमितियावत् आगतमुदितंवर्तमानं गंतव्यंभविष्यदितिप्रसिद्धं एतत्त्रयंआत्मनःकेनध र्मेणवास्वरूपेणवाजानेइत्येतदपिनजानामीतिजाग्रदादिगतात्मस्वरूपाबोधोदर्शितः अहंकोवस्तुतःकिंस्वरूपःस्यांभवेयमितिशुद्धात्मस्वरू

भगवंस्तत्रयद्वत्सन्नंधोवैदेशिकोवने ॥ दिङ्मूढःक्षुत्पिपासार्तोवृद्धोविस्मृतिमागतः ॥ ७१ ॥ पृच्छन्नशेषगंत व्यमार्गंज्ञानविवर्जितः ॥ दयापरंहिदेशानांमर्मज्ञंकंचनातुरः ॥ भवेत्तादृगहंब्रह्मन्पृच्छामित्वांमुनीश्वर ॥ ७२ ॥ आगतोस्मिकुतोब्रह्मन्जानाम्येतदपीहन ॥ अनुभूतंस्वयंकेनजानेनागतमात्मनः ॥ ७३ ॥ गंतव्यमपिकोहं स्यांजानेनेदमपिप्रभो ॥ सुखदुःखेतथाहेतूंस्तयोरप्याप्नुवन्सदा ॥ ७४ ॥ दुःखमेकंसदाजानेबाल्यादारभ्यस र्वतः ॥ कस्यतत्केनवाकीदृग्जानामीत्यपिनैवभो ॥ ७५ ॥ महाग्नौपतितोयद्वत्पतंगोस्मृतिवर्जितः ॥ वायुनाभ्रा म्यमाणःसन्दुःखमेवावगच्छति ॥ ७६ ॥ नात्मानंनपरंवापिनदुःखस्यापिकारणं ॥ प्रकारंवापिजानातिदुःखमू र्तिरिवस्थितः ॥ ७७ ॥ एवमेवात्रसंसारेनाहंजानामिकिंचन ॥ क्लेशमेकंविजानामिप्रकाररहितंसदा ॥ अह मेतादृशोमूढोगंतव्यंकेनवेद्मिभो ॥ ७८ ॥

पाबोधोदर्शितः तथासुखदुःखेआप्नुवन्भुंजानोपितयोःसुखदुःखयोर्हेतूनुत्पत्तिज्ञप्तिप्रयोजकान्नजानेइतिसंसारनिमित्तानामबोधोदर्शि तइतिद्वयोरर्थः ॥ ७३ ॥ ७४ ॥ तर्हित्वंकिंजानासीतिचेद्दुःखमेवविवेकिदृष्ट्यासर्वसंसारस्यदुःखरूपत्वादित्याह दुःखमेवेति अहंसर्वाव स्थासुदुःखमेवजानामिपरंतुदुःखस्यभोक्तृत्वेनसंबंधिनंहेतुंविशेषंचनजानामीत्यर्थः ॥ ७५ ॥ दुःखमात्रावगतौदृष्टांतमाह महाग्नाविति द्वाभ्यां स्पष्टं ॥ ७६ ॥ ७७ ॥ दार्ष्टांतिकेयोजयति एवमेवेति फलितमाहाहमेतादृशइति ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचयद्यहंजानीयांतदातन्मार्गमपिजानीयामेव दृश्यंतेहिइष्टगंतव्यमार्गंपथिकेभ्योजानंतः तथाचमार्गप्रश्नभंग्यामयागंतव्यमेवभवतेपृष्टमित्याह अपीति ज्ञातुंसुशकःशक्यइतिसंबंधः ॥ ७९ ॥ तिष्ठतुमुक्तोपसृप्यस्यपरमगंतव्यस्यदुर्ज्ञेयताकर्मफलरूपंगंतव्यमपिलोकेदुर्ज्ञेयमित्याह शरीरादिति शरीरान्निर्गतःसन्कःकिंस्वरूपःकथंकेनप्रकारेणकिंफलंगमिष्यतितदेतदतींद्रियंलोकेकोवेदेति ॥ ८० ॥ एवंविधाऽज्ञाननिवर्तनायैवममभवंतंमहात्मानंप्रतिप्रश्नइत्याह अतएवेति ॥ ८१ ॥ जनकेनेति एवमुक्तोमुनीराज्ञउत्तमाधिकारितामालक्ष्यतस्यतत्त्वप्रदर्शनंभयनिवर्तकंप्रतिजज्ञावित्यर्थः ॥ ८२ ॥ मुनिनापूर्वंकुत्रगमिष्यसीतियत्पृष्टंतदाशयंमुनिमुखेनाह गंतव्यमिति कारणंप्रयोजकम् ॥ ८३ ॥ लोकेइति अजानत्कर्तृकोजानत्कर्तृकश्चेतिद्विविधःप्रश्नस्तत्राद्योयथाभवत्कृतइतिपूर्वार्धार्थः सम्यक्ज्ञानिकर्तृकोऽसम्यग्ज्ञानिकर्तृकश्चेतिजानत्कर्तृकोद्विविधस्तत्राद्यःसंवादार्थंस्वज्ञानपरज्ञानयोःसमानविषयत्वनिश्चयार्थंभवेत् द्वितीयस्तुसंशयेनविपर्ययेणवाकृतस्तन्निवृत्तिफलकइत्यर्थः ॥ ८४ ॥ संवादार्थमिति संवादार्थःप्रश्नोपिस्वबुद्धेःपरबुद्धेर्वावैमल्यज्ञानरूपप्रयोजनभेदेनद्विधाभवेदित्यर्थः ॥ ८५ ॥ पक्षेष्विति एतेषुजानत्कर्तृकप्रश्नभेदरूपेषुपक्षेषुसत्सुप्रष्टृसंबंधिगंतव्यस्यनिश्चयेसत्येवधीमद्भिर्मार्गोवक्तव्योभवतिनान्यथेति ॥ ८६ ॥

अपिगंतव्यविज्ञानेमार्गोपिसुशकोभवेत्॥ ज्ञातुंयथैवपांथानांपथिकेभ्यःसमंततः ॥ ७९ ॥ शरीरान्निर्गतःकोवाकथंवात्रगमिष्यति ॥ किंवातदत्रकोवेदपुमानर्थमतींद्रियं ॥ ८० ॥ अतएवतुपृच्छामिसूर्यशिष्यंमहाधियं ॥ भगवंतंमहात्मानमिहामुत्रार्थकोविदम् ॥ ८१ ॥ जनकेनैवमुक्तस्तंयाज्ञवल्क्योप्युवाचह ॥ अहंवक्ष्यामिगंतव्यंतवमाभूद्भयंनृप ॥ ८२ ॥ गंतव्यंयन्मयापृष्टंतत्रवक्ष्यामिकारणम् ॥ भवतेधर्मयुक्तायवदान्यायमहीभुजे ॥ ८३ ॥ लोकेस्याद्द्विविधःप्रश्नोऽजानतोजानतोपिवा ॥ गंतव्यस्ययदाज्ञानात्तदापिद्विविधोभवेत् ॥ संवादार्थंभवेत्कापिसंदेहाद्वाविपर्ययात् ॥ ८४ ॥ संवादार्थंयदाप्रश्नस्तदाप्येषद्विधाभवेत् ॥ आत्मनोबुद्धिवैशद्यज्ञानाद्यर्थंपरस्यवा ॥ ८५ ॥ पक्षेष्वेतेषुधीमद्भिर्गंतव्यस्यविनिश्चये ॥ वक्तव्योत्रभवेन्मार्गोनान्यथाराजसत्तम ॥ ८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अज्ञानेनेति यदातुअज्ञानेनपृच्छतितदादयालुर्बुद्धिमांस्तस्मैगंतव्यंतदीयंमार्गंचब्रूयात् तत्रापिमार्गमात्रंकथंचननब्रूयात्किंतुतद्विशेषमपि ब्रूयादित्यर्थः एवंस्थितेहेराजंस्तुभ्यमज्ञानेनपृच्छतेऽहंगंतव्यंतावत्कथयामितत्रचेतसोवधानमेवमार्गइत्यतःसंदेहंपरित्यज्यसावधानमनाः सन्शृण्विति ॥ ८७ ॥ इत्युक्तेप्राहेति इतिमुनिनोक्तेसतिराजाइत्थमाह इत्थंकथं भगवान्ब्रवीतुअहंसावधानःस्थितोस्मीति ॥ ८८ ॥ इत्युक्तेइति इतिराज्ञोक्तेसतिमुनिस्तंराजानंप्रतिइतिवक्ष्यमाणप्रकारेणआदित्यकीर्तितंज्ञानमब्रवीत् कीदृशं आत्मविद्यार्थंआत्मसाक्षात्कारहेतुंनानोपायंनानारूपैरंतरंगबहिरंगसाधनैर्लभ्यम् ॥ ८९ ॥ अथविश्वतैजसप्राज्ञानुवादेनतुरीयप्रदर्शनपरस्यइन्धइत्यादिकण्डिकात्रयस्यार्थमेकोनचत्वारिंशदधिकशतेनोपबृंहयंस्तत्रविश्वस्यवैश्वानरात्मनःस्वरूपप्रदर्शनपरस्यविराडित्यंतभागस्यार्थंदर्शयति इंद्रियैरित्ये

अज्ञानेनतुगंतव्यंमार्गंब्रूयान्नराधिप ॥ दयालुर्बुद्धिमान्नैवमार्गमात्रंकथंचन॥ माकुथान्नृपसंदेहंसावधानमनाःशृणु॥ ८७॥ इत्युक्तेप्राहविप्रेंद्रंराजासंहृष्टमानसः॥ ब्रवीतुभगवानित्थंसावधानःस्वयंस्थितः॥ ८८॥ इत्युक्तेयाज्ञवल्क्यस्तंज्ञानमादित्यकीर्तितं॥ अब्रवीदात्मविद्यार्थंनानोपायमितिप्रभुः॥ ८९॥ इंद्रियैर्विषयानेषकोपिगृह्णातिदेहभाक्॥ यस्तंजागरणावस्थंद्विधादेहेवधारय॥ ९०॥ माययासकलंविश्वंसृष्ट्वायद्भूतभौतिकं॥ दृष्टवानिदमात्मायमिंद्रइन्धश्चसस्मृतः॥ ९१॥ अस्यभासाविश्वमिदंविभातीहचराचरम्॥ नायंसूर्येणभातीशोनैवचंद्रेणनैववा॥ ९२॥ तारकाभिःसमग्राभिःकुतोग्निस्तंप्रकाशयेत्॥ नेंद्रियैर्ज्ञानसंशब्दैःकुतःकर्मेंद्रियैरयम्॥ मनसापिनगम्योयंकथंशब्देनगम्यते॥ ९३॥

कविंशतिश्लोकैः यःकोपिलौकिकप्रमाणाविषयोपिदेहभाक्अविद्ययादेहतादात्म्याभिमन्ताएषसर्वापरोक्षआत्माइंद्रियैर्विषयान्यदागृह्णातितदाजागरणावस्थोभवतितंदेहेद्विधावक्ष्यमाणेन्द्रेंद्राणीरूपाभ्यामवस्थितंजानीहीत्यर्थः ॥ ९० ॥ तत्रेंद्रतांव्युत्पादयति माययेति माययासृष्टमिदंसर्वंदृष्टवानितिव्युत्पत्त्याइदंद्रइतिवक्तव्योपिपरोक्षनाम्नाइन्द्रइतियथास्मृतस्तथादीप्तत्वेनइन्धइतिवक्तव्योपिइंद्रइतिपरोक्षनाम्नास्मृतइत्यर्थः ॥ ९१ ॥ एतत्स्फुटयन्नस्येन्धतांचतुर्भिःप्रपंच्यततःपरैःपंचभिरिंद्रपदस्यपरोक्षनामतामुपपादयति अस्येति अस्यभासादीप्त्यासर्वंभातिअन्येनतुनप्रकाश्यतेइतिद्वयोरर्थः ॥ ९२ ॥ ९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेति यतःसर्वस्यप्रकाशकएवनप्रकाश्यस्तथाप्ययंस्वयंनप्रकाशतेइतिनकिंतुप्रकाशतएव अतइतराप्रकाश्यत्वेसतिप्रकाशमानत्वार्थके नस्वप्रकाशपदेनविद्वद्भिरुच्यतइत्यर्थः ॥ ९४ ॥ स्वप्रकाशत्वेचदीप्तत्वलक्षणमिंधत्वंतत्परोक्षरूपमिंद्रत्वंचोपपन्नमित्याह स्वप्रकाशात्मेति स्वप्रकाशात्मस्वरूपभूतयादीप्त्यायुतत्वादिंधसंज्ञएषमहेश्वरोदेवैरिंद्रइत्युच्यतइति ॥९५॥ स्वप्रकाशात्मनइति स्वप्रकाशस्यात्मनइन्धइतिप्रत्यक्षंनाम इन्धीदीप्तावितिस्मृतेः इंद्रइतितुपरोक्षमित्यर्थः॥ ९६ ॥ मान्यानांपरोक्षनाम्नाव्यवहरणंलोकेपिसात्विकजनेषुप्रसिद्धमित्याह सात्विकाइति एतेसात्विकाःस्त्रीपुरुषवपुराश्रिताःपुमांसःस्त्रियोवातामसजनवत्पित्रादीनांनामप्रत्यक्षंनगृह्णंतिपरैःप्रत्यक्षंगृह्यमाणं

सर्वप्रकाशकोदेवोनचायंनप्रकाशते ॥ स्वप्रकाशस्ततःस्वात्माविद्वद्भिःपरिपठ्यते ॥ ९४ ॥ स्वप्रकाशात्मबोधाख्यदीप्त्याविशदयायुतः॥ इंद्रइत्युच्यतेदेवैरिंधएषमहेश्वरः॥ ९५ ॥ स्वप्रकाशात्मनोनामप्रत्यक्षंहींधशब्दितम्॥ परोक्षंचेंद्रइत्येतदुच्यतेसात्विकैर्जनैः ॥ ९६ ॥ सात्विकानपितुर्नाममातुर्नैवगुरोरपि ॥ स्वाम्यादेरपिनैवैतेनामगृह्णंतिकर्हिचित्॥ ९७ ॥ प्रत्यक्षंतामसायद्वत्स्त्रीपुंसवपुराश्रिताः॥ प्रत्यक्षंगृह्यमाणंतत्सहंतेनपरैरपि ॥ ९८ ॥ परोक्षंहिप्रियंतेषांपित्रादेर्नामसर्वदा॥ ततोव्यवहरंत्येतेनाम्नाकेनापितादृशा ॥ ९९ ॥ सात्विकानामिमेमौलिभूतादेवाउदाहृताः ॥ अग्न्यादयस्ततोहीन्धमिंद्रनाम्नावदंतिते ॥ १०० ॥ सोयंजागरणावस्थइंद्रनाम्नापरःपुमान्॥ अधिष्ठायेंद्रियगणमास्तेस्मिन्दक्षिणेऽक्षणि ॥ १०१ ॥

नसहंतेचेतिद्वयोरर्थः ॥ ९७ ॥ ९८ ॥ परोक्षंहीति यतस्तेषांसात्विकानांपरोक्षंपित्रादीनांनामप्रियमतएवएतेसात्विकास्तादृशामुख्यनामसदृशेनकेनचिन्नाम्नापित्रादीन्व्यवहरंतीति ॥ ९९ ॥ यदालौकिकसात्विकानामप्ययंस्वभावस्तदापरमसात्विकानांब्रह्मादिदेवानांकिमुवाच्यइत्युक्त्वाफलितमाह सात्विकानामिति स्पष्टम् ॥ १०० ॥ अस्यदेवस्यविशेषाभिव्यक्तिस्थानंदक्षिणंनेत्रंबोध्यमित्याह सोयमिति अधिष्ठायवशेकृत्वा ॥ १०१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसिद्धइंद्रोयथावैजयंताख्येमंदिरेतिष्ठतिसर्वदेवाधिपतिःसंस्तथादक्षनेत्रइत्याह प्रासादेइतिद्वाभ्यां अग्न्यादिभिर्वागादिदेवैः आदत्तेगृह्णातिदक्षिणाक्षिरूपेप्रासादेस्थितइतिद्वयोरर्थः ॥ १०२ ॥ १०३ ॥ दक्षिणेऽक्षणिप्रकाशाधिक्यंवामेतुकिंचित्प्रकाशाल्पत्वमित्यनुभवसिद्धंतदादायवामेऽक्षणिविश्वस्यरूपंइंद्राणीत्वेनवैश्वानरोपासकैर्ध्येयमित्याह यद्वदिति यथासभास्थस्येंद्रस्यभोग्याइंद्राणीइंद्रसमैश्वर्यशालिनीसन्निहितेकुत्रचित्प्रासादेतिष्ठेदेवमस्यविश्वस्यात्मनइंद्रस्यदक्षाक्षिस्थस्यजायाइंद्राणीवामेतिष्ठतीतिद्वयोःसंबंधः ॥ १०४ ॥ १०५ ॥ तस्याविराट्संज्ञांद्वेधाउपपादयति विविधमितिद्वाभ्यां साइन्द्रवल्लभाइन्द्राणीजाग्रतिस्थूलभोगभुजाऽनेनभर्त्राइन्द्रेणसहयतोविविधंराजतेततोविराडितिपदेनश्रुतिविद्भिरुक्ता॥१०६ ॥ अथवादशाक्षरच्छंदोवाचकंविराट्पदंदशेंद्रियतादात्म्येनदशधाभूतायामस्यांवर्त्ततेइत्या

प्रासादेवैजयंताख्येइंद्रोयद्वद्दिविस्थितः॥भोगान्नानाविधान्गृह्णन्देवैःसर्वैःसमर्पितान्॥ १०२॥अग्न्यादिभिस्तथादेवैरर्पितान्विविधान्शुभान्॥ विषयान्बहुधादत्तेप्रासादेदक्षिणेऽक्षणि ॥ १०३॥ यद्वदिंद्रस्यचेंद्राणीसभास्थस्यपरत्रसा॥ प्रासादेकुत्रचित्तिष्ठेत्तादृग्भोगसमन्विता॥ १०४॥ एवमस्यात्मनोजायावामेचक्षुषितिष्ठति॥सदाजागरणावस्थांगतस्यजगदीशितुः॥ १०५॥ विविधंराजतेत्त्येषास्थूलभोगभुजासह॥ भर्त्रानेनविराडुक्ताविद्वद्भिःसेंद्रवल्लभा ॥ १०६ ॥ दशेंद्रियाणांबाह्यानामधिष्ठातायथापुमान्॥ तथासापिततोवास्याद्विराडिंद्रस्यवल्लभा॥ १०७॥ एवमिंद्रःसहेंद्राण्याचक्षुषासमवस्थितः॥ चक्षुष्मतांहिसर्वेषामभिन्नोपिविभिन्नवत्॥ १०८ ॥इयंजागरणावस्थायस्यांत्वंवर्तसेऽधुना॥ भोगान्नानाविधान्राजन्भुंजानःपृथिवीपतिः॥ १०९॥

शयेनाह दशेंद्रियाणामिति यथापुमानिंद्रोबाह्यदशेंद्रियाधिष्ठातातथासाइंद्राण्यपिभवतिततोवाविराट्पदेनोक्तेति भाष्यकारैस्तुअन्नंविराडितिश्रुत्यनुरोधेनभोग्यभोक्तृत्वेनजाग्रतिद्विधावस्थितस्यात्मनोयतइयंभोग्यात्मकंरूपंततोविराडित्युक्ताभोग्यत्वेनान्नत्वादितिदर्शितं ॥ १०७ ॥ एवंजाग्रतिद्विधावस्थितोयंसर्वेषामात्मासमष्टिरूपेणैकोभातदृष्ट्याव्यष्टिरूपेणभिन्नोभासतेइत्याह एवमिति सर्वेषांचक्षुष्मतांचक्षुषाइन्द्रियेणसहतद्गोलकयोरितियावत् इंद्राण्यासहेंद्रोवस्थितः कीदृशः समष्टिरूपेणाभिन्नोविभिन्नवत्व्यष्टिदर्शिनांभासमानः ॥ १०८ ॥ विश्ववर्णनमुपसंहरति इयमितिद्वाभ्यां अधुनाइंद्रियव्यापारकाले ॥ १०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेनोपदेशेन चवैश्वानरभावंप्रापितोसीत्याह अग्नीति भोक्ताअग्निर्भोग्यःसोमइत्यन्यत्रप्रपंचितं अतस्त्वमपिभोक्तृभोग्यात्मकस्त्रीपुंस रूपेणद्विधाएकैकस्मिन्शरीरेव्यवस्थितःसन्नग्नीषोमात्मकःसर्वव्यवहारनिर्वाहकउक्तोसीत्यर्थः ॥ ११० ॥ एवंविश्वस्यवैश्वानरात्मकस्यस्व रूपेद्विधाभावावस्थानात्मकेप्रदर्शिते अर्थादेतदुक्तंभवति यत्रेंद्रेंद्राण्योःसंभूयावस्थानंतत्तैजसप्राज्ञयोर्हिरण्यगर्भसूत्रात्मेश्वरात्मकयोरू पमिति अथतयोरवांतरविशेषसूचकस्यतयोरेषइत्यादेरवांचःप्राणाइत्यंतस्यग्रंथस्यार्थमाह तयोरितिविंशतिश्लोकैः तयोःस्त्रीपुंसयोरिंद्रें द्राण्योरितरेतरंसंभोगायसंगतयेएकांतगृहसमोहृदयाकाशउक्तः कीदृशोहृदयाकाशः दहरविद्यादौईश्वरत्वेनोक्तःसुषुप्तिस्थानतयाचा जातशत्रूपाख्यानेवर्णितइत्यर्थः संस्तूयतेसंगम्यतेऽत्रेतिसंस्तावइतिश्रुतिपदार्थः ॥ १११ ॥ तयोरिन्द्रेन्द्राण्योरन्नत्वेनहृदयकमलस्यक र्णिकानिभोरक्तवर्णोमांसपिंडोध्येयइत्याह योयमिति अन्नत्वाभिप्रायंस्वयमेववक्ष्यति ॥ ११२ ॥ तयोर्वस्त्रत्वेनध्येयमाह सुसूक्ष्मा

अग्नीषोमात्मकोलोकव्यवहारस्यकारकः ॥ स्त्रीपुंसवपुरेकस्मिन्द्विधाराजन्मयेरितः ॥ ११० ॥ तयोःस्त्रीपुंसयो रेषहृदयाकाशईश्वरः ॥ एकांतगृहतुल्यःस्यात्संभोगायेतरेतरं ॥ सुषुप्तिस्थानमेतद्धिकथितंवेदवादिभिः १११ योयंहृदयपद्मस्यकर्णिकाकारसंस्थितः ॥ राजन्हिलोहितःपिंडस्तयोरन्नमिदंस्फुटं ॥ ११२ ॥ सुसूक्ष्माणांहिना डीनांग्रथितानांपरस्परं ॥ राजन्हृदयपद्मस्यकेसराणांसमंततः ॥ जालोपमंकिमप्यास्तेतत्स्यास्त्रावरणंतयोः ॥ ११३ ॥ हृदयान्निर्गतायेयमूर्ध्वांनाड्यत्रमूर्धनि ॥ एतयोराजमार्गोयंगमनागमनेहृदि ॥ ११४ ॥ अनया निर्गतोदेहाद्द्वाध्येयात्यर्चिषंनरः ॥ अंतर्गच्छन्विनिर्यातिनाडीभिर्नयनादिकान् ॥ ११५ ॥

णामिति हेराजन्हृदयपद्मस्यकेसरसमानांनाडीनांपरिणामभूतंजालसमंयत्किंचिदस्तितत्तयोरिंद्रेंद्राण्योर्वस्त्रत्वेनध्येयमित्यर्थः ॥ ११३ ॥ इंद्रेंद्राण्योःशयनस्थानाद्धाम्नदेशाद्वागमनागमनमार्गत्वेनसुषुम्नानाडीध्येयाइत्याह हृदयादिति याइयंसुषुम्नानाडीअत्रशरीरेहृदयकम लान्मूर्द्धनिगत्वाततोप्यूर्ध्वाब्रह्मलोकपर्यन्तंनिर्गताप्रसिद्धा शतंचैकाहृदयस्यनाड्यस्तासांमूर्द्धानमभिनिःसृतैकाइत्यादिश्रुतेः तद्रूपोनयो राजमार्गःश्रुतौसंचरणीपदेनोक्तोबोध्यः कीदृशः हृद्देशेवर्तमानोगमनागमनप्रयोजकश्चेत्यर्थः ॥ ११४ ॥ सुषुम्नायागमनमार्गतांस्फुटयति अनयेति अनयासुषुम्नयामार्गभूतयादेहाद्धाम्नेनिर्गतोयदाभवतितदार्चिषमर्चिराद्यभिमानिदेवतोपलक्षितंदेवयानंब्रह्मलोकपंथानंयाति प्राप्नोति यदातुशरीरांतरेवगच्छन्भवतितदासुषुम्नावयवभूताभिरन्याभिर्नाडीभिर्मार्गभूताभिर्नयनादिदेशान्यातीति ॥ ११५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरासांहितासंज्ञानांनाडीनांसुषुम्नायावृक्षोपमायाः शाखोपमत्वंसूक्ष्मतांचसदृष्टांतमाह अन्याश्चेति यस्याःसुषुम्नायाः ॥ ११६ ॥ सुषुम्नायाःसशाखायाआगमनमार्गतांस्फुटयन्सुप्तिस्वप्नयोर्देशव्यवस्थामाह सुषुम्नयेति सुषुम्नयाताभिस्तच्छाखाभूताभिरितरनाडीभिर्वाअंतरागच्छन्भवतितदाहृदयंचेत्प्राप्नोतितदासुप्तिसंस्थानंसुप्त्यवस्थांप्राप्नोतीतिशेषः गमनागमनयोस्तासुनाडीष्वेवमार्गभूतासुतिष्ठन्स्वप्नंप्राप्नोति अयमिंद्राणीमिलितइंद्रइत्यर्थः ॥ ११७ ॥ सुषुप्ताविति येनहेतुनानाडीभिःकेशस्यसहस्रतमांशसूक्ष्माभिर्मार्गभूताभिःसुषुप्त्यर्थंहृदयाकाशेयातितेनहेतुनासूक्ष्मतराहारःसुप्तिकालेप्रोक्तः यतःस्वप्नदर्शिनस्तैजसस्यभोग्यंबुद्धिरूपंशरीरंनाड्यंतर्गतसूक्ष्मान्नरसोपचितंभवति सुषुप्तस्तुततोपिपरतःस्थितइतिभावः प्रविविक्तपदार्थमाह सूक्ष्ममिति श्रुतौएतत्पदमन्नपरमास्रवत्पदंगच्छदित्यर्थकमिति ॥ ११८ ॥ एतत्स्फुटयन्श्रुतिगतेवपदार्थमाह स्वप्नेति तयोर्नाडीमध्यहृदयमध्यदेशतयावर्णितयोःस्वप्नसुषुप्त्योर्मध्येस्वप्नदर्शिनःस्वप्नस्यद्र

अन्याश्चसंतिशतशोयस्याःशाखोपमाःशिराः॥ केशःसहस्रधाभिन्नोभवेच्चेत्सभवेदिह॥ उपमानंहिनाडीनांसूक्ष्मतासुनराधिप॥ ११६ ॥ सुषुम्नयाथवाताभिर्यातिगच्छन्नयंसदा ॥ हृदयंसुप्तिसंस्थानंतासुस्वप्नमथापिवा॥ ११७॥ सुषुप्तौहृदयाकाशेनाडीभिर्येनयात्ययम्॥ प्रविविक्ततराहारस्तेनसुप्तौप्रकीर्तितः॥ प्रविविक्तंहिसूक्ष्मंस्याद्भोग्यंतत्स्वप्नदर्शिनः॥ ११८॥ स्वप्नसुप्त्योस्तयोर्मध्येशारीरात्स्वप्रदर्शिनः॥ सुप्तःसूक्ष्मतराहारोत्यभोक्ताभोगवानिव॥ ११९॥ स्थूलंभुंक्तेतदादेवोदक्षिणेक्षण्यवस्थितः॥ नाड्यादिभिर्गतश्चित्तेसूक्ष्मभुक्परिकीर्तितः॥ १२०॥

ष्टुस्तैजसात्शारीरात्सूक्ष्मशरीराभिमानिनःपरतःस्थितोयःसुप्तःप्राज्ञःसतैजसभोगापेक्षयासूक्ष्मतरआहारोयस्यएतादृशोवर्त्तते यतोभोक्तापिस्पष्टभोगहीनोपिसंस्कारभावापन्नबुद्ध्यानियंत्रितत्वेनभोगवद्भ्यांविश्वतैजसाभ्यांसदृशः अवस्थात्रयंबुद्ध्युपाधिकस्यैवबुद्धिश्चाहारपरिणामसूक्ष्मतातारतम्येनावस्थात्रयेत्रिरूपाभवतीतिभावः अग्रभाष्यकारैःप्रविविक्ताहारत्वंतैजसस्यैवविश्वापेक्षयायदुक्तंतत्प्राज्ञस्यसमष्टितादात्म्येनासंसारितांस्पष्टयितुं एतैस्तुप्राज्ञस्यव्यष्टिरूपेणसंसारितांद्योतयितुमेवंव्याख्यातमितिबोध्यं ॥ ११९ ॥ उक्तमर्थंप्रपंचयति स्थूलमितिपङ्क्तिः जायतिदक्षिणेक्षणिस्थितःसन्स्थूलंविषयजातंबुद्धिरूपंचभुंक्तेततोनाडीभिःपुरीतताचचित्तेचित्तस्थानेहृदयकमलकोणेपुस्थितस्तैजसःसूक्ष्मभुक्पूर्ववदुक्तः ॥ १२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयेति यदातुहृदयकमलमध्यच्छिद्रंदहरादिपदैःप्रसिद्धंप्राप्नोतिसप्रियःइंद्राणीयुक्तइंद्रस्तदासत्पदवाच्येनभूम्नातादात्म्यलाभात्स्वयं प्रकाशानन्दरूपोभवतीत्यभोक्तृत्वंतस्योपपन्नं नहिस्वयंप्रकाशानंदस्यज्ञानविषयतारूपाभोग्यतासंभवतीति साक्षिरूपेणदुःखाभावाव गाहनमात्रेणत्वानंदभुगित्युच्यतेउपचारादित्यर्थः ॥ १२१ ॥ ननुसुप्तौयद्यभोक्तैवात्मातर्हितस्यान्नत्वेनहृदयमांसपिंडःकथमुक्तइति शंकांवारयति अस्येतिद्वाभ्यां अस्यइंद्राण्याएकीभूतस्यइंद्रस्यान्नत्वेनहृदयकमलकर्णिकाभूतोमांसपिंडोयउक्तस्तद्वचनंतस्यहृदयपिंड स्यइंद्रेणभोग्यत्वाभिप्रायकंनभवतिकिंतुतद्वाक्यंरूपकरूपेणरूपकालंकारघटिताकारेणतथाप्रवृत्तंयथाबाह्यैर्बहिर्मुखैर्बोधैरत्यंतचंचल

हृदयाकाशतादात्म्यंप्राप्तइंद्रोऽत्रसप्रियः॥ आनंदात्माभवेत्सुप्तौदेवआनंदभुक्तथा॥ १२१ ॥ अस्यान्नंक र्णिकाकारःपिंडोलोहितरूपधृक्॥ कथितस्तस्यभोग्यत्वाभिप्रायंवचनंनहि॥ १२२ ॥ किंतुरूपकरूपेणस्थैर्य मस्मिन्यथाभवेत्॥ अत्यंतचंचलस्यास्यमनसोबाह्यबोधतः॥ १२३ ॥ सुषुप्तःसर्वविज्ञानरहितोभोगवान्क थं॥ दुःखस्योपरमाद्यद्वद्भवेदानंदभुक्पुमान्॥ तद्वत्सूक्ष्मतराहारःसुषुप्तःकथितोद्विजैः ॥ १२४॥ सुप्तौविशेष विषयविज्ञानविलयोभवेत्॥ आत्मानमप्ययंनैवविजानातिविमोहितः॥ आनंदात्माततःसुप्तावभोक्ताभो क्तृवत्स्थितः॥ १२५॥

स्यास्यमनसःस्थैर्यंभवेत् तथाचचित्तैकाग्र्यफलकध्यानमात्रविधानपरंतद्वाक्यमितिद्वयोरर्थः ॥ १२२ ॥ १२३ ॥ मुख्योभोगस्तुसुप्तेन संभवतीत्याह सुषुप्तइति सुषुप्तोयतोविशेषविज्ञानहीनस्ततःसुखदुःखविषयीकरणात्मकभोगशालीकथंस्यात् तस्मादानंदभुक्त्वंयथौप चारिकंतथासूक्ष्मतराहारत्वमपि नहिसंस्कारभावापन्नांबुद्धिमयंविशेषतोऽनुभवतीत्यर्थः ॥ १२४ ॥ सुप्तौविशेषज्ञानाभावंकैमुत्येनाह सुप्ताविति यतःसुप्तौआत्मानमपिबुद्धिवृत्तिरूपैर्विशेषविज्ञानैर्नविषयीकरोतिततःसर्वविशेषविज्ञानानांविलयःस्पष्टइतिफलितमाह आ नंदात्मेति ॥ १२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुषुप्तौव्यष्टिसमष्ट्युपाधिकयोःप्राज्ञेश्वरयोरभेदस्पष्टीकरणपरस्यतस्यप्राचीत्यादिवाक्यस्यार्थमाह तस्येतिपंचभिः तस्यवर्णितस्यमहेशितुरिंद्रस्यजाग्रतिस्त्रीपुंसभावेनस्थितस्यहृदयाकाशवासकालेरक्तपिंडोन्नंशिराजालंवसनंचयस्यैतादृशस्ययेसुषुप्तेःपूर्वमविच्छेदेनेश्वराभेदप्रयोजकाःप्राणाःशरीरेपूर्वादिदशदिगवच्छेदेनदशधावस्थिताआसंस्तेऽधुनाकारणेलयेनकारणात्मनासर्वपदार्थविशिष्टप्राच्यादिदिग्भावमापन्नाइतिप्राणानुद्दिश्यअधिदेवेश्वराभेदोविधीयतइति यद्वादिशःसर्वपदार्थविशिष्टाउद्दिश्यप्राणत्वंविधीयते प्राणशब्दोऽत्रसुषुप्तौशिष्यमाणेऽज्ञानात्मनिवर्तते सुषुप्तदृष्ट्याप्राणविलयेपिपरदृष्ट्याप्राणसत्वात्प्राणशब्दप्रवृत्तिरित्युक्तमिति अत्रदृष्टांतः सर्वदिशामाधिपत्येनसर्वदिशःप्रियत्वेनप्राणतयामन्यमानःस्वर्गस्थइंद्रइतिद्वयोरर्थः ॥ १२६ ॥ १२७ ॥ दृष्टांताद्विशेषंस्वयमेवदर्शयति अत्रेति अत्रदार्ष्टांतिकेऽयंविशेषः अयंकः वर्णितेंद्रस्यसर्वजगत्कारणत्वेनसर्वैर्दिग्भिराधिदैविकपदार्थैःप्राणैराध्यात्मिकपदार्थैश्चाभिन्नतैवभवति कार

तस्यस्त्रीपुंसरूपस्यहृदयाकाशवासिनः॥रक्तपिंडशिराजालद्वयान्नवसनस्यतु॥ १२६॥प्राच्याद्याःकथिताःसर्वाःप्राणाइतिदिशोदश॥यथेंद्रस्यदिविष्ठस्यतथेंद्रस्यमहेशितुः॥१२७॥अत्रायंतुविशेषःस्याद्दिग्भिःप्राणैरभिन्नता॥इंद्रस्यसर्वजगतःकारणस्येतरस्यन ॥ १२८ ॥ चतुर्विधानांभूतानांपंचानांमहतामपि॥भौतिकानांचसर्वेषांसदासदसदात्मनाम् ॥ १२९ ॥ दिक्कालसहितानांस्याद्धृदाकाशेस्थितःपुमान्॥ कारणंयद्वदेतस्यान्नभोऽभ्रादेर्विलक्षणं॥ १३० ॥

णस्यसर्वविकारात्मतायाःकारणरूपेणैक्यस्यचलोकेपिप्रसिद्धत्वादितिभावः इतरस्यदिविष्ठस्यतुतथान तस्यहिअभिमानमात्ररूपएवदिग्भिरभेदइत्यर्थः ॥ १२८ ॥ सुषुप्तौशिष्यमाणमायोपाधिकस्यसर्वजगत्कारणतासर्ववेदांतेषुप्रसिद्धेत्याह चतुर्विधानामितिद्वाभ्यां जरायुजादिभेदेनचतुर्विधानांभूतानांप्राणिशरीराणांतथामहतांभूतानामाकाशादीनांतद्विकाराणांस्थूलसूक्ष्मात्मकानांचसदिक्कालानामेतेषांसर्वेषांकारणंभवतियएषसुप्तौहृदयाकाशेवर्णितःपुरुषः ननुसच्चिदानंदात्मकःकथमनृतजडदुःखात्मकस्यजगतःकारणमित्याशंकांदृष्टांतेनपरिहरति यद्वदिति यथानिरवयवत्वादिनामेघविद्युदादिभ्योविलक्षणमपिनभोमेघादीनांकारणंतथायमात्मापिप्रपंचस्यविवर्त्तस्याभिन्ननिमित्तोपादानताशालीतिद्वयोरर्थः ॥ १२९ ॥ १३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतुरीयनिरूपणपरस्यसएषनेतीत्यादिश्रुतिग्रंथस्यार्थमुत्तरग्रंथेनाचक्षाणस्तत्रसएषइत्यनयोःपदयोरर्थमाह सएषभवतेतित्रिभिः य
स्त्वयागंतव्यत्वेनपृष्टःसएषएवयःपुमानिंधत्वेनजाग्रतिवर्णितोहृदाकाशेतैजसत्वद्वारादिगादिसर्वपदार्थात्मककारणरूपश्चवर्णितइत्यर्थः
॥ १३१ ॥ अयमेवतवसर्वेषांचपरमार्थतआत्मेत्याह अयमेवेति उपाधिमात्रेणाकाशवद्भिन्नोवस्तुतस्त्वेकइत्युत्तरार्द्धार्थः ॥ १३२ ॥ अ
स्यात्मत्वेनातिसन्निहितत्वेनज्ञानमात्रमेवप्राप्त्युपायत्वेनराजमार्गभूतंनग्रामादाविवक्रियारूपागतिरत्रेत्याह राजन्निति ॥ १३३ ॥ ने
तिनेतीत्यंशस्यार्थमाह अवाङ्मनसेतित्रिभिः यतोऽवाङ्मनसगम्यत्वेनसर्वैःसाक्षाद्वक्तुमशक्योऽयंतेनमयाईदृक्उत्तरश्लोकद्वयोक्तप्रकारे
णकथितमुपदिष्टंभवतीतिशेषः ॥ १३४ ॥ नैवमिति अत्रमत्कर्तृकोपदेशकालेएवंविधिमुखेनैवनविज्ञेयःकिंत्वतद्व्यावृत्त्याबोद्धोयतोयं

**सएषभवताराजन्गंतव्यःसर्वदापुमान् ॥ इंधोयोहृदयाकाशेस्थितोदिक्प्राणमूर्तिमान् ॥ १३१ ॥ अयमेवभ
वान्राजन्नहमन्येचजंतवः ॥ देहादेर्भेदतोभिन्नोनभोयद्वद्घटादिना ॥ १३२ ॥ राजन्नेषसदाज्ञेयोघोरसंसार
भीरुणा ॥ अस्यज्ञानंहिविज्ञेयंराजमार्गोत्रगच्छताम् ॥ १३३ ॥ अवाङ्मनसगम्योयंनशक्योवक्तुमंजसा ॥
मयात्वयानबोद्धुंचतेनेदृक्कथितंमया ॥ १३४ ॥ नैवंत्वयात्रविज्ञेयोभावरूपोनचापिसः ॥ भावस्यप्रतिषेधो
वाभावाभावविवर्जितः ॥ १३५ ॥ नभोयथानमेघादिःप्रतिषेधोपिनैवतत् ॥ एवमात्मानविश्वंस्याद्विश्वाभा
वोपिनैवसः ॥ १३६ ॥ सकारणोयथासर्पोरज्ज्वामेवप्रलीयते ॥ रज्जुज्ञानात्तथाविश्वंभावाभावंसकारणम् ॥
आत्मबोधादिदंराजन्नात्मन्येवविलीयते ॥ १३७ ॥ अगृह्योयंसदैवात्माबाह्यैराभ्यंतरैस्तथा ॥ करणैरतएवा
यंगृह्यतेनकथंचन ॥ १३८ ॥**

भावरूपोभावत्वेनलोकेप्रसिद्धायेपदार्थास्तद्रूपोनभवति तथाभाव
स्यप्रतिषेधात्मकाभावरूपोपिनभवति यतोभावत्वाभावत्वाभ्यांवर्जितइति ॥ १३५ ॥ अत्रदृष्टांतमाह नभइति यथानभोमेघादिरूपंमेघ
प्रतिषेधरूपंचनभवत्येवमात्माविश्वविश्वाभावोभयात्मकोनभवतीत्यर्थः ॥ १३६ ॥ यच्चाप्नोतियदादत्तेइत्यादिभगवद्व्यासोक्तिमनुरुध्य
सर्वंकल्पितंस्वज्ञानेनादत्तेयसतीतिव्युत्पत्तिंप्रदर्शयन्नात्मपदार्थमाह सकारणइति स्वारोपप्रयोजकाज्ञानेनसहितःसर्पोज्ञातायांरज्ज्वांय
थालीयतेतथासहमूलेनविश्वंज्ञातेऽधिष्ठानेलीयतेअतःसर्वाधिष्ठानमात्मेत्युच्यतइतिभावः ॥ १३७ ॥ अगृह्यपदार्थमुपबृंहयति अगृह्यो
यमित्यादिभिःपञ्चाधिकचत्वारिंशताश्लोकैः ग्रहीतुंविषयीकर्तुमयोग्यत्वादेवज्ञानादिकरणैर्नगृह्यतेइति ॥ १३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणग्राह्यताभावेकरणविशेषात्मकप्रमाणग्राह्यतारूपंप्रमेयत्वंदूरापास्तमित्याह प्रमाणानामिति योभावःकरणैर्गृह्यतेविषयीक्रियतेसए वप्रमाणविषयत्वेनलोकेप्रसिद्धोनतुतद्विपरीतः तथाचागृह्यआत्माकथंप्रमेयःस्यादितिभावः ॥ १३९ ॥ ननुबाह्यांतरकरणविषयत्वंनप्र माणविषयत्वव्यापकमतींद्रियेस्वर्गापूर्वदेवतादौप्रमाणविषयेकरणसंसर्गादर्शनादितिशंकांवारयति अर्थइति अन्यथातस्यमनोग्राह्यत्वा नङ्गीकारेअयमर्थोऽतींद्रियइत्याकारंमनस्यनुभूयमानंज्ञानंकथमुपपद्येतेति तथाचव्याप्तिज्ञानशब्दज्ञानादिसहकृतंमनोऽतींद्रियमपिवि षयीकरोतीतिभावः अत्रमनःपदेनतदुपहितःसाक्षीविवक्षितःसिद्धांतेमनसःकरणत्वाभावादितिबोध्यम् ॥ १४० ॥ एवमविषयस्वभाव स्यात्मनोग्रहणायोग्यतादर्शिताअथात्मभिन्नस्यसर्वस्यविषयस्वभावत्वेनस्वभासकमात्मानंग्रहीतुंनसामर्थ्यमितिदर्शयितुमात्मभिन्नस्यस र्वस्यविषयस्वभावतामाह प्रमाणमित्यादिना प्रमाणंप्रमाकरणं अप्रमाणमप्रमायाःकरणं एतेद्वेअपितावत्प्रमातारंप्रमातृत्वोपलक्षितंसा

प्रमाणानांभवेल्लोकेविषयःकरणैर्हियः॥ गृह्यतेनत्वगृह्यःस्यात्प्रमाणविषयःक्वचित्॥ १३९॥ अर्थोयोतींद्रि योनित्यंबोद्धोसौमनसाभवेत्॥अन्यथातींद्रियोर्थोयमितिज्ञानंकथंभवेत्॥ १४०॥प्रमाणमप्रमाणंवाप्रमा तारमपेक्षते॥प्रमाप्रमायाविषयःफलंचाप्यप्रमातथा॥ अप्रमायाश्चविषयःफलंवातंसमाश्रयेत्॥ १४१॥ मानामानेतथाभग्नेविषयौतत्फलेअपि ॥ विषयौहियदास्यातांतथाभिन्नेपरेचते॥ यथाकथंचित्पुरुषावर्ण यंतीहसाहसात्॥१४२॥

क्षिणंस्वसिद्धयेसमाश्रयतः नकेवलमेतएवकिंतुप्रमाअबाधितार्थ गोचरावृत्तिस्तस्याविषयोघटादिरूपःफलंचावरणभंगादिरूपंतथाअप्रमाबाधितार्थगोचरावृत्तिस्तद्विषयस्तत्फलंचैतानिसर्वाणिसाक्षिणं स्वसिद्धयेसमाश्रयंतीति ॥ १४१ ॥ एवंसतियथासुचक्षुषःसन्निधौपयःश्वेतमेवअंधानांसदसितुनानारूपंभवतुनामतथासाक्षिणोभास कस्यापेक्षयामानादीनांसर्वेषांविषयत्वमेवमानत्वादिरवांतरोविशेषस्तुतेषामंधपरम्परयैवसिद्धइत्याह मानेति मानामानेप्रमाणाप्रमाणे यदाविषयौविषयत्वमात्रपात्रंजाते कीदृशे भग्नेशिलाभेदनप्रवृत्तकुठारवत्साक्षिणंप्रकाशयितुंप्रवृत्तेसतीभग्नेप्रतिहते फलाश्रयोहिविषय इत्युच्यते तथाचमानामानेएवभवतोनसाक्षीतिभावः तत्फलेइतिपदमावर्त्तते तथाचतयोर्मानामानयोःफलेप्रमाऽप्रमारूपेतयोःप्रमाऽप्रम योःफलेचविषयनिष्ठेज्ञाततादिरूपेविषयौजातेतथातयोर्विषयौविषयावेवतदातेमानामानादिरूपेद्वंद्वचतुष्टयेपरस्परंभिन्नेपरेविरुद्धस्वभा वेचभवतइतियत्पुरुषावादिनोवर्णयंतितद्वर्णनंतेषांसाहसादेवविषयत्वेनाविशेषंमानादीनामननुसंधायैवप्रवृत्तमित्यर्थः ॥१४२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रमानामानयोर्निरूपणेसाहसंतावत्स्पष्टयति अमानमिति मानामानयोर्मध्येअमानंवर्णयंतोवादिनःकिममानस्वरूपंप्रमाणेनगृहीत्वा वर्णयंतिअप्रमाणेनवा अंत्येभ्रांतत्वंतेषांस्पष्टं आद्येइदमुच्यते अमानंमानतोमानेनगम्यंग्राह्यंयदास्यात्तदाततूअमानग्राहकंमानंकिंमानं स्यादपितुनस्यात् मिथ्यार्थगोचरामानग्राहकस्यमानत्वंव्याहतमितिभावः ननुयदेवयस्यग्राहकंतदेवतत्रमानमितिचेत्तर्हिमिथ्यार्थग्राहकममानमपिमानंस्यादित्याशयेनाह तथात्वइति तथात्वेग्राहकमात्रस्यमानत्वे ॥ १४३ ॥ मानामानकथायावृथात्वंप्रकारांतरेणस्पष्टयति अपेक्षयेति यथारूपापेक्षयामानत्वाभिमतंचक्षुर्मानंतथागंधापेक्षयातदेवामानमिति ॥ १४४ ॥ अमानग्राहकत्वेमानस्यामानत्वापत्तिदृष्टांतेनस्फुटयति मानेति यत्यतोमानगम्यंमानेनगृहीतममानस्वरूपमपिभवतांगीकृतंततएवअमानभूतार्थग्राहकत्वादेवमानस्यापि

अमानंमानतोगम्यंयदास्यात्तर्हिकिंतदा॥ भवेन्मानंतथात्वेस्यान्मानामानकथावृथा॥ १४३॥ अपेक्षया यथामानममानंतद्वदेवहि॥ अपेक्षयैवमानंस्यादमानंवादिनांबलात्॥ १४४॥ मानगम्यममानंयन्मानस्यापिनमानता॥ रज्जुसर्पादिकानांस्याज्ज्ञानेष्वत्रनमानता ॥ १४५॥ एवंमायामपिज्ञेयमुक्तंयत्करणेष्विह॥ फलेनैवविभेदोस्तिक्वचिदर्थप्रकाशने॥ स्वतोऽतोभेदकंहित्वाकिंचिन्मानादिकारणं॥ १४६॥

मानतान मानतागता रज्जुसर्पज्ञानवदित्यर्थः ॥ १४५॥ एवंमानस्यग्रहणंमानेनामानेनवा आद्येस्वेनग्रहणेआत्माश्रयः परेणग्रहणेऽन्योन्याश्रयादिश्च अंत्येमानत्वहानिरितीममर्थंसिद्धवन्मत्वाउक्तंन्यायंप्रमादावतिदिशति एवमिति मायांप्रमायांतदुपलक्षितायामप्रमायांचज्ञेयंयोज्यं यत्करणेषुमानामानरूपेषुउक्तमिति किंप्रमाप्रमयैवग्राह्याअप्रमयावा आद्येआत्माश्रयादिरंत्येऽप्रमात्वापत्तिरिति यदाकरणानांतज्जन्यवृत्तीनांचप्रमासंज्ञानांभेदस्याप्रामाणिकत्वंसिद्धंतदाप्रमाणाद्युपाधिकएवयस्यभेदस्तस्यफलस्यभेदोऽप्रामाणिकइतिकिमुवक्तव्यमित्याह फलेइति अर्थप्रकाशनरूपेफलेआवरणभंगोपलक्षितेस्वतःस्वभावादेवभेदोनास्तिकिंतुमानादिकंअतःअनयाउपाधितयाभेदस्यकारणंप्रयोजकमपेक्ष्यैवभेदःसचोपाधीनामेव भेदसाधकाभावोबाधितइत्यर्थः ॥ १४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंमानादीनांविषयसाधकानांभेदस्याप्रामाणिकत्वेविषयाणांभेदस्याप्रामाणिकत्वंसुतरांसिद्धमित्याह विषयेष्विति भेददृष्टेर्भेददृष्टिसामग्र्याअभावेअप्रामाणिकत्वेविषयेषुकथंभेदःसिद्ध्येत् तदेवस्पष्टयति सत्तेत्यादिना सत्ताविषयस्येतिशेषः ज्ञानेनप्रमादिरूपेण अन्यथाअप्रमाविषयस्यापिसिद्धौरज्जुसर्पादीनामपिसिद्धिरप्रमादतःप्रमादाभावकालेपिस्यात्सत्यार्थस्यहिसावधानतादशायांज्ञानंप्रसिद्धमितिद्वयोरर्थः ॥ १४७ ॥ १४८ ॥ ननुचक्षुरादिमानेनविषयसिद्धिरितिदुराग्रहेणपृच्छतोदुराग्रहंमानत्वासिद्ध्यासोपपत्तिकंखण्डयति मानंहीति पंचभिः भवदभिमतंमानंयदाविषयान्गृण्हत्प्रकाशयद्भवतितदामानंप्रमाणत्वशालिभवतिकिंवास्वतःस्वभावादेवमानं आद्येविषयमानयोःपरस्परसिद्धिसापेक्षसिद्धिकयोरन्यतरस्यापिसिद्धिर्नस्यात् नहिपरस्परापेक्षाणिकार्याणिलोकेपिसिद्ध्यंतीतिभावः ॥ १४९ ॥ ननुसापे

विषयेषुनभेदोस्तिभेददृष्टेरभावतः ॥ सत्ताज्ञानेनगंतव्याऽज्ञानंचेदप्रमाभवेत् ॥ १४७ ॥ नचैवविषयःसिद्धिं यातिकुत्रापिकर्हिचित् ॥ अन्यथारज्जुसर्पादेःसिद्धिःस्यादप्रमादतः ॥ १४८ ॥ मानंहिविषयान्गृह्णन्मानंस्यादथवास्वतः ॥ प्रथमेनैवसिद्धिःस्यात्सदाविषयमानयोः ॥ १४९ ॥ अन्योन्याश्रयतापिस्याद्दोषःपक्षेपुरोदिते ॥ स्वतश्चेन्मानतातस्यस्यादमानस्यसानकिं ॥ १५० ॥ परतोयद्यमानत्वममानेषुतथापिहि ॥ मानेनैवभवेत्तद्धितस्यापिपरतोनकिम् ॥ १५१ ॥

क्षाणामपिसिद्धिःकुतोनभवतीतिचेत्परस्परापेक्षायाएवदोषत्वेनप्रतिबंधकत्वादित्याह अन्योन्याश्रयतेति पुरोदितेप्रथमे अपिशब्देनसापेक्षसिद्धिकस्यतृतीयादेःकल्पनायांचक्रकानवस्थादिर्गृह्यते अंतेतुस्वभावादेवमानस्यमानत्वेअमानस्यापिस्वभावादेवमानत्वंकुतोनसिद्ध्यतीति नचस्वभावस्यपर्यनुयोगायोगइतिवाच्यं सत्यंस्वभावोनपर्यनुयोज्योयदिप्रामाणिकःस्यादत्रतुनमानमितिभावः ॥ १५० ॥ ननुमानानांमानत्वमौत्सर्गिकत्वात्स्वाभाविकं अमानानांतुदोषेणपरगृहीतेनापोद्यतेतिमीमांसकरीत्यामन्यमानंप्रत्याह परतइति यदिअमानेषुअमानत्वंपरतःपरेणदोषग्राहकेणसिद्ध्यतीतिमन्यसेतथापितदमानस्यामानत्वंकेनचिद्दोषग्राहकेणमानेनैवस्यादुपपद्येत तत्रैवंपृच्छ्यते तस्यदोषग्राहकस्यापितदमानत्वंपरेणतद्दोषग्राहकेणकिंनभवेदिति ॥ १५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुदोषग्राहकमानस्यामानत्वंभवेदेवयदितत्राप्रामाण्यप्रयोजकोदोषउपलभ्येतअत्रतुप्रत्युतअनुपलब्ध्यादोषाभावएवगृह्यतेइतिकथम प्रामाण्यमितिशंकामनूद्यतन्निरासंप्रतिजानीते भवेदिति त्वदुक्तविधयादोषग्राहकमानस्यामानताभवेदेवपरंतुतत्रामानत्वग्राहकस्यामान त्वेकारणंप्रयोजकंदोषरूपंनदृश्यतेइतित्वयोक्तेपिमानस्यस्वस्तिकुशलंसिद्धिरूपंदुर्लभमिति ॥ १५२ ॥ कुतइत्याकांक्षायामाह अदर्शन मिति अदर्शनमनुपलब्धिर्दोषाभावंमानत्वोपयोगिनंगृह्णंतीकिंमानरूपासतीगृह्णातिअमानरूपासतीवा आद्येउक्तविधयास्वाभाविकमा नत्वानुपपत्त्यादोषशंकावारणायोत्तरोत्तरंमानापेक्षायामनवस्थाभवेत् अंत्येविषयस्यानुपलब्धिग्राह्यदोषाभावकस्यामानतासिद्धिरि त्यर्थः ॥ १५३॥ फलितमाह ततइति यतउक्तविधयामानत्वसिद्धिर्नास्तिततएवविषयसत्तासाधकस्याभावः तेस्वप्रकाशात्मानमनभ्यु

भवेद्मानतातत्रकारणंनैवदृश्यते ॥ इत्युक्तेपिभवेत्स्वस्तिमानायास्मैनकर्हिचित् ॥ १५२ ॥ अदर्शनंयथामा नंतदोक्तादोषसंततिः ॥ भवेद्मानतायांस्याद्विषयस्याप्यमानता ॥ १५३ ॥ ततोविषयसत्तायांमानंनैवल भामहे ॥ मामानयोःकथंनामसत्तायांमानमस्तिते ॥ १५४ ॥ अपिसर्वस्यमेयत्वेकथमेतच्चतुष्टयम् ॥ चतुष्ट यस्यचाभावेकथंमानादिसंस्थितिः ॥ १५५ ॥ ततोमानादिभेदोयंगंधर्वनगरोपमः ॥ अभिमानेनसंसिद्धोवा दिनांनतुवस्तुतः ॥ १५६ ॥ अपेक्षयाहियद्यत्रभवेत्तत्रनतद्भवेत् ॥ पुरुषत्वंयथास्त्रीणामपेक्षाजंनविद्यते १५७ ॥

पगच्छतोमते विषयसत्ताऽसिद्धौचत्वन्मतेविषयभानानुमेयसत्ताकयोर्मायाःप्रमायाःतथाऽमानस्यचसत्तासाधकमानाभावःकिमुवाच्य इत्यर्थः ॥ १५४ ॥ किंचमामानयोःफलस्यचमानेनसिद्धिस्वीकारेतेषांमेयत्वस्यैवापत्तौमामानमेयफललक्षणस्यचतुष्टयस्यतत्प्रयुक्त स्यव्यवहारस्यचसिद्धिस्तवमतेकथंस्यादित्याह अपीति सर्वस्यमाप्रभृतेः संस्थितिर्व्यवहारक्षमत्वं ॥ १५५ ॥ कथंतर्हिसिद्धांतेसर्वोपप त्तिरितिचेत्स्वमवदविद्यामूलकयाकल्पनयेत्याह ततइति अभिमानेनकल्पनयेतियावत् कल्पितानांतुसाक्षिमात्रभास्यत्वंप्रसिद्धमिति ॥ ११ ॥
॥ १५६ ॥ कल्पितस्यवस्तुतोऽभावंविशदयति अपेक्षयाइति अपकृष्टादोषप्रयुक्ताईक्षादृष्टिरपेक्षातयायत्राधिष्ठानेयद्भवेत्सिद्ध्येत्तत्क ल्पितंतत्राधिष्ठानेवस्तुतोनभवेत् यथापुरुषवेषशालिनीषुस्त्रीषुपुरुषत्वमिति ॥ १५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपेक्षापदार्थप्रदर्शनपूर्वकंकल्पनायाविषयसत्तौदासीन्येऽनुमानमाह अपेक्षेति अपकृष्टेक्षारूपापेक्षालोकेबुद्धिरित्युद्दिष्टाप्रोक्ता अतएवनूतनमर्थंकल्पयंतःकवयोमद्बुद्धावेवंभातीतिव्यवहरंतीति तथाचैवंप्रयोगः बुद्धिरर्थस्यग्रहेसत्तासाधनेनक्षमाबुद्धित्वाद्रज्जुसर्पविषयकबुद्धिवदिति नचाप्रयोजकत्वं नेहनानेत्यादिश्रुत्यनुगुणत्वादिति ॥ १५८ ॥ अर्थेति यथाचएषरज्जुसर्पबुद्धिकृतोव्यवहारोभयकंपादिलक्षणःसदर्थग्रहंविनापिभवतितद्वदेवायंलौकिकःसर्वोपिव्यवहारोविनामानंसिद्धइत्यर्थः ॥ १५९ ॥ एवंदृश्यमात्रस्यकल्पितत्वेनसाक्षिमात्रभास्यस्यात्मभानाक्षमत्वंदर्शितंतत्रौपनिषदत्वप्रसिद्ध्याश्रुतिविषयत्वमाशंक्यतस्यान्यथोपपत्तिमाह श्रुतेरिति श्रुतेरपिजडंनतात्पर्यविषयोमिथ्यात्वात् नात्मास्वयंप्रकाशत्वात् किंतुसाश्रुतिरपिभावाभावपदार्थस्थूलसूक्ष्मप्रपंचानुकूलाःकृतीःकर्तृत्वानिजगज्जन्मादिकारणत्वमिति

अपेक्षाबुद्धिरुद्दिष्टाबुद्धिर्नार्थग्रहक्षमा॥ बुद्धित्वाद्यद्वदेषास्याद्रज्जुसर्पगतासदा ॥ १५८॥ अर्थग्रहंविनाप्येषव्यवहारोयथाभवेत्॥ लौकिकस्तद्वदेवायंव्यवहारोप्यमानतः ॥ १५९ ॥ श्रुतेरपिनकोप्यस्तिविषयःकिंतुसापिहि॥ भावाभावकृतीरात्मन्यध्यस्यैवप्रवर्तते ॥ १६० ॥ स्वयंप्रकाशआत्मातःसिद्ध्यतिस्वतएवहि॥ तस्मान्नमानतस्तस्यसिद्धिःक्वापीहसंभवेत्॥ १६१ ॥ अपिमानादिभेदोयंप्रमातुःसंश्रयाद्भवेत्॥ प्रमिणोमीतिविज्ञानकर्तारंनविहायहि॥ प्रमाणादिविभेदोयंदृष्टःकेनापिकुत्रचित्॥ १६२ ॥

यावत् आत्मनिअध्यस्याध्यारोप्यतदपवदंतीप्रवर्त्ततेबोधयतीत्यर्थः तथाचावरणभंगएवतदाकारवृत्तिव्युत्पादनेमश्रुतेर्व्यापारोनात्मप्रकाशनेतावतैवचौपनिषदत्वमितिभावः ॥ १६० ॥ फलितमाह स्वयमिति क्वापिलोकेवेदेच मानानामावरणभंगएवव्यापारादिति॥ १६१॥ एवंमानादेर्भास्यत्वेनस्वभासकात्मभासकत्वंनास्तीत्युक्तं अथचेतनभास्यत्वनिरासेनस्वयंप्रकाशत्वंद्रढयितुंपूर्वोक्तमनुवदति अपीति अपिशब्दःश्लोकादौवर्त्तमानोवाक्यांतरारंभसूचकइत्युक्तं सर्वोमानादिभेदःप्रमातुःसंश्रयात्प्रमातृसिद्धौसत्यामेवभवतीतिप्रसिद्धंसर्वत्र एवमन्वयमुखेनोक्तंव्यतिरेकमुखेनाह प्रमिणोमीत्यादिना अहंप्रमिणोमिसम्यङ्निश्चिनोमीत्याकारकतयाश्रयंप्रमातारंविनामानादिभेदसिद्धिर्नदृष्टेत्यर्थः ॥ १६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमातात्विति उक्तविधःप्रमातास्वरूपभूतस्वप्रकाशचैतन्येनैवसिद्धोविशिष्टकेवलयोरभेदादितिसिद्धांतः अन्यथावादिनांमतान्यनुसृत्याहमित्याकारकज्ञानविषयत्वेनसिद्धिस्वीकारेवक्तव्यं असौप्रमाताकिंस्वेनात्मनैवचेतनेनज्ञानलक्षणक्रियाविषयतांनीयतेपरेणवेति ॥ १६३ ॥ अंत्येआह परेति यथादेवदत्तोयज्ञदत्तंजानन्नेनंजानामीत्यनुसंदधातितथापरविज्ञानपक्षेएनंप्रमातारंजानामीत्येवमनुसंदध्यान्नत्वात्मानंजानामीति परस्यपरत्रात्मशब्दप्रयोगानुपपत्तेरिति आद्यआह आत्मनैवेति आत्मकर्तृकाआत्मकर्मिकाचज्ञानक्रिया कर्मकर्तृत्वविरोधान्नसंभवतीत्यर्थः ॥ १६४ ॥ किंचतार्किकमतेजडेभ्यआत्मनःकोविशेषइत्याह अपिचेदिति ज्ञानात्मनःसंयोगजंज्ञानगुणंप्राप्यचेतनःसन्नात्मात्मानंजानाति केवलस्त्वज्ञोजडएवेतिमतेघटोपिमनःसंयोगेनात्मानंकुतोनजानातीत्यर्थः नचघटेमनोयो

प्रमातातुयदाज्ञेयोभवेद्वादिमतेतदा ॥ केनासौचेतनेनस्यात्स्वास्वेनपरेणच ॥ १६३ ॥ परविज्ञानपक्षेस्याज्ज्ञानाम्येनमितीवधीः ॥ आत्मानमितिनैवस्यान्नह्यन्योन्यात्मतांव्रजेत् ॥ आत्मनैवात्मनोज्ञानंदुष्करंतत्प्रसज्यते ॥ १६४ ॥ अपिचेदात्मनात्मानमात्मावेत्तिसचेतनः ॥ ज्ञानादज्ञोघटोप्येवंस्वयंस्वंकेनवेत्तिन ॥ १६५ ॥ जडरूपोभवेदात्माघटश्चकथमेतयोः ॥ विशेषोनचमूर्तत्वंनभसोज्ञानिनांतथा ॥ १६६ ॥ नचदेहेनसंबंधोज्ञानित्वेस्यान्नियामकः ॥ नभआदेरसौनैवनास्तिकेननभस्तदा ॥ १६७ ॥

गोनास्तीतिवाच्यं अणुत्वेननित्यानामनेकमुक्तपुरुषसंबंधिमनसांसंबंधस्यसौलभ्यादितिभावः ॥ १६५ ॥ जडत्वेनघटात्मनोःसाम्येतवमतेघटात्मनोर्विशेषोदुर्वचइत्याह जडेति ननुघटस्यमूर्त्तत्वंपरिच्छिन्नपरिमाणत्वरूपमात्मनोवैलक्षण्यप्रयोजकमितिचेत्तर्हिविभोराकाशस्यात्मत्वप्रसक्तिस्त्वयादुष्परिहरेत्याह नचमूर्त्तत्वमित्यादिना यथाघटेवर्त्तमानंमूर्त्तत्वंघटस्यात्मनोविशेषस्तथाविभूनांज्ञानिनांभवदभिमतात्मनांनभसश्चकोपिविशेषोनास्तीत्यर्थः ॥ १६६ ॥ विशेषमाशंक्यनिराचष्टे नचेति शरीरावच्छिन्नआत्मनिज्ञानंजायतेइत्यभ्युपगच्छतस्तवमतेदेहसंबंधोपिनियामकोज्ञाननियमनद्वाराआत्मभेदकोंगीकर्त्तुंनशक्यःयतोनभःप्रभृतेर्विभोरसौदेहसंबंधःकेनहेतुनानैवनास्तिकिंत्वस्त्येव विभुत्वस्यसाम्यात् फलितमाह नभस्तदेति तदाशरीरसंबंधस्यात्मत्वनियामकत्वेनभएवात्मास्यादित्यर्थः ॥ १६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जडात्मवादिनइष्टापात्तिंनिरस्यति एवमिति एवंस्वभावतोजडरूपात्मनःस्वीकारेस्वस्वामिभावोजडवर्गेणसहचेतनस्यभोक्तृभोग्यभावइ तियावत् आदिपदेनउपकार्योपकारकभावादिःसंबंधश्चेतननिर्वाह्योदुर्निरूपःस्यात् आगंतुकज्ञानहेतोर्मनःसंयोगादेरुक्तविधयाघटा दिदेशेपिसौलभ्यात्कर्त्तृत्वंभोक्तृत्वंचसर्वत्रस्यादिति ॥ १६८ ॥ ननुनघटादेःकर्त्तृत्वाद्यापत्तिः प्रत्यक्षरूपायास्तन्मूलकानुमितिरूपाया श्चदृष्टेर्व्यवस्थापकतयाश्रयणादितितार्किकशंकामनूद्यतन्निरासंप्रतिजानीते यद्यत्रेति अपेशलमसुंदरं त्वयाभ्युपगतादृष्टिःकिमात्मरूपा तद्धर्मरूपावा आद्येअस्मदिष्टापत्तिः अंत्येधर्मस्यभवन्मतेधर्मिभिन्नस्यप्रकाशरूपत्वेपिधर्मिणोजडस्यभानंकथंनहिपुत्रपांडित्येनपितुः पांडित्यमित्याशयेनाह दृष्टिर्नामेति अत्रआत्मनित्वदंगीकृतादृष्टिःकिंस्वरूपायामुपपाद्यभवान्कृतीकृतार्थःस्यादित्यर्थः ॥ १६९ ॥ आत्म भिन्नायादृष्टेरात्मनिनोपकारकत्वमितीममर्थंहेतुत्वेनाह अस्येति दृष्ट्यामभ्युपगतायामप्यस्यात्मनस्तद्भिन्नस्यजडस्ययद्यसिद्धिस्तदातदा

एवंस्वस्वामिभावादिसंबंधोदुर्भणोभवेत्॥ भोक्तृताकर्तृताचैवंसर्वत्रैवप्रसज्यते॥ १६८॥ यद्यत्रदृश्यतेतत्र तत्स्यादित्यप्यपेशलम्॥दृष्टिर्नामात्रकातेस्याद्यांसमर्थ्यकृतीभवान्॥ १६९॥ अस्यासिद्धौयतोनैवज्ञानमात्रं प्रसिद्ध्यति॥अस्यसिद्धौतयानार्थःसर्वदाफलशून्यया॥ १७०॥अपिदृष्टिर्भवेन्नूनंमानंमानंचनैवहि॥सिद्धम द्यापिकेनत्वमात्मानंसाधयिष्यसि॥ १७१॥अपिमानंभवेन्मायाहेतुर्वासाप्रमाभवेत्॥माहेतोर्माननतातेस्यात्प्र दीपस्येवसर्वथा॥ १७२॥तथाचसर्वमानानांमानांतरमपेक्षितं॥एवंस्यादनवस्थादिदूषणंदुर्भणंतव॥ १७३

श्रितायादृष्टेःकथंसिद्धिः यदित्वात्मास्वयंप्रकाशत्वेनमानांतरेणवासिद्ध्यतितदानिष्फलयादृष्ट्याकोर्थइत्यर्थः ॥ १७० ॥ किंचत्वयादृष्टिः करणव्युत्पत्त्याप्रमाणरूपाऽभ्युपगम्यतेप्रमाणत्वसिद्धिस्तुपूर्वोक्तरीत्यादुर्लभेतिकथंतयादृष्ट्यात्मसिद्धिरित्याह अपीति स्पष्टम्॥ १७१॥किं चभवदभ्युपगतादृष्टिर्मानंभवंतीकिंचक्षुरादिवत्करणव्युत्पत्त्यामानंभावव्युत्पत्त्यावा आद्येप्रमाकरणत्वलक्षणप्रामाण्यलाभायस्वजन्य ज्ञानस्यप्रमात्वसाधकंमानांतरमपेक्षणीयं एवंतेनान्यत्तेनान्यदित्यनवस्थास्यादित्याह अपिमानमिति सादृष्टिर्मानंभवंतीमायाःप्रमायाः करणंयतस्ततोमानंभवेदथवाप्रमैवभावव्युत्पत्त्यामानपदार्थभूतासादृष्टिर्भवेदितिपूर्वार्द्धार्थः आद्येप्रदीपवत्प्रमाहेतोर्माननतात्वदभ्युपगता तथाचस्वजन्यज्ञानप्रमात्वग्राहकमानांतरापेक्षापरंपरयानवस्था आदिपदेननिःशंकप्रवृत्त्यनुपपत्तिर्ग्राह्या दुर्भणंदुःखेनसमाधेयमितिद्व योरर्थः ॥ १७२ ॥ १७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१३॥

अंत्येयान्यायमतेप्रमाप्रसिद्धासैवसांख्यमतेयथाप्रमाणंतथात्वयांगीकारेपिवक्तव्यंसांख्यानामिवमानभूतादृष्टिःकिंस्वयंप्रकाशाप्रकाश हीनावापरप्रकाश्यावेतिविकल्प्यांत्यावनूद्यनिरस्यति मापीतिद्वाभ्यां माप्रमा ॥ १७४॥ भानेति यदाभानशून्यातदांधकारस्यघटसाम्यं यदापरप्रकाश्यातदापिघटसाम्यं अनवस्थाप्रसंगश्चाधिकः परस्यापिपरसापेक्षस्यापेक्षणादित्यर्थः आद्यंस्वयंप्रकाशविकल्पंनिराचष्टे न चस्वेनेति स्वेनभातेतिनचवक्तव्यं यतोलोकेस्वयंस्वस्यभानंनदृश्यतइत्यन्वयः त्वयाहिशुष्कतार्किकेणलौकिकदृष्टांतमुनुरुद्ध्यैवार्थःसाध नीयः लोकेचस्वकर्मकप्रकाशकर्त्ताकश्चिदर्थोनदृष्टइत्याशयः॥ १७५॥ स्वयंभानपक्षेप्यात्मभिन्नादृष्टिःकिंखद्योतवत्स्वरूपस्यैवप्रकाशि कांकिंवादित्यवत्सर्वप्रकाशिकेत्याह अपिस्वयमिति ॥ १७६ ॥ विकल्पयोःक्रमेणविषयासाधकत्वंसर्वज्ञतापत्तिंचदोषमाह आद्येइति

मापिमानंभवेद्यर्हितदासापिकथंभवेत् ॥ भातासतीस्वयंकिंसाप्यथवाभानवर्जिता ॥ १७४॥ भानशून्याभ वेन्नैषामानंघटसमायतः ॥ भातापिनपरेणस्यादुक्तदोषप्रसंगतः ॥ नचस्वेनस्वयंस्वस्यभानंलोकेनदृश्यते ॥ १७५ ॥ अपिस्वयंयदाभातातदाप्येषाहिकीदृशी ॥ खद्योतसदृशीवास्यादादित्यसदृशीहिवा ॥ १७६ ॥ आ द्येखद्योतवन्नस्याद्विषयस्यप्रकाशिका ॥ द्वितीयेसर्वविज्ञानमेकबुद्धौभवेत्तव ॥ १७७॥ अपिबुद्धिर्यदाजाता विषयेनतदास्वयं ॥ उत्पद्यतेविनातत्रसंयोगादीन्कदाचन ॥ १७८ ॥ कर्ताभोक्तायमात्मास्यादितितेवगतंक थं ॥ नेत्रसंयोगतोनैवंगम्यतेत्रकथंचन ॥ १७९ ॥

एकबुद्धावेकस्यार्थस्यापिज्ञानकालेसर्वज्ञानंस्यादिति ॥ १७७॥ एवंमानस्यदुर्निरूपत्वेनात्मनोऽगृह्यतोक्ता इदानीमभ्युपेत्यापिचक्षुरादी नांमानतांतत्सन्निकर्षायोग्यतयात्मनोऽगृह्यतेतिदर्शयति अपिबुद्धिरितित्रिभिः किंचयदाबुद्धिर्विषयेघटादौजायतेतदापिस्वयमेवनजा यतेकिंतुचक्षुरादिप्रमाणानांसंयोगादिसंबंधमपेक्ष्यैवजायतेइत्यर्थः ॥ १७८ ॥ ततःकिमतआह कर्त्तेति आत्माकर्तृत्वेनभोक्तृत्वेनचवि शिष्टइत्याकारकंज्ञानंतवकथंजातं नहिचक्षुरादींद्रियसंयोगेनैवमुक्ताकारेणज्ञानंसंभवति पराचिखानीत्यादिश्रुतेः पराक्त्वस्येंद्रियसं योगव्यापकस्याभावेनतद्व्याप्यस्येंद्रियसंयोगस्याभावात् मनस्तुप्रमाणपरतंत्रत्वाद्वृत्तिप्रत्युपादानत्वेनतांप्रतिकरणत्वात्करणत्वाभ्युपगमे चानुमित्यादीनांप्रत्यक्षत्वापाताच्चनप्रमाणमितिभावः ॥ १७९ ॥ ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इंद्रियसंयोगविषयत्वाभ्युपगमेचपराक्पदार्थस्यदेहादेरात्मतापत्तिस्तथाचासुरव्यामोहार्थंचार्वाकमतप्रणेतुर्गुरोर्बृहस्पतेर्मतस्यस्वीकारप्रसंगइत्याह नेत्रेति एतदुक्ताकारकंज्ञानंयदिनेत्रसंयोगतोजायेततर्हिदेहेएवजायेततथाचचार्वाकत्वमंधतमःप्रवेशकारणंबृहस्पतिप्रणीतलोकायतशास्त्रानुसारिप्रसज्जेतेत्यर्थः इंद्रियकरणकप्रत्यक्षासंभवेचप्रत्यक्षमूलकानामनुमानादीनांविषयतादूरतोनिरस्तेत्याह नानुमानादिकमिति॥ १८०॥ननुप्रमाणांतराभावेपिकर्तृवाचकतृच्प्रत्ययांतद्रष्टाश्रोतामंताइत्यादिपदरूपाऐतरेयश्रुतिःकर्तृत्वेमानमितिचेन्न दर्शनकर्तृत्वादिनिषेधकस्याद्रष्टाऽश्रोतेत्यादिश्रुत्यंतरस्याप्यपूर्वार्थत्वेनस्वार्थपरस्यतत्रविद्यमानत्वादित्याह द्रष्टेत्यादि द्रष्टेत्यादिकाकर्तृत्वानुवादिकाश्रुतिर्यथाविद्यतेतथाअद्रष्टेत्यादिकाकर्तृत्वनिषेधिकापिवर्ततेइत्यर्थः ब्रह्मैवतेजएवेत्यादिकाआत्मनस्तेजस्त्वेनचैतन्यमात्रताबो

नेत्रसंयोगतश्चैतज्ज्ञानंदेहेविजायते॥ तथाचमतमायातंबलाद्देवगुरोस्तव ॥ नानुमानादिकंकिंचिद्दृश्यतेमूलहीनतः॥ १८०॥ द्रष्टेत्यादिश्रुतिर्यद्वदद्रष्टेत्यादिकातथा॥ तस्मादात्मगतौनैवंमानमेयादिलभ्यते॥ १८१॥ अपिसर्वस्यनैवैतदुक्तरीत्यात्रलभ्यते॥ आत्मनस्तुकथंनामभवेदेतत्सुदुर्लभम्॥ अगृह्यस्ततएवायमुक्तोमात्रासमानया॥ १८२॥ श्रुत्यासर्वात्मनस्तस्यशीर्णतापिनविद्यते॥ भेदवत्तुशीर्णतांगच्छेल्लोकेयद्वसनादिकम् ॥ १८३॥ मूर्तिमत्त्वतथानायंशीर्यतेतत्कथंपुमान्॥ अशीर्योऽतस्तथोक्तोयंश्रुत्यायस्मान्नशीर्यते ॥ १८४॥

धिकातथाविद्यावस्थायांकेनकंपश्येदित्यादिकाकर्तृत्वंप्रतिक्षिपंतीचश्रुतिरत्रानुसंधेया फलितमाह तस्मादिति आत्मनोगतौज्ञानेमानादिकंनास्तीतिकिंतुस्वयंप्रकाशतयैवात्माभासतेइत्यर्थः ॥ १८१ ॥ परमार्थतोवर्णितरीत्याकस्याप्यर्थस्यज्ञानेमानादिकंदुर्वचंकिमुतात्मनीत्याह अपिसर्वस्येति परमफलितमाह अगृह्यइति हितोपदेशकत्वेनजननीसमानयाश्रुत्याततएवागृह्यइत्ययमात्मोक्तइत्यन्वयः॥ १८२॥ अशीर्यपदार्थमाह श्रुत्येति श्रुत्येतिपदंपूर्वान्वयि सर्वात्मकत्वेनांहसकस्यासंभवात्शीर्णताहननकर्मताऽस्यात्मनोनयुज्यते किंचलोकेवस्त्रादिकंशीर्णतायाअवयवबंधशैथिल्यरूपायाआश्रयत्वेनप्रसिद्धंतद्भेदवत्तथामूर्त्यावयवघनीभावात्मकयायुक्तंचदृष्टं आत्मनितुशीर्णताव्यापकंतदुभयंभेदवत्त्वमूर्तिमत्त्वलक्षणंनास्ति ततस्तद्व्याप्यशीर्यत्वंकथमुच्येतेत्यभिप्रायेणयस्मान्नशीर्यतेऽतोऽशीर्यइतिश्रुत्योक्तइतिद्वयोरर्थः ॥ १८३ ॥ १८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंस्वाभाविकविक्रियाभावउक्तोऽथागंतुकदोषाभावपरस्यासंगपदस्यार्थंदर्शयति अपिसंगवतामितिपंचभिः येलोकेसंगवंतस्तेषांसंगहेतुकोदोषःपरिणामादिरायातिप्राप्नोतिकालवशाद्यथावन्हेःसंगाज्जलस्येति॥ १८५ ॥ संगस्यदोषप्रयोजकतांव्यतिरेकेणापिदर्शयति असंगस्येति अब्दोमेघः आदिपदेनविद्युदादिग्रहः॥ १८६ ॥ श्रुतौनहिसज्जतेइत्यनेनसंगप्रयोजकयोर्मूर्त्तत्वपरिच्छिन्नत्वयोरभावःसंगाभावेहेतुतयासूचितइत्याशयेनाह मूर्तंहीति तस्मान्मूर्त्तात्परिच्छिन्नाच्चविलक्षणस्यअस्यात्मनः॥१८७॥ संगस्यसफलस्यस्वरूपमभिनयति प्रत्यासत्तिरिति प्रतिआभिमुख्येनआसत्तिर्लाभइतरंप्रतिगुणीभावइतियावत् यथावन्हेर्जलंप्रति अथवासंयोगादिःसंबंधः एतदुभयरूपः संगःप्रसिद्धः तस्यसंगस्यफलंतुकंचित्कालंतदात्मतातस्यसंगप्रतियोगिनआत्मेवआत्मास्वरूपंयस्यतत्त्वं यथावन्हिसंगेनजलस्यउष्णतया

अपिसंगवतांसंगाद्दोषआयातिकालतः॥ यथाजलस्यशीतस्याप्युष्णतावन्हिसंगतः॥१८५॥ असंगस्यतथादोषोदृष्टोनैवकथंचन॥ नभसोत्रविशुद्धस्ययथाब्दादिकृतोनहि॥१८६॥ मूर्तंहिसंगवद्दृष्टंपरिच्छिन्नंचवादिभिः॥ तस्माद्विलक्षणस्यास्यसंगःस्यात्केनहेतुना॥ १८७ ॥ प्रत्यासत्तिर्भवेत्संगःसंयोगादिरथापिवा ॥ फलंतस्यभवेल्लोकेकंचित्कालंतदात्मता॥ १८८॥ स्वसजातिविजात्युत्थभेदगंधविवर्जितः ॥ कथंसतादृशःकेनतत्फलोपिभवेत्पुमान्॥१८९॥ अपिसंगवतांसंगाद्बंधादिफलभाजिनां ॥ आरंभकादिहेतूनांवियोगादिसमुद्भवात्॥ विनाशःसहसाक्वापिशनैर्वाथक्वचिद्भवेत्॥ १९० ॥

वन्ह्यात्मकताइति ॥ १८८ ॥ आत्मनस्त्वद्वितीयत्वेनउक्तस्यसंगस्यतत्फलस्यचासंभवइत्याह स्वजातीति यतआत्मासजातीयादिभेदहीनस्ततस्तादृशोवर्णितसंगवान्कथंभवेत्तथाइतरतादात्म्यलक्षणसंगफलशालीचकथंभवेदिति ॥ १८९ ॥ असंगत्वेचात्मनोनित्यमुक्तत्वं तेनरूपेणाविनाशित्वंचपरमपुरुषार्थरूपताप्रयोजकंसिद्धमित्यर्थपरस्यासितोनरिष्यतीतिवाक्यस्यार्थमाह अपिसंगवतामितिद्वाभ्यां ये लोकेसंगवंतस्तेबंधरूपमादिपदग्राह्यपरिणामरूपंवाफलंभजंतोदृष्टास्तेषांविनाशश्चसंभवति कुतः आरंभकाणांन्यायमतेसांख्यमतेतुपरिणामिनांहेतूनामुपादानादिकारणानांवियोगस्यविभागस्यादिपदग्राह्यविनाशस्यवासमुद्भवात् कीदृशःसंगवतांनाशः क्वचित्सहसाअलक्ष्यक्रमकःक्वचित्शनैर्लक्ष्यक्रमकइत्यर्थः॥ १९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनित्वसंगेसंगव्याप्यौबंधविनाशौनसंभवतइत्याह अयमात्मेति नबध्यतेनषिजूधात्वर्थबंधभाक् ॥ १९१ ॥ एतदेवात्मनस्तुरीयंरूपंतवगंतव्यत्वेननिर्दिष्टमभूदित्याह विशेषैरिति गंतव्योज्ञानमात्रेणप्राप्यः अधुनातुतंसाक्षात्कुर्वन्भवान्सर्वात्मकःपुमान्संपन्नोस्तीतिचतुर्थपादार्थः ॥ १९२॥ अभयमित्यादिवाक्यस्यार्थमाह मातेइत्यादिना अधुनासंसारशूलतोभयंतेमाभवतुत्वयिनसंभवति यतःसर्वजंतूनामात्मानमीश्वरमीश्वरत्वोपलक्षितमानंदात्मकमभयंतत्त्वमात्मरूपेणजानन्प्राप्तोसि ज्ञानमात्रेणप्राप्तौहेतुरैक्येनेति यद्यात्मातटस्थोग्रामादिवत्स्यात्तदातस्यप्राप्तिःक्रियामार्गेणस्यात् ऐक्येतुज्ञानमेवतत्प्राप्तिरितिभावः ॥ १९३ ॥ नन्वात्मज्ञानेपिभयंकुतोनभवतीतिचेद्भयकारणद्वितीयविज्ञानस्याद्वितीयसतत्त्वकात्मज्ञानस्यचविरोधादित्याशयेनाह सर्वेति सर्वेषांप्राणिनांद्वितीयंविज्ञायैवभयंभवति सर्वतःसर्वस्मिन्

अयमात्मायतोऽसंगोबध्यतेनततःक्वचित्॥ विनश्यतिनचाप्येषसंगाभावेनहेतुना॥ १९१ ॥ विशेषैरखिलैःशून्योह्यवाङ्मनसगोचरः ॥ गंतव्योभवताराजन्भवान्सर्वात्मकःपुमान्॥ १९२ ॥ मातेभवतुराजेंद्रभयंसंसारशूलतः॥ अभयंसर्वजंतूनामानंदात्मानमीश्वरम्॥ आत्मानमात्मरूपेणप्राप्तोस्यैक्येनसर्वदा॥ १९३ ॥ सर्वप्राणभृतांराजन्द्वितीयाद्भयमाव्रजेत्॥ नद्वितीयेभवेज्ज्ञानमात्मनःसर्वतोपिहि॥ १९४ ॥ नात्मनःप्रतिकूलत्वंविद्यतेसर्वदेहिनां॥ प्रतिकूलस्यनाज्ञानेराजन्भीतिःप्रजायते॥ १९५ ॥ ततएवाभयंब्रह्मविज्ञानानंदरूपभृत्॥ त्वमेवासिमहाराजसर्वभेदविवर्जितः ॥ १९६॥ अहंत्वंसर्वभूतानियद्वासदसदात्मकम्॥ विश्वंब्रह्माभयंराजन्नेकमेवनचापरम्॥ १९७॥

बहुशोऽल्पशोवाद्वितीयेविज्ञातेआत्मनोज्ञानंप्रमारूपंदुर्वचंविपरीतरूपावगाहनादितिभावः ॥ १९४ ॥ अद्वितीयात्मविज्ञानेचभयप्रयोजकप्रतिकूलताविज्ञानव्यापकद्वितीयज्ञानाभावेकथंभयंस्यादात्मनिप्रतिकूलताभावस्यलोकेपिप्रसिद्धत्वादित्याह नात्मनइति स्पष्टम् ॥ १९५ ॥ फलितमाह ततइति यतःप्रतिकूलत्वव्यापकद्वितीयवर्जितंब्रह्मततएवाभयंभवतितस्यब्रह्मणःस्वरूपलक्षणंविज्ञानानंदरूपत्वमपियतोबिभर्षिततस्त्वमेवसर्वभेदविवर्जितोब्रह्मासीतियावत् ॥ १९६ ॥भेदविवर्जितत्वंभेदप्रतियोगिद्वैतबाधेनस्फुटयति अहमिति पूर्वार्द्धोक्तंविश्वंजडंबाधासामानाधिकरण्येनचेतनस्वरूपंत्वैक्यसामानाधिकरण्येनयतोब्रह्मैव अतएवाद्वितीयंब्रह्माभयंभवतीत्यर्थः॥ १९७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पितेनबाधयोग्येनद्वैताभावंदृष्टांतेनस्पष्टयति गंधर्वेति ॥ १९८ ॥ एतादृशस्यविश्वस्यप्रयोजकंज्ञाननिवर्त्यमज्ञानमेवेत्याह माययैवे ति ॥ १९९ ॥ कल्पितस्याधिष्ठानेत्रैकालिकाभावोलोकेपिप्रसिद्धइत्याह गंधर्वेति ॥ २०० ॥ वस्तुतोऽसतोपिभानंभ्रमेणलोकेपिप्रसिद्धं तथास्यद्वैतस्यबोध्यमित्याह गंधर्वनगरंयद्वद्राजन्निितिद्वाभ्यां ॥ २०१ ॥ २०२ ॥ भ्रमकारणंत्वज्ञानमचिंत्यशक्तिकंयद्विशिष्टस्यात्मनः स्वमेनानाभावइत्याह यथाशयानइति विसाधनोरथादिसामग्रीहीनः ॥ २०३ ॥ दार्ष्टांतिकेयोजयति एवमिति ॥ २०४ ॥ दृष्टांतेयथा

गंधर्वनगरंयद्वन्नभसोन्यन्नविद्यते ॥ तथाविश्वमिदंराजन्नात्मनोन्यन्नविद्यते ॥ १९८ ॥ माययैवयथाकाशे गंधर्वनगरस्थितिः ॥ स्थितिर्विश्वस्यतद्वत्स्यादात्मन्यपिचमायया ॥ १९९ ॥ गंधर्वनगरंयद्वन्नासीदस्तिभवि ष्यति ॥ गगनेतद्वदेवेदंविश्वमात्मनिसर्वदा ॥ २०० ॥ गंधर्वनगरंयद्वद्राजन्सदसदात्मकं ॥ जडाजडंचगगने दृश्यतेभ्रांतबुद्धिभिः ॥ २०१ ॥ तद्वद्विश्वमिदंसर्वमात्मानात्मादिभेदधृक् ॥ आत्मन्येवमहाराजभ्रांतिबुद्ध्या प्रतीयते ॥ २०२ ॥ यथाशयानःपुरुषएकएवविसाधनः ॥ देशकालादिरहितोभूयान्नानाविधःस्वयं ॥ २०३ ॥ एवमात्मामहाराजसर्वसाधनवर्जितः ॥ देशकालादिकंविश्वमेकएवभवत्ययं ॥ २०४ ॥ शयनादुत्थितोय द्वत्स्वाप्नंविश्वंनपश्यति ॥ एवमात्मात्मविज्ञानादिदंविश्वंनपश्यति ॥ २०५ ॥ एवमुक्तस्तदाराजायाज्ञवल्क्येन धीमता ॥ मनसाचिंतयित्वेत्थंनापश्यद्गुरुदक्षिणाम् ॥ २०६ ॥ दारपुत्रसमेतंमांराज्यसेनादिसंवृतम् ॥ याज्ञ वल्क्यायचेदेवंदास्यामिगुरुदक्षिणां ॥ नैषातथासमाभूयादेतदेवयतोधिकम् ॥ २०७ ॥

प्रबोधादेवस्वाप्नद्वैतनिवृत्तिस्तथातवाधुनाप्रबोधाद्द्वैतनिवृत्तेरभयत्वमित्याह शयनादिति ॥ २०५ ॥ एवंयाज्ञवल्क्यमुनिनोपदिष्टोराजा आशीर्नमस्क्रियासर्वस्वंचेतित्रिविधांदक्षिणांददावितिश्रुतावुक्तंतत्राशीरूपदक्षिणाभिप्रायमाह एवमुक्तइतिद्वादशभिः इत्थंवक्ष्यमाणप्र कारेण ॥ २०६ ॥ इत्थंपदोक्तंविचारमभिनयति दारेतिपंचभिः मामात्मानंसपरिकरं एवंयथानेनविद्यादत्तातथाययदिददामितथाप्येषा सपरिकरमद्रूपादक्षिणासमानभवतियतएतदात्मज्ञानमधिकमिति ॥ २०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आधिक्येयदीमामद्भिःपरिगृहीतांप्रयच्छेदेतदेवततोभूयइतिच्छांदोग्यश्रुतिमर्थतःपठति वसुभिरिति वसुभिर्धनैः ॥ २०८ ॥ उपपत्तिमप्याह आत्मेति योनेकजन्माभ्यस्तसाधनैःसर्वदेहिभिर्दुर्लभःआत्मलाभान्नपरंविद्यतेइतिश्रुतौचयस्यलाभोत्कर्षःप्रसिद्धःसआत्मायेन गुरुणादत्तस्तस्मैदेयाकासमादक्षिणायतःसर्वादक्षिणाअनात्मभूतैःपदार्थैर्घटितत्वेनानात्मसंश्रयातेनत्वात्मादत्तइतिकथंसाम्यमितिद्वयोरर्थः ॥ २०९॥२१० ॥ लोकत्रयीमिति यदींद्रादिदेवानूजित्वात्रिलोकीमपिदद्यांतदापिनसमादक्षिणा त्रिलोक्याःपरिच्छिन्नत्वान्मिथ्यात्वाच्चेतिभावः ॥ २११ ॥ इतिसंचिंत्येति स्पष्टम् ॥२१२॥ राजाआशीरूपदक्षिणायाउपपत्तिमाह याज्ञवल्क्येतिचतुर्भिः नेत्राणिनिरु

वसुभिःसकलैःपूर्णांभूमिंसागरमेखिलां ॥ गुरवेदक्षिणांनैतांमन्यंतेवेदवादिनः ॥ २०८॥ आत्मादत्तोत्रयेनायंदुर्लभःसर्वदेहिभिः॥ अनेककोटिजन्मांतेब्रह्मचर्यादिसाधनैः ॥ २०९॥ आत्मलाभात्परोलाभोनास्तिलोकत्रयेयतः॥ सद्त्तोयेनतस्मैकादक्षिणानात्मसंश्रया॥२१०॥ लोकत्रयींयदाद्द्यांजित्वादेवान्सवासवान्॥ तदाप्येषाभवेन्नैवदक्षिणागुरवेमम॥ २११ ॥इतिसंचिंत्यराजासौजातहर्षोवचोब्रवीत् ॥ याज्ञवल्क्यंमुनिंशांतमपश्यन्गुरुदक्षिणां॥ २१२॥ याज्ञवल्क्ययथासूर्योगुरुस्तेत्रबहिश्वरः॥ प्राणोनेत्रनिरोधाख्यंतमोहंत्यतिदुःसहं ॥ २१३ ॥ देहिनांदेहिनस्तस्मैतेजसांनिधयेसदा ॥ प्रयच्छंत्यत्रतेदीपमपश्यंतोत्रनिष्कृतिं ॥ २१४॥ उपकारस्यतेनैवतुष्यत्येषप्रभाकरः॥ तथाभवान्प्रभाकर्त्तुःशिष्यस्तेनसमोयतः॥ २१५॥ अभयब्रह्मविज्ञानदाताकामविवर्जितः॥ भवतेगुरवेनान्यामत्रपश्यामिदक्षिणां॥ २१६॥

णद्धीतिव्युत्पत्त्याकर्मण्यणंतानेत्रनिरोधेत्याकारिकाआख्यायौगिकीसंज्ञायस्यैतादृशंलौकिकंतमस्तवगुरुर्निहन्ति कीदृशः देहिनांबहिश्वरःशरीराद्बहिश्वरन्प्राणः तेचदेहिनस्तस्मैसूर्यायदीपंप्रयच्छंति कीदृशादेहिनः उपकारस्यनिष्कृतिंप्रतिक्रियामपश्यंतः भवद्गुरुस्तुतावतापितुष्यतितथाभवानपिस्वल्पेनतुष्यतु कीदृशोभवान् प्रभाकर्त्तुःसमःशिष्यःविज्ञानेनांतरतमोहंतृत्वात्प्रत्युपकारानपेक्षत्वाच्चेतिचतुर्णामर्थः ॥ २१३ ॥ २१४ ॥ २१५॥ २१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमवतार्यआदित्यदीपसमामाशिषमभिनयति अभयंत्विति स्थूलसूक्ष्मकारणरूपंजगत्त्रयंहित्वाऽवशिष्टंयत्तुरीयंब्रह्मतदेवैकंभयवर्जितत्वादभयमुक्तंमह्यमितिशेषः ततोमह्यमभयदानात्त्वांप्रत्यपितदेवाभयंगच्छतात्प्रामोतु यद्ददातितदश्नुतेइतिन्यायोप्यत्रानुकूलइतिसूचयन्नाह मत्तमिति ॥ २१७ ॥ स्वस्मिन्यापूर्वंभयसंपदासीत्तांनिरूप्यतदपहरणलक्षणोपकारस्यसमादक्षिणानास्तीत्याह अज्ञानेति अज्ञानमयसूत्ररचिताःकामादिमयग्रंथिशालिनश्चविपर्ययात्मकाःपाशाजालाःकालेनअविद्याचित्संबंधतयासिद्धांतेलक्षितेननिर्मितास्तेप्रसिद्धाःसंतितेभ्योहंमोचितोस्मिदयामात्रेणएतादृशोपकारस्यसमाकादक्षिणेतिद्वयोरर्थः ॥ २१८ ॥ २१९ ॥ वित्तशाठ्याभावसूचि

अभयंत्वेकमेवोक्तंहित्वाब्रह्मजगत्त्रयम्॥ ततस्त्वागच्छतात्ब्रह्मन्नभयंभयवर्जितम्॥मत्त्यंदास्यसियत्त्वंतद्भवतेभवतात्सदा॥ २१७ ॥ अज्ञानसूत्रसंजाताःकामादिग्रंथिशालिनः॥कालेनरचिताःपाशाजंतुपक्षिवधायते ॥ २१८॥ तेभ्योहंमोचितोघोरदुःखमग्नोतिदीनधीः॥दयालुनात्वयाब्रह्मन्कातेस्याद्गुरुदक्षिणा ॥ २१९॥ इमेविदेहनामानोदेशाःस्फीततमामुने॥ मदाज्ञावशगाःसर्वेपुर्यामिथिलयासह॥ २२० ॥ सदारसुतभृत्योहमेतैर्देशैश्चसंयुतः॥ तवास्मिकिंकरोब्रह्मन्गुरोर्ब्रह्मात्मरूपिणः॥ २२१॥ दत्तमेतन्मयासर्वंतुभ्यमित्यप्यहंनच॥ वक्तुंशक्तोस्मियेनैतत्तवैवस्याद्धिधर्मतः॥ २२२॥ अशनेपिनमेब्रह्मन्स्वातंत्र्यंविद्यतेनिजे ॥भवदाज्ञांविनाब्रह्मन्कथंतेदातुमुत्सहे॥ २२३॥

कायाःसर्वस्वार्पणरूपायादक्षिणायाःस्वरूपमभिनयति इमेइतित्रिभिः स्फीततमाःसंपन्नतमाः ॥ २२० ॥ सदारेति एतैर्विदेहसंज्ञैः ब्रह्माभिन्नात्मानंरूपयतिप्रतिपादयतीतिसतथातस्यएवंविधस्यतवगुरोःस्वामिनःस्वभूतोहंयतःकिंकरः ॥२२१॥ दत्तमिति एतद्देशादिकंमयातुभ्यंदत्तमित्यपिवक्तुंनशक्तोस्मिस्वत्वपरित्यागलक्षणदाधात्वर्थस्यबाधानुसंधानान्मदीयस्वत्वस्यपरित्यागप्रतियोगिनोऽसत्वात् यतोधर्मशास्त्रमालोच्यसर्वंतवैवेति तथाहि अजरामरशरीरप्रदस्यब्रह्मविद्यादेशकस्यगुरोःपितृत्वंत्वंनःपितायोस्माकमविद्यायाःपरंपारंतारयसीत्यादिश्रुतौमन्वादिस्मृतौचप्रसिद्धं शिष्यस्यपुत्रत्वेनधनस्वत्वहीनत्वं त्रयएवाधनाराजन्भार्यादासस्तथासुतः एतेयत्समुपार्जंतियस्यैतेतस्यतद्धनमित्यादिस्मृतिप्रसिद्धमिति ॥ २२२ ॥ एतदेवस्फुटयति अशनेपीति भवदाज्ञांविनाभोजनेपिममयदास्वातंत्र्यंनास्तितदादानशब्दप्रयोगःकथमुपपद्येतेत्यर्थः ॥ २२३ ॥ ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमस्काररूपदक्षिणामभिनयति नमस्तेइति तुभ्यंसदानमोस्तु कीदृशाय ब्रह्मवेदयतिबोधयतिसतथातस्मै मुनिषुआद्यायप्रथमगण्याय मन्वाद्यायेतिपाठेमनूनांमंत्राणामाद्यायअभिव्यक्तिहेतवेऋषयेइतियावत् शास्त्रदृष्ट्यापरमात्मरूपाय शेषंस्फुटम् अत्रदक्षिणानांश्रौतक्रमस्यपरित्यागेऽयमाशयः गुरोरभयप्राप्तेःसिद्धत्वेनाशीरयुक्तासर्वस्वार्पणंतुस्वत्वाभावेनायुक्तमितितेअभिधायकर्त्तुंशक्यतयायुक्तत्वेननमस्कारस्यांतेनिर्देशइति ॥ २२४ ॥ श्रुतौअर्थात्सूचितंयाज्ञवल्क्यवाक्यंतदाश्रमगमनंचदर्शयति एवमुक्तइतिषड्भिः स्पष्टम् ॥२२५॥ अङ्गीकारप्रकारमाह सर्वमिति तवदेहादिपदार्थजातंसदेशंममैवेत्यत्रनसंशयः॥२२६॥ तथापिमदपेक्षितांदक्षिणांदातुमर्हसीत्याह मयोपदिष्टमि

नमस्तेयाज्ञवल्क्यायगुरवेब्रह्मवेदिने॥ मुन्याद्यायसदादित्यशिष्यायपरमात्मने ॥ २२४ ॥ एवमुक्तस्तदाराज्ञायाज्ञवल्क्योमुनीश्वरः॥ अंगीचकारनिखिलंस्मयमानमुखांबुजः॥ २२५॥ सर्वमेतन्महाराजममैवात्रनसंशयः॥ सदेशंतवदेहादिजातंभूपतिसत्तम॥ २२६॥ मयोपदिष्टमात्मानमुपासनपरोभवान्॥ राज्यव्यग्रश्चमाकालान्वृपतंविस्मरक्कचित्॥ २२७॥एषैवपरमाराजन्दक्षिणाममनापरा॥आत्मानंयन्मदुक्तंत्वंनविस्मरसिकर्हिचित्॥ २२८ ॥ इदंसर्वममैतत्सत्त्वयितिष्ठतुकिंकरे ॥ गत्वेदानींपुनाराजन्नागमिष्यामिकालतः ॥ २२९ ॥ इत्युक्तायाज्ञवल्क्यःसजगामस्वगृहंतदा॥ राज्ञात्रैवर्णिकैःसार्धंप्रार्थितोपिसमुत्सुकः॥ २३०॥

तिद्वाभ्यां तवोपासनपरत्वेनराज्यव्यग्रत्वेनचमदुपदिष्टार्थविस्मरणंसंभाव्यतइत्यतोब्रवीमितंमदुपदिष्टमात्मानंमाविस्मरएषैवदक्षिणेतिद्वयोरर्थः अत्रउपासनपरत्वेनब्रह्मलोकाभिवांछायाराज्यव्यग्रत्वेनोत्कटप्रारब्धस्यचसाक्षात्कारप्रतिबंधकत्वंसूचितं विस्मरणेचभयप्राप्तिस्त्वेवभयंविदुषोऽमन्वानस्येतिश्रुत्यंतरप्रसिद्धासूचिता यदविदुषईश्वराद्भयंतद्विदुषोपिभवतियदिविद्वानमन्वानःश्रुतार्थमननहीनःस्यादितिश्रुत्यंतरार्थः ॥२२७॥२२८॥ इदंसर्वमिति इदंराज्यादिकंसर्वंमदीयंसत्त्वयिकिंकरेतिष्ठतु अहंत्विदानींगत्वाकालांतरेआगमिष्यामीति ॥ २२९ ॥ इत्युक्तेति स्वगृहमाश्रमंययौ यतःसमाध्युपयोगिनिएकांतदेशेसमुत्सुकउत्कंठितः ॥ २३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंगतग्रंथेनसंक्षेपेणोक्तस्यात्मनोविस्तरेणनिरूपणपरस्यज्योतिर्ब्राह्मणस्यार्थंषड्भिःशतैरुपबृंहयंस्तत्रप्रथमकंडिकायाअर्थंनिरूपयति गत
इतिद्वाविंशतिश्लोकैः मुनीश्वरेयाज्ञवल्क्येगतेसतिराजाजनकोराज्यव्यग्रत्वात्तथाग्निहोत्रदेवतायाअग्नेर्यत्परमंरूपंवैश्वानरविराडादिसं
ज्ञंतस्यात्मत्वेनचिंतनरूपायांवैश्वानरविद्यायांकुशलत्वेनतत्परत्वादुपासननिष्ठत्वादितियावत् याज्ञवल्क्योपदिष्टमर्थंविस्मृतःकिंचिद्विस्म
तवानित्यर्थः विस्मृतइत्यादिकर्मणीतिकर्तरिक्तः ॥ २२१ ॥ याज्ञवल्क्योपीति याज्ञवल्क्योपितद्राज्ञोवृत्तंलोकमुखाद्दिव्यदृष्टितश्च
विज्ञायजनकराजपुरमाजगामसभास्थंराजानंचाजगामप्राप किंकृत्वाजगाम एवंसंकल्प्यमनसावधार्य एवंकथं अनेनराज्ञासहनव
दिष्यामिआगमनप्रयोजनंयोगक्षेमादिनप्रकाशयिष्यामीति एतेनश्रुतौनवदिष्यइतिमेनेइत्यन्वयःसूचितः तत्रएतेनसंवदिष्यइत्यन्वयम

गतेमुनीश्वरेराजाराज्यव्यग्रोथकालतः॥ वैश्वानरात्मविद्यायांकुशलस्तत्परोपिच ॥ याज्ञवल्क्येनमुनिनास्वो
पदिष्टंसविस्मृतः॥ २३१॥ याज्ञवल्क्योपिविज्ञायलोकाद्दिव्याच्चनेत्रतः॥आजगामपुरंचैनंसभास्थंराजसत्त
मं॥ २३२॥ एवंसंकल्प्यमतिमान्नवदिष्याम्यनेनहि ॥ वक्ष्यामिवामुनातर्हिब्रह्मैवोक्तंनचापरं॥ २३३॥एवं
स्थितेस्वयंगत्वाराजानमतिधार्मिकं॥ त्रैवर्णिकैर्वृतंसद्भिरूहापोहविशारदैः॥ २३४॥ तत्रचित्राःकथास्तेषां
प्रवृत्ताराजसन्निधौ॥ तासुवैश्वानरीविद्याप्रस्तुताकासुचिद्द्विजैः॥ २३५॥ राजातस्यांहिविद्यायांप्रवीणोनि
तरांततः॥इदमाहसभासंस्थान्सर्वानेवद्विजोत्तमान्॥ २३६॥ एनांजानाम्यहंविद्यांकृत्स्नामाहुतिधारिणीं ॥
फलैर्बहुविधैर्युक्तांब्रह्मलोकफलप्रदां॥ २३७॥

भिप्रेत्याह वक्ष्यामिवेति अथवाउक्तंपूर्वमुपदिष्टंब्रह्मैवामुनासहसंवादेनवक्ष्यामिप्रकटीकरिष्यामीतिद्वयोरर्थः ॥ २३२ ॥ २३३ ॥ एवं
स्थितइति एवंवर्णितेसंकल्पेस्थितेदृढीकृतेसतियाज्ञवल्क्योमुनीराजांतिकंगत्वाऽऽदृतउपविवेशेतिशेषः ॥ २३४ ॥ तत्रेति तत्रराज
सदसिराजसन्निधावुपविष्टैस्त्रैवर्णिकैःकृताःकथावाक्यप्रबंधाश्चित्रानानाविधाःप्रवृत्तास्तासुकथासुकासुचित्प्रवृत्तासुद्विजैर्वैश्वानरीअग्नि
होत्रदेवतासंबंधिनीकथाप्रस्तुताप्रवर्तिता ॥ २३५ ॥ राजेति तस्यामग्निहोत्रसंबंधिन्यां ॥ २३६ ॥ इदंपदेनोक्तंराजवाक्यमभिनयति
एनामिति आहुत्योःसायंप्रातर्हुतयोर्योधारःअंतरिक्षादिलोकपरिपोषणरूपःतेइमेआहुतीअन्तरिक्षमाविशतइत्यादिनोक्तःसविषयत्वेन
विद्यतेयस्याःसातथातां आनुषंगिकबहुविधफलकांब्रह्मलोकप्रधानफलकामिति ॥ २३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रेति अत्रविद्यायांयोविशेषज्ञःसमांपृच्छतु अथवामेपृच्छतेवदताद्युत्तरंददातु ॥ २३८ ॥ इत्युक्तइति स्पष्टं ॥ २३९ ॥ तेष्विति तेषुसभास्थत्रैवर्णिकेषुगृहीतमौनेषुसत्स्वेकोयाज्ञवल्क्यस्तंजनकमग्निहोत्रसंबंधिनींविद्यांनानाविधैःप्रश्नैःपप्रच्छ जनकोपियाज्ञवल्क्यायसर्वं परिपूर्णमग्निहोत्रमुवाचेति कीदृशोयाज्ञवल्क्यः प्रसंगंसंकल्पत्यागयोग्यकालमागतंवीक्ष्यसंकल्पंनवदिष्यामीत्याकारकंब्रह्मैववदिष्यामीत्याकारकंवामौनप्रयोजकंत्यक्तवान्परित्यजन्नितियावत् नचविरोधः प्रथमाकारेणयोगक्षेमकथायाएवनिरोधात् द्वितीयाकारस्यापि कामप्रश्नद्वाराब्रह्मनिर्णयसाधनाग्निहोत्रप्रश्नेनाविरोधादितिभावः इतिद्वयोरर्थः ॥ २४० ॥ २४१ ॥ याज्ञवल्क्योपीति तत्अग्निहोत्रवि

अत्रत्रैवर्णिकोयस्तुजानातिसतुपृच्छतु॥ मामेतामथवाहंतंपृच्छामिवदताद्धिमे॥ २३८॥ इत्युक्तेसर्वएवैते सभास्थावर्णिनस्तदा॥ वक्तुंप्रष्टुंचराजानंसमर्थानाभवन्नमुम्॥ २३९॥ तेषुतूष्णींस्थितेष्वेकोयाज्ञवल्क्यो मुनीश्वरः॥ प्रसंगमागतंवीक्ष्यसंकल्पंत्यक्तवान्निजम्॥ २४०॥ पप्रच्छतंमहाराजंविद्यांवैश्वानरींप्रति॥ प्रश्नैर्नानाविधैःसोपितस्मैसर्वमुवाचतत्॥ २४१॥ याज्ञवल्क्योपिराज्ञस्तद्बुद्धिकौशलमेक्ष्यहि॥ दत्तवान्हृष्टचित्तःसन्राज्ञेभीष्टतमंवरम्॥ २४२॥ राजापिकृतकृत्यःसन्धीमतांपुरतःस्थितः॥ इत्थंविचार्यमनसाकामप्रश्नमयाचत॥ २४३॥ अनेनपूर्वमादिष्टमात्मज्ञानंमहात्मना॥ मद्यंमयातिमंदत्वाद्विस्मृतंपापचेतसा॥ २४४॥ अपराधोमयिमहान्विद्यतेदुष्प्रतिक्रियः॥ तस्यैषाममसंप्राप्ताभाग्यतोहिप्रतिक्रिया॥ २४५॥

द्याविषयकं एक्ष्यालोच्य ॥ २४२ ॥ राजापीति पुरतःस्थितःमुख्यः इत्थंवक्ष्यमाणप्रकारेणकामप्रश्नंकामंसमुदायात्मकंप्रश्नंनानारूपप्रश्नमितियावत् अयाचतवव्रे कामोरेतोनिकाययोरितिविश्वः ॥ २४३ ॥ इत्थंपदार्थमभिनयति अनेनेतिचतुर्भिः अनेनयाज्ञवल्क्येनमह्यंयदुपदिष्टंतद्विस्मरणरूपोऽपराधोमहान्मयिवर्त्ततेतस्यापराधस्यप्रतिक्रियातिरोधानोपायःकामप्रश्नरूपोमयाभाग्येनलब्धइतिद्वयोःसंबंधः ॥ २४४ ॥ २४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नष्टलाभोमहाभाग्यमितिन्यायेनकामप्रश्नरूपवरलाभोविस्मृतस्याभीष्टस्यचज्ञानस्योज्जीवकःपरमभाग्यफलमित्याह विद्यतइतिद्वाभ्यां ममांतिकेविविधंपशुहिरण्यादिरूपंमानुषंवित्तंविद्यतेतथादैववित्तात्मिकानानाविधाःसंत्येवविद्यास्तत्रममनस्पृहायत्रत्वात्मज्ञानेस्पृहात द्विस्मरणेनाक्रांतमतोभीष्टस्यात्मज्ञानस्यपुनःसंपादनोपायलाभःपरमभाग्यादेवेतिद्वयोर्भावः ॥ २४६ ॥ २४७ ॥ कामप्रश्नइति उ क्ताभिप्रायेणभूभृताकामप्रश्नेवृतेसतितस्यवरस्यचिकीर्षितत्वादाश्रमादागमनप्रयोजनस्यनिष्पत्तयेसंपादयितुमिष्टत्वात्तंवरंयाज्ञवल्क्योद दाविति ॥२४८॥ स्वचिकीर्षितत्वमेवव्यनक्ति याज्ञवल्क्योहीति हियतोयाज्ञवल्क्योराज्ञउक्तमुपदिष्टंबोधंस्मारयितुमेवागतइति तस्यच

विद्यतेविविधंवित्तंविद्यानानाविधास्तथा ॥ ममनैवात्मविज्ञानंविस्मृतंयन्मयाधुना ॥ २४६ ॥ कामप्रश्नव रेणातःपुनःसंपादयामितत् ॥ गुरोरस्मान्महाभागात्संतुष्टाद्भाग्ययोगतः ॥ २४७ ॥ कामप्रश्नेवृतेतेननिजशि ष्येणभूभृता ॥ दत्तवान्याज्ञवल्क्योपितंवरंस्वचिकीर्षितम् ॥ २४८ ॥ याज्ञवल्क्योहिराज्ञोस्यबोधंस्मारयितुंस्व यं ॥ उक्तमत्रागतोनैवकार्यांतरमपेक्ष्यसः ॥ २४९ ॥ याज्ञवल्क्येनदत्तेस्मिन्वरेराजातिहृष्टधीः ॥ एवंविचार्य पप्रच्छयाज्ञवल्क्यंमहामुनिं ॥ २५० ॥ यद्यप्यसौस्वभावेनशीतलोमुनिसत्तमः ॥ तथापिममदुष्प्रश्नमथनो त्थितवन्हिमान् ॥ दर्शयेन्ममपंथानंशाकल्यस्यकदाचन ॥ २५१ ॥ अधुनानैवसाभीतिर्विद्यतेममदुर्धियः ॥ प्रष्टुर्नानाविधंप्रश्नंपुनरुक्तमसंगतम् ॥ २५२ ॥

सम्यक्स्मारणंवरद्वारैवेतिभावः ॥ २४९ ॥ याज्ञवल्क्येनेति स्पष्टम् ॥ २५० ॥ एवंपदोक्तांविचारेवरस्यप्रकृतोपयोगावगाहितामभिनय ति यद्यपीतिद्वाभ्यां असौयाज्ञवल्क्योयद्यपिक्षमाशीलत्वेनचन्दनवच्छीतलस्तथापिपुनरुक्तत्वादिदोषदुष्टेनप्रश्नेनक्षोभितःसन्शाकल्य गतिंदर्शयेदितिशंकयादुःखेनप्रष्टुंशक्यः वरसत्वेतुतादृशशंकाभावात्पुनरुक्तमप्यसंगतमपिचपृच्छतोममाभयमितिद्वयोःसंबंधः अत्रेदंबो ध्यं शतपथब्राह्मणस्यैकादशेकांडेचतुर्थेप्रपाठकेजनकोवैदेहइत्यादिनाश्वेतकेतुसत्यशुष्मयाज्ञवल्क्यैरथानुधावयद्भिःसहाग्निहोत्रविषयो जनकसंवादोयाज्ञवल्क्येनकामवरदानंचप्रतिपादितंतदेवप्रकृतेग्रंथकृताकिंचिद्भेदेनवर्णितमिति ॥ २५१ ॥ २५२ ॥ ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंवरेणवशीकृतंयाज्ञवल्क्यंपृच्छन्राजाआदौत्वंपदार्थमालानंसंघातव्यतिरिक्ततयास्वयंज्योतिष्ट्वेनासंगतयाचनिर्धारयितुंपंचभिःक ण्डिकाभिःप्रश्नपरम्परांलब्धपूर्वपूर्वोत्तरःकृतवांस्तामभिनयति मुनेइत्यष्टादशभिः हेमुनेअयंपुरुषःस्थूलसूक्ष्मसंघातरूपःश्रुतिगतायंपदेनविवक्षितैर्जागरणावस्थादेशकालादिभिर्विशिष्टःकिंज्योतिर्भवतिकिंसंघातांतर्वर्तिनाकेनचिज्ज्योतिषाभास्यः किंवासंघातव्यतिरिक्तेन केनचिज्ज्योतिषाइतिपृच्छतेमस्त्वंवदहेधार्मिकवरलक्षणस्वप्रतिज्ञापरिपालकेत्यर्थः ॥ २५३ ॥ विशेषणानीति प्रश्नवाक्येअयंपुरुषपदाभ्यामुक्तानिविशेषणान्यालोच्यतस्यव्यतिरिक्तज्योतिर्जिज्ञासयाप्रवृत्तस्यप्रश्नस्योचितंयोग्यमित्याकारकमुत्तरंयाज्ञवल्क्यआहस्म इ

मुनेजागरणावस्थागतोयंदिवसेसति॥ किंज्योतिःपुरुषोभूयादिदंमेवदधार्मिक ॥ २५३॥ विशेषणानिवीक्ष्यायंप्रश्नेतदुचितंहिसः ॥ ज्योतिरादित्यइत्याहयाज्ञवल्क्योनृपोत्तमम् ॥ २५४ ॥ आदित्येजगतःप्राणेत्वस्मिन्नस्तमयंगते ॥ किंज्योतिरितिपप्रच्छराजातंमुनिपुंगवम् ॥ चंद्रमाइतितंप्राहयाज्ञवल्क्योनृपोत्तमम् ॥ २५५॥ चंद्रमस्यस्तमायातेकिंज्योतिरितिसप्रभुः॥ पप्रच्छपुनरप्याहतमग्निरितिविप्रराट्॥ २५६॥ अग्नावस्तंगतेकिंस्याज्ज्योतिरित्येवतंपुनः ॥ पप्रच्छमुनिशार्दूलंराजाविस्रब्धमानसः ॥ २५७॥ वागित्येवचसोप्याहयाज्ञवल्क्योमुनीश्वरः॥ २५७॥ रविसोमाग्निवागाख्यंतज्ज्योतिःसावधारणं॥ याज्ञवल्क्येनमुनिनाराज्ञउक्तंसकारणम्॥ २५८॥

तिकिं आदित्योस्यज्योतिरिति ॥ २५४ ॥ आदित्येइति जगतःप्राणे प्राणःप्रजानामुदयत्येषसूर्यइतिश्रुत्यंतरात् स्पष्टमन्यत् ॥ २५५॥ चंद्रमसीति प्रभूराजा अग्निर्दीपादिरूपः ॥ २५६ ॥ अग्नाविति विस्रब्धंवरेणनिःशंकंमानसंयस्यसतथा ॥ २५७ ॥ उक्तंसंगृह्णाति रवीति एवंसूर्यादिचतुष्टयरूपंज्योतिःपूर्वपूर्वाभावेसावधारणंसनियमंप्रकाशकंमुनिनाराजानंप्रत्युक्तं सकारणंकारणेनप्रकाशकार्यरूपहेतुनिर्देशेनसहितमित्यर्थः ॥ २५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदित्यादित्रयेप्रकाशकत्वेहेतुनिर्देशपरस्यआस्तइत्याद्यंशस्यार्थमाह आदित्येतिद्वाभ्यां आदित्यचंद्रमोग्नीनांमध्यएकेनप्रकाशेनसर्पा
दिरहितंसुखकारणमनुकूलंदेशंदृष्ट्वातत्रास्तेतिष्ठति तथागृहक्षेत्रादिरूपेभूतलेपर्यैतिगच्छति तत्रगत्वाचेहामुत्रवाहितंकर्मकरोतितद्वत्तथा
क्षेत्रादिभ्योविपर्यैतिगृहादिप्रत्यावर्त्तते श्रुतौरेफस्थानेसावर्ण्याल्लकारःप्रयुक्तइतिद्वयोरर्थः॥ २५९ ॥ २६० ॥ वाक्पर्यायगतस्यास्तइ
त्यादिभागस्यार्थमाह गाढइतित्रिभिः यत्रगाढांधकारेनिजहस्तोपिनदृश्यतेतत्रसर्वोव्यवहारोवागधीनः तथाहिअंधकारेअयंदेशःसु
खोनुकूलइत्युक्तेसतितत्रदेशेआसनंस्थितिंकुरुते तथापर्यटनंकुरुते आदिपदेनश्रुतौउपन्येतीतिपदेनोक्तंवदउपगमनंग्राह्यमितिद्वयोरर्थः
॥२६१॥२६२॥ ततइति ततउक्ताकारात्कार्यान्मुनिनावाग्ज्योतिष्ट्वेनोक्तानकेवलमुक्तकार्यादेववाचोज्योतिष्ट्वंकिंतुशास्त्रादपि तथाहि

आदित्यचंद्रमोग्नीनांलोकएकतमेनवै॥ दृष्ट्वादेशंहिसर्पादिरहितंसुखकारणम्॥ २५९॥ आस्तेतत्रचपर्यैति
गृहक्षेत्रादिभूतले॥ लोकद्वयफलंयद्वत्कुरुतेकर्मसर्वदा॥ क्षेत्रादिभ्योविपर्यैतिपुनरेवगृहादिकम्॥ २६०॥
गाढेतमसियन्नायंज्ञायतेननिजःकरः॥ आसनादिकमत्रापिवाचासर्वःकरोतिहि॥ २६१॥ सुखोदेशोय
मत्रास्तीत्युक्तेतत्रसुखंपुमान्॥ आसनंकुरुतेतद्वत्सर्वंपर्यटनादिकम्॥ २६२॥ ततोवागपिसंप्रोक्तामुनिना
ज्योतिषांगणे॥ कार्यतःशास्त्रतश्चैषाज्योतिरग्न्यादिवद्भवेत्॥ २६३॥ एवंनानाविधंज्योतिरादित्यादिकमीरि
तम्॥ अंगीचकारसंबोध्ययाज्ञवल्क्येतिभूपतिः॥ २६४॥ एवंजागरणेराजापृष्ट्वाज्योतींष्यनेकशः॥ स्वप्नेपृ
च्छत्पुनर्ज्योतिःपुरुषस्यास्यधीमतः॥ २६५॥ वाचोप्युपरमोयत्रभवेत्स्वप्नेमुनीश्वर॥ तत्रकिंज्योतिरुद्दिष्टः
पुमान्स्वप्नमुपागतः॥ २६६॥

मंत्राणांप्रयोगसमवेतार्थप्रकाशकत्वंकर्मकांडप्रसिद्धमिति अत्रेदंबोध्यं वाग्गंधादीनामप्युपलक्षणंगंधादिज्ञानेनाप्यंधकारव्यवहारदर्श
नादिति॥२६३॥आत्मप्रकाशसाधनेदृष्टांतभूतानामादित्यादीनांज्योतिष्ट्वमुक्तंराजांगीचकारेत्याह एवमिति ॥२६४॥ योयःपुरुषव्यवहा
रःसस्वभिन्नप्रकाशप्रयुक्तोयथाजागरणइतिव्याप्तिबलेनयत्रनिर्णयश्चिकीर्षितस्तंस्वप्नस्थानमुपन्यस्यतिराजेत्याह एवंजागरणइति स्प
ष्टं ॥ २६५ ॥ वाचोपीति यत्रस्वप्नावस्थायांवाचस्तथाऽपिशब्दगृहीतानामादित्यादीनामुपरमोविलयोभवतितत्रपुमान्सूक्ष्मसंघातरूपः
स्वप्नमुपागतःकिंज्योतिःकिमात्मकज्योतिर्युक्तइति ॥ २६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुभवतुतत्रमनोज्योतिरित्याशंकांवारयति यथेतिचतुर्भिः यथाजागरणेविद्यमानमपिनेत्रमादित्यादिप्रकाशंविनासमावृतमंधकारा क्रांतंसज्ज्योतिःप्रकाशकंनभवेत्तथास्वप्नेविद्यमानंमनःसमावृतंआवरणाभिभावकसहकारिविनिर्मुक्तंज्योतिरितिवक्तुमशक्यमित्यर्थः ॥ २६७ ॥ ननुकिंमनसःसहकारिप्रसिद्धमितिचेदिंद्रियवृन्दमित्याह सूर्येति यथानेत्रस्यचक्षुषोऽर्थकर्मकेग्रहणलक्षणव्यापारेसूर्या दयोऽनुग्राहकास्तथामनसइंद्रियाणिसहकारीणितानितुस्वप्नेलीनानीतिकथंमनोविषयज्योतिष्ट्वंभजेदितिभावः ॥ २६८ ॥ किंचस्वाप्न पदार्थानांतदाकारवृत्तीनांचपरिणामिकारणंमनः यथाघटस्यमृत् तथाचतत्रप्रकाशकेनान्येनैवभवितव्यमित्याह अपिस्वप्नेति उपादानं परिणामिकारणमिदंमनः ॥ २६९ ॥ फलितमाह तेनेति तेनोक्तप्रकारेणस्वाप्नभावानामविद्योपादानकत्वपक्षेमनसोजाग्रत्संस्कारधारण

यथानेत्रंभवेन्नैतज्ज्योतिर्जागरणेसदा ॥ विद्यमानंतथानस्यान्मनोज्योतिःसमावृतं ॥ २६७॥ सूर्यचन्द्राग्न योयद्वदनुग्रहकराःस्मृताः॥ नेत्रस्यार्थग्रहेतद्वदिंद्रियाण्यपिचेतसः॥ २६८॥ अपिस्वप्नगतंचेतोमृत्समंविद्य तेत्रहि॥ स्वाप्नानांसर्वभावानामुपादानमिदंयतः॥ २६९॥ तेननेत्रसमंचैतन्मृदादिसदृशंहिवा॥ विद्यमानं मनोहित्वास्वप्नगंसर्वबोधकृत्॥ २७०॥ आत्मानंतस्यमनसइन्धंसाक्षिणमुक्तवान्॥ याज्ञवल्क्योपिराजानं स्वप्नेज्योतिःस्वरूपिणं॥ २७१॥ आस्तेयमात्मनास्वप्नेपर्येतिचगृहादिकम्॥ कुरुतेचैवकर्माणिलोकद्वयफला निसः॥ क्षेत्रादिभ्योविपर्येतियद्वज्जागरणेपुमान्॥ २७२॥

व्यापारेणकरणत्वाभ्युपगमेपिनेत्रवदनुग्राहकसापेक्षत्वंमनसएव स्वाप्नभावोपादानकत्वपक्षेतुमृत्समत्वमतःस्वप्नावस्थागतंसर्वबोधकार कंकिंचिज्ज्योतिःस्वभिन्नंहित्वानपेक्ष्यस्वप्नेविद्यमानमपिमनोनज्योतिः तन्मनसोनुग्राहकंज्योतिस्वप्नेकिमितिशेषः ॥ २७० ॥ उक्ताशये नराज्ञापृष्टोयाज्ञवल्क्यआत्मैवास्यज्योतिरित्यादिवाक्येनोत्तरंददौतस्यार्थमाह आत्मानमितित्रिभिः एवंपृष्टोयाज्ञवल्क्यःपूर्वोक्तंस्मा रयन्राजानंप्रतिस्वप्नेआत्मानंज्योतिःस्वरूपमुक्तवान् कीदृशमात्मानं तस्यनेत्रसमतयामृत्समतयाचवर्णितस्यमनसःसाक्षिणंसाक्षाद्द्रष्टारं अतएवइन्धेदीप्यतइतिव्युत्पत्तिकेनइन्धनाम्नावर्णितमिति ॥ २७१ ॥ कथमात्मनःस्वप्नेज्योतिष्ट्वमितिचेज्ज्योतिःप्रयुक्तस्यासनादिव्यव हारस्यप्रयोजकत्वादित्याह आस्तेऽयमिति उक्तार्थम् ॥ २७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततइति ततःस्वप्नेप्रकाशकांतराभावेपिप्रकाशकार्यकरणात्स्वयंज्योतिःपरानपेक्षप्रकाशआत्मानानाविधांनानारूपांबुद्धिंपश्यन्प्रकाश
यन्यःपुराइंधसंज्ञयोक्तःसएवपुनर्मुनिनायंस्पष्टोज्योतिष्ट्वेनोक्तइत्यन्वयः ॥ २७३ ॥ नन्वेवंस्वप्नेगत्वात्मनोज्योतिष्ट्वाभिधानंकिमर्थं
कृतंजागरणेपितस्यस्वयंप्रकाशत्वादितिचेत्सत्यं तथापिबालबुद्धिमनुसरंत्याश्रुत्यालौकिकप्रकाशासंकीर्णस्थलमुदाहृतं स्वप्नेहिआत्मनः
सर्वस्रष्टृत्वेनबुद्धेस्तदेकभास्यत्वेनचज्योतिष्ट्वेसावधारणंनिर्धारितेजाग्रत्यपितत्सुबोधंभवतीतीममाशयंश्लोकशतेनदर्शयन्सर्वस्रष्टृत्वंताव
दाह रवीत्यादिना अयमात्मारविप्रभृतीन्प्रकाशकान्रथादिरूपान्प्रकाश्यांश्चेश्वरवदेकःसृजतीति द्वितीयांतानांषष्ठेनसंबंधः ॥ २७४ ॥

ततआत्मास्वयंज्योतिःपश्यन्नानाविधांधियं ॥ स्वप्नइन्धःपुरोक्तोयंकथितोमुनिनापुनः ॥ २७३ ॥ रविसोमा
ग्निवाचोयंस्वप्नेसृजतिसर्वतः ॥ प्रकाशकान्प्रकाश्यांश्चरथादीनीश्वरोयथा ॥ २७४ ॥ अनुग्राह्यांश्चनेत्रादी
न्सर्वेषांकारणानिच ॥ महाभूतानिकालांश्चदेशांश्चापिदिशस्तथा ॥ २७५ ॥ स्थावरान्जंगमांस्तद्वज्जंतूनुच्चा
वचानपि ॥ समुद्रान्सरितोद्वीपान्गिरीन्मेर्वादिकानपि ॥ २७६ ॥ उरूनपिचपाताललोकान्सप्तापिचापरान् ॥
लोकपालांस्त्विमान्नानाविभूतिभिरधिष्ठितान् ॥ २७७ ॥ इंद्रमग्निंयमंरक्षोवरुणंपवनंतथा ॥ धनदंचमहे
शानंब्रह्माणंशेषमेवच ॥ परानपिचविष्ण्वादीन्नानाजातिप्रभूंस्तथा ॥ २७८ ॥ यदस्तियच्चनास्त्यत्रगम्यते
यन्नगम्यते ॥ ब्रह्मांडादिसमग्रंतदेकःस्वप्नेसृजत्ययं ॥ २७९ ॥

अनुग्राह्यानिति आदित्यादिप्रकाशैरनुग्राह्यान्नेत्रादिरूपभावान्करणतयाप्रसिद्धान्सृजतितथामहाभूतादीन्स्थावरादीन्तथासमुद्रादीन्
॥२७५॥२७६॥उरूनिति उरून्विशालान्सप्तपातालाख्यलोकान्तथाअपरानूर्ध्वान्सप्तभूरादिलोकान्तथातदधिपतींश्चसृजति ॥ २७६ ॥
दशदिक्पतीन्सृजतीत्याह इंद्रमिति ऊर्ध्वदिक्पतिर्ब्रह्माऽधरदिक्पतिःशेषः परानिति परानीश्वरविग्रहान्विष्ण्वादीन्तथानानाजातीन्
नानाभेदान्प्रभून्भूपत्यादीन् ॥ २७८ ॥ यदस्तीति अस्तिस्थूलं नास्तिसूक्ष्मं गम्यतेप्रत्यक्षं नगम्यतेपरोक्षं ॥ २७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मेति आत्मनोब्रह्मैक्यावगाहकंब्रह्माहमित्यारकंश्रुतेर्वाक्यंभ्रांतानामात्मनःपरिच्छिन्नत्वादिदर्शनेनाद्वैक्यायोग्यातांमन्यमानानामप्रामाण्यशंकास्कंदितमपिस्वप्नेआलोचितेसतिअप्रामाण्यशंकानिवृत्त्याप्रमाणतांगच्छतिअतिरोहितांप्रमाणतांधारयति ननुकथंस्वप्नमालोचनेनतद्वाक्यार्थयोग्यतानिश्चयइतिचेज्जगज्जन्मादिकारणत्वस्यब्रह्मलक्षणस्याद्वितीयतापर्यवसन्नस्यात्मन्यपिदर्शनादित्याह यस्मादित्यादिना यस्मादसामर्थ्यादिनाशोच्याअपिजंतवोब्रह्मवदीश्वरवन्मायाशबलेनात्मनैवनानाविधानांयथाभूतानामीश्वरसृष्टसमानांसृष्ट्यादिकंकुर्वंतीतिद्वयोरर्थः॥२८०॥२८१॥ एकस्मादात्मनोऽनेकप्रमातॄणामुत्पत्तौदृष्टांतस्तद्यथामहतोभ्याहितादग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंतीतिश्रुत्यंतरेयउक्तःसोपिस्वप्नेसुपरिचेयइत्याशयेनाह महतइति यथाज्वलतोवन्हेःसरूपाःसमानरूपाःकणानिःसरंतितथाएकस्माज्जंतोरात्म

ब्रह्माहमितियद्वाक्यंश्रुतेस्तद्धिप्रमाणतां॥स्वप्नेगच्छतियस्मात्तेतत्रशोच्याश्चजंतवः॥ २८०॥ ब्रह्मवद्विविधं विश्वंमाययैवसृजंतिहि॥ आत्मनःस्थापयंत्येतत्स्वात्मन्येवमहेश्वराः॥संहरंतियथाभूतान्जंतून्नानाविधानिह॥ २८१॥ महतोज्वलतोवन्हेःसरूपाविस्फुलिंगकाः॥ निःसरंतियथास्वप्नेतथाजंतोश्चजंतवः॥ २८२॥ यद्वदेवजगत्स्रष्टाब्रह्मसर्वस्यकारणम्॥ भूतभौतिकगर्भाढ्यंप्रथमंसृजतेमनः॥ २८३॥ तस्मिन्सृष्टेविजानातिनामरूपात्मकंजगत्॥ अव्यक्तनामरूपेस्मिन्स्थितआत्मनिसर्वदा॥ २८४॥ एवंशयानःपुरुषोमनोमात्रैकसाधनः॥ मनसासृजतेविश्वमात्मनाभासितेनहि॥ २८५॥

नःसकाशाज्जंतवःप्रमातारोनिःसरंतीति ॥ २८२ ॥ जीवस्रष्टौक्रमोपीश्वरकर्तृकसृष्ट्यासमानइत्याह यद्वदेवेतित्रिभिः यद्वद्यथासर्वस्यकारणंब्रह्मईश्वरःप्रथमंमनोहिरण्यगर्भरूपंसृजते कीदृशंमनः स्थूलभूततद्विकारात्मकेनगर्भेणजनिष्यमाणभावेनआढ्यंयुक्तं॥२८३॥ तस्मिन्निति तस्मिन्हिरण्यगर्भरूपेमनसिसृष्टेसतिनामरूपात्मकंजगत्सूक्ष्मंस्थूलंचविजानातिविस्पष्टमुपलभते कीदृशंजगत् मनःसृष्टेःपूर्वमात्मनिईश्वरेअव्याकृतनामरूपोपाधिकेअव्यक्तरूपेणस्थितं ॥ २८४ ॥ एवमिति एवंशयानःअज्ञानव्यष्ट्युपाधिकःपुरुषोव्यष्टिमनसएवएकःअसहायःसाधनःसाधकोजनकइतियावत् सृष्टेनस्वयंप्रकाशितेनचमनसासर्वंसृजतीति ॥ २८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्माहमितिवाक्यार्थेयोग्यतांस्पष्टयितुमुपाधिविनिर्मुक्तेआत्मनिभेदोनास्तीतितावद्दर्शयति जंतूनामितित्रिभिः जंतूनांप्रमातॄणांब्रह्म
णःसकाशाद्भेदेप्रयोजकाःससूक्ष्माःस्थूलादेहाउक्ताःरूपंरूपंप्रतिरूपइत्यादिश्रुतौ यथाखस्याकाशस्यभेदेप्रयोजकाःसूक्ष्माघटाःस्थूला
गृहाउद्दिष्टालोकेव्यवहृताः ॥ २८६ ॥ बहिरिति यथाकाशंबहिर्देशेगृहेघटेवाविद्यमानंविलक्षणंनकिंत्वेकरूपमेव विषमत्वंतुगृहाद्युपा
धिगतमेव ॥ २८७ ॥ स्थूलेति तथैवभेदउपाधिष्वेवस्वरूपेणतुब्रह्मणश्चिद्धातोःकुत्रापिवैषम्यंभेदोनास्तीति ॥ २८८ ॥ एवमुपहिताभे
दमुक्त्वाउपाधीनामभेदंवक्तुंसूक्ष्मोपाधिस्वरूपंतावदभिनयति सूक्ष्ममिति मनएवव्यष्टिरूपंप्रतिप्रमातृवर्त्तमानंजंतूनांसूक्ष्मंशरीरमुक्तं सूक्ष्म
शरीरस्यमनःप्रधानत्वात् यथेश्वरस्यहिरण्यगर्भःसूक्ष्मशरीरमिति ॥ २८९ ॥ ततःस्थूलशरीरोत्पत्तिसमष्टिदृष्टांतेनाह निर्मिमीतेइति यथे

जंतूनांब्रह्मणोभेदेस्थूलादेहाउदाहृताः॥ससूक्ष्मायद्वदुद्दिष्टाःखस्यैतेसघटागृहाः॥ २८६॥ बहिर्वापिगृहेचैत
द्घटेवाविषमंनहि ॥ आकाशंविषमत्वंतुगृहकुंभादिसंस्थितम्॥ २८७॥ स्थूलसूक्ष्मशरीरेषुवैषम्यंसमुपस्थि
तं॥ ब्रह्मणोनस्वरूपेणकुत्राप्येतत्तथैवहि ॥ २८८॥ सूक्ष्मंशरीरंजंतूनांमनोमात्रमुदाहृतम्॥ यथाहिरण्यग
र्भोयंब्रह्मणोऽव्यक्तरूपिणः ॥ २८९॥ निर्मिमीतेयथातेनसूत्रेणैवजगत्पटं॥ तथाशयानःपुरुषोमनःसूत्रंज
गत्पटं ॥ २९०॥ यथैवज्वलतोवन्हेःकणास्तद्वन्मनांस्यपि॥ जंतूनांब्रह्मणःसूत्राद्विनिर्गच्छंत्यनेकशः॥२९१॥
यथावह्निर्महान्दीप्तोदहेच्चापिप्रकाशयेत्॥ कणाअपितथादाहंप्रकाशंचप्रकुर्वते ॥ २९२॥ एवंसूत्रंयथावि
श्वंसृजत्यत्तिचपातिच॥ तथामनांसिसर्वाणिशयनेसर्वदेहिनां॥ २९३॥

श्वरस्तेनहिरण्यगर्भरूपेणसूत्रेणस्थूलजगद्रूपंपटंनिर्मिमीतेरचयतितथाव्यष्ट्युपाधिकःपुरुषोपिस्वप्नादौमनःसूत्रस्थानीयंयस्यएतादृशंज
गत्पटंनिर्मिमीतेइति ॥ १९० ॥ व्यष्टिसमष्ट्योरभेदंवक्तुंतयोःसाधर्म्यमाह यथैवेतिपंचभिः यथैकस्माज्ज्वलतोवन्हेर्नानाविधाःकणावि
निर्गच्छंतिउड्डीयमानपार्थिवांशोपाधिकंभेदंव्रजंति तथासूत्रात्मभूतादेकस्माद्ब्रह्मणःसकाशाज्जंतूनांमनांसिविनिर्गच्छंतिकार्योपाधिकभे
दशालीनिभंवतीति ॥ २९१ ॥ यथावन्हिरिति यथाचवन्हेस्तत्कणानांचदाहकत्वप्रकाशकत्वयोर्नविशेषः तन्महत्त्वाल्पत्वयोर्दाहप्रका
शाल्पत्वमहत्त्वापेक्षत्वादितिभावः॥२९२॥ एवमिति एवंयथासमष्टेःसूत्रस्यसृष्ट्यादिसामर्थ्यंतथामनसामपिस्वप्नेप्रसिद्धमित्यर्थः॥२९३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसमष्टिव्यष्ट्योर्विश्वस्रष्ट्यादितटस्थलक्षणसाम्यमभिधायस्वरूपलक्षणसाम्यमप्याह स्वाकारेणेति यथादृष्टांतेस्वाकारेणस्वस्यवन्हेराकारस्तेजस्त्वंलोहितरूपंचतेनवन्हेःकणानांचसमानत्वंतथासूत्रात्मनोमनसांचसूक्ष्मत्वादिरूपसाम्यमित्यर्थः स्वकारणेतिपाठेपूर्वश्लोकद्वयेनस्वरूपतटस्थलक्षणसाम्यमभिधायानेनश्लोकेनअव्याकृतेनसाम्यंसूक्ष्मसमष्टिव्यष्ट्योरुच्यते तथाचयथाप्रज्वलतोवन्हेःसूक्ष्मसमष्टिस्थानीयस्यकणानांचव्यष्टिस्थानीयानांस्वकारणेनतेजःसामान्येनधर्मैःकार्यैश्चसाम्यंतथासूत्रस्यमनसांचकारणेनकारणाज्ञानविशिष्टेनईश्वरात्मनास्रष्टिसामर्थ्यादिधर्मैःसाम्यमित्यर्थः ॥ २९४ ॥ एवंलक्षणसाम्यमुक्त्वातत्फलमभेदंदर्शयति अव्याकृतइतिद्वाभ्यां यथाज्वलतोवन्हेःकणानांचाव्याकृतेतेजःसामान्यात्मकेरूपेउपाधिभूतकाष्ठनिष्ठंभेदंविहायानपेक्ष्यनभेदस्तथासूत्रस्यमनसांचस्वरूपेनभेदःकिंतुविराट्शरीरोपाधिकःसूत्रेभेदोव्यष्टिस्थूलशरीरोपाधिकोमनसांभेदःस्वतस्त्वभेदइतिद्वयोरर्थः ॥ २९५ ॥ २९६ ॥ एवंचिद्धातोरेक

स्वाकारेणसमानत्वंवन्हेःप्रज्वलतोपिहि ॥ कणानांचतथैवस्यात्सूत्रस्यमनसामपि ॥ २९४ ॥ अव्याकृतेयथैवस्याद्भेदोरूपेनकश्चन ॥ कणानांचमहावन्हेःकाष्ठभेदंविहायहि ॥ २९५ ॥ सूत्रस्यमनसांचैवंरूपभेदोनविद्यते ॥ विराट्स्थूलशरीराणांभेदमेकंविहायहि ॥ २९६ ॥ सूत्रंयथाजगच्चित्रभित्तिभूतमुदाहृतं ॥ मनांस्येवंजगच्चित्रभित्तिभूतानिदेहिनां ॥ २९७ ॥ अव्याकृतंयथासर्वैरप्रकाश्यंप्रकाशकं ॥ सूत्रस्यापिविराजश्चभूतभौतिकरूपिणः ॥ २९८ ॥

त्वंतथाउपाधिभूतसमष्टिव्यष्ट्योरभेदोदर्शितःअथचिज्जडयोर्द्वैतंवारणीयंतदर्थंदृग्दृश्यसंबंधस्यदृश्यमिथ्यात्वमंतरेणानुपपन्नस्यसूचनायचिद्भास्यतांजडस्यदर्शयिष्यमाणस्तत्रापिचितासाक्षान्मनएवप्रकाश्यतेइतरत्तुतद्द्वारेतिप्रदर्शनोपयोगिनींचित्तस्यभित्तिस्थानीयतांदर्शयति सूत्रमिति यथास्थूलसमष्टिरूपस्यचित्रस्यआलेख्यस्यकुड्यभूतंसूत्रंसूक्ष्मसमष्टिस्तथाव्यष्टिमनांस्यपिस्थूलव्यष्टीनांभित्तिभूतानीति ॥ २९७ ॥ यथादीपेनकुड्येभासितेतद्गतंचित्रमपिभासितंभवतितथामनएवसमष्टिव्यष्टिरूपंभित्तिभूतंसाक्षिणासाक्षाद्भास्यतइत्याह अव्याकृतमिति अव्याकृतपदस्यसमष्ट्यज्ञानवाचकस्यतदुपाधिकईश्वरसाक्षिणिलक्षणा तथाचाव्याकृतमीश्वरःसाक्षीसर्वैरस्योपाधिमायातद्विलासैरप्रकाश्योपिसूत्रस्यतद्द्वाराविराजश्चप्रकाशकः ॥ २९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाऽज्ञानेति तथाअज्ञानसमष्ट्युपाधिकवत् अज्ञानस्याश्रयःअहमज्ञइत्याकारेणअज्ञानाभिमानीजंतुर्जीवसाक्षीतियावत् सूक्ष्मस्थूल शरीरैरप्रकाश्योपितेषांप्रकाशकइति जीवस्यैवाहंकारारूढमज्ञानंनेश्वरस्येतिविशेषःसंक्षेपशारीरकेप्रपंचितः ॥ २९९ ॥ एवंमहावाक्यार्थयोग्यतादर्शिताअथात्मनिसंसारोपलब्धिर्मनोन्वयएवमनोव्यतिरेकेतददर्शनादितिसूचयितुंव्यष्टिमनोव्यतिरेकस्त्रिविधः समष्टौलये कारणेलये अधिष्ठानलयेच तस्यावांतरभेदंषड्भिःश्लोकैर्दर्शयन्समष्टिलयाख्यंमनोव्यतिरेकंतावदाह इंधनेति यथालोकेपाकाद्यर्थंप्रज्वालितोवन्हिरिंधनाभावेसतिमहावन्हौतेजःसामान्येलीयतेतथाहिरण्यगर्भाद्युपासकानामुपासनाफलप्रादुर्भावकालेमुक्त्यादिअध्यात्मपरिच्छेदाभावलक्षणांमुक्तिदेवभावावाप्तिलक्षणामतिमुक्तिंचाश्वलप्रश्नेपंचमाध्यायेउक्तांफलत्वेनगच्छतांमनःसूत्रेसमष्टिमनसिलीयतेइत्यर्थः तावताप्याध्यात्मिकपरिच्छेदलक्षणसंसारनिवृत्तिरितिभावः ॥ ३०० ॥ द्वितीयंकारणलयेमनोव्यतिरेकंदर्शयति सएवचे

तथाऽज्ञानाश्रयोजंतुरप्रकाश्यःप्रकाशकः॥ सूक्ष्माणामपिदेहानांस्थूलानामपिसर्वदा॥ २९९॥ इंधनाभावतोवन्हिर्महावन्हौयथैवहि॥ लीयतेत्रमनांस्येवंसूत्रेमुक्त्यादिगच्छताम्॥ ३००॥ सएवचयथावन्हिर्भस्मच्छन्नोनकार्यकृत्॥ पुनश्चभस्मनोपायेदहेच्चैवंप्रकाशयेत्॥ ३०१॥ सुप्तौमृतौचजंतूनांकर्माभावविभूतिभिः॥ अभिभूतानितान्येवसृष्ट्यादिंचनकुर्वते ॥ ३०२॥ उद्बोधेकर्मणस्तानिपुनःकुर्वंतिसर्वदा॥ सृष्ट्यादिकंनचान्यानिस्वप्नेजागरणेपिच॥ ३०३॥ भस्मीकृत्ययथाकाष्ठजातंवन्हिःक्षयंगतः॥ मथनेनपुनर्जातुसएवचनजायते॥ ३०४॥

तित्रिभिः यथाभस्मनाछन्नोवन्हिर्दाहादिकार्यंनकरोतिभस्मनोऽपायेऽपसारणेतुयश्छन्नआसीत्सएवदाहादिकंकरोति ॥ ३०१ ॥ सुप्ताविति तथासुप्तिदशायांमरणदशायांचजंतूनांतानिमनांस्यग्निरूपाणिभोगप्रदकर्माभावरूपाभिर्विभूतिभिर्भस्मभिरभिभूतानिच्छन्नानिसृष्ट्यादिकंनकुर्वंति ॥ ३०२ ॥ उद्बोधइति पुनःकर्मणामुद्बोधेतुयानिमनांसिसुप्तिमरणयोःकारणेलीनानितान्येवस्वप्नजागरणयोःसृष्ट्यादिकंकुर्वंति तथाचकारणेमनोलयेकिंचित्कालंसंसारानुभवेपिपुनरुद्बोधोभवतीतिमुक्तेर्विशेषइतिभावः ॥ ३०३ ॥ तृतीयमधिष्ठानेलयेबाधसंज्ञेसतिमनोव्यतिरेकंमुक्तिसंज्ञंप्रदर्शयति भस्मीकृत्येतिद्वाभ्यां यथासर्वकाष्ठचयंभस्मीकृत्यक्षयंगतोयोवन्हिःसएवपुनर्जातुकदाचिदपिनजायतेमथनेनापिवन्ह्यंतरमेवजायतइति ॥ ३०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मेति तथासाधनसंपन्नेनमनसातत्त्वज्ञानाग्निभावापन्नेनसविलासाज्ञानरूपकाष्ठचयेदग्धेसतिमनसोप्यज्ञानविलासत्वेनदग्धत्वात्प्राण्यंतरेषुजायमानेष्वपिचित्तजन्मोपाधिकंजन्मानुभवत्स्वपिमुक्तोनजायतेमनोजन्मोपाधिकंजन्मनप्राप्नोतीति जायमानेषुभूतेष्वित्युक्तिरनेकजीववादाभिप्रायेण एकजीववादेतुनकोपिजायतइतिबोध्यम् ॥ ३०५ ॥ एवंमनोव्यतिरेकेसंसारव्यतिरेकोदर्शितः अथमनोन्वयेसंसारान्वयंप्रपंचयंस्तत्रापिस्वप्नेसूक्ष्मांसृष्टिजाग्रतितुस्थूलांसृष्टिमात्मामनोविशिष्टःकरोतीतिविशेषंदृष्टांतेनस्पष्टयति निदाघेतिचतुर्भिः यथाग्रीष्मर्तौरात्रिकालेतेजऊष्मरूपंप्रकाशहीनंसंतापमात्ररूपंकार्यमिन्धनानपेक्षमेवकरोतितथास्वप्नेमनोविशिष्टआत्मालौकिकसामग्रीहीनोप्यात्मनैवसूक्ष्मंरथादिकंसृजति तस्यकार्यस्यैषैवसूक्ष्मतायद्बाह्यसामग्र्यनपेक्षत्वं एतादृशीसूक्ष्मतैवचस्वप्नस्यमिथ्यात्वेहेतूकृतामा

ब्रह्मज्ञानाग्निनादग्धेस्वात्माज्ञानेतथैवहि ॥ जायमानेषुभूतेषुमुक्तोनैवप्रजायते ॥ ३०५॥ निदाघशर्वरीकाले तेजइंधनवर्जितं ॥ नप्रकाशंहिसंतापंकुरुतेसर्वदेहिनां ॥ ३०६ ॥ स्वप्नस्थितस्तथैवात्मासर्वकारणवर्जितः॥ आत्मनैवसृजत्येतद्विश्वंसदसदात्मकम्॥ ३०७॥ शिशिरेत्रयथावन्हिरिंधनानिसमाश्रितः॥ शीतंहरतिजंतूनामत्यंतनिकटःस्थितः॥ ३०८ ॥ तथाजागरणेप्यात्मास्थूलंदेहंसमाश्रितः ॥ देशकालादिसापेक्षःसृजत्येतन्नचान्यथा ॥३०९॥स्वप्नेमनोयथाभूयाद्विश्वंसदसदात्मकम्॥तथाजागरणेप्येतन्मनएवनसंशयः॥३१०॥

यामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वादितिसूत्रेइतिद्वयोरर्थः ॥ ३०६ ॥ ३०७ ॥ बाह्यसामग्रीसापेक्षत्वेनस्थूलांजाग्रत्सृष्टिंव्युत्पादयति शिशिरइति यथाशिशिरर्तौवन्हिःशीतहरणलक्षणंकार्यंकुर्वन्निन्धनलक्षणमुपकरणंसान्निध्यंचापेक्ष्यैवकरोतितथाजागरणआत्मादेशाद्यपेक्षस्तत्तत्कार्यकरः देशाद्यपेक्षत्वमेवजाग्रत्कार्यस्यस्थूलत्वंभगवद्व्याससूत्रेकार्त्स्न्यपदेनोक्तमितिद्वयोरर्थः॥३०८॥३०९॥ सूत्रकारादिभिःस्वप्नेमिथ्यात्वंकार्त्स्न्याभावेनयत्प्रसाधितंतन्नस्वप्नमात्राभिप्रायेणकिंतुस्वप्नदृष्टांतेनजाग्रत्यपिमिथ्यात्वसाधनायेतीममाशयंस्पष्टयन्स्वप्नजाग्रतोःसाम्यमभिनयति स्वप्नइत्येकादशभिः यथास्वप्नेप्रतीयमानंसदसदात्मकमनुकूलप्रतिकूलात्मकंविश्वंमनएवमनोमात्रमेवमिथ्येतियावत् तथाजाग्रत्प्रपंचोपीत्यर्थः अत्रस्वप्नपदार्थानांमायोपादानकत्वपक्षेमनःपदंमनःकारणाज्ञानपरमितिबोध्यम्॥३१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुंमनोमात्रान्वयव्यतिरेकानुविधायित्वंदर्शयनृव्यतिरेकंतावदाह निरोधइति यथास्वप्नेऽस्यमनसोनिरोधेविषयाकारवृत्तिक्षयेद्वैतंतत्तद्विषयरूपंनोपलभ्यतेतथाजाग्रत्यपीति ॥ ३११॥ अन्वयंदर्शयति शत्रुमित्रेति यथास्वप्नेमनसःशत्रुमित्रात्मकेनभावेनपरिणामेनरागद्वेषादयोजायमानाःसंकल्पमात्रहेतुकाएवतथाजागरणेप्येतेरागादयस्तथारागद्वेषोपेक्षाविषयरूपाइष्टादिपदार्थाःसंकल्पादेवजायंतेविषयैर्बाह्योपकरणैर्विनेत्यर्थः जाग्रत्पदार्थेषुबाह्यकारणजन्यत्वाभिमानोपिकारणत्वाभिमतानांपूर्वंसंकल्पितत्वात्स्थिरत्वाभिमानोप्यभ्यासात्एतादृशमेवकात्स्र्यंजाग्रत्यभ्युपेत्यतदभावेनहेतुनास्वप्नेमिथ्यात्वप्रसाधनंसूत्रकारादिभिःकृतमितिभावः ॥ ३१२ ॥ ३१३ ॥ ननुजाग्रत्पदार्थानांदृश्यमाननानाविधसामग्रीजन्यानांकथंमिथ्यात्वमितिचेद्यदिनानाविधसामग्रीदर्शनमात्रेणसत्वमुच्यतेतर्हिस्वप्नेपिजाग्रदृष्टपदार्थानांसर्वेषामुपलब्धेःस्वाप्निकानांभावानांसत्यत्वापत्तिरित्याशयेनाह यावानिति स्पष्टं ॥ ३१४ ॥ ननुजाग्रत्पदार्थेषुस्थिरत्वंवि

निरोधेमनसोयद्वत्स्वप्नेद्वैतंनलभ्यते॥ तथाजागरणेप्यस्यनिरोधेलभ्यतेनहि॥३११॥ शत्रुमित्रात्मभावेनरागद्वेषादयोयथा॥ संकल्पेनैवजायंतेस्वप्नेसर्वशरीरिणाम्॥ ३१२॥ तथाजागरणेप्येतेजायंतेविषयैर्विना॥ इष्टानिष्टादिविषयाःसंकल्पादेवमानसात्॥ ३१३॥ यावान्जागरणेदृष्टःप्रपंचोदेहधारिणा॥ सुखदुःखकरःसर्वस्तावान्स्वप्नेपिविद्यते॥ ३१४॥ यथासव्यभिचारत्वंस्वप्नदृष्टस्यवस्तुनः॥ दृष्टंजागरणेस्वप्नेसुखदुःखकरस्यच॥ ३१५॥ तथाजागरणावस्थागतस्याखिलवस्तुनः॥ सुखदुःखकरस्यापिस्वप्नेसव्यभिचारिता॥ ३१६॥ सुखहेतुर्यथादृष्टःकदाचिद्दुःखदोत्रसः॥ सर्वोजागरणेस्वप्नेप्येवंसव्यभिचारता॥ ३१७॥

शेषइतिचेत्स्थिरत्वंकिंअन्यथाभावशून्यत्वंनियतकार्यकरत्वंवा नाद्यः तस्यात्मभिन्नेजडेपरिणामिनिदुर्वचत्वात् नांत्यः सुखदुःखजनकत्वाभिमतानांविपरीतकार्यजनकतायादृष्टेरित्याह यथेतित्रिभिः यथास्वप्नदृष्टस्यवस्तुनःपदार्थजातस्यजागरणेसव्यभिचारत्वंव्यभिचारेणदृष्टस्वभावपरित्यागलक्षणेनसाहित्यंदृष्टंस्वप्नेसुखदुःखकरस्यचजागरणेभिन्नकार्यसंबंधलक्षणंसव्यभिचारित्वंदृष्टंतथाजाग्रत्पदार्थानांस्वप्नेसव्यभिचारत्वंदृष्टमितिद्वयोःसंबंधः ॥ ३१५ ॥ ३१६ ॥ सुखादिकार्यव्यभिचारितामेवविशदयति सुखहेतुरिति यथात्रजागरणेयःसुहृदादिर्भावःसुखहेतुर्दृष्टःसएवकदाचिद्वियोगादिकालेदुःखदोदृष्टःएवंविधाएवभावाःस्वप्नेपिसंतीतिसव्यभिचारतास्पष्टा एवंविधत्वंस्थिरत्वेऽनुपपन्नमितिभावः ॥ ३१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचजाग्रत्स्वप्नयोःपदार्थानांसामग्रीवैलक्षण्यं कल्पितसामग्र्याउभयत्रसाम्यात् सत्यायाःकुत्राप्यभावादित्याशयेनाह शुक्रेति यथाजागरणेशरीरंपितृमात्रंशजंतथास्वप्नेपि यदिस्वप्नगयोःशुक्रशोणितयोरसत्यत्वंपश्यसितदाजागरणगयोरपिवाचारंभणश्रुत्यादार्शितमसत्यत्वं कुतोनपश्यसि भ्रमसिद्धायाःकारणतायाअसत्ययोरपिसुवचत्वादितिद्वयोरर्थः ॥ ३१८ ॥ ३१९ ॥ कारणकारणानामपिकल्पितानां स्वप्नेसौलभ्यमित्याह पितेति तयोःस्वप्नजाग्रतोः ॥ ३२० ॥ फलितमाह मनएवेति ततःप्रपंचस्यमनोऽन्वयव्यतिरेकानुविधानात् सदसद्रूपंस्थूलसूक्ष्मात्मकंरूपंयस्यसतथातस्य ॥ ३२१ ॥ मनसःप्रपंचकारणतामेवप्रपंचयति तेनैवेत्यादिना जीवेशादिनिरूप्योभेदोत्रसंसारेते

शुक्रशोणितसंभूतंयथाजागरणेवपुः ॥ एवंस्वप्नेपिजंतूनांजायतेशुक्रशोणितात् ॥ ३१८ ॥ असत्येस्वप्नगेदृष्टेयथातेशुक्रशोणिते ॥ तथाजागरणेप्येतेअसत्येअपिकारणे ॥ ३१९ ॥ पितामातासुतोभ्रातेत्यादिस्वप्नेपिविद्यते ॥ यथाजागरणेकेनविषमत्वंभवेत्तयोः ॥ ३२० ॥ मनएवततोज्ञेयंस्वप्नेजागरणेपिवा ॥ सदसद्रूपरूपस्यप्रपंचस्यास्यकारणम् ॥ ३२१ ॥ तेनैवमनसासर्वोभेदोविरचितोत्रहि ॥ ईशानीशात्मकोयेनभृशंमोमुत्यतेपुमान् ॥ ३२२ ॥ मनएवततोज्ञेयंबन्धेमोक्षेचकारणं ॥ आत्मनोऽज्ञानमायातंभवेद्बन्धस्यकारणं ॥ त्रिविधस्यापिदुःखस्यभेददर्शनमागतम् ॥ ३२३ ॥ श्रुत्युक्तंस्वात्मनोरूपंस्वप्रकाशसुखात्मकं ॥ जानन्मनोभवेज्जंतोर्मुक्तेरपिचकारणम् ॥ ३२४ ॥

नवर्णितेनमनसैवनिर्मितोयेनभेददर्शनेनभृशंमोमुह्यतेपुनःपुनर्मोहंप्रमादाख्यमृत्युंगच्छति मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतीतिश्रुतेः ॥ ३२२ ॥ मनएवेति ततउक्तविधयासर्वप्रपंचकारणत्वादेवमनोबंधमोक्षयोरपिकारणं बंधमोक्षयोःप्रपंचनिरूप्यत्वेनप्रपंचांतर्गतत्वादिति तत्रबंधप्रयोजकंमनसोरूपंदर्शयति आत्मनइति आत्मविषयकमज्ञानमावरणरूपमायातमभिमन्यमानंमनोबंधस्याध्यासलक्षणस्यकारणंस्थितिहेतुर्भवति भेददर्शनंविक्षेपशक्तिरूपमज्ञानमभिमन्यमानंतुबंधफलस्याध्यात्मिकादिदुःखत्रयस्यकारणंक्षेत्रंभवतीत्यर्थः ॥ ३२३ मोक्षप्रयोजकंतत्त्वज्ञानात्मकंमनसोरूपंदर्शयति श्रुत्युक्तमिति मनआत्मनःश्रुत्युक्तंरूपंजानत्सत्जंतोर्मोक्षकारणंभवतीति ॥ ३२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंधमोक्षयोर्मनसिनिक्षेपेहेतुंशुद्धात्मनोबंधाद्ययोग्यत्वमाह नवंधइति आनंदात्मकंरूपंयस्यएतादृशस्यमनसस्तद्विकाराणांचसाक्षिण आत्मनोवंधादिकंनास्तिकिंतुमनःकृतत्वात्सर्वमेतद्वंधादिकंमनसएवविद्यतेइति ॥ ३२५ ॥ मनसआत्मनोनर्थकरत्वेदृष्टांतमाह क्रीडे ति मरणांतिकंमरणपर्यंतं ॥ ३२६ ॥ तथेति स्पष्टं ॥ ३२७ ॥ तत्रापिमनसआत्माकारताप्रच्यावकःकामएवविशेषतोदुःखहेतुरितिसदृ ष्टांतमाह मत्स्यइतिद्वाभ्यां स्पष्टं ॥ ३२८ ॥ ३२९ ॥ इंद्रियाभिमानस्यविशेषतोदुःखजनकतांसदृष्टांतंदर्शयति मर्कटइति यथादशरज्जु वद्धस्यमर्कटस्यधावनपरस्यमहद्दुःखंतथादशेंद्रियाभिमानिनोविषयाभिमुखंधावतश्चबंधदुःखयोःप्रसक्तिरितिद्वयोरर्थः ॥ ३३० ॥

नवंधोनचवैमुक्तिर्नचभेदस्यदर्शनं॥ आनंदात्मस्वरूपस्यसाक्षिणोमनसोपिच॥ विद्यतेकिंतुमनसःसर्वमेत न्मनःकृतम्॥ ३२५ ॥ क्रीडापरोयथालोकेमर्कटोत्यंतचंचलः॥ आत्मनैवात्मनोदुःखंकुरुतेमरणांतिकम् ॥ ३२६॥ तथातिचंचलंसर्वजंतूनांमनईरितम्॥ आत्मनैवात्मनोदुःखंसंसारंकुरुतेसदा ॥ ३२७॥ मत्स्यो गाधेजलेयद्वत्स्थितोभयविवर्जितः॥ वडिशार्थंबहिर्गच्छन्दुःखंप्राणांतमाव्रजेत्॥ ३२८॥ आनंदजलधौत द्वत्स्वप्रकाशेऽभयेस्थितं॥ मनोविषयलाभार्थंबहिर्गच्छद्व्रजेद्भयं॥ ३२९॥ मर्कटश्चंचलोयद्वद्वद्धःसूत्रैर्दशोद श॥ धावन्दुःखंसमाप्नोतिसर्वतोदुःसहंसदा॥ ३३०॥ इंद्रियैर्दशभिस्तद्वन्मनोऽबद्धमभीतवत्॥ धावद्बंधमवा प्नोतिदुःसहंदुःखमत्रहि॥ ३३१॥ पारावतोयथाकाशेवर्ततेनयनातिगः॥वीक्ष्यपारावतींमंदस्तत्क्षणाद्भुवमा व्रजेत्॥ ३३२॥एवंशब्दादिपैशाचींनिरीक्ष्यात्मन्यवस्थितं॥ततूक्षणाद्बहिरायातिमनोदुःखकरेस्थले॥ ३३३॥

॥ ३३१ ॥ मनसोविषयाभिमुखंवेगेनधावनेदृष्टांतमाह पारावतइति यथापारावतःकपोतोऽतिदूरमाकाशेवर्त्तमानोनेत्राविषयोपिपारा वतींवीक्ष्यतद्रागांधस्त्वरितंभुवंगच्छति ॥ ३३२ ॥ दार्ष्टांतिकेयोजयति एवमिति एवंमनआत्मनिचिदाकाशेऽवस्थितंस्वभावतस्तदाकार तांआकाशेजन्मतएवघटवत्परिपूर्णतालक्षणांगतमपियदाशब्दादिविषयरूपांपैशाचीं प्रज्ञादित्वेनस्वार्थिकाणंतात्स्त्रियांङीप् पश्यतितदा द्वैतदर्शनात्मकेदुःखदेस्थलेआयातीति अत्रशब्दादिविषयाणांपिशाचीत्ववर्णनेनमनसःपिशाचत्वंसूचितं तस्माद्दृश्यस्याकाशवासित्वरू पस्यचसूचकमात्मन्यवस्थितमितीतिवोध्यम ॥ ३३३ ॥ ॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंकामस्यप्रवृत्तिद्वाराद्दुःखदत्वंप्रदर्श्याथकर्मणःफलजननेकामसापेक्षस्यदुःखदत्वंदृष्टान्तेनस्फुटयति पाशेति यथापशुरजादिःपाशबं न्धनेनानीश्वरःपरतंत्रस्सन्नुत्तरोत्तरंदुःखदंदेशंयातितथामनोपिसकामंशुभाशुभादृष्टरूपपाशबद्धमुत्तरोत्तरंदुःखकरींविषयभूमींयातीति द्वयोरर्थः ॥ ३३४ ॥ ३३५॥ ननुबद्धस्यपशोर्देशांतरनेतृपुरुषस्थानीयोत्रकइतिचेल्लोकेऽप्रसिद्धआगमैकबोध्योंतर्याम्येवेतिसूचयन्नाह अकारणमिति शेषःसंकर्षणेऽनंतेउपयुक्तेतरेवधेइतिविश्वकोशेवधपदोक्तमृत्युरूपशेषस्यसर्वत्रभूतलेव्यवस्थयाधावनंयथाअकारणंअल क्ष्यमाणकारणकंतथामनसोपिबहिस्तत्तदाकारतालक्षणंधावनंदुर्लक्ष्यकारणकमित्यर्थः शेषपदस्थानेशिशुरितिपाठेअकारणंव्यर्थंयथा शिशोर्गृहांगणधावनंतथामनसोबहिरित्यर्थः परंत्वत्रपाठेसर्वत्रपदास्वारस्यंसंकोचोवा व्यर्थत्वमात्रबोधनपरत्वंचास्यपद्यस्येतिबोध्यम् ॥३३६॥ अथसंघाताध्यासरूपायाःकार्याविद्यायाअनर्थकरत्वंदृष्टांतेनस्फुटयति प्रमत्तैरितिद्वाभ्यां यदिकश्चिद्रथीबंधनाद्यैःसंयुतोरथो

पाशबद्धोयथाकश्चित्पशुरायात्यनीश्वरः॥ देशाद्देशांतरंनित्यंदुःखाद्दुःखकरंभृशं॥ ३३४॥ कर्मपाशैस्तथाब द्धंमनोविषयभूमिकाः॥ आयातिविवशंनित्यंदुःखाद्दुःखकरीर्भृशं॥ ३३५॥ अकारणंयथाधावेच्छेषःसर्व त्रभूतले॥ अकारणंतथैवैतन्मनोयातिबहिःसदा ॥ ३३६॥ प्रमत्तैर्वाजिभिर्युक्तैर्बद्धैःशिथिलबंधनैः॥ यथा नश्येद्रथीसाश्वोबंधनाद्यैश्चसंयुतः॥ ३३७॥ दुर्दांतैरिंद्रियैस्तद्वन्मनोबंधनसंयुतैः॥ मनःस्थितःपुमानेषसंसा रंप्रतिपद्यते ॥ ३३८ ॥ बालोयथामुखेस्वस्यविक्रियाःकुरुतेयतः ॥ पुरःस्थितेऽतिसंशुद्धेविलोकयतिदर्पणे ॥ ३३९॥ एवंमनोपिसंसारविक्रियाकारणंसदा॥ आत्मनिस्वप्रकाशेस्मिन्विलोकयतिविक्रियाः॥ ३४० ॥

परिबद्धपादः आद्यपदद्याद्यविहाररागरथाभिनिवेशयुतश्वस्यात्तस्यचरथेयुक्तावाजिनःप्रमत्ताःशिथिलबंधनबद्धाश्चस्युःसयथागर्त्तपाते नसाश्वोनश्येत्तथामनःस्थितोमनस्तादात्म्याध्यासमापन्नएषपुरुषोदुर्दांतैरशिक्षितैरिंद्रियाश्वैर्मनसाप्रग्रहभूतेनक्षणभंगुरतालक्षणशिथि लताशालिनाबद्धैर्युतेसंघातरूपेरथेस्थितःपुमान्संसारलक्षणगर्तपातंप्राप्नोतीति आत्मानंरथिनंविद्धीत्यादिकठश्रुतेरितिद्वयोरर्थः॥३३७॥ ॥ ३३८॥ सचसंसारोमनस्येववर्त्तमानोभ्रांत्याऽऽत्मनिप्रतीयतइत्येतद्दृष्टांतेनविशदयति बालइतिद्वाभ्यां यथाबालःस्वमुखेविक्रियाःवक्र त्वादिविकारान्यतःकुरुतेततएवदर्पणेविलोकयतिनतुताविक्रियाःसंतिदर्पणेतथामनःस्वयंविकृतंसत्स्वनिष्ठाविक्रियाःशुद्धात्मनिपश्यती तिद्वयोरर्थः॥ ३३९ ॥ ३४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुजडस्यमनसोविकारकारणत्वमपिकथमितिचेच्चिदात्मनःसंनिधेःप्रतिबिंबादिपदैःप्रसिद्धस्यप्रभावादितिसूचयन्नात्मनःसंनिधिमात्रेण प्रेरकत्वंसदृष्टांतमाह अम्लइति यथाजंबीरादिरम्लरसवान्पदार्थोदृष्टःसन्जिव्हांवाद्रावयतिमनोवाक्षोभयतिएवमात्मासन्निधिमात्रेण मनसोविक्रियासुप्रवर्तकइतिद्वयोरर्थः ॥ ३४१ ॥ ३४२ ॥ नन्वसंगस्यात्मनोमनःक्षोभकत्वमपिकथमितिशंकांवारयन्मूलाज्ञाना दिपदवाच्ययाअचिंत्यशक्त्याविशिष्टस्ययथामनआदिसर्जकत्वंतथैतदपीतिदर्शयति स्वप्नेइत्यष्टभिः यथैषआत्मास्वप्नेस्रष्टानांनानाप्रमा तृणांमनांसिसृजतिएवंयेनमनसाविशिष्टःस्वप्नावस्थांगच्छतितन्मनोपिसृजतीति ॥ ३४३ ॥ ननुस्वप्नेमनसांसृष्टिर्मनःकृतैवदृष्टेतिप्रधा नमनःसृष्टिरपिमनोंतरकृताभविष्यतीतिशंकांसदृष्टांतंपरिहरति नष्टेति यथादिराजेनपृथुनापृथिवीदोहनात्पूर्वकालेलोकेनष्टबीजेसति

अम्लोरसोयथास्वस्यसंनिधौमुखपंकजे॥ नीरमुत्पादयेत्शीघ्रंक्षोभयेद्वापिमानसम्॥ ३४१ ॥ एवमात्मासदानंदस्वप्रकाशशरीरवान्॥ आत्मसंनिधिमात्रेणक्षोभयत्येषमानसं॥ ३४२॥ स्वप्नेयथासृजत्येषमनांसिविविधान्यपि॥ सृजत्येवंमनोप्येतत्स्वप्नदर्शनकारणं॥ ३४३॥ नष्टबीजेयथालोकेबीजहेतुर्वसुंधरा॥ निर्बीजैवभवेदेवममनामनसोपिहि॥ कारणंभगवानीशःस्वात्मज्ञानविवर्जितः॥ ३४४ ॥ यथामेघादिरहितआकाशोत्यंतनिर्मलः॥ उत्पत्तिस्थितिनाशानांमेघादेःकारणंभवेत्॥ ३४५॥ मनआदिप्रपंचेनरहितोऽव्याकृतोथवा॥ मनआदिप्रपंचस्यकारणंपरमेश्वरः॥ ३४६॥

पृथुराजप्रेरणयावसुंधरायद्बीजहेतुर्बभूवतत्रनबीजानांबीजहेतुत्वंकिंतुनिर्बीजायाग्रस्तबीजायाःपृथिव्याएव एवंभगवानीशःस्वात्मज्ञान विवर्जितोमूलाज्ञानविशिष्टआत्मैवमनसःकारणं कीदृशआत्मा अमनाःसुषुप्तिप्रलयादौमनोरहितत्वेनप्रसिद्धइत्यर्थः ॥ ३४४ ॥ आत्म नोविकारकारणतायांविकाराणांनविशेषणत्वंकिंतुमूलाज्ञानादिपदवाच्यायाःशक्तेरेवेत्येतद्दृष्टांतेनस्फुटयति यथेतिद्वाभ्यां यथाकाश स्यमेघाद्युत्पत्तिकारणत्वंमेघादिहीनस्यानिर्वाच्यशक्तिविशिष्टस्यैवनमेघादिविशिष्टस्यतथाप्रपंचप्रागभावपदेनाव्याकृतपदेनवाभिलप्यं यदज्ञानंतद्विशिष्टएवआत्माप्रपंचकारणमितिद्वयोरर्थः ॥ ३४५ ॥ ३४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वज्ञानमात्रेणकथंविपरीतरूपलाभइतिनशंकनीयंदृष्टत्वादित्याह आत्मेति यथाकुतश्चननिमित्ताद्भिक्षुर्दरिद्रोविप्रविशेषःअघमर्षणकालेराजाबभूवतस्यचराजभावनिर्वाहकमात्मनोभिक्षुत्वेनाज्ञानमेवप्रसिद्धमेतद्वासिष्ठे तथाराजालवणोदैवयोगाद्भिक्षुर्दरिद्रोबभूवतस्याप्यात्मनोराजत्वेनाज्ञानमेवभिक्षुत्वनिर्वाहकंतथात्मनोप्यात्माज्ञानान्नानाविधप्रपंचभावइतिद्वयोरर्थः॥ २४७॥२४८॥ नन्वनर्थांतराण्यज्ञानकृतानिसंभाव्यंतेजन्ममरणेतुनसंभाव्येतेअदृष्टत्वादितिचेत्स्वप्नेऽनुभूयापिकिमपलपसीत्याह जायतइति यथाऽजरोऽमरश्चायंपुमान्स्वप्नेजायमानोम्रियमाणश्चाज्ञानप्रभावाद्दृष्टःस्वप्नदृष्टानामेतद्रूपत्वात्तथाजागरणेपिजानीहीति ॥ २४९॥ एवंमूलाज्ञानोपाधिकात्मरूपादीश्वरादुत्पन्नस्यमनसःअविद्याकामकर्मभिःसहकृतस्यसकलप्रपंचोपादानतयाप्राधान्यमुक्तं अथतस्यचिदेकभास्यतांस्फुट

आत्माज्ञानाद्भवेद्भिक्षुर्यथाराजाकुतश्चन॥ राजावापिभवेद्भिक्षुर्दैवयोगात्कथंचन॥ २४७॥ तथैवायंब्रह्मरूपआनंदात्माद्वयःपुमान्॥ आत्माज्ञानाद्भवत्येतद्विश्वंसदसदात्मकं॥ २४८॥ जायतेम्रियतेयद्वदजातोप्यमृतःपुनः॥ स्वप्नेजागरणेप्येवंजायतेम्रियतेपिसः॥ २४९॥ दृश्यैर्घटादिभिर्यद्वद्दृश्योजागरणेनहि॥ द्रष्टास्वप्नेतथैवायंमनसानैवदृश्यते॥ २५०॥ मनोज्योतिर्यदप्युक्तंक्वापिनैवात्मबोधनात्॥ किंत्वात्मव्यतिरेकस्यवस्तुनस्तत्प्रकाशनात्॥ २५१॥ यथालोकेभवेज्ज्योतिर्नयनंघटबोधकृत्॥ मूर्तामूर्तधियोहेतुर्मनोज्योतिस्तथैवहि॥ २५२

यति दृश्यैरित्यादिना यथाजागरणेघटादिभिर्द्रष्टापुरुषोनप्रकाश्यतेस्वयंतद्दृश्यत्वात्तथास्वप्नेदृश्याकारपरिणतंमनोद्रष्टारंनभासयतिकिंतुद्रष्टात्मनैवमनोभास्यतइत्यर्थः ॥ २५० ॥ ननुमनःस्वयंप्रकाशमेवकुतोनस्यात्शाकल्यब्राह्मणेपुरुषाष्टकस्यमनोज्योतिरित्युक्तत्वादित्याशंकांतदभिप्रायप्रदर्शनेनवारयति मनइति क्वापिशाकल्यब्राह्मणेमनसोज्योतिष्ट्वंयदुक्तंतदात्मानंमनःप्रकाशयतीत्यभिप्रायेणनोक्तंकिंत्वात्मव्यतिरिक्तवस्तूनामात्मकर्तृकेभासनेमनःसाहाय्यमाचरतीत्यभिप्रायेणैवेत्यर्थः ॥ २५१ ॥ आत्मेतरवस्तुप्रकाशनेचक्षुर्वत्संबंधघटकतामात्ररूपमेवमनसोज्योतिष्ट्वमित्येतद्दर्शयति यथेति यथालोकेनयनस्यचक्षुषोघटादिबोधेउपकारकत्वेनज्योतिष्ट्वंतथामनसोवृत्तिद्वाराविषयात्मसंबंधघटकत्वेनज्योतिष्ट्वमिति ॥ २५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटादिभासनकालेमनसःकरणत्वविवक्षायामपिचिदपेक्षयामनसोघटादिसमत्वमेवेत्याह यथेंद्रियैरिति यथाबाह्यंसर्वंसदसदात्मकमनिर्वचनीयमिंद्रियैर्विजानातियथाचतदग्राह्यमिंद्रियाग्राह्यंपरोक्षंविषयमिंद्रियाणिचमनसाजानातितथाएषपुमानात्मामनस्तद्विषयांश्चएकःप्रकाशयेदिति॥३५३॥आत्मनोमनोभासकत्वंकैमुत्यन्यायेनाह अपियदिति यन्मनसःकारणमज्ञानमात्ममात्राश्रयविषयकंनामरूपकर्मभिर्हीनमव्याकृतमितियावत् तस्यापिभासकस्यात्मनस्तज्जन्यमनोभासकत्वंकिमुवाच्यमित्यर्थः ॥ ३५४॥एवंसकारणेमनसिसिद्धमात्मभास्यत्वंजाग्रत्पदार्थेष्वतिदिशति इंद्रियाणीति यथामनश्चिदात्मनाभास्यंतथाइंद्रियादयोऽग्निपर्यंताःप्रकाशकत्वेनप्रसिद्धाअपिबोध्याश्चिद्भास्याःसदसद्रूपत्वेनानिर्वचनीयत्वेनाज्ञानकार्यत्वव्याप्येनाचिद्रूपत्वात् फलितमाह ततइत्यादिना तैजसानितेजःप्रचुराणि इतिद्वयोरर्थः॥३५५॥३५६॥ एषात्मनःसर्वभासकतासर्वतंत्रसिद्धांतःउपपत्तिबलेनापिसर्वैरभ्युपेयत्वादित्याशयेनसर्वभासकतायामुपपत्तिप्रपंच

यथेंद्रियैर्विजानातिसर्वंसदसदात्मकम्॥ इंद्रियाणितदग्राह्यंमनसायद्वदेवच॥ तथामनःसविषयंपुमानेष प्रकाशयेत्॥ ३५३॥ अपियन्मनसःप्रोक्तंकारणंरहितंसदा॥ नामरूपादिभिःस्वात्माज्ञानंस्वात्मनिसंश्रितं॥ प्रकाशयेत्तदप्येपकिमुतद्धेतुकंमनः॥ ३५४॥ इंद्रियाणिमनस्तद्वत्तारकामणयोपिहि॥ तैजसानितथान्यानि रत्नादीनिसहस्रशः॥ ३५५॥ रविसोमाग्नयोप्येतेबोध्याःसदसदात्मकाः॥ अचिद्रूपास्ततःसर्वेप्रकाश्याःस्युर्घटादिवत्॥ ३५६॥ बोधेभ्योव्यतिरिक्तानांकारणानामनेकशः॥ बोधानांजडतासर्ववादिसिद्धाह्यसंशयम्॥ विनासुरगुरोःशिष्यान्बोधेप्येवंविचार्यतां॥ ३५७॥

यति बोधेभ्यइतिचतुर्विंशतिश्लोकैः बोधानांयानिकारणानिविषयकरणरूपाणितेषांजडतासर्वैर्वादिभिरंगीकृतैवभूतचैतन्यवादिनोबृहस्पतिशिष्यान्चार्वाकान्विहाय तेहिज्ञानविषयत्वेनप्रसिद्धानांभूतानांपृथिव्यादीनांशरीराकारपरिणतानांचैतन्यमिच्छंति परंतुतेकृतनाशाकृताभ्यागमरूपदोषदंडेनबालैरपिसुजेयाइत्युपेक्ष्याइतिभावः ननुज्ञानकारणानामपिपूर्वज्ञानविशेषणज्ञानव्याप्तिज्ञानादीनांजडत्वंवादिभिर्नाभ्युपगतमित्यतोज्ञानकारणविशेषणंबोधेभ्योव्यतिरिक्तानामिति तथाचबोधभिन्नेषुप्रकाशत्वंकेनापिवक्तुमशक्यमितिभावः ननुबोधानामेवप्रकाशत्वेकिंतवेतिचेत्तेषांस्वप्रकाशत्वेपरप्रकाशत्वेवाश्रौतात्मसिद्धिरेव तेहियदिस्वप्रकाशास्तदातएवात्मायदितुपरप्रकाशास्तदापितत्साधकतयात्मनःसिद्धिरित्याशयेनाह बोधेपीति बोधस्वरूपेपिएवंवक्ष्यमाणविधयाविचारःकर्त्तव्यइत्यर्थः ॥ ३५७ ॥ ॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रबोधानांस्वप्रकाशत्वपक्षेब्रह्मात्मरूपतांसाधयति बोधाइतिद्वाविंशत्या तेघटादिबोधाःकिंचिद्रूपतयास्वप्रकाशाःकिंवाव्त्तिरूपगौण ज्ञानात्मकतयापरप्रकाशाइतिविचारेयदितेस्वयंप्रकाशास्तदातेषांबोधानांभिदाभेदःकुतःसिद्ध्यति किंस्वतःपरतोवा नाद्यः स्वपदेनभेदविव क्षायांभेदेनजडेनस्वसाधनोक्तेर्व्याहतत्वात् स्वपदेनभेदाश्रयज्ञानविवक्षायांप्रतियोग्यनुयोगिग्रहणसापेक्षस्यभेदग्रहणस्यभेदाश्रयेणकर्तु मशक्यत्वात् प्रतियोग्यनुयोगिनोरुभयोरप्यविषयत्वभावतालक्षणस्वप्रकाशताशालिनोर्ग्रहणायोग्यत्वादितिभावः अथद्वितीयंपरतइ तिपक्षंविचारयति स्वप्रकाशेष्विति स्वप्रकाशबोधेषुतिष्ठन्भेदस्त्वयाभेदाश्रयज्ञानभिन्नेनपरेणगृह्यतेविषयीक्रियतेवानवाइति ॥ ३५८ ॥ तत्रायंविकल्पयति गृह्यतइति यदिभेदोगृह्यतेतदापिकिंभेदोस्तीत्येतावन्मात्राकारेणगृह्यतेकिंवाअमीषांबोधानांभेदइत्यनेनाकारेणगृह्य

बोधाःस्वयंप्रकाशाःस्युर्यदितेतद्भिदाकुतः ॥ स्वप्रकाशेषुभेदोयंगृह्यतेवानवात्वया ॥ ३५८ ॥ गृह्यतेयदिसो प्येवंभेदइत्येवगृह्यते ॥ अमीषामितिवापूर्वंबोधानांकिंभवेत्तव ॥ ३५९ ॥ नहिभेदेगृहीतेस्तिनभसोनभसो भिदा ॥ अमीषामितिचेद्भेदोगृह्यतेभवताधिया ॥ तथाचस्वप्रकाशत्वंनभवेद्धिघटादिवत् ॥ ३६० ॥ भेदोयं हिमयाग्राह्योघटस्यचपटस्यच ॥ एवंप्रतीयमानानांतेषांनस्वप्रकाशता ॥ ३६१ ॥

तेइति पूर्वंप्रथमेतवपक्षेबोधानांकिंजातं बोधानांहिभेदसंबंधस्वरूपापरिच्छिन्नतातदाआपद्येतयदातेषांप्रतियोगिताअनुयोगितावागृह्येत सातुभेदइत्येतावन्मात्राकारेज्ञानेनभासतइतिभावः ॥ ३५९ ॥ एतदेवदृष्टांतेनस्फुटयति नहीति यथाभेदइत्याकारेणभेदेगृहीतेआकाश स्याकाशाद्भेदोनसिद्ध्यति आकाशस्यप्रतियोगित्वादिनाऽनुल्लेखात् अयोग्यतयाआक्षेपस्याप्यप्रसरात्तथातटस्थानांबोधानामपीत्यर्थः द्वितीयंपक्षमादायनिराचष्टे अमीषामितीति चेद्यदिअमीषामितिइदंरूपेणबोधान्विषयीकृत्यतद्भेदोगृह्यतेतदापरप्रकाश्यानांबोधानांस्वप्र काशत्वंनस्यात्यथाघटादीनामित्यर्थः ॥ ३६० ॥ दृष्टांतंस्फुटयति भेदइति यथामयाअमीषांघटादीनांभेदोगृह्यतेइत्येवंप्रतीतिविषयी क्रियमाणानांतेषांघटादीनांस्वप्रकाशतानदृष्टेति ॥ ३६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंस्वप्रकाशानांभेदोग्रहीतुमशक्यः प्रतियोग्यनुयोगिग्रहणलक्षणायाःसामग्र्याअसंभवात् प्रतियोग्यनुयोगिनोरविषयस्वभावत्वादित्यु
क्तं अथनगृह्यतेइतिपक्षेदोषमाह अग्रहेइति अग्रहेभेदस्यग्रहणाभावपक्षेग्रहणाभावरूपेणहेतुनाभेदोनास्ति भेदात्यंताभावएवसिद्ध्येदित्य
र्थः अयंभावः जडानांपराधीनसिद्धिकानांमानाधीनासिद्धिरित्यविवादं तेषुचकेनचिन्मानेनसिद्धेषुप्रत्यक्षाप्रवृत्तावपिनासत्वंनिश्चेतुंश
क्यते भेदोपिचपरसापेक्षत्वेनस्वरूपेनिवेशमलभमानोजडएववाच्यः श्रुत्यादिबाधितत्वेनभ्रममात्रसिद्धश्च अतस्तत्रग्रहणाभावेनलिंगेननृ
शृंगवदसत्त्वानुमितौनकिंचिद्बाधकमिति एतदेवनृशृंगप्रतिबंद्यादर्शयति अगृहीतेष्विति ॥ ३६२ ॥ ग्रहणपक्षएवदोषांतरमाह अपियदि
ति किंचबोधानांभेदग्रहणपक्षेग्राहकंज्ञानांतरंस्वप्रकाशंपरप्रकाशंवा अंत्येऽनवस्था आद्येभेदग्रहणायप्रतियोग्यनुयोगिनौग्रहीतुमिष्टाव

अपियद्ग्रहणंतच्चेत्स्व
अग्रहेनास्तिभेदोयंग्रहणाभावहेतुना॥ अगृहीतेषुसत्त्वंचेन्नरिशृंगंकुतोनसत्॥ ३६२॥
प्रकाशंभवेत्तव॥ तादृशंग्राहकंनस्यात्सवितुश्चंद्रमायथा॥ ३६३॥ स्वप्रकाशेपिभेदश्चेज्ज्ञानेज्ञानेव्यवस्थि
तः॥ नस्वप्रकाशतातेषांतारतम्याद्घटादिवत्॥ ३६४ ॥ समानानांभवेत्कापिग्राह्यग्राहकताभुवि॥ खद्योता
नांचदीपानांयस्मादेषानदृश्यते॥ ३६५॥

पिकथंगृह्णीयात्प्रकाशत्वेनसमत्वादन्यथासूर्याचंद्रमसोरपिप्रकाश्यप्रकाशकभावापत्तिरित्यर्थः ॥ ३६३ ॥ स्वप्रकाशंस्वप्रकाशस्यनसा
धकमित्येतदेवस्फुटयति स्वप्रकाशेपीतिद्वाभ्यां यदिसर्वाज्ञानव्यक्तयःस्वप्रकाशाअपिपरस्परंप्रकाश्यंतइत्युच्यतेतदातासांप्रकाश्यप्रकाश
कभावनिर्वाहकोभेदस्तारतम्यरूपोपिवाच्यः तत्स्वीकारेतुप्रकाश्यघटादिसमत्वापत्त्यास्वप्रकाशबोधेनस्वप्रकाशस्यप्रकाशइत्युक्तेर्व्याहत
त्वंस्पष्टमित्यर्थः ॥ ३६४ ॥ यदितुउक्तोविशेषोनांगीक्रियतेतदापिप्रकाश्यप्रकाशकंभावोक्तिःसुतरांव्याहता खद्योतदीपादीनामपिप्रका
शत्वेनसमानांप्रकाश्यप्रकाशकभावादर्शनादित्याह समानामिति समानांसमानजातीयानाम् ॥ ३६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथबोधानांसच्चिदानंदत्वलक्षणात्मत्वविधानोपयोगिनींपूर्वोक्तविचारफलभूतांचसुखरूपतांदर्शयति ततइति यतउक्तविधयाभेदग्रहणंनसंभवतिततोग्रहणाभावेनन्नृशृंगवद्भेदाभावसिद्धेस्तेबोधाभेदशून्याइतिचेदंगीकुरुषेतर्हितेबोधाःसुखरूपिणइत्यपिनिश्चिनोतुभवान् योवैभूमातत्सुखमितिश्रुत्युक्तसुखलक्षणयोगात् श्रुतौभूमपदस्यभेदशून्यतापरत्वादितिपूर्वार्द्धार्थः ननुश्रुत्युक्तलक्षणस्यसुखेसमन्वयःक्क दृष्टइतिचेत्सुषुप्तेसमाधौचेत्याह नहीति भेदंभेददर्शनंविनावर्तमानेसुप्त्यादिकालेनृभिःप्राणिभिर्दुःखंनदृश्यतेकिंतुसुखमेवतत्रभासतेइति प्रसिद्धमित्यर्थः ॥ ३६६॥ ननुसुप्त्यादौभेदाभावलक्षणसुखसत्वेपितस्यसुखस्यस्वप्रकाशबोधात्मकत्वेकिंमानमितिचेद्भानान्यथानुपपत्तिरेवेत्याह स्वप्रकाशाइति स्वप्रकाशाःस्वप्रकाशत्वेनवर्णिताबोधायदितेसुखरूपानस्युस्तदातेषांनृणांसुप्त्यादौसुखस्यापिलाभोनसंभवेत् दुःखस्येवयथादुःखस्यतदालाभोनास्तिततःस्वप्रकाशाबोधाएवामीसुप्तौभासमानसुखरूपाइत्यर्थः अयंभावः सुखस्यस्वप्रकाशबोधभि

ततोभेदनशून्याश्चेद्बोधास्तेसुखरूपिणः ॥ नहिभेदंविनादुःखंसुप्त्यादौलभ्यतेनृभिः ॥ ३६६ ॥ स्वप्रकाशानचेत्तेस्युस्तेषांलाभोनसंभवेत्॥ दुःखस्येवसुखस्यापिस्वप्रकाशास्ततोऽप्यमी॥ ३६७॥ दुःखाभावोपिनैवस्यादप्रकाशःकथंचन॥ भेदशून्यैःकथंत्वेतैर्भेदवान्सप्रकाश्यते ॥ ३६८ ॥

न्नत्वेअद्वितीयत्वात्मकस्वलक्षणप्रच्युतिर्दुःखवद्भेददर्शनव्याप्यताचस्यात्तथाचसुषुप्तौभेददर्शनहीनायांसुखभानंनस्यादिति ॥ ३६७॥ ननुसुषुप्तेदुःखाभावशालितयैवेच्छाविषयत्वोपपत्त्याबोधाभिन्नसुखसत्वंकिमर्थंतत्रव्युत्पाद्यतेइतिशंकांवारयन्ननंतत्वविशदीकरणायबोधानांदुःखाभावरूपतामपिदर्शयति दुःखाभावइति दुःखाभावोप्यप्रकाशोबोधात्मकप्रकाशभिन्नश्चेत्तदानैवस्यान्नसिद्ध्येदित्यर्थः कथंनसिद्ध्येदित्यतआह भेदेति चिद्भिन्नोदुःखाभावःसुप्तौप्रकाशतइतिवदन्प्रष्टव्यः किमादित्याद्यैःप्रकाश्यतेकिंवाबोधैरेव नाद्यः सुप्तौतेषांविलयात् नांत्यः वर्णितविधयाभेदहीनैर्बोधैःसदुःखाभावःकथंप्रकाश्यते कीदृशोदुःखाभावोभेदवान्भवताअत्यंतंबोधभिन्नत्वेनाभिमतइत्यर्थः चित्प्रकाशेहिद्वयमेवभासतेचित्स्वरूपंतत्तादात्म्यलक्षणविषयताशालिचनात्यंतभिन्नमितिभावः ॥ ३६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःखाभावस्तुचित्स्वरूपएवेतिसूचयन्कथंभावरूपास्तेबोधादुःखाभावरूपाइतिशंकांवारयंश्वाह अप्यभावइति किंचअभावपदार्थोपि
भावेभ्योऽधिकरणतयाभिमतेभ्योनभिन्नःकिंत्वनुयोगिभावात्मकएवयथाघटःस्वेतरेषांसर्वेषामभावात्मकइतिसत्ख्यातिवादिभिरभ्युपग
म्यते तेह्येवमाहुः भावांतरमभावोन्योनकश्चिदनिरूपाणादिति सर्वेपदार्थाःस्वरूपेणसद्रूपाःपरापेक्षयाचाभावरूपाः भावभिन्नस्त्वभावो
नास्तिभिन्नत्वेननिरूपयितुमशक्यत्वादितितदर्थः तथैवास्माभिरप्यभ्युपगम्यतइतिभावः ॥ ३६९ ॥ ननुभावांतराभाववादिमतांगी
कारेवःकोलाभःप्रत्युतसर्वेषामभावात्मतापत्तिरूपोदोषएवेतिचेन्न पदेपदेऽद्वैतानुसंधानस्यसिद्धेरेवफलत्वादितिशंकासमाधानाभ्यांदर्शय
ति अभावात्मकतेति एवंभावात्मकाभाववादिमतस्वीकारेयदिविश्वस्यपदार्थजातस्याभवरूपताप्राप्नोतितर्हिप्राप्नोतुकानोहानिःप्रत्युता
द्वैतपरिचयएवेति ॥३७०॥ ननुकथंसत्ख्यातिमतांगीकारेऽद्वैतपरिचयःप्रत्युततेषांस्वरूपभेदंमन्वानानामनुसरणेभेदधीप्रसक्तिरेवेतिचेत्स्या
देवंयदिसर्वथातन्मतमनुगम्येत औपनिषदैस्तुयथाज्वरकरमपिदधिशर्करयासंस्कृत्योपयुज्यतेतथापरमतमपिश्रुत्यनुकूलतर्कपरम्पराशर्क

अप्यभावोनभावेभ्योविभिन्नोविद्यतेभुवि ॥ यतोघटोत्रविज्ञेयःस्वान्याभावोमनीषिभिः ॥ ३६९ ॥ अभा
वात्मकताचैवंयदिविश्वस्यजायते ॥ जायतांकिंविनष्टंनोत्यद्वितीयात्मवादिनां ॥ ३७० ॥ नचाभावोद्वितीयः
स्यात्सर्वाभावेनहेतुना ॥ सर्वाभावइदंयत्त्वंब्रूषेतन्नोऽद्वयंस्मृतम् ॥ ३७१ ॥

रयासंस्कृत्योपयुज्यतेइतिनकोपिदोषइत्यभिप्रेत्योक्तमतोऽद्वैतसिद्धिमभिनयति नचेति घटस्वरूपाद्वितीयोभिन्नःअभावोपिनस्यात्कि
मुतभावः कुतःसर्वाभावरूपेणहेतुना यदिहिकिंचिदपिघटस्वरूपाद्भिद्येततदाघटस्यसर्वाभावरूपेणाभिधानंव्याहन्येतेति ततश्चघटस्या
द्वितीयत्वेनब्रह्मत्वंसिद्धमित्याह सर्वाभावइति सर्वाभावपदेनयद्वस्त्वभिदधासितदेवनोस्माकंश्रुत्यनुगृहीतानामद्वयंब्रह्ममतं नचविरोधः
घटनामरूपयोःपंचीकरणप्रक्रिययासन्मात्रत्वात्सत्ताभानप्रियांशानांब्रह्मत्वस्यनिश्चितत्वात् तथाचानुगुणोयंसत्ख्यातिपक्षोस्माकमिति
भावः नचाभावोद्वितीयस्यसर्वाभावोपिहेतुनाइतिपाठेतु ननुकथंनहानिःशून्यतापत्तेःस्पष्टत्वादितिशंकावारणपरःश्लोकः तथाचद्वितीय
स्यइतरत्वावच्छिन्नस्याभावःशून्यतापादकसर्वाभावरूपोनभवति कुतः हेतुना भावप्रधानोनिर्देशः हेतुत्वेनेति सर्वाभावपदेनयदुच्यतेतद
स्मत्सिद्धांतप्रसिद्धाद्वयब्रह्मात्मनैवसिद्ध्यति इतरथातुजडस्यासाक्षिकस्यसिद्धिर्दुर्लभास्यात् घटादौसर्वाभावव्यपदेशोपिस्वावच्छिन्नचै
तन्यधर्माध्यासान्निर्वहतीतिभावः ॥ ३७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभावस्यभावभिन्नत्वाभावंपदार्थत्वानुपपत्त्यापिसाधयति अपिचेति किंचात्रपरीक्षकव्यवहारेऽस्तिपदत्वेनास्तिपदतादात्म्येनसहितोभावःपदार्थत्वेनमतः शब्दार्थयोस्तादात्म्यात् अस्तिपदाभिधेयत्वंपदार्थसामान्यलक्षणमितियावत् पदस्यतुवृक्षइत्यादिरूपस्याप्यभावःसद्भिन्नोर्थोनदृष्टःकिमुतास्तिपदस्य तथाचपदार्थत्वानुपपत्त्यापिसर्वस्यसद्रूपतायाःसिद्धिरिति तदुक्तंवार्तिककृद्भिः स्फुरतापिसतोनान्यदभिधातुंघटादिवत् शक्यतेह्यभिधानेननासद्वस्तुनिरुच्यतेइति स्फुरताव्याख्यानकुशलेनापिसतोन्यत्सद्भिन्नमभिधातुंघटादिवन्नशक्यतेयतोभिधानेननाम्नासद्रूपेणासद्वस्तुनिर्वक्तुमशक्यंसदसतोस्तादात्म्यायोगादितिवार्तिकार्थः ॥ ३७२ ॥ ननुबाह्याःप्रतिसंख्याऽप्रतिसंख्यानिरोधावाकाशंचेतिवदन्तोबुद्धिपूर्वकाबुद्धिपूर्वकौनाशावाकाशंचेत्येतत्त्रयमसदितिमन्यंतेतद्दृष्टांतेनेतरत्राप्यसत्वमस्त्वितिशंकांनिराकरोति कथमिति पदत्वेपदतादात्म्यरूपेकारणेसदर्थसाधकहेतौसतिआकाशोऽभावरूपःकथंस्यान्नकथंचिदपीत्यर्थः उपलक्षणंचेदं अधिकरणत्वे

अपिचात्रपदार्थोस्तिपदत्वेनमतोपिहि ॥ पदस्यवृक्षइत्यादेर्नाभावोर्थउदीरितः ॥ ३७२ ॥ कथंनभोप्यभावः स्यात्पदत्वेसतिकारणे ॥ वस्त्वंतरमभावोतोनतुभावविवर्जितः ॥ ३७३ ॥ अध्यस्तस्येहसर्पस्ययथाभावःस्रगीरितः ॥ आत्माचैवमभावःस्यादध्यस्तस्यजडात्मनः ॥ दुःखाभावस्ततोज्ञेयआनन्दात्मामहेश्वरः ॥ ३७४ ॥ स्वप्रकाशसुखाबोधाःसर्वेभेदविवर्जिताः ॥ आनंदात्मोपमास्तस्मादानंदात्मासमीरिताः ॥ ३७५ ॥

नप्रसिद्धस्याकाशस्यासत्वंदुर्वचमित्यस्य असतोधिकरणताऽदर्शनात्सिद्धांतेनास्तीतिपदविषयतासूक्ष्मत्वप्रयुक्तैवेतिभावः फलितमाह वस्त्वंतरमिति सत्ख्यातिमतइतिशेषः ॥ ३७३ ॥ अस्मत्सिद्धांतेपिअधिष्ठानावशेषोहिनाशःकल्पितवस्तुनइतिवचनस्यावशिष्यमाणाधिष्ठानरूपएवास्यकल्पितस्याभावइत्यर्थकस्यानुसारेणाभावस्यभावात्मकत्वंसिद्धमेवेतिसदृष्टांतमाह अध्यस्तस्येति यथास्रजिकल्पितसर्पाभावःस्रग्रूपस्तथाप्रपंचाभावआत्मरूपइत्यर्थः फलितमाह दुःखेति ततोदुःखस्यकल्पितत्वात्परिपूर्णात्मनएवाधिष्ठानत्वाच्चमहेश्वरः परमात्मैवदुःखाभावरूपइत्यर्थः ॥ ३७४ ॥ एवंबोधेषुव्युत्पादितैःपरमात्मलक्षणैःपरत्वादिभिःपरमात्मतांतेषांसाधयति स्वप्रकाशेति यतोबोधाःस्वप्रकाशत्वेनसुखत्वेनभेदहीनत्वेनचआनंदोपमाःपरमात्मसमास्ततस्तेभ्रांतानांभिन्नत्वेनभासमानाअपिवस्तुतआत्माब्रह्मेति समीरितामहावाक्यैरितिशेषः ॥ ३७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुबोधेषुसजातीयस्वगतभेदयोरभावेपिविजातीयविषयभेदःस्थितएवेतिचेन्न भ्रांतिदशायांतथात्वेपिविवेकेनविषयभेदव्यापकबोधभेदबाधेविषयभेदस्थितेर्दुर्लभत्वादित्याशयेनविषयबोधभेदयोर्व्याप्यव्यापकभावंदर्शयति बोधेष्विति पंचभिः यदाबोधेषुनभेदस्तदाबोध्येषुविषयेषुभिदाभेदःकेनहेतुनासिद्ध्येत् अयंभावः विषयाणामविद्यादशायामेवभासमानानांप्रातिभासिकत्वेनदृष्टिसृष्टानांबोधरूपादृष्टेरेवसामग्री सामग्रीभेदाभावेचकार्यभेदोनदृष्टइति हियतोघटइत्याकारकस्यभेदशून्यस्यएकत्वेनलोकेप्रसिद्धस्यबोधस्यविषयेघटेकेनापिपरीक्षकेणभेदोनोक्तः तथाचबोधभेदोविषयभेदव्यापकइत्यर्थः ॥ ३७६ ॥ ननुविशिष्टज्ञानविषयाणांविशेषणविशेष्यसंसर्गाणामेकज्ञानविषयत्वेपिभेदोदृष्टइतिचेन्न तत्रापिनागृहीतविशेषणाबुद्धिर्विशेष्येव्यवतिष्ठतइतिन्यायेनपूर्वकल्पितोयोज्ञानभेदस्तदुपाधिकएवविषयभेदइतिदर्शयति घटाइति त्रिभिः दशघटाइत्यपेक्षाबुद्धिजन्यदशसंख्याप्रकारकंविशिष्टज्ञानं शुक्लोघटइतिस्थिरत्वाभिमतगुणप्रकार

बोधेषुचयदानस्याद्भेदःकेनभवेद्भिदा ॥ बोध्येषुनहिबोधस्यभेदशून्यस्यकर्हिचित् ॥ घटइत्यादिरूपस्यविषये भेदईरितः ॥ ३७६ ॥ घटादशतथाशुक्लोघटश्चैत्रोत्रगच्छति ॥ दंडीमनुजजातीयःसुतोमित्रस्यरूपवान् ॥ ३७७ ॥ इत्यादावपिनैवास्तिभेदोऽभिन्नेत्रबोधने ॥ विशेषणमविज्ञायविशेष्यंनैतिधीर्यतः ॥ ३७८ ॥ विशेषणंविशेष्यंचसंबंधंचतयोस्तथा ॥ ज्ञानत्रयेणविज्ञायपश्चादेकेनगच्छति ॥ ३७९ ॥

कं चैत्रइत्यादिनातुएकत्रद्रव्येआर्थक्रमेणजातिगुणक्रियासंज्ञासंबंधात्मकपंचविशेषणकंज्ञानमुक्तं तथाहि मनुजत्वंजातिः गतिःक्रिया चैत्रेतिसंज्ञा मैत्रस्यजन्यत्वलक्षणःसंबंधश्च एतेछत्रीकुण्डलीदेवदत्तइत्यत्रेवप्रकारतयात्रभांतीति ॥ ३७७ ॥ इत्यादाविति इत्यादौवर्णितविशिष्टज्ञानप्रभृतिस्थलेष्वपिबोधनेअभिन्नेसतिविषयभेदोनबोध्यःकिंतुबोधभेदतएवविषयभेदः कथमत्रबोधभेदइतिचेद्भवदंगीकृतन्यायादेवेत्याह विशेषणमिति यतोधीर्विशेषणमज्ञात्वाविशेष्यंनएतिनावगाहते तथाचपूर्वकालिकज्ञानभेदाधीनएवतत्रापिविषयभेदइतिभावः ॥ ३७८ ॥ अस्मत्प्रक्रियायांतुपरस्परसापेक्षविशेषणादित्रितयाकारवृत्तित्रयोपाधिकश्चैतन्यभेदव्यवहारःफलचैतन्याभेदात्तुएकबोधत्वव्यवहारइतिसूचयन्नाह विशेषणमिति ज्ञानत्रयेणवृत्तित्रयेणविज्ञायविषयीकृत्यएकेनफलेनतत्त्रयंविषयीकरोतितदाज्ञानभेदाभेदव्यवहारयोरुभयोरुपपत्तिरितिभावः ॥ ३७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतइति अतउक्तनियमाद्वृत्त्युपाधिकबोधभेदापेक्षएवबोधानांविषयाणांभेदःसिद्ध्यतिनस्वतः वस्तुतस्तुसबोधगतोभेदोनास्ति इतरसापेक्षत्वेनमिथ्यात्वात् विषयाबोधभेदबाधेत्वयंभेदोबोध्यगतःकथंभवेत्तिष्ठेत्स्वामिकराजत्वबाधेतन्निरूपितराज्यबाधस्यप्रसिद्धत्वादितिभावः ॥ ३८० ॥ एवंस्वप्रकाशत्वपक्षेऽभीष्टात्मसिद्धिर्दर्शिताऽथपरप्रकाशत्वपक्षेपिवर्णितात्मसिद्धिः तदस्वीकारेजगदांध्यप्रसंगादित्याह अस्वप्रकाशेति यदितेविषयकरणभिन्नाभेदशालिनोबोधाअस्वप्रकाशाइतिस्वीक्रियंतेतथापिघटवत्प्रकाश्यानांतेषांप्रकाशकेनकेनचिद्भवितव्यं तत्रचभेदग्राहकाणामप्रसरात्स्वप्रकाशानंदत्वलक्षणंब्रह्मत्वंसिद्धमेवेत्याशयः॥ ३८१॥ आशयप्रदर्शनमुपसंहरति इत्यभिप्रायेति उक्ता

अतोबोधगतंभेदमपेक्ष्यैवप्रसिद्ध्यति ॥ बोध्यभेदोनबोधेसकथंबोध्येभवेदयम् ॥ ३८० ॥ अस्वप्रकाशरूपास्तेभेदबोधास्ततोह्यमी ॥ प्रकाश्याघटवत्स्वात्मबोधेनैकात्मरूपिणा ॥ स्वप्रकाशेनसर्वेषांबोधानांसाक्षिणा सदा ॥ ३८१ ॥ इत्यभिप्रायवान्याज्ञवल्क्यःस्वप्नेपरात्मनः ॥ आत्मज्योतिष्ट्वमाहैतत्सर्वज्योतिःप्रकाशनात् ॥ ३८२ ॥ रविसोमाग्निवागाख्येज्योतिष्युपरमंगते ॥ आत्मैवज्योतिरेकंतदास्तेनुपरतंसदा ॥ ३८३ ॥ श्रुत्वैवंजनकोराजापप्रच्छमुनिपुंगवम् ॥ आत्मात्रकतमोब्रह्मन्नेषुदेहेंद्रियादिषु ॥ ३८४ ॥

शयेनयाज्ञवल्क्यःस्वप्नेपरमात्मनोधर्ममात्मज्योतिष्ट्वरूपमाहस्म एतदुत्तरश्लोकोक्तप्रकारकंयथाभवतितथाआत्मैवज्योतिःआत्मज्योतिषोभावःआत्मज्योतिष्ट्वं कुतः सर्वेषांज्योतिषामपितेनप्रकाशनात् ॥ ३८२ ॥एतत्पदोक्तमात्मज्योतिष्ट्वाभिधानप्रकारमभिनयति रवीतिस्पष्टम्॥ ३८३॥अथकतमइत्यादेःपुरुषइत्यंतस्यवाक्यस्यार्थंप्रपंचयति श्रुत्वैवमित्यादिस्त्रिंशताश्लोकैः एवमुक्ताभिप्रायेणवर्णितमात्मतत्त्वंश्रुत्वापिराजाएवंपप्रच्छ एवंकथं हेब्रह्मन्अत्रसंघातेवर्तमानेषुदेहेंद्रियादिषुकतमआत्मेति एवमाकारेणराज्ञःप्रश्नकरणेबीजंतुउक्ताभिप्रायापरिज्ञानं आत्मैवास्यज्योतिरितिवाक्यस्ययोविपरीतोर्थःअस्यसंघातस्यआत्मास्वरूपमेवज्योतिरित्याकारकस्तस्यग्रहणंचेतिबोध्यम् ॥ ३८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपृष्टइति याज्ञवल्क्यस्त्वात्मपदेनसंघातस्याधिष्ठानभूतत्वंविवक्षितमितिदर्शयन्नितरव्यावृत्तिमुखेनात्मानमेवमाहप्रतिपादयतिस्म एवं
कथं आत्मपदार्थःसर्वजंतूनांप्रसिद्धएव कीदृशः आत्मसंबंधिनोःशब्दबोधयोरात्मेत्याकारकशब्दस्यतदाकारवृत्तेश्चविषयः शब्दबोधाभ्यां
भिन्नश्च नकेवलमात्मशब्देनैवप्रसिद्धःकिंतुचेतनपुरुषशब्दाभ्यांतथाप्रसिद्धः देहादिकंतुनात्मायतःसाक्ष्यमितिद्वयोरर्थः ॥३८५॥३८६॥
एवंश्रुतिगतयत्पदार्थमुक्त्वाऽयमितिपदार्थमाह प्रश्नेति मादूरंगच्छएतस्मिन्प्रश्नानुरूपविज्ञानएवतत्परिचयंकुरुते कथमितिचेच्छृणु यःसा
क्षिवत्साक्ष्यवर्गात्पृथग्भूतोभासतेअयमेवात्मा अस्यभेदेमानाभावाच्चैकोऽयंसर्वसाक्षिभूतइति ॥३८७॥ आत्मनःस्थूलदेहाद्व्यतिरेकस्फो
रकस्यविज्ञानमयपदस्यार्थमाह नानेतिसप्तभिः एषआत्मानानाविधांतःकरणेषुविज्ञानपदवाच्येषुअभेदेनाध्यासिकेनतादात्म्यसंबंधेन

एवंपृष्टोयाज्ञवल्क्यआहैवंनृपतिंप्रति ॥ प्रसिद्धःसर्वजंतूनामात्मनःशब्दबोधयोः ॥ ३८५ ॥ विषयःशब्दबो
धाभ्यांरहितश्चेतनःपुमान् ॥ देहेंद्रियादिकंनैवभवेदात्मायथाघटः ॥ ३८६ ॥ प्रश्नविज्ञानएतस्मिन्यआस्ते
साक्षिवन्नृप ॥ अयमात्मासदासाक्षिस्वरूपःसर्वदेहिनां ॥३८७॥ नानांतःकरणेष्वेपस्थितोऽभेदेनचेतनः॥
वन्हिर्यथात्रलोहेषुभेदशून्योव्यवस्थितः ॥ ३८८ ॥ यथालोहमयोवन्हिर्लोहस्थोव्यपदिश्यते ॥ विज्ञानमयए
वंसस्थितोंतःकरणेष्वपि ॥ ३८९ ॥ विज्ञानानिसदाबोधरहितानिस्वरूपतः ॥ आत्मसंनिधिमात्रेणबोधवंति
भवंतिहि ॥ ३९० ॥ लोहपिंडायथादाहप्रकाशाभ्यांविवर्जिताः ॥ वन्हितादात्म्यमापन्नाःप्रकाशंतेदहंतिच
॥ ३९१ ॥ तथांतःकरणस्थानावृत्तयोविविधाइमाः ॥ मानामानादिभेदिन्योभेदशून्याःसकारणाः ॥३९२॥
आत्मतादात्म्यमापन्नाःप्रकाशंतेत्रसर्वतः ॥ प्रकाशयंतिचैवैतद्विश्वंसदसदात्मकम् ॥ ३९३ ॥

स्थितः यथाऽयसिवन्हिर्भेदशून्योदुर्लक्ष्यभेदइत्यर्थः ॥ ३८८॥ यथेति स्पष्टं ॥३८९ ॥ तस्यात्मनोंतःकरणेतद्वृत्तिषुचतादात्म्यहेतुतयास
वृत्तिकांतःकरणस्यस्वतोजाड्यंचिदात्मसंबंधेनबोधशालित्वंचाह विज्ञानानीति स्पष्टं ॥ ३९० ॥ एतद्दृष्टांतेनस्फुटयति लोहेतित्रिभिः
स्पष्टम् ॥३९१॥ तथेति तथालोहवत् अंतःकरणेउपादानभूतेस्थानंस्थितिर्यासांतास्तथाभूतावृत्तयःसकारणाःसोपादानाआत्मतादात्म्य
मापन्नाएवप्रकाशंतेविषयजातंप्रकाशयंतिच कीदृश्योवृत्तयः स्मृत्यनुभवविकल्परूपैर्मानामानादिभेदिन्यः पुनःकीदृश्यः भेदशून्यादुर्ल
क्ष्यचिद्भेदकाइतिद्वयोरर्थः ॥ ३९२ ॥ ३९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंवृत्तिषुचित्ततादात्म्यफलंदर्शितमथात्मन्यपितत्फलंचेतनत्वव्यवहारलक्षणमाह विज्ञानमयएवेति अतआत्मतादात्म्येनसद्वृत्तिकांतःकरणस्यबोधधर्मकत्वादेवविज्ञानमयःसन्नयंपुरुषश्चेतनोबोधाश्रयइतिस्मृतः अन्यथाहिचिद्रूपइत्येवव्यवह्रियेत यथालोहमयःसन्वन्हिर्दाहादिकर्त्ता ज्वलःज्वलनक्रियाकर्त्ताचव्यवह्रियते केवलोहिप्रकाशकइत्येवाख्यायतेइत्यर्थः ॥ ३९४ ॥ अथप्राणात्मत्वभ्रमवारणपरस्य प्राणेष्वितिपदस्यतात्पर्यमाह प्राणानामितिद्वाभ्यां वायुभेदरूपाणांमुख्यप्राणानामिंद्रियाणांचप्राणतादात्म्येनप्राणपदलक्ष्याणांव्यापारेषुहेतुःसंनिधिमात्रेणप्रयोजकोयतोभवतिततःप्राणेष्वित्येवंवैदिकैरात्माप्रतिपाद्यतेइत्यर्थः ॥ ३९५ ॥ विभुमात्मानंप्रत्यपिप्राणानामधिकरणतयानिर्देशोऽवच्छेदकत्वेनाभिव्यक्तिस्थानत्वेनवाबोध्यइतिसदृष्टांतमाह यथेति यथाविभ्वपिनभोऽवच्छेदकेषुघटेषुस्थितमित्युच्यते यथाचव्यापकोपिवायुर्वृक्षचालनेनाभिव्यक्तोवृक्षेष्वितिवृक्षाधिकरणकतयोच्यतेतथात्माप्राणेष्वित्युच्यतेइति ॥ ३९६ ॥ अंतःकरणाद्व्यतिरेकबोधकस्यत्वदीतिपदस्यतात्पर्यंदर्शयति आत्मेत्येकादशभिः सर्वगस्याप्यात्मनोत्वद्देशगतायांबुद्धौयतोविशेषतोऽभिव्यक्तिस्तेनत्वदीतिदेवःकथ्यतेइत्येकादशेनसंबंधः तत्रहेतुर्बुद्धेर्विशेषतोत्वद्देशेऽवस्थानमिति ॥ ३९७ ॥ बुद्धेश्चित्प्रतिबिंबग्राहिण्यात्वद्देशेविशेषतोवस्थानेलोकानुभवंप्रमाणयति आपादेति यद्यप्येषजनःसर्वशरीरवर्तिनीसुखदुःखेअवगच्छतितथापिहार्दाद्विशेषतोत्वन्निष्ठतयाभासमानाज्ज्ञानादेवावगच्छति तथाचघर्मतप्तस्यगंगान्हृदप्रवेशेसर्वांगीणसुखानुभवकालेपिज्ञानस्यत्वद्देशेविशेषतःस्थितिःसर्वानुभवसिद्धेतिभावः ॥ ३९८ ॥ उक्तमर्थंदृष्टांतवलेनविशदयति यथेति एकंसमानं ॥ ३९९ ॥

विज्ञानमयएवातःपुरुषश्चेतनःस्मृतः ॥ यथालोहमयोवन्हिर्दाहभानकरोज्वलः ॥ ३९४ ॥ प्राणानांवायुभेदानामिंद्रियाणांचसर्वदा ॥ व्यापारेषुभवेद्धेतुस्तेषुतादात्म्यमागतः ॥ तेनप्राणेष्वयंदेवःकथ्यतेवेदवादिभिः ॥ ३९५ ॥ यथानभोघटेष्वेतद्वर्त्ततेतद्बहिःस्थितम् ॥ चालयन्नखिलान्वृक्षान्यद्वदेषप्रभंजनः ॥ उच्यतेतत्रतद्वत्स्यात्प्राणेष्वात्मापरःपुमान् ॥ ३९६ ॥ आत्मासर्वगतोप्येषविशेषाद्धृदितिष्ठति ॥ यतःसमग्रजंतूनांविज्ञानंत्वदिलभ्यते ॥ ३९७ ॥ आपादमस्तकेदेहेयद्यप्येषोवगच्छति ॥ सुखदुःखेतथाप्येतेहार्दाद्विज्ञानतःसदा ॥ ३९८ ॥ यथासर्वगतंतेजोभानोरेकंतथापिहि ॥ घटेमणौसूर्यकांतेवैषम्येणैववर्तते ॥ ३९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिषुवैषम्यंदर्शयन्दार्ष्टांतिकेयोजयति यथाघटेइतित्रिभिः यथायंसूर्यप्रकाशोघटेविद्यमानोप्यभिव्यक्तःसन्नलभ्यतेतथादेहाद्बहिरा त्मेत्यर्थः ॥ ४०० ॥ यथामणाविति यथाचसूर्यप्रकाशोमणौस्फटिकादौप्रतिबिंबितत्वलक्षणाभिव्यक्तिशालितयोपलभ्यमानोदा हलक्षणकार्यविशिष्टोनलभ्यतेतथादेहेहृदयातिरिक्तदेहप्रदेशेषुसुखदुःखेज्ञानवर्जितेलभ्येते सुखदुःखयोरुपसर्जनीभूतज्ञानस्यांगांतरेषू पलंभेप्यनुसंधानलक्षणस्यज्ञानकार्यस्यहृद्देशान्नान्यत्रोपलंभइतियावत् ॥ ४०१ ॥ सूर्यकांतेतुयथासकार्यस्यसूर्यप्रकाशस्योपल ब्धिस्तथाहृद्देशेविज्ञानस्येत्याह प्रकाशश्चेति पूर्ववदाशयः ॥ ४०२ ॥ अथवाहृत्पदेनहृदयकमलमेवयाह्यंतस्यचात्मानंप्रत्यधिकरण तांऽतःकरणद्वारेतिसूचयन्हृदयस्यसर्वकरणाधारतांशाकल्यब्राह्मणादावुक्तांनिरूपयति अपीति इंद्रियाणांतथांतःकरणस्यविश्वात्मक

यथाघटेप्रकाशोयंविद्यमानोनलभ्यते॥ देहाद्बहिस्तथैवात्माविद्यमानोनलभ्यते॥ ४००॥ यथामणौप्रकाशो यंलभ्यतेदाहवर्जितः॥ सुखदुःखेतथादेहेलभ्येतेज्ञानवर्जिते॥ ४०१॥ प्रकाशश्चयथादाहोलभ्यतेसूर्यकां तके॥ सुखदुःखेसविज्ञानेलभ्येतेहृदितेतथा॥ ४०२ ॥ अपिसर्वेंद्रियाणांस्यात्प्रतिष्ठाहृदयांबुजम् ॥ तथां तःकरणस्यापिविश्वचित्रविधारिणः॥ ४०३ ॥ अपिसुप्तिमयंयातिविचित्रेहृदयांबुजे ॥ सर्वविक्षेपशून्यः सन्नानंदात्मामहेश्वरः॥ ४०४॥ अपिविज्ञायतेसद्भिर्गुरुशास्त्रोपदेशतः ॥ अष्टांगयोगनिरतैर्ब्रह्मचर्यादिसाध नैः॥ ४०५॥ अपिमार्गप्रकाशोस्माद्धृदयाग्रस्यदीपनात्॥ मुमूर्षोःसर्वदाभूयात्स्थानत्रययियासतः ॥ ४०६॥

चित्रधारकस्यहृदयांबुजंप्रतिष्ठाआधारइति ॥ ४०३ ॥ अथवासर्वभेदकोपाधिलयेनात्मनःस्वरूपावस्थानलक्षणायाःसुप्तेःस्थानतया हृदयस्यात्माधारताहृदीत्युक्तेत्याह अपिसुप्तिमिति विचित्रेपंचच्छिद्रत्वादिरचनाविशेषशालिनि ॥ ४०४ ॥ अथवाआत्मोपलब्धि स्थानतयाहृदयस्यात्माधारतोक्तिरित्याह अपिविज्ञायतइति यतःसद्भिरधिकारिभिर्हृदयांबुजआत्माविज्ञायतेसाक्षात्क्रियतेततोवाहृदी त्युक्तमितिसंबंधः ॥ ४०५ ॥ अथवामरणकालेभाविशरीराकारंविशिष्टंज्ञानंनाडीमार्गप्रकाशकंहृद्देशेजायतेऽतोहृदीत्युक्तमित्याह अ पिमार्गेति अपिचस्थानत्रयंब्रह्मलोकपितृलोकौकीटपतंगभावश्चेतिच्छन्दोगश्रुत्युक्तंयियासतोगंतुमिच्छतोमुमूर्षोस्तत्तन्नाडीमयमार्गप्र काशोऽस्मादुत्क्रांतिप्रतिपादकश्रुतिप्रसिद्धाद्धृदयाग्रस्यदीपनात्सविज्ञानभावलक्षणप्रज्वलनादेवभूयात्भवति अतोवाविशेषाद्धृदीत्युक्त मिति ॥ ४०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह त्वदीति यथासर्वगोपिसवितृप्रकाशःसवितृमंडलाधिकरणकतयाव्यपदिश्यतेतत्रविशेषोपलब्धेस्तथात्मासर्वगोपित्वदीत्युक्त इत्यर्थः ॥ ४०७ ॥ अत्रात्मनिजडत्वव्युदासेनचिद्रूपताविधायकस्यांतर्ज्योतिरितिपदस्यार्थमाह अंतर्ज्योतिरितिचतुर्भिः तत्रज्योतिःप दार्थमाह ज्योतिरिति घटादेर्वस्तुनःप्रकाशकमादित्यादिकंज्योतिरितिदृष्टंप्रसिद्धंततआदित्यादेरन्यद्यद्घटादिअतैजसंअतेजोमयंतदज्यो रितिप्रसिद्धमित्यर्थः ॥ ४०८ ॥ आत्मेति आदित्योयथाघटादिभ्योविलक्षणःसन्घटादीन्प्रकाशयतितद्वदात्माज्योतिषआदित्यादेरज्यो तिषोघटादेश्चप्रकाशकश्चित्त्वेनतस्माज्जडवर्गाद्विलक्षणश्चातोज्योतिरितिश्रुत्योक्तइत्यर्थः ॥ ४०९ ॥ अंतःपदतात्पर्यमाह ज्योतिरिति देहाद्वहिर्बाह्यमादित्यादिरूपंज्योतिःस्वस्मादन्यस्यभिन्नसत्ताकस्यवस्तुनःप्रकाशकंप्रसिद्धं आत्मज्योतिस्त्वित्थंनभवतिकिंतुस्वाभिन्नस

त्वदितेनसदादेवःसर्वगोपिचकथ्यते ॥ मंडलेसवितुर्यद्वत्प्रकाशःसर्वगोपिच ॥४०७॥ अंतर्ज्योतिरयंदेवआ नंदात्मापरःपुमान् ॥ ज्योतिःप्रकाशकंदृष्टंघटादेरिहवस्तुनः ॥ आदित्यादिकमन्यत्स्यादज्योतिर्यदतैजसम् ॥ ४०८ ॥ आत्माप्रकाशकस्तद्वज्ज्योतिषोऽज्योतिषोपिच ॥ विलक्षणोतःसर्वस्माच्छ्रुत्याज्योतिरितीरितः ॥ ४०९ ॥ ज्योतिःप्रकाशकंयद्वत्स्वस्मादन्यस्यवस्तुनः ॥ देहाद्बहिर्नहीत्थंतदंतर्ज्योतिस्ततःस्मृतः ॥४१० ॥ आ त्मानंचपरंचात्मज्योतिःसर्वंप्रकाशयेत् ॥ अंतर्ज्योतिस्ततस्तस्मात्स्वप्रकाशंनचेतरत् ॥ ४११ ॥ अनेनज्योति षाविश्वंपूर्णमेतच्चराचरम् ॥ ज्योतीरूपस्ततःसोयंपुरुषःपरिकीर्तितः ॥४१२॥ पुरोवाविविधाःकृत्वापुमान्स्था वरजंगमाः ॥ शेतेतासुयथापक्षीतेनायंपुरुषःस्मृतः ॥ ४१३ ॥

त्ताकस्यप्रकाशकंसर्वविवर्तोपादानत्वेनसर्वांतरत्वादित्याशयेनांतर्ज्योतिरित्यात्मोक्तइत्यर्थः ॥ ४१० ॥ अथवास्वभासनायेतरानपेक्ष त्वमंतर्ज्योतिःपदेनोच्यतेआदित्यादयोहिस्वभासनायचित्प्रकाशापेक्षाइत्याह आत्मानमिति यतःसर्वभासनेइतरानपेक्षआत्माततोंतर्ज्यो तिरित्युक्तोयतस्तस्मादात्मनइतरत्स्वप्रकाशंनभवतीत्यन्वयः ॥ ४११ ॥ पुरुषपदार्थमाह अनेनेतिद्वाभ्यां यथापरीक्षणायक्षीरेप्रक्षिप्ते नमरकतमणिनास्वभासासर्वंक्षीरंपूर्यतेतथानेनात्मज्योतिषासर्वंपूर्णंततःपुरुषइत्युक्तिरित्यर्थः ॥ ४१२ ॥ अथवापूर्षुवसतीतिचतुर्थाध्या योक्तविधयापुरुषत्वमित्याह पुरइति वाअथवाविविधाःस्थावरजंगमात्मकाःपुरःशरीराणिकृत्वातासुपूर्षुशेतेआध्यासिकसंबंधेनस्थित स्तेनात्मनःपुरुषतयोक्तिरिति ॥ ४१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोक्तात्मनः कथंसंसारित्वमित्याशंकावारणपूर्वकमसंगत्वस्वप्रभत्वनिरूपणपरस्यससमानइत्यादिश्रुतिग्रंथस्यार्थमुपबृंहयति एकएवे त्यादिना सोयंवर्णितःपुमानेकोऽद्वितीयएवस्वप्नेजागरणेचसमएकरूपःसन्यथासुखदुःखानिप्राप्नोतितथेमंलोकंपरंचजन्मांतरत्वेनप्रसिद्धं प्राप्यसुखदुःखानिप्राप्नुवन्भवतीति ॥ ४१४ ॥ लोकद्वयभ्रमणमेवाभिनयति जातइति ग्राहंग्राहंगृहीत्वागृहीत्वा त्याजंत्याजंत्यक्त्वा त्यक्त्वाकर्मपाशबद्धःसन्ननुसंचरतिसंसरतीतियावत् ॥ ४१५ ॥ ननुपरिपूर्णस्यकर्मादिसंबधएवकथमितिशंकते यद्यपीति विक्रिया मात्रवर्जितःसकलविकारहीनः ॥ ४१६ ॥ आविद्यकांतःकरणतादात्म्याध्यासएवात्मनिकर्मादिसंबंधहेतुरितिसमाधत्ते अंतःकरणेति

एकएवपुमान्सोयंस्वप्नेजागरणेसमः॥ प्राप्नुवन्सुखदुःखानिलोकमेनंपरंतथा ॥ ४१४ ॥ जातोमृतोमृतो जातोघटीयंत्रसमःसदा॥ ग्राहंग्राहंशरीराणित्याजंत्याजंचभूरिशः ॥ कर्मपाशनिबद्धःसन्ननुसंचरतीश्वरः ॥ ४१५॥ यद्यप्ययंपुमान्पूर्णोनचायातिनगच्छति ॥ नकर्तानचभोक्तावाविक्रियामात्रवर्जितः ॥ ४१६॥ अंतःकरणतादात्म्यंसंप्राप्यात्मातथापिहि॥ कर्माणितत्फलैःसार्धंप्राप्नोत्यात्माऽविबोधतः ॥ ४१७॥ उष्णेप यसितत्रत्यंयथोष्णंजायतेनभः ॥ अनुष्णंवस्तुतस्तद्वदात्मायंपरमेश्वरः ॥ ४१८ ॥ भूत्वाधियासमानःसक र्माणिचफलानिच ॥ प्राप्नोतियतएतस्यांध्यायंत्यांध्यायतीवसः ॥ चलंत्यांचलतीवेशःकामिन्यांकामुकोय था॥ ४१९ ॥

अविबोधतःअज्ञानादंतःकरणसंबंधंप्राप्यकर्माणितत्फलानिचात्माप्राप्नोतितत्संबंधंलभतेइतियावत् ॥ ४१७ ॥ औपाधिकधर्माध्यासं दृष्टांतेनस्फुटयति उष्णइति यथावस्तुतउष्णत्वानर्हमप्याकाशमुष्णजलावच्छिन्नंतदंतिकोर्ध्वदेशावच्छिन्नंचोष्णमिवभातितद्वदयमात्मा वस्तुतःपरमेश्वरोप्यविद्याप्रभावेणबुद्ध्यासमानस्तादात्म्याध्यासमापन्नःसन्कर्तृत्वंभोक्तृत्वंचाप्नोति तथाचानुभूयतेइत्याह यतइत्यादि ना यतएतस्यांबुद्धौध्यानव्यापारंकुर्वत्यांतद्भासकआत्माध्यायन्निवभासतेतथाबुद्ध्याधारप्राणचलनेनबुद्धौचलंत्यांतद्भासकआत्माच लन्निवभासतेयथाकामिन्यनुसारीकामुकइतिद्वयोरर्थः ॥ ४१८ ॥ ४१९ ॥ ॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयंबुद्धितादात्म्याध्यासोयदास्थूलदेहाध्यासंरचयतितदासुतरामनर्थकृदितिदर्शयितुंव्यतिरेकंतावदाह ससमानइतित्रिभिः सधियासा म्यमापन्नोदेवःस्वप्नोभूत्वातैजससंज्ञोभूत्वास्वप्नप्रपंचंपश्यन्सइमंलोकंजाग्रदवस्थाशालिनंस्थूलशरीरप्रधानंसुखादनायासादेवातिक्राम तिउल्लंघते यथामहाराजःसुखान्महानदींतरेत् अत्रनौस्थानीयास्वप्नगामिनीबुद्धिरेवबोध्या कीदृशमिमंलोकं ग्रहातिग्रहरूपैर्विषयेंद्रिया दिभिर्युक्तं पुनःकीदृशं अनेकधाप्रसृतं मृत्योरविद्याकामकर्मात्मिकायारूपंकार्यमितियावत् तथाक्षणभंगुरंनानानर्थसंकुलंचेतित्रयाणा मर्थः ॥ ४२० ॥ ४२१ ॥ ४२२ ॥ अथयदास्थूलशरीराभिमानस्तदादुःखातिशयइत्यन्वयंदर्शयति स्वप्नेतिचतुर्भिः यःस्वप्नद्रष्टासएवा

ससमानोधियादेवःस्वप्नोभूत्वास्वयंप्रभः ॥ पश्यन्नानाविधंस्वप्नमिंद्रजालंस्वनिर्मितं ॥ ४२० ॥ इमंजागर णावस्थंलोकंस्थूलशरीरकम् ॥ विषयेंद्रियसंयुक्तंमृत्युरूपमनेकधा ॥ ४२१ ॥ जलबुद्बुदवच्छश्वन्नश्वरंदुःख कारणम् ॥ व्याध्यादिभिःसमाविष्टमतिक्रामत्ययंसुखात् ॥ महाराजोयथानावामहागाधजलांनदीम् ॥ ४२२ ॥ स्वप्नद्रष्टासएवायंपुमान्स्वाप्नस्यसंक्षयात् ॥ कर्मणःस्थूलदेहेस्मिन्जायमानोयथोदरात् ॥ ४२३ ॥ अहंमानं करोत्यात्मापुण्यपातकबोधितः ॥ पाप्मभिर्विविधैर्दुःखैर्देहीसंसृज्यतेतदा ॥ २४ ॥ अत्रजागरणेदुःखंवर्णनी यंकिमस्तिहि ॥ स्वप्नात्समागतस्यास्यपुंसःप्रत्यक्षदर्शनात् ॥ ४२५ ॥ यावत्स्थूलस्यदेहस्यनाभिमानंजहात्य यं ॥ तावद्दुःखान्यनंतानिप्राप्नोत्यात्मापरःपुमान् ॥ ४२६ ॥ सउत्क्रामन्नितोदेहात्स्वप्नादौमरणेथवा ॥ पाप्म नोभूरिशोदुःखकारणानिबहून्यपि ॥ सदुःखानिपुमानेषविजहातिक्षणेनहि ॥ ४२७ ॥

यंपुमान्स्वाप्नस्यस्वप्नभोगप्रदस्यकर्मणःक्षयाज्जाग्रद्भोगप्रदपुण्यपातकाभ्यांबोधितःसन्मातुरुदराज्जायमानइवयदास्मिन्स्थूलेदेहेअभि मानंकरोतितदाश्रुतौपाप्मपदोक्तैर्विविधैर्दुःखैःसंसृज्यतइतिद्वयोरन्वयः ॥ ४२३ ॥ ४२४ ॥ ननुकानिदुःखानिस्थूलदेहाभिमानेइतिचे त्प्रसिद्धत्वान्नतानिवर्णनीयानीत्याह अत्रेति स्वप्नात्समागतस्यास्यपुंसोयज्जागरणेदुःखंतत्किंवर्णनीयमपितुनवर्णनीयंप्रत्यक्षसिद्धत्वा दित्यन्वयः ॥ ४२५ ॥ उक्तमेवस्फुटयति यावदिति स्फुटम् ॥ ४२६ ॥ यथास्वप्नंगच्छन्देहाभिमानजंदुःखंनाप्नोतितथामरणादिकाले पीत्याह सउत्क्रामन्निति उत्क्रामन्लोकांतरंगच्छन् इतःप्रत्यक्षात् दुःखकारणानिदुःखानिचपाप्मपदोदितानिक्षणेनजहाति ॥ ४२७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्सदृष्टांतंप्रपंचयति सोपद्रवइतिचतुर्भिः ॥ ४२८ ॥ ४२९ ॥ सोपद्रवादिति धीधनोबुद्धिमान् ॥ ४३० ॥ ४३१ ॥ एवमष्टमकंडिका तात्पर्यार्थोदर्शितोऽथनवमकंडिकार्थंसम्प्रतिश्लोकैर्दर्शयंस्तत्रानंदांश्चपश्यतीत्यंतभागस्यननुयदुक्तंपरलोकंगच्छन्नेतद्देहाभिमानजंदुःखं नाप्नोतीतितदनुपपन्नंपरलोकस्यैवाभावादितिशंकावारकस्यार्थमाह ग्राहंग्राहमितिपञ्चदशभिः अस्यपुंसोवस्तुतोब्रह्मात्मरूपिणःअविद्यातुपुर्यष्टकवेष्टितस्यपुनःपुनःशरीराणिगृह्णतस्त्यजतश्चानुगतेद्वेएवस्थानेविहारभूमीइवभवतः केतेइत्यतआह अयंप्रत्यक्षोलोकःस्थूलशरीरादिकस्तथापरलोकोयत्रशरीरेतिष्ठतितद्भिन्नशरीरादिकइतियावत् ॥ ४३२॥ ननुपरलोकेकिंमानमितिचेत्स्वाप्नंप्रत्यक्षंतावदवधारये

सोपद्रवेयथादेशेमोहात्तत्रवसन्पुमान् ॥ सकारणानिदुःखानिप्राप्नोत्यनिशमेवसः ॥ ४२८ ॥ एवंदेहेवसन्नेषपरमात्माविमोहितः ॥ नानादुःखमवाप्नोतिबहुहेतुसमुत्थितम् ॥ ४२९ ॥ सोपद्रवाद्यथादेशाद्गच्छन्नन्यत्रधीधनः ॥ दुःखंतद्देशजंनैवप्राप्नोत्यन्यत्रसंस्थितः ॥ ४३० ॥ एवंदेहादितोदेवोनिर्गच्छन्देहसंभवं ॥ नकदाचिद्वाप्नोतिबहुदुःखंसकारणं ॥ ४३१ ॥ ग्राहंग्राहंशरीराणित्यजतोनित्यमेवहि ॥ त्याजंत्याजंतथैवास्यगृह्णानस्यात्मरूपिणः ॥ अयंलोकःपरश्चैवस्थानद्वयमुदाहृतम् ॥ ४३२ ॥ लोकयोरुभयोःसंधौजातंस्वप्नंमहाधियः ॥ स्थानंतृतीयमिच्छंतिराजंस्तस्यैवसर्वदा ॥ ४३३ ॥ नायंलोकोभवेत्स्वप्नःशुक्रशोणितसंभवे ॥ नाहंमानःशरीरेस्तियतोमृतसमंवपुः ॥ स्वप्नेभूमौनिपतितंदेहीजानातिनैवतत् ॥ ४३४ ॥

तिदर्शतितुंस्वमस्यसांध्यत्वमाह लोकयोरिति केचित्स्वप्नंभोगभूमित्वेनतृतीयंस्थानमिच्छंति महाधियस्तुसंधौजातत्वेनस्वप्नंसांध्यमेवाहुः तथाचग्रामद्वयसंधेर्यथानग्रामान्तरत्वंतथानस्वप्नस्यस्थानांतरत्वमितिभावः ॥ ४३३ ॥ तर्हिलोकपरलोकयोरन्यतरत्रांतर्भावएववर्णनीयःकिमितिसांध्यत्वमुच्यतइत्याशंकावारणायान्यतरत्रांतर्भावासंभवमाह नायमितिद्वाभ्यां स्वप्नएतल्लोकात्मकएवनभवति एतच्छरीरेअभिमानाभावात् तत्रहेतुर्यतइत्यादिनोक्तः यतःस्वप्नेवर्तमानोदेहीमृतदेहवद्भूमौपतितंदेहंनजानातीत्यन्वयः ॥ ४३४ ॥ ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नापिपरलोकएवांतर्भावइत्याह लोकइति परलोकमात्रात्मकएवन यतोदेहीस्थूलदेहंसर्वथानत्यक्तवान्सर्वथास्थूलदेहत्यागकर्त्तानभवतियेनतद्रोहेतस्यस्थूलदेहस्यद्रोहेपीडनेदुःखीभवतिनिःश्वसंश्चभवति तथाचएतत्स्थूलदेहाभिमानात्यंतपरित्यागऐहिकपीडाश्वासाभावाभ्यामनुमितःपरलोकधर्मस्तदभावःपरलोकेभेदेहेतुरेवंपूर्वत्रापिबोध्यमितिनवैयधिकरण्यशंकेतिभावः ॥ ४३५ ॥ फलितमाह शरीरस्येति ततःशरीरस्यापरित्यागादेतल्लोकलक्षणादहंमानपरित्यागात्परलोकलक्षणाच्चस्वप्नःसांध्यएवभवेदिति ॥ ४३६ ॥ एतद्दृष्टांतेन स्फुटयति अदर्शनादिति यथोडूनामदर्शनाद्दिवसलक्षणात्तथानिर्मलेगगनेपिसवितृमंडलादर्शनरूपाद्रात्रिलक्षणात्सायंकालःअहोरात्रयोःसंधिरेवस्ततः नकेवलमहर्नवाकेवलरात्रिरिति ॥ ४३७ ॥ तत्रेति तत्रसंधौजातः स्फुटमन्यत् ॥ ४३८ ॥ एवंसांध्यत्वंस्वप्नस्योप

लोकःपरोपिनस्वप्नःस्थूलंदेहंनसर्वथा ॥ त्यक्तवान्येनतद्द्रोहेदुःखीभवतिनिःश्वसन् ॥ ४३५ ॥ शरीरस्यापरित्यागादहंमानविवर्जनात् ॥ लोकयोरुभयोःसंधौजातःस्वप्नस्ततोभवेत् ॥ ४३६ ॥ अदर्शनाद्यथोडूनांसवितुर्मंडलस्यच ॥ निर्मलेगगनेसंधिरन्होरात्रेश्चसस्ततः ॥ ४३७ ॥ तत्रजातःपदार्थोयःससांध्यःकीर्त्यतेयथा ॥ तथास्वप्नोपिसांध्यःस्यात्संधिजत्वेनहेतुना ॥ ४३८ ॥ तस्मिन्स्थानेस्थितःसांध्येस्थानयोरुभयोरपि ॥ मध्येस्थितंसदैवात्मापश्यतिद्वयमेवतत् ॥ ४३९ ॥ अस्मिन्देहेमुनायत्स्यादनुभूतंशरीरिणा ॥ विलोकयतितत्स्वप्नेयच्चदेहांतरेपिवा ॥ ४४० ॥ अपिभाविशरीरेयदनुभाव्यंभविष्यति ॥ विलोकयेत्तदप्यत्रस्वप्नेकश्चित्कदाचन ॥ ४४१ ॥ देहल्यामुपविष्टःसन्यथाकश्चिद्गृहांगणे ॥ विलोकयेत्तयोःसंधौस्थितत्वेनैवहेतुना ॥ ४४२ ॥

पाद्यतत्फलंपरलोकप्रत्यक्षमवतारयति तस्मिन्निति तस्मिन्स्वप्नसंज्ञेसांध्येस्थानेस्थितःसन्नात्माउभयोरेतल्लोकपरलोकात्मकयोर्मध्येस्थितंपदार्थजातंद्वयमतीतमनागतंचपश्यतीति ॥ ४३९ ॥ तत्रातीतस्यैहिकामुष्मिकार्थजातस्यस्वाप्नप्रत्यक्षविषयतांदर्शयति अस्मिन्निति अस्मिन्वर्त्तमानेदेहेदेहांतरेचातीतेयदनुभूतंस्यात्संभवेत्तत्स्वप्नेप्रायोवलोकयतीति ॥ ४४० ॥ अनागतेतद्दर्शयति अपिभावीति कदाचनमरणसन्निधौ ॥ ४४१ ॥ एतद्दृष्टांतेनस्फुटयति देहल्यामिति यथाकश्चिद्देहल्यामुपविष्टःसन्गृहमंगणंचपश्येत् तयोर्गृहाङ्गणयोःसंधौस्थितत्वात् ॥ ४४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्ष्टांतिकेयोजयति इममिति स्पष्टम् ॥ ४४३॥ यथाऽऽक्रमइत्यादिभागस्यार्थंयादृशेनाऽऽक्रमेणआलंबनेनधर्मादिरूपेणशरीरादिहेतुना सहितोलोकद्वयेफलंभुंक्तेतादृशःसन्नेवस्वप्नेपापफलानिदुःखानिपुण्यफलानिसुखानिचपश्यतीत्याकारंदर्शयति यादृशमितित्रिभिःअ स्यजंतोःस्थूलदेहत्यागानंतरंयादृशंवपुर्भविष्यतितत्तादृशमेवस्वप्नगंशरीरंपरिगृह्यशुभेनपुण्येनपरेणपापेनचसुखदुःखेप्राप्नोतीतिद्वयोःसं बंधः॥ ४४४॥ ४४५॥एतत्स्पष्टयन्नूफलितमाह पुण्येति तथाचपरलोकेस्वाप्नंप्रत्यक्षंमानंसिद्धमेवमन्यदपिश्रुतिस्मृतिपुराणादिबोध्यमिति भावः॥ ४४६॥ ननूपाधिसंसर्गेणमलिनस्यात्मनोविविक्तंरूपंयावन्नेक्ष्यतेतावन्नमोक्षादिसंभाव्यतइतिचेत्स्वप्नेतावत्स्वयंप्रकाशतयातत्परि

इमंलोकंपरंचैवविलोकयतिसंधिगः ॥ आत्माचसर्वजंतूनांममतेपिचभूपते ॥ ४४३ ॥ यादृशंवपुरेतस्यभ विष्यत्यत्रदेहिनः ॥ स्थूलस्यवपुषस्त्यागेशुभंवाऽशुभमेववा ॥ ४४४ ॥ संगृह्यस्वप्नगंसोयंतच्छरीरंसदापु मान् ॥ शुभेनसुखमाप्नोतिदुःखंतद्वत्परेणच ॥ ४४५ ॥ पुण्यकारीसुखान्येयाद्दुःखान्येवंचपातकी ॥ एवंलोक द्वयंपश्येदात्मायंपरमेश्वरः ॥ ४४६ ॥ सयदावपुषःस्थूलादयंलोकइतीरितात् ॥ स्वाप्नंसंध्याभिधंस्थानंपश्यँल्लो कद्वयंव्रजेत् ॥ ४४७ ॥ तदास्थूलस्यदेहस्यविषयानिंद्रियैःसह ॥ आदायसर्वतोगच्छेन्महाराजोयथाजनान् ॥ ४४८ ॥ क्रीडन्निहयथाबालःक्रीडायाःसाधनंबहु ॥ क्रीडत्यविरतंसर्वंनिर्मायचनिहत्यच ॥ ४४९ ॥ यथा स्वप्नगतोदेवोनिर्मायचनिहत्यच ॥ स्वप्रकाशात्मविज्ञानात्स्वप्नान्पश्यत्यनेकशः ॥ ४५० ॥

चिनुहीतिप्रदर्शकस्यसयत्रेत्यादेरर्थमाह सयदेत्यादिना सआत्मायदास्थूलाद्देहात्तंविहायस्वाप्नंस्थानंलोकद्वयंदर्शनायव्रजेत्तदास्थूलदे हसंबंधिनोविषयानिंद्रियाणिचविषयेंद्रियवासनाःश्रुतौमात्रापदोक्तास्तासांधारकंमनश्चसहादायैवगच्छति यथाराजागच्छन्ननुचरान्स हनयतितद्वत् कीदृशादेतल्लोकात् अयंलोकइतिअयमात्मासर्वेषांभूतानांलोकइत्यादिवाक्येनतृतीयाध्यायचतुर्थब्राह्मणगतेनसर्वभोग्य तयोक्तात् एतेनसर्वावत्पदंसर्वानवतिपालयतीत्यर्थकतयाव्याख्यातमिति ॥ ४४७ ॥ ४४८ ॥ क्रीडन्निति यथासिकतायांक्रीडन्सन्बा लःक्रीडासाधनंसिकतामयंनिर्मायनिहत्यभंक्त्वाचक्रीडतितथायमात्मास्वप्नेविषयाणांनिर्माणमनुभूतानांभंगंचकुर्वन्क्रीडतीतिद्वयोःसंबं धः ॥ ४४९ ॥ ४५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यचनानापदार्थविषयीकरणमेवक्रीडनमित्याह स्वप्रकाशेति ॥ ४५१ ॥ स्वयंदासास्तपस्विनइत्यत्रप्रयोगेयथास्वेतरदासाभावोबो
ध्यतेतथास्वयंज्योतिःपदेनात्मेतरप्रकाशाभावोबोध्यइतिदर्शयन्नाह स्वप्रकाशेति स्वप्रकाशमात्मभूतंस्वरूपभूतंविज्ञानंयस्यैतादृशमा
त्मानंविहायान्यज्ज्योतिर्नास्तीत्यर्थः ॥ ४५२ ॥ ननुमनोज्योतिर्भवत्विति चेन्नतस्यपरिणामित्वेनजडत्वादितिदृष्टांतेनाह बालकस्येति
यथाबालकस्यक्रीडासाधनानामार्द्रमृद्विकाराणांकारणमुपादानंमृद्रूपंजडंप्रसिद्धंतथास्वप्नभावकारणंमनोपिजडमित्यर्थः ॥ ४५३ ॥ जड
त्वाच्चभास्यत्वमेवमनसोनभासकत्वमितितंदृष्टांतमनुसृत्यैवदर्शयति बालकेनेति यथाबालकेनविविधानानाकारपरिणतापुरःस्थिताच
मृत्तिकादृश्याज्ञानविषयतांनेयातथात्मनास्वप्नगंमनइति ॥ ४५४ ॥ अस्तुतर्ह्यविद्याज्योतिरित्यपिनवाच्यंतस्याआवरकत्वेनदृश्यत्वेन

स्वप्रकाशात्मविज्ञानात्पश्यन्स्वप्नानयंपुमान् ॥ क्रीडत्यविरतंदेवोह्यात्मज्योतिर्यईरितः ॥ ४५१ ॥ स्वप्रकाशा
त्मविज्ञानमात्मानंपरिहायन ॥ विद्यतेज्योतिरन्यद्यत्स्वयंज्योतिस्ततःपुमान् ॥ ४५२ ॥ बालकस्ययथैवस्या
त्क्रीडासाधनकारणं ॥ स्वप्नद्रष्टुस्तथैवस्यान्मनःस्वप्नस्यकारणं ॥ ४५३ ॥ बालकेनयथादृश्याविविधामृत्पुरः
स्थिता ॥ स्वप्रकाशात्मनातद्वद्दृश्यंस्वप्नैःसमंमनः ॥ ४५४ ॥ अविद्यानभवेत्कापिकस्यचिद्धिप्रकाशिका ॥ म
नश्चघटवद्दृश्यंनित्यंस्वप्नदशायतः ॥ ४५५ ॥ इंद्रियाणिनसंत्यत्रस्वप्नेजागरणेयथा ॥ रविसोमाग्निवाचोपि
तेजोरूपाश्चकेपिन ॥ ४५६ ॥ अगमन्मेमनोन्यत्रेत्यादिनागम्यतेमनः ॥ सर्वैर्जागरणेयेनतेनदृश्यमिदंस्मृ
तम् ॥ ४५७ ॥ चेतनत्वंनचास्यास्तिवादिनःकस्यचिन्मते ॥ यस्याप्यस्तिसवक्तव्यःकिमात्मैतद्धुतापरं ॥ ४५८ ॥

चजडत्वस्यस्फुटत्वादित्याह अविद्येति स्पष्टं ॥ ४५५ ॥ लोकेप्रकाशकत्वाभिमतानामिंद्रियादीनामभावोपिस्वप्नेनिर्विवादइत्याह इंद्रि
याणीति भावाइतिशेषः ॥ ४५६ ॥ मनसोदृश्यत्वेनुभवमपिसंवादयति अगमदिति त्वदुक्तार्थंविहायमेमनोन्यत्रगतमित्याद्याकारेणा
नुभवेनलोकैर्मनोयतोगम्यतेविषयीक्रियतेतेनमनसोदृश्यत्वेनविवादइत्यर्थः ॥ ४५७ ॥ मनसोजडत्वमेवप्रपंचयति चेतनत्वमित्यादिना
अस्यमनसश्चेतनत्वंकस्याप्यास्तिकस्यवादिनोमतेनास्ति अथयस्यबौद्धस्यमतेचेतनत्वंमनसोस्तिसवादीएवंवक्तव्यःप्रष्टव्यः एवंकथंकि
मेतन्मनआत्मरूपमुतापरमनात्मरूपमिति ॥ ४५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंत्येदोषंप्रपंचयति अनात्मत्वइतिद्वाविंशतिश्लोकैः यद्यनात्मत्वेपिमनसश्चैतन्यंस्वीक्रियतेतदानात्मत्वाविशेषादेतत्सर्वंजडजातंचेतनं स्यात् अत्रेष्टापत्तिमनोवैयर्थ्यापादानेनवारयति भूतानामिति यदाभूतादीनामनात्मनांसर्वेषांबोधनंचैतन्यंस्वीक्रियतेतदामनसोवैयर्थ्यं दीपेनदीपांतरवत् केनाप्यनपेक्षितत्वादित्यर्थः ॥४५९॥ नन्वागमोक्तत्वात्सर्वत्रचैतन्यंमन्यामहेइतिचेत्किमागमोनुवादरूपःसन्सर्वंचैतन्य माहकिंवाविधिरूपइतिविकल्प्यतत्रनाद्यइत्याह प्रमाणमिति आगमोवेदःसर्वमात्मैवेत्याद्याकारकएतत्सर्वंचैतन्यंनानुवदति हियतःसर्वचै तन्येऽस्मदादिसंबंधिप्रत्यक्षादिकंप्रमाणंनास्तियत्सिद्धमागमोनुवदेदिति ॥ ४६० ॥ नद्वितीयस्तस्यागमस्यफलवदनधिगताबाधितविधेयां तरलाभेनतद्विपरीतेजडस्यचेतनत्वेतात्पर्याभावात् प्रत्युतबाधासामानाधिकरण्येनजडस्यबाधनादित्याशयेनाह सर्वतामिति सउक्ताका

अनात्मत्वेकुतोनस्यात्सर्वमेतद्धिचेतनम् ॥ भूतानांभौतिकानांचमनसोवापिबोधने ॥ सतिकिंमनसाकार्यं चेतनेनसमेनतैः ॥ ४५९ ॥ प्रमाणंसर्वचैतन्येनास्मदादेस्तुकिंचन ॥ आगमोनुवदत्येतत्सर्वात्मात्मेत्ययंनहि ॥ ४६० ॥ सर्वतामात्मतांतद्वद्बोधंचविदधातिसः ॥ अन्याहिवचनव्यक्तिर्जगत्सर्वंभवेदिदं॥ ४६१ ॥ अन्या चसर्वमेतत्स्याच्चेतनंसचराचरं ॥ आत्मेतिचपरैवस्यादन्यास्याच्चेतनोहिसः ॥ ४६२ ॥

रआगमःसर्वतादित्रयंविदधाति सर्पत्वभ्रमापनोदायरज्जुत्वमिवद्वैतभ्रमापनोदायअज्ञातंबोधयतीत्यर्थः तर्ह्यनेकविधानेवाक्यभेदइतिचे न्न पदार्थशोधनद्वाराजायमानमहावाक्यार्थज्ञानक्रमानुसारित्वेनेष्टत्वादित्याशयेनाह अन्याहीत्यादि इदंजगत्सर्वमद्वितीयात्मकब्रह्म रूपमित्येवंविधावचनस्यव्यक्तिःस्वरूपमितियावत् साऽन्यत्वेनेष्टैव यतोऽनयातत्पदार्थशोधनंक्रियतेइतिभावः तथातत्पदार्थेचिद्रूपतावि धायिकाएतत्सचराचरंचेतनमित्याकारावचनव्यक्तिरपिपृथगिष्टा तथात्मास्तीत्याकारावचनव्यक्तिस्त्वंपदार्थस्यसर्वान्तरताबोधनद्वारा शोधिकापिपृथगिष्टा परइतिपदमुत्तरश्लोकादपकृष्यते तथाचपरस्तत्पदार्थःसआत्मैवेत्याकाराचतुर्थीवचनव्यक्तिरपीष्टैवमहावाक्यरूप त्वादितिद्वयोरर्थः ॥ ४६१ ॥ ४६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिचोक्तविधयावेदांतवाक्यानांब्रह्मात्मपरत्वमनभ्युपगम्योक्तवाक्यस्य चिज्जडयोस्तादात्म्यलक्षणसंसर्गपरत्वमिष्यतेतद्बलाच्चजडस्यचेतनत्वमापाद्यतेतदाचितोजडत्वमपिस्याद्विधीयमानजडतादात्म्यानुयोगित्वादित्याह परइति प्रथमपदंपूर्वान्वयित्वेनव्याख्यातं यदि आत्मैवेदंसर्वमित्यादिवाक्यार्थत्वेनाभिमतंचेतनतादात्म्यंहेतुत्वेनावलंब्यसर्वंजडंचेतनमित्युच्यतेतदाअचेतनतादात्म्यादात्माअचेतनइति किंनोच्यते यतस्तेमतेविधानंविधीयमानतादात्म्यानुपयोगित्वमुभयोश्चिज्जडयोस्तुल्यंविनिगमनाहीनं तथाचचेतनेजडस्यचेतनत्वोपपादनेकिमाधिक्यंकानुकूलायुक्तिर्यतस्तदेवांगीक्रियतइत्यर्थः ॥ ४६३ ॥ किंचजडस्यचैतन्यंनवेदप्रमेयमबाधितत्वादितात्पर्यप्रयोजकाभावादितिवक्तुमबाधितत्वस्यतात्पर्यव्यापकतांतावदाह अपिदृष्टेति अपिचदृष्टेनानुभवेनविरोधेविरुद्धेक्वचिदप्यर्थेवेदवाक्यस्यमानतातत्परतानांगीकर्तव्याइतिशेषः अंगीकारेऽनिष्टंदर्शयति माभूदिति तथांगीकारेहिआदित्योयूपइतिवाक्यबलेनाकाशस्थितस्यप्रभाभृतः

परश्चेतनतादात्म्यात्सर्वंचेत्तद्धिचेतनं॥ अप्यचेतनतादात्म्यादात्माऽतेऽचेतनोनकिं॥ विधानमुभयोस्तुल्यमाधिक्यंकिंतुचेतने॥ ४६३॥ अपिदृष्टविरोधेनक्वचिद्वाक्यस्यमानता॥ माभूद्यूपेनतादात्म्यंखस्थितस्यप्रभाभृतः॥ माचाभूद्यजमानस्यप्रस्तरेणभृतात्मना॥ ४६४॥ अपिवाक्येनयत्किंचिद्वैदिकेनविधीयते॥ पुरुषार्थायतत्सर्वमितिवैदिकसंस्थितिः॥ ४६५॥ आत्मनोचेतनत्वेवाचैतन्येऽनात्मनोपिवा ॥ पुरुषार्थोनकोप्यस्तिविदधातिकथंहितत्॥ पुरुषार्थविहीनंयत्प्रमाणंवेदईश्वरः॥ ४६६॥

आदित्यस्ययूपेनाप्रकाशमयेनतादात्म्यंजगदंधकारापादकंप्रसज्येत तथायजमानःप्रस्तरइतिवाक्यबलेनयजमानस्यप्रस्तरेणदर्भमुष्टिमयेनभृतात्मनाजडरूपेणतादात्म्यंस्यात् तथाचसूक्तवाकेनप्रस्तरंप्रहरतीतिविहितसूक्तवाकाख्यमंत्रकरणकहोमकालेयजमानस्याग्नौप्रक्षेपेसर्वक्रियालोपप्रसक्तिस्तदुभयंमाभूदिति ॥ ४६४॥ अथफलत्वस्यतात्पर्यलिंगस्यव्यतिरेकमुक्तार्थेदर्शयति अपिवाक्येनेति वैदिकेनवाक्येनयत्किंचिद्विधीयतेअज्ञातंबोध्यतेतत्सर्वंपुरुषार्थप्रयोजकमेवविधीयतइतिवेदविदांसिद्धांतइत्यर्थः ॥ ४६५ ॥ त्वदभिमतोर्थस्तुनतथेत्याह आत्मनइति आत्मनोजडत्वेजडस्यचेतनत्वेवाज्ञातेनकिंचित्फलमतस्तज्जडस्यचैतन्यंपुरुषार्थविहीनंवेदईश्वरात्मकःकथंविदधीतयतःप्रमाणंभवतिविफलबोधनेह्यप्रामाण्यंप्रसिद्धमितिभावः ॥ ४६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥३६॥

अन्वर्थनामावेदः स्वस्यवेदत्वसंरक्षणायापिनपुरुषार्थरूपमर्थंप्रतिपादयितुंतत्परोभवतीत्याह वेदेति वेदइत्याकारकःशब्दोवाचकोयस्या म्नायस्यसप्रमाणराजःअत्रप्रमाणव्यापारेप्रवृत्तःसन्नक्वचिदनर्थकमपिब्रूयात्प्रकाशयेत् यथाचक्षुरिष्टदर्शनायोन्मीलितमनिष्टमपिप्रकाश यतितद्वद्दितिनैववाच्यमितिप्रथमार्द्धार्थः द्वितीयार्द्धेनानर्थकस्वरूपमुक्तं प्रथमार्द्धोक्तप्रतिज्ञायांहेतुतयावेदपदव्युत्पत्तिविरोधंदर्शयंस्तद्व्यु त्पत्तिमाह पुमर्थमिति ॥४६७॥ चक्षुरादीनांविषयप्रकाशनप्रवृत्तौतात्पर्येणनियामकंवेदस्यतूपक्रमादिषड्विधलिङ्गगम्यंतन्नियामकमिति विशेषमभिप्रेत्यतत्रफलस्यनियामकतांन्यायेनसाधयति ज्ञानेतिचतुर्भिः विदिर्वेदशब्दघटकोविदधातुर्ज्ञानकर्माज्ञानंकर्मवाच्यंयस्यसत थाज्ञानार्थकइतियावत् एषवेदस्तत्रविदधात्वर्थेज्ञानेप्रयोजकोवेदयतीतिव्युत्पत्त्याज्ञानेप्रेरकत्वेननिर्दिष्टः प्रेरकत्वंतुमुख्यंतत्रैवलोकेप्रसि

वेदशब्दोपिनैवात्रक्वचिद्ब्रूयादनर्थकम् ॥ पुरुषार्थविहीनंयत्तदनर्थकमीरितं ॥ पुमर्थंवेदयेद्यस्मात्तस्माद्वेदो यमीरितः ॥ ४६७ ॥ ज्ञानकर्माविदिःप्रोक्तोज्ञानेचैषप्रयोजकः ॥ प्रयोजकोभवेल्लोकेप्रयोज्यापेक्षयैवहि ॥ मुख्योपरोजघन्यःस्यान्मारीपुंसोलयेयथा ॥ ४६८ ॥ अपेक्षाचभवेत्पुंसःपुरुषार्थेपरत्रन ॥ मुख्यःसुखंपुमर्थः स्याद्गौणंतस्यापिसाधनं ॥ ४६९ ॥ आत्मनोऽचेतनत्वंवाचैतन्यंचपरस्यवा ॥ नसुखंनापितस्यस्यात्साधनंक स्यचित्क्वचित् ॥ ४७० ॥

द्धंयत्रप्रयोज्यस्यक्रियायामपेक्षारागोभवतियथाक्षुधितस्यभोजनप्रवर्त्तके अपरःप्रयोज्यापेक्षामंतरेणप्रवर्त्तकस्तुजघन्योगौणःप्रयोज कःस्यात्यथामारीपदेनमारयतीतिव्युत्पत्त्यापुंसोलयेमरणेप्रयोजकतयानिर्दिष्टोपिमृत्युर्गौणएवप्रयोजकइष्यते पुंसांमरणेअपेक्षाभावा दित्यर्थः ॥ ४६८ ॥ कुत्रतर्हिप्रयोज्यस्यपुंसोरागइतिचेत्फलेतत्साधनेवाइत्याह अपेक्षेति पुंसोपेक्षाचतत्रैवभवतियोर्थःपुरुषार्थरूपःस्या त् पुरुषार्थत्वमपिमुख्यंसुखेएवतत्साधनेतुगौणमित्यर्थः ॥ ४६९ ॥ उक्तस्यपुमर्थत्वस्यप्रकृतेव्यतिरेकमाह आत्मनइति आत्मनोयदचेतन ॥ ३६ ॥
त्वंयच्चपरस्यानात्मनश्चैतन्यमेतदुभयंसुखरूपंवातस्यकस्यचित्सुखविशेषस्यसाधनरूपंवाक्वचिदपिदेशेकालेवानभवतीति ॥ ४७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह अप्रमेयमिति अतोऽपुरुषार्थरूपत्वादनात्मगतंचेतनत्वमप्रमेयंप्रमातुमर्हंप्रमातुमिष्टमितियावत् एतादृशंनभवति एतादृशेच विफलार्थज्ञानेवेदःकथंप्रयोजकःप्रवर्तकःस्यादपितुनस्यात्यतःपितृवाक्यवत्प्रमाणंभवति तादृशार्थप्रतिपादनेहिप्रामाण्यंभज्येतेत्यर्थः ॥ ४७१ ॥ किंतर्हिवेदप्रमेयमितिचेदात्मतत्त्वमेवानधिगताबाधितत्वेसतिफलत्वादित्याह स्वप्रकाशमिति अतआत्मेतरस्याप्रतिपाद्यत्वात्ततोवेदात्प्रमाणराजात्स्वप्रकाशमद्वयंचात्मनोरूपंसिद्धमिति अद्वयत्वेनानंदरूपतायोभूमेतिश्रुतिसिद्धासूचिता तस्यप्रमाणांतरागोचरत्वेनापूर्वतामबाधिततांचाह कुतर्कैरित्यादिना कीदृशमुक्तमात्मरूपं प्रपंचात्मकंद्वैतंपश्यद्भिःकुतर्कमलिनमतिभिश्चतैर्लौकिकैःपुंभिःस्वात्मनास्वयमेवजन्मशतेनापिगंतुंविज्ञातुंनशक्यमिति यदिवेदेतरप्रमाणगम्यंस्यात्तदातार्किकादयोपितंजानीयुरितियावत् ॥ ४७२ ॥ यदि

अप्रमेयमतस्तस्मिन्कथंस्याद्विप्रयोजकः ॥ प्रमाणंहिभवेद्वेदःपितुर्वचनसंमितः ॥ ४७१ ॥ स्वप्रकाशमतः स्वात्मरूपंसिद्धंततोद्वयं ॥ कुतर्कमतिभिःपुंभिःप्रपंचद्वयदृष्टिभिः ॥ नशक्यंस्वात्मनागंतुमपिजन्मशतेनतैः ॥ ४७२ ॥ तेषांयथाप्रपंचस्यविलयोबुद्धिमाव्रजेत् ॥ तदर्थमिदमाहैषाश्रुतिर्मातेवनोहिता ॥ ४७३ ॥ इदंसर्वंभवेदात्मायोयंवोहृदयेस्थितः ॥ सर्पधारादिकंद्वैतंरज्जुरेवयथाद्वया ॥ ४७४ ॥ अनुमानंचचैतन्येजगतोनास्तिकिंचन ॥ प्रत्युतास्तिभुजाह्येतत्प्रत्यक्षंपरिपालनम् ॥ ४७५ ॥

जडस्यचेतनत्वंनवेदप्रतिपाद्यंतर्ह्यात्मैवेदंसर्वमित्यादिवाक्यानांकोर्थइतिचेद्वैतबाधेनाद्वैतबुद्ध्यवतारणमेवेत्याह तेषामितिद्वाभ्यां तेषांजिज्ञासूनांबुद्धिप्रपंचविलयोयथाआरोहेत्तदर्थंमातेवहितकारिणीश्रुतिरिदमाह इदंकिं इदंसर्वंदृश्यंयुष्माकंहृदयस्थितआत्मैवभवतिदृश्यंतुनास्त्येवयथारज्जौदृष्टंसर्पजलधारामालादिरूपंद्वैतंरज्जुमात्रमित्युपदेशइतिद्वयोरर्थः ॥ ४७३ ॥ ४७४ ॥ ननुवेदप्रतिपाद्यत्वाभावेपिजडस्यचैतन्यमनुमानेनसाधयिष्यतइतिचेन्नेत्याह अनुमानमिति जगतश्चैतन्यसाधकमनुमानंकिंचिदपिनास्तिलिंगादिसामग्रीविरहादितिभावः प्रत्युतविपरीतंजडत्वसाधकंत्वनुमानंदृश्यत्वादिलिंगकमस्तिनिर्बाधंभवतिहियतएतत्प्रत्यक्षंजाड्यावगाहिपरिपालकत्वादनुग्राहकत्वादनुमानस्यभुजाइवसहायइतियावत् सिद्धिस्तुसिषाधयिषाबलान्नप्रतिबंधिकेतिभावः ॥ ४७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हिकस्यचित्प्रत्यक्षंजगतश्चैतन्यसाधकंभविष्यतीतिमंदाशंकांव्यावर्तयितुंकिंजगच्चैतन्यविषयकप्रत्यक्षशालीजनोऽस्मज्जातीयःकिंवा स्मद्विलक्षणइतिविकल्प्यतत्रनाद्यइत्याह प्रत्यक्षस्यत्विति अस्मासुअस्मज्जातीयेषुजगच्चैतन्यगोचरस्यप्रत्यक्षस्याशाकदाचिन्नकार्याहि यतोस्मदादेर्जगतश्चैतन्यगोचरंप्रत्यक्षंनदृश्यतइत्यर्थः ॥ ४७६ ॥ नद्वितीयइत्याह प्रत्यक्षमिति जगतोयोबोधश्चेतनत्वमितियावत् तद्विषयकंप्रत्यक्षमस्मदादिविलक्षणेजनेवर्तमानमपिनास्तीति तत्रहेतुंनृशृंगवत्साधकमानाभावमाह कुतइति अस्माभिरिदंकुतोगम्यंज्ञातव्यं यत्तत्प्रत्यक्षंतादृक्जगच्चैतन्यविषयकंतत्रास्मद्विलक्षणेजनेविद्यतइति॥४७७॥ ननुप्रमाणैरेवोक्तप्रत्यक्षसिद्धिःपरंतुतानिप्रमाणानियुष्मज्जातीयेषुनसंतीतिशंकांवारयन्सर्वकारणोपपन्नेषुमनुष्येष्वप्रसिद्धानांप्रमाणानामसत्त्वमेवान्यथासप्तमरसादीनामपिसिद्ध्यापत्तिरित्याशयेनाह यदीति तस्मिन्नुक्तेप्रत्यक्षेसाधकानिप्रमाणानियदिसंतितर्हितानिनोस्माकंगोचरेकुतोनविद्यंते अत्रार्थेविचित्रादैवस्यसंगतिर्घटने

प्रत्यक्षस्यतुनैवास्तित्याशास्मास्वत्रकर्हिचित्॥ प्रत्यक्षमस्मदादेर्नचैतन्येजगतोस्तिहि॥ ४७६ ॥ प्रत्यक्षंजगतोबोधेनास्मदादिविलक्षणे॥ कुतोस्माभिरिदंगम्यंतत्तादृक्तत्रविद्यते॥ ४७७॥ यदितस्मिन्प्रमाणानिसंतिनोविषयेकथं॥ विद्यंतेतानिनैवात्रविचित्रादैवसंगतिः॥ ४७८॥ विषयोनास्तियत्तत्स्याद्विषयःस्थानजेनरे॥ विषयोविषयीभावंनयात्यात्मांतरेस्वतः॥ ४७९॥ ततोव्यसनमायातंचैतन्येमनसस्तव॥ अनात्मभिःकृतंसर्वैःप्रतिपक्षैर्मनःसमैः॥ ४८०॥

त्यर्थः ॥ ४७८॥ जगच्चैतन्यगोचरंप्रत्यक्षंकुत्रचित्पुरुषेस्तिकुत्रचिन्नास्तीत्येवंस्वीकारेव्याघातमुपपत्तिहीनत्वंचाह विषयइति यद्वस्तुचेतनत्वेनविषयोविषयतार्हंनास्तितदेवस्थानजेदेशविशेषजेनरेवर्त्तमानज्ञानस्यविषयीभवतीतितथासएवविषयआत्मांतरेअस्मदादौवर्त्तमानज्ञानस्यविषयीभावंनयातितदपिस्वतःस्वभावइत्यर्थः तथाचएकस्यविषयत्वमविषयत्वंव्याहतंस्वभावमात्रेणचविरुद्धरूपतानयुज्यते इतिभावः ॥ ४७९ ॥ मनसोऽनात्मत्वपक्षेदोषप्रपंचनमुपसंहरति ततइति ततउक्तदोषकदंबात् मनसश्चेतनत्वस्वीकारेतववादिनोव्यसनं दुःस्थत्वरूपाविपत्आयातं कीदृशंव्यसनं यदिमनसश्चैतन्यंस्वीक्रियतेतर्हिसर्वेअनात्मानश्चेतनाःस्युरितिप्रतिबंदीघटकैरनात्मभिःकृतं कीदृशैरनात्मभिर्मनःसमैर्जडत्वादिभिर्धर्मैरित्यर्थः ॥ ४८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथायंमनसआत्मत्वेसतिचेतनत्वपक्षंदूषयति सात्मतेतिषड्भिः साकिमात्मैतदुतापरमित्यधस्ताद्विकल्पिताआत्मताचेतनस्यमनसोयदिवा दिसंमतातदाप्येवंविचार्यं एवंकथं तस्यमनसश्चेतनत्वविशिष्टात्मत्ववादिनोमतेकिंमनःपरिच्छिन्नंविभुवा आद्येतुयावद्विकारंतुविभागइ तिन्यायेनभेदस्यकार्यत्वव्याप्यत्वात् तेनमनसाकार्येणधूमेनवन्हिवद्भूतभौतिकंकारणंस्मर्यते भूतानिअपंचीकृतानिभौतिकंभुक्तान्नंतेषां समाहारः तथाचजडकार्यस्यचेतनत्वमात्मत्वंचव्याहतमितिभावः ॥४८१॥ विभुत्वपक्षेत्वात्मैवत्वयानामांतरेणोक्तइत्याह वस्तुतइतित्रि भिः अस्यवादिनोमतेमनःकुत्रचिदपिवस्तुनिकालेदेशेवानवर्ततेविभूनामवृत्तित्वस्यसिद्धांतितत्वादतस्त्रिविधपरिच्छेदशून्यमितिचेत्तर्ह्येवं

सात्मतामनसश्चेत्स्याच्चेतनस्यात्रवादिनः॥ तत्किंतस्यपरिच्छिन्नंसर्वगंवामनोभवेत्॥ परिच्छेदेपुनस्तेनस्म र्यतेभूतभौतिकम्॥ ४८१ ॥ वस्तुतःकालतश्चास्यदेशतोपिनकुत्रचित् ॥ वर्ततेऽतस्त्रिधाछेदशून्यंचेन्नमनो भवेत्॥ स्वयंज्योतिरयंस्यात्माविज्ञानानंदरूपभृत्॥ ४८२ ॥ मनोनामत्रिलोकेस्मिन्संकल्पशतकारणं॥ तैज संभवतानैतदुक्तंनामविनाधुना॥ ४८३॥ नहिनाम्निविवादोपिकस्यचित्कर्हिचित्क्वचित्॥ आत्मेतियंवयंब्रू मोमनइत्याहतंभवान्॥४८४॥आत्मादीन्यपिनामानिनविद्यंतेपरात्मनि॥ अवाङ्मनसगम्येऽस्मिन्स्वप्रका शात्मबोधने॥ ४८५॥

प्रतिपादितंवस्तुमनोनभवेत्किंतुस्वयंज्योतिरादिलक्षणआत्मैवभवेदिति ॥ ४८२ ॥ मनोनामेति यच्चास्मिंस्त्रिलोकेऽन्वयव्यतिरेकेसंकल्प शतकारणंतैजसंसत्वप्रधानंमनोनामप्रसिद्धंतदेतद्भवतानोक्तंस्यात् नामविनातदीयंनामैवआत्मपरत्वेनभवतोक्तंनत्वर्थइत्यर्थः ॥ ४८३ ॥ नाम्नितुनविवादइत्याह नहीति स्पष्टम् ॥ ४८४ ॥ ननुविद्यतएवात्रविवादोयतोभवतांसिद्धांतेआत्मादिनामानिमुख्यवृत्त्यावर्ततेमनःपदं तुलक्षणयामन्मतेतुविपरीतमितिचेन्नावाङ्मनसगोचरेलक्षणयैवसर्वशब्दवृत्तेःसिद्धांतितत्वादित्याशयेनाह आत्मादीन्यपीतिद्वाभ्यां स्वप्र काशात्मबोधनेस्वप्रकाशात्मकबोधरूपे ॥ ४८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यस्यंतेइति यथात्मतत्त्वकुशलैरन्यान्यात्मादिनामान्यत्रात्मन्यध्यस्यंतेआरोप्यंतेतथाभवामूमनइतिनामाध्यस्यतीति अयंभावः आत्मज्ञानानन्दशब्दाःशवलेरूपेव्युत्पन्नाःशुद्धेलक्षणयाप्रवर्तन्ते एतत्संक्षेपशारीरकेप्रपञ्चितमिति फलितमाह परिशेषादिति प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगात्परिशिष्यमाणेसंप्रत्ययइत्युक्तलक्षणात् प्रकृतेतल्लक्षणसमन्वयस्तुस्वप्नेज्योतिष्ट्वंभ्रांतदृष्ट्यायत्रमनसिप्रसक्तंतस्यप्रतिषेधःकृतःअन्यत्राविद्यायामावरकत्वेनप्रसिद्धायांतथाजाग्रत्प्रपंचेस्वप्नेअविद्यमानेज्योतिष्ट्वप्रसक्तिरेवनास्तीत्यतोहेतोःपरिशिष्यमाणेआत्मनिज्योतिष्ट्वसंप्रत्ययइति ॥ ४८६ ॥ परिशेषमेवव्यनक्ति प्रतीतेरिति आत्मनःप्रतीतिर्भासमानताभवतितद्वत्तथाआत्मनोपेक्षयाव्यतिरेकिणोभिन्नस्यप्रत्यायकस्यबोधकस्याभावोपिभवतीत्यतःपरिशेषादयमात्मास्वयंज्योतिरित्यर्थः ॥ ४८७ ॥ यद्यप्यद्वितीयत्वपरश्रु

अध्यस्यंतेयथान्यानिनामान्यात्मविशारदैः॥ मनइत्येवचात्रैकमध्यस्यतितथाभवान्॥ परिशेषात्ततोज्ञेयः स्वयंज्योतिरयंपुमान्॥ ४८६ ॥ प्रतीतेरात्मनस्तद्वदात्मनोव्यतिरेकिणः॥ प्रत्यायकस्यचाभावात्स्वयंज्योतिरयंपुमान्॥ ४८७॥ नज्ञानमात्मनोभिन्नंस्वप्रकाशंकथंचन॥ परिच्छेदोभवेद्भेदेपरिच्छेदादनात्मता॥ ४८८ ज्ञानात्मनोर्घटस्येवततोभेदोऽनयोर्नहि॥ विभेदाभावतश्चापिस्वयंज्योतिरयंपुमान्॥ ४८९॥ यद्यपिस्यात्तथाप्येषत्वन्वयव्यतिरेकतः॥ गम्यतेस्वप्नकालेत्रस्वयंज्योतिस्ततोपिच॥ ४९०॥

त्यंतरानुसारितर्केणापिस्वयंज्योतिष्ट्वमनुसंधातुंशक्यंतथापिप्रकृतश्रुत्यान्वयव्यतिरेकाख्यायुक्तिःसुखबोधायदर्शितेतिनिरूपयति नज्ञानमितित्रिभिः यथाप्राभाकराआत्मनोधर्मस्वप्रकाशंज्ञानंमन्यंतेतथानमंतुंयुक्तं तथासतिहिभेदात्मकवस्तुपरिच्छेदादनात्मत्वव्याप्याद्धेतोरनात्मत्वमेवघटवत्ज्ञानात्मनोर्ज्ञानस्यात्मनश्चस्यात्ततोनयोर्ज्ञानात्मनोर्नभेदोज्ञानाभेदेचात्मास्वयंप्रकाशइतियद्यपितर्केणैवसिद्ध्यतितथाप्येषआत्मास्वप्नकालेचयेनभासकतयासत्वेनेतरेषांभासकत्वाभिमतानामादित्यादीनांव्यतिरेकाच्चसुखेनगम्यतेततइत्यभिप्रायेणस्वयंज्योतिरित्युक्तइतित्रयाणामर्थः ॥ ४८८ ॥ ४८९ ॥ ४९० ॥ ॥३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रायंपुरुषःस्वयंज्योतिरितिश्रुतिभागस्याशयंवक्ष्यमाणोपयोगायप्रकारांतरेणाह सदेति यथालोकेदाहकःकाष्ठादिपुंजंदहन्नेवाग्निःस्वयंज्योतिरितिव्यपदिश्यतेनतुकाष्ठांतर्गतोभस्मच्छन्नोवातथायमात्मास्वप्नेस्वयंज्योतिष्ट्वेननिर्दिष्टइत्यर्थः दार्ष्टांतिकंस्फुटयति अव्याकृतेति अव्याकृतंप्रलयकालेनभिव्यक्तनामरूपकंयज्जगत्तस्ययोनिरुपादानंसर्वस्यकारणंनिमित्तंचयद्ब्रह्मसर्वज्ञंसर्वशक्तिमत्तद्वेदांतेषुस्वयंज्योतिरितिप्रसिद्धंनिरपेक्षत्वात्तदेवचात्रवाक्येस्वयंज्योतिःपदेनानूद्यप्रमातुरात्मत्वेनोच्यतेइत्यर्थः ॥४९१॥ तस्यब्रह्मणःप्रत्यभिज्ञापकंलक्षणंकिमत्रदृष्टमितिचेज्जगज्जन्मादिकारणत्वंतटस्थलक्षणंतावदवधारयेत्याह यथेति यथातद्ब्रह्मजगत्सृजतेतथायमपीत्यतःस्वयंज्योतिःशब्दवाच्यःसपरमात्मैवायमित्यर्थः स्वरूपलक्षणंतुसत्यत्वज्ञानत्वादिकंप्रसिद्धमेवेतिभावः ॥४९२॥ अथोक्ततटस्थलक्षणस्यप्रतिपादिकांनतत्ररथाइत्यादिकांदशमकंडिकामुपबृंहयति नहिस्वप्नइत्यादिसप्तदशभिः अत्रलोकप्रसिद्धेस्वप्नेरथानसंति कीदृशाः स्वर्णखचिताः अभ्रंलि

सदादाहकएवाग्निःस्वयंज्योतिःपुमांस्तथा॥ अव्याकृतजगद्योनिर्नामरूपविवर्जितं॥ ब्रह्मयत्सर्वदेहेषुतदेवात्मास्वयंप्रभः॥४९१॥यथातत्सृजतेसर्वमेतत्सदसदात्मकं॥ आत्मासर्वशरीरेषुस्वयंज्योतिस्तथैवसः॥४९२
नहिस्वप्नेत्रविद्यंतेरथाःकनकभूषिताः॥ अभ्रंलिहध्वजास्तद्वत्पताकाःकृतकौतुकाः॥ मेघघोषाविचित्रैस्तैःपरिपूर्णाःपरिच्छदैः॥४९३॥ रथयुक्ताहयानैवविचित्रगतिकर्णिकाः॥ वायुवेगाःपुरोभूमिंदृष्ट्वालज्जामुपागताः॥४९४॥ उत्पतंतइवाकाशेदारयंतइवातुरां॥ भूमिंभूधरविष्टब्धांपूर्वोत्तरपदद्वयात्॥४९५॥ पन्थानोनैवविद्यंतेतत्रचित्रामनोरमाः॥ मृदुलाःशीतलास्तद्वत्सिक्ताश्चंदनवारिभिः॥४९६॥

हाआकाशस्पर्शिनोध्वजायेषांतेतथा पताकाभिःस्वल्पध्वजैःकृतचमत्काराः मेघध्वनयोविचित्रोपकरणपरिपूर्णाश्चेति अत्रेदंबोध्यं श्रोतुर्जनकस्यराजत्वात्तदनुकूलतयारथादिपदार्थाअत्रनिरूप्यन्तइति ॥४९३॥ रथयुक्ताइति रथेयुज्यंतेइतिव्युत्पत्त्यारथयोगपदोक्तास्तुरगाअप्यत्रनसंति कीदृशाः विचित्रागतिःकर्णिकाःकर्णभूषणानिचयेषांतेतथा कर्णिकाकर्णभूषणइतिविश्वः पुनःकीदृशाः वायुवेगसमवेगोत्कर्षात्पुरतोभूमिंदृष्ट्वालज्जमानाआकाशंयेउत्पतंतिउत्प्लुत्यगच्छंतीवतथायेपूर्वोत्तरपदद्वयात्पूर्वतोनिधायउत्तरतोवामतोनिहितेनपदद्वयेनकुद्दालसमेनभूमिंविदारयंतीव कीदृशींभूमिं आतुरांविदारणभयव्याकुलामिवेतिद्वयोरर्थः ॥४९४॥४९५॥ पन्थानइति तत्रस्वप्ने पंथानोरथमार्गाः ॥४९६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घनापणादीति कीदृशाःपंथानोघनानांनिबिडबद्धपंक्तीनामापणानांआदिपदग्राह्यगृहाणांवामध्यगताः पुनःकीदृशाः घटदीपैर्मंगलकलशोपरिनिहितदीपैःप्रकाशिताः चित्रस्थानेत्यादिदीपविशेषणं चित्राणामालेख्यानांस्थानेषुस्थितानियानिचित्राणितेषांमंडनभूताविकासिकामूर्तयोयेषांतेतथातैरित्यर्थः ॥४९७॥ अप्सरइति पुनःकीदृशाःपंथानः सुरूपाभिर्भूषिताभिर्मङ्गलहस्ताभिश्चललनाभिर्विराजिताः॥ ४९८ ॥ संतिनैवेति अत्रानंदपदेनेष्टभोगजन्यंसुखंविवक्ष्यते यथाजागरणेभीष्टयुवतीनामन्नपानवस्त्रभूषणादीनांचसमागमहेतुकाआनंदाःसंतितथास्वमेनसंत्यस्थिरत्वादितिसंबंधः ॥ ४९९ ॥ संतिनैवमुदइति यथाजागरणेप्रियाप्रिययोर्लाभवियोगाभ्यांमुदोहर्षादृष्टा

घनापणादिमध्यस्थाघटदीपैःप्रकाशिताः ॥ चित्रस्थानस्थितानेकचित्रमंडनमूर्तिभिः ॥ ४९७॥ अप्सरःसदृशानंतललनाभिर्विराजिताः ॥सुवर्णमणिरत्नौघमंडिताभिःसमंततः ॥ दधिलाजादिसंयुक्तस्वर्णपात्राब्जपाणिभिः॥ ४९८॥ संतिनैवात्रचानंदाश्चेतनाचेतनैःकृताः ॥ यथाजागरणेभीष्टयुवतीनांसमागमात् ॥ इष्टादन्नात्तथापानाद्वसनाभरणादितः॥ ४९९॥ संतिनैवमुदस्तत्रयथाप्रियसमागमात्॥ अप्रियस्यवियोगाच्चदृष्टाजागरणेनृणां ॥ ५०० ॥ नपुत्रजननाद्याश्चविद्यंतेप्रमुदोपिहि ॥ यथाजागरणेलोकेपुत्रादिरहितस्यतु ॥ ५०१ ॥ पल्वलानिननीराणितत्रजागरणेयथा ॥ निर्गच्छदुदकानैवपुष्करिण्योपिसंतिहि ॥ ५०२ ॥ प्रासादाद्यागृहानैवंप्रांगणैरुपशोभिताः ॥ नपर्वतावनैःसाकंनसरित्सागरादयः ॥ ५०३ ॥

स्तथास्वमेनसंतीति ॥ ५०० ॥ नपुत्रेति यथाजाग्रतिलोकेपुत्रादिहीनस्यपुत्रादिलाभजन्याःप्रमुदःप्रकृष्टहर्षाःप्रसिद्धास्तथानसंतीति ॥ ५०१ ॥ पल्वलानीति श्रुतिगतवेशंतपदोक्तानिपल्वलानिस्वल्पसरांसियथाजागरणेसंतितथातत्रस्वमेनसंति कीदृशानिपल्वलानिनीराणिजलस्थानोपलक्षकानीत्यर्थः स्रवंतीपदंपुष्करिणीविशेषणत्वेनव्याचष्टे निर्गच्छदिति निर्गच्छत्स्रवदुदकंयाभ्यएतादृश्यःपुष्करिण्योवृहत्तडागादिरूपाअपिजाग्रद्वन्नसंतीति ॥ ५०२ ॥ श्रौतानांरथादीनामुपलक्षणत्वालंबनेनेतरपदार्थानप्यभावप्रतियोगित्वेनाहप्रासादाद्याइत्यादिना स्पष्टम् ॥ ५०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचलोकाइति नभआदीनिपंचभूतान्यत्रनसंतितथास्वेदजोद्भिज्जादीनिचत्वारिभूतानिप्राणिजातयोनसंतितथाब्रह्मांडंब्रह्मांडाद्बाह्यंस्थूलंसूक्ष्मंचाकिंचनस्वप्नेनविद्यते मनस्तुदृश्याकारपरिणाम्येकमवशिष्यतेअतस्तदास्वप्नेप्रकाशकांतराभावेनस्वप्रकाशआत्माकर्त्तारथादिविषयाणांतथाभवेत्अव्याकृतोपाधिकेश्वरवदितित्रयाणामर्थः ॥ ५०४ ॥ ५०५ ॥ ५०६ ॥ कर्तृत्वंस्पष्टयति मनइति आत्मारथमुख्यंविश्वमेवचित्रंनेतिसमीरितंनत्वत्ररथाइत्यादिनानिषिद्धंस्वप्नेमाययासृजतिअतःकर्तेतिसंबंधः ॥ ५०७ ॥ अतइति यतःस्वप्नेअस्य

नचलोकालोकपालैःसहितानापिवादिशः ॥ नभूतानिमहांत्यत्रपंचचत्वारिनैवच ॥ ५०४ ॥ नभआदीनितद्वत्स्वेदजादीन्यनेकशः ॥ नब्रह्मांडंनतद्बाह्यंसदसद्वस्तुकिंचन ॥ ५०५ ॥ विद्यतेस्वप्नकालेस्मिन्मनएकंविहायतत् ॥ स्वयंज्योतिस्तदात्मायंकर्ताऽव्याकृतवद्भवेत् ॥ ५०६ ॥ मनोभित्ताविदंविश्वंचित्रंसृजतिमायया ॥ कर्तात्मारथमुख्यंयत्स्वप्नेनेतिसमीरितं ॥ ५०७ ॥ अतएवभवेदेषकर्ताविश्वस्यदेहगः ॥ मायांविनाकथंनामसृजेदेतच्चराचरम् ॥ देशकालनिमित्तादिरहितोनिर्गुणःपुमान् ॥ ५०८ ॥ देशकालनिमित्तादीन्सृष्ट्वायद्वद्बहिःसृजेत् ॥ ईश्वरस्तद्वदेवायंस्वप्नेदेहगतःपुमान् ॥ ५०९ ॥ ब्राह्मणैर्यादृशःस्वप्नेकर्तोक्तःपरमेश्वरः ॥ आत्मासर्वशरीरेषुतादृङ्मंत्रैरपीरितः ॥ ५१० ॥

प्रभावोदृष्टोऽतएवएषआत्माविश्वस्यकर्त्ताईश्वरोभवेत् नत्वत्रमायाहानिःकार्याअन्यथानुपपत्त्यातत्सिद्धेरित्याह मायामिति अयंपुमान्निर्गुणत्वेनदेशादिहीनोभवति यदिचमायापिनस्यात्तर्हिकथंसृजेदितिसंबंधः ॥ ५०८ ॥ फलितमाह देशेति बहिर्जागरणेनुभूयमानंविश्वमीश्वरोयथादेशादिसृष्टिपूर्वकंसृजतितथायमात्मास्वप्नेचराचरंसृजतीत्यर्थः ॥ ५०९ ॥ तदेतेश्लोकाइत्यस्यार्थमाह ब्राह्मणैरिति यथाब्राह्मणभागैरात्मनःस्वप्रकाशत्वबोधनायकर्तृत्वमुक्तंतथाश्लोकपदोक्तैर्मंत्रैरप्युच्यतेइत्यर्थः ॥ ५१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रस्वमेनेत्यादेःप्रथममंत्रस्यार्थमाह विषयेंद्रियेतिसप्तभिः स्वप्नावलोकतःस्वप्नदर्शनार्थंस्थूलशरीरसंबंधिविषयेंद्रियसमूहंत्यक्त्वात्या गेनमृतप्रायंकृत्वाइमान्मानसान्मनःपरिणामभूतान्सर्वान्भावान्सकारणान्कारणाज्ञानसहितान्जडान्जाड्यात्मकनिद्रासुप्तान्अयंशरी रभाक्जीवात्माप्रकाशयति कीदृशस्तैःसर्वैरप्रकाश्यःसुप्तिशून्योऽलुप्तदृक्स्वयंप्रभश्चेतिद्वयोरर्थः ॥ ५११ ॥ ५१२ ॥ स्वयंज्योतिरि ति स्वयंज्योतिःस्वयंप्रकाशंयत्स्वरूपंश्रुतौशुक्रपदोक्तंतदेवादायान्यत्सर्वंस्वप्नदृश्यजातंपरित्यज्यजागरणावस्थांगत्वापुनरेवस्वप्नाभिधंसां ध्यंस्थानमायातीत्यन्वयः भाष्यव्याख्यातोवैलक्षण्यंतुप्रमेयाविरोधान्नदोषायेतिबोध्यम् कीदृशआत्मा हिरण्मयः स्वार्थेमयट् मयटोम

विषयेंद्रियजातंयत्स्थूलदेहस्यतत्पुमान्॥ स्वप्नावलोकतस्त्यक्त्वासुप्तिशून्यःस्वयंप्रभः ॥ ५११ ॥ जडान्सर्वा निमान्भावान्मानसान्हिसकारणान्॥ प्रकाशयतितैःसर्वैरप्रकाश्यःशरीरभाक्॥ ५१२ ॥ स्वयंज्योतिःस्वरूपं यत्शुक्रमादायतत्स्वयं॥ आयातिपुनरेवायंगत्वाजागरणंसदा ॥ ५१३ ॥ स्थानंस्वप्नाभिधंयत्तुसांध्यमित्य भिधीयते॥ हिरण्मयःसदास्वस्यभासायंभास्वरोयतः ॥ ५१४ ॥ एकश्चायंसमग्रासुर्यात्यवस्थास्वहर्निशं॥ हित्वावस्थांपूर्वजातांविक्रीडन्बालकोयथा॥ ५१५ ॥ चराणांचस्थिराणांचशरीराण्यखिलान्यपि॥ अन्नपा नरसाद्यैश्चपूर्यंतेहर्निशंयतः॥ ५१६॥ ततस्तानिपुरीशब्दैरुच्यंतेवेदवादिभिः॥ शेतेपुरीष्वयंयस्मात्तस्मात्स पुरुषःस्मृतः॥ ५१७॥ एकएवसदावस्थाआददानोजहत्तथा॥ एकहंसःपुमांस्तेनपुरुषश्चेतिगीयते॥ ५१८॥

कारलोपश्छांदसः प्रकाशरूपइत्यर्थः तत्रहेतुः यतःस्वस्यभासाभास्वरइतिद्वयोरर्थः ॥ ५१३ ॥ ५१४ ॥ एकहंसपदार्थमाह एकश्चेति पूर्वांपूर्वामवस्थांहित्वाउत्तरोत्तरांयतएकएवहंतिगच्छतिततएकहंसइत्युक्तइत्यर्थः ॥ ५१५ ॥ पुरुषपदार्थमाह चराणामितिद्वाभ्यां चरा चरशरीराण्यन्नादिरसैःपुनःपुनःपूरणात्पुरीवाचकशब्दैर्हलंतपुर्शब्दप्रभृतिभिरुच्यंते तासुपूर्षुवसनात्पुरुषइत्युच्यतेइतिद्वयोरर्थः ॥ ५१६॥ ॥ ५१७ ॥ चतुर्णामर्थमेवसंक्षिप्याह एकएवेति स्पष्टम ॥ ५१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणेनेत्यादेर्द्वितीयमंत्रस्यार्थमाह स्थूलादिति यथाराजापरदेशंगच्छन्स्वराजधानीरक्षार्थंकंचित्सामंतमवस्थाप्यगच्छतितथायंपुरुषःस्थूलदेहाभिमानंपरित्यज्ययदास्वप्नंयातितदास्थूलदेहरक्षायांप्राणंपंचवृत्तिकमवस्थाप्ययाति मरणकालेतुप्राणंसहैवनयतीत्यर्थः ॥ ५१९ ॥ देहेति स्थूलदेहाभिमानतःश्रुतिगतकुलायपदलक्ष्यार्थाद्बाह्येगत्वातंपरित्यज्येतियावत् स्वप्नान्पश्यति कीदृशोयंपुरुषः मरणादिभिर्देहधर्मैर्मुक्तःस्वयंप्रभश्च योयंयथेच्छंदेहांतरेचनाडीषुविचरतिनानाभावान्कल्पयतीत्यर्थः ॥ ५२० ॥ स्वप्नांतइत्यादेस्तृतीयमंत्रस्यार्थमाह स्वेच्छयेत्येकादशभिः एवंस्वप्नेस्वेच्छयापर्यटन्सन्देवोयमात्माब्रह्माहिरण्यगर्भस्तच्छरीरादिउच्चंस्तंबस्तृणगुच्छस्तच्छरीरपर्यंतमवचंचवपुराददातित्यजतिच तत्तद्भोगप्राप्तयइत्यर्थः श्रुतावंतशब्दोमध्यवचनइति ॥ ५२१ ॥ नानाभावप्रकारंविशदयति भोगोपकरणमिति

स्थूलाद्देहाद्यदास्वप्नंप्रयातिपुरुषस्तदा॥देहरक्षाकरंप्राणंमुक्त्वायातिस्मृतिंविना॥ ५१९॥ देहाभिमानतोबाह्ये
गत्वास्वप्नान्प्रपश्यति॥ देहधर्मैरयंसर्वैर्विमुक्तोमरणादिभिः॥ स्वेच्छयाविचरत्यत्रदेहयंत्रेस्वयंप्रभः॥५२०॥
स्वेच्छयापर्यटन्देवोयथामायाविबालकः॥ ब्रह्मादिस्तंबपर्यंतंस्वप्नउच्चावचंवपुः॥ आदत्तेचजहात्येषतत्तद्भो
गानवाप्नुवन्॥५२१॥भोगोपकरणंतत्रतत्तत्स्रजतितादृशः॥ स्वयंपितातथामाताभ्राताताद्वद्गुरुःस्वयं॥५२२
जायासुतादिकंतद्वत्स्वयमेवभवत्ययं॥ एवंकल्पयतेरूपमुच्चंवाऽवचमेववा॥ ५२३॥ भोक्तृत्वकरणंस्वस्य
भोगसंगविवर्जितः॥ भोग्यरूपाणिचान्यानिकल्पयत्यात्मनःपुमान्॥ ततज्जात्यनुकारीणिप्रधानसदृशानि
सः॥ ५२४ ॥ कदाचित्कामितामाप्तकामःकल्पयतीश्वरः॥ आत्मनस्ततएवायंकामुकस्वप्नमागतः॥ ५२५॥

भोगोपकरणंशरीरेंद्रियादिकंतत्तन्नानाविधंस्रजतितथास्वयमेवपित्रादिरूपोभवतिएवममुनाप्रकारेणउत्कृष्टंनिकृष्टंवारूपंकल्पयतीतिद्वयोरर्थः ॥ ५२२ ॥ ५२३ ॥ भोक्तृत्वेति तथावस्तुतोभोगस्यसंगेनसंबंधेनवर्जितोपिस्वकीयभोक्तृत्वस्यकरणमारोपनिमित्तमंतःकरणवृत्तिविशेषंकल्पयतितथाभोग्यरूपाणिवस्तूनि कीदृशानि तत्तद्देवादिजातीनांतथाप्रधानस्यकर्मफलभोगस्यसदृशानियोग्यानीत्यर्थः ॥ ५२४ ॥ उतेवस्त्रीभिरित्यादेर्जक्षदित्यंतस्यांशस्यार्थमाह कदाचिदितिपंचभिः अयमात्माआप्तकामईश्वरोपिकदाचिदात्मनःकामितांकामिभावंकल्पयतितदातुकामुकस्वप्नंकामुकैरनुभूयमानंस्वप्नमागतःसन्नारीभिर्नेत्रपंकजैरालिंगितोनिभृतंदृष्टःसन्रममाणोहसंश्चसन्शोभनेस्वप्नेऽद्भुतंसुखमुपैतीतिपंचमेनसंबंधः ॥ ५२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्सरइति कीदृशीभिर्नारीभिरप्सरःसदृशीभिर्ह्यष्टवर्षाभिःषोडशवर्षाभिश्वसोत्कंठाभिश्च ॥ ५२६ ॥ पीनोन्नतेति पुनःकीदृशीभिः पीनेनउन्नतेनचकुचद्वंद्वेनजघनेनचउत्थितःप्रयुक्तोयोभारस्तेनप्रस्खलद्गतिभिः पुनःकीदृशीभिः विह्वलतयाध्वस्तानिआकल्पःपुष्पादिनिर्मितोवेशआभरणानिचयासांतास्तथाताभिः ॥ ५२७ ॥ सीमंतेति पुनःकीदृशीभिः सीमंतलग्नेनसिंदूरेणपार्वतीयधातुरागेणपीतालोहितारक्ताश्वभूमयोयदिभवंतितद्रूपाभिः गैरिकहरितालमयपर्वतोपत्यकाभूमिशोभामभिभवन्तीभिरितियावत् अत्रपीतत्वंशरीरकांत्याबोध्यं पुनःकीदृशीभिः देववनसमवनगताभिः ॥ ५२८ ॥ परितइति पुनःकीदृशीभिः तूर्यादिध्वनिभिर्ध्वनितासशब्दीकृताविहारभूमयोयाभिस्तास्तथाताभिः पुनःकीदृशीभिः गांधर्वेगानविद्यायांकंठस्यसौष्ठवेमनोहरत्वेचविद्याधरीसमाभिः अत्रहसन्नित्यर्थकस्यजक्षदितिश्रुति

अप्सरःसदृशह्यष्टवर्षाभिर्नेत्रपंकजैः॥ आलिंगितोत्रनारीभिःसोत्कंठाभिश्वसर्वतः॥५२६॥ पीनोन्नतकुचद्वंद्वजघनोत्थितभारतः॥ प्रस्खलद्गतिभिर्ध्वस्तस्वाकल्पाभरणादिभिः ॥ ५२७॥ सीमंतलग्नसिंदूरपीतलोहितभूमिभिः॥ नंदनादिवनप्रख्यवनगाभिरितस्ततः॥ ५२८ ॥ परितस्तूर्यवादित्रध्वनिध्वनितभूमिभिः॥ विद्याधरीसमानाभिर्गांधर्वेकंठसौष्ठवे ॥ रममाणइवोपैतिसुस्वप्नेसुखमद्भुतम्॥ ५२९॥ पश्यन्दुर्गंधदुष्टानिवस्तूनिललनाःसदा ॥ मनोहरांगहीनोयंयथाजागरणेगृही ॥ ५३० ॥ तथातीवक्वचित्पश्यन्नानाहेतूत्थितान्यपि॥ अनंतंदुःखमाप्नोतिप्रतीकारविवर्जितं ॥ चोरव्याघ्रादितोयद्वत्पापीजागरणेसदा॥ ५३१ ॥

गतपदस्यार्थोरममाणपदेनोक्तइतिबोध्यम् ॥ ५२९ ॥ कदाचित्पुण्यपापयोर्मिश्रितयोःफलमनुकूलप्रतिकूलोभयलक्षणंप्राप्यकदाचित्तुकेवलपापफलंव्याघ्रादिप्रतिकूलमात्रदर्शनंप्राप्योद्विग्नोभवतीत्यर्थपरस्यमंत्रचरमांशस्यार्थमाह पश्यन्निति द्वाभ्यां यथाकश्चिद्गृहीजागरणेऽनुकूलाललनाःपश्यंस्तत्संनिहितानिदुर्गंधवस्तूनिप्रतिकूलानिचपश्यन्स्वस्यमनोहरांगहीनतांचप्रतिकूलांमन्यमानोदुःखितोभवेत्तथायमात्मास्वप्नेनानाहेतुभ्यःसंमिश्रितकर्मरूपेभ्यउत्थितान्यनुकूलप्रतिकूलवस्तूनिअपिशब्दात्केवलप्रतिकूलानिवस्तूनिपश्यन्ननंतदुःखमाप्नोति केवलप्रतिकूलदर्शनजन्यदुःखेदृष्टांतमाह चोरेत्यर्धेन अत्रश्रुतौबिभेत्येभ्यइतिव्युत्पत्त्याभयपदेनचोरादयोविवक्षिताइतिबोध्यमितिद्वयोरर्थः ॥ ५३० ॥ ५३१ ॥ ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कश्चनेत्यंतस्य चतुर्थमंत्रस्यार्थमाह अयमुक्तइति हेराजन्‌योयंमयातेआत्मोक्तःजंतवस्तस्यआराममेवपश्यंतितंकेचननपश्यंतिइत्यहोभा ग्यहीनतालोकानामितिसंबंधः करणव्युत्पत्त्याऽऽरामपदार्थमाह आत्मनोव्यतिरिक्तंक्रीडायाःसाधनंरथादिकमिति ॥ ५३२ ॥ सुप्तआ घंतंत्वरितंनबोधनीयइत्याकारायाविवेकिजनप्रसिद्धेरपिहेतोर्जाग्रत्प्रपंचासंकरस्थलेस्थितिरात्मनःस्वप्रकाशत्वसिद्ध्यनुकूलाबोध्याइत्या शयकस्यनप्रतिपद्यतेइत्यंतब्राह्मणभागस्यार्थमाह यदायमितिदशभिः गाढनिद्रापदेनसुषुप्तिःशयनपदेनतुस्वप्नावस्थाविवक्षिता आत्मन इंद्रेंद्राणीरूपकल्पनाअस्याध्यायस्यनवतितमश्लोकमारभ्याधस्तादुक्तानुसंधेया स्फुटमन्यत्‌ ॥ ५३३ ॥ सुप्तप्रबोधनेदोषप्रसक्तिंलौ किकन्यायेनोपपादयति स्त्रीपुंसयोरिति यथाएकांतेरममाणयोःसर्वकार्यसमर्थयोरनिवृत्ताभिलाषयोरितियावत्‌ एतादृशयोःस्त्रीपुंसोर्ब

अयमुक्तोमयाराजन्नात्मायस्तस्यजंतवः ॥ आरामंसाधनंचस्यात्क्रीडायास्तुरथादिकम्‌ ॥ आत्मनोव्यतिरि क्तंतत्पश्यंत्येतंनकेचन ॥ ५३२ ॥ यदायंगाढनिद्रायांवर्ततेशयनेस्थितः ॥ तदानबोधयेदेनमिंद्राण्यालिंगितंह्र दि ॥ ५३३ ॥ स्त्रीपुंसयोरिहैकांतेयथास्याद्रममाणयोः ॥ बहिर्निर्गमनेक्षोभःसर्वकार्यसमर्थयोः ॥ ५३४ ॥ इं द्रेंद्राण्योस्तथैवस्याद्बोधेक्षोभोमहानिह ॥ सुषुप्तेस्वप्नकालेचतस्मात्तंनप्रबोधयेत्‌ ॥ ५३५ ॥ अपिदेहस्यनाडी षुपवनोऽनियमाद्व्रजेत्‌ ॥ आत्मनःसहसाबोधेसहसाबोधयेन्नतम्‌ ॥ ५३६ ॥ अन्तःपुराद्यथायातिमहाराजो निशादिषु ॥ सहसासंभ्रमादस्यसंभ्रांताःसैनिकाःक्रमात्‌ ॥ मार्गादमार्गतश्चैवपुरस्तस्यव्रजंतिहि ॥ ५३७ ॥

हिर्निर्गमनेक्षोभोभवतितथासुषुप्तिस्वप्नयोरेकीभूतयोरिंद्रेंद्राण्योःप्रबोधेक्षोभोभवेदतःसुप्तंनप्रबोधयेदितिद्वयोरर्थः ॥ ५३४ ॥ ५३५ ॥ सुप्ताप्रबोधनेकारणांतरमपिदर्शयति अपिदेहस्येति किंचसहसात्वरितमात्मनःप्रबोधेजागरणेसतिदेहस्यनाडीषुप्राणोऽनियमादव्यवस्थ याव्रजेत्‌धावेत्‌अतोपिनप्रबोधयेदिति ॥ ५३६ ॥ त्वरितप्रबोधनेसेंद्रियप्राणस्यव्याकुलत्वं तद्यथाराजानमायांतमुपाप्रत्ययेनसइत्यादि व्याख्यास्यमानश्रुत्यनुरोधेनाह अंतःपुरादितित्रिभिः यथावश्यककार्यवशेनमहाराजेसंभ्रमात्सहसानिशादिकालेष्वंतःपुरादायातिआ गच्छतिसतिअस्यराज्ञःसैनिकाःसंभ्रांताःसत्वराःसंतोयथाकथंचिन्मार्गेणकुपथेनवातस्यराज्ञःपुरतःसंमुखेयांतीत्यन्वयः ॥ ५३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमार्गतइति यदाचतेसैनिकाअमार्गेणायांतितदापुरस्यअट्टालादीनांप्राकारोपरिस्थगृहादीनां आदिपदेनकुड्यादिग्रहः तेषांभेदनमपि
कुर्वंतिराज्ञःपुरतोगमनायतथात्मकिंकराःप्राणाअपिनिद्रायाःसकाशात्सहसात्मनोजीवस्यसमागमेसतिनाडीमार्गंहित्वापीयुरागच्छेयुरि
ति ॥ ५३८ ॥ तत्रचिकित्सकप्रसिद्धंदोषमाह अंगेति तत्रसहसाप्रबोधेंगभंगोंगमोटनंतदादिकस्तल्लक्षणकोरोगऔषधशतैरपिदुर्निवा
रोजायतेइति ॥ ५३९ ॥ फलितमाह प्राणांतिकइति प्राणस्यप्रियत्वधर्मेणअंतिकंसमीपंप्राणवत्प्रियमितियावत् इदृशेपिकार्येसहसान
वोधयेदिति ॥ ५४० ॥ कथंतर्हिबोधयेदित्यतआह यदीति आत्मनउत्थापकस्यतस्यसुप्तस्यवायदिमहत्कार्यंस्यात्तदाकोमलस्पर्शाद्यु

अमार्गतःसमायाताःपुराट्टालादिभेदनं ॥ यद्वत्कुर्वंतितेतद्वत्प्राणाआत्मसमागमे॥ निद्रायाःसहसामार्गंहि
त्वापीयुःकदाचन॥५३८॥ अंगभंगादिकस्तत्ररोगोऽगदशतैरपि॥ असाध्योजायतेतस्मात्शयानंनप्रबो
धयेत्॥५३९॥ प्राणांतिकेपिसंजातेकार्येतस्यात्मनोपिवा॥शयानंपुरुषंविद्वान्सहसानप्रबोधयेत्॥५४०
यदिकार्यंमहत्किंचिदात्मनस्तस्यवाभवेत्॥ मृदुस्पर्शादिभिस्तर्हिशनैस्तंप्रतिबोधयेत्॥ अन्यथासहसाबोधे
त्वचिकित्स्योगदोभवेत्॥५४१॥दंपत्योश्चवियोगोयमुभयोर्दुःखदोभवेत्॥ प्रबोधयेत्पुमान्योयंयश्चायंप्रति
बुध्यते॥ उभयोर्जायतेपापंदृष्टादृष्टसुखापहम्॥५४२॥ योयंस्वप्नंप्रयात्यात्मायातिजागरणंचसः॥ आत्मनो
नैवभेदोस्तिस्वप्नेजागरणेपिवा॥५४३॥

पायैःशनैरेवंबोधयेत् विपक्षेदोषमनुवदति अन्यथेति अचिकित्स्योदुर्वारः गदोरोगः ॥ ५४१ ॥ वर्णितेंद्रेंद्राणीयोगानुसारेणादृष्टदोषम
प्याह दंपत्योरिति अयंप्रबोधकृतोवियोगउभयोरुत्थापकोत्थाप्ययोर्दुःखदः यतःसहसाप्रबोधेउत्थापकस्यादृष्टसुखापहमुत्थाप्यस्यदृ
ष्टसुखहरंपापंजायतेप्रादुर्भवतीत्यर्थः ॥ ५४२ ॥ अथोखल्वाहुरित्यादिवाक्यंभाष्यकृद्भिःस्वप्नमनभ्युपगच्छतांचार्वाकादीनांमतनि
रासपरत्वेनयोजितंस्वप्नेजाग्रत्प्रपंचासंकरेणस्वयंज्योतिष्ट्वदार्ढ्याय एतेशंकरानंदास्तुप्रपंचविलयवादिमतानुसारेणजाग्रत्यपिद्वैतंनास्ति
तदभावेनस्वयंज्योतिष्ट्वबोधनायकिमर्थंस्वप्नपर्यंतानुधावनमित्यर्थपरत्वेनव्याकुर्वंति योयमित्यादिसप्तदशश्लोकैः जाग्रत्स्वप्नयोरेको ॥४२॥
यमात्मानुसंधानादित्यर्थः ॥ ५४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपिकेचिदिति केचित्प्रपंचविलयवादिनोमहात्मानोद्वैतविस्मरणात्महाधियस्तत्त्वनिष्ठत्वात्तेएवमाहुः एवंकथं जाग्रत्स्वप्नयोर्दृश्यानांदेशस्यचतदुपलक्षितकालस्यचनभेदः आत्मसत्तातिरिक्तसत्ताभावेनासत्त्वादसतःप्रतियोगितानर्हत्वादितिभावः तथाचजाग्रत्स्वप्नप्रपंचयोरधिष्ठानस्यात्मनएवदेशभूतस्यभेदकोपाधिविरहेणकथंभेदशंकास्यादित्यर्थः ॥५४४॥ एतदेवस्फुटयति देशकालाविति भूतभौतिकरूपदृश्यसहितौदेशकालौजागरणसंबंधिनौआध्यासिकसंबंधेनयथात्मन्येवसंस्थितौसत्तालाभायपर्यवसन्नौ एवंस्वप्नगतावपितावात्मन्येवसंस्थितौतथाचतदधिष्ठानदृष्ट्याउभयत्रनतयोःप्रपंचयोर्भेदःस्वतस्तुअसत्वादेवनभेदप्रतियोगित्वमितिभावः एतद्व्याख्यायांश्रुत्यर्थस्तुअयमेवस्वप्नप्रपंचस्याधिष्ठानत्वेनदेशभूतआत्माजागरितप्रपंचस्यापिदेशःयानियादृशानिआत्मसत्तयासत्तावंतिवस्तूनिजागरणेपश्यतितादृशान्येवस्वप्नेतथाचपरमार्थदृष्ट्यानकस्यापिभेदइति ॥ ५४५ ॥ स्वमतेऽनुकूलांवादिसंमतिमपिसंभावनायैदर्शयति देशइति देशेदिग्रूपेका

अपिकेचिन्महात्मानएवमाहुर्महाधियः॥ दृश्यानांदेशयुक्तानांनास्तिभेदःकथंचन॥स्वप्नेजागरणेचैवसस्यात्मेनात्मनोधुना॥५४४॥देशकालौयथाऽध्यस्तावात्मन्येवचसंस्थितौ॥ भूतभौतिकदृश्येनसहजागरणेसदा॥ आत्मन्येवमिमौस्वप्नेकथंभेदस्तयोर्भवेत्॥ ५४५॥ देशेदेशंतथाकालेकालंनेच्छंतिकेचन॥ तस्मिन्नेवहितद्वस्तुयेपिसत्यंवदंत्यदः॥५४६॥ देशोदेशेतथाकालःकालेतद्वद्घटोघटे॥ व्यवहारोयथाव्यर्थोदेशादिस्तद्वदेवसः॥ वास्तवत्वंततोनास्यदेशादेर्विद्यतेक्वचित्॥ ५४७॥

लेचदेशांतरंकालांतरंचकेचननैयायिकादयोनेच्छंतियच्चतत्रउपपत्तिमपिचवदंतितद्देशकालरूपंवस्तुतस्मिन्देशकालादिस्वरूपएवव्यवहारोपयोगिसतस्थितमित्याकाराअदस्तदस्मत्सिद्धांतानुसारेणसत्यमबाधितमेववदंतीतियोजना ॥ ५४६ ॥ नन्वभेदेकथमाधाराधेयव्यवहारः दृश्यतेचासौदेशकालौविभूनित्यौचेति विभुर्हिसर्वदेशवृत्तिरुच्यतेनित्योपिसर्वकालवृत्तिरुच्यतइतिचेद्यथाऽभावाधिकरणकाभावभेदमनभ्युपगच्छद्भिरपिघटाभावेपटाभावइतिव्यवह्रियतेतथाविकल्परूपेव्यवहारेनकिंचिद्बाधकमित्याह देशोदेशेतथेति यथालोकेव्यर्थःअर्थेनविषयेणहीनोविकल्परूपोव्यवहारोदृष्टस्तथाभूमिकोत्तरीत्यादेशेदेशःकालेकालस्तथाघटोघटेतादात्म्येनवर्ततइत्यादिरूपोव्यवहारोपिभवत्वितिसंबंधः फलितमाह वास्तवत्वमिति ॥ ५४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुव्यवहारजनकस्यभेदस्यकथमसत्त्वमितिचेन्नहिव्यवहारःसत्त्वस्यव्याप्योगालिदानादावसत्येनापिवाक्यार्थेनकोपजननदर्शनात्नापिव्यापकःसतोपिब्रह्मानंदस्यलोकेव्यवहाराभावादित्याशयेनाह व्यवहारादिति व्यवहारमात्रप्रयुक्तंसत्यत्वंकस्यचिदपिपदार्थस्यकुत्रचित्कदाचिद्विद्वानसंमतं येतुमीमांसकादयःसर्वस्यव्यावहारिकपदार्थजातस्यसत्यत्ववदंतितेषांबलाज्जघन्याशक्तिलक्षणागौणीनांवृत्तीनांमध्येपाश्चात्यागौणीवृत्तिःप्रसज्येत नहिमुख्यंसत्यत्वंदृश्यजातस्यसंभवतीत्यर्थः ॥ ५४८ ॥ येतुभेदाभिनिवेशेनदेशादौविभुत्वादिव्यवहारायान्यद्देशादिकंमन्यंतेतेषामनवस्थापत्तिरित्याह देशेदेशांतरमिति भेदवर्जितत्वादेकस्मिन्देशादौयोदेशांतरादिकमंगीकरोतितस्यव्यवस्थितिःपर्यवसानंक्कभवेन्नकुत्रापीतियोजना ॥ ५४९ ॥ यदिकश्चिदनेकांतवादिनामार्हतानामनुगामीएकस्याप्यनेकतामंगीकु

व्यवहाराद्भवेत्सत्यंनैवकुत्रापिकर्हिचित्॥ जघन्यासर्वसत्यत्ववादिनोबलतोभवेत्॥ ५४८ ॥ देशेदेशांतरंतद्वत्कालेकालांतरंतथा॥ घटेघटांतरंस्वस्मिन्नेकस्मिन्भेदवर्जिते॥ अंगीकरोतियस्त्वेवंतस्यक्कैषाव्यवस्थितिः ॥ ५४९॥ अव्यवस्थितवादित्वेत्वव्यवस्थाऽस्यसंपतेत्॥ देशकालादिभेदस्यव्यवस्थाजीवहेतुतः॥ ५५०॥ व्यवस्थायांचनैषास्यात्प्रमाणात्कर्हिचित्कचित्॥ ततोदेशस्तथाकालस्तत्रयत्सदसद्वपुः॥ वस्तुजातंतदध्यस्तमात्मनिद्वयवर्जिते ॥ ५५१ ॥ सर्पादिकंयथाध्यस्तंरज्ज्वांतद्वदिदंजगत्॥ देशकालादिसहितमध्यस्तंसर्वसाक्षिणि॥ ५५२॥

र्यात्तंप्रतिलोकव्यवहारविरोधरूपंदंडंप्रक्षिपति अव्यवस्थितेति अस्यवादिनोऽव्यवस्थितवादित्वेएकत्वानेकत्वादिधर्माणामनियमस्यांगीकर्तृत्वेऽव्यवस्थाशीतस्योष्णत्वमुष्णस्यशीतत्वमित्यादिरूपासंपतेत्प्रसज्येत लोकेतुजीवहेतुतःजीवभोगार्थमितियावद्देशादिव्यवस्थैवदृश्यतेइतिशेषः ॥ ५५० ॥ अथसिद्धांतेकथंव्यवस्थेतिचेत्तत्त्वज्ञानात्पूर्वंस्वप्नवद्भ्रमसिद्धैवेत्याह व्यवस्थायामिति सिद्धांतेव्यवस्थायामप्यंगीकृतायामेषाव्यवस्थाप्रमाणसिद्धानभवतिकिंतुभ्रमसिद्धेत्यर्थः तस्मादधिष्ठानसत्तामादायैवजाग्रत्स्वप्नप्रपंचयोर्व्यवहारक्षमत्वेनसाम्यमित्याह ततइति ततोभ्रमसिद्धत्वाद्देशकालौतद्वृत्तिस्थूलसूक्ष्मरूपंजगच्चाद्वितीयेआत्मन्यध्यस्तमिति ॥ ५५१ ॥ एतद्दृष्टांतेनस्फुटयति सर्पादिकमिति स्पष्टम्॥ ५५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यस्तत्ववर्णनस्यफलमाह ततइति ततोऽध्यस्तत्वात्जाग्रत्स्वप्नवृत्तिप्रपंचयोर्द्वयंयुगलंसहदेशकालाभ्यामात्मनिप्रलीयतेआलोचितंसदात्ममात्रंभवतीतियावत् ॥ ५५३ ॥ ततःकिमतआह आत्मनश्चेति आत्माहिसर्वस्यपारमार्थिकंरूपंतद्भेदाभावेनकस्यापिभेदःरज्जुभेदाभावेतत्रकल्पितसर्पदंडजलधारादीनांयथानभेदस्तद्वदिति ॥ ५५४ ॥ अत्रयदिकश्चिदेवंब्रूयात्परमार्थदृष्ट्याभेदेपिविकारदृष्ट्याममभेदभ्रमोननिवर्त्ततेइतितंप्रत्यद्वैतेबुद्ध्यवतरणोपायंसूचयन्नाह एकेति विज्ञानंविज्ञानशक्तिरूपमंतःकरणंतस्यनानेंद्रियद्वारोपाधिकभेदशालिनउपाधिविवेकेनैकत्वंतावदवधार्यंसर्वेषांविज्ञानानांहृदयमेकायनमितिश्रुतेस्ततआश्रयस्याधारस्यमायाशबलस्यविश्वकारणस्यैकत्वमवधार्यंततःसर्वभासकस्यशुद्धचैतन्यस्येतिक्रमेणकस्यचित्तमद्वैतंनाधिरोहति लोकेहिविज्ञानादिभेदाभिमानपूर्वकएवहिविषयभेदा

ततोजागरणेयत्स्याद्यच्चस्वप्नेद्वयंजगत् ॥ देशकालादिसहितमात्मन्येवप्रलीयते ॥ ५५३ ॥ आत्मनश्चनभेदोस्तिदेशादेरपिनैवसः ॥ रज्जुभेदंविनानस्यात्सर्पादेर्हियथाभिदा ॥ ५५४ ॥ एकविज्ञानगम्यानांतथैकाश्रयवर्तिनां ॥ एकस्यविषयाणांस्याद्भेदःकेनात्रहेतुना ॥ ५५५ ॥ ततोजागरणेदेशोयःसस्वप्नेपिनापरः ॥ दृश्यानांदृश्यतेनैवभेदोदेशस्यभेदकृत् ॥ ५५६ ॥ घटःस्वावयवेष्वेकोदृष्टोयोबहिरंगणे ॥ गृहमध्येसचेद्दृष्टःस्वाश्रयेषुभिदानहि ॥ ५५७ ॥

भिमानोविज्ञानाद्यभेदज्ञानेतुकथंदृश्यजातस्यभेदोभायादित्याशयः एकस्यचैतन्यस्यविषयाणांसर्वभावानामितिशेषः ॥ ५५५ ॥ वर्णितार्थस्यप्रकृतोपयोगमाह ततइति ततोभेदकत्वाभिमतानांविषयाणामुक्तयुक्त्याभेदाभावात्जागरणस्वप्नयोर्देशआत्मरूपकएवेतिपूर्वार्द्धार्थः तत्रदृष्टांतंसूचयति दृश्यानामिति यथाकाशेदृश्यानांमेघादीनांभेदआकाशरूपदेशस्यभेदकृन्नदृश्यतेतथाचिदाकाशरूपदेशस्यापिबोध्यमित्यर्थः ॥ ५५६ ॥ एवंपरमार्थात्मरूपदेशस्यआधेयानांभेदेननभेदइत्युक्तमथकल्पितानांदेशानांभेदेपिएकत्वेननिश्चितस्यभावस्यनभेदइत्याह घटइति यथाएकएकत्वेननिश्चितोघटःस्वावयवरूपेषुअंतरंगाश्रयेषुयोदृष्टःसएवबाह्यांगणेगृहमध्येवाबहिरंगाश्रयेयदिदृष्टस्तथापिस्वाश्रयेषुभिन्नेष्वपिघटस्यभिदानहिदृष्टाइत्यन्वयः तथाचसर्वपदार्थानांस्वभावभूतमेकत्वंकल्पितदेशादिभिर्नान्यथाभवतीतिभावः ॥ ५५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतवाक्यार्थंनिगमयति दृश्यानामितिद्वाभ्यां एवंदृश्यानामपिभेदाभावेस्वप्नजागरणयोरेकोदेशःसिद्धःसचैकोदेशआत्मरूपइत्यतआत्माभेदःसिद्धइत्यर्थः ॥ ५५८ ॥ तथाचआत्मेतरस्यैवाभावादितरप्रकाशराहित्यरूपंस्वप्रकाशत्वंसुतरांसिद्धमित्याह अतइति स्पष्टम् ॥ ५५९ ॥ ब्रूहीत्यंतायाश्चतुर्दश्याःकंडिकायाःशेषस्यार्थमाह एवमुक्तइत्यष्टभिः एवंमुनिनोक्तेसतिराजामुनिंप्रत्याहस्म कीदृशोराजा कामप्रश्नरूपेणवरेणाप्यंसंपादयितुमिष्टंस्वात्मज्ञानंयेनसतथाअतएवबुद्धिमानिति ॥ ५६० ॥ एतावतामयाकामप्रश्नफलंतत्त्वज्ञानंनलब्धमतःसाधारणविद्यादक्षिणांतुभ्यंदास्यामीत्याशयकंराजवाक्यमभिनयति विद्यामात्रमितित्रिभिः विद्यामात्रंसाधारणविद्यामपियोमह्यं

॥४४॥ दृश्यानांभेदराहित्यात्स्वप्नेजागरणेपिच ॥ देशाभेदोभवेन्नात्मभेदोदेशैकरूपतः ॥ ५५८ ॥ अतआत्मास्वयंज्योतिःसर्वभेदविवर्जितः ॥ स्वप्नेराजन्मयोक्तस्तेकिमन्यत्प्रष्टुमर्हसि ॥ ५५९ ॥ एवमुक्तेततोराजायाज्ञवल्क्यमभाषत ॥ कामप्रश्नवरेणाप्यस्वात्मज्ञानोऽतिबुद्धिमान् ॥ ५६० ॥ विद्यामात्रंवदेन्मह्यंयःकश्चिद्ब्राह्मणोत्तमः ॥ एकैकस्यामहंतस्यांतस्मैदास्यामिसर्वदा ॥ ५६१ ॥ तरुणीनांगवांशास्त्रलक्षणानांसहस्रकं ॥ गजेनसदृशोयत्रवृषभोस्तिमहावपुः ॥ ५६२ ॥ इतिमेसर्वलोकोयंव्रतंजानात्यतोधुना ॥ मुनयेगोसहस्रंतुविद्यामात्रप्रदायिने ॥ याज्ञवल्क्यायदास्यामीत्युक्तोराज्ञामुनीश्वरः ॥ ५६३ ॥ मयाराज्ञेब्रह्मविद्याप्युक्तासर्वातथापितां ॥ नज्ञातवानयंसम्यङ्मभशिष्योमहीपतिः ॥ ५६४ ॥ किंतुकाचिदियंविद्येत्येतावत्प्रतिबुद्धवान् ॥ इतिसंचिंत्यवचनंप्रोवाचनृपतिंतदा ॥ ५६५ ॥

ब्रूयात्तस्मैगजसदृशवृषभयुक्तंगवांसहस्रंददामि कीदृशीनांगवां गोलक्षणशास्त्रोक्तलक्षणानां तच्छास्त्रंयथा अस्राविलरूक्षाक्षामूषकनयनाःशुभप्रदागावः प्रविचलचिपिटविषाणावरटाखरसदृशवर्णाश्चइत्यादीतिद्वयोरर्थः ॥ ५६१ ॥ ५६२ ॥ इतिमेइति अतइत्यादिस्पष्टम् ॥ ५६३ ॥ अर्थलभ्यंमुनिवाक्यंप्रतिपादयति मयेतित्रिभिः मुनिस्तुइतिसंचिंत्यनृपतिंप्रतिप्रोवाच इतिकिं मयापूर्णायांविद्यायामुक्तायामप्ययंनृपस्तस्याःपूर्णतामज्ञात्वासाधारणविद्यात्वेनतांविज्ञातवानितिद्वयोःसंबंधः ॥ ५६४ ॥ ५६५ ॥ ॥४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोसहस्रमिति विद्यानिष्क्रयायगोसहस्रंददामीतिभवद्वाक्यात्संदिह्यतेकिंभवतातज्ज्ञातंनवा तत्किंयदात्मरूपंज्योतिर्योयंविज्ञानमयःप्राणेष्वित्यादिवाक्येनोक्तमिति ॥ ५६६ ॥ इत्युक्तेनेतीति इतिमुनिनोक्तेसतिराजानज्ञातमित्याहस्म एतेनविशिष्टोमोक्षोयेनतस्मैतत्त्वज्ञानायैवब्रूहिपूर्वंतुनसम्यग्बुद्धमित्यर्थकोभागोव्याख्यातइतिध्येयम् एतादृशोराज्ञःप्रतिवचनस्यार्थःपंचदश्यांषोडश्यांचकंडिकायांबोध्यइत्याह तथेति ॥ ५६७ ॥ अथसवाएषसंप्रसादइत्यादिकंडिकाचतुष्टयस्यतात्पर्यार्थभूतमुत्तरत्रयमर्थाक्षिप्तराजप्रश्नप्रदर्शनपूर्वकंनिरूपयति भवतेतित्रयोदशभिः तत्रराजास्वप्नेवर्णितात्मस्वरूपएवंप्रथमंदोषमुद्भावयन्प्रश्नंचकार एवंकथं हेमुनेभवतायोयमित्यादिवाक्येनस्वप्नेयोयमात्मोक्तस्तस्याविद्याकामकर्मात्मकमृत्योस्तरणंनसंभवति यतःस्वप्नेभोगेनकामकर्मकार्येणसंगेनाविद्याकार्येणचसमुत्थितंप्रयुक्तंदोषंबंधा

गोसहस्रंददाम्यद्यविद्यायानिष्क्रयंप्रति ॥ योयमित्यादिनोक्तंयज्ज्योतिरात्मस्वरूपकम् ॥ मयातेप्रोक्तमखिलंतज्ज्ञातंतेनवाधुना ॥ ५६६ ॥ इत्युक्तेनेतितंप्राहमुनिनासद्द्विजोत्तमम् ॥ तथापुनर्द्वितीयवारंतंसमुनिंप्रत्यभाषत ॥ ५६७ ॥ भवतायोयमात्मोक्तःप्रथमंस्वप्नगःपुमान् ॥ दोषंपश्याम्यहंतत्रभोगसंगसमुत्थितं ॥ ५६८ ॥ स्वप्नेयस्मादयंस्त्रीभिर्मोदतेचहसत्यपि ॥ अन्नंनानाविधंतद्वद्त्तियातिनयात्यपि ॥ ५६९ ॥ इत्युक्तेमुनिवर्योपिस्वप्नेऽसंगत्वसिद्धये ॥ उत्तरंप्रथमंप्राहजनकंमिथिलेश्वरं ॥ ५७० ॥ राजापुनर्याज्ञवल्क्यमभिप्रायममुंश्रितः ॥ द्वितीयंपूर्ववत्प्रश्नंकृतवान्बुद्धिसत्तमः ॥ ५७१ ॥ स्वप्नेभवत्वसंगत्वंसूक्ष्मदेहसमाश्रयात् ॥ स्थूलदेहगतःकेनासंगोजागरणेभवेत् ॥ ५७२ ॥

ख्यंपश्यामीत्यर्थः ॥ ५६८ ॥ तंदोषमभिनयति स्वप्नेइति अयमात्मा अत्तिभुंक्ते यातिइष्टदर्शनायप्रवर्तते नयातिअनिष्टंदृष्ट्वानिवर्ततेइतिपदार्थः ॥ ५६९ ॥ एवंपृष्टोमुनिःस्वप्नेऽसंगत्वंप्रतिपादयन्प्रथममुत्तरंसएषसंप्रसादइत्यादिकंडिकारूपमुक्तवानित्याह इत्युक्तइति इत्युक्तेइतिराज्ञापृष्टेसति ॥ ५७० ॥ द्वितीयंप्रश्नमवतार्याभिनयति राजेतिद्वाभ्यां अमुमुत्तरश्लोकाभिनेयमभिप्रायमाश्रितःसन्बुध्यासत्तमोविद्वत्तमोराजाद्वितीयंप्रश्नंकृतवानिति ॥ ५७१ ॥ स्वप्नेइति स्वप्नेयदात्मनोऽसंगत्वमुक्तंतत्संभाव्यते यतःस्वप्नेशिष्यमाणोदेहोपिसूक्ष्मत्वादसंगः शिलादावपितत्प्रवेशस्यप्रसिद्धेः जाग्रतितुस्थूलदेहेनससंगतयाप्रसिद्धेनयुक्तायांवर्तमानस्यात्मनःकथमसंगत्वमित्यर्थः ॥ ५७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपृष्टोमुनिरमुमभिप्रायमाश्रित्यैषस्वप्नइत्यादिवाक्येनोत्तरंद्वितीयंददावित्याह याज्ञवल्क्योपीति स्पष्टं ॥ ५७३ ॥ अमुमितिपदोक्तमभि
प्रायमभिनयति यादृशइति असंगइत्यत्रसंगपदेनशिलादौप्रवेशप्रतिबंधोनोच्यतेकिंतुमूर्तानांमूर्तैरेवक्रियाहेतुकःसंयोगः तदभावआकाश
समेआत्मनिनञाबोध्यते तथाचभ्रांत्यात्मानंपरिच्छिन्नंमन्यमानैर्यथासूक्ष्मदेहेनात्मनःसंगःकल्प्यतेतथास्थूलेनापिसंगस्तद्भ्रांतिवारणाया
संगपदेनायमर्थउच्यते एषआत्मानिखिलैःस्थूलैःसूक्ष्मैर्वाभावैर्भ्रांतदृष्ट्यासक्तोपिवस्तुतोनसज्जतेइत्यर्थः॥ ५७४॥महामत्स्यनिदर्शनेनसमा
धेयंतृतीयंप्रश्नवमतार्याभिनयति तृतीयमितित्रिभिः एतमुत्तरश्लोकद्वयेननिरूप्यमभिप्रायमाश्रितोराजापूर्ववत्तृतीयंप्रश्नमाहस्म यतःका
मप्रश्नरूपवरलाभेनपुनःपुनःप्रश्नेनिर्भयइत्यर्थः ॥५७५॥ स्वप्नइति हेमुनेस्वप्नंजागरणंचगच्छतएकस्यात्मनःस्वप्नजागरणरूपमुभयंस्थानं

याज्ञवल्क्योपिराजानमुत्तरंप्राहपूर्ववत्॥ अभिप्रायममुंप्राप्यद्वितीयंमुनिपुंगवः ॥ ५७३ ॥ यादृशःसूक्ष्मदे
हस्यसंगःस्थूलेपितादृशः॥ नभोवन्निखिलैर्भावैःसक्तोप्येषनसज्जते ॥ ५७४ ॥ तृतीयंप्रश्नमाहैतंराजाभिप्रा
यमाश्रितः॥ यथापूर्वंमुनिंविप्रंवरंप्राप्याकुतोभयः॥ ५७५ ॥ स्वप्नेजागरणेनित्यंगच्छतोदेहिनःकथं॥ एक
स्यैवोभयंस्थानंनभवेद्दुर्घटंमुने ॥ ५७६ ॥ माहिष्मत्यांभवेद्योयंभूपतिर्नभवेद्दिसः ॥ काश्यामेकस्ततोत्रा
पिभेदःस्थानस्थयोर्भवेत् ॥ ५७७ ॥ तृतीयमुत्तरंविप्रःपुनरेवमभाषत॥ अभिप्रायेणामुनैनंजनकंमिथिले
श्वरम्॥ ५७८ ॥ युगपद्यदिगच्छेत्सपुमान्स्थानद्वयंतदा॥ स्थानभेदाद्भवेद्भेदोनैवमेषप्रयातिहि॥ ५७९॥

कथंदुर्घटंनभवेत्किंतुदुर्घटमेवेति ॥ ५७६ ॥ एकस्यस्थानद्वयनिष्ठत्वंदुर्घटमित्यत्रदृष्टांतमाह माहिष्मत्यामिति यथाउज्जयिन्यांकाश्यां
चैकोभूपतिर्नतिष्ठेत्किंतुउज्जयिनीभूपतेःकाशीभूपतिर्भिन्नएवतथाजाग्रत्स्वप्नरूपस्थानस्थयोरात्मनोर्भेदःस्यादित्यर्थः ॥ ५७७ ॥ अस्य
प्रश्नस्योत्तरंसवाएषबुद्धांतइत्यादिकयातथामहामत्स्यइत्यादिकयाचकण्डिकयाददावित्याह तृतीयमुत्तरमिति अमुनाग्रिमश्लोकाभिने
येनाभिप्रायेणमुनिस्तृतीयमुत्तरमुक्तवानिति ॥ ५७८ ॥ युगपदिति यद्येकस्मिन्कालेस्थानद्वयवृत्तित्वमुच्येततदाभेदप्रसक्तिर्भवेदेवोक्त ॥ ४५॥
दृष्टांतात्परंत्वेषआत्माएवंयुगपत्स्थानद्वयंनप्रयातिकिंतुक्रमेणयाति तथाचयथाएकस्यतीर्थाटकस्यक्रमेणमाहिष्मतींकाशींचगच्छतो
नभेदस्तथात्मनोपीत्यर्थः ॥ ५७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तात्पर्यप्रदर्शनंनिगमयन्कण्डिकाचतुष्टयस्यश्रौतार्थप्रदर्शनंप्रतिजानीते साभिप्रायमिति येऽमीसाभिप्रायंसोत्तराःप्रश्नास्त्रिरूपानिरूपितास्तेषामुत्तराणिउत्तराभिधायकश्रुतिवाक्यानिएवंवक्ष्यमाणप्रकारेणक्रमेणप्रवृत्तानिप्रवृत्तव्याख्यानानिबोध्यानीतिशेषः ॥ ५८० ॥ तत्रप्रथमप्रश्नसमाधानपरायाःसवाएषसंप्रसादइत्यादिकायाःपंचदश्याःकंडिकायाअर्थंनिरूपयति सएवेत्यादिद्वाविंशतिश्लोकैः हेराजन्यआत्मामयातुभ्यंस्वप्नेस्वयंज्योतिष्ट्वेनोक्तःसएवकदाचित्संप्रसादेव्यवस्थितोभवतीति ॥ ५८१ ॥ अधिकरणव्युत्पत्त्यासंप्रसादशब्दार्थमाह सुषुप्तिरितिद्वाभ्यां हियतःअस्यांसुषुप्तावस्थायांसम्यङ्ङितरांप्रसीदतिकालुष्यंत्यजति ॥ ५८२ ॥ सम्यक्त्वंविवृणोति विक्षेपमिति विक्षेपंमनआद्युपाधितद्धर्माध्यासरूपमखिलंत्यक्त्वासदात्मरूपेणतिष्ठन्सम्यक्प्रसीदतीत्यतःसुषुप्तिःसंप्रसादसंज्ञिकेत्यर्थः ॥ ५८३ ॥

साभिप्रायममीप्रश्नाउत्तरैःसहितास्त्रिधा॥ जाताएषूत्तराण्येवंप्रवृत्तानित्यनुक्रमात्॥ ५८० ॥ सएवात्मामयायस्तेस्वयंज्योतिरुदाहृतः॥ स्वप्नस्थितःकदाचित्तुसंप्रसादेव्यवस्थितः ॥ ५८१ ॥ सुषुप्तिःसंप्रसादाख्याकथितावेदवादिभिः॥ सम्यक्प्रसीदतित्यस्यांशरदीवजलंपुमान्॥ ५८२ ॥ विक्षेपमखिलंहित्वासमनस्कंसुषुप्तिगः॥ सम्यगात्मस्वरूपेणप्रसीदत्यात्मनास्वयम् ॥ संप्रसादस्ततोज्ञेयासुषुप्तिरिहमानवैः ॥ ५८३ ॥ यद्यप्यत्रनकाप्यस्तिरतिर्वागतिरेववा॥ अस्याःप्राप्तेःपुरापश्चात्स्यातांरतिगतीसदा॥ संप्रसादेततोरत्वाचरित्वाचपरःपुमान्॥ ५८४ ॥ पुण्यपापेचनस्यातांयद्यप्यत्रतथापिते ॥ सुषुप्तावपिसर्वेषांविद्येतेकारणात्मना ॥ अतएतेविलोक्यैवस्वप्रकाशात्मनापुमान्॥ ५८५॥

रतेःक्रीडायागतेर्नानाविषयाटनरूपायाश्चयद्यपिसुषुप्तौनसंभवस्तथापितेस्वप्नगतेएवानूद्येतेभूतभाविगत्येतिभाष्यव्याख्यानुरोधेनाह यद्यपीति द्वितीयार्द्धस्यतथापीत्यादिः तथाचयद्यप्यत्रसुषुप्तौरतिगतीनस्तस्तथापिसुषुप्तिप्राप्तेःपूर्वंपश्चाद्वास्वप्नेरतिगतीभवतः ततस्तेएवस्वप्नादिगतेअनूद्यसंप्रसादेरत्वाचरित्वेत्येवंपरःपुमानुक्तइतिसंबंधः ॥ ५८४ ॥ एवंपुण्यपापयोरपिदर्शनंयत्सुषुप्तावुक्तंतदपितयोःसफलयोःसुप्तौकारणाज्ञानरूपेणस्थितयोरेवबोध्यंतदानीमभिव्यक्तयोरसंभवादित्याह पुण्यपापेइति यद्यप्यत्रसुषुप्तौपुण्यपापेनस्यातामभिव्यक्तेनभवतस्तथापितेसुषुप्तौकारणात्मनाविद्येतेअतोऽभिप्रायादेतेपुण्यपापेस्वप्रकाशेनाज्ञानभासकरूपेणविलोक्येत्युक्तमितिशेषः ॥५८५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनःपदार्थमाह अनादाविति यथापूर्वंसंप्रसादानुगतस्तथाःपुनरेषव्रजेदिति ॥ ५८६ ॥ निश्चितआयोगतिस्तमभिलक्ष्येत्यर्थकस्यप्रतिन्यायपदस्यतथायद्योनिकंशरीरंसुप्तेःपूर्वमासीत्तदेवप्राप्नोतीत्यर्थकस्यप्रतियोनिपदार्थस्यपूर्वोत्तरार्द्धाभ्यांक्रमेणार्थमाह यथागतमितितथैवतेनैवगतिमार्गेणेतियावत् योयद्योनिशरीरकःसुप्तिंगच्छतिसभूत्वातद्योनिशरीरकोभूत्वासमायाति अत्रमुखंव्यादायस्वपितीतिवत्क्त्वाप्रत्ययोबोध्यः ॥५८७॥ प्रतियोनिपदार्थमेवव्यवहितोत्तरश्रुत्यनुरोधेनविशदयति व्याघ्रदेहइतिद्वाभ्यां व्याघ्रःसुप्तिंप्राप्यसमागतःसन्

अनादाविहसंसारेसंप्रसादान्त्यनेकशः ॥ यथासमागतःपूर्वंपुनरेषतथाव्रजेत् ॥ ५८६ ॥ यथागतंतथैवायंसमायातिसदापुमान् ॥ योगच्छतिसभूत्वायंसमायातिनचेतरः ॥ ५८७ ॥ व्याघ्रदेहोयदासुप्तिंव्रजेद्व्याघ्रोभवेत्तदा ॥ सुषुप्तादागतोनापितज्जातावपरंवपुः ॥ ५८८ ॥ सिंहोवृकोवराहोवाकीटादिर्मनुजोपिवा ॥ यज्जातियद्वपुःसुप्तिंगच्छेदायात्यसौतथा ॥ ५८९ ॥ विक्षेपदर्शनायैवजंतुःसर्वःसमाव्रजेत् ॥ स्वप्नायैवेतितेनेदमुच्यतेसावधारणम् ॥ ५९० ॥ सुषुप्तादागतःसोयंतत्रस्वप्नेव्यवस्थितः ॥ नारीभोगादिकंयत्तत्पश्यत्यात्मास्वयंप्रभः ॥ नतेनसज्जतेयस्माद्द्रष्टायद्घटादिना ॥ ५९१ ॥

व्याघ्रदेहएवभवतितत्रचतामेवव्यक्तिंप्राप्नोतीत्यर्थः ॥ ५८८ ॥ सिंहइति तथातज्जातितद्व्यक्तिवैशिष्ट्येनेत्यर्थः स्फुटमन्यत् ॥ ५८९ ॥ ननुसुषुप्तायत्समायातितत्स्वप्नायैवेत्यवधारणंनोपपद्यतेसुप्त्यनंतरंजाग्रत्प्राप्तेरपिदर्शनादितिचेन्न स्वप्नपदस्यविपर्ययज्ञानात्मकविक्षेपसामान्यपरत्वादित्याह विक्षेपेति तेनस्वप्नपदस्यविक्षेपसामान्यपरत्वेनस्वप्नायैवेतिसावधारणमुच्यतइति ॥ ५९० ॥ असंगताप्रतिपादकभागार्थमाह सुषुप्तादिति सुषुप्तादागत्यतत्रविक्षेपात्मकेस्वप्नेव्यवस्थितःसन्नात्मायत्किंचिन्नारीभोगादिकंपश्यतितेनविषयजातेननसंबध्यतेयतोद्रष्टाभवति नहिलोकेपिद्रष्टादृश्येनसंसृज्यतेयथाघटादिद्रष्टाघटादिनेतिसंबंधः ॥ ५९१ ॥ ॥४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वात्मनोप्यहमित्याकारेणस्वमेभानंपरेमन्यंतेतथाचात्मस्वरूपस्याप्यननुगमापत्तिरितिचेन्न स्वयंप्रकाशस्यात्मनोविषयतयाभानंन संभवति परेतदुपाधिबुद्धेर्विषयतामात्मनिमन्यमानास्तुभ्रांताइत्याशयेनात्मनोविषयतयाभानांगीकारेआत्मत्वादेवप्रच्युतिःस्यादित्याह स्वसंबद्धमिति स्वसंबद्धंस्वेनात्मनाविशिष्टमितियावत् ईदृशमर्थंकोपिद्रष्टुंविषयीकर्तुंनार्हतियतस्तथात्वेआत्मविशिष्टस्यार्थस्यविषयत्वे स्वीक्रियमाणेस्वस्यात्मनोदृश्यताविषयताबलाद्विशिष्टवृत्तेर्धर्मस्यविशेषणवृत्तित्वनियमात्प्रसक्ताभवेत् तथाचबहिश्चरूपानात्मत्वप्रस क्तिरितिभावः ॥५९२॥यद्यात्मनोविषयविशेषणत्वमभ्युपगम्येततदानागृहीतविशेषणाबुद्धिर्विशेष्येपर्यवतिष्ठतइतिन्यायेनविषयत्वप्रस क्तिरवश्यंस्यादित्याह विशिष्टेति त्रयाणांविशेष्यविशेषणतत्संबंधरूपाणामग्रहेविषयीकरणाभावेसतिविशिष्टस्यग्रहणंविषयीकरणंन

स्वसंबद्धंनकोप्यत्रद्रष्टुमर्हतिकिंचन॥तथात्वेदृश्यतास्वस्यबलादेवसमापतेत्॥ ५९२ ॥ विशिष्टग्रहणंनस्या त्रयाणामग्रहेक्वचित् ॥ योनजानातिसंबंधंविशेष्यंवाविशेषणम् ॥ प्रपद्यतेविशिष्टंसनकदाचित्पुमानिह ॥ ५९३ ॥ योगदंडनराणांस्यादग्रहेनग्रहःक्वचित्॥ दंडीतिततएवात्मवैशिष्ट्येत्स्यात्मनोगतं॥५९४॥ नैवात्म नात्मनःशक्योग्रहःकेनापिवस्तुना॥ गृह्णीयादत्रकोनाममुष्टिंतेनैवमुष्टिना ॥ ५९५॥ अपिस्वस्यग्रहेस्वस्यस र्वथास्यादनात्मता॥ गृह्यमाणंजडंदृष्टमात्मतानजडेभवेत्॥ ५९६॥ आत्मताचेज्जडस्यस्याद्धटस्यैषानकिंभ वेत्॥ खादीनांवाप्यमूर्त्तानांजडानामात्मतानहि॥ ५९७॥

स्यात्एतदेवस्फुटयति योनेत्यादिना ॥५९३ ॥ योगेति यथासंयोगस्यसंबंधस्यदंडस्यविशेषणस्यपुरुषस्यविशेष्यस्यचाग्रहेसतिदंडीत्या कारकोविशिष्टग्रहःक्वचिदपिनस्यात् ततएवन्यायादात्मवैशिष्ट्येविषयाणामंगीकृतेसतिआत्मनोविशेषणीभूतस्यगतंज्ञानविषयत्वरूपं प्रसज्जेतेतिशेषः ॥ ५९४ ॥ तच्चव्याहतमितिसदृष्टांतमाह नैवेति केनापिवस्तुनैवात्मनोग्रहःकर्त्तुमशक्यः यथादक्षिणहस्तमुष्टिनादक्षिण हस्तमुष्टिर्ग्रहीतुमशक्यइतिसंबंधः ॥ ५९५ ॥ किंचात्मनोविषयत्वस्वीकारेविषयत्वव्यापकस्यजडत्वस्यप्रसक्त्यानात्मत्वंस्यादित्याह अ पिस्वस्येति स्वस्यात्मनः ॥ ५९६ ॥ परिच्छिन्नेविभुनिवावस्तुनियत्रयत्रजडत्वंतत्रानात्मत्वमितिव्याप्तिमाह आत्मतेति एषात्मताखादी नामाकाशकालदिशाममूर्त्तानांविभूनामपिजडत्वेनात्मतानदृष्टेतिशेषः ॥ ५९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तविचारस्यप्रकृतोपयोगमाह ततइति ततोग्राहकस्यग्राह्यकोटावनिवेशात्स्वप्नदृश्यैःसहद्रष्टुर्नसंबंधः यतोद्रष्टृत्वंदृश्यासंबंधव्याप्यत्वा त्तत्रहेतुर्भवतीत्यर्थः ॥ ५९८ ॥ द्रष्टृत्वस्यदृश्यासंबंधेनव्याप्तिंविशदयति यद्येनेति येनद्रष्ट्रायद्दृश्यतेतेनदृश्येनासौद्रष्टानबध्यतेयथाघटद्र ष्टाघटेनेत्यन्वयः ॥ ५९९ ॥ फलितमाह अनन्वागतइति अतोऽसंगत्वात्तत्रजागरणेसघटद्रष्टातेनघटादिरूपदृश्येनानन्वागतःअनुगतो नभवत्येवतथास्वप्नद्रष्टास्वप्नदृश्येनासंगत्वादनन्वागतइतिसंबंधः ॥ ६०० ॥ तथाचयत्त्वयाप्रथमप्रश्नेस्वप्नेससंगत्वदोषेणात्मनोमोक्षायो ग्यत्वंसूचितंतन्निरस्तमित्याह यतएवेति यतएषपुमानुक्तविधयास्वप्नेसंगलेशेनापिवर्जितस्तस्मात्स्वप्रकाशरूपेणमोक्षायमोक्षयोग्यएवहे

ततःस्वप्नेत्रयद्दृश्यंनारीभोगाऽदनादिकं॥ संबंधस्तेननद्रष्टुर्द्रष्टृत्वादेवहेतुतः ॥ ५९८ ॥ यद्येनदृश्यतेद्रष्ट्रातेना सौबद्ध्यतेनहि॥ यथापुमान्घटद्रष्टाबद्ध्यतेनघटेनसः॥ ५९९॥ अनन्वागतएवातस्तेनदृश्येनतत्रसः॥ स्वप्न द्रष्टाभवेत्स्वप्नदृश्येनासंगरूपधृक्॥६००॥ यतएवपुमान्स्वप्नेसंगलेशविवर्जितः॥ स्वप्रकाशात्मनातस्मान्मो क्षायैषनरेश्वर॥ ६०१ ॥एवमेवेतिजनकोयाज्ञवल्क्यमभाषत ॥ याज्ञवल्क्येतिसंबोध्यमुनिंतंद्विजसत्तमं ॥ ६०२ ॥ याज्ञवल्क्योपितंप्राहजनकंनृपतिंपुनः॥ पुंसोजागरणावस्थासर्वस्यास्तितथैवच ॥ ६०३॥ तत्र मार्गाननेकांश्चदृष्ट्वैवभयमप्यदः॥ पुण्यंपापंतथात्मानंयातिजागरणायसः ॥ केवलायबहिष्क्वायसमायाति यथागतं॥ ६०४॥

नरेश्वरइति ॥ ६०१ ॥ एवमुक्तोराजाप्रथमप्रश्नोत्तरमेवमेवेत्याकारेणांगीचकारेत्याह एवमेवेति॥६०२॥जाग्रत्यसंगत्वबोधिकायाःषोड श्याःकंडिकायाअर्थंवदन्द्वितीयोत्तरमभिनयति याज्ञवल्क्योपीतिपंचभिः हेराजन्सर्वस्यजंतोर्जागरणावस्थापितथैवस्वप्नावस्थावदेवा स्ति यथास्वप्नावस्थाद्रष्टुर्नलेपाधायिकातथाजाग्रदवस्थापीत्युत्तरार्द्धार्थः॥६०३॥तथैवेत्युक्तंसाम्यमेवस्फुटयति तत्रेति तत्रस्वप्नेअनेका न्नाडीमार्गान्दृष्ट्वातथापुण्यपापफलाकारेणपरिणतमात्मानंबुद्धिंदृष्ट्वैवनतुकिंचित्कृत्वासआत्माजागरणाययाति तत्रैतावान्स्वप्नाद्विशे षः यज्जागरणेकेवलंबहिष्क्वंवर्ततेस्वप्नेतुयद्यपिजाग्रदपेक्षयांतरत्वमपिवर्त्ततेतथापिसंप्रसादापेक्षयाबहिष्क्वाययथागतंगमनमार्गमनतिक्र म्यागमनंसममेवेतिभावः ॥ ६०४ ॥ ॥४७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रष्टृत्वेनात्मनोऽसंगताप्युभयत्रसमेत्याह यथेति यथाएषपुमान्स्वप्नेदृश्येनसंगविवर्जितस्तथाजाग्रत्यपिदृश्येनसंगविवर्जितोयतोद्रष्टृत्वेननिःसंगोभवतीत्यन्वयः ॥ ६०५ ॥ एतदेवस्फुटयति स्वप्नदृश्यैरिति स्वयमेवेत्यस्यस्वभावादेवेत्यर्थः तथाचयथास्वप्नेद्रष्टाद्रष्टृस्वभावादेवहेतोःस्वप्नदृश्यैर्नसज्जतेतथाजागरणेपीतिसंबन्धः ॥ ६०६ ॥ फलितमाह ततइति तेनदृश्यजातेनअनन्वागतोऽसंबद्धः शेषंस्पष्टम् ॥ ६०७ ॥ एकस्यक्रमेणस्थानसंबंधेपिनभेदइत्याकारस्यतृतीयोत्तरस्यप्रतिपादकयोःसप्तदश्यष्टादश्योःकंडिकयोरर्थमाह याज्ञवल्क्यो

यथास्वप्नेपुमानेषभवेत्संगविवर्जितः॥ द्रष्टादृश्येननिःसंगःस्वप्नवत्संगवर्जितः॥ ६०५ ॥ स्वप्नदृश्यैर्यथास्वप्ने स्वयमेवनसज्जते॥ तथाजागरणेदृश्यैरपिद्रष्टानसज्जते ॥ ६०६ ॥ ततोजागरणेप्यात्मातेनानन्वागतोभवेत्॥ असंगोयतएवायंपुरुषःस्वप्नदृक्समः॥ अंगीचकारराजातदेवमेवेतिपूर्ववत्॥ ६०७॥ याज्ञवल्क्योपि तंप्राहयथापूर्वंपुनर्मुनिः॥ अवस्थाद्वयमेकस्यदृष्टांतेनातिबुद्धिमान्॥ ६०८ ॥ अत्रजागरणेरत्वावध्वाद्यैः स्वात्मनःप्रियैः॥ गत्वाचविविधान्मार्गान्पुरग्रामादिमध्यगान्॥ ६०९ ॥ सुखदुःखकरींबुद्धिंपुण्यपापसमुद्भवां॥ दृष्ट्वैवस्वप्नवद्गच्छेत्पुनःस्वप्नंस्वयंप्रभः॥ ६१० ॥ तत्रजागरणात्स्वप्नंस्वप्नाज्जागरणंपुनः॥ एकस्यगच्छतः पुंसोदृष्टांतंविद्धिभूपते॥ ६११ ॥ महानद्यायथाकूलेउभेगच्छतिसर्वदा ॥ एकएवमहामीनोत्द्यपांवामंचदक्षिणम्॥ ६१२॥ एवमात्मासदैवायमेकएवस्वयंप्रभः॥ स्थानद्वयंप्रयात्यत्रस्वप्नंजागरणंचसः ॥ ६१३॥

पीतिषड्भिः यथापूर्वंपूर्ववाक्यसमानाकारवाक्यंसप्तदशकंडिकारूपमुच्चरन्याज्ञवल्क्योष्टादशकंडिकोक्तदृष्टांतेनैकस्यात्मनःक्रमेणावस्थाद्वयमाहस्मेतिसंबंधः ॥ ६०८ ॥ तत्रसप्तदश्याअर्थंसंगृह्णाति अत्रेतिद्वाभ्यां अत्रप्रसिद्धेजागरणेस्थूलैर्वध्वादिरूपविषयैरत्वाक्रीडित्वातथास्थूलान्मार्गान्चरित्वातत्रापितद्विषयाकारांपुण्यपापाभ्यांसुखदुःखाकारांचबुद्धिस्वप्नवद्दृष्ट्वैवनतुकिंचित्कृत्वापुनःस्वप्नंव्रजतीतिद्वयोःसंबंधः॥ ६०९ ॥ ६१० ॥ अष्टादश्याअर्थंदर्शयति तत्रजागरणादितित्रिभिः स्पष्टं ॥ ६११ ॥ महेति यथाएकोमीनोमहानदीसंबंधिनीनामपांजलानांवामदक्षिणरूपेउभेकूलेगच्छतीत्यन्वयः॥ ६१२ ॥ दार्ष्टांतिकमाह एवमिति ॥ ६१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथस्वप्नजागराभ्यांतद्धर्मैःकामादिभिश्चात्मनोनस्वाभाविकःसंबंधस्तेषांसुषुप्तौ कारणेलयेप्यात्मनस्तद्भासकत्वेनावस्थानादितिसूचयितुं सदृष्टांतंसुषुप्तिप्राप्तिप्रतिपादिकायास्तद्यथास्मिन्नाकाशेइत्यादिकायाःकंडिकायाअर्थंनिरूपयति सुप्तावितिपङ्क्तिः सुप्तौसुषुप्तिप्राप्तिविषयंदृष्टांतंशृणु यथाकश्चित्पक्षीश्येनोगरुडोवाभूमिसमीपस्थमाकाशदेशंक्रांत्वाआक्रम्यपुनर्भूमेर्दूरस्थितेऽतएवदृष्टेरगोचरेआकाशेव्रजेदितिद्वयोरन्वयः ॥६१४ ॥६१५॥ पक्षिणोदूरगतौफलरूपंहेतुचतुष्टयंविकल्पितंनिर्दिशति स्त्रियइति स्त्रियःपक्षिण्याःप्राप्तिःभक्ष्यप्राप्तिःपक्ष्यन्तरहननंस्वेच्छापूरणंचेतिहेतुचतुष्टयाकारः ॥६१६॥ गच्छन्नेवमिति एवंरुचयादिरागद्वेषनिमित्तंयथाभवतितथादूरंगच्छन्सन्यदा

सुप्तावपिमहाराजदृष्टांतंशृणुधीधन॥ नीडेस्थितोयथाकश्चित्श्येनोगरुडएववा॥ ६१४॥ पक्षीभूमिसमीपस्थंदेशंक्रांत्वाव्रजेत्पुनः॥ अस्मिन्दूरस्थितेभूमेराकाशेदृष्ट्यगोचरे॥ ६१५॥ स्त्रियोभक्ष्यस्यवालाभंसमुद्दिश्यैषणावृतः॥ कोपात्पक्ष्यंतरंहंतुमथवास्वेच्छयैवहि ॥६१६॥ गच्छन्नेवंभवेत्श्रांतःपक्षौस्वस्यगतिप्रदौ॥ संकोच्यात्मशरीरेसौनीडमेवाभिधावति॥ ६१७॥ एवमात्मास्वयंज्योतिःस्वप्नजागरणांबरे ॥कर्मपक्षोव्रजन्श्रांतोहृदयाकाशमाव्रजेत्॥ ६१८॥ संप्रसादःसमुद्दिष्टोयत्रसुप्तोनकंचन ॥ कामंकामयतेनापिस्वप्नंकंचनपश्यति॥ ६१९॥

श्रांतोभवतितदासौपक्षीस्वस्यगतिप्रदौपक्षौआत्मशरीरेसंकोच्यविश्रामायनीडमेवाभिधावतीति ॥ ६१७॥ एवमात्मेति एवंयथोक्तोदृष्टांतस्तथायमात्माविक्षेपस्थानेस्वप्नजागरणरूपेंबरेआकाशेपुण्यपापरूपपक्षाभ्यांविशिष्टोव्रजन्धावन्सन्यदाश्रांतोभवतितदाहृदयाकाशंसुप्तिस्थानमागच्छतीति ॥ ६१८ ॥ संप्रसादइति यत्रहृदयाकाशेसुप्तःसुषुप्तिविशिष्टोयमात्मावैमल्यप्रवृत्तिनिमित्तकेनसंप्रसादशब्देनोक्तः कस्यमलस्यतत्रत्यागइतिचेदविद्याकामकर्माख्यस्येत्याह नकंचनेत्यादिना कामशब्दःकर्मघञंतः स्वप्नपदेनविपर्ययाख्याकार्याविद्याबोधिता तथाचयत्रनकंचनविषयमिच्छतिनवाकंचनविषयंपश्यतीत्यर्थः विपर्ययरागयोरभावोक्त्याचतन्निमित्तकर्माभावोपिसूचितः ॥ ६१९ ॥ ॥४८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंस्थूलसूक्ष्मशरीराभ्यांतद्धर्मैश्चात्मनःस्वाभाविकःसंबंधोनभवतीत्युक्तमथकारणशरीरादविद्याख्यादात्मनोविवेकंदर्शयितुमविद्यास्वरूपस्यतदावृतात्मस्वरूपस्यचप्रतिपादिकायाविंशतितम्याःकंडिकायाअर्थंद्वाषष्टिश्लोकैर्निरूपयंस्तत्रजाग्रतःसकाशात्स्वप्नसुषुप्तिप्राप्तिद्वारभूतानांनाडीनांस्वरूपप्रदर्शकस्यपूर्णाइत्यंतभागस्यार्थंवर्णयति मार्गोयोयमितिनवभिः हेराजन्स्तआत्मनःसर्वास्ववस्थासुगमनागमनार्थंमार्गोयस्तुभ्यंमयाश्रौतप्रतिन्यायपदेनोक्तःसमार्गोहृदयनिर्गतनाडीरूपोबोध्यः यासांहृदयकंदनिर्गतनाडीनांमध्येएकाधिकंशतंप्रधानमत्रशास्त्रेवेदांतेप्रश्नोपनिषदादावीरितंतासांप्रधाननाडीनांवल्लीनिभानांशाखाभूतानाड्यस्तुकोटिशोबोध्याइतिद्वयोःसंबंधः निश्चित

मार्गोयोयंमयातुभ्यंप्रतिन्यायमितीरितः॥ अवस्थास्विहसर्वासुगमनागमनेसतः॥ ६२०॥ मार्गभूताःस्थिताएवह्येताहृदयनिर्गताः॥ नाड्यएकाधिकंयासांप्रधानंशतमीरितं॥ शास्त्रेत्रकोटिशःसंतितासांशाखासमाःशिराः॥ ६२१॥ सहस्रधाभवेत्केशोयदिभिन्नस्तदोपमा॥ कथंचित्परिमाणेसाभवेद्वापिनवाभवेत्॥ ६२२॥ आसांहिताइतिप्रोक्तंनामधेयंमनीषिभिः॥ मातुःस्तनस्थितायद्वत्स्तनंधयहिताःशिराः॥ वपुर्हितास्तथाराजन्नाड्योवपुषिसंश्रिताः॥ ६२३॥ अन्नपानरसंशश्वत्सर्वजंतुहितंयतः॥ नयंत्यविरतंतेनहिताएताःशिराःस्मृताः॥ ६२४॥ अन्नपानरसैःपूर्णाश्चित्रवर्णोपमैःसदा॥ नीरैर्नानाविधैर्यद्वत्सरितोभूतलस्थिताः॥ ६२५॥

आयोगतिर्मार्गइतियावत् तमभिलक्ष्येतिप्रतिन्यायपदार्थोऽधस्तादुक्तः॥ ६२०॥ ६२१॥ तासांनाडीनांसूक्ष्मतांदर्शयति सहस्रधेति यदिएकःकेशःसहस्रधाभिन्नोविभक्तोभवेत्तदातासांनाडीनांपरिमाणेसाप्रसिद्धाउपमादृष्टांतोभवेदुपपद्येतअथवानभवेत्ततोपिसौक्ष्म्यादितिभावः॥ ६२२॥ तासांहिताइत्याकारकनामधेयस्यान्वर्थतांदर्शयति आसामिति यथामातृस्तनगतानाड्योबालस्यहितकरामातृभुक्तान्नरसप्रापकत्वात्तथासर्वशरीरेन्नरसप्रापकत्वादासांनाडीनांहिताइतिनामोक्तमितिद्वयोरर्थः॥ ६२३॥ ६२४॥ तासांनाडीनांवर्णान्नपानरसप्रयुक्तान्दर्शयति अन्नपानरसैरित्यादिना चित्रानानाविधावर्णास्तत्प्रयुक्ताउपमाश्चयेषामेतादृशैरन्नरसैःसदापूर्णानानाविधनीरैर्नद्यइवेत्यन्वयः तादृशरससंबंधाच्चनाड्योपिनानारूपाइतिभावः॥ ६२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसानांवर्णान्कीर्तयति अन्नपानरसास्तास्विति यथाचित्रकारस्यगृहेशुक्लादिवर्णारसाःपात्रेषुनिहिताःसंतितथैतासुनाडीषुकफवातपि त्ताऽल्पपित्तरुधिरसंभृतासुयथाक्रमंशुक्लादिवर्णानिहिताइत्यर्थः तथाचोक्तंसुश्रुते अरुणाःशिराःपित्तवहानीलावातवहाःस्मृताः अस्र ग्वहास्तुरोहिण्योगौर्यःश्लेष्मवहाःस्मृताः अरुणाःपिंगलारोहिण्योरक्ताइतितदर्थः ॥ ६२६ ॥ ननुदूर्वादलश्यामइत्यादौहरितेनीलपर्या यप्रयोगादत्रनीलहरितपदयोःपौनरुक्त्यमित्याशंकामर्थभेदप्रदर्शनेनवारयति नीलमिति अत्रांजननिभंनीलमितिविवक्षितं हरितंतुदू र्वादलनिभमतोनपुनरुक्तिरिति ॥ ६२७ ॥ पिंगलमिति पिंगलपदेनस्वर्णवर्णसमःपीतवर्णोत्रविवक्षितः नन्वन्येपिकफादिसन्निपातजाव र्णाःसंतीतिचेत्तेपिकफादिवर्णोपन्यासेनोपलक्षिताइत्याह तेनेत्यादिना तेनकफादिसंबंधिनांप्राकृतवर्णानामुपन्यासेनसर्वेवर्णाउदाहृ

अन्नपानरसास्तासुशुक्लानीलाश्चपिंगलाः॥हरितालोहिताःसंतिचित्रकारगृहेयथा॥६२६॥नीलमंजनसंका शमीरितंहरितंपुनः॥दूर्वादलनिभंतेननैतयोःपुनरुक्तता ॥ ६२७॥ पिंगलंस्वर्णवर्णस्यात्तेनसर्वउदाहृताः॥ वर्णायेशुक्लरक्तादेरन्यथाभावतःस्मृताः॥ नाडीमार्गैरयंगत्वास्वप्नंवासुप्तिमेतिवा ॥६२८॥ स्वप्नोयःसभवेद्द्वेधादुःखदःसुखदोपिच ॥ यथाजागरणंपुंसोदुःखदंसुखदंतथा॥ ६२९ ॥ दुःखदायादृशाभावास्तादृशाःसुखदाअपि॥ पुंसोजागरणेदृष्टाःस्वप्नेतेतादृशाःस्मृताः ॥ ६३० ॥

ताउपलक्षिताः केते येवर्णाःशुक्लरक्तादिवर्णानामन्यथाभावतःपरिणामतःस्मृतालोकेपिप्रसिद्धाइत्यर्थः दृश्यंतेहिचित्रकराद्विचित्रवर्णयोज नेनापूर्ववर्णजनयंतस्तथाचधातुवैषम्यजाःसर्वेवर्णाअत्रसंगृहीताइतिभावः वर्णितनाडीनांप्रकृतोपयोगंदर्शयति नाडीमार्गैरिति स्वप्नंवा सुप्तिंवाएतीत्यन्वयः ॥ ६२८ ॥ अथयत्रैनमित्यादिभागस्यार्थंवदन्स्वप्नमेकार्यद्वारेणाविद्यायाःस्वरूपंस्पष्टयति स्वप्नोयइत्यादिना नाडी मार्गंप्राप्यस्वप्नसुषुप्त्योर्मध्येयःस्वप्नःसजाग्रद्वद्यदापापसहकृताविद्याजन्यस्तदादुःखदोभवतिपुण्यसहकृताविद्याजन्यस्तुसुखदोभवतीति द्विविधइत्यर्थः ॥ ६२९ ॥ नापिस्वप्नपदार्थेष्वपिजाग्रत्पदार्थेभ्यःस्वरूपेणदुःखादिजननव्यापारेणवाविशेषइत्याह दुःखदाइति यादृशा श्चोरादिरूपाःप्रतिकूलतयाज्ञाताःसंतोजागरणेदुःखदादृष्टाः सुखदाअपियादृशाःस्रक्चंदनादिरूपाअनुकूलतयाज्ञातास्तेभावाःस्वप्नेपि तादृशाइत्यन्वयः ॥ ६३० ॥ ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रदुःखदंस्वप्नमुदाहरणेनस्फुटयति अतइतिसप्तभिः अतउक्तसाम्यात् स्वप्नेदुःखभोगकालेदुःखदेपापकर्मणिअविद्यासहकारितयास्थि
तेसत्येनमात्मानंस्वप्नदृशंदीनभूतंचोरादयोयथाक्रमंशस्त्रादिभिर्द्रव्याद्यर्थंघ्नंतीवहिंसंतीव यतःस्वार्थसाधकाः कीदृशमेनमात्मानं वस्तुतो
ऽच्छेद्यममरंचेतिद्वयोःसंबंधः ॥ ६३१ ॥ ६३२ ॥ अपरमुदाहरति यथेति यथावयसआयुषःक्षयेअपचयकालेजरापुमांसंवशीकुर्यात्
तथाकेचिद्दुर्बुद्धयोधूर्ताःसर्वगमवश्यंवशीभावानर्हमप्येनंदेवंजिनंतीववशीकुर्वंतीवेत्यर्थः यद्यपिज्याधातुःक्र्यादिकोवयोहानौवर्त्ततेतथा
पिजीर्णानांपारवश्यप्रसिद्धेरयमौपचारिकःप्रयोगइतिबोध्यं ॥ ६३३ ॥ एतदेवदृष्टांतेनस्फुटीकरोति यथाकुनृपतेरिति यथाकुत्सित

अतःस्वप्नेदुःखकालेदुःखदेकर्मणिस्थिते ॥ एनंस्वप्नदृशंदीनंचोरव्याघ्रवृकादयः ॥ ६३१ ॥ निष्ठुराःक्रूरकर्मा
णःशस्त्रैर्दंतैर्नखैःखुरैः ॥ आकाशसदृशंशस्त्रैरच्छेद्यंवधवर्जितं ॥ घ्नंतीवद्रव्यमांसादिलाभार्थंस्वार्थसाधकाः
॥ ६३२ ॥ यथाजरावशीकुर्यात्पुमांसंवयसःक्षये ॥ अवश्यंसर्वगंदेवंजिनंतीवेहदुर्द्धियः ॥ ६३३ ॥ यथाकु
नृपतेर्भृत्याअर्थार्थंधनिनोखिलान् ॥ वशीकुर्वंतिबलतोदीनान्नाथविवर्जितान् ॥ तथास्वप्नेप्यमुंकेचिद्वशीकु
र्वंतिदेहिनं ॥ ६३४ ॥ यथाकाष्ठमयोहस्तीहस्तीवनृपवेश्मनि ॥ सूत्रैर्विद्रावयेद्बालान्भयसंजातवेपथून् ॥ स्व
प्नेहस्तीतथादृष्टोविद्रावयतिदेहिनं ॥ ६३५ ॥ सभायांचित्ररूपायांसमायांसर्वतोयथा ॥ मत्वागर्त्तमिवाप्रा
ज्ञोनिपतेन्मूढचेतनः ॥ एवंगर्त्तमिवस्वप्नेपतत्यात्मातिमूढधीः ॥ ६३६ ॥ भयंजागरणेपश्येद्यत्स्वप्नेपितदेव
सः ॥ मन्यतेऽविद्ययात्मायंसर्वमप्यभयःसदा ॥ ६३७ ॥

स्यराज्ञोभृत्याःपुरुषाधनाढ्यान्धनंग्रहीतुंवशीकुर्वंतितथैनंस्वप्नेकेचिद्वशीकुर्वंतीति ॥ ६३४ ॥ तथाविधमन्यंस्वप्नंदर्शयति यथाकाष्ठेति
यथाराजद्वारगतहस्तिवद्दृश्यमानःकाष्ठमयोहस्तीसूत्रैर्बद्धश्चालितःसन्बालान्भयेनकंपमानान्विद्रावयेत्पलायमानान्कुर्यात्तथास्वप्न
दृष्टोहस्तीएनंविद्रावयेदित्यर्थः यद्यपिश्रुतौछोधातुश्छेदनार्थकस्तथापिविपूर्वकस्यविद्रावणार्थकत्वमपिसंभवतीतिबोध्यम् ॥ ६३५ ॥ ता
दृशमितरंदर्शयति सभायामिति यथाचित्ररूपायांसर्वतःसमायांचसभायांसमदेशंगर्तवन्मत्वादुर्योधनवन्मूढोनिपतेत्तथास्वप्नेमिथ्यागर्त्ते
निपततीत्यर्थः ॥ ६३६ ॥ अद्वितीयत्वेननिर्भयोप्यात्मास्वप्नेजागरणवदविद्ययाभयंपश्यतीत्याह भयमिति यज्जागरणेभयंपश्येत्तदेवस
र्वंस्वप्नेप्यविद्ययाआत्मामन्यते कीदृशः सदाऽभयोपीत्यन्वयः ॥ ६३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविद्यापदार्थंवक्तुंविद्यास्वरूपमाह विशिष्टमिति पदांतरैरपिनिर्ब्रूयादितियास्कोक्तेर्विद्यापदेविपदार्थौविशिष्टमितिदपदार्थौदद्यादितिया पदार्थौगमयेदिति याप्रापणेइतिस्मृतेः तथाचविशिष्टंविलक्षणंयतःसर्वगंविभुंसर्वसंनिभंसर्वपदार्थाकारंसर्वात्मानमितियावत् स्वप्रकाशं सदानंदरूपंचएतादृशमात्मनोरूपंदद्यात्संनिहितंकुर्यात्गमयेदात्मतयाप्रकाशयेच्च तेनैतेनयोगार्थेनविद्येत्युच्यतेसाचविद्यावृत्त्युपलक्षित चिदात्मरूपेत्यर्थः ॥६३८॥उक्तविद्याविरुद्धमज्ञानमयेवाविद्येत्युच्यतेइत्याह ततइति ततउक्तविद्यास्वरूपाद्यदन्यत्परिच्छिन्नानात्मजडा सद्दुःखरूपंतदविद्येत्युच्यते साचाविद्याअज्ञानरूपैवातोऽज्ञानान्नभिन्नेत्यर्थः ॥ ६३९ ॥ अविद्यायाअज्ञानरूपतांविशदयति स्वसजाती

विशिष्टमात्मनोरूपंसर्वगंसर्वसंनिभं॥स्वप्रकाशंसदानंदंदद्याद्वागमयेच्चसा॥तेनैवसाभवेद्विद्यासर्वात्माचि द्वपुःपुमान् ॥ ६३८ ॥ ततोन्यद्यदसद्रूपंतदविद्येतिगीयते॥ अज्ञानंचभवेत्तद्धिनातोन्यद्विद्यतेपरं ॥ ६३९ ॥ स्वसजातिविजात्युत्थभेदत्रयविवर्जितः॥ आनंदात्मास्वप्रकाशएकश्चेत्सकथंभवेत्॥ ६४० ॥ चित्ररूपःक थंवास्यसृष्ट्यादिकमितोभवेत्॥ इत्याक्षेपेयदज्ञानंतदविद्येतिगीयते॥ ६४१ ॥ अनयामन्यतेस्वप्नेवधंवश्यं पलायनं॥ पातंचभयजातंतदसदेवसहेतुकम्॥ ६४२ ॥ वध्वादिजनितंमोहमेवमेवविपर्ययम् ॥ स्वप्नेगतः पुमान्व्यर्थमन्यतेऽविद्ययैवतं ॥ ६४३ ॥

ति सजातीयादिभेदत्रयराहित्येनानंदरूपःस्वप्रकाशएकोयमात्मायदिवस्तुतोभवतितर्हिसचित्ररूपोनानारूपःकथंसंपन्नः इतउक्तरूपा दात्मनःसकाशादस्यजडादिरूपस्यजगतःसृष्ट्यादिचकथंजातमित्याकारकेआक्षेपेकेनचित्कृतेसतियदाक्षेपश्रोतुश्चित्तेनजानामीत्याकारे णानुभूयमानमज्ञानंतदेवाऽविद्यास्वरूपमितिद्वयोरर्थः ॥ ६४० ॥ ६४१ ॥ एवमविद्यास्वरूपंव्युत्पाद्यतस्याःस्वप्नेस्पष्टतामभिनयति अ नयेति अनयाऽविद्ययैवस्वप्नेवधादिकंवर्णितंपश्यति कीदृशंवधादिकं सहेतुकमसत् तस्यवधादेर्हेतवश्चोरादयोप्यसंतोमिथ्याभूताइतियाव त् वश्यमितिभावप्रधानोनिर्देशः वध्वादीति एवंवध्वादिवदेववध्वादिवियोगप्रयुक्तंमोहंविषादंतथापरंविपर्ययंतंप्रसिद्धंस्वप्नेयन्मन्यतेतदवि द्ययैवमन्यतेइतिद्वयोरर्थः ॥ ६४२ ॥ ६४३ ॥ ॥५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविद्ययैवेत्यवधारणमुपपादयति उक्तमिति श्रुत्योक्तं कथमुक्तमितिचेदत आह स्वप्नेइति स्वप्नेरथादयोनसंतिअतस्तान्रथादीन्विनातैरथा दिभिर्जन्येसुखदुःखेकथंस्यातांसंभवेतांयतोऽकारणेप्रसिद्धकारणवर्जितेअतोऽविद्ययैवेत्यवधारणमुपपन्नमिति॥ ६४४॥ असंभवमेवविशदयति सुखेति अल्पदेशेहृदयेरथादीनांमहतांमानाभावात्सुखादिसामग्र्यामुख्यायाःसंभवोनास्तितेनासंभवेनएषांरथादीनांवास्तवीसृष्टिरपिनसंभवतिअतःस्वप्नेहृदयेवस्तुतोजगत्सृज्यतइतिकेनवक्तुंशक्यमितिशेषः॥ ६४५॥ ६४६॥ तथाचदेशकालादिलक्षणकारणाभावात्स्वप्नपदार्थामायामायामात्रंतुकात्स्न्येनानभिव्यक्तस्वरूपत्वादितिन्यायादित्याह देशेति स्वयोग्यदेशाद्यभावेपियज्जायतेतन्मायामात्रं

उक्तंस्वप्नेनसंत्यत्ररथाद्यास्तान्विनाकथं॥ अकारणेकथंस्यातांसुखदुःखेरथादिजे॥ ६४४॥ सुखदुःखकराभावानसंतिहृदयेसदा॥ हृदयस्याल्पदेशत्वाद्रथादेश्चमहत्त्वतः॥ ६४५॥ सृष्टिरप्यत्रतेनैषांस्वप्नेनैवोपपद्यते॥ वास्तवीहृदयेकेनवस्तुतःसृज्यतेजगत्॥ ६४६॥ देशकालनिमित्तानामभावेजायतेहियत्॥ मायाकार्यंभवेत्तत्खेगंधर्वनगरंयथा॥ ६४७॥ स्वप्नगस्यभवेच्छक्तिःसर्वसृष्ट्याद्यलौकिकी॥ येयंसाकथिताऽविद्यासर्वशास्त्रविशारदैः॥ ६४८॥ यद्यन्यत्रभवेच्छक्तिरविद्यातस्ततस्तुका॥ किंतयासर्वमेवांतर्नयेद्विश्वंजडाजडं॥ ६४९॥ अथवासर्वदेशेषुस्वयंगत्वावलोकयेत्॥ पक्षद्वयेपिमायैवसैषाशक्तिःप्रसज्जते॥ ६५०॥

यथानगराधारतानर्हेखेगंधर्वनगरमिति॥ ६४७॥ साचमायाख्याआत्मनःशक्तिरविद्यातोनभिन्नेत्याह स्वप्नगस्येत्यादिना स्वप्नगस्यात्मनोयेयंशक्तिः कीदृशी सर्वस्यसृष्ट्यादिकरणेनालौकिकीलोकेऽप्रसिद्धासाऽविद्येतितत्त्वविद्भिरुक्तेत्यर्थः लोकेपिमायामणिमंत्रादिक्षोभ्याऽविद्यातोनभिन्नेत्युक्तंप्रथमेध्याये॥ ६४८॥ तस्याअविद्यातोभेदशंकामेवापाकरोति यदीति यदिसाशक्तिरविद्यातोभिन्नाभ्युपेयतेतत्तमविद्यातोभेदपक्षमाश्रित्यापिकाकुत्रकार्येक्षमाभ्युपेयतेइत्यर्थः तस्मात्कार्यद्वयंविकल्पयति किंतयेति तयाऽविद्याभिन्नत्वेनाभ्युपगतयाशक्त्याआत्मस्वप्नेबाह्यंप्रपंचमंतर्हृदयेनयतिप्रापयतिकिंवास्वयंवहिर्गत्वाविलोकयतिअनयोरुभयोरपिपक्षयोरविद्यातोभेदस्तस्याःशक्तेर्नसंभवतीतिद्वयोरर्थः॥ ६४९॥ ६५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविद्यातोभेदासंभवप्रतिज्ञायामुक्तयोर्व्यापारयोरविद्यातोऽन्यत्रासंभवंहेतुतयावदंस्तत्रप्रथमस्य विश्वांतरानयनलक्षणस्यासंभवमाह अं गुष्ठमात्रेइतिद्वाभ्यां सत्यतइतिसार्वविभक्तिकस्तसिः तथाचसत्यंबाह्यप्रपंचंस्वल्पहृदयाकाशेकथमानयेत्यथास्थूलस्यशतपादस्य चभु जंगस्यकर्णयोःस्थापनंविनामायामशक्यंतथैतदपीतिद्वयोरर्थः ॥ ६५१ ॥ ६५२ ॥ द्वितीयस्यबहिर्गत्वावलोकनलक्षणव्यापारस्यापि

॥५१॥ मायातइतरत्रासंभवमाह बहिरपीति अत्रशयनदेशेप्राणेषुवसत्स्वप्यस्यस्वप्नद्रष्टुर्यद्बहिर्द्वीपांतरादिषुक्षणाद्गमनंतदपिमायांपरिहायनस्या दित्यन्वयः ॥ ६५३ ॥ अत्रदृष्टांतमाह अत्रस्थितइति यथात्रभूलोकेस्थितःक्षणात्सूर्यलोकंद्रष्टानागच्छेद्विनामायांतथास्वप्नेस्वरादिकं

अंगुष्ठमात्रेहार्देस्मिन्नवकाशेकथंजगत् ॥ जडाजडमिदंसर्वमानयेत्सत्यतःपुमान् ॥ ६५१ ॥ स्थूणास्थूलंशत पदंभुजंगंकर्णरंध्रयोः ॥ स्थापयेन्नविनामायांयथात्वदितथाजगत् ॥ ६५२ ॥ बहिरप्यस्यगमनंक्षणाद्वीपांत रादिषु ॥ नमायांपरिहायस्यात्प्राणेष्वत्रवसत्स्वपि ॥ ६५३ ॥ अत्रस्थितःक्षणात्सूर्यलोकंगत्वानचाव्रजेत् ॥ विनामायांयथातद्वत्स्वप्नेद्रष्टास्वरादिकं ॥ ६५४ ॥ विश्वस्यानयनेचित्तेबहिर्गत्वाऽवलोकने ॥ नविद्यतेश्रुतिः स्रष्टैसातुकर्त्रेतिविद्यते ॥ ६५५ ॥ अपिनीत्वाजगत्सर्वमंतःपश्यतिवाबहिः ॥ गत्वोभयत्रनास्यत्रसंवादश्चे तनैःसमं ॥ ६५६ ॥

स्वर्गादिकंद्रष्टानागच्छेदित्यर्थः ॥ ६५४ ॥ किंचोक्तव्यापारविशिष्टायाःशक्तेरविद्याभिन्नायाःकल्पनंश्रुतिबाह्यमित्याह विश्वस्येति विश्व स्यबाह्यप्रपंचस्यचित्तेहृदयदेशआनयनप्रतिपादिकाबहिर्गत्वावलोकनप्रतिपादिकावाकाचित्श्रुतिर्नास्ति हृदयांतरेवविश्वस्यसृष्टिप्रति पादिकातुसहिसर्वस्यकर्तेत्याकाराव्याख्याताश्रुतिरस्ति तथाचसृष्ट्युपपादिकाऽविद्यैवाभ्युपगंतव्येतिभावः भित्तेरितिपाठेतुशयनदेशभि त्तेर्बहिर्गत्वेतिसंबन्धः ॥ ६५५ ॥ किंचोक्तव्यापारद्वयसंकल्पनंलोकानुभवविरुद्धमित्याह अपिनीत्वेतिपंचभिः किंचस्वप्नकालेसर्वंजगदं तर्नीत्वाअथवाबहिर्गत्वापश्यतीत्याकारकेउभयत्रपक्षद्वयेस्वप्नद्रष्टुश्चेतनान्तरैःसमंसहसंवादःसमानानुभवशालित्वंनास्तीत्यर्थः ॥ ६५६ ॥ ॥५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंनसंवादइत्याकांक्षायामाह चेतनाइति यदिअंतरानयनेसंवादःस्यात्तदातेचेतनाःस्वमद्रष्टारंप्रत्येवंब्रूयुःकथयेयुः एवंकथं अद्यत्वया स्वमेत्हृदयांबुजेवयमानीताइति यदिचबहिर्गमनेसंवादःस्यात्तदाअद्यत्वयास्वगृहेस्थितावयंदृष्टाइतिब्रुयुः अथवातेनस्वमद्रष्ट्राउत्थानकालेयूयंत्हृदयेआनीताःस्वगृहेस्थितादृष्टाइत्येवमुक्ताःसंतस्तथेतिमन्येरन्नतेतुतथानब्रुवंतिनवामन्यंते एवमपिउक्तव्यापारद्वयकल्पनेतेषांचेतनांतराणांघटादिवदज्ञानंजडत्वमपिकल्पनीयंस्यात् जडास्नानीतादृष्टावानब्रुवंतिनमन्यंते तथाचातिगौरवंलोकविरोधश्चेतिद्वयोरर्थः ॥६५७॥६५८॥किंचचेतनांतराणांस्वमेअंतरागनंवहिर्दर्शनंवास्वामिकशरीरवतांजाग्रद्भवशरीरवतांवातत्रनाद्यइत्याह अपितेपीति यदि तेदृश्यमानाश्चेतनाअपिनिद्राणाःनिद्रांप्राप्ताःसंतःसमकालंस्वमंपश्येयुस्तदातेषांत्हृदंतरानयनादिकंसंभावितंसंभावनायोग्यंभवेत्तच्चबाधि

चेतनावयमानीतास्त्वयास्वप्नेत्हृदंबुजे॥ स्वगृहेवास्थितादृष्टानैवंब्रूयुःकदाचन॥ ६५७॥ उत्थानेनचतेनोक्ता मन्यंतेपिकथंचन॥ अतस्तेषांप्रकल्प्यंस्यादज्ञानंघटकुड्यवत्॥ ६५८॥ अपितेपियदास्वप्नंसमकालंहिचेतनाः॥ विलोकयेयुर्निद्राणास्तदासंभावितंभवेत्॥ ६५९॥ त्हृदयेंतर्बहिर्वापिपश्यन्नेतान्बहिःस्थितान्॥ दिवसेपश्यतिस्वप्नेदृष्टास्तेनचतादृशाः॥ ६६०॥ एवंतेषामपिस्वप्नेविसंवादोमहान्भवेत्॥ स्वस्यदेशांतरेस्वप्नान् त्हृदयेवापिपश्यतां॥ ६६१॥

तमितिभावः निद्राणाइतिचानशन्तं धातोःपरस्मैपदित्वादितिबोध्यम॥ ६५९॥ नद्वितीयइत्याह त्हृदयइति एतान्चेतनान्स्वमेंतर्बहिर्वा पश्यन्स्वप्नद्रष्टाप्रबुद्धःसंस्तान्बहिःस्थितानेवपश्यतितेचबहिःस्थिताश्चेतनायादृशाःशरीरादिविशेषणैस्तादृशाःस्वमेनदृष्टाःकिंतुनानाविपरीतविशेषणवंतोदृष्टाइत्यर्थः तथाचस्थूलशरीरविशिष्टानांस्वमेत्हृदंतरानयनादिकंबाधितमितिभावः॥ ६६०॥ प्रथमेपक्षेदोषांतरमाह एवमिति एवंतथायमपिदोषः अयंकः तेषांचेतनांतराणांयुगपत्स्वमेपिस्वस्वापेक्षयादेशांतरेत्हृदयेवापरान्पश्यतांततउत्थानेविसंवादोविरुद्धज्ञानवत्ताकलहइतियावत् तस्मान्नहिसर्वेषांदेशांतरस्यत्हृदयदेशस्यवाएकत्वं तथाचस्वस्वत्हृदयेदेशांतरेवापरेषांस्थितिंप्रतिपादयतां त्वंममत्हृदयेऽद्यागतःमैवंवदत्वमेवममत्हृदयआगतइत्याद्याकारकःकथंकलहोनभवेदित्यर्थः॥ ६६१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइति ततःस्वप्नदृश्यायेचेतनाःप्रमातारस्तेसर्वैंवादिनोमायाकल्पितत्वेनस्वीकर्त्तव्याः कीदृशस्यवादिनः प्रपंचसत्यतावा
दितयामायामयतामनिच्छतोऽनंगीकुर्वतोपीत्यर्थः ॥ ६६२ ॥ चेतनन्यायमचेतनेष्वतिदिशति मायामयाइति यथाचेतनामायामया
जाताःपूर्वयुक्त्यासिद्धास्तथाअचेतनाअपिमायामयावादिनाऽनिच्छतापिमंतव्याइत्यन्वयः ॥ ६६३ ॥ मायामयत्वंस्फुटयितुमचेतना
नामपियोग्यदेशादिसंबंधलक्षणकात्त्कर्याभावंदर्शयति स्वगृहमितिचतुर्भिः देशांतरस्थितंराजभवनंस्वगृहाभिन्नंस्वगृहदेशेकदाचित्स्वप्नद्र
ष्टाविलोकयतीत्यन्वयः ॥ ६६४ ॥ समुद्रमिति विस्तीर्णंसमुद्रंस्वगृहद्वारिस्थितंविलोकयतीति ॥ ६६५ ॥ अगाधमिति अधस्ताद

ततोमायामयाःसर्वेंबहिर्वात्वदिवास्थिताः ॥ स्वप्नदृश्याश्चेतनायेवादिनोऽनिच्छतोपिते ॥ ६६२ ॥ मायाम
यायथाजाताश्चेतनाअप्यचेतनाः॥मायामयास्तथैवस्युर्वादिनोऽनिच्छतोपिच॥६६३॥स्वगृहंराजभवनंस्व
प्नद्रष्टाविलोकयेत् ॥ देशांतरस्थितंशश्वद्गृहदेशेकदाचन ॥ ६६४ ॥ समुद्रंस्वगृहद्वारिक्वचिदप्यवलोकयेत् ॥
स्थितंयोजनसाहस्रंबहुकल्लोलभूषितम् ॥६६५॥अगाधंसरितांनाथमधस्ताल्लक्षयोजनम् ॥अनेनवपुषाक्वा
पिगुल्फमात्रंविलंघयेत् ॥ ६६६ ॥ विलंघ्यचकदाचित्तुनीलपर्वतमग्रतः ॥ पश्येदित्यादिकंसर्वंतत्रासत्स्वप्न
गःपुमान् ॥६६७॥ तेनमायामयंसर्वंस्वप्नदृश्यंजडाजडम् ॥ स्वात्मनोदेहसहितंकारणंसुखदुःखयोः॥६६८॥
मायामयत्वेसंजातेविश्वस्मिन्हिजडाजडे ॥ स्वप्नद्रष्टैवमायावीवर्तेतैतद्धिसुस्थितम् ॥ ६६९ ॥

गाधमुपरिलक्षयोजनंचसमुद्रमनेनमानुषेणवपुषागुल्फमात्रंमन्यमानोलंघयेदिति ॥ ६६६ ॥ विलंघ्येति नीलपर्वतःसमुद्रापरपारगोभ
गवतःपुरुषोत्तमस्यनरसिंहस्यस्वलीलाविग्रहस्यनिकासभूमिःप्रसिद्धस्तंपरपारेपश्येदिति आदिपदेनरात्रौसूर्योपरागादिग्रहः एवंतत्रस्वप्ने
सर्वमसन्मिथ्याभूतमेवंस्वप्नगःपश्यतीत्यर्थः ॥ ६६७ ॥ फलितमाह तेनेति तेनवास्तवत्वाभावेनदेहसहितंस्वप्नदृश्यंस्वात्मनःसुखादिकार
णंसर्वंमायामयमित्यन्वयः ॥ ६६८ ॥ ननुस्वप्नभावोपादानमाश्रयःकइतिचेत्सहिसर्वस्यकर्त्तेतिश्रुत्याइतराश्रयानुपपत्त्याचस्वप्नद्रष्टै
वेत्याह मायामयत्वेइति स्वप्नगतसर्वजडाजडनिष्ठेमायामयत्वेसंजातेसिद्धेसतितस्यामायायाआश्रयःस्वप्नद्रष्टैवेत्येतत्सुस्थितंश्रुत्युपपत्ति
भ्यांसिद्धमित्यर्थः ॥ ६६९ ॥ ॥५२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसतिस्वप्नद्रष्टुर्बहिर्गमनस्यविश्वांतरानयनस्यचकल्पनंवादिनोव्यर्थमित्याह तथाचेति स्वप्नस्यस्वप्नदृश्यभावजातस्यबहिर्गत्वावलोकनंजगतःस्वांतर्नयनंचकेनप्रयोजनेनस्यात्कल्प्येतेत्यर्थः ॥ ६७० ॥ साचमायाअज्ञानरूपैवमायाचतमोरूपेत्याथर्वणश्रुतेरित्याह अज्ञानमिति स्वप्नस्यकरणादिषुसृष्ट्यादिषुसमर्थंयदज्ञानंतदेवमायाऽविद्यादिपदवाच्यमित्यर्थः ॥ ६७१ ॥ स्वप्नन्यायेनजाग्रत्यपिमायामयत्वंबोध्यंतदर्थमेवश्रुत्यास्वप्नमिथ्यात्वप्रतिपादनादित्याह अविद्ययेति स्पष्टम् ॥ ६७२ ॥ स्वप्नजागरणयोरभेदएतदर्थमेवपूर्वंप्रपंचितइत्याह

तथाचसतिकेनस्याद्बहिर्गत्वावलोकनम् ॥ स्वप्नस्यकेनवास्वांतर्नयनंजगतोपिच ॥ ६७० ॥ अज्ञानंयद्भवेत्तस्यस्वप्नस्यकरणादिषु ॥ सेयंमायेत्यविद्येतिकथ्यतेवेदवादिभिः ॥ ६७१ ॥ अविद्ययायथास्वप्नेपश्यत्येषजडाजडं ॥ तथाजागरणेप्यात्माविश्वंपश्यत्यविद्यया ॥ ६७२ ॥ स्वप्नेजागरणेनैवभेदःकोपीहदृश्यते ॥ द्रष्टृत्वेपिचदृश्यत्वआत्मनोऽनात्मनस्तथा ॥ ६७३ ॥ अतोजागरणेजंतोर्यत्स्यात्स्वप्नेपितद्भयं ॥ मन्यतेऽविद्ययैवायंनिर्भयोद्वयवर्जितः ॥ ६७४ ॥ एषस्वप्नोत्रनाडीभिर्गत्वादेहेविलोक्यते ॥ ताभिर्गत्वात्रयासुप्तिर्लोक्यतेतन्निशामय ॥ संप्रसादइतिप्रोक्तायावस्थाभवतेमया ॥ ६७५ ॥

स्वप्नइति आत्मनोद्रष्टृत्वेअनात्मनोदृश्यत्वेचस्वप्नजागरणयोर्नकश्चिद्विशेषइत्युक्तमितिशेषः ॥ ६७३ ॥ तथाचाविद्ययैवभयंमन्यतेइतियच्छ्रुत्योक्तंतदुपपन्नमितिनिगमयति अतइति अतःस्वप्नस्यजाग्रदुपलक्षणत्वाज्जागरणेस्वप्नेवायद्भयंमन्यतेतदविद्ययैवमन्यतेयतोवस्तुतोऽद्वयत्वान्निर्भयइत्यन्वयः ॥ ६७४ ॥ एवंभेददर्शनलक्षणकार्यद्वारेणाविद्यास्वरूपंस्वप्नमधिकृत्यदर्शितमथयादृशात्मस्वरूपमावृत्त्याविद्योक्तंकार्यंकरोतितत्स्वरूपंसुषुप्तिमधिकृत्यदर्शयन्नथदेवइवेत्यादेःकंडिकाशेषस्यार्थमाह एषस्वप्नइतिसप्तभिः नाडीमार्गगम्यत्वेनोक्तयोःस्वप्नसुषुप्त्योर्मध्येस्वप्नोवर्णितोथसंप्रसादशब्दवाच्याताभिर्नाडीभिर्गम्यासुषुप्तिरुच्यतेइत्यर्थः ॥ ६७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाडीभिरिति नाडीद्वारापुरीतद्वेष्टितंहृदयाकाशंगतइंद्राण्यभिन्नइंद्रोदेवएषआत्माप्रसिद्धदेवोपमोराजोपमश्चभवति तत्रदीव्यतिद्योतत इतिव्युत्पत्त्यादेवपदार्थंराजतेइतरानपेक्षयादीप्यतइतिव्युत्पत्त्याराजपदार्थंचाह स्वयमित्यादिना स्वबोधेनस्वरूपभूतेनबोधेनस्वप्रकाशेनयतःस्वयमेवबोधितस्ततोदेवोपमइत्युक्तः यतश्चस्वयंज्योतिष्ट्वेनपरापेक्षांहित्वादेदीप्यतेऽतिशयेनदीप्यतेततोराजोपमइतिद्वयोरर्थः
॥५३॥ ॥ ६७६ ॥ ६७७ ॥ सर्वस्मिन्निति विक्षेपेविक्षेपशक्तिकार्येमनःपर्यंतेसर्वस्मिन्लयंगतेसतिएवंमनसोपिलीनत्वेसतितमोवदावरकेऽज्ञाने अप्रतीतेअल्पमस्फुटंयथाभवतितथाप्रतीतेसतिअहमज्ञइत्याकारकांतःकरणवृत्त्यारूढस्यैवाज्ञानस्यस्फुटत्वात्सुषुप्तौतुसूक्ष्माज्ञानवृत्तिरज्ञानाकाराऽतोनञोऽनुदराकन्याइत्यत्रेवाल्पार्थकत्वमितिभावः ॥ ६७८ ॥ यदेति एवंसतिहृदयस्यांतर्गत्वात्तत्रस्थितंपरमात्मानंतादात्म्य

नाडीभिर्हृद्याकाशंपुरीतद्वेष्टितंगतः॥ देवराजोपमोदेवइंद्राण्याभेदवर्जितः ॥ ६७६ ॥ इंद्रःस्वयंस्वबोधेन स्वप्रकाशेनबोधितः॥ स्वयंज्योतिःपरापेक्षांहित्वादेदीप्यतेमुहुः॥ ६७७॥ सर्वस्मिन्नेवविक्षेपेसमनस्केलयं गते॥ अप्रतीतेचसत्येवंस्वात्माज्ञानेतमोनिभे॥६७८॥ यदागत्वाप्रयात्यंतस्तादात्म्येनतदाभवेत्॥ मुक्तेनसदृशःसर्वमहमेवेतिमन्यते॥ दुःखैःसर्वैर्विहीनःसन्नानंदवपुषिस्थितः॥ ६७९॥ सोयमस्यपरोलोकःस्वप्राप्तौ प्राप्यतेहियः॥ हृदयेयदिहाकाशंस्वप्रकाशसुखंस्थितं॥ ६८०॥

संबंधेनयदायंजीवःप्रयातितदामुक्तेनसदृशोभवेत् मुक्तस्यलक्षणमाह सर्वमिति यःसर्वमात्मैवेतिवेत्तिसविद्वान्मुक्तइत्यर्थः अज्ञानमात्रशेषस्यसुप्तस्यज्ञानाग्निदग्धाज्ञानेनमुक्तेनकिंसाधर्म्यमित्याकांक्षायामाह दुःखैरिति सर्वदुःखविवर्जितभूमानंदेस्थितिःसाधर्म्यमित्यर्थः एतेनमुक्तस्वरूपप्रदर्शनेनकारणाज्ञानमपिनात्मनःस्वभावोमुक्तौतद्व्यतिरेकादितिसूचितं ॥ ६७९ ॥ इदमेवसुषुप्तिमुक्तिप्राप्यमात्मतत्त्वमनात्मभूतेभ्योलोकेभ्यउत्कृष्टत्वात्परमलोकपदाभिधेयमित्याह सोयमिति यःस्वप्राप्तौस्वस्यात्मनःप्राप्तौसत्यांप्राप्यतेलभ्यतेसोयमस्यजीवस्यपरमोलोकः किमात्मकोसावित्याकांक्षायामाह हृदयेइति हृदयांतःस्वप्रकाशसुखरूपंयदाकाशंस्थितंवेदांतैर्बोधितंतदात्मकइति संबंधः ॥ ६८० ॥ ॥५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रकर्मव्युत्पत्त्यालोकपदसमन्वयमाह तस्मादिति तस्मात्सर्वांतराद्वितीयादात्मतत्त्वात्परंभिन्नंशास्त्रैर्लौक्यंदर्शनीयंनभवतिमिथ्यात्वात् आत्मतत्त्वंतूत्तमाधिकारिभिरिहजन्मन्येवगुरुशास्त्रोपदेशेनहृदंबुजेलोक्यतेउपासकैस्तुब्रह्मलोकादिलोकेषुगत्वालोक्यतेऽतस्तच्चिदाकाशमेव परंलोक्यंलोकइतियावत् ॥ ६८१ ॥ सुषुप्तिमुक्तिप्राप्यात्मरूपप्रतिपादिकायास्तद्वाइत्यादिकायाएकविंशतितम्याःकंडिकायाअर्थंप्रदर्शयति एतदेवेतिषोडशभिः एतदेवसुप्तिमुक्तिगम्यमात्मस्वरूपंछंदांस्यतिक्रांतमितिव्युत्पत्तिकेनातिच्छंदाइतिपदेनोक्तं यतोवेदगतानिच्छंदांसिगायत्र्यादीनिसकलप्रपंचप्रकाशकान्येषआत्माअत्येत्यतिक्रामतिनिर्विशेषत्वेनवाङ्मनसयोरगोचरत्वादित्यर्थः ॥ ६८२ ॥ पा

तस्मात्परंचनानेनलोक्यंशास्त्रशतैरपि ॥ गुरुशास्त्रोपदेशेनलोक्यतेयद्धृदंबुजे ॥ ब्रह्मलोकादिलोकेषुतदाकाशमिदंपरम् ॥ ६८१ ॥ एतदेवभवेन्नित्यमतिच्छंदाइतीरितम् ॥ छंदांसिवेदगान्येषोह्यत्येत्यात्मामहेश्वरः ॥ मनसोवचसोयस्माद्गोचरेवर्त्ततेनसः ॥ ६८२ ॥ पापंकिमपिनैवास्मिन्नासीदस्तिभविष्यति ॥ ततोपहतपाप्मायंहृदयाकाशईरितः ॥ ६८३ ॥ नास्यसर्वात्मनोभेदगंधशून्यस्यकिंचन ॥ विद्यतेभयमेतस्मादभयंभवतीश्वरः ॥ ६८४ ॥ अप्यभेदस्यविज्ञानाद्भवेद्भेदोत्रकोपिन ॥ कारणाभावतस्तेननात्मनीहभयंभवेत् ॥ ६८५ ॥

प्मेति यतोस्मिन्हृदयाकाशेपरमात्मनिकिंचिदपिपापंकालत्रयेनास्तिततोऽपहतंनिरस्तंपाप्मपापंयस्मादितिव्युत्पत्तिकेनापहतपाप्मपदेनोक्तइत्यर्थः ॥ ६८३ ॥ अभयपदार्थमाह नास्येति अस्येश्वरस्यहृदयाकाशरूपस्यसर्वभेदशून्यत्वाद्यतोनकिंचिद्भयंततोऽभयमित्युक्तिरित्यर्थः ॥ ६८४ ॥ भेदज्ञानशून्यस्यभयाभावेहेतुतांविशदयति अप्यभेदस्येति अपिचहृदयाकाशेहिस्वभावभूतत्वादभेदएवस्वप्रकाशवोधेनभासते भेदस्तुपरसापेक्षत्वात्पराभावेकथंभासेत भेदज्ञानस्यकारणस्याभावेचभयंकथंस्यात् द्वितीयाद्वैभयंभवतीतिश्रुतेरित्यर्थः ॥ ६८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःखाभावाच्चाभयत्वमित्याह अपिदुःखस्येति अपिचइतरत्द्वितीयमपियद्भयंबिभेत्यस्मादितिव्युत्पत्त्याभयहेतुर्भवतितत्स्वयंस्वभावेनन भवतिकिंतुदुःखजनकत्वात्लोकेभयंस्यात् तद्भयत्वप्रयोजकंदुःखमचत्वदयाकाशेकिमपिनास्ति कीदृशे स्वप्रकाशेइत्तरानपेक्षप्रकाशे तत्र हेतुगर्भंविशेषणंस्वतेजसीति आदित्यादयोहिपरतेजसः तस्यभासासर्वमिदंविभातीतिश्रुतेः यदादित्यगतंतेजोजगद्भासयतेखिलं यच्चंद्रम सियच्चाग्नौतत्तेजोविद्धिमामकमितिस्मृतेश्च तथाचपरमेश्वरत्वादत्रनकिंचिद्दुःखंतत्प्रयुक्तंभयंचेतिभावः ॥ ६८६ ॥ किंचलोकेदुःखस्य व्यापकंविशेषविज्ञानंदृष्टंअत्रत्वदयाकाशेऽद्वितीयत्वेनविशेषविज्ञानरहितेकथंदुःखंस्यादित्याह अपिदुःखमिति किंचसर्वशरीरिणांदुःखं विशेषविज्ञानेजातएवभवेदितिप्रसिद्धं अस्यत्वदयगतस्यात्मनस्तुविशेषविज्ञानंनविद्यतेकुतऐक्यादद्वितीयत्वादित्यर्थः ॥ ६८७ ॥ यत्रन

अपिदुःखस्यहेतुत्वात्स्याद्भयंनेतरत्स्वयं ॥ नचदुःखंकिमप्यस्तिस्वप्रकाशेस्वतेजसि ॥ ६८६ ॥ अपिदुःखंभ वेज्ज्ञानेजातेसर्वशरीरिणां ॥ नचास्यविद्यतेज्ञानमैक्याद्हृदयगात्मनः ॥ ६८७ ॥ विशेषज्ञानशून्योयंयथाभ वतिकामुकः ॥ गाढमालिंगितोभीष्टयोषिताकंठलग्नया ॥ ६८८ ॥ बाह्यंकिमपिनैवायंपुत्रवित्तधनादिकं ॥ वेत्तिनैवांतरंतद्वदात्मानंयुवतिंतथा ॥ ६८९ ॥ एवमेवपुमानेषप्राज्ञेनाकाशरूपिणा ॥ स्वप्रकाशेनतादात्म्या त्परिष्वक्तःसुखात्मना ॥ ६९० ॥ भूतभौतिकसंघातंबाह्यंवेत्तिनकिंचन ॥ नैवांतरमिमांमायामात्मानंचसु खात्मकम् ॥ इंद्राण्यासहितंयत्स्यादिंद्रस्याकाशसंश्रयात् ॥ ६९१ ॥

विशेषविज्ञानंतत्रनदुःखमित्यत्रश्रोतुर्जनकराजादेःप्रसिद्धंदृष्टांतमाह विशेषेतिद्वाभ्यां यथाकामुकोभीष्टयोषितालिंगितोविशेषज्ञानशू न्योभवतियतोबाह्यांतरादिकंनवेत्तीतिद्वयोःसंबंधः ॥ ६८८ ॥ ६८९ ॥ दार्ष्टांतिकेयोजयति एवमिति यथोक्तोदृष्टांतएवमेषपुमान्जी वःसुषुप्तौत्वदयाकाशरूपेणप्राज्ञेनसर्वज्ञेश्वरेणस्वप्रकाशसुखरूपेणतादात्म्यसंबंधेनालिंगितःसन्बाह्यंभूतादिकमांतरंभिंद्रियादिकंतथेमांसु प्तौशिष्यमाणांमायामज्ञानंचनवेत्तितथात्मानंसुखरूपंनवेत्ति ननुकिंतत्सुखंयदस्यस्वरूपभूतमित्याकांक्षायामाह इंद्राण्येति यत्सुख मिंद्राण्यासहितंयथाभवतितथेंद्रस्यत्वदयाकाशसंश्रयाद्भवति इंद्राणीसहितइंद्रोत्वदयाकाशंशयनस्थानमाश्रित्ययत्सुखंलभतेतदपिवि शेषतोनजानातीतियावत् इतिद्वयोरर्थः ॥ ६९० ॥ ६९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आप्तकामत्वादिविशेषणानामुत्तरोत्तरंहेतुभूतानामर्थंदर्शयति आप्तेत्यादिना तदेतत्सुप्तौमुक्तौवागम्यमात्मरूपमाप्तकामंभवतीतिप्रथमार्द्धेनप्रतिज्ञा द्वितीयार्द्धेनयत्नुयतोहेतोरितोऽस्मादेवरूपात्सर्वस्यविवर्त्तोपादानात्कामाःकाम्यमानपदार्थाआप्यंतेलभ्यंतेइत्यर्थकेनाप्ताःकामायत्रेतिव्युत्पत्तिरुपादानलाभेसर्वोपादेयलाभइतिन्यायानुगृहीतातत्रहेतुतयासूचिता तृतीयार्द्धेनतुनिगमनमित्यपुनरुक्तिरित्यर्थः ॥ ६९२॥ उक्तार्थकमाप्तकामत्वमनूद्यतद्धेतुकतामात्मकामत्वस्यदर्शयति नास्येति यथाकनकंविहायकुंडलादिकंनास्तितथाआनंदात्मरूपमेकंसर्वोपादानत्वेनाद्वयंयदेतत्स्वयंज्योतिःस्वरूपंतद्विहायपुत्रादिविषयःकामोऽस्यजीवस्यनास्तीत्यतआप्तकाममित्युक्तं ततउक्तविधाप्तकामत्वादेवइदंरूपमात्मकाममित्युक्तमित्यर्थः ॥ ६९३ ॥ कथमुक्तविधाप्तकामत्वेनात्मकामत्वमित्याकांक्षायामाह बाह्यइति यतः

आप्तकामंतदेवस्याद्रूपंनान्यत्कथंचन ॥ पुत्राद्याःसकलाःकामाआप्यंतइतएवयत्॥ ततोरूपमिदंज्ञेयमाप्तकामंमनीषिभिः॥६९२॥ नास्यकश्चनकामोऽस्तिपुत्रादिविषयोयतः॥ आनंदात्मानमेवैकंस्वयंज्योतिर्विहायहि॥ आप्तकामंततस्त्वेतदात्मकाममुदाहृतं ॥ ६९३ ॥ बाह्येपुत्रादिकेनास्यकामोयस्माद्धिविद्यते॥ तेनात्मकाममेतत्स्यात्कामाभावादनात्मनि॥६९४॥ अकामंवस्तुतस्तस्मात्कामोनात्मनिविद्यते॥ अप्राप्तेविषयेकामोनित्यप्राप्तेःकथंहिसः॥ आत्मनात्मनएतस्मादाप्तकाममकामकं ॥ ६९५ ॥ विद्यतेयत्रकामोयंसर्वदुःखकरःसदा॥ स्वरूपेतत्रशोकाद्याजायंतेतेनतत्रहि॥ ६९६॥ अकामरूपंकेनैतत्शोकवृद्धिर्भविष्यति ॥ अशोकंततएवैतत्शोकादन्यदितीरितं॥ ६९७॥

पुत्रादौकल्पितेकामोनास्तीत्यतोऽनात्मनिकामाभावःसिद्धः ततश्चपरिशेषादेतद्रूपमात्मकाममात्मैवकामःकाम्यमानोयत्रेतिव्युत्पत्तेरित्यर्थः ॥ ६९४ ॥ अकाममिति तस्मादात्मकामत्वादेतद्रूपमकामंभवतियतोवस्तुतआत्मनिकामःकामनानविद्यते कामोह्यप्राप्तेविषयेभवतिआत्मनस्तुआत्मनास्वभावेननित्यप्राप्तेःसदाप्राप्तत्वात्सकामआत्मनिकथंस्यात्संभवेत् एतस्माद्धेतोरात्मकामंरूपमकामकमुक्तमित्यर्थः ॥ ९५ ॥ शोकान्तरपदार्थमाह विद्यतेइतिद्वाभ्यां यत्रस्वरूपेसर्वदुःखबीजभूतःकामोविद्यतेतत्रतेनकामेनप्रयुक्ताःशोकविषादादयोदुःखभेदेजायंते तत्रसुप्त्यादौगम्यमात्मरूपंतुयतोऽकामंभवतिततःशोकादिवृद्धिःकथंस्यादित्याशयेनशोकादन्यदित्यर्थकेनशोकांतरपदेनएतद्रूपमशोकमित्युक्तमितिद्वयोरर्थः श्रुतौशोकपदमर्शआद्यजंतमितिभावः ॥ ६९६ ॥ ६९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथउक्तस्यरूपस्यसर्वाध्यास्यविमुक्तत्वप्रतिपादिकायाद्वाविंशतितम्याःकंडिकायाअर्थंपूर्वकंडिकार्थानुवादपूर्वकमाह अस्मिन्निति षोडशभिः अस्मिन्सुप्तेसुप्तिगम्येस्वरूपेपरमलोकत्वाद्यशोकत्वांतविशेषणतयावर्णितेस्थूलदेहस्यजनकोऽजनकोभवतीत्येवंद्वयोस्तृतीयादिभिःसंबंधः आप्तात्मकामेआप्तकामेआत्मकामेचेत्यर्थः ॥ ६९८॥६९९॥ स्थूलेति वर्णितेस्वरूपेस्थूलदेहस्यजननव्यापारेणयोजनकःपितासोऽपिताभवति उक्तस्वरूपस्यस्थूलशरीरसंबंधप्रयोजकाविद्याकामकर्मातीतत्वात् एवंजनन्यादावपियोज्यं यदाषाट्कौशिकस्यस्थूलशरीरस्योपादानभूतावयवकत्वेनांतरंगयोर्मातापित्रोःसंबंधत्यागस्तदाबहिरंगसंबंधवतांजायादीनांसंबंधत्यागःकिमुवाच्यइत्याह कुतइत्यादिना ॥ ७००॥ अथसूक्ष्मदेहसंबद्धानांसंबंधत्यागमाह विषयाइति कर्मव्युत्पत्त्याकरणव्युत्पत्त्याचलोकपदेनोक्ताविषयाःशब्दादयः

अस्मिन्सुप्तेपरेलोकेत्यतिच्छंदःस्वरूपिणि॥ विध्वस्तपापसंघातेसर्वदाभयवर्जिते॥ ६९८॥ महिष्यावापरिष्वंगसमानानंदभाजिनि॥ अंतर्बहिःस्थिताशेषविशेषज्ञानवर्जिते॥ आप्तात्मकामेनिष्कामेशोकादिपरिवर्जिते॥ ६९९॥ स्थूलदेहस्यजनकोजनकोनभवेदयं॥ जननीनैवजननीकुतोवध्वादयोहिते॥ ७००॥ विषयाःसेंद्रियानैवभवेयुःस्वात्मरूपतः॥देवाअग्न्यादयोनैवयेवागाद्यधिदेवताः॥ वेदाऋगादयोनैवसुप्तौवेदाभवंतिते॥ ७०१॥ ममाध्यासानकेप्यत्रविद्यंतेजनकादिषु॥ यथातथाहमोध्यासानसुप्तेसंतिकेचन॥ ७०२॥ स्तेनःसुवर्णस्यपुमानथवान्यस्यवस्तुनः॥ नस्तेनःसुप्तिकालेस्यात्स्वप्रकाशसुखात्मकः॥ ७०३॥

सेंद्रियाइंद्रियैःसहितास्तत्रस्वरूपेस्वात्मरूपतःस्वकीयेनविषयत्वादिरूपेणनभवेयुः तथायेवागादीनामधिदेवताअभिमानिनोऽग्न्याद्यादेवास्तेसुप्तौअदेवाभवंति तथाप्रमातृरूपेणसंबद्धावेदाःप्रमाणराजाअवेदाभवंति तन्निरूपकसूक्ष्मशरीरसंबंधातिक्रमादितिभावः ॥ ७०१ ॥ अवेदाइत्यंतेनग्रंथेनममत्वेनयेऽध्यस्यन्तेआरोप्यंतेपित्रादयस्तेषामभावउक्तः स्तेनइत्यादिग्रंथेनतुस्तेनोस्मीत्यादिरूपेणाहमित्याकारेणयेध्यस्यंतेतेषामभावउच्यतइत्याह ममाध्यासाइति स्पष्टम् ॥ ७०२ ॥ स्तेनत्वाभिमानाभावंदर्शयति स्तेनइति सुवर्णस्यान्यस्यवस्तुनःपश्वादेर्वायःस्तेनश्चौरःससुप्तौस्वप्रकाशसुखरूपत्वादस्तेनःस्तेनत्वाभिमानहीनोभवतीत्यर्थः ॥ ७०३ ॥ ॥५५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रूणइति भ्रूणशब्दोयज्ञस्यतत्कर्तुश्चवाचकः अतएवयागस्थवैश्यक्षत्रिययोर्वधेब्रह्महत्याप्रायश्चित्तमुक्तंस्मृताविति भावः तथाद्विजोत्तमो पिभ्रूणःतथाचविश्वः अथभ्रूणोगर्भिण्यांश्रोत्रियद्विजेइति तथातद्योग्योद्विजोत्तमत्वयोग्योगर्भोपिभ्रूणः अतएवस्मृतावुक्तंगर्भेअविज्ञाते ब्रह्महेतिएवंविधभ्रूणस्यहंतामहापातक्यपिसुप्तौतत्पातकवर्जितोभवतीत्यर्थः ॥ ७०४ ॥ नकेवलमागंतुकैःपापैःसुप्तौमुक्तोभवतिकिंत्व धमजात्यारंभकैरपीत्याह ब्राह्मण्यामिति पूर्वार्द्धेनचंडाललक्षणमुक्तं तृतीयपादेनप्रज्ञादित्वात्स्वार्थिकोणितिदर्शितं चतुर्थेनतज्जातिसंबं धाभावोक्तिरिति ॥ ७०५ ॥ क्षत्रियायामिति एवंक्षत्रियायांमातरिशूद्रात्पितुर्योजातःसपुल्कसोथवाकश्चिदन्योऽधमजातिविशेषःपुल्क

भ्रूणोयज्ञइतिप्रोक्तस्तस्यकर्ताभ्रूणउच्यते ॥ द्विजोत्तमोथवागर्भस्तद्योग्योभ्रूणईरितः ॥ तस्यभ्रूणस्यहंतास्याद्भ्रूणहत्याविवर्जितः॥७०४॥ब्राह्मण्यांशूद्रतोजातश्चंडालइतिकथ्यते॥चंडालएवचांडालःसोऽचंडालोभवेदिह ॥७०५॥ क्षत्रियायांहियोजातःशूद्रात्तंपुल्कसंविदुः॥ कश्चिज्जातिविशेषोवापुल्कसोऽपुल्कसोभवेत्॥ पुल्कसःपौल्कसोज्ञेयोनापरःकश्चिदेवसः॥ ७०६॥ श्रमणोयतिरुद्दिष्टोभवेदश्रमणोहिसः॥ तापसोत्रवनीप्रोक्तः सुप्तौसस्यादतापसः॥ ७०७॥ बहुनाकिमिहोक्तेनसुप्तौकश्चननास्यसौ ॥ अध्यासोममतायाःस्याद्योवास्यादहमोपिच॥ ७०८॥ अहंममधियाहीनोह्रदाकाशात्मतांगतः ॥ असंगःपुण्यपापाभ्यांहार्दान्शोकांस्तरत्ययं॥ ७०९ ॥

सःससुप्तावपुल्कसोभवति श्रुतौतुस्वार्थिकाणंतत्वेनपौल्कसइत्युक्तमित्यर्थः ॥ ७०६ ॥ एवमाश्रमसंबंधाभावबोधनायश्रुत्याश्रमणतापसपदाभ्यांयतिवानप्रस्थाव नूद्यतदभावःसुप्तावुक्तइत्याह श्रमणइति उद्दिष्टउक्तः ससुप्तः ॥ ७०७ ॥ उक्तानांसर्वाध्यासोपलक्षणतामाह बहुनेति ममतायाअहमो वाअवगाहीअध्यासःकोप्यत्रसुप्तिगतेस्वरूपेणनास्तीत्यन्वयः ॥ ७०८ ॥ अनन्वागतमित्यादेःकंडिकाशेषस्यार्थवदनुक्तार्थैहेतुतयाअवि द्याकामकर्मणामभावमाह अहमिति हार्दान्कामामूलत्वेनहृदयस्यांतःकरणस्यधर्मान्शोकानयंसुप्तस्तरतिअतिक्रामतीत्यर्थः ॥ ७०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रत्स्वप्नयोस्त्वविद्याकामकर्मसंबंधान्नशोकतरणमितिव्यतिरेकमाह स्वप्नेइतिद्वाभ्यां इष्टानिष्टवियोगयोगाभ्यांजातानग्निजतापवद्दुः सहान्हार्दान्शोकान्स्वप्नजागरणयोरनुभवन्कथंतरेदितिद्वयोःसंबंधः ॥ ७१०॥ ७११ ॥ फलितमाह अतइति स्पष्टम् ॥ ७१२॥ अथा त्मनःस्वयंज्योतिष्ट्वेऽपिसुप्तौविशेषविज्ञानाभावोपपादिकानांत्रयोविंशतितम्यादीनामष्टानांकंडिकानांतात्पर्यार्थंदर्शयति सुप्ताविितिनव भिः चिद्वपुःस्वयंप्रकाशोयंपुमान्यत्सुप्तौचाक्षुषादिविशेषविज्ञानरहितोभवति तदित्थमवगंतव्यंइत्थंकथंद्वैतस्यविभक्तस्याभावादिदंदृश्य जातंनपश्यतीति अन्यथास्वरूपभूतप्रकाशाभावात्तुतथानावगंतव्यमित्यर्थः ॥ ७१३ ॥ नान्यथेत्युक्तंस्फुटयति दृष्टाविितिद्वाभ्यां दृष्ट्या

स्वप्नेजागरणेनित्यंशोकान्हृदयसंश्रितान् ॥ पुत्रादीष्टवियोगेनसंजातान्बहुभेदतः ॥ ७१० ॥ अनिष्टस्यापि योगेनजातान्कोटिसहस्रकान् ॥ जानन्कोनामलोकेस्मिन्स्वप्नेजागरणेपिवा ॥ हार्दान्शोकांस्तरेद्देषद्दुःसहा नग्निसंभवान् ॥ ७११ ॥ अतोविशेषविज्ञानरहितःसुप्तिमागतः ॥ तीर्णोभवतिशोकाब्धीन्हार्दान्नानाविधा नपि ॥ ७१२ ॥ सुप्तौविशेषविज्ञानरहितश्चिद्वपुःपुमान् ॥ द्वैताभावादिदंसर्वंनावगच्छतिनान्यथा ॥ ७१३ ॥ दृष्टौघ्राणेचरसनेवाचिचश्रवणेपिच ॥ मनस्यपित्वगाख्येचबुद्धौचिच्छक्तिरस्तिया ॥ ७१४ ॥ इंद्रियेष्वपरेष्वे षासर्वदाप्यनपायिनी ॥ नभोवद्वर्त्ततेयस्मात्तस्मान्नाज्ञोनचाप्यसन् ॥ ७१५ ॥ पश्यन्जिघ्रंश्चरसयन्वदन्श्टृ ण्वन्सदैवसः ॥ मन्वानोपिस्पृशन्जानन्व्यापारानिंद्रियांतरैः ॥ अपरानपिकुर्वाणोनकरोतिमहेश्वरः ॥ ७१६ ॥ विषयेंद्रियसंघातराहित्यात्सुप्तिगःपुमान् ॥ द्वैताभावान्नचिद्रूपराहित्यादात्मनःसतः ॥ ७१७ ॥

दिबुद्ध्यंतपदार्थेषुचाक्षुषादिवृत्तिषुपाण्यादीतरेंद्रियवृत्तिषुचप्रतिबिंबेनानुगतायाचिच्छक्तिरस्तिसानभोवत्सर्वदानपायिनीवर्ततेतस्मात्स्वरू पभूतायाश्चिच्छक्तेरनपायत्वात्सुप्तावात्माअज्ञोजडःअसन्अभावप्राप्तोवानभवतीतिद्वयोरर्थः ॥ ७१४ ॥ ७१५ ॥ विशेषविज्ञानंह्यात्मनऔ पाधिकंतदुपाधीनामिंद्रियादीनामभावेनभवतीतिदर्शयति पश्यन्निितिद्वाभ्यां चक्षुरादिबुद्ध्यंतैःकरणैर्दर्शनादिज्ञानानांतान्व्यापारांस्तथेंद्रि यांतरैःपाण्यादिभिरादानादिव्यापारान्जाग्रतिसंघातसत्वकालेकुर्वाणोपिमहेश्वरःपुमान्यत्सुप्तिगोनकरोतितदुपाधिभूतविषयेंद्रियसंघा तराहित्यप्रयुक्ताद्वैताभावादेवहेतोर्बोध्यंनतुसतःसद्रूपस्यात्मनश्चिदात्मकरूपस्यराहित्यादभावादितिद्वयोःसंबंधः ॥ ७१६ ॥ ७१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतोप्युपाधिविशेषाभावेविशेषकार्याकरणंदृष्टांतेनस्फुटयति विद्यमानइति यथेंधनसंनिधौदाहादिकरोपिवन्हिस्तदभावेनकरोतितथा त्मासुप्तिगतइत्यर्थः ॥ ७१८ ॥ स्वयंप्रकाशरूपस्यतुनकदाचिद्विनाशइत्याह यथेति यथावन्हेःस्वरूपभूतस्यप्रकाशस्यतेजःसामान्या त्मकस्येंधननाशेपिननाशस्तथाद्रष्टुःस्वरूपभूतायादृष्टेर्नकदाचिन्नाशइत्यर्थः ॥ ७१९ ॥ तत्रहेतुमात्मनोद्रष्टुरविनाशितांसदृष्टांतमुप पादयति भावानामितिद्वाभ्यां सर्वेषांभावानांयत्स्वरूपंतत्स्वरूपिणोभावस्यसम्यक्स्थितौसत्यांननश्येत् यथावन्हेर्नाशएवतद्रूपनाशइ त्यर्थः ॥ ७२० ॥ ततइति ततउक्तव्याप्तेर्द्रष्टुरनाशेनाशाभावेसतितत्स्वरूपभूतायादृष्टेर्नाशोनविद्यतेनसंभवति द्रष्टुस्तुविनाशोनास्तिअ

विद्यमानोयथावन्हिर्दाहपाकप्रकाशकृत्॥ भस्मच्छन्नोनतत्कुर्यादात्मैवंसुप्तिगःसदा ॥ ७१८ ॥ यथावन्हेः प्रकाशस्यविनाशोनैवविद्यते॥ द्रष्टुर्दृष्टेस्तथैवस्याद्विनाशोनकदाचन॥ ७१९॥ भावानांयत्स्वरूपंस्यान्ननश्ये द्भावसंस्थितौ॥ तत्कदाचिद्यथावन्हेरनाशेनास्तिकर्हिचित्॥ उष्णप्रकाशरूपस्यनाशोहेतुशतैरपि ॥ ७२० ॥ ततोद्रष्टुरनाशेनदृष्टेर्नाशोत्रविद्यते॥ नचद्रष्टुर्विनाशोस्तित्व्यविनाशित्वहेतुतः॥ ७२१ ॥ भवेद्द्रष्टुर्विनाशश्चेत्स किंकारणतोभवेत्॥ कारणाभावतोवापिद्विधाप्येषनसंभवेत्॥ ७२२ ॥ आत्मनोव्यतिरिक्तस्यसत्तानाशस्य केनसा॥ नाशहेतोःकथंनामसैषास्याद्तिदुर्भणा ॥ ७२३॥

विनाशिशीलत्वादित्यर्थः तथाचैवंश्रुत्यक्षरार्थः यद्वैतत्तत्रसुप्तौपुरुषोनपश्यतीतिमन्यसेनतत्तथामंतव्यंयतस्तत्तत्रपश्यन्नेवनपश्यतितत्रवि भक्तद्वैताभावान्नपश्यतीत्युच्यतेस्वरूपप्रकाशसत्त्वात्तुपश्यन्नित्युच्यतइति एवंघ्राणादिवाक्येष्वपीति ॥ ७२१ ॥ श्रुत्युक्तमात्मनोऽविना शित्वमुपपत्त्याविशदयति भवेदितिसप्तत्रिंशच्छ्लोकैः योवादीआत्मनोपिविनाशोभवेदितिमन्यतेसप्रष्टव्यःकिमात्मनोनाशःकारणजन्यः कारणहीनोवा नोभयथापिसंभवतीत्यर्थः॥ ७२२ ॥ तत्रकारणजन्यनाशपक्षंदूषयति आत्मनइतिषोडशभिः कारणजन्योनाशइतिप क्षेपिविचारणीयं किंसनाशआत्मभिन्नआत्मरूपोवा अंत्येनाममात्रेविवादः आद्येसद्रूपादात्मनोभिन्नस्यनाशस्यतत्कारणस्यचसाप्रसि द्धासत्ताकेनमानेनस्यात्सद्भिन्नस्यासत्वात् प्रमाणंनकारकमितिवक्ष्यतीतिभावः ॥ ७२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचकस्यापिपदार्थस्यात्मभेदोनसंभवति आत्मनोवस्तुपरिच्छेदहीनत्वादित्याह स्वसजातीति स्पष्टम् ॥ ७२४ ॥ कथंतरामितिय
 दानाशस्यैवसत्तादुर्लभातदातेननाशेनकार्येणानुमेयस्यतत्कारणस्यसत्ताकथंतरांभवेत्सुतरांदुर्लभेत्यर्थः तथाएतयोर्नाशतत्कारणयोरा
त्मभेदिनोरात्मभेदादसद्भावंगतयोःसाधकंमानंकथंतमांभवेत्तत्साधकमानस्यसत्तासुतमांदुर्लभेतियावत् वक्ष्यमाणत्रिधयामानसत्ताया
 मेयाधीनत्वादितिभावः ॥ ७२५ ॥ किंचसआत्मनाशोभावरूपोऽभावरूपोवेतिविकल्प्यतत्राद्यंनिरस्यति अपिनाशइतित्रिभिः भावत्वप
क्षेपिसनाशःकिंघटवदनित्यःकिंवात्मवन्नित्यइतिविकल्प्यआद्यइदमुच्यते यद्यसौनाशःस्वयंभावःसन्घटोपमोघटवदनित्योभवेत्तदास
नाशःस्वयंविनाशित्वेनासन्नसद्रूपःसन्नस्यआत्मनःसर्वसाक्षितयानित्यस्यनाशंकथंकुर्यादित्यर्थः ॥ ७२६ ॥ आत्मवन्नित्यत्वपक्षंनिर

स्वसजातिविजात्युत्थसर्वभेदविवर्जितः॥ अयमात्माकथंतस्मादन्योनाशःप्रसिद्ध्यति॥ ७२४ ॥ कथंतरांच
नाशस्यकारणंयच्चदुर्भणं॥ कथंतमांभवेन्मानमेतयोरात्मभेदिनोः ॥ ७२५ ॥ अपिनाशोभवेद्भावोयद्यसौ
सघटोपमः॥ स्वयंनाशीकथंचास्यनाशंकुर्यादसन्स्वयं॥ ७२६ ॥ आत्मनासदृशोनाशोभवेच्चेन्नभवेद्विसः॥
चेतनत्वेनसादृश्यान्नात्मानंनाशयेदयं॥ ७२७ ॥ वैपरीत्यप्रसंगंचकोवातत्रनिवारयेत्॥ आत्मनानाशनाशा
स्यंचेतनत्वेनहेतुना॥ ७२८ ॥ अभावत्वंचकस्यस्यादस्येत्येतद्विविच्यतां ॥ आत्मनोव्यतिरिक्तस्ययद्ययंत्वा
त्मनोत्रकिं॥ घटाभावेननैवस्याद्विशेषःकोपिवैपटे ॥ ७२९ ॥

स्यति आत्मनेति यदिसनाशआत्मनासदृशोभवेत्तदासनाशोनभवेत् चेतनत्वेनात्मसादृश्यात् नहिचेतनश्चेतनस्यनाशरूपोभवति तथा
चायमात्मानंननाशयेदित्यर्थः ॥ ७२७ ॥ किंचसाम्यपक्षेआत्मैवतंकुतोननाशयेदित्याह वैपरीत्येति तत्रसाम्यपक्षेआत्मनैवनाशस्य
नाशःकुतोनभवेदित्याकारकंवैपरीत्यप्रसंगंकोवारयेत् कीदृशंवैपरीत्यं चेतनत्वेनहेतुनाविनिगमनाभावद्वाराप्रयुक्तमित्यर्थः ॥ ७२८ ॥
अथाभावत्वपक्षंदूषयन्किमयमभावोऽनात्मप्रतियोगिकआत्मप्रतियोगिकोवेतिविकल्प्यआद्येकात्मनःक्षतिरित्याह अभावत्वमिति अ
स्यनाशस्यअभावत्वंकस्यस्यात्किंनिरूपितंस्यात्यद्यात्मभिन्ननिरूपितंतदात्रात्मव्यतिरिक्ताभावेसतिआत्मनःकिंहीनं नहिघटस्याभा
वेनपटेकश्चिद्विशेषोहानिसूचकोभवतीत्यर्थः ॥ ७२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मप्रतियोगिकइतिपक्षंनिरस्यति आत्मनइति अत्रपक्षेप्यात्माकिमेकःकिंवाऽनेकः आद्येनाशस्यापिसएवात्माइतिनाशःकथमात्म नाविरुद्ध्येत अंत्येनाशेनान्येषामात्मनामपहारेपिस्वात्मानापद्दतइत्यतस्तदर्थंनाशस्वरूपभूतात्मनोपहारार्थंनाशांतरस्यगवेषणमन्वेषण मपेक्षेतियावत्सास्यात् तथाचनाशात्मनामुत्तरोत्तरंनाशकल्पनादनवस्थेतिभावः यदिचोत्तरोत्तरंनाशोनकल्प्येततदात्मनाशोनस्यात् सामान्याभावोयावद्विशेषविरोधीतिन्यायविरोधादित्याह नात्मनीदमिति इदमात्मनाशइतिप्रतिज्ञातमात्मनियस्मिन्कस्मिन्नपिसति विद्यमानेनस्यात् यथाएकत्रापिघटेसतिघटसामान्याभावोनव्यवह्रियतइत्यर्थः ॥ ७३० ॥ एवंसामान्यतोऽभावतांनिरस्यविशेषतो निरस्यति प्रागभावादयइतिसप्तभिः अयमात्मनाशःप्रागभावादिरूपोनभवतियतस्तत्त्वेप्रागभावादिरूपत्वेसत्यस्यनाशस्ययोगेनात्मनो

आत्मनश्चेत्तदर्थंस्यान्नाशांतरगवेषणम् ॥ नात्मनीदंनदृष्टोयत्घटाभावोघटेसति ॥ ७३० ॥ प्रागभावादयो भावानायंनाशःकथंचन ॥ तत्त्वेनैवात्मनोनाशःसंभवेदस्ययोगतः ॥ ७३१ ॥ प्रागभावोयदानाशस्तदात्मा वर्त्ततेनच ॥ वर्त्तमानेस्वरूपेस्यान्नाशनाशोबलादिह ॥ आत्मानवर्त्ततेचेत्सनाशस्तस्यभवेन्नच ॥ ७३२ ॥ प्रागभावोनकस्यापिभावस्यात्रविनाशकः ॥ किंतुभावेननाश्योयंसर्वदोत्पत्तिकारणं ॥ ७३३ ॥ अपिजन्म वतांदृष्टःप्रागभावोमनीषिभिः ॥ आत्मनोजन्मशून्यस्यकथमेवंभविष्यति ॥ नचनाशोस्तिसंसिद्धोजन्मये नप्रकल्प्यते ॥ ७३४ ॥

नाशरूपाकाचित्क्षतिर्नभवतीत्यर्थः ॥ ७३१ ॥ तत्रप्रागभावरूपत्वेहान्यसंभवंवर्णयति प्रागभावइतित्रिभिः नाशस्यप्रागभावरूपता भ्युपगमेएवंवादीप्रष्टव्यः एवंकथं प्रागभावकालेकिमात्मस्वरूपंवर्त्ततेनवेति आद्येआत्मस्वरूपमेवस्वनाशंप्रतिक्षेप्स्यति अंत्येपरोक्षगा लिदानवन्नाशःकिमात्मनोऽपकरिष्यति आत्मनासमंसंबंधाभावात् सतोरेवसंबंधार्हत्वादित्यर्थः ॥ ७३२ ॥ किंचोत्पादकस्यभावस्यप्रा गभावस्यनाशरूपतावक्तुमयुक्तेत्याह प्रागभावोनेति स्पष्टम ॥ ७३३ ॥ किंचजन्मव्याप्यःप्रागभावआत्मनिअजेकथमुच्येत नध्रुवंज न्मभृतस्यचेतिन्यायेननाशंदृष्ट्वाजन्मापिकल्प्यं नाशस्यप्रमाणसिद्धत्वाभावात् नहिसंदिग्धेनपीनत्वेनरात्रिभोजनंकल्प्यतेइत्याह अ पिजन्मवतामिति ॥ ७३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्योन्याभावरूपतांनिराकरोति अन्योन्येति यदिनाशोन्योन्याभावरूपस्तदासनाशआत्मनोविरोधीनस्यात् तत्रहेतुमात्मनस्तदाश्रयत्वमाह आश्रयइति यथाघटपटयोरन्योन्याभावःप्रतियोग्यनुयोग्याश्रितोघटपटयोराश्रययोरभावेनतिष्ठेत्तथात्मन्याश्रयेअसतिअविद्यमानेसतिसनतिष्ठेदित्यर्थः ॥ ७३५ ॥ अत्यंताभावरूपतांनिरस्यति अत्यंतेति नाशस्यात्यंताभावरूपत्वेस्वीकृतेआत्मानृश्रृंगवदसत्त्वेनैव प्रतीयेतनचतथाप्रतीयतेअस्मीत्येवसर्वस्यात्मनोभानादित्यर्थः अयंभावः दैशिकपरिच्छेदशून्यस्यात्मनोऽत्यंताभावोऽभ्युपगम्यमानःकेवलान्वय्येवाभ्युपगंतव्यः तथाचकेवलान्वय्यत्यंताभावप्रतियोगित्वलक्षणमलीकत्वमापद्येततच्चानुभवविरुद्धमिति॥ ७३६॥ ध्वंसरूपतांनिराचष्टे प्रध्वंसत्वइतिद्वाभ्यां नाशस्यध्वंसाभावरूपतायांपूर्वमुक्तोदोषगणआत्मसत्तांविहायनाशस्यसत्तादुर्लभेत्यादिकःसर्वोयोज्यः ननु

अन्योन्याभावरूपश्चेन्नाशःस्यान्नात्मनोहिसः॥ आश्रयेसतिनैवायंस्वयंतिष्ठतिकर्हिचित्॥ ७३५ ॥ अत्यंताभावरूपत्वेनाशस्यात्माभवेत्सदा॥ नरश्रृंगोपमोनायंगम्यतेतादृशोनृभिः॥ ७३६॥ प्रध्वंसत्वेचपूर्वोक्तोदोषआयातिसर्वथा॥ अपिकोपिजगत्यस्मिन्भावादन्योनविद्यते ॥ ७३७॥ अभावोहिघटाभावःकपालानीतिसंस्थितिः॥ भावत्वेपूर्वमुक्तंयद्दूषणंतत्पतेद्बलात्॥ ७३८ ॥ अकारणोनकुत्रापिदृष्टोनाशःकथंचन॥ कारणेपियथानाशेविकल्पस्तादृशोभवेत्॥ दोषाअपितएवस्युस्तेनाहेतुर्नसिद्ध्यति॥ ७३९॥

ध्वंसस्याभावत्वादभावपक्षोक्तदोषयोजनसंभवेपिकथंभावपक्षोक्तदोषयोजनेत्याशंक्यतस्यभावरूपतांमहीघटत्वंघटतःकपालिकाकपालिकाचूर्णरजस्ततोणुरित्यादिविष्णुपुराणोक्तरीत्याअस्याध्यायस्यसप्तषष्ट्यधिकशतत्रयसंख्यापूरकश्लोकाद्युक्तयुक्त्याचसिद्धांस्मारयति अपिकोपीति अपिचकोप्यभावोभावभिन्नोनास्ति यथाघटध्वंसाभावोघटोपादानकपालात्मकइतिसंस्थितिःसिद्धांतः तथाचनित्यानित्यत्वविकल्पेनभावपक्षोक्तदूषणमपिपतत्येवेतिद्वयोरर्थः ॥७३७॥ ७३८ ॥ कारणाजन्यनाशपक्षंदूषयति अकारणइति अकारणकनाशाभ्युपगमोदृष्टविरुद्धः तथानाशेकारणजन्येस्वीकृतेयादृशोविकल्पआत्मभेदाभेदादिकोटिकःकृतोयेचतत्कोटिषुदोषाउक्तास्तेसर्वेअत्रापिपक्षेस्युस्तेनोक्तदोषप्रसंगेनअहेतुर्हेतुनाकारणेनशून्योनाशोनसिद्ध्यतिनयुज्यतइत्यर्थः ॥ ७३९ ॥ ॥५८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिंहावलोकनन्यायेनकारणजन्यत्वपक्षेदोषांतरमाह कारणेइति नाशस्ययत्कारणंतत्कारणजन्यंतदजन्यंवेतिविकल्प्यप्रथमपक्षेदोषः पूर्वार्द्धेनोक्तः तदर्थस्तुकारणेकारणजन्यत्वपक्षेहेतौकारणेकारणंचेदभ्युपगम्यतेतदाहेतुपरंपरास्यात्तथाचानवस्थेति अंत्येदोषमाह अहेताविति अहेतौकारणस्यकारणाजन्यत्वेनित्यत्वेनआत्मत्वापत्तिः तथाचात्मास्वस्वरूपनाशेकथंहेतुःस्यादित्यर्थः ॥ ७४० ॥ नन्वात्मनाशः पूर्वोक्तयुक्तिबाधितोपियत्सत्तत्क्षणिकंयथाविद्युत्तथाचायमात्मेत्याद्यनुमानबलात्सेत्स्यतीतिचेन्न मानस्यव्यंजकत्वमात्रस्वभावत्वेना कारकत्वादितिदर्शयन्नुमानस्यमेयसत्तासापेक्षत्वंप्रपंचयति अपिमानमित्यष्टभिः अपिचयत्त्वयास्वमतप्रसिद्धंमानंनाशहेत्वोरात्मनाशस्य तद्धेतोश्चसाधकतयाप्रकीर्तितंतस्यमानस्यसिद्धिःप्रमाणत्वलाभरूपानाशहेत्वोरसत्वेसतिकदाचननस्यात्तस्मान्मानविषयस्यसत्वंवक्तव्य

कारणेकारणंचेत्स्याद्धेतौहेतुपरंपरा ॥ अहेतौनित्यतैवस्यात्तद्वदात्मस्वरूपता ॥ आत्मनास्वात्मनाशादिर्भवेन्नैवकदाचन ॥ ७४० ॥ अपिमानंहियन्नाशमनाशहेत्वोःप्रकीर्तितं ॥ तस्याऽसत्वेनसिद्धिःस्यान्नाशहेत्वोःकदाचन ॥ ७४१ ॥ सत्वेसत्यपितन्मानंमेयेसत्यपिसंभवेत् ॥ विद्यमानेथवानाद्योमेयहानिप्रसंगतः ॥ ७४२ ॥ सतिचेत्स्वबलात्तस्यसत्तामानबलेनवा ॥ स्वबलेनयदासास्यान्मानंतत्रनिरर्थकं ॥ बलान्मानस्यचेद्भूयात्सत्तासाभाववद्गिरा ॥ ७४३ ॥

मितिसंबंधः ॥७४१॥ ततःकिमतआह सत्वेसत्यपीति मेयस्यसत्त्वेसत्यपिअंगीकृतेपिइदंविचारणीयं इदंकिं यत्प्रमाणंस्वप्रवृत्तेःपूर्वमसति अविद्यमानेपिप्रमेयेसंभवेत्प्रमाणत्वेनव्यवहारार्हंभवेत्किंवाविद्यमानएवतत्रप्रथमःपक्षोनयुक्तः मेयहानिप्रसंगतः मेयंविनाप्रमाणत्व लाभेकिंमेयेनेतिमेयापलापप्रसंगादित्यर्थ. ॥ ७४२ ॥ सतिचेदिति विद्यमानएवमेयेमानंसंभवतीत्यंत्यपक्षेपिविचारणीयं किंप्रमेयस्य सत्तास्वबलात्प्रमेयस्वभावप्रभावादेवप्रयुक्ताकिंवामानबलात् मानस्वभावप्रयुक्तेत्याद्येमानंनिरर्थकं मानस्यकारकतामिच्छतोमतेइ तिशेषः व्यंजकत्वेनसाफल्यस्यसिद्धांतसंमतत्वादिति अंत्येदोषमाह बलान्मानस्येति यदिमानस्यबलात्सत्ताभवतितर्हिअभाववद्गिराप्र तिपादकतासंबंधेनाभाववत्यातुच्छार्थप्रतिपादिकयेतियावत् एतादृश्यागिरावाण्यापिसासत्ताभूयादित्यर्थः ॥ ७४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभावप्रतिपादिकांगिरमनुमानवाक्यविधयाअभिनयति मिथिलायामिति वंध्यापुत्रोमिथिलायांवर्त्तमानःसन्महाराज्यंकरिष्यतीतिप्र
तिज्ञा जनकदौहित्रत्वात् यथान्योजनकदौहित्रइत्यर्थः॥ ७४४ ॥ नन्वस्यागिरःप्रामाण्यमेवनास्तिकथमनयार्थसत्ताआपाद्यतइतिचेत्
शृणु औत्सर्गिकस्यप्रामाण्यस्यत्रीणिबाधकानि बाधितार्थत्वमबोधकत्वंसंशयजनकत्वंच तदुक्तंभट्टैः अप्रामाण्यंत्रिधाभिन्नंमिथ्यात्वा
ज्ञानसंशयैरिति तत्रप्रमाणस्यकारकतामिच्छतोमतेबाधितार्थत्वंनदोषतयावाच्यं प्रमाणेनसत्यार्थसृष्ट्यातस्यकुत्राप्यसंभवात् तस्मात्तन्मते
अवोधकत्वसंशयजनकत्वेएवप्रामाण्यविरोधिनीइतिचप्रकृतवाक्येनस्तइत्याशयेनोक्तवाक्यस्यप्रामाण्यमाह प्रतिज्ञायामित्यादिना अ
त्रवाक्येसाध्यविशिष्टतयाधर्मिवचनंप्रतिज्ञाइतिलक्षणलक्षितप्रतिज्ञारूपेपूर्वार्द्धेदोषानिराकांक्षत्वादयोबोधप्रतिबंधकाःकेपिनसंति अर्थ

मिथिलायांमहाराज्यंवंध्यापुत्रःकरिष्यति॥जनकान्वयसंजातस्त्रीसुतत्वाद्यथापरः॥ ७४४॥ प्रतिज्ञायांनके
प्यत्रदोषाःसंतिकथंचन ॥ वंध्यापुत्रश्चनास्त्येवशब्दतोगम्यतेयतः॥ ७४५ ॥ सत्तामानवलेनैवयस्मात्सर्व
स्यवस्तुनः॥ वंध्यापुत्रवचोमानंबोधकत्वेनहेतुना॥ ७४६॥ अतएवनहेत्वादिदोषःकोप्यत्रसंभवेत्॥ ततोमे
यबलात्सत्तानमानवलतःक्वचित्॥ अन्यथामानमेयादिसर्वस्यादधरोत्तरम्॥ ७४७॥

बाधप्रयोजकाःप्रत्यक्षविरोधादयःप्रतिज्ञादोषाअप्यत्रनसंति यतोवंध्यापुत्रोनापुरुषोस्त्येवयतःशब्देनगम्यतेतवमानस्यकारकतांवदतो
मतेबोधकतयाप्रमाणभूतेनशब्देनसोप्यारब्धइतियावत् ॥ ७४५ ॥ उक्तमाशयंविशदयति सत्तेति यस्मात्त्वन्मतेसर्वस्यवस्तुनःसत्ता
मानवलेनैवभवतितस्मादुक्तंवंध्यापुत्रप्रतिपादकंवाक्यमपिबोधकत्वेनमानंसदर्थसत्तांकरोत्विविशेषः॥ ७४६ ॥ ननूक्तवाक्येप्रतिज्ञादो
षाभावेपिआश्रयासिद्धत्वादयोहेतुदोषाःसंतीत्यप्रामाण्यमितिचेन्न त्वन्मतेशब्देनाश्रयादेरपिसर्जनादित्याह अतएवेति फलितमाह तत
इति ततोवंध्यापुत्रवाक्यप्रामाण्यापत्तेर्भयात् अन्यथामानबलादेवसत्तांगीकारे अधरोत्तरंविपर्यस्तं अलीकवाक्यविरोधेनप्रमाणानाम
प्रामाण्यप्रसंगादितिभावः ॥ ७४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तविचारस्यफलंप्रकृतेयोजयति नचेति त्वयात्मनाशस्तद्धेतुश्चेत्युभयंमेयंमानगम्यमिष्टंतत्तुनसंभवति उभयोःसत्ताहीनत्वेनतत्रमानस्यनिष्फलत्वात् मानफलभूताभिव्यक्तिर्हिसतएवभवतीत्याशयः॥७४८॥ एवमात्मनाशेमानसंभावनांसामान्यतोनिरस्यविशेषतोपिनिरस्यति अपिमानमित्यादिना अपिचप्रत्यक्षंतदुपजीवकमनुमानादिकंचमानमात्मनाशेनसंभवति प्रतियोगिनआत्मनोऽतींद्रियत्वेनप्रत्यक्षायोग्यत्वादित्यर्थः प्रत्यक्षयोग्यतायाव्यापिकायाअभावेव्याप्यायाअनुमानादियोग्यतायाअप्यभावइतिभावः नचमनआत्मभासकं

नचमेयस्यनाशस्यतद्धेतोर्वाकथंचन॥ सत्तादृष्टाततोमानंनिष्फलंनाशहेतुगम्॥ ७४८ ॥ अपिमानंभवेन्नात्रप्रत्यक्षंनापरंतथा॥ आत्मनोऽतींद्रियत्वेनप्रत्यक्षाभावहेतुतः॥ ७४९॥ आगमःकोपिनैवात्रदृश्यतेस्वात्मनाशने॥ प्रत्यभिज्ञादिमानानिसंत्यत्रचविपर्यये॥७५०॥अद्राक्षंहस्तिनंस्वप्नेयःसजागरणेधुना॥ पश्यामिपंकजंनीलंश्रृणोमिचवचस्तव॥ ७५१॥ यश्चजागरणेद्राक्षंशब्दानश्रृणवंतथा॥ गाढंमूढःसुषुप्तेयोनाविदंतत्रकिंचन॥ ७५२॥दृष्टवानपियःस्वप्नान्बाल्येनानाविधानपि॥ सोधुनाजरयाग्रस्तस्तिष्ठामीहकुरूपभृत्॥ इत्यादिप्रत्यभिज्ञानंवर्त्ततेस्वात्मसंश्रयं॥ ७५३॥

तस्यात्मभास्यतायाःप्रपंचितत्वादिति ॥ ७४९ ॥ अस्तुतर्हिप्रत्यक्षयोग्यताऽनपेक्षआगमोत्रेतिचेन्न तादृशागमानुपलब्धेरित्याह आगमइति आत्मनाशप्रतिपादकआगमःश्रुतिवाक्यमत्रवेदेनदृश्यतेकिंतुसत्ताप्रतिपादनएवसर्वोवेदोव्यापृतइतिभावः विपर्ययेआत्मसत्तासाधनेतुप्रत्यभिज्ञादिमानानिसंत्युपलभ्यंतइत्यर्थः ॥ ७५० ॥ तत्रजागरणादिबुद्ध्यवस्थात्रयेबाल्यादिशरीरावस्थासुचात्मनऐक्यावगाहिनींप्रत्यभिज्ञामभिनयति अद्राक्षमितित्रिभिः त्रयंनिगदव्याख्यातम् ॥ ७५१ ॥ ७५२ ॥ ७५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मनोऽविनाशित्वसाधकंप्रत्यभिज्ञालक्षणंप्रत्यक्षंदर्शितमथानुमानंनानालिंगकमाह सद्यइतित्रिभिः जातस्यबालस्ययाःस्तन्यपा
नेआदिपदोक्तभयादिचेष्टासुचप्रवृत्तिरूपाःक्रियास्तालिंगभूताअतीतदेहेष्वप्यात्मनोऽविनाशित्वंपरंपरयानुमापयंतीत्यर्थः तथाहि प्र
वृत्त्यास्वकारणमिष्टसाधनताज्ञानमनुमीयते तच्चेष्टसाधनताज्ञानमन्वयव्यतिरेकज्ञानाधीनमेतज्जन्मन्यनुभवरूपेणासंभवात्स्मृतिरूपमेव
वाच्यं तथाचस्मृत्यासंस्काराअनुमेयाःसंस्कारैश्चस्वाश्रयोजन्मांतरसंबंध्यात्मेति ॥७५४॥ पुण्येति तथायेएतेविदुषांपुण्यपापक्रियासुकर
णाकरणेप्रवृत्त्यप्रवृत्तीअपिशब्दात्तदनुकूलौरागद्वेषौचतान्येतान्युत्तरकालउपकारकाणिउत्तरकालिकोपकारकसंबंधिनमात्मानंविनानु

सद्योजातस्यबालस्यस्तस्यन्यपानादिकाःक्रियाः॥ लिंगानिनाशशून्यत्वेपूर्वदेहेपिचात्मनः॥७५४॥ पुण्यपा
पक्रियास्वेतेकरणाकरणेअपि॥ विदुषांभाविदेहेपिनाशाभावेभवंतिहि॥ ७५५॥ अन्यथानुपपत्त्यादिरूप
लिंगान्यनेकशः॥ आत्मनस्ततएवायंविनाशरहितःपुमान्॥७५६॥ द्रष्टाविनाशरहितोयतोदृष्टिस्ततोनसा॥
नश्यत्यात्मस्वरूपेयंवन्ह्यनाशेयथोष्णता॥ ७५७॥ ततःसुप्तौपुमानेषद्वैतजालंनपश्यति ॥द्वैताभावापराधेन
नतुदृष्टेरभावतः॥७५८॥

पपद्यमानानिसंतिभाविदेहेप्यात्मनोविनाशाभावेलिंगानिभवंतीतिसंबंधः अन्यथानुपपत्तिःसाध्येनसाहचर्यनियमरूपाआदिःप्रथमं
मुख्यंरूपंसहकारियेषांतानिअन्यथानुपपत्त्यादिरूपाणितानिचतानिलिङ्गानीतिविग्रहः फलितमाह ततएवायमित्यादिनेतिद्वयोरर्थः
॥ ७५५ ॥ ७५६ ॥ द्रष्टेति यतउक्तयुक्त्याद्रष्टात्माविनाशरहितःसिद्धस्ततएवात्मस्वरूपभूतादृष्टिर्ननश्यति यथावन्हेरनाशेसतितत्स्वरूप
भूतोष्णतेत्यर्थः ॥ ७५७ ॥ ततइति यतआत्मस्वरूपभूतादृष्टिरविनाशिनीततएवंबोध्यं एवंकथं एषपुमान्सुप्तौयद्वैतजालंनपश्यतितत्रप्र
योजकोद्वैतस्यैवाभावलक्षणोपराधोनतुदृष्टेरभावस्तत्रप्रयोजकइत्यर्थः ॥ ७५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसुप्तौचितोविशेषाकारतालक्षणस्यद्वैतस्याभावएवकुतइतिचेत्तत्प्रयोजककार्याविद्याऽभावादितिदर्शयितुंकार्याविद्यायाःसविशेषताकारणत्वस्यान्वयव्यतिरेकाभ्यांस्पष्टीकरणपरायायत्रवाइत्यादिकायाएकत्रिंशत्तम्याःकंडिकायाअर्थंदर्शयति यत्रद्वैतमितिचतुर्भिः यत्रयस्मिन्कालेस्वमेस्वप्नावस्थारूपेतत्समेस्वप्नसमेजागरेजाग्रदवस्थारूपेवातद्वन्मायाविनिर्मितेमायाविनानिर्मितप्रपंचदर्शनकालेवाद्वैतमिवमिथ्याभूतंद्वैतमाभातितत्रकालेदर्शनादिक्रियाकर्त्तातक्रियाकर्मणोऽन्यआत्मानंभिन्नंमन्यमानःसन्स्वस्माद्भिन्नत्वेनकल्पितैःसर्वैश्चक्षुरादिभिर्बाह्याभ्यंतरकरणैःकर्मरूपादिकंस्वस्माद्भिन्नतयावगच्छति अत्रनानाविधविशेषदर्शनप्रयोजकस्तुभेदमोहोभेदाकारेणपरिणताऽविद्यैवेतिद्वयोःसंबंधः कीदृशेस्वप्नादौ सुप्तीतरात्मनिसुप्तिविलक्षणस्वरूपे ॥ ७५९ ॥ ७६०॥ सुप्ताविति सुप्तौतुतस्यभेदमोहस्यापिश

यत्रद्वैतमिवाभातिस्वप्नेसुप्तीतरात्मनि॥ मायाविनिर्मितेतद्वत्तत्समेजागरेपिच॥ ७५९॥ तत्रान्यःकर्मणःकर्त्ताकर्मान्यदवगच्छति॥ सर्वैराभ्यंतरैर्बाह्यैःकरणैर्भेदमोहतः॥ ७६०॥ सुप्तौतस्याप्यभावेनकथंभिन्नंप्रपद्यते॥ स्वस्मादेकरसाद्विश्वंगंधर्वनगरोपमं॥ ७६१॥ यत्किंचित्सकलंविश्वंभूतभौतिकरूपभृत्॥ विभक्तंनात्मनःसुप्तावात्मायदवगच्छति॥ ७६२॥ स्वसजातिविजात्युत्थभेदत्रयविवर्जनात्॥ एकोनिरंतरोद्रष्टासुप्तौभवतिभूपते॥ ब्रह्मशब्दाभिधेयोयंस्वयंज्योतिःपरःपुमान्॥ ७६३॥ अनुशासनमेवंसचकारमुनिसत्तमः॥ जनकायविदेहाययाज्ञवल्क्योतिबुद्धिमान्॥ ७६४॥

ब्दात्कामकर्मादिश्चाभावेनस्वस्मादेकरसाद्विश्वंभिन्नतयाकथंप्रपद्येतजानीयादितिसंबंधः ॥ ७६१ ॥ तत्रहेतुतयासकलभेदकोपाधीनांसदात्मरूपकारणाद्विभागेनानवस्थानमाह यत्किंचिदिति यतःसर्वंविश्वंसुप्तिकालेआत्मनःसकाशाद्विभक्तंविभागेनावस्थितंनभवतियदात्मावगच्छेदित्यर्थः ॥ ७६२ ॥ अथद्वात्रिंशत्तम्याःकंडिकायाअर्थंवर्णयति स्वसजातीतिद्वात्रिंशच्छ्लोकैः श्रुतिगतसलिलपदेनशुद्धत्वाभिधायिनाविजातीयभेदस्यएकपदेनसजातीयभेदस्याद्वैतपदेनस्वगतभेदस्यचवारणात्सुप्तौद्रष्टाएकोनिरंतरःसर्वभेदरहितइतियावत्एतादृशोयतोभवतिअतएवायंब्रह्मशब्दाभिधेयःस्वयंज्योतिश्चयःपरःपुमान्भासमानानंदत्वेनपरमपुरुषार्थरूपोलोकपदेनोक्तःसएवभवतीत्यर्थः ॥ ७६३ ॥ एवंविधउपदेशोयाज्ञवल्क्येनजनकायकृतइतिश्रुतिरधिकारिजनान्प्रत्याह अनुशासनमिति स्पष्टम् ॥ ७६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंविधंतदनुशासनमित्याकारामधिकारिणांपुनरुत्थितामाकांक्षामालक्ष्यश्रुत्याएषास्येत्याद्युक्तंतदर्थमाह याज्ञवल्क्येनेत्यादिना याज्ञवल्क्येनयासुप्तिरुक्तासुप्तिगम्यमात्मस्वरूपमुक्तमितियावत् एषासुप्तिगम्यात्मस्वरूपात्मिकाऽस्यजंतोःपरमागतिः गंतव्यंस्थानमित्यर्थः परमुत्तरार्द्धेनोक्तमिति ॥ ७६५ ॥ कैर्गंतव्येतिजिज्ञासायांबहिरंगैर्यज्ञादिभिरंतरंगैःशमादिभिश्चोपकृतैःश्रवणाद्युपायैरित्याह यज्ञादिभिरिति श्रवःश्रवणं एषागतिः॥ ७६६॥ अस्यरूपस्यपरमसंपद्रूपतामाह कुबेरस्येति यथालोकेकुबेरस्यसंपत्परमाप्रसिद्धातथैषासुषुप्तिःपरमासंपत्यतोस्यांसुप्तावात्मनःसकाशात्परंभिन्नंकिंचित्संपाद्यंयत्नेनसाध्यंन तथाचनित्यसिद्धत्वादात्मस्वरूपमेवपरमासंपत् अन्यास्तुसंपदआ

याज्ञवल्क्येनयासुप्तिरुक्तैषापरमागतिः ॥ नातःपरंहिगंतव्यमस्तिलोकत्रयेषुहि ॥ ७६५ ॥ यज्ञादिभिर्महापुण्यैर्ब्रह्मचर्यादिसाधनैः ॥ श्रवादिभिस्तथोपायैर्गंतव्यैषात्मरूपिणी ॥ ७६६ ॥ कुबेरस्ययथासंपत्परमाताद्दशीनृणां ॥ सुषुप्तिःपरमासंपत्संपाद्यंनात्मनःपरम् ॥ ७६७॥ सुषुप्तौप्राप्यतेसर्वैरेषआत्माऽस्यदेहिनः ॥ परोलोकोयतोनान्यल्लोकनीयंपरंस्मृतम् ॥ ७६८ ॥ तरुणीरूपसंपन्नापुत्रोवागुणसंयुतः ॥ देहोवाम्दृदुलोरूपलावण्यसहितोनिजः॥ ७६९॥ गजैःपर्वतसंकाशैर्हयैराकाशगामिभिः॥ मेघघोषैरथैस्तद्वत्पादातैरकुतोभयैः॥ ७७०॥ शंखपद्मनिधिप्रख्यैःकोशैश्चक्षयवर्जितैः॥ कोष्ठागारैस्तथानंतैर्नानाधान्यप्रपूरितैः॥ ७७१॥ अप्सरःसदृशानंतनानावारांगनागणैः॥ वैजयंतोपमैःप्रौढप्रासादैःसुमनोहरैः॥ ७७२॥

गंतुकत्वादपरमाइतिभावः ॥ ७६७ ॥ उक्तस्यरूपस्यपरमलोकतामाह सुषुप्तावितिसप्तभिः यआत्मासुषुप्तौसर्वैःप्राप्यतेसएषोऽस्यदेहिनोलोककामस्यपरोलोकोलोकनीयः यतइतोन्यद्यद्यल्लोकनीयंतत्परमुत्कृष्टंनभवतिकिंत्वपकृष्टमेवेत्यर्थः ॥ ७६८ ॥ उक्तंस्फुटयन्नन्यपदार्थभूतान्कांश्चिद्दर्शयति तरुणीति रूपादिसंपन्नास्तरुण्यादयोऽथवावर्णितविशेषणैर्गजाद्यैरुपलक्षितमिंद्रस्येवराज्यंसदातनंस्वात्मनःसंबंधिभवेत्तत्सर्वंपरंलोकनीयंनभवतीतिषष्ठेनाभिसंबंधः लावण्यंमुक्तावदंगकांतिः ॥ ७६९ ॥ गजैरिति स्पष्टं ॥ ७७० ॥ शंखेति शंखादिनिधिस्वरूपंमार्कंडेयपुराणेद्रष्टव्यं ॥ ७७१ ॥ अप्सरइति स्पष्टं ॥ ७७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इंद्राणीति एतत्पूर्वार्द्धमपिप्रासादविशेषणं अव्याहताअमोघाआज्ञायेषुतेतथातैः॥ ७७३॥ इंद्रस्येवेति पूर्वार्द्धान्वयोदर्शितः तरुण्यादीनामपरमलोकत्वेहेतुर्द्वितीयार्द्धेनोक्तः यतोऽनेनतरुण्यादिसाधनेनलोकनीयंनृणांयत्सुखंतज्जायते जन्यमनित्यमितियावदितितदर्थःफलितमाह परमइति तस्मादत्रसुप्तौयोऽयमात्मासएवशरीरिणःपरमोलोकनीयइतिसंबंधः॥ ७७४ ॥ परमलोकपदेनयत्परमपुरुषार्थत्वमुक्तंतत्रहेतुतयापरमानंदत्वमाह परमेति यआत्माऽमुनाशरीरिणासुप्तौप्राप्यतेसपरमानंदरूपः अस्त्वानंदत्वंपरमत्वंकथमित्यतआह परमत्वमित्या

इंद्राणीसदृशस्वात्मजायासंघविराजितैः॥ दृष्टपुष्टप्रजासंघैर्दैशैरव्याहताज्ञकैः ॥ ७७३ ॥ इंद्रस्येवभवेद्राज्यमथवास्वात्मनःसदा ॥ लोकनीयंयतोनेनसुखंसंजायतेनृणां ॥ परमोलोकनीयोयमस्यात्मात्रशरीरिणः ॥७७४॥ परमानंदरूपोयःसुषुप्तौप्राप्यतेऽमुना ॥ परमत्वंनचासिद्धंगतिसंपत्स्वरूपिणः॥लोकस्यानंदरूपस्यसर्वाधिक्येनहेतुना॥ ७७५ ॥ यतःसर्वाणिभूतानिस्थावराणिचराणिच ॥ एतस्यैवोपजीवंतिमात्रामानंदरूपिणः॥ ७७६॥ समुद्रस्ययथामात्रामुपजीवंतिखेस्थिताः ॥ मेघानीरमुचोभूमौवर्षकालउपागते॥ ७७७॥ मात्रालेशःसमुद्दिष्टोयथास्निग्धस्यवस्तुनः॥ हस्तस्थितस्यसंत्यागेहस्तेतिष्ठतिकिंचन॥ ७७८ ॥ ब्रह्मादिस्तंबपर्यंताजंतवोलेशभागिनः॥ आनंदस्यास्यतेनायमानंदःपरमःस्मृतः॥ ७७९ ॥

दि यथागतिरूपेणसंपद्रूपेणलोकरूपेणचपरमत्वंनासिद्धंकिंतुसिद्धमेवतथानंदरूपेणापिपरमत्वंनासिद्धंसर्वानंदाधिक्यादित्यर्थः॥७७५॥ कथंसर्वाधिक्यमित्यतआह यतइति उपजीवंतिआश्रित्यवर्तंते मात्रांलेशं ॥ ७७६ ॥ तत्रदृष्टांतमाह समुद्रस्येवि यथाकाशगतावर्षुकामेघाःसमुद्रस्यजलसमष्टेर्लेशमाश्रित्यस्वरूपाभिव्यक्तिलभंतइत्यर्थः ॥ ७७७ ॥ मात्रापदार्थमभिनयति मात्रेति यथास्निग्धस्यघृतादेर्हस्तेगृहीत्वात्यक्तस्यापिकश्चिल्लेशोहस्तेतिष्ठतिसतस्यमात्रेत्युच्यतेइत्यर्थः ॥ ७७८ ॥ दार्ष्टांतिकेयोजयति ब्रह्मादीनि ब्रह्माहिरण्यगर्भःस्तंबस्तृणादिगुच्छः॥ ७७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थमुपपत्त्याविशदयन्संसारदशायामात्मनःपरमानंदतायाअभानेप्रयोजकंदर्शयति आत्मनइत्यादिना एवंवक्ष्यमाणप्रकारेणआ त्मनःपरमानंदत्वंजानीयात् तत्रानंदत्वंसुखव्यवहारेणसाधयति आनंदइति विषयप्राप्तिजन्यत्वेनाभिमतस्यसुखनाम्नाप्रसिद्धस्यानंदप दार्थस्यसत्वेनविवादःकस्यचिदित्याशयः ॥ ७८० ॥ तस्यविषयाःकारणमितिलौकिकावदंतीत्याह अभीष्टमिति अशनंभक्ष्यं तस्यसुख नामकस्य ॥ ७८१ ॥ तत्रापीदंविचार्यं विषयाणांकिमुत्पादकत्वलक्षणंकारणत्वंकिंवाभानप्रतिबंधकापनयरूपाभिव्यंजकत्वलक्षणंतत्र

आत्मनःपरमानंदंजानीयादेवमत्रहि ॥ आनंदसुखनामायमस्तिकश्चिज्जनेष्विह ॥ विषयःप्राप्तितोजातोम नुजानामहर्निशं ॥ ७८० ॥ अभीष्टमशनंतद्वल्ललनाश्चमनोरमाः ॥ पुत्रमित्रादिकंचैवकारणंतस्यकीर्तितं ॥ ७८१ ॥ यद्यप्येतैरसौनैवजायतेस्वात्मरूपकः ॥ तथापिदुःखहानिंतेकुर्वंतिविषयाःसदा ॥ ७८२ ॥ आत्मा ज्ञानेनजंतूनांतथाबाह्यस्यदर्शनात् ॥ विषयेजायतेकामःकामाद्दुःखंचजायते ॥ ७८३ ॥ विषयावाप्तितःका मोविनश्यतितदाहिसः ॥ यावदन्योनजायेततस्मिन्नपिपरत्रवा ॥ ७८४ ॥

नाद्यःनित्यात्मस्वरूपलक्षणस्यानंदस्योत्पत्त्ययोगात् तस्मादंत्यःपक्षःपारिशेष्यतइत्याशयेनाह यद्यपीति असावानंदोदुःखस्यसुखप्र तिबंधकस्यहानिंकारणापहारेणापचयं ॥ ७८२ ॥ किंतद्दुःखकारणमितिचेत्कामइत्याह आत्मेति यथात्तृणप्रच्छादितमंभोविहायक श्चिन्मृगतृष्णामभिधावेत्तथात्मानमानंदरूपमज्ञानावृतंविहायविषयदर्शिनांकामइच्छादुःखमूलंभवतीति ॥ ७८३ ॥ विषयेति वि षयप्राप्त्यातुविषयेच्छाउपशाम्यतिसाकामोपशांतिरपितावत्तिष्ठतियावत्तस्मिन्पूर्वमिष्टेपरत्रतद्भिन्नेवाकामान्तरंनजायतइति ॥ ७८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामस्येति तस्यविषयगोचरस्यकामविशेषस्यनाशेतज्जंतस्मात्कामविशेषाज्जातंदुःखंविनश्यतिसदुःखविनाशोयावदात्मनिबुद्धौतिष्ठति तावदात्मनोरूपंस्फुरेत् कीदृशमात्मरूपं एतावद्विक्षेपरहितंएतावताप्रतियोगिदुःखव्यक्तिमात्राकारेणविक्षेपेणरहितं तत्त्वज्ञानंविनाऽज्ञानानपायादज्ञानावृतंच ततआवरणानपायात्तद्विक्षेपरहितमात्मरूपमावृतंसल्लोकेसुखशब्देनव्यवह्रियतइतिद्वयोरर्थः अयंभावः लोकेद्विविधंप्रतिबंधकं किंचिदावरणरूपंयथारवेर्घनः किंचिद्विक्षेपरूपंयथानेत्रचांचल्यं तथाचात्रविक्षेपस्यबुद्धिचांचल्यस्यनिवृत्तिमात्रेणाज्ञानावृतस्यैवात्मनोमेघावृतरवेरिवयद्भानंतथात्तत्सुखमितिलोकेव्यवह्रियतइति ॥ ७८५ ॥ ७८६ ॥ अतएवेति यतआत्मनोरूप

कामस्यतस्यनाशेनतज्जंदुःखंविनश्यति ॥ यावद्दुःखविनाशोयमात्मन्यस्मिन्स्थितोभवेत् ॥ ७८५ ॥ अज्ञानावृतमेतावद्विक्षेपरहितंस्फुरेत् ॥ आत्मरूपंततस्तत्स्यादावृतंसुखशब्दभाक् ॥ ७८६ ॥ अतएवसुखंनाहमितिबोधोनृणांभवेत् ॥ आत्मनस्त्वावृतंयस्मात्संसारेवर्त्ततेवपुः ॥ तेनात्मासुखरूपोहमितिबोधोनजायते ॥७८७॥ तमोवृतेयथाकाशेखद्योतोमणिरेववा ॥ यावत्तमोनिहंत्येषतावदेवचतत्स्फुरेत् ॥ ७८८ ॥ एवमेवात्रसंप्राप्तिर्यावतीविषयस्यहि ॥ तावत्कामफलंदुःखंनिहन्यादात्मनिस्थितं ॥ ७८९ ॥ सुखंसंजायतेतावत्सर्वेषामिहदेहिनां ॥ तारतम्यंभवेत्तेनसुखस्यात्मस्वरूपिणः ॥ ७९० ॥

मावृतमतएवसंसारिणामहंसुखमित्याकारोबोधोनदृश्यतइतिप्रथमदलार्थउत्तरदलद्वयेनस्फुटीकृतः ॥ ७८७ ॥ सुखस्यतारतम्यंदृष्टांतेनस्फुटयति तमोवृतइतिपंचभिः यथाएषखद्योतोमणिर्वाऽऽकाशगतःसन्यावद्देशावच्छिन्नंतमोनिहंतितावद्देशावच्छिन्नमेवचतदाकाशंस्फुरेदिति ॥ ७८८ ॥ एवमिति एवंविषयप्राप्तिःखद्योतादिसमादुःखमिच्छाजन्यंतमोनिभमात्माकाशेकल्पितंनिहंतितावदपगतदुःखसपरिमाणमात्मरूपंसुखंजायतेविक्षेपरहितंभासतेइत्येवंतारतम्यंबोध्यमितिद्वयोरर्थः अत्रतमोदुःखयोरावरणविक्षेपत्वरूपोऽवांतरविशेषोनविवक्षितः प्रतिबंधकतामात्रेणसाम्यस्यविवक्षितत्वादितिबोध्यं ॥ ७८९ ॥ ७९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंप्रतिबंधकाभावस्यआत्मभानेऽन्वयोदर्शितोव्यतिरेकमाह केनचिदिति यथाकेनचिन्निमित्तेनवायुवेगादिरूपेणखद्योतादेरपायेऽपग मेसतिपुनस्तमःप्रादुर्भावादाकाशोनस्फुरति कीदृशआकाशः खद्योतादिसत्वकालेप्रतीतोपितथाकामांतरस्यआत्मानंदभानप्रतिबंधकदुः

खप्रयोजकस्योत्पत्त्यात्मरूपंसुखंनभासते कीदृशं कामशांतिकालेयप्रतीतमितिद्वयोःसंबंधः ॥ ७९१ ॥ ७९२ ॥ ननुकामोपशमस्यसु खप्रादुर्भावप्रयोजकत्वंनसंभवतिपीनसरोगिणश्छिक्काजन्यसुखेव्यभिचारादितिचेन्नतत्रापिच्छिक्कानिरोधकालेतदिच्छायाःस्फुटोपलं भेनान्यदाप्यस्फुटेच्छाकल्पनेबाधाभावादित्याह क्षुतादिजइति क्षुतंछिक्का तदुद्भवःतस्मिन्क्षुतादौविषयतासंबंधेनोद्भवउत्पत्तिर्यस्य कामस्यसतथाकामइच्छाअस्त्येव यतएतस्यक्षुतादेर्निरोधादिकालेसस्फुटोदृश्यतइति प्रथमादिपदेनोद्गारादिग्रहः द्वितीयेनानुदयग्रहः

केनचिद्धिनिमित्तेनखद्योतादेरपायतः॥ आकाशोनस्फुरेत्सोयंप्रतीतोपीहदेहिनां॥ ७९१॥ तद्वत्कामांतरप्रा प्त्यापूर्वजातंसुखंनहि॥ प्रतीयतेसदेवात्मस्वरूपंसर्वदेहिनाम्॥ ७९२॥ क्षुतादिजेपिलोकेस्मिन्सुखेकामस्त दुद्भवः॥ अस्त्येवयतएतस्यरोधादौदृश्यतेस्फुटः॥ ७९३॥ ततोविषयजंनृणांतारतम्याद्यवस्थितं॥ प्रसिद्धं सुखमेतस्मिन्लोकेबुद्धिमतांसदा॥ सुखमेवसमुद्दिष्टमानंदोनापरस्तुसः॥ ७९४॥ मनुष्याणांचसर्वेषांप्र सिद्धोयोधिकःपुमान्॥ युवादृढवपुस्तद्वद्धीमार्जुनसमोबली॥ ७९५॥ सर्वज्ञोव्यासवत्तद्वत्पार्वतीपतिनासमः॥ अस्त्रैर्नानाविधैर्मोक्षसंधानादिसमन्वितैः॥ अश्विनाविवनीरोगःसिद्धएषप्रकीर्तितः॥ ७९६॥

॥ ७९३ ॥ फलितमाह ततइति ततःकामोपशमस्यसुखाविर्भावप्रयोजकत्वात्तारतम्येनावस्थितंवैषयिकंसुखंलोकेप्रसिद्धंतच्चसुखमात्म स्वरूपभूतानंदान्नभिन्नं यदिहिजन्यमभविष्यत्तदात्मभिन्नमभविष्यत् इदंत्वभिव्यंग्यमेवेत्यर्थः ॥ ७९४ ॥ एवंलौकिकसुखानामौपा धिकभेदभिन्नानामात्मानंदमात्रत्वंदर्शितमथेतरत्रआपेक्षिकपरमत्वप्रदर्शनपूर्वकमात्मानंदस्यनिरतिशयत्वस्पष्टीकरणपरायास्त्रयस्त्रिंशत्त म्याःकंडिकायाअर्थंपंचत्रिंशच्छ्लोकैर्वर्णयंस्तत्रमानुषानंदस्यपरमकाष्ठांदर्शयति मनुष्याणामितिसप्तभिः यःपुमान्युवत्वादिभिर्गुणैःसर्वा धिकोभवेत्तस्ययआनंदःसद्विपदांमनुष्याणांपरमइतिषष्ठेनाभिसंबंधः तत्रश्रुतिगतराद्धपदेनसिद्धत्वाभिधायिनासंगृहीतान्गुणान्दर्शयति युवेत्यादिनानीरोगइत्यंतेन दृढवपुर्वज्रसंहननांगः अस्त्रैःश्रीशंभुसमः मोक्षउत्सर्गः संधानंशरादौअस्त्रशक्तेराधानं आदिपदेनोपसंहारग्रहः एतन्मंत्रसमन्वितत्वमस्त्रविशेषणं ॥ ७९५ ॥ ७९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाह्योपकरणसंपन्नत्ववाचकस्यसमृद्धपदस्यार्थमाह समृद्धइति यथाबलानुजःश्रीकृष्णस्तत्प्रयुक्तात्साहाय्यात्पांडवोयुधिष्ठिरोऽर्जुनो वासमृद्धइतिप्रसिद्धस्तथाताद‍ृशाश्रीकृष्णसमेनसहायेनसंपन्नःप्रकृतेसमृद्धोज्ञेयइतिसंबंधः ॥ ७९७ ॥ अधिपतिपदार्थंचक्रवर्तिराजत्व रूपमाह सर्वेषामिति द्विपदांमनुष्याणांतथापक्ष्यादीनांचसप्तद्वीपवासिनांसर्वेषांचक्रवर्तीस्वतंत्रोराजाभवेत्सोत्राधिपतिशब्देनोक्तइत्यर्थः ॥ ७९८ ॥ तथाभोग्यैर्भोगोपकरणैर्भोगशक्त्याचसंपन्नोभवेदित्याह मनुष्याणामिति ॥ ७९९ ॥ तस्येति तस्यवर्णितस्य श्रुतौत्वानन्दानं दिनोरभेदविवक्षयासामानाधिकरण्यमितिबोध्यम् ॥ ८०० ॥ तस्यपरमत्वंस्फुटयति एतद्वदिति स्पष्टम् ॥ ८०१ ॥ वर्णितमनुष्यानंदात्श

समृद्धःपांडवोयद्वद्बलानुजसमुतिस्थात् ॥ साहाय्यात्ताद‍ृशाज्ञेयःसहायेनसमन्वितः ॥ ७९७ ॥ सर्वेषांद्विपदांतद्वत्सप्तद्वीपनिवासिनां ॥ भवेदधिपतीराजाचक्रवर्त्तीमहायशाः ॥ ७९८ ॥ मनुष्याणांहियेभोगाअन्नपानांगनादयः ॥ तैःसंपन्नतमःसर्वैराप्तकामइवस्थितः ॥ ७९९ ॥ तस्ययोजायतेपुंसआनंदश्चक्रवर्तिनः ॥ अस्माकंद्विपदांसोयमानंदःपरमःस्मृतः ॥ ८०० ॥ एतद्वन्मनुजेष्वत्रसुखीकोपिनविद्यते ॥ यतोऽतःपरमोऽस्यायमानंदोद्विपदामिह ॥ ८०१ ॥ आनंदोयःपरःप्रोक्तोद्विपदांतच्छतादपि ॥ अधिकोजितलोकानांपितॄणांस्वर्गवासिनां ॥ ८०२ ॥ पितृलोकस्थितानंदशततोप्यधिकःस्मृतः ॥ गंधर्वलोकआनंदोगंधर्वाणांमहात्मनां ॥ ८०३ ॥ गंधर्वलोकआनंदशततोप्यधिकःस्मृतः ॥ आनंदःकर्मदेवानांयेदेवाःकर्मणाभवन् ॥ ८०४ ॥ कर्मदेवस्थितानंदशततोप्यधिकःस्मृतः ॥ आजानजानांदेवानामानंदोहिमहात्मनां ॥ ८०५ ॥

तगुणाधिकःपितृलोकवासिनामानंदइत्याह आनंदइति जितःपूर्वकल्पार्जितश्राद्धादिकर्मणावशीकृतोलोकोयैस्तेतथेतिपितृविशेषणं स्वर्गश्चंद्रलोकः ॥ ८०२ ॥ ततोपिशतगुणोगंधर्वानंदइत्याह पितृलोकेति पितृलोकगतानंदायदिशतसंख्याःस्युस्ततोपिगंधर्वलोकानंदव्यक्तिरधिका खंडव्यक्तिभ्यस्तत्समैकव्यक्तेराधिक्यस्यलोकेपिप्रसिद्धत्वादितिभावः एवमग्रेपि ॥ ८०३ ॥ गंधर्वेति गंधर्वलोकेवर्तमानोयआनंदस्तज्जातीयानांशतात्कर्मदेवानांसंबंध्यानंदोधिकः तेकर्मदेवाइतियेकर्मणाअग्निहोत्रादिरूपेणलब्धदेवभावाः ॥ ८०४ ॥ कर्मेति कर्मदेवानंदानांशतादधिकआजानजदेवसंबंध्यानंदः आजानजदेवानामयेसृष्ट्यादौउत्पन्नायागदेवताअग्न्यादयः ॥ ८०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आजानेति आजानजदेवानंदात्प्रजापतिलोकेशतगुणाधिकआनन्दः यस्मात्प्रजापतिलोकानन्दात्परमेष्ठिनोविराजोलोकेआनन्दःशतगुणाधिकइतिसंबंधः ॥ ८०६ ॥ विराडिति विराडानंदशतात्सूत्रात्मनोहिरण्यगर्भस्यनिवासभूतेब्रह्मलोकेआनंदोधिकः कीदृशस्यसूत्रात्मनः स्थूलजगत्कारणस्य ॥८०७॥ शरीरिणामानंदोहिरण्यगर्भलोकानंदात्परोनास्तीत्याह इतइति इतोहिरण्यगर्भानंदात् ॥८०८॥ वर्णितविधयायदानंदतारतम्यमुक्तंतत्फलंहिरण्यगर्भानंदाद्वैराग्यंपरमात्मानंदप्राप्तिसाधनभूतंश्रुतेर्विवक्षितमित्याह अत्रेति अत्रहिरण्यगर्भानंदे ॥ ८०९ ॥ परमवैराग्यस्यपरमानंदप्राप्तिसाधनतांस्पष्टयितुंवैराग्यतारतम्यानुसारेणतत्तदानंदप्राप्तिप्रतिपादकानांश्रोत्रियपदघटित

आजानदेवजानंदशतततोप्यधिकःस्मृतः॥यस्मात्प्रजापतेर्लोकआनंदःपरमेष्ठिनः॥८०६॥विराडानंदशततोब्रह्मलोकेधिकःस्मृतः॥ सूत्रात्मनोमहेशस्यजगत्कारणरूपिणः॥८०७॥ इतःपरंनदेहेषुस्थूलसूक्ष्मविभेदिषु॥ वर्त्ततेधिकआनंदःकोपिकुत्रापिकर्हिचित्॥ ८०८ ॥ अत्रवैराग्यसिद्ध्यर्थंस्थूलसूक्ष्मशरीरगः॥ आनंदस्तारतम्येनकथ्यतेवेदवादिभिः ॥८०९॥ सार्वभौमेजनेतद्वत्पितृलोकेमनोरमे ॥ गंधर्वाणांतथालोकेकर्मदेववपुष्यपि॥८१०॥आजानदेवदेहेपिविराज्यपितथेश्वरे॥ योयआनंदउक्तोत्रतंतमाप्नोत्ययंसदा॥८११॥ योधीतवेदोविज्ञातवेदार्थःपापवर्जितः॥ यस्मिन्यस्मिन्हिनिष्कामआनंदेत्रातिशायिनि ॥८१२॥

वाक्यानामर्थंदर्शयति सार्वभौमइतित्रिभिः सार्वभौमेसर्वभूमेरीश्वरेजनेमनुष्येतथापितृलोकेगंधर्वलोकेकर्मदेवशरीरेआजानजदेवशरीरेअपिशब्दोक्तप्रजापतिशरीरेविराट्शरीरेईश्वरपदोक्तहिरण्यगर्भशरीरेचयोयउत्तरोत्तरंशतगुणआनंदउक्तस्तस्यतस्यप्राप्तिसाधनंद्विविधंतत्रएकंसाधनंसार्वभौमत्वादिसंपादकंकर्मकालांतरभाविफलकंप्रसिद्धं द्वितीयंसद्यःफलकमाह तमित्यादिना तंतमानंदमयमधिकार्यपिप्राप्नोति अयंकः योवेदाध्ययनार्थज्ञानसंपन्नोनिष्पापोनिष्कामश्च वेदाध्ययनार्थज्ञानाभ्यांहीनोहिजिज्ञासयादुःखितोभवति पापीतुपापफलभयेनाकुलः सकामेतुकामनैवसुखप्रतिबंधिका तत्रनिष्कामत्वतारतम्यानुसारेणतत्तदानंदविशेषलाभइतित्रयाणामर्थः तथाचोक्तं यतोयतोविरज्यतेततस्ततोविमुच्यतइति ॥ ८१० ॥ ८११ ॥ ८१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह यदेति यदायमधिकारीहिरण्यगर्भानंदेशरीरिणामानंदोत्कर्षपर्यवसानभूमावपिकामवान्नभवतितदातंहिरण्यगर्भानंदंगच्छेत् योयंहिरण्यगर्भानंदोयस्यानंदस्यलेशभूतःसआनंदःपरमात्मरूपःसर्वेषांसुषुप्तिगम्यइतिद्वयोःसंबंधः ॥ ८१३ ॥ ८१४ ॥ सुषुप्तानंदस्यपरमत्वमेवस्फुटयति अवाङ्मनसेति अयंपरमात्मनःस्वरूपभूतआनंदःसूत्रजानंदादितरापेक्षयापरमादपिपरमोयतोऽवाङ्मनसगोचरस्तारतम्यवर्जितः कीदृशस्यपरमात्मनः अव्याकृतस्यअव्याकृतोपाधिकत्वेनसविशेषस्यतत्साक्षितयानिर्विशेषस्यचेतिसंबंधः॥८१५॥

यदासूत्रेपिनैवायमानंदावधिरूपिणि॥कामवानथतंगच्छेदानंदंयस्यसोपिहि॥८१३॥सूत्रानंदोभवेन्मात्राभूतोयःपरमःस्मृतः॥सतुसौषुप्तआनंदःपरमात्मेतिकीर्तितः ॥८१४॥ अवाङ्मनसगम्योयंतारतम्यविवर्जितः॥परमात्सूत्रजानंदात्परमःपरमात्मनः॥आनंदोऽव्याकृतस्यास्यसाक्षिणोव्याकृतस्यच ॥ ८१५ ॥ सूत्रतःपरमानंदःपरस्तिष्ठतिदेहिनः॥इतिसिद्ध्यर्थमत्रापिश्रोत्रियःकीर्त्यतेश्रुतौ॥८१६॥ आनंदमेनमादिश्यपरमानंदरूपिणम्॥ याज्ञवल्क्यइदंवाक्यमुक्तवान्जनकंप्रति॥८१७॥ब्रह्मलोकोमयाराजन्सुप्तौयस्तेसमीरितः॥सएषपरमानंदःसूत्रजादधिकोहियः॥८१८॥ एवमुक्तेतदाराजायाज्ञवल्क्यमभाषत ॥ त्रिवारंचयथापूर्वंनिजाभिप्रायदर्शकः॥८१९॥

अस्यपरमात्मानंदस्यसूचनायैवहिरण्यगर्भानंदस्यविरक्तश्रोत्रियलभ्यताश्रुतावुक्तेत्याह सूत्रतइति देहिनःसूक्ष्मसमष्टिशरीरात्सूत्रतःपरंयथाभवतितथापरमात्मानंदस्तिष्ठतीत्यस्यार्थस्यसिद्ध्यर्थमत्रहिरण्यगर्भानंदप्रतिपादिकायांश्रुतौश्रोत्रियउक्तविशेषणआनंदलब्धत्वेनोक्तइत्यर्थः ॥ ८१६ ॥ आनन्दमिति स्पष्टम् ॥ ८१७ ॥ एषब्रह्मलोकइत्यादेःशेषस्यार्थमाह ब्रह्मेत्यादिना योमयातुभ्यंसुप्तौगम्योब्रह्मलोकउक्तःसवर्णितपरमानंदरूपएवेत्यर्थः ॥ ८१८ ॥ एवमिति एवंमुनिनोक्तेसतिराजामुनिंप्रतितथाऽऽहस्म तथाकथं यथापूर्वंत्रिवारमुक्तं कीदृशोराजा निजाभिप्रायस्यवरापरिपूर्तिलक्षणस्यदर्शकःसूचकइत्यर्थः ॥ ८१९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रराजवाक्यमभिनयति सोहमिति हेमुनेसोहंत्वयाविद्यामनुशिष्टोस्मिअतस्तेगुरवेगुरोर्दक्षिणांगोसहस्ररूपांददामिइतऊर्ध्वंविशेषेणमो क्षोयेनोपदेशेनसिद्ध्येत्तमेवोपदेशंकुर्विंतिसंबंधः॥८२०॥ एवंवदतोराज्ञोभिप्रायमभिनयति अभिप्रायोस्येतिपंचभिः हेमुनेभवतैतावदुक्तं यत्स्वप्रकाशोवस्तुतःसंगशून्योपिपुमानविद्ययाएकोवस्थात्रयेभ्रमतितत्रापिकर्मवशेनस्वप्नंजागरणंवाऽऽप्नोति जाग्रत्स्वप्नभोगप्रदक्षयेतु श्रांतःपक्षीनीडमिवानंदरूपमात्मानंप्राप्नोतीतिद्वयोरर्थः॥८२१॥८२२॥नैतावतीति एतावतिअवस्थात्रयविवेकरूपेअर्थेविज्ञातेपिमोक्षोन

सोहंत्वयोपदिष्टोस्मिविद्यांतेगुरवेगुरोः॥ गोसहस्रंददाम्यत्रविद्यायादक्षिणामिमां॥ अतऊर्ध्वंविमोक्षायब्रूहिमेनापरंमुने॥ ८२०॥ अभिप्रायोस्यराज्ञोयमवस्थाभवतेरिताः॥स्वप्नोजागरणंसुप्तिरेकस्तासुपुमानपि॥ स्वप्रकाशोनिजाविद्याविमूढःसुखदुःखभाक्॥ ८२१॥ वस्तुतःसंगशून्योपिकर्मणायात्यहर्निशम्॥ स्वप्नंजागरणंचैवसुप्तिंकर्मद्वयेक्षये॥ श्रांतःसन्नीडतुल्येस्मिन्परमानंदआत्मनि॥ ८२२॥ नैतावत्यत्रविज्ञातेमोक्षोभवतिकर्हिचित्॥ मृतिजन्मादयोयस्मात्संतिजागरणेसदा॥ ८२३॥ कामाश्चविविधाःपुंसोनात्मन्येतेनिराकृताः॥ नानोपपत्तिभिर्यस्माद्भवतातःकथंभवेत्॥ संसारीपरमानंदोविपरीतात्मबंधनः॥ ८२४॥ यावन्नजायतेज्ञानंसंदेहादिविवर्जितम्॥ तावन्नजायतेपुंसोमोक्षोजन्मशतैरपि॥ ८२५॥ विज्ञायेममभिप्रायंयाज्ञवल्क्योमहामुनिः॥ राज्ञोबुद्धिमिमांदृष्ट्वाभीतोभूच्चिंतयन्निदं॥ ८२६॥

भवतियतःशरीरांतरसंचरणस्यजन्ममरणाख्यस्यतद्धेतूनांकामानांचात्मसंबंधनिराकरणंनानोपपत्तिभिर्नकृतंतन्निराकरणाभावेचसंसारी परमानंदरूपःकथंस्यात् कीदृशःसंसारी विपरीतात्मबंधनःमोक्षगम्यात्मस्वरूपाद्विपरीतकर्तृत्वभोक्तृत्वादिलक्षणशोकव्याप्तोमिथ्यात्मैवबंधनंयस्यसतथेतिद्वयोरर्थः ॥ ८२३ ॥ ८२४ ॥ यावच्चसंसारधर्मानवगाहिनिश्चयरूपंज्ञानंनजायतेतावन्मोक्षोनभवतीत्याह यावन्नेति स्पष्टम् ॥ ८२५ ॥ विज्ञायेति एतादृशंराज्ञोभिप्रायंज्ञात्वाइदंवक्ष्यमाणप्रकारकंविचारंकुर्वन्मुनिर्भयंप्राप्तवान्नतूत्तरदानासामर्थ्येनमुनिर्भयंप्राप्तइत्यर्थः ॥ ८२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंपदोक्तांमुनेर्श्चिताममभिनयति संतीति ममशिष्याणांमध्येजनकसमोबुद्धिमान्कोपिनास्ति योयंजनकःकामप्रश्नरूपेणैकव्यापारेणम दीयांनिखिलांविद्यांग्रहीतुमुद्यतइतिद्वयोःसंबंधः ॥ ८२७ ॥ ८२८ ॥ निरुद्धोस्मीति ततोबुद्धिमत्त्वादनेनकामप्रश्नवरंदत्तवताराज्ञाहं निरुद्धोवशीकृतोस्मि यतोहंसत्यपाशनिबंधनःसत्यरूपपाशाधीनस्तस्मादहंबहुकालार्जितांदुर्लभांचविद्यामस्मैवदाम्येवेति एवंविचार्य मुनिरेतद्वक्ष्यमाणंवाक्यमाहस्मेतिद्वयोरर्थः तथाचदुर्लभायारहस्यायाश्चविद्यायाःप्रकाशनप्रसंगएवमुनेर्भयकारणमितिभावः ॥८२९ ॥ ॥ ८३० ॥ एवमतीतग्रंथेनयद्यपिस्वप्नदृष्टांतेनपरलोकप्राप्तिःसुप्तिदृष्टांतेनमोक्षप्राप्तिश्चासंगस्यात्मनःसूचितातथापितत्रदृष्टांतमात्रमेवोक्त

संतिमेशतशःशिष्याबुद्धिमंतोनकोपिहि ॥ जनकेनामुनाराज्ञासदृशोविद्यतेमम ॥ ८२७ ॥ वरव्याजेनयो विद्यांनिखिलामेकहेलया ॥ गृहीतुमुद्यतोयातुवर्षपूगैर्नलभ्यते ॥ ८२८ ॥ निरुद्धोस्मिततोनेनसत्यपाशनिबं धनः ॥ वदाम्यस्माइमांविद्यामिदानीमेवभूभुजे ॥ ८२९ ॥ लब्धायाबहुकालेनगुरुशुश्रूषणान्मया ॥ इतिसं चिंत्यतंप्राहवाक्यमेतन्मुनीश्वरः ॥ ८३० ॥ स्वयंज्योतिःपुमान्यस्तेमयोक्तोराजसत्तम ॥ सएवैषपुमान्बुद्धि साक्षीदेहाख्यपंजरे ॥ ८३१ ॥ सुप्तिंगत्वाप्यगत्वावास्वप्नेस्वेनैवतेजसा ॥ रत्वावध्वादिभिःसार्द्धंगत्वानाडीरनेक शः ॥ ८३२ ॥ पुण्यपापफलावस्थंसुखदुःखस्वरूपकं ॥ दृष्ट्वैवसंगरहितःस्वप्रकाशसुखात्मकः ॥ ८३३ ॥ य थागतंयथादेहमेतिजागरणंपुनः ॥ अत्रभोगोपभोगायकेवलंनान्यकारणं ॥ ८३४ ॥

मित्यपरितुष्यताराज्ञादार्ष्टांतिकंश्रोतुकामेनपृष्टोमुनिस्तावत्परलोकसंबंधंनिरूपयिष्यन्नात्मनःस्वप्नजाग्रद्भूमिप्राप्तियथास्वप्नाज्जाग्रत्प्राप्ति स्तथाएतच्छरीरात्परशरीरप्राप्तिरित्येवंदृष्टांतभावार्हांचतुस्त्रिंशत्तम्याकंडिकयोक्तवांस्तस्याअर्थमभिनयति स्वयंज्योतिरितिचतुर्भिः हेरा जन्योमयातुभ्यंस्वयंज्योतिःपुमान्वर्णितःसकदाचित्सुप्तिंगत्वास्वप्नंगच्छतिकदाचित्सुप्तिंविनापिस्वप्नंगच्छति एवंस्वप्नंगत्वातत्रकल्पितैर्व धूप्रभृतिभीरत्वाविहृत्यतथानानाविधनाडीपुभ्रमित्वातथाफलभावापन्नंपुण्यपापंसुखदुःखरूपंदृष्ट्वैवनतुकृत्वाअसंगत्वात्पुनःस्थूलदेहा भिमानरूपंजागरणंप्राप्नोति किमर्थमत्रस्थूलशरीरेभोगानामुपभोगायदर्शनायैवेतिचतुर्णांसंबंधः ॥ ८३१ ॥ ८३२ ॥ ८३३ ॥ ८३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परलोकमंतःकरणपरिवेष्टितईश्वरप्रेरितश्चगच्छतीतिसदृष्टांतंप्रतिपादयंत्याःपंचत्रिंशत्तम्याःकंडिकायाअर्थमाह आगतोत्रेतिचत्वारिंश
च्छ्लोकैः यथास्वप्नभोगप्रदकर्मणःक्षयेसत्यत्रजागरणेस्थूलदेहमागतस्तथैतच्छरीरभोगप्रदकर्मक्षयेशरीरांतरंयातीतिशेषः तत्रशरीरांतरप्रा
प्तौपूर्वशरीरत्यागेदृष्टांतंशृण्वित्यर्थः ॥८३५॥ दृष्टांतमभिनयति भवतीतिद्वाभ्यां यथालोकेकस्यचिद्धनिकस्यशकटंसोपकरणंभवेत् की
दृशस्यधनिकस्य कस्याश्चित्पुरोनगरस्यमहांतमध्वानंयियासतोगंतुमिच्छतः ॥८३६॥ वित्तैरिति तच्चशकटंनानाविधवित्तैर्बालकादिभि
॥६६॥ श्चपूर्णंनानाविधशब्दान्मुचत्कुर्वत्सद्व्रजेत् ॥ ८३७ ॥ दार्ष्टांतिकमाह एतस्मादिति तथापुरुषस्यधनिकस्थानीयस्यपरलोकयात्रानुकूलः
सूक्ष्मदेहःपुण्यपापलक्षणैःपरिच्छदैःसंभृतःशकटस्थानीयोनानाशब्दान्कुर्वन्यातीत्यर्थः ॥ ८३८ ॥ तत्रपरलोकयात्राकालेचिदाभा

आगतोत्रयथास्थूलदेहंकर्मक्षयेपुमान् ॥ तथात्रदेहमोक्षेस्मिन्दृष्टांतंवच्मिभूपते॥८३५॥ भवत्यत्रयथालो
केशकटंसपरिच्छदम् ॥ यियासतःपुरोध्वानंमहान्तंधनिकस्यहि॥८३६॥ वित्तैर्नानाविधैःपूर्णंबालकैश्चवधू
जनैः ॥ शब्दान्नानाविधान्मुंचन्शनकैःशनकैर्व्रजेत् ॥ ८३७॥ एतस्मात्स्थूलतोदेहात्पुंसोनिर्गच्छतस्तथा॥
सूक्ष्मोदेहोभवेत्पुण्यपापपूर्णपरिच्छदः ॥ निर्गच्छन्नतएवायंशब्दान्मुंचत्यनेकशः ॥ ८३८ ॥ हासुतानयसंप
न्नाहाजायेनवयौवने ॥ हावित्तंबहुसंक्लेशलब्धंनानाविधंमया ॥ हामित्राणिसुमित्राणिहाबंधुजनसंगम
॥८३९॥धिङ्मामेतान्विहायाद्यगच्छंतंपापकारिणं ॥ दूरमध्वानमत्यंतमितएकाकिनंत्विह ॥ ८४० ॥ मया
बाल्येऽतिबलिनाबालकाभर्त्सिताभृशं ॥ ताडिताश्चापिदेवानांमस्तकेनिहितंपदम् ॥ ८४१ ॥

सव्याप्तेनांतःकरणेनकर्मात्मसंज्ञकेनकृतान्शब्दानभिनयति हासुताइत्यादिना अत्रनीतिसंपन्नत्वादिगुणकान्पुत्रादीन्संस्मृत्यतद्वियोगे
नात्मनःशोच्यताविवक्षितेत्यतोहाशब्दयोगेनपुत्रादिषुनद्वितीयेतिबोध्यं हावित्तयत्त्वंनानाविधंमयाबहुसंक्लेशलब्धमतस्त्वद्वियोगेनमम
शोच्यता सुमित्राणिधियोजाड्यंहरतीत्यादिसन्मित्रलक्षणसंपन्नानि ॥ ८३९ ॥ उक्तानांवियोगेनात्मनःशोच्यतामेवाभिनयति धिङ्मा
मिति एतान्विहायदूरमध्वानमेकाकिनमत्यंतंगच्छंतंमांधिगित्यन्वयः ॥ ८४०॥ अथबाल्यादिकृतानिदुष्कृतान्यनुस्मृत्ययेशब्दाःप्रयुज्यंते ॥६६॥
तानभिनयंस्तत्रबाल्यदुर्वृत्तमनुवदति मयेतिनवभिः दुर्बलबालानांभर्त्सनताडनेदेवावज्ञांचकृतवानस्मीत्यर्थः ॥ ८४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाजनन्याःपरमोपकारकारिकायावहवोपराधाःकृताइत्याह जननीति स्पष्टम् ॥ ८४२ ॥ जनन्याहितकारितामभिनयति योनियंत्र मितिचतुर्भिः यस्यायोनियंत्रंक्रकचवद्विदार्याहंकीटवन्निर्गतः कीदृशोहमनंतदुःखानांकारणभूतः तथाचमदुत्पत्त्येययानंतदुःखान्यं गीकृतानीतिस्पष्टंहितकारित्वम् ॥ ८४३ ॥ ययामूत्रमिति तथाययाजनन्याममशरीरशोधनायमदीयंमूत्रंतथाअमेध्यंपुरीषंस्वकीयाद्ध स्ताद्गुद्धृतंउपरिधृतंप्रक्षेपायेतिशेषः ॥ ८४४ ॥ अन्नेति तथाययाजनन्यास्वभक्षितोन्नपानादिरसःक्षीररूपेणस्तनस्थितोमह्यंदत्तोमज्जी

जननीक्लेशितातद्वन्मत्त्यंयाहितकारिणी ॥ गर्भेययाधृतःपूर्वंपाषाणइवदुःसहः ॥ ८४२ ॥ योनियंत्रंविदार्याहं यस्याःक्रकचसंनिभः ॥ निर्गतोऽनंतदुःखानांकारणंकीटकोपमः ॥ ८४३ ॥ ययामूत्रंतथामेध्यंमदीयंहस्तपं कजात् ॥ स्वकीयादुद्धृतंभूरिमन्मलक्षालनायहि ॥ ८४४ ॥ अन्नपानरसःस्वात्मभक्षितःस्तनसंस्थितः ॥ दत्तो मह्यंययापूर्वंजीवनायदिवानिशं ॥ ८४५ ॥ वंचयित्वापिचात्मानमन्नपानमनेकधा ॥ मह्यंदत्तंययास्नेहसं पूर्णनयनाम्भया ॥ ८४६ ॥ सामयाबालभावेनराक्षसीवावधारिता ॥ ताडिताचकठोरैस्तैःकर्णबाणैःसुदुःस हैः ॥ नकृतंवचनंतस्यायथानाप्तजनेरितं ॥ ८४७ ॥ पित्रादयस्तथावृद्धाब्राह्मणाश्चबहुश्रुताः ॥ सुहृदोबहव श्चान्येहतानिष्ठुरवाक्यतः ॥ ८४८ ॥ भक्षितान्यप्यभक्ष्याणिनिंदितानिबहून्यपि ॥ कर्माणिचकृतान्येवंबाल्य तोलोकशास्त्रयोः ॥ ८४९ ॥ यौवनेसततंचित्तेसंस्थाप्ययुवतिंप्रियां ॥ ध्यातवान्देववन्मूढःस्वस्यवापिपरस्य च ॥ ८५० ॥

वनायेति ॥ ८४५ ॥ वञ्चयित्वेति तथाचययाजनन्याआत्मानंवंचयित्वापिआत्मनेनदत्वेतियावत् अन्नादिकंमह्यंदत्तं कीदृश्या प्रेमाश्रुप्लु तनयनया ॥ ८४६ ॥ सेति सार्वर्णिताजननीमयाराक्षसीवदनादृताकर्णलग्नवाणवद्दुःसहैःकठोरवाक्यैस्ताडिताचेति तथातदीयंवचनमना प्तवाक्यवन्नानुष्ठितं ॥ ८४७ ॥ तथापित्रादयःक्रूरवाक्यैस्ताडिताइत्याह पित्रादयइति ॥ ८४८ ॥ भक्षितानीति एवंअभक्ष्यभक्षणादी निनिंदितकर्माणिकृतानि लोकशास्त्रव्यवहारयोर्बाल्यादवोधात् ॥ ८४९ ॥ यौवनानौचित्यस्मृतिपूर्वकानूशब्दानभिनयति यौवनइति पंचभिः यौवनेस्वकीयांपरकीयांवायुवतिंचित्तेधृत्वादेववद्ध्यातवानस्मिनेश्वरम् ॥ ८५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुष्पूरेणेति स्पष्टम् ॥ ८५१ ॥ हिरण्यमिति न्यायानुसारिवृत्तिमतोविप्रादेर्हिरण्यादिकंहृतवानस्मि ॥ ८५२ ॥ यूनइति लिप्सालाभेच्छा ॥ ८५३ ॥ ब्रह्मेति तत्रयौवनेयद्ब्रह्महत्यादिकृतंतदनंतदुःखदंभविष्यतीति ॥ ८५४ ॥ जरागतानौचित्यस्मृतिपूर्वकानूशब्दानभिनयति यदाहमितिषड्भिः स्वांगानांसम्यक्चालनेऽशक्तः ॥ ८५५ ॥ कामातुरस्येति तत्रावस्थायांयुवतीनामप्राप्त्याकामातुरत्वेनदुःखंतांसांप्राप्तौतुशक्तिराहित्येनदुःखमभूदिति ॥ ८५६ ॥ क्रोधाग्नीति तथातत्रावस्थायांक्रोधकालेयद्दुःखमभूत्तच्चेतनोनापुरुषःकःसहेतेति ॥ ८५७ ॥ तथातत्रलोभदुःखंततोभ्यधिकमित्याह लोभेति ॥ ८५८ ॥ हृदयच्छिद्रवासिभिरतिवर्द्धमानैःकामादिभिर्हृदयंयत्कर्कटीवन्नविदीर्णंतदेवचित्रमित्याह कामइति वृद्धस्यममहृदयेयःकामादिरभवत्तेनहृदंबुजंयन्नविदारितमेतदेवचित्रमित्यन्वयः ॥ ८५९ ॥ अत्रेति अत्रवार्द्धकेवृद्धत्वेप्राप्तेजायादयोममावज्ञांसकृमिशुनइवकृतवंतः ॥ ८६० ॥ नकेवलंजरायामेवैतेकामादयःकिंतुबाल्यादावपि तथाचतेषामुपशमासंपादनेनवृथाजन्मगतमित्याह कामइति ॥ ८६१ ॥

दुष्पूरेणापिलोभेनवर्द्धमानेननित्यशः ॥ हृतानिसाधुलोकानांमयावित्तानिभूरिशः ॥ ८५१ ॥ हिरण्यंसपशून्दारान्गृहक्षेत्रधनादिकं ॥ हृतवानस्मिलोभेनविप्रादेर्न्यायवर्त्तिनः ॥ ८५२ ॥ यूनोममसदायातादिवसालिप्सयैवहि ॥ वधूजनसमाश्लेषाद्रात्रयोपिगतास्तथा ॥ ८५३ ॥ ब्रह्महत्यादिकंपापंयच्चतत्रमयाकृतं ॥ नानाविधमनंतंतद्दुःखराशिफलप्रदम् ॥ ८५४ ॥ यदाहंजरयाग्रस्तःस्वांगसंचालनाक्षमः ॥ कामःक्रोधस्तथालोभस्तदामेभ्यधिकोभवत् ॥ ८५५ ॥ कामातुरस्यचलितुंशक्त्याविरहितस्यमे ॥ युवतीनामसंप्राप्त्यादुःखंप्राप्याप्यभून्महत् ॥ ८५६ ॥ क्रोधाग्निदीप्तगात्रस्यवृद्धस्याशक्तिभाजिनः ॥ यदासीन्ममदुःखंतच्चेतनःकःसहेतना ॥ ८५७ ॥ लोभाकुलितचित्तस्यत्वसमर्थस्ययन्मम ॥ दुःखमासीत्तदेवैकंब्रह्महत्याफलोपमम् ॥ ८५८ ॥ कामःक्रोधस्तथालोभोहृदयेयोभवन्मम ॥ वृद्धस्यतेनतच्चित्रंयन्नदीर्णंहृदंबुजं ॥ ८५९ ॥ अत्रजायास्तथापुत्रावार्द्धकेसमुपस्थिते ॥ कृतवंतोममावज्ञांकृमिदष्टशुनोयथा ॥ ८६० ॥ कामःक्रोधस्तथालोभश्चतुर्थोमोहएवच ॥ बाल्यादारभ्यवर्त्ततेसर्वदानाशवर्जिताः ॥ ८६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामादेर्विषयप्राप्त्यातुनशांतिर्यथाद्धृत्यादीनामिंधनानांप्राप्त्यावन्हेरित्याह दिवसइति प्रज्वलतोलब्धेंधनस्य ॥ ८६२ ॥ अथमरणकालिकदुःखानुसंधानजानूशब्दानाह एवमित्यादिना एवंकामाद्यनुपशमेनदीनतमंमांमीनंमृत्युरूपोधीवरोनेतुमागतः कीदृशंमांमीनं गृहरूपेपल्वलेस्थितं कीदृशेगृहपल्वले कलत्रादिरूपेणदुष्टेनमलिनेनजलेनपूर्णे पुनःकीदृशंमांमीनं दुःखत्रयरूपार्कतापतप्तं पल्वलमीनोरजसापङ्केनमलिनोभवतितथाहंकामरूपरजसेतिद्वयोरर्थः ॥ ८६३ ॥ ८६४ ॥ हाकष्टमिति कृंततिच्छिनत्ति एषमृत्युः यथासूनागृहेनानापशुव

दिवसेदिवसेवृद्धिर्वन्हेःप्रज्वलतोयथा ॥ कामादीनांतथावृद्धिर्दिवसेदिवसेमम ॥ ८६२ ॥ एवंदीनतमावस्थागतंपापार्जनेरतं ॥ मृत्युधीवरएषोत्रमांमीनंनेतुमागतः ॥ ८६३ ॥ गृहेक्षेत्रकलत्रादिदुर्जलेपल्वलेस्थितं ॥ दुःखत्रयार्कसंतप्तंकामादिरजसावृतम् ॥ ८६४ ॥ हाकष्टंममगात्राणिकृंतत्येषसुनिर्घृणः ॥ सूनागृहेविनोदेनक्रकचेनपशोर्यथा ॥ ८६५ ॥ सूचीभिरिवसर्वांगंभिनत्त्यत्रहिकोपिमे ॥ हस्तौपादौचवर्त्तेतेममकाष्ठसमाविमौ ॥ ८६६ ॥ नेत्रेमेवलनंप्राप्तेनाहंपश्यामिकिंचन ॥ मनसासहितान्यत्रममसर्वेंद्रियाण्यपि ॥ स्ववशानिनवर्त्तंतिदुर्दांताःपशवोयथा ॥ ८६७ ॥ कंठोमेरोधितोभूरिश्लेष्मणादुःसहेनहि ॥ जाठरःपावकस्त्वेषोप्युपर्युपरिसर्पति ॥ पवनेनसमंदेहंशोषयंश्चदहंस्तथा ॥ ८६८ ॥ दशंतियदिगात्रेषुवृश्चिकाविषकंटकाः ॥ सर्वेषुकोटिसंख्याताभूयोभूयश्चकोपिताः ॥ ८६९ ॥ तैर्व्यथायादृशीन्दृणांतादृशीममजायते ॥ इत्यादीन्बहुशःसोपिशब्दान्कुर्वन्व्रजेदितः ॥ ८७० ॥

धस्थानेविनोदार्थंक्रकचेनपशोर्गात्राणिकृन्तत्तद्वत् ॥ ८६५ ॥ सूचीभिरिति भिनत्तिविध्यति कोपिअलक्षितः ॥ ८६६ ॥ नेत्रेइति वलनंविपर्यासं तथासमनस्कानींद्रियाण्यप्यशिक्षितवृषभवद्वशेनसन्तीति ॥ ८६७ ॥ कफादीनांत्रयाणामुद्रेकंदर्शयति कंठइति कफेन कंठोरोधितोनिरुद्धः उदराग्निश्चदाहरूपःपवनसहितऊर्ध्वमाक्रामतीति ॥ ८६८ ॥ तदानींतनींपीडांदृष्टांतेनस्फुटयति दशंतीति विषविशिष्टाःपुच्छकंटकायेषामेतादृशावृश्चिकाःकोटिसंख्याताःसकोपाश्चभूयोभूयोयदिदशेयुस्तज्जन्यपीडासमापीडाममवर्ततेइत्यादिशब्दान्कुर्वन्नितोस्माच्छरीराद्व्रजेदितिद्वयोःसंबंधः ॥ ८६९ ॥ ८७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपिवाचइति किंचवाचोनिरोधोपियदिभवेत्तथापिघुरघुराद्याकाराःशब्दाःश्रूयंतएव अयमेवंविधशब्दमोक्तामुमूर्षुर्देहतोयात्येवपुनरिमंदेहंप्रतिनावर्त्ततेइत्यन्वयः ॥ ८७१ ॥ एवंसूक्ष्मशरीरस्यसचिदाभासस्यशकटसाम्यंप्रपंचितमथसारथिसमेनपरमेश्वरेणसंबंधंदर्शयति सुषुप्ताविति परमानंदरूपंप्राज्ञमीश्वरम् ॥ ८७२ ॥ मरणकालेकारणोपाधिकेश्वरप्राप्तौहेतुतयाविशेषज्ञानलक्षणकारणाविद्यायाअभावमाह यथेति स्पष्टम् ॥ ८७३ ॥ ततइति ततोविशेषज्ञानाभावरूपहेतोरेवजंतोर्मृत्युकालेप्राज्ञेनेश्वरेणकारणोपाधिकेनजंतोःसंगमःसंबंधोभवति एतेनप्राज्ञेनतादात्म्यंसंबंधंप्राप्यवर्णितशब्दान्मुंचन्सन्अदःपरोक्षंस्थानंशरीरांतररूपमात्मनःसंबंधीनियानिकृतकर्माणितदनु

अपिवाचोनिरोधोपिकंठेघुरघुरादिकान्॥ आप्राणनिर्गमंशब्दान्मुमूर्षुस्त्विहमुंचति ॥ सनावर्त्ततएवायंमुमूर्षुर्यातिदेहतः॥८७१॥सुषुप्तौयद्वदेवायंपरमानंदमाप्नुयात्॥प्राज्ञंहृदिस्थितंतद्वन्मरणेप्येषगच्छति॥ ८७२ यथाविशेषविज्ञानरहितःसुप्तिगोभवेत् ॥ तथाविशेषविज्ञानरहितोमरणेपुमान्॥ ८७३ ॥ ततएवमृतौजंतोर्भवेत्प्राज्ञेनसंगमः॥ तादात्म्यंतेनसंप्राप्यशब्दान्मुंचन्व्रजत्यदः॥८७४॥ कृतकर्मानुसारेणस्थानंसोप्यात्मनोयतः॥ ऊर्ध्वश्वासीयदाभूयान्मुमूर्षुर्दीनधीःपुमान्॥ ८७५ ॥सपूर्वंदुर्बलोभूत्वाप्रायःपश्चादयंभवेत्॥ यदाप्यस्यभवेद्देहेदौर्बल्यमणुमात्रकम्॥ तदातज्जरयावास्याद्व्याधिभिर्वापिदेहिनः ॥ ८७६ ॥ तत्रदेहस्यमोक्षेस्मिन्दृष्टांतंशृणुभूपते॥आम्रोदुंबरसंज्ञानांपिप्पलानांयथाफलं॥पक्वंवृंतात्पतेदेवप्रतीकारविवर्जितं॥ ८७७

सारेणयातियतोमरणकालेमुमूर्षुर्दीनधीर्भवति कदादीनधीर्भवतीतिचेद्यदाऊर्ध्वोच्छ्वासीभवतीतिद्वयोःसंबंधः ॥ ८७४ ॥ ८७५ ॥ अथपूर्वशरीरत्यागोत्तरशरीरप्राप्तिप्रकारप्रतिपादिकायाःषट्त्रिंशत्तम्याःकंडिकायाअर्थमाह सपूर्वमित्यादिपंचचत्वारिंशच्छ्लोकैः प्रायोबाहुल्येनेयंरीतिर्यत्समुमूर्षुःपूर्वंदुर्बलोभूत्वापश्चादयमूर्ध्वश्वासोपलक्षितदीनधीत्वविशिष्टोभवतीतिप्रथमदलार्थः तच्चदौर्बल्यंद्वाभ्यांहेतुभ्यांभवतिजरयाश्रुतावुपतपच्छब्दोक्तेनरोगेणवेत्याह यदापीतिदलद्वयेन ॥ ८७६ ॥ तत्रेति तत्रोक्तदशायांपूर्वदेहत्यागेदृष्टांतोयथाआम्रादिवृक्षाणांपक्वंफलंप्रतीकारेणप्रतिरोधोपायेनवर्जितंसद्वृंताद्बंधनादवश्यंपततीति ॥ ८७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्ष्टांतिकेयोजयति एवमिति हेतोःस्थितिप्रयोजकस्यआरंभकस्यप्रारब्धफलकस्यकर्मणःप्रक्षयेसतिदेहीदेहंत्यजतीति ॥ ८७८ ॥ दृष्टांतस्वारस्यमाह फलानामिति स्कंधादिफलपुष्पपल्लवांतानामवयवानांसमुदायरूपोहिवृक्षइत्यतःपतनात्पूर्वंफलानांवृक्षेणतादात्म्यमिति भावः तथात्मनोपिदेहेनाविवेकंतादात्म्यमिति ॥ ८७९ ॥ नन्वभेदेनभासमानस्यशरीरस्यकथंवियोगोभवतीतिकस्यचिन्मंदमतेःशंकाप्यनेनदृष्टांतेननिरस्तेत्याशयेनाह तादात्म्येपीति यथापतनात्पुराफलानांतरुभिःसहतादात्म्येपिप्रतीयमानेवियोगोभवतितथाशरीरैरहंगौरइत्यादिविधयात्मतादात्म्येनभासमानैरात्मनोवियोगोभवतीत्यर्थः ॥ ८८० ॥ एवंपूर्वशरीरंत्यक्त्वाशरीरांतरमवश्यंयातीत्याह निराधार

एवमस्यशरीरस्यहेतोरारंभकस्यहि ॥ कर्मणःप्रक्षयेदेहीदेहमेतंप्रमुंचति ॥ ८७८ ॥ फलानांतरुभिर्यद्वत्तादात्म्यंपतनात्पुरा ॥ मरणात्पुरतस्तद्वत्स्थूलैर्देहैरिहात्मनः ॥ ८७९ ॥ तादात्म्येपियथादृष्टोवियोगस्तरुभिःसदा ॥ फलानामात्मनोप्येवंवियोगःस्याच्छरीरकैः ॥ ८८० ॥ निराधारंयथानैवफलंनभसितिष्ठति ॥ वृंताद्विनिर्गतंस्वस्मात्सर्ववृक्षसमुद्भवम् ॥ ८८१ ॥ एवमात्माविनिर्गम्यपूर्वस्माद्वपुषःसदा ॥ यथागतंयथादेहंवपुरंतरमाव्रजेत् ॥ ८८२ ॥ यथागतंयथादेहंप्रायिकंपरिकीर्त्यते ॥ देहाद्विनिर्गतोदेहंयात्येतन्नियतंस्मृतम् ॥ ८८३ ॥

मितिद्वाभ्यां यथावृक्षफलजातंस्वस्माद्वृंताद्बंधनाद्विनिर्गतंवियुक्तंसन्निराधारंनिरालंबनंनतिष्ठतिकिंत्वाश्रितमेवावतिष्ठतेतथात्मापिपूर्वशरीराद्विनिर्गम्यशरीरांतरंव्रजेत् तच्चशरीरांतरगमनंयथागतंपूर्वशरीरप्राप्तिप्रकारमनतिक्रम्य तथायथादेहंपूर्वदेहसजातीयदेहप्राप्तिमनतिक्रम्येतिद्वयोरर्थः अत्रयथागतयथादेहपदाभ्यांनियोन्यादिपदद्वयस्यार्थोदर्शितः ॥ ८८१ ॥ ८८२ ॥ अत्रसर्वंवाक्यंसावधारणमितिन्यायेनावधारणवाचकस्यैवकारस्यनिवेशोवपुरंतरमाव्रजेदित्यंशेकर्त्तव्योनतुयथागतमित्यंशेइत्याह यथागतमिति यथागतंयथादेहमितियदुक्तंतत्प्रायिकंबाहुल्याभिप्रायेणोक्तंनतुनियतंसावधारणं देहांतरंयातीत्येतावत्तुनियतमितिसंबंधः ॥ ८८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथास्यश्लोकस्यार्थंस्फुटयंस्तत्रदेहांतरप्राप्तिनियममुपपादयति ब्रह्मज्ञानमितिसप्तभिः ब्रह्मज्ञानंविनाअविनाशिनःसूक्ष्मशरीरस्याश्रये
णयेनकेनचित्स्थूलशरीरेणावश्यंभवितव्यमित्यर्थः ॥८८४॥ सूक्ष्मशरीरस्याश्रयापेक्षांविशदयति संस्कारेति सूक्ष्मशरीरस्यसंसारदशायां
द्वयीद्विविधागतिरवस्थेतियावत् यतःसुप्त्यादिकालेसंस्काराख्यदोषभावेसूक्ष्मशरीरस्थितिःकारणाज्ञानेसंस्काररूपतयास्थितिरितियावत्
अन्यदातुस्थूलशरीरालंबनेनस्थितिरिति ॥ ८८५ ॥ तत्रद्वितीयायांगतौहेतुतयाभोगार्थंसृष्टस्यसूक्ष्मस्यस्थूलंविनाभोगजननासामर्थ्यमा
ह यातनास्विति यातनासुपापफलतीव्रपीडाभोगस्थानेषुनरकेषु ॥८८६॥ ननुकथंसूक्ष्मस्यगतिद्वयमेवेत्युच्यतेयतःशरीराद्बहिर्निर्गमनल
क्षणोत्क्रांतिकालेतथापरलोकंप्रतिगमनकालेआत्मनउत्क्रांत्यादावुपाधिभूतत्वेनस्थितस्यसूक्ष्मस्यतृतीयापिगतिरंगीकार्या संस्कारभावः

ब्रह्मज्ञानंविनानैवसूक्ष्मंदेहंविनश्यति॥ स्थूलंदेहंविनानैवसूक्ष्मोदेहोवतिष्ठते॥ ८८४॥ संस्कारदोषभावेस्या
त्स्थूलेवावपुषिस्थितिः॥ सूक्ष्मदेहस्यसंसारेद्वयीगतिरुदाहृता॥ ८८५॥ यातनासुतथास्वर्गेब्रह्मलोकेथवापि
च॥ भोगःसूक्ष्मशरीरस्यस्थूलदेहंविनानहि॥ ८८६ ॥ सूक्ष्मेणवपुषानामभवताद्गमनंबहिः ॥ स्थूलदेहस्थि
तिर्नैवस्थूलदेहांतरंविना॥ ८८७॥ अस्तुनामगतिर्योयंभोगोदुःखफलोत्रसः॥ सूक्ष्मदेहेनचान्यःस्यादन्नपा
नादिनाकृतः॥ ८८८॥

स्थूलशरीरालंबनंवेत्युक्तयोर्गत्योस्तदानीमसंभवादितिचेदस्तुतादृशीसूक्ष्मशरीरावस्थातथापिसाभोगक्षमानभवतीत्याह सूक्ष्मेणेतित्रिभिः
यद्यपिकेवलेनसूक्ष्मेणवपुषाशरीरेणस्थूलशरीराद्बहिर्निर्गमनमुत्क्रांत्यादिसंज्ञंभवतुनामतथापिभोगोपयोगिनीसूक्ष्मदेहस्थितिःस्थूलदेहांत
रमन्यत्स्थूलदेहंविनानभवतीत्यर्थः ॥ ८८७॥ एतदेवस्फुटयति अस्त्विति नचेतिचकारोभिन्नक्रमःअन्यशब्दोत्तरंद्रष्टव्यः तथाचसूक्ष्मश
रीरस्यगतिर्नामप्रसिद्धाभवतुतथापियोऽयंभोगःसुखदुःखसाक्षात्काररूपोदुःखफलःपरिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्चदुःखमे
वसर्वंविवेकिनइतिपातंजलसूत्रोक्तविधयादुःखफलकः सतथान्यश्चभोगस्तत्साधनभूतोन्नपानादिनाकृतःअन्नादिजनितोपकारलक्षणः
सद्विविधोपिस्थूलशरीरवियुक्तेसूक्ष्मशरीरेनस्यादितिसंबंधः ॥ ८८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वशरीरंपरित्यज्योत्तरशरीरप्राप्तेः पूर्वंमध्यमार्गेनकोपिभोगइत्येतद्दृष्टांतेनस्फुटयति गच्छन्निति यथाभक्षणशक्तोगृध्रोपिमुखेस्थितंमांसं गच्छन्सन्नात्तिनभक्षयतिकिंतुकुत्रचित्स्थित्वैवात्ति तथाचइदंसूक्ष्मशरीरमशक्तमेतस्मात्स्थूलाद्गच्छत्तत्कथमन्नादिभोगंकुर्यादित्यन्वयः॥ ८८९ ॥ फलितमाह एतस्मादिति प्रथमपदंपूर्वान्वयित्वेनव्याख्यातं ततःसूक्ष्मस्यभोगार्थंस्थूलापेक्षानियमात्सूक्ष्मोदेहःस्थूलाद्देहाद्विनिर्गतःसन्नन्यंस्थूलंदेहंस्वस्यसूक्ष्मस्यभोगोपकारकंव्रजेदेवेति ॥ ८९० ॥ उक्तमनूद्यसजातीयशरीरप्राप्त्यंशेनियमोनास्तीत्याह ततइति पूर्वार्द्धोक्तंयत्तन्नियतंचतुर्थपादेनतुयदुक्तंतन्ननियतमित्यन्वयः ॥ ८९१ ॥ तत्रहेतुतयामरणानंतरमनिश्चितोदयकनानाविधक

गच्छन्गृध्रोपिनैवात्तित्यपिमांसंमुखेस्थितं॥ कथंगच्छदिदंभोगंकुर्यादन्नादिसंभवं॥ ८८९॥ एतस्मात्तत एवायंस्थूलाद्देहाद्विनिर्गतः॥ सूक्ष्मोदेहोव्रजेद्देहंस्थूलमन्यंस्वभोगदं॥ ८९०॥ ततोदेहाद्विनिष्क्रांतोदेहीदेहांतरंव्रजेत्॥ नियतंनैवनियतंयथादेहंयथागतं॥ ८९१॥ नारकाःप्राणिनःकेचिद्भवंतिमनुजाभुवि॥ कदाचित्सुकृतात्स्वर्गेदेवाअपिभवंतिते ॥ ८९२ ॥ कुतश्चित्पापतोभूमौदेवाअपिभवंतिच ॥ गच्छेयुर्भूगतास्तेपिकदाचिन्नरकान्बहून्॥ ८९३ ॥ अनंतभवसंजातपुण्यपापसमुत्थितैः॥ सूत्रैर्निबद्धाःसंसारकाष्ठेक्रीडनमर्कटाः ॥ ८९४ ॥ सर्वलोकस्थिताःसर्वेप्राणिनःस्थिरजंगमाः॥ क्रीडार्थंजगदीशेनशिशुनाविश्वकर्मणा॥ ८९५॥ आकर्षयेद्धियत्सूत्रंजगदीशोयदृच्छया॥ प्राणिनःपुण्यपापाख्यंतत्फलंयात्यनीश्वरः॥ ८९६॥

र्मवशादनियतयोनिप्राप्तिदर्शनमाह नारकाइतिद्वाभ्यां नारकानरकंभुक्त्वावतीर्णाःसंसृष्टपुण्यपापोदयेमनुजाभवंतितेएवनारकाःकदाचित्केवलसुकृतोदयेदेवाअपिभवंतीति तथायेदेवास्तेपिभूमौमनुजत्वंप्राप्यनारकशरीराणिप्राप्नुवंतीतिद्वयोरर्थः ॥ ८९२॥ ८९३ ॥ ननुजीवैरलक्ष्यांतत्तद्योनिप्राप्तिंकोघटयतीतिचेत्सर्वज्ञईश्वरएवेतिरूपकेणदर्शयति अनंतेतिचतुर्भिः सर्वेप्राणिरूपाःक्रीडनमर्कटाःपरमेश्वररूपेणशिशुनाविश्वकर्मणासर्वकर्मकार्यंयस्यतथाभूतेनसंसाररूपेकाष्ठेनिबद्धाः कैः अनेकजन्मानुष्ठितानियानिपुण्यपापानिशुभाशुभकर्माणितज्जन्यादृष्टरूपैःसूत्रैरितिद्वयोःसंबंधः ॥ ८९४ ॥ ८९५ ॥ आकर्षयेदिति सजगदीशःशिशुर्यस्यप्राणिनःसूत्रमदृष्टरूपमाकर्षयेत्फलाभिमुखंकुर्यात्ससर्वःप्राणीअनीश्वरःपरतंत्रस्तत्फलंप्राप्नोति ॥ ८९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वइति प्रथमपदद्वयंपूर्वान्वयित्वेनदर्शितं ततउक्तविधयाफलप्राप्तौपारतंत्र्याद्यथागतंयथादेहंचसर्वोगच्छतीतिकथमुच्यतेयतःसर्वई
श्वरस्यवशेभवतीति ॥ ८९७ ॥ तर्हिकांयोनिमेषयास्यतीतिचेदयमस्यकर्मविपाकानुसंधाताईश्वरोनिर्मास्यतीत्याह अतइति तयोः
पुण्यपापयोः गतौतत्तल्लोकंप्रतीतिशेषः कारणंनिमित्तं ॥ ८९८ ॥ जंतुरिति एयात्प्राप्नुयात् ॥ ८९९ ॥ कर्मवशत्वमेवस्फुटयति ब्रह्मेति
यत्रसंसारेतृणदेहगतोजीवःअत्यंतोत्कृष्टपुण्योदयेब्रह्माप्रजापतिभावार्हशरीरोभवेत् तथासब्रह्मातृणदेहंप्राप्नुयादतिदुष्कृतोदयेन वस्तुत
स्तुयत्रेत्यव्ययमप्यर्थे नमर्षयेयत्रभवान्वषलंयाजयेदित्यादौदृष्टत्वात् तथाचतृणदेहस्थितोपीत्यर्थः ॥ ९०० ॥ फलितमाह ततइति

सर्वःप्राणीततःकेनगच्छेद्देषयथागतं॥ यथादेहंचसर्वोयमीश्वरस्यवशेयतः ॥ ८९७॥ अतईश्वरएवात्रपु
ण्यपापप्रवर्त्तकः॥ तयोःफलस्यदाताचगतौदेहेचकारणम् ॥ ८९८॥ जंतुरेषपराधीनःकर्मपाशवशंगतः॥
यथागतंयथादेहंकथमेयादनीश्वरः॥ ८९९॥ ब्रह्माभवतियत्रायंतृणदेहस्थितःपुमान्॥ ब्रह्मदेहस्थितस्तद्वत्तृ
णंभवतितत्क्षणात्॥ ९००॥ ततोयंनरकेस्वर्गेभूमौनभसिवाव्रजन् ॥ नियमेनविनाशश्वद्वायौभूतोपमःपु
मान्॥ यथागतंयथादेहंनव्रजेन्नियतःसदा॥ ९०१॥ प्रायेणपूर्वसंस्कारबलीयस्त्वेनहेतुना॥ यथागतंयथादे
हंदेहीदेहांतरंव्रजेत्॥ ९०२॥ यथागतंयथादेहंनियमाच्चेदयंव्रजेत्॥ पुण्यापुण्यव्यवस्थेयंव्यर्थास्याद्वैदिकीस
दा॥ ९०३॥ अनादाविहसंसारेप्राथम्याभावहेतुतः॥ कस्यकिंवपुरित्येतन्नियतंनैवलभ्यते ॥ ९०४॥

यथावायुतंत्रस्यभूतशरीरस्यननियतागतिस्तथास्वर्गादौनियमेनविनाजंतोर्गतिस्तथाचयथागतमित्याद्युक्तनियमेनसंसारेनव्रजेदित्यर्थः
॥ ९०१ ॥ तर्हिकथंश्रुतौयथागतमित्युक्तमितिचेद्यस्यपूर्वशरीरसमानस्यशरीरांतरस्यप्रापकंकर्मोद्भूतंतदभिप्रायेणेत्याह प्रायेणेति पूर्व
स्यपूर्वसमानस्यदेहस्यप्रापकायेज्ञानकर्मणोःसंस्कारास्तेषांप्राबल्येपूर्वसमानाकारंदेहंप्राप्नुयादित्यर्थः ॥ ९०२ ॥ किंचपूर्वसमानदेहप्रा
प्तिनियमेधर्माधर्मयोःफलनिर्देशिशास्त्रमप्रमाणंस्यादित्याह यथागतमिति ॥ ९०३ ॥ संसारस्यानादित्वान्यथानुपपत्त्यापिसमानदेहप्रा
प्तिनियमोनास्तीत्याह अनादाविति यतःसंसारेकस्यचिज्जीवस्यप्राथम्यंनास्तीत्यतोहेतोःकस्यजंतोःकिंजातीयंशरीरमित्येवंपृष्टोनियमे
नास्येदंशरीरमितिवक्तुंनशक्नोतीत्यर्थः ॥ ९०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनादित्वान्यथानुपपत्तिंस्फुटयति इदमिति अस्यजंतोरिदंमनुष्याद्यन्यतमविशेषरूपमेवशरीरंयोग्यमित्याकारकेनियमेसतिजन्मांनरानन्वयात्संसारःसादिःस्यात्तच्चसर्ववादिनामनिष्टमित्यर्थः ॥ १०५ ॥ संसारस्यानादितांविशदयति उत्पत्ताविति द्वादशभिः यदाएकस्याउत्पत्तेःप्रवाहआदिमान्वक्तुंनशक्यस्तदाकिमुवाच्यमुत्पत्त्यादिसमुदायरूपस्यसंसारस्यानादित्वमितिप्रथमदलार्थः तत्रदृष्टांतोजाग्रदवस्थाप्रवाहोद्वितीयदलार्थः तत्रहेतुतयाघटीयंत्रसाम्यंतृतीयदलेनोक्तमिति ॥ १०६ ॥ घटीयंत्रसाम्यंसत्कार्यवादेनाभिनयति उत्पन्नमितिउत्पन्नंलब्धोत्पत्तिकंवस्तुस्थितिंवर्तमानतामायातीत्युत्पत्तिस्थित्योःक्रमनियमोवक्तुमशक्यः यतःकारणेसूक्ष्मरूपेणस्थितमेवोत्पद्यते तथा

इदमस्येतिनियतौसादितासंस्तेर्भवेत्॥ सादिताचनकस्यापित्वभीष्टावादिनोत्रहि॥ १०५॥ उत्पत्तावपिनैवात्रप्राथम्यंजगतोस्तिहि ॥ यथाजागरणेनैवप्राथम्यंविद्यतेक्वचित् ॥ घटीयंत्रसमाएतेविसृष्टिस्थितिसंयमाः॥ १०६॥ उत्पन्नंस्थितिमायातिस्थितमुत्पद्यतेतथा॥ उत्पन्नंचस्थितंतद्वद्विनाशमुपगच्छति ॥ विनष्टंजायतेतद्वद्विनष्टमवतिष्ठते॥ १०७॥ सादितांयोवदेदस्यसवक्तव्यःकदेतिच ॥ एवमुक्तोयदाकालंनैवायंप्रतिपद्यते॥ तथाकथंभवेत्सादिःसंसारोवादिनोऽधुना॥ १०८॥ स्वदेहस्ययदोत्पत्तिस्तदेत्येवंवदेद्यदि॥ तदापिनैवसंसारःसादिरस्यप्रसज्जते॥ तद्देहजनकादीनांपूर्वसत्त्वेनहेतुना॥ १०९॥

उत्पत्तिस्थित्योरनंतरंविनाशव्यवहारोदृश्यते तथाविनाशानंतरंकारणरूपेणस्थितिव्यवहारोदृश्यतेइत्यर्थः तथाचोत्पत्त्यादीनांपुनःपुनर्व्यवहारारूढत्वेनघटीयंत्रसाम्यमितिभावः ॥ १०७॥ अथसंसारसादितावादिनश्चार्वाकादेर्मतपंकंप्रश्नोत्तरधारयाऽपाकरोति सादितामित्यादिना यश्चार्वाकादिःसंसारस्यसादितांवदेत्सवादीइत्येवंप्रष्टव्यः इतिकथं कदास्यसंसारस्यादिरिति एवंपृष्टोयदासआदिकालंनजानातितदाकथंसादितांप्रतिपादयेदित्यर्थः तथाचसव्याहतप्रतिज्ञइतिभावः॥१०८॥ स्वदेहस्येति यदितुधृष्टतयाएवंवदेत् एवंकथं अस्यस्वस्यात्मीयदेहस्योत्पत्तिस्तदासंसारस्यादिरिति तदापितदीयाप्रतिज्ञाव्याहतैव तदीयपित्रादीनांपूर्वंसत्वादित्यर्थः॥१०९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्येति यदिपुनःसएवंब्रूयात् एवंकथं ममस्वस्यात्मनःअपेक्षयासंसारोनादिर्नतुमत्पित्राद्यपेक्षयेति तंवादिनंप्रतिआस्तिकइदंवदेत्पृच्छेत् इदंकिं भवतःसंसारःकिंरूपोऽभिमतइति ॥ ११० ॥ अयमिति एवंपृष्टोवादीयद्येतद्देहरूपःसंसारइतिवदेत्तंप्रत्यास्तिकइदंब्रूयात् इदंकिं एतद्देहस्यसादितास्माभिर्ननिवार्यतेकिंतुअभ्युपगम्यतएव तथाचतत्साधनेतवसिद्धसाधनं अस्माभिस्त्वेतत्साध्यतेयदयंदेहःसर्वदेहेभ्यः प्रथमोनभवतिइतःपूर्वमपिदेहपरंपरासीदितितत्तुत्वयाननिराकृतमित्यर्थः ॥ १११ ॥ ममैतदिति एवमुक्तोवादीयद्येवंनिरपत्रपोब्रूयात् एवं कथं ममैतद्देहंप्रथममेवेति तंप्रतिआस्तिकएवंब्रूयात्त्वंकःकिंस्वरूपोयत्स्वरूपस्यसंबंधिअत्रभवेसंसारेइदंशरीरंप्रथममुच्यतइति॥ ११२ ॥ वपुषइति किंस्वरूपइतिप्रश्नेनकिंदेहरूपस्तदन्योवेतिविकल्पःसूचितः तत्राद्येममदेहइत्युक्तिविरोधःपित्रादिप्रत्यक्षविरोधश्चेत्यनुसंधायवा

स्वस्यसादिरयंभूयादितिचेत्तंवदेदिदं ॥ संसारोभवतःकोयमभिप्रेतस्तमीरय ॥ ११० ॥ अयंदेहइतिब्रूयाद्यद्यंतंवदेदिदं ॥ नास्माभिरस्यदेहस्यसादिताविनिवार्यते ॥ किंतुदेहमिदंसर्वदेहेभ्यःप्रथमंनहि ॥ १११ ॥ ममैतत्प्रथमंदेहमितिचेद्वक्तितंवदेत् ॥ कस्त्वंयस्यभवेऽत्रस्यादिदंहिप्रथमंवपुः ॥ ११२ ॥ वपुषोन्यइतिप्रोक्तेवदेत्तंकुत्रसंस्थितः ॥ त्वमस्माद्वपुषःपूर्वंकुतोवाऽत्रसमागतः ॥ ११३ ॥ आत्मन्येवस्थितःपूर्वमागतोस्मियदृच्छया ॥ एवंचेद्वक्तितंब्रूयादितःपूर्वंकुतोभवान् ॥ ११४ ॥ देहांतरंनसंप्राप्तोयदृच्छावाकुतोनते ॥ एवमुक्तेनचास्यास्तिनाप्यंकिंचिदिहोत्तरं ॥ ११५ ॥ अथचैवंवदेन्नाहंस्मरामिस्वात्मनोवपुः ॥ अतीतमितितंब्रूयादनेकांतंत्वयेरितं ॥ अनुभूतस्यसर्वस्यस्मृतिःकस्यात्रविद्यते ॥ ११६ ॥

दीयदीतिब्रूयात् इतिकिं अहंवपुषोन्योस्मीति तंप्रत्यास्तिकइतिपृच्छेत् इतिकिं त्वमस्माद्वपुषःपूर्वंकुत्रसंस्थितः अत्रशरीरेचकुतोहेतोरागत इत्यर्थः॥ ११३॥ आत्मनीति एवंपृष्टोवादीयद्येवंवदेत् एवंकथं अहमेतच्छरीरात्पूर्वमात्मन्येवस्थितःअत्रशरीरेतुयदृच्छयाअचिंतितार्थप्रापकस्वभावेनागतइति तंप्रत्येवंब्रूयात् एवंकथं भवानितःपूर्वंदेहांतरंकथंनप्राप्तःसातेदेहलाभसाधनभूतायदृच्छावाइतःपूर्वंकुतोनाभूदिति एवंपृष्टेयोग्यमुत्तरंनास्तीतिद्वयोरर्थः यदृच्छास्वैरितेत्यमरः॥ ११४ ॥ ११५॥ अथचैवमिति यदिचसवादीस्मरणाभावलिंगेनातीतदेहाभावसाधनाभिप्रायेणएवंवदेत्अहमतीतंदेहंनस्मरामीति तंप्रत्येवंब्रूयात्त्वयास्मरणाभावरूपमतीतदेहाभावस्यसाधनमनेकांतंव्यभिचारवदुक्तं यतःसर्वस्यानुभूतस्यस्मृतिनियमोनास्तितथाचार्थाभावाभावेअर्थसत्त्वरूपेसत्यपिस्मरणाभावदृष्टेर्व्यभिचारःस्फुटइतिभावः ॥ ११६ ॥ ॥७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथदेहइति ससंसारसादितावादीयदिवपुषोन्यइतिपक्षेदोषगणंश्रुत्वादेहोहमित्याकारंदेहरूपतापक्षंवदेदवलंबेत ननुपित्रादिप्रत्यक्षविरोधेनदूषितंपक्षंकथमवलंबेतेत्यतआह विस्मृतिमागतइति यतःश्रुतदोषविस्मरणशीलइत्यर्थः तंप्रतिपूर्वोक्तंपित्रादिप्रत्यक्षविरोधादिकंदोषंपुनःश्रावयेदित्यर्थः ॥११७॥ फलितमाह अनादितेति श्रयणीयास्वीकर्तव्या अनादित्वसिद्धौपुण्यादिफलव्यवस्थासिद्धातस्यांचसत्यांयथादेहमित्यादिश्रुतिवचनंप्रायिकंप्रायोभिप्रायकमेवेतिद्वयोःसंबंधः ॥ ११८ ॥ ११९ ॥ प्रायिकत्वंस्फुटयन्यथागतंयथादेहमित्यर्थकयोःश्रुतिगतप्रतिन्यायप्रतियोनिपदयोस्तात्पर्यमाह प्रतिन्यायमितित्रिभिः प्रतिन्यायादिपदद्वयमुक्तवतीयेयंश्रुतिःसाइत्थमुत्तरश्लोकद्वयेनवक्ष्यमाणाभिप्रायवतीवोध्येत्यर्थः ॥ १२० ॥ अनादाविति अनादौसंसारेऽनेनपुरापूर्वंयोयज्जातीयोदेहःअधुनेदानीमिवकदा

अथदेहोहमित्येवंब्रूयाद्विस्मृतिमागतः॥ सहिचेत्तंप्रतिब्रूयात्पूर्वोक्तंदूषणंपुनः॥ ११७॥ अनादिताततःसर्वैः श्रयणीयात्रसंस्तुतौ॥ अनादाविहसंसारेपुण्यापुण्यव्यवस्थितिः॥ ११८॥ पुण्यापुण्यव्यवस्थायांयथादेहंयथागतं॥ नियतंनभवेत्तस्मात्प्रायिकंवचनंश्रुतेः॥ ११९ ॥ प्रतिन्यायमिदंतद्वत्प्रतियोन्यपियत्पदम् ॥ तद्वयंश्रुतिराहेत्थमभिप्रायवतीहिसा॥ १२० ॥ अनादाविहसंसारेयोधुनेवपुरागतः॥ यश्चदेहःकदाचित्तुपुनस्तंप्रतिपद्यते॥ १२१ ॥ नरकेब्रह्मलोकेवास्वर्गेवायेनकर्मणा॥ गतवान्यादृशंभोगंतेषुतादृग्व्रजेत्पुनः ॥ कर्मणातादृशेनैवस्थूलदेहग्रहायहि॥ १२२ ॥

चिद्गतःप्राप्तःपुनस्तंतज्जातीयमेवप्रतिपद्यतेप्राप्नोतीत्यर्थः अयंभावः अयंजीवोमृगादिकांयांयांयोनिंव्रजतितस्यास्तस्यायोनेर्व्यवहारेऽनुपदिष्टोपिकुशलोभवतीतिप्रसिद्धंतच्चपूर्वाभ्यासजन्यसंस्कारमंतरानसंभवतितथाचकदाचित्प्राप्तपूर्वामेवयोनिमेषगच्छतीतिविज्ञायतइति ॥ १२१ ॥ यथागतत्वंविशदयति नरकइति नरकादिगताश्चयोनयःपूर्वंयादृशभोगप्रदेनयेनयज्जातीयेनकर्मणालब्धाःपुनस्तादृशभोगप्रदेतादृशेकर्मणिफलायोन्मुखेसतितांयोनिंलभतेसचयोनिलाभःपुनस्तज्जातीयशरीरग्रहस्यहेतुःसंस्कारादृष्टयोरुत्पादनद्वारेत्यर्थः पुनःप्राणलाभायेत्यर्थकस्यप्राणायेतिपदस्यार्थःस्थूलदेहग्रहायेतिपदेनदर्शितइतिबोध्यम् ॥ १२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तत्रिंशत्तम्याःकंडिकायाअर्थमाह स्थूलेतित्रयोदशभिः कर्मिणोजंतोर्मरणानंतरंस्थूलदेहांतरस्यसभोगोपकरणस्यग्रहेलाभेदृष्टांतंश्र
ण्वित्यर्थः॥ १२३॥ तत्रोग्रपदार्थमाह क्षत्रियायामिति क्षत्रियायांमातरिवैश्येनपित्रायेजातास्तेउग्रपदेनोक्ताः अथवाउग्रकर्मसुवधादिषु
विनियुक्ताःसंकरजातयोनुलोमाहीनजातिकायांमातरिउत्कृष्टजातिकात्पितुरुत्पन्नाःप्रतिलोमास्तद्विपरीतावाउग्रपदार्थाइत्यर्थः ॥१२४
सूतपदार्थमाह ब्राह्मण्यामितित्रिभिः ब्राह्मण्यांक्षत्रियात्पितुर्जाताःसूताइतिप्रसिद्धाः येषांसारथित्वंपुराणवृत्तज्ञानंवाजीविकेत्यर्थः
॥ १२५ ॥ अथवेति सर्वएवराजोपजीविनश्चातुर्वर्णिकाःसंकरजातयोवासूताइतिपदेनोक्ताइत्यर्थः ॥ १२६ ॥ तत्रहेतुतयासूतश

स्थूलदेहग्रहेतत्रकर्मिणोमरणात्परम् ॥ वक्ष्यामियमहंतुभ्यंदृष्टांतंतंनिशामय ॥ १२३ ॥ क्षत्रियायांहिवैश्ये
नजाताउग्राःप्रकीर्तिताः ॥ अथवाक्रूरकर्माणउग्रालोकेउदाहृताः ॥ अनुलोमाविलोमाश्चसर्वएवात्रमान
वाः ॥ १२४ ॥ ब्राह्मण्यांक्षत्रियाज्जाताःसूताःसंकीर्तिताजनैः ॥ येस्युःसारथिनःकेचित्पुराणज्ञाश्चकेचन
॥ १२५ ॥ अथवासर्वएवैतेवर्णिनोपिपरेतथा ॥ अनुलोमविलोमाभ्यांजाताःसूताउदाहृताः ॥ १२६ ॥ सू
ताःप्रसूताइत्युक्ताःसर्वेतेदेहधारिणः ॥ नहिदेहधराःकेचिदजाताःसंतिजंतवः ॥ १२७ ॥ एनःपापमितिप्रोक्तं
तत्रयेविनियोजिताः ॥ भृत्याःसामंतसहिताःप्रत्येनसइतीरिताः ॥ ग्रामाणामत्रनेतारोग्रामण्यःपरिकीर्तिताः
॥ १२८ ॥ उग्राःप्रत्येनसःसूतग्रामण्याद्यास्तथाजनाः ॥ देशस्वामिनमायांतंराजानंकुत्रचिद्गतम् ॥ आयांति
संमुखंयद्वत्कृतकौतुकमंगलाः ॥ १२९ ॥ महद्भिस्तूर्यनिर्घोषैर्गीतैःकर्णसुखावहैः ॥ नानावारांगनाहस्तस्थितै
र्नीराजनैःसह ॥ १३० ॥

ब्दस्ययोगार्थमाह सूताःप्रसूताइति यतः
प्रसूतागर्भान्निर्मुक्ताःसूतशब्देनोक्ताः अयमस्ययोगार्थःसर्वप्राणिषुवर्ततइत्यर्थः ॥ १२७ ॥ प्रत्येनसइतिपदस्यार्थमाह एनइति एनइ
तिपदंपापवाचकंतत्रपापेपापिनांदंडेइतियावत् येविनियुक्ताअधिकृताभृत्याःसामंतेनपुराध्यक्षेणसहितास्तेप्रत्येनसइतिपदेनोक्ताः ग्रामा
ध्यक्षास्तुग्रामणीपदेनोक्ताइत्यर्थः स्यात्सामंतःपुराध्यक्षइतिहेमचंद्रः ॥ १२८ ॥ पदार्थानुक्त्वावाक्यार्थमाह उग्राइतिपंचभिः यथाव
र्णिताउग्रादयःकुत्रचिद्गत्वाआयांतंराजानंप्रतिसन्मुखंयथाभवतितथाआयांतिप्रतीक्षंतइतियावत् कीदृशाः कृतानिसंपादितानिकौतुका
निउत्साहजनकानिमंगलानिचयैस्तेतथा पुनःकीदृशाः तूर्यनिनदादिभिर्युक्ताः नीराजनमार्तिक्यदीपः ॥ १२९ ॥ १३० ॥ ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्नेति किंकृत्वाराज्ञःसंमुखंयांति मनःप्रभृतिसुखदान्यन्नादीनितत्रतत्रनिधानभाजनेषुनिधाय ॥ १३१ ॥ स्कंधेति पुनःकिंकृत्वा स्कंधावारस्यसैन्यस्यतथासामंतानांतथाभूपतेश्चवासार्थंपृथक्पृथक्प्रासादान्तत्रतत्रयोग्यस्थानेषुकल्पयित्वा चमूश्चक्रंस्कंधावारइतिहेमचंद्रःपुनःकिंकृत्वाप्रतीक्षंते तन्नगरादतिदूरमपिभूतलमतिक्रम्येति ॥ १३२ ॥ वार्तामिति पुनःकीदृशास्तेउग्रादयः इत्यादिरूपांवार्तांतस्यराज्ञएवसंबंधिनींकुर्वंतः इतिकथं राजाकुत्रसमागतःअयंराजाआयातिअयमायातीति ॥ १३३ ॥ दार्ष्टांतिकेयोजयति एवमितिद्वाभ्यां एवंदेहांतरसमागमकालेअजडान्यादित्यादिदेवतारूपाणिजडानिशरीरारंभकाणिचसर्वाणिभूतानिकर्मानुसारेणभोगदान्युपकरणानिसं

अन्नपानानिचित्राणितत्रतत्रनिधायहि ॥ मनोनयनदेहानांसुखकारीणिभूरिशः ॥ १३१ ॥ स्कंधावारनिवेशार्थंसामंतानांचभूपतेः ॥ प्रासादान्विविधान्हृष्टाःकल्पयित्वामनोरमान् ॥ तत्रतत्रातिदूरंतदतिक्रम्यापिभूतलं ॥ १३२ ॥ वार्तांतस्यैवकुर्वंतोराजाकुत्रसमागतः ॥ अयमायात्ययंतद्वदित्याद्येवपरस्परं ॥ १३३ ॥ एवंसर्वाणिभूतानिदेहांतरसमागमे ॥ कृतकर्मानुसारेणभोगदानिशरीरिणाम् ॥ १३४ ॥ अस्यापत्यमिदंब्रह्मत्वायातीदमिहेतिच ॥ कर्मिणंजायमानंतंप्रत्युद्गच्छंतिसर्वतः ॥ कर्मानुसारिभिर्भोगैरजडानिजडानिच ॥ १३५ ॥ मरणेप्युक्तदृष्टांतंविजानीहिमहीपते ॥ यियासंतंहिराजानंकुत्रचित्तस्यदेशगाः ॥ उग्राद्योयथायांतितमन्वेवत्वरान्विताः ॥ १३६ ॥

पाद्यजायमानंदेहिनमित्येवंप्रत्युद्गच्छंतिप्रतीक्षंते इतिकथं इदंब्रह्मास्माकंकर्तृभोक्तृचअस्यदेवदत्तस्यइहपत्न्यामृतुस्नातायांजन्मनेआयातिइदंब्रह्मेहायातीति जीवेब्रह्मशब्दप्रयोगोवस्तुतोब्रह्मत्वाभिप्रायेणेतिद्वयोरर्थः ॥ १३४ ॥ १३५ ॥ अथपरलोकशब्दितंदेहांतरंयियासंतंचिदाभासरूपंजीवंकेनुयांतीतिजिज्ञासांदृष्टांतेनपरिहरंत्याअष्टात्रिंशत्तम्याःकंडिकायाअर्थंदर्शयति मरणइतिद्वाभ्यां हेराजन्मरणेपूर्वदेहपरित्यागेप्युक्तराजवृत्तांतरूपंदृष्टांतंशृणु यथाकुत्रचिद्यियासंतंगंतुमिच्छंतंराजानंविज्ञायतमनुतस्यराज्ञःपश्चादेवयांति के येतस्यराज्ञोदेशगताभृत्याउग्रादयः ॥ १३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथेति तथाशरीरगावागादयोगौणप्राणामुख्येनमुखबिलवासिनाप्रधानेनप्राणेनसहिताःपरलोकंयियासंतमात्मानमनुयांति कदा यदा मुमूर्षुरूर्ध्वश्वासीजायतइत्यन्वयः एतेनमनएवपरलोकंयातीत्यादिकास्तार्किकाणांकल्पनाःपरास्ताः इतितृतीयब्राह्मणस्यज्योतिराख्यस्यव्याख्यानम् ॥ १३७॥ अथसंसारमोक्षयोःससाधनयोर्विस्तरेणप्रतिपादकस्यचतुर्थब्राह्मणस्यशारीरकाख्यस्यार्थमध्यायांतंयावद्ग्रंथेनप्रदर्शयंस्तत्रेतिनुकामयमानइत्यंतभागस्यसंसारप्रदर्शकस्यार्थःप्रदर्श्यते बलहीनइत्यादिश्लोकशतत्रयेणाष्टत्रिंशदधिकेन यदायं

तथावागादयःप्राणामुख्यप्राणेनसंयुताः॥ आत्मानमिममेवानुयांतिराजन्शरीरगाः॥ ऊर्ध्वश्वासीयदादेही मुमूर्षुर्जायतेतदा॥ १३७॥ बलहीनोयदाजंतुर्नजानातिसुतादिकं ॥ वागादिभिःसमंतात्सतेजोमात्रास्वरूपिणः॥ गृहीत्वामरणेसर्वान्हृदयाकाशमाव्रजत्॥ १३८॥ नेत्रेघ्राणेपिरसनेवाचिश्रोत्रेमनस्यपि॥त्वचिबुद्धौतथान्येषुकरणेषुस्थितःपुमान्॥ १३९॥ हृदयाकाशमागच्छेन्नेत्राद्यैर्हिंसमंयदा ॥ तदामुमूर्षुःपुरुषोनपश्यतिनजिघ्रति ॥ १४० ॥ रसयत्यपिनैवायंवक्तिनायंशृणोतिन ॥ मनुतेनस्पृशत्येषनैषजानातिनक्वचित् ॥१४१॥इंद्रियाण्यपराण्येवव्यापारयतिनप्रभुः॥ एकतांहृदयाकाशेगतःसन्परमेश्वरे॥ १४२॥

मरणकालेजंतुर्बलहीनोभूत्वावागादिभिरिंद्रियैःसुतादिकंविषयजातंनविजानातिनविषयीकरोतिसंमूढोभवतीतियावत् तदासर्वान्वागादीन्सहकारिभावान्समंताद्गृहीत्वाहृदयाकाशमागच्छति कीदृशान्वागादीन् तेजसःसात्विकत्वेनप्रकाशप्रधानस्यसूक्ष्मशरीरस्यमात्रारूपान् अंशरूपानित्यर्थः ॥ १३८ ॥ नेत्रइति यदाएवंनेत्रादौकरणजातेस्थितश्चिदाभासरूपःपुरुषोहृदयाकाशंप्रतिकरणदेशेभ्यःपरावृत्त्यगच्छतिएवंसूर्यादिदेवतांशःस्वदेवरूपंप्रतिपद्यतेतदामुमूर्षुःपुरुषोहृदयाकाशरूपेपरमेश्वरेएकतांगतःसन्दर्शनादिकंनकरोतीतिचतुर्णांसंबंधः॥ १३९ ॥ १४० ॥ १४१ ॥ १४२ ॥ ॥ ७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन्कालेमुमूर्षुकर्तृकदर्शनाद्यभावोलोकेपिप्रसिद्धइत्याह नाप्रसिद्धमिति इदंमुमूर्षोर्दर्शनादिकमप्रसिद्धंनभवतिकिंतुप्रसिद्धमेवय तोभूमौपतितंमुमूर्षुंप्रस्तुत्यतत्समीपगताःपुरुषाइदंवदंति इदंकिमित्याकांक्षायांपार्श्वस्थैःकृतंमुमूर्षोर्दर्शनाद्यभावानुवादमभिनयति नेत्या दिनाअवस्थिताइत्यंतेन अयंमुमूर्षुरस्मान्नपश्यतिअस्मदीयंवचश्चनशृणोतीतिद्वयोरर्थः ॥ १४३ ॥ १४४ ॥ नजिघ्रतीति तथाकंठेनि हितायास्तुलसीदलमालायागंधंनजिघ्रतितथामुखेनिहितंदधिचनास्वादयति ॥ १४५ ॥ अस्मानिति सदाप्रेमास्पदानस्मान्नवक्तिअस्म दीयंगात्रंचनस्पृशति ॥ १४६ ॥ अतइति यतोबाह्येंद्रियव्यापारंनकरोतिअतोविज्ञायतेमनोबुद्ध्योरपिव्यापारंनकरोतियथावयंसुषुप्तिं

नाप्रसिद्धमिदंसर्वंप्राज्ञतादात्म्यमागते ॥ आत्मनीहयतोभूमौप्रक्षिप्तंतत्समीपगाः ॥ १४३ ॥इदंवदंतिनै वायंपश्यत्यस्मान्समीपगान्॥ नशृणोतिवचस्तद्वदस्माभिःसमुदीरितम्॥ १४४॥ नजिघ्रतितथागंधंमाला याःकंठआत्मनः॥ रसयत्यपिनैवायंदधियन्निहितंमुखे॥ १४५॥ अस्मान्समीपगानेषनचवक्तिसदाप्रिया न्॥ नस्पृशत्यपिनोगात्रंपुत्रादीनांप्रियंसदा ॥ १४६ ॥ अतोनमनुतेनैवविजानातिभुविस्थितः॥ करणोपर मात्सुप्तौवयंयद्वदवस्थिताः॥ १४७॥ अभावेदर्शनादीनामेकीभावंवदंतिच ॥ हेतुंसर्वत्रविद्वांसःसुहृदःपरि तःस्थिताः॥ १४८॥ यदायंहृदयाकाशतादात्म्यंप्रतिपद्यते॥ मुमूर्षुस्तस्यपुरतोमार्गसंदर्शनायहि॥ हृदयस्या ग्रभागोत्रप्रज्वलत्यतिभूरिशः॥ १४९ ॥

गताःकंचिन्मनःप्रभृतिव्यापारंनकुर्मइत्यर्थः ॥ १४७ ॥ अभावेइति नकेवलंदर्शनाद्यभावमेववदंतिकिंतुमुमूर्षोर्दर्शनाद्यभावेहेतुतयास र्वेंद्रियाणांहृदयदेशेसूक्ष्मशरीरेणैकीभावंपिंडीभावंवदंतिपार्श्वगाइत्यर्थः ॥ १४८ ॥ एतावताकंडिकाद्वयंव्याख्यातमथतस्येत्यादिका यास्तृतीयकंडिकायाअर्थमाह यदेतिद्वादशभिः यदायंमुमूर्षुर्हृदयाकाशेनतादात्म्यंप्राप्नोतितदापिपरलोकगमनानुकूलविशेषज्ञानाभा वोनमंतव्यः यतस्तस्यमुमूर्षोःपुरतःपरलोकमार्गस्यसंदर्शनायहृदयस्याग्रभागोनाडीमुखरूपःप्रज्वलति भाविशरीरप्राप्तिहेतुद्वाराका रचिदाभासव्याप्तवृत्तिरूपेणाधिकंप्रकाशेनयुक्तोभवतीत्यर्थः ॥ १४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथेति यथाराज्ञोगंतुमिच्छतःपुरतोदीपिकाःकिंकरकरगताःप्रकाशंतेतद्वत ॥ १५० ॥ तेनैवेति तेनत्हृदयाग्रगतेनप्रकाशेनप्रकाशितो महापथःपरलोकमार्गोयस्यैतादृशःसन्निद्रएकादशद्वारात्स्थूलशरीररूपात्पुरान्निष्क्रामतीति ॥ १५१ ॥ एकादशद्वाराणिगणयति चक्षुरिति चक्षुःश्रोत्रनासिकानांप्रत्येकंद्वेद्वेछिद्रेइतिषट्पायूपस्थनाभीनांत्रीणिछिद्राणिमुखस्यैकंमूर्ध्निचैकमेतानिसंकलितान्येकादशे त्यर्थः ॥ १५२ ॥ द्वाराणांगंतव्यानुसारेणविभागमाह नारकीतिचतुर्भिः नारकीनरकंगंता प्रेतसमःप्रेतयोनिगामी ॥ १५३ ॥ अन्नेति अ

॥७४॥ यथायियासतोराज्ञोदीपिकाराजमार्गगाः॥ प्रज्वलंतितथैवास्यपरलोकंयियासतः ॥ १५० ॥ तेनैवैषप्रका शेनप्रकाशितमहापथः॥ पुरादेकादशद्वाराद्विद्वान्निष्क्रामतीश्वरः॥ १५१ ॥ चक्षुःश्रोत्रनसांद्वेद्वेपायूपस्थोदरे ष्वपि॥ मुखेमूर्द्धनिपंचस्युद्वाराण्यस्यविनिर्गमे॥ १५२॥ नारकीपायुतोगच्छेत्कामीशिश्नाध्वनापुनः ॥ ना भिमार्गेणनिर्यातिप्रायःप्रेतसमःपुमान्॥ १५३॥ अन्नासक्तस्तुनिर्यातिमुखतोबहुलोजनः॥ गंधप्रियोवि निर्यातिनासाविवरतःपुमान्॥ १५४॥ गीतज्ञःश्रोत्रदेशेनगंधर्वान्प्रायशोव्रजेत् ॥ चक्षुषोनिर्गतोगच्छेत्स वितारंप्रभानिधिं॥ १५५ ॥ अन्यंवातैजसंकंचिदग्निंवाचंद्रमेववा॥ मूर्द्धतोनिर्गतोगच्छेद्ब्रह्मलोकमनिंदि तं॥१५६॥ अधमत्वेपरासीमापायुद्वारमुदाहृतं ॥ उत्तमंचतथानान्यन्मूर्द्धद्वारात्तुकिंचन॥ अन्येषुतारतम्ये नह्युतमाधमतास्थिता॥ १५७॥ अयंयदाविनिर्यातिबुद्ध्युपाधिर्महेश्वरः॥ प्राणस्तदाक्रियाशक्तिस्तमन्वेव व्रजत्ययम्॥ प्राणेगच्छतिसर्वाणिवागादीन्यनुयांतिच॥ १५८॥

न्नासक्तोभोजनलोलुपः ॥ १५४ ॥ गीतज्ञइति गीतज्ञःश्रोत्रमार्गेणगंधर्वलोकंव्रजेत् चक्षुर्द्वारेणनिर्गतस्तुसूर्यमन्यंवातेजोमयंभावमन्या दिकंगच्छति मूर्द्धद्वारेणगतस्तुब्रह्मलोकंयातीतिद्वयोरर्थः ॥ १५५ ॥ १५६ ॥ अधमत्वइति अधमफलप्रदद्वाराणांमध्येपायुद्वारादप कृष्टंनास्तिउत्कृष्टफलदानांतुमूर्द्धद्वारादुत्कृष्टंनास्ति अन्येषुद्वारेषुत्वापेक्षिकेउत्कृष्टत्वापकृष्टत्वेइत्यर्थः ॥ १५७ ॥ अयमिति अयंज्ञान शक्त्युपाधिकोमहेश्वरोयदानिर्गच्छतितदातदनुसारिणोवागादयोपिनिर्गच्छंतीत्यर्थः ॥ १५८ ॥ ॥७४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति बुद्ध्युपाधिकआत्मामहेश्वरःसकलसंघाताधिपतिरेवमुक्तविधयामरणकालेप्राज्ञेनकारणोपाधिकेश्वरेणतादात्म्यंसुषुप्तावविवेक तांविशेषज्ञानाभावप्रयोजिकांप्राप्तोपिसविज्ञानोभवति सविज्ञानपदार्थमेवाह पुनर्ज्ञानंप्रपद्यतइति पूर्वंयद्धृदयाग्रभागप्रज्वलनरूपंज्ञा नमुक्तंतन्निर्गमनमार्गाकारमिदंतुभाविशरीराकारमितिविशेषःपुनःशब्दार्थः ॥ १५९ ॥ पूर्वंपरलोकयात्रायांशकटस्थानीयतासूक्ष्मशरी रस्योक्तात्रसंभारस्थानीयानूभावान्दर्शयति तंशरीराद्विति तंबुद्ध्युपाधिकंजीवंशरीराद्विनिष्क्रांतमभिलक्ष्येतिशेषः ज्ञानंमानसंकर्म कर्मशारीरंतत् एतेद्वेअपिदृष्टरूपेणगच्छतः गत्वाचतादृक्कृतत्तद्भोगानुकूलंदेहंप्रयच्छतः कीदृशेज्ञानकर्मणी पूर्वसंस्कारेणपूर्वानुभूतत

एवमात्मासविज्ञानोबुद्ध्युपाधिर्महेश्वरः ॥ प्राज्ञतादात्म्यमायातःपुनर्ज्ञानंप्रपद्यते ॥ १५९ ॥ तंशरीराद्विनि
ष्क्रांतंसुखदुःखोपभोगिनं ॥ पूर्वसंस्कारसहितेगच्छतोज्ञानकर्मणी ॥ शुभाशुभेसमुद्बुद्धेतादृग्देहंप्रयच्छतः
॥ १६० ॥ स्थूलदेहाद्विनिष्क्रम्यस्थूलदेहविवर्जितः ॥ नतिष्ठतिपुमानत्रदृष्टांतस्तृणयःकृमिः ॥ १६१ ॥ यथा
तृणजलौकाख्यःकृमिस्तृणगणंव्रजन् ॥ एकंतृणंगृहीत्वैवजह्यात्पूर्वंतृणंसदा ॥ १६२ ॥ एवमात्मावपुष्यस्मि
न्स्थूलेस्थित्वापरंवपुः ॥ स्थूलंसंपाद्यनिर्गच्छेदप्राप्तौनैवतस्यसः ॥ १६३ ॥

त्तद्योनिव्यवहाराद्यनुभवजन्येनसंस्कारेणतत्रतत्रकौशलप्रयोजकेनसहितेइत्यर्थः ॥ १६० ॥ आत्मनःपूर्वशरीरांतरग्रहणपूर्वशरीरपरि त्यागप्रकारयोःस्पष्टीकरणपरायाश्चतुर्थकंडिकायाअर्थंनिरूपयति स्थूलदेहादितित्रयोविंशतिश्लोकैः स्थूलदेहविवर्जितःअनालंबित स्थूलदेहांतरःसन्पूर्वदेहाद्विनिष्क्रम्यनतिष्ठतिकिंत्वालंब्यैवदेहान्तरंपूर्वदेहाद्विनिष्क्रामतीत्यत्रार्थेदृष्टांतस्तृणयःतृणेषुयातिभ्रमतियःकृमिवि शेषःसबोद्धः ॥ १६१ ॥ दृष्टांतंस्फुटयति यथेति स्पष्टं श्रुतावाक्रमपदेनआक्रम्यतेइतिव्युत्पत्त्याआलंबनीयंतृणांतरादिकमुक्तमिति बोध्यम् ॥ १६२ ॥ दार्ष्टांतिकेयोजयति एवमिति संपाद्यालंब्यपूर्वस्मान्निर्गच्छेत्शरीरांतरस्याप्राप्तौतुतस्यपूर्वस्यदेहस्यसपरित्यागोनैव भवतीति ॥ १६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंलौकिकदृष्टांतेनापिस्फुटयति यथेतिद्वाभ्यां यथाराजादेर्गृहांतरगतिंप्रतिगृहांतरप्राप्त्यर्थंजीर्णगृहंपरित्यज्यनिर्गच्छतोयःपूर्वस्य परित्यागःसोभिनवेगृहेनिष्पन्नेसत्येवभवेत् तथाएवंदेहिनोऽभिनवेदेहेनिष्पन्नेसत्येवपूर्वत्यागोभवेदितिद्वयोरन्वयः ॥ १६४ ॥ १६५ ॥ ननुपूर्णस्यात्मनःकथंगत्यादिकमितिचेद्घटाद्युपहिताकाशवद्बुद्ध्याद्युपहितात्मनिसर्वंसंभवतीत्याह आत्मनइति यद्यपिसर्वगस्याद्वितीय स्यात्मनोगत्यादयोनसंभवंतितथापिबुद्ध्यादिसंबंधात्सर्वमुपपन्नमितिद्वयोःसंबंधः ॥ १६६ ॥ १६७ ॥ ननुबुद्ध्यादेरेवकथंदेहांतरेगत्या

यथानिर्गच्छतोराज्ञोधनिकस्यापरस्यवा॥ जीर्णंगृहंपरित्यज्यगृहांतरगतिंप्रति॥ १६४॥ पूर्वस्यतुपरित्यागो निष्पन्नेभिनवेगृहे॥ भवेदेवंपरित्यागोनवेदेहेत्रदेहिनः॥ निष्पन्नेपूर्वदेहस्यनान्यथाक्वापिकर्हिचित्॥१६५॥ आत्मनःसर्वगत्वेनभेदस्यापिविवर्जनात्॥ गत्यादयोनसंत्येवसर्वकर्मफलैःसमं॥ १६६॥ यद्यप्यस्यतथा प्यत्रबुद्धितादात्म्यहेतुतः॥ उपपन्नमिदंसर्वंगतिकर्मफलादिकम्॥१६७॥ अस्मिन्देहेस्थिताबुद्धिर्नाप्नुयादप रंवपुः॥ यद्यप्येषातथाप्येवंप्राप्तिर्देहद्वयेभवेत्॥ १६८॥ वृत्तिभिर्नयनंयद्वद्गच्छेन्नयनमंडलात्॥ बहिर्ध्रुवादि कंदेशंबहुलक्षादियोजनं॥ १६९॥ धर्माधर्माख्यसंस्कारैरेवंबुद्धिश्चवृत्तिभिः॥ पूर्वदेहस्थितादेहमन्यंयाती श्वरेच्छया ॥ १७० ॥

दिकमित्यसंभावनांदृष्टांतेनापाकर्तुंप्रतिजानीते अस्मिन्निति यद्यप्यस्मिन्देहेस्थिताबुद्धिरपरंदेहमाप्नुयादितिनसंभाव्यतेतथाप्येवंवक्ष्यमा णविधयादेहद्वयेबुद्ध्यादिप्राप्तिःसंबन्धरूपासंभावनीयेत्यर्थः ॥ १६८ ॥ एवंपदोक्तांविधामभिनयति वृत्तिभिरिति यथानयनंचक्षुरिं द्रियंनयनमंडलात्स्वगोलकाद्बहिर्बाह्यंदूरमपिध्रुवादिकंदेशंवृत्तिभिर्गच्छेदितिसर्ववादिसंमतंतथाबुद्धिःपूर्वदेहस्थितापिमरणकालेअन्यंदे हंयाति कीदृशीबुद्धिः धर्माधर्माभ्यांविहितनिषिद्धकर्मजन्यादृष्टाभ्यांपूर्वानुभवजन्यसंस्कारेणचईश्वरेच्छयाचप्रयुक्तेतिशेषः अनेनबु द्धिविशेषणेनजीवनदशायांभाविदेहाकारवृत्तिप्रसंगोनिरस्तः ॥ १६९ ॥ १७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुमरणकालेभाविदेहमनुसंदधानाबुद्धिरहंदेहांतरंप्राप्तास्मीत्येवंकुतोनजानातीतिशंकाप्युक्तदृष्टांतेननिरस्तेत्याह नेत्रेतिद्वाभ्यां यथा स्वगोलकस्थंचक्षुर्ध्रुवादिकंगच्छत्सत्तद्ध्रुवादिकंप्राप्यापिएतन्नवेत्ति एतत्किं मयाएतद्ध्रुवादिकंप्राप्तमिति तथामरणकालेबुद्धिःपूर्वदेहस्थितादेहांतरंप्राप्याप्येतन्नवेत्ति एतत्किं मयाएतन्नवंदेहंप्राप्तमितिद्वयोःसंबंधः वेगातिशयाज्जडत्वाच्चेतिहेतुःपूरणीयः ॥ १७१॥ १७२॥ देहांतरंतत्तद्भोगानुकूलमारप्स्यमानान्यपिकर्माणिभाविशरीराकारांवृत्तिमारभंतेइत्येतावदेवतृणजलौकादृष्टांतेनविवक्षितमित्याशयंदृष्टांतेनविशदीकरोति अभिप्रायमित्यादिना यथाराजकिंकरास्तस्यराज्ञःप्रासादांतरगमनाभिप्रायंज्ञात्वाप्रासादांतरंनिर्माययतत्रराज्ञोहस्त्यश्वा

नेत्रमंडलमध्यस्थंनेत्रंगच्छद्ध्रुवादिकं ॥ तत्प्राप्यापिनवेत्त्येतत्प्राप्तमेतन्मयायथा ॥ १७१ ॥ पूर्वदेहस्थिताबुद्धिःप्राप्यदेहांतरंतथा ॥ प्राप्तमेतन्मयादेहंनवंवेत्तिनकर्हिचित् ॥ १७२ ॥ अभिप्रायंयथाज्ञात्वाराज्ञस्तस्यात्रकिंकराः ॥ प्रासादमपरंकुर्युस्तत्रस्थेपिचराजनि ॥ १७३ ॥ नयंतिचविधायान्यंप्रासादंराजकिंकराः ॥ हस्त्यश्वादीन्स्थितेप्यस्मिन्प्रासादेपूर्वनिर्मिते ॥ १७४ ॥ वदंतिचजनास्तत्रहस्त्यश्वादिसमागमात् ॥ राजासमागतःसोयंयदिमार्गेपितिष्ठति ॥ १७५ ॥ मुमूर्षोर्देहिनोप्येवंकर्माणिविविधानिह ॥ आरभंतेवपुस्त्वन्यद्यत्रयास्यत्यसौमृतः ॥ १७६ ॥ आत्मनःसर्वगत्वेनत्वाभिमुख्येनकर्मणां ॥ फलायबुद्धिसंयोगाद्वृत्तिद्वारेणहेतुना ॥ देहद्वयेपिसंप्राप्तोजंतुस्तेनात्रकथ्यते ॥ १७७ ॥

दीन्नयंति क्वसति अस्मिन्राज्ञिपूर्वप्रासादेस्थितेपि तानश्वादीन्दृष्ट्वाजनाएवंवदंति एवंकथं सोयंसोयंराजासमागतइति सचराजायद्यपि मार्गेपूर्वप्रासादेवातिष्ठतितथापीतित्रयाणांसंबंधः ॥ १७३ ॥ १७४ ॥ १७५ ॥ दार्ष्टांतिकमाह मुमूर्षोरिति एवंमुमूर्षोर्देहिनोराजस्थानीयस्यकर्माणिकिंकरस्थानीयानिशरीरांतरंप्राप्यंप्रासादांतरस्थानीयंस्वप्नकालइवप्रातिभासिकंमरणकालआरभंते तथाचतदाकारावृत्तिरश्वादिस्थानीयेतिभावः ॥ १७६ ॥ आत्मनइति एतेनाभिप्रायेणात्रजलौकानिदर्शनवाक्येमरणकालेजंतुर्देहद्वयेपिसंप्राप्तःसंबद्धःकथ्यते एतेनकेन यदात्मासर्वगःसत्कार्यवादेभाविशरीरेणापिसंबद्धएवकर्माण्यपिभाविशरीराकारायफलायोन्मुखान्येवातएवबुद्धिरपिवृत्तिद्वारेणभाविशरीरेणापिसंयुक्तैवेति ॥ १७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहद्वयस्थितत्वमभिनयति उपभोक्ष्यतीति यदाकारामरणेवृत्तिर्जायतेतच्छरीरंभविष्यद्भोगसाधनंत्यज्यमानंत्वतीतस्येतिशरीरद्वयसंबं
धोपपत्तिरितिभावः ॥ १७८ ॥ भाविशरीराकारवृत्तिरूपैवस्मृतिकालेभाविशरीरप्राप्तिरितीममर्थंदृष्टांतेनस्फुटयति यथाकंठेतिद्वाभ्यां य
थाभुक्तंमालादिकंतित्यक्षुस्त्यक्तुमिच्छुरपरंतज्जातीयंवीक्षतेतदाकारांचित्तवृत्तिधारांकरोतितथाजंतुरपिपूर्वदेहंतित्यक्षुरपरदेहाकारांवृत्ति
कर्मभिःप्रयुक्तांप्राप्नोति कीदृशैःकर्मभिः नवैःपूर्वशरीरारंभकभिन्नैःशरीरांतरस्यारंभकैः बुद्धिसंस्थानैश्चबुद्धेःसंस्थानंतत्तद्भोग्याकारःपरि
णामोयैस्तथातैरितिद्वयोरर्थः ॥ १७९ ॥ ५८० ॥ पूर्वदेहस्याविद्यागमनंनिहननंचस्पष्टीकरोति महावन्हिरितित्रिभिः लोहमितिभावप्र

उपभोक्ष्यतिदेहेनफलमेकेनदेहभाक् ॥ उपभुक्तंपरेणापितेनदेहद्वयस्थितः ॥ १७८ ॥ यथाकंठस्थितांमालाम
न्यद्वावसनादिकं ॥ तित्यक्षुरपरंजंतुर्वीक्षतेदूरसंस्थितम् ॥ १७९ ॥ पूर्वदेहंतथाजंतुस्तित्यक्षुरपरंनिजैः ॥ कर्म
भिर्बुद्धिसंस्थानैःप्राप्नोत्यारंभकैर्नवैः ॥ १८० ॥ महावन्हिर्ज्वलन्यद्वल्लोहपिंडंस्वसन्निभं ॥ गमयेत्संत्यजन्लो
हंदाहदीप्त्यपराहतः ॥ १८१ ॥ अविद्यांगमयेदेवंजडंदेहंत्यजन्पुमान् ॥ चैतन्यस्यापहारेणस्वाभिमानस्थित
स्यहि ॥ १८२ ॥ स्वात्मनस्तुपरित्यागाद्धंतिलोहंयथाज्वलन् ॥ अंतरात्मापिचतथात्यागाद्धंतिवपुस्त्विदं ॥ १८३ ॥

धानोनिर्देशः यथाज्वलन्देदीप्यमानोमहावन्हिर्लोहपिंडंस्वसन्निभंस्वतादात्म्येनस्वसमानाकारतांनीतंसंत्यजन्सन्पुनर्लोहभावंगमयेत्स्वा
पयेत् कीदृशोवन्हिः दाहदीप्तिभ्यामपराहतःअपरित्यक्तः नित्ययुक्तइतियावत् तथाचदाहदीप्तीवन्हिधर्मावपिवन्हिनात्यक्तंलोहपिंडंत्य
जतइतिभावः ॥ १८० ॥ अविद्यामिति एवंमहावन्हिवत्जडंदेहंचित्तादात्म्याध्यासाच्चेतनायमानंत्यजन्सन्पुरुषःस्वाभिमानाश्रितस्य
चैतन्यस्यापहारेणाविद्यामव्याकृतादिशब्दवाच्यायाअविद्यायाःकारणीभूतायाःस्वभावंजडत्वमितियावत् गमयेदित्यर्थः ॥ १८२ ॥ एता
वतैवपूर्वदेहस्यहननमित्याह स्वात्मनइति यथावन्हिकर्तृकंलोहहननंपरित्यागरूपंतथात्मकर्तृकंदेहहननमित्यर्थः ॥ १८३ ॥ ॥ ७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनोनानाविधशरीरारंभिकाचपंचभूताकारपरिणामिनीअव्याकृताख्याऽविद्यैवयथानानाभूषणोपादानमेकंसुवर्णमेवेतिप्रतिपादिकायाःपंचमकंडिकायाअर्थंवर्णयति लोहपिंडमितित्रयोदशभिः यथाअग्निःपूर्वंलोहपिंडंनिहत्यस्ववियोगेनदीप्त्यादिरहितंकृत्वाअन्यंलोहपिंडंव्रजेत्तचलोहपिंडंस्वसंबंधेनमनोनयनयोर्हर्षप्रदंकुर्यात्तथात्माप्यस्यपूर्वदेहस्यभोगप्रदानांकर्मणांक्षयेसतिपूर्वदेहंत्यक्त्वाअन्यंदेहंयातितंचकल्याणंमन्यतेइतिद्वयोरर्थः ॥ ९८४ ॥ ९८५ ॥ तत्रनवंशरीरंपूर्वशरीरोपादानभूताविद्यायाएवपरिणामइत्याह यथेतिद्वाभ्यां यथासुवर्णकारःश्रुतौपेशस्कारिपदोक्तःकुंडलाङ्गुलीयकादिरूपैरेकंसुवर्णपिंडंपर्यायेणक्रमेणकरोतिविपरिणामयतितथात्माप्यविद्यांना

लोहपिंडंनिहत्याग्निरन्यंनवतरंव्रजेत् ॥ सुखप्रदंलोहपिंडंमनसोनयनस्यच ॥ ९८४ ॥ पूर्वदेहंतथात्मायंहित्वा नवतरंपुनः ॥ कल्याणंसुखदंदेहंयातिकर्मक्षयेस्यहि ॥ ९८५ ॥ यथासुवर्णकृल्लोकेस्वर्णमेकमनेकधा ॥ पर्यायतःकरोत्येवमात्माऽविद्यामनेकधा ॥ पर्यायतःकरोत्येषनानादेहस्वरूपिणीं ॥ ९८६ ॥ अविद्यांगमयित्वाहिपूर्वदेहंपरंपुनः ॥ अविद्यातःसमादत्तेपुण्यपापवशंगतः ॥ ९८७ ॥ समीचीनतमंपूर्वदेहंकर्मक्षयेपुमान् ॥ मनुतेत्यसमीचीनंभाविकर्मप्रचोदितः ॥ ९८८ ॥ आगाम्यप्यसमीचीनंसमीचीनधियापुमान् ॥ गृह्णातिसर्वदाजंतुरीश्वरस्यवशेस्थितः ॥ ९८९ ॥ मंत्रौषधिबलैर्यद्वद्दुर्बुद्धधीःकुष्ठिनीमपि ॥ रजसावृतगात्रांचकर्णनासादिवर्जितां ॥ इंद्राणीसदृशीमितांमन्यतेपरयोषितं ॥ ९९० ॥ इंद्राणीसदृशींस्वस्यगुणयुक्तांपतिव्रतां ॥ कुलप्रसूतांयुवतिंहित्वास्वस्यसमीपगां ॥ ९९१ ॥

नादेहरूपेणपरिणामयतीत्यर्थः ॥ ९८६ ॥ एतदेवस्फुटयति अविद्यामिति देहस्यअविद्योपादानंपुण्यादिकंतुनिमित्तमित्यर्थः ॥ ९८७ ॥ उत्तरदेहस्यकल्याणतमत्वमाभिनानिकंदर्शयितुंपूर्वदेहेजंतोरसमीचीनबुद्धिर्भवतीत्याह समीचीनमिति पूर्वदेहंसमीचीनमप्यसमीचीनंमन्यते ॥ ९८८ ॥ आगामीति आगामिदेहंत्वसमीचीनमपिसमीचीनंमन्यते ॥ ९८९ ॥ दोषोपप्लुतांतःकरणस्यविपरीतदर्शनंनचित्रमितीममर्थंनिदर्शनेनविशदयति मंत्रौषधीतिचतुर्भिः यथाकश्चिद्वशीकरणोपायैर्मंत्रादिभिःक्षोभिताविषयव्याप्तबुद्धिर्नानादोषामपिपरस्त्रियमिंद्राणीसदृशीमन्यतेसद्गुणांस्वकीयांहित्वेतिद्वयोरन्वयः ॥ ९९० ॥ ९९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्ष्टांतिकेयोजयति श्वादीति तथाजंतुःपुण्यपरिक्षयेराजादिदेहान्मनोरमानपित्यक्त्वाश्वादिदेहान्सुखदान्मन्यतेपापोदयवशादितिद्वयोःसं
वंधः ॥ ११२ ॥ ११३ ॥ कर्मानुसारेणदेहलाभव्यवस्थामाह यदीतिद्वाभ्यां यदिपूर्वदेहांतेपुण्योदयस्तदाशुभसंस्कारादिभिःपितृलो
कादिगतंशुभंदेहंप्राप्नोतिमध्यमैःसंकीर्णैर्मनुष्यादिभावमधमैःश्वादिभावमितिद्वयोरर्थः ॥ ११४ ॥ ११५ ॥ एवंजंतोःसंसारभ्रमणप्रका
रोदर्शितइत्युपसंहरति एवमिति स्पष्टं ॥ ११६ ॥ अथसंसारंप्राप्तस्याप्यात्मनोयत्सर्वाधिष्ठानभूतंशुद्धंस्वरूपंयच्चकल्पितंनानाविधंस्वरूपं
तयोरुभयोर्विभज्यप्रदर्शिकायाःषष्ठकंडिकायाअर्थंपंचाशदधिकशतद्वयेनोपबृंहयंस्तत्रात्मनोब्रह्मतालक्षणमुद्दत्ताप्रतिपादकस्यप्रथमवा

श्वादिदेहानयंतद्वत्पापपुंजविमोहितः॥ आत्मानवतमान्स्वस्यसुखदानभिमन्यते॥ ११२॥ राजदेवादिकांस्त्य
क्त्वादेहान्पूर्वान्मनोरमान्॥ अनेकसुखसंपन्नान्पुण्यपुंजपरिक्षये॥ ११३॥ यदिपुण्योद्भवस्तस्यभवेद्देहस्यसंक्ष
ये॥ तदानवतमंदेहंकल्याणंचैवगच्छति॥ ११४॥ पितृगंधर्वदेवानांविराट्सूत्रात्मनोरपि॥ यातिदेहंशुभैःपूर्व
संस्कारज्ञानकर्मभिः॥ व्यामिश्रैर्मनुजादीनांश्वादीनामधमैरपि॥ ११५॥ एवंसंसारशूलेस्मिन्वर्ततेसर्वदेहि
नः॥ ब्रह्माद्याःस्तंबपर्यंताआत्मज्ञानविवर्जिताः॥ ११६॥ आनंदेतारतम्यंयद्वर्णितंतन्निजात्मनः॥ तारतम्या
त्प्रकाशस्यतत्तद्बुद्धेरपेक्षणात्॥ ११७॥ तारतम्यंयथादृष्टमाकाशस्यघटादिषु॥ आनंदस्यतथाबुद्धौतारतम्यं
व्यवस्थितं॥ ११८॥ सूच्यांघटेगृहेतद्वत्प्रासादेनगरेपिवा॥ स्वरूपेनहिवैषम्यंभौतिकेघटरूपिणि॥ ११९॥

क्यस्यार्थंवर्णयति आनंदइत्यष्टादशभिः तत्रात्मनआनंदलक्षणंस्वरूपंसर्वत्राविशिष्टमेव यच्चतत्तल्लोकेष्वानंदस्यतारतम्यमुक्तंतत्स्वा
भाविकंकिंतुचित्प्रतिबिंबग्राहिकायाआवरणभंजिकायावाबुद्धेःसत्वोत्कर्षतारतम्यवत्याःसंवंधमपेक्ष्ययदात्मनःप्रकाशस्याभिव्यक्तेस्तार
तम्यंतदभिप्रायेणवोध्यमित्यर्थः ॥ ११७ ॥ औपाधिकतारतम्यंदृष्टांतेनस्फुटयति तारतम्यमिति स्पष्टम् ॥ ११८ ॥ औपाधिकंतारतम्यं
वस्तुतउपहितंनस्पृशतीतिदर्शयति सूच्यामिति यदासूचीच्छिद्रादिष्वनुगतेभौतिकेभूतस्याकाशाख्यस्यसंबंधिनिस्वरूपेवैषम्यमुत्कर्षापक
र्षयोगोनास्ति कीदृशेभौतिकस्वरूपे घटरूपिणि घटस्वरूपस्यसंयोगसंबंधेनाधारेपि तदाअसंगात्मनिऔपाधिकधर्मयोगोनास्तीतिकिमु
वाच्यमितिभावः ॥ ११९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मेति अत्युत्कृष्टतयाप्रसिद्धेब्रह्मणोहिरण्यगर्भस्यदेहेअत्यपकृष्टेश्वदेहेवाशुद्धात्मनोवैषम्यंनास्तीतिकिमुवाच्यं यतआत्मनोयदुपाधिशवलंरूपंभोक्तृत्वेनप्रसिद्धंयच्चभोग्यंसुखादितत्रापिवैषम्यंनदृश्यतइत्यर्थः ॥ १००० ॥ तत्रसुखेतद्धेतोरिचवैषम्याभावमभिनयति कदन्नेनेति कदन्नंकुत्सितमन्नंकोद्रवादितेनयथादरिद्रस्यतोषःसुखंतथैवराजादेर्लेह्यचोष्यादिभेदैरन्नैरिति ॥ १००१ ॥ दुःखतद्धेतोरपितमाह क्षुधादिभिरिति ॥ १००२ ॥ वैषम्येपीति उक्तविधयाफलाविशेषेसतिसाधनप्रयुक्तवैषम्येपिदरिद्रस्येतरस्यसंपन्नस्यचनवैषम्यंनविशेषः कीदृशस्यदरिद्रादेः अत्रलोकेमनोगतंसुखदुःखौघंसमंपश्यतइतिशेषः किंचबहिरंगाणांसुखादिसाधनानांवैषम्येप्यंतरंगाणांत

ब्रह्मलोकस्थितेब्रह्मदेहेदेहेशुनोत्रवा ॥ नविद्यतेहिवैषम्यंसुखेदुःखेतथैवच ॥ १००० ॥ कदन्नेनदरिद्रोयंयथातोषंव्रजेत्सदा ॥ लेह्यादिभिस्तथैवान्नैराजावाधनिकोथवा ॥ १००१ ॥ क्षुधादिभिर्यथादुःखंदरिद्रोयातिमानवः ॥ राजादिकस्तथैवायंधनिकोपिप्रयातिहि ॥ १००२ ॥ वैषम्येपिनवैषम्यंदरिद्रस्येतरस्यवा ॥ विद्यतेसुखदुःखौघमत्रलोकेमनोगतम् ॥ १००३ ॥ क्षुत्पिपासाभयंनिद्राप्रियेरागस्तथाप्रिये ॥ द्वेषोमोहोनिजेरूपआनंदात्मन्यधीश्वरे ॥ १००४ ॥ मलमूत्रविमोक्षायविषयावाप्तिरेवच ॥ तज्जंसुखंतथादुःखंसममेतद्धिदेहिनाम् ॥ १००५ ॥ दरिद्रादेस्तथाराज्ञःपशोःकीटादिकस्यवा ॥ जंतोःकस्यापिनैवात्रवैषम्यंविद्यतेभुवि ॥ अवांतरेषुवैषम्यंनैवकिंचिद्धिविद्यते ॥ १००६ ॥ एवंहिरण्यगर्भस्यकृमिदष्टस्यवाशुनः ॥ वैषम्येसतिवैषम्यंनैवकिंचिद्धिविद्यते ॥ १००७ ॥

त्साधनानांरागादीनांसाम्यमेवेत्याह क्षुत्पिपासेत्यादिना क्षुत्तृड्भयनिद्राश्चतस्रःप्रियाप्रियगोचरौरागद्वेषौद्वौतथात्मविषयकोमोहस्तथा मलमूत्रविमोक्षपूर्वकालेविषमदशाप्राप्तिरितिदोषाष्टकंतज्जंततोदोषाष्टकादुपशमद्वारेणजायमानंसुखंविपर्ययेऽनुपशमेतुदुःखंएतद्दोषाष्टकहेतुसहितंसुखादिकंसर्वदेहिषुसममितिद्वयोरर्थः ॥ ११०४ ॥ १००५ ॥ दरिद्रादेरिति तथासतिलोकदृष्ट्यादरिद्रादीनामवांतरेवैषम्येमहत्यपिसतिकस्यापिजंतोर्वैषम्यमत्रफलंनविद्यतेइत्यन्वयः ॥ १००६ ॥ एवमिति एवमुक्तविधयासहांतरंगसाधनैःफलाविशेषेसतिहिरण्यगर्भस्यात्युत्कृष्टोपाधेःशुनश्चनिकृष्टोपाधेर्नविशेषइत्यर्थः ॥ १००७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुतयारागादिदोषसाम्यमाह कामेति सूत्ररूपिणोहिरण्यगर्भाख्यस्य ॥ १००८ ॥ नचतत्रक्षुधादयोनसंतीतिवाच्यंक्षुधयाविराडा
ख्यसुतभक्षणप्रवृत्तेश्चतुर्थाध्यायेवर्णितत्वादित्याह शुनइति सश्वासुतादनेनप्रवर्त्ततेसूत्रात्मातुप्रवृत्तइति ॥ १००९ ॥ किंचशुनःसुता
दनादिप्रवृत्तौनिंदाभयंनास्तिसर्वगुरोःसूत्रात्मनस्तुतदस्तीत्याह अपीति तंसूत्रात्मानम् ॥ १०१० ॥ अपकर्षांतरमाह स्वामिनइति शुनो
व्यापारोभषणादिश्चौरादिवारकत्वात्स्वामिनोऽनुकूलोपिभवतिसूत्रात्मव्यापारस्तुजगत्सृष्ट्याद्यैश्वर्यरूपोनकस्यापिसुखदः तथाहि किंक
र्मिणांसुखदउपासकानांवाज्ञानिनांवा नाद्यः त्रिलोक्यंतरालवर्तिनांतेषांसूत्रात्मनोनिद्रयात्रिलोकीविनाशिकयाभयप्रदत्वात् नद्वितीयः
सयत्पूर्वोऽस्मादित्यादिश्रुत्यासहिरण्यगर्भःप्रथममैश्वर्यलाभेनेतरानुपासकानीर्ष्यादुःखेनतापितवांस्तस्मात्पुरुषसंज्ञइत्यर्थकयातापदत्वो

कामक्रोधादयोभावायथासंतिशुनोभुवि ॥ तथैवजगदीशस्यसंतितेसूत्ररूपिणः ॥ १००८ ॥ शुनोपिचनि
कृष्टोयंभगवान्जगदीश्वरः ॥ क्षुधादिविषयेयस्मान्नाद्यात्सस्वसुतान्कचित् ॥ १००९ ॥ अपितंपापनिरतंनिं
दंतिसकलाजनाः ॥ नतुश्वानंततःसूत्रदेहंकृष्टतमंस्मृतम् ॥ १०१० ॥ स्वामिनेहितएवस्याद्व्यापारःप्रायशःशु
नः ॥ कस्मैचिन्नहितस्तस्यव्यापारःसूत्ररूपिणः ॥ १०११ ॥ ततोविद्यैवहेतुःस्यादाधिक्येजगदीशितुः ॥ निकृ
ष्टत्वेशुनस्तद्वद्वैषम्येणविनापिहि ॥ १०१२ ॥ आत्माहिरण्यगर्भेवाशुनिवान्येषुजंतुषु ॥ एकएवयथाकाशःस
र्वेष्वपिघटादिषु ॥ १०१३ ॥ सएवायंमहाराजममतेपिहृदिस्थितः ॥ ब्रह्मरूपोजंगमानांस्थावराणांचसर्व
गः ॥ १०१४ ॥

क्तेः नतृतीयः ब्रह्मज्ञानप्रतिबंधकब्रह्मलोकेच्छाजननद्वारांतरायभयप्रदत्वादितिभावः अथवाविराड्भक्षणप्रवृत्तिरूपोव्यापारोनकस्यापि
सुखदः सर्वोपायसंपन्नसृष्टेःप्रतिबंधादित्यर्थः ॥ १०११ ॥ तर्हिकेनगुणेनजगदीशोत्कर्षइतिचेद्ब्रह्मविद्ययैवेत्याह ततइति ततःजगदीशितु
र्हिरण्यगर्भस्याधिक्येहेतुःप्रयोजिकाब्रह्मात्मविद्यैवभवति अन्यत्रापकर्षस्यचात्माविद्यैवप्रयोजिकाअन्यद्वैषम्यंतूक्तविधयानास्तीत्यर्थः
॥ १०१२ ॥ तथाचकल्पिताविद्यामात्रप्रयुक्तैर्विशेषैरात्मनोऽस्पृष्टत्वात्शुद्धत्वेनकिंचिद्बाधकमित्याह आत्मेति स्पष्टम् ॥ १०१३ ॥ शु
द्धात्मनश्चाद्वितीयत्वाद्ब्रह्मत्वेनकिंचिद्बाधकमित्याह सएवायमिति यःसर्वत्राकाशवदनुस्यूतोवस्तुतोऽद्वयश्चात्मासएवत्वत्प्रभृतीनांहृदि
स्थितोब्रह्मरूपइति ॥ १०१४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसर्वाधिष्ठानभूतंशुद्धात्मस्वरूपंदर्शितमथकल्पितानामात्मस्वरूपाणांप्रदर्शकस्यविज्ञानेत्यादेःपापेनेत्यंतस्यवाक्यस्याक्षरार्थंतावदभिन यति विज्ञानेत्येकादशभिः योयमात्मावर्णितःसविज्ञानोपाधिकोबुद्ध्युपाधिकःसन्विज्ञानमयइत्येवंपूर्वमतीतग्रंथेपितुभ्यंवर्णितः सचय थाबुद्ध्युपाधिकोविज्ञानमयइत्युक्तस्तथामनःप्रभृत्युपाधिवशान्मनोमयादिसंज्ञकउक्तः श्रुतावित्यर्थः ॥ १०१५ ॥ तत्रेति तत्रोपाधि विशिष्टेऽस्मिन्नात्मनिव्यपदेशोविशिष्टनामशालीव्यवाहारएतादृगुक्तः एतादृक्कीदृगित्याकांक्षायामाह मनोमयइत्यादिना सर्वत्रस्त्रीमयो जाल्मइतिवत्प्राधान्येमयट्प्रत्ययः अन्यानींद्रियाणित्वगादीनि तथाचत्वङ्मयरसनामयादिनामानिबोध्यानि पृथिवीमयादीनिभूतसं

विज्ञानमयइत्येवंयःपुरातेमयेरितः॥ विज्ञानोपाधिकोयद्वद्विज्ञानमयईश्वरः॥ मनःप्राणाद्युपाधिःसंस्तन्मयः परिकीर्तितः ॥ १०१५ ॥ तत्रास्मिन्व्यपदेशोयमेतादृक्परिकीर्तितः॥ मनोमयस्तथाप्राणमयश्चक्षुर्मयस्त था॥देवःश्रोत्रमयस्तद्वदन्येंद्रियमयोपिच॥ १०१६॥ पंचभूतमयश्चायमात्मातद्वत्तमोमयः॥ कामक्रोधम यस्तद्वत्प्रभुर्धर्ममयस्तथा॥ १०१७॥ तदभावमयश्चापितदन्यमयएवच॥ तद्विरोधिमयोप्येषस्वयंज्योतिः परःपुमान्॥ १०१८ ॥ किंबहूक्तेनराजेंद्रस्त्यस्तिनास्तीतियज्जगत्॥ तत्सर्वमयएवायंयतःसर्वत्रसंस्थितः॥ प्रत्यक्षेवापरोक्षेवाततःसर्वमयःपुमान् ॥ १०१९ ॥ यादृशंकुरुतेकर्मयथाकारीभवेदयं ॥ आचारंयादृशं कुर्याद्यथाचारीपरःस्मृतः॥ १०२० ॥

बंधेननामानिबोध्यानि तमस्त्वज्ञानं अधर्ममयशब्दगतनञाऽभावोभेदोविरोधश्चोक्तइतिदर्शयति तदभावमयइत्यादिपदत्रयेण धर्माभा वोयथासुषुप्तौधर्मभेदोजलताडनादिव्यर्थक्रियासुधर्मविरोधस्तुनिषिद्धक्रियासुप्रसिद्धइतित्रयाणामर्थः॥१०१६॥१०१७॥१०१८॥ किमिति अस्तिस्थूलंयत्प्रत्यक्षवाचकेदंपदेनोक्तं नास्तीतिसूक्ष्मंयत्परोक्षवाचकादःपदोक्तं तत्रसर्वत्रतादात्म्येनस्थितत्वात्सर्वमयइत्यर्थः ॥ १०१९॥अस्यात्मनस्तत्तद्विशेषभावेनिमित्तभूतंकर्मेतिदर्शयति यादृशमितिपंचभिः अयमात्मावस्तुतःपरःसर्वोत्कृष्टोयादृशंविहितंप्रति षिद्धंवाकर्मकुर्वन्यथाकारिपदेनोक्तः एवमुत्तरार्धंयोज्यं ॥ १०२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्माचारपदयोरर्थभेदंदर्शयति आचारोपीतिद्वाभ्यां यद्यप्याचारपदार्थोपिकर्मैवतथापिदेशकुलावस्थादिपारतंत्र्येणानुष्ठीयमानत्वरूपविशेषेणाचारपदार्थःकर्मपदार्थादन्यत्रभिन्नोलभ्यतेव्यवह्रियतेइतियावत् ॥ १०२१ ॥ एतदेवस्फुटयति कर्मात्रेति यत्कर्मविहितत्वेनेष्टसाधनत्वेननिषिद्धत्वेनानिष्टसाधनत्वेनरूपेणवाशास्त्रीयंश्रुत्यादिप्रमाणवेद्यंतत्कर्मपदेनात्रोक्तं यत्तुविहितादिरूपेणलोकाद्देशकुलादिरूपादेवविदितंतत्कर्मआचारपदेनोक्तमित्यर्थः ॥ १०२२ ॥ लौकिकमिति कर्माचारपदाभ्यामुक्तंकर्मसाधुसमीचीनंकुर्वन्साधुकारीतिपदेनोक्तस्तद्विपर्ययेत्वसाधुकारीतिपदेनेत्यर्थः ॥ १०२३ ॥ तत्फलमाह साध्विति यःसाधुकारीससाधुरुत्कृष्टशरीरादिविशिष्टोभवति साधुकारीत्यादिपदगतंणिनिप्रत्ययंदृष्ट्वाअभ्यस्तमेवकर्मफलदमितिभ्रमोनकर्त्तव्योयतःसकृदनुष्ठितमपिकिंचित्कर्मफलदमित्याशयेना

आचारोपिभवेत्कर्मयद्यप्येषतथापिच ॥ देशादेःप्रविभागेनकर्मणोन्यत्रलभ्यते ॥ १०२१ ॥ कर्मात्रस्याद्धिशास्त्रीयंविहितंचपरंतथा ॥ आचारोलौकिकस्तद्वद्विहितोनिंदितोपिवा ॥ १०२२ ॥ लौकिकंवैदिकंकर्मसाधुचेत्कुरुतेपुमान् ॥ साधुकारीतिसंप्रोक्तोऽसाधुकारीततोन्यथा ॥ १०२३ ॥ साधुकारीभवेत्साधुरसाधुरपरस्तथा ॥ पुण्यःपुण्येनभवतिपापःपापेनकर्मणा ॥ १०२४ ॥ पुरुषस्यततोनात्रकर्माचारौद्विधास्थितौ ॥ साध्वसाधूतथापुण्यपापेलौकिकवैदिके ॥ १०२५ ॥ कामःक्रोधस्तथाधर्मस्तदन्यादिश्चकश्चन ॥ अज्ञानंचतथाब्राह्यतमसासहितंनहि ॥ १०२६ ॥

ह पुण्यइति पुण्यःसत्फलदः पापस्तद्विपरीतः ॥ १०२४ ॥ उक्तानांविज्ञानमयादिरूपाणांकल्पितत्वंस्फुटयितुंतेषांवस्तुतआत्मन्यभावमाह पुरुषस्येतिचतुर्भिः यतएतानिरूपाण्युपाधिसंबंधात्पुरुषेकल्पितानिततःकर्माचारौवस्तुतःपुरुषेनस्तः कीदृशौकर्माचारौ साधुत्वेनासाधुत्वेनचद्विधाविभज्यस्थितौ तत्रसाधूयौकर्माचारौतौलौकिकवैदिकत्वाभ्यांद्विविधपुण्यात्मकौ असाधूतुलौकिकवैदिकत्वाभ्यां ॥७९॥
द्विविधपापात्मकावित्यर्थः ॥१०२५ ॥ कामइति तथाकामादयोपिपुरुषस्यसंबंधिनोनभवंतीतिसंबंधः तदन्यादिर्न धर्मभिन्नधर्मविरोधधर्माभावाश्चात्मनोनसंतीत्यर्थः तमःपदेनोक्तमांतरमज्ञानंबाह्यंध्वांतंचनेति ॥ १०२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाभूतानीति तथामहाभूतादीनिपुरुषस्यसंबंधीनिनेतिसंबंधः तथानानाविधप्राणादिरूपाक्रियाशक्तिस्तथानानाविधचित्तवृत्त्यालिकाज्ञानशक्तिस्तत्प्रपंचभूतेवुद्धिमनसीचएतानिनसंतीत्यर्थः ॥ १०२७ ॥ शब्दादीति तथासुखदुःखलक्षणफलसमन्विताःशब्दादिविषयाश्चात्मसंबंधिनोनसंतियतस्तेसर्वेपरिच्छिन्नाःपरिणामादिनादुःखहेतवइतिसंबंधः ॥ १०२८ ॥ वर्णितरूपाणांदुःखहेतूनामात्मन्यसंभवेहेतुतयात्मनोभूमभावलक्षणामानंदरूपतामाह आनंदेति स्पष्टम् ॥ १०२९ ॥ सआत्मासर्वत्रपरिपूर्णोल्पदृहायांविशेषेणभासतेइत्याह ममेति शरीरस्थितिपर्यंतंविशेषेणहृदिस्थितःसंश्चकास्तीत्यर्थः ॥ १०३० ॥ सोयमात्मासर्वस्यजगतोविवर्तस्योपादानमित्याह सकारणमिति स्पष्टम् ॥ १०३१ ॥ तस्यचनानाविधदुःखप्रयोजकानांविज्ञानमयादिरूपाणांनिदानमात्माज्ञानमेवेत्याह नजानातीति

महाभूतानिपंचापिनेंद्रियाणिदशापिच॥ क्रियाशक्तिर्नचप्राणोनानाभेदोवपुःस्थितः॥ ज्ञानशक्तिस्तथानानावुद्धिमनसीअपि॥ १०२७॥ शब्दादिविषयाःसर्वेसुखदुःखसमन्विताः॥ नैवात्मनोमहाराजसर्वेदुःखकराःसदा॥ १०२८॥ आनंदात्मास्वयंज्योतिरवाङ्मनसगोचरः॥ स्वसजातिविजात्युत्थभेदत्रयविवर्जितः ॥ १०२९ ॥ ममतेपितथान्येषांस्थिरजंगमदेहिनां ॥ सर्वावस्थासुहृदयेविशेषेणव्यवस्थितः ॥ आविमोक्षंशरीरस्यस्फुरत्यविरतंपुमान्॥ १०३०॥ सकारणंसमग्रस्यजगतोस्यमहीपते ॥ गंधर्वनगरस्येवगगनंसंगवर्जितं ॥ १०३१ ॥ नजानातियदायंस्वमानंदात्मानमव्ययं ॥ तदानानाविधंदुःखमेतिराजन्नकारणं ॥ १०३२॥ विज्ञानमयतांप्राप्यघोरंसंसारकारणं ॥ शुष्कालावूसमोभूत्वाप्राप्नोत्येषमहेश्वरः॥ १०३३ ॥ दंडहस्तैर्यथाबालैःकंदुकःसर्वतोदिशम्॥ अशांतंप्रेर्यतेतद्वद्विविधैःकर्मभिःपुमान्॥ १०३४ ॥

अकारणंवास्तवकारणहीनंदुःखमेतिप्राप्नोति ॥ १०३२ ॥ तत्रतावद्विज्ञानमयतायाअनर्थहेतुतांप्रपंचयति विज्ञानमयतामित्यादिना मनोमयोयदायंस्यादित्यतःप्राक्तनेनग्रंथेन तत्रकर्तृत्वभोक्तृत्वाद्युपाधिनाकार्याविद्याकामकर्माश्रयेणपरिच्छिन्नेनचविज्ञानेनतादात्म्यंप्राप्यएषआत्मामहेश्वरःपरिपूर्णोपिशुष्कतुंबीवल्लघुर्भूत्वासंसारस्यकारणंकामकर्मादिसंबंधंप्राप्नोतीत्यर्थः ॥ १०३३ ॥ बुद्धितादात्म्याल्लब्धैर्दोषैःप्रयुक्तंसंसारमभिनयति दंडेत्यादिना अशांतंशांतिःकंदुकस्यभूमिसंयोगस्तद्रहितंयथास्यात्तथासर्वासुदिक्षुकंदुकःप्रक्षिप्यतेबालैस्तथाजीवःकर्मभिर्नानायोनिष्विति ॥ १०३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उच्चेति ग्राहंग्राहंगृहीत्वागृहीत्वा एवंत्याजमिति यंत्रमरघट्टाख्यं ॥१०३५॥ दृष्टांतंस्फुटयति ग्राहमिति यथायंत्रस्थिताघटीजलंग्राहं ग्राहंत्याजंत्याजंचअपरंजलंयातिनभस्थलंचप्रामोति कीदृशंजलंनभस्थलंच शश्वत्सुलभंबहुवारंप्राप्तमितियावत् ॥१०३६॥ एवमिति एवंघटीवत्॥१०३७॥ तत्तच्छरीरेषुकार्याविद्याव्यापारंदर्शयति यद्यदिति आदत्तेनवंलभते आत्मतयायातिआत्मत्वेनमन्यते॥ १०३८॥ यद्यच्त्यजतीति अस्मात्शरीरात् ॥ १०३९ ॥ किंचयस्यदेहस्ययोयआहारस्तमेवश्रेष्ठंमन्यतेइत्याह यदाहारमिति ॥ १०४० ॥ किंच

उच्चावचानिदेहानिग्राहंग्राहंत्यजत्ययं ॥ त्याजंत्याजंचगृह्णातिघटीयंत्रस्थितायथा ॥ १०३५॥ ग्राहंग्राहंज
लंयातित्याजंत्याजंतथापरं ॥ प्राप्नोतिशश्वत्सुलभंतथैवनभसःस्थलम् ॥ १०३६ ॥ एवमेषपुमान्गच्छेत्क
दाचिद्वसुधातलं॥पातालंनरकंवापिनभोवादिवमेववा॥१०३७॥ यद्यच्छरीरमादत्तेब्रह्मणोवाशुनोपिवा॥
तत्तदात्मतयायातिविज्ञानमयईश्वरः ॥ १०३८॥ यद्यत्त्यजतिदेहंसब्रह्मणोवाशुनोपिवा॥ तत्तद्विष्ठासमंप
श्चात्पश्यत्यस्माद्विनिष्कृतः॥१०३९॥ यदाहारंहियद्देहंगृह्णात्येषपरःपुमान्॥ तदेवाभ्यधिकंनान्यदिति तत्राव
गच्छति॥१०४०॥अस्यदाहादिनासर्वंदाहाद्यात्मनिमन्यते॥चंदनाद्यनुलेपादितस्यतद्वदयंव्रजेत्॥१०४१॥
मरणंगर्भवासंचजननंचतथाभुजिम् ॥ उच्चावचेषुदेहेषुविज्ञानमयएत्ययम्॥ १०४२॥ दुःखात्मकमिदंस
र्वंभवतावगतंस्वयम्॥ राजंस्तथापिकिंचित्तेवक्ष्येतत्स्मृतयेधुना॥ १०४३॥ विज्ञानमयआत्मायमनादिः
कर्मयोगतः॥देहंत्यजन्महादुःखंप्राप्नोत्येतत्पुरोदितम्॥ १०४४॥

प्राप्तदेहधर्मान्दाहपूजादीनात्मनिमन्यतइत्याह अस्येति तस्यास्यदेहस्य ॥ १०४१ ॥ मरणमिति एवंविज्ञानमयःसन्नात्मामरणादि कमेतिप्रामोति भुजिभोगं॥ १०४२॥ नरकदुःखानिवर्णयितुंप्रतिजानीते दुःखात्मकमिति हेराजन्यद्यपिभवताइदंसंसरणंसर्वंदुःखात्मकमित्यवगतंतथापितत्स्मृतयेतस्यसंसारदुःखरूपत्वस्यस्मृतयेयत्किंचिद्वक्ष्यामितच्छृणिवति ॥ १०४३ ॥ तत्रमरणकालेयद्दुःखंतदुत्सर्जनूयातीतिश्रुतिव्याख्यानकालेदर्शितमित्याह विज्ञानेति पुरातृतीयब्राह्मणव्याख्योपांते ॥ १०४४ ॥ ॥८०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधुनातुनारकदेहप्राप्तौसत्यांयद्दुःखंतद्वर्ण्यतेइत्याह त्यक्त्वेति एकंदेहंत्यक्त्वादेहांतरमवश्यंजीवोयातितत्रदेहांतरेनरकेप्राप्तेसतियद्दुःखंभव तितस्यस्मरणान्ममभीतिर्जायतेइहविद्वद्दशायामपीत्यर्थः ॥१०४५॥ ननूत्कटदुःखकालेयातनादेहःकुतोननश्यतीतिशंकांदृष्टांतेनपरिहर ति स्वप्नेति यथास्वप्नेशिरश्छेदाद्यनुभवेपिदेहोननश्यतितथैतदपीतिभावः॥१०४६॥ तत्रतत्रलोकेसामान्यरूपेणदुःखंवर्णयति कर्मणेति अनेनजंतुनाकायादिव्यापारैर्यस्यजंतोर्दुःखंयादृशंपूर्वदेहेमानुषलोकेकृतंसदत्तदुःखकोजंतुस्तस्यदुःखप्रदस्यदेहिनस्तादृशमूर्तिःसंस्तादृ कृद्दुःखंकोटिगुणाधिकंकरोतीत्यन्वयः ॥१०४७॥ अथविशेषतस्तद्वर्णयति अदूराइत्यादिना मार्गविप्लावकानांमार्गोपद्रवकारिणांक्रूरा

त्यक्त्वादेहंपुनर्यातिदेहांतरमयंसदा॥ नरकेतत्रमेभीतिःस्मरणादिहजायते॥ १०४५॥ स्वप्नकालेयथादेहःस र्वनाशविवर्जितः॥ नरकेयातनादेहोननश्यतितथैवसः॥१०४६॥ कर्मणामनसावाचादुःखंयद्यादृशंकृतं॥ यस्यानेनपुरादेहेतत्तादृक्तादृशःपुनः॥ कोटिकोट्यधिकंसोपिकुरुतेतस्यदेहिनः॥ १०४७॥ अदूराअपिपंथा नःकोटियोजनविस्तृताः॥ मार्गविप्लावकानांस्युर्नरकेक्रूरकर्मणां॥ १०४८॥ आयसास्तीक्ष्णवदनाःसर्वतो विषकंटकाः॥ कुर्वंतिपादवेधंतेपादत्राणापहारिणां॥१०४९॥ मरणांतसमोभूयात्क्षुधयाचपिपासया॥ नर केगच्छतामन्ननीरपाथेयहारिणां॥१०५०॥ वासोपहारिणांतद्वद्वसनानिहरंत्यमी॥ यूनांमातुःपुरस्तद्वत्तन्मा त्रादेश्वतत्पुरः॥ १०५१॥ सुवर्णहारिणांतद्वत्स्वर्णाकारांत्वचंबलात्॥ हरंतितदतोदेहात्शतशोपिसहस्रशः ॥१०५२॥

णामदूराअपिमार्गाःकोटियोजनविस्तृताभवंतीति ॥ १०४८ ॥ आयसाइति पादघ्राणमुपानदादितस्यचौराणांलोहमयाःसविषाः कंटकाःपादवेधंकुर्वंतीति॥ १०४९॥ १०५०॥ वासइति अमीयमपुरुषावस्त्रचौराणांवस्त्राणिहरंति तथामातुस्तन्मात्रादेश्चपुरोबालव त्सरतंत्रतयावर्त्तितव्यत्वेसतियेयुवानोयुववद्गगल्भतयावर्त्ततेतेषांयूनांतद्वर्णितविधंदुःखंभवतीत्यर्थः ॥ १०५१॥ सुवर्णेति सुवर्णचौ राणांत्वचंस्वर्णाकारांस्वर्णवदुज्ज्वलांविधायतत्तस्मात्स्वर्णापहारदोषात्अतोनुभूयमानाज्जीवतोदेहाद्यमदूताहरंतीति ॥ १०५२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मघ्नानामिति यथालोहकारगृहेतप्तंलोहंताडयंतितथाएतेयमपुरुषाब्रह्मघ्नानांशिरांसिताडयंतीति ॥ १०५३ ॥ सुरेति मद्यपानांमुखे तप्तांसुरांपुनःपुनःपातयंति कीदृशींतप्तांसुरां आयसींलोहद्रवरूपां ॥१०५४॥ सुवर्णेति ब्राह्मणस्यतुसुवर्णंतिलमात्रमपियेहरंतितेषांदेहं स्वर्णवदुज्वलंघनंचविधाययमदूतास्तिलशश्छिदंति ॥ १०५५ ॥ गुरुतल्पगानांगतिमाह जननीमिति जननींगुरुस्त्रियंचग्राम्यधर्मेणगंतॄ णांछिश्नंछित्वातेनमुखेक्षिप्तेनश्वासंनिरुद्ध्यतैर्जननीगंतृभिस्तांजननींक्रकचसमानांगत्वादिविशिष्टांनाथयंतिआक्रामयंतिपूर्ववदितिद्व योरर्थः ॥ १०५६ ॥ १०५७ ॥ परेति परदारगाणामपिएतद्गुरुतल्पगेषुयदुक्तंतदेवदुःखंवेदितव्यंपरंतुतत्रशिश्नच्छेदतन्मुखरोधौनस्तइत्य

ब्रह्मघ्नानांशिरांस्येतेमुद्गरैर्वज्रसंनिभैः॥ आताडयंतिबलिनस्तप्तलोहंयथाजनाः॥ १०५३ ॥ सुरापानांसुरां तप्तामायसींपथिभूरिशः ॥ बलात्क्षिपंतिवदनेरुदतांदीनवक्त्रणाम् ॥ १०५४ ॥ सुवर्णसंमितंस्वर्णंब्राह्मण स्यापहारिणाम्॥ तिलशःस्वर्णसदृशंदेहंछिंदंतिमार्गगाः ॥ १०५५ ॥ जननीमधिगंतॄणांग्राम्यधर्मेणदुर्धि याम्॥ छित्वाशिश्नंमुखेक्षिप्त्वाश्वासरोधंविधायच॥ १०५६॥ क्रकचांगींतप्ततनुंमानवींतामयोमयीं॥ ना थयंतियथापूर्वंग्राम्यधर्मेणसागता॥ १०५७॥ परदारगतौचैतत्किंचिन्न्यूनमुदीरितं ॥ दुःखंमृतशरीराणां नरकेपापकारिणां॥१०५८॥ यथापुंसोभवेद्दुःखंस्वैरिणोग्राम्यधर्मतः ॥ स्वैरिण्याश्चतथैवस्यान्नरकेदुःखमु त्कटं॥ १०५९॥ नपुंसकंवधूर्वापिपुमान्वापापकृद्यदि॥ पाप्मनःफलमागच्छेत्पुंसांनिर्दिश्यतेपरं॥१०६०॥ पश्वादीनामपीच्छंतिपुण्यापुण्यफलंद्विजाः॥ केचित्कथंभवेन्नैतत्स्त्रीणांधर्माधिकारतः ॥ १०६१ ॥

र्थः ॥ १०५८ ॥ यथापुरुषस्यदुःखमुक्तंतादृशंव्यभिचारिण्याःस्त्रियोपिबोद्ध्यमित्याह यथेति ॥ १०५९ ॥ ननुपापफलादेशकेषुयोब्रा ह्मणायावगुरेत्तंशतेनयातयादित्यादिश्रुतिस्मृत्यादिवचनेषुप्रायःपुंल्लिंगेनैवपापिनांनिर्देशात्कथंस्त्रीणांदुःखमितिचेन्नपुंल्लिंगनिर्देशस्योपल क्षणार्थत्वादित्याह नपुंसकमिति परंकेवलंपुंसांसंबंधिनिर्दिश्यतेउपलक्षणायनतुपुंस्त्वंविवक्षितमुद्देश्यविशेषणत्वात्ग्रहंसंमार्ष्टीत्यत्रैकत्व वदितिचतुर्थपादार्थः ॥ १०६० ॥ स्त्रीणांफलसंबंधेकैमुत्यन्यायंदर्शयति पश्वादीनामिति केचिन्मुनयःपशुपक्ष्यादीनामपिधर्माधर्मफ लमिच्छंतिस्वीकुर्वंतिस्त्रीणांतुपत्नीत्वेनयज्ञाधिकारित्वेनप्रसिद्धानामेतद्धर्माधर्मफलंकथंनभवेदित्यन्वयः ॥ १०६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुपत्नीत्वेनापियज्ञादिधर्मस्यैवसंबंधइत्याशंकांवारयति अपीति किंचवध्वाःस्त्रियाःफलंधर्माधर्मयोरुभयोरपियदिनस्यात्तदाइत्युच्चार्यपाणिग्रहोव्यर्थःस्यात् इतिकिं त्वंममधर्मादौसहायिनीस्याःसहैवप्राप्तिशीलाभवेति यतएषास्त्रीपाप्मनःफलंनगच्छेत् तथाचधर्मग्रहणस्याधर्मस्याप्युपलक्षणत्वात्सहैवेतिनियमोभज्येतेतिभावः ॥ १०६२ ॥ किंचयोयस्यशुभफलस्यसंगीसतस्याऽशुभफलमप्यादत्तेइतिलौकिकन्यायेनापिपतिधर्मफलभोक्त्र्याःस्त्रियाःपापसंबंधोदुर्निवारइत्याह दृष्टइति यथालोकेराजादीनांसंपत्संबंधिनोविपत्तावपिसंबंधिनोदृष्टाइति ॥ १०६३ ॥ अथप्रयोजकादीनांफलंविवेचयति प्रवर्तकइत्यादिना स्पष्टं ॥ १०६४ ॥ यदिकश्चित्केनचित्कुत्रचित्पापेबलात्प्रवर्तितःसन्स्वयमपिरागवांस्तत्रपापेभवतितदाप्रयोज्यप्रयोजकयोःसमंफलंभवतीतिग्राम्यधर्मोदाहरणेनाह उभयोरिति उभयोः

अपिवध्वाःफलाभावेव्यर्थःस्याद्धिकरग्रहः ॥ धर्मेचार्थेचकामेचममत्वंस्याःसहायिनी ॥ इत्युच्चार्ययतोनैषापाप्मनःफलमाव्रजेत् ॥ १०६२ ॥ दृष्टोनकोपिलोकेस्मिन्जंतुर्यःपाप्मनःफलं ॥ हित्वाधर्मफलंगच्छेत्प्रमाणैर्विविधैरपि ॥ १०६३ ॥ प्रवर्तकोत्रयःपापेजंतुर्नारीनरोपिवा ॥ तस्यस्यादधिकंदुःखंप्रवर्त्यस्यतथानतत् ॥ १०६४ ॥ उभयोरागतःसंगेसमंदुःखमुदाहृतं ॥ अज्ञानाच्चबलात्प्रायःकर्तुरेवपरस्यन ॥ १०६५ ॥ नारीवापिनरोवापिग्राम्यधर्मंबलाद्यदि ॥ प्राप्नुयान्नभवेत्पापंदुर्बलस्येच्छयाविना ॥ १०६६ ॥ एवंबलात्कृतेपापेप्रतीकारविवर्जिते ॥ कर्तुःपापफलंनैवकिंतुकारयितुर्भवेत् ॥ १०६७ ॥ मरणेनप्रतीकारोयद्यप्यत्रभवेत्सदा ॥ निरुणद्धियदातच्चपरःकर्तुस्तदानच ॥ १०६८ ॥

स्त्रीपुंसोर्यदित्वन्यतमस्यतत्रप्रवृत्तिरज्ञानादिष्टसाधनत्वज्ञानाभावात्प्रायोबाहुल्येनवर्तमानात्परकीयबलाज्जायेततदाकर्तुर्हेतुसंज्ञकस्यप्रयोजकस्यैवपापंपरस्यप्रयोज्यस्यतुनेत्यर्थः ॥ १०६५ ॥ एतदेवस्पष्टयति नारीतिद्वाभ्यां तत्रप्रथमंस्पष्टं द्वितीयेप्रतीकारविवर्जितत्वविशेषणप्रयोगाभिप्रायस्तुयदिप्रतीकारस्यप्रतिबंधोपायस्यसंभवःस्यात्तदातस्याकरणेकर्तुर्दोषःस्यादेवेति ॥ १०६६ ॥ १०६७ ॥ बलात्पापकरणप्रसक्तौमरणेनापितत्प्रतीकारोविधेयइतिकेषांचिन्मुनीनांमतमाह मरणेनेति अत्रबलात्पापकरणप्रसंगेयदिमरणेनापिप्रतीकारोभवेत्तदामरणमपिसदासर्वावस्थासुसंपाद्यमितिसंबंधः यदाचतन्मरणोपायमपिपरःकश्चिन्निरुणद्धिप्रतिबध्नातितदापिकर्तुर्दोषोनास्तीत्यर्थः ॥ १०६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मरणभिन्नेनैवोपायेनपापप्रतीकारोविधेयआत्महत्यायाःसर्वपापेभ्योऽधिकत्वात् यस्तुपापभयेनात्महत्यांकरोतिसदृश्चिकाद्भीतःसर्पेणद
ष्टइतिन्यायस्यविषयोभवेदित्याशयवतांमुनीनांमतंसिद्धांततयाह अपरइतिषड्भिः केचिन्मुनयोऽपरेपरेभ्यःपूर्वपक्षिभ्योभिन्नाःसिद्धांतवि
दइतियावत् तेएवंमन्यंते एवंकथं सदासर्वास्वप्यवस्थास्वात्ममरणंनसंपाद्यमितिशेषः तत्रहेतुरुत्तरार्द्धेनोक्तः ॥ १०६९ ॥ पापस्येति प्र
त्युतयदापापाकरणेमृत्युनिश्चयस्तत्रतादृशेप्रसंगेकथंचननकर्त्तव्यमपिपापंकर्तव्यमितिसिद्धांतः ॥ १०७० ॥ हेतुमिति एतेसिद्धांतवि
दोद्विजोत्तमाउक्तार्थेहेतुमुपपत्तिरूपमिमंवदंति इमंकं यद्बलेनपापकर्तुर्नकश्चिद्दोषः कारयितुःप्रयोजकस्यैवदोषभाक्त्वात् यदितुतद्ब

अपरेकेचिदिच्छंतिमरणंनात्मनःसदा॥ आत्महत्याधिकंपापंमहापातककोटितः॥ १०६९ ॥ पापस्याकर
णेयत्रमृत्युःस्यादात्मनोध्रुवः ॥ कर्तव्यंपातकंतत्रनकर्तव्यंकथंचन ॥ १०७० ॥ हेतुंचेमंवदंत्येतेबुद्धिमंतोद्वि
जोत्तमाः॥ पापंनबलतःकर्तुःकिंतुकारयितुर्भवेत्॥ मरणेकर्तुरेवस्यान्नत्वसौकारयेदिदं॥ १०७१ ॥ अकर्त
व्यंनकर्तव्यंप्राणैःकंठगतैरपि॥ कर्तव्यमेवकर्तव्यंप्राणैःकंठगतैरपि ॥ १०७२ ॥ इत्यादिवचनंस्वस्यस्वाधीन
करणस्यतत्॥ नैतद्बलकृतौयस्मान्मृतौदोषोत्रविद्यते॥ १०७३॥ असुर्यानामतेलोकाअंधेनतमसावृताः॥
मृत्वातानभिगच्छंतियेकेचात्महनोजनाः॥ १०७४ ॥

येनप्रयोज्यआत्ममरणंसंपादयिष्यतितदाप्रयोज्यस्यैवदोषः हियतःअसौप्रयोजकइदंमरणंनकारयतिमरणेनप्रवर्तयतिकिंतुपापमात्रेप्रव
र्तयतीतियावत् तथाचमरणेस्वांतंत्र्यलक्षणस्यकर्तृत्वस्याक्षतत्वादात्महत्यादोषोभविष्यत्येवेतिभावः ॥ १०७१ ॥ सर्वदापापनिषेधकवा
क्यानांगतिमाह अकर्तव्यमितिद्वाभ्यां अकर्तव्यमित्यादिवचनजातंहितत्पापनिषेधकंसत्स्वाधीनकरणकस्यैवास्यजन्तोःसंबंधि परबले
नपापकरणेत्वेतन्निषेधकंवाक्यंनप्रवर्तते यस्माच्चमरणेऽयंस्वतंत्रस्तस्मान्मृतौहठेनकृतायांदोषोविद्यतेएवेतिद्वयोरर्थः ॥ १०७२ ॥
॥ १०७३ ॥ आत्महत्यानकर्तव्येत्यत्रश्रुतिमप्यनुकूलयति असुर्याइति असुर्याःअसुराणामविवेकिनांयोग्याः आत्महनःआत्मघाति
नः ॥ १०७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइति यद्यस्माद्धेतोः प्रयोजकस्यतथासरागस्यप्रयोज्यस्यतथावारणशक्तौसत्यामपियस्तटस्थउपेक्षकइतिलक्षितोऽनुमंता एतेषांत्रयाणामपिकर्मफलसंबंधोभवतिततःपापंस्वयंनकर्तव्यंपरेणनकारयितव्यंचेत्यन्वयः अत्रप्रयोजकादौरोगाद्यापदांतारतम्यानुसारेणफलस्यवैषम्यंतारतम्यंभवतीतिद्वयोरर्थः ॥ १०७५ ॥ १०७६ ॥ प्रायश्चित्तानुष्ठानेपिविषयरागिणांनक्षेममितिदर्शयति अज्ञानादीति अज्ञानंव्यामोहआदिपदेनविभ्रमोविपत्तिभेदाश्चगृह्यंते एतैरेवनिमित्तैः कृतेपापेप्रायश्चित्तंयदुक्तंश्रुतिस्मृत्यादौतदपिपुनःपापकरणान्निवृत्तस्यैवक्षेमायभवति यस्तुजंतुःपरमन्यत्पापंकुर्वन्करिष्यमाणोवापूर्वपापस्यप्रायश्चित्तंकरोतितस्यजंतोस्तत्प्रायश्चित्तंकुंजरस्नानवद्व

ततःपापंनकर्तव्यंकारणीयंचकर्हिचित् ॥ प्रयोजकःप्रयोज्यश्चतदिच्छासहितोयदि ॥ अनुमंतातटस्थोयःसामर्थ्येसतिमानवः ॥ १०७५ ॥ त्रयाणामपियद्भूयात्पुण्यपापफलंसदा ॥ अत्ररोगादिवैषम्याद्विषमंतत्प्रजायते ॥ १०७६ ॥ अज्ञानादिकृतेपापेप्रायश्चित्तमुदाहृतं ॥ पाप्मनोविनिवृत्तस्यनप्रवृत्तस्यकर्हिचित् ॥ १०७७ ॥ पापंकुर्वन्परंजंतुःप्रायश्चित्तंकरोतिच ॥ प्रायश्चित्तंतदातस्यभवेत्कुंजरशौचवत् ॥ १०७८ ॥ ततोनारीनरोवापिप्रायश्चित्तविवर्जितः ॥ नरकेदुःखमाप्नोतिपापीजंतुःसुदुःसहं ॥ १०७९ ॥ यस्तुसंवत्सरंसंगंमहापापिषुकेनचित् ॥ कुर्यात्सोपितथैवेयाद्दुःखंनरकगामिनः ॥ १०८० ॥ विवादान्प्राणिनोहन्यात्करुणारहितस्तुयः ॥ तंमार्गेतादृशाजीवाबहुशोघ्नंतिनिर्दयं ॥ १०८१ ॥ प्राणरोधैस्तथाशस्त्रघातैर्दंतैश्चनिष्ठुरैः ॥ खुरैश्चनखरैस्तद्वत्पादघातैःसुदारुणैः ॥ लोहैस्तीक्ष्णैस्तथाशृंगैःप्रहारैर्वज्रसन्निभैः ॥ १०८२ ॥

र्थमितिद्वयोरर्थः ॥ १०७७ ॥ १०७८ ॥ फलितमाह ततइति स्पष्टम् ॥ १०७९ ॥ ब्रह्महादिमहापापिनांयेसंवत्सरंसंसर्गिणस्तेपिमहापापिनांगम्यंनरकंयांतीत्याह यस्त्विति ब्रह्महादेर्नरकगामिनोयादृशंदुःखंभवतितथासंसर्ग्यपिप्राप्नुयादित्यर्थः ॥ १०८० ॥ हिंस्रस्यगतिमाह विवादानिति विगतोवादःसिंहव्याघ्रादिवत्प्रतिद्वंद्वितालक्षणोयेभ्यएतादृशान्प्राणिनोयोहंतितंनिर्दयंनरकमार्गेबहवस्तादृशाहतसजातीयाजीवाःप्राणरोधाद्युपायैर्घ्नंतीतिद्वयोःसंबंधः ॥ १०८१ ॥ १०८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मांसभक्षकस्यगतिमाह मांसाशिनइति अत्रमनुष्यलोकेमांसभक्षकस्यनरकजीवतएवमांसानिश्वगृध्रादयोभक्षयंतीति ॥ १०८३ ॥
अधर्मेणकुटुंबपोषणासक्तस्यगतिमाह एवमित्यष्टभिः अल्पमेधसःपरलोकचिंताशून्यबुद्धेःपरद्रव्यापहारादिनाकुटुंबपोषणपरस्यनरकं
गतस्यपश्यस्ततःतस्यसुतादीन्पिशिताशिनोव्याघ्रादयोऽदंतीतिद्वयोःसंबंधः ॥ १०८४ ॥ १०८५ ॥ क्वचिदिति क्वचिन्नरकमार्गदेशे त

मेतंअधर्मेणकुटुंबपोषकं ॥ १०८६ क्वचित्क्वचिदिति तेगृध्रास्तंमूषकव्याप्तदेशादौनभसःक्षिपंति ॥ १०८७ ॥ खादयंतइति क्वचिच्चते

मांसाशिनोत्रमांसानिजीवतोऽदंतिसर्वतः ॥ श्वगृध्रप्रमुखाःसर्वेजंतवःपिशिताशनाः ॥ १०८३ ॥ एवमेव
कुटुंबेनसहितस्याल्पमेधसः ॥ परद्रव्यापहारेणकुटुंबभरणस्यहि ॥ १०८४ ॥ पश्यतस्तस्यखादंतिसुतान्प्रा
णादपिप्रियान् ॥ दारान्बंधुजनांश्चान्यान्जीवतःपिशिताशिनः ॥ १०८५ ॥ क्वचिद्गृध्रास्तमाकाशेवज्रतुंडान
यंतिच ॥ कुटुंबसहितंतद्वद्धन्हावेतंक्षिपंत्यपि ॥ १०८६ ॥ क्वचित्क्वचिच्चमहतिमूषकादिसमाकुले ॥ जलाशये
क्वचिद्भूमौकठिनायांनभस्थलात् ॥ १०८७ ॥ खादयंतःक्वचित्पापंगृहीत्वादशनैर्निजैः ॥ कर्षयंतिमुहुर्दीनंस
मेपिविषमेपिच ॥ १०८८ ॥ क्वचिदग्नौक्वचिद्वायौत्यगाधेपिजलेक्वचित् ॥ मलमूत्रादिसंघेवापरपीडाकरः
पतेत् ॥ १०८९ ॥ आधिभिर्व्याधिभिश्चायंपरिपूर्णकलेवरः ॥ क्षुत्पिपासापरिश्रांतःश्ववत्सर्वैर्निराकृतः
॥ १०९० ॥ तादृशैर्बंधुभिर्वीतएकाकीवाव्रजेत्पुमान् ॥ यमराजपुरस्यैतंमार्गंघोरतमंम्त्तः ॥ १०९१ ॥ क्वचि
न्मार्गेतपत्येषसविताद्वादशात्मकः ॥ ताम्राभिर्धातुभिर्वन्हेर्वन्हिज्वालासमावृते ॥ ननीरंनतरुस्तत्रनाश्रयश्चाश
नंकुतः ॥ १०९२ ॥

गृध्रास्तंपापंखादयंतःसंतोदशनैःकर्षयंतिआकृष्टंकुर्वंति ॥ १०८८ ॥ क्वचिदग्नाविति सपापोगृध्रादिभिर्मुक्तःसन्नग्न्यादिषुपतति ॥ १०८९ ॥
आधिभिरिति अयमधर्मेणकुटुंबपोषकोमानसशारीरपीडाव्याप्तःक्षुधादिव्याकुलश्चश्ववत्सर्वैरनादृतोभवतीति ॥ १०९० ॥ तादृशैरिति
तादृशैर्वर्णितदशापन्नैर्बंधुभिर्विशिष्टएकाकीवायमलोकमार्गंसपापीगच्छतीति ॥ १०९१ ॥ मार्गंवर्णयति क्वचिन्मार्गइतितत्रमार्गेद्वादश
मूर्तिरादित्यस्तपति कीदृशे अधोज्वलतोवन्हेःसंबंधात्ताम्रवर्णैर्धातुभिर्युक्ते वन्हिज्वालाव्याप्तेनीरादिरहितेचेति ॥ १०९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रमार्गेगमनाधिकारिणंनिर्दिशति कर्मणेति कर्मस्थूलशरीरव्यापारः ॥ १०९३ ॥ तत्रमार्गेपापिनोयद्यमदूतैर्नयनंतत्रदृष्टांतमाह यथे तिद्वाभ्यां एषांराजभटानांसराज्ञांराजसहितानांविप्रियंकोपजनकंयत्कर्मकृतंतत्कथयंतः ॥ १०९४ ॥ १०९५ ॥ दार्ष्टांतिकेयोजयति एवमिति किंकरायमस्य पापकृतंपापकारिणम् ॥ १०९६ ॥ यमदूतैःकृतंपापिभर्त्सनवाक्यजातमभिनयति आःपापेत्यादिना आसूइ त्यव्ययंकोपोक्तौ वर्षेखंडे ॥ १०९७ ॥ बांधवास्तुनारकशरीरेपिसुखवर्जंसंतीत्याहुः रेइति ॥ १०९८ ॥ येषांचितयात्वयासुकृतवैमुख्यं

कर्मणामनसावाचाभूतानांतापकृत्पुमान् ॥ मार्गमेतंसमायातिहन्यमानश्चकिंकरैः ॥ १०९३ ॥ यथाराजभ टाश्चोरंबध्वापाशैःसुदारुणैः ॥ प्रहारैर्विविधैस्तद्वन्निघ्नंतोनिर्दयंमुहुः ॥ १०९४ ॥ भर्त्सयंतश्चतत्कर्मकथयंतः पुरामुना ॥ कृतंयद्बहुधामीषांसराज्ञांविप्रियंमुहुः ॥ १०९५ ॥ एवंबध्वादृढैःपाशैर्निघ्नंतोविविधैरपि ॥ प्रहारै र्मुद्गराद्युत्थैर्भर्त्सयंतश्चकिंकराः ॥ नयंतिनरकग्राममार्गेपापकृतंनरम् ॥ १०९६ ॥ आःपापभवताकस्माल्ल ब्ध्वादेहंसुदुर्लभं ॥ मानुषंभारतेवर्षेस्वर्गमोक्षप्रदंसुखात् ॥ नकृतंसुकृतंकिंचित्पातकंचकृतंमुहुः ॥ १०९७ ॥ रेमंदनरकेप्यस्मिन्भविष्यंतितवाधुना ॥ दाराःसुतास्तथाचान्येबांधवाःसुखवर्जिताः ॥ नभविष्यतिकिंत्वेवं सुखंयद्धित्वमिच्छसि ॥ १०९८ ॥ दारादीनांकृतेपापभवतापातकंकृतं ॥ परित्यज्यगताःसर्वेश्मशानेत्वांतईदृ शं ॥ १०९९ ॥ कृतंचेत्सुकृतंपूर्वंभवतातत्त्वयासह ॥ समागच्छेद्यथापापमागतंदुःखदंत्विदं ॥ ११०० ॥ व्या घ्रादिवविभीतानिभूतानिभवतोधम ॥ सर्वदाबलतस्तेषांद्रव्यादेरपहारकात् ॥ ११०१ ॥ यद्यदस्यसमीचीनं गोधनंस्त्रीधनादिकं ॥ तत्तत्तस्यहृतंपूर्वंत्वयादुष्कृतकारिणा ॥ अतोनेत्रेचहृदयंगृध्रास्तेपाटयंत्यमी ॥ ११०२ ॥

पापैर्न्मुख्यंचकृतंतेबांधवास्त्वांश्मशानेत्यक्त्वागताइत्याहुः दारादीनामिति ॥ १०९९ ॥ कृतमिति यदित्वयासुकृतंकृतमभविष्यत्तदा तत्त्वयासहागमिष्यत् यथादुष्कृतमागतमिति ॥ ११०० ॥ व्याघ्रादिवेति तेषांप्राणिनांद्रव्याद्यपहारकाद्भवतःसकाशात्प्राणिनोव्याघ्रादि वविभीताभयंप्राप्ताः ॥ ११०१ ॥ यद्यदिति अतःसमीचीनपरद्रव्यापहारदोषात् ॥ ११०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्येनेति यश्चवाक्यादिनापरेषांसंतापःकृतःसएवत्वांप्राप्तः ॥ ११०३॥ धिगिति विनश्यतिपततति ॥ ११०४ ॥ पापिनउद्वेगायत्वयापि
तृलोकप्रापकःपितृयाणाख्यःपंथाअपिनवशीकृतइतिवक्तुंपितृयाणमभिनयति मानुषादितित्रिभिः अत्रधूमादिशब्दास्तदभिमान्यातिवा
हिकदेवतापराःयेषण्मासादक्षिणायनसंज्ञास्तान्कृष्णपक्षाद्गच्छतीति॥ ११०५॥ततइति ततोदक्षिणायनसंज्ञमासेभ्यः॥ ११०६॥आकाशा
दिति अत्रचंद्रमंडलेसकर्मीदेवाधीनोभोगान्भुंक्तेइत्यर्थः ॥ ११०७॥ वर्णितवक्ष्यमाणयोःप्रकृतोपयोगउच्यते यज्ञेति हेपापयथायज्ञादि
कर्त्तारोवर्णितमार्गेणपितृलोकंयांतितथात्वंयज्ञादिकर्त्तासन्नगतःएवंशारीरकर्मणापिसाध्यंस्वर्गंगंतुमनर्हैस्त्वयिमानसकर्मरूपोपासनासा
ध्यब्रह्मलोकगतिप्रतिकाआशासंभावनेत्यर्थः ॥ ११०८ ॥ ब्रह्मलोकगमनाधिकारिणोदर्शयति मानुषमिति येमानुषंवपुःप्राप्यमहा

वाक्येननिष्ठुरेणैषांकर्मणाचवधादिना॥ यःकृतोदुःसहस्तापःसोयंतेसमुपस्थितः॥ ११०३॥ धिक्त्वांयोभार
तेजातोनरकेपुनरागतः ॥ पुण्यहीनोयथालोकेप्राप्यराज्यंविनश्यति ॥ ११०४ ॥ मानुषाद्वपुषोधूमंधूमाद्रा
त्रिंततोपिच॥ कृष्णपक्षंततोमासान्षड्येस्युर्दक्षिणायनं॥ ११०५॥ ततोरम्यतरंलोकंपितॄणांप्रतिपद्यते॥ पि
तृलोकादयंगच्छेदंतरिक्षंसदोज्ज्वलं॥ ११०६॥ आकाशाच्चंद्रमभ्येतिसुधामंडलमत्रसः॥ सुखीभोगानवा
प्नोतिदेवैर्दत्तान्मनोरमान्॥ ११०७॥ यज्ञदानादिपुण्यस्यकर्तानत्वंतथागतः॥ कुतस्त्वयिभवेदाशाब्रह्मलो
कगतिंप्रति ॥ ११०८॥ मानुषंवपुरास्थायमहात्मानोजितेंद्रियाः॥ अष्टांगयोगसंपन्नानानोपासनवेदिनः
॥ ११०९॥ उपासनेनकेनापिसमुपास्यमहेश्वरं॥ पंचाग्निविद्ययावैतेब्रह्मलोकंव्रजंतिहि॥ १११०॥दशम
द्वारतोयेयंबहिर्नाडीविनिर्गता॥ तयागत्वार्चिषंयांतितस्माद्यांतिहिवासरम्॥ ११११॥

त्मानःक्षुद्रसुखेभ्योविरक्ताअतएवजितेंद्रियायमनियमादियोगांगसंपन्नाश्चनानोपासनानिशास्त्रतोविज्ञायतेष्वन्यतमेनपर्यंकविद्यादिसं
ज्ञेनपरमेश्वरमहंग्रहेणोपासंतेपंचाग्निविद्यांवानुतिष्ठंतितेब्रह्मलोकंव्रजंतीतिद्वयोरर्थः ॥ ११०९ ॥ १११० ॥ अथब्रह्मलोकमार्गस्यदे
वयानाख्यस्यरूपंतथाब्रह्मलोकस्वरूपंचछान्दोग्यबृहदारण्यकवाक्योपसंहारपूर्वकंकौषीतकिप्रथमाध्यायानुसारेणाह दशमेति पंच
विंशतिश्लोकैः येयंनाडीशतंचैकेत्यादिश्रुतिप्रसिद्धासुषुम्नाख्यादशमद्वारेणशरीराद्बहिर्गतातयामार्गभूतयायेप्रथममर्चिषमर्चिरभिमानि
नींदेवतांततोदिनाभिमानिनींदेवतांयांतीत्यर्थः एवमग्रेपि ॥ ११११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुक्लमिति दिनात्शुक्लपक्षंशुक्लपक्षान्मासषट्करूपमुत्तरायणमुत्तरायणात्संवत्सरंव्रजंतीति ॥ १११२॥ देवेति संवत्सराद्देवलोकंदेवलोका द्वायुंव्रजंति कीदृशंवायुं आगतायउपासकायस्वस्मिन्रथचक्रच्छिद्रसमच्छिद्रदायिनं वायोःसकाशादादित्यंयांति कीदृशमादित्यं आ गतायउपासकायडंबराख्यवाद्यविशेषमध्यच्छिद्रसमच्छिद्रदायिनमित्यर्थः पटहाडंबरौसमावित्यमरः ॥ १११३॥ आदित्यादिति आदि त्याच्चंद्रंदुंदुभिसंज्ञवाद्यविशेषमध्यच्छिद्रसमच्छिद्रदायिनंप्राप्नुवंतिततो विद्युल्लोकंयांतितत्र विद्युल्लोकेऽमानवोमनुस्रष्टावनुत्पन्नःपुरुषविशे षआगत्यउपासकंब्रह्मलोकंप्रतिनयति कीदृशंब्रह्मलोकं वरुणलोकादिंद्रलोकात्प्रजापतिर्विराट्तल्लोकाच्चपरतःस्थितं पुनःनकीदृशं कामक्रोधादिभिर्ब्रह्मलोकप्राप्तिप्रतिबन्धकैर्विरचितत्वादारसंज्ञकेनन्हदेनआदिपदयाज्ञविजरानद्यादिभिश्चप्रवेशदेशेयुक्तमितिद्वयोरर्थः

शुक्लपक्षंव्रजंत्यन्हस्तस्मादप्युत्तरायणम् ॥ उत्तरायणषण्मासाद्ययुःसंवत्सरंत्विमे ॥ १११२ ॥ देवलोकंप्रयां त्यब्दाद्देवलोकात्प्रभंजनं ॥ रथचक्रसमच्छिद्रंवायोरादित्यमीश्वरम् ॥ व्रजेयुश्छिद्रसहितंडंबरस्येवमध्यतः ॥ १११३ ॥ आदित्याच्चंद्रमायांतिदुंदुभिच्छिद्रदायिनं ॥ चंद्राद्विद्युतमायांतिततोऽमानवएत्यतान् ॥ १११४ ॥ वरुणेंद्रप्रजानाथलोकानांपरतःस्थितं ॥ ब्रह्मलोकंनयेद्यत्रतिष्ठत्यारन्हदादिकं ॥ १११५ ॥ ब्रह्मणाप्रहिताय त्र्यायांत्यप्सरसःसदा ॥ दिव्याःपंचशतंपूर्णनानोपायनपाणयः ॥ १११६ ॥ शतंसुगंधपुष्पाणांमालाहस्तं समाव्रजेत् ॥ सुगंधीनिचदिव्यानिगृहीत्वाशतमाव्रजेत् ॥ १११७ ॥ फलानिचास्यदिव्यानिगृहीत्वाशतमाव्र जेत् ॥ चूर्णानिचविचित्राणिसुगंधीनिसमंततः ॥ १११८ ॥ गृहीत्वाशतमायातिवासोहस्तंशतंपरं ॥ नानालं कारहस्तंचव्रजेत्पंचमकंशतम् ॥ १११९ ॥

॥ १११४ ॥ १११५ ॥ ब्रह्मणेति यत्रआरसंज्ञकन्हदापरपारे वर्तमानमुपासकंब्रह्मणोयोग्येनालंकारेणालंकर्तुंब्रह्मणाप्रहिताःप्रेषिताःपंचशतसंख्याकाअप्सरसआयांति नानाविधान्युपायनानिपा णिषुयासांतास्तथा ॥ १११६ ॥ तासांशतपंचकस्यउपायनभेदेनविभागमाह शतमितित्रिभिः तासांमध्येशतमप्सरसःसुगंधिपुष्पनिर्मि तमालाहस्ताःसमायांति द्वितीयमप्सरसांशतंसुगंधीनिकर्पूरादिवासिततैलादीनिशरीरांजनोपयोगीनिकरेषुगृहीत्वायातीत्यर्थः॥ १११७॥ फलानिचेति अथतृतीयमप्सरसांशतंदिव्यफलहस्तमागच्छति चतुर्थंशतमंगमर्दनोपयोगिनानासुगंधिचूर्णहस्तमागच्छति पंचमंशतंवा सोभिर्वसनैर्युक्तहस्तमागच्छति एतत्पंचमंशतंनानालंकारहस्तंचबोध्यमितिद्वयोरर्थः ॥ १११८ ॥ १११९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मेति यथाताभिरप्सरोरूपाभिः परिचारिकाभिर्ब्रह्मा हिरण्यगर्भः प्रतिदिनं भूष्यतेतथाऽमुमुपासकमपिब्रह्माज्ञयाभूषयंतीत्यर्थः ॥ ११२० ॥
अलंकृतइति सब्रह्मलोकंप्रतिआगंताउपासकस्ताभिरलंकृतःसन्क्षणेनआरंनामन्हृदंमनसैवातीत्यतीर्त्वापरपारेस्थितान्मुहूर्तान्त्रिंशन्मु
हूर्तान्प्रतियाति कीदृशान्मुहूर्त्तान् येष्टिहसंज्ञकान् अमुन्मुहूर्तरूपेणसर्वेषांसन्निहितानित्यर्थः येष्टिहनामनिर्वचनंतुयांतिब्रह्मलोकंप्रतीति
याःउपासकास्तेषामिष्टिमुपासनांनानासंकल्पोत्पादनेनघ्नंतीतितितथेति तमुपासकंविद्याबलेनागतंदृष्ट्वातस्यदर्शनगोचरदेशात्सर्वेमुहूर्त्ताः
पलायंतइत्यर्थः ॥ ११२१ ॥ पापानीति ततोविजरानदीतीरंगतस्योपासकस्यपापादीनितंपरित्यज्यविलीयमाना।निद्वेषिप्रभृतिषुस्व

ब्रह्मायथाब्रह्मलोकेदेवोलंक्रियतेसदा॥ अलंकुर्वंत्यमुंतद्वत्तत्रतास्तुसमागताः॥ ११२० ॥ अलंकृतस्ततस्ता
भिरागंताऽऽरंक्षणेनहि ॥ मनसाभ्येत्यनिर्यातिमुहूर्तान्येष्टिहानमून् ॥ तंदृष्ट्वादर्शनेसर्वेविद्रुताःस्युर्दिशोदश
॥ ११२१ ॥ पापानिद्वेषिणांदत्वासुहृदांसुकृतानिच ॥ पुत्राणांचधनान्येषजरामरणवर्जितः ॥ मनसाविज
रांनामनदीमभ्येतितत्क्षणात्॥ ११२२ ॥ इल्यवृक्षंगतंब्रह्मगंधस्तंप्रविशेदिह ॥ ततःशालज्यसंस्थानेरसोपि
ब्रह्मणोविशेत्॥ ११२३ ॥ अथायतनमायातिब्रह्मणःसोपराजितम् ॥ ब्रह्मतेजोविशेदेनंतत्रयेनामुनासमः
॥ ११२४ ॥ इंद्रप्रजापतीदेवौद्वारगोपाववस्थितौ॥दत्वामार्गमिमौतस्माआसातेभीतवत्स्वयम्॥ ११२५॥

सजातीयोत्पत्तिंकुर्वंतीत्यर्थः तथासत्येषउपासकोजरामरणवर्जितःसन्विजरांनामनदींमनसैवतरतीत्यर्थः ॥ ११२२ ॥ इल्येति ततइल्यं
इलापृथिवीतन्मयत्वेनइल्यसंज्ञंवृक्षंप्राप्नोतितत्रप्राप्तमुपासकंब्रह्मणोयोग्योदिव्यगंधःप्राप्नोतिततःशालज्यसंज्ञकंसंस्थानंनगरंप्राप्नोतितत्रग
तंब्रह्मयोग्योदिव्योरसस्तंप्राप्नोति शालज्यनामनिर्वचनंतुशालवृक्षवत्तथाधनुर्ज्यावच्चसरलत्वेनमनोरमावापीकूपादिरचनायत्रतत्तथेति
॥ ११२३ ॥ अथेति ततोऽपराजितंनामब्रह्मणआयतनंमंदिरंप्राप्नोतितत्रगतमुपासकंब्रह्मणस्तेजःप्रविशेत्येनतेजोलाभेनहेतुनाअमुना
ब्रह्मणासमोभवतीत्यर्थः ॥ ११२४ ॥ इंद्रेति तस्यब्रह्मगृहस्यद्वारपालतयाऽवस्थिताविंद्रप्रजापतीतस्मैउपासकायमार्गंदत्वाभीतवत्तिष्ठतः
॥ ११२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभुप्रमितमिति सउपासकोविभुप्रमितेतिसंज्ञकंब्रह्मणःसंभामंडपंयातितत्रगतंतंब्रह्मसंबंधियशःप्राप्नोति तेनयशोलाभेनब्रह्मणासमोय शस्वीभवति नामनिर्वचनंतुविभुनाब्रह्मणैवस्वयंविमितंनिर्मितमितिभाष्यकृतोक्तं वृत्तिकृतातुविभुरहंकारस्तेनविमितंतन्मयमितियावदि त्युक्तम् ॥ ११२६ ॥ प्रज्ञेति सउपासकःपरमेष्ठिनोवेदिकांसभामध्यगतंयत्पर्यंकस्थानभूतंकाष्ठादिनिर्मितंपादयुक्तमुन्नतमासनंतद्रूपामा संदीपदोक्तांबुद्धितत्त्वमयींप्राप्नोतितांवेदिकांप्राप्यबुद्धिवृद्धिंप्राप्नोतिततस्तत्रस्थितंब्रह्मणःपर्यंकंप्राप्नोतीत्यर्थः तस्यावेदिकायाःस्वरूपवि न्यासस्तुबृहत्सामतथारथंतराख्यंसामएतेपूर्वगतपादद्वयभावंप्राप्तेस्तः श्यैतसंज्ञंनौधससंज्ञंचएतेसामनीपश्चिमपादभावंप्राप्ते तस्यावेदिका याउपरिचत्वारःकोणाः तत्रदक्षिणःकोणोवैरूपाख्यसामरूपः उत्तरःकोणोवैराजाख्यसामरूपः पूर्वःकोणःशाक्कराख्यसामरूपः पश्चिम स्तुरैवताख्यसामरूपइतिश्रुत्युक्तोबोध्यः॥११२७॥ पर्यंकंवर्णयति आसंदीतिचतुर्भिः कीदृशंपर्यंकं वर्णितायाआसंद्याउपरिस्थितंचित्र

विभुप्रमितमायातिब्रह्मणःससभास्थलं ॥ विशत्यमुंब्रह्मयशोयशस्वीतत्रतेनसः॥ ११२६॥ प्रज्ञाभिधांस आसंदींवेदिकांपरमेष्ठिनः॥ प्राप्यप्रज्ञासमायुक्तोव्रजेत्पर्यंकमीशितुः॥ ११२७॥ आसंदीसंस्थितंचित्रंप्रा णाख्यममितौजसं॥ ११२८॥ पूर्वौपादौजगत्सर्वंकालत्रयवशीकृतं॥ इराश्रीश्चपरौपादौपर्यंकस्यमहात्मनः बृहद्रथंतरेज्ञेयेखट्वांगेवामदक्षिणे॥ मूर्धपादस्थितेभद्रयज्ञायज्ञीयसंज्ञिते॥ ११२९॥ ऋचश्चसामसहिताः पूर्वपश्चिमसंस्थिताः॥ पट्टिकाश्चयजूंष्येतावामदक्षिणसंस्थिताः॥ ११३०॥

मद्भुतंप्राणरूपममितौजससंज्ञंचेति तस्यपर्यंकस्यपूर्वौशिरोभागाधाररूपौपादौअतीतानागतंतदुपलक्षितंवर्त्तमानंचयज्जगत्तद्रूपौ इरा पृथिवीश्रीर्लक्ष्मीश्चएतदुभयरूपौपश्चिमौचरणभागाधारभागगतौपादौबोध्यावित्यर्थः॥ ११२८॥ बृहदिति तस्यपर्यंकस्यबृहत्सामदक्षि णदीर्घपट्टिकारूपंखट्वांगंरथंतरंतुउत्तरदीर्घपट्टिकारूपंभद्रसंज्ञकंसामपूर्वपादयोर्मध्यगतायालघुपट्टिकातद्रूपंयज्ञायज्ञीयसंज्ञंसामतुपाद भागाधारयोःपश्चिमपादयोर्मध्यगतपट्टिकारूपमित्यर्थः॥११२९॥ ऋचश्चेति पर्यंकपूर्वपश्चिमायतादक्षिणोत्तरायताश्चसूत्रमय्यःपट्टि काःप्रसिद्धाःतथात्रगीत्यात्मकसामसहिताऋचश्छंदोबद्धमंत्ररूपाःपूर्वपश्चिमायतसूत्रपट्टिकाभूताबोध्याः यजूंषिसंश्लिष्टपठितमंत्ररूपा णिदक्षिणोत्तरायतसूत्रपट्टिकाभूतानिबोध्यानीत्यर्थः॥ ११३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमांशवइति तस्यपर्यंकस्योपरियन्मृदुकोमलमुपस्तरणंतूलकादिरूपंतच्चंद्रकिरणात्मकंबोध्यं यच्चास्तरणोपरिश्वेतंवस्त्रंनिबध्नंतितदत्रो द्गीथरूपंबोध्यं उद्गीथोनामसाम्नोभागविशेषः तत्रपर्यंकेउपबर्हणंलक्ष्मीरूपं उपबर्हणपदार्थमाह उच्छीर्षकमिति उदूर्ध्वंन्यस्यतेशीर्षेशि रोयत्रतत्तथा पूर्वंपादत्वेनवर्णितालक्ष्मीलौकिकीइयंवैदिकीतिभेदोबोध्यः ॥ ११३१ ॥ आस्तइति तस्मिन्वर्णितेपर्यंकेहिरण्यगर्भस्तिष्ठ तियस्यानंदादुत्कृष्टआनंदोलोकेनास्तीत्युक्तमितिशेषः ॥ ११३२ ॥ अश्वत्थइति सोमस्यामृतस्यस्रावकत्वात्सोमसवननामकोश्वत्थवृक्ष स्तस्यहिरण्यगर्भस्यनित्यंप्रियःप्रीतिजनकस्तिष्ठति तथाएकोऽर्णवःअरसंज्ञकोद्वितीयोण्यसंज्ञकःएतौद्वौद्वंद्वंसहभूतौअमृतपूर्णौब्रह्मणःप्री

सोमांशवस्तुविज्ञेयामृदूपस्तरणंमहत् ॥ क्षीरगौरंतथावस्त्रमुद्गीथस्तस्यचोपरि ॥ उपबर्हणमाख्यातंश्रीरस्यो च्छीर्षकंमहत् ॥ ११३१ ॥ आस्तेतस्मिन्ब्रह्मनामापूर्वजोजगदीश्वरः ॥ हिरण्यगर्भोयस्मात्स्यादानंदःपरमोनहि ॥ ११३२ ॥ अश्वत्थःसोमसवनोयस्यनित्यप्रियोमतः ॥ अरण्यावर्णवौद्वंद्वंब्रह्मलोकेनिवासिनौ ॥ ११३३ ॥ मनसोजननीयेयमविद्यासर्वकारणम् ॥ यस्यप्रियाहिदेवीसाब्रह्मणःसूत्ररूपिणः ॥ ११३४ ॥ चक्षुषःप्रकृ तिर्येयंतेजोरूपाव्यवस्थिता ॥ तेजोमयीमहेशस्यच्छायायस्यमहात्मनः ॥ ११३५ ॥ अंबाःशब्दालिजननी श्रुतयस्तद्गताधियः ॥ वसंत्यप्सरसोयस्यपरितोत्रसुखप्रदाः ॥ ११३६ ॥

त्यैतिष्ठतइत्यर्थः ॥ ११३३ ॥ मनसइति मनसोमातायेयमविद्यारूपाजगत्कारणभूताप्रसिद्धासादेवस्यहिरण्यगर्भस्यप्रियामुख्याभार्ये ति ॥ ११३४ ॥ चक्षुषइति तथायेयंचक्षुरिंद्रियस्यप्रकृतिरुपादानभूतातेजसःसात्विकांशात्मिकासाहिरण्यगर्भस्यप्रभोश्छायाप्रतिबिं बरूपेत्यर्थः ॥ ११३५ ॥ अंबाइति वाचकशब्दानुसंधानपूर्विकाजगत्सृष्टिःप्रसिद्धासभूरित्युक्त्वाभुवमसृजत्वेदशब्देभ्यएवादौनिर्ममेसम हेश्वरइतिश्रुतिस्मृत्यादौ तथाचशब्दालिर्वाचकशब्दपंक्तिस्तद्रूपेणजगतोजननीभूतायाःश्रुतयोवेदवाक्यानितांबापदेनात्रोक्ताःयाश्वत द्गताःताभिःश्रुतिभिर्लब्धाधियःशाब्दबोधरूपास्ताअंबायवीयाशब्देनोक्ताः अंबाभ्योयवमात्रमपिनाधिकाइत्यर्थकत्वात् ताएताःश्रुतय स्तज्जन्यबुद्धयश्वब्रह्मलोकेअप्सरोरूपेणवसंतीत्यर्थः ॥ ११३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्येति यस्य हिरण्यगर्भस्य प्रभोर्देशेन ह्यएताःश्रुतिषुप्रसिद्धाउपासनारूपाःश्रुतौअंबपाशब्देनअंबंनेत्रसमंब्रह्मज्ञानंपांतिरक्षंतीतिव्युत्प त्तिकेनोक्ताःसगुणंनिर्गुणंवाब्रह्मज्ञानंजलवद्धारयंत्योवहंति धारावाहित्वंहिनदीनामुपासनानांचसममित्यर्थः तथाजगंतिनानाविधानि लोकसंस्थानानिविकाशित्वधर्मेणपुष्पाणियस्यप्रभोर्भोग्यतयासंति तथासूक्ष्मसमष्ट्यात्मनोहिरण्यगर्भशरीरस्याच्छादकत्वात्तानिजगंति वाससीचदुकूलशाटिकात्मकवस्त्रद्वयात्मकानीत्यर्थः ॥११३७॥ एवमिति एवंरूपंवर्णितेनदेवयानाध्वनाआरन्ह्रदादिभिश्चविशिष्टतयाध्ये यंब्रह्माणमुपास्यपर्यंकविद्याख्यध्यानगोचरंकृत्वासउपासकस्तस्यब्रह्मणआसनेपुत्रवत्पालितःपतनस्थानाद्रक्षितोनिःशंकश्चसमारोहती त्यर्थः ॥ ११३८ ॥ संवाद्येति तत्रचतंब्रह्मापृच्छतीत्यादिशास्त्रेश्रुतियंथेदृष्टंप्रसिद्धंयद्वर्त्मप्रकारस्तेनकृत्वाब्रह्मणापित्रासहसंवाद्यसंवादं कस्त्वमसिकानिचतवोपकरणानीतिचेत्यस्त्वमसिसएवाहमस्मियानिचतवोपकरणानितान्येवममएवंविधंकृत्वातेनब्रह्मणानुज्ञातःसंस्त

यस्यराष्ट्रेवहंत्येतानघःसर्वसुखप्रदाः॥ ब्रह्मज्ञानाभिधंनीरंगृहीत्वासर्वतोदिशम् ॥ जगंतियस्यपुष्पाणिवास सीचमहात्मनः॥ १८३७॥ एवंरूपमुपास्यैनंब्रह्माणंतस्यचासने ॥ सुतवत्पालितःसोपिसमारोहत्यशंकितः ॥ ११३८॥ संवाद्यब्रह्मणापित्राशास्त्रदृष्टेनवर्त्मना ॥ अनुज्ञातोवसेत्तेनतत्रतद्वत्सुखंनरः ॥ ११३९ ॥ चक्षु र्वाक्श्रोत्रमनसांवायोश्चापिसमंततः ॥ प्राणापानौतथाव्यानसमानौचापरौस्मृतौ ॥ उदानश्चेतिविज्ञेया आश्रयाःपंचसूरिभिः॥ ११४० ॥ प्राच्यांप्रतीच्यांचतथादक्षिणोत्तरयोरपि ॥ऊर्ध्वंवाहृदिपद्मेस्मिन्पंचच्छि द्राणितेस्मृताः॥ ११४१ ॥

त्तुल्यभोगभागीब्रह्मलोकस्थितिपर्यंतंब्रह्मलोकेवसतिततोमुच्यतेचेत्यर्थः ॥ ११३९ ॥ एवंपर्यंकविद्यादर्शिताअथान्यासामपिशांडि ल्यविद्यादिसंज्ञानामहंग्रहोपास्तीनांब्रह्मलोकप्रापिकानामुपलक्षणायतासांसर्वासामंगभूतंहृदयकमलध्यानंछांदोग्यतृतीयेप्रसिद्धमभि नयति चक्षुरिति चक्षुरिंद्रियस्याधिदैवरूपादित्यसंबद्धस्याध्यात्मंप्राणआश्रयस्तस्यप्राणस्यापिहृदयकमलपूर्वदिग्गतंछिद्रमाश्रयःएव मग्निदैवतसंबद्धवागिंद्रियस्यापानमाश्रयस्तस्यापिहृदयकमलदक्षिणच्छिद्रमाश्रयः तथापर्जन्यदैवतकमनसःसमानआश्रयस्तस्यापिहृ दयकमलोदक्छिद्रमाश्रयः तथावायोराकाशसंबद्धस्यउदानआश्रयस्तस्यापिहृदयकमलोर्ध्वच्छिद्रमाश्रयइतिद्वयोस्तात्पर्यं तेप्राणा दयःप्राच्यादिवर्तिच्छिद्रात्मकाइतितुआश्रिताश्रययोरभेदविवक्षयोक्तमितिबोध्यम् ॥ ११४० ॥ ११४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हृदयवर्णनस्यप्रकृतोपयोगंदर्शयति पंचच्छिद्रइति वर्णितपंचच्छिद्रवतिहृदयेत्वयासत्यकामादिगुणैःसगुणमपिब्रह्मनचिंतितंशांडिल्य विद्यादिविधिनानध्यातंनिर्गुणंब्रह्मतुत्वादृशचित्ताद्दूरतरंस्थितंयस्यनिर्गुणब्रह्मणोज्ञानादेनमधिकारिणंप्रतिनिखिलंसंसारदुःखंनागच्छति कीदृशंसंसारदुःखरूपंफलं स्थूलसूक्ष्मकारणशरीरैर्वृक्षांकुरबीजस्थानीयैःप्रयुक्तमितिद्वयोःसंबंधः ॥ ११४२ ॥ ११४३ ॥ अहंग्रहोपा स्तयोहिप्रत्यग्दृष्टिसाध्यत्वाद्दुष्कराअतएवतासांक्रममुक्तिःफलं पंचाग्निविद्यातुप्रत्यग्दृष्टिहीनत्वेनसुकराऽतएवसपुनरावृत्तिब्रह्मलोकप्राप्ति फलका भवतातुसापिनकृतेतिबोधयंतोवाजसनेयिशाखानुरोधेनपंचाग्निविद्यामभिनयंति भवतेतिषड्भिः हेजंतोभवताद्यौश्चस्वर्गःपर्ज न्योमेघोधरामनुष्यलोकोरेतःसिक्पुरुषोयोषित्स्त्रीचएतद्रूपंवन्हिपंचकंनकृतंनध्यातं कीदृशंवन्हिपंचकं सुकृतंअचिंत्यंयद्ब्रह्मलोकप्रा पकंपुण्यंतज्जनकमितियावत् पुनःकीदृशं अग्निहोत्रादिकंअग्निहोत्रमादिरधिकारसंपादकंयस्यतत्तथा नह्यग्निहोत्ररहितैःपंचाग्निविद्या

पंचच्छिद्रेहृदंभोजेभवताचिंतितंनहि ॥ ब्रह्मैतद्गुणसंयुक्तंनिर्गुणंदूरतःस्थितं ॥ ११४२ ॥ यस्यविज्ञानतो नैनंदुःखमण्वपिगच्छति ॥ शरीरद्वयसंजातमविद्याबीजमद्भुतं ॥ ११४३ ॥ भवतासुकृतंपूर्वंनाग्निहोत्रादि कंकृतं ॥ द्युपर्जन्यधरारेतःसिग्योषिद्वन्हिपंचकम् ॥ ११४४ ॥ आदित्यवत्सरौतद्वत्पृथिवीव्यात्तसंयुतः ॥ उप स्थइतियस्यैतत्समित्पंचकमीरितम् ॥ ११४५ ॥

नुष्ठातुंशक्यते आहिताग्नेःषष्ठाग्नित्वेनध्यानस्यवाजसनेयिशाखाविहितस्यलोपप्रसंगादितिभावः ॥ ११४४ ॥ स्वर्गादीनांयदग्नित्वे नध्यानंतत्परिपोषकाणामग्न्युपकरणानांकल्पनांप्रपंचयंस्तत्रसमिद्रूपेणध्येयान्पदार्थान्निर्दिशति आदित्येति सम्यगिंधयतिदीपयत्यग्नि मितिसमिद्यथाप्रसिद्धाग्नेस्तथास्वर्गरूपाग्नेरादित्यःसमित्सत्कर्मणांप्रवर्तकत्वात् एवंपर्जन्याग्नेःसंवत्सरःसमित्संवत्सरेणहिजलेसंचितेपर्ज न्योवर्षाकालेवृष्टिसमर्थोभवति तथामनुष्यलोकाग्निःपृथिव्यासर्वाधारभूतयाशोभतेइतिपृथिवीतस्यसमित् तथापुरुषोव्यात्तेनव्याख्या नादौप्रसारितेनमुखेनशोभतेइतिव्यात्तंमुखंपुरुषाग्नेःसमित् एवंयोषास्तृष्टिसमर्थेनोपस्थेनदीप्यतइतियोनिर्योषाग्नेःसमिदितितथाचयस्य स्वर्गादिरूपाग्निपंचकस्यएतदादित्यादिपंचकंक्रमेणसमित्पंचकमुक्तमित्यर्थः ॥ ११४५ ॥

CC-0. In Public Domain. Digitization by eGangotri

समिदुत्थितत्वरूपसाधर्म्याद्धूमत्वेनध्येयायेपदार्थायेचप्रकाशकत्वादिरूपसाधर्म्याज्ज्वालात्वेनध्येयास्तान्दर्शयति रश्मीति लोमांतःसमाहारद्वंद्वः रश्मयःकिरणाःआदित्यात्मकसमिज्जन्यत्वात्द्युलोकाग्नेर्धूमः अभ्राणिश्वेतमेघाःसंवत्सरजन्यत्वात्पर्जन्याग्नेर्धूमः अग्निःकाष्ठादिरूपपृथिवीजन्यत्वान्मनुष्यलोकाग्नेर्धूमः प्राणाख्यवायुर्मुखजन्यत्वात्पुरुषाग्नेर्धूमः लोमानियोनिजत्वात्योषाग्नेर्धूमइत्यर्थः अहरादिपंचकंयथाक्रममुक्ताग्नीनामर्चिष्ट्वेनज्ञेयं तथाहि समिज्जन्यत्वेसतिप्रकाशकस्यार्चिष्ट्वंप्रसिद्धंतच्चाहर्विद्युतोरादित्यजयोरविवादं निशायास्तमोमय्याःपृथिवीजन्यत्वंतुयत्कृष्णंतदन्नस्येतिशुद्धप्रसिद्धकृष्णवर्णायाःपृथिव्याःशरीरकांतित्वेनबोद्ध्यं रात्रेःप्रकाशकत्वमपिनक्तंचरान्प्रतिप्रसिद्धं एवंजिव्हावक्रंजिव्हायावक्रेमुखेअग्रभागेस्थितंवागिंद्रियंव्यात्तरूपसमिज्जन्यमर्थप्रकाशकंचेतिपुरुषाग्नेरर्चिः उपस्थेंद्रियार्थत्वात्तद्गोलकस्पष्टेःरक्तवर्णसामान्याच्चयोषाग्नेर्योनिरर्चिरित्यर्थः अंगाराणांतथैवचेत्यस्योत्तरेणसंबंधः ॥ ११४६ ॥ अर्चिषउपशम

रश्म्यभ्राग्निप्राणलोमधूमपंचकमीरितम् ॥ अहर्विद्युन्निशाजिह्वावक्रंयोनिश्चपंचमम् ॥ अर्चिषांपंचकंज्ञेयमंगाराणांतथैवच ॥ ११४६ ॥ दिशश्चाशनयश्चंद्रश्चक्षुर्मैथुनकर्मणः ॥ समाप्तेःपूर्वआनंदआरंभादुत्तरश्चयः ॥ ११४७ ॥ विस्फुलिंगाइमेयत्रकथितावेदवादिभिः ॥ अवांतरदिशःसर्वास्तथाऽऽह्लादनयोपराः ॥ ११४८ ॥ नक्षत्राणितथाश्रोत्रमानंदामैथुनोत्थिताः ॥ यस्मिन्नग्नौभवेदेतत्पंचकंविस्फुलिंगकं ॥ ११४९ ॥

कालेप्रकाशमानत्वरूपसाधर्म्यादंगारत्वेनध्येयान्पदार्थानाह दिशश्चेति दिशोहिअहरुपशमेसंध्याकालेनानारूपाःप्रकाशंतेतथाविद्युदुपशमेऽशनयोरात्र्युपशमेचमंदप्रभश्चंद्रोवाग्व्यापारोपशमेचचक्षुरिंद्रियंयोन्युपशमेचमैथुनमध्यकालिकआनंदइत्येतेयथाक्रमंद्युप्रभृत्यग्नीनामंगाराइत्यर्थः ॥ ११४७ ॥ विकीर्णत्वसाधर्म्येणविस्फुलिंगत्वेनध्येयान्पदार्थानाह विस्फुलिंगाइतिद्वाभ्यां यत्रवर्णिताग्निपंचकेक्रमेणइमेअवांतरदिगादिरूपाविस्फुलिंगावन्हिकणाःप्रोक्ताः तथाहि अवांतरदिशःकोणाःस्वर्गाग्नेर्विस्फुलिंगाः ह्लादनयोमेघशब्दाःअपराःपरेभ्यउत्कृष्टेभ्योभिन्नाःपर्जन्याग्नेर्विस्फुलिंगाः नक्षत्राणितारकाःपृथिवीलोकाग्नेर्विस्फुलिंगाः मनुष्यलोकेयागादिकर्तारएवहितारकारूपेणपरिणताइतिभावः श्रोत्रंश्रोत्रेंद्रियवृत्तयस्तत्तच्छब्दग्रहणायविषयदेशंगच्छंत्यःपुरुषाग्नेःकणाः आलिंगनाद्यानंदास्तुयोषाग्नेःकणाइत्यर्थः ॥ ११४८ ॥ ११४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आहुतित्वेनध्येयांस्तथाहोमकर्तृत्वेनध्येयान्पदार्थानाह श्रद्धेति अत्रश्रद्धाशब्देनश्रद्धासाध्यानामग्निहोत्रादिकर्मणांयदपूर्वंपरलोकगामिजीवसंपृक्तंतदुच्यते तथाचस्वर्गाग्नेःश्रद्धाआहुतिः सातत्रगतास्वर्गिशरीरारंभकाम्तमयसोमात्मनापरिणमतेभोगावसानेचतच्छरीरंशोकाग्निनाद्रुतंसन्मेघेषुपततीत्यतःसोमःपर्जन्याग्नेराहुतिः ततोवृष्टिरूपेणपृथिव्यांपततीतिवृष्टिर्मनुष्यलोकाग्नेराहुतिः ततोन्नरूपेणपुरुषंगच्छतीतिपुरुषाग्नेरन्नमाहुतिः ततोरेतोरूपेणयोषांगच्छतीतियोषाग्नेराहुतीरेतइति एतासामाहुतीनांहोतारस्तुदेवायजमानकरणानामधिष्ठातारइंद्रादयोबोध्याइत्यर्थः ॥ ११५० ॥ स्वर्गादवरोहमार्गंस्मारयति आगत्येति एवंतत्रस्वर्गेभोगेनकर्मक्षयेसतिआकाशवायुमेघादि

श्रद्धासोमौतथावृष्टिरन्नंरेतश्चपंचमं ॥ होमद्रव्यंचयत्रैतेदेवाहोतारईरिताः ॥ ११५० ॥ आगत्यस्वर्गतस्तत्रकृतकर्मपरिक्षये ॥ तद्रूपंघनतांप्राप्तंमानुषंप्राप्तवान्भवान् ॥ ११५१ ॥ कललादिक्रमेणैवयद्भूद्भवतःपुरा ॥ गर्भेदुःखंनतस्यायंलेशोपिनरकेस्तिहि ॥ ११५२ ॥ जननीजठरेवासंकःसहेतात्रचेतनः ॥ मलमूत्रादिसंपूर्णेदुर्गंधेकृमिसंवृते ॥ ११५३ ॥ जरायुपटसंवीतोजंतुर्जठरगःसदा ॥ नोच्छ्वासंनचनिःश्वासंकर्तुंशक्नोतिकर्हिचित् ॥ ११५४ ॥ जाठरोजातवेदाःसजनन्याःप्रज्वलन्मुहुः ॥ गात्रेतेकृतवांस्तापंयंतस्यायंनकोपिहि ॥ ११५५ ॥

मार्गेणस्वर्गतआगत्यभवान्मानुषंरूपंप्राप्तवान् कीदृशंमानुषंरूपं यद्वर्णिताहुतीनांस्वरूपंजलप्रधानंतदेवघनीभूतं पंचम्यामाहुतावापःपुरुषवचसोभवंतीतिश्रुतेः आपःक्षीरादिरूपाप्प्रधानाग्निहोत्रादिकर्मापूर्वरूपाःपंचम्यामाहुतौरेतोरूपायांपुरुषपदवाच्याभवंतीतिश्रुत्यर्थः ॥ ११५१ ॥ गर्भदुःखंस्मारयति कललेतिपञ्चदशभिः हेकृपणयद्भवतोदुःखंकललबुद्बुदाद्यवस्थाक्रमेणात्रगर्भेअभूत्तल्लेशसममपिदुःखंनरकेनास्तीति ॥ ११५२ ॥ तदेवस्फुटयति जननीति स्फुटम् ॥ ११५३ ॥ जरायुपटेति स्पष्टम् ॥ ११५४ ॥ जाठरइति जनन्याः जाठरोग्निर्यंतापंतेगात्रेकृतवान्तस्यतापस्यकोपिभागोऽयंनरकतापोनभवतीत्यर्थः ॥ ११५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रमणमिति यच्चगर्भवायुहेतुकंगर्भेनानाविधंभ्रमणदुःखमभूत्तेनतद्दुःखभेदेनएकेनापिसममत्रनरकैतेदुःखंनास्तीत्यर्थः ॥ ११५६॥ निर्गच्छतइति प्रसूतिकालेयत्तवदुःखंतस्यवर्णनेवयंयातनास्वधिकृताअपिनशक्ताः ॥ ११५७ ॥ कट्वम्लेति कट्वादिभेदैःस्वसजातीयरसारंभकैर्मातृभुक्तान्नैर्नितरांदह्यमानदेहःसन्भवान्दशमासान्कथंस्थितोऽभूरिति ॥ ११५८ ॥ कृमिभिरिति हेकृपणक्षुद्रसुखलोभेनबह्वर्थविघातकअग्निशतव्याप्तदेशवत्तापमयेजनन्युदरेकृमिभिर्भक्ष्यमाणःसन्कथंस्थितइति ॥ ११५९ ॥ जननीति हेमंदाधमतवगर्भेप्राप्तांदुर्दशांवक्तुमस्माकंनशक्तिः तद्वर्णनेभयेनखिन्नगात्रत्वादिति ॥ ११६० ॥ तस्यदुःखस्यभयहेतुतामेवस्पष्टयंति नरकेति नरकरूपंग्रामं

भ्रमणंयदभूद्गर्भेतवगर्भप्रभंजनात्॥ समंतेनात्रदुःखंतेनैकेनापिहिविद्यते॥ ११५६॥ निर्गच्छतोयोनियंत्राद्यदासीन्निर्गमेपिच॥ तवदुःखंवयंनास्यवक्तुंशक्ताःकथंचन॥ ११५७॥ कट्वम्ललवणात्युष्णैरसकृन्मातृभोजनैः॥ दंदह्यमानदेहःसन्दशमासान्कथंस्थितः ॥ ११५८ ॥ कृमिभिर्भक्ष्यमाणश्चमहासर्पोपमैर्मुहुः॥ कृपणत्वंकथंगर्भेस्थितोस्यग्निशतोपमे॥ ११५९॥ जननीजठरेमंदयातेभूद्दुर्दशाधम॥ तांवदंतोवयंखिन्नगात्राभयमुपागताः॥ ११६०॥ नरकग्राममासाद्यदुःखंकल्पशतैरपि॥ भवेत्तेनोपमीयेतजननीजठरेस्थितिः॥ ११६१ ॥ नारीणांसुरतंपुंसादुरंतंगर्भधारणात्॥ भवेद्गर्भस्थितस्यापिपरोक्षंतन्नगीयते॥ ११६२॥ अपरंभद्रमित्येवब्रूयान्नूनमितिस्थितिः॥ उपेतंसुरतंतेनकथयंतिमहाधियः॥ ११६३॥

प्राप्यकल्पशतावच्छिन्नंदुःखंयदिकस्यचित्स्यात्तदागर्भदुःखमुपमानंलभेतेत्यर्थः ॥ ११६१ ॥ मातुर्ग्राम्यधर्मप्रसक्तौगर्भस्थस्यसुतरांदुःखंभवतीतिदर्शयंति नारीणामितिचतुर्भिः गर्भधारणादुत्तरकालेयन्नारीणांपुंसासहसुरतंतद्गर्भस्थितबालस्यापिशब्दान्नारीपुंसोश्चदुरंतंदुःखदपरिणामकंभवतिपरंतुतद्दुरंतत्वंपरोक्षत्वाल्लोकेनव्यवह्रियतइत्यर्थः ॥ ११६२ ॥ अपरमिति येमनीषिणोदुरंतत्वंजानंतिते उपेतमितिभावेक्तः तथाचउपगमनंग्राम्यधर्मंदुरन्तंसन्तंसुरतमितियत्कथयंतितत्रहेतुरियंस्थितिः शिष्टाचाररूपैवभवति इयंका अपरंस्वभिन्नंभद्रत्वेनप्राशस्त्यबोधकशब्देनैवब्रूयात्व्यवहरेदिति अचस्वमुखेनस्वापकर्षबोधनमपिशिष्टाचारइत्यपरपदेनसूच्यतेइति ॥ ११६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुरंततामेवविशदयंति अहोइतिद्वाभ्यां रेतःसेकपर्यंतग्राम्यधर्मार्थंनारींगुर्विणींगच्छतःपुंसोद्वयोःस्त्रीबालयोर्हत्यादोषोभवेदित्यर्थः ११६४ गर्भेति तथानार्याःपुरुषसंगमेप्रवृत्तौआत्महत्यागर्भहत्यारूपौदोषौभवतइत्यर्थः॥ ११६५॥ एवंपुनःपुनरनुभूतमपिदुःखंविस्मृत्ययत्त्वया दुष्कृतंकृतंतस्येदंनरकदुःखंफलमित्याहुः अस्मिन्निितिचतुर्भिः हेकृपणस्वान्यघातकरःकर्षयंतःशरीरस्थंभूतग्राममचेतसइतिभगवद्वाक्यो क्तविधयास्वपरपीडाकरस्त्वमस्मिन्संसारचक्रेपतितोदुःसहंदुःखंप्राप्तोपितत्सर्वंविस्मृतः कर्तरिक्तोबाहुलकात् तत्रमानुषदेहेपुनःपापंकृतवा निति ॥ ११६६ ॥ विष्ठेति यच्छरीरंपित्रोर्विष्ठासमंविनश्वरंभूतानांश्वसृगालादीनांपृथिव्यादीनांवास्वंममत्वविषयंचतदात्मत्वेनाश्रित्यय

अहोग्राम्येणधर्मेणनारींपुंसोधिगच्छतः॥ रेतःसिचोभवेद्धत्याद्वयोःस्त्रीबालयोस्तदा॥११६४॥ गर्भधात्र्या स्तथानार्याःसंगमेपुरुषस्यहि ॥ आत्मनश्चभवेद्धत्यागर्भस्यापिनसंशयः ॥ ११६५॥ अस्मिन्संसारचक्रेत्वं स्वान्यघातकरोमुहुः ॥ पतितोदुःखमप्याप्तोदुःसहंदेहधारिभिः ॥ तत्सर्वंविस्मृतस्तत्रकृतवान्पातकंपुनः ॥११६६॥ विष्ठासमंसमाश्रित्यभूतानांस्वंविनश्वरम्॥ निंदितंकृतवान्भूयःकर्मयल्लोकशास्त्रयोः॥ तस्येदंफ लमप्याप्तंकिमर्थमनुतप्यते॥११६७॥ नतेदुःखस्यकर्तारोवयंनायंविभावसुः॥ भूतान्यपितथान्यानिभवा नेवात्रकारणं॥११६८॥ आत्मनःप्रतिकूलंयःपरेषामाचरेत्पुमान्॥ कर्मणामनसावाचातस्यान्नंतद्धियद्भवे त्॥ ११६९ ॥ भवतासर्वजंतूनांसर्वदोपद्रवःकृतः॥ साधूनांसमचित्तानांविशेषेणचदुर्धिया॥११७०॥

त्वंनिंदितंभूयःपुनःकृतवानसितस्येदंनरकदुःखंफलत्वेनप्राप्तं अतोधुनाकृताकृतानुतापोव्यर्थेत्यर्थः ॥ ११६७ ॥ नतेइति वयंदूताःविभा वसुःसूर्यपुत्रःअन्यानिभूतानिगृध्रादीनिचतवदुःखहेतवोनभवंतिकिंतुभवानेवतथेत्यर्थः ॥ ११६८ ॥ आत्मनोदुःखहेतुताप्रयोजकंद र्शयंति आत्मनइति यद्यस्माद्धेतोःआत्मनःप्रतिकूलंयत्तदेवपरस्ययआचरतिशरीरादिभिस्तत्परस्मैदत्तंप्रतिकूलंतस्यप्रतिकूलकर्तुरन्न मन्नवदवश्यभोग्यंभवेदित्यर्थः ॥ ११६९ ॥ यदकृतमनुतापजनकंसत्कर्मजातंतत्प्रदर्शितपूर्वमित्यभिसंधाययत्कृतमनुतापकंमनोवाक्का यैःकृतंदुष्कृतंतत्स्मारयंति भवतेत्यादिना भवताआसुरप्रकृतिकेनसर्वतापकेनसाधवोविशेषेणतापिताइत्यर्थः ॥ ११७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रसाधुतापेप्रवृत्तिप्रयोजिकांसाधुपुरुकृतांदुर्भावनांस्मारयंति अरण्यादीति आदिपदेनैकांतस्थानपरिग्रहः यथापित्तदूषितचक्षुष्कःशंखं पीतवर्णंपश्यतितथाकामदूषितेनभवतानैष्ठिकादिषुसकामतामारोप्यइत्थंदुर्विनीतवाक्यजातमुक्तमित्यर्थः ॥ ११७१ ॥ तद्दुर्विनीतवाक्यजातमभिनयंति अन्नेत्यष्टभिः एतेब्रह्मचर्यादिरूपतपोहीनाअन्नाद्युपभोक्तृत्वादस्मद्वदित्यर्थः ॥११७२॥ रूपेति इतरेंद्रियनिरोधाभाववत्स्वेतेषुकानामोपस्थनिरोधलक्षणब्रह्मचर्यसंभावनेतिद्वयोरर्थः॥११७३॥११७४॥ किंचसकलेंद्रियेजीवतिब्रह्मचर्यंनदृष्टंकुत्रापीत्या

अरण्यादिस्थितान्दृष्ट्वानैष्ठिकान्ब्रह्मचारिणः॥ वनस्थांश्चयतींस्तद्वत्कामुकेनेरितंत्वया॥११७१॥ अन्नपानोपभोगंचेत्कुर्वंत्येतेद्विजोत्तमाः॥ अस्मद्वत्कुतएतेषांब्रह्मचर्यादिकंतपः॥ ११७२॥ रूपगंधरसस्पर्शशब्दांश्चेन्नयनादिभिः॥ गृह्णंतिमनसातद्वत्सुखदुःखेमहाधियः॥११७३॥ कर्मेंद्रियैश्चकर्माणिकुर्वंतियदिकेनते॥ मैथुनंनैवकुर्वंतिविजनेस्मिन्नवस्थिताः॥११७४॥ आहारंचतथानिद्रांतृतीयंचात्रमैथुनं॥ जीवन्जंतुस्त्यजेन्नायमिंद्रियैर्विकलोनचेत्॥ ११७५ ॥ अपिव्यापारशून्यंनकिंचिदस्तींद्रियंभुवि ॥ कथमेषांप्रजननंस्वव्यापारविवर्जितम्॥११७६॥ अपिकामेनबाध्यंतेतृणाहारामृगावने॥जलेमीनोजलाहारःसर्पाश्चपवनाशिनः॥ अन्नादावुद्धिमंतोमीकथंकामविवर्जिताः॥ ११७७॥ युवानःपरचित्तानांहारिणोलोकवंचकाः॥ मार्जारव्रतमास्थायदांभिकानिवसंत्यमी॥ वित्तस्त्रीहारिणोनृणांसाधूनांक्रूरचेतसः॥ ११७८॥ नासाग्रनयना एतेध्यायंतियुवतींसदा॥ तथापरस्यवित्तानित्यर्जितान्यतिदुःखतः॥ ११७९॥ एवंधर्मरताःसर्वेदूषिताभवतानराः॥ साध्व्योनार्यश्चदुर्दांतचेतसापापकारिणा॥ ११८०॥

ह आहारमिति ॥ ११७५॥ अपिचव्यापृतेतरेंद्रियकस्यैकत्रेंद्रियेव्यापाराभावोनसंभाव्यतइत्याह अपीति प्रजननमुपस्थेंद्रियम् ॥ ११७६ ॥ किंचजलमात्राहारादिभिरप्यविजितस्यकामस्यविशिष्टान्नास्वादकेषुकाविजयाशेत्याह अपिकामेनेति ॥ ११७७॥ फलितमाह युवानइति तस्मादित्यादिः ॥ ११७८ ॥ नासाग्रेति एतेषांध्यानमपिपरकीययुवतिविषयकंपरकीयद्रव्यविषयकंचेत्यर्थः ॥ ११७९ ॥ यथानैष्ठिकादयोदूषितास्तथान्येपिधार्मिकाःपुरुषाःपतिव्रताश्चदूषिताइत्याहुः एवमिति ॥ ११८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिव्रतासुप्रयुक्तंदुर्विनीतवाक्यजातमभिनीयते साध्वीमितिषड्भिः कायुवतिःपरपुरुषंनेच्छेत्यतःपित्रादिकमपिरूपिणंदृष्ट्वानारीणांयोनिःस्यंदतइतिद्वयोःसंबंधः ॥ ११८१ ॥११८२ ॥ नूनमिति नूनमितिसंभवे तथाचदृष्टेनिमित्तेपरपुरुषंसानाधिगच्छतीतियद्युच्यतेतत्संभाव्यतइत्यर्थः दृष्टनिमित्तान्येवनिदर्शयति स्वस्येति मानलज्जाभीतिस्थानाभावरूपाणिचत्वारिदृष्टनिमित्तानीत्यर्थः ॥ ११८३ ॥ अधस्तादिति परपुरुषंदृष्ट्वाऽधोविलोकनंसाध्वीलक्षणंतुव्यभिचारि त्रिलोकीवर्तिनानापुरुषध्यानार्थत्वस्यापिसंभवादित्यर्थः ॥ ११८४ ॥

साध्वींनारींविलोक्याहभवान्पापविमोहितः ॥ कावधूःपुरुषंनेच्छेद्युवतीरूपशालिनं ॥ ११८१ ॥ पितरंभ्रातरंवापिसुतंवापिनयान्वितं ॥ नारीणांस्यंदतेयोनिर्दृष्ट्वारूपान्वितंनरम् ॥ ११८२ ॥ नूनंदृष्टनिमित्तेनकेनचिन्नाधिगच्छति ॥ स्वस्यसाबहुमानेनलोकानांलज्जयापिच ॥ भीत्यापत्यादिकानांवास्थानकाभावतोपिवा ॥ ११८३ ॥ अधस्तात्पुरुषंदृष्ट्वाविलोकयतियावधूः ॥ त्रैलोक्यंलोकयेदेषामनसाकाममोहिता ॥ ११८४ ॥ विवेकाक्रांतचित्तानांपुरुषाणांमहात्मनां ॥ हरेद्धैर्यंस्मरःकेनवध्वानापहरिष्यति ॥ ११८५ ॥ साध्वीभूतास्थितानारीविज्ञेयाव्यभिचारिणी ॥ गणिकायाइयंयस्मात्स्वजनानपिवंचयेत् ॥ ११८६ ॥ इत्यादिवादिनासर्वंभवताकलुषीकृतम् ॥ जगत्सूत्रंयथावस्त्रंतैलस्नेहेनसर्वदा ॥ ११८७ ॥ भवतानिंदितादेवागुरवश्चतपोधनाः ॥ पितृमात्रादिकाःसर्वेह्यधिक्षिप्ताश्चबांधवाः ॥ ११८८ ॥ लोभमाश्रित्यदुष्पूरंकामंचाधमसर्वदा ॥ परेषांविविधंवित्तंदाराश्चापहतामुहुः ॥ ११८९ ॥

विवेकेति विवेकिनामिंद्रादीनांधैर्यहारकस्यस्मरस्यवधूचित्तहरणंकिमुतेत्यर्थः ॥ ११८५ ॥ फलितमाह साध्वीति तस्मात्साध्वीत्वेनप्रसिद्धास्त्रीगणिकायाअधिकाव्यभिचारिणीज्ञेया स्वजनवंचकत्वादिति ॥ ११८६ ॥ इत्यादीति एवंविधदुर्वाक्यानिवदताभवतासर्वंधर्मस्वरूपंकलुषीकृतंदूषितं कीदृशंधर्मस्वरूपं जगदात्मकपुष्पमाल्यस्यसूत्रवद्धारकं केनकिमिव कलुषीकृतंतैलेनवस्त्रमिवेत्यर्थः ॥ ११८७ ॥ भवतेति अधिक्षिप्ताअनादृताः ॥ ११८८ ॥ लोभमिति यथाक्रोधेनदेर्वानंदादिकंकृतंतथालोभकामाभ्यांपरवित्तंदाराश्चहृताः ॥ ११८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनसेति तथामनसापरतापोपायाश्चिंतिताः तांचितामभिनयंति इदमित्यादिना अस्यवैरिणइदंसुकरंदुःखसाधनंकृत्वाऽदःदुष्करमपिदुःखसाधनंकरिष्ये तथाअनेनवैरिणापूर्वस्नेहंकृत्वापश्चाच्छनैःशनैरेतंवैरिणंदुःखांबुधौपातयिष्यामीतिद्वयोःसंबंधः ॥ ११९० ॥ ॥ ११९१ ॥ दूतवाक्यमुपसंहरन्नरकदुःखमुपलक्षयति इत्यादीतिद्वाभ्यां इत्यादिरूपंदुष्कर्तंभवताशरीरादिभिःकृतमित्यादिवाक्यजातंवदंतोयमकिंकरानरकेषुपापिनांदुःखंकुर्वंति कीदृशेषुनरकेषु मार्गादिदेशभेदेनभिन्नेषु केचिद्धितप्तवालुकादयोयममार्गेनरकभेदाःकेचिद्यमपुर्यांकेचिच्चपातालाधइतिद्वयोरर्थः ॥ ११९२ ॥ ११९३ ॥ नरकदुःखमन्यत्राप्यतिदिशति नानाविधमिति यदिदंनानाविधंनर

मनसाचिंतितंभूरिजंतूनांतापकारणं॥ इदंकृत्वाकरिष्येदोदुःखमस्यस्ववैरिणः॥ ११९० ॥ अनेनस्नेहमतुलंकृत्वापश्चाच्छनैरहं॥ एतंदुःखोदधौशत्रुंपातयिष्यामिकालतः ॥ ११९१ ॥ इत्यादिभवताभूरिकर्मणामनसागिरा॥ कृतमित्यादिवचनाःकिंकराःपापकारिणां ॥ ११९२॥ नरकेषुचसर्वेषुमार्गस्थानादिभेदिषु॥ कुर्वंतिदुःखमतुलंदुःखिनांदीनचेतसां॥ ११९३॥ नानाविधमिदंदुःखंनरकेदेहधारिणां॥ यथात्रनरकेदुःखंतथासर्वत्रजन्मनि॥शरीरस्यस्थितौतद्वन्मरणेपिचदुःसहं॥ ११९४॥ब्रह्मलोकेतथास्वर्गेभूमौवावासुकेःपुरे॥ चतुर्विधानांदेहानांदेहमेकंप्रजायते॥ ११९५॥ सुखंसातिशयंतत्रसर्वत्रैवशरीरिणः ॥ पराधीनंतथातोकंसाधनैर्जायतेपिच ॥ ११९६॥ समानेभ्योभयंतद्वदधिकेभ्यश्चनित्यशः॥ क्लेशश्चसुमहानत्रजायतेनात्रसंशयः ॥ ११९७॥ ब्रह्मलोकेतथास्वर्गेभोगवत्यांतथैवच ॥ मरणाद्बिभ्यतेभीतिर्भोगेच्छासैवदारुणा ॥ ११९८॥

केदुःखंवर्णितंतत्केवलंनरकएवनभवतिकिंतुसर्वत्रशरीरस्यजन्मस्थितिमरणेषुप्रसिद्धमित्यर्थः ॥ ११९४ ॥ तत्रसर्वत्रजन्मदुःखंविशदयति ब्रह्मेति वासुकिपुरंपातालं देवशरीरमपिसूक्ष्मभूतान्युद्भिद्यजायमानत्वादुद्भिज्जमितिबोध्यम् ॥ ११९५ ॥ स्थितिदुःखमुपलक्षयति सुखमिति तत्रतेषुलोकेषुसुखंसातिशयंपराधीनंसाधनजन्यंचतथाच यथाक्रममीर्ष्याभयनाशचिंताभिर्व्याप्तमित्यर्थः॥ ११९६ ॥ समानेभ्यइति अन्नशरीरस्थितौ ॥ ११९७ ॥ मरणदुःखस्यसर्वत्रान्वयमाह ब्रह्मलोकइतिपंचभिः यतोभोगेच्छादारुणाउत्कटाततःसर्वत्रलोकेमरणभीरिति ॥ ११९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमाविति याद‍ृशभूलोकेमरणेनबांधवविनाशेनवादुःखंततःकोटिगुणंभोगवतीनागपुरंतत्प्रभृतिलोकेषुबोध्यंतत्रभोगाधिक्यादितिद्वयोरर्थः ॥ ११९९ ॥ १२०० ॥ बांधववियोगदुःखमपिसर्वत्रेतिस्पष्टयितुंसर्वत्रबांधवसत्वमाह सर्वत्रेतिद्वाभ्यां द्वयंस्पष्टम् ॥ १२०१ ॥ ॥ १२०२ ॥ यदासशरीरत्वंहिरण्यगर्भादीनामपिदुःखसंबंधप्रयोजकंतदान्यत्रकिमुतेतिदर्शयितुंहिरण्यगर्भंतावद्वर्णयति हिरण्यगर्भइति चतुर्भिः योयंहिरण्यगर्भोभगवान्येचइंद्रादयःप्रभवस्तेषांसर्वेषांकिंचनसुखंनास्तिशरीरित्वादितिसप्तानांसंबंधः कीद‍ृशोहिरण्यगर्भोऽस्माकंकार्योपाधीनांजीवानांपूर्वजःप्रथमजः त्रय्याःवेदत्रयसंप्रदायस्येश्वरःप्रवर्त्तकः ॥ १२०३ ॥ अनेकेति विविधसृष्टिप्रकाराणांक

भूमौमरणतोयावद्रोगेच्छाचैवदुःसहा॥ बांधवादिविनाशेनदुःखंसंजायतेनृणां॥ ११९९॥ तत्ततोप्यधिकंदुःखंकोटिकोटिगुणंभवेत्॥ भोगवत्यांतथास्वर्गेब्रह्मलोकेचदेहिनां॥ १२००॥ सर्वत्रजनकःकश्चिज्जननीचापिविद्यते॥ दाराःसुतास्तथाबंधुर्जनोनानाविधोहियः॥ १२०१॥ मित्राणिशत्रवस्तद्वदुदासीनाइमेजनाः॥ देहिनोत्रयथासंतितथादेहांतरेपिवा॥ ब्रह्मलोकेतथास्वर्गेपातालेपन्नगप्रिये॥ १२०२॥ हिरण्यगर्भोभगवानस्माकंपूर्वजोहिसः॥ सर्वाधिकसुखोदेवःशरीरीचत्रयीश्वरः॥ १२०३॥ अनेककल्पकोटीनांकर्तास्थितिविधायकः॥ हर्तातथैकएवायंद्वैतगंधविवर्जितः॥ १२०४॥ पादपाद्यतएतानिब्रह्मांडोदुंबराणिहि॥ शतशःकोटिशश्चैवभवंतिनभवंतिच॥ १२०५॥ विभूतयस्तुयस्यैताब्रह्मलोकादिसंश्रयाः॥ मानस्याजाययासार्धपर्यंकेपरमेश्वरः॥ ब्रह्मलोकेवसत्येषवेदात्माचतुराननः॥ १२०६॥ यस्तिष्ठत्यमरावत्यांशचीहृदयनंदनः॥ देवानांप्रथमोदेवस्त्रिलोक्याःपतिरीश्वरः॥ १२०७॥ लोकपालाष्टकंतद्वदष्टकंकुलजेषुच॥ सर्वेष्वधिकमत्यंतंवासुक्यादिकमद्भुतं॥ १२०८॥

र्तापालकःहर्त्ताचसहसिद्धविद्ययाद्वैतहीनश्च ॥ १२०४ ॥ पादपादिति समष्टित्वेनपादपसमाद्यस्माद्व्यष्टिजीवद‍ृष्टिसृष्टानिब्रह्मांडरूपोदुंबराणिप्रभवंतिजायंतेनभवंतियत्रलीयंतेचेत्यर्थः ॥ १२०५ ॥ विभूतयइति यस्यविभूतयएताःप्रजापत्यादिरूपाःप्रजापतिलोकादिषुवसंतियश्चप्राणरूपेपर्यंकेस्थितोब्रह्मलोकेवसतीति ॥ १२०६ ॥ यस्तिष्ठतीति यश्चेंद्रोऽमरावतीवासी ॥ १२०७॥ लोकेति यच्चपूर्वादिदिगधिपतिरूपंलोकपालाष्टकंयच्चनागकुलेषुअधिकत्वेनप्रसिद्धंवासुक्यादिकमष्टकं आदिपदेनतक्षकपद्मकादिग्रहः ॥ १२०८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति येचमनुजादिप्रभवएतेषांशरीरिणांविवेकिदृष्ट्यासुखंनास्तीत्युक्तं ॥ १२०९ ॥ तत्रहेतुतयाजन्माद्यविशेषमाह जननइति येइ मेजन्ममरणेयच्चविषयोत्थितंविषयगतंशांतघोरमूढत्वाख्यंवैषम्यंतारतम्यंकीदृशंसुखादिप्रयोजकंयश्चायंनश्वरोभूतावासःपांचभौतिकं शरीरंएतेषांसंबंधेकृमिमारभ्यसूत्रात्मपर्यंतंविशेषोनास्तीत्यर्थः ॥ १२१०॥ फलितमाह सशरीरइति विज्ञानमयआत्मासुखदुःखाभ्यांवि वर्जितःकथंस्यात्यतःसशरीरः तथाचश्रुतिः नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्तीति ॥ १२११ ॥ एतादृशोनर्थोबुद्धितादात्म्या ध्यासस्यफलमित्युपसंहरति विज्ञानमयतामिति स्पष्टम् ॥ १२१२ ॥ मनस्तादात्म्याध्यासस्यफलमनर्थंदर्शयति मनोमयइतित्रिभिः ए

एवंमनुजपक्ष्यादिप्रभवोविविधाअपि ॥ देहभाजःसुखंतेषांनकिंचिदिहविद्यते ॥ १२०९ ॥ जननेमरणेत द्वैषम्येविषयोत्थिते ॥ सुखदुःखकरेतद्वद्भूतावासेचनश्वरे ॥ कृमेःसूत्रात्मनश्चास्यवैषम्यंनैवविद्यते ॥ १२१० सशरीरोहिलोकेनोसुखदुःखविवर्जितः ॥ विज्ञानमयआत्माकःशरीरेणविवर्जितः ॥ १२११ ॥ विज्ञानम यतांप्राप्यततएषनिरंजनः ॥ उच्चावचानिदेहानिप्राप्नोत्यविरतंपुमान् ॥ १२१२ ॥ मनोमयोयदायंस्यात्तदा ऽस्यैतत्प्रजायते ॥ इच्छानानाविधास्तद्वत्संकल्पोपिशुभाशुभे ॥ १२१३ ॥ शुभाशुभत्वहेतुर्यःसंशयोविविध स्तथा ॥ आस्तिक्यंचतथाजंतोर्नास्तिक्यंचसुदारुणं ॥ १२१४ ॥ धैर्याधैर्येतथालज्जाबुद्धिश्चिताशरीरिणां ॥ भीत्यादिकंचदेवस्यमनोरूपस्यसंभवेत् ॥ १२१५ ॥ देवःप्राणमयोभूत्वापंचधादेहमास्थितः ॥ दशधाशत धातद्वन्नाडीभेदादनेकधा ॥ १२१६ ॥ उच्छ्वासादेर्भवेद्धेतुर्जीवनस्यचसर्वदा ॥ अन्नादोनेकधानेककर्मणां परमेश्वरः ॥ १२१७ ॥

तदिच्छादिकं संकल्पइच्छाकारणंशुभत्वादिप्रकारकंविशिष्टज्ञानं तथाशुभत्वादिप्रकारकःसंशयोविचिकित्सापदोक्तः तथाश्रद्धादिपद वाच्यमास्तिक्यादिकंजायते तथाचश्रुतिःकामःसंकल्पइत्याद्याकामादीनांमनोधर्मत्वंप्रतिपादयतीतित्रयाणामर्थः ॥ १२१३ ॥ १२१४ ॥ ॥ १२१५ ॥ प्राणतादात्म्याध्यासस्यफलंतद्धर्माध्यासमाह देवइति प्राणापानादिरूपेणपंचधानागकूर्मादिभेदसंयोजनेदशधानाडीभे देनत्वनेकधाभूत्वाऊर्ध्वश्वासादिव्यापारस्यजीवनव्यवहारस्यचहेतुर्भवतितथाऽनेकधाअन्नादःअन्नभोक्तासन्अनेकबलसाध्यकर्मणांक र्ताभवतीतिद्वयोरर्थः ॥ १२१६ ॥ १२१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इंद्रियाध्यासस्यफलमाह नीलेति चक्षुर्मयःसन्नीलादिरूपाणांश्रोत्रमयश्चतारादिशब्दानांग्राहकोभवति एवमितरज्ञानेंद्रियतादात्म्यंप्राप्यतत्तद्विषयज्ञानमितरकर्मेंद्रियतादात्म्येनचतत्तत्कर्मकरोतीतिद्वयोरर्थः ॥१२१८॥१२१९ ॥ पृथिव्यादिभूततादात्म्यस्यफलमाह पंचेति भूतमयोभूत्वाशरीराणांदशेंद्रियनिरूपितत्वेनदशविधानांविषयाणांचनिर्वाहकोभवति॥१२२०॥ अतेजोमयइतिपदेऽतेजःपदेनतमोयाऽसंतच्चाविद्यारूपंप्रसिद्धांधकाररूपंवेत्यभिप्रेत्यद्वयोस्तादात्म्याध्यासस्यफलेदर्शयति अविद्येति यदाऽविद्यामयोभवतितदास्वरूपावरणस्यविक्षेपस्यचकारणंभवति अंधकारमयस्तुनिद्रास्वमादीनांकारणंभवतीत्यर्थः ॥ १२२१ ॥ काममयत्वस्यतदाह तथेतिद्वाभ्यां स्र

नीलपीतादिरूपाणांशब्दानांचमहेश्वरः॥ चक्षुःश्रोत्रमयोभूत्वाग्राहकःपरिकीर्तितः॥ १२१८॥ परिशिष्टेंद्रियात्मत्वंप्राप्यात्मासर्वगःपुमान्॥ कुरुतेविविधेलोकेसर्वदाज्ञानकर्मणी॥ १२१९॥ पंचभूतमयोभूत्वादेहानेषचतुर्विधान्॥ दशधाविषयांस्तद्वत्स्वयच्छतिशरीरिणां॥ १२२०॥ अविद्यामयआत्मायंभवेदावरणंसदा॥ आनंदात्मस्वरूपस्यविक्षेपस्यचकारणं॥ भूत्वातमोमयोदेवोनिद्रादेःकारणंस्मृतम्॥ १२२१ ॥ तथा काममयोभूत्वाप्रजोत्पत्तेस्तुकारणं॥ दुःखोदर्कस्यबहुशःसुखस्यविविधस्यच॥ १२२२॥ गच्छेत्काममयोभूत्वादीनाद्दीनतमांदशां॥ वधूजनस्यचसदाक्रीडामर्कटकोभवेत्॥ पुण्यपापकरस्तद्वत्शुभाशुभकरोपिच ॥१२२३॥ यदाक्रोधमयोभूयास्प्रायःपापकरस्तदा॥ दुःखंचातुलमाप्नोतिवन्हिमध्येस्थितोयथा॥१२२४॥ ब्रह्महत्यादिपापानियातिक्रोधमयःपुमान्॥ कुंभीपाकादिकांस्तद्वन्नरकानतिदारुणान्॥१२२५॥ कामक्रोधावुभौज्ञेयौसंसारस्यचकारणं॥ अतन्मयोयदाभूयाज्जीवन्मुक्तस्तदाभवेत्॥ १२२६॥

ष्टेस्तथादुःखमुदर्कैउत्तरकालेयस्यएतादृशस्यराजससुखस्यतथादैन्यस्यतथापुण्यपापयोस्तथाइदंशुभमिदमशुभमितिदृष्टेश्चकारणंभवतीतिद्वयोरर्थः ॥ १२२२ ॥ १२२३ ॥ क्रोधमयत्वस्यतदाह यदेति कदाचित्शरणागतत्राणादौशरणागतविरोधिप्रभृतिविषयकःक्रोधोधर्महेतुरपिभवतीत्यतःप्रायःपापतत्फलेप्रतिक्रोधस्यहेतुत्वमुक्तं ॥ १२२४ ॥ १२२५ ॥ अक्रोधमयत्वमकाममयत्वस्याप्युपलक्षणमित्यभिप्रेत्यतत्फलमाह कामेति संसारोजननादिप्रवाहश्चकारात्तन्निमित्तादृष्टादिप्रहस्तयोःकारणभूतौकामक्रोधौतयोरभावोजीवन्मुक्तलक्षणमित्यर्थः ॥ १२२६ ॥ ॥९२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदृष्टतादात्म्यफलमाह धर्मेति सुखदुःखयोस्तथापार्थिवत्वादिनानिर्भेदेसमानेपिपांचभौतिकेशरीरेयउच्चनीचादिभावलक्षणोभेदोविशेषस्तस्यापिकारणंभवेदिति ॥ १२२७ ॥ एवंपरिशिष्टपदार्थानांपरोक्षादिरूपाणांतादात्म्याध्यासस्यतत्तत्फलंबोध्यमित्याह एवमिति तादृशःप्रत्यक्षमयःपरोक्षमयश्चसन् ॥ १२२८ ॥ अस्यतत्तद्भावेप्रधानंनिमित्तंकर्मैवेतिदर्शयति यद्यदितित्रिभिः आचारादिरूपंयादृशंकर्मकरोतितेनतेनतत्तत्कर्मप्रयुक्तेनसाधुप्रभृतिनाम्नोच्यतेऽयंवस्तुतोऽभिधानविवर्जितोपीति ॥ १२२९ ॥ अभिधानविवर्जितत्वंस्पष्टयति नायमिति ॥ १२३० ॥ साधुवादमिति तत्रापियःपुण्यकृत्ससाधुवादंप्रशंसांचसुखंचप्राप्नोतिपरःपापकृत्तुविपरीतमसाधुत्वादादिकं

धर्माधर्ममयोभूत्वाकारणंसुखदुःखयोः॥उच्चनीचत्वभेदस्यनिर्भेदेपांचभौतिके॥१२२७॥एवंसर्वमयोभूत्वासर्वमेवाधिगच्छति॥ प्रत्यक्षंचपरोक्षंचतादृशोजगदीश्वरः॥१२२८॥यद्यद्धिकुरुतेजंतुःकर्माचारादिकिंचन॥ तेनतेनोच्यतेसर्वैरभिधानविवर्जितः॥ १२२९॥नायंसाधुरसाधुर्ननपापःपुण्यएषन ॥ सर्वसंगविनिर्मुक्तोनभोवत्सर्वगःपुमान् ॥ १२३० ॥साधुवादंतथाकीर्तिंतथैवबहुलंसुखं ॥ प्राप्नोतिपुण्यकृत्तद्वद्विपरीतंपरःपुमान् ॥ १२३१ ॥ अत्रकेचिन्महात्मानएवमाहुर्विचक्षणाः ॥ पुरुषोनिर्गुणोऽसंगःसर्वभेदविवर्जितः॥स्वयंनकुरुतेकिंचित्कार्यकारणमण्वपि॥१२३२॥ अविद्यासंगमासाद्यत्यविद्याजंतुदुर्भणम् ॥ प्रथमंकुरुतेकामंततःसर्वमयोभवेत् ॥ १२३३॥ संकल्पयतएवायंबहुस्यामितिवैपुरा॥ससर्जसकलंविश्वंदेवःसदसदात्मकं ॥१२३४॥

प्राप्नोतीत्यर्थः ॥ १२३१ ॥ एवंकर्मप्राधान्यंपूर्वपक्षत्वेनदर्शितमथसिद्धांतःकामएवाऽविद्याजन्यःसंसारकारणमित्याकारकःश्रुत्याअथोखल्वाहुरित्यादिनाकंडिकांतवाक्येनोक्तस्तमभिनयति अत्रेतिचतुर्दशभिः अत्रसंसारनिदानविचारेकेचिदतिकुशलाएवमाहुः एवंकथंआत्माअसंगाद्वितीयत्वात्स्वतःकिंचिदपिस्थूलंसूक्ष्मंवानारभतेकिंतुअविद्यायाःसंगंसंबंधंप्राप्यप्रथमंकामंकुरुतेततःसर्वंभावंलभते कीदृशमविद्यासंगमविद्याजषविद्ययैवप्रयुक्तमतएवदुर्भणमनिर्वाच्यमितिद्वयोरर्थः ॥ १२३२ ॥ १२३३ ॥ अतएवसृष्टिवाक्येषुकामपूर्विकासृष्टिःसोकामयतेत्यादिषूक्तेत्याह संकल्प्येति अयमीश्वरोयतःसंकल्प्यैवससर्जेतिसंबंधः ॥ १२३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवजीवप्रवृत्तिरपिसर्वाकामपूर्विकैवदृश्यतइत्याह अन्यइति अन्यईश्वरभिन्नइदंमेभवतुइदंचमाभवत्विति प्रथमंचिंतयन्नेवभवतित तःसंसारदशाःप्रामोतीतिद्वयोरर्थः ॥ १२३५ ॥ १२३६ ॥ कामपदार्थंदर्शयति अनर्थांतरमिति कामइच्छारागःस्पृहाइत्यनर्थांतरं एतेषांपदानामर्थांतरंभिन्नोर्थोनभवतीतिमहर्षिभिरुक्तं येपियोषितांसंगःकामइत्याहुस्तैरपिसंगेच्छैवकामःप्रोक्तः अन्यत्रतुलक्षणयैवकामशब्दोवर्ततइत्यर्थः ॥ १२३७ ॥ फलितमाह इच्छेति ततइच्छायाएवकामपदमुख्यार्थत्वादिच्छारूपःकामःसंसारवृक्षस्यबीजभूतःकारस्करःकुचलेतिप्रसिद्धफलकोवृक्षइत्युक्तं ॥ १२३८ ॥ पुमानिति अस्यसंसारवृक्षस्यफलस्थानीयस्तुविज्ञानमयमनोमयादिपदोक्तो

अन्योपिजंतुरत्रायंचेतनोजातमात्रकः॥इदंभवतुमेभूयादिदंमेत्येवचिंतयन्॥ १२३५ ॥ प्रथमंततएवामुं संसारंबहुदुःखदं॥प्राप्नोतिविवशोभूत्वाकालपाशसमावृतः ॥ १२३६ ॥ अनर्थांतरमुक्तंहिकामेच्छादेर्मनीषिभिः॥कामोपियोषितांसंगःसंगेच्छापरिकीर्तितः ॥ १२३७॥ इच्छामात्रंततःकामोबीजमत्रप्रकीर्तितं॥संसारपादपस्यास्यकारस्करसमस्यहि॥ १२३८॥ पुमान्फलमयोनित्यंसंसारीपरिकीर्तितः॥ विज्ञानमयइत्यादिभेदोनैवापरःपुमान्॥ १२३९॥हेतुंकाममयत्वेस्यवदंत्येतंमहाधियः॥ देहधारीपुरःकाममिच्छाख्यंकुरुतेऽधमः॥ १२४०॥इदंप्रियंसमाप्स्यामिहास्याम्यप्रियमप्यदः॥इतियादृग्भवेत्कामस्तादृङ्निश्चयवान्पुमान्॥ ११४१ ॥ यादृशंनिश्चयंकुर्यात्तादृक्कर्मसमारभेत् ॥ अस्मिन्लोकेपरस्मिन्वासुखदंदुःखहानिदम् ॥ ११४२॥यादृशंकुरुतेकर्मपापपुण्यसमाश्रयं॥ शुभाशुभंततस्तस्यफलमेतिपुमान्सदा॥ १२४३॥

नानाविधावस्थावान्पुरुषोबोध्यः अपरोब्रह्मात्मपदाभिधेयावस्थाशालीपुरुषस्तुनफलंतस्यज्ञानाभिव्यंग्यस्यनित्यसिद्धत्वादित्यर्थः ॥ १२३९ ॥ हेतुमिति अस्यसंसारिणःकामप्रधानत्वेइमंहेतुंचतेविचक्षणाःप्रवदंति इमंकं सदेहीप्रथममित्याकारामिच्छांकरोति इतिकिं इदमिष्टंप्राप्स्यामीदमनिष्टंत्यक्ष्यामिचेति साकामपदवाच्येच्छायादृशीभवतितादृशंकर्त्तव्यगोचरंनिश्चयंक्रतुशब्दवाच्यंकरोतियादृशंच निश्चयंकरोतितादृशंलोकद्वयोपकारायकर्मकरोतियादृशंचकर्मकरोतितादृशंशुभाशुभंफलमाप्नोतीतिचतुर्णामर्थः॥ १२४०॥ १२४१ ॥ ॥ १२४२ ॥ १२४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसुखदुःखप्राप्तिपरिहारकामनयायागादिकुर्वतःकथंदुःखमितिशंकांवारयति प्राप्तयइतित्रिभिः यद्यपिसुखदुःखयोर्यथाक्रमंप्राप्तयेप रिहारायचायंकर्मकरोतितथाप्यत्रसंसारेतत्सुखप्राप्त्यादिरूपंफलंनभवतियतोस्मिन्काम्यकर्मरूपेसाधनेसत्यपिवर्तमानेपिकामिनामवश्यं भावीसाधनवैगुण्यादिदोषोभवति किंचसांसारिकसुखस्यदुःखसंसर्गनियमोपिभवत्यतःसकामीदुःखमेवाप्नोतीतिद्वयोरर्थः ॥ १२४४ ॥ ॥ १२४५ ॥ फलितमाह ततइति मानसेनमनोधर्मेणकामेनदुःखमेवाप्नोतीति ॥ १२४६ ॥ तदेवशक्तेइत्यादेर्मंत्रस्यकाममयत्वसंवाद कस्यार्थमुपबृंहयति यत्रेत्यूनत्रिंशच्छ्लोकैः अयंजंतुःप्रबलैर्भाविफलैःकर्मभिःप्रेरितोमरणकालेयत्रब्रह्मलोकादिगतभोगेसक्तउत्कटराग

प्राप्तयेपरिहारायसर्वदासुखदुःखयोः॥ कर्मयद्यप्ययंकुर्यात्तथाप्यत्रनतद्भवेत्॥ १२४४॥ साधनादेश्चवैगु ण्यात्सत्यप्यस्मिन्सदैवहि ॥ सुखस्यदुःखबाहुल्याद्दुःखमेवव्रजेत्पुमान् ॥ १२४५॥ ततःकामेनसंसारंदुःख रूपंसमाप्नुयात्॥ मानसेनसदादेहीदुःसहंबहुदेहजम्॥ १२४६॥ यत्रासक्तोभवेज्जंतुर्भाविकर्मप्रचोदितः॥ ब्रह्मलोकेतथास्वर्गेभूमौवानरकेथवा॥ १२४७॥ तत्रैवकर्मणातेनसहितोलिंगदेहभाक्॥ प्राप्नोतिमरणादू र्ध्वंस्थूलदेहंनसंशयः॥ १२४८॥ स्वर्गादौयदिसक्तोयंसुकृतीदेवदेहभाक्॥ उपभुज्यफलंस्वर्गेयातिभूमौपर त्रवा॥ १२४९॥ भूमौचेद्द्वारतेवर्षेस्वर्गीत्रैवर्णिकोभवेत्॥ स्वर्गकर्मक्षयेसोयंपूर्ववत्कुरुतेहितत्॥ १२५०॥ स्वर्गाद्भूमिंततःस्वर्गंस्वर्गाच्चपुनरेवतां॥ प्रायशोयातिमनुजःक्वचित्तुनरकादिषु ॥ १२५१ ॥

वान्भवतितत्रैवब्रह्मलोकादौस्थूलदेहंप्राप्नोतीति कीदृशः तेनरागोत्पादकेनकर्मणासहितः रागाश्रयेणसूक्ष्मशरीरेणविशिष्टश्चेतिद्वयोःसंबं धः ॥ १२४७ ॥ १२४८ ॥ स्वर्गादाविति तत्रयदिदेवलोकादौसक्तोभवतितदादेवपितृगंधर्वादिदेहेनतत्तल्लोकभोगानुभुक्त्वाभोगांतेप्रोदि तकर्मानुसारेणपृथिव्यादिलोकेपुस्थूलदेहंलभतइत्यर्थः ॥ १२४९ ॥ भूमाविति सस्वर्गीस्वर्गभोगक्षयेभूमौजायमानोयदित्रैवर्णिको भवेत्तदासपूर्वसंस्कारेणपुनःस्वर्गप्रापकंकर्मकरोति ॥ १२५० ॥ केवलकर्मिणामेतद्यातायातंघटीयंत्रवदनुवर्ततएवेत्याह स्वर्गादिति त तःभूमेः तांभूमिं मनुजइष्टापूर्तकारीतिशेषः क्वचित्पापाधिक्ये ॥ १२५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मरूपबीजस्यतत्तदारंभेकामात्मकसलिलसंयोगएवप्रयोजकइत्यावेदयति पातालइति ॥ १२५२ ॥ वासनात्मनाचित्तेस्थितस्यकाम स्यमरणकालेऽभिव्यक्तस्यशरीरांतरारंभकत्वंस्वमदृष्टांतेनोपपादयति दिवसइति यस्यपुंसोयादृशीयद्विषयिकावासनारागादिसंस्काररूपायथाउत्कटत्वादिरूपेणदिवसेवर्ततेसशयनंस्वमंप्राप्तस्तादृशंदेहंसृजतेएवंदेहपातानंतरमपीतिद्वयोःसंबंधः ॥ १२५३ ॥ १२५४ ॥ एतदेवस्फुटयति कर्मभिरिति तन्मनाःसकामोमनसियस्यसतथादेहांतेकर्मानुसारेणयद्यच्चिंतयेत्तत्तत्प्राप्नुयादिति ॥ १२५५ ॥ नन्वेवंचिंतितसिद्धिर्मरणात्पूर्वंकुतोनभवतीतिचेत्प्रारब्धफलकर्मलक्षणप्रतिबंधकसत्वादित्याह पूर्वेति तस्यजंतोर्मरणकालेपूर्वकर्मणःप्रारब्धाख्यस्य

पातालेनरकेतद्वद्ब्रह्मलोकेतथादिवि ॥ भूमौचविविधान्देहान्यातिकाममयःपुमान् ॥ १२५२ ॥ दिवसेयादृशीयस्यवासनावर्ततेयथा ॥ तादृशंशयनंप्राप्तोदेहमाप्नोतिसर्वदा ॥ १२५३ ॥ एवंजन्मांतरेयस्ययादृशीवासनाभवेत् ॥ तादृशंवपुराप्नोतिदेहपातात्परंपुमान् ॥ १२५४ ॥ कर्मभिःपुण्यपापाख्यैःप्रेरितस्तन्मनाःपुमान् ॥ देहांतेचिंतयेद्यत्तत्प्राप्नुयात्समनंतरं ॥ १२५५ ॥ पूर्वकर्मक्षयस्तस्यमरणेसतिजायते ॥ अनारंभस्तथाभाविकर्मणोमरणात्पुरा ॥ १२५६ ॥ अस्मिन्नवसरेदेवःकर्मकाराविनिर्गतः ॥ सत्यसंकल्पआत्मायंचिंतयेद्यद्भवेद्वितत् ॥ १२५७ ॥ गृह्णीयाद्बहुधादेहान्नटोयद्वद्यदृच्छया ॥ आत्मातथैवसंसारीकामाद्देहानवाप्नुयात् ॥ १२५८ ॥ कामिनोनिश्चयोभूयान्निश्चितस्यापिकर्मिता ॥ कर्मिणःकामिताचैवंक्रमेणैतत्प्रवर्तते ॥ १२५९ ॥

क्षयोभवति मरणात्पूर्वंतुभाविफलककर्मणोयोऽनारंभःफलाजनकत्वरूपःसतथाप्रारब्धकर्मणःप्रतिबंधकतयैवेत्यर्थः ॥ १२५६ ॥ एतदेवस्फुटयति अस्मिन्निति अस्मिन्नवसरेमरणकालेप्रारब्धकर्मरूपायाःकारायाबंधनागाराद्विनिःसृतोमुक्तःसन्सत्यसंकल्पत्वाद्यदिच्छति तदाप्नोतीत्यर्थः ॥ १२५७ ॥ गृह्णीयादिति यदृच्छयास्वैरितया स्वातंत्र्येणेतियावत् ॥ १२५८ ॥ काममूलकंसंसारचक्रमभिनयति कामिनइतित्रिभिः सकामस्यकर्तव्यगोचरोनिश्चयोभवतितादृशनिश्चयवतश्चकर्मानुष्ठानंतादृशकर्मानुसारेणपुनःकामोदयइतिक्रमेणैतत्संसारचक्रंप्रवर्ततइत्यर्थः ॥ १२५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामजन्यस्यकर्मणःपुनःकामोदयहेतुतामेवविशदयति कर्मेति चित्तभूमौद्विविधाःसंस्कारास्तिष्ठंतिकर्मजन्याश्वज्ञानजन्याश्व तत्रकर्मजन्यसंस्कारैःस्वफलारंभोपपत्तयेइच्छातावज्जन्यते येतुबुद्धिहेतवोज्ञानारंभकाज्ञानजन्याःसंस्कारास्तैयत्रेच्छातदनुकूलकर्त्तव्यादिज्ञानसंतानारंभकोबाध्याइत्यर्थः॥ १२६०॥ भावीति भाविबुद्धिःकर्त्तव्यनिश्वयस्तदनुसारेणकर्मकरोतितदनुसारेणचपुनरिच्छाजायतइत्यर्थः॥१२६१॥फलितमाह कामएवेतिद्वाभ्यां तस्माद्देहउत्पन्नेसतिकर्मकरस्यकर्मारंभप्रयोजकस्यक्रतोःसंकल्पस्यकर्त्तव्यनिश्वयरूपस्यकारणभूतःकामएवबोध्यइत्यर्थः॥१२६२॥एतस्मिन्निति ततश्वएतस्मिन्संसारेकामएवकारणंबोध्यं सचकामइच्छारूपोयस्यतृप्तिकृदुपशाम

कर्मानुसारतोभूयादिच्छाजंतोःशुभाशुभा॥ इच्छानुसारतोज्ञेयाःसंस्काराबुद्धिहेतवः॥ १२६०॥ भाविबुद्ध्यनुसारेणकुर्यात्कर्मशुभाशुभं॥ भूयात्शुभाशुभेष्विच्छातस्यकर्मानुसारतः॥ १२६१ ॥ कामएवततोज्ञेयोजातेदेहेत्रकारणं॥ क्रतोःकर्मकरस्यास्यनिश्वयापरसंज्ञिनः॥ १२६२ ॥ एतस्मिंस्ततएवायंसंसारेकारणंस्मृतं॥ कामइच्छाभिधोयस्यतृप्तिकृन्नैवकिंचन॥ १२६३॥ यत्पृथिव्यांव्रीहियवंयच्चास्तिबहुकिंचन॥ एकस्यापिनपर्याप्तंपुंसःकामाग्निधारिणः॥ १२६४॥ दरिद्रोभगवानिंद्रःसदायस्मान्नतस्यसः॥ ब्रह्मलोकःसमग्राणामानंदानांहियोऽवधिः॥१२६५॥ कामाग्नेस्ततएतस्यनेंधनंविद्यतेभुवि॥ स्वर्गेवाब्रह्मलोकेवादहतोजगतांत्रयम्॥ १२६६॥

कंलौकिकंकिंचिन्नास्तीत्यर्थः॥१२६३॥ कामस्यविषयैरनुपशाम्यतावादिपुराणवाक्यमर्थतःपठति यदिति सर्वमन्नंहिरण्यादिकंचवस्तुजातमेकस्यापिपुंसस्तृष्णाशमक्षमंनभवतीत्यर्थः ॥ १२६४ ॥ अत्रार्थेत्रिलोकीराजएवब्रह्मलोकानंदकामनयातप्यमानउदाहरणमित्याह दरिद्रइति तस्येंद्रस्य सप्रसिद्धोब्रह्मलोकोनास्ति ॥ १२६५॥ यदाचेंद्रस्येयंदशातदाकिमुवाच्यमन्येषांकामदुःखमित्याह कामाग्नेरिति यतइंद्रेपिनोपशांतिस्ततएवंज्ञायतेयद्यपिप्रसिद्धाग्नेर्घृतकुल्यादिकंतर्पकमिधनंमहाभारतेप्रसिद्धंतथापित्रिलोकींदहतःकामाग्नेस्तर्पकमिधनंकुत्रापिनास्तीति॥ १२६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामएवचसंसारस्यविवेकाद्बिभ्यतस्त्राणकृदितिरूपकेणदर्शयति कामेति एषजीवःकामात्मकेनकंचुकेनवर्मणारक्षितंपुंयानंशिबिकातुल्यंवाहनंसूक्ष्मशरीररूपमतएवसर्ववस्तुभिर्विवेकराजसैन्यैरभेद्यमाश्रित्यत्रिलोकीवर्तिषुचतुरशीतिलक्षयोनिषुभ्रमतीत्यर्थः ॥ १२६७ ॥ अतएवचप्राधान्यान्मनोवृत्तीनामभिनायिकायांकामःसंकल्पइत्यादिकायांश्रुतौकामाख्यवृत्तेःप्रथमकीर्तनमित्याह कामोहीति हियतःकामरूपावृत्तिर्जगद्रूपस्यपटस्यनिर्माणसूत्रस्थानीयाअतएवश्रुतौप्रथमंकीर्तितेत्यर्थः ॥ १२६८ ॥ नन्वन्यत्राविद्यायामनसश्चसंसारदुःखकारणेषुप्राधान्यमुच्यतेअत्रकामस्यप्राधान्योक्तौकोहेतुरितिचेत्तयोरपिकामद्वारैवदुःखप्रयोजकत्वमित्याह अविद्येति संसारका

कामकंचुकपुंयानमभेद्यंसर्ववस्तुभिः॥ आश्रित्यत्रिषुलोकेषुसंचरत्येषसर्वदा॥ १२६७॥ कामोहिमानसीवृत्तिःप्रथमापरिकीर्तिता॥ जगत्पटस्यनिर्माणसूत्रभूतामनीषिभिः ॥ १२६८ ॥ अविद्यामनआश्रित्यवर्ततेजयकाशिनी॥ मनःकामंसमाश्रित्यजयेद्विश्वंचराचरम्॥ १२६९ ॥ इच्छाहीनेषुकिंकुर्यान्मनोवृत्तिसहस्रकं॥ अविद्यावापिजननीविश्वस्यात्मविमोहिनी॥ १२७० ॥ इच्छाहीनेनविज्ञातंसुखदुःखप्रदंभवेत्॥ मनोपिनभवेत्तद्वन्निश्चयस्यापिकारणं॥ १२७१ ॥ संतोप्यसंतएवस्युःप्राणाःश्वासादिहेतवः ॥ दशेंद्रियाणिभूतानिपंचापिवपुषासह॥ १२७२ ॥

रणेषुप्राधान्यरूपेणजयेनकाशिनीप्रसिद्धिमतीयदविद्यावर्ततेतत्रमनएवालंबनत्वेनप्रयोजकंमनोप्युक्तंजयंकामरूपवृत्तिप्रभावादेवप्राप्नोतीत्यर्थः॥ १२६९॥ कामस्यदुःखनिदानत्वंव्यतिरेकेणस्फुटयति इच्छेतिचतुर्भिः इच्छाहीनेषुजनेषुसवृत्तिकंमनोवाऽविद्यावाविश्वजननीकिंदुःखंकुर्यादितिसंबंधः नहिसुषुप्तौसमाधौचवर्तमानयोरविद्यामनसोर्दुःखजनकत्वमितिभावः ॥ १२७० ॥ इच्छाहीनेनेति यतइच्छाहीनेनविज्ञातमपिविषयजातंतत्रसुखादिप्रयोजकंनभवतितथाइच्छाहीनस्यमनःकर्तव्यगोचरंनिश्चयंप्रतिकारणंनभवतीति ॥ १२७१ ॥ संतइति तथाइच्छाहीनस्यश्वासप्रश्वासादिव्यापारशालिनःप्राणापानादयःसंतोवर्तमानाअप्यसंतोदुःखाप्रयोजकत्वेनाविद्यमानसमाःतथादशेंद्रियाणिपंचभूतानिशरीरंचएतान्यसत्प्रायाणिबोध्यानीत्यर्थः ॥ १२७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथेति तथायुवत्यादयोपीच्छाहीनस्याकिंचित्कराइत्यर्थः ॥ १२७३ ॥ अन्वयमप्याह सर्वमिति सर्वकारणजातंसर्वकरंसर्वस्यकार्यस्या रंभकंयद्भवतितत्रसर्वत्रेच्छायाःसत्वमेवप्रयोजकंयतोनिच्छंतंप्रतिदारादीनामकिंचित्करत्वंलोकेपिप्रसिद्धमित्यर्थः॥१२७४॥ फलितमाह तस्मादिति स्पष्टं ॥ १२७५ ॥ संसारप्रकरणोपसंहारकस्येतिनुकामयमानइतिवाक्यस्यार्थमाह इच्छयेति यादृशमिहलोकेदृश्यमानं दुःखंकामीप्रामोतितज्जातीयंनानायोनिषुप्रामोतीत्यर्थः ॥ १२७६ ॥ अथवर्णितसुषुप्तेर्दार्ष्टांतिकंमोक्षंप्रतिपादयतोथेत्यादेर्मंथस्यार्थं प्रपंचयंस्तत्राप्येतील्यंतस्यार्थंदर्शयति दैवेतिचतुर्विंशतिश्लोकैः दैवयोगात्पुण्योदयकृतोयःप्रतिबंधकदुरितापायस्तद्योगाद्यदाकामर

तथायुवतयोनूनंयौवनाग्निप्रदीपिताः ॥शत्रवःक्रूरकर्माणःकर्मणामनसागिरा ॥ धर्मःसुखप्रदस्तद्वदधर्मो दुःखदस्तदा॥ १२७३॥ सर्वंसर्वकरंपुंसामिच्छासत्त्वेनहेतुना॥ अनिच्छतोहिकेदाराःपुत्रालोकाश्चदेहिनः ॥ १२७४॥ तस्मादिच्छैवसंसारोनान्यःकश्चनविद्यते॥ इच्छाविरहितोजंतुर्जीवन्मुक्तसमोभवेत्॥ १२७५ इच्छयाविविधंदुःखमुच्चावचशरीरजं॥ अस्माभिर्दृश्यतेयादृक्तादृक्कामीसमाप्नुयात् ॥ १२७६॥ दैवयोगाद्य दाकामरहितोजायतेपुमान् ॥ सदुःखंनेदमाप्नोतिकथंचित्कर्हिचित्क्वचित्॥ १२७७॥ कामशून्योभवेद्योयं यस्मात्कामविनिर्गमात्॥ वैराग्येणयथासुप्तौनिष्कामोजायतेपुमान्॥ १२७८ ॥ निष्कामोनेनयत्पुंसाप्रा प्ताःकामाःसुतादयः॥ साकल्येनसदानैवप्राप्यंतेकामिनाहिते॥ १२७९॥

हितोभवतितदासंसारदुःखंनानुभवतिकिंतुमुक्तोभवतीत्यर्थः ॥ १२७७ ॥ तच्चकामरहितत्वंमुख्यंब्रह्मात्मविद्ययैवभवतीतिप्रदर्शकेऽकाम इत्यादिविशेषणसमुदायेपूर्वपूर्वंप्रत्युत्तरोत्तरस्यहेतुतांविशदयति कामशून्यइतिचतुर्भिः योयंसर्वदुःखाभावयोग्यःपुमानुक्तःसकामैः शून्योरहितोभवेत् कुतः यस्माद्वैराग्येणसर्वकामविनिर्गमान्निष्क्रांताःकामायस्मादितिव्युत्पत्तिसमन्वयाद्धेतोर्निष्कामोजायतेभवति य थासुषुप्तौनिष्कामत्वंवर्णितंतद्वदित्यर्थः ॥ १२७८ ॥ ननुनिष्कामपदोक्तःसर्वकामविनिर्गमएवतस्यकुतइतिचेदाप्तकामपदोक्तात्सर्वका मलाभाद्धेतोरित्याह निष्कामोनेनेति यत्यतोऽनेनपुंसासर्वेपुत्रादयःकामाःकाम्यमानपदार्थाःसाकल्येनप्राप्ताःयेसकामेनसदानैवप्रा प्यंतेतस्मादयंनिष्कामइतिसंबंधः नहिप्राप्तेर्थेकस्यापीच्छोदेतीतिभावः ॥ १२७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुराप्तकामत्वमित्याह आत्मेति यतोयंनिष्कामःपुरुषोत्तमआत्मकामस्ततएवाप्तकामइतिपूर्वार्द्धसंबंधः ननुकथमात्मकामत्वमाप्तकामत्वेहेतुरितिचेद्ब्रह्मविषयालब्धस्यात्मनःसर्वरूपत्वादित्याह प्राप्ताइति यतःसद्रूपेणसर्वविवर्तोपादानेनअतएवभूमानंदरूपेणात्मनासर्वैकाम्यमानाभावास्तेनविदुषालब्धाइत्युत्तरार्द्धार्थः ॥ १२८० ॥ तस्मादात्मकामत्वमेवपरंपरयाकामाभावरूपेऽकामत्वेहेतुरितिफलितमाह आत्मेति स्पष्टम् ॥ १२८१ ॥ आत्मकामत्वस्याकामत्वंप्रतिहेतुतामेवस्फुटयति कदाचिदिति कामिनापुरुषेणयत्किंचित्प्राप्यतेतत्तृष्णाशामकंनभवतिकिंतुतृष्णांवर्द्धयत्येवविकारित्वेनानित्यत्वादित्यर्थः ॥ १२८२ ॥ आत्मेति आत्मकामस्तुविद्वानेतत्सुतादिकंविषयजातंतथाकामिवत्कर्मसाध्यतयापराग्भावेनचनप्राप्नोतिकिंतुविश्वंसर्वमहंभवामीत्याकारयाविद्ययाकृत्स्नंविषयजातंसदैवा

आत्मकामोयतोयंस्यान्निष्कामःपुरुषोत्तमः॥ प्राप्ताःसदात्मनासर्वैयतःकामाःसुतादयः॥ १२८० ॥ आत्मकामस्ततोज्ञेयआप्तकामःपुमानिह॥ आप्तकामस्तुनिष्कामोनिष्कामोऽकामईरितः॥ १२८१ ॥ कदाचित्किंचिदेवात्रकामिनातनयादिकं॥ प्राप्यतेनश्वरंभूयःकामाग्नेर्दीप्तिकारणं॥ १२८२ ॥ आत्मकामस्तथानैवप्राप्नोत्येतत्सुतादिकं॥ किंतुविश्वमहंकृत्स्नंप्राप्नोत्येवसदैवसः॥ १२८३ ॥ अपिदुःखंसुखंनृणांधनिनांतोषिणांतथा॥ विषमंसर्वदातद्धिदुःखादुःखकरंमहत्॥ १२८४ ॥ इतश्चेतश्चधावन्सधनीराजादिकाज्जनात् ॥ दुःखंबहुविधंप्राप्यसुखमाप्नोतिमानवः॥ १२८५ ॥ दरिद्रस्तुष्टहृदयोदुःखंकिंचिन्नगच्छति ॥ यथाप्राप्ताशनोलोकेमोदतेदेवराजवत्॥ १२८६॥

त्मभावेनप्राप्नोतीत्यर्थः ॥ १२८३ ॥ किंचतिष्ठतुब्रह्मात्मविषयाकामाभावस्यपरमानंदहेतुत्वंलोकेपिकामाभावलक्षणसंतोषवतामानंदोत्कर्षःप्रसिद्धइत्याह अपीति विषममितिभावप्रधानोनिर्देशः तथाचलोकेपिधनिनांधनतृष्णावतांतथासंतोषिणांपरस्परंविषमत्वंवैलक्षण्यंयथाक्रमंदुःखरूपंसुखरूपंचप्रसिद्धं कीदृशंधनिनांदुःखमुत्तरकालेपिदुःखकरं कीदृशंतोषिणांसुखमुत्तरकालेपिसुखकरमित्यर्थः ॥ १२८४ ॥ तत्रधनिनांदुःखरूपंवैषम्यंस्फुटयति इतइति धनीहिबह्वायासीराजादिभ्योहेतुभ्योबहुदुःखंप्राप्यकदाचित्किंचिद्राजसंसुखंप्राप्नोति ॥ १२८५ ॥ तोषिणांसुखरूपंतदाह दरिद्रइति तुष्टहृदयस्तुदरिद्रोपियथाप्राप्तस्यानायासेनलब्धस्यभोक्तासदासात्विकंसुखमाप्नोतीत्यर्थः ॥ १२८६ ॥ ॥९६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचतोषिणोभयमपिनास्तियद्धनिनांदुःखदमित्याह नतस्येति तस्यतोषिणः ॥ १२८७ ॥ तस्मात्संतोषस्यसुखप्रयोजकत्वंनिश्चितंका
मस्यतुनानायासविशिष्टस्यापितत्संदिग्धमित्याह अल्पेति अल्पायासेनस्वल्पोद्यमेनापिसंतोषःसुखविकासकः कामस्तुअसाध्यात्कष्टसा
ध्यान्महायासादपिदुःखमेवददातीत्यर्थः ॥ १२८८ ॥ मनोगतःसंतोषःसर्वभावान्सुखमयान्करोतीत्यत्रदृष्टांतमाह यथेति यथापादग
तमुपानद्रूपंचर्मसर्वदेशानांकंटकराहित्यप्रयोजकंपांथान्प्रतितद्वदित्यर्थः ॥ १२८९ ॥ उक्तमर्थंव्यतिरेकेणापिस्फुटयति वसुधामितिद्वा
भ्यां यथाकश्चित्पांथइत्याकारकेनसंकल्पेनदुःखितोभवति इतिकिं अहंसर्वांमार्गभूमिंनिष्कंटकांकोमलांचकुर्यामिति ॥ १२९० ॥ त
थेति तथासकामःपुरुषोहंसर्वान्काम्यमानपदार्थानवाप्स्यामिसंपादयिष्यामीत्येवंसंकल्प्यदुःखितोभवति तस्यसुखलाभस्तुसंदिग्धइत्य

नतस्यास्तिभयंकिंचिद्राजतश्चोरतोपिवा ॥ यथात्रधनिनोनित्यंविद्यतेसततंभयम् ॥ १२८७ ॥ अल्पायासे
नसंतोषःसुखंयच्छतिदेहिनं ॥ आयासान्महतोऽसाध्यात्कामोयच्छतिवानवा ॥ १२८८ ॥ यथापादस्थितंच
र्मसर्वदासुखकारणं ॥ पांथानामेवमेवस्यात्संतोषोदेहधारिणां ॥ १२८९ ॥ वसुधांसकलांकश्चिद्यथाकुर्या
मकंटकां ॥ मृदुलांचेतिसंकल्प्यपांथःक्लेशमवाप्नुयात् ॥ १२९० ॥ तथाकामानवाप्स्यामीत्येवंसंकल्प्यकामु
कः ॥ प्रवृत्तोदुःखमाप्नोतिसुखमाप्नोतिवानवा ॥ १२९१ ॥ नसुखंसार्वभौमस्यविद्यतेनबिडौजसः ॥ ब्रह्म
णोनसुखंयत्स्यात्पुंसःकामविवर्जनात् ॥ १२९२ ॥ अकामस्यात्मविज्ञानमहंब्रह्मेतिजायते ॥ जातेतस्मिन्न
निर्यातितस्यलिंगंमनोबहिः ॥ १२९३ ॥ अंतःशरीरएवैतेप्राणालिंगशरीरगाः ॥ तेनसार्धंविलीयंतेध्वांतदी
पोयथागृहे ॥ १२९४ ॥

र्थः ॥ १२९१ ॥ परिणामादिकमालोचयतांनिष्कामानांदृष्ट्यातुब्रह्मलोकपर्यंतंनसुखंकिंत्वात्मन्येवतदित्याह नसुखमिति बिडौजसइं
द्रस्य ॥ १२९२ ॥ कामाभावस्यब्रह्मात्मविद्याद्वारामोक्षप्रयोजकतांविवृणोति अकामस्येति ब्रह्मलोकेच्छादिरूपप्रतिबंधकाभावेसतिम
हावाक्येनात्मसाक्षात्कारोजायतेततःकर्मणांबीजशक्तिदाहात्कर्मारभ्यायालोकांतराकारायाःसमुत्क्रांतिहेतोदीर्घभावनायाअसंभवात्
तस्यविदुषोमनःप्रधानंलिंगंसूक्ष्मंशरीरंबहिःस्थूलशरीरान्ननिर्गच्छति तथासति सूक्ष्मशरीरगताःप्राणाःसेंद्रियवायवस्तेनमनसासहशरीरा
भ्यंतरएवविलीयंतेस्वविवर्तोपादानेविलयंयांतिगेहांतर्देशेदीपवदितिद्वयोरर्थः ॥ १२९३ ॥ १२९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वेवंविदुषःकरणवर्गस्यविलयेपिशेषीचिद्धातुःक्कगच्छतीतिचेन्नकुत्रापीत्याह ब्रह्मरूपइति अयंविदुषआत्मातत्त्वज्ञानात्पूर्वमाद्यतब्रह्म भावआसीत् इदानींतुनिरावरणःसर्वविशेषविनिर्मुक्तश्चविद्वद्दृष्ट्याभवतिअज्ञानूभतितुईशःसर्वेश्वरोभवतीत्यर्थः ॥ १२९५ ॥ आरोपितपरिच्छेदनिवृत्तौब्रह्मभावेदृष्टांतमाह महाकाशमिति यथामहाकाशमेवघटनाशात्पूर्वंघटेनभःघटावच्छिन्नाकाशरूपमभूत्तच्चघटनाशोत्तरंमहाकाशमेवभवतितथाविदुषआत्मापीत्यर्थः ॥ १२९६ ॥ उक्तार्थमुपपादयति यथाविशुद्धइति यथाविशुद्धमाकाशमज्ञातंसतृगंधर्वनगरादीनांक्षेत्रंतथाआत्मावस्तुतोविशुद्धोनिष्कामश्चकल्पिताज्ञानेनविषयीकृतोजगद्वृक्षस्यकामबीजकस्यक्षेत्रंतत्त्वज्ञानाग्निसंपर्कात्तस्यक्षेत्रभावेसवीजेविप्लुतेतुजगद्वृक्षोनभविष्यतीतिद्वयोरर्थः ॥ १२९७ ॥१२९८ ॥ उक्तमर्थमेवसंक्षिप्याह आत्मेति अयमात्मात

ब्रह्मरूपःपुरैवायमहंब्रह्मेतिबोधत. ॥ ब्रह्मैवभवतीशःसप्राणनाशादनंतरं ॥ १२९५ ॥ महाकाशंयथापूर्वंघटनाशाद्घटेनभः ॥ घटनाशेमहाकाशंभवत्येवंपुमानिह ॥ १२९६ ॥ यथाविशुद्धआकाशेगंधर्वनगरादिकं ॥ आकाशाज्ञानतोभूयादात्माज्ञानात्तथाजगत् ॥ १२९७ ॥ निष्कामआत्मनीशेस्तिकामबीजोजगत्तरुः ॥ जायतेस्वात्मविज्ञानेबीजनाशाद्विनश्यति ॥ १२९८ ॥ आत्माज्ञानादयंजातकामःकामाज्जगत्त्रयं ॥ आत्मज्ञानाद्विनश्येत्तत्सर्वमज्ञानमात्मगं ॥ १२९९ ॥ अज्ञाननाशतःकामोमूलाभावाद्विनश्यति ॥ कामनाशाज्जगद्वृक्षोनिर्बीजोनभविष्यति ॥ १३०० ॥ यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः ॥ तदामर्त्योमृतोभूयाद्ब्रह्माप्यास्मिन्कलेवरे ॥ १३०१ ॥ अहंमानस्यसंत्यागीदेहेदेहाद्विनिर्गतः ॥ सतिदेहेपिचेत्सस्याद्देहस्थोपिनदेहगः ॥ १३०२ ॥

त्क्षेत्रभावापादकमज्ञानमितिद्वयोरर्थः ॥ १२९९ ॥ १३०० ॥ उक्तार्थदार्ढ्यापादकस्यनिष्कामत्वेजीवतोपिमुक्तिःकिमुतविदेहस्येतिप्रदर्शकस्यमंत्रस्यार्थमुपबृंहयति यदेत्यूनविंशतिश्लोकैः यदास्यपुंसोहृदिबुद्धौश्रिताःस्थूलसूक्ष्मरूपाभ्यांवर्त्तमानाःसर्वेकामाइच्छाभेदाःपुत्रैषणादिसंज्ञाःप्रमुच्यंतेशांताभवंतितदामर्त्योमरणधर्माअपिपुमान्अस्मिन्नेवदेहेब्रह्मआप्यलब्ध्वाअमृतोभवतीत्यर्थः ॥ १३०१ ॥ एतदुपपादयति अहमिति देहादिष्वध्यासरूपोभिमानएवकामानांप्रयोजकस्तस्याभिमानस्यदेहविषयकस्यत्यागीदेहाद्विनिर्गतोजनःसर्वोभवति यदितुदेहेसतिविद्यमानेपिसोभिमानोनस्यान्निवर्तेततदादेहस्थोपिजीवन्नपिनचदेहगःमुक्तएवेत्यर्थः ॥ १३०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तत्वेहेतुतयामोक्षलक्षणयोगमाह कामानामिति हृदयबुद्धिसाक्षिणियःकामानांबुद्धिधर्माणांवासआरोपःसंबंधस्तेषांकामानांसर्वात्मनासमूलानांनाशोबाधस्तुमोक्षइति ॥ १३०३ ॥ सचात्यंतिकःकामनाशस्तन्मूलाविद्योच्छेदकब्रह्मज्ञानेनयदिजीवनावस्थायामेवजन्येततदाजीवतएवमुक्तिकोवारयेदित्याह ब्रह्मेति इदंकाममूलोच्छेदकंब्रह्मज्ञानं ॥ १३०४॥ यदाब्रह्मज्ञानंबंधोच्छेदकंतदाब्रह्मसाक्षात्कारएवमोक्षलक्षणमित्याह आनंदेति ब्रह्मसाक्षात्कारःसतिदेहेमुक्तिर्जीवन्मुक्तिलक्षणंदेहेगतेविदेहावस्थायांयामुक्तिस्तांप्रतिब्रह्मसाक्षात्कारस्यलक्षणत्वंतुहिनिश्चितमेव तस्यतावदेवचिरमित्यादिच्छंदोगश्रुतेरित्यर्थः ॥ १३०५ ॥ ननुनित्यमुक्तत्वेनप्रसिद्धस्यात्मनःकीदृशोबंधोयःसाक्षात्कारेणनिवर्त्यतेइत्याशंकांवारयन्बंधस्वरूपंविशदयति कामानामितित्रिभिः कामानांयद्बुद्धिस्थानंवासउक्तविधःसस्वस्यात्म

कामानांहृदयेवासःसंसारइतिकीर्तितः॥ तेषांसर्वात्मनानाशोमोक्षउक्तोमनीषिभिः॥ १३०३॥ ब्रह्मज्ञानाद्विनानायंकामोनश्यतिसर्वथा ॥ जीवतश्चेदिदंजातंसतिदेहेविमुक्तिभाक्॥ १३०४ ॥ आनंदात्मनईशस्यस्वयंज्योतिःस्वरूपिणः॥ साक्षात्कृतिर्भवेन्मुक्तिःसतिदेहेगतेस्तिहि॥ १३०५॥ कामानांहृदयेस्थानंबंधउक्तोमनीषिभिः॥ स्वस्यनायंतथातेनजीवन्मुक्तःप्रकीर्तितः॥ १३०६॥ आत्मनोवरणंमायाचिदंशःकामएववा॥ बंधउक्तोद्वयाभावाद्ब्रह्मविन्मुक्तईरितः॥ १३०७॥ संबंधेनात्मनोदृश्यंपश्येच्चेद्बंधईरितः ॥ विनातेनैषसंपश्येन्मुक्तोजीवन्भवेत्पुमान्॥ १३०८॥

नोबंधः अयंविद्वांस्तुतथावर्णितबंधवान्नभवतितेनबंधाभावेनजीवन्नपिमुक्तउच्यतइत्यर्थः ॥ १३०६ ॥ बंधसर्वस्वमाह आत्मनइति अस्तिअविद्यायाःशक्तिद्वयमावरणविक्षेपनामकं तत्रविक्षेपशक्तेरप्यस्तिरूपद्वयं एकंप्रपंचभानापादकंद्वितीयंप्रपंचेरागोत्पादकमिति तत्र यदात्मनोवरणंमायाआवरणशक्तियुक्तामायाऽविद्या यश्चविक्षेपशक्तिरूपःकामआसक्तिरूपोरागः कीदृशः चिदंशःपरिपूर्णायाश्चितोंऽशत्वस्यपरिच्छिन्नत्वरूपस्यप्रयोजकःएतदुभयात्मकोबंधोयदानिवर्ततेतदाजीवन्मुक्तिः यदातुप्रपंचभानापादकोविक्षेपशक्तिभागोपि निवर्ततेतदाविदेहमुक्तिरितिभावः ॥ १३०७ ॥ संबंधेनेति यदिदृश्यजातंशरीरत्रयरूपमात्मनःसंबंधेनतादात्म्यरूपेणस्वत्वरूपेणवासंबद्धंदृश्यंपश्यतितदायंपुमान्बद्धइतिवाच्यःअसंगात्मदर्शीतुजीवन्मुक्तइतिनिश्चयइत्यर्थः ॥ १३०८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वेवंविधस्यजीवन्मुक्तस्यकथंलोकयात्रानिर्वाहइतिशंकांनिदर्शनैःपरिहरति कर्मणेत्यादिना कर्मणाप्रारब्धविपाकेनप्रयुक्तंयथाप्रमत्त स्यबालादेश्चआहारादिकंशुभमशुभंवाभवत्येवतथाऽस्यापीत्यर्थः ॥ १३०९ ॥ अस्यजीवन्मुक्तस्यचित्तंतुसर्वाधिष्ठानचिताव्यग्रंनारो पितविशेषेष्वादरंदधातीत्यत्रदृष्टांतमाह गर्भेति यथागर्भगोबालोनवममासात्पूर्वंनानाविधान्मातृभुक्तान्नरसान्भुंजानोपिविशेषतोनवे त्तितथायमपीति ॥ १३१० ॥ तथास्वरूपनिष्ठातारतम्यानुसारेणमासजातबालादयोप्यत्रदृष्टांताइत्याह बालोन्मत्तेति ॥ १३११ ॥ अस्यचित्तंयदात्मविवेकप्रवणमेवभवतितत्रदृष्टांतउच्यते यथेति यथाऽशोकवनिकान्यायेनरावणेनकुत्रचिद्वनेनिधेयासीताअशोकवनि

कर्मणायद्वदेवस्याप्रमत्तादेःशुभाशुभं॥ आहारादिकमेवंस्याज्जीवन्मुक्तस्यदेहिनः ॥ १३०९ ॥ गर्भवासे स्थितोजंतुर्नवमान्मासतःपुरा॥ रसान्नानाविधान्यद्वद्भुंजानोपिनवेत्त्यमून्॥ १३१०॥ बालोन्मत्तजडादिर्वा नानाभोगान्समाप्नुवन्॥ नवेत्तितद्वदेवायंजीवन्मुक्तःपुमानपि॥ १३११॥ यथाकश्चित्प्रमत्तोत्रकिंचिद्देवप्र पद्यते॥ आत्मानमेवमेवैषजीवन्मुक्तःप्रपद्यते॥ १३१२ ॥ सुशीलोत्रयथाकश्चिद्देहीदैवादियोगतः॥ विस्मृ तात्मस्वरूपःसन्कुरुतेनिंदितंनहि॥ १३१३॥ शांतोदांतस्तथैवायंसर्वकामविवर्जितः॥ निंदितंकुरुतेनैवजी वन्मुक्तःकदाचन॥ १३१४॥ वासनाभिर्यथामत्तःशास्त्रार्थान्प्रतिपद्यते॥ वासनाभिस्तथाचायंजीवन्मुक्तो पिनोगुरुः॥ १३१५॥

कायामेवधृतेत्यर्थकेनप्रमत्तादिचित्तंकुत्रचिदेकत्रविषयेप्रायशोलग्नंभवतितथास्यमुक्तस्यचित्तमात्मविषयिकायांप्रतिपत्तौविचाररूपा यामेवलगतीत्यर्थः ॥ १३१२ ॥ अस्यनिषिद्धाचरणेप्रवृत्त्यभावमपिदृष्टांतेनोपपादयति सुशीलइतिद्वाभ्यां यथाकश्चिद्देहीसुशीलःस दाचारपरोदैववशादुत्पन्नप्रमादादिरोगवशात्स्वकीयंकुलादिप्रभावंविस्मरन्नपिपूर्वाभ्यासेननिंदितंनकरोतितथाजीवन्मुक्तोपिमुमुक्षुदशा नुष्ठितशमाद्यभ्यासवशान्निंदितेनप्रवर्ततइतिद्वयोरर्थः ॥ १३१३॥ १३१४॥ तस्यशास्त्रार्थप्रवृत्तिंदर्शयति वासनाभिरिति यथाकश्चित्पं डितउन्मादादिरोगव्याप्तोप्यभ्यस्तान्शास्त्रार्थानेवप्रकाशयतितथाअस्माकंजिज्ञासूनांगुरुर्जीवन्मुक्तोपीत्यर्थः ॥ १३१५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुयोग्यायोग्यशिष्यभेदज्ञानाधीनमुपदेशव्यवहारंसजीवन्मुक्तोऽद्वैतात्मदर्शीकथंकरोतीतिशंकामपिदृष्टांतेनैवपरिहरति मायावीविद्वा भ्यां यथाकश्चिन्मायावीसर्वशास्त्रज्ञःस्वयंकृतैर्बहुभीरूपैःस्वस्यएकाकित्वेऽद्वितीयत्वेविस्मृतिंप्राप्तइवेतिशेषः ईदृशःसंस्तेषांपाठनादिकं कुर्यात्यथाचसवस्तुतोनिर्भेदोपिसभेदइवतथायंजीवन्मुक्तोविद्वानानंदात्मरूपेणाद्वितीयोपिप्रारब्धभोगोपयुक्ताविद्यालेशेनगुरुशिष्या दिभेदमपिपश्यतीतिद्वयोरर्थः ॥ १३१६ ॥ १३१७ ॥ तस्यजीवन्मुक्तस्यविशेषतःप्रपंचंविस्मृत्यजीवनमात्रप्रयुक्तंभेददर्शनंनबंधायभ वतिमिथ्यात्वेननिश्चितत्वादित्येतदपिदृष्टांतेनविशदयति यथेतित्रिभिः यथाकश्चित्स्वप्नावस्थांगतःस्थूलदेहविस्मरणंसर्वसुप्तसाधारणंधर्मं

मायावीविस्मृतिंप्राप्तःसर्वशास्त्रविशारदः ॥ एकाकित्वेस्वरूपस्यस्वकृतैर्बहुरूपकैः ॥ १३१६ ॥ सयथागुरु शिष्यादिभेदोनिर्भेदएवहि ॥ आनंदात्मातथाचायंगुरुशिष्यादिभेदवान् ॥ १३१७ ॥ यथाशयानःपुरुषःस्थू लदेहंनवेत्त्यसौ ॥ स्वप्नान्पश्यन्हिसस्वप्नेस्वप्नाइत्येवमन्यते ॥ १३१८ ॥ कदाचिद्दैवयोगेनस्वयंशास्त्रार्थतत्त्ववि त् ॥ वासनावासितस्तत्रह्युपदेशंकरोतिच ॥ १३१९ ॥ जीवन्मुक्तस्तथादेहद्वयंनैवावगच्छति ॥ साज्ञानंतद्धि जानन्सकुरुतेचोपदेशनम् ॥ १३२० ॥ अभिमानस्यसंत्यागेदेहेसत्यपिदेहिनः ॥ तामसस्यापिसर्पादेर्दुःखं तज्जंनजायते ॥ १३२१ ॥ विदुषःकिमुतैतत्स्याद्धीमतोतिविवेकिनः ॥ दुःखंदेहोत्थितंयस्माद्देहेहंकारभाङ्न सः ॥ १३२२ ॥

धारयन्कदाचिद्दैवयोगेनस्वप्नपदार्थानपिइमेस्वप्नाःस्वप्नपदार्थाइत्येवंमन्यमानस्तत्रनसज्जेतनासक्तोभवेत्तथाभ्यस्तशास्त्रवासनयातदु पदेशेप्रवर्तेततथायंविद्वानपिसाज्ञानंसकारणशरीरंस्थूलसूक्ष्मरूपंदेहद्वयंसमष्टिव्यष्टिरूपंमिथ्यात्वेनजानन्नुपदेशादिकंकरोतिनबद्ध्यतेचे तित्रयाणामर्थः ॥ १३१८ ॥ १३१९ ॥ १३२० ॥ ननुजीवन्मुक्तस्यसशरीरत्वेनोपलभ्यमानस्यबंधावस्थायाःकोविशेषइत्याशंकावारक स्यतद्यथेत्यादेस्तेजएवेत्यंतग्रंथस्यार्थंवर्णयति अभिमानस्येत्येकविंशतिश्लोकैः तामसस्यसर्पादेरपिदेहेकंचुकरूपेअभिमानस्यत्यागे सतिकंचुकखंडनादिकृतंदुःखंनभवतिकिमुतसत्त्वातिशयशालिनोविदुषोदेहप्रयुक्तंदुःखंनभवतीतिद्वयोरर्थः ॥ १३२१ ॥ १३२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तंविशदयति कंचुकमितिद्वाभ्यां यथासर्पस्त्यक्तंकंचुकंपश्यन्नपिनसज्जतेतद्धर्मानात्मनिमत्वानदुःखितोभवतीतियावत् कीदृशं उल्वा ख्यंउल्वंगर्भवेष्टनीभूतंसूक्ष्मंचर्म तत्तुल्यत्वेनतन्नाम्नाव्यवहर्तव्यं पुनःकीदृशं स्वस्यमृतकंदेहंस्वकीयमृतदेहसमं तथाविद्वानपीमंवर्त्तमानंदे हंविवेकेनत्यक्तंपश्यन्नपिनपश्यतीतिद्वयोरर्थः ॥ १३२३ ॥ १३२४ ॥ अभिमानलक्षणसंबंधेनशरीरविशिष्टएवपुंसिदुःखंनत्यक्ताभि मानइत्येतद्दृष्टांतेनविशदयति भूतेति यथाभूतेनदेवजातिविशेषेणाविष्टंव्याप्तंशरीरंपरशरीराभिमानविशिष्टंभूतमितियावत् तत्कर्तृदुःखंप्र हारादिकृतंसुखंपूजादिकृतंचप्राप्नोति यत्तुतत्रशरीरेभूंततच्छरीराभिमानहीनंसत्तेसुखदुःखेनाप्नोति एवंजीवन्मुक्तस्यदेहोप्यभिमानल

कंचुकंहियथासर्पस्त्यक्त्वाद्वारिबिलस्यच॥ उल्वाख्यंमृतकंस्वस्यदेहंपश्यन्नसज्जते॥ १३२३॥ एवंविद्वानिमं देहमभिमानविवर्जितः॥ पश्यन्नपिनतेनायंसज्जतेसंगवर्जितः ॥ १३२४॥ भूताविष्टंयथादेहंसुखंदुःखंच गच्छति॥ नसुखंनापिदुःखंवाभूतंतत्राधिगच्छति॥१३२५॥ एवमुक्तस्यदेहोपिसुखदुःखेसमाप्नुयात्॥कर्म तोनैवमुक्तोयंपुण्यपापविवर्जितः॥ १३२६॥ शिशोर्यथाभवेल्लोकेविज्ञानंसुखदुःखयोः ॥ रागद्वेषविहीन स्यतद्वन्मुक्तस्यसर्वदा॥ १३२७ ॥ यथात्रस्थविरोरोगीत्यशक्तोमृतिमागतः ॥ सुखदुःखेपरेच्छायांप्राप्नुया दात्मवित्तथा॥ १३२८ ॥

क्षणसंबंधेनयदाव्याप्तोभवतितदासुखदुःखेकर्मकृतेप्राप्तोभवतितद्देहगतोविद्वांस्तुशरीरविविक्तःसुखदुःखेनैवाप्नोतीतिद्वयोरर्थः॥१३२५॥ ॥ १३२६ ॥ एवंजीवन्मुक्तस्यसमाधिकालेप्रारब्धकर्मफलाननुभवउक्तोथतस्यव्युत्थानकालेपिसुखदुःखयोरनुभवेबद्धेभ्योविशेषमा ह शिशोरिति यथाऽतीतानागतचिंताशून्यंशिशुकर्तृकंसुखादिज्ञानंरागाद्यजनकंतथाऽस्यापीत्यर्थः ॥ १३२७ ॥ किंचतेसुखदुःखेअपि परेच्छासाध्यव्यापारादेवविदुषोभवतइत्याह यथात्रेति यथालोकेकश्चिद्वृद्धोरोगकृताशक्तेर्हेतोर्मृतिंमृत्युसमावस्थांप्राप्तःसन्परेषांव ध्वादीनामिच्छायांनिमित्तभूतायामेवसुखादिकंप्राप्नोतितथायमपीत्यर्थः ॥ १३२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यलौकिकीलाभालाभौहर्षादिकंनकुरुतइत्येतद्दृष्टांतेनस्फुटयति प्रसंगादितिद्वाभ्यां यथाकश्चित्कर्षकोभूयसाधनेनतुष्टमनाःकदाचित्क्षेत्रंगतःसंस्तत्रसस्यसंपत्तेरलाभंपश्यन्यद्वन्नविषीदतितोलाभंवापश्यन्नहृष्यतितथायंविद्वानपिब्रह्मानंदतुष्टोलौकिकलाभालाभयोर्हर्षादिकंनाप्नोतीतिद्वयोरर्थः ॥ १३२९ ॥ १३३० ॥ तस्यचित्तमात्मचिंतायामेवप्राधान्येनवर्त्ततइत्येतद्दृष्टांतेनदर्शयति भृतकइति यथाभृतकोवेतनोपजीवीभृतिवेतनमेवमनसाचिंतयन्गृहस्वामिवन्नात्यल्पंमध्यविधंवद्धवाकर्मकरोति कीदृशोवेतनकालावधिदर्शी तथायंजीवन्मुक्तोपिलौकिकव्यापारेष्वव्यवस्थितोऽतत्परआत्मदर्शनप्रधानएवतिष्ठतीतिद्वयोरर्थः ॥ १३३१ ॥ १३३२ ॥ तस्यलोकयात्रा

प्रसंगात्क्षेत्रमायातोयथाकश्चिद्धनीपुमान्॥ अलाभेनविषादीस्याल्लाभेत्दृष्टोनचात्रसः॥१३२९॥ लाभालाभौतथैवास्यजीवन्मुक्तस्यसर्वदा॥ हर्षंचैवविषादंचनसंजनयतःक्वचित्॥ १३३०॥ भृतकोभृतिमेवेच्छन्नात्यल्पंवद्धवाक्वचित्॥ स्वामीवकुरुतेकर्मकालावधिविलोकनः॥ १३३१॥ जीवन्मुक्तस्तथैवायंव्यापारेष्वव्यवस्थितः॥ आत्मानमवलोक्यैवतिष्ठत्यामरणंसदा ॥ १३३२ ॥ दारुयंत्रंयथासूत्रैर्गच्छेत्तत्सर्वतोदिशम्॥ कर्मसूत्रैस्तथादेहोजीवन्मुक्तस्यगच्छति ॥ १३३३॥ यथाचर्ममयोहस्तीसुखदुःखकरोभवेत्॥ कर्मानुसारतःपुंसांजीवन्मुक्तवपुस्तथा॥ १३३४॥ आनिपातंयथागच्छेद्बाणोमुक्तोधनुष्मता॥ आरब्धकर्मभिस्तद्वद्देहोप्यामरणंव्रजेत्॥ १३३५॥ भूताविष्टोयथाकर्ताकुर्वन्वेत्तिनकिंचन॥ व्यवहारंतथाकुर्वन्जीवन्मुक्तोनवेत्त्यमुं॥ १३३६ ॥

मचिंतयतोपिप्रारब्धकर्मवशाल्लोकयात्रानिर्वहतीतितिनिदर्शयति दारुयंत्रमिति अत्रसूत्रबद्धंदारुयंत्रंतदेवयत्कार्पाससूत्राणांखनिभूतंतस्यभ्रमणंयथासूत्रप्रयुक्तंप्रसिद्धंतथाविद्वद्देहस्यप्रारब्धकर्मरूपसूत्रप्रयुक्तमित्यर्थः॥ १३३३॥ वीतरागस्यविदुषःशरीरमेवसुखदांदुर्खदांचभावानुसारेणहर्षादिकरंभवतीत्यत्रदृष्टांतमाह यथाचर्मेति चर्ममयःकुतुकायचर्मणानिर्मितः ॥ १३३४ ॥ शरीरयात्रार्थंमनोव्यापाराभावेपिपूर्वसंस्काराद्देहप्रवृत्तौदृष्टांतमाह आनिपातमिति ॥ १३३५ ॥ देहेंद्रियादिभिःकृतमपिकर्मब्रह्मनिष्ठावेशवशान्नजानातीतिदर्शयति भूतेति ॥ १३३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतादृशीमवस्थांप्राप्तोविद्वान्सशरीरतयादृश्यमानोप्यशरीरोऽमृतश्चवाच्यस्तद्दृष्ट्यासविलासाज्ञानदाहादितिवदन्नशरीरामृतपदयोस्तत्र समन्वयंदर्शयति एतादृशीमिति जनेःशरीरधर्मस्याभावादमृतः॥ १३३७॥ तत्रहेतुतयाप्राणादिशब्दैःसूचितमखंडब्रह्मात्मत्वमाह प्राणस्येति यतोयंविद्वान्वस्तुतःप्राणादिवर्जितत्वेपिसन्निधिमात्रेणसर्वप्राणानांचालकत्वात्प्राणपदलक्ष्यमद्वितीयत्वाद्ब्रह्मपदलक्ष्यंसर्वांतरचित्प्र

काशरूपत्वात्तेजःपदलक्ष्यमेवकारसूचिताखंडात्मकंचयद्वस्तुतद्रूपएवभवतीत्यर्थः ॥ १३३८ ॥ एवंज्ञेयंतत्त्वंज्ञात्वापिराजापुनःसाधनविशिष्टांविद्यांश्रोतुकामःपूर्ववत्सहस्रदक्षिणादानवाक्यमेवोवाचेत्याशयकस्यकंडिकाशेषस्यार्थमाह एवमितित्रिभिः एवंतत्त्वंज्ञात्वापिरा

एतादृशींयदावस्थांप्राप्तोभवतिमानवः॥ तदाविनाशमायातेसतिवास्मिन्शरीरके॥ शरीरत्रयहीनःस्यादमृतोजन्यभावतः ॥ १३३७॥ प्राणस्यायंभवेत्प्राणःप्राणापानविवर्जितः ॥ स्वसजातिविजात्युत्थभेदत्रयविवर्जितः॥ ब्रह्मैवात्मप्रकाशत्वात्तेजएवनचापरम् ॥ १३३८॥ एवमात्मानमाज्ञायराजासम्यग्गुरोर्मुखात्॥ कारणंब्रह्मविज्ञानेज्ञातवान्नमहीपतिः॥१३३९॥ नहिशब्दःश्रुतोऽशुद्धमनसःप्रमितिप्रदः॥ इत्यभिप्रायवान्भूयोराजापूर्ववदब्रवीत्॥ १३४०॥ प्राप्तविद्योस्मिसोहंतेयाज्ञवल्क्यददाम्यहं॥ गवांसहस्रंविद्यायानिष्क्रयंमुनिसत्तम॥१३४१ ॥इत्युक्तेयाज्ञवल्क्योपिमंत्रब्राह्मणभागतः ॥ साधनंविविधंतस्माउक्तवान्मुनिसत्तमः ॥१३४२॥ पंथाःसूक्ष्मोतिविततःपुराणःसुखदोनृणाम्॥ विषयीकृत्यमांजातोबोधश्चरमजन्मनि ॥१३४३॥

जाब्रह्मविद्यासाधनंयतोनज्ञातवानित्यतःपूर्ववदब्रवीत् कीदृशोराजा इत्यभिप्रायवान् इतिकिं अशुद्धमनसाश्रुतोपिशब्दःप्रमितिप्रदःफलाधायकोनभवतीत्यतःसत्वशुद्धिसाधनमपिश्रोतव्यमितीतिद्वयोःसंबंधः॥१३३९॥१३४०॥ पूर्ववद्वाक्यमभिनयति प्राप्तेति॥१३४१॥ एवंपृष्टोमुनिर्मंत्रैर्ब्राह्मणवाक्यैश्चससाधनांविद्यांवक्तुमुपचक्रमेइत्याह इत्युक्तेइति ॥ १३४२ ॥ तत्रब्रह्मविद्यैवमोक्षमार्गइत्यवधारकस्याणुरित्यादेःप्रथममंत्रस्यार्थमाह पंथाइतिपंचभिः साक्षात्कृतात्मतत्त्वोमुनिरेवमाह एवंकथं योयंचरमजन्मनिमांममात्मानंविषयी ॥१००॥
कृत्यबोधोजातःसएवसूक्ष्मादिविशेषणकोमोक्षस्यपंथाइतिसंबंधः ॥ १३४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषपंथाअतिदुर्गमोमयैववेदमनुसृत्यज्ञातःफलवत्तयादृष्टश्चेत्याह ज्ञातइति सर्वदः सर्वात्मभावप्रदोयोयंपन्थाःमयैवसर्वज्ञेनज्ञातइतिसंबंधः ॥ १३४४ ॥ मयैवेत्येवकारोऽयोगव्यवच्छेदार्थोनत्वन्ययोगव्यवच्छेदार्थइत्यभिप्रायेणतत्फलमितरेषामपिसाधनसंपन्नानांभवतीतिदर्शयति तेनेति तेनज्ञानरूपमार्गेणअन्येविद्वांसोपिब्रह्मानंदरूपंस्वर्गंगच्छंतीतिसंबंधः ॥ १३४५ ॥ तत्फलस्येतरमार्गगम्यफलेभ्योवैलक्षण्यंगंतृविशेषणैराह विलीनाइतिद्वाभ्यां विलीनाःसिंधौसैंधवपिंडवत्तद्भावंगतास्तिष्ठंतिजीवंतोपीतिशेषः देहाभिमानत्यागादूर्ध्वंनिर्बंधनामुक्ताः श्रुतौतूर्ध्वशब्दस्यौकारश्छांदसइतिद्वयोरर्थः ॥ १३४६ ॥ १३४७ ॥ केचिन्मणिप्रभायांमणिदर्शिनइवसुषुम्नानाडीरूपंमो

ज्ञातोमयैवयोनित्यंसर्वदःसर्वदेहिनां॥ मदन्यःकोमुमध्वानंजानीयादतिदुर्गमम्॥ गुरुर्वेदात्मकस्तस्माज्ज्ञानाम्येनमहंमुनिः॥ १३४४॥ तेनमार्गेणविद्वांसोब्रह्मचर्यादिसाधनाः॥ अपिगच्छंत्यतिसुखंस्वर्गलोकंस्वयंप्रभम्॥ १३४५॥ विलीनाइवतिष्ठंतिगत्वानंदात्मरूपकम्॥ दुःखैर्नानाविधैर्मुक्तानिश्चलाःस्वात्मनिस्थिताः॥ १३४६॥ रागद्वेषादिनिर्मुक्ताअज्ञानेनविवर्जिताः॥ देहाभिमानसंत्यागादूर्ध्वंनिर्बंधनाजनाः॥ १३४७॥ हार्दादित्येतथाबाह्येसंलग्नोयोत्रवर्तते ॥ ब्रह्मज्ञानाख्यमार्गेणसोंतएकीभवेदपि ॥ १३४८॥ सगुणब्रह्मलोकस्यमार्गःसूर्येतथाहृदि॥ रश्मिनाडीमयोनित्यंवर्ततेराजमार्गवत्॥ १३४९॥ तस्मिन्शुक्लंतथानीलंपिंगलंहरितंतथा॥ लोहितंचेत्येवमादिरूपमाहुर्मनीषिणः॥ १३५०॥

क्षमार्गमाहुस्तन्मतप्रदर्शकस्यद्वितीयमंत्रस्यार्थमाह हार्देतिपंचभिः यःसुषुम्नारूपोमार्गोहृत्कमलगतादित्यमारभ्यबाह्यादित्येनसंबद्धोवर्ततेसमार्गोंतेब्रह्मणासहमोक्षकालेब्रह्मज्ञानाख्यमार्गेणसहएकीभवतितुल्यफलोभवतीत्यर्थः ॥ १३४८ ॥ तमेवमार्गमभिनयति सगुणेति सूर्येहृदिचसंलग्नइतिशेषः रश्मिनाडीमयःसूर्यात्प्रसृताभीरश्मिभिर्हृदयात्प्रसृताभिर्नाडीभिश्चनिर्मितः ताआदित्यात्प्रतायंतइत्यादिछन्दोगश्रुतेः ॥ १३४९ ॥ नानाविधान्नरसपूर्णत्वेनतस्यनानाविधान्वर्णानुपासकाःप्राहुरित्याह तस्मिन्निति तस्मिन्सगुणब्रह्मलोकमार्गे ॥ १३५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयंसगुणोपासकैर्गम्योमार्गःसाक्षिप्रत्यक्षसिद्धइत्याह चित्रेति सगुणब्रह्मणोहंयहेणोपासकस्तेनगच्छति तथापंचाग्निविद्गृहस्थोपितेनमा र्गेणगच्छति तथान्योपिगृहस्थभिन्नाश्रमीऊर्ध्वरेतस्त्वेनश्रुतौतैजसपदोक्तःस्वाश्रमकर्मात्मकपुण्यकर्त्तातेनगच्छतीतिद्वयोरर्थः भाष्यव्याख्यानभेदस्तुप्रमेयाविरोधात्समाधेयः ॥१३५१॥१३५२॥ अथब्रह्मविद्यारूपमार्गएवमुमुक्षुभिरुपादेयइतिबोधयितुंतदितरमार्गाणांहेयताबोधकयोस्तृतीयचतुर्थयोर्मंत्रयोरर्थमाह अंधमितिनवभिः येकेवलंकर्मिणोयागदानादिरूपकर्मात्मकाऽविद्याशालिनस्तेधूमादिकेनदक्षिणमार्गेणस्वर्गंगच्छंतोप्यंधंतमोदेहाभिमानरूपंव्रजंति कीदृशंतत्तमः पुत्रदारादिसक्तिद्वाराविवेकचक्षुःपिधायकत्वादंधमंधत्वकर

चित्रवर्णस्त्वयंपंथाब्रह्मणासाक्षिरूपिणा ॥ ज्ञातस्तेनव्रजेन्नित्यंसगुणब्रह्मचिंतकः ॥ १३५१ ॥ पंचाग्निवित्तथान्योपिगृहस्थान्यत्रयाश्रमी ॥ स्वाश्रमोचितमत्यंतंपुण्यकर्मविधायहि ॥ १३५२ ॥ अंधंतमोविशंत्येतेपुत्रदारादिमोहदं ॥ धूमादिमार्गतोगत्वास्वर्गंकेवलकर्मिणः ॥ १३५३ ॥ ब्रह्मेंद्रादीन्सुरांस्तद्वन्नानोपासनयाहिये ॥ आराधयंतिकर्मिभ्यस्तेधिकांसंस्तंतियुः ॥ १३५४ ॥ देवताविद्ययागत्वापरमैश्वर्यमत्रते ॥ कर्मिभ्योभ्यधिकासक्तादारादिषुभवंतिहि ॥ १३५५ ॥ विद्ययाकर्मणावापिसक्तादारसुतादिषु ॥ कंचित्कालंसुखंप्राप्यपश्चाद्दुःखमिमेययुः ॥ १३५६ ॥

मित्यर्थः एतेनकेवलपापकारिणःकीटपतंगादिभावलक्षणतृतीयमार्गगामिनोंधंतमोविशंतीतिकिमुवाच्यमितिसूचितं ॥ १३५३ ॥ तथोपासनारूपांविद्यामनुतिष्ठंतोपिदेवभावद्वारातिरमणीयविषयेष्वासक्त्यतिशयात्पूर्वेभ्योधिकंतमोविशंतीत्याह ब्रह्मेंद्रादीनिति स्पष्टं ॥ १३५४ ॥ आधिक्यंविशदयति देवतेति देवताविषयकयाविद्ययाउपासनयातेउपासकाःपरमैश्वर्यंलब्ध्वाकर्मिभ्योधिकांदारादिषुसक्तिलभंतइत्यर्थः ॥ १३५५ ॥ ततश्चतमसोहेतोर्जन्मपरम्परांदुःखरूपांतेकर्मिणउपासकाश्चप्रामुवंतीत्याह विद्ययेति इमेउपासकाःकर्मिणश्चविद्ययाकर्मणाचकंचित्कालंसुखलेशंप्राप्यपश्चाज्जन्मपरंपरारूपंदुःखंययुःप्रापुरिति ॥ १३५६ ॥ ॥१०१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्माज्ञानरूपतमसःफलमेवदुःखात्मकसंसाररूपंदर्शयति असुखाइति नामेतिप्रसिद्धौ लोकाःकर्मफलानि स्वपदार्थआत्मा॥१३५७॥ व्याख्यातमंत्रयोस्तात्पर्यार्थमाह एवमिति एतेछांदोग्यादौप्रसिद्धाःसर्वेषांसात्विकादिभेदशालिनांदेहिनांसंसारिणांसंबंधिनस्त्रयोदेवयान पितृयाणतृतीयस्थानाख्याःपंथानोयद्यप्येवंतमोद्वारादुःखमयलोकप्रदत्वेनकथितास्तथाप्येषविशेषोबोध्यइतिशेषः एषकः तेषांमध्ये योमार्गःकेवलमंधेतमसिवर्त्तमानस्तृतीयस्थानाख्यःसूचितःसब्रह्मज्ञानाख्यंतुरीयंपंथानंपरंपरयापिनस्पृशतियतोयाम्यपुरंनिरयजातंप्र त्येवगतः तथाचोक्तंगीतासु तानहंद्विषतःक्रूरान्संसारेषुनराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिष्विति ॥ १३५८॥यस्तुविद्यावतां संबंधीदेवयानाख्यःपंथायश्चसत्कर्मिणांसंबंधीपितृयाणाख्यस्ताविमौपरंपरयाचित्तशुद्धिद्वाराब्रह्मज्ञानाख्यमार्गोपयोगिनौभवतइत्याह

असुखानामयेलोकाअंधेनतमसावृताः ॥ मृत्वातानभिगच्छंतियेस्वज्ञानविवर्जिताः ॥ १३५७॥ एवमेते त्रयोमार्गाःकथिताःसर्वदेहिनां॥ अंधेतमसियोमार्गोब्रह्मज्ञानपथंहिसः ॥ नपरंपरयाप्येषयातियाम्यपुरंग तः ॥ १३५८ ॥ विद्याकर्मवतांमार्गावुक्तौतौकर्हिचित्क्वचित् ॥ ब्रह्मज्ञानपथंयातोजंतोर्भाग्योदयेसति ॥ १३५९॥ ब्रह्मविज्ञानमार्गेस्मिन्सुखदुःखविवर्जिते ॥ यातियस्तस्यसदृशाइमेमार्गास्त्रयोपिहि॥ १३६०॥ पुण्यविद्याफलेब्रह्मलोकेपुण्यफलेपिच ॥ स्वर्गभूम्यादिकेतद्वन्नरकेपाप्मनःफले॥ १३६१ ॥ सुखदुःखेशरीर स्यनात्मनस्तेकथंचन॥ शरीरस्थस्ततस्ताभ्यामसंबद्धःपुमानयं॥ १३६२॥

विद्येति यातःप्राप्तुतः॥१३५९॥यस्तुब्रह्मविद्याख्येतुरीयमार्गेचरतितेनत्रयोपितेमार्गाहेयाइत्याह ब्रह्मेति सदृशाहेयत्वेनेतिशेषः॥१३६०॥ तानेवत्रीन्मार्गान्फलभेदेनविभजते पुण्येति तत्रदेवयानाख्यःपंथाःसत्कर्मसमुच्चितसगुणविद्याफलेब्रह्मलोकेपर्यवसन्नः पितृयाणाख्य स्तुकेवलसत्कर्मफलेस्वर्गादिलोकेपर्यवसन्नः तृतीयस्थानाख्यस्तुकेवलपापफलेनरकेपर्यवसन्नइत्यर्थः ॥ १३६१ ॥ अथब्रह्मविद्याफ लंसर्वदुःखनिवृत्तिलक्षणंप्रतिपादयितुमात्मानमित्यादेःपंचममंत्रस्यार्थमाह सुखेतिद्वादशभिः सुखदुःखेशरीरस्योपाधेरेवधर्मौनात्मन स्तथासतिशरीरस्थोप्यात्माताभ्यांसुखदुःखाभ्यामसंबद्धइतिसंबंधः ॥ १३६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोप्यात्माशरीरधर्मानात्मनिमन्यमानस्तप्यतेइत्याह देहमिति अयंपुमान्स्वात्मतत्त्वेमूढत्वाद्देहतादात्म्यमापन्नः सन्देहमुपाधिसंसा
रधर्मैस्तप्यमानमनुसृत्यज्वलेत्तप्यतइव कुतः सुखेच्छायांसत्यांसुखस्यकामायभोगाय कीदृशःपुमान्सर्वोपिवस्तुतःसर्वात्मापि यद्वासर्वः
सर्वप्रकारःलोकेपंडितत्वादिनाप्रसिद्धोपीत्यर्थः ॥ १३६३ ॥ आनंदात्मेति यस्तुनरःअयंसाक्षादपरोक्षःपुरुषःपूर्णोहमस्मीत्येवमात्मानं
जानीयात्सकिमिच्छन्कस्यभोगायवाशरीरमनुसृत्यतप्येत् कीदृशमात्मानमेवंभूतात्सदात्महृदयेवर्त्तमानान्महेश्वरादभिन्नंसदात्महृदयेवर्तमा
नंच एवंकथमित्यतउक्तमानंदात्मेति निःशेषाणांसुखानांप्रतिबिंबभूतानांसागरोबिंबस्थानीयइतिद्वयोरर्थः ॥१३६४ ॥ १३६५ ॥ विदु

देहंहिसुखदुःखाभ्यांज्वलंतमनुसंज्वलेत् ॥ देहतादात्म्यमापन्नोमूढःसर्वोप्ययंपुमान् ॥ सुखंभूयादितीच्छायां
सुखकामायसर्वदा ॥ १३६३ ॥ आनंदात्मास्वयंज्योतिर्निःशेषसुखसागरः ॥ एवंभूतंसदासंतंहृदयेस्वेमहे
श्वरम् ॥ १३६४ ॥ आत्मानंचेद्विजानीयादयमस्मीत्यहंनरः ॥ किमिच्छन्कस्यकामायशरीरमनुसंज्वरेत्
॥ १३६५ ॥ विज्ञातात्मस्वरूपस्यमोहोयस्मान्निवर्तते ॥ तन्निवृत्तौनिवर्तेतदेहतादात्म्यधीरपि ॥ १३६६ ॥
तादात्म्यबुद्ध्यभावेयद्देहतापःकथंभवेत् ॥ सदानंदस्वरूपस्यपुंसोदेहात्परस्यहि ॥ १३६७ ॥ तादात्म्यमग्निना
यावदयसोविद्यतेत्रहि ॥ वन्हिंज्वलंतंज्वलतितावदेवतुलोहकं ॥ १३६८ ॥ तादात्म्येपगतेकस्माज्ज्वलंतम
नुसंज्वलेत् ॥ एवंसंज्वलतोप्यात्मादेहादन्योनसंज्वलेत् ॥ १३६९ ॥

षस्तापनिवृत्तौहेतुतयाविद्ययांकार्यकारणरूपाविद्ययोःप्रहाणमाह विज्ञातेति विज्ञातमात्मस्वरूपंयेनसतथातस्यमोहःकारणाविद्यात
त्कार्यदेहात्मधीश्चनिवर्ततइति ॥ १३६६ ॥ धर्म्यध्यासाभावेचतत्प्रयुक्तोदुःखादितद्धर्माध्यासःकथंस्यादित्याह तादात्म्येति परस्यभिन्न
स्य॥ १३६७॥एतद्दृष्टांतेनस्फुटयति तादात्म्यमितिद्वाभ्यां तादात्म्यमभेदाध्यासोलोहस्यवन्हिनासहयावद्वर्ततेतावल्लोहंवन्हेरनुकारिभव ॥१०२॥
तितादात्म्याभावेतुनैवंतथातप्यमानाद्देहादन्योविविक्तःसन्नात्मानैप्यतइतिद्वयोरर्थः ॥ १३६८ ॥ १३६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादात्म्याभिमानोलोकेपिदुःखदत्वेनप्रसिद्धइत्याह लोकेपीति पुत्रादिकंयदात्मत्वेनमन्यतेतदातद्दुःखेनदुःखितोभवति त्यक्तेनचपुत्रादा वात्माभिमानेनअन्यथातद्दुःखेनदुःखभागीनभवतीत्यर्थः ॥ १३७० ॥ त्यक्तेनचान्यथेत्येतदेवविशदयति यदेति यथामार्गगामीतटस्थत यादेवदत्तपुत्रादिसंबंधिदुःखंनाप्नोतीतितुरीयपादार्थः ॥१३७१॥१३७२॥ नकेवलंब्रह्मविषयादुःखनिवृत्तिरेवभवतिकिंतुविश्वकर्तृत्वल क्षणमीश्वरत्वंसर्वात्मभावश्चभवतीतिप्रदर्शकस्यषष्ठमंत्रस्यार्थमाह गुर्विति पञ्चभिः अत्रशरीरेंद्रियादिसंघातेदुर्विवर्तनेदुःखेनविशिष्टंव र्त्तनंप्रवेशमार्गोयत्रतत्तथातत्रगव्हरेइतियावत् अत्रप्रविष्टःस्वयंज्योतिरादिविशेषणआनंदरूपआत्मायेनाधिकारिणागुरुशास्त्रोपदेशेनज्ञा

लोकेपिपुत्रमित्रादिंयावदात्मतयापुमान्॥ गृह्णातितावदाप्नोतिदुःखंत्यक्तेनचान्यथा॥१३७०॥ यदाभिमा नसंत्यागंपुत्रादौकुरुतेपुमान्॥ नतद्दुःखंतदाप्नोतियथामार्गस्थितोपरः ॥ १३७१ ॥ एवंदेहाभिमानेनदुःखी भवतिनिर्गुणः॥ अभिमानस्यसंत्यागान्नसदुःखंसमाप्नुयात्॥ १३७२ ॥ गुरुशास्त्रोपदेशेनयेनज्ञातःपरःपु मान्॥ आनंदात्मात्रसंघातेप्रविष्टोदुर्विवर्तने॥१३७३॥ स्वयंज्योतिःस्वरूपोयंहार्दपद्मेव्यवस्थितः॥ सर्वगः सर्वसंघातात्सर्वथायोविलक्षणः॥ सविश्वकृद्भवेदस्यकर्ताविश्वस्ययेनहि ॥ १३७४॥ तस्यसर्वोभवेल्लोकः सुखदुःखप्रदोहियः॥ यथारज्जौभवेत्सर्वःसर्पधारादिकोपरः॥१३७५॥ब्रह्मलोकादिकोलोकोनरकांतोयईरि तः॥ मार्गत्रयेणसंप्राप्योनास्मादन्योस्तिकश्चन॥ १३७६॥ किंतुसर्वमिदंविश्वमधिदैवादिभेदभाक्॥ सद सद्रूपआत्मायंरज्जुःसर्पादिकंयथा ॥ १३७७॥

तःसविश्वकृत्पदार्थविश्वकर्तृत्ववान्भवतीतिद्वयोरर्थः ॥१३७३॥१३७४॥ तस्येति यःस्तंबादिब्रह्मलोकांतोलोकःसुखदुःखप्रदःप्रसिद्धः सर्वस्तस्यविदुषोब्रह्मात्मतयासर्वाधिष्ठानस्याधेयोभवेत् यथारज्जौकल्पितसर्पजलधारादंडादिकःसर्वोऽपरःप्रपंचोरज्ज्वधिकरणकइत्यर्थः ॥ १३७५ ॥ उक्तार्थेहेतुतयाकल्पितस्याधिष्ठानाद्भिन्नसत्ताकत्वाभावमाह ब्रह्मेतिद्वाभ्यां वर्णितोलोकःसर्वोप्यस्माद्भिन्नसत्ताकोनभव तिकिंतुसर्वमध्यात्मादिभेदभिन्नंस्थूलसूक्ष्मरूपंविश्वमस्यविदुषआत्मैवभवतिबाधासामानाधिकरण्येनेतिद्वयोरर्थः ॥१३७६॥१३७७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 अधिकारिदेहंलब्ध्वाययुक्तरूपआत्मानज्ञायतेतदामहतीअनर्थपरंपराभवतीतिप्रदर्शकस्यसप्तममंत्रस्यार्थमुपबृंहयति ततइत्यादिभिरष्टा
धिकपञ्चाशच्छ्लोकैः ततोब्रह्मज्ञानलक्षणस्यमार्गस्यसर्वोत्कृष्टफलकत्वाद्भवाटवीगतमार्गत्रयंहित्वाब्रह्मज्ञानरूपमार्गेणब्रह्माभिन्नंलोकंजी
वनावस्थायामेवसाधयेदित्यर्थः ॥ १३७८ ॥ त्रैवर्णिकेति जानीयादात्मज्ञानसाधनंवेदांतश्रवणादिकमनुतिष्ठेत् यतःसर्वंसर्वात्मकंब्र
 ह्मभवामः सद्योलभामहइत्यर्थः ॥ १३७९ ॥ अधिकारीति आत्मनिश्चयोयदिनभवितानभविष्यति तदामहापुरुषार्थप्रतियोगिकत्वा

ततोमार्गत्रयंहित्वासंसारवनमध्यगं॥ ब्रह्मबोधेनसूक्ष्मेणमार्गेणविततेनच॥ गच्छेज्झटितिराजेंद्रमृत्युर्यावन्नचाव्रजेत्॥ १३७८॥ त्रैवर्णिकशरीरेषुस्थित्वैवात्मानमव्ययं॥ जानीयाद्यस्यविज्ञानाद्भवामःसर्वमेवभो ॥ १३७९॥ अधिकारिशरीरेषुत्त्यात्मनोनिश्चयोनचेत्॥ भविताभविताहानिरस्माकंमहतीनृप॥ १३८०॥ दुर्लभंप्राप्यमानुष्यंविद्युत्संपातचंचलं॥ तथाकुर्वीतनयथापुनर्दुःखंसमाव्रजेत्॥ १३८१॥ आददीतकथंराजन्हस्ततःप्रच्युतंघृतं॥ सैकतेवह्निसंतप्तेयोपिस्याद्तिबुद्धिमान्॥ १३८२॥ सुलभाःसततंदेहानानायोनिषुभूपते॥ उच्चावचासुजंतूनांमानुषंपरिहायहि॥ १३८३॥ तत्रापिभारतेवर्षेत्त्यधिकारिवपुर्यदि॥ लभ्यतेनृपशार्दूलनातोधिकतमंक्वचित्॥ १३८४॥ विषयाःसंतिराजेंद्रदिविवानरकेपिवा॥ प्राणिनांतेनतेनैवदेहेनसदृशाःसदा॥ कर्मणातेनतेनैवप्राप्यंतेस्वयमेवहि॥ १३८५॥

न्महतीहानिर्भविष्यतीतिज्ञेयमितिशेषः ॥ १३८० ॥ दुर्लभमिति स्पष्टम् ॥ १३८१ ॥ लब्धज्ञानसामग्र्याःपुनर्दुर्लभत्वेदृष्टांतमाह आद
दीतेति यथासिकताव्याप्तदेशेपतितस्यघृतस्योपादानंदुष्करंबुद्धिमतापितथैतदपीति ॥ १३८२ ॥ तत्रमानुषभावादिसामग्रीदौर्लभ्यमे
वस्फुटयति सुलभाइति मानुषभावएवतावद्दुर्लभस्तत्राप्यधिकारिभावोदुर्लभतरःतल्लाभादधिकोलाभोनास्तीतिद्वयोरर्थः ॥ १३८३ ॥
॥ १३८४ ॥ विषयास्तुनदुर्लभास्तत्प्राप्तेस्तद्देहप्रापकैःकर्मभिरवश्यारभ्यत्वादित्याह विषयाइति हियतस्तत्तद्देहयोग्याविषयास्तेनतेन
तद्देहारंभकेणकर्मणाप्राप्यंतेऽतःसर्वत्रसुलभाइतिसंबंधः ॥ १३८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानुषदेहस्यसर्वेष्टसाधकत्वंदौर्लभ्यप्रयोजकंदर्शयति कर्मार्थमिति स्पष्टम् ॥ १३८६ ॥ तत्रपातालभोगप्रदंकर्मापिभारतखंडए वसाध्यमित्याह भारतादिति भारताद्भारतखंडेकृतात्सुकृताद्धेतोः भोगैःसुखसाधनैः ॥१३८७॥ नृत्यंत्यइवेति यत्रपातालेएताःप्रसिद्धा नागकन्यानृत्यंत्यइवेत्यस्यसविलासाइत्यर्थः पीनेषुउन्नतेषुचकुचद्वंद्वेषुप्रस्फुरद्विलसद्धरिचंदनंयासांतास्तथा ॥ १३८८ ॥ मणीति पुनःकीदृश्यः मण्याद्यावलीनांकांत्याकांतानिमनोहराण्याननान्येवसुधाकरायासांतास्तथा चित्रलिखिताभिःसदृश्यः धैर्यरूपस्यसर्वस्व

कर्मार्थंभारतंवर्षमनुजानांविनिर्मितं ॥कृत्वात्रविविधंकर्मविविधंदेहमाप्नुयात् ॥उच्चावचेषुलोकेषुदारपुत्रादिसंयुतं ॥ १३८६ ॥ भारतात्पुरुषोगच्छेत्पातालंस्वर्गतोधिकं ॥ सप्तभेदविभिन्नंयन्नानाभोगैःप्रपूरितम् ॥ १३८७॥ नृत्यंत्यइवयत्रैतानागकन्यामनोरमाः ॥ पीनोन्नतकुचद्वंद्वप्रस्फुरद्धरिचंदनाः ॥ १३८८ ॥ मणिमुक्तावलीकांतिकांताननसुधाकराः ॥ चित्रस्थितायथायूनांधैर्यसर्वस्वहारिकाः ॥ १३८९ ॥ स्वर्गेनतादृशीकाचिद्विद्यतेललनाभुवि ॥ कुतःसासुंदरीजात्यातादृशीस्यादिहांगना ॥ १३९० ॥ घनीभूतमिदंप्रायःसुकृतंतलवासिनां ॥ पातालमितियत्प्रोक्तंनानाभेदंविचित्रकं ॥ १३९१ ॥अत्रसूर्येणसदृशामणयःसंतिकोटिशः ॥ नागानांनागकन्यानांमस्तकेषुमहात्मनां ॥ १३९२ ॥ चंद्रबिंबसमप्रख्यैर्मुक्तैर्बिल्वसमानकैः ॥ प्रकंपितेषुगात्रेषुहाराःसंतिसहस्रशः ॥ १३९३ ॥ असूर्यंपश्यइत्येतत्स्मरणंसार्थकंमुनेः ॥ पातालेनहिकोप्यत्रसूर्यंपश्यति देहभाक् ॥ १३९४ ॥

स्वहारिकाः ॥ १३८९ ॥ स्वर्गइति यदातादृशीसाप्रसिद्धाजात्यास्वभावेनसुंदरीचललनास्वर्गेनविद्यतेतदाइहभुविलोकेतादृशीकुतः स्यात्संभाव्येतेति ॥ १३९० ॥ घनीभूतमिति प्रायइत्युत्प्रेक्षायां तथाचपातालवासिनांसुकृतमेवघनीभूतंपातालरूपेणपरिणतमित्युत्प्रेक्ष्यतइत्यर्थः ॥१३९१ ॥ अत्रेति अत्रपाताले ॥१३९२॥ चन्द्रेति मुक्तपदमर्शआद्यजंतं तथाचमुक्तावद्भिर्बिल्वसमैश्वगुच्छैर्घटिताहाराः सहस्रशोयत्रसंतीति ॥ १३९३ ॥ असूर्यमिति मुनेःपाणिनेःस्मरणंस्मृतिविषयीभूतंयदसूर्यंपश्यइतिपदंतत्रपातालेएवसार्थकंमुख्यार्थकं तत्रत्यैःसूर्यादर्शनात् इतरत्रराजदारादौतुगौणमेवेत्यर्थः ॥ १३९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पूर्वेति अत्रपातालेपूर्वदेवाअसुरानागाश्चश्रीमंतोवसंति यत्रयेषुनागेषुभोगिनइत्येतत्पदंसार्थकंपरिपूर्णसर्वार्थकं भोगपदार्थास्तुभोगःसुखे
स्याद्दिभृतावहेश्चफणकाययोरितिप्रसिद्धाः भूमप्रशंसयोरिनिरितिभावः ॥ १३९५ ॥ तत्रनागेषुमुख्यान्दर्शयति वासुकिरितित्रिभिःम
हादेवकंठभूषाभूतोवासुकिर्नारायणशय्याभूतःशेषश्चात्रपातालेवसति ॥१३९६॥ तक्षकइति सूर्यरथवासित्वेनप्रसिद्धोमहाविषस्तक्षको
प्यत्रवसतीति॥१३९७॥कर्कोटकइति नलस्यदमयंतीभर्तुर्मित्रत्वेनप्रसिद्धःकर्कोटकनामातथापद्मादयश्चसबांधवाअत्रवसंति महादेवा

पूर्वदेवावसंत्यत्रपन्नगाश्चमहाश्रियः॥ भोगिनोनामयत्रैतत्सार्थकंजायतेसदा ॥ १३९५॥ वासुकिश्चात्र
वसतिकंठेयःशूलिनःस्थितः॥ शेषश्चात्रमहानागःशयनंयोऽसुरद्विषः॥ १३९६॥ तक्षकश्चमहानागोरथेयः
सवितुःस्थितः॥ नास्तियस्यप्रतीकारोविषस्यात्रकथंचन॥ १३९७॥ कर्कोटकस्तथानागोमहान्नलसखोहि
यः॥ पद्मश्चैवमहापद्मःसशंखःकुलिकस्तथा॥एलापत्रकइत्याद्याःकुलजाविषधारिणः॥१३९८॥अनेकको
टिसंख्यातैर्बंधुभृत्त्यादिभिर्वृताः॥ कुंडलादिविभूषासुदेवादीनांयईरिताः॥ १३९९॥ विश्वकर्मसमोदैत्योम
योमायाविशारदः॥विप्रचित्तिस्तथान्येपिसंतिशक्रस्यवैरिणः ॥ बल्याद्याःशतशोयेभ्योभीतादेवाःसदासते
॥१४००॥वर्णयंतिसदास्वर्गेपातालानिमुनीश्वराः॥नारदाद्याःसमागत्यपातालेभ्योदिवंप्रति॥१४०१॥ अ
स्यांस्वर्गेतथाब्रह्मलोकेराजन्भवानपि॥ वेत्तियत्प्राप्यतेपुंभिःसुकृतैःसुखमद्भुतं॥ १४०२॥ तत्सर्वंभारतेवर्षे
मानुषाद्देहतोव्रजेत्॥दुःखंयन्नरकेषूक्तंगच्छेत्तदपिभारतात्॥तथाविदेहकैवल्यंभारतादेवसंव्रजेत्॥१४०३॥

दीनांकुंडलादिभूषणरूपत्वेनप्रसिद्धाः आदिपदेनदेवीगरुडादयोग्राह्याः मातलिजामातानागोहिगरुडभूषणमितिप्रसिद्धंभारते॥१३९८॥
॥ १३९९ ॥ असुरमुख्यान्प्रदर्शयति विश्वेति मयोविप्रचित्तिर्बलिरित्याद्यादेवभयप्रदाअसुरायत्रवसंति॥ १४०० ॥ एतादृशंपातालप्र
भावंपातालात्स्वर्गमागतानारदाद्याःकथयंतीत्याह वर्णयंतीति ॥ १४०१ ॥ हेराजन्पृथिव्यादिलोकेषुयद्यत्सुकृतफलंतद्भवान्जानात्येवे
त्याह अस्यामिति अस्यांपृथिव्यां ॥ १४०२ ॥ तत्सर्वंसुकृतफलंतथादुष्कृतफलंनरकादिकंतथातत्त्वज्ञानफलंविदेहकैवल्यंचभारतभव
मनुष्यदेहादेवलभ्यतइत्याह तत्सर्वमिति ॥ १४०३ ॥

CC-0. In Public Domain. Digitization by eGangotri

भारतस्यक्षेत्रसाम्यमाह क्षेत्रेष्विति ॥ १४०४ ॥ यद्यपिब्रह्मविद्याधिकारोदेवशरीरेष्वपिसाधितस्तदुपर्यपीत्यधिकरणेतथापिपुनर्ब्रह्मवि द्यायोग्यदेहलाभस्यसंदिग्धत्वादत्रैवयतितव्यमित्याह यद्यपीति तत्रदेहांतरे पाक्षिकीसंदिग्धा ॥ १४०५ ॥ यस्तुदेहांतरेविद्यालाभाशया इहतदर्थंनयततेसपिंडंत्यक्त्वाकरंलेढीतिन्यायस्यगोचरइत्याह हस्तेतिद्वाभ्यां स्पष्टं ॥ १४०६ ॥ १४०७ ॥ लोकांतरेविद्यालाभस्यपाक्षिकत्वंस्फुटयति इतइतित्रिभिः इतोमनुष्यदेहान्निर्गमने स्विदितिवितर्के किंकर्मफलाभिमुखंभविष्यतीतिकोवेदनकोपीति येनानेनसंशये

क्षेत्रेषुजायतेधान्यंभुज्यतेतद्गृहेषुच ॥ यथातथाभारतेत्रकर्मलोकांतरेफलं ॥ १४०४ ॥ यद्यप्यत्रभवेद्ब्रह्मविद्यालोकांतरेपिच ॥ तथापिपाक्षिकीतत्रराजन्नत्रसुनिश्चिता ॥ १४०५ ॥ हस्तस्थितंमहापिंडंदधियुक्तोदनस्यतं ॥ परित्यज्यकरंलेढितृप्तिकामोयथाज्ञधीः ॥ १४०६ ॥ तथैवमानुषेदेहेहित्वाब्रह्मात्मबोधनं ॥ लोकांतरेयइच्छेत्सविज्ञेयोबालिशःपुमान् ॥ १४०७ ॥ इतोनिर्गमनेकस्यांकिंस्वित्कर्मभविष्यति ॥ इतिकोवेदयेनायंसुस्थितोपिपुमान्शिशुः ॥ १४०८ ॥ संतिसुप्तानिशतशःप्रतिबद्धानिकर्मभिः ॥ कोटिजन्मार्जितान्यस्यपुण्यपापात्मकानिहि ॥ १४०९ ॥ ततःशरीरसंत्यागादुद्भवेपाप्मनोपिच ॥ किंकरिष्यतिवैदेहीनष्टेद्यूतेमहाग्लहे ॥ १४१० ॥ दीव्यन्पुनःपुनर्नैषतंग्लहंलभतेक्वचित् ॥ तथासंसारदुर्द्यूतेनष्टेनरवपुर्ग्लहे ॥ संसारीकितवःकेनप्राप्नुयात्पुनरप्यदः ॥ १४११ ॥

नहेतुनायःपुमान्सुस्थितःपुरुषार्थचिंताशून्यःशिशुरेवबुधैर्मतइतिशेषः ॥ १४०८ ॥ तदुपपादकतयाऽनेकसंचितकर्मणांस्थितिमाह संतीति सुप्तानिसूक्ष्मरूपेणस्थितानिकर्मभिःप्रारब्धफलैःप्रतिबद्धानिकर्माणिशतशःसंतीति ॥ १४०९ ॥ तथाचयदिपापमेवमरणानंतरमुद्भवेत्तदायंकिंकुर्यादित्याह ततइति महान्ग्लहोजेतव्यंद्रव्यंतस्मिन्द्यूतकालेनष्टेपराजितेसतीत्यर्थकश्चतुर्थपादउत्तरान्वयी ॥ १४१० ॥ दीव्यन्निति यथैषकितवःद्यूतेकदाचिदागतेमहाग्लहेनष्टेसतिपुनर्दीव्यन्नपितंतादृशंग्लहंपुनर्नलभतेइत्यन्वयः तथासंसारिरूपःकितवःसंसाररूपेदुर्द्यूतेनरदेहरूपेग्लहेनष्टेसतिअदःमहाग्लहरूपंनरवपुःपुनःकेनहेतुनाप्राप्नुयादिति ॥ १४११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यूतेपराजिताःप्रच्छन्नंप्रकाशंचदुःखमनुभवंतीतिप्रसिद्धंतथायंसंसार्यपिभारतखंडेपराजितःसन्नानायोनिषुसुखाभासप्रच्छन्नंप्रकाशंवा दुःखमाप्नोतीत्याह पातालइतिद्वाभ्यां पारतंत्र्यादीत्यादिपदेनक्षयादिग्रहः ॥ १४१२ ॥ १४१३ ॥ अयंचकितवानांस्वभावःप्रसिद्धोलो केयत्तेयंमूढमेकवारंजयंतितंयत्रकुत्रापिगतंसुतरांजेतुमुद्यमंकुर्वन्तियावत्सकौपीनमात्रशेषोनभवेदितितथात्रभारतेविजयशालिनोविष

॥१०५॥ यरूपकितवादेहांतरेष्वनुव्रजंतोऽस्यजंतोःपुण्यरूपंधनंविजित्यपापरूपकौपीनशेषमेनंकुर्वंतीत्याह यैरयमितित्रिभिः अयंसंसारीपुमान् यैर्विषयैःकितवैर्मानुषंदेहंमहाग्लहरूपंनिर्जितोमुषितः अकथितंचेतिद्विकर्मकजिधातोर्गौणेकर्मणिक्तः तेविषयकितवाद्यूतेजितेसतिअ

पातालेदेवलोकेवाब्रह्मलोकेथवापुनः॥ नरकेभूमिभागेवाशरीराणिसमाप्नुवन्॥ १४१२॥ तत्रतत्रचवैदेहे पारतंत्र्यादिदूषितं॥सुखाभिधंसमाप्नोतिदुःखमेवशरीरभाक्॥ १४१३॥ यैरयंमानुषंदेहंकितवैर्निर्जितःपु मान्॥ विषयैर्निर्जितेद्यूतेस्वयंतेसर्वतोप्यमुं॥ १४१४॥ अभिधावंतिलोकेषुकितवाजितभूमिकाः॥ परा जयायसततंतत्रतत्रकृतोद्यमाः॥ १४१५॥ विषयैःकितवैःसोपिसदादुर्द्यूतदेविभिः॥ हृतपुण्यधनःपापकौ पीनोत्रावशिष्यते ॥ १४१६ ॥ ततोदेहस्यपतनादूर्ध्वमज्ञानिनामिह ॥ महतीनष्टिरायाताराजन्पापावशे षिणी ॥ १४१७॥ माभूदियंमहाराजत्वस्माकमधिकारिणाम्॥ अत्रैवब्रह्मविज्ञानंकरिष्यामोध्रुवंवयम् ॥१४१८॥

मुंपराजितंपुमांसंलोकांतरगतमपिसम्यक्पराजेतुमभिधावंतियतोजितभूमिकाःजितावशीकृताभूमिकानानारूपपरिग्रहरूपायैस्तेतथा भूमिकारचनायांतुरूपांतरपरिग्रहइतिहैमः एवमनुगतैर्विषयकितवैःस्वर्गलोकादौहृतपुण्यधनःपापकौपीनशेषश्चसन्नरकखट्वायामधोमु खःपततीतित्रयाणामर्थः ॥ १४१४ ॥ १४१५ ॥ १४१६ ॥ एवंहानिःप्रमादिनामापततीत्याह ततइति नष्टिर्हानिः आयाताअवश्यं भाविनीतियावत् ॥ १४१७॥ वयंतदापत्तिभयादिहजन्मन्येवविज्ञानंसाधयामइत्याह माभूदिति ॥ १४१८ ॥ ॥१०५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुब्रह्मविज्ञानेनकथंकितवभयनिवृत्तिरित्याशंक्यसोपकरणस्यब्रह्मविज्ञानस्यविषयज्ञानकितवरूपारिनिवृत्तिसाधनतांविशदयति शास्त्रेत्यादिना ब्रह्मज्ञानसाधनमध्यात्मशास्त्रंसाक्षितयायत्रस्थितमेतादृशंद्यूतमत्राधिकारिशरीरेऽस्माभिस्तैर्विषयकितवैःसहारब्धं कीदृशैस्तैर्द्यूतेद्यूतकालेदुर्द्यूतैःकपटपाशकैःकृत्वादेवनशीलैः ॥ १४१९ ॥ जेष्यामइति अधुनातान्विषयान्कितवान्वंचकान्जेष्यामएवयतोनोस्माकमनुकूलंशास्त्रंशास्त्ररूपंसाक्षिअस्तिविद्यतेइतस्त्वमपितान्जेतुंस्थिरोदृढनिश्चयोभवेति ॥ १४२० ॥ तेचनिःसाक्षिकेद्यूतएवजेतारोधुनाकेनहेतुनाजेष्यंतीत्याह विषयाइति शठाःसंमुखेहितवद्भासमानाःपरोक्षेऽनिष्टकराइमेविषयाः ॥ १४२१ ॥ पूर्वंविषयकितवैःसहद्यूतेनरवपुरात्मकोग्लहःकृतःसहिविषयाणामपिभोगोपयोगी अधुनाशास्त्ररूपसाक्षिणानुग्रहमात्रेणास्मानधिकारिणःप्रत्येवंहितमुक्तंयूयंब्र

शास्त्रसाक्षिकमस्माभिरारब्धंद्यूतमत्रतैः ॥ दुर्द्यूतदेविभिर्द्यूतेकितवैर्विषयैःसह ॥ १४१९ ॥ जेष्यामःकितवानेतान्नित्यंदुर्द्यूतदेविनः ॥ विषयानस्तिनःसाक्षिशास्त्रंराजन्स्थिरोभव ॥ १४२० ॥ विषयाःकितवाराजन्जेतारःसाक्षिवर्जिताः ॥ दुर्द्यूतदेवनैःकेनजेष्यंत्यस्मान्शठाइमे ॥ १४२१ ॥ ब्रह्मचर्यादिभिर्ग्लहैःशास्त्रसाक्षिनिरूपितैः ॥ दुर्द्यूतदेविनःशत्रून्जेष्यामःक्षणतोधुना ॥ १४२२ ॥ बाणैर्यज्ञादिभिश्चापिनिहत्योन्मार्गवर्तिनः ॥ बध्वाशमादिभिःपाशैर्विषयारीनथापरान् ॥ स्वल्पशेषान्हिजेष्यामोब्रह्मचर्यादिभिर्ग्लहैः ॥ १४२३ ॥

ह्मचर्यादिरूपंग्लहंकुरुततस्मिन्विषयकितवैर्जितेऽपिभवतांजयएवब्रह्मचर्यादिकंदृष्ट्वाविषयैःपलायनादित्याशयेनाह ब्रह्मेति ग्लहैरिति दीर्घादित्वंस्वार्थिकाणंतत्वेनबोध्यं शास्त्रेणसाक्षिभूतेनाप्यनुग्रहेणनिरूपितैःप्रदर्शितैर्ब्रह्मचर्यारण्यवासादिरूपैर्ग्लहैर्लाप्यमानद्रव्यैर्निश्चितंतान्जेष्यामइति ॥ १४२२ ॥ ननुबहवोविषयाऽरयोद्यूतमात्रेणकथंजेतव्याइतिशंकांवारयन्नाह बाणैरिति येतावदुन्मार्गेशास्त्रबाह्यमार्गेचरंतिविषयारयस्तान्शास्त्रविहितयज्ञदानादिबहिरंगसाधनैर्दूरगतानांहननसाधनत्वेनबाणसमैर्निहत्यतेषांशिरःसमंप्रमादमृत्युंशास्त्रोक्तकर्मलक्षणाविद्ययाछित्वेतियावत् अविद्ययामृत्युंतीर्त्वेतिश्रुतेः तथापरान्निषेधाभावेनसन्निहितान्विषयारीन्शमदमाद्यंतरंगसाधनैःप्रवृत्तिविरोधित्वेनपाशसमैर्बध्वाव्युत्थानदशायांकदाचिदुपलभ्यमानत्वेनस्वल्पावशिष्टान्विषयारीन्ब्रह्मचर्यादिग्लहकेनद्यूतेनजेष्यामइत्यर्थः ॥ १४२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाप्रमाणेश्वरशास्त्रदृष्टिजेनब्रह्मज्ञानाग्निनातान्सबांधवानूदग्धानूकरिष्यामइत्याह एतेषामितित्रिभिः एतेषांविषयारीणां मत्तांगर्वितां धक्ष्यामोदग्धान्करिष्यामोब्रह्मज्ञानाग्निनेति ॥ १४२४ ॥ नन्वेषांजनकादयःकिंरूपाइत्याकांक्षायामाह अन्यस्मिन्निति विक्षेपावरणलक्षणशक्तिद्वयवत्यविद्यैवतेषांजननीत्यर्थः ॥ १४२५ ॥ मनइति तेषांस्रष्टृत्वेनमनःपिताभवति मनःप्रजापतिमसृजदित्यादिश्रुतेः तथाकार्यकालेसन्निहितत्वसाधर्म्येणतेषांवासनागणोबंधुस्थानीयस्तद्दाहकोग्निस्तुब्रह्मास्मीतिज्ञानात्मकइत्यर्थः ॥१४२६॥ नन्वेवंतेषांसर्वथोच्छेद्यत्वस्यप्रयोजकोपराधःकुतोभवद्भिर्निश्चितइत्याकांक्षायामाह एतैरिति एतैर्विषयकितवैर्वयंबहून्वारान्पराजिताइत्यत्रार्थेयथा

एतेषांजनकंतद्वज्जननींचवयंनृप॥ बंधुभिःसहितांमत्तांधक्ष्यामोब्रह्मवन्हिना॥ १४२४॥ अन्यस्मिन्नन्यबुद्धिर्याजननीसाप्रकीर्तिता॥ आत्मावरणसंयुक्ताकितवानांदुरात्मनां ॥ १४२५॥ मनःपितातथाबंधुजनोयंवासनागणः॥ वयंब्रह्मस्मइत्येवंमहताज्ञानवन्हिना॥ दग्ध्वाकुटुंबसहितान्विषयान्विजयेमहि॥ १४२६॥ एतैःपराजिताराजन्बहुरुत्वःपुरावयं॥ यथेमेसकलालोकालोकपालास्तथेश्वरः ॥ १४२७॥ अद्यप्रभृतितेसर्वेंद्यप्रमत्तावयंस्थिताः॥ अक्षैर्बाणैश्वजेष्यामोविषयान्कितवानमून्॥ शास्त्रसाक्षिबलेनैवमातेभवतुसाध्वसम्॥ १४२८॥

साक्षित्वेनप्रमाणभूताःसंति के इमेपृथिव्यादयोलोकास्तथालोकपालाधर्मराजादयस्तथेश्वरोंतर्यामीचेत्यर्थः तदुक्तंमनुना आदित्यचंद्रावनिलोनलश्चद्यौर्भूमिरापोहृदयंमनश्च अहश्वरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमिति हृदयशब्देनसाक्षिणईश्वरस्यग्रहणमिति ॥ १४२७ ॥ अधुनातुवयंशास्त्रसाक्षिप्रसादात्सावधानाःसंतस्तानूजेष्यामएवेत्याह अद्येति तेयेपूर्वंपराजिताःसर्वेवयमधिकारिणःअक्षैरिंद्रियरूपपाशकैः प्रवृत्तिविशेषेणजयादिप्रयोजकत्वंहिपाशकानामिंद्रियाणांचतुल्योधर्मः तत्ररागादिहीनेंद्रियप्रवृत्तिरधिकारिणांजयावहेतिबोध्यं रागद्वेषविमुक्तैस्तुविषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छतीतिस्मृतेः तथाबाणैर्बहिरंगसाधनरूपैश्वतानरीनूशास्त्रानुगृहीताःसंतोजयेमेत्यर्थः ॥ १४२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथासर्वसाक्षीपरमेश्वरःश्रीकृष्णरूपेणपांडवाननुजग्राहतथास्मानपिवेदरूपेणानुगृह्णातीत्याह कृष्णेति धार्तराष्ट्रान्जितवंतइतिशेषः तथाचोक्तंगीतासु तस्माच्छास्त्रंप्रमाणंतेइत्यादि ॥ १४२९॥ येतुशास्त्रविमुखास्तेपराजीयंतएव अशास्त्रविहितंघोरमित्यादिभगवदुक्तेरित्याह अस्पष्टकेत्रेति येतुअस्पष्टकंशास्त्ररूपसाक्षिवर्जितंयूतंकुर्वंतितेषामत्रदुर्यूतेमहतीहानिरिति अस्माकंतुइदंयूतमीदृशंशास्त्रसाक्षिराहित्येनास्पष्टंनभवतीत्यर्थः ॥ १४३० ॥ तस्माद्वयमपिशास्त्रानुगृहीताःशुकवामदेवादिवदरीन्जित्वाब्रह्मभावलक्षणंस्वाराज्यंलभेमहीत्याह वामेतिद्वाभ्यां स्पष्टंद्वयं ॥ १४३१ ॥ १४३२ ॥ येतुशास्त्रसाक्षिविमुखास्तैर्दीव्यंतितेऽधोधोभावलक्षणांदुर्गतिलभंतइत्याह शास्त्रेति यैरबु

कृष्णसाक्षिबलेनैवयथापंचापिपांडवाः॥ अधमान्धार्तराष्ट्रांस्तान्कितवान्कलहप्रियान्॥ १४२९॥ अस्पष्टकेत्रदुर्द्यूतेकितवैर्विषयैःसह॥ महतीनष्टिरुद्दिष्टानास्माकमिदमीदृशं ॥ १४३०॥ वामदेवादयोयद्वद्विषयान्कितवानमून्॥ जित्वामरणनिर्मुक्ताबभूवुःस्वात्मरूपिणः॥ १४३१॥ वयंतथैवराजेंद्रजित्वैतान्कितवानिह॥ ब्रह्मामृतंभविष्यामोनात्रकार्यविचारणा॥ १४३२॥ शास्त्रसाक्षिपरित्यागाद्विषयैःकितवैःसमं॥ दुर्द्यूतदेविभिर्द्यूतंप्रारब्धंयैरबुद्धिभिः ॥ १४३३ ॥ हृतपुण्यधनास्तेमीपापकौपीनशेषिताः॥ तत्रतत्रमहाराजदुःखाद्दुःखमुपागताः॥ १४३४॥ पक्षिणःस्थावरास्तद्वद्ग्राम्यारण्यविभेदिनः॥ पशवश्चापिसर्पाद्यादृश्यंतेसर्वतःस्थिताः ॥ १४३५ ॥ विषयाःकितवाराजन्नेतेदुर्द्यूतदेविनः ॥ अनक्षहृदयान्पुंसोजयंत्यक्षैःकृताभिधैः ॥ १४३६॥

द्धिभिर्मूढैःशास्त्रंविनाद्यूतमारब्धंतेपापरूपकौपीनमात्रशेषाःसंतोदुःखंयांतीतिद्वयोःसंबंधः ॥ १४३३ ॥ १४३४ ॥ यथाद्यूतागारेपराजितानांमंडलीदृश्यतेतथेयंप्रकृतेपापयोनीनांमंडलीबोध्येत्याह पक्षिणइति पक्षिणश्चस्थावराश्चग्राम्यारण्यभेदभिन्नाःपशवश्चसर्पाद्याश्चयेऽमीदृश्यंतेतेसर्वेविषयकितवैःपराजितानामाकाराबोध्याइतिसंबंधः ॥ १४३५ ॥ तद्विदुरित्यादिभागस्यार्थमाह विषयाइतिद्वाभ्यां लोकेहिकितवाअनक्षहृदयान्अक्षानुकूलताप्रयोजकाक्षहृदयाख्यमंत्रविशेषज्ञानशून्यानेवजयंति कृताभिधैःकृताःकल्पिताःकृतत्रेताद्यापरकलिरूपाअभिधाःसंज्ञायेषांतादृशैरक्षैःपाशकैरिति ॥ १४३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अचेति यथानलेनराज्ञाकृतुपर्णादक्षल्हदयंज्ञातंतद्विज्ञानाद्विषयकितवान्जयामएवेत्यर्थः ॥ १४३७ ॥ उक्तार्थेऽष्टममंत्रंसमन्वितंकरोति गुर्विंतित्रिभिः सर्वेश्वरब्रह्मरूपमात्मानमंतर्यामित्वेनाक्षल्हदयभूतंयदाउपदेशानुसारेणल्हदिसन्निहितःसाक्षात्कारोतितदाश्रुतिगतजुगुप्सापदोक्तांनिंदामनुतापरूपांनकरोतीत्यर्थः ॥ १४३८ ॥ अनुतापरूपात्मनिंदामभिनयति अथेतिद्वाभ्यां अथाक्षल्हदयंज्ञात्वेतिनिंदति इतिकथं अहंभारतेखंडेजातःसन्विषयकितवैःपुण्यरूपंविद्यारूपंचग्लहंनिर्जितोस्मिपापकौपीनशेषश्चकृतोस्मीतिद्वयोःसंबंधः

अद्याक्षहृदयंब्रह्मज्ञातमस्माभिरंजसा॥ विज्ञानाद्यस्यसततंपुमानक्षैर्नजीयते॥१४३७॥ गुरुशास्त्रोपदेशेन यदैतमनुपश्यति॥ ह्यक्षहृदयंब्रह्मस्वात्मानंदेवमंजसा॥ ईशानंभूतभव्यस्यनततोनिंदतिस्वयं॥ १४३८॥ अथाक्षल्हदयंज्ञात्वाविषयैःकितवैरहं॥ दुर्घूतदेविभिर्नित्यंसर्वप्राण्योघवंचकैः॥ १४३९॥ जातोपिभारते वर्षेत्यधिकारिशरीरभाक्॥ पुण्यविद्याग्लहंसर्वंनिर्जितोस्मिक्षणेनहि॥ पापकौपीनशेषश्चकृतोस्मीतिकदाचन॥ १४४०॥ नास्यनाशःकथंचित्स्यादात्मनःसर्वदेहिनाम्॥ कर्ताभोक्तातथामातानात्माकिंतुततःपरः॥ १४४१॥ यस्मादर्वागयंकालोनानाभेदःप्रवर्तते॥ संवत्सरःसहाहोभिर्ब्रह्मादीनांमहात्मनाम्॥ १४४२॥ आत्मज्योतिस्तदन्येनज्योतिषानप्रकाश्यते ॥ तदेवज्योतिषांज्योतिःसूर्यादीनांविराजते ॥ १४४३॥

॥ १४३९॥ १४४० ॥ आत्मनोनित्यत्वसर्वभासकत्वसर्वसत्ताप्रदत्वानांप्रतिपादकस्यनवममंत्रस्यार्थमाह नास्येतिचतुर्भिः आत्माऽविनाशीयतःकर्तृत्वभोक्तृत्वप्रमातृत्वलक्षणविकारवान्नभवतिकिंतुततःकर्त्रादिरूपाद्विकारिणःपरःसाक्षिरूपइत्यर्थः ॥ १४४१ ॥ तत्र हेतुतयाकालापरिच्छेद्यत्वमाह यस्मादिति ब्रह्माहिरण्यगर्भस्तत्प्रभृतीनामहोभिःसहस्रयुगादिरूपैरवयवैःसहितःसंवत्सरात्माकालोनानाविधोयस्मात्साक्षिरूपादात्मनोऽर्वागेवविकारेषुपरिच्छेदायप्रवर्ततइति ॥ १४४२ ॥ आत्मेति तदात्मज्योतिरन्येनज्योतिषानप्रकाश्यतेयतस्तदेवसूर्यादीनांज्योतिषांज्योतिःप्रकाशकंसद्विराजतइति ॥ १४४३ ॥ ॥१०७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सएषआत्मैवसर्वसत्ताप्रदत्वादायुरित्युच्यतइत्याह नप्राणइति आयुर्जीवनप्रदोऽयमात्माज्योतिषांज्योतिर्भूतएवदेवैरायुरितिनिश्चितइति ॥ १४४४ ॥ आत्मनोब्रह्मत्वयोग्यतास्फुटीकरणार्थंसर्वाधारताप्रतिपादकस्यदशममंत्रस्यार्थमाह यस्मिन्निति द्वाभ्यां प्राणाद्यावक्ष्यमाणस्वरूपाःपंचजनसंज्ञकायत्राधिष्ठानेसंतितथापरैर्भूतैःपृथिव्यादिभिःसहितआकाशश्चयत्रतिष्ठतितमेवाहंसर्वभासकमीश्वरममृतमात्मानंजानामितंविद्वान्जानन्सन्नहंतादृशःसर्वाधिष्ठानादिरूपःसंपन्नोस्मीतिद्वयोरर्थः ॥ १४४५ ॥ १४४६ ॥ पंचजनपदार्थानांप्राणादीनांस्वरूपंप्रदर्श्यतद्भासकतयातदांतरत्वमात्मनःप्रतिपादयतएकादशस्यमंत्रस्यार्थमाह प्राणइतित्रिभिः प्राणचक्षुःश्रोत्रमनांसिचत्वारितथापुरातीतमंत्रेज्योतिषांज्योतिरितिषष्ठ्यंतज्योतिःपदेनेरितंवागादिपंचकंतद्धिलोकेऽप्यंधकारादौप्रकाशकत्वेनकथितंप्रसिद्धमितियावत्

नप्राणोनाप्यपानोवाभवेदायुःशरीरिणां ॥ ज्योतिषांज्योतिरेवायमायुर्देवैःसुनिश्चितः ॥ १४४४ ॥ यस्मिन्पंचजनाःपंचप्राणाद्याःसंतिसर्वदा ॥ भूतैश्चतुर्भिरपरैराकाशोपिचसर्वगः ॥ १४४५ ॥ तमेवज्योतिषांज्योतिर्जानाम्यात्मानमीश्वरं ॥ मरणादिविनिर्मुक्तमहंविद्वांश्चतादृशः ॥ १४४६ ॥ प्राणश्चक्षुस्तथाश्रोत्रंमनोज्योतिःपुरेरितं ॥ वागादिकथितंलोकएतज्ज्योतिश्चपंचकं ॥ १४४७ ॥ आत्मेतिज्ञानवंतोयेनिश्चितंतैस्तुसर्वदा ॥ ब्रह्माक्षरहृदयंपूर्णंपुराणंनाशवर्जितं ॥ १४४८ ॥ उत्पत्तेर्जगतःपूर्वमेकमेवव्यवस्थितम् ॥ परतोनाशतोमध्येनैकधेवव्यवस्थितम् ॥ १४४९ ॥

आदिपदेनचंद्रादित्यादयोगृह्यंते एतज्ज्योतिरेतेषांप्राणादीनांयज्ज्योतिःप्रकाशकंतत्त्वं कीदृशं पंचकंपंचभिःप्राणादिशब्दैःप्रथमाविभक्त्यंतैःकायतेप्रतिपाद्यतेतत्तथा कैधातोःशब्दार्थात्सुपिस्थइतियोगविभागात्कप्रत्ययः तथाचप्राणादीनांप्राणादिरूपंसर्वांतरंतत्त्वमात्मेतीत्थंज्ञानवंतोयेभवंतितैरेवाक्षरहृदयतयोक्तंब्रह्मज्ञातमितिद्वयोरर्थः ॥ १४४७ ॥ १४४८ ॥ अव्ययपदार्थमाह उत्पत्तेरिति कीदृशमात्मतत्त्वं जगतउत्पत्तेःपूर्वंतथाजगतोनाशतःपरतोऽनंतरंचैकमेकरूपमेवावस्थितंतयोर्मध्येतुकल्पितोपाधिभिर्नैकधेवनानारूपमिवस्थितमितिसंबंधःअव्ययशब्दोहिअपेक्षावशात्पूर्वमपरंचाभिधत्तेइतिभावः ॥ १४४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशमंत्रस्य आत्मज्ञानसाधनमद्वितीयत्वंतदविज्ञानेऽनर्थंचप्रतिपादयतोऽर्थमाह नबाह्यैरित्येकोनपंचाशच्छ्लोकैः एतत्सर्वभेदविवर्जितम
द्वितीयंश्रुत्युक्तमात्मनोरूपंबाह्यैरिंद्रियैरवगम्यंनभवतिकिंतुश्रवणमननादिसंस्कृतेनमनसैवावगंतव्यमितिसंबंधः॥ १४५०॥ मनसआत्मदर्श
नयोग्यतांस्पष्टयति मनइति यद्यपिबाह्येंद्रियाण्यात्मदर्शनायोग्यान्येवसृष्टानि परांचिखानीत्यादिश्रुतेः तथापिमनःसर्वार्थविषयंपर
॥१०८॥ मेष्ठिनाप्रजापतिनासृष्टमितिप्रकृतश्रुतेरेवविज्ञायतइतिभावः तेनमनसःसर्वार्थत्वेनहेतुनात्रिकालंकालत्रयसंबंधिदृश्यजातंतथाकालतोऽ
तीतमात्मतत्त्वंचमनसापुमानवगच्छतीत्यर्थः॥ १४५१॥परंतुप्रमाणसहकृतस्यैवमनसःसर्वार्थदर्शनसामर्थ्यमित्याह यद्यपीतिचतुर्भिः यद्य
पिमनोव्यवस्थावर्जितमेकत्रार्थेनिश्चयरूपस्थितिरहितमेवभवेत्प्रायशोदृश्येततथापितस्यमनसःप्रमाणरूपसहकारिहीनस्यविभ्रांतत्वरू

नबाह्यैरिंद्रियैरेतत्सर्वभेदविवर्जितम्॥ श्रुत्युक्तमात्ममननसंस्कारसचिवेनहि॥ मनसैवावगंतव्यंब्रह्मरूपं
निरंजनम्॥ १४५०॥ मनःसर्वार्थविषयंनिर्मितंपरमेष्ठिना॥ त्रिकालंकालतोऽतीतंमनसातेनगच्छति
॥ १४५१॥ यद्यप्येतद्भवेन्नृणांव्यवस्थावर्जितंमनः॥ तथापितस्यनैवस्यादपराधःकथंचन॥ १४५२॥ न
मनःश्रोत्रसहितःपुमान्रूपंप्रपद्यते॥ चक्षुष्मानिवलोकेस्मिन्नेत्राभावेनहेतुना॥ १४५३॥ नीलंपीतंतथाऽगृ
ह्णन्नंधोनैवभवेत्क्वचित्॥ अपराधीयथालोकेनिष्प्रमाणंमनस्तथा॥ १४५४॥ गृह्णीयाद्भेदमेवायंकरणैर्न
यनादिभिः॥ भेदाभेदंचमनसासर्वार्थत्वेनहेतुना॥ १४५५॥

पोऽपराधोनमंतव्यः सहकारिणंविनाकार्यासिद्धेर्लौकेपिदृष्टत्वादितिभावः ॥ १४५२ ॥ सहकारिणंविनाकार्यवैगुण्यंनदोषायेत्येत
दुदाहरणेस्फुटयति नमनइति यथालोकेचक्षुष्मान्पुमान्रूपंपश्यतितथामनःसहकृतश्रोत्रसहितोपिपुमान्रूपंनपश्यति कुतः रूपदर्शनकर
णस्यनेत्रस्याभावात् तथाप्रमाणासहकृतंमनोयद्येकत्रानवस्थितंतथापिनापराधीतिद्वयोरर्थः ॥ १४५३ ॥ १४५४ ॥ गृह्णीयादिति
अयंप्रमाताचक्षुरादिबाह्यकरणैःसहितोभेदमेवगृह्णीयात् मनसातुभेदग्राहिप्रमाणसहकृतेनभेदमभेदग्राहिवेदांतवाक्यादिप्रमाणसहकृते ॥१०८॥
नाभेदमात्मरूपंगृह्णीयान्निश्चिनुयादित्यर्थः ॥ १४५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह मनसैवेति गृह्णीयादितिशेषः ॥ १४५६ ॥ नेहनानेत्यंशार्थमाह नानेत्यादिना नानापदेनसर्वंभेदवद्वस्तूच्यतेतदिहब्रह्मात्म
निनास्तीत्यर्थः ॥ १४५७ ॥ तत्रहेतुतयाब्रह्मत्वानुपपत्तिंदर्शयति ब्रह्मेत्यादिना ब्रह्मशब्दोयंबृहतोऽपरिच्छिन्नस्यवाचकः तच्चभेदवतिव
स्तुपरिच्छिन्नेनास्तीत्यर्थः ॥ १४५८॥ लोकेतुगजादिषुबृहत्त्वव्यवहारआपेक्षिकतयागौणःसोत्रनग्राह्यइतिवक्तुंन्यायंस्मारयति मुख्यइति
पदार्थौद्विविधोमुख्योगौणश्च यथाव्रीहिपदार्थःशालिबीजरूपोमुख्योनीवाररूपोगौणः ॥ १४५९ ॥ ततइति ततउक्तव्यवस्थानुसारात्

मनसैवततोब्रह्मसर्वभेदविवर्जितं ॥ आत्मरूपंमहाभागस्थिरजंगमदेहिनां ॥ १४५६ ॥ नानेतिकथ्यतेलो
केभेदवद्वस्तुसर्वथा ॥ इहब्रह्मणिकिंचिन्नभेदवद्वस्तुविद्यते ॥ १४५७॥ ब्रह्मशब्दोभवेन्नित्यंबृहतोर्थस्यवा
चकः ॥ बृहत्त्वंनभवेल्लोकेभेदवत्यत्रवस्तुनि ॥ १४५८ ॥ मुख्योगौणस्तथाज्ञेयःशब्दार्थःशाब्दिकैःसदा ॥
मुख्येसतिनगौणःस्यादेषाप्यत्रव्यवस्थितिः ॥ १४५९॥ ततोबृहदिदंकिंचिद्वस्तुलोकेषुगीयते ॥ गौणमापे
क्षिकंतद्धिनमुख्यंब्रह्मणाविना ॥ १४६० ॥ परिच्छिन्नंभवेद्यद्धिबृहत्तत्केनकथ्यते ॥ परितश्छेदवज्ज्ञेयंपरि
च्छिन्नंमनीषिभिः ॥ परिच्छेदवत्स्वल्पंस्याद्यद्वदामलकंकरे॥ १४६१॥ बृहदभ्यधिकंज्ञेयंपरिच्छिन्नंतथात्मक
म् ॥ इदंविरुद्धमेकस्मिन्केनधर्मद्वयंभवेत् ॥ १४६२ ॥ अधिकंचेन्नतत्स्वल्पंस्वल्पंचेदधिकंनहि ॥ स्वल्पत्वम
धिकत्वंतदेकस्मिन्नोपपद्यते ॥ १४६३॥ परिच्छेदोभवेत्त्रेधासर्वभावेषुसर्वदा ॥ देशतःकालतस्तद्वत्केषुचि
त्तत्स्वरूपतः ॥ १४६४ ॥

लौकिकवस्तुजातंबृहत्पदस्यगौणोऽर्थएव तन्मुख्यार्थस्तुब्रह्मैवेत्यर्थः ॥ १४६०॥ लौकिकवस्तुनोमुख्यबृहत्त्वासंभवंविरोधहेतुकंविशदय
ति परिच्छिन्नमिति परिच्छिन्नंतदल्पंभवेद्ययथाकरदेशावच्छिन्नमामलकमिति ॥ १४६१ ॥ बृहदिति बृहत्पदवाच्यमभ्यधिकरूपंपरि
च्छिन्नपदवाच्यंतुतथात्मकंस्वल्परूपं इदमभ्यधिकत्वस्वल्पत्वरूपंधर्मद्वयमेकत्रवस्तुनिकथमन्वियादित्यर्थः ॥ १४६२ ॥ विरोधमभिनय
ति अधिकमिति स्पष्टं ॥ १४६३ ॥ परिच्छेदत्रैविध्यंप्रथमाध्यायेवर्णितंस्मारयति परिच्छेदइति स्वरूपतोवस्तुतः ॥ १४६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रवस्तुपरिच्छेदंस्वरूपसजातीयविजातीयप्रतियोगिकतयात्रिविधमन्यत्रदर्शयन्ब्रह्मणितदभावमाह स्वरूपादितिचतुर्भिः अद्वितीयरूपं ब्रह्मविहायसर्वलौकिकवस्तुषुवस्तुपरिच्छेदस्तिष्ठतीत्यर्थः ॥१४६५॥ तत्रस्वरूपप्रतियोगिकंतमुदाहृत्यतद्व्यतिरेकंब्रह्मण्याह नहीति यथा वृक्षेशाखादिवैलक्षण्यरूपःस्वरूपभेदस्तिष्ठतिनैवंब्रह्मणीत्यर्थः ॥ १४६६ ॥ सजातीयात्तंतथाह ब्रह्मणइति यथाशुक्लवर्णेगविदृषभेख ण्डादिव्यक्तिभ्योभेदएवंनब्रह्मणीति खंडोंगहीनः मुण्डःशृंगहीनः ॥ १४६७ ॥ विजातीयात्तंतथाह विजातीयैरिति तस्मात्सजातीयभे

स्वरूपात्सर्वभावानांपरिच्छेदोमनीषिभिः ॥ इष्टोब्रह्मविहायैकंसर्वभेदविवर्जितं ॥ १४६५ ॥ नहिस्वरूपतो भेदोब्रह्मण्यस्तियथातरौ ॥ शाखास्कंधादिरूपोयमेकस्मिन्नुपलभ्यते ॥ १४६६ ॥ ब्रह्मणोनसजातीयैःकृतो भेदोस्तिकश्चन ॥ खंडमुंडादिभिर्यद्वद्गोभिर्गोःशुक्लरूपिणः ॥ १४६७ ॥ विजातीयैश्चतस्माद्योभेदःकोपिन दृश्यते ॥ ब्रह्मणोघटकुड्याद्यैर्यद्वन्मनुजदेहिनः ॥ १४६८ ॥ सदसच्छब्दधीगम्यंयत्किंचिद्वस्तुविद्यते ॥ जगत्य स्मिन्हितत्सर्वंब्रह्मभेदविवर्जितं ॥ १४६९ ॥ भावाभावात्मकंयद्वद्गंधर्वनगरंमहत् ॥ कालत्रयेपिगगनाद्भिन्नं नैवास्तिकिंचन ॥ १४७० ॥ तथाविश्वमिदंसर्वंप्रतीतंब्रह्मणीश्वरे ॥ कालत्रयेपिनैवास्तिभिन्नंतद्ब्रह्मणःक्वचि त् ॥ १४७१ ॥ देशकालौयथास्वप्नेजायेतेहृदयांबुजे ॥ साश्रितौतद्वदेवैतौजायेतेब्रह्मणीश्वरे ॥ १४७२ ॥

दाभावलब्धकैमुत्यन्यायाद्विजातीयैर्निरूपितोभेदोपिब्रह्मणिनविद्यतेयादृशोमनुष्यस्यघटादिभिरिति ॥ १४६८ ॥ सर्वविधभेदाभा वेब्रह्मणःसर्वात्मकतांहेतुतयाह सदसदिति जगतियावद्वस्तुजातंतत्सर्वंब्रह्मैवभवतीत्यर्थः ॥ १४६९ ॥ एतत्स्फुटयति भावेतिद्वाभ्यां भा वाभावात्मकमनिर्वचनीयंगंधर्वनगरंयथानाकाशात्कदाचिद्भिन्नंतथाविश्वंब्रह्मणइतिद्वयोरर्थः ॥ १४७० ॥ १४७१ ॥ विश्वस्यब्रह्मभे दाभावेब्रह्मणिकल्पितत्वंहेतुमाह देशेति साश्रितौआश्रितैःपदार्थजातैःसहितौदेशकालौयथास्वप्नेहृदंबुजावच्छिन्नेचिद्वस्तुनिजायेतेक ल्प्येतेतथाएतौजाग्रत्कालिकौब्रह्मणीत्यर्थः ॥ १४७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मणःस्वरूपलक्षणमाह परमेति यद्ब्रह्म ॥ १४७२ ॥ तत्पदार्थस्यब्रह्मणस्त्वंपदार्थाद्भेदशंकांवारयति गगनस्येति यथागगनस्यस्वात्म निस्वस्वरूपेभेदोनास्तितथाचैतन्यरूपिणाआत्मनात्वंपदार्थेनब्रह्मणोपिनभेदइत्यर्थः ॥ १४७४ ॥ तत्रहेतुतयासमोमशकेनसमोनागेने त्यादिश्रुतिप्रसिद्धंसर्वत्रपरिपूर्णतालक्षणसाम्यरूपंब्रह्मणःस्वभावमाह अंतरिति पुत्तिकास्वल्पमशकजातिर्नागोगजस्तद्देहयोराकाशंयथा समंतथासर्वत्रात्मरूपमित्यर्थः ॥ १४७५ ॥ तत्रहेतुतयाब्रह्मणएवसर्वरूपतयाऽवस्थानमाह देशेति सर्वस्यसंबंधियद्देशकालादिकंस्वरूपं तत्सर्वंब्रह्मैवनततोन्यदित्यर्थः ॥ १४७६ ॥ ब्रह्मणिकल्पितविश्वस्यान्यत्वाभावंदृष्टांतेनस्पष्टयति सर्पादयइतिद्वाभ्यां स्पष्टंद्वयं ॥ १४७७ ॥

परमानन्दरूपंयज्ज्योतिषांज्योतिरव्ययं ॥ भेदशून्यंस्वरूपेणसर्वत्रैवव्यवस्थितम् ॥ १४७२ ॥ गगनस्ययथा नास्तिभेदःस्वात्मनिकर्हिचित् ॥ ब्रह्मणोपितथानास्तिभेदश्चैतन्यरूपिणा ॥ १४७४ ॥ अंतर्बहिःसमंयद्वत्पुत्ति कानागदेहयोः ॥ आकाशमात्मनोरूपंतद्वत्समतमंस्मृतम् ॥ १४७५ ॥ देशकालस्वरूपंचसर्वंसर्वस्यसर्वदा ॥ ब्रह्मैवनततोन्यत्स्याल्किंचिद्वस्त्वंतरंहिसत् ॥ १४७६ ॥ सर्पादयोयथाभावारज्ज्वामेवव्यवस्थिताः ॥ आदौम ध्येतथाचांतेरज्जोरन्येनकेचन ॥ १४७७ ॥ देशकालादयोभावास्तद्वद्ब्रह्मण्यवस्थिताः ॥ आदौमध्येतथाचां तेब्रह्मणोन्येनकेचन ॥ १४७८ ॥ अयमात्मापरंब्रह्मभेदशून्यःशरीरिणां ॥ अत्रैवब्रह्मशब्दोयंमुख्योनान्यत्र कर्हिचित् ॥ १४७९ ॥ एतस्मादधिकंयस्माल्किंचिदत्रनविद्यते ॥ सर्वाधिकस्ततोवेदैःकथ्यतेसमहेश्वरः ॥ स र्वाधिकत्वाद्भेदोस्मिन्कोपिनास्तिकथंचन ॥ १४८० ॥ यदिभेदोभवेन्नस्याद्ब्रह्मतात्रकदाचन ॥ ब्रह्मताचेद्भ वेन्नैषभेदःकोपिकथंचन ॥ १४८१ ॥

॥ १४७८ ॥ तथाचायमात्माब्रह्मेतिश्रुतिप्रसिद्धंब्रह्मपदमुख्यार्थत्वमात्मनएवसिद्धमित्याह अयमिति सर्वशरीरिणामयमपरोक्षआत्मा भेदशून्यत्वाद्ब्रह्मभवतितच्चब्रह्मत्वमस्यैवमुख्यमित्यर्थः ॥ १४७९ ॥ एतदेवस्फुटयति एतस्मादिति यस्माद्धेतोरेतस्मादात्मनःकिंचिदधि कंनविद्यतेततोवेदैर्ब्रह्मादिपदघटितवाक्यैःसआत्मासर्वाधिकत्वलक्षणमहेश्वरत्ववानुच्यतेतस्मिन्नस्मिन्भेदस्यनावकाशइत्यर्थः ॥ १४८० ॥ तत्रहेतुतयाब्रह्मत्वभेदयोर्विरोधमाह यदीति अत्रात्मनि ॥ १७८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविरोधेसतिब्रह्मत्वभेदयोरुभयोरुपादातुमशक्यत्वेनान्यतरस्यहेयत्वप्रसंगेपरसापेक्षत्वेनबहिरंगोभेदएवहेयोनतुनिरपेक्षस्वरूपाब्रह्मता असिद्धंबहिरंगमंतरंगइतिन्यायादित्याह अंतरंगतयेति आदेयामहीतव्याब्रह्मताअंतरंगत्वात् भेदस्तुहेयस्त्यक्तव्योयतस्तस्याब्रह्मतायाविघातकइत्यर्थः ॥ १४८२ ॥ ब्रह्मतायाअंतरंगत्वेहेतुमात्मतारूपतामाह आत्मतेति ब्रह्मताआत्मतारूपाज्ञेया आत्मपदंहिसर्वांतरस्य वस्तुनोवाचकंयदाप्नोतीत्यादिश्रुतेरित्युक्तं तन्नाशेतस्याब्रह्मतायानाशेसतितद्रूपात्मतानाशादात्मनआत्मपदार्थस्यनाशःस्यात्तदपेक्षयाभेदनाशएवकर्तुमुचितइत्यर्थः॥१४८३॥ आत्मरक्षार्थंभेदस्त्यक्तव्यइत्यत्रआत्मार्थेपृथिवींत्यजेदितिनीतिविदांवचनमप्यनुकूलमित्याह कामुकाइति येषामर्थकामौपुरुषार्थौतेनीतिविदोप्येवंवदंति एवंकथं आत्मनाशप्रसंगेतद्रक्षार्थंसर्वंत्यजेदिति॥१४८४॥अत्रकैमुत्यन्यायंदर्श

अंतरंगतयाऽऽदेयाब्रह्मणोब्रह्मतानतु॥ बहिरंगसमोहेयोभेदस्तस्याविघातकृत्॥१४८२॥आत्मताब्रह्मताज्ञेयातन्नाशेस्वात्मनोभवेत्॥ नाशस्तस्माद्वरंभेदनाशोभवतुसर्वथा॥ १४८३॥ कामुकाअर्थलुब्धाश्चइदमाहुर्महाधियः॥ आत्मनाशेसमुत्पन्नेत्यजेत्सर्वमशंकितः ॥ १४८४॥ आत्मसंबंधनाशेपिभेदिनोपिबहिर्दृशः॥ सर्वंत्यजंतिकेनाद्यत्यक्ष्यामोनवयंजडं॥ १४८५॥ आत्महानौभवेन्नाशोह्यत्यक्तस्यापिसर्वथा ॥जडस्यततएवेदमस्माभिस्त्याज्यमेवहि॥ १४८६ ॥

यति आत्मेति येभेदिनोभेददर्शिनोबहिर्दृशोबहिर्मुखाश्चेतिआत्मसंबंधिनोदेहादेरात्मत्वेनाभिमतस्यनाशप्रसंगेसर्वंतदन्यत्त्यजंतिवयंनिष्कामत्वादिभिस्तद्विपरीताःसंतःअद्यपरमपुरुषार्थमोक्षसंपादनकालेजडंभेदजातंनत्यक्ष्यामइत्यत्रकोहेतुः तथाचयदागौणात्मरक्षार्थंसर्वत्यागःप्रसिद्धस्तदामुख्यात्मरक्षार्थंदुःखरूपस्यजडस्यचभेदस्यत्यागःकिमुतेतिभावः ॥ १४८५॥येतुजडाभिनिवेशेनात्मत्यागेसमुद्यतास्तेऽतिमुग्धाआत्महानौजडस्याप्यपहारादित्याह आत्महानाविति आत्महानौजातायांस्वयमत्यक्तस्यापिजडस्यकृपणधनन्यायेननाशोभवतिततस्तमेतंन्यायमनुसंधायेदंजडजातमस्माभिस्त्याज्यमेवेत्यर्थः ॥ १४८६ ॥ ॥११०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनाशेसर्वनाशइत्येतद्व्याख्यानामपिर्संमतमित्याह विनाशइति येसुरगुरोःशिष्याश्चार्वाकायेचतत्सदृशाःपामरास्तेपिदेहरूपस्यात्मनो नाशेजगन्नाशंवदंतितदाप्रामाणिकावैदिकास्तथाकथंनवदेयुरित्यर्थः ॥ १४८७ ॥ तत्रोपपत्तिमप्याह अजडेनेति नह्यसाक्षिकंकिंचि त्सिद्ध्यतितत्रात्मासाक्षीतदन्यज्जडंसाक्ष्यंतदात्मानंविनाकथंसिद्ध्येदित्यर्थः ॥ १४८८ ॥ ननुसर्वजडविनाशेतत्साधकंब्रह्मापिकथंतिष्ठेदि त्याशंकांवारयति संतानस्येति यथासंतानस्यबुद्धिवृत्तिरूपज्ञानप्रवाहस्यसुषुप्त्यादौनाशेपितत्साक्षिणआत्मनोननाशस्तथासर्वजडनाशे पितत्साधकब्रह्मणोननाशइत्यर्थः॥१४८९॥ किंचयथोष्णस्वभावेवन्हौशैत्यंप्रमातुमशक्यंतथाऽद्वितीयस्वभावेब्रह्मणिभेदइत्याह अपिब्र

विनाशेस्वात्मनोनाशंजगतःप्रवदंत्यमी॥ शिष्याःसुरगुरोर्येचतादृशाःपामराजनाः॥ प्रामाणिकाःकथंतस्य नाशेनाशंवदंतिन॥ १४८७॥ अजडेनविनासिद्धिंजडंयातिनकर्हिचित् ॥ अजडोज्योतिषांज्योतिरात्मान्य ज्जडमीरितं॥ १४८८॥ संतानस्ययथानाशेस्वात्मनोनतथैवहि ॥ जडनाशेननाशोस्तिब्रह्मणोद्वयरूपिणः॥ ततोजडस्यसंत्यागंकुर्मोनब्रह्मणःक्वचित्॥ १४८९॥ अपिब्रह्मणिभेदोयंग्रहीतुंनैवशक्यते ॥ अगृहीतःकथं भेदःसिध्येदत्रात्मरूपिणि॥ ब्रह्मेतिभेदशून्यंस्यात्तत्रभेदग्रहःकुतः ॥ १४९० ॥ रज्जौसर्पस्थितिर्यद्वदवस्थाने भवेन्नहि॥ ब्रह्मण्येवमवस्थानंनभेदस्योपपद्यते॥ १४९१॥ प्रकाशेतमसोयद्वन्मायायास्यादवस्थितिः॥ब्रह्म ण्यपितथाभेदोमाययैवावतिष्ठते॥ वस्तुतोनैवभेदोयंकोपिब्रह्मस्वरूपिणः॥ १४९२ ॥ ततोभेदःस्वरूपेणदे शकालादिभिःकृतः॥ वंध्यासुतसमोज्ञेयःशब्दधीवपुरेवसः॥ १४९३॥

ह्मणीति अत्रब्रह्मणिआत्मपदार्थरूपेज्ञातुमशक्योभेदःकथंसिद्ध्येदिति कथंज्ञातुमशक्यइत्याकांक्षायांब्रह्मपदार्थमाह ब्रह्मेतीति॥१४९०॥ ब्रह्मणिवस्तुतोभेदाभावंदृष्टांतेनस्फुटयति रज्जाविति यथारज्जुरूपेअवस्थानेआधारेसर्पस्यवस्तुतोनस्थितिस्तथात्रब्रह्मणिभेदस्येति ॥ १४९१ ॥ किंत्वविद्ययैवकल्पितःसइत्याह प्रकाशइति माययाऽविद्यया तमसोघूककल्पितस्य प्रकाशेसूर्येस्थितिः ॥ १४९२ ॥ वि चारदशायांसभेदःशशशृंगवदलीकइत्याह ततइति ततोवस्तुतोऽसंभवात् स्वरूपादिभिर्निरूपितोभेदःशब्दमात्ररूपोज्ञानमात्ररूपोवावा ध्योनत्वर्थात्मेत्यर्थः ॥ १४९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भेदस्यवस्तुतोऽसंभवमेवस्फुटयति ब्रह्मणइति यदिब्रह्मणःसकाशादन्यत्किंचिदपिवस्तुस्यात्तदाभेदःस्वरूपंलभेततदेवतुनास्तिब्रह्मणःसर्वा
त्मकत्वादित्यर्थः ॥ १४९४ ॥ शब्देति तेनायंभेदःशब्दबुद्ध्योर्बलादेवस्थितःशशशृंगादिवदिति ॥ १४९५ ॥ शब्दबुद्ध्योश्चेति शब्दश्चबु
द्धिश्चैतेद्वेयदाभेदस्यमध्येपततःप्रतिभूवन्मध्येतिष्ठतःस्वयंभेदेनदृष्टेशब्दबुद्धीविषयंभिन्नतयादर्शयतइतियावत् तदानानेवनानाविधइव
॥१११॥ दृश्यमानोपिभेदोवस्तुनिब्रह्मणिनास्तीत्यर्थः ॥१४९६ ॥ भेददर्शनप्रयुक्तमनर्थंदर्शयति अवाङ्मनसेति मृत्योर्मृत्युंपुनःपुनर्मृत्युं॥१४९७॥
तत्रहेतुंसंसारावस्थानमाह भेदबुद्धिरिति हियतोभेदबुद्धिःसंसारवर्द्धिकाततआत्मनिभेदंनपश्येदिति ॥ १४९८ ॥ दुःखादिति तेनसंसार

ब्रह्मणोयदिकिंचित्स्यादन्यत्तत्रभवेदयं॥ यदाभूत्सकलंब्रह्मतदायंकभविष्यति॥ १४९४॥ शब्दधीबलतस्ते
ननानेवायंव्यवस्थितः॥ शशशृंगनिभोभेदोवंध्यापुत्रसमस्तथा॥ १४९५॥ शब्दबुद्ध्योश्चभेदस्यमध्यतःप
ततेनेनहि ॥ नानेवापिनभेदोस्तिब्रह्मण्यात्मस्वरूपिणि ॥ १४९६ ॥ अवाङ्मनसगम्येस्मिन्स्वप्रभेनिर्द्वयात्म
नि ॥ नानेवापिचयःपश्येन्मृत्योर्मृत्युंसगच्छति ॥ १४९७॥ भेदबुद्धिर्हिसंसारंदुःखदंसंप्रयच्छति ॥ स्वरूपे
णापिदृश्योनभेदस्तुपरमात्मनि॥ १४९८॥ दुःखाद्दुःखतमंतेननरकादिशरीरजं॥ दुःखमाप्नोतिसततंभेददृ
ग्ब्रह्मणीश्वरे ॥ १४९९॥ यतएवंततोब्रह्मज्योतिषांज्योतिरव्ययं ॥ अवाङ्मनसगम्यंतदप्रमेयंसुनिश्चलम्
॥ १५००॥ द्रष्टव्यमेकधैवात्मरूपंसर्वशरीरिणां॥ स्वसजातिविजात्युत्थभेदगंधविवर्जितं॥ १५०१॥

पातेननरकादिरूपमतिदुःखंभेददर्शीप्राप्नोतीत्यर्थः ॥ १४९९ ॥ त्रयोदशस्यमंत्रस्यैकधेत्यादेर्ब्रह्माखण्डत्वावधारणपरस्यार्थमाह यतइ
तिचतुर्भिः यतएवंवर्णितविधयाभेदराहित्यंततःसर्वेषामात्मरूपंब्रह्मएकधैवसर्वद्वैताभावलक्षणाखंडत्वेनैवज्ञेयं कीदृशं सर्वभासकमवा ॥१११॥
ङ्मनसगोचरत्वादप्रमेयमविषयस्वभावमितिद्वयोरर्थः श्रुतौमेयशब्दस्यएकाराभावश्छान्दसः अत्रबुद्धिगम्यत्वाप्रमेयत्वयोर्विरोधएवमा
चार्यैःपरिहृतः वृत्तिव्याप्तिमपेक्ष्यैववेद्यत्वंप्राहुरात्मनः चिदंतरानपेक्षत्वादवेद्यत्वंतथागमाइति ॥ १५०० ॥ १५०१ ॥

CC-0. In Public Domain. Digitization by eGangotri

विरजोरजसामलेनकामकर्मादिरूपेणरहितमात्मरूपमाकाशादव्याकृताख्यमायारूपात्परमित्याकारंतृतीयपादार्थंभंग्यंतरेणाह अविद्येति इयमहमज्ञइत्यनुभूयमानाअविद्याआकाशाव्याकृतादिपदैःश्रुतिप्रसिद्धाब्रह्मरूपिणआत्मनःसकाशादर्वागेववर्तते साक्ष्यापेक्षयासाक्षिणःपरत्वस्यप्रसिद्धत्वादितिभावः कीदृशीअविद्या अस्यभेदस्यजननीविश्वरूपानानारूपाच कीदृशस्यभेदस्य सरुजोराजसत्वेनसंतापकस्य कीदृशाद्ब्रह्मरूपिणआत्मनः नीरुजःरुग्भिःसंतापैर्हीनादानंदरूपादितियावदित्यर्थः॥ १५०२॥ततइति ततोवस्तुतोमायासंसर्गहीनत्वात्सर्वविकाररहितआत्मानिश्चलःकूटस्थोदेशादिपरिच्छेदहीनत्वान्महान्परिपूर्णश्चमतइत्यर्थः ॥ १५०३ ॥ विदुषात्मनिष्ठेनेतरत्सर्वंत्याज्यमितिबोधकस्यचतुर्दशस्यमंत्रस्यार्थमाह तमेवेत्येकसप्ततिश्लोकैः तमुक्तलक्षणमात्मानंगुरूपदेशाच्छ्रुत्वाअनात्मप्रतिपादकशास्त्रंहि

अविद्याविश्वरूपेयंजननीसरुजोस्यसा ॥ भेदस्यवर्ततेत्वर्वाङ्नीरुजोब्रह्मरूपिणः॥ १५०२॥ ततोजन्मादिरहितआत्मायंनिश्चलःपरः ॥ देशतःकालतस्तद्वत्स्वरूपाच्चमहांस्तथा ॥ १५०३ ॥ तमेवभेदरहितंविज्ञाय गुरुशासनात्॥ धीमान्बालसमोभूत्वारागद्वेषविवर्जितः॥ १५०४॥ श्रुतिश्रवणतात्पर्यमननध्यानसंयुतं॥ मनसोंतरवस्थानंसर्वदादुःखवर्जितम्॥ प्रज्ञाभिधंप्रकुर्वीतत्यक्त्वाशास्त्रमनात्मगं॥ १५०५॥ आत्मनोव्यतिरिक्तंयल्लोकशास्त्राद्यनिंदितं॥ अभिध्यातंतदप्यत्रवागादेर्दुःखकृद्भवेत्॥ १५०६॥

त्वाचमनसोंतरवस्थानंविलयरूपंप्रज्ञाभिधंश्रुतिगतप्रज्ञापदेनविवक्षितंकुर्वीतेतिसंबंधः कीदृशंमनसोंतरवस्थानं श्रुतिश्रवणेनतत्तात्पर्यार्थमननेनध्यानेननिदिध्यासनेनचसंयुतंश्रवणादिप्रभावादसंभावनाविपरीतभावनाभ्यांवर्जितमितियावत् एतद्विशेषणंयोगप्रसिद्धंविदेहप्रकृतिलयादिसाम्यवारणार्थंबोध्यं कीदृशोधिकारी धीमान् धीमत्त्वविवरणंरागद्वेषराहित्यरूपंबालसाम्यमितिद्वयोरर्थः॥ १५०४ ॥ ॥ १५०५॥ इतरस्यहेयत्वमुपपादयति आत्मनइति लोकःलौकिकपदार्थजातंशास्त्रंतत्प्रतिपादकंआदिपदग्राह्यंतत्साधनंचानिन्दितमनिषिद्धमप्यभिध्यातंचिंतितंसत्प्रवृत्तिद्वारावागादेरिंद्रियस्यकेवलश्रमरूपदुःखहेतुरेवभवेदतोहेयमितिभावः ॥ १५०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयसंबंधस्यदुःखहेतुतामेवस्फुटयति भारमितित्रिभिः चकारोप्यर्थकोभिन्नक्रमः तथाचातीतानागतचिंतांविहायवर्तमानमेवविषयं
 सेवमानोपिजनोभारवाहकवद्दुःखीभवेत्किमुतातीतानागतचिंताकुलइत्यर्थः ॥ १५०७ ॥ यावतइति अयंजंतुरात्मानंविहाययावतो
यत्परिमाणान्विषयानभिध्यायेच्चिंतयेत्तावंतस्तेध्याताविषयाःप्रवृत्तिद्वाराइंद्रियाणांदृथाश्रमहेतवएवयतएतैर्विषयैःशास्त्रीयैःशास्त्राविरु
 द्धैरपिवागादयःखेदमेवयांति फलस्यसुखस्यप्रत्यगात्मरूपस्येंद्रियैरसंस्पर्शादितिद्वयोरर्थः ॥ १५०८ ॥ १५०९ ॥ फलितमाह सं
त्यजेदिति ततःश्रममात्रहेतुत्वादमून्विषयान्संत्यजेत्तांस्त्यक्त्वाचप्रज्ञामात्मस्वरूपाकारांकुर्वीतयथामनःपुनःसखेदतांदुःखितांनप्राप्नुयादि

भारंवहन्यथाजंतुर्दुःखीभवतिसर्वदा ॥ विषयंवर्तमानंचसेवमानस्तथापुमान् ॥ १५०७ ॥ यावतोहृदयां
भोजेविषयान्मनसःप्रियान् ॥ अभिध्यायेदयंजंतुर्विहायात्मानमव्ययं ॥ १५०८ ॥ इंद्रियाणांहितावंतोभा
राःश्रमकराहिते ॥ एतैर्वागादयःखेदंशास्त्रीयैरपियांतिते ॥ १५०९ ॥ संत्यजेत्ततएवामून्प्रज्ञामात्मस्वरूपगां ॥
कुर्वीतनमनोभूयोयथायातिसखेदतां ॥ १५१० ॥ एवंयेज्ञातवंतस्तेप्रवृत्ताःस्वात्मबोधने ॥ श्रवणादिमुखैरे
वोपायैर्नापरनामभिः ॥ १५११ ॥ द्वारैःपंचावयवकैर्बुद्धिशुद्धिकरैरपि ॥ ब्रह्मचर्यादिसंपन्नाऊहापोहविशा
रदाः ॥ १५१२ ॥ संसारसागरंतीर्त्वाप्रवृत्त्यात्मावलोकनात् ॥ दृष्टोमतःपरेणैषदृश्यतेनैवकर्हिचित् ॥ १५१३ ॥

त्यर्थः ॥ १५१० ॥ एवमितरविस्मरणमेवात्मदर्शनंतस्यैवसाधनानिश्रवणादीनीत्याह एवमितित्रिभिः एवंयेआत्मानंज्ञातवंतस्तेएव
स्वात्मनोबोधनेसाक्षात्कारेप्रवृत्तावोध्याइतिशेषः कैर्ज्ञातवंतः श्रवणादिसंज्ञैरुपायैः तथापंचावयवकैरन्नमयाद्यानंदमयांतकोशैः तेषां
शिरःपक्षद्वयमध्यपुच्छैःपंचावयवकत्वात् कीदृशैःकोशैर्द्वारैःशुद्धात्मज्ञानेस्थूलारुंधतिन्यायेनद्वारभूतैः पुनःकैः बुद्धिशुद्धिकरैर्बहिरंगांत
रंगसाधनैः कीदृशास्ते ब्रह्मचर्यैणादिपदग्राह्यैकांतवासादिभिश्चसंपन्नाविचारकुशलाश्चेतिद्वयोरर्थः ॥ १५११ ॥ १५१२ ॥ संसारेति
एवंसंसारसागरंद्वैतजातंतीर्त्वाविस्मृत्यप्रवृत्त्याप्रकृष्टयांतर्लीनयाचित्तवृत्त्याअवलोकनादावरणध्वंसादात्मादृष्टःसाक्षात्कृतोमतःसंमतः प
रेणोक्तभिन्नेनप्रकारेणतुनदृश्यतेनदृष्टतयाव्यवह्रियतेइत्यर्थः ॥ १५१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परेणैषनदृश्यतेइत्येतत्स्फुटयितुंपराग्दृष्टीनांशास्त्राध्ययनमपिरोगिणामपथ्याशनवद्दोषोत्कर्षहेतुरेवभवतीतिदर्शयंस्तत्रपदशास्त्रेव्याकरणे प्रसिद्धान्कांश्चित्पदार्थान्व्यामोहकतयाऽनुवदति इयमित्यष्टभिः इत्यादिरूपपदविषयकज्ञानात्पुमान्पराग्दृष्टिर्भृशमतिशयेनमोमुह्यतेपु नःपुनर्मोहंविपर्ययसंतानमुपैतिप्रामोतीत्यष्टमेनाभिसंबंधः इतिकथमित्याकांक्षायामियंरूढिरित्यादियोज्यं रूढिःसमुदायशक्तिर्यथा विप्रादिपदे योगोऽवयवशक्तिर्यथापाचकादिपदे गुणोगुणद्वारेणशब्दस्यान्यत्रवृत्तिर्यथाग्निर्माणवकइत्यत्रतेजस्वित्वगुणेनाग्निशब्दस्य माणवकेवृत्तिः लक्षणाशक्यार्थसंबंधेनवृत्तिः साउभयीद्विविधाजहत्स्वार्थाऽजहत्स्वार्थाच तत्राद्यास्वार्थस्यहानकरीयथागंगायांघोषइ त्यादौ अंत्यास्वार्थाहानकरीयथाकाकेभ्योदधिरक्ष्यतामित्यादावित्यर्थः ॥ १५१४ ॥ स्वार्थस्येति प्रथमपदंपूर्वान्वयित्वेनदर्शितं इयंद्वि

इयंरूढिरयंयोगोगुणोयंलक्षणातथा॥ हानाहानकरीतद्वदुभयीयंहिलक्षणा ॥ १५१४ ॥ स्वार्थस्यलक्षितेने यंलक्षणानोपचारतः॥ प्रकृतेर्बलमेतद्धिप्रत्ययस्यबलंत्विदम् ॥ १५१५॥ कारकंत्विदमुद्दिष्टमिदंस्यादप्य कारकं॥क्रियेयंस्यात्तथाकर्मक्रियाकर्मेदमेवच ॥ १५१६ ॥

रेफादिपदगतालक्षणालक्षितेनबहुव्रीहौपरमतप्रसिद्धयालक्षणयालक्षितंयद्भ्रमरपदंतद्वारेणालिप्रभृतिपदार्थैबोध्यानोपचारतः उपचारो नामगुणयोगस्ततोहेतोरियंलक्षणानबोध्या नहिरेफद्वयस्यकश्चिद्धर्मोऽलिशरीरेवर्ततइतिभावः एवंपदवृत्तिभेदंविचार्यप्रकृतिप्रत्ययार्थ योःप्राधान्यव्यवस्थामाह प्रकृतेरिति यत्रप्रत्ययस्यद्योतकत्वंतत्रद्योत्योर्थोविशेषणमेवेतिसिद्धांतात्प्रकृतेःप्रकृत्यर्थस्यबलंप्राधान्यंयथा श्वकइत्यल्पार्थेकनिअल्पोश्वइत्यर्थः तद्वाचकत्वस्थलेतुप्रत्ययार्थप्राधान्यं यथापाचकइत्यत्रपाककर्तेत्यर्थइतिभावः ॥ १५१५ ॥ कार कमिति इदंक्रियाजनकभावरूपंकर्त्रादिषड्विधंकारकपदाभिधेयमुद्दिष्टमुक्तं इदंशेषरूपंनिपातादिरूपंचाकारकमुद्दिष्टं इयंधात्वर्थरूपा क्रियाउक्ता तथाइदंतंडुलादिकंपाकादिक्रिययाफलाश्रयत्वेनेष्टतमादिरूपंकर्मोक्तं तथेदंपश्यमृगोधावतीत्यत्रमृगकर्तृकधावनरूपंक्रि याकर्मक्रियारूपंकर्मेत्यर्थः ॥ १५१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सकर्मकउक्तस्तत्समानाधिकरणव्यापारवाचकस्त्वकर्मकइत्यर्थः
धातुरिति अयंस्वार्थफलव्यधिकरणव्यापारवाचकरूपोधातुःपचादिःसकर्मकउक्तस्तत्समानाधिकरणव्यापारवाचकस्त्वकर्मकइत्यर्थः
अयंणिचूप्रत्ययःसकर्मकधातुर्वाप्रयोजकस्यप्रेरकस्यव्यापारमाह अपरोणिचूप्रकृतिरूपोधातुरकर्मकधातुर्वाप्रयोज्यस्यस्वतंत्रकर्तुर्व्या
पारमाहेत्यर्थः तत्रोदाहरणंघटोभवतीतिभूधातुरकर्मकोभाविणिचूप्रकृतिश्चप्रयोज्यमाह तथायंनियमोबोध्यः अयंकः यत्पदंप्रकृति
रूपंप्रत्ययरूपंवाजंतुर्भाषतेतद्विशिष्टमेवभाषतेनकेवलाप्रकृतिःप्रयोक्तव्यानकेवलःप्रत्ययइतिवचनादितिभावः ॥१५१७॥ प्रत्ययोयमि
तिअयंस्वौजसित्यादिरूपःप्रत्ययःसुप्संज्ञकः तिप्तस्झिइत्यादिस्तुतिङ्संज्ञकः अस्मिन्सुप्तिङ्रूपेप्रत्ययेजातेसतिअपरःप्रत्ययोनजायतेइत्य
र्थः प्रायेणेतिशेषः अन्यथापचतितरामितितरपूततइतिपंचम्यंतात्तसिंश्चनस्यादितिबोध्यम् ॥ १५१८ ॥ तद्धितोयमिति एषयूनस्ति

धातुःसकर्मकश्चायमयंनिष्ककर्मकोपरः॥ अयंप्रयोजकस्याहव्यापारमपरोपिहि ॥ प्रयोज्यस्यतथाजंतुर्वि
शिष्टंभाषतेध्रुवं॥ १५१७॥ प्रत्ययोयंसुबुद्दिष्टस्तिङेषोपिनचापरः॥ प्रत्ययेप्रत्ययोभूयादस्मिन्नुभयरूपिणि
॥ १५१८॥ तद्धितोयंकृदेषस्यादेषकृत्यादिकःपरः॥ समासोयंतथैवायंसमासांतपरोपिच ॥ १५१९ ॥ स
नादिर्नामधात्वादावेषस्त्रीप्रत्ययःपरः॥ अपत्यादिषुचैवायंचतुरर्थोयमीरितः ॥ १५२० ॥

तथाएषकृदधिकारेण्वुलःप्रा
रित्यादिकस्तद्धिताधिकारपठितःप्रत्ययस्तद्धितसंज्ञकः तथाएषकृदतिङित्यधिकारपठितःप्रत्ययःकृत्संज्ञकः तथाएषकृदधिकारेण्वुलःप्रा
कृपठितस्तव्यदादिःप्रत्ययःकृत्यसंज्ञः कीदृशः परःसामान्यविशेषयोर्भेदपक्षेकृत्सामान्याद्भिन्नइत्यर्थः तथायंप्राक्कडारात्समासइत्यधि
कारेपठितसूत्रैर्निष्पन्नोभूतपूर्वादिःशब्दःसमाससंज्ञकः तथायंद्वित्राइत्यादिकःसमासःसमासांतसंज्ञकडजादिप्रत्ययांतइत्यर्थः ॥१५१९॥
सनादिरिति धात्वादावितिधातुपदंभावप्रधानं तथाचसनादिःसन्क्यच्काम्यजित्यादिर्द्वादशविधःप्रत्ययः धात्वादौधातुत्वारंभेनिमित्तमि
तिशेषः सनाद्यंताधातवइत्यनुशासनादित्यर्थः एषङीप्टाबादिःप्रत्ययःपरस्तद्धितभिन्नस्तदधिकारात्पूर्वंपाठादितिभावः तथायमणादिः
प्रत्ययोऽपत्याद्यर्थेषुविहितः तथायंतदस्मिन्नस्तीत्याद्यर्थचतुष्टयेविहितःप्रत्ययश्चतुरर्थइत्युक्तः ॥ १५२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावादिष्विति तथायंघञादिःप्रत्ययोभावादिषुआदिपदेनकर्तृभिन्नकारकेषुचबोध्यः परंत्वयंघञादिर्यदाभावेभवतितदावचनस्यतदुपल क्षितलिंगस्यचभेदंविशेषंकरोति कृदभिहितोभावोद्रव्यवत्प्रकाशतेइतिसिद्धांतादित्यर्थः इत्यादीत्यर्द्धंव्याख्यातमिति ॥ १५२१ ॥वाक्यशा स्त्रेमीमांसायांप्रसिद्धान्पदार्थान्कांश्चित्तथानुवदति वाक्येपीत्याद्येकत्रिंशताश्लोकैः एवंकथमित्याकांक्षायामेतत्पदमित्यादियोज्यं एतद्व र्णसमुदायात्मकंपदंबोध्यं तथैतत्पदसमुदायात्मकंवाक्यं तथायंज्योतिष्टोमादिशब्दःशब्दपरोविष्णुमुच्चारयेत्यादाविवस्वस्वरूपस्यैवोपस्था पकः सहिस्वभिन्नपदानुपस्थितएवयागादिनाऽभेदसंबंधेनान्वेतीतिभावः तथामीषांज्योतिष्टोमेनयजेतस्वर्गकामइतिवाक्यगतपदानांवि भागतःएकैकप्रयोगकालेशून्यतावाक्यार्थावोधकत्वलक्षणाकांक्षाइयमनुभवसिद्धावर्ततेऽतएषांमिलितानांवाक्यत्वमितिशेषः॥ १५२२॥ एकवाक्यलक्षणपरस्यार्थैक्यादेकंवाक्यंसाकांक्षंचेद्विभागेस्यादितिसूत्रस्यार्थमाह इदमितिद्वाभ्यां इदमुद्भिदायजेतपशुकामइतिवाक्य

भावादिषुतथाचायमयंवचनभेदकृत् ॥ इत्यादिपदविज्ञानाद्भृशंमोमुच्यतेपुमान् ॥ १५२१ ॥ वाक्येप्येवंम हाराजविद्वान्मोहमुपैतिसः ॥ एतत्पदमिदंवाक्यमयंशब्दपरोस्तिह ॥ तथेयंशून्यतामीषांपदानांहिविभाग तः॥ १५२२॥ इदंवाक्यांतरंयस्माद्विभागेविद्यतेनहि॥ आकांक्षापदसंघस्यपूर्ववाक्यस्थितस्यहि॥ १५२३॥ एकमर्थंवदेदेकंवाक्यंवापदमेववा॥ द्वितीयेवचनेतस्यभेदोभवतिसर्वथा॥ १५२४॥ वर्णाःसर्वगतानित्या विवर्त्ताब्रह्मणोपिते॥ स्थानप्रयतनैःशुद्धैरितिवासंस्कृताहिते॥ १५२५॥

मुक्तज्योतिष्टोमवाक्याद्वाक्यांतरंभिन्नंवाक्यंभवतियतोविभागेपृथक्प्रयोगेएतद्गतपदसंघस्यतथापूर्वमुक्तंयज्ज्योतिष्टोमवाक्यंतत्रस्थितस्य चपदसंघस्यपरस्परमाकांक्षानास्तीत्यर्थः ॥ १५२३ ॥ एकमिति एकंएकवारंप्रयुक्तंपदंवाक्यंवाएकमेवार्थंवदेत् द्वितीयस्याप्यर्थस्यवचने प्रतिपादनेतस्यवाक्यस्यभेदोभवति विधेयभेदाद्वाक्यभेदइतिसिद्धांतादित्यर्थः ॥ १५२४ ॥ पदवाक्ययोःस्वरूपघटकानांवर्णानांतत्त्वंमत भेदेनाह वर्णाइतिद्वाभ्यां वर्णाःसर्वगताविभवोनित्याश्चेतिपूर्वमीमांसकावदंति उत्तरमीमांसकानांमतेतुतेवर्णाःपरब्रह्मणोविवर्त्तामायया तत्रब्रह्मणिकल्पिताआकाशादिवद्व्यावहारिकसत्ताशालिनइतिविशेषोभिन्नक्रमस्यवाशब्दस्यार्थः तेवर्णाइतिशिक्षायुक्तप्रकारेणशुद्धैर्दो षसंकरहीनैःस्थानैःकंठादिभिःप्रयतनैःस्पृष्टादिभिश्चध्वनिद्वारासंस्कृताभवंतीत्यर्थः ॥ १५२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धातुरिति अयंस्वार्थफलव्यधिकरणव्यापारवाचकरूपोधातुःपचादिःसकर्मकउक्तस्तत्समानाधिकरणव्यापारवाचकस्त्वकर्मकइत्यर्थः अयंणिचूप्रत्ययःसकर्मकधातुर्वाप्रयोजकस्यप्रेरकस्यव्यापारमाह अपरोणिचूप्रकृतिरूपोधातुरकर्मकधातुर्वाप्रयोज्यस्यस्वतंत्रकर्तुर्व्यापारमाहेत्यर्थः तत्रोदाहरणंघटोभवतीतिभूधातुरकर्मकोभाविणिचूप्रकृतिश्चप्रयोज्यमाह तथायंनियमोबोध्यः अयंकः यत्पदंप्रकृतिरूपंप्रत्ययरूपंवाजंतुर्भाषतेतद्विशिष्टमेवभाषतेनकेवलाप्रकृतिःप्रयोक्तव्यानकेवलःप्रत्ययइतिवचनादितिभावः ॥१५१७॥ प्रत्ययोयमितिअयंस्वौजसित्यादिरूपःप्रत्ययःसुपसंज्ञकः तिप्तस्झिइत्यादिस्तुतिङ्संज्ञकः अस्मिन्सुप्तिङ्रूपेप्रत्ययेजातेसतिअपरःप्रत्ययोनजायतेइत्यर्थः प्रायेणेतिशेषः अन्यथापचतितरामितितरपूततइतिपंचम्यंतात्तसिंश्चनस्यादितिबोध्यम् ॥ १५१८ ॥ तद्धितोयमिति एषयूनस्ति

धातुःसकर्मकश्चायमयंनिष्ककर्मकोपरः ॥ अयंप्रयोजकस्याहव्यापारमपरोपिहि ॥ प्रयोज्यस्यतथाजंतुर्विशिष्टंभाषतेध्रुवं ॥ १५१७॥ प्रत्ययोयंसुबुद्दिष्टस्तिङेषोपिनचापरः ॥ प्रत्ययेप्रत्ययोभूयादस्मिन्नुभयरूपिणि ॥ १५१८ ॥ तद्धितोयंकृदेषस्यादेषकृत्यादिकःपरः ॥ समासोयंतथैवायंसमासांतपरोपिच ॥ १५१९ ॥ सनादिर्नामधात्वादावेपस्त्रीप्रत्ययःपरः ॥ अपत्यादिषुचैवायंचतुरर्थोयमीरितः ॥ १५२० ॥

रित्यादिकस्तद्धिताधिकारपठितःप्रत्ययस्तद्धितसंज्ञकः तथाएषकृदतिङित्यधिकारपठितःप्रत्ययःकृत्संज्ञकः तथाएषकृदधिकारेण्वुलःप्राकृपठितस्तव्यदादिःप्रत्ययःकृत्यसंज्ञः कीदृशः परःसामान्यविशेषयोर्भेदपक्षेकृत्सामान्याद्भिन्नइत्यर्थः तथायंप्राक्कडारात्समासइत्यधिकारेपठितसूत्रैर्निष्पन्नोभूतपूर्वादिःशब्दःसमाससंज्ञकः तथायंद्वित्राइत्यादिकःसमासःसमासांतसंज्ञकडजादिप्रत्ययांतइत्यर्थः ॥१५१९॥ सनादिरिति धात्वादावितिधातुपदंभावप्रधानं तथाचसनादिःसन्क्यचूकाम्यजित्यादिर्द्वादशविधःप्रत्ययः धात्वादौधातुत्वारंभेनिमित्तमितिशेषः सनाद्यंताधातवइत्यनुशासनादित्यर्थः एषङीपूटाबादिःप्रत्ययःपरस्तद्धितभिन्नस्तदधिकारात्पूर्वंपाठादितिभावः तथायमणादिःप्रत्ययोऽपत्याद्यर्थेषुविहितः तथायंतदस्मिन्नस्तीत्याद्यर्थचतुष्टयेविहितःप्रत्ययश्चतुरर्थइत्युक्तः ॥ १५२० ॥ ॥११३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावादिष्विति तथायंघञादिःप्रत्ययोभावादिषुआदिपदेनकर्त्रभिन्नकारकेषुचबोध्यः परंत्वयंघञादिर्यदाभावेभवतितदावचनस्यतदुपल क्षितलिंगस्यचभेदंविशेषंकरोति कृदभिहितोभावोद्रव्यवत्प्रकाशतेइतिसिद्धांतादित्यर्थः इत्यादीत्यर्द्धंव्याख्यातमिति ॥ १५२१॥वाक्यशा स्त्रेमीमांसायांप्रसिद्धान्पदार्थान्कांश्चित्तथानुवदति वाक्येपीत्यायेकचिशताश्लोकैः एवंकथमित्याकांक्षायामेतत्पदमित्यादियोज्यं एतद्व र्णसमुदायात्मकंपदंवोध्यं तथैतत्पदसमुदायात्मकंवाक्यं तथायंज्योतिष्टोमादिशब्दःशब्दपरोविष्णुमुच्चारयेत्यादावविवक्षस्वरूपस्यैवोपस्था पकः सहिस्वभिन्नपदानुपस्थितएवयागादिनाऽभेदसंबंधेनान्वेतीतिभावः तथामीषांज्योतिष्टोमेनयजेतस्वर्गकामइतिवाक्यगतपदानांवि भागतःएकैकप्रयोगकालेशून्यतावाक्यार्थावोधकत्वलक्षणाकांक्षाइयमनुभवसिद्धावर्ततेऽतएषांमिलितानांवाक्यत्वमितिशेषः॥१५२२॥ एकवाक्यलक्षणपरस्यार्थैक्यादेकंवाक्यंसाकांक्षंचेद्विभागेस्यादितिसूत्रस्यार्थमाह इदमितिद्वाभ्यां इदमुद्भिदायजेतपशुकामइतिवाक्यं

भावादिषुतथाचायमयंवचनभेदकृत् ॥ इत्यादिपदविज्ञानाद्भृशंमोमुच्यतेपुमान् ॥ १५२१ ॥ वाक्येप्येवंम हाराजविद्वान्मोहमुपैतिसः ॥ एतत्पदमिदंवाक्यमयंशब्दपरोस्तिह ॥ तथेयंशून्यतामीषांपदानांहिविभाग तः॥१५२२॥ इदंवाक्यांतरंयस्माद्विभागेविद्यतेनहि॥ आकांक्षापदसंघस्यपूर्ववाक्यस्थितस्यहि॥१५२३॥ एकमर्थंवदेदेकंवाक्यंवापदमेववा॥ द्वितीयेवचनेतस्यभेदोभवतिसर्वथा॥१५२४॥ वर्णाःसर्वगतानित्या विवर्त्ताब्रह्मणोपिते॥ स्थानप्रयतनैःशुद्धैरितिवासंस्कृताहिते॥ १५२५॥

मुक्तज्योतिष्टोमवाक्याद्वाक्यांतरंभिन्नंवाक्यंभवतियतोविभागेपृथक्प्रयोगेएतद्गतपदसंघस्यतथापूर्वमुक्तंयज्ज्योतिष्टोमवाक्यंतत्रस्थितस्य चपदसंघस्यपरस्परमाकांक्षानास्तीत्यर्थः ॥१५२३॥ एकमिति एकंएकवारंप्रयुक्तंपदंवाक्यंवाएकमेवार्थंवदेत् द्वितीयस्याप्यर्थस्यवचने प्रतिपादनेतस्यवाक्यस्यभेदोभवति विधेयभेदाद्वाक्यभेदइतिसिद्धांतादित्यर्थः ॥ १५२४ ॥ पदवाक्ययोःस्वरूपघटकानांवर्णानांतत्त्वंमत भेदेनाह वर्णाइतिद्वाभ्यां वर्णाःसर्वगताविभवोनित्याश्चेतिपूर्वमीमांसकावदंति उत्तरमीमांसकानांमतेतुतेवर्णाःपरब्रह्मणोविवर्त्तामायया तत्रब्रह्मणिकल्पिताआकाशादिवद्व्यावहारिकसत्ताशालिनइतिविशेषोभिन्नक्रमस्यवाशब्दस्यार्थः तेवर्णाइतिशिक्षायुक्तप्रकारेणशुद्धैर्दो षसंकरहीनैःस्थानैःकंठादिभिःप्रयतनैःस्पृष्टादिभिश्चध्वनिद्वारासंस्कृताभवंतीत्यर्थः ॥ १५२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभिव्यक्ताइति तेवर्णास्तात्वादिस्थानेष्वाभ्यंतरवायुसंयोगैरभिव्यक्ताःसंतोऽस्यश्रोतुःकर्णमण्डलींश्रोत्रदेशंक्रमाद्वक्तृमुखजन्यवायुना श्रोतृश्रोत्रपिधायकवाय्वपसारणक्रमेणाभ्यागताःप्राप्ताश्चसंतःक्रमबुद्धिक्रमेणोपलब्धिमुपागताःपदरूपावाक्यरूपाश्चकथ्यंतइतिशेषः ॥ १५२६॥ ननुपदादिरूपेणवर्णानांबोधकत्वंनसंभवतितदुपलब्धीनांयौगपद्यासंभवादितिशंकांवारयति संस्कारेति पदादिषुपदवाक्य महावाक्येषुवर्तमानोयोयमंत्यवर्णःसएवपदादिजन्यबुद्धीनांकारणत्वेनोक्तः कीदृशोंत्यवर्णः संस्कारसचिवःपूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतइत्यर्थः ॥१५२७॥ औत्पत्तिकसूत्रार्थंपूर्वार्द्धेनाकृत्यधिकरणार्थंचोत्तरार्द्धेनसूचयति नित्यइति पदवाक्ययोःसंबंधिनौयौ शब्दार्थौशब्दोवर्णात्मकोघटकतयातत्संबंधीअर्थस्तुबोध्यतयेतितयोःसंबंधोबोध्यबोधकभावरूपःसनित्यःस्वाभाविकोनतुकेनचित्कृतइ

अभिव्यक्ताश्चताल्वादिसंयोगैःकर्णमंडलीं॥ क्रमादस्यागताःसंतःक्रमबुद्धिमुपागताः॥ १५२६॥ संस्कारसचिवोयोयमंत्यवर्णःपदादिषु॥ पदवाक्यादिबुद्धीनांकारणंसप्रकीर्तितः॥ १५२७॥ नित्यःशब्दार्थयोस्तद्वत्संबंधःपदवाक्ययोः॥ अर्थस्याकृतिरूपस्यशब्दःस्याद्बोधकःसदा॥ १५२८॥ स्मारयंत्यात्मनोर्थ्यंर्थंवाक्यगानिपदानिहि॥ तेनाभिधायकान्याहुःपदानिपदकोविदाः ॥ १५२९ ॥ वाक्यार्थप्रत्ययायैवयद्यप्येषांप्रवर्तनं॥ नांतरीयकसंबंधाद्बोधयंतिहितानपि॥ १५३० ॥

त्यर्थः नन्विदमयुक्तंसंबंधनित्यत्वस्यसंबंधिनित्यताधीनत्वाद्वर्णव्यक्तीनांनित्यत्वेप्यर्थव्यक्तीनांनित्यत्वासंभवादित्यतआह अर्थस्येति आकृतिर्जातिस्तद्रूपस्यजातिरूपस्यैवार्थस्यशब्दःप्रतिपादकोव्यक्तिबोधस्तुलक्षणयाभवतीतिभावः ॥ १५२८ ॥ तत्रवर्णानामनुभावकत्वंवाक्यरूपेणैवभवतीत्याह स्मारयंतीति यतोवाक्यगतानिपदान्यात्मनोऽर्थंपदार्थंस्मारयंतितेनतावताव्यापारेणपदान्यभिधायकान्याहुर्नत्वनुभावकत्वेनेतिसंबंधः ॥ १५२९ ॥ वाक्यार्थेति यद्यप्येषांपदानांप्रवर्तनमुच्चारणंवाक्यार्थबोधायैवक्रियतेतथापिपदानितान्पदार्थानपिबोधयंति कुतः नांतरीयकसंबंधात् अंतराविनाभवतीत्यांतरीयकंतद्भिन्नंनांतरीयकंअविनाभावीतियावत् तादृशात्संबंधात्पदार्थबोधनंविनावाक्यार्थबोधनानुपपत्तेरितियावत् ॥ १५३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भट्टसंमतमभिहितान्वयवादमभिनयति तेनेति तेनपदानांस्मृतिमात्रजननोपक्षीणत्वेनवाक्येवर्तमानैःपदैरभिहिताःस्मारिताअर्थाएवान्वयंवाक्यार्थंयांतिबोधयंति कीदृशेवाक्ये सच्चिदानंदरूपोयमात्मेत्यादिरूपे एतद्विशेषणंप्रकृताभिप्रायेणेत्यर्थः अर्थइत्येकवचनंतुजात्यभिप्रायेणबोध्यं ननुकियंतःपदार्थावाक्यार्थपूरकाइतिचेद्यावंतआकांक्षिताइत्याह येषामिति येषांपदार्थानामाकांक्षतातासाकांक्षत्वंतेषांतावतांतत्रवाक्यार्थेसंबंधोघटकत्वरूपःकीर्तितइत्यर्थः॥ १५३१॥ वाक्यार्थःक्रियापदार्थेनैवपूर्यतइतिसूचयंस्तदितरेषांवाक्यार्थापूरकत्वंतद्भृताधिकरणसिद्धांतमाह कारकाख्यमिति कारकाख्यंकारकंकर्तृकर्मादिरूपमेवाख्यात्यभिदधातीतिकारकाख्यमेतादृशंपदमेकमनेकंवावाक्यंवाक्यभावापन्नंभवेदितिनियतंनियमइत्यर्थः तथाशेषःषष्ठ्यर्थोप्येकोनेकोवाअवाचकोवाक्यार्थाप्रतिपादकइत्यर्थः क्रियालक्ष

तेनाभिहितएवार्थोबाध्येयात्यन्वयंसदा॥ सच्चिदानंदरूपोयमात्मेत्यादिस्वरूपके॥ येषामाकांक्षतातेषांसंबंधस्तत्रकीर्तितः॥ १५३१॥ कारकाख्यंपदंवाक्यंनियतंनभवेत्क्वचित्॥ अनेकंवाभवेदेकंतथाशेषोप्यवाचकः॥ १५३२॥ क्रियापदंसदैवैकंवाक्येस्यान्नाधिकंक्वचित्॥ वाक्यंवाक्यांतराकांक्षंनयत्तद्वाक्यमीरितं॥ तत्रप्रकरणंकेचिद्वदंत्यन्येविपश्चितः॥ १५३३॥ क्रियावाक्येषुविज्ञेयौलिङ्लोटौहिविधायकौ॥ कृत्याश्चवैदिकेतद्वल्लकारःपंचमोहियः॥ १५३४॥

णयातुकारकादिपदानामपिवाक्यार्थबोधकत्वंभवति यथावैश्वदेव्यामिक्षेत्यादौदेवतादिवाचकपदानांयागलक्षणयेतिभावः॥१३३२॥ एकेनक्रियापदेनैकंवाक्यंपूर्यतइत्याह क्रियेति एकमेवक्रियापदंवाक्येस्यादितिसंबंधः यतोहेतोर्यद्वाक्यंवाक्यांतरापेक्षंवाक्यांतरसापेक्षंनभवतितदेववाक्यमीरितं तत्रवाक्यस्यवाक्यांतरापेक्षायांतुप्रकरणलक्षणप्रमाणंकेचिद्वदंति कीदृशाःकेचिद्विपश्चितःसर्वज्ञाद्भट्टपादादन्येभट्टपादस्तुतत्रमहावाक्यमाह तदुक्तं स्वार्थबोधेसमाप्तानामगांगित्वाद्यपेक्षया वाक्यानामेकवाक्यत्वंपुनःसंहत्यजायतेइति तथाचप्रमाणांतराभ्युपगमोव्यर्थाउभयाकांक्षारूपस्यप्रकरणस्यवाक्यभावकल्पनोपक्षीणत्वादितिभावः॥ १५३३॥ तत्रविधायकवाक्यलक्षणानिसंगृह्णाति क्रियावाक्येष्विति क्रियायाःसाध्यार्थस्यप्रतिपादकेषुवाक्येषुविधेःप्रवर्तनारूपस्यप्रतिपादकालिङ्लोट्लेट्लकाराःकृत्यसंज्ञास्तव्यदादिप्रत्ययाश्चबोध्याइत्यर्थः॥ १४३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्राप्तार्थेएवविधिरितिदर्शयन्प्राभाकराभिमतालौकिकापूर्वार्थतांनिरस्यति अपूर्वार्थइति सर्वत्रापूर्वार्थेविधिर्ज्ञेयः अपूर्वपदार्थमाह प्र
माणांतरतोऽप्राप्तइति प्रमाणांतरेणाज्ञातेइतितदर्थः विधिर्लिङाद्यर्थोवेदेऽन्यथालोकाद्विलक्षणोनचभवति तथाचप्राभाकराभिमतमलौ
किकमपूर्वंविद्ध्यर्थत्वेननस्वीकार्यमितिभावः॥१५३५॥ वेदपदार्थमाह मंत्रेति अंगेषुशिक्षाकल्पादिषुआदिपदग्राह्यमीमांसादिशास्त्रेषुच
प्रदर्शितानियानिलक्षणानिअपौरुषेयवाक्यत्वादीनितैर्युक्तोवाक्यसमूहोवेदपदार्थोबोध्यः कीदृशोविध्याद्यर्थैर्विधिनिषेधदेवतादिस्वरू
पात्मकार्थैर्युक्तः सद्वेधामंत्ररूपेणब्राह्मणरूपेणचेत्यर्थः तत्रमंत्रलक्षणंमंत्रत्वेनवैदिकप्रसिद्धत्वंतद्भिन्नत्वंब्राह्मणत्वमितिबोध्यम्॥१५३६॥
अर्थवादंलक्षयति विधेरिति विधेर्विधायकवाक्यस्यार्थाद्विधेयरूपात्परोभिन्नोर्थोऽर्थवादइतिपदोक्तेनवेदभागेनईरितउक्तइत्यर्थः सचा

अपूर्वार्थेविधिर्ज्ञेयोलोकेवेदेचसर्वदा॥ प्रमाणांतरतोऽप्राप्तेविधिर्वेदेनचान्यथा॥१५३५॥ मंत्रब्राह्मणभा
गेनवेदोद्वेधाप्रकीर्तितः॥ अंगादिलक्षणैर्युक्तोविध्याद्यर्थसमावृतः॥ १५३६॥ विधेरर्थात्परस्त्वर्थोत्वर्थवा
दइतीरितः॥ परकृत्यादिभेदेनभिद्यतेससहस्रधा॥ १५३७॥ अपूर्वमपिचेदर्थंविरुद्धंभाषतेक्वचित्॥ प्रमा
णैर्गुणवादाख्यःसोर्थवादइतीरितः॥ १५३८॥ क्रियापदंहियद्वाक्येदृश्यतेनैवकर्हिचित्॥ कार्यस्तत्रानुषंगो
स्यवाक्यात्पूर्वापरस्थितात्॥ कारकाणांपदेष्वेवंकेचिदाहुर्मनीषिणः॥ १५३९॥

र्थवादःपरकृतिप्रभृतिरूपैरनेकधा तत्रपरकृतिर्नामपरकीया तत्रहेतुर्यथाशूर्पेणजुहोतीत्यत्रतेनह्यन्नंक्रियतेइतिहेतुनिर्वचनं साधारणी
कृतिर्व्यापारः यथादर्शयागप्रकरणेबहुनाम्नःकस्यचिद्वृत्तमुक्तंमाषानेवमह्यंपचतेति आदिपदेनहेतुनिर्वचनादयोग्राह्याःयथावज्रहस्तःपुरं
दरः॥ १५३७॥ गुणवादाख्यमर्थवादभेदंलक्षयति अपूर्वमिति अपूर्वमप्यर्थंयदिप्रमाणांतरैर्विरुद्धंभाषतेसोर्थवादोगुणवादइत्युक्तः एते
नप्रमाणांतरसिद्धार्थाभिधानेनुवादत्वंप्रमाणांतरसंवादविसंवादयोरभावेभूतार्थवादत्वमितिसूचितं ॥ १५३८ ॥ पूर्वमीमांसाद्वितीया
ध्यायप्रसिद्धस्यानुषंगाधिकरणस्यतात्पर्यमाह क्रियापदमिति यत्रवाक्येक्रियापदंनदृश्यतेतत्रपूर्वस्मादुत्तराद्वावाक्यादनुषंगस्तत्रस्थित
स्यैवबुद्ध्यापरामर्शरूपःकार्यः एवंकारकवाचकपदानामप्यनुषंगइतिकेचिद्भाष्यकारादयआहुरित्यर्थः ॥ १५३९ ॥

॥११५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याहारादिस्थलमाह सन्निधानमितिद्वाभ्यां यत्रवाक्येउपयोगिपदघटितस्यकस्यचित्पूर्वस्योत्तरस्यवावाक्यस्यसन्निधानंसामीप्यं नास्तितत्रैवाध्याहारोऽनुक्तपदप्रक्षेपरूपःकार्यइतिसंबंधः यथाइषेत्वेतिमंत्रेच्छिनद्मीतिपदाध्याहारः हेशाखेइषेअन्नायत्वांछिनद्मीतित दर्थः॥१५४०॥ आकांक्षादीति तथाआकांक्षायोग्यतादिवशात्पदानांवचनादीनांविपर्ययःकर्तव्यः यथापशुयागमंत्रे संतेप्राणोवातेनग च्छतांसमंगानियजत्रैरित्यत्र हेपशोतेप्राणोवातेनसंगच्छतांसंगतोभवेत् तथाअंगानिचतेयजत्रैर्यज्ञोपकरणैःसंगच्छन्तामितिवचनव्यत्य यः एवंलोकेप्ययंन्यायःसाधारणइत्यर्थः आदिपदेनवाक्यान्यथात्वकरणरूपव्यवधारणकल्पनायाग्रह्या तदुदाहरणंयथा यावतोऽश्वान्प्र तिगृह्णीयात्तावतोवारुणान्चतुष्कपालान्निर्वपेदित्यत्रप्रतिगृह्णीयादित्यस्यप्रतिग्राहयेदित्यर्थइति ॥ १५४१ ॥ लोकवेदाधिकरणार्थमा

सन्निधानंनयत्रास्तिवाक्येवाक्यस्यकस्यचित्॥ अध्याहारस्तुतत्रैवकार्योनान्यत्रकर्हिचित् ॥ १५४० ॥ आ
कांक्षादिवशात्तद्वद्वचनव्यत्ययादिकं॥ एवंलोकेचसर्वत्रसाधारणमुदीरितम् ॥ १५४१ ॥ संगतिग्रहसापे
क्षःशब्दःस्वार्थस्यबोधकः॥ यएवलौकिकाःशब्दावैदिकाश्चतएवहि॥ १५४२॥ विध्यर्थोधर्मउद्दिष्टोब्रह्मवा
ऽपूर्वरूपकं॥ अर्थवादादिकंसर्वंमानंविध्यर्थईरितम्॥ स्तुतिनिंदादिकंकृत्वाप्रवृत्तिंजनयेद्यतः॥ १५४३ ॥
विनियोगःप्रयोगश्चत्वुत्पत्तिश्चाप्यधिक्रिया॥ चतुर्विधंहिविज्ञेयंविधिवाक्यंमनीषिभिः ॥ १५४४ ॥

ह संगतीति यतःसर्वःशब्दःसंगतिग्रहसापेक्षः संगतिश्चपदपदार्थसंबंधरूपालोकतएवग्राह्या अतोयेलौकिकाःशब्दास्तएववैदिकास्तेषांभू योवयवसामान्यशालिनांयत्किंचित्स्वरादिवैलक्षण्यंनधर्मिभेदापादकमितिभावः॥१५४२॥ एवंपदपदार्थानांलोकवेदयोरविशेषेपिवा क्यार्थोवेदेऽपूर्वएवेत्याह विध्यर्थइति विधेरज्ञातज्ञापकत्वलक्षणविधित्वशालिनोवेदवाक्यस्यार्थोद्विविधः पूर्वकांडेधर्मरूपः उत्तरकांडे चब्रह्मरूपउभयोरपूर्वत्वात्प्रमाणांतराविषयत्वादित्यर्थः अर्थवादमंत्रादिकंतुविधेयस्तुतितदितरनिंदादेवतादिस्मृतिंचकृत्वाप्रवृत्तिजनय त्सद्विध्यर्थेविधिवाक्यार्थएवप्रमाणमित्यर्थः ॥ १५४३॥ विधिभेदानाह विनियोगइति कर्मस्वरूपबोधकउत्पत्तिविधिः अंगांगिभावबो धकोविनियोगविधिः प्रयोगःक्रमेणानुष्ठानंतद्बोधकःप्रयोगविधिः अधिक्रियाफलसंबंधस्तद्बोधकोधिकारविधिरित्येवंविधिवाक्यंचतु र्विधमित्यर्थः ॥ १५४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकवाक्यताप्रयोजकमाकांक्षात्रयंतथाऽपूर्वकल्पनाप्रकारंचदर्शयति केनेति भावनापूर्वोत्पत्त्यनुकूलव्यापाररूपतातत्प्रतिपादकस्यवा क्यस्यार्थेसाधनंसाध्यमितिकर्तव्यताचेत्याकारकमंशत्रयंकेनेत्याद्याकारकाकांक्षाविषयभूतमुक्तंतेननवाक्यभेदइतिभावः अथवाक्यार्थ वोधोत्तरमिष्टस्यस्वर्गादेःसाधनंसाधनस्ययागादेर्व्यापारभूतमपूर्वकल्पनीयमित्यर्थः ॥१५४५॥ कर्मणांभेदमाह कर्माणीति कर्माणिद्वि विधानिप्राकृतानिवैकृतानिचेति तत्रप्रकृतौसमग्रांगोपदेशवतियागेदर्शपूर्णमासादाविदंकर्मैवंकुर्वीतेत्येवंविधीयमानंप्रयाजादिप्राकृतमि त्युच्यते विकृतौसौर्यादियागेप्रकृतिवद्विकृतिःकर्त्तव्येत्येवंविधीयमानमंगजातंवैकृतमित्युच्यतइत्यर्थः ॥१५४६॥ शब्दादिभिरिति शब्दः शब्दांतरं आदिपदेनाभ्याससंज्ञासंख्यागुणप्रकरणांतराणिगृह्यंते उदाहरणानियथाक्रमं दद्यात्जुहुयादिति समिधोयजतितनूनपातंय जतीति अथैषज्योतिरथैषसर्वज्योतिरिति सप्तदशप्राजापत्यानालभेतेति वैश्वदेव्यामिक्षावाजिभ्योवाजिनमिति कुंडपायिनामयनेमास

केनकिंकथमित्येतदंशत्रयमुदीरितं ॥ भावनायाश्चवाक्यार्थेऽथापूर्वंचेष्टसाधनम् ॥ १५४५॥ कर्माणिप्रा कृतान्यत्रकानिचिद्वैकृतान्यपि ॥ इदमेवंप्रकुर्वीतेत्यादिप्राकृतमीरितं ॥ एतद्वदिदमप्यत्रयदुक्तंवैकृतंहितत् ॥ १५४६ ॥ शब्दादिभिर्विभिन्नानिकर्माण्येतानिसर्वशः ॥ अंगांगिभेदभिन्नानिनानाशाखागतानिच ॥ श्रुत्यादिभिस्तुनियतातेषामंगांगितामता ॥ १५४७ ॥ शब्दादिक्रमतस्तेषामनुमानंसमीरितं ॥ त्रैवर्णिकैः सपत्नीकैरेकानेकैर्व्यवस्थितम् ॥ १५४८ ॥

मग्निहोत्रंजुव्हतीत्याद्याकाराणिबोध्यानि तानिचकर्माणिकानिचिदंगानिशेषभूतानियथाप्रयाजादीनिकानिचिदंगीनिप्रधानानियथा आग्नेयादीनि तेषामंगांगिभावेप्रमाणानितुश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यारूपाणिबोध्यानीत्यर्थः एतेनप्रयोज्यप्रयोजकभावश्च तुर्थाध्यायार्थोपिसूचितः यदर्थमंगस्यानुष्ठानंतत्प्रयोजकंयथापुरोडाशकपालेनतुषानुपवपतीत्यत्रपुरोडाशएवकपालप्रयोजकःकपालः प्रयोज्यइति ॥ १५४७॥ पंचमषष्ठयोरर्थंसूचयति शब्दादिक्रमतइति तेषांकर्मणामनुमानमंगांगिभावनिश्चयोत्तरंमानंपरिमाणमियत्ता रूपंशब्दादिभिःश्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिरूपैःषड्भिःप्रमाणैर्बोध्यमित्यर्थः उदाहरणानिमीमांसाप्रकरणेषुप्रसिद्धानि कीदृशंकर्मणां परिमाणं त्रैवर्णिकैःसपत्नीकैरधिकारिभिर्व्यवस्थितंव्यवस्थयाक्रियमाणं कीदृशैरधिकारिभिरेकानेकैः यागेष्वेकसंख्याकैःसत्रेष्वनेकसं ख्याकैरित्यर्थः ॥ १४४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमाष्टमयोरर्थंसूचयति द्रव्यादीति दर्शकस्येतिकर्तरिषष्ठी तथाचदर्शकेन विवेकिना विकृतिगतंद्रव्यदेवतादिकंदृष्ट्वाइयंविकृतिरस्यकर्मणइतिविशेषतःप्रकृतिविकृतिभावोज्ञेयइत्यर्थः यथासौर्ययागेएकदेवताकत्वमौषधिद्रव्यकत्वंच निश्चित्याग्नेयपुरोडाशविकृतित्वंज्ञायतइति एतेननोदनालिंगाख्यप्रमाणप्रदर्शनेनप्रत्यक्षवचनातिदेशोनामातिदेशश्चसूचितः तयोरुदाहरणंचसमानमितरत्श्येनेनेतिकुंडपायिनामयनेमासमग्निहोत्रंजुह्वतीतिचवोध्यम् ॥ १५४९ ॥ नवमदशमयोरर्थंसूचयति विकृताविति विकृतियागेप्रकृतितःप्राप्तमंत्रादिगतानांपदपदावयवसामसंस्काराणामूहःप्रधानानुसारेणरूपांतरापत्तिरूपोज्ञेयः तथातत्रविकृतौकर्मसुविशेषविहितांगैःसर्वेषुपूर्णेषुसत्सुप्राकृतांगानांबाधोनिवृत्तिरूपोविज्ञेयः यथाग्नयेजुष्टंनिर्वपामीतिमंत्रस्यसौर्ययागेसूर्यायजुष्टमित्यादिप्रयोगरूपऊहःशतकृष्णलचरौचव्रीहीणांतत्संस्काराणामवहननादीनांचबाधः ॥ १५५० ॥ द्वादशैकादशयोरर्थमाह अन्यार्थमिति यत्रान्यार्थंकृतेनांगेनान्यस्योपकारःसप्रसंगइ

द्रव्यादिदर्शनेनैवदर्शकस्यविशेषतः॥ अस्येयंविकृतिर्ज्ञेयानान्यथासामनीषिभिः॥ १५४९ ॥ विकृतौसर्वदैवोहःपदादीनांमनीषिभिः॥ बाधश्चखल्वविज्ञेयस्तत्रसर्वेषुकर्मसु ॥ १५५० ॥ अन्यार्थंहिकृतेनस्यादुपकारःपरस्ययः॥ सप्रसंगःपरंतंत्रमेकंनानार्थसिद्धये॥ १५५१ ॥ यइत्यादिपुमान्वक्तित्वन्यच्चापिसदावदेत्॥ ब्रह्मज्ञानेयतःसंतियज्ञादीनिसहस्रशः॥ साधनान्यहमेवैतत्सर्ववेद्मिनचापरः॥ १५५२॥ इदंत्र्यवयवंवाक्यमेतद्व्यवयवंतथा॥ पंचावयवमेतत्स्यात्साधनंचेतरन्नहि ॥ १५५३ ॥

त्युच्यते यथापशुयागेपश्वर्थंकृतैःप्रयाजैःपुरोडाशस्योपकारइति यत्रत्वेकमेकवारंकृतंकर्मनानाप्रधानानामंगभूतंतत्तंत्रमित्युच्यते यथापूर्णमासेआग्नेयोपांशुयाजाग्नीषोमीयाख्यप्रधानानांसकृदनुष्ठितप्रयाजाउपकारकाः ॥ १५५१ ॥ पूर्वमीमांसार्थमुपसंहृत्योत्तरमीमांसापदार्थांस्तयोपलक्षयति यइत्यादीति यःपंडितंमन्यइत्यादिपूर्वमीमांसापदार्थजातंसदसिवदतिसोन्यच्चशास्त्रांतरार्थजातमेवंवदेत् एवंकथं ब्रह्मज्ञानसाधनानामहमेववेत्तेति ज्ञात्वापिसाधनाननुष्ठानेनत्रपतेइत्यतिचित्रमितिभावः ॥ १५५२ ॥ प्रमाणशास्त्रेन्यायेप्रसिद्धान्कांश्चित्पदार्थान्व्यामोहकतयानुवदति इदमितिपञ्चभिः इदंप्रतिज्ञाहेतूदाहरणरूपमुदाहरणोपनयनिगमनरूपंवात्र्यवयवंपरार्थानुमानवाक्यंमीमांसकैरुच्यते इदंउदाहरणोपनयरूपंद्व्यवयवंबौद्धैरुच्यते तथापिएतन्न्यायशास्त्रेप्रसिद्धंप्रतिज्ञादिनिगमनांतमेवबाक्यसाधनंसाध्यनिश्चयोपयोगिस्यात्पूर्णत्वादित्यर्थः ॥ १५५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुमानमूलव्याप्तिज्ञानमूलत्वेनप्रधानस्यतर्कस्यषड्भेदानात्माश्रयान्योन्याश्रयचक्रकाऽनवस्थाव्याघातप्रतिबंदिरूपान्प्राचीनसंमतान
भिनयति अयमिति तार्किकएवंपरानूदूषयति एवंकथमित्याकांक्षायांत्वन्मतेअयमात्माश्रयाख्यस्तर्कइत्यादियोज्यं तत्रस्वसिद्धौस्वापे
क्षणेबाधकस्तर्कआत्माश्रयइत्युच्यते यथास्वभाववादिनंस्वयंजन्यतांकार्याणांस्वीकुर्वंतंप्रत्युच्यते यदिकार्यंस्वजन्यंस्यात्तर्हिस्वपूर्वका
लवृत्तिस्यादिति एवंपरस्परापेक्षणेबाधकस्तर्कोऽन्योन्याश्रयः अपेक्षणद्वयव्यवहितेपूर्वापेक्षणेबाधकस्तर्कश्चक्रकं अपर्यवसितोत्तरा
पेक्षणेबाधकस्तर्कोनवस्थेति प्रसंगहतोव्याघातः यथायदिवन्हिःशीतोनस्यात्तदावन्हिरेवनस्यादित्यादिः यंप्रकृत्येदमुक्तं संभावितःप्रति
ज्ञायांपक्षःसाध्येतहेतुना नतस्यहेतुभिस्त्राणमुत्पतन्नेवयोहतइति प्रतितर्कःप्रतिबंदीतुल्यायुक्तिरितियावत् तयाहतःप्रतिरुद्धः यथाशब्दोय
दिनित्योनस्यात्तदाश्रावणोनस्यादितिमीमांसकेनोक्तेनैयायिकआह शब्दोयद्यनित्योनस्यात्तदाकृतिसाध्योनस्यादिति ॥१५५४॥ अ

अयमात्माश्रयस्तर्कोह्ययमन्योन्यसंश्रयः॥ चक्रग्रहस्तएषोपिह्यनवस्थाहतोपरः॥ प्रसंगहतएषस्यात्प्रतित
र्कहतोपरः ॥ १५५४ ॥ इष्टापत्त्यास्वयंग्रस्तएषोऽनिष्टाकृतौतथा ॥ व्याप्त्याहीनस्त्वयंतर्कोविपरीतोप्ययंत
था॥ अनुग्राहकशून्योयमयंस्यादप्रयोजकः॥ १५५५॥ आपादकोत्रविज्ञेयोहेत्वाभासोपिदुर्बलः ॥ आ
पाद्यंचतथैवैतदाश्रयादिविवर्जितम्॥ १५५६॥

सत्तर्कानाह इष्टापत्त्येति यत्रतर्कैपरस्येष्टमेवसिद्ध्यति यथायदिविषयाणांभेदोज्ञानान्नस्यात्तदातेषांसत्यत्वंनस्यादित्यद्वैतवादिनंप्रत्या
पादनेतादृशस्तर्कइष्टापत्त्याग्रस्तउच्यते यश्चतर्कःप्रतिवादिनोऽनिष्टस्याकृतौअकरणेपर्यवसन्नःपरानिष्टानारंभकइतियावत् सोपितथा
इष्टापत्तिग्रस्तवदसन्नित्यर्थः यथाव्यवहारेयदिकर्मवैचित्र्यंनस्यात्तदासृष्टिवैचित्र्यंनस्यादितिकर्मवैचित्र्यसाधनेपरमार्थाद्वैतवादिनोन
किंचिदनिष्टमिष्टंवेति यत्राव्याप्येनाव्यापकापादनंयथावन्हिनाधूमस्यतर्कोव्याप्तिहीनः यत्रतुव्यापकंप्रथमंनिर्दिश्यव्याप्यमापाद्यते
यथायदिधूमोनस्यात्तदावन्हिर्नस्यादितिसतर्कोविपरीतउच्यतइति यस्यतर्कस्यानुग्राहकंप्रमाणांतरंनास्तिसोनुग्राहकशून्यः अयमनु
ग्राहकशून्यएवाप्रयोजकउच्यतइत्यर्थः यथायदिनित्यःफलारंभकोनस्यात्तदास्वरूपयोग्यएवनस्यादित्यादिः॥ १५५५ ॥ हेत्वाभासा
न्सूचयति आपादकइति साध्यस्यापादकःसाधकतयोपन्यस्तोयंहेतुर्हेत्वाभासोयतोदुर्बलोव्याप्तिपक्षधर्मतारूपेणबलेनहीनः तथात्रत
वानुमानेआपाद्यंसाध्यंआश्रयेणादिपदयाह्यया प्रसिद्ध्याचहीनमित्यर्थः ॥ १५५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टांतइति दृष्टांतस्यसमीचीनत्वंसाध्यादिमत्तयोभयवादिप्रसिद्धत्वं उदाहरणंउदाहरणसंज्ञंवाक्यमत्रानुमानेमंदबुद्धिनावादिनाव्यर्थमुक्तंविपरीतत्वेनव्याप्त्यनिश्चायकत्वादितिभावः तथाहेतुनिर्देशोत्तरप्रतिज्ञावचनरूपस्यनिगमनस्यविपरीतःप्रयोगोव्यर्थइत्यर्थः॥ १५५७॥ वर्णितप्रपंचस्यप्रकृतोपयोगमाह इत्यादीत्यादिना अयंशास्त्रवासनावानुक्तविधतर्केष्वेवसक्तचित्तोरजसाव्याप्तधीत्वादात्मानंसर्वज्ञंमन्यतइत्यर्थः ॥ १५५८ ॥ एवमिति एवंसर्वज्ञतयाआत्मानंमन्यमानोऽतिमानीदंतदर्शीसकलान्दंतान्दर्शयन्व्यर्थंक्रुध्यति सर्वदंतदर्शनेदृष्टांतःश्वभिर्वेष्टितःश्वेति कर्मणिदृशिविदोःसाकल्यइतिणमुल् ॥ १५५९ ॥ अनात्मविदःशास्त्रज्ञत्वेपीतरजंतुभ्यःकोविशेषःक्षुत्पिपासादि

दृष्टांतोनास्तिकोप्यत्रसमीचीनोहियोभवेत्॥ उदाहरणमस्योक्तंव्यर्थमेवात्रदुर्धिया ॥ नस्यान्निगमनस्यास्य त्युपयोगोत्रकश्चन॥ १५५७॥ इत्यादितर्कसंसक्तचित्तश्चंचलधीरयं॥ एतत्सर्वमहंवेदनान्योवेत्तीतिमन्यते ॥ १५५८ ॥ एवंमन्वानआत्मानंगर्वंपरमुपागतः ॥ दंतदर्शीश्वभिःश्वेवव्यर्थंक्रोधमुपाव्रजेत् ॥ १५५९ ॥ क्षुधानिद्रापिपासावाबहुकस्यनजायते॥ अहर्निशंप्रसार्याऽऽस्यंक्रोष्टेवैषोत्रवर्तते ॥ १५६० ॥ अकारणमिमान्सर्वान्विदुषोब्रह्मचिंतकान्॥ अधिक्षिपत्ययंतद्वदर्थकर्तॄन्हसत्यपि ॥ १५६१ ॥ पिशुनोदुर्जनोयद्वदारोप्यापिवदेदयं॥ दोषान्साधुजनस्येत्थंदुर्वादीत्येषनित्यशः ॥ १५६२ ॥ पाणिनिस्त्वत्रविभ्रांतोभ्रमच्चित्तोत्रजैमिनिः॥ अविचार्य्यैवमाहात्रभगवान्बादरायणः॥ १५६३॥

धर्मैःसाम्यात् यदितुवाचाटत्वमात्रंविशेषस्तदाबहुक्रोशनेनलब्धक्रोष्टुनाम्नाश्रृगालेनसाम्यमित्याह क्षुधेति दिवाक्षुत्पिपासादिभिर्नक्तंनिद्रयाचसर्वजंतुषुभूयस्यामुखप्रसारणसाम्येक्रोशनाधिक्यंक्रोष्टुःसाम्यातिशयंपुष्णातीतिभावः एषःपंडितंमन्यः ॥ १५६० ॥ अकारणमिति अयंपंडितमानीअकारणंनिष्प्रयोजनंविवेकिनोजनानधिक्षिपतिअवजानातितथाअर्थकर्तॄन्व्याख्यातॄनुपहसति ॥ १५६१ ॥ पिशुनइति आरोप्यासतोपिकल्पयित्वासाधूनांदोषानयंपंडितपाशोवदेदित्थंवक्ष्यमाणविधया ॥ १५६२ ॥ इत्थंपदार्थमभिनयति पाणिनिरिति अत्रएतत्सूत्रनिर्माणे तृतीयात्रपदस्यएतत्सूत्रइत्यर्थः इदंपदमहंसर्वंवेद्मीतिभावः ॥ १५६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदेति इदंवेदवाक्यमिहप्रकरणेप्रमत्तवाक्यवदसंगतमतःकेनचिदत्रप्रक्षिप्तंभविष्यति अथवानव्यर्थंसार्थकमेवभविष्यति एतदर्थमहमेववे द्मीतिभावः ॥ १५६४॥ स्वरेति आदिपदेनपदादिग्रहः तथास्वानभ्यस्तेस्वराद्युच्चारणप्रकारेवेदपाठकानेषपंडितमानीनिंदति कथमित्या कांक्षायामाह अहोइत्यादि ॥ १५६५ ॥ वदन्निति ईदृशगर्वाढ्योवदन्नात्मश्लाघांकुर्वन्गुरुमप्यवजानाति तदभिनयति यादृशीति मद्बुद्धिसदृशीबुद्धिर्मद्गुरोर्दुर्लभैव तस्याब्रह्मण्यपिसंशयएवेत्यर्थः ॥ १५६६ ॥ तत्रनिरर्गलरमणीयवाक्यप्रवृत्तिहेतुमाह समुद्रस्येति पद वाक्यशास्त्रयोरुक्तानिलक्षणानियासांतास्तथा ॥ १५६७ ॥ एवंविधस्यबहुभाषणंभाराक्रांतक्रोशनसमंमत्वाविवेकिभिःसउपेक्षणीय

वेदवाक्यमिदंमत्तवाक्येनसदृशंत्विह ॥ क्षिप्तंवाकेनचिन्नैवव्यर्थमेतद्भविष्यति ॥ १५६४ ॥ स्वरवर्णक्रमादौ चपाठकानेषनिंदति ॥ अहोएतैरयंवेदःसर्वोप्यत्रविनाशितः ॥ १५६५ ॥ वदन्नीदृशगर्वाढ्योगुरुमप्यवम न्यते ॥ यादृशीवर्ततेबुद्धिर्ममतीक्ष्णानतादृशी ॥ मद्गुरोर्ब्रह्मणोवैषानासीदस्तिभविष्यति ॥ १५६६ ॥ समुद्र स्येवकल्लोलाममवाचोमनोरमाः ॥ निर्यान्त्यविरतंचित्राःपदवाक्योक्तलक्षणाः ॥ १५६७ ॥ इत्यादिबहुधा प्राप्यविद्वत्ताभारमातुरः ॥ क्रोशत्यतोऽतिनिंद्योयंदुर्जनोरासभोयथा ॥ १५६८ ॥ गृहक्षेत्रकलत्रादिदुस्त्यजं सर्वजंतुभिः ॥ त्यक्त्वापिनत्यजत्येषगर्वपर्वतमद्भुतं ॥ १५६९ ॥ दध्योदनंयथाकश्चिद्भारभृन्मस्तकस्थितं ॥ प रित्यज्यवहेद्व्यर्थंपाषाणंहस्तिसन्निभं ॥ १५७० ॥ तथासुखकरंसर्वंत्यक्त्वादारादिकंपुमान् ॥ दुःखदंगर्वमत्यंतं वहत्येषसुदुर्वहं ॥ १५७१ ॥ नानुध्यायेद्बहून्शब्दान्स्वात्मनेहितकृत्ततः ॥ शब्दानांबहुशोध्यानंवाचोविग्ला पनंहितत् ॥ १५७२ ॥

इत्याह इत्यादीति विद्वत्तांदुःखदत्वाद्भारसमांप्राप्येइत्याद्युक्तप्रकारंबहुधायःक्रोशत्यतोयंदुर्जनइतिसंबंधः ॥ १५६८ ॥ केचित्प्रव्रजिता अप्युक्तविधपांडित्यगर्वभारंवहंतितानुद्दिश्याह गृहेति जंतुभिर्दुस्त्यजंगृहादित्यक्त्वापिभारेणदुःखदत्वात्पर्वतखंडसमंगर्वंनत्यजतीत्यत्य द्भुतमित्यन्वयः ॥ १५६९ ॥ गर्वपर्वतमित्येतत्स्फुटयति दध्योदनमिति यथाकश्चिद्भारभृत्भारवाहकउपकारकंदध्योदनंविहायमहापाषा णंशिरसिधारयेत्तथोपकारकंदारादिकंत्यक्त्वागर्वरूपमहापाषाणस्यधारणंदथेतिद्वयोरर्थः ॥ १५७० ॥ १५७१॥ फलितमाह नानुध्या येदिति विग्लापनंदथाश्रांतीकरणं ॥ १५७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वागूपाधेनुःप्रसादितैवामृतंस्रवतिनतुग्लानिंनीतासतीत्याह चतुरिति स्वाहाकारवषट्कारस्वधाकारहन्तकाररूपादेवपितृमनुष्याणांसम माध्यायोक्तविधयातर्पकाश्चत्वारःस्तनायस्याःसातथातामम्तमयक्षीरप्रदांवागूपांधेनुंकोविवेकीग्लानिंप्रापयेदित्यर्थः॥ १५७३ ॥ केन वाग्धेनुस्तुष्यतीत्याकांक्षांपूरयन्निगमयति तस्मादिति स्पष्टम् ॥ १५७४ ॥ सवाएषइत्यादिब्राह्मणवाक्यंसंगमयति अथेति अथेतिपक्षां तरपरिग्रहे यदित्वंनिर्गुणेमनसोविलयरूपंनिग्रहंकर्तुंनशक्नोषितथापिसगुणेश्वराभेदचिंतनरूपमुपायांतरंवक्ष्यामीत्यर्थः ॥ १५७५॥ सवा इत्यादेरसंभेदायेत्यंतस्यात्मप्रभावकथनपरस्यार्थमाह सएवेत्यूनविंशतिश्लोकैः आत्मामहान्परिपूर्णोऽजोजन्मादिविकारहीनःसएक स कः योऽतीतग्रंथेकीर्तितः कथंकीर्तितइत्याकांक्षायामाह प्राणइत्यादि प्राणेइतिजातावेकवचनं तथाचयःप्राणेषुवायुभेदेषुइंद्रियेषुचस

चतुःस्तनींकामधेनुंक्षीरिणींजननीसमां ॥ वाचंग्लानिंनयेत्कोवाचेतनःपुरुषोभुवि ॥ १५७३॥ तस्मात्प्रज्ञां विधायैवब्रह्मणिस्वात्मरूपिणि ॥ व्यापारमिंद्रियाणांहिजह्यादेवाविचारयन् ॥ १५७४ ॥ अथचेन्मनसोत्यं तचंचलस्यप्रमाथिनः ॥ अशक्योनिग्रहःकर्तुंतदावक्ष्यामितेनृप ॥ १५७५॥ सएवैषमहानात्माह्यजोयःप रिकीर्तितः॥ प्राणेज्ञानमयोयोयमाकाशोयोहृदिस्थितः॥ यस्मिन्ज्ञानमयःशेतेसुषुप्तेसततिसर्वदा॥ १५७६॥ अयंज्ञानमयोयस्मादाधाराधेयभेदवान् ॥ अभिन्नःसुप्तिसमयेमयोक्तःसमहानजः ॥ १५७७ ॥ सर्वमेत ज्जगद्राजन्वशेयस्यात्रवर्तते ॥ मंत्रवादिवशेयद्वत्सकलंभूतभौतिकं ॥ १५७८॥ अयंवासकलैर्जीवैर्हृदिस्व स्यवशीकृतः ॥ अपत्यैर्जननीयद्वत्स्वेषुस्निग्धावशीकृता ॥ १५७९ ॥

न्निहितोज्ञानमयोवुद्धितादात्म्यापन्नउक्तस्तथाहृदिहृत्कमलांतराकाशेआकाशरूपःअजातशत्रूपाख्यानउक्तः यस्मिन्हृदंतराकाशेवि ज्ञानमयोजीवः यस्माल्ल्यब्लोपेपंचमी यमादायजाग्रदादौआधाराधेयभेदवान्व्यपदिश्यतेसुप्तिसमयेतुसविज्ञानमयोयेनाभिन्नएवभव तिसमहानजःसर्वेषामात्मतयामयोक्तइत्यर्थः॥ १५७७॥ आत्मनोमायाशवलस्यैश्वर्यंविशदयंस्तत्रवशित्वंद्वेधाह सर्वमितिद्वाभ्यां यस्या त्मनोवशेऽधीनत्वेसर्वंभूतभौतिकात्मकंजगद्वर्ततेयथामंत्रावादिनःसिद्धमंत्रस्यवशेलोकइत्यर्थः॥ १५७८ ॥ अयंवेति अथवाअयमात्मा सर्वस्यहृदयागारंपरित्यज्यनयातीत्यनेनवश्यसाधर्म्येणवशीत्युच्यते वशोऽधीनत्वंतद्वत्त्वादितिभाव तत्रजननीदृष्टांतः वशोजन्मप्रहाय तेष्वधीनत्वप्रभुत्वयोरितिहैमः ॥ १५७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुभूतंप्रभुत्वलक्षणमीशत्वंतदुपपादकमधिपतित्वंचाह सर्वमीष्टइति सोयमात्मासर्वंजगदीष्टेप्रशास्ति तथाधिष्ठायप्रभुर्भूत्वापातिच यथासूर्यःस्ववंश्यराजरूपेणपातितद्वदित्यर्थः ॥ १५८० ॥ अस्यशुभाशुभकर्मभिर्वृद्धिहानीनभवतइत्याह कर्मणेतिद्वाभ्यां यथालोकेसु कृतीयशःप्रभृतिभिर्वर्धमानोभवतितथानायमित्यर्थः यथाचपातकीयशआदिनाकनीयान्हीनोभवतितथानायमितिद्वयोरर्थः॥ १५८१ ॥ ॥ १५८२ ॥ कर्मणाहानिवृद्ध्योरभावेहेतुतयासर्वेश्वरत्वादीन्योजयति एषइतिद्वाभ्यां स्पष्टंद्वयं ॥ १५८३ ॥ १५८४ ॥ अस्यसकलम

सर्वमीष्टेजगत्सोयंस्वगृहंहिगृहीयथा॥ अधिष्ठायजगत्सर्वंपातिचैवंयथारविः॥ १५८० ॥ कर्मणासुकृतेनैष नाधिकःस्यात्कथंचन ॥ सुकृतीहियथालोकेभूयान्स्याद्यशआदिना ॥ १५८१ ॥ कर्मणापातकेनायंकनीया न्नभवेत्क्वचित्॥ लघुर्भवतिपापेनयथापापरतोजनः ॥ १५८२ ॥ एषसर्वेश्वरोदेवःपुण्यपापविवर्जितः ॥ राजादिवज्जगत्सर्वमीष्टेवैषम्यवर्जितः॥ १५८३ ॥ भूताधिपतिरप्येषयद्वदेषदिवाकरः ॥ भूतपालोप्ययंयद्व त्शिशूनांजननीयथा॥ १५८४ ॥ एषदेवःस्वयंज्योतिःपरमानंदरूपभाक्॥ वर्णाश्रमादिमर्यादाधारकःसेतु रीरितः॥ १५८५॥ पारावारांतरेयद्वन्नीरपूरस्यधारकः॥ नद्याःकाष्ठादिजोदृष्टःसेतुःसकलजंतुभिः॥ १५८६॥ एषांभूरादिलोकानांतद्वदेषविधारकः॥ असांकर्यायसर्वेषांस्वेनस्वेनात्मनासदा॥ १५८७॥ यद्ययंनभवेल्लो केमर्यादानांविधारकः॥ महाभूतान्यमून्यत्रकोनामविनिवारयेत्॥ १५८८ ॥

र्यादाधारकत्वेनसेतुतांप्रतिपादयति एषदेवइत्यादिना ॥ १५८५ ॥ सेतुपदार्थमाह पारेति यथानद्याःपारस्यपरतीरस्यअवारस्यापरतीर स्यचांतरेमध्येकाष्ठादिनिर्मितःसेतुर्जलप्रवाहस्यमर्यादाकरःसर्वलोकप्रसिद्धइत्यर्थः ॥१५८६॥ दार्ष्टांतिकेयोजयति एषामिति तथाएष आत्माएषांपृथिव्यादिलोकानांस्वेनस्वेनात्मनारूपेणविधारकोव्यवस्थापकःअसंकराय स्वार्थेष्यञ् ॥ १५८७ ॥ विधारकत्वंविशदय ति यदीति यद्ययमात्मामर्यादाकरोनभवेत्तदापृथिव्यादिमहाभूतानिमर्यादामुल्लंघमानानिकोवारयेदिति ॥ १५८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलेति तथाबलादिसंपन्नांस्तेजस्विनःक्षत्रियान्प्रियव्रतादीन्भुविअनभ्यधिकान्स्वाधिकवर्जितानेतस्मादात्मनोन्यःकोधर्मेप्रवर्तयेदिति ॥ १५८९ ॥ ब्राह्मणानिति तथादुर्वासःप्रभृतीन्ब्राह्मणान्जगद्दाहात्कोवारयेदिति ॥ १५९० ॥ आशीति तथासर्पवत्क्रोधनान्संहार्दीस्तामसान्जंतून्सकलप्राणिहिंसोद्यमात्कोवारयेदिति ॥ १५९१ ॥ अंभोनिधीनिति तथासमुद्रान्जगदाचमनंप्रत्युद्यतान्कोवारयेदिति जगदाचमनेसतीतिपाठेजगतआचमनेयासेसतिप्रसक्तेइत्यर्थः ॥ १५९२ ॥ नदीनामिति कोनदीनांजलानिमर्यादयाचालयति कोभुवंजलस्थांमज्जंतींस्तंभयति कोवासूर्यादीन्खात्पततोवारयतीति ॥ १५९३ ॥ इत्यादिकमिति आदिशब्दःप्रकारे तथाचइतिप्रकारकंलोक

बलवीर्यादिसंपन्नान्क्षत्रियान्पावकोपमान् ॥ शस्त्रास्त्रकोविदांस्तद्वत्सुशूरानकुतोभयान् ॥ धर्मेप्रवर्तयेदेतान्कोन्योनभ्यधिकान्भुवि ॥ १५८९ ॥ ब्राह्मणान्क्रोधसंदीप्तान्शापानुग्रहकारिणः ॥ निवारयेच्चकोनामदहतोनिखिलंजगत् ॥ १५९० ॥ आशीविषनिभांस्तद्वत्तामसानतिकोपिनः ॥ निवारयतिकोनामसर्वदाप्राणिहिंसने ॥ १५९१ ॥ अंभोनिधीनगाधोदान्कल्लोलशतमालिनः ॥ निवारयेच्चकोनामजगदाचमनंप्रति ॥ १५९२ ॥ नदीनामपिनीराणिकोनयेन्निम्नभूमिकां ॥ वसुधांनीरसंस्थानांकोमज्जंतींनिवारयेत् ॥ सूर्यादीनपिखादस्मात्पततःकोनिवारयेत् ॥ १५९३ ॥ इत्यादिकंसमग्रस्यलोकस्यास्यविधारणं ॥ क्रियतेयेनसज्ञेयःसेतुरात्मामहेश्वरः ॥ १५९४ ॥ बहिर्मुखेनमनसायदिज्ञातुंनशक्यते ॥ तदुपायःसमुक्तोस्तिब्राह्मणैर्वेदवादिभिः ॥ १५९५ ॥ बहिर्मुखंसमायातिमनोत्रविषयेच्छया ॥ यथातथैवतद्गच्छेदंतरात्मेच्छयास्वयं ॥ १५९६ ॥ समीचीनंयदायद्धिविजानातिमनःस्वयं ॥ तदातद्यातिसहसाप्रतिबंधविवर्जितम् ॥ १५९७ ॥

विधारणंयेनात्मनाईश्वररूपेणक्रियतेसत्वयात्मत्वेनज्ञेयइत्यर्थः ॥ १५९४ ॥ तमेतमित्यादेरनाशकेनेत्यंतस्यवाक्यस्यार्थंनिरूपयति बहिर्मुखेनेत्यूनपंचाशच्छ्लोकैः यदिसगुणात्मापिबहिर्मुखेनमनसाज्ञातुंनशक्यतेइतिमन्यसेतदातदुपायश्चित्तांतर्मुखतायाउपायोपिवेदविद्भिरुक्तस्तंकुरुष्वेतिशेषः ॥ १५९५ ॥ तत्रमनसोबहिरंतर्वातात्पर्येणप्रवृत्तौप्रयोजिकेच्छैवेत्याह बहिर्मुखमिति स्पष्टं ॥ १५९६ ॥ इच्छायाःकारणंचदोषज्ञानाभावविशिष्टंविषयसौंदर्यज्ञानमेवेत्याह समीचीनमिति समीचीनंसुंदरं प्रतिबंधोदोषज्ञानंतद्धीनं ॥ १५९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विषयस्येति यतोविषयसौंदर्यज्ञानमिच्छाकारणंप्रसिद्धमतश्चित्तस्यात्मप्रवणतारूपांतर्मुखतासिद्ध्यर्थमात्मनःसौंदर्यंपरमानंदादिरूपतां जानीयादित्यर्थः ॥ १५९८ ॥ आत्मनःसौंदर्यज्ञानेप्रयोजकंचप्रतिबंधनिवर्तकंशुभादृष्टमितिसदृष्टांतमाह अदृष्टादिति यथाऽनिष्टवस्तुविषयकज्ञानंप्रत्यदृष्टंप्रयोजकंतथेष्टपदार्थज्ञानंप्रत्यपीत्यर्थः ॥ १५९९ ॥ तत्रादृष्टस्यव्यवस्थामाह अशुभेति स्पष्टम् ॥ १६०० ॥ पुण्यस्वरूपंकथयंस्तस्यात्मज्ञानेच्छाप्रयोजकतामाह यज्ञेति शास्त्रविहितंयज्ञदानादिकंपुण्यमित्युक्तंतेनपुण्येनआत्मसौंदर्येज्ञातेसतिइच्छातत्रस्थितिहेतुःस्वयमनायासेनभवेदिति ॥ १६०१ ॥ ननुस्वर्गादिफलेषुतत्तद्वाक्यैर्विनियुक्तानांयज्ञादीनांकथमात्मज्ञानार्थत्वमितिशंकांवारयन्नेकस्यकर्मणोभिन्नार्थविनियोजकयोर्द्वयोर्वाक्ययोःसामर्थ्यादुभयार्थत्वमपिभवतीतिसंयोगपृथक्त्वन्यायमभिनयति य

विषयस्यात्रसौंदर्यज्ञातइच्छास्वयंभवेत्॥ ततःसौंदर्यविज्ञानआत्मनोयत्नवान्भवेत् ॥ १५९८॥ अदृष्टा ज्जायतेज्ञानंयथानिष्टेषुवस्तुषु॥ अदृष्टादेवतद्वत्स्यादभीष्टेष्वपिसर्वदा॥ १५९९॥ अशुभज्ञानहेतुःस्यात्पापंयद्वन्नृणामिह॥ शुभज्ञानस्यतद्वत्स्याद्धेतुःपुण्यंमहात्मनां ॥ १६००॥ यज्ञदानादिकंपुण्यमुक्तंशास्त्रेस्तिसर्वदा॥ तेनविज्ञानउत्पन्नइच्छातस्मिन्स्वयंभवेत्॥ १६०१॥ यज्ञाद्यायद्यपिप्रोक्ताःस्वर्गादिफलहेतवः ॥ आत्मनोपिचविज्ञानेतथाप्येतेभवंतिहि॥ १६०२॥ तएवास्माकमाकांक्षावशाद्दर्शादिकंयथा॥ नित्यंकाम्यंतदेवस्यादेवंयज्ञादयोपिनः॥ स्वर्गप्रदाःस्वविज्ञानेभविष्यंत्यत्रहेतवः ॥ १६०३॥

ज्ञाद्याइतिद्वाभ्यां यद्यपियज्ञादयःपूर्वकाण्डपठितस्वर्गकामादिवाक्यैःस्वर्गादिफलहेतवःप्रोक्तास्तथापितएवयज्ञादयआत्मविज्ञानेप्येतेहेतवोभवंतीतिसंबंधः प्रकृतवाक्यबलादितिभावः ॥ १६०२ ॥ एतद्दृष्टांतेनस्फुटयति तएवेति प्रथमपदद्वयंपूर्वान्वयित्वेनव्याख्यातं यथायद्दर्शपूर्णमासादिकंयावज्जीवंदर्शपूर्णमासाभ्यांयजेतेतिवाक्यान्नित्यंतदेवदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतिवाक्योत्थायाअस्माकमधिकारिणामाकांक्षायावशात्संबंधात्काम्यमपिभवति तथायज्ञादयोपिनोस्माकमधिकारिणांस्वर्गकामादिवाक्योत्थाकांक्षावशात्स्वर्गादिप्रदाअपिअत्रयज्ञेनेत्यादिवाक्येसतिस्वस्यात्मनोविज्ञानेपिहेतवोभवंतीत्यर्थः ॥ १६०३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रवाक्येउक्तानांयज्ञदानतपोनशनानांस्वरूपाणिनानाविधानिवर्णाश्रमभेदापेक्षयाव्यवस्थितरूपाणिबोध्यानीत्याह यज्ञइति अपरंचतुर्थं ॥ १६०४ ॥ तत्रयज्ञस्वरूपाणांव्यवस्थामाह ज्योतिरिति ज्योतिष्टोमादिरूपाद्रव्यसाध्यायज्ञागृहिणांयथाधिकारंकर्तव्यतयोक्ताः स्वाध्यायोजपोयोगःसमाधिश्वएतद्रूपायज्ञास्तुगृहस्थभिन्नाश्रमिणामपिशब्दाद्गृहस्थानामपियथावकाशंकर्त्तव्याः तथाज्ञानाभ्यासरूपायज्ञायतिभिर्विशेषेणप्राधान्येनकर्त्तव्याः इतराश्रमिभिस्तुकर्मप्रधानैरुपसर्जनत्वेनेत्यर्थः ॥ १६०५॥ दानस्वरूपव्यवस्थामाह दानमिति अन्नंसिद्धान्नंधान्यमामान्नं आदिपदेनगवादयः एतादृशद्रव्यसाध्यंदानंयतिभिन्नाश्रमस्थैःसर्वैःकर्त्तव्यतयोक्तमित्यर्थः

यज्ञोदानंतपस्तद्वदनाशकमथापरम् ॥ वर्णाश्रमादिभेदेनकर्तव्यंशास्त्रकीर्तितं ॥ १६०४ ॥ ज्योतिष्टोमादिकायज्ञागृहिणांपरिकीर्तिताः ॥ स्वाध्याययोगयज्ञाश्चतथान्याश्रमिणामपि ॥ ज्ञानयज्ञाविशेषेणयतीनांपरिकीर्तिताः ॥ १६०५॥ दानंनानाविधंतद्वदन्नधान्यादिकंमहत् ॥ यतेरन्याश्रमस्थस्यसर्वस्याप्यत्रकीर्तितम् ॥ १६०६ ॥ चतुर्विधेभ्योभूतेभ्यःकर्मणामनसागिरा ॥ आत्मवत्प्रतिकूलानामकृत्याख्यमुदीरितम् ॥ दानमेतत्परंनास्मादधिकंकिंचिदस्तिहि ॥ १६०७॥ सर्ववर्णाश्रमादिस्थैःकर्त्तव्यमधिकंस्मृतम् ॥ यतिभिस्तुविशेषेणकर्तव्यमिदमेवहि ॥ आश्रमोयममीषांस्यात्सर्वभूताभयायहि ॥ १६०८ ॥ अभयंसर्वभूतेभ्योमत्तःस्वाहेत्युदीरयन् ॥ निर्गच्छत्यत्रपरमोहंसोप्यन्योयतिस्तथा ॥ १६०९ ॥

॥ १६०६ ॥ यतेस्तुसर्वभूताभयसंपादनरूपमेवदानमितिदर्शयति चतुर्विधेभ्यइतित्रिंशताश्लोकैः जरायुजादिचतुर्विधभूतसंप्रदानकमेतद्दानंपरमुत्कृष्टंस्मृतं एतत्किं आत्मवत्सर्वभूतानांप्रतिकूलस्ययाशरीरादिभिरकृतिरनाचरणंतदभयमित्यर्थः॥ १६०७॥सर्वैति एतद्दानंसर्वेषामधिकंप्रशस्तं यतिभिस्त्वेतदेवकर्तव्यं एतदनुष्ठानायैवसंन्यासाश्रमस्यविधानादित्यर्थः॥ १६०८ ॥अभयदानोद्देश्यकत्वंसंन्यासाश्रमस्यसंन्यासकरणमंत्रादेवसिद्धमित्याह अभयमिति मत्तःस्वस्मादभयंसर्वभूतेभ्योददामीत्यर्थकंस्वाहांतंमंत्रमुच्चारयन्नेवयतःपरमश्रौतोयतिस्तथान्यःस्मार्तःकुटीचकबहूदकहंसान्यतमरूपःपूर्वाश्रमान्निर्गच्छतिनिष्क्रामतीत्यर्थः ॥ १६०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततइति यतस्तस्ययतेस्तदेवसर्वभूताभयप्रदानमेवपरमंदानंप्रोक्तंततोयतिस्तथाकुर्वीत तथाकथं यथाचतुर्विधानांभूतानांदेहेंद्रियमनस्सु
अणुकिंचिदपिपीडानभवेदित्यन्वयः न्यस्तंत्यक्तंकर्मयेनसन्यस्तकर्मातद्योग्यंन्यस्तकर्मीयंविद्यादेर्विद्यायास्तत्साधनस्यचयद्दानंतदपिअ
न्यथाप्रतिष्ठालाभाद्युद्देशेनकचिदपिनोक्तंकिंतुशरणागतस्याभयोद्देशेनैवविद्यादिकंयतिर्दद्यादितियावदितिद्वयोरर्थः॥१६१०॥१६११॥
सर्वाभयदानस्यसर्वदानेभ्यउत्कर्षंकैमुत्यन्यायेनाह वित्तैरितित्रिभिः सर्ववित्तपूर्णांन्यायार्जितांचसर्वांपृथ्वींब्रह्मणेब्रह्मविद्ययाब्रह्मीभूता
यविप्रायकुरुक्षेत्रेसूर्यग्रहणकालेपरमश्रद्धयायदिकश्चिद्दद्यात्ततस्तद्दानादप्यधिकंस्थावरादीनामेकस्यापिजंतोरभयदानमितिद्वयोःसंबं

ततस्तस्यतदेवोक्तंदानंपरममण्वपि॥ यथानैवभवेत्पीडादेहेंद्रियमनस्विह ॥१६१०॥ चतुर्विधानांभूतानां
तथाकुर्वीतसर्वदा॥ विद्यादेर्न्यस्तकर्मीयंदानंनैवान्यथाक्वचित् ॥ १६११ ॥ वित्तैर्नानाविधैःपूर्णांत्रिलोकीं
ब्रह्मणेयदि॥ न्यायलब्धांकुरुक्षेत्रेसूर्यग्रहउपागते॥ स्वदेहसहितांदद्यात्श्रद्धयापरयान्वितः ॥ १६१२॥ त
तोपित्यधिकंदानमभयंपरिकीर्तितं॥ स्थिरजंगमभूतानांमध्येकस्यापिदेहिनः ॥ १६१३ ॥ स्थिरजंगमभू
तानांसर्वेषामभयंसदा ॥ ददातिसर्वथासर्वदेशेयःकोपिमानवः ॥ तस्माद्दानात्परंदानंसदृशंचनविद्यते
॥ १६१४॥ अभयंसर्वभूतेभ्योदत्वायोत्रचरेद्यतिः॥ अस्मिन्देहेतथान्यस्मिन्भयंतस्यनविद्यते॥ १६१५॥च
तुर्विधानांभूतानांकर्मणामनसागिरा॥ अहिंसायांसदाधर्मश्चतुष्पाद्धिव्यवस्थितः॥ १६१६॥

धः॥१६१२॥१६१३॥ यस्तुसर्वभूतेभ्योऽभयंसदासर्वत्रचददातितद्दानस्योत्कर्षःकिमुवाच्यइत्याह स्थिरेति स्पष्टम्॥१६१४॥अभयदान
फलप्रदर्शकमभयंसर्वभूतेभ्योदत्वायश्चरतेमुनिः नतस्यत्रिषुलोकेषुभयंभवतिकर्हिचिदितिवाक्यमर्थतःपठति अभयमिति चरतिआत्मवि
द्यामभ्यसतिसत्रिषुसूक्ष्मकारणात्मकेषुसमष्टिव्यष्टिलोकेषुभयंद्वितीयदर्शनजंनाप्नोतिअद्वितीयब्रह्मभावंप्राप्नोतीतियावत् ॥ १६१५॥
सर्वभूताभयप्रदानोत्कर्षंस्फुटयंस्तल्लक्षणभूतायाअहिंसायाःसर्वधर्मांतर्भावकत्वेनोत्कर्षमाह चतुर्विधानामिति हियतश्चतुर्विधभूतानांश
रीरवाङ्मनोभिरपीडनरूपायामहिंसायांचतुष्पात्पादचतुष्टयेनसत्यदयातपोदानाख्येनविशिष्टःपूर्णइतियावत् व्यवस्थितोविशेषेणाधर्म
संकरराहित्यात्मकस्पष्टत्वेनस्थितइत्यर्थः ॥ १६१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्स्पष्टयितुंप्रतियोगिभूतांशरीरादिकृतांहिंसामधर्मरूपांनिर्दिशति कर्मणेतिनवभिः चतुर्विधभूतानांकर्मणास्थूलशरीरव्यापारेणप्रयुक्तायाशस्त्रघातादिरूपाहिंसायाचमंत्रेणमंत्रसाध्याभिचाराख्ययागेनओषधादिनाचपरशरीरेरोगजननालिकासाद्विविधाशारीरत्वेनप्रसिद्धैवेतिसंबंधः ॥ १६१७ ॥ वित्तेति यन्नराणांवित्तादिहरणंतदपिपूर्वोक्तादधिकंकर्मजंहिंसनंज्ञेयं परस्यआधिर्मानसपीडातद्द्वाराप्राणवियोगानुकूलत्वादित्यर्थः ॥ १६१८ ॥ वाचिकींहिंसामभिनयति पापस्येति परकीयपापस्यराजपुरुषादेःपुरतःप्रकाशनंयच्चानिंदाकरणंयच्चपरकीयगुणेषुदोषाविष्करणमेवंविधंवाचिकंहिंसनंबोध्यमित्यर्थः ॥ १६१९ ॥ मानसंहिंसनमाह गुणानामिति यद्विद्यादि

कर्मणाभूतहिंसायाप्रसिद्धामरणप्रदा ॥ चतुर्विधानांभूतानांशस्त्रघातादिकाचया ॥ शरीरेरोगजननंहिंसा मंत्रौषधादिना ॥ १६१७ ॥ वित्तदारादिहरणंनराणामधिकंसदा ॥ हिंसनंतत्रविज्ञेयमाधिद्वारेणकर्मजम् ॥ १६१८ ॥ पापस्यराजभृत्यादेःकथनंहिंसनंगिरा ॥ अपकीर्त्तेश्चकरणंदोषकीर्तिर्गुणेष्वपि ॥ १६१९ ॥ गुणानांपरकीयानांमनसाऽसहनंचयत् ॥ विद्याकीर्त्यादिजातानामन्यदारादिचिंतनं ॥ १६२० ॥ प्राप्त्यर्थंस्वस्य विज्ञेयंतथाद्रोहस्यचिंतनं ॥ चतुर्विधानांभूतानांमानसंहिंसनंस्मृतम् ॥ १६२१ ॥ परवैर्यादिवृद्ध्यादिदानमेतदुदाहृतम् ॥ उपायहिंसनंतच्चलोकेनानाविधंभवेत् ॥ १६२२ ॥ असत्यवचनंतद्वद्भूतानांदुःखकारणं ॥ आत्मनोवात्रलोकेवापरलोकेचहिंसनं ॥ १६२३ ॥

जातानांपरकीयगुणानांमनसाऽसहनंमत्सराख्यं यच्चपरकीयदारादीनांस्वंप्रतिप्राप्त्यर्थंचिंतनं यच्चभूतानांद्रोहस्यनाशोपायस्यचिंतनं एवंविधंमानसंहिंसनंबोध्यमितिद्वयोरर्थः ॥ १६२० ॥ १६२१ ॥ उक्तमानसादिव्यापाराणांपरंपरयाहिंसनत्वमितिदर्शयन्परंपराहिंसामुदाहरति परेति परकीयवैरिप्रभृतिभ्योयद्वृद्धेर्धनादीनांचदानंतद्धिंसोपायत्वादुपायहिंसनमितिप्रोक्तंलोकेनानाविधंप्रसिद्धमिति ॥ १६२२ ॥ तथानृतभाषणमपिहिंसनमेवइहलोकेपरलोकेवाभूतानांस्वस्यवादुःखहेतुत्वादित्याह असत्येति यतोलोकद्वयेभूतानामात्मनश्चदुःखकारणमतोऽसत्यवचनमपिहिंसनमेवेतिसंबंधः ॥ १६२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यज्ञादीति यत्कुतर्काद्यैःपरस्यधर्मेप्रवृत्तस्यनिवारणंयच्च
अनृतस्यपरलोकेपरेषांस्वस्यचहिंसनरूपतांस्फुटयन्नास्तिक्यमपिहिंसैवेत्याह
स्वयंधर्मानाचारणंतत्स्वस्यपरेषांचहिंसनमेवनिदानरकादिहेतुत्वादित्यर्थः ॥१६२४॥ एवंसर्वविहिताकरणंनिषिद्धाचरणंचात्मनःकुला
देश्वपातित्यादिहेतुत्वाद्धिंसैवेत्याह शौचादीनामिति विहितानांशौचादीनामकरणंप्रतिषिद्धस्याचरणंचस्वस्यकुलदेशादेश्वपातित्यादिहे
तुत्वाद्धिंसनमेव यथाविश्वामित्रपुत्रैःशुनःशेपज्येष्ठीकरणात्मिकायाःपितुराज्ञायाअकरणान्म्लेच्छत्वप्राप्तिरूपंहिंसनंस्वस्यस्वकुलस्यच
कृतमिति देशहिंसनोदाहरणंचयथादंडकाख्येनराज्ञाऽगस्त्यकन्याधर्षणेनदेशनाशःकृतइतिरामायणेप्रसिद्धमिति एतेननिद्रातंद्रादिताम
सवृत्तीनामपिवृथाकालक्षेपिकानामुदर्कदुःखप्रयोजकत्वाद्धिंसनत्वमितिसूचितं ॥ १६२५ ॥ एतस्मादिति एतस्मात्प्रपंचिताद्धिंसास्वरू

यज्ञादिधर्मकरणेप्रवृत्तस्यनिवारणं ॥ स्वयंचाकरणंपुंसःकुतर्काद्यैस्तुहिंसनं ॥ १६२४ ॥ शौचादीनांतुसं
त्यागःकर्त्तव्यानांसदात्मनः ॥ अकर्त्तव्यस्यकरणंकुलात्मादेस्तुहिंसनं ॥ १६२५ ॥ एतस्माद्विपरीतःस्याद्ध
र्मःशास्त्रोक्तलक्षणः ॥ अहिंसायांततःसर्वोप्यंतर्भवतिसर्वदा ॥ १६२६ ॥ अहिंसापरमोधर्मस्ततएवात्रकी
र्त्यते ॥ अहिंसासर्वथासर्वैःकर्त्तव्याबुद्धिजीविभिः ॥ १६२७ ॥ तयाधर्मस्तथामोक्षोभवेत्तेषांकरेस्थितः ॥
अर्थकामौचकिंनामवक्तव्यौसुलभौहियौ ॥ १६२८ ॥ ब्रह्मचर्यमहिंसायामंतर्भवतिसर्वदा ॥ उदर्केमहती
हिंसाजंतूनांभोगतःस्त्रियः ॥ १६२९ ॥

पाद्विपरीतरूपोधर्मःशास्त्रप्रसिद्धस्ततःसधर्मःसर्वोप्यहिंसायामंतर्भवतीति ॥ १६२६ ॥ अहिंसेति ततउक्तविधयासर्वधर्मांतर्भावकत्वादे
वपरमधर्मत्वमहिंसायाःशास्त्रेषूक्तमतःसर्वैर्विवेकिभिरहिंसाकर्तव्येति सर्वथासर्वयत्नेन ॥ १६२७ ॥ अहिंसायाःफलमाह तयेति तया
अहिंसयाधर्मोऽशुक्लकृष्णाख्योयोगशास्त्रप्रसिद्धस्तथामोक्षश्चकरेस्थितोवश्योभवति ससाधनेतरपदार्थलाभस्तुसुकरत्वात्तस्याःफलत्वप
दवीयोग्यइत्यर्थः ॥ १६२८ ॥ अतएवाहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाइतियोगसूत्रेऽहिंसायाआदौकीर्तनंतस्याःसर्वयमांतर्भा
वकत्वादितिवक्तुंतदितरयमानांतत्रांतर्भावंदर्शयति ब्रह्मेतिषड्भिः ब्रह्मचर्यंस्त्रीव्यतिकराभावरूपमहिंसांतर्गतमेव स्त्रीसंबंधस्योदर्केउत्तर
फलेसंसारसंततिरूपेदुःखप्रदत्वादित्यर्थः ॥ १६२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहलोकेपिस्त्रीसंबंधस्यपरपीडाकरव्यापाररूपंहिंसात्वंप्रसिद्धमित्याह ग्राम्येतिद्वाभ्यां ग्राम्यधर्मेणेतिप्रकृत्यादित्वात्तृतीया तथाचयौवने ग्राम्यधर्मरूपाद्योषिद्गमनाद्गर्भोजायतेयतोगर्भभवान्नारीतद्गर्भयोर्मरणतुल्यंमरणरूपंवादुःसहंदुःखंजायतइतिप्रसिद्धमित्यर्थः॥१६३०॥ नारीति किंचनारीसंयोगात्पुंसोरेतोजनिष्यमाणजंतवेदेहरूपस्यकारागृहस्यबंधनागारस्यप्रदायकंभवेत् यतोदेहकारागृहलाभादेतदद्या त्मादित्रिविधंदुःखंजंतूनांस्यादिति ॥ १६३१ ॥ रेतइति रेतःसिचतीतिरेतःसिक्तस्यरेतःसिचःपुंसस्ततोनारीसंसर्गतउक्तविधदुःखदंपापं जायते ब्रह्मचर्यैकृतेतुएतदुक्तविधंहिंसनंनकिंचिज्जायतेऽतोब्रह्मचर्यमहिंसायामंतर्भूतमितिसंबंधः॥१६३२॥ अहिंसकइति अहिंसकोव णितसर्वहिताचरणरूपाहिंसापरःपुमानत्रलोकेऽनृतभाषणंस्तेयंपरिग्रहंचसंचयरूपंकिमर्थंकरिष्यतिअतःसत्यास्तेयापरिग्रहरूपायमाअ

ग्राम्यधर्मेणगमनाद्योषितांयौवनेसति॥ भवेद्गर्भोयतोनारीगर्भयोर्मरणोपमं ॥ मरणंवाभवेद्दुःखंदुःसहंदे हधारिभिः॥ १६३०॥ नारीसंयोगतोवीर्यंदेहकारागृहप्रदं॥ जंतूनांयतएतस्यात्रिविधंदुःखमद्भुतं॥ १६३१॥ रेतःसिचस्ततःपापंभवेदत्यंतदुःखदम्॥ ब्रह्मचर्यैकृतेनैतद्भवेत्किंचिद्धिहिंसनं॥ १६३२॥ अहिंसकोत्रभूता नांकर्मणामनसागिरा॥ वदेदसत्यंकेनायंनिर्निमित्तंमहामुनिः ॥ १६३३ ॥ परद्रव्यापहारंचकुरुतेकेनहे तुना॥ परिग्रहंकथंकुर्याद्भूतपीडाविवर्जितः॥ १६३४॥ अहिंसाततएवेयंयमानांजननीमता ॥ अहिंसको त्रयःकश्चित्सज्ञेयःपुरुषोत्तमः ॥ १६३५ ॥ अहिंसैवततोदानंयतीनांपरमंस्मृतम्॥ अन्येषामपिकिंत्वन्यैः कर्त्तुंनैतद्धिशक्यते ॥ १६३६ ॥

प्यहिंसायामंतर्भूताइतिद्वयोरर्थः ॥ १६३३ ॥ १६३४॥ फलितमाह अहिंसेति ततःसर्वयमांतर्भावकत्वादहिंसाजननीवाभ्यर्हितत्वेन यमानामादौनिर्दिष्टेत्यर्थः तथाचोक्तंयोगभाष्ये इतरेचयमनियमास्तदवदातकरणायैवोपादीयंतइति तस्याअहिंसायाअवदातत्वस्यशु द्धत्वस्यकरणायेतितदर्थः तस्मादहिंसकःसर्वोत्तमइत्यर्थः ॥ १६३५॥ अहिंसैवेति ततएकानुष्ठानेनसर्वधर्मसिद्धिरूपलाघवादहिंसारू पंपरमंदानंयतीनांभाराद्युद्विग्नानांकर्तव्यतयाविहितं यद्यप्यन्येषामाश्रमिणामप्येतदहिंसारूपंदानंकर्तुंयोग्यंतथापिशक्यंनभवति परि यहादेःपरपीडाकरस्यसर्वथात्तैस्त्यक्तुमशक्यत्वादितिभावः ॥ १६३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपोविभागमाह सर्वेति सर्वेषांवर्णिनामाश्रमिणांचस्वस्वधर्माविरोधेनशास्त्रोक्तविधिनाएतच्छरीरेंद्रियमनसांनियमरूपंतपोभगवद्गीता
दिषूक्तमित्यर्थः ॥ १६३७ ॥ अनशनविभागमाह शास्त्रेणेतित्रिभिः यत्शास्त्रेणानिषिद्धानामपिविषयाणांयथाशक्तिअसेवनंभोगत्याग
एतद्यतिंहित्वासर्वेषांवर्णाश्रमाणांयोग्यमनशनमित्यन्वयः ॥ १६३८ ॥ यथेति प्रथमपादःपूर्वान्वयित्वेनदर्शितः यतेस्तुयोग्यमिदमनशनं
॥१२३॥ इदंकिं इहामुत्रवाविद्यमानपदार्थेष्विच्छालेशस्याप्यकरणंतथाययथोपपन्नेनयथाप्राप्तेनभिक्षान्नेनतादृशाययथोपपन्नेनवाससाचदेहस्य
विधारणंनिर्वहणमितिद्वयोरर्थः ॥ १६३९ ॥ १६४० ॥ एवमिति एवंविधयज्ञादिचतुष्टयरूपंपुण्यंब्रह्मविज्ञानहेतुतयोक्तमित्यर्थः

सर्ववर्णाश्रमस्थानांस्वधर्मपरिवर्तिनां ॥ शास्त्रस्थेनविधानेनतपएतदुदीरितम् ॥ १६३७ ॥ शास्त्रेणाप्यनि
षिद्धानांविषयाणामसेवनं ॥ सर्ववर्णाश्रमाणांयत्स्याददोनशनंपरं ॥ १६३८ ॥ यथाशक्तियतिंहित्वायतेर
नशनंत्विदं ॥ इच्छामात्रस्यसंत्यागइहामुत्रार्थसंश्रयः ॥ १६३९ ॥ यथोपपन्नभैक्षेणवाससापिचतादृशा ॥
विधारणंतुदेहस्ययतेरुक्तंनचापरं ॥ १६४० ॥ एवंयज्ञस्तथादानंतपोनशनमेवच ॥ चतुष्टयंभवेत्पुण्यंब्रह्म
विज्ञानकारणं ॥ १६४१ ॥ जातेब्रह्मणिविज्ञानेदृष्टादृष्टसहायतः ॥ इच्छाविषयसौंदर्यात्स्वयमेवप्रजायते ॥
॥ १६४२ ॥ अदृष्टाज्जायतेदृष्टंदृष्टाज्ज्ञानंप्रजायते ॥ इच्छाज्ञानाद्भवेच्चित्तमिच्छातोनबहिर्व्रजेत् ॥ १६४३ ॥

॥१६४१॥ यज्ञादीनांदृढविज्ञानजननेद्वारमाह जातेइतिद्वाभ्यां यदादृष्टादृष्टरूपेभ्यः सहायेभ्योब्रह्मविज्ञानंजायतेतदाब्रह्मरूपविषयस्य
स्वभावसुंदरत्वात्तत्रेच्छास्वयमेवजायतइति ॥ १६४२ ॥ अदृष्टादिति तत्राऽदृष्टाद्यागादिजन्यसुकृतरूपाद्दृष्टंगुरुशास्त्राधिकारिशरीरादि ॥१२३॥
लाभरूपंजायतेततोगुरुप्रभृतिलाभरूपाद्दृष्टादात्मज्ञानंपरोक्षंजायतेततआत्मसाक्षात्कारेच्छाजायतेइच्छयाचचित्तस्यात्मन्येकाग्रत्वंजा
यतेइत्यर्थः तथाचसामग्रीसंपादनायप्रतिबंधकदुरितापनयायचयागादिपुण्यमपेक्षितमितिभावः ॥ १६४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुकिमर्थमात्मविज्ञानमपेक्षणीयंमहाप्रभावैःकर्मभिरेववयंकृतार्थाइत्याशंकावारकस्यमुनिर्भवतीत्यन्तवाक्यस्यार्थमाह यदाचित्तमिति त्रिभिः यदाचित्तैकाग्र्यंभवतितदादृढमसंभावनादिभिरनास्कंदनीयंमहावाक्यजंज्ञानंजायतेततोदृढज्ञानादेषब्राह्मणोमुनिर्जीवन्मुक्तिफलकज्ञानशीलताशालीभवतियतोहेतोर्यदायज्ञादिभिरात्मनिब्रह्मरूपेदृढाज्ञानेच्छाजायतेतदात्मानंविज्ञायैवमुनिर्जीवन्मुक्तिलक्षणोभवतिनान्यथाइतरत्कर्मफलंप्राप्येतित्रयाणांसंबंधः ॥ १६४४ ॥ १६४५ ॥ १६४६ ॥ उक्तविधमुनित्वकामनयाविविदिषासंन्यासविधायकस्यप्रव्रजंतीत्यंतवाक्यस्यार्थमाह इच्छावंतइतिद्वादशभिः इच्छावंतइत्यतिशयार्थेमतुप्तथाचोत्कृष्टेच्छाशालिनोभोगकार्पण्यरहिताइतियावत् एतेनप्रव्रजनशीलवाचकस्यप्रव्राजिपदस्यार्थःसूचितः एतादृशाहमात्मानएतमेवात्मरूपंलोकमिच्छंतःसंतःसर्वकर्माणिसंन्यस्यं

यदाचित्तंबहिर्नैतिस्वात्मनोदैवयोगतः ॥ तदातस्मिन्हिविज्ञानंदृढमस्यप्रजायते ॥ १६४४ ॥ ततोमुनिर्भवेदेषआत्मज्ञोब्राह्मणोयतः ॥ आत्मानमेवविज्ञायमुनिर्भवतिनान्यथा ॥ १६४५ ॥ यदायज्ञादिभिःपुण्यैरिच्छाभवतिदेहिनः ॥ आत्मनिब्रह्मरूपेस्मिन्स्वयंज्योतिःसुखाद्वये ॥ १६४६ ॥ इच्छावंतोमहात्मानएतमेवात्मरूपिणं ॥ संन्यासिभिःसदादृश्यमवाङ्मनसगोचरम् ॥ इच्छंतःसर्वकर्माणिसंन्यस्यंतिमहाधियः ॥ १६४७ ॥ कर्मासक्तस्यनैवस्यात्कर्हिचित्स्वात्मनिस्थितिः ॥ निषिद्धकाम्ययोस्त्यागोनशक्योदेहधारिभिः ॥ कर्तुमस्यतुशक्यत्वेप्यस्तिदोषोमहानयं ॥ १६४८ ॥ नित्यंनैमित्तिकंकर्मदेशकालाद्यपेक्षया ॥ चोदितंकर्मिभिःकार्यमन्यैराश्रमिभिःसदा ॥ अकृतौतस्यतेषांस्यात्प्रत्यवायोतिदुःखदः ॥ १६४९ ॥

तीत्यन्वयः ॥ १६४७ ॥ कर्मणस्त्याज्यत्वेहेतुंविक्षेपरूपत्वंदर्शयन्नयंविक्षेपोयतिभिन्नाश्रमिभिःपरिहर्तुंनशक्यतइत्याह कर्मेत्यादिना कर्मानुष्ठानपरस्यात्मज्ञानेस्थितिर्निष्ठादुर्लभाकर्मत्यागस्त्वितराश्रमिभिर्दुष्करः तथाहि प्रायेणनिषिद्धानांकाम्यानांचकर्मणांत्यागएवकर्तुमशक्योदृश्यतेतेषांस्थूलसूक्ष्मदेहाभिमानिनांभोगानुकूलत्वात् अस्यनिषिद्धकाम्यत्यागस्यकथंचिद्विवेकेनकर्तुंशक्यत्वेप्यऽयमुत्तरश्लोकेवक्ष्यमाणउभयतःपाशरज्जुनिभोदोषःप्राप्नोत्येवेत्यर्थः ॥ १६४८ ॥ तंदोषमभिनयति नित्यमिति कर्मिभिरन्यैराश्रमिभिश्चोदितंशास्त्रविहितंनित्यंसंध्याग्निहोत्रादिकंनैमित्तिकमुपरागस्नानादिकंचदेशकालानुसारेणावश्यंकर्तव्यमन्यथाप्रत्यवायापत्तेरित्यर्थः तथाचकरणेआत्मैकाग्र्यहानिरकरणेतुप्रत्यवायप्राप्तिरित्युभयतःपाशारज्जुरितिभावः ॥ १६४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संन्यासविधिनाकर्मत्यागेतुनदोषइत्याह शास्त्रोक्तेनेति इतिवेदव्यवस्थितिर्नित्यादिकर्मविधायकानांसंन्यासविधायकानांचवाक्यानां
विषयव्यवस्थयासिद्धोयमर्थइत्यर्थः भगवताप्युक्तं मोहात्तस्यपरित्यागस्तामसःपरिकीर्तितइति॥ १६५०॥ विषयव्यवस्थामेवस्फुटयति
स्रगादीत्यादिना यस्यमानसंस्रक्चंदनादिसांसारिकविषयेषुव्यग्रंरागिसआत्मविषयकविज्ञानंकथंप्राप्नुयादित्यर्थः तथाचतेनकर्मैवक
र्तव्यमितिभावः ॥ १६५१ ॥ संन्यासाधिकारिणंनिर्दिशति अपीति निर्विषयंविषयेभ्योनितरांविरतंयस्यचित्तंसकर्मभारंकिमर्थंवहेदि
त्यर्थः ॥ १६५२ ॥ तत्रोपपत्तिमाह कर्त्तव्यानीति अधिकारःफलसंबंधःफलकामनादिरूपस्तद्वंतंप्रत्येवशास्त्रंकर्मविधत्ते अयंवीतराग

शास्त्रोक्तेनैवमार्गेणत्यक्तंकर्मसुखायहि॥ अन्यथादुःखदंतस्यादितिवेदव्यवस्थितिः॥ १६५० ॥ स्रगादिवि
षयेष्वेववर्ततेयस्यमानसं॥ व्यग्रंसविषयासक्तःकथमात्मनिगच्छति॥ १६५१ ॥ अपिनिर्विषयंचित्तंजा
तंयदिहिकर्मिणः॥ किमर्थंकर्मजंभारंवहतिस्वस्यदुःखदम् ॥ १६५२ ॥ कर्तव्यानीतिकर्माणिशास्त्रंवक्त्य
धिकारिणं॥ विषयप्रार्थनाहीनोत्यधिकारीकथंत्वयं॥ १६५३॥ ततोनिर्विषयंचित्तंयस्यजातंमहात्मनः ॥
तस्यत्यागंवदत्येतत्कर्मणांशास्त्रमागतं ॥ १६५४ ॥ यथात्रविषयाःकुर्युर्बहिर्दृष्टिंशरीरिणां॥ कर्माण्यपित
थाकुर्युर्नित्यादीनिहिदेहिनः ॥ १६५५ ॥

स्तुकथंतदधिकारीस्यादित्यर्थः नित्यकर्मसुसामान्यरूपेणफलकामोधिकारीस्वर्गपश्वादिविशेषरूपेणफलकामस्तुकाम्येष्विितिविभागो
बृहदारण्यकभाष्यादौद्रष्टव्यः ॥ १६५३ ॥ ततइति ततःसरागस्यैवकर्माधिकारित्वात्यस्यचित्तंविरक्तंतंप्रत्येतत्प्रकृतंशास्त्रंकर्मणांत्यागं
वदति कीदृशंत्यागं आगतंकर्मप्रयोजनाभावेनस्वयंप्राप्तमित्यर्थः तदुक्तं प्रत्यक्प्रवणतांबुद्धेःकर्माण्युत्पाद्यशुद्धितः कृतार्थान्यस्तमायां
तिप्रावृडंतेघनाइवेति॥ १६५४ ॥ प्रत्यक्प्रवणताविरोधित्वेनविषयवद्बिरक्तःकर्मनित्यमपित्यजेदित्याह यथेति बहिर्दृष्टिंप्रत्यग्विवेकवै
मुख्यम् ॥ १६५५ ॥ ॥१२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसंन्यासेपिभिक्षाटनादिरूपंकर्मावशिष्यतएवेतितद्वन्निस्यान्यपितिष्ठंत्वितिशंकांविशेषप्रदर्शनेनवारयति भिक्षेतिद्वाभ्यां अग्निहोत्रा दीनिकर्माणिकर्मप्रवणचित्तेनैवकर्तुंशक्यानिअकरणेप्रत्यवायप्रयोजकानिच भिक्षाटनादीनितुभोजनेमुखंप्रतिहस्तव्यापारवदन्यपर चित्तेनापिकर्त्तुंशक्यानि ननियतामावश्यकींवहिर्दृशिंवहिर्मुखतांकुर्वंति नवाअकरणेप्रत्ययवायप्रयोजकानीतिविशेषइतिद्वयोरर्थः ॥ १६५६ ॥ १६५७ ॥ फलितमाह ततइति तेज्ञानाधिकारिणःसर्वसंगविवर्जिताजाताइशेषः ॥ १६५८ ॥ यस्यगृहस्थाश्रमादौ तत्त्वसाक्षात्कारेपिजीवन्मुक्तिलक्षणमुनित्वंनसिद्ध्यतितेनविद्वत्संन्यासःकार्यइतिबोधकस्यैतद्ब्रह्मेत्यादेर्भवतइत्यंतवाक्यस्यार्थमाह विद्वां

भिक्षाटनादिभिर्नैवक्रियतेत्रवहिर्दृशिः ॥ नियतायादृशीनृणामग्निहोत्रादिकर्मभिः ॥ १६५६ ॥ अकृतौप्रत्य वायोपिनास्तिभिक्षाटनादिषु ॥ यादृशोविद्यतेलोकेत्व्यग्निहोत्रादिकर्मणां ॥ १६५७ ॥ ततःकर्माणिसंत्यज्य नैष्कर्म्याश्रममागताः ॥ आत्मानंद्रष्टुकामास्तेसर्वसंगविवर्जिताः ॥ १६५८ ॥ विद्वांसोयेऽभवन्पूर्वेब्राह्मणाः स्वात्मवेदिनः ॥ विक्षेपकारकत्वेनतत्यजुःकर्मतेपिहि ॥ किमुयैर्नैवविदितआत्मासाक्षादयंपुमान् ॥ १६५९ ॥ प्रत्यक्षतोपिदृष्टोयैःकरामलकवत्पुमान् ॥ स्वयंज्योतिःसदानंदोभेदगंधविवर्जितः ॥ १६६० ॥ विक्षेपकारणं कर्मनित्यंविषयवद्भवेत् ॥ इतिविज्ञायसंत्यज्यकर्मचक्रुर्नकामनां ॥ १६६१ ॥ विप्राभवद्भिःकेनायंनकृतो दारसंग्रहः ॥ सुखप्राजादइत्युक्ताएवमाहुर्महाधियः ॥ १६६२ ॥

सइतित्रयोदशभिः पूर्वमपियेब्रह्मात्मसाक्षात्कारवंतोऽभूवंस्तेपिविक्षेपजनकत्वेनकर्मसंन्यस्तवंतः यैस्तुआत्मानसाक्षात्कृतस्तेविविदिष यासंन्यस्यंतीतिकिमुवाच्यमित्यर्थः ॥ १६५९ ॥ विद्वत्पदार्थविशेषणभूतंज्ञानंसाक्षात्काररूपंग्राह्यमितिदर्शयन्नुक्तंस्फुटयति प्रत्यक्षतइ ति यैःस्वयंज्योतिरादिरूपआत्माप्रत्यक्षतोदृष्टस्तेपिकर्मणोविषयभोगवदविक्षेपरूपतांविज्ञायसर्वविषयकामनांसंत्यज्यकर्मनचक्रुःसंन्य स्तवंतइतियावदितिद्वयोःसंबंधः ॥ १६६० ॥ १६६१ ॥ विप्राइति तेचमहाधियोविद्वांसइतिउक्ताःपृष्टाःसंतएवंवक्ष्यमाणविधयाआ हुरुत्तरंदत्तवंतः इतिकथं हेविप्राभवद्भिर्दारसंग्रहःकिमर्थंनकृतः कीदृशोदारसंग्रहः सुखप्रजादःसुखहेतुसंततिप्रदायकइत्यर्थः ॥ १६६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषामुत्तरवाक्यमभिनयति सुखमितित्रिभिः आत्मस्वरूपभूतसुखादधिकंसुखंनास्तितच्चात्मरूपंसुखंसाध्यसाधनभावविवर्जितमस्माक
मपरोक्षमित्यर्थः ॥१६६२॥ प्रजातीति इहलोकेपरलोकेवाप्रजातिसुखस्यसंततिप्रयुक्तसुखस्यसिद्ध्यर्थःसाधकोद्वारद्वारतयापरम्परयास
दारसंग्रहःस्यात् वयंतुतेविद्वांसःस्वयंसुखरूपाःसंतःप्रजयाकिंप्रयोजनंसाधयामः नहितयामोक्षेकश्चिदुपकारोनिरययोनिष्वपिविद्यमा
नत्वादित्यर्थः ॥ १६६४ ॥ नचास्माकंक्षुद्रसुखकामनाआनंदनिधिरूपत्वादित्याहुः अस्माकमिति हियतःएषांलौकिकानंदानांबिंबभूत
आनंदोस्माकंस्वात्मनःस्वरूपादभिन्नोनिधिवदक्षयःस्वयंज्योतिरादिलक्षणोऽयमपरोक्षोवर्ततइत्यर्थः॥ १६६५॥इत्येवमिति इत्येवंवादिन
स्तेसर्वेविद्वांसःसंन्यासाश्रममागताःसंतोभिक्षाचर्यंभिक्षांचरन्तिस्मकुर्वंतिस्म कीदृशास्ते केचित्कृतदाराःविवाहिताः केचिदपरे अपरपदा

सुखंनैवाधिकंकिंचिदात्मनोविद्यतेत्रभोः॥ तच्चास्तिसर्वदास्माकंसाधनादिविवर्जितं॥ १६६३॥ प्रजाति
सुखसिद्ध्यर्थइहचापिपरत्रवा॥ द्वारद्वारतयासस्यात्सुखरूपाश्चतेवयं॥ प्रजयाकिंकरिष्यामःश्वादीनांविद्यते
हिया॥ १६६४॥ अस्माकंविद्यतेह्येषामानंदोयंनिधेःसमः ॥ अक्षयःस्वात्मनोभिन्नःस्वयंज्योतिःसदद्वयः
॥ १६६५॥ इत्येवंवादिनःसर्वेकृतदारास्तथापरे॥ अगृहीत्वैवदाराणांपाणिंपरमनिर्वृताः॥ १६६६॥ पुत्रा
णामपिवित्तानांलोकानांचोभयात्मनां॥ इहामुत्रसुखार्थानांपरित्यज्यैषणात्रयं ॥ भिक्षाचर्यंचरंतिस्मसं
न्यासाश्रममागताः॥ १६६७॥ पुत्रैषणाऽत्रयाप्रोक्तासैववित्तैषणास्मृता॥ पुत्राणामपिवित्तत्वंपितुःस्याद्भो
धनादिवत्॥ १६६८॥ वित्तैषणातुयाप्रोक्तासास्याल्लोकैषणासदा ॥ वित्तंहिसुखहेतुःस्याल्लोकोनाकादि
कोयथा॥ १६६९ ॥

र्थमाह अगृहीत्वेति दारपाणिग्रहणमकृत्वैवतुष्टाः किंकृत्वा पुत्राणांवित्तानांलोकानांचसंबंधिएषणात्रयंकामनात्रयंपरित्यज्य कीदृशा
नांलोकानां ऐहिकामुष्मिकभोगसाधनत्वेनोभयात्मनांद्विविधानामितिद्वयोरर्थः ॥ १६६६ ॥ १६६७ ॥ वस्तुतस्तुवर्णितत्रिविधैषणाए
कत्वेनैवगण्यासाधनैषणात्वेनसर्वासांसंग्रहाद्वितीयातुफलैषणेत्येषणाद्वैविध्यमेवेतिवक्तुंवर्णितमेषणात्रयंसाधनैषणात्वेनैकीकरोति पुत्रै
षणेतिद्वाभ्यां पुत्रैषणावित्तैषणात्वेनैवमंतव्या पुत्राणामपिगोसुवर्णादिरूपवित्तवद्भोगोपकरणत्वेनवित्तत्वात् तथावित्तैषणापिलोकैष
णात्वेनमंतव्या लोकपदस्यभोगसाधनवाचित्वाद्वित्तस्यापिचस्वर्गादिवद्भोगसाधनत्वादितिद्वयोरर्थः॥ १६६८ ॥ १६६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह उभेइति फलतत्साधनविषयकत्वेनसंसारेएषणाद्वैविध्यमेवेत्यर्थः ॥ १६७० ॥ विद्वांसस्तुनित्यसिद्धसुखरूपत्वात्साधनस्यानपेक्षितत्वाच्चद्विविधामप्येषणांनकुर्वंतीत्याह असाधनमिति असाधनंसाधनानपेक्षंनिरतिशयंसुखंयेषांवर्त्ततेतेद्विविधामेषणांकिमर्थंकुर्वीरन्नित्यर्थः ॥ १६७१ ॥ आत्मनःसंन्यासादिसहकृतज्ञानैकलभ्यत्वस्फुटीकरणायउत्पाद्यविकार्यादिकर्मफलविलक्षणस्वरूपंप्रदर्शयतःसएषइत्यादेर्नरिष्यतीत्यंतस्यवाक्यस्यार्थमाह स्वयमितिनवभिः यःपूर्वग्रंथेआनंदादिरूपतयामहेश्वरोवर्णितःसविद्वद्भिरात्मतयैवाधिगम्यतेइतिसंबंधः ॥ १६७२ ॥ एषइति एषएवमयापूर्वंशाकल्यायपृष्टः कीदृशोनेतिनेतीतिवाक्यगतनञ्द्वयेनमूर्तामूर्तंजगतो

उभेएवततोज्ञेयेएषणेवेदवादिभिः॥ सुखेचैकाद्वितीयास्यात्साधनेतस्यसर्वदा॥ १६७० ॥ असाधनंसुखंयेषांसर्वातिशयवर्जितं॥ वर्त्ततेकेनतेकुर्युरेषणामुभयीमपि॥ १६७१ ॥ स्वयंज्योतिःपुरोक्तोयआनंदात्मामहेश्वरः॥ सएवात्मतयाराजन्विद्वद्भिरधिगम्यते॥ १६७२॥ एषपृष्टोमयापूर्वंशाकल्यायमहात्मने॥ मूर्त्तामूर्तजगद्भावाभावरूपविवर्जितः ॥ १६७३ ॥ स्वयंज्योतिःसवागाद्यैरग्न्याद्यैश्चनगृह्यते ॥ ग्राहकत्वंहिसापेक्षंसर्वदोक्तंमनीषिभिः ॥ १६७४ ॥ ग्राहकग्रहणग्राह्यफलसंबंधभेदभाक् ॥ ग्रहणंजायतेयस्मान्नतुभेदविवर्जितम् ॥ १६७५॥ स्वसजातिविजात्युत्थभेदत्रयविवर्जितः ॥ आनंदात्माततोऽगृह्यःस्वयंज्योतिःपरःपुमान् ॥ १६७६ ॥

र्भावाभावयोर्वाक्रमेणनिषेधेनतद्वर्जितइत्यर्थः ॥ १६७३ ॥ अगृह्यपदार्थमाह स्वयंज्योतिरिति सआत्मास्वयंज्योतिरविषयोऽतोवागाद्यैराध्यात्मिकैरग्न्यादित्यादिभिर्वाह्यैश्चप्रकाशैर्नगृह्यतेनप्रकाश्यते तत्रोपपत्तिमाह ग्राहकत्वमित्यादिना हियतोग्राहकत्वंग्राहकशब्दप्रवृत्तिनिमित्तभूतंग्रहणमितरसापेक्षंवुधैरुक्तमित्यर्थः॥ १६७४ ॥ ग्रहणस्यप्रकाशनरूपस्यभेदसापेक्षत्वेऽनुभवंप्रमाणयति ग्राहकेति यस्माद्ग्राहकादिपंचपदार्थानांकर्तृकरणकर्मतन्निष्ठफलतत्संबंधानांभेदशाल्येवग्रहणंप्रकाशनंलोकेजायमानंदृष्टंनतुतद्भेदहीनमित्यर्थः ॥ १६७५॥ आत्मातुसर्वभेदहीनःकथंग्राह्यःस्यादित्याह स्वसजातीति स्पष्टम् ॥ १६७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशीर्यइति भेदाभावहेतुकात्ततो विषयत्वाभावादयमात्मा ऽशीर्योहिंसनयोग्योनभवतियतोहिंस्रशिरोमणेःकालस्यसंबंधात्परिणामरूपं विशरणमपिवस्त्रादिवदात्मनिनदृश्यतइत्यर्थः ॥ १६७७ ॥ अतएवेति अतोभेदाभावादेवआत्माअभितउभयतोंतर्बहिर्वावर्तमानैःसर्वप दार्थैःसंगहीनः यतोभेदवदेववस्तुसंगवद्दृष्टमितिसंबंधः किंचभेदवदेववस्तुप्रबध्यतेबंधंप्राप्नोतिविनश्यतिचआत्मातुअतोभेदाभावान्नसज्ज तेनबध्यतेनविनश्यतिचनवाक्रियासंबंधप्रयुक्तंदुःखमाप्नोतीतिद्वयोरर्थः ॥ १६७८ ॥ १६७९ ॥ एतादृशस्वभावत्वादेवात्मविज्ञानेधिका रिणःसकलकर्मत्यागिनउक्ताइत्याह एषणेति स्पष्टम् ॥ १६८० ॥ उक्तात्मविज्ञानफलप्रदर्शकस्यैतमुहेत्यादेर्वाक्यस्यार्थमाह एतमेवेत्येका

अशीर्यस्ततएवायंभेदाभावेनहेतुना ॥ नशीर्यतेयतःस्वात्मायथावस्त्रादिकंशनैः ॥ १६७७ ॥ अतएवाभितः स्वात्मासर्वसंगविवर्जितः ॥ संगवद्भेदवद्दृष्टंभेदवच्चप्रबध्यते ॥ १६७८ ॥ विनश्यतिचनात्मातःसज्जतेनवि नश्यति ॥ नचदुःखंसमाप्नोतिकिंचिद्दुःखविवर्जितः ॥ १६७९ ॥ एषणात्रयनिर्मुक्ताभिक्षाचर्यपरायणाः ॥ यंजानंतिमहात्मानस्तंकोवेत्तिपुमान्सुधीः ॥ १६८० ॥ एतमेवात्मविज्ञानसंपन्नंपुरुषोत्तमं ॥ सुखदुःखकरे नित्यंपुण्यपापेसुदुःसहे ॥ १६८१ ॥ अकर्त्तुश्चतथाकर्त्तुःसदासंतापकारके ॥ नतापयतइत्यंतेतापदेसर्वदेहि नां ॥ १६८२ ॥ करणात्तापयेत्पापंकर्त्तारंफलतोपिच ॥ सुकृतंकरणात्तद्वत्स्वफलस्यक्षयादिना ॥ १६८३ ॥

दशभिः एतमात्मविदंपुरुषोत्तमंपुण्यपापेनतापयतः कीदृशे सुखदुःखरूपफलारंभणेनसुदुःसहेउत्कटवेगतयाप्रसिद्धे पुनःकीदृशे इति वक्ष्यमाणप्रकारेणकर्तुरकर्तुश्चसदातापके अंतेउत्क्रमणानंतरंविशेषतश्चतापकेइतिद्वयोःसंबंधः ॥ १६८१ ॥ १६८२ ॥ तत्रसदातापकत्वं पुण्यपापयोर्विशदयति करणादितित्रिभिः पापंपापरूपंकर्मकष्टंकर्मेतिन्यायात्करणादनुष्ठानक्लेशात्तापयेत्तथाफलतःफलरूपेणतापये त् एवंसुकृताख्यमपिकर्मकरणादनुष्ठानक्लेशात्तथाफलरूपेणक्षयित्वाच्चकर्तारंतापयतीत्यर्थः ॥ १६८३ ॥ ॥१२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंकर्त्तारंप्रत्युभयोस्तापकत्वमुक्त्वाअकर्त्तारंप्रत्यपितापकत्वंविशदयति गर्वेणेति पाप्मनःपापस्याऽकर्त्तारंतत्पापंगर्वद्वारातापयति दृ
श्यंतेह्यज्ञाःपापाकरणेगर्विताइतिभावः तथाऽपरंपुण्यंतत्कर्मअकर्त्तारंकृपादुःखेनतापयति पुण्यंहिलोकोपकाररूपंतदकृतंसद्गुपका
र्याणांदुःखितलोकानांदर्शनेकृपयादुःखयति तदुक्तं ईर्षुर्घृणीत्वसंतुष्टःक्रोधनोनित्यशंकितः परभाग्योपजीवीचषडेतेनित्यदुःखिनइति
॥१६८४॥ सुकृतमिति तथासुकृतंपापफलस्यदुःखस्यप्रतिबंधाकरणेनाकर्त्तारंतापयति तथाइहामुत्रवालोकानांस्वाननुष्ठितकर्मफला
नांभोग्यानांस्वभोग्येभ्यउत्कर्षस्यदर्शनेनईर्ष्याद्वारासुकृतमकर्त्तारंतापयतीत्यर्थः ॥ १६८५॥ अंतेदुःखदत्वंविशदयति अस्मिन्निति

गर्वेणतापयेत्तद्वदकर्त्तारंहिपाप्मनः॥ लोकदुःखासहिष्णुत्वात्तापयेच्चापरंहितत् ॥ १६८४॥ सुकृतंदुःखसं
प्राप्त्यात्यकर्त्तारंप्रतापयेत्॥ लोकद्वयेपिलोकानामुच्चतावीक्षणेनच॥१६८५॥ अस्मिन्देहस्यजननान्मरणां
तमहंसदा॥ पापान्यकरवंतद्वत्पुण्यानिनतथापरम्॥ एवंसंकल्पतश्चापितपतःपुण्यपातके ॥ १६८६॥ तर
त्येषउभेएतेदुस्तरेपुण्यपातके॥ आत्मविज्ञानसंपन्नोहनूमानिवसागरं॥१६८७॥ विदुषोनास्तिसंकल्पःको
पिकुत्रापिकर्हिचित्॥ अनेनकर्मणास्वर्गःसुकृतेनभविष्यति॥अनेननरकस्तद्वन्महतापातकेनमे॥१६८८॥
पुत्रपश्वादिकंतद्वन्ममानेनभविष्यति॥ अस्मिन्नेवशरीरेऽदोनेत्यदृष्टफलप्रदं॥ १६८९॥

अस्मिन्लब्धेमनुष्यलोकेजननमारभ्यमरणपर्यंतमहंपापान्यकरवंकृतवानस्मितथापरंकेवलंपुण्यानिनाकरवमित्याकारेणसंकल्पेनपुण्य
पापेअंतेतापयतइत्यर्थः॥ १६८६ ॥ विद्वांस्तुविज्ञानबलेनतयोरश्लेषादिरूपंतरणंकरोतियथाजांबवदादिप्रकाशितंस्वमहिमानमनुसृत्य
हनूमतासिंधुस्तीर्णइत्याह तरतीति एषविद्वान् एतेपुण्यपापे ॥ १६८७॥ संकल्पवंतंहिपुण्यपापेतापयतोविदुषस्तुसंकल्पएवनास्तीति
कथंतापयतइत्याह विदुषइति संकल्पभेदानभिनयति अनेनेत्यादिना स्पष्टम्॥ १६८८॥ पुत्रेति अनेनपुत्रेष्ट्यादिरूपकर्मणाअस्मिन्ने
वशरीरेपुत्रादिफलंभविष्यतितथाऽदःस्वाराज्यादिफलमस्मिन्नेवशरीरेनभविष्यतिइतिइत्यतोहेतोर्वाजपेयादिकर्मअदृष्टफलप्रदंपारलौ
किकमेवेत्यर्थः॥ १६८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथानेनेति तथानेनब्राह्मणापकारादिरूपेणकर्मणास्वार्थस्यस्वकीयप्रयोजनस्यसिद्धिंकुर्वतोममकुष्ठादिरोगोऽपकीर्तिश्चभविष्यतीति ॥ १६९० ॥ इत्यादीति इत्यादिरूपेणबोधेनसंकल्पेनतापकेइमेपुण्यपापेअस्यविदुषस्तापप्रदेनभवतः ततोब्रह्मवित्पुण्यपापेतरतीत्युच्यतेइत्यर्थः ॥ १६९१ ॥ उक्तार्थसंवादकस्यऋक्संज्ञकमंत्रस्यार्थमाह मंत्रोपीतित्रिभिः हेमहाराजउक्तविधंविद्वांसंमंत्रोपिइतिइत्थंप्रतिपादयति इतिकथं आत्मविदोब्राह्मणस्यायंस्वरूपभूतोमहिमाकूटस्थनित्यःकालत्रयेणान्यथाभावादित्यर्थः ॥१६९२॥ यतःशुभाशुभकर्मकृतवृद्धिहानिरहितइत्याह वर्धतइति॥ १६९३॥ तस्यैवेति तस्यपुराब्रह्मीभूतस्यब्राह्मणस्यमहिमास्वरूपभूतंमहिमानंप्राप्तोऽयमिदानींत

तथानेनमहारोगोलोकेऽकीर्तिश्चदारुणा॥ भविष्यत्यचिरादेवस्वार्थसिद्धिंप्रकुर्वतः॥ १६९० ॥ इत्यादिबोधतोयस्मान्नास्यतापप्रदेइमे॥ ब्रह्मवित्ततएवायंपुण्यपापेतरेत्सदा॥ १६९१ ॥ मंत्रोप्याहमहाराजविद्वांसमितिसर्वदा॥ ब्राह्मणस्यात्मविदुषोमहिमायंमहानहो॥ नित्यःकालत्रयेप्यस्यनविपर्येतिकर्हिचित्॥ १६९२॥ वर्द्धतेकर्मणानायंसुकृतेनयथापरः ॥ कनीयानपिपापीवनभवेत्पातकेनच ॥ १६९३ ॥ तस्यैवब्राह्मणस्यायंमहिमाब्राह्मणोभवेत्॥ पदनीयात्मविज्ञानाद्योद्वयात्मवपुःस्थितः ॥ कोनामान्यस्तरेद्देतेदुस्तरेपुण्यपातके ॥ १६९४॥ यस्मात्पूर्वेपिविद्वांसःपुण्यपापविवर्जिताः ॥ एषणात्रयनिर्मुक्ताजाताभिक्षाटनेरताः ॥ आत्मलोकेनसंपन्नाःपरिव्राजोजितेंद्रियाः॥ १६९५॥

नोब्राह्मणोपिभवेत् कीदृशइदानीतनब्राह्मणः यःपदनीयस्ययथापदेनपादचिन्हेनगवादिर्बुध्यतेतथाअस्तिभातिप्रियमित्याकारैःपदैर्वेदनीयस्यात्मनोविज्ञानादद्वयादिरूपतयास्थितः अन्यथापुण्यपापाभ्यामतीतोमहिमादुर्लभइत्यर्थः॥ १६९४॥वर्णितफलकमात्मज्ञानमुद्दिश्यशमाद्यंतरंगसाधनविधानपरस्यतस्मादित्यादेःपश्यतीत्यंतस्यार्थमाह यस्मादित्यूनविंशतिश्लोकैः यस्मात्पूर्वेपिविद्वांसोविवेकिनइहजन्मनिजन्मांतरेवानुष्ठितैर्यज्ञादिभिःशुद्धांतःकरणत्वात्पुण्यपापाभ्यांतत्प्रयोजकैषणात्रयेणचरहिताःसंतआत्मनोलोकस्यदर्शनस्यदार्ढ्यरूपसंपत्तिफलकंजितेंद्रियत्वाद्यंतरंगसाधनसंपन्नंभिक्षाटनोपलक्षितंपारिव्राज्यंसंन्यासंकृतवंतइत्यर्थः ॥ १६९५ ॥ ॥१२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति तस्मादिदानींतनोपियज्ञादिभिःक्षीणपातकत्वेनशुद्धमानसआत्मेच्छुरात्मज्ञानसंपत्तिकामएवंगुणोवक्ष्यमाणशमादिगुणसंप न्नःसन्प्रव्रजेदिति ॥ १६९६ ॥ तत्रशमदमौपूर्वोत्तरार्धाभ्यामभिनयति मनसेति बालवद्रागादिराहित्यंशमःमिंद्रियनिरोधात्मकंदमंचकु र्यादित्यर्थः शमादीनांपूर्वपूर्वस्योत्तरोत्तरंप्रतिहेतुत्वात्क्रमेणोपन्यासः ॥ १६९७ ॥ संतोषातिशयरूपामुपरतिमाह यथोपपन्नेति यथो पपन्नमनायासागतम् ॥ १६९८ ॥ तितिक्षांक्षमारूपामभिनयति कर्मणेतिदशभिः शरीरादिभिःकृताभूतैःप्राणिभिःपीडाममदेहादिष्वे ववर्ततेनमत्स्वरूपेइतिजानन्नकुप्येदित्यर्थः ॥ १६९९ ॥ विचारयेदिति भूतैरपकृतश्चइदमेवंविधंविचारंकुर्यात् इदंकिमित्याकांक्षायां

तस्माद्यज्ञादिभिःक्षीणपातकःशुद्धमानसः॥ आत्मेच्छुःप्रव्रजेदेवंगुणोभूत्वासदामुनिः॥ १६९६ ॥ मनसा विषयान्सर्वान्परित्यज्यार्भकोपमः॥ दमेंद्रियाणिसंयम्यदुर्दांतानिववाजिनः ॥ १६९७॥ यथोपपन्नलाभे नवर्त्तयेत्स्वकलेवरं ॥ हर्षंनलाभतोगच्छेद्विषादंनाप्यलाभतः ॥ १६९८ ॥ कर्मणामनसावाचापीडांभूतैः कृतामपि॥ देहेंद्रियमनःस्वेपजानन्कोपंचनव्रजेत्॥ १६९९ ॥ विचारयेदिदंस्वस्यचित्तेस्वच्छतमेसदा॥ निं दांयदिप्रकुर्वंतिममेमेबांधवास्ततः॥ मयासमार्जितंपापंसर्वमेवनयंत्यमी॥ १७०० ॥ इतःपरंममामीभिः कार्याकोपकृतिस्त्विह॥ यतोदुःखकरंपापंममसर्वंनयंत्यमी ॥ १७०१ ॥ परोपकारनिरताअहोएतेमहाधि यः॥ मनसोवचसःस्वस्यदुःखंदत्वाहिदुःखदम्॥ ममपापंहरंत्येतेस्वस्यदुःखकरंसदा॥ १७०२ ॥

निंदामित्यादियोज्यं यदीमेलोकामांनिंदंतितदाबांधवाएवमदर्जितपापहरणरूपोपकारकारित्वादित्यर्थः ॥ १७०० ॥ बांधवत्वेहेतुमुप कारमेवविशदयति इतइति काउपकृतिरितिच्छेदः॥ १७०१ ॥ परोपकारेति किंचएतेनिंदकत्वेनभासमानाममतेपरोपकारिणःसज्जना एवयतःस्वकीयेमनसिवाचिचमदीयदोषचिंतनादिरूपंदुःखमायासंदत्त्वानिधायममदुःखदंपापंहरंति कीदृशंपापं स्वस्यदुःखकरंह्यियमा णंसत्स्वस्यहर्तुर्दुःखप्रयोजकमित्यर्थः तथाचशंभोर्हालाहलपानमिवपरपापहरणंसज्जनानांनचित्रंपरंत्वेतेनिंदकादुर्जनत्वेनप्रसिद्धाइति चित्रमितिभावः ॥ १७०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंनिंदाकालेविचारमुक्त्वाभूतानांस्वंप्रतिजिघांसांदृष्ट्वाकर्तव्यंविचारमभिनयति मत्स्यमित्यादिना अमीलोकाःकस्मान्मत्स्यंद्रुह्यंतिजिघां
संतिमदनिष्टंचिंतनफलंचांडालयोनित्वमेषांमास्त्वितिकामये तदुक्तंमनुना परद्रव्याण्यभिध्यायंस्तथानिष्टानिचिंतयन् वितथाभिनि
वेशीचजायतेंऽत्यासुयोनिषु अभिध्यायनूस्पृहयन् वितथाःपाखंडास्तत्राभिनिवेशीआग्रहवानिति ॥ १७०३ ॥ हस्तयोरिति यथास्व
स्यहस्तयोःपादयोर्वास्वयंताडनमनुचिंततथामेशरीरस्यताडनंतेलोकाःकस्मात्कुर्वंति एकात्मकत्वाविशेषेणस्वांगवत्परांगताडनस्याप्ययु
क्तत्वाविशेषात् अहंत्वेवंकामये एतेषांस्वस्यमेस्वशरीरतुल्यस्यमच्छरीरस्यताडनान्मद्वद्दुःखंमास्त्वित्यर्थः ॥ १७०४ ॥ मद्दुःखदंतुमया

मत्स्यंद्रुह्यंतिमनसावतकस्माद्मीवृथा ॥ माभूदंत्यजयोनित्वमेतेषांममचिंतनात् ॥ १७०३ ॥ हस्तयोःपाद
योःकस्माद्यथामेतेप्रकुर्वते ॥ स्वस्यमेताडनादेषांमाभूद्दुःखंयथामम ॥ १७०४॥ नैतेकुर्वंतिमेकिंचिद्दुःखम
त्रसमागताः ॥ पुराकृतंमयायत्तुतदेवात्रकरोतिमे ॥ १७०५॥ एतेममशरीराणिगुरुशास्त्रोपदेशतः ॥माभूदे
तेषुतद्दुःखंयदस्तिमयिसंप्रति ॥ १७०६ ॥ सर्वेत्रसुखिनःसंतुसर्वेसंतुनिरामयाः ॥ ममगात्रसमाजीवामा
कश्चित्पापमाप्नुयात् ॥ १७०७॥ इत्यादिचिंतयित्वायंनिर्विकारोभवेत्सदा ॥ दुःखेभूतकृतेस्वस्यदेहेंद्रियमनः
स्वपि॥ १७०८॥सावधानःसदाभूयादात्मनोदर्शनायहि ॥ गुरुशास्त्रोपदेशेनपरमास्तिक्यमागतः॥ १७०९॥

पुराकृतंदुष्कृतमेवेत्याह नैतइति स्पष्टं ॥ १७०५ ॥ एतेइति यतएतेप्राणिदेहाःसर्वेपिममैकस्यात्मनःशरीराणीतिगुरुशास्त्रोपदेशात्सि
द्धमतइतिकामयेयत्संप्रत्यधुनामयिमच्छरीरेयद्दुःखंतदेतेषुप्राणिषुमाभूदिति ॥ १७०६ ॥ तस्मादेवमस्त्वित्याह सर्वेइति गात्रंशरीरं
॥ १७०७ ॥ इत्यादीति स्वस्यदेहादिषुभूतैर्दुःखेकृतेसतिवर्णितविधविचारेणनिर्विकारोभवेदितिसंबंधः ॥ १७०८ ॥ समाधानंश्रद्धां
चदर्शयति सावधानइति अवधानंचित्तैकाग्र्यंतद्भावरूपंसमाधानंगुरुप्रभृत्युपदेशानुसारिविश्वाससरूपांश्रद्धांचकुर्यादित्यर्थः ॥१७०९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्कैरिति चकारोभिन्नक्रमः तथाचउक्तसाधनसंपत्त्यनंतरंसम्यक्शास्त्रैर्वेदांतरूपंतन्मार्गानुसारिभिरुत्तरमीमांसाप्रसिद्धैस्तर्कैः श्रवणमनन संज्ञैस्तथायथोपदिष्टमुपदेशानुसारेणएतस्मिन्नात्मतत्त्वेप्रत्ययानांचित्तवृत्तीनांप्रवाहरूपेणनिदिध्यासनेनचसहकृतेनब्रह्माहमस्मीत्यादिरूपेणशास्त्रेणकरणेनउपकृतंयन्मनस्तेनैवदेवमवलोकयेत्साक्षात्कुर्यात् कीदृशंदेवं मनसिसाक्षितयास्थितं पुनःकीदृशं यज्ज्योतिषांज्योतिरुक्तंतद्रूपंपुनःकीदृशं अद्वयत्वादानंदरूपमितिद्वयोःसंबंधः ॥ १७१० ॥१७११ ॥ तत्साक्षात्कारात्किंभवतीत्याकांक्षायांपरिच्छेदहेतोरविद्यायानिवृत्त्यासर्वात्मभावइत्याह तेनेतिद्वाभ्यां तेनब्रह्मात्मविषयकेनविज्ञानेनआवरणविक्षेपरूपशक्तिद्वयवतीमायायतोबाधिताभव

तर्कैर्नानाविधैःसम्यक्शास्त्रमार्गानुसारिभिः ॥ यथोपदिष्टंत्वेतस्मिन्प्रत्ययानांप्रवाहतः ॥ १७१० ॥ सहब्रह्माहमस्मीतिशास्त्रेणकरणेनच ॥ मनस्यवस्थितंदेवंमनसैवावलोकयेत् ॥ यदुक्तंज्योतिषांज्योतिरानंदात्मानमद्वयं ॥ १७११ ॥ तेनज्ञानेनविध्वस्तास्वात्मावरणरूपिणी ॥ विक्षेपजननीमायापुनर्नैवभविष्यति ॥ १७१२ ॥ अस्याःसर्वात्मनानाशेसर्वमात्मेतिसर्वदा ॥ पश्यत्यात्माऽत्मनोभासात्यवाङ्मनसगोचरः ॥ १७१३ ॥ एवंय आत्मविल्लोकेउभेसुकृतदुष्कृते ॥ अत्येचमहतीराजंस्तरतस्तपतोपिन ॥ १७१४ ॥ किंतुतेएवविद्वान्सतरेन्नौरर्णवंयथा ॥ तपेच्चगगनाद्वह्निस्तूलराशिंयथाक्षणात् ॥ १७१५ ॥ अनेनविदुषाप्राप्योयएतैःसाधनैःसदा ॥ पुण्यपापैर्विनिर्मुक्तोत्यविद्यागंधवर्जितः ॥ असंशयस्ततःप्रोक्तोब्राह्मणोब्रह्मभूतकृत् ॥ १७१६ ॥

तीत्यतआत्मानंसर्वरूपंविदुषआत्मापश्यति कया स्वरूपभूतयाभासा यतोवागाद्यविषयइतिद्वयोरर्थः ॥ १७१२ ॥ १७१३ ॥ नैनमित्यादेर्दास्यायेत्यंतस्यवाक्यस्यार्थमाह एवमितिद्वादशभिः यएवमात्मवित्तत्स्वरूपंपुण्यपापेनतरतोनप्राप्नुतोनवातपतस्तापयतःकिंतुसविद्वानेवतेपुण्यपापेतरेत्तयोःपारंगच्छेत् यथानौरर्णवं किंचसविद्वांस्तेपुण्यपापेतपेद्दहेत् यथागगनादुत्थितोवैद्युतोग्निस्तूलराशिमितिद्वयोरर्थः ॥ १७१४ ॥ १७१५ ॥ अनेनेति वर्णितेनविदुषावर्णितैःसाधनैःप्राप्योयआत्मासयतःपापैस्तद्वुपलक्षितैःपुण्यैस्तन्मूलभूताविद्ययाचवर्जितोऽतएवासंशयश्चअतोहेतोर्ब्राह्मणोब्रह्मवित्ब्रह्मैवप्रोक्तः ब्रह्मवेदब्रह्मैवभवतीतिश्रुतेः कीदृशंब्रह्म भूतकृत्जगत्कारणत्वोपलक्षितमित्यर्थः ॥ १७१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुपुप्तइति यः पूर्वंसुप्तौसर्वगम्यब्रह्मलोकतयावर्णितःसएवसर्वबुद्धिसाक्षितयातेदर्शितइत्यर्थः ॥ १७१७ ॥ अयमिति अयमात्मास र्वेषांहृदिस्थितःसर्वभासकानंदरूपोमरणाद्यवस्थास्वविद्ययागच्छन्भ्रमन्नपिवस्तुतोमरणादिकंनगच्छति सर्वसंसारधर्मातीतइतियावत् ॥ १७१८ ॥ १७१९ ॥ अभयमिति यत्पूर्वंकूर्चब्राह्मणेअयमात्माअभयंब्रह्मेतितुभ्यमुक्तंतदेवाभयंब्रह्मेहात्मतयावर्णितमितिव्यतिहार भेदान्नपौनरुक्त्यमितिभावः अत्रात्मनिअन्योभिन्नसत्ताकःसन्स्थूलोऽसन्सूक्ष्मोवाकश्चिद्भावोनविद्यतेइत्यर्थः ॥ १७२० ॥ इतितेइति

सुषुप्तेसर्वसंप्राप्योब्रह्मलोकःपुरेरितः॥ एषबुद्धिप्रचाराणांसाक्षीसर्वशरीरिणां॥ १७१७॥ अयंहृदिस्थितो राजन्ममतेप्यन्यदेहिनां॥ अयंहिज्योतिषांज्योतिरानंदोयंपरःस्मृतः ॥ १७१८ ॥ मरणेजननेवायंतथाव स्थात्रयेपिवा॥ अविद्ययामहाराजगच्छन्नपिनगच्छति॥ १७१९ ॥ अभयंब्रह्मयत्पूर्वंमयातेकथितंनृप॥ तदेवायमितोनान्यःसन्नसन्नात्रविद्यते॥ १७२० ॥ इतितेकथितंसम्यक्ज्ञानंसाधनसंयुतं ॥ सम्राट्प्रसन्न चित्तस्त्वंप्रतिबुद्धोसिधीधन॥ १७२१ ॥इत्युक्तेयाज्ञवल्क्येनप्रतिबुद्धोनराधिपः॥ अनयोक्त्यानिजंबोधमु क्त्वान्मुनयेतदा॥ १७२२॥इमेविदेहायेपूर्वंतुभ्यंदत्तामयिस्थिताः॥ सुतादिसहितोहंचपुरतोयंस्थितस्तव ॥१७२३॥स्वदास्यायचमांब्रह्मन्गृहीत्वैतान्व्रजापरं॥स्थानकंतिष्ठवात्रत्वमासेनाहंत्वयाविना॥१७२४॥ इत्युक्तोयाज्ञवल्क्योपिराजस्नेहसमावृतः॥ मिथिलोपवनेतस्थौकृत्वाऽऽसनमनिंदितं॥ १७२५॥

हेसंम्राट्महाराजत्वंप्रबुद्धोसीत्यतःप्रसन्नचित्तोभवेति ॥ १७२१ ॥ इत्युक्तेइति याज्ञवल्क्येनेत्युक्तेसतिराजाअनयाबोधापूर्तिबोधकस हस्रदक्षिणावाक्यविलक्षणयाउक्त्यावचनभंग्यास्वंबोधंपरिपूर्णंज्ञापितवानित्यर्थः ॥ १७२२ ॥ तांवचनभंगीमभिनयति ॥ इमेइतिद्वा भ्यां हेब्रह्मन्निमेविदेहानांनिवासोजनपदोयेपूर्वमेवमयार्पितामयिन्यासवत्स्थिताःअहंचसानुबंधःसंमुखेस्थितोस्मि मामेतांश्चमत्सुता दीन्दास्यायदासकर्मणेगृहीत्वास्वीकृत्यापरंस्थानंगच्छेहवातिष्ठ अहंतुत्वयाविनानासेनस्थास्यामीतिद्वयोरर्थः ॥ १७२३ ॥ १७२४ ॥ ॥१२९॥
इत्युक्तइति स्नेहोनुग्रहः आसनंस्थानं ॥ १७२५ ॥

CC-0. In Public Domain. Digitization by eGangotri

उत्तराध्यायार्थजिज्ञासामुत्थापयति पश्चादिति समुनिःपश्चाज्जायायैब्रह्मविद्यांसमर्प्यसंन्यस्यचराज्ञासहमोक्षंप्राप्तः ॥ १७२६ ॥ पूर्वग्रंथेइतिहासरूपेणवर्णितंयदात्मतत्त्वंतस्यसगुणंनिर्गुणंचरूपंतद्विज्ञानफलंचकंडिकाद्वयेनोक्तंतत्रध्येयस्यसगुणरूपस्यप्रदर्शिकायाःप्रथमकंडिकायाअर्थमाह सएवेतिद्वाभ्यां योवर्णितःसएवात्मासगुणरूपेणान्नादःसर्वोपाधिषुस्थित्वासर्वान्नानांभोक्तातथावसुदानःवसोर्धनस्यकर्मफलात्मकस्यदाताच यतोरातेर्धनस्यतद्दातुश्चपरायणंपरमालंबनं तत्ररातेर्भोग्यरूपधनस्यपरायणत्वादन्नादः दातुर्यजमानस्यप्रतिभूवत्परायणत्वाद्वसुदानइतिविभागश्चतुर्थपादरूपाश्रुतिःपंचमांतिपिव्याख्यातेति ॥ १७२७ ॥ अन्नादत्ववसुदानत्वरूपविशेषणद्वये

पश्चात्संन्यस्यजायायैब्रह्मविद्यांसमर्प्यच ॥ राज्ञातेनसमंप्राप्तःस्थानमावृत्तिवर्जितम् ॥ १७२६ ॥ सएवायंमहानात्माजरामरणवर्जितः ॥ अन्नादोवसुदानश्चरातेर्दातुःपरायणं ॥ १७२७ ॥ संप्रदानवपुर्भूत्वादत्तमन्नादिकंवसु ॥ अत्तिदाताचभोक्तायंभवेज्जन्मांतरेत्रवा ॥ वसुनानाविधंतद्दातृरूपःप्रयच्छति ॥ १७२८ ॥ विज्ञानानंदरूपोयंजनकायमहात्मने ॥ याज्ञवल्क्येनमुनिनाकीर्तितोभयवर्जितः ॥ १७२९ ॥ दुःखंजनिमृतिप्रोक्तंप्राप्नुयाज्जरसामृतः ॥ अजरोमरआत्मातोजायतेम्रियतेनच ॥ १७३० ॥ देहद्वयविनिर्मुक्तोमाययाचविवर्जितः ॥ सर्वगोब्रह्मरूपोयंनभावन्मुनिनेरितः ॥ १७३१ ॥

नोपासनस्यफलमाह संप्रदानेति अयमुक्तविशेषणात्मोपासकःसंप्रदानवपुर्नानोपायनानांपात्ररूपोभूत्वालोकैर्दत्तमर्पितमन्नादिरूपंवसुधनमत्तिभुंक्तेतथायतोदातात्रजन्मांतरेवाभोक्ताभवतीत्यतोदातृरूपःप्रशस्तोदातासन्नानाविधंवसुधनंप्रयच्छतिददातीत्यर्थः ॥ १७२८ ॥ अंत्यकंडिकायाःसफलनिर्गुणविद्यानिगमनरूपायाअर्थंदर्शयति विज्ञानेतित्रिभिः अयमात्माविज्ञानादिरूपोमुनिनाजनकायाभयत्वेनवर्णितइत्यर्थः ॥ १७२९ ॥ अभयत्वेहेतुतयाऽजरत्वादिकंयोजयति दुःखमित्यादिना योहिजरसामृतोजरयामरणेनचसंबद्धःसजन्मादिकालिकंदुःखंभयंचप्राप्नुयादयमात्मातुनतथायतोऽजरादिरूपइतिसंबंधः ॥ १७३० ॥ तत्रहेतुर्ब्रह्मत्वलक्षणंमहत्त्वमित्याह देहेतिस्पष्टं ॥ १७३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरति इतीति ऐरयदुक्तवान् ॥ १७२२ ॥ यःषष्ठोविश्वमारभ्यदेवःषष्ठीपतेःपिता सषष्ठार्पणसंतुष्टःकष्टंदृष्ट्याप्रतक्षति अस्यार्थः वि
श्वतैजसप्राज्ञविराट्सूत्रेश्वरात्मकानामवस्थानांगणनेयःषष्ठईश्वरःषष्ठीपतेःस्कंदस्यपिताचसषष्ठस्याध्यायस्यमनसोवाषष्ठेंद्रियस्यार्पणे

इतितेकथितंसर्वंजनकाययदैरयत् ॥ याज्ञवल्क्योमहाप्राज्ञःकिमन्यत्श्रोतुमिच्छसि ॥ १७२२ ॥ ॥ इतिश्री
मत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेबृ
हदारण्यकयाज्ञवल्क्यकांडसारार्थप्रकाशेयाज्ञवल्क्यजनकसंवादोनामषष्ठोध्यायः ॥ ६ ॥ ॥ छ ॥

नतुष्टःसन्दृष्ट्यासानुग्रहकटाक्षेणस्वरूपाविर्भावेणवाकष्टमज्ञानेनतत्कार्येणवाप्रयुक्तंप्रतक्षतिहरतीति इतिश्रीदत्तकुलतिलककृष्णचं
द्रात्मजदिलारामसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतौआत्मपुराणटीकायांसत्प्रसवाख्यायांषष्ठोध्यायःस
माप्तः ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे षष्ठोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे सप्तमाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ सप्तभिःकरणैर्द्वारैःप्रमायस्यप्रजायते सदेवःसप्तमःसम्यक्सप्तमेत्रविविच्यते ज्ञानेंद्रियाणिमनोबुद्धिश्चेत्याकारैःसप्तभिःकरणैरेकायनप्रक्रियायांवक्ष्यमाणविधयाप्रमेयत्वादात्मासप्तमपदवाच्यइतिभावः बृहदारण्यकतृतीयाध्यायेषष्ठाध्यायेचपठितमैत्रेयीब्राह्मणस्यार्थमुपबृंहयितुंतत्रशिष्यजिज्ञासांपूर्वोक्तानुवादपूर्विकांदर्शयति ब्रह्मेतिदशभिः याज्ञवल्क्येनजनकायोक्तांब्रह्मविद्यांगुरुमुखात्श्रुत्वाशिष्योभूयःपप्रच्छेतिसंबंधः ॥१॥ भगवन्निति द्वयंस्पष्टम् ॥२॥३ ॥ मधुनइति षडध्यायीरूपेबृहदारण्यकेद्वाभ्यांद्वाभ्यामध्या

श्रीगणेशायनमः॥ ब्रह्मविद्यामिमांश्रुत्वाजनकायसमीरितां॥ याज्ञवल्क्येनशिष्योसौगुरुवक्त्रारविंदतः॥ पप्रच्छस्वगुरुंभूयोब्रह्मविद्याश्रयांकथां॥ १ ॥ भगवन्भवताख्यातमैतरेयसमीरितं ॥ ज्ञानंनानाविधाख्यानयुक्तंवैराग्यसंयुतम्॥ २॥ यच्चकौषीतकिप्रोक्तंसूर्योक्तंचविभागशः॥ इंद्रप्रतर्दनाख्यानमद्भुतंरोमहर्षणं॥ अजातशत्रोःसंवादोदृप्तबालाकिनातथा॥३॥ मधुनोयाज्ञवल्क्यस्यतृतीयस्यखिलस्यच॥ कांडत्रयस्ययोवंशोभिन्नाभिन्नश्चकश्चन॥४॥ अश्विनोःसहसंवादऋषिणासर्वदर्शिना॥ दध्यङ्ङाथर्वणात्ताभ्यांप्राप्ताविद्यातिदुर्लभा ॥ पूर्णस्यब्रह्मणस्तद्वत्शक्रेणचदिवौकसा॥ ५ ॥ परोपकारनिरतोदध्यङ्ङाथर्वणोमुनिः ॥ प्राप्तवान्व्यसनंशक्रादश्विभ्यांचसुदुःसहं॥ ६॥ याज्ञवल्क्यस्यसंवादोमुनिभिश्चाश्वलादिभिः॥ विजयस्तस्यविप्रस्यशाकल्यस्यमृतिस्तथा ॥ ७॥

याभ्यांघटितानांकाण्डानांत्रयं तत्रप्रथमंमधुनोमधुविद्यायाःप्राधान्येनप्रकाशकत्वान्मधुकांडमित्याख्यायते द्वितीयंयाज्ञवल्क्यसंबंधाद्याज्ञवल्क्यकांडमिति तृतीयंतुखिलस्यपरिशिष्टार्थस्यसंबंधात्खिलकांडमिति तेषामंतेषुप्रोक्तवंशानांभेदोऽभेदश्चकश्चनाद्भुतोव्याख्यात इतिसंबंधः ॥ ४ ॥ अश्विनोरिति सर्वज्ञेनदधीचामुनिनासहाश्विनोःसंवादोव्याख्यातः ताभ्यामश्विभ्यांततोमुनेर्यथापूर्णब्रह्मविद्याप्राप्ताइंद्रेणचतथाव्याख्यातमेवमग्रेपि ॥ ५ ॥ परोपकारेति व्यसनंशिरश्छेदरूपांविपत्ति ॥ ६ ॥ याज्ञवल्क्यस्येति स्पष्टम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनकस्येति कामवरतःकामवरेणयतःकामवरप्रभावाद्राजाकृतीकृतकृत्योजातः ॥ ८ ॥ तत्रेति तत्रकामवरप्रयुक्तसंवादाध्याये प्रव्र जिष्यतासंन्यासोद्यतेन ॥ ९ ॥ १० ॥ इतिपृष्टोगुरुर्मधुकांडियाज्ञवल्क्यकांडिचप्रोक्तस्यमैत्रेयीब्राह्मणस्यार्थोपबृंहिकांकथांवक्तुमुपचक्र मेइत्याह इत्युक्तइति ॥ ११ ॥ तत्रप्रथमकंडिकार्थंपादोनशतद्वयश्लोकैरुपबृंहयन्बाल्यादारभ्ययाज्ञवल्क्यकथामाह धर्मात्मेत्यादि ना अयंधर्मात्मायाज्ञवल्क्योबाल्यादारभ्यविषयेषुगतस्पृहआसीत् ॥ १२ ॥ तत्रहेतुमाह विकारीवेतिद्वाभ्यां विकारीवविकारितुल्यः त

जनकस्योपदेशोयोयाज्ञवल्क्यकृतोमहान् ॥ पुनश्चकामवरतोयतोराजाभवत्कृती ॥ ८ ॥ तत्रांतेभवताप्रोक्तं याज्ञवल्क्योमहामुनिः ॥ जायायैब्रह्मविज्ञानंदत्वासंन्यासमागतः ॥ ९ ॥ तदहंश्रोतुमिच्छामिजायायाआह यद्द्विजः ॥ कीदृशंतद्धिविज्ञानंयदुक्तंप्रव्रजिष्यता ॥ १० ॥ इत्युक्तेगुरुरत्यंतंसंतुष्टहृदयस्तदा ॥ मधुनोयाज्ञव ल्क्यस्यकांडद्वयसमीरितां ॥ वैदिकींशिष्यमाहैतांकथांकर्णसुखप्रदां ॥ ११ ॥ धर्मात्मायाज्ञवल्क्योयमासीद्वा जसनेयकः ॥ बाल्यादारभ्यतेजस्वीविषयेषुगतस्पृहः ॥ १२ ॥ विकारीवबहिर्भातिचित्तदोषविवर्जितः ॥ लो कोपकारनिरतोबाल्येतपउपाश्रितः ॥ १३ ॥ नारीवृंदकसमाकीर्णेप्रविष्टोयद्वनेवने ॥ नचचालमुनिर्धैर्याद्धी राणांप्रथमःस्थितः ॥ १४ ॥ वर्षासुस्थंडिलेष्वेववसत्यावरणंविना ॥ वृक्षपर्वतवत्तिष्ठन्गृह्णन्धारामपोमयीं ॥ १५ ॥ उष्णकालेचमध्यान्हेबहुतप्तशिलादिषु ॥ वसत्यावरणंहित्वावन्हीनांमध्यतःस्थितः ॥ १६ ॥ शीतका लेस्थिरेतोयेस्थलेहिमचयावृते ॥ चित्तेविकारशून्यःसन्निमग्नइवतिष्ठति ॥ १७ ॥ आराधयन्नमुंदेवंज्योतीरू पंत्रयीमयं ॥ मंडलस्थितमादित्यंतदेकनयनःसदा ॥ १८ ॥

पउपाश्रितस्तपोरतः ॥ १३ ॥ नारीति यत्यतोघनेगह्वरेवनेनारीभिरिंद्रप्रेषिताभिर्वृंदवद्रहस्युपयांतीभिर्व्याप्तेप्रविश्यतपस्यन्धैर्यान्न चचालयतोधीराणांप्रथमोमुख्यः ॥ १४ ॥ तस्यतपोवर्णयति वर्षास्विति षड्भिः वर्षाकालेच्छत्रादिकमावरणंविनास्थंडिलेष्वेववृक्षादिव न्निश्चलोवसति ॥ १५ ॥ उष्णेति स्पष्टं ॥ १६ ॥ शीतेति हिमचयस्तुहिनराशिस्तद्व्याप्ते ॥ १७ ॥ आराधयन्निति तदेकनयनआदित्यप्र णिहितदृष्टिः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्णेति पर्णाद्याहारेणक्रमेणदेहंशोषयन्नादित्यमेवपरब्रह्मरूपेणध्यायन्पित्रोपनयनकालेउपदिष्टांगायत्रींजपंश्चतेपे ॥ १९ ॥ २० ॥ एवमिति एवंतपःकुर्वतोविघ्नभयेनाप्रमत्तस्यचतस्यबहुकालेव्यतीतेआदित्यःपुरुषरूपेणप्रादुरासेत्यर्थः ॥ २१ ॥ एताभ्यामिति पाण्यादिविशेषणैरेतच्छब्दैःप्रत्यक्षविषयस्थूलशरीरसंबंधबोधकैर्मानसत्वंव्यावर्त्यते तथाचक्रमेणभूमिस्पर्शिभिः पाणिमूर्द्धहृदयपादैर्दंडव

पर्णमूलफलाहारःशोषयन्नात्मनोवपुः ॥ तृतीयेदिवसेभुंक्तेक्वापिषष्ठेमहामुनिः ॥ १९ ॥ द्वादशेदिवसेक्वापिश्रमनिद्राविवर्जितः ॥ मनसाब्रह्मपरममादित्यंचिंतयन्मुहुः ॥ पित्रादत्तांचसावित्रींसर्वदाप्रजपन्गिरा ॥ २० ॥ एवंतपस्यतस्तस्यविघ्नराशेश्चबिभ्यतः ॥ अप्रमत्तस्यविप्रस्यकालेमहतिभास्करः ॥ वरदोमांसनयनगोचरोभूत्पुमाकृतिः ॥ २१ ॥ एताभ्यामेवपाणिभ्यांमूर्ध्नानेनोरसातथा ॥ पद्भ्यामाभ्यांचसहसापतितोदंडवद्भुवि ॥ २२ ॥ दुर्दर्शंजगतांप्राणंदृष्ट्वांस्तपसःफलं ॥ याज्ञवल्क्योपिसंहृष्टस्तुष्टावचयथामति ॥ २३ ॥ देवोपिचजगत्प्राणआनंदाश्रुविलोचनः ॥ रोमांचकंचुकोभूत्वापस्पर्शमुनिपुंगवं ॥ पाणिभ्यांवचनंचेदमाहभक्तप्रियोरविः ॥ २४ ॥ वत्सत्वंबहुधाक्लेशंप्रथमेयद्वनंगतः ॥ वरंवरयभद्रंतेदास्यामीप्सितमेवते ॥ २५ ॥ इत्युक्तेयाज्ञवल्क्योपिप्राहदेवंप्रभाभृतं ॥ बद्धांजलिपुटोमूर्ध्नितिर्यग्दृष्टिरधोमुखः ॥ २६ ॥ भगवन्जगतःप्राणकर्मसाक्षिन्महेश्वर ॥ नतेस्त्यविदितंकिंचित्तथाप्येतद्वदाम्यहं ॥ २७ ॥

त्प्रणतोयाज्ञवल्क्योजगतःप्राणभूतमादित्यंपश्यंस्तुष्टावेतिद्वयोःसंबंधः जगत्प्राणत्वेश्रुतिस्तुप्राणःप्रजानामुदयत्येषसूर्यइत्याथर्वणेप्रोक्ता ॥ २२ ॥ २३ ॥ देवोपीति रविर्देवोपिप्रसन्नःपाणिभ्यांमुनिंस्पृष्टवानिदंवचनमाहचेति इदंकिं हेवत्सत्वंप्रथमेवयसिवनंगतोबहुधाक्लेशंप्राप्तोऽतोवरंगृहाणेतिद्वयोरर्थः ॥ २४ ॥ २५ ॥ इत्युक्तेइति तिर्यग्दृष्टिरतितेजस्विनःसंमुखंद्रष्टुमशक्यत्वात् ॥ २६ ॥ याज्ञवल्क्यवाक्यमभिनयति भगवन्निितिद्वादशभिः स्पष्टं ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैशंपायनेति अहंवैशंपायनंगुरुंदेववत्सेवितवानस्मीति ॥ २८ ॥ तस्येति तस्यगुरोःऋषीणांसंकेतस्य ऋषिर्योद्यमहामेरौसमाजेनागमिष्यति तस्यवैसप्तरात्रात्तुब्रह्महत्याभविष्यतीति विष्णुपुराणेप्रसिद्धस्यभेदनेनप्रयुक्तात्तथापादप्रहारमात्रेणस्वस्रीयस्यमरणरूपाब्रह्महत्या जातातयाखिन्नंप्रायश्चित्तायशिष्यानाज्ञपयन्तंचतंप्रतिभक्त्याबटूनांब्रह्मचारिणामनुकंपयाचैवमवदमुक्तवानस्मीत्यर्थः ॥ २९ ॥ गुरुं प्रत्युक्तंवाक्यंश्रावयति भवानितिद्वाभ्यां भवतोवृद्धत्वादेतेषांबालत्वाच्चप्रायश्चित्ताशक्तेर्हेतोरहमेवनववयाःप्रायश्चित्तंब्रह्महत्याकृतेब्र

वैशंपायननामानंव्यासशिष्यमहंसदा॥ देववत्पूजयन्नासंकर्मणामनसागिरा॥ २८ ॥ तस्यसंकेतभेदेनब्रह्महत्यात्वथाभवत्॥ ब्रह्मघ्नंखिन्नवदनमवदंगुरुमप्यहं॥ गुरुभक्त्यैवचतथाबटूनामनुकंपया॥ २९ ॥ भवान्वृद्धोमहाभागप्रायश्चित्तेक्षमोनहि ॥ अशक्ताश्चतथासर्वेशिष्यास्तेब्रह्मचारिणः॥ ३० ॥ बालाइमेहिकठिनदेहोहंयौवनोन्मुखः॥प्रायश्चित्तंकरिष्यामिब्रह्महत्याकृतेतव॥ ३१॥इत्युक्तेदैवयोगेनगुरुःकोपमुपागतः॥ मामभाषतकोपेनबहुशोनिर्घृणोयथा॥ मुंचमुंचेतिविद्यांत्वंमद्दत्तांविप्रनिंदक॥ ३२ ॥ एवमुक्तोहमप्येनंप्रणिपातादिनाबहु॥ प्रसादयितुमारब्धःकर्मणामनसागिरा॥ ३३ ॥ ब्रह्महत्यार्तचित्तःसनिर्घृणोभूदतीवसः॥ कोपसंरक्तनयनोमामेतत्पुनरुक्तवान्॥ ३४॥ प्रसादयसिमांचेत्त्वमधिकंविप्रनिंदक ॥ इतोदास्यामितेशापंदेहप्राणादिहारकं ॥ ३५ ॥ मुंचतस्मादिमांविद्यांमद्दत्तांक्षणतोयदि॥ लोकद्वयसुखेच्छातेह्यन्यथाद्यविनंक्ष्यसि ॥ ३६ ॥

ह्महत्यायानिवृत्त्यर्थंकरिष्यामीतिद्वयोरर्थः ॥ ३० ॥ ३१ ॥ इत्युक्तइति इतिमयोक्तेसतिकुपितोगुरुर्मामित्युवाच इतिकिं हेविप्रनिंदक विप्रेष्वपकर्षदर्शिस्त्वंमद्दत्तांविद्यांमुंचमुंचेति ॥ ३२ ॥ एवमुक्तोहमिति स्पष्टं ॥ ३३ ॥ ब्रह्मेति सगुरुर्ब्रह्महत्ययाव्याकुलचित्तत्वेनात्यंतंनिर्घृणःसन्मामेतत्पुनरुवाच एतत्किं यदित्वंमत्प्रसादनेउद्यमंकरिष्यसितदाइतोधिकेदेहादिहारकंशापंदास्यामितस्मान्मद्दत्तांविद्यांमुंचैवयदितेलोकद्वयहितेच्छाअन्यथातदत्यागेतुअद्यशीघ्रंविनंक्ष्यसीतित्रयाणांसंबंधः ॥ ३४ ॥ ३५॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्तेइति इतिगुरुणोक्तेसतिअहंतस्माद्गुरोर्भीतःसन्क्षमापणादुपारमंनिवृत्तोऽभवंतद्दत्तांविद्यांचादांदत्तवानस्मीत्यर्थः ॥ ३७ ॥ कलि तमाह सोहमिति स्पष्टम् ॥ ३८ ॥ एवमुक्तोरविस्तस्याचार्यत्वं उपनीयतुयःशिष्यंवेदमध्यापयेद्द्विजः सकल्पंसरहस्यंचतमाचार्यंप्रचक्षते इत्युक्तलक्षणंचकारेत्याह इत्युक्तेइति अंगानिशिक्षादीनि रहस्यादयोऽपूर्वश्रुत्यर्थबोधकानिगमादियंथास्तत्सहितांश्चतुरोवेदानध्यापयामासेति ॥ ३९ ॥ अंभिणीति अंभिणीनामदेवतास्त्रीवंशेआदित्यशिष्यतयावर्णितातत्तुल्योयाज्ञवल्क्योभूदित्यर्थः ॥ ४० ॥ सत्विति

इत्युक्तेभीतिमापन्नस्तस्मादहमुपारमं ॥ क्षमापणाददांचास्मैविद्यांवांतेनकर्मणा ॥ ३७॥ सोहंविद्याविहीनोस्मिभवंतंशरणंगतः ॥ मानुषात्प्रार्थयेनैनांपूर्वंदुःखमनुस्मरन् ॥ ३८ ॥ इत्युक्तोभगवान्सूर्योयाज्ञवल्क्यंमहामुनिं ॥ वेदान्षडंगसहितान्रहस्यादिसमन्वितान् ॥ चतुरोध्यापयामासस्थापयित्वारथेनिजे ॥ ३९ ॥ अंभिणीयद्वदेतस्यशिष्याऽभूत्सवितुःपुरा ॥ तथैवयाज्ञवल्क्योपिशिष्योभूत्प्रीतिवर्द्धनः ॥ ४० ॥ सतुसंजातविज्ञानःसंन्यासायसमुद्यतः ॥ ब्रह्मचर्याश्रमादेवनिस्पृहोदारसंग्रहे ॥ ४१ ॥ विरक्तंवीक्ष्यशिष्यंतंभगवान्रविरब्रवीत् ॥ याज्ञवल्क्यात्रविद्यायाःप्रयच्छगुरुदक्षिणां ॥ ४२ ॥ संप्रदायप्रवृत्त्याख्यांवेदानध्यापयाखिलान् ॥ त्रैवर्णिकान्गृहस्थःसन्पश्चात्संन्यासमाव्रज ॥ ब्रह्मविद्यांचसंन्यस्यवदवापूर्वमेववा ॥ ४३॥ इत्युक्तेयाज्ञवल्क्योपितथेतिगुरुशासनं ॥ गृहीत्वाशिरसाभूमिंसमागाद्भास्करोयथा ॥ ४४ ॥

सयाज्ञवल्क्यःसर्ववेदार्थंविज्ञायब्रह्मचर्यादेवप्रव्रजितुमुद्यतोभूत् दारादिसंग्रहेविरक्तत्वादित्यर्थः ॥ ४१ ॥ विरक्तमिति तंविरक्तंवीक्ष्यरविरेवमुक्तवान् एवंकथं हेयाज्ञवल्क्यत्वंसंप्रदायप्रवृत्तिरूपांगुरुदक्षिणांदेहि कथंसंप्रदायःप्रवर्त्तनीयइत्याकांक्षायामाह वेदानित्यादि त्वं गृहस्थःसन्वेदानधिकारिणःप्रतिपाठ्यततःसंन्यस्य ब्रह्मविद्यासंप्रदायप्रवर्तनंतुसंन्यासात्पूर्वमुत्तरंवाकुरुइतिद्वयोरर्थः ॥ ४२ ॥ ४३ ॥ एवमाकारांगुरोराज्ञांतथास्त्वितिप्रणतेनशिरसागृहीत्वायाज्ञवल्क्योभूलोकमागमदित्याह इत्युक्तइति भास्करोयथातेजसारविसमः॥ ४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितुरिति समागतोयाज्ञवल्क्यःपितुर्यज्ञवल्काख्यस्याज्ञांप्राप्यस्नातःसमावर्तनाख्यसंस्कारंप्राप्तःसन्जनकराज्ञाद्धनंचप्राप्यद्वेभार्येउदवहत् तत्रैकानाम्नाकात्यायनीकतगोत्रस्यापत्यत्वात् द्वितीयामैत्रेयीसंज्ञामित्रयुसंज्ञकस्यापत्यत्वादित्यर्थः पित्र्ययज्ञफलमितिपाठेदारद्वयविशेषणं पित्र्यंपितृप्रीतिदंकर्मयज्ञोदेवप्रीतिदंतदुभयानुष्ठानफलकमित्यर्थः ॥ ४५ ॥ ऋषीणामिति यथाब्रह्मचर्येणऋषीणामृणममुनायाज्ञवल्क्येनापाकृतंतथादेवानामृणापाकरणार्थंयज्ञान्पितॄणामृणापाकरणार्थमपत्योत्पादनंचकृतवानितिद्वयोरर्थः ॥ ४६ ॥ ४७ ॥ ननुतस्यविरक्तस्यऋणप्रसंगएवकथमितिशंकांवारयति ऋणमिति आश्रमयोर्ब्रह्मचर्यगार्हस्थ्यरूपयोःसंबन्धादस्मिन्याज्ञवल्क्येऋणंप्रसक्तमित्यर्थः तथाचश्रुतिः जायमानोवैब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान्जायतेइत्यादिः तत्रजायमानइत्यस्योपनयनादिनाकर्माधिकारीसंप

पितुराज्ञामलंप्राप्यजनकाच्चधनंबहु ॥ स्नातोदारद्वयंचक्रेयाज्ञवल्क्यःसमागतः ॥ कात्यायनस्यतनयांमित्रयोश्चमहाधियं ॥ ४५ ॥ ऋषीणांब्रह्मचर्येणऋणंदत्तंयथामुना ॥ देवानांचपितॄणांचदत्तवान्सतथैवतत् ॥ ४६ ॥ अग्निष्टोमादिकान्यज्ञान्कृतवान्बहुदक्षिणान् ॥ स्वात्मनःसदृशान्पुत्रान्कन्यकाश्चोदपादयत् ॥ ४७ ॥ ऋणंयद्यपिनैवास्तिविरक्तस्यास्यकिंचन ॥ तथाप्याश्रमसंबंधादृणमस्मिन्नुपागतं ॥ ४८ ॥ ब्रह्मचर्याश्रमीयद्वदृषीणांहिभवेदृणी ॥ ऋणीगृहस्थश्चतथादेवपित्रोःसदाभवेत् ॥ ४९ ॥ संन्यासेतुकृतेनस्याद्यत्स्यात्पूर्वाश्रमेऋणं ॥ लौकिकंचयथानस्यादृणंतद्वद्धिवैदिकं ॥ संन्यासिनामतःपूर्वंविदुषोपिभवेद्धितत् ॥ ५० ॥

द्यमानइत्यर्थः ॥ ४८ ॥ एतमर्थंस्फुटयति ब्रह्मचर्याश्रमीतिसप्तदशभिः यथाब्रह्मचर्याश्रमपरिग्रहेवेदाध्ययनापनोद्यस्यार्षस्यऋणस्यप्राप्तिस्तथागृहस्थाश्रमसंबंधाद्यज्ञाद्यपनोद्यस्यदेवाद्यृणस्यप्राप्तिरित्यर्थः ॥ ४९ ॥ तीव्रवैराग्येणसंन्यासेतुनकिंचिदृणमितिलोकेपिप्रसिद्धमित्याह संन्यासेत्विति यत्पूर्वाश्रमसंबंधिऋणंतत्संन्यासेकृतेनिवर्ततइतिपूर्वदलार्थः तदुक्तंभागवतेपि देवर्षिभूताप्तनृणांपितॄणांनकिंकरोनायमृणीचराजन् सर्वात्मनायःशरणंशरण्यंगतोमुकुंदंपरिहृत्यकर्तमिति कर्त्तभेदं यथालौकिकोत्तमर्णानामृणंसंन्यासिनामसंबंधितयाप्रसिद्धंतथावैदिकमृष्यादिसंबंध्यपिऋणंसंन्यासिनामसंबंधिमतमतःसंन्यासात्पूर्वंविदुषोपितदृणमाश्रमसंबंधात्स्यादेवेत्यर्थः ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचसंन्यासात्पूर्वमृणत्रयापाकरणंनैमित्तिकन्यायेनविदुषापिकर्त्तव्यमित्याह नैमित्तिकमिति निमित्तेपुत्रजन्मादौजातंनैमित्तिकंजातेष्ट्यादिरूपंनियतमवश्यकर्त्तव्यंस्यादितिलोकवेदयोःप्रसिद्धंतथाब्रह्मचर्यगृहस्थरूपमाश्रमद्वयमृष्यादिऋणापाकरणकर्मणिनिमित्तमित्यर्थः ॥ ५१ ॥ यदिपूर्वाश्रमद्वयमृणसंबंधप्रयोजकंतर्हितदकृत्वाप्रथमंवानप्रस्थाश्रमएवशुद्धिकामेनकर्त्तव्यइतिशंकांवारयति द्विजानामिति अनाश्रमीनतिष्ठेतक्षणमेकमपिद्विजइतिस्मृतेराश्रमाभावस्यायुक्तत्वाद्वनवासस्यवक्ष्यमाणविधयागृहस्थोत्तरकालिकत्वनियमाच्चप्रथमंशुद्धिकामेनपूर्वाश्रमद्वयंकर्त्तव्यमेवेत्यर्थः ॥ ५२ ॥ वनवासस्यगृहस्थोत्तरकालिकत्वेमनुवाक्यमर्थतःपठति गृहस्थस्त्विति

नैमित्तिकंनिमित्तेस्यान्नियतंलोकवेदयोः॥ ऋणत्रयेनिमित्तंस्यात्पूर्वोक्तंह्याश्रमद्वयं॥ ५१॥ द्विजानामाश्रमाभावोनप्रशस्तःकदाचन॥ वनवासस्यनियतःकालउक्तोमनीषिभिः ॥ ५२॥ गृहस्थस्तुयदापश्येद्वलीपलितमात्मनः॥ अपत्यस्यतथापत्यंतदारण्यंसमाश्रयेत्॥ ५३॥ ब्रह्मचर्याद्गृहाद्वापिवनाद्वाप्रव्रजेद्यथा॥ नतथा ब्रह्मचर्यादिर्वनवासःश्रुतौश्रुतः॥५४॥ आनिपाताच्छरीरस्यह्येकमाश्रममाश्रितः॥तिष्ठेदित्यादिवचनंनक्रमंविनिवारयेत्॥ ५५ ॥

वलीचर्मशैथिल्यं कृदिकारादितिङीप् पलितंकेशशुक्लता तयोःसमाहारंयदादेहेपश्येत्पौत्रोत्पत्तिंवातदावनस्थोभवेदित्यर्थः॥५३॥ संन्यासस्यवैराग्यमेवप्रयोजकंयदिवेतरथेत्यादिजाबालश्रुतेः वनवासस्यतुतादृशश्रुत्यभावात्क्रमएवेत्याह ब्रह्मेति यथाजाबालश्रुतौब्रह्मचर्याद्युत्तरंसंन्यासउक्तस्तथाब्रह्मचर्यादिर्ब्रह्मचर्यआदिप्रथमंयस्यतादृशोब्रह्मचर्योत्तरइतियावत् वनवासःक्वापिश्रुतौनश्रुतः तथाचतद्विषयेपूर्वोक्तएवनियमइत्यर्थः ॥ ५४ ॥ ननुब्रह्मचर्यंपरिचरेदाशरीरविमोक्षणादित्यादिनावसिष्ठादिवचनेनबाधितत्वात्क्रमनियमोऽयुक्तइतिचेन्न तस्यवचनस्यप्रत्युतक्रमदार्ढ्यसंपादकत्वादित्याशयेनाह आनिपातादिति आमरणमेकमाश्रमंसेवमानस्तिष्ठेदित्याद्यर्थकंवसिष्ठादिवचनंक्रमंननिवारयेत्किंतुतंद्रढयेदितिशेषः॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यवचनस्यक्रमदार्ढ्यसंपादकतांविशदयति किंत्वितिद्वाभ्यां किंत्वित्यस्यपूर्वान्वयः यदिब्रह्मचर्यादौप्रीतीरागःस्यात्तदाआनिपात संकल्पंकृत्वैवतत्रवस्तव्यंतथासतिसंकल्पेकृतेसतिउपरिउत्तरंकर्त्तव्यतयाप्राप्तस्यक्रमशाल्याश्रमस्यपरिग्रहंग्रहणमकुर्वन्नप्रत्यवेयात्नदो षंप्राप्नुयात् तत्रवैधर्म्येदृष्टांतोरागीजनइतिद्वयोरर्थः ॥ ५६ ॥५७ ॥ ननुनैष्ठिकब्रह्मचार्यपिवनवासादिरूपंवानप्रस्थादिसंबंधिकर्मकृत्वा

॥४॥ वानप्रस्थादिभावमात्मनःसाधयतुतथाचकिमर्थमुक्तव्यवस्थाकल्प्यतेइतिशंकांदृष्टांतेनपरिहरति ब्रह्मचारीति यथाएषप्रसिद्धोगृहीआ

किंतुचेज्जायतेप्रीतिर्ब्रह्मचर्येगृहेवने ॥ रागतस्तत्रनस्थेयंसंकल्प्यैववसेदिह ॥ ५६ ॥ तथासत्युपरिप्राप्तक्र माश्रमपरिग्रहं ॥ विनानप्रत्यवेयात्सयथारागीजनोपरः ॥ ५७ ॥ ब्रह्मचारीवनेतिष्ठन्वनस्थोनभवेत्क्व चित् ॥ गृहीयथारण्यवासीतथैषोपियतिस्तथा ॥ ५८ ॥ नैष्ठिकोब्रह्मचारीयदृषीणामृणभाङ्नसः ॥ देवानां चपितॄणांचगृहीयद्वद्धवेदृणी ॥ ५९ ॥ अपाकृत्यऋणंतस्माद्वनंपश्चात्समाव्रजेत् ॥ ऋणत्रयविनिर्मुक्तोना न्यथातंक्रमाश्रमं॥६०॥ब्रह्मचर्याश्रमंयद्वद्गत्वानगृहीभवेत्॥ गृहाश्रममगत्वैवंवनीनैवभवेत्क्वचित्॥६१॥

पत्कालेवनेवासंकुर्वन्नरण्यवासीवानप्रस्थोनभवेत् तथाचयतिकर्मभिक्षाटनकाषायधारणादिकंकुर्वन्नयतिर्नभवेत्तथाब्रह्मचारीवनवासा दिनावनस्थादिसंज्ञोनभवेदितिसंबंधः ॥ ५८ ॥ तत्रहेतुतयावनस्थादिभ्योविशेषमृणसंबंधमाह नैष्ठिकइति यद्यपिसनैष्ठिकोब्रह्मचा रीगृहिवद्देवानांपितॄणांचऋणीनभवतितथापिऋषीणामृणभागेवेतिसंबंधः ॥ ५९ ॥ फलितंनियममभिनयति अपाकृत्येति अत्रपूर्वा र्धार्थएवोत्तरार्धेनस्फुटीक्रियते तंवानप्रस्थरूपंक्रमाश्रमंक्रमवंतमाश्रममन्यथाऋणसत्वेनसमाव्रजेदितिसंबंधः ॥ ६० ॥ वानप्रस्थस्यक्रम ॥४॥

वत्त्वमेवस्फुटयति ब्रह्मचर्येति यथाद्विजानांगृहित्वंब्रह्मचर्यपूर्वकमेवतथावनस्थत्वंगार्हस्थ्यपूर्वकमेवेत्यर्थः ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रप्रमाणमाह त्रयाणामिति त्रयाणांब्रह्मचर्यगार्हस्थ्यवनस्थत्वानामितिउक्तविधःक्रमःश्रुत्यादिकेनप्रमाणेनसिद्धः तथाचजाबालश्रुति ब्रह्मचर्याद्गृहीभवेदित्याद्या दक्षस्मृतिश्च त्रयाणामानुलोम्यंस्यात्प्रातिलोम्यंनविद्यते प्रातिलोम्येनयोयातिनतस्मात्पापकृत्तमइति वैराग्यमात्रकारणकस्यसंन्यासस्यतुनकेनचिदाश्रमेणक्रमनियमइत्याह चतुर्थइति सोयंक्रमस्तदादिनाश्रुत्यादिनाबाधितः तत्रश्रुतिर्यदिवेतरथेत्याद्योक्ता स्मृतिश्च यदैवचास्यवैराग्यंजायतेसर्ववस्तुषु तदैवसंन्यसेदित्याद्यानुसंधेया ॥ ६२ ॥ न्यासोहिब्रह्मेत्यादिश्रुतेःसंन्यासस्यब्रह्माश्रमत्वात्तदेतद्ब्रह्मापूर्वमनपरमित्यादिश्रुतिप्रसिद्धब्रह्मवदेवकेनचित्पौर्वापर्यंनास्तीतिसूचयन्संन्यासादुत्तरःकश्चिदाश्रमोनास्तीत्याह चतुर्थमिति हियतआश्रमिणोद्विजस्यचतुर्थमाश्रमंहित्वाकस्यचिदाश्रमस्यभावःसत्तानास्तीतिप्रसिद्धंतद्भूतस्यतुनातद्भावइतिव्याससूत्रा

त्रयाणामितिसंसिद्धःक्रमःश्रुत्यादिनासदा॥ चतुर्थआश्रमेसोयंबाधितोस्तितदादिना॥ ६२ ॥ चतुर्थमाश्रमंहित्वानभावोस्तिहिकस्यचित्॥ द्विजस्याश्रमिणोनस्याद्द्विजआश्रमवर्जितः॥ ६३ ॥ ऋणाद्वनीवनस्थोयं शुद्धोभवतिसर्वथा॥ आश्रमाभ्यांहिपूर्वाभ्यामृणंदत्वायतोगतः ॥ ६४ ॥ ऋषीणामनृणोयद्वद्गृहस्थोत्रवनी तथा॥ सर्वेषामनृणीन्यासीसंन्यासादेवकेवलात्॥ ऋणीगृहाश्रमाज्जातोविद्वानपिततोमुनिः ॥ ६५ ॥

दौ तथाद्विजआश्रमवर्जितोनस्यादित्यपिप्रसिद्धं तथाचदक्षः अनाश्रमीनैवतिष्ठेदब्दमेकमपिद्विजः आश्रमेणविनातिष्ठन्प्रायश्चित्तीयतेहिसइति तथाचसंन्यासोत्तरआश्रमोनास्तीतिभावः व्याससूत्रार्थस्तुतद्भूतस्योर्ध्वरेतस्काश्रमंप्राप्तस्यातद्भावःअवरोहोनास्तिनियमादाविमोक्षाच्छरीरस्येत्यादिरूपात्अतद्रूपात्श्रुतीनामवरोहप्रतिपादकरूपाभावात्तादृशशिष्टाचाराभावाच्चेति ॥ ६३ ॥ तस्मादनृणएववनवासंकुर्यादित्याह ऋणादिति ऋणपदमर्शआद्यजंतं तथाचऋणाद्दृणद्वयवतोगृहस्थाश्रमादुत्तरंवनीभवेत् यस्तुवनस्थःससर्वथाशुद्धोऽनृणोभवतिपूर्वाश्रमाभ्यामपाकृतर्णत्वादित्यर्थः ॥ ६४ ॥ संन्यासीतुसर्वेषामनृणइत्याह ऋषीणामिति यद्वद्गृहस्थऋषीणामनृणीवनीचत्रयाणामनृणीतथासंन्यासीसर्वेषामनृणः संन्यासस्यऋणसंबंधाभावप्रयोजकतायालोकेपिप्रसिद्धत्वादित्यर्थः फलितमाह ऋणीगृहाश्रमादिति ॥ ६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याज्ञवल्क्यस्य गृहस्थाश्रमेतिशयेनदानादिप्रवृत्तौप्रयोजकमाह देवानामितित्रिभिः सतपोधनोमुनिरेवंविचार्यदेवानांपितॄणांचतोषायप्र वृत्तयाकृपयाइदंगोसुवर्णान्नादिकंद्रव्यंदत्तवानित्यन्वयः ॥ ६६ ॥ एवंकथमित्याकांक्षांपूरयति ऋषीणामिति मयाब्रह्मचर्याश्रमसंपत्त्या ऽनायासेनऋषीणामृणंसमर्पितं अथततःऋषिभ्यःशेषप्राणिनांदेवादिरूपाणांतत्प्रसिद्धमृणद्वयंसमर्प्यसम्यग्दत्वैवसंन्यस्यामिसंन्यासंक

॥५॥ रिष्यामियथात्रयाणाममीषामृष्यादीनांपंक्तिभेदोविषमार्चनरूपोनभवेदित्यर्थः॥६७॥ एवंचेति एवंसतिऋणत्रयापाकरणोत्तरंसंन्यासे कृतेसतिगुरोर्भगवतआदित्यस्यवाक्यमाज्ञारूपंसम्यक्कृतंभविष्यति कुतः प्रवृत्तस्यनिवृत्तस्यचाधिकारिणोगम्यतयासंबंधिनौयावध्वानौ

देवानांचपितॄणांचकृपयादत्तवानिदम् ॥ विचार्यैवंहिमतिमान्सूर्यशिष्यस्तपोधनः॥ ६६ ॥ ऋषीणामृणम त्यर्थमनायासान्मयार्पितं ॥ समर्प्यैवततःशेषंप्राणिनांतदृणद्वयं ॥ संन्यस्यामिततोमीषांपंक्तिभेदोनसंभवे त्॥ ६७ ॥ एवंचसतिवाक्यंयद्गुरोस्तच्चकृतंमया॥ भविष्यतिप्रवृत्तस्यनिवृत्तस्याध्वपालनात्॥ ६८॥ चित्रो भूदाश्रमस्तस्यगृहस्थस्यमहामुनेः॥ दिवारात्रौचसततंसर्वभूतोपकारकः॥ ६९ ॥ द्विभार्यःपुत्रसंपन्नोधनि कोमुनिसत्तमः॥ यज्ञैर्होमैश्चदेवानामाश्रयोभूदहर्निशम् ॥ ७० ॥ नित्यैःस्वाध्यायवचनैर्ऋषीणांचमहात्म नां॥ प्रजाभिःपिंडदानाद्यैःपितॄणांस्वर्गवासिनां॥ ७१॥ सायंवासादिभिस्तद्वदन्नपानैर्मनोरमैः॥ धनादिभि श्चदानेनमनुष्याणांतथार्थिनां ॥ ७२ ॥

अभ्युदयंनिःश्रेयसंचप्रतिगामिनौमार्गौतयोःपालनात्सेवनादित्यर्थः॥६८॥ अयमात्मासर्वेषांभूतानांलोकइत्यादिमधुकांडप्रथमाध्याय प्रसिद्धकंडिकानुसारिणंतस्यमुनेर्गृहाश्रमंवर्णयति चित्रइतिषड्भिः चित्रःपश्यतांविस्मयकरः ॥ ६९ ॥ द्विभार्यइति समुनिर्द्विभार्यत्वादि विशेषणकोयागादिभिर्देवानामाश्रयउपकारकोभूदित्यर्थः॥७०॥ नित्यैरिति तथानित्यवेदपाठादिभिर्ऋषीणामाश्रयःप्रजोत्पादनश्राद्धा दिभिःपितॄणांचाश्रयोभूत् ॥ ७१ ॥ सायमिति सायंकालेवासादिभिर्धनार्तैःसंपादितेनदानकर्मणामनुष्याणामाश्रयोभूदिति ॥ ७२ ॥ ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृणोदकेति तथातृणादिदानेनपशूनामाश्रयः भांडलेपकणप्रक्षेपबलिदानादिभिःश्वादीनांचाश्रयोभूदिति ॥ ७२ ॥ स्वाहेति यथा धनिनांगृहेदुंदुभिशब्दैरन्नार्थिनआकार्यन्तेआहूयंतेतथातद्गृहेस्वाहाकारादिरूपाणांवाग्धेनुस्तनानांखिलकांडप्रथमाध्यायप्रसिद्धानां मध्येस्वाहाकारवषट्काराभ्यांदेवाआकार्यंतेस्वधाकारेणचपितरोहंतकारेणहर्षद्योतकेनमनुष्याआकार्यंते एवंविधोगृहीसोभूदितिद्वयो रर्थः ॥ ७४ ॥ ७५ ॥ उपोद्घाततयातस्यभार्यांनाम्नाकात्यायनींवर्णयति कात्यायनीतिसप्तभिः तस्यमुनेर्याकात्यायनीनामभार्या

तृणोदकादिदानेनपशूनांविविधात्मनां॥ एवंभांडादिलेपेनधान्यादिपतनैरपि ॥ श्ववायसादिजंतूनांकीटादीनांसमाश्रयः॥ ७३ ॥ स्वाहावषट्स्वधाहंतकारैर्वाचःस्तनैःसदा॥ देवाःसपितरस्तद्वन्मनुष्याःसर्वतःस्थिताः ॥ ७४॥ दुंदुभेरिवनिर्घातैराकार्यंतेगृहेस्यहि॥ याज्ञवल्क्यःप्रसिद्धोयंबभूवैवंपुरागृही॥ ७५॥ कात्यायनीतियातस्यभार्याभूत्साविचक्षणा॥ गृहकर्मणिनारीणांप्रज्ञायांनीतिमास्थिता॥ ७६॥ गृहकुड्यादिसर्वत्रसंमार्जयतिसर्वदा॥ भूमिंचदेहलींतद्वद्वेदिकामंगणंतथा ॥ ७७॥ तथासर्वत्रधवलंगृहंरक्तंचकुत्रचित्॥ करोतिचित्रितंक्वापिहस्तकौशलमास्थिता॥ ७८ ॥ भांडानिचघटांस्तद्वत्प्रक्षालयतिसर्वदा ॥ करकांश्चविचित्रैस्तुन्युब्जपात्रैस्तुसंयुतान् ॥ ७९ ॥ भीमसेननलादीनांमतमास्थायनित्यशः॥ लेह्यंपेयंतथाचोष्यंभोज्यंचेतिचतुर्विधं॥ अन्नंपचतिसानित्यंसूर्यपाकादिनामुहुः॥ ८० ॥ श्वश्रूश्वशुरभर्तॄणांनित्यंशुश्रूषणेरता ॥ देवरांश्चतथाज्येष्ठान्वांधवानतिथीनपि॥ ननांद्राद्याःस्त्रियस्तद्वत्पूजयेत्सायथोचितं॥ ८१॥

सानारीणांप्रज्ञायांनीतिंकौशलमास्थितासतीगृहकर्मणिविचक्षणाऽभूदित्यन्वयः ॥ ७६ ॥ तस्यागृहकर्मकौशलमेवप्रपंचयति गृहेति देहलींद्वारदेशं वेदिकांयागभूमिं ॥ ७७॥ तथेति सर्वत्रबहुदेशेषु ॥ ७८ ॥ भांडानीति करकान्कमंडलून्न्युब्जपात्राणिकमंडल्वादिमुखपिधायकलघुपात्राणितैःसह॥ ७९ ॥ भीमेति यथाभीमसेनादयःपाकविद्यायांप्रसिद्धास्तथासापीत्यर्थः सूर्यपाकआतपेनपचनं आदिपदेनपुटपाकपिठरपाकादिग्रहः ॥ ८० ॥ श्वश्रूश्वशुरेति स्पष्टम् ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येवमिति इत्येवंप्रज्ञयानारीणामाद्याप्रथमगण्याभूत्तयासदृशीचापरानाभूदित्यर्थः ॥ ८२ ॥ तस्यद्वितीयांभार्यांज्ञानाधिकारित
यावर्णयति द्वितीयेतिचतुर्भिः दुःखदर्शनात्सांसारिकदुःखालोचनात् ॥ ८३ ॥ काहमिति साएवमादिसदाचिंतयंतीसतीमृतवत्सागौ
रिवभृशंक्लिन्नाद्रुतचित्तासदावर्ततेस्म एवंकथमित्याकांक्षायांकाहमित्यादियोज्यं अहंकाकिंदेहादिसंघातरूपातदन्यावेति अन्यत्वेपिकिं
॥६॥ मात्मिकाकिंजडरूपाचिद्रूपावा एवमग्रेपि इतित्रयाणांसंबंधः ॥ ८४ ॥ ८५ ॥ ८६ ॥ याज्ञवल्क्योपीति मुनिस्तुतस्याश्चित्तवृत्तिंजान

इत्येवमाद्यानारीणांप्रज्ञयासदृशीतया ॥ ललनानापराकाचिद्दासीदस्तिभविष्यति ॥ ८२ ॥ द्वितीयाप्यस्य भार्याभून्मैत्रेयीतिचविश्रुता ॥ प्रमत्तसदृशीनित्यमुद्विग्नादुःखदर्शनात् ॥ ८३ ॥ काहंकिमात्मिकाकस्मादेनंलोकमुपागता ॥ कुत्रस्थितामयाकिंचगंतव्यंमरणेसति ॥ ८४ ॥ कोयंपतिरितिप्रोक्तःकेसुताःकाश्चकन्यकाः ॥ किंदुःखंकिंचमेतद्वत्सुखंकेचक्षुरादयः ॥ ८५ ॥ कोयंजनोमयादृश्यएवमादिसदैवसा ॥ चिंतयंतीभृशंक्लिन्नामृतवत्सेववर्तते ॥ ८६ ॥ याज्ञवल्क्योपितत्सर्वंजानात्यस्यामनोगतम् ॥ गृहस्थाश्रमसिद्ध्यर्थमादिदेशपुराचतां ॥ ८७ ॥ स्वयमेकांतआसीनःकदाचिन्मुनिसत्तमः ॥ इदंविचारयामासकालेबहुतिथेगते ॥ ८८ ॥ अहोदुःखंमहत्प्रोक्तंप्राणिनांप्राणधारणं ॥ यत्रकारागृहंदेहःसप्तधातुस्त्रिदोषभाक् ॥ पूयविण्मूत्रसंपूर्णोदुर्गंधातिभयप्रदः ॥ ८९ ॥

न्नपिगृहनिर्वाहायगृहकर्मण्येवपूर्वमादिदेशआज्ञापितवानित्यर्थः तस्यमुनेःकरिष्यमाणसंन्यासोपयोगिवैराग्यकारणंसंसारदोषदर्श
नमन्यद्वृत्तमित्याद्यंशेनसूचितंप्रपंचयति स्वयमित्यादिना गृहस्थाश्रमानुष्ठानेनबहुतिथेभूयसिकालेगतेसतिसमुनिःकदाचिदेकांतेस्थि
तइदंवक्ष्यमाणविधंविचारयामासेति ॥ ८८ ॥ इदंपदार्थमभिनयति अहोइत्यादिना अहोइत्यद्भुते प्राणिनांप्रियत्वेनप्रसिद्धंयत्प्राणधा ॥६॥
रणंतदेवदुःखं यत्रयदर्थंदेहरूपंकारागृहंस्वीकर्त्तव्यं देहविशेषणानिसप्तधातुत्वादीनिस्फुटानि ॥ ८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रदेहेवर्त्तमानान्याध्यात्मिकादिदुःखानिदर्शयति शिरोक्षीतिषड्भिः शिरोरोगाक्षिरोगातिसारादिव्याधिजंयद्दुःखंयच्चकामक्रोधादिसर्वावस्थासुआधिसमुत्पन्नंदुःखंतदाध्यात्मिकत्वेनप्रसिद्धमित्यर्थः तत्रगुदावर्तःपाय्विन्द्रियनिरोधरूपःगण्डमालाकण्ठकर्णादिषुविस्फोटरूपपंक्तिरूपा इतरेरोगाःप्रसिद्धाः ॥ १० ॥ सर्पेति लूतातंतुवायाख्यकीटःशरीरोपरिपरिभ्रमणेनकंडूत्यादिकारीप्रसिद्धः तथाचसर्पादिजंशत्रुप्रभृतिजंचाधिभौतिकं शीताद्युत्पातजंचाधिदैविकंदुःखंभयप्रदंप्रसिद्धमितिद्वयोर्भावः ॥ ११ ॥ १२ ॥ बाल्येइति बाल्येमोहरागद्वेषशोकैर्नानाविधयाअशक्त्याचप्रयुक्तंदुःखमत्रदेहेप्रसिद्धंतथान्यदापिबोध्यम् ॥ १३ ॥ अभिनिवेशाख्यंक्लेशमभिनयति सर्वावस्थास्विति प्रा

शिरोक्षिरोगातिसारप्लीहगुल्मादिकंतथा ॥ भगंदरगुदावर्त्तगंडमालाद्यनेकधा ॥ दुःखंव्याधिसमुत्पन्नंसर्वावस्थासुयच्चतत् ॥ १० ॥ सर्पवृश्चिकलूतादिजातंदुःखंतथापरं ॥ शीतातपादिसंजातंदुःखमन्यच्चदुःसहं ॥ ११ ॥ शत्रुभिर्दुर्जनैस्तद्वत्क्रियतेदुर्जयैरिह ॥ कर्मणामनसावाचादुःखंत्रासकरंसदा ॥ १२ ॥ बाल्येमोहादवाप्नोति दुःखमत्रातिदुःसहं ॥ रागाद्वेषात्तथाशोकादशक्त्याबहुरूपया ॥ १३ ॥ सर्वावस्थासुसततंदुःखमत्रनियच्छति ॥ प्राणानामागमेतद्वन्निर्गमेचमहद्भयं ॥ गर्भवासेचमरणेनहिदुःखंततोधिकं ॥ १४ ॥ एवमादीनिदुःखानिविविधानिबहूनिच ॥ देहमाश्रित्यजायंतेलोकेस्मिन्हिपरत्रवा ॥ १५ ॥ मुक्तस्यापिभवेद्दुःखंदेहमेकांतवासिनः ॥ मादृशस्यकुतोनस्यात्संसारासक्तचेतसः ॥ १६ ॥ अहोसंगोऽस्यदेहस्यत्वेकस्याप्यतिदुःखदः ॥ आत्मैक्येनगृहीतस्यकिमुदारादिरूपिणः ॥ १७ ॥

णानामागमेनूतनदेहेप्रवेशेदेहान्निर्गमेचस्मर्यमाणेसतियन्महद्भयंमानभूवमित्याद्याशीःप्रयोजकंतत्सर्वावस्थासुदुःखंनियच्छति नियतंकरोति ततउक्तभयजाद्दुःखादधिकंदुःखंगर्भवासादावपिनास्तीत्यर्थः ॥ १४ ॥ फलितमाह एवमिति स्पष्टम् ॥ १५ ॥ मुक्तस्यापीति मुक्तस्यवीतरागस्यापिदेहंदुःखरूपंस्यात्किमुतान्यस्येत्यर्थः ॥ १६ ॥ यदाएकत्रापिदेहेऽहंममाभिमानलक्षणःसंगोदुःखदस्तदाकिमुवाच्यंदारपुत्राद्यनेकदेहसंगस्यदुःखदत्वमित्याह अहोसंगइति गृहीतस्याभिमतस्यदारादिरूपस्यदेहस्यसंगोदुःखदइतिकिमुवाच्यमिति ॥ १७ ॥

Nepal Sanskrit University,.Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदर्थंसंगस्यानर्थहेतुतांप्रपंचयति संगइतिनवभिः निर्गुणत्वादसंगोप्यात्मायतःसंगाद्दुःखमागतः ॥ ९८ ॥ तदुदाहरणेनस्फुटयति स्वभा वादित्यादिना स्पष्टंद्वयम् ॥ ९९ ॥ १०० ॥ संगाद्बहिरिति यन्मनःस्वभावादंतरात्माभिमुखंप्रवर्तते तदुक्तं आत्मानात्माकारंस्वभावतोऽव स्थितंसदाचित्तमिति तदपिसंगाद्बहिर्मुखंयातीति तथापापीसंचितपापशाल्यपिदुःसंगादेवपापफलंदुःखमनुभवतीतिप्रसिद्धं तथानिर्दुः

॥७॥ खःशांतात्मापिदुःखिनांसभायामुपविष्टोदुःखीभवतीतिप्रसिद्धमित्यर्थः ॥ १०१ ॥ एवंकामिप्रभृतीनांसंगात्तथाभूतोभवतीतिप्रसिद्धमि त्याह एवमिति इदंसंगफलंप्रत्यक्षंप्रसिद्धमत्रलोकेनोस्माकम् ॥ १०२ ॥ किंचसंनिधिमात्रेणविकारहेतुत्वंविषयाणांस्वभावएवेतिदाडि

संगोविनाशहेतुःस्यात्सर्वेषामिहदेहिनां॥ निःसंगोनिर्गुणोयस्मात्संगाद्दुःखमुपागतः॥ ९८ ॥ स्वभावात्शी तलंतोयमुष्णंभवतिसंगतः॥ वन्हेस्ततोत्रसंगोयमतिदुःखप्रदःस्मृतः ॥ ९९ ॥ संगात्कुठारजनिताद्वृक्षश्छे दंसमाप्नुयात्॥ शस्त्रसंगात्तथाकायःप्राणिनांशतधाव्रजेत्॥ १०० ॥ संगाद्बहिर्मुखंयातिमनोंतर्यत्प्रवर्त्तते॥ दुर्धियांप्राणिनांसंगात्पापीदुःखंसमाप्नुयात् ॥ निर्दुःखोदुःखिनांसंगाद्दुःखीसंजायतेजनः ॥ १०१ ॥ एवं काम्यादिसंसर्गात्कामादिपरिवर्जितः॥काम्यादिर्जायतेजंतुःप्रत्यक्षमिदमत्रनः॥ १०२ ॥ अपिसंनिधिमात्रे णभावाःकुर्वंतिविक्रियां॥ अम्लोरसोयथाकुर्याद्दंतेषूदकनिर्गमं॥ १०३ ॥ जडेष्वपिचदृष्टेयंविक्रियाभाव संनिधेः॥लोहमाकर्षयेद्दूरात्पाषाणश्चुंबकोयतः ॥ अयस्कांतस्तथैवैतद्भ्रामयेद्दारुयंत्रवत् ॥ १०४ ॥ चेतन स्यतुसांनिध्याच्चेतनस्येहकिंपुनः॥ वक्तव्याविक्रियायस्मान्नानैकैयंप्रदृश्यते॥ १०५॥

माद्यम्लपदार्थदर्शनेदंतादिजलस्रावेणनिश्चितमित्याह अपीति ॥ १०३ ॥ यदाजडेष्वपिसंगप्रयुक्ताविक्रियादृश्यतेतदाचेतनेषुकिंवा च्यमित्याह जडेष्वपीतिद्वाभ्यां यदाभावस्यपदार्थविशेषस्यसंनिधिहेतुकाविक्रियाजडेष्वपिदृष्टा यथाचुंबकायस्कांतपदाभ्यांव्यवन्हि ॥७॥ यमाणःपाषाणविशेषोलोहमाकर्षयेत्दारुयंत्रवद्भ्रामयेच्चेतिप्रसिद्धंतदाचेतनस्यदारादिशरीरस्यसांनिध्याच्चेतनस्यविक्रियांकिंवक्तव्या व्याख्यातुंशक्याअपितुन यस्मादेकापीयंचेतनगताविक्रियाऽवांतरभेदान्नानाबहुविधादृश्यतेइतिद्वयोःसंबंधः ॥ १०४ ॥ १०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह एवमिति एवंसंगविधयैवसर्वेषांदेहिनांवपुर्देहंदुःखरूपंजातं तत्रचाहमेवदृष्टांतइत्याह दारादीति यथाममेदंवपुर्दारपुत्रादिसंगतिवशादनेकं अनेकविक्षेपमयंजातमित्यर्थः ॥ १०६ ॥ संगस्यविक्षेपकारणत्वेव्यतिरेकमन्वयंचप्रमाणयति यद्वनइति यद्यस्मादहंयदाब्रह्मचर्यकालेएकाकीदेहादपिविरक्तस्तपःकृतवानस्मितदाममधैर्यविलोपंस्वर्गांगनाअपिनाकुर्वन् इदानींवार्धकेदारादिसंगतिप्रभावान्ममधैर्यंत्वथागतमितिएकादशंयावदभिसंबंधः बहुमन्मथेनमंथरामंदगतयः ॥ १०७ ॥ १०८ ॥ केतकीति पुनःकीदृश्यःस्वर्गांगनाः स्वदेहगंधैःकेतक्यादिगंधानभिभवंत्यः ॥ १०९ ॥ पीनोन्नतेति पुनःकीदृश्यः पीनादुन्नताच्चकुचद्वंद्वाज्जघनाच्चवायुनापहृतमंबरंयासांतास्त

एवमेववपुर्दुःखंसर्वेषामिहदेहिनां ॥ दारादिसंगतेर्जातंममानेकमिदंवपुः ॥ १०६ ॥ यद्वनेहमहोधैर्यंप्राप्य वैराग्यमाश्रितः ॥ विष्ठावांतसमंपश्यन्देहंतपउपाश्रितः ॥ १०७ ॥ नाकुर्वन्ममधैर्यस्यविलोपंवामलोचनाः ॥ स्वर्गादभ्यागताःशश्वद्बहुमन्मथमंथराः ॥ १०८ ॥ केतकीचंपकादीनांगंधान्देहोत्थितैर्मुहुः ॥ गंधैरधिक्षिपंत्यस्ताःकांचनोत्पलसंनिभाः ॥ १०९ ॥ पीनोन्नतकुचद्वंद्वजघनापहृतांबराः ॥ पूर्णचंद्राननास्तद्वद्वसनाभरणैर्युताः ॥ ११० ॥ उद्दामभावपिशुनैःकटाक्षैर्धैर्यहारिभिः ॥ मृदुलैःसस्मितैःश्लक्ष्णैःसिद्धैर्गुर्वर्थसंयुतैः ॥ १११ ॥ वचनैःकामदावाग्निदीपकैर्भूरिकीर्तितैः ॥ प्रस्खलत्पदविन्यासैर्मंजुमंजीरमंजुलैः ॥ ११२ ॥ श्लथद्दुकूलवलयैःकांचीतारांगदादिभिः ॥ सहितैःखिन्नसर्वांगैस्तथारोमांचकंचुकैः ॥ ११३ ॥

था तद्वत्पूर्णचंद्रवद्दीप्तिमद्भिर्वसनादिभिर्युताश्चेति ॥ ११० ॥ ताश्चकैर्ममधैर्यंनहृतवत्यइत्याकांक्षायांतत्रकारणतयाप्रसिद्धान्भावान्दर्शयति उद्दामेति उत्कृष्टाभिप्रायसूचकैःकटाक्षैस्तथामृदुलादिभूरिकीर्तितत्वान्तविशेषणकैर्वचनैः तत्रश्लक्ष्णत्वंमनोहरत्वं सिद्धत्वंप्रसिद्धवाच्यार्थकत्वं गुर्वर्थत्वंगंभीराभिप्रायकत्वं भूरिकीर्तितत्वंदीर्घललितस्वरेणोच्चारितत्वं स्फुटमन्यत् तथामंजीरशिंजितशालिभिःपदन्यासैश्चेतिद्वयोरर्थः ॥ १११ ॥ ११२ ॥ श्लथदिति तथाखिन्नैःश्रमभराक्रांतैःसर्वांगैः कीदृशैःसर्वांगैः श्लथद्दुकूलादिभिःसहितैः तत्रतारामस्तकभूषणं अथवातारत्वंभास्वरत्वमंगदविशेषणमिति पुनःकीदृशैरंगैः रोमांचमयकंचुकविशिष्टैः ॥ ११३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पटेति तथाभ्रष्टेनविकीर्णेनसीमंतगतसिंदूरेणनयनांजनेनचसहितैःललाटादिगतैःकुंकुमादिभिः ॥ ११४॥ सममिति तथासमेतानिसम्य
ग्यथितानिकुसुमानियत्रतादृशस्यधम्मिल्लस्यकेशपाशस्यपतनेनग्रंथिविमोकेनसमंसहवर्तमानकंदर्पदर्पेणविलसद्भिर्हासादिभिः ॥११५
कोकिलादीति तथानंदनादिवनेष्वन्तर्वर्तमानैर्देशैःस्थलविशेषैः कीदृशैर्देशैः कोकिलादिस्वरविशिष्टवसंतादिशालिभिः मंदाकिनीजल
सान्निध्येनकोमलैः वालुकाराजितैर्देवसेवितैश्चेति इंद्राभ्यनुज्ञातदेवमाययातपःस्थानेपिनंदनाद्युपलंभोनचित्रमितिबोध्यं नत्द्गतंअत्द्गत
पूर्वंममधैर्यवार्धकेद्वथाविभ्रममात्रेणगतमितिद्वयोरर्थः ॥ ११६ ॥ ११७॥ विभ्रमनिमित्तकत्वरूपंव्यथात्वमेवस्फुटयति मांसेति मां

भ्रष्टसीमंतसिंदूरनयनांजनसंयुतैः॥ ललाटोरःस्थलस्थानबहुकुंकुमचंदनैः ॥ ११४॥ समंसमेतकुसुमध
म्मिल्लपतनेनच॥ कंदर्पदर्पविलसद्धासवादित्रगीतकैः॥ ११५॥ कोकिलादिस्वरासक्तवसंतमलयानिलैः॥
मंदाकिनीजलप्रांतमृदुलैर्वालुकांचितैः॥ ११६ ॥ नंदनादिवनेष्वंतर्देशैर्देवैर्निषेवितैः ॥ ममधैर्यंद्गतंनाद्य
वार्धकेतद्गतंव्यथा ॥ ११७॥ मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतिः॥ देहोममतथामीषांदाराणांसु
खकारणं॥ ११८ ॥ मृज्जलैर्बहुशोदेहोमयाप्रक्षाल्यतेनिजः ॥ नसोपिशुद्धोजातोस्तिदुःखदोदुःसहःपरम्
॥ ११९॥ दारामद्वन्निजंदेहंनैवंप्रक्षालयंत्यमी॥ तेषुमोहंविनाकेनसुखमत्रभविष्यति ॥ १२० ॥

सादिसंहतिरूपोदारादिदेहोममसुखकारणमितिविभ्रमत्वंस्फुटमितिभावः ॥ ११८ ॥ एतदेवव्यनक्ति मृज्जलैरिति यदामद्देहोबहुशःप्रक्षा
ल्यमानोपिवस्तुतोऽशुद्धएव तदुक्तं स्थानाद्बीजादुपष्टंभान्निष्यंदान्निधनादपि कायमाधेयशौचत्वात्पंडिताह्यशुचिंविदुरिति स्थानंजन
न्युदरं बीजंशुक्रशोणिते उपष्टंभोभुक्ताहारपरिणामः निष्यंदोनवद्वारप्रस्रावः निधनंश्रोत्रियशरीरस्याप्यशुचित्वकारणं आधेयत्वंस्वा
भाविकत्वाभावइतितदर्थः अतएवविवेकिनोदुःखदोदुःसहश्च परंकेवलंदारास्तुमद्वत्शौचमपिनकुर्वंतितेषुदारेषुसुखबुद्धिर्मोहंविनाक
थमुपपद्येतेतिद्वयोरर्थः ॥ ११९ ॥ १२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोहमेवप्रपंचयन्रोगजमांसग्रंथिनिभयोःस्तनयोःस्वर्णकलशधीर्मुधैवेत्याह पीनोन्नताविति पीडितस्यरोगिणइत्यर्थः ॥ १२१ ॥ किंच पुरुषस्यस्वदेहसमेनारीदेहेविशेषबुद्ध्याप्रयुक्तासुखहेतुत्वबुद्धिर्बाधितार्थैवेत्याह स्तनयोरितित्रिभिः स्फिजौकटिगतमांसपिंडौ अंतरंवि शेषः स्मरनिर्गमेस्मरवेगापगमकालेस्तनभागाच्छेषःस्त्रीपुंसदेहःसमइति ॥ १२२ ॥ पायोरिति यतःपाय्वादिस्वरूपभूतयोश्छिद्रयोर्वैष म्यंनअतइदंसिद्धं इदंकिमतआह नारीत्यादि एकःपायुर्यस्यतत्तथापुंवपुःपुंशरीरं ॥ १२३ ॥ एवमिति एवमुक्तविधयावधूदेहःपुंदेहस दृशःसिद्धः अस्मिन्वधूदेहेसुखःसुखजनकोयमित्याकारायाममधीरुत्पन्नासावृथाबाधितार्थेत्यर्थः ॥ १२४ ॥ किंचनारीदेहमात्रस्यस्त्री

पीनोन्नतौस्तनौस्यातांवध्वाःप्रथमयौवने॥पीडितस्ययथाग्रंथीरोगादुरसिनिर्गतौ ॥ १२१ ॥ स्तनयोश्च स्फिजोर्नैववस्तुतोविद्यतेंतरं॥शेषोदेहःसमःस्त्रीणांपुंसश्चस्मरनिर्गमे ॥ १२२ ॥ पायोर्योनेश्चवैषम्यंछिद्र योर्नैवविद्यते॥नारीदेहोद्विपायुःस्यादेकपायुचपुंवपुः ॥ १२३॥ एवमस्मिन्वधूदेहःपुंदेहसदृशःसदा ॥ म मयाबुद्धिरुत्पन्नासुखोयमितिसावृथा॥ १२४॥ अपिग्राम्येणधर्मेणनारीहृदयसंस्थितं ॥पुरुषंगच्छतःक स्मान्ममलज्ज्ञानजायते ॥ १२५ ॥ देहयोर्योगतोभूयात्सुखंप्राणिषुनैवतत् ॥ आलिंगयन्सुतंस्नेहाज्जननीं युवतिंयुवा ॥ १२६ ॥ सुतावायुवतिःस्वस्ययुवानंपितरंमुहुः ॥ आलिंगयंतीसंस्नेहात्कस्मादेनंनगच्छति ॥ १२७॥ भगिनीभ्रातरौयद्वद्युवानौस्नेहिनौमिथः॥ आलिंगयंतौकेनेमौसुखमेतंनगच्छतः॥ १२८॥ पर स्परंहिविद्विष्टौदंपतीदैवयोगतः॥ आलिंगयंतौकेनेमौसुखंनैवात्रगच्छतः॥ १२९॥

त्वेपितदंतरात्मनःपुरुषत्वमेव सवाअयंपुरुषःसर्वासुपूर्ष्वितिश्रुतेः तथाचततस्त्रपामकुर्वतोममात्यंतमनौचित्यमित्याह अपिग्राम्येणेति स्प ष्टम् ॥ १२५ ॥ किंचकामसुखस्यभावनाविशेषएवोपशांतिद्वाराप्रयोजकोननार्यादिदेहयोगोऽन्वयव्यभिचारादित्याह देहयोरिति पंचभिः देहयोगस्यहेतुत्वेयुवासुतोजननीमालिंगन्युवतिःसुतावासम्यक्स्नेहाद्युवानंपितरमालिंगंतीसतीएनंकामुकप्रसिद्धमानंदंकस्मा न्नगच्छतिअतोदेहयोगोनहेतुरितिद्वयोःसंबंधः ॥ १२६ ॥ १२७ ॥ उदाहरणांतरेआह भगिनीतिद्वाभ्यां स्नेहिनौस्नेहवंतौ विद्विष्टौद्वेषं प्राप्तौ ॥ १२८ ॥ १२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइति भावोविकारः ॥ १२० ॥ स्वदत्तंस्मृत्वोपहसति अहोइति नारीरूपासुनरकभूमिषु ॥ १२१ ॥ किंचपरमानंदरूपम
तिसंनिहितंचात्मानंविहायसुखायनारीनरकाश्रयणंममानौचित्यसीमानमावेदयतीत्याह अहोमेइतिद्वाभ्यां अहोअतिचित्रंयदात्मासा
क्षादपरोक्षोवर्ततेतंविहायसुखेप्सयानरकआश्रीयतइतिद्वयोःसंबंधः ॥ १२२ ॥ १२३ ॥ किंचमहतामवज्ञैवहननं यथातुंकारेणगुरूणा
मितिकर्णपर्वणिप्रसिद्धंतथात्मवधेसर्वपापांतर्भावोऽन्यथासंतमात्मानमित्यादिस्मृतिप्रसिद्धः तथाचसर्वात्मकस्यात्मनोऽवज्ञयोपेक्षारूप
याहननेसर्वपापप्रसक्तिरित्याह मत्तइति मत्तःमत्सकाशात् ॥ १२४ ॥ अपिचज्ञात्वात्मावमानःपामरेभ्योपकर्षमावहतीत्याह पामरेभ्य

ततोमानसएवायंभावःस्त्रीपुंसयोर्मिथः ॥ सुखप्रदोभवेदत्रनिःसुखेस्मिन्कलेवरे ॥ १२० ॥ अहोभूतैरिवा
विष्टःपतनोत्पतनादिकं ॥ कृतवानस्मिसंमोहान्नारीनरकभूमिषु ॥ १२१ ॥ अहोमेहृदयेशश्वज्ज्योतिषांज्यो
तिरद्वयः ॥ परमानंदरूपोयमात्मातिष्ठतिसर्वदा ॥ १२२ ॥ आनंदात्मानमेतंतंस्वस्थंप्रियतमंसदा ॥ सुहृदंस
र्वजंतूनांपितृमात्रादिरूपकम् ॥ परित्यज्यसुखप्रेप्सुर्नारीनरकमागतः ॥ १२३ ॥ मत्तःपापतमःकोवापितृमा
त्रादिघातकः ॥ सर्वात्मानममुंयस्माद्धतवानस्म्यवज्ञया ॥ १२४ ॥ पामरेभ्योप्यहंतुच्छोजानन्नात्मानमद्वयं ॥
अयंबहिर्मुखोजातोनैतेजानंतितंप्रभुम् ॥ १२५ ॥ अहोतेपिचनेच्छंतिवृद्धावृद्धांचयोषितं ॥ अहंवृद्धोत्रसं
जातोजरसाथवशीकृतः ॥ १२६ ॥ दाराअपितथैवैतेशुष्ककाष्ठसमामम ॥ भेरीसमोदरास्तद्वन्नापिस्पष्टप
योधराः ॥ १२७ ॥ अपत्यपीतसर्वस्वहतदृष्टिपयोधराः ॥ किंस्विदद्यापिमेचित्रंमनस्तेषुप्रवर्त्तते ॥ १२८ ॥

इति तुच्छोपकृष्टः यतोहमात्मानंजानन्बहिर्मुखोजातः एतेपामरास्तुतमात्मानंनजानंतीति ॥ १२५ ॥ किंचवार्धकेमान्मथाविकारालो
कदृष्ट्याप्यनुचिताइत्याह अहोतेपीतित्रिभिः तेपामराअपिवृद्धाःसंतोवृद्धांनेच्छंति तथाचाहमपिवृद्धोदाराअपिवृद्धाःशुष्ककाष्ठसम
त्वादिभ्यः पयोधरयोःस्पष्टत्वमुन्नतत्वंतदभावादितिद्वयोरर्थः ॥ १२६ ॥ १२७ ॥ अपत्येति तथापत्यैःपीतंसर्वस्वंययोस्तौतथाहताउद्वे
जितादृष्टिर्याभ्यांतौतथातथाविधौपयोधरौयेषांदाराणांतेतथातेषुमेमनःस्विदितिवितर्केकिंकिमर्थंप्रवर्ततइतिचित्रमितिसंबंधः ॥ १२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचगुरोराज्ञापूर्तावपिममगृहरागसंततिरूपोनर्थःसंगस्यैवफलमित्याह अहोभगवतइतिदशभिः अहोइतिविषादे अहोधिगर्थेशोकेच करुणार्थविषादयोरितिहेमचंद्रः तथाचगुरोराज्ञाअपत्योत्पादनसंप्रदायप्रवर्तनयोरेवाभून्मयातुअधिकःकालक्षेपःकृतइतिविषादइतिभावः ॥ १३९ ॥ विषादमेवविशदयति संप्रदायइत्यादिना तत्रसंप्रदायोनानाशिष्यादिपरम्परारूपोमत्तोजातइति ॥ १४० ॥ तेष्विति तेषुशिष्यादिषुजातेष्वपिइतिसंचिंत्यमयागृहरूपंबंधनंनत्यक्तं इतिकिं मदीयेभार्येवनेवर्तेतेअधुनात्यागेतुतयोर्मद्वर्जनान्मद्वियोगाद्दाहोभवेदिति ॥ १४१ ॥ ततइति भार्ययोर्वियोगासहिष्णुत्वात् अनयोर्भार्ययोः ॥ १४२ ॥ कालइति परस्तदुत्तरःकश्चित्कालएवमेवएवंविध

अहोभगवतस्तस्यगुरोर्मंडलवर्तिनः ॥ ममाज्ञाभूदपत्यार्थेसंप्रदायप्रवर्त्तने ॥ १३९ ॥ संप्रदायोमहान्मत्तोजातोवेदचतुष्टये ॥ शिष्याःप्रशिष्यास्तच्छिष्यायतोमेसंतिकोटिशः ॥ १४० ॥ तेषुजातेष्वपिमयानत्यक्तंगृहबंधनं ॥ इतिसंचिंत्यमेजायेवर्त्तेतेयद्वनेधुना ॥ स्निग्धेमयितयोर्मोहाद्दाहोमद्वर्जनाद्भवेत् ॥ १४१ ॥ ततोहमनयोःकंचित्कालंदत्वासुखंततः ॥ स्वकार्यसाधयिष्यामित्युपकारकृतेसति ॥ १४२ ॥ कालःकश्चिन्मयानीतएवमेवतथापरः ॥ एतयोर्यदिनापत्यमुत्पाद्याहमितोगतः ॥ मद्वियोगात्तदानूनमुद्विग्नेतेभविष्यतः ॥ १४३ ॥ ततस्तयोरपत्यानिशीघ्रमुत्पादयाम्यहं ॥ उत्पन्नेषुचपुत्रेषुनयामिकालमात्मनः ॥ १४४ ॥ जातकर्मादिसंस्कारान्करिष्येतनयेष्वहं ॥ कृतेषुतेषुचैवाहंकृतवानायुषोव्ययं ॥ १४५ ॥ एवंविद्यांप्रदास्यामितनयेभ्योमयिस्थितां ॥ जातविद्येषुदाराणांसंयोगोभवतान्मम ॥ १४६ ॥ तनयानांसुतास्तद्वत्पतिभिर्यांतुसंगमं ॥ द्वंद्वीभावेप्रजायास्तुतत्प्रजांद्रष्टुमुद्यतः ॥ १४७ ॥

विचारेणैवमयानीतः एवंकथमित्याकांक्षायामाह एतयोरित्यादि एतयोर्भार्ययोः इतोगृहाश्रमात् उद्विग्नेतमे ॥ १४३ ॥ ततइति नयामिअतिवाहयामि ॥ १४४ ॥ जातेति तेषुतनयसंस्कारेषु ॥ १४५ ॥ एवमिति एवमितिमयाचिंतितं इतिकिं तनयेभ्यःस्वगतांविद्यांदास्यामीति तनयेषुजातविद्येषुइतिचिंतितंयत्तनयानांदारसंयोगोभवतात् तथासुताःकन्यकाःपतिभिःसंगमंयांत्विति प्रजायाअपत्यानां द्वंद्वीभावेपरिणयेजातेपितत्प्रजांपौत्रादिरूपांद्रष्टुमहमुद्यतइतिद्वयोरर्थः ॥ १४६ ॥ १४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहमिति अहंपदंपूर्वान्वयित्वेनदर्शितं एवंस्थितेएवंकामादिदोषमयतयास्थितेनिश्चितेसंसारेयन्ममनोधावतिततइतिनिश्चितंयत्संगःपा
पतमःअतिपापनिदानं यतीनांतुविशेषतःसतथा यतोमादृशोविद्वानीदृशदशांगतइतिसंबंधः ॥ १४८ ॥ संगदोषानेवप्रपंचयति करेत्या
नाइत्यादिवृद्धेत्यतःपूर्वतनेनग्रंथेन स्पष्टं ॥ १४९ ॥ विशेषतइति नारीणांतत्रापियुवतीनांसंगस्तुविशेषतोवर्ज्यः यतोद्विपात्पादद्वयसं

अहमेवंस्थितेचित्तंममधावतिदुर्धियः॥ अहोपापतमःसंगश्चतुर्थाश्रमगामिनां ॥ मादृशोपियतःसंगात्प्रा
पितोत्रदशामिमां॥ १४८॥ करामलकवद्यस्यप्रत्यक्षंब्रह्मवर्त्तते ॥ संगस्तेनापिकर्त्तव्योनकेनापीहकर्हिचि
त्॥ १४९ ॥ विशेषतस्तुनारीणांयुवतीनांततोपिच ॥ मूर्तिमानेषनरकोद्विपाद्योषिदितीरितः ॥ १५० ॥
वलिष्ठोनरकस्तद्वद्युवतिःपतितोत्रयः॥ उद्धर्त्तुंस्वंनशक्तःस्याद्विद्वानपिसमाहितः॥ १५१ ॥ निदर्शनमहंतेषां
भाविनांविदुषामिह॥ युवत्यानरकाद्यस्मादुद्धर्त्तुंस्वंनहिक्षमः ॥ १५२ ॥ अहोनिष्पन्नयोगोपिसंगात्पतति
निश्चितं॥ अहमेतादृशोविद्वान्नरकेत्रयतःस्थितः॥ १५३॥ नरकग्राममार्गोयंनारीदेहःप्रकीर्तितः॥ सर्वथा
परिवर्ज्योतोमोक्षमार्गेयियासता॥ १५४ ॥ चतुर्थाश्रममार्गेणगच्छतामिदमेवहि॥ महद्भयंसमुद्दिष्टंनारी
देहसमुद्भवं ॥ १५५ ॥ नसर्पाद्व्याघ्रतोनैवचोरेभ्योनचराजतः ॥ नजलान्नविषान्नाग्नेर्नाधेर्व्याधेश्चविद्यते
॥१५६॥ देवेभ्योनचभूतेभ्योभयंकिंचिदुपाव्रजेत्॥ चतुर्थाश्रममार्गेणगच्छतामधिकारिणां ॥ विहाययो
षितस्तद्वद्युवतीश्चविशेषतः॥ १५७॥

चारीनरकोयंयायोषिदिति ॥ १५० ॥ बलिष्ठइति युवतिरूपोनरकोवलिष्ठोऽतिबलवान् अत्रयुवतिरूपनरकेयःपतितःसस्वमात्मानमु
द्धर्तुंनशक्नोतितत्राहमेवदृष्टांतइतिद्वयोरर्थः ॥ १५१ ॥ १५२ ॥ अहोइति निष्पन्नयोगोयोगारूढः अत्रनारीरूपे ॥ १५३ ॥ नरकेति
नरकरूपग्रामस्यमार्गः यियासतागंतुमिच्छता ॥ १५४ ॥ चतुर्थेति संन्यासमार्गेणमोक्षंगच्छतांमार्गमध्येनारीदेहतएवभयंनसर्पादिभ्य
इतित्रयाणांभावः ॥ १५५ ॥ १५६ ॥ १५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्कामलभ्यस्यमोक्षस्यमार्गेनारीप्रयुक्तंभयमिदमेवयत्स्मरणादिनाकामादिवृत्तिजननमित्याह स्मरणादिति यदावधूनांस्मरणादपि
कामोजायतेतदादर्शनादेःकिमुवाच्यमित्यर्थः ॥ १५८ ॥ आत्मनइति यतिःशुभमिच्छन्मनआदिभिर्योषित्संगंनकुर्यात् तत्संसर्गस्यघृ
ताग्निसंसर्गवद्द्रावकत्वादितिद्वयोरर्थः ॥ १५९ ॥ १६० ॥ एकएवेति नारीरूपसर्पस्यविषेप्रसक्तेएकमेवौषधंयन्नारीस्मरणादिवर्जन
मिति ॥ १६१ ॥ तच्चेति तच्चनारीस्मरणादिवर्जनंमयात्रगृहाश्रमेवसताऽत्यक्तुमशक्यमतःसंन्यसिष्यामिअन्यथासंगात्यागेदेहांतरलाभ
द्वाराविनंक्ष्यामीत्यर्थः ॥ १६२ ॥ संगस्यदेहांतरहेतुत्वंकामद्वारकंविशदयति वासनेतिद्वाभ्यां वासनापूर्वकर्मानुभवजन्यःसंस्कारःसका

स्मरणाज्जायतेकामोवधूनांधैर्यनाशनः ॥ दर्शनाद्वचनात्स्पर्शात्किस्मादेषनसंभवेत् ॥ १५८ ॥ आत्मनःक्षेम
मन्विच्छंश्चतुर्थाश्रममागतः ॥ नकुर्याद्योषितांसंगंमनसावपुषेंद्रियैः ॥ १५९ ॥ विलीयतेघृतंयद्वदग्नेःसंस
र्गतस्तथा ॥ नारीसंसर्गतःपुंसोधैर्यंनश्यतिसर्वथा ॥ १६० ॥ एकएवप्रतीकारोनारीसर्पविषेभुवि ॥ आसाम
स्मरणंतद्वद्दर्शनादेश्चवर्जनम् ॥ १६१ ॥ तच्चसंगवताऽशक्यंमयानिवसतात्रहि ॥ ततःसर्वात्मनानारीसंगंत्य
क्ष्याम्यहंसदा ॥ विनंक्ष्याम्यन्यथासंगाद्देहांतरसमाश्रितः ॥ १६२ ॥ वासनायत्रयस्यस्यात्सतंस्वप्नेषुपश्यति ॥
स्वप्नवन्मरणेज्ञेयंवासनातोवपुर्नृणां ॥ १६३ ॥ कामिनांकामिनीनांचसंगात्कामीभवेत्पुमान् ॥ देहांतरेततः
क्रोधीलोभीमोहीचजायते ॥ १६४ ॥ कामक्रोधादिसंसर्गादशुद्धंजायतेमनः ॥ अशुद्धेमनसिब्रह्मज्ञानंतच्च
विनश्यति ॥ दूरापास्तोभवेत्तत्रतस्योत्पादोत्रदुर्लभः ॥ १६५ ॥

मिनांदेहांतरहेतुःस्वप्नवदिति परलोकस्यस्वप्नसाम्यंचप्रपंचितंषष्ठे सचकामःकामिनीनांसंगाज्जायतेस्वसंस्कारद्वारादेहांतरेरागद्वेषादिसं
ततिंचकरोतिततःपुनर्जन्मांतरबीजोद्भवः तदुक्तं क्लेशसलिलावसिक्तायांचित्तभूमौधर्माधर्मावंकुरंजनयतइतीतिद्वयोर्भावः ॥ १६३ ॥
॥ १६४ ॥ कामादीनांतत्त्वज्ञानप्रतिबंधद्वारापिसंसारहेतुत्वमित्याह कामेति कामादिसंबंधान्मनोऽशुद्धंजायतेअशुद्धेचमनसिजातम
पिज्ञानंविनश्यतिप्रतिबंधात्कार्यकरंनभवतितत्राशुद्धेमनसितस्यज्ञानस्योत्पादस्तुदूरापास्तोदूरान्निरस्तोऽतएवदुर्लभइति ॥ १६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ततःकिमतआह कामेति कामादिमान्ब्रह्मज्ञानादुपासनाकर्मलक्षणमार्गद्वयाच्चपरिभ्रष्टःसंस्तृतीयंमार्गंजायस्वम्रियस्वेत्यादिश्रुत्युक्तंप्रा
मुयादिति ॥ १६६ ॥ तृतीयेइति स्पष्टम् ॥ १६७ ॥ कामिनीसंगवत्कामिसंगोपिपरित्याज्यउक्तविधदुःखहेतुत्वादित्याह कामिनामिति
॥११॥ एवंउक्तविधया ॥ १६८ ॥ तत्रकामिसंगस्यदुःखजननेद्वारमाह कामिनीनामितिद्वाभ्यां तथैवकामिनांसंगोपिदुःखदोयतस्तेकामिनः
कामादिकंवर्णयंतितद्वर्णनाच्चनारीविषयंज्ञानंजायतेयतोत्यंतासत्यपिज्ञानमर्थेशब्दःकरोतिहीतिशब्दसामर्थ्यंप्रसिद्धमस्तितेनज्ञानेनच
मनोरूपेगृहेकल्पितायोषिदग्निवद्दहेत्तापयेदितिद्वयोरर्थः ॥ १६९ ॥१७० ॥ फलितमाह श्रेयस्कामइति स्पष्टं ॥ १७१ ॥ तत्रहेतुतयो

कामक्रोधादिसंसक्तोब्रह्मज्ञानविवर्जितः॥ मार्गद्वयपरिभ्रष्टस्तृतीयंमार्गमाव्रजेत्॥ १६६ ॥ तृतीयेध्वनिसं
प्राप्तःपुण्यविद्याविवर्जितः॥ कीटादिदेहभाजीसन्नरकाच्चननिःसरेत् ॥ १६७॥ कामिनांकामिनीनांचसं
गादेवंसमाव्रजेत्॥ कल्पकोट्यादिकंकालंदुःखंसुखविवर्जितः ॥ १६८॥ कामिनीनांयथासंगोदुःखदःका
मिनामपि ॥ तथैववर्णयंतेतेयतःकामंचकामिनीं ॥ १६९॥ वर्णनाच्छब्दसामर्थ्याज्ज्ञानंनारीषुजायते ॥
ज्ञानेनचित्तगृहगायोषिदग्निर्दहेदिदं॥ १७०॥ श्रेयस्कामस्ततोनित्यंचतुर्थाश्रममागतः॥ कामिनांकामिनी
नांचसंगंसर्वात्मनात्यजेत्॥ १७१ ॥ महावातेज्वलन्दीपोयथाकार्यंकरोनहि ॥ संगेसतितथाब्रह्मज्ञानंकार्यं
करोतिन॥ विद्यमानंकथंतद्धितत्रोत्पत्तुंसमर्हति॥ १७२॥ इत्यादिबहुधाचित्तेचिंतयित्वातदामुनिः ॥ इदं
विचिंतयामासपुनश्चकरुणान्वितः॥ १७३॥ यावत्कालमयंगच्छेत्पुमान्सप्तपदंभुवि॥ तावत्कालंस्थितोजं
तुस्सहमित्रमुदाहृतः॥ सद्भिर्बहुतिथंकालंभार्याभ्यांतुस्थितोह्यहं॥ १७४॥

क्तांसंगस्यज्ञानप्रतिबंधकतांस्मारयति महावातेइति यथामहतिवातेज्वलन्दीपःकार्यंमार्गप्रकाशादिरूपंनकरोतितथासंगेब्रह्मज्ञानंविद्य
मानमपिकार्यमविद्याध्वंसंनकरोति तज्ज्ञानंतत्रसंगकालेउत्पत्तुंजन्मलब्धुंकथमर्हतीति ॥ १७२ ॥ एवंत्यागस्ययोग्यतांविचार्यपुन
भार्ययोरुपकारोपयोगिइदंवक्ष्यमाणंचिंतयामासेत्याह इत्यादीति ॥ १७३ ॥ इदंपदोक्तंविचारमभिनयति यावदितिषड्भिः सप्तपादन्या ॥११॥
सान्यावताकालेनगच्छेत्तावत्कालंयेनसहयःस्थितःसतस्यमित्रंसद्भिरुक्तः अहंतुभार्याभिःसहचिरंस्थितोस्मीतिसंबंधः ॥ १७४ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मेति स्त्रीप्रज्ञास्त्रीयोग्याप्रज्ञागृहकौशलरूपायस्याःसातथा हिताहितंमोक्षबंधरूपं ॥ १७५ ॥ मयीति एषामैत्रेयीमयिप्रव्रजितेसति चिंतयाशोषंगमिष्यतीतिसंभाव्यतेवित्तेननतुतोषंनैवगमिष्यतिसंसारविरक्तत्वात्तत्त्वंचसंसारदोषदर्शनेनमोक्षैककामत्वादितिद्वयोःसंबंधः ॥ १७६ ॥ १७७ ॥ स्नेहश्चेति अस्यामैत्रेय्यायदानिजेपिशरीरेस्नेहोनास्तितदापत्त्यादिषुसस्नेहःकेनस्यादिति ॥ १७८ ॥ अनुवृत्तिमिति एषायन्मत्सेवांकरोतितद्धर्मभयान्नतुलौकिकललनावत्कामतःतेनास्याज्ञानाधिकारित्वेनअथसंन्यासात्प्रथमंब्रह्मज्ञानमस्यैउपदेक्ष्यामी

ब्रह्मविद्याधिकारश्चकात्यायन्यानविद्यते॥स्त्रीप्रज्ञैवयतःसेयंनजानातिहिताहितं॥ १७५॥ मयिप्रव्रजितेचिंताशोषमेषागमिष्यति॥वित्तेननैवसंतोषमैत्रेयीतुगमिष्यति ॥ १७६ ॥ एषासंसारसंतप्तामोक्षमेवसमिच्छति॥अस्यानविद्यतेकामोयौवनेपिकदाचन॥ १७७॥स्नेहश्चननिजेप्यस्तिदेहेकेनपरत्रसः॥ पत्यादिषुभवेदस्याःसर्वदोद्विग्नचेतसः॥ १७८॥ अनुवृत्तिंकरोत्येषामयिधर्मविभीतितः ॥ नतुकामेनललनापत्यौयद्वत्परा भुवि॥ अथवक्ष्यामितेनाहंब्रह्मज्ञानमनिंदितं॥ १७९॥ इतिसंचिन्त्यसंन्यासंकरिष्यन्निदमुक्तवान्॥ मैत्रेयीतिचसंबोध्यमैत्रेयींमुनिसत्तमः॥ १८०॥ अरेजायेप्रियेन्यासंचतुर्थयोग्यमाश्रमं ॥ करिष्याम्यहमत्रत्वंगृहस्थत्वंविहायहि॥ १८१॥ हंतजायेततःकुर्वेवित्तभागंतवाधुना ॥ कात्यायन्यानयासार्द्धंपश्चात्सुखकरंद्वयोः ॥ १८२॥ एवमुक्तातिसंखिन्नासंसारभरमंथरा॥ अप्राप्तावसरापूर्वंसाहोवाचपतिंप्रति ॥ १८३॥

त्यर्थः ॥ १७९ ॥ प्रथमकंडिकार्थमुपसंहरन्द्वितीयकंडिकार्थमुपक्रमते इतिसंचित्येतिभविष्यत्संन्यासकर्तामुनिर्मैत्रेयींहेमैत्रेयिइतिसंबोध्यइदंवाक्यमुक्तवानिति ॥ १८० ॥ इदंकिमित्याकांक्षायामाह अरेइति अरेप्रियेअहंगृहस्थत्वंविहायचतुर्थमाश्रमंकरिष्यामिअत्रत्वमनुमन्यस्वेतिशेषः अत्रत्यमितिपाठेगृहस्थत्वविशेषणं अत्रकर्माधिकारेसतिभवंप्रसिद्धमितितदर्थः ॥ १८१ ॥ हंतेति हंतेत्यनुकंपायां कात्यायन्यासहतववित्तविभागंकरिष्यामियेनपश्चात्सुखंभवेदिति ॥ १८२ ॥ तृतीयकंडिकार्थंप्रपंचयति एवमितिद्वाविंशतिश्लोकैःएवमुक्तासंसाराद्भारादिवात्यंतमुद्विग्नामैत्रेयीपूर्वमलब्धावसराप्यवसरंप्राप्येदमुवाचेति ॥ १८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंपदोक्तंमैत्रेयीवाक्यमभिनयति भगवन्निति द्वाभ्यां हेभगवन् अमृतत्वकरमेव वित्तमिच्छामीत्यर्थः ॥ १८४ ॥ पृथिवीति यदिस
 कलापृथ्वीवित्तपूर्णामदीयास्यात्तदातेनवित्तेनाहममृतभावंप्राप्ताभवेयंनवेत्यनयोःपक्षयोरेकंपक्षमवधारयपश्चादहंयोग्यतामालोच्यवि
त्तंग्रहीष्यामीत्यर्थः ॥ १८५ ॥ इत्युक्तइति इतिमैत्रेय्याउक्तेसतिमुनिर्द्वितीयंपक्षंनेत्याकारकमेवावधारितवानितिप्रथमदलार्थः तमुपपा
 दयति शरीरीत्यादिना नश्वरेणनाशशीलेनवित्तेनकःशरीरीअविनश्वरोऽमृतोभवेत् प्रत्युतवित्तेनतत्साध्येनकर्मणाचमरणमेवप्राप्नुयादित्य

भगवन्वित्तमिच्छामिमरणेनविवर्जितं ॥ त्वयादत्तंनचान्यत्तुलोकेयन्मरणप्रदम् ॥ १८४ ॥ पृथिवीसकला
चेत्स्यात्पूर्णावित्तेनमेमुने ॥ त्वयादत्तात्रतेनाहममृतास्यांनवेतितत् ॥ वदपश्चादहंत्वत्तोवित्तमिच्छामिधार्मि
क ॥ १८५ ॥ इत्युक्तेयाज्ञवल्क्यस्तांनेत्याहमुनिसत्तमः ॥ शरीरीकोत्रवित्तेननश्वरेणाविनश्वरः ॥ भवेत्प्रत्युत
वित्तेनमरणंप्राप्नुयात्सदा ॥ १८६ ॥ वित्तवान्राजतस्तद्वच्चोरेभ्योपिचदुर्जनात् ॥ राजादिभ्योपिसततंमृत्यु
माप्नोतिदुःखतः ॥ १८७ ॥ वित्तवान्कोहिलोकेस्मिन्निश्चितःकुत्रचिद्वसेत् ॥ अपिस्वप्नेपितस्यास्तिभयंराजा
दिजंमहत् ॥ १८८ ॥ निर्धनानांसदादैवमनुकूलंहिजायते ॥ धनिनांप्रतिकूलंतस्मायशोभुविदृश्यते ॥ १८९ ॥
यतोत्रधनिनोलोकेरोगिणःक्षुद्विवर्जिताः ॥ अल्पायुषोत्यदृप्ताश्चधनराशौमहत्यपि ॥ १९० ॥ विरोधिनश्चस
ततमंतःपुत्रादिभिर्जनैः ॥ केचिद्बहिश्चदृश्यंतेश्वभिःश्वानोयथाभुवि ॥ १९१ ॥ चित्तेव्याकुलतातेषांकर्तव्या
सक्तचेतसां ॥ वर्त्ततेनैवगच्छंतियथातेसुखमण्वपि ॥ १९२ ॥

र्थः ॥ १८६ ॥ तत्रवित्तस्यमृत्युभयप्रदत्वंलोकेप्यन्वयव्यतिरेकाभ्यांदर्शयति वित्तवानित्यादिना दुःखतःदुःखद्वारा ॥ १८७ ॥ वित्तवा
न्कोहीति स्पष्टम् ॥ १८८ ॥ व्यतिरेकंदर्शयति निर्धनानामिति अनुकूलंनीरोगत्वादिप्रयोजकत्वादितिभावः ॥ १८९ ॥ अनुकूलत्वमे
वधनिषुव्यतिरेकेणस्फुटयति यतोत्रेति दृश्यंतइतिसंबन्धः ॥ १९० ॥ विरोधिनइति अंतःप्रच्छन्नंपुत्रादिभिर्विरोधिनःकेचिद्धनिनोदृश्यं
तेकेचित्तुबहिःस्फुटमपिश्वभिःश्ववद्विरोधिनोदृश्यंतइत्यर्थः ॥ १९१ ॥ चित्तइति तेषांधनिनांइदंकर्त्तव्यमिदंनकर्त्तव्यमितिचिंतया ॥१२॥
तथाव्याकुलतावर्ततेयथाअणुस्वल्पमपिसुखंनगच्छेयुरित्यर्थः ॥ १९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैतैरिति किंचसाधवोजनायथानिर्धनैःस्नेहंकुर्वंतितथाएतैर्धनिभिःस्नेहंनकुर्वंतीतिसंबंधः कीदृशैर्निर्धनैः शोच्यैरनुग्राह्यैः क्षुधयाकृशत्वात् ॥ १९३ ॥ धनेति तथाधनिनोधनमदेनपापानिकुर्वंतिदरिद्रास्तुनतथेति ॥ १९४ ॥ अवेति तथाधनिनोदेवादीन्वेदपारगब्राह्मणांतान्अवजानंति तथासमुद्रवद्गंभीरान्ब्रह्मविदुषोमनुष्यानप्यवजानंतीति ॥ १९५ ॥ दुःखान्यपीति तथाएतेधनिनोजनाबहूनिदुःखान्यपिगच्छंति कीदृशाः स्वपक्षेपरपक्षेचवर्तमानानांभूतानामुपद्रवकारकाः तदुक्तंगीतासु कर्षयंतःशरीरस्थंभूतग्राममचेतनाः मांचैवांतःशरीरस्थंतान्विद्ध्यासुरनिश्चयानिति कर्षयंतःक्लेशयंतः ॥ १९६ ॥ इत्यादिकमिति इत्यादिकंदुःखंधनीप्राप्नुयान्नतुनिर्धनःपरदुःखजननादौ

नैतैःकुर्वंतिसततंसाधवःस्नेहमद्भुतं॥ धनहीनैर्यथाशोच्यैर्नित्यंक्षुत्क्षामदेहिभिः॥ १९३॥ धनमत्ताःप्रकुर्वंतिपापानिविविधानिहि॥ दरिद्राःसर्वतोभीतानैवकुर्वंतिकिंचन॥ १९४॥ अवजानंतिधनिनोदेवान्राज्ञोगुरूनपि॥ अतिथीन्ब्राह्मणांस्तद्वद्वेदवेदांगपारगान्॥ मनुजान्बुद्धिसंपन्नानगाधान्जलधीनिव॥ १९५॥ दुःखान्यपिबहून्येतेगच्छंत्यविरतंजनाः॥ पक्षद्वयेपिमैत्रेयिभूतोपद्रवकारकाः॥ १९६॥ इत्यादिकंधनीदुःखंप्राप्नुयान्निर्धनोननतु॥ शक्त्यभावेनमैत्रेयिधनिनोनिर्धनोवरः॥ १९७॥ धनिनांजीवितंयादृक्तादृगेवतवापिच॥ धनलाभाद्धिमैत्रेयिभविष्यतिनसंशयः॥ १९८॥ वित्तासक्तेषुपतिषुचलचित्तेषुसर्वदा॥ अमृतत्वस्यनैवाशायथातेपितथैवसा॥ १९९॥ अमृतत्वंहिमोक्षःस्यान्मोक्षोदेहाद्यभावतः॥ अज्ञानस्यविनाशःस्यादानंदात्मावबोधतः॥ २००॥ धनिनांचलचित्तानांभवेद्बोधःकथंहिसः॥ बोधाभावेकथंनाशमज्ञानंतुगमिष्यति॥ २०१॥

सामर्थ्याभावादतोनिर्धनोधनिनःसकाशाद्वरइति ॥ १९७ ॥ धनिनामिति हेमैत्रेयियदित्वंधनंलप्स्यसितदायादृशंप्रकृष्टोपकरणशालिधनिनांजीवनंस्यात्तादृशंतवापिभविष्यतीति ॥ १९८ ॥ वित्तासक्तेष्विति पतिषुधनस्यस्वामिषुतदासक्त्याचलचित्तेष्वमृतत्वस्ययथानैवाशातथातवापिधनसक्तायाःसाअमृतत्वाशानभविष्यतीति ॥ १९९ ॥ धनिष्वमृतत्वाशाभावममृतत्वसामग्र्यभावेनोपपादयति अमृतत्वमितिपंचभिः अमृतत्वशब्दवाच्यस्यमोक्षस्यप्रयोजकोदेहादिसंबंधाभावस्तत्प्रयोजकोऽज्ञानाभावःअज्ञानाभावस्यतुप्रयोजकआत्मबोधस्तत्रधनासक्तेष्वात्मबोधोदुर्लभस्तदभावेऽज्ञाननाशाभावइतिद्वयोरर्थः ॥ २०० ॥ २०१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अज्ञानानाशतइति अज्ञाननाशाभावेचतत्कार्यसूक्ष्मदेहस्यस्थितिस्तत्स्थितौचतदाश्रितपुण्यपापयोःस्थितिस्तत्स्थितौचपुनःस्थूलशरीरोत्पत्तिस्तत्सत्वेचकर्मांतरारंभप्रयोजकसुखदुःखोपभोगोमरणंचेतिपूर्वजोहिरण्यगर्भोपिशरीरीकोनमरिष्यतीति फलितमाह अमृतत्वस्येति इतित्रयाणामर्थः ॥ २०२ ॥ २०३ ॥ २०४ ॥ चतुर्थकण्डिकार्थमाह इत्युक्तेतिद्वाविंशतिश्लोकैः एवमुक्तामैत्रेयीतंमुनिप्रतिइत्यभाषत इतिकिमित्याकांक्षायामाह अमृतत्वस्येत्यादि यदिवित्तंनामृतत्वसाधनंतदाऽमृतत्वकामाहंतेनवित्तेनकिंप्रयोजनंसाधयेयं नकिंचि

अज्ञानानाशतःकेनसूक्ष्मदेहंविनश्यति॥ सूक्ष्मदेहस्यसंस्थानेननश्येत्पुण्यपातकं॥ २०२ ॥ पुण्यपातकसंस्थानेस्थूलोदेहोविजायते॥ सतिस्थूलशरीरेस्मिन्सुखदुःखोपभोगवान्॥ २०३ ॥ नमरिष्यतिकोनामशरीरीयोपिपूर्वजः॥ अमृतत्वस्यनैतस्मादाशावित्तेनविद्यते॥ २०४॥ इत्युक्तायाज्ञवल्क्येनमैत्रेयीतमभाषत॥ अमृतत्वस्यनैवाशायदिवित्तेनविद्यते॥ किमहंतेनवित्तेनकुर्यामरणहेतुना॥ २०५॥ भगवंस्ततएवैतन्माभून्ममकदाचन॥कात्यायन्यैभवत्वेतद्वित्तंतेसकलंपते ॥ २०६॥ भिक्षाहारेणदेहंस्वमानिपाताद्यथाभवान्॥ धारयिष्यत्यहंतद्वद्धारयिष्यामिसुव्रत॥ २०७॥ जीवनेपिततोमाभून्ममदेहस्यचिंतनम्॥ भवतोमुनिशार्दूलगच्छतोत्याश्रमांतरं॥ २०८॥दशमासानहंगर्भेरक्षितायेनकेनचित्॥ देवःसएवमेचिंतामधुनापिकरिष्यति ॥२०९॥ अपिविप्रयदादेहोगमिष्यतितदामम॥ दुर्गंधोदुस्तरोभारआधिव्याधिसमाकुलः॥ अनेकदुःखजनकोयास्यत्येषमहामुने॥ २१०॥

दपीत्यर्थः ॥ २०५ ॥ भगवन्निति ततोमदिष्टासाधनत्वादेतद्धनंकात्यायन्यर्थमेवास्तु हेपतेस्वामिन् ॥ २०६ ॥ देहधारणंत्वहंभवद्वद्भिक्षान्नेनैवकरिष्यामीत्याह भिक्षेति आनिपातात्आमरणात् ॥ २०७ ॥ जीवनेपीति ततोभिक्षयापिनिर्वाहसंभवान्मद्देहस्यजीवनेनिर्वाहेपिभवतश्चिंतामास्तु ॥ २०८ ॥ जीवनचिंताकरणंमौढ्यमेवविश्वंभरदेवप्रभावानालोचनमूलत्वादित्याशयेनाह दशेति केनचिदचिंत्यप्रभावेणयेनदेवेनाहंगर्भेरक्षितासएवेदानीमपिमद्रक्षांकरिष्यतीति ॥ २०९ ॥ अपिचजीवनालाभेनदेहापगमेपिनमेभयंप्रत्युतोपकारोदेहस्यभारभूतत्वादित्याह अपिविप्रेति दुस्तरोदुःखेनतर्तुंधारयितुंशक्यइतियावत् ॥ २१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचप्रवृत्तिद्वारापापहेतावतएवदोषाणांदुःखशतानांचआकारभूतेदेहेममासक्तिर्नास्तीत्याह पापादिति ॥ २११ ॥ आहारेति याम म नित्यंभोजनेप्रवृत्तिःसापिनरागात्किंतुराजभटप्रेरितजंतोरिवपारतंत्र्यादित्यर्थः ॥ २१२ ॥ आहारग्रहणेदोषान्प्रपंचयति आहारग्रहणा दिति अन्नाहरणात्कामादयोजायंतेतथेंद्रियाणिचप्रवर्तंतइतिद्वयोरर्थः ॥ २१३॥ २१४ ॥ क्षुधैकेति भोजनाकरणेएकंक्षुधादुःखंभोज नेतुकामादिकृतानिबहूनिदुःखानीत्यर्थः ॥ २१६ ॥ तत्रयन्ममकामकृतंदुःखंतद्भवानूजानात्येवेत्याह कामेनेति ॥ २१६॥ कामदुःखेति

पापाद्वित्रस्तचित्ताहंनैवास्थामेकलेवरे ॥ भूरिभारकरेनित्यंदोषदुःखशताकरे ॥ २११ ॥ आहारग्रहणेनित्यं प्रवृत्तास्म्यतिदुःखतः॥ यथाराजभटैर्जंतुर्बाध्यमानःप्रवर्तते॥ २१२॥ आहारग्रहणात्कामःक्रोधश्चापिहिजा यते॥ लोभोमोहस्तथातद्वन्निद्रातंद्रादयोपिच॥ मलमूत्रविसर्गोपिह्याहारादेवजायते ॥ २१३॥ कर्मज्ञानें द्रियाण्यत्रमनोदेहयुतानिच॥ व्यापारान्विविधान्कुर्युराहारादेवनान्यथा ॥ २१४॥ क्षुधैकाबाधतेब्रह्मन्ना हाराग्रहणेसदा ॥ ग्रहणेतस्यबाधंतेकामाद्याःकोटिशत्रवः ॥ २१५ ॥ कामेनममयाब्रह्मन्कृतादीनतमाद शा॥ तांत्वंवेत्थनवक्तव्यमत्रकामकृतंतव॥ २१६॥ कामदुःखफलंब्रह्मन्सद्योनारीषुजायते ॥ गर्भस्तस्यच तद्दुःखंधारणेमोचनेपिच॥ नरकादपितद्भूयोमरणाच्चापिकोटिशः॥ २१७॥ कामःकारस्करोवृक्षोनारीणा मिहजन्मनि॥ ददातिकटुकंयत्तत्फलंदुःखोदधिप्रदम्॥ प्रत्यक्षंननराणांतन्नारीणामिवसर्वदा॥ २१८॥ ते नदुःखेनमेदेहोनगतोयत्तदद्भुतम्॥ वज्रसारवपुःप्रायोनारीधात्राविनिर्मिता ॥ २१९॥ क्रोधादीनांतुयद्दुः खंतज्जानासिस्वयंमुने॥ नवक्तव्यंमयातत्रसर्वज्ञस्यपुरस्तव ॥ २२०॥

कामदुःखस्यफलंगर्भरूपंनारीणांसद्योजायतेतद्दुःखंतुगर्भदुःखंतुनरकान्मरणाच्चाधिकमित्यर्थः॥ २१७॥ कामःकारस्करइति कामरूपो वर्णितकारस्करवृक्षःकटुरसंफलंयन्नारीणांदुःखदंप्रसूतेतन्नारीवन्नरानजानंतीत्यर्थः ॥ २१८ ॥ तेनेति तेनदुःखेनममदेहावशेषोपिचि त्रमतएवोत्प्रेक्षतेयन्नारीदेहोवज्रमयइत्यर्थः ॥ २१९ ॥ क्रोधादीनांत्विति स्पष्टं ॥ २२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामादीति कामादिभिर्बहुभिःप्रयुक्तान्मरणादेकयाक्षुधयाप्रयुक्तंमरणभयंश्रेष्ठंमन्ये तत्रन्यायमाह एकएकेनेत्यादिना यथाएकःशूर एकेनशूरेणयोद्धुंशक्तोबहुभिस्तुअशूरैरपिसंग्रामेएक.कुशलोपिसीदेद्दुःखितोभवेदितिद्वयोरर्थः ॥ २२१ ॥ २२२ ॥ दार्ष्टांतिकेयोजय ति एकयेति दुर्गंदुष्करमपीत्यर्थः ॥ २२३ ॥ फलितमाह ततोवित्तमिति ॥ २२४ ॥ परंतुयथाममर्मौर्ख्यंनश्येत्तथाविधेहीत्याशयेनाह

॥१४॥ मौर्ख्येणेति यथाहंमौर्ख्येणविशिष्टादेहंनत्यक्ष्यामिभवद्वत्तोषादिशालिनीचभवेयंतथानुगृहाणेतिशेषः ॥ २२५ ॥ ततोयदीति ततोभ

कामादिमरणाच्छ्रेयःक्षुधयामरणंमुने ॥ एकएकेनशक्नोतियोद्धुंशूरतमेनच ॥ २२१ ॥ अशूरैर्बहुभिश्चैको भटःशूरतमोपिच ॥ सीदेत्संग्राममागत्यशस्त्रास्त्रकुशलोपिच ॥ २२२ ॥ एकयाक्षुधयाकर्तुंब्रह्मन्प्रबलयापि च ॥ शक्तास्मिकलहंदुर्गंदुर्बलापिमुनीश्वर ॥ दुर्बलैरपिकामाद्यैर्बहुभिर्नोत्सहेमुने ॥ २२३ ॥ ततोवित्तंविना देहोनतिष्ठेच्चेत्कदाचन ॥ भारएषतदाविप्रममयास्त्यत्युपेक्षितः ॥ २२४ ॥ मौर्ख्येणनैवदेहंस्वंत्यक्ष्यामिमुनिस त्तम ॥ भवानिवप्राप्तलाभसंतुष्टाजितमानसा ॥ २२५ ॥ ततोयदिभवान्किंचिदमृततत्त्वस्यकारणं ॥ वेत्तिम त्त्यंवदत्वेतत्कृपाचेद्विद्यतेमयि ॥ २२६ ॥ इत्युक्तेयाज्ञवल्क्योपिवक्तुंब्रह्ममहामुनिः ॥ अंगीचकारसकलंवित्तं प्रतितयेरितम् ॥ २२७ ॥ भवेद्यद्यपिवित्तेनधर्मःकामश्चसर्वदा ॥ अमृतत्वंतथापिस्यान्नवित्तेनकदाचन ॥ २२८ ॥

वान्यदिकिंचिन्मोक्षकारणंवेत्तितदातदेवमह्यंवदेति ॥ २२६ ॥ अथपंचम्याःकण्डिकायाअर्थेनमैत्रेयीवाक्यानुमोदनरूपेणसूचितंवित्त स्यामृतत्वासाधनत्वांगीकारंप्रपंचयति इत्युक्तेइतिपंचदशभिः इतिमैत्रेय्योक्तेसतितस्याअधिकारंविज्ञायब्रह्मवक्तुमिच्छन्मुनिस्तयावि त्तविषयकंयद्वाक्यमुक्तंतत्सर्वमंगीकृतवानिति ॥ २२७ ॥ अंगीकारमेवाभिनयति भवेदित्यादिना यदिवित्तस्यधर्मकामौपुरुषार्थौप्रति ॥१४॥ साधनत्वमिष्यतेतथाप्यमृतत्वंप्रतिसाधनत्वंनास्तीत्यर्थः ॥ २२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्तुतस्तु धर्मकामौ पुरुषार्थौ प्रत्यपि वित्तस्य साधनत्वं नास्तीति दर्शयंस्तत्र कामस्य पुरुषार्थत्वमेवन भवति तत्फले सुखत्वस्य भ्रममात्रसिद्धत्वा दित्याह अपिवित्तेनेति वित्तेन कामो विषयसंबंधो जायते तेन कामेन किं सुखं न किंचिदपि नारीसंसर्गजंचेन्न अत्र हि नारीसंसर्गे श्रांत पादप्रहारन्यायेन मोहंभ्रमं विना न किंचित्सुखमित्यर्थः ॥ २२९ ॥ तादृशसुखं प्रत्यपि धनस्य व्यतिरेकव्यभिचारं दर्शयति अप्यर्थेति तत्कामसुखं अतएव कामसुखं प्रत्यर्थस्याऽहेतुत्वादेवपुष्पचंदनादिभोगजं सुखमपि तत् अर्थजं न भवेदित्यर्थः ॥ २२० ॥ अपिवित्तेति

अपिवित्तेनकामोयंजायतेतेनकिंसुखं॥ नारीसंभोगजंतत्स्यादितिचेन्नात्रकिंचन॥ सुखंमोहंविहायस्यात्प्र हारेष्विवदुर्धियः ॥ २२९॥ अप्यर्थरहितानांतत्श्वादीनामपिदृश्यते॥ पुरुषस्ययथानारीशुनस्तद्वत्शुनीम ता॥ अतएवनपुष्पादिभोगजंतत्सुखंभवेत्॥ २२०॥ अपिवित्तविहीनायेभ्रमराःकोकिलाअपि॥ गंधान् जिघ्रंतिचरसान्रस्यानास्वादयंतिच॥ २३१॥ शृण्वंतिचतथाशब्दान्गीतवादित्रजान्मुहुः॥ देवालयादि संस्थानाःपश्वाद्याअपिजंतवः॥ २३२॥ पश्यंतिललितंरूपंनिर्धनाःपुरुषाअपि ॥ लोकेवारांगनादीनांयुव तीनामशंकिताः॥ २३३ ॥तथैवमृदुलान्स्पर्शान्मक्षिकाद्याश्चजंतवः॥ दुर्लभानपिगच्छंतिस्यपितेराजयोषि तां॥ २३४॥ सर्वंसर्वधनीनापिप्राप्नुयाद्विषयेस्थितं॥ धनेननिर्धनोप्यत्रकिंचित्कापिसमाप्नुयात्॥ १३५॥ धर्मोपिपरलोकस्यसुखदःकेवलाद्धनात्॥ भवेदेतच्चनियतंनैवलोकेत्रदृश्यते॥ १३६॥

निर्धना अपि भ्रमरा गंधान् जिघ्रंति कोकिलाश्चरस्यानास्वादनीयानाम्रादिरसान्स्वादयंतीति ॥ २३१ ॥ शृण्वंतीति तथा देवालयादिग ताः पश्वाद्या अपि गीतादिशब्दान् शृण्वंतीति ॥ २३२ ॥ पश्यंतीति तथा निर्धना अपि पुरुषा वारांगनादीनां रूपं पश्यंतीति ॥ २३३ ॥ तथैवेति तथा मक्षिकाद्या राजयोषितामपि दुर्लभान् स्पर्शान् गच्छंति प्राप्नुवंति ॥ २३४ ॥ अन्वयव्यभिचारमपि दर्शयति सर्वमिति सर्वध नीवद्बहुविधधनोपि धनेन सर्वं विषयसुखं न प्राप्नुयात् यत्किंचिद्विषयसुखं तु दरिद्रोपि प्राप्नुयादिति ॥ २३५ ॥ धर्मं प्रत्यपि वित्तस्याहेतुत्वं व्य भिचारेण स्फुटयति धर्मोपीति एतद्धनस्य धर्महेतुत्वं नियतमव्यभिचारि न दृश्यते ॥ २३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्धनाइति मुद्गलाख्योविप्रःसकुटुंबःशिलोंछवृत्त्यार्जितंप्रस्थपरिमितमन्नमतिथयेदत्वास्वर्गंगतइतिभारतेप्रसिद्धं तत्प्रभृतयोगृहस्थाअ
पिक्षुत्कृशाःस्वर्गंगताःश्रूयंते ॥ २३७ ॥ धनिकास्तुप्रायशःप्रमादेननरकयोग्याएवकालत्रयेप्रसिद्धाइत्याह धनिनइति स्पष्टं ॥ २३८ ॥
ननुयागादयोधनंविनानस्युरितिचेन्नसंतुतत्फलस्यस्वर्गस्योपायांतरेणापिसंभवेनक्षत्यभावादित्याह अग्निष्टोमादयइति उपायाजप
यज्ञादयः ॥ २३९ ॥ किंचधनस्यमोक्षंप्रतिहेतुतायागादिद्वारैववक्तव्यातत्रयागादीनामेवमोक्षंप्रतिहेतुतानास्तिकिमुतवित्तस्येत्याह
अप्यमीति अमीअग्निष्टोमादयोज्ञानमात्रलभ्यममृतत्वंप्रतिनहेतवइतिप्रसिद्धं यदितुस्वर्गहेतवस्तदाभ्युदयार्थरूपंतपःप्रभृत्युपायतुल्यत्व

निर्धनाबहवःस्वर्गंप्राप्तास्तेगृहिणोपिहि॥ मुद्गलाद्यामहात्मानोनित्यंक्षुत्क्षामवर्चसः॥ २३७॥ धनिनोबहव
स्तद्वद्गतायास्यंतियांतिच॥ नरकंतेननस्वर्गोधनेनैवात्रलभ्यते॥ २३८॥ अग्निष्टोमादयोयज्ञायदिनस्युर्द्धनं
विना॥ माभूवन्काममेतेषांफलंस्वर्गोभविष्यति॥ उपायाविविधायस्माद्दृश्यंतेस्वर्गसाधने॥ २३९॥ अप्य
मीनामृतत्वस्यकारणंस्युःकथंचन॥ स्वर्गस्यकारणत्वेस्यात्समत्वंतपआदिभिः॥ २४०॥ अग्निष्टोमादयस्ते
नभवंतुधनकारणात्॥ अमृतत्वस्यनैवस्यादाशातेनोक्तहेतुतः ॥ २४१॥ इत्यभिप्रायवान्विप्रोयाज्ञवल्क्यो
वचोब्रवीत्॥ मैत्रेयीममृतत्वस्यप्रीतिदंमुनिसत्तमः॥ २४२॥ मैत्रेयितववाक्येनप्रियेप्रीतिर्ममाभवत्॥ प्रिया
सतीयतःप्राहभवतीप्रीतिदंवचः॥ प्रियंवृतवतीतद्वन्ममतेपितथानृणां॥ १४३॥

मेषामस्तु तथाचस्वर्गार्थमप्येषांनावश्यकतेतिभावः ॥ २४० ॥ फलितमाह अग्निष्टोमादयइति॥ २४१ ॥ एवंतात्पर्यार्थमुक्त्वाऽस्याःकंडि
कायाअक्षरार्थमाह इत्यभिप्रायवानितिसप्तभिः उक्ताशयवान्मुनिर्मैत्रेयींप्रतिइदंवक्ष्यमाणश्लोकषट्काभिनेयंवचोऽब्रवीत् कीदृशंवचः
अमृतत्वप्राप्तिदंमोक्षाधिकारसूचकमितियावत् ॥ २४२ ॥ मैत्रेयीति हेमैत्रेयियतोभवतीपूर्वमपिप्रियासतीप्रीतिदंवित्तहेयत्वप्रतिपादकं
वचःप्राहतथाममतवसर्वेषांचयत्प्रियंवस्तुज्ञानद्वारामृतसाधनत्वात्तद्वृतवतीचततस्तववाक्येनममप्रीतिरभवदितिसंबंधः अभूदितिवक्तव्ये
ऽभवदित्युक्तिःकालविस्मृतिबोधनद्वाराहर्षातिशयसूचिका ॥ २४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वमेवेति लोकेपुत्ररूपेणयतोजायतेसाजायेतिप्रसिद्धं वस्तुतस्तुपुत्रादयोपिपदार्थास्तादृशप्रीतिविशिष्टरूपेणयतोजायंतेसाजायेतिवक्त व्यातादृशीचत्वमेवासियतोऽहंत्वत्तउक्तविधवचनेनकरणेनप्रीतिविशिष्टरूपेणजातोस्मीत्यर्थः ॥ २४४ ॥ जायेतीति त्वादृश्येवजायेति पदेनवक्तव्याअपरातुललनाभार्येत्येववक्तव्या अशनवसनादिभिर्भरणक्लेशदायकत्वात् ॥ २४५ ॥ एहीति तस्मात्हेजायेत्वंममनिष्का मस्यनिष्कामत्वेनसदृशीआत्मानंपृच्छंतीसतीपुरतःसमीपमेहि याचलज्जास्त्रीणांनिसर्गतःस्वभावतःप्रसिद्धातांमाकुर्वितिद्वयोरर्थः॥२४६ ॥ २४७ ॥ हंतेति हंतहर्षे हेजायेअहंत्वत्पृष्टममृतसाधनंवक्ष्यामित्वंतुचक्षुःश्रोत्रेमनश्चप्रणिधायमदुक्तमवधारयेत्यर्थः अत्रेदंबोध्यं

त्वमेवममजायेतित्वत्तोजातोस्म्यर्हयतः॥ प्रीतिमान्बहुशोऽनेनवचसाभृशमेवच ॥ २४४॥ जायेतित्वादृ शीप्रोक्ताललनात्वपराभुवि ॥ भार्येतिप्रोच्यतेयस्माद्भरणीयाशनादिभिः ॥ २४५ ॥ एहिजायेसमीपंमेनि ष्कामस्यात्मवेदिनः॥ निष्कामप्रियमात्मानंपृच्छंतीप्रीतिकारिणी॥ २४६ ॥ आश्रमेपुरतःसुभ्रुयथापूर्वम शंकिता॥ भवत्यामाभवेल्लज्जास्त्रीणांयास्तिनिसर्गतः॥ २४७॥ हंतजायेप्रियेतुभ्यंव्याख्यास्याम्यमृतंहितत्॥ त्वयापृष्टंममत्वंहिवीक्षमाणामुखांबुजं ॥ सावधानमनास्तद्वद्दत्तकर्णावधारय ॥ २४८ ॥ इत्युक्त्वायाज्ञव ल्क्यःसपरमानंदरूपतां॥ आत्मनोऽन्वयतस्तद्वद्व्यतिरेकादुवाचतां॥ २४९ ॥ अरेभवतिमैत्रेयिपतिस्तेहिप्रि यःसदा॥ जायाममतथात्वंचप्रियास्यतितरांबहु ॥ २५० ॥

यायाज्ञवल्क्यकांडेपंचमीकण्डिकासामधुकांडेचतुर्थी एवमयेपीति ॥ २४८ ॥ अथषर्ष्ठीनवत्याश्लोकैर्व्याकुर्वंस्तत्रात्मन्येवचित्तैका ग्र्यकर्त्तव्यतावोधनायात्मनःपरमानंदरूपतावोधकस्यसर्वंप्रियंभवतीत्यंतभागस्यार्थमाह इत्युक्तेतिचतुर्विंशतिश्लोकैः अन्वयःस्वसंबंधे नप्रियत्वप्रयोजकत्वरूपोव्यतिरेकःस्वसंबंधाभावेप्रियत्वाभावप्रयोजकत्वरूपस्ताभ्यामात्मनःपरमानंदरूपतामुवाचेति ॥ २४९ ॥ अरे इति अरेमैत्रेयिइदंभवतिप्रसिद्धं इदांकिं यत्तेमद्रूपःपतिःप्रियःप्रीतिकरोममचत्वंजायाप्रियासीति ॥ २५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवयोरिति परंतुइयंममतवचप्रीतिःस्वभिन्नस्यकामायोपकारायनभवतिकिंतुस्वस्यैवकामायेतिद्वयोरर्थः ॥ २५१ ॥ २५२ ॥ तत्रना
र्याःपतिगोचरप्रेम्णःस्वात्मार्थतांविशदयति आत्मनइति कामाग्न्युपशमद्वाराअन्नादिलाभद्वाराचात्मनःसुखायनार्याःपतिःप्रियोभवतीति
॥ २५३ ॥ एतद्व्यतिरेकेणस्फुटयति आत्मनःप्रतिकूलइति अन्यनारीसक्त्यादिनाप्रतिकूलेपत्यौतुनारीणांप्रीतिर्नदृश्यतेइत्यर्थः ॥२५४॥
पतिप्रेम्णोपितथात्वमाह जायायामिति कामाग्निशांतिद्वारापाकादिकृतिद्वाराचात्मोपकारायपतेर्जायायांप्रीतिरित्यर्थः॥२५५॥एतदपि

आवयोःप्रीतिरस्त्यर्थमितरेतरदेहयोः ॥ इतरेतरकामायनकथंचनभामिनि ॥ २५१ ॥ किंतुस्वस्यप्रियार्थंते
प्रियोस्मिपतिरात्मनः॥ ममापित्वंतथाजायाप्रियासिस्वात्मनःकृते॥ २५२॥ आत्मनःसुखमिच्छंत्यानार्याः
कामाग्निदीपनात्॥ अन्नवस्त्रादिलोभाच्चजायतेत्रपतिःप्रियः॥ २५३॥ आत्मनःप्रतिकूलेतुपत्यौप्रीतिर्नजा
यते॥ अन्यनार्यादिसंसक्तेनारीणांकर्हिचित्प्रिये ॥ २५४ ॥ जायायांप्रीतिमांस्तद्वत्पतिर्भवतिकामुकः॥ पा
कादिकृतिलोभाच्चनान्यथाकर्हिचित्प्रिया॥ २५५॥ आत्मनःप्रतिकूलायाभवेज्जायारतादिषु॥ नतस्यांप्रीति
मान्दृष्टःपतिरत्रकथंचन॥ २५६॥ आत्मैवप्रियएवायंजायेप्रियतमोमतः॥ स्वयंज्योतिःसदानंदःस्त्रियःपुंस
श्चसर्वदा ॥ २५७॥ जायापतीयथातद्वत्पुत्रवित्तगवादिकाः ॥ ब्रह्मक्षत्राभिधेजातीलोकाभूरादिकाअपि
॥ २५८ ॥देवावेदाश्चभूतानिस्थावराणिचराणिच॥ किंबहूक्तेनमैत्रेयिजगत्सर्वमिदंचयत्॥ स्वात्मनःसुख
दंसर्वंप्रियंस्यान्नेतरत्क्वचित्॥ २५९॥

व्यतिरेकेणविशदयति आत्मनःप्रतिकूलायेति रतादिषुरतप्रभृतिव्यापारेषु ॥ २५६ ॥ फलितमाह आत्मैवेति यथाशर्करास्वतोमधुराइ
तरेषांमधुरताधायकत्वान्मधुरतमाचतथात्माप्रियत्वात्प्रियतमत्वाच्चपरमानंदरूपइत्यर्थः ॥ २५७ ॥ उक्तन्यायमन्यत्राप्यतिदिशति
जायेति यथाजायापतीस्वात्मार्थंप्रियत्वेनोक्तौतथापुत्रश्चवित्तंचगवादयःपशवश्चब्राह्मणजातिश्चक्षत्रियजातिश्चभूरादयोलोकाश्चदेवा
श्चवेदाश्चस्थावरादिभूतानिचएतैरुपलक्षितंसर्वंजगच्चएतत्सर्वंस्वात्मोपकारार्थमेवप्रियंनान्यथेतिद्वयोरर्थः २५८ ॥ २५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेतरदित्युक्तमेवस्फुटयति पुत्रादयइति येपुत्रवित्तादयःप्रियत्वेनप्रसिद्धास्तेपिप्रतिकूलाःसंतःप्रियानभवंति अतःस्वकामायस्वस्यपित्रा
देःप्रयोजनायैवप्रियाः तेषांपुत्रादीनांप्रियायप्रयोजनायप्रियानभवंतीत्यर्थः ॥ २६० ॥ ननुकिमितिपदार्थानामात्मसंबंधेनप्रियत्वमुच्य
तेस्वभावादेवतत्किनस्यादितिशंकते यद्यपीति यद्यपिवर्णितंपतिजायादिरूपंसर्वंजगत्प्रतिकूलंस्थितंसन्मुदेमुदंजनयितुंयोग्यंनस्यात्अ
नुकूलंस्थितंतुमुदेस्यादितिसंबंधः तथाचस्वभावादेवप्रियत्वादिकमितिभावः ॥ २६१ ॥ अन्वयव्यतिरेकाभ्यामात्मोपकारकत्वलक्षणा
नुकूलत्वज्ञानमेवप्रियत्वप्रयोजकमित्युत्तरयति तथापीति दृश्यतेहिसुहृदोप्यनुकूलस्यप्रतिकूलतयाबुद्धस्याप्रियत्वं प्रतिकूलतयास्थित
स्यवैरिणोप्यनुकूलतयाबुद्धस्यप्रियत्वं तथाचतत्पतिजायादिकंचप्रतिकूलतयाग्रहात्ज्ञानान्नसुखदं अनुकूलतयाग्रहादेवचसुखदंभ

पुत्रादयःप्रियायेस्युःप्रतिकूलानतेप्रियाः ॥ ततएवस्वकामायप्रियास्तेषांप्रियायन ॥ २६० ॥ यद्यपीदंजग
त्सर्वंपतिजायादिकीर्तितं ॥ प्रतिकूलंमुदेनस्यादनुकूलमपिस्थितं ॥ २६१ ॥ तथापिप्रातिकूल्येनगृहीतंनसु
सुखायच ॥ आनुकूल्यग्रहादेवजंतूनांसुखकृद्भवेत् ॥ २६२ ॥ विनाशेदुःखदंसर्वंपतिजायादिकंजगत् ॥ अ
नुकूलमपिस्थित्यांततोनैवानुकूलता ॥ जडवर्गस्यकस्यापिविनात्मानंहिचेतनम् ॥ २६३ ॥ तथापिग्रहणंत
स्ययदिस्यादनुकूलतः ॥ तदाप्रियंभवेत्तत्तुनान्यथादेहिनःक्वचित् ॥ २६४ ॥

वेदितिसंबंधः स्वाभाविकत्वेत्वन्यथात्वंनस्यात् नहिस्वभावोभावानांव्यावर्त्ततेौष्ण्यवद्रवेरितिन्यायेनेतिभावः॥२६२॥ यदिचस्वभावतः
पदार्थानांप्रियत्वंस्यात्तदाऽतीतदशायामपिप्रियत्वंस्यान्नचतथादृश्यतइत्याह विनाशइति विनाशेसत्कार्यवादिप्रसिद्धेऽतीतताख्यपरिणा
मेसर्वंपत्यादिकंदुःखदंयत्स्थित्यांस्थितिकालेअनुकूलमपीति ततोनुकूलत्वस्यस्वाभाविकत्वव्यतिरेकदर्शनात्कस्यापिजडस्यात्मसंबंधा
नादरेणानुकूलतानैवास्तीतिसंबंधः ॥ २६३ ॥ आत्मोपकारकत्वज्ञानस्यत्वन्वयोदृश्यतइत्यतस्तदेवप्रियत्वप्रयोजकमित्याह तथापी
तितथापिप्रियत्वस्यस्वाभाविकत्वाभावेपितस्यपतिजायादिपदार्थस्यानुकूलतोऽनुकूलत्वेनयदिग्रहणंस्यात्तदातत्पत्यादिकंप्रियंभवेदिति
॥ २६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह पतीति स्वरूपतःस्वभावतःपत्यादिकंप्रियंनभवतिकिंतुस्वस्यात्मनो मुख्यप्रियत्वेनयत्सुखदत्वंस्वसंबंधिषुसुखत्वप्रयोजकत्वंतेनहेतुनाप्रियत्वंततश्चात्माप्रियतमइतिसंबंधः ॥ २६५ ॥ आत्मनःप्रियतमत्वंस्फुटयितुमप्रियंप्रियतरंचदर्शयति दुःखमिति दुःखंतत्साधनंचाप्रियं पत्यादिकंसुखसाधनत्वात्प्रियमित्युच्यते सात्विकांतःकरणवृत्तिरूपंसुखंतुतस्मात्सुखसाधनादधिकंप्रियंभवति तेनप्रियतरपदेनवक्तुंयुक्तंयोग्यमित्यर्थः ॥ २६६ ॥ तादृशसुखापेक्षयापिप्रियत्वादात्माप्रियतमइतिवक्तुमेवसुखस्यात्मापेक्षयापकर्षमाह सुखमपीति सुखमपिवृत्तिरूपंयत्प्रियंभवतितदात्मनःकामायस्फुटत्वरूपप्रयोजनायैवनसुखस्यप्रयोजनाय यतःशत्रोःसुखंविज्ञायमानमपिन

पतिजायादिकंतेननप्रियंस्यात्स्वरूपतः॥ किंतुस्वस्यप्रियत्वेनसुखदत्वेनहेतुना॥ आनंदात्माप्रियतमस्ततःसर्वस्यदेहिनः ॥ २६५॥ दुःखंतत्साधनंनैवप्रियंकस्यापिदेहिनः ॥ पतिजायादिकंयत्तुप्रियंतत्सुखसाधनं ॥ सुखंतस्मात्प्रियंतेनयुक्तंप्रियतरंसदा ॥ २६६॥ सुखमप्यात्मकामायप्रियंनसुखकामतः ॥ सदाविज्ञायमानंवैसुखंशत्रोर्नहिप्रियम् ॥ २६७ ॥ आत्मार्थंहिप्रियंतस्मात्सुखंप्रियतरंयतः॥ ततःप्रियतमःशश्वदानंदात्मातुदेहिनां॥ २६८॥ स्वयंज्योतिःसदानंदःपरमोब्रह्मणोपिच ॥ आनंदस्योपजीवंतिमात्रांब्रह्मादयोस्यहि ॥ २६९॥ परसंबंधरहितंभासमानंसदासुखं॥ स्वर्गानंदाधिकंस्वात्माभैत्रेय्येषोत्रदेहिनां॥ २७० ॥

प्रियंदृष्टमित्यर्थः सुखप्रेम्णःसुखार्थत्वेवैरिसुखेपिप्रेमास्यादितिभावः ॥ २६७ ॥ आत्मार्थमिति यतइतरापेक्षयाप्रियतरमपिसुखमात्मार्थंप्रियंततआत्माप्रियतमइतिसंबंधः ॥ २६८ ॥ फलितमात्मनोभासमानपरमानंदरूपत्वेनपरमपुरुषार्थत्वमाह स्वयमिति ब्रह्मणोहिरण्यगर्भानंदात्परमःसदातनोब्रह्मानन्दः हियतोस्यब्रह्मस्वरूपभूतस्यानंदस्यमात्रांलेशंहिरण्यगर्भादयउपजीवंतिआश्रित्यवर्ततेइत्यर्थः ॥ २६९ ॥ सचब्रह्मानंदआत्मरूपइत्याह परेति यत्ब्रह्मलोकांतस्वर्गानंदाधिकंपरसंबंधेनद्वैतेनरहितंसुखंतद्रूपोयमात्मेत्यर्थः ॥ २७० ॥ ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तविधयापरमानंदरूपात्मनःपरमपुरुषार्थत्वमितरत्रहेयत्वंचविज्ञायचित्तैकाग्र्यशालिनंप्रत्यात्मसाक्षात्कारायश्रवणादिविधायकस्य निदिध्यासितव्यइत्यंतवाक्यस्यार्थमाह अरेइतिचतुर्दशभिः हेमैत्रेयितस्मादात्मनएवपरमपुरुषार्थत्वात्अत्रात्मज्ञानेअधिकारिभिःशमादिगुणसंपन्नैरात्मसाक्षात्कारायाऽयमात्माब्रह्मब्रह्माहमस्मीत्येवंविधंश्रुतेर्वचोवाक्यजातमसकृत्श्रोतव्यं कुतः श्रोत्रियत्वादिलक्षणकगुरोर्मुखादितिद्वयोरर्थः॥२७१॥२७२॥ मननमाह वेदेति वेदवाक्याविरुद्धेनतर्केणविचारणरूपंमननंकुर्यात् कीदृशेनतर्केण व्यासादिभिः व्यासोविस्तार एकस्यकारणस्यनानारूपतयावस्थानमितियावत् आदिपदेनसमासरूपःकारणेकार्याणांप्रलयस्तथात्मनःसर्वावस्थास्वनुगमरूपोन्वयइतरेषांव्यतिरेकश्चगृह्यतेएवंविधपदार्थालोचनजन्येनअतएवात्मसाक्षात्काररूपप्रत्यक्षस्यसहकारिणाअसंभावनादिदो

अरेजायेप्रियेतस्मान्मैत्रेय्यत्राधिकारिभिः॥ करामलकवत्स्वात्मप्रत्यक्षज्ञानसिद्धये॥ २७१॥ आत्माब्रह्माहमस्मीतित्येवमादिश्रुतेर्वचः॥ श्रोत्रियब्रह्मनिष्ठाख्यगुरोर्वक्त्रारविंदतः॥ श्रोतव्यमसकृच्छांतदांतादिगुणयोगिभिः॥ २७२॥ वेदवाक्याविरुद्धेनतर्केणचविचारयेत्॥ व्यासादिभिःसमुत्थेनप्रत्यक्षस्थैर्यकारिणा॥ २७३॥ मनसोयोग्यतायास्यात्कारणंज्ञानसंततेः॥ एकस्मिन्विषयेचैकंजानीयात्सर्वदेहिनां॥ तामप्यात्मनिकुर्वीतवहिश्चारनिवारिणीम्॥ २७४॥ एवंतर्कैस्तथाध्यानैःसंदेहादिविवर्जितम्॥ आगत्यांतर्मनःकुर्यात्प्रत्यक्षंवाक्यमानतः॥ २७५॥

षवारकेणेत्यर्थः तदुक्तंगीतासु यदाभूतपृथग्भावमित्यादि व्याप्त्यादिभिरितिपाठेतर्कपदेनानुमानग्रहः आदिपदेनचपक्षधर्मतादिग्रहइति ॥ २७३ ॥ निदिध्यासनमाह मनसइति मनसोयाएकस्मिन्विषयेयोग्यताएकाग्रतातिशयरूपासाज्ञानस्यसाक्षात्कारस्यसंततेर्धारायाःकारणंभवति साकथंकर्तव्येत्याकांक्षायामाह एकमिति प्रथमंसर्वदेहिनांमध्येकंचिदेकंजानीयात्ध्यायेत् तदुक्तंपतंजलिना यथाभिमतध्यानाद्वेति पुनश्चतांचित्तयोग्यतामात्मनिकुर्याद्यथापुनश्चित्तस्यवहिश्चारोवहिर्मुखतानस्यादित्यर्थः ॥ २७४ ॥ एवंविधश्रवणादिसंस्कृतमनःसहकृतान्महावाक्यादात्मसाक्षात्कारोभवतीत्याह एवमिति संदेहोऽसंभावनाआदिपदेनविपरीतभावनाताभ्यांहीनंमनःअंतरागत्यप्रत्यक्प्रवणतांलब्ध्वामहावाक्यरूपप्रमाणफलंप्रत्यक्षमात्मसाक्षात्कारंजनयेदित्यर्थः ॥ २७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुस्वतंत्रमेवमनआत्मसाक्षात्कारंकुतोनजनयेदितिशंकांवारयति चक्षुरादीनीति मानमबाधितार्थगोचरवृत्तिरूपंअमानंचबाधितार्थगो
चरवृत्तिरूपंतयोःसमानिपक्षपातरहितानियथाचक्षुरादीनिबर्हिरिंद्रियाणिप्रसिद्धानि नहिचक्षुषःपीतंशंखंनपश्यामीत्यादिरूपआग्रहः
तथामनसोपिवृत्त्युपादानस्यप्रमाणाप्रमाणरूपवृत्तिषुनपक्षपातइत्यर्थः महावाक्यंतुप्रमाणमेवजनयतीतितदेवप्रधानमितिभावः॥२७६॥
 तर्हिस्वतंत्रंवाक्यमेवसाक्षात्कारंजनयेदित्याशंकामपिवारयन्नाह वस्तुयोगइति यथाचक्षुरादिनाजन्येप्रत्यक्षेचक्षुरादेर्विषयेणयोगोऽपे
क्षितस्तथामानसेमनःपरिमाणतयामनसिवर्त्तमानेप्रत्यक्षेपिमनसोविक्षेपवस्तुनासाकंयोगोऽपेक्षितइत्यर्थः अयंभावः महावाक्येनाप्या
त्मसाक्षात्काररूपावृत्तिर्मनस्येवजननीयातस्याश्चसाक्षात्कारत्वंज्ञेयेनमनःसंयोगमंतरेणनघटतइत्यतोमनःसंयोगोपिवाक्यस्यापेक्षितइ

चक्षुरादीनियद्वत्स्युर्मानामानसमानिहि॥ मनोपितद्वदेवस्यान्मानामानसमंहितत्॥ २७६॥ वस्तुयोगोयथा
हेतुःप्रत्यक्षेचक्षुरादिजे॥ मनोयोगस्तथाहेतुःप्रत्यक्षेमानसेपिच ॥ २७७ ॥ मननध्यानसंयुक्तंमनोत्रश्रुति
मानतः॥ प्रत्यक्षंजनयेज्ज्ञानमानंदात्मनिनिर्द्वये ॥ २७८ ॥ प्रत्यक्षज्ञानउत्पन्नेआत्माऽविद्याविनश्यति ॥
तन्नाशान्नाशमायातिदुःखंसर्वमिदंजगत् ॥ २७९ ॥ स्वयंज्योतिस्ततस्तस्यभासाद्वैतविवर्जितः ॥ आनंदा
त्माप्रियतमआविर्भवतिसर्वतः ॥ २८० ॥ अभ्रादिनाशतोयद्वद्गगनंभातिकेवलं ॥ अविद्यानाशतोभाति
त्यानंदात्मैवमद्वयः॥ २८१ ॥ स्वप्नाद्बुद्धोयथास्वाप्नंदुःखंमिथ्येतिमन्यते ॥ आत्मज्ञानात्तथाविद्वानिदंमिथ्ये
तिमन्यते॥ २८२ ॥

ति॥२७७॥ फलितमाह मननेति मननिदिध्यासनाभ्यांयुक्तंमनःश्रुतिरूपेणप्रमाणेनआत्मनिसाक्षात्कारंस्फुटीकुर्यादित्यर्थः ॥२७८॥
ततःकिंभवतीत्यतआह प्रत्यक्षेति दुःखंदुःखरूपंजगत्कर्तृत्वादीति ॥ २७९ ॥ स्वयमिति सविलासाज्ञाननिवृत्त्यनंतरंस्वयंज्योतिरानंद
रूपआत्मातस्याधिकारिणआविर्भवति कीदृशः भासास्वरूपविकासेनद्वैतविवर्जितः अतएवानंदरूपःप्रियतमश्चेति ॥ २८० ॥ अवि
द्यानाशेविशदात्मभानंदृष्टांतेनस्फुटयति अभ्रादीति अभ्रंमेघः आदिपदेननीहारादिग्रहः ॥ २८१ ॥ जीवन्मुक्तस्यभासमानमपिद्वैतंमि ॥१८॥
थ्यात्वेननिश्चितत्वान्नाद्वैतविज्ञानविरोधीतिदर्शयन्द्वैतस्यमिथ्यात्वंसदृष्टांतंव्युत्पादयति स्वप्नादिति इदंदृश्यजातं॥ २८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टांतांतरमाह महाराजइति यथाचक्रवर्तीराजानिर्भयोपिस्वप्नआगतोऽकारणंभयंपश्यतिप्रतिबुद्धस्तुतत्भयंनपश्यति ॥ २८३ ॥ दार्ष्टां तिकेयोजयति आत्माज्ञानादिति स्पष्टम् ॥ २८४॥ अथकंडिकाशेषस्यात्मज्ञानात्सर्वज्ञानप्रतिपादकस्यार्थसंभावनायप्रपंचस्यात्मसत्ता तिरिक्तसत्ताराहित्यंमिथ्यात्वेनप्रपंचयति गंधर्वेतिसप्तदशभिः यथाकाशेगंधर्वनगरमविद्ययैवजायतेतथात्मनिजगदपि ॥ २८५ ॥ तस्या तिरिक्तसत्ताभावमाह गंधर्वनगरमिति गंधर्वनगरंयद्वन्नासीदिति यथागगनेगंधर्वनगरंकालत्रयेपिनास्ति तत्रवैधर्म्यैणदृष्टांतमाह नगर मित्यादिना यथापिनाकिनःशिवस्यक्षेत्रभूतंनगरंवाराणसीसंज्ञंभूमौस्थितमित्यर्थः वस्तुतस्तुवियत्स्थासापुरीदिव्यातेनयोगबलाद्धृतेति

महाराजोयथास्वप्नेनिर्भयोभयमागतः॥ पश्यत्यकारणंपश्चात्प्रतिबुद्धोनपश्यति ॥ २८३ ॥ आत्माज्ञानात्त थादुःखमानंदात्मात्रमन्यते॥ आत्मज्ञानात्पुनःस्वस्मिन्निदंमिथ्येतिमन्यते ॥ २८४ ॥ गंधर्वनगरंयद्वज्जाय तेखेत्वविद्यया॥ अविद्ययाजगत्सर्वमात्मन्येवंप्रजायते॥ २८५॥ गंधर्वनगरंयद्वन्नासीन्नास्तिनभाव्यपि ॥ गगनेनगरंयद्वद्भूमौक्षेत्रंपिनाकिनः॥ २८६॥ आत्मन्येवंजगत्सर्वंनासीन्नास्तिनभाव्यपि ॥ दुःखरूपंहिमैत्रे यिनिर्दुःखेनिर्द्वयेसति॥ २८७॥ दोषात्तैमिरिकोयद्वच्चंद्रंभिन्नंप्रपश्यति ॥ आत्मानंचतथाभिन्नंदोषादेवाव लोकयेत्॥ २८८॥ अंगुल्यानयनंयद्वद्विष्टभ्यस्वस्यबालकः॥ केशोंड्रकमसत्पश्येद्गगनेचित्ररूपकं ॥ २८९॥ जगदेतदसद्दुःखमानंदात्मनिकेवले॥ असत्याविद्ययाबालतुल्यएषप्रपश्यति॥ २९० ॥

काशीप्रस्तुत्यकालीपुराणोक्तेः तथा गच्छवाराणसींव्यासयत्रविश्वेश्वरःशिवः नतत्रयुगधर्मोस्तिनैवलग्नावसुंधरेत्यादित्यपुराणोक्तेश्वसा धर्म्यैणापिदृष्टांतइतिबोध्यम् ॥ २८६ ॥ दार्ष्टांतिकेयोजयति आत्मनीति नहिनिर्दुःखेदुःखरूपंजगत्संभवतीतिद्वितीयदलार्थः ॥ २८७॥ आत्मभेदमिथ्यात्वमपिदृष्टांतेनस्फुटयति दोषादिति तैमिरिकस्तिमिराख्यरोगवान्यथाचंद्रमनेकंदोषादेवपश्येत्तथाज्ञोप्यात्मानमिति ॥ २८८ ॥ दृष्टांतांतरमाह अंगुल्येति केशोंड्रकंमयूरपक्षतंतुनिभतंतुसमुदायरूपंयथाबालकोंऽगुल्यानेत्रनिरोधेनपश्यतितथाऽसन्मिथ्या भूतंदुःखरूपंचजगदसत्यामिथ्यारूपयाऽविद्ययाबालवन्मूढोयंजीवःपश्यतीतिद्वयोरर्थः ॥ २८९ ॥ २९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुप्रपंचस्याविद्यकत्वेअविद्याविरोधिविद्याशालिनांप्रपंचोनभासेतेतिशंकामपिदृष्टांतेनपरिहरति दिशामिति यथादिग्भ्रमोविदुषामपि दृष्टस्तथात्मनिसंमोहोविपरीतदर्शनंविदुषामपिसममिति ॥ २९१ ॥ प्रारब्धसंरक्षिताविद्यालेशरूपदोषवशाद्विदुषामपिप्रपंचभानंदृष्टांतेनोपपादयति निश्चितोपीति यथापित्तोद्रेकेसतिधवलत्वेननिश्चितःशंखःपीतोभातिगुडश्चमधुरत्वेननिश्चितस्तिक्तःकटुर्भातितथानंदात्मापिदुःखात्मकप्रपंचरूपेणभातिभेददृशाभेदज्ञानेनसहेतिशेषः अधुनाजीवन्मुक्तिकालेइतिद्वयोरर्थः ॥ २९२ ॥ २९३ ॥ अथमूढस्य

दिशांमोहोयथालोकेविदुषामपिजायते॥ आनंदात्मनिसंमोहोविदुषामेवमस्त्यपि॥ २९१ ॥ निश्चितोपि यथाशंखोधवलोभातिपित्ततः॥ पीतोगुडस्तथातिक्तोमधुरोपिविभातिहि॥ २९२ ॥ स्वयंज्योतिस्तथैवाय मानंदात्मासुनिश्चितः॥ दुःखरूपेणमैत्रेयिभातिभेददृशाधुना॥ २९३॥ रिंगत्तरंगतरलंजलंभातियथोषरे॥ तृषार्त्तस्यस्वदोषेणमध्यान्हादिषुगच्छतः॥ २९४॥ एवंविषयसंजातमृगतृष्णस्यदुर्धियः॥ आनंदात्मनिनिर्भेदेभेदएषप्रतीयते॥ २९५॥ शुक्तिकायांयथारूप्यंभातिलुब्धस्यसर्वदा॥ आनंदात्मन्येवमेतद्भातिभेददृशोजगत्॥ २९६ ॥ मंदांधकारेपुरुषोरज्ज्वांपश्यतिशेषकं॥ अथवास्थाणुगंचोरंपश्यत्येषस्वभीतितः ॥ २९७॥ आनंदात्मनिनिर्दुःखेस्वप्रकाशेतथाजडं॥ दुःखरूपमनात्मैतन्मूढःपश्यतिसर्वथा॥ २९८॥ पतिजायादिकंविश्वमात्मनोन्यन्नविद्यते॥ यथास्वप्नेतथैवैतन्नास्तिजागरणेपिच॥ २९९॥

प्रपंचदर्शनंदृष्टांतैर्विशदयति रिंगदितिपंचभिः रिंगंतइतस्ततःप्रचलंतोयेतरंगास्तैश्चंचलंजलंयथातृषार्तस्यभातितथासतृष्णस्यअज्ञस्यनानायोनिमयःप्रपंचआत्मनीतिद्वयोरर्थः॥ २९४ ॥ २९५॥ शुक्तिकायामिति स्पष्टं॥ २९६ ॥ मंदांधकारेइति शेषकंसर्पं स्वभीतितः स्वचित्तगतभयरूपदोषात्॥ २९७॥ आनंदात्मनीति एतज्जगदनात्मनिःस्वरूपंमिथ्याभूतमितियावत्॥ २९८ ॥ पतीति यथाचस्वप्नकल्पितंपत्यादिकमसत्यंतथाजाग्रत्यपीति॥ २९९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह आत्मैवेति यतःसर्वमात्मैवातस्तस्यात्मनःप्रत्यक्षरूपंज्ञानंत्वंसाधय केन संयुक्तेनसमाहितेनमनसासहकृतंयत्श्रुतिवाक्यंतेन तथाऽभयेन अस्पर्शयोगोनामैषदुर्दर्शःसर्वयोगिभिः योगिनोबिभ्यतिह्यस्मादभयेभयदर्शिनइतिप्रसिद्धभयाकरणेन तत्फलंसकलसंसार दुःखनिवृत्तिरितिद्वयोरर्थः ॥ ३०० ॥ ३०१॥ एवमवतारितस्यतस्याक्षरार्थमाह आत्मेत्यष्टभिः यथागंधर्वनगरादिकंखमाकाशमात्रंत थासर्वमिदमात्मैवयस्माद्भवतिततआत्मनःसर्वस्यपारमार्थिकस्वरूपत्वात्त्वयाकृतैरात्मनःश्रवणाद्यैर्जगतोपिश्रवणादिकंकृतंस्यात् हिय तआत्मनःसंबंधियत्श्रवणादिकंतज्जगतोपिसंबंधिस्यात् यतस्तत्सर्वंजगदात्मनिकल्पितत्वात्तन्मात्रमितिद्वयोरर्थः ॥ ३०२ ॥ ३०३ ॥ एवमात्मनिज्ञातेतद्विवर्तस्यजगतःस्वरूपजातमानुषंगिकतयाज्ञातंभवतीत्युक्तं प्राधान्येनतुनानाविशेषंजगन्नज्ञेयं अविहितत्वादपुरुषार्थ

आत्मैवैतज्जगत्सर्वंपतिजायादिभेदवत्॥ मैत्रेयितस्यविज्ञानंप्रत्यक्षंत्वंप्रसाधय॥ ३००॥ अभयेनचसंयु क्तंमनसाश्रुतिवाक्यतः ॥ ततोदुःखमिदंजायेपुनर्नैवगमिष्यसि ॥ ३०१ ॥ आत्मासर्वमिदंयस्माद्गंधर्वनग रादिकं॥ यथाखंततएवात्मश्रुत्याद्यैर्जगतोपिते॥ ३०२॥ श्रवणंमननंध्यानंदर्शनंचात्मनोहियत्॥ सर्वंतज्ज गतोपिस्यात्सर्वमात्मनितद्यतः ॥ ३०३॥ अपिसर्वस्यविज्ञानउपयोगोनविद्यते ॥ अर्थज्ञतापिनैवस्यात्सु खंपरयादिवत्ततः॥ ३०४ ॥ उपयोगेपिसर्वस्यनशक्यंश्रवणादिकं ॥ कर्तुंततोनतज्ज्ञेयंदुःखदंस्वात्मनःस दा ॥ ३०५ ॥

त्वादशक्यत्वाच्चेत्याह अपिसर्वस्येतिद्वाभ्यां सर्वस्यसविशेषस्यजगतोविज्ञानेविज्ञानरूपक्रियायामुपयोगःसंबंधबोधकंवाक्यंसर्वंजानी यादेवमाद्याकारकंनविद्यते तथाजगतोज्ञानेसतिअर्थज्ञतापुरुषार्थज्ञतापिनास्ति जगतःसुखदुःखाभावभिन्नत्वेनपुरुषार्थरूपत्वाभावा दितिभावः नापिजगत्पुरुषार्थसाधनमित्याह नैवेति ततोजगतोरूपविशेषेभ्यःसर्वेभ्यःसुखंनैवस्यात्जायेत यथापतिजायादिभ्यःसुखं जायतइतिवैधर्म्यदृष्टांतः नहिहिमालयावयवपाषाणानांप्रत्येकज्ञानात्किंचित्सुखंदृश्यतइतिभावः ॥ ३०४ ॥ अशक्यत्वमाह उपयो गइति उपयोगेपिसकलकार्यस्याद्दृष्टारब्धत्वेनसुखाद्युपयोगेपिसर्वस्यश्रवणादिकमशक्यंप्रत्युतात्मनोदुःखदंचक्लेशरूपत्वादतस्तज्जगतो विशेषरूपजातंनज्ञेयमितिसंबंधः ॥ ३०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथचेदिति अथेतिपक्षांतरे यदित्वंस्त्रीस्वभावात्कुतूहलरूपादिदंसर्वंजगत्ज्ञातुमिच्छसितथापितस्यसर्वजगतोज्ञानेऽयमेवोपायः अयं कः यदात्मनःश्रवणादीनांकरणमिति यतस्तदात्मीयंश्रवणादिकंतस्यजगतोपिस्यादित्यर्थः ॥ ३०६ ॥ उपादानंहिविकाराणांपारमार्थिकंरूपंतज्ज्ञानेचसर्वेविकाराज्ञायंतइत्येतद्दृष्टांतेनस्फुटयति मृत्तिकायाइतिद्वाभ्यां यथामृदोज्ञानात्सकलंमृत्कार्यंघटादिरूपंज्ञायतेमृदभिन्नत्वात् कीदृशंकार्यं व्यवहितमपि व्यवधानंदेशादिभिस्त्रिधा तत्रदेशेनयथादेशांतरस्थे कालेनयथातीतादौ स्वभावेनयथापरोक्षेद्व्यणुकादौ इतिद्वयोरर्थः॥३०७॥३०८॥दार्ष्टांतिकेयोजयति आत्मेति नापरंअभिन्नं यतःततआत्मनः श्रवणादिहेतुकज्ञानाज्ज्ञायतेइति॥३०९

अथचेत्त्वमिदंज्ञातुंस्त्रीस्वभावात्समिच्छसि॥ तथापितस्यविज्ञानउपायोयंनचापरः॥ आत्मनःश्रवणादीनां करणंतस्यतद्भवेत्॥ ३०६॥ मृत्तिकायास्तुविज्ञानाद्यथाविज्ञायतेनृभिः॥ घटादिसकलंतस्याःकार्यंव्यवहितंचयत्॥ ३०७॥ देशकालस्वभावैर्हियत्स्याद्व्यवहितंसदा॥ ज्ञायतेमृन्मयंसर्वंमृत्कार्यंनमृदोऽपरं॥ ३०८॥ आत्मकार्यंजगत्सर्वमात्मनोनापरंतथा॥ ज्ञायतेस्वात्मनोज्ञानात्श्रवणादेःसदाप्रिये ॥ ३०९ ॥ अपिभेददृशांपुंसामिहलोकेपरत्रवा॥ नसुखंविद्यतेजायेकुतोमोक्षोभविष्यति॥ ३१०॥ आत्मवद्यदिजायेयंपत्यादिपुनवर्त्तते॥ पतिर्वापिचजायादौततस्तेसंत्यजंतितं ॥ ३११ ॥ पतिःपुत्रस्तथावित्तंपशवोविविधाअपि ॥ नारींजहतिविज्ञायस्वात्मनोभेदकारिणीं ॥ ३१२॥ पुत्रादिसहितातद्वत्पतिंनारीत्यजेद्धिया ॥ स्वस्मिन्भेददृशंज्ञात्वानिस्पृहातत्रसर्वदा॥ ३१३॥

भेदेनदर्शनस्यानर्थहेतुताबोधिकायाःसप्तमकंडिकायाअर्थंप्रपंचयति अपिभेदेतित्रिंशच्छ्लोकैः किंचभेददर्शिनांलोकद्वयेसुखमपिदुर्लभं किमुतमोक्षइत्यर्थः ॥ ३१० ॥ तत्रेहलोकेभेददर्शिनांसुखाभावंस्फुटयति आत्मवदिति तेभेदेनदृष्टास्तंभेददर्शिनंत्यजंतीति तथाचश्रुतौ परादानपदेननिरसनमुच्यतेतच्चस्वरूपाद्बहिष्करणरूपमनादरेपर्यवस्यतीतिबोध्यम् ॥ ३११ ॥ पतिरिति तथापत्यादयोनारींत्यजंति कीदृशीं स्वस्माद्भेदंवैषम्यंकुर्वाणां ॥ ३१२ ॥ पुत्रादीति तथानार्यपिभेददर्शिनंपतिंज्ञात्वाधियाबुद्ध्यात्यजेत्उपेक्षेत ॥ ३१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेतनेति स्त्रीपुंसवपुःस्त्रीरूपःपुंरूपोवाजनोमनुष्योजडंचेतनंवावस्तुयावदात्मवत्पश्यन्पालयेत्तदातत्सुखदंभवति यदितुद्वेषप्रयोजकंतत्रभे दंपश्यतितदातस्यभेददृष्टवस्तुनोवियोगादिप्रयुक्तंदुःखंप्राप्नोतीतिद्वयोरर्थः ॥ ३१४ ॥ ३१५ ॥ ततइति योहियद्रूपोभवतिसतद्विपरी तरूपेणदृष्टःकुप्यतीतिन्यायेनात्मभेददृष्ट्याऽपकारकत्वदर्शनेनपत्यादीनामात्मैवरूपमन्वयव्यतिरेकाभ्यांसिद्धमित्यत्रमयानवक्तव्यंकिंतू क्तमेवेत्यर्थः ॥ ३१६ ॥ पतिजायेति यथाभेददृष्टेःपत्यादिकंदुःखदंतथाब्राह्मणादिजातिरप्यद्वितीयरूपादात्मनोभिन्नतयादृष्टास त्येतस्माद्भेददर्शिनोऽपयातिविमुखीभवतिअपकारंकरोतीतियावत् लोकद्वयेपीत्यर्थः जातेरात्मभेददर्शनाकारस्त्वहंब्राह्मणजातिरेवा

चेतनाचेतनंवस्तुयावदात्मसमंजनः ॥ स्त्रीपुंसवपुरेषोत्ररक्षयेत्तावदेवतत् ॥ ३१४ ॥ सुखदंतस्यचेद्भेदमेष पश्यतिमंदधीः ॥ तस्यदुःखमवाप्नोतिवियोगादिसमुत्थितं ॥ ३१५ ॥ ततआत्मैवलोकेस्मिन्पतिजायादि कंस्थितं ॥ अन्वयव्यतिरेकाभ्यांनवक्तव्यंमयात्रतत् ॥ ३१६ ॥ पतिजायादिकंयद्वद्भेददृष्टेर्हिदुःखदं ॥ ब्रह्मक्ष त्राभिधेजातीआत्मनोऽन्येविलोकिते ॥ एतस्मादपयातस्तेजन्मन्यस्मिन्परत्रच ॥ ३१७ ॥ पातित्यादिसमुद्भूत दोषादस्मिन्द्विजन्मनि ॥ पराकुरुतएतेतमात्मनोभेददर्शिनं ॥ ३१८ ॥ जन्मांतरेत्वसंप्राप्यास्वस्यदीनतमंज नं ॥ पराकुरुतएवंतेभेदिनंदुःखकारणं ॥ ३१९ ॥ यथाजातीतथालोकादेवावेदाश्चसर्वदा ॥ लोकद्वयेपिपुरु षमपाकुर्वंतिभेदिनं ॥ ३२० ॥

स्मिनब्रह्मेत्यादिरूपोबोध्यः ॥ ३१७ ॥ तत्कृतमनर्थमभिनयति पातित्येति पातित्यंयोन्यथासंतमात्मानमित्यादिप्रसिद्धदुष्कृतप्रसंग स्तत्कृतोदोषःपंचक्लेशप्रचयः पराकुरुतःअपकुरुतः एतेब्रह्मक्षत्रजाती ॥ ३१८ ॥ जन्मांतरेत्विति जन्मांतरेतुस्वस्यब्राह्मणादिजातेर्दुर्लभ त्वेनापकृष्टजातिप्राप्त्येतियावत् दीनतमंकुर्वत्यौतेब्रह्मक्षत्रजातीपराकुरुतः कं भेदिनंभेददर्शिनं कीदृशं दुःखकारणंस्वस्यैवस्वयंदुःखहेतु भूतमित्यर्थः ॥ ३१९ ॥ यथाजातीइति यथाब्राह्मणक्षत्राख्यजातीअपाकुरुतस्तथादेवादयोपिभेददर्शिनमपाकुर्वंतीति ॥ ३२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकापाकरणफलंदर्शयति लोकापाकरणादित्यादिना तत्रभेददर्शनकुपितैःस्वर्गादिलोकैःकृतंयदनादरणात्मकमपाकरणंतत्फलंनरकप्रा
प्तिः तादृशदेवकृतापाकरणफलंतुनारकीयदुःखप्राप्तिरित्यर्थः ॥ ३२१ ॥ लोकापाकरणादस्मिन्निति तथाऽस्मिन्नेवलोकेश्ववद्दीनतया
भ्रमणंलोकापाकरणफलंबोध्यं वेदापाकरणेतुयद्दुःखमवाप्नोतितदुच्यतइतिशेषः ॥ ३२२ ॥ वेदापाकरणमिति वेदापाकरणंभेददर्शन
कुपितैर्वेदैःकृतंयदपाकरणंतत्फलमितियावत् तदस्मिन्परस्मिन्वाजन्मनिबोध्यं तत्फलंकिमात्मकमित्याकांक्षायामाह शूद्रादीत्यादि शू
द्राद्यपकृष्टजातिलाभस्त्रैवर्णिकानांव्रात्यत्वस्यसंस्कारराहित्यरूपस्यादिपदग्राह्यपानित्यस्यवाप्राप्तिःफलतयाबोध्येत्यर्थः ॥ ३२३ ॥ प

लोकापाकरणादेषनरकान्प्रतिपद्यते ॥ देवापाकरणाद्दुःखंयातितत्रापिदारुणं ॥ ३२१ ॥ लोकापाकरणाद
स्मिन्लोकेभ्रमतिसर्वदा ॥ श्ववद्दुःखमवाप्नोतिवेदापाकरणात्तथा ॥ ३२२ ॥ वेदापाकरणंज्ञेयमस्मिन्वा
परजन्मनि ॥ शूद्रादिजातिमांस्तद्वद्व्रात्यादिर्वात्रिवर्णभाक् ॥ ३२३ ॥ पदवाक्यस्वरादेर्वान्यूनतोच्चारणेस
ति ॥ स्वाधीनोच्चारणानैतेभवेयुर्वाकदाचन ॥ ३२४ ॥ अर्थज्ञानादिशून्यत्वंतेषुवासर्वदाभवेत् ॥ विस्मृति
र्वापितेषांस्यादर्थतःपाठतोपिवा ॥ तदुक्ताकरणंवापिकारणैर्बहुधैवतत् ॥ ३२५ ॥ एवंभूतानिसर्वाणिस्था
वराणिचराणिच ॥ पराकुर्वंतिसततंह्यात्मनोभेददर्शिनं ॥ ३२६ ॥ भूतैःपराकृतिर्ज्ञेयातत्तज्जातिसमुद्भवे ॥
कर्मभिर्मानसैर्वाग्भिःप्राणिभिःस्थिरजंगमैः ॥ ३२७ ॥ अपकारस्यकरणमुपकारस्यचाकृतिः ॥ लोकद्वये
पिसर्वत्रसर्वथासर्वदैवहि ॥ ३२८ ॥

देति तथात्रैवर्णिकानांवेदाध्ययनेपदादीनांन्यूनतासातत्फलं तथाएतेपदादयःस्वाधीनोच्चारणाःसम्यगुच्चारणविषयायन्नभवेयुरेतदपि
तत्फलमित्यर्थः ॥ ३२४ ॥ अर्थेति अध्ययनेजातेपियत्तेषुपदादिष्वर्थज्ञानतद्विनियोगादिज्ञानशून्यत्वंयाचतेषांपदादीनांपाठादिविस्मृति
र्यच्चतदुक्तस्यवेदविहितस्याकरणंतत्सर्वंतत्फलमित्यर्थः ॥ ३२५ ॥ एवंभूतानीति यथाउक्तालोकादयोभेददर्शिनमपाकुर्वंतितथाभूता
निप्राणिनःसर्वेप्यपाकुर्वंतीति ॥ ३२६ ॥ भूतैःपराकृतिरिति भूतैःकृतापराकृतिरपकारोयमेवबोध्यः अयंकः यल्लोकद्वयेतत्तज्जातिषुप्रा
णिभिःकर्तृभिःशरीरवाङ्मनोभिःकृत्वाप्रतिकूलाचरणमनुकूलानाचरणंचेतिद्वयोःसंबंधः ॥ ३२७ ॥ ३२८ ॥ ॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंबहुनासर्वंजगत्पंचभूतात्मकंभेददर्शिनमपाकरोतीत्याह एवंसर्वमिति ॥ ३२९ ॥ अपकारोनामदुःखकरणमितिदर्शयन्नेवोक्तंस्फुटय
ति यद्यदिति अयमज्ञोयद्यद्वस्तुजडंचेतनंवास्वस्माद्भेदेनपश्येत्तत्तदस्यदुःखंकरोतीति ॥ ३३० ॥ अप्राप्त्येति तथाप्रियरूपंवस्तुप्राप्त्यास्व
संबंधेनदुःखकरमित्युत्तरार्द्धार्थः ॥ ३३१ ॥ प्राप्तस्यापिप्रियस्यदुःखदत्वंनानानिमित्तप्रयुक्तंदर्शयति केनचिदिति केनचित्प्रतिबंध
केनभोगाभावात्तथान्यत्रगतौगमनेसतियःस्वस्माद्विच्छेदोवियोगस्तस्मात्तथानाशाद्वाप्रियंदुःखकरमित्यर्थः॥ ३३२ ॥ एवमिति यतएव

एवंसर्वंजगत्पंचमहाभूतसमन्वितं॥ पराकरोतिसततमात्मनोभेददर्शिनं॥ ३२९॥ यद्यद्भेदेनसंपश्येदेषस्व
स्माद्विमोहितः ॥ तत्तद्दुःखंकरोत्यस्यजडंवाऽजडमेववा ॥ ३३० ॥ अप्राप्त्यादुःखदंज्ञेयंप्रियंसर्वशरीरि
णां॥ लोकद्वयेतथाप्राप्त्यादुःखमेतत्करोतितत् ॥ ३३१ ॥ केनचिद्विनिमित्तेनभोगाभावात्तथागतौ॥ अ
न्यत्राप्यथवास्वस्माद्विच्छेदान्नाशतोपिवा॥ ३३२ ॥ एवंसर्वमपाकुर्याद्भेददृष्टंजडाजडं ॥ द्रष्टव्यंपरमंनैतद्द्र
ष्टव्यंकर्हिचित्क्वचित्॥ ३३३ ॥ एषभेददृशांदोषोलोकद्वयउदाहृतः ॥ एतद्दोषात्तथाजायेनद्रष्टव्यस्त्वयाहि
सः॥ ३३४॥ विपरीतदृशांयस्माद्दुःखंभवतिदारुणं॥ विपरीतमिदंज्ञानंत्यक्तव्यंसर्वथाततः ॥ ३३५॥ स्व
सजातिविजात्युत्थभेदत्रयविवर्जितः॥ आनंदात्मास्वयंज्योतिःसम्यग्ज्ञानमितीरितं ॥ ३३६ ॥ एतस्मादा
त्मनोभिन्नंयद्यत्पश्यतिकिंचन॥ विपरीतंभवेदेतज्ज्ञानंभेदावलोकनात् ॥ ३३७॥

मुक्तविधयासर्वंभेदेनदृष्टमपाकुर्यात्ततएतद्भेदविशिष्टंवस्तुनद्रष्टव्यंकिंतुयत्परमंसर्वभावानांसर्वोत्कृष्टंरूपंब्रह्मपदाभिधेयंतदेवद्रष्टव्यमिति
संबंधः ॥ ३३३॥ तत्रनैतद्द्रष्टव्यमित्युक्तांभेददर्शनस्यानर्थकारितांविशदयति एषइतिद्वाभ्यां एषसर्वापकारकत्वरूपोदोषोभेददृशांयतो
भवतिअतःसभेदस्त्वयानद्रष्टव्यः ॥ ३३४ ॥ विपरीतेति स्पष्टम् ॥ ३३५ ॥ द्रष्टव्यंपरममित्येतत्स्फुटयति स्वसजातीति अद्वितीयत्वादा
नंदरूपःस्वप्रकाशश्चायमात्माइत्याकारकमेवज्ञानंसम्यगित्युक्तंश्रुतिषु ॥ ३३६ ॥ द्वैतावगाहितुसर्वमेवज्ञानंभ्रांतिरूपमित्याह एतस्मादि
ति भेदस्यमिथ्याभूतस्यावलोकनादवगाहनात् ॥ ३३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माद्ब्राह्मणजात्यादिकंसर्वंब्रह्मैवेतिनिश्चितमित्याह ब्रह्मक्षत्रमिति ॥३३८॥उपसंहरति आनंदात्मेति स्पष्टम् ॥३३९॥एतावताश्रवणरी तिःप्रपंचिताअथमननरीतिप्रदर्शकस्याष्टम्यादिकंडिकाषट्कस्यतात्पर्यार्थमाह जडाजडमितिद्वाभ्यां जडाजडंसर्वंजगदस्मिन्वर्णितेआत्म न्येवास्तितत्सत्तयैवसत्तावत्सत्तिष्ठतितथाऽस्मादेवात्मनोजायतेतथात्रैवात्मनिलीयते विश्वंलीयतइतिकिमुवाच्यंयतोविश्वभ्रमोपादानभू ताऽविद्याप्यत्रात्मनितत्त्वज्ञानेजातेसतिलीयतेअतआत्माऽद्वितीयइतिशेषः तत्रस्थित्यादिकालेष्वात्मनोऽद्वितीयत्वेनमनसोयत्स्थैर्यमसं भावनानिरासेनस्थिरत्वंतद्धेतुःफलंयेषांतादृशान्दृष्टांतान्ब्रवीमीतिद्वयोरर्थः ॥ ३४० ॥ ३४१ ॥ तत्रस्थितिकालेदृष्टांतप्रदर्शकस्यक

ब्रह्मक्षत्रमतोलोकादेवावेदाःसभूतकाः॥ सर्वंजडाजडंचैतद्ब्रह्मैवेत्यवधारय॥ ३३८ ॥ आनंदात्माततोब्र ह्मनिर्द्वयोयंमहेश्वरः ॥ ब्रह्मक्षत्रादिकंयस्मात्ततोन्यन्नैवविद्यते ॥ ३३९ ॥ जडाजडमिदंविश्वमस्मिन्नऽस्या त्मनस्तथा॥ जायतेलीयतेचात्रसदैतन्निखिलंप्रिये ॥ ३४० ॥ अविद्याप्यत्रसंजातआत्मज्ञानेविलीयते ॥ दृष्टांतांस्तत्रतेवक्ष्येमनसःस्थैर्यहेतुकान्॥ ३४१ ॥ तामसाराजसाभावाःसात्विकाश्चत्रिधास्थिताः ॥ आत्म नोभेदरहिताःस्थितिकालेयतःप्रिये॥ ३४२ ॥ भेरींशंखंतथातंत्रींदृष्टांतान्वच्मिभामिनि ॥ मातेभवतुसंमो हःस्थितौमेविदुषोगिरा ॥ ३४३ ॥ भेरीशंखस्तथावीणाक्रूरमध्यममंजुलान् ॥शब्दान्कुर्वंतिसततंनिमित्ते सतिभामिनि ॥ ३४४ ॥

ण्डिकात्रयस्यार्थंप्रपंचयति तामसाइतिद्वाविंशतिश्लोकैः येतामसादिरूपैस्त्रिविधाभावास्तेस्थितिकालेभेदरहिताइत्यत्रार्थेसंभावनाहे तून्भेर्यादिरूपान्दृष्टांतान्यतोवच्मिअतस्तेव्यामोहोमास्तु कया स्थितौअद्वितीयत्वप्रतिपादिकयामद्गिराइतिद्वयोःसंबंधः॥३४२॥३४३॥ दृष्टांतस्वरूपंव्याकरोति भेरीतितिभिः यथाभेर्यादयोवाद्यविशेषानिमित्तेदंडमुखवायुकोणाद्यभिघातरूपेसतिक्रूरान्वीरादिरसव्यंजका नूमध्यमान्भयानकादिरसव्यंजकान्मंजुलान्शृंगारादिरसव्यंजकांश्चशब्दानुच्चनीचाद्यवांतरभेदान्कुर्वंतीत्यर्थः ॥ ३४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भेरीशब्दइति तेचशब्दविशेषाभेरीशब्दत्वादिसामान्यैस्त्रेधा तानिचत्रीणिसामान्यानिशब्दत्वसामान्यापेक्षयाविशेषरूपाणि हेसतितेषां विशेषाणांग्रहणंतुभेर्यादिशब्दसामान्यानांभेरीशब्दत्वादिरूपाणामवांतरसामान्यानांशब्दत्वरूपमहासामान्यस्यचाग्रहेऽग्रहणेसतिनैवभ वर्तिकिंतुभेर्यादिशब्दव्यापकसामान्यस्यग्रहणेसत्येव अनंतरंभैरः भेरीसंबंधादिकृतोविशेषस्तद्विशेषरूपश्चशब्दोगृह्यतइतिद्वयोरर्थः अत्रे दंबोध्यं दुंदुभेस्तुग्रहणेनेत्यादिश्रुतौदुंदुभिपदेनशब्दत्वाख्यमहासामान्यव्याप्यंदुंदुभिशब्दत्वसामान्यमुक्तं दुंदुभ्याघातपदेनचतद्विशेषोवी राद्विरसव्यंजकःशब्दउक्तः शब्दपदेनचतद्विशेषाउच्चादिशब्दाउक्ताः एवंशंखादिवाक्येपीति ॥ ३४५ ॥ ३४६ ॥ दार्ष्टांतिकेयोजयति सदानं दात्मेति एवमात्मनोऽस्तिभातिप्रियमितित्रिविधसामान्यरूपस्यस्फुरणरूपेणमहासामान्यरूपस्यचाऽग्रहणेसतिकस्यापिपदार्थविशेषस्य

भेरीशब्दस्तथाशंखशब्दोयमपरस्तथा ॥ वीणाशब्दइतित्रेधाविशेषग्रहणंसति ॥ भेर्यादिशब्दसामान्याग्रहे नैवास्तिकिंचन ॥ ३४५ ॥ भेर्यादिशब्दसामान्यग्रहणेसत्यनंतरं ॥ भैरःशांखस्तथावैणःशब्दोयंगृह्यतेनृभिः ॥ ३४६ ॥ सदानंदात्मरूपस्यज्योतिषांभासकस्यच ॥ एवमग्रहणेनैवग्रहणंकस्यचिद्भवेत् ॥ ३४७ ॥ अयं वाप्येषवाभावःसचाहंचात्रगृह्यते ॥ प्रथमादिकएवायमसत्सन्ममतादिभिः ॥ ३४८ ॥ युष्मदोर्थःसमुद्दि ष्टइदमादिरनेकधा ॥ अहंममादिभिर्भावैरस्मदोप्यर्थईरितः ॥ ३४९ ॥

ग्रहणंनभवतीत्यर्थः ॥ ३४७ ॥ आत्मनःसामान्यरूपतांसर्वत्रानुगमेनस्फुटयति अयंवेत्यादिना इदमादिभिरस्मदंतैःसर्वनामसंज्ञैःशब्दैर्वि शेष्यसमर्पकैस्तथाअसत्सद्भिरनिर्वचनीयैर्ममत्वादिभिःप्रकारैश्चयोभावोगृह्यतेविषयीक्रियतेससर्वोपिप्रथमादिकएवेत्यन्वयः प्रथमःसम ष्ट्युपाधिकोहिरण्यगर्भादिसंज्ञःसवैशरीरीप्रथमइत्यादिश्रुतिप्रसिद्धः तथाचएकश्चेतनएवसचसर्वात्मनास्थितोरज्जुरिवसर्पधारादिरूपैरि तिभावः ॥ ३४८ ॥ तद्रूपाणांयुष्मदस्मच्छब्दार्थत्वरूपाभ्यांद्वेधास्थितिरित्याह युष्मदोर्थइति तत्रेदमादिशब्दैरुक्तोभावोयुष्मच्छब्दार्थः युष्मच्छब्दोहिसंबोध्यचेतनाभिधायकः चेतनसत्ताचजडेष्वपीतिभावः तथाहंशब्देनप्रधानतयाप्रत्यक्चेतनाभिधायकेनममशब्देनचउ पसर्जनतयाप्रत्यक्चेतनाभिधायकेनआदिपदग्राह्यैरनिदंपदादिभिश्चास्मदर्थतयासभावउक्तइत्यर्थः ॥ ३४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भागत्यागलक्षणयातुयुष्मदस्मच्छब्दौतुल्यार्थावित्याह युष्मच्छब्दोत्रेति अत्रउक्तविभागेसत्यपिविचारतोवस्तुविचारेक्रियमाणेयमर्थंयुष्मच्छब्दोवदतितमेवास्मच्छब्दोपिवदतिप्रतिपाद्यचेतनांशस्योभयत्रसमानत्वादिति ॥ ३५० ॥ तयोःसमानार्थत्वंस्फुटयितुंयुष्मदर्थतयाप्रसिद्धेपराक्पदार्थेप्यस्मदर्थसत्वंदर्शयति वागादीतिद्वाभ्यां यःपदार्थःशंखःशंखादिजडरूपतयाप्रसिद्धोपियदावागादिकंकरणजातंगतःप्राप्तोऽभवद्भवेद्वातदाचेतनश्चेतनत्वव्यवहारयोग्योदेहसंगतःदेहतादात्म्याभिमान्यपिसन्अस्मदर्थमात्मानंयुष्मदर्थात्त्वापेक्षयाभिन्नात्सर्वस्माद्भिन्नमेवावगच्छति एवमन्योपियुष्मदर्थतयाभिमतश्चेतनःस्वात्मानंसर्वस्माद्भिन्नतयावगच्छति सर्वजडस्यचेतनव्याप्तत्वेनत

युष्मच्छब्दोत्रयंब्रूतेत्यस्मच्छब्दोपितंपुनः॥ अर्थमाहयतोनेमौभिन्नार्थौस्तोविचारतः ॥ ३५० ॥ वागादियोगतःशंखश्चेतनोदेहसंगतः॥ अस्मदर्थंविजानातिमनसाभिन्नमेवसः ॥ ३५१ ॥ युष्मदर्थात्परोप्येवमवगच्छतिदेहभाक् ॥ अधिष्ठितंजडंसर्वंकेनचिच्चेतनेनहि ॥ ३५२ ॥ नयदात्मतयाजंतुर्गृह्णीयादस्तिनात्रतत्॥ अविद्यामीश्वरःस्वात्मबुद्ध्यागृह्णातिनिर्दयः ॥ ३५३ ॥ अविद्याकार्यमखिलंसूक्ष्मंस्वात्मतयाप्रभुः ॥ हिरण्यगर्भोगृह्णातिविराजोजनकःपुमान्॥ ३५४ ॥ अविद्याकार्यमखिलंस्थूलंस्वात्मतयाविराट् ॥ महाभूतादिसहितंब्रह्मांडंप्रतिपद्यते ॥ ३५५ ॥ जडजातंपरंसर्वंकश्चित्किंचित्प्रपद्यते ॥ जंतुरात्मतयातस्मात्सर्वंचेतनपालितं॥ ३५६॥

च्छरीरत्वादितिद्वयोरर्थः ॥ ३५१॥ ३५२॥ सर्वस्यजडस्यचेतनाधिष्ठितत्वमेवविशदयति नयदात्मतयेति यज्जडंचेतनआत्मतयानगृह्णात्येतादृशंजडंकिंचिन्नास्ति यतःसर्वेषांजडानांमूलभूताऽविद्याईश्वरेणउपाधित्वलक्षणशरीरत्वेनगृहीतासूक्ष्मसमष्टिश्चहिरण्यगर्भेणशरीरतयागृहीतेतिद्वयोरर्थः ॥ ३५३ ॥ ३५४ ॥ अविद्याकार्यमखिलमिति तथास्थूलसमष्टिविराट्शरीरतयागृह्णातीत्यर्थः ॥ ३५५ ॥ जडजातमिति तथासर्वंव्यष्टिरूपंजडजातमप्यनेकचेतनैःशरीरतयागृहीतमित्यर्थः ॥ ३५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसतिसर्वस्यभावस्यभावनाभेदनयुष्मदस्मच्छब्दार्थतेत्याह एकैकापेक्षयेति सर्ववस्तुप्रत्येकस्यसर्वस्यापेक्षयास्वतयास्वकीयतयागृहीतंसद्युष्मदर्थोभवेत् अन्यत्रयुष्मदर्थाद्भिन्नेत्वस्मदर्थता कसति स्वग्रहेस्वत्वेनआत्मत्वेनग्रहणेसतीत्यर्थः॥३५७॥वस्तुतस्त्वात्माकस्यापिपदस्यवाच्यार्थोनभवतिकिंतुलक्ष्यएवाधिष्ठानत्वेनसर्वसंवद्धत्वादित्याह अवाङ्मनसेति कस्यापिपदस्यार्थोवाच्योनभवतिकिंतुअत्रात्मनिस्वरूपतयावर्तमानंयत्स्फुरणंतत्सर्वप्रपंचस्यानपायिअधिष्ठानत्वेनव्यापकंभवति अतोलक्ष्यमेवेतिशेषः॥३५८॥ फलितमाह एकार्थाविति ततस्तमात्मरूपंलक्ष्यार्थमादाययुष्मदस्मदौसमानार्थौ तयोरेकार्थत्वेतुतदर्थव्याप्यार्थकाइदमादिशब्दाअप्येकार्थाः कीदृशाइद

एकैकापेक्षयासर्वंयुष्मदर्थोभवेत्सदा॥ गृहीतंस्वतयान्यत्रस्वग्रहेचास्मदर्थता॥ ३५७॥ अवाङ्मनसगम्योयमात्माकस्यापिनैवसः॥ अर्थःशब्दस्यकिंत्वत्रस्फुरणंपरिकीर्तितं॥शब्दार्थज्ञानरूपस्यप्रपंचस्यानपायितत्॥३५८॥ एकार्थौततएवेमौशब्दौयौयुष्मदस्मदौ॥इदमाद्यास्ततःशब्दास्तयोरर्थस्यवाचकाः॥एकार्थास्तेपिविज्ञेयास्तमःसत्वरजोभिधाः॥ ३५९॥ सर्वत्रचैकएवायंज्योतिषांज्योतिरव्ययः॥आनंदात्मास्फुरत्यस्मिन्विशेषोध्यस्यतेनृभिः॥ ३६०॥ यथाभेर्यादिसामान्येस्फुरत्यविरतेसति॥ भैरादिकस्ततोज्ञेयोविशेषोमंदवुद्धिभिः॥ ३६१॥ अहंत्वमयमित्यादिव्यवहारोनसंभवेत्॥ असतिस्फुरणेतच्चज्योतिषांज्योतिरीरितं॥३६२॥स्थितौसर्वंजगत्तस्मादानंदात्मास्वयंप्रभः॥उक्तःप्रियतमोयस्तेप्रियेतस्मान्नचापरः॥३६३॥

मादिशब्दाः तामसादिपदार्थानांप्रतिपादकाइत्यर्थः॥ ३५९॥ योयंसर्वपदानामेकोलक्ष्यार्थःसकिमात्मकइत्यपेक्षायामाह सर्वत्रेति सर्वत्रसर्वपदार्थेषु॥ ३६०॥ वर्णितात्मभानपूर्वकमेवसर्वभानमित्येतदुक्तदृष्टांतयोजनपूर्वकमाह यथेतिद्वाभ्यां यथाभेर्यादिशब्दसामान्येअविरतेउपराममप्राप्तेऽतएवस्फुरतिभासमानेसतिभैरःभेरीशब्दांतर्गतोविशेषःश्रुतौवाह्यपदोक्तोज्ञेयोभवति तथासर्वोऽहमादिव्यवहारआत्मस्फुरणेसतिभवतिअसतितुनभवतीतिद्वयोरर्थः॥३६१॥३६२॥ स्थितिदृष्टांतव्याख्यानमुपसंहरति स्थिताविति तस्मात्स्थितिकालेसर्वमद्वितीयात्मरूपमेव कोसावात्मेतिचेद्यस्तेतुभ्यंप्रियतमत्वेनोक्तःसएवनापरइत्यर्थः॥ ३६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगतउत्पत्त्युपलक्षितकाले अथोत्पत्तेः पूर्वमप्यद्वैतप्रतिपादिकायाएकादशकंडिकायाअर्थंप्रपंचयति उत्पत्ताविल्यूनपंचाशच्छ्लोकैः पियदात्मनोभेदवर्जनंभेदराहित्यंतत्रदृष्टांतंशृणुयथाभेदवर्जनात्कार्योत्पत्तेःपूर्वंनिर्भेदाज्ज्वलतआहितेंधनाद्वन्हेर्धूमास्तदुपलक्षिताःस्फुलिंगांगारादयश्चजायंतेतथात्मनःसर्वंजगज्जायतेइतिद्वयोःसंबंधः॥ ३६४॥ ३६५॥ जडाजडमिति हेप्रियेइदंस्थूलंजगज्जडाजडरूपंयथाहिरण्यगर्भाज्जातंतथात्वंस्वयंजानीषे कुतः तेषांचनामरूपाणिकर्माणिचपृथक्पृथक्वेदशब्देभ्यएवादौनिर्ममेसमहेश्वरइत्यादिस्मृतिवाक्यात्सूर्येत्यादिश्रुतिवाक्याच्चपरंतुवेदात्मकशब्दराशेःसंभवंत्वंनजानीषेइतिद्वयोरर्थः ॥ ३६६ ॥ ३६७॥ वेदानामिति अतस्त्वया

जायंतेसदृशाःकेचिद्यथा
उत्पत्तौश्रृणुदृष्टांतमात्मनोभेदवर्जने॥ महतोज्वलतोवन्हेःस्फुलिंगाधूमसंयुताः॥ जायंतेसदृशाःकेचिद्यथा विसदृशाअपि ॥ ३६४ ॥ आनंदात्मनएवंतच्चेतनाचेतनंजगत् ॥ सर्वमुत्पद्यतेनित्यंप्रियेभेदविवर्जनात् ॥ ३६५ ॥ जडाजडमिदंजातंजानीषेत्वंस्वयंप्रिये ॥ वेदशब्देभ्यएवादौनिर्ममेसमहेश्वरः ॥ ३६६ ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत्॥ इत्यादिवचनाद्वित्वावेदराशेस्तुसंभवं ॥ ३६७ ॥ वेदानांशब्दसंदर्भरूपाणामतएवते॥ वक्ष्याम्युत्पत्तिमखिलामानंदात्मस्वरूपतः ॥ ३६८॥ अग्नेर्यद्वद्विजातीयोधूमोमैत्रेयिजायते॥ अभ्रंलिहोमहान्लोकेशुष्कार्द्रेंधनसंचयात्॥ ३६९॥ एवंनानाविधज्ञानसंपन्नात्परमात्मनः ॥शब्दराशिरयंवेदोविजातीयःप्रजायते ॥ ३७० ॥ शब्देमानांतरापेक्षाजायतेयत्रतत्रसः॥ उत्पद्यतेविचार्यैवयथालोकरवोधुना॥ ३७१ ॥

ऽविज्ञातत्वादेववेदानामुत्पत्तिःपरमात्मनएवाखिलासर्वविधाहिरण्यगर्भादिव्यापारानपेक्षेतियावत् सायथाभवतितथातुभ्यंवक्ष्यामीत्यर्थः ॥ ३६८ ॥ अग्नेरिति यथाऽनायासादग्नेःस्वरूपाद्विलक्षणोधूमोजायतेतथाचिद्रूपात्परमात्मनःशब्दात्मकत्वेनविलक्षणोवेदोजायतइतिद्वयोरर्थः ॥ ३६९ ॥ ३७० ॥ ननुयदिवेदउत्पद्यतेतदातस्यपौरुषेयत्वापत्तिरितिशंकांवारयितुंतदुत्पत्तिलौकिकशब्दोत्पत्तेर्विलक्षणांदर्शयति शब्दइतिद्वाभ्यां यत्रशब्देजायमानेविवक्षितार्थनिश्चयायप्रमाणांतरापेक्षाजायतेतत्रव्यवहारेसशब्दोविचार्यैवालोचनपूर्वकमेवउत्पद्यतेयथाऽऽधुनिकोलोकरवोलौकिकःशब्दइत्यर्थः ॥ ३७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नायमिति अयंवेदस्तुतथालोचनपूर्वकंनजायते किंतु निःश्वासवदयत्नतएवपरमात्मनोजायतइत्यर्थः ॥ ३७२ ॥ तथाचपुरुषेणार्थालोचनपूर्वकंनिर्मितंवाक्यंपौरुषेयंताहृशंतुवेदवाक्यंनभवतीत्याह विचार्येति यद्वचनंपुरुषोविचार्यरचयेत्तत्पौरुषेयमित्युक्तं कीदृशंतद्वचनमसम्यक्यावच्छितितार्थप्रकाशनासमर्थं नहिसिताक्षीरादिमाधुर्यावांतरविशेषःपुरुषवचसाप्रकाशयितुंशक्यः वेदवाक्यंत्वीदृशंविचारजन्यमसम्यक्चनभवतीत्यर्थः ॥ ३७३ ॥ तर्हिपौरुषेयमपिवाक्यमविचार्योक्तंवेदवत्प्रमाणंस्यादितिचेन्न प्रमत्तगीतवदर्थव्यभिचारित्वेनसुतरामप्रामाण्यादित्याशयेनाह अविचार्येति अनीश्वरईश्वरभिन्नःपुरुषोब्रह्मलोकेपिवर्तमानोयद्वाक्यमविचार्यब्रूयात्तत्स्वार्थव्यभिचरेदेवेतिनियमः ईश्वरभाषितंतुवेदरूपमेवमविचार्योक्तत्वेसतिस्वार्थव्यभिचारिनभवतीत्यर्थः ॥ ३७४ ॥ ततोऽज्ञाताबाधितार्थत्वेनवेदस्य

नायंतथासमुत्पन्नःकिंतुनिःश्वाससन्निभः ॥ स्वप्रभादात्मनोजातोयथाभूतार्थवादिनः ॥ ३७२ ॥ विचार्यपुरुषोऽसम्यग्रचयेद्वचनंहियत् ॥ पौरुषेयंहितज्ज्ञेयंवेदवाक्यंनचेदृशम् ॥ ३७३ ॥ अविचार्यतुयद्ब्रूयाद्ब्रह्मलोकेप्यनीश्वरः ॥ स्वार्थव्यभिचरेत्तत्तुनैवमीश्वरभाषितम् ॥ ३७४ ॥ ततोमानांतरापेक्षावेदवाक्येनविद्यते ॥ नस्वार्थव्यभिचारश्चमानंतेनायमीरितः ॥ ३७५ ॥ अप्यनाप्तेनचोक्तस्यव्यभिचारोनविद्यते ॥ शब्दस्यार्थेनकुत्रापिकथंवेदस्यसस्मृतः ॥ ३७६ ॥ संतितीरेफलान्यस्यनद्याइतिवचोयतः ॥ अर्थबोधंकरोत्येवपरमार्थोनदृश्यते ॥ अबोधकत्वात्प्रत्यक्षंतत्रमानंनतद्भवेत् ॥ ३७७ ॥

मुख्यंप्रामाण्यंसिद्धमित्याह ततइति ततःअविचार्येश्वरोक्तत्वात्प्रतिपाद्यार्थप्रकाशनायप्रमाणांतरापेक्षास्वार्थव्यभिचारश्चनास्तितेनानुवादकत्वबाधितार्थत्वरूपदोषद्वयाभावेनवेदोमानंप्रमाणराजईरितः ॥ ३७५ ॥ अथवेदप्रामाण्येकैमुत्यन्यायंस्फुटयन्लौकिकशब्दानामप्यौत्सर्गिकंप्रामाण्यंमीमांसकमतप्रसिद्धंदर्शयति अप्यनाप्तेनेत्यादिना अपिकिंचअनाप्तेनविप्रलंभकतयाप्रसिद्धेनपुरुषेणाप्युक्तस्यशब्दस्यवाक्यस्यकुत्रचिदर्थव्यभिचारोनभवतिकिमुतवेदस्यापौरुषेयस्यसोर्थव्यभिचारोभवेदित्यर्थः ॥ ३७६ ॥ अनाप्तोक्तवाक्यमुदाहृत्यतस्यमानतामुपपादयति संतीतिद्वाभ्यां अस्यपथिकस्ययोग्यानिफलानिनद्यास्तीरेसंतीत्याकारकमनाप्तोक्तमपिवाक्यमर्थस्यनदीतीरगतफलरूपस्यबोधंकरोत्येवातस्तदप्युत्सर्गतःप्रमाणमेवेतिशेषः परंतुसोर्थोनदृश्यतेवाक्यश्रवणकालेपथिकेननसाक्षात्क्रियतेऽतस्तत्रार्थेप्रत्यक्षंनमानंभवेदबोधकत्वादितिसंबंधः ॥ ३७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दस्त्विति किंतुतत्रार्थेसशब्दएवमानंबोधकत्वात् यतोमानामानयोर्व्यवस्थास्वरूपविभागोबोधकत्वाबोधकत्वाभ्यामेवकृता मानंहि व्यंजकंनकारकमतोबोधकतयैवतस्यमानत्वंविज्ञेयंनान्यथेत्यर्थः॥ ३७८ ॥ संवादिप्रवृत्त्यानुमेयंज्ञानप्रामाण्यमितिवदतांनैयायिकादीनांमतंप्रत्याह बोधकमिति येषांवादिनांमतेबोधकमात्ररूपंमानंभवतितेषांमतेतन्मानस्वरूपंकुतःसिद्ध्यतिसमर्थायाःप्रवृत्तेर्हेतोरितिचेन्नेत्यर्थः ॥ ३७९ ॥ तत्रसमर्थाप्रवृत्तिहेतुतयावदन्प्रष्टव्यःकिंप्रवृत्तेःसामर्थ्यंसमोबोधेनसमानोर्थोविषयोयस्याःसातथातस्याभावस्तत्त्वमितिव्युत्पत्त्याशकंध्वादित्वेनचसमानविषयत्वरूपं किंवासम्यग्विद्यमानोर्थःफलंयस्याइतिव्युत्पत्त्यासंप्रयोजनत्वरूपं आद्येसाम्यप्रतियोगिनंबोधंप्रत्येवप्रवृत्तेर्लिंगत्वंभविष्यतीतिसूचयन्प्रवृत्तेस्तद्धर्मसामर्थ्यस्यचबोधसापेक्षतामाह प्रवृत्तेरपीति बोधेनेष्टसाधनताविषयकेन

॥२५॥

शब्दस्तुबोधकत्वेनमानंतत्रभविष्यति॥ मानामानव्यवस्थेयंबोधाबोधकृतायतः॥३७८॥ बोधकंचनचेन्मानंयेषांतेषांकुतोहितत्॥ मानस्यमानतानैवसमर्थायाःप्रवृत्तितः॥ ३७९॥ प्रवृत्तेरपिबोधेनविनानैवोदयोयतः॥ कुतःसामर्थ्यमेतस्याबोधशून्यंभविष्यति॥ समर्थताचविज्ञेयासुखदुःखकृतेर्बलात्॥ ३८०॥ नह्यनाप्तस्यवाक्येनप्रवृत्तस्यात्रवादिनः॥ सुखदुःखेनजायेतेनदीतीरस्यदर्शनात्॥ ३८१॥ प्रवृत्तिर्नैवकाचित्स्यादुभयोर्लोकवेदयोः॥ कुर्याद्यासुखमेवैकंदुःखगंधविवर्जितं॥ ३८२॥

विनाप्रवृत्तिसामान्यस्याप्युदयाभावादेतस्याःप्रवृत्तेःसामर्थ्यंबोधशून्यंबोधनिरपेक्षंकुतःस्यादित्यर्थः अंत्येपिसुखादिलक्षणप्रयोजनोपयोगिनंबोधमात्रमेवआक्षिपेत्प्रवृत्तिर्नप्रमाणंपरंपरयाप्रयोजकत्वेनअन्यथासिद्धत्वादितिदर्शयंस्तादृशीचसमर्थताऽनाप्तवाक्येप्यस्तीत्याह समर्थताचेति सुखदुःखयोःकृतेरारंभस्यबलादन्यथानुपपत्तेर्विज्ञेयासमर्थतात्वनाप्तवाक्येप्यस्तीतिशेषः॥ ३८० ॥ अनाप्तवाक्येतत्सत्वमेवव्यतिरेकमुखेनाह नहीत्यादिना अनाप्तस्यवादिनोवक्तुर्वाक्येनप्रवृत्तस्यपथिकस्यनदीतीरंदृष्ट्वासुखादिकंनजायतइतिनहिंकितु जायतएवेत्यर्थः ॥३८१॥ ननुफललाभेपथिकःसुखमेवप्राप्नुयादितिवक्तव्येसुखदुःखयोरुभयोःफलत्वेननिर्देशोनुचितइतिचेत्किमस्थानेभ्रांतोसिकिंनजानासिप्रवृत्तिसामन्यस्यदुःखहेतुतांकष्टंकर्मेतिन्यायसिद्धामित्याशयेनाह प्रवृत्तिर्नैवेति एतादृशीप्रवृत्तिःकापिनास्तियासुखमेवजनयेदित्यर्थः ॥ ३८२ ॥ ॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थेतार्किकसिद्धांतोप्यनुकूलइत्याह अपिकुत्रापीति दुःखविवर्जितंदुःखासमानाधिकरणंसुखंकुत्रापिनास्तीत्याकारकस्तार्किकाणांसंकेतोभिप्रायोमहान्दुरतिक्रमोस्ति तस्यमहत्त्वमुपपादयति यतइत्यादिना तेतार्किकायतःस्वसंकेताद्भीताःसंतःश्रुतिप्रसिद्धपरमानंदरूपेमोक्षेप्यानंदंनेच्छंतिनांगीकुर्वंतिकिंतुदुःखाभावरूपतयैवमोक्षस्यपुरुषार्थतामुपपादयंतीत्यतस्त्वयायदेतत्प्रवृत्तेःसुखमात्रहेतुत्वमुक्तंतद्यत्किंचित्तुच्छमितिद्वयोरर्थः ॥ ३८३ ॥ ३८४ ॥ फलितमाह बोधकत्वमिति ततउक्तविधयामानस्यबोधमात्रजननक्षमत्वान्माननिष्ठायांमानतायांबोधकत्वमेवकारणंप्रयोजकं तच्चबोधकत्वंयादृशंशब्देवर्ततेतादृशंप्रत्यक्षादौनास्ति अतोनाप्तवाक्यरूपोदाहरणेपिशब्दोमानमित्यनिंदितंयुक्तमेवेत्यर्थः ॥ ३८५ ॥ विप्रलंभकवाक्यादावपियदुक्तंप्रामाण्यंतदपिबाधावतारात्पूर्वमेवापवादविषयंपरिहृत्यो

अपिकुत्रापिनैवास्तिसुखंदुःखविवर्जितं॥ इतितार्किकसंकेतोमहानस्तियतोहिते॥ ३८३॥ भीतामोक्षेपिनेच्छंतिपरमानंदरूपिणि॥ आनंदंततएवैतद्यत्किंचित्त्वीरितंभवेत्॥ ३८४॥ बोधकत्वंततोमानेमानतायांहिकारणं॥ बोधकोविद्यतेशब्दःप्रत्यक्षंनैवतादृशम्॥ ततोऽनाप्तस्यवाक्येस्याच्छब्दोमानमनिंदितं॥ ३८५॥ कामंतस्यापिबाधोस्तुनकारसहितेनच॥ वाक्यांतरेणबलवान्नकारोवर्णसंहतौ॥ ३८६॥ मृगाणांहियथासिंहोवर्णानांतादृशःस्मृतः॥ नकारस्तेनबलवानन्यशब्दार्थहारकः॥ ३८७॥ नकारयोर्विरोधेस्यादुभयोरप्रमाणता॥ तृतीयंतत्रविज्ञेयंमानमन्याप्रपीडितं॥ ३८८॥

त्सर्गस्थितेरित्याशयेनाह काममिति तस्यप्रमाणत्वेनव्यवहृतस्यपश्चान्नकारसहितेननञ्घटितेनवाक्यांतरेणबाधोभवतुनामनैतावताऔत्सर्गिकस्यपूर्वकालिकप्रामाण्यस्यकाचित्क्षतिरितिशेषः प्रपंचितंहिभाष्यकारैर्बाधपर्यंतंलौकिकवैदिकप्रमाणानांप्रामाण्यमहंब्रह्मास्मीत्येतदवसानाएवसर्वेविधयइत्यादिना नञ्घटितवाक्यस्यैवबाधकतायांप्रयोजकंबलवत्त्वमाह बलवानित्यादिना नकारोनिषेधवाचकोवर्णोवर्णानांसंहतौसमुदायमध्येबलवान्मृगाणांसिंहवत् स्वसंबद्धपदार्थानांसत्तालक्षणप्राणापहारकत्वादितिद्वयोरर्थः ॥ ३८६ ॥ ॥ ३८७ ॥ यत्रतुसमानविषयौद्वौनिषेधौस्यातांयथासमयोर्वादिनोर्विप्रतिपत्तौतत्रोभयोर्नञ्घटितवाक्ययोःपरस्परप्रतिबंधेननिश्चयाजनकत्वात्ताभ्यामपरंकिंचित्प्रमाणंनिश्चयायान्वेष्टव्यमित्याह नकारयोरिति तृतीयमपिमानंतदन्वेष्यंयस्यचतुर्थादिकंबाधकंनस्यादितिचतुर्थपादार्थः ॥ ३८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रापियद्येकंनिषेधवाक्यंलौकिकंस्याद्वितीयंतुवैदिकंतत्रतृतीयमानान्वेषणानकर्तव्याद्वयोरेकस्यदौर्बल्यनिश्चयादित्याह नकारयोर्वि रोधेत्विति लोकवेदयोर्लौकिकवैदिकयोर्नकारयोर्विरोधेतुलौकिकोदुर्बलोयतःशंकितोदोषोलौकिकेभवतिनवैदिकइतिसंबंधः॥ ३८९ ॥ एतदेवस्फुटयति अन्ययोरिति अन्ययोःकेवललौकिकयोःशब्दयोर्नदीतीरफलभावाभावप्रतिपादकयोर्यद्वद्विरोधोभवतितथालौकिक वैदिकयोरपिपरलोकनास्तित्वसत्त्वादिप्रतिपादकयोर्विरोधोभवतितत्रलौकिकःसंभावितदोषत्वाद्दुर्बलोवैदिकस्तुनतथेत्यर्थः ॥ ३९० ॥ बोधकत्वलक्षणंप्रामाण्यंतुशब्दस्वरूपमात्रपरेष्वपिवाक्येषुविद्यतेइत्याह कखगादिरिति स्पष्टं ॥ ३९१ ॥ यस्त्विइति यस्तुशब्दोदशदाडि मानिषडपूपाइत्यादिवाक्यरूपोबोधंनजनयतितस्याप्रमाणत्वेप्यस्माकंबोधकत्वलक्षणप्रामाण्यवादिनांनकाचिद्धानिरित्यर्थः ॥ ३९२ ॥

नकारयोर्विरोधेतुदुर्बलोलोकवेदयोः॥ लौकिकःशंकितोदोषोलौकिकेस्तिनवैदिके ॥ ३८९ ॥ अन्ययोःश ब्दयोर्यद्वद्विरोधोलोकवेदयोः ॥ लौकिकोदुर्बलोनैवंवैदिकोदोषवर्जितः ॥ ३९० ॥ कखगादिस्तुयःशब्दः सोपिचेद्वर्णगोचरं॥ बोधमुत्पादयेत्कस्मादप्रमाणमयंभवेत् ॥ ३९१ ॥ यस्तुनोत्पादयेद्बोधंकामंसोऽमानम स्तुनः॥ नचात्रच्छिद्यतेकिंचिद्बोधमानत्ववादिनां ॥ ३९२ ॥ अपिसर्वाणिमानानिविरुद्धानिपरस्परं ॥ न कारानुग्रहाज्जेतुंप्रभवंतिपराणिहि॥ ३९३ ॥ तस्माद्वर्णगणेज्ञेयोनकारोबलवानिह ॥ बलवत्त्वात्सचेद्बोधंक रोत्यस्तुससर्वदा॥ ३९४॥

किंचनप्रवर्तकतालक्षणंप्रामाण्यंकिंतुबोधकतामात्ररूपमित्यत्रनिषेधवाक्यमेवोदाहरणंतस्याभावमात्रबोधकत्वेनप्रामाण्यस्यसमन्वय सूत्रेभाष्यकारैःप्रपंचनादित्याशयेननिषेधवाक्यप्रामाण्यमाह अपिसर्वाणीतिद्वाभ्यां परस्परंविरुद्धानियानिप्रत्यक्षादीनिमानानितानि कर्मभूतानिजेतुंपराणिअविरुद्धानिमानानिकर्तॄणिक्षमंते कुतोनकारानुग्रहात्निषेधवाक्येनविरुद्धानांशिथिलीकरणद्वाराअनुगृहीत त्वादिति तस्मात्स्वानुग्रहेणान्येषांबलाधायकत्वाद्बलवत्त्वेनप्रसिद्धोनकारोयदास्वार्थबोधंजनयतीत्यनुभवसिद्धंतदासनकारजोबोधःसर्व दास्तुअवाधितार्थकःसंस्तिष्ठत्विनिद्वयोरर्थः तथाताद‍ृशनिषेधवाक्यवद्बोधकतामात्ररूपंप्रमाणत्वमितिभावः ॥ ३९३ ॥ ३९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइति ततउक्तयुक्तेर्बोधकत्वेनलौकिकशब्दोप्यौत्सर्गिकप्रामाण्यभाजनंभवतिकिमुतवेदोनिरस्तदोषाशंकइत्यर्थः ॥ ३९५ ॥ एवंवेदस्यापौरुषेयतयानिरस्तदोषाशंकस्यस्वतःप्रामाण्यमुपपाद्याथतद्विभागप्रतिपादकस्ययदृग्वेदइत्यादेर्वाक्यशेषस्यार्थमाह एवमित्यादिना स्वभावतःप्रमाणानांशिरोमणिभूतोवेदःप्रथमंद्विधाभूतोमंत्ररूपोब्राह्मणरूपश्चेति तत्रमंत्ररूपोमंत्रत्वेनप्रसिद्धत्वलक्षणकःऋग्यजुःसामाथर्वभेदेनचतुर्विधः मंत्रभिन्नत्वलक्षणकब्राह्मणरूपस्तुइतिहासादिश्रुत्युक्ताष्टविधभेदवानितिद्वयोरर्थः ॥ ३९६ ॥ ॥ ३९७ ॥ तत्रेतिहासस्यस्वरूपमाह इतिहासइति इतिइत्थं हप्रसिद्धं आसबभूव इतिव्युत्पत्त्याजनकोहवैदेहइत्यादिरूपोवेदभागइति

ततःशब्दोनकोप्यस्तिबोधकोयोनमानतां ॥ गच्छेदतःकुतोवेदोमानतांनगमिष्यति ॥ ३९५ ॥ एवंमानशिरोरत्नभूतोवेदोमहानयं ॥ मंत्रब्राह्मणभागेनद्विधाभूतःस्वभावतः ॥ ३९६ ॥ ऋग्यजुःसामभिस्तद्वदथर्वांगिरसासह ॥ चातुर्विध्यंसमापन्नइतिहासादिभेदवान् ॥ ३९७ ॥ इतिहासइतिप्रोक्तइतिहेतिबभूवयत् ॥ जनकोहेत्यादिरूपोवेदेऽनेकत्रसंस्थितः ॥ ३९८ ॥ सृष्टिःस्थितिर्लयोयत्रकीर्त्यतेमूलकारणात् ॥ आकाशाद्वायुरित्यादिवंशोपिचमहानयं ॥ विराजस्तनयस्यास्यमनोःस्वायंभुवस्यच ॥ ३९९ ॥ सृष्टिजानांहिसर्वेषांकर्माणिविविधानिच ॥ इदंपुराणंविज्ञेयंपंचलक्षणसंयुतं ॥ ४०० ॥ सर्गश्चप्रतिसर्गश्चवंशोमन्वंतरस्थितिः ॥ वंश्यानुचरितंयच्चतत्पुराणमितिस्थितं ॥ ४०१ ॥ उपइत्यादिकाप्रोक्ताविद्यात्रोपासनासदा ॥ सत्यस्यसत्यमित्यादिकास्थितोपनिषद्द्विजैः ॥ ४०२ ॥

हासपदेनोक्तइत्यर्थः ॥ ३९८ ॥ पुराणाख्यंवेदभागंलक्षयति सृष्टिरितित्रिभिः सर्गपदोक्तेसृष्टिस्थितीप्रतिसर्गपदोक्तःप्रलयश्चआकाशाद्वायुरित्येवंविधवाक्यैर्यत्रोच्यतेतथायंपौतिमाष्यादिरूपोमहान्विद्यायावंशःस्वायंभुवमनोःस्थितिर्वंशश्चयत्रोच्यतेतत्सृष्टिजानांब्राह्मणादीनांकर्माणिचयत्रोच्यंतेएतादृशपंचलक्षणकोवेदभागःपुराणमित्युच्यतेइतिद्वयोरर्थः ॥ ३९९ ॥ ४०० ॥ लक्षणंपठति सर्गश्चेति स्पष्टं ॥ ४०१ ॥ विद्योपनिषदोःस्वरूपमाह उपेति उपेतिपदादिकेनोपासीतेतिपदेनविधीयमानाउपासनाविद्याइत्युच्यते तथारहस्यंदेवतादिनामोपनिषदित्युच्यते यथासत्यस्यसत्यमितिब्रह्मणोनामचतुर्थाध्यायउक्तमित्यर्थः ॥ ४०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लोकादिपदार्थानाह श्लोकाइति ब्राह्मणेपठितामंत्राःश्लोकाइत्युच्यंते तथाबह्वर्थस्यसंक्षेपेणप्रतिपादकंवाक्यंसूत्रमित्युच्यते यथात्मे
त्येवोपासीतेतिवाक्यंब्रह्मविद्यायाःसंक्षिप्यप्रतिपादकत्वाद्विद्यासूत्रमितिभाष्यकारादिभिर्व्यवहृतं मंत्रार्थविवरणरूपंब्राह्मणंतुव्याख्यान
मित्युक्तमित्यर्थः ॥ ४०३ ॥ अनुव्याख्यानपदार्थमाह अन्वितिद्वाभ्यां यत्संग्राहकवाक्यरूपंसूत्रमुक्तंतस्यार्थवादमंत्रादिरूपेणग्रंथेनार्थ
प्रपंचकंवाक्यजातमनुव्याख्यानमित्युक्तमित्यर्थः ॥ ४०४ ॥ अतएवेति यतस्तादृशंवाक्यजातंकर्तृअनेकविधत्वेनगुरुभूतार्थकंसूत्रंपुनः
पुनर्व्याकरोतिविशदीकरोतिअतएवइमंविशेषंबोधयितुमेवानुव्याख्यानमितिपदेनुशब्दःपठ्यतेइत्यर्थः एतदुदाहरणंतुउक्तसूत्रोत्तरंवाक्य
जातमुत्तराध्यायसमाप्तियावद्बोध्यं ॥ ४०५ ॥ ननुसकृदुच्चरितःशब्दःसकृदर्थंगमयतीतिन्यायविरोधात्सूत्रस्यानेकार्थत्वंकथमितिचेन्न

श्लोकामंत्रास्तथासूत्रमात्मेत्यादिसमीरितं॥ मंत्राणामर्थकथनंव्याख्यानमितिकीर्तितं ॥ ४०३॥ अनुव्या
ख्यानमित्येतदुक्तसूत्रार्थकीर्तनं॥ अर्थवादादिभिःसार्द्धंग्रंथेनमहताहियत्॥ ४०४॥ अतएवानुशब्दोयंव्या
ख्यानेसूत्रगेभवेत्॥ पुनःपुनर्यतःसूत्रंव्याकरोत्यर्थगौरवात् ॥ ४०५॥ अनेकार्थत्वमस्यस्याद्भूषणंसूत्ररूपि
णः॥ वाक्यस्यनपरस्येवदूषणंकर्हिचिद्भवेत्॥ ४०६॥ पिंडीभूतान्बहूनर्थान्सूचयत्यात्मनाहियत्॥ व्यापारै
र्विविधैर्नित्यंतत्सूत्रंपरिकीर्तितं ॥ ४०७॥ अष्टभेदःसमुद्दिष्टोवेदकल्पद्रुमोमहान्॥ ऋगादिभिश्चतुःस्कंधः
शाखाभिःशतधागतः॥ ४०८॥ एवमेषसमुत्पन्नोब्रह्मणोब्रह्मजन्मना ॥ शब्दात्मकोवेदराशिरर्थस्तस्याप्य
यंतथा॥ ४०९ ॥

आवृत्त्यातत्संभवात् नचावृत्तिरेवदोषः सूत्रस्वरूपघटकत्वेनतस्याभूषणत्वादागंतुकस्यैवदोषत्वादित्याशयेनसूत्रस्यानेकार्थतामुपपादय
ति अनेकार्थत्वमितिद्वाभ्यां अस्यसूत्ररूपिणोवाक्यस्यानेकार्थत्वंभूषणमेवनेतरवाक्यवद्दूषणंयतःपिंडीभूतबह्वर्थसूचकत्वादेवसूत्रसंज्ञां
प्राप्तमितिद्वयोःसंबंधः॥ ४०६॥ ४०७ ॥ अष्टेति एवंब्राह्मणभागेऽष्टविधोवेदरूपःकल्पद्रुमऋग्यजुःसामाथर्वात्मकस्कंधचतुष्टयशालीना
नाशाखश्चब्रह्मणोब्रह्मरूपात्क्षेत्रात्समुत्पन्नः कीदृशोवेदकल्पद्रुमः जन्मनाब्रह्मणोजन्मरूपान्निमित्ताद्ब्रह्मब्रह्मशब्दार्थः एषावेदसृष्टिरर्थ
सृष्टेरप्युपलक्षणमित्याशयेनाह शब्दात्मकइति यथाशब्दात्मकोवेदराशिर्ब्रह्मणउत्पन्नस्तथातदर्थोपीतिद्वयोरर्थः ॥ ४०८ ॥ ४०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवाहनित्यतयानित्यस्यवेदस्यार्थभूतान्पदार्थान्सामान्यतःसंगृह्णाति योगइतित्रिभिः योगादिसंज्ञानिवस्तून्यनायासान्महेश्वरान्निःश्वासवन्निर्गतानीतितृतीयेनसंबंधः तत्रयोगःकर्मयोगज्ञानयोगभेदेनप्रथमंद्विविधः अवांतरभेदैस्तुबहुविधः महान्महाप्रभावः तथाबहिर्वेदिवेदेर्यागार्थसंस्कृतभूमेर्बहिर्वर्तमानंस्वतंत्रमितियावत् ईदृशंदानं अस्यकर्मयोगेनसंग्रहेपिपृथगुपादानंब्राह्मणवशिष्ठन्यायेनप्राशस्त्यबोधनार्थंतथासुखादिरूपमैहिकमामुष्मिकंवाफलमिति ॥ ४१० ॥ तत्साधनानीति तयोःसुखदुःखयोर्भोगसाधनभूतानिस्थावरादिशरीराणितथाकाशादिपंचमहाभूतानि कीदृशानि स्वंपंचभूतानांस्वरूपंदेहोयेषांतेस्वदेहाःस्वाभिमानिदेवास्तैःसहितानि एतेनान्येदेवाअप्युप

योगोमहांस्तथादानंबहिर्वेदिसहस्रधा ॥ सुखदुःखेतथैवास्मिन्जन्मन्यपिपरत्रच ॥ ४१० ॥ तत्साधनानिसर्वाणिस्थावराणिचराणिच ॥ महांत्यपिचभूतानिस्वदेहसहितान्यपि ॥ ४११ ॥ एकादशेंद्रियगणप्राणादिसहितानिच ॥ निःश्वासवदनायासान्निर्गतानिमहेश्वरात् ॥ ४१२ ॥ जडाजडानामंतेपिदृष्टांतमवधारय ॥ यथासर्वाणिनीराणिसरितामभ्रगानिच ॥ ४१३ ॥ साक्षादायांतिवेगेनतंपरंपरयापिवा ॥ समुद्रंसरितांनाथंसर्वातिशयवर्जितम् ॥ ४१४ ॥ एवंसर्वाणिभूतानिसंहारेसमुपस्थिते ॥ आनंदात्मानमायांतिमैत्रेयिपरमेश्वरम् ॥ ४१५ ॥

लक्षिताः सूक्ष्मशरीरघटकैरिंद्रियादिभिःसहितानिचेतिद्वयोरर्थः ॥ ४११ ॥ ४१२ ॥ अथप्रलयेऽद्वितीयत्वप्रतिपादिकायाद्वादशकंडिकायाअर्थमाह जडाजडानामित्यष्टभिः जडाजडरूपाणांदृश्यानामंतेप्रलयेपिब्रह्माद्वैतत्वबोधकंदृष्टांतंशृणु यथापार्थिवानिमेघगतानिचनीराणिसाक्षात्परंपरयावासमुद्रंयांति कीदृशं स्वातिरिक्तेषुसर्वेषुजलस्थानेष्वतिशयहीनंसर्वतोधिकमितियावत् अत्रसमुद्रशब्देनजलसामान्यमुच्यतेतत्प्राप्तिश्चतद्रूपेणावस्थानमितिवदंतीति ॥ ४१३ ॥ ४१४ ॥ दार्ष्टांतिकेयोजयति एवमिति स्पष्टम् ॥ ४१५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुकेनक्रमेणभूतपदोक्तानिजन्यवस्तूनिलयंयांतीत्याकांक्षायांतत्क्रममाह विषयाइति दृष्टिसृष्टिविधयाशब्दादिविषयाणामिंद्रियाण्यु त्पत्तिहेतुत्वात्श्रुतिगतैकायनपदोक्तलयस्थानताशालीनिअतोविषयाइंद्रियेषुलीयंतेइंद्रियाणितुस्वोपादानकारणभूतेषुलीयंतेतानिभू तानितुसंतिरस्थूलानिअसच्छब्दभांजिसूक्ष्माणिचप्रलयकालेमायोपाधिकंपरमात्मानंप्रयांतीतिद्वयोरर्थः ॥४१६॥ ४१७॥ विषयादीना

मिंद्रियादिषुलयप्रकारमेवविशदयति स्पर्शइतिचतुर्भिः स्पर्शादयोविषयास्त्वगादिषुलीयंतइतियथाक्रमंसंबंधोबोध्यः लौकिकावैदिक शब्दभिन्नाः ॥४१८॥ अभिलाषाइति संकल्पोमनसिविद्यापदोक्तावृत्तयस्तुहृदयशब्दोक्तायांबुद्धौलीयंतेतथासर्वेव्यापाराहस्तयोःसर्वे आनंदाश्चउपस्थे॥४१९॥ आनंदाइति तथासर्वेविसर्गाःपायौगमनादिकंपादयोर्वेदात्मकशब्दस्तुवाचिलीयतेइति अत्रवेदस्यवाचिलया

विषयाइंद्रियाण्येवस्वकीयानिप्रयांतिहि॥इंद्रियाण्यपिभूतानिकरणान्यात्मनोपिच॥४१६॥भूतानिचप्रयां त्येनमानंदात्मानमीश्वरं॥ मैत्रेयिसंत्यसच्छब्दभांज्यपिप्रलयेसति ॥ ४१७॥ स्पर्शस्त्वचंरसोजिह्वांगंधोघ्रा णंव्रजत्यपि॥ चक्षुश्चैवचरूपाणिश्रोत्रंशब्दाश्चलौकिकाः ॥ ४१८ ॥ अभिलाषाअशेषायेमनोबुद्धिंचवृत्त यः॥हस्तौसर्वाणिकर्माणियांत्युपस्थंचसर्वतः॥ ४१९॥ आनंदाश्चविसर्गास्तुपायुंपादौगतागतं ॥ निखि लोवेदराशिश्चवाचमेवप्रयात्ययं ॥ ४२० ॥ गत्वैवंकारणंसर्वकारणैःसहितंसदा ॥ प्रयातिपरमात्मानंमैत्रे यिप्रलयेसति ॥ ४२१ ॥

भिधानाभिप्रायस्तुवेदस्याध्ययनाख्यवाग्व्यापारविषयतानियताइतितस्यवाचाविशेषतःसंबंधः लौकिकशब्दानांत्वनिच्छतोपिश्रोत्रस्य विषयतांगच्छतांश्रोत्रेणविषयसंबंधात्तत्रैवलयउक्तइतिबोध्यं ॥ ४२० ॥ गत्वैवमिति यथाक्षुद्रनद्योगंगांप्राप्यतयासहसमुद्रंयांत्येवंसर्वा णिकार्याणिकारणानिप्राप्यतैःसहपरमकारणंपरमात्मानंप्रलयेयांतीत्यर्थः अत्रभाष्यकारैरुक्तोलयक्रमइत्थंबोध्यः इंद्रियवाचकैस्त्वगा दिशब्दैर्लक्षितेषुस्पर्शादिविषयसामान्येषुविषयविशेषाणांलयःवाह्यविषयसामान्यानांचमनोविषयसामान्येसंकल्पसामान्येलयःतेषांसं कल्पमात्ररूपत्वात्संकल्पसामान्यस्यचबुद्धिव्यापारसामान्येविज्ञानाख्येतस्यमायाशबलात्मनीति ॥ ४२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंप्राकृतप्रलयेमोक्षदृष्टांतभूतेऽद्वितीयत्वमात्मनउक्तमथदार्ष्टांतिकेमोक्षेआत्माद्वितीयताविशदीभावपरायास्त्रयोदशकंडिकायाअर्थंप्रपंचयति ब्रह्मविज्ञानइतिचतुर्विंशत्याश्लोकैः यथाचविद्योत्पत्तौसविलासमायायाआत्यंतिकःप्रलयोभवतितत्स्फुटीभावायसैंधवखिल्याख्यंदृष्टांतंशृणिवत्यर्थः ॥ ४२२ ॥ दृष्टांतंदार्ष्टांतिकंचाभिनयति द्रवेत्यादिना सैंधवंसामुद्रंलवणं आदिपदेनहिमकरकादिग्रहः तद्रूपस्यकार्यस्योपादानभूतानिसमुद्रादिनीराणिदृष्टादृष्टनिमित्तवशात्परिणामदशायांघनतांमूर्ततांपिंडीभावरूपांयथायांतितथाशुद्धात्माप्यविद्यारूपनिमित्तेनघनतांजीवभावरूपांयातीत्यर्थः ॥ ४२३ ॥ दशेति यथाचउक्तरूपेसैंधवघनेसामुद्रलवणपिंडेपूर्वादिभागेषुकुत्रापिलवणसमुद्रजलाद्भेदोनास्तितथाजीवात्मन्यपीत्यर्थः ॥ ४२४ ॥ द्रवरूपमिति यथाचद्रवरूपंसमुद्रजलंक्षेत्रपातातपसंयोगादिरूपनि

ब्रह्मविज्ञानउत्पन्नेयथामायालयंव्रजेत् ॥ तथामैत्रेयिदृष्टांतंशृणुवक्ष्यामितेधुना ॥ ४२२ ॥ द्रवरूपाणिनीराणिप्रयांतिघनतांयथा ॥ सैंधवादेस्तथैवात्माविद्ययाघनतांगतः ॥ ४२३ ॥ दशदिक्षुतथामध्येबहिरंतश्चकश्चन ॥ यथाघनेनभेदोस्तितथात्मन्यपिनास्त्यसौ ॥ ४२४ ॥ द्रवरूपंघनीभावंनीरंयातिनिमित्ततः ॥ यथातथैवसंसारीभवत्यात्माविचक्षणः ॥ ४२५ ॥ नीरप्रक्षेपमात्रेणघनोयद्वल्लयंव्रजेत् ॥ ब्रह्मविद्याजलेतद्वन्नाशंमायाघनोव्रजेत् ॥ ४२६ ॥ समुद्रजलभेदेस्याद्घनतालवणेयथा ॥ आनंदात्मविभेदेपिमायास्माकंतथैवसा ॥ ४२७ ॥ आद्यावंतेतथामध्येसामुद्रंनसमुद्रतः ॥ भेदंयथासमायातितद्वज्जीवाःपरात्मनः ॥ ४२८ ॥

मित्तवशाद्घनतांयातितथात्मापिकार्यकारणरूपाविद्यात्मकनिमित्तवशात्संसारंयातीत्यर्थः ॥ ४२५ ॥ यथासैंधवघनस्यलयप्रयोजकंनीरप्रक्षेपमात्रंतथाजीवघनस्यमायामयस्यलयप्रयोजकंब्रह्मविद्ययाब्रह्मरूपजलेप्रक्षेपमात्रमित्याह नीरेति घनःसैंधवः ब्रह्मविद्याजलेविद्यात्मकेब्रह्मरूपजलेप्रक्षेपान्नाशमदर्शनंमायाघनोजीवोव्रजेदिति ॥ ४२६ ॥ समुद्रजलेति यथालवणेवर्तमानाघनतासमुद्रजलाद्भेदेपृथग्भावएवस्याद्रुपलभ्येततथापूर्णात्मनःसकाशाद्भेददर्शनकालेएवास्माकंजीवानांमायामायामयःसंसारोदृश्यतइत्यर्थः ॥ ४२७ ॥ आद्याविति यथाकालत्रयेकुत्रचिद्देशेवासामुद्रंलवणंसमुद्रतःसमुद्रजलान्नभेदंवस्तुनोभजतितथाजीवाअपिब्रह्मणइत्यर्थः ॥ ४२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाचसामुद्रलवणेघनीभावोऽनित्यस्तथाविद्यानाश्यंजीवत्वमपीत्याह घनेति हेसति ॥ ४२९ ॥ यथाचदृष्टांतेघनत्वनाशमात्रेणलवणनाशव्यवहारस्तथाऽविद्यानाशमात्रेणमोक्षेजीवनाशव्यवहारोनतुचेतनांशस्यनाशादित्याह घनतायाइति ॥ ४३० ॥ सर्वतइति यथाचलवणंघनीभावावस्थायावर्तमानत्वेततःपूर्वंपश्चाच्चसर्वांशेषुक्षारैकरसमेवतथात्मापिसर्वदासर्वांशेषुचचिदेकरसइतःस्वयंप्रकाशचित्स्वभावादपरोऽन्यस्वभावोनेतिद्वयोरर्थः ॥ ४३१ ॥ ४३२ ॥ यद्यात्मास्वयंज्योतिःस्वभावस्तदासर्वेषांकुतोनप्रकाशतइतिशंकांपरिहरति विद्यमानइति यथासूर्यादिप्रकाशोविद्यमानोपितमोरोगावृतनेत्रैःकस्यचिदपिघटादिविषयस्यसंबन्धितयाक्वचिदपिन

घनतानश्वरीयद्वत्सामुद्रस्यननीरता॥ जीवतानश्वरीतद्वदात्मनोनात्मतासति॥ ४२९॥ घनतायायथानाशेसामुद्रंनाशमाप्नुयात्॥ संसारित्वंतथाविद्यानाशान्नाशंप्रयातितत् ॥ ४३०॥ सर्वतोलवणंयद्वत्क्षारमेतन्नचापरं॥ घनतामपिसंप्राप्तंपूर्वंपश्चाच्चसर्वदा॥ ४३१॥ अरेमैत्रेयितद्वत्स्यादात्मासर्वत्रसर्वदा॥ स्वयंज्योतिःस्वभावोयंनकदाचिदितोपरः ॥ ४३२॥ विद्यमानःप्रकाशोयंसवित्रादेर्यथानृभिः॥ तमसावृतनेत्रैर्नलभ्यतेकस्यचित्क्वचित्॥ ४३३॥ एवंमायातमश्छन्ननयनैःपुरुषैःसदा॥ नलभ्यतेस्वयंज्योतिरात्मासर्वगतःपुमान्॥४३४॥अन्यासक्तोयथालोकेनपश्यतिपुरःस्थितं॥ तद्वत्संसारसंसक्तोनानंदात्मानमीक्षते॥ ४३५॥ विशेषज्ञानजनकंस्थूलंदेहमुदीरितं॥ जीवतोभौतिकंतस्यनाशादेषविनश्यति॥ स्वयंज्योतिरनंतात्मापरिच्छेदविवर्जितः ॥ ४३६ ॥

दृश्यतेतथामायारूपतमसाच्छादितबुद्धिदृष्टिकैरात्मानलभ्यतेइतिद्वयोःसंबंधः ॥ ४३३ ॥ ४३४ ॥ कारणाज्ञानस्यात्मभानप्रतिबंधकतामुक्त्वाकार्याविद्यायाअपितथात्वमाह अन्यासक्तइति अन्यासक्तःकांतादिगतमनाःपुरस्थितमपियथानपश्यतितथात्मानमपीत्यर्थः ॥ ४३५ ॥ अस्यात्मनोविशेषज्ञानलक्षणांघनतांविहायाद्वितीयरूपेणमुक्तावस्थानंमरणावस्थादृष्टांतेनवक्तुमुक्तघनताविशिष्टस्यशरीरनाशेननाशमाह विशेषेविद्वाभ्यां जीवतःप्राणान्धारयतःसूक्ष्मशरीरविशिष्टस्येतियावत् एतादृशस्यात्मनोयदिदंपांचभौतिकंस्थूलंशरीरंतद्विशेषज्ञानस्यमनुष्योहमित्यादिरूपस्यघनतामयस्यजनकंप्रसिद्धंतस्यभौतिकशरीरस्यनाशेत्वेषघनताविशिष्टआत्मास्वयंज्योतिरादिलक्षणोपिनश्यतिविशिष्टरूपाभावंप्राप्तोभवतीत्यर्थः ॥ ४३६ ॥ ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रदृष्टांतमाह लोहस्येति यथावन्हितादात्म्येनज्वलनाश्रयत्वेनप्रसिद्धस्यलोहपिंडस्यनाशेसतिलोहपिंडतादात्म्येनचतुष्कोणत्वादित द्धर्मविशिविष्टस्यवन्हेरपिनाशोव्यवह्रियतेतथादेहभिन्नोप्यात्मादेहतादात्म्येनजीवनकालेतद्धर्मभागीमरणावस्थायांदेहनाशेसतितत्ता दात्म्यप्रयुक्तविशेषविशिष्टरूपेणनश्यतीत्युच्यतेइत्यर्थः ॥ ४३७ ॥ एतच्चमरणेआत्मनाशाभिधानंविशेषज्ञानाभावसाधर्म्येणमोक्षेदृष्टांत त्वाभिप्रायेणैवेत्याह अभिप्रायेणेतित्रिभिः याज्ञवल्क्यआत्मनाशंयदुक्तवान्तदमुनाभिप्रायेणेत्यन्वयः ॥ ४३८॥ अमुनाकेनेत्याकांक्षा यांतमभिप्रायमभिनयति मरणेइति मरणावस्थायांसर्वस्यभेदज्ञानप्रयोजकस्यविशेषज्ञानस्यविलयात्पूर्वदेहगतंकिंचिदपिदुःखंनपश्य

लोहस्यज्वलतोनाशादनुनाशंव्रजेद्यथा॥ वन्हिरात्मातथादेहनाशादेषविनश्यति ॥ मरणेदेहतोभिन्नोदेहता दात्म्यमागतः॥ ४३७॥ अभिप्रायेणामुनैवंयाज्ञवल्क्यउदैरयत् ॥ आत्मनाशवचोविद्वान्धीमतांपुरतःस्थि तः॥ ४३८ ॥ मरणेसुप्तिवत्सर्वजंतूनांविलयोभवेत्॥ विशेषज्ञानमात्रस्यभेददृष्टिकरस्यहि ॥ ४३९ ॥ भेद दृष्टौविलीनायांदुःखंकिंचिन्नपश्यति ॥ मरणेऽनेनदेहेनकदाचिन्मनुजोभुवि ॥ ४४० ॥ यद्यप्यस्तीहविलयः सुप्तौभेदस्यसर्वतः॥ विशेषज्ञानमात्रस्यहेतोर्दुःखप्रदस्यहि ॥ ४४१ ॥ तथाप्येषपुनर्गत्वादेहेस्मिन्जागरंपु मान्॥ दुःखमाप्नोतिमरणेनैनंदेहंपुनर्व्रजेत्॥ ततःसुप्तिंपरित्यज्यमृतिमाहमुनीश्वरः॥ ४४२ ॥

तीतितस्यमोक्षदृष्टांतत्वयोग्यतेतिद्वयोरर्थः ॥ ४३९ ॥ ४४० ॥ ननुसुप्तिरपिविशेषज्ञानाद्यभाववतीअतःसैवकुतोनदृष्टांततयोक्तेतिशं कते यद्यपीति भेदस्यविशेषज्ञानस्यचदुःखहेतोर्यद्यपिसुप्तावपिलयोभवतीत्यर्थः ॥ ४४१ ॥ तथापिमोक्षेआत्यंतिकदुःखाभावबोध नायमरणावस्थैवदृष्टांतत्वयोग्यानसुषुप्तिस्तदनंतरंजागरणेएतद्देहदुःखानांसर्वैरनुभूयमानत्वादित्याह तथापीति तथापिएषपुमान्पुनः सुप्त्यनंतरमस्मिन्नेवदेहेजागरंप्राप्यदुःखमाप्नोतिमरणेसतितुएनंदेहंसद्दुःखंपुनर्नव्रजति ततइति मोक्षदृष्टांतत्वयोग्यतामभिप्रेत्यमुनिर्भूता वासस्यपांचभौतिकस्यदेहस्यमृतिंमरणावस्थामुक्तवान्नसुप्तिमित्यर्थः ॥ ४४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंमरणावस्थायादृष्टांतत्वयोग्यतामुपपाद्यतस्यादृष्टांतत्वमभिनयति भूतावासस्येति प्रथमपदंपूर्वान्वयित्वेनदर्शितं यद्वदयंस्वप्रकाश वोधरूपःपुमान्भूतानांशरीराकारपरिणतानांनाशानंतरमनेनभूतावासेनशरीरेंणजनितंदुःखंनाप्नुयात् विशेषज्ञानशून्यत्वादितिसंबंधः ॥४४३॥ दार्ष्टांतिकेयोजयति अविद्येति तथाऽविद्यानाशेनात्यंतिकलयेपिपुनःसंसारदुःखाप्राप्तिरित्यर्थः॥४४४॥मरणेतुदुःखाभावोना त्यंतिकोदुःखबीजाविद्यावशेषादतोदृष्टांततयैवतदभिधानमित्याशयेनाह अविद्यायाइति मृतोजंतुरविद्याशेषात्पुनर्देहांतरंप्राप्यदुःखमे तिमुक्तस्तुमायारूपबीजदाहान्नकदाचनदुःखमाप्नोतीतिविशेषइत्यर्थः ॥४४५॥ औपाधिकविशेषभावस्यैवलयोनाद्वितीयस्वप्रकाशचै

भूतावासस्यभूतानांनाशाद्यद्वदयंपुमान्॥ अनेनजनितंदुःखंभूतावासेननाप्नुयात्॥ विशेषज्ञानशून्यःसन्स्व प्रकाशैकबोधवान्॥ ४४३ ॥ अविद्यानाशतस्तद्वद्विशेषज्ञानसंक्षये ॥ आनंदात्मास्वयंज्योतिःपुनर्दुःखंनग च्छति॥४४४॥अविद्यायाश्चसद्भावान्मृतोदेहांतरात्पुनः॥दुःखमेतिनमुक्तोयंमायानाशात्कदाचन॥४४५॥ अभिप्रायमिमंतस्यमुनेर्गंभीरचेतसः॥ अजानतीवधूरेवंपप्रच्छाकुलमानसा॥ ४४६॥ पतेसर्वप्रियतमः पुरात्मायंत्वयेरितः ॥ अधुनातस्यनाशोपिभूतावासविनाशतः ॥ ४४७ ॥ ततस्तेवाक्यपवनोमनस्तूलमिदं मम॥ इतस्ततोनयत्यत्रव्यवस्थानविवर्जितम्॥ ४४८॥ मोमुह्यतेमनोमेत्रभगवन्वचनात्तव॥ अभिप्राय मजानत्याराज्ञोयंसेवकोयथा॥ ४४९॥

तन्यस्वरूपस्येत्येतदेवस्फुटयंत्याश्चतुर्दशकंडिकायाअर्थंप्रपंचयति अभिप्रायमितित्रयोविंशत्याश्लोकैः उक्ताभिप्रायमज्ञात्वामैत्रेयीएवं पप्रच्छ हेपतेपूर्वंत्वयात्मासच्चिदानंदरूपउक्तइदानींतुभूतात्मकोपाधिनाशात्तन्नाशउच्यतेइतिविरोधइतिद्वयोरर्थः ॥ ४४६ ॥ ४४७ ॥ ततइति ततउक्तविप्रतिषेधात्त्वद्वाक्यरूपःपवनोमदीयमनोरूपंतूलंसर्वतोभ्रामयतीत्यर्थः ॥ ४४८ ॥ मोमुह्यतइति आत्मस्वरूपेतववच नान्मेमनोऽतिशयेनमोहंप्राप्नोत्यभिप्रायाज्ञानात् राज्ञोभिप्रायमजानन्सेवकइवेति ॥ ४४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचवृद्धिमिच्छतोमूलहानिरितिन्यायोममापन्नः पूर्वावगतात्मनोनाशश्रवणादित्याशयमावेदयति तृणेतिचतुर्भिः परावृत्तंविपरीतंजातं चतुष्टयंस्पष्टम् ॥४५०॥४५१॥४५२॥४५३॥ एवमुक्तोमुनिःस्वाभिप्रायंप्रकाशितवानित्याह इत्युक्तइति॥४५४॥ मातइति हेमैत्रेयिमद्वचनात्तवमोहःपूर्वावगतहानिचिंताप्रयुक्तःखेदश्चमास्त्विति ॥ ४५५॥ नाहमिति हेप्रियेत्वंयंमोहंप्रतिपन्नाप्राप्तासितस्यमोहस्यहेतुतया मोहपदप्रतिपाद्यंवाक्यंनाहंब्रवीमित्वंत्वस्थानेविभ्रांतासीत्यर्थः तत्रहेतुश्चपूर्वापरवाक्याभिप्रायानालोचनमेवेत्याह अरेइति येनएतद्वचनाभिप्रायंपूर्ववचनाभिप्रायंचनबुध्यसेतेनेमंमोहंगतासीतिसंबंधः ॥ ४५६ ॥ मयातुयदभिप्रेतंतच्छृण्वित्याह विज्ञानेतित्रिभिः चि

तृणलुब्धायथाधेनुर्दूरंयात्यविवेकतः॥ तृणच्छन्नेतिमहतिपंकेमज्जतिदीनधीः ॥ ४५० ॥ तथातेवाक्यपंकेस्मिन्मग्नास्मिमुनिसत्तम ॥ आत्मविज्ञानलोभेनभवंतंप्रष्टुमुद्यता ॥ ४५१ ॥ आत्मनोनविनाशोस्तिमयैतद्बहुशःश्रुतं॥ ब्राह्मणेभ्योमहाभागभवतश्चप्रसंगतः ॥ ४५२ ॥ इदानींतत्परावृत्तंनिश्चितंसकलंमम॥ देहनाशमनुस्वात्मानश्यतीतितवोक्तितः॥ ४५३ ॥ इत्युक्तेयाज्ञवल्क्योपिमैत्रेयींप्रत्यभाषत ॥ कृपयापरयाविष्टःस्वाभिप्रायंमहामुनिः॥ ४५४॥ मातेभवतुसंमोहोमैत्रेयिवचनान्मम॥ माचखेदंव्रजाद्यत्वंस्वस्थचित्ताभव प्रिये॥ ४५५ ॥ नाहंमोहंब्रवीमित्वंप्रतिपन्नासियंप्रिये॥ अरेमैत्रेय्यभिप्रायंमदीयंनैवबुध्यसे॥ पूर्वोक्तंवचनंचैवयेनमोहमिमंगता॥ ४५६॥ विज्ञानघनएवायमात्मामायापरिक्षये॥ घनतांतांपरित्यज्यस्वप्रकाशोवतिष्ठते॥ ४५७ ॥ विशेषज्ञानविलयेसत्यप्यस्यनदुःखिता॥ अस्मिन्नर्थेइदंतुभ्यमुक्तंमरणमात्मनः॥ ४५८॥ देहनाशमनुस्वात्मनाशोनैवस्वभावतः॥ इत्यभिप्रायतोजायेस्वात्मनोनाशईरितः ॥ ४५९ ॥

न्मात्ररूपोयमात्मामाययाजीवतारूपांघनतांप्राप्तोमायायाःपरिक्षयेसतिस्वरूपेणैवतिष्ठतितस्यांचावस्थायामौपाधिकानांविषयविशेषज्ञानानांहानावपिनानंदस्वरूपहानिरितिबोधयितुमेवमरणावस्थाउक्तेतिद्वयोरर्थः ॥ ४५७ ॥ ४५८ ॥ तदवस्थोपन्यासेनचइतिसूचितंयदात्मस्वरूपेऽविनाशिन्युपाधिधर्मोनाशएवारोप्यव्यवह्रियते उपाधिनाशएवहिलोकैर्दृश्योनत्वविषयात्मनाशइतिदर्शयति देहनाशमिति देहनाशमनुसृत्यारोप्यैवात्मनाशव्यवहारोनस्वरूपनाशमादायेत्यर्थः ॥ ४५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतद्दृष्टांतेनस्फुटयति घटनाशमिति यथा घटस्थितंनभोघटीयंनाशमारोप्यैवनाशवदुच्यतेतथादेहनाशमारोप्यात्मापिमूढैर्नाशवानुच्यते
इत्यर्थः ॥ ४६० ॥ स्वरूपेणाविनाशितामेवस्फुटयति अरेइत्यादिना आत्मनाशेकृतनाशाकृताभ्यागमादिदोषप्रसंगोपीतिसूचयन्विशि
॥ ३१ ॥ नष्टि सर्वदेहगइति ॥ ४६१ ॥ उपाध्यभावआत्मस्वरूपभानेऽनुकूलएवविशेषज्ञानात्मकप्रतिबंधकाभावरूपत्वादित्याह देहाद्यभावत
इतित्रिभिः देहेंद्रियादीनामभावेऽनुपलंभेसतिजनिमंतिज्ञानानिबुद्ध्यादिवृत्तिरूपाणिनजायंतेतादृशदशायांचसंसारेप्यात्मादुःखंनगच्छ
तिकिमुताद्वितीयभावरूपायांमुक्तावितित्रयाणांसंबंधः ॥ ४६२ ॥ ४६३ ॥ ४६४ ॥ यश्चतादृशदशायामात्माद्वैतंनजानातिसद्वैत

घटनाशमनुप्राप्तनाशंयद्वद्घटस्थितं॥ भवेन्नभस्तथात्मापिदेहनाशाद्विनश्यति ॥ ४६० ॥ अरेमैत्रेयिनित्योसा
वानंदात्मास्वयंप्रभः ॥ विज्ञानैकस्वभावश्चमरणेसर्वदेहगः ॥ ४६१ ॥ देहाद्यभावतोनॄणांमरणेसतिसर्व
दा॥ ज्ञानानिजनिमंत्यत्रनजायंतकदाचन॥ ४६२ ॥ जनिमज्ज्ञानरहितआनंदात्मास्वयंप्रभः ॥ द्वैतावग
तिशून्यत्वादिदंदुःखंनगच्छति ॥ ४६३ ॥ संसारेपिकुतोगच्छेन्मुक्तावाविद्यकंहितत् ॥ अविद्यारहितोयत्रद्वै
ताशापिनविद्यते ॥ ४६४ ॥ अविनाशीततःस्वात्माविशेषज्ञानसंक्षये ॥ स्वप्रभोपिनजानातिद्वैताभावेनहे
तुना॥ यथासुप्तौमृतौचैवमुक्तावपितथैवसः ॥ ४६५ ॥ सुप्तौमृतौतथामुक्तावानंदात्मास्वयंप्रभः ॥ अविना
शीस्वस्वभावंनजहातिकदाचन ॥ ४६६ ॥ सुतादीन्विषयान्सुप्तौस्वप्रभोपिनगच्छति ॥ अभावाद्वैतजाल
स्यकरणादिकरूपिणः॥ ४६७ ॥ ज्ञानकर्मेंद्रियगणेदेहांतःकरणेपिच ॥ वर्त्ततेसर्वदाप्यात्मायतःसर्वगतः
पुमान्॥ ४६८ ॥

स्यासत्वलक्षणाऽपराधान्नात्मनिभासनाक्षमत्वरूपादित्याह अविनाशीति यथासुप्तौमृतौचचिद्रूपेणविद्यमानोप्यात्माद्वैताभावादेवद्वैतं
नजानातितथामुक्तावपीतिसंबंधः ॥ ४६५॥ आत्मस्वरूपंतुनकदाचिदन्यथाभवतिअविनाशित्वादित्याह सुप्ताविति नजहातिनत्यजति
॥ ४६६ ॥ द्वैताभावाद्वैताज्ञानंसुप्तिदृष्टांतेनस्फुटयति सुतादीनिति करणादिकरूपिणइंद्रियादिरूपस्य ॥ ४६७ ॥ यच्चमुक्तावात्मनःस्व ॥ ३१ ॥
रूपंतत्संसारदशायामपिविद्यतेपरंतुदेहादिसंबंधान्नस्फुटमवभासतइत्याशयेनाह ज्ञानेति ज्ञानेंद्रियादिसत्वकालेआत्मस्वरूपंचैतन्यमनुग
तमेवेत्यर्थः ॥ ४६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह सुप्ताविति सुषुप्त्यादौस्वप्रकाशाद्वितीयचिदात्मकमात्मस्वरूपंनान्यथाभवतीत्यर्थः ॥ ४६९ ॥ एवंशोधितस्यत्वंपदार्थस्यपरिपूर्णताप्रतिपादनेनब्रह्मविद्यायास्तद्दृढिमप्रयोजकसंन्यासस्यचाभिनयपरायाःपंचदशकंडिकायाअर्थमाध्यायांतग्रंथेनप्रपंचयंस्तत्रद्वैतभानस्याविद्याव्याप्यताप्रतिपादकस्ययेनेदमित्यतःपूर्वग्रंथस्यार्थमाह स्वयंज्योतिरितिदशभिः अस्मिन्नात्मनिवस्तुतोद्वैतासंभवात्संसारित्वदशाकालेयद्द्वैतंकार्यकारणात्मकंद्वैतवत्द्वितीयचंद्रादिवद्वर्त्ततेतन्मायामयमितिद्वयोरर्थः ॥ ४७० ॥ ४७१ ॥ तत्रान्वयव्याप्तिंस्फुटयति यदेति यदाएतदात्मनःस्वरूपंद्वैतापेक्षयाअन्यदेवविलक्षणमेवाद्वैतमितियावत् तद्द्वैतमिवमायया‌द्वैताकारेणभासमानमिवभवतितदा

सुप्तौस्मृतौतथामुक्तावविनाशीस्वयंप्रभः॥ मैत्रेयिततएवायंचिच्छक्तिर्भेदवर्जितः॥ अध्यादिवत्स्वभावोस्य नविपर्येतिकर्हिचित्॥ ४६९ ॥ स्वयंज्योतिःस्वभावेस्मिन्नानंदात्मनिनिर्द्वये ॥ वस्तुतोविद्यतेनैवद्वैतंकिंचिन्न कर्हिचित्॥ ४७० ॥ ततोमायामयंद्वैतंद्वैतवद्वर्त्ततेऽत्रतत्॥ संसारित्वदशाकालेनिःसंसारस्वरूपिणः॥ ४७१ ॥ यदाद्वैतमिवैतद्धिस्वरूपंस्वात्मनोभवेत्॥ अन्यदेवान्यमात्मानंनानाभेदसमन्वितं ॥ ४७२ ॥ विषयत्वंसमापन्नंजगद्रूपमनेकधा ॥ सुखदुःखकरंब्रह्मज्ञानादर्वाक्शरीरिणाम् ॥ एकादशेंद्रियैरंतर्बहिश्चैवाधिगच्छति ॥ ४७३ ॥ अविद्यायांविलीनायामानंदात्मस्वरूपिणि॥ स्वप्रभेब्रह्मविज्ञानाद्भेदगंधविवर्जिते॥ कर्तृकर्मादिरहितेकःकिंकेनाधिगच्छति॥ ४७४ ॥ सर्वंब्रह्मेतिविज्ञानेनदेहाःस्थिरजंगमाः ॥ ज्ञानकर्मेन्द्रियाण्यत्रनैवस्युर्विषयैःसह॥ ४७५॥ सुखदुःखादिभिःसार्द्धंनैवांतःकरणंक्वचित्॥ कारणाभावतोयस्मादविद्यानाशमागता॥ ४७६ ॥

यंजीवआत्मानमन्यंतत्पदार्थाद्भिन्नंविश्वतैजसादिभेदवंतंप्रमात्रादिभेदवंतंवातथानानाविधंविषयात्मकंजगद्रूपंचएकादशेंद्रियैरंतर्बहिर्वावर्तमानंपश्यति कीदृशंजगद्रूपमनेकधासुखदुःखकरमितिद्वयोरर्थः ॥ ४७२ ॥ ४७३ ॥ व्यतिरेकंस्फुटयति अविद्यायामिति किंशब्दआक्षेपे अविद्याहीनस्वरूपेत्रिपुटीनसंभवतीत्यर्थः ॥ ४७४ ॥ तत्रहेतुतयात्रिपुटीरूपकाणामंतर्बाह्यभावानामभावमविद्यात्मककारणाभावप्रयुक्तमाह सर्वंब्रह्मेति सर्वंब्रह्मेतिज्ञानेसतिअत्रात्मस्वरूपेदेहादयःकारणाभावान्नसंति कारणाभावएवकुतइत्यतआह यस्मादित्यादि इतिद्वयोःसंबंधः ॥ ४७५ ॥ ४७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततश्चात्माकेवलोऽवशिष्यतेइत्याह अविद्याभावतइति स्पष्टं ॥ ४७७ ॥ अस्यांदशायांज्ञानलक्षणाक्रियापिनसंभवतीत्याह अस्मिन्नि
ति अस्मिन्नविद्याविनिर्मुक्तेतस्यदर्शनस्यफलमावरणभंगादिरूपमपिकथंजायेतसिद्धत्वादिति ॥ ४७८ ॥ ननुतदानीमात्मानमेवजानी
यादितिशंकांवारयन्विजानीयादित्यंतवाक्यस्यार्थमाह अपीतिद्वाभ्यां यदाऽविद्याकालेद्वैतमिवभवतितदापिसर्वआत्मभिन्नमेवज्ञान
स्यविषयीकरोतिनात्मानमितिप्रसिद्धं विद्योदयानंतरमात्मानंनविषयीकरोतीतिकिमुवाच्यमितिद्वयोरर्थः ॥ ४७९ ॥ ४८० ॥ उक्ता
र्थेउपपत्तिमगृह्यादिपदैःसूचितांप्रपंचयति विज्ञातारमित्यादिना सर्वस्यविज्ञातारमात्मानमहंज्ञानस्यविषयीकुर्यामितियोवदतिसमूढएवं

अविद्याऽभावतोयस्माद्विनाशःसर्ववस्तुनः॥ जातस्तेनस्वयंज्योतिरानंदात्मावतिष्ठते॥ ४७७॥ अस्मिन्नात्म
निकोनामपश्येत्किंकेनवाकथं॥ कुत्रकालेपिकस्मिन्वाकिंचतस्यफलंभवेत्॥ ४७८॥ अपिद्वैतमिवेदंस्याद्य
दात्मायंस्वयंप्रभः॥ तदापिस्वात्मनोभिन्नंजानीतेसकलोजनः॥ नात्मानंकर्हिचित्क्वापिविज्ञातारंस्वयंप्रभं
॥ ४७९॥ सर्वमात्मेतितुयदाजातमात्मावबोधतः॥ तदातुनिर्द्वयंदेवंस्वप्रभंकोधिगच्छति॥ ४८०॥ विज्ञा
तारमहंजानइतियोनिश्चितोभवेत्॥ पृच्छामस्तंवयंमंदंकेनतेधिगतस्त्विति॥ ४८१॥ यद्योजानातिमनुज
स्तत्केनापिनचान्यथा॥ ततस्त्वात्मविज्ञानंकेनेत्येतत्समीरय॥ ४८२॥ मूर्तामूर्तद्वयंसर्वंतदभावश्चनात्म
नि॥ अविद्यारहितेसोयंगृह्यतेकेनहेतुना॥ अगृह्यःसर्वकरणैर्बाह्यैश्चाभ्यंतरैरपि॥ ४८३॥ अपिगृह्यंविशी
र्यंतत्कालतस्तच्छनैःशनैः॥ यथावस्त्रादिकंशीर्यमशीर्योगृह्यतेकथं॥ ४८४॥

प्रष्टव्यः एवंकथं त्वयात्माकेनकरणेनज्ञातइति ॥ ४८१ ॥ ज्ञानेनविषयीकरणेकरणमवश्यमपेक्षितमित्याह यद्यइति योमनुजोयद्वस्तु
ज्ञानस्यविषयीकरोतितद्विषयीकरणंकेनचित्करणेनैवेत्यर्थः ॥ ४८२ ॥ तत्रमूर्तामूर्तलक्षणंद्वैतंतदभावश्चकरणतयानवाच्योऽविद्यारहि
तात्मनिसदातदभावादतएवायमात्माश्रुतावगृह्यइत्युक्तइत्याह मूर्तेति स्पष्टं ॥ ४८३ ॥ किंचयद्यात्मनोगृह्यत्वंस्यात्तदागृह्यत्वव्यापका
निशीर्यत्वादीन्यपिस्युरितितर्कंसूचयन्शीर्यत्वादीनांतद्व्यापकतांधाराविधयादर्शयति अपिगृह्यमितित्रिभिः शीर्यत्वमवयवशैथिल्येन
नाशशीलत्वं ॥ ४८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीर्यत्वस्यव्यापकंचावयवद्वारासंयोगित्वलक्षणंसंगित्वमित्याह अपियच्छीर्यतइति यच्छीर्यतेतदवयवैःकृत्वायुक्तंसंयोगवदपिभवति आत्मातुनतथेत्यर्थः ॥ ४८५ ॥ संगस्यव्यापकंचभयमित्यस्यव्यथातस्याश्चविनाशकारणसंबंधइत्याह अपिसक्तस्येति सक्तस्यसंगिनो भयंदृष्टंयथाइंद्रियैस्तदुपलक्षितविषयैश्चयोगिनःशरीरस्येति तथाभीतौसत्यांव्यथादृष्टास्तिव्यथायांसत्यांचविनाशकारणसन्निधानंदृष्ट मित्यर्थः ॥ ४८६ ॥ व्यापकाभावेचव्याप्याभावइत्याह अविनाशीति आत्मायतोऽविनाशीततोव्यथाशून्यएवमग्रेपियोज्यम् ॥ ४८७॥

अपियच्छीर्यतेलोकेयुक्तंस्वावयवैर्हितत् ॥ नशीर्यतेततःस्वात्मासंयोगरहितःसदा ॥ ४८५॥ अपिसक्तस्यभीतिःस्यात्शरीरस्ययथात्रहि ॥ इंद्रियैर्योगतश्चात्मानिर्भयःकेनसज्जते ॥ अस्तिभीतौव्यथादृष्टाविनाशस्यापिकारणं ॥ ४८६ ॥ अविनाशीव्यथाशून्यआत्माकेनभयंव्रजेत् ॥ निर्ममःसज्जतेकेननिःसंगःशीर्यतेकथं ॥ अशीर्योगृह्यतेकेनत्वगृह्येकरणंतुकिं॥ ४८७॥ भावाभावविनिर्मुक्तेनिर्मायेस्वप्रकाशके॥ करणादेश्चवार्त्तापित्युपपन्नाकथंभवेत् ॥ ४८८॥ ततोनैवात्मविज्ञानेकरणंश्रुतिमार्गतः॥ लभ्यतेनापियोगस्यदर्शनेनचकेनचित् ॥ ४८९ ॥ आत्मासुरगुरोःशिष्यैरुक्तोरूपादिमानयं ॥ ऐंद्रियस्तर्हितस्यापिकरणंग्रहणेनहि ॥ ४९० ॥

किंचात्मनःस्वभावमालोच्यापिकरणादिकंतत्स्वरूपभानेनवाच्यमित्याह भावाभावेति स्पष्टं ॥ ४८८ ॥ फलितमाह ततइति औपनिषदमतेनपातंजलमतेनचात्मभानेकरणंकेनचिदपिवक्तुमशक्यमित्यर्थः ॥ ४८९ ॥ अथचार्वाकादिवैशेषिकांतमतेष्वपिकरणासंभवंप्रपंचयति आत्मेतिनवभिः येतावद्बृहस्पतिशिष्येषुचार्वाकेषुदेहेंद्रियमनःप्राणानात्मत्वेनपश्यत्सुप्रथमंपृथिव्यप्तेजोवायुसंघातात्मकंदेहंरूपादिमत्तयाइंद्रियविषयत्वेनात्मत्वानर्हमप्यात्मानंमन्यंतेतेषांमतेतस्यदेहरूपात्मनोभानेकरणंनहिसंभवेदित्यर्थः ॥ ४९०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथमित्याकांक्षायामाह सर्वस्येति तन्मतेहियद्यन्नेत्रादिकंकरणत्वेन विवक्ष्येततत्तत्कर्तृत्वेनाक्रांतंसंघातलक्षणात्मनएवज्ञानकर्तृत्वात् संघातस्यचसंहतमात्ररूपत्वात् तथाचसर्वंकरणत्वेन विवक्षितंकर्तृरूपमेवस्यान्नकरणंभेदाभावात् करणत्वस्यकर्तृभेदनियतत्वादित्यर्थः एतदुक्तंदूषणमिंद्रियसंघातात्मवादिमतेपियोज्यं देहस्तुतन्मतेनकरणंज्ञानक्रियांप्रतिकर्मत्वात् एवंबाह्यविषयाअपि इंद्रियेभ्यआंतरोभावस्तुतैरनभ्युपगमादेवनकरणमितिभावः ॥ ४९१॥ देहेंद्रियादीति यैरपिदेहेंद्रियसमुदायाद्भिन्नोमनोरूपःप्राणरूपःकर्त्तृभोक्तृरूपोवात्माभ्युपगम्यतेतेप्रष्टव्याः किमात्मारूपादिमान्नीरूपोवा आद्येतस्यरूपादिमतइंद्रियैर्मनसावाऽनुपलभ्यमानत्वात्तानींद्रियाणितदुपलब्धौन करणानिवक्तुंशक्यानि मनोपिरूपादिमतोग्रहणइंद्रियैर्विनाऽसमर्थत्वान्नकरणत्वेनवाच्यमित्यर्थः ॥ ४९२ ॥ अंत्येआह नीरूपोपीति

सर्वस्यकरणस्यास्यसंघातांतर्निपातनात् ॥ ततःकर्त्तैवसर्वस्यात्करणंनैवाकिंचन ॥ इंद्रियाणांयदात्मत्वंतदाप्युक्तंव्यवस्थितं ॥ ४९१ ॥ देहेंद्रियादिसंघाताद्व्यतिरिक्तोयदापुमान् ॥ रूपादिमांस्तदातस्यचक्षुराद्यैरदर्शनात् ॥ नतानिकरणानिस्युर्मनोप्येतैर्विनानच ॥ ४९२ ॥ नीरूपोपियदायंस्यात्तदापिमनसानहि ॥ गृह्यतेकरणंयस्मात्कर्त्तारंसमपेक्षते ॥ ४९३ ॥ आत्मायंकर्मतांप्राप्तःकर्त्तातस्यभवेद्धिकः ॥ अकर्मत्वेपिकर्त्तैवकर्मकिंनुभविष्यति ॥ ४९४ ॥ एकस्यापिसदानस्याद्पायेकर्तृकर्मणोः ॥ करणंयतएतस्यात्सापेक्षंकर्त्तृकर्मणोः ॥ ४९५ ॥ करोत्यनेनसततंकर्त्ताकर्मणिकिंचन ॥ यस्मात्ततोत्रकरणमुक्तमेतन्मनीषिभिः ॥ ४९६ ॥

यदायंदेहेंद्रियसंघातव्यतिरिक्तआत्मानीरूपःस्वीक्रियतेतदापिमनस्तद्ग्रहणेकरणंवक्तुमशक्यं तदाहिआत्माकर्मवास्यात्कर्तावा आद्येकर्त्तृहान्याकरणत्वहानिः करणत्वस्यकर्तृसापेक्षत्वात् अंत्येतु नुइतिवितर्के आत्मग्रहणक्रियायामात्मभिन्नंकिंकर्मभविष्यतिनकिंचिदपि तथाचकर्महान्याकरणत्वहानिरितिद्वयोरर्थः ॥ ४९३ ॥ ४९४ ॥ कर्त्तृकर्मणोर्मध्येऽन्यतरस्यापिहानेकरणस्यकरणत्वंनस्यात्तस्यकर्त्तृकर्मसापेक्षत्वादित्याह एकस्यापीति व्याख्यातं ॥ ४९५ ॥ सापेक्षतांस्फुटयितुंकरणलक्षणमाह करोतीति येनकर्त्ताकर्मनिष्ठंकिंचित्फलंजनयतितत्करणमित्युक्तमित्यर्थः तदुक्तंहरिणा क्रियायाःपरिनिष्पत्तिर्यद्व्यापारादनंतरं विवक्ष्यतेयदायत्रकरणंतत्तदास्मृतमिति एतेनाकर्मकधातुयोगेतृतीयाहेत्वर्थेबोध्येतिसूचितं ॥ ४९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युगपदेकत्रव्यापारेएकस्यात्मनःकर्तृत्वंकर्मत्वंचनसंभवतिदृष्टिविरोधादुपपत्तिविरोधाच्चेत्याह एकदैवेति॥४९७॥ किंचप्रमाणन्यायविरुद्धंयुगपदेकस्यकर्मकर्तृत्वमंगीकृत्यश्रुत्यनुभवसिद्धंस्वयंप्रकाशत्वमनभ्युपगच्छतास्वमौढ्यमेवाविष्क्रियतेइत्याह अदृष्टमिति हेमूढकरणादिविभागेनकरणस्वरूपस्यादिःकारणंनिर्वाहकइतियावत् ईदृशोयःकर्तृकर्मणोर्विभागोभेदस्तेनविनाप्यस्यात्मनःप्रकाशनंभानेकरणंदृष्ट्युपपत्तिविरुद्धमप्यंगीकरोषिचेत्तदामादिप्रवेदिनंमाप्रमाआदिपदेनाप्रमादिग्रहःतेषांप्रवेदिनंसाक्षिणंस्वप्रकाशंश्रुत्यादिप्रसिद्धंकस्मान्नांगीकरोषिकोत्रतेभारइत्यर्थः तदुक्तंवार्तिककृद्भिः प्रमाणमप्रमाणंचप्रमाभासस्तथैवच कुर्वंत्येवप्रमांयत्रतदसंभावनाकुतइति॥४९८॥

एकदैवचनैकस्यव्यापारेभेदवर्जिते॥ कर्तृताकर्मतादृष्टात्युपपन्नाथवाभवेत् ॥४९७॥ अदृष्टमुपपत्त्यापिहीनमंगीकरोषिचेत् ॥ करणादिविभागेनविनाप्यस्यप्रकाशनं ॥ अंगीकरोषिकस्मान्नमूढमादिप्रवेदिनं ॥४९८॥ श्रुतिरप्यात्मनोज्ञानेकरणंनैववस्तुतः ॥ अस्माकंकिंतुवचनात्श्रुतेर्वृत्तिःप्रजायते॥ ४९९ ॥ वृत्त्यातयातमोनाशंयातिस्वात्मावरोधनं ॥ आनंदात्मास्वयंज्योतिस्ततोभातिस्वयंहिनः॥ ५०० ॥ एवंमंदमतेप्यात्मज्ञानेलोकसमाश्रयात् ॥ करणंनास्तिकेनेदंभवेद्वेदसमाश्रये ॥ ५०१ ॥ देहादेर्नात्मतादृष्टाजडत्वात्करकादिवत्॥ ततोऽजडःस्वयंज्योतिरानंदात्मैवनिर्द्वयः॥ ५०२॥

कथंतर्हिसिद्धांतेश्रुतेःकरणत्वमितिचेदात्मभानप्रतिबंधकावरणापसारणेनगौणमित्याह श्रुतिरपीतिद्वाभ्यां वस्तुतःश्रुतिरप्यात्मभानेकरणंनभवतिकिंतुतांश्रुत्वाऽस्माकमधिकारिणामात्माकारावृत्तिर्जायतेतयावृत्त्याचस्वात्मावरोधनंआत्मस्वरूपावरकंतमोऽज्ञानंनश्यतिततःस्वयमेवात्माभातीतिद्वयोरर्थः ॥ ४९९ ॥ ५०० ॥ फलितमाह एवमित्यादिना केवललोकदृष्ट्याश्रयणाद्येमंदास्तेषांमतेपिकरणमात्मभानेनसंभवतिकिमुतवैदिकमताश्रयणेइत्यर्थः ॥ ५०१ ॥ किंतद्वैदिकमतमित्याकांक्षायामाह देहादेरिति करकःकमंडलुस्तत्प्रभृतिवज्जडत्वाद्देहादीनामनात्मत्वमित्यविवादंतेषांचभानमाध्यासिकचित्संबंधंविनानसंभवतीत्यतस्तेषांमिथ्यात्वात्सर्वाधिष्ठानभूतआत्माऽद्वयइत्यर्थः ॥ ५०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सचाद्वयःसर्वबुद्धिसाक्षिणोनभिन्नइतिबोधयितुंमधुकांडेविज्ञातारमित्याद्युक्तमितिसूचयंस्तस्याविषयतांभानेकरणानपेक्षतारूपांनिग
मयति विज्ञातेति सआत्मासाक्षिरूपएवतंचकेनकरणेनजानीयादितिसंबंधः ॥ ५०३ ॥ एवमात्मानंविज्ञायत्वयातन्निष्ठैवसंपाद्येत्या
ह ततइति पत्यादिकंदृश्यजातंविस्मृत्यस्वयंप्रकाशात्मानंदैकरसिकाभवेतिद्वयोरर्थः ॥ ५०४ ॥ ५०५ ॥ एवमिति यत्त्वयाऽमृतत्वममृत
त्वसाधनंपृष्टंतदात्मविद्यारूपमुक्तमित्यर्थः ॥ ५०६ ॥ अरेइति सर्वांतराद्द्वितीयात्मज्ञानादन्यदमृतत्वसाधनंनास्तीत्यर्थः ॥ ५०७ ॥ आ

विज्ञातासर्वबुद्धीनांसाक्ष्येवात्मानचापरः॥विज्ञातारमरेकेनजानीयात्ततएवहि॥ मैत्रेयिकरणेनायमानंदा
त्मानमव्ययं॥५०३॥ततस्त्वमपिमैत्रेयिसर्वप्रियतमंत्विमं ॥ स्वयंज्योतिःस्वभावेनस्वप्रकाशंसदाद्वयम्
॥५०४॥आनंदात्मानमात्मस्थमात्मनैवावधारय ॥ पतिपुत्रादिकंहित्वादुःखजातमिदंप्रिये॥५०५॥ए
वमुक्तंमयातुभ्यंप्रियेस्वात्मानुशासनं ॥एतावदेवविज्ञेयममृतत्वंनसंशयः॥५०६ ॥अरेमैत्रेयिनैवान्यदमृ
तत्वंहिविद्यते॥मुक्तात्महृदयेसंतमानंदात्मानमद्वयम्॥५०७॥आत्मनस्त्वस्यविज्ञानान्मरणंतेपुनर्नहि॥भ
विष्यतिवपुस्त्यागात्तस्मान्मैत्रेय्यनंतरं॥५०८॥एवंस्वहृदयेसंतंस्वयंज्योतिःस्वरूपिणं॥ आनंदात्मानमद्वैत
मनंतमविनाशिनं॥५०९॥परित्यज्यबहिश्चित्तंमाकृथास्त्वंकदाचन ॥तथाचमरणंभूयोनभविष्यतितेप्रि
ये॥५१०॥एवमुक्त्वामुनिवरोयाज्ञवल्क्यःप्रियांनिजां॥मैत्रेयींजातवैराग्यःप्रवव्राजगृहाश्रमात्॥५११॥
आत्मशक्तिगुणैर्गूढामात्मनोन्यांविलोकयन्॥विचारात्कारणानांयांदृष्टवंतोमुनीश्वराः॥५१२॥

त्मनस्त्विति अस्यात्मनोज्ञानप्रभावादेतद्देहत्यागानंतरंपुनर्मरणंतेनभविष्यतीति ॥ ५०८ ॥ एतदेवस्फुटयति एवमिति उक्तविधयात्हृदय
स्थात्मानमद्वैतंनिश्चित्यचित्तस्यतत्प्रवणताकरणंविज्ञानंतत्फलंतुपुनःसंसाराभावइतिद्वयोरर्थः ॥ ५०९ ॥ ५१० ॥ उक्तात्मज्ञानदार्ढ्या
यविद्वत्संन्यासःकार्यइतिदर्शयन्मुनिःसंन्यस्तवानित्याह एवमुक्त्वेति स्पष्टम् ॥ ५११ ॥ उत्तराध्यायजिज्ञासामुत्थापयति आत्मशक्ति
मितिद्वाभ्यां किंकुर्वन्मुनिःप्रवव्राज आत्मनःशक्तिमायांप्रकृत्यादिपदवाच्यांसत्वादिगुणैर्गूढामात्मनःसच्चिदानंदलक्षणादन्यांविलक्षणां
मिथ्यात्वेनविलोकयन्सन् यांशक्तिकालादीनांजगत्कारणानांविचारेणमुनयःसाक्षात्कृतवंतइत्यर्थः ॥ ५१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तांचशक्तिनस्वतंत्रत्वेननिश्चितवंतःकिंत्वात्मनोजगत्कारणत्वादिनिर्वाहकत्वेनतच्छेषतयेत्याह आत्मैवेति आत्मैवजगतःप्रधानंकारणंमायातुतत्रोपकरणमित्ययमर्थोयदादृष्टस्तदैवयस्याःशक्तेर्विनिश्चयःशुद्धात्मनांमुनीनांजातइत्यर्थः ॥ ५१३ ॥ शीतोष्णेति पुनःकिंकृत्वाप्रवव्राज ब्रह्मादिस्तंबपर्यंतेजगतिसमोभूत्वा कीदृशेब्रह्मादिस्तंबपर्यंतेजगति शीतोष्णादिसाधुपापांतरूपैर्द्वंयात्मनिउभयरूपेअनुकूलप्रतिकूलात्मकइतियावत् स्वदेहेचेतिचकारेणपरदेहग्रहः ॥ ५१४ ॥ प्रवृत्तमिति समुनिरिंद्रियाणांप्रवृत्तिनिवृत्त्योरुदासीनोऽभवत् किंकृत्वा गुणाबाह्यांतरकरणात्मकाएवगुणेषुविषयेषुप्रवृत्तिनिवृत्तिस्वभावाआत्मातुसदानिर्विकारइतिभगवद्गीतोक्तंविचारंकृत्वा ॥ ५१५ ॥ देहें

आत्मैवजगतोहेतुर्मायियेत्येवदर्शनात् ॥ यस्याविनिश्चयोजातोमुनीनांभावितात्मनां ॥ ५१३ ॥ शीतोष्णसुखदुःखेषुतथामानापमानयोः ॥ मित्रेशत्रौस्वदेहेचसाधौपापेद्वयात्मनि ॥ ब्रह्मादिस्तंबपर्यंतेसमोभूत्वामहामुनिः ॥ ५१४ ॥ प्रवृत्तमिंद्रियगणंनामुंद्वेष्टिकदाचन ॥ स्वव्यापारेनिवृत्तंचतस्मात्कांक्षतिनैवसः ॥ गुणागुणेषुवर्ततइतिमत्वामुनीश्वरः ॥ ५१५ ॥ देहेंद्रियैर्मनोयुक्तैर्भूतानामभयप्रदः ॥ चचारवसुधांकृत्स्नांरविचंद्रविदेशितः ॥ ५१६ ॥ याज्ञवल्क्योयथातद्वन्मैत्रेय्यपिचचारह ॥ संन्यासलिंगरहिताभुवमात्मस्वरूपिणी ॥ ५१७ ॥ द्विजोत्तमस्यलिंगंस्याच्चतुर्थाश्रमवासिनः ॥ वर्णिनामपिनान्येषांकुतएतत्स्त्रियोभवेत् ॥ ५१८ ॥

द्रियैरिति एवंमनोवाग्देहैर्भूतानामभयप्रदःसन्विचचार कीदृशः रविचंद्रविदेशितः रविर्चंद्राभ्यांविशेषेणदेशितोभागवतैकादशोक्तविधयादत्तात्रेयवदितरेषांविकारित्वेपिनिर्विकारत्वलक्षणांशिक्षांप्रापितः रविचंद्रवदीशतइतिपाठेईशतइतिभावप्रधानोनिर्देशः ईशत्वेननिर्विकारत्वलक्षणैश्वर्येणेत्यर्थः ॥ ५१६ ॥ मैत्रेयीवृत्तांतमाह याज्ञवल्क्यइत्यादिना संन्यासलिंगंदंडादिकंतद्रहिता आत्मस्वरूपिणीआत्मस्वरूपानुसंधानपरा ॥ ५१७ ॥ मुखजानामयंधर्मोयद्विष्णोर्लिंगधारणं बाहुजातोरुजातानांनायंधर्मोविधीयतइतिवाक्यानुसारेणस्त्रियोदंडग्रहणानधिकारंकैमुत्येनाह द्विजोत्तमस्येति अन्येषांक्षत्रियाणांवैश्यानांच ॥ ५१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणादितरेतुदंडधारणादिकमकृत्वाऽहिंसासत्यादिकंयतिधर्मंकुर्वीरन् तेषांसाधारणधर्मत्वेनापिपुराणादिषुविधानादित्याशयेनाह ब्रह्मचर्यादिकमिति चतुर्थाश्रमवासिनांयोब्रह्मचर्यादिरूपोधर्मस्तदनुष्ठानरूपमुत्तमाश्रमधारणंयोषितृक्षत्रियाद्याश्चकुर्वंत्विति संबंधः ब्रह्मचर्यमुपस्थसंमयः ॥ ५१९ ॥ एतदेवस्फुटयति विटादीति विटःखिन्नः विटोद्रौलवणेखिन्नेइतिविश्वः यआश्रमेऽनधिकारोऽधिकारहीनःसआश्रमिणआश्रमाधिकारिणःप्रतिउक्तंविहितमहिंसादिकंधर्मंकुर्वीत कीदृशःसन् शैलूषादीनांवेषेणप्रच्छन्नश्चरन्नपीत्यर्थः ॥ ५२० ॥ उक्ताधिकारिणांविद्यालाभायगुरुशिष्यव्यवस्थामाह काममित्यादिना ब्राह्मणोगुरुर्द्विजंस्त्रीणांक्षत्रवैश्ययोश्चात्मज्ञानंस्वयमेवोच्चारितेनवे

ब्रह्मचर्यादिकंधर्मंचतुर्थाश्रमवासिनां ॥ योषिदाद्याश्चकुर्वंतुआश्रमस्यविधारणम् ॥ ५१९ ॥ विटादिवेषयुक्तोपिचरेद्धर्ममनिंदितम् ॥ आश्रमेऽनधिकारोयउक्तमाश्रमिणःसदा ॥ ५२० ॥ कामंत्रैवर्णिकस्त्रीणांतथाक्षत्रियवैश्ययोः ॥ विज्ञानंवेदवाक्येनकारयेद्ब्राह्मणःस्वयं ॥ ५२१ ॥ चतुर्थमाश्रमंनैवकारयेत्तुकदाचन ॥ लिंगधारणरूपंतमलिंगंधर्मतःसमम् ॥ ५२२ ॥ कारयेत्केपिकुर्युर्वानधर्मकरणेनहि ॥ विरोधोविद्यतेयद्वद्यागेशूद्रस्यकीर्तितः ॥ ५२३ ॥

दवाक्येनकामंयथेच्छंकारयेज्जनयेत् एतेषांवेदवाक्यश्रवणेशूद्रवत्पर्युदासाद्यभावान्मैत्रेयीब्राह्मणाद्यनुसारिशिष्टाचाराच्चेतिभावः परंत्वध्ययनंस्त्रीणांनास्तीतिस्वयमेववक्ष्यतीति॥ ५२१ ॥ चतुर्थमिति सब्राह्मणउक्ताधिकारिणांलिंगधारणरूपंचतुर्थमाश्रमंतुनकारयेत् यदितंचतुर्थाश्रमंकारयेत्तदाअलिंगंदंडादिलिंगरहितंब्रह्मचर्यादिधर्मैःसमवेतंकारयेत् नवाकेपिविप्रभिन्नास्तंलिंगधारणरूपंचतुर्थाश्रमंकुर्युः यदिकुर्युस्तदाऽलिंगंधर्मतःसमंकुर्युःहियतोधर्ममात्रानुष्ठानेनकोपिश्रुत्यादिविरोधोविद्यते विशेषानुष्ठानेतुसविद्यते उभयत्रोदाहरणंशूद्रः यथाशूद्रस्यश्रौतस्मार्तयागेषुशूद्रोयज्ञेऽनवकॢप्तइत्यादिवाक्यैःपर्युदासस्तत्तुल्यदानादिसाधारणधर्मेष्वनुमतिर्नमस्कारेणमंत्रेणपंचयज्ञान्नहापयेदित्यादिवाक्यैरितिद्वयोरर्थः ॥ ५२२ ॥ ५२३ ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षत्रियाश्चेति विद्यावंतइतिपुमान्स्त्रियेत्येकशेषः क्षत्रियादयोविद्यावंतोप्यालविद्यायामन्येषांगुरुत्वंनभजेरन्ब्राह्मणंप्रतितुसुतरामित्युत्स र्गइत्यर्थः॥ ५२४॥ उक्तोत्सर्गस्यापवादस्थलंप्रपंचयन्क्षत्रियादिभिरावश्यकत्वेस्वसजातीयोऽपकृष्टोवाशिष्यःकार्यइत्याह क्षत्रियइत्यादि ना क्षत्रियःक्षत्रियवैश्ययोस्तयोःक्षत्रियवैश्ययोःसजातीयानांस्त्रीणांचगुरुर्भवेद्यादिब्राह्मणस्तज्जातीयास्त्रीवागुरुत्वयोग्यानलभ्येतेत्यर्थः ॥ ५२५ ॥ वैश्यस्तुवैश्यंसजातीयांस्त्रियंवाकामंशिष्यतांनयेत् उत्तमवर्णगाब्राह्मणक्षत्रियजातीयाःस्त्रियस्तुशिष्यतांननयेदित्याह वैश्य मिति ॥ ५२६ ॥ स्त्रियस्तुद्विजानांगुरुत्वंनप्रतिपद्येरन् अध्ययनहीनत्वेनतेभ्योऽपकृष्टत्वादित्याह स्त्रियइति ॥ ५२७ ॥ संप्रदा

क्षत्रियाश्चतथावैश्यास्तद्वत्त्रैवर्णिकाःस्त्रियः॥ विद्यावंतोपिनान्येभ्यःकुर्युरात्मोपदेशनं॥ उपदेशेपिविप्रस्यके पिनैवाधिकारिणः॥५२४॥ क्षत्रियःक्षत्रियंवापिवैश्यंवापिद्वयोःस्त्रियः॥ विप्राद्यभावतःकामंशिष्यंकुर्वीत धर्मवित् ॥ ५२५ ॥ वैश्यंवैश्यस्तथावैश्यस्त्रियोवाधर्मसंयुताः ॥ शिष्यत्वेनप्रगृह्णीयात्कामंनोत्तमवर्णगाः ॥ ५२६ ॥ स्त्रियस्त्रैवर्णिकानांस्युर्गुरवोनैवकर्हिचित्॥ अनधीतायतस्त्वेतावेदवाक्याविचक्षणाः॥ ५२७ ॥ संप्रदायस्यविच्छेदेकामंत्रैवर्णिकस्त्रियः॥ उपदेशान्प्रकुर्वंतुसमानानधमान्प्रति ॥ ५२८ ॥ त्रैवर्णिकास्तुवि ज्ञायसंप्रदायंस्वयंधिया॥ वेदेभ्योप्यवगच्छंतुवक्तृभावेस्थितेसति ॥ ५२९ ॥ ब्राह्मणानांस्त्रियोविप्रोगुरुरु क्तोनचापरः॥ अन्यस्यापिभवेदेषगुरुःसर्वशरीरिणः॥ ५३० ॥ अत्रापिकुलविद्यादिसंपन्नःपितृतस्तथा ॥ मातृतश्चापिसंबुद्धःप्रशस्तोगुरुरीरितः॥ ५३१ ॥

यस्येति यदातुसंप्रदायप्रवर्तकःकश्चित्पुरुषोनलभ्यतेतदास्त्रियोपिसमानजातीयानामपकृष्टजातीयानांचविद्योपदेशिकाभवेयुरित्यर्थः ॥ ५२८ ॥ त्रैवर्णिकाइति त्रैवर्णिकाअप्युत्तमगुरोरलाभेसतिसंप्रदायमात्रंकुतश्चिद्विज्ञायवेदवाक्येभ्यःसम्यग्ज्ञानंस्वयमेवसंपादयंत्वित्य र्थः ॥ ५२९ ॥ ब्राह्मणजातीयायाःस्त्रियोगुरुस्तुविप्रएवतस्यसर्वगुरुत्वादित्याह ब्राह्मणानामिति ॥ ५३० ॥ अत्रापीति अत्रविप्राणांम ध्येपिईदृशोविप्रःप्रशस्तोगुरुरुक्तोयःकुलीनोबाल्येमात्रासंबुद्धःशिक्षितस्ततःपित्राततआचार्येणेत्यर्थः तथाचश्रुतिः मातृमान्पितृमाना चार्यवानिति ॥ ५३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रापिस्त्रियाःपतिरेवमुख्योगुरुस्तस्यविद्यागुरुत्वासंभवेत्वन्योप्युत्तमजातीयःसमजातीयोवागुरुःकार्यइत्याह पतिरिति ॥ ५३२ ॥
वर्णोनैवेति निकृष्टोऽधमोविप्रापेक्षयाअधमानांक्षत्रियादीनांमध्येनिकृष्टोवर्णःशूद्रस्तुकदाचिदापद्यपिकस्यामपिविद्यायांगुरुर्नस्यादि
त्यर्थः एतेनापदिक्षत्रियादेर्गुरुत्वमनुमतमिति ॥ ५३३ ॥ शूद्रादयइति आदिपदेनसंकरजातयस्तदीयाःशूद्रजातीयाः एतेषामात्मजि
॥३६॥ ज्ञासायांसत्यांपुराणकाव्यादिवाक्यश्रवणेनज्ञानंसंपाद्यं अत्रशूद्रादिषुवेदवाक्येनोपदेशनंतुकदाचिन्नकर्त्तव्यमित्यर्थः तथाचश्रुतिः पद्यु
वाएतत्श्मशानंयच्छूद्रस्तस्मात्तत्समीपेनाध्येतव्यमिति पद्युपादयुक्तं ॥५३४॥ यदाधमइति यदाऽधमोऽधमजातीयोगुरुत्वेनब्रूयाद्विद्यो

पतिःसर्वत्रनारीणांप्रथमःप्रोच्यतेगुरुः॥तदभावाद्भवेदन्यउत्तमोपिसमोपिवा॥५३२॥वर्णोनैवनिकृष्टःस्या
दधमःकस्यचिद्गुरुः॥ कस्यांचिदपिविद्यायामापद्यपिचकर्हिचित्॥५३३॥शूद्रादयस्तदीयायायोषितोयदि
धर्मतः॥ वर्त्ततेतत्रविज्ञेयंपुराणादेश्चवाक्यतः॥ उपदेशनमत्रस्याद्वेदवाक्यान्नकर्हिचित् ॥ ५३४॥ यदाध
मोगुरुर्ब्रूयात्कदाचित्संकटेसति॥ वर्णिनोविक्रयादेवविद्यामस्मात्समाप्नुयात् ॥ ५३५॥ निःस्पृहोयदितत्रा
पितदान्यविद्ययाप्नुयात्॥ विद्यागुरुश्चनोतस्मादधिकंकारयेत्क्वचित् ॥ ५३६॥

पदेष्टास्यात्तदोत्तमजातीयोविद्याकामस्तस्मादधमजातीयगुरोःसकाशाद्विद्यांविक्रयादेवधनादिविनिमयेनैवप्राप्नुयात्संकटेउत्तमजाती
यगुरुलाभासंभवरूपापदीत्यर्थः ॥ ५३५ ॥ निःस्पृहइति यदितुसोऽधमजातीयगुरुस्तत्रधनेनिःस्पृहःस्यात्तदाकांचिद्विद्यांदत्वाततो
विद्यामाप्नुयात्सचगुरुस्तस्मात् ल्यब्लोपेपंचमी तमुत्तमजातीयंशिष्यंप्राप्याधिकंपादसंवाहनादिकंनकारयेदित्यर्थः तदुक्तंमनुना अब्रा
ह्मणादध्ययनमापत्कालेविधीयते अनुव्रज्याचशुश्रूषायावदध्ययनंगुरोरिति अत्रमनुवाक्येचकारःपादसंवाहनादिरूपसेवाव्यावृत्त्य
र्थइतितद्व्याख्यातारः श्रुतिश्च तानूहानुपनीयेति तानुद्दालकादीननुपनीयपादग्रहणमकारयित्वैवराजाऽश्वपतिस्तेभ्योविद्यांददाविति ॥३६॥
दर्थः ॥ ५३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्वपत्यादिकानिति अश्वपत्यादिकानुत्तमजातीयोद्दालकादिमुनीनांगुरूनूदृष्ट्वाश्रुतिप्रसिद्धान्विज्ञायमन्वादिभिरिदमपकृष्टगुरोःसका शाद्विद्याग्रहणमुक्तंपरंतुतत्संभवेउत्तमगुरुलाभयोग्यत्वेसतिनशस्तंनकर्त्तव्यमित्यर्थः ॥ ५३७ ॥ एतांसकलमर्यादांजानानामैत्रेयीदंडा दिरहितासतीप्रच्छन्नवेषेणविचचारेत्याह मैत्रेयीति ॥ ५३८ ॥ याज्ञवल्क्यस्येति तदायाज्ञवल्क्यस्यदंडादिधारणमात्ररूपोविशेषोमैत्रे

अश्वपत्यादिकान्दृष्ट्वागुरूनधमवर्णिनः॥ प्राचीनशालप्रभृतीन्शिष्यानुत्तमवर्णिनः॥ इदमुक्तंनतत्शस्तंक दाचित्सतिसंभवे॥५३७॥ मैत्रेयीसकलंत्वेतद्वेदयस्मात्ततोत्रसा॥ पत्युःसंप्राप्तविज्ञानाब्रह्मचर्यादिसंयुता॥ चतुर्थाश्रमलिंगेनशून्याभूमिंचचारसा॥ ५३८॥ याज्ञवल्क्यस्यमैत्रेय्यावैषम्यंलिंगधारणं॥ अभून्नैवापरं किंचिच्चतुर्थाश्रमधर्मतः॥ ५३९ ॥ इत्युक्तंयाज्ञवल्क्येनब्रह्मज्ञानंमयेरितं॥ मैत्रेय्याःकिंपुनर्भूयःश्रोतुमिच्छ सिसुव्रत॥ ५४० ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणश्रीशंकरानंदभगवताविर चितउपनिषद्रत्नआत्मपुराणेबृहदारण्यकयाज्ञवल्क्यमैत्रेयीसंवादोनामसप्तमोध्यायः॥ ७॥

यीसकाशादभूत्समदृष्टित्वादिधर्मास्तुसमाएवाभवन्नित्यर्थः ॥ ५३९ ॥ उपसंहरति इत्युक्तमिति ॥ ५४० ॥ हितार्थंयजमानस्ययस्य सप्तापिमूर्तयः ॥ तत्रमानमयंपूर्णःसप्तम्यांसप्तमोऽजनि ॥ १ ॥ यस्याष्टमूर्त्तेर्यजमानाख्यमूर्त्त्युपकारार्थंसप्तशिष्टाःपंचभूतरविचंद्रात्मि कामूर्तयःसदोद्यतास्तत्रास्यप्रभोःस्वरूपेमानभूतोयंसप्तमोध्यायःसप्तम्यांतिथौपूर्णोजातइत्यर्थः इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदि लारामसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतावालपुराणटीकायांसप्रसवाख्यायांसप्तमोध्यायः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे सप्तमोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे अष्टमाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंपदोक्तंदूषणजातमेवप्रपंचयति अपिचेदित्यादिना कारणाभावःकारणमित्यत्रपक्षेकोसौकारणस्याभावःकारणं किंकारणस्यात्यंताभावःकिंवाप्रागभावःकिंवाध्वंसःकिंवान्योन्याभावः तत्रनाद्यः त्वदुक्तेर्व्याघातदोषेणव्यर्थत्वापत्तेरित्यर्थः ॥ ३९॥ व्याघातमभिनयति अकारणमिति इदंविश्वमकारणकमितिपक्षस्त्वयांगीकृतएवतदुपपादनायैवहित्वयाकारणाभावःकारणमितिपक्षउपपाद्यते तथाचतदत्यंताभावस्यकारणत्वांगीकारेसतियथासप्रथमांगीकृतपक्षोपिनस्यात्हीयेततथात्वयोक्तंस्यात् तथाचप्रतिज्ञाविरोधरूपोव्याघातःस्फुट इत्यर्थः एतद्दूषणंकारणप्रागभावस्यकारणत्वांगीकारेपिबोध्यमित्यर्थः॥४०॥ प्रागभावपक्षेदोषांतराणिवक्तुंविकल्पयति प्रागभावादिति

अपिचेत्कारणाभावःकारणंस्यात्तथात्रकः ॥ अत्यंताभावएवैषइतिचेद्व्यर्थमेवतत्॥ ३९॥ अकारणमिदंविश्वंपक्षएषव्यवस्थितः ॥ तथाचसतिसोप्यत्रयथानस्यात्तथेरितं ॥ प्रागभावोयदासस्यात्तदाप्येतत्समंभवेत्॥ ४०॥ प्रागभावाद्यदाजन्मकार्याणांवादिनोभवेत्॥ प्रागभावस्तदानष्टःस्थितोवेतिविचार्यतां॥४१॥ यदानष्टस्तदाकार्यजनेःपूर्वमनंतरं ॥ अथवायदिपूर्वःस्यात्तदानैषोत्रकारणं ॥ ४२॥ अनंतरंयदानाशोभवेत्तस्यतदाहिसः॥ किमेकोप्यथवानेकोयद्येकस्तर्हिकिंहिसः॥ ४३॥ नष्टोधुनाथवानैवयदिनष्टःकथंभवेत्॥ कार्यमेतदिदानींयद्दृश्यतेसर्वजंतुभिः॥ ४४॥

यदाप्रागभावात्कार्याणांजन्मभवतीत्याकारकंवादिनोमतंतदाइतिविचार्यतांविकल्प्यतां इतिकिं तदाकार्योत्पत्तिकालेप्रागभावोनष्टःस्थितोवेति ॥४१॥ यदेति आद्येपिइदंविचार्यंकिंप्रागभावःकार्योत्पत्तेःपूर्वंनष्टोथवानंतरंनष्टइति यदितुपूर्वंनष्टस्तदासकथंकारणंस्यात् नहिघटोत्पत्तेःपूर्वंमृतःकुलालोघटकारणमित्युच्यतइत्यर्थः ॥ ४२ ॥ कार्योत्पत्तेरनंतरंप्रागभावोनश्यतीतिपक्षेपिविकल्पयति अनंतरमिति यदातस्यप्रागभावस्यनाशःकार्योत्पत्तेरनंतरंभवतितदाप्येतद्वक्तव्यं एतत्किं सप्रागभावःकिमेकव्यक्तिकोऽनेकव्यक्तिकोवा यदिसकलकार्यहेतुःप्रागभावएकव्यक्तिकस्तर्हिइदंवक्तव्यंकिमधुनानष्टोनवेति आद्येइदानींजायमानंकार्यंकथंस्यात्नहिकारणेनष्टेसतिकार्यंजायतइतिद्वयोरर्थः॥ ४३ ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधुनासप्रागभावोननष्टइतिपक्षंदूषयति अधुनेतिद्वाभ्यां प्रागभावोहिकार्यनाश्यइतिप्रसिद्धं यदित्वधुनाइदानींतनकार्यपर्यंतकार्येषु जातेष्वप्ययंप्रागभावोननष्टस्तदास्यप्रागभावस्यसनाशःकदाभावीभविष्यतीति अस्मिंस्तेपक्षेइदमपरंपृच्छ्यते यदायंप्रागभावोनंक्ष्यतित त्प्रभृतिइदंजगद्रूपंकार्यंभविष्यतिनवेति ॥ ४५ ॥ भविष्यतीतिपक्षेव्यवहारलोपांतंपूर्वोक्तदूषणंप्रसज्जेतेत्याह कार्यभावइति प्रागभावरूपं कारणंविनापिकार्यस्यभावेउत्पत्तौसत्यांकारणेनविनाकार्यजनिरितिपक्षःस्यादापद्येत तथाचपूर्वोक्तदोषप्रसक्तिरित्यर्थः ॥ ४६ ॥अस्मि न्पक्षेनिर्युक्तिकत्वंचेत्याह अपिचेदिति यदितदाप्रागभावनाशोत्तरकालेअकारणकंकार्यंभविष्यतितदाइदानीमपितथाकुतोनभवतीति

अधुनायद्यनष्टोयंभावीनाशःकदास्यसः॥ यस्मिन्कालेत्वयंनाशंयास्यत्येतत्तदादिकिं॥भविष्यतिजगत्कार्य मथवानभविष्यति ॥ ४५ ॥ कार्यभावेविनैवस्यात्कारणेनतदाजनिः ॥ तथाचसतिपूर्वोक्तंदूषणंपुनराव्रजेत् ॥ ४६ ॥ अपिचेत्कारणाभावेसदाकार्यंभविष्यति ॥ इदानींकेनतन्नैवभवतीतिवदंतुते ॥ ४७॥ तस्मिन्नष्टेत दानैतत्कार्यंक्कापिभविष्यति ॥ अनायासेनमुक्तिःस्यात्तर्हितेषांमहात्मनां ॥ ४८ ॥ अप्यनंतस्यचेदंतःसंसार स्यभविष्यति॥ अनादेःसादिताकस्मात्तस्यनैवभविष्यति ॥ ४९ ॥ अंतवांश्चतथासादिःसंसारोयदिवादि नः॥ मुक्तस्यतस्यकेनायंपुनर्नैवभविष्यति ॥ ५० ॥ यदिमुक्तस्यसंसारःपुनरेवभविष्यति ॥ व्यर्थास्तदासम स्ताःस्युर्वादिनोमुक्तिहेतवः॥ ५१ ॥

प्रश्नेइदानीमकारणककार्यसंभवोपपादिकायुक्तिर्वक्तव्यासाचनास्तीत्यर्थः ॥ ४७ ॥ प्रागभावनाशेकार्यंनभविष्यतीतिपक्षंदूषयति त स्मिन्निति चतुर्भिः तस्मिन्प्रागभावेनष्टेसतिकार्यंनभविष्यतीतिचेदितिशेषः तर्हिअनायासेनमुक्तिसिद्धिनिश्चयान्मुक्त्यर्थंप्रयासवैयर्थ्य मित्यर्थः॥ ४८॥किंचात्रपक्षेसंसारस्यानंततयाऽनादितयाचसर्वसंमतस्यसान्तत्वसादित्वयोरापत्तिरित्याह अप्यनंतस्येति विवेकख्यातिही नान्प्रतिसंसारोऽनंतोऽनादिश्चप्रसिद्धस्तस्यात्रपक्षेसांतत्वंस्यात्सांतत्वेचसादित्वमपिस्यादित्यर्थः ॥ ४९॥ सादित्वेचमुक्तस्यापिबंधापत्ति रित्याह अंतवानिति वादिनोमतेइतिशेषः तस्योक्तवादिसम्मतस्यमुक्तस्यायंसंसारःपुनःकेनहेतुनानभविष्यतिकिंतुभविष्यत्येवेत्यर्थः ॥ ५० ॥ ततःकिमतआह यदीति स्पष्टम् ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतावतैकव्यक्तिकःप्रागभावोजगत्कारणमितिपक्षोनिरस्तोऽथानेकव्यक्तिकःसतथेतिपक्षंदूषयति यदानेकइत्येकादशभिः प्रागभावस्यानेकव्यक्तित्वेतस्यभेदःप्रतियोगिभेदादेववाच्यः स्वरूपमात्रेणाभावेभेदासंभवादित्यर्थः ॥ ५२ ॥ तस्यप्रतियोगित्वंकारणानांकार्याणांवा नाद्यः अनादेःप्रागभावस्यकारणासंभवादित्यभिप्रेत्यनांत्यः तथासतितस्यकार्याभावत्वेनतवकारणाभावःकारणमितिप्रतिज्ञाहीयेतेत्याह कार्यभेदादिति यदाप्रागभावस्यभेदःकार्यरूपप्रतियोगिभेदाधीनस्तर्हिंसकारणाभावपदेनव्यवहार्योनस्यात्किंतुकार्याभावपदेन तथाचत्वत्प्रतिज्ञाहानिरित्यर्थः ॥ ५३ ॥ एवंचकारणाभावरूपस्यत्वदुक्तकारणस्याप्यसंभवेव्यवहारलोपांतदूषणविशिष्टाऽकारणककार्योत्पत्तिःप्रसज्जेतेत्याह एवंचसतीति आवर्ततेपुनःप्रसज्जते ॥ ५४ ॥ किंचप्रागभावःप्रागभावत्वरूपेणघटजनकोघटीयत्वरूपेणवा आद्येपटप्रागभावादपिघटोत्पत्त्यापत्तिः अंत्येतस्यघटीयत्वंप्रतियोगितासंबंधेनघटविशिष्टत्वंतच्चविशिष्टज्ञानाधीनं नहिपदार्थानामयः

यदानेकस्तदातस्यभेदःकेनभवेदिह॥प्रागभावोहियस्यस्यात्तद्भेदादेवभेदवान्॥ अभावस्यस्वतोभेदोनदृष्टोवादिभिर्यतः॥५२॥ कार्यभेदाद्यदाभेदःप्रागभावगतोभवेत्॥ तदायंकारणाभावोनभवेत्कर्हिचित्क्वचित्॥ ॥५३॥ एवंचसतिकार्यस्यकारणेनविनाजनिः॥ पूर्वोक्ताऽऽवर्ततेभूयोवादिनंदुर्धियंप्रति॥५४॥ अपिकार्येत्यनुत्पन्नेतस्याभावःकथंभवेत्॥ विशेषणेसतिज्ञातेविशिष्टावगतिर्यतः॥ अनुत्पन्नंकथंतत्स्यात्कथंवाज्ञायतेत्रतत्॥५५॥ कारणात्मतयातस्याद्यदीदंनैवकारणम्॥ विद्यतेभवतस्तेनतस्यज्ञानंचदुर्घटम्॥५६॥

शलाकासदृशानांस्वभावेनपरस्परंसंश्लेषः विशिष्टज्ञानंतुविशेषणज्ञानाधीनमित्यतोनुत्पन्नेघटेतदसंभवाद्विशिष्टरूपेणकारणमपिनवक्तुंशक्यमित्याशयेनाह अपिकार्येइति कार्येऽनुत्पन्नेसतिअभावःप्रागभावस्तस्यतदीयत्वेनकथंभवेत्ज्ञायेत यतोविशेषणज्ञानंविशिष्टज्ञानंप्रतिहेतुरिति अनुत्पन्नंकार्यंतुतद्विशेषणंकथंस्यात् अत्रअनुत्पन्नकार्यरूपेविशेषणेसतितद्विशिष्टंरूपंकथंज्ञायेतेत्यर्थः ॥ ५५ ॥ ननु विशिष्टज्ञानंप्रतिविशेषणज्ञानंकारणमितिनस्वीक्रियतेकारणाभावःकारणमितिवादिभिःकस्यापिकारणस्यकुत्राप्यनभ्युपगमादित्याशंक्यतर्हिंसुतरांप्रागभावस्यकारणतावच्छेदकंविशिष्टरूपंनज्ञायेतोपायांतराभावादित्याह कारणात्मतयेति तद्विशेषणज्ञानंकारणरूपेणविशिष्टज्ञानोपयोगिस्यादित्यालोच्यइदंविशेषणज्ञानंयदिभवतःकारणाभावकारणतावादिनोमतेनकारणंविद्यतेतर्हिंतस्यविशिष्टस्यस्वरूपज्ञानंतेनसामग्र्यभावेनसुतरांदुर्घटंस्यादित्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुविकल्परूपेणज्ञानेनानुत्पन्नकार्यविशिष्टत्वंप्रागभावस्योपपादयिष्यतइत्याशंक्यतर्हिवंध्यापुत्रप्रागभावइत्याकारेणविशिष्टज्ञानेन यथाप्रागभावस्यनवंध्यापुत्रकारणत्वंतथाघटादिकंप्रत्यपिनस्यादसत्त्वाविशेषादित्याह वंध्येति तस्यानुत्पन्नकार्यस्य शब्दयोगतःशब्दप्रभावात् तदुक्तं अत्यंतासत्यपिज्ञानमर्थेशब्दःकरोतिहीति ॥ ५७ ॥ ननुघटादिकार्योत्पत्त्यनंतरंप्रागभावोघटादिकार्यसंबंधीभविष्यति

तथाचभाविसंबंधमादायकुमारेराजत्ववद्घटीयत्वादिव्यपदेशोपिस्यादित्याशंकते उत्पन्नेइति कार्येउत्पन्नेसतिप्रागभावस्तस्यकार्यस्यसंबंधीभविष्यतीतिचेदित्यर्थः कार्यउत्पन्नेप्रागभावस्यनष्टत्वात्संबंधिद्वयाश्रितःसंबंधःकथंस्यादित्याशयेनोत्तरयति नहीति अत्रकार्योपादाने ॥५८॥ किंचकार्योत्पत्त्यनंतरंप्रागभावस्यकार्येणसंबंधांगीकारेप्रागभावस्याविनाशित्वापत्तिः तथाचप्रागभावस्तदानष्टःस्थितोवेतिविचार्यतामित्यधस्तादुक्तंस्थितत्वेनकारणरूपंपक्षांतरंप्रसज्जेतेत्याह अपिचैवमिति कार्यस्यजन्मनइतियोजना तच्चपक्षांतरंप्रागभाव

वंध्यापुत्रादिवत्तस्यज्ञानंचेत्शब्दयोगतः॥ तद्वदेवचतस्यापिजनिर्नैवभविष्यति ॥५७॥ उत्पन्नेसतिचेत्तस्य प्रागभावोभविष्यति॥ नहिजातेघटेतस्यप्रागभावोत्रविद्यते ॥ ५८॥ अपिचैवंननाशःस्यात्प्रागभावस्यजन्मनः॥ कार्यस्यततएवैतत्पक्षांतरमुपागतं॥ अनष्टप्रागभावोयंकारणंजगतामिति ॥ ५९ ॥ कार्यस्यजनिरेवस्यात्प्रागभावविनाशिनी॥ तयाननाशितोयस्मात्प्रागभावस्ततोध्रुवः॥ ६० ॥ नित्येननैवभेदोस्तिप्रागभावेत्वकार्यतः॥ अनित्येनास्यभेदश्चेत्सध्वंसोयंभविष्यति॥ ६१ ॥

पदघटकप्राक्पदार्थविरोधादेवासंगतमितिभावः ॥५९॥ उत्पत्त्यनंतरसंबंधाङ्गीकारेविनाशित्वापत्तिमेवस्फुटयति कार्यस्येति कार्योत्पत्तिरेवप्रागभावनाशसामग्रीत्वेनप्रसिद्धातयायदिनसनाशितस्तदाकस्तंप्रागभावंनाशयिष्यति तथाचसध्रुवोनित्यःस्यादित्यर्थः ॥ ६० ॥ स्वरूपेणप्रागभावस्यनित्यत्वेतुतस्यानेकत्वंयदुक्तंतद्व्याहतंस्यादित्याह नित्येनेति अस्यनित्यस्यप्रागभावस्यनित्येनोपाधिनाभेदोनस्यात् कुतोऽकार्यतःनित्यस्यभावस्यअकार्यत्वात्प्रागभावप्रतियोगित्वलक्षणकार्यत्वविरहात्प्रागभावभेदस्यप्रतियोगिभेदमात्रनिरूप्यत्वादितियावत् अनित्येनोपाधिनास्यनित्यप्रागभावस्यभेदश्चेदंगीक्रियतेतदायमेवप्रागभावोध्वंसाभावरूपोपिस्यादतिरिक्तस्यध्वंसस्यकल्पने ॥ ४ ॥
गौरवात् नचेष्टापत्तिः ध्वंसस्यकार्यविरोधिनःकारणत्वस्यव्याहतत्वादितिभावः ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंकारणस्यनित्यानित्यत्वपक्षयोरपितत्प्रतियोगिकप्रागभावासंभवस्तस्यध्वंसत्वापत्तिश्चदूषणतयाबोध्येत्याह कारणस्यापीति एतदु क्तंदूषणंखंडनीयतयाप्रकृतेकारणाभावस्यप्रागभावरूपत्वेपिबोध्यं यतःकारणस्यनित्यत्वेआत्मवत्प्रागभावासंभवः अनित्यत्वेतुनित्य स्यप्रागभावस्यैवध्वंसत्वापत्तिरित्यर्थः अत्रेदंबोध्यं यथाकार्यध्वंसःकार्यविरोधीतथाकारणध्वंसोपि नहिमृत्तिकाध्वंसेघटोजायतइति ॥ ६२ ॥ अथकारणाभावस्यध्वंसरूपस्यकारणतापक्षमेकादशभिर्दूषयंस्तत्रवादिनआशयंश्रोतुंतंपृच्छति अपिचेदिति किंचयदिलो केनित्यानित्यभावरूपंकारणंप्रसिद्धंतर्हितदेवास्तु तस्यलौकिककारणस्याभावेनकारणतयास्वीकृतेनतववादिनःकिंप्रयोजनमित्यर्थः ॥ ६३ ॥ एवंसिद्धांतिनापृष्टःसौगतःस्वाभिप्रायमुद्घाटयति बीजादीति बीजादिरूपंकारणमविनष्टंचेत्कार्यस्यांकुरादेःकारणंनभवतिकिं

कारणस्याप्यनित्यत्वेसममेतद्धिदूषणं॥ नित्यत्वेप्रागभावश्चनभवेदात्मनोयथा॥ ६२॥ अपिचेत्कारणंलोकेविद्यतेकिंचिदेवहि॥ अनित्यंवापिनित्यंवातस्याभावेनकिंतव॥ ६३॥ बीजादिनाऽविनष्टंचेत्कारणंकार्यकारणं॥ कारणाभावएतस्मात्कारणंनैवकारणं ॥ ६४॥ आयुष्मांस्तत्रवदतुप्रागभावःकिमत्रसः॥ अंकुरादेर्हिजनकोबीजादिःकारणंनतु ॥ ६५ ॥ प्रागभावस्यपक्षस्त्वंत्यक्तवानसिसंप्रति ॥ प्रध्वंसस्ययतोब्रूषे कारणत्वंजगज्जनौ ॥ ६६ ॥ बहूनांकारणानांस्यात्प्रध्वंसोजठरादिषु ॥ अंकुरादीनिकार्याणिकुतस्तत्रभवंतिन ॥ ६७॥

तुविनष्टमेव एतस्मादेतदालोच्यमयाकारणाभावःकारणमुच्यतेनबीजादिरूपंकारणमित्यर्थः ॥ ६४ ॥ एतत्श्रुत्वासिद्धांतीवादिनंप्रतिज्ञां तरेणनिगृह्णंस्तदुक्तितएवप्रागभावविचारसमाप्तिंदर्शयति आयुष्मानितिद्वाभ्यां समाधानार्थंवादिनामहदायुरपेक्ष्यमितिसूचनायायु ष्मानित्युच्यतेवादी तत्रोक्ताभिप्रायेसतिसवादीतावदितिवदतु इतिकिं बीजादिरूपकारणस्यप्रागभावःकिमंकुरादेःकार्यस्यनजनकइ ति त्वयासंमतंयतःप्रागभावपक्षंपरित्यज्यबीजादिनाविनष्टमित्युक्त्याप्रध्वंसस्यकारणत्वंब्रूषेइतिद्वयोःसंबंधः ॥ ६५ ॥ ६६ ॥ तत्रमौने नवादिनःस्वीकारंलक्षयित्वाध्वंसस्याकारणतायांहेतुतयाव्यभिचारंदर्शयति बहूनामिति बहूनांबीजकंदादिरूपाणांकारणानांभक्षकोद रादिषुप्रध्वंसेप्यंकुरादयोनजायंतइतिव्यभिचारात्कथंतस्यकारणत्वमित्यर्थः ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणाभावःकारणमित्युक्तौव्याघातश्चेत्याह अपियद्यस्येतिद्वाभ्यां जनकत्वलक्षणंकारणत्वंबीजादेर्यदिनास्तितदाबीजाद्यभावपरःकारणाभावशब्दःकथंनव्याहतइत्यर्थः ॥ ६८ ॥ यद्यभावइति किंचयदित्वन्मतेबीजाद्यभावःकारणंतदातस्यबीजाद्यभावस्याप्यभावः

कारणमितित्वयावक्तव्यं कारणत्वाविशेषात् तथाचबीजाद्यभावस्यकारणतोक्तिर्व्याहताअनवस्थिताचेति ॥ ६९॥ किंचयद्यत्कारणत्वेनाघ्रातंतस्यतस्याभावःकारणमित्युक्तौव्यवहारलोपांतदोषविशिष्टाऽकारणककार्योत्पत्तिःपुनःप्रसज्जेतेत्याह एवंचेति ॥ ७० ॥ ध्वंसस्यकारणत्वंप्रत्यक्षविरुद्धंचेत्याह अपितंत्विति कार्योत्पादेसतिअत्रपटकुंडलादिकार्यशरीरेअनुगतस्यतंतुसुवर्णादिरूपकारणस्यप्रत्यक्षसिद्धत्वात्कारणाभावःकारणमितित्वयाकथंकीर्त्यतेइत्यर्थः ॥ ७१॥ एवमन्वयव्यतिरेकाभ्यांभावानांकारणत्वेनिश्चितेसतियत्रबीजांकुरोदाह

अपियद्यस्यजनकंकारणंतस्यतद्भवेत्॥ बीजाद्यजनकंकेनकारणंभवतोच्यते॥ ६८ ॥ यद्यभावोभवेत्कार्यजनौकारणमत्रते॥तर्हितस्याप्यभावःस्यात्कारणत्वेनहेतुना॥६९॥ एवंचकारणंहित्वाभवेत्कार्यजनिस्तव॥ तत्रोक्तदूषणंपूर्वंपुनरावर्त्ततेधुना ॥ ७० ॥ अपितंतुसुवर्णादेःकारणस्यात्रदर्शनात् ॥ कार्योत्पादेपिकेनास्यप्रध्वंसःकीर्तितस्त्वया ॥ ७१ ॥ ततोबीजस्यचेन्नाशोमाभूत्कारणमत्रतत् ॥ अनष्टाबीजजठरेपृथिव्यवयवाहियेाा तएवकारणंतत्रसंतुसर्वाविरोधतः ॥ ७२ ॥ प्रागभावेहियेदोषाःप्रध्वंसेपितएवहि ॥ उक्तिभेदाद्भवंत्येतेत्यभावेसकलेपिच॥ ७३ ॥ अन्योन्यभेदधीहेतुरभावोपिनकारणं ॥ अदर्शनादभावोतःकारणंकोपिनैवसः॥ ७४॥

रणेत्वयाध्वंसस्यहेतुतोच्यतेतत्रबीजाद्यवयवानांहेतुतासंभवात्ध्वंसोन्यथासिद्धत्वान्नहेतुरित्याह ततइति ततःसतःकारणस्यसिद्धत्वात् बीजस्यनाशेसतितद्बीजंकारणंमास्तु येतुबीजस्यांतर्वर्त्तमानाअनष्टाःपार्थिवाअवयवास्तएवकारणतांभजंतु सर्वप्रमाणाविरोधादित्यर्थः बीजस्यबीजत्वंतुतदुपाधिकमितिभावः ॥ ७२ ॥ प्रागभावपक्षोक्तादोषाअपिध्वंसादिपक्षेयोज्याइत्याह प्रागभावइति उक्तिभेदात्किंचित्प्रकारकभेदात् यथाएकस्यध्वंसस्यजगद्धेतोरिदानींजातत्वेपूर्वंसृष्ट्यनापत्तिः अनेकत्वेअविद्यमानप्रतियोगिसंबंधानुपपत्तिरित्यादयः

एवमत्यंताभावेऽन्योन्याभावेचयथासंभवंदोषायोज्याइत्यर्थः ॥ ७३ ॥ अन्योन्याभावस्यकारणत्वंत्वनुपलब्धिबाधितमित्याह अन्योन्येति ॥ ७४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्यंताभावपक्षंदूषयितुंशून्यवादिमतंखंडनीयत्वेनोपन्यस्यति अतएवेति अतोऽभावत्वावच्छिन्नस्यकारणत्वासंभवादेवहेद्विजोत्तमाः शून्यस्यकारणत्वंनमंतव्यं शून्यमितिहिसामान्याभावात्मकात्यंताभावस्यैवनामवादिभिःकल्पितंतस्यवन्ध्यापुत्रवत्सत्ताहीनस्यकारणत्वंकथंस्यादित्यर्थः॥७५॥ तत्रदोषंवक्तुंविकल्पयति अपिकार्यस्येति शून्यपदार्थघटकोऽभावःकिंकार्यप्रतियोगिकःकारणप्रतियोगिकोवाकार्यकारणोभयप्रतियोगिकोवा त्रेधाप्यसंभवइत्यर्थः ॥ ७६ ॥ तत्रनाद्यः कारणाभावःकारणमित्यभ्युपेत्यकार्याभावस्यकारणतांवक्तुःप्रतिज्ञाहानेरपसिद्धांतस्यवादोषस्यापातादित्याह कार्यस्ययदीति कार्यस्यात्यंताभावस्तत्कारणमित्यंगीकारेपक्षहानिरित्यर्थः

अतएवनशून्यस्यकारणत्वंद्विजोत्तमाः॥अत्यंताभावएवायंशून्यंवादिजनेरितम्॥वंध्यासुतसमस्यास्यकारणत्वंकथंभवेत्॥ ७५ ॥ अपिकार्यस्यवायंस्यादथवाकारणस्यहि ॥ उभयोर्वापिनैवस्यात्त्रेधाप्येषमहाधियः॥ ७६ ॥ कार्यस्ययदिसोयंस्यात्तदापक्षपरिक्षयः॥ कारणाभावतःकार्यंपक्षएषयतस्तव॥७७॥ अपिभूयान्विरोधःस्यादस्यपक्षस्यसंग्रहे॥ अतःकारणतःकार्यमत्यंतासत्प्रजायते॥ वंध्यायास्तनयःकस्मात्तादृगेवनजायते ॥ ७८ ॥ अथवंध्याभवेन्नैषाकारणंशक्त्यभावतः ॥ केयंशक्तिस्तदैतत्तुवक्तव्यंशक्तिवादिना ॥ ७९ ॥ ययासंजायतेकार्यंकारणात्सेतिचेन्मतं॥ कारणंकिंततोभिन्नंशक्तेरेतन्निरूप्यताम्॥ ८० ॥

॥ ७७ ॥ अत्रैवदोषांतरमाह अपिभूयानिति अस्यकार्याभावःकारणमित्याकारकस्यपक्षस्यांगीकारेऽतोहेतोर्भूयान्बहुविधोविरोधःस्यात् अतःकुतइत्याकांक्षायामाह कारणतइत्यादि अयंभावः कार्याभावोनिरपेक्षःकारणंकिंवादंडोयथाचक्रादिसापेक्षोघटकारणंतद्वत्सापेक्षः आद्येसर्वत्रसर्वकार्यापत्तिः अंत्येपिदृष्टसामग्रीसद्भावाद्वंध्यायाःसुतःकुतोनजायते एतन्मतेकार्यस्यात्यंतासद्रूपत्वाद्वंध्यासुतस्याप्यत्यंतासत्त्वाविशेषादिति ॥ ७८ ॥ ननुवंध्यायाःसामग्रीघटकत्वमेवनास्तिशक्त्यभावेनकारणत्वविरहादितिशक्तिवादिनःशंकामनूद्यतन्निरासायशक्तिलक्षणंपृच्छति अथेति ॥ ७९ ॥ यद्बलात्कारणात्कार्यंजायतेसाशक्तिरितिलक्षणमाशंक्यसाशक्तिःकिंकारणाद्भिन्नाऽभिन्नावेतिविकल्पयति ययेति साशक्तिः ततःशक्तेःसकाशात्कारणंभिन्नमभिन्नंवाइत्यर्थः ॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आद्येपिकार्यारंभकत्वंकिंशक्तेरेवोतकारणस्यापि प्रथमेकारणस्यकारणत्वहानिःकारणत्वस्यकार्यारंभकतामात्ररूपत्वात् चरमेतुकिंश
क्त्यातांविनापिकार्यारंभकतायाःसत्वादित्याह शक्त्येतिद्वाभ्यां यदिशक्त्याकार्यंजायेततदाप्रसिद्धंकारणमकारणंकारणताहीनंस्यात्
॥६॥ किंचशक्तिसद्भावेभावमात्रस्यएतत्प्रसिद्धंकारणत्वंनस्यात्तयैवनिर्वाहात् तार्किकैःशक्तिस्थानाभिषिक्तःप्रतिबंधकाभावःकारणंस्यादि
त्याशयेनभावमात्रस्येत्युक्तं ॥ ८१ ॥ तेनेति तेनएकत्रैवारंभकतौचित्येनशक्तिकारणयोरन्यतरस्यवैयर्थ्यंयतःकार्यजनकात्मकंकारणं
तवमतेतुशक्तिरप्येतादृशीकार्यजनकात्मिकैवेत्यर्थः ॥ ८२॥ शक्तिकारणयोरभेदपक्षेतुशक्तिकारणपदयोःपर्यायत्वापत्तिरित्याह एतयो
रिति ॥ ८३ ॥ एवंशक्त्यंगीकारस्याप्यसामंजस्येकार्यात्यंताभावःकारणमित्याकारकेऽसत्कार्यवादेवंध्यासुतोत्पत्तिप्रसक्तिरपरिहार्यैवे

शक्त्यासंजायतेकार्यंकारणंस्यादकारणं॥ भावमात्रस्यनैवैतत्कारणत्वंप्रसिद्ध्यति ॥८१॥ तेनशक्तेस्तुस
द्भावेकारणंव्यर्थमेवतत्॥कारणस्यापिसद्भावेशक्तिर्व्यर्थाप्रसज्जते॥ कारणंकार्यजनकंशक्तिश्चेत्तादृशीतव
॥ ८२ ॥ एतयोर्यद्यभेदःस्यात्तदानामद्वयंभवेत्॥ कारणंशक्तिरित्येतद्व्यर्थाशक्तिस्तदातव ॥८३॥ ततोवं
ध्यापिकस्मान्नजनयेत्सुतमात्मनः॥ अत्यंतासत्त्वसामान्यंतत्सुतस्यापिविद्यते ॥ ८४ ॥ नकारणत्वंचास्य
स्याइतिचेत्तत्त्वतोवद॥ कार्यस्यादर्शनंनैवभवेदस्यनियामकं ॥ कुतोनस्यादिदंयस्मादस्माभिःपृच्छ्यतेधुना
॥८५॥ पुत्राजनिंविनाचैवनवंध्यालभ्यतेक्वचित्॥ अभावेकारणत्वस्यकारणंधीमतापिच॥ ८६॥

त्याह ततइति एतत्प्रत्यक्षसिद्धमत्यंतासत्वरूपंकार्यलक्षणंयतोवंध्यासुतस्यापिवर्ततेऽतोवंध्यापिकथंसुतंनजनयेदितिसंबंधः ॥८४॥ नन्व
त्यंतासद्रूपमपिकार्यंकारणादेवजायतेवंध्यातुनकारणमितिचेत्तत्त्वंविचार्यब्रूहीनहिवंध्यायाःकारणत्वमेव कुतोनेतिपृच्छंतंप्रतिसंदिग्धः
कारणत्वाभावोहेतुतयोपन्यसितव्यइत्याह नकारणत्वमिति अस्यावंध्यायाःअस्यकारणत्वाभावस्यनियामकंनियमेनबोधकंकार्यादर्श
नंनसंभवति इदंकार्यदर्शनमेवकुतोनस्यादितिप्रश्नारूढतयासंदिग्धत्वादित्यर्थः ॥ ८५ ॥ नचवंध्यात्वंकारणत्वाभावोवापुत्रादर्शनप्रयो
जकत्वेनवाच्यस्तयोःपुत्रादर्शनैकप्रयोज्यत्वेनान्योन्याश्रयतयासंदिग्धत्वादित्याशयेनाह पुत्राजनिमिति पुत्राजनिरूपंहेतुंविनावंध्या ॥६॥
त्वंकारणत्वाभावेकारणंसाधकंचधीमतापिदुर्लभमित्यर्थः ॥ ८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचयथासत्कार्यवादिभिःकारणेकार्यस्यसूक्ष्मरूपेणस्थितिःकार्यनियामिकाङ्गीकृतातथाभवद्भिरनभ्युपगमात्सर्वंसर्वत्रोत्पद्येतात्यंतासत्वात्मकस्यभवदभ्युपगतस्यकार्यतावच्छेदकस्याविशेषादित्याह अपिकार्यमिति यतःकारणेकार्यंनास्त्यतःसर्वंसर्वत्रकुतोनजायतइतिसंबंधः॥८७॥ अपिचासतःकार्यस्यसत्कारणाऽभ्युपगमोऽयुक्तः योग्यंयोग्येनसंबध्यतइतिन्यायविरोधादित्याह अत्यंतासदिदमिति यदिकार्यमत्यंतासत्तर्हितस्यसद्रूपंकारणंकुतःस्यात् नहिविलक्षणयोःकार्यकारणभावेकिंचित्कारणंसाधकंविद्यते फलितमाह अत्यंतासत्वमित्यादिना॥ ८८॥ किंचासत्कार्यवादिभिस्तार्किकैःसत्ताजातिसंबंधादसतःसत्त्वरूपोत्पत्तिरिष्यतेतथावंध्यापुत्रस्यापिस्यादित्याह अ

अपिकार्यंनकुत्रापिकारणेस्तिकुतोनतत् ॥ सर्वस्माज्जायतेसर्वमत्यंतासत्त्वसाम्यतः ॥८७॥ अत्यंतासदिदंकार्यंयदितस्यकुतोभवेत् ॥ कारणंसदिदंनैववैलक्षण्येस्तिकारणम् ॥ अत्यंतासत्त्वमेतस्मात्कार्येनैवोपपद्यते॥८८॥ असतश्चेद्धिसत्तायाःसंबंधात्कार्यताभवेत्॥ तस्यसत्ताभिसंयोगोयदिकेनभवेन्नहि॥ वंध्यासुतस्यतस्यापिकार्यतास्तुतथैवसा॥ ८९॥ अप्यर्धजरतीयंस्यात्कार्यस्यासत्त्ववादिनः॥ कारणस्यापितत्कस्मान्मतेतस्यभवेन्नहि॥ ९० ॥ कारणस्यतथात्वस्यस्वीकारेपक्षसंक्षयः॥ असिद्धिश्चयतोनात्रकार्यंसंजायतेऽसतः॥ ९१ ॥ वंध्यासुतादयोभावाःपटतैलादिहेतवः॥ नदृश्यंतेप्रदृश्यंतेतिलतंत्वादिकास्तथा॥ ९२॥

सतश्चेदिति सत्तायाःसंबंधाद्यद्यसतःकार्यताउत्पत्तिरिष्यतेतदातस्यवंध्यापुत्रस्यापिसत्तायोगःकार्यताचास्त्वितियोजना॥ ८९॥ स्वेच्छयैवकार्यस्यासत्त्वमभ्युपगम्यकारणस्यासत्त्वमनभ्युपगच्छतस्तार्किकस्यार्धजरतीयन्यायापत्तिरित्याह अप्यर्धेति यथाजरतीकामुकःस्वेच्छयैवकिंचिदङ्गमुपादत्तेकिंचित्त्यजतितथेदमपीत्यर्थः एतदसत्त्वं॥ ९०॥ यदितुतार्किकःकारणस्याप्यसत्वमंगीकुर्यात्तदातस्यसतोसज्जायतइत्याकारकसिद्धांतहानिर्दृष्टविरोधरूपाऽसिद्धिश्च नह्यसतःसकाशात्कार्यंजायमानंदृश्यतइत्याह कारणस्येति तथात्वस्यासत्त्वस्य॥ ९१॥ दृष्टविरोधरूपाऽसिद्धिमेवस्फुटयतिवंध्यासुतादयइति वंध्यासुतादयोऽसंतःपटादीनांहेतुभूतानदृश्यंतेकिंतुसद्रूपास्तंत्वादयएवतथापटादिहेतुत्वेनदृश्यंतइत्यर्थः॥ ९२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुभ्रांतत्वाल्लौकिकान्वयव्यतिरेकदर्शनंसत्कारणत्वेनप्रमाणमितिशंकांवारयति दर्शनेपीति यदासदन्वयव्यतिरेकयोर्दर्शनेसतिइदंदर्शनंभ्रांतिरूपमितितेमतंतदापिनसर्वंज्ञानंभ्रांतित्वेनस्वीकार्यंकिंतुकिंचिद्धर्मिविषयंज्ञानमभ्रांतमस्तीत्यभ्युपगंतव्यं सर्वज्ञानंधर्मिण्यभ्रांतंप्रकारेतुविपर्ययइतिन्यायात् यतोयद्धर्म्यंशेज्ञानप्रामाण्यमाश्रित्यैवपक्षाणांपूर्वपक्षसिद्धांतरूपाणांनिर्णयोभवति धर्मितत्त्वबहिर्भूताहिपक्षाःपूर्वपक्षाइत्युच्यंतेयथारज्जौसर्पदण्डधाराद्यवगाहिनः धर्मितत्त्वावगाहिपक्षस्तुसिद्धान्तोयथेयंरज्जुरिति धर्म्यंशेज्ञानप्रामाण्यानङ्गीकारेतुसनस्यादित्यर्थः ॥ १३ ॥ धर्मित्वेनतुसद्रूपमेवसर्वत्रानुगतंगृह्यतेनासदित्याह प्रत्यक्षेणेति कार्यस्यकारणस्यवासद्रूपत्वंप्रत्यक्षेणानुमानेनवानगृह्यतइत्यर्थः ॥ १४ ॥ यदिसर्वमसद्रूपंस्यात्तदासत्त्वंसर्वत्रानुगतंभासेतनचतथाभासते अपिचदृश्यासत्वांगीकारेपितद्ग्राहकस्यसाक्षिणःसत्त्वमनपन्हवनीयमेवनिःसाक्षिकस्यकस्याप्यसिद्धेरित्याह अत्यंतासदिदमित्ति यदिइदंकार्यकारणरूपंजगद

दर्शनेपियदाभ्रांतिर्विद्यतेभवतस्तदा॥ अस्तिकिंचिदसंभ्रांतंयतःपक्षविनिर्णयः ॥ १३ ॥ प्रत्यक्षेणचकेनापिकार्यकारणयोर्भुवि॥ असत्त्वंगृह्यतेनैवनानुमानंचविद्यते॥ १४॥ अत्यंतासदिदंसर्वंकार्यकारणरूपकं॥ ग्राह्यंतेनयथैवैतन्नरश्रृंगमिदंनच॥ ग्राहकंसंतमात्मानंपरिहायप्रसिद्ध्यति ॥ १५॥ अपिभ्रांतिंविनाबाह्यैर्नरिश्रृंगंकदाचन॥ गृह्यतेनचकार्यंचकारणंचात्रगृह्यते॥ १६॥ अपिशब्दोगृहीतार्थसंबंधोबोधकोनृणां॥ वंध्यासुतादिविषयेकेनायंजायतेग्रहः॥ १७॥

त्यंतासत्स्यात्तदातेनासद्रूपेणग्राह्यंस्यात् यथानरश्रृंगमसद्रूपेणगृह्यते इदंसर्वस्यासत्त्वमपिसद्रूपंग्राहकंसाक्षिणंविनानसिद्ध्यतिकिंतुसाक्षिणमाश्रित्यैवेत्यर्थः ॥ १५ ॥ किंचयदिसर्वमसद्रूपंस्यात्तदानरश्रृंगवद्भ्रांतिदशायांनप्रतीयेतइदंतुप्रमाणव्यापारैःप्रतीयतइतिकथमसत्त्वमित्याह अपिभ्रांतिविनेति बाह्यैरतिपामरैरपिनरिमनुष्येश्रृंगंभ्रांतिविनानचगृह्यते कार्यकारणरूपंजगत्तुअत्रप्रमाणव्यापारदशायांगृह्यतेइतिसंबंधः एतेनोभयाभावःकारणमितिपक्षोपिनिरस्तइति ॥ १६ ॥ यदिकार्यकारणात्मकंजगदसत्स्यात्तदातस्यकेनापिप्रमाणेनबोधोनस्यात् असतःप्रमाणसंसर्गायोग्यत्वादित्यर्थंकैमुत्येनसूचयन्शब्देनाप्यलीकानुभवासंभवमाह अपिशब्दइति गृहीतोर्थैसंबंधोयस्यैतादृशएवसन्शब्दोयतोर्थंबोधयतिअतोहेतोरसतिवंध्यासुतादिरूपेविषयेकेनकरणेनग्रहोऽनुभवःसंजायतइतिवदेतिसंबंधः यच्चजायतेऽलीकविषयकंज्ञानंतद्विकल्परूपं नचतादृशंजगदज्ञानंमंतव्यंसर्वव्यवहारलोपप्रसंगादितिभावः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलंदूरंगत्वाशब्दरूपकार्योदाहरणेनैवसतःकारणतांभवानवधारयत्वित्याह अपिशब्दस्येति वागादिव्यापारवान्सत्त्वविशिष्टोदेवदत्तादिदेहएवशब्दस्यजनकोदृष्टः वंध्यापुत्रदेहस्तुअसन्नसद्रूपःशब्दजनकतयानदृष्टइत्यर्थः॥ ९८॥नन्वसद्वाइदमग्रआसीत्ततोवैसदजायतइत्यादिश्रुतार्थानुपपत्त्याकल्पितमायया ऽसत्कारणतामुपपादयिष्यामीतिचेन्मैवंवोचः तवमतेवेदप्रामाण्यस्यैवाभावादित्याह अपिवेदस्येति अनुमानमनुमानरूपंतवमतमपिश्रुतिसिद्धमायया ऽऽलंबनभूतयाकथंचिन्मानंभवेदपिपरंतुअयंवेदस्तवमतेमानंनास्तीत्यर्थः ॥ ९९॥ वस्तुतस्तुतत्रवाक्येअसत्पदमव्याकृताख्यसूक्ष्मावस्थापरंनशून्यत्वपरमित्याशयेनाह अपिवेदइति वेदोपिकार्यकारणयोरसत्तांकुत्रापिनब्रूतने

अपिशब्दस्यजनकोदेहोवागादिसंयुतः॥ दृष्टःसत्त्वेननैवासन्दृष्टोवंध्यासुतस्यसः॥ ९८॥ अपिवेदस्यमानत्वेकथंचिन्माययाभवेत्॥ अनुमानमिदंमानंनैवमानमयंतव॥ ९९॥ अपिवेदोनकुत्रापिब्रूतेऽसत्तांकदाचन॥ कार्यकारणयोःकेनस्यादसत्त्वंतवानयोः॥ १००॥ असद्वाइदमित्यादिपूर्वपक्षानुवादकं॥यतआहपुनःसोयंततोवैसदजायत॥इत्यादिकंततोऽसत्त्वेनमानंकस्यचिद्भवेत्॥ १०१॥ ततःशून्यंचनैवस्यादत्यंताभावसंहितं॥ कार्यकारणयोर्यस्मात्सिद्धोभावःप्रमाणतः॥ १०२॥

चान्यत्किंचिन्मानमस्तीत्यतस्तवमतेअनयोःकार्यकारणयोरसत्त्वंकेनसिद्ध्येदित्यर्थः ॥ १०० ॥ छांदोग्येअसद्वाइत्यादिवाक्यंतुपूर्वपक्षस्यानुवादरूपं तद्धैकआहुरित्युपक्रमात् तदुत्तरवाक्येनासतःसदुत्पत्त्यसंभवस्योक्तत्वाच्चेत्याह असद्वाइदमिति सोयंवेदोयतस्ततोवैसदजायतेत्यादिकंसत्कारणतोपपादकमाहततोहेतोरसद्वाइत्यादिकंपूर्वपक्षानुवादकमितिसंबंधः यद्यपिततोवैसदजायतेत्यंशोपिपूर्वपक्षवाक्येपठितस्तथापिपूर्वपक्षेतस्यानुपपद्यमानत्वात्सिद्धांतहेतुतयातदुपन्यासइतिबोध्यं फलितमाह ततइत्यादिना॥ १०१॥ शून्यवादनिरासंनिगमयति ततःशून्यमिति अत्यंताभावेनसंहितंघटितंशून्यमपिनकारणंयतःकार्यकारणयोर्भावःसत्ताप्रमाणसिद्धेति ॥ १०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंकिंकारणमित्यंशेनप्रागभावादीनांकारणत्वासंभवउक्तेसतितर्हिंब्रह्मकारणमस्त्वितिशंकांब्रह्मपदार्थस्यकारणत्वायोग्यताप्रदर्शनेनप
रिहरन्ब्रह्मेत्यंशंयोजयति नचब्रह्मापीतिपंचभिः हेविप्रेंद्राब्रह्मापिजगत्कारणंनसंभवतिसर्वाधिक्यात्मकेनब्रह्मपदमुख्यार्थेनप्रयुक्तत्वात्
तच्चसर्वाधिक्यंसजातीयादिनिरूपितभेदराहित्यरूपं सजातीयादीनांब्रह्मण्यसंभवादितिद्वयोरर्थः ॥ १०३ ॥ १०४ ॥ तथाचद्वितीय
निरूपितंकारणत्वंब्रह्मणिकथंस्यादित्याह आनंदात्मेति ॥ १०५ ॥ ब्रह्मणइति यच्चकुत्रचित्शास्त्रेषुब्रह्मणोजगत्कारणत्वमुच्यतेतत्प्रत्यक्षा
नुमानादिविरोधान्नसंभाव्यतेइत्यर्थः ॥१०६॥ ब्रह्मशब्दमिति ब्रह्मशब्दवाच्यंयन्मुख्यंतन्नकारणत्वयोग्यंकिंतुपरंआपेक्षिकमहत्त्वाद्गौणं

नचब्रह्मापिविप्रेंद्राःकारणंजगतोभवेत् ॥ ब्रह्मशब्दस्यमुख्यार्थःसर्वाधिक्यंप्रकीर्तितः ॥ सर्वाधिक्येचभेदस्य
स्यादभावोत्रसर्वथा ॥ १०३ ॥ स्वसजातिविजातीयैर्देशकालार्थरूपिभिः ॥ भेदोत्रक्रियतेविप्रानतेब्रह्मणि
संतिहि ॥ १०४ ॥ आनंदात्मस्वभावेस्मिन्स्वयंज्योतिषिनिर्द्वये ॥ ब्रह्मण्येकरसेकेनकारणत्वंभविष्यति ॥ १०५ ॥
ब्रह्मणोयदपिप्राहशास्त्रंकारणतामिह ॥ तथापितर्कसहितैःप्रत्यक्षाद्यैर्विरुध्यते ॥ १०६ ॥ ब्रह्मशब्दंहितेनात्र
विप्रामुख्यंनकारणं ॥ किंतुकिंचित्परंतत्रकल्प्यंवाकारणांतरम् ॥ १०७ ॥ अतःकारणजिज्ञासाकरणीयाद्वि
जोत्तमाः ॥ जायमानंयतःसर्वंकारणादेवजायते ॥ ततोवयमिमेसर्वेकुतोजाताःशरीरिणः ॥ १०८ ॥ रेतस
श्चेद्भवेज्जन्मविप्रास्तस्मात्कुतोनहि ॥ सप्तमात्पितृदेहस्थधातोर्जन्मसदानृणां ॥ १०९ ॥

ब्रह्मशब्दप्रतिपाद्यमाकाशादिकंकारणंमंतव्यंअथवाब्रह्मणउपाधितयाकारणत्वोपपादकंकिंचित्कल्पनीयमित्यर्थः ॥ १०७ ॥ कुतोजा
ताइत्यंशंव्याकरोति अतइत्येकविंशत्या यतउक्तविधयाजगतोऽकारणकत्वमभावकारणकत्वंब्रह्मकारणकत्वंवानसंभवतिअतःकिंचि
त्कारणांतरमस्तितत्किमितिजिज्ञासाप्रसंगेप्रथममिदंशरीरमेवकुतोजायतेइतिविचार्यमित्यर्थः ॥ १०८ ॥ तत्ररेतसःकारणत्वमाशंक्या
न्वयव्यतिरेकव्यभिचाराभ्यांनिराकरोति रेतसइतिनवभिः त्वगसृङ्मांसमेदोस्थिमज्जाशुक्ररूपाणांधातूनांमध्येसप्तमाद्रेतसश्चेज्जन्मस्या
त्तर्हिपितृदेहगतादेवतस्मात्कुतोदेहजन्मसदानभवतीत्यर्थः ॥ १०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः सर्वज्ञःसर्वशक्तिश्वश्वेताश्वतरदर्शितः देवोऽष्टमूर्त्तिःसर्वात्मासम्यगष्टमईर्यते ॥ १ ॥ शिष्यप्रश्नंपूर्वोक्तानुवादपूर्वकमभिन
यति याज्ञवल्क्येरितमितिद्वादशभिः स्पष्टंद्वयम् परन्तुउक्तमिति ॥ १ ॥ २ ॥ आदित्येनेति यत्रयदुपबृंहणार्थं यत्रआदित्यप्रोक्तज्ञाने
॥ ३ ॥ कांडत्रयस्येति भेदाभेदाभ्यांभिन्नः ॥ ४ ॥ दध्यङ्ङाथर्वणस्येति अश्विनोःशिष्यता अस्यदध्यङ्ङाथर्वणस्य ॥ ५॥ पंचमाध्यायार्थ

श्रीगणेशायनमः ॥ याज्ञवल्क्येरितंब्रह्मज्ञानंश्रुत्वातिविस्मितः॥ शिष्यःपुनरिमंप्रश्नंकृतवान्स्वगुरुंप्रति ॥ १॥
भगवन्भवताब्रह्मज्ञानमाख्यानसंयुतं ॥ ऐतरेयोदितंतद्वत्कौषीतकिसमीरितम् ॥ २ ॥ आदित्येनतथाप्रोक्तं
यत्रचित्रकथाइमाः ॥ इंद्रप्रतर्दनौयत्रगुरुशिष्यौमहाबलौ ॥ अजातशत्रुबालाकीसर्वज्ञसदृशौतथा ॥ ३ ॥
कांडत्रयस्यवंशोपिभेदाभेदविभेदवान् ॥ ऋषिणासहसंवादोत्यश्विनोर्देवयोस्तथा ॥ दध्यङ्ङाथर्वणेनापिश
क्रस्यामिततेजसः ॥ ४ ॥ दध्यङ्ङाथर्वणस्यैवगुरुताशिष्यतापिच ॥ अश्विनोरस्यसंक्लेशोमरणांतस्तथामुनेः
॥ ५ ॥ संवादोयाज्ञवल्क्यस्यत्वाश्वलाद्यैर्द्विजोत्तमैः ॥ नानादेश्यैश्चमरणंशाकल्यस्याततेजसः ॥ ६ ॥ भू
पतेर्जनकस्यापिशिष्यतागुरुतातथा ॥ धीमतोयाज्ञवल्क्यस्यमैत्रेय्याश्चापिशिष्यता ॥ ७॥ गुरुतायाज्ञल्क्य
स्यकथितासोपिवैद्विजः ॥ संन्यस्यसर्वकर्माणित्यविद्यांस्वात्मनिस्थितां ॥ ८ ॥ दृष्टवान्पृथगेवायंयथापूर्वंमु
नीश्वराः ॥ कारणानांविचारेणदृष्टवंतोमहाधियः ॥ ९ ॥ अत्रतेषांमुनीशानांविचारःकीदृशोगुरो ॥ जातःस
भावाबुद्धिर्वाकथंकेनैवकीदृशी ॥ १० ॥

मनुवदति संवादइति ॥ ६ ॥ षष्ठसप्तमयोरर्थमाह भूपतेरिति जनकस्ययाज्ञवल्क्यशिष्यताषष्ठउक्ता मैत्रेय्यास्तच्छिष्यतातुसप्तमउक्ता त
त्रसप्तमांतेयदुक्तंयाज्ञवल्क्यःसंन्यस्याविद्याख्यामात्मशक्तिपरमार्थात्मस्वरूपात्पृथग्दृष्टवान्यस्याःशक्तेःस्वरूपंमुनिभिःकारणस्वरूपेण
दृष्टमिति अत्रपृच्छ्यते तेषांमुनीनांविचारःकीदृशोजातः तेषांसभाचकीदृशीजाता तत्रकेनवादिनाबुद्धिःस्वस्वाभिप्रायरूपाकीदृशीकथं
चप्रकटिताइतिचतुर्णामर्थः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणानामिति तेनविचारेणमुनिभिः किंकारणंनिश्चितंब्रह्मवाअन्यत्किंचिद्वा एवंतेषांमहात्मनांसर्वेषांसिद्धांतनिश्चयश्चकिमाकारकः ए तत्सर्वंवदयतोमत्सकाशाद्गोप्यंतवनास्तीतिद्वयोरर्थः ॥ ११ ॥ १२ ॥ एवंपृष्टोगुरुःश्वेताश्वतरेणमुनिनायाब्रह्मविद्यातदर्थिभ्यउक्तातांवर्ण यितुमुपचक्रमेइत्याह एवमिति ॥ १३ ॥ तत्रश्वेताश्वतरमुनिंप्रतिआर्थिनांयतीनांप्रश्नादिकमुपोद्घाततयाकथयति श्वेताश्वतरमितिनव भिः तंप्रसिद्धं ॥ १४ ॥ श्वेताश्वतरतेइति ब्रह्मज्ञानरूपांभिक्षांदेहीति ॥ १५ ॥ भवतेति स्वयंभुवस्तपसानुस्मृताद्वेदाद्धिरण्यगर्भाद्वाभव

कारणानांविचारेणकारणंकिंमुनीश्वरैः॥निश्चितंब्रह्मवाऽन्यद्वानिश्चयोपिचकीदृशः॥११॥तेषांमहात्मनामा सीद्गुरोत्वंतद्वदाधुना॥ कृपयापरयामत्यमवक्तव्यंनतेस्तिहि॥१२॥एवमुक्तोतिसंहृष्टोगुरुःशिष्यमभाषत॥शृ णुवत्सकथामेतांश्वेताश्वतरकीर्तितां॥यतिभ्योतिविरक्तेभ्योत्यर्थिभ्योब्रह्मवेदने॥१३॥श्वेताश्वतरमासीनंत पसादग्धकिल्बिषम् ॥ यतयःकुत्रचिद्दृष्ट्वापप्रच्छुस्तंमहाधियं॥ १४॥ श्वेताश्वतरतेस्वस्तिवेदशाखाप्रवर्ति ने॥ ब्रह्मज्ञानंस्वशाखोत्थंभिक्षांयच्छाद्यनोमुने ॥ १५॥ भवतायादृशंब्रह्मज्ञानंप्राप्तंस्वयंभुवः ॥ तद्वयंश्रोतु मिच्छामएतदर्थमिहागताः ॥ १६॥ अस्माकंकारणेवादोयतीनांसुमहानभूत् ॥ भिन्नकारणदृष्टीनांसंप्रदा यविभेदिनां॥ १७॥ चिरकालंवयंसर्वेसंवाद्यचपरस्परं॥ इतरेतरसंकेतंकृत्वात्वांहिसमागताः॥१८॥ श्वेता श्वतरनामायंवेदशाखाप्रवर्तकः॥ कारणंयदयंब्रूयात्तदस्माभिर्यतीश्वराः॥ अभिवादेननिखिलैरंगीकार्यम संशयम्॥ १९ ॥पक्षपातेनरहितःसर्वज्ञोयंमुनीश्वरः॥ शत्रौपुत्रेस्वदेहेचविषमोनकदाचन॥२०॥

तायादृशंज्ञानंप्राप्तंतज्ज्ञानमेतदर्थंश्रोतुमिहागताःस्मेतिसंबंधः॥१६॥ एतदर्थंकिमर्थमित्याकांक्षायांविप्रतिपत्तिजन्यसंशयवारणार्थमिति दर्शयंति अस्माकमित्यादिना संप्रदायभेदेनभिन्नंभिन्नंकारणंमन्यमानानामस्माकंजगतःकारणेविवादोभूदित्यर्थः ॥ १७ ॥ चिरकाल मिति संकेतंकर्तव्यनिश्चयं स्पष्टमन्यत्॥ १८ ॥ संकेतमभिनयंति श्वेताश्वतरनामेतिद्वाभ्यां अयंमुनिर्यत्कारणंब्रूयात्तदस्माभिःसर्वैःप्रण म्यांगीकार्यमित्यर्थः ॥ १९ ॥ तत्रहेतुतयामुनेराप्ततामाह पक्षेति ॥ २०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थमिति स्पष्टं ॥२१॥ गुरुःशिष्यंप्रत्याह एवमिति एवंपृष्टःश्वेताश्वतरोमुनिस्तेभ्योयतिभ्योयदुक्तवांस्तदहंतुभ्यंश्रावयामीत्यर्थः॥२२॥ तत्रब्रह्मवादिनोवदंतीतिब्राह्मणभागस्यार्थंप्रपंचयति ब्राह्मणाइतिनवभिः श्वेताश्वतरउवाच हेयतयोयथेदानींभवंतोमिलिताःसमवेतास्तथापूर्वमपिनानाविधमुनीनांसमाजोऽभवदितिद्वयोरर्थः ॥२३॥२४॥ तेष्विति तेषांसमुदितानांमध्येकेचिद्ब्रह्मविदएतानूअविज्ञानूअनुग्रहीतुमिच्छंतएवमूचुरिति॥२५॥ एवंकथमित्याकांक्षायांतद्वाक्यमभिनयति भवंतइतित्रिभिः भोब्राह्मणाभवतांलोकोपकारिणामत्रदे

इत्थंविधायसंकेतंवयमत्रसमगताः॥ छिंधिनःसंशयान्ब्रह्मन्स्वास्तितेमुनिपुंगव॥ २१ ॥ एवमुक्तोयतीन्प्राहयथान्यायमुपागतान्॥ कारणंयदहंतत्तेकथयामिमहामते॥ २२ ॥ ब्राह्मणाबहवःपूर्वंयतयोवेदवादिनः॥ षडंगकुशलास्तद्वदूहापोहविशारदाः॥ २३ ॥ शिष्यानानागुरूणांचकेचिद्ब्रह्मविदामपि ॥ यथाभवंतोयतयएकत्रमिलिताःक्वचित्॥ २४ ॥ तेषुब्रह्मविदःकेचिदेताननुजिघृक्षवः ॥ इदंवचनमाहुस्तेनिरीक्ष्यैवपरस्परम्॥ २५॥ भवंतोब्राह्मणाःसर्वेवेदवेदांगपारगाः॥ अत्रागतामहाभागालोकानुग्रहकारिणः ॥ २६॥ समाजोभवतांतस्मादेषलोकोपकारकः॥ भवताद्ब्राह्मणाहेतुर्जगतोत्रविचार्यतां॥२७॥ परित्यज्यकथाएतालौकिकीर्ग्लानिहेतुकाः॥ वचसोमुनिशार्दूलाभवद्भ्योरोचतेयदि ॥ २८ ॥ एवमुक्तेऽथतेसर्वेसंहृष्टाजातकौतुकाः ॥ ब्राह्मणामिलितास्तत्रतर्ककर्कशबुद्धयः ॥ कारणंजगतःश्रोतुमूचुस्तान्ब्रह्मवादिनः ॥ २९ ॥ भवंतएवमुनयःकीर्त्तयंतुमहाधियः॥ कारणंजगतःसर्वेश्रोष्यामःसंगतावयं ॥ ३० ॥ इत्युक्त्वामुनिवर्यास्तेसर्वदास्वात्मवेदिनः॥ तर्ककर्कशबुद्धींस्तान्ज्ञात्वामीमांसयोचिरे॥ ३१॥

शेसमाजोलोकोपकारायास्तु सचलोकोपकारइदानींवाचोग्लानिहेतुभूतालौकिकीःकथाःविसृज्यजगत्कारणविचारेणसिद्ध्येदितित्रयाणामर्थः ॥२६ ॥२७॥२८ ॥ एवंब्रह्मविद्भिरुक्तेसतिइतरेतर्कप्रधानाविप्राएवमाहुरित्याह एवमुक्तेइति ॥२९॥ इतरवाक्यमभिनयति भवंतएवेति स्पष्टं॥३०॥ इत्युक्त्वाइति एवमुक्तास्तेब्रह्मविदइतरद्विजांस्तार्किकान्ज्ञात्वामीमांसयामीमांसारीत्याविषयसंशयपूर्वपक्षादिरूपाधिकरणोपन्यासेनेतियावत् उक्तवंतइत्यर्थः विषयोविशयश्चैवपूर्वपक्षस्तथोत्तरं प्रयोजनंचपंचांगंशास्त्रेधिकरणंस्मृतमिति ॥३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रविषयशोधनपरत्वेनकिंकारणमित्यादिमंत्रंयोजयन्किंकारणमित्यंशस्यार्थंप्रपंचयति अकारणमित्यादिभिरष्टषष्टिश्लोकैः हेविप्राः एतज्जगदकारणकंजायतेइतिनवाच्यं यथापटस्तंत्वादिकारणंविनाजायतेइतिनवक्तुंशक्यमित्यर्थः ॥ ३२ ॥ दृष्टांतमेवस्फुटयति अहेतुतेति यदिदृष्टेप्रत्यक्षसिद्धेपटेअहेतुताभवेत्तदापटस्तंतून्विनापिभवेत्सचतथासर्वथानभवत्येवेतिसंबंधः ॥ ३३ ॥ उक्तमर्थमुदाहरणांतरैर्विशदयति अपिकार्याणीतिचतुर्भिः यदिकार्याणिकारणैर्विनापिस्युर्जायेरंस्तदासर्वेजंतवःसाधनार्जनमंतरेणापिकृतार्थाःस्युरित्यर्थः ॥ ३४ ॥ तथाचनार्यादिभिर्नरसमीपगमनादिकंनक्रियेतेत्याह नारीति ॥ ३५ ॥ स्वस्वाम्यादिश्चेति धनाद्यनपेक्षत्वेचसेव्यसेवकभावा

अकारणंजगत्सर्वंविप्रानैतत्प्रजायते ॥ पटोयथानजायेतविनातंत्वादिकारणं ॥ ३२ ॥ अहेतुताभवेद्दृष्टेयदितेनविनाभवेत् ॥ पटस्तंतून्विनाविप्रानभवत्येवसर्वथा ॥ ३३ ॥ अपिकार्याणिहेतूनामभावेपिजनिंयदि ॥ व्रजेयुश्चरितार्थाःस्युःसर्वएवात्रजंतवः ॥ ३४ ॥ नारीननरमागच्छेन्नरोनारींचकामुकः ॥ प्रजाद्यर्थंतथान्योपिनिर्धनोधनिनंनच ॥ ३५ ॥ स्वस्वाम्यादिश्चसंबद्धोनैवकश्चिद्भविष्यति ॥ क्षुत्पिपासातुरस्तद्वदन्नपानेच्छयानहि ॥ इतस्ततोजनोगच्छेत्तृप्तिरन्नादिनानच ॥ ३६ ॥ एवंवासःप्रभृत्यर्थेनगच्छेत्कोपिकुत्रचित् ॥ व्यवहारस्तथासर्वःपरिलोपंगमिष्यति ॥ ततःसकारणंसर्वंजायमानंमुनीश्वराः ॥ ३७ ॥ कारणाभावएतेनकारणंनोपपद्यते ॥ व्याख्यातमिदमप्यत्रज्ञातव्यंमुनिसत्तमाः ॥ ३८ ॥

दिसंबंधेनसंबद्धोपिकश्चननस्यात् तथान्नादीच्छयापिनकश्चिद्भ्रमेत् अन्नादिभिस्तृप्तिश्चनस्यादित्यर्थः ॥ ३६ ॥ एवमिति तथावस्त्राद्यर्थमपिनकश्चिद्भ्रमेत् एवमन्योपिव्यवहारोनस्यादित्यर्थः फलितमाह ततइति ॥ ३७ ॥ केचिद्बौद्धाःकारणाभावंबीजाद्यभावरूपमंकुरादिकार्याणांकारणमाहुस्तन्मतासंभवेप्युक्तहेतुजातंयोजयति कारणाभावइति एतेनव्यवहारलोपांतदोषप्रसंगेनकारणाभावःकारणमितिपक्षोपिनोपपद्यते अत्रपक्षेइदंवक्ष्यमाणंदूषणजातमपिव्याख्यातंविस्तरेणोक्तंसद्बोध्यमित्यर्थः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदितुधातुभ्यःपृथग्भूतात्तस्माज्जन्मभवतीत्युच्यतेतदापिकामाग्नितापाद्धृदयदेशमागतादेवतस्माद्रेतसःकुतोदेहजन्मनभवतीत्याह धातुभ्य इति ॥ ११० ॥ अथप्रजननेति प्रजननमुपस्थः ॥१११॥ अथयोनाविति स्पष्टं ॥११२॥ जरायुजानामंडजानांचदेहोजागरणेयोनिमथनाज्जायतेइतिशंकते अथजागरणइति विनिर्गतात्तेजसोरेतसइतिसंबंधः ॥११३॥ तत्रापिव्यभिचारप्रदर्शनेनोत्तरयति बालेति बालायावृद्धायावास्त्रियोगमनाद्देहःकुतोनजायतइत्यर्थः ॥ ११४ ॥ तत्रयौवनावस्थाकृतंविशेषमाशंक्यनिषेधति युवत्याइति वंध्यायांतद्वि

धातुभ्योपिपृथग्भावेत्हृदिकामाग्निदीपनात् ॥ समागतात्कुतोनस्याज्जन्मसर्वशरीरिणां ॥ ११० ॥ अथप्रजननद्वारानिर्गताच्चेज्जनिर्भवेत् ॥ निद्रादिदोषतस्तस्यनिर्गमेनजनिःकुतः ॥ १११ ॥ अथयोनौप्रमथनान्निर्गमेचेद्वपुर्भवेत् ॥ स्वप्नेयोनिप्रमथनान्निर्गमेनकुतोवपुः ॥ ११२ ॥ अथजागरणेयोनिमथनेनविनिर्गतात् ॥ जरायुजांडजस्थानांतेजसोजायतेवपुः ॥ ११३ ॥ बालवृद्धस्त्रियोयोनेर्मथनात्केननैवसः ॥ निर्गतोरेतसोदेहोभवेत्सर्वशरीरिणाम् ॥ ११४ ॥ युवत्याइतिचेत्केनवंध्यायांनभवेद्धिसः ॥ गर्भधारणशक्तायाइतिचेत्संगमंप्रति ॥ सर्वदैवकुतोदेहोनजायेतशरीरिणां ॥ ११५ ॥ ततोरेतोनविप्रेंद्राःकारणंदेहजन्मनि ॥ ततोवयंपितृभ्यांनजाताःसर्वेशरीरिणः ॥ ११६ ॥ उद्भिज्जाअपिजीवायेस्वेदजायेचजंतवः ॥ पित्रोर्वीर्यंविनादृष्टंतेषांजन्मशरीरिणां ॥ ततोवीर्यंनजंतूनांदेहधारणकारणं ॥ ११७ ॥ अदृष्टमितिचेत्किंचित्पुण्यपापात्मकंयदि ॥ केनतज्जायतेविप्राआत्मनाचेन्नमुक्तता ॥ ११८ ॥ मुक्तानामपियस्मात्सपुण्यपापंकरोतिच ॥ सुखदुःखोपभोगीचमुक्तोबद्धसमोभवेत् ॥ अनिर्मोक्षप्रसंगोयमनिष्टःसर्ववादिनाम् ॥ ११९ ॥

न्नायामपिचप्रतिसंगमंदेहाजननान्नयुवत्याअपिकारणत्वमित्यर्थः ॥ ११५ ॥ रेतसःकारणत्वाभावेचमातापित्रोःकारणत्वंनवाच्यमित्याह ततइति ॥ ११६ ॥ किंचस्वेदजोद्भिज्जशरीराणांदेहस्यरेतोविनाजायमानत्वदृष्टेर्नरेतसःकारणत्वमित्याह उद्भिज्जाइति ॥ ११७ ॥ धर्माधर्मात्मकमदृष्टमपिनदेहकारणमित्याह अदृष्टमितित्रिभिः पुण्यपापात्मकमदृष्टंहेतुरित्युच्यतेचेत्तदापिइदंविचार्यं किमदृष्टस्यहेतुः शुद्धआत्मादेहोवा आद्येमुक्तानामपिबद्धत्वापत्तिः यस्मान्मुक्तानामपिसआत्मापुण्यपापकर्तृत्वस्यतत्फलभोक्तृत्वस्यचभागी एतच्चसर्ववादिनामनिष्टमितिद्वयोरर्थः ॥ ११८ ॥ ११९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुण्यपापयोर्देहजन्यत्वरूपमंत्यंपक्षंदूषयति देहेनेत्यादिना ततआत्मनोविकारित्वप्रसंगेनानिर्मोक्षापत्तेरेवपुण्यपापयोर्देहजन्यत्वमभ्युपे
यंतत्रापिचेदंविचार्यं किंसदेहःपुण्यपापाभ्यामेवजायतेअन्यस्माद्वा आद्येअन्योन्याश्रयः नचबीजांकुरवत्परिहारः देहादृष्टयोःकार्यका
रणभावस्यप्रत्यक्षाविषयस्यांगीकारेअंधपरंपरापत्तेः अंत्येतुतत्स्वरूपंवाच्यमित्यर्थः ॥१२०॥ ननुस्थूलदेहस्यकारणंसूक्ष्मशरीरमेवेतिचे
दुच्यतेतदापिकिंयंकंचित्स्थूलदेहंप्रतिसूक्ष्मंकारणमुतसर्वान्प्रति आद्येयत्किंचिद्घटपूर्ववर्त्तिनोरासभस्यापिसर्वघटकारणत्वापत्तिरविशे
षात् अंत्येदेवदत्तसूक्ष्मशरीराद्देवदत्तदेहवदन्येपिस्थूलदेहाःकुतोनजायंतइत्याशयेनाह सूक्ष्मादिति यदिसूक्ष्मदेहादेवपुण्यपापहेतुभूतः
स्थूलोदेहविशेषोजायतेतदाऽपरोपिततोजायतां समर्थस्यक्षेपायोगादितिन्यायात् क्षेपोविलंबः ॥ १२१ ॥ अत्रपक्षेपुण्यपापयोः

देहेनततएवैतत्क्रियतेपुण्यपातकं॥ पुण्यपापकरोदेहःकुतएषप्रजायते॥१२०॥सूक्ष्माच्छरीरतःसोयंजायते
पुण्यपापकृत्॥ देहश्चेत्तर्हिविप्रेंद्रास्तथैवान्योपिजायतां ॥ १२१ ॥ पुण्यपापेभवेतांनकारणंदेहजन्मनि॥ त
थाचसतितद्व्यर्थंकारणत्वंतयोर्भवेत्॥ १२२॥ अपिसूक्ष्मंवपुःकेनजायतेद्विजसत्तमाः॥ अज्ञानादितिचेत्त
स्मात्स्थूलंकस्मान्नजायते॥ १२३॥ पुण्यपापविनिर्मुक्तमज्ञानंसूक्ष्मकारणं॥ भवेच्चेन्नभवेत्केनतादृक्स्थूल
स्यकारणम् ॥ १२४ ॥पुण्यपापादिकार्याणांवासनाकोटिवासितं ॥ सूक्ष्मस्यचेदिदंहेतुःस्थूलस्याप्यस्तुता
दृशं ॥ १२५ ॥

कारणत्वाभ्युपगमोव्यथासूक्ष्मदेहेनैवसर्वनिर्वाहादित्याह पुण्यपापेइति सूक्ष्मेणैवनिर्वाहसाम्येतददृष्टमितिचेदित्यादिनांगीकृतंतयोःपुण्य
पापयोःकारणत्वंव्यर्थंस्यादित्युत्तरार्धार्थः ॥ १२२ ॥ किंचसूक्ष्मशरीरस्याप्यागतुंकत्वेनकार्यत्वात्तत्कारणान्वेषणायांयद्यज्ञानंसूक्ष्म
स्यकारणमुच्यतेतर्हितदेवस्थूलस्यापिकारणमस्तुकिंसूक्ष्मस्यकारणत्वाभ्युपगमेनतद्धेतोरेवास्तुहेतुत्वंकितेनेतिन्यायादित्याह अपिसूक्ष्म
मिति तस्मादज्ञानात् ॥१२३॥ किंचतदज्ञानंपुण्यपापानपेक्षंसूक्ष्मशरीरकारणंतत्सापेक्षंवा आद्येस्थूलशरीरमपितथैवकिंनजनयेदित्याह ॥९॥
पुण्येति तादृक्पुण्याद्यनपेक्षं॥ १२४ ॥तत्सापेक्षत्वपक्षंदूषयति पुण्यपापादिकार्याणामितिचतुर्भिः यदिपुण्यकर्मादिरूपकार्याणांवास
नाकोटिभिर्वासितमिदमज्ञानंसूक्ष्मस्यहेतुरित्युच्यतेतर्हितादृशमेवाज्ञानंस्थूलस्यापिहेतुरस्त्विति ॥ १२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचांधपरंपरापत्तिरित्याह वासनाइतित्रिभिः वासनापदंहिसंस्काराणांवाचकंसंस्कारास्तुविनश्यदवस्थैःपुण्यादिभिःकार्यैर्जन्यंते विनाशयोग्यतातुपूर्वंविद्यमानानामेवनासतामित्यतःसंस्कारोत्पत्तयेपूर्वंपुण्यादीनांसत्तापेक्षितेत्यर्थः ॥ १२६ ॥ एवंसतिप्रसक्तांघटीयंत्रसमामनवस्थामभिनयति पुण्यपापाच्चेति कर्मादिभ्यःसंस्काराजायंतेतेभ्यश्चद्विविधंशरीरंशरीराच्चपुनःकर्माणीत्येवमनवस्थास्यादित्यर्थः ॥ १२७॥ फलितमाह एवमितिद्वाभ्यां एवंसतिसर्वानुपपत्तिपरिहारक्षमंकारणंदेहस्यापिनलभ्यतेकिमुतान्यस्यपरंतुतेनकारणेनभवितव्यमकारणककार्योत्पत्तेरसंभवस्योक्तत्वादिति ॥ १२८ ॥ ततोस्मादिति स्पष्टम् ॥ १२९ ॥ नचान्नमपिदेहकारणंवक्तुंशक्यंतस्यजन्मानंतरंभक्ष्यमाणत्वेनजन्मनिकारणान्तरस्यैववाच्यत्वादित्याह अन्नतइति वयमन्नतोनजाताःस्मयतोजाताःप्राप्तजन्मानःसंतइद

वासनाअपिसंस्काराःसंस्काराश्चविनाशतः॥ पुण्यादीनांप्रजायंतेनासतांचविनाशनं ॥ पुण्यपापेततःपूर्वं जायेतेकेनहेतुना॥ १२६॥ पुण्यपापाच्चसंस्काराःसंस्कारेभ्यस्तथावपुः ॥ सूक्ष्मंवाप्यथवास्थूलंततःपुण्यंच पातकं॥ १२७॥ एवंनकारणंकिंचिदस्माकंदेहजन्मनि॥ लभ्यतेतेनचैवात्रभवितव्यंद्विजोत्तमाः॥ १२८॥ ततोस्मादिहसंजाताइतिनैवास्तिनिश्चयः॥ अस्माकंद्विजशार्दूलाःकुतोजातावयंततः॥ १२९॥ अन्नतोनैवसंजातावयंजातायतस्त्विदं॥ भक्षयामोवयंविप्रास्तृप्तितुष्ट्यादिकारणम्॥ १३०॥ जीवनस्यापिनैतत्स्यात्कारणंद्विजसत्तमाः॥ अन्नादाएवसत्यन्नेम्रियंतेजंतवोयतः ॥ १३१ ॥ अन्नदोषाद्यतोव्याधिःसर्वेष्वेवप्रजायते॥मरणंचेतिविप्रेंद्राश्चिकित्साशास्त्रनिर्णयः॥१३२॥विषयांतरसंयोगएवंमरणकारणं॥ नारीसंयोगसंजातस्वांततापःपुमानयम्॥ १३३॥

मन्नंभक्षयामः तृप्त्याद्यर्थमित्यर्थः ॥ १३० ॥ तिष्ठतूत्पत्तिकारणंस्थितिकारणमेवनिर्णेतुंनशक्यतेइतिप्रतिपादकस्यजीवामकेनेत्यंशस्यार्थमुपबृंहयति जीवनस्यापीतिचतुस्त्रिंशच्छ्लोकैः एतदन्नंजीवनस्यापिहेतुतयानवक्तुंशक्यंयतोन्नभक्षकाजंतवोऽन्नेविद्यमानेपिम्रियमाणादृष्टाइत्यर्थः ॥ १३१ ॥ प्रत्युतान्नस्यव्याधिद्वारामरणहेतुत्वंवैद्यशास्त्रप्रसिद्धमित्याह अन्नदोषादिति ॥ १३२ ॥ अन्नोपलक्षितानांविषयांतराणामपिजीवनंप्रत्यहेतुत्वंप्रत्युततद्विरोधित्वंचदर्शयति विषयांतरेत्यादिना एवमन्नसंयोगवद्विषयांतराणांसंयोगोभोगोपिमरणहेतुः तथाहि नारीसंयोगेनसंजातःस्वांतेहृदयेतापोयस्यतथाभूतोऽयंकामीपुमान्प्रसिद्धइतिशेषः ॥ १३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रोत्रविषयस्यमरणहेतुतामुदाहरति घंटेति घंटाशब्दादितुल्यानाभ्यंतरवायोःशब्दान्श्रृण्वन्रोगीशीघ्रंम्रियतेइतिनैमितिकानिमित्तशास्त्रविदआहुरित्यर्थः॥ १ ३ ४॥ वीर्येति वेदार्थतत्त्वज्ञाअपिएवंस्त्रीयोगेनतुमरणंकथयंति एवंकथं स्वकीयनारीषुदिवारात्रौदिनादिकालानियमेनवीर्यभ्रंशात्परकीयासुतुसकृदेकवारमपिवीर्यभ्रंशात्कामीप्रत्यवायद्वारामरणंगच्छेदिति तथाचाथर्वणश्रुतिः प्राणंवाएतेप्रस्कंदंतियेदिवारत्यासंयुज्यंतेइति तथाप्रपंचसारेभगवत्पादैरप्युक्तं हानिनगच्छेज्जीवस्येति जीववासस्थानस्यरेतसोहानिस्त्यागोयथानभवतितथाय

घंटारवादिसदृशान्श्रृण्वन्प्राणरवान्बहून्॥ अल्पकालान्मृतिंगच्छेदेवंनैमित्तिकाविदुः ॥ १ ३ ४ ॥ वीर्यभ्रंशाद्दिनारीणांयोनौकामविमोहितः॥ स्वकीयानांदिवारात्रौप्रत्यवेयात्पुमानयं॥ परेषांतुसकृद्वापिप्रत्यवायान्मृतिंव्रजेत्॥ १ ३ ५ ॥ एवंवेदार्थतत्त्वज्ञामरणंयोगतःस्त्रियः॥ कथयंतितथादेहयोगशास्त्रविशरदाः॥ १ ३ ६॥ च्युतोरसोविनाशायदेहस्यास्यप्रकीर्तितः॥ वृक्षस्येवचपुंसोपिधारणाज्जीवनंतथा॥ १ ३ ७॥ सरसःस्निग्धतांप्राप्यचिरंजीवतिपादपः ॥ नीरसःशुष्कसर्वांगःसमूलोपिविनश्यति ॥ १ ३ ८ ॥ यथातथैवपुरुषोजीवेद्धिरसधारणात्॥ कंदर्पसदृशोभूत्वाम्रियतेरसनिर्गमात्॥ १ ३ ९॥

तेतेतितद्व्याख्यातारः परदारानगंतव्याःसर्ववर्णेषुकर्हिचित् नहीदृशमनायुष्यंत्रिषुलोकेषुविद्यतेइतिधर्मशास्त्रेप्युक्तं तथादेहयोगोदेहांतर्वर्तिषट्चक्रादिध्यानंतत्प्रतिपादकशास्त्रेषुशैवागमादिषुवक्ष्यमाणविधयावीर्यभ्रंशाद्धानिरुक्तेतिद्वयोरर्थः ॥ १ ३ ५॥ १ ३ ६ ॥ देहयोगशास्त्रोक्तांप्रक्रियामभिनयति च्युतइत्यष्टादशभिः अस्यदेहस्यवृक्षस्येवरसश्च्युतःसन्विनाशायधृतःसंश्चजीवनायभवतीत्यर्थः ॥ १ ३ ७ ॥ एवदेवस्फुटयति सरसइति यथावृक्षस्यस्थितिशोषौरसस्थितिनाशाभ्यांप्रयुक्तौप्रसिद्धौतथापुरुषोपिधातुरूपरससधारणात्कंदर्पसदृशोभूत्वाजीवति रसनिर्गमात्तुम्रियतइतिद्वयोःसंबंधः ॥ १ ३ ८ ॥ १ ३ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरधातुभ्योरेतसउत्कर्षसदृष्टांतंप्रतिपादयति शाखेतित्रिभिः यथाप्रसिद्धोवृक्षःशाखादिगतेरसेनिर्गतेपिननश्यतिमूलाच्चेद्रसोनिर्गच्छति तदासनश्यतितथापुमानूवनस्पतिःपुरुषरूपोवृक्षोहस्तादिगतेरसेनिर्गतेपिकचिन्ननश्यतिशिरसःसकाशाद्रसेनिर्गतेतुनित्यंनिश्चितंनश्यती तिद्वयोःसंबंधः ॥ १४० ॥ १४१ ॥ वृक्षस्यैवेति वृक्षस्यमूलसमंपुरुषस्यशिरोबोध्यं ऊर्ध्वमूलोऽवाक्शाखएषोऽश्वत्थःसनातनइतिश्रुतेः एषशरीररूपःसनातनःप्रवाहानादिः यथाचवृक्षमूलस्यमध्यभागस्तत्तुल्यंमस्तिष्कंमस्तकगतस्निग्धभागरूपंबोध्यमित्यर्थः॥ १४२ ॥ मूलमध्यगतरसतुल्यंचमस्तिष्कांतर्गतंरेतोबोध्यमित्याह मूलमध्येति जीवनंजीवनहेतुः ॥ १४३ ॥ मस्तिष्कपदार्थंविशदयति मस्तिष्कमिति यत्श्लेष्मलत्वादिविशिष्टंमांसंतन्मस्तिष्कमित्युच्यतेइत्यर्थः ॥ १४४ ॥ पद्मेति यत्रमस्तिष्केविद्यमानाःसहस्रशोनाड्यःसहस्रदलकमलाकारेणपरिणताभवंतीत्यर्थः ॥ १४५ ॥ गंगांचेति अत्रमस्तिष्कदेशेगंगामिडाख्यवामनाडीरूपांयमुनांचपिंगलाख्यदक्षिणनाडीरूपांहित्वासुषुम्नाख्यतन्मध्यनाडीरूपांसरस्वतींजीवाख्यकोहंसोगच्छति कीदृशोमानसोमनोरूपमानससरोवासीत्यर्थः तदुक्तंस्वरोदयेपि इडागंगेतिविज्ञेयापिंगलायमुनानदी मध्येसरस्वतींविद्यात्प्रयागादिसमस्तयोरिति तयोरिडापिंगलयोर्मध्येतिसृणांसंगमस्तुप्रयागादिसमइतिसंबंधः ॥ १४६ ॥

शाखास्कंधादिगेयद्वन्निर्गतेपिरसेक्वचित् ॥ वृक्षोननाशमायातिमूलाच्चेन्नाशमाव्रजेत् ॥ १४० ॥ हस्तपादादिगेतद्वन्निर्गतेचरसेपुमान् ॥ वनस्पतिःक्वचिन्नित्यंशिरसस्तुविनश्यति ॥ १४१ ॥ वृक्षस्यैवयथामूलंपुरुषस्यतथाशिरः॥ मूलमध्यंयथावृक्षेमस्तिष्कंपुरुषेतथा ॥ १४२ ॥ मूलमध्यस्थितोयादृग्रसोवृक्षस्यजीवनं॥ मस्तिष्कमध्यगस्तादृग्रसःपुंसोत्रजीवनं॥ १४३ ॥ मस्तिष्कंश्लेष्मलंमांसंदशमद्वाररोधकं ॥ चंद्रबिंबसमंसवंनाडीसूत्रविधारकं॥ १४४ ॥ पद्मपत्रसमायत्रस्थूलानाड्यःसहस्रशः ॥ सहस्रपत्रसंयुक्तंकमलंतत्प्रकुर्वते ॥ १४५ ॥ गंगांचयमुनांतद्वद्वित्वाहंसोत्रमानसः ॥ यत्रपश्चिमवाहिन्यासरस्वत्याप्रयात्ययम् ॥ १४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्तुमोक्षद्वारभूतसुषुम्नागतिंनजानातितस्यसंसारेस्थितिंनिरूपयति षट्चक्रेति षट्चक्राणिमूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञासंज्ञानिकुंडलिनीसंचरणस्थानानितद्रूपस्यमार्गस्याचार्याद्यनुग्रहमंतरासंरोधेअविज्ञानरूपेनिरोधेसतितुसजीवरूपोहंसोऽनेकशोविविधासुदेहनाडीषुभ्रामंभ्रामंभ्रमित्वाभ्रमित्वाअन्नविसानि विश्वस्तुस्थूलभुङ्नित्यंतैजसःप्रविविक्तभुक् आनन्दभुक्तथाप्राज्ञस्त्रेधाभोगंनिबोधतेतिभगवद्गौडपादोक्तत्रिविधान्नरूपाणिभुक्त्वाऽस्मिन्देहेचिरंवसतिसर्वव्याधिविवर्जितश्चेदितिशेषः कीदृशानितान्यन्नबिसानिरसपाकसमुत्थानिरसोभुक्तान्नजोद्भवांशस्तत्परिणामात्मकानि स्फुटमेतत्षष्ठेकूर्चब्राह्मणे अयंभावः यथाहंसोजलोर्ध्वगतिनिरोधेजलांतर्भ्रमन्बिसान्येवभुंजानस्तिष्ठेत्तथायमपिनिरुद्धोर्ध्वगतिकःसंसारेतिष्ठतीति ॥ १४७ ॥ तस्मात्सप्तधातूनांमध्येरेतउत्कृष्टमित्याह

षट्चक्रमार्गसंरोधेभ्रामंभ्राममनेकशः ॥ रसपाकसमुत्थानिखादित्वान्नबिसानिसः ॥ चिरंवसतिदेहेस्मिन्सर्वव्याधिविवर्जितः॥ १४७॥ त्वगादिधातुषट्कस्यसारएषउदीतः॥ रसोत्रसप्तमोधातुर्योसौमस्तिष्कसंस्थितः॥ १४९ ॥ अयंत्रेधाशरीरेस्मिन्परिणामंप्रयातिहि॥ अकामत्हृदयांभोजेसर्वस्यापिचदेहिनः॥ सर्वांगेसंस्थितःकुर्याद्बलंवैरिभयंकरम्॥ १४९॥ मस्तकस्थोपिकुरुतेचिरंदेहविधारणं॥ क्षुब्धोवाभ्यधिकोवैषओजोनामाष्टमींदशां॥ कुरुतेयद्बलादेषनीरोगोवर्ततेपुमान्॥ १५० ॥ क्षरत्ययंयदादेहाद्देहिनोनतदाभवेत्॥ इदंसर्वंततस्तस्यक्षरणंविनिवारयेत्॥ मंत्रैरप्यौषधैस्तद्वद्योगैर्नानाविधैरपि ॥ १५१ ॥

त्वगादीति ॥ १४८ ॥ रेतसस्त्रेधापरिणाममाह अयमितिद्वाभ्यां अयंरेतोधातुः तत्रप्रथमंपरिणाममाह अकामेति सर्वस्यापिदेहिनःअकामेकामरहितेत्हृदयांभोजेविशेषेणेतरांगेषुचसामान्यरूपेणस्थितःसन्वैरिभयहेतुबलरूपेणपरिणमतेइत्यर्थः॥ १४९॥ द्वितीयमाह मस्तकस्थइति मस्तकगतोरेतोधातुश्चिरदेहधारणोपयोगिसामर्थ्यात्मनापरिणमतइत्यर्थः तृतीयमाह क्षुब्धइति क्षुब्धःप्राप्तक्षोभोपिनिरुद्धःसन्अभ्यधिकःसन्वाओजःसंज्ञकाष्टमधातुरूपांदशांप्राप्नोतियेननीरोगःक्षेत्रज्ञस्तिष्ठेदित्यर्थः तदुक्तंप्रपंचसारेभगवत्पादैः शुक्रपाकात्स्वयंभिद्येदोजोनामाष्टमीदशा क्षेत्रज्ञस्यतदोजस्तुकेवलाश्रयइष्यतेइति ॥ १५० ॥ रेतसःक्षरणेदोषमाह क्षरतीति अयंरेतोधातुर्यदादेहात्क्षरतितदादेहिनइदमुक्तंफलंनभवतीत्यतोमंत्राद्युपायैस्तस्यक्षरणंनिवारयेदितिसंबंधः योगाःध्यानविशेषास्तैः ॥ १५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्निरोधस्यलक्षणमाह अग्नेरिति यदाअग्नेर्मुखेसन्निधानेपिसतिरसस्तिष्ठेत्तदाबद्धोज्ञेयः तस्मिन्बद्धेतुखेचरताऽऽकाशगमनंतत्प्रभृतिःसिद्धिर्भवेज्जायेतेत्यर्थः ॥ १५२ ॥ अग्निरसपदयोरर्थमाह नारीति स्पष्टं ॥ १५३ ॥ अग्नीति यदाएकदाप्यग्निसंपर्केणवृक्षस्यमूलाद्रसोनिःसरेत्तदापिवृक्षोनश्येत् बहुवारंरसनिर्गमेवृक्षोनश्यतीतिकिमुवक्तव्यमित्यर्थः ॥ १५४ ॥ दार्ष्टांतिकेयोजयति नारीति तंरसविनिर्गमं ॥ १५५ ॥ देहयोगोक्तप्रक्रियामुपसंहरति इत्यादीति अयंनारीभोगः ॥ १५६ ॥ त्वग्विषयस्यप्रतिकूलतामाह चंदनैरिति चंदनकर्पू

अग्नेर्मुखेयदातिष्ठेद्रसोबद्धस्तदाभवेत्॥ बद्धेखेचरतादिःस्यात्सिद्धिःसर्वशरीरिणः॥ १५२ ॥ नारीयोनिर्भवेदग्निःपुमान्वृक्षइतीरितः॥ रसोरेतइतिप्रोक्तंयोगशास्त्रविचक्षणैः ॥ १५३ ॥ अग्निसंपर्कतोमूलाद्रसोवृक्षस्यनिःसरेत्॥ एकदापिविनश्येत्सबहुकृत्वस्तुकिंपुनः॥ १५४ ॥ नारीवन्हिसमाश्लेषात्पुंसोरसविनिर्गमे ॥ वृक्षस्येवविनाशःस्यात्ततस्तंपरिवर्जयेत्॥ १५५॥ इत्यादिदेहयोगेपिश्रूयतेमृतिकारणम्॥ नारीभोगस्ततोनायंजीवनायद्विजोत्तमाः ॥ १५६॥ चंदनैर्बहुशोयुक्तादतिशीतादयंपुमान्॥ वाताद्वासंनिपाताद्वासद्योमरणमाव्रजेत्॥ १५७॥ अन्यैरपितथाभोगैःसुगंधैश्चमनोहरैः॥ परदृष्टोपभोगैस्तैर्भुक्तैस्तेपितदर्थिनः॥ सर्पदुर्जनवैर्याद्याःसद्योमरणहेतवः॥१५८॥ ततोमीविषयाःकेपिजीवनायनदेहिनः॥ जीवनायापिनस्युर्येतेस्युःकेनजनौनृणां॥ १५९॥

रादिभिर्युक्ताद्बहुशोलेपनाज्जातोयोतिशीतःकफरोगोवातरोगःसंनिपातरोगोवातैर्हेतुभिर्म्रियतेइत्यर्थः ॥ १५७ ॥ परिशिष्टविषयाणांतथात्वमाह अन्यैरपीति तथान्यैरपिभोगैःसद्योमरणमाव्रजेदित्यनुषंगः तत्रहेतुगर्भंभोगानांविशेषणं परेति परैःकुदृष्टिभिर्दृष्टउपभोगोयेषांतेतथातैः नकेवलंविषयाएवमरणहेतवःकिंतुतेकुदृष्टयःसर्पाद्याश्चापिमरणहेतवोभवंति यतस्तदर्थिनस्तत्तद्भोगकामाइतिसंबंधः ॥ १५८ ॥ फलितमाह ततइति स्पष्टम् ॥ १५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणस्यापिजीवनंप्रतिहेतुत्वाभावंव्यभिचारेणाह प्राणोपीति प्राणपदेनात्रश्वासप्रश्वासाख्यःप्राणव्यापारोलक्ष्यते स्थावरेष्वप्यंकुराद्युद्ग मेनप्राणसत्वस्यसर्वसंमतत्वात् तथाचनिष्प्राणाअनुपलभ्यमानश्वासप्रश्वासकाअपिस्थावरायतोजीवंतोदृश्यंतेततःश्वासप्रश्वासरूपःप्रा णव्यापारोपिनजीवनहेतुरित्यर्थः ॥ १६०॥ जंगमाअपिमूर्छाद्यवस्थास्वनुपलभ्यमानप्राणव्यापारकाअपिजीवंतोदृश्यंतइत्यतोनतस्यहे

तुत्वमित्याह जंगमाअपीति दिनाधिकंएकदिनादधिकंकालं अत्यंतसंयोगेद्वितीया ॥१६१॥ केचिदौदर्याग्निंकेचिच्चरुधिरंजीवनहेतुंवदं तितन्मतंदूषयति नचेतिद्वाभ्यां स्पष्टम् ॥ १६२ ॥ तत्रोदाहरणमाह शस्त्रेति केषांचिद्रोगिणांशस्त्रेणनाडीविदारणेपिरुधिरंनदृश्यते केषां चिद्रोगिणांचस्पर्शेनौष्ण्यंनलभ्यतेतथापितेजीवंतोदृश्यंते यतइतिशेषः ॥१६३॥ एवंजीवनहेतुनिश्चयस्यापिदुर्लभत्वेउत्पत्तिहेतुनिश्चय

प्राणोपिनचदेहेस्मिन्जंतूनांजीवनायहि॥ निष्प्राणाअपिजीवंतिदेहिनःस्थावरायतः॥ १६० ॥ जंगमाअ पिमूर्छादौप्राणशून्यादिनाधिकं॥ जीवंतिततएवायंप्राणोहेतुर्नजीवने ॥ १६१ ॥ नचवन्हिश्चरक्तंचजीव नेकारणंस्मृतम्॥ नीरक्ताःप्राणिनःकेचिज्जीवंत्यपिनिरग्नयः ॥ १६२ ॥ शस्त्रच्छेदेपिकेषांचिद्रोगिणांनैव दृश्यते॥ रुधिरंस्पर्शतोप्येषामौष्ण्यंनैवोपलभ्यते ॥ १६३॥ केनतेनवयंविप्राजीवामइतिसंशये॥ जीवन स्यापिचेच्छक्तानिश्चेतुंकारणंनहि॥ शक्नुमःकेनचोत्पत्तिकारणेनिश्चयंप्रति॥ १६४॥ प्रतिष्ठामपिजानीमो नवयंस्वात्मनःक्वचित्॥ यदिभूमिस्थितोदेहोस्त्यस्माकंकुत्रसास्थिता॥ १६५ ॥ यत्रसावर्ततेभूमिराधारःसो पिकुत्रवा॥ तिष्ठत्येवंननश्चित्तमाधारेत्रव्यवस्थितम्॥ १६६॥

स्यदुर्लभत्वंकिमुवाच्यमित्याह केनेति वयंकेनजीवामइतिसंशयेसतियदिजीवनस्यकारणंनिश्चेतुंनशक्ताःस्मतदाउत्पत्तिकारणविषयक निश्चयंप्रतिकेनप्रकारेणशक्नुमःशक्ताभवेमनकेनापीत्यर्थः ॥१६४॥ वयंकिमाधारकाइत्यर्थकंकचसंप्रतिष्ठाइत्यंशंविवृणोति प्रतिष्ठामि तिचतुर्भिः प्रतिष्ठामाधारमप्यात्मनःसंघातस्यनजानीमः तथाहि यदिदेहोभूम्याश्रितस्तर्हिसाभूमिःकिमाश्रयिकायश्चभूमेराधारःकल्प्य तेसोपिकुत्रतिष्ठतीत्याकांक्षानशाम्यतीति एवंचित्ताधारोदेहाद्याधाराद्विलक्षणएववाच्यः देहाविशेषेपिचित्तगतीनांनानाविधत्वस्यानुभू यमानत्वादित्याशयेनाह एवंननइति एवंनोऽस्माकंचित्तमत्रदेहाधारएवव्यवस्थितमितिनवक्तव्यमितियोजना ॥ १६५ ॥१६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचदेहस्याप्याधारताभूमेर्नसंभवतिभूमिसत्वेपिपतनाभावलक्षणस्याधारफलस्यानुपलंभादित्याह अपीति यतोयंदेहस्तिष्ठन्नूर्ध्वस्थितः आसनेस्थितआसीनोवानिद्रादिकालेपततिस्थातुंनशक्नोतितेनज्ञायतेयदयंदेहोभूमेःसकाशादन्यस्मिन्कुत्रचिदाधारेस्थितइति ॥ १६७ ॥ नचतमिति तंदेहस्यस्थितिहेतुंभूमिसंश्रयंभूमेरप्यालंबनभूतमाधारमपियदानजानीमस्तदाजीवनादिहेतुंज्ञातुंकथंशक्नुयामइति ॥ १६८ ॥ केनप्रेरिताश्चसुखदुःखफलकेषुकर्मसुप्रवृत्ताःस्मतत्रव्यवस्थांनिर्णयंकुर्मइतिप्रतिपादकस्योत्तरार्धस्यार्थमाह अपिकेनेतिपंचभिः अस्माकंजीवानामनिच्छतामपिनानाविधकर्मसुकर्तृत्वस्यहेतुःकइत्यर्थः ॥ १६९॥ किंचनानाफलानांभोक्तृत्वस्यचहेतुःकोनचतत्रवयंस्वतंत्राः

अपिनिद्राभिभूतोयंतिष्ठन्नप्यासनेस्थितः॥ देहःपतितितेनायंभूमेरन्यत्रसंस्थितः ॥ १६७ ॥ नचतंवयमाधारंजानीमोभूमिसंश्रयं ॥ जीवनस्यतथोत्पत्तेर्ज्ञास्यामःकारणंकथं॥ १६८॥ अपिकेनत्वदिस्थेनभूताविष्टाइवाधुना ॥ अनिच्छंतोपिकर्माणिकुर्मोनानाफलान्यपि ॥ १६९॥ अपिकुर्मःसुखार्थानिकर्माण्यत्रतपोधनाः॥ दुःखदानिकुतस्तानिभवंत्यस्माकमर्थिनाम् ॥ १७० ॥ दुःखदेपिकृतेक्वापिकर्मण्यस्तिसुखंद्विजाः ॥ सुखदुःखेततोऽस्माकंस्वतंत्रःकोपियच्छति ॥ प्रविष्टोहृदयांभोजेतंनविद्मोवयंद्विजाः॥ १७१ ॥ यदैतमपिजानीमःसुहृदंत्वद्दयस्थितं ॥ सुखदुःखप्रदंनैवजानीमःकेनवापरं ॥ आधारेजीवनेतद्वज्जनौहेतुमलक्षितं ॥ १७२ ॥ ततोमीमांस्यतांविप्राःकारणंजगतोत्रकिं॥ वयंदैवादिहायाताःसर्वएवमहाधियः॥ १७३ ॥

सुखाद्यर्थानुष्ठितकर्मणोविपरीतरूपस्यफलस्यदर्शनादित्याह अपिकुर्मइति वयंसुखार्थंकर्माणिकानिचित्कुर्मस्तानितुदुःखदानिकुतोभवंति अर्थिनांसुखमिच्छतांनइत्यर्थः ॥ १७० ॥ दुःखदेपीति कदाचित्तुदुःखदत्वेनाभिमतेकर्मणिकृतेपिसुखंभवतियथाऽपथ्यसेवनाद्रोगनिवृत्तिरित्यादि तस्मादेवंज्ञायतेयदस्माकंत्वद्धृतःकश्चित्कर्तृत्वभोक्तृत्वयोःप्रेरकोवर्त्ततेपरन्तुतंनजानीमइति ॥ १७१ ॥ यदैतमिति आधारपदेनाधारकार्यंधारणंलक्ष्यते तथाचएतंकर्मसुप्रेरकंसुखादिप्रदंचयदानैवजानीमस्तदापरंधारणजीवनादौहेतुंकेनजानीमइतियोजना ॥ १७२ ॥ ततःश्रुतिगतव्यवस्थापदोक्तोनिर्णयोविचारेणकार्यइत्याह ततइति स्पष्टं ॥ १७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंविषयांशशोधनपरत्वेनप्रथममंत्रोव्याख्यातोऽथनानापक्षोपन्यासमुखेनसंशयपूर्वपक्षयोर्निरूपणपरत्वेनकालइत्यादेर्द्वितीयमंत्र
स्यार्थंपंचसप्ततिश्लोकैर्निरूपयंस्तत्रैकेनावतारयति इत्युक्तेति निराकार्यानूखंडनीयानूपक्षानथानंतरेणद्वितीयमंत्रेणऊचिरेउक्तवंतः

इत्युक्तातइमान्पक्षान्ब्राह्मणानांसभास्थिताः ॥ ब्रह्मविज्ञानसंपन्नानिराकार्यानथोचिरे ॥ १७४॥ ब्राह्म
णाःकालइत्येवकेचित्कारणमास्थिताः॥ कालतोजायतेसर्वंपंचभूतादिकंजगत्॥सर्वंतिष्ठतिकालेचलीयते
कालआगते॥१७५॥ कालतःस्वर्गमागच्छेत्कालतोनरकंव्रजेत् ॥ कालतश्चाखिलान्लोकान्भूरादींश्चापि
देहभाक् ॥ १७६ ॥ कालेनैवोच्चतांगच्छेत्कालादेवचनीचतां ॥ कालेनमध्यमोभूयाद्देहधारीजनोखिलः
॥१७७॥ संपदोविपदश्चापिकालादेषसमाप्नुयात् ॥ कालतोविषयान्सर्वान्सुखदुःखप्रदानपि॥ १७८॥
विद्यानानाविधाःकालाद्भोगमोक्षसुखप्रदाः ॥ कालतःप्राप्नुयाद्दारान्नवयौवनशालिनः ॥ १७९॥पुत्रान्ना
नागुणोपेतान्बांधवांश्चसहस्रशः॥ सुहृदोपिचमध्यस्थान्वैरिणोद्वेषकारिणः॥ १८० ॥उपकारापकाराणांक
र्तृन्जंतूंश्चकालतः॥ कालतोलभतेजन्मबाल्ययौवनवार्द्धकं॥१८१॥ मरणंचतथाकालात्पितरंमातरंपुनः॥
सहोदरानेकांश्चस्त्रीपुंसवपुराश्रितान्॥१८२॥ गर्भवासंतथाकालाद्गर्भान्निःसरणंपुनः॥ ऐश्वर्यंविविधंका
लात्तद्ध्वंशमपिकालतः॥१८३॥ कालादृतुमतीनारीगर्भंकालाच्चगच्छति॥वातवर्षातपाद्याश्चजायंतेकालतः
सदा॥१८४॥ किंबहूक्तेनविप्रेंद्राःकालात्सर्वस्यसंभवः॥ जायमानंततःसर्वंकालकार्यमुदीरितम्॥१८५॥

॥१७४॥ तत्रकालस्यस्वतंत्रकारणतावादिनांज्योतिर्विदांपक्षंप्रपंचयति ब्राह्मणाइतित्रयस्त्रिंशच्छ्लोकैः केचिद्ब्राह्मणाःकालएवकारणमि
तिपक्षमास्थिताःप्रतिज्ञातवंतः तमभिनयति कालइत्यादिना ॥ १७५ ॥ कालतःस्वर्गमित्याद्याद्दशश्लोकानिगदव्याख्याताः ॥ १७६॥
॥ १७७ ॥ १७८ ॥ १७९ ॥ १८० ॥ १८१ ॥ १८२ ॥ १८३ ॥ १८४ ॥ १८५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रोपपत्तिमपिप्रपंचयति भावांतरमित्यादिना यदिकिंचिद्भावांतरंकालवर्जितंकालनिरपेक्षंकारणंकार्यनियतपूर्ववर्तिस्यात्तदातस्यैवका रणत्वंभवतादस्तुननिवारयामःपरंतुतादृशंभावांतरंनास्तियतएषकालःसर्वेषुकारणेषुकारणत्वाभिमतेषुस्थितेष्वपिसंनिहितेष्वप्यपेक्ष्यते ऽतोऽनन्यथासिद्धान्वयव्यतिरेकशालित्वात्कालएवकारणमितिद्वयोरर्थः ॥ १८६ ॥१८७॥ अन्यानिकारणत्वाभिमतानिव्यभिचारीणि नियतपूर्ववर्तीनिनभवंतिकालस्तुतथाभवतीत्यतःकालएवकारणमित्याह व्यभिचारीणीति ॥ १८८ ॥ अनन्यथासिद्धान्वयव्यतिरेक शालित्वरूपंकारणलक्षणंकालेयोजयति यस्मिन्निति यस्मिन्भावेसतिपूर्वविद्यमानएवयद्भूयाज्जायेतअसतिचअविद्यमानेतुनजायेतत

भावांतरंयदाभूयात्कारणंकालवर्जितं ॥ कारणत्वंतदातस्यभवतान्ननिवार्यते ॥ १८६॥ कारणेषुचसर्वे षुस्थितेष्वेषोप्यपेक्ष्यते ॥ यदातदाकथंकालःकारणंनभविष्यति ॥ १८७॥ व्यभिचारीणिसर्वत्रकारणानि परस्परं॥ कार्येष्वव्यभिचार्येकःकालस्तेनात्रकारणं ॥ १८८॥ यस्मिन्सत्येवयद्भूयान्नभवेदसतीहतत्॥ का रणंप्रोच्यतेसर्वैःकालस्तादृग्घिलभ्यते॥ १८९॥ तंतुभ्यस्तुपटोयद्वज्जायतेचमृदोघटः ॥ बीजेभ्यस्त्वंकुरस्त्वत्र भूमिःसर्वत्रकारणं॥ सर्वत्रानुगतत्वेनहेतुनापार्थिवेष्विह ॥ १९० ॥ एवंसर्वत्रकार्येषुनानाकारणजेष्वपि॥ कालःसर्वगतःसर्वकारणंपरिकीर्तितः ॥ १९१ ॥ कालेनरहितंनैवकारणंकार्यजन्मनि ॥ समर्थंदृश्यतेनापि कार्यंस्वस्यजनौतथा॥ १९२॥

त्कारणमुच्यते कालस्तुतादृगुक्तकारणलक्षणवान्लभ्यतेदृश्यतेइत्यर्थः ॥ १८९ ॥ किंचकालस्यसर्वत्रानुगतत्वात्तस्यैवलाघवात्कारण त्वमस्तुइतरेषांसहकारित्वमात्रमितिदर्शयन्ननुगतस्यकारणतायांदृष्टांतमाह तंतुभ्यइति यथापटघटांकुराणांतंत्वादिरूपाणिविशेषकार णान्युपलभ्यंतेतथापिसर्वेषुपार्थिवेषुकार्येषुभूमिरेवकारणत्वेनस्वीक्रियतेऽनुगतत्वाद्विशेषास्तुतत्सहकारित्वेनैवांगीक्रियंतेइत्यर्थः॥१९० दार्ष्टांतिकेयोजयति एवंसर्वत्रेति स्पष्टम् ॥ १९१ ॥ कालस्यसर्वत्रापेक्षितत्वरूपंसर्वत्रानुगतत्वमेवस्फुटयति कालेनेति कार्यमपिस्वोत्प त्तौतथाकालमनपेक्ष्यसमर्थंनेतिचतुर्थपादार्थः ॥ १९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाचोत्पत्तौकालनिरपेक्षंकारणंनलभ्यतेतथास्थित्यादिष्वपीत्याह एवमिति ॥ १९३ ॥ फलितमाह ततइतिद्वाभ्यां ततउक्तयुक्त्याका लस्यैवकारणतौचित्याद्यदिकिंचित्कारणांतरंप्रधानरूपमपरंपरमाण्वादिरूपंवावादिभिःकल्प्यतेतदकारणंबोध्यमितिसंबंधः कारणांतर
॥ १४ ॥ कल्पनायांहेतुमाह स्फुरणेति स्फुरणंप्रत्यक्षरूपंज्ञानंबोधस्तुपरोक्षरूपंताभ्यामित्यर्थः किंचिद्धिप्रत्यक्षेणान्वयव्यतिरेकौगृहीत्वाकारणंक ल्प्यतेयथापार्थिवानांपृथिवी किंचित्तुपरोक्षज्ञानेनसामान्यतोदृष्टाख्येनयथाप्रधानादीति ॥ १९४ ॥ कालयोगादिति तेषांकल्पित कारणांतराणांयतःकालसंबंधेनैवकार्यजननसामर्थ्यंततःकालएवहेतुरिति ॥ १९५ ॥ अत्रतार्किकमतसिद्धंपरमाणूनांकारणत्वमाशंक्य

एवंस्थितिविनाशेषुकालेनरहितंनहि ॥ कारणंवापिकार्यंवादृश्यतेकेनचित्क्वचित् ॥ १९३ ॥ ततोत्रजगदुत्प त्तौयदिस्फुरणबोधतः ॥ प्रधानंचापरंवापिकारणंतदकारणं ॥ १९४ ॥ कालयोगाद्धिसामर्थ्यंतेषांनैवस्वतो यतः ॥ कालस्ततोत्रविज्ञेयःकारणंनापरंततः ॥ १९५ ॥ अपिनैवाणवोनित्याभूतत्वाद्धिमृदादिवत् ॥ नचम ध्यममानस्ययोगोऽनित्यत्वकारणं ॥ १९६ ॥ असर्वगतमानत्वेऽसत्त्वंसर्वस्यवस्तुतः ॥ भूतात्मकस्यकेनायं पक्षपातस्त्वणुषु ॥ १९७ ॥

तेषांकारणत्वमनित्यत्वादेवनसंभवतीतिपरिहारंसूचयंस्तदनित्यत्वंसाधयति अपिनैवेति पृथिवीपरमाणवोननित्याःपृथिवीत्वान्मृत्तिका वदित्यादयःप्रयोगाः ननुमध्यममानमनित्यत्वस्यव्यापकंतदभावेकथमणूनामनित्यत्वमितिचेन्न शब्दादिषुगुणेषुमध्यमपरिमाणाभावे प्यनित्यत्वदर्शनेनमध्यमपरिमाणस्यानित्यत्वाव्यापकत्वादित्याशयेनाह नचेति अणुपरिमाणपरममहत्परिमाणभिन्नपरिमाणरूपस्य मध्यममानस्ययोगःसंबंधोप्यनित्यत्वस्यकारणंप्रयोजकोनभवतीत्यर्थः ॥ १९६ ॥ लाघवेनविभुभिन्नत्वमेवाऽनित्यत्वस्यप्रयोजकंतद्ब लाच्चपरमाणूनामनित्यत्वमभ्युपेयमित्याह असर्वगतेति सर्वस्यभूतात्मकस्यवस्तुनःअसर्वगतमानत्वेविभुभिन्नत्वेसत्यसत्त्वमनित्यत्वंदृष्ट मेवंसत्यपितवपरमाणुषुकःपक्षपातोयन्मूर्त्तानामपिनित्यत्वंमन्यसेइत्यर्थः ॥ १९७ ॥ ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुपरमाणवोनित्याःस्युर्निरवयवत्वादितिसत्प्रतिपक्षमाशंक्यनिरवयवत्वस्यगुणादिषुव्यभिचारित्वेनहेतुत्वायोग्यतामाह नचावयवेति निरवयवत्वंनित्यत्वसाधकंनभवतियतोगुणादयस्तादृशानिरवयवाअप्यनित्यादृश्यंतइत्यर्थः ॥ १९८ ॥ अथनिरवयत्वमात्रंनहेतुःकिंतुनिरवयवत्वेसतिद्रव्यत्वंतस्यचनकुत्रापिव्यभिचारइतिचेत्तथाप्यस्माभिःप्रयुक्तेनमूर्त्तत्वरूपहेतुनाअनित्यत्वसाधकेनप्रतिरोधात्तवनिश्चयोनसेत्स्यति सत्प्रतिपक्षस्थलेपरस्परप्रतिबंधादेकेनाप्यनुमितिरूपोनिश्चयोनजन्यतइतिसिद्धांतादित्याशयेनाह नचावयवहीनत्वेसतीति निरवयवत्वेसतिद्रव्यत्वस्यहेतोःसंगमात्संबंधान्नित्यत्वंनसिध्यतियतोऽस्मत्प्रयुक्तोमूर्त्तत्वरूपोहेतुर्विपर्ययेऽनित्यत्वेसाधनक्षमोवर्त्ततेतथासतितवनिर्णयोनभविष्यतीति नन्वेवंसतिभवतामप्यनित्यत्वनिर्णयःकथंस्यादितिचेद्यावद्विकारंतुविभागोलोकवदितिन्यायप्रसिद्धेना

नचावयवहीनत्वंनित्यत्वेकारणंमतं ॥ क्रियागुणादयोयस्मादनित्याःसंतितादृशाः ॥ १९८ ॥ नचावयवहीनत्वेसतिद्रव्यत्वसंगमात् ॥ नित्यत्वंतेषुयस्मात्स्यान्मूर्त्तत्वंचविपर्यये ॥ १९९ ॥ विरोधादनयोर्नैकंनिर्णेतुंशक्यतेत्वया ॥ विभक्तत्वादनित्यत्वमस्माभिरवधार्यते ॥ २०० ॥ अप्यष्टदिक्समाश्लिष्टाःकुतोवयववर्जिताः ॥ अणवोयोगिनोयस्मात्सर्वेसावयवामताः ॥ २०१ ॥ अणवोपिततस्त्वेतेकालादव्यक्तजन्मनः ॥ प्रभवंति जगत्सर्वंयथातस्मान्महात्मनः ॥ नित्यावासंतुमैवैतेकारणंकालवर्जिताः ॥ २०२ ॥

तोन्यदार्त्तमितिश्रुत्यनुगृहीतेनविभक्तत्वरूपहेतुनेत्याह विभक्तत्वादिति अस्माभिस्तुविभक्तत्वादनित्यत्वमवधार्यतइतिद्वयोरर्थः ॥ १९९ ॥ ॥ २०० ॥ किंचोक्तोहेतुर्विशेषणासिद्धः निरवयवत्वस्यपरमाणुष्वसंभवादित्याह अप्यष्टेति अपिचपरमाणवोमूर्त्तत्वात्सकोणपूर्वाद्यष्टदिग्भिस्तद्वर्त्तिपरमाण्वंतरादिभिर्वासमाश्लिष्टाःसंयुक्ताइष्यंतएवभवद्भिस्तथाचकथंनिरवयवत्वं संयोगिनोहिसावयवादृष्टाः संयोगस्यैकदेशवृत्तित्वरूपाव्याप्यवृत्तित्वस्यप्रसिद्धेरिति ॥ २०१ ॥ अणूनामनित्यत्वेचतेस्योत्पत्त्यर्थंयंकालमपेक्षंतेसएवजगद्धेतुस्तद्धेतोरितिन्यायादित्याह अणवोपीति अव्यक्तमलक्षितंजन्मयस्यतस्मात्कालादेवाणवोजायंतइतिवाच्यमनित्यत्वात् तथाचसएवजगद्धेतुरस्त्वित्यर्थः तेषांनित्यत्वाभ्युगमेपिसर्वदासतांसृष्टिव्यवस्थार्थंकालस्यावश्यापेक्षणीयत्वादपिकालस्यैवजगद्धेतुत्वमुचितमित्यर्थः ॥ २०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचाणुभिःप्रलयेविभागेनावस्थितैःसृष्ट्यनारंभात्संयोगहेतुःकालोऽपेक्षणीयइत्यतोपिकालस्यैवहेतुतोचितेत्याह अपिभिन्नाइति भिन्नाविभागेनावस्थिताएतेऽणवोजगतःकृतौनिर्माणेनप्रभवंतिशक्तानभवंति ॥ २०३ ॥ फलितमाह ततइति सर्वव्यापारान्कारयतीतिस तथा ण्यन्तात्कर्त्तरिल्युः ॥ २०४ ॥ स्वभावस्यजगत्कारणतांवदतांलोकायतानांमतंप्रपंचयति अत्रापीतिचतुर्दशभिः अत्रकालवादिमते एवंवक्ष्यमाणविधया॥२०५॥ युक्तिजालंप्रपंचयति कारणमिति भवतांकालवादिनांकारणत्वेनाभिमतःकालःकथंकारणंस्यादितिविचार्यं किमेषकालोनिखिलवस्तुनःकारणंभवन्नात्मनःस्वस्यकार्यस्यवास्वभावात्स्वभावमपेक्ष्यकारणंभवेत्किंवास्वभावमनपेक्ष्येत्यर्थः ॥२०६॥ अंत्यंदूषयति अस्वभावादितिदशभिः यद्येषकालःस्वभावमनपेक्ष्यहेतुस्तदावन्हेःसंहतौपुंजेखेआकाशेवाअनाश्रयेजलानाधारस्वभावेजलंकुतोनोत्पादयतीत्यर्थः ॥ २०७ ॥ एवंवन्हिनातृट्शांतिजलेनचशीतशांतिंकुतोनकरोतीत्याह वन्हिनेति ॥ २०८ ॥ तथान्नादिसाधनानिविनाक्षुन्नाशादिकार्याणिकुतएषकालोनजनयेदित्याह अन्नमिति ॥ २०९ ॥ एवंमृतशरीरसंयोगद्वारापिसुखादिकंकुतोनजनयतीत्याह मृतानामिति महेश्वरःकालः ॥ २१० ॥

अपिभिन्नाइमेनैवसर्वस्यजगतःकृतौ॥ प्रभवंतिकुतस्त्वेषांसर्वकारणताभवेत्॥ २०३॥ ततःसर्वगतःकालःसर्वव्यापारकारणः॥ एकःकारणमुद्दिष्टोनेतरत्कारणांतरम् ॥ २०४ ॥ अत्रापिदूषणंप्राहुःकेचिन्मुनिवराद्विजाः ॥ एवंवदंतोबहुशोयुक्तिजालंमहाधियः॥ २०५ ॥ कारणंभवतांकालःकथंस्यादितिचिंत्यतां॥ किमेषकारणंकालोभवेन्निखिलवस्तुनः॥ आत्मनस्तस्यकार्यस्यस्वभावाद्वाऽस्वभावतः॥ २०६ ॥ अस्वभावाद्यदाहेतुस्तदावन्हेस्तुसंहतौ ॥ कालोजलंकुतोनैषकुरुतेखेत्वनाश्रये ॥ २०७ ॥ वन्हिनाकुतएवैषतृषाशांतिंकरोतिन ॥ नीरेणशीतलेनात्रकस्मात्शीतक्षयंनच ॥ २०८॥ अन्नंविनाक्षुधानाशंकस्मादेषकरोतिन॥ जायांविनासुतानेषददात्वेषांसुतार्थिनां ॥२०९॥ मृतानामपिसंयोगंशरीराणामिहैवच ॥ सुखदुःखकरंकस्मान्नददातिमहेश्वरः॥ २१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुतोवेति भाषतेभाषणंकरोति ॥ २११ ॥ तथाकाशादयोऽवकाशादिरूपाणिकुतोनत्यजंति कालःस्वस्यपरस्यवास्वभावंनापेक्षतइति त्वयाभ्युपेतत्वादित्याह नभइतिद्वाभ्यां पृथिवीचरसातलमित्यस्यपृथिवीधारणव्यापारंत्यजत्वित्यर्थः शेषंस्पष्टंद्वयं ॥ २१२॥ २१३ ॥ एवंस्वभावानपेक्षःकालइतरेंद्रियव्यापारमितरेंद्रियेणकुतोनकारयतीत्याह अपिकस्मादितित्रिभिः निगदव्याख्यातंत्रयम् ॥ २१४ ॥ ॥ २१५॥ २१६॥ एवंस्वभावानपेक्षत्वपक्षस्यदुष्टत्वेस्वभावसापेक्षत्वपक्षएवाभ्युपेयः तथाचतद्धेतोरितिन्यायात्स्वभावएवजगद्धेतुरस्त्वि

कुतोवाम्तदेहोयंनास्माभिर्भाषतेधुना ॥ नारीपुरुषयोगेनविनागर्भंदधात्विह ॥ २११ ॥ नभोनिश्छिद्रतां यातुपृथिवीचरसातलम् ॥ अस्नेहत्वंचनीराणितेजोयात्वप्रकाशतां ॥ २१२ ॥ वायुर्निश्चलतांयातुयतोनापेक्षतेतव ॥ कालःस्वभावंकस्यापिस्वस्यवापिपरस्यवा ॥ २१३ ॥ अपिकस्मादयंकालोमलमूत्रविसर्जनं ॥ नराणांवदनेनैवनकारयतिकारणं ॥ २१४ ॥ घ्राणेनशब्दश्रवणंश्रोत्राद्गंधग्रहंतथा ॥ नयनाभ्यांतथाहारग्रहणंसर्वदेहिनां ॥ २१५ ॥ एवंशेषेंद्रियाणांचव्यापाराणांविपर्ययं ॥ नकारयतिकस्मात्सकालःसर्वस्यकारणम् ॥ २१६ ॥ ततःस्वभावएवात्रकालस्यापिनियामकः ॥ कारणस्यापिकार्याणांस्वभावस्तेनकारणं ॥ २१७ ॥ व्यापारानिंद्रियाण्येवंस्वभावादेवकुर्वते ॥ विषयाश्चस्वभावेनस्वेंद्रियाणिव्रजंत्यमी ॥ २१८ ॥ एवंसर्वस्वभावेनजगदेतच्चवर्तते ॥ निवर्त्ततेचजन्मादिस्वभावादेवगच्छति ॥ २१९ ॥

त्याह ततइति ततःकारणस्यकार्याणांवास्वभावएवकालस्यनियामकोव्यवस्थापकोभ्युपेयस्तेनावश्यापेक्षणीयत्वेनस्वभावएवकारणमस्त्वितिसंबंधः ॥ २१७ ॥ सचस्वभावःसर्वशंकापरिहारक्षमइत्याह व्यापारानिति एवंस्वभावस्यहेतुतांगीकारेसतिरूपग्रहणेचक्षुषएव करणत्वंरूपस्यचचक्षुषएवविषयत्वंकुतइत्यादिशंकासुस्वभावादित्येवोत्तरमितिभावः ॥ २१८ ॥ एवमिति एवंविषयेंद्रियनियमवत्सर्वस्यप्रवृत्तौनिवृत्तौजन्मादौचस्वभावएवहेतुरित्यर्थः ॥ २१९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वभावस्यापिव्यवस्थाहेतुर्धर्माधर्मात्मकमदृष्टंनियतिपदवाच्यंजगद्धेतुरितिमीमांसकमतंप्रस्तौति अत्रापीतिपंचभिः स्वभावोपिनियतःके
नचिद्व्यवस्थापितःसन्हेतुरनियतोवा अंत्येवन्ह्यादिभिःशैत्यादिजननापत्तिरितिद्वयोरर्थः ॥ २२० ॥ २२१ ॥ एवमिति दूषणमव्यवस्था
रूपंस्यादितिशेषः ततोनियतोनियत्याव्यवस्थापितएवस्वभावःकारणमभ्युपेयइति ॥ २२२॥ नियतेरेवकारणत्वेपूर्वन्यायमतिदिशति य
थेतिद्वाभ्यां यथाजगत्सृष्ट्यादौकारणीभवन्नपिकालःस्वभावसापेक्षःकारणंभवतीत्यालोच्यसनकारणंकिंतुस्वभावएवकारणमित्युक्तंएवं
स्वभावसंस्थानास्वभावस्यसंस्थानंव्यवस्थारूपोविन्यासोययाताद‍ृशीनियतिरेवहेतुतयात्वयाऽभ्युपेयानस्वभावइतिद्वयोःसंबंधः॥२२३
॥ २२४ ॥ प्रत्यक्षैकशरणाःकेचित्काकतालीयन्यायेनोत्पत्तिकेषांचिद्भावानांदृष्ट्वाकार्यस्यकर्त्राद्यालोचनानपेक्षत्वरूपांयदृच्छामेवहेतु

अत्रापिमुनयःकेचिद्दोषंप्राहुर्विचक्षणाः ॥ स्वभावोनियतोहेतुरथवानियतिंविना ॥ २२० ॥ विनापिनिय
तिंचेत्स्यात्स्वभावःकार्यकारणं ॥ सर्वत्रसर्वदासर्वसर्वथाकिंनजायते ॥ २२१ ॥ एवंस्थितौविनाशेचदू
षणंनियतिंविना॥ नियतस्ततएवायंस्वभावःकारणंस्मृतः ॥२२२॥ यथाकालोजगत्यस्मिन्सृष्टिस्थित्यंतका
रणं॥ भवन्नपिस्वभावेनभवतीतिनकारणं ॥ किंतुस्वभावएवायंकारणंकालगोपियः ॥ २२३॥ एवंस्वभा
वसंस्थानानियतिःसर्वकारणं ॥ नियतिश्चयतोहेतुःस्वभावोनतयाविना ॥ २२४॥ अत्रापिदूषणंप्राहुःके
चित्सूक्ष्मार्थदर्शिनः ॥ अनेनैवभवेदेवंहीदमेवनचापरं ॥ २२५॥ इतिभावेतथाभावेव्यतिरेकेणकारणं ॥
नियतिर्वादिनामिष्टापुष्पवत्यायथारजः॥ एतद्याद‍ृच्छिकंदृष्टंलोकेकार्यंसकारणं॥ २२६॥

तयामन्यंतेतन्मतंदर्शयति अत्रापिदूषणमितिचतुर्भिः अत्रनियतिकारणवादेदूषणंव्यभिचाररूपंसूक्ष्ममल्पंकाचित्कमितियावत् ताद‍ृशम
र्थंपश्यंतइत्यर्थः सूक्ष्मंस्यादल्पकेऽन्यवदितिविश्वप्रकाशः नियतिस्वरूपमनूद्यतद्व्यभिचारप्रदर्शनमेवाभिनयति अनेनैवेत्यादिना व्यतिरे
कपदमन्वयस्याप्युपलक्षणं तथाचइदंकार्यमनेनैवकारणेनभवेत्तथाएवमेवानेनैवप्रकारेणभवेत्तथास्मात्कारणादिदमेवकार्यंभवेदित्ये
वंविधानियतिःकार्यस्यभावाभावयोरन्वयव्यतिरेकाभ्यांकारणत्वेनवादिभिरभिमतायथाऋतुमत्याःस्त्रियोरजएवगर्भधारणकारणमिति
परंतुतथानमंतव्यं यतोलोकेकार्यंकारणंचयाद‍ृच्छिकंयदृच्छायाःस्वरितायाःकर्त्रालोचनाद्यनपेक्षत्वरूपायाहेतोरागतंदृष्टमितिद्वयोरर्थः
यदृच्छास्वैरितास्वेच्छेतिहेमचंद्रः ॥ २२५ ॥ २२६ ॥

CC-0. In Public Domain. Digitization by eGangotri

तत्रोदाहरणंदर्शयति धर्मात्मनामिति यथासुखसाधनधर्मसंपन्नानामकस्माद्दुःखंजायमानंदृष्टंतथादुःखसाधनपापशालिनांसुखंसुखसाधनत्वेनप्रसिद्धानांनार्यादीनांदुःखहेतुत्वंदुःखहेतुतयासिद्धानांपादप्रहारादीनांश्रांतादौसुखहेतुत्वंचदृष्टमित्यर्थः ॥ २२७ ॥ नियतिरिति तेनोक्तव्यभिचारेणएवंज्ञायतेयत्कुत्रचिद्यदृच्छयैवसंपादितानियतिःकारणत्वेनलोकैर्मन्यतेपरंतुतन्नयुक्तं घटपूर्वकालेयदृच्छयासन्निहितानांरासभादीनांकारणत्ववारकेणार्थसमाजग्रस्तानांनकारणत्वमितिन्यायेनविरोधात् किंतुतत्प्रयोजिकायदृच्छैवकारणतायोग्येत्यर्थः ॥ २२८ ॥ अथयदृच्छायाधर्मभूतायाधर्मिनैरपेक्ष्येणकारणत्वासंभवात्प्रत्यक्षाणिभूतानिविहायधर्म्यंतरकल्पनायाअन्याय्यत्वाच्चपृथिव्यादीनिभूतान्येवकारणमित्याकारंप्रत्यक्षशरणानामेवमतांतरमाह अत्रापिकेचिदितित्रिभिः सायदृच्छापिभूतलक्षणधर्मि

धर्मात्मनांयथादुःखंपापिनांवायथासुखं॥ नारीपुत्रादयस्तद्वत्सुखार्थादुःखकारणं॥ प्रहाराद्याश्चदृश्यंतेदुःखार्थाःसुखहेतवः ॥ २२७॥ नियतिःकारणंतेनभवेल्लोकेयदृच्छया ॥ यदृच्छैवततोहेतुर्नियतिर्ननियामिका ॥ २२८॥ अत्रापिकेचिन्मुनयइत्थमाहुर्महाधियः॥ भूतेषुसत्सुसापिस्यान्नभूतानिविनाक्वचित्॥ २२९॥ यदृच्छानामधर्मोयंहेतोर्नियतिवर्जितः॥ धर्मिणंतुविनानैवधर्मःसिद्ध्यतिकुत्रचित्॥ १३०॥ धर्मीनैवप्रकल्प्योत्रप्रत्यक्षेसतिधर्मिणि॥ प्रत्यक्षाणिचभूतानिततस्तान्येवकारणं ॥ २३१ ॥ अत्रापिमुनयःकेचिदसंतुष्टाइदंजगुः॥ भूतानिघटतुल्यानिकारणेनविनाकथं॥ भवंतिततएतेभ्योप्यन्यदप्यस्तिकारणम्॥ २३२॥

सापेक्षैवेत्युत्तरार्द्धार्थः ॥ २२९ ॥ यदृच्छानामेति नियतिनिरपेक्षोयंयदृच्छानामधर्मःकस्यचिद्धेतोःकारणस्यैवसंबंधितयावाच्यः यतोधर्मोधर्मिनिरपेक्षोनदृश्यतेइत्यर्थः ॥ २३० ॥ तस्यचधर्मीभूतभिन्नोनाभ्युपेयःसंभवतिदृष्टेऽदृष्टकल्पनायाअन्याय्यत्वात्तथाचभूतान्येवकारणमित्याह धर्मीनैवेति अत्रयदृच्छायामुपयोगीधर्मीनकल्पनीयःप्रत्यक्षाणांभूतानामेवधर्मित्वसंभवादिति फलितमाह प्रत्यक्षाणिचेति ॥ २३१ ॥ भूतानामपिसावयवत्वेनकारणसापेक्षाणांत्रिगुणत्वादिसाधर्म्येणकारणत्वयोग्याप्रकृतिरेवश्रुतिगतयोनिपदोक्ताजगत्कारणमितिसांख्यमतंदर्शयति अत्रापिमुनयइतिपंचभिः अत्रभूतकारणत्वे असंतोषमेवाभिनयति भूतानीति घटवत्सावयवानांकारणेनविनाभावासंभवादेतेषामपिकिंचिदन्यत्कारणमभ्युपेयमित्यर्थः ॥ २३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तच्चकारणंसजातीयमेवाभ्युपेयमितिसदृष्टांतमाह कार्यमिति स्पष्टं ॥ २३३ ॥ तच्चसाजात्यंसुखदुःखमोहलक्षणसत्वादिगुणत्रयशालित्वेनेतिदर्शयन्भावानांत्रैगुण्यंप्रतिजानीते रत्नेति तत्रसुखरूपत्वेनसत्वात्मतामाह सुखस्येति एतेरत्नादयोयस्यहस्तगास्तस्यसुखहेतवोभवंतीति दुःखात्मकत्वेनराजसत्वमाह दुःखस्येति स्वस्यरत्नादिमतोयोतिवैरीतस्यदुःखदाः ॥ २३४ ॥ मोहात्मकत्वेनतामसत्वमाह मोहंचेति तेरत्नादयः ॥ २३५ ॥ एतेषामिति तस्मात्सदृशस्यैवकारणतायोग्यत्वादेतेषांजन्यभावानांत्रिगुणत्वेनजडत्वेनचसदृशंसर्वत्रानुगतंचयत्प्रधानाख्यंकारणंतदत्रश्रुतौयोनिशब्देनोक्तमित्यर्थः ॥ २३६ ॥ संघातपरार्थत्वादिभ्योहेतुभ्यःप्रकृतिरपियदर्थासपुरुषए

कार्यंहियादृशंदृष्टंतादृगेवात्रकारणं॥भवेद्यद्वत्घटादेःस्यान्मृत्तिकैवात्रकारणं॥२३३॥रत्नस्त्रीहेमवस्त्राद्याभावास्त्रिगुणकाइमे॥सुखस्यैतेभवेयुस्तेहेतवोयस्यहस्तगाः॥दुःखस्यापिभवंत्येतेकारणंस्वातिवैरिणः॥२३४॥मोहंचजनयन्तस्तेलोभाविष्टस्यकामिनः॥एतानलभमानस्यसर्वदादीनचेतसः ॥ २३५॥ एतेषांकारणंतस्मात्त्रिगुणंसर्ववस्तुषु॥ अनुस्यूतंजडंचैतद्योनिशब्दसमीरितम्॥ २३६ ॥ अत्रापिमुनयःकेचिदिमंदोषंवदंतिहि॥ सर्वात्मनानसादृश्यंविद्यतेहेतुकार्ययोः॥ नियमस्ततएवायंव्यर्थोयस्तुयथातथा॥ २३७ ॥ जडानांशकटादीनांनस्वतःस्यात्प्रवर्त्तनं॥ ततोजडाकथंचैषायोनिर्विश्वंकरोतिसा॥ २३८ ॥ अतोऽजडःपरःकश्चित्पुरुषस्तत्प्रवर्त्तकः॥ पुमानेवततोहेतुर्नयोनिःशकटोपमा॥ २३९॥

वहिरण्यगर्भादिरूपोजगद्धेतुरित्याकारंयोगिनांमतंदर्शयति अत्रापिमुनयइतित्रिभिः तत्रप्रधानकारणाभ्युपगमेहेतूक्तंयत्सादृश्यंतत्सर्वात्मनाअत्यंतंभवद्विवक्षितंयत्किंचिद्रूपेणवा तत्रनाद्यः अत्यंतसादृश्येभेदाभावप्रसंगेनभेदसापेक्षकार्यकारणभावस्यैवासंभवादित्याशयेनाह सर्वात्मनेति नांत्यः यत्किंचित्सादृश्यस्यसर्वत्रसंभवेनातिप्रसंगावारकत्वादित्याह नियमइति यस्त्वयंयथातथायत्किंचिद्रूपेणवर्तमानसादृश्यनियमःसव्यर्थः भावत्वादिरूपेणशुद्धचितोपिजडानांसादृश्यसंभवादित्यर्थः ॥ २३७ ॥ तस्माज्जडत्वेनप्रवृत्तौशकटरथादिवत्परसापेक्षाप्रकृतिर्नहेतुतयांगीकार्येत्याह जडानामिति जडायोनिःप्रकृतिः ॥ २३८ ॥ तस्मादजडःसर्वशेषीपुरुषोहेतुतयामंतव्यइत्याह अतइति स्पष्टं ॥ २३९ ॥ ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्यमितिपदस्यार्थमाह एवमेतेइतिद्वाभ्यां एतेकालादयःपुरुषांताः तेषुकआदेयोग्राह्योनकोपिसर्वत्रदोषसद्भावादितिभावः ॥२४०॥ ननुपुरुषपक्षेकोदोषइतिचेदसंगत्वादिभिःकारणत्वायोग्यत्वमेवेतिदर्शयन्फलितमाह पुरुषेपीति ॥२४१॥ अस्तुतर्ह्येषांकालादीनांपुरुषार्थोयःसंयोगःसहेतुरितिशंकावारकस्यतृतीयपादस्यार्थमाह संयोगइति चेतनेसतिचेतनार्थयस्तेषांसंयोगःसोपिनकारणंप्रकृतिवज्जडत्वेनपरसापेक्षतयाअत्रसंयोगेपिकिंकारणमित्याकांक्षायाअनुपरमादित्यर्थः एतेनश्रुतिगतस्यतथात्वभावादित्यस्यसापेक्षतयातत्तुल्यभावादित्यर्थइतिसूचितं ॥ २४२ ॥ ननुशुद्धात्मनःकारणत्वायोग्यत्वेपिप्रतिबिंबात्मनोऽभिव्यंग्यचिच्छक्तित्वेनसांख्यमतप्रसिद्धस्यपरिणा

एवमेतेद्विजाःपक्षाःसप्तास्माभिरुदाहृताः॥पूर्वपूर्वपरित्यागादुत्तरोत्तरसंग्रहात् ॥ आदेयस्तेषुकोनामपक्षोब्राह्मणसत्तमाः॥ २४० ॥ पुरुषेपिवयंदोषंपश्यामःसंगवर्जिते ॥ निर्गुणेहेतुताकेनभवेद्व्यापारवर्जिते ॥ चिंतनीयंततोविप्राःसर्वैरस्माभिरेवहि ॥ २४१ ॥ संयोगोपिनतेषांस्यात्कारणंसतिचेतने ॥ जडःप्रकृतिवत्तस्मादत्रकिंकारणंद्विजाः॥ २४२ ॥ परिणाम्यपिनैवात्माकारणंयेनसोपिच ॥ आत्मनःसुखदुःखादावनीशःकारणंकथं ॥ २४३ ॥ एवमुक्तेमहात्मानःसर्वेसंशुद्धचेतसः ॥ कारणंब्रह्मजानानावेदवाक्यप्रमाणतः ॥ २४४॥ तेसर्वेसर्वपक्षेषुतर्कतोदूषणानिहि॥ निरीक्ष्यश्रुतिवाक्योक्तपक्षेब्रह्मणिकेवले॥२४५॥ गुरुवेदोपदिष्टार्थैप्रत्ययानेकरूपकान्॥ संतत्याकृतवंतोमीयोगशास्त्रविशारदाः॥ २४६॥

मित्वेनकारणत्वयोग्यस्यकारणत्वमस्त्वितिशंकांवारयंश्चतुर्थपादार्थमाह परिणामीति यदिजीवःस्रष्टैस्वतंत्रःस्यात्तदासुखसाधनमेवसृजेन्नदुःखसाधनमितिभावः ॥ २४३ ॥ अथसिद्धांतपक्षप्रकाशकस्यतेध्यानेत्यादेस्तृतीयमंत्रस्यार्थमाह एवमुक्तेइतिसप्तदशभिः एवंब्रह्मवादिभिरुक्तेसतितत्सभागताःसर्वेशुद्धचित्ताःश्रुतिवाक्याद्ब्रह्मकारणतांविज्ञायापितत्रोपपत्तिजिज्ञासंतउक्तपूर्वपक्षेषुदोषान्निरीक्ष्यश्रुत्यनुकूलत्वात्सिद्धांतभूतेकेवलब्रह्मरूपेगुरुवेदोपदिष्टार्थेसमानाकारचित्तवृत्तिसंतानात्मकंध्यानंयोगशास्त्रानुसारेणकृतवंतइतित्रयाणामर्थः॥ २४४ ॥ २४५ ॥ २४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंयोगादिति एवंचेतसिध्यानंप्राप्यनिष्पन्नाद्योगात्समाधेर्हेतोर्ब्रह्मणोदेवस्यशक्तिमायाविद्यादिपदवाच्यांददृशुः याब्रह्माभिन्नात्मनःशक्तिर्जगतःसृष्ट्यादिहेतुःकुतार्किकैर्दुर्दर्शाचेतिद्वयोःसंवंधः ॥ २४७ ॥ २४८ ॥ भूदेवाइति तेभूदेवाब्राह्मणास्तांशक्तिंवक्ष्यमाणैरावरणादिभिर्गुणैर्निगूढांप्रच्छन्नांविलोक्यविस्मिताआसन्निति ॥ २४९ ॥ आवरणादिगुणान्दर्शयति स्वयमितित्रिभिः एषाशक्तिस्तत्रात्मनि वस्तुतोऽविद्यमानापितत्रैवभासमानायत्स्वयंप्रकाशादिरूपमात्मानंतद्विपरीतजाड्यादिरूपेणात्मनास्वरूपेणआवृणोतिएषतस्याःप्रथमःस्वाभाविकोगुणइतिसंबंधः ॥ २५० ॥ विक्षेपरूपांस्तद्गुणानाह सृष्टीति अस्यस्थूलसूक्ष्मात्मकस्यजगतोयेसृष्ट्याद्यास्तथायेचअहंता

एवंयोगान्महात्मानोध्यानंप्राप्याथचेतसि॥ब्रह्माश्रयामिमांशक्तिमविद्यांददृशुस्तदा॥ २४७ ॥ आत्मनोब्रह्मणःशक्तिःसृष्टिस्थित्यंतकारिणी॥जगतोयातिदुर्दर्शाकुतर्कहतबुद्धिभिः ॥ २४८॥ भूदेवास्तामिमांस्वस्यगुणैरावरणादिभिः॥ निगूढामवलोक्याथविस्मयंपरमंगताः॥ २४९॥ स्वयंप्रकाशमद्वैतमानंदात्मानमीश्वरम्॥ आत्मनाजाड्यरूपेणस्यावृणोतिनविद्यते ॥ तत्रचैषेतिसंप्रोक्तस्तस्याःस्वाभाविकोगुणः॥ २५० ॥ सृष्टिस्थितिविनाशाद्याजगतोस्यतथापरे॥ अहंममादयश्चान्येकामक्रोधादयोपिच॥ २५१॥ आगंतारश्चगंतारःकोटिशस्तद्गुणाइमे ॥ आनंदात्मानमप्येतंविषयंचाश्रयंतथा ॥ माययारहितंचापिमाययात्रस्वयंप्रभं॥२५२॥यःकारणानिसर्वाणिकालादीन्यधितिष्ठति॥उक्तानिभगवानेकःसविताविषयान्यथा॥ २५३॥

ममताकामक्रोधादयएतमात्मानंप्रत्यागंतारोदेहद्वयाध्यासेनागमनशीलाःगंतारोनिवृत्तिशीलाश्चतेसर्वेअस्याःशक्तेर्गुणाः कीदृशमेतमात्मानं अद्वयत्वेनस्वयंप्रकाशानंदरूपं वस्तुतोमायारहितमपिचानयामाययैवास्यामायायाविषयतामाश्रयतांचगतमितिद्वयोर्योजना ॥ २५१ ॥ २५२ ॥ कीदृशोयमात्मरूपोदेवोयस्येयंशक्तिरित्याकांक्षापूरकस्योत्तरार्धस्यार्थमाह यइत्यादिना यएकोऽद्वितीयउक्तानिकालादीन्यात्मपर्यंतानिकारणान्यधितिष्ठतिसत्तास्फूर्तिप्रदानेनव्याप्नोतियथासूर्यश्चाक्षुषान्भावान्विषयीकरोतितद्वदित्यर्थः॥ २५३ ॥ ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकाशवदिति योयंदेवःकारणानिसमष्टिरूपाणिव्याप्येतिशेषः अतःकारणव्याप्त्यनंतरमिदंव्यष्टिरूपंविश्वमप्यधितिष्ठति यथाकाशो घटादीनित्यर्थः ॥ २५४ ॥ येयमस्यात्मनःकार्यकारणाधिष्ठातृतोक्तासाप्यनयाऽघटितघटनापटीयस्यामाययैवोपपद्यतेइत्याह अनयेति तस्यासंगस्वप्रकाशरूपस्ययत्कारणतादात्म्यंतदनयामाययैवसंभवतिनस्वतःस्वभावतइत्यर्थः ॥ २५५ ॥ एवंकार्यसंगोपितथेत्याह पुरुषइति संगमायातःससंगोजातः यथाकयाचिद्योषिताकार्मणौषधैर्मोहितःकश्चित्तद्विलासेषुसज्जेततद्वदित्यर्थः ॥ २५६ ॥ तत्रदृष्टान्तान्तरमाह असंगइति यथाकश्चिदसंगःसंगविमुखोपिसकलानुग्राहकत्वलक्षणसौहार्दवशेनकेनचिद्दुर्जनेनापिसंगमागत्याभि

आकाशवदयंदेवःकारणानिघटादिवत् ॥ अतोविश्वमिदंसर्वमधितिष्ठत्ययंपुमान् ॥ २५४॥ अनयामाययातस्यसंगेनरहितस्यहि॥ स्वयंज्योतिःस्वरूपस्यकारणत्वंस्वतोनहि॥ २५५॥ पुरुषोनिर्गुणोऽसंगोविक्रियालेशवर्जितः॥ माययासंगमायातऔषधैरिवमोहितः ॥२५६॥ असंगःसंगमागत्ययथाकश्चित्सुहृज्जनः॥ अभिशापंचपापंचप्राप्नुयाद्दुःखकारणं ॥ २५७॥ एवमेषपुमान्मायासंगात्क्लेशाननेकधा॥ प्राप्नोतिजीवतांप्राप्यहेतुतांजगतोपिच ॥ २५८॥ अहोमायाबलंकीदृगनयासंविमोहितः ॥ असंगोनिर्गुणोज्योतिरानंदात्मास्वयंप्रभः॥ २५९॥ एवंभूतोपिसंसारचक्रंस्वात्मविनिर्मितं ॥ प्राप्तवानिदमत्युग्रंमाययापरिमोहितः ॥ २६०॥

शापंमिथ्यापवादंपापंतत्फलंचाणीमांडव्यवत्प्राप्नुयादित्यर्थः॥२५७॥ दार्ष्टांतिकेयोजयति एवमिति स्पष्टं ॥२५८॥ तदुपपादकंमायाया अघटितघटनापटीयस्त्वमाह अहोइति कीदृगचिंत्यंयतोऽनयाऽसंगादिरूपोप्यात्मामोहितः ॥२५९ ॥ एतत्संबंधादेवात्मासंसारचक्रंप्रविष्टइतिदर्शयन्संसारंचक्रतयाप्रतिपादयंतंचतुर्थमंत्रमवतारयति एवंभूतोपीतिद्विषष्टिश्लोकैः एवंभूतोऽसंगादिरूपोप्यात्माअनयामायया मोहितःसंसारचक्रंप्राप्तवान् कीदृशंचक्रं स्वात्मनामायाशबलरूपेणनिर्मितमितिसंबंधः अत्रस्वात्मविनिर्मितमितिपदेनेदंसूच्यते मंत्रगतः पुंल्लिंगोद्वितीयांतश्चतच्छब्दआत्मानंपरामृश्यचक्रेणसहतत्तादात्म्यंमृद्घटइत्यत्रेवबोधयतीति ॥ २६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविद्येति यस्यसंसारचक्रस्यमूलप्रकृत्यादिपदवाच्याअविद्याकेवलानेमिर्बहिर्मंडलाकारकाष्ठसमासर्वतोव्याप्यावस्थितत्वादित्यर्थः ॥ २६१ ॥ त्रिवृत्पदार्थमाह रूपैरिति तच्चक्रंशुक्लरक्तकृष्णवर्णतयाप्रसिद्धैःसत्वरजस्तमोगुणैःसंवीतंवेष्टितंयथालोहरजतविद्रुममयफलकैःखचितंप्रसिद्धंरथचक्रंभवेदित्यर्थः ॥ २६२ ॥ षोडशांतपदार्थमाह एकादशेंद्रियैरिति नाभिच्छिद्रस्येतिजातावेकवचनं अरानाभिनेम्योस्तिर्यक्प्रोतानिकाष्ठानितानियेषुनाभिगतच्छिद्रेषुतिष्ठंतितेषांछिद्राणांयत्संस्थानंसन्निवेशस्तद्रूपाःषोडशविकाराबोध्याः तेचएकादशेंद्रियभूतपंचकात्मकाःप्रसिद्धाः तथाचषोडशअंतानाभिप्रांतायस्येतिश्रौतपदार्थः नाभिर्नामअराणामंतरतआधारभूतंकाष्ठमित्यर्थः

अविद्यायस्यचक्रस्यनेमिरुक्तामनीषिभिः ॥ यतःसंसारचक्रस्यपरितोनेमिवत्स्थिता ॥ २६१ ॥ रूपैस्त्रिभिस्तुसंवीतंकृष्णशुक्लारुणैर्बहिः ॥ अयोरूप्यप्रवालानांपट्टिकाभीरथांगवत् ॥ २६२ ॥ एकादशेंद्रियैःसार्द्धंभूतपंचकमस्यहि ॥ नाभिच्छिद्रस्यसंस्थानमरायत्रप्रतिष्ठिताः ॥ २६३ ॥ अराःपंचाशदस्यापिचक्रस्योक्तामनीषिभिः ॥ पंचक्लेशास्तथाचाष्टौसिद्धयोनवतुष्टयः ॥ अशक्तयस्तथैवाष्टाविंशतिःस्युरराइमे ॥ २६४ ॥ अन्यस्मिन्नन्यबुद्धिर्यासाऽविद्यातमईरिता ॥ मोहोहंबुद्धिरुद्दिष्टादेहादौमूढचेतसः ॥ २६५ ॥ महामोहोत्ररागःस्याद्विषयेसुखहेतुके ॥ तामिस्रोद्वेषउद्दिष्टःप्रतिकूलेषुवस्तुषु ॥ २६६ ॥ स्याद्योत्राभिनेवेशाख्यःसोंधतामिस्रईरितः ॥ पुत्रदारादिविषयेममत्वेनैवजायते ॥ २६७ ॥ ऊहःशब्दश्चसंप्रोक्तस्तथैवाध्ययनंपुनः ॥ दुःखत्रयविघातश्चसुहृत्प्राप्तिश्चसप्तमी ॥ दानमित्युदिताअष्टौसिद्धयोमुनिसत्तमैः ॥ २६८ ॥

॥ २६३ ॥ शतार्धारपदार्थमाह अराइतिषट्त्रिंशच्छ्लोकैः अस्यचक्रस्याराःक्लेशादिरूपास्तत्तद्भेदसंख्ययापंचाशच्चबोध्याः क्लेशादेर्भेदान्सांख्यप्रसिद्धान्दर्शयति पंचेत्यादिना ॥ २६४ ॥ तत्रपंचक्लेशानविद्यास्मितारागद्वेषाभिनिवेशरूपान्तमोमोहमहामोहतामिस्रांधतामिस्रसंज्ञान्निरूपयति अन्यस्मिन्नितित्रिभिः येयंविपर्ययरूपाऽविद्यासातमइत्युक्तायातुमूढस्यदेहादिविषयिकाहंबुद्धिरस्मितारव्यासामोहइत्युक्तेत्यर्थः ॥ २६५ ॥ महामोहइति स्पष्टं ॥ २६६ ॥ स्याद्योत्रेति ममत्वेनैवजायतेत्यागासहिष्णुत्वलक्षणममतारूपइतियावत् ॥ २६७ ॥ सिद्ध्यष्टकमुद्दिशति ऊहइति एतत्स्वरूपंस्वयमेववक्ष्यति ॥ २६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्टीरुद्दिशति आध्यात्मिकाइति अध्यात्मंसंघातांतर्वर्तिनंप्रकृत्यादिपदार्थमाश्रित्यप्रवृत्ताआध्यात्मिकास्ताश्चतस्रोबाह्याबाह्यविषयोपरमनिमित्ताः ॥ २६९ ॥ अशक्तीरष्टाविंशतिसंख्याःकीर्त्तयितुंतदुपयोगीन्येकादशेंद्रियाणिदर्शयति त्वगितिद्वाभ्यां स्पष्टंद्वयं ॥ २७० ॥ ॥ २७१ ॥ अशक्तीनामष्टाविंशतिंस्फुटीकुर्त्यताभिरराणांपञ्चाशत्संख्यापूर्तिंदर्शयति तेषामितिद्वाभ्यां तेषामेकादशेंद्रियाणांयत्कुष्ठादिरोगैःस्वरूपस्यहानंनाशःसत्त्वेविद्यमानत्वेपिवाविषयग्रहणरूपकार्यराहित्यंअथवापुरुषांतरेंद्रियापेक्षयास्वल्पकार्यकारित्वंसमकार्यकारित्वंवाउत्कर्षाभावइतियावत् तद्रूपेइंद्रियाणांवधेसतिबुद्धेस्तत्प्रयुक्तासामर्थ्यरूपाअशक्तयोनिरूपकभेदादेकादश एवमष्टसिद्ध्यभावप्र

आध्यात्मिकाश्चतस्रःस्युस्तुष्टयोमुनिसत्तमाः ॥ अत्रप्रकृत्युपादानकालभाग्याभिधाइमाः ॥ पंचबाह्याश्चसंप्रोक्तास्तुष्टयःपरमाइमाः ॥ २६९ ॥ त्वक्चक्षुःश्रोत्ररसनाघ्राणानींद्रियपंचकं ॥ ज्ञानाभिधमिदंचान्यत्पंचकंकर्मसंज्ञितं ॥ वाक्पाणिचरणद्वंद्वपायूपस्थाख्यमीरितं ॥ २७० ॥ एकादशंमनश्चात्रकारणंज्ञानकर्मणोः ॥ एकादशेंद्रियाण्यत्रकथितानिमनीषिभिः ॥ २७१ ॥ तेषांस्वरूपहानंवासत्त्वेवाकार्यशून्यता ॥ स्वल्पसाम्यादिकारित्वमथवेंद्रियजोवधः ॥ २७२ ॥ सिद्धितुष्टींद्रियाणांस्युर्वधाउक्तास्त्वशक्तयः ॥ अष्टाविंशतिरित्येतास्तुष्टिसिद्धिसमन्विताः ॥ अविद्याद्यैःसहक्लेशैरराःपंचाशदीरिताः ॥ २७३ ॥ तमोविद्येतियाप्रोक्तासाविद्यापरिकीर्तिता ॥ अष्टधाविषयोयस्मादष्टधायंव्यवस्थितः ॥ २७४ ॥ कारणंत्वेकरूपंस्यात्कार्यंसप्तविधंपुनः ॥ द्विधांतःकरणंतद्वन्महाभूतानिपंचच ॥ २७५ ॥

युक्तावुद्धेरशक्तयोष्टौ नवतुष्ट्यभावप्रयुक्ताश्चतानव संकलनयाष्टाविंशतिरेताअशक्तयोनवभिस्तुष्टिभिरष्टाभिःसिद्धिभिःपंचभिःक्लेशैश्चसहिताःपंचाशदरात्मकाउक्ताइतिद्वयोरर्थः ॥ २७२ ॥ २७३ ॥ प्रसंगात्क्लेशानामवांतरभेदानाह तमोऽविद्येतिनवभिः तमइतिअविद्येतिचनामद्वयेनप्रसिद्धायाऽनात्मन्यात्मबुद्धिरूपाऽविद्यासाऽष्टधाज्ञेयातद्विषयस्याष्टधाव्यवस्थितत्वादित्यर्थः ॥ २७४ ॥ तद्विषयाष्टकमेवदर्शयति कारणमिति कारणंप्रकृत्याख्यंप्रथममात्माध्यासविषयोभवतितदनंतरंकार्यक्रमेणमहत्तत्त्वाहंकाररूपमंतःकरणद्वयंभूतपंचकंचेतेअध्यासगोचरीभवंतीत्यर्थः ॥ २७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्ताऽविद्याबीजरूपेणसुषुप्तावपितिष्ठतितस्याअंकुरभूतामोहाख्याऽस्मितापिजाग्रत्स्वप्नयोरहंरूपेणतानेवाष्टावविद्याविषयान्विषयीक
रोतीत्यतःसमोहोप्यष्टधाज्ञेयइत्याह मोहइति तेष्वविद्याविषयेष्वहंबुद्ध्यात्मकेग्रहणेसतिनिरूप्यमाणोयोमोहोऽस्मिताख्यःसोपिपूर्ववद
विद्यावदष्टधाज्ञेयः कीदृशोविषयव्यक्तिभेदेनानंतभेदोपीतिसंबंधः ॥ २७६ ॥ पंचज्ञानेंद्रियविषयाणांदिव्यादिव्यभेदेनप्रत्येकंद्वैवि
ध्यात्तद्विषयकोरागोदशविधइत्याह परत्रेति परत्रलोकेभवादिव्याःपंचेंद्रियविषयाःस्युः अत्रलोकेभवामानुषाविषयाअपिपंचस्युः
तेषुदशसुसुखसाधनत्वाज्जायमानोरागइच्छात्मकोपिदशविधइत्यर्थः ॥ २७७ ॥ द्वेषस्याष्टादशविषयभेदादष्टादशधाभावमाह अणि
मेतित्रिभिः दिव्यादिव्यभेदेनोक्तविषयैःसहिताअणिमाद्याअष्टौसिद्धीर्वक्ष्यमाणविधयाद्वेषस्यविषयभूताःप्राहुरितिशेषः केचित्तुमनीषि

मोहोस्मिताचतेषुस्यादहंबुद्ध्याग्रहेसति ॥ सोपितेनाष्टधाप्रोक्तोनंतभेदोपिपूर्ववत् ॥ २७६॥ परत्रात्रचलो
केस्युःपंचपंचविभेदिनः ॥ दिव्याश्चमानुषाश्चैतेविषयाःसुखहेतवः ॥ रागोदशसुसर्वेषांतत्संख्यस्तेनसस्मृ
तः॥ २७७॥ अणिमागरिमाचैवलघिमामहिमातथा॥ प्राप्तिःप्राकाम्यमप्युक्तमीशित्वंवशितातथा ॥ अ
ष्टावेतामहासिद्धीःकेचिदाहुर्मनीषिणः॥ २७८॥ अस्मितारागयोर्भेदाद्भेदोत्रोत्तरयोर्द्वयोः ॥ एकैकस्तेनक
थितोलोकेऽष्टादशधास्थितः॥ २७९॥ केनाप्यत्रनिमित्तेनयदातेदुःखहेतवः ॥ प्रातिकूल्यान्निमित्तस्यतेषु
द्वेषःप्रजायते॥ विषयाष्टादशत्वेनतत्संस्थापरिकीर्तिता॥ २८० ॥

णइत्थमाहुः इत्थंकथमित्याकांक्षायामाह अस्मितेत्यादि भेदादितिल्यब्लोपेपंचमी तथाचास्मितायायःकारणाद्यष्टविषयकत्वेनभेदो
यश्चरागस्यदशविधविषयकत्वेनभेदस्तंसविषयकमादायैवउत्तरयोर्द्वेषाभिनिवेशयोर्भेदोवर्णनीयः तेनास्मितारागयोर्विषयोपादानेनैव
द्वेषाभिनिवेशयोर्मध्यएकैकःप्रत्येकमष्टादशधोक्तइतिद्वयोरर्थः ॥ २७८ ॥ २७९ ॥ अष्टादशधात्वमेवस्फुटयति केनापीति तेदशविष
याअणिमादिसिद्ध्यष्टकसहिताःपक्षांतरेऽस्मिताविषयसहितावाकेनचिन्निमित्तेनविहताःसंतोदुःखहेतवोभवंतितदाविघातनिमित्तगतप्रा
तिकूल्यमाश्रित्यतेषुद्वेषोजायतेतत्संस्थातस्यद्वेषस्यसंस्थासम्यग्भेदेनस्थितिर्विषयापेक्षयाष्टादशधोक्तेत्यर्थः ॥ २८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्तविषयाणांविनाशभयरूपोऽभिनिवेशोप्यष्टादशधाज्ञेयइत्याह प्रातिकूल्यस्येति विषयेषुममत्वाद्धेतोस्तदपहारकेआत्मनःप्राति कूल्यंविज्ञाययाऽधिकाद्बलिनःसकाशाद्भीतिर्जायतेतद्रूपोभिनिवेशोपिद्वेषवदष्टादशधाभवेदितिसंबंधः ॥ २८१ ॥ अविद्यादीति योयं विपर्ययःअविद्यादिपंचक्लेशरूपैःपंचधोक्तोविद्वद्भिर्व्यासाद्यैः तथाचोक्तं अविद्यापंचपर्वैषातस्माज्जातामहात्मनइति सतुविपर्ययोऽवांतर भेदैःसूक्ष्मोभवतितांसूक्ष्मतामादायतुद्यधिकषष्टिसंख्याकउक्तः तथाहि अविद्यास्मितयोरुक्तविधयाप्रत्येकमष्टविधत्वं रागोदशधा द्वेषा भिनिवेशौप्रत्येकमष्टादशधा संकलनेद्विषष्टिरिति ॥ २८२ ॥ सिद्ध्यष्टकस्वरूपंस्फुटयति ऊहइतिपंचभिः ऊहपदेनतर्कात्मकंमननमुच्यते

प्रातिकूल्यस्यविज्ञानाद्भीतिर्याजायतेऽधिकात् ॥ आत्मनोभिनिवेशोयंममत्वाद्द्वेषवद्भवेत् ॥ २८१ ॥ अवि द्यादिःसमुद्दिष्टोविद्वद्भिर्योविपर्ययः ॥ पंचधासतुसूक्ष्मत्वाद्द्विषष्टिरिहसंस्थितः ॥ २८२ ॥ ऊहस्तर्कःसमुद्दिष्टो मननंयस्यकीर्तितं ॥ शब्दोवेदोत्रसार्थःस्याद्यतःसाज्ञानसंततिः ॥ २८३ ॥ प्रवर्ततेततोध्यानंशब्दशब्दादुदीरि तं ॥ तदेवाध्ययनंप्रोक्तंश्रवणंशास्त्रगंहियत् ॥ २८४ ॥ अध्यात्ममधिदैवंस्यादधिभूतमितित्रिधा ॥ दुःखंत स्यविघातोयंसिद्धित्रयमुदीरितं ॥ २८५ ॥ गुरुःप्रोक्तःसुहृन्नॄणांप्राप्तिस्तस्यातिदुर्लभा ॥ सप्तमीसिद्धिरुद्दि ष्टायतःसर्वाश्चसिद्धयः ॥ २८६ ॥ दानंवेदांतविज्ञानसंप्रदायप्रवर्तनं ॥ ऊहाद्याःसिद्धयस्त्वेवंकथितादुर्लभा नृणां ॥ २८७ ॥

शब्दपदेनतुवेदवाचकेनस्वतःप्रवर्तमानाज्ञानसंततिर्लक्ष्यते ततोध्यानंनिदिध्यासनंशब्दइतिपदेनोक्तं अध्ययनंतुश्रवणंबोध्यं तथाचार्थव शेनअध्ययनमूहःशब्दइत्येवमेषामुत्पत्तिक्रमोबोध्यइतिद्वयोर्भावः ॥ २८३ ॥ २८४ ॥ अध्यात्मादिदुःखत्रयस्ययद्विघातत्रयंतद्रूपफ लभूतंसिद्धित्रयंचबोध्यमित्याह अध्यात्ममिति॥ २८५॥ फलरूपसिद्धित्रयस्यश्रवणादिसिद्धित्रयद्वाराजनिकागुरुप्राप्तिरूपासुहृत्प्राप्त्या ख्यासप्तमीसिद्धिर्बोध्येत्याह गुरुरिति ॥ २८६ ॥ दैपृशोधनेइतिधात्वर्थानुसाराद्दानपदेनविवेकख्यातेःशुद्धिःसंप्रदायानुसारेणविमल प्रमेयावगाहित्वरूपाप्रतिपाद्यतेइत्याह दानमिति एताएवमोक्षोपयोगित्वात्सिद्धिपदाभिधानयोग्याअणिमादयस्त्वैश्वर्यरूपत्वाद्गौण्यइ तिसूचयन्नुपसंहरति ऊहाद्याइति ॥ २८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवतुष्टीश्चतुर्दशभिर्निरूपयंस्तत्राध्यात्मिकासुप्रथमांप्रकृत्याख्यांतुष्टिमभिनयति प्रकृत्याख्येतित्रिभिः इत्थंप्रकृत्याख्यातुष्टिरलसानांज्ञेया इत्थंकथं मायायाःसकलकार्यकारित्वात्तयायथाकार्यांतरंजन्यतेतथात्मज्ञानमपिजनिष्यतेतत्रममोद्यमैःकिमित्यालोच्ययदात्मज्ञाने उद्यमविवर्जनमेषाप्रकृतितुष्टिरित्युच्यतेइतित्रयाणामर्थः ॥ २८८ ॥ २८९ ॥ २९० ॥ संन्यासस्यज्ञानसाधनतांश्रुत्वासंन्यासानुष्ठान मात्रेणकृतकृत्यतांमन्यमानोयच्छ्रवणादिकंनकुर्यादेषाउपादानाख्यातुष्टिरित्याह कारणमितिद्वाभ्यां यन्नियतंकार्यजनकंतत्कारणमित्युच्यते संन्यासोपिचात्मज्ञानस्यकारणतयाशास्त्रेप्रसिद्धस्ततउक्तकारणतालंबनेनसंन्यस्यापियःश्रवणादेःकृत्यभावःसाउपादानाख्यातु

प्रकृत्याख्याभवेत्तुष्टिरित्थमालस्यभाजिनां॥ माययंसकलंविश्वंसृजत्यत्तिचपातिच ॥ सैवविक्रियतेनाना कार्यरूपाविकारिणी॥२८८॥ ततस्तयैवसकलंमाययैवयथाभवेत्॥ तयैवचतथैवस्यादात्मज्ञानंकिमुद्यमैः ॥ २८९ ॥ एषाप्रकृतितुष्टिःस्याज्ज्ञात्वामायामयंजगत्॥ आत्मविज्ञानजननेउद्यमस्यविवर्जनम्॥ २९०॥ कारणंकार्यजनकंनियतंसंस्थितंयतः ॥ संन्यासोप्यात्मविज्ञानजनकःसंप्रकीर्तितः ॥ २९१ ॥ संन्यस्यापि ततोनैवश्रवणादिकृतिर्हिया ॥ सोपादानाभिधाध्यातुरालस्यादेवजायते ॥ २९२॥ कालतोजायतेविश्वंकालाज्ज्ञानंभविष्यति॥ श्रवणादौततोव्यग्रंचित्तंकुर्वन्नचोचितं ॥ २९३॥ इतिसंचिंत्यदुर्बुद्धिःश्रवणादावनुद्यमं॥ करोतिकालतुष्टिःसापुनर्देहकरीनृणां॥ २९४॥ भाग्याज्जंतुःसमाप्नोतिराज्यंलक्ष्मींयशस्तथा ॥ भाग्यतश्रममाप्येतदात्मज्ञानंभविष्यति॥ २९५॥ इत्थंविचारउद्दिष्टाभाग्यतुष्टिर्मनीषिभिः॥ विचार्यैवंप्रवृत्तोपिश्रवणादेर्निवर्त्तते॥ २९६॥

ष्टिराश्रमोपादानप्रयुक्तत्वादितिद्वयोरर्थः ॥ २९१ ॥ २९२ ॥ कालमालंब्यश्रवणादेरकरणरूपाकालाख्यातृतीयातुष्टिरित्याह कालत इतिद्वाभ्यां ततःसर्वस्यफलस्यकालाधीनत्वाद्यःश्रवणादौव्यग्रंचित्तंकुर्वन्भवतिसउचितंनकरोतीतिशेषः ॥ २९३ ॥ इतिसंचिंत्येति स्पष्टम् ॥ २९४ ॥ चतुर्थीभाग्यतुष्टिमभिनयति भाग्यादितिद्वाभ्यां राज्यादिलाभवदात्मज्ञानलाभोपिभाग्याधीनएवंविचार्य्ययाश्रवणादेर्निवृत्तिस्तद्रूपाभाग्यतुष्टिरितिद्वयोरर्थः ॥ २९५॥ २९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाह्यतुष्टिपंचकंत्रिधादर्शयति शब्देतिचतुर्भिः अनुकूलानामप्रतिषिद्धानामपिशब्दादिपंचेंद्रियविषयाणांयदग्रहणमेतद्रूपंबाह्यतुष्टिपंचकं कैश्चिदुक्तमित्यर्थः ॥ २९७ ॥ द्वितीयंप्रकारमाह अर्जनमिति अर्थसंबंधादर्जनमारभ्यपंचममेतद्धिंसनंक्लेशरूपंभवेदित्यनुसंधायस्यःसंचितानामर्थानांत्यागस्तेनपंचनिमित्तकेननिरूप्याःपंचोपरमाभवंतीतिकेचिद्विदुरितिद्वयोःसंबंधः॥२९८॥२९९॥ अथवार्जनादिक्लेशमनुसंधायार्थसंचयादेवनिवृत्तिःपूर्ववत्तुष्टिपंचकात्मिकाबोध्येत्याह अर्थानामिति क्लेशभाजिनःक्लेशप्रयोजकान् ॥ ३०० ॥ सकलाएतास्तुष्टयोज्ञानसाधनानुष्ठानविरोधित्वाद्बंधहेतवइत्याह सर्वथैवेति स्वल्पोलघुचित्तःपुमान्बाह्यतुष्टिगणेआंतरेतुष्टिगणेवाअत्रएकत्रापिसंतुष्टःस

शब्दस्पर्शरूपरसगंधानामिंद्रियैर्निजैः ॥ अग्रहोप्यनुकूलानांतुष्टिपंचकमीरितं ॥ २९७ ॥ अर्जनंरक्षणंतद्वत्क्षयभोगौचहिंसनं ॥ प्राणिनामर्थसंबंधाद्भवेदेतत्तुपंचमं ॥ २९८ ॥ अर्थसंत्यागतोप्येतेपंचाप्युपरमाविदुः ॥ एवंवापंचकंज्ञेयमत्रतुष्टेर्मनीषिभिः ॥ २९९ ॥ अर्थानामर्जनेक्लेशस्तथैवपरिपालने ॥ नाशेव्ययेचभोगेचधिगर्थान्क्लेशभाजिनः ॥ इतिवापंचकंज्ञेयंबाह्यतुष्टेर्मनीषिभिः ॥ ३०० ॥ सर्वथैवात्रसंतुष्टोनात्मज्ञाने प्रवर्त्तते ॥ बाह्येवाभ्यंतरेवापिस्वल्पस्तुष्टिगणेपुमान् ॥ ३०१ ॥ पंचाशत्संख्ययाप्रोक्ताअराविंशतिसंख्यया॥ इंद्रियाणिदशैवस्युरेतेषांविषयाअपि॥ क्षुद्राअराश्चतिष्ठंतितस्यचक्रस्यसर्वतः॥३०२॥भूमिरापोनलोवायुःखमहंबुद्धिमानसे॥ प्रकृत्यष्टकमेतत्स्यात्प्रकृत्यावासहापिच ॥ मनोबुद्ध्योरभेदेनसंयोगेप्यष्टकंभवेत् ॥३०३॥

न्नात्मज्ञानेनप्रर्ततेइत्यन्वयः ॥३०१॥ उक्तंचक्रंविंशतिप्रत्यराभिर्दशेंद्रियदशविषयात्मिकाभिर्युक्तमित्याह पंचाशदिति यस्यपंचाशदराःप्रोक्तास्तस्यविंशतिसंख्याःक्षुद्राअराःप्रत्यरापदोक्ताःसर्वतस्तिष्ठंतीतिसंबंधः प्रत्यराअराणांप्रतिअभिमुखंवर्तमानाःस्वल्पाअराः ॥ ३०२॥ तस्यचक्रस्यषड्भिरष्टकैर्नेमिगततीक्ष्णधारारूपैर्योगंदर्शयितुंषण्णामष्टकानांस्वरूपंमतभेदेनदर्शयंस्तत्रप्रथमंकेषांचिद्व्याख्यातॄणामभिमतंषडष्टकस्वरूपंप्रतिपादयति भूमिरितिचतुर्भिः भूतपंचकंमनोबुद्ध्यहंकाररूपंप्रकृत्यष्टकंभगवद्गीतासूक्तंग्राह्यं अथवामनोबुद्ध्योरभेदेनसंयोगेऐक्येविवक्षितेसतिमूलप्रकृत्याष्टसंख्यापूरणीया तथाचसांख्यप्रसिद्धंप्रकृत्यष्टकंप्रथमंग्राह्यमितिभावः ॥ ३०३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगांगाष्टकंद्वितीयंबोध्यमित्याह यमइति स्पष्टं ॥ ३०४ ॥ ऊहादीति सिद्धेरितिजातावेकवचनं तथाचवर्णितमूहशब्दादिकंसिद्धीनामष्टकंतृतीयं अणिमादिकमष्टकंचतुर्थं तथावागादीनांस्पर्शपदोक्तत्वकूपर्यंतानांपंचमाध्यायेग्रहपदेनव्यवहृतानामष्टकंपंचमंबोध्यमित्यर्थः॥३०५॥ अमीषामिति अमीषांवागादीनांविषयाइंद्रियाणांबंधकत्वप्रयोजकत्वादतिग्रहपदोक्तास्तेषामष्टकंषष्ठमित्यर्थः॥३०६॥वैदिक्याकांक्षावैदिकेनैवपूरणीयेतिन्यायमनुसृत्यवैदिकपदार्थैरेवषडष्टकसंख्यापूर्तिंदर्शयतांपरेषांव्याख्यानंदर्शयति ग्रहातिग्रहेति ग्रहादि

यमोपिनियमस्तद्वदासनंप्राणसंयमः॥प्रत्याहारोधारणाचध्यानंसहसमाधिना॥३०४॥ ऊहादिचाणिमाद्येतत्सिद्धेःस्यादष्टकद्वयं ॥ घ्राणंवाग्रसनंचक्षुःश्रोत्रंचमनसासह ॥ हस्तौस्पर्शश्चविज्ञेयंग्रहाष्टकमिदंसदा ॥३०५॥ अमीषांविषयास्तद्वद्वेदेउक्ताअतिग्रहाः॥ एतद्धिकथितंकैश्चिद्विद्वद्भिःषष्ठमष्टकं॥ ३०६ ॥ ग्रहातिग्रहयोरन्येतथायतनलोकयोः॥ सुरेचपुरुषेतद्वत्प्रवदंतिषडष्टकं॥३०७॥ पृथिवीचतथाकामोरूपाण्याकाशएवच॥ तमोरूपाणिनीराणिरेतश्चायतनाष्टकं ॥ ३०८ ॥ अग्निश्चहृदयंचक्षुःश्रोत्रंहृदयचक्षुषी ॥ हृदयंहृदयंचैतल्लोकाष्टकमुदीरितम्॥ ३०९॥ अमृतंचस्त्रियःस्वर्गोदिशोमृत्युरसुस्तथा ॥ अपांनाथःप्रजानाथोदेवाष्टकमुदीरितम्॥३१०॥ शारीरोयंकाममयआदित्यःश्रोत्रएवच॥छायामयस्तथादर्शेस्थितोयश्चोदकस्थितः॥ योयंपुत्रमयश्चैतद्विज्ञेयंपुरुषाष्टकं॥३११॥षडष्टकमिदंचक्रेकुलालस्यघटादिवत् ॥ वर्त्ततेसंस्तृतेश्चक्रेधारानेमिर्द्विजोत्तमाः॥ ३१२ ॥

शब्दाजातिपराः तथाचग्रहाणामतिग्रहाणांचपंचमाध्यायेआर्तभागप्रश्नेप्रसिद्धानामायतनादीनांचप्रत्येकमष्टकान्यादायषडष्टकंबोध्यमित्यन्येआहुरित्यर्थः॥ ३०७ ॥ आयतनादीनामष्टकचतुष्टयंपंचमाध्यायेपंचसप्तत्यधिकपंचशतसंख्यापूरकंश्लोकमारभ्यवर्णितंस्मारयति पृथिवीतिचतुर्भिः चतुर्णामर्थोपिततएवावगंतव्यः॥ ३०८ ॥ ३०९ ॥ ३१० ॥ ३११ ॥ एतत्षडष्टकंसंसारचक्रस्यविदारकस्यनेमिगततीक्ष्णधाराभूतमित्याह षडष्टकमिदमिति नेमेर्धाराभूतमिदंषडष्टकमत्रसंस्तृतिचक्रेतिष्ठति स्थितिमात्रेदृष्टांतः कुलालचक्रेघटादिवदिति ॥ ३१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुष्पमालायाःसूत्रवद्विधारकत्वेनपाशभूतस्तस्यचक्रस्यमायाशबलःपरमेश्वरएवेत्याह विश्वेति ॥ ३१३ ॥ यदिपाशोनस्यात्तदाचक्रंविशीर्येतेतिलोकेपिप्रसिद्धमित्याह अरेति विनश्येतविशीर्येत तद्वदेतत्संसारचक्रं ॥ ३१४ ॥ त्रिमार्गभेदमितिपदस्यत्रिभिर्मार्गैर्भेदोनाभिविन्यासविशेषोयस्यतत्तथेतिव्युत्पत्तिमभिप्रेत्यार्थमाह पुत्तिकेतिपंचभिः पुत्तिकापतंगिकाख्यावर्षासुजायमानाकृमिजातिस्तत्प्रभृतयःकीटाःपुनःपुनर्जनिमृतिभ्यांदुःखभाजनत्वेनप्रसिद्धाः ॥ ३१५ ॥ एषइति एषक्षुद्रजंतुभावरूपोमार्गोदक्षिणोत्तरयोःपितृयाणदेवयानाख्य

विश्वरूपःपुमानेषरूपंरूपंबभूवयः ॥ स्थावरंजंगमंसर्वंमहाभूतसमन्वितम् ॥ सएकःपाशइत्युक्तोजगच्चक्राभिबंधने ॥ ३१३ ॥ अरनेम्यादिसंयुक्तंबंधनेनविनायथा ॥ सद्यश्चक्रंविनश्येतेतद्वदेतद्द्विजोत्तमाः ॥ ३१४ ॥ पुत्तिकाकीटमुख्यायेस्वल्पाकारास्तुदेहिनः ॥ संतत्याजनिमृत्यादिगच्छंतोदुःखभाजनं ॥ ३१५ ॥ एषमार्गस्तृतीयःस्याद्दक्षिणोत्तरयोर्द्वयोः ॥ अपेक्षयात्रमार्गोयंचक्रभेदस्यकारणं ॥ त्रिनाभितदिदंचक्रंज्ञातव्यंमुनिसत्तमैः ॥ ३१६ ॥ वलयत्रयसंयोगात्तदिदंजायतेसदा ॥ त्रिवृतंततएवैतन्नेमिनाभ्योर्द्वयोरपि ॥ ३१७ ॥

योर्मार्गयोरपेक्षयातृतीयत्वेनप्रसिद्धोत्रच्छांदोग्यादौ तथाचश्रुतिः जायस्वम्रियस्वेत्येतत्तृतीयंस्थानमिति अयंत्रिविधोमार्गउक्तचक्रस्यभेदेविन्यासविशेषेकारणंप्रयोजकंतत्तस्मान्मार्गत्रयान्नाभिभावमापन्नादिदंचक्रंत्रिनाभिर्ज्ञेयं तदिदंत्रिनाभित्वंमध्यगोलकस्यवलयत्रयेणमंडलत्रयेणसंयोगाद्वेष्टनाज्जायते अतएवैतच्चक्रंद्वयोरपिनेमिनाभ्योस्त्रिवृतमावृत्तित्रययुक्तमितिद्वयोर्योजना अयंभावः एकंमंडलंकर्णिकावत्सूक्ष्मंलिखित्वातंत्रिभिर्मंडलैर्बहिर्विस्तृतैर्वेष्टयेत् तथाचतेषुमध्यमंडलंनाभिरेवबाह्यंनेमिरेव आंतरालकयोर्मंडलयोर्बाह्यापेक्षयानाभित्वमांतरापेक्षयाचनेमित्वं तथाचनाभित्रयंनेमित्रयंचसिद्ध्यतीति ॥ ३१६ ॥ ३१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गत्रयस्यनाभित्रयभावेव्यवस्थांदर्शयति मध्यनाभिरितिद्वाभ्यां अंतर्मुखगम्यत्वसाधर्म्येणदेवयानमार्गोमध्यनाभिस्तदपेक्षयाबहिर्मुखगम्यत्वात्पितृयाणोद्वितीयनाभिःकेवलदुष्कृतपदैरतिबहिर्मुखैर्गम्यत्वात्तृतीयःपंथाबहिर्नाभिः ततोप्यधमैःस्थावरादिभावयोग्यैरतितामसैर्गम्याऽविद्यात्मिकानेमिस्ततोपिबहिर्ज्ञेया कीदृशी नाभिद्वयोपमावेष्टकत्वसाधर्म्येणद्वितीयतृतीयनाभिभ्यांतुल्येतिद्वयोरर्थः ॥ ३१८ ॥३ १९ ॥ द्विनिमित्तपदार्थमाह निमित्तमिति कारणाभ्यांपुण्यपापाभ्यांतादात्म्येनविवक्षितेयेसुखदुःखेतदुभयरूपंनिमित्तंफलरूपमस्यचक्रस्यबोध्यं यथाध्ययनेनवसनीत्यत्राध्ययनंवासस्येति निमित्ततायांदृष्टांतमाह कुलालेति यथाकुलालचक्रस्यकाष्ठंलोष्ठंमृत्पिंडश्चकारणंतद्वदित्यर्थः ॥ ३२० ॥ एकमोहपदार्थमाह मोहइति तमोरूपोमोहस्तुएतच्चक्रप्रयुक्तएकरूपएव किंतस्यरूपमितिचेत्

मध्यनाभिस्तुविज्ञेयामार्गोयोब्रह्मलोकगः ॥ पितृलोकगतोमार्गोंत्वंतरानाभिरीरिता ॥ ३१८॥ बहिर्नाभिस्त्वियंज्ञेयापंथायःस्यात्तृतीयकः ॥ तस्यापिचबहिर्ज्ञेयानेमिर्नाभिद्वयोपमा ॥ ३१९ ॥ निमित्तमस्यविज्ञेयंसुखदुःखेसकारणे ॥ कुलालचक्रस्ययथाकाष्ठलोष्ठात्मकंद्वयं ॥ ३२० ॥ मोहस्तमोत्रविज्ञेयश्चक्रस्यास्यैकरूपकः ॥ आनंदात्मानमत्रैकंवेत्तिनैतद्भ्रमाद्यतः ॥ ३२१ ॥ अस्यचक्रस्यजननीमायानाममहानदी ॥ तस्याविक्षेपरूपायाइदंरूपंमुनीश्वराः ॥ ३२२ ॥ पंचज्ञानेंद्रियाणांस्युःस्रोतांसिस्थानकानिहि ॥ अंबूनितेषुचलनात्पंचज्ञानेंद्रियाणिच ॥ ३२३ ॥

यदात्मतत्त्वविस्मरणंनाम्नेत्यर्थः येआत्मतत्त्वंनस्मरंतितेसर्वेऽनेनमोहिताज्ञेयाः अज्ञानस्यचिदात्ममात्रविषयत्वस्यसिद्धांतितत्वादितिभावः ॥ ३२१ ॥ एवंचतुर्थोमंत्रःपूर्वमंत्रादपश्यन्नितिपदमनुषज्यैतादृशचक्रभावापन्नमज्ञानशबलमात्मानंदृष्टवंतइतियोजनाभिप्रायेणव्याख्यातोऽथतमेवात्मानंनदीरूपेणवर्णयंतंपंचमंमंत्रंव्याकरोति अस्यचक्रस्येतिद्वात्रिंशच्छ्लोकैः अस्यचक्रस्यजननीउपादानभूतायामायातच्छबलात्मरूपामहानदीमंत्रेणोक्ता तस्याविक्षेपप्रधानायाइदंवक्ष्यमाणंरूपंमुनीश्वराअपश्यन्निितिशेषः ॥ ३२२ ॥ पंचस्रोतांसिअंबूनिचयस्याइतिव्युत्पत्तिमभिप्रेत्यप्रथमपदार्थमाह पंचेति पंचज्ञानेंद्रियाणांयानिस्थानकानिगोलकानितानिस्रोतांसिजलवहनस्थानानिबोध्यानि तद्गतानिज्ञानेंद्रियाणितुजलस्थानीयानि तेषुस्रोतस्सुचलनात्मकसाधर्म्यादित्यर्थः कर्मेंद्रियाणीतिपाठेतुज्ञानेंद्रियविशिष्टानितद्गोलकानिस्रोतांति तत्रत्वगाधारतयाप्रसिद्धेनशरीरेणविशिष्टेषुस्रोतस्सुचलनसामान्यात्कर्मेंद्रियाण्यंबूनीत्यर्थः ॥ ३२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यानद्यायोनिपदोक्तानिकारणानिपंचेत्याह स्रोतसामिति यथाप्रसिद्धनद्याःस्रोतसामंभसांचमेघाःकारणंतथाऽस्याःस्रोतसामंभसांच पंचमहाभूतानिकारणमितियोजना ॥ ३२४ ॥ तस्याःपंचोग्रात्मकावक्राःकुटिलप्रवाहाःसंतीतिवक्रेतिपाठाभिप्रायेणाह आसुराणीति द्वाभ्यां असुराःकामक्रोधाद्यात्मकासुरसंपच्छालिनोजीवास्तेषुवर्त्तमानानिपंचेंद्रियजानिज्ञानान्युग्राणिभवंतिदुःखहेतुत्वात् यथाप्राव्षिआगंतुकजलसंयुक्ताःप्रवाहाउग्राभवंतितद्वदित्यर्थः ॥ ३२५॥ तेषामुग्रतांस्फुटयति नक्राइति नक्राख्यजलजंतुवत्कुटिलगामिनस्ते नदीप्रवाहायथादुःखदास्तथैतेआसुराबोधाअपिअशास्त्रीयविषयेषुप्रवर्त्तयंतोदुःखदाइत्यर्थः ॥ ३२६ ॥ वस्तुतस्तुश्रुतौचक्रेतिपाठइति सूचयन्नुक्तविधयोग्रास्तेबोधाश्चक्रभूताअधोगतिहेतुत्वाद्यस्याइत्याह अथवेति अशास्त्रजनिताःप्रामादिकाउग्राबोधाश्चक्रंजलभ्रमस्त

स्रोतसामंभसांचैवमहाभूतानिकारणं॥ मेघानद्यायथायोनिःस्रोतसामंभसामपि॥ ३२४॥ आसुराणींद्रियाणांस्युर्ज्ञानान्युग्राणिदेहिनां॥ प्रवाहानीरसंयुक्ताःप्रावृष्युग्रायथैवते॥ ३२५॥ नक्रादुःखकरान्नृणांयथा कुटिलगामिनः ॥ अशास्त्रीयेतथैवैतेविषयेवक्रचारिणः ॥ ३२६ ॥ अथवाऽशास्त्रजनिताउग्राबोधाःप्रकीर्तिताः॥ स्रोतसामंभसांयद्वच्चक्रभूताअधोगतौ॥ ३२७॥ प्राणोपानस्तथाव्यानःसमानश्चाप्युदानकः॥ पंचप्राणाइमेपंचकल्लोलाःपरिकीर्तिताः॥ ३२८॥ नद्याअस्याद्विजश्रेष्ठामूलपंचकमत्रच॥ शास्त्रीयाअप्यशास्त्रीयाबुद्धयोविषयेषुयाः॥ ३२९॥ शब्दादिषुप्रजायंतेइहवामुत्रवानृणां॥ इच्छाभिःसहितास्तास्तुपंचमूलमुदाहृताः॥ ३३०॥ शब्दःस्पर्शस्तथारूपंरसगंधौचपंचते॥ आवर्त्ताःकथितायस्मादेषुमज्जतिदेहभाक्॥ ३३१॥

द्रूपाःसंतोऽधोगतौप्रयोजकाइतिशेषः यथास्रोतसामंभसांचचक्रभूतागतिविशेषाअधोगतिहेतवःप्रसिद्धाइत्यर्थः ॥ ३२७ ॥ तस्याःपंचप्राणात्मकाःपंचबृहत्तरंगाइत्याह प्राणइति ॥ ३२८ ॥ बुद्धयःशब्दादिज्ञानानिआदिपदग्राह्याइच्छाश्चसंस्कारद्वारातस्यामूलमित्याह नद्याइतिद्वाभ्यां अस्यामूलपंचकमत्रश्रुतौउक्तमितिशेषः किंतदित्याकांक्षायामाह शास्त्रीयाइत्यादि याविषयेषुशास्त्रीयाअशास्त्रीयावाबुद्धयइच्छाश्चजायंतेतद्रूपमस्याःपंचविधंमूलमुत्पत्तिस्थानमितिद्वयोरर्थः ॥ ३२९ ॥ ३३० ॥ पंचावर्त्तामितिपदार्थंप्रपंचयति शब्दइतित्रयोदशभिः आवर्त्तोनाममहास्रोतोभ्रमणस्थानंमज्जनहेतुत्वात्तत्तुल्याअत्रशब्दादिविषयाबोध्याइत्यर्थः ॥ ३३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवर्त्तस्यमज्जनहेतुतामेवस्फुटयति नाविकइति जलेमत्स्यसमः तरणविधावितिशेषः ॥ ३३२ ॥ दार्ष्टांतिकेयोजयति एवमिति शब्दादिजेशब्दादिरूपैःकल्पितेआवर्त्तेपतितोविद्वानपिस्वंपरंवोद्धर्त्तुंनक्षमतेइति ॥ ३३३ ॥ अत्रविदुषैवमभिमानोनकर्त्तव्योयन्ममपरेषांतारकस्यकिंविषयावर्त्ताःकरिष्यंतीति यतस्तारकाअप्यावर्त्तेपतिताःशोच्यतामुपहास्यतांवागच्छंतोदृश्यंतेइत्याह तारयित्वेतिचतुर्भिः तार

॥ २४ ॥

नाविकोपियदावर्त्तेपतेन्मत्स्यसमोजले ॥ उद्धर्तुंनैवशक्नोतिस्वात्मानंतारकोनृणां ॥ ३३२ ॥ एवंशब्दादिजावर्तेविद्वानपिपतेद्यदि ॥ उद्धर्तुंनैवशक्नोतिस्वात्मानंपरमेववा ॥ ३३३ ॥ तारयित्वापरंपारंनद्यायद्वद्धितारकः ॥ आवर्त्तेपतितोनैवमुद्धर्तुमिहशक्यते ॥ ३३४ ॥ परतीरंगतायेस्युरुपकारस्यबोधकाः ॥ शोचंतितत्रतंत्वन्येगच्छंतिचयथासुखं ॥ ३३५ ॥ शब्दाद्यावर्त्तपतितोविद्वानपितथैवसः ॥ शोच्यतेत्रोपकारज्ञैःपरपारमुपागतैः ॥ ३३६ ॥ अशक्तैरेनमुद्धर्तुंतत्प्रसादाद्बहिर्गतैः ॥ कृतघ्नैरपरैःसोयंबहुशस्तूपहस्यते ॥ ३३७ ॥ तस्मात्शब्दादिजावर्त्ताद्भेतव्यंद्विजसत्तमाः ॥ विदुषापिपरंपारंदर्शकेनापरेणकिं ॥ ३३८ ॥ आवर्त्तामुनिशार्दूलाःशब्दादिजनिताइमे ॥ दुस्तराःसर्वजंतूनामज्ञानांविदुषामपि ॥ तार्याणांतारकाणांचयथावर्त्तानदीरुताः ॥ ३३९ ॥ आवर्त्तास्तारकायद्वद्वामदक्षिणभागतः ॥ परित्यज्यैवगच्छंतिनप्रविश्यकथंचन ॥ ३४० ॥ एवंशब्दादिविषयाआवर्त्तामुनिसत्तमाः ॥ विदुषापिपरित्याज्याःप्रवेशेनविनैवहि ॥ ३४१ ॥ तारकोपियदावर्त्तप्रविष्टोनबहिर्व्रजेत् ॥ विद्वानपितथावर्त्तेपतितोनबहिर्व्रजेत् ॥ ३४२ ॥

यित्वानीत्वा स्पष्टं ॥ ३३४ ॥ तस्यशोचकानुपहासकांश्चदर्शयति परेति तंतारकमावर्त्तेपतितं अन्येकृतघ्नाः ॥ ३३५ ॥ दार्ष्टांतिकेयोजयति शब्दाद्यावर्त्तेइतिद्वाभ्यां स्पष्टंद्वयं ॥ ३३६ ॥ ३३७ ॥ फलितमाह तस्मादितिद्वाभ्यां निगदव्याख्यातंद्वयं ॥ ३३८ ॥ ३३९ ॥ विषयावर्त्तेभ्योरक्षाहेतुस्तेषांदूरतःपरिवर्जनमेवेतिसदृष्टांतमाह आवर्तास्तारकाइतिद्वाभ्यां प्रसिद्धमेतत् ॥ ३४० ॥ ३४१ ॥ अंतःप्रवेशिनांत्वनुतापएवभवतीत्याह तारकोपीति ॥ ३४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निगमयति ततइति तस्याः ॥ ३४२ ॥ पंचेंद्रियविषयजानांदुःखानांप्रवाहएववेगइतिदर्शयितुंविषयसुखानांमधुविषसंपृक्तान्नवद्दुःखत्वमाह शब्दादीनिद्वाभ्यां पंचप्रकारवत्कारणभेदात्पंचविधं नाशादीत्यादिपदेनभयादिग्रहः ततःदुःखसंसर्गात् इदंवैषयिकं ॥ ६४४ ॥ ॥ ३४५ ॥ उक्तपंचविधदुःखसंततिरूपोस्यावेगइत्याह पंचानामेवेति स्पष्टं ॥ ३४६ ॥ तस्याःपंचाशद्भेदत्वंद्विधादर्शयंस्तत्रप्रथमंस्रोतःप्रभृतीनांमंत्रोक्तदशपदार्थानामेवप्रत्येकंपंचसंख्याःसंकलय्यपंचाशत्त्वंबोध्यमित्याह स्रोतसामिति उग्ररूपिणांचक्राणामेकंपंचकंविष

ततःशब्दादिविषयाआवर्त्तामुनिसत्तमाः॥सर्वथैवपरित्याज्याविदुषाऽविदुषापिच॥३४३॥शब्दादिजनितंयत्स्यात्सुखंपंचप्रकारवत्॥दुःखंतदेवविप्रेंद्राअंतेनाशादिदर्शनात्॥३४४॥ततःसुखमिदंसर्वंदुःखमेवप्रकीर्तितं॥तेनशब्दादयोविप्रादुःखानामेवकारणं॥३४५॥पंचानामेवदुःखानांनैरंतर्यमहर्निशं॥सएववेगइत्युक्तोनद्याअस्याद्विजोत्तमाः॥३४६॥स्रोतसामंभसांतद्वद्योनीनामुग्ररूपिणां॥चक्राणांचतथैवैतत्प्राणानांचधियामपि॥३४७॥इच्छानांविषयाणांचदुःखानांपंचकानिहि॥दशतैर्जायतेचैषापंचाशद्भेदसंयुता॥३४८॥अथवातमआदिस्यात्पंचकंत्वष्टकंपुनः॥सिद्धेश्चनवकंतद्वत्तुष्टेश्चैताअशक्तयः॥३४९॥अष्टाविंशतिभेदिन्यःपंचाशदितिकीर्तिताः॥एतैर्भेदैरियंज्ञेयापंचाशद्भेदमागता॥३५०॥तमोमोहोमहामोहस्तामिस्रोह्यंधसंज्ञितः॥एतैःपंचभिरुद्दिष्टापंचपर्वामहानदी॥संसारचक्रजननीस्वात्ममायेतिकीर्तिता॥३५१॥

याणामावर्त्तरूपाणांचकाराद्वक्ष्यमाणपर्वणांग्रहः एवंपंचकानिदशजातानि तैःसंकलितैरेषापंचाशद्भेदेतिद्वयोरर्थः ॥ ३४७ ॥ ३४८ ॥ अथवासांख्यप्रसिद्धंप्रत्ययसर्गंपंचाशद्भेदमादायएषापंचाशद्विधेतिदर्शयन्स्मारयति अथवेति सिद्धेरष्टकंतुष्टेर्नवकमितिसंबंधः ॥३४९॥ ॥ ३५० ॥ तमआदिपंचकंदर्शयन्पंचपर्वतामपितस्याःप्रतिपादयति तमइति एतैस्तमआदिभिरविद्यादिरूपैःकृत्वाएषानदीस्वात्ममायारूपापंचपर्वापंचभागाप्रोक्तेति ॥ ३५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपश्यन्निति पदेनानुषक्तेन विशिष्टस्य स्मरणार्थकस्य चरमपदस्य फलितार्थमाह एनामिति एषा शक्तिरात्मस्था विश्वकारणभूते ब्रह्मणि आगमानुमानार्थापत्तिभिः पूर्वं निश्चितासंभाविता पिता मेनां ध्यानयोगकाले मुनयो दृष्टवंतः साक्षादिव कृतवंतः ननु ब्रह्मणि समाहितानां कथं शक्तिभानमिति शंकां वारयन्नाह स्मृतिंप्राप्येति यदा ते समाधिकाले प्रणवार्थमिव स्रष्ट्याद्यनुपपत्तिं स्मरंति तदैनां शक्तिमवधारयन्तीति भावः ॥ ३५२ ॥ षष्ठं मंत्रमवतारयति भविष्यतीति द्वाभ्यां यतो भवतामपि शक्तिनिश्चय एवमेव ब्रह्मसमाधानेनैव भविष्यति ततो यथा भवतां ब्रह्मनिश्चयो भवेत्तथा वदामीत्यर्थः ॥ ३५३ ॥ ज्ञाते इति योगध्यानमितरवृत्तिनिरोधात्मकं ब्रह्माकारवृत्तिप्रवाहं ॥ ३५४ ॥ मंत्रेण समाना

एनां शक्तिं हिते विप्रा दृष्टवंतो यतीश्वराः ॥ आत्मस्थां तां स्मृतिं प्राप्य निश्चितां ब्रह्मकारणे ॥ ३५२ ॥ भविष्यत्येवमेवात्र भवतामपि निश्चयः ॥ यतीश्वरा भवद्भ्योत्र ततो ब्रह्म वदाम्यहं ॥ ३५३ ॥ ज्ञाते ब्रह्मणि तत्रस्थां शक्तिमेतां महानदीं ॥ स्वयमेव भवंतोपि ज्ञास्यंति ब्रह्मवादिनः ॥ योगध्यानं समागत्य यथापूर्वं मुनीश्वराः ॥ ३५४ ॥ ब्रह्म यन्निर्गुणं प्रोक्तं दृष्टं तैर्मुनिपुंगवैः ॥ कारणानामधिष्ठातृ तद्भवंतो न चापरम् ॥ ३५५ ॥ भवतां हृदये योयं बुद्धिसाक्षी प्रकाशते ॥ अविद्यां प्राप्य संसारचक्र एष प्रवर्त्तते ॥ ३५६ ॥ अस्मिन्नुक्ते महाभागाः सर्वजीवनहेतुके ॥ सर्वेषामपि संस्थाने महत्याकाशतोपि च ॥ ३५७ ॥ अत्र स्थितो महानेको बुद्धिभेदविभेदवान् ॥ कामक्रोधादिभिर्दंडैर्भ्राम्यते विवशः सदा ॥ ३५८ ॥

धिकरणयोर्जीवब्रह्मपदयोस्तात्पर्यार्थमाह ब्रह्मेति यन्निर्गुणं ब्रह्म सर्वकारणानामधिष्ठातृ अधिष्ठानरूपं प्रसिद्धं तद्भवंत एव भवतां शुद्धं स्वरूपमेवेत्यर्थः ॥ ३५५ ॥ तदेव भवतां ब्रह्मात्मस्वरूपं मायोपहितं साक्षी ईश्वर इति च व्यपदिश्यते स्वरूपावरणलक्षणाविद्यया संसारी सन् जीवश्च भवतीत्याह भवतामिति योयं भवतां ब्रह्मरूप आत्मा बुद्धिसाक्षी सन् प्रकाशते स एवाविद्यां प्राप्यास्मिन्नुक्ते वर्णिते संसारचक्रे प्रवर्त्तमानो जीव इत्युच्यते इति शेषः ॥ ३५६ ॥ अस्मिन्निति प्रथमपदद्वयं पूर्वान्वयित्वेन व्याख्यातं हे महाभागाः स जीवोत्र हृदयस्थ साक्षिरूपे ईश्वरे स्थितः सन् बुद्ध्युपाधिकनानाभेदशाली कामादिदंडैस्ताडितत्वेन विवशोऽनेनांतर्यामिणेश्वरेण भ्राम्यते कीदृशेऽत्रेश्वरे सत्तादिप्रदत्वेन सर्वजीवनहेतुभूते सर्वाधारे आकाशाद्बृहति चेति द्वयोरर्थः ॥ ३५७ ॥ ३५८ ॥ ॥ २५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयंजीवोयदाहृदयाकाशरूपेसमागतोभवतितदाविद्यांघ्नन्सन्हंसपदाभिधेयोभवतीत्याह ब्रह्मजइति ब्रह्मजेशुद्धब्रह्मणएवविवर्त्तभूतेहृदयाकाशेसाक्षिरूपेसंसारचक्राद्बंधकात्पृथङ्मोक्षहेतुतयाविलक्षणत्वेनस्थितेसमागतःसमाहितःसन्स्वबोधेनाविद्यायाघातकोभवतिततदाहंसइत्युच्यते हंतीतिहंसइतिव्युत्पत्तिसमन्वयादित्युत्तरश्लोकाद्धंसपदानुषंगेणार्थः ॥ ३५९ ॥ हंसइति सहंसआत्मानंसर्वजडप्रेरकत्वेनसर्वांतरंत्वंपदार्थंज्ञात्वातेनैवरूपेणप्रीतस्तुष्टःसंस्ततस्तत्पदार्थभूताद्वयसदानंदरूपेणतदेवनिजंरूपंदृष्टवान्यतोभवतिततएवाम्तत्वंगच्छतीत्यर्थः॥ ३६० ॥ ब्रह्मात्मज्ञानादमृतत्वमित्येतदेवस्फुटयति आनंदात्मनीति स्पष्टं एतेनजीवस्यब्रह्मणःसकाशादुत्पत्तिकथनेनकृतःस्म

ब्रह्मजेहृदयाकाशेपृथक्संसारचक्रतः॥ समागतःस्वबोधेनह्यविद्यायाश्चघातकः ॥ ३५९ ॥ हंसोज्ञात्वास्वमात्मानंप्रेरकंचजडस्यहि ॥ प्रीतस्तेनसदानंदंसर्वप्रियतमंनिजम् ॥ दृष्टवान्यतएवायमम्तत्त्वंततोव्रजेत् ॥ ३६० ॥ आनंदात्मनिविज्ञातेसत्येप्रियतमेपुमान्॥ अविद्यारहितोभूयोमरणंनैवगच्छति॥ ३६१॥ योयंहंसेनसर्वात्माहृदयाकाशईश्वरः॥ आनंदात्मापरप्रीतिकरःस्वस्यात्मदर्शनात् ॥ ३६२ ॥ दृश्यतेसहिवेदांतैरूर्ध्वंगीतस्तुकर्मणः॥ सएवपरमंब्रह्मयतोनावर्त्ततेगतः॥ ३६३॥ कृष्णंश्वेतंतथारक्तंतेजोबन्नात्मकंत्रयं॥ ब्रह्मज्ञानाद्विनायस्यानाशोनास्तिकथंचन॥ मायासापिचतत्रैवस्वात्मावरणकारणं॥ ३६४॥

जाताइतिप्रश्नोपिसमाहितइतिबोध्यं ॥ ३६१ ॥ ब्रह्मणःसर्वाधिष्ठानतांतस्यात्मत्वज्ञानान्मोक्षंचविशदयतःसप्तममंत्रस्यार्थमाह योयमितिपंचभिः योयमीश्वरोहृदयाकाशरूपोहंसेनात्मतयादृश्यतेसवेदांतवाक्यैःकर्मणःकर्मप्रतिपादकात्पूर्वकांडात्उत्ऊर्ध्वंस्थितैर्गीतःप्रतिपादितः अथवाकर्मणःकर्मफलादूर्ध्वमुपरिष्टात्स्थितोगीतःसहृदयाकाशरूपईश्वरएवपरंब्रह्मेतिद्वयोरर्थः ॥ २६२ ॥ २६३ ॥ कृष्णमिति तस्मिन्नेवब्रह्मणिकृष्णादिवर्णत्वेनच्छांदोग्येपष्ठेप्रपाठकेवर्णिततंतेजःप्रभृतित्रयंस्थितंतथास्वात्मावरणकारणत्वेनस्वप्रतिष्ठापदोक्ताब्रह्मात्मज्ञानेतरानाश्यत्वेनाक्षरपदोक्ताचमायास्थितेत्यर्थः ॥ ३६४ ॥

CC-0. In Public Domain. Digitization by eGangotri

 एतस्मिन्निति एतस्मिन्हृदयाकाशेसकार्यायाःसविलासायामायायाःसकाशाद्विभिन्नतारूपमंतरंप्रथमंज्ञात्वापुनर्ब्रह्मात्मत्वेनचतंज्ञात्वा
तत्पराऐक्यपरावेदज्ञविप्राविक्षेपावरणरूपायायोनेरविद्याया विमुच्यसुनिर्वृताआनंदमग्नाअस्मिन्नेवब्रह्मणितादात्म्येनलीनाभवनेनजन्म
नावर्जिताजाताइतिद्वयोरर्थः॥३६५॥३६६॥ तत्त्वंपदार्थयोर्विभाजकोपाधीतद्विवेकेनमोक्षंचदर्शयतोऽष्टममंत्रस्यार्थमाह तत्पदार्थइत्य
 ष्टभिः अत्रप्रस्तुतविवेकेहृदयाकाशरूपईश्वरोब्रह्माद्वितीयोमहावाक्यगततत्पदार्थउक्तस्तथाहंसत्वेनोक्तोजीवस्त्वंपदार्थइत्यर्थः ॥३६७॥
औपाधिकइति अनयोस्तत्त्वंपदार्थयोरेवमुत्तरश्लोकोक्तविधयाविभिन्नउपाधिर्ज्ञेयइति ॥ ३६८ ॥ व्यक्तेति तत्रव्यक्तंकारणसंबद्धका

एतस्मिन्हृदयाकाशेचिदानंदात्मरूपिणि ॥स्वयंज्योतिषिमायातःसकार्यायाविभिन्नतां ॥ज्ञात्वावेदविदो विप्राब्रह्मात्मत्वेनतत्पराः॥३६५॥ विक्षेपावरणाद्योनेर्विनिर्मुक्ताःसुनिर्वृताः॥ अस्मिन्नेवचतादात्म्याल्लीना भवनवर्जिताः ॥ ३६६ ॥ तत्पदार्थोंत्रविज्ञेयोहृदयाकाशईश्वरः ॥ ब्रह्महंसस्तथैवायंत्वंपदार्थःप्रकीर्तितः ॥ ३६७॥ औपाधिकोऽनयोर्भेदःकथितोद्विजसत्तमैः ॥ उपाधिश्चानयोरेवंविभिन्नोत्रयतीश्वराः॥ ३६८॥ व्यक्ताव्यक्तमिदंविश्वंकार्यकारणरूपधृक्॥ क्षराक्षरवचःप्रोक्तमीशोब्रह्मबिभर्त्यदः ॥ ३६९ ॥ सुखदुःखोप भोगेनस्वात्मानंबुद्धिसंयुतः ॥ अजानानोऽविवेकेनजीवत्वंगम्यतेपरः ॥ ३७० ॥ जीवत्वस्यपरित्यागादेष मायाकृतस्यहि॥ईशमात्मानमाज्ञायमुच्यतेसर्वपाशतः॥ ३७१॥ सूचीपाशस्थितंयद्वन्नभोन्यूनमुदाहृतं॥ ब्रह्मांडोदरसंस्थानंमहदेतत्प्रकीर्तितं ॥ ३७२ ॥ तद्वद्बुद्धिस्थितोजीवआत्मैवपरिकीर्तितः ॥ मायास्थितश्चप रमोत्यतोभेदोनवस्तुनि॥३७३॥

र्यरूपंविश्वंक्षरपदोक्तंत्वंपदार्थोपाधिरव्यक्तंकारणमक्षरंतुतत्पदार्थोपाधिरनयोर्द्वयोरधिष्ठानभूतंतुशुद्धंब्रह्मपरमीशानमित्यर्थः ॥ ३६९ ॥
एवमस्यात्मनोबुद्ध्यविवेकेनजीवत्वंदर्शयति सुखेति परआत्मैवबुद्धिसंयुतआत्मानमजानानःसन्जीवत्वंगतइति ॥ ३७० ॥ सएवोपा
धिविवेकेनात्मानमीशंजानानोमुच्यतइत्याह जीवत्वस्येति स्पष्टं ॥ ३७१ ॥ एतस्यात्मनःसमष्टिव्यष्ट्युपाधिवशात्तत्त्वंपदार्थभावंदृष्टांते
नस्फुटयति सूचीति सूचीपाशःसूचीमूलच्छिद्रंतद्गतमाकाशंस्वल्पमित्युच्यतेब्रह्मांडावच्छिन्नंमहदितितथाबुद्ध्यवच्छिन्नआत्माजीवःकार
णावच्छिन्नस्तुपरमईश्वरत्युच्यतेइतिद्वयोरर्थः॥ ३७२ ॥ ३७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति एवंपरमार्थतोवस्तुनऐक्येनात्मानमद्वयंज्ञात्वाजीवःकामादीन्पाशांस्तत्कारणीभूतांमायांचत्यजतीत्यर्थः ॥ ३७४ ॥ नन्वात्मनएकत्वेऽयंभेदव्यवहारःकिंकृतइतिशंकांनिवार्यमोक्षसाधनंविज्ञानमभिनयतोनवममंत्रस्यार्थमाह अनादीति एतद्वक्ष्यमाणंपदार्थत्रयमनादिमाययैवकल्पितंतेषांत्रयाणांपदार्थानामजत्वमनादित्वमप्यतएवमायातएवस्यात् तेपदार्थाअनादित्वेनैवमाययाकल्पिताइति यावत् ॥ ३७५ ॥ केतेइत्याकांक्षायामाह सर्वज्ञइति तथाचईशोजीवःशुद्धंब्रह्मचेतित्रयमनादीतिपादत्रयार्थः एतेषामनादित्वेउक्तेतत्प्रयोजिकायामायायाअनादित्वमर्थादुक्तमित्याह मायेति सर्वस्यत्रयाणांभेदस्यतदनादित्वादेश्चकारणंप्रयोजिकेत्यर्थः तदुक्तंवार्तिककृता जीवईशोविशुद्धाचिद्विभागश्चतयोर्द्वयोः अविद्यातच्चितोर्योगःषडस्माकमनादयइति ॥ ३७६ ॥ मोक्षोपायमाह एतत्त्रय

एवंविज्ञायजीवोयमानंदात्मानमीश्वरं॥ कामक्रोधादिकान्पाशान्संत्यजेन्माययासह ॥ ३७४॥ अनादित्रयमेतत्स्यान्माययैवयतीश्वराः॥ अजत्वमतएवस्यात्त्रयाणामपिसर्वदा ॥ ३७५ ॥ सर्वज्ञःपरमात्मैकोमूढोजीवस्तथापरः ॥ आनंदात्मातथान्यश्चमायासर्वस्यकारणं॥ ३७६॥ एतत्त्रयंयदाजंतुर्जानीतेस्वस्वरूपतः ॥ अभिन्नंभोक्तृभोग्यादिरूपेणपरितःस्थितं॥ अनंतमेकमात्मानमहमस्मीत्यसंशयं॥ ३७७॥ अजाभोग्यस्वरूपेणसुखदुःखप्रदायिनी॥ अव्यक्तनामरूपत्वादक्षरंचेतिकीर्तिता॥ स्वात्मनोज्ञानउत्पन्नेनश्वरत्वात्क्षरंभवेत्॥ ३७८॥ मरणादिविनिर्मोक्षादक्षरंनाशवर्जितं॥ अविद्याहरणादेषपरमात्माहरःसदा॥ ईशेक्षरमिदंसर्वंकार्यकारणरूपधृक्॥ ३७९ ॥

मिति यदायमधिकारीएतद्वर्णितंत्रयंस्वस्वरूपादभिन्नंजानातिआत्मानंस्वस्वरूपंचसर्वात्मतयास्थितमतएवानंतंजानात्ययमहमस्मीति तदामुच्यतेइतिशेषः ॥ ३७७ ॥ अथबोधात्पूर्वमक्षरत्वेनप्रसिद्धायाअविद्यायाःक्षरत्वलक्षणःस्वभावविपर्ययश्चतुर्भिर्निमित्तैर्भवतीतिप्रदर्शयतोदशममंत्रस्यार्थमाह अजेत्येकादशभिः याअजामायासृष्टिकालेभोग्यादिरूपेणप्रलयेऽव्याकृतरूपेणचविद्यमानत्वादक्षरमितिनाम्नाप्रसिद्धासाबोधकालेक्षरणशीलत्वात्क्षरपदेनव्यवहार्याभवतीत्यर्थः ॥ ३७८ ॥ बोधकालेत्वविद्याक्षपणाद्धरसंज्ञआत्मैवाक्षरपदेनव्यवहार्यइत्याह मरणादीति यद्वस्तुनाशवर्जितंतदक्षरमितिवाच्यंतादृशश्चात्मैवयोऽविद्यायाहरणाद्धरइतिक्षररूपयोःकार्यकारणयोर्नियमनादीशइतिचोक्तइत्यर्थः ॥ ३७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रोत्तरार्द्धार्थमवतारयति यतीश्वराइति हेयतयोभवद्भिरितिनमन्तव्यं इतिकिं अस्माभिरात्माज्ञातस्तथाप्यविद्यानगतानिवृत्तेतिक
थंज्ञानस्याविद्यानिवर्त्तकत्वमिति ॥३८०॥ तत्रहेतुतयाआसक्त्यादिहेतवोऽविद्याशक्तयस्तत्त्वज्ञानावस्थाभेदैर्निरस्यमानादृश्यन्तइतिप्र
तिपादकस्योत्तरार्धस्यार्थमाह तस्येत्यादिना यतस्तस्यहरस्यात्मनोऽभिध्यानात्अभितःसर्वत्रजगत्यनुस्यूतत्वचिंतनात्काचिज्जगतिसत्य
त्वभ्रमद्वारासक्तिप्रयोजिकाअविद्याअविद्याशक्तिःक्षीयमाणाबुद्ध्यते यतःसर्वमिदंदृश्यमात्मैवेतिजानानःपुमान्पूर्ववद्रागादिभिर्युज्यमा
नोनदृश्यतेतत्रभवंतएवोदाहरणमित्यर्थः ॥ ३८१ ॥ फलितमाह तेनेति तेनोक्तज्ञानफलप्रदर्शनेनात्युत्कटासक्तिहेतुत्वाद्यथायेनउत्कटा

यतीश्वराअयंब्रह्मसर्वात्माभेदवर्जितः॥ज्ञातोविद्यागतानेतिनमंतव्यंकदाचन॥ ३८०॥ तस्याभिध्यानतः
काचिद्विद्यानाशमाव्रजेत् ॥ आत्मासर्वमिदंजानन्यतोरागादिभिःपुमान् ॥ नयुज्यतेयथापूर्वंभवंतइव
चाधुना॥ ३८१॥ तेनाभिध्यानतश्चैकाविद्यानाशंप्रयातिसा॥अत्युत्कटायथाविद्वान्संसारिभ्योविलक्षणः॥
भवेद्भ्रांत्यादिसंपन्नोरागद्वेषविवर्जितः ॥ ३८२ ॥ आत्मनोब्रह्मभावेनयोजनाच्चापरापिसा ॥ विनश्यति
महाभागायथाब्रह्मात्मतांप्रति॥ ३८३॥ संदेहादिविहीनःसन्ब्राह्मणत्वादिकंयथा ॥ अवगच्छतितद्वत्ताम
वगच्छतिसर्वदा॥ ३८४॥ तत्त्वभावात्तृतीयैषामायालयमुपाव्रजेत् ॥ यथाविदेहकैवल्येमुक्तानांमुनिसत्त
माः॥ ३८५॥ अत्रसर्वापिमायेयंसंस्कारैश्चशुभाशुभैः॥ सहैवनाशमायातिमुक्तानांहियतीश्वराः॥३८६॥

विद्यानाशेनसंसारिभ्यःसंसारासक्तेभ्योविलक्षणोभवेदिति ॥ ३८२ ॥ जीवानांपरस्परंब्रह्मणश्चभेदभानहेतुभूताद्वितीयाविद्याशक्ति
रैक्यचिंतनलक्षणाद्योजनादपगच्छतियेनात्मनोब्रह्मत्वेनिःसंशयोभवेद्यथात्मनोब्राह्मणत्वादिजातौलौकिकजनोनिःसंशयस्तद्वदित्याह
आत्मनइतिद्वाभ्यां तांब्रह्मात्मतां शेषंस्पष्टंद्वयं ॥३८३॥३८४ ॥ अथाद्वयनिष्ठारूपात्तत्त्वभावाख्यात्तत्त्वज्ञानावस्थाविशेषात्ज्ञानकर्म
वासनाप्रयोजिकातृतीयाविद्याशक्तिर्नश्यतियेनसमाहितोविद्वान्जीवन्नपिविदेहमुक्तसमोभवेदित्याह तत्त्वभावादिति तत्त्वस्याद्वयरूप ॥ २७॥
स्यभावोनैरंतर्येणानुसंधानंतस्मात् ॥३८५॥ अत्रेति अत्रतत्त्वभावेसमाहितत्वरूपेसर्वासर्वविधामायासंस्कारैर्वासनाभिःसहनश्यतिवि
देहमुक्तिवदित्यर्थः ॥ ३८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रस्वाप्नमिति तथात्रतत्त्वभावेजाग्रदवस्थःस्वाप्नंप्रपंचमिव विश्वंदेहपर्यंतंनपश्यतिस्वयंप्रकाशानंदरूपेवस्थितत्वादित्यर्थः तदुक्तंभागवते देहंचनश्वरमवस्थितमुत्थितंवासिद्धोनपश्यतियतोध्यगमत्स्वरूपमिति एतेनप्रपंचभानप्रयोजिकाचतुर्थीअविद्याशक्तिःप्रारब्धांतेलीयतेइ तिसूचितं समाधेरपिप्रारब्धात्प्राबल्यस्यसर्वतंत्रसिद्धत्वादिति ॥ ३८७ ॥ उक्तव्यवस्थामेवस्फुटीकुर्वतएकादशमंत्रस्यार्थमेकात्रिंशताश्लो कैःप्रपंचयंस्तत्राभिध्यानफलप्रदर्शकस्यपूर्वार्द्धस्यार्थंस्फुटयति अभिध्यानादितिचतुर्भिः एषोधिकारीपूर्वंमूढःअभिध्यानेनोक्तलक्षणे नयदात्मानंजानातितदाअविमूढाव्यामोहहीनामतिर्यस्यसतथाभूतःसन्सर्वान्कामादिरूपपाशांस्त्यजेद्यैःकामाद्यैर्बद्धोनानायोनिषुकारा

अत्रस्वाप्नमिदंविश्वंप्रतिबुद्धोनपश्यति ॥ आनंदात्माद्वयःसोयंस्वयंज्योतिर्वपुःस्थितः ॥ ३८७॥ अभिध्याना
द्यदात्मानंजानात्येषोऽविमूढधीः ॥ कामक्रोधादिकान्पाशांस्तदासर्वानयंत्यजेत् ॥ ३८८ ॥ यैर्निबद्धोभिसंया
तियोनिमुच्चावचामयं ॥ तत्रापित्रिविधंदुःखंव्रजेन्नानाविधंपुनः ॥ यैर्निबद्धोत्रनैवायंसंसारेपिसुखंव्रजेत्
॥ ३८९ ॥ तइमेदारुणाःपाशाहीयंतेप्रथमंसदा ॥ इदंजडाजडंविश्वंस्वात्मेत्येवावधारणात् ॥ गुरुशास्त्रोक्तवि
श्वासात्तदभिध्यानरूपिणः ॥ ३९० ॥ अहंब्रह्मेतितादात्म्याद्योजनेसतियद्दृढं ॥ जायतेब्रह्मविज्ञानंनभोवत्स्वा
त्मनोयदा ॥ ३९१ ॥ हृदयेसंप्रभेदःस्यात्तदातस्यमहात्मनः ॥ क्लेशकर्मक्षयश्चैवच्छिन्नसंशयबोधता ॥ ३९२ ॥
मायालयेयदाक्लेशाःक्षीयंतेप्राणिनामिह ॥ तदाकारणशून्यानिदुःखानिनभवंतिच ॥ ३९३ ॥

गारस्थानीयासुभ्रमति तत्रतासुयोनिषुअत्रदेहेचनानादुःखानिचानुभवतीतिद्वयोरर्थः ॥ ३८८ ॥ ३८९ ॥ तइमेइति तेनानायोनिद्वारा दुःखप्रयोजकाइमेकामादयःपाशाःक्षयंगच्छंति कुतः इदंविश्वमात्मैवेत्याकारकादभिध्यानादात्मज्ञानात्श्रद्धयालब्धादित्यर्थः॥३९०॥ अथार्थाल्लब्धंयोजनफलंप्रपंचयति अहंब्रह्मेतिचतुर्दशभिः नभोवत्घटाकाशस्यमहाकाशइवअहंब्रह्मेतिस्वात्मनस्तादात्म्येनब्रह्मणि योजनेसतियदाब्रह्मज्ञानंजायतेतदाहृदयेहृदयग्रंथौअध्यासरूपेसंप्रभेदोविशीर्णताक्लेशादिक्षयोनिःसंशयबोधशालित्वंचभवति भिद्यते हृदयग्रंथिरित्यादिश्रुतेरितिद्वयोरर्थः ॥ ३९१ ॥ ३९२ ॥ क्लेशानामविद्यादीनांक्षयेतुदुःखानिकारणाभावादेवनभवंतीत्याह मायेति मायायाभेदप्रयोजकाज्ञानस्यक्षये ॥ ३९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अज्ञानस्यक्लेशद्वारादुःखप्रयोजकतामेवान्वयव्यतिरेकाभ्यांस्फुटयति अज्ञानमितिद्वाभ्यां अहंताअस्मिताख्या ममताअभिनिवेशः ॥ ३९४ ॥ व्यतिरेकमाह अज्ञानेइति तल्लयेअहंतालये ॥ ३९५ ॥ तस्यविदुषःप्रारब्धकर्मणादेहसंघातधर्माणांदुःखादीनांभानमात्रंभवतिनत्वात्मन्यध्यासइत्याह एवमित्यादिना निर्वाणंसमाप्तिं एषविद्वान् ॥ ३९६ ॥ दुःखादिकंसंघातधर्मएवेत्याह सुकृतैरिति बुद्धिसहि

तदेहरूपःसंघातोदुःखाद्याश्रयोनात्मेति ॥ ३९७॥ अतइति अतउक्तविवेकात् विद्वान्सुखादिकंनयातियथामूढोऽभिमानाद्देहधर्मान्याती

अज्ञानंहियदैवस्यात्तदाहंताप्रजायते॥ रागद्वेषभयैःसार्द्धंममतायास्तुकारणं ॥ ३९४ ॥ अज्ञानेविलयंप्राप्ते यात्यहंतालयंततः॥ तल्लयेकेनदुःखानिप्राप्नुयादेषमानवः ॥ ३९५ ॥ एवंनिर्दुःखतांप्राप्यपुण्यपापविवर्जितः॥ आरब्धकर्मनिर्वाणमिच्छन्नेषोत्रवर्त्तते॥ ३९६ ॥ सुकृतैःसुखमायातिदुःखंयातिचदुष्कृतैः ॥ संघातोबुद्धिसहितोदेहोनाहंकदाचन ॥ ३९७॥ अतोदेहकृतंकिंचित्सुखंदुःखंनविंदति ॥ अभिमानाद्यथादेहेमंडितेमंडितोभवेत्॥ तस्मिन्नुपहतेतद्वदुपघातंचयात्यसौ॥ ३९८॥ एवंदेहाभिमानेनसुखंदुःखंचगच्छति॥ अनुकूलात्तथैवायंप्रतिकूलाच्चदेहभाक्॥३९९॥ अभिमानेनरहितोयथादेहांतरेपुमान् ॥ सुखदुःखेनयात्येवमस्मिन्नपिवपुष्ययं॥ पश्यत्येषनिजंदेहंपरदेहसमंपुमान् ॥४००॥ मध्यस्थोत्रयथाकश्चिद्द्वयोर्विवदमानयोः॥ सुखदुःखेविजानन्सनैवजानातिकर्हिचित्॥ ४०१ ॥ एवमेवशरीरस्थःपुमान्संगविवर्जितः॥ सुखदुःखेविजानन्सनजानात्येकरूपभाक् ॥ ४०२ ॥ वासनाभिर्यथास्वप्नंपश्यत्येवविमूढधीः ॥ पुमान्क्वचित्तथैवायंक्षीणक्लेशःसुखादिकं॥ जीवन्मुक्तवपुर्गच्छेत्सर्वदुःखविवर्जितः॥ ४०३॥

तिसंबंधः उपहतेताडिते उपघातंपीडां ॥३९८॥ एवमिति मूढोदेहभाक्देहात्मदर्शीअनुकूलात्सुखंप्रतिकूलाद्दुःखंचगच्छतीति ॥ ३९९ ॥ विद्वांस्तुनतथेत्याह अभिमानेनेति देहांतरधर्मानिवस्वदेहधर्मानपिनात्मन्यारोपयतीत्यर्थः ॥ ४०० ॥ देहताटस्थ्येलौकिकंदृष्टांतमाह मध्यस्थइति मध्यस्थःपक्षपातहीनः ॥४०१॥ दार्ष्टांतिकेयोजयति एवमिति स्पष्टम् ॥ ४०२ ॥ तस्यसमाधेर्व्युत्थानकालेप्रपंचभानंभवतीतिदृष्टांतेनस्फुटयति वासनाभिरिति यथास्वप्नभानंस्वप्नभोगप्रदकर्मवासनाधीनंतथास्यप्रारब्धकर्माधीनंविश्वभानमित्यर्थः ॥४०३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरार्द्धोक्तंतत्त्वभावफलंविशदयति तत्त्वभावादिति तदेकनिष्ठारूपात्तत्वभावाद्यदानिरविद्यःसंस्कारवर्जितोभवतितदातत्पदार्थेपरमेश्वरेवि यमानेविश्वैश्वर्यंपुराएषह्येवसाधुकर्मकारयतीत्यादिश्रुतिव्याख्यानावसरेउक्तं देहभेदेवक्ष्यमाणस्वरूपे प्राप्नोतीतिशेषः कीदृशंतदैश्वर्यं अभिध्यानयोजनयोःफलभूतंयदैश्वर्यद्वयंतदपेक्षयातृतीयमित्यर्थः ॥४०४॥ तत्राभिध्यानफलस्यैश्वर्यभावंसकामस्येंद्रस्यापिदुर्लभत्वेनाह रागद्वेषादीति रागादिराहित्यात्मकसर्वपाशविमोक्षणरूपमैश्वर्यंप्रथमंप्रथमस्याभिध्यानस्यफलं ॥४०५॥ योजनफलस्यतथात्व

तत्त्वभावादविद्यायाःक्षयेसंस्कारवर्जितः॥ तत्पदार्थेस्तियत्किंचिद्विश्वैश्वर्यंपुरोदितं ॥ देहभेदेतृतीयंतद्द्वयमाद्यमपेक्ष्यहि ॥ ४०४॥ रागद्वेषादिराहित्यंसर्वपाशविमोक्षणं॥ ऐश्वर्यंप्रथमंप्रोक्तमिंद्रस्यापिनचास्तियत् ॥ ४०५॥ सर्वक्लेशप्रहाणेनजायतेयददुःखदं॥ द्वितीयंनतदस्त्यत्रब्रह्मणोऽव्यक्तजन्मनः ॥ ४०६ ॥ तृतीयं सर्वसंस्कारसमुच्छेदात्प्रजायते॥ विश्वैश्वर्यंतृतीयंतद्विद्यतेपरमात्मनः॥ ४०७॥ नात्मानंनपरंयत्रसंस्कारैरपिपश्यति॥ आनंदात्मास्वयंज्योतिरवाङ्मनसगोचरः॥ ४०८॥ स्वसजातिविजात्युत्थभेदत्रयविवर्जितः॥ वर्त्ततेप्राप्तकामोयमुपमादिविवर्जितः ॥ ४०९ ॥ यदाविलीयतेदेहेप्राणःसत्यइतीरितः॥ उत्क्रांतिरहितस्तस्मिन्देहभेदेयतीश्वराः॥ इदमाप्नोतिकोप्यत्रपुमांश्वरमजन्मनि॥ ४१० ॥

माह सर्वेति अदुःखदंभेदाभावेनभूमानंदरूपंद्वितीयमैश्वर्यंभेददर्शनकालेहिरण्यगर्भस्यापिदुर्लभमित्यर्थः ॥ ४०६ ॥ तत्त्वभावप्रयुक्तमैश्वर्यंविशदयति तृतीयमितित्रिभिः परमात्मानःपरमेश्वरस्य ॥ ४०७ ॥ तस्यभूमानंदरूपतामेवदर्शयति नात्मानमिति संस्कारप्रयुक्तंदर्शनंस्मृतिः तथाचभिन्नत्वेनात्मादिकंस्मरत्यपिनतथानुभवनंतुदूरतइत्यर्थः ॥ ४०८ ॥ स्वसजातीति अयंविद्वान् ॥ ४०९ ॥ देहभेदपदार्थंब्रुवंस्तत्रोक्तमैश्वर्यंविदुषालभ्यतेइत्याह यदेति सत्पृथिव्यादिभूतत्रयंत्यत्परोक्षंवाय्वाकाशरूपंतत्समुदायात्मकत्वेनसत्यपदार्थंतयासत्यस्यसत्यमितिब्रह्मनामव्याख्यानेउक्तःप्राणोयदादेहएवलीयतेतद्रूपेदेहभेदेइदमैश्वर्यंकश्चिल्लभतेइत्यर्थः ॥ ४१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतादृशस्यविदुषोदौर्लभ्यंगीतादिषुप्रसिद्धंदर्शयति मनुष्याणामिति मनुष्येषुमुमुक्षुर्दुर्लभस्तेषुमुमुक्षुष्वपिसाधनसंपन्नोदुर्लभतरस्तेष्व प्यात्मवान्परोक्षात्मविद्दुर्लभतमइतिद्वयोरर्थः ॥ ४११ ॥ ४१२ ॥ तेष्वप्यपरोक्षात्मविदउक्तलक्षणस्यप्रभावोनवाङ्मनसगोचरइत्याह आत्मबोधेनेति ॥ ४१३ ॥ कुलंपवित्रंजननीकृतार्थेत्यादिपद्यंतस्यैवमाहात्म्यंकिंचित्ख्यापयतीत्याह कृतार्थेतिद्वाभ्यां ब्रह्मबोधस्य जनिमुत्पत्तिस्थानंविद्वांसंविषयीकृत्यबहुनोक्तेनकियतस्तस्यजनन्यादिमहिमापिवर्णयितुमशक्यइतिद्वयोःसंबंधः ॥ ४१४ ॥ ४१५ ॥

मनुष्याणांसहस्रेषुकोपिविद्वान्विमुक्तये॥ चित्तंकरोतितेष्वत्रसहस्रेष्वपिकश्चन ॥ ४११॥ श्रवणादिसमु द्युक्तोभवेत्पुण्यकरःपुमान्॥ तादृशेष्वपिकश्चित्स्यात्सहस्रेष्वात्मवानयं॥४१२॥ आत्मबोधेनसंपन्नोरागद्वेष विवर्जितः॥ आत्मवत्सर्वभूतानिकश्चिदेषप्रपश्यति॥ ४१३॥ कृतार्थाजननीतस्यजनकोपिमहात्मनः॥ कु लंपवित्रंतस्यैतद्यत्रजातःपुमानयं ॥ ४१४॥ किंबहूक्तेनसर्वज्ञाब्रह्मबोधजनिंप्रति ॥ विश्वंभरापिसकला कृतार्थातेनजायते॥ ४१५॥ विदुषःस्वात्मविज्ञानंयस्यजातंमहात्मनः॥ मुच्यंतेपातकैर्घोरैरपितद्दृष्टिगोच राः॥ महापातकिनोप्येतेसर्वमात्मेतिजानतः॥ ४१६॥ क्षयीयथानिजंकायंगच्छत्येवात्रकालतः॥ क्लेशैरा गादिभिःशून्यआत्मध्यानपरायणः॥ प्रत्यक्षमात्मनोज्ञानंगच्छत्येवतथैवसः ॥ ४१७॥ तस्मिन्नात्मेसमाप्नो तिदेहभेदादनंतरं॥ विश्वैश्वर्यंयतश्चायंभयंकिंचिन्नगच्छति॥ ४१८॥

यस्यानुभवपर्यंताबुद्धिस्तत्त्वेप्रवर्त्ततेतद्दृष्टिगोचराःसर्वेमुच्यंतेसर्वकिल्बिषैरित्यस्यार्थमाह विदुषइति एतेब्रह्महादयः ॥ ४१६ ॥ तस्यवि दुषआत्मतत्त्वंयादृशंभवतितादृशंहस्तामलकवत्स्फुटंभासतइत्येतद्दृष्टांतेनस्फुटयति क्षयीति यथाक्षयरोगीनिजकायस्यतत्त्वंसर्वदोषनि धानत्वादिरूपंबहुनाकालेनजानाति नीरोगस्तुदेहमात्मत्वेनमन्यमानोनतथादेहदोषान्जानाति तथाविद्वांश्चिरमात्मध्यानेनात्मगुणान्स त्यत्वादीन्सम्यग्गच्छतिजानातीत्यर्थः॥४१७॥ तस्मिन्निति तस्मिन्नात्मबोधेप्राप्तेब्रह्मवेदब्रह्मैवभवतीतिश्रुत्युक्तंफलंप्राप्नोतीत्यर्थः॥४१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयस्वरूपावधारणपरस्यद्वादशमंत्रस्यार्थमाह आत्मनइतिषड्भिः यदेतद्धृदयाकाशंमायाशबलेश्वररूपं कीदृशमात्मसंस्थानंस्वस्मिन्नव स्थितं तदेवविवृणोति सर्वाधारविवर्जितमिति ॥ ४१९ ॥ तस्यब्रह्मणोहृदयाकाशत्वाभिधानेनसूचितमात्मनैक्यमेवज्ञेयमित्याह आत्म नोब्रह्मणइति नुइतिवितर्के ॥ ४२० ॥ उक्तैक्यज्ञानसाधनंचपदार्थशोधनमितिसूचयन्सोपाधिकजीवेशरूपमभिधायतत्रलक्ष्याखंडैक मात्रतामाह हंसइतिचतुर्भिः संसारचक्रेसंस्थानंस्थितिर्यस्यतथाभूतोयोयंसुखादिभोक्ताहंसस्त्वंपदार्थतयोक्तोयाचतस्यहंसस्यभोग्या कारपरिणामिनीमायाशक्तिरुक्तायश्चहंसस्यांतर्यामितयाप्रेरकईशस्तत्पदार्थतयोक्तएतत्रयमपिवस्तुतोखंडब्रह्मैक्यमात्रंबोध्यं आकाश

आत्मनोहृदयाकाशमिदंज्ञेयंसदैवहि ॥ सर्वदैवात्मसंस्थानंसर्वाधारविवर्जितं ॥४१९॥ आत्मनोब्रह्मणोनै वभेदःकश्चिन्नुविद्यते ॥ इतिब्रह्मात्मविज्ञानात्परंज्ञेयंनविद्यते ॥४२०॥ हंसोभोक्तायउद्दिष्टःसर्वदासुखदुः खयोः ॥ संसारचक्रसंस्थानोमाययानीशतांगतः ॥ ४२१ ॥ मायाशक्तिश्चयाप्रोक्तासंसारजननीनदी ॥ भो ग्यासापिचसंसाररूपात्मावरणात्मिका ॥ ४२२ ॥ हंसेनयश्चविज्ञेयःप्रेरकःसर्वकर्मसु ॥ ईश्वरोयस्यविज्ञा नाद्धंसईशःप्रजायते ॥ ४२३ ॥ ब्रह्मैवैतत्त्रयंज्ञेयंसर्वभेदविवर्जितं ॥ माययाद्वित्वमापन्नमेकरूपंनभोयथा ॥ ४२४ ॥ नानेकरूपताप्यस्यमायारूपाविशेषतः ॥ दर्शनादितिमंतव्यंकदाचिच्चयतीश्वराः ॥ ४२५ ॥ देहा दावात्मनोनित्यंनैवस्याद्दर्शनंयदा ॥ तदैवंभवतात्त्वत्रह्युपायादस्तितात्मनः ॥४२६॥

भेदवत्तद्भेदस्यकल्पितोपाधिमात्रप्रयुक्तत्वादितिचतुर्णांसंबंधः ॥ ४२१ ॥ ४२२ ॥ ४२३ ॥ ४२४ ॥ पराग्दर्शिनंमंदंप्रत्यप्यात्मस त्तामुपायद्वारेणबोधयतस्त्रयोदशमंत्रस्यार्थंपंचदशभिःप्रपंचयंस्तत्रनिवर्त्यांमंदाशंकामनूद्यतत्समाधानार्थतामुत्तरग्रंथस्योपन्यस्यति ना नेकेतिद्वाभ्यां हेयतयोभवद्भिरितिनकदाचिन्मंतव्यं इतिकिं अस्यात्मनोनेकरूपतैवनाऽद्वितीयरूपता कुतः मायायारूपेभ्योदेहादिभ्योऽ विशेषेणावैलक्षण्येनप्रतीयमानत्वादिति ॥४२५॥ देहादाविति एवमुक्तविधाशंकातदाभवतादस्तुयदाउपायेनापिदेहादिसंघातेआत्मनो दर्शनंनस्यात् अत्रतुउपायादात्मनोस्तितासत्त्वंलभ्यतेअतोनतथाशंकितव्यमित्यर्थः ॥ ४२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रानुमानेनविज्ञानरूपंप्रथममुपायमेकादशभिःप्रपंचयंस्तत्रदृष्टांतमाह यथेति यथाकाष्ठगोवन्हिःस्वरूपेणानुपलभ्यमानोपिनास्तीति नचवाच्यः यतऊष्मातत्रकाष्ठेदृश्यतेसऊष्माहिदेहेजीवस्येवकाष्ठेवन्हेर्लिंगमनुमापकइत्यर्थः ॥ ४२७ ॥ तथात्मादेहेउपायेनविनानुपलभ्यमानोप्यस्तीतिबोध्यः यतस्तस्यस्फुरणरूपंलिंगमस्तीत्याह तथैवेति ॥ ४२८ ॥ स्फुरणपदार्थमाह प्रकाशइति योयंजडानांसर्ववस्तूनांप्रकाशःसस्फुरणसंज्ञआत्मनोलिंगमुक्तः ॥ ४२९ ॥ स्फुरणस्यसच्चिदानंदाद्वितीयरूपात्मनोलिंगत्वयोग्यत्वंदर्शयंस्तस्याभिन्नत्वंस्वप्रकाशत्वंचदर्शयति घटेइतिचतुर्भिः यतोघटादिविषयेष्वेवभेदोभातिनतत्स्फुरणेततएतत्स्फुरणमभिन्नंततोऽभिन्नत्वादेवपराप्रकाश्यत्वे

यथाकाष्ठगतोवन्हिःस्वरूपान्नोपलभ्यते ॥ नचासौनास्तियेनायमूष्मातत्रप्रदृश्यते ॥ लिंगंमानेस्तुसत्त्वेयःशरीरइवदेहिनः ॥ ४२७ ॥ तथैवात्मापिदेहेषुविद्यमानोनलभ्यते ॥ उपायेनविनाप्यस्तिलिंगंस्फुरणनामकं ॥ ४२८ ॥ प्रकाशःसर्ववस्तूनांजडानांलिंगमीरितः ॥ सत्तायाआत्मनोनित्यंमुनिभिर्हियतीश्वराः ॥ ४२९ ॥ घटेपटेयथाकुड्येभेदोनस्फुरणेस्तिहि ॥ अभिन्नंततएवैतत्स्वप्रकाशमुदीरितं ॥ ४३० ॥ इंद्रियादेस्तुसंयोगात्प्राकट्यंस्फुरणेभवेत् ॥ एकरूपंनभोवत्तन्नजनिंधर्त्तुमर्हति ॥ ४३१ ॥ ततोभिव्यक्तिकारिस्यात्करणंहींद्रियादिकं ॥ स्फुरणेचनतस्यास्तिपरापेक्षाकथंचन ॥ ४३२ ॥ स्वयंप्रकाशमेतस्मादिदमुक्तंयतीश्वराः ॥ अंतर्बहिश्चनैवास्तियस्यभेदःकथंचन ॥ ४३३ ॥ देहांतरतएवैतदात्मेत्युक्तंमनीषिभिः ॥ सर्वप्रियतमश्चात्मातेनानंदस्वरूपकः ॥ ४३४ ॥

नस्वप्रकाशंचेत्यर्थः ॥ ४३० ॥ इंद्रियादिभिर्ज्ञानकरणैस्तुतस्यस्फुरणस्यावरणाभिभवलक्षणंप्राकट्यमेवक्रियतइत्याह इंद्रियादेरिति तत्स्फुरणंजनिंधर्तुंजन्मशालिभवितुंनार्हतीति ॥ ४३१ ॥ फलितमाह ततइति स्फुरणेअभिव्यक्तिप्राकट्यमेवकरोतींद्रियादिकंतस्यस्फुरणस्ययतःपरापेक्षानास्तिएतस्मात्स्वप्रकाशमुक्तंनिर्भेदत्वाच्चेतिद्वयोरर्थः ॥ ४३२ ॥ ४३३ ॥ तस्यैवस्फुरणस्यसर्वांतरत्वेनात्मपदार्थत्वंनिरतिशयप्रेमास्पदत्वेननिर्भेदत्वेनचानंदपदार्थत्वंचेत्याह देहांतरतइति एतत्स्फुरणंयतोदेहस्यसंघातस्यांतरतःप्रत्यक्भवतिततआत्मेत्युक्तमितिपूर्वदलार्थः ॥ ४३४ ॥ ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain: Digitization by eGangotri

यथातापकत्वेनवन्हिसदृशस्योष्मणोवन्हिलिंगत्वंतथात्मलक्षणलक्षितस्यस्फुरणस्यात्मलिंगत्वमित्याह ऊष्मेति भेदवर्जितःसमः अथवा ननूक्तविधयाआत्मनःस्वरूपभूतस्यस्फुरणस्यकथमात्मलिंगत्वमितिशंकामपिदृष्टांतेनपरिहरति ऊष्मेति अयंभावः यथावस्तुतोभिन्नाना मपिसत्यत्वादीनांकल्पितभेदेनब्रह्मलक्षणत्वंतथागमकत्वेनलिंगत्वमप्यस्तुअन्यथास्वरूपलक्षणकथोच्छिद्येतेति ॥ ४३५ ॥ यथामथनरू पोपायेनलौकिकोवैदिकोवाऽग्निर्लभ्यतेतथोक्तलिंगजानुमानलक्षणोपायेनसंसारीशुद्धश्चात्मालभ्यतइत्याह मथनेनेतिद्वाभ्यां तत्रात्म नोरूपद्वयंपादद्वयेनाह स्वर्गादेरिति ॥ ४३६ ॥ ४३७॥ यस्याधिकारिणउक्तविवेकेप्यसामर्थ्यंतंप्रतिप्रणवोपासनामुपदिशेदित्याह अवि

ऊष्मायथाभवेल्लिंगंवन्हिर्भेदविवर्जितः॥ तथैवस्फुरणंलिंगमात्मनोभेदवर्जितं ॥ ४३५॥ मथनेनयथैवायं काष्ठाद्वन्हिःपृथक्कृतः॥ लौकिकोवैदिकश्चापिलभ्यतेसर्वजंतुभिः ॥४३६॥ तद्वदात्मास्वबोधेनलभ्यतेत्रपरा परः॥ स्वर्गादेःफलभोक्ताचनिर्गुणब्रह्मरूपधृक् ॥ ४३७॥ अविद्यायाःसकार्यायाभेदेनैवमनीषिणः ॥ ब्रह्म बोधोयदानैवजायतेत्राधिकारिणः ॥ ४३८॥ तत्त्वमस्यादिवाक्येभ्यःकुतश्चित्प्रतिबंधतः ॥ तदास्यप्रणवेनै वंकारयेद्ब्रह्मविद्गुरुः ॥ ४३९ ॥ एवमेनंमहात्मानंशिष्यंविगतकल्मषं ॥ आदिशेद्बुद्धिसंपन्नोगुरुःसर्वार्थद र्शकः॥ ४४० ॥ अधरारणिरेषोयंतवदेहोत्रधार्मिकः ॥ उत्तरारणिरेषस्यात्प्रणवोब्रह्मवाचकः ॥ ४४१ ॥ ना मधेयमयंनित्यंममब्रह्मस्वरूपिणः॥ इतिप्रत्ययसंतत्यामथनंकुरुसर्वदा ॥ ४४२ ॥ अनेनमथनेनैषपश्येद्देवं यथारणौ॥ निगूढमग्निमचिरादेवंदेहेनिजेपिच॥ ४४३॥

द्यायाइतिद्वाभ्यां हेमनीषिणोयदासविलासाविद्यायाःसकाशाद्भेदेनविवेकेनब्रह्मबोधोमहावाक्येभ्योनजायेततदाएवंवक्ष्यमाणप्रमाणे नध्यानंकारयेदितिद्वयोरर्थः ॥ ४३८ ॥ ४३९ ॥ प्रणवोपास्यतामभिनयतश्चतुर्दशमंत्रस्यार्थमाह एवमितिचतुर्भिः स्पष्टम् ॥ ४४० ॥ एवंकथमित्याकांक्षायामाह अधरेति अरणिरग्निमथनकाष्ठंतत्रदेहःसंघातोऽधरारणिःप्रणवस्तूत्तरउपरिगतोऽरणिर्बोद्धव्यः अयंप्रणवोममना मेतिचिंतनमेवमथनमितिद्वयोरर्थः अयंभावः अस्मिन्संघातेऽनुप्रविष्टंयत्प्रणवेनाभिधानयोग्यंवस्तुतदेवममात्मेतिचिंत्यं प्रणवोहिमहावा क्यार्थाभिधायकइत्यन्यत्रविस्तरः ॥ ४४१ ॥ ४४२ ॥ अनेनेति देवमात्मानं ॥ ४४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सचात्माशुद्धांतःकरणैरेवदृष्टांतचतुष्टयेनवेद्यइतिदर्शयतःपंचदशमंत्रस्यार्थमाह ततइतित्रिभिः ततउक्तविवेकेनचतुर्विधेजरायुजादिभेदैर
यमात्मानास्तिनोपलभ्यतेइतिन शेषंस्पष्टं ॥४४४॥ तिलेष्विति स्रोतसिसिकतामयप्रवाहेखननेन स्पष्टमन्यत् ॥ ४४५ ॥ सत्यादिभिरि
ति श्रुतिगतसत्यतपोभ्यामुपलक्षितैर्यमनियमैर्मनसिशुद्धेसत्यधिकारिभिःसंग्राह्योभवति कीदृशैरधिकारिभिर्गुरुशास्त्रोपदेशानुसारिभिरि
त्यर्थः ॥४४६॥ निगमनपरस्यषोडशमंत्रस्यार्थमाह सर्वेति क्षीरेसर्पिरिवसर्वांतर्गतंतथेशरूपेणकर्मोपासनातपसांमूलंसंप्रदायप्रवर्त्तकंफल
प्रदंवासर्वकारणमात्मानंयोधिगच्छतिसएववेदविदुपनिषदर्थज्ञः केनाधिगच्छतीत्याकांक्षायांमंत्रतृतीयपादस्यार्थांतरंसूचयन्नाह आत्म

ततश्चतुर्विधेदेहेनायंनास्तियतीश्वराः ॥ उपायाल्लभ्यतेयस्माद्देहेष्वत्रचतुर्ष्वपि ॥ चतुरस्तत्रदृष्टांतान्भवद्भ्यःक
थयाम्यहं॥४४४॥तिलेषुलभ्यतेतैलंयथासर्पिर्दधन्यपि॥स्रोतस्यापोऽरणौवन्हिरेवमात्मायतीश्वराः॥४४५॥
सत्यादिभिर्यमैस्तद्वन्नियमैस्तपआदिभिः॥शुद्धेमनसिसंग्राह्योभवेदात्माधिकारिभिः॥ अनुपश्यंतियेनित्यं
गुरुशास्त्रोपदेशतः॥ ४४६ ॥सर्वव्यापिनमात्मानंक्षीरेसर्पिरिवस्थितं ॥ कर्मविद्यातपोमूलंब्रह्मतत्सर्वकार
णं॥ आत्मनोविद्ययाशक्त्यायोधिगच्छतिवेदवित्॥ ४४७ ॥ एषसंक्षेपतःसर्वशास्त्रार्थःकथितोमया॥ पुन
र्विस्तरतोवक्ष्येभवद्भ्योहंयतीश्वराः॥ ४४८॥ आत्मायोयंहंसरूपोब्रह्माभिन्नोमयेरितः॥ मनस्तत्रैवयुंजानो
योगेनाष्टांगरूपिणा॥ तत्त्वायाऽथाभवद्बुद्धिस्तस्याःसजनकोभवेत्॥४४९॥

नइति आत्मनोविद्यामहावाक्यजातदाकारावृत्तिःशक्तिश्चतद्योग्यतारूपातयेत्यर्थः तथाचमूलपदंसाधनवाचकंबहुव्रीहिश्चश्रुतावितिभा
वः ॥४४७॥ प्रथमाध्यायसमाप्तिंसूचयन्नुत्तराध्यायार्थव्याख्यानंप्रतिजानीते एषइति स्पष्टं ॥४४८॥ पूर्वाध्यायांतेपरमेश्वरस्यतपोवि
द्यामूलत्वंयदुक्तंतत्स्फुटीकुर्वतांमनःप्रभृतिनिरोधात्मकतयातपोरूपस्ययोगस्यारंभेविघ्नपरिहारायांतर्यामित्वादिरूपेणेश्वरस्तुतिपराणांस
प्तमंत्राणामर्थंषड्विंशतिश्लोकैःप्रदर्शयंस्तत्रप्रथममंत्रार्थमाह आत्मेतिद्वाभ्यां योयमात्मातत्त्वंपदाभ्यांप्रतिपाद्यतयापूर्वमुक्तःसएवायमा
त्माधिकारिणांमनःसंकल्पात्मकंतत्रैवात्मस्वरूपेतत्त्वायययथाभूतस्वरूपलाभायाष्टांगयोगविधयायुंजानोयोजयन् अंतर्भावितण्यर्थत्वा
त् तस्यमनसःपरिणामभूतायानिश्चयात्मिकाबुद्धिस्तस्याजनकःकारणंभवेदिति तथाचसएवांतर्यामीतिभावः ॥ ४४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमीश्वरेणानुगृहीतोयस्तंसाक्षात्करोतिसतद्वत्सर्वात्मभावेनतिष्ठतीत्याकारमुत्तरार्द्धस्यार्थमाह अयमात्मेति प्रथमपदद्वयंपूर्वान्वयित्वेन दर्शितं अयमधिकारीतमात्मानमग्न्युपलक्षितसर्वज्योतिषांभासकत्वेनस्वयंप्रकाशंतत्त्वावगाहिन्याबुद्ध्यानिश्चित्यपृथिवीपदोपलक्षितदेहाख्यसंघातात्पृथक्त्वेनतन्नियंतृतयास्थितःसन्नंतर्बहिःपूर्णत्वेनतिष्ठतीत्यर्थः ॥ ४५० ॥ द्वितीयमंत्रेत्यंपदत्रयमुत्तरान्वयियतामहइतिशेषश्चेत्यभिप्रेत्यतदर्थमाह युक्तेनेति सवितुःसूर्यमंडलाधिष्ठातुर्देवस्यांतर्यामिणःअभ्यनुज्ञानेसतितदीयशक्त्यैवपूर्वकालेप्यस्मज्जातीयाअधिकारिणोयुक्तेनतत्परेणमनसासर्वदुःखपरिहारकंज्ञानाभ्यासरूपंयत्नंकृतवंतइत्यर्थः किमर्थं स्वर्गिभिर्देवैर्गेयंप्रशस्यंयत्सुखंब्रह्मानंदाख्यंतत्स्वरूपलाभायेत्यर्थः ॥ ४५१ ॥ पूर्वोत्यपदत्रयविशिष्टस्यतृतीयमंत्रस्यार्थंपरमेश्वरएवेंद्रियाणांसन्मार्गेप्रवृत्तिहेतुरित्याकार

अयमात्मातमात्मानंस्वयंज्योतिःस्वरूपिणं ॥ तत्त्वबुद्ध्याविनिश्चित्यपृथिव्यादेहरूपतः॥ अधितिष्ठन्नयंस्वांतर्बहिश्चैवावतिष्ठते ॥४५०॥ युक्तेनमनसापूर्वंतेवयंमुनिसत्तमाः ॥ देवस्यसवितुःशक्त्यास्वर्गिगेयसुखात्मनेकृतवंतोत्रतज्ज्ञानंयतोदुःखंनसंव्रजेत् ॥ ४५१ ॥ सवितुःस्वात्मनःशक्त्यायद्धियुक्तंमनोभवेत् ॥ मनसातेनवागादीन्देवान्नित्यसुखार्थिनः ॥ ४५२ ॥ करिष्यतोबृहज्ज्योतिःसुखज्ञानमनेकधा ॥ उत्पादयतियान्देवःसवितातानिमान्धिया ॥ ४५३ ॥ आनंदात्मैकगामिन्यापरिबुद्ध्यस्वयंप्रभं ॥ देवंतंपरमात्मानमधिगच्छंतिसूरयः ॥ ४५४ ॥

माह सवितुरितिद्वाभ्यां मंत्रेयुक्तायेतिचतुर्थीतृतीयार्थेप्रथमार्द्धेनसूच्यते तथाचईशशक्तियुक्तेनमनसायमधिकारीयान्वागादिकरणरूपान्देवान्सुवःपदोक्तनित्यसुखार्थप्रवृत्तिशालिनउत्पादयतिकरोतितानिमान्सवितादेवःपरमेश्वरएवोत्पादयति तस्यैवांतर्यामित्वेनसर्वशक्तिप्रदत्वात् कीदृशान्वागादिदेवान् बृहज्ज्योतिःसुखज्ञानंकरिष्यतः बृहज्ज्योतिःपदाभ्यामुक्तस्यसुखज्ञानस्यभूमानंदरूपज्ञानस्याभिव्यंजयितॄनितिद्वयोरर्थः ॥ ४५२ ॥ ४५३॥ एतादृशईश्वरानुग्रहोब्रह्मसाक्षात्कारात्मककार्येणानुमेयइतिदर्शयन्धियादिवमित्यनयोःपदयोरर्थमाह आनंदेति आनंदात्मैकगामिन्याधियाउक्तविधदेवानांकार्यभूतयापरिबुद्ध्यवागादिदेवानामीश्वरानुगृहीतत्वमनुमायदिवंद्योतनात्मकंतंपरमात्मानंदेवमधिगच्छंतितदेकनिष्ठाभवंतीत्यर्थः ॥ ४५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतईश्वरानुग्रहःकार्यैकगम्यःअतएवयोगिनःप्रथमंमनईश्वरतत्त्वेयोजयंतिनत्वीश्वरानुग्रहप्रतीक्ष

 चतुर्थस्यार्थंदर्शयति अतएवेतिषड्भिः याविलंबंतेततोबुद्धिमपियुंजते कीदृशींबुद्धिं तस्यपरमात्मरूपस्यब्रह्मणःपरमब्राह्मणस्यस्वयंप्रकाशस्यस्वरूपभूतानंदगोचरांयस्याबुद्धेः

प्रसादतोनैर्मल्येनप्रत्यक्षज्ञानसिद्धिः यस्येतिपाठेयस्येश्वरस्यानुग्रहेणेतिद्वयोरर्थः ॥ ४५५ ॥४५६ ॥ येहोत्राः प्राणाग्निहोत्रिणआसंस्ते

 षांवयुनापदोक्ताभिप्रायाणांवेत्ताएकःपरमेश्वरइदित्थंममैवाभिप्रायानूविदधेपूरयामासेतियोजनामभिप्रेत्यतृतीयपादार्थमाह पूर्वेइति

प्राणापानयोःश्वासप्रश्वासयोःपरस्परविलयलक्षणमग्निहोत्रमपानेजुह्वतिप्राणमित्यादिनाभगवद्गीतासुप्रदर्शितंकुर्वाणायोगिनोयेआसं

अतएवमनःपूर्वंयुंजतेयोगतत्पराः॥ ततस्तज्जनितांबुद्धिंपरमानंदगोचराम् ॥ ४५५ ॥ ब्रह्मणस्तस्यबृहतः स्वयंज्योतिःस्वरूपिणः॥ यस्याःप्रसादतोज्ञानंप्रत्यक्षमिहजायते ॥ ४५६ ॥ पूर्वेविप्रामहात्मानःप्राणापानाग्निहोत्रिणः॥ योगिनोयेत्रदेवोयमभिप्रायावधारकः॥ ४५७॥ तेषांमनोरथंसर्वमित्थमेकोदधातिसः॥ यथाममहाभागावर्त्ततेब्रह्मवेदने॥ ४५८॥ महतीतस्यदेवस्यसवितुःसापरिस्तुतिः ॥ अवाङ्मनसगम्योपियथाधीविषयोभवेत् ॥ ४५९ ॥ स्तोतव्यस्ततएवायमेवंनित्यंयतीश्वराः ॥ दुर्दांतस्यात्रमनसोयुंजानेनाधिकारिणा॥ ४६० ॥

स्तेषांमनोरथानेकईश्वरइत्थंपूरयतियथामदीयोब्रह्मवेदनविषयकोमनोरथःपूरितइतिद्वयोःसंबंधः ईश्वरस्यसन्मार्गवर्तिनामनुग्राहकत्वं

स्वभावइतिभावः ॥ ४५७॥ ४५८ ॥ एतांचपरमेश्वरशैलीमतिप्रशंसनीयांपश्यतयद्वाङ्मनसागोचरोप्यधिकारिणांमतिगोचरोभवती

त्यर्थपरत्वेनचतुर्थपादंव्याचष्टे महतीति साअविषयस्वभावस्यविषयीभावरूपापरिसर्वतःप्रसिद्धास्तुतिःस्तूयमानाशैली ॥ ४५९ ॥ अ

थवामंत्रेकर्त्तव्येतिशेषइत्यभिप्रेत्यवक्ष्यमाणमंत्रत्रयोक्तविधयातस्यस्तुतिःकर्त्तव्येत्यर्थमाह स्तोतव्यइति ततोधिकारिणांसकलमनोर

थपूरकत्वादेववक्ष्यमाणविधयामनःसंबंधियोगपरेणसभगवानूस्तोतव्यइति ॥ ४६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाक्षात्स्तुतिपराणांपंचमादित्रयाणांमध्येपंचमस्यार्थमाह कुर्वेइतिषड्भिः मंत्रेप्रथमपदेउत्तमपुरुषस्थानेप्रथमपुरुषप्रयोगोव्यत्यया दितिसूचनाययोगंकुर्वेइत्युक्तिः हेब्रह्मणःसोपाधिकरूपात्मकौतत्त्वंपदार्थौअहंयुवयोर्योगमैक्यलक्षणमतिप्रमाथिनाशास्त्राचार्यप्रसादल ब्धबलेनमनसाकुर्वे यतोयुवयोर्जीवानंदात्मकयोःसर्वांतराद्वितीयात्मकलक्ष्यरूपाभ्यांभेदाभावंशास्त्रंमहावाक्यरूपमवांतरवाक्यैरुपक्र तंप्रतिपादयति अतएवतत्पदार्थशोधकैर्वाक्यैःसृष्टेःपूर्वंभवतोरद्वितीयब्रह्मात्मत्वंप्रतिपाद्यतेइतिद्वयोरर्थः ॥ ४६१॥ ४६२॥ भवतेइति भ वतेएवमैक्येनज्ञातंभवत्स्वरूपंलब्धुंकृतैर्नमस्कारैस्तत्प्रवणत्वरूपैःकीर्त्तिकीर्तिवन्निरतिशयप्रेमास्पदत्वेनानंदरूपंमोक्षंव्रजंत्येव यशोहंभवा

कुर्वेत्रयुवयोर्योगंमनसातिप्रमाथिना॥ जीवानंदात्मरूपौवांश्रुतौशास्त्रात्प्रमाणतः॥ ४६१॥ भेदोपियुवयो नैवकोपितत्त्वंपदार्थयोः ॥ सर्वस्यजगतःपूर्वंयुवांब्रह्माद्वयंसदा ॥ ४६२ ॥ भवतेब्रह्मरूपायनमस्कारैरनेक शः॥ कीर्तिमेवव्रजंत्येतंमोक्षमानंदरूपिणं॥ ब्रह्मज्ञानाध्वनायद्वन्मार्गेणनगरंपरे॥४६३॥ सूरयोज्ञाततत्त्वा र्थाःसर्वदोषविवर्जिताः॥ शृण्वंतिबहुशःस्वीयकीर्तिसाधुजनैःकृतां ॥ ४६४ ॥ सर्वएतेमहाभागाअम्हतेब्र ह्मरूपिणि॥ पुत्राइवात्रदायादामोक्षआवृत्तिवर्जिते ॥ ४६५॥ येसमंताद्वहून्यत्रतेजांस्यात्मावबोधतः॥ प्रा प्ताहृदयस्वप्नादिस्थानकस्थाजितेंद्रियाः ॥ ४६६ ॥ भवतोर्ब्रह्मरूपत्वंप्राप्तयोर्भेदशून्ययोः ॥ जानामिस्था नकंनित्यमुपदेशाद्गुरोरहं॥ ४६७॥

मिब्राह्मणानामित्यादिश्रुत्यंतरात् केनमोक्षंव्रजंति ब्रह्मज्ञानरूपेणमार्गेणयथालौकिकमार्गेणपरेलौकिकानगरंव्रजंतीत्यर्थ॥ ४६३॥ एता दृशंब्रह्मज्ञानफलंसर्वेषांभवति योदेवानांप्रत्यबुध्यत्सएवतदभवत्तथर्षीणांतथामनुष्याणामितिश्रुत्यंतरादित्याशयेनोत्तरार्धार्थमाह सूर यइत्यादिना सर्वएतेसूरयोब्रह्मविदःस्वीयांकीर्तिसद्भिःकृतांशृण्वंति पुत्रवन्मोक्षलक्षणेब्रह्मवित्तेभागार्हत्वादितिद्वयोःसंबंधः ॥ ४६४ ॥ ॥ ४६५ ॥ धामान्यातस्थुरित्यस्यसूर्यचंद्रमःप्रभृतिषुगतानीश्वरांशभूतानितेजांसिप्राप्ताःअथवाहृदयादिस्थानान्याक्रम्यस्थिताअथवा इंद्रियरूपाणितेजांस्याक्रम्यस्थिताइत्यर्थत्रयंसूचयन्नाह येसमंतादिति येविद्वांसोहृदयादिस्थानेपुब्रह्मचिंतनार्थंस्थिताः ॥ ४६६ ॥ षष्ठस्यार्थमाह भवतोरितिचतुर्भिः हेतत्त्वंपदार्थौअहंभवतोःस्थानंउपलब्धिद्वारंगुरूपदेशाज्जानामीति ॥ ४६७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कितदित्याकांक्षायांजगज्जन्मादिकारणमायाशबलरूपमितिसूचयन्नक्षरार्थमाह मथ्यमानइति मथ्यमानोग्निर्यतोजायतेयत्रलीयतेचत
थावायोःसोमादितेजसांचयत्रोत्पत्तिलयौएतैरुपलक्षितानिकार्यांतराणिचयत्राधिक्यमाविर्भावंविनाशंतिरोभावंचव्रजंतितदेतच्छबलं
रूपंभवतोःशुद्धरूपव्यंजकमितित्रयाणामर्थः ॥ ४६८ ॥ ४६९ ॥ ४७० ॥ शबलस्यशुद्धव्यंजकतांस्फुटयन्सप्तमस्यार्थंदर्शयति तत्रेति
पंचभिः तत्रविश्वकारणेमायाशबलरूपेज्ञातेसतिविद्वान्ब्रह्मरूपःसंजायते केन नानात्वरूपदर्शनप्रयुक्तायेसर्वेमोहाभ्रमास्तेषांपरित्यागतः
सिद्धोयस्तत्त्वभावोऽखंडभावस्तेनेतियोजना अयंभावः यदापुरुषःकारणदृष्टिर्भवतितदाकार्योपाधिप्रयुक्तान्भेदांस्त्यजतिअथशुद्धंप्र

मथ्यमानोयतोवन्हिर्जायतेस्थानकादिह॥दग्धेंधनानिसर्वाणियत्रचैषलयंव्रजेत्॥ ४६८॥ यतश्चोत्पद्यते वायुरेषयत्रचलीयते॥ सोमादीनिचतेजांसियत्रोत्पन्नानिसर्वतः॥४६९॥आधिक्यंचविनाशंचव्रजंतीहस्व कारणे॥ तदेतद्भवतोरूपंपरित्यक्तविभेदयोः॥ ४७०॥ तत्रसंजायतेभूयोविद्वान्नानात्वरूपतः॥ सर्वमोहप रित्यागात्तत्त्वभावेनसर्वतः॥४७१॥ब्रह्मरूपस्ततोनित्यंजीवंहंसस्वरूपिणं॥ आत्मज्ञानेनजातेनसेवसेप्रीति मानपि ॥ ४७२ ॥ तादात्म्येनामुनावापिसेव्यसेप्रीतियोगिना ॥ भवानद्वयरूपःसन्परमानंदरूपभाक् ॥ ४७३॥ तस्यामीदृग्दशायांत्वमविद्यांदुःखकारिणीं॥ विनाशयसिभेदस्यजननीमात्मबोधतः॥ ४७४ ॥पू र्तादिकंततःकर्मनैवकिंचित्स्तजेदिह॥ भवंतमेकमेवैतदात्मज्ञानंविहायहि॥ ४७५॥

काशतइति तथाचश्रुत्यंतरं अस्तीत्येवावबुद्धस्यतत्त्वभावःप्रसीदतीति॥४७१॥ मंत्रेजुषेतेतिकर्मणिव्यत्ययेनरूपं तथाचसवित्रातत्पदार्थे
नाविर्भावलक्षणाभ्यनुज्ञानेनत्वंपदार्थःसेव्यतेत्वंपदार्थेनचब्रह्मतत्पदार्थःसेव्यतइतियोजनांदर्शयति ब्रह्मरूपइतिद्वाभ्यां प्रथमपदंपूर्वान्व
यित्वेनदर्शितं ततःशुद्धाविर्भावात् जीवंत्वंपदार्थं ॥४७२॥ तादात्म्येनेति अमुनात्वंपदार्थेनत्वंतत्पदार्थोब्रह्मरूपःसेव्यसेइत्यर्थः ॥४७३॥
तदासंसारयोनिमविद्यांकृण्वसेनिःशेषंहंसीत्याह तस्यामिति स्पष्टम् ॥ ४७४ ॥ तेत्वत्प्राप्त्यर्थंपूर्तादिकंनक्षिपेन्नकुर्यात्किंतुज्ञानमेवा
भ्यसेदितिलिङ्स्थानेलङ्ोव्यत्ययमभिप्रेत्यार्थमाह पूर्त्तादिकमिति स्तजेत्कुर्यात् भवंतमुद्दिश्येतिशेषः ॥ ४७५ ॥ ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसप्तभिर्मंत्रैःकृतायाःस्तुतेर्योगोपकारितांदर्शयति एवंहीति एवंस्तुत्याप्रतिबंधकदुरितापायेयोगेवक्ष्यमाणेइच्छाजायतेततोयोगंकुर्यात् योगफलंतुमनसासंबद्धस्यमनःसाक्षिणोदर्शनमित्यर्थः ॥ ४७६ ॥ वक्ष्यमाणोपयोगायाष्टांगंयोगमभिनयति अहिंसेतिसप्तभिः अहिंसाषष्ठेयज्ञेनदानेनेतिश्रुतिव्याख्यावसरेव्याख्याता सत्यंयथार्थभाषणं अस्तेयंपरस्वाद्यावृत्तिः ब्रह्मचर्यमितरेंद्रियनिरोधसहितउपस्थसंयमः अपरिग्रहोभोगसाधनानामसंग्रहः एतेनित्यादेशकालाद्यनवच्छिन्नाःसदासर्वत्रचवर्त्तमानायमसंज्ञायोगस्यप्रथमांगमित्यर्थः॥ ४७७ स्वाध्यायइति स्वाध्यायःप्रणवादिजपः तपःकृच्छ्रादि ईशध्यानमीश्वरप्रणिधानं आदिपदेनशौचादिग्रहः एतेविहितदेशादिष्वनुष्ठीयमा

एवंहिस्तुवतस्तस्यपुंसःसंशुद्धचेतसः॥ स्तुतितोजायतेयोगइच्छापश्चादिमंपुमान्॥ कुर्यात्ततोवसंबद्धंमनसैनंप्रपश्यति ॥ ४७६ ॥ अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहाः ॥ सर्वदिग्देशकालेषुनित्याएतेयमाःस्मृताः ॥ ४७७॥ स्वाध्यायस्तपसासार्द्धमीशध्यानाद्यस्तथा॥ नियमादेशकालादिसापेक्षाःकथिताद्विजैः॥ ४७८॥ पद्मकस्वस्तिकादीनिप्रोक्तान्यत्रासनानिच॥ पूरकःकुंभकस्तद्वद्रेचकश्चत्रिधास्मृतः॥ प्राणायामोगुरुमुखात्ज्ञातव्योमुनिसत्तमैः ॥ ४७९ ॥ विषयाभिमुखत्वस्यव्यावृत्तिर्यास्वबुद्धितः॥ प्रत्याहारःसविज्ञेयइंद्रियाणांविनिग्रहः॥ ४८० ॥ पंचकंवाह्यमेतत्स्यादांतरंहित्रयंत्विदं॥ धारणामनसोज्ञेयावंधनंब्रह्मसद्मनि॥ ध्यानंप्रत्ययसंतानस्तत्रैवसदृशोहियः ॥ ४८१ ॥

नानियमसंज्ञाद्वितीयमंगंयोगस्येत्यर्थः ॥ ४७८ ॥ आसनप्राणायामाख्यमंगद्वयमाह पद्मकेति पद्मासनमूर्वोरुपरिपादद्वयनिधानरूपंप्रसिद्धं स्वस्तिकंतुवामपादंदक्षिणजंघोर्वंतरेनिधायदक्षिणपादस्यवामजंघोर्वंतरेनिधानरूपंइत्यादीन्यासनानिप्राणायामप्रकारश्चगुरुमुखादवगंतव्यः ॥४७९॥ प्रत्याहाराख्यंपंचमांगमाह विषयेति याबुद्धेःसकाशाद्विषयाभिमुखत्वस्यव्यावृत्तिस्तिरस्कृतिरिंद्रियनिरोधलक्षणातद्रूपःप्रत्याहारइत्यर्थः ॥ ४८० ॥ पंचकमिति एतत्प्रत्याहारांतमंगानांपंचकंवहिरंगमित्युच्यते अंगिनःसमाधेर्भिन्नविषयत्वात् इदंधारणादित्रयंतुतत्समानविषयत्वादंतरंगं तत्रब्रह्मणिमनसोविनियोजनंधारणेत्युच्यते तत्रनियुक्तस्यमनसोयःप्रत्ययसंतानःविजातीयप्रत्ययानंतरितोवृत्तिप्रवाहःसध्यानमित्युच्यतेइत्यर्थः ॥ ४८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिरिति यच्च धारणाध्यानयोःफलभूतंब्रह्मप्रत्यक्षंसविकल्पकनिर्विकल्पकत्वाभ्यांद्विविधंतद्रूपोयोगःसमाधिरित्युच्यते एतेनपरोक्षविज्ञानरूपःसमाधिरंगमितिसूचितं ॥ ४८२ ॥ उक्तसमाधेःफलंदर्शयति उत्पन्नेस्मिन्निति अस्मिन्ब्रह्मप्रत्यक्षे आत्मज्ञानंआत्माकारावृत्तिः ॥ ४८३॥ योयमष्टांगोयोगउक्तस्तस्योपलक्षणमुत्तरमंत्रैःक्रियतेइत्याह यमादिरिति दिशमुपलक्षणमत्रप्रकरणेवक्ष्यामि मंत्रानुसारेणप्रकाशयामीत्यर्थः ॥ ४८४ ॥ तत्रदेहेंद्रियानवधानवारकयोरासनप्रत्याहारयोःप्रदर्शकस्याष्टममंत्रस्यार्थमाह पद्मेतिपंचभिः वक्ष्यमाणादशममंत्रेणनिरूपयिष्यमाणागुणायस्यसतथातस्मिन्देशेकृतपद्मासनाद्यन्यतमासनआसीनःसन्उरश्चांसद्वयंचउदरंचएषुत्रिषुदेशेषु

समाधिःफलमुद्दिष्टंधारणाध्यानयोरपि ॥ प्रत्यक्षंब्रह्मविज्ञानंसविकल्पमथापरं॥ ४८२॥ उत्पन्नेस्मिन्नियंमायाकार्यकारणरूपिणी ॥ आत्मज्ञानविनष्टासापुनर्नैवभविष्यति ॥ ४८३ ॥ यमादिःकथितोयोगःसमाध्यंतोमनीषिभिः ॥ अष्टांगस्तस्यवक्ष्यामिदिशमत्रयतीश्वराः ॥ ४८४ ॥ पद्मासनाद्यन्यतममासनंसुखमास्थितः॥ वक्ष्यमाणगुणेदेशेऋजुकायोतिनिर्मलः ॥ ४८५॥ उरोंसोदरदेशेषुप्रबलाद्वायुपूरणात् ॥ त्रिरुन्नतमिमंदेहंस्थापयेद्दंडवत्समम् ॥ ४८६ ॥ इंद्रियाणिप्रमाथीनिवाजिनोबुद्धिसारथौ ॥ हृदिस्थितोमनोरज्ज्वावध्वात्रैवसमर्पयेत् ॥४८७॥ अहंब्रह्मेतिबोधेननावासुदृढयापुमान्॥ मायानदीसमुत्थानिस्रोतांस्येतानिसर्वथा ॥ ४८८ ॥ इंद्रियाणिमनोरज्ज्वाबद्धान्यपिततस्ततः ॥ गतिमंत्यतिदुःखाययांतितानितरेदयं ॥ संसारभयकारीणिपुंसःसंसक्तचेतसः॥ ४८९॥

त्रिवारंकृताद्वायुपूरणाख्यप्रयत्नादुत्पन्नतत्त्वफलकाद्धेतोस्त्रिरुन्नतपदेनोक्तंदेहंदंडवत्सरलंस्थापयेत् अंसपदेनग्रीवोपलक्ष्येतिकेचित् वस्तुतस्तुउत्क्रमणेग्रीवायाजत्रुदेशेनिधानप्रसिद्धेरंसपदंमुख्यार्थमेवेतिद्वयोरर्थः॥४८५॥४८६॥ इंद्रियाणीति तथाइंद्रियरूपान्वाजिनःमनोरज्ज्वाबध्वाअत्रहृदिदेशेसमर्पयेत् कीदृशेहृदि बुद्धिसारथौश्रुत्यंतरेबुध्यात्मकसारथित्वेनवर्णिते तथाचकठश्रुतिः बुद्धिंतुसारथिंविद्यादिति ॥ ४८७ ॥ अहमिति अहंब्रह्मेतिबोधरूपयानौकयामायानद्याःस्रोतांसिइंद्रियाणितरेदिति तानिहिब्रह्मबोधमंतरादुस्तराणियतोमनोरज्ज्वाबद्धान्यपिइतस्ततोगतिमंतिचलानिपुंसोदुःखाययांतिप्रवर्त्तंतेसंसारभयकारीणिचभवंतीतिद्वयोःसंबंधः ॥ ४८८ ॥ ४८९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथमनोजयफलकस्यप्राणायामप्रदर्शकस्यनवमस्यार्थमाह नवेतित्रिभिः गुरुदेशतोगुरूपदेशानुसारेणसर्वद्वारनिरोधात्मिकांचेष्टांकुर्व न्सर्वद्वारागतान्वायूनहृदिनिरुद्ध्यआवायुप्रक्षयंस्वांतःअंतरेववायोर्लयपर्यंतंरागतउत्साहेनाभ्यसेदिति ॥ ४९० ॥ क्षीणइति एवमंतः क्षीणेविलयंप्राप्तेसतिवायौततोनासाद्वारेणश्वासोच्छ्वासविधयाबहिर्निःसारयेद्यावद्वायुःसूक्ष्मतामापद्यतेतावदयमभ्यासस्ततश्चवायुजये नमनोजयोनिश्चयेनभवतीत्यर्थः ॥४९१॥ मनोजयेत्विंद्रियजयोऽनायासेनभवतीत्याह यथेति अप्रमत्तःसावधानस्तथाइंद्रियाणिजय

नवद्वारागतान्प्राणान्वायूनहृदिनिरुद्ध्यच॥ योगोपयोगिनींचेष्टांकुर्वाणोगुरुदेशतः॥ आवायुप्रक्षयंस्वांत रभ्यसेदेवरागतः ॥ ४९० ॥ क्षीणेवायौततोमंदंनासिकापुटयोःपुमान् ॥ श्वासोच्छ्वासंप्रकुर्वीतयावत्स्वल्पो वतिष्ठते ॥ एवंवायुजयेजातेजायतेहिमनोजयः॥ ४९१॥ यथारश्मिजयेदुष्टानश्वान्जयतिसारथिः॥ अ प्रमत्तस्तथाविद्वानिंद्रियाणिमनोजये ॥ ४९२॥ देशोयमासनार्थंस्याद्विदुषःसुखदःसदा ॥ निम्नोन्नतादिर हितोगोमयाद्युपलेपितः॥ ४९३॥ महानद्यादिसांनिध्यवर्जितःकंटकादिभिः॥ वालुकाशर्कराभ्यांवाशीतो ष्णाभ्यांचसर्वदा॥४९४॥ शब्दैर्नानाविधैर्मुक्तोनात्यंतमपिपाथसः॥ समीपस्थोतिसुखदःसर्वलक्षणसंयुतः ॥ ४९५॥ किंबहूक्तेनदेशस्यलक्षणेनयतीश्वराः॥ मनोनयनयोर्यःस्यात्सुखदःसोत्रकीर्तितः॥ गुहादिकोति निर्वातस्तत्रयोगरतिर्भवेत्॥ ४९६॥ यत्रयोगउपक्रांतेयदिदैवादिदोषतः॥ विघ्नःसंभावितोनैवतत्रकुर्वीत तंसुधीः॥४९७॥ यथादेशस्तथाचान्यदाहारादिकमात्मनः॥आश्रयेद्यत्नकुर्वीतयोगविघ्नंकदाचन॥ ४९८॥

तीतिसंबंधः ॥ ४९२ ॥ योगदेशप्रदर्शकस्यदशमस्यार्थमाह देशइति अयंसुखदत्वादिविशेषणकः ॥ ४९३ ॥ महेति नद्यादिजलस्थान सामीप्येनवर्जितः तथाकंटकादिभिर्वर्जितः शर्करासूक्ष्मपाषाणाः ॥ ४९४ ॥ शब्दैरिति पाथसोजलस्यसमीपस्थोयोनभवति ॥ ४९५॥ किंबहूक्तेनेति मशकादिराहित्येनमनोनयनसुखदोयोदेशःसोत्रमंत्रेगुहादिरूपोनिर्वातोवायुरहितःकीर्तितः तत्रयोगंकुर्यादित्यर्थः॥४९६॥ यत्रेति यत्रयोगारंभेदैवादिदोषाद्विघ्नःसंभावितःशंकितोभवेत्तत्रयोगंनकुर्यादिति ॥ ४९७ ॥ एतेनासननियमेनद्वौभागौपूरयेदन्नैरित्या युक्तोऽशनयोगोपिसूचितइत्याह यथेति स्पष्टं ॥ ४९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादशस्यब्रह्मोपलब्धिसांनिध्यसूचिकानांसिद्धीनांतत्रसक्तस्यविघ्नहेतूनांप्रदर्शकस्यार्थमाह एवमितिपंचभिः प्रादुःस्युःप्रकटीभवेयुः कीदृश्यःसिद्धयः तत्रसक्तस्यविघ्नरूपाः ॥ ४९९॥ नीहारेणेति नीहारादिसमानिमनोरूपाणिपश्यतीति ॥५००॥ नीहारइति तत्रनीहारो जलस्ययद्रूपंशुक्लाख्यंतद्वानेव धूमस्यवर्णस्तुकृष्णः सूर्यस्यपिंगलःअनेकवर्णसमुदायात्मकत्वात् आदित्यस्यहिपंचरोहितादिरूपाणि च्छांदोग्येमधुविद्यायामुक्तानि तथावन्हेर्वर्णोरक्तःपाटलोवायोर्वर्णस्तुदूर्वाभःश्यामउक्तःशास्त्रेआगमे तथाचप्रपंचसारेआकाशादिव

एवमष्टांगयोगेनस्वात्मप्रत्यक्षमिच्छतः॥ प्रथमंसिद्धयोनानाप्रादुःस्युर्विघ्नहेतुकाः॥ ४९९ ॥ नीहारेणसमं रूपंपश्यत्येषकदाचन॥ धूमेनचकदाचित्तुभास्करेणचकर्हिचित्॥ वन्हिनापिचकुत्रापिवायुनापिसमंतथा ॥५००॥नीहारोजलरूपत्वंगच्छेदुक्तोमनीषिभिः॥धूमःकृष्णस्तथैवार्कःपिंगलोनेकवर्णितः॥रक्तोवन्हिस्तथा वायुर्दूर्वाभःशास्त्रतोभवेत् ॥ ५०१ ॥खद्योतेनतथैवान्यद्विद्युतास्फटिकेनच॥ शशिनापिसमंरूपंकदाचित्तु प्रपश्यति॥ ५०२॥ यथारूपाणितद्वत्तुशब्दस्पर्शरसानपि ॥ गंधांश्चविविधानेषपूर्वंपश्यतियोगतः ॥ समाधिस्थःसदायोगीब्रह्मबोधसमीपगः॥५०३॥ समाधौयोगिनोयद्वदांतराःप्रत्ययाःसदा॥ भवंतितद्वदेवात्रबाह्याअपिभवंतिच॥ ५०४ ॥ योगिनोरोगनिर्मुक्तोदेहोभवतितत्क्षणात् ॥ जरयामृत्युनातद्वदन्यलोकविलक्षणः ॥ ५०५ ॥

र्णाःक्रमेणोक्ताः सितशितिपाटलशुभ्रपीतभासइति ॥ ५०१ ॥ तथाखद्योतादिरूपाणिचपश्यतीत्याह खद्योतेनेति ॥५०२॥ नकेवलंचाक्षुषविषयानेवदिव्यान्पश्यतिकिंत्वितरेंद्रियविषयानपीत्याह यथेति एताश्चसिद्धयोयोगाश्वासद्वाराचित्तस्थितिहेतवोपिभवंति तदुक्तं विषयवतीवाप्रवृत्तिर्मनसःस्थितिनिबंधनीति तदेतत्सूचयति ब्रह्मबोधसमीपगइति ॥ ५०३ ॥ तथाविधशारीरसिद्धिप्रतिपादकयोर्द्वादश त्रयोदशयोरर्थंदर्शयति समाधावित्यष्टभिः समाधिकालेयथोक्ताआन्तरानीहारादिदर्शनरूपाःप्रभवंतितथाइमावक्ष्यमाणाबाह्याबहिर्व्युत्थानदशायामुपलब्धाःसिद्धयोपिभवंतीत्यर्थः ॥ ५०४ ॥ योगिनइति योगिनोदेहोरोगाद्यभावेनान्यविलक्षणोभवतीति ॥५०५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगाग्निनेति पंचात्मकस्यपांचभौतिकस्यदेहस्यरोगोहियोगाग्निनानश्यतीति एतेनमंत्रेपंचभूतसमुदायेसतिसमुत्थितउत्पन्नोयःपंचात्मकोदेहस्तस्मिन्योगगुणेयोगकृतातिशयेप्रवृत्तेसतीतियोजनासूचिता ॥ ५०६ ॥ त्रयोदशार्थमुपक्रमते एतइति योगस्ययोगादनुष्ठानात् अंगगतजाड्याभावरूपंलघुत्वंनीरोगत्वंविषयेषुवैतृष्ण्यंचभवतीत्यर्थः ॥ ५०७ ॥ स्निग्धेत्यादिद्वयंनिगदव्याख्यातम् ॥५०८॥ ५०९ ॥ भूयसइति प्रचुरस्यान्नस्यभक्षणेस्वल्पमलत्वंजीर्णस्याप्यन्नस्यसम्यक्पाकात् ॥ ५१० ॥ इयमिति इयमेवंविधायोगस्ययोगफलस्य

योगाग्निनासमग्रोपिरोगःपंचात्मकस्यहि॥देहस्यनाशमायातिहेम्नोयद्वदिहाग्निना॥ ५०६॥ एतेगुणाश्चदेहस्यजायंतेयोगयोगतः॥ लघुत्वमंगजाड्यानामभावश्चाप्यरोगता॥ अलोलुपत्वंसर्वेषुभूस्वर्गविषयेष्वपि ॥५०७॥स्निग्धवर्णस्तथैवायंजायतेकनकादिवत्॥दर्शनात्सर्वलोकानांमनोनयननंदनः॥५०८॥ स्वरश्चमधुरःसर्वलोककर्णसुखप्रदः॥ चंपकादिसमोदेहगंधःशुभतमस्तथा॥५०९॥ भूयसोप्यन्नपानस्यग्रहेतद्वच्चयोगिनः॥ अल्पेमूत्रपुरीषेचसम्यक्जीर्णस्यपाकतः॥५१०॥ इयंयोगप्रवृत्तिःस्यात्प्रथमंतुयतीश्वराः॥ अत्राणिमादिकासिद्धिर्जायतेविघ्नहेतुका॥५११॥ अस्यांसंसक्तचित्तःसन्योगभ्रष्टोभियते॥ एतांस्त्यजन्नवाप्नोतिप्रत्यक्षंब्रह्मवेदितं॥५१२॥ मृदालिप्तंयथाबिंबरवेश्चंद्रस्यवामृदः॥ अपरित्यागतोनैतद्दृष्टुमर्हतिकर्हिचित्॥५१३॥एवंसिद्धेरसंत्यागान्नात्मानंद्रष्टुमर्हति॥ मृदस्त्यागेऽमृदंबिंबममृतंतेजसांनिधिं॥ पश्येदात्मानमेवंहिसिद्धित्यागात्प्रपश्यति॥५१४॥

प्रवृत्तिःप्रवाहःप्रथमंस्यात् प्रवृत्तिःकथितावृत्तौप्रवाहोदंतयोरपीतिविश्वप्रकाशः अत्रउक्तफलप्रवाहे ॥ ५११॥ आत्मसाक्षात्कारेसिद्ध्यादिषुरागःप्रतिबंधकोऽतस्तत्परिहारेणात्मानंसाक्षात्कृत्यकृतार्थोभवेदित्यावेदकस्यचतुर्दशस्यार्थमाह अस्यामितिपंचभिः अस्यांयोगफलप्रवृत्तौ एतान्दिव्यादिव्यविषयान् वेदितंवेदप्रतिपाद्यम् ॥ ५१२॥ तत्रदृष्टांतमाह मृदेति यथासूर्यस्यचंद्रस्यवाबिंबंमंडलंरजतादिनापूजार्थंनिर्मितंभवेत्तद्यदामृदामृत्तिकयालिप्तंतदातन्मृत्परिहारमंतरेणसम्यग्द्रष्टुंयोग्यंनभवतिद्रष्टेत्यर्थः ॥ ५१३ ॥ दार्ष्टांतिकेयोजयति एवमिति मृदस्त्यागेतुअमृदंमृद्रहितंतद्बिंबंपश्येत्तथाऽमृतादिविशेषणकमात्मानंसिद्धिरागपरिहारेणपश्यतीतिद्वितीयार्धदलार्थः ॥ ५१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततश्चकृतार्थोभवतीत्याह सर्वसिद्धीति स्पष्टं ॥५१५॥ शोकात्कर्तृत्वादिरूपात्संसारप्रयोजकाच्चमुच्यतेइत्याह एतदिति॥५१६॥योगिनस्त्वं पदार्थज्ञानमात्रान्मोक्षंमन्यंतेतथानमंतव्यंकिंत्वात्मानंपूर्णतयामहावाक्यानुसारेणज्ञात्वैवमुच्यतेइतिप्रदर्शकस्यपंचदशस्यार्थमाह यदाय मितित्रिभिः यदायमधिकारीमहाभागोब्रह्मणस्तत्पदार्थस्यतत्त्वंसर्वभेदरहितस्वप्रकाशात्मरूपंप्रथमंविज्ञायततस्त्वंपदार्थस्यजन्मादिराहि त्याद्युपलक्षितस्यप्रत्यक्षविज्ञानंप्राप्यतयोरैक्यंकार्यकारणात्मकसर्वतत्त्वराहित्यात्मकाखंडत्वशालिप्रत्यक्षीकुरुतेतदासर्वपाशेभ्योमुच्यत इतित्रयाणांसंबंधः॥५१७॥५१८॥५१९॥ आत्मनःपरिपूर्णताप्रतिपादकस्यषोडशस्यार्थमाह एषएवेतित्रिभिः एषआत्मदेवःसर्वदिग्रूपः

॥३६॥

सर्वसिद्धिपरित्यागादानंदात्मानमद्वयं॥ निरीक्ष्यैवकृतार्थःस्यात्कश्चिदेवपुमानिह॥५१५॥ एतद्विज्ञानतःशो
कःकृतार्थस्यापयास्यति॥ यस्मात्शोकादिदंदुःखंदुःसहंदेहजंव्रजेत्॥५१६॥ यदायमात्मरूपेणस्वप्रकाशे
नसर्वदा॥ ब्रह्मतत्त्वंविजानातिभेदत्रयविवर्जितं॥५१७॥ योगात्प्रत्यक्षविज्ञानंप्राप्यभाग्याधिकःपुमान्॥
जन्मादिरहितंतद्वत्ध्रुवंविगतविक्रियं॥५१८॥ कार्यकारणनिर्मुक्तमानंदात्मानमद्वयं॥ प्रत्यक्षीकुरुतेतर्हि
सर्वपाशच्छिदिर्भवेत्॥५१९॥ एषएवस्वयंज्योतिर्देवःसर्वादिशोदश॥ एषएवपुराजातःशरीरीब्रह्मरूपधृ
क्॥५२०॥ एषएवजलादीनांगर्भेतिष्ठतिसर्वदा॥ ब्रह्मांडादिस्वरूपेणयोनियंत्रसमीपगः॥५२१॥ आंत
रोपिचबुद्ध्यादेःसर्वेंद्रियशरीरवान्॥ योगिभिस्त्ववगम्योयोमयोक्तःपरमेश्वरः॥५२२॥ अग्नावप्सुचभूतेषु
महत्स्वप्येषसंस्थितः॥ जातोजनिष्यमाणश्चेत्येषएवमहेश्वरः॥५२३॥

तथापुराजातोहिरण्यगर्भस्तद्रूपः॥५२०॥ एषएवजलादीनामिति तथाविराट्शरीरब्रह्मांडादिरूपेणअप्प्रभृतिस्त्रीणांयोनियंत्रसमीपदेश रूपेगर्भेतिष्ठन्नेषएवेत्यर्थः॥५२१॥ आंतरइति तथासर्वव्यष्टिषुबुद्ध्यादेरांतरःसर्वसंघातशेषीएषएव एषकः योमयायोगिगम्यउक्तइति ॥५२२॥ आत्मनःसर्वांतरत्वंविघ्नपरिहारायनमस्कार्यत्वंचदर्शयतःसप्तदशस्यार्थमाह अग्नावितित्रिभिः प्रसिद्धाग्निजलयोर्महाभूतेषु चायंस्थितःतथाजातोलब्धजन्माजनिष्यमाणोलप्स्यमानजन्मावायोभावस्तदंतर्गतोप्येषएवेत्यर्थः॥५२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्ततेइति तथावर्तमानभूतानामंतःसाक्षिरूपेणस्थितः यतःसर्वंसृष्ट्वायमेवांतःप्रविष्टवानिति ॥ ५२४ ॥ सर्वेति स्पष्टम् ॥ ५२५॥ द्वितीय तृतीयाध्यायव्याख्यायाःसमाप्तिंसारंभौसूचयति एषसंक्षेपतइति योगेनगम्योयआत्मातस्यविद्ययालाभोयथाभवेत्तथाप्रतिपादयतस्तृतीयाध्यायस्यार्थंश्रृणुतेत्यर्थः ॥ ५२६ ॥ अस्मिन्नध्यायेंऽतर्यामित्वादिलक्षणैस्तत्पदार्थप्रधान्येनप्रतिपादयंतिमंत्रास्तेषुप्रथमस्यार्थमाह यःपुरेति यईश्वरःपुराप्रथमाध्यायेतथाअधुनाद्वितीयाध्यायेचकथितःसएकोऽद्वितीयःसंसाराख्यजालस्यस्वामीबोध्यइत्यर्थः ॥५२७॥

वर्ततेसर्वभूतानामंतर्हृदयसंस्थितः ॥ सर्वेषुनिखिलंविश्वंसृष्ट्वेवात्रप्रविष्टवान् ॥५२४॥ सर्वभूताऽऽत्मकोयोयंस्थावरेषुचरेषुच ॥ तस्मैसर्वात्मनेशुद्धरूपायचनमोनमः ॥ ५२५ ॥ एषसंक्षेपतोयोगःकथितोत्रयतीश्वराः॥ योगगम्यमिमंदेवमात्मानंश्रृणुताधुना॥ ५२६॥ यःपुराकथितोदेवईश्वरोप्यधुनाचयः ॥ एकएवसविज्ञेयःसदासंसारजालवान्॥ ५२७॥ ईशिनीभिःस्वमायायाविभिन्नाभिस्तुशक्तिभिः ॥ सर्वान् लोकानिमानीष्टएकोजन्मनिचस्थितौ॥ सर्वदाजगतोपीशंयेविदुस्तेमृताःस्मृताः॥ ५२८॥ एतज्ज्ञानाद्यतोजन्मपुनर्नैवभविष्यति॥ अजातानांकुतोमृत्युस्ततोमीअमृताःस्मृताः॥५२९॥ अंतकालेददद्दुःखंरुद्रएषप्रकीर्तितः॥ एकएवद्वितीयेनशून्यईशःपुरेरितः॥५३०॥ सृष्टिंस्थितिंयथैवायमीशिनीभिःकरोतिहि॥ तथैवजगतोनाशमंतकालमुपागते ॥५३१ ॥

ईशिनीभिरिति ईशिनीभिस्तत्तन्नियमनसाधनभूताभिःस्वमायायाःशक्तिभिःसर्वान्लोकानीष्टेवशेस्थापयति ततस्तंसर्वस्यजगतउत्पत्त्यादौईशंसमर्थंयेजानंतितेऽमृताःस्युरिति ॥ ५२८ ॥ अमृतत्वमेवस्फुटयति एतदिति उक्तात्मनोज्ञानेनरागादिक्लेशप्रहाणेनजन्मनएवाभावेकुतोमृत्युरित्यर्थः ॥ ५२९ ॥ उक्तमेवस्फुटयतोद्वितीयस्यार्थंदर्शयति अंत्येतिचतुर्भिः रुत्पदोक्तंदुःखंप्राणिभ्योंतकालेरातिददातीति रुद्रःद्वितीयत्वयोग्यतयाकेनापिभावेनानवस्थानादेकपदोक्तश्चायमीशोयथाजगतःसृष्टिस्थितीकरोतितथानाशमपिकरोतीतिद्वयोरर्थः ॥ ५३० ॥ ५३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संचुकोचेति ईशस्यायमेवसंसाराख्योव्यापारोयत्सर्वांतःस्थितत्वेनकार्याकारपरिणतस्यात्मरूपस्यसंकोचनमितिप्रथमदलार्थः यथालू
तारव्यःकीटस्तंतून्निर्मायतत्पालकःसन्नंतेस्वस्मिंस्तान्संहरतितथाविश्वमयमपि फलितमाह रुद्रइत्यादिनेतिद्वयोरर्थः ॥ ५३२ ॥५३३ ॥
तस्यप्रत्यक्त्वंसर्वस्रष्टृत्वंचस्फुटयतस्तृतीयस्यार्थमाह अस्येतिचतुर्भिः सर्वाणिज्ञानेंद्रियादीनिसर्वांतरस्यास्यैवसंति ॥ ५३४ ॥ अयमिति
अयमेवमहाभूतद्वाराभौतिकंमाययासृजति ॥ ५३५॥ कथंमहाभूतद्वाराभौतिकसृष्टिरित्याकांक्षापूरकस्योत्तरार्द्धस्यार्थमाह पतत्रैरिति

संचुकोचात्मनोरूपंप्रत्यङ्‌रूपव्यवस्थितः॥ गोप्ताविश्वमिदंसृष्ट्वास्थावरंचचरंतथा ॥५३२ ॥ यथासंहरतेलू
तातंतून्निर्मायपालकः॥ आत्मन्येवमयंदेवोरुद्रएकोवतिष्ठते ॥५३३॥ अस्यसर्वत्रसर्वाणिज्ञानकर्मेंद्रिया
णिच॥ शरीराणिचसर्वाणिस्थावराणिचराणिच ॥ ५३४ ॥ अयंसर्वमिदंविश्वंनिर्मिमीतेस्वमायया॥ म
हाभूतादिकंतद्वन्नित्यंभौतिकमेवच ॥५३५॥ पतत्रैःपंचभिर्भूतैःसदापतनशीलकैः॥ उत्पत्त्याचविनाशेनग्र
स्तत्वाद्विहगादिवत्॥ ५३६॥ भुजाभ्यामिवपुण्याख्यपापाभ्यांचमहेश्वरः ॥ भौतिकंसकलंविश्वंप्रलयांतंसृ
जत्ययं॥ द्यावाभूमीचजनयन्देवएकोत्रवर्त्तते॥ ५३७॥ विश्वाधिकोत्रयोरुद्रोविद्यतेनाधिकोयतः॥ मह
र्षिःसर्वविज्ञानसंपन्नोलोकभावनः ॥५३८॥ देवानामग्निमुख्यानांवागादीनांतथैवच॥ उत्पत्तिस्थितिना
शानांकर्तासर्वात्मकोविभुः॥ ५३९॥ हिरण्यगर्भमीशानंजनयामासपूर्वजं ॥ स्थावराणांचराणांचसर्वेषां
देहधारिणाम्॥ सदेवःशुभयाबुद्ध्यासदास्मान्योजयन्निह॥ ५४०॥

नवनवोत्पत्तिविनाशशालित्वलक्षणसाधर्म्येणपक्षिपक्षसमैःपंचभूतैर्बाहुसमाभ्यांपुण्यपापाभ्यांचसहितोयंविहंगवन्नीडसमंभौतिकजातं
प्रलयपर्यंतंसृजति किंकुर्वन् ऊर्ध्वाधोलोकविभागंकुर्वन् परंतुपक्षीस्वतोभिन्नंनीडादिकंकरोतिअयंतुआत्मानमेवतथाकरोतीतिसूच
यन्नाह एकइत्यादीतिद्वयोरर्थः ॥ ५३६ ॥ ५३७॥ चतुर्थादीनांत्रयाणामेकवाक्यतयाअर्थंदर्शयति विश्वाधिकइतिचतुर्दशभिः यो
रुद्रोविश्वाधिकोमहर्षिःसर्ववेदस्मर्ताअतएवसर्वज्ञानसंपन्नोदेवादीनामुत्पत्त्यादिकर्त्ताचस्थावरादीनांपूर्वजंहिरण्यगर्भंजनयामाससदेवोऽ
स्मान्शुभयाबुद्ध्यायोजयन्सन्नित्यर्थकानांत्रयाणांमयाइतिसंप्रार्थितइतिदशमेनाभिसंबंधः॥ ५३८ ॥ ५३९॥ ५४० ॥ ॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईश्वरप्रार्थनापरस्ययातेइत्यादिमंत्रयुगलस्यार्थःप्रदर्श्यते तवेतिसप्तभिः महादेवस्यद्वेमूर्त्तीसात्विकीतामसीचतयोराद्याप्रथममंत्रेणस्तूयते तथाहि हेरुद्रयातेसौम्यरूपातनुर्गुरुरूपिणीमोक्षसाधनविद्यासंप्रदायप्रवर्त्तिकावर्त्ततेतयातन्वाअस्मान्मोहांधान्प्रकाशवतःकुर्वितिद्वयोः संबंधः ॥ ५४१ ॥ ५४२ ॥ उक्तंदृष्टांतेनस्फुटयति यथेति गुरोर्विद्याप्रवर्त्तकस्यतवयातनुस्तांप्रकाशयदर्शयेत्यर्थः ॥ ५४३ ॥ अथ द्वितीयांतामसीमभिप्रेत्यप्रार्थनापरस्यद्वितीयस्यार्थमाह कामेत्यादिना हेगिरिशंतगिरिशत्वेसतिअंतसंहारक शकंध्वादिः यांद्वितीयांतनुं नारीरूपांतामसींहस्तेस्वैकदेशेबिभर्षिधारयसि कस्मै मोक्षायपापिषुप्रक्षेपाय कीदृशाय प्राणिनांसंसारगर्त्तपातात्मकाय तामस्मान्प्रति शिवांशुभावहांकुर्वित्यन्वयः कीदृशींद्वितीयांतनुं कामक्रोधात्मकंयल्लोहंतन्मयीं अत्रलोहांगीपदेनश्रौतेषुपदसूचितंप्रहारसाधनशस्त्रतु

तवरुद्रतनुर्यात्रप्रसिद्धामंगलात्मिका ॥ सौम्यरूपाथपापानांहारिणीगुरुरूपिणी ॥ ५४१ ॥ तयातन्वामहेशा नस्वानंदतमयापिच ॥ अस्मान्मोहपिनद्धाक्षान्गिरीशत्वंप्रकाशय ॥ ५४२ ॥ यथानयनदानेनत्वंधान्वैद्यः प्रकाशयेत् ॥ अस्मान्प्रतितथैवैनांप्रकाशयगुरोस्तनुं ॥ ५४३ ॥ कामक्रोधादिलोहांगींनारींवैर्यादिबालिकां ॥ अप्रसिद्धातिरूपांयांविभर्ष्यत्रसदाभवान् ॥ ५४४ ॥ संसाररूपमापन्नोहस्तेमोक्षायसर्वदा ॥ संसारचक्रपा तायप्राणिनांतांशिवांकुरु ॥ ५४५ ॥ मानयाभगवन्हिंसीर्जगत्पुरुषरूपकं ॥ मावास्यांतःस्थितंतद्वद्रूपंपरम मैश्वरं ॥ ५४६ ॥

ल्यत्वंदर्शितं तस्याअतिदुःखदत्वसूचनायविशेषणं वैर्यादिबालिकामिति यथावैरिणःआदिपदग्राह्यराक्षसादेर्वाबालिकाकन्यादुःखदाभ वतितादृशीमिति अथवेषुतुल्यत्वस्फुटीकरणायवैर्यादीनांवारिकामितिरलयोःसावर्ण्यादुक्तं अतएवाप्रसिद्धंअतिभयानकंरूपंयस्याःसा तथा ईश्वरस्यतादृशरूपधारणमेवकुतइतिशंकांवारयन्नाह संसाररूपमापन्नइति यतोभवान्अज्ञानांसंसाररूपेणभासमानइत्यर्थः पापिनःप्रतिदुःखहेतुत्वमीश्वरस्यभगवद्गीतास्वप्युक्तंतानहंद्विषतइत्यादिनेतिद्वयोरर्थः ॥ ५४४ ॥ ५४५ ॥ मानयेति हेभगवन्अनयाकामादिमय्यातामस्यानार्याकारयामूर्त्यापुरुषरूपंजगत्माहिंसीःप्रमादलक्षणंमृत्युंमाप्रापय अथवापुरुषपदोक्तमैश्वरंरूपंमाहिंसीर्माप्रच्छादयेत्यर्थः ॥ ५४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेनमंत्रत्रयेणकृतास्तुतिरंतःकरणशुद्ध्यादिद्वाराकृतकृत्यताहेतुरितिदर्शयति इतिसंप्रार्थितइतिपंचभिः एवंयदामयादेवःप्रार्थितस्तदाहं कामादिरहितःसन्देवस्यगुरुमयींमूर्तिंदृष्ट्वाकृतकृत्योजातइतिद्वयोःसंबंधः ॥५४७॥५४८॥ कृतकृत्यत्वहेतुतयादुर्लभलाभंसूचयन्दृष्टांत त्रयमाह अपुत्रइति आत्ममनःस्थितांध्यातां ॥ ५४९ ॥ तयाभगवन्मूर्त्यागुरुरूपयायउपकारःकृतस्तत्प्रत्युपकारःकथंचिदपिकर्तुंनशक्य इत्याह तयेति ॥ ५५० ॥ अतोभवद्भिरपिसामूर्तिरुक्तस्तुतिद्वाराद्रष्टव्याकृतकृत्यत्वायेत्याह अतइति स्पष्टम् ॥ ५५१ ॥ ईशानुग्रहादे

इतिसंप्रार्थितोदेवोमयापूर्वंमहेश्वरः॥ कामक्रोधादिरहितस्ततोहंस्वगुरोस्तनुं॥५४७॥ दृष्टवान्देवदेवस्यरुद्रस्यशिवरूपिणीं॥ तद्दर्शनादहंजातःकृतकृत्योयतीश्वराः॥ ५४८॥ अपुत्रोत्रयथापुत्रंसंप्राप्यधनिकोगृही ॥ यथावाकामुकःकांतांसंप्राप्यात्ममनःस्थितां॥ यथावाकृपणोलुब्धःप्राप्यनष्टंमहाधनं॥ ५४९ ॥ तयातन्वाममकृतउपकारोयतीश्वराः॥ यस्तस्यनैवपश्यामिकांचनापचितिंभुवि॥ दिविवाप्यन्यलोकेवाकर्त्तुंजन्मशतेनवा॥ ५५० ॥ अतःशिवतमामेतामानंदात्मस्वरूपिणीं ॥ तनुंरुद्रस्यसंप्राप्यभवंतोपियतीश्वराः ॥ कृतकृत्याभविष्यंतिमद्वदत्रनसंशयः॥५५१॥ इदमुक्तवतीमत्यंरौद्रीशिवतमातनुः॥ अस्मात्संसारचक्राद्यत्परतोस्तिसकारणात्॥ तत्त्वंब्रह्मनसंसारीमादुःखंव्रजपुत्रक॥ ५५२॥ अनेकैःसंशयैःशून्यस्तदाहंतद्गिराऽभवं॥ नानायुक्तिसहस्रेणयुक्तयाचमनोज्ञया॥ ५५३ ॥ ततस्तस्यप्रसादेनतस्मात्संसारजालतः ॥ अपश्यंपरमीशानंब्रह्मानंदात्मरूपकम् ॥ ५५४ ॥

वनिर्गुणंज्ञानंभवतीतिदर्शयन्सप्तमार्थमवतारयति इदमितिद्वाभ्यां सागुरुरूपारुद्रस्यमूर्तिर्मह्यमेवमुपदिष्टवती एवंकथं हेसौम्ययत्समूल कारणात्संसारात्परंब्रह्मतदेवतवरूपंत्वंसंसारीनासीति ॥ ५५२ ॥ अनेकैरिति उक्ताकारयातद्गिरातस्यरुद्रस्यगुरुमूर्तेरुक्त्यानानायुक्त्युपेतयाहंनिःसंशयोजातः॥५५३॥ तदुपदिष्टब्रह्मतत्त्वाभिनयपरःसप्तमोमंत्रइतिसूचयंस्तदक्षरार्थमाह ततइतिषड्भिः तस्यरुद्रस्यप्रसादेनततः संशयादिप्रतिबंधापायात्संसारात्परंब्रह्मापश्यमिति ॥ ५५४ ॥ ॥ ३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमिति परब्रह्मपदाभ्यांसमानाधिकरणाभ्यांसर्वातिशयउच्यतेबृहत्पदेनचततउत्कृष्टंकिंचिन्नास्तीत्युच्यतेश्रुतौयथानिकायपदेनचयथा दृश्यानिसकारणपंचभूतानिशरीरभूतानियस्येत्युच्यतेइत्यर्थः ॥ ५५५ ॥ अथवासमःप्लुषिणासमोमशकेनेतिश्रुत्यनुसाराद्यस्यदेहिनो यादृशोदेहस्तादृशरूपेणस्थितमितियथानिकायपदार्थइत्याह यादृशइति तस्यकायेइतिसंबंधः ॥ ५५६ ॥ गूढपदार्थमाह सर्वेति स्पष्टम् ॥ ५५७ ॥ परिवेष्टितृपदार्थमाह विश्वस्येति जीवत्वमात्मप्राप्तंस्वरूपंयेषांतेषांजीवानांजडवर्गस्यचयोवेष्टकस्तान्वेष्टयित्वातदंतरवस्था

परंब्रह्मनयस्मात्स्यात्किंचिदभ्यधिकंत्विदं ॥ नितरांयस्यकायोयंविकायस्यमहात्मनः ॥ महाभूतानिसर्वाणि माययासहितानिच ॥ ५५५ ॥ यादृशोयस्यकायोयंवर्त्ततेदेहधारिणः ॥ तादृग्रूपंस्थितंतस्यवर्त्ततेगगनोपमम् ॥ ५५६ ॥ सर्वभूतेषुसततंगूढत्वान्नप्रकाशते ॥ यथासर्वेषुकाष्ठेषुवन्हिरंतरवस्थितः ॥ ५५७ ॥ विश्वस्यास्य समग्रस्यवेष्टकोयःसमंततः ॥ तंतूनांयादृशीलूताजीवत्वाप्तस्वरूपिणां ॥ ५५८ ॥ तमेवमीश्वरंज्ञात्वाभवंति मरणादिना ॥ रहितायेत्रविद्वांसःप्राप्ताःशिवतमांतनुम् ॥ ५५९ ॥ पुरुषंतमहंजानेमहांतंसर्वदेहगम् ॥ स्वयंज्योतिषमात्मानंमायायाःपरतःस्थितं ॥ ५६० ॥ तमेवपुरुषंसर्वेविदित्वास्वगुरोर्मुखात् ॥ मृत्युमत्येतिसंसारंसर्वदुःखौघकारणम् ॥ ५६१ ॥ आत्मविज्ञानतोनान्यःपंथामुक्तिपुरंप्रति ॥ गमनायततस्तेनकर्तव्यंतद्यतीश्वराः ॥ ५६२ ॥ यस्मादभ्यधिकंकिंचिन्नान्यदस्तिमहात्मनः ॥ ज्यायस्तद्वदणीयश्चपुरुषाद्विश्वरूपिणः ॥ ५६३ ॥

ता तंतूनांयथालूताख्यकीटोवेष्टकस्तथेत्यर्थः ॥ ५५८ ॥ तमेवेति येशिवतमांगुरुमूर्त्तिप्राप्यतमीश्वरंजानंतितेमरणादिरहिताभवंतीति ॥ ५५९ ॥ मंत्रदर्शिनकृपेरात्मापरोक्षानुभवंमोक्षस्यज्ञानैकलभ्यत्वंचाभिनयतोऽष्टमस्यार्थंदर्शयति पुरुषमितित्रिभिः तंवर्णितरूपं मायाख्यात्तमोरूपायाःपरं ॥ ५६० ॥ तमेवेति सर्वोधिकारीतंज्ञात्वैवसंसाररूपंमृत्युमत्येतिअतिक्रम्यगच्छतीति ॥ ५६१ ॥ आत्मेति यत आत्मज्ञानाद्भिन्नोमोक्षगमनायमार्गोनास्तिततस्तदात्मज्ञानंकर्त्तव्यंपुरुषेणश्रवणादिद्वारासंपाद्यमित्यर्थः ॥ ५६२ ॥ ईशस्याद्वितीयतां विशदीकुर्वतोनवमस्यार्थंनिरूपयति यस्मादिति यस्मादधिकंज्यायःप्रशस्तंअणीयःसूक्ष्मंचनास्तिविश्वात्मत्वात् ॥ ५६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतेति यथाबहुशाखोवृक्षोभूयांसमवकाशंसंनिरुध्यव्याप्यतिष्ठेत्तथायमपिविश्वंव्याप्यदिविस्वप्रकाशस्वरूपेवस्थितः ॥ ५६४ ॥ वृक्षदृ ष्टांतमेवस्फुटयति वायुरिति निबिडोघनशाखः स्तब्धोऽनम्रःएकःआलंबनायलतादिवत्परानपेक्षः ॥ ५६ ५॥मुमुक्षुणानिर्गुणमेवात्मतत्त्वंज्ञे यमितिबोधयतोदशमस्यार्थमाह यद्यपीतिपंचभिः यद्यप्येषआत्माचराचरविश्वशरीरकविराड्रूपःसूक्ष्मसमष्ट्युपाधिकहिरण्यगर्भरूपश्चभ वतितथाप्येतत्कार्योपाधिकंरूपमुपासनामात्रोपयोग्येवनज्ञेयंकिंतुतस्मात्कार्योपाधिकात्परंयत्तत्त्वंतदेवज्ञेयमावरणभंजकधीवृत्तिगोच

शतशाखोयथावृक्षःसन्निरुध्यावतिष्ठते ॥ एवंस्वयंप्रकाशेस्मिन्स्वरूपेसमवस्थितः ॥ एकस्तेनेदमखिलंपूर्णं पुरुषरूपिणा ॥ ५६४ ॥ वायुशून्येयथादेशेनिबिडोबहुपर्णवान् ॥ स्तब्धोवृक्षोभवेदेकस्तद्वदेकःपुमानयम् ॥ ५६५॥ यद्यप्येषभवेद्विश्वंकार्यमेतच्चराचरं ॥ हिरण्यगर्भश्चतथातथाप्येषमुमुक्षुणा ॥ ५६६ ॥ नज्ञेयःकिं तुतस्माद्यदुत्तरंपरतःस्थितं ॥ रूपंतदेवविज्ञेयंनकार्यंब्रह्मकर्हिचित् ॥५६७॥ कार्येब्रह्मणियस्मात्स्याद्रूपंनाम चकर्मच ॥ साऽऽमयंततएवैतन्नाशकारणवत्त्वतः॥५६८॥हिरण्यगर्भतोयत्स्यादुत्तरंपरतःस्थितम्॥ एतन्मु मुक्षुभिर्ज्ञेयंस्यादरूपमनामयं ॥ ५६९॥ येजानंतीदमात्मस्थंतेभवंत्यमृताःसदा ॥ अन्येसंसारमासाद्यदुःख मेवाभियांतिच ॥ यएतत्स्वात्मसंस्थानंरूपंजानंतिनकश्चित् ॥ ५७० ॥

रीकार्यमितिद्वयोरर्थः ॥ ५६६॥५६७॥ तत्रहेतुमाह कार्यइति यस्मात्कार्येब्रह्मणिहिरण्यगर्भादौनामशब्दप्रपंचोरूपमर्थप्रपंचःकर्मक्रि याप्रपंचएतत्त्रयमेवदृश्यतेतच्चत्रयंसामयंआमयेनआर्त्यायुक्तं कुतः विनाशस्यबाधस्यकारणंप्रयोजकंयन्मिथ्यात्वंतद्वत्त्वात् तथाचश्रुत्यं तरंअतोन्यदार्त्तमिति अतश्चिदात्मनः एतेनतुल्ययुक्त्याऽव्याकृतेपिमिथ्यात्वंसूचितमिति ॥ ५६८ ॥ हिरण्येति हिरण्यगर्भादुत्तरंअव्या कृतंततःपरंशुद्धंयत्तदेवज्ञेयमिति ॥ ५६९ ॥ तद्विज्ञानस्यान्वयव्यतिरेकाभ्यांमोक्षहेतुतामाह येजानंतीति स्वात्मसंस्थानंस्वेमहिम्निप्रति ष्ठितंसर्वांतरंवा ॥ ५७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेश्वरस्यसर्वांतरतान्यथानुपपत्त्यापूर्णतांविशदयतामेकादशादीनामर्थःप्रदर्श्यते सर्वाननेत्यादिना यतःसर्वाणिआननादीनियस्यसत थासर्वहृदिस्थितःसर्वस्यात्माचभवतिततःशिवःसर्वगतःपूर्णः ॥ ५७१ ॥ शिवेतिनाभैवतस्यसंसारधर्माभावमाहेतिदर्शयति स्वयमिति अ मंगलंशोकादि यतस्तस्यशोकस्यहेतुरविद्यानास्तीति ॥ ५७२ ॥ द्वादशार्थमाह महतोपीति महतआकाशादेःसकाशान्महान् नवद्वारा णिप्रसिद्धानिमूर्द्धच्छिद्रंनाभिच्छिद्रंचसंकलय्यएकादशद्वारंशरीरंतदंतःस्थितः ॥ ५७३ ॥ बुद्धेरिति बुद्धेःसत्वपदोक्तायाःप्रेरकोयोदेवःस्व स्वरूपभूतांशांतिमानंदंस्वरूपभूतेनप्रकाशेनजानातीति ॥ ५७४ ॥ त्रयोदशस्यार्थंदर्शयति ईशानइतिचतुर्भिः भूतभव्यस्यअतीतानाग

सर्वाननशिरोग्रीवःसर्वभूतहृदिस्थितः ॥ सर्वव्यापीचभगवानात्मायस्माच्छरीरिणां ॥ आनंदात्मस्वरूपःसं
स्तस्मात्सर्वगतःशिवः ॥ ५७१ ॥ स्वयंज्योतिःस्वरूपेस्मिन्नानंदात्मनिनिर्द्वये ॥ भवेदमंगलंकेनतस्यहेतुश्च
नास्तियत् ॥ ५७२ ॥ महतोपिमहानेषआनंदात्माप्रभुस्तथा ॥ पुरेएकादशद्वारेसर्वेषांसमवस्थितः ॥ ५७३ ॥
बुद्धेःप्रवर्त्तकोदेवःशांतिमात्मस्वरूपिणीं ॥ सुनिर्मलांसदास्वात्मज्योतिषायोऽवगच्छति ॥ ५७४ ॥ ईशानोभूत
भव्यस्यज्योतिषांज्योतिरेवच ॥ अव्ययःपुरुषःसाक्षीक्षेत्रज्ञवपुरास्थितः ॥ ५७५ ॥ अंगुष्ठमात्रःपुरुषोहृदयें
गुष्ठमात्रके ॥ स्थितःस्वरूपतोयोयमतिमात्रनभःसमः ॥ ५७६ ॥ बुद्धेरंतःस्थितोदेवआत्मासर्वशरीरिणां ॥
सदाहृदयएवायंलभ्यतेसर्वगोपिच ॥ ५७७ ॥ मनसाबुद्धिवृत्तीनामीश्वरेणोपलभ्यते ॥ हृदयस्थेनदेवोय
मेतावत्त्वंप्रकल्प्यच ॥ येजानंत्येतमात्मानममृतास्तेभवंतिहि ॥ ५७८ ॥

तस्यप्रभुःक्षेत्रज्ञरूपः ॥ ५७५ ॥ अंगुष्ठेति सर्वेषांशरीरिणांस्वस्वांगुष्ठपरिमितंहृदयच्छिद्रंतत्रोपलभ्यत्वात्पुरुषःपरमात्माप्यंगुष्ठमात्र इत्युक्तः नतावतातस्यपूर्णत्वक्षतिः यतोतिमात्रंमात्रांपरिच्छेदमतिक्रांतंयन्नभस्तत्तुल्यः तथाचश्रुत्यंतरं यावान्वाअयमाकाशस्तावानेषोंत र्हृदयआकाशइति अयंवाह्यः एषआत्मरूपइत्यर्थः ॥ ५७६ ॥ हृद्युपलभ्यत्वादेवतस्यहृदयस्थत्वव्यवहारइतिस्फुटयति बुद्धेरिति बुद्धे रंतःस्थितः साक्षित्वेनेतिशेषः ॥ ५७७ ॥ तस्योपलंभेश्रवणादिसंस्कृतंमनएवसाधनमित्याह मनसेति अस्यात्मनएतावत्त्वंहृदयावच्छि न्नत्वंप्रकल्प्यहृदयस्थेनहृद्येकायतामापन्नेनसर्वधीवृत्तीनामीश्वरेणनियमनसमर्थेनमनसायमुपलभ्यते येएवमेनमात्मानंजानंतितेऽमृता भवंतीतिसंबंधः ॥ ५७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दशार्थमाह सहस्रेति तस्यसहस्रमूर्द्धत्वादिकंसर्वात्मत्वादेवोपपन्नमिति ॥५७९॥ सउपाधिमतिक्रम्यबहिरपिनिर्गच्छतिउपाधिनानि रुद्धांतरवस्थापयितुमशक्यत्वादितिदर्शयति सभूमिमिति सपरमात्माभूमिसमष्टिव्यष्टिरूपांसर्वतःअंतरतोबाह्यतश्चव्याप्यअधिकत्वेनति ष्ठतियथाकाष्ठंव्याप्यदशांगुलपरिमितंदेशंवह्निर्व्याप्याग्निज्वालातिष्ठतीति अत्रात्मनोवहिर्व्याप्तिर्वृत्त्वेत्यनेनैवलब्धत्वात् दशांगुलावच्छि न्नेहृदयेआकाशस्थानेपृथिव्यनाक्रांतेपरमात्मनःस्थितिविवक्षायामपिपृथिव्यपेक्षयादशांगुलाधिकास्थितिःसंभवतीत्याशयेननचतुर्था ध्यायगतव्याख्ययाविरोधइतिध्येयं अथवाउभेअस्मिन्द्यावापृथिवीअंतरेवसमाहितेइतिदहरविद्यागतश्रुत्यनुसारेणमनःकल्पितत्वेनपृ

सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सर्वप्राणिस्वरूपत्वादुपपन्नमिदंसदा ॥ ५७९ ॥ सभूमिंसर्वतोवृ त्वाप्यधिकत्वेनतिष्ठति ॥ दशांगुलंयथावृत्त्वाकाष्ठंवह्निशिखाबहिः ॥५८०॥ ततोब्रह्मांडपिंडस्यबहिरंतरयं स्थितः ॥ नभोवत्पुरुषःसर्वव्यापीज्ञानसुखात्मकः ॥ ५८१ ॥ सर्वंपुरुषएवेदंभूतंभव्यंभवच्चयत् ॥ अपिमो क्षस्यचेशानोह्यमृतत्वस्वरूपिणः ॥ किमुतान्यस्यसर्वादेस्त्रिवर्गस्यास्यसर्वतः ॥ ५८२ ॥ अन्नरूपेणचैषोत्रपृ थिव्यामतिरोहति ॥ जंगमानांयतःसृष्टिर्जायतेभक्षणात्सदा ॥ ५८३ ॥

थिव्याहृदयांतरणुदेशेस्थितायाअपेक्षयासर्वहृदयव्यापिनःपरमात्मनःस्थितिर्दशांगुलमधिकेत्युक्तं वस्तुतस्तुभूमिंविराजंतदावरणभूतं हिरण्यगर्भंसकारणंहृदयस्थत्वेनदशांगुलपदोक्तंव्याप्यततोधिकंस्वेमहिम्नितिष्ठतीत्यर्थः ॥ ५८० ॥ फलितमाह ततइति स्पष्टं ॥ ५८१॥ यतस्तेनपुरुषेणव्याप्यंविश्वंततोभिन्नसत्ताकंनभवतिअतःसर्वपुरुषार्थानांसएवदाताअतएवान्नरूपेणलोकसमृद्धिहेतुत्वंतस्यप्रसिद्धमि त्यर्थपरतयापंचदशमंत्रंव्याचष्टे सर्वमितिद्वाभ्यां ईशानोदानसमर्थः त्रिवर्गस्यधर्मार्थकामात्मकस्य कीदृशस्य सर्वादेःसर्वत्वंहिरण्यगर्भ भावात्मकमुपासनाफलंतत्प्रभृतेरित्यर्थः स्वर्गादेरितिपाठेस्पष्टत्वेपिछंदोहानिःपंचमस्यगुरुत्वापत्तेरिति ॥५८२॥ अन्नेति अतिरोहतिप्रादु र्भवति ॥ ५८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंप्रपंचस्यभेदस्तस्मिन्नास्तीत्युक्तमथचिद्भेदवारकयोःषोडशसप्तदशयोरर्थमाह यस्मादिति यस्मादयंपुरुषःसर्वात्मकस्ततएवास्यस्वरूपं सर्वतःपाणिपादत्वादिसुत्हृत्त्वांतविशेषणैरुपलक्षितंयद्ब्रह्मतदात्मकमुक्तमितित्रयाणांसंबंधः सर्वेंद्रियैर्वर्जितमपिसर्वेषामिंद्रियगुणानामिंद्रियविषयाणांप्रकाशकं प्रभुस्स्वामि ईशानंनियंतृ शरणंरक्षकं सुहृदुपकारकं ॥५८४॥५८५॥ ५८६॥ सएवपरमात्मासर्वदेहेषुजीवरूपेणप्रविष्टइतिबोधयतोष्टादशस्यार्थमाह इदमितिनवभिः इदंसर्वात्मकंपरमात्मनोरूपंयदुक्तंतदेवहंसरूपेणदेहस्थमिति ॥ ५८७ ॥ नवद्वा

यस्मात्सर्वात्मकोदेवःपुमान्ब्रह्मस्वरूपधृक्॥ सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं ॥ ५८४ ॥ एतादृक्ततएवास्यस्वरूपंब्रह्मईरितम् ॥ सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति ॥ ५८५॥ सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितम्॥ सर्वस्यप्रभुचेशानंसर्वस्यशरणंसुहृत्॥ ५८६॥ इदंसर्वात्मकंरूपंसर्वभूतोपकारकम्॥ हंसरूपेणसततंदेहआस्तेयतीश्वराः॥ ५८७॥ द्वाराणिवदनेसप्तद्वेअधस्ताच्चसंस्थिते॥ देहस्यतेनमुनिभिर्नवद्वारंप्रकीर्तितं॥ ५८८॥ पूर्यतेधातुभिर्नित्यमन्नपानानुगामिभिः ॥ ततएवपुरंचैतत्शरीरंपरिकीर्त्तितं ॥ ५८९॥ हिनस्त्यविद्यामखिलामात्मनोब्रह्मतागतौ ॥ ततएवशरीरस्योहंसएषप्रकीर्त्तितः ॥ ५९० ॥ नवद्वारेपुरेस्थित्वाहंसोबहिरुपागतः॥ चेष्टांविषयलाभार्थंकुरुतेमाययावृतः ॥ ५९१ ॥ वशीसर्वस्यलोकस्यस्थावरस्यचरस्यच॥ संसारचक्रंसंप्राप्यभवत्यात्मवशोप्ययम्॥ ५९२॥ कामुकत्वाद्यथाजंतुरिंद्रियाणांवशंगतः ॥ नारीणांवशमायातोवशीत्येवप्रकीर्त्तितः॥ ५९३॥ अथवायस्यहस्तेस्याद्वशीकरणकारणं ॥ मंत्रौषधादिकंसस्यात्स्वतंत्रोत्रवशीजनः॥ ५९४॥

रपदार्थमाह द्वाराणीति ॥ ५८८ ॥ देहेपुरपदसमन्वयंदर्शयति पूर्यतइति अनुगामिकार्यं ॥ ५८९ ॥ हंसपदव्युत्पत्तिंस्मारयति हिनस्तीति गतिर्बोधः ॥ ५९० ॥ चेष्टावाचकलेलाधातोरूपस्यार्थमाह नवेति ॥ ५९१ ॥ वशःपराधीनत्वंतद्वानित्याकारंवशिपदार्थमाह वशीतिद्वाभ्यां अयमात्मात्मवशःस्वतंत्रोप्यविद्ययाउपाधिपारतंत्र्याद्वशीत्युक्तइत्यर्थः ॥ ५९२ ॥ तत्रदृष्टांतउच्यते कामुकत्वादिति ॥५९३॥ अथवावशोवशीकरणसाधनंतद्वान्वशीत्युक्तइत्याह अथवेति मंत्रादिरूपंवशीकरणसाधनंयस्यहस्तेभवतिसजनोवशीतिप्रसिद्धः॥५९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथात्मन्यपिजंडवशीकरणसाधनंचैतन्यरूपमस्तीतिसवशीत्युक्तइत्याह तथेति ॥ ५९५॥ ईश्वरस्यज्ञानशक्तिःक्रियाशक्तिश्चकरणानपे
क्षासचस्वयंप्रकाशइतिविशदयतोऽपाणीत्यादेर्मंत्रस्यार्थमाह अपाणिःसन्निति सप्तभिः अयंदेवःपाणींद्रियहीनोपिग्रहणंकरोति पादही
नोपिचमनसोऽधिकेनवेगेनधावति ॥ ५९६॥ एवंनेत्रादिहीनोपिदर्शनादिकंकरोतीत्याह नेत्रेति ॥५९७ ॥ ननुतस्यसर्वोपादानत्वेनसर्व
वतइंद्रियाभावःकथमुच्यतेइतिचेन्नित्यसिद्धविद्ययासंघाताभिमानाभावादित्याह ज्ञानेति इंद्रियाणितद्गोलकाश्चदेहस्यसूक्ष्मस्यस्थूल
स्यचघटकतयावर्ततेअतस्तत्संबंधोदेहाध्यासवतएवननित्यमुक्तस्येत्यतएवआत्मातेनदेहेनहीनोऽकायमव्रणमित्यादिश्रुतिषूक्तइत्यर्थः ॥

**तथास्यापिचचैतन्यंवशीकरणकारणं ॥ स्थावरस्यचरस्यापिविद्यतेऽतोवशीस्मृतः ॥ ५९५॥ अपाणिःसन्न
यंसर्वमादत्तेपुरुषोत्तमः ॥ वेगवान्मनसोप्येषपादहीनोपिसर्वदा ॥ ५९६ ॥ नेत्रहीनोपिसर्वाणिरूपाण्येषप्र
पश्यति ॥ अकर्णोपिश्रृणोत्येषशब्दान्विश्वस्थितानपि ॥ ५९७॥ ज्ञानकर्मेंद्रियगणोयस्माद्देहस्यनात्मनः॥
तस्मात्तेनविहीनोयमात्माश्रुतिषुकीर्त्यते ॥ ५९८॥ ज्ञानकर्मेंद्रियाणांयेव्यापाराःसफलाहिते॥ भवंत्यनिंद्रि
यात्पुंसस्तस्मादात्माकरोतितान्॥ ५९९॥ किंबहूक्तेनपुंसोत्रव्यापारकरणंप्रति ॥ बाह्यैर्वाभ्यंतरैर्वापिकरणै
रवगम्यते॥ ६००॥ तत्तत्सर्वमयंतेनह्यात्मासर्वगतःपुमान् ॥ अस्यकोपिनवेत्तास्तिजडोवाप्यजडोपिवा
॥ ६०१॥ आनंदात्मास्वयंज्योतिरयंस्यात्पुरुषोत्तमः॥ अग्रेस्थितमिमंप्राहुर्जगतोब्रह्मवादिनः॥ ६०२॥**

५९८ ॥ एवंभूतोपिसस्वोपाधिमायाशक्तिवशादिंद्रियैर्विनापितद्व्यापारान्करोतीत्याह ज्ञानकर्मेंद्रियाणामिति व्यापारोविषययोगः फ
लंविषयाविर्भावः भवंतिजायंते तस्मादचिंत्यशक्तिविशेषात्तानिंद्रियव्यापारानयमेवकरोतीत्युच्यतेइति ॥ ५९९ ॥ अयमितरनिर
पेक्षइंद्रियव्यापारान्करोतीतिकिमुवाच्यंयतःसर्वविषयरूपेणाप्ययमेवविवर्त्ततेइत्याह किंबहूक्तेनेति इंद्रियव्यापारजननविषयकेण
बहुप्रशंसनेनकिंयतोयद्यत्करणगम्यंवस्तुजातंतत्तत्सर्वमयमेवदेवोघटादिरूपेणमृदिववर्त्ततेतेनसर्वोपादानत्वेनायंसर्वगतःसर्वपरिच्छेदही
नःसर्वतःपूर्वसिद्धत्वादविषयस्वभावः अतएवश्रुतावग्र्यपदेनोक्तइतित्रयाणामर्थः ॥ ६०० ॥ ६०१ ॥ ६०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमात्मासूक्ष्मत्वमहत्त्वयोःपर्यवसानभूमिःसर्वेषांहृद्गुहायांसंनिहितोपिगुरुकृपैकलभ्यइतिदर्शयतोविंशस्यार्थमाह अणोरितिपंचभिः मध्येहृद्गुहायां ॥६०३॥ संकल्पेति तंदेवंविषयभोगसंकल्परहितंगुरोःप्रसादतःपश्यन्वीतशोकोभवतीत्यर्थः॥६०४॥ गुरुप्रसादस्यचस्वरूपमभिनयति गुरुरिति शिवतमतनुरूपेणधातापोषकोयोरुद्रःसएवगुरुरुक्तः योजयतिपरेतत्त्वेसदीक्षयाचार्यमूर्तिस्थइत्यागमात् अयमधिकारीतेनदेवेनइत्थंपरिबोधितोभवतीति ॥ ६०५॥ इत्थंकथमित्याकाक्षांपूरयति नत्वमितिपादसप्तकेन तेनउक्तोपदेशजज्ञानेन ॥६०६॥

अणोरणीयानात्मायंमहीयान्महतोपिच॥ अस्यप्राणिशरीरस्यमध्येतिष्ठतिसर्वदा॥ ६०३ ॥ संकल्परहितं देवंमहत्त्वैकस्वरूपिणं॥ गुरोःप्रसादतोवीतशोकःपश्यनितंप्रभुं॥६०४॥ गुरूरुद्रोमहेशानोधाताशिवतमातनुः॥ तेनसंसारतप्तोयंदेवेनपरिबोधितः॥ ६०५॥ नत्वंकर्त्ताचभोक्ताचदुःखित्वंतेकथंभवेत्॥ ब्रह्मवेदांतकथितंत्वमस्यत्रनसंशयः॥ ६०६॥ त्वत्तोन्यत्सकलंविश्वंत्वय्येवपरिकल्पितं॥ स्वप्नाभंनश्वरंतेनवीतशोकःप्रजायते॥ ६०७॥ वीतशोकःपुमान्यद्वदात्मानंपरिपश्यति॥ वेदाहमेतमजरंसर्वात्मानंपुरातनम् ॥ ६०८ ॥ विभुत्वात्सर्वगंदेवंसर्वभेदविवर्जितं ॥ जन्मनाशंचयस्यैतेलौकिकाःप्रवदंतिहि ॥ नित्यंचयंवदंत्येतेसर्वदा ब्रह्मवादिनः ॥ ६०९ ॥ अध्यात्ममेवमुदितंमयाचैवंयतीश्वराः ॥ अन्यत्राप्येतमधुनावक्ष्येवोबुद्धिवृद्धये ॥ ६१० ॥

॥६०७॥ उक्तात्मज्ञानेऽसंभावनानकर्त्तव्यायतोममतथाविज्ञानंसिद्धमितिविदुषोनुभवमभिनयतएकत्रिंशस्यार्थमाह वीतशोकइतिद्वाभ्यां वीतशोकत्वंप्राप्नुवन्यथात्मानंपश्येत्तथाहंश्वेताश्वतरनामावेदजानामि कीदृशमजरत्वाद्युपलक्षितंयस्यात्मनोजन्मादिकंलौकिकाअज्ञाःजडतादात्म्यदर्शिनोवदंति तत्त्वविदस्तुनित्यमेवयत्स्वरूपंवदंतीतिद्वयोरर्थः ॥ ६०८ ॥ ६०९॥ तृतीयचतुर्थाध्यायव्याख्ययोःसमाप्त्यारंभौसूचयति अध्यात्ममिति एवमधिदैवंप्रतिपाद्यअध्यात्ममांतरत्वेनवर्त्तमानमात्मरूपमुदितमुक्तं एवमेवअन्यत्रचतुर्थाध्यायमंत्रेषुप्रतिपादितंतत्त्वंवक्ष्येहेमुनयइत्यर्थः ॥ ६१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥४२॥

तत्रप्रथममंत्रचतुष्टयंबुद्धिशुद्ध्याधायकंयदीश्वरस्यसगुणरूपंचिंतनंतत्परमितिदर्शयंस्तदर्थमाह एकवर्णेतित्रयोदशभिः योदेवःपरापर विभागवान्द्वेवावब्रह्मणोरूपेपरंचापरंचेतिश्रुत्यंतरानुसारेणसगुणनिर्गुणात्मकरूपद्वयवान्प्रणवादिस्वरूपःशब्दार्थयोस्तादात्म्यमितिन्या येनस्ववाचकप्रणवरूपः अकारोवैसर्वावाक्इतिश्रुत्यंतरप्रसिद्धस्यविष्णुवाचकस्याकारस्यादिपदेनग्रहणादकाररूपोवासन्स्ववाचकव र्णरूपेणवहून्वर्णान्शब्दांस्तदुपलक्षितानर्थांश्चमाययासृष्ट्यादौकरोतिजीवानांभोगादिप्रयोजनसिद्धये पुनःसंहारकालेतत्सर्वंस्वात्मनि शांतेविक्षेपशून्येअतएवनिर्नादेनादेनसूक्ष्मशब्देनापिरहितेएकीकरोतिविलापयति सोस्मान्शुद्धयाबुद्ध्यायुक्तान्करोतुयस्याबुद्धेःशुभा यानैर्मल्यमहंब्रह्मेतिबोधहेतुरितित्रयाणामर्थः प्रणवात्सर्ववर्णोत्पत्तिप्रक्रियातुप्रपचंसाराद्यागमग्रंथेभ्योबोध्या॥६११॥६१२॥॥६१३॥ अयमेवेश्वरःसर्वेष्वधिदैवशरीरेष्वेकोऽवस्थितइतियोजयतोद्वितीयस्यार्थःप्रदर्श्यते विज्ञेयमितिद्वाभ्यां अहंब्रह्मेत्याकारयाबुद्ध्यायद्विज्ञेयं

एकवर्णस्वरूपेणपरापरविभागवान्॥प्रणवादिस्वरूपोयोवहून्वर्णान्करोतिहि॥प्रयोजनवशेनैवदेवःशक्त्या स्वमायया॥६११॥आदौविश्वंसमग्रंचसंहारेपुनरेवतत्॥शांतआत्मनिनिर्नादेसर्वमेकीकरोतिच॥६१२॥ सयोजयतुनःसर्वान्सर्वदाशुभयाधिया॥अहंब्रह्मेतिजानीमोवयंयस्याःप्रसादतः॥६१३॥ विज्ञेयंशुभया बुद्ध्याब्रह्मयद्यतिपुंगवाः॥तदेवाग्निस्तदादित्यस्तद्वायुस्तच्चचंद्रमाः॥६१४॥ तदेवदीप्तंतद्वेदास्तदापस्तत्प्रजाप तिः॥ विराट्हिरण्यगर्भोवामरीच्यादिरथापिवा॥६१५॥ तदेवस्त्रीपुमांस्तच्चकुमारस्तत्कुमारिका॥ जातंतदे ववृद्धंसत्शनैर्दंडेनगच्छति॥६१६॥तत्सर्वंत्वंपदार्थोयंतत्पदार्थात्पृथङ्नयः॥ज्ञानंतदेवभवतिबहुरूपंयतीश्व राः॥६१७॥

ब्रह्मतदेवाग्न्यादिरूपमितिसंबंधः दीप्तंसत्वगुणाधिक्येनदेदीप्यमानं अव्याकृतंतारामंडलंवा वेदायजुराद्यभिमानिदे वाः आपःअप्प्रधानानिसूक्ष्मभूतानि प्रजापतिपदेनविराट्हिरण्यगर्भोमरीचिदक्षादयोवाग्राह्याइतिद्वयोरर्थः॥६१४॥६१५॥ सएवेश्वर स्त्वंपदार्थोपाधिभूतव्यष्टिशरीरेष्वप्यवस्थितइतिदर्शयतस्तृतीयस्यार्थमाह तदेवस्त्रीतिद्वाभ्यां तदेवब्रह्मस्त्रीत्वपुंस्त्वशालियुवशरीरावच्छिन्नं तथाकुमारादिवालशरीरावच्छिन्नं तथादंडालंबनकचलनोपलक्षितवृद्धशरीरावच्छिन्नं किंपरिगणनेनयावज्जातंजन्मवच्छरीरंतदवच्छि न्नंतदेव फलितमाह तत्सर्वमिति उक्तरूयादिशरीरावच्छिन्नोयोयंत्वंपदार्थःसतत्पदार्थान्नभिन्नइर्थः तथाआश्रयस्यविषयस्यस्वस्यचप्र काशकत्वेनविश्वतोमुखपदाभिधानयोग्यंबुद्धिवृत्त्युपाधिभिर्नानारूपंचयज्ज्ञानंतदपितदेवेतिद्वयोरर्थः॥६१६॥६१७॥ ॥४२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृहदारण्यकपंचमाध्यायेभुज्युप्रश्नेइंद्रःपक्षीभूत्वेतिश्रुतंतदनुसारेणेश्वरस्यपक्षिरूपतापरत्वंदर्शयंश्वतुर्थस्यार्थंवर्णयति कारणमितिषड्भिः अत्रविराड्रूपापन्नमितिशेषोबोध्योऽतोनपंचमाध्यायविरोधः तथाचकारणोपाधिकमीश्वरंविराड्भावापन्नंवक्ष्यमाणविधयापक्षित्वेनक ल्पयंतिअल्पानांमंदमतीनामुपासनादिसौकर्यायेत्यर्थः तदुक्तं निर्विशेषंपरंब्रह्मसाक्षात्कर्त्तुमनीश्वराः येमंदास्तेऽनुकंप्यंतेसविशेषनिरूप णैः वशीकृतमनस्येषांसगुणब्रह्मशीलनात् तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनमिति ॥ ६१८ ॥ कारणात्मेति कारणात्मेश्वरोविराड्रूपोदू र्वादलश्यामपक्षिरूपेणध्येयस्तस्याक्षिणीतुरक्तवर्णेध्येयेइत्यर्थः ॥ ६१९ ॥ तडिदिति क्षणभंगुरत्वलक्षणंदृष्टनष्टत्वेनतडितविद्युतातुल्यंकार्य जातंतस्यगर्भेभवतीत्यतस्तडिद्गर्भपदेनोक्तइत्यर्थः ॥ ६२० ॥ ऋत्विति वसंतादिऋतुरूपःकालःसमुद्रश्चइत्येतौप्रत्येकंनानाविधौतस्यपक्षि

कारणंकल्पयंत्येतत्पक्षित्वेनमहाधियः ॥ यथैवशक्यतेज्ञातुंस्तोतुमल्पैश्चदेहिभिः ॥ ६१८ ॥ कारणात्माभवे त्पक्षीनीलोदूर्वादलप्रभः ॥ लोहितेतस्यविज्ञेयेचक्षुषीपतगात्मनः ॥ ६१९ ॥ तडित्समानमखिलंदृष्टनष्टस्व भावकं ॥ अस्यगर्भेस्थितंयद्वज्जनन्याजठरेशिशुः ॥ ३२० ॥ ऋतुरूपस्तुकालोयमपांराशिश्चसागरः ॥ अने कभेदसंभिन्नःपक्षौतस्यमहात्मनः ॥ ६२१ ॥ आदिशून्यस्तत्पदार्थस्त्वमित्यपिचकीर्तितः ॥ इंद्रःसर्वगतो भूत्वाविद्यतेंतर्वहिस्तथा ॥ पारिक्षितानांब्रह्मांडाद्बहिर्नेतामहेश्वरः ॥ ६२२ ॥ यतोजातानिसर्वाणिमहाभूता निपंचच ॥ येभ्योजातानिसर्वाणिब्रह्मांडेभुवनानिच ॥ ६२३ ॥ एवंसंकल्प्यतेहेतुंपक्षिरूपंमहाधियः ॥ पुनर त्रत्रिधाभावंकृत्वैवंकल्पयंतिच ॥ तत्त्वंपदार्थौतद्भेदहेतुर्मायाचदुःखदा ॥ ६२४ ॥

णःपक्षत्वेनध्येयावित्यर्थः ॥ ६२१ ॥ मंत्रतृतीयपादेनतत्पदार्थमीश्वरंत्वंपदेननिर्दिश्यविभुपदवाच्येंद्ररूपेणवर्तमानोसीत्युच्यतइत्याह आ दीति पारिक्षिताःपंचमाध्यायेभुज्युप्रश्नेव्याख्याताः यआदिशून्यस्तत्पदार्थइंद्ररूपोभूत्वाब्रह्मांडस्यांतर्वहिर्वर्तमानःपारिक्षितानांबहिर्नेतो क्तःसोत्रमंत्रेत्वंपदेननिर्दिष्टइतिसंबंधः ॥ ६२२ ॥ यतइति यतइंद्राद्ब्रह्मांडांतर्वर्तीनिभुवनानितदुपादानभूतानिस्थूलभूतानिचजातानी त्यर्थः ॥ ६२३ ॥ एवंमंत्रचतुष्टयाराधितेश्वरानुग्रहाद्विमलधियामहावाक्योपयोगिविचारःकर्त्तव्यइतिसंगत्याअजामित्यादेर्मंत्रस्यार्थ माह एवमित्यष्टभिः हेतुंजगत्कारणमीश्वरंएवंउक्तविधयापक्षिरूपंसंकल्प्यध्यात्वापुनरत्रशबलस्वरूपेपदार्थद्वयंतद्भेदिकामायाचेत्येवं त्रिधाभावंकल्पयंतीति ॥ ६२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रपदार्थयोर्भेदिकामायाऽनादित्वेनाजेत्युक्तातथातेजोबन्नलक्षणकार्यरूपेणच्छांदोग्यप्रसिद्धरूपकत्रयेणतुत्रिरूपेत्युक्तेत्याह अजेति ॥ ६२५ ॥ छांदोग्यप्रसिद्धंतेजःप्रभृतीनांरूपत्रयमभिनयति लोहितेति ॥ ६२६ ॥ त्रिरूपेयमिति इयंमायाउक्तविधयालोहितादिभिः त्रिरूपासतीत्रिरूपत्वेनस्वसदृशंविश्वंजनयति तथाचच्छांदोग्यश्रुतिः यदग्नेरोहितंरूपंतेजसस्तद्रूपंयच्छुक्लंतदपांयत्कृष्णंतदन्नस्येति यद्वद परालौकिकीअजाछागीत्रिवर्णास्वसमानरूपान्वर्करांश्छागान्जनयेत् वर्करःपरिवारेस्याच्छागेयुवपशावपीतिविश्वः ॥६२७॥ तामिति तांछागींयथाकश्चिच्छागःकामुकःसेवेतकश्चित्तुनिष्कामस्त्यजेदिति ॥ ६२८ ॥ एवमिति एवंलौकिकाजावद्वर्त्तमानायामस्यांमा

अजामायायतोनास्याजन्मस्यात्कारणात्मना॥ कार्यात्मनात्रिरूपासातेजोबन्नस्वरूपिणी॥६२५॥ लोहिता वन्हिरूपेणश्वेतानीरात्मनापिच॥ भूमिरूपातथाकृष्णात्रिरूपेतिप्रकीर्त्तिता ॥ ६२६॥ त्रिरूपेयंत्रिरूपंतद्विश्वं स्वसदृशंमुहुः॥ जनयत्यपरायद्वच्छागीवर्णत्रयात्मिका॥ सावर्करान्स्वसरूपान्जनयेत्सुबहूनपि॥६२७॥ता मेकःकामुकश्छागःप्रीतियुक्तस्तुसेवते॥ अपरःसुरतंकृत्वाभुक्तभोगांजहातिताम्॥६२८॥ एवमस्यामजा वेतौबंधंमोक्षमुपागतौ॥त्वंतत्पदार्थौपुरुषःसस्पृहोनिःस्पृहोपिच॥६२९॥स्पृहायुक्तःपुमानेनांप्रकृतिंविश्वरूपिणीं॥ नजहातियथाच्छागींछागःसुरतकामुकः॥ ६३० ॥ निःस्पृहःप्रजहात्येनांसुरतेनयथापरः॥ छागो निःस्पृहतांप्राप्यच्छागींत्यजतिलौकिकः॥ ६३१ ॥ एवंचकल्पयंत्येतेबुद्धिसाकल्यहेतुतः ॥ अविद्याकार्यसहितापादपत्वेनकीर्त्तिता॥ भिन्नातस्यांपदार्थौतुसुपर्णौपरिकीर्त्तितौ॥६३२॥ पक्षिणौद्वाविमौनित्यंयुक्तौभेदविवर्जितौ॥ सखायावेकमेवैनंवृक्षमाश्रित्यसंश्रितौ॥६३३॥

यायांसत्यांसस्पृहनिःस्पृहपुरुषरूपौत्वंतत्पदार्थावजरूपौबंधमोक्षभागिनावुक्ताविति ॥ ६२९ ॥ एतदेवस्फुटयति स्पृहायुक्तइति स्पष्टम् ॥ ६३० ॥ निःस्पृहइति सुरतेननिःस्पृहतांप्राप्येतिसंबंधः ॥ ६३१ ॥ षष्ठमंत्रोप्येवमेवसोपाधिकंपदार्थद्वयंप्रतिपादयतीतिदर्शयंस्तदक्षरार्थमाह एवंचेतित्रिभिः एतेमहाधियोवुद्धेःसाकल्यादत्युत्कर्षादेवमपिकल्पयंतिरूपकंवर्णयंति एवंकथं सकार्याविद्यावृक्षरूपाबोध्यात त्रवर्त्तमानपक्षिरूपौतुजीवेश्वरौबोध्यावित्यर्थः ॥ ६३२ ॥ पक्षिणाविति तौपक्षिणौवस्तुतोभेदराहित्यान्नित्ययुक्तावित्युक्तौसखायौसमानरूपावेनंसकार्याविद्यारूपंवृक्षमाश्रितौ ॥ ६३३ ॥ ॥४३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तयोरिति तयोर्मध्येएकःपतगःपक्षीबुद्धिविशिष्टजीवरूपस्तस्यवृक्षस्यकर्मरूपपुष्पजन्यंसुखाद्यात्मकंफलंस्वादुमन्यमानोऽत्तिभुंक्तेअपरस्तुपश्यत्येवेत्यर्थः ॥ ६३४ ॥ अनयोर्मंत्रयोर्जीवेयाभोक्तृताउक्तासानविधेयाकिंतुबुद्ध्युपाधिकभ्रमसिद्धत्वादनूद्यैव तदनुवादोपिजीवस्यशुद्धचैतन्यात्मकब्रह्मताबोधनाय अतएवपैंगीब्राह्मणेएतन्मंत्रव्याख्यानेसत्वपदोक्तायांबुद्धौभोक्तृत्वंप्रक्षिप्तमितितात्पर्यार्थमाह अजाविति सप्तभिः अनयोर्मंत्रयोःअजरूपौपक्षिरूपौचतत्त्वंपदार्थौभोक्तृत्वाभोक्तृत्वाभ्यांविलक्षणौयदुक्तौतदुक्तेस्तात्पर्यंत्वंपदार्थस्यभोक्तृतानिवृत्तावेवेत्यर्थः ॥ ६३५ ॥ तत्रहेतुतयाअप्राप्तेशास्त्रमर्थवदितिन्यायविरोधेनप्रसिद्धायाभोक्तृतायाअज्ञातज्ञापनलक्षणविधानायोग्यत्वमाह प्रतीतेति जीवेस्वात्माज्ञानप्रयुक्ताभोक्तृतायतःप्रतीताप्रसिद्धाऽतोनशास्त्रेणविधानयोग्या शास्त्रश्रवणात्पूर्वमेवज्ञातत्वादित्यर्थः

तयोःकर्मप्रसूनोत्थंसुखदुःखात्मकंफलं ॥ एकःस्वादत्तिपतगोबुद्धिजायावशंगतः ॥ अन्यःप्रकाशयत्येवन तदश्नातिकर्हिचित् ॥ ६३४ ॥ अजौवापक्षिणौवापिभोक्त्रभोक्तृविभागतः ॥ उक्तौतौत्वंपदार्थस्यभोक्तृताविनिवृत्तये ॥ ६३५ ॥ प्रतीताभोक्तृताजीवेस्वात्माऽज्ञानात्तृणामिह ॥ नसाविधीयतेयस्माज्ज्ञातापूर्वमियंस्वयं ॥ ६३६ ॥ तत्पदार्थस्यभोक्तृत्वेज्ञानंशास्त्रंविनानहि ॥ शास्त्रांतरात्तुतस्यापिप्राप्तैवाभोक्तृतासदा ॥ ६३७ ॥ ततोब्रह्माहमस्मीतिशाब्दंब्रूतेत्वनर्थकं ॥ भोक्त्रभोक्तृपदार्थौतौस्यातांकिंनैकरूपिणौ ॥ इतिशंकाव्युदासार्थमिदंरूपकमीरितं ॥ ६३८ ॥

॥ ६३६ ॥ नन्विदंवाक्यंतत्पदार्थेश्वरस्यैवभोक्तृतावारकमस्त्वितिचेन्न प्रसक्तंहिप्रतिषिध्यतेइतिन्यायविरोधादित्याह तत्पदार्थस्येति ईश्वरस्यभोक्तृत्वंकिंलौकिकैःप्रत्यक्षादिप्रमाणैःसिद्धंकिंवाश्रुत्यंतरेण नाद्यः तस्यालौकिकत्वेनलौकिकप्रमाणायोग्यत्वात् नांत्यः ईश्वरेभोक्तृत्वप्रतिपादिकायाःश्रुतेरनुपलंभात्प्रत्युतभोक्तृत्वाभावप्रतिपादिकायानतदश्नातिकिंचनेत्यादिश्रुतेरक्षरप्रकरणेआरण्यकपंचमाध्यायेउपलंभादितिभावः ॥ ६३७ ॥ फलितमाह ततइति ततस्तत्पदार्थेभोक्तृत्वस्याऽप्रसंगेननिषेधायोग्यत्वादिदंगतमंत्रद्वयदर्शितंरूपकमित्यस्याःशंकायावारणार्थमेवोक्तं इत्यस्याःकस्याः ननुब्रह्माहमित्यर्थकंशाब्दंशब्दसमूहःअनर्थकंबाधितमर्थंब्रूतेयतोभोक्तुर्जीवस्यत्वंपदार्थस्यअभोक्तुरीश्वरस्यतत्पदार्थस्यचएकरूपत्वंनसंभवतीति ॥ ६३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथमस्याःशंकायाअनेनरूपकेणनिराकरणमितिचेद्दृष्टांतविधयेत्याह आरोपितायथेति यथाचात्ररूपकद्वयेतत्पदार्थेशुद्धेअजत्वंपक्षित्वंचशब्दबलात्प्रतीयमानमारोपितमेवतथात्वंपदार्थेभोक्तृत्वंबुद्धिसंबंधात्प्रतीयमानमारोपितमेवनसत्यमितिद्वयोरर्थः ॥ ६३९ ॥ ६४० ॥ एतदभिप्रायस्फुटीकरणायैवपैंगिब्राह्मणेबुद्धौभोक्तृत्वंदर्शितमित्याशयेननिगमयति अतइति स्वरूपंशुद्धंरूपमादायभोक्तृत्वंनोक्तमिति ॥ ६४१ ॥ एषाजीवस्यसंसारवृक्षफलभोक्तृताआविद्यकीविषवृक्षफलभोक्तृतेवासामर्थ्याधानद्वाराशोकहेतुस्तस्याःपरित्यागेनतत्पदार्थस्वरूपदर्शनंतुतद्भावहेतुरित्यावेदकस्यसप्तमस्यार्थमाह एकस्मिन्नेवेतित्रिभिः एकस्मिन्पदार्थद्वयात्मकसुपर्णद्वयस्यसाधारणेवृक्षेसकार्याविद्यारूपेसजीवरूपःसुपर्णःफलभोगीसन्ननीश्वरत्वमसामर्थ्यंप्राप्यशोचतितत्रसर्वत्रहेतुःस्वरूपाज्ञानरूपोविमोहइत्यर्थः ॥ ६४२ ॥

आरोपितायथाचात्रच्छागतापिसुपर्णता ॥ तत्पदार्थेत्रनिःशेषधर्मशून्येप्रतीयते ॥ ६३९ ॥ आरोपितैवनत्वेषावस्तुतोस्तिकथंचन ॥ त्वंपदार्थेपिचतथाभोक्तृतात्रप्रतीयते ॥ ६४० ॥ अतोरूपकरूपेणभोक्तृत्वमिहकीर्त्तितं ॥ जीवस्यबुद्धिसंसर्गान्नस्वरूपात्कथंचन ॥ ६४१ ॥ एकस्मिन्नेववृक्षेससुपर्णःफलभोगभाक् ॥ देहबुद्ध्यादिसंबंधान्मग्नोदुःखोदधाविह ॥ अनीश्वरत्वमापन्नःशोचत्यात्मविमोहतः ॥ ६४२ ॥ आनंदात्मानमद्वैतंस्वयंज्योतिषमीश्वरं ॥ देहादिभ्यःपरंबुद्ध्यायदैषगुरुलब्धया ॥ ६४३ ॥ पश्यतिस्वंहृदाकाशंवीतशोकस्तथापुमान् ॥ महत्त्वमस्यसंयातितादात्म्यात्सभवेत्ततः ॥ ६४४ ॥ यन्महत्त्वमयंगच्छेत्तदक्षरमुदीरितम् ॥ ऋगादिकस्तुयत्रायंवेदराशिःप्रतिष्ठितः ॥ विश्वेदेवाश्चयत्रैतेवन्ह्याद्यानिवसंतिच ॥ ६४५ ॥

आनंदात्मानमिति यदातुनिरतिशयप्रेमास्पदत्वादिनोपलक्षितानंदादिरूपंसर्वांतरमात्मानंहृदयाकाशरूपंगुरुप्रसादलब्धयाबुद्ध्यापश्यतितदावीतशोकःसन्नस्यतत्पदार्थस्यमहिमानमेवैति श्रुतौह्रस्वत्वंछांदसमिति महत्त्वप्राप्तिमेवस्फुटयति तादात्म्यादिति तादात्म्यंतत्पदार्थस्वरूपंप्राप्यततःपूर्णःसर्वात्माभवेत्सआत्मानमेवावेदहंब्रह्मास्मीतितस्मात्तत्सर्वमभवदितिश्रुत्यंतरादितिद्वयोरर्थः ॥ ६४३ ॥ ६४४ ॥ तत्पदार्थस्वरूपंतदविज्ञानेविज्ञानेचदोषंगुणंचदर्शयतोष्टमस्यार्थमाह यन्महत्त्वमितिषड्भिः अयंगुरुणाऽनुगृहीतोविद्वान्यस्यतत्पदार्थस्यमहत्त्वंगच्छतितस्यस्वरूपमक्षरात्मकंपंचमाध्यायेगार्गींप्रतियाज्ञवल्क्येनवर्णितं यत्राक्षरस्वरूपेधिष्ठानेऋक्प्रभृतयोवेदास्तत्प्रतिपादितादेवादयश्चनिवसंतितत्सत्ताभानादिभिःसत्तादिकंलभंतइत्यर्थः ॥ ६४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आधिक्येनेति आधिक्यंसर्वसत्तादिप्रदत्वलक्षणंसर्वांतरत्वंतेनरूपेणतदक्षरंयोनजानातिसव्वथाजीवतियश्चजानातिसधन्यः ॥ ६४६ ॥ यथाचंदनमयोभारोगर्दभस्यनोपकारायतथापराग्दर्शिनःशास्त्राध्ययनमित्याह किंकरिष्यतीति ॥ ६४७ ॥ येतुतज्ज्ञानंतितेहेमुनयो भवादृशाःसुखंतिष्ठंतीत्याह यइत्थमिति समासतेसम्यकूतिष्ठंति ॥ ६४८ ॥ ऋगादीति स्पष्टम् ॥ ६४९ ॥ ननुकथमात्मज्ञानेनकृतकृत्यता ज्ञेयानांबहूनांजगत्यवशेषादित्याशंकावारणायात्मनोविश्वकारणताप्रतिपादकस्यनवमस्यार्थमाह आत्मनीतिदशभिः स्पष्टम् ॥ ६५० ॥ तत्रोपपत्तिमाह अज्ञातइति कारणंहिसर्वकार्याणांवास्तवंस्वरूपमितितज्ज्ञानेसर्वकार्याणांस्वरूपंविज्ञातमेव विशेषतोविकाराणांज्ञानंतु

आधिक्येननयोवेदतद्व्यर्थंतस्यजीवनं ॥ आधिक्येनचयोवेदसफलंतस्यजीवनम् ॥ ६४६ ॥ किंकरिष्यत्य नात्मज्ञोवेदैःसांगैर्ऋगदिभिः ॥ अधीतैर्गर्दभोयद्वद्भारैस्तैश्चंदनैरपि ॥ ६४७ ॥ यइत्थमात्मनस्तत्त्वमुक्तरीत्या विजानते ॥ समासतेहितेसर्वेमहाराजसमाःसुखम् ॥ इमेभवादृशाःसर्वेमादृशाश्चयतीश्वराः ॥ ६४८ ॥ ऋ गाद्यध्ययनस्यापिफलमेतावदीरितम् ॥ यदात्मनोत्रविज्ञानंनाधिक्यंहियतीश्वराः ॥ ६४९ ॥ आत्मन्यविदि तेसर्वंज्ञातुंनैवात्रशक्यते ॥ तस्मिन्हिविदितेसर्वंज्ञातमेवयतीश्वराः ॥ ६५० ॥ अज्ञातेकारणेनैवज्ञायतेकार्य मल्पकम् ॥ विज्ञातेकारणेशक्यंज्ञातुंकार्यंतथाखिलं ॥ ६५१ ॥ आत्मात्रकारणंज्ञेयोवेदादीनांयतीश्वराः ॥ मा ययैवयथाकश्चिन्मायावीकारणंत्विह ॥ ६५२ ॥ छंदांसिविविधान्येवगायत्र्यादीनिवेदराट् ॥ वेदानपितथा यज्ञानग्निष्टोमादिकान्बहून् ॥ ६५३ ॥ संकल्पानपिनानार्थान्व्रतान्यपिबहूनिच ॥ तपआदीनिसर्वाणिभूतंभ व्यंभवच्चयत् ॥ ६५४ ॥ वेदावदंतितत्सर्वमस्मादात्मस्वरूपतः ॥ सृजतेमाययैवैषमायावीसमहेश्वरः ॥ ६५५ ॥

काकदंतनिर्णयवद्विफलमितिभावः ॥ ६५१ ॥ यथामायावीनानारूपाणांकारणमिहलोकेप्रसिद्धस्तथात्मावेदादीनांमाययाकारणत्वे नशास्त्रप्रसिद्धइत्याह आत्मेति तुशब्दश्छंदःपूरणार्थः ॥ ६५२ ॥ आत्मनःसर्वस्रष्टृत्वमेवविशदयति छंदांसीतित्रिभिः एषमहेश्वरोवेद राट्वेदानांस्रष्टृत्वसंप्रदायप्रवर्त्तकत्वपालकत्वादिभिःप्रभुश्छंदःपदोक्तानिगायत्र्यादीनिवेदान्वाछंदःपदोक्तांस्तथायज्ञांस्तथाक्रतुपदोक्ता न्नानाविषयकसंकल्पांस्तथाव्रतादीनिभवदन्तानियज्जगत्स्वरूपंवेदाबहुधाप्रतिपादयंतितत्सर्वंजगदस्मादितिश्रुतिपदोक्तादात्मस्वरूपतोभि न्ननिमित्तोपादानात्सृजतिमाययैवेतित्रयाणांसंबंधः ॥ ६५३ ॥ ६५४ ॥ ६५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यास्वसत्तासाधकंमानंनयातिनिर्मिमीतेचकार्यजातंसामायेत्याकारांमायापदव्युत्पत्तिस्मारयति मानमिति ॥ ६५६ ॥ तयैवेति तयामा ययैवस्वमप्रपंचवद्विश्वंसृजति ॥ ६५७ ॥ अस्मिन्नीशसृष्टेजगतित्वंपदवाच्यश्चिदाभासःकामाद्यैर्निरुद्धइत्याकारंचतुर्थपादार्थमाह अने नेतिद्वाभ्यां अयंचिदाभासः अन्यत्वंभेददर्शनं अहोअत्यद्भुतंमायाबलंयतोवलंसंवरणकरं वलसंवरणेइतिस्मरणात् ॥ ६५८ ॥ ६५९ ॥

मायायाःसामर्थ्यातिशयप्रतिपादकस्यदशमस्यार्थमाह मायांत्विति सप्तभिः करणव्युत्पत्त्याप्रकृतिपदार्थमाह प्रकर्षेणेत्यादिना ॥६६०॥

मानंनयातियासत्वेकार्यंचकुरुतेपुनः॥मायेतिकथितासेयंदुर्घटावेदवादिभिः॥६५६॥तयैवसृजतेविश्वंपालयत्यत्तिचेश्वरः॥यथाशयानःपुरुषःस्वप्नजातमनेकधा॥६५७॥ अनेनसृष्टएतस्मिन्घोरेसंसारचक्रके॥ माययैवनिरुद्धोयमस्मादन्यत्त्वमागतः ॥ ६५८॥ तथाकामादिभिःपाशैर्बद्धोदीनदशांगतः ॥ कर्मकारागृहेसोयमहोमायाबलंबलं ॥ ६५९॥ मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं ॥ प्रकर्षेणययासर्वंकार्यंबहुविधंत्विदम् ॥ क्रियतेप्रकृतिःसेयंकथ्यतेवेदवादिभिः ॥ ६६० ॥ पुरुषोनिर्गुणोऽसंगोबहुधाक्रियतेकथं॥ कार्याकारेणसर्वाभिर्विक्रियाभिर्विवर्जितः॥ ६६१ ॥ वस्तुतःक्रियतेचायंतयानानाविधःपुमान् ॥ अनानापिततोमायाप्रकृतिःसोच्यतेबुधैः॥ ६६२॥ असदेवात्रसकलंवस्तुजातंप्रदर्शयेत् ॥ यासामायेतिकथितापुरुषैर्लौकिकैरपि॥ ६६३॥ तथानानाविधोयःस्याद्नानापिस्वयंपुमान्॥ मायीतिकथितःसोयमत्राप्येतद्द्वयंतथा॥ ६६४॥

तस्याःप्रकर्षमघटितघटनापटीयस्त्वेनदर्शयति पुरुषइतिद्वाभ्यां वस्तुतोविक्रियारहितस्यनानापदार्थाकारतामद्वितीयस्यनानात्वंचासंभाव्यंयतोमायाकरोतिअतःप्रकृतिरित्युक्तेतिद्वयोरर्थः ॥ ६६१ ॥ ६६२ ॥ असदर्थकरणमेकस्यनानात्वकरणंचेत्येतत्स्वभावद्वयंमायायालोकेपिदृष्टमित्याह असदेवेतिद्वाभ्यां वस्तुजातंसूत्रेणाकाशारोहणादिरूपं ॥ ६६३ ॥ तथेति स्वयंपुमानैंद्रजालिकःअनानाएकोपि ययानानाविधःप्रदर्श्यतेतयामायया विशिष्टोमायावीसइंद्रजालेश्वरःप्रसिद्धस्तथात्रात्मनिएतन्मायास्वभावद्वयंबोध्यमित्यर्थः ॥६६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथेत्युक्तमेवस्फुटयति मायावीतिद्वाभ्यां अयंमायावीईश्वरोमाययाबहुधाभवतिस्वतःपृथगवस्थातुमशक्तत्वेनस्वावयवभूतैर्महाभूतादि भिर्जगद्व्याप्नोतिचेतिद्वयोरर्थः ॥ ६६५ ॥ ६६६ ॥ एकादशस्यार्थमाह एनमितिद्वाभ्यां एनंदेवंयदायमधिकारीसर्वोयत्रकुत्रचिच्छरी रेस्थितोविलोकयतितदामोक्षरूपांपरांशांतिंव्रजति कीदृशंदेवं सर्वयोनिशरीरोपाधिषुएकंस्थितंजगतःसृष्ट्यादिकरमीशानंवरदंदेवैरीड्यं चेतिद्वयोःसंबंधः ॥ ६६७ ॥ ६६८ ॥ द्वादशस्यार्थःपूर्वदर्शितप्रायइतिप्रथमार्धेनसूचयंस्त्रयोदशस्यार्थमाह देवानामितिपंचभिः यो

मायावीपुरुषोयोयंमाययाबहुधाभवेत्॥ असंगोनिर्गुणोनंतएकएवमहेश्वरः ॥ ६६५ ॥ अस्यावयवभूतैस्तुमहाभूतादिभिःसदा॥ इंद्रियैश्चजगत्सर्वंव्याप्तमेतच्चराचरं॥ ६६६ ॥ एनंसर्वगतंदेवंचतुर्विधशरीरकं॥ एकंसर्वस्यजगतःसृष्टिस्थित्यंतकारिणम्॥६६७॥ विलोक्यात्मतयासर्वःशांतिंमोक्षाभिधांव्रजेत्॥ ईशानंवरदंत्वीड्यंदेवैःसर्वैःसवासवैः॥ ६६८ ॥ देवानांजनकःपूर्वमुक्तोबुद्धिप्रदोमया ॥ देवानामधिपोयश्चयस्मिन्लोकाअधिश्रिताः ॥ भूराद्यानिखिलायद्वत्प्रोच्यंतेमनुजादयः ॥ ६६९ ॥ ईष्टेयोद्विपदांतद्वत्सर्वेषांचचतुष्पदां॥ प्राणिनांनिखिलानांचस्थिराणामपिसर्वदा॥ ६७० ॥ एकस्मैसर्वपतयेतस्मैज्योतिःस्वरूपिणे॥ परिचर्यामिमांकुर्मोहविषाप्यंधसापिच॥ ६७१ ॥ आत्मज्ञानस्यजननात्प्राग्बहिर्यतिसत्तमाः॥ निजवर्णाश्रमप्रोक्तांवेदवादरतैर्द्विजैः ॥ ६७२ ॥

देवोदेवानांहिरण्यगर्भादीनांजनकस्तेभ्योऽधिकारिभ्यश्चबुद्धिप्रदइत्यादिविशेषणैर्विशिष्टतयापूर्वमुक्तः यस्मिंश्चाधारेभूराद्याःलोकाःश्रिताःस्थिताः यथामनुजादिशरीराणिपृथिव्याद्याश्रितानिप्रोच्यंतेतद्वत् यश्चद्विपदादिशरीरशालिनांप्राणिनामीशोनियंताचतमेकंदेवंप्रीणयितुमिमांपरिचर्यांहविःपदोक्तेनदेवदेयद्रव्येणांधसाभोज्यान्नेनचसाध्यांवयमधिकारिणःकुर्मइतित्रयाणामर्थः श्रुतौत्वेकपदस्यैकारलोपश्छांदसः ॥ ६६९ ॥ ६७० ॥ ६७१ ॥ तत्रतत्त्वज्ञानात्पूर्वंशास्त्रोक्तविधिनादेवप्रदेयान्नरूपेणहविषापरिचर्यांकुर्मइत्याह आत्मेति आत्मज्ञानोत्पत्तेःपूर्वंबहिर्बाह्यांवेदज्ञैर्द्विजैर्वर्णाश्रमाधिकारमनुसृत्ययथोपदिष्टातथातांकुर्मइतिसंबंधः ॥ ६७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदुत्तरंतुअंधसान्नेनयच्छरीरधारणमियमेवतस्यपूजातस्यदेवस्यास्माकंविदुषामात्मनिप्रविष्टत्वादित्याह संजातइति ज्ञानेजातेसतियतः सदेवोवयमेवास्माकंस्वरूपमेवसंपन्नोऽतस्तत्रविद्यावस्थायामपितस्यदेवस्यइयमेवपरिचर्यायद्देहधारणमिति॥६७३॥ चतुर्दशस्यार्थंदर्शयति सूक्ष्मंहीतिचतुर्भिः यल्लोकेइंद्रियैरग्राह्यंकेवलंबुद्ध्यैवगृह्यतेतत्सूक्ष्ममित्युच्यते अयमात्मातुततःसूक्ष्मादप्यतिसूक्ष्मोदुर्लक्ष्यप्रभावोयोरेतोद्वारायुवतिशरीरंगतःसन्नानाविधशरीरेंद्रजालंनिर्मिमीतेइत्यर्थः॥६७४॥ आर्तवमिति नारीवीर्यंनार्यावीर्यस्थानीयमार्तवंरजःसंप्राप्यरेतःकर्तृकललंफेनतुल्यावस्थारूपंभवति ॥ ६७५॥ तस्येति तस्यकललस्यउपाधिभूतस्यमध्येविविधकार्यानुकूल्यलक्षणेनविशेषेण

॥४६॥

संजातेब्रह्मविज्ञानेवयमेवयतोत्रसः॥ तत्रापितस्यचेयंस्याद्स्मद्देहस्यधारणम् ॥ ६७३ ॥ सूक्ष्मंहिकथितंयत्तुगम्यतेत्रधियैवहि॥ ततोप्यत्यंतसूक्ष्मोयोरेतसायुवतिंगतः॥ ६७४ ॥ आर्त्तवंस्वमनुप्राप्यनारीवीर्यंतुगर्भगम्॥ एकरात्रेणकललंरेतःस्यात्फेनसंनिभं॥६७५॥ तस्यमध्येजगत्स्रष्टानानारूपोव्यवस्थितः॥ नानाविधशरीराणांविभेदाद्भेदवर्जितः॥ एकएवजगत्सर्वंपरिवेष्ट्यावतिष्ठते ॥ ६७६ ॥ आनंदात्मानमद्वैतंयस्तंपरममंगलम् ॥ जानीतेसतुमोक्षस्थोदुःखंनैतिकदाचन ॥ ६७७ ॥ सएवस्थितिकालेस्मिन्प्राप्तेविश्वस्यगोपकः॥ विश्वाधिपःशरीरेषुत्हृदिगूढोवतिष्ठते॥ यथाकाष्ठेषुभगवान्वन्हिःसर्वेषुसंस्थितः॥६७८॥ सर्वदायत्रतिष्ठंतियोगयुक्तामहाधियः॥ अतींद्रियदृशोविप्रादेवताश्चसहस्रशः॥६७९॥

स्थित्वासर्वंकार्यजातंस्वांतर्गतंपरिवेष्ट्याभिव्याप्यजगत्स्रष्टाईश्वरोऽवतिष्ठते कीदृशः नानाविधशरीरभेदान्नानारूपोपिस्वतोभेदवर्जितःअतएवैकइत्यर्थः एतत्कललोदाहरणंवटादिवीजानामपिकुर्वदवस्थोपलक्षणमितिबोध्यं ॥ ६७६ ॥ आनंदात्मानमिति तमीश्वरमात्मानमद्वैतत्वादानंदरूपंस्मरणमात्रेणसर्वसंसारभयापहत्वात्परममंगलरूपंचयोजानीतेसमुक्तःसन्दुःखंनपश्यतीति ॥ ६७७॥ पंचदशस्यार्थमाह सएवेतित्रिभिः यःपूर्वमंत्रेबीजाद्यांतरत्वेनजगत्स्रष्टोक्तःसएवस्थितिकालेसर्वस्यांतर्गूढःसन्पालकःअतएवविश्वस्याधिपःअंतर्यामीत्युक्तः गूढत्वेदृष्टांतउच्यते यथेति ॥ ६७८ ॥ सर्वदेति यत्रउक्तेगोप्तुःस्वरूपेतत्परतयायोगिनःसांख्याश्चांतर्मुखाविप्रास्तथादेवताश्चहिरण्यगर्भाद्यास्तिष्ठंति ॥ ६७९॥ ॥४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तेनैवेति उक्तेनसर्वोपादानत्वसर्वांतरत्वादिनाप्रकारेणविशेषेणयस्तंजानातिसमृत्युनाप्रमादलक्षणेनकृतान्कामादिरूपपाशान्ज्ञानासिनानिश्चितंछिनत्ति॥ ६८० ॥षोडशस्यार्थमाह दध्नइतित्रिभिः यद्वद्दध्नोनिर्गतंघृतंदध्यपेक्षयापरमुत्कृष्टंतस्माद्धृताच्चद्रवावस्थाशालिनःसकाशात्तस्यघृतस्यघनीभावःपिंडावस्थारूपःपरःस्वादीयस्त्वात् कीदृशोघृतस्यघनीभावोदधिमंडसमः दधिमंडोनामवस्त्रेणनिःसारितजलकंदधीत्यर्थः ॥ ६८१॥ यद्वदिति प्रथमपदंपूर्वान्वयि तद्वज्जगतःस्थूलसूक्ष्मरूपाद्दधिस्थानीयाद्युत्कृष्टंघृतस्थानीयंमायाशबलंसत्यकामत्वादिगुणंब्रह्मततोप्युत्कृष्टंशुद्धमानंदघनंयद्व्यापकंसर्वांतर्गूढंतंशिवंतुरीयंयदाजानातितदासर्वेपाशाःक्षीयंतेइतिद्वयोरर्थः॥६८२॥६८३॥

उक्तेनैवप्रकारेणज्ञात्वातंपरमेश्वरम्॥ मृत्युपाशांस्तुकामादींश्छिनत्त्येषनसंशयः ॥ ६८० ॥ दध्नस्तुनिर्गतं यद्वत्सर्पिस्तस्मात्परंपुनः ॥ द्रवरूपाद्घनीभावोदधिमंडोपमःपरः ॥ ६८१ ॥ यद्वत्तद्वद्धिजगतोमायैषापरतः स्थिता॥ मायायाःपरतोदेवोजगतोव्यापकोहियः॥ ६८२ ॥ गूढःसर्वेषुभूतेषुज्ञात्वातंशिवमद्वयं ॥ पाशाःसर्वेप्रहीयंतेकामक्रोधादिनिर्मिताः॥ ६८३॥ अंगुष्ठमात्रःपुरुषोयोमयापरिकीर्त्तितः॥ महात्माविश्वकर्मैषस्वयंज्योतिर्महेश्वरः॥६८४॥ मायाविश्वस्यजनिकाआत्मरूपायदातुसा॥ प्रलीयतेतमश्चैतन्नदिवाननिशापि च॥६८५॥ नसन्नैवाप्यसच्चैतत्शिवएवाक्षरस्तथा ॥ केवलोभासतेस्वस्यभासाद्वैतविवर्जितः॥ ६८६॥ तदक्षरंपरंब्रह्मगायत्र्याप्रतिपादितं॥ सवितुर्वरणीयंतज्जनकस्यमहात्मनः॥ ६८७॥

सप्तदशस्यार्थःप्रदर्श्यते अंगुष्ठेति योमहेश्वरःअंगुष्ठमात्रत्वेनहृदयाद्युपाधिवशादुक्तोबुद्धेर्मनसश्चसाक्षित्वप्रेरकत्वाभ्यांसिद्धःस्वयंप्रकाशश्चसविश्वकर्माविश्वानिसर्वाणिकर्माणियस्यतथाविधःअतएवमहात्मापूर्णोज्ञेयइत्यर्थः॥६८४॥विद्योपलक्षितमात्मरूपंप्रतिपादयतोऽष्टादशस्यार्थंनिरूपयति मायेति यदाविश्वकारणभूताआत्मरूपाआत्मसत्तयालब्धसत्ताकाचयामायातद्रूपंतमएतल्लौकिकंचतमःप्रलीयतेतदादिनंनिशास्थूलंसूक्ष्मंचएतेपदार्थान्नशिष्यंतेकिंतुकेवलःशिवएवस्वयंज्योतिर्भासतेइतिद्वयोरर्थः ॥ ६८५ ॥ ६८६॥ तदक्षरमिति तच्छुद्धमात्मरूपमक्षरमित्युक्तंतदेवचसवितृपदेनोक्तस्यजगत्कारणस्यसूर्यमंडलांतस्थस्यवरणीयमाराध्यंरूपंगायत्र्योक्तमित्यर्थः ॥ ६८७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवचाराधितंसद्बुद्धिप्रदमित्याह प्रज्ञेति तस्मादेवहेतोरियंप्रज्ञापुराणीअनादिसंप्रदायागतास्माकंजाताययासएषदेवःपुराणोजगत्कारणत्वोपलक्षिततत्पदार्थरूपःसाक्षात्कृतइत्यर्थः॥६८८॥ऊनविंशतितमस्यार्थमाह बुद्धिरितिद्वाभ्यां गुरोरुपदेशात्पूर्वमस्माकंबुद्धिस्तदाकारतयासमुत्पन्नाप्यूर्ध्वादिदिक्षुकोणेषुचभ्रांतापिचएनमात्मानंनाग्रहीत् इदानींगुरोरुपदेशानंतरंतुतमात्मानंसर्वत्रगृह्णातीत्यर्थः ॥ ६८९॥ कीदृशंतदात्मरूपमितिनप्रष्टव्यंतदुपमानाभावेनतदुत्तरस्यावचनीयत्वादित्याह नतस्येति प्रतिमाउपमानं तस्यनिरतिशयप्रेमास्पदत्वबो

प्रज्ञाचनिर्गतातस्मादस्माकंबुद्धिरूपिणी॥ पुराणीभगवान्सैषययास्माभिर्विलोकितः॥ पुराणःसर्वजगतः कर्त्तार्थस्तत्पदस्ययः ॥ ६८८ ॥ बुद्धिरेषासमुत्पन्नाप्युपदेशात्पुरागुरोः ॥ नैनमूर्ध्वंनसर्वासुदिक्षुमध्येपिनैव च॥ पर्यग्रहीदिदानींचगृह्णीतेसर्वतोपिच॥ ६८९ ॥ नतस्यप्रतिमालोकउपमार्थेत्रविद्यते ॥ महद्यशइदंनामयस्यास्तेत्रमहात्मनः ॥ ६९० ॥ विलोक्यतेनकेनापिरूपमस्यात्रचक्षुषा ॥ नैवतद्ग्रहणेयोग्यमानंदात्मस्वरूपतः॥ ६९१ ॥ हृदयस्थेनमनसामनोवृत्तिंनियम्यहि॥ विलोकयेत्प्रसादेनरुद्रस्यास्यमहात्मनः॥ ६९२॥ एवंसंप्रार्थ्यतंदेवमेकाग्रत्हृदयेस्थितं॥ जन्मादिविक्रियाशून्योभगवन्पाशमोचकः॥६९३॥

धकंमहद्यशइत्याकारंनामेति ॥ ६९० ॥ आत्मनोऽविषयतांबोधयतोविंशस्यार्थमाह विलोक्यतइतिद्वाभ्यां अस्यात्मनःस्वरूपंचक्षुरादिभिःकरणैर्नालोक्यतेयतस्तत्सदृक्पदोक्तायग्रहणाययोग्यंनभवतिअद्वयलक्षणानंदरूपत्वादित्यर्थः ॥ ६९१ ॥ हृदयस्थेनेति हृदयस्थंमनःकृत्वातद्वृत्तीर्निरुध्यचईश्वरानुगृहीतःकश्चिद्देवतंविलोकयेदिति ॥६९२॥ ईश्वरप्रसादहेतुप्रार्थनाभिनयपरमंत्यंमंत्रद्वयंतत्रप्रथमस्यार्थमाह एवमितित्रयोदशभिः सचसाक्षात्कारहेतुःप्रसादस्तंदेवंहृदयेस्थितंसन्निहितमेवंसंप्रार्थ्यलभ्यतेइतिसंबंधः एवंकथमित्याकांक्षायामाह जन्मादीत्यादि हेभगवन्भवान्जन्मादिविक्रियाशून्यत्वादस्माकंजीवानांपाशमोचनशक्तोभवतीत्यर्थः ॥ ६९३ ॥ ॥४७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहंत्वित्थंपाशबद्धोभयार्तोस्मीत्याह अग्नीत्यादिना यथाजीवन्नेवाग्निमध्यगतोजंतुर्दुःखीभवेत्तथाहंशरीरेदुःखाग्निमयेस्थितोदुःखितो स्मीति अतएवपशुवदस्वातंत्र्यात्तवपशुपतेरधीनोस्मीतिद्वयोरर्थः ॥ ६९४ ॥ ६९५॥ दशामिति मत्समोदीनोनास्तित्वत्समश्चोद्धरणक्षमः कृपालुर्नास्तीतियोग्यःसंबंधोविधिनाकृतइतिभावः॥६९६॥ईशंशपथेनबध्नाति यदीति यदिचवेदानांप्रामाण्यमसंकुचद्वृत्तियदिचशंकरः सुखप्रतानकत्वेनशंकरनामादेवःप्राणमोक्षाततःप्राणेजीवनावस्थायांमोक्षेचआततःपूर्णइतिप्रसिद्धं तत्रप्राणेतत्सांनिध्यंकोह्येवान्यात्कः प्राण्याद्यदेषआकाशआनंदोनस्यादितिश्रुतिर्दर्शयति मोक्षेतत्सांनिध्येतुयदाऽतमइत्यादिकाष्टादशमंत्रपूर्वार्द्धादीनिशतशोवाक्यानि तेन

अग्निमध्येयथाजंतुर्मरणेनविवर्जितः॥ प्राप्नोतिदुःसहंदुःखमहमेवंवपुःस्थितः॥६९४॥त्रिविधैर्दुःसहैर्दुःखैः पीडितोस्मिनिरंतरं॥तवाधीनःपशुर्नित्यमनीशःपुण्यपापयोः॥६९५॥ दशांदीनतमांप्राप्तोमत्तोनान्योस्तिक श्चन॥ कृपालुश्चतथात्वंतुनियंतापुण्यपापयोः॥६९६॥ यदिवेदाःप्रमाणानियदितिष्ठतिशंकरः॥प्राणमोक्षा ऽऽततःप्रोक्तंदुःखमेतद्विनाशय॥६९७॥ आर्तत्राणकरोयस्माद्वेदवाक्यान्मयाश्रुतः॥ भवानतःप्रपन्नोस्मिभ वंतंदीनवत्सलं॥ ६९८॥ अहंकश्चिन्नजानामिस्वात्मानमपिशंकर॥ दुःखमेकंविजानामिमातृहीनःशिशुः सुधीः॥ ६९९॥ अरण्येनिर्जनेसर्पव्याघ्रादिपरिवारिते॥ परित्यक्तोयथातद्वत्परंभयमुपागतः ॥ ७००॥

सत्येनहेभगवन्मेदुःखंनाशयेत्यर्थः प्राणमोक्षादितिपंचम्यंतपाठेप्राणमोक्षान्मरणात्पूर्वमितिशेषः ततःतेनसत्येनजीवतएवमेदुःखंनाशयेत्य र्थः॥ ६९७ ॥ आर्तेति यतोभवतआर्त्तानांदुःखितानांत्राणकरत्वंवेदवाक्यसमुदायादवगतमतस्त्वांप्रपन्नोस्मीत्यर्थः ॥६९८ ॥ ननुत्वंस्वय मेवात्मानंविचार्यनिर्दुःखोभवकिंमदनुग्रहेणेत्याशंकांवारयन्नाह अहमिति अहंकश्चित्कुत्रापिगुणिगणनायामगण्योस्मियतःस्वात्मानम पिनजानामि तर्हिकंजडोसीतिशंकांवारयति दुःखमित्यादिना यथाशिशुर्बालःसुधीःअतिमुग्धावस्थामतिक्रांतःसोपद्रवेनिर्जनारण्येप्रक्षि प्तोभीतःसन्दुःखमेवजानातितथाहमपिदुःखमात्रज्ञानोपक्षीणचैतन्यइतिद्वयोरर्थः ॥ ६९९ ॥ ७०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वप्रक्षेपस्थानस्यसंसारस्यसोपद्रवारण्यसाम्यमेवस्फुटयति क्षुत्पिपासेइतित्रिभिः अत्रसंसारारण्येक्षुत्तृड्रूपेपिशाच्यौदुःखयतः यौवनरूप महारण्यंप्रविष्टंचमांकंदर्परूपःसर्पोदशतिदंशविषेणमोहयति ॥ ७०१ ॥ इमेइति यत्रयौवनारण्येशब्दादिविषयरूपाष्टकानारीरूपाः काकाश्वममधर्मविवेकादिमयंशरीरंहंतुमायांति ॥ ७०२ ॥ क्रोधेति अत्रारण्येक्रोधरूपःसिंहोहृदयंगर्जितेनतापयतितथालोभस्तरक्षुः डाकिनीवाहनत्वेनप्रसिद्धोमृगविशेषश्चित्रोनानारूपोदर्शनेननेत्रतापकोवर्तते अतएवलुब्धंदृष्ट्वादातारोदृष्टिंपरिवर्त्तयंतीतिप्रसिद्धं तथा हंकाररूपोगिरिर्मदात्मरूपादित्यस्यप्रकाशंछादयतिविंध्याचलवदित्यर्थः ॥ ७०३ ॥ एवमादीति एवमादीनिसहस्राण्यसंख्यातानिरूपा

क्षुत्पिपासेपिशाच्यौद्वेबाधेतेमामहर्निशं ॥ यौवनंवनमाविष्टंसर्पःकंदर्पनामकः ॥ दशत्यतिविषोनित्यंप्रतीकारविवर्जितः ॥ ७०१ ॥ इमेशब्दादयस्तद्वद्वकाःसर्वत्रसंस्थिताः ॥ वधूकाकैश्चसहिताहंतुमायांत्यनेकशः ॥ ७०२ ॥ क्रोधसिंहस्यनादेनहृदयंपरिदूयते ॥ ममलोभोपिचित्रोयंतरक्षुर्नेत्रदाहकः ॥ रुणद्ध्यपिप्रकाशंचममाहंनामकोगिरिः ॥ ७०३ ॥ एवमादिसहस्राणिदुःखानिमयिसंतिभोः ॥ यानिश्रोतुंनचभवान्शक्तोतिकरुणाव्रतः ॥ ७०४ ॥ रुद्रयत्तेमुखंसौम्यमघोरंदक्षिणेस्तिहि ॥ दक्षंशिवतमंतत्तुगुरुरूपंमहेश्वर ॥ पाहितेनाघमांनित्यंवीतशोकंकुरुप्रभो ॥ ७०५ ॥ यावन्नोजायतेनैतद्ब्रह्मानंदःशुचापहः ॥ तावत्त्वंभगवान्मृत्युर्माहिंसीर्नोत्रकिंचन ॥ कुपितोयद्वदेतेषांनिहंसीशाखिलंप्रियं ॥ ७०६ ॥ रोगादिकंचमाभूयादपत्येषुसुतेषुच ॥ विशेषतोत्रनोदेवगवाश्वादिषुवासदा ॥ ७०७ ॥

णियेषांतादृशानिममदुःखानिसंतियानिश्रोतुंभवान्करुणावेगाकुलितत्वान्नसमर्थइत्यर्थः ॥ ७०४ ॥ रुद्रेति हेरुद्ररुत्पदोक्तदुःखस्यपरिहारकत्वाद्रुद्रसंज्ञयत्तवमुखानांतत्पुरुषाघोरसद्योजातवामदेवेशानाख्यानांपूर्वादिदिक्षुमध्येचक्रमेणस्थितानांमध्येदक्षिणंमुखमघोराख्यंदक्षमुपदेशेकुशलंचप्रसिद्धंतेनमांरक्षेत्यर्थः ॥ ७०५ ॥ मानइत्यादेरंत्यस्यार्थमाह यावन्नइतिपंचभिः यावन्नोस्माकमधिकारिणामिदमुक्तलक्षणंब्रह्मज्ञानंनजायतेतावदस्माकंप्रियंसुतादिरूपंमृत्युरूपःसन्माहिंसीः यथाइतरेषांपापिनांप्रियंहंसितथेत्यर्थः ॥ ७०६ ॥ रोगादिकमिति तथास्माकमपत्येषुविशेषतोमंत्रोपात्तेषुपुत्रेषुगवादिषुचरोगादिकंचित्तक्षोभकंमास्तु ॥ ७०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीरानिति तथावीरपदार्थान्पुत्रभ्रात्रग्निरूपांस्तथाभामिपदोक्तानुपकारकरान्राजादीनस्मत्तःप्रथमंमाहिंसीः तत्राग्नेर्वीरपदार्थत्वंवीरहावाएषदेवानांयोग्निमुद्वासयतेइतिश्रुतिसिद्धं नइत्यादिपदत्रयमुत्तरान्वयि ॥ ७०८ ॥ परंत्वेतत्प्रार्थनंत्वयिकरुणावरुणालयेस्वभावादस्माकंत्राणपरेऽनुवादभूतमित्याह नहिनस्तीति यतोभवानस्माकंप्रियंस्वयंनहिनस्तिनहंतिप्रत्युतायुर्ददाति ततःप्रार्थनापुनरुक्तिप्रायत्वादनुवादभूतेत्यर्थः ॥ ७०९ ॥ धनेति यथावासाधनसंपन्नाःसदमित्पदोक्तेसर्वकालेवयंपरिचर्यामाराधनंकुर्मस्तथाकुरु ॥ ७१० ॥ चतुर्थपंचमाध्यायव्याख्ययोःसमाप्त्यारंभौसूचयन्नाह एवमिति योदेवइत्थंस्तुतोभोगमोक्षप्रदस्तंपुनःपंचमाध्यायमंत्रानुसारेणवोयुष्मभ्यंवच्मि

वीरान्भ्रातॄन्सुतानग्नीन्राज्ञोवामत्प्रियानपि॥ अस्मत्तःपूर्वमेवैतान्माहिंसीर्नःस्वयंप्रियान्॥ ७०८॥ नहिनस्तिभवान्यस्माच्चित्रमायुर्ददातिच॥ ततोस्मद्विषयेनैवंसंप्रार्थ्यमिहविद्यते॥७०९॥धनधान्यादिसंपन्नावयंतेपरिचारकाः ॥ यथासुखेनतेकुर्मःपरिचर्यांतथाकुरु ॥ ७१० ॥ एवंसंप्रार्थितस्तेषांयोददातियतीश्वराः॥ भोगंमोक्षंचवोदेवस्तंभूयःकथयाम्यहं॥ ७११ ॥क्षराक्षरेइहप्रोक्तेविद्याविद्येमनीषिभिः ॥द्वेइमेब्रह्मसंबद्धेनिगूढेवेदपादपे ॥उभयोरेतयोरीशेकर्मज्ञानाख्ययोःशिवः ॥ ७१२ ॥ अविद्यापठ्यतेवेदेकर्ममार्गोविनश्वरः ॥ब्रह्मज्ञानार्थमेषोपिकृतोब्रह्मपरोभवेत् ॥ ७१३॥ ब्रह्मज्ञानंसदाब्रह्मपरंतद्विषयंयतः ॥ अमृतंमोक्षहेतुत्वाद्विद्यास्याच्चयथार्थतः॥ ७१४॥

शतशोपिपथ्यंवक्तव्यमितिन्यायादित्यर्थः ॥ ७११ ॥ अथप्रथमेषण्मंत्रास्तेत्पदार्थप्रतिपादकास्तेष्वाद्यस्यकर्मज्ञानमार्गयोःसंप्रदायप्रवर्तकत्वमीश्वरस्यदर्शयतोऽर्थमाह क्षराक्षरेइतिपंचभिः अनित्याभ्युदयफलकत्वेनक्षरपदोक्ताकर्मरूपाऽविद्यामोक्षहेतुर्विद्यात्वक्षरपदोक्ताद्वेअपिइमेब्रह्मणासंबद्धे यतःकर्मविद्यापिचित्तशुद्धिद्वाराब्रह्मप्राप्तिहेतुरितिभावः पुनःकीदृशे वेदवृक्षेपत्राच्छादितफलवद्गूढतयास्थिते अनयोरीशःप्रवर्तकःफलदश्चशिवएवेत्यर्थः ॥ ७१२ ॥ प्रथमंक्षरपदोक्तकर्मविद्यारूपाविद्यायाःपरंपरयामोक्षहेतुत्वमाह अविद्येति एषकर्ममार्गः ॥ ७१३ ॥ ब्रह्मज्ञानस्ययथार्थत्वेनविद्यापदोक्तस्यब्रह्मप्रापकत्वेनाक्षरत्वममृतत्वंचप्रसिद्धमेवेत्याह ब्रह्मज्ञानमिति यतस्तद्विषयंब्रह्माकारम् ॥ ७१४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभयोरुक्तरूपविद्याविद्ययोरनंतत्वंस्फुटयति कर्मेति यतःकर्मचविद्याचएतेस्वंस्वंफलमदत्वाननश्यतःकिंत्ववश्यंफलंददातेएवतेनहेतुना अनंतेइत्युक्तेइत्यर्थः ॥ ७१५ ॥ तयोरीशत्वंशिवस्यस्फुटयति विद्याविद्येइति हेसौम्यायतयःशिवस्यजीवेभ्यःसंसारिभ्योऽन्यस्यविलक्षणस्यप्रसादात्तयोःसिद्धिः ॥ ७१६ ॥ द्वितीयस्यार्थमाह चतुर्विधानामितित्रिभिः यःसर्वेषांजरायुजादीनांभूतानांबीजानिकललादिरूपाण्यधिष्ठायस्थितोयश्चसर्वभूतरूपेणयोनिपदोक्ततद्बीजरूपेणचविवर्त्तते ॥ ७१७ ॥ विचित्रेति विचित्रवर्णत्वेनकपिलपदोक्तंसर्वार्थदर्शकत्वेनऋषिपदोक्तंचहिरण्यगर्भंवेददानद्वाराज्ञानैर्नानाविषयैर्योबिभर्तितंचहिरण्यगर्भंजायमानंसृष्टिसमर्थंपश्यत्यालोचयतिसईश्वर

कर्मविद्येसदाऽनंतेनाऽदत्वास्वफलंनृणां॥ विनश्यतोयतस्तेनकीर्त्तितेमुनिपुंगवैः ॥ ७१५ ॥ विद्याविद्येइमेस्यातांशिवस्यैवप्रसादतः॥ मनुजानांसदासौम्यानान्यथाकर्हिचित्क्वचित् ॥ ७१६ ॥ चतुर्विधानांभूतानांयोबीजान्यधितिष्ठति॥ यश्चसर्वाणिभूतानिबीजानिचमहेश्वरः॥ ७१७॥ विचित्रवर्णंकपिलमृषिंसर्वार्थदर्शकं॥ हिरण्यगर्भंप्रथमंजातंविश्वस्यकारणं॥ ७१८ ॥ईश्वरःसभवेन्नित्यंयस्तंज्ञानैर्बिभर्त्यपि ॥ दत्वातुचतुरोवेदाननेकार्थसमन्वितान् ॥ जायमानंचतंस्वस्माद्यःपश्यतिसईश्वरः॥ ७१९॥ चतुर्विधानांभूतानामेकैकंबहुधाऽव्ययः॥ जालवत्कुरुतेनानायोनिभेदैरनेकशः॥ ७२० ॥भूयश्चसकलंस्वस्मिन्क्षेत्रेससंहरत्ययं॥ नानाविधंततस्तद्वत्स्रष्ट्वादेवोमहेश्वरः॥ सर्वाधिपत्यंस्वस्यायंमहात्माकुरुतेतथा॥ ७२१ ॥ प्रकाशयन्दिशःसर्वास्तिर्यगूर्ध्वमधस्तथा ॥ अनड्वानिवयात्येषरविर्विश्वधुरंवहः ॥ भ्राजतेतेजसास्वेनलोकानुग्रहकारकः ॥ ७२२ ॥

स्तत्पदार्थौबोध्यइतिद्वयोरर्थः ॥७१८॥ ७१९ ॥ तृतीयस्यार्थंनिरूपयति चतुर्विधानामिति जरायुजांडजस्वेदजोद्भिज्जरूपंयोनिचतुष्टयंप्रत्येकंबहुधाएकविंशतिलक्षविधंकुर्वन्अनेकशोऽवांतरभेदैर्योगेनसाधर्म्येणजालसमंयःकरोतीत्यर्थः॥ ७२०॥ भूयश्चेति भूयःप्रलयकालेसकलंसृष्टंस्वकीयेक्षेत्रेमायारूपेसंहरतिततःपुनःसृष्टिकालेनानाविधंपूर्ववत्स्रष्ट्वाव्यत्ययेनद्वितीयाबहुवचनस्थानीयप्रथमाबहुवचनांतपतिपदोक्तान्दिक्पालांदीश्वस्रष्ट्वास्वस्यसर्वाधिपत्यंप्रकटयतिसोयमीश्वरइत्यर्थः ॥ ७२१ ॥ चतुर्थपंचमयोरर्थमाह प्रकाशयन्निति षड्भिः यश्चानड्वान्वृषभइवविश्वभारंवहन्रविरूपोभूत्वासर्वादिशःप्रकाशयन्यातिभ्रमतिस्वेनतेजसाराजतेचलोकानुग्रहाय ॥७२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति एवंतथाचतुर्विधानांभूतानामेकैकमितिश्लोकोक्तेनप्रकारेणनानाविधाननेकान्योनिस्वभावानधिष्ठायतिष्ठति ॥ ७२३ ॥ भगवानिति तथायंभगवान्ऐश्वर्यादिसंपन्नोवरणीयआराध्यःस्त्रीपुरुषादीनांस्वभावान्पूर्वसंस्कारानुरोधिचित्तवृत्तिविशेषरूपान्संतत्यादिप्रयोजकानधितिष्ठतिपाकंफलाभिमुखंनयतिच ॥ ७२४ ॥ विश्वेति तथायंविश्वस्यकारणभूतोभगवानेतान्नानायोनिदेहान्पूर्वान्पूर्वावस्थाशालिनःपरिणामयेदुत्तरावस्थांनयेत् यतईश्वरप्रयुक्तपरिणामिस्वभावादयंदेहोबालादिवृद्धांतरूपोभवतीत्यर्थः ॥ ७२५ ॥ तस्य सर्वाधिष्ठातृत्वेकैमुत्यन्यायंदर्शयति किंबहूक्तेनेति तस्याधिष्ठातृत्वंप्रतिअभिलक्ष्यबहुनाविशेषतउक्तेनकिं यतोयस्याऽस्यविश्वस्यजग

एवमुक्तप्रकारेणदेवएकोमहेश्वरः॥ नानाविधाननेकांस्तुस्वभावांश्चाधितिष्ठति॥ ७२३ ॥ भगवान्वरणीयोयंपाकंनयतिसर्वतः॥ स्त्रीपुंसादिस्वभावांस्तान्प्रजोत्पत्त्यादिहेतुकान्॥ ७२४॥ विश्वयोनिस्तथैवैतान्पूर्वांश्चपरिणामयेत् ॥ यतोभवतिबालोयंयुवावृद्धश्चसोपिहि ॥ ७२५ ॥ किंबहूक्तेनतस्यात्रव्यधिष्ठातृत्वमस्यहि॥ प्रतिसर्वाणिभूतानिगुणैश्चसहितान्यपि॥ ७२६॥ विश्वस्यसंतियस्यात्रगर्भेतदधितिष्ठति॥अधिष्ठायचसर्वाणिव्यापारेष्वपियोजयेत्॥ ७२७॥ एकएवपुमान्ब्रह्मनित्यंसर्वस्यकारणं॥ जानाम्यहंहितद्ब्रह्मवेदगुह्यंसनातनं॥ नानाज्ञानेषुसंगूढंस्वयंज्योतिःस्वरूपकं॥७२८॥ जानातिभगवान्ब्रह्मायश्चलोकस्यकारणं॥ रुद्रप्रसादतश्चान्येजानंतिचमहाधियः॥ वेदकारणमीशानंसर्वज्ञंचस्वयंप्रभं॥ ७२९ ॥

तोगर्भेउक्तानिस्वभावलक्षणगुणसहितानिभूतानिसंतिवर्त्तंतेतद्विश्वमेवसईशोधितिष्ठतिअधिष्ठायचसर्वाणिविश्वांतर्गतानिभूतानिस्वस्वव्यापारेषुयोजयतीतिद्वयोःसंबंधः ॥ ७२६ ॥ ७२७ ॥ षष्ठस्यार्थमाह एकएवेतित्रिभिः सउक्तलक्षणःपुमान्सर्वस्यकारणत्वादभिन्ननिमित्तोपादानत्वाद्ब्रह्माद्वितीयोभवतितद्ब्रह्माहंश्वेताश्वतरनामावेद्मि कीदृशं वेदगुह्यंउपनिषद्भागेनप्रदर्शितं पुनःकीदृशं लौकिकघटादिज्ञानेष्वपिस्वयंप्रकाशचिद्रूपेणस्थितं गूढंमूढैरलक्षितं ॥ ७२८ ॥ जानातीति तज्जगत्कारणंतत्त्वंरुद्रानुग्रहात्ब्रह्माहिरण्यगर्भःअन्येचसुधियोजानंति कीदृशं वेदकारणतयास्फुटीकृतसर्वज्ञताकं ॥ ७२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवाइति देवादयोन्येचदेहिनोयेयेतत्तत्वंविदुर्जानंतिस्मतेतेऽमृतत्त्वंगताः ॥ ७३० ॥ अथसप्तमादयोद्वादशांतामंत्रास्त्वंपदार्थतयात्मानंप्रति पादयंतीतिसूचयंस्तेषांक्रमेणार्थमाह कामेत्यादिनादेहानांग्रहणेइत्यतःपूर्वग्रंथेन यःपुरुषोजीवतामापन्नःसन्कामादिरूपान्सत्वरज स्तमइत्याकारान्वागुणानुपाधिगानन्वेतिभजते यथाजलंस्वसंयोगिवन्हिपुष्पादीनांधर्मानौष्ण्यगंधादीन्भजतितथेत्यर्थः ॥ ७३१ ॥ तादात्म्यमिति गुणैस्त्रिगुणात्मकैरुपाधिभिस्तादात्म्याध्यासंप्राप्यरागादिदृष्टद्वाराकर्माणिकरोतिअदृष्टद्वाराचकर्मणांफलानिकृत्वातेनउ पाधितादात्म्याध्यासेनैवकर्मफलानांभोक्ताभवति कीदृशः वस्तुतएकोमहेश्वरः पुनःकीदृशः नानारूपैःसत्वादिगुणैस्तादात्म्याध्यासाद्वि

देवाश्चमुनयोयेन्येब्रह्माहमितिदेहिनः ॥ तद्विदुस्तन्मयाभूत्वातेऽमृतत्वंहिभेजिरे ॥ ७३० ॥ कामक्रोधादिका न्नित्यंतथासत्वादिकानपि ॥ योऽन्वेतिपुरुषोनीरंयद्वदौष्ण्यादिकान्गुणान् ॥ ७३१ ॥ तादात्म्यंचगुणैःप्राप्यक र्माणिकुरुतेभुवि ॥ फलानामपितेनैवभोक्ताभवतिचेश्वरः ॥ ७३२ ॥ कर्त्ताचतद्वदेवैषफलस्यैकोमहेश्वरः ॥ विश्वरूपःसत्वरजस्तमोगुणसमन्वितः ॥ ७३३ ॥ उत्तमंमध्यमंमार्गमधमंचसमाव्रजन् ॥ प्राणाधिपःकृतै स्तेनकर्मभिर्यातिसर्वतः ॥ ७३४ ॥ हृदयेनसमोभूत्वासर्वमानातिगःपुमान् ॥ अंगुष्ठमात्रोरविवत्स्वयंज्यो तिःप्रकाशते ॥ ७३५ ॥ अहंसंकल्पसंयुक्तोगुणैर्बुद्धिकृतैःसदा ॥ आत्मनारचितैस्तद्वत्स्वप्नदृष्टसमैरपि ॥ ७३६ ॥

श्वरूपोनानारूपइतिद्वयोरर्थः फलस्येत्येकत्वंजातौ ॥ ७३२ ॥ ७३३ ॥ उत्तममिति तथायमात्माप्राणाधिपःप्राणतादात्म्यापन्नःसंस्ते नप्राणेनक्रियाशक्तिरूपेणकृतैःकर्मभिर्देवयानपितृयाणक्षुद्रजंतुभावरूपमुत्तमादिमार्गत्रयंगच्छन्सर्वतोयातिभ्रमति ॥ ७३४ ॥ अष्ट मार्थमाह हृदयेनेतित्रिभिः तथायंपुमान्सर्वपरिच्छेदातिगतोपिहृदयदेशधर्माध्यासादंगुष्ठपरिमाणोभवतितथाहमाअहंकारेणसंकल्पेन मनोधर्मेणचसहितस्तथाबुद्धेर्गुणैर्धर्मैर्वृत्तिरूपैःपरिणामैः कीदृशैः आत्मनाप्यविद्याशबलेनविवर्त्तोपादानतयारचितैरतएवस्वप्नदृष्टसमैः साक्षिणमंतराभानानर्हैर्युक्तस्तद्भासकतयालोचितःसन्रविवत्स्वयंज्योतिष्ट्वेनाविर्भवतीतिद्वयोरर्थः एतेनबुद्धिगुणात्मगुणपदयोःसामा नाधिकरण्यंसूचितं ॥ ७३५ ॥ ७३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुरीयपादार्थमाह बुद्धेरिति तथायंपुमान्बुद्धेरल्पंपरिमाणमादायतत्रबुद्धौस्थितःप्रतिबिंबितःसन्आराग्रमग्रभेदिनीतदग्रतुल्यपरिमाणो भवति एवंजीवतांगत्वाबुद्ध्याऽवरोनिकृष्टोपिसन्मनीषिभिर्विवेकिभिर्नास्तिवरोयस्मादितिव्युत्पत्त्याऽवरपदोक्तेनसर्वोत्कृष्टत्वेनदृष्टइत्यर्थः ॥ ६३७ ॥ नवमार्थंदर्शयति बुद्धाविति त्रिभिः तस्यांसूक्ष्मतायामुपलक्ष्यायांसत्यांसूक्ष्मतायाउपलक्षणार्थं ॥ ७३८ ॥ केशांतइति केशस्यांतोऽग्रभागःसकेशभागोयावान्यत्परिमाणः ॥ ७३९॥ यदात्वयमात्मानंब्रह्मत्वेनजानातितदानंतोभवतीत्याह ब्रह्मेति ॥ ७४०

बुद्धेरल्पप्रमाणत्वात्तत्रस्थःपुरुषोमहान् ॥ आराग्रमात्रोभवतिबुद्ध्यादृष्टोमनीषिभिः ॥ निकृष्टोजीवतांगत्वा सर्वोत्कृष्टःपरःपुमान्॥ ७३७ ॥ बुद्धौस्थितस्यजीवस्यसूक्ष्मतायेहविद्यते ॥ तस्यांमानमिदंप्रोक्तंविद्वद्भिःसूक्ष्मदर्शिभिः ॥ ७३८ ॥ केशांतःशतधाभिन्नःपुनश्चशतधाकृतः ॥ सयावांस्तावतातुल्योजीवोज्ञेयोमनीषिभिः ॥ ७३९ ॥ ब्रह्मविज्ञानउत्पन्नेबुद्ध्युपाधिपरिक्षयात्॥ सएवानंतरूपःस्याज्जीवोब्रह्मात्मरूपतः ॥ ७४० ॥ आत्मानस्त्रीपुमान्नापिनैवचायंनपुंसकः ॥ यद्यच्छरीरमादत्तेतत्तत्स्यान्नटवत्पुमान् ॥ ७४१ ॥ बाह्यैर्विषयजैर्भोगैरांतरैश्चसुखेच्छया ॥ अन्नपानादिसंप्राप्यावृद्धिमेतिचजायते ॥ ७४२ ॥ पुण्यापुण्याभिधंकर्मनिमित्तमिहतद्भवेत् ॥ जन्मवृद्ध्यादिकेकार्येसर्वदैवयतीश्वराः ॥ ७४३ ॥

दशमस्यार्थमाह आत्मेति आत्मास्वतःस्त्रीत्वादिहीनोपितत्तद्देहतादात्म्याध्यासरूपाऽविद्ययैवस्त्रीत्वादिभागीभवति ॥ ७४१ ॥ एकादशार्थउच्यते बाह्यैरितिचतुर्भिः तथायमात्माऽविद्ययास्वरूपानंदंविस्मृत्योपाधिरूपमात्मानंमन्यमानःसुखेच्छयाकृतैर्दर्शनस्पर्शनादिजन्यैर्बाह्यैःसंकल्पादिजन्यैरांतरैश्चभोगैर्होमपदोक्तैःशब्दादीन्विषयानन्येइंद्रियाग्निषुजुह्वतीतिभगवद्गीतोक्तैस्तथान्नप्राशनातथांबुवृष्टिपदोक्तयापानप्राप्त्याचवृद्धिमेतिदेहादिषुवृद्धिप्राप्तवत्त्वात्मनोवृद्धिमन्यतेजायतेचतत्तद्वासनावासितोजन्मानिलभतेचेत्यर्थः ॥ ७४२ ॥ एषुजन्मादिषुकर्मापिनिमित्तमित्याह पुण्येति स्पष्टं ॥ ७४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहविशेषलाभेतत्तल्लोकलाभेचकर्मनिमित्तमित्याह कर्मानुसारतइति समाप्तिःसम्यक्प्राप्तिस्तदर्थंनपुंसकादिसंज्ञाश्रयान्देहांस्तत्रतत्र स्थानेलोकेक्रमेणप्रयातिएवंनानाजनौनानाविधजन्मसुयातिभ्रमतीतिद्वयोःसंबंधः ॥ ७४४ ॥ ७४५ ॥ द्वादशार्थउच्यते स्थूलानि तिद्वाभ्यां अयमात्मायन्त्रटवत्स्थूलान्गजादिदेहान्सूक्ष्मान्पुत्तिकादिदेहान्प्रयाति तत्रत्वपदोक्तायाबुद्धेर्गुणानांसमावेशःसंसर्गोपिहेतु रित्यर्थः ॥ ७४६ ॥ नकेवलमुक्ताएवसंसरणहेतवःकिंतुनिकृष्टत्वप्रयोजकंस्वरूपाज्ञानमप्यन्यन्मुख्यंनिदानंबोध्यमित्याकारमुत्तरा र्धार्थमाह निकृष्टत्वमिति निकृष्टत्वंकार्पण्यलक्षणनिकृष्टत्वप्रयोजकंकारणमज्ञानंसमाप्यस्वस्मिन्कल्पयित्वाएकादशेंद्रियैर्ज्ञानकर्मेंद्रि

कर्मानुसारतश्चात्मासुखदुःखसमाप्तये ॥ अनुक्रमेणसंसारेयातिदेहाननेकशः ॥ ७४४ ॥ नपुंसकस्यवादेवःस्त्रियोवापुरुषस्यवा ॥ भूमिस्वर्गादिकेस्थानेयातिनानाजनौपुमान् ॥ ७४५ ॥ स्थूलानपिचसूक्ष्मान्सबहून्देहान्प्रयात्यपि ॥ बौद्धैर्गुणैःसमाविष्टोनटवत्पुरुषःपरः ॥ ७४६ ॥ निकृष्टत्वंसमाप्यैवजीवोभवतिकारणं ॥ एकादशेंद्रियैःसार्द्धंतादात्म्यंसमुपागतः ॥ देहानांग्रहणेहेतुःसर्वसंगविवर्जितः ॥ ७४७ ॥ अनाद्यनंतएवायंसूक्ष्मोयःकललस्थितः ॥ उक्तोमयापुरातस्यनास्तिनाशोजनिस्तथा ॥ अस्यविज्ञानतःपाशच्छेदःपूर्वंमयेरितः ॥ ७४८ ॥ प्राणःप्रतर्दनायोक्तोयःपुरेंद्रेणसत्वयं ॥ अहंब्रह्मेतिबोधेनग्राह्योभावाभिधेनहि ॥ ७४९ ॥

यमनोरूपैःक्रियागुणात्मगुणपदाभ्यामुक्तैस्तादात्म्यंप्राप्तःसन्वस्तुतःसर्वसंगविवर्जितोप्यात्मातेषांदेहानांग्रहणेहेतुर्भवतीत्यर्थः ॥ ७४७ ॥ एवंत्वंपदवाच्यार्थउक्तोऽथतस्यलक्ष्यार्थंतत्पदार्थाभेदेनदर्शयतित्रयोदशोमंत्रस्तदर्थउक्तप्रायइत्याह अनाद्यनंतइति यतोजन्मनाशौनस्त स्ततोऽनाद्यनंतोयःकललादिसर्वबीजस्थितःपुरुषउक्तस्तद्रूपएवायंतत्पदार्थस्तद्विज्ञानफलंसर्वपाशच्छेदरूपमपिपूर्वमुक्तमित्यर्थः ॥ ७४८ ॥ ऐक्यपरस्यचतुर्दशस्यार्थमाह प्राणइति यइंद्रेणप्रतर्दनायप्राणत्वेनोक्तःसआत्माभावपदोक्तेनाहंब्रह्मेत्याकारकबोधेनलभ्यतइत्यर्थः मंत्रप्रथमार्द्धेनअन्प्राणःईडेनईड्येनेंद्रेणआख्यानिरूपणंयस्येत्याकाराऽनीडाख्यपदव्युत्पत्तिःसूचिता ॥ ७४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथायमेवात्माप्रश्नोपनिषत्प्रसिद्धानांकलानांस्रष्टेत्याह प्राणमितिद्वाभ्यां प्राणआत्मनउत्क्रमणादिसाधनंश्रद्धाचिकीर्षारूपापंचमहाभूतानिएवंसप्तइंद्रियाणांदशकमेकंमनोनवमंअन्नंदशमंततोवीर्यंसामर्थ्यंततस्तपस्ततोमंत्राःस्मर्यमाणास्त्रयोदशास्ततःकर्मयागादिरूपंततोलोकाःफलानिततस्तेषांलोकानांनामषोडशं एताःकलाउत्तरोत्तरंप्रतिकारणभूताःससर्जेतिद्वयोरर्थः ॥ ७५० ॥ ७५१ ॥ यस्मादिति उक्तकलाहेतुत्वादेवयावद्दृश्यस्यभावाभावयोरुदयास्तमययोर्हेतुर्भवतिततश्चाद्वितीयत्वादानंदादिरूपइत्यर्थः ॥ ७५२॥ एवंज्ञानफलमाह य

प्राणंश्रद्धांचभूतानिमहांतिदशकंतथा॥इंद्रियाणिमनश्चैवतद्वदन्नंशरीरिणां ॥ ७५० ॥ वीर्यंतपश्चमंत्राश्च कर्मलोकान्सनामकान् ॥ कलाएताःससर्जादौसर्वदेहस्थितोहियः ॥ ७५१ ॥ यस्मात्कलाकरस्तस्माद्भावाभावकरःशिवः ॥ आनंदात्मास्वयंज्योतिर्मंगलानांहिमंगलं ॥ ७५२ ॥ यएनंपरमात्मानंज्ञातवंतोमुनीश्वराः॥ देहंसकारणंतेत्रत्यक्तवंतोयतीश्वराः॥ ७५३॥ एषएवंमयादेवःकारणंपरिकीर्तितः॥ परपक्षव्युदासेन पुनरेवंवदामिवः ॥ ७५४॥ कालस्वभावमुख्यान्यान्हेतून्केचिद्वदंतिये ॥ कवयस्तेपरंनैतेवेदार्थपरिनिष्ठिताः ॥ ७५५॥ वेदार्थेनिर्णयंकर्त्तुंनशक्ताःकर्हिचिद्द्विजाः ॥ मोमुह्यमानाजल्पंतिजात्यंधसदृशंबहु ॥ ७५६ ॥ न तेषांवचनंक्वापिग्राह्यंवेदार्थकोविदैः॥ मानहीनंविहीनंचयुक्त्यातद्वयतीश्वराः॥ ७५७॥

एनमिति सकारणंदेहंशरीरत्रयरूपंबंधमितियावत् ॥ ७५३ ॥ पंचमषष्ठाध्यायव्याख्ययोःसमाप्त्यारंभौसूचयति एषएवमिति एष देवएवमागमधियापंचमाध्यायउक्तोऽथपुनःषष्ठेपरपक्षनिरासयुक्तिपूर्वकमेवंवक्ष्यमाणविधयावच्मि ॥ ७५४ ॥ तत्रस्वभावमित्यादेः प्रथमस्यार्थमाह कालेत्यष्टभिः केचित्कवयःकालादिरूपान्जगद्धेतून्वदंतिपरंतुतेएतेकालादिकारणवादिनोवेदार्थेपरिनिष्ठितानिष्णातानभवंति ॥ ७५५ ॥ वेदार्थइति यतस्तेवेदार्थेऽतिगंभीरेनिर्णेतुमशक्ताअतएवमोमुह्यमानाव्यामोहंगताःसंतोयत्किंचिद्बहुजल्पंति ॥ ७५६ ॥ तत्त्वविद्भिस्तेषांवचनंनग्राह्यंमानयुक्तिभ्यांहीनत्वादित्याह नतेषामिति ॥ ७५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रमानहीनतांस्फुटयति कालादीति कालादयोजगत्कारणमित्यत्रार्थेवेदवाक्यरूपंप्रत्यक्षंतावन्नैवास्ति लौकिकप्रत्यक्षमपितत्रनास्तिजग
त्कारणस्यैंद्रियायोग्यत्वात् एवंप्रत्यक्षरूपमूलाभावेअनुमानंस्मृतिरूपंतर्करूपंवानप्रवर्तेतनिर्मूलस्यकुत्राप्यप्रामाण्यादित्यर्थः॥७५८॥ यु
क्तिहीनतांस्फुटयति कालादीनिचेति कालादीनिहिजडान्येवकारणतयाकल्प्यानि जडानांस्वातंत्र्येणहेतुत्वंतुबाधितमित्यर्थः ॥ ७५९ ॥
॥५२॥ जडमिति किंचजडत्वस्यकार्यत्वव्याप्यतायादर्शनात्कालादीनामपिकिंचित्कारणांतरंकल्प्यंस्यात् तथाचतद्धेतोरेवहतुत्वमस्तुकिंतेनेति
न्यायेनमूलकारणस्यैवहेतुत्वमुचितंनकालादीनामिতিতন্मतंयुक्तिहीनमित्यर्थः नचतैर्जडत्वस्यश्रुतिसिद्धमायायांव्यभिचारःशंक्यः तैःश्रु

कालादिकारणेनास्तिवेदवाक्यंयतीश्वराः॥ प्रत्यक्षंजगतोयःस्यात्कारणंतन्नविद्यते॥ अनुमानंततोनास्तिमू
लहीनत्वहेतुतः॥ ७५८॥ कालादीनिचकल्प्यानिजडान्येतानिकारणम् ॥ चेतनेनविनानैवभवंत्यत्रतुकर्हि
चित् ॥ ७५९॥ जडंसर्वंभवेत्कार्यंकालादिचजडंतथा॥ ततःकारणतातेषांयुक्तिहीनायतीश्वराः ॥ ७६० ॥
नाश्चर्यमिदमत्रैषांमूढानांभाषणंमुहुः ॥ स्वयंज्योतिःस्वरूपस्यमहिमात्रायमद्भुतः ॥ संसारचक्रमखिलंभ्रा
म्यतेयस्यमायया ॥ ७६१ ॥ वायुनाभ्राम्यतेयद्वत्तूलंनभसिसर्वतः ॥ तद्वद्बुद्धिमतांबुद्धीर्भ्रामयत्येषदेहिनां
॥ ७६२॥ येनावृतमिदंसर्वंसर्वदाज्ञानरूपिणा॥ कालकालोगुणैर्युक्तःसर्ववित्कर्मणांप्रभुः॥७६३॥ पंचभू
तस्वरूपेणविवर्त्तंयोधिगच्छति॥ चिन्तनीयःससर्वात्मासर्वदामुक्तिकामिना॥ ७६४॥

त्यर्थाननुसरणादितिभावः ॥ ७६० ॥ ननुवेदरूपादित्येभास्वतिकथंतेषामेवंव्यामोहइतिचेन्न ईशमायाचरितस्यापर्यनुयोज्यत्वादित्या
ह नाश्चर्यमिति इदंबहुभाषणमत्रकारणत्वेतेषांवादिनांयद्दृश्यतेतन्नाश्चर्यंयत्स्वयंप्रकाशस्यदेवस्यमायाविनोद्भुतोमायालक्षणोमहिमा
॥ ७६१ ॥ ईशेनमाययाजगद्भ्रामणंसदृष्टांतंदर्शयति वायुनेति स्पष्टम् ॥ ७६२ ॥ द्वितीयार्थमाह येनेतिद्वाभ्यां येनेश्वरेणज्ञानरूपेणे
दंसर्वंविश्वमावृतंवेष्टितं यश्चकालस्यापिकालःस्वस्मिन्नुपसंहारकः गुणैःसत्यकामत्वादिभिर्युक्तः सर्ववित्सर्वज्ञः कर्मणांप्रभुःफलदः
आकाशादिभूतपंचकरूपेणविवर्तंअतात्त्विकान्यथाभावंगंताचसईश्वरःसर्वदामुमुक्षुणाचिंत्यइतिद्वयोरर्थः श्रुतौचिंत्यमित्यत्रलिंगव्यत्य ॥५२॥
यस्तुच्छांदसः ॥ ७६३ ॥ ७६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयार्थमाह ईश्वरइतित्रिभिः ईश्वरपदंपूर्वान्वितत्वेनदर्शितं मुमुक्षुःप्रथमंशुद्धेनफलाभिसंधिरहितेनमनसाकृतैर्यागादिकर्मभिश्चित्तशुद्धिसंपाद्यततःसमनसामिंद्रियाणांस्वस्वव्यापारेभ्योनिवृत्तिंचसंपाद्यवक्ष्यमाणाविद्यादितत्त्वेभ्यःपरंवस्तुतःकालत्रयेप्यसंबद्धमात्मतत्त्वं जानीयादित्यर्थः एतेनात्मतत्त्वस्यतत्त्वांतरेणायोगंसमेतिजानातीत्याकारकस्तुरीयपादार्थःसूचितः ॥७६ ५॥ उक्तंस्फुटयंस्तत्त्वांतराण्येकादिरूपेणदर्शयति अविद्ययेति अयुक्तमितिच्छेदः अविद्यारूपेणएकेनतत्त्वेनायुक्तंसदाऽसंबद्धमेवंपुण्यपापाभ्यांसत्वादिगुणरूपैस्त्रिभिःपंचमहाभूतानितत्कारणमव्यक्तंबुद्धिरहंकारश्चएतैर्भगवद्गीतोक्तैरष्टभिः अथवाऽपरैर्महातियहादिरूपैरष्टभिस्तत्त्वैःषडष्टकपदव्याख्यानेद

ईश्वरःशुद्धमनसाकृत्वायज्ञादिकाःक्रियाः ॥ व्यापारेभ्यःपुनःकृत्वानिवृत्तिंमनसासह ॥ इंद्रियाणांविजानीयादविद्यादेःपरंस्थितं ॥ ७६५ ॥ अविद्ययैकयाऽयुक्तंपुण्यपापद्वयेनवा ॥ त्रिभिःसत्वादिभिर्वापिमहाभूतैःसकारणैः ॥ ७६६ ॥ बुद्ध्याहमाष्टभिर्वापिसंसारेवापरैरपि ॥ कालेनचतथाबुद्धिगुणैःसूक्ष्मतमैरपि ॥ ७६७ ॥ कृत्वाकर्माणिसर्वाणिगुणैश्चविविधैःसह ॥ भावांश्चविविधांस्तद्वद्योयोजयतिनित्यशः ॥ ७६८ ॥ व्यापारेषु निजेष्वेकःसुखदुःखप्रसिद्धये ॥ तेषामात्मकृतानांस्यादभावेकर्मणांक्षयः ॥ ७६९ ॥ कर्मक्षयेपरंब्रह्मयाति तेभ्यःसदापरः ॥ आत्मरूपंततःस्वात्मज्ञानादेषमहेश्वरः ॥ ७७० ॥ सर्वस्यास्यपुरादेवःस्थितोऽविद्याश्रयःपुमान् ॥ अविद्यायाश्चसंयोगेचेतनत्वेनकारणं ॥ ७७१ ॥

शितैरयुक्तंतथाकालेनतदवच्छेदकेनात्मपदोक्तबुद्धिधर्मैश्चायुक्तमितिद्वयोरर्थः ॥ ७६६ ॥ ७६७ ॥ पुनर्विवेकिनोमोक्षप्रकारमेवविशदयतश्चतुर्थस्यार्थमाह कृत्वेतित्रिभिः यएषमहेश्वरआत्मानानाकर्माणित्रैगुण्याभिमानेनकृत्वाबाह्याभ्यंतरान्भावांस्तत्तद्व्यापारेषुयोजयति सएवयदातेषांबाह्याभ्यंतरभावानांस्वस्वरूपेअभावमालोचयतितदाकर्मणांक्षयोज्ञानाग्निनादाहोभवतिततस्तेभ्योभावेभ्यःपरोविविक्तःसन्स्वात्मरूपंब्रह्मज्ञानबलाद्यातीतित्रयाणांसंबंधः ॥ ७६८ ॥ ७६९ ॥ ७७० ॥ ईशस्यजगत्कारणत्वादिनाऽद्वयत्वादिकंदर्शयतःपंचमस्यार्थउच्यते सर्वस्येतित्रिभिः यःपुमानस्यकार्यजातस्यपुरापूर्वकालेमायाशवलरूपेणकारणतयास्थितस्तथाऽविद्यायाःसकार्यायाश्चेतनत्वेनसंयोगश्चिदाभाससंबंधेनचेतनायमानतेतियावत् तत्रचकारणंभवति ॥ ७७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालेति यश्चमहात्मभिःकालत्रयानवच्छिन्नोवर्णिताभिःप्राणादिषोडशकलाभिर्हीनत्वलक्षणेनशुद्धरूपेणसाक्षात्कृतः ॥ ७७२ ॥ तंदेवमादावुपास्यज्ञानोदयद्वारावहवःस्वंब्रह्मात्मरूपंगताइत्याह तंविश्वरूपमिति स्पष्टम् ॥ ७७३ ॥ षष्ठार्थंदर्शयति संसारेतिपंचभिः यःसंसारवृक्षात्कालादविद्यायाश्चपरतःस्थितोयतस्तद्भिन्नोयश्चविश्वोपादानंस्मरणेनधर्मदःपापहाच ॥ ७७४ ॥ ऐश्वर्यस्येति यश्चैश्वर्यादिषट्रूपस्यउत्पत्त्यादिषट्कूरूपस्यवाभगपदार्थस्यईशःकर्तुमकर्तुमन्यथाकर्तुंचशक्तोमरणादिहीनःसर्वेषामंतस्थश्चेतित्रयाणांसंबंधः तत्रागतिः

कालत्रयादतीतश्चप्राणाद्याभिर्विवर्जितः॥ कलाभिःसकलाभिःसदृष्टःपूर्वैर्महात्मभिः ॥ ७७२ ॥ तंविश्वरूपं सर्वात्मभूतमीड्यंसुरासुरैः॥ स्वचित्तेषुस्थितंदेवमुपास्यादौस्वमागताः ॥७७३॥ संसारकालाविद्यानामन्योयःपरतःस्थितः॥ विश्वंप्रजायतेयस्माद्धर्मदःपापहापुमान्॥ ७७४ ॥ ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः॥ ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरितं॥७७५॥ उत्पत्तिःप्रलयश्चैवभूतानामागतिर्गतिः॥विद्याचैवाप्यविद्याचषट्कंचेदंभगःस्मृतः॥७७६॥ तस्येशःकर्मणांस्वामीमरणादिविवर्जितः॥ प्राणिनांहृदयावासःस्वयंज्योतिःसदाद्वयः॥७७७॥ विश्वस्यस्थानकंतद्वत्प्रकाशस्यप्रकीर्तितः॥ यस्तंविज्ञायपुरुषःकृतकृत्यःप्रजायते ॥७७८॥ तमीश्वराणांपरमंमहेशानंतथैवच॥ देवतानांपरंदेवंपतीनांपरमंपतिम्॥७७९॥ जानीमोयतयःसर्वेवयमीड्यंसुरासुरैः ॥भुवनानांनियंतारंस्वयंज्योतिषमद्वयं ॥ ७८० ॥ईशाब्रह्मादयःप्रोक्तादेवतावासवादयः॥ पतयश्चमरीच्याद्याभुवनानिचतुर्दश॥ ७८१॥ नियंतैषांपरोयस्मादात्मानान्योयतीश्वराः॥ अतएवनंविजानीमोवयंवेदप्रमाणतः॥ ७८२॥

परलोकादवरोहः अविद्याविपर्ययः ॥ ७७५ ॥ ७७६ ॥ ७७७ ॥ विश्वस्येति यश्चविश्वस्यवाभगपदार्थस्यईशःकर्तुमकर्तुमन्यथाकर्तुंचशक्तःसर्वस्यप्रकाशस्यएकःस्थानमाश्रयस्तदेवंविज्ञायकृतकृत्योभवतीत्यर्थः ॥ ७७८ ॥ सप्तमार्थमाह तमीश्वराणामितिचतुर्भिः तंदेवमीश्वराणामपिपरमंमहेशानमीश्वरं पतीनांप्रजापतीनां स्पष्टमन्यद्द्वयोः ॥ ७७९ ॥ ७८० ॥ यष्टयंतेश्वरादिपदैरुक्तानभिनयति ईशा इति प्रजानांपतयोमरीचिप्रभृतयः ॥ ७८१ ॥ नियंतेति एषामीश्वरादीनांनियंतापरमात्मैवभवतितंचप्रमाणांतराविषयमपिवेदवाक्यमेवतात्पर्येणबोधयतीत्यर्थः ॥ ७८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कथंवेदस्तंबोधयतीत्याकांक्षायामष्टमनवमयोरर्थमाह तस्येत्यष्टभिः तस्यदेवस्यस्थूलप्रपंचात्मकदेहरूपंकार्यंनास्तितथाचक्षुरादिघटितं कारणंसूक्ष्मदेहाख्यमपिनास्ति ॥ ७८३ ॥ समानइति स्पष्टम् ॥ ७८४॥ मायाख्येति तस्यमायाख्याशक्तिःप्रसिद्धा याप्रथमंज्ञानशक्ति क्रियाशक्तिरूपाभ्यांद्विविधा तत्रक्रियाशक्तिर्बलादिरूपैर्ज्ञानशक्तिश्चप्रमाणादिरूपैःसहस्रधाभिन्नेतिद्वयोरर्थः ॥ ४८५ ॥ ७८६ ॥ पुत्रादेरिति यथापुत्रस्यपितापतिःस्वामीप्रसिद्धः राजातुईशोनियंतेति तथाऽस्यात्मनःपतिःईशःलिंगंचैतत्त्रयमपिनास्ति तद्विसगुणस्यपरि

तस्यदेवस्यविश्वाख्यंकार्यंदेहात्मकंनहि॥ करणंचननेत्रादिकिंचिदस्तिमहात्मनः॥ ७८३ ॥ समानस्तेनलोकेस्मिन्विद्यतेकोपिनैवहि॥ कुतोधिकोभवेत्तस्माद्यतोनास्तिसमोपिच॥७८४॥ मायाख्यास्यपराशक्तिःश्रूयतेविविधैवसा॥ स्वाभाविकीभवेज्ज्ञानक्रियाभ्यांयासहस्रधा॥ ७८५ ॥ बलवीर्यादिभेदेनक्रियाशक्तिर्विभिद्यते॥ प्रमाणसंशयाद्यैस्तुज्ञानशक्तिस्तथैवच॥ ७८६ ॥ पुत्रादेश्चयथादृष्टःपतिःपित्रादिकोनृभिः॥ ईशिताचतथैवायंराजादिःसर्ववर्णिनां॥ ७८७॥ यथैवगमकोदृष्टोधूमोवन्हेःसदानृभिः॥ नतथास्यपतिःकश्चिदीशिताचात्रविद्यते ॥ वस्तुतोनैवलिंगंचनिर्गुणस्यमहात्मनः ॥ ७८८ ॥ सकारणंसमग्रस्यविश्वस्यपरमेश्वरः॥ करणेशाश्चसूर्याद्यास्तेषामेषनियामकः॥ नचास्यजनकःकश्चिद्विद्यतेवानियामकः॥७८९॥ तंतुनाभसमोदेवोमायाजैस्तंतुभिःसदा॥ महाभूतादिभिःसर्वानस्मानावृत्त्यतिष्ठति॥ ७९० ॥ एकएवस्वयंज्योतिरस्माकंब्रह्मसोद्वयं॥ प्रकाशयतुचित्तस्थमात्मनोनिर्गुणंपरम् ॥ ७९१ ॥

च्छिन्नस्यस्यात् आत्मातुनिर्गुणाद्वितीयत्वेनपूर्णश्चभवतीतिद्वयोरर्थः ॥ ७८७ ॥ ७८८ ॥ सकारणमिति सपरमेश्वरःसर्वस्यकारणंकरणाधिपानांचक्षुरादिदेवानांनियंताचभवतितस्यतुजनकःकोपिनास्तीत्यर्थः ॥ ७८९ ॥ तदनुग्रहादेवतद्विज्ञानमित्येतत्प्रार्थनापरस्यदशमस्यार्थमाह तंत्विति योदेवोलूतावन्मायायास्तंतुस्थानीयैर्भूतादिकार्यैर्जीवान्वेष्टयित्वास्थितःसोद्वयब्रह्मरूपोऽस्माकमधिकारिणांचित्तस्थंनिर्गुणंरूपंप्रकाशयत्वितिद्वयोरर्थः ॥ ७९० ॥ ७९१ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकादशार्थमाह एकइतिचतुर्भिः यथाकाशोव्यापीतथात्मापि यथाकाष्ठेष्वग्निर्गूढस्तथासर्वस्यांतरात्मागूढःकर्मणांफलदायकत्वलक्षणाध्यक्षतावानितिद्वयोरर्थः ॥७९२ ॥७९३ ॥ स्वयमिति सदेवःसर्वभूतशरीरेष्वात्मरूपेणवसति कीदृशः सर्वधीवृत्तीनांद्रष्टृत्वलक्षणसाक्षित्ववान्यतश्चिदेकरूपः ॥ ७९४ ॥ वस्तुतइति सदेवोवस्तुतःकेवलरूपोयतोस्यसाक्षित्वंगुणोवानविद्यतेअतएवनिर्गुणइत्युक्तइत्यर्थः ॥ ६९५ ॥ द्वादशार्थमाह एकइतित्रिभिः योदेवएकोऽखंडचिद्रूपःअनेकेषांजडानांस्वतोनिष्क्रियाणांप्रवृत्त्यशक्तानांवशीस्वातंत्र्येणप्रवर्त्तयितायश्चबहुधास्थितानांभूतानांव्यष्टीनांबीजभूतमात्मजंहिरण्यगर्भरूपंस्वयमुपाधिष्वनुप्रविश्यकरोति ॥ ७९६ ॥ एकएवेति यश्च

एकःपुमान्स्वयंज्योतिःसर्वभूतगुहाशयः॥ सर्वव्यापीयथाकाशोह्यंतरात्मातथैवच॥ ७९२॥ सर्वस्यकाष्ठसंघस्यवह्निर्व्यापीयथैवच ॥ कर्मणांपुण्यपापानामध्यक्षःफलदायकः॥ ७९३ ॥ स्वयंसर्वेषुभूतेषुयतोवसति सर्वगः॥ द्रष्टासर्वत्रबुद्धीनांसाक्षीचैतन्यरूपतः॥ ७९४॥ वस्तुतःकेवलोनात्रसाक्षित्वमपिविद्यते॥ गुणोवा निर्गुणस्तस्मात्पुरुषःसंगवर्जितः ॥ ७९५ ॥ एकोवशीनिष्क्रियाणांजडानांबहुधाहियः ॥ कुरुतेस्वप्रवेशेन भूतानांबीजमात्मजं॥ ७९६ ॥ एकएवसदादेवोविश्वोत्पत्तिविधायकः॥ आत्मस्थितंतंयेब्रह्मचर्यादि साधनाः ॥ ७९७ ॥ धीराःपश्यंतिविद्वांसस्तेषांशांतिर्भवेद्ध्रुवा ॥ दुःखानांमोक्षसंप्राप्त्यानेतरेषांकदाचन ॥ ७९८ ॥ नित्यानामपियोनित्यश्चेतनानांचचेतनः॥ यत्सुखंप्राप्यतेह्येतैःशांतिरूपंमनीषिभिः ॥ ७९९ ॥

एकएवविश्वोपादानंतमंतस्थंयेपश्यंतितेषामेवमोक्षेणदुःखानांशांतिर्भवतीतिद्वयोरर्थः ॥ ७९७ ॥ ७९८ ॥ त्रयोदशार्थमाह नित्यानामित्येकविंशतिश्लोकैः यआत्मालोकेनित्यत्वेनप्रसिद्धानामाकाशादीनांनित्यश्चेतनत्वेनप्रसिद्धानांनानाप्रमातॄणांचेतनः यदीयांनित्यतांचेतनतांचादायैवान्येभावानित्याश्चेतनाश्चाख्यायंतेइतियावत् अतोन्यदार्त्तमितिनान्योतोस्तिद्रष्टेतिचश्रुत्यंतरात् तथायस्यस्वरूपभूतंसुखंशांतिरूपमेतैर्ब्रह्मचर्यादिसंपन्नैःप्राप्यतेइत्युक्तंसोयमात्मायदाब्रह्मज्ञानादविद्यानिवृत्त्याभासतेतदासर्वेअविद्याजाःपाशाश्छिद्यंतेइत्येकविंशेनाभिसंबंधः ॥ ७९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतल्लाभसाधनतयानिर्दिष्टौसांख्ययोगौनिरूपयंस्तत्रविचारात्मकंसांख्यमभिनयति अनिर्देश्यमित्यष्टादशभिः मुमुक्षुरितिइत्थंअस्यब्र ह्मणःप्राप्त्यैचिंतयेत् इतिकथं तद्ब्रह्मअनिर्देश्यंवाङ्मनसागोचरंवेदज्ञावदंतितत्तत्वंकथंजानीयां तावदेवमहंविचारयामिकिंब्रह्मसुखंममभा तिनवाभानस्वभावमभानस्वभावंविपरीतंवाभाति वस्तुतोभानरूपत्वेपिकेनचननिमित्तेनविषयत्वादिनाभासमानंवेतिद्वयोरर्थः॥८००॥ ॥ ८०१ ॥ अयंविचारोगुरूपदेशानंतरमेवकार्यःश्रवणोत्तरमेवासंभावनानिवृत्तयेमननविधानादित्याशयेनाह यदेति मुमुक्षुर्यदात्वमा नंदात्मकंब्रह्मासीत्येवंगुरुणादेशितउपदिष्टोभवेत्तदैवंचिंतयेदित्यन्वयः ॥ ८०२ ॥ तत्रभातिनभातीत्युक्तयोःपक्षयोरन्यतरमवधारयितु

अनिर्देश्यंपरंतत्तुमन्यंतेवेदवादिनः॥ कथंनुनद्विजानीयांमुमुक्षुरितिसर्वदा ॥ ८०० ॥ चिंतयेदस्यसंप्राप्त्यै किमुभातिनभातिवा॥ विपरीतमिदंवापिभातिब्रह्मसुखंमम॥ ८०१ ॥ यदाविवेकसंपन्नोमुमुक्षुर्गुरुदेशि तः॥ आनंदात्मात्वमेवैषब्रह्मासीहनसंशयः॥ तदैवंचिंतयेच्चित्तेनिजेनित्यमतंद्रितः॥८०२॥ आनंदात्माप्र काशात्स्याद्भिन्नोभिन्नोथवापुमान्॥ यदाभिन्नस्तदाकेनप्रकाशंयातिसर्वदा॥ ८०३॥ आनंदश्चप्रकाशश्च भिन्नौस्यातांयदातदा॥ इतरेतरसंबद्धौस्यातांतौकेनहेतुना॥ ८०४॥

मात्मनःस्वरूपभूतस्यानंदस्यप्रकाशाद्भेदोऽभेदोवेतिविचार्यमित्याह आनंदात्मेति आनंदरूपआत्माआनंदोब्रह्मेतिव्यजानादित्यादिश्रु तिप्रसिद्धःप्रकाशाच्चिद्वस्तुनःसकाशाद्भिन्नोऽभिन्नोवा तत्रप्रथमपक्षोनसंभवतीत्याह यदेति आनंदात्मनश्चिद्भिन्नत्वेकिंद्वयोर्नित्यत्वम न्यतरस्यवाआद्येद्वयोःपूर्णयोर्निर्विकारयोश्चकालाकाशयोरिवसंयोगःसमवायोवानसंभवति तादात्म्यंत्वन्यतरस्यकल्पितत्वएवयुक्तं त त्रात्मनःकल्पितत्वंनयुक्तंकृतनाशादिप्रसंगात् नापिचैतन्यस्यततःपूर्वमात्मनोऽसिद्धिप्रसंगात् नापिचैतन्यस्यगुणत्वादिनात्मनिसंबंधः नि र्गुणत्वादिश्रुतिविरोधात्प्रथमाध्यायोक्तयुक्तिकलापाच्चेत्याशयेनेदमुच्यतेआनंदात्मायदाप्रकाशाद्भिन्नस्तदाकेनप्रकाशंभानंगच्छेदिति ॥ ८०३ ॥एतदाशयमेवस्फुटयति आनंदइत्यादिना स्पष्टम् ॥ ८०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदानंदात्मप्रकाशयोर्मध्येऽन्यतरस्यैवजन्यत्वंनित्यत्वंवास्यात्तदातयोःसंबंधोनस्यात् योग्यंयोग्येनसंबध्यतेइतिन्यायविरोधात् तथाच संबंधयोग्यतार्थंद्वयोरेवजन्यत्वमजन्यत्वंवास्वीकार्यमित्याह अजातइति यदितुतयोरसंबंधएवांगीक्रियतेतदाआनंदात्मनःप्रकाशाभावःसदास्वीकार्यःस्यादितितृतीयदलार्थः ॥८०५॥ तत्रानंदात्मनःप्रकाशाभावोनस्वीकर्तुंशक्यःप्रकाशंविनानिरतिशयप्रेमानुपपत्तेरित्याह आत्मेति आत्माहिकस्यापिजंतोर्दुःखरूपेणद्वेषयोग्योनप्रतीयतेप्रत्युतपरप्रेमविषयएवभवतितेनज्ञायतेआत्मनःस्वरूपभूतंसुखंनित्यंप्रकाशसंबद्धमित्यर्थः ॥ ८०६ ॥ सचप्रकाशेनसुखस्यसंबंधऐक्यरूपएवेतिदर्शयितुंसुखप्रकाशयोर्नित्यताप्रदर्शनीयातदर्थंसुखस्यात्मरूपतयानित्यत्वंप्रतिपादयति आत्मनइतिद्वाभ्यां तत्सुखंयद्यात्मनःसकाशाद्भिन्नंस्यात्तदात्माप्रियतमोनस्यात्किंतुस्रक्चंदनादिवत्सुखा

अजातश्चैवजातश्चसंबद्धोनैवसर्वदा॥ ततोद्वयोर्जनिर्वास्यादजनिर्वासदैवहि ॥ अप्रकाशोथवाक्वापिस्यात्सुखस्यात्मरूपिणः॥८०५॥ आत्मानैवात्रकस्यापिजंतोर्दुःखस्वरूपतः॥ प्रतीयतेपरप्रेमसंश्रयोहृदयस्थितः॥ तेननित्यप्रकाशेनसंबद्धंसुखमात्मनः॥८०६॥ आत्मनस्तद्विभिन्नंचेदात्माप्रियतमोनहि ॥ भवेत्सुखार्थतायस्मादात्मनोत्रप्रसज्जते ॥ सुखरूपस्ततःस्वात्मासर्वेषामिहदेहिनाम् ॥८०७॥ आत्मनोनजनिर्युक्ताकारणाभावहेतुतः॥ आत्माभिन्नस्यतेनास्यसुखस्यापिजनिर्नहि॥ ८०८॥ सुखस्यजन्मनोभावेप्रकाशस्यकुतोजनिः॥ प्रकाशस्यजनौनैवनित्यमानंदरूपता॥ आत्मनस्तुप्रतीयेतसदासंबंधवर्जनात् ॥ ८०९॥ किंनुतत्करणंनामसुखरूपेनिजात्मनि॥ जनयेन्नित्यविज्ञानंसुखबोधात्मकंहियत् ॥८१०॥

र्थत्वेनप्रियइत्येवस्यात् दृश्यतेतुमानभूवंभूयासमित्याकारकोनिरतिशयःप्रेमात्मन्येव तेनात्मसुखयोरैक्यमेवेत्यर्थः ॥८०७॥ एवंसुखस्यात्मरूपत्वेआत्मनोजन्मायोग्यत्वादनात्मनआत्मानंप्रतिहेतुत्वस्यव्याहतत्वाच्चसुखंनित्यमित्याह आत्मनइति स्पष्टम् ॥ ८०८ ॥ एवंसुखस्यनित्यत्वेतेनसंबंधयोग्यस्यप्रकाशस्यापिनित्यत्वमभ्युपेयमित्याह सुखस्येति प्रकाशस्यजन्मांगीकारेहिनित्येनसुखेनसंबंधायोगादात्मासदानंदरूपोनप्रतीयेततथाचपरंप्रेमनस्यात्तच्चानुभवविरुद्धमित्याह प्रकाशस्येत्यादिना ॥ ८०९ ॥ किंचात्मरूपनित्यसुखस्यभानमागंतुककरणाधीनंनवाच्यंनित्यानित्यसंयोगविरोधन्यायादित्याह किंन्विति नुइतिवितर्के यत्सुखस्यबोधसंज्ञंअतएवनित्यंनिरतिशयप्रेमनिर्वाहायनित्यमपेक्षितंचविज्ञानंजनयेत्तादृशंकरणंकिंभवेन्नकिंचिदपीत्यर्थः ॥ ८१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तुमनस्तथेतिशंकांनिरस्यति मनस्त्विति यदामनआत्मभानेकरणंस्वीक्रियेततदाकरणस्यप्रयोजकत्वेनापेक्षितःकर्त्ताकःस्यात् नचात्माकर्त्ताभवितुमर्हति तस्यकर्मत्वेनावस्थितस्यकर्तृत्वविरोधादितिभावः ननुमनएवकर्तृतामपिभजत्वित्याशंकांवारयति एकदैवेति कर्तृचेन्मनोभवेत्तदात्वात्मनःकर्तृस्वरूपस्योपकारकतालक्षणांहेतुतांकरणतांकथंव्रजेत्कर्तृत्वांगीकारेकरणत्वंनस्यादितियावत् नहियुगपदेकस्योपकार्यत्वमुपकारकत्वंचसंभवतीतिभावः ॥ ८११ ॥ किंचमनसोपिदृश्यत्वानुभवान्मनःस्वसाधकेज्ञानेनकरणीभवितुमलमतस्तदात्मरूपमेवेत्याह अपिदृश्यमिति अपिचएतन्मनइतिइत्थंदृश्यतेऽनुभूयते इतिकथं मदीयंमनइति एतन्मनसोदृश्यत्वंकथमुपपद्येत यदिअमानसंमनसाजनयितुमशक्यंआत्मस्वरूपभूतंविज्ञानंनस्यादित्यर्थः ॥ ८१२ ॥ फलितमाह ततइति सुखप्रकाशात्मपदार्थानामै

मनस्तुकरणंचेत्स्यात्कर्त्तातस्यभवेद्धिकः ॥ एकदैवकथंकर्तृहेतुतांस्वात्मनोव्रजेत् ॥ ८११ ॥ अपिदृश्यंमनश्चैतद्दृश्यतेमन्मनस्त्विति ॥ कथंविनात्मविज्ञानंभवेदेतदमानसं ॥ ८१२ ॥ ततःसुखप्रकाशात्मासर्वदैवव्यवस्थितः ॥ तदात्मनःसुखंकिंमेइदानींभातिवानवा ॥ ८१३ ॥ विरुद्धंकिंनिमित्तेनभातितत्सुखमात्मनः ॥ भिन्नंतथामयाज्ञेयंजातंविषयसेवनात् ॥ ८१४ ॥ यद्यादृशंनतत्तादृग्यदिवस्तुप्रतीयते ॥ विपरीतंतदाज्ञानंतस्यनूनमवस्थितम् ॥ ८१५ ॥ विपर्ययस्यजनकंनहिसत्यमुदीरितम् ॥ असत्यंजनकंचेतितत्तन्मायेतिकीर्तितं ॥ ८१६ ॥

क्यंसिद्धंततश्चात्मसुखंभातिनवेतिसंशयइदानींकिंसंभवतिअपितुनैवसंभवतीत्यर्थः ॥ ८१३ ॥ अथविपरीतभानपक्षंनिरसितुंवैपरीत्यमभिनयंस्तद्धेतुंविचारयति विरुद्धमिति तदात्मरूपंविरुद्धंविपरीतरूपंकेननिमित्तेनभाति ननुकाविरुद्धतेत्यतआह आत्मनइत्यादि आत्मनःसकाशाद्भिन्नत्वंज्ञानविषयत्वंविषयसेवनजन्यत्वंचयत्सुखेभासतेएतत्त्रयंविरुद्धमित्यर्थः ॥ ८१४ ॥ नचेदंभिन्नत्वादिज्ञानंप्रमेतिवाच्यंविषयस्वभावाननुसरणादित्याह यद्यादृशमिति यद्वस्तुयादृशंभवतितादृशंयत्रज्ञानेनप्रतीयतेतज्ज्ञानंविपर्ययरूपमेवप्रसिद्धमित्यर्थः ॥ ८१५ ॥ विपर्ययस्त्वनृतत्वात्स्वसजातीयमनृतंकारणमपेक्षतेतच्चानृतत्वेसतिकारणत्वंमायायाएवप्रसिद्धमित्याह विपर्ययस्येति सामायातुसत्यदृष्टेर्मत्तःपलायितेतिभावः ॥ ८१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृग्विचाररूपंसांख्यमात्मसाक्षात्कारहेतुरित्युपसंहरति इतिचिंतयतइति ॥ ८१७॥ योगरूपमात्मलाभोपायमाह कर्मणेति यागादि
रूपंवाह्यमुपासनरूपमांतरंचयत्कर्मतद्योगसंज्ञंचित्तशुद्धितत्त्वज्ञानद्वाराआत्मलाभसाधनमित्यर्थः॥८१८॥ब्रह्मेति व्याख्यातं॥८१९॥चतु
र्दशस्यार्थमाह ब्रह्मज्ञानात्स्वयमितिद्वाभ्यां यत्स्वयंज्योतिर्ज्ञानमात्मरूपमधिकारिणस्तत्त्वज्ञानादुपलभ्यतेतदिदंज्ञानंसूर्यचंद्रादिभिर्नप्र
काश्यंप्रत्युतसूर्यादयस्तेनभास्यंतेइत्यर्थः ॥ ८२० ॥ किंचवाह्यानांसूर्यादीनांभासकंचित्प्रतिबिंबशालिवृत्तिरूपंज्ञानंतदपियेनात्मज्योति
षाअविषयस्वभावेनभास्यतेतस्यात्मज्योतिषोबाह्यप्रकाशैर्भानायोग्यत्वंकिमुवाच्यमित्याह ज्ञानस्येति यआत्माज्ञानस्यचित्संवलितवृ

इतिचिंतयतस्तस्यमायातःपृथगेवतत्॥ स्वयंज्योतिःसुखंनित्यमनिर्देश्यंप्रकाशते ॥ ८१७ ॥ कर्मणायज्ञदा
नादिरूपेणात्मास्वयंप्रभः॥ जगतःकारणंब्रह्मज्ञानोत्पत्तौप्रतीयते ॥ ८१८ ॥ ब्रह्मज्ञानात्स्वयंज्योतिर्यदायम
वभासते॥ अविद्यानाशतस्तज्ज्ञाःपाशानाशंप्रयांतिच ॥ ८१९॥ ब्रह्मज्ञानात्स्वयंज्योतिर्यद्भात्यत्राधिकारि
णः॥ नहिज्ञानंकदाचित्तुभातिसूर्यादिभिस्त्विदं॥ किंतुतेनैवसूर्याद्याःप्रतीयंतेसदैवते॥ ८२० ॥ ज्ञानस्यापि
चयोज्ञानंज्ञानेनापिनभातिच॥ सकथंतैजसैरेतैःप्रतिभायात्स्वयंप्रभः॥८२१॥ एकएवपुमानेषसर्वभूतहृ
दिस्थितः॥ अविद्याघातकोहंसोमध्येपिचजगत्त्रये॥ अग्निरूपःसएवायमस्तिनीरादिसंस्थितः॥ ८२२॥ त
मेवात्मस्वरूपेणज्ञात्वादेहीसमाव्रजेत् ॥ मृत्युमत्येत्यसंसारमीशश्चाप्येषजायते ॥ ८२३ ॥ नान्योहेतुर्जगत्य
स्मिन्नीश्वरत्वायविद्यते॥ ब्रह्मज्ञानादतस्तत्तुकरणीयंयतीश्वराः॥ ८२४॥

त्तिरूपस्यज्ञानंभासकःसतैर्जडतेजोमयैरेतैःसूर्यमंडलादिभिःकथंप्रकाश्येतेति ॥ ८२१ ॥ पंचदशार्थंवर्णयति एकएवेतित्रिभिः एकएवपु
रुषःसर्वव्यष्टीनांत्रिलोक्यात्मकसमष्टेश्चांतस्थःअविद्यांघ्नन्हंसइत्युक्तः तस्यसर्वरूपतामाह अग्नीति नीरंसमुद्रादिजलंआदिपदेनजाठरं
जलंतद्गतवाडवाग्न्यादिरूपः अथवानीरंआपइत्युक्तानिसूक्ष्मभूतानितद्रूपेआदौकारणेस्थितोयोग्निर्विराट्तद्रूपइत्यर्थः॥ ८२२॥ तमेवेति
तमेवज्ञात्वासंसाररूपंमृत्युमत्येत्यउल्लंघ्यअमृतंगच्छेदेषविद्वान्सर्वज्ञत्वादिविशेषरूपेणईशभावंगच्छतीत्यर्थः ॥ ८२३ ॥ नान्यइति ब्रह्म
ज्ञानादन्यईशभावलाभायहेतुर्नास्तीत्यतस्तद्ब्रह्मज्ञानंकरणीयंश्रवणादिद्वारासंपाद्यमित्यर्थः ॥ ८२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईशरूपावेदकयोःषोडशसप्तदशयोरर्थउच्यते विज्ञेयइतिषड्भिः योयंमोक्षसाधनविज्ञानविषयत्वेनोक्तःपुमान्ससर्वज्ञतादिधर्मशाली तत्र सर्वज्ञत्वंसामान्येनसर्ववित्त्वं अनुत्पन्नत्वंकारणहीनत्वं ॥ ८२५ ॥ विशेषेणेति श्रुतौज्ञपदेनतस्यविशेषतःसर्ववित्त्वमुक्तं तथाजीवस्यमायायास्तद्गुणानांचपतिःप्रभुःसुखादिरूपकर्मफलदस्तथाबंधादिकारणत्वेनसंसारस्यनियंताव्यवस्थाहेतुःपालकश्चेतिद्वयोरर्थः ॥ ८२६ ॥ ॥ ८२७ ॥ सआत्मेति सप्रपंचरूपेणदृष्टोबन्धहेतुः मरणादिहीनत्वेनदृष्टस्तुमोक्षहेतुः तथाज्ञानरूपेआत्मनिस्वरूपेस्थित्वाईशःसर्वगश्च

विज्ञेयोयःपुमान्सोयंसर्वज्ञोविश्वकृत्तथा॥ अनुत्पन्नःसदाकालकालःसर्वगुणैर्युतः॥८२५॥ विशेषेणापिनिखिलंजानातीदंचराचरं॥ क्षेत्रज्ञस्यास्यजीवस्यमायायाश्चपतिस्तथा॥ ८२६॥ गुणानामपिसर्वेषांसुखदुःखादिकारणं॥ नियंतासंस्तेर्बंधस्थितिमोक्षैककारणं ॥ ८२७ ॥ सआत्माविश्वरूपःसन्हेतुर्बंधस्थितौभवेत्॥ मरणादिविहीनश्चबंधमोक्षैककारणं ॥ ८२८॥ ईशआत्मनिसंस्थायज्ञानरूपोऽत्रसर्वगः॥ स्थितिकालेसदादेवोभुवनस्यास्यगोपकः॥ ८२९॥ यईष्टेजगतोनित्यंयस्माद्न्योनचेश्वरः॥ कश्चिदस्तिसएवात्मातस्माद्न्योनविद्यते ॥८३०॥ अहंपूर्वमिमंदेवमित्थंसंप्रार्थ्यसर्वदा ॥ प्राप्तवानात्मविज्ञानंनियतोत्रयतीश्वराः ॥८३१ ॥ब्रह्माणंजगतोयोनिंयउत्पादितवान्पुरा ॥ यश्चवेदानदादस्मैतंदेवंस्वात्मनिस्थितम् ॥ आत्मज्ञानैकसंवेद्यंमुमुक्षुःशरणंगतः॥ ८३२ ॥ निष्कलंनिष्क्रियंशांतंसुखमात्मस्वरूपकम् ॥ सर्वदोषविनिर्मुक्तंकारणेनविवर्जितं॥ ८३३॥

तथास्थितिकालेगोपकश्चेतिद्वयोरर्थः ॥ ८२८ ॥ ८२९॥ यईष्टेइति यश्चऐश्वर्यस्यपरमकाष्ठाभूतःकश्चिद्विशेषतोवर्णायितुमशक्यःसएवात्मत्वेनविज्ञेयइत्यर्थः ॥ ८३० ॥ अष्टादशादिमंत्रद्वयस्यैकवाक्यतयार्थंदर्शयति अहमितिपंचभिः हेयतयोऽहमित्थंनियतोनियमैःशौचादिभिर्युतःसंस्तंदेवंसंप्रार्थ्यज्ञानंप्राप्तवानस्मीति ॥ ८३१ ॥ इत्थंकथमित्याकांक्षायामाह ब्रह्माणमित्यादि योब्रह्माणंहिरण्यगर्भमुत्पाद्यतस्मैसहवेदैर्ज्ञानंदत्तवांस्तंदेवमात्माकारवृत्तिलभ्यमहंमोक्षकामःशरणंगतोस्मीतिसंबंधः ॥ ८३२ ॥ तस्यदेवस्यस्वरूपलक्षणमाह निष्कलमित्यादिना कीदृशंतं निष्कलंनिरवयवं स्फुटमन्यत् ॥ ८३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमृतत्वस्येति मोक्षरूपस्यामृतत्वस्यस्वरूपेणमर्यादांकुर्वंतं यत्स्वरूपमेवामृतत्वमितियावत् तथादग्धेंधनाग्निवदुपाधिविनिर्मुक्तरूपेणाव स्थितमितिद्वयोरर्थः ॥ ८३४ ॥८३५॥ विशार्थमवतारयति एवमितिद्वाभ्यां एवंप्रार्थितोदेवोमह्यंतादृशंज्ञानंदत्तवान्येनाहंतंदेवमात्मत्वे नदृष्टवानस्मियद्विज्ञानंविनामोक्षोनैवभवतीतिद्वयोरर्थः ॥ ८३६ ॥८३७॥ विशार्थमाह यदेतिदशभिः आकाशस्यचर्मवद्वेष्टनंयःकुर्या त्सदेवमविज्ञायापिमुच्येतेत्यर्थः ॥ ८३८ ॥ अस्याशयंस्फुटयति आकाशेति स्फुटं ॥ ८३९ ॥ शिवपदप्रदर्शितामात्मनस्तुरीयतामभिन

अमृतत्वस्यमोक्षस्यसेतुवद्धारकंपरम्॥ दग्धेंधनोयथावन्हिःस्वरूपेणावतिष्ठते ॥८३४॥ तथास्वस्यस्वरूपे णवर्तमानंमहेश्वरं॥ मायामयसमुत्थानकार्यजातविवर्जितं॥८३५॥ एवंसंप्रार्थ्यमानःसन्मह्यंसभगवा न्शिवः॥ मोक्षस्यकारणंज्ञानंदत्तवान्करुणाकरः॥८३६॥ येनज्ञानेनतंदेवमात्मस्थंपरमेश्वरं॥ दृष्टवान्य मविज्ञायमुक्तिर्नैवभवेदिह ॥८३७॥ यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः॥ तदादेवमविज्ञायदुःखस्यां तोभविष्यति ॥८३८॥ आकाशवेष्टनंयद्वत्कर्तुमत्रनशक्यते ॥ आत्माविज्ञानतस्तद्वन्मोक्षःप्राप्तुंनशक्यते ॥८३९॥ एषएवततोदेवःस्वयंज्योतिरितीरितः॥ आनंदात्मैवयतयोज्ञातव्योत्रमुमुक्षुणा ॥८४०॥ अयमेव जगद्योनिर्मायावीमाययाप्रभुः॥ भवतांचममाप्येषस्थिरजंगमदेहिनां ॥ आत्मासर्वगतोनित्यःसर्वभेदवि वर्जितः॥८४१॥ अस्मिन्नेवचकालाद्याहेतवःपरिकल्पिताः ॥ यथाविशुद्धआकाशेमेघानानाविधाअपि ॥८४२॥ अस्मिन्सर्वमिदंविश्वंमाययापिसमन्वितं॥ प्रतीयतेयथाकाशेगंधर्वनगरंतथा॥८४३॥

यत्नूसर्वग्रंथप्रमेयमुपसंहरति एषएवेत्यष्टभिः एषदेवःस्वयंप्रकाशानंदरूपोज्ञेयोमुमुक्षुणेति ॥ ८४० ॥ यतःसएवमाययासर्वोपादानंसर्वे श्वरःसर्वात्माचेत्याह अयमेवेति प्रभुरीश्वरःभवतांममान्येषांचात्माचेति ॥ ८४१ ॥ तस्यसर्वाधिष्ठानत्वंदर्शयति अस्मिन्नेवेतिद्वाभ्यां स्प ष्टम् ॥ ८४२ ॥ कालादिकारणानिवादिभिर्यथातत्रकल्पितानितथाअव्याकृतादिकंविश्वमप्यध्यारोपप्रदर्शिकाभिःश्रुतिभिस्तत्रकल्पि तमित्याह अस्मिन्सर्वमिति ॥ ८४३ ॥ ॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रजीवभेदकल्पनांदृष्टांतेनस्फुटयति एकएवेति ॥ ८४४ ॥ ज्ञानलभ्यमोक्षकालेतस्यशुद्धतांदृष्टांतेनाह करणोपरमादिति करणाना मिंद्रियाणामुपरमरूपायांसुषुप्तौसंसारांतर्गतायामपिविज्ञेयोपरममात्रेणापियथाद्वैतंनजानातितथाअविद्योपरमोपलक्षितेमोक्षेपीतिद्व योःसंबंधः ॥ ८४५ ॥ ८४६ ॥ तत्त्वज्ञानेनप्रपंचोपरमंदृष्टांतेनविशदयति यथेति ॥८४७॥ अस्यज्ञानस्यदौर्लभ्यंवर्णयन्नुत्तराध्यायजि ज्ञासामुत्थापयति इदमितित्रिभिः हेयतयइदंज्ञानंदुर्लभमितियद्वद्यथाभवद्भिर्बुध्यतेतथावच्मीतिशेषः देवताअपिमनुजैस्तोषिताःसत्यः

एकएवयथास्वप्नेशयानोबहुभेदवान्॥ एवमात्मात्रसंसारेबहुभेदोन्यथैवच ॥ ८४४ ॥ करणोपरमाद्यद्वत्सुषु प्तौनैवकिंचन ॥ द्वैतजालंविजानातिसंसारेपिस्थितःपुमान् ॥ ८४५ ॥ अविद्योपरमात्तद्वदिदंदुःखमनेक धा॥ नपश्यतिपुमान्मुक्तावानंदात्मास्वयंप्रभः ॥ ८४६ ॥ यथाजागरणज्ञानात्स्वप्नःसर्वःप्रलीयते ॥ तथानं दात्मविज्ञानात्प्रपंचोपिविलीयते ॥ ८४७॥ इदंकारणविज्ञानंदुर्लभंयतिपुंगवाः ॥ मनुजैर्देवतायद्वद्बहुशःप रितोषिताः ॥ नवदंतिप्रयच्छंतिवरान्नानाविधानपि ॥ ८४८ ॥ संतोषंयोनतैर्गच्छेत्पुमानत्यंतबुद्धिमान्॥ तस्मैवदंतिकृच्छ्रेणसत्यपाशवशंगताः ॥ ८४९ ॥ यमोयथापुरावादीत्संतुष्टोनचिकेतसे ॥ स्वयमेवभवंतो पिजानंत्येतद्यतीश्वराः॥ ८५० ॥ भवतांतुमयायत्तुकथितंब्रह्मवेदनं॥ दुर्लभंतदिदंकिंतुममबुद्धिरियंस्थिता ॥ ८५१ ॥ अहमप्यात्मविज्ञानमर्थिभ्यश्चेद्ददामिन॥ अर्थिभ्यःकोपरोब्रूयान्मत्तोयोब्रह्मविद्भवेत्॥ ८५२ ॥

इदंज्ञानंनवदन्तिकिन्तुवरानेवतस्मैमनुजायउपन्यस्यंति यस्तुतैर्वरैर्नतुष्यतितंप्रत्येवंसत्यपाशबद्धावदंतीतिद्वयोःसंबंधः ॥८४८॥८४९॥ त त्रोदाहरणभूतंयमनचिकेतसोर्वृत्तमित्याह यमइति यथासत्यपाशबद्धोयमोवरैरसंतुष्टायनचिकेतसेब्रह्मविद्यामवादीत्तथावृत्तंभवंतस्तपः प्रभावात्स्वयंजानंत्येवेति ॥ ८५० ॥ तर्हिभवताकथंसभायामिदमुक्तमितिशंकांवारयति भवतांत्विितिचतुर्भिः दुर्लभमपीदंज्ञानंयन्म याभवतांपुरतउक्तंतत्रहेतुरियमेवंविधाममबुद्धिरित्यर्थः ॥ ८५१ ॥ एवंविधाकीदृशीत्याकांक्षांपूरयति अहमपीतिद्वाभ्यां यद्यहमप्येते भ्योऽर्थिभ्योनवक्ष्यामितर्हिमत्तोपरःकोवक्ष्यतितस्यचमत्तुल्यंब्रह्मवित्त्वंसंदिग्धमित्यर्थः ॥ ८५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहमिति अहंदध्यङ्ङाथर्वणवत्सर्वोपकारायप्रवृत्तःसन्नेतानधिकारिणोऽतिथींश्चप्रतिकथंस्वज्ञानंवंचयामिअपलपामीत्यर्थः ॥ ८५३ ॥
इत्यादीति आदिपदेन इदंयःपरमंगुह्यंमद्भक्तेष्वभिधास्यति भक्तिमयिपरांकृत्वामामेवैष्यत्यसंशयः नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्त
मः भवितानचमेतस्मादन्यःप्रियतरोभुवीतिभगवदुक्तिप्रदर्शितस्यपात्रोपदेशेभगवत्प्रसादस्यग्रहः स्पष्टमन्यत् ॥ ८५४ ॥ एवमुक्त्वाश्वेता
श्वतरोमौनंकृतवानित्याह एतावदिति ॥ ८५५ ॥ एकविंशस्यार्थमाह तपइतिचतुर्भिः तपःप्रभावेणदेवानुग्रहेणचात्मविज्ञानंलब्ध्वानि

॥५८॥

अहंसर्वोपकारायप्रवृत्तोस्मिसदायतः॥ ततःकथंनिजंज्ञानंवंचयामियतीन्प्रति ॥ एतेमेऽतिथयस्तद्वद्ब्रह्मज्ञा
नाधिकारिणः॥ ८५३ ॥ इत्यादिबहुधाचित्तेचिंतयित्वोक्तवानहं॥ आत्मज्ञानमिदंगुह्यंभवद्भ्योत्रयतीश्वराः
॥ ८५४ ॥ एतावदुक्त्वाभगवान्स्श्वेताश्वतरोमुनिः॥ वाक्यादुपरतिंप्राप्तआस्तेपूर्ववदीश्वरः ॥ ८५५ ॥ तपः
प्रभावतस्तद्वदीश्वरस्यप्रसादतः ॥ श्वेताश्वतरनामायंवेदवेदांगपारगः ॥ ८५६ ॥ आत्मविज्ञानसंपन्नोत्य
तिथिभ्योनिजाश्रमे॥ अत्याश्रमिभ्योन्यासिभ्यउक्तवानात्मबोधनं॥ ८५७॥ लोकेस्यात्परमोहंसआश्रमीत्य
धिकोहिसः॥ आश्रमिभ्यश्चसर्वेभ्यस्तस्मादत्याश्रमीत्वयं॥ ८५८ ॥ एतदाश्रममापन्नायतयोधीयिरेततः॥
इदंपवित्रंब्रह्मात्मविज्ञानंमोक्षकारणं॥ मोक्षार्थिभिःसदासद्भिर्मुनिसंघैर्निषेवितम्॥ ८५९ ॥ वेदांतेपरमं
गुह्यंपुराकल्पप्रणोदितं ॥ पूर्वेषांकथ्यतेयत्रस्तुत्याद्यादिकमनेकधा ॥ सपुराकल्पइत्युक्तस्तेनैतत्परिकीर्त्तितम्
॥ ८६० ॥

जाश्रमागतेभ्यःअत्याश्रमिपदोक्तेभ्यःसंन्यासिभ्यइदंज्ञानमुक्तवानितिद्वयोःसंबंधः ॥ ८५६ ॥ ८५७ ॥ अत्याश्रमिपदस्यसंन्यासिषु
समन्वयंदर्शयति लोकेइति परमहंसोह्याश्रमीभवतिइतराश्रमिभ्योऽतिशयितश्चभवति न्यासएवात्यरेचयदितिश्रुतेः अतःसंन्यासीअत्या
श्रमीत्युक्तः ॥ ८५८ ॥ एतदाश्रममिति एतंसंन्यासाश्रमंप्राप्ताऋषयस्ततःश्वेताश्वतरादिदंज्ञानंपवित्रत्वादिशालिअधीयिरेअध्ययनेनल
ब्धवंतइत्यर्थः ॥ ८५९ ॥ द्वाविंशस्यार्थमाह वेदांतेइति इदंज्ञानंवेदांतेषुगुह्यंगोप्यतयोक्तं अत्रतुपुराकल्परूपेणग्रंथेनोक्तं यत्रवेदभागेपूर्वे
षांप्राचीनानांस्तुत्यादिरूपोव्यवहारउच्यतेसपुराकल्पइत्युच्यतेयथात्रैवब्रह्मवादिनांविचारायसमागमउक्तइति ॥ ८६० ॥ ॥५८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शांतीति इदंज्ञानंकृपालुनापिशांत्यादिगुणहीनायअर्थिनेपिनदेयं शांत्यादिलक्षणाधिकारसंपन्नायापिपुत्रशिष्यभिन्नायनदेयमित्यर्थः ॥ ८६१ ॥ अंत्यमंत्रतात्पर्यार्थंप्रपंचयति उक्तइत्यादिना गुरुभक्त्याविहीनायाधिकारिणेतुयथाकथंचिदुक्तापिसारंतात्पर्यार्थंनवदेदित्यर्थः ॥ ८६२ ॥ कीदृशायतर्हिवक्तव्यमित्यतआह देववदिति अधिकारंसाधनचतुष्टयसंपन्नत्वंभजन्देववद्गुरुसेवायामप्रमत्तश्चयोभवेत्तस्मैवदेदित्यर्थः ॥ ८६३ ॥ गुरुवैमुख्येऽनर्थप्रदर्शकानिपुराणागमादिवाक्यान्यर्थतःपाठतश्चानुक्रामति गुरुमित्यादिना मोहःप्रमादः

शांतिदांत्यादिहीनायविषयासक्तचेतसे ॥ अर्थिनेपिनदातव्यंगुरुणापिकृपालुना ॥ अपुत्रायाप्यशिष्याय वक्तव्यंनाधिकारिणे ॥ ८६१ ॥ उक्तेसत्यपितत्सारोवक्तव्यःसर्वथानहि ॥ गुरुभक्त्याविहीनायसर्वदाप्यधिकारिणे ॥ ८६२ ॥ देववद्योगुरुंपश्येदप्रमत्तोधिकारभाक् ॥ सएवब्रह्मविज्ञानंफलवत्प्राप्नुयान्नरः ॥ ८६३ ॥ गुरुंयोमानवैरन्यैःसमंपश्यतिमोहतः ॥ नतस्यास्मिन्भवेल्लोकेसुखंनैवपरत्रवा ॥ ८६४ ॥ कर्मणामनसावाचा गुरुंयोनावमन्यते ॥ सयातिनरकान्घोरान्महारौरवसंज्ञितान् ॥ ८६५ ॥ एकाक्षरप्रदातारंगुरुंयोनैवमन्यते ॥ समूढोनरकंयातियावदाभूतसंप्लवं ॥ ८६६ ॥ कृतघ्नानांहियेलोकायेलोकाब्रह्मघातिनां ॥ गत्वातानभिसंयातिगुरुद्रोहपरोनरः ॥ ८६७ ॥ समहापातकीज्ञेयस्तथोपपातकीत्यपि ॥ गत्वाकल्पसहस्रांतेविष्ठायांजातेकृमिः ॥ ८६८ ॥ अत्रसर्वासुविद्यासुकारणंगुरुरीरितः ॥ यथाशिवस्तथैवायंपूजनीयःप्रयत्नतः ॥ ८६९ ॥ शिवेरुष्टेगुरुस्त्रातागुरौरुष्टेशिवोनहि ॥ शिवादप्यधिकंतस्माद्गुरुंयत्नेनपूजयेत् ॥ ८७० ॥ अहंमानादिदोषेण स्वगुरुंयोवमन्यते ॥ प्रायश्चित्तंनतस्यास्तिलोकेस्मिन्पापकारिणः ॥ ८७१ ॥

॥ ८६४ ॥ कर्मणेति योनामनुष्योगुरुमवमन्यतेसरुरुभिर्दश्चिकसहस्रसमविषैर्जंतुभिर्व्याप्तेनरकेपततीत्यर्थः ॥ ८६५ ॥ एकाक्षरेति एकाक्षरप्रदातारमपीतिशेषः भूतसंप्लवःप्रलयस्तत्पर्यंतम् ॥ ८६६ ॥ कृतघ्नानामिति स्पष्टम् ॥ ८६७ ॥ समहेति सगुरुद्रोहीमहापातकानि ब्रह्महत्यासुरापानादीनि उपपातकानिगोवधादीनिस्मृतिप्रसिद्धानि गत्वानरकमितिशेषः ॥ ८६८ ॥ अत्रेति अत्रशास्त्रे ॥ ८६९ ॥ शिवेइति रुष्टेरोषंगते ॥ ८७० ॥ अहमिति स्पष्टम् ॥ ८७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मेति निष्कृतिःप्रायश्चित्तं गुरुद्रोहस्यतुसानसंभवतिशास्त्रेनदृष्टाचेत्यर्थः ॥ ८७२ ॥ ब्रह्मघ्नादिति कृतघ्नवृत्तंभारतेगौतमोपाख्यानेद्रष्ट
व्यं ततोप्यधिकोगुरुध्रुक् ॥ ८७३ ॥ अस्यकृतघ्नादाधिक्यंस्फुटयितुंगुरोःसर्वोपकारिरूपतामाह गुरुरिति सखामित्रं सुहृदुपकारकः
॥ ८७४ ॥ गुरुद्रोहस्यसर्वपापाधिक्येउपपत्तिमप्याह गंतव्यइति ब्रह्मवेदब्रह्मैवभवतीतिश्रुतेर्देहिनाज्ञानेनलभ्यंयत्ब्रह्मतद्रूपोगुरुर्भवतित

दवज्ञायांब्रह्मणोऽभिन्नस्यात्मनोऽवज्ञाभवतिआत्मनोऽवज्ञायांतुआत्ममयस्यसकलप्रपंचस्यावज्ञावधरूपाभवतीतिद्वयोरर्थः ॥ ८७५ ॥

ब्रह्महत्यादिपापानांदृष्टाशास्त्रेणनिष्कृतिः ॥ गुरुद्रोहस्यनैवस्यात्क्वापिशास्त्रेप्रदृश्यते ॥ ८७२ ॥ ब्रह्मघ्नादधिको
ज्ञेयःकृतघ्नोमनुजोभुवि ॥ गुरुद्रोहीततोपिस्यादधिकोयंनराधमः ॥ ८७३ ॥ गुरुर्मातापितावापिगुरुर्दैवमु
दाहृतं ॥ गुरुर्बंधुःसखातद्वन्नगुरोरपरःसुहृत् ॥ ८७४ ॥ गंतव्योगुरुरेवात्रस्वात्मज्ञानेनदेहिना ॥ ततोगुरोरव
ज्ञानादात्मनःकुरुतेत्विमां ॥८७५॥ आत्मन्यस्मिन्नवज्ञातेविश्वावज्ञाकृताभवेत् ॥ अवज्ञावधउद्दिष्टःशस्त्रशू
न्योतिदारुणः ॥ ८७६ ॥ हतःशस्त्रात्क्षणंदुःखंप्राप्नुयाद्वानवापुमान् ॥ अवज्ञयाहतोदुःखंयावज्जीवंसगच्छ
ति ॥ विश्वदुःखकृतःकेनशुभंपुंसोभविष्यति ॥ ८७७ ॥ तस्मात्सर्वात्मनाकार्यंकर्मणामनसागिरा ॥ गुरोः
प्रियतमंसर्वंस्वात्मनाक्षेममिच्छता ॥ ८७८ ॥ सावधानोयथाजंतुर्देवपूजापरोभवेत् ॥ गुरुपूजारतस्तद्वत्सा
वधानःसदापुमान् ॥ ८७९ ॥ उक्तमस्यप्रकुर्वीतशुभंवाऽशुभमेववा ॥ मनसाहर्षयुक्तेननिजदेहमरक्षयन्
॥८८०॥ कर्णाभ्यांश्रृणुयात्तद्वत्तस्यकीर्तिंचसर्वदा ॥ दोषवक्तुर्यथाशक्तिकुर्यात्परिभवंसदा ॥ ८८१ ॥

॥ ८७६॥ अवज्ञारूपवधस्यशस्त्रवधादुत्कर्षमाह हतइति शस्त्राद्धेतोर्योहतस्तस्यक्षणंदुःखप्राप्तिःसंदिग्धाअवज्ञयातुस्मृतिद्वारामरणांतंदुः
खंजन्यते एवंविश्वंदुःखयतःशुभंदुर्लभमित्यर्थः ॥ ८७७ ॥ फलितमाह तस्मादित्यादिना स्पष्टंद्वयं ॥ ८७८ ॥ ८७९ ॥ उक्तमिति अ
स्यगुरोर्वचनंस्वशरीररक्षाचिंतांविहायकर्त्तव्यमित्यर्थः ॥ ८८० ॥ कर्णाभ्यामिति तस्यगुरोःकीर्तिश्रृणुयात्तन्निंदकस्यतुपरिभवमपमा
नंयथाशक्तिकुर्यादिति ॥ ८८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशक्येइति निंदकस्यपरिभवेऽशक्येतुत्वयंततोगंतव्यं तदशक्तौकर्णौपिधायनिरुद्धस्थेयमित्यर्थः ॥ ८८२ ॥ किंबहूक्तेनेति बहुनोक्तेन किंसंक्षेपाद्ब्रवीमि इदंगुरुभजनंगुरुभक्त्यैवसुखकामेनकार्यमित्यर्थः ॥ ८८३ ॥ मोक्षरूपःपुरुषार्थस्त्वनेनैवलभ्यइत्याह अभीष्टेति अयं मोक्षरूपः ॥ ८८४ ॥ उक्तार्थेमूलभूतंप्रमाणमेषमंत्रइत्याह यस्येति एतेश्रुत्युक्ताअर्थाःपदार्थाः पुरुषार्थावा ॥ ८८५ ॥ अर्थपदस्यपुरुषार्थपरत्वमादायमंत्रार्थमाह एतेइति हस्तस्थावश्याः ॥ ८८६ ॥ गुरुभक्तिप्रवणत्वउपपत्तिमप्याह ब्रह्मेति यथाब्रह्मचर्येश्वरप्रणिधा

अशक्येसतिकुर्यात्सएवंबुद्धिमतांवरः ॥ यत्रात्मनोगुरोर्निन्दाक्रियतेपापमोहितैः ॥ तत्रकर्णौपिधायैवस्थेयंशक्यागतिर्नचेत् ॥ ८८२ ॥ किंबहूक्तेनसंक्षेपाद्गुरुभक्त्यावदाम्यहम् ॥ करणीयमिदंस्वात्मसुखकामेनसर्वदा ॥ ८८३ ॥ अभीष्टदेववन्नित्यंगुरुभक्तिमहर्निशम् ॥ कुर्वतोजायतेचायंपुरुषार्थोधिकारिणः ॥ ८८४ ॥ यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ ॥ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनः ॥ ८८५ ॥ एतेवेदोदिताःसर्वेपुरुषार्थाश्चतुर्विधाः ॥ गुरुभक्तस्यहस्तस्थाभवंत्यत्रनसंशयः ॥ ८८६ ॥ ब्रह्मचर्यादिकेयद्वदप्रमत्तोत्रसाधने ॥ वर्त्ततेगुरुभक्तौचवर्तितव्यंतथैवहि ॥ ८८७ ॥ तद्भ्रेषेपिचसंतुष्टेगुरौनास्तिभयंततः ॥ प्रायश्चित्ताद्युपायेनयतएपविशोधयेत् ॥ ८८८ ॥ गुरुभक्तेस्तुविद्वेषेगुरौविमुखतांगते ॥ प्रायश्चित्तादिकंनैवतत्रकिंचनविद्यते ॥ ८८९ ॥ गुरौविमुखतांयातेविमुखाःसर्वदेवताः ॥ भवंतिक्रियमाणंचपुण्यंपापंहिजायते ॥ ८९० ॥

नादिषुसावधानोवर्त्ततेतथाधिकारिणागुरुभक्तावपिसावधानेनभवितव्यमित्यर्थः ॥ ८८७ ॥ तद्भ्रेषइति तेभ्योब्रह्मचर्यादिभ्योभ्रेषेभ्रंशेपिसतिप्रसन्नोगुरुःप्रायश्चित्ताद्यैर्विशोधयिष्यति ॥ ८८८ ॥ गुरुभक्तेस्त्विति यदापुमान्गुरुभक्तेर्विद्वेषवान्भवतितदानकिंचित्त्राणं यतोदेवताअपिविमुखीभवंतिक्रियमाणंपुण्यमपिचपापात्मनापरिणमतेइतिद्वयोरर्थः ॥ ८८९ ॥ ८९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति चतुर्विधंधर्मार्थकाममोक्षरूपंफलमिच्छद्भिस्तथाशांत्यादिसंपन्नैर्ज्ञाततत्त्वैर्जीवन्मुक्तैःपरमहंसैरपिगुरुरर्चनीयः यावदायुस्त्रयो
वंद्यावेदांतोगुरुरीश्वरइत्युक्तेः अन्याश्रमवासिभिःसपूज्यइतिकिमुवाच्यमिति ततोभवद्भिर्ज्ञाततत्त्वैरपिगुरवःपूजार्थंगंतव्याइतिद्वयोरर्थः
॥ ८९१ ॥ ८९२ ॥ इत्यभिप्रायवानिति उक्ताशयेनश्वेताश्वतरोमौनीजातस्तस्यचित्तमभिप्रायंज्ञात्वातदुपदिष्टमभिनंद्यप्रशस्यसर्वेमु
नयःस्वस्वगुरुदेशानूगताइति ॥ ८९३ ॥ उपसंहरति इतितेइतिद्वाभ्यां कारणविचारपूर्वकंमायाशक्तिदर्शनेनिष्पन्नंमुनीनांप्राचांज्ञानंयत्

तस्मात्सर्वात्मनासर्वैश्चतुर्विधफलार्थिभिः ॥ देववन्नित्यमेवायमर्चनीयोऽप्रमादिभिः ॥ ८९१ ॥ शांत्यादिगु
णसंपन्नैःकिमन्याश्रमवासिभिः ॥ ततएवभवंतोपिगुरून्यांतुमुनीश्वराः ॥ ८९२ ॥ इत्यभिप्रायवान्मौनीस
श्वेताश्वतरोभवत् ॥ ज्ञात्वातेयतयस्तस्यचित्तमुक्तंचधीमतः ॥ अभिनंद्ययथान्यायंसर्वेस्वान्स्वान्गुरून्ययुः
॥ ८९३ ॥ इतितेकथितंज्ञानंयत्श्वेताश्वतरोवदत् ॥ कारणानांविचारेणमायाशक्तेश्चदर्शनात् ॥ ८९४ ॥ मु
नीनांब्रह्मविज्ञानसंपन्नानांमहात्मनां ॥ इतःपरंकिमन्यत्त्वंश्रोतुमर्हसिसुव्रत ॥ ८९५ ॥ इतिश्रीमत्परमहंसपरि
व्राजकाचार्यानंदात्मपूज्यपादशिष्येणश्रीशंकरानंदभगवताविरचितेउपनिषद्रत्नआत्मपुराणेश्वेताश्वतरोप
निषत्सारार्थप्रकाशेश्वेताश्वतरसंन्यासिसंवादोनामाष्टमोऽध्यायःसमाप्तः ॥ ८ ॥

श्वेताश्वतरउक्तवांस्तत्तेकथितं अन्यच्चकिंश्रोतुमिच्छसीति ॥ ८९४ ॥ ८९५ ॥ यमष्टांगेनयोगेनप्रणवाष्टमदर्शितम् ॥ भजंतेयमिनोऽष्टा
भिर्नामभिःसोऽस्तुशंकरः ॥ १ ॥ अस्यार्थः प्रणवस्यावयवेष्वकारोकारमकारार्धमात्रानादबिंदुशांतिशांत्यतीताख्येषुविश्वादितुरीयांता
नामध्यात्मानांचतुर्णामोतानुज्ञात्रनुज्ञाऽविकल्पाख्यानामधिदैवसाक्षिरूपाणांचतुर्णांचक्रमेणवाचकेषुमध्येअष्टमेनदर्शितमविकल्परूपं
यंयतयोयोगेनभजंतेसोस्माकंतदशक्तानांभवशर्वाद्यष्टनामभिरेवशंतनोत्विति इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनु
जरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतौआत्मपुराणटीकायांसत्प्रसवाख्यायामष्टमोऽध्यायःसमाप्तः ॥ ८ ॥ ॥ श्री ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे अष्टमोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे नवमाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ नवमेनवमेघाभःश्रीवत्साङ्कितमध्यमः पीताम्बरधरोदेवोवृणीतांकठगामिमां ॥१॥ अस्यार्थः कठःस्वरेऋचांभेदइतिवि श्वात्माधवःकठंस्वरंवंशीरवंप्रतिगतांगोपींयथानवमेनवशोभावतिवनेवृतवांस्तथेमांमन्मतिनवमेनवद्वारशोभितेदेहेतद्वंशीरवनिभांकठश्रु तिगतांवृणीतामङ्गीकुर्यादित्यर्थः शिवपक्षे अनवःपुराणःशारदोघनस्तदाभःश्रीवत्साङ्कितस्यविष्णोर्मध्येमाकान्तिर्यस्यसतथा एवंहिपुराणे उपाख्यायते सात्विकत्वात्शुक्लवर्णोविष्णुस्तमसाकृष्णवर्णस्यशंभोर्ध्यानात्श्यामतांगतःशंभुश्चतद्ध्यानात्शुक्लतामिति वरधरोवरप्रदइमां मतिपीतांकान्तिकेकुरंटकपुष्पवदर्पितामंगीकरोत्विति पीताकुरंटकोझिंटीत्यमरः कठंतदीयस्वरनिभामिमांश्रुतिगतामित्यर्थः ग्रन्थप्रमेय निर्गुणपक्षेतु नवमेघवदावरकेअज्ञानेपिआभाचिदाभासलक्षणायस्य श्रीवत्सेनजीवेनअङ्कितंमध्यमंयस्य यन्मध्येजीवःकल्पितइतिया

श्रीगणेशायनमः॥एवंमायापृथक्दृष्टायैरमीषांविचारणां॥श्रुत्वाशिष्योगुरुंभूयःपर्यपृच्छदिदंवचः १॥गुरो त्वयाममानेकमुनिदृष्टंस्ववेदनं॥विचित्राख्यानसंयुक्तमुक्तंतन्मोक्षसाधनं॥२॥ऐतरेयोमुनिस्तद्वन्मुनिःकौषी तकिस्तथा॥आदित्योभगवांस्तद्वच्छ्वेताश्वतरोमुनिः॥ वेदतत्सकलंत्वत्तःश्रुतमाख्यानसंयुतं॥३॥ मयागु रोविचित्रार्थास्तत्रचित्राःकथामताः॥ प्रजानाम्रुषिभिःसार्धसंवादोब्रह्मबोधकः॥ वामदेवस्यमुक्तस्यनिजा नुभवकीर्त्तनं॥४॥ प्रतर्दनस्यकाश्यस्यदैवोदासेर्महात्मनः॥ विजयःशक्रसंवादरूपोब्रह्मात्मबोधनः॥५॥

वत् पीतंस्वस्मिन्विलापितमंवरंधराचयेनसतथादेवोद्योतनात्मकःपरमात्माकठगामिनांकठाध्यायिनांमांप्रमाख्यांवृत्तिमाविष्कारेणभजेत नवमाध्यायइत्यर्थः जीवस्यश्रीवत्सरूपत्वंतु कौस्तुभव्यपदेशेनस्वात्मज्योतिर्विभर्त्यजः तत्प्रभांव्यापिनींसाक्षाच्छ्रीवत्समुरसाविभुरितिप्र सिद्धंश्रीमद्भागवतइति ॥ १ ॥ अथशिष्यप्रश्नमवतारयति एवमिति यैर्मुनिभिर्मायास्वरूपंपृथक्शुद्धात्मस्वरूपाद्दृष्टंतेषांविचारणांपरस्पर विचारनिष्पन्नमर्थंश्रुत्वाइदंपृष्टवानिति ॥ १ ॥ मेधावितासूचकोक्तानुवादपूर्वकंशिष्यप्रश्नमभिनयति गुरोइत्येकादशभिः स्वकीयं ज्ञानंभवतामस्मभ्युक्तमिति ॥ २ ॥ ऐतरेयइति ऐतरेयादिसंज्ञोमुनिवर्गोयद्वेदतत्श्रुतमिति ॥ ३ ॥ क्रमेणकथाअनुवदति मयेतिषड्भिः प्रथ मद्वितीयार्थौद्वाभ्यांक्रमेणोक्तौ ॥ ४ ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तृतीयचतुर्थार्थौनूद्यते बालाकेरितिद्वाभ्यां यत्कृतंशिरोव्यत्ययरूपं ॥ ६ ॥ ७ ॥ पंचमार्थंवदति याज्ञवल्क्यस्येति ॥ ८ ॥ षष्ठसप्तमयोस्तमाह याज्ञवल्क्येनेति यियासुनागंतुमिच्छुना ॥ ९ ॥ अत्याश्रमिभ्यइति तत्रअतीतग्रंथेएतत्एतावदर्थजातंमयाश्रुतं ॥ १० ॥ यच्चतत्रभवतासंप्रार्थिताश्चेत्यादिनायमनचिकेतसोःसंवादउपक्षिप्तस्तद्गतांविद्यांसप्रकारांवदेत्याह संप्रार्थिताश्चेतित्रिभिः साविद्याकाकीदृशी ॥ ११ ॥ १२ ॥ १३ ॥ इत्युक्तेइति वेदकीर्त्तितंकठशाखागतं ॥ १४ ॥ तत्रप्रथमकंडिकाद्वयार्थमुपबृंहयति आसीदितिदशभिः अरु

बालाकेश्चैवदृप्तस्यसंवादोजातशत्रुणा ॥ वंशःकांडत्रयस्यापिभिन्नाभिन्नस्वरूपतः ॥ ६ ॥ अश्विभ्यामपिसंवादऋषेःसर्वार्थदर्शिनः ॥ दध्यङ्ङाथर्वणस्यापिव्यसनंशक्रसंभवं ॥ ब्रह्मविद्याकृतेतद्वदश्विभ्यामपियत्कृतं ॥ ७ ॥ याज्ञवल्क्यस्यसंवादोनानादेश्यैर्द्विजोत्तमैः ॥ शाकल्यस्यतथैवात्रमरणंद्वेषकारिणः ॥ याज्ञवल्क्येनमुनिनाब्रह्मविद्योपदेशनम् ॥ ८ ॥ वारद्वयंक्षितीशायजनकायमहात्मने ॥ मैत्रेय्यैचस्वजायायैप्रव्रज्यांहियियासुना ॥ ९ ॥ अत्याश्रमिभ्योविज्ञानंयच्छ्वेताश्वतरोमुनिः ॥ उक्तवांस्तच्चतत्रैतच्छ्रुतमित्थंमयागुरो ॥ १० ॥ संप्रार्थिताश्चदेवानब्रह्मविद्यांकदाचन ॥ प्रयच्छंतिवरान्किंतुततोन्यानपिदुर्लभान् ॥ ११ ॥ सत्यपाशवशंप्राप्ताःकथंचित्तांवदंतिच ॥ यथायमःपुरावादीदर्थिनेनचिकेतसे ॥ १२ ॥ तदिदंश्रोतुमिच्छामिमहत्कौतूहलंगुरो ॥ कथंयमोब्रह्मविद्यामुक्तवान्नचिकेतसे ॥ कीदृशायचकासापिब्रह्मविद्यागुरोवद ॥ १३ ॥ इत्युक्तेगुरुराहैतदाख्यानंवेदकीर्त्तितं ॥ प्रहृष्टोहृष्टमनसेस्वशिष्यायप्रियायसः ॥ १४ ॥ आसीदुद्दालकोनाम्नाविप्रोवेदविदांवरः ॥ अरुणस्यसुतोलोकेकमनीयतमःसदा ॥ अन्नदानेननितरांकीर्तिंप्राप्तोद्विजोत्तमः ॥ १५ ॥ कदाचित्कुत्रचिद्यागेसर्वस्वंदातुमुद्यतः ॥ पुत्रस्वंप्रविधायैवशुभागाःस्नेहसंयुतः ॥ पुत्रेऽतिबालकेविप्रोधर्मज्ञानांपुरःस्थितः ॥ १६ ॥

णाख्यस्यपुत्रःकमनीयोऽर्थिभिःस्पृहणीयोयतोवाजपदोक्तान्नदानेनकीर्तिंप्राप्तइति ॥ १५ ॥ कदाचिदिति कुत्रचिद्विश्वजिदाख्ये याःशुभागावस्ताःपुत्रस्यस्वंधनमितिप्रविधायकल्पयित्वा यतोऽतिबालेपुत्रेस्नेहवानिति धर्मज्ञमुख्यः वृद्धौचमातापितरौभार्यासाध्वीसुतःशिशुः अप्यकार्यशतंकृत्वाभर्तव्यामनुरब्रवीदितिवाक्यानुसरणात् ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

गोवित्तमिति गोरूपंवित्तं स्वभागेनस्वकीयभागाभिप्रायेण ताःगाः ॥ १७ ॥ पातुमिति एतावृद्धागावोहिजलपानादिकमपिसम्यक्कर्त्तु मशक्ताइत्यभिव्यंक्तुमेवपीतोदकाइत्यतीतार्थप्रत्ययप्रयोगःश्रुतौकृतइतिभावः गर्भधारणमिंद्रियपदोक्तं ॥ १८ ॥ १९ ॥ तस्येति तस्यो द्दालकस्यस्वभावादास्तिकःसांसिद्धिकधर्मश्रद्धावान् ॥ २० ॥ तद्विचारमभिनयति यद्येनेत्यादिना स्पष्टं ॥ २१ ॥ एताइति एताजरत्यो गावोविप्राणांनसुखदाःप्रत्युतदुःखदाःसंति ततएतादृशीनांदानान्मेपिताःदुःखंयास्यतीति ॥ २२ ॥ अयमर्थोमंत्रेणोक्तइतिदर्शयंस्तदर्थमा

गोवित्तमेवबहुलमस्यासीद्ब्राह्मणस्यहि ॥ वृद्धागास्तुस्वयंतत्रजगृहेपुत्रलोभतः ॥ स्वभागेनचताःसोपिब्राह्म णेभ्योददौतदा ॥ १७ ॥ पातुंपानीयमप्येताअत्तुंचयवसंतथा ॥ नशक्ताःकेनदुग्धस्यदानेशक्तास्तुधेनवः ॥ १८ ॥ आशातासुकथंनामभवेद्गर्भस्यधारणे ॥ एतादृशीस्तुगादातुंप्रवृत्तोयंकदाचन ॥ १९ ॥ तस्यासीत्त नयःकश्चिन्नचिकेताइतिश्रुतः ॥ स्वभावादास्तिकोनित्यंकुमारःपंचहायनः ॥ इदंविचारयामासपितुरंकस्थि तस्तदा ॥ २० ॥ यद्येनदीयतेयस्मैयादृशायचयादृशं ॥ तत्तेनलभ्यतेयस्मात्तादृशेनचतादृशं ॥ २१ ॥ एता गावोऽधुनादत्ताःपित्राक्लेशैकहेतुकाः ॥ विप्राणांततएवायंपिताक्लेशंगमिष्यति ॥ २२ ॥ असुखानामयेलो काःसर्वदैवभयप्रदाः ॥ दुःखदोब्राह्मणानांयस्तान्सयातिनसंशयः ॥ २३ ॥ तावद्ददुःखदोमेत्रपितायाःस्युर्निर र्थकाः ॥ गास्तस्मादमुमेतस्माद्वारयामिकुदानतः ॥ २४ ॥ अनेनस्थापितागावोमदर्थंयाःसुशोभनाः ॥ तासा मेपकरोत्वत्रदानमस्यमयाहिकिं ॥ २५ ॥

ह असुखाइतिद्वाभ्यां योब्राह्मणानांदुःखदःसोऽसुखसंज्ञान्भयप्रदान्लोकान्यातीति ॥ २३ ॥ तावददिति यानिरर्थकानिष्फलागावस्ता गाविप्रेभ्योददत्समर्पयन्मेपिताविप्राणांदुःखदःसन्नुक्तंफलंगच्छेदतस्तंवारयामीति ॥ २४ ॥ तृतीयकंडिकार्थमुपबृंहयति अनेनेतिनवभिः अनेनपित्रा अत्रयागेयागावोमदर्थंस्थापितास्ताएवकुतोनददाति अस्यपितुर्मंचिंतयाकिंप्रयोजनमिति ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतोवित्तस्यपरलोकोपकारएवप्रधानंफलमित्याह पुत्रेति यत्पुत्रादिरूपंवित्तंतत्सर्वंपरलोकोपकारिसदेववित्तत्वेनवाच्यमपरंकेवलंबंधकत्वात्श्रृंखलाभमिति ॥ २६ ॥ अहमिति अहमप्यस्यपुत्रत्वेनवित्तंभवामिधर्मतोधर्ममर्यादामालोच्येति ॥ २७ ॥ यस्यचपुत्रस्य पश्यतःपितुःपरलोकहानिनिमित्तंस्यात्सपुत्रःपुरीषसमइत्याह अंधमिति ॥ २८ ॥ ततइति ततःस्वस्यवित्ततामालोच्यएतंमयिस्नेहयुक्तं पितरमहमात्मनोदानेप्रेरयामि एतावताऽयंमदभिप्रायंमदर्थस्थापितगोदानीयतारूपंज्ञास्यतिअथवाप्रक्ष्यतिततःस्वाभिप्रायंवक्ष्यामीतिद्व

पुत्रदारादिकंवित्तंपरलोकोपकारियत् ॥ तदेववित्तंविज्ञेयमपरंलोहश्रृंखला ॥ २६ ॥ अहंचास्यसुतोयस्मात्तस्माद्वित्तंनसंशयः॥अस्यैवधर्मतःस्वस्यजनकस्यमहात्मनः ॥ २७ ॥ अंधंतमःपितायस्यदुःखोदधिसमंव्रजेत् ॥ सुतस्यजानतःपुत्रःपितुरुच्चारएवसः ॥ २८ ॥ ततोहमात्मनोदानेप्रेरयिष्याम्यमुंमयि ॥ स्नेहयुक्तंततश्चित्तमयंमेज्ञास्यतिस्वयं ॥ २९ ॥ अथचैवंवचःश्रुत्वाप्रश्नमेषकरिष्यति ॥ ततोहंविशदंतस्मैवक्ष्येपित्रेत्रपृच्छते ॥ ३० ॥ इतिसंचिंत्यतनयःपितरंप्राहधर्मवित् ॥ तातकस्मैद्विजेंद्रायमांभवान्संप्रदास्यति ॥ द्वित्रिवारमिदंवाक्यमुक्तवान्पितरंप्रति ॥ ३१ ॥ पितापिपंडितंमन्यंविज्ञायतनयंततः ॥ कोपसंरक्तनयनइदंवचनमब्रवीत् ॥ ३२ ॥ त्वामहंपंडितंमन्यंपितृस्नेहावमानकम् ॥ दास्यामिमृत्यवेसर्वलोकसंहारहेतवे ॥ ३३ ॥ एवमुक्तेसपुत्रोपिचिंतामेतामुपागतः ॥ अयंदुःखकरंस्वस्यकस्मादेतद्वचोब्रवीत् ॥ पितामममयथाकश्चित्तामसःपामरःपरः ॥ ३४ ॥ पुत्रस्यमरणाद्दुःखंब्रह्महत्याफलंविदुः ॥ कुतएतत्स्वयंस्वस्यकृतवान्बुद्धिमानयं ॥ ३५ ॥

योरर्थः ॥२९॥३०॥ इतिसंचिंत्येति तनयोनचिकेताःपितरंप्रतीत्युक्तवान् इतिकिं हेतातमत्वंकस्मैद्विजायदास्यसीतिनकेवलमेकवारंतेनेदमुक्तंकिंतुद्वितीयवारंतृतीयवारंचेत्यर्थः ॥३१॥ एवंतंप्रगल्भंवदंतंपिताप्राहेत्याह पितापीति ॥३२॥ पितृवाक्यमभिनयति त्वामिति स्पष्टम् ॥ ३३ ॥ चतुर्थार्थंप्रपंचयति एवमुक्तइति ततःसनचिकेताएवंचिंतयामास एवंकथं एषपितास्वस्यदुःखप्रयोजकंवचनंकिमर्थमुक्तवान् ॥ ३४ ॥ पुत्रस्येति एतद्दुःखं ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममत्विदंप्रतिकूलंनभवतिअवश्यंभाविन्यर्थेपितृवाक्यपरिपालनजन्यधर्मस्यप्रत्युतलाभादित्याह ममेति श्रेयोधर्मानुकूलमतःपरंनास्ति यःस्वयंग्रहीष्यतितस्मैपित्रादानमिति ॥ ३६ ॥ परंत्वेतस्यदुःखमनुसंधायममचित्तंविषीदतीत्याह अस्येत्यादिना अत्रमद्वियोगे पुत्रस्य शिष्यस्यवातिस्रोवृत्तयः उत्तमश्चिंतितंकुर्यात्प्रोक्तकारीतुमध्यमः अधमोऽश्रद्धयाकुर्यात्प्रत्याख्यातायतद्वचइतिप्रसिद्धाः तत्राधमांवृत्ति महंनकदाचिद्भजामिकिंत्वेतस्यबहूनांशिष्याणांपुत्राणांवाउत्तमांमध्यमांवावृत्तिमेवभजामिअतःप्रियोऽसह्यवियोगश्चास्मीतिद्वयोरथः

ममनातःपरंश्रेयोयन्मांतस्मैपितास्वयं॥ दत्तवान्मृत्यवेयोमांस्वयमेवग्रहीष्यति॥ ३६॥ अस्यदुःखंपरंनित्यं पितुरत्रभविष्यति ॥ यतोहंप्रथमोनित्यंबहूनामस्मिमध्यमः ॥ ३७ ॥ तनयानांप्रियश्चैवसर्वदास्मिमहात्म नः॥ मांविनानक्षणंत्वेषपितामेत्रावतिष्ठते॥ ३८॥ किंस्विद्यमस्यसंयातेगृहेमयिकरिष्यति ॥ कार्यमया विनानूनंमत्तएषभविष्यति॥ ३९॥ इतोमयिगतेनूनंदुःखमस्यभविष्यति॥ कर्त्तव्यंचमयाकिंस्विद्यमस्या द्यभविष्यति॥४०॥ ममास्यचवियोगोयमुभयोरप्रयोजकः॥ यमस्यचततःकष्टंकृतवान्मेपिताधुना॥४१॥ इदानीमेववदनंपरिम्लानंपितुर्मम॥ अश्रूणिचबहून्येषमांविलोक्यविमुंचति ॥ ४२॥ आलिंगयतिमांगा ढंस्नेहपूर्णांतरात्मना॥ अनुतापंपरंप्राप्तस्तिष्ठत्येषोतिदुःखितः॥४३॥ ततएवंवदाम्यद्यमयिस्नेहंयथात्यजेत्॥ अन्यथानृतवाक्येननरकोस्यभविष्यति ॥ इतिसंचिंत्यपितरमिदंवाक्यमभाषत ॥ ४४॥

॥ ३७ ॥ ३८ ॥ किंचमद्गमनेनयमस्यकश्चिदुपकारोनास्तीत्याह किंस्विदिति स्विद्वितर्के कार्यंउपकारं मत्तोविभ्रांतः ॥ ३९॥ इतइति स्पष्टं ॥ ४० ॥ ममेति अप्रयोजकःअनुपकारकः यमस्यचाप्रयोजकइतिसंबंधः ॥ ४१ ॥ अस्येदानीमेवपरितापस्तुलक्षणैरनुभाव्य तइत्याह इदानीमेवेतिद्वाभ्यां स्पष्टंद्वयं ॥ ४२ ॥ ४३ ॥ पंचमार्थंप्रपंचयति ततइति ततएतादृशींदशामस्यालोच्यअनृतादेनंपरित्रातुं मयाकिंचिद्वाच्यमेवंविचार्यनचिकेताइदमुक्तवानित्यर्थः ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदंकिमित्याकांक्षायामाह अनुपश्येत्यादि अनुपश्येत्यस्यकोर्थः हेतातत्वमात्मानमभाषितपूर्वानृतमालोच्य पूर्वान्पितृपितामहादीननु क्तानृतकान्पश्येति तथाप्रतिपश्येत्यस्यकोर्थः तान्सर्वानालोच्यस्ववंश्यतुल्यान्परांश्चत्रैवर्णिकान्सत्यवादिनःपश्येतिद्वयोरर्थः ॥४५॥४६॥ परानुदाहरति कर्णइत्यादिना कर्णोविप्ररूपायेंद्रायत्वचंददौ शिबिश्चशरणागतकपोतत्राणार्थंस्वमांसंजीमूतवाहनश्चशरणागतार्थंराक्षसा यतनुंददौ सिंहायमयूरध्वजवत् दधीचिश्चदेवेभ्योवज्रार्थमस्थीनियाचमानेभ्यस्तानिददावितीतिहासादौप्रसिद्धमित्यर्थः॥४७॥ तथात्रा प्यतीतग्रंथेप्रोक्तानिसत्यसंरक्षणायमहात्मनांचरितान्यनुसंधेयानीतियद्दध्यङ्ःाथर्वणादिकानित्युक्तंतत्स्फुटयति दध्यङ्ङितिद्वाभ्यां स्पष्ट

अनुपश्ययथापूर्वेपूर्वजास्तवसुव्रत ॥ अनृतंनोक्तवंतस्तेमरणेपिमहाधियः ॥ आत्मानमवलोक्याथतान्सर्वा
श्चस्वपूर्वजान् ॥ ४५ ॥ प्रतिपश्यपरांस्तद्वत्तादृशान्सत्यवादिनः ॥ त्रैवर्णिकान्महाभागान्दध्यङ्ःाथर्वणादिका
न् ॥ ४६ ॥ कर्णस्त्वचंशिबिर्मांसंजीवंजीमूतवाहनः ॥ ददौदधीचिरस्थीनिप्रतिश्रुत्यवचःपुरा ॥ ४७ ॥ दध्य
ङ्ःाथर्वणोश्विभ्यांब्रह्मविद्यांप्रतिश्रुतां ॥ त्यक्त्वानिजंशिरोप्याहब्राह्मणोवेदवित्तमः ॥ ४८ ॥ इंद्रःप्रतर्दनायाह
ब्रह्मविद्यांस्वशत्रवे ॥ प्रतिज्ञायददौकामवरंजनकभूभुजे ॥ याज्ञवल्क्योपिमेधावीब्राह्मणोवेदवित्तमः ॥ ४९ ॥
तथादशरथोराजाप्राणेभ्योपिप्रियंसुतं ॥ अरण्येप्रेषयामाससिंहव्याघ्रादिसेविते ॥ ५० ॥ एवमन्येपिबहवः
कृतवंतोतिदुष्करं ॥ सत्यपाशवशंप्राप्ताबहुलाद्याश्चजंतवः ॥ ५१ ॥ अपिसस्यंयथातद्वद्दिवसेदिवसेजनः ॥
पच्यतेकालसूर्येणतद्वदेवप्रजायते ॥ ५२ ॥

म् ॥४८॥ ४९ ॥ तथाकैकेय्यैदत्तवरयोःपूर्त्यर्थमात्मत्वेननिरतिशयप्रेमास्पदंश्रीरामचंद्रमपिवनेविसर्जयतोदशरथस्यराज्ञोवृत्तमनुसंधेय मित्याह तथेति ॥ ५० ॥ एवमिति बहुलाःकृत्तिकागावइत्यमरस्तथाचयथागावःशरणागतत्राणात्मकस्वप्रतिज्ञानिर्वाहार्थंयतमानाय थागावोगोपायंतीतिश्रुतौलोकेचप्रसिद्धास्तत्प्रभृतयोऽन्येचबहवःसत्यपराःसंतीत्यर्थः ॥ ५१ ॥ अनित्येनक्षणभंगुरेणजीवितेननित्यस्य सत्यस्यसाधनमेवकौशलमितिदर्शयन्नाह अपिसस्यमिति किंचसस्यंवृक्षादिफलमिवजनःशरीरजातंकालरूपसूर्येणपच्यतेविनाशोन्मु खीक्रियतेतथातद्वदेवैषजनःपुनःपुनर्जायतेइत्यर्थः ॥ ५२ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइतिद्वाभ्यां एवंसत्यपालने श्रेयःशुभं ॥ ५३ ॥ ५४ ॥ एवमुक्तइति प्राहिणोत्प्रेषितवान् ॥ ५५ ॥ षष्ठसप्तमयोर्यमंप्रति यमपरिवारवाक्याभिनयपरयोरर्थमवतारयति सत्विति सनचिकेताःपितृभक्त्यादिप्रभावात्सशरीरोयमालयंगत्वायमंग्रामांतरगतंश्रुत्वा दिनत्रयमुपवासंकृतवान्मांपितृदत्तंयमोगृह्णीयादित्येतदर्थमितिद्वयोरर्थः ॥ ५६ ॥ ५७ ॥ अन्यथेति अन्यथाउपवासात्मकहठाकरणे

ततोहंस्वयमेवात्रमरिष्यामिनसंशयः ॥ त्वंचतद्वज्जनाःसर्वेमृत्युपाशवशंगताः ॥ ५३ ॥ ततस्त्वंवचनंसत्यंकुरुदत्वायमायमां ॥ एवंतवममाप्यत्रश्रेयस्तातभविष्यति ॥ ५४ ॥ एवमुक्तोतिदुःखेनपितापुत्रंयमायसः ॥ प्राहिणोद्दीनवचनःसत्यपाशवशंगतः ॥ ५५ ॥ सतुगत्वामहाभागोनचिकेतायमालयं ॥ पितृभक्त्यातथैवात्मतपसाशुद्धचेतसा ॥ ५६ ॥ यमेग्रामांतरंयातउपवासत्रयंगृहे ॥ चकारतस्यतेनात्मपरिग्रहणकारणात् ॥ ५७ ॥ अन्यथास्वपितुर्वाक्यमसत्यंतद्भविष्यति ॥ दातव्यस्यात्मनस्तेनयमेननपरिग्रहे ॥ ५८ ॥ यमोपिपरिवारेणकृत्वासंकेतमात्मनः ॥ दिनत्रयंगृहेनागात्तस्यचित्तपरीक्षकः ॥ ५९ ॥ एनमागतमाज्ञायसर्वेतेयमकिंकराः ॥ गृहेस्थितमिदंवाक्यमुक्तवंतोतिधार्मिकाः ॥ ६० ॥ अस्मिन्यमपुरेघोरेकिमर्थंविप्रबालक ॥ आगतोसीतितैरुक्तेसर्वमेतदुवाचसः ॥ ६१ ॥

यमकर्तृकआत्मनोनचिकेतसःपरिग्रहोंगीकारोनस्यात्तथाचपितुर्वाक्यमसत्यंस्यात्तन्माभूदित्याशयेनतथाकृतमितिपूर्वेणसंबंधः ॥ ५८ ॥ यमोपीति यमोपिपरिवारेणानुजीविवर्गेणसहतस्यनचिकेतसश्चित्तधैर्यपरीक्षितुंसंकेतंसभवद्भिर्यथाकथंचिद्विसर्ज्यइत्याकारंकृत्वात्रिदिनंनागादिति ॥ ५९ ॥ एनमिति एनंनचिकेतसं ॥ ६० ॥ अस्मिन्निति हेविप्रात्मजत्वमिहकिमर्थमागतइत्येवंतैर्यमपुरुषैःपृष्टेसतिसएतदागमननिमित्तंसर्वमुवाचेति ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वमेवेति धर्मराजसांनिध्याज्ज्ञाततत्त्वाअपियमपुरुषास्तद्वाक्यात्पुनर्ज्ञात्वाइदमाहुः इदंकिं हेवत्सयमआयुःक्षयात्पूर्वंचतुर्विधशरीरिणां मध्येकंचनापिअदत्तंदत्तंवानगृह्णाति किंचयमस्येहासन्निधानात्त्वयागृहंप्रत्येवगंतव्यमितित्रयाणामर्थः॥६२॥६३॥६४॥ इत्यादीति न चचालधैर्यादितिशेषः स्फुटमन्यत् ॥ ६५.॥ एवमवतारितयोस्तयोरर्थमाह यमेति हेयमराजन्तेगृहेविप्रकुमाररूपोऽतिथिरग्निरूपआगतोवर्त्ततेतस्यशांतयेझटितिशीघ्रमुदकंपाद्यादिजलमाहरप्रापयेत्यर्थः ॥ ६६ ॥ एतत्स्फुटयति ज्वलतइतिद्वाभ्यां यथावन्हेःशांतिर्जलेनत

पूर्वमेवचतेसर्वेज्ञाततत्त्वायमाश्रिताः॥ ज्ञात्वाबालस्यवचनात्पुनरूचुरिदंवचः॥ ६२॥ वत्सनायुःक्षयात्पूर्वं यमोगृह्णातिकंचन॥ अदत्तंवापिदत्तंवाचतुर्विधशरीरिणां॥ ६३॥ धर्मराजश्चनात्रास्तिप्राणिनांयोनियामकः॥ ततस्त्वंस्वगृहंशीघ्रंगच्छस्वंपितरंप्रति॥६४॥ इत्यादिबहुधोक्तस्तैर्नचचालयदातदा॥ तृतीयेदिवसेतीते यमआगान्निजंगृहं॥ आगतंधर्मराजंतंकिंकराइदमूचिरे ॥ ६५॥ यमवैश्वानरोविप्रकुमारस्तेगृहेतिथिः॥ तस्यशांत्यर्थमुदकंझटित्याहरमानद ॥ ६६ ॥ ज्वलतोत्रयथावन्हेर्भवेच्छांतिर्जलैःसदा ॥ अर्घ्यपाद्यादिभिस्तद्वदतिथेःशांतिरीरिता॥ ६७॥ शांतिशून्योयथावन्हिरुदकैःसपरिच्छदान्॥ गृहान्दहतितद्वत्स्यादतिथिःसर्वदाहकः॥ अपूजितोनरेणायमर्घ्यपाद्यादिभिर्जलैः ॥ ६८॥ संभावितसुखस्याशाप्रतीक्षानिश्चितस्यच॥ सुखस्यसंगतंनद्वद्विविधंसुखहेतुकं ॥ ६९ ॥ स्वाभीष्टेनजनेनात्रसूनृतायासमीरिता ॥ वाणीसुखकरीलोकेवेदेचार्थप्रकाशिनी॥ ७०॥

थापाद्यादिदानेनातिथेरिति ॥ ६७ ॥ शांतीति यथाशांतिमनीतोग्निर्गृहंदहेत्तथाऽनर्चितोतिथिःसर्वंदहेदित्यर्थः ॥ ६८ ॥ सर्वपदार्थंदर्शयति संभावितेतिचतुर्भिः संभावितस्यानिश्चितप्राप्तिकस्यसुखस्येच्छाआशेत्युच्यते निश्चितस्यसुखस्येच्छाप्रतीक्षेत्युच्यते स्वाभीष्टेनजनेनसहसमागमःसंगतमित्युच्यते तथालोकेवेदेचार्थप्रकाशिकासुखकरीवाणीसूनृतेत्युच्यतइतिद्वयोरर्थः ॥ ६९ ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इष्टपूर्तशब्दयोरर्थौदर्शयति अग्नीति तटाकादीत्यादिपदेनप्रपादानादिपरिग्रहः ॥ ७१ ॥ पुत्रपशुपदयोरर्थावुच्येते औरसाइति गवाद्याश्च सल्लक्षणाःपशवइति एतदाशादिरूपंसर्वमतिथिर्दहतियस्यमंदस्यगृहेसोतिथिर्ब्राह्मणोनश्नन्वसेदितिसंबंधः तस्मात्सोवश्यमर्च्यइतिभावः ॥ ७२ ॥ ७३ ॥ अष्टमार्थमाह एवमितित्रिभिः इत्थंतैःपार्षदैरुक्तोयमस्तमतिथिंप्रत्येवमुक्तवानिति ॥ ७४ ॥ एवंकथमित्याकांक्षांपूरयति तिस्रइतिद्वाभ्यां हेब्रह्मन्यतस्त्वंमद्गृहेऽनश्नंस्तिस्रोरात्रीरवात्सीरुषितवानसिततस्तद्दोषशांत्यर्थंवरत्रयंवरयेति ॥७५॥ स्वस्तीति हेब्रह्मन्

अग्निष्टोमादिकोयागइष्टमित्युच्यतेबुधैः॥ कूपारामतटाकादिपूर्त्तमुक्तंमनीषिभिः ॥ ७१ ॥ औरसास्तनयास्तद्वत्सर्वलक्षणसंयुताः ॥ गवाद्याःपशवस्तद्वद्बहुमूल्याअनेकशः ॥ ७२ ॥ एतत्सर्वंदहत्येवपुरुषस्याल्पचेतसः॥ यस्यानश्नन्वसेदत्रब्राह्मणस्त्वतिथिर्गृहे॥ ७३ ॥ एवमुक्तोयमस्तैःस्वैःकिंकरैरुक्तवानथ॥ अतिथिंभीतचेताःसंस्तंतदानचिकेतसं ॥ ७४ ॥ तिस्रोरात्रीर्गृहेयन्मेत्यवात्सीस्त्वंप्रियोऽतिथिः॥ अनश्नंस्ततएवत्वंवरांस्त्रीन्वरयाधुना ॥ ७५ ॥ स्वस्तितेस्तुप्रियंकर्त्तुंयदिब्रह्मन्समुद्यतः ॥ नमस्तेऽतिथयेतस्मादस्तुमेचास्त्वनामयं ॥ ७६ ॥ एवमुक्तोयमेनैवनचिकेतावरांस्त्विमान् ॥ वव्रेत्रीन्बुद्धिसंपन्नोधर्मराजंप्रतीदृशान् ॥ पितृप्रसादमग्नेश्चज्ञानंचैवात्मनस्तथा॥ ७७॥ पितृप्रसादमेवंसवव्रेबुद्धिमतांवरः ॥ दुःखशून्योयथाहंवैत्वत्प्रसादाद्दिविस्थितः॥ ७८॥ सुमनाविगतक्रोधस्तथामांप्रतिगौतमः॥ यमलोकात्पुनःप्राप्तंमांविश्वासमुपागतः॥ यथापूर्ववदेदेषवरोमेप्रथमःस्मृतः॥ ७९ ॥

यदित्वंक्षमयामत्प्रियंकर्त्तुंसमुद्यतोसितस्मात्तेपिस्वस्त्यस्तुनमश्चास्तुत्वत्प्रसादान्ममसपरिवारस्यानामयंदुःखाभावश्चास्त्वित्यन्वयः ॥७६॥ उत्तरग्रंथमवतारयति एवमुक्तइति इत्युक्तोनचिकेताःपितृप्रसादाग्निज्ञानात्मज्ञानरूपांस्त्रीन्वरान्वृतवानित्यर्थः ॥ ७७ ॥ नवमार्थंदर्शयति पितृप्रसादमितिपङ्क्तिः तत्रपितृप्रसादमित्थंसवृतवान् इत्थंकथं हेधर्मराजयथादिविस्वर्गरूपेभवल्लोकेस्थितोहंदुःखशून्यत्वादिमांस्तथामत्पितादुःखशून्यत्वसौमनस्यनिष्क्रोधत्वविश्वस्तत्वैर्युक्तःसन्मामितोगतंपूर्ववत्संभाषेतेतिद्वयोरर्थः ॥ ७८ ॥ ७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुतत्रमुनिवर्येदुःखशून्यत्वादिप्रतिद्वंद्विदुःखादिकंकथंसंभाव्यतइतिशंकांवारयितुंदुःखादिनिमित्तानिदर्शयति पितुरिति मदर्शनेनदुःखंमांप्रतिक्रोधावेशेनक्रूरवाक्यसमीरणोपलक्षितंदौर्मनस्यंचसंभाव्यतइत्यर्थः ॥८०॥ पंडितमिति तथामयिपंडितंमन्यतांमत्वाक्रोधश्चसंभाव्यते ॥ ८१ ॥ यममिति तथायमंगतानांतेनैवदेहेनपुनरागमनस्यप्रायेणादर्शनादविश्वासश्चेतोगतेमयिसंभाव्यते ॥ ८२ ॥ इतइति एतद्दुःखादिकंसंभाव्यंवस्तुतोमत्पितर्यसंभवदपिव्यहारदृष्ट्यासंभावनायोग्यंत्वत्प्रसादतइतोमयिगतेमास्त्वित्यर्थः ॥ ८३ ॥ दशमार्थ

पितुर्मेसुमहद्दुःखंवर्ततेमामपश्यतः ॥ मनसश्चतथातापोमहान्वाक्यसमीरणे ॥ मृत्यवेत्वाददामीतिसुक्रोधाविष्टचेतसः ॥ ८० ॥ पंडितंमन्यतांतद्वन्ममज्ञात्वामहात्मनः ॥ क्रोधश्चसुमहांश्चित्तेवर्त्ततेवन्हिनासमः ॥८१॥ यमंप्राप्यतथाकेपिमर्त्यलोकंनयांतिच ॥ तेनैववपुषातस्मादविश्वासश्चसंभवेत् ॥ ८२ ॥ इतोमयिगतेतत्रधर्मराजवरप्रद॥माभूयादखिलंत्वेतत्संभाव्यंत्वत्प्रसादतः॥ ८३॥ एवमुक्तोधर्मराजोनचिकेतसमब्रवीत्॥ सर्वमेतत्त्वयाप्रार्थ्यंपितुस्तेद्यभविष्यति॥ ८४॥ यथापूर्वंसविश्वासीमर्त्यलोकंगतेत्वयि॥ मयासंप्रेरितेतेपितावत्सर्वंभविष्यति॥ ८५॥ त्वत्कृतेनैवदुःखंनगमिष्यतिकदाचन॥ वीतमन्युश्चभवितासुखंस्थास्यतिसर्वदा॥ निद्राहारादिकंतद्वत्सुखचित्तोगमिष्यति ॥ ८६ ॥ उद्दालकःपितातेसआरुणिःसर्वशास्त्रवित् ॥ दृष्ट्वामृत्युमुखान्मुक्तंभवंतंपुनरागतम्॥ ८७॥ पितृप्रसादमासाद्यवरंयममुखात्पुनः ॥ नचिकेताधर्मराजमिदंवव्रेवरांतरं ॥ ८८ ॥

माह एवमुक्तइतिचतुर्भिः स्पष्टम् ॥८४॥ यथेति मयाप्रेरितेत्वयिइतोगतेसतिसत्वत्पितायथापूर्वंविश्वासीभविष्यतितथातवापिसर्वंदुःखशून्यत्वादिकंभविष्यतीति ॥ ८५ ॥ त्वत्कृतेनेति तथात्वत्कृतेनत्वदाचरितेनदुःखंदौर्मनस्यंनभविष्यतिसचोद्दालकोऽरुणस्यापत्यंवीतमन्युःस्वस्थश्चसन्निद्रादिकंकरिष्यतित्वामागतंदृष्ट्वेतिद्वयोःसंबंधः उद्दालकपदेश्रुतौस्वार्थिकइजितिबोध्यम् ॥८६॥८७॥ द्वितीयवराभिनयपरयोरेकादशद्वादशयोरर्थमाह पितृप्रसादमितिपंचभिः वरांतरंद्वितीयंवरं ॥ ८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंकिमित्याकांक्षायामाह स्वर्गेइति स्वर्गपदेनात्रस्वर्लोकमारभ्यब्रह्मलोकावसानऊर्ध्वलोकसमुदायोविवक्षितः तत्रस्वर्गेलोकेगतानांम नुजानामधिकारिणांभयंमृत्युरूपाद्भवतोजरादिभ्यश्चनविद्यतेतत्रगतोजंतुःसुखेनमोदतेतृष्यत्येवेतिमयाश्रुतंवेदविद्भ्यइतिशेषइतिद्वयोःसंबंधः ॥ ८९ ॥ ९० ॥ सत्विति सचस्वर्गश्चितेनचयनसाध्येनाग्निनानिश्चितंलभ्यइतिचश्रुतं तंचस्वर्ग्यंस्वर्गसाधनभूतमग्निंस्वर्गेवर्तमानोभवानभिजानात्येवतंमह्यंव्याचक्ष्वेत्यर्थः ॥ ९१ ॥ अयमग्निरमृतत्वहेतुःश्रुतइत्याह मोक्षमिति यतोऽनेनाग्निनास्वर्गंगताब्रह्मविद्याद्वा

स्वर्गेलोकेभयंकिंचिन्मनुजानांनविद्यते ॥ मृत्योस्त्वत्तोजरातोवाव्याधितःशत्रुतोपिवा ॥ ८९ ॥ क्षुधातोवा पिपासातःशोकतोमोहतोपिवा ॥ मोदतेचसदाजंतुःसुखीभूत्वेतिहिश्रुतं ॥ ९० ॥ सतुस्वर्गोनृभिर्गम्यश्चितेनैवाग्निनासदा ॥ स्वर्ग्यमग्निंभवान्स्वर्गेस्मरत्येवनसंशयः ॥ श्रद्दधानायमर्त्यंत्वंतमग्निंवक्तुमर्हसि ॥ ९१ ॥ मोक्षंचस्वर्गलोकस्थाभजंतिब्रह्मविद्यया ॥ आभूतसंप्लवंस्थानंब्रह्मज्ञानंविनापिच ॥ अयंवरोद्वितीयोमेदातव्योभवतानघ ॥ ९२ ॥ एवमुक्तोयमोराजानचिकेतसमब्रवीत् ॥ स्वर्ग्यमग्निमहंजानन्ब्रवीमिनचिकेतसे ॥ तुभ्यंप्रकर्षतस्तत्त्वंसावधानमनाःशृणु ॥ ९३ ॥ अनंतलोकसंप्राप्तौस्थितावपिचकारणं ॥ एतमग्निंसदाबुद्धौधीमतांसमवस्थितं ॥ विद्धिस्वरूपतःसंतंकाष्ठेष्विवजगत्त्रये ॥ ९४ ॥

रामोक्षरूपंमुख्यममृतंभूतसंप्लवाख्यप्रलयपर्यंतस्थितिरूपंगौणममृतत्वंवायांतीत्यर्थः ॥ ९२ ॥ त्रयोदशादित्रयाणामर्थमाह एवमुक्तइतिद्वादशभिः एवमुक्तोयमआह हेनचिकेतस्तुभ्यमहंस्वर्ग्यमग्निंप्रकर्षेणइतिकर्त्तव्यताख्यांगादिकलापवैशिष्ट्यरूपेणसहब्रवीमितंशृणु ॥ ९३ ॥ अनंतेति अनंतस्यस्वर्गलोकस्यलाभेक्षेमेचकारणभूतमेतमग्निंवक्ष्यमाणविराड्रूपत्वात्काष्ठेष्वग्निवत्रिषुलोकेषुस्थितमपिधीमतांबुद्धावेवगुहाभूतायांस्थितंगोप्यत्वाद्वस्तुतःसाक्षिरूपत्वाद्वाजानीहीत्यर्थः ॥ ९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति एवमुक्त्वाधर्मराजस्तस्मैशिष्यायतमग्निं विराड्रूपत्वेनसर्वकारणत्वाल्लोकादिंलोकानामाद्यमवदत् तथाचयनयागेतस्याग्नेःस्वरूपघ टिकाइष्टकायावत्योयत्संख्याकायादृशरूपाश्चभवंतियथाचयेनप्रकारेणचीयंतेन्यस्यंतेयच्चान्यत्तदुपयुक्तंद्रव्यादिकंतत्सर्वमवददितिद्व योरर्थः ॥ १५ ॥ १६ ॥ प्रत्यवादीदिति सचनचिकेतास्तत्सर्वंमृत्युतोयमादधीतंतदाज्ञयाप्रत्यवादीत्प्रत्युच्चारितवान् विश्वाससहितोभ यप्रयुक्तगद्गदत्वादिहीनः ॥ १७ ॥ शिष्यस्येति अग्नेश्चित्याग्निग्रंथस्यप्रत्युच्चारणादनुवादात्तुष्टोयमइदमाह इदंकिं हेनचिकेतःअयमधि कोवरोदीयतेयदयमग्निस्त्वत्संबंधवाचकेननाचिकेतइतिनाम्नाप्रसिद्धोभविष्यतीतिद्वयोरर्थः ॥ १८ ॥ १९ ॥ एतदेवस्फुटयति नाचिकेत

एवमुक्त्वायमोराजालोकादिंसर्वकारणं॥ विराडात्मकमग्निंतंतस्मैशिष्यायसोवदत्॥ १५॥ यद्रूपाइष्टकास्त द्यावंत्योवायथापिवा ॥ चीयंतेसकलंतद्वद्द्रव्यमंत्रक्रियादिकं ॥ १६ ॥ प्रत्यवादीत्सचाप्येतदधीतंयत्तुमृ त्युतः॥ विश्वाससहितःशिष्योधर्मराजस्यशासनात्॥ १७ ॥ शिष्यस्यतस्यसंलोक्यमृत्युःप्रज्ञामलौकिकीं ॥ यथोक्तोच्चारणादग्नेःसंतुष्टइदमब्रवीत्॥ १८॥ वरत्रयाद्वरोन्योयंमयातुभ्यंप्रदीयते॥ तवैवायंमयोक्तोग्निर्ना मधारीभविष्यति ॥ १९॥ नाचिकेतमसुंवन्हिंकथयिष्यंतिसद्धियः॥ यावद्वेदाश्चसूर्यश्चतथाभूतादिकंजग त्॥ तावदग्निरयंब्रह्मंस्तवनाम्नाभविष्यति॥ १००॥ अन्यंचैववरंतुभ्यंददामिनचिकेतसे॥ अग्नेरुच्चारणात्तुष्टः स्वशिष्यायमहात्मने॥ १०१॥ जांबूनदमणिप्रोतसूत्रसंघविराजितां ॥ अमूल्यनवरत्नौघमंडितांसूर्यसन्नि भां॥ १०२॥ स्थूलामलकसंमानमुक्ताकोटिविलंबिनीं॥ मालामिमांमयादत्तांस्ववक्षसिविधारय॥ चित्रव र्णांयथामेघोविद्युतंशब्दसंयुतां ॥ १०३ ॥ इत्युक्तातामदान्मालांतस्मैसनचिकेतसे ॥ धर्मराजोऽतिसंतु ष्टोव्यग्नेरत्रानुभाषणात्॥ १०४॥

मिति सद्धियःसुबुद्धयः ॥ १०० ॥ अन्यंचवरंस्तंकापदोक्तमालारूपंददामीत्याह अन्यमितित्रिभिः स्पष्टम् ॥ १०१ ॥ मालांवर्णयति जांबूनदेति उत्तमकनकमयामणयोमण्याकाराःकणाःप्रोतायत्रतादृशैःसूत्रयष्टिभिर्विराजितांनवभिर्वज्रादिभीरत्नैःसूर्यवद्दीप्तांस्थूलाम लकतुल्यानांमुक्तानांकोटिभिरसंख्यव्यक्तिभिरग्रभागैर्वापरस्परंमिलितैर्दीर्घामिमांसशब्दांमालांविद्युतंमेघइवधारयेतिद्वयोरर्थः॥ १०२॥ ॥ १०३ ॥ इत्युक्तेति अग्नेरग्निग्रंथस्यात्रगुरोःसन्निधावनुभाषणादनुवादात्तुष्टः ॥ १०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिणाचिकेतइत्यादेःषोडशस्यार्थमाह नाचिकेतमितित्रिभिः इममग्निमद्वारान्नाचिकेतसंज्ञंत्रिस्त्रिवारंचित्वाचयनेनसंपाद्यत्रीनूयागान ग्निष्टोमादिकान्योमात्राआपंचमवर्षात्ततःपित्राततआचार्येणचसुशिक्षितःशिक्षाद्वारासंबद्धःसन्कुरुतेसब्रह्मविज्ञानजन्मनाविनापिब्रह्म लोकाप्तिद्वाराजन्ममृत्यूतरेत् अथवाअत्रभवेजन्मनिब्रह्मविज्ञानस्यसाकल्यंसंपत्तिजन्मादितरणसाधनभूतांलभेतेतिद्वयोरर्थः ॥ १०५ ॥ ॥१०६॥ स्वर्गेइति अथवातस्यस्वर्गवासरूपंमोक्षरूपंवाजन्ममृत्युतरणंभवतिपरंतुसमोक्षःकस्यचिदेवभवतिदुर्लभत्वात् स्वर्गस्यजन्ममृत्यु तरणरूपतासूचितमात्यंतिकत्वमिदमेव इदंकिं धर्मिष्ठस्यस्वर्गाद्यत्परिभ्रंशोनभवेत्पुण्यपर्यंतंवासश्चस्यादित्यर्थः ॥१०७॥ ब्रह्मणइति हि

नाचिकेतममुंयोग्निंत्रिश्चित्त्वोक्तविधानतः ॥ यागांस्त्रीन्कुरुतेमातृपित्राचार्यैःसुशिक्षितः ॥ १०५ ॥ जन्म मृत्यूतरेत्सोत्रब्रह्मविज्ञानजन्मना ॥ विनापिब्रह्मविज्ञानसाकल्यंवाभवेत्रहि ॥ १०६ ॥ स्वर्गेवासोथवामो क्षोब्राह्मणस्यहिकस्यचित् ॥ स्वर्गादस्यपरिभ्रंशोधर्मिष्ठस्यमहात्मनः ॥ नभवेत्पुण्यंयावद्वैतावत्कालंवसेद्ध्रु वं ॥ १०७ ॥ ब्रह्मणःसूत्रतोजातमग्निंसर्वज्ञरूपिणं ॥ विराजंदीप्तवपुषंस्तुत्यंसर्वैःसुरासुरैः ॥ ज्ञात्वाकर्मादि कंकृत्वास्वर्गंमोक्षंचवाव्रजेत् ॥ १०८ ॥ यतएवंततोयेनत्रिश्चितोग्निर्भवेदयम् ॥ एतत्त्रयंसुविज्ञायरूपसं ख्याप्रकारतः ॥ इष्टकाअग्निरूपंसस्वर्गेलोकेत्रमोदते ॥ १०९ ॥ फलेनसहितंदेवमग्निमुक्त्वायमःपुनः ॥ इदं वचनमाहैतत्स्वशिष्यंनचिकेतसं ॥ ११० ॥ अंगुल्यानिर्दिशन्नग्निमेषतेग्निर्मयेरितः ॥ नचिकेतस्त्वयापृष्टः स्वर्ग्योयोदुर्लभोनृणां ॥ द्वितीयोयंवरोजातस्तृतीयंवरयाधुना ॥ १११ ॥

रण्यगर्भरूपाद्ब्रह्मणोजातंविराडात्मकमेतमग्निंदेदीप्यमानंसर्वैःस्तुत्यंचयोज्ञात्वावास्वंकर्मयागादिरूपंआदिपदयाद्ग्नमुपासनंचकरोतिसभा वनातारतम्यानुसारेणस्वर्गरूपांमोक्षरूपांवाशांतिंव्रजतीत्यर्थः ॥ १०८ ॥ सकलकर्मफलोपसंहारपरस्यसप्तदशस्यार्थमाह यतएवमिति यतएवमीदृक्प्रभावोऽयमग्निस्ततइदंसिद्धं इदंकिं येनरूपसंख्याप्रकारैस्त्रिविधायाइष्टकाश्चित्वाग्नेःस्वरूपभूतास्तदात्मकमेतत्त्रयंविज्ञाय अयंनाचिकेतोग्निस्त्रिवारंचितःसस्वर्गंमोक्षंवाक्रमेणप्राप्यमोदतेइत्यर्थः ॥ १०९ ॥ अष्टादशस्यार्थमाह फलेनेति एवंसफलमग्निरूपदेव विज्ञानमुक्त्वापुनर्यमऊर्ध्वलोकात्मकमग्निंनिर्दिशन्सन्निदमाह हेनचिकेतःयस्तुभ्यंमयाग्निरुक्तःसएषदृश्यतेस्वर्गरूपेण एवंद्वितीयवरपूर्त्तौ सत्यांतृतीयंवरयेतिद्वयोरर्थः ॥ ११० ॥ १११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येयंप्रेतेइत्यादेरूनविंशस्यार्थमुपबृंहयति एवमुक्तेपुनरितित्रिंशता स्पष्टं ॥ ११२ ॥ धर्मराजेति हेधर्मराजसर्वस्यदेहिनोमरणंप्रारब्धांत कालावच्छिन्नत्वाद्भवति मृत्युर्जन्मवतामित्यादिपुराणवचनैर्मृत्योर्जन्मव्यापकतायाःप्रसिद्धेरितिद्वयोःसंबंधः ॥ ११३ ॥ ११४ ॥ अतोऽन्यदार्त्तंजातस्यहिध्रुवोमृत्युरित्यादिश्रुतिस्मृतिवचनानिचोक्तव्याप्तिंदर्शयंतीतिसूचयन्नाह जातानामिति ब्रह्माहिरण्यगर्भस्तत्प्रभृतीनां जन्मभाजांमरणंध्रुवमितिमयाश्रुतमिति ॥ ११५ ॥ तत्रजन्मव्यापकेमरणेआत्मनःसत्तायांसंशयेकैमुत्यंदर्शयितुंजीवनदशायांतत्संशयं चार्वाकादियुक्तिभिर्दर्शयति विद्यमानेपीतिविंशत्या केचिद्धीमतस्तार्किकादेहेसत्यप्यात्मनोनसत्तांसत्ताभावमित्थंवदंतीत्यर्थः ॥११६॥

एवमुक्तेपुनःप्राहतृतीयवरलिप्सया ॥ नचिकेताधर्मराजंसत्यपाशवशंगतं ॥११२॥ धर्मराजजनःसर्वश्चतुर्विधशरीरभाक् ॥ म्रियतेसर्वथैवांतेकालादेवनसंशयः ॥११३॥ मृत्युर्जन्मभृतांयस्माद्देहेनसहजायते ॥ अद्यवाब्दशतांतेवाततःसर्वोंऽर्तिंव्रजेत् ॥ ११४ ॥ जातानांमरणंनित्यंब्रह्मादीनांसमंततः ॥ आवश्यकंधर्मराजश्रुतमेतन्मयापुरा ॥ ११५ ॥ विद्यमानेपिदेहेस्मिन्नसत्तामात्मनःसदा ॥ केचिद्वदंतिधीमंतएवंयुक्तिपरायणाः ॥११६॥ आत्मानामनदेहादिसंघातादपरोस्तिहि ॥ सतेभ्यस्तुपृथक्त्वेनयस्मान्नैवोपलभ्यते ॥११७॥ आत्मादेहादिसंघातात्पृथक्त्वेसतुकीदृशः ॥ स्पर्शादिमान्यथान्योवाप्रापितःसर्वदेहिनां ॥ ११८ ॥ स्पर्शेनलभ्यमानश्चेद्वायुरेवभविष्यति ॥ आत्माप्राणइतिप्राप्तोत्यनिष्टंतत्त्ववादिनां ॥ ११९ ॥

इत्थंकथमित्याकांक्षायामाह आत्मेत्यादि आत्मेत्यास्तिकानांप्रसिद्धोयोभावःससंघाताद्भिन्नोनास्तिदेहादिभ्यःपृथगनुपलभ्यमानत्वादित्यर्थः ॥ ११७ ॥ यदितुसंघातात्पृथक्सइष्यतेतदावक्तव्यंकिंसआत्मास्पर्शादिगुणकस्तद्रहितोवेत्याह आत्मादेहादीति प्रापितः प्रसंजितोभ्युपगतइतियावत् चार्वाकैर्वाय्वादिभूतचतुष्टयस्यैवांगीकारात्स्पर्शस्यादौनिर्देशइतिबोध्यं ॥ ११८ ॥ तत्रात्मनःस्पर्शवत्वेन त्वग्ग्राह्यत्वस्वीकारेवायुतत्त्वात्मकप्राणरूपत्वापत्तिःस्यात्साचनित्यात्मवादिनामनिष्टाप्राणानित्यतायाःस्पष्टत्वादित्याह स्पर्शेनेति तदात्मनःप्राणरूपत्वं ॥ ११९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रपक्षेविनिगमनाविरहमपिदर्शयति अपीति यदिप्राणरूपोवायुरात्माभवतितदातेजःप्रभृतिभूतत्रयमात्मानभवतीत्यत्रकिंचिद्विनिगमकंवाच्यमित्यर्थः ॥ १२० ॥ ननुजीवनाभावप्रयोजकाभावप्रतियोगित्वमेवप्राणस्यात्मत्वसाधकमितिचेत्सममेतत्तेजःप्रभृतिष्वपि यतउष्णत्वाद्यभावेपिजीवनंनदृश्यतेइत्याह प्राणेनेति ओजोनामरेतसःसारभूतोष्टमोधातुरित्युक्तंप्रथमाध्यायेतद्रहितोऽनोजाः ॥ १२१ ॥ औष्ण्यादीनांतेजोमयत्वादिकंदर्शयति अग्नेरिति स्पष्टं ॥ १२२ ॥ मरणकालेतेषांसर्वेषामेवासत्वंसममित्याह अपायइति चतुर्णांप्राणौष्ण्यरक्तौजसामपायोवियोगोमरणेसमोदृश्यतेजाड्यंचसर्वेषांसममतःप्राणएवात्मेतिपक्षपरिग्रहोऽयुक्तइत्यर्थः ॥ १२३ ॥ नचज्ञानप्र

अपिप्राणोवायुरूपोभवेदात्मायदातदा॥ तेजआदिकुतोनात्माभवेदेतद्वदंत्विह॥ १२०॥ प्राणेननविनायद्वज्जीवनंतद्वदेवहि ॥ तेजआदिविनाप्यत्रनदृष्टंजीवनंक्वचित् ॥ अनुष्णोवापिनीरक्तोप्यनोजावानजीवति ॥ १२१॥ अग्नेरौष्ण्यंवपुष्यस्मिन्रक्तंनीरास्रजायते॥ पृथिवीतस्तथौजोपिवायोःप्राणश्चदेहिनां॥ १२२॥ अपायोत्रचतुर्णांहिसमएवप्रदृश्यते ॥ मरणेपक्षपातोयंव्यर्थःप्राणेतुवादिनां॥ औष्ण्यादीनामचैतन्यंयदिप्राणेपितत्समं॥ १२३ ॥ अवस्थानेचतुर्णांहिज्ञानमुत्पद्यतेयदा॥ तदाप्राणस्यविज्ञानमितिकेनविनिर्णयः ॥ १२४॥ अतःप्राणात्मवादोयंमोहमात्रविनिर्मितः ॥ बालिशैर्वादिभिर्युक्तिहीनैरात्मविमोहकः॥ १२५॥ अपिप्राणोनिराधारःकुतोदेशांतरंव्रजेत्॥ व्रजन्वाविलयंकेननव्रजेद्बाह्यवायुवत् ॥ नबाह्यावायवोनाशंनयांतीतिव्यवस्थितिः॥ १२६॥

योजकत्वंप्राणेविशेषइतिवाच्यं ज्ञानकालेचतुर्णांसान्निध्यस्याविशेषेणतेष्वेकस्यैवज्ञानप्रयोजकत्वमितिवक्तुमशक्यत्वादित्याह अवस्थानइति यदाउक्तानांचतुर्णामवस्थानेसन्निधौसमेसतिज्ञानमुत्पद्यमानंदृष्टंतदाइदंज्ञानंप्राणस्यैवधर्मइतिवक्तुमयुक्तमित्यर्थः ॥ १२४॥ अतइति आत्मनोवक्तुर्विमोहंकायतिशब्दयतिप्रकाशयतीतियावत्सतथा ॥ १२५ ॥ प्राणस्यात्मत्वायोगेहेत्वंतरानुपपत्त्यंतरंदर्शयति अपिप्राणइत्यादिना किंचप्राणरूपआत्मादेशांतरंपरलोकंगच्छन्निराधारःसन्कथंव्रजेत्मार्गेएवबाह्यवायुवत्कथंनलीयेतेतिवक्तव्यमित्यर्थः नचबाह्यवायूनांलयेदृष्टांतताकथमितिवाच्यं यतोबाह्यवायवोनाशंनयांतीतिव्यवस्थितिर्निश्चयोलोकस्यनास्तिप्रत्युतविलयएवलोकप्रसिद्धइति ॥ १२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचवायुरूपस्यात्मनोबद्धवद्देहेस्थितिरेवानुपपन्नेत्याह अपिवाय्विति स्पष्टम् ॥ १२७ ॥ यदिचप्राणस्यदेहस्थितेर्विनाशस्यचप्रयोजकं कर्मेष्यतेतदातस्यकर्मणोनित्यत्वमनित्यत्वंवाइतिवाच्यमित्याह कर्मणेति ॥ १२८ ॥ आद्येकर्मणएवात्मत्वापत्तिरित्याह नित्येनेति तस्यप्राणस्यदेहेबंधनंविनाशनंचयदिकर्माधीनंतदातत्कर्मैवात्मास्त्विति ॥ १२९ ॥ अंत्यआह अनित्येइति अनित्येकर्मणिसतितस्यकर्मणोनाशात्प्राणोवहिर्गच्छतीतियथाकल्प्यतेतथाकर्मनाशादेषप्राणरूपआत्मानश्यतीत्येवकुतोनकल्प्यतेइत्यर्थः तथाचवादिनामनिष्टापत्तिरितिभावः ॥ १३० ॥ फलितमाह तस्मादिति यतःपरलोकगमनाद्युपपत्तिरत्रवादेनास्तिततोभूतचतुष्टयंसंहितमात्मेतिवदंतंचार्वाकम

अपिवायुस्वरूपोयंसच्छिद्रेस्मिन्शरीरके॥ केनबद्धोवपुर्हित्वायेननायंबहिर्व्रजेत्॥ १२७॥ कर्मणाबंधनंदेहेकर्मणैवविनाशनं॥ यदिप्राणस्यतत्कर्मनित्यंवानित्यमेववा ॥ १२८॥ नित्येनकर्मणादेहेबंधनंवाविनाशनं॥ यदितस्यतदेवात्माकुतस्तेनभविष्यति॥ १२९॥ अनित्येतस्यनाशेनदेहाद्यद्वद्बहिर्व्रजेत् ॥ नाशंकेनतु तन्नाशादेषनैवप्रयास्यति॥ १३०॥ तस्मात्प्राणस्ययेषांस्यादात्मत्वंतन्मतेपिहि॥ भूतानामात्मतैवस्यात्प्रच्छन्नाशब्दभेदतः ॥ १३१ ॥ स्पर्शवांस्ततएवात्मानभवेद्देहतःपृथक् ॥ अदर्शनाच्चसततंनरूपरसगंधवान् ॥ १३२॥ चतुर्भ्योपिचभूतेभ्यःशब्दवान्नपृथक्क्वचित् ॥ पृथक्त्वसंभवेवंध्यापुत्रोत्रकलभाषणः ॥ १३३ ॥ अपिचेत्शब्दवानेषगृह्यतेकेनतद्वद॥ नहिशब्दवतांश्रोत्रादस्तिलोकेग्रहःक्वचित्॥ १३४॥

नुसरतैवकेनचिद्भाषाभेदमात्रेणप्रच्छन्नःपृथगिवभासमानोयंवादःप्रवर्तितोनत्वास्तिकेनेत्यर्थः ॥ १३१ ॥ एवंस्पर्शवत्त्वंयथात्मनोनोपपद्यतेतथारूपादिमत्त्वमपिसदानास्तिअनुपलब्धेरित्याह स्पर्शवानिति ॥ १३२ ॥ नचशब्दवत्त्वमप्यात्मनःस्वीकर्तुंशक्यंभूतचतुष्टयस्यैवशब्दवत्त्वेनोपलब्धेः यदितुभूतचतुष्टयभिन्नस्यापिशब्दवत्त्वमिष्यतेतदावंध्यापुत्रोपिशब्दवत्त्वेनाभ्युपगम्येतेत्याह चतुर्भ्यइति कलभाषणोमधुरस्वरःस्यादितिशेषः ॥ १३३ ॥ किंचात्मनःशब्दवत्त्वांगीकारेतस्यश्रोत्रेणग्रहणंनवाच्यंश्रोत्रस्यशब्दवद्द्रव्यग्रहणाक्षमत्वस्यवादिभिरेवस्वीकृतत्वादित्याह अपिचेदिति ॥ १३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तुतर्हिमनस्तत्रकरणमितिशंकांवारयति मनसेति शब्दवतोग्रहणंकेवलंमनसाभवतीत्येतल्लोकेव्यवस्थितंनिश्चितंनास्ति यतोयद्यदेवम नोरथादिकंमनःकर्तृकल्पयतिरचयतितत्तदेवतेनमनसापश्यन्जनःप्रसिद्धोनतुशब्दादिकमपिमनसापश्यन्नित्यर्थः ॥ १३५ ॥ अतएवेति अतोऽनित्यत्वादिप्रसंगादयमात्मास्पर्शादिगुणरूपोपिनसंभवतीत्यर्थः गुणरूपत्वेचकारसूचितंदोषांतरंदर्शयति स्पर्शादयइत्यादिना स्प र्शादयोगुणाभवंतिआत्माचद्रव्यंभवतीतिवदतांतेषांमतेद्रव्यंगुणरूपंकथंभविष्यतीतिसंबंधः ॥१३६॥ अतएवनरूपादीति अतउक्तदोषा देवरूपादिगुणभिन्नत्वमप्यात्मनोनभवतीत्यर्थः कोसावुक्तदोषइत्याकांक्षायामाह ग्राहकत्वेनेति यदासौवाय्वादिद्रव्यरूपेणगुणभिन्नो

मनसाग्रहणंनैवक्कचित्स्याद्धिव्यवस्थितं॥ यद्यत्कल्पयतेयस्मात्तत्तत्तेनात्रपश्यति॥१३५॥ अतएवचनैवा यंस्पर्शाद्यात्माकदाचन॥ स्पर्शादयोगुणायस्माद्द्रव्यमात्माचवादिनां॥ गुणरूपंकथंद्रव्यंमतेतेषांभविष्यति ॥ १३६॥ अतएवनरूपादिव्यतिरिक्तोभवेदिह॥ ग्राहकत्वेननेत्रादेरसत्त्वाद्ग्रहणंप्रति॥ १३७॥ इत्यादिवच नैस्तेषांमोमुह्यंतेत्रधीधनाः॥जीवत्यपिमृतेप्रायः सर्वेसंशेरतेयम॥ १३८॥ वेदवाक्यबलेनैवकेचिदस्तीति तंविदुः॥ अपरेयुक्तिबलतोनास्तीत्येवंप्रपेदिरे ॥ १३९॥ एतस्मिन्संशयेमह्यंब्रूहित्वंनिर्णयंप्रभो ॥ अनुशि ष्टस्त्वयाविद्यामत्राहंनिर्णयंसदा॥१४०॥ ततोन्यतरदत्रत्वंसविशेषंवदाधुना॥ अयंतृतीयोभवतादेयोमेव रईश्वर ॥ १४१ ॥

वाय्वादिभिन्नोवाभवेदुभयथापितद्ग्रहणमभिलक्ष्यकरणविचारेक्रियमाणेनेत्रादिकंग्राहकरूपेणनतिष्ठति तेषांरूपादिष्वेवशूरत्वादित्य र्थः ॥१३७॥ इत्यादीति इत्यादिभिस्तेषांकुतार्किकाणांवचनैर्धीमंतोपिजीवनदशायामपिचसंघातव्यतिरिक्तात्मसत्तायांव्यामोहंगच्छंती ति ॥ १३८ ॥ यथातार्किकास्तस्यनास्तित्वंवदंतितथातस्यास्तित्वंवेदानुसारिणोवदंतीत्याह वेदेति तंसंघातव्यतिरिक्तात्मानं ॥ १३९ ॥ एतस्मिन्निति एतस्मिन्नस्तित्वनास्तित्वकोटिकेसंशयेसतिभवान्निर्णययोग्यमर्थंब्रवीतुयथाहंत्वयाशिक्षितःसन्विद्यांजानीयामिति ॥ १४० ॥ ततइति अत्रानयोःपक्षयोर्मध्येअन्यतरपक्षोपपादकंसविशेषंवाक्यंवदेति ॥ १४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचिकेतसःश्रद्धापरीक्षणाययमवाक्याभिनयपरस्यविंशस्यार्थमाह एवमुक्तइतिपंचभिः एतच्छ्रुत्वायमस्तंनचिकेतसंहस्तद्वयभ्रामण
लक्षणयाचेष्टयावारयन्सन्नेतन्माप्राक्षीरित्युक्तवांस्तत्रहेतुमप्यवददिति ॥ १४२ ॥ दुर्विज्ञेयमिति इदमात्मतत्त्वंदुःखेनज्ञेयंभवतिय
तःपूर्वैपिदेवाःशमादिशालिनोऽत्रात्मनिसंदिह्यनिश्चयंनगताइत्यर्थः ॥ १४३ ॥ तत्रहेतुमाह अस्तितेति यतआत्मनोऽस्तितारूपोनास्ति
 तारूपोवाधर्मःसूक्ष्मोदुर्लक्ष्यः ॥१४४॥ वरमन्यमिति हेनचिकेतस्त्वमितोन्यरूपंतृतीयंवरंवरयमोपरोत्सीःअत्रार्थेममोपरोधंदाक्षिण्येनप्रे

एवमुक्तेयमःप्राहतंतदानचिकेतसम् ॥ नैतत्प्राक्षीरितिश्रीमान्वारयन्हस्तसंज्ञया ॥ हेतुंचाप्यवदत्तत्रतत्कृ
तप्रश्नवारणे ॥ १४२ ॥ दुर्विज्ञेयमिदंयस्माद्देवैश्चविचिकित्सितं ॥ संदिह्यचपुरादेवाःकेचिदद्याप्यनिश्चि
ताः ॥ १४३ ॥ अस्तितानास्तिताधर्मःसूक्ष्मएषनिजात्मनः ॥ यतस्ततोनजानंतिदेवाअपिमहाधियः ॥ १४४ ॥
वरमन्यंतृतीयंत्वंनचिकेतोवृणीष्वभोः ॥ मोपरोत्सीर्महाभागंमात्वंसत्यवशंगतम् ॥ १४५ ॥ मुंचमांसत्य
वचनाद्बद्धंतववशंगतं ॥ मातिप्रश्नमिमंब्रह्मन्दुर्विज्ञेयंमयिक्षिप ॥ १४६ ॥ एवमुक्तेयमंप्राहनचिकेताइदंव
चः ॥ देवाःसंशेरतेयत्रदुर्विज्ञेयंचयत्त्वया ॥ पूर्वैरप्युदितंत्वंचवक्तायस्यातिदुर्लभः ॥ १४७ ॥ तच्चेदहंनभ
वतोजानीयांकःपरोमम ॥ त्वादृगस्यभवेद्वक्तापुमान्लोकत्रयेपिच ॥ १४८ ॥ ततोयदिमयिप्रीतिर्यदिसत्यं
वचस्तव ॥ एतमेववरंमह्यंलोकपालप्रयच्छभोः ॥ १४९ ॥ अनेनसदृशोनान्योवरःकश्चनविद्यते ॥ यतस्त
तःकथंमेन्यंत्वंवरंदातुमुद्यतः ॥ १५० ॥

रणरूपंप्रतिमांननयेत्यर्थः ॥१४५॥ मुंचेति मांसत्यपाशमुक्तंकुरु दुर्ज्ञेयार्थगोचरमतिप्रश्नंमयिमाक्षिपउपन्यसितुंनार्हसीत्यर्थः ॥१४६॥
एकविंशस्यार्थमाह एवमितिचतुर्भिः एवंयमेनोक्तेसतितंप्रतिनचिकेताइदमुवाच इदंकिं हेधर्मराजयत्रात्मतत्त्वेदेवानांसंशयोयस्यचदुर्ज्ञे
यत्वंभवतापूर्वैश्चप्रोक्तंयस्यचदुर्लभोवक्ताभवान्लब्धस्तच्चेदहंभवतोनजानीयांतदान्यंकंवक्तारमन्विच्छेयमितिद्वयोरर्थः ॥१४७॥१४८॥
फलितमाह ततइतिद्वाभ्यां स्पष्टंद्वयं ॥ १४९ ॥ १५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाविंशादित्रिकस्यार्थंवर्णयति एवमितिद्वाविंशतिश्लोकैः एवंविधंनचिकेतसोवाक्यंश्रुत्वाधर्मराजइदंवक्ष्यमाणंवचनमब्रवीत् किंकुर्वन् नचिकेतसोवैराग्यपरीक्षणायाष्टमानष्टसंख्ययामिताःपरिच्छिन्नास्तेतथातानितिव्युत्पत्त्याऽष्टसंख्याकवाचकेनपरिखावत्तुड्प्रत्ययसाधुनाष्टमपदेनोक्तानष्टवरांस्तथातेभ्यःप्रथमाष्टभ्योन्यानपिअष्टवरान्कृत्वाउपन्यस्यमानयन्प्रशंसन्प्रलोभयन्नितियावत् तथाहि द्वाविंशेपुत्राःपौत्राःपशवोहस्तिनोहिरण्यमश्वामंडलाधिपत्यंचिरजीवनमित्यष्टौवराउक्ताः त्रयोविंशचतुर्विंशयोश्चवित्तंस्थिरंजीविकाचक्रवर्तित्वंदिव्यमानुषकामभोगित्वंसत्यकामत्वंदिव्यस्त्रियस्तासांदास्यस्तासांतूर्यपदोक्तनाट्यकौशलंचेत्याकाराअष्टौवराउक्ताइति ॥ १५१ ॥

एवमुक्तोयमोराजापरितुष्टोब्रवीदिदं॥ अष्टमानपिनेभ्योन्यान्वरान्कृत्वाष्टमानयन् ॥ १५१ ॥ शतायुषोगुणैर्युक्तान्पुत्रपौत्राननेकशः ॥ रूपयौवनसंपन्नान्बहुमूल्यान्बहून्पशून् ॥ १५२ ॥ गवादिकांस्तथानागान्प्रत्यक्षानिवपर्वतान् ॥ कांचनंकांचनगिरेःसमानंस्वर्गतःस्थितं॥ १५३॥ सवितुर्यादृशास्तादृगश्वाश्वाकाशगामिनः॥ सार्वभौमंतथाराज्यंभूमेःकंटकवर्जितम्॥ आयुःस्वस्यापितद्वच्चयावदिष्टंतवात्रभोः॥ १५४॥ एतत्सर्वंपुरोक्तंयत्तुल्यंतद्यदिमन्यसे॥ पुरोक्तेनवरेणात्रतद्वृणीष्वयथेच्छया॥ १५५॥ वित्तंबहुविधंतद्वदात्मनश्चिरजीविकां ॥ महाभूमावाधिपत्यंनचिकेतस्त्वमाप्नुहि ॥ १५६॥ पुत्रपौत्रादयःकामास्तेचतेमत्प्रसादतः॥ भवंत्वव्याहताःसर्वेनचिकेतःसदैवहि ॥ १५७॥

तत्रप्रथमवराष्टकमभिनयति शतायुषइतित्रिभिः शतायुषःशतवर्षजीविनःपुत्रान्पौत्रांश्चरूपादिसंपन्नान्वृणीष्वेतिसंबंधः तथागवादिकान्पशूंस्तथानागान्हस्तिनस्तथास्वर्गेस्थितंकांचनंचेतिद्वयोरर्थः ॥ १५२ ॥ १५३ ॥ सवितुरिति सूर्याश्वसमानश्वांस्तथासर्वत्रभूमौगुणैःप्रसिद्धंभूमेर्मंडलस्यराज्यंयथेष्टमायुश्चेति ॥ १५४ ॥ एतदिति एतत्पुरोदितंयदितृतीयवरेणसमंमन्यसेतदावृणीष्वेति ॥ १५५ ॥ द्वितीयंवराष्टकमभिनयति वित्तमितिद्वादशभिः महाभूमौ सर्वस्यांभूमौआमुहिलभस्व ॥ १५६ ॥ पुत्रेति पुत्रादयोलौकिकाःकामाःकाम्यमानपदार्थास्तेदिव्याश्चयेकामास्तेसर्वेऽव्याहताव्याघातरहिताःसंतुतवेति ॥ १५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येयत्रेति येदुर्लभाःकामास्तानपीच्छयासंकल्पमात्रेणनिष्पद्यमानान्प्रार्थयस्ववरयेत्यर्थः ॥ १५८ ॥ इमाइति याइमारामाःस्वर्गस्त्रियः पश्यसिताभिरात्मानंपरिचारयेतिदशमेनाभिसंबंधः स्फुटमन्यत् ॥१५९॥ तासांदौर्लभ्यसूचकानिविशेषणान्याह पीनोन्नतेत्यादि पीनोन्नतेनकुचद्वंद्वेनतिरस्कारोयस्यतथाभूतःसुधाकरश्चंद्रोयाभिस्तास्तथा अयंभावः चंद्रश्चक्रवाकद्वंद्वस्यदुःखदइतिप्रसिद्धंतत्प्रतीकारायचक्रवाकद्वंद्वंयत्कुचद्वंद्वभावंगत्वातंचंद्रंमंडलाकारत्वशोभातिशयादिभिस्तिरस्करोतीवेति अथवाताद‍ृशकुचाच्छादकाश्चताःसुधायाअधर

येयत्रदुर्लभाःकामाःसंतिलोकत्रयेपिहि ॥ प्रार्थयस्वमहाभागस्वेच्छयात्वंहितानपि ॥ १५८ ॥ इमारामाः सदापुंसांमनोनयननंदनाः॥ स्वर्गिणांबहुभिर्यज्ञैःप्राप्यानयनगोचरं॥ १५९ ॥ पीनोन्नतकुचद्वंद्वतिरस्कारसुधाकराः॥ नितंबबिंबसंलग्नकांचीक्वणितभूमयः॥ १६० ॥ मुखपंकजसौगंध्यमारुतावासितांतराः॥ अवृंतचंपकोद्दामस्पर्शभर्त्सकमार्दवाः ॥ १६१ ॥ उद्दामहावभावौघरसोल्लासविलासकाः ॥ कलकंठरवत्रस्तभृंगीसंगीतसुस्वराः ॥ १६२ ॥ स्निग्धमुग्धस्मितानेकचित्रार्थपदभाषिकाः ॥ स्वदेहविमलस्वच्छकांतिभर्त्सितभास्कराः॥ १६३ ॥ सर्वलक्षणसंपन्नाःप्रथमोद्गतयौवनाः॥ स्वदेहेनस्मरस्यापिसततंस्मरदायिकाः ॥ १६४ ॥

वृत्तेराकराः नितंबमंडललग्नकांचीशब्दवत्यश्च ॥१६०॥ मुखेति मुखपंकजस्यसौगंध्यशालिनामारुतेनवासितमंतरंगृहमध्यंयाभिस्तास्तथा वृंतरहितचंपकमयंयदुत्कृष्टंदाममालातत्स्पर्शस्यभर्त्सकंमार्दवंमृदुत्वंयासांतास्तथा ॥ १६१ ॥ उद्दामेति उत्कृष्टैर्हावैःश्रृंगारचेष्टाभिर्भावैर्मानसविकारैश्चरसोल्लासकराविलासायासांतास्तथा कलकंठानांकोकिलानांरवाश्चत्रस्तानांभृंगीणांसंगीतंचतत्तुल्यःशोभनःस्वरोयासांतास्तथेति ॥ १६२ ॥ स्निग्धेति स्निग्धंमुग्धंचयत्स्मितंतेनअनेकेषांचित्रार्थानांपदानांभाषिकाः देहकांत्यारवेर्जेत्र्यःमदनस्यापिमादकाश्चेतिद्वयोरर्थः ॥ १६३ ॥ १६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचित्रेति ताराणिभास्वराणिअनर्घ्याणिचयानिआभरणानितैर्मंडिताः तथादासीनांकायशतेनस्वसमानवेषेणश्रौतरथपदोक्तेनयुताःत थातूर्यैर्वाद्यैर्युताः रथःस्याच्चरणेकायेइतिविश्वः ॥ १६५ ॥ आसामिति स्पष्टम् ॥ १६६ ॥ आलिंग्यंतइति याएतामदनुगृहीतैःस्वर्ग स्थैरेवालिंग्यंतेमनुष्यलोकेनसंतिचेति ॥ १६७ ॥ मद्दत्ताभिरिति हेनचिकेतस्त्वमेताभिर्मद्दत्ताभिरात्मनःपरिचर्यांकारय मरणविषयकंप्र

विचित्रवसनास्ताराऽनर्घ्याभरणमंडिताः ॥ (प्राणिनांपुण्यपुंजेननिर्मिताःसुखमूर्तयः ॥ शश्वत्परिवृताए तैरथनागाश्वपत्तिभिः ॥) दासीनांचशतेनापिस्वात्मरूपसमेनहि ॥ तूर्यैर्नानाविधैस्तद्वत्सर्वदापरिवारिताः ॥ १६५ ॥ आसांकटाक्षमोक्षोपिमोक्षादप्यक्षयंसुखं ॥ प्रयच्छतिकथंस्पर्शःपरमानंददोनहि ॥ १६६ ॥ आलिंग्यंतइमानित्यंनिःशंकंस्वर्गवासिभिः ॥ मदाज्ञावशगैर्नैतामनुष्येकर्हिंचिद्द्विज ॥ १६७ ॥ मद्दत्ताभिः स्वमात्मानंसततंपरिचारय ॥ नचिकेतस्त्वमत्रैतन्मरणंपृच्छमाकचित् ॥ १६८ ॥ मृतेसतिगतःस्वर्गंयदिवा भस्मतांपुमान् ॥ भवतःकोत्रलाभःस्यात्काकदंतपरीक्षणे ॥ १६९ ॥ इदंसुखंतवैवस्यादधुनाफलमत्र भोः ॥ विचारोमरणेनायंफलंकस्यापितद्भवेत् ॥ १७० ॥ चेष्टेतसफलंधीमान्निष्फलंनकदाचन ॥ सफले पिफलंस्वस्ययत्रतच्चेष्टनंवरं ॥ १७१ ॥ एवमादिवरान्प्राहयमस्तंनचिकेतसं ॥ लोभयन्स्वात्मविज्ञानप्रश्न स्योपरमायहि ॥ १७२ ॥

श्नंमाकुर्वित्यर्थः ॥ १६८ ॥ तत्प्रश्नस्यवैयर्थ्यंस्फुटयति मृतेइति मरणानंतरंजीवःस्वर्गादिकंगच्छतुवाअभावंगच्छतुवातच्चिंतायांकाकदंत सदसद्भावचिंतासमायांकिफलमिति ॥ १६९ ॥ इदमिति इदंवर्णितविषयजन्यंसुखं अधुनासाक्षात्फलंत्वयासंपादनयोग्यं मरणविषय कविचारस्तुस्वयंकस्यचित्फलंनभवति अथवानतत्फलंभवेद्गच्छेदित्यर्थः भूप्राप्तौचौरादिकोविभाषितणिच् ॥ १७० ॥ यत्कर्मस्वकीयेष्ट साधनंतदेवानुष्ठेयमित्याह चेष्टेतेति चेष्टनमनुष्ठानं ॥ १७१ ॥ एवमादीति स्पष्टम् ॥ १७२ ॥

१ काशीस्थपुस्तकेदृष्टोऽधिकोयंश्लोकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वोभावाइत्यादिनचिकेतसोवाक्यमवतारयति नचिकेताइति स्पष्टम् ॥१७३॥ तत्रश्वोभावाइतिपदेनश्वउत्तरदिनेभविष्यंतिनवेतिव्युत्पत्यायमोपन्यस्तपदार्थानामनित्यत्ववाचकेनसूचितंयत्तेषांसुखसाधनत्वस्यभ्रममात्रसिद्धत्वंतत्प्रपंचयति इमारामाइतित्रयस्त्रिंशताश्लोकैः हेधर्मराजयाइमारामाभवतासुखहेतुत्वेनोक्तास्ताएताःकिमुत्पत्तितःपूर्वंस्वस्यपरस्यवासुखंकृतवत्योविनाशोत्तरंवाकिंसुखंकरिष्यंति अपितुनकृतवत्योनकरिष्यंतीत्येववाच्यं तथाचमध्येयदेताःसुखवदाचरंतितत्रहेतुरेतासांस्वभावोनभवतिकिंतुव्यामोहएवेतिद्वयोरर्थः

नचिकेतास्तुतच्छ्रुत्वाधर्मराजसमीरितं॥ वचनंतदिदंवाक्यंप्रत्यभाषतधर्मवित्॥ १७३ ॥ इमारामास्त्वयाप्रोक्तारूपलावण्यसंयुताः ॥ पुण्यपुंजसमारब्धानिःशेषसुखहेतवः ॥ १७४ ॥ एताउत्पत्तितःपूर्वंविनाशाच्चतथोत्तरं॥ स्वस्यकांतस्यवास्वर्गेधर्मराजसुखंनुकिं ॥ कृतवत्यःकरिष्यंतिमध्येकेनसुखायताः ॥ १७५ ॥ अपिस्वर्गस्थितावध्वस्त्वयायावर्णिताःसुखं ॥ ग्राम्यधर्मेणताःपुंसःकुर्युश्चेदधिकाःकथं ॥ अन्याभ्योमनुजस्त्रीभ्योधर्मराजविचारतः॥ १७६॥ पूतिगंधधरानार्यःसुगंधायदिवायम॥ कामुकानांसुखंकुर्युरासांभेदःकथंभवेत्॥ १७७॥ शुनीयथाशुनःकुर्यात्सुखंनारीनरस्यवा॥ देवांगनातथैवैषादेवस्यसुखदायदि॥ भेदोजातिकृतोजातःफलेकोपिनविद्यते ॥ १७८ ॥

॥ १७४ ॥ १७५ ॥ कामजव्यामोहेनसुखायमानत्वस्येतरनारीष्वपितुल्यत्वादेतासामाधिक्यंविचारेणनदृश्यतेइत्याह अपीति यास्त्वयावर्णिताःस्वर्गवध्वस्ताअपियदिग्राम्यधर्मद्वारैवपुंसांसुखंकुर्युस्तदामनुजस्त्रीभ्यःकथमधिकाइतिसंबंधः ॥ १७६ ॥ एतदेवस्फुटयति पूतीति स्पष्टं॥ १७७॥ यदिचैतासांस्वभावेनसुखरूपत्वंस्यात्तदासर्वास्त्रीव्यक्तिःसर्वंप्रत्यविशेषेणसुखहेतुःस्यात्तथाचनदृश्यते कामव्यामोहेनप्रयुक्तंसुखत्वंतुसर्वत्रदृश्यतइत्येवंव्याप्तिमेवविशदयति शुनीत्यादि यदातत्तज्जातीयायास्तत्तज्जातीयंप्रत्येवसुखत्वंदृष्टंतदातत्तज्जातिकृतोभेदोव्यामोहस्यैवसिद्धोनतुसुखभानरूपस्यफलस्यापिसइत्यर्थः ॥ १७८ ॥ ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाहिसुगंधत्वादिभिर्देवांगनारमणीयत्वेनपश्यतोदेवस्यैवतस्यांव्यामोहोनतुतथाऽपश्यतःशुनएवंशुनातथात्वेनदृष्टायांशुन्यांदेवस्यन व्यामोहइत्याह सुगंधाचेतिद्वाभ्यां वैषम्यंस्वाभाविकोत्कर्षरूपंकिंकृतंकेनसंपादितंनकेनापीत्यर्थः ॥ १७९ ॥ १८० ॥ नचशुन्यादोषधीविषयत्वेनापकर्षः देवाङ्गनायाअपिश्वनिष्ठदोषधीविषयत्वस्यसमानत्वादित्याह शुन्याइति नपरितुष्यतिकिंतुदेवांगनायादोषानेव पश्यतियतएषश्वाशुन्याएवगुणान्पश्यतीतिसंबंधः ॥ १८१ ॥ शुनादृष्टान्शुन्यागुणानभिनयति सुदीर्घेतिचतुर्भिः एवंहिश्वामन्यते एवं

सुगंधाचसुरूपाचसुस्पर्शासुरसातथा॥ सुशब्दाचारुसर्वांगीसुश्रोणीपृथुलस्तनी॥१७९॥ देवांगनाशुनोनैषाग्राम्यधर्मसुखप्रदा॥ शुनीदेवस्यतद्वच्चवैषम्यंकिंकृतंयम॥१८०॥ शुन्यादोषान्यथादेवोगुणान्हित्वात्रपश्यति॥ तथाश्वापिचदेवानांवध्वानपरितुष्यति॥ शुन्यागुणानमूनेषश्वानित्यंपरिपश्यति॥१८१॥ सुदीर्घवदनाम्हद्वीतीक्ष्णदंष्ट्रारुणानना॥ रक्तोत्पलसमाजिव्हामांसास्टक्चारुगंधिनी॥ १८२॥ दीर्घनेत्रासुघोणाचनित्यमुत्तब्धकर्णिका॥ सदाशीघ्रगतिस्तद्वन्मांसलाचकृशोदरी॥ १८३ ॥ उत्तब्धपुच्छासंकीर्णयोनिच्छिद्रातिशोभना॥ उगुंकारैश्वभंकारैर्मन्मनःकर्णनंदनैः॥ १८४॥ गमनैःपृष्ठतोदिक्षुपुरतश्चनिरंतरं॥ सेवतेमांसदैवैषामनोनयननंदिनी॥ १८५॥ तांदृष्ट्वायादृशीप्रीतिर्धर्मराजशुनोस्तिह॥ दृष्ट्वाशचींचशक्रस्यविद्यतेतादृशीनवा॥ १८६॥ एवंपुत्रादयोभावाःसर्वेषामपिदेहिनां॥ समाश्चनरदेवानांविषमाश्चपरान्प्रति॥१८७॥

कथं एषाशुनीसुदीर्घवदनत्वादिविशिष्टामांसेवतेइतिचतुर्णांसंबंधः यस्याअस्याजिव्हारक्तोत्पलसमामांसास्टग्भ्यांचारुगंधिनीचभवतीति योजना उगुमितिभमितितच्छब्दानुकरणं स्फुटमन्यत् ॥ १८२ ॥ १८३ ॥ १८४ ॥ १८५ ॥ तामिति तांशुनींदृष्ट्वायादृशीशुनःप्रीतिस्तादृशीशक्रस्यशचीदर्शनेभवेन्नवेतिसंशयइत्यर्थः ॥ १८६ ॥ उक्तन्यायमन्यत्रातिदिशति एवमिति समाव्यामोहजसुखसाधनत्वेनतुल्याः परान्भिन्नजातीयान्प्रतितुविषमाविपरीताइत्यर्थः ॥ १८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अदृष्टसंस्कारादिकृतस्तज्जात्यध्यासएवप्रियत्वव्यवस्थाहेतुरित्याह यज्जातीयइति अन्नतत्तज्जातिषुतदेवतज्जात्यनुकूलमेवबहुसुखरूपंम
न्यते॥१८८॥ एतदेवविशदयति शुनइतिद्वाभ्यां परिकरोभोगसाधनं तथाचशुनःपरिकरभूतेषुयोषिदादिभावेषुयथाभवतांदेवानांजुगुप्सा
ग्लानिस्तथाशुनोपिस्वजातेरन्यत्रजुगुप्सायतएषश्वाशुनींहित्वादोषानेवावगच्छतीतिद्वयोःसंबंधः ॥१८९॥१९०॥ फलितमाह ततइति
सम्यक्स्वभावेनसुखरूपोनार्यादिदेहोनभवतिकिंतुपित्तेनशंखेपीतबुद्धिर्यथाजायतेतथाकामज्वरजातव्यामोहरूपपित्तेनविभ्रमंगतस्य

यज्जातीयोहियोजीवस्तज्जातीयंहितत्प्रियं॥ अन्नपानांगनाद्यन्नतदेवबहुमन्यते॥ १८८॥ शुनःपरिकरेयद्व
ज्जुगुप्सायोषिदादिषु॥ भवतांग्राम्यधर्मादौयमस्वर्गनिवासिनां॥ १८९॥ तथाशुनोपिसर्वत्रस्वजातेरपरत्र
हि॥ जुगुप्सायतएवायंशुनींहित्वावगच्छति॥ १९०॥ ततोनकोपिसंसारेदेहःसम्यगिहास्तिभोः॥ किंतुका
मज्वरात्पित्तंजातंसर्वशरीरिणां॥ १९१॥ सजातीयेषुसम्यक्त्वबुद्धिमेतत्प्रयच्छति॥ भ्रमंपरंगतस्यात्रस्त्रियो
वापुरुषस्यवा॥ १९२॥ क्वसुखंप्राणिनांदेहेस्त्रियोवापुरुषस्यवा॥ नारीयदिसुखंकस्मात्स्वस्यैषानसुखंभवेत्
॥ १९३॥ अपरस्याःकुतोनस्याद्ध्वाएषासदासुखं॥ देहांतरस्यसततंभवेद्धिसुखदायदि॥ १९४॥ पुंसश्चेत्कु
तएवैषाकुमारस्यभवेन्नहि॥ विवस्त्रायाउरोमध्येशयानस्यापितादृशः॥ १९५॥

जंतोःसजातीयस्त्र्यादिशरीरेसुखबुद्धिर्भवतीतिद्वयोरर्थः॥१९१॥१९२॥ नार्याःस्वभावेनसुखत्वाभावमेवविशदयति क्वसुखमिति प्रथमः
सुखमितिनिर्देशोभावप्रधानः नारीयदिसुखरूपातदात्मानंप्रत्यपिसुखत्वेनभायात् यदितुदेहांतरस्यसुखदास्यात्तदाऽपरांवधूंसपत्न्यादिरू
पांप्रत्यपितथास्यादितिद्वयोरर्थः ॥ १९३ ॥ १९४ ॥ पुंसइति पुमांसंप्रतिसातथेतिनवाच्यं यतोबालोनग्नायास्तदिक्रीडंस्तादृक्पुंपदवा
च्योनभवति साचतंप्रतियुववत्सुखदानदृश्यतेइति ॥ १९५ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवंयुवत्वावच्छिन्नंप्रत्यपिनतस्याःसुखदत्वनियमोयूनःपुत्रादिरूपत्वेमदनज्वरापायशालित्वेवातथात्वादर्शनादित्याह यूनश्चेदितिद्वाभ्यां अस्मिन्यूनि ॥ १९६ ॥ १९७ ॥ एवंरुग्णापिसानसुखदेत्याह एवंव्याध्यादीति ॥ १९८ ॥ एवंपुमानपिनस्वभावेनसुखदइत्याह पुरुषोपीति पुत्र्यादौकन्याप्रभृतिपुसमत्वतःकामसुखदत्वरूपविशेषाभावात् ॥ १९९ ॥ ततश्चकामदोषजत्वाद्देहेषुसुखबुद्धिर्भ्रमरूपैवेत्याह ततइति सुखायसुखत्वेनभानायक्षमाइतिशेषः ॥ २००॥ यथाधत्तूरबीजभक्षिणांपीतंजगद्भासतेतथाकामिनांस्त्र्यादिदेहाःसुखाइत्या

यूनश्चेत्कुतएवैषापुत्रादेस्तादृशीनहि ॥ अपियूनोतिसंभोगेनिवृत्तेसमनंतरं ॥ १९६ ॥ तत्क्षणात्पुनरप्यस्मिन्नजातेमदनज्वरे ॥ कुतएषासुखंतस्यपूर्ववन्नकरोतिहि ॥ १९७ ॥ एवंव्याध्यादिदोषेपिसंजातेनैवकामुकं ॥ सुखयेद्युवतिस्तेनसुखंनैवकदाचन ॥ १९८ ॥ पुरुषोपिसुखंनायंभवेत्कापिवधूरिव ॥ स्वस्यवाप्यथवावध्वाः पुत्र्यादौहिसमत्वतः ॥ १९९ ॥ ततःकामज्वरस्यायंमहिमाकोपिदेहिनां ॥ येनदेहाःसुखायस्युरसुखाअपिसर्वदा ॥ २०० ॥ उन्मत्तबीजसेवातोयथाहेममयंजगत् ॥ अहैममपिसंभ्रांतोविलोकयतिमानवः ॥ २०१ ॥ एवंकामज्वराज्जंतुःस्त्रीपुंसवपुरास्थितः ॥ सजातीयेषुसुखतांवैपरीत्येनमन्यते ॥ २०२ ॥ जरायथाविरूपत्वहेतुःस्याद्विद्धुषामपि ॥ यौवनंतद्वदेवस्यात्कामज्वरकरंसदा ॥ २०३ ॥ कामज्वरवशंप्राप्तोधर्मराजततोभवान् ॥ प्रशंसतिवधूरेताअपिदुःखकरीःसदा ॥ २०४ ॥ किंबहूक्तेनताह्येताअनित्याइतिनिश्चितं ॥ प्रियंहिसुखहेतुःस्यादनित्यंसर्वदानृणां ॥ २०५ ॥

ह उन्मत्तेतिद्वाभ्यां वैपरीत्येनयुक्तामितिशेषः ॥ २०१ ॥ २०२ ॥ कामज्वरस्यनिदानंतुयौवनमेवेतिसदृष्टांतमाह जरेति यथाविरूपताहेतुर्जरातथाकामज्वरहेतुर्यौवनमिति ॥ २०३ ॥ भवतातुयदेतासांप्रशंसनंकृतंतदुक्तभ्रमसिद्धार्थानुवादरूपमेवनविधिरूपमित्याह कामज्वरेति ॥ २०४ ॥ तासांदुःखकरत्वंत्वनित्यत्वमेवप्रख्यापयतीत्याह किंबहूक्तेनेति यतःसुखहेतुरूपंप्रियमनित्यमितिप्रसिद्धम् ॥ २०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनित्यस्यवियोगेसंयोगादधिकदुःखहेतुत्वंसर्वेजानंतीत्याह यद्यस्येति अतिप्रियंवस्तुकर्तृयावत्सुखंरागोदयद्वारादुःखबीजभूतंकृत्वाव्रजेत्ततःशतगुणंदुःखंवियुक्तंसत्कुरुतेइतिसंबंधः ॥ २०६ ॥ सांसारिकभावानांवियोगशीलतामेवस्फुटयति इमाइति यएतेरामाप्रभृतयोभावाःप्रियतमत्वेनभवतोपन्यस्तास्तेसर्वेअद्ययावन्नासन्नजाताभवद्वरात्श्वउत्तरदिनेभवितारोलब्धजन्मानोपिततःपरदिनेनभविष्यंतीत्येवमागमापायित्वेनानित्यत्वाद्दुःखमयाएवेतिद्वयोरर्थः ॥ २०७ ॥ २०८ ॥ मर्त्यस्येत्यादेस्तेजइत्यंतभागस्यार्थमाह अपिसत्तेति पंचभिः किंचयदेतेषांरामाप्रभृतिभावानांसत्तालोकदृष्ट्यनुसारेणस्थिरत्वमभ्युपगम्यतेतदाप्येषांदुःखदत्वमेवालोच्यतेयतस्तेषुरामाःपु

यद्यस्यातिप्रियंवस्तुतस्यदुःखस्यकारणं॥ सुखंकृत्वाव्रजेद्यावत्तावच्छतगुणंपुनः ॥ वियुक्तंकुरुतेदुःखंकष्टंप्रियतमंततः ॥ २०६ ॥ इमाःप्रियतमारामाःपुत्रपौत्रादयोपिच ॥ आयुर्भूमिर्महाराज्यंहस्त्यश्वकनकादयः॥ २०७॥ अद्यनासन्पुनःश्वस्तेभवितारःपरेहनि ॥ नभविष्यंतितेनामीयमकष्टतमाःस्मृताः ॥ २०८॥ अपिसत्तायदातेषांरामादीनांतदापिन ॥ सुखंकिमपिकुर्वंतिदुःखंकुर्वंतिकिंतुते॥ २०९ ॥ रामाःसंभोगतःपुंसोवीर्यंजीवनहेतुकं ॥ हरंतियंत्रतोयद्वद्वन्हिःपुष्परसंत्विह॥ २१०॥ गतसारंयथापुष्पंभुक्तभोगस्तथापुमान्॥ तेजसारहितःसर्वैरिंद्रियैरल्पजीवनः ॥ २११ ॥ एवंपुत्रादयोभावामनःश्रोत्ररसापहाः ॥ धनिनःपुत्रिणोदृष्टंदुःखंमेत्रपितुर्मया॥ मनोदुःखाच्चजीर्यंततेजइंद्रियगंमहत्॥ २१२॥

रुषस्यरेतोलक्षणंचिरस्थितिहेतुभूतंसारंहरंति यथासारोद्धरणसनलिकयंत्रारूढकुसुमानांसारांशमग्निर्हरतितद्वदितिद्वयोरर्थः ॥ २०९ ॥ ॥ २१० ॥ ततःकिमतआह गतेति यथोद्धृतसारंपुष्पमल्पकालेनक्षीयतेतथातेजसारेतसाहीनःपुमान्सर्वेंद्रियैःसहाल्पजीवनोभवतितदीयानींद्रियाण्यायुश्चक्षीयतेइतियावत् ऊर्ध्वरेतसस्तुसहेंद्रियैश्चिरजीविनःप्रसिद्धाइत्युक्तंप्रथमेध्याये ॥ २११ ॥ एवमिति एवमन्येपिपुत्रादिभावामनसःश्रोत्रादीनांचरसस्यसारस्यसत्त्वाख्यस्यधर्मज्ञानादिवृद्धिहेतोरपहारकाः तत्रोदाहरणंचमत्पितैव यतस्तस्यमच्चितयाजरद्गवीदानप्रवृत्त्याधर्महानिर्मद्वियोगेनमनःक्षोभश्चाभूत् मनःक्षोभेहिसर्वेंद्रियाणांतेजोबलंजीर्यतइतिप्रसिद्धमिति ॥ २१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह तस्मादिति हेधर्मराजतस्मादुक्तन्यायादिमेभावाअनित्यादुःखदाश्वसिद्धाः एवमपियद्यमीतवाधिकारिकस्यसंमतालोकपालाधिकारपरिपालनायसम्यकूत्वयांगीकृतास्तथापिनुइतिवितर्केममजिज्ञासोःसंमताःकिंकिमर्थंभवेयुरित्यर्थः॥ २१३॥ उत्तरार्द्धार्थमाह अपियदित्यादिना यद्ब्रह्मणोहिरण्यगर्भस्यायुस्तदप्यल्पंद्विपरार्द्धपरिच्छिन्नत्वात् तदंतर्गतानामितरायुषामल्पत्वंकिमुवाच्यमित्यर्थः॥२१४॥ उक्तंस्फुटयति मनुष्याणामित्यष्टभिः मनुष्याणांवत्सरोदेवानामहोरात्रंतत्रोत्तरायणंदिनंदक्षिणायनंतुरात्रिरित्यर्थः॥२१५॥

तस्मादिमेचरामाद्याअनित्यादुःखहेतवः॥ तवापिसंमताधर्मराजकिन्नुममत्वमी॥ २१३॥ अपियद्ब्रह्मणः प्रोक्तंपरमायुर्महात्मनः॥ द्विपरार्द्धावसानंतदत्यल्पमिहकीर्त्यते॥ २१४॥ मनुष्याणांहियःप्रोक्तोवत्सरःस दिवौकसां॥ अहश्चैवतथारात्रिरयनेदक्षिणोत्तरे॥ २१५॥ देवतानामहोरात्रैःषष्ट्यासहशतैस्त्रिभिः॥ संवत्सरोयमुदितोदेवानांस्वर्गवासिनां॥ २१६॥ दिव्यैर्द्वादशसाहस्रैर्वत्सरैस्तच्चतुर्युगं॥ कृतंत्रेताद्वापरश्चकलिश्चेतिचकीर्तितं॥ २१७॥ चतुर्युगसहस्रंस्याद्ब्रह्मणोदिवसःसदा॥ रात्रिश्चतावतीयस्यांनाशंलोकत्रयीव्रजेत्॥ २१८॥ ब्रह्मणोवत्सरस्त्वेतैःसहषष्टिशतैस्त्रिभिः॥ अहोरात्रैःशतंसोपिवत्सराणांहिजीवति॥ २१९॥ पंचाशद्वर्षमात्रंस्यात्परार्द्धमेकमेवतत्॥ ब्रह्मणस्तद्गतंतस्यद्वितीयमिहविद्यते॥ २२०

देवतानामिति देवानांषष्ट्यधिकशतत्रयसंख्यैरहोरात्रैर्वत्सरोभवतिएतादृशैर्वत्सरैर्द्वादशसहस्रसंख्यैःकृतादिसंज्ञंयुगचतुष्टयंभवतीतिद्वयोरर्थः॥ २१६॥ २१७॥ चतुर्युगसहस्रमिति तावतीदिनसमा यस्यांब्रह्मरात्रौ॥ २१८॥ ब्रह्मणोवत्सरइति एतैरेतादृशैःषष्ट्यधिकशतत्रयसंख्यैरहोरात्रैर्ब्रह्मणोवत्सरस्तच्छतंचतस्यपरमायुरित्यर्थः॥ २१९॥ पंचाशदिति ब्राह्मपंचाशद्वर्षपरिमितःकालःपरार्द्धमित्युच्यते परस्यहिरण्यगर्भस्यायुषोऽर्द्धमितिव्युत्पत्तेः तत्परार्धमेकंगतमतीतमेवद्वितीयंतुविद्यतइत्यर्थः॥ २२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमिति अयंश्रीमान्ब्रह्माअर्धवयाःअर्द्धंवयोऽतीतंयस्यसतथावर्त्तते यस्यांतेमहाप्रलयोभावीत्यर्थः ॥ २२१ ॥ मरणत्रासस्तुब्रह्मणो पिलक्ष्यतेयतःसकिंचिदात्मतत्त्वंध्यायन्नेववर्त्ततेअतस्तदंशभूतैर्भवद्भिःपरमायुःप्रदानमशक्यमित्याह मरणत्रासतइति अत्रब्रह्मलोके आस्तेतिष्ठति ॥ २२२ ॥ ततइति यतउक्तविधयादुःखदत्वंसिद्धंततोहेलोकपालक्षणभंगुरत्वादिशालिनिसंसारेवर्त्तमानावाहनादयःप

दार्थास्त्वय्येवतिष्ठंत्वितिद्वयोःसंबंधः ॥ २२३ ॥ २२४ ॥ नवित्तेनेत्यादेरर्थःप्रपंच्यते अपिवित्तेनेतिद्वादशभिः हेलोकपालमर्त्यस्यतृष्णा

अयमर्द्धवयाःश्रीमान्ब्रह्मालोकपितामहः॥ मरणेयस्यकोप्यत्रजीविष्यतिनदेहभाक्॥ २२१ ॥ मरणत्रासतःसोपिनित्यंमीलितलोचनः॥ आस्तेत्रसर्वदाकिंचिच्चिंतयन्जगदीश्वरः ॥ ततःकथंभवान्मह्यंपरमायुःप्रयच्छति॥२२२॥ ततस्तवैवलोकेशसंसारेक्षणभंगुरे॥ असारेदुःखजलधौफेनबुद्बुदसंनिभे॥ २२३ ॥वाहाःसंतुमहाभागगजवाजिरथादयः॥ नृत्यगीतैश्चसंयुक्ताइमारामाश्चसर्वदा॥ पुत्रादयश्चसकलायान्मेदातुंत्वमुद्यतः ॥ २२४ ॥ अपिवित्तेनकोनामतर्पयेन्मानवंभुवि ॥ लोकपालत्रिलोकींचेत्प्राप्नोत्येषकथंचन ॥ २२५ ॥ सत्यलोकंपुनःसोयमिच्छत्येषनसंशयः॥ ब्रह्मलोकेतुसंप्राप्तेपुनरिच्छतिकिंचन॥ २२६॥ नजातुपुरुषोवित्तैस्तृप्तिंगच्छतिकुत्रचित्॥ वन्हिःकाष्ठैर्जलैस्तद्वत्सागरःपुरुषैरपि ॥ २२७ ॥ललनानैवसंयातितृप्तिंवित्तैःपुमानपि ॥ तद्वद्बुद्धिमतावित्तैस्तर्पणीयोनरोनहि ॥ २२८ ॥ अपिवित्तंधर्मराजवयंलप्स्यामहेस्वयं॥ दृष्टवंतोमांसनेत्रैस्त्वांमहादुःखघातकं॥ २२९॥

वित्तेनभोग्यपदार्थजातेननशाम्यतियतस्त्रिलोकीराज्यप्राप्तावपिब्रह्मलोकमिच्छतितदाप्तावपिपतनाभावममृतत्वादिकंचेच्छत्येवेतिद्वयोरर्थः ॥ २२५ ॥ २२६ ॥ उक्तंदृष्टांतैःस्फुटयति नजात्वितिद्वाभ्यां यथावन्हिसागरललनायथाक्रमंकाष्ठजलपुरुषैर्नतृप्यंतितथावित्तैः पुरुषोपीति ॥ २२७ ॥ २२८ ॥ यावदपेक्षितद्रव्यलाभस्त्वस्माकंभवद्दर्शनप्रभावादेवसिद्धोतोनवरणीयइत्याह अपिवित्तमितिपंचभिः यतस्त्वांदृष्टवंतोऽतोऽनायासेनवित्तंप्राप्स्यामएवेति ॥ २२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मराजरूपंवर्णयति मेघेत्यादिना उदारांगंदीर्घतनुंपीतांबररक्तनेत्रंचेति ॥ २३० ॥ कंबुग्रीवमिति आदित्यनयनंतेजस्विनेत्रं ॥२३१॥ महेति दृष्ट्यादर्शनेनक्रुद्धसर्पवद्भयप्रदं चित्तेदयालुं ॥ २३२ ॥ सद्वयत्वेहेतुभूतानिविशेषणान्याह वेदोदितेति ॥२३३॥ चिरजीवनमप्यस्माकंभवदीयशिष्यत्वमात्रेणलब्धत्वान्नवरेणार्थनीयमित्याह सर्वेषामिति भवानेवहिसर्वेषांमृत्युरूपोभवत्यस्माकंगुरुश्च गुरोश्चशिष्यानु

मेघश्याममुदारांगंपीतकौशेयवाससं॥ लाक्षारससमस्वच्छविशालनयनोत्पलं॥ २३०॥ कंबुग्रीवंमहोरस्कमाजानुभुजमद्भुतं॥ आदित्यनयनंदेवमादित्यसमवर्चसं॥ २३१॥ महामहिषसंस्थानंपुरुषंदंडधारिणं॥ आशीविषसमंदृष्ट्याचित्तेप्राणिकृपायुतं॥ २३२॥ वेदोदितमहामार्गरक्षाकरणकर्मकं ॥ आत्मविज्ञानसंपन्नंभगवंतमनामयम् ॥ समंसर्वेषुभूतेषुशत्रुमित्रविवर्जितम् ॥ २३३ ॥ सर्वेषांहिभवान्मृत्युश्चरस्थिरशरीरिणां॥ गुरुभूतस्ततोमृत्युःकेनास्माकंभविष्यति॥ २३४॥ लोकपालोभवान्यावद्दक्षिणस्यांदिशिस्थितः॥ जीविष्यामोवयंतावद्धर्मराजनसंशयः ॥ २३५ ॥ अतोवरःस्वयंसिद्धश्चिरकालंहिजीवनं ॥ भवतःकरुणापांगमोक्षवज्रशरीरिणां ॥ २३६ ॥ ततोवरःसएवात्रवरणीयोमृतौहियः ॥ संशयच्छेदकृद्ब्रूयाद्धर्मराजपरोनहि॥ २३७॥

यहशीलत्वंप्रसिद्धमतोनास्माकंमृत्युभयमित्यर्थः ॥ २३४ ॥ अतोयावद्भवतोऽयंलोकपालत्वलक्षणोऽधिकारस्तावज्जीवनेऽस्माकंनकश्चित्प्रतिबंधकइत्याह लोकेति ॥ २३५ ॥ अतइति भवत्कृपाकटाक्षपातेनवज्रसमंशरीरंयेषांतेतथातेषां ॥ २३६ ॥ अतोभवतासएवबोधोवरत्वेनदेयोयोनउक्तस्यमरणविषयकसंशयस्यच्छेदनंकुर्यादित्याह ततोवरइति ॥ २३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचभवादृशांमहात्मनांसन्निधिंप्राप्तस्यमर्त्यस्यचित्तेसंभोगचिरजीवनतृष्णाव्याहतेत्यावेदकस्यअजीर्यतामित्यादेरर्थंदर्शयति जरेतिच तुर्भिः योजरादिमान्भवतांस्वर्गवासिनामधोभवेश्रौतकुपदोक्तेभूमिलोकेवसनशीलोमादृशोमर्त्योभवतांदेवानांसन्निधिंप्राप्तःसन्नात्माना त्मतत्त्वविवेकवान्यदिभवेत्सइमान्रामाप्रभृतीन्भावान्वस्तुतोदुःखकारकान्मूढानांनानारूपदर्शनद्वाराऽरतिपदोक्तोपभोगद्वाराचसुख दानभिध्यायन्रमणीयत्वेनमन्यमानःसंश्चिरजीवितेकःसज्जेतेतित्रयाणांसंबंधः ॥ २३८ ॥ २३९ ॥ २४० ॥ फलितमाह त तदति यतोहंमनुजानंदमारभ्यब्रह्मलोकानंदपर्यंतजन्यानंदानामुक्तविधयादुःखमयत्वमेवजानाम्यतस्त्वयासमीरितेवरत्वेनोपन्यस्तेवि

जरामरणशून्यानांभवतांस्वर्गवासिनां॥दैवयोगेनसांनिध्यंप्राप्तोत्रयदिकश्चन॥ २३८ ॥जरामरणवान्भूमावधस्ताद्भवतांस्थितः॥मादृशःपुरुषोजानन्नात्मानंचपरांस्तथा॥ २३९॥ दर्शनेनतथारत्यारामाद्याःसुखदा हिये॥ अभिध्यायन्निमानत्रसर्वदादुःखकारिणः ॥ रमेतजीवितेकोनुबहुकालेपिबुद्धिमान्॥ २४० ॥ ततो जानामिदेवानामानंदंस्वर्गिणामपि॥ मनुजानांचधर्मज्ञनमेप्रीतिःसमीरिते ॥ २४१ ॥ यत्रसंशेरतेदेवाज रामरणवर्जिताः॥ परलोकगतौमृत्योमहत्यांनिर्णयंविना॥ तमेवब्रूहिभगवन्मत्यंचेद्वरदोभवान्॥ २४२ ॥ यमेनलोभ्यमानोपिनचिकेतामुहुर्मुहुः ॥ वरमन्यंवृणीतेनस्वात्मज्ञानात्कथंचन ॥ २४३ ॥ एवंसर्वेषुभूतेषुगूढस्तिष्ठतिसर्वदा॥ सृष्ट्वाजगत्प्रविष्टश्चतमेकंपरिपृच्छति ॥ २४४ ॥ एवंनिश्चलचित्तंतंज्ञात्वासनचिकेतसं॥ यमोऽभीष्टतमंतस्यवरंदातुमिदंजगौ॥ २४५॥

षयजातेमेप्रीतिःसक्तिर्नास्तीत्यर्थः ॥ २४१ ॥ वक्ष्यंतकंडिकार्थमाह यत्रेति यत्रपरलोकगतौमहत्यांदुर्ज्ञेयायांनिर्णयंविनादेवाअपि संदिग्धास्तन्निर्णयरूपमेववरंदेहीत्यर्थः ॥ २४२ ॥ यमेनेति एवंयमेनलोभ्यमानोपिनचिकेताःस्वात्मज्ञानादन्यंवरंनवृणीतेस्मकिंतुसर्वं सृष्ट्वातत्रगूढतयास्थितमात्मानमेवविषयीकुर्वतःप्रश्नस्यसमाधानमेववदतवानितिद्वयोरर्थः ॥ २४३ ॥ २४४ ॥ द्वितीयवल्लीव्याख्यामु पक्रमते एवंनिश्चलचित्तमिति निश्चलंविषयकामनयाऽक्षोभ्यंचित्तंयस्यतादृशंतंज्ञात्वातदिष्टंवरंदातुंतंप्रशंसन्निदमाहेति ॥ २४५ ॥ ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रप्रथमास्त्रयोदशऋचोऽभ्युदयनिःश्रेयसविभागादिप्रदर्शनद्वाराअधिकारिनिर्णयार्थास्तासामाद्ययोरर्थंप्रपंचयति अन्यदितित्रिंशता श्लोकैः मोक्षरूपंफलमतिप्रशस्तत्वात्श्रेयःपदोक्तमन्यत्स्वरूपसाधनप्रमाणाधिकारिभिर्विलक्षणतयास्थितं तथासांसारिकसुखरूप मभ्युदयाख्यंफलमतिमूढानांप्रेमास्पदत्वात्प्रेयःपदोक्तमन्यत्स्वरूपादिभिर्विलक्षणमित्यर्थः तथाहि आद्यस्यस्वरूपंनित्यसिद्धात्मरूपं साधनंविद्या प्रमाणंवेदांताः अधिकारीसाधनचतुष्टयवान् अंत्यस्यस्वरूपंजन्यसुखं साधनंकर्म प्रमाणंपूर्वकांडादि अधिकारीसकामइति ॥ २४६ ॥ श्रेयसइति श्रेयःप्रेयोरूपयोर्द्वयोःफलयोर्मध्येश्रेयएवयःपुमानाददानःसंपाद्यतयांगीकुर्वाणोभवतिसस्वकीयादर्थात्पुरुषा

अन्यन्मोक्षाभिधंश्रेयःप्रेयोन्यत्सुखशब्दितं॥ सांसारिकंद्विधातत्स्यादिहलोकेपरत्रवा॥ २४६ ॥ श्रेयसःप्रेयसश्चापिद्वयोर्मध्येऽत्रसर्वदा॥ आददानःपुमान्श्रेयःस्वार्थान्नैवप्रहीयते॥ २४७ ॥ प्रेयःसमाददानस्तुसंसारंयातिमानवः॥ अनेकदुःखनिकरंमोहितोयंसुखाशया॥ २४८॥ यथाजलगतोमत्स्योमोहितोबडिशाशया॥ अनवाप्यसुखंकिंचिद्दुःखंमरणमाव्रजेत्॥ २४९॥ एवंस्वर्गंचभोगंचसमिच्छन्पुरुषःसदा॥ अनवाप्यसुखंभूरिदुःखमेवाधिगच्छति ॥ २५० ॥ वधंबंधादिकंयद्वत्कुराज्येपिननिर्धनः॥ प्राप्नोतितद्वदेवायंविरागीदुःखमण्वपि॥ नैवाप्नोतिसदामोक्षीनचिकेतोभवादृशः ॥ २५१ ॥ अतोभिन्नार्थकारित्वात्श्रेयःप्रेयोपिसर्वदा॥ विभिन्नंपुरुषंस्वस्यबध्नीतोत्राधिकारिणं ॥ २५२ ॥

जनान्नपरिच्युतोभवति इतरःप्रेयोयाहीतुसंसारेभ्रमन्पुरुषार्थंनलभतेइतिद्वयोरर्थः ॥ २४७ ॥ २४८ ॥ प्रेयोर्थीप्रत्युतदुःखमेवलभतेइतिसदृष्टांतमाह यथेतिद्वाभ्यां निगदव्याख्यातंद्वयं ॥ २४९ ॥ २५० ॥ श्रेयोर्थीप्रारब्धवशेनसंसारेवर्तमानोपिनदुःखंलभतेइत्येतद्दृष्टांतेनस्फुटयति वधमिति यथानिर्धनःकुराजकदेशेवर्त्तमानोपिवधादिदुःखंनप्राप्नोतितथाविरक्तोमोक्षाधिकारीसंसारस्थोप्यणुस्वल्पमपिदुःखंनैतीत्यर्थः ॥ २५१ ॥ अतइति अतःप्रदर्शितात्विभिन्नौयावदर्थौदुःखाभावदुःखरूपौतयोःप्रयोजकत्वाद्धेतोःश्रेयःप्रेयसीविभिन्नंपरस्परविलक्षणमधिकारिणंपुरुषंबध्नीतःस्वेनसंबद्धंकुरुतइत्यर्थः ॥ २५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिकारभेदमेवदर्शयति त्वादृशाइति भवद्विधाःसविवेकाअधिकारिणःश्रेयसासंबद्धामंदधियस्तुप्रेयसेति ॥ २५३ ॥ उभयोःसंबंधप्र
सक्तिस्तुशास्त्राध्ययनकालेभवतीत्याह वेदाध्ययनेति यदायंवेदंतन्मूलकंपुराणादिकंवाअधीतेतदर्थकुशलश्चभवतितदाश्रेयःप्रेयसीउभे
 अपिअनेनसंबद्ध्येतेसंबंधयोग्येभवतः तत्रप्रशस्तमतिःश्रेयोभ्यर्थयेत्प्रेयोऽपेक्षयाधिकत्वात्मंदधीस्तुप्रेयइच्छतीतिद्वयोरर्थः ॥ २५४ ॥
२५५ ॥ प्रेयोर्थिनोमंदत्वंस्फुटयति अप्राप्तमिति यतएषप्रेयोर्थीअप्राप्तंपुत्रादिप्राप्तुंतथास्थितंप्राप्तंपुत्रादिरक्षयितुंचइच्छन्भवतितत्पुत्रा

त्वादृशाःश्रेयसानित्यंसंबद्धात्यधिकारिणः॥ अन्येचप्रेयसानित्यंसंबद्ध्यंतेल्पमेधसः॥ २५३॥ वेदाध्ययनमा
त्रेणश्रेयःप्रेयश्चसर्वदा॥ संबद्ध्येतेमनुष्येणवेदार्थकुशलेनहि॥ २५४ ॥ बुद्धिमान्श्रेयसोयत्स्यादधिकंश्रेयई
रितं ॥ प्रार्थयेततदेवान्योमंदःप्रेयोत्रयाचते ॥ २५५ ॥ अप्राप्तंपुत्रपश्वादिप्राप्तुमिच्छंस्तथास्थितं ॥ अभि
रक्षयितुंनैतद्दैवाधीनंप्रपश्यति॥ २५६ ॥ बुद्धिमान्सर्वमेवैतद्दैवाधीनमवस्थितं ॥ एतयोश्चविवेकंचत्वादृ
शोत्रावगच्छति॥ अयमेवंविवेकेनविचारयतिसर्वदा ॥ २५७॥ सुखंमेस्यात्तथादुःखंमाभूदण्वपिसर्व
दा॥ जंतुरिच्छतिसर्वोपिनचैतदधिगच्छति ॥ २५८ ॥ ततःकस्यात्रदोषोयंपुरुषस्योद्यमेसति ॥ सुखंनजा
यतेदुःखंजायतेचानभीप्सितं॥ २५९॥

दिप्राप्त्यादिकंदैवाधीनंनजानातीति ॥ २५६ ॥ बुद्धिमानिति त्वादृशोबुद्धिमांस्तुयोगक्षेमयोर्दैवाधीनत्वंविज्ञायविवेकपरोभवतिसच
विवेकएवंवक्ष्यमाणविधयाश्रेयःप्रेयसोर्विवेकेनस्वरूपादिभेदेनविचाररूपइत्यर्थः ॥ २५७॥ तत्रप्रेयसःस्वरूपादिगोचरंविचारमभिन
यति सुखंमेइत्यादिनाअमूढोहमित्यतःपूर्वग्रंथेन सर्वोजंतुरात्यंतिकंसुखंदुःखाभावंचकामयन्नपिसतत्सुखादिकंनलभतेइतिप्रसिद्धं तद्वि
परीतंचलभतेइति इत्थंसुखाद्यर्थोद्यमेपिविपरीतफललाभप्रयोजकोदोषःकस्यधर्मःकिंपुरुषस्यकिंवाकर्मणइतिद्वयोरर्थः ॥ २५८ ॥
॥ २५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणादेरिति तत्रनाद्यः पुरुषदोषोहिवैगुण्येनकर्मानुष्ठानरूपोवाच्यः सचनदृश्यते यतःकरणस्यफलसाधनतयाप्रापितस्ययागादेरादिपद ग्राह्यस्यतदुपकारिव्यापारादेश्चप्रचारेणसम्यगनुष्ठानेनउद्यताःसमीक्ष्यंतेजनाअतःपरिशेषात्सुखसाधनत्वाभिमतंयत्काम्यकर्मादिकंतदे वदुःखहेतुरितिनिश्चीयतइत्यर्थः ॥ २६० ॥ तत्रसंसारेसुखहेतुतयाभिमतान्भावान्दर्शयति प्रतिग्रहेति प्रतिग्रहादयोब्राह्मणादीनामर्थसं ग्रहहेतवःप्रसिद्धाःसचार्थःकामसुखसाधनमित्यर्थः ॥ २६१ ॥ अर्थस्यसुखकरत्वंविशदयति अर्थतइति अर्थेनह्यन्नंदाराभोगसाधना निग्रहादीनिचलभ्यंतेतेभ्योन्नादिभ्यस्तुतृप्तिःसंततिर्मनस्तुष्टिश्चलभ्यते अन्नादिविभागादिनायशःस्वर्गश्चलभ्यतेइति ॥ २६२ ॥ अर्था

करणादेःप्रचारेणदृश्यंतेसर्वदोद्यताः॥ ततःसुखकरंनूनंदुःखमस्मैकरोतितत्॥ २६० ॥ प्रतिग्रहप्रजारक्षाकृ
ष्याद्याहेतवोयतः॥ अर्थसंपादयंतीष्टमिहलोकेसुखप्रदं॥ २६१ ॥ अर्थतोन्नंततोदारान्भोगान्नानाविधान
पि॥ तेभ्यस्तृप्तिंप्रजांतुष्टिंमनसोपियशस्तथा॥ स्वर्गादिकंचपुंसःस्यात्सर्वदानियतंयतः॥ २६२ ॥ एवमर्थेन
जायेतदत्तमिष्टंसपूर्त्तकं॥ ततःस्वर्गंप्रयात्येषतत्रभोगान्यथाभुवि॥ प्राप्नोतिविविधान्दिव्याननेकसुखहेतु
कान्॥ २६३ ॥ एवंस्थितेषुतत्सर्वंसुखबीजंसुदारुणं॥ दुःखवृक्षमयंजातमिहलोकेपरत्रवा ॥ २६४ ॥ अ
र्थादीनांचसंप्राप्तौदुःखंस्यान्मरणांतिकं ॥ प्राप्तानांचवियोगोत्थंभयंदुःसहमेवच ॥ २६५ ॥ अन्यत्रगम
नाशंकास्वप्रियस्येहवस्तुनः ॥ दहत्यविरतंचित्तंचेतनस्यजडस्यवा ॥ अप्रियस्यतथैवैषानित्यमागमनंप्रति
॥ २६६ ॥

त्स्वर्गलाभेदानयागपूर्त्तादिकंव्यापारतयाप्रसिद्धमित्याह एवमर्थेनेति पूर्त्तंवाप्यारामादिकृतिस्तत्फलेस्वर्गेचनानाभोगाःप्रसिद्धाः हेतुपदे कःस्वार्थे ॥ २६३ ॥ वर्णितानांसुखकराणांदुःखकरत्वंप्रपंचयति एवमित्यादिना एवंघटीयंत्रवदुक्तपदार्थेषुस्थितेषुसत्सुसर्वंसुखसाधनं दुःखरूपवृक्षाकारेणपरिणामिसिद्धमित्यर्थः ॥ २६४ ॥ अर्थानामर्जनेदुःखमित्यादिवाक्यानितथात्वमेवदर्शयंतीत्याह अर्थादीनामि ति अर्थोधनं आदिपदेनभोगसाधनांतरग्रहः संप्राप्तिरर्जनं ॥ २६५ ॥ अन्यत्रेति जडस्यान्यत्रगमनाशंकापिदहतीति अप्रियागमनंप्रति चयाएषाशंकासापितथेति ॥ २६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रियाप्रियगमनागमनयोर्वह्निवद्धृदयदाहकत्वंप्रसिद्धमित्याह प्रियस्येति ॥ २६७ ॥ आत्मनइति तथालोकद्वयेइहलोकेपरलोकेवा स्थितिर्यस्यतादृशस्यात्मनआत्मीयशरीरस्यस्वामिशरीरस्यवामरणत्रासाद्यःसुखस्यसंक्षयोभिभवःततोदुःखंप्रसिद्धमितिशेषः ॥ २६८ ॥ तथाभाविशरीरंकिंभविष्यतीतिचिंतयाभयदुःखंप्रसिद्धमित्याह दिवीति ॥ २६९ ॥ तथाध्यात्मिकादिदुःखानिप्रसिद्धानीत्याह आध्यादयइति तेनोक्तदुःखसद्भावेनइहसंसारेस्विदितिवितर्केकिंसुखमितितुरीयपादार्थः ॥ २७० ॥ मूढानांदुःखसाधनेसुखसाधन

प्रियस्यगमनंतद्वदप्रियस्यसमागमः ॥ उभौत्हृदयगौवन्हीदहतोदिविवाभुवि ॥ २६७ ॥ आत्मनोमरणत्रासात्तथैवसुखसंक्षयात् ॥ पित्रादेःस्वामिनश्चापिनित्यंलोकद्वयस्थितेः ॥ ॥ २६८ ॥ दिविवाभुविवायत्स्यात्शरीरंतस्यसंक्षये ॥ कर्मांतरेणकिंनामवपुःस्यादितितद्भयं ॥ २६९ ॥ आध्यादयश्चवर्त्ततेदिविवाभुविवासदा ॥ सशरीरस्यसर्वस्यकिंस्वित्तेनसुखंत्विह ॥ २७० ॥ विषमिश्रंयथैवान्नंमूढस्यसुखदंभवेत् ॥ एवंप्रेयइदंसर्वंमूढस्यसुखदंस्मृतम् ॥ २७१ ॥ अमूढोहंततोनेनममाकिंस्वित्सुखंभवेत् ॥ उदर्केदुःखदंप्रेयःश्वमैथुनसमंकथं ॥ धीमतात्रमयाग्राह्यमिहवापिपरत्रवा ॥ २७२ ॥ अशरीरंततोयत्स्यात्सर्वदुःखविवर्जितं ॥ सुखंतदेवभवतान्ममनान्यत्कदाचन ॥ २७३ ॥ एतत्पृच्छाम्यहंवृद्धान्वेदवेदांगपारगान् ॥ अशरीरंसुखंकिंचिद्विद्यतेवानवाक्वचित् ॥ २७४ ॥ यद्वदिष्यंतितेतत्तत्श्रेयोज्ञात्वाविचक्षणः ॥ विवेकेनवृणीतेत्रश्रेयःसत्वादृशोजनः ॥ २७५ ॥

बुद्धौदृष्टांतमाह विषेति ॥ २७१ ॥ अथश्रेयोगोचरंविचारंदर्शयति अमूढोहमिति अनेनप्रेयसाममामूढस्यनकिंचित्सुखंभवेद्यतस्तत्प्रेयःशुनांमैथुनवदुदर्केदुःखमतोमयाधीमतातत्श्रेयोलोकद्वयगंनग्राह्यमिति ॥ २७२ ॥ किंतुमयाश्रेयःसंज्ञंनित्यसुखमेवसंपाद्यमित्याह अशरीरमिति भवतात्आविरस्तु ॥ २७३ ॥ तत्प्राप्तयेअहंमहात्मनःप्रतिपृच्छामीत्याह एतदिति ॥ २७४ ॥ यद्वदिष्यंतीति तेवृद्धायद्वदिष्यंतिप्रतिपादयिष्यंतितदेववस्तुतन्मज्जिज्ञासितंश्रेयोभविष्यतीत्येवंज्ञात्वाविचार्यविचक्षणःश्रेयोवृणीतेसतथाश्रेयोवरितात्वादृशःकश्चिदेवेत्यर्थः ॥ २७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयायाअर्थःप्रदर्श्यते सत्वमितिचतुर्भिः सश्रेयोग्राहीममशिष्यस्त्वंविवेकिनांमुख्योसियतोमयोपन्यस्तान्काम्यपदार्थान्वांतवत्त्यक्तवानसि किंकुर्वत् तान्कामान्तदेकान्तद्दुःखमेकंप्रधानंयेषुतेतथातान् एकोन्यार्थेप्रधानेचेत्यमरः अतएवतेषांमूढानांदुःखोदधिप्रदानभिध्यायन्जानन्सन्नितिद्वयोरर्थः ॥ २७६ ॥२७७॥ नचिकेतइति वित्तंभोगसाधनंतदुपादानरूपांस्वर्णमयींश्रृंखलांहस्तपादयोःसम्प्रवृत्तिरोधिकांविवेकबलेनविमथ्यनिर्गतत्वाद्विगतज्वरोसीत्यर्थः ॥२७८॥ ययेति कीदृशीश्रृंखलाययाबद्धाबहवःसंसारेमग्नाइत्यर्थः अत्रेदंबोध्यम सृकिगतावित्यनुशासनात्सृंक्यतेगम्यतेसंसारोऽनयेतिव्युत्पत्तिबाहुलकात्संप्रसारणंचाभिप्रेत्यग्रंथकृताभोगसाधनासक्तिःसृंकाप

सत्वंविवेकिनामग्रेसरःशिष्योममासिभोः॥ मयादत्तान्यतस्त्वित्थंत्यक्तवानसिवांतवत् ॥ २७६ ॥ प्रियरूपानिमान्कामान्नित्यंप्रियकरानपि॥ अभिध्यायंस्तदेकांस्तांस्तेषांदुःखोदधिप्रदान्॥ २७७॥ नचिकेतइमांहैमींश्रृंखलांवित्तरूपिणीं॥ हस्तपादस्थितांत्यक्त्वागतोसिविगतज्वरः ॥ २७८॥ ययानिबद्धाबहवोबुद्धिमंतोपिमानवाः॥ संसारजलधौमग्नानिःसरंतिनकर्हिचित्॥ २७९ ॥ अतिदूराविमौमार्गौसंसारस्थितिभेदिनौ॥ कर्मज्ञानात्मकौप्रेयःश्रेयःपुरमुपागतौ॥ २८० ॥ मन्येज्ञानार्थिनंत्वत्रभवंतंनचिकेतसं ॥ यतस्त्वांबहवःकामानचकुर्द्धैर्यतश्च्युतम्॥ २८१ ॥

दार्थतयोक्ता भाष्यकारैश्वसैवकर्मगतित्वेनोक्ता पूर्वंतुसृंक्यतेकांतिरनयेतिविवक्षयामालाव्याख्यातेति ॥२७९॥ चतुर्थ्यर्थमाह अतिदूरावितिद्वाभ्यां इमौमार्गौपरस्परमतिदूरौभवतः ययोरेकःकर्मरूपोद्वितीयस्तत्त्वज्ञानरूपः अतिदूरत्वेहेतुगर्भंविशेषणद्वयं संसारक्रमेणयौस्थितिभेदौस्थितिःसंरक्षणंभेदोविदारणंचतत्प्रयोजकौ अतएवश्रेयोरूपंप्रेयोरूपंचनगरंप्रतिक्रमेणप्रविष्टावित्यर्थः ॥ २८० ॥ तयोर्मार्गयोर्मध्येज्ञानरूपमार्गपरंभवंतंजानेकामैरविहतधैर्यकत्वादित्याह मन्येइति ॥ २८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः कर्ममार्गस्तुद्विविधःशास्त्रेणविहितोनिषिद्धश्चतत्राद्यंसकामतयानुतिष्ठतांनिंदकःपंचमोमंत्रइतिसूचयंस्तदर्थमाह प्रेयांसइतिदश
भिः कर्मिणःकर्मसक्तस्यप्रेयांसःअतिप्रियाःकामाःकाम्यपदार्थास्तथातत्कामयितारोऽज्ञाश्चएतेसर्वेंअविद्याभूमावेववर्त्तंते यद्भ्रमेभास
तेतन्मिथ्येतिन्यायात् कीदृशाअज्ञाः सर्वदाआत्मनआत्मत्वेनाभिमतस्यदेहादिसंघातस्यप्रशंसांकुर्वंतः यतोदुर्धियोपिपंडितमानिनः तेऽ
ज्ञाःसंसारेकुत्सितांगर्भवासादिमर्यांगतिंप्राप्नुवंतःसंतोदुःखिताभवंतितद्दुःखनिदानंतुतेषामविद्यैवेतिद्वयोरर्थः ॥ २८२ ॥ २८३ ॥ गुरू
पदेशेति एतेऽज्ञाःपरमार्थविद्गुरूपदेशराहित्येनमोक्षमार्गेकुशलताहीनाअज्ञान्गुरुत्वेनाश्रयंतःअंधस्येवांधलग्नस्यविनिपातःपदेपदेइति

प्रेयांसःकर्मिणःकामाअविद्यायास्तुमध्यगाः॥ अज्ञाश्चपंडितंमन्याःसर्वदात्मप्रशंसनं ॥ २८२ ॥ कुर्वंतोदु
र्धियोत्यंतंसंसारेकुत्सितांगतिं॥ व्रजंतोमोहसंपन्नादुःखंतेयांत्यविद्यया ॥ २८३ ॥ गुरूपदेशरहितामोक्षमा
र्गाविचक्षणाः॥ अंधाइवस्वयंत्वन्यैरंधैर्नीतादिशोदश ॥२८४॥ एतेनानाविधास्तत्रदृष्टादृष्टसुखार्थिनः॥ सं
सारेस्मिन्महामोहप्रदेनित्यंपतिष्णवः॥ २८५॥ वेदवादरतःकश्चिदेकोराशिर्व्यवस्थितः ॥ अपरोवेदवादे
नरहितोध्यक्षमानभाक् ॥ २८६॥ गुरुणायादृशोदृष्टःपंथाःशिष्येणतादृशः ॥ पंडितंमन्यतांप्राप्तागुरुशिष्य
परंपरा॥ २८७॥ घोरांभवाटवीमेतामुपरिष्टादधोगतिं॥ अधोगतेस्तुसंप्राप्तउपरिष्टादयंजनः॥ २८८॥

न्यायविषयतांनातिवर्त्तंतेइत्यर्थः ॥२८४॥ एतेइति एतेऽज्ञाःसंसारेपतनशीलानानाविधाद्विविधाः तत्रकेचिददृष्टद्वारासुखार्थिनःकेचि
दृष्टद्वारैवतथेत्यर्थः ॥ २८५ ॥ वेदेति तत्राद्यानांराशिर्गणोवेदवादेसार्थवादकर्मवाक्यरूपेसक्तःइतरेषांदृष्टसुखार्थिनांराशिस्तुआगम
विमुखः प्रत्यक्षप्रमाणमात्रशरणत्वादित्यर्थः ॥ २८६ ॥ तत्राद्यराशिमभिलक्ष्याह गुरुणेति यादृशःपंथाःसेवितोगुरुणापित्राचार्यादिरू
पेणतादृशएवशिष्येणाक्षिणीनिमील्यसेव्यइत्यध्यवसायवतीगुरुशिष्यधारापंडितमानिनांकर्मिणांदृश्यतइतिशेषः ॥ २८७ ॥ तस्यांपरंप
रायांवर्तमानोजनस्तुघोरांभवाटवींगच्छन्नूर्ध्वाधोलोकपरिभ्रमणंप्राप्नोतीत्याह घोरामिति प्रथमपादांतेगच्छन्नितिशेषः अयंआद्यरा
शिवर्त्ती ॥ २८८ ॥ ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरंराशिमभिलक्ष्याह तर्जनमिति अर्द्धांतेकुर्वन्नितिशेषः मठश्छात्रादिनिलयः वेदविमुखऐहिककाममात्रसक्तस्तर्जनादिपापंप्राधा न्येनकुर्वन्नधस्तान्नरकक्षुद्रजंतुभावादिष्वेववर्त्ततइत्यर्थः ॥ २८९ ॥ राशिद्वयवर्तिनांसर्वेषामात्मतत्त्वविस्मरणंसाधारणधर्मइत्याह आनं दात्मेति ॥२९०॥ तत्राद्यानामेतावान्विशेषोयत्तेपुण्यफलभोगांतेममयमस्ययातनाप्रदस्यवशंयांतीतिसदृष्टांतमाह दूरमिति यथाजाला दूरमाकाशेभ्रमन्नपिपक्षीततोऽवतरन्जालेपतेत्तथास्वर्गीकियतापुण्यफलभोगावसानोपलक्षितेनकालेनततःपतन्ममवशंयातीति तथाच स्वर्गिणंप्रकृत्यश्रुत्यंतरंकपूयचरणाःकपूयांयोनिमापद्यंतइति स्वर्गभोगांतेकुत्सितकर्मफलोदयेकुत्सितांयोनिंनरकद्वारागच्छंतीतितदर्थः

तर्जनंताडनंनिंदामठादिपरिलुंठनं ॥अधस्ताद्वेदमार्गेणरहितःकाममोहितः॥२८९॥आनंदात्मास्वयंज्योतिः प्रतिभातिनकस्यचित्॥ सर्वेषांहृदयेनित्यंवसन्नाकाशसन्निभः॥ २९० ॥दूरंगत्वायथापक्षीनिपतेल्लुब्धक स्यहि॥ जालेकश्चिदयंयद्वत्पुमानत्यंतबालिशः॥ कालेनकियतास्वर्गीममायातिवशंपुमान् ॥ २९१ ॥ अ परोनित्यमेवैषमद्वशेवर्ततेजनः॥ प्रमाद्यन्धनमोहेननित्यपापरतोहियः॥ २९२ ॥ अयंलोकोत्रसत्यःस्या द्देहोयोवर्त्ततेधुना॥ मृतेसतिपुनस्तस्यदेहःकेनभविष्यति॥ २९३॥ देहःकरोतिकर्माणिफलमात्माधिगच्छ ति॥ इदंकथंविरुद्धंस्यादात्मनोस्तित्ववादिनः॥ २९४॥

॥ २९१ ॥ द्वितीयराशिगतानांकेवलपापिनांगतिंविशदयतःषष्ठस्यार्थमुपबृंहयति अपरइत्येकविंशत्याश्लोकैः योऽपरोराशिर्धनेनगाढे नमोहेनतमसाप्रमाद्यन्ननवधानंप्राप्नुवन्नित्यंपापरतसनित्यंममयमस्ययातनाप्रदस्यवशेवर्त्तते ॥ २९२ ॥ तद्राशिगतानांलक्षणभूतंपा पप्रवृत्तिप्रतानकंकुतर्कमभिनयति अयंलोकइतिनवभिः अयंप्रत्यक्षसिद्धःअत्रलोकेयोदेहोवर्त्ततेतस्मिन्मृतेसतितस्यदेहरूपालनःपरलो केदेहांतरंभविष्यतीत्यत्रकोहेतुः नहिदेहांतरारंभकंकिंचिद्दृश्यतेइत्यर्थः ॥२९३॥ कर्मतत्रहेतुरितिचेन्नान्येनकृतस्यान्येनोपभोगानुपपत्ते रित्याह देहइति योदेहादतिरिक्तस्यात्मनोस्तित्वंमन्यतेतन्मतेइदंविरुद्धंकथमुपपद्येत इदंकिं देहःकर्माणिकरोतितत्फलंतुतदन्यआत्माभुं क्तइति ॥ २९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचपरलोकार्थधर्मकर्त्तुःकृतनाशादिदोषप्रसंगइत्याह कृतेति महात्मनइत्युपहासः ॥ २९५॥ उक्तदोषद्वयमेवस्फुटयति योदेहइति
योदेहोधर्मकृतवान्सपुण्यफलंनभुंक्तेयश्चायंभवदभ्युपगतआत्माधर्मनकृतवान्सतत्फलंभुंक्तेइति ॥ २९६ ॥ आत्मनइति यद्युक्तदोष
परिहारायात्मनःकर्मकर्तृतेष्यतेतदानिक्रियत्वहेतुकाआत्मनोनित्यताकथंसिध्येत् यदितुसक्रियस्याप्यात्मनोनित्यतांगीक्रियतेतदादेह
॥१९॥ स्यापिसास्त्वित्यर्थः ॥२९७॥ किंचसक्रियत्वस्यस्पर्शवत्त्वव्याप्यतादर्शनात्सक्रियत्वांगीकारेस्पर्शवत्त्वमप्युपलभ्येततथाचदेहादात्मनो

कृतनाशःकथंनाममतेनास्यभवेद्ध्रुवः॥ अकृताभ्यागमश्चापिधार्मिकस्यमहात्मनः ॥ २९५॥ योदेहःकृत
वान्धर्मंभस्मतांसगतोस्तिह ॥ तस्यनैवफलंकिंचित्पुण्यापुण्यसमुद्भवं ॥ यश्चायंकृतवान्नात्माभुंक्तेसौक
र्मणःफलं ॥ २९६ ॥ आत्मनःकर्तृताचेत्स्यान्नित्यतात्वक्रियत्वतः ॥ कथंस्यात्केनदेहस्यनभवेत्साचनित्य
ता॥ २९७॥ क्रियावान्स्पर्शवान्दृष्टःस्पर्शवांश्चेत्कुतोभवेत् ॥ विभिन्नोदेहतस्तस्मान्नास्तिदेहात्पृथग्घिसः॥
अतएवपरोलोकोनास्तिकश्चिन्मृतेसति॥ २९८॥ अपिचेन्मरणंप्राप्तःपुमान्लोकांतरंव्रजेत् ॥ प्रियान्दारा
न्सुतान्कस्माद्द्रष्टुंनायातिकर्हिचित् ॥ २९९॥ देहाद्यमभटैर्बध्वायद्ययंनीयतेपुमान्॥ आक्रोशंकुरुतेकस्मा
न्नबहिर्देहतःस्थितः॥ यथाराजभटैर्गेहान्नीयमानोबलात्पुमान् ॥ ३०० ॥ आक्रोशमपिकुत्रापिम्रतःकिंचि
त्करोतिन ॥ शुभाशुभंचतेनात्मानदेहात्पृथगास्थितः॥ ३०१ ॥ आत्मनःपरलोकेऽस्यसत्त्वेवेदवचोस्तियत्॥
ब्राह्मणानांहितज्ज्ञेयंपरवित्तापहारिणां ॥ ३०२॥

भेदकथानयुक्तेत्याह क्रियावानिति देहाद्भिन्नःकुतइतिसंबंधः सआत्मा अतोदेहभेदासंभवात्॥२९८॥ किंचयद्यात्मापरलोकंगच्छेत्तदा
दारादीन्द्रष्टुंकदाचिदागच्छन्नुपलभ्येतनचतथादृश्यतइत्याह अपिचेदिति ॥ २९९ ॥तथापरलोकंनीयमानउच्चैःशब्दंकुर्वन्दृश्येतेतिसदृ
ष्टांतमाह देहादिति स्पष्टं ॥ ३०० ॥ नचतथादृश्यतइत्याह आक्रोशमिति यतआक्रोशंतथाशुभाशुभमुपकारमनुपकारंवाम्रतःकुर्वन्दृ ॥१९॥
श्यतेततोदेहात्पृथक्केनात्मनःस्थितिरयुक्तेत्यर्थः ॥ ३०१ ॥ तस्मादस्यात्मनःपरलोकेसत्वप्रतिपादकंवेदवाक्यंयदुपलभ्यतेतद्ब्राह्मणैर्लुब्धैः
प्रक्षिप्तमित्याह आत्मनइति ॥ ३०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिविप्रेभ्योदानेनमृतस्यतृप्तिस्तर्हिपांथादेरपिलोकेस्यादित्याह दत्तइति एषातृप्तिः ॥ ३०३ ॥ एवंविधान्कुतर्कान्कामादिवशोबहुशः सदसिजल्पतीत्याह इत्यादीति ॥ ३०४॥ तस्यनास्तिकस्यदेहांतरंभविष्यतीतिशंकापिनोदेतीत्याह मन्यमानस्येति नभातिनचिंताविषयोभवति ॥ ३०५ ॥ तादृशस्तुपुनःपुनर्मद्वशंयातीत्याह एवमिति मारंमारंमृत्वामृत्वामेयमस्यमृत्युरूपस्ययातनाप्रदस्यचवशंयाति ॥३०६॥ ममधर्मरूपस्यनिंदारूपंतदीयवाक्चापल्यंतावदेवदृश्यतेयावन्मयोपेक्ष्यते मयावेक्षितस्तुकर्मफलमनुभवतीतिदर्शयितुंदृष्टांतमा

दत्तेसतिमृतस्यस्याद्यदितृप्तिर्द्विजन्मनां॥भूमौकिमन्यदानेनान्यस्यैषानहिजायते॥३०३॥इत्यादिबहुधामूढः कुरुतेजल्पनंतथा॥ कामाल्लोभात्तथाक्रोधादपिस्नेहादिनाद्विज॥ ३०४॥ मन्यमानस्यतस्यैवंपरलोकदर्शिविना॥ जन्मांतरंनभात्यस्यबालिशस्यदुरात्मनः ॥ ३०५॥ एवंवदन्हिपापात्मादुर्जनोनित्यमेवहि ॥ मारंमारंचसततंवशंमेयातिदीनधीः॥ ३०६॥ यथावनगतःकश्चिन्मर्कटःकपिचेष्टया॥ धन्विनोहेलनंकुर्यात्शाखामारुह्यशाखिनः॥ ३०७॥ क्षणमात्रमयंयावत्बाणंप्राणहरंगुणात्॥ नमुंचतिविमुक्तेतुफलमेतिस्वकर्मणः॥ ३०८॥ तथायंपापपुरुषोवेददेवादिनिंदकः॥ प्राङ्मृतेर्मरणादूर्ध्वंकल्पांतंनरकंवसेत्॥ ३०९॥ दानादेरमुनायेयंकृतापायाविडंबना॥भावानामत्रसामर्थ्यविज्ञानाभावजाहिसा॥ ३१०॥

ह यथेतिद्वाभ्यां धन्विनोधनुर्धरस्यहेलनमवज्ञांक्षणमात्रंतावदेवमर्कटःशाखारूढःकुरुतेयावत्सधन्वीगुणात्ज्यातोबाणंनमुंचति बाणमोक्षेतुमर्कटःस्वकर्मणःफलमनुभवतीतिद्वयोरर्थः ॥ ३०७॥ ३०८ ॥ दार्ष्टांतिकेयोजयति तथेति तथायंपापोमरणात्प्रागेववेदादिनिंदायांप्रगल्भोदृश्यतेतदुत्तरंतुनरकेफलंभुंक्तेइति ॥ ३०९ ॥ दानादेरिति अमुनापापपुरुषेणदानादेर्विडंबनादत्तेसतीत्याद्युपहासरूपायाकृतातस्याःप्रयोजकःपदार्थानांसामर्थ्यविज्ञानाभावएवेत्यर्थः ॥ ३१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टानुसारिणएवसर्वेभावाइतिननियमोदीपेव्यभिचारादित्याह वासरेइति वासरेतमःस्तोमानाशकत्वेनदृष्टोपिदीपस्तथैवनतिष्ठतिकिंतुरात्रौगृहमध्येतमोनाशयत्येवेत्यर्थः ॥ ३११ ॥ किंचअरेमूढदृष्टानुसारेणापिसंभवंतंसत्तर्कंकुतोनकरोषियेनतेभव्यंस्यादित्याह अदत्त इति अयंजनोमूर्छितोरोगेणमूर्छांप्राप्तोविप्रेभ्योऽदत्तेसतिमूर्छितएवस्यात्तिष्ठेत्दत्तेग्रहादिदानेकृतेतुजीवितोनिवृत्तमूर्छःअत्रप्रत्यक्षव्यवहारेस्यादेषाएवंविधामतिस्तर्करूपाभविष्यतिभाविनिमरणेपितवकुतोनभवति और्ध्वदेहिकादिदानेमरणमूर्छातउत्थानमन्यथाप्रेतत्वेनतथाभावस्थितिरितिन्यायस्यसाम्यादित्यर्थः ॥ ३१२ ॥ अचिंत्याःखलुयेभावानतांस्तर्केणयोजयेदितिन्यायेनागमप्रमेयेऽसंभावनानकार्येत्याह ततइति ततोऽचिंत्यत्वाद्दानादिस्वरूपंप्रमाणतःशब्दाख्यात्यादृशंसिद्ध्यतितादृशमेवांगीकार्यंहितकामेनेत्यर्थः ॥ ३१३ ॥

वासरेयद्दिदीपोयंतमःस्तोमंननाशयेत् ॥ रात्रावपितथैवायमस्तुकिंगृहमध्यतः ॥ ३११ ॥ अदत्तेमूर्छितोयंस्याद्दत्तेसत्यत्रजीवितः ॥ विप्रेभ्योमरणेनैषाभविष्यतिकुतोमतिः ॥ ३१२ ॥ ततःप्रमाणतोयत्स्याद्यादृशंतद्धितादृशं ॥ अंगीकार्यंसदैवात्रस्वात्मनःक्षेममिच्छता ॥ ३१३ ॥ कृतनाशादिदोषेणस्वात्मनोसत्त्ववर्जनं ॥ यद्यप्यनेकवचसानघटेतकदाचन ॥ ३१४ ॥ ततआत्मास्वयंज्योतिर्विक्रियालेशवर्जितः ॥ जीवतांप्राप्यकर्त्तासभोक्ताचभवतिप्रभुः ॥ ३१५ ॥ वेदवाक्यस्यविज्ञेयःश्रवणेनसदात्हदि ॥ अगण्यपुण्यपाकेनकेनचिद्धिमहात्मना ॥ ३१६ ॥

एवमात्मस्वरूपमप्यागमेनैवावधार्यमितिदर्शयन्नूसप्तममवतारयति कृतेतित्रिभिः यद्यपिकृतनाशाद्यापादनरूपतर्केणात्मनोऽसत्तायावारणंनघटेतनोपपद्येत तत्रहेतुरनेकवचसेति बहुशाखाह्यनंताश्चबुद्धयोऽव्यवसायिनामितिभगवद्गीतोक्तविधयाअनेकेननानामतजन्येनवचसावादिवाक्यसमूहेनेत्यर्थः यतोदेहःकरोतिकर्माणीत्यादिनाकृतनाशादिदूषणमतिरिक्तात्मसत्त्वाभावसाधकतयैवोपन्यस्तमतस्तर्केनविश्वासइतिभावः ॥ ३१४ ॥ तथाप्युपक्रमादिलिंगैस्तात्पर्यावधारणरूपश्रवणसंस्कृतवेदवाक्येनतदवधारणंभवतीत्याह ततइति ततस्तर्कायोग्यत्वादात्मावेदवाक्यस्यश्रवणेनैवकरणेनकेनचिन्महात्मनाऽधिकारिणाविज्ञेयोभवति कीदृशआत्मा स्वप्रकाशोवस्तुतोनिर्विकारोप्यविद्ययाजीवत्वकर्तृत्वभोक्तृत्वानिप्राप्तोपिसुविद्ययासर्वात्मभावरूपप्रभुत्वयोग्यइतिद्वयोरर्थः ॥ ३१५ ॥ ३१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तच्छ्रवणादिदौर्लभ्यप्रतिपादकस्यसप्तमस्यार्थमाह श्रवणायापीत्यष्टभिः पाशैरविद्यादिक्लेशैर्दुष्कृताभिव्यक्तैर्मोहितैःकैश्चित्तच्छ्रवणमपि दुर्लभमित्यर्थः ॥ ३१७ ॥ सुप्ताविति केचित्तुसुप्त्यादिकालेयःसर्वैर्जंतुभिःसद्रूपोगम्यतेसाक्षिरूपेणहृदिसंनिहितःसइत्येवंवेदांतैःप्रतिपादितंश्रुत्वापिक्लेशप्रतिबद्धाननिश्चिन्वंति यथालोकेवालिशाःप्रमत्ताआप्तैरुपदिष्टस्यापिकार्यस्यगौरवंतत्परतयानुष्ठेयत्वरूपंनजानंतीतिव्यतिरेकेवादृष्टांतः यथालौकिककार्यगौरवंजानंतितथातन्निर्णयगौरवंनजानंतीत्यर्थः ॥ ३१८ ॥ तथास्यात्मनोयथावत्तात्पर्यवृत्त्याप्रतिपादयितापिदुर्लभइत्याह अस्यात्मनइति यतोवागाद्यगोचरमपिप्रतिपादयत्यतआश्चर्योविस्मयाधायकोदुर्लभइतियावत् ॥ ३१९ ॥

श्रवणायापिबहुभिर्बहुपाशविमोहितैः॥ नलभ्यतेपुमानेषकथंसाक्षाद्धिलभ्यते॥ ३१७॥ सुप्तौम्लतौनराःकेचिज्जानंत्येतंहृदिस्थितं॥ नैवयद्वद्धिपुरुषावालिशाःकार्यंगौरवं॥ ३१८॥ अस्यात्मनोत्रवक्तास्यादाश्चर्यःपुरुषोत्तमः॥ अवाङ्मनसगम्यंयद्ब्रूतेतंवचसास्वयं॥ ३१९॥ लब्धास्यकुशलोज्ञेयोयःसाक्षात्कुरुतेपरं॥ अशेषगुणशून्यंकोलभेतकुशलंविना॥ ३२०॥ कुशलेनात्मविज्ञानसंपन्नेनमहात्मना॥ वेदवाक्येनशिष्टःसन्नतुशिष्टश्चयुक्तिभिः॥ विजानातिपुमान्नान्यआश्चर्यइतिकीर्तितः॥ ३२१॥ वक्तृताज्ञातृताचास्ययस्मादाश्चर्यवद्भवेत्॥ वक्ताज्ञाताचतेनोभावाश्चर्यइतिकीर्त्तितौ॥ ३२२॥ अतिसूक्ष्मेणबोधेनयस्मादात्मात्रलभ्यते॥ कुशलस्तेनलब्धास्यादात्मनोब्रह्मरूपिणः॥ ३२३॥

तादृशगुरूपदेशादात्मनःसाक्षात्कर्त्तापितद्वद्दुर्लभइत्याह लब्धेतिद्वाभ्यां लब्धाज्ञाता ॥ ३२० ॥ कुशलेनेति युक्तिभिःशुष्कतर्कैर्योनुशिष्टोनभवतिकिंतुवेदवाक्यैनैवानुशिष्टस्तादृशःकश्चिदेवजानात्यतोलब्धाऽऽश्चर्यइत्युक्तइत्यर्थः ॥ ३२१ ॥ वक्तृतेति यस्मादस्यात्मस्वरूपस्यवक्तृत्वंप्रतिपादनंज्ञातृत्वंज्ञानंचएतद्द्वयमाश्चर्यंततस्तद्वंतौपुरुषावप्याश्चर्यत्वेनोक्तावित्यर्थः ॥ ३२२ ॥ अतिसूक्ष्मेणेति अतिसूक्ष्मःसंसर्गानवगाहीनिर्विकल्पकइतियावत् तादृशेनबोधेनचरमवृत्तिरूपेणयतआत्मनोलाभआवरणभंगोभवतिसचबोधःसूक्ष्मविवेकलभ्योऽतस्तादृशबोधवान्कुशलइत्युक्तइत्यर्थः ॥ ३२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशेनकुशलेनगुरुणाऽनुशिष्टएवाधिकारीजानात्यात्मतत्त्वंनपरोक्षविदाशिक्षितइत्याह आनंदात्मेति तेनकुशलेनउपदिष्टेउपदेशेकृतेसति ॥ ३२४ ॥ अष्टमार्थमाह स्वात्मेतिसप्तभिः स्वात्मसाक्षात्काररहीनतालक्षणाऽपकृष्टताशालिनाचिरमुक्तेउपदेशेकृतेसतित्वयमात्मान ज्ञातुंशक्यः तथाअपरेणकुशलानुशिष्टव्यतिरिक्तेननरेणबहुधातर्कैश्चिंत्यमानोपिचनज्ञातुंशक्यइतिसंबंधः ॥ ३२५॥ एतद्दृष्टांतेनस्फुटयति महारण्यइतिद्वाभ्यां यथामार्गानभिज्ञःस्वसदृशेनमार्गानभिज्ञेनकथितमुपदिष्टंमार्गंभजंस्तेनमार्गेणनश्यतिविषीदति ॥ ३२६ ॥

आनंदात्मस्वरूपस्यलब्धायःकुशलःपुमान्॥ तेनोपदिष्टआत्मायंज्ञायतेनान्यथाक्वचित् ॥ ३२४ ॥ स्वात्मज्ञानविहीनेनत्वपरेणनरेणतु॥ उक्तेनैवचिरंज्ञातुंशक्यआत्माकथंचन ॥ बहुधाचिंत्यमानोपितर्कैर्नानाविधैरपि॥ ३२५॥ महारण्येयथाकश्चिदज्ञात्वासम्यगेवहि॥ मार्गंस्वसदृशेनैवकथितंतेननश्यति ॥३२६॥ एवंभवाटवीस्थातापुमानकुशलेनचेत् ॥ उपदिष्टोनवैत्येतन्मार्गमन्यंसमेतिच ॥ ३२७ ॥ अतोत्रकुशलःपूर्वमन्वेष्यःस्वात्मनोहियः॥ वक्ताभवतितेनायंजानात्येवपुमान्सदा॥ ३२८ ॥ वक्तायःकुशलःसस्यादनन्यःसर्वतोपिच॥ब्रह्मसर्वमिदंयस्मादहमस्मीतिवेत्त्ययं ॥ ३२९ ॥ अनन्योक्तेनिजेतत्त्वेस्वस्मादन्यागतिर्नहि ॥ तस्मात्कुशलवक्तोपिभवेत्सर्वमिदंजगत्॥ ३३० ॥

एवमिति तथासंसारारण्यगतोऽकुशलेनशिक्षितश्चेत्स्यात्तदाएतदात्मज्ञानंमोक्षमार्गभूतंनैतिकिंत्वन्यंविपर्ययरूपंसंसारमार्गमेवसम्यगेतीति ॥३२७॥ तस्मान्मुमुक्षुणाकुशलोगुरुरन्वेष्यइत्याह अतइति तेनगुरुणानुशिष्टइतिशेषः॥३२८॥ श्रुतौगुरोर्विशेषणमनन्यत्वमुक्तंतदर्थमाह वक्तेति यःकुशलोवक्तासर्वस्मादनन्योऽभिन्नोभवतियस्मात्सर्वात्मकंब्रह्माहमस्मीतिवेत्तीति ब्रह्मवेदब्रह्मैवभवतीतिश्रुतेः ॥३२९॥ अनन्योक्तइति तादृशेनानन्येनगुरुणाउपदिष्टेसतितत्त्वेतद्विज्ञानस्यगतिःफलंस्वस्मादुपदेष्टुःस्वरूपादद्वितीयब्रह्मलक्षणादन्यानभवतितस्मात्तादृशगुरूपदिष्टःसर्वात्मकोभवेत्परंतुसकोपिविरलः मनुष्याणांसहस्रेष्वित्यादिस्मृतेरित्यर्थः ॥ ३३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमात्माकेवलतर्केणतुज्ञातुमशक्योऽतिसूक्ष्मत्वादित्याह सूक्ष्मादिति सूक्ष्मोदुर्लक्ष्यः ॥ ३३१ ॥ नवमार्थमाह आत्मन्यत्रेतिविंशत्या येयंकुशलाचार्योपदेशजाआत्माकारामतिर्जातातांकुतर्कालंबनान्नापनयेन्नदूरीकुर्यादित्यर्थः ॥३३२॥ प्रत्युतकुतर्कमेवश्रुत्यनुकूलतर्कै र्बाधित्वाब्रह्मात्मनिष्ठांद्रढयेदित्याह नास्तिकेनेति नास्तिकेनश्रुत्यर्थानंगीकर्त्रायस्तर्कउक्तस्तमात्मनिर्णयार्थंश्रुत्यायेतर्काउक्तास्तैश्छि त्वाऽपहत्यब्रह्मणातत्पदार्थेनसात्मतांसमानरूपतांत्वंपदार्थस्यस्थापयेद्दृढीकुर्यादित्यर्थः तेनकुतर्केणतूत्पन्नाप्येषाविद्यायातिप्रतिबंधकु

सूक्ष्मादपियतःसूक्ष्मएषआत्माशरीरिणां॥अतएवनतर्केणशक्योज्ञातुंकथंचन॥ ३३१ ॥ आत्मन्यत्रभवेद्यैषामतिःकुशलशासनात्॥नैनामपनयेत्तर्कादात्मनोनरकप्रदात्॥ ३३२ ॥ नास्तिकेनहियस्तर्कःकथितःस्वात्मसिद्धये॥श्रुत्युक्ततर्कैस्तंछित्वास्थापयेद्ब्रह्मसात्मतां॥तेनोत्पन्नापियात्येषापुराकुशलतर्कतः॥ ३३३॥ अन्योहिबहुधातर्कःप्रतिपक्षोस्त्यनेकधा॥मतेरस्यामहाभागपापिभिःपरिकल्पितः॥ ३३४ ॥ आत्मायंसर्वभूतानांस्यादेकोनेकएववा॥एकत्वेत्वमहंचान्यइतिभेदःकथंभवेत्॥ ३३५॥ देहभेदादयंभेदःस्यात्तस्येत्यभिधीयते॥ एकस्ययुगपद्देहभेदःकेनभविष्यति॥ ३३६॥ योगिनामिवनैवास्यसिद्धिःकापिसमागता॥ संसारेयेनचैकोपिबहुधायुगपद्व्रजेत्॥ ३३७॥

तंवैफल्यमितिशेषः यदिकुशलःश्रुत्यनुसारीतर्कोनावतरेदित्यर्थः॥ ३३३ ॥ सचात्मविद्याप्रतिपक्षभूतस्तर्कोवादिभिर्बहुधाकल्पितइत्याह अन्योहीति अन्यःश्रुत्यननुसारी मतेरात्मविद्यायाःप्रतिपक्षउत्पत्तौफलेचप्रतिबंधकः अत्रेदंबोध्यं फलेप्रतिबंधोविद्यायाःपरोक्षदशायामेवेति॥ ३३४॥ तंकुतर्कमभिनयति आत्मायमितिनवभिः अयमात्मासर्वदेहेष्वेकोऽनेकोवा आद्येत्वमहमित्याद्याकारकोभेदोपलंभःकथं अंत्येत्वऽद्वैतहानिरिति॥ ३३५ ॥ देहेति यदितुनानादेहोपाधिकोभेदउच्यतेतदापीदंपृच्छ्यतेएकस्यात्मनोनानादेहप्रसंगएव कथमितिनह्यनेनतदुपपादिकाकाचिद्योगसिद्धिर्लब्धेतिद्वयोरर्थः॥ ३३६ ॥ ३३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदितुयोगिवदयंसर्वदेहेष्वेकत्वेनावस्थितःस्यात्तदासर्वदेहेषुममत्वंकुर्यादित्याह अपिचेदिति ॥३३८॥ किंच विनोपायमिति सर्वदेहेषुय
द्ययमेकःस्यात्तदास्वदेहगतंसुखादिकमिवसर्वदेहगतंसुखादिकंकुतोनजानीयात् ननुनानायोनिभ्रमणेनसर्वदेहव्यत्तंजानात्येवेतिशंकावा
रणायविनोपायमित्युक्तं उपायोयोनिभ्रमणादिः ॥३३९॥ किंचायमात्माजडश्चेतनोवा आद्येसकिमर्थंस्वीकार्यः जडस्यकर्तृत्वभोक्तृत्व
योरनुपयोगादित्याह अप्ययमिति॥३४०॥किंचजडत्वेतदर्थंशरीरारंभोनस्यात् नहिजडस्यघटस्यभोगायजडत्वेनतत्समंपदार्थांतरंदृष्टमि
त्याह नजडार्थमिति ॥३४१॥ पुमर्थइति किंचदेहादिरूपःपदार्थःपुमर्थःपुरुषोपकारीभवन्ज्ञानरूपसंबंधाद्भवतिकिंवातेनज्ञानरूपसंबंधेन

अपिचेदेकएवायंसर्वदेहव्यवस्थितः ॥ सर्वत्रैवकुतोनास्यमद्देहइतिधीर्भवेत् ॥ ३३८ ॥ विनोपायमयंया
तिकस्मादत्रसुखादिन ॥ सर्वदेहगतंसाक्षात्स्वदेहगतवत्पुमान् ॥ ३३९ ॥ अप्ययंपुरुषोज्ञानीजडोवापिघ
टादिवत् ॥ जडत्वेपुरुषेणस्यादमुनाकिंप्रयोजनं ॥ ३४० ॥ नजडार्थंजडंदृष्टंघटार्थंचसमंयथा ॥ पुमर्थंतत
एवायंदेहोपिनभविष्यति ॥ ३४१ ॥ पुमर्थोज्ञानसंबंधाद्विनातेनाथवाभवेत् ॥ यदाज्ञानेनसंबंधस्तदाज्ञा
नंचकिंहितत् ॥ ३४२ ॥ अनित्यंवापिनित्यंवापक्षयोरुभयोरपि ॥ प्रकाश्यतेत्रकिंज्ञानंस्वेनवाथपरेणवा
॥३४३॥इत्यादीन्श्रुतिमार्गेणविरुद्धान्क्रकचोपमान्॥तर्कान्बहुविधान्मूढाःकल्पयंतिस्वबुद्धितः॥३४४॥
एतैस्तर्कैरनुत्पन्नाश्रुत्याविश्वाससंशयात्॥ विनश्यतिमतिर्नूनमथवापिविपर्ययात् ॥ ३४५ ॥

विनैवभवति नांत्यः असंवद्धस्यज्ञानातिरिक्तसंबंधशालिनश्चपुमर्थतायाअदर्शनात् आद्येज्ञानस्यस्वरूपंनित्यंकिंवाऽनित्यं नित्यत्वेसर्वदा
भोगाविशेषापत्तिः अंत्येपितज्ज्ञानंकेनप्रकाश्यंकिंस्वेनकिंवापरेण आद्येकर्मकर्तृत्वविरोधः अंत्येत्वनवस्थेतिद्वयोरर्थः ॥३४२॥३४३॥
इत्यादीनिति क्रकचःकाष्ठदारणसाधनंतत्तुल्यान् ॥ ३४४ ॥ कथमेतेतर्काअनिष्टेपर्यवस्यंतीत्याकांक्षायामाह एतैरिति अस्याःपूर्वमे
षांतर्काणांप्रसक्तौएषामतिरनुत्पन्नैवभवति उत्पत्त्यनंतरंतर्कप्रसक्तौतुविनश्यतितिरोहिताभवति कुतःश्रुत्यविश्वासेनप्रयुक्तोयःसंशयोवि ॥२२॥
पर्ययोवातस्मादित्यर्थः ॥ ३४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्सिंहाद्गौरिवकुतर्कादेषारक्ष्येत्याह ततइति ॥ ३४६ ॥ प्रोक्तेत्यादिद्वितीयपादस्यार्थमाह नास्तिकेभ्यइति यद्यप्येषाआत्मव्यवस्थितिरात्मस्वरूपाकारामतिर्नास्तिकेभ्यःपरेभ्यआस्तिकेभ्यश्चगुरुभ्योहेतुभ्यःप्रोक्तातैरुपदिष्टासतीजायते यतएषासर्वेषांदेहिनांप्रेष्याकिंकरवदधीनाभवति सर्वेहिदेहिनोयादृशंतादृशमात्मस्वरूपंजानंतिवदंतिचेतितथापिआत्मविज्ञानसंपन्नःश्रुत्यनुगृहीततर्ककुशलश्चगुरुर्यद्येतांवदेत्तदासुखेनभूमानंदाख्येनफलतिएषाप्रजायते क्वसति आत्मनिविशेषेणसमस्ताध्यासापोहरूपेणज्ञातेसतीतिद्वयोरर्थः ॥ ३४७ ॥

ततएषामतिःसाध्वीधेनुवत्तर्कसिंहतः॥ सदारक्ष्यामहाभागस्वात्मनःक्षेममिच्छता ॥ ३४६ ॥ नास्तिकेभ्यःपरेभ्यश्चसर्वदात्मव्यवस्थितिः॥ प्रोक्तैषाजायतेप्रेष्यासर्वेषामिहदेहिनां ॥ ३४७ ॥ आत्मविज्ञानसंपन्नःकुशलश्चेद्वदेदिह ॥ तदासुखेनविज्ञातआत्मन्येषाप्रजायते ॥ ३४८ ॥ प्राप्तवान्यांभवानत्रस्वयमेवातिभाग्यवान् ॥ आश्चर्यंत्वंहियद्धैर्यंप्राप्तोस्यवितथंयतः॥ मयाप्रलोभ्यमानोपिगतोनविषयंप्रति ॥ ३४९ ॥ त्वादृङ्नचिकेतःस्यात्प्रष्टाजन्मनिजन्मनि॥ शिष्यायतोजगत्यस्मिन्सुलभानभवादृशाः ॥ ३५० ॥ नानाविषयसंप्राप्तौसत्यांहिगुरुणापिच ॥ लोभ्यमानोपिधैर्यान्नच्युतःसपुरुषोत्तमः ॥ ३५१ ॥ इदंधैर्यंहिकस्यापिनासीन्नास्तिनभाव्यपि॥ त्वयियद्वर्त्ततेतातशिष्येममकुमारके ॥ ममापिनेदृशंधैर्यंवर्त्ततेयादृशंतव ॥ ३५२ ॥

॥ ३४८ ॥ प्राप्तवानिति किंविधासासफलात्मव्यवस्थितिरितिचेत्शृणु यांयादृशीमात्मनिष्ठामतिभाग्यवशाद्भवान्प्राप्तोभवतितत्प्राप्तिलक्षणमाह आश्चर्यमित्यादिना हियतस्त्वमाश्चर्यंविस्मयावहंधैर्यंप्राप्तोयतोमयाप्रलोभितोपिविषयाभिमुखंनगतइति ॥ ३४९ ॥ त्वादृशाःप्रष्टारःशिष्याःसुदुर्लभाःपुरुषोत्तमत्वादित्याह त्वादृगितिद्वाभ्यां निगदव्याख्यातंद्वयम् ॥ ३५० ॥ ३५१ ॥ मत्तोपितवधैर्यमधिकमितिद्योतनपरस्यदशमस्यार्थमाह इदमितिसप्तभिः स्पष्टं ॥ ३५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुतयायमःस्वस्यैश्वर्यादिसक्तिमाह यतइति यतोहंत्वद्गुहायांनिहितंब्रह्मानंदरूपंनिधिंजानामितथास्वकीयंदेवत्वंसाधिकारंसदेहंच अनित्यंजानामितथापित्वद्वदत्रदेवत्वादौहेयत्वबुद्धिर्ममनास्तिनवापूर्वमासीत्हेतातयथातवसावर्ततइतिद्वयोरर्थः ॥३५३॥३५४॥ पूर्वंना सीदित्यत्रहेतुतयाऐश्वर्यकामनयाग्निचयनादिकर्मानुष्ठानंदर्शयति अध्रुवैरित्यादिना यतोमयाएवमविज्ञायअनित्यैर्द्रव्यैःपश्विष्टकादिभि र्नाचिकेताख्योग्निश्चितः एवंकथं अध्रुवैरनित्यैर्यज्ञादिकर्मभिःपरमार्थनित्यंमोक्षरूपमयमधिकारीनप्राप्नोतीतियद्यहमेतदवेदिषंतदाकर्म

यतोजानाम्यहंनित्यमानंदात्मनिधिंत्वदि॥ निहितंस्वामरत्वंचसाधिपत्यंसदेहकम्॥ ३५३ ॥ अनित्यंचतथा प्यत्रत्वद्वद्बुद्धिर्नमेस्तिहि॥ नासीत्पूर्वंचतातैवंमतिस्तेवर्त्ततेयथा ॥ ३५४ ॥ अध्रुवैर्नहियज्ञाद्यैर्ध्रुवंमोक्षंप्रया त्ययम्॥ यतएवमविज्ञायनाचिकेतश्चितोमया॥ ३५५॥ अग्निर्द्रव्यैरनित्यैस्तदमरत्वंसमाप्तवान्॥ आभू तसंप्लवस्थानंनित्यंनैवाविनाशियत्॥ ३५६॥ एतदर्थंपुरायज्ञान्कृतवान्भूरिदक्षिणान्॥ अहंहिमहतःक्लेशा दिमांभूमिंसमाप्तवान्॥ ३५७॥ काम्यमानस्यसर्वस्यस्वप्रियस्येहवस्तुनः॥ यत्रप्राप्तिरनायासात्सुदप्तिर्भो जनादिव॥ अनायासात्त्वयालब्धंतत्सर्वंत्यक्तवान्भवान्॥ ३५८॥

नाकरिष्यमितिभावः तत्तस्मादग्निचयनाख्यकर्मणोहेतोरहमापेक्षिकनित्यताशालिअमरत्वादिकंप्राप्तवानस्मिनतुमुख्यंनित्यमितिद्वयोर र्थः॥ ३५५॥ ३५६॥ नकेवलमग्निचयनमेवैतदैश्वर्यार्थंकृतवानस्मिकिंत्वग्निष्टोमादियज्ञानपीत्याह एतदर्थमिति इमांभूमिंधर्मराजाधि काररूपां ॥ ३५७॥ कीदृशीयंयत्रसर्वस्यसांसारिकभोग्यजातस्यानायासेनपृथग्यत्नानपेक्षाप्राप्तिर्भवतियथाभोजनेकृतेतृप्तिरनायासे नभवतीत्याह काम्यमानस्येति त्वंत्वेतत्सर्वमैश्वर्यमुपस्थितमपित्यक्तवानसीत्यहोतेधैर्यमित्याह अनायासादिति ॥ ३५८ ॥ ॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तार्थपरत्वेनैकादशमपियोजयति आप्तकाममितित्रिभिः आप्तकामत्वादिविशेषणकंदेवंयथातथाययथावद्दृष्ट्वाप्यहंतथाविषयान्नत्य क्तवानस्मियथाभवानात्मदर्शनायत्यक्तवानितितृतीयेनसंबंधः आप्ताअंतर्भूताःकामालौकिकानंदायत्रसतथातंजगदाधारंपूर्णंस्तुत्यंस वैर्वेदैरुरुत्वेनपूर्णत्वेनअनेकधास्तुत्याद्युपन्यासैर्गेयमित्यर्थः ॥ ३५९ ॥ संकल्पस्येति संकल्पस्यक्रतुपदोक्तस्यप्रतिष्ठामाश्रयंप्रवर्त्तकमंत र्यामिणमितियावत् कीदृशस्यसंकल्पस्य नानाविषयैर्भेदवतः पुनःकीदृशं देशादिप्रयुक्तभेदराहित्यादनंतमित्यर्थः॥३६०॥ अभयस्येति भयराहित्यस्यपरंपारंकाष्ठाभूतंदृष्ट्वेत्यादिव्याख्यातमिति ॥ ३६१ ॥ यत्त्वमात्मानंपृच्छसितल्लाभसाधनमप्येतदेवयस्त्यक्तप्रवणत्वंचित्त

आप्तकामंजगत्स्थानंमहांतंस्तुतिसंश्रयं॥ वेदैःसर्वैश्चसततमुरुगेयमनेकधा॥ ३५९ ॥ संकल्पस्यप्रतिष्ठा नंनानाविषयभेदिनः ॥ अनंतंदेशकालादिसर्वभेदविवर्जितं॥ ३६० ॥ अभयस्यपरंपारंयतोनास्त्यभयंप रं ॥ दृष्ट्वायथातथादेवंत्यक्तवान्विषयानिमान्॥ नाहंत्वंतुयथात्याक्षीरात्मनोदर्शनायहि॥३६१॥ यस्यतेद र्शनात्प्रीतिरानंदात्मस्वरूपिणः॥ तंबुद्धिसाक्षिणंदेवंदुर्दर्शमकृतात्मभिः ॥ ३६२ ॥ वन्हिर्यथात्रकाष्ठेषुतद्वद्गूढ मवस्थितं॥ सर्वभूतानिसृष्ट्वातुप्रविष्टंतेषुसर्वतः ॥ नभोवन्निहितंसर्वबुद्धौत्हृदयगह्वरे॥ ३६३॥ पुराणंपुरु षंशश्वन्नवीनमपिसर्वदा॥ अहमस्मीतियोगस्यसंप्राप्त्याप्राप्यमीश्वरम् ॥ ३६४॥

स्यफलंतुहर्षशोकादित्यागइतिप्रदर्शयतोद्वादशस्यार्थमाह यस्यतेइतिचतुर्भिः यस्यानंदरूपस्यदेवस्यदर्शनादेवतवप्रीतिर्नतुविषयदर्शनात् तंबुद्धिसाक्षिणंदेवंमत्वाहर्षशोकौभवद्वज्जहातीतिचतुर्थेनाभिसंबंधः कीदृशंतं असंयतात्मभिर्दुर्दर्शं काष्ठेषुवन्हिवद्गूढतयाऽव्यक्ततयास्थितं सर्वकार्यजातंसृष्ट्वातत्रघटमठादौनभोवत्प्रविष्टंबुद्धिगुहायांहृदयरूपेगह्वरेबहिर्मुखैर्दुष्प्रवेशेदेशेवर्त्तमानायांनिहितंस्थितं प्रासादेशेतेपर्यं केशेतेइतिन्यायेनश्रुत्यविरोधइतिद्वयोरर्थः ॥ ३६२ ॥ ३६३ ॥ पुराणमिति पुनःकीदृशं पुराणं तदेवविवृणोति सदानवीनमिति पुनः कीदृशं सत्यंब्रह्माहमस्मीत्याकारकस्ययोगस्यनिदिध्यासनस्यसंप्राप्त्यालाभेनप्राप्यंगम्यं ॥ ३६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वप्रकाशमिति एवंशास्त्रोक्तविधिना स्फुटमन्यत् ॥३६५॥ त्रयोदश्याअर्थउच्यते एतत्सर्वात्मकमितिपंचभिः यःपुमानेतत्सर्वात्मकंपूर्ण मात्मनस्तत्पदार्थस्यरूपंगुरुमुखात्श्रुत्वातद्वत्तादृशमेवरूपंसम्यगात्मतयात्वंपदार्थतयागृहीत्वाअत्रअनयोस्तत्त्वंपदार्थयोर्विरुद्धायेईश्वर त्वानीश्वरत्वादयोधर्मास्तानखिलांस्त्यक्त्वाश्रुतौप्रदृष्टेत्युक्तंविवेचनंनीत्वाचधर्मिमात्रंसूक्ष्मंचैतन्यंब्रह्मात्मतोपयोगितयाप्राप्तोभवतिससदा मोदते किंकृत्वा मोदनीयंकोपनीयं रंजनीयादिवत्कर्त्तरिअनीयर् एषह्येवानंदयातीतिश्रुतेःसर्वानंदप्रदमिममात्मानंभूमानंदरूपंलब्ध्वेति

स्वप्रकाशंसदैवंतंमत्वाधीरोतिबुद्धिमान्॥ हर्षशोकौसुदुस्त्यागौविजहातियथाभवान्॥ धीरोधृत्यामयादत्तं त्यक्तवान्क्षणतोखिलं॥ ३६५॥ एतत्सर्वात्मकंरूपंश्रुत्वागुरुमुखात्पुमान्॥ सम्यगात्मतयातद्वत्स्वीकृत्यचस मग्रतः ॥ ३६६ ॥ अत्रधर्माविरुद्धायेसंतितत्त्वंपदार्थयोः ॥ त्यक्तातानऽखिलान्धर्मिमात्रचैतन्यरूपकं ॥ ३६७॥ सूक्ष्ममात्मतयाप्राप्तोयःसदासोत्रमोदते ॥ मोदनीयमिमंलब्ध्वास्वानंदात्मस्वरूपकं॥ ३६८ ॥ आनंदसद्मत्हृदयंप्राप्यतेयद्गुरोर्मुखात् ॥ विवृतद्वारकंतत्त्वांप्रत्यास्तेनचिकेतसं॥ ३६९॥ आनंदसद्मनिभ वान्प्रविष्टइतिमेमतिः ॥ एतत्प्रवेशसंरोधकारणंविषयार्गलाः ॥ भग्नायतस्ततःकेनतवरोधोभविष्यति॥ ॥ ३७० ॥ एवमुक्तेयमेनायंनचिकेतामहायशाः॥ मरणेस्वात्मनःसत्तामर्थतोधिजगामसः॥ ३७१॥

त्रयाणामर्थः ॥ ३६६ ॥ ३६७॥ ३६८॥ आनंदेति हेनचिकेतःयद्ब्रह्मानंदरूपंसद्मगृहंत्हृदयंत्हृद्गुहायांस्थितमुपदेशाल्लभ्यतेतत्त्वांमु ख्याधिकारिणंनचिकेतसंप्रतिविवृतद्वारकंविमुक्तप्रवेशमार्गकंवर्ततइत्यर्थः ॥ ३६९॥ एतदेवस्फुटयति आनंदसद्मनीति भवानत्रानंदरू पेसद्मनिप्रविष्टइतिजानेयतएतस्ययःप्रवेशःप्रवेशमार्गभूताप्रत्यक्प्रवणताचित्तस्यतस्याःसंरोधेप्रतिबंधेविषयाकारावृत्तयोऽर्गलात्वेनस्थि तास्तद्भंगस्त्वयाविवेकबलेनकृतोऽतस्तवप्रवेशप्रतिबंधःकेनकर्त्तुंशक्यइत्यर्थः ॥ ३७० ॥ एवंविधैर्धर्मराजवचनैरर्थादात्मनोऽस्तित्वपक्षः स्थापितइत्याह एवमुक्तेइतित्रिभिः अर्थतःश्रुतार्थापत्त्या ॥ ३७१ ॥ ॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामर्थापत्तिमभिनयति श्रेयइति यमःश्रेयःप्रेयोरूपंफलद्वयमधिकारादिभिर्भिन्नंयत्प्राहयच्चमरणकालेआत्मनोजीवस्यस्ववशतांस्वस्य यमस्यमृत्युरूपस्याधीनतांप्राहयदपिपापिनांनृणांतंनरकंप्रतिगतानांस्ववशतांपुनःपुनर्वशमापद्यतेमेइतिवाक्येनप्राहतत्सर्वंदेहाद्भिन्नस्यात्मनःसत्वेएवसंभवेत्यदात्वेषाप्राकृतजनानुभवसिद्धादेहस्यैवात्मतास्यात्तदाएतदुक्तंसर्वंनोपपद्यते नहिदेहआमुष्मिकफलभागीतिद्वयोरर्थः ॥ ३७२ ॥ ३७३ ॥ चतुर्दशार्थंदर्शयति इत्थमितित्रिभिः मतिमान्नचिकेताइत्थंविचारेणात्मनःसत्तांस्वयंस्वीकृत्यनिश्चित्या

श्रेयःप्रेयइतिप्राहभिन्नंस्ववशतांतथा॥ आत्मनोमरणेनृणांपापिनामपितंप्रति ॥ ३७२॥ तत्सर्वंस्वात्मनःसत्वेदेहाद्भिन्नस्यसंभवेत् ॥ देहात्मतायदानैषातदैवमुपपद्यते ॥ ३७३ ॥ इत्थंविचार्यमतिमान्स्वयंस्वीकृत्यचात्मनः॥ पप्रच्छातिविशेषंतंस्वात्मनोत्रयमंप्रति ॥ ३७४॥ धर्मराजमहाप्राज्ञगुरोसर्वज्ञलोकय॥ धर्माधर्मविनिर्मुक्तंकार्यकारणवर्जितम्॥ ३७५ ॥ कालत्रयेणनिर्मुक्तंसुखदुःखविवर्जितं॥ यत्त्वंपश्यसितद्वस्तुमह्यंशिष्यायकीर्त्तय॥ ३७६ ॥ एवमुक्तेयमोराजानचिकेतसमब्रवीत् ॥ सर्वधर्मविनिर्मुक्तमानंदात्मानमद्वयम् ॥ ३७७॥ प्रणवेनात्मरूपेणस्वाभिधानेनसर्वदा॥ अभिन्नमभिधेयंतंबुद्धिसौकर्यहेतवे॥ ३७८॥

त्मनोयोऽतिशयितोविशेषःशुद्धत्वनित्यमुक्तत्वादिकस्तंधर्मराजंप्रतिपृष्टवानिति ॥ ३७४ ॥ प्रश्नमभिनयति धर्मेतिद्वाभ्यां हेलोकपलोकपाल यद्वस्तुधर्माधर्माभ्यांसकारकाभ्यांसफलाभ्यांचभिन्नंकार्यकारणाभ्यांचकृतादिपदोक्ताभ्यांभिन्नंकालत्रयावच्छिन्नभिन्नंचअतएवसुखादिवर्जितंत्वंजानासितन्मह्ममुपदिशेत्यर्थः श्रुतावन्यत्रेत्यस्यान्यदित्यर्थकत्वात् ॥ ३७५ ॥ ३७६ ॥ पंचदश्यादित्रयस्यतात्पर्यार्थमाह एवमितिद्वाभ्यां एवंपृष्टोयमःशुद्धमात्मानंबोधयन्प्रथमंबुद्धेस्तत्रप्रवेशसौकर्यायप्रणवेनब्रह्मणोभिधानेननाम्नाऽऽभिन्नतयातमात्मानंप्रणवाभिधेयमब्रवीदितिद्वयोःसंबंधः ॥ ३७७ ॥ ३७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रपंचदश्याअर्थमाह पदनीयमितिनवभिः यत्परंब्रह्मपदनीयंपदांकैर्गवादिवच्चिदाभासलिंगैर्बुधैर्गम्यंयच्चवेदाउपनिषद्रूपावदंतिकृच्छ्रा
दीनितपांसिचयद्वदंतितत्प्रणवरूपंजानीहीतिनवमेनाभिसंबंधः ॥ ३७९ ॥ ननुवेदास्तद्वदंतीतियुक्तंतपांसितद्वदंतीतिकथमुपपद्येते
त्याशंकांसमाधत्ते तपोभिरिति यस्मादेषोधिकारीतपोभिःशुद्धएवहृदयेपरंब्रह्मावगच्छतिततस्तपांसितंवदंतीत्युक्तमितिसंबंधः अयंभावः
 वेदैस्तत्प्रतिपादनंनामतदावरणभंजकवृत्त्युत्पादनंतादृशवृत्त्यनुकूलत्वंतपसामपिचित्तमलापहरणद्वारेतितेपिवदंतीवेति ॥ ३८० ॥ ब्र
ह्मचर्यस्वरूपंदर्शयितुंतत्प्रतियोग्यष्टविधंमैथुनंनिरूपयति नारीणामितिपंचभिः नारीणांस्मरणंप्रथमं तासांकीर्त्तनंताभिःसहवाकीर्तनं

पदनीयंपरंब्रह्मसर्वेवेदावदंतियत् ॥ तपांस्यपिचसर्वाणिकृच्छ्रादीनिसहस्रशः ॥ ३७९ ॥ तपोभिःशुद्धहृदये
यस्मादेषपरंव्रजेत् ॥ वेदवत्ततएवैतत्तपांस्यपिवदंतिच ॥ ३८० ॥ नारीणांस्मरणंतासांकीर्त्तनंताभिरेववा ॥
आभिस्तथैवकाचिच्चक्रीडाद्यूतादिरूपिणी ॥ ३८१ ॥ प्रेक्षणंचतथैवासांकामासक्तेनचक्षुषा ॥ गुह्यानांभा
षणंतद्वद्ग्राम्यधर्मोपकारिणां ॥ ३८२ ॥ इयंमेभवतात्सुभ्रूर्ग्राम्यधर्मोपकारिणी ॥ इतियच्चिंतनंसस्यात्संक
ल्पःकामुकस्यहि ॥ ३८३ ॥ अनयासहसंभोगंकरिष्यामीतिनिश्चयः ॥ कथितोध्यवसायोयंसुरतंतत्रकारणं
॥३८४॥ ग्राम्यधर्मेणगमनंललनायाःसुखप्रदं ॥ क्रियानिर्वृतिरित्युक्तासर्वदात्रमनीषिभिः ॥ ३८५॥

द्वितीयं नारीभिःसहद्यूतादिक्रीडातृतीयमिति ॥ ३८१ ॥ प्रेक्षणमिति सकामेनमनसाप्रेरितेनचक्षुषायदालोकनंतत्प्रेक्षणमित्युक्तंच
तुर्थं गुह्यांगादीनांग्राम्यधर्मपरिपोषायभाषणंपंचममिति ॥ ३८२ ॥ षष्ठंसंकल्पमभिनयति इयमिति इयंसुभ्रूर्ममग्राम्यधर्मोपयोगिन्य
स्त्वित्याकारकंचिंतनंसंकल्पइत्युक्तम् ॥ ३८३ ॥ सप्तममध्यवसायमभिनयति अनयेति तत्रउक्तरूपाध्यवसायेसुरतंकारणंफलंवासस्या
ध्ययनवदितितुरीयपादार्थः ॥ ३८४ ॥ अष्टम्याःक्रियानिर्वृतेःक्रिययानिर्वृतिःसुखमितिव्युत्पत्त्यनुसारेणाकारमाह ग्राम्येति ॥ ३८५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमष्टविधंव्यापारंमुमुक्षुर्वर्जयेत्तद्वर्जनमेवतुब्रह्मचर्यमित्युक्तमित्याह स्मरणमिति ॥ ३८६ ॥ यदिच्छंतइति उक्ताकारंब्रह्मचर्यंयदवा मीच्छयाकुर्वंतितद्ब्रह्मप्रणवाभिधेयत्वात्प्रणवप्रतीकत्वाद्वाप्रणवतादात्म्यापन्नंविद्धीत्यर्थः अन्यत्रान्यदृष्ट्यालंबनत्वंप्रतीकत्वम्॥ ३८७॥ षोडशीसप्तदश्योःप्रणवस्यप्रतीकतामालंबनतांचक्रमेणप्रशंसंत्योरर्थमाह एतद्ध्येवेतिद्वाभ्यां एतत्प्रणवरूपमक्षरंब्रह्मकार्यब्रह्मात्मकंहिरण्य गर्भदृष्ट्याध्येयमितियावत् तथापरंब्रह्मापिएतत् परब्रह्मात्मत्वेनापिध्येयमितियावत् तस्मादस्याक्षरस्यब्रह्मत्वेनोपासकःकार्यब्रह्मभावपर ब्रह्मभावरूपफलयोर्मध्येयदिच्छतितदेवाप्नोतीत्यर्थः ॥ ३८८ ॥ प्रणवोच्चारणेप्रतीयमानंतन्मात्राचतुष्टयवाच्यस्थूलसूक्ष्मकारणतुरीयाव

स्मरणंकीर्तनंक्रीडाप्रेक्षणंगुह्यभाषणं ॥ संकल्पंनिश्चयंचैवक्रियानिर्वृतिमष्टमीं ॥ वर्जयेद्वर्जनंतत्तुब्रह्मच र्यमुदाहृतं॥३८६॥ यदिच्छंतोमहात्मानोब्रह्मचर्यंचरंत्यपि॥ तत्तेसंग्रहतोवक्ष्येओमित्येवावधारय॥३८७॥ एतद्ध्येवाक्षरंब्रह्मएतद्ध्येवाक्षरंपरं ॥ एतद्ध्येवाक्षरंज्ञात्वायोयदिच्छतितस्यतत् ॥ फलंभवतिनैवात्रसंशयः कोपिविद्यते ॥ ३८८॥ एतदालंबनंश्रेष्ठमेतदालंबनंपरम्॥ एतदालंबनंज्ञात्वाब्रह्मलोकेमहीयते॥३८९॥ अयमोंब्रह्मणोभावःसर्वदैवविभावयेत्॥ नजायतेनम्रियतेस्वयंज्योतिःस्वरूपकं॥ ३९० ॥

स्थावच्छिन्नंशुद्धंचिन्मात्रमेवास्मीतिचिंतनरूपामालंबनोपासनांप्रशंसति एतदालंबनमिति एतत्प्रणवरूपमालंबनंश्रेष्ठंश्रेष्ठस्यकार्यब्रह्म णोध्यानोपकारकंतथापरंपरब्रह्मणोध्यानोपकारकं एवंप्रणवमालंब्यद्विविधब्रह्मध्यानेनब्रह्मलोकप्राप्तिद्वारामुच्यतेइत्यर्थः ॥ ३८९ ॥ एवंद्विविधप्रणवोपासनयाशुद्धांतःकरणंप्रत्यात्मतत्त्वबोधिकानामष्टादश्यादीनामृचामर्थप्रदर्शनमुपक्रमते अयमोमित्यादिना ओंब्रह्म णःप्रणवप्रतिपाद्यस्यब्रह्मणोभावःस्वभावोऽयंभवतितंसदामुमुक्षुश्चिंतयेत् अयंकइत्याकांक्षांपूरयति नजायतइत्यादिना अयमात्मास्व यंज्योतिष्ट्वेनसर्वभासकतयाविपश्चित्पदोक्तोजननमरणाभ्यांतदुपलक्षितविकारांतरैश्चहीनइत्यर्थः ॥ ३९०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तत्रहेतुतयाकारणाभावंद्वैताभावंचाह नायमिति अयमात्माकुतश्चिन्नजायतेतत्कारणतायोग्यस्यकस्याप्यसंभवात् नाप्यस्मात्किंचिदव
स्थांतरादिकंजायतेद्वितीयस्यैवाभावादित्यर्थः ॥ ३९१ ॥ अतएवायमजोनित्यश्चोक्तइत्याह अजइति नित्यत्वाच्चसदावर्त्तमानत्ववाच
केनशाश्वतपदेनोक्तइत्याह यतइति शाश्वतत्वाच्चपुराणइत्युक्तः पुरापिनवइतिव्युत्पत्तिसमन्वयादित्याह ततएवेत्यादिना ततःशाश्वतत्वा
 त्पुरापिनवएवेत्यतःपुराणोभवतीतिद्वयोरर्थः ॥ ३९२ ॥ ३९३ ॥ यतईदृशआत्मनःस्वभावोऽतउपाधिनाशेतन्नाशशंकानकार्येत्याह ह

नायमात्माकुतश्चित्स्यात्कारणाभावहेतुतः॥ अस्मादपिनकोपिस्याद्द्वितीयाभावहेतुतः॥ ३९१ ॥ अजस्ततो
यमात्मास्यान्नित्योजन्मविवर्जितः ॥ यतोनित्यस्ततःशश्वद्वर्त्ततेत्रजगत्त्रये ॥ ३९२ ॥ शाश्वतस्ततएवायं
पुराप्यस्तिमहेश्वरः ॥ पुराणोनवएवात्मासर्वेषामपिदेहिनां ॥ ३९३ ॥ हन्यमानेशरीरेस्मिन्न्हन्यतेनैवक
स्यचित्॥ हन्यमानेघटेयद्वन्नभोनैवात्रहन्यते ॥ ३९४ ॥ हंताचेन्मन्यतेहंतुंहतश्चेन्मन्यतेहतं ॥ उभौतौनवि
जानीतोनायंहंतिनहन्यते ॥ ३९५ ॥ कार्यकारणयोर्नाशेवधउक्तोमनीषिभिः ॥ अकार्यकारणःकेननिहं
तिचकथंहतः ॥ ३९६ ॥ देहेंद्रियगणैःशून्यमात्मानंनभसासमं ॥ हन्मीतिमन्यतेमूढोयश्चासौहन्यतेपिच
॥ ३९७ ॥

न्यमानइति स्पष्टम् ॥ ३९४ ॥ यःस्वात्मानंक्रियाकारकंमन्यतेसभ्रांतइतिप्रदर्शयंत्याऊनविंशतिपूरण्याअर्थमाह हंतेतिपंचभिः यदिहं
ताहननक्रियाकर्तृसंघातावच्छिन्नआत्मानंहंतुंक्षमंहननक्रियाकर्त्तारमितियावत्मन्यते योवाहतंहननक्रियाकर्मभूतंमन्यतेतावुभावज्ञौ
आत्मनोऽकारकस्वभावत्वादित्यर्थः ॥ ३९५ ॥ एतत्स्फुटयति कार्येति लोकेकार्यंस्थूलंकारणंसूक्ष्ममिंद्रियादिकमेतयोरेवनाशदर्शनेन
कार्यकारणान्यतरत्वंनाशव्यापकंदृष्टं वस्तुतस्तद्रहितात्मनःकथंनाशःस्यादित्यर्थः ॥ ३९६ ॥ देहेंद्रियेति देहादिरूपकार्यादिहीनमात्मा
नंयःकारकंमन्यतेसमूढइत्यर्थः ॥ ३९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानेति तौहंतृत्वेनहतत्वेनचात्मानंमन्यमानौशास्त्रज्ञानवंतावप्येतयोर्हंतृहतयोस्तत्त्वंमिथ्यात्वरूपंनजानीतः अनयोर्मिथ्यात्वंचविपर्ययकालएवभानादित्यर्थः ॥ ३९८ ॥ नाभावोविद्यतेसतइतिन्यायेनात्मनोऽवध्यत्वंदर्शयति सतइति देहःस्वतःसत्ताहीनोयथानाशयोग्यस्तथायंसद्रूपआत्माकथंस्यादित्यर्थः ॥ ३९९॥ आत्मनोनाशायोग्यतायांहेतुप्रपंचकत्वेनविंश्याअर्थमाह अणोरितिसप्तभिः केचिद्वादिनोनैयायिकादयोऽणोःसूक्ष्मस्यमनःप्रभृतेर्नाशंनांगीकुर्वंतिआत्मातुतस्मादणोरप्यणीयान्भवतितद्विवर्त्तोपादानत्वादतःसकथंनाशयोग्यइत्यर्थः ॥ ४०० ॥ एवंमहत्त्वेनानाशयोग्यतयाभिमतस्यकालादेरप्यधिष्ठानतयातिमहतआत्मनःकथंनाशयोग्यत्वमित्याह महतश्चेति

ज्ञानवंतावपिनतौजानीतस्तत्त्वमेतयोः ॥ विपरीतमिदंज्ञानमवध्येवधदर्शनात् ॥ ३९८ ॥ सतोनविद्यते नाशोवस्तुनोत्रकदाचन॥ सन्नात्मासर्वदाकेनवधमर्हतिदेहवत् ॥ ३९९॥ अणोरपिननाशोस्तिकेषांचिद पिवादिनां ॥ मतेकेनात्मनःसस्यादपितस्मादणीयसः ॥ ४०० ॥ महतश्चननाशोस्तिकालादेर्वादिनांमते ॥ केनात्मनोभवेदेषमहतोत्रमहीयसः॥ ४०१ ॥ आत्मनोनस्वभावेनविनाशोवसनादिवत् ॥ ततःकारणतो नाशोवर्णनीयोमनीषिभिः॥ ४०२॥ कारणानिचसर्वाणिविनाशंप्रतियांतिवै ॥ देहेंद्रियगणंप्राप्यनापिबु द्धिंव्रजंतिहि ॥ ४०३ ॥

॥ ४०१ ॥ साक्षितयाबुद्धिगुहानिहितत्वाच्चसननाशयोग्यइत्याह आत्मनइतित्रिभिः वस्त्रादिकंस्वभावेनपरिणामित्वलक्षणेनयथानाशयोग्यंतथाआत्मायतोनभवतिअतःस्वरूपाद्बहिर्भूतंकिंचित्तस्यनाशेनिमित्तंवाच्यमात्मनाशवादिनेत्यर्थः ॥ ४०२ ॥ स्वरूपाद्बहिर्भूतानांनाशनिमित्तानांप्रवृत्तिस्तुदेहेंद्रियगणमभिव्याप्यैवदृष्टानतुसाक्षात्बुद्धिमभिव्याप्यापि बुद्धेःसाक्षिणमात्मानंप्रतिनकिंचिन्नाशकारणंगंतुंसमर्थमित्याह कारणानीतिद्वाभ्यां नाशकारणानिसर्वाणिकुठारौषधादीनिदेहेंद्रियगणंप्राप्यविनाश्यस्वयंविनाशंयांतिक्षीणबलानिभवंतिनहिशरीरेंद्रियहीनेनाशकारणानिप्रवर्त्तमानानिकेनचिद्दृष्टानीतिभावः ॥ ४०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचबुद्धेरप्यांतरस्यनाशःकथंस्यादित्याह बुद्धेरपीति स्पष्टम् ॥४०४॥ यश्चैवंविधमात्मनस्तत्त्वंजानातितस्यहंतृत्वादिव्यवहारोनिवर्त्त
तइत्याकारमुत्तरार्धार्थमाह गुरुप्रसादतइति अत्रश्रुतौधातुपदेनसचित्तेंद्रियाणांविवक्षितत्वात्तन्नैर्मल्यंस्वच्छेत्यादिविशेषणद्वयेनोक्तं गुरु
प्रसादतइतित्वर्थापत्तिलब्धानुवादइतिभाष्याविरोधः उत्तरार्धेनवीतशोकत्वंक्रतुपदोक्तसंकल्पहीनत्वंचोक्तं एतादृशोऽधिकारीयदात्म
नोमहिमानंशास्त्रप्रसिद्धमात्मतयाऐक्येनपश्यतितदाकर्तृत्वादिरहितोभवति कीदृशंमहिमानं महत्त्वस्याणुत्वस्यचसंश्रयंपर्यवसानभूमिं
अद्वितीयत्वेनानंदरूपंचेतिद्वयोरर्थः ॥ ४०५॥ ४०६ ॥ अयमात्माकल्पितोपाधिभेदैस्तथातथाभासमानोपिवस्तुतःपूर्णःशुद्धोऽविषय

बुद्धेरप्यांतरःस्वात्माबुद्धावेषस्थितोयतः ॥जंतोःसर्वस्यकेनायंकारणैर्नाशमेष्यति ॥ ४०४ ॥ गुरुप्रसादतः
स्वच्छचित्तोत्रविजितेंद्रियः ॥ दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः॥ ४०५॥ आत्मनोमहिमानंतंमहत्त्वा
णुत्वसंश्रयं॥ आनंदात्मस्वरूपेणभेदगंधविवर्जितम् ॥ पश्यत्यात्मतयायेननहंतिनचहन्यते॥ ४०६ ॥ दूरं
यातिसमासीनआत्मायंसर्वदेहिनां ॥ यतःसर्वगतोनित्यंविक्रियालेशवर्जितः ॥ ततःशयानएवात्रशरीरे
यातिसर्वतः॥ ४०७॥ बुद्ध्यादीनांहिसंयोगाद्विद्यादिमदमेतिच ॥ जलंयथैवधातूनांसंयोगात्तादृशंभवेत् ॥
अमदश्चस्वभावाद्यआनंदात्मास्वयंप्रभः ॥ ४०८ ॥

स्वभावश्चेतिप्रकटयंत्याएकविंशतितम्याअर्थमाह दूरमितित्रिभिः लौकिकोजनस्तिष्ठन्शयानोवादूरंगंतुंनशक्तःपरिच्छिन्नत्वादितिप्रसि
द्धं अयमात्मातुतद्विलक्षणत्वात्समासीनोजाग्रदवस्थांपश्यन्नपितथाशयानःस्वप्नसुषुप्तीपश्यन्नपिदूरंसर्वत्रगतःपूर्णस्वभावत्वादित्यर्थः
॥४०७॥ तथाबुद्ध्यादिसंघाततादात्म्याध्यासाद्विद्याधनादिप्रयुक्तंमदंतदुपलक्षितंधर्मांतरंचप्राप्नुवन्भासमानोपिवस्तुतःशुद्धइत्याह बुद्ध्या
दीनामिति धातवोगैरिकादयःतत्संगाज्जलमिवबुद्ध्यादिसंगान्मदादिमानपिस्वभावादानंदलक्षणादमदोमदादिरहितोभवतीत्यर्थः॥४०८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याविषयत्वमाह कस्त्वमिति तदेवंमदामदंमदवंतममदवंतंचमदन्योममतत्त्वविदःस्वरूपादखंडचिद्धातुलक्षणाद्भिन्नोजडभावःकोज्ञातुंक्ष मइत्यर्थः मदन्यइत्याद्येवस्फुटयति मत्तइति मत्तोममस्वरूपाद्भिन्नंहिजडंतादृक्तत्तुनात्मप्रकाशार्हंयतोमूढामोहव्याप्ताधीर्भवतितेनतथा त्वात्तस्मात्स्वयंप्रकाशआत्मेत्यर्थः ॥४०९॥ आत्मविज्ञानफलप्रदर्शिकांद्वाविंशतितमींपठति अशरीरमिति वस्तुतःशरीरत्रयरहितमनित्ये षुसर्वशरीरेष्वंतःस्थितंपूर्णंचात्मानंयदाजानातितदाशोकमतिक्रामतीत्यर्थः ॥४१०॥ शोकातिक्रमेउपपत्तिमाह शोकइति शोकःकर्तृत्वा

कस्त्वंमदामदंदेवंमदन्योज्ञातुमर्हति ॥ मत्तोयोहिविभिन्नःस्यात्सोनात्मात्रघटादिवत् ॥ ममात्मानंकथंतादृग्ज्ञातुमर्हतिमूढधीः ॥ ४०९ ॥ अशरीरंशरीरेषुत्वनवस्थेष्ववस्थितं ॥ महांतंविभुमात्मानंमत्वाधीरोनशोचति ॥ ४१० ॥ शोकोऽज्ञानसमुत्थोयमज्ञानंस्वात्मबोधनात् ॥ विनष्टंकेनशोकःस्यादहेतुःपुनरस्यसः ॥४११॥अयमात्माविभुत्वेनमहान्यःपरिकीर्त्तितः॥ नाध्यापनैर्नाध्ययनैरादेयोनबहुश्रुतात् ॥ नानाशास्त्रोत्थविज्ञानान्नलभ्योजन्मकोटिभिः ॥ ४१२ ॥ एषयंप्रतिदेवेशोदर्शयेद्धिनिजंवपुः ॥ गुर्वादिरूपमापन्नस्तेनलभ्योधिकारिणा ॥ ४१३ ॥ यतएनंप्रतिस्वात्मातादात्म्येनात्मनोवपुः ॥ आनंदात्मस्वरूपंयत्तत्साक्षात्कृतवान्प्रभुः ॥ ४१४ ॥

दिरूपोबंधःसोऽज्ञानकार्यंभवतितदज्ञानंतुतत्त्वज्ञानेननष्टमतोनिष्कारणःशोकःकथंस्यादित्यर्थः ॥४११॥ त्रयोविंशतितम्याअर्थमाह अयमात्मेति एषवर्णितआत्माअध्ययनादिभिरुपायैर्नादेयोनलभ्यइत्यर्थः ॥ ४१२ ॥ एषइति किंत्वेषआत्मागुरुदेवादिरूपःसन्यमधिकारिणंप्रतिस्वरूपप्रदर्शनरूपंवरणंनयेत्तेनैवलभ्यतइति ॥ ४१३ ॥ यतइति कीदृशंगुरुदेवादिकर्तृकंवरणं यतःयस्यवरणस्यप्रभावादयमात्माप्रभुरेनमधिकारिणंप्रतिस्वीयमानंदात्मकंवपुःस्वरूपंतादात्म्येनाभेदेनसाक्षात्कृतवानपरोक्षतांनीतवान्भवतीत्यर्थः ॥ ४१४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मापरोक्षाधिकारिणंदर्शयंतींचतुर्विंशतितमींपठति नाविरतइति दुश्चरितंपापंतस्मादनिवृत्तःशमहीनःसमाधिहीनोऽशान्तमानसःस माधिफलादैश्वर्यरूपादनिवृत्तमनाश्चपुरुषएनमात्मानंप्रज्ञानपदोक्तसाक्षात्कारविषयंनकरोतीत्यर्थः ॥ ४१५ ॥ व्यतिरेकमुखेनोक्तमन्व यमुखेनाह पुण्यात्मेति जंतौजंतौसर्वोपाधिषु आत्मनःअखंडात्मतत्त्वस्य ॥ ४१६ ॥ द्वितीयवल्ल्युंत्यकंडिकार्थमाह ब्रह्मेतिद्वाभ्यां यस्य महात्मनोदेवस्यतमःप्रधानमायाशबलस्यब्रह्मक्षत्रोपलक्षितंसर्वंजगदोदनस्थानीयंभवति सर्वसंहारकोमृत्युस्तुशाकसूपस्थानीयः सदेवो यत्रशुद्धेस्थितस्तमात्मानमित्थंयथामयायमेनज्ञातस्तथान्यःकोज्ञातुंशक्नुयादित्यर्थः ॥ ४१७ ॥ तज्ज्ञानस्यदुःशकत्वमेवस्फुटयति सएवे

नाविरतोदुश्चरितान्नाशांतोनासमाहितः॥ नाशांतमानसोवापिप्रज्ञानेनैनमाप्नुयात् ॥ ४१५ ॥ पुण्यात्मा क्रोधरहितोजंतौजंतौक्षणेक्षणे॥ आत्मनश्चिंतयायुक्तोरागद्वेषविवर्जितः॥ अहंब्रह्मेतिविज्ञानादात्मानम वलोकयेत्॥ ४१६ ॥ ब्रह्मक्षत्रादिकंविश्वमन्नंयस्यमहात्मनः॥ मृत्युःसर्वहरस्तद्वत्शाकसूपादिवत्स्थितः॥ अन्यःकइत्थमात्मानंजानीयाद्यत्रसस्थितः॥ ४१७॥ सएवचेद्भवेदात्मातस्यतादात्म्यबोधतः॥ जानीतेस कथंचित्तंनपरोत्रकथंचन ॥ ४१८ ॥ अयमात्मावगंतव्यउपायेनामुनासदा ॥ तत्त्वंपदार्थौवपुषिपरिक ल्प्यौद्विधासदा ॥ ४१९ ॥ एकःकर्मफलंभुंक्तेभोजयत्यपरोपितं॥ पूर्वकर्मविपाकेनजातेस्मिन्हिशरीरके ॥ ४२० ॥

ति तस्याधिकारिणःसएवशबलाधिष्ठानभूतःशुद्धात्मैवआत्माआत्मतयापदार्थशोधनदशायांज्ञातःस्यात्सएवतंवाक्यार्थतयाज्ञातुंशक्तोन परःशुद्धशरीरत्रयात्मदृष्टिरित्यर्थः ॥ ४१८ ॥ तृतीयवल्ल्यांप्रथमायाअर्थमाह अयमात्मेतिचतुर्भिः आत्मनोविज्ञानप्रकारोऽयंबोध्यः अयंकइत्यपेक्षायामाह तत्त्वमित्यादि तत्त्वंपदार्थौदेहेद्विधावक्ष्यमाणद्वैविध्यशालिव्यापारवत्तयास्थितौचिंतनीयौ ॥ ४१९ ॥ तद्व्या पारद्वयंपिबत्पदेनभोक्तरिमुख्यतयाभोजयितरितूपचारेणवर्त्तमानेनोक्तंदर्शयति एकइति ययोःपदार्थयोर्मध्येएकस्त्वंपदार्थोदेहेऽपूर्वव शाज्जातेसत्यवश्यभोक्तव्यत्वेनऋतपदनिर्दिष्टंकर्मफलंभुंक्तेअपरस्तत्पदार्थस्त्वंतर्यामित्वाद्भोजयतीति ॥ ४२० ॥ ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभाविति कीदृशौतौ बुद्धिरूपेउत्कृष्टेस्थानेसहस्थितौ भोक्तृत्वाभोक्तृत्वसर्वज्ञत्वासर्वज्ञत्वादिविरुद्धधर्मशालिनौचेत्यर्थः ॥ ४२१ ॥ तयोःस्वरूपंतुदक्षिणाग्निगार्हपत्याहवनीयसभ्यावसथ्यसंज्ञानांपंचाग्नीनामुपासनेननाचिकेताग्नेस्त्रिवारंचयनेनवाशुद्धांतःकरणाःप्रतिपादयंतीत्याह वेदेति त्रिवेलंत्रिवारम् ॥४२२॥ ननुपंचाग्निविप्रभृतीनांब्रह्मविज्ञानंनदृश्यतेइतिशंकांवारयंत्याद्वितीयायाअर्थमाह प्रायइति त्रिभिः यद्यपितेपंचाग्न्यादयःप्रायोब्रह्मविज्ञानहीनाजीवपरयोर्भेदमेववदंतोदृश्यंतेतथापितेषांतथाविधंवदनंतावदेवयावत्सद्गुरुणासमागमोनजातइतिशेषः तथाचतेसत्संगंविनाकामहताएवदृश्यंतइतिभावः ॥ ४२३ ॥ लब्धसद्गुरुसमागमास्तुतेब्रह्मभावमिदानीमपियां

उभावपिचबुद्धिस्थावुत्कृष्टस्थानकप्रियौ॥ विलक्षणस्वभावौचभोक्तृताऽभोक्तृतादिगौ ॥ ४२१ ॥ वेदवादरतैःप्रोक्तौनित्यंपंचाग्निधारिभिः॥ त्रिवेलंनाचिकेताग्निर्यैश्चितोत्रमहात्मभिः॥ ४२२॥ प्रायस्तेब्रह्मविज्ञानरहिताभेदमेवहि ॥ वदंतिजीवपरयोर्यावद्गुरुसमागमः ॥ ४२३ ॥ नाचिकेतममुंचित्वापूर्वंशुद्धधियोहिते॥ प्रणवेनात्मनःपश्चात्कृत्वोपासनमैक्यतः ॥ ४२४ ॥ तत्पदार्थश्चयःसेतुरीजानानांमहात्मनां ॥ संसारसागरस्यास्यपरंपारंतितीर्षतां ॥ अभयंब्रह्मयांत्येतत्सदाकल्पनयानया॥ ४२५॥ भोक्तारंरथिनंविद्धिशरीरंरथमेवच॥ बुद्धिंतुसारथिंतद्वन्मनःप्रग्रहमेवच ॥इंद्रियाणिहयांश्चैवविषयानश्वभूमिकाः॥ ४२६ ॥

तीत्याह नाचिकेतमिति तेकर्मिणःसद्गुरुसंगतास्तुनाचिकेताख्याग्निचयनेनप्रणवोपासनानुष्ठानेनचशुद्धधियःसंतःसदाइदानीमपिअभयंब्रह्मयांतिअनयावक्ष्यमाणकल्पनया कीदृशंब्रह्म तत्पदार्थरूपेणईजानानांयागादिकारिणांसंसारस्यपरंपारंतितीर्षतांगंतुमिच्छतांसेतुभूतमनुग्रहेणपारप्रापकमितिद्वयोरर्थः ॥ ४२४ ॥ ४२५ ॥ अनयेत्युक्तांकल्पनांदर्शयंस्तृतीयाचतुर्थ्योरर्थमाह भोक्तारमितिद्वाभ्यां तत्रकर्मफलभोक्तृतयोक्तमात्मानंत्वंपदार्थंरथिनंरथेनसंसारमोक्षयोर्गंतारंजानीहि तंरथंतुशरीरात्मकंजानीहि यस्यरथस्यबुद्धिःसारथिस्थानीयामनोरश्मिस्थानीयमिंद्रियाण्यश्वस्थानीयानिशब्दादयोविषयास्तत्त्वश्वप्रचरणदेशस्थानीयाइत्यर्थः ॥ ४२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 यद्यपिबुद्धेर्विविक्तस्यशुद्धात्मनोभोक्तृत्वंगंतृत्वंवानसंभवतितथापींद्रियमनोबुद्धिसंबंधरूपेणकल्पितश्चिदाभासाख्यआत्माभोक्तागंताचे
त्युक्तःशुद्धात्मातुगंतव्यत्वेनोक्तइत्याह बुद्धेरिति भिन्नोविविक्तःसन्नात्मापरमात्मनोन्योभोक्ताचनभवतितथापिसइंद्रियादियोगाद्भो
क्ताकल्पितः सएवचेंद्रियादियोगहीनोगंतव्यतयोक्तइत्यर्थः ॥ ४२७ ॥ उक्तकल्पनायाःफलमाह यांत्येतेइति एतेशुद्धधियोऽधिका
 रिणोभोक्तृतारूपंपूर्वदेशंविहायपरमात्मभावरूपमुत्तरंदेशंयांति किंकृत्वा बुद्धिरूपसारथिनाइंद्रियरूपाश्वान्जित्वेति ॥ ४२८ ॥ तत्रबु
द्धिरूपसारथेर्द्वौगुणौगम्येतरदेशेरागहीनत्वंविज्ञानाख्यंकौशलंचतत्राद्यंगुणंप्रशंसंत्योःपंचमीषष्ठ्योस्तात्पर्यार्थमाह वैराग्येति यस्यरथि

बुद्धेर्यद्यपिभिन्नःसन्भोक्तानान्यःपरात्मनः॥ तथापींद्रियबुद्ध्यादियोगादात्मैवकल्पितः॥ भोक्तातद्योगनिर्मु
क्तोगम्यएषपरेश्वरः ॥ ४२७ ॥ यांत्येतेपरमात्मानंभोक्तृतांपरिहायहि ॥ इंद्रियाश्वान्विनिर्जित्यबुद्धिसार
थिसंश्रयात् ॥ ४२८ ॥ वैराग्यकवचंप्राप्तोयस्यस्याद्बुद्धिसारथिः ॥ दृढधैर्येणमनसाप्रग्रहेणेंद्रियाभिधान्॥
वाजिनःस्ववशेकृत्वापरंयातिनचापरः॥ ४२९॥ रागबुद्धिस्तुयोत्रस्यान्मनसाधैर्यवर्जितः॥ तस्येंद्रियाण्य
वश्यानिदुष्टाश्वाइवसारथेः ॥ ४३० ॥ विरक्तोयस्तुलोकेस्मिन्मनसाधैर्यसंयुतः ॥ तस्येंद्रियाणिवश्यानिस
दश्वाइवसारथेः ॥ ४३१ ॥ यस्त्वविज्ञानवान्भवत्यमनस्कःसदाशुचिः ॥ नसतत्पदमाप्नोतिसंसारंचाधि
गच्छति ॥ ४३२ ॥

नोबुद्धिरूपःसारथिर्वैराग्यवान्भवतिसरथीदृढेनबलवतामनोरूपप्रग्रहेणेंद्रियात्मकवाजिनःसारथिद्वारावशीकृत्यइष्टंपरमात्मरूपंदेशंया
ति ॥ ४२९ ॥ तयोरक्षरार्थमाह रागेतिद्वाभ्यां योरथीरागशालित्वेनापकृष्टंविज्ञानंबुद्धिर्यस्येतिव्युत्पत्तिकेनविज्ञानवत्पदेनोक्तःस
रागबुद्धिकोधैर्यबलहीनमनस्कश्चतस्येंद्रियाश्वाअवश्याभवंतियथालोकेदुष्टाश्वाःसारथेरित्यर्थः ॥ ४३० ॥ इतरस्यतुतेवश्याइत्याह
विरक्तइति स्पष्टम् ॥ ४३१ ॥ सप्तम्यष्टम्यौतुबुद्धिसारथेःकौशलेनमनोरूपप्रग्रहांतराकर्षणरूपेणप्रयुक्तंफलंव्यतिरेकेणान्वयेनचदर्शयं
त्यौपठति यस्त्वविज्ञानेति अपकृष्टंविवेकहीनंविज्ञानंयस्यसतथा अमनस्कःअनंतर्मुखमनाः अतएवसदाऽशुचिः तदीयस्नानादेःकुंजर
स्नानसमत्वात् एतादृशोविष्णुपदंनाप्नोतिकिंतुसंसारमेवेत्यर्थः ॥ ४३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सविवेकधीस्तुतदाप्नोतीत्याह यस्त्विति मनःपदंनिगृहीतमनःपरं यस्मायंप्राप्यभूयोनजायतेइत्यर्थः ॥ ४३३ ॥ एवंविधसत्करणवताल भ्यंयत्तदेवपरंपदमितिदर्शयंतींनवमींपठति विज्ञानेति सबुद्धिसारथिकोमनसानिगृहीतेंद्रियश्चसंसारसिंधुमार्गात्पारंपरंविष्णोःपरमात्म नःपदंस्वरूपंयातीत्यर्थः ॥ ४३४ ॥ फलितमाह विरक्तेति यतःसरागत्वेधैर्यराहित्येचानर्थःप्रसिद्धस्ततएवविरक्ताबुद्धिःसधैर्यंमनश्चएत द्द्वयंमोक्षसाधनंविपरीतंबंधसाधनंचेति ॥ ४३५ ॥ दशम्यादिद्वयमवतारयति मोक्षइतिसप्तभिः प्रत्यक्त्वमांतरभावस्तद्रूपोमोक्षोबाह्यभा वस्तुबंधस्तत्रकार्यापेक्षयाकारणेआंतरेतद्दृष्टिर्मोक्षइत्यर्थः ॥ ४३६ ॥ तत्रपरमकारणभावएवमुख्योमोक्षइतिदर्शयितुंकारणपरंपरामाह

यस्तुविज्ञानवान्भवतिसमनस्कःसदाशुचिः ॥ सतुतत्पदमाप्नोतियस्माद्भूयोनजायते॥ ४३३ ॥ विज्ञानसार थिर्यस्तुमनःप्रग्रहवान्नरः ॥ सोध्वनःपारमाप्नोतितद्विष्णोःपरमंपदं ॥ ४३४ ॥ विरक्तातत एवेयंबुद्धिर्विज्ञान रूपिणी ॥ मनश्चधैर्यसंपन्नंनित्यंयत्सुखकामुकं ॥ पुंसोमोक्षायकथितमन्यथाबंधनायच ॥ ४३५ ॥ मोक्षः प्रत्यक्त्वमुदितंबहिष्ट्वंबंधनंतथा ॥ प्रत्यक्त्वंकारणेनित्यंबहिष्ट्वंकार्यसंश्रयं ॥ ४३६ ॥ महाभूतात्मकाएतेशब्दा द्याविषयाःसदा ॥ इंद्रियाणांहिकथिताःकारणंसर्वदेहिनां ॥ ४३७ ॥ इंद्रियाणितथैतानिविषयग्रहणान्य पि ॥ मनोयोनीनिसततंव्यापारयतितद्यतः ॥ ४३८ ॥ सुखंमेभवतात्तद्वद्दुःखंमाभूदितीदृशं ॥ मनोनिश्चय विज्ञानरूपांबुद्धिमपेक्षते ॥ ४३९ ॥

महेत्यादिना तत्रशब्दादयोविषयाःपंचभूतसारात्मकत्वात्पंचभूतरूपेणइंद्रियाणांभौतिकत्वेनप्रसिद्धानांकारणतांयांति ॥ ४३७ ॥ इंद्रि याणीति तानींद्रियाणितुमनोयोनीनिमनःकारणकानि यतस्तन्मनएवतानिव्यापारेप्रवर्तयतीतिप्रसिद्धं तथाचसमुद्रोलहरीणामिवमनइं द्रियाणांकारणमितिभावः कीदृशानिइंद्रियाणि विषयग्रहणानिभौतिकत्वेनसजातीयविषयाणांग्राहकाणिविषयरूपाणीतियावत् त थाचयथाभूतरूपेणार्थाइंद्रियेभ्यःपराउक्तास्तथेंद्रियरूपापन्नेभ्योऽर्थेभ्योमनःपरमुच्यतइत्याशयः ॥ ४३८ ॥ तस्यचमनसइच्छारूपस्य निश्चयात्मिकाबुद्धिःकारणमित्याह सुखमिति भवतात्जायेत इतीदृशंइत्याकारम् अपेक्षतेउत्पत्त्यैइतिशेषः ॥ ४३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यष्टिबुद्धीनांकारणंतुमहत्तत्त्वाख्यासमष्टिबुद्धीनांकारणंतुमहत्तत्त्वाख्यासमष्टिरूपाहिरण्यगर्भबुद्धिरित्याह बुद्धिरिति बुद्धिर्व्यष्टिरूपातु हिरण्यगर्भबुद्धिसर्वस्यस्थूलप्रपंचव्यवहारस्यनिमित्तभूतांमहत्तत्त्वाख्यामुत्पत्तयेऽपेक्षतइत्यर्थः साहिरण्यगर्भबुद्धिरप्यव्यक्तपदोक्तंसूक्ष्म

शरीरंस्वोपादानमायाख्याविद्यासहितमपेक्षते कीदृशं समायंसूक्ष्मंस्थूलविलक्षणत्वादव्यक्तपदेनोक्तं सामायातुआश्रयविषयलाभाय चिद्रूपंपरंपुरुषमपेक्षतेइतिद्वयोरर्थः ॥ ४४० ॥ ४४१ ॥ पुरुषइति सचपुरुषःस्वसिद्धयेन्यंयतोनापेक्षतेततःसमुख्यःपरोभवतितद्बोधना येवतुएनामुक्तरूपांकारणपरंपरांप्राहुरिति ॥ ४४२ ॥ वर्णितकारणपरंपराभिधायिकांदशम्यादिकाम्गद्वयींपठति इंद्रियेभ्यइति बुद्धे

बुद्धिर्हिरण्यगर्भस्यबुद्धिंसर्वस्यकारणं ॥ अपेक्षतेमहत्तत्त्वंसापिलिंगशरीरकम् ॥ ४४० ॥ अविद्याप्रभवंनित्यमव्यक्तंस्थूलदेहतः ॥ विलक्षणंहिसाविद्यंमायाचपुरुषंपरं ॥ ४४१ ॥ पुरुषःस्वात्मनोनैवकदाप्यन्यमपेक्षते ॥ यतस्ततःपरःप्राहुरेनांहेतुपरंपराम् ॥ ४४२ ॥ इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः ॥ मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः ॥ ४४३ ॥ महतःपरमव्यक्तमव्यक्तात्पुरुषःपरः ॥ पुरुषान्नापरंकिंचित्साकाष्ठासापरागतिः ॥ ४४४ ॥ इयमेवपराज्ञेयानित्यादिक्कालरूपिणी ॥ संवित्स्वयंप्रभायस्याहेतोर्नास्तिपरागतिः ॥ ४४५ ॥ इदमस्मात्परंचास्मादिदमस्मात्परंतथा ॥ पुरुषंनैवयात्येवसैषाहेतुपरंपरा ॥ ४४६ ॥ पुरुषेकारणाभावाद्गतिरस्मान्नविद्यते ॥ परातत:पुमानुक्तःपंडितैःपरमागतिः ॥ ४४७ ॥

र्व्यष्टिरूपायाःपरःमहान्समष्टिबुद्धिरूपः कीदृशआत्मा कार्यापेक्षयांतरः स्फुटमन्यत् ॥ ४४३ ॥ ४४४ ॥ पुरुषस्यस्वरूपंदर्शयन्परत्वं विशदयति इयमेवेति इयंसाक्षादपरोक्षासंवित्सर्वप्रमाणफलभूताचित्दिक्कालयोरपिकल्पनाधिष्ठानत्वान्नित्यापराज्ञेया यस्याःसंविदः परस्ताद्गतिर्नास्ति कीदृश्याःसंविदः हेतोर्विश्वविवर्त्तोपादानभूतायाः ॥ ४४५ ॥ तस्याःपरमकाष्ठात्वंस्फुटीकरोति इदमिति इदमस्मात्परमिदमस्मात्परमित्येवमाकाराएषाहेतूनांपरंपराधारायतःपुरुषपर्यंतैवभवतिततःपरमकाष्ठेतिसउक्तः ॥ ४४६ ॥ परमगतित्वंस्फुटयति पुरुषेइति पुरुषस्वरूपविषयककारणाभावाद्धेतोरस्मात्पुरुषात्परागतिर्नविद्यते पुरुषएवपरमागतिरित्युक्तः तथाचव्यासःस्मरति मुक्तानांपरमागतिरिति ॥ ४४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्याऽऽत्मनोऽदर्शनदर्शनयोर्हेतूप्रदर्शयंतींद्वादशींव्याचष्टे एषइतिद्वाभ्यां एषआत्माकार्यकारणाविद्याभ्यांगूढआवृतःसर्वदेहांतःस्थो गुरूपदेशात्पूर्वंदर्शनश्रवणादिलिंगैःकिंचित्चिद्रूपेणज्ञायमानोपिस्पष्टमानंदादिरूपेणनभासतेकाष्ठगूढाग्निवदित्यर्थः ॥ ४४८ ॥ गुरूपदि ष्टयेति यदातुगुरूपदिष्टमहावाक्यजन्यांप्राधान्येनांगीकृतत्वादग्र्यपदोक्तांदुर्लक्ष्यात्मगोचरत्वात्सूक्ष्मांब्रह्मात्माकारवृत्तिंलभतेकुशलम तिःतदायमात्मासम्यग्भासतइत्यर्थः ॥ ४४९ ॥ आत्मज्ञानसाधनंयोगमुपदिशंत्यास्त्रयोदश्याअर्थमुपबृंहयति आत्मनइतिचतुस्त्रिंशता श्लोकैः आत्मसाक्षात्कारायअयंवक्ष्यमाणचतुरवस्थोयोगोनिरोधःकार्यस्तत्राद्यामवस्थामाह वागादिमिति इंद्रियगणस्यसुखकामन

एषसर्वेषुभूतेषुगूढआत्माशरीरिणां ॥ गुरूपदेशतःपूर्वंस्पष्टंनैवप्रतीयते ॥ यथासर्वेषुकाष्ठेषुगूढोग्निर्मथनात्पुरा ॥ ४४८ ॥ गुरूपदिष्टयासम्यक्तत्त्वमस्यादिजन्यया ॥ दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिः ॥ ४४९ ॥ आत्मनोज्ञानकामःसन्नेनंयोगंसमाचरेत् ॥ वागादिमिंद्रियगणंज्ञानकर्मोभयात्मकं ॥ सुखार्थिनिमनस्यादौनियच्छेद्दांतिसंयुतः ॥ ४५० ॥ अश्वान्यथाऽतिदुर्दांतान्बाह्यादाहृत्यभूस्थलात् ॥ नियच्छेदश्वशालायामश्वानामभिरंजकः ॥ ४५१ ॥ मनःस्तब्धंबलान्नित्यंप्रमादकरणोद्यतं ॥ महागजोपमंनित्यंबुद्ध्याचांकुशरूपया ॥ नियच्छेन्निश्चयात्मिक्यादृढवैराग्ययुक्तया ॥ ४५२ ॥

याप्रेरकेमनसियन्नियमनंविलापनंदमसंज्ञंमनोमात्रव्यापारावशेषणमितियावत् साप्रथमावस्थाऽस्ययोगस्येत्यर्थः श्रुतौमनसीतिदीर्घश्छान्दसः ॥ ४५० ॥ तत्रदृष्टांतउच्यते अश्वानिति यथाश्वानामभिरंजकःशिक्षको बाह्यादरण्यादिरूपात्तत्प्रचरणदेशादानीयाश्वान्मंदुरायांबध्नीयात् तत्रयथाश्वानांबाह्यव्यापारोनिरुद्ध्यतेशरीरसंचलनमात्रमवशिष्यतेतथाप्रकृतेमनसइंद्रियात्मनाबहिर्व्यापारोनिरुध्यते आंतरोवशिष्यतेइति ॥ ४५१ ॥ द्वितीयामवस्थामाह मनइति मनस्तुइच्छात्मकंस्तब्धंसगर्वंअतएवसदाबलात्प्रमादकरणेसाहसेउद्यतंगजसमंतदंकुशस्थानीययाबुद्ध्याअंकुशदंडस्थानीयवैराग्ययुतयानियच्छेन्निरुध्यात् तन्निश्चयरूपायांबुद्धौविलापयेदितियावत् कीदृशीसा बुद्धिः निश्चयात्मिकी निश्चयलक्षणेआत्मनिस्वरूपेभवा अध्यात्मादित्वाट्ठक् ॥ ४५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयांचतुर्थीचावस्थामाह बुद्धिमिति तांनिश्चयरूपांव्यष्टिभूतांबुद्धिंमहतिमहत्तत्त्वाख्येईशाख्येईशस्यहिरण्यगर्भस्यआख्यानिरूपणं येनतथाभूतेज्ञानेअस्मीत्याकारकेसामान्यावगाहित्वाद्बुद्ध्यौघस्यविशेषावगाहिव्यष्टिबुद्धिजातस्यकारणेविलापयेत् तत्सामान्याकारसमष्टिबुद्धिरूपंज्ञानंतुपरमात्मनिविलापयेदित्यर्थः ॥ ४५२ ॥ एवमागमविधयोक्तेर्थेसंभावनायैअनुकूलांयुक्तिंप्रपंचयति अत्रेत्यादिना नियमःप्रतिज्ञा नियमोयंत्रणायांस्यात्प्रतिज्ञायांचसंयमेइतिविश्वप्रकाशात् प्रकारःसामान्यस्यभेदकोविशेषः तथाचअत्रउक्तेनियमे प्रतिज्ञासमेसंक्षिप्तवाक्येअयंवक्ष्यमाणःप्रकारोविशेषबोधकानुकूलयुक्तिरूपःपंडितैर्बोध्यइत्यर्थः तत्रेंद्रियाणांमनसिनियमनाभिधानेऽयमभिप्रायः इंद्रियाणांद्विविधानांसुखकामनयाप्रवृत्तिरित्यविवादं तत्रयत्सुखरूपंप्रयोजनंतदिच्छेतियावत् यच्चतदनुकूलंरमणीयत्वाव

बुद्धिंतांमहतीशाख्येज्ञानेबुद्ध्यौघकारणे॥ नियच्छेत्तच्चविज्ञानमानंदात्मनिकेवले॥ ४५३॥ अत्रायंनियमेज्ञेयःप्रकारःपंडितैःसदा॥ कर्मेंद्रियाणिकुर्वंतिव्यापारंयंशुभाशुभं॥ सुखार्थमेवतंसर्वंतथाज्ञानेंद्रियाण्यपि ॥ ४५४॥ सुखंप्रयोजनंतत्रतज्ज्ञानंचापिकारणं॥ व्यवस्थितंतदुभयंमनोमात्रविजृंभितं ॥ ४५५॥ सुखज्ञानात्मकस्यास्यमनसोनिश्चयाज्जनिः॥ ननिश्चयंविनायस्माद्दृश्यतेसुखकारणं ॥ स्मृत्यादिवाजनिंगच्छेत्सर्वेषामिहदेहिनां ॥ ४५६॥ सनिश्चयोबुद्धिरूपोमनसःकारणंहियः ॥ हिरण्यगर्भजांबुद्धिंविनानैवात्रसंभवेत्॥ ४५७॥ तटाकादिषुनीराणियथानजलदंविना॥ धीमतांहिधियस्तद्वन्नेश्वरेच्छांविनाक्वचित्॥ ४५८॥

गाहिस्मृतिरूपंज्ञानंतदुभयंमनोमात्रविलासत्वेनव्यवस्थितंप्रसिद्धमितिद्वयोरर्थः॥ ४५४॥ ४५५॥ द्वितीयावस्थानुकूलांयुक्तिमाह सुखेति सुखेच्छातदनुकूलज्ञानोभयात्मकस्यमनसउत्पत्तिर्निश्चयाद्भवति यतःपूर्वानुभवरूपनिश्चयंसंस्कारजनकंविनासुखकारणंलौकिकसुखाभिव्यंजिकाइच्छातदनुकूलंस्मृत्यादिरूपंज्ञानंवाजनिमुत्पत्तिंनगच्छेदितिप्रसिद्धमित्यर्थः ॥ ४५६ ॥ सचनिश्चयोविशेषरूपःसामान्यरूपांहैरण्यगर्भींबुद्धिमुत्पत्तयेऽपेक्षतेइत्याह सनिश्चयइति स्पष्टं ॥ ४५७ ॥ सामान्यरूपायाहैरण्यगर्भबुद्धेर्विशेषधियांहेतुत्वेदृष्टांतमाह तटाकादिष्विति यथातटाकादिजलानांमेघजलंकारणंतथाईश्वरस्यहिरण्यगर्भस्येच्छाकारणभूताबुद्धिर्व्यष्टिजीवधियांकारणमित्यर्थः ॥ ४५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याःकारणत्वमेवस्फुटयति इयमिति यथास्माकंस्वप्नकालिकीधीःस्वप्नकालिकस्यजडाजडप्रपंचस्यहेतुस्तथेयमिश्वरेहिरण्यगर्भेस्थिता बुद्धिर्विश्वस्यकारणमिति ॥ ४५९ ॥ स्वप्नदृष्टांतंविशदयति शयानइति तेषुसृष्टेषु ॥ ४६० ॥ दार्ष्टांतिकेयोजयति एवमितिद्वाभ्यां निग दन्याख्यातंद्वयं निर्भेदइत्यत्रवस्तुतइतिशेषः ॥ ४६१ ॥ ४६२ ॥ फलितमाह अतइति अतोयोगिनःयोगकर्तुर्व्यष्टिजीवस्यैषाबुद्धिरत्र व्यवहारेदृश्यतेसाएषातद्बुद्धिस्तस्यहिरण्यगर्भस्ययाबुद्धिस्तद्रूपैवघटाकाशमठाकाशन्यायेनसामान्यविशेषयोरभेदात् कीदृशीयोगिनो

इयमीश्वरसंस्थानाबुद्धिर्विश्वस्यकारणं ॥ जडाजडस्यकृत्स्नस्ययथानःस्वप्नधीरिह ॥ ४५९ ॥ शयानःपुरुषो यद्वद्बुद्धिमात्रविजृंभणात् ॥ महाभूतानिदेहांश्चसृजतेत्रचतुर्विधान् ॥ तेषुसर्वेषुसर्वत्रस्वयमेवावतिष्ठते ॥४६०॥ एवंहिरण्यगर्भोपिभगवान्भूतभावनः॥ स्वात्मबुद्धिविलासेनसृजतीदंजडाजडं ॥ ४६१ ॥ सृष्ट्वा चविविधान्देहांश्चरस्थिरशरीरिणां ॥ आस्तेतेषुचसर्वेषुनिर्भेदोभिन्नवत्सदा ॥ ४६२ ॥ अतस्तद्बुद्धिरेवैषा बुद्धिर्यैषात्रयोगिनः ॥ कारणंसकलस्यास्यदुःखजालस्यसंसृतौ ॥ ४६३ ॥ तस्याःकारणमीशानःपरमा त्मामहेश्वरः॥ साविद्योब्रह्मणोबुद्धेरेकएवनिरंजनः॥ ४६४ ॥ अहंब्रह्मेतिविज्ञानादविद्याकंचुकक्षये ॥ अ धिदेवात्मनोबुद्धिरानंदात्मनिकेवले॥ विलीयतेयतस्तत्रचिंतनीयासदैवसा॥ ४६५॥

व्यष्टिरूपाबुद्धिः सांसारिकसकलदुःखजालस्यकारणमित्यर्थः ॥ ४६३॥ तुरीययोगावस्थायामुपपत्तिमाह तस्याइतिद्वाभ्यां तस्याहिर ण्यगर्भबुद्धेरविद्याख्यमायोपाधिकब्रह्मोपादानकत्वात्तत्रलयउचितइतिभावः ॥ ४६४ ॥ सर्वविशेषबुद्धिविशिष्टसमष्टिबुद्धेर्निरासेनि मित्तंतुब्रह्मास्मीतिज्ञानमेवेत्याह अहमिति कंचुकभूतत्वग्विशिष्टानामेवव्रीहीणांबीजत्वंनकंचुकहीनानांतथात्मनोबीजत्वप्रयोजकस्या विद्यालक्षणकंचुकस्यमहावाक्यजज्ञानेनक्षयेसतिअधिदेवात्मनोहिरण्यगर्भस्यबुद्धिःकेवलात्मनिलीयतेअतआत्मनस्तल्लयस्थानत्वात्सा समष्टिबुद्धिस्तत्रआत्माधिकरणकत्वेनचिंतनीयाध्यातव्येत्यर्थः ॥ ४६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचिंतनंहिनिदिध्यासनत्वेनब्रह्मसाक्षात्कारहेतुरित्याह एवमिति एवंसमष्टिबुद्धिःशबलात्मोपादानिकेत्याकारांचिंतांकुर्वंतस्तस्ययोगिनःपुण्यपरिपाकात्प्रतिबंधहीनस्यभेदहरंज्ञानंजायते कीदृशस्ययोगिनः अधिदैवाभिजातस्यव्यष्ट्यभिमानंत्यक्त्वासमष्टिरूपेबुधस्यकुशलस्येत्यर्थः अभिजातःस्मृतोन्याय्येकुलीनप्राप्तरूपयोरितिविश्वः प्राप्तरूपोबुधेरम्येइतिच समष्टिदृष्टिरूपोपासनानामतएवब्रह्मसाक्षात्कारांगत्वमितिभावः ॥ ४६६ ॥ एवंविधयोगस्यपरमपुरुषार्थप्रापकत्वंदर्शयति जातेइतित्रिभिः तस्मिन्ब्रह्मविज्ञानेजातेसत्यविद्याया‌अभावस्ततश्चब्रह्मधीरस्मीत्याकारासमष्टिबुद्धिःक्षीयते कारणस्याविद्यात्मकस्याभावात् ॥ ४६७ ॥ ब्रह्मणइति ब्रह्मणोहिरण्यगर्भस्य

एवंचिंतयतस्तस्ययोगिनःशुद्धचेतसः॥ अहंब्रह्मेतिविज्ञानंभेदपर्वतभेदकं ॥ अधिदैवाभिजातस्यजायते पुण्यपुंजतः ॥ ४६६॥ जातेतस्मिन्नविद्यायाःक्षयोभवतिसर्वथा ॥ अविद्यायाःक्षयेनस्याद्ब्रह्मधीःकारणं विना॥ ४६७॥ ब्रह्मणोबुद्धिनाशेथनभवेद्योगिनोपिधीः ॥ बुद्धेरभावेनभवेन्मनश्चतदभावतः ॥ ४६८ ॥ व्यापाराइंद्रियाणांनभवेयुर्दुःखहेतवः॥ तदभावादयंदुःखंनाणुमात्रंचगच्छति ॥ ४६९ ॥ किंतुनित्यंस्वयं भातमानंदात्मानमद्वयम्॥ अवाङ्मनसगम्यंतमाश्चर्यःकुशलोव्रजेत् ॥ ४७० ॥ अहोमायाबलंचित्रमेकस्मिन्भेदवर्जिते॥ नलीयतेलीयतेचस्वयमेकाजगज्जनिः॥ ४७१ ॥

याबुद्धिःसमष्टिरूपातस्यानाशेसतियोगिनोबुद्धिर्व्यष्टिरूपापिनश्यतिततश्चमनइच्छाद्यात्मकंनप्रवर्त्ततेमनःप्रवृत्त्यभावेत्विंद्रियव्यापाराभावस्ततोदुःखाभावइतिद्वयोरर्थः ॥ ४६८ ॥४६९॥ ततश्चब्रह्मभावेनावतिष्ठतेइत्याह किंत्विति किंतुतमात्मानंव्रजेत्यत्प्राप्याकुशलश्चरमदेहआश्चर्यइतिचोच्यतेइति ॥ ४७० ॥ ननुएवंविधयोगेनसर्वप्रपंचंविलाप्यैकस्मिन्मुक्तेसत्ययोगिनामितरेषांसंसारोपलब्धिःकथमितिशंकांमायायादुर्घटतास्वभावमादायपरिहरति अहोइति मायायाबलंप्रभावआश्चर्यं यदेकापिमायाजगज्जनिर्जगतोहेतुभूताएकस्मिन्कालेलयाऽलयव्यवहारयोग्याभवतीति ॥ ४७१ ॥ ॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यौगपद्येनलयालयौयोग्ययोगिनौप्रतिमायायाःस्फुटयति उत्पन्नमिति तदुक्तंपतंजलिना कृतार्थंप्रतिनष्टमप्यनष्टंतदन्यसाधारणत्वादि ति ॥ ४७२ ॥ ननुपातंजलानामात्मभेदाभ्युपगंतॄणांमतेउक्तव्यवस्थोपपत्तावपिसिद्धांतेएकात्मत्वेकथमियमुपपद्येतेतिचेन्न उपाधिभूतांतःकरणभेदेनदृष्टस्यव्यवहारस्यापर्यनुयोज्यत्वादितिदर्शयितुंदृष्टांतमाह एकमिति एकमित्यावर्त्तते तथाचयथागोलकद्वयेएकमपिचक्षुरिंद्रियमेकंदक्षिणगोलकावच्छिन्नमेवसत्वामंसुंदरंयथाभवतितथापश्यतिनेतरद्वामगोलकावच्छिन्नंतथैकोप्यात्मायोग्याख्योयोगिशरीरावच्छिन्नएतांसविलासांमायांनपश्यति अयोगिशरीरावच्छिन्नस्तुतांपश्यति इतिस्थानपदोक्तोपाधिभेदादस्मन्मतेप्युपपन्नमितिशेषः

उत्पन्नंयस्यविज्ञानमहंब्रह्मेतिकेवलं॥ तंप्रत्यदर्शनंयातिनापशन्प्रतियातिसा ॥ ४७२ ॥ एकमेवयथानेत्रं वामंपश्यतिनेतरत्॥ स्थानभेदात्तथैवात्मासर्वभेदविवर्जितः ॥ ४७३ ॥ एकएवचयोग्याख्योनाविद्यांपरि पश्यति ॥ पश्यत्येतामयोग्याख्यःस्थानभेदान्नलीयते ॥ मायासाकल्यतश्चापिसहतेननिरूपणं ॥ ४७४ ॥ एकएवस्वयंज्योतिरानंदात्मागुणोद्वयः ॥ मायायाआश्रयस्तद्वद्विषयश्चमहेश्वरः ॥ माययापिचमायायाःसंबंधादिविवर्जितः ॥ ४७५ ॥

याचसाकल्यतोमायानलीयतेमूढैरुपलभ्यमानत्वात् विवेकिदृष्ट्याचनिरूपणमुपपत्तिंनसहतेविलीयतइतियावत् एषानुपपत्तिःसामायायादुर्घटत्वभावत्वेनसमाधेयेतिवक्ष्यमाणेनसंबंधइतिद्वयोरर्थः ॥ ४७३ ॥ ४७४ ॥ मायायादुर्घटत्वांतराण्यपिदर्शयति एकएव स्वयमितित्रिभिः एकएवप्रकाशरूपआत्माअस्यामायायाआश्रयोविषयश्चभवतीत्यनुपपन्नं लोकेज्ञानादीनामाश्रयविषयभेददर्शनात् तथाऽद्वितीयोपिईशितव्यसापेक्षोमहेश्वरोभवतीत्यनुपपन्नं तथामायासंबंधरहितेआत्मनिमायानिरूपितमाश्रयत्वादिकंमाययैवभवतीत्यनुपपन्नमात्माश्रयादित्यर्थः ॥ ४७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथासत्त्वासत्त्वादिभिरनिर्वचनीयापिभावरूपत्वेनप्रसिद्धाभवतीत्यनुपपन्नं तथाजडापिस्थूलसूक्ष्मस्यजगतोहेतुःकर्त्रीत्यनुपपन्नमित्याह स्वयमिति कर्तृत्वादिकंमायाप्रयुक्तत्वान्मायाशिरस्येवनिक्षिप्यतेइतिस्पष्टं भाष्येपैंगिरहस्यब्राह्मणवाक्यव्याख्यानेइतिभावः॥ ४७६ ॥ गामिनइति तथामरणसुषुप्त्योःस्पष्टमनुपलभ्यमानापिगामिनआगामिनोदेहस्यबीजभूतावर्त्ततेइत्यनुपपन्नंतथाहेतुशून्याअनादिरपिन
॥३३॥ श्यतीत्यनुपपन्नं अनादिभावस्यनाशादर्शनात् तथाविद्वदपेक्षयातन्नाशेपीतरेषांसंसारोननश्यतीति ॥ ४७७ ॥ इत्यादीति आदिपदे नअप्रामाणिक्याअपिबंधमोक्षादिनानावैचित्र्यहेतुत्वग्रहः यस्मादेवंविधंदुर्घटत्वमविवादमतस्तस्यादुर्घटत्वमादायैवसर्वाक्षेपान्परिह

स्वयंचसदसत्त्वादिप्रकारैरपिवर्जिता॥ भावरूपाजडाहेतुःसदसद्वपुषस्तथा ॥४७६॥ गामिनोपिचदेहस्येह तुशून्याचनश्यति॥ नष्टायामपिसंसारोननश्यतिकदाचन॥४७७॥इत्यादिदुर्घटत्वंस्याद्यस्मात्तस्मादियंसदा मायातिदुर्घटेत्येवंवदंतिसकलाजनाः॥ ४७८ ॥ दुर्घटत्वमविद्यायाभूषणंनतुदूषणं ॥ कामिनःकामिताय द्वत्क्रोधिनःक्रोधितायथा॥ भूषणंदुर्घटायाश्चदुर्घटत्वंतथैवच ॥ ४७९ ॥ सुघटस्यभवेद्यर्हिदुर्घटत्वंतदैव तत् ॥ गच्छेद्दूषणतांनैवमविद्यासुघटायतः॥ ४८० ॥ अहोधार्ष्ट्यमविद्यायायदियंस्वविवर्जिते ॥सर्वमा नैर्विरुद्धाचतिष्ठत्येवनतिष्ठति॥ ४८१ ॥

रंतिसर्वेमायावादिनइत्यर्थः ॥ ४७८ ॥ स्वभावभूतस्यदुर्घटत्वस्यभूषणतांसदृष्टांतमाह दुर्घटत्वमिति यथाकामिनोगोपवधूटीदुकूलचो रस्यकामिताक्रोधिनोरुद्रस्यक्रोधिताचभूषणमेवतथाध्यानेनसत्फलदत्वात्तथामायायादुर्घटत्वमपीत्यर्थः ॥ ४७९ ॥ यत्रसुघटत्वमुप पन्नत्वलक्षणंस्वभावभूतंस्यात्तत्रैवक्कचिदंशेदृश्यमानंदुर्घटत्वंदूषणंयथासत्कविकृतिषु मायातुस्वभावेनदुर्घटैवेत्याह सुघटस्येति॥४८०॥ अहोइति धार्ष्ट्यंभूयोभूयोऽनादरेपिसम्मुखीभवनशीलत्वंतदविद्यायांयादृशंतादृशंनान्यत्र यतइयंसर्वप्रमाणैरावरणभंजनफलकैःशतश स्तिरस्क्रियमाणापिस्वसंसर्गपराङ्मुखेचिदात्मनितिष्ठत्येवेतितद्धार्ष्ट्यमद्भुतंचवस्तुतोऽसत्वात्यतइयंतत्त्वविद्दृष्ट्याकालत्रयेपिनतिष्ठतीत्यर्थः ॥३३॥
॥ ४८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह तस्मादिति यस्मादियंमायातत्त्वज्ञानंविनानबिभेतिदुःखयतिचतस्मादेतयाकृतेदुःखमयेसंसारेविरक्तेनसर्वदुःखापहारनिदानलाभाययत्नःकार्यइत्यर्थः ॥ ४८२ ॥ किंतत्सर्वदुःखापहारनिदानमितिचेत्समष्टिबुद्धिलयस्थानस्यात्मनोज्ञानमेवेत्याह हिरण्येति यत्र शांतेआत्मनिहैरण्यगर्भीबुद्धिर्लीयतेतस्यज्ञानेहेपुरुषोत्तमाःप्रयतध्वमिति ॥ ४८३ ॥ तत्त्वविज्ञानोद्यमलक्षणंहितंमातृवदुपदिशंत्याश्चतुर्दश्याअर्थमुपबृंहयति उत्तिष्ठतेतिविंशतिश्लोकैः हेअधिकारिणोयूयंमायाप्रयुक्तंजाड्यंविवेकवैमुख्यंविहायोतिष्ठतविवेकाभिमुखाभवत यतोजाड्यादात्मसंबंधीआत्मविषयकइतियावत्मोहोविस्मृतिलक्षणःसम्यगागतःसंततोवर्ततेइत्यर्थः ॥ ४८४ ॥ निद्रामिति तथा

तस्मादेतत्कृतेदुःखेविरक्तःसततंपुमान् ॥ महायत्नंप्रकुर्वीतसर्वदुःखप्रशांतये ॥ ४८२ ॥ हिरण्यगर्भगाबुद्धिःशांतआत्मनिलीयते ॥ यस्मिंस्तस्यात्मनोज्ञानेयतध्वंपुरुषोत्तमाः ॥ ४८३ ॥ उत्तिष्ठतपरित्यज्यजाड्यंमायाविनिर्मितम् ॥ आत्मनोब्रह्मरूपस्ययतोमोहःसमागतः ॥ ४८४ ॥ निद्रांत्यजतसंयत्तायतःपाटच्चराइमे ॥ कामादयोत्रसर्वस्वंहरंतिभवतांसदा ॥ ४८५ ॥ स्वप्नोयंभवतांभूरिभीतिदःसमुपस्थितः ॥ यतोहंममतावेशाद्दुःखमेतदुपस्थितं ॥ ४८६ ॥ गर्भस्थोहंतथाजातःकुमारोप्यथवायुवा ॥ वृद्धोहंधनवांस्तद्वन्निर्धनोथसुखीतथा ॥ ४८७ ॥ दुःखीसदारोनिर्दारश्चापुत्रःपुत्रवानपि ॥ देहेऽहंतासमावेशादित्याद्येषोधिगच्छति ॥ ४८८ ॥ अहंतातनयाप्येषाममताभूरिदुःखदा ॥ शत्रुर्ममायंदुःसाध्यःसर्वदाप्यपकारकृत् ॥ ४८९ ॥

निद्रांमूलाविद्यारूपांत्यजत संयत्ताःसावधानाभवत यतःसुप्तानांभवतांसर्वस्वंधर्मज्ञानादिरूपंकामादिरूपाःपाटच्चराश्चोराहरंति ॥ ४८५ ॥ तस्यांनिद्रायामेषविपर्ययसंतानात्मकःस्वप्नःप्राप्तोयत्राहंताममताभ्यांसंसारदुःखंप्रतन्यतेइत्याह स्वप्नोयमिति ॥ ४८६ ॥ तत्राहंताघटितंविपर्ययमभिनयति गर्भस्थइतिद्वाभ्यां अयंसत्यज्ञानानंदलक्षणोप्यहंतापिशाच्याविष्टोगर्भस्थत्वादिनाऽत्मानंमन्यतेइतिद्वयोरर्थः ॥ ४८७ ॥ ४८८ ॥ ममताघटितंतमाह अहंतेति अहंतायाःपुत्रीममताप्येषाएवमादिभेदैःसहस्रधायातिप्रसरतीतितृतीयेनाभिसंबंधः अयंममशत्रुर्दुःखेनसाध्योवशंनेयःसर्वदापकारकरत्वात् अयंममसुहृदुपकारकरत्वात् ॥ ४८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्रमिति उपकारेणवशीकृतत्वंमित्रत्वं ॥ ४९० ॥ ममेति इदंममक्षेत्रंवस्त्रादिकंवाऽसारमस्थिरंसारंस्थिरं ममकामोस्तिनास्तिवेतिसंबंधः ॥ ४९१ ॥ उक्तयोरहंताममतयोःफलमाह मरणमिति आभ्यांपुनःपुनर्मरणादिकंप्राप्नुवंश्चक्रवद्भ्रमतीत्यर्थः ॥ ४९२ ॥ निगमयति एवमिति स्पष्टम् ॥ ४९३ ॥ भवतामिति यदिभवतामियंमूलाज्ञानरूपानिद्रास्वयंवामदेवादिवन्नयातिनदूरीभवतितदावरपदोक्तान्कुशलान्प्रत्युपदेशायगच्छतेत्यर्थः ॥ ४९४ ॥ तेचकुशलाःकरुणयायुष्मानुपदेक्ष्यंतीत्याह विनिद्राइति ॥ ४९५ ॥ तेभवतांसाक्षाद्ब्रह्मो

मित्रमेषतथास्माभिर्बहुधोपकृतोयतः ॥ उदासीनोयमस्माकंकुरुतेनप्रियाप्रियम् ॥ ४९० ॥ ममक्षेत्रादिकंतद्वदसारंसारमेववा ॥ कामःक्रोधस्तथालोभोभयंमोहोथवामम ॥ अस्तिनास्तीत्येवमादिभेदैर्यातिसहस्रधा ॥ ४९१ ॥ मरणंचपुनर्देहग्रहणंपुनरेवतत् ॥ गर्भवासादिकंभूयश्चक्रवत्परिवर्त्तते ॥ ४९२ ॥ एवमेषोतिदुःखानांकारणंस्वप्नआगतः ॥ ततोजाग्रतविद्वांसोभयमेतदुपस्थितं ॥ ४९३ ॥ भवतांयदिनिद्रेयंबहुस्वप्नप्रदर्शिका ॥ स्वयमेवनयात्येतान्व्रजंतुकुशलान्वरान् ॥ ४९४ ॥ विनिद्रास्तेमहात्मानःसर्वभूतदयापराः ॥ बोधयिष्यंतिवःप्राप्तानुपायैर्विविधैरपि ॥ ४९५ ॥ नियमान्योगजनकान्योगजान्योगधीविदः ॥ शिक्षयेयुःशनैस्तद्वद्भवतोप्युपदेशकाः ॥ ४९६ ॥

पदेशेऽनधिकारमालोच्यचित्तशुद्धिहेतून्नानाविधसंयमानप्युपदेक्ष्यंतीत्याह नियमानिति नियमोयंत्रणायांस्यात्प्रतिज्ञायांचसंयमेइति विश्वः त्रयमेकत्रसंयमइतियोगसूत्रं धारणाध्यानसमाधिरूपंत्रयमेकविषयकंसंयमपदवाच्यमितितदर्थः तथाचतेमहात्मानोयोगविद्याविदोभवतःप्रतिनियमान्संयमरूपानपिशिक्षयेयुः कीदृशान्नियमान् योगजनकान्योगस्यआत्मसाक्षात्कारप्रयोजकसमाधेराविर्भावहेतून् पुनःकीदृशान् योगजान्योगाभ्यासादेवप्रादुर्भूतान् तथाचोक्तंयोगभाष्ये भूमेरस्याइयंभूमिरनंतरेत्यत्रयोगएवोपायइति संयमदेशोयोगेनैवप्रदर्श्यतइतितदर्थः ॥ ४९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरपदेनाभीष्टंदेवतादितोलभ्यमुच्यतेइतिपक्षेपिवाक्यंधर्मराजमुखेनयोजयति निबोधतेति यथामांवरपाशेनबध्वानचिकेताआत्मानंबुद्धवांस्तथान्येपिहेअधिकारिणोयूयंगुरून्वरपाशैर्वशीकृत्यात्मानंनिबोधतेत्यर्थः ॥ ४९७ ॥ यद्यत्रेति यद्यस्मिन्नधिकारिदेहेबोधोनभविष्यतितदादेहदानानादेहप्रयोजिकाविनष्टिर्हानिःप्राप्स्यतीति ॥ ४९८ ॥ अतिसूक्ष्मेति हेअधिकारिणःअयंब्रह्मबोधरूपोमार्गःसूक्ष्मतमोदुर्लक्ष्यतमोविषमश्चलितुंदुःशकश्चभवतिततःसावधानैर्भवितव्यमित्यर्थः ॥४९९॥ तत्रविषमत्वेदृष्टांतमाह क्षुरस्येति क्षुरपदेनगोक्षुरकंग्रंथकृतोविवक्षितं जातावेकवचनंच धारासंततिः कीदृशस्यक्षुरस्य त्रिशाणकंकंटकत्रयंतेनशितस्यतीक्ष्णस्य तथाचगोक्षुराणांसं

निबोधतमहाभागाजाड्यनिद्रेंविहायहि ॥ आनंदात्मानमद्वैतंवरान्प्राप्यस्वयंप्रभं ॥ नचिकेतायथामत्तःसंप्राप्यविविधान्वरान्॥ ४९७॥ यद्यत्रभवतामात्मबोधोनैवभविष्यति ॥ ततोविनष्टिर्महतीभवतांदेहदैष्यति॥ ४९८॥ अतिसूक्ष्मतमोमार्गोविषमश्चाधिकारिणः॥ ब्रह्मात्मबोधसंज्ञोयमप्रमत्ताभवंत्वतः॥४९९॥ क्षुरस्ययादृशीधारात्रिशाणकशितस्यच ॥ अनेकशतसंख्यस्यमार्गस्थस्यनिरंतरम्॥ ५०० ॥ पत्रेणरहितैर्यद्वत्पुरुषैःसादुरत्यया॥ सिंहव्याघ्रादिसंकीर्णेदुर्गमेत्रमहावने ॥ ५०१ ॥ एवमेतद्धिविज्ञेयमात्मज्ञानंमहात्मभिः ॥ दुर्गमंमुक्तिपुर्यायद्राजमार्गसमंस्मृतम् ॥ ५०२॥ वदंतिकवयस्तद्वद्दृष्टवंतःपुराहिये ॥ एनंमार्गंमहात्मानोमादृशाःकुशलाअपि॥ ५०३ ॥

ततिर्महावनमार्गगतायथापत्रेणवाहनेनहीनैर्दुरत्ययादुरतिक्रमेतिद्वयोःसंबंधः शाणोमाषचतुष्टयेकषणेचेतिविश्वः कषणःकंटकोहिंसकत्वात् धारासैन्यायिमस्कंधसंतत्योरितिच त्रिःशाणेतिपाठेवारत्रयंशाणसंघर्षेणतीक्ष्णस्यक्षुरस्यनापितास्त्रस्यधारासंततिर्मार्गगायदिस्यादित्यभूतोपमेयमितिभाष्यानुसारेणबोध्यम् ॥ ५०० ॥५०१॥ दार्ष्टांतिकेयोजयति एवमिति एवंमोक्षरूपपुरद्वारभूतमात्मज्ञानंगुरुपरमेश्वरानुग्रहरूपवाहनंविनादुर्गमंविघ्नकंटकाक्रांतत्वादित्यर्थः ॥ ५०२ ॥ एतन्मार्गचलनप्रकारोप्येतन्मार्गपांथेभ्योबुधेभ्योज्ञेयइत्याह वदंतीति तद्वत्पूर्वतरवत्येपुराएनंमार्गंदृष्टवंतस्तेकवयःतद्गतिप्रकारंवदंतिमादृशादेवाअपिचेति ॥ ५०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथज्ञानस्यातिसूक्ष्मतांसूचयन्नात्मनःसर्वदृश्यधर्मराहित्यप्रतिपादिकांपंचदशींव्याचष्टे यस्मादितिषड्भिः यस्मादयमात्माऽद्वयत्वानंदरूपोऽवाङ्मनसगोचरोभवतितस्मात्कवयःकुशलाएवतज्ज्ञानमार्गंवदंतीतिपूर्वेणसंबंधः ॥ ५०४ ॥ तत्रावाङ्मनसगोचरत्वंविशदयितुंशब्दादिराहित्येनेंद्रियायोग्यतामाह शब्दइति यस्मात्शब्दादिर्गुणोस्मिन्नात्मनिनविद्यतेतस्मादिंद्रियाग्राह्योयमिति ॥ ५०५ ॥ अव्ययादिपदार्थमाह व्ययइति शनैरवयवापचयक्रमेणयोविनाशःसव्ययइत्युच्यतेसचस्पर्शवतांवाय्वादीनामेवप्रसिद्धइहात्मनितुकथंस्यात् यतोत्रकोपिभूतगुणोनास्तीतिसंबंधः ॥ ५०६ ॥ अतइति यतश्चाव्ययमतएवनित्यं नाशाभावस्यनित्यपदप्रवृत्तिनिमित्तस्यसत्वात् सचनाशा

यस्मादात्मात्रजंतूनामेकएवव्यवस्थितः॥ आनंदात्मास्वयंज्योतिरवाङ्मनसगोचरः॥५०४॥ शब्दःस्पर्शस्तथारूपंरसोगंधश्चपंचमः॥ अस्मिन्नविद्यतेयस्माद्दृश्यतेतेननेंद्रियैः ॥ ५०५॥ व्ययःशनैर्विनाशःस्याद्यथास्पर्शवतामिह ॥ सकेनात्रभवेद्यस्मात्कोपिभूतगुणोनहि ॥ ५०६ ॥ अतोव्ययमिदंब्रह्मनित्यंनाशविवर्जनात्॥ अंतवद्यद्भवेद्वस्तुत्याद्यादिमत्तत्प्रसज्जते ॥ यथाघटादिकंनायमंतवान्पुरुषःपरः ॥ ५०७॥ हिरण्यगर्भबुद्ध्यादेरंतवत्ताप्रकीर्तिता॥ तस्याअपिपरंयत्स्यादव्यक्तंविक्रियायुतं ॥ ५०८॥ अविक्रियस्ततोप्येषपरःपुरुषईरितः॥ध्रुवोननाशमायातिनिर्मायःपरमेश्वरः॥ ५०९ ॥ अनंतोयतएवायंमहद्वच्चनकर्हिचित् ॥ जन्मवांस्ततएवायंपुमान्नित्यउदीरितः॥ ५१० ॥

भावोऽनादित्वेनस्फुटीकृतइत्याह अंतवदिति यद्वस्तुभावरूपमादिमद्भवेत्तदंतवदपिप्रसज्जतेभवति अयंपुरुषस्त्वनादिःकथमंतवान्स्यादितियोजना ॥ ५०७ ॥ सआत्माहिरण्यगर्भीयबुद्धेर्महत्पदोक्तायाआद्यंतवत्याःपरोध्रुवत्वाच्चकूटस्थत्वलक्षणात्परिणामिन्याप्रकृतेश्चपरइत्याह हिरण्येति तस्याहिरण्यगर्भबुद्धेःपरंयदव्यक्तमव्याकृतंततोप्ययमविक्रियत्वात्परोभवतीत्यतोध्रुवइत्युक्तइतिद्वयोरर्थः ॥ ५०८ ॥ ५०९ ॥ फलितमाह अनंतइति यतोनंतोभवतियतश्चमहद्वद्धिरण्यगर्भबुद्धिवज्जन्मवान्नभवतिततोनित्यइति ॥ ५१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णितात्मज्ञानफलमाह एनमिति स्वयुक्तिभिःश्रुत्यनुकूलतर्कैः मत्वाविचार्य ॥ ५११ ॥ अध्यायांत्ययोस्तात्पर्यार्थमाह देशेति यःपुमान्देशकालवस्तुसंबंधिभिर्भेदैःशून्यस्तस्यज्ञानादमृतत्वंभवेदेतन्नाश्चर्यंयतोस्यात्मनःप्रतिपादकोयोयंग्रंथःअस्यकीर्त्तनादितोप्यर्चिरादिमार्गेणब्रह्मलोकलाभोभवतीतिद्वयोःसंबंधः ॥ ५१२ ॥ ५१३ ॥ एतद्ग्रंथश्रवणादितोयदनंतफललाभउक्तस्तत्रप्रमाणमेतद्वाक्यद्वयंबोध्यमित्याह श्रवणादिति यावदित्यवधारणे ॥ ५१४ ॥ किंतद्वचनद्वयमित्याकांक्षायांतत्पठति नाचिकेतमिति नाचिकेतंनचिकेत

एनंगुरुमुखात्श्रुत्वातथामत्वास्वयुक्तिभिः॥ संसारमृत्युमुखतोमुच्यतेत्रपुमान्सदा ॥ ५११ ॥ देशकालस्वरूपाणांभेदशून्यःपुमान्हियः॥ तज्ज्ञानान्मृत्युमुखतोमुच्यतेयन्नतद्भवेत् ॥ ५१२ ॥ आश्चर्यंकारणंयस्मादस्यग्रंथस्वकीर्त्तनात् ॥ श्रवणाच्चभवेद्ब्रह्मलोकोगम्योर्चिरादिना॥ ५१३॥ श्रवणात्कीर्त्तनाद्यावन्मननाच्चतथाभवेत्॥ अनंतफलसंप्राप्तिरितस्माद्वचनद्वयात् ॥ ५१४॥ नाचिकेतमुपाख्यानंमृत्युप्रोक्तंसनातनं॥ उक्त्वाश्रुत्वाचमेधावीब्रह्मलोकेमहीयते ॥ ५१५ ॥ यइमंपरमंगुह्यंश्रावयेद्ब्रह्मसंसदि ॥ प्रयतःश्राद्धकालेवातदानंत्यायकल्पते॥ ५१६॥ एवंसंग्रहतोब्रह्मप्रोच्यप्रणवनामकं ॥ विस्तरेणचतद्वक्तुमिदमाहयमोवचः॥५१७॥ नायमिंद्रियतोलभ्योनचिकेतःकदाचन॥ आनंदात्मामयायस्तेसंग्रहात्प्रागुदीरितः ॥ ५१८॥

सालव्धंयमेनप्रोक्तमिदंवल्लीत्रयरूपं ॥ ५१५ ॥ यइममिति ब्रह्मसंसदिब्राह्मणसभायां प्रयतःपवित्रः तत्श्राद्धं ॥ ५१६ ॥ इतिकाठकप्रथमाध्यायव्याख्या द्वितीयाध्यायार्थप्रदर्शनमवतारयति एवमिति एवंप्रणवप्रतीककंप्रणवालंबनकंवाब्रह्मसंक्षेपेणवल्लीत्रितयात्मकप्रथमाध्यायेप्रतिपाद्यतदेवविस्तरेणप्रतिपादयितुमिदंवल्लीत्रितयात्मकद्वितीयाध्यायरूपंवचोयमःप्राहेत्यर्थः ॥५१७॥ तत्रात्मज्ञानप्रतिबंधकमिंद्रियाभिमानरूपंप्रदर्शयंत्याःपरांचीत्याद्यायाश्चतुर्थवल्लीप्रथमायाःपूर्वार्द्धरूपायाऋचोर्थमाह नायमितिद्वादशभिः हेनचिकेतःयोमयावर्णितआत्मासइंद्रियैर्ग्राह्योनभवतीतिप्रतिज्ञा ॥ ५१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुतयेंद्रियाणांबहिर्मुखत्वेनसर्जनलक्षणंहिंसनप्रयुक्तमशक्तत्वमाह इंद्रियाणीत्यादिना विभुःस्वतंत्रईश्वरइंद्रियाणिखपदोक्तान्यात्मनःसकाशात्परंभिन्नंप्रतियांतिगमनपराणियतःसस्रजेसृष्टवानतस्तानिबहिर्मुखानिहिंसितानिमृतप्रायतांनीतानीवास्माभिर्विवेकिभिर्ज्ञायंतेइत्यर्थः ॥ ५१९ ॥ बहिर्मुखीकरणेनहिंसनमिवभवतीत्यत्रलौकिकंदृष्टांतमाह राजेति यथाराजासामंतंपुराध्यक्षंप्रतिदूरस्थदेशाधिकारदानेनांतरस्यस्वांतरंगाधिकारस्यापहरणेनचतंसामंतंहिंसितवानिवभवतीत्यर्थः ॥ ५२० ॥ दार्ष्टांतिकेयोजयति आनंदा

इंद्रियाणिपरंयांतिस्वात्मनःसस्रजेविभुः ॥ बहिर्मुखान्यतस्तानिहिंसितानीवभांतिनः ॥ ५१९ ॥ राजायथात्रसामंतंबहिर्विषयदानतः ॥ आंतरस्यापहरणात्तंसहिंसितवानिव ॥ ५२० ॥ आनंदात्मानमंतस्थमदत्वाविषयंतथा ॥ शब्दादीन्दत्तवान्यस्मात्तस्माद्धिंसितवानिव ॥ ५२१ ॥ विरोधिनोयथाराज्ञोबहिर्विषयवासिनः ॥ सामंतानुपहन्युस्तेच्छिद्रेच्छिद्रेसमीपगान् ॥ ५२२ ॥ इंद्रियाणितथैतानिबहिर्विषयगानिहि ॥ आनंदात्मविरोद्धारोहन्युःकामादयस्त्विह ॥ ५२३ ॥ इंद्रियैरतएवायंशब्दादीन्परिपश्यति ॥ नानंदात्मानमंतस्थंमहाराजसमंसदा ॥ ५२४ ॥

त्मानमिति परमेश्वरेणेंद्रियेभ्यआनंदात्मरूपोविषयोनदत्तःकिंतुबाह्याःशब्दादयएवविषयतयादत्ताअतस्तानींद्रियाणिहिंसितानीवेत्युक्तमित्यर्थः ॥ ५२१ ॥ स्वयंतानिनहतानिकिंतुपरैर्हननयोग्यतांनीतानीत्याकारमिवपदस्वारस्यंसदृष्टांतमाह विरोधिनइतिद्वाभ्यां यथाराज्ञःसकाशाद्दूरविषयेदेशेवसतोवैरिणांसमीपगतान्सामंतान्राज्ञोविरोधिनोवैरिणश्छिद्रंलब्ध्वाउपहन्युस्तथाविषयगतानींद्रियाणिरागद्वेषादयोऽद्वैतात्मविरोधिभेदोपजीविनउपहन्युरितिद्वयोरर्थः ॥ ५२२ ॥ ५२३ ॥ फलितमाह इंद्रियैरिति यथादूरस्थसामंतानांराजदर्शनंदुर्लभंतथाबहिर्मुखेंद्रियाणामांतरात्मदर्शनमित्यर्थः ॥ ५२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्विन्द्रियाणामित्थंभावेपिमनसःकागतिरितिचेच्छृणु द्विविधंमनःसकामंनिष्कामंचतत्राद्यमिंद्रियकिंकरत्वात्तत्समानगतिकंद्वितीयंत्वि द्रियनिरोधादात्मसाक्षात्कारसाधनमितिसूचयंत्याद्वितीयायाउत्तरार्द्धरूपायाअर्थमाह इंद्रियाणामितिपंचभिः तत्सकामंमनइंद्रिया ण्यनुसरतितेषामन्तर्निरोधेतुमनोनिष्कामंबहिर्नगच्छति ॥ ५२५ ॥ इंद्रियाणामिति इंद्रियाणामंतर्नयनंनिरोधरूपंनृणांदेहाभिमानिनां दुर्भणंकथितुमप्यशक्यंतत्करणंदूरतइतिभावः कश्चिदेवमनुष्याणांसहस्रेषुमध्येशमादिमांस्तानींद्रियाण्यंतःस्थापयेदित्यर्थः ॥ ५२६ ॥ इंद्रियनिरोधेचनिर्द्वारंमनोंतरेवशाम्यतीत्याह तेषामिति तेषामिंद्रियाणां असंश्रयंबाह्यालंबनरहितं ॥ ५२७ ॥ तत्रदृष्टांतउच्यते नवेति

इंद्रियाणांबहिर्भावेमनोपिबहिरेतितत् ॥ तेषामंतरवस्थानेबहिर्नैतिमनःक्वचित् ॥ ५२५ ॥ इंद्रियाणांस्वदेहां तर्नयनंदुर्भणंनृणां ॥ धीरःकश्चिन्नयेत्तानिस्वांतःशांत्यादिसंयुतः ॥ ५२६ ॥ तेषामंतरवस्थानेबहिर्गंतुमश क्नुवत् ॥ द्वाराभावान्मनस्तिष्ठेद्देहस्यांतरसंश्रयं ॥ ५२७ ॥ नवद्वारेयथाबद्धकपाटेमर्कटःस्थितः ॥ गृहेविचे ष्ट्यतत्रैवश्रांतःसन्नवतिष्ठते ॥ ५२८ ॥ अंतर्नीतंमनस्तद्वच्छास्त्रसंस्कारसंस्कृतं ॥ मोक्षेच्छोःकुरुतेस्वात्मसा क्षात्कारमसंशयं ॥ ५२९ ॥ अमीभिरिंद्रियैर्नित्यंबहिर्विषयचारिभिः ॥ आत्मनोन्यांस्तुशब्दादीनिहवामुत्र वापिये ॥ विषयानभिगच्छंतिविवेकज्ञानवर्जिताः ॥ ५३० ॥ विस्तीर्णस्यात्रतेमृत्योर्व्याधिवैर्यादिरूपिणः ॥ देहेदेहेवशंयांतिविवशादीनचेतसः ॥ मत्स्यायथात्रजालेनमृत्युंयांतिविमोहिताः ॥ ५३१ ॥

स्पष्टम् ॥ ५२८ ॥ एवंनिरुद्धंमनःश्रवणादिसंस्कृतमात्मतत्त्वाकारतांभजतइत्याह अंतर्नीतमिति मोक्षेच्छोर्मुमुक्षोः ॥ ५२९ ॥ तथाचें द्रियसंगरूपआत्मदर्शनप्रतिबंधोयैर्नदूरीकृतस्तेसंसारेपतंतिविवेकिनस्तुतंप्रतिबंधमपनीयमुच्यंतेइतिप्रदर्शिकायास्तृतीयायाअर्थमाह अ मीभिरितिचतुर्भिः इहलोकेअमुत्रपरलोकेवायेसंतितान्शब्दादीन्विषयानात्मभिन्नान्येविवेकहीनाइंद्रियैरभिगच्छंतिभजंतेतेविस्तीर्ण स्यप्रसृतस्यव्याध्यादिनानारूपस्यमृत्योःपुनःपुनर्वशंयांतिजालबद्धामत्स्याबंधकस्येवेतिद्वयोःसंबंधः ॥ ५३० ॥ ५३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवेकिकृत्तमाह मृत्युपाशेतिद्वाभ्यां अथविवेकिनस्तुहिरण्यगर्भादीनूस्तंबपर्यंतान्देहिनउक्तदशान्निरीक्ष्यमोक्षमेवनित्यंविज्ञायानित्यंकर्मफलंब्रह्मलोकांतंकदाचिन्नप्रार्थयंतेनेच्छंतिहेनचिकेतःत्वद्वत्पण्डितत्वादितिद्वयोःसंबंधः॥ ५३२ ॥ ५३३॥ उक्तप्रतिबंधहीनैर्ज्ञेयमात्मानंनानालक्षणैःप्रदर्शयतांयेनेत्यादिवाक्यानामर्थमाह दशेंद्रियाणामित्यादिना अयंप्रमातादशानांज्ञानकर्मेन्द्रियाणांव्यापारानूदर्शनादिरूपांश्चेतसाचित्ताख्यांतःकरणेनाधिगच्छत्यनुसंदधातीतिप्रसिद्धंतच्चेतश्चित्तंसविषयंयेनस्वाभाविकेनज्योतिषासाक्षिसंज्ञेनात्रसंघातांतः

मृत्युपाशवशंप्राप्तानूस्थिरजंगमदेहिनः॥ ब्रह्मादीन्स्तंबपर्यंतान्निरीक्ष्याथविवेकिनः॥५३२॥ ध्रुवंविज्ञायमोक्षंतमध्रुवंकर्मणःफलं॥ प्रार्थयंतेकदाचिन्नत्वद्वद्धौतमपंडिताः ॥ ५३३॥ दशेंद्रियाणांव्यापारानधिगच्छतिचेतसा॥ विषयग्राहकंचेतोयेनत्यत्राधिगच्छति॥ ५३४ ॥ स्वभावाज्ज्योतिषातत्तुधर्मादिभ्यःपरंत्वया॥ पृष्टमात्मस्वरूपंयदेतदेवनचापरं ॥ ५३५ ॥ परिशिष्टंकिमत्रास्तितस्मादात्मस्वरूपिणः ॥ कालत्रयांतरेयत्तुयच्चकालत्रयात्मकं॥ तत्सर्वमत्रचाध्यस्तंरज्जौसर्पादिकंयथा॥ ५३६ ॥ येनजागरणंतद्वत्स्वप्नंचपरिपश्यति॥ चेतसःसाक्षिणासोयमात्माज्ञेयःसदात्वया॥ ५३७॥ विभुत्वाद्यःपुरात्मातेमहानेवमयेरितः॥ यस्यविज्ञानतोधीरानशोकंयांतिकर्हिचित् ॥ ५३८ ॥ यइमंमध्वदंवेदत्यात्मानंजीवमंतिकात् ॥ ईशानंभूतभव्यस्यनततोविजुगुप्सते॥ ५३९॥

स्थितेनाधिगच्छतितत्साक्षिसंज्ञंज्योतिस्त्वेतदेव एतत्किं यत्त्वयाधर्माधर्माद्यतीतत्वोपलक्षितमात्मरूपंपृष्टमितिद्वयोरर्थः ॥ ५३४ ॥५३५॥ तस्याद्वितीयतामाह परिशिष्टमिति अत्रप्रपंचेवर्त्तमानमेतस्मात्साक्षिरूपिणःसर्वांतरात्परिशिष्टंभिन्नसत्ताकंकिमस्तिनकिंचिदपि यतःकालत्रयावच्छिन्नंकालत्रयंचएतत्सर्वमत्रसाक्षिण्यध्यस्तंकल्पितंभवतियथारज्जौसर्पदंडजलधारादिकमित्यर्थः ॥ ५३६ ॥ चतुर्थ्यर्थमाह येनेति येनचेतसःसाक्षिणाअवस्थाजागरणादिकाःपश्यतिसएवपूर्वोक्तोमहानात्मायस्याद्वितीयत्वलक्षणंमहत्त्वंजानंतःशोकंकर्तृत्वादिरूपंतरंतीतिद्वयोरर्थः ॥ ५३७ ॥ ५३८ ॥ पंचमींपठति यइममिति ॥ ५३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्याअर्थमाह अंतिकइतिद्वाभ्यां अयमात्मापुमान्पुरुषोधियःसाक्षितयासर्वेषामंतिकेसमीपेभवति कीदृशः कर्मफलानांसारघमधुसमानांभोक्ताऽत्तातमेतंभूतभव्योपलक्षितसर्वविश्वाधिपतित्वेनयोविजानातिससंशयंत्राणेच्छाप्रयोजकंनिंदांप्रतिकूलबुद्धिप्रयुक्तांकिंकुर्वीत अपितुनकुर्वीत अद्वितीयात्मवित्त्वादितिद्वयोरर्थः अत्रेदंबोध्यं गुपेर्निन्दायामितिस्मरणान्निंदाजुगुप्सापदस्यमुख्योर्थः संशयस्तुविचिकित्सापदइवव्युपसर्गप्रसादलभ्योभाष्यकारोक्तानुसरणयोक्तइति ॥ ५४० ॥ ५४१ ॥ एवंत्वंपदार्थशोधनप्रधानंवाक्यद्वयंव्याख्यातमथ षष्ठ्यादिकृक्चतुष्टयस्यतत्पदार्थशोधनप्रधानस्यार्थंदर्शयति हिरण्यगर्भइत्यादिना यस्मात्सहिरण्यगर्भोजातः सकः योनीरतः अप्प्रधान

अंतिकेस्तिसदैवात्माजीवरूपोधियःपुमान्॥ फलानांकर्मणांभोक्तासर्वदामधुरूपिणां॥५४०॥ योविजानातितत्रायंसंशयंकेनहेतुना॥ निंदांवापिचकेनायंकुरुतेकस्यचित्स्वयं ॥ जानन्नात्मानमद्वैतंप्रपंचरहितंशिवं ॥ ५४१ ॥ हिरण्यगर्भोभगवान्जातोयस्मान्महात्मनः ॥ यःपूर्वंतपसोजातःकृच्छ्रचांद्रायणादिकात् ॥ ब्रह्मांडपिंडजनकादखिलादपिनीरतः ॥ ५४२ ॥ ब्रह्मणोजनकंयत्तुचतुर्विधशरीरगम् ॥ पश्यदास्तेखिलांबुद्धिंतदेतद्ब्रह्मविद्धिभो ॥ सर्वबुद्धीःप्रविश्यैवंनभोवत्सर्वतोगतम् ॥ ५४३ ॥ देवतातपसःपूर्वंयाजाताप्राणरूपिणी॥ अदितिःसर्वतोजातमन्नमत्तियतस्त्विदम्॥ ५४४ ॥

स्थूलभूतसमुदायाद्ब्रह्मांडारंभकात्पूर्वंजातः कुतः तपसःपूर्वजन्मानुष्ठितकृच्छ्रादिसमुच्चितोपासनाबलादित्यर्थः ॥ ५४२ ॥ ब्रह्मणइति ब्रह्मणस्तस्यहिरण्यगर्भस्यापिजनकंयत्तत्त्वंसर्वशरीरेषुसर्वबुद्धिरूपांगुहांप्रविश्याखिलपदार्थाकारांतांबुद्धिंसाक्षितयापश्यन्सदास्तेतदेवतत्पदार्थंब्रह्मेत्यर्थः श्रुतौतुविभक्तिवचनलिंगव्यत्ययश्छांदसः ॥ ५४३ ॥ सप्तम्याअर्थउच्यते देवतेति यादेवताहिरण्यगर्भाख्यात्तपसोऽतीतकल्पानुष्ठिताद्धेतोःपूर्वंविराडादितःप्रथमंजाता कीदृशी प्राणरूपिणीअशनायाव्याप्तप्राणशरीरा अतएवादितिरितितस्यानाम सर्वमन्नंस्थूलप्रपंचात्मकमत्तिभुंक्तेइतिव्युत्पत्तिसमन्वयादित्यर्थः ॥ ५४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेति पुनःकीदृशीसादेवता सर्वेदेवायस्याविभूतयः कोसावेकोदेवःप्राणइतिश्रुत्यंतरात्तथायादेवताविविधव्यष्टिप्राणिष्वनुगमात्सर्वभूतमयीसर्वप्राणितादात्म्यमापन्नाभवतिसादेवतापियस्यपरमेश्वरस्यरूपंध्येयाकारोभवतितदेवत्वत्पृष्टंब्रह्मेत्यर्थः ॥ ५४५ ॥ तथाविराडपियस्यरूपंतत्सर्वांतरंब्रह्मविद्धीतिप्रदर्शयंत्याअष्टम्याअर्थमाह अदितेरितिपंचभिः अदितेरुक्तरूपायाःसकाशाज्जायमानोयोविराट् कीदृशः अग्निरूपत्वेनवर्णितः अतएवारण्योरुत्तराधरमथनकाष्ठयोर्निहितोयज्ञेप्रादुर्भूतः ॥ ५४६ ॥ नकेवलंयज्ञएवप्रादुर्भूतःकिंतुयोगिनामंतरपीतिसदृष्टांतमाह गर्भमिति यथागर्भिण्योगर्भंदधतिधारयंतिस्नेहप्रयुक्तपथ्याशनादिनातद्वदयंमहेश्वरोविराडग्निरूपोयाज्ञिकैररणिभ्यांधृ

सर्वदेवमयीतद्वत्सर्वभूतमयीतथा ॥ जायतेविविधानंतप्राणिभेदसमाश्रयात् ॥ तद्रूपमपियत्तत्त्वंब्रह्मजानीहिसुव्रत ॥ ५४५ ॥ अदितेर्जायतेयोयंविराडग्निस्वरूपधृत् ॥ अरण्योर्निहितोनित्यमधरोत्तरसंज्ञयोः ॥ ५४६ ॥ गर्भंदधतिगर्भिण्योयद्वत्स्नेहसमन्विताः ॥ अरणिभ्यांधृतस्तद्वदग्निरित्थंमहेश्वरः ॥ ५४७ ॥ लोकेषुसकलेष्वेषस्थितोनिद्राविवर्जितैः ॥ ईड्योदेवैर्मनुष्यैश्चस्वर्गमोक्षाभिकांक्षिभिः ॥ ५४८ ॥ अयमप्यात्मनोरूपंसर्वदेवादितिर्यथा ॥ स्वरूपतस्तुतद्रूपंनवक्तुमपिशक्यते ॥ ५४९ ॥ अध्यात्ममधिदैवंवासर्वभेदविवर्जितं ॥ ततएतैःप्रकारैस्त्वंविजानीहिमहामते ॥ ५५० ॥

तः इत्थंतथैवनिद्राविवर्जितैर्योगिभिरंतर्धृतः कीदृशः सर्वभूतेषुस्थितः स्वर्गमोक्षकांक्षिभिर्देवैर्मनुष्यैश्चप्रतिदिनमीड्यइतिद्वयोःसंबंधः ॥५४७॥ ५४८ ॥ अयमिति अयमुक्तरूपोविराडप्यदितिपदोक्तहिरण्यगर्भवत्परमात्मनोरूपत्वेनध्येयइतिशेषः ननुसाक्षादेवतदीयंज्ञेयंरूपमुच्यतामितिचेन्न तस्यवागाद्यगोचरत्वादित्याह स्वरूपतस्त्विति तस्यज्ञेयस्यरूपंस्वरूपतःस्वभावतोवक्तुमशक्यं अध्यात्माद्युपाधिप्रयुक्तसर्वभेदराहित्यात् नहिजात्यादिविशेषरहितंशब्दःसाक्षाद्वक्तुंक्षमते ततएतैःसविशेषरूपैर्विराडादिभिःप्रकारैरनंतत्वादिरूपसादृश्यद्वारातदुपलक्षणभूतैस्त्वंतत्स्वरूपंजानीहीतिद्वयोरर्थः ॥ ५४९ ॥ ५५० ॥. ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवम्यर्थंदर्शयति यस्मादितिद्वाभ्यां यस्मात्प्राणाख्याद्रूपादधिदैवंवाय्वात्मकात्सूर्यादिकंतेजउदेतितत्रैवास्तंचगच्छति तथाचश्रुत्यंतरं प्राणाद्वाएषउदेतिप्राणेऽस्तमेतीति तथासर्वेदेवावागादयोऽग्न्यादयश्चयत्रप्राणेरथचक्रनाभावरवत्समर्पिताःस्थिताः सर्वंप्राणेऽर्पितमितिश्रुत्यंतरात् तथायमेनंप्राणंबलेनातिक्रम्यकोपिगंतुंनसमर्थःसएषवर्णितःप्राणोपियस्यब्रह्मणोध्येयंरूपंतदेवब्रह्मविद्धीतिद्वयोरर्थः ॥ ५५१ ॥ ५५२ ॥ दशम्याऐक्यपरत्वान्महावाक्यरूपायाअर्थंदर्शयति यदेवेहेति यच्चिद्वस्तुइहदृश्यमानेषुमदीयादिशरीरेषुसर्वबुद्धिसाक्षितयावर्त्ततेतदेवामुत्रपरोक्षेपुईशादिशब्दप्रवृत्तिनिमित्तेषुअव्याकृताद्युपाधिषुवर्त्ततेनिर्भेदत्वात्यच्चामुत्रईशादिषुवर्त्ततेतदेवेहदृश्यमानेषुवर्त्ततेनिर्भेदत्वादे

यस्माद्रूपादुदेत्येषयत्रचास्तंनिगच्छति ॥ सूर्यचंद्रादिकंतेजोयत्रदेवाश्चसंत्यमी ॥ ५५१ ॥ रथचक्रेत्वरायद्वत्सर्वदैवसमर्पिताः ॥ समर्थोपिनकोप्येनमतिक्रम्यव्रजेत्परं ॥ एतद्ब्रह्ममहाभागनचिकेतोवधारय ॥ ५५२ ॥ यदेवेहशरीरेषुममतेपिपरस्यवा ॥ सर्वबुद्धिप्रचाराणांयःसाक्षीभेदवर्जितः ॥ ५५३ ॥ तदेवामुत्रविज्ञेयमीशेसूत्रेविराज्यपि ॥ यदमुत्रतदेवेहचैतन्यंभेदवर्जितं ॥ ५५४ ॥ यथानभसिनैवास्तिभेदःकोप्येकरूपिणि ॥ चैतन्येतद्वदेवात्रभेदःकोपिनविद्यते ॥ ५५५ ॥ निर्भेदंगगनंयद्वद्भिद्यतेत्रगृहादिना ॥ ईशादिनातथैवैतच्चैतन्यमपिभिद्यते ॥ ५५६ ॥ गंधर्वनगरंयद्वदसदेवविभेदकृत् ॥ कालत्रयेपिखस्यैवंविश्वमप्यात्मनोभवेत् ॥ ५५७ ॥ अतोनानेवनैवास्तिब्रह्मनानाकुतःपुनः ॥ संसारादपिसंसारंघोरदुःखप्रदंपुमान् ॥ व्रजेद्विलोकयेद्यस्तुनानेवचकदाचन ॥ ५५८ ॥

वेतिद्वयोरर्थः ॥ ५५३ ॥ ५५४ ॥ निर्भेदत्वंदृष्टांतेनस्फुटयति यथेति एकरूपिणिअखंडे ॥ ५५५ ॥ उपाधिदर्शिनोभ्रांताएवतत्रभेदंपश्यंतीत्याह निर्भेदमिति ईशःअव्याकृतंतत्प्रभृत्युपाधिना ॥ ५५६ ॥ वस्तुतोऽसतामप्युपाधीनांभेदभ्रमहेतुत्वेदृष्टांतमाह गंधर्वेति यद्वत्कालत्रयेऽसदपिगंधर्वनगरंखस्यविभेदकृत्तथाविश्वंजडजातमात्मनइत्यन्वयः ॥ ५५७ ॥ अतइति अतोऽखंडत्वादत्रब्रह्मणिनानेवकल्पितंनानात्वमपिविद्वद्दृष्ट्यानास्तिएतद्ब्रह्मनानापरमार्थतोनानात्ववस्तुकुतःस्यादित्यर्थः योत्रब्रह्मणिकल्पितंनानात्वंपश्यतिसनानायोनिभ्रमणलक्षणंसंसारंयातीति ॥ ५५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्तुसत्यमेवात्रभेदंपश्यतिसनरकमेवयातीत्याह नानैवेति फलितमाह एकधैवेति एकधाऽखंडत्वेन ॥५५९॥ एकादश्यर्थंदर्शयति तस्यापीतिपङ्क्तिः अपिःसंभावनायां तस्यात्मनोदर्शनेकारणंवाह्यंबहिर्मुखंकिंचिदपिनसंभाव्यते यतइंद्रियाणिपराचोबाह्यस्यैवार्थस्यग्रहणशीलानीत्युक्तंप्रथमाध्यायेइत्यर्थः ॥५६०॥ मनसैवेति ततोबहिरिंद्रियायोग्यत्वाद्ब्रह्मवादिनालब्धब्रह्मोपदेशेनाधिकारिणामनसानिष्कामेनैवाद्वितीयब्रह्मावरणमपनेयमित्यर्थः॥५६१॥ तस्यभेदराहित्यमेवस्फुटयति नहीत्यादिना गगनवदेकरूपेब्रह्मणिस्वाभाविकंनानात्वंनसंभवतीत्यर्थः ॥५६२॥ परतइति परतउपाधितआरोपितोयोभेदःसोभेदरूपएवबोध्यः औपाधिकभेदस्योपाधिमात्रनिष्ठतायाःप्रसिद्धत्वा

नानैवेतिचयोमंदःपश्येत्पापविमोहितः॥ नरकान्नरकंसोयंयातिदुःखप्रदंबहु॥ एकधैवततोब्रह्मद्रष्टव्यंभेदवर्जितम् ॥ ५५९ ॥ तस्यापिदर्शनेयत्स्यात्कारणंतन्नकिंचन॥ बाह्यंयेनपराग्ग्राहीणींद्रियाणीतिकीर्तितं ॥ ५६० ॥ मनसैवततोब्रह्मज्ञातव्यंब्रह्मवादिना ॥ सर्वभेदविनिर्मुक्तमानंदात्मस्वरूपकम् ॥ ५६१ ॥ नहिब्रह्मणिनानात्वंविद्यतेस्वयमेवतत् ॥ एकरूपेकथंतत्स्यात्सर्वदागगनोपमे ॥ ५६२ ॥ परतोयत्रनानात्वंतदनानात्वमीरितं॥ यथैवगगनेतत्स्यान्निर्मितंहिघटादिना ॥ ५६३ ॥ अपिभिन्नंनकिंचित्तुसदस्तिब्रह्मणःसदा॥ असताकेनभेदःस्यात्तेनस्वात्मस्वरूपतः॥ ५६४॥ तस्मान्निर्द्वैतमेवैतद्द्रष्टव्यंमनसैवहि ॥ शास्त्रसंस्कारसूक्तेनहृदिस्थेनात्मनःसदा॥ यतोनानात्वदृष्टौस्याद्दोषःप्रागेवकीर्तितः॥५६५॥ अयमात्माजीवरूपोमनुष्याणांहृदिस्थितः॥ अंगुष्ठमात्रंहृदयंतेषांप्रायःप्रकीर्त्तितं॥ अंगुष्ठमात्रस्तेनायंहृदयस्थोभवेत्सदा॥ ५६६ ॥

त् यथाघटमठादिप्रयुक्तोगगनभेदोनगगनंस्पृशतिकिंतुघटादिष्वेवतिष्ठतीत्यर्थः ॥ ५६३ ॥ किंचोपाधयोपिवस्तुतोनब्रह्मणःपृथक्सत्ताकाइत्याह अपिभिन्नमिति किंचिदपिब्रह्मणोभिन्नंविविक्तंसत्सत्ताशालिनभवति तथाचासतान्नृश्रृंगसाम्यंगतेनतेनोपाधिनासर्वेषामात्मभूताद्ब्रह्मणःसकाशाद्भेदःकथंस्यादित्यर्थः ॥ ५६४ ॥ फलितमाह तस्मादिति तस्मात्शास्त्रसंस्कारवत्त्वेनसूक्तंसुष्ठूपदिष्टंतत्तथातेनमनसैवनिर्द्वैतमात्मरूपंद्रष्टव्यं भेददर्शनेदोषस्योक्तत्वादित्यर्थः ॥ ५६५ ॥ द्वादश्यर्थमाह अयमितिद्वाभ्यां अयमद्वितीयत्वेनवर्णितआत्माजीवरूपेणमनुष्याणांहृदिस्थितस्तस्यचमनुष्यहृदयस्यप्रायेणांगुष्ठपरिमितत्वात्सोपितदवच्छेदेनांगुष्ठमात्रइत्युक्तइत्यर्थः ॥ ५६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंगुष्ठमात्रइति तंत्द्दयांतःस्थमंगुष्ठमात्रपुरुषंसर्वेशानरूपेणयोजानीयात्तस्यजुगुप्सापदोक्तंसंशयादिकंनभवतीत्यर्थः ॥ ५६७ ॥ त्रयोदश्यर्थमाह अंगुष्ठेतिद्वाभ्यां अंगुष्ठमात्रःसर्वेशानःस्वयंज्योतिर्निर्धूमाग्निवद्देदीप्यमानःअद्यश्वःपदोपलक्षितकालत्रयेप्येकरूपस्तिष्ठतीत्यर्थः ॥ ५६८ ॥ नास्येति अस्यात्मनश्चिदेकरूपस्यकुत्रापिदेशेकालेवाभेदोनास्ति यथासर्वत्रजलंद्रवादिरूपमेवनभिन्नमित्यर्थः ॥ ५६९ ॥ चतुर्दश्याअर्थंदर्शयति उच्चैरिति यथापयोजलंमेघेभ्यउच्चैरुच्चेषुपर्वतशिखरादिदेशेषुनिपतितंसन्नीचैर्यातिविशीर्यतेइतियावत् एवंभेदवान्भेदेनदृष्टआत्मापिबोध्यः किंतस्यभवतीतिचेत्शृणु भेदमाव्रजेदिति भेदंविदारणंनानायोनिभावंगच्छेदितिभाष्यानुसारेणार्थः

अंगुष्ठमात्रःपुरुषोमध्येस्तित्द्दयस्यहि ॥ ईशानोभूतभव्यस्ययज्ज्ञानात्संशयादिन ॥ ५६७ ॥ अंगुष्ठमात्रईशानःस्वयंज्योतिर्त्द्दिस्थितः ॥ कालत्रयेप्येकरूपोनविपर्येतिकर्हिचित् ॥ ५६८ ॥ नास्यभेदोस्तिकुत्रापिचैतन्यैकस्वरूपिणः ॥ यथाजलस्यसर्वत्रद्रवस्नेहस्वरूपिणः ॥ ५६९ ॥ उच्चैर्निपतितंयद्वद्यातिनीचैःपयःसदा ॥ भेदवानपिचात्मैवंमंतव्योभेदमाव्रजेत् ॥ ५७० ॥ मेघान्निपतितंनीरंसमेवाविषमेस्थले ॥ पर्वतानपिसंप्राप्यततोनिम्नांभुवंव्रजेत् ॥ ५७१ ॥ एवंकर्मनिमित्तेननानायोनीःसमाव्रजन् ॥ आत्मात्रब्रह्मविज्ञानादेकतांयातिसर्वथा ॥ ५७२ ॥ यथाजलंस्थलेशुद्धेशुद्धमेवावतिष्ठते ॥ कलुषंगैरिकादीनांसंयोगादपितद्व्रजेत् ॥ ५७३ ॥ एवमात्मासदाशुद्धोविशुद्धेमनसिस्थितः ॥ रागादिसहितेतद्वदशुद्धश्चभवेदयं ॥ ५७४ ॥ स्वभावःस्वच्छतायद्वदपांचसर्वदैवहि ॥ आत्मनोपितथैवैषास्वच्छतापरिकीर्तिता ॥ ५७५ ॥

॥ ५७० ॥ फलितार्थमाह मेघादितिद्वाभ्यां यथापर्वतीयेसमेविषमेवाऊर्ध्वदेशेमेघान्निपतितंनीरंपर्वतात्पर्वतस्यमध्यादिभागान्प्राप्यततोपिनिम्नांभूमिंव्रजति निम्नाभूमिस्तस्यविश्रामस्थानमितियावत् ॥ ५७१ ॥ एवमिति यथोक्तोदृष्टांतस्तथाभेददर्शनलक्षणोच्चनिपातप्रयुक्तंनानायोनिभ्रमणलक्षणंविशरणंव्रजन्सन्नात्माब्रह्मज्ञानात्मिकांविश्रामभूमिंप्राप्यएकतांभूमानंदरूपांविश्रांतिंव्रजेदित्यर्थः ॥ ५७२ ॥ चतुर्थवल्ल्यंत्यायाअर्थमाह यथाजलमिति यथाशुद्धदेशेपतितंजलंशुद्धमेवतिष्ठति तस्यहिमालिन्यंगैरिकादिवद्देशसंसर्गकृतमेव तथास्वतःशुद्धस्यात्मनःशुद्धधियामंतःसम्यग्भानंमलिनधीभिस्तस्यान्यथादर्शनेपितत्स्वरूपस्यनकापिक्षतिरितित्रयाणांभावः ॥ ५७३ ॥ ५७४ ॥ ५७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचमवल्ल्याद्याम्टचमवतारयति सुशीतलमितिषड्भिः यथास्वभावतःशीतलमपिनीरंवन्हियोगादुष्णंजायतेतथास्वभावतःसुखरूपोप्यात्मा देहयोगाद्दुःखीभवतीति ॥ ५७६ ॥ नचिकेतइति हेनचिकेतस्ततोदेहस्यदुःखेनान्वयव्यतिरेकदर्शनात्कारणाज्ञानसहितंस्थूलसूक्ष्म रूपंशरीरद्वयंदुःखहेतुरित्यर्थः ॥ ५७७ ॥ तत्रकारणाज्ञानंनसाक्षाद्दुःखहेतुःकिंतुविषवृक्षवीजमंकुरादिद्वारेवसूक्ष्मादिदेहद्वयद्वारेत्याह वी जमिति ॥ ५७८ ॥ तत्रापिसूक्ष्मदेहःस्थूलदेहंविनानभोगदइत्याह माययेतिद्वाभ्यां तत्रयःसूक्ष्मोदेहःसमायायाःकार्यमायानाशमंत राऽविनाशीचस्थूलदेहाश्रयेणैवात्मनोभोगहेतुश्च कीदृशस्यात्मनःतत्रशरीरद्वयेतादात्म्याध्यासंगतस्येतिद्वयोरर्थः ॥ ५७९ ॥ ५८० ॥

सुशीतलंयथानीरंवन्हियोगात्प्रजायते ॥ उष्णमात्मासुखंतद्वद्दुःखीदेहस्ययोगतः ॥५७६॥ नचिकेतस्ततोदेहो द्विविधोपिसकारणः ॥दुःखस्यकारणंदृष्टोब्रह्मविद्भिर्महात्मभिः ॥५७७॥ बीजंयथाफलायस्यान्नांकुरेणविना क्वचित् ॥ एवंदेहंविनामायानदुःखायकदाचन ॥५७८॥ माययाजायतेदेहःसूक्ष्मोयोनविश्यति ॥ मायानाशं विनायोयंसूत्रमित्युच्यतेबुधैः ॥ संसारपटनिर्माणेसर्वेषामिहदेहिनाम् ॥ ५७९॥ स्थूलंदेहंसमाश्रित्यसहिभो गंप्रयच्छति ॥ आत्मनस्तत्रतादात्म्यंमन्यमानस्यसर्वदा॥५८०॥ स्थूलेवपुषितेनायंविभातिविशदःपुमान्॥ गुरुशास्त्रोपदेशेनतस्माद्देहंवदामितं ॥ ५८१ ॥ पूर्यतेपुरुषेणैतद्धातुभिश्चतथैवहि ॥ त्वगादिभिस्तथैवान्नपा नजातरसैर्मुहुः ॥ पुरंशरीरंतेनैतत्पूर्णंशेनसमन्वितं ॥ ५८२ ॥

स्थूलेइति तेनस्थूलदेहस्यभोगलिंगद्वारात्मवैशद्यदेशत्वेनअत्रस्थूलदेहेऽयंपुरुषःशास्त्राचार्यप्रसादादतिविशदोपिभवतितस्मात्तदाऽत्मवैश द्यात्मकंप्रयोजनमभिसंधायतंस्थूलंदेहंवर्णयामीत्यर्थः ॥ ५८१ ॥ अवतारितांव्याचष्टे पूर्यतेइतिविंशत्या पुरुषपदंसूक्ष्मशरीरवाचकं मधुब्राह्मणादौप्रसिद्धंधातवस्त्वगादयःसप्तप्रसिद्धाअन्नादिरसश्चएतैःपूर्यमाणत्वलक्षणव्युत्पत्तिसमन्वयादेतत्स्थूलंशरीरंपुरमित्युच्यतेअथ वायथालौकिकंपुरमीशेनस्वामिनाराजादिरूपेणसमन्वितंतद्वत्पूर्णेनप्रभुणासमन्वितत्वाद्गौणमस्यपुरत्वमित्यर्थः ॥ ५८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लौकिकपुरसाम्यमेवप्रपंचयति द्वारवदिति यथागृहंप्रभुणागृहस्वामिनाऽधिष्ठितंतथाकेनचित्स्वामिनाधिष्ठितंचलौकिकंपुरंभवति ॥ ५८३ ॥ तत्रद्वारवत्त्वरूपंसाम्यमस्यस्फुटमित्याह तद्वदिति सप्तश्रोत्रनेत्रनासिकायुगानिमुखंचेति द्वेपायूपस्थरूपे दशमीनाभिः शिरोमध्यद्वारंत्वेकादशमितिद्वयोरर्थः ॥ ५८४ ॥ ५८५ ॥ सरस्वतीति यत्रकपालत्रयसंधिस्थएकादशेद्वारेसरस्वतीसुषुम्नारूपावहतिप्रच्छन्नचारिणीअयोगिभिर्दुर्लक्ष्यायययासुषुम्नारूपसरस्वत्याऊर्ध्वंगच्छन्योगीअर्चिराद्युपलक्षितंदेवयानंपंथानमाक्रामतीत्यर्थः ॥ ५८६ ॥

द्वारवद्भिर्यथालोकेपुरंभवतिसर्वतः ॥ अधिष्ठितंचकेनापिभोगिनाप्रभुणागृहं ॥ ५८३ ॥ तद्वदेकादशद्वारमिदंदेहमुदाहृतम् ॥ सप्तद्वाराणितस्योर्ध्वमधस्ताद्द्वेचसंस्थिते ॥ ५८४ ॥ उदरेदशमंनाभिच्छिद्रमुक्तंमनीषिभिः ॥ कपालत्रयसंधिस्थमुक्तमेकादशंसदा ॥ ५८५ ॥ सरस्वतीगतायत्रनित्यंप्रच्छन्नचारिणी ॥ ऊर्ध्वंययाव्रजन्योगीव्रजेदर्चिषमंजसा ॥ ५८६ ॥ जन्मशून्यःपुमानिंद्रःस्वयंज्योतिःसदैवयः ॥ वर्जितःकुटिलेनान्यचेतसाजडरूपिणा ॥ ५८७ ॥ अधितिष्ठतिसर्वज्ञःकरणैरपिवर्जितः ॥ इदंपुरंसदादेवैर्वागाद्यैरप्यधिष्ठितं ॥ ५८८ ॥ संपाद्यकर्मणास्वेनसर्वकर्मविवर्जितः ॥ आनंदात्मास्वरूपेणनशोचतिकदाचन ॥ ५८९ ॥ शोकोदुःखसमुत्थःस्याद्दुःखंसंगसमुद्भवं ॥ निःसंगःपुरुषःकेनशोकंगच्छेदकारणम् ॥ ५९० ॥ आनंदात्मास्वयंज्योतिर्विशोकोयःपुरःस्थितः ॥ धर्मादिरहितंरूपंसएवैतन्नसंशयः ॥ ५९१ ॥

तदधिष्ठातारंदर्शयति जन्मेति जन्मादिविकारशून्यइंद्रःपरमेश्वरःस्वयंप्रकाशत्वाज्जडतयास्वतोभिन्नेनचेतसामनसावर्जितः स्वभानेतदनपेक्षइतियावत् कीदृशेन कुटिलेनसत्तादिप्रदमात्मानंविहायविषयाभिमुख्यरूपकौटिल्यशालिना ॥ ५८७ ॥ सदेवोस्यपुरस्यवागाद्यैर्नगरवासिसमैर्युतस्याधिष्ठातेत्याह अधितिष्ठतीति ॥ ५८८ ॥ सदेवोवस्तुतःसर्वकर्मरहितत्वादानंदरूपत्वाच्चकल्पितेनकर्मणाउक्तंपुरंनानाक्लेशागारंसंपाद्यापिशोकादिनिर्मुक्तइत्याह संपाद्येति स्पष्टम् ॥ ५८९ ॥ वस्तुतःशोकादिराहित्येउपपत्तिंदर्शयति शोकइति स्पष्टम् ॥ ५९० ॥ यएवंवर्णितःपुरुषःसएवत्वत्पृष्टंधर्माद्यतीतंतत्त्वमित्याह आनंदात्मेति ॥ ५९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमधिकारीनित्यमुक्तात्मरूपेणनित्यमुक्तरूपोप्येतद्विज्ञानात्कल्पितमज्ञानरूपंबंधंत्यजन्पुनर्मुक्तत्वव्यवहारभाग्भवतीत्याह एतदिति
॥ ५९२ ॥ यथाभाग्यवान्लोकेसुखंप्राप्यपुनःसुखीभवेत्तथाविद्वान्मुक्तएवमुच्यतेइत्याह सुखादिति स्पष्टं ॥ ५९३ ॥ आत्मनोनित्य
मुक्ततांस्फुटयितुंबंधपदेनकिंरज्वादिनावेष्टनंविवक्ष्यतेकिंवासंसर्गइतिविकल्प्यतत्रनाद्यस्तस्यमूर्तत्वव्याप्यत्वादात्मनोगगनवत्पूर्णत्वादि
त्याह बंधनमिति बंधनात्मकोबंधोमूर्त्तानांपरिच्छिन्नानांघटादीनामेवदृष्टोनमगनादाविति ॥ ५९४ ॥ नद्वितीयइत्याह संयोगेति संयो
गादिसंबंधरूपंबंधनंयद्वादिभिःकल्पितंतत्सत्सत्यमेवनभवतिकल्पनामात्रत्वादेवेत्यर्थः ॥ ५९५ ॥ संयोगादेःकल्पनामात्रत्वमप्रामाणि
कत्वेनस्फुटयितुंतत्रप्रत्यक्षंतावन्नास्तीत्याह संयोगइति वस्तुनीअनुयोगिप्रतियोगिरूपेविज्ञायविशेषेणावहितचित्ततारूपेणावधार्यता

एतद्विज्ञानतःसोयंविमुक्तःस्वात्मरूपतः ॥ अज्ञानबंधनाद्भूयोमुच्यतेत्रभवादृशः ॥ ५९२ ॥ सुखात्सुखंय
थैवायंलौकिकःपुरुषोव्रजेत् ॥ विमुक्तस्तद्वदेवात्मापुनरेवविमुच्यते ॥ ५९३ ॥ बंधनंहिभवेद्बंधोमूर्त्तानांज
डरूपिणां ॥ घटादीनामयंदृष्टोगगनेनकदाचन ॥ ५९४ ॥ संयोगसमवायादिकल्पितंबंधनंहियत् ॥ वादि
भिर्नभवेत्सत्तत्कल्पितत्वेनहेतुना ॥ ५९५ ॥ संयोगःसमवायोवाप्रत्यक्षोनैवदृश्यते ॥ विज्ञायवस्तुनीय
स्मात्तस्मान्नैषोत्रविद्यते ॥ ५९६ ॥ नानुमानमतोत्रास्तिग्रहेकिंचनकर्हिचित् ॥ शब्दस्तुनरशृंगादौपक्ष
पातविवर्जितः ॥ ५९७ ॥

भ्यांपृथग्भूतःसंयोगादिर्नदृश्यतेतस्मादनुपलंभादेषसंयोगादिःपदार्थोऽत्रवस्तुस्वरूपेणास्तीत्यर्थः तथाहि दंडीपुरुषइत्यत्रप्रतियोग्यनुयो
गिनोर्दंडपुरुषयोःस्वरूपविवेकेक्रियमाणेसंयोगपदार्थःपृथङ्नदृश्यतेएवंसमवायोपि ॥ ५९६ ॥ नानुमानमिति अतःप्रत्यक्षायोग्यत्वा
दत्रसंयोगादिस्वरूपविषयकेग्रहणेसाध्येऽनुमानमपिनप्रवर्त्तते नहिप्रत्यक्षेणकेनापिरूपेणागृहीतेअनुमानंप्रवर्त्तते तथाचन्यायभाष्यं
नानुपलब्धेन्यायःप्रवर्त्ततेइति शब्दोपिद्विविधः लौकिकोवैदिकश्च तत्रनाद्यस्तस्यप्रमाणांतरानुग्रहेणैवार्थसाधकत्वदृष्टेरित्याह शब्द
स्त्विति पक्षपातःप्रमाणांतरानुग्रहस्तद्वर्जितःशब्दोयदिप्रमाणंस्यात्तदानरशृंगादावपिस्यादित्यर्थः ॥ ५९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नद्वितीयइत्याह नचेति तयोःसंयोगसमवाययोः एवंप्रत्यक्षादित्रयाभावेतदुपजीविनामुपमानादिप्रमाणांतराणांसंभावनादूरतोनिरस्ते त्याह प्रमाणांतरमिति एतस्यउक्तस्यउपजीव्यप्रमाणत्रयस्याभावात् ॥ ५९८ ॥ तथाचउक्तरीत्यासंयोगादेःसंभवोजडेष्वपिदृश्येषुनव कुंशक्यःतदादृग्रूपात्मनिसर्वांतरेतदसंभवःकिमुवाच्यइत्याह गगनादाविति ॥ ५९९ ॥ अस्तुतर्ह्यनिर्वचनीयःसंबंधइतिचेन्न तस्यापियो ग्यंयोग्येनसंबध्यतेइतिन्यायेनानिर्वचनीयदेहादिष्वेवसत्वादित्याह देहादिनापीति यःकश्चिद्दुर्भणःअनिर्वचनीयःसंबंधःसोपिदेहादिनै वानिर्वचनीयेनसहस्थितःअत्रानंदरूपेब्रह्मात्मनिवस्तुतोनविद्यतेइतियोजना ॥ ६०० ॥ फलितमाह ततइति ततःसंबंधस्यदुर्निरूपत्वात्

नचवेदस्यवचनंतयोःसत्वेस्तिकिंचन॥ प्रमाणांतरमेतस्माद्दूरापास्तंकथंभवेत् ॥ ५९८ ॥ गगनादौततोनै तौविद्येतेजडवस्तुनि॥ भविष्यतःकथंत्वेतावमूर्तेज्ञानरूपिणि ॥ ५९९ ॥ देहादिनापियःकश्चित्संबंधोदुर्भ णःस्थितः॥ आनंदात्मनिसोप्यत्रविद्यतेनचवस्तुतः ॥ ६०० ॥ ततोबंधनशून्यत्वाद्विमुक्तःसर्वदैवसः ॥ वि मुच्यतेपुनर्मायानाशादात्मप्रबोधतः॥ ६०१ ॥ आत्मप्रबोधतोयस्माद्धंत्यविद्यामयंपुमान्॥ तस्माद्धंसइति प्रोक्तःपंडितैर्वेदवादिभिः ॥ ६०२ ॥ सूर्यरूपेणवालोकत्रयीमटतिसर्वदा ॥ प्राणोबहिश्चरस्तेनहंसआत्मा निगद्यते॥ ६०३ ॥ शुचौतिष्ठतिसर्वात्माद्ददिवागगनेपिवा ॥ वसुभूतःसुवर्णेनसदृशोवैमहेश्वरः ॥ अंतरि क्षेत्वद्द्यगेवात्र्येवैषोवतिष्ठते ॥ ६०४ ॥

सदाबंधनशून्यत्वेनमुक्तोप्यात्माकल्पितबंधात्मिकांमायामात्मबोधेननिघ्नन्पुनर्मुच्यतेइत्युक्तः ॥ ६०१॥ एवंनिरावरणात्मनःप्रभाववर्णय तोहंसइत्यादेर्मंत्रस्यार्थंषोडशभिर्निरूपयंस्तत्रहंसपदार्थसमन्वयंदर्शयति आत्मेतिद्वाभ्यां तत्रार्थस्फुटं ॥ ६०२ ॥ सूर्येति अथवाप्राणः प्रजानामुदयत्येषसूर्यइतिश्रुत्यंतराद्बहिश्चरप्राणात्मकसूर्यरूपेणत्रिलोकीभासकत्वात्सूर्यवाचकहंसपदेनात्मोक्तइत्यर्थः ॥ ६०३ ॥ शु चिपदादिपदत्रयार्थमाह शुचाविति शुचौशुद्धे यथालोकेसुवर्णप्रियंतद्वत्प्रियत्वादयंमहेश्वरआत्माधनवाचकवसुपदेनोक्तः तथाद्ददया काशेआत्मरूपेणवाह्याकाशेसूर्यादिरूपेणस्थितत्वादंतरिक्षवासीप्रोक्तइत्यर्थः ॥ ६०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथायमेवात्माधियज्ञंहोतृसंज्ञकऋत्विग्रूपेणवेद्यांसंस्कृतभूमौतिष्ठतीत्याह यज्ञेति॥६०५॥अथवाप्राणाग्निहोत्रादिविधयाअन्नभोक्तृत्वा दयमात्माहोतेत्युक्तः वेदिसममध्यच्छिद्रवतिहृदयेसूर्यमंडलेवास्थितत्वाच्चवेदिषदित्युक्तइत्याह आत्माग्नाविति आत्माग्नौभोक्तृरूपाग्नौ यतःसर्वमन्नंजीवनहेतुभूतंजुहोतिततोभोक्तात्माहोतेतिकथितः हृदिबिंबेवामध्यतोमध्येवेदिसमंयच्छिद्रंतत्रयतःश्रितस्ततोवेदिषदित्युक्त इत्यर्थः ॥६०६॥ दुरोणइति द्रोणपदंछांदसदकारोत्तरोकारागमेनदुरोणेत्याकारकंसत्यज्ञेसोमरसाधारेकलशेमुख्यवृत्त्यावर्ततेतेनकलशे नातिथिसंमानकत्वलक्षणसाधर्म्येणसद्गृहिणांगृहेपिगौण्यावर्त्तते तथाचसोमयागेऽतिथिवत्पूज्यत्वाद्वह्म्यात्मकसोमरसरूपेणद्रोणकलशे

यज्ञकर्मणिदेवोयंहोतृरूपेणसर्वदा ॥ वेद्यांतिष्ठतिसर्वात्मायजमानप्रमोदकः ॥ ६०५॥ आत्माग्नौसर्वमेवान्नंजुहोत्येवयतस्ततः॥ होतात्माकथितोभोक्ताहृदिबिंबेथवाश्रितः ॥ वेदिवन्मध्यतश्छिद्रेप्राणिजीवनहेतुके॥ ६०६ ॥ दुरोणेद्रोणकलशेगृहेवागृहमेधिनां॥ तत्रसीदतिसोमोयमतिथिर्यज्ञकर्मणि ॥ ६०७॥ अज्ञातकुलगोत्रोवामध्यान्हादिसमागतः॥ अन्नाद्यर्थीमानवोयःसोतिथिःपरिकीर्तितः ॥ ६०८ ॥ नृषुनानाविधैरूपैरेषतिष्ठतिदेवराट्॥ नानेंद्रियसमुत्थानैर्वीर्यैर्भोक्तात्मनापिच॥ ६०९ ॥ वरंसम्यक्सुखंप्रोक्तंतत्रतिष्ठत्ययंपुमान्॥ आनंदात्मास्वयंज्योतिःस्वस्मिन्नेवस्वयंप्रभो॥६१०॥ऋतंकर्मसमुद्दिष्टमवश्यंफलदायियत्॥ तत्रतिष्ठत्ययंदेवःफलरूपेणसर्वदा॥ ६११ ॥

ऽयमात्मासीदतितिष्ठतितथाप्रसिद्धातिथिरूपेणगृहमेधिनांगृहेसीदतीत्यर्थः ॥६०७॥ प्रसिद्धातिथिंनिरूपयति अज्ञातेति वाशब्देनज्ञात कुलगोत्राणामाचार्यऋत्विगादीनांपरिग्रहः स्फुटमन्यत् ॥ ६०८ ॥ नृष्विति तथायमात्मानृषुतिष्ठन्ज्ञायते कैःनानेंद्रियेषुसमुत्थानंप्रादुर्भावोयेषांतथाविधैर्वीर्यैःशक्तिविशेषैः तेषामंतर्याम्यभिव्यंग्यत्वात् तथाभोक्तृरूपेणच तथाचस्मृतिः सुखंदुःखंभवोभावइत्याद्याक्षेत्रज्ञं चापिमांविद्धीतिच ॥ ६०९ ॥ वरमिति तथायमात्मावरपदोक्तेसम्यक्सुखेभूमाख्येस्वरूपेतिष्ठति सभूमाकस्मिन्प्रतिष्ठितःस्वेमहिम्नीतिश्रुत्यंतरात् ॥ ६१० ॥ ऋतमिति तथायमात्माऋतपदेनसत्यवाचिनाअवश्यभाविफलकत्वसाधर्म्येणलक्षितेकर्मणिफलरूपेणतिष्ठतीत्यर्थः॥ ६११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदित्येति तथायमानंदरूपआत्मातत्रसंस्थानःसम्यक्स्थितिमान् तत्रकुत्र यद्योमाकाशंसूर्यमंडलांतःस्थस्यपुरुषस्यसूक्ष्मसमष्टिरूपस्यांतः बुद्धेःसूक्ष्मव्यष्टिरूपायावाअंतर्गुहासंज्ञकंव्यवस्थितमिति ॥ ६१२ ॥ उदकेभ्यइति तथायमात्माब्रह्मपदोक्तहिरण्यगर्भरूपेणउदकेभ्यःअप्प्रधानेभ्यःसूक्ष्मभूतेभ्योजातः तथागोपदोक्तसूर्यकिरणेभ्योमेघात्मनापरिणतेभ्योजलरूपेणजातइत्यर्थः ॥ ६१३ ॥ ऋतेति तथायमात्माऋतपदोक्तात्फलारंभोन्मुखात्कर्मणःसकाशात्सुखादिप्रदनानाविधदेहादिरूपेणजायते तथाचयोगसूत्रं सतिमूलेतद्विपाकेजात्यायुर्भोगाः मूलेअविद्यादिक्लेशरूपेसतिअबाधितेतस्यकर्मणःफलानिजात्यादिरूपाणिभवंतीतितदर्थः ॥ ६१४ ॥ अद्रेरिति त

आदित्यपुरुषस्यांतर्बुद्धेर्वापिव्यवस्थितं॥ व्योमयत्तत्रसंस्थानआनंदात्मैवकेवलः॥ ६१२॥ उदकेभ्यस्त्वयं जातोब्रह्मणोवपुराश्रितः॥ गोभ्यश्चापितथैवायंनीररूपोत्ररश्मितः॥ ६१३॥ ऋतरूपादयंजातःसर्वदाकर्मणःफलात् ॥ सुखदुःखफलानेकदेहेंद्रियविभेदवान् ॥ ६१४ ॥ अद्रेर्मेरोरयंजातउल्बतश्चतुराननः ॥ अथवाहिमवन्नाम्नोगिरिजारूपएवसः ॥ ६१५ ॥ किंबहूक्तेननिखिलंचराचरमिदंजगत् ॥ ऋतंकर्मफलं सर्वंब्रह्मैवैकंनचापरं ॥ ६१६ ॥ आत्मायंसर्वजगतांहृदयेसर्वदास्थितः ॥ ऊर्ध्वंप्राणंनयत्येषोत्यपानं प्रत्यगस्यति ॥ ६१७॥

थायमात्माचतुराननवेधोरूपेणसुमेरुरूपपर्वताद्भूवलयात्मककमलकर्णिकाभूताज्जातः कीदृशान्मेरोः उल्बतश्चतुराननात्मकगर्भप्रादुर्भावेजरायुस्थानीयात् गर्भाशयोजरायुःस्यादुल्बंचेत्यमरः अद्रिजाइतिटावंतमित्यभिप्रेत्यहिमाद्रेर्गिरिजारूपेणायमुत्पन्नइत्याह अथवेति ॥ ६१५ ॥ किंबहूक्तेनेति ऋतपदोक्तकर्मफलात्मकंयावज्जगत्तत्सर्वंबाधासामानाधिकरण्येनब्रह्मैवेत्यर्थः ॥ ६१६ ॥ अथात्मनोधिगमेलिंगमुपदिशतस्तृतीयमंत्रस्यार्थमाह आत्मायमिति अयमात्मासर्वेषांहृदयस्थःसन्प्राणाख्यंवायुमूर्ध्वंनयति अपानाख्यंतुप्रत्यगधःअस्यतिक्षिपतितथाचप्राणापानविधरणमात्मनोलिङ्गमिति ॥ ६१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अंगुष्ठेति तथायमात्माल्हृदयस्यमध्येअंगुष्ठमात्रेआसीनःसन्वामनःपरिच्छिन्नपरिमाणइवभासमानः यद्वावामानांप्रशस्तफलानांनाय
कःसर्वैर्देवैर्वागादिरूपैरुपास्यउपजीव्यः ॥६१८॥ चतुर्थस्यमंत्रस्यदेहादिस्थितिप्रयोजकत्वमात्मलिंगंदर्शयतोऽर्थमाह यदेति अयमात्मा
शरीरस्थोमरणप्रयोजकेनकर्मणाविस्रंसनपदोक्तंशरीरतोबहिर्गमनंकरोतितदाएतद्देहस्थितिकारणंकिंशिष्यतेनकिंचिदपियतःकाष्ठवद्दा
 हादियोग्योदेहोऽस्यात्मनोनिर्गमनेभवतिअतोज्ञायतेएतद्देहस्थितिहेतुभूतंचैतन्यंनावशिष्यतेइतिद्वयोरर्थः ॥ ६१९ ॥ ६२० ॥ यदेत
दिति यच्चैतद्देहस्थितिप्रयोजकंचैतन्यंतदेवत्वत्पृष्टमद्वितीयंब्रह्मेत्यर्थः ॥ ६२१ ॥ ननुदेहस्थितिप्रयोजकत्वंप्राणेऽतिप्रसक्तमित्याशंक्यस्व

अंगुष्ठमात्रआसीनोवामनोल्हृदयस्यहि॥ मध्यतश्चाप्युपास्योयंवागाद्यैर्विश्वदैवतैः॥ ६१८॥ यदाशरीरतो
यातिवहिर्मरणकर्मणा॥ शरीरस्थस्तदातस्मिन्देहेकिंपरिशिष्यते॥ ६१९॥ देहःकाष्ठसमोयस्मादस्यनिर्गम
नेभवेत्॥ तस्मान्नकिंचिदप्यत्रचैतन्यमवशिष्यते॥ ६२०॥ यदेतद्देहसंस्थानंचैतन्यंभेदवर्जितं॥ तदेतद्भव
तापृष्टंधर्मादिरहितंहियत्॥ ६२१॥ नप्राणेननापानेनमर्त्योजीवतिकश्चन॥ इतरेणतुजीवंतियस्मिन्नेतावु
पाश्रितौ॥ ६२२॥ प्राणापानौततोनात्मरूपौकस्यापिदेहिनः॥ किंतुयस्मिन्नभावेतौमूर्छादौसंप्रतिष्ठितौ॥
श्वासाद्यलाभरूपायांसआत्मासर्वदेहिनां॥ ६२३॥ धर्माधर्मादिनिर्मुक्तएषआत्मामयेरितः॥ प्रियत्वष्टेन
मनसातुभ्यंहिनचिकेतसे॥ ६२४॥ प्रवक्ष्यामित्वयापृष्टमिदानींपरमंवरं॥ आत्मात्रमरणंप्राप्ययथाभव
तितच्छृणु॥ ६२५॥

धारणेप्यशक्तस्यपरधारणकथाव्याहतेतिदर्शयन्पंचमंपठति नप्राणेनेति ॥ ६२२ ॥ एतत्तात्पर्यमाह प्राणापानाविति ततःपरायत्त
त्वात्प्राणापानावात्मरूपावात्मनोरूपंस्वपरस्थितिप्रयोजकत्वंधारयितुंयोग्यौनभवतःकिंत्वेतौप्राणापानौयत्रकारणेप्रतिष्ठितौलीनौभव
तः कदा श्वासाद्यलाभरूपायांश्वासाद्यदर्शनोपलक्षितायांमूर्छामरणादिपदवाच्यायामवस्थायांसएतत्कारणभूतंतत्त्वमेवसर्वेषामात्मेत्य ॥४३॥
र्थः ॥ ६२३ ॥ षष्ठ्यादिद्वयस्यार्थमाह धर्माधर्मेत्येकादशभिः एवंशुद्धआत्मातुभ्यमुक्तःअथयत्त्वयात्मनःपरलोकेसत्त्वंपृष्टं कीदृशं पर
मंवरंत्रयाणांवराणांमध्येंऽत्यवरत्वेनोपन्यस्तंतदिदंश्रृण्वितिद्वयोरर्थः ॥ ६२४ ॥ ६२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योनिमिति मरणेआत्मनःअत्यंतोच्छेदोनभवतिकिंतुकेचिज्जंतवोजंगमशरीरलाभाययोनियोन्युपलक्षितंजंगमबीजभावंप्राप्नुवंति केचित्तुस्थावरभावायस्थावरबीजभावं तत्रचकर्मकायिकादिश्रुतपदलक्षिताभावनाचव्यवस्थापिकेत्यर्थः ॥ ६२६ ॥ तत्रकर्मणोव्यवस्थापकतांस्फुटयती पुण्याधिक्यादितित्रिभिः पापापेक्षयापुण्याधिक्यंजंगमदेहप्रयोजकंपुण्यापेक्षयापापाधिक्यंतुस्थावरत्वस्य तथाजंगमेष्वपिपुण्यतारतम्यंकीटमारभ्यहिरण्यगर्भांतदेहेषुधर्मज्ञानादितारतम्यप्रयोजकमितिद्वयोरर्थः ॥ ६२७ ॥ ६२८ ॥ येषांपुण्यमणुवत्पापं

योनिमन्येप्रपद्यंतेजंगमत्वायदेहिनः॥ स्थावरत्वंपरेयांतियथाकर्मयथाश्रुतं ॥६२६॥ पुण्याधिक्याद्भवंत्येते जंतवोजंगमात्मकाः॥ पापाधिकाश्चसततंभवंतिस्थावराअपि ॥ ६२७ ॥ जंगमेषुचपुण्यस्यतारतम्याद्भवंत्यमी॥ ब्रह्मादयश्चकीटांताःसर्वदैवशरीरिणः॥ ६२८ ॥ पुण्यंस्वल्पांशतोयेषांपापंपर्वतवत्स्थितं॥ तेदुःखबहुलाएतेस्थावराःस्तब्धजीविनः ॥ ६२९ ॥ पुण्यंवापातकंवापिकरणीयतयापुरा ॥ पित्रादिभ्यःस्ववृद्धेभ्यःश्रुतंजन्मांतरेयथा॥ ६३० ॥ तथातत्समनुष्ठायजातास्तेतादृशाःपुनः॥ कुर्वंतिचतथैवैतच्छृण्वंतिचपुनःपुनः॥ कुर्वंतिचतथैवैततत्स्वदेहेनपुनःपुनः ॥ ६३१ ॥ पापिनांपातकस्यैवश्रवणेकरणेपिच ॥ प्रीतिरुत्पद्यतेतद्वद्धर्मस्यचमहात्मनां ॥ ६३२॥ वालाग्रशतभागेनपापंपूर्वशरीरिणि॥ पुण्यंपर्वतसंकाशंविद्यतेपरमेश्वरे ॥ ६३३ ॥

पर्वतवत्तेस्थावराभवंतीत्याह पुण्यमिति स्तब्धंगमनादिस्वातंत्र्यरहितंजीवितुंशीलंयेषांतथा ॥ ६२९ ॥ श्रुतस्यकर्मानुष्ठानद्वाराव्यवस्थापकतांस्फुटयति पुण्यंवेति वृद्धेभ्यआप्तत्वाभिमतेभ्यःपितृप्रभृतिभ्यःपुण्यंपातकंवायत्कर्त्तव्यतयाश्रुतंतदुत्थभावनयातदेवपुण्यादिकमनुष्ठायतदनुरूपंजन्मलभंतेपुनश्चतादृशरुच्यातादृशंकर्मकुर्वंतीतिद्वयोरर्थः ॥ ६३० ॥ ६३१ ॥ एतदेवस्फुटयति पापिनामिति स्पष्टम् ॥ ६३२ ॥ हिरण्यगर्भशरीरमपिपुण्यपापोभयारब्धमितिदर्शयितुंतत्रसोऽबिभेदितिश्रुतिप्रसिद्धभयानुमितपापलेशारब्धत्वमाह वालाग्रेति वालाग्रशतभागेनतुल्यमितिशेषः पूर्वशरीरिणिसर्वेशरीरीप्रथमइतिप्रसिद्धे ॥ ६३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णितस्यात्मसत्तायांपर्यवसानमाह ब्रह्मादीति एवंसर्वसंसारस्यपुण्यपापोभयारब्धत्वात्पुण्यपापयोश्वपूर्वशरीरारब्धत्वात्पूर्वशरीरस्या
त्मसत्ताव्याप्यत्वात्ततःसंसारवर्णनेनात्मनःसत्यत्वचेतनत्वादिकंसिद्धमितिद्वयोरर्थः ॥ ६३४ ॥ ६३५ ॥ षष्ठ्याद्वितीयंपादंयोजय
नूपूर्वोत्तरसंगतिमाह अतइति अतःसंसारवर्णनस्याप्यात्मरूपेपर्यवसानाद्यमएवमुक्तविधयाआत्मनोस्तित्वमभिधायानयादिशावक्ष्य
माणप्रकारेणगुह्यमुपनिषत्प्रमेयंसनातनंब्रह्मआह ननुअपृष्टंसनातनंब्रह्मकथंयमेनोच्यतेइतिशंकावारणायोक्तं प्रश्नद्वयेपीत्यादिकृत्वेत्यं
तंअयमर्थः वरत्रयंलब्ध्वानचिकेताएकेनवरेणपितुःसौमनस्यंद्वितीयेनाग्निविद्यांचप्राप्यतृतीयेनपूर्णांब्रह्मविद्यामादित्सुरेकमेवात्मवस्तुप्र

ब्रह्मादिस्थावरांतोयंपुण्यपापफलात्मकः ॥ संसारःकर्मतोजातस्तच्चपूर्वशरीरतः ॥ ६३४ ॥ पूर्वशरीरंनैवैत
दसत्यात्मनिविद्यते ॥ आत्मास्तिततएवायंशरीरांतरभाक्पुमान् ॥ ६३५ ॥ अतःप्रश्नद्वयेप्येतदेकमेवात्म
नोवपुः ॥ पृष्टंतन्मिलितंकृत्वागुह्यंब्रह्मसनातनं ॥ अस्तितामभिधायैवंयमआहानयादिशा ॥ ६३६ ॥ यो
जागर्तिपुमानेषुस्वप्रकाशचिदात्मकः ॥ कामंकामंबहुविधंपुत्रक्षेत्रादिरूपकं ॥ निर्मिमाणःसदास्वप्नेसर्वे
षामिहदेहिनाम् ॥ ६३७ ॥ पौरुषंयदिदंरूपंत्द्यास्तेस्वप्नसंश्रयं ॥ तदेवदीप्तंतद्ब्रह्ममोक्षरूपंतदुच्यते ॥ ६३८ ॥
तस्मिँल्लोकाःश्रिताःसर्वेभूराद्याबहुयोजनाः ॥ चतुर्विधजनास्तद्वन्नानालोकसमाश्रयाः ॥ ६३९ ॥

थमंसंसारोपलक्षितत्वंपदार्थरूपेणपृष्ट्वाधर्माधर्माद्यतीतत्वोपलक्षिततत्पदार्थरूपेणपृष्टवान् पदार्थद्वयमेलनेनवाक्यार्थसिद्धेरर्थप्राप्तत्वा
त् अतस्तदभिप्रायंविज्ञायवाक्यार्थभूतब्रह्मात्माभिधानंयमस्ययुक्तमिति ॥ ६३६ ॥ अष्टममंत्रार्थमाह योजागर्तीतिचतुर्भिः यएव
स्वप्रकाशचिद्रूपःपुरुषःसर्वेषामात्माइंद्रियेषुसुप्तेषुसत्सुजागर्त्तिननिद्राति किंकुर्वन् स्वप्नेआवृत्तकामपदेनोक्तंबहुविधंपुत्रादिरूपंकाम्यमा
नंवस्तुजातंनिर्मिमाणोरचयन् ॥ ६३७ ॥ पौरुषमिति यदेतत्स्वप्नद्रष्टृतयावर्णितंपुरुषस्यस्वरूपंतदेवदीप्तंचिन्मात्ररूपतयाशुद्धंतदेवचब्र
ह्माद्वितीयंमोक्षरूपंचउच्यतेश्रुतिभिः ॥ ६३८ ॥ तस्यब्रह्मत्वेहेतुतयासर्वाधारतामाह तस्मिन्निति लोकपदोक्ताःपृथिव्यादयः जनाश्च
तदाश्रिताः ॥ ६३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोक्षरूपत्वेहेतुंपरमगतित्वमाह संसारेति संसारस्यपारंजिगमिषुःकश्चिदपितद्वर्णितात्मनःस्वरूपंनात्येतिनातिक्रामतिकिंतुतदेवसंसारपारभूतंगच्छति तदतिरिक्तस्यपरमगत्यात्मकमोक्षस्वरूपस्यात्रसंसारपारेऽसत्वादित्यर्थः ॥ ६४० ॥ अथशतकृत्वोपिपथ्यंवक्तव्यमितिन्यायेनोक्तात्मस्वरूपंविशदयतामग्निरित्यादिमंत्राणामर्थमाह एकएवेत्यादिना अयंसर्वेषामात्मासर्वशरीरेष्वेकइत्यर्थः ॥ ६४१ ॥ यथेति यथासर्वेषुकाष्ठेषुतिष्ठन्वन्हिस्तत्तत्काष्ठसमानरूपतापन्नोभवति वस्तुतस्तुतेजोरूपेणतेभ्यःकाष्ठेभ्योपिविलक्षणइत्यर्थः ॥ ६४२ ॥ दार्ष्टांतिकेयोजयति एवमिति एवंवस्तुतोदेहविलक्षणःसोप्यात्मातत्तद्देहेषुतादृक्तत्तद्देहसरूपोभवति ॥ ६४३ ॥ वायुरित्यादेरर्थमाह वा

संसारपरपारार्थींतच्चनात्येतिकश्चन॥ एतस्मादपरस्यात्रपरस्यासत्त्वहेतुतः॥ ६४० ॥ एकएवायमात्मास्यात्सर्वेषामिहदेहिनां॥ स्थूलेष्वपिचसूक्ष्मेषुशरीरेषुससर्वदा ॥ ६४१ ॥ यथास्थूलेषुकाष्ठेषुवन्हिःसर्वत्रसंस्थितः॥ सदृशःकाष्ठसंघैस्तैर्वस्तुतोन्यादृशोपिच॥ ६४२॥ एवंस्थूलेषुदेहेषुदेवासुरनरादिषु॥ तादृगात्माभवेदेपवस्तुतोपिविलक्षणः॥ ६४३ ॥ वायुर्यथात्रसूक्ष्मेषुसूक्ष्मरूपोव्यवस्थितः ॥ तद्वत्प्रतीयतेतद्वद्वस्तुतःसमवस्थितः ॥ ६४४॥ तद्वत्सूक्ष्मेषुदेहेषुतिष्ठत्यात्मात्रतादृशः ॥ अतादृशःस्वरूपेणसदानंदात्मरूपभृत्॥ ६४५॥ शरीरद्वयसंस्थोपिपरमात्मामहेश्वरः ॥ शरीरद्वयदोषेणलिप्यतेनकदाचन ॥ ६४६॥ सूर्योयथात्रसर्वेषांनेत्रेष्वास्तेनिरंतरं॥ नलिप्यतेचतत्रस्थैर्दोषैर्नैवगुणैरपि॥ ६४७॥

युरितिद्वाभ्यां अतद्वदितिच्छेदः यथासूक्ष्मसमष्टिरूपोवायुःसूक्ष्मेषुव्यष्टिभूतसूक्ष्मशरीरेषुतद्वत्तत्तादात्म्येनव्यवस्थितोपिवस्तुतःअतद्वत्व्यष्टिविलक्षणपूर्णत्वादिरूपैर्व्यवस्थितइत्यर्थः ॥ ६४४ ॥ तद्वदिति सूक्ष्मेषुबुद्ध्यादिषुतादृशस्तत्तत्सरूपआत्मातिष्ठति कीदृशः वस्तुतोऽतादृशःसदानंदात्मकत्वादित्यर्थः ॥ ६४५ ॥ सूर्यइत्यादिविवृणोति शरीरद्वयेतिसप्तभिः स्थूलसूक्ष्मोपाधिष्वात्मातद्दोषैर्नलिप्यतेयथालोकानांनेत्रेषुदेवतात्वेनस्थितोप्यादित्यस्तत्रस्थैस्तत्तन्नेत्रगतैर्दोषादिभिर्नलिप्यतेतद्वदितिद्वयोरर्थः ॥ ६४६ ॥ ६४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाचदृष्टांतेसर्वचाक्षुषदोषवर्जितत्वमनुभवसिद्धंतद्वदत्रापीत्याह बाह्येइति यथासूर्योबाह्याकाशेस्थितोऽन्यःसर्वदोषवर्ज्योभिन्नोनुभूयते तथात्मापिहार्दाकाशेसाक्षिरूपोदेहद्वयात्पृथक्तद्धर्मासंगीचानुभूयतेइत्यर्थः ॥६४८॥ एकत्वेपीमंदृष्टांतंयोजयति स्वतंत्रइत्यादिना अय मात्मास्वतंत्रःसत्ताभानादौपरानपेक्षएकश्चसन्नपियद्वद्बहुधाभातितद्बहुधाभानंतथामिथ्यैव यथातत्तद्देशवासिनामादित्यस्यस्वसन्निकृष्टयोजनादिपरिमितदेशवर्तितयाबहुधाभानंमिथ्यातद्वदित्यर्थः ॥ ६४९ ॥ यथादृष्टांतेकल्पितैर्बहुधाभानैरादित्यस्वरूपमखंडंनस्पृश्यतेत

बाह्येनभसिबिंबात्मायस्मादन्यःप्रगृह्यते॥ शास्त्रदृष्ट्यातथैवात्माहार्देनभसिगृह्यते॥ देहद्वयात्पृथक्केनतद्धर्मैर्नैवलिप्यते॥ ६४८॥ स्वतंत्रएकएवायमात्मासर्वशरीरिणां॥ सूर्यवद्बहुधाभातिनेत्रभेदात्तथैवसः॥६४९॥ यथैवबहुधाभानैर्भानोर्नैवभिदाक्वचित्॥ आत्मनोबहुधाभानमेवंभेदेनकारणं॥ ६५० ॥ भानोर्भेदंयथाऽसंतंगृहीत्वादुःखमाव्रजेत्॥ उपहासादिजनितंबहुधाबालिशःपुमान् ॥ ६५१ ॥ आनंदात्मनितद्वद्योऽसंतंभेदंस्वचेतसा॥ गृह्णीयात्सतुसंसारदुःखमेतत्समाप्नुयात्॥६५२॥अंतरात्माततःसर्वभूतानामेकएवसः॥ स्वतंत्रःस्वात्मनोरूपंबहुधाकुरुतेस्वयं॥ माययाजगदीशानोमाययापिविवर्जितः ॥ ६५३ ॥ यस्तंस्वहृदयेसंतंगुरुशास्त्रोपदेशनात्॥ अनुपश्यंतियेधीराब्रह्मचर्यादिसाधनाः॥ ६५४ ॥शाश्वतंमोक्षसंज्ञंस्यात्सुखंतेषांमहात्मनां॥ अन्येषांदुःखमखिलंसंसाराख्यंभवेत्सदा॥ ६५५॥

थात्रापीत्याह यथैवेति स्पष्टं ॥ ६५० ॥ यथादृष्टांतेभेददर्शनस्योपहासादिप्रयुक्तदुःखंफलंतथात्रात्मनिभेददर्शनस्यसंसारमयमित्याह भानाविति असंतमितिच्छेदः स्पष्टंद्वयं ॥ ६५१ ॥ ६५२ ॥ एकइत्यादेरर्थमाह अंतरात्मेतित्रिभिःततउक्तविधयात्सर्वभूतानामेक एवात्मासंसिद्धः सकः यःस्वतंत्रःस्वकीयंरूपंमाययाबहुधाकरोतितंस्वहृदयेसंतमुपदेशानुसारेणपश्यंतितेषामेवनित्यंमोक्षाख्यंसुखंभवतिइतरेसंसारदुःखभागिनइतित्रयाणांसंबंधः ॥ ६५३ ॥ ६५४ ॥ ६५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यानामित्यर्थौवर्ण्यते नित्यानामितित्रिभिः नित्यानांकालादीनामपियोनित्यश्चिरंस्वसत्ताप्रदानेननित्यताप्रयोजकस्तथाचेतनाना मिंद्रियाणामिंद्रियावच्छिन्नधीवृत्तीनांचेतनःस्वाभासदानेनचेतनत्वप्रयोजकइत्यर्थः ॥ ६५६ ॥ यमन्वीक्ष्येति तथायंसाक्षात्कृत्यपूर्वं पूर्वमुक्तंशाश्वतंसुखंयांतितथायएकएवसर्वेषांकामितार्थप्रदः ॥ ६५७ ॥ तस्येति तस्यब्रह्मणएतदेवस्वरूपंयद्धृदयेस्वप्रकाशंस्थितमित्य र्थः ॥ ६५८ ॥ तदेतदित्यादिवाक्यार्थमाह तदेतदितीत्यूनविंशत्या तद्वर्णितमात्मनःस्वरूपभूतंपरमंसुखमनिर्देश्यंवक्तुमशक्यमपिमहा

नित्यानामपिनित्योयंकालादीनांमहेश्वरः ॥ इंद्रियाणांहिसर्वेषांचेतनानांचचेतनः ॥ ६५६ ॥ यमन्वीक्ष्यसु खंधीरायांतिपूर्वसमीरितं ॥ एकएवबहूनांयःकामान्मनसिसंस्थितान् ॥ ददातिसर्वजंतूनांदुःखशांतिकरः पुमान् ॥ ६५७ ॥ तस्यरूपमिदंब्रह्मसर्वप्राणिहृदिस्थितं ॥ अवाङ्मनसगम्यंयत्स्वयंज्योतिःस्वरूपधृक् ॥ ६५८ तदेतदितिमन्यंतेऽनिर्देश्यंपरमंसुखं ॥ महात्मानोत्रविद्वांसःसदास्वानुभवेरताः ॥ ६५९ ॥ अपिवैषयिकंय त्स्यात्सुखंतदपिकोवदेत् ॥ मृष्टान्नभोजनादौयज्जायतेत्रसुखंनृणां ॥ ६६० ॥ सुखमित्येवतद्ब्रूयुर्लौकिकान विशेषतः ॥ विशेषंकथयंतोपिनैववक्तुंक्षमाःक्वचित् ॥ ६६१ ॥ अध्यस्यकस्यचित्तस्यसादृश्यंतेवदंतितत् ॥ ततःसुखमनिर्देश्यंसर्वमेवव्यवस्थितं ॥ ततःस्वानुभवेनैवगम्यतेनान्यथाहितत् ॥ ६६२ ॥

त्मानःकोविदाएतदितिअपरोक्षत्वेनमन्यंतेजानंतीत्यर्थः ॥ ६५९ ॥ तस्यानंदस्यानिर्देश्यतायांकैमुत्यंदर्शयितुंलौकिकानंदस्याप्यनिर्दे श्यतामाह अपिवैषयिकमिति मृष्टंस्वादु ॥ ६६० ॥ यतस्तद्वर्णयंतोपिसुखत्वादिसामान्यरूपेणैववर्णयंतीत्याह सुखमिति ॥ ६६१ ॥ अध्यस्येति यतस्तेवक्तारस्तस्यभोजनादिसुखस्य स्वरूपेइतिशेषः कस्यचित्सादृश्यमध्यस्यारोप्यैवतद्भोजनादिसुखंवदंतीति फलितमा ह ततइति ततोवक्तुमशक्यत्वात् हिशब्दःपादपूरणार्थः ॥ ६६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचमानुषामनुष्यगंधर्वादेवगंधर्वाःपितरआजानपदोक्तस्मार्त्तकर्मजदेवाःश्रौतकर्मजदेवाहविर्भुग्देवाइंद्रोबृहस्पतिर्विराट्हिरण्यगर्भश्चै
तेषामानंदाःशतगुणोत्तरास्तित्तिरिश्रुतिप्रसिद्धास्तेष्वंत्योहिरण्यगर्भानंदोपियस्यब्रह्मानंदस्याब्धेर्मात्रापदेनबिंदुतयोक्तस्यानिर्देश्यत्वंकि
मुवाच्यमित्याह ब्रह्मणइतिद्वाभ्यां ब्रह्मणोहिरण्यगर्भस्यसुखंसर्वोविराट्तदीयानंदात्शताधिकंयतोहिरण्यगर्भसुखात्वैषयिकंसुखंकिं
चिदप्यधिकंनभवतितच्चहिरण्यगर्भसुखमपि ॥ ६६३ ॥ ६६४ ॥ अतएवगुरवःश्रुतयश्चतत्स्वरूपंप्रियतमत्वात्मकसामान्यरूपेणैवव
दंतिसाक्षाद्भाषितुमक्षमत्वादित्याह गुरवइति ॥ ६६५ ॥ गुरूपदिष्टमिति यतस्तत्स्वरूपंकेनापिनिर्देष्टुमशक्यंतेनायमधिकारीतत्साक्षा

ब्रह्मणोपिसुखंयत्तुसर्वानंदशताधिकं॥ यतोधिकंनकिंचित्स्यात्सुखंवैषयिकंक्वचित्॥ ६६३॥ आनंदवारि
धेस्तच्चबिंदुमात्रमुदीरितं ॥ अतःकथंहिनिर्देश्यंभवेत्तत्परमंसुखं ॥ ६६४॥ गुरवःश्रुतिभिःसार्धमात्माप्रि
यतमःसदा ॥इत्थंवदंतोनैवैतेशक्ताःसाक्षाद्विभाषितुं ॥ ६६५॥ गुरूपदिष्टंतेनायंयदस्तिपरमंसुखं ॥ कथं
तुतद्विजानीयांसाक्षादितिविचिंतयेत् ॥ ६६६ ॥ परमंसुखमात्माख्यंकिमुभातिविभातिवा ॥ ममब्रह्मा
त्मविज्ञानवतोनीरागचेतसः ॥ ६६७॥ आनंदस्यस्वयंयस्मादन्यस्यापिचतादृशं ॥ ततोमेभातिसम्यक्त
द्विरुद्धंभातिवाधुना ॥ ६६८ ॥

त्कारार्थीयद्गुरूपदिष्टंपरमंसुखंतदहंकथंसाक्षाद्विजानीयांएवंकामयन्निितिवक्ष्यमाणविधयाचिंतयेत्विचारयेदित्यर्थः ॥ ६६६ ॥ तद्वि
चारमभिनयति परममितिनवभिः तद्ब्रह्मणःस्वरूपभूतंसुखमिदानींकिममभातिकिंवाविभातिविपरीतंभाति कीदृशस्यममतदावरणापहा
रकविज्ञानवत्त्वेनप्रसिद्धस्यरागाख्यप्रतिबंधकहीनस्यचेत्यर्थः ॥ ६६७ ॥ नन्वनिर्देश्यत्वलक्षणेनतद्ज्ञानस्यसुज्ञेयत्वात्किमनेनविचारेणे
तिचेन्न अनिर्देश्यत्वस्यलौकिकसुखेपिसत्वेनातिप्रसक्तत्वादित्याह आनंदस्येति स्वयंपदंस्वरूपपरं तथाचान्यस्यलौकिकस्याप्यानंद
स्यस्वरूपंतादृशमनिर्देश्यंभवतीत्यर्थः अतउक्तोविचारोयुक्तइत्याह ततइति विरुद्धंविपरीतं ॥ ६६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदर्थंयोवैभूमातत्सुखमित्यादिश्रुत्यनुसारेणसुखलक्षणमाह कारकाणीति कारकाणिकर्मादीनिषट् शेषःषष्ठ्यर्थःसंबंधः क्रियाच वाशब्दश्चार्थे तेननिपातार्थसंग्रहः एतेसर्वेभेदंविहायनतिष्ठंति एतदुपलक्षितभेदशालियद्भवतितत्परंमुख्यंसुखंनभवतिकिंतुनिर्भेदमेवसुखमित्यर्थः ॥ ६६९ ॥ सभेदंवस्तुहिभयादिप्रयोजकत्वाद्दुःखमेवेत्याह भेदेसतीति भेदेसतियत्सुखंतज्जन्मादिविकारैर्ग्रस्तमेवभवेत्तादृशेविकारिणिसुखत्वमेवबाधितंसुतरांपरसुखत्वमित्यर्थः ॥ ६७० ॥ तादृशेसुखबुद्धिस्तुभ्रमएवेतिसदृष्टांतमाह आदाविति आदौस्पृहादिप्रयोजकत्वादंतेवियोगाच्चयद्वस्तुदुःखरूपंतन्मध्येसुखरूपंकथंभविष्यति वियोगभयादिभिर्दुःखतायाएवौचित्यात् तादृशंचबालाएवसुखमि

कारकाणीहयत्रस्युःशेषोवाक्रिययायुतः ॥ तत्रभेदोभवेन्नित्यंभेदवन्नसुखंपरम् ॥ ६६९ ॥ भेदेसतिहिजन्मादिग्रस्तमेवसुखंभवेत् ॥ सुखत्वमपिनैवास्तितादृशेपरतःकुतः ॥ ६७० ॥ आदावंतेचयद्दुःखंवर्त्तमाने कथंसुखं ॥ ततोदुःखेसुखाख्येयंबालैर्वैषयिकेकृता ॥ ६७१ ॥ तेनभानंहियस्यस्यात्कारकादेरभावतः ॥ सुखंतदेवविज्ञेयंपरमंचमहात्मभिः ॥ ६७२ ॥ यदितद्धिस्वयंभातिस्वभानंयत्सुखंपरं ॥ ततोभात्येवविशदंसर्वदापरमंसुखं ॥ ६७३ ॥

तिमन्यंतेयथावातरोगिणोमुष्टिकादिप्रहारंसुखंमन्यंतेतद्वदिति ॥ ६७१ ॥ फलितमाह तेनेति अभावोऽप्राप्तिरनपेक्षेतियावत् तथाच कारकादिद्वैतमनपेक्ष्यवर्तमानंयद्वस्तुतदेवपरमंसुखमित्यर्थः ॥ ६७२ ॥ एवंलक्षितेसुखेभातीतिकोटिरेवोपपन्नास्वयंप्रकाशेनचैतन्येनसहतस्याऽभेदादित्याह यदीति यदितत्परमंसुखंभातिस्वयंप्रकाशचिद्रूपंयच्चस्वभानंस्वयंप्रकाशाचित्तद्रूपंपरमंसुखमित्येवंव्यतिहारेणचित्सुखयोरभेदःसिद्धस्तदातत्परमंसुखंसदाविशदंभातीत्येवयुक्तमित्यर्थः निरतिशयप्रेमास्पदत्वानुपपत्त्यादयोनुकूलतर्काश्चात्रानुसंधेयाः ॥ ६७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यसर्वदाभानेऽनुकुलांयुक्तिमप्याह अन्यथेति ममसुखंभातीत्यादिलौकिकबोधेषुयतोन्यथाध्यासइतरस्यान्यधर्मेणावभासस्तन्मा त्रंवर्त्तते आत्मधर्मभूतंसुखमंतःकरणवृत्त्यादावारोप्यैवलोकेसुखव्यवहारइतियावत्‌यथाकामुकाःकामनोपशमेनाभिव्यक्तंस्वरूपसुख मेवातिवीभत्सेस्त्रीकायेकल्पयंतीतिप्रसिद्धं तथाचयदीदंवर्णितंसुखंसदानभासेततदातद्धर्मसुखत्वस्यान्यत्रारोपोनस्यादितिभावः दुःखका लेपिकिंचित्प्रेमास्पदमालंब्यैवजनाजीवंतीत्यपिध्येयं ॥ ६७४ ॥ एवंविचारेणापगतविरुद्धांशकंतत्सुखंयोगिनःसम्यगाविर्भवतीत्या ह इत्थमिति ॥ ६७५ ॥ तदानिःशेषदुःखनिवृत्तिनिरूपयति यस्येति यस्यारात्रेरंतेमंगलावहःसूर्योदयोभवतिसासुप्रभातेत्युच्यते ल्यब्लो

अन्यथाध्यासमात्रंमेसुखंभातीतिवर्तते॥ कामुकानांयथाध्यासात्सुखंभात्यत्रकामिनी ॥ ६७४ ॥ इत्थंचिं तयतोनित्यंविरक्तस्यमहात्मनः॥ अवाङ्मनसगम्यंतत्प्रतिभातिसुखंपरं॥ ६७५॥ यस्यदर्शनतोदुःखरूपैषा शर्वरीनृणां॥ सुप्रभाताभवेन्नित्यमानंदात्मदिवाकरात्॥ ६७६॥ आनंदात्मास्वयंज्योतिर्दुःखरात्रिविनाश कः॥ दिवाकरःसदामायातमःस्तोमविनाशकः ॥ ६७७॥ सूर्यादिभिःसदैवायंतैजसैर्नप्रतीयते ॥ किंतुते नैवसकलंसूर्याद्येतत्प्रतीयते ॥ ६७८ ॥ स्वयंज्योतिर्यदैवायमानंदात्माप्रतीयते ॥ तदापश्चाज्जगत्सर्वमनु भातिजडाजडं ॥ ६७९॥ यथादीपस्यकलिकाभानादनुविभातितत्॥ वर्त्तितैलादिकंतद्वदात्मभानादनंतरं ॥६८०॥ बुद्ध्यादिकंजगत्सर्वमध्यात्मादिविभेदवत्॥ आत्मभासैवभात्येतत्स्वयंभानविवर्जितं॥ ६८१ ॥

पेपंचमी तथाचयस्यउक्तानंदरूपब्रह्मणोदर्शनंतदाकारवृत्तिरूपमानंदरूपोदिवाकरोभिव्यक्तोयत्रतथाभूतंप्राप्यइयंप्रसिद्धादुःखरूपाश र्वरीसुप्रभाताभवेदित्यर्थः ॥ ६७६ ॥ आनंदात्मनोदिवाकरत्वंसाधर्म्यैःस्फुटयति आनंदात्मेति मायारूपस्यतमःस्तोमस्यवृत्तिलक्षण पूर्वाचलारूढत्वेननाशकः ॥ ६७७॥ अत्रार्थेपंचमवल्ल्युंत्यामृचमनुकूलयति सूर्यादिभिरितिपंचभिः अयमात्मासूर्यादिभिर्नभास्यः किंतुतेनैवसूर्यादयोभास्याइत्यर्थः ॥ ६७८ ॥ यथाग्निभांतमनुसृत्याऽयोभातितथासर्वंजगत्तमात्मानंभासमानमनुसृत्यभातीत्याह स्व यमिति प्रतीयतेभासते ॥ ६७९॥ एतद्दृष्टांतेनस्फुटयति यथेतिद्वाभ्यां यथादीपशिखाभानतंत्रंवर्त्यादिभानंतथाबुद्ध्यादिप्रपंचभानं चिदात्मभानतंत्रं उभयत्रस्वयंभानशक्तेरभावादितिद्वयोरर्थः॥ ६८० ॥ ६८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुप्रकाशानामादित्यादीनांप्रकाशांतरापेक्षाबाधितेतिशंकांकैमुत्यसूचकदृष्टांतेनपरिहरति भानवश्चेति भानवःप्रकाशत्वेनप्रसिद्धाः सूर्यादयश्चतमपेक्ष्यभांतीतियोजना यथातैजसमपिचक्षुःसूर्यानुग्रहेणघटादिकंप्रकाशयतीतिप्रसिद्धंतथाचयदातैजसमपिचक्षुःस्वव्यव हारायतैजसमप्यादित्यादिकमपेक्षतेतदाजडानांविजातीयचिल्लक्षणप्रकाशापेक्षोपपत्तिःकिमुवाच्येतिभावः ॥ ६८२ ॥ संसारमूल त्वादिनाब्रह्मावधारणपरायाःषष्ठवल्ल्याआद्यांकंडिकांव्याकरोति पुरमित्यष्टभिः यच्छरीरंसंसारमयंपूर्वमेकादशद्वारपुरत्वेनवर्णिततंदेवा श्वत्थवृक्षत्वेनवर्णयंतिवेदविदइत्यर्थः ॥ ६८३ ॥ ऊर्ध्वमिति यद्ब्रह्मसर्वस्माज्जगतऊर्ध्वमुत्कृष्टंकारणत्वात्पूर्वोक्तपरमार्थस्वयंप्रकाशानंदा

भानवश्चयथादित्यभासाभातंघटादिकं॥चक्षुःप्रकाशयेत्सर्वंस्वयंतदपितैजसं ॥ ६८२ ॥ पुरमेकादशद्वारं यदुक्तंतेमयापुरा ॥ तदेवाश्वत्थरूपेणकेचिदाहुर्द्विजोत्तमाः ॥ ६८३ ॥ ऊर्ध्वंसर्वस्यजगतःकारणंब्रह्मयत्पु रा ॥ स्वयंज्योतिःसदामोक्षरूपंवस्तुचकीर्त्यते ॥ मूलंतदेवस्यादस्यसदाश्वत्थस्वरूपिणः ॥ ६८४ ॥ श्वोन तिष्ठतियस्मात्सतस्मादश्वत्थईरितः ॥ प्रतिक्षणविनाशित्वंभूतावासस्यदृश्यते ॥ ततःकथंनुविश्वासःश्वोव स्थानेस्यसंभवेत् ॥ ६८५ ॥ अर्वागधइतिप्राहुःकारणापेक्षयाद्विज ॥ अधोनिकृष्टतालोकेकथ्यतेसर्वजंतु भिः ॥६८६॥ शाखानानाविधादेहाःसेंद्रियाःकर्मसंभवाः॥अस्यस्थूलस्यदेहस्यनिकृष्टाब्रह्मरूपतः॥६८७॥

त्मकमोक्षरूपत्वाच्चतदेवास्यशरीरस्याश्वत्थरूपवृक्षस्यमूलमिति ॥ ६८४ ॥ तत्राश्वत्थपदसमन्वयंदर्शयति श्वइति श्वउत्तरदिनेयस्यभूता वासस्यपांचभौतिकस्यक्षणस्थितावप्यविश्वासस्तत्रदिनांतरपर्यंतमास्थाकस्यस्यादित्यर्थः ॥ ६८५ ॥ अस्यार्वाक्शाखतांविवृणोति अ र्वागितिद्वाभ्यां अर्वाक्पदमधःइत्यर्थेप्रयुंजतेवेदविदः तथाचश्रुत्यंतरे अर्वाग्देवाअस्यविसर्जनेनेति अधःपदंनिकृष्टेपिलोकेप्रयुज्यते त थाचब्रह्मात्मकमूलान्निकृष्टानानायोनिदेहाःसेंद्रियाःसूक्ष्मदेहाश्चकर्मलक्षणस्कंधप्रभवाअस्यदृश्यमानस्यस्थूलदेहात्मकाश्वत्थस्यशा खास्थानीयाइतिद्वयोरर्थः ॥ ६८६ ॥ ६८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्याश्वत्थपदसूचिताऽस्थानर्हताकत्वेपिबीजांकुरप्रवाहरूपेणनित्यत्वमुक्तमित्याह अश्वत्थोपीति ॥ ६८८ ॥ अयंवृक्षोमूलस्यसर्वाधि ष्ठानत्वादिविज्ञानेनैवनिकृत्यतेइतिसूचयन्नाह मूलमिति अस्यवृक्षस्ययन्मूलंतदेवसर्वाधिष्ठानंस्वयंप्रकाशात्मरूपत्वाच्चकेनाप्यतिक्रम णीयंनभवतीत्युक्तं हेनचिकेतएतदेवत्वत्पृष्टंतत्त्वमित्यर्थः ॥६८९॥ नियंतृत्वात्मब्रह्मलिंगप्रदर्शकद्वितीयार्थमाह प्राणात्मनीतित्रिभिः य स्मिन्प्राणपदोक्तेआत्मनिविश्वकारणेप्रतिष्ठितंलब्धस्थितिकंसर्वंजगत्स्वस्वव्यापारेप्रवर्त्ततेततएवचप्राणादात्मरूपाज्जायतेच ॥ ६९० ॥

अश्वत्थोप्येषसततंनित्योबीजांकुरादिना ॥ प्रवाहरूपतोयद्वत्तरुरन्योवटादिकः ॥ ६८८ ॥ मूलंयदस्यतस्मि न्हिलोकाःसर्वेसमास्थिताः ॥ यदतिक्रम्यकोप्यत्रनगच्छेदितिकीर्तितं ॥ एतदेवत्वयापृष्टंधर्मादिपरिवर्जि तं ॥ ६८९ ॥ प्राणात्मनिजगद्धेतौयस्मिन्विश्वंप्रतिष्ठितं ॥ व्यापारंस्वस्यकुरुतेसर्वदाशंकयाविना ॥ तत एवचसंजातंप्राणादात्मस्वरूपिणः ॥ ६९० ॥ सहिसर्वस्यकथितोमृत्युरूपोमहेश्वरः ॥ अयमेवमिहलोकेभ यमुद्यतवज्रवत् ॥ एतदात्मतयाविप्रायेविदुस्तेऽमृताःस्थिताः ॥ ६९१ ॥ आत्मनोमरणंनात्माकारयेत्कस्य चित्कचित् ॥ ततएवमृतिंहित्वानिर्भयोभयदःस्थितः ॥ ६९२ ॥ सूर्याग्नीतपतोनित्यंनिखिलंभुवनत्रयं ॥ इंद्रोवर्षतिवायुश्चवातिलोकसुखप्रदः ॥ ६९३ ॥ मृत्युश्चपंचमस्तेषामहंभीतःसदाततः ॥ धावन्प्राणान्श रीरेभ्यस्तस्माद्त्यंतभीतितः ॥ ६९४ ॥

सहीति सस्थित्याद्युपलक्षितोमायोपाधिरीश्वरःसर्वसंहारकत्वेनमृत्युरूपत्वात्कार्यात्माभिमानिनांभयहेतुरुद्यतेंद्रवज्रवत्तंयेआत्मत्वेनवि दंतितेऽमृतत्वंभजंतेइत्यर्थः ॥ ६९१ ॥ आत्मभूतानाममृतत्वेउपपत्तिमाह आत्मनइति यथाग्निरात्मानंदग्धुमशक्तस्तथात्मनाआत्ममर णस्यकर्त्तुमशक्यत्वादात्मस्वरूपममृतमित्यर्थः ॥ ६९२ ॥ तस्यसर्वभयप्रदत्वेकैमुत्यंदर्शयंत्यास्तृतीयायाअर्थमाह सूर्याग्नीइतित्रिभिः त पतःप्रकाशादिमंतंकुरुतः वातिवहति ॥ ६९३ ॥ मृत्युश्चेति तेषामेतद्वाक्योक्तानांमध्येपंचमोयोमृत्युस्तद्रूपोमृत्युरहंयमोधावन्सन्प्राणा न्हरामि कीदृशःतस्मादीश्वरादत्यंतभयरूपाद्भीतः ॥ ६९४ ॥ ॥४८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचवामनत्वादिरूपेणवर्णितादस्मादीश्वरादन्येषांभयंकिमुवाच्यमित्याह कुतइति ॥ ६९५॥ तद्भयनिवृत्तयेइहदेहएवतत्त्वज्ञानंसंपाद्य मित्याकारंचतुर्थ्यर्थमाह आत्मविज्ञानेतित्रिभिः यस्मादेतद्भयानुत्पत्तिप्रयोजकमात्मविज्ञानमेवततइहैवज्ञातव्योमृत्योर्बिभ्यता अतएवो क्तं मृत्योर्बिभेषिकिंमूढभीतंमुंचतिकिंयमः अजातंनैवगृह्णातिकुरुयत्नमजन्मनीति ॥ ६९६ ॥ इहचेदिति यदित्विहदेहेपतनात्पूर्वंज्ञानं नलब्धंतदनेनेश्वरेणयथाकर्मसृज्यमानेषुनानालोकेषुनानादेहान्मृत्युभयव्याप्तान्प्राप्नोतीतिद्वयोःसंबंधः ॥ ६९७ ॥ ६९८ ॥ पंचमी

कुतोपरेभयंनैवगच्छेयुःप्राणिनःसदा ॥ अस्माद्वामनतःप्राणात्प्राणापानांतरस्थितात् ॥ ६९५ ॥ आत्मवि ज्ञानतोयस्माद्भयमेतन्नजायते ॥ इहैवततएवायंज्ञातव्योमृत्युभीरुणा ॥ ६९६ ॥ इहचेदात्मविज्ञानंनजा तंपतनात्पुरा ॥ ततःसर्वेषुलोकेषुसृज्यमानेषुसर्वदा ॥ ६९७ ॥ शुभाशुभेषुसततंशरीराण्यधिगच्छति ॥ बहुमृत्युकराण्येषयतःस्यात्सततंभयं ॥ ६९८ ॥ यथाविशुद्धआदर्शेविस्पष्टंदृश्यतेमुखं ॥ अधिकारिश रीरेस्मिन्बुद्धावात्मातथैवहि ॥ ६९९ ॥ स्वप्नेयथानविशदंस्वस्यरूपंप्रतीयते ॥ पितृलोकेतथैवात्माभोगा सक्तानगम्यते ॥ ७०० ॥ अप्सुयद्वच्चलास्वत्रवैपरीत्यात्प्रतीयते ॥ मुखंगंधर्वलोकेपितथैवात्माप्रतीयते ॥ ७०१ ॥ गंधर्वलोकआत्मायंभोगासक्तेनचेतसा ॥ प्रतीतोपिकरोत्येषनाऽविद्यायाविनाशनं ॥ ७०२ ॥

मुक्तार्थेयोजयति यथेतिसप्तभिः यथाशुद्धेदर्पणेस्पष्टंमुखंदृश्यतेतथासाधनचतुष्टयसंपन्नाधिकारिशरीरेविशुद्धतयाप्रत्यक्प्रवणायांम तौस्पष्टमात्मदर्शनमित्यर्थः ॥ ६९९ ॥ तथापितृलोकपदोक्तेपितृयाणगम्येस्वर्गलोकेरम्यविषयप्रवणायांमतौनस्पष्टमात्मदर्शनमितिसदृ ष्टांतमाह स्वप्नेइति स्वस्यात्मनः ॥ ७०० ॥ अप्स्विति यथाचंचलेजलेकंपादिविपरीतधर्मयुक्तंमुखमीक्ष्यतेतथागंधर्वलोकेध्वनिमय त्वादिविपरीतधर्मकमात्मरूपमीक्ष्यतइतिउपलक्षणमेतल्लोकांतराणामिति ॥ ७०१ ॥ एतत्स्फुटयति गंधर्वेति भोगाभुज्यमानाविषयाः उत्तरार्द्धेशुद्धरूपेणाविज्ञानादितिशेषः ॥ ७०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यपिहिरण्यगर्भलोकेस्पष्टमात्मभानंतथापितस्यबह्वंतरायकत्वेनदुष्करोपासनालभ्यतयादुष्प्रापत्वात्तत्प्रतीक्षयाइहयत्नशैथिल्यंनका र्यमित्याह ब्रह्मलोकइति अत्रश्रुतिप्रसिद्धे ॥७०३॥ ब्रह्मलोकउपाधिविविक्ततालक्षणशुद्धतयात्मभानेदृष्टांतमाह छायेति ॥७०४॥ फ लितमाह अस्मिन्नेवेति स्वाधीनेसुलभेच ॥ ७०५ ॥ आत्मसाक्षात्कारेसाधनंतुद्वयंसांख्यंयोगश्चतत्रसांख्यंविवेकात्मकंप्रदर्शयंत्योःषष्ठी सप्तम्योरर्थमाह इंद्रियाणामितिषड्भिः इंद्रियाणांसदृत्तिकानांपृथक्पृथक्स्वस्वकारणेभ्योजायमानानांपृथग्भावंस्वस्वरूपात्परस्परंचभे दंयच्चैतन्यंजानातितदेवबुद्धेःसाक्षिभूतमात्मतयाज्ञेयं यएवंबुद्धिसाक्षिणमेवात्मतयामन्यतेनदृश्यवर्गंसएवशोकंतरतिसएवचविद्वानिति यावदितिद्वयोरर्थः ॥ ७०६ ॥ ७०७ ॥ तत्पदार्थशोधनपरतयासप्तमींयोजयति आत्मेत्यादिना यआत्माहेतुशून्योऽजःपूर्वमुक्तःसज्ञानें

ब्रह्मलोकेतिविशदमात्माजंतोःप्रतीयते ॥ यद्यप्यत्रतथाप्येषदुष्प्रापःप्राणिभिःसदा ॥ ७०३ ॥ छायातपौ यथैवैतौप्रतीयेतेपृथक्पृथक् ॥ ब्रह्मलोकेतथैवात्माजगद्भिन्नःप्रतीयते ॥ ७०४ ॥ अस्मिन्नेवततोदेहेस्वाधी नेसुलभेसति ॥ आत्मनोनुभवःसाक्षात्संपाद्यःसुखमिच्छता ॥ ७०५ ॥ इंद्रियाणांपृथग्भावमुदयास्तमयौ चयत् ॥ पृथगुत्पद्यमानानांव्यापारज्ञानरूपिणां ॥ ७०६ ॥ जानात्यात्मासविज्ञेयोबुद्धिस्थःसर्वदेहिनां ॥ ए नमात्मतयाविद्वान्मत्वाधीरोनशोचति ॥ ७०७ ॥ आत्मायस्तेमयापूर्वंहेतुशून्यःप्रकीर्तितः ॥ विषयैर्भेदशू न्यानामिंद्रियाणांद्वयात्मनां ॥ कर्मज्ञानात्मकादस्मात्परतोव्यवहारतः ॥ ७०८ ॥ इंद्रियेभ्यःपरंज्ञेयंमनोबु द्धिस्ततःपरा ॥ सत्वादधिमहानात्मामहतोव्यक्तमेवच ॥ अव्यक्तात्पुरुषस्तद्वत्परःसर्वगतःसदा ॥ ७०९ ॥

द्रियकर्मेंद्रियभेदेनद्विविधानामिंद्रियाणांसंबंधिनोव्यवहारात्प्रपंचात्कर्मज्ञानात्मकात्कर्मज्ञानोभयमयात्परतःस्थितइतिशेषः कीदृशा नामिंद्रियाणां विषयैर्भेदशून्यानांदृष्टिसृष्टिविधयामैत्रेयीब्राह्मणादौएकायनप्रक्रियोक्तयास्वस्वदृश्यविषयेभ्यःकारणतयाभेदायोग्या नां इदंविशेषणमद्वयत्वस्फुटीकरणायोत्तरत्रविषयाणामनुपादानेनन्यूनतापरिहारायचोक्तमितिध्येयं ॥ ७०८ ॥ तत्रपरंपरांश्रौतींदर्श यति इंद्रियेभ्यइति इंद्रियेभ्योविशेषभूतेभ्योमनःसामान्यरूपंपरंततश्चसविकल्पात्बुद्धिःसत्त्वपदोक्तानिर्विकल्पकरूपापराततश्चमहत्प दोक्तासमष्टिबुद्धिःपराततश्चाव्यक्तंसूक्ष्मलयस्थानमव्याकृतंपरंततःपरःपूर्णःपुरुषइत्यर्थः ॥ ७०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्येति कीदृशःपुरुषः स्थूलसूक्ष्मप्रपंचेनदृश्यतयाद्रष्टुरनुमापकेनवर्जितः ज्ञानद्वारामोक्षामृतत्वयोःप्रयोजकश्चेत्यर्थः ॥ ७१० ॥ एकस्मिन्नात्मनिसविलासाविद्याध्वंसत्वंभासमानानंदरूपत्वंचवर्तेतेतेक्रमेणमोक्षामृतपदयोःप्रवृत्तिनिमित्तभूतेइत्याह अविद्यायाइति ॥७११॥ मोक्षेति अस्माद्वर्णितात्प्रवृत्तिनिमित्तयोर्भेदाद्विशेषाद्धेतोर्मोक्षामृतत्वयोर्भेदःअपर्यायतारूपउक्तः ननुकल्पिताभावस्याधिष्ठानात्मकत्वादुक्तभेदोपिकथमित्याशंकांवारयति अभेदेपीति प्रतिपाद्यवस्तुनएकत्वेपिकंचित्कल्पितप्रतियोगिनिरूप्यंभेदंविगम्यकल्पयितेत्यर्थः ॥ ७१२ ॥ अथसाक्षात्कारायइंद्रियनिरोधलक्षणंयोगंविदधत्याअष्टम्याअर्थमाह दर्शनेइतिचतुर्भिः अस्यात्मनोरूपंदर्शनेइं

कार्यकारणरूपेणलिंगेनचविवर्जितः॥ यज्ज्ञात्वामुच्यतेजंतुरमृतत्वंचगच्छति॥७१०॥ अविद्यायाःसकार्यायानाशोमोक्षइतीरितः॥ आनंदात्मप्रभानंयदमृतत्वंतदीरितं ॥ ७११ ॥ मोक्षामृतत्वयोरस्माद्भेदाद्भेदउदीरितः॥ अभेदेपिचविद्वद्भिर्भेदंकंचिद्विगम्यच ॥ ७१२॥ दर्शनेयोग्यतांनैतिरूपमस्यात्मनःसदा॥ नचक्षुषैनमात्मानंकोपिपश्यतिकर्हिचित्॥ ७१३॥ यतोरूपादिहीनोयमिंद्रियैर्नैवगम्यते॥ उक्तमेतत्पुरातुभ्यंमयात्रनचिकेतसे ॥ ७१४॥ हृत्स्थयात्रततोबुद्ध्यानियंत्र्यामनसोपिहि॥ संकल्प्यकंचनाकारमवाङ्मनसगोचरे॥ ७१५॥ आनंदात्मनितेनायंगमयेत्स्वात्मरूपतः॥ इत्थंजानंतियेनित्यममृतास्तेभवंतिच॥७१६॥ यदापंचावतिष्ठंतेज्ञानानिमनसासह॥ विचेष्टतेनबुद्धिश्चतामाहुःपरमांगतिं॥ ७१७॥

द्रियजज्ञानेयोग्यतांयतोनप्राप्नोतिततश्चक्षुषातदुपलक्षितेतरेन्द्रियैश्चैनंनकश्चित्पश्यतीत्यर्थः ॥ ७१३ ॥ योग्यताऽभावेहेतुतयारूपाद्यभावमाह यतइति ॥ ७१४ ॥ ततोनिरोधेनैवात्मानमात्मतयाजानीयादित्याह हृत्स्थयेति अयमधिकारीतेनयोगेनस्वात्मत्वेनात्मानंगमयेत्साक्षात्कुर्यात् कीदृशेनतेन हृत्स्थयाहृदयेकायतामापन्नयाबुद्ध्यामनसःसविकल्पकस्यनियंत्र्यावशीकर्त्र्याकिंचकमप्याकारंदृश्यरूपमानंदात्मनिनसंकल्प्यनिष्पादितेनेतिशेषेणयोजना इत्थमित्यादिस्फुटमितिद्वयोरर्थः ॥ ७१५ ॥ ७१६ ॥ योगस्योत्कर्षंबोधयंतींनवमींपठति यदेति ज्ञानानिज्ञानेंद्रियाणिमनोबुद्धिश्चएतेषांनैश्चल्यरूपापरमागतिरिति ॥ ७१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमतामुपपादयति जीवतइतिद्वाभ्यां यन्मनःप्रभृतीनांनिरंतरमैकाग्र्यमस्याअवस्थायाःसंप्राप्तितुल्यापराउत्कृष्टागतिर्नास्तिकिंत्वियमेव पराआनंदात्मभानेनसकलदुःखप्रहाणादितिद्वयोरर्थः ॥७१८॥७१९॥ दशमींविवृणुते तामितित्रिभिः तांवर्णितांबाह्यांतरकरणानांधारणांस्थिरांविघ्नैरप्रकंप्यांसकलदुःखवियोगरूपामपिविपरीतलक्षणयायोगपदेनाहुरित्यर्थः अयंयोगोयतःसृष्टिसंहारक्षमत्वलक्षणैश्वर्यलाभहेतुरतस्तदर्थमप्रमत्तोभवेदित्यर्थः ॥ ७२० ॥ एतत्स्फुटयन्निंद्रियप्रवृत्तेःप्रमादस्यचयोगविरोधितामाह अहमिति ब्रह्मात्मैक्याव

जीवतोविदुषोनास्याःसंप्राप्त्यास्तिपरागतिः॥ मनोबुद्धींद्रियाणांस्याद्यदैकाग्र्यंनिरंतरं ॥ ७१८॥ एतेषांनिश्चलीभावआनंदात्मास्वयंप्रभः॥ प्रतिभातियतोदुःखंनाणुमात्रंचगच्छति॥ ७१९ ॥ तांयोगमितिमन्यंते स्थिरामिंद्रियधारणां॥ अप्रमत्तस्तदाभूयाद्योगोहिप्रभवाप्ययौ॥ ७२० ॥ अहंब्रह्मेतिविज्ञानंयोगोनेंद्रियधारणां॥ विनाभवतिकामादिप्रमादाभासएववा॥७२१॥ अप्रमत्तःपुमान्योगीजगदुत्पत्तिनाशने॥समर्थोभवतिश्रीमानीश्वरोत्रयथैवहि॥७२२॥ योगमेकंविहायायमानंदात्मामहेश्वरः॥ नैववाचानमनसाप्राप्तुंशक्योनचक्षुषा ॥ ७२३॥ आत्मरूपमिदंश्रद्धावित्तादेवोपलभ्यते॥ आनंदात्मास्वयंज्योतिरस्तीत्येतत्समीरणं ॥ गुरुशास्त्रादिविश्वासात्तस्मिन्श्रद्धेयमीरिता॥ ७२४ ॥

धारणरूपोयंयोगइंद्रियधारणांविनानभवतितथाकामसंकल्पादिचित्तवृत्त्युदयलक्ष्यस्यप्रमादस्यआभासेईषदुदयेपिसतिनभवतीत्यर्थः ॥७२१॥ तस्यपरमैश्वर्यहेतुतांसोपाधिकब्रह्मभावद्वारिकामाह अप्रमत्तइति यथानित्यसिद्धईश्वरोजगदुत्पत्त्यादौशक्तःतथायमपिभवतीत्यर्थः ॥ ७२२ ॥ नैवेत्यादेरेकादश्याअर्थमाह योगमितिचतुर्भिः अयमात्माउक्तंयोगंविनानलभ्यः वागाद्यगोचरत्वादित्यर्थः ॥७२३॥ उत्तरार्द्धार्थंस्फुटयति आत्मेत्यादिना इदमात्मनोरूपंश्रद्धालक्षणाद्वित्ताद्धनादेवहेतोर्लभ्यं श्रद्धायाःस्वरूपंतुनास्तिकविकल्पान्परित्यज्य सदुपदेशविश्वासेनानंदात्मास्तित्वांगीकरणमित्यर्थः ॥ ७२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतश्चान्योहेतुरात्मसाक्षात्कारेनास्तीत्याह कालेतिद्वाभ्यां यत्सदसत्स्थूलसूक्ष्मंवस्तुकालत्रयावच्छिन्नत्वेनवागादिगोचरतयाप्रसिद्धंयच्च कालानवच्छिन्नलक्षणनित्यतयाचलोकेप्रसिद्धंतत्सर्वमस्तिमायाशबललक्षणंयत्सत्तन्मयं यच्चालौकिकंशुद्धंतदस्तिसन्मात्रमित्येवंब्रुवत आस्तिकस्यमतादन्यत्रमतेस्वीकृतेसतितदात्मतत्त्वंकथमुपलभ्यमितिद्वयोरर्थः ॥७२५॥७२६॥ द्वादशीमुपादत्ते सदसत्त्वेति यद्यप्ययमात्मासत्त्वासत्त्वलक्षणधर्माभ्यांविमुक्तत्वात्सदसत्त्वयोर्मध्येभवति सत्त्वलक्षणधर्मराहित्यात्सत्पदेनाभिधातुमशक्यःसर्वव्यवहारनिर्वाहकत्वाच्चासत्पदप्रयोगानर्हइतियावत् तथापितद्दर्शनेऽयमेवक्रमः अयंकः प्रथमंविश्वकारणलक्षणसद्रूपेणद्रष्टव्यःपश्चात्तत्त्वभावपदोक्तशुद्ध

कालत्रयात्मकंयत्तुयच्चकालत्रयात्परं ॥ सदसद्वस्तुतत्सर्वंधियावाचावगम्यते ॥ ७२५॥ अवाङ्मनसगम्यं यत्सर्वतोपिविलक्षणं ॥ अस्तीतिब्रुवतोन्यत्रकथंतदुपलभ्यते ॥ ७२६ ॥ सदसत्त्वविनिर्मुक्तोमध्येयंसदसत्त्वयोः॥ अस्तीत्येवोपलब्धव्यस्तत्त्वभावेनचोभयोः ॥ अस्तीत्येवोपलब्धस्यतत्त्वभावःप्रसीदति ॥७२७॥आनंदात्मस्वरूपस्यस्वप्रियस्यास्तितायतः॥ तत्त्वभावस्ततोस्तित्वमात्मनोनास्तिनास्तिता ॥७२८॥ नास्तिताभासकोनास्तीत्येवंवक्तुंनशक्यते ॥ अस्तित्वाद्भातिनिखिलंद्रष्टुस्तद्धिप्रसिद्ध्यति ॥ कथंसत्वमयोगौणेनप्रसिद्ध्येतचात्मना ॥ ७२९ ॥ यथाराजात्रराजेतिविज्ञातःसन्प्रसीदति ॥ सुखदस्तद्वदात्मायंतत्त्वज्ञानात्प्रसीदति ॥ ७३० ॥

रूपेण यतउभयोरनयोरस्तित्वतत्त्वभावयोः* ॥७२७॥ उक्तक्रमेहेतुंस्फुटयन्विशिष्टरूपेणयादृष्टासत्तासैवशुद्धरूपेणस्थितासतीतत्त्वभावपदेनोक्तेत्याह आनंदेति यतआनंदरूपत्वेननिरतिशयप्रेमास्पदस्यात्मनएवास्तित्वंभवतिनास्तितातुनैवास्तिततःकेवलास्तित्वमेवतत्त्वभावइत्युक्तमित्यर्थः॥७२८॥ आत्मनोऽस्तितामेवस्फुटयति नास्तितेति आत्मनोनास्तित्वस्यापिसाधकत्वान्नास्तित्वंवक्तुमशक्यंयतस्तद्दृश्यजातंद्रष्टुःप्रसादात्सिध्यत्यतआत्मनोऽस्तित्वमादायैवभाति एवंसर्वसत्ताप्रदत्वात्सत्त्वमयःसदेकरूपआत्मागौणेनआत्मनासद्रूपेणकथंसिध्येतकिंतुसएवमुख्यसद्रूपइत्यर्थः ॥ ७२९ ॥ योहियद्रूपस्तद्रूपेणैवज्ञातःसप्रसीदतीत्येतद्दृष्टांतेनस्फुटयति यथेति यथाराजाराजत्वेनज्ञातःप्रसीदतिसुखदश्चभवतितथात्मापिकेवलास्तित्वरूपेणेत्यर्थः ॥ ७३० ॥

* एतदग्रेग्रंथःकिंचित्त्रुटितइतिभाति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भृत्यादीति यथाचातत्त्वज्ञानतोव्यामोहाद्भृत्यमंत्र्यादिरूपेणविज्ञातोनृपोज्ञातुरात्माआत्मवत्प्रेमास्पदभूतोपिनप्रसीदतिप्रत्युतकोपेनानर्थं करोतीत्यर्थः ॥ ७३१ ॥ एवमिति प्रथमदलंस्पष्टं तत्त्वंत्वात्मनोस्तितैवेत्याह अस्तितेति फलितमाह तत्त्वेति तत्त्वभावःपरमार्थभूत मस्तित्वं ॥ ७३२ ॥ तत्रपूर्वोक्तःक्रमोनविस्मर्त्तव्यइत्याह अस्तितायाइति यतोस्तितादृष्टेरनंतरंतत्त्वभावोपदेशोनोऽस्मानधिकारिणःप्रति तेनतथैवावधारणंकर्त्तव्यमित्यर्थः ॥ ७३३ ॥ तत्त्वभावेनदर्शनात्किंभवतीत्याकांक्षायांत्रयोदशीपठति यदेति ॥ ७३४ ॥ अस्याअर्थंद

भृत्यादिरूपतोयद्वदतत्त्वज्ञानतोनृपः ॥ विज्ञातोज्ञातुरात्मायंनप्रसीदतिकर्हिचित् ॥ प्रत्युतप्राप्तकोपःसन्ननर्थं संप्रयच्छति ॥ ७३१ ॥ एवमात्माप्यतत्त्वेनविज्ञातोऽनर्थदोभवेत् ॥ अस्तिताचेदात्मनोनविज्ञातानर्थदाभवे त् ॥ तत्त्वभावेनतस्मात्सज्ञातव्यःसुखमिच्छता ॥ ७३२ ॥ अस्तितायाश्चनस्तत्त्वभावउक्तोमनीषिभिः ॥ त त्त्वभावेनतेनायमात्मादृष्टःप्रसीदति ॥ ७३३ ॥ यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः ॥ अथमर्त्योऽमृतोभ वत्यत्रब्रह्मसमश्नुते ॥ ७३४ ॥ तत्त्वभावेनदृष्टःसन्नात्मकामंहृदिस्थितं ॥ इहामुत्रसुखेनैकंनाशयत्यात्मसौष्ठ वात् ॥ ७३५ ॥ रूपयौवनसंपन्नाकामिनीस्वीयसौष्ठवात् ॥ कामुकस्ययथैवान्यवधूरागंविनाशयेत् ॥ ७३६ ॥ सद्यस्तप्तंयथैवैतत्सुगंधंगोघृतंनृणां ॥ हृदिश्रितंतैलकामंनाशयत्यात्मसौष्ठवात् ॥ ७३७ ॥ आनंदात्मास्वयं ज्योतिःप्रतीतस्तुतथैवसः ॥ रागंविनाशयेत्सद्योनृणांवैषयिकेसुखे ॥ ७३८ ॥ मर्त्यस्यमरणंनामकामोवैष यिकेसुखे ॥ तस्मिन्नपगतेजीवन्नमरःसप्रजायते ॥ ७३९ ॥

र्शयति तत्त्वेत्येकादशभिः अयमात्मातत्त्वभावेनदृष्टःसन्नैहिकादिविषयसुखरागमनेकविधंस्वकीयसौंदर्यान्नाशयेदिति ॥ ७३५ ॥ तत्रदृष्टांतद्वयमाह रूपेति प्रथमदृष्टांतःस्फुटः यथाचनवनीतंयथारुचिभक्षिततैलभक्षणेवांछांवारयेदितिद्वितीयदृष्टांतस्वरूपं ॥ ७३६ ॥ ॥ ७३७ ॥ दृष्टांतिकेयोजयति आनंदात्मेति प्रतीतोभातः इतरत्स्पष्टम् ॥ ७३८ ॥ ततोमर्त्यत्वापगमेनामरत्वमाविर्भवतीतिसोपपत्तिक माह मर्त्यस्येत्यादिना मर्त्यपदप्रवृत्तिनिमित्तभूतंमरणमिदमेवयद्विषयसुखेप्रसंजनंकामपदोक्तंतस्यापगमेत्वयंनमर्त्यःकिंत्वमरएवेत्यर्थः ॥ ७३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवस्फुटयति देहेति प्रसिद्धंमरणमपिदेहांतरकामनैव निष्कामस्योत्क्रांत्यनुपपत्तेरितिभावः ॥ ७४० ॥ कामेष्विति सर्वकामव्यपगमे सत्यमरःसन्नयंपुमान्सर्वदुःखवर्जितंजीवनंजीवतीत्येवंव्यवहारंकथंनप्राप्नुयादित्यर्थः ॥ ७४१ ॥ तत्रहेतुतयाब्रह्मभावाप्तिमाह सर्वेति शुद्धात्मनिआनंदरूपेप्रतिभातिभासमानेसत्ययंनापुरुषःकथंब्रह्मरूपोनस्यात्किंतुस्यादेवेत्यर्थः ॥ ७४२ ॥ तत्रहेतुतयाआत्मभूतस्यब्रह्मणोज्ञानैकलभ्यतामाह ब्रह्मेतित्रिभिः आनंदात्मलक्षणस्यस्वरूपस्ययद्विबोधनंविज्ञानमेतद्रूपैवब्रह्मप्राप्तिःश्रुतिप्रसिद्धा यदिब्रह्मआ

देहनाशोनविद्वद्भिर्मरणंकीर्त्यतेक्वचित्॥किंतुकामाभिधंदैन्यंमरणंसर्वदुःखदं॥७४०॥कामेष्वपगतेष्वस्मादमरत्वमयंपुमान् ॥ जीवनंचकुतोनेयात्सर्वदुःखविवर्जितं ॥ ७४१ ॥ सर्वदुःखविनिर्मुक्तआनंदात्मनिकेवले ॥ प्रतिभातिकथंनायंजीवन्ब्रह्मात्मकोनहि ॥ ७४२ ॥ ब्रह्मप्राप्तिरियंनामजीवतोयद्विबोधनं ॥ आनंदात्मस्वरूपस्यस्वात्मभेदविवर्जनात्॥ ७४३ ॥ आनंदात्मानमेतंचेत्स्वप्रभंसर्वगंमहत् ॥ भावाभावविनिर्मुक्तंसर्वभेदविवर्जितम् ॥ देहेस्मिन्प्राप्तवान्केननाप्तंब्रह्माद्वयंपरं ॥ ७४४ ॥ ततःकामविनिर्मोकेदुःखशून्योऽमृतःपुमान्॥ ब्रह्मानंदात्मरूपंतद्देहेस्मिन्नवगच्छति॥ ७४५॥ अहंब्रह्मेतिविज्ञानेसंशयाग्रंथिसन्निभाः॥विपर्ययाश्चजायंतेप्रायःसर्वशरीरिणां॥ असत्यास्ततएवाहंब्रह्मेतिज्ञानवान्भवेत्॥ ७४६ ॥

त्मभिन्नंस्यात्तदाऽद्वितीयत्वंजह्यादित्याद्युपपत्तिविरोधेनब्रह्मात्मनोर्भेदःकथंस्यात् ॥ ७४३॥ एतदेवस्फुटयति आनंदात्मानमिति यदि आनंदादिलक्षणकमेतमात्मानंप्राप्तवान्ज्ञातवान्भवतितदाद्वयंब्रह्मनप्राप्तमितिकेनवक्तुंशक्यमित्यर्थः ॥ ७४४ ॥ फलितमाह ततइति विनिर्मोकेवाधे ॥ ७४५ ॥ चतुर्दशींव्याचष्टे अहमिति ब्रह्मात्मविज्ञानेसतिसर्वेसंशयाविपर्ययाश्चअसत्याबाधिताजायंतेभवंतिततोब्रह्मात्मज्ञानंसंपाद्यं कीदृशाःसंशयादयः हृदयपदोक्तमनोरूपजालस्यग्रंथिनिभाः ॥ ७४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संशयादीन्कुतर्करूपान्दर्शयति असदिति ब्रह्मनास्त्येवअनुपलभ्यमानत्वात् सच्चेदुपलभ्येत किंचममकर्तृत्वादिमतोब्रह्मभावोनसंभवी त्यादिकुतर्करूपाःसंशयादयःपंडितंमन्यानामतत्त्वविदांसंगेनभवंतीतिद्वयोर्योजना ॥ ७४७ ॥ ७४८ ॥ हृदयस्येति यस्याचार्या नुगृहीतस्ययस्मिन्क्षणेएतेसंशयादयोविघट्यंतेतदैवतेनब्रह्मात्मैक्यंप्राप्तंभवति बोधार्कोदयस्यतमोनिवृत्तेश्चसमानकालतायाःप्रसिद्धत्वा त् एतावदेवचतत्त्वंशास्त्राचार्योपदेशेनविज्ञेयमित्यर्थः ॥ ७४९ ॥ येनतूक्तविधयाऽऽत्मतत्त्वंनविज्ञातंतस्यद्वयीगतिरुक्ताग्निविद्यादिनाब्र ह्मलोकाप्तिरितरलोकाप्तिर्वातदुपयोगिद्वारप्रदर्शिकायाःपंचदश्याअर्थमाह हृदयस्येति हृदयकंदादुद्भूताएकाधिकशतसंख्याकाःप्रधा

असद्ब्रह्माप्रतीतेश्चसच्चेत्किंनप्रतीयते॥ सर्वधर्मविनिर्मुक्तंकथंब्रह्मभवामितत् ॥ ७४७॥ इत्यादिरूपिणोनॄ णांमुग्धानांसंशयाहृदि ॥ विपर्ययाश्चजायंतेपंडितंमन्यसेविनां ॥ ७४८ ॥ हृदयस्ययदैवैतेग्रंथयःसंश यादिकाः॥ छिद्यंतेयस्यतेनैतत्प्राप्यंब्रह्माम्रतात्मना ॥ एतावदेवविज्ञेयमप्येतद्धृदयेनिजे ॥ ७४९ ॥ हृदय स्यास्यनाड्यःस्युःशतमेकोत्तरंशतं ॥ तासामेकाचमूर्द्धानंविभिद्यास्तेवहिःसदा ॥ द्वारभूतायथागच्छेदनि शंवामनःसदा॥ ७५० ॥ अन्यास्तुशतसंख्याताबहिर्निर्गमनेसदा॥ भवंतिगच्छतोनित्यंत्वग्रूपेणसमावपुः ॥ ७५१ ॥ अंगुष्ठमात्रःपुरुषःसर्वदामद्दशेपुमान्॥ निर्गतःशतसंख्याभिरायात्येवनसंशयः॥ ७५२ ॥

ननाड्यःसंतितास्वेकासुषुम्नाख्यामूर्द्धानंविभिद्यसूर्यमंडलद्वाराब्रह्मलोकपर्यंतंसंतताअतएवब्रह्मलोकद्वारभूतायया द्वारावामनउपाधिप रिच्छिन्नोजीवोऽनिशमापेक्षिकंनित्यंब्रह्मलोकंगच्छेदित्यर्थः ॥ ७५० ॥ अन्यास्तुलोकांतरगमनद्वारभूताइत्याह अन्याइति अन्यास्तु ताभिर्बहिर्गतोयंपरि वपुःशरीरांतरंगच्छतोजीवस्यबहिर्गमनेउपयोगिन्योभवंति कीदृश्यः त्वग्रूपेणसाम्यादस्पष्टरूपाइत्यर्थः ॥ ७५१ ॥ च्छेदाभिमानेनवामनोजीवोममयमस्यवशंयात्येवेत्याह अंगुष्ठेति ॥ ७५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसर्वग्रंथप्रतिपाद्यंप्रदर्शयंत्याःषोडश्याअर्थमाह ह्रदयेइतिषड्भिः अयमंगुष्ठमात्रःपुरुषःसूक्ष्मदेहाविद्याभ्यांबाह्यांतरकंचुकभूताभ्या
मावृतोह्रदयदेशेसंनिहितोवर्ततेइत्यर्थः ॥ ७५३ ॥ तमिति तमेतंविवेकयुक्तेनमसैवाधिकारीसूक्ष्मदेहाद्बाह्यंकुर्यात् कीदृशात्सूक्ष्मदेहात्
दुःखदात् चित्तमेवनिग्रहःश्रृंखलास्थानीयंयत्रतथाभूतात् यथाइषीकाख्यंमध्यतृणंमुंजाख्यगूपाद्बाह्यतृणात्सावधानेनमनसाकरेणच
शिशुर्बाह्यंकुरुतेतथेतिद्वयोर्योजना ॥ ७५४ ॥ ७५५ ॥ पृथक्कृतइति एवमुपाधितःपृथक्कृतोयंवामनःअवामनःपूर्णःसंपद्यतेइति

ह्रदयेसन्निविष्टोयंपुरुषःसर्वदेहिनां॥ सूक्ष्मदेहधरोनित्यमविद्याकंचुकावृतः॥ ७५३॥ तंसूक्ष्मदेहाद्दुःखौघ
कारणाच्चित्तनिग्रहात्॥ विवेकेनतृणंबाह्यंमनसाचत्वचोयथा ॥इषीकाख्यंहिमुंजाख्यात्कुरुतेकरतःशिशुः
॥ ७५४॥ ब्रह्मचर्यादिसंपन्नोधैर्ययुक्तोविवेकवान्॥ मनसैवैनमात्मानंकुर्यादस्माज्जडात्पृथक् ॥ ७५५॥
पृथक्कृतोवामनोयंजडजातादशेषतः ॥ अवामनोभवेत्सद्योविश्वरूपधरःपुमान् ॥ ७५६ ॥ अवामनोन
मेपाशैर्बध्यतेकर्हिचित्क्वचित्॥ ह्रत्स्थितोवामनोयद्वन्नित्यंदेहपरिक्षये॥ ७५७॥ अवामनःपुमान्योयंस्वप्र
भोम्रतिवर्जितः॥ सएवात्मेतिविज्ञेयोनचिकेतःसदात्वया ॥ ७५८॥ इत्युक्त्वाभगवान्धर्मराजस्तूष्णींबभूव
सः ॥ नचिकेताश्चसंतुष्टःकृतकृत्योभवत्तदा॥ ७५९॥ मृत्युप्रोक्तामिमांविद्यामात्मनोलब्धवान्पुरा ॥ कृत्स्नं
योगविधिंतद्वन्नचिकेताःकुमारकः ॥ ७६० ॥ लब्ध्वाचदेहएतस्मिन्जीवन्ब्रह्माद्वयंपरं ॥ आनंदात्मस्व
रूपंतत्स्वप्रभंप्राप्तवानपि ॥ ७६१ ॥ अविद्यालेशरहितोदुःखशोकविवर्जितः ॥ मरणेनविनिर्मुक्तोमोक्ष
मेवगतोमुनिः॥ ७६२ ॥

॥ ७५६ ॥ सचपूर्ववन्ममम्रत्युरूपस्यगोचरेनवर्त्ततेइत्याह अवामनइति ॥ ७५७ ॥ एवमवामनःपूर्णःपुरुषएवात्मतयात्वयाविज्ञेयइत्या
ह अवामनःपुमानिति स्वप्रभःशुक्रपदार्थः ॥ ७५८ ॥ षोडशींविवृणोति इत्युक्त्वेतिपंचभिः स्पष्टंद्वयं ॥ ७५९ ॥ ७६० ॥ लब्ध्वाचे
ति आत्मविद्यांसयोगांलब्ध्वाचजीवन्नेवब्रह्मप्राप्तवान् कीदृशं अद्वयत्वादानंदरूपमात्मरूपंचअतएवस्वप्रकाशं ॥ ७६१ ॥ ततश्चविदेह
मोक्षंगतइत्याह अविद्येति लेशःप्रारब्धफलकर्मभिःस्वनिर्वाहायसंरक्षितोविक्षेपशक्तिभागः ॥ ७६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नचिकेताइति यथानचिकेताःस्वात्मज्ञानाद्यादृक्द्विविधंमोक्षंगतोऽभवत्तथान्योप्यात्मवित्तादृक्स्यादित्यर्थः ॥ ७६३ ॥ उपसंहरति आख्यानमिति यदाख्यानंकठस्तपसालब्धेनवेदवाक्येनाधिकारिणःप्रत्युक्तवांस्तदिदंतुभ्यमुक्तमिति ॥ ७६४ ॥ सहनाववितिशांतिमंत्रस्यतात्पर्यंदर्शयति ब्रह्मेत्यादिना एतज्ज्ञानंदुर्लभं देवानुग्रहेणैवपूर्वैर्लब्धत्वात् अतएवास्यब्रह्मबोधस्यवक्ताश्रोताचाश्चर्यरूपतयादुर्लभइत्युक्तमित्यर्थः ॥ ७६५ ॥ अत्रेति अत्रविद्योपदेशेगुरुशिष्ययोर्द्वयोरेकस्यवाविक्षेपःफलप्रतिरोधीविघ्नोदुष्कृतकुपितैर्देवैःकृतःप्रा

नचिकेतायथायादृगात्मविज्ञानतोभवत्॥ अन्योपिचतथातादृगात्मविज्ञानतोभवेत्॥ ७६३ ॥ आख्यानमुक्तवानेतत्कठस्त्रैवर्णिकान्प्रति ॥ अपौरुषेयवचसायदिदंतेमयेरितं ॥ ७६४ ॥ ब्रह्मविज्ञानमेतद्धिदुर्लभं सर्वदेहिभिः॥ एतद्यस्मात्पुराप्राप्तंदेवेभ्योमानवैरिह॥ आश्चर्यात्माब्रह्मबोधवक्ताश्रोताचदुर्लभः॥ ७६५ ॥ अत्रवक्तुस्तथाश्रोतुर्द्वयोरन्यतरस्यवा ॥ विक्षेपोजायतेप्रायोब्रह्मविद्याप्रबोधने ॥ ७६६ ॥ देवैःकृतस्तदेतत्तेमयाप्रागेवकीर्तितं॥ शक्रेणसहसंवादेदध्यङ्ङाथर्वणस्यहि॥ ७६७॥ कुशलोत्रगुरुस्तस्यविक्षेपोदेवजोनहि॥ शिष्यस्यजांयतेसोत्रकौशलाभावहेतुकः ॥ ७६८ ॥ पूर्वपापसमायोगाद्विपरीतास्यधीर्भवेत् ॥ विपरीतधियासोयंगुरुद्वेषादिकंपुमान् ॥ कुर्यात्तेनैवनरकान्गच्छेच्छिष्योबहूनपि ॥ ७६९ ॥ गुरुसेवाकृतेज्ञानंदेवसेवाकृतेफलं ॥ द्वयोःसेवैकतंत्रेणततोविघ्नैर्विवर्जितः॥ गुरोर्विद्यामवाप्नोतिशिष्यःकुशलभावदां ॥ ७७० ॥

योदृश्यतेतदेतच्चतुर्थाध्यायेदध्यङ्ङिन्द्रसंवादेउक्तमित्यर्थः ॥ ७६६ ॥ ७६७ ॥ कुशलइति हेतुत्वंफलरूपेण तथाचयस्यशिष्यस्य गुरुःकुशलःसंप्रदायवित्तस्यसविक्षेपोदेवजोनजायते कीदृशोविक्षेपः कौशलस्यकुशलोस्यलब्धेतिश्रुत्युक्तस्याभावप्रयोजकइत्यर्थः ॥ ७६८ ॥ विक्षेपमभिनयति पूर्वेति अस्यशिष्यस्य ॥ ७६९ ॥ गुरुसेवेति कृतपदंभावक्तांतं तथाचगुरुसेवाकरणेसतिज्ञानलाभोभवतिदेवसेवाकरणेतुज्ञानस्यफलंतन्निष्ठारूपकौशलात्मकंभवत्यतोद्वयोर्गुरुदेवयोःसेवारूपेणैकेनप्रधानेनतंत्रेणसाधनेनकुशलभावप्रयोजिकांविद्यांनिर्विघ्नःशिष्योलभतेइत्यर्थः तंत्रंशास्त्रेकरणेचेतिहैमः ॥ ७७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोक्षमिति स्वप्रकाशत्वंविधानंप्रकारोयस्यसतथातंस्वप्रकाशात्मरूपमितियावत् एवंविधंमोक्षरूपंफलमुक्तविधयासाकल्यप्रयोजकदेवानुग्रहाधीनंमन्ये ऽतोदेवप्रीत्यैशांतिमंत्रःपठनीयइतिभावः इत्येवंकठोनाममुनिरधिकारिणःप्रत्युक्तवानित्यर्थः विधानंप्रकारेइतिहैमः ॥ ७७१ ॥ वल्लीघटितत्वेनसमानशांतिमंत्रकर्तृत्वेनचतैत्तिरीयजिज्ञासामुत्थापयति तित्तिरिश्चेति तित्तिरिश्चैवमुवाचेत्यनुषंगः यस्ति

मोक्षंदेवकृतंमन्येस्वप्रकाशविधानकं ॥ कठएवमुवाचादौशिष्यान्विद्यार्थिनःप्रति ॥ ७७१ ॥ तित्तिरिश्चमहात्मायोब्रह्मविद्यामनेकधा ॥ उवाचशिष्यसंघेभ्योनानाख्यानसमन्वितां ॥ ७७२ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेकाठकोपनिषत्सारार्थप्रकाशेयमनचिकेतःसंवादोनामनवमोऽध्यायःसमाप्तः ॥ ९ ॥ ॥ ७ ॥ ॥ ७ ॥

त्तिरिरनेकधाविद्यामुवाचेति ॥ ७७२ ॥ कारुण्यंकरणंयस्यसमीहितसमर्थने ॥ यंभूमानंसमवदद्यमोभीतोऽवनंस्वतः ॥ श्रोतॄणामपिवकॄणांसदेवःशरणंपरम् ॥ १ ॥ ॥ इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतावात्मपुराणटीकायांसप्रसवाख्यायांनवमोध्यायः समाप्तः ॥ ९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे नवमोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणेदशमाऽध्याय प्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः सत्यानंदंगुहागूढंनिभृतानिललक्षणम् ॥ सेवेदेवंविधेर्वंद्यंदशमेशमितापरम् ॥ १ ॥ अस्यार्थः सत्येपितुर्वचनरूपे सकृदेव प्रपन्नायतवास्मीतिचयाचते अभयंसर्वभूतेभ्योददामीतिव्रतंममेत्यादिरामायणेस्ववचनरूपेवाआनंदोयस्यसतथातं गुहःसखाआगूढ आलिङ्गितोयेनसतथातं निभृतःसेवापरआनिलोहनुमानूलक्षणोलक्ष्मणश्चयस्यसतथातं लक्ष्मणोलक्षणोपिचेतिद्विरूपकोशः विधेर्ब्रह्मणोवंद्यं कसति दशमेदानांरावणवदनानांशमेविदारणेकृतेसति दोऽशुद्धौदश्चवदनेइतिविश्वः अतएवशमिनामृषीणांतापस्यअसुरकृतदुःखस्यरंवन्हिभूतंविध्वंसकमितियावत् यद्वाकृषितापंरातिआदत्तेहरतीतियावत्सतथातं एवंविधंश्रीरामंसेवेइति शंभुपक्षे सत्याःपार्वत्याआ

श्रीगणेशायनमः॥ श्रुत्वैवमद्भुताख्यानंसशिष्योनचिकेतसः॥ अपृच्छत्पुनरेवैनंस्वगुरुंब्रह्मबोधकम् ॥ १॥ भवताकथितंब्रह्मज्ञानंनानाविधंगुरो॥ ऐतरेयोमहाप्राज्ञस्तथाकौषीतकिर्मुनिः॥ २॥ याज्ञवल्क्यगुरुस्तद्वदादित्योभगवानयं ॥ श्वेताश्वतरनामाचतथैवचकठोमुनिः ॥ ३ ॥ एतेजानंतियद्वत्स्यमात्मज्ञानंमहाधियः॥ तत्त्वयाकथितंसम्यङ्ज्ञानाख्यानसमन्वितं॥ ४ ॥ प्रजानामृषिभिःसार्द्धंसंवादोब्रह्मवेदने ॥ प्रतर्दनस्य शक्रेणविप्रस्याजातशत्रुणा॥ ५ ॥

नंदकरं गुहेनषडाननेनआगूढंआलिंगितं निभृतानिवशीकृतानिअनिलानांपंचप्राणानांलक्षणानिस्वरूपाणियेनसतथा योगिनमितियावत् दशमेदशमद्वारेवंद्यंउपासकैर्गुरुरूपेणध्येयंविधेःविहितत्वात् शमितायामुपशमनिष्ठायांपरंतत्परमित्यर्थः निर्गुणपक्षे सत्यानंदरूपंदेवंस्वप्रकाशं पंचकोशगुहागतं निभृतौमर्यादयाचलंतावनिलौप्राणापानौउपलक्षणभूतौयस्य कोह्येवान्यादित्यादिश्रुतेः सतथातं विधेर्वाक्यस्यवंद्यंवाङ्मनसातीतत्वात् शमितमपरंद्वैतंयेनसतथास्वाकारवृत्त्यभिव्यक्तमितियावत् तंपरमात्मानंदशमाध्यायेसेवेअनुसंदधे इत्यर्थः अथशिष्यस्योक्तानुवादेनप्रश्नमभिनयति श्रुत्वैवमितित्रयोदशभिः तत्रचतुष्टयंनिगदव्याख्यातं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ आख्यानानिप्रदर्शयति प्रजानामितिचतुर्भिः विप्रस्यबालाकेः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थपंचमयोरुक्तंदर्शयति अश्विनोरितिद्वाभ्यां तद्वदित्यंतंचतुर्थार्थउक्तः तस्यप्रसिद्धस्ययाज्ञवल्क्यस्य जल्पोविजिगीषुवाक्यप्रबंधइतिद्वयोरर्थः ॥६॥ ७॥ षष्ठाद्यध्यायत्रयार्थमाह जनकेनेति वादस्तत्त्वनिर्णयार्थोवाक्यप्रबंधस्तद्रूपःसंवादःषष्ठसप्तमयोरुक्तोब्रह्मरूपकारणविषयकस्त्वष्टमइत्यर्थः ॥८॥ नवमोक्तंप्रश्नबीजंदर्शयति इदानीमिति इदानींपूर्वाध्यायेकथितोयःसंवादस्तत्रेदंभवताकथितं इदंकिसहनावित्यादिकोमंत्रोविघ्नशांतयेशिष्येणपठनीयएवंकठउक्तवान् तथातित्तिरिश्चशिष्येभ्योब्रह्मविद्यांवदन्नस्यमंत्रस्यपठनीयतामाहेतिद्व

अश्विनोर्गुह्यविज्ञानमृषिणाकीर्तितंचयत्॥ दध्यङ्ङाथर्वणस्यापितत्रशक्रोपदेशनं॥६॥ अश्विनोःशिष्यता तद्वत्तस्यब्रह्मात्मवेदिनः॥ याज्ञवल्क्यस्यसंवादोजल्पाख्योमुनिपुंगवैः॥ ७॥ जनकेनचमैत्रेय्याशिष्याभ्यां वादशब्दितः॥ मुनीनामपिसंवादःकारणेब्रह्मरूपिणि ॥ ८ ॥ इदानींकथितस्तद्वन्मृत्योश्चनचिकेतसः ॥ संवादस्तत्रकथितंविघ्नराशिप्रशांतये ॥ ९॥ पठनीयोत्रशिष्येणसहनावितिमंत्रकः॥ एवंकठःपुराप्राहतित्तिरिश्चमुनीश्वरः ॥ ब्रह्मविद्यांवदन्धीमान्स्वशिष्यान्प्रतिसप्तधा ॥ १० ॥ मुनिभिःकथितातत्रब्रह्मविद्यामयाश्रुता॥ तित्तिरिःकीदृशींतांतुस्वशिष्येभ्यःसमुक्तवान् ॥ ११॥ श्रोतुमिच्छाम्यहंत्वत्तोगुरोमेकृपयावद॥ अत्रचित्रंसमाख्यानमस्तीतिमतिरस्तिमे ॥ १२॥ नानाख्यानसमायुक्तंस्वशिष्येभ्यःसउक्तवान् ॥ इतिपूर्वंत्वयाख्यातंतत्रकौतूहलंमहत्॥ श्रोतुमिच्छामितद्ब्रह्मन्यदिनेवर्त्ततेकृपा ॥ १३॥ इतिशिष्यवचःश्रुत्वागुरुःस्नेहसमन्वितः ॥ आरण्यकेस्थितांब्रह्मविद्यांतित्तिरिकीर्त्तितां ॥ उक्तवानखिलांकर्णमनस्तापापहारिणीं ॥ १४॥

योःसंबंधः सप्तधेत्युत्तरान्वयि ॥ ९ ॥ १० ॥ मुनिभिरिति तत्रातीतग्रंथेसप्तधावर्तमानैर्मुनिभिरैतरेयकौषीतक्यादित्यदध्यङ्ङाथर्वणयाज्ञवल्क्यश्वेताश्वतरकठसंज्ञैःशाखाप्रवर्त्तकैरुक्तांविद्यांश्रुत्वापितित्तिरिप्रोक्तांश्रोतुमिच्छामीत्यर्थः॥ ११ ॥ श्रोतुमिति अत्रतित्तिरिप्रोक्ते मतिःसंभावना युक्तमित्यंतंक्रियाविशेषणं सतित्तिरिः स्फुटमन्यत् ॥ १२ ॥ १३ ॥ एवंपृष्टस्यगुरोःप्रतिज्ञामवतारयति इतिशिष्येति आरण्यकेअरण्येपठनीयेब्राह्मणभागे कर्णेति श्रोत्रमनसोरनुकूलां ॥ १४ ॥ ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्प्रतिज्ञामभिनयति शृण्विति ॥ १५ ॥ तित्तिरिपदस्यमुनिगणपरतांदर्शयितुमितिहासमाह यदैनमितिदशभिः एवंहिविष्णुपुराणादावु पाख्यायते सुमेरौऋषीणांसमाजआसीत्तत्राऽनागमनेब्रह्महत्याप्रसक्तेर्ऋषिभिरुपन्यस्तत्वादथतत्समाजाप्राप्तिप्रयुक्तांहत्यामपाकर्त्तुंशि ष्यानादिशन्वैशंपायनोगुरुर्याज्ञवल्क्योक्तिमहमेवव्रतंकरिष्यामिकिमेतैरक्षमैरित्याकारांश्रुत्वाचुकोपेतिवृत्तंयदाशब्दार्थः एनंयाज्ञव ल्क्यम् ॥ १६ ॥ अष्टांगेति करणीकर्मगजवत्पीतस्योद्धरणंतद्वीत्यासयाज्ञवल्क्योऽधीतमत्यजद्गुरूपदेशात् ॥ १७ ॥ भूमाविति तानि

शृणुवत्सप्रवक्ष्यामिविद्यांतित्तिरिकीर्त्तितां ॥ याज्ञवल्क्येननिर्मुक्तांतित्तिरिर्यांसमाप्तवान् ॥ १५ ॥ यदैनमुक्त वान्कोपान्मुंचविद्यांमयेरितां ॥ याज्ञवल्क्यगुरुःश्रीमान्वैशंपायननामकः ॥ १६ ॥ अष्टांगयोगवित्तस्यशि ष्योवाजसनेयकः ॥ करणीकर्ममार्गेणविद्यांचच्छर्दसोपितां ॥ १७ ॥ भूमौयजूंषितान्यासन्सूर्यवर्चांसिस र्वतः ॥ मुक्तानियाज्ञवल्क्येनवैशंपायनवाक्यतः ॥ १८ ॥ सर्वतःस्थितमालोक्यदीप्तंतंयजुषांगणं ॥ वांतंशिष्ये णसंप्राहवैशंपायननामकः ॥ शिष्यानन्यानिदंवाक्यंविस्मयाविष्टचेतसः ॥ १९ ॥ यथाशास्त्रमधीतानियजूं षिमुनिसत्तमाः ॥ याज्ञवल्क्येनमुनिनासूर्यवर्चांसितान्यतः ॥ २० ॥ गृह्णीध्वंसहसाविप्रास्त्वरितंब्रह्मणःस भां ॥ इतउत्प्लुत्यगच्छंतिनैतान्यस्मद्धनानिभोः ॥ २१ ॥ वांतानीतिविचारंमाकुरुतब्राह्मणोत्तमाः ॥ शरीरां तरतोवांतंभक्ष्यंभवतिदेहिनां ॥ २२ ॥ ततस्तित्तिरिरूपाणिकृत्वाझटितियोगतः ॥ दिविभूमौप्रसर्पंतिगृह्णंतु मुनिसत्तमाः ॥ २३ ॥

यजूंषियजुःसंज्ञामंत्रायाज्ञवल्क्येनत्यक्ताअभिमानिदेवरूपेणसूर्यवद्भास्वरमूर्त्तयोभूमौसर्वतोविकीर्णाअभवन्नित्यर्थः ॥ १८ ॥ सर्वत इति एतद्दृष्ट्वाचकितान्शिष्यान्प्रतिगुरुरित्थमाहेति ॥ १९ ॥ इत्थंकथमित्याकांक्षायामाह यथेति भोविप्राएतानियजूंषियतोयथाशा स्त्रमधीतान्यतएवभास्वराणितानीमानियथाइतःपृथिव्याउत्प्लुत्यब्रह्मसभांनगच्छेयुस्तथायूयंगृह्णीध्वमितिद्वयोःसंबंधः ॥ २० ॥ २१ ॥ वांतानीति अत्रवांतत्वमालोच्यविलंबोनकार्योदेहांतरेणवांतभक्षणेदोषाभावादित्यर्थः ॥ २२ ॥ तच्चदेहांतरंतित्तिरिपक्षिरूपंभवद्भिः कार्यप्रकृतोपयोगादित्याह ततइति योगतोयोगबलेन प्रसर्पंतियजूंषीतिशेषः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति तेनगुरुणाएवमुक्तेसति ॥ २४ ॥ यथेति फलितमाह एवंमुनिगणइति ॥ २५ ॥ वांत्येति एवंवांत्यादिदोषेणतानियजूंषिकृष्णानीतिप्रसिद्धानि तेषुआरण्यकभागेप्रोक्ताब्रह्मविद्याएषाउच्यतेइति ॥ २६ ॥ आनंदवल्लींव्याख्यातुमुपक्रमते ब्रह्मेति तत्राप्नोतीत्यंतवाक्यंसूत्रमित्युक्तंसकलार्थस्यसूचनादित्यर्थः ॥ २७ ॥ सर्वार्थसूचकतांस्फुटयितुमनुबंधचतुष्टयमनेनवाक्येनसूचितंतद्दर्शयति ब्रह्मेतिचतुर्भिः अत्रसूत्रेब्रह्मपदेनास्यशास्त्रस्यविषयएतच्छास्त्रजप्रमानिवर्त्याज्ञानगोचरउक्तः यतोनेनपदेनसामान्यतोबोधितेपिब्रह्मण्यात्मत्वानात्मत्वजडत्वचेतनत्वादिसंशयानामनिराकरणेनोत्तरवाक्येषुजिज्ञासोत्थाप्यतेइत्यर्थः ॥ २८ ॥ तस्येति तस्यब्रह्मणोयद्विज्ञानंविदधातुनोक्तंतदाकारवृत्तिरूपंतन्मध्येभवंगौणमितियावत्एतादृशंप्रयोजनं परमंमुख्यंप्रयोजनंतुसकलानर्थमूलाज्ञानध्वंसात्मकपरब्रह्मप्राप्तिरूपमुक्तमित्यर्थः ॥ २९ ॥ तदर्थीति तस्यउक्तद्विविधप्रयोजनस्यअर्थीप्राप्तिकामोधिकारीतुएषएवबोध्यः एषकः योब्रह्मविज्ञानतोब्रह्मप्राप्नोतीतिफलसंबंधयोग्यतयानिर्दिष्टइतियोजना नहिमोक्षरूपफलश्रवणजामुमुक्षानित्यानित्यविवेकादिमंतरानिष्पद्यतेइतिसाधनचतुष्टयसंपन्नाधिकारिसिद्धिरितिभावः तस्यशास्त्रस्यसंबंधस्तुयोग्यतावशादनेकविधोबोध्यइत्यर्थः ॥ ३० ॥

एवमुक्तेमुनिगणास्तेनतित्तिरिरूपिणः॥ यजूंषिजगृहुःशीघ्रंसूर्याभानिसमंततः॥ २४ ॥ यथातित्तिरयोलोकेपतंगान्सर्वतःस्थितान् ॥ भक्षयंतिक्षुधाक्रांताभूमौवानभसिस्थितान् ॥ एवंमुनिगणःसोयंतित्तिरिःपरिकीर्त्तितः ॥ २५ ॥ वांत्याचभक्षणेनापिकृष्णान्यासन्यजूंष्यपि ॥ ब्रह्मविद्याचतेष्वेषाकथिताऽरण्यकेसदा ॥ २६ ॥ ब्रह्मवित्परमाप्नोतीत्येतत्सूत्रमुदाहृतं ॥ अत्रैवसकलायस्माद्ब्रह्मविद्याप्रतिष्ठिता॥ २७॥ ब्रह्मयत्कथितंसूत्रेतदेवविषयोमतः ॥ आत्मानात्मादिसंदेहायतःसंत्यत्रकोटिशः ॥ २८ ॥ तस्यविज्ञानमुदितंमध्येयत्स्यात्प्रयोजनं ॥ परमंचपरप्राप्तिरूपंदुःखौघघातकम् ॥ २९ ॥ तदर्थीत्वधिकार्येषयआप्नोतिपरंमहत्॥ ब्रह्मविज्ञानतस्तस्यसंबंधोनेकधास्मृतः॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संबंधस्यानेकविधत्वंस्फुटीकरोति अर्थिनेति अर्थिनाधिकारिणासहशास्त्रस्यबोध्यबोधकभावलक्षणःसंबंधः अधिकारिणोबोध्यत्वाद्बोधंप्रतिप्रापणीयत्वात्शास्त्रस्यबोधकत्वात् अन्यत्रार्थिभिन्नेषुवेदनादिषुवेदनपदोदिततत्त्वज्ञानेब्रह्मणिअज्ञानेचशास्त्रस्यक्रमेणजन्यजनकभावोऽभिव्यंग्यव्यंजकभावोनिवर्त्यनिवर्त्तकभावएतेसंबंधाबोध्याइत्यर्थः ॥ ३१ ॥ नकेवलमिदंवाक्यमनुबंधसूचकतयैवसूत्रमित्युक्तंकिंतूत्तरग्रंथव्याख्येयतयापीत्याह आसमाप्तेरिति आत्मदर्शकमात्मदर्शनायप्रवृत्तमिदंवाक्यमेवासमाप्तेस्तित्तिरिप्रवक्तृकेब्रह्मवेदनेब्रह्मविद्याप्रकाशकेग्रंथेव्याख्येयंभवतीत्यतःसूत्रमित्युक्तमितिसंबंधः ॥ ३२ ॥ उक्तवाक्यंसंग्रहेणव्याकुर्वतःऋक्संज्ञमंत्रस्यार्थंप्रपंचयति ब्रह्मेति पञ्चोनषष्टिश्लोकैः ब्रह्मपदेनोक्तोऽद्वयत्वादानंदरूपस्तत्पदार्थोलक्ष्योभवतितस्यलक्षणवाचकानिसत्यज्ञानानंतपदानि

अर्थिनाचापिशास्त्रस्यबोध्यबोधकलक्षणः॥ अन्यत्रजन्यजनकत्वादिस्तद्वेदनादिषु ॥ ३१ ॥ आसमाप्तेरिदंसूत्रमेकमेवात्मदर्शकं॥ व्याख्येयमत्रविज्ञेयंतित्तिरेर्ब्रह्मवेदने ॥ ३२ ॥ ब्रह्मेतिकथ्यतेवेदेआनंदात्मामहेश्वरः॥ लक्ष्यस्तस्यात्रकथितंलक्षणंमंत्रवाक्यतः॥ सत्यंज्ञानमनंतंचब्रह्मणोलक्षणंत्विदं ॥ ३३ ॥ लक्षणत्रयमेतत्स्यादथवैकमिहात्मनः ॥ लोकदृष्ट्यनुसारेणकथ्यतेवेदवादिभिः ॥ ३४ ॥ सत्यंयथार्थमुदितंयथार्थंनजडंयतः॥ ज्ञानंचनपरिच्छिन्नंवेदवादिमतेक्वचित् ॥ ३५॥ ततोनंतमितिप्रोक्तेज्ञानमित्येवलक्ष्यते ॥ ज्ञानमित्युदितेतद्वत्सत्यमित्येवलक्ष्यते॥ ३६ ॥

मंत्रप्रथमपादेबोध्यानीत्यर्थः ॥ ३३ ॥ एषांत्रयाणांपदानांप्रत्येकंब्रह्मपदान्वितानांलक्षणत्रयपरत्वंशास्त्रदृष्ट्यावेदविद्भिरुक्तं लोकदृष्ट्यनुसारेणत्वेकलक्षणपरत्वमित्याह लक्षणेति एततूएभिःपदैःप्रतिपादितम् ॥ ३४ ॥ तत्रशास्त्रदृष्ट्यालक्षणत्रयपरत्वंप्रपंचयति सत्यमितिपंचविंशतिश्लोकैः सत्यपदंतावद्यथार्थस्याबाधितस्यवाचकंतच्चाबाधितंवस्तुतश्चैतन्यमेव जडस्यदृश्यजातस्यदृक्स्वरूपेकल्पितत्वात् एवंसर्वाधिष्ठानभूतस्यचैतन्यस्यपरिच्छिन्नतायादुर्वचत्वादनंतत्वमपिसिद्धमेवेत्यर्थः ॥ ३५ ॥ तथाचैकैकस्यातिप्रसंगादिहीनार्थकत्वात्पदांतरार्थोपस्थापनक्षमत्वाच्चपरस्परनिरपेक्षंलक्षणत्रयमेवात्रोक्तमित्याह ततइति ततःसत्यत्वादीनांज्ञानत्वादिनियतत्वातूअनंतपदमात्रप्रयोगेपियज्ज्ञानरूपमनंतंवस्तुतदेवप्रतीयते एवंज्ञानपदोक्तौसत्यपदोक्तमनंतंवस्त्वेवप्रतीयतेइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यपदेनाबाधितत्वमुखेनानंतज्ञानात्मकब्रह्मप्रतिपादनंस्फुटयति सत्यंकालत्रयइति यत्कालत्रयेपिनपर्यैतिनान्यथाभवतितदेवयथार्थं
वस्तुसत्यपदेनोदितंतादृशत्वंत्वात्मनएवचिद्रूपेणकूटस्थत्वादित्यर्थः ॥ ३७ ॥ आत्मभिन्नंतुविकारित्वान्नसत्यपदेनाभिधानयोग्यमित्या
ह सर्वमेवेति विपर्यैतिअन्यथाभवति आत्मातुनविकारीसर्वांतरत्वेनएतद्विनाशेकस्यापिकारणीभावानर्हत्वादित्याह आत्मेति ॥ ३८ ॥
किंचात्मनाशस्यसाधकाभावाच्चासत्त्वमित्याह आत्मनइति आत्मनोनाशःकेनचिदज्ञातएववाच्यः केनचिदविज्ञातस्यसत्ताभिधानेम
ममातावंध्येतिवद्व्याघातदोषप्रसक्तेरित्यर्थः ॥ ३९ ॥ किंचाज्ञातस्यासत्तायाअपिवक्तुंसुकरत्वात्सत्तावधारणासंभवइत्याह अज्ञात

सत्यंकालत्रयेयत्तुनपर्यैतिकदाचन ॥ आनंदात्माचतादृक्स्यांत्सर्वदैकस्वरूपभाक् ॥ ३७ ॥ सर्वमेवविपर्यै
तिविनात्मानंविनेश्वरं ॥ आत्माविनाशरहितोनाशकारणशून्यतः ॥ ३८ ॥ आत्मनोत्रविनाशःस्याज्ज्ञातए
वनचान्यथा ॥ अज्ञातोविद्यतेचेतिव्याहतंस्यादिदंवचः ॥ ३९ ॥ अज्ञातस्यापिचेत्सत्तास्यादसत्ताकुतोनवा ॥
ज्ञातश्चेदात्मनैवायंज्ञातव्योज्ञातृतायतः ॥ आत्मन्येवचसंसिद्धालोकवादिमतेसदा ॥ ४० ॥ विनष्टेनात्म
नानायंशक्योज्ञातुंकथंचन ॥ विनाशआत्मनस्तेनज्ञातवान्नाशवर्जितः ॥ अनष्टआत्मनिस्वस्यनाशोस्तीति
नगम्यते ॥ ४१ ॥ सत्तयारहितःसोयंगम्यतेचेदसत्स्मृतः ॥ आत्माविनाशशून्योतःसर्वेषामिहदेहिनां ॥ यस्मा
त्प्रियतमश्चायंतेनानंदस्वरूपधृक् ॥ ४२ ॥

स्यापीति तस्माज्ज्ञातत्वपक्षस्यैवाङ्गीकारेपीदंविचार्यं किमात्मातस्यज्ञाताअनात्मावा नांत्यस्तस्यजडत्वाल्लोकप्रसिद्धिविरोधाच्चेत्यर्थः
॥ ४० ॥ आद्येपिकिंविनष्टआत्मानाशंजानात्यविनष्टोवा नाद्यः अक्षमत्वादित्याह विनष्टेनेति अयमात्मनोविनाशोविनष्टेनज्ञातुंनश
क्यइतियोजना अंत्येतुनाशसत्त्वैवबाधितेत्याह तेनेत्यादिना तेननाशवर्जितआत्माएनंज्ञातवानित्यंगीकर्त्तव्यंतच्चनसंभवतिज्ञेयस्यैवास
त्त्वादित्यर्थः ॥ ४१ ॥ नन्वसन्नेवाभावआत्मनाज्ञायतेइतिचेच्छतंजीवेत्याह सत्तयेति सोयमात्मनाशःसत्ताहीनएवगम्यतेविकल्प्यतेइ
त्यंगीकारेशशश्रृंगादिसाम्यस्यसिद्धत्वादिष्टापत्तिरित्यर्थः अविनाशित्वादेवचात्मनःप्रियतमत्वंततश्चानंदरूपत्वंसिद्धमित्याहात्मेति यस्मा
दात्माविनाशरहितोऽतएवप्रियतमस्तेनप्रियतमत्वेनानंदरूपइतियोजना ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनाशिनांप्रियत्वमेवमुख्यंनभवतिआत्मोपकारोपाधिकत्वादित्याह पुत्रादयइति ससुखाःसुखरूपोपकारेणसहिताः ॥ ४३ ॥ आत्मातु तेभ्यःप्रियत्वाभिमतेभ्यःसुखाच्चप्रियतरत्वाभिमताच्छेषितयोत्कृष्टत्वेनप्रियतमःपरमानंदरूपःसिद्धइत्याह सुखादपीति फलितमाह परमानंदेति ॥ ४४ ॥ नन्वात्मनःसत्यत्वादिसिद्धावपिब्रह्मणःकथंतत्सिद्धिरितिनशंक्यंब्रह्मात्मपदयोरेकार्थतायाबृंहत्यऽततिधात्वोःसमानार्थत्वेनचतुर्थाध्यायेप्रपंचितत्वादित्याह आत्मैवेति ॥ ४५ ॥ तथाचात्रापिब्रह्मनाम्नात्मैवलक्ष्यत्वेननिर्दिष्टस्तस्यचाविनाशशीलस्यउक्तरूपंसत्यत्वंलक्षणमुपपन्नमित्याह आनंदात्मैवेति तेनब्रह्मात्मपदयोरेकार्थत्वेन ॥ ४६ ॥ ननुब्रह्मणःस्वरूपभूतानांसत्यादिपदार्थानांकथंभेदव्याप्यंलक्षणत्वमितिचेत्किकल्पितभेदव्याप्यत्वंलक्षणत्वस्योतपरमार्थभेदव्याप्यत्वं आद्येनविरोधः शब्दप्रयोगायकल्पितस्यभेदस्ये

पुत्रादयोत्रयेभावाजंतूनांसुखकारकाः॥ ससुखाःसर्वएवैतेआत्मार्थेहिप्रियाःस्मृताः॥ ४३॥ सुखादपिपरप्रेमसंश्रयोयंशरीरिणां॥ आत्मात्रपरमानंदरूपःसिद्ध्यतिसर्वदा॥ परमानंदरूपोतआत्मानाशविवर्जितः॥ ४४॥ आत्मैवब्रह्मशब्दार्थउक्तस्तेपूर्वमेवहि॥ बृहत्यत्योरिहैकार्थंकथनेनमयाद्विज॥ दध्यङ्ङाथर्वणस्योक्तौशक्रंप्रतिसुरेश्वरम्॥ ४५॥ आनंदात्मैवतेनायंलक्ष्योब्रह्माभिधःपुमान्॥ सदाविनाशिनःसत्यंलक्षणंतस्यतद्भवेत्॥ ४६॥ लक्ष्यलक्षणयोर्भेदोबुद्ध्यैवपरिकल्पितः॥ सर्वत्रवस्तुतोनायंकुतोब्रह्मणिनिर्द्वये॥ ४७॥ पृथिव्यागंधरूपायागंधवत्त्वंपृथङ्नहि॥ पृथक्केधर्मधर्मित्वंनस्येदत्रगवाश्ववत्॥ ४८॥ पृथिवीत्वादिकंतेनसामान्यंबुद्धिकल्पितं॥ विशेषेषुयतोनास्यग्रहणंविद्यतेपृथक्॥ ४९॥

ष्यमाणत्वात् नांत्यः सत्यभेदस्यकुत्राप्यदृष्टेरित्याशयेनाह लक्ष्येति सर्वत्रलौकिकोदाहरणेष्वपिलक्ष्यलक्षणयोर्भेदःकल्पितएवनवस्तुतोभवतिसब्रह्मणिअखंडेकथंस्यादित्यर्थः ॥ ४७ ॥ लौकिकोदाहरणेभेदस्यवास्तवत्वाभावंदर्शयति पृथिव्याइति यथापृथिव्यागंधगुणेन तादात्म्यशालिन्याःसकाशाद्गंधवत्त्वरूपलक्षणंपृथक्वास्तवत्वलक्षणात्यंतिकत्ववताभेदेनयुक्तंनभवति आत्यंतिकभेदेहिगवाश्वयोरिव धर्मधर्मिभावोपिनस्यादित्यर्थः तथाचकल्पितएवतत्रभेदइतिभावः ॥ ४८ ॥ एवंपृथिवीत्वजातिरूपंपृथिव्यालक्षणमपिनवस्तुतोभिन्नमित्याह पृथिवीत्वादिकमिति तेनधर्मधर्मिभावासंभवेनपृथिवीत्वादिकमपिबुद्ध्यैवभिन्नत्वेनकल्पितं गोरश्ववत्विशेषेभ्योव्यक्तिभ्यःपृथक् अत्यंतभेदेनागृह्यमाणत्वादित्यर्थः ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथगग्रहणेव्यतिरेकदृष्टांतमाह यथेति यथाघटःपटात्पृथग्गृह्यतेतथातत्सामान्यंनगृह्यतेइति ॥ ५० ॥ तथाचकल्पितभेदेनप्रकृतेपिलक्ष्यत्वादिकमुपपन्नमित्याह ततइति ॥ ५१ ॥ ब्रह्मणःस्वरूपभूतानपिकल्पितभेदेनधर्मतयानिर्दिष्टान्पदार्थान्दर्शयति आत्मतेति कल्पितेकल्पितभेदेनिरूपिते ॥ ५२ ॥ ब्रह्मत्ववदिति यथाब्रह्मत्वरूपोधर्मःकल्पितस्तथापूर्वोक्ताःपंचापीत्यर्थः ॥ ५३ ॥ सत्यमिति तेनकल्पितभेदशास्त्युक्तधर्मषट्कलक्षणप्रवृत्तिनिमित्तलाभेनसत्यादित्रयंब्रह्मादित्रयंचेतिषण्णामानिसर्वाधिष्ठानस्यसाक्षिरूपस्यवागाद्यगोचरवस्तुनोवेदमुख्यतयात्स्वरूपबोधकतालक्षणप्राधान्येनप्रसिद्धानीत्यर्थः ॥ ५४ ॥ तस्यस्वरूपपदोक्तांसर्वाधिष्ठानतांस्फुटयति अध्यस्तमितिद्वाभ्यां

॥४॥

यथाघटःपटाद्भिन्नउदकाहरणक्षमः॥ गृह्यतेपृथगेवायंतथातन्नैवगृह्यते॥५०॥ ततोब्रह्मणिनिर्भेदेकल्पयित्वाभिदामिमां॥ लक्ष्यलक्षणभावोयंकथितोत्रमनीषिभिः ॥ ५१ ॥ आत्मतानंदतायद्वद्विघेतेकल्पितेउभे॥ सत्यताज्ञानतातद्वद्विघेतेनंततापिच॥ ५२ ॥ ब्रह्मत्ववदिमेधर्माआनंदाद्यामनीषिभिः॥ पंचप्रोक्ताःपरेनित्येनिर्गुणेभेदवर्जिते ॥ ५३ ॥ सत्यंज्ञानमनंतंचब्रह्मात्मानंदइत्यपि॥ नामषट्कमिदंमुख्यंकीर्तितंवेदवादिभिः॥ अवाङ्मनसगम्यस्यस्वरूपस्यात्रसाक्षिणः ॥ ५४ ॥ अध्यस्तंयत्रसकलंनामरूपक्रियात्मकम् ॥ कालातीतंचकालांतःपतितंकालसंयुतं॥ सदसद्वस्तुजातंयदक्षैर्गम्यंतथेतरत्॥५५॥ गंधर्वनगरंयद्वद्गगनेपरिकल्पितं॥ तच्छून्येत्रतथैवैतत्शून्यएतत्प्रकल्पितम्॥ ५६ ॥ षट्पदानामभिन्नार्थंकृत्वैकंवाचकंपदं॥ वाच्यंपदद्वयस्यार्थमानंदात्मानमीश्वरं ॥ पदत्रयार्थमुनयोलक्षणंकथयंतिते ॥ ५७ ॥

यत्रपरमार्थतत्त्वेनामाद्यात्मकंविश्वमध्यस्तं विश्वंविभजते कालेति कालातीतंनित्यतयाभिमतं कालांतःपातिअतीतानागतकालयोर्मध्यवर्तिवर्तमानमितियावत् कालसंयुतंअतीतादिरूपंसदक्षगम्यं इतरदतींद्रियंत्वसदित्यर्थः ॥ ५५॥ गंधर्वेति तच्छून्येगंधर्वनगरहीनेगगनेएतत्पदाभ्यांवर्णितविश्वप्रहः ॥ ५६ ॥ उक्तेषुषट्सुनामस्वविशेषेणतत्त्वंबोधयत्सुकथंलक्षणवाक्यव्यवस्थेत्याकांक्षायांव्यवस्थांदर्शयति षट्पदानामिति अभिन्नार्थइतिभावप्रधानोनिर्देशः एषांपदानामभिन्नार्थत्वेप्येषांमध्येएकंपदंवाचकंलक्ष्यप्रतिपादकंकृत्वाउपन्यस्यपदद्वयस्यआनंदात्मेत्याकारस्यार्थंसर्वांतरमद्वयंवस्तुवाच्यंलक्ष्यस्वरूपंचकृत्वापरिशिष्टपदत्रयमध्येएकैकंपदंलक्षणवाचकत्वेनाहुरित्यर्थः ॥ ५७ ॥ ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवप्रकृतेयोजयित्वादर्शयति आनंदात्मेति यथाप्रकृतवाक्येआनंदात्मशब्दौनप्रयुक्तौतयोर्लक्ष्यस्वरूपांतर्भावस्यविवक्षितत्वात् ब्रह्मपदंत्वानंदादिपदद्वयार्थरूपलक्ष्यवाचकतयोपन्यस्तं सत्यादिपदत्रयंतुप्रत्येकमसाधारणधर्मवाचकत्वाद्विकल्पेनलक्षणवाचकमित्यर्थः ॥५८॥ शास्त्रदृष्टिजप्रत्येकलक्षणमुपसंहरति एवमिति उपनिषत्सिद्धांतरूपंयत्सारंतस्ययत्सर्वस्वमसाधारणंरूपंतद्विदः अलौकिकाःशास्त्रदृष्टयः ॥ ५९ ॥ लौकिकदृष्ट्यनुसारिणमेकलक्षणपरत्वपक्षमुपपादयति लौकिकाइत्यादिना लौकिकालोकवुद्ध्यनुसारिणआचार्याएतत्सत्यज्ञानानंतरूपंपदानांत्रयमेकलक्षणघटकमाहुरित्यर्थः लोकेहिसत्यमित्युक्तेव्यवहाराबाधितमात्रंप्रतीयतेनतुब्रह्मैव एवंज्ञानमित्युक्तेवृत्तिसंवलितमेवप्रतीयते अनंतपदेनचकालाद्यपरिच्छिन्नमेव अतोतिप्रसक्तार्थकत्वेनप्रत्येकंलक्षणत्वासंभवाद्विशिष्टेशक्तानांपदानां

आनंदात्माचलक्ष्यंस्याद्ब्रह्मशब्दाभिधोहियः ॥ सत्यंज्ञानमनंतंचभवेत्तल्लक्षणत्रयम् ॥ ५८ ॥ एवंवेदांतसिद्धांतसारसर्वस्ववेदिनः ॥ ब्राह्मणाज्ञाततत्त्वार्थाअर्थमाहुरलौकिकाः ॥ ५९ ॥ लौकिकास्त्रितयंचैतत्प्राहुरेकंहिलक्षणं ॥ आनंदात्मस्वरूपस्यब्रह्मशब्दस्यसर्वदा ॥ ६० ॥ एकार्थविषयत्वेपिपदानांपुनरुक्तता ॥ व्यावृत्तिभेदतोनस्यान्नचभेदोपिकश्चन ॥ ६१ ॥ असज्जडंपरिच्छिन्नंनिरस्यतिपदत्रयं ॥ ततोनगुणगुण्यादिभवेन्नीलोत्पलादिवत् ॥ ६२ ॥

शुद्धेलक्षणयावृत्तिमंगीकृत्यैकलक्षणपरत्वमुक्तमितिभावः ॥ ६० ॥ नन्वेषांपदानांसमानार्थलक्षकत्वेएकेनैवेष्टसिद्धेःपदांतरवैयर्थ्यमितिशंकांपरिहरति एकार्थेति समानार्थपराणामप्येषांपदानांफलभूतव्यावृत्तीनांभेदात्पुनरुक्तत्वंनस्यादिति तत्रैतावान्विशेषोवार्तिककृद्भिरुक्तः सत्यज्ञानपदेसत्यत्वंज्ञानत्वंचविधायार्थादितरव्यावृत्तिंबोधयतः अनंतपदंतुसाक्षादेवपरिच्छिन्नतांवारयतीति एवंसतिधर्मधर्मिभावादिरूपोभेदोनप्रसज्जतेइत्यर्थः ॥ ६१ ॥ एतदेवस्फुटयति असज्जडमिति यतःसत्यपदंब्रह्मणिभ्रमसक्तमसत्त्वंवारयति ज्ञानपदंजडत्वं अनंतपदंतुपरिच्छिन्नत्वंवारयति ततएवंव्यावृत्तिपरत्वान्नीलमुत्पलमित्यादिवाक्यस्ययथागुणगुणिभावसंसर्गपरत्वंविशिष्टपरत्वंवाभवतितथास्यवाक्यस्यनबोध्यंकिंत्वखंडार्थपरत्वमेवेत्यर्थः ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुतथापिब्रह्मनिष्ठव्यावृत्तीनांभेदादेवाद्वैतहानिःस्यादितिशंकांभावाद्वैतपक्षंनृसिंहाश्रमादिभिर्व्युत्पादितमालंब्यपरिहरति असदादीति यद्यप्यसज्जडपरिच्छिन्नैर्निरूपिताअभावव्यावृत्तयआत्मनिस्थिताःस्युस्तथापिब्रह्मातिरिक्तोभावोनास्तीत्येवमद्वैतमुपपादयतामस्माकम द्वैतहानिरूपोविरोधोनप्राप्नोतीत्यर्थः ॥६३॥ भावाद्वैतवादिभिर्येनाशयेनद्वैतविलयव्यापारेभावाउपेक्षितास्तंविवृणोति अभावाइत्यादि ना असंख्यातानामभावानामवशेषेप्यात्मनःस्वभावभूतामद्वितीयतांप्रतिपादयतांकिंचिदपिप्रतिज्ञादिकंनहीयतेइत्यर्थः ॥६४॥ तत्रहेतुत याऽभावस्यतुच्छत्वेनाद्वैतविघाताक्षमत्वंदर्शयन्किमभावःस्वरूपेणभिद्यमानोऽद्वैतंविहन्यात्स्वप्रतियोगिद्वारावास्वव्यवहारद्वारावाइति विकल्प्यनप्रथमद्वितीयावित्याह अभावेष्विति प्रतियोगिनंविनास्वरूपेणाभावेभेदोनवक्तुंशक्यः नचप्रतियोगिद्वारापिभेदः सहितदाव

असदादित्रयाभावायद्यप्यात्मन्यवस्थिताः॥ तथापिनविरोधःस्याद्भावाद्वैतत्त्ववादिनां॥ ६३॥ अभावाःसंतुशतशोनिर्भेदेब्रह्मरूपिणि॥ अस्माकंकिंचिदप्यत्रहीयतेनात्मवादिनाम्॥ ६४॥ अभावेषुयतोभेदःस्वयंकोपिनविद्यते॥ विनाश्यंभावरूपंतंविहायप्रतियोगिनम्॥ ६५॥ व्यवहारोत्रभिन्नःस्याद्विनाशःप्रतियोगिनः॥ अभावस्यस्वरूपंनभिद्यतेकर्हिचित्क्वचित्॥ ६६॥ साक्षात्कृतेसदाऽद्वैतआनंदात्मनिकेवले॥ व्यवहारश्चकोप्यत्रनैवास्तिवचनादिकः॥ ६७॥ एकएवततोभावोद्वैतस्यात्रावतिष्ठते॥ अभावःसोपिनैवस्याद्वस्तुनत्त्वेविचारिते॥ ६८॥

क्तुंशक्योयदाऽविद्यादशायांप्रतियोगिनोविनाश्यतयास्थिताआसन् इदानींतुनेहनानास्तीतिवाक्यनृसिंहेनकवलीकृतानांतेषांविनष्टत्वे नभेदकत्वंनसंभवतीतिभावः॥६५॥ नतृतीयइत्याह व्यवहारइति प्रतियोगिनइतिपंचमील्यब्लोपे तथाचप्रतियोगिनमपेक्ष्यैवभिन्नोभेद घटितोव्यवहारोऽभिलापादिरूपोविनाशविषयकःअत्रव्यवहारभूमौस्यात्संभवेन्नस्वरूपतइत्यर्थः अत्रतुप्रत्यग्दृष्ट्यापरागर्थाकारताबुद्धे रपहृतेतिभावः॥६६॥ एतदेवविशदयति साक्षादिति अद्वितीयत्वादानंदरूपात्मनिविषयेलब्धेबुद्धिःसर्वव्यवहारंत्यजतीत्यर्थः॥ ६७॥ ॥५॥
फलितमाह एकएवेति ततःप्रतियोगिभेदालोचनमंतराऽभावेभेदासंभवात्सर्वद्वैताभावएकरूपेणावशिष्टःसोपिवस्तुनस्तत्त्वेऽधिष्ठानत्वरूपेविचारितेतुनैवपृथक्त्वेनतिष्ठेत् कल्पिताभावस्याधिष्ठानात्मकत्वादितिभावः॥ ६८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचलोकदृष्ट्याप्यभावस्यनभिन्नत्वंसत्ताराहित्येनप्रसिद्धत्वात् यदित्वभावेपिसत्ताभ्युपगम्यतेतदाऽभावस्यापिभावत्वापत्त्यासद्रूपात्म नःसकाशात्सुतरामभेदइत्याह अभावस्यत्विति किंशब्दआक्षेपे एतस्यभावस्यसत्तायतोनप्रसिद्धाऽतःसाऽभावसत्ताअद्वैतस्यविनाशि काकथंस्यात् तस्याभावस्यसत्त्वांगीकारेतुभावाभावयोर्विशेषोनस्यादित्यर्थः ॥ ६९ ॥ तस्यसत्त्वासंभवमेवस्फुटयति स्वरूपेति यतोभे दोविशेषःसत्तादयोधर्माश्चएतैःसर्वसत्तारूपेणप्रसिद्धैर्वर्जितोऽभावस्ततोस्तीतिवक्तुंनयोग्यस्तेनविकल्पाख्यज्ञानमात्ररूपइत्यर्थः ॥७०॥ विकल्पलक्षणंशब्दज्ञानानुपातीवस्तुशून्योविकल्पइत्याकारंस्मारयति वचनादिति सोयमसत्पदार्थः ॥ ७१ ॥ अविषयात्मसाक्षात्का रेतुविकल्पोपिनिवर्त्ततेइत्याह विकल्पादिरिति ॥ ७२ ॥ भावाद्वैतवादिनामाशयप्रदर्शनंनिगमयति द्वैताभावइति स्पष्टम् ॥ ७३ ॥ अ

अभावस्यतुकेयंस्यात्सत्ताद्वैतविनाशिनी ॥ घटादिष्विवनैतस्यसत्ताकाचनविद्यते ॥ तत्सत्त्वेकेनभेदःस्या द्भावाभावस्वरूपयोः॥ ६९॥ स्वरूपभेदसत्तादिसर्वसत्ताविवर्जितः ॥ यतोभावस्ततःकेनसोस्तीतिव्यपदि श्यते॥ विकल्पमात्रंतेनायमभावोनरशृंगवत्॥ ७० ॥ वचनाद्व्यवहारःस्यादसतोयस्यवस्तुनः॥ विकल्पवि षयःसोयमुच्यतेन्यायवेदिभिः ॥ ७१ ॥ विकल्पादिरयंयत्रव्यवहारःक्षयंगतः ॥ अवाङ्मनसगम्येऽस्मिंस्त त्राभावःकुतोभवेत्॥ ७२ ॥ द्वैताभावोपितेनस्यादद्वैतस्यनघातकः॥ विचारेसतिनिर्द्वैतंभवेद्व्रह्मानयादिशा ॥ ७३ ॥ देशकालपरिच्छिन्नंजायमानंघटादिकं ॥ देशकालौस्वरूपेणभिन्नौतौहिपरस्परम् ॥ ७४॥ देशेनै वपरिच्छिन्नाःकेषांचित्परमाणवः ॥ मतेसंतियथावंध्यापुत्रोस्त्येवशिशोर्मते॥ ७५॥

नयादिशेत्युक्तंस्फुटयन्द्वैताभावसाधनेप्रधानस्यानंतपदस्यव्यावर्त्यंदर्शयति देशेतिषड्भिः कार्यत्वेनप्रसिद्धंसर्वमुभाभ्यांदेशकालाभ्यांप रिच्छिन्नंप्रसिद्धं देशकालौतुस्वरूपेणवस्तुनापरिच्छिन्नौ अन्योन्याभावप्रतियोगित्वादित्यर्थः ॥ ७४ ॥ नन्वेकेनवस्तुपरिच्छेदेनैवसकल व्यावर्त्यसंग्रहात्किमितित्रिविधःपरिच्छेदस्तत्रतत्रनिरूप्यतइतिचेन्मंदधियमनुग्रहायेत्याह देशेनैवेतिद्वाभ्यां केषांचिदर्द्धवैनाशिकैः प्रतारितधियांमतेपरमाणवोनामपदार्थादेशेनैवपरिच्छिन्नाःसंति नकालेन नित्यत्वाभ्युपगमात् नवस्तुना भेदस्यपरिच्छेदरूपतायास्तैरबु द्ध्यमानत्वात् नन्वप्रामाणिकानांपरमाणूनांकथंसत्त्वमितिशंकांदृष्टांतेनपरिहरति यथेति स्पष्टं ॥ ७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालेनैवेति तथाकेषांचित्सांख्यानांमतेमहन्महत्तत्त्वंविभुत्वेनाभिमतत्वात्सर्वविकारकारणत्वाच्चदेशवस्तुभ्यांपरिच्छिन्नमपिप्रलयेलय शालित्वात्कालपरिच्छिन्नमस्ति नभआकाशंआदिपदेनदिगादियहस्तेषांनित्यत्वाद्विभुत्वाच्चदेशकालपरिच्छेदायोग्यत्वाद्भेदात्मकवस्तुप रिच्छेदशालित्वमेवकैश्चिदभ्युपगम्यते इत्येवंविधभ्रांतानांप्रबोधायतदनुसारेणपरिच्छेदत्रयमुक्तमित्यर्थः रूपादेववस्तुनः॥७६॥ तथावस्तु परिच्छेदात्मकभेदस्यैवस्वावयवसजातीयविजातीयात्मकप्रतियोगित्रित्वप्रयुक्तंत्रैविध्यंदर्शयति अन्योपीति अन्योभेदमात्रप्रपंचत्वेनपू र्वोक्तविलक्षणःपरिच्छेदस्त्रिविधोविद्यते यत्रवृक्षरूपमुदाहरणंतत्प्रसिद्धमस्तीत्यर्थः ॥ ७७ ॥ वृक्षस्योदाहरणतांस्फुटयति वृक्षइति य

कालेनैवपरिच्छिन्नंकेषांचिन्महदस्तिच ॥ रूपादेवपरिच्छिन्नंकेषांचिन्नभआदिकं ॥ इतिभ्रांतप्रसिद्ध्यायं परिच्छेदस्त्रिधास्थितः॥ ७६ ॥ अन्योपिलौकिकःकश्चित्परिच्छेदस्त्रिधैवहि॥ विद्यतेवृक्षएतस्मिन्नुदाहरणम स्तितत् ॥ ७७ ॥ वृक्षःस्वयंविभिन्नोयंशाखास्कंधादिभेदतः॥ वटोवटांतरात्तद्वदश्वत्थादेश्चसर्वदा ॥ ७८ ॥ स्वसजातिविजात्युत्थःसोयमत्रत्रिधास्थितः ॥ देशकालस्वरूपोत्रत्रिधापूर्वश्चकीर्तितः ॥ ७९ ॥ सर्वोप्य यंपरिच्छेदोनंतशब्देनवार्यते ॥ परिच्छिन्नपरिच्छेदद्वयाभावविवर्जितं ॥ आनंदात्मस्वरूपंयत्तद्ब्रह्मेतिस मीरितम् ॥ ८० ॥

थायंवटाख्योवृक्षःशाखादिभिःस्वरूपैर्भिद्यमानःस्वयंभिन्नइत्युच्यते वटांतरात्सजातीयाद्भिन्नः अश्वत्थादेर्विजातीयाच्चभिन्नइत्यर्थः ॥ ७८ ॥ स्वसजातीति सोयंपरिच्छेदःस्वस्मात्सजातेर्विजातेश्चप्रतियोगिनउत्थितोनिरूपणंप्राप्तःअत्रवृक्षोदाहरणेस्थितःकीर्तितः दे शादित्रितयनिरूपितत्वेनत्रिविधस्तुपूर्वकीर्तितइत्यर्थः ॥ ७९ ॥ अस्यपरिच्छेदस्यब्रह्मणिसंभावनांकुतर्कपंकजातामनंतशब्दःक्षालय तीत्याह सर्वोपीति अनंतशब्दप्रसादात्शोधितंतत्त्वमभिनयति परिच्छिन्नेति परिच्छिन्नंचप्रत्येकंत्रिविधपरिच्छेदयोर्द्वयंचतदभावश्चएतै र्विवर्जितं अभावोपियदिभिन्नत्वेनावतिष्ठेत्पुनरनंतशब्दःकुप्येदित्यतोऽभावोपिवार्यते तत्पूर्णस्वरूपंब्रह्मेतिवाक्यार्थः॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानपदकृत्यंदर्शयंस्तस्यार्शआद्यजंतत्वेनज्ञानवत्परत्वभ्रमंवारयति संभावितमिति तद्वर्णितंब्रह्मजडमितिकेनचित्संभावितंशंकितंस्यादत स्तज्जडंज्ञानपदेनवार्यतेइत्यर्थः एवंचिद्भिन्नत्वलक्षणजडतांवारयितुंप्रवृत्तंज्ञानपदंयदिज्ञानवत्परंस्यात्तदानेष्टसिद्धिंलभेत् नहिनरवतीभूमिरित्युक्तेर्भूमेर्नरभिन्नत्वंवार्यते अतःशुद्धंज्ञानपदंज्ञानरूपतामेवाचष्टेइत्यर्थः ॥८१॥ यावताविनानुपपत्तिस्तत्सर्वंकल्प्यतेइतिन्यायेनभद्वानामिवज्ञाततानुमेयतांवृत्तिज्ञानवत्परप्रकाश्यतांचज्ञानपदमेवस्वार्थस्यवारयतीत्याह ज्ञानंचेति तज्ज्ञानपदोक्तंवस्तुयद्यभातंअप्रकाशशीलंस्यात्प्रकाशशीलत्वेपिपरप्रकाश्यंस्यात्तदाघटादिवत्सूर्यादितैजसवच्चपुनर्जडंस्यात्ततस्तंदोषंवारयितुंस्वयंप्रकाशतैवानेनपदेनबोध्यतेइत्यर्थः ॥ ८२ ॥ तत्रस्वरूपेव्यामोहजांमिथ्यात्वभ्रांतिंसत्यपदंवारयतीत्याह रज्जुसर्पादीति तत्तत्त्वमसत्यंमाभूदित्याकारकासंभावन

संभावितंजडंतस्यात्तज्ज्ञानेननिवार्यते ॥ ज्ञानवत्तानजडतांविनिवारयितुंक्षमा ॥ नरवत्तायथाभूमेरनरत्वंनवारयेत् ॥ ८१ ॥ ज्ञानंचयद्यभातंस्याज्ज्ञातंवान्येनचेद्भवेत् ॥ घटसूर्यादिवन्नैतदजडंस्यात्कथंचन ॥ ततःस्वयंसदाभातंज्ञानमेतदवस्थितं ॥ ८२ ॥ रज्जुसर्पादिवत्तच्चासत्यंमाभूत्स्वयंप्रभम् ॥ इत्यसत्यत्वमत्रैतद्वार्यतेसत्यशब्दतः ॥ ८३ ॥ रज्जुसर्पादिकंबाध्यंपरिच्छिन्नंजडंयतः ॥ अपरिच्छिन्नमजडंबाध्यतेकेनहेतुना ॥ ८४ ॥ असत्याज्ञानभेदानामभावेनपदत्रयं ॥ सत्यंज्ञानमनंतंचततःस्याद्ब्रह्मलक्षणम् ॥ ८५ ॥ सर्वत्रापिस्थितंब्रह्मबुद्धावेवोपलभ्यते ॥ गुहायांनिहितंतेनबुद्धिस्थंवेदईरितम् ॥ ८६ ॥

याप्राप्तमसत्यत्वंतत्पदेनवार्यतेइत्यर्थः ॥ ८३ ॥ ननुभ्रमकालिकाबाधितत्वस्यरज्जुसर्पादावपिसत्त्वात्कथमनेनासत्त्वंवार्यतेइतिचेत्ज्ञानानंतपदयोःसामानाधिकरण्यबलादित्याह रज्जुसर्पादिकमिति लोकेहिबाध्यत्वेनतदेवप्रसिद्धंयत्प्रहारादिगोचरतांजडतांवाभजेत् एतत्तत्त्वंतुस्वयंप्रकाशत्वादगोचरंपूर्णंकोबाधेतेत्यर्थः ॥ ८४ ॥ फलितमाह असत्याज्ञानेति भेदःपरिच्छेदः अभावोव्यावृत्तिः ॥ ८५ ॥ एवंप्रथमंपादंव्याख्यायपरिशिष्टपादत्रयार्थमाह सर्वत्रेति तद्ब्रह्मसर्वत्रपूर्णमपियतोबुद्धावेवपंचकोशमयगुहाप्रधानायांसाक्षितयोपलभ्यतेऽतस्तस्यगुहानिहितत्वमुक्तं तथाचोक्तंयोगभाष्ये नपातालंनविवरंगिरीणांनैवांधकारंकुक्षयोनोदधीनां गुहायस्यांनिहितंब्रह्मशाश्वतंबुद्धिवृत्तिमविशिष्टांकवयोवेदयंतेइति बुद्धेर्वृत्तिमविशिष्टांचित्तादात्म्यापन्नां ॥ ८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यएतदिति यएतत्तत्त्वमवगच्छेत्सब्रह्मवत्सर्वंव्याप्नुयात्व्याप्यचसर्वमिष्टजातंयुगपत्प्राप्नुयात् सहशब्दस्यश्रुतौयौगपद्यार्थकत्वात् ॥ ८७ ॥
तस्मादित्यादेरन्नरसमयइत्यंतस्यवाक्यस्यार्थंविशत्याप्रपंचयंस्तत्रसृष्टिप्रदर्शनस्यफलवत्सन्निधावफलंतदंगमितिन्यायेनाद्वयत्वबोधशे
षतांदर्शयति सत्यादीतिद्वाभ्यां समीरितः सूत्रवाक्येमंत्रेचेतिशेषः सभेदासंभवान्निर्भेदोऽद्वयोभवति तत्रभेदराहित्येयुक्तिस्तुइयंसृष्टि
वाक्यप्रदर्शितास्मृताप्रसिद्धेत्यर्थः ॥ ८८ ॥ इयंकेत्यतआह कारणादिति कारणाद्भिन्नसत्ताकत्वाभावःकार्यस्यप्रसिद्धः ततोब्रह्मण
एवविश्वकारणत्वेप्रतिपादितेऽद्वयत्वंस्फुटंभवतीत्यर्थः ॥ ८९ ॥ एतस्मादिति एतस्माद्वर्णितादात्मनःशब्दगुणकआकाशउत्पन्नः गगनात्म

यएतत्सर्वबुद्धीनांसाक्षिरूपंसदापुमान्॥ अहंब्रह्मेतिजानातिसव्याप्नोतिचराचरम् ॥ ब्रह्मवद्ब्रह्मतादात्म्यंप्राप्यसर्वमवाप्नुयात्॥ ८७॥ सत्यादिलक्षणोयोयमानंदात्मासमीरितः॥ निर्भेदोभेदराहित्यात्तत्रयुक्तिरियंस्मृता ॥ ८८ ॥ कारणान्नपृथक्कार्यंम्रदोयद्वद्घटादिकं ॥ कारणंचतथाब्रह्मनभआदेस्ततोऽद्वयं ॥ ८९ ॥ एतस्मादात्मनोजातंगगनंशब्दसंयुतं ॥ स्पर्शवांश्चततोवायुःसंजातोगगनात्मकात् ॥ ९० ॥ वायुरूपादिदंतेजोरूपवद्दिव्यजायत॥ तेजोरूपादिदंनीरंरसवत्समभूत्पुरा॥जातानीराद्रसवतोभूमिर्गंधवतीत्वियम्॥९१॥ सर्वेष्वपिचकार्येषुवर्त्ततेकारणंसदा ॥ तेनब्रह्मात्रगगनेगगनंपवनेपिच ॥ ९२ ॥ पवनोपितथावन्हौवन्हिर्नीरेष्वपिस्थितः॥ पृथिव्यामपिनीराणितादात्म्येनात्रसंस्थितिः ॥ ९३॥ एकद्वित्रिचतुःपंचगुणाउक्ताश्चखादयः॥ कारणानांगुणैःसार्धंपंचभूतानितेस्मृताः॥ ९४॥

काद्गगनभावापन्नाच्चास्माद्वायुःस्पर्शगुणकउत्पन्नः एवमग्रेपीति ॥ ९० ॥ वायुरूपादिति रूपवद्रूपगुणकम् ॥ ९१ ॥ उत्पन्नेकार्येतत्र
तादात्म्यसंबंधेनोपसर्जनतयावस्थितिरूपंकारणस्यानुगममाह सर्वेष्वपीति यतःसर्वत्रकार्येकारणानुगमःप्रसिद्धस्तेनसद्रूपंगगनेस्थितंगग
नादिकंचोत्तरेत्रेति अपरंत्वत्रकार्येयाकारणस्थितिःसातादात्म्यसंबंधेनभेदसहिष्णुरभेदइतिलक्षितेनबोध्या अत्रभेदस्तुकल्पितइतिद्वयोर
र्थः ॥ ९२ ॥ ९३ ॥ एकेति तेचखादयःपृथिव्यंताःपदार्थाःपंचभूतसंज्ञकाःएकादिगुणकाश्चोक्ताः उत्तरेषांकारणगुणशालित्वादित्यर्थः ॥७॥
॥ ९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणानाह शब्देति एतेसर्वेंपीतिशेषः तत्तस्मादाकाशादितादात्म्यरूपाद्धेतोरासमंतात्पृथिव्यांस्थिताः ॥ ९५ ॥ यदिज्ञानमात्मनोगुणोभविष्यत्तदाभूतेषुदृष्टमभविष्यत्परंतुतत्स्वरूपमेवात्मनोनगुणोऽतोनदृश्यतेइत्याह ज्ञानमिति यतोज्ञानंगुणोनभवतिततःखादौनदृश्यतइति योजना इदमानंदस्याप्युपलक्षणं ॥ ९६ ॥ किंचपरिणामिनःकारणस्यगुणाःकार्येदृश्यंतेइतिनियमः आत्मनस्तुविवर्त्तोपादानत्वान्नतत्रसक्तिरित्याह आत्मनइति आत्मनोयत्सत्यंरूपमानंदादितेनयद्यात्माकारणंभवेत्तथासत्यानंदादिकमत्रखादिषुदृश्येतैवतदभावादात्म

शब्दःस्पर्शस्तथारूपंरसोगंधश्चपंचमः॥ पृथिव्यांखादितादात्म्याद्गुणाएतेतदास्थिताः॥ ९५॥ ज्ञानंनामगुणोनायमानंदात्मस्वरूपिणः॥ यतस्ततोनखादौसद्दृश्यतेकर्हिचित्क्वचित्॥ ९६॥ आत्मनःसत्यरूपेणयद्यात्माकारणंभवेत्॥ आनंदादिकमप्यत्रदृश्येतचतथासति ॥ ९७॥ खादिकेचजडेयस्मादानंदादिर्नलभ्यते ॥ परिणामंविनातस्मादात्मास्यादस्यकारणं ॥ ९८ ॥ परिणामंविनायस्माज्जगतःकारणंपुमान्॥ माययैवचतेनायंकारणंनचवस्तुतः ॥९९॥ माययैवयथारज्जुःसर्पादेःकारणंभवेत् ॥ परिणामंविनातद्वत्पुमानप्यस्यकारणं॥ १००॥ आत्मनोव्यतिरिक्तानिखादीनिपरिणामतः॥ कारणानियतस्तेषांगुणाःकार्येषुसंत्यमी॥ १०१॥ अथवाकारणंसर्वपरिणामविवर्जितं॥ ब्रह्मसर्वत्रविज्ञेयंकार्यस्यादितरत्पुनः॥ १०२॥

नोविवर्त्तोपादानत्वैवज्ञायतेइतिद्वयोरर्थः ॥ ९७ ॥ ९८ ॥ विवर्त्तोपादानतातुमायाशबलाख्येनकल्पितेनैवरूपेणभवतीत्याह परिणामंविनेति ॥९९॥ तत्रदृष्टांतमाह माययैवेति ॥१००॥ आकाशादीनांतुपरिणामित्वात्तद्गुणानुगमउत्तरत्रयुक्तइत्याह आत्मनइति ॥ १०१ ॥ वस्तुतस्तुसर्वाणिरूपाणिविचित्यधीरइत्यादिश्रुतेर्ब्रह्मणएवसर्वत्रकारणत्वं भूतानांकारणत्वव्यवहारस्तुमायावत्कारणावच्छेदकतयेत्याह अथवेतित्रिभिः अथवासर्वपरिणामैर्वर्जितंब्रह्मैवसर्वत्रकारणमितरदाकाशादिकंतुकार्यमित्येववाच्यंनकारणत्वयोग्यमक्षमत्वादित्यर्थः ॥ १०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंतर्हिखादिषुकारणत्वधीर्लोकस्येत्यतआह ततइति ततोब्रह्मातिरिक्तस्यकारणत्वानर्हत्वात् जगत्कर्तृब्रह्मयदापूर्वेणकार्येणाकाशादिनासमन्वितमवच्छिन्नंसदुत्तरंवाय्वादिकंकार्यंतत्प्रसिद्धंकरोति तर्हितद्द्वयंब्रह्माकाशंचेत्युभयमत्रवायुरूपेकार्येकारणवत्संविभातिततोब्रह्मवदाकाशस्यापिकारणाभिमानाद्वायौशब्दंदृष्ट्वाकारणगुणोयमागतइत्याकारकआवेशोभ्रमइतियावत् सलोकस्यजायतइतिद्वयोरर्थः॥१०३॥ १०४ ॥ प्रकृतसृष्टिक्रमंगृह्णाति एवमिति स्पष्टम् ॥ १०५ ॥ अस्याइति ग्राम्याओषध्योयवाद्याआरण्याःश्यामाकादयः अद्याभक्ष्याः ॥ १०६ ॥ ताभ्यइति ताभ्यओषधिभ्योऽन्नरूपंगताभ्यःततोरेतोभावंगताभ्यश्चपंचम्यांस्वर्गाभ्रभूपुरुषयोषात्मकाग्निषुमध्ये

ततोब्रह्मजगत्कर्तृपूर्वकार्यसमन्वितं॥यदोत्तरंकरोत्येतत्कार्यंतत्तर्हितद्द्वयं ॥ १०३॥ मिलित्वासंविभात्यत्र कार्येकारणवत्सदा॥ ततःपूर्वगुणावेशउत्तरस्मिन्प्रजायते॥ १०४॥एवंभूतेषुचरमंकार्यंपंचगुणामही॥ जाताब्रह्मांडजननीस्थिरजंगमधारिणी॥ १०५॥ अस्याःपृथिव्याःसंजाताग्राम्यारण्याःसहस्रशः॥ ओषध्योयवमाषाद्याअद्यायाजंगमैःसदा॥ १०६॥ ताभ्योत्पन्नस्वरूपाभ्यःस्थिताभ्योरेतआत्मना॥ पंचम्यामाहुतौगर्भःपुरुषोयंप्रजायते॥ शिरःपाण्यादिमानुक्तःसुकृतंदैवतैरपि॥ १०७॥बीजतोयोनितस्तद्वन्नित्यमन्नस्यभक्षणात्॥पुरुषोन्नरसानांस्यात्कार्यंस्थूलवपुःसदा॥ १०८॥ आत्मनोस्यत्रिधादेहःकथ्यतेवेदवादिभिः॥ स्थूलःसूक्ष्मस्तथाऽज्ञानमत्रतेष्वपिपंचधा॥ असेरिवातिदुर्भेदान्कोशांस्तित्तिरयोद्विजाः॥ १०९॥

पंचमाग्निगोचरायामाहुतौगर्भरूपेणशिरःपाण्यादिमान्पुरुषोजायतेइत्यर्थः ननुपश्वादीनामप्यन्नजत्वेसमानेपुरुषस्यैवनिर्देशःकुतइति शंकांपरिहरंस्तस्यप्राधान्यमैतरेयव्याख्यानेप्रथमाध्यायेउक्तंस्मारयति उक्तइति गवाश्वादिदेहसृष्टावपरितुष्टैर्देवैर्मनुष्यदेहःसर्वाधिकारसंपन्नतयासुकृतमितिपदप्रयोगेणप्रशस्तइत्युक्तइत्यर्थः ॥ १०७॥ बीजतइति सोयंपुरुषोनकेवलंपितृमात्रंशद्वाराऽन्नविकारःकिंतुनित्यभक्षणेनोपचयादप्यन्नरसमयइत्यर्थः ॥ १०८ ॥ एवंस्थूलदर्शिनंप्रतिसर्वांतरात्मतत्त्वंबोधयितुंप्रवृत्तांपंचकोशप्रक्रियामवतारयति आत्मनइति अस्यात्मनःस्थूलसूक्ष्मकारणाख्यंशरीरत्रयंप्रसिद्धंतेषुत्रिषुशरीरेषुपंचधाकोशान्खड्गप्रावरणवदसंगशस्त्रहीनैर्दुर्भेदांस्तित्तिरिशाखाध्यायिनःकल्पयंतीत्यर्थः ॥ १०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिषुशरीरेषुपंचकोशभावमभिनयति स्थूलमिति स्थूलशरीरंप्रथमोऽन्नमयाख्यःकोशः सूक्ष्मंतुप्राणमयमनोमयविज्ञानमयाख्यकोशत्र यात्मकं पंचमआनंदमयःकारणशरीरात्मकइत्यर्थः ॥ ११०॥ तेषुशिष्यबुद्धिसौकर्यायपक्षितांकल्पयित्वापक्षिणोऽवयवान्पक्षादीन्कल्प यंतीत्याह पक्षित्वमिति ॥ १११ ॥ तत्रान्नमयनिरूपणपरस्यतस्येत्यादेरन्नंतदुच्यतेइत्यंतस्यार्थमाह अस्येतिद्वादशभिः अस्यान्नमयस्य स्थूलदेहात्मकस्यपक्षिणःप्रसिद्धंशिरएवशिरोबोध्यं वामभुजोवामःपक्षः दक्षिणोभुजोदक्षिणःपक्षः उदरात्मकोमध्यभागएवपक्षिमध्य भागः कीदृशः श्रुतावात्मपदेनोक्तः तथाचश्रुत्यंतरं मध्यंह्येषामंगानामात्मेति पादद्वयंपुच्छवद्दीर्घत्वात्पुच्छत्वेनबोध्यं स्थित्याधारत्वात्प्रति

स्थूलंशरीरमेकःस्यात्कोशस्तेषुत्रयोपरे ॥ कोशाःसूक्ष्मंशरीरंस्यादज्ञानंपंचमोपिच ॥ ११० ॥ पक्षित्वमत्र कोशेषुपंचस्वपिमहाधियः ॥ कल्पयित्वात्रपक्षादीन्कल्पयंत्यपितेद्विजाः ॥ एवंहिबुद्धिसौकार्यकामाःशिष्य हितैषिणः ॥ १११ ॥ अस्यस्थूलस्यदेहस्यशिरएवशिरःस्मृतं ॥ वामदक्षिणपक्षौचहस्तौतौवामदक्षिणौ ॥११२॥ उदरंचोदरंतस्यपक्षिणश्चात्मशब्दितं॥ पादौदीर्घाविमौपुच्छसदृशौपुच्छमीरितौ॥ तावेवचप्रतिष्ठा ख्यावत्रायंप्रतितिष्ठति ॥ ११३ ॥ प्रतिष्ठापक्षिदेहानांसमाप्तिर्नापरास्तिहि ॥ पक्षिणःप्रतितिष्ठंतिनपुच्छेक र्हिचिद्यतः॥११४॥ यद्यप्यत्रतथाप्यत्रप्रतितिष्ठंतिकेचन॥ वानराद्याश्चपुच्छेषुप्रतिष्ठातेनतद्भवेत्॥११५॥

ष्ठात्वेनापिबोध्यमितिद्वयोरर्थः ॥ ११२ ॥११३॥ नन्वत्रप्रतिष्ठापदस्यस्थित्याधारतारूपोर्थःप्रतिष्ठागौरवेस्थितावितिहैमकोशानुगुणोपि नयुक्तः प्रसिद्धपक्षिपुच्छस्यतदाधारतायाअप्रसिद्धत्वात्किंतुप्रतिःपदसमाप्तिप्रतिधानेत्याद्युपसर्गसूत्रानुसारात्पदपदोक्तदेहसमाप्तिरर्थो वाच्यइत्याशंक्यवानरादिशरीराधारतायादृष्टत्वाद्विवक्षितायाब्रह्मणःसर्वाधारतायाअनुकूलत्वाच्चस्थित्यर्थएवग्राह्यइत्याह प्रतिष्ठेति य द्यपिप्रतिष्ठापदार्थतयापक्षिदेहसमाप्तिरेववाच्या यतःपक्षिणःपुच्छेस्थितिंकुर्वंतोनदृश्यन्तेतथापिवानरभल्लुकादीनांतथात्वदृष्टेस्तेनस्थित्या धारत्वेनतत्पुच्छंप्रतिष्ठापदवाच्यंभवेदितिद्वयोरर्थः ॥ ११४ ॥ ११५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्नकार्येइति अस्मिन्ब्राह्मणेप्रतिपादितेस्थूलशरीरात्मकेकोशेअमुंश्लोकंमंत्रं जातावेकवचनं वदंतिपठंति अमुंकमित्याकांक्षायांपठति अन्नादेवेति अन्नादेवरसबीजादिभावापन्नात्सर्वप्रजानामुत्पत्तिःस्थितिश्चप्रसिद्धा लयश्चपृथिव्यात्मकेतत्रेत्यर्थः ॥ ११६ ॥ सर्वपदार्थं स्फुटयितुंस्थावराणांतावद्भूमिरससंपृक्तनीररूपान्नादुत्पत्त्यादिकमाह स्थावराणामितिद्वाभ्यां तेनोक्तान्नेनैवजीवनमस्मिन्नन्नेएवनाशश्च

जायमानःप्रसिद्धस्तेषांस्थावराणामितिद्वयोरर्थः ॥ ११७॥ ११८ ॥ जंगमानांतूत्पत्त्यादिकमन्नहेतुकंप्रसिद्धमित्याह ओषध्यात्मकमिति स्पष्टम् ॥ ११९ ॥ अथैनदपियंत्यंततइतिपादस्यान्नेलीयंतइत्यर्थोदर्शितः अन्नरूपाःसत्यःप्रजानश्यंतीत्याकारकमर्थांतरंदर्शयति स्थावराइतिद्वाभ्यां स्थावरादिदेहानांशाकादिभावेनयंकंचित्प्राणिनंप्रत्यन्नभावःप्रसिद्धइत्यर्थः ॥ १२० ॥ किंचपृथिवीसर्वभूतानामन्नं

अन्नकार्येशरीरेस्मिन्स्थूलेश्लोकंवदंत्यमुं ॥ अन्नादेवप्रजाःसर्वाजायंतेपृथिवीस्थिताः ॥ अन्नेनैवचजीवंतिलयमन्नेव्रजंतिच ॥ ११६ ॥ स्थावराणांनीररूपादन्नादुत्पत्तिरीरिता ॥ जीवनंचतथानाशस्तेनैवास्मिंश्चजायते॥ ११७॥ नकेवलेननीरेणतेषामपिहिजीवनं॥ वर्तनंवाविनाशोवाकिंतुभूमियुतेनच॥ ११८॥ ओषध्यात्मकमन्नंतुजंगमानांहिकारणं॥ उत्पत्तौजीवनेनाशेप्रसिद्धंसर्वदेहिनां ॥ ११९ ॥ स्थावराजंगमादेहाःसर्वेजीवविवर्जिताः॥ जीवस्यकस्यचित्केचिद्भवंत्यन्नमसंशयं॥ १२० ॥ पृथिव्याश्चतथाऽभिन्नाःसर्वेसर्वशरीरिणां ॥ अन्नंततोभवंत्येतेविनष्टाःसर्वएवहि ॥ १२१ ॥ अन्नंततोत्रभूतानांज्येष्ठमुक्तंमनीषिभिः॥सर्वौषधंचयेनायंक्षुधारोगोविनश्यति॥ १२२॥ अन्नंब्रह्मेतियेनित्यंब्राह्मणाद्याउपासते ॥ प्राप्नुवंतिचतेसर्वेह्यन्नंस्वमनसेप्सितं ॥ अद्यतेत्तिचभूतानितस्मादन्नंतदुच्यते॥ १२३॥

भोगसाधनत्वात्तल्लीनानांसर्वेषामन्नत्वंविनाशदशायांसिद्धमित्याह पृथिव्याइति अभिन्नाइतिच्छेदः पृथिव्याःसकाशादभेदहीनाःसंतइतितदर्थः स्फुटमन्यत् ॥ १२१ ॥ द्वितीयमंत्रार्थमाह अन्नमिति ततःसकलप्रजोत्पादादिहेतुत्वादन्नंसमष्ट्यात्मकंज्येष्ठंप्रथमोत्पन्नमुच्यते क्षुधायाःसर्वरोगात्मिकायाअपहारकत्वात्सर्वौषधमितिचोच्यतइत्यर्थः ॥ १२२ ॥ अन्नंब्रह्मेति येधिकारिणःअन्नेसमष्टिरूपेसकलभू
तोत्पादादिहेतुत्वेनलक्षणेनब्रह्मत्वंनिश्चित्यतदेवध्यायंतितेयथेष्टान्नलाभरूपंफलंभजंतइत्यर्थः अन्नपदव्युत्पत्तिस्तुव्यष्टिरूपेणअद्यतेसमष्टिरूपेणात्तिचभूतानीतिद्विविधाबोध्येत्यर्थः शिष्टमंत्रभागस्तुव्याख्यातप्रायत्वान्नलिखितइति ॥ १२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्ष्यमाणात्मतत्त्वनिर्णयायपुच्छपदोक्तस्यतथोत्तरोत्तरकोशस्यप्राधान्यादिकंबोध्यमित्याह अत्रेति यदंगंपुच्छप्रतिष्ठापदाभ्यामत्रपंचकोशकउच्यतेतदंगंकोशेकोशेप्रधानंकथंचित्कारणंचविज्ञेयमितिसंबंधः तथाप्रतिकोशमांतरमांतरंकोशंकोशस्यपूर्वपूर्वस्यकारणंविद्यादितिशेषः ॥ १२४ ॥ सूक्ष्मशरीरेकोशत्रयकल्पनायांनिमित्तभेदंदर्शयति क्रियेति सूक्ष्मेदेहेक्रियाप्रधानोंशःप्राणमयःकोशउक्तः वक्ष्यमाणविधयाप्रमाणभूतनामप्रधानोंशोमनोमयः रूपंप्रमेयंतत्प्रधानस्तुविज्ञानमयइत्यर्थः ॥ १२५ ॥ प्राणमयपरस्यवाक्यजातस्यार्थंप्रदर्शयति अंतरितिदशभिः अस्यस्थूलशरीरात्मकान्नमयस्यपंचावयवकत्वेनवर्णितस्यांतःस्थितत्वात्प्राणःप्राणमयकोशोपितादृक्पंचावयव

अत्रपुच्छंप्रतिष्ठायदीर्यतेपंचकोशके॥ प्रधानंतद्धिविज्ञेयंकारणंचकथंचन॥ कोशेकोशेचकोशस्यप्रतिकोशंमनीषिभिः ॥ १२४ ॥ क्रियानामचरूपंचसूक्ष्मेदेहेपृथक्त्रयं ॥ कृत्वाप्राणमनोबुद्धिरूपमेवंवदंतिच ॥ १२५ ॥ अंतःस्थूलस्यदेहस्यप्राणएषव्यवस्थितः ॥ स्थूलंशरीरंयादृक्स्यात्तादृग्भवतिसस्वयं॥ १२६ ॥ प्राणस्यांतर्मनश्चैवंमनसोपिचधीस्तथा ॥ धियोपिचतथाऽविद्यासदृशंसर्वमेवतत् ॥ १२७ ॥ मूषारसेनयद्वत्स्यात्पूर्णाताम्रादिजेनहि॥ उत्तरोत्तरतस्तद्वत्पूर्वःपूर्वःप्रपूर्यते॥ कोशःकोशेनसर्वत्रप्राणेनेदंवपुर्यथा॥ १२८॥ प्राणरूपेचकोशेऽस्मिन्शिरःप्राणउदीरितः॥ अपानउत्तरःपक्षोव्यानोदक्षिणएवच॥ १२९॥

कोबोध्यइत्यर्थः ॥ १२६॥ प्राणस्येति प्राणमयस्यांतर्गतोमनोमयस्तस्यांतर्गतस्तुविज्ञानमयस्तस्याप्यंतर्गतआनंदमयोऽविद्यारूपः एषांमध्यउत्तरोत्तरंयत्तत्पूर्वपूर्वेणसदृशमित्यर्थः ॥ १२७ ॥ पूर्वपूर्वसादृश्येदृष्टांतमाह मूषेति द्रुतंताम्रंयत्रपात्रेप्रतिमाकारार्पकेक्षिप्यतेसामूषेत्युच्यते सामूषायथाताम्रादिद्रवेणमूषाकारग्राहिणापूर्णाभवति तथाउत्तरोत्तरेणमनोमयादिनापूर्वपूर्वःकोशःप्रपूर्यते तत्रोदाहरणं यथाप्राणमयेनेदंस्थूलशरीरंपूर्णमिति ॥ १२८ ॥ अस्यप्राणमयस्यावयवकल्पनामभिनयति प्राणरूपइति अत्रकोशेप्राणोमुखादिसंचारीवृत्तिविशेषःशिरस्त्वेनध्येयः अपानोऽधःसंचारीव्यानःप्राणापानयोःसंधिरूपाएतौवामदक्षिणपक्षत्वेनध्येयावित्यर्थः ॥ १२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकाशेनइति आकाशइनःस्वामीदेवतेतियस्यतादृशःसमानोमध्यत्वेनध्येयः पृथिवीनःपृथिवीदेवताकउदानस्तुपुच्छत्वेनप्रतिष्ठात्वेनच ध्येयइत्यर्थः ॥ १२० ॥ तस्यप्रतिष्ठात्वंस्फुटयति उदानेति यद्युत्क्रमणशीलउदानोनिर्गच्छेत्तदासर्वःप्राणमयोबहिर्गच्छेदतःपृथिवीदेव
 तयागुरुत्वेनप्रतिबद्धोत्क्रमणशक्तिकःसन्नुदानःप्रतिष्ठापदप्रयोगमर्हत्येवेत्यर्थः ॥ १२१ ॥ यथान्नमयःसमष्टिरूपेणध्यातःसर्वान्नला भहेतुरुक्तस्तथायंप्राणमयःसमष्टितयादृष्टःसर्वायुर्लाभहेतुरित्याह यथैवेति ॥ १२२ ॥ अत्रापीति अत्रपदस्यव्याख्याप्राणमयंप्रतीति श्लोकपदोक्तंमंत्रंपठति प्राणंतीत्यादि समष्टिप्राणाभिमानिनंदेवंप्राणंतंप्राणव्यापारंकुर्वंतमनुस्त्यैवसर्वेदेवादयःप्राणिनःप्राणंतिचेष्टंतेइ

आकाशेनःसमानोयउदरंसतुकीर्तितः॥ पृथिवीनउदानोयंप्रतिष्ठापुच्छमीरितः॥१३०॥ उदाननिर्गमाद्या तिप्राणःसर्वोबहिर्यतः॥ उदानस्ततएवायंप्रतिष्ठापरिकीर्तितः ॥ १३१ ॥ यथैवान्नमयःकोशःसर्वान्नंपरि कीर्तितः॥ एवंप्राणमयोप्येषसर्वायुःपरिकीर्त्यते ॥ १३२ ॥अत्राप्युदाहरत्येतंश्लोकंप्राणमयंप्रति॥ प्राणं तिप्राणिनःप्राणंप्राणंतमनुसर्वदा॥ देवामनुष्याःपशवोजीवंतःसर्वएवहि॥ १३३ ॥ प्राणोहिसर्वभूताना मायुर्यस्माद्धिजीवनं ॥ प्राणेसतिहिसर्वेषांतस्मात्सर्वायुषंहिसः ॥ वेदेषुपठ्यतेवेदवादिभिस्तत्त्वदर्शिभिः ॥ १३४॥ उपासतेत्रयेप्राणंब्रह्मबुद्ध्यामहाधियः॥ शतसंवत्सराद्यायुःसर्वमेवप्रयांतिते॥ १३५॥ तस्यस्थू लस्यसर्वस्ययएषइहकीर्तितः॥ आत्माप्राणमयोयस्माद्व्याप्यतेतेनतद्वपुः ॥ १३६ ॥ यथैवान्नमयादन्यआं तरोन्नमयेस्थितः॥ आत्माप्राणमयस्तद्वत्तस्मिन्नास्तेमनोमयः॥ १३७॥

त्यर्थः ॥ १३३ ॥ प्राणोहीति प्राणःसर्वेषामायुरात्मकः यस्मात्प्राणेसत्येवजीवनंप्रसिद्धं अतएवप्राणस्यसर्वायुषमितिनामवेदेप्रसिद्धमि त्यर्थः ॥ १३४ ॥ अस्यब्रह्मत्वेनोपासनात्पूर्णायुर्लाभःफलमित्याह उपासतइति आदिपदेनसहस्रसंवत्सरादिपुराणोक्तायुर्ग्रहः ॥१३५॥ तस्येति यएषप्राणमयःकीर्तितःससर्वस्यस्थूलप्रपंचात्मकस्यान्नमयस्यात्माबोध्यः यतस्तेनप्राणमयेनतद्वपुर्व्याप्तमित्यन्वयः अन्नमया
दात्मबुद्धिमपकृष्यप्राणमयेनिदध्यादितिभावः ॥ १३६ ॥ अन्नमयवाक्यजातार्थमाह यथैवेति यथाप्राणमयःकोशोऽन्नमयाद्भिन्नत्वे नततआंतरत्वेनतस्यात्मत्वेनचसत्ताप्रदत्वलक्षणेनोक्तस्तथातस्मिन्प्राणमयेंऽतःस्थोमनोमयोबोध्यइत्यर्थः ॥ १३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यपंचावयवानाह यजुरिति यजुर्वेदःशिरस्त्वेनध्येयः ऋक्सामेदक्षिणवामपक्षत्वेन आदेशपदोक्तोब्राह्मणभागस्तुअंतरपदोक्तमध्यमभागत्वेन अथर्ववेदस्तुशांत्यादिप्रयोजकत्वेनस्थितिहेतुत्वात्पुच्छमितिप्रतिष्ठेतिचध्येयइत्यर्थः ॥ १३८ ॥ ननुशब्दात्मकानांयजुरादीनांकथंमनोमयावयवत्वमित्याशंकांपरिहरति यद्यपीति यद्यपियजुरादिर्वेदःशब्दराशिरूपएवप्रसिद्धोनमानसज्ञानरूपस्तथापियजुरादेःस्वरूपघटिकाप्रमाणत्वघटिकावावृत्तिर्मानस्येवतिष्ठतितेनयजुरादिशब्दानांवृत्तिपरत्वांगीकारेणमनोमयस्यनामावयवकत्वमुपपन्नमित्यर्थः अयंभावः नकेवलावर्णावेदःकिंतुस्थानप्रयत्नस्वराद्यनुसंधानविशिष्टाः तथाचयजुरादिस्वरूपंमनोवृत्तिघटितं एवंप्रमाजनकत्वम

यजुस्तस्यशिरोज्ञेयंपक्षऋक्दक्षिणःस्मृतः॥ उत्तरश्चतथासामत्वादेशोब्राह्मणात्मकः ॥ अंतरंचतथापुच्छमथर्वांगिरसःस्मृतः॥ १३८ ॥ यद्यप्ययंशब्दराशिर्यजुरादिर्नमानसं ॥ तथापितादृशीवृत्तिर्यजुरादेर्मनोगता॥ वर्त्ततेनेननामत्वंमनसोनविरुद्ध्यते ॥ १३९॥ मनसावेदरूपेणब्रह्मात्मानैवगम्यते ॥ तथातेननगम्योयमवाङ्मनसगोचरः॥ अस्मिन्नर्थइमंश्लोकंवदंतिब्रह्मवादिनः ॥ १४० ॥ यतोवाचोनिवर्त्ततेअप्राप्यमनसासह॥ आनंदंब्राह्मणोविद्वान्नबिभेतिकदाचन ॥ १४१ ॥मनसासहितावाचोयजुराद्याःप्रकीर्तिताः ॥ निवर्ततेत्रताःसर्वाआनंदात्मप्रवेदनात् ॥ १४२ ॥ यद्यप्येवंतथाप्यात्मानबिभेतिकदाचन ॥ आनंदमात्मनोविद्वान्मनसैवनचान्यथा॥ १४३॥

पिनस्वरूपेणैववेदवाक्यानांकिंतुमानसवृत्तिरूपेणैवेति ॥ १३९ ॥ अनेनमनोमयेनप्रमाणात्मकेनाविषयोप्यात्माऽवरणभंगद्वाराप्रकाश्यतेइत्यर्थपरत्वेनश्लोकाख्यमंत्रमवतारयति मनसेति यथामनःकर्तृवेदरूपेणआत्मानंब्रह्मरूपंसाक्षाद्विषयीकर्त्तुंनशक्नोतितथास्वरूपेणाप्यात्मनोगोचरस्वभावत्वादित्यस्मिन्नर्थेइमंश्लोकंपठंतीत्यर्थः ॥ १४० ॥ तंपठति यतइति ॥ १४१ ॥ इदमुक्तार्थेयोजयति मनसेतिद्वाभ्यां यद्यपियजुराद्यावाचस्तत्स्वरूपघटकंमनश्चएतेषांप्रमाणभूतानांस्वांतर्गतमानंदरूपमात्मानंप्रवेदयितुंप्रकाशयितुंनशक्तिस्तथाप्यात्माऽधिकारीआत्मनोमनोमयस्यस्वरूपांतर्गतमानंदंमनसैवांतर्मुखेनावरणभंजकेनविद्वान्जानन्संसारान्नबिभेतीत्यर्थः तस्मात्प्राणमयादात्मत्वदृष्टिमपकृष्यमनोमयेपरमानंदलाभहेतौतांकुर्यादितिभावः ॥ १४२ ॥ १४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मादपिनामात्मकप्रमाणलक्षणान्मनोमयात्प्रमातृत्वेनसकलप्रमेयात्मकत्वेनचोत्कृष्टस्यविज्ञानमयस्यबोधकंवाक्यजातंव्याकरोति त
स्यप्राणमयस्येत्यष्टभिः यएषमनोमयस्तस्यप्राणमयस्यात्मत्वेनोक्तस्तस्मिन्मनोमयेंतर्विज्ञानमयःसकर्तृप्रमात्रादिरूपप्रपंचात्मकःकथि
तोस्तीत्यन्वयः ॥१४४॥ एतदेवस्फुटयति मनोमयइति यथामनोमयःप्राणमयस्यांतस्तथात्रमनोमयेतस्यकर्तृत्वादिनाप्रसिद्धस्यविज्ञान
मयस्यास्तित्वंस्थितिरुक्तेत्यर्थः ॥ १४५ ॥ तदीयपंचावयवानाह शिरइति श्रद्धाआस्तिक्यरूपासर्वकर्ममूलभूताशिरस्त्वेनविज्ञानमयस्य
ध्येयातथाविहितेस्वाध्यायोध्येतव्यइतिविधिप्रयुक्तेकर्मज्ञानेकर्मविचारेमनसिवर्तमानेमानसीयाशास्त्रजामीमांसाशास्त्रजन्याधीःसाऋ
तपदोक्तादक्षिणपक्षत्वेनध्येयेत्यर्थः ॥ १४६ ॥ क्रियमाणइति तथातस्मिन्विहितेकर्मणिअनुष्ठीयमानेयाधीःश्रौतसत्यपदोक्तासावा

तस्यप्राणमयस्यात्मापूर्वस्योक्तोमनोमयः॥ यएषकथितस्तस्मिन्सविज्ञानमयोस्तिहि॥ १४४॥ मनोमयो
यथैवास्तेसतुप्राणमयेस्वयं॥ विज्ञानमयरूपस्यतस्यात्रास्तित्वमीरितं ॥ १४५ ॥ शिरःश्रद्धातथापक्षोदक्षि
णःशास्त्रजैवधीः॥ मानसीविहितेकर्मज्ञानेमनसिसंस्थिते॥ १४६॥ क्रियमाणेचतस्मिन्स्यात्सत्यशब्दोदि
तैवधीः॥ सोत्तरोपिभवेत्पक्षोयोगःशास्त्रार्थनिश्चयः॥ उदरंसतुविज्ञेयोविज्ञानमयरूपिणः॥ १४७॥ महः
प्रथमजस्यैषाबुद्धिर्विज्ञानकारणं॥ अस्यपुच्छंप्रतिष्ठैषायद्वियंसर्वकारणं ॥ १४८ ॥ अत्रापिमुनयःश्लोकं
वदंत्येतंमहाधियः॥ बुद्धिर्यज्ञांस्तथानेकंकर्मजातंचलौकिकं॥ कुरुतेपूर्वजांचैतांदेवाब्रह्मेत्युपासते॥ १४९॥
विज्ञानंब्रह्मचेद्वेदतस्माच्चेन्नप्रमाद्यति॥ शरीरेपाप्मनोहित्वासर्वान्कामान्समश्नुते॥ १५० ॥

मपक्षत्वेनध्येया तथायोगपदोक्तोऽध्यात्मशास्त्रार्थनिश्चयःसमाधानरूपोदक्षिणोत्तरपक्षाभ्यांचित्तशुद्धिद्वारोपकार्यत्वेनमध्यभागोवि
ज्ञानमयात्मनोध्येयइत्यर्थः ॥ १४७ ॥ महइति तथामहःपदोक्ताप्रथमजस्यहिरण्यगर्भस्यबुद्धिःसमष्टिरूपासर्वकारणत्वात्पुच्छमितिप्र
तिष्ठेतिचध्येया ॥१४८॥ अत्रापीति अत्रविज्ञानमये एतंएतदर्थकं श्लोकार्थंलिखति बुद्धिरिति बुद्धिर्विज्ञानाख्यैवसकलस्ययज्ञादि
रूपस्यवैदिकस्यलौकिकस्यचकर्मजातस्यकारणंभवति एतांबुद्धिपूर्वजांसमष्टिरूपांसर्वेदेवादेवभाविनोब्रह्मेत्युपासतेइत्यर्थः ॥ १४९ ॥ ॥११॥
एतदुपासनफलप्रदर्शकंद्वितीयंश्लोकंपठति विज्ञानमिति यएतंविज्ञानमयंविज्ञायेतरत्रात्मबुद्धित्यजन्नेतन्निष्ठोभवतिसदेहाभिमानप्रयु
क्तंपापजातंविहायसर्वमैश्वर्यंलभतेइत्यर्थः ॥ १५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोमयस्येति यएषविज्ञानमयरूपःकोशःकीर्त्तितः सतस्यवर्णितस्यमनोमयस्यात्माबोध्यः मूषाताम्ररसन्यायेनतत्पूरकत्वादिति ॥ १५१ ॥ आनंदमयवाक्यार्थमाह विज्ञानमयतइत्यादिना तस्माद्विज्ञानमयात्कर्त्रादिरूपात्भोक्तृत्वेनोत्कृष्टआनंदमयशब्दितआत्मा अन्यआंतरश्चबोध्यः कीदृशः अव्याकृतमयइत्यर्थः ॥ १५२ ॥ अस्यावयवानाह अस्येतित्रिभिः इष्टार्थदर्शनजंसुखंप्रियपदोक्तमस्यानंदमयस्यशिरस्त्वेनध्येयं तथेष्टार्थलाभजन्यंसुखंमोदपदोक्तंदक्षिणपक्षत्वेन तस्येष्टस्यभोगजंसुखंप्रमोदपदोक्तमुत्तरपक्षत्वेनेत्यर्थः ॥ १५३ ॥ सुखमिति यत्सुखंप्रियादिषुविशेषेषुसामान्यरूपेणानुगतमानन्दपदोदितंसुषुप्तौप्रसिद्धंतदस्यमध्यभागत्वेनध्येयमित्यर्थः ॥ १५४ ॥ नि

मनोमयस्यपूर्वस्यतस्यात्मैषप्रकीर्तितः ॥ विज्ञानमयरूपोयःपूर्णोयेनमनोमयः ॥ १५१ ॥ विज्ञानमयतस्तस्मादानंदमयशब्दितः ॥ आंतरोह्यन्यएवायमात्माऽव्याकृतरूपधृक् ॥ १५२ ॥ अस्यानंदमयस्यस्यात्शिर इष्टार्थदर्शनं ॥ प्रियंलाभस्तथेष्टस्यमोदःपक्षोपिदक्षिणः ॥ भोगस्तस्यप्रमोदःस्यादुत्तरःपक्षएवसः ॥ १५३ ॥ सुखंसामान्यमेतेषुह्यानंदोयःप्रियादिषु ॥ आत्मोदरंसविज्ञेयःपक्षिणोस्यमहात्मनः ॥ १५४ ॥ आनंदात्मस्वरूपंयद्ब्रह्मसर्वस्यकारणं ॥ यस्यावगमसंप्राप्त्यैकोशपंचकमीरितं ॥ अस्यपुच्छंप्रतिष्ठाचतदेवोक्तंमनीषिभिः ॥ १५५ ॥ चित्तंबहिर्मुखंप्रायःसर्वेषामिहदेहिनां ॥ नित्यंबहिर्मुखान्येवज्ञानकर्मेंद्रियाणिच ॥ अतः सर्वोपिबाह्यार्थंजंतुर्गच्छतिनांतरं ॥ १५६ ॥ आनंदात्मानमंतस्थंसुखपाथोनिधिंनिजं ॥ परित्यज्यबहिःसर्वःसुखार्थंपरिधावति ॥ १५७ ॥ धावंश्चनकुतश्चिच्चसुखलेशंचगच्छति ॥ जनःसर्वःपरंतीव्रदुःखपाथोनिधौपतेत् ॥ १५८ ॥

विशेषानंदरूपंप्रतिपाद्यत्वेनप्रधानंसर्वाधिष्ठानंब्रह्मैवास्यपुच्छादिरूपेणबोध्यमित्याह आनंदात्मेति स्पष्टं ॥ १५५ ॥ एतेपंचकोशाब्रह्मात्मावगमायैवश्रुत्याप्रोक्ताइतीममर्थंलौकिकन्यायैरेकविंशत्याश्लोकैर्विशदयंस्तत्रलोकानुग्रहार्थंमहतांप्रवृत्तिरितिन्यायेनश्रुतिप्रवृत्तिमाह चित्तमितिषड्भिः सर्वेषांजंतूनांबाह्यविषयार्थंप्रवृत्तिर्बहिर्मुखचित्तेंद्रियाद्यभिमानप्रयुक्ताप्रसिद्धातत्रप्रवृत्तौचनित्यप्राप्तस्वरूपानंदाबोधोमूलतयादुःखसिंधुपातःफलतयाचप्रसिद्धइतित्रयाणामर्थः ॥ १५६ ॥ १५७ ॥ १५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति सर्वेषांजंतूनामुक्तविधयाप्राप्तंव्यसनंपरमपुरुषार्थाद्भ्रंशरूपंदुःखपातात्मकविपद्रूपंवावीक्ष्यमातृवत्स्नेहाकुलाश्रुतिःकरुणार्द्रासा क्षाद्वारयितुमशक्ताचसतीउपायात्निवृत्त्युपायमालोच्यततोबाह्यप्रवृत्तेःसकाशादित्थंद्विजान्वेदाध्ययनाधिकारिणस्तावद्वारयति इत्थं कथमित्यतआह कोशानिमान्जगाविति ननुसर्वहितायप्रवृत्तयाश्रुत्याकथंद्विजाएवोपदिष्टाइत्यतआह वारयिष्यंतीत्यादिसंकल्प्येत्यं तं तेद्विजावारिताइतरानपिपुराणादिवाक्येनवारयिष्यंतीतिसंकल्प्यद्विजाएवोपदिष्टाइतित्रयाणांसंबंधः ॥१५९॥१६०॥ १६१ ॥ ननु कथंपंचकोशोपदेशेनबाह्यप्रवृत्तिर्निरस्तेत्याशंक्याऽर्केचेन्मधुविंदेदितिन्यायमादर्शयति रूपेतिपंचभिः लोकेरूपादिसंपन्नाअपिपुमां

एवमेतत्समापन्नंदुस्तरंव्यसनंतदा॥ सर्वेषांप्राणिनांदृष्ट्वाश्रुतिर्मातेववत्सला॥१५९॥ साक्षाद्वात्यार्थलोभे नप्रवृत्तंनकथंचन॥ श्रुतिर्वारयितुंशक्तादुःखितान्वीक्ष्यदुःखिता॥१६०॥उपायात्ततएवैतानित्थंवारयतिद्वि जान्॥वारयिष्यंतितेपश्चादित्थमन्येनिवारिताः॥इतिसंकल्प्यजननीश्रुतिःकोशानिमान्जगौ॥१६१॥ रूप यौवनसंपन्नःपुमानपिगुणोदधिः॥ ललनावापिनस्वेनदेहेनपरितुष्यति ॥ १६२ ॥ देहमन्यंसुखप्रेप्सुर्जंतुःस र्वोभिधावति॥ जीवंतंवामृतंवापिपिशाचसदृशःसदा ॥१६३॥ स्थूलादेहाश्चसर्वेषामन्नकार्याणिसर्वदा॥ विज्ञानंचमनःप्राणाःसूक्ष्माणांकारणानिच॥ अव्याकृतंतृतीयंस्याद्धेतुशून्यंवपुःसदा॥ १६४॥ एतावानेव सकलःप्रपंचोनापरोस्तिहि॥ लोकत्रयेपिदेहेस्तिप्रत्येकंप्राणिनांचसः॥ १६५॥

सःस्त्रियोवापरशरीरंजीवंतंमृतंवापिशाचवच्चित्तपरितोषायभजंतःप्रसिद्धाइतिद्वयोरर्थः ॥ १६२ ॥ १६३ ॥ स्थूलाइति तच्चपरशरीरं त्रिविधंस्थूलसूक्ष्मकारणभेदात् तत्रप्रथममन्नकार्यमेवद्वितीयंतुविज्ञानादित्रितयात्मकमेवतृतीयमप्यनाद्यज्ञानरूपमेवेत्यर्थः ॥ १६४ ॥ एतावानिति नकेवलंपरशरीरमेवान्नाद्यात्मकंकिंतुयावान्लोकत्रयेप्रपंचःसर्वोप्यन्नप्राणमनोबुद्धिकारणेभ्योभिन्नोनभवतितन्मयत्वा त् सचसर्वःप्रपंचःप्राणिनांप्रत्येकंस्वदेहएववर्त्ततेऽतोबहिरर्थनीयंनकिंचिदितिभावः ॥ १६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनंदात्मेति तत्रबहिर्गच्छन्बालएवंश्रुत्याबोध्यते एवंकथं हेतातयदितवायमेवायहोयन्मयानंदात्मस्वरूपंनस्प्रष्टव्यमात्मनोन्यदेववस्तु ममसुखायेतितर्हिभवतःसुखंसुखदमात्मनोन्यदेवभवतादस्तुतथापित्वंतदात्मान्यदन्नादिकंस्वदेहएवविद्यमानंप्रयाहिभजकिमर्थंबहिर्गच्छसीत्यर्थः ॥ १६६ ॥ एवमुपदेशेलौकिकमातृवृत्तंदृष्टांतयति क्षुधितइतिचतुर्भिः यथाक्षुधावशात्कामवशाद्वास्वगृहंपरित्यज्यबहिर्गच्छन्सुतएवंजनन्याहस्तंगृहीत्वानिवार्यते एवंकथं हेवत्सतवेष्टस्यसर्वस्यगृहएवमयासंपाद्यमानत्वाद्बहिर्गमनंक्लेशदमयुक्तमितित्रयाणामर्थः ॥ १६७ ॥१६८॥ १६९॥ एवमुक्तइति एवंजनन्योक्तःपुमान्यदिधीमान्भवतिबुद्धेःफलमनाग्रहइतिन्यायात्तर्हिबहिर्गंतित्य

आनंदात्मस्वरूपाच्चेदन्यतोपिसुखंभवेत्॥ भवतात्भवतस्तत्त्वंस्वदेहेन्यत्प्रयाहिभोः ॥ १६६॥ क्षुधितःकामुकोवापिपरित्यज्ययथानिजं॥ गृहंगच्छन्निवार्येतहस्तग्राहंकदाचन॥ १६७॥ जनन्यावत्सकस्मात्त्वंबहिर्यास्यसिदुःखितः॥ गृहएवतवाभीष्टमन्नंनानाविधंशुभं ॥ १६८ ॥ रूपयौवनसंपन्नादाराश्चमनसेप्सिताः॥ संपादयामिमाक्लेशंगमिष्यसिकदाचन ॥ १६९ ॥ एवमुक्तेयथाधीमान्कुत्रकुत्रेतिचेरयन् ॥ गृहस्यांतःप्रयात्याशुबहिस्त्यक्त्वागतिंपुमान्॥ १७०॥ एवंसुखार्थिनोजंतोर्देहाद्बाह्यंप्रधावतः॥ अंतर्मुखत्वसंपत्त्यैदेहःपक्षीपुरोदितः ॥ १७१ ॥ अस्मिन्नेषसमायातिझटित्येवपुमानिह ॥ परित्यज्यततोभिन्नंविषयंसुखकारकम् ॥ १७२ ॥ बाह्याद्व्यावृत्तचित्तःसन्नस्मिन्स्थूलेस्थितःपुमान् ॥ प्रयातिसहसासूक्ष्ममुत्सुकःसुखलिप्सया ॥ १७३॥ तत्रापिप्राणमायातिप्रथमंसततोमनः॥ ततश्चबुद्धिमायातिकार्यंतत्रजहातिसः॥ १७४॥

क्त्वाकुत्रकुत्रेतिवदन्नंतर्गत्वासर्वमिष्टंलभतेइत्यर्थः ॥ १७० ॥ दार्ष्टांतिकेयोजयति एवमित्यादिना एवंदेहाद्बाह्यंपरशरीरादिकंप्रतिसुखायधावंतंजंतुमंतर्मुखंकर्त्तुंप्रथममन्नमयकोशःश्रुत्योक्तइत्यर्थः ॥ १७१ ॥ अस्मिन्नेषइति ततःश्रुत्युपदेशादस्मिन्नन्नमयएवसर्वस्थूलविषयजन्यंसुखंलभतेइत्यर्थः ॥ १७२ ॥ बाह्यादिति एवंबाह्यान्निवृत्तःसन्नन्नमयेपिवास्तवंसुखमलब्ध्वाश्रुतिजनन्यावचनविश्वासेनतदंतर्गच्छन्सूक्ष्मशरीरंकोशत्रयात्मकंयातीत्यर्थः ॥ १७३ ॥ कोशक्रममाह तत्रापीति तत्रसूक्ष्मेपिप्राणमयंमनोमयंविज्ञानमयंचक्रमेणयातितत्रविज्ञानमयेपिविरज्यमानःकार्यवर्गंजहातीत्यर्थः ॥ १७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंस्थूलारुंधतीन्यायमनुसरन्कारणात्मकमानंदमयंयातीत्याह अव्यक्तमिति तत्रानंदमयेसुखस्यस्वरूपंदर्शनजंलाभजंभोगजंचक्रमेणप्राप्यसामान्यमानंदाख्यंरूपंयातीत्यर्थः ॥ १७५ ॥ ततःश्रुतिजनन्याप्रापणीयतयेष्टंब्रह्मानंदंसर्वांतरंपुच्छभूतंलभतइत्याह सुखसामान्येति संस्थानःसम्यक्स्थितिमान् ॥ १७६ ॥ एवमनुग्रहेणश्रुत्याप्रदर्शितमप्यात्मानंयोनजानातिसोऽसत्शब्दप्रयोगार्होभवतीत्यस्मिन्नर्थेपर्यवसन्नउत्तरोमंत्रइत्याह यदीदमिति यदीदमात्मरूपंब्रह्मत्वेननावगच्छतितर्हिअसत्तुल्यःअसतान्नृश्रृंगादिनाअसत्शब्दप्रयोगार्हत्वधर्मेणतुल्योभवतीत्यत्रार्थेइममुत्तरंमंत्रंपठंतीत्यर्थः ॥ १७७ ॥ तंदर्शयति असन्नेवेति योब्रह्मनास्तीतिवेदतस्यात्माऽसन्भवतीतिपूर्वदलार्थः

अव्यक्तंकारणंबुद्धेस्ततोयातिगुरूक्तितः॥ तत्रयातिसुखस्यायंदर्शनंहिततोपिच ॥ लाभंतस्माच्चभोगंससामान्यंचततोव्रजेत्॥१७५॥ सुखसामान्यसंस्थानःसर्वदुःखविवर्जितः॥आनंदात्मानमात्मायमात्मत्वेनाधिगच्छति ॥ १७६॥ यदीदमात्मनोरूपंब्रह्मनात्मतयापुमान्॥ अधिगच्छतिजीवन्सन्नसत्तुल्यःप्रजायते॥ अत्रापिश्लोकमाहुस्तेमुनयोब्रह्मवेदिनः ॥ १७७॥ असन्नेवभवेदात्मानास्तिब्रह्मेतिवेदचेत्॥ अस्तिब्रह्मेतिचेद्वेदसंतमेनंततोविदुः॥ १७८॥ ब्रह्मणोनास्तिताज्ञानान्नित्यंसंजातपातकः॥ बहिर्विषयलाभार्थंव्रजन्देहाद्दहर्निशं॥१७९॥ दुःखाद्दुःखांतरंप्राप्यमरणंसोधिगच्छति॥ मृतश्चजायतेदुःखीदुःखीचम्रियतेपुनः॥१८०॥ एवंयमवशोदीनःसंसारेपरिवर्त्तते ॥ असन्नेवशरीरेषुभूत्वाभूत्वानिरंतरम् ॥ अल्पायुश्चाप्यवज्ञातोजनैर्भवतिनास्तिकः॥ १८१ ॥ आस्तिकोब्राह्मणःसत्तांदृढांज्ञात्वागुरोर्मुखात् ॥ संपादयतितज्ज्ञानंयतस्तिष्ठति सर्वदा॥ आनंदात्मस्वरूपेणमायादुःखविवर्जितः॥ १८२ ॥

॥ १७८ ॥ तत्रपूर्वदलार्थंस्फुटयन्सत्पदार्थानांसद्विद्यमानेसत्येचप्रशस्तार्चितसाधुष्वितिकोशोक्तानांव्यतिरेकंनास्तिकेदर्शयति ब्रह्मणइतित्रिभिः सत्यंयथार्थेवाङ्मनसीइतियोगभाष्योक्तेर्ब्रह्मणोनास्तितांजानन्ननृतदूषितचित्तोभवतिस्वदेहाद्बहिर्विषयलाभार्थंगमनेनासन्तुष्टतालक्षणामसाधुनांचस्वस्यदर्शयतीतिभावः ॥ १७९ ॥ दुःखादिति तथादुःखसंतानंदैन्यंमरणंचपुःपुनःप्राप्नुवन्नविद्यमानइवभवतिअल्पायुष्ट्वेनाप्रशस्तोधिकृतत्वेनानर्चितश्चजायतेइतिद्वयोरर्थः ॥ १८० ॥ १८१ ॥ मंत्रोत्तरार्द्धार्थमाह आस्तिकइति आस्तिकस्तु ॥१३॥
ब्रह्मणःसत्तामवधार्यमाययाऽज्ञानेनदुःखेनचहीनताप्रयोजकंज्ञानंसंपाद्यब्रह्मरूपेणतिष्ठतीत्यर्थः ॥ १८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रइति ततोज्ञानफलसंबंधादमुमास्तिकंसंतमाहुः विद्यमानत्वादिशालित्वादितिभावः ॥१८३॥ फलितमाह तस्मादिति स्पष्टं ॥ १८४॥
तस्यैषइत्यादेर्वाक्यार्थमाह पूर्वमिति योविज्ञानमयःपूर्वंसमीरितस्तस्यैषएवात्मा एषकः योयमानंदमयःकथितइतियोजना ॥ १८५॥
आनंदमयःकोशएवब्रह्मत्वेनदर्शितइत्येकदेशिनआहुस्तन्निरस्यन्सोपानारोहणसमांकोशावयवपरंपरांपुच्छभूतेब्रह्मणिसमाप्तांदर्शयति
शिरइत्यष्टभिः आत्मजठरंआत्मपदोक्तंजठरंशिरःप्रभृतिभिःपंचभिरंगैर्युक्ताःपंचकोशायेप्रोक्तास्तेषामंगानिसंकलय्यपंचविंशतिर्भवंतिता

ततःसंतममुंप्राहुर्ब्राह्मणावेदवादिनः॥ आस्तिकंनास्तिकश्चायमसन्नेवप्रजायते॥ १८३॥ तस्मान्नास्तिकता
नैवकरणीयासुखेप्सुना॥ गुरुशास्त्रादिकथितेतींद्रियार्थेकदाचन॥ १८४॥ पूर्वंयस्तस्यविज्ञानमयस्यात्मा
समीरीतः॥ एषएवायमानंदमयोयंकथितोधुना ॥ १८५॥ शिरःपक्षौतथैवात्मजठरंपुच्छमेवच॥ पंचांगः
कथितःकोशएकैकोमुनिसत्तमैः॥ १८६॥ पंचकोशेषुविज्ञेयाःपंचविंशतिभूमिकाः॥ बहिर्मुखस्यचित्तस्य
स्थिरीकरणहेतवः॥ १८७॥ शिरसस्तुकरंगच्छेद्दक्षिणंततएवच॥ वामंततोपिजठरंजठराच्चपदद्वयं॥ १८८॥
पदद्वयात्परंनास्तिकोशेतास्मिन्हिकिंचन ॥ ततःकोशांतरंगच्छेत्पूर्ववत्शिरआदिकं ॥ १८९॥ एवंकल्पन
यायोगीपंचविंशतिभूमिकाः॥ गच्छेदतःपरंनैवगंतव्यंविद्यतेत्रहि॥ १९०॥ ब्रह्मपुच्छंप्रतिष्ठेतियदुक्तंपाद
रूपतः॥ नित्यंतत्रैवतिष्ठंतिचतुर्विंशतिभूमिकाः ॥ १९१॥

निब्रह्मजिज्ञासूनांचित्तालंबनभूमित्वेनदर्शितानीतिद्वयोरर्थः ॥ १८६॥ १८७॥ तत्रक्रममाह शिरसइति प्रथमंशिरोध्यात्वादक्षिणंकरं
पक्षंध्यायेत्ततोवामंततोमध्यंततःपदद्वयंपुच्छमितियावत् ॥१८८॥ एवमेकंकोशंध्यात्वाद्वितीयंकोशंगच्छेदित्याह पदद्वयादिति॥१८९॥
एवमिति गच्छेत्ध्यायेत् अतःपंचविंशतितम्याः ॥ १९०॥ सर्वांतेनिर्देशात्सर्वाधिष्ठानत्वमपिदर्शितमित्याह ब्रह्मेति यथान्नमयस्यां
तेकीर्तितंपादद्वयंतदाधारस्तथासर्वान्तेपुच्छप्रतिष्ठापदाभ्यामुक्तंयद्ब्रह्मतत्रैवतदाश्रिताएवार्वाक्चतुर्विंशतिभूमिकाःस्थिताबोध्याइत्यर्थः
॥ १९१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवात्रप्रतिपाद्यमज्ञातत्वादप्राप्तेशास्त्रमर्थवदितिन्यायादित्याह अस्यैवेति अस्यब्रह्मणएव नह्यानंदमयःप्रियाद्यवयवकोऽप्रसिद्धइ
तिभावः ॥ १९२ ॥ असन्नेवेत्यादिमंत्रानुसारेणतद्विज्ञानस्यैवफलवत्वाच्चतदेवप्रतिपाद्यमित्याह ब्रह्मणइतिद्वाभ्यां अस्याज्ञानेसतिनर्किं
चित्सुखं यतोऽज्ञानादात्मनोऽसत्तांजानानउक्तविधयाअसन्भवति ततोब्रह्मविज्ञानादेवसर्वेष्टसिद्धिरितिद्वयोरर्थः ॥१९३॥१९४॥ एवं
श्रवणविधयात्मतत्त्वंदर्शितमथमननविधयातत्प्रदर्शकउत्तरपंथइतिदर्शयति इदमिति इदमात्मनःसत्यत्वादिकंविचार्यमननंकृत्वापिनि
श्चितंततूतदीयविचारस्वरूपंयथाउदाह्रियतइत्यर्थः विचारप्रयोजनंप्रमेयासंभावनानिवृत्तिदर्शयति एवमिति ब्रह्मविज्ञानस्यब्रह्मप्राप्ति

अस्यैवबोधनायैतेकोशाःश्रुत्यासमीरिताः॥ पंचांगसहिताःपंचप्राणिनांवपुषिस्थिताः॥ १९२॥ ब्रह्मणः
पुच्छभूतस्यसर्वेषामाश्रयात्मनः॥ अज्ञानेनसुखंकिंचिदिहलोकेपरत्रवा ॥ १९३॥ अज्ञानादात्मनोऽसत्तां
जानीतेऽसन्स्वयंततः ॥ उक्तरीत्याभवत्यत्रपुमान्लोकद्वयेपिच ॥ ततोब्रह्मात्मविज्ञानाद्भवेल्लोकद्वयंसदा
॥ १९४ ॥इदंविचार्यमुनिभिर्निश्चितंतद्यथाशृणु॥एवंविचारयंत्यत्रमुनयोब्रह्मदर्शिनः॥ ब्रह्मवेदनतोब्र
ह्मप्राप्तिंकर्त्तुंस्थिरामिमे ॥ १९५ ॥ ब्रह्मास्तिवादिनांयेषांसत्यंज्ञानमनंतकं ॥ तेषांव्यर्थंभवेज्ज्ञानंतस्यानं
दात्मरूपिणः ॥ १९६ ॥

हेतुतांस्थिरामसंभावनाहीनांकर्त्तुंवक्ष्यमाणोविचारइत्यर्थः॥१९५॥तत्रानुप्रश्नपदोक्तसंशयत्रयप्रदर्शकस्यउतेत्यादिश्लोकस्यार्थंदर्शयति
ब्रह्मास्तीतिपंचभिः अत्रभाष्येपूर्वमंत्रेचेदितिप्रयोगमूलकोऽस्तित्वनास्तित्वकोटिकोब्रह्मणिप्रथमःसंशयोदर्शितः अविद्वत्प्राप्यत्वाप्राप्यत्व
कोटिकोद्वितीयः विद्वत्प्राप्यत्वाप्राप्यत्वकोटिकस्तृतीयः तत्रप्रथमसंशयस्यकोटिर्नास्तित्वरूपात्रश्लोकेपूर्वपक्षतयोच्यते तथाहि येषांवा
दिनामौपनिषदानांमतेसत्यादिलक्षणंब्रह्मास्तितेषांज्ञानंमतंव्यर्थंविषयशून्यं तादृशब्रह्मणोऽनुपलब्धेः यदितत्स्यात्तर्हिपृथिव्यादिवदुपल
भ्येतेत्यर्थः ॥ १९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयसंशयस्यकोटिमविद्वत्प्राप्यतांपूर्वपक्षतयाह विदुषइतिद्वाभ्यां यस्माद्भवद्भिरभ्युपगतआत्माब्रह्मरूपोविदुषोऽविदुषश्चसमःपक्षपातरहितस्तस्मात्स्मृत्वाप्रत्यभिज्ञायतमात्मानंविद्वान्यथायातितथैवाऽविद्वानपिकुतोनगच्छेत् अतोविदुषएवब्रह्मणिगतिरित्यत्रकारणंवाच्यमित्यर्थः अविदुषआत्मस्मरणंनभवतीतितुनयुक्तंसर्वस्यात्मप्रसिद्धेरितिभावः ॥ १९७॥ एतदेवस्फुटयति ततइति यदाऽद्वितीयस्यब्रह्मणःसर्वात्मतयासत्तातदाततस्तस्यसमत्वादेवोभयोर्विद्वदविदुषोस्तत्प्राप्तिःसमास्यादित्यर्थः ॥ १९८ ॥ तृतीयसंशयकोटिंविद्वदप्राप्यतांपूर्वपक्षतयाह अविद्वांश्चेदिति यद्यप्यविद्वांस्तद्ब्रह्मनयातितर्हितद्ब्रह्मासदेवस्यात् नहिआत्माअप्राप्तश्चेतियुज्यते तथाचविद्वानपितद्ब्रह्मक

विदुषोऽविदुषोयस्मादेकआत्मासमःस्मृतः॥ स्मृत्वाविद्वान्यथागच्छेत्तंतथैवकुतोनहि ॥ अविद्वान्यातित
द्वाच्यंकारणंविदुषोगतौ॥ १९७॥ ततःसत्तायदाब्रह्मरूपस्यस्यात्तदाद्वयोः ॥ विदुषोऽविदुषश्चापिगतिस्तत्र
सुनिश्चिता ॥ १९८ ॥ अविद्वांश्चेदिदंब्रह्मनयात्यात्मस्वरूपकम् ॥ असदेवतदातत्स्याद्विद्वानपिकुतोव्रजेत्
॥ १९९ ॥ नत्वेकमेवगगनंयातिविद्वान्नचापरः॥ सर्वज्ञस्यशिशोश्चापिजीवतोर्मृतयोरपि ॥ प्राप्यप्राप्तीस
मेयद्वद्गगनेतद्वदात्मनि ॥ २०० ॥ इत्याक्षिप्यततःप्राहुरुत्तरंब्रह्मवेदिनः॥ यद्यप्येतत्समंब्रह्मविदुषोऽविदुषोपि
वा ॥ २०१ ॥ आत्मरूपंचसंप्राप्तमुभाभ्यामपिवस्तुतः॥ आप्नोतिनतथाप्येतदविद्वान्हिकदाचन ॥ २०२॥

थंप्राप्नुयात् असत्कर्मकप्राप्त्ययोगादित्यर्थः ॥ १९९ ॥ सत्त्वेहिकंचित्प्रतिप्राप्तिःकंचित्प्रत्यप्राप्तिरितिनसंभवतीतिगगनदृष्टांतेनस्फुटयति नत्वेकमिति यथासर्वज्ञंप्रतिबालंप्रतिचआकाशस्यप्राप्तिःसमातथाऽस्यापियुक्तेत्यर्थः ॥ २०० ॥ एषांपूर्वपक्षाणामुत्तराणियद्यपिसोऽकामयतेत्यादिश्रुत्यनुसारेणवक्ष्यमाणानितथापिसुखबोधायसूचीकटाहन्यायेनप्राप्यप्राप्तिव्यवस्थामादौदर्शयति इत्याक्षिप्येतिषड्भिः एवंपूर्वपक्षयित्वामुनयइत्थंसिद्धांतयंति इत्थंकथं यद्यपिब्रह्मसमंविज्ञाविज्ञौप्रति यद्यपिचउभाभ्यांविज्ञाविज्ञाभ्यांवस्तुतःप्राप्तमात्मत्वात्तथापिअविज्ञस्तन्नप्राप्नोतीत्येवयुक्तमितिद्वयोःसंबंधः ॥ २०१ ॥ २०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुतयाब्रह्मप्राप्तेरविद्याक्षयोपलक्षितप्रकाशरूपतामाह प्राप्तिरिति अविद्वांस्तुतयाऽविद्ययाशून्योनभवति अविद्याक्षयप्रयोजकविद्याया अभावात् वस्तुयाथात्म्यावगाहिज्ञानस्यैवविद्यात्वात् तथाचाविदुषस्तत्प्राप्तिर्नवक्तुंशक्येत्यर्थः ॥२०३॥ अज्ञानमात्रेणाप्राप्तौतद्यथाहिरण्यनिधिमित्यादिश्रुत्यंतरप्रसिद्धंदृष्टांतमाह यथानिधिमिति यथासन्नुसुधीर्निधिर्भूमिखातद्रव्यंतज्ज्ञःअनिधिज्ञश्चएतौवस्तुतोनिधिंप्राप्तावप्यज्ञोऽप्राप्तइत्येवोच्यतेइत्यर्थः ॥ २०४ ॥ दार्ष्टांतिकेयोजयति अविद्वानपीति तथाऽज्ञोवस्तुतःप्राप्तोपिब्रह्मतथापिस्वाज्ञानदोषादध्यात्मादितापपीडितःस्यादित्यर्थः ॥२०५॥ फलितमाह असत्त्वमिति सत्यस्वभावताबलेनासत्त्वंपरिहायैवस्थितस्यापिब्रह्मणोयोयम

प्राप्तिरत्रप्रकाशःस्यादविद्यायाःक्षयेसति ॥ अविद्यायाःक्षयोनित्यंविद्ययाब्रह्मजातया ॥ अविद्वान्नतयाशून्यःकथंब्रह्मसमाप्नुयात् ॥२०३॥ यथानिधिंनिधिज्ञःसन्ननिधिज्ञश्चतावुभौ ॥ प्राप्तावपिचनप्राप्तःस्यादज्ञोवोधवर्जनात् ॥ २०४ ॥ अविद्वानपितद्वत्स्याद्ब्रह्माप्नोतिनिरंतरं ॥ तज्ज्ञानरहितत्वेनदुःखत्रितयपीडितः ॥ २०५ ॥ असत्त्वंपरिहायैवब्रह्मणःसत्यरूपतः ॥ स्थितस्यापिनसंप्राप्तिरेवंत्वविदुषोभवेत् ॥ २०६ ॥ ब्रह्मणोऽसत्यताकेनशक्याशंकितुमप्यहो ॥ यतएतज्जगज्जातंमहाभूतात्मकंमहत् ॥ २०७ ॥ एवंहिजगतःस्रष्टिमानंदात्माचकारयः ॥ तस्यासत्त्वंहिकोनामप्रतिपत्तुमिहार्हति ॥ २०८ ॥ जगत्सिस्रक्षुर्भगवान्भूतभौतिकरूपधृक् ॥ अनादिवासनाचित्रंमायाकंचुकमाश्रितः ॥ २०९ ॥ एकएवस्थितःपूर्वमिदमीशोव्यचिंतयत् ॥ बहुरूपोहमत्रस्यांजन्मकृत्वात्मनःस्वयम् ॥ २१० ॥

विद्वांसंप्रतिप्राप्त्यभावःसएवंवर्णितइतिसंबंधः ॥ २०६ ॥ अथकामनालोचनस्रष्टृत्वप्रवेष्टृत्वभोग्याकारपरिणामैःपंचभिर्हेतुभिर्ब्रह्मणःसत्तांसाधयतःसोकामयतेत्यादेःसत्त्यमभवदित्यंतस्यार्थमाह ब्रह्मणोऽसत्यतेतिविंशतिश्लोकैः सर्वजगद्धेतोर्ब्रह्मणोऽसत्ताशंकितुमप्यशक्येति ॥ २०७ ॥ एतदेवविशदयति एवमिति एवंवक्ष्यमाणविधया ॥ २०८ ॥ एवंकथमित्यतआह जगदित्यादि अनादिवासनाविचित्रमायाशबलोभगवानीश्वरःसृष्टेःपूर्वमद्वितीयतयास्थितः अथभूतभौतिकात्मकंजगत्स्रष्टुमिदंव्यचिंतयत्कामितवान् इदंकिं अहमात्मनएवजन्मकृत्वाबहुरूपोभवेयमितिद्वयोःसंबंधः ॥ २०९ ॥ २१० ॥ ॥३५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामनामुक्त्वातपःपदोक्तनानाविशेषगोचरमालोचनंदर्शयति इत्थमिति इत्थंकामनाक्षिप्तांस्रष्टव्यसामान्यगोचरांचितांकृत्वाजगतो नामादिरूपांतरविशेषान्कर्त्तुंपुनःपर्यालोचयत् कीदृशईशः पूर्वकल्पेऽस्यजगतोनामादिकंयादृशंयत्स्वरूपंयत्संबंधिचतत्तथाविधमेवकर्त्तुकामइतिद्वयोःसंबंधः ॥ २११ ॥ २१२ ॥ स्रष्टृत्वमाह एवंविचिंत्येतित्रिभिः स्पष्टम् ॥ २१३ ॥ तत्रमंत्रसम्मतिमाह सूर्येति भानां दीप्तीनांगणोयत्रतेनस्वर्गेणसहितं ॥ २१४ ॥ यदिदमिति किंचविशेषरूपं ॥ २१५ ॥ सृष्टोपाधिषुप्रतिबिंबितत्वलक्षणंप्रवेष्टृत्वमाह सृ

इत्थंविचिंत्यजगतोनामरूपक्रियात्मनः ॥ जडाजडस्यबहुधानामरूपक्रियाअपि ॥ सिसृक्षुःपुनरप्यस्यपर्यालोचयदीश्वरः ॥ २११ ॥ यादृश्योयाश्चयस्यास्यनामरूपक्रियाःपुरा ॥ तादृशस्ताश्चतस्यैताःकर्त्तुकामोजगत्प्रभुः ॥ २१२ ॥ एवंविचिंत्यसर्वेषांनामरूपक्रियाःप्रभुः ॥ असृजत्सयथापूर्वमिदंसर्वंजडाजडं ॥ २१३ ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींतद्वदंतरिक्षंसभागणं ॥ २१४ ॥ यदिदंकिंचविश्वंस्याद्भूतभौतिकरूपभृत् ॥ सर्वमेवजगन्नाथःसृष्टवान्पूर्ववत्प्रभुः ॥ २१५ ॥ सृष्ट्वाचसकलंविश्वंसहस्थावरजंगमैः ॥ अनंतरंप्रविष्टोयंतत्राहंतात्मनाप्रभुः ॥ २१६ ॥ सत्यंज्ञानमनंतंयोब्रह्मानंदात्मरूपकं ॥ सर्वस्मिन्सर्वदासोयंवर्तमानोपिविश्वकृत् ॥ २१७ ॥ स्थावरेजंगमेदेहेप्रविश्याहंतयाविभुः ॥ एवंनानाविधोजातएकएवजनार्द्दनः ॥ २१८ ॥ पृथिव्यापस्तथातेजश्चक्षुर्गम्यंसदीरितं ॥ वायुश्चैवांतरिक्षंचपरोक्षंत्यदितीरितं ॥ २१९ ॥

ष्ट्वाचेति अहंतात्मनाहंकारावच्छिन्नरूपेण ॥ २१६ ॥ एतत्प्रवेशांतंकर्मतस्यैवब्रह्मणोयस्यसत्यादीनिलक्षणानीत्याह सत्यमिति सर्वत्र सर्वदावर्त्तमानोपीत्यस्याधिष्ठानतयापूर्वसिद्धोपीत्यर्थः ॥ २१७ ॥ २१८ ॥ अथस्रष्टानांभोग्याकाराणांविशेषाभिधायकानिपदानिव्याचष्टे पृथिव्यापइत्यादिना पृथिव्यादिभूतत्रयंचक्षुरादिगोचरत्वात्सदित्युच्यते वाय्वाकाशौतुपरोक्षत्वात्त्यदित्युक्ताविन्यर्थः ॥ २१९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतेति तथानामरूपादिभिर्निरूपयितुंशक्यंभूतभौतिकंनिरुक्तमित्युक्तं तद्भिन्नंकपोतरूपादिअनिरुक्तमित्युक्तं तथासाधारतयाप्रसिद्धंनि
लयनमित्युक्तं निराश्रयतयाप्रथितमाकाशादिकंतुअनिलयनमितिद्वयोरर्थः ॥ २२० ॥ २२१ ॥ जडमिति किंचिद्वस्तुविज्ञानराहित्येन
जडमितिप्रसिद्धं तद्विलक्षणमिंद्रियादिकमजडमिति ॥ २२१ ॥ अबाध्यमिति लोकेकिंचित्पृथिव्यादिकंबाधाभावेनसत्यमितिख्यातं
तद्विलक्षणंरज्जुसर्पादिकमनृतमित्यर्थः ॥ २२३ ॥ एवंविविधजगदात्मतांब्रह्मप्राप्तंयथाकाशंगंधर्वनगरात्मतामित्याह सर्वमितिद्वाभ्यां

भूतपंचककार्यंचतथैतद्भूतपंचकं ॥ नामरूपक्रियाभिःस्यान्निरुक्तंकीर्त्यतेहियत् ॥ २२० ॥ अनिरुक्तंतुताभि
र्यन्नोच्यतेमनुजादिभिः ॥ साश्रयंतच्चकिंचित्स्यात्किंचित्स्यात्तुनिराश्रयं ॥ २२१ ॥ जडंकिंचिच्चतत्रापिभवे
त्कुड्यघटादिकं ॥ अजडंचेंद्रियादिस्याद्व्यवहारेत्रमानुषे ॥ २२२ ॥ अबाध्यंकिंचिदेवस्याद्यथाभूमिघटादिकं ॥
किंचिच्चबाध्यमानंतद्रज्जुसर्पादिकंयथा ॥ २२३ ॥ सर्वमेतज्जगच्चित्रमस्तिनास्तीतिचस्थितं ॥ सत्यादिलक्ष
णंब्रह्मजातमेकमनेकधा ॥ २२४ ॥ एकमेवयथाकाशंगंधर्वनगरात्मना ॥ नानाभवतितद्वत्स्याद्ब्रह्मविश्वात्म
नासदा ॥ २२५ ॥ यस्मात्सत्यमिदंब्रह्मजातंविश्वात्मनापुरा ॥ तस्मादनृतमप्येतद्विश्वंसत्यमितीरितम् ॥ २२६ ॥
जायमानंजगत्सर्वंसत्यंकेनभविष्यति ॥ सत्यंकालत्रयेयत्स्यादेकरूपंतदीरितं ॥ २२७ ॥ आदावंतेचय
न्नास्तिमध्येतत्केनहेतुना ॥ भवेत्सत्ततएवैतदनृतंसचराचरम् ॥ २२८ ॥ अनृतंसकलंविश्वमात्मनासत्यरूपि
णा ॥ सत्यंस्यादग्नितोयद्वल्लोहपिंडोग्नितामियात् ॥ २२९ ॥

स्पष्टं ॥ २२४ ॥ २२५ ॥ यदिदमित्यादेस्त्रयोदशाक्षरवाक्यस्यार्थमाह यस्मादितिचतुर्भिः यत्सत्यरूपंब्रह्मैवविश्वात्मकंजातंतस्मादनृ
तमपिविश्वंयाचितमंडनन्यायेनब्रह्मणःसत्तामादायैवसत्यंजातमितिवेदविद्भिरुक्तमित्यर्थः ॥ २२६ ॥ स्वतःसत्तातुजगतोनास्तिकूटस्थ
त्वरूपायास्तस्याजन्मादिविकारैःसहविरोधादित्याह जायमनमिति ॥ २२७ ॥ नासतोविद्यतेभावइतिन्यायविरुद्धंजगतोमध्यएवस
त्त्वंततोनृतत्वमेवजगतइत्याह आदाविति ॥ २२८ ॥ परसत्तयासत्तावत्वंदृष्टांतेनस्फुटयति अनृतमिति ॥ २२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमर्थोमंत्रेणाप्युक्तइत्याह अनृतंसत्यतामिति ॥ २३० ॥ तंश्लोकंकिंचिद्व्यत्यासेनपठति असद्वाइति ॥ २३१ ॥ अस्याक्षरार्थमाह गंधर्वेतिद्वाभ्यां यथागंधर्वनगरंजनेरुत्पत्तेःपूर्वमाकाशेअसदभवत्तथाविश्वमप्यात्मनिजनेःपूर्वमसदभवत् असत्त्वंनिर्वक्ति नामादीति नामरूपंचस्पष्टंनासीदितितदर्थः ॥ २३२ ॥ स्पष्टेति ततःसृष्टिकालेसदभूदित्यस्यकोर्थः आत्मसत्तायाःप्रसादाद्वाध्यासिकसंबंधात्स्पष्टनामरूपकमभूदिति यतइदंविश्वंसत्येनात्मनैवसत्यंनस्वतस्ततःसुकृतमितिब्रह्मणोनामसिद्धमित्यर्थः सुष्ठुआत्मसत्तयासत्तावद्विश्वंकृतवदितिव्युत्पत्तिः छांदसत्वेनकर्त्तरिक्तप्रत्ययश्चबोध्यइतिभावः ॥ २३३ ॥ केचित्तुअस्यप्रकरणस्यात्मसत्तास्फुटीकरणा

अनृतंसत्यतांगच्छेदात्मनासत्यरूपिणा॥इत्यत्रमुनयःश्लोकमेतमाहुर्विचक्षणाः॥ २३०॥ असद्वाइदमग्रेभूत्ततोवैसदजायत॥ ब्रह्माऽऽत्मनःप्रपंचत्वमकरोत्सुकृतंततः ॥ २३१ ॥ गंधर्वनगरंयद्वद्गगनेतद्वदात्मनि॥ विश्वंततोजनेःपूर्वमसन्नामादिनाभवत्॥ २३२॥ स्पष्टनामादिकंस्वात्मसत्यतायाःप्रसादतः॥ जातंसुकृतमित्युक्तंसत्यंसत्यात्मनायतः ॥ २३३ ॥ केचिदेनमनालोच्यप्रक्रमंमंदबुद्धयः ॥ असद्वाइदमित्यादेःकारणासत्त्वमास्थिताः॥ २३४॥ इदंशब्दसमादानात्कार्यस्यैवेतिकेचन॥ कार्यकारणयोःसाम्यमिदंशब्दस्यकेचन ॥ स्वीकृत्यसर्वजगतःशून्यतांप्रतिजानते ॥ २३५॥ कारणस्यविचारेतदस्माभिर्ब्रह्मवादिभिः॥ निराकृतमभावौघखंडनेऽनेकधायतः ॥ २३६ ॥

यप्रवृत्तिरूपंप्रक्रममनालोच्यास्यमंत्रस्यप्रथमपादेनकारणासत्त्वमुक्तमित्याहुरित्याह केचिदिति आस्थिताःस्वपक्षत्वेनगृहीतवंतः यथा बीजध्वंसादंकुरोत्पत्तिवादिनोवाह्याः॥ २३४॥ केचनार्द्धवैनाशिकास्तुइदंपदस्यकार्यपरस्यासत्पदेनसामानाधिकरण्यात्कार्यस्यैवासत्त्वमाहुरित्याह इदमिति समादानंसामानाधिकरण्यं केचिच्चइदंपदस्यकार्यकारणोभयपरत्वंमत्वासर्वशून्यतामाहुरित्याह कार्यकारणयोरिति साम्यमपक्षपातित्वंस्वीकृत्येति ॥ २३५ ॥ तेषांमंदमतित्वंस्फुटयन्नुकिंयुक्तिबलेनतैःकारणासत्वादीनिस्थाप्यंतेश्रुतिबलेनवेति विकल्प्यतत्रनाद्यः कालःस्वभावइत्यादिश्रुतिव्याख्यानेऽष्टमाध्यायादौतद्युक्तिकदंबस्यनिराकृतत्वादित्याह कारणस्येति तत्तेषांयुक्तिवृंदंयतोऽभावानांप्रागभावादीनांखंडनेननिराकृतमतस्तेमंदमतयइतिसंबंधः ॥ २३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नद्वितीयउपक्रमादिविरोधादित्याह सत्यादीति ब्रह्मणःसत्तांकारणत्वोपन्यासमुखेनदर्शयितुंप्रवृत्तोवेदःकथंकारणासत्तांव्याघातावहां वदेदित्यर्थः ॥ २३७ ॥ अर्द्धवैनाशिकंप्रत्याह इदमिति यदीदंशब्दउद्देश्यसमर्पकउत्पत्तिपूर्वकालिकासत्त्वरूपायविधेयायकार्यजातं नयेत्तदाधुनाकार्येसत्त्वंकुतआगच्छेदित्यर्थः तथाचासदसदित्यनुगताबुद्धिःस्यान्मृत्कार्येषुमृद्बुद्धिवत् मंत्रद्वितीयपादश्चबाधितार्थःस्यादितिभावः ननुब्रह्मसत्तयैवकार्येसत्तावदिष्यतेइतिचेदायातंमार्गेइत्याह ब्रह्मणाचेदिति इदंकार्यंब्रह्मणासद्रूपेणतादात्म्यंलब्ध्वासत्यंभवतीतियद्युच्येततर्हितथाभवतादस्त्वित्यर्थः ॥ २३८ ॥ इष्टापत्तौहेतुतयाप्रकृतमंत्रस्योक्तार्थबोधनायैवप्रवृत्तिंदर्शयति एतदर्थमिति ए

सत्यादिलक्षणंप्रोच्यब्रह्मणःकारणात्मनः॥ वेदःकथंनुतस्यायमसत्तांचस्वयंवदेत्॥ २३७॥ इदंशब्दोपिका र्यस्ययद्यसत्त्वंवदेदयं॥ उत्पत्तेःपूर्वमधुनातत्सत्यंकेनहेतुना॥ब्रह्मणाचेदिदंनामभवतान्ननिवार्यते॥२३८॥ एतदर्थमयंश्लोकःकीर्त्यतेवेदवादिभिः॥ असत्यमपियत्सत्स्याद्ब्रह्मसत्ताप्रभावतः॥ २३९॥ कार्यंकालत्र येप्येतदसत्यंब्रह्मसत्तया ॥ अनादिमाययामोहान्मध्येसत्यंविभातिनः ॥ २४० ॥ ब्रह्मणोव्यतिरिक्तस्य कार्यकारणवस्तुनः॥ सर्वस्यापिनसत्तास्तिकुतस्तेनास्यसाभवेत्॥ २४१॥ कार्यस्यकुरुतेसत्तांब्रह्मान्यद्यदि किंचन॥ आत्मनस्तत्करोत्वेतांप्रथमंत्वसतःसदा॥ २४२॥

तत्पदार्थमभिनयति असत्यमिति ॥ २३९ ॥ ननुब्रह्मसत्ताप्रपंचेकेनानीतेतिचेत्सकलप्रपंचनिर्वाहकेणाज्ञानेनेत्याह कार्यमिति कालत्रयेअसदपिकार्यंयद्ब्रह्मसत्तयासत्यंनोऽस्मान्प्रतिभातितत्रप्रयोजकोऽनादिमायाकृतोमोहएवाध्यासनामेत्यर्थः ॥ २४० ॥ अथब्रह्मव्यतिरिक्तस्यसत्तयाकार्यंसत्स्यादितितुनशंक्यंतस्यसत्तायाएवदुर्वचत्वेनान्यत्रसत्ताधानशक्तेःसुतरामसंभवादित्याह ब्रह्मणइति तेनब्रह्मव्यतिरिक्तेनास्यकार्यस्यसासत्ताकुतःस्यादितितुरीयपादार्थः ॥ २४१ ॥ यथांधोमार्गंप्रदर्शयितुमुद्यतएवमुपालभ्यतेभवतैवमार्गःकुतोनदृश्यतेइतितथाब्रह्मभिन्नंपरत्रसत्ताधानोद्यतंप्रतिवक्तव्यंभवतास्वकीयासत्तैवकुतोनसाधितेत्येतदाह कार्यस्येति तद्ब्रह्मभिन्नंप्रथममात्मनःस्वस्यासतःसत्ताहीनस्यसत्तांकरोत्विति ॥ २४२ ॥ ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचतिष्ठतुब्रह्मभिन्नस्यसत्तासत्ताधायकत्वंच यतोब्रह्मभेदएवकुत्रचिद्वक्तुमशक्यः श्रौतस्यब्रह्मत्वस्यव्याघातप्रसंगादित्याह अपीति अपिचअसत्असद्रूपेणप्रसिद्धमपिसूक्ष्मादिब्रह्मभिन्नतांनसहतेकुतःसदपीति ब्रह्मणःसर्वात्मतायाःप्रमाणराजेनवेदेनप्रतिज्ञातत्त्वादित्यर्थः ॥ २४३ ॥ ब्रह्मणोभिन्नस्याणुमात्रस्यापिस्वीकारेंअनिष्टप्रसंगंविशदयति ब्रह्मणोत्रेतिपंचभिः अनंतताअन्योन्याभावप्रतियोगित्वलक्षणवस्तुपरिच्छेदहीनतानभवेत् गगनादिवदितिव्यतिरेकेदृष्टांतः ॥ २४४ ॥ स्वरूपलक्षणभूतायाअनंततायाअभावेतुब्रह्मपदार्थाभावः

अप्यसद्ब्रह्मणोभिन्नंनास्तिकेनतुसद्भवेत् ॥ ब्रह्मैवसकलंयस्माज्जगत्सदसदात्मकम् ॥ असकृत्कथ्यतेवेदवादिभिःसर्वपंडितैः ॥ २४३ ॥ ब्रह्मणोत्रविभिन्नंयत्सदसद्वस्तुकिंचन ॥ यदातदानंततास्यनभवेद्गगनादिवत् ॥ २४४ ॥ अभावेनंततायाःस्याद्ब्रह्माभावःसुनिश्चितः ॥ प्रकाशोष्माद्यभावेस्यात्तेजोभावोयथाभुवि ॥ २४५ ॥ ब्रह्माभावाच्चवेदांतागच्छंत्यत्राप्रमाणतां ॥ अप्रामाण्येनतेषांस्याद्वेदानामप्रमाणता ॥ २४६ ॥ अप्रामाण्येचतेषांस्याद्वचसामप्रमाणता ॥ अप्रामाण्येनवचसांनेत्रादेरप्रमाणता ॥ २४७ ॥ तदप्रमाणतायांचव्यर्थामानकथाभवेत् ॥ तदभावेकथंनामब्रह्मणोन्यद्भवेदिह ॥ सदसद्वाद्वयंचापिमानान्मेयंयतोभवेत् ॥ २४८ ॥ तस्मान्नैवविभिन्नंस्यादसदप्यात्मरूपतः ॥ कुतोभिन्नंभवेत्सत्तुसत्तायस्यात्मसत्तया ॥ २४९ ॥

स्यात्प्रकाशाद्यभावेतेजोभाववदित्याह अभावेइति ॥ २४५ ॥ ततश्चप्रमेयाभावाद्वेदांतानामप्रामाण्यंस्यात्तथासतितत्सजातीयस्यपूर्वकांडस्यापितथात्वापत्तिरित्याह ब्रह्माभावाच्चेति ॥ २४६ ॥ अपौरुषेवेदेप्येवंभावंगतेलौकिकवाक्यानांप्रत्यक्षाणांशतशोदृष्टव्यभिचाराणांकाप्रामाण्यंप्रत्याशेत्याह अप्रामाण्येचेति तेषांवेदानां ॥ २४७ ॥ तदप्रमाणतायामिति तेषांप्रमाणत्वेनप्रसिद्धानांविशेषाणामप्रामाण्येसतिनिर्विशेषंसामान्यंनेतिन्यायात्प्रमाणसामान्यकथाप्युच्छिद्येत ततोब्रह्मभिन्नस्यापिसिद्धिर्दुर्लभास्यात् मानाधीनामेयसिद्धिरितिन्यायादित्यर्थः द्वयंकार्यकारणरूपं ॥ २४८ ॥ फलितमाह तस्मादिति ॥ २४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्तुइदंशब्दपरामृष्टस्यकार्यादेःशून्यताअनेनोच्यतेइतिमंदधीभिरुक्तंतन्नसंभवति कालत्रयाभावरूपायाःशून्यतायाःप्रत्यक्षेणवर्तमान मात्रगोचरेणग्रहीतुमशक्यत्वात् इदंशब्देनप्रत्यक्षसन्निकृष्टवाचिनापरामृष्टुमयोग्यत्वाच्चेत्याह कार्यस्यापीतित्रिभिः यत्तत्रासत्तायांप्रत्य क्षंकारणंसाधकंनभवतिअतःकार्यकारणयोरसत्ताअसतोरिदंताइदंशब्दार्हताचनेति ॥ २५०॥ प्रत्यक्षतेति तस्यकार्यादेःप्रत्यक्षत्वेअसत्त्वं व्याहतं प्रत्यक्षस्यसदर्थगोचरतायाःसर्वसंमतत्वादित्यर्थः ॥२५१॥ अनागतमिति ततइत्यस्यार्थोऽसत्त्वादिति अतीतानागतयोरसत्वादेव प्रत्यक्षागोचरत्वमन्यथाऽसतोपिप्रत्यक्षगोचरत्वेनतस्यातीतादेरपिप्रत्यक्षत्वंकथंनस्यादित्यर्थः ॥ २५२ ॥ मायांतुप्रकृतिंविद्यादित्यादिश्रु

कार्यस्यापिनचासत्ताकारणस्यकुतोहिसा॥इदंताचकथंतत्रप्रत्यक्षंनहिकारणं॥ २५० ॥ प्रत्यक्षतायदात स्यतदाऽसत्ताभवेन्नहि॥सदेकविषयंयस्मात्प्रत्यक्षंपंडितैःस्मृतं॥ २५१ ॥ अनागतमतीतंवाप्रत्यक्षंततए वन॥असत्त्वादन्यथातस्यप्रत्यक्षत्वंकथंनहि ॥ २५२ ॥ ततोनकारणंनापिकार्यंनैवद्वयंतथा॥ असदत्रो च्यतेवेदेकिंतुमायाविनिर्मितम्॥२५३॥आत्मनःसत्तयायस्मात्सदसत्ततएवसः॥सत्त्वरूपोनचासत्त्वमस्या शक्यंकदाचन॥एतावदेवमंत्रेस्मिन्नुच्यतेनापरंक्वचित् ॥ २५४॥ सुष्ठुयत्कृतवद्ब्रह्मत्यानंदात्मस्वसत्तया॥ रसःसारःसविज्ञेयःसुखसंविस्वरूपतः॥ २५५॥

त्यंतराच्चनकार्यकारणयोःशून्यतालक्षणमसत्त्वंकिंतुसूक्ष्मतारूपमेवेत्याह ततइति ततःशून्यत्वेप्रत्यक्षादिविरोधादेवकारणादिकमसत्शू न्यंनोच्यतेकिंतुमायामयमित्यर्थः॥२५३॥ मंत्रार्थमुपसंहरति आत्मनइति यस्मादसत्सर्वंमायामयमागमापायित्वेनमुख्यसत्तानर्हमप्या त्मसत्तयैवसत्संपद्यतेततआत्मैवपरमार्थसत्यइत्येतदनेनमंत्रेणोक्तमित्यर्थः ॥ २५४ ॥ एवंसत्यतांकेवलांस्फुटीकृत्यअथानंदत्वविशिष्टां तांप्रदर्शयतोयद्वाइत्यादेर्यातील्यंतस्ययंथस्यार्थमाह सुष्ठुयदिति यद्ब्रह्मानंदात्मिकयास्वसत्तयाविश्वंसुष्ठुलब्धसत्ताकंकृतवत्तदेवविश्वस्य रसः सारइतियावत् भासमानानंदरूपत्वादित्यर्थः ॥ २५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यात्मनआनंदरूपेणसत्त्वविद्वदनुभवोमानमित्याह लब्ध्वैनमिति एनमात्मानंब्रह्मास्मीतिज्ञानेनलब्ध्वैवबाह्यसामग्रीहीनाअपिविद्वांस आनंदिनआनंदमग्नादृश्यंतेइत्यर्थः ॥ २५६ ॥ किंचसंघातपरार्थत्वन्यायेनसर्वाःप्राणादिक्रियापदार्थास्तस्यात्मनःशेषिणआनंदत्वेकःसं देहइत्याह यद्येषइति हृदयाकाशरूपोरसत्वेनानंदरूपआत्मावामनःप्रशस्तफलप्रदउपाधिसंबंधेनपरिच्छिन्नतयाभासमानोवाजीवने क्रियायांतदनुकूलप्राणादिव्यापाररूपायांचहेतुःप्रयोजकोनस्यात्तर्हिप्राणनादिकंनकश्चित्कुर्यादित्यर्थः॥२५७॥ लौकिकानंदानांप्रति बिंबस्थानीयानांबिंबतयाप्रयोजकत्वाच्चास्यानंदरूपत्वसिद्धिरित्याह हृदयाकाशइति अस्यहृदयाकाशस्यानंदत्वेसंशयोनकार्यः सर्वा

लब्ध्वैनंरसमात्मानमानंदात्मानमीश्वरम् ॥ अहमस्मीतिविज्ञानादानंदीभवतिस्वयं ॥ २५६ ॥ यद्येषरसआ काशआनंदात्माहृदिस्थितः॥नभवेज्जीवनेहेतुःक्रियायामपिवामनः॥प्राणापानादिभिःकुर्यान्नक्रियाजीव नप्रदाः ॥ २५७ ॥ हृदयाकाशआनंदएषइत्यत्रसंशयः॥ नकार्योयतएतस्मात्पुरुषैर्लभ्यतेसुखं ॥ २५८ ॥ विषयाःसदृशादीपैःसुखमात्मनिसंश्रितं ॥ प्रकाशयंतिसततंततोजन्यंनतद्भवेत् ॥ २५९ ॥ अतआत्मैवस र्वेषामानंदंसंप्रयच्छति ॥ अज्ञातोविषयाज्ज्ञातंज्ञातआत्मास्वमव्ययम् ॥ २६० ॥ विद्वानेवततोयातिमत्वा नंदात्मरूपकं ॥ जीवन्वापिसुखंनित्यंपरोविषयसंभवं ॥ २६१ ॥

नंदप्रयोजकत्वादित्यर्थः ॥२५८॥ विषयास्तुलब्धाःकामनाशमनद्वारेणात्मानंदस्यतारतम्येनाभिव्यंजकाएवनजनकाइतिसदृष्टांतमाह विषयाइति ततोविषयेभ्यस्तत्सुखंजन्यंनभवेदितितुरीयपादार्थः ॥ २५९ ॥ अतइति यतःसुखमात्मरूपमेवातआत्मैवाऽज्ञातःसन्विष यानंदप्रयोजकोज्ञातस्तुपूर्णानंदप्रदइत्यर्थः॥ २६० ॥ एवमस्तित्वमवधारितमथतस्यविद्वदेकलभ्यतांविद्वदभयहेतुत्वोपन्यासद्वारेणप्रति पादयतोयदेत्यादेर्भवतीत्यंतस्यवाक्यस्यार्थमाह विद्वानेवेतिचतुर्भिः ततउक्तात्मस्वरूपस्यविद्ययैवस्फुटीभावाद्विदेहोजीवन्वाविद्वानात्म रूपंसुखंयातीत्येवयुक्तं अविद्वांस्तुसुखंविषयसंभवंमन्वानोविपरीतदर्शित्वान्नतत्प्राप्तिकथामर्हतीत्यर्थः ॥ २६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदर्थंब्रह्मानंदलाभप्रयोजिकायाविद्यायाःपरमंस्वरूपमभिनयति एषइतित्रिभिः एषविद्वान्कुशलोधिकारीयदास्वात्मनस्त्वंपदार्थस्यस
वींतरलक्षणस्यबोधादभययोग्यरूपःसन्गुरुप्रोक्तमहावाक्यजेनतेनबोधेनएतस्मिन्हृदयाकाशरूपेतत्पदार्थेप्रतिष्ठापदोक्तंतादात्म्यमैक्यं
लभतेतदासब्रह्मवित्तमःसन्नभयंब्रह्मानंदंयातितस्यब्रह्मवित्तमतांस्फुटीकर्तुंहृदयाकाशस्यविशेषणानिक्रमेणबाह्यप्रपंचस्यस्थूलसूक्ष्मका
रणदेहानांचव्यावर्त्तकानि तथाहि अदृश्यत्वाद्बाह्यप्रपंचहीनत्वमुक्तं अनात्म्यपदार्थेनअनात्मनादेहेनतादात्म्यंगतेइत्याकारेणभूतार्थक्त
प्रयोगात्स्थूलविवेकउक्तः निरुक्तत्वस्यसूक्ष्मधर्मस्यनिलयनपदोक्ताधारत्वस्याव्याकृतधर्मस्यचनिषेधात्सूक्ष्मकारणयोर्व्यावृत्तिरितीति

एषविद्वान्यदास्वात्मबोधादभयरूपधृक्॥ प्रतिष्ठांतेनतादात्म्यंलभतेगुरुवाक्यतः॥ २६२॥ एतस्मिन्हृदया
काशेह्यदृश्येनयनादिभिः ॥ अनात्मनात्रतादात्म्यंगतेसर्वात्मनीश्वरे॥ २६३॥ अनिरुक्तेवचनतःसर्वाश्रय
विवर्जिते॥ अभयंब्रह्मसंयातितदासब्रह्मवित्तमः ॥ २६४ ॥ यथाविद्वानविद्वांश्चनतथायातिकर्हिचित् ॥
भेददर्शीयतःसोयंभेददृष्टिश्चदुःखदा॥ २६५ ॥ विद्वानपियदैवैषपंडितंमन्यतांगतः ॥ अल्पमप्यात्मनोभेदं
कुरुतेव्यावहारिकं॥ २६६ ॥ वस्तुतोनास्तिभेदोयमात्मनोब्रह्मणासह ॥ व्यवहारदशायांतुकश्चिदस्तीतिचे
दृशं॥ तदातस्यापिभीतिःस्याद्भेदपर्वतसंनिधेः॥ २६७॥ किमुयोवेत्तिनात्मानंभेदपर्वतभेदिनं॥ भेदपर्वत
वासीसन्वर्ततेसर्वदापुमान्॥ २६८॥

त्रयाणामर्थः ॥ २६२ ॥ २६३ ॥ २६४ ॥ अथाविद्वदप्राप्यताकोटिंस्फुटयितुमज्ञान्प्रतीश्वरस्यभयहेतुतांदर्शयतोयदाहीत्यादेःपंच
मइत्यंतस्यार्थंविवृणुते यथेतिदशभिः यथाविद्वान्ब्रह्मयातितथाअविद्वान्गंतुंनयोग्यः अनर्थहेतुभेददृष्टिशालित्वात् ॥ २६५॥ भेददृ
ष्टेरनर्थहेतुत्वेकैमुत्यमाह विद्वानपीतित्रिभिः यद्वाविद्वानपिबहिर्मुखत्वात्पंडितंमन्यपदप्रयोगार्होऽल्पमपिव्यवहारकालमात्रवृत्तित्वेनाल्प
मपिभेदंकुरुतेतदातस्यविदुषोपीश्वराद्भयंस्यात् भेदरूपस्यपातहेतोःपर्वतस्यसपक्षस्यनैकट्यादितिसंबंधः तत्रव्यावहारिकभेदाकारःप्रदर्श्य
ते वस्तुतइत्यादिना ॥ २६६ ॥ २६७॥ किमुइति यस्त्वात्मानंद्वैतपर्वतखंडनेवज्रभूतमजानानोभेदपर्वतानांमध्यएववसतितस्यभयंकि
मुवाच्यमित्यर्थः ॥ २६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंडितंमन्येति पंडितंमन्यस्य विप्रलंभकस्य विदुषोभ्रांतैर्विद्वत्तयामतस्यतथाअज्ञस्यचयद्भयमीश्वरात्स्यात्तदेवभयंविदुषोपिप्रमादिनोयथा वद्विज्ञायापिश्रुतार्थेनिष्ठामकुर्वतःस्यादित्यर्थः ॥ २६९ ॥ फलितमाह अप्रमत्तइति कुशलीभावःश्रुत्यनुसारितर्कनिपुणता अन्यथामन नाकरणे त्तदुक्तंभागवतेसप्तमे विद्वानपीत्थंदनुजाःकुटुंबमित्यादि ॥ २७० ॥ मननेनतुवासनालक्षणानांभेदभ्रमबीजानांदाहोभवती त्याह आत्मनइति ॥ २७१ ॥ ईश्वरस्याविदुषांभयहेतुत्वेकैमुत्यांतरमाह आत्मज्ञानमितित्रिभिः उपासनासिद्धिरूपयाविद्वत्तयाप्रसि

पंडितंमन्यरूपस्यविदुषोऽविदुषोपियत्॥ तत्त्वेवस्याद्भयंनित्यंविदुषोपिप्रमादिनः ॥ २६९॥ अप्रमत्तस्त तोनित्यंविद्वान्सगुरुणेरितं॥ चिंतयेत्कुशलीभावात्परानंदात्मरूपकं॥ अन्यथासंसृतिंगच्छेद्बलवद्भेदवासनः ॥ २७०॥ आत्मनश्चिंतनाद्भेदवासनानांक्षयोभवेत् ॥ नान्यथातस्तदेवैकंकुर्यान्नान्यत्कदाचन ॥ २७१॥ आत्मज्ञानंविनाब्रह्मदेवानांविदुषामपि॥ कुर्याद्भयंकथंनान्यजंतूनांकुरुतेतुतत् ॥ २७२ ॥ अत्राप्युदाहरं तीमंश्लोकंपूर्वेमहाधियः ॥ ब्रह्मणोभयतोवातोवातिसूर्यउदेतिच ॥ अवतींद्रोज्वलत्यग्निर्धावन्मृत्युर्निहंति च॥ २७३॥वाय्वाद्याःपुरुषाःपंचजगतोपिनियामकाः॥यतोभीतास्ततःकोन्यःपुमान्नभयमाव्रजेत्॥ २७४॥ हृदयाकाशरूपोयमानंदात्मासुखप्रदः॥भयदश्चसुखंतत्रकियदित्यत्रचिंत्यते॥ २७५॥ अनंतमितितस्माद्धु विद्वांसःस्वात्मकोविदाः॥सुखेस्मिन्नवतार्यैवमानंदस्यपरंपरां॥ २७६॥

द्धानांदेवानामप्युक्तात्मनिष्ठामंतरेणभयकरंयदाब्रह्मतदाज्ञान्प्रतिभयदत्वंतस्यकिमुवाच्यमित्यर्थः ॥२७२॥ अत्रापीति स्पष्टम् ॥२७३॥ अस्यतात्पर्यमाह वाय्वाद्याइति स्फुटं ॥ २७४ ॥ एवंसत्यत्वंमंत्रोक्तंविवृतमथानंदतांनिरतिशयांप्रदर्शयतोऽथेत्यादेःसएकइत्यंतस्यार्थ माह हृदयाकाशेत्येकविंशतिश्लोकैः योयमात्मागुहाप्रविष्टत्वादिरूपैर्वर्णितस्तत्स्वरूपभूतआनंदःकिंपरिमाणइतिजिज्ञासायांवक्ष्यमा णशताधिक्यपरंपरयातस्यानंततांतित्तिरयोवदंतीतिद्वयोःसंबंधः ॥ २७५ ॥ २७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रमनुष्यानंदोत्कर्षमभिनयति यौवनेतिचतुर्भिः यौवनाद्यैर्लोकस्पृहणीयैर्गुणैःसंपन्नोभवेत् तथापुराणादीनिधर्मशास्त्रांतानिचत्वारि शिक्षादीनिषट्वेदांगानिचत्वारोवेदाश्चएतानिचतुर्दशज्ञानधर्मयोःस्थानान्यभिव्यंजकान्यधीयानोयथावत्पाठनशक्तऊहादिकुशलत्वा दितिद्वयोरर्थः ॥ २७७ ॥ २७८ ॥ आसमंतात्शिष्टःशिक्षितइत्याकारमाशिष्टपदार्थमाह मात्रेति क्रमेणेतिशेषः द्रढिष्ठादिपदार्थमाह वज्रेति वलभिदिंद्रः ॥ २७९॥ आध्यात्मिकगुणसंपत्तिलोकद्वयहितामुक्त्वाबाह्यामाह तस्येयमिति तस्यवर्णितस्ययदिसप्तमसमुद्रांता

यौवनेनाभिसंपन्नोरूपशीलादिसंयुतः॥पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः॥२७७॥वेदाःस्थानानि विद्यानांधर्मस्यचचतुर्दश॥सर्वाण्येतान्यधीयानऊहापोहविशारदः॥२७८॥मात्रापित्रातथाचार्यैःशिक्षि तोविनयान्वितः॥ वज्रसारसमानांगोबलवान्बलभिद्यथा ॥ २७९ ॥ तस्येयंपृथिवीसर्वासप्तसागरमेख ला॥ सर्वैर्वित्तैश्चसंपूर्णानाभिकांचनपर्वता॥स्वाधीनाचेद्भवेत्सोयमानंदोमानुषःपरः॥ २८० ॥ शतंयेमा नुषाःप्रोक्ताआनंदाअधिकाइह॥एकोमनुष्यगंधर्वानंदःसपरिकीर्तितः॥ २८१ ॥ अत्रानंदेषुसर्वेषुवक्ष्यमा णेष्वपीरिते ॥ यस्मिन्यस्मिन्विरक्तोयस्ततस्तस्यसुखंभवेत् ॥ श्रोत्रियस्यसदाशुद्धचेतसोत्राधिकारिणः ॥ २८२ ॥ तेयेमनुष्यगंधर्वानंदाःस्युःशतसंख्यया॥देवगंधर्वजःसोयमेकआनंदईरितः ॥ २८३ ॥ देवगं धर्वजानंदाःशतंयेपरिकीर्तिताः॥भवेत्सएकआनंदःपितॄणांचिरवासिनां॥ २८४॥

सुमेरुमध्यकासर्वापृथ्वीवशेस्यात्तदातस्ययश्चित्तप्रसादः ससर्वमानुषानंदसमष्टिरूपएकआनंदइत्यर्थः ॥ २८०॥ शतंयइति उक्तानंदाः शतगुणिताःसंतोमनुष्यगंधर्वानंदएकोभवति येमनुष्ययोनिजाःकर्मोपासनाबलाद्गंधर्वत्वंप्राप्तास्तेमनुष्यगंधर्वाउच्यंतेइत्यर्थः ॥ २८१ ॥ अत्रेति अत्रवर्णितेषुवक्ष्यमाणेषुचानंदेषुमध्येयत्रयत्रयःश्रोत्रियःशुद्धमनाविरक्तोभवेत्तस्यततोमानुषाद्यानंदात्शतगुणाधिकंसुखंज्ञेय मित्यर्थः ॥ २८२ ॥ तेयेइति शतंमनुष्यगंधर्वानंदाएकीभूतादेवयोनिजगंधर्वानंदएकोभवतीत्यर्थः एवमग्रेपीति ॥ २८३ ॥ देवगं धर्वजानंदाइति चिरवासिनांचिरस्थायिलोककानां ॥ २८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितॄणामिति आजानोदेवलोकस्तत्रस्मार्त्तकर्मानुष्ठानेनजातादेवाआजानजाः ॥ २८५ ॥ देवयोनीति कर्मदेवाःश्रौतकर्मणादेवभावं गताः ॥ २८६ ॥ तेभ्योपिवसुरुद्रादीनामाधिकारिकदेवानामानंदःशतगुणाधिकइत्याह आनंदाइति ॥ २८७ ॥ वस्विति वस्वादिदेवानंदशतात्मकइंद्रस्यानंदइत्यर्थः ॥ २८८ ॥ आनंदायत्रेति यत्रानन्देइंद्रानंदशतमंतर्भूतंतादृशआनंदोदेवगुरोर्बोध्यः बृहस्पतेरानंदाःशतंयत्रलीनास्तादृशआनंदःप्रजापतिपदोक्तस्यविराजोबोध्यइत्यर्थः ॥ २८९ ॥ प्रजापतेरिति विराडानंदशतंयत्रांतर्भूतंतादृशआनंदो

पितॄणांचिरलोकानामानंदायेशतंस्मृताः ॥ आजानजानांदेवानामेकःसपरिकीर्तितः ॥ २८५ ॥ देवयोनिप्रजातानामानंदायेशतंस्मृताः ॥ सएकःकर्मदेवानांकर्मणायेदिवंगताः ॥ २८६ ॥ आनंदाःकर्मदेवानांशतंयेपरिकीर्तिताः ॥ वसुरुद्रादिदेवानामेकएवहिसस्मृतः ॥ २८७ ॥ वसुरुद्रादिदेवानामानंदायेशतंस्मृताः इंद्रस्यैकःसविज्ञेयआनंदोजगदीशतुः ॥ २८८ ॥ आनंदायत्रशक्रस्यशतंसतुबृहस्पतेः ॥ एकएवशतंतस्ययआनंदोबृहस्पतेः ॥ प्रजापतेर्विराजःसएकएवप्रकीर्तितः ॥ २८९ ॥ प्रजापतेःशतंयेस्युरानंदाएकएवसः ॥ भवेत्परमआनंदोब्रह्मणःसूत्ररूपिणः ॥ २९० ॥ अस्मात्परोनकोपिस्यादानंदोदेहिनामिह ॥ आनंदात्मानमाकाशमेकंहित्वास्वयंप्रभं ॥ २९१ ॥ आनंदवारिधेस्तस्यपरमानंदरूपिणः ॥ ब्रह्मानंदःपरोस्माकंबिंदुमात्रंतुतस्यसः ॥ २९२ ॥ आनंदस्ततएवायमनंतःपरिकीर्तितः ॥ आनंदात्मस्वरूपस्यस्वयंभातस्यसर्वदा ॥ २९३ ॥

ब्रह्मपदोक्तस्यहिरण्यगर्भस्यज्ञेयइत्यर्थः ॥ २९० ॥ अस्मादिति अस्माद्धिरण्यगर्भानंदादधिकआनंदोदेहिनामुपाध्यभिमानिनांनास्तिकिंतुहिरण्यगर्भानंदादपिविरक्तस्यश्रोत्रियस्यचित्तेभासमानोयश्चिदाकाशरूपआनंदःसततोधिकइत्यर्थः ॥ २९१ ॥ सक्रियानितिचेदनंतइत्याह आनंदेतिद्वाभ्यां योयंब्रह्मणोहिरण्यगर्भस्यानंदःसोऽस्माकमपेक्षयापरोपितस्यचिदाकाशानंदस्यवारिधिस्थानीयस्यबिंदुमात्रंभवतीत्यर्थः तस्यसइतिपदद्वयमुत्तरान्वयि ॥ २९२ ॥ आनंदइति तस्यस्वयंभातस्याद्वयात्मरूपस्यसआनंदस्ततएवानंतइतियोजना ॥ २९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याद्वयात्मतांमहावाक्येनाह अयमिति अयंचिदाकाशरूपआनंदोयःपुरुषेव्यष्ट्युपाधौवर्त्ततेसएवादित्येमूर्तामूर्तसमष्टिसारभूतेवर्तते अतस्तयोस्तत्त्वंपदार्थयोर्भेदोनेत्यर्थः ॥ २९४ ॥ फलितमाह अतइति स्पष्टं ॥ २९५ ॥ एवमित्यादिपंचकोशोपसंक्रमणावाक्यार्थमाह ज्ञातेतत्त्वेपीति परोक्षतत्त्वेज्ञातेसाक्षात्कारात्पूर्वंमोहोभ्रमस्तिष्ठतियथादिग्भ्रमइत्येवंभ्रममर्यादांजानन्सनूयःसाक्षात्काराययततेसोन्नमया दिपंचकोशानांसमष्टिरूपाणांगमनमुपसंक्रमणपदोक्तंतत्तन्मात्रनिष्ठारूपंक्रमेणकृत्वाचरमकोशपुच्छभूतंब्रह्मगच्छतिसाक्षात्करोतीतिद्व

अयमानंदआकाशःपुरुषेयश्चवर्तते॥ आदित्येयश्चसूत्राख्येतयोर्भेदोनवर्त्तते ॥ २९४ ॥ अतोभेदोनिजा ज्ञानात्सर्वत्रैवप्रतीयते॥ अध्यात्ममधिदैवंवाप्यधिभूतमथापिवा॥२९५॥ ज्ञातेतत्त्वेपिदिङ्मोहोयथाप्रत्य क्षजन्मनः॥ प्रागास्तेततएवायंवर्त्ततेभेदविभ्रमः ॥ साक्षात्कारात्पुराब्रह्मविदुषामपिसर्वदा॥ २९६॥ एवं जानन्पुमान्योत्रसाक्षात्कारप्रसिद्धये ॥ क्रमतोन्नादिकान्कोशान्गत्वाब्रह्मसगच्छति ॥ २९७॥ आनंदा त्मानमद्वैतंपुच्छंब्रह्मविनिर्भयम् ॥ प्राप्तस्यविदुषोभीतिःकुतश्चिन्नैवजायते ॥ अस्मिन्नर्थइमंश्लोकंपठंति ब्रह्मवादिनः ॥ २९८ ॥ यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह ॥ आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चन ॥ २९९॥शब्देवाचःप्रवर्तंतेशब्दार्थेचमनस्तथा॥ अशब्दार्थेप्यशब्देस्मिन्कथंगच्छेन्मनोपिवाक्॥ ३००॥ अस्मिन्नात्मतयाऽज्ञातेसर्वेषांभयरूपिणि ॥ विदुषस्तुकुतोभीतिर्भेदशून्यस्यसंभवेत् ॥ ३०१ ॥

योरर्थः ॥ २९६ ॥ २९७ ॥ एवंब्रह्मप्राप्तःसनिर्भयोभवतीत्यत्रार्थेइममुत्तरंश्लोकंमंत्रंपठंतीत्याह आनंदात्मानमिति ॥ २९८॥ यतइति ॥ २९९॥ अस्यमंत्रस्यार्थमाह शब्दइतिद्वाभ्यां शब्देनामप्रपंचेवाचःप्रवृत्तिःतदर्थेरूपप्रपंचेतुमनसः नामरूपाभ्यामतीतेब्रह्मणिमनोवाक् चकथंप्रवर्तेतेत्यर्थः ॥ ३०० ॥ अस्मिन्निति अस्मिन्वाङ्मनसागोचरेब्रह्मण्यज्ञातदशायांसर्वेषांभयप्रदेआत्मतयाज्ञातेसत्यद्वयस्यविदुषः कुतोभीतिःस्यादित्यर्थः ॥ ३०१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदुषोद्वयत्वेनकिंचिद्भयप्रदंनसंभवतियथाकृताकृतेदुष्कृतसुकृतेइतिदर्शयतएतमित्यादेःफलवाक्यस्यार्थमाह अहंब्रह्मेतिचतुर्भिः यथा भेददर्शिनंअहंपातकंकृतवान्पुण्यंकिनकृतवानित्येवंदीनंप्रतिकृतंपातकंअकृतंपुण्यंचैतेतापयतस्तथाएतंविद्वांसंविज्ञानाद्ब्रह्मात्मभूतंतेनता पयतइतिद्वयोरर्थः ॥ ३०२ ॥ ३०३ ॥ तत्रहेतुतयापुण्यपापयोर्विदुषआत्मनिलीनत्वमाह आनंदात्मनीति सर्वात्मदर्शीपुण्यपापेअ पिआत्मतयापश्यंस्ताभ्यांकथंतप्येत् नह्यग्निरात्मानंदहतीत्यर्थः ॥ ३०४ ॥ ततोज्ञानफलेऽभयप्राप्तिरूपेनसंदेहइत्याह ततइति स्पष्टम्

अहंब्रह्मेतिविज्ञानादानंदात्मस्वरूपिणं ॥ एतंहितपतोनैतेनित्यंसुकृतदुष्कृते ॥ अकृतेचकृतेचापियथान्यंभे ददर्शिनं ॥ ३०२ ॥ कृतवान्पातकंकस्मात्पुण्यंचाहंकुतोनहि ॥ इतियद्वत्सदादीनंसर्वशक्तिविवर्जितं ॥ ३०३ ॥ आनंदात्मनिविज्ञातेपुण्यपापेउभेअपि ॥ असावात्मतयाजानन्कथंतापंततोव्रजेत् ॥ ३०४ ॥ ततोविद्वानमुं लोकमानंदात्मस्वरूपकं ॥ जानन्नात्मतयागच्छेज्जीवन्वापिमृतोपिवा ॥ ३०५ ॥ एवंविचारेसंप्रोक्ताब्रह्म विद्यामनीषिभिः ॥ आनंदात्मस्वरूपस्यप्राप्तिहेतुःसदानृणां ॥ ३०६ ॥ गुरूपदेशतोब्रह्मज्ञात्वायश्चविचारये त् ॥ कोशपंचकमप्येतस्ततोनात्मतयाव्रजेत् ॥ ३०७ ॥ अत्रचोदाहरंतीममाख्यानंपितृपुत्रयोः ॥ गुरूपदे शतःपश्चान्मननायेतिपंडिताः ॥ ३०८ ॥ भृगुर्नामाभवत्कश्चिद्वरुणस्यसुतोमहान् ॥ वरुणंपितरंगत्वापप्र च्छेदंकदाचन ॥ ३०९ ॥ भगवन्ब्रह्मजानीषेमत्यंतत्त्वंवदप्रभो ॥ इत्युक्तोवरुणस्तस्मैप्रोवाचेदंमहामतिः ॥ ३१० ॥

॥ ३०५ ॥ आनंदवल्लीव्याख्यामुपसंहरति एवमिति स्पष्टं ॥ ३०६ ॥ भृगुवल्लीव्याख्यांप्रवर्तयति गुरूपदेशइत्यादिना योगुरूपदिष्टंब्र ह्मतत्त्वंमननगोचरंकरोतिसपंचकोशानात्मतयानावगच्छतिकिंतुचरमकोशपुच्छभूतंब्रह्मैवात्मतयावगच्छतिसाक्षात्करोतीत्यत्रार्थेभृगुव ल्लींपितृपुत्रयोर्वरुणभृगुसंज्ञयोर्वृत्तप्रकाशिकांतित्तिरयःपठंतीतिद्वयोरर्थः मननायमननाकारंस्फुटयितुं ॥ ३०७ ॥ ३०८ ॥ इतिहासम भिनयति भृगुरिति महान्महाप्रभावः जानीषेस्मरसि इदंवक्ष्यमाणं स्फुटमन्यत् ॥ ३०९ ॥ ३१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रयद्यद्यंशुद्धधीस्तर्हिस्वयमेवोपलक्ष्यंज्ञास्यतीत्याशयेनशिष्यबुद्धिपरीक्षणायोपलक्षणान्येवप्रदर्शयन्वरुणःश्रुतावन्नादिपदोक्तान्शरीरादीन्पदार्थांस्त्वंपदार्थोपलक्षणभूतांस्तावदाह शरीरमितिद्वाभ्यां शरीरंस्थूलंपंचप्राणास्तथावागुपलक्षितानिदशेंद्रियाणिमनःपदोक्तमंतःकरणचतुष्टयंचएतावदेववस्तुजातंव्यष्टिसमष्टिरूपंविश्वस्मिन्सर्वस्मिन्जगतिभोग्यादिरूपेणवर्त्ततेइतिद्वयोरर्थः तत्सर्वंकंचिद्भोक्त्रादिरूपंसाक्षिणंविनानुपपन्नमितिभावः ॥ ३११ ॥ ३१२ ॥ अथतत्पदार्थस्योपलक्षणतयाजगज्जन्मादीनिदर्शयितुमाह एतेष्विति हेतनयलक्षणाद्वक्ष्यमाणादुक्तपदार्थरूपंतद्विलक्षणरूपंवाब्रह्मतत्पदार्थंजानीहीत्यर्थः ॥ ३१३ ॥ लक्षणंवक्तुंप्रतिजानीते वक्ष्यामीति अव्यक्तंलो

शरीरंचतथाप्राणभेदाःपंचशरीरगाः॥ ज्ञानकर्मेंद्रियाणिस्युर्दशात्रचचतुर्विधं॥ मनोंतःकरणंनामविद्यतेभुवनत्रये॥३११॥ अध्यात्ममधिदैवंवाप्यधिभूतमथापिवा॥एतावदेवविश्वस्मिन्नाधिकंनैवविद्यते॥३१२॥ एतेष्वन्यतमंवात्वमेतेभ्योवाविलक्षणं ॥ अवगच्छस्वयंबुद्ध्यातनयब्रह्मलक्षणात् ॥ ३१३ ॥ वक्ष्यामिलक्षणंतत्तेब्रह्मणोव्यक्तजन्मनः॥ येनत्वंस्वयमेवैतद्ब्रह्मबुद्ध्यावगच्छसि॥ ३१४॥ यतउत्पद्यतेविश्वंसकलंभूतभौतिकं॥ यत्रतिष्ठतियत्रांतेलीयतेचतदेवतत् ॥ ३१५॥ जगज्जनिस्थितिध्वंसानेवंसब्रह्मलक्षणं॥ उक्त्वापुनरुवाचेदंपुत्रंतंब्रह्मवित्तमः॥ ३१६॥ ब्रह्मणोयत्स्वरूपाख्यंलक्षणंतत्त्वयाधुना ॥ अधिगंतुमशक्यत्वान्मयातेकथितंनहि ॥ ३१७॥

केप्रसिद्धंजन्मप्रादुर्भावसाधनंयस्यतथाभूतस्यब्रह्मणःप्रादुर्भावायलक्षणंवच्मीत्यर्थः॥३१४॥ यतोवाइत्याद्युक्तंलक्षणमभिनयति यतइति यतउपादानात्कार्यस्यसमस्तस्यजन्मभवतियत्रसमस्तकार्यस्यस्थितिर्यत्रचतस्यलयस्तद्ब्रह्मेत्यर्थः ॥ ३१४ ॥ अत्रापिपूर्ववत्शास्त्रदृष्ट्यालक्षणत्रयमिदंबोध्यमनतिप्रसंगात् मंदधियामनुरोधेत्वेकलक्षणत्वमितिसूचयन्केवलतटस्थलक्षणाभिधानेस्वाशयमुद्घाटयामासेत्याह जगज्जनीति जगन्निष्ठान्जन्मस्थितिभंगान्ब्रह्मलक्षणभूतानुक्त्वापिताइदमाहेति ॥ ३१६ ॥ इदंकिमतआह ब्रह्मणइति ब्रह्मणःस्वरूपलक्षणंत्वयाज्ञातुमशक्यत्वान्नोक्तमित्यर्थः ॥ ३१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिगंतुमशक्यत्वेहेतुतयासूक्ष्मधीयांग्रत्वमाह सूक्ष्मेति भवांस्तुसूक्ष्मधीर्यतोनभवत्यतःस्थूलंतटस्थलक्षणमुक्तं लक्षणस्यतटस्थत्वंल क्ष्यस्वरूपाद्बहिःस्थितत्वमित्यर्थः ॥ ३१८ ॥ तटस्थलक्षणंस्फुटयितुंलोकेस्वरूपलक्षणमुदाहरति स्थूलाइति यथासोमशर्मस्वामिकप्रा सादानांस्थूलत्वादिकंस्वरूपघटकत्वात्स्वरूपलक्षणत्वेनप्रसिद्धमित्यर्थः ॥ ३१९ ॥ तत्प्रासादानांतटस्थलक्षणमभिनयति कीराइति की राःशुकाः ॥ ३२० ॥ तत्रलक्ष्यापायाप्रयोजकापायकत्वंतटस्थलक्षणलक्षणमित्याह लक्षकाणामिति लक्षकाणांलक्षणतयानिर्दिष्टानां

सूक्ष्मबुद्ध्यैवतन्नित्यंगम्यतेसूक्ष्मबुद्धिभिः॥ स्थूलबुद्धिर्भवानद्यततस्तेस्थूलमीरितं ॥ तटस्थलक्षणंतस्यब्रह्म णोयद्बहिःस्थितं॥३१८॥ स्थूलामनोरमाःशुभ्राश्चित्रध्वजपताकिनः॥ अभ्रंलिहाइमेवत्सप्रासादाःसोमश र्मणः ॥ स्वरूपलक्षणंत्वेतत्प्रासादानांपरंतथा ॥ ३१९ ॥ कीराःससारिकायत्रचित्रशब्दाःसमासते ॥ इमे तेभवताज्ञेयाःप्रासादाःसोमशर्मणः ॥ तटस्थलक्षणंत्वेतत्प्रासादानामुदाहृतं ॥ ३२० ॥ लक्षकाणामभावे पिलक्ष्यंयत्रावतिष्ठते ॥ तटस्थलक्षणंतद्धिविज्ञेयंपंडितैःसदा ॥ ३२१ ॥ लक्षकाणामपायेहिलक्ष्यापायः प्रसज्जते॥ यत्रतत्कथितंनित्यंस्वरूपस्येहलक्षणं॥ ३२२॥ स्वरूपलक्षणंयत्रतत्रभेदोधियाकृतः ॥ लोकेभ वतिचान्यत्रगवाश्वादेरिवस्वतः ॥ ३२३॥ जगज्जडमिदंसर्वैःप्राणिभिःपरिगृह्यते ॥ जन्मादिमदतस्तत्स्या त्ताटस्थ्येनैवलक्षणं ॥ ३२४ ॥

॥ ३२१ ॥ लक्ष्यापायप्रयोजकापायकत्वंतुस्वरूपलक्षणमित्याह लक्षकाणामपायइति ॥ ३२२ ॥ ननुस्वरूपभूतानांकथंलक्षणत्वंलक्ष णत्वस्यभेदघटितत्वादितिचेत्कल्पितंभेदमादायेत्याह स्वरूपेति धियावक्तुर्विवक्षयाकृतोनतुवास्तवः एतेनवास्तवभेदशालित्वेसतिलक्षण त्वंतटस्थलक्षणत्वमित्येवसिद्धमित्याह अन्यत्रेति अन्यत्रतटस्थेगवाश्वादिवद्भेदोवास्तवइत्यर्थः ॥ ३२३ ॥ दार्ष्टांतिकेयोजयति जगदि ति जगतोजडत्वपरिच्छिन्नत्वादिभिर्ब्रह्मभेदस्यप्रसिद्धत्वात्तद्धर्माणांजन्मादीनांतटस्थलक्षणत्वमेवयुक्तमित्यर्थः ॥ ३२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तटस्थलक्षणोपन्यासेनैवविचारात्मकतपसआक्षेपंदर्शयति तटस्थलक्षणेइति तटस्थलक्षणेप्रोक्तेसतिलक्ष्यंलक्ष्यासाधारणंरूपंसाक्षात् झटित्येवननिश्चीयतेकिंतुसामान्यरूपेणतदानीमवधार्यतेपश्चात्तुमानांतरेणसमागमोयस्यतथाभूतात्तर्कात्मकविचारादयंलक्ष्यगतोविशेषोनिश्चीयते अयंन्यायःसर्वत्रप्रसिद्धइत्यर्थः ॥ ३२५ ॥ भवानपीति ततउक्तन्यायानुरोधात्हेभृगोभवानपिविचारसहकृताडुक्तलक्षणवाक्याद्ब्रह्मावगच्छत्वित्यर्थः ॥ ३२६ ॥ ननुस्वतःप्रमाणभूतस्यवेदवाक्यस्यकथंविचारापेक्षेत्याशंक्यफलजननेतदनपेक्षत्वेपिपुरुषापराधस्यासंभावनादेर्निवृत्तयेविचारोपेक्षितोयथाचक्षुषोविषयप्रकाशनेंजनानपेक्षत्वेपितत्प्रतिबंधकमलापहारायतदपेक्षेत्याह निधिरिति यथासमीपस्थोनिधिर्भूमिनिखातद्रव्यंसुलोचनैरप्यंजनेनविनानप्रेक्ष्यतेतथाब्रह्मापिज्ञानंविचारंविनेत्यर्थः ॥ ३२७ ॥ सचविचारः

तटस्थलक्षणेलक्ष्यंसाक्षान्नैवावधार्यते ॥ किंतुसामान्यतःपश्चान्मानांतरसमागमात् ॥ निश्चीयतेविशेषोयं सर्वत्रैवात्रवस्तुनि ॥ ३२५ ॥ भवानपिततोब्रह्मस्वयमेवविचारतः ॥ तटस्थलक्षणादुक्तमवगच्छतुधीधनः ॥ ३२६ ॥ निधिर्यथासमीपस्थैरंजनेनविनानहि ॥ गृह्यतेतद्वदेवैतद्ब्रह्मज्ञानंविनानच ॥ ३२७ ॥ अंजनेहि यथानस्यादत्रयत्किंचिदौषधं ॥ ब्रह्मज्ञानेपिनैवस्यादुपायोन्योपिकोपिच ॥ ३२८ ॥ उपायःप्रथमोज्ञेयोगुरुशास्त्रसमीरणात् ॥ विज्ञानेब्रह्मणोलोकेनाशुद्धमनसांहिसः ॥ ३२९ ॥

श्रुत्यनुकूलतर्कात्मकएवात्रोपयुज्यतेनान्यइतिसदृष्टांतमाह अंजनेहीति यथासिद्धांजनरूपेणपरिणामशालिऔषधंयत्किंचित्सर्वलोकसाधारणंनभवतिकिंतुविलक्षणमेवतथाब्रह्मज्ञानप्रयोजकउपायउक्तलक्षणवाक्यविचारात्मकएवनान्यइत्यर्थः ॥ ३२८ ॥ एवंभाष्योक्तस्यविचारात्मकस्यतपःपदार्थस्याक्षेपोदर्शितोऽथरूढ्यातपःपदोक्तस्यशारीरादित्रिविधस्यतपसोप्याक्षेपंदर्शयति उपायइतिपंचभिः ब्रह्मज्ञानेयोयमुपायोलक्षणवाक्यज्ञानात्मकःसप्रथमोमुख्यः अस्यहिचक्षुषोंजनमिवविचारःसहकारिमात्रं सचगुरुशास्त्रोपदेशाल्लब्धोप्यशुद्धधियांनकिंचित्फलंजनयतीत्यर्थः ॥ ३२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साबुद्धेरशुद्धीरागाद्भवतिरागस्तुविषयाभिलाषात्मकःसदेहेंद्रियाणांदर्पाद्भवति दृप्तोधर्ममतिक्रामतीतिन्यायात् सचदर्पआहाराद्विषयसंसर्गात्मकाद्भवतितस्मादाहारसंक्षयेणदर्पादिक्षयंकुर्यादित्याह चित्तेति दर्पोगर्वः तेषांसदेहेंद्रियाणां ॥३३० ॥ तस्माद्विषयग्रहणंशरीरधारणमात्रोपयुक्तादधिकंनकुर्यादिदमेवतपइत्याह यथायमिति ॥३३१॥ ततःकिंभवतीत्यतआह एवमिति तपस्यतस्तपःकुर्वतः ॥३३२॥ नीरागमिति गुरुवाक्यविषयकोयउक्तोमंतव्यइतिविहितस्तर्कस्तेनतद्ब्रह्मप्रकाशयेत्निरावरणंकुर्यात् ॥ ३३३ ॥ फलितमाह ततइति

चित्तशुद्धिश्चनैवास्यरागिणःसहसैवहि ॥ इंद्रियाणिसदेहानिरागेदृप्तानिकारणं ॥ दर्पआहारजस्तेषांक्षय आहारसंक्षयात् ॥ ३३० ॥ यथायंनपतेद्देहोनचदर्पंसमाव्रजेत् ॥ तथावर्णाश्रमप्रोक्तमाहारंपुरुषोग्रसेत् ॥ ३३१ ॥ एवंतपस्यतोनाशंदर्पोदेहादिगोव्रजेत् ॥ दर्पनाशाच्चचित्तस्योरागोपिविलयंव्रजेत् ॥ ३३२ ॥ नीरागंविमलंचित्तंस्वस्थंसर्वार्थदर्शकं ॥ निश्चलंगुरुवाक्योक्ततर्कतस्तत्प्रकाशयेत् ॥ ३३३ ॥ ततस्त्वंतपसाशुद्धचित्तस्तर्कप्रसादतः ॥ मदुक्तलक्षणंब्रह्मजानीहितनयस्वयम् ॥ ३३४ ॥ इदंमयानवक्तव्यंतपोज्ञानस्यकारणं ॥ स्वयमेवभवान्यस्माज्जानीतेतत्तपोधनः ॥ ३३५ ॥ पितुर्मुखाद्भृगुःश्रुत्वाब्रह्मणोलक्षणंहितत् ॥ उपायंतंस्वयंजानन्सूचितंजनकेनच ॥ तपःस्वधर्मवर्तित्वंकृतवान्मुनिसत्तमः ॥ ३३६ ॥ शुद्धेमनसिपित्रोक्तंपर्यालोच्यमहामुनिः ॥ अन्नंस्थूलमिदंदेहमध्यात्मादिविभागवित् ॥ ३३७ ॥ आत्मनःप्रथमंकोशंब्रह्मलक्षणसंयुतं ॥ विज्ञायदोषदृष्ट्याथपुनःपितरमाव्रजत् ॥ ३३८ ॥

स्पष्टम् ॥३३४॥ प्रथमपर्यायेतपसःसूचितत्वमेवविशदयति इदमिति तपोधनमिवप्रियंयस्यसतथा तथाचतपसिप्रेम्णःसर्वाभीष्टसाधनताधीजन्यत्वादन्वयव्यतिरेकाभ्यांतपसोज्ञानकारणत्वस्यत्वयाज्ञातत्वादिदंतपसोज्ञानकारणत्वंनवक्तव्यंनविधियोग्यमित्यर्थः ॥ ३३५ ॥ सतपइत्यादिग्रंथार्थमाह पितुरित्यादिना तंतपोरूपमुपायं स्वधर्मोब्राह्मणधर्मःशमादिः स्फुटमन्यत् ॥ ३३६ ॥ शुद्धइति मनःशुद्ध्यनंतरं पितृप्रोक्तलक्षणानुसारेणान्नपदोक्तंसमष्टिव्यष्ट्यात्मकस्थूलदेहरूपंप्रथमंकोशंब्रह्मत्वेनविज्ञायतत्रदोषंदृष्ट्वाचपितुरंतिकंगतइतिद्वयोरर्थः आदिपदेनाधिदैवस्यसमष्टिरूपस्यग्रहः ॥ ३३७ ॥ ३३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथमन्नेब्रह्मलक्षणसमन्वयस्तत्रदोषश्चकोदृष्टइत्याकांक्षायांलक्षणसमन्वयंतावदाह देहेभ्यइति समष्टिव्यष्टिदेहेभ्यएवप्राणिनामुत्पत्त्यादिकंप्रसिद्धमित्यर्थः तान्देहानेवान्तकालेयाति यथामृतशरीरंश्वकृम्यग्निदेहान्‌अन्ततोविड्देहंयातीति ॥ ३३९ ॥ तत्रदोषमभिनयति यद्यप्येवमितिद्वाभ्यां परिच्छिन्नत्वंविनाशित्वंचब्रह्मत्वविरोधिदोषइतिभावः ॥ ३४० ॥ समष्टावप्ययंदोषस्तदुत्पत्त्यादेःश्रुतत्वेनपरिच्छिन्नतायाविनाशितायाश्चसिद्धत्वादित्याह महाभूतात्मकइति स्थवीयसःअतिस्थूलस्य ॥३४१॥ एवमिति अन्नस्यकारणंप्रष्टुकामः॥३४२॥

देहेभ्योजायतेविश्वंदेहएवात्रजीवति॥ स्थितंदेहेषुयात्यंतेतानेवात्रनसंशयः ॥ ३३९॥ यद्यप्येवंतथाप्येते स्वयंदेहाविनश्वराः॥ परिच्छिन्नाश्चकेनस्युर्ब्रह्मकारणवर्जितम् ॥ ३४० ॥ महाभूतात्मकोयोयंविराजोपि स्थवीयसः॥ सोपिदेहःपरिच्छिन्नोजातश्चैवान्यदेहवत्॥ ३४१ ॥ एवंदोषंविलोक्याथप्रष्टुकामोन्नकारणं॥ आगत्यचयथापूर्वंप्रश्नंसकृतवान्भृगु॥ ३४२ ॥ वरुणस्तूत्तरंत्वेतदुक्तवान्ब्रह्मवित्तमः ॥ त्वयादृष्टउपायोयःसूचितश्चमयातथा॥ सएवब्रह्मविज्ञानेमुख्योनान्योस्तिकश्चन॥ ३४३ ॥ तपसाब्रह्मतेनत्वंजगतोविद्धिकारणं॥ तपोब्रह्मेतितेनेत्थंवदंतिब्रह्मवादिनः ॥ ३४४॥ एवमुक्तेयथापूर्वंतप्तवांस्तपआत्मवान्॥ विज्ञायकारणंभूयःपितरंगतवान्भृगुः ॥ ३४५ ॥ एवंत्रिवारंगतवान्पितरंदोषदर्शकः ॥ पितापितपसेत्यादित्रिवारमपिसोवदत् ॥ ३४६ ॥

वरुणइति ततोवरुणस्तस्मैभृगवेइदमुत्तरमाह इदंकिं यस्तपोरूपउपायस्त्वयादृष्टउपदेशमंतरैवकर्त्तव्यत्वेनावधारितोमयासूचितश्चसएव पुनःकर्त्तव्यः तेनतपसोब्रह्मज्ञानसाधनेषुमुख्यत्वेनजगत्कारणंब्रह्मतपसाजानीहि तेनमुख्यसाधनत्वेनैवहितपसिब्रह्मशब्दंप्रयुंजतेइतिद्वयोरर्थः ॥ ३४३ ॥ ३४४ ॥ एवमिति तप्तवान्‌अर्जितवान् ॥ ३४५ ॥ एवंत्रिवारमिति यथाद्विवारंगमनंप्रतिपादितमेवंत्रिवारंगमनमन्यद्बोध्यं तथाचपंचवारंगमनंपितरंप्रतिभृगोःसिद्धं तपसाजानीहीत्याकारकःश्रुत्यर्थाभ्यांकृतःपितुरुपदेशोपिपंचधाबोध्यइतिभावः ॥ ३४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयतृतीयचतुर्थपर्यायेषुकारणतयादृष्टान्पदार्थानाह क्रियेति तत्रक्रियात्मकंप्राणमयंशक्तिरूपेणादृष्टाख्येनान्नस्यकारणंदृष्टवान् त स्यकारणंनामात्मकंमनोमयंतस्यचविज्ञानमयंरूपात्मकमेवंदृष्ट्वातेष्वेतान्वक्ष्यमाणान्दोषानलोकयदित्यर्थः ॥ ३४७ ॥ तत्रप्राणेब्रह्म लक्षणान्वयंतत्रदोषंचाभिनयति सप्राणादितिद्वाभ्यां प्राणविशिष्टादेवशरीराद्भूतानांजन्मदर्शनात्प्राणकृतेनान्नभक्षणेनैवस्थितिदर्शना त्प्राणनिर्गमनेविलयदर्शनाच्चप्राणस्यब्रह्मत्वमित्यर्थः ॥ ३४८ ॥ दोषमाह यद्यपीति तथापिप्राणःकथंजगतःकारणंस्यात् जडत्वात् त

क्रियानामचरूपंचशक्तिरूपेणदृष्टवान् ॥ कारणंक्रमतस्तत्रदोषानेतानलोकयत् ॥ ३४७ ॥ सप्राणादेवज गतोजातोदेहश्चतुर्विधः ॥ प्राणेनान्नादनात्तद्वत्तिष्ठत्येषनसंशयः ॥ प्राणनिर्गमनादंतेविनाशंचसगच्छति ॥ ३४८ ॥ यद्यप्येवंतथाप्येषजडःप्राणःकथंभवेत् ॥ कारणंहिसमादृष्ट्याजडताप्राणदेहयोः ॥ ३४९ ॥ ततःप्राणस्यांकिंचित्स्यात्कारणंचेतनंसदा ॥ चेतनंहिमनोलोकेप्रसिद्धंतस्यकारणं ॥ ३५० ॥ प्राणेयथा पुरादोषंदृष्टवान्मुनिसत्तमः ॥ मनस्यपितथैवायमिमंदोषंव्यलोकयत् ॥ ३५१ ॥ इदंसंशयरूपंस्यान्नमनः कारणंविना ॥ अकारणोयतोलोकेसंशयोनैवजायते ॥ ३५२ ॥ संशयस्यसदैवायंनिश्चयोबुद्धिनामकः ॥ कारणंनविनाबुद्धिंसंशयोजायतेक्वचित् ॥ ३५३ ॥

च्चजडत्वंप्राणस्यस्थूलदेहस्यचसमंप्रसिद्धमित्यर्थः ॥ ३४९ ॥ ततश्चेतनकारणान्वेषणायांममनोजानातीत्यादिलोकदृष्ट्याचेतनत्वेनप्र सिद्धंमनोजगत्कारणत्वेनभृगुर्निश्चितवानित्याह ततइति ॥ ३५० ॥ ततःपूर्ववद्दोषंचिंतयन्मनसीमंवक्ष्यमाणंदोषमालोकयदित्याह प्रा णेइति ॥ ३५१ ॥ संशयात्मकत्वेनकारणसापेक्षतैवात्रदोषइत्याह इदमिति इदंमनःसविकल्पात्मकसंशयरूपंकारणानपेक्षंकथंस्यात् यतःसंशयस्यधर्मिसामान्यज्ञानादिजन्यत्वंप्रसिद्धमित्यर्थः ॥ ३५२ ॥ तच्चधर्मिज्ञानादिकंनिर्विकल्पकबुद्धिरूपमित्याह संशयस्येति बुद्धिस्वरूपभूतोनिश्चयोधर्मिगोचरःसंशयस्यकारणमितिसंबंधः ॥ ३५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवस्फुटयति निश्चित्येति यतःपुराप्रथमंवस्तुधर्मिस्वरूपमूर्ध्वत्वलक्षणसामान्यधर्मवन्निश्चित्यानंतरंस्थाणुत्वपुरुषत्वकोटिकःसंशयःप्रसिद्धः ततोमनोविहायतत्कारणंबुद्धिंब्रह्मत्वेनभृगुर्विज्ञातवानित्यर्थः ॥ ३५४ ॥ बुद्धावपिकारणसापेक्षत्वरूपंदोषंदृष्टवानित्याह बुद्धावपीति अखिलासर्वप्रकाराबुद्धिर्ब्रह्मत्वंनार्हतिकादाचित्कत्वात् कादाचित्कत्वेहेतुःप्रजायतेइत्युक्तंकार्यत्वं तत्रहेतुर्देहवत्परिच्छिन्नत्वमिति ॥ ३५५ ॥ अस्याबुद्धेःकर्तृत्वरूपायाउदयेभोक्तृत्वलक्षणआनंदएवनिमित्तं शास्त्रेलोकेचतथान्वयव्यतिरेकदर्शनात् तथाहि स्वर्गकामोयजेतेत्यादौस्वर्गकामादिमुद्दिश्ययागकर्तृत्वंविधीयतेइतिवदद्भिरुद्देश्यस्य विधेयंप्रतिपूर्वसिद्धतामीमांसकैःसंमतैव फलेहेतुतृतीयांविदधद्भिर्वैयाकरणैःपुरुषार्थएवहेतुरितिवदद्भिःसांख्यैश्च तथाप्रयोजनमनुद्दिश्येतिन्यायःसर्वलौकिकपरीक्षकसंमतोऽत्रानुकूलइत्याशयेनसु

निश्चित्योर्ध्वंपुरावस्तुसंशयःस्यादनंतरं ॥ ततोबुद्धिर्हिमनसःकारणंनापरंक्वचित्॥ ३५४ ॥ बुद्धावपिमनोहेताविमंदोषंव्यलोकयत् ॥ कादाचित्कीयमखिलाब्रह्मबुद्धिःकथंभवेत्॥ देहोपमापरिच्छिन्नातस्मादेषाप्रजायते ॥ ३५५ ॥ बुद्धिःसुखंसमुद्दिश्यजायतेधीमतांसदा ॥ कारणांतरतोदुःखमुपेक्ष्यंचाधिगच्छति ॥ ३५६ ॥ इच्छयाजायतेबुद्धिरिच्छाचसुखगोचरे ॥ उपेक्ष्येनिखिलेचात्रदुःखेवादुःखसाधने ॥ जानीयांप्राप्नुयांवापिनैवमिच्छाप्रजायते ॥ ३५७ ॥ ततःसुखेप्रवृत्तेयमिच्छादुःखादिकंसदा ॥ अनुपादेयरूपेणगोचरीकुरुतेनृणां ॥ ३५८ ॥

खस्यबुद्धिप्रतिकारणतांश्रुत्युक्तांसंभावयति बुद्धिरितिचतुर्भिः बुद्धेःप्रवृत्तिःसुखार्थैवदृष्टायतोदुःखादौद्वेष्येउपेक्ष्येचतत्प्रवृत्तिःकारणांतरतोदोषपारवश्यरूपादेवभवतीत्यर्थः लौकिकानिप्रमाणान्यप्यविद्याकामकर्मात्मकदोषपक्षपातीन्येवेतिभावः ॥ ३५६ ॥ एतत्स्फुटयति इच्छयेति निष्कामानांसमाहितानांबुद्ध्युत्थानादर्शनाद्बुद्धिकारणत्वमिच्छायाःसिद्धं इच्छातुसुखएवजायते नह्युपेक्ष्यंद्वेष्यंवाहंजानीयांप्राप्नुयांवेत्याकारिकेच्छास्वतोजायमानादृष्टेत्यर्थः ॥ ३५७ ॥ ततोघटायोन्मीलितंचक्षुःपटंनहिनपश्यतीतिन्यायेनसुखार्थैप्रवृत्तेच्छादुःखादिकमपिगोचरयतीत्याह ततइति यत्प्रसक्तंप्रयत्नेनपरिहर्तुंनशक्यतेतदनुपादेयमित्युच्यते अनुपादेयस्यरूपमपरिहार्यत्वंतेनदुःखादिकंगोचरयतीत्यर्थः ॥ ३५८ ॥ ॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततःसुखैकेति ततउक्तव्याप्तेः ततइच्छाप्रयुक्तत्वात् सुखमेवबुद्धेःफलरूपंनिमित्तं अनुपादेयंदुःखादिकंत्विच्छायाइवबुद्धेर पिफलरूपनिमित्ततांनार्हतीत्यर्थः तथाचप्रियाद्यवयवकआनंदमयोविज्ञानमयस्यकारणत्वेनब्रह्मतयानिश्चितइतिभावः॥३५९॥ आनंदमयस्यापियेप्रियमोदप्रमोदानंदाश्चत्वारोवयवास्तेपिब्रह्मत्वयोग्यानभवंत्यागमापायित्वेनकारणसापेक्षत्वादित्याह सुखंचेति प्रियादित्रयमंतःकरणवृत्तिरूपंसौषुप्ताविद्यावृत्तिरूपंत्वानंदाख्यंसुखंतत्सर्वंजायमानत्वात्कारणापेक्षमित्यर्थः ॥ ३६० ॥ तस्मात्पुच्छभूतंभूमाख्यंसुखमेवप्रियादीनामपिप्रतिबिंबानांबिंबभूतंसर्वकारणमित्याह कारणेनेति बुद्धिहेतुःबुद्ध्यादिप्रपंचस्याज्ञातरूपेणकारणमुद्देश्यल

ततःसुखैकविषयाइच्छाबुद्देस्तुकारणं॥ बुद्धिश्वततएवेयंसुखएवप्रजायते॥इच्छावच्चानुपादेयेजातातद्धेतुकानसा॥३५९॥ सुखंचजायमानंयत्प्रियमोदप्रमोदकं॥अविद्यावृत्तिरूपंतदन्यकारणजंभवेत्॥३६०॥ कारणेनविनानंदोयोभवेद्ब्रह्मरूपभाक्॥ तारतम्यविहीनश्चबुद्धिहेतुर्हिसस्मृतः॥ ३६१ ॥ इतिविचार्यमतिमान्भृगुर्ब्रह्मविदांवरः॥ आत्मरूपोयमानंदोब्रह्मेतिप्रत्यपद्यत ॥ ३६२ ॥ आनंदादेवभूतानिजायंतेनिखिलान्यपि॥स्त्रीपुंसयोश्चसंभोगजाताज्जन्मविवर्जितात्॥३६३॥ आनंदेनैवजीवंतिजातानिनिखिलान्यपि॥ निद्राहारविहारांगरागस्त्रीविषयादिना॥ ३६४॥

क्षणनिमित्तंवा ॥ ३६१ ॥ इतिविचार्येति एवंविचार्यपुच्छभूतमानंदंब्रह्मत्वेननिश्चितवानित्यर्थः ॥ ३६२ ॥ तत्रलक्षणसमन्वयवाक्यस्यार्थमाह आनंदादेवेतित्रिभिः सर्वाणिलौकिककारणान्यानंदंप्राप्यैवकार्यजननक्षमाणि यथागर्भहेतुभूतौस्त्रीपुंसौ अतोज्ञायतेसर्वत्रानुगतआनंदएवजगत्कारणं सचनित्यः विषयाणांतदभिव्यंजनमात्रेव्यापारादित्यर्थः ॥ ३६३ ॥ स्थितिहेतुतामाह आनंदेनेति तथासर्वाणिभूतान्यानंदेनैवजीवनंगच्छंतिप्रसिद्धानि कीदृशेनानंदेन निद्राचाहारश्चविहारश्चांगरागश्चचंदनलेपादिरूपःस्त्रीचेत्यादिविषयाआदयोऽभिव्यंजकायस्यसतथातेनेत्यर्थः पूर्वन्यायोऽत्रापिध्येयः ॥ ३६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रलयमाह आनंदेइति तथासर्वाणिभूतानिसर्वतःस्थूलात्सूक्ष्माच्चदेहतोविक्षेपमयादुद्विग्नानिप्रयांतिप्रयाणंतदभिमानत्यागरूपंकुर्वंति संतिहृदयाकाशप्राज्ञपदाभ्यांप्रोक्तेऽत्रानंदेब्रह्मणितादात्म्यरूपसंबंधेनाभिविशंतितद्भावंयांतीत्यर्थः ॥ ३६५ ॥ ननुब्रह्मलीनानांकथंजन्मेतिचेदविद्याख्यबीजावशेषादित्याह निरविद्यानीतिद्वाभ्यां निवृत्ताविद्यानिसंतिभूतानियदितत्रविशेयुस्तर्हिमुक्तवज्जन्मनैवभजेयुः ब्रह्मत्वस्यसंभवाल्लाभादित्यर्थः ॥ ३६६ ॥ संसारिणस्तुसुप्ताविवाविद्याशेषाएवलीयंतेऽतःपुनर्जन्मयुक्तमित्याह सुप्ताविवेति॥३६७॥एवंविधजन्मादिकारणत्वेनानंदस्यब्रह्मत्वंसिद्धमित्याह जगज्जन्मेति॥३६८॥फलितमाह एवमिति इदंमननम् ॥३६९॥ सैषेति एषाप्रसिद्धा

आनंदेहृदयाकाशेप्राज्ञेतादात्म्यरूपतः॥ प्रयांतिदेहतस्तद्वत्सर्वतोभिविशंतिच॥ निखिलान्यपिभूतानिस्थावराणिचराणिच॥३६५॥निरविद्यानिचेदेनंव्रजेयुर्नपुनर्भवेत्॥शरीरग्रहणंतेषांमुक्तवद्ब्रह्मसंभवात्॥३६६ सुप्ताविवमृतौयस्मादानंदेहृदयेस्थितं॥ व्रजंतिसर्वभूतानिसाविद्यान्येवसर्वदा॥ मृत्वाततःपुनर्देहग्रहणंच प्रकुर्वते ॥ ३६७ ॥ जगज्जन्मस्थितिध्वंसाएवमानंदतःसदा ॥ यतोभवंतितेनायमानंदोब्रह्मशब्दभाक् ॥३६८॥ एवंमननतःपूर्वंभृगुरात्मावबोधनं ॥ प्राप्तस्तस्मादिदंसर्वंकरणीयंमुमुक्षुणा ॥ ३६९ ॥ सैषाविद्यापुरालब्धाभृगुणावरुणेनच॥ प्रोक्तास्तिपरमेव्योम्निहृद्यानंदस्वरूपिणि ॥ ३७० ॥ अन्योपिभृगुवद्वेदयः पुमान्सोत्रसर्वदा॥ प्रतितिष्ठतिसर्वात्मभूतआवृत्तिवर्जितः ॥ ३७१ ॥ अन्नादिकोशविज्ञानादन्नाद्याप्तिर्यथाफलं॥ आनंदज्ञानतस्तद्वदानंदाप्तिःफलंभवेत्॥ ३७२॥

विद्यावरुणेनप्रोक्ताभृगुणालब्धाचहृद्गुहागतेपरमचिद्रूपेआकाशेआनंदात्मकेअस्तिपर्यवसन्नेत्यर्थः ॥ ३७० ॥ व्याख्यातवाक्यस्यतात्पर्यार्थमाह अन्योपीति यतोऽनयाविद्ययैवसहसर्वात्मभावलक्षणफलस्यसंबंधोनतुवरुणसुतत्वऋषित्वादिनाततोन्यस्याप्येवंमननपरस्य तत्फलंभवत्येवेत्यर्थः ॥ ३७१ ॥ उपासनावाक्यार्थंसूचयन्नानंदात्मविदउक्तंफलंयुक्तमित्याह अन्नादीति अन्नमयादिकोशानांसमष्टिरूपाणामात्मत्वेनविज्ञानात्सर्वान्नलाभादिफलंयथाश्रुत्युक्तंभवतितथानंदात्मविज्ञानात्तद्भावरूपमपिफलंयुक्तमित्यर्थः ॥ ३७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोक्तविज्ञानफलस्यसर्वात्मभावस्यजीवन्मुक्तेनानुभूयमानस्याभिनयपरंसामवाक्यंव्याचष्टे क्रमादित्यष्टभिः वर्णितानांकोशाना मतिक्रमणमुपसंक्रमणपदोक्तंकृत्वाहावुइत्यादिकंसामगायन्सन्जीवन्मुक्तस्तिष्ठतीत्यर्थः ॥ ३७३ ॥ अहोइति इदमत्याश्चर्ययदहमेकः सर्वभोग्यभोक्तृरूपःसन्स्थितइत्यर्थः ॥ ३७४ ॥ अन्नादइत्यस्यार्थांतरंमृत्युरूपेणान्नवद्भक्षकइत्याकारमाह मृत्युरूपइति अन्नंदेवादि भ्योऽदत्वाभोक्तारंकृपणंमृत्युरूपोहमग्निभक्षयामीत्यर्थः ॥ ३७५ ॥ मंत्राणामिति तथामंत्राणांश्लोकपदोक्तानामीश्वररूपेणकर्त्ताऋषि रूपेणद्रष्टास्मर्त्ताचास्मीत्यर्थः तथाकृतपदोक्तकर्मविद्याफलरूपेणनित्यानित्यसुखात्मकेनाहमेवस्थितइति ॥ ३७६ ॥ देवेभ्यइति अहं

क्रमात्कोशानतिक्रम्यपंचाथानंदबोधतः॥ गायन्नास्तइदंसामहावुहेत्यादिकंबहु॥३७३॥ अहोअहोइदंचि त्रमाश्चर्यमिहविद्यते ॥ अन्नादश्चतथैवान्नमेकएवास्म्यहंयतः ॥ ३७४ ॥ मृत्युरूपस्तथैवाहमन्नदानविव र्जितं॥ अन्नादमग्निमनुजंसर्वदास्वोदरंभरिम्॥३७५॥ मंत्राणामपिकर्त्ताहंद्रष्टावासर्ववित्तमः॥ कर्मणां फलरूपेणजातश्चाहंसुखात्मकः॥३७६॥ देवेभ्यश्चापिपूर्वोहंजातःसूत्रंविराडपि ॥ आनंदस्यामृतस्याहंम ध्येनाभिरिवस्थितः ॥ संसारचक्रंनिखिलमपियस्मिन्समर्पितं॥३७७॥ धर्मार्थकाममोक्षाख्यंमामन्नादि स्वरूपतः॥ योददातिपुमान्मांसआत्मानमपिचावति ॥ ३७८ ॥ अग्नियत्कृपणंदीनमन्नदानविवर्जितं॥ मृत्युःसन्निखिलंविश्वंनित्यंदेहेंद्रियक्षयात्॥३७९॥

हिरण्यगर्भादिसमष्टिरूपेणव्यष्टिभूतदेवेभ्यःप्रथमंजातः तथानंदरूपस्यमोक्षस्यसंसारस्यचमध्येविधारकत्वेनस्थितोस्मिनाभिरिव मद्धी नौसंसारमोक्षौजनानामितियावत् ॥ ३७७ ॥ योमेत्यादिखंडार्थमाह धर्मेति श्रुतौइत्पदेनेत्थमित्यर्थकेनवर्णितःसर्वात्मभावःप्रदर्श्यते तथाचयतोहंधर्मादिसकलपुरुषार्थरूपोऽन्नादिपदार्थरूपोदातृरूपश्चाहंभवामिततोयोमामन्नादिरूपमतिथ्यादिभ्योददातिसदातायदात्मा नंयमाद्रक्षतितन्मामेवरक्षतिममैवतस्यात्मत्वादित्यर्थः अपिरवधारणे ॥ ३७८ ॥ तत्रहेतुतयाऽदातुर्मृत्युभक्ष्यत्वमाह अद्मीति यत्यतःकृ पणंदीनमुदरंभरिंप्रतिदिनमिंद्रियादिक्षयहेतुकालरूपेणांतेमृत्युरूपेणचाहमद्मीत्यर्थः ॥ ३७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिरस्करोमीति तथायोयमादित्यमंडलांतस्थःस्वर्णवद्देदीप्यमानःपुरुषोनिरतिशयज्ञानैश्वर्यादिमांस्तद्रूपेणाहमेवसर्वंतिरस्करोमिसर्वतउ
त्कृष्टोस्मीतियावत् ॥ ३८० ॥ ईदृशानुभवप्रकाशनेविदुषःश्रुतेरिवकरुणैवकथमिमेजनाविद्यायांप्रवर्त्तेरन्नित्याकारिकाप्रयोजिके
त्याह एवमिति एतदर्थस्यइत्थंव्याख्यातस्य तस्यहावुइत्यादेः छलंव्याजः ॥ ३८१ ॥ प्रतिबंधसिंधुतरणेतरणीनारायणेनमस्यैका श्रु
तिसंमतोयमर्थःप्रतिभूर्नारायणीयभावाय ॥ १ ॥ चतुर्थीविकासयितुमितितुमंतलोपापेक्षयेति बृहन्नारायणोपनिषदितिनारायणीयमि
तिचप्रसिद्धस्यतैत्तिरीयारण्यकभागस्यनिर्गुणविद्याप्राधान्येनार्थंदर्शयितुमुपक्रमते विदुषेत्यादिना यद्ब्रह्मव्याख्यानसाममिषेणविदुषा

तिरस्करोमिपुरुषःस्वर्णवत्सूर्यसंस्थितः॥ आनंदात्मास्वयंज्योतिःसर्वधर्मविवर्जितः॥ ३८० ॥ एवंस्वानुभ
वंविद्वान्प्रकटीकुरुतेसदा॥ लोकानुग्रहकामःसन्श्रुतिवद्दीनवत्सलः ॥ एतदर्थस्यतस्यासौसाम्नोगानच्छले
नहि॥ ३८१ ॥ विदुषागीयतेयद्धिब्रह्मतत्त्वंमयेरितं ॥ सावधानमनाभूत्वाश्रृणुनारायणेस्थितं ॥ ३८२ ॥
आनंदात्मास्वयंज्योतिरविद्यायाःपरःपुमान्॥ संसारसागरेऽगाधेह्यविद्याजलपूरिते॥ ३८३ ॥ यस्मिंस्तिष्ठं
तिसततंभुवनानिचतुर्दश॥ अनेकभुवनस्यास्यमध्येगगनसन्निभः॥ ३८४॥ स्वर्गस्यापितथैवायमुपरिष्टा
न्महेश्वरः॥ गगनादेश्चमहतोमहीयान्सर्वगोयतः॥ ३८५ ॥ वर्त्ततेयश्चशुक्लेनस्वप्रभेणात्मतेजसा ॥ ज्योतीं
षिचक्षुरादीनित्वधिदैवादिरूपतः॥ स्थितानिप्राणिनांदेवःप्रविष्टोगगनोपमः॥ ३८६॥

गीयतेतद्देवनारायणेनारायणप्रतिपादकेग्रंथेप्रतिपाद्यतयास्थितंमयावर्णितंश्रृण्विति गुरोःशिष्यंप्रत्युक्तिः ॥ ३८२ ॥ तत्रप्रथमकंडिका
र्थंदर्शयति आनंदात्मेतिसप्तदशभिः अविद्याजलमयेसंसारसागरेतदंतर्गतस्यानेकजातीयस्यभुवनस्यचमध्येपरमःपुमानानंदात्मागग
नवत्शुद्धःसमनुगतोवर्त्ततेइतिद्वयोरर्थः ॥ ३८३ ॥ ३८४ ॥ सनसंसारेणावच्छेत्तुंशक्योऽतिमहत्त्वादित्याह स्वर्गस्यापीति स्वर्गस्योन्नत
त्वेनप्रसिद्धस्याप्युपरिष्टादयमीश्वरोभवति गगनाद्यपेक्षयातिमहत्त्वात् यतोयंसर्वगोवर्त्ततेइत्यर्थः ॥ ३८५ ॥ वर्त्ततइति प्रथमपदंपूर्वा
न्वयि यश्चदेवःशुक्लपदोक्तेनस्वप्रकाशेनचैतन्यज्योतिषाप्राणिनांचक्षुरादीनिकरणान्यंतर्यामितयाप्रविष्टः कीदृशानिचक्षुरादीनि ज्योतिः ॥२७॥
पदोक्तान्यधिदैवादित्यादिरूपेणाध्यात्मरूपेणचस्थितानीत्यर्थः ॥ ३८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्यगात्मतयेति अयंस्थूलसूक्ष्मकारणोपाधिकत्वेनविराडादिसंज्ञःसम्यगात्मतयासर्वस्यमुख्यात्मत्वात्सृष्टिपरंपराविधायकत्वेनप्रजापतिरित्युक्तइत्यर्थः ॥ ३८७ ॥ अयंदेवःसर्वस्यहृदयाकाशेगर्भपदोक्तेतिष्ठतीत्याह स्थावराणामिति ॥ ३८८ ॥ श्रुतौसंचविचैतीत्यस्याधीनतयावर्त्ततेइत्यर्थंदर्शयन्नाह यस्मिन्निति सर्वंजगत्सदायस्मिन्समवरुद्धंयदधीनमित्यर्थः ॥ ३८९ ॥ नकेवलमैहलौकिकंजगदेवतद

सम्यगात्मतयास्रष्टेरनुसृष्टिविधायकः ॥ प्रजापतिरयंदेवोविराट्सूत्रंतथेश्वरः ॥ ३८७ ॥ स्थावराणांचराणांचत्यधिदैवादिभेदिनां ॥ चरतिप्राणिनांगर्भेसोंतर्हृदयसद्मनि ॥ ३८८ ॥ यस्मिन्समवरुद्धंचजगदेतच्चराचरम् ॥ उत्पत्तौचस्थितौतद्वत्प्रलयेचमहेश्वरे ॥ ३८९ ॥ अधितिष्ठंतियस्मिंश्चविश्वेदेवाःसवासवाः ॥ भूतंभव्यंभवच्चैतद्विश्वमाहुस्तदेवहि ॥ ३९० ॥ आनंदात्मस्वरूपंयदिदंक्षरणवर्जितं ॥ आत्मन्याकाशरूपेस्तिस्वमहिम्निचसर्वदा ॥ ३९१ ॥ येनावृतंनभस्तद्वत्स्वर्गोभूमिश्चविस्तृता ॥ आदित्योयेनसंदीप्तःस्वप्रभेणात्मतेजसा ॥ तपत्यविरतंसर्वलोकमंडलमध्यगः ॥ ३९२ ॥

धीनंकिंतुपरोक्षदेवादिरूपमपीत्याह अधितिष्ठंतीति अधीनोक्त्याप्रसक्तंभेदंवारयति भूतमिति तदेवउक्तात्मरूपमेव समंतादित्यर्थकस्यश्रौतस्यआइतिपदस्यव्याख्यानंविश्वमिति ॥ ३९० ॥ ननूक्तमात्मरूपंकुत्रस्थितमितिचेद्व्योमपदोक्तेस्वेमहिम्नीत्याह आनंदात्मेति यदिदंवर्णितंतच्चिदाकाशरूपेस्वमहिम्न्येवस्थितमित्यर्थः ॥ ३९१ ॥ येनेति आवृतंवेष्टितमाकाशादिकंयेन येनचादित्योपिचैतन्यज्योतिषाप्रकाशितस्तपतिभातीत्यर्थः ॥ ३९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारेति यथातंतुवायाःसूत्रंपटभावायवयंतिसंतानयंतितथायमेनंदेवंसंसारसमुद्रांतर्गतंसकलपदार्थात्मकपटानांसूत्रभूतंकवयउशनो
वाल्मीकिप्रभृतयोजगत्पटात्मनावयंतितस्यवानंनामवागाद्यविषयस्यापितादात्म्येनजगत्सत्ताप्रदस्यवर्णनमितिद्वयोरर्थः अयंभावः
यथापटवर्णनेसूत्रस्यैववर्णनंपटस्यतदतिरिक्तत्वाभावात्तथाकवयःपराधीनसत्ताकंजगद्वर्णयंतःपरमेश्वरमेववर्णयंति यथोक्तंवेदस्तुतौ
अतऋषयोदधुस्त्वयिमनोवचनाचरितंकथमयथाभवंतिभुविदत्तपदानिनृणामिति श्रुत्यंतरंच यइमेवीणायांगायंतिएतमेवतेगायंतीति
॥ ३९३ ॥ ३९४ ॥ यस्मिन्नेतस्मिन्नीश्वरेअव्यक्तत्वात्सर्वविशेषशून्यत्वरूपात्तथासर्वोत्कृष्टत्वादक्षरत्वेनश्रुत्यंतरप्रसिद्धेसर्वाःप्रजाः

संसारसागरेसूत्रभूतमंतःसदैवयं ॥ जगत्पटात्मनानित्यंवयंतिकवयोजनाः ॥ ३९३ ॥ तंतुवायायथातद्व
द्वर्णयंतिमहेश्वरम् ॥ जगत्यैक्यंसमापन्नमवाङ्मनसगोचरं ॥ ३९४ ॥ यस्मिन्नव्यक्तरूपेस्मिन्नुत्कृष्टेजगदी
श्वरे ॥ कालत्रयेऽवतिष्ठंतेप्रजाःसर्वाश्चराचराः ॥ ३९५ ॥ यस्माज्जातोजगद्योनिर्ब्रह्मालोकपितामहः ॥ अप्र
धानैर्महाभूतैःससर्जनिखिलाःप्रजाः ॥ भूमौब्रह्मांडरूपायांव्रीह्याद्योषधिरूपतः ॥ ३९६ ॥ पुरुषांश्चपशूंस्तद्व
द्योविशत्यत्रसर्वदा ॥ चराचराणिभूतानितथानानाविधात्मना ॥ ३९७ ॥ अतःपरंनकिंचित्स्यात्सूक्ष्मंब्रह्मात्म
रूपतः ॥ अणोरणीयएतत्स्यान्महीयोमहतोपिच ॥ परात्परमिदंब्रह्मत्येवमव्यक्तरूपकं ॥ ३९८ ॥ अनंतंभेद
शून्यत्वात्पुराणंविश्वरूपभृत् ॥ परस्तात्तमसोमायातत्कार्याच्चसदैवयः ॥ ३९९ ॥

सदातिष्ठंतीत्याह यस्मिन्निति ॥ ३९५ ॥ यस्मादिति यस्मादीश्वरादुत्पन्नोजगद्योनिर्जगत्प्रसवाङ्कुरभूतोहिरण्यगर्भस्तोयपदोक्तजलप्र
धानपंचभूतैःसर्वाःप्रजाःससर्जतत्रभूमिलोकेपुरुषादिरूपाःप्रजाःससर्ज एवंसृष्ट्वाचराचरशरीरेषुनानाविधरूपेणविज्ञानशक्तिप्रमुखेनप्र
विशतीतिद्वयोरर्थः ॥ ३९६ ॥ ३९७ ॥ अतइति अतईश्वरादद्वितीयात्मलक्षणात्परंसूक्ष्मंदुर्लक्ष्यंकिंचिन्नास्ति तत्रहेतुतयाऽणीयस्त्वादि
कमाह अणोरित्यादिना ॥ ३९८ ॥ अनंतमिति यदेतद्ब्रह्माद्वितीयत्वादनंतंविश्वकारणत्वात्पुराणंसविलासमायालक्षणात्तमसःपरंचप्रसि
द्धंवेदांतेष्वित्यर्थः ॥ ३९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयकंडिकार्थमाह व्यापारइतिदशभिः योयंमानसःशास्त्रीयोव्यापारःसकृतसंज्ञःकायिकस्तुसत्यसंज्ञः अवश्यभाविफलकत्वात् स द्विविधोव्यापारस्तत्स्यात् तत्किं यत्कवीनांसूत्रवद्धानीयत्वेनोक्तमित्यर्थः तथातदेवेष्टापूर्त्तरूपमाहुः जगदभ्युदयबीजभूतंकर्मापिब्रह्मणोविभूतिरितियावदिति ॥ ४०० ॥ ४०१ ॥ जातमिति तथातीतादिरूपजगतःप्रतिष्ठाश्रयत्वात्संसारचक्रनाभित्वेनयदुक्तंब्रह्मतदेवाग्न्यादिरूपमितिसंबंधः तत्रदीप्तंस्वप्रकाशचिद्रूपममृतंमोक्षःआपःसूक्ष्मभूतानिप्रजापतिर्विराडितिद्वयोरर्थः ॥ ४०२ ॥ ४०३ ॥ एतस्मादेवनिमे

व्यापारोमानसस्तत्स्याच्छास्त्रीयःकायिकोपिवा॥ कृतसत्याभिधोयोयंफलंयच्छतिदेहिनां ॥ ४०० ॥ कवीनांसूत्रभूतंचब्रह्मयद्विवयंतिते ॥ इष्टंपूर्त्तंचतत्प्राहुर्वहुधाविश्वरूपकम् ॥ ४०१ ॥ जातंचजायमानंचविश्वंयस्मिन्प्रतिष्ठितं ॥ नाभिःसंसारचक्रस्यब्रह्मविद्भिर्यदीरितम् ॥ ४०२ ॥ अग्निस्तदेवतद्वायुस्तत्सूर्यस्तच्चचंद्रमाः॥ तदेवदीप्तममृतंतदापःसप्रजापतिः ॥ ४०३ ॥ निमेषाजज्ञिरेतस्माद्ब्रह्मणःसर्वरूपिणः ॥ स्वभानात्पुरुषात्सर्वैर्व्याधिक्येनसहस्रधा॥ ४०४॥ कलाःकाष्ठामुहूर्ताश्चत्यहोरात्राश्चसर्वशः॥ अर्द्धमासास्तथामासाकृतुभिःसहवत्सराः॥ ४०५ ॥ अपस्तथात्रिलोकींचस्तस्त्वासदुदुहेपुमान् ॥ नानाभोगस्वरूपंतत्पयोनःसुखरूपकं ॥ ४०६ ॥ नैनमूर्ध्वंनतिर्यक्कनमध्येपिचकश्चन ॥ पर्यग्रहीन्नतस्येष्टेकोपितस्यमहात्मनः॥ ४०७॥ महद्यशोत्रनामस्याद्दृश्यात्मस्वरूपिणः ॥ चक्षुषाकोपिनात्मानंपश्यत्यत्रकदाचन ॥ हीनोरूपादिभिर्यस्मादिंद्रियैश्चनगम्यते॥ ४०८॥

षादिरूपकालावयवोत्पत्तिरित्याह निमेषाइतिद्वाभ्यां स्वभानात्स्वप्रकाशतालक्षणविशिष्टद्योतनशालिनः कलादिस्वरूपंकोशतःप्रसिद्धं ॥ ४०४॥४०५॥ अपइति एवंस्तस्त्वासदेवोपःपंचभूतानितन्मयींत्रिलोकींचधेनुवददुहत्तद्दोहनलब्धंदुग्धंतुइदमेवयन्नानाविधभोगस्वरूपमित्यर्थः ॥ ४०६ ॥ अस्याविषयस्वभावतामाह नैनमिति द्वितीयस्यतस्यपदस्योत्तरेणान्वयः एनंदेवंजगतऊर्ध्वादिदेशेऽन्विच्छन्कोपिनगृहीतवान् अतएवास्येशोनियंतापिकोपिनास्तीत्यर्थः ॥ ४०७॥ महदिति तस्यात्मत्वेननिरतिशयप्रेमास्पदत्वसूचकंनाममहद्यशइत्याकारमुक्तं तथायंरूपादिहीनत्वाच्चक्षुराद्यगोचरइत्यर्थः ॥ ४०८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथमस्योपलब्धिरितिचेन्नकल्पनयातदाकारबुद्ध्येत्याह हृदयस्थेनेति हृदिएकात्मतांगतेनबोधेनबुद्धिरूपेणमनसःसविकल्पकस्यनिरोधकेनगम्यमिमंदेवंयेजानंतितेमुक्ताभवंतीत्यर्थः ॥ ४०९ ॥ अत्रोपनिषदिव्याख्यातमंत्रानंतरंअद्भ्यःसंभूतइत्यादयउत्तरेमंत्राःषट्तथा. हिरण्यगर्भइत्यादयोष्टौचमंत्राःपाठ्याइत्युक्तंतत्राद्भ्यइत्यादीनामर्थमाह अयमेवेत्यष्टाविंशतिश्लोकैः आदित्यमंडलांतर्वर्तित्वेनब्रह्मस्वरूपमत्रप्रस्तूयते तथाहि योदेवोऽद्भ्योऽप्प्रधानसूक्ष्मभूतेभ्यःपृथिव्युपलक्षितस्थूलभूतानांयोरसःपूर्वानुष्ठितोपासनाप्रभावेणशोभनःपरिणामस्तस्माच्चतथाविश्वंकर्मकार्ययस्यतथाभूतात्परस्माद्ब्रह्मणोजगत्पटसूत्रभूतात्कालात्मकाद्योदेवोहिरण्यगर्भवैश्वानरादिसंज्ञःसर्वजगतो

हृदयस्थेनबोधेननियंत्रामनसोपिच ॥ गम्यंयेविदुरात्मानंतेभवंत्यमृताअपि ॥ ४०९ ॥ अयमेवपुरादेवो जातोद्भ्योब्रह्मगोलके ॥ पृथिवीरसतश्चापिलोकेस्मिन्समवर्तत ॥ ४१० ॥ ब्रह्मणःसूत्रतोनित्यात्परस्माद्विश्वकर्मणः ॥ अधिकःसर्वजगतःशारीरःप्रथमोहियः ॥ ४११ ॥ त्वष्टात्रजगतोधातातस्यरूपंविनिर्ममे ॥ विश्वरूपंपुमानेतियंनित्यंस्वात्मबोधनात् ॥ ४१२ ॥ स्वभावसिद्धंरूपंतदग्रेयत्पुरुषस्यहि ॥ अभूदनंतमगुणमस्मात्पुरुषजन्मनः ॥ ४१३ ॥

व्यष्टिरूपात्समष्टित्वेनाधिकउत्पन्नःअस्मिन्लोकेव्यष्टिजनसमुदायेसमवर्तत कीदृशः प्रथमःशारीरः सवैशरीरीप्रथमःसवैपुरुषउच्यते आदिकर्त्तासभूतानांब्रह्माग्रेसमवर्त्ततेतिस्मृतेः तस्यप्रथमशारीरस्यरूपंविश्वरूपंसर्वप्रपंचमयं अयमेवदेवोनारायणाख्यस्त्वष्टाआदित्यमंडलांतस्थःसन्जगतोधारकोविनिर्ममेसत्ताभानादिविशिष्टंकृतवानित्यर्थः अयंकः यमेनंब्रह्मविद्ययापुमानधिकारीलभतेइतित्रयाणां योजना ॥ ४१० ॥ ४११ ॥ ४१२ ॥ आदित्यमंडलांतस्थोनारायणएवपुरुषस्यनानाविधौपाधिकविशेषानुगतस्यापिपारमार्थिकंस्वरूपमित्याह स्वभावेति अस्यपुरुषस्यप्रथमशारीरादिसंज्ञस्यतदेवनारायणतत्त्वंस्वभावसिद्धमाजानसिद्धंपारमार्थिकमितियावत्तादृशंरूपं तत्किं यत्सृष्टेःपूर्वमनंतत्वनिर्गुणत्वचिद्घनत्वादिभिर्लक्षितमित्यर्थः ॥ ४१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन्रूपेऽसत्वशंकांमंत्रद्रष्टाऋषिःस्वानुभवविरोधेननिरस्यति वेदाहमिति तादृशंनारायणरूपंमायालक्षणतमसःपरंयज्ज्योतिरानन्दात्मकंस्वयंप्रकाशंचतल्लक्षणंममापरोक्षमित्यर्थः ॥ ४१४ ॥ अन्योपियोमद्वदेनंपुरुषमहंब्रह्मेत्येवंवेदसोस्मिन्देहेसत्येवब्रह्मसन्मृतःकेवलंब्रह्मयातियतोयंपुरुषोज्ञानैकलभ्यइत्याह जानन्नेवमिति तमादित्यांतःस्थं ॥ ४१५ ॥ अस्यज्ञानविधांस्फुटयंस्तत्रत्वंपदार्थशोधनमाह अयमितिद्वाभ्यां अयमादित्यांतःस्थःपरःपुरुषःप्रजापतिरूपेणसर्वशरीरिणामंतःस्थित्वानानाविधसृष्टिंकुर्वंश्चरति कीदृशोऽजायमानउपाधिजन्मसत्वेपिवस्तुतोजन्मरहितः तस्यास्यप्रजापत्याख्यस्यमायाशबलरूपस्यकारणमधिष्ठानंशुद्धंरूपंधीराःकुशलालक्षयंति कथं यदि

वेदाहमेतंपुरुषंमहांतंसूर्यवर्चसं ॥ परस्तात्तमसोज्योतिरानंदात्मस्वयंप्रभम् ॥ ४१४ ॥ जानन्नेवंतमात्मानमहंब्रह्मेतिनिश्चितं ॥ अस्मिन्देहेमृतोभूत्वाब्रह्मसन्ब्रह्मयातिसः ॥ ब्रह्मप्राप्त्यैनमार्गोन्योविद्यतेब्रह्मबोधनात् ॥ ४१५ ॥ अयंप्रजापतिर्भूत्वाचरत्यंतःशरीरिणां ॥ गर्भेशिशुर्यथामातुर्बहुधात्रविजायते ॥ ४१६॥ अजायमानस्तस्यास्यधीराजानंतिकारणं ॥ मरीचीनांहिसूर्यादेर्यदिवेच्छंतिवेधसः ॥ आनंदात्मस्वरूपंयत्कारणंतन्नचापरं ॥ ४१७॥ वन्हिवागादिदेवार्थंयआतपतिसर्वदा ॥ पुरोहितश्चदेवानामभूद्यश्चबृहस्पतिः ॥ ४१८ ॥ देवेभ्यश्चपुराजातोनमस्तस्मैमहात्मने ॥ तेजसेब्रह्मणेशुद्धस्वप्रकाशस्वरूपिणे ॥ ४१९ ॥

वायथासूर्यादेर्मरीचीनांकारणंसूर्यमंडलादिकमिच्छंतिनह्यकारणकामरीचयःसंभवंतितथावेधसःप्रजापत्याख्यस्यकारणंशुद्धंसर्वांतरंवस्त्वेवावगच्छंतीतिद्वयोरर्थः ॥ ४१६॥ ४१७ ॥ तत्पदार्थंशोधयंस्तदाराधनस्यचित्तशुद्धिहेतोर्विधामप्याह वन्हीत्यादिना वन्हीत्यादयोदेवाःसमष्टिगताःप्रसिद्धावाक्पाण्यादयस्त्वाध्यात्मिकास्तेषांसर्वेषामुपकारायय आदित्यमंडलांतःस्थआसमंतात्तपतिविद्योततेयस्यचविभूतिर्देवपुरोहितोबृहस्पतिरित्यर्थः ॥ ४१८ ॥ देवेभ्यश्चेति यश्चविभूतिभूतेभ्यःसर्वदेवेभ्यःपूर्वंजगत्प्राणात्मकादित्यरूपेणप्रादुर्भूतस्तस्मैदेवायस्वप्रकाशचैतन्यज्योतिषारोचमानायब्रह्मरूपायनमःप्रव्हीभावोस्त्वित्यर्थः श्रुतौब्रह्मशब्दादपत्यार्थकइञ्प्रत्ययआदित्यमंडलप्राधान्याभिप्रायेणेतिबोध्यम् ॥ ४१९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनपरमेश्वरेणायंवरोदेवेभ्योदत्तइत्याह आनंदात्मेति हेसुराआनंदरूपंमामादित्यरूपंप्रीणयितुंवर्णिनोऽधिकारिणोनमस्कारंकुर्वंतु एवंवि
ज्ञायनमस्कारेणक्षीणपापानांज्ञानलाभोभविष्यतीत्यर्थः ॥ ४२० ॥ अयंवरःकदादत्तइत्याकांक्षायांयदादेवैःप्रार्थितंतदेतिदर्शयन्रुच
मित्यादेरर्द्धस्यार्थमाह दीप्तिमंतमितिचतुर्भिः पूर्वंदेवाब्रह्मपुत्रेणरोचमानेनचादित्येनतादात्म्यापन्नंभगवंतंनमस्कारेणप्रादुर्भूतंकृतवंतस्तंच
प्रकटीकृतंदेवमित्थमब्रुवन्प्रार्थितवंतः तेनदत्तंवरंप्रतिअभिलक्ष्यवरकामनयेतियावदितिद्वयोरर्थः ॥ ४२१ ॥ ४२२ ॥ देवप्रार्थनामभि
नयति आनंदात्मेति जगदात्मनेसकलजगदात्मकविग्रहायनमस्यतिनमस्करोति ॥ ४२३ ॥ इत्युक्तेइति इत्थंदेवैःप्रार्थितेसतिभगवता

आनंदात्मस्वरूपायमत्यंकुर्वंतुवर्णिनः॥ एवमेषामिदंज्ञानंबहुधायत्समीरितं ॥भविष्यतिसुराःपापप्रक्षया
च्छुद्धचेतसां॥४२०॥ दीप्तिमंतंमहात्मानंब्रह्मपुत्रंनमस्यया॥ प्रकटंकृतवंतस्तेदेवावह्निपुरोगमाः॥४२१
ब्रह्मानंदात्मरूपंतन्नमसाप्रकटीकृतं॥पुराकालेब्रुवन्देवास्तेनदत्तंवरंप्रति ॥ ४२२ ॥ आनंदात्मस्वरूपायभ
वतेजगदात्मने॥ योनमस्यतितस्यत्वंप्रकटीभवसर्वदा ॥ ४२३ ॥ इत्युक्तेतेनदत्तःसवरोब्रह्मस्वरूपिणा ॥
नमतस्ततएवात्माप्रत्यक्षोत्रप्रजायते ॥ ४२४ ॥ यएवंदेवतागुह्यंनमस्कारंप्रतिद्विजः ॥ विद्यात्तस्यवशेदे
वाभवंतिसकलाअपि॥ ४२५॥ स्तुतिंचेमांप्रकुर्वीतस्वात्मज्ञानप्रसिद्धये॥ कुर्वाणोत्रनमस्कारंब्रह्मणेपरमे
ष्ठिने॥४२६॥ श्रीश्चलक्ष्मीश्चतेपत्न्यौपार्श्वेरात्रिस्तथादिवा॥ नक्षत्राणिचतेरूपंव्यात्तमश्विकुमारकौ॥ ४२७

सउक्तरूपोवरोदत्तस्ततोवरप्रभावान्नमतोनतिंकुर्वतोधिकारिणोब्रह्मात्मज्ञानंभवतीत्यर्थः ॥ ४२४ ॥ उत्तरार्द्धार्थमाह यएवमिति नम
स्कारविषयकंदेवतानांगुह्यंगोप्यंवरप्रदानात्मकंव्यवहारंयोजानातितस्यविदुषोवशेसर्वेदेवाभवंतीत्यर्थः ॥ ४२५ ॥ पंचमार्थमाह स्तु
तिमितिद्वाभ्यां नमस्कारंकुर्वन्सन्निमांस्तुतिंकुर्वीत इमांकामतआह श्रीश्चेति श्रीरैश्वर्याभिमानिनीदेवतालक्ष्मीःसौंदर्याभिमानिनीदेवता
एतेद्वेतवपत्नीभूतेवश्येइतियावत् दिनंरात्रिश्चएतौकालौसहावच्छिन्नैर्भावैस्तवपार्श्वस्थानीयौ नक्षत्राणितारागणादीप्तिलक्षणंतवरूपंधा
रयंति तथाऽश्विकुमारकौ सादृश्येकन् अश्विकुमारवत्द्वंद्वत्वेनवर्त्तमानौद्यावापृथिव्यौतेव्यात्तंप्रसृतमुखस्थानीयावितिद्वयोरर्थः ॥४२६॥
॥ ४२७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरप्रार्थनात्मकस्यषष्ठस्यार्थमाह इष्टमिति हेदेवेशमदीयमिष्टंकुर्वन्नमुंस्वयंप्रकाशात्मरूपंलोकंप्रकटीकुरुतुभ्यंनमोस्त्वित्यर्थः अत्रेदंबोध्यं नमस्कारस्यत्वंपदार्थार्पणरूपत्वेमहावाक्यार्थलाभइति ॥ ४२८ ॥ एवंवैश्वानरांतर्यामित्वेननारायणरूपंदर्शितमथहिरण्यगर्भांतर्यामित्वेनतत्प्रतिपादकानांहिरण्यगर्भइत्यादीनामर्थमाह हिरण्यगर्भइत्याद्येकविंशतिश्लोकैः योहिरण्यगर्भःपूर्वंप्रादुर्भूयसकलस्यभूतस्य कार्यवर्गस्यएकोमहेश्वरआसीत् त्रिलोकीरूपंगृहंस्तंभवद्धृतवांश्च तस्मैहिरण्यगर्भरूपायएकस्मैदेवायतंप्रीणयितुंस्ववर्णाश्रमानुरूपेणहविषापरिचर्यांकुर्मइतिद्वयोरर्थः श्रुतौकस्मैइत्यतः पूर्वमेकारलोपइतिभावः ॥ ४२९ ॥ ४३० ॥ अथद्वितीयादिमंत्राणांचतुर्थपादान

इष्टंमेकुरुदेवेशत्वमुंसर्वंस्वयंप्रभम् ॥ आनंदात्मानमात्मस्थंप्रकटीकुरुतेनमः ॥ ४२८ ॥ हिरण्यगर्भोभगवानग्रेयःसमवर्तत ॥ भूतस्यपतिरेकश्चजातआसीन्महेश्वरः ॥ ४२९ ॥ त्रिलोकींधृतवानादौमहास्तंभोयथा गृहं ॥ तस्मैदेवायहविषास्ववर्णाश्रमजेनहि ॥ परिचर्यांवयंकुर्मएकस्मैज्ञानहेतवे ॥ ४३० ॥ प्राणतोजगतोयश्चव्यापारमपिकुर्वतः ॥ इंद्रियैर्ज्ञानकर्माख्यैराजाभून्महिमान्वितः ॥ इत्थमाश्चर्यरूपःसन्यश्चेष्टेद्विचतुष्पदां ॥ ४३१ ॥ आत्मानंयश्चजंतूनांददातिस्वात्मबोधतः ॥ बलंचवपुषिस्थित्वायंचविश्वउपासते ॥ ४३२ ॥ यस्यशिष्याइमेदेवाःप्राप्ताश्चयतआशिषः ॥ छायावद्यस्यवर्त्तेतेमोक्षमृत्यूचकिंकरौ ॥ ४३३ ॥

वगतार्थत्वेनविहायक्रमेणार्थमाह प्राणतइत्यादिना श्रुतौमिषधातुश्चलनार्थकः इत्पदमित्थमित्यर्थकं तथाचयोदेवःप्राणतःप्राणान्धारयतोज्ञानेंद्रियादिभिर्व्यापारंकुर्वतश्चजगतश्चेतनवर्गस्यराजाधिपतिरासीत् यश्चेत्थंसर्वकरणप्रेरकत्वेनाद्भुतरूपोद्विपदांचतुष्पदांचईशइत्यर्थः यत्पदानांतमहंशरणंगतइतिवक्ष्यमाणेनसंबंधः ॥ ४३१ ॥ तृतीयार्थमाह आत्मानमितिद्वाभ्यां यश्चतत्त्वज्ञानेनात्मानंददातिबलंचात्मनाविंदतेवीर्यमितिकेनश्रुतेः आत्मलाभेनैवबललाभइतितदर्थः तथायंवपुषिस्थित्वासर्वेदेवादयआराधयंतीत्यर्थः ॥ ४३२ ॥ प्रशिषंपदस्यशिष्याइत्यर्थः अथवाआशिषमित्यर्थः प्राप्ताइतिशेषइत्याशयेनाह यस्येति स्पष्टं ॥ ४३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थार्थमाह हिमवदितिद्वाभ्यां हिमालयादयोगिरयोयस्यजगद्विधारकस्यमहिमाविभूतिरूपाः अथवागिरयइमेपरिच्छिन्नाएवयस्य देवस्यमहिमहिमातुआसमंताद्याप्तइतिश्रुतियोजनामुत्तरार्द्धेनसूचयति गरीयानत्यधिकः ॥ ४३४ ॥ पातालैरिति तथायस्यशिशुव द्विहरतःपातालाःसमुद्राश्चक्रीडापुष्करिणीस्थानीयाः कीदृशाःसमुद्राः महागिरयोहिमवदादयस्तटभूतायेषांते तथाकिंचदिशःको णाश्चयस्यबाहुभूताः ॥ ४३५ ॥ पंचमार्थमाह रक्षणेनेति तथाश्रुतौक्रंदसीपदोक्तेद्यावापृथिव्यौयत्कर्तृकरक्षणेनविधृतेधारितेस्थितेस

हिमवत्प्रमुखायस्यगिरयोमहिमेरिताः॥ हिमवत्प्रभृतिभ्योवागरीयान्महिमाविभोः॥ ४३४ ॥ पातालैःसहि तायस्यसमुद्राभूमिसंश्रयाः ॥ महागिरितटाक्रीडातटाकास्तेशिशोरिव ॥ दिशश्चप्रदिशस्तद्वद्यस्यबाहुःप्र कीर्तितः ॥ ४३५ ॥ रक्षणेनचयस्येमेविधृतेतिष्ठतःसदा ॥ शोभितेयंसदात्मस्थमैक्षेतांब्रह्मवित्तमे ॥ मन सास्वात्मनोरूपंसर्वधर्मविवर्जितं ॥ ४३६ ॥ आधिक्येनचयत्त्रायमुदितोभगवान्रविः ॥ विविधंयातिस ततंदिवारात्रौचभीतवत्॥ ४३७॥ उग्रायेनचभात्येषाक्षत्रधर्मरतासदा॥ द्यौरत्रेंद्रादिरूपेणपृथिवीचातिनि श्चला॥ दृढाजलेस्थितानित्यंननिमज्जतिनौरिव॥ ४३८ ॥ स्वर्गलोकस्तथाकाशोयेनस्तंभात्मनाधृतः ॥ ब्र ह्मलोकश्चपततिनैवाश्रयविवर्जितः॥ ४३९ ॥

त्यौयंदेवंनिर्विशेषात्मरूपंमनसाऐक्षेतांध्यायतः ध्यायतिपृथिवीध्यायतिद्यौरितिच्छंदोगश्रुतेः कीदृश्यौ शोभमानेब्रह्मवित्तमत्वादित्यर्थः ॥ ४३६ ॥ आधिक्येनेति तथायत्त्रयमाश्रित्यआधिक्येनोदितः प्रसिद्धोरविर्विविधंयातिभ्रमतिसदायतोभीतइत्यर्थः ॥ ४३७ ॥ षष्ठा र्थमाह उग्रेतित्रिभिः यद्विभूतिभिरिंद्रादिभिर्वीरैर्युक्तत्वात्द्यौःस्वर्गलोकउग्रत्वेनप्रसिद्धा तथायदनुगृहीतापृथिवीदृढाबलवत्वेनप्रसिद्धा नानाभाराक्रांतायाअपिउत्कृष्टनौवज्जलनिमज्जनविरहादित्यर्थः ॥ ४३८ ॥ स्वर्गेति स्वर्गलोकस्तदुपलक्षितोंऽतरिक्षलोकोनाकपदोक्तो ब्रह्मलोकश्चएतेयेनस्तंभभूतेनधृताइत्यर्थः ॥ ४३९ ॥ ॥३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योंतरिक्षइति योभगवानंतरिक्षेविमानारूढनानाभोगिरूपेणदेववधूनामप्सरसांवक्त्रचंद्रेष्वर्पितानिनयनोत्पलानियस्यतादृशोभवतीत्यर्थः अथवाविमानपदस्यमानहीनत्वमर्थः तत्रहेतुर्देवेत्यादि देवानांसमष्टिरूपाणांप्रासादभूतंमन्दिरभूतंवैश्वानरसंज्ञंरूपंभजतिसतथेतितदर्थः ॥ ४४० ॥ सप्तमार्थमाह भूतेतित्रिभिः यथालौकिक्यआपोनद्यादिरूपाःसमुद्रमापुःपतित्वेनवृतवत्यस्तथाअविद्याऽव्याकृतंप्रकृतिरितिप्रसिद्धातद्रूपाआपोयंदेवंविश्वरूपंसर्वात्मानंपतित्वेनवृतवत्यःकीदृश्यः महत्यःतत्रहेतुःपंचभूतगर्भकत्वेनसर्वलोकाधारत्वं तथाहिपंचमेगार्गिब्राह्मणव्याख्यानेसर्वलोकाधारत्वमव्याकृतस्याकाशपदोक्तस्योक्तमिति पतित्वेनवरणेहेतुःसर्वज्ञत्वलक्षणंदक्षत्वमिति एतेनतस्यस्व

योंतरिक्षेरजोजुष्टोभगवान्विषयोत्सुकः ॥ नित्यंदेववधूवक्त्रचंद्रस्थनयनोत्पलः ॥ मानहीनश्चसततंदेवप्रासादरूपभाक् ॥ ४४० ॥ भूतपंचकगर्भिण्योमहत्योलोकसंश्रयाः ॥ आपोऽविद्यात्मिकादेवंयमापुर्विश्वरूपिणं ॥ समुद्रमिवलौकिक्योदक्षंकुशलरूपिणं ॥ ४४१ ॥ दधानाश्चात्मनोगर्भंजनयंत्यःसमंततः ॥ लौकिकंवैदिकंतद्वदग्निंसर्वार्थसाधकं ॥ ४४२ ॥ अग्निवागादिदेवानामद्भ्यःप्राणोव्यजायत ॥ ताभिर्विनाततोनायंप्रायस्तिष्ठत्यहर्निशं ॥ ४४३ ॥ एकएवपुमान्यश्चमहिम्नाताव्यलोकयत् ॥ स्वेनसर्वगतेनैवस्वप्रभेणातितेजसा ॥ ४४४ ॥

तत्रत्वंसूचितं ॥ ४४१ ॥ दधानाइति पुनःकीदृश्यस्ताआविद्यात्मिकाआपः अग्निविराडात्मकंवैदिकंवन्ह्यादिरूपंलौकिकंचबीजरूपेणगर्भंदधानाधारयंत्योजनयंत्यश्चेत्यर्थः ॥ ४४२ ॥ अग्नीति नकेवलमग्निरेवताभ्यउत्पन्नःकिंतुसर्वेषामाध्यात्मिकाधिदैविकदेवानांविधारकःप्राणोपिततस्तत्कार्यत्वादेवप्राणस्याद्भिर्विनाव्याकुलत्वमप्युपपद्यतेइत्यर्थः तथाचश्रुत्यंतरंआपोमयःप्राणइति ॥ ४४३ ॥ अष्टमार्थमाह एकएवेति योदेवःताउक्तलक्षणाअपःस्वयंप्रकाशचैतन्यलक्षणातिशयिततेजसाव्यलोकयत् नहीश्वरंविनानानासंस्कारसंभृतस्याव्याकृतस्यदर्शनेकस्यापिशक्तिरितिभावः ॥ ४४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वात्मकइति अहंतंप्रीणयितुंसपर्यांकुर्वाणस्तंदेवंहिरण्यगर्भरूपंशरणंगतोस्मीतिसंबंधः ॥ ४४५ ॥ ४४६ ॥ श्रौतस्यचित्पदस्यार्थमसा
दृश्येनवाङ्मनसागोचरत्वरूपंदर्शयन्नमस्यामभिनयति नमोस्त्विति यस्मैकस्मैचित्वक्तुमशक्याय ॥ ४४७ ॥ मह्यमिति स्पष्टं ॥ ४४८ ॥
उक्तस्तुतेःफलमाह एवमिति इदंवक्ष्यमाणरूपम् ॥ ४४९ ॥ एवंपाठ्यत्वेनोपन्यस्तमंत्राणांवैश्वानरहिरण्यगर्भतादात्म्येननारायणप्रतिपा
दकानामर्थउक्तोथसाक्षात्तत्प्रतिपादकस्यैषहीत्यादेरभिसंबभूवेत्यंतस्यमंत्रसमुदायस्यार्थमाह एषदेवइत्येकविंशतिश्लोकैः एषनाराय

सर्वात्मकश्चयोदेवोदेवानामधिदैवतम् ॥ हिरण्यगर्भंतमहंमुमुक्षुःशरणंगतः ॥ ४४५ ॥ कुर्वाणःसततंत
स्माएकस्मैहविरादिना ॥ सपर्यांपरमेशायब्रह्मणेऽव्यक्तजन्मने ॥ ४४६ ॥ नमोस्तुतेजसेतस्मैयस्मैकस्मैचि
दात्मने ॥ एकस्मैक्वापिसंस्थायसर्वगम्यायसर्वदा ॥ ४४७ ॥ मह्यंमुमुक्षवेब्रह्मज्ञानंयच्छतुकश्चन ॥ सर्वात्म
कोविहीनश्चधर्मैःसर्वैश्चिरंतनः ॥ ४४८ ॥ एवंहिस्तुवतोनित्यंतथैनंचनमस्यतः ॥ मुमुक्षोरात्मविज्ञानमि
दमेवप्रयच्छति ॥ ४४९ ॥ एषदेवःस्वयंज्योतिःप्रदिशोपिदिशस्तथा ॥ सर्वाःपूर्वंहियोजातोजगतःसूत्ररूप
भाक् ॥ ४५० ॥ ब्रह्मांडगोलकस्यापिगर्भएषव्यवस्थितः ॥ वधूनांचयथैवैषचतुर्विधशरीरभाक् ॥ जातो
जनिष्यमाणश्चसचैषपरिजायते ॥ ४५१ ॥ अंतर्मुखायमात्मानमीक्षंतेविश्वतोमुखम् ॥ सएषप्रतिभात्यात्मा
तस्यास्मिन्विश्वतोमुखः ॥ ४५२ ॥

णाभिधानोदेवःस्वयंप्रकाशःसर्वदिगादिरूपोयतोयमेवहिरण्यगर्भरूपेणजगतःस्थूलात्पूर्वमुत्पन्नइत्यर्थः ॥ ४५० ॥ ब्रह्मांडेति तथायमेव
ब्रह्मांडगर्भगतस्त्रैलोक्यशरीरोविराट्व्यष्टिरूपाण्यतीतानागतवर्त्तमानशरीरकाणिभूतानिचायमेवेत्यर्थः ॥ ४५१ ॥ एवमद्वयत्वेनोक्त
स्यप्रत्यक्त्वमाह अंतर्मुखाइति विश्वतःसर्वतोमुखंसांनिध्यंयस्यतथाभूतंयंप्रत्यग्दृष्टयःपश्यंतिसएषदेवएवास्मिन्नंतर्मुखीभावलक्षणेसमा
धौप्रतिभाति यतस्तस्यसमाहितस्यद्रष्टुरात्माभवतिविश्वतोमुखत्वात् अनात्मत्वेहिप्रत्यङ्मुखान्प्रतिसंमुखत्वाभावेनविश्वतोमुखत्वंनस्या
दितिभावः ॥ ४५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मत्वमेवस्फुटयति विश्वतश्चक्षुरादिरिति विश्वानिसर्वाणिचक्षुरादीनियस्यसतथा एवमग्रेपि सर्वभूतःसर्वस्यात्मा ॥ ४५३ ॥ तत्रहेतुतयाजगज्जन्मादिकारणत्वमाह बाहुभ्यामितिद्वाभ्यां श्रुतौसमुपसर्गेणव्यवहितेनयुक्तस्यनमधातोःसंयोजनमर्थः संपतत्रशब्देनपतनात्मकविनाशवाचकेनजन्मादिकमुपलक्षितं तथाचपुण्यपापाभ्यामधीनत्वेनबाहुभूताभ्यांवियदादिपंचभूतव्यापृताभ्यांजरायुजादिचतुर्विधशरीरात्मकंविश्वंजन्मस्थितिभंगेनसंयोजयतिअयंदेवः किंकुर्वन् द्यावापृथिव्यौऊर्ध्वाधोलोकौएकोऽसहायएवजनयन्सन्निति द्वयोरर्थः ॥ ४५४ ॥ ४५५ ॥ एतादृशंनारायणतत्त्वंपूर्ववेनाख्येनगंधर्वेणोक्तस्तुत्यादिभिःशुद्धचित्तेनविज्ञायवामदेववल्लोकानुग्रहेणप्रकटीकृतमि

विश्वतश्चक्षुरादिर्योविश्वतोवदनस्तथा॥ विश्वतःकरपादादिःसर्वभूतोयतःपुमान् ॥ ४५३॥ बाहुभ्यामिव पापाख्यपुण्याभ्यांभूतपंचकैः॥ सहिताभ्यामिदंविश्वंचतुर्विधशरीरभृत् ॥ ४५४ ॥ सृष्टिस्थितिविनाशेनसंयोजयतिनित्यशः॥ देवोयंजनयन्द्यावापृथिव्यावेकएवहि॥ ४५५ ॥ वेनोनामपुराकश्चिद्गंधर्वःशुद्धमानसः ॥ उक्तस्तुतिनमस्याद्यैर्दृष्ट्वाब्रह्मसनातनं ॥ प्रोवाचानुभवंस्वस्यलोकानुग्रहकारकः ॥ ४५६ ॥ यस्मिन् जगदिदंनित्यमेकस्मिन्नवतिष्ठते॥ नानालोकादिसंयुक्तंतथाकालत्रयेपिहि॥ यतउत्पद्यतेयत्रलीयतेचाखिलंतथा ॥ ४५७ ॥ ओतःप्रोतश्चलोकाख्यपटेसौसूत्ररूपभाक् ॥ जीवरूपश्चयोदेवःस्थिरजंगमरूपिणां ॥ ४५८॥ एतंसर्वशरीरेषुसंतंबुद्धिषुसंस्थितं॥ आनंदात्मानमद्वैतंमरणादिविवर्जितम् ॥ ४५९ ॥ पदानि त्रीणियस्यस्युरात्मनःपरमेष्ठिनः॥ बुद्धिस्थानिमनुष्याणांसर्वदैवचतुष्पदः॥ ४६० ॥

त्याह वेनइति श्रुतौवेनगंधर्वपदयोःप्रोपसर्गवचधात्वोश्चव्यवहितान्वयइतिबोध्यं ॥ ४५६ ॥ वेनानुभवमेवाभिनयति यस्मिन्नित्यादिना यस्मिन्नेकस्मिन्नानाविधैर्लोकदेवादिविशेषैर्युक्तंजगत्तिष्ठतितथायतउत्पद्यतेयत्रलीयतेचयश्चप्रपंचाख्यपटेसूत्रवदोतःप्रोतश्चसर्वशरीरेषुजीवरूपेणानुप्रविष्टश्चतमेतंदेवंसर्वांतरमद्वयानंदरूपंसाक्षात्करोमीतिशेषइतित्रयाणामर्थः ॥ ४५७ ॥ ४५८ ॥ ४५९ ॥ पदानीतिपादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवीतिस्तुत्यंतरात्ब्रह्मचतुष्पात् तत्रभूतानामेकपादत्वाभिधानंब्रह्मणोनंतत्वख्यापनायनतुपरिमाणबोधनायेतिभाष्येस्पष्टं तथाचतुष्पदःपादचतुष्टयवतोब्रह्मणःसर्वभूतलक्षणपादभिन्नास्त्रयःपादाबुद्धिगुहायांसाक्षिलक्षणेस्वरूपेस्थिताइत्यर्थः ॥ ४६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्तदिति तत्साक्षिरूपंपादत्रयंसदानंदरूपंसवितुःसूर्यमंडलांतस्थस्यनारायणस्यब्रह्मणःसंबंधियोधिकारीवेदसाक्षात्करोतिसविद्वानस्मा कंबंध्वादिरूपइतिद्वयोःसंबंधः तत्रएषइतिपदस्यपितेत्यर्थः विधाताब्रह्मा ॥ ४६१ ॥ ४६२ ॥ तत्रहेतुतयासर्वात्मभूतब्रह्मभावमाह यतइ ति यतोयंविद्वान्धामपदोक्तानितेजःस्थानानिसूर्यचंद्रादीनांभुवनानियदात्मभूतंब्रह्मैवेत्येवंजानातीत्यर्थः ॥ ४६३ ॥ एतद्ब्रह्मज्ञानाद्बह वोदेवादयःसिद्धिंप्राप्ताइत्याह यत्रेतिचतुर्भिः यत्रउक्तलक्षणेब्रह्मणिजातोयोयमहंब्रह्मेत्याकारकोबोधस्तेनाश्रितेसतिबहवोदेवामोक्षं साक्षात्प्रापुर्वंति कीदृशेयत्रब्रह्मणि स्थूलसूक्ष्मकारणलक्षणोपाधीनांमध्येतृतीयस्याव्याकृतस्येशानेऽधिपतौ अतएवस्वरूपेणशुद्धेइत्य

यस्तत्पादत्रयंवेदस्वप्रकाशंगतद्वयं ॥ सदनंतंसदैवास्यसवितुर्ब्रह्मरूपिणः ॥ ४६१ ॥ सनोबंधुस्तथैवैषजननी चात्मरूपवान् ॥ विधाताचसएवस्यात्ततोन्योनैवकश्चन ॥ ४६२ ॥ यतःसर्वाणिधामानितेजःस्थानानिसर्व तः ॥ भुवनानिसदैवायंब्रह्मेत्येवावगच्छति ॥ ४६३ ॥ यत्रवन्ध्यादयोदेवामरणादिविवर्जितं ॥ प्राप्नुवंतिस दामोक्षमहंब्रह्मेतिबोधतः ॥ तृतीयस्यात्मनीशानेविश्वमायाविवर्जिते ॥ ४६४ ॥ स्थानानीहसतेजांसिप्रेर यंतोजनेष्वपि ॥ भक्तेषुवरदानाद्यैःसर्वदाभक्तवत्सलाः ॥ ४६५ ॥ द्यावापृथिव्योःपरितोयंतिसद्यउपर्यधः ॥ लोकानपिदिशस्तद्वत्स्वर्गाद्यागोलकांतरे ॥ ४६६ ॥ अवश्यंभाविनःकर्मकार्पासस्यफलात्मनः ॥ तंतुंसूत्रा त्मरूपंतंविसृज्येहजगत्पटे ॥ ४६७ ॥

र्थः ॥ ४६४ ॥ नकेवलंमोक्षमेवप्राप्ताःकिंतुब्रह्मवद्भक्तेषुवरदानादिसामर्थ्यमपीत्याह स्थानानीति कीदृशास्तेदेवाः सतेजांसितेजोवं तिस्थानानिभुवनानिभक्तजनेषुप्रेरयंतःप्रयच्छंतः अनुग्रहादित्यर्थः ॥ ४६५ ॥ तेषांसर्वलोकेषुकामचारोपिभवतीत्याह द्यावेति परित इत्यस्यविवरणंउपर्यधोमध्यानीति तथाचआकाशपृथिव्योःसर्वतोवर्त्तमानान्लोकान्यंतियथेच्छमटंतिचतेदेवाब्रह्मविदइत्यर्थः ॥ ४६६ सूत्रात्मदृष्टिस्तत्साक्षात्कारेद्वारमित्याह अवश्यमितिद्वाभ्यां अवश्यंभाविफलकत्वेनकृतपदोक्तयागादिकर्मकार्पासवृक्षस्थानीयंतज्जन्य मपूर्वंकार्पासफलस्थानीयंअपूर्वारब्धानिस्थूलसूक्ष्मभूतानितंतुस्थानीयानितच्छरीरईश्वरोपितंतुस्थानीयस्तंजगद्रूपेपटेविसृज्यसंसृज्यप थित्वाऽनुगतंबुद्ध्वेतियावत् श्रुतौचृतधातोर्ग्रथनार्थस्यप्रयोगः ॥ ४६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनेति तेनेश्वरेणसूत्रवदनुगततयादृष्टेनोपलक्षितंनिजंवपुरखंडंतत्त्वमपश्यंसाक्षात्कृतवानस्मीत्यर्थः तत्रहेतुतयासूत्रात्मस्वरूपस्य विचार्यमाणस्यनैर्गुण्येनावस्थानमाह सूत्रात्मतामिति तत्रजातस्रष्टृसूत्रात्मनःस्वरूपम् ॥ ४६८ ॥ नकेवलंमयैवेत्थंविचारेणब्रह्मात्मत्वंलब्धंकिंतुहिरण्यगर्भेणापीत्याह परीत्येतिद्वाभ्यां स्वर्गादीन्लोकान्जरायुजादीनिभूतानिपंचाकाशादीनिवापूर्वाद्यादिशःप्रदिशश्चपरीत्याभिव्याप्यउत्कृष्टकर्मोपासनाबलेनतत्स्वामित्वंलब्ध्वेतियावत् तथाप्यपरितुष्टःप्रजापतिर्हिरण्यगर्भःशुभकर्मणांफलमयशरीरोयदात्मानमालोचितवांस्तदैवस्वयंप्रकाशंब्रह्मानंदंप्राप्तइतिद्वयोरर्थः तथाचप्रत्यग्विचारएवात्मलाभहेतुर्नबाह्यैश्वर्यमितिभावः ॥ ४६९ ॥ ४७० ॥

तेनसूत्रात्मरूपेणतदपश्यंनिजंवपुः ॥ सूत्रात्मतांपरित्यज्यतदभूद्ब्रह्मनिर्गुणं ॥४६८॥ परीत्यलोकान्नाकाद्यान् भूतान्यपितथैवसः ॥ चतुर्विधानिपंचापिप्रदिशोपिदिशस्तथा ॥ ४६९ ॥ प्रजापतिःप्रथमजःफलंयःकर्मणामिह ॥ आत्मनात्मानमालोच्यत्वात्मैवाभूत्स्वयंप्रभः ॥ ४७० ॥ सदसस्पतिमित्यादिमंत्रैर्नानाविधैरपि ॥ प्रतिपाद्योमहेशोयोजडाजडवपुःस्थितः ॥ ४७१ ॥ स्वयंप्रकाशविज्ञानादानंदात्मस्वरूपिणः ॥ ऋतंसत्यं तथायस्माद्उत्पन्नेकर्मणःफले ॥ ४७२ ॥ मानसस्यतुपूर्वस्यादुत्तरंकायजस्यहि ॥ ऋतंसत्यंचचंद्रार्काविति केचनपंडिताः ॥ ४७३ ॥

सदसस्पतिमद्भुतमित्यादिमंत्राणांइमंमेगंगेइत्यादिमंत्राणांतात्पर्यार्थमाह सदसस्पतिमिति सर्वेवेदायत्पदमामनंतीतिश्रुतेःसदसस्पतिमित्यादिभिर्मंत्रैरग्न्यादिसंज्ञजडाजडदेवशरीरोपहितोयःपरमात्माप्रतिपाद्यतेतद्रूपएवविद्वान्भवतीतिपूर्वेणसंबंधः ॥ ४७१ ॥ अघमर्षणमंत्रस्यार्थमाह स्वयमिति षड्भिः स्वयंप्रकाशविज्ञानरूपेणसर्वतइद्धाद्दीप्तादद्वयत्वेनानंदरूपाद्यस्मात्परमात्मनऋतसत्याख्येकर्मफलेजातेतद्भावंमुक्तोगच्छतीतिपूर्ववत्संबंधः ॥ ४७२ ॥ ऋतसत्यपदयोरर्थमाह मानसस्येति मानसस्यसत्कर्मणःफलंपूर्वंऋतपदोक्तंकायजस्यशारीरस्यसत्कर्मणःफलंतुउत्तरंसत्यपदोक्तमित्यर्थः केचनऋतसत्यपदवाच्यौचंद्रार्कावित्याहुस्तत्रवक्ष्यमाणेनपुनरुक्तिरेवास्वरसः ॥ ४७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसृष्टिकालेकृतादिसंज्ञकर्मफलानामुदयाभिमुख्येसतिरात्रिपदोक्तोंधकारःसमुद्रपदोक्तान्यप्रधानानिसूक्ष्मभूतानिचोत्पन्नानीत्याह
अजायतेति तदनंतरंभ्रमणेनदिवारजन्योर्विधायकोयोयमादित्यस्तद्रूपःसंवत्सराख्यःकालोजातइत्याह संवत्सरइति ॥ ४७४ ॥ स्वतं
त्रइति स्वतंत्रःसर्वस्यव्यापारवतोजगतोवशेस्थापयितापरमेश्वरोजीवघनसंज्ञहिरण्यगर्भोभूत्वाविश्वंसृजन्पूर्वसृष्टेर्विलक्षणंनकुरुतेइत्य
र्थः ॥ ४७५ ॥ चतुर्विधानीति भूतानिप्राणि शरीराणिमहाभूतानितदुपादानानिस्थूलभूतानि एतैर्भूतादिभिःसहसूर्यादिकंयथापूर्वंपूर्वक
ल्पीयसमानंधाताहिरण्यगर्भःअकल्पयदितिद्वयोर्योजना दिवंस्वर्गादूर्ध्वलोकंभागणोदीप्तीनांगणस्तत्सहितंस्वर्गमित्यर्थः ॥४७६॥४७७॥

अजायतततोरात्रिःसमुद्रोविविधस्तथा॥ संवत्सरस्ततोजातःकालोयंभास्करात्मकः ॥ अहश्चैवतथारात्रिं
कुरुतेयश्चरन्सदा ॥ ४७४ ॥ स्वतंत्रःपरमेशानोयोजीवघनईर्यते ॥ इदंसर्वंजगत्स्रष्टासृजन्नपिविलक्षणं॥
पूर्वसृष्टेर्नकुरुतेकल्पेकल्पेजगत्प्रभुः ॥ ४७५ ॥ चतुर्विधानिभूतानिमहाभूतानिपंचच ॥ एकादशेंद्रियाणी
हपंचप्राणादयोपिच ॥ एतैःसर्वैःसमंदेवोभगवान्भूतभावनः ॥ ४७६ ॥ सूर्याचंद्रमसौधातायथापूर्वमक
ल्पयत् ॥ दिवंचपृथिवींतद्वदंतरिक्षंसभागणं ॥ ४७७॥ यःपृथिव्यांपुमानेषवरुणःपापनाशनः ॥ पुरुषेणा
मुनासोपिसंसृष्टःपूर्ववत्प्रभुः ॥ ४७८ ॥ भूतानांमध्यसंस्थोयंविश्वकृद्भगवान्प्रभुः ॥ गोप्ताभुवनजातस्यस्थि
तिकालेसमागते॥ ४७९ ॥ एषपुण्यकृतांलोकान्प्रयच्छतिसुखात्मकान् ॥ एषमृत्योर्भयंनित्यमानंदात्मास्व
यंप्रभः॥ ४८० ॥

यत्पृथिव्यामित्यादेरघमर्षणइत्यंतस्यतात्पर्यार्थमाह यःपृथिव्यामिति योयंवरुणोदेवःसकलजलमयशरीरःपापस्यरजःपदोक्तस्यना
शकत्वेनपृथिव्यांप्रसिद्धःसोप्यमुनासर्वात्मत्वसर्वस्रष्टृत्वादिभिर्धर्मैरुपलक्षितेनपुरुषेणपरमेश्वरेणसंसृष्टःसंबद्धएवपूर्ववत्पूर्वोक्तहिरण्यगर्भ
वत्प्रभुःस्वव्यापारेशक्तः तथाचोक्तंगीतासु ईश्वरःसर्वभूतानामित्यादीत्यर्थः ॥ ४७८ ॥ एषइत्यादेःसंशिशाधीत्यंतस्यार्थमाह भूतानामि
ति अयंपरमेश्वरःसर्वलोकानांमध्येस्थितःसृष्टिकालेरक्षकः ॥ ४७९ ॥ एषपुण्यकृतामिति अयमेवचसुकृतिनांसत्फलप्रापकःपापि
नांतद्गोचरकस्यमृत्योश्चभयंप्रयच्छतीत्यनुषंगः कीदृशः विदुषांस्वयंप्रकाशानंदरूपइत्यर्थः श्रुतौहिरण्मयपदेनस्वयंप्रकाशत्वं संशिशाधी
तिपदेनभयप्रदत्वमुक्तमितिभावः ॥ ४८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यावेति तदुपर्यधस्तस्य भुवनजातस्य उपरि अधश्च स्थितयोर्द्यावापृथिव्योस्तथा स्वर्गस्य स्वात्मनि अंतःसंश्रितं विधारणप्रयोजकत्वेन स्थितं भयं तद्देष एव प्रयच्छतीति संबंधः ॥४८१॥ आर्द्रमित्यादेः स्वाहेत्यंतस्यार्थमाह सचेति स एव देवः स्वर्गादिप्रदत्वेनोक्तो योऽप्सु आर्द्रपदोदितासु वन्हौ ज्वलत्पदोदिते च तादात्म्येन स्थितश्चिद्रूप इत्यर्थः ॥४८२॥ ब्रह्मेति तच्चिज्ज्योतिर्ब्रह्मणोऽद्वयस्य स्वरूपभूतमहंपदलक्ष्यं सर्वांतरं वस्तु भवति यतोऽहंपदार्थस्यास्माद्ब्रह्मपदार्थात्पृथक्त्वं न संभवति पृथक्त्वे हि उभयोः स्वरूपहान्यापत्तिः ततो ब्रह्मैवेत्यादि व्यतिहारः सिद्ध इत्यर्थः ॥४८३॥ मज्ज्ञानादिति उक्तरूपेण मत्स्वरूपविज्ञानेन मूलाज्ञानपंचक्लेशकर्मवासनारूपाद्बंधान्मुच्यते तत्र हेतुतया संसारभ्रमणयोग्यचिदाभासदाह

द्यावापृथिव्योश्च सदा स्थितयोस्तदुपर्यधः ॥ स्वर्गस्यापि तथैवायं भयं स्वात्मनि संश्रितं ॥ ४८१ ॥ सच स्वर्गं तथा मोक्षं प्राणिनां संप्रयच्छति ॥ योऽप्सु वन्हौ च भगवानास्तेऽन्यत्र च चिद्वपुः ॥ ४८२ ॥ ब्रह्मरूपं तदेवाहमहमस्मात्पृथक् न च ॥ ब्रह्मैव तत एवाहमहं ब्रह्मेति वा पुनः ॥ ४८३ ॥ मज्ज्ञानान्मुच्यते मायाक्लेशकर्माशयात्पुमान् ॥ अहमात्माग्निरूपेऽस्मिन् जुहोम्यात्मानमेव हि ॥ ४८४ ॥ इत्यादिमंत्रजानर्थान् विचार्य सततं पुमान् ॥ कृत्वा कर्म जपित्वा च मंत्रान्कांश्चिदिहस्थितान् ॥ ४८५ ॥ यदाति कीर्तिमान् लोके जायते पुण्यकर्मणा ॥ तदा ब्रह्मपरं गच्छेत्पुरुषः शुद्धमानसः ॥ ४८६ ॥ चंपकादेस्तरोर्यद्वत्पुष्पितस्य दिशो दश ॥ वायुर्वाति सुगंधो यं प्राणिनां सुखकारकः ॥ ४८७ ॥ पुण्यात्मनस्तथा कीर्तिः प्रधावति दिशो दश ॥ आनंदयति सततं धीमतोऽत्र बहुश्रुतान् ॥ ४८८ ॥

माह अहमिति आत्मैव चरमवृत्तिसमिदारूढोऽग्निः सविलासाज्ञानदाहकत्वात् तद्रूपेऽस्मिन् ब्रह्मण्यात्मानं चिदाभासं प्रक्षिपामीत्यर्थः ॥ ४८४ ॥ अकार्येत्यादिमंत्रमारभ्यैतत्तप इति मंत्रपर्यंतस्य ग्रंथस्य तात्पर्यं दर्शयति इत्यादीति इतिपदेन व्याख्यातपरिग्रहः आदिपदेनाकार्येत्यादीनां मंत्राणां ग्रहः तथा चैतेषु मंत्रेषु केषांचिदर्थान् विचार्य तैर्ब्राह्मणोक्तं कर्म कृत्वा कांश्चित्तु यश्छंदसामित्यादीन्केवलं जपित्वा यदा कीर्तिमान् प्रशंसायोग्यो भवति तदा ज्ञानाधिकारी भवतीति द्वयोः संबंधः ॥ ४८५ ॥ ४८६ ॥ यथावृक्षस्येत्यादिमंत्रस्यार्थमाह चंपकादेरिति पंचभिः यथा चंपकादिवृक्षस्य पुष्पितस्य सुगंधविशिष्टो वायुर्जनान्मोदयति तथा पुण्यात्मनः कीर्तिः साधुजनानिति द्वयोरर्थः ॥ ४८७ ॥ ॥ ४८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुण्यात्मनोलक्षणमाह पुण्यात्मेति यःपापादेवभयंप्राप्नोतिनचमरणान्नवादारादिवियोगात् मरणादिप्रसंगेपियःपापंनाचरतीतियावत् सपुण्यात्मेत्युच्यतेइत्यर्थः ॥ ४८९ ॥ विवेकिनःपापभयहेतुभूतंपरमेश्वरभयमाह असिधाराइति यदितीक्ष्णाःखड्गधारागर्तस्योपरिप्रसारिताःस्युस्तासामतिक्रमादुल्लंघनात् कीदृशात् वाहनरहितावंबुजवत्कोमलौपादौयत्रतथाभूतात् यादृशंभयंभवति अस्यविदुषस्तादृशंभयं
॥३५॥ महात्मनपरमेश्वराद्भवतियेनपापाद्बिभेतीत्यर्थः श्रुतौगुपधातोःसनिच्छायां त्रातुमिच्छेदितितदर्थः व्हेञ्धातुःक्रोशनार्थइतिचबोध्यम् ॥ ४९० ॥ अस्यमंत्रस्यईश्वरस्वरूपेपर्यवसानप्रकारमभिनयति यद्भयमिति यत्तत्त्वंविदुषःपापनिवृत्तिप्रयोजकभयरूपमुक्तंतेन

पुण्यात्मासहिविज्ञेयःपाप्मनोयःसदाभयं॥ प्राप्नोतिमरणान्नैवनचदारादिदुःखतः ॥ ४८९ ॥ असिधाराःसुसंतीक्ष्णागर्त्तस्योपरिसंस्तृताः ॥ अतिक्रमाद्यथातासांयत्रशून्यपदांबुजात् ॥ भयंभवतितादृक्स्याद्भयमस्यमहात्मनः ॥ ४९० ॥ यद्भयंविदुषःप्रोक्तंयच्चतेनात्मरूपतः ॥ गम्यतेसोयमेवस्यांदानंदात्मामहेश्वरः ॥ ४९१ ॥ अणीयानप्यणोस्तद्वन्महीयान्महतोपिच॥ आत्मास्यजंतोर्निहितोबुद्धौहृदयसद्मनि ॥ ४९२ ॥ असंकल्पंतमात्मानंस्वस्थचित्तोगुरोःसदा॥ प्रसादाद्वीतशोकःसन्पश्यत्यात्मतयापुमान्॥ ४९३ ॥ सर्वस्यजगतोयोयंमहिमासर्वदेश्वरः ॥ ईश्वरादितएवेमेसप्तलोकशरीरगाः ॥ जायंतेप्राणिनांप्राणास्तथासप्तापिवन्हयः॥ ४९४ ॥

विदुषात्मरूपतयालभ्यमानंचतद्रूपोऽयमेवनारायणाख्यईश्वरोभवतीत्यर्थः ॥ ४९१ ॥ अणोरित्यादिमंत्रस्यार्थमाह अणीयानितिद्वाभ्यां अतिसूक्ष्मोऽतिमहांश्चात्मासर्वबुद्धिसाक्षितयास्थितोस्तितमसंकल्पंनिर्विकल्परूपंविद्याधायकत्वेनधातृपदोक्तस्यगुरोरनुग्रहेणपश्यतीतिद्वयोःसंबंधः ॥ ४९२ ॥ ४९३ ॥ तस्यात्मनोऽद्वयत्वस्फुटीकरणायविश्वकारणत्वंप्रतिपादयतःसप्तप्राणाइत्यादेरंतरालेत्यंतस्यार्थमाह सर्वस्येतिसप्तभिः महिमेतियोवैभूमेत्यादिश्रुतौभूमशब्दइवभवितृप्रधानोनिर्देशः तथाचसर्वदःसर्वप्रदोयोयंसर्वस्यजगतईश्वरःसमहिमामहानद्वितीयइतियावत् यतइतोस्मादेवसप्तलोकवर्तिशरीरावच्छिन्नत्वेनसप्तसंख्याकाःप्राणा जातास्तथार्चिःपदोक्ताःसप्तवन्हयोजाताइत्यर्थः ॥ ४९४ ॥ ॥३५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तवन्हीन्गणयति भौमइति भौमःकाष्ठादिस्थितोग्निःप्रथमः जाठरोद्वितीयः सूर्यसोमविद्युद्वाडवाश्चत्वारइतिषट् चक्षुरिंद्रियरूपःसप्तमः इत्येवंतेवन्हयःसप्तेत्यर्थः ॥ ४९५॥ सप्तसमिधःसप्तलोकाश्चततोजाताइत्याह आदित्याद्याइति द्युपर्जन्यपृथिवीपुरुषयोषिद्रूपाणां पंचानामग्नीनांक्रमेणआदित्यवायुसंवत्सरवागुपस्थरूपाःपंचसमिधश्छांदोग्येप्रसिद्धाः श्रौतीश्रौतेषुआहवनीयाद्यग्निषुनिधीयमानकाष्ठरूपाषष्ठीस्मार्त्तीस्मृतिप्रसिद्धावसथ्याग्निसंबन्धिनीसप्तमी स्फुटमन्यत् ॥ ४९६ ॥ मुंडकप्रसिद्धाग्नेःसप्तजिव्हाअपिततोजाताइत्याह का

भौमोयंविविधस्त्वेकोद्वितीयोजाठरस्तथा॥ सूर्यःसोमस्तथाविद्युद्वाडवश्चक्षुरत्रते॥ ४९५॥ आदित्याद्याश्च समिधःपंचाग्नौपंचकीर्तिताः॥ श्रौतीस्मार्त्तीचसप्तैताःसमिधोपिततोभवन्॥ भूराद्याःसप्तयेलोकास्तेप्यस्माद्दात्मनोभवन् ॥ ४९६ ॥ कालीचैवकरालीचतृतीयास्यान्मनोजवा ॥ सुलोहितातथैवान्याधूम्रवर्णाचपंचमी॥ स्फुलिंगिनीविश्वरूपीसप्तजिह्वास्ततोभवन्॥ ४९७॥ लोकायेब्रह्मणोजाताःसप्तसप्तमरुद्गणाः ॥ चरंतितेषुसततंबाह्याःप्राणाःशरीरिणां ॥ ४९८ ॥ अतःसमुद्राःसंजाताःसर्वेपिगिरयस्तथा ॥ नद्योनानाविधास्तद्वत्स्यंदंतेयादिशोदश ॥ ४९९ ॥ अतोरसास्त्वयंभासओषध्योभूमिसंश्रयाः ॥ जायंतेयेनदेहेषुजीवस्त्वेषोवतिष्ठते ॥ ५०० ॥

लीति काल्यादीनिविश्वरूप्यंतान्यग्निजिव्हानांनामानीति ॥ ४९७ ॥ लोकाइति येभूरादयोलोकाब्रह्मणोजाताउक्तास्तेषुविचरंतःसप्तसप्तएकोनपंचाशत्संख्याकामरुतोपिब्रह्मणोजाताइत्यनुषंगः कीदृशामरुतः सर्वेषांबाह्यप्राणरूपाः ॥ ४९८ ॥ अतइति अतउक्तरूपादीश्वरादेवसमुद्रादयोजाताइति ॥ ४९९ ॥ अतोरसादिति तथाऽतएवेश्वरादंकुरादिपरिणामहेतुरसरूपेणावस्थितादोषध्योयवव्रीह्यादयोजायंते नकेवलंरसरूपईश्वरओषधयुत्पत्तिहेतुःकिंतुजीवनस्यापीत्याह येनेति येनरसरूपेश्वरेणदेहाजीवंतइतिव्यवह्रियंतेतेष्वेष जीवात्मातिष्ठतिचेत्यर्थः ॥ ५०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मादेवानामित्यादिमंत्रत्रयस्यार्थंसूचयति ब्रह्मादयोहीति यस्यपरमेश्वरस्यब्रह्माहिरण्यगर्भस्तत्प्रभृतयोदेवादीनांमध्येमुख्याविभूतयइ तिसंबंधः श्रुतौपदवीपदेनपदंत्राणंमृतसंजीविनीविद्यारूपंवेतिजानातीतिव्युत्पत्त्याशुक्रउक्तःस्वधितिपदेनधनदानंवनपदेनवशीकरणसा धनमुक्तंरेभन्निितिपदस्यस्तूयमानइत्यर्थइतिभावः निरुक्तेविभूतिपक्षंत्यक्त्वाप्रकारांतरेणास्यमंत्रस्यव्याख्यानंततएवावगंतव्यं तथायमीश्व रंअजामित्यादिकेमंत्रेऽष्टमाध्यायेव्याख्यातेहंसइत्यादिकेपूर्वाध्यायेव्याख्यातेप्रतिपादितंबुधाजानंतीत्यर्थः ॥५०१॥ घृतमित्यादीनांपंच मंत्राणांतात्पर्यार्थमाह घृतमित्यादीति यंदेवंघृतमित्यादिमंत्रेषुप्रतिपादितंकर्मणिघृताद्यंगरूपेणयज्ञरूपेणचसंबद्धंवदंतीतियोजना तत्रच

ब्रह्मादयोहियस्यस्युःपुरुषस्यविभूतयः ॥ मुख्याहियमजामंत्रेहंसमंत्रेचजानते ॥ ५०१ ॥ घृतमित्यादिमंत्रे षुयंकर्मण्यपिसंगतं ॥ वदंतिकवयोनित्यमानंदात्मानमीश्वरम् ॥ ५०२ ॥ देवानांप्रथमोयश्चपुरस्तात्सर्वदे हिनां ॥ वर्तमानोहृदिस्थित्वाधियःसर्वाःप्रपश्यति ॥ ५०३ ॥ हिरण्यगर्भमुत्पाद्यभगवान्भूतभावनः ॥ संयो जयतुनःसर्वानात्मनःशुभयाधिया ॥ ५०४ ॥ एवंसंप्रार्थ्यमानोयंभगवानधिकारिभिः ॥ आत्मानंदर्शयत्वे नंतान्प्रतिप्रतिवर्जितं ॥ ५०५ ॥ यस्मात्परःपरोनास्तिकश्चिज्ज्यायानणुश्चवा ॥ निश्चलोवृक्षसदृशःस्वप्रका शोदिविस्थितः ॥ एकस्तेनेदमखिलंपूर्णंपुरुषरूपिणा ॥ ५०६ ॥

त्वारीत्यादिर्मंत्रोयज्ञपरइतिबोध्यमिति ॥ ५०२ ॥ योदेवानामित्यादेःपरमःस्वराडित्यंतस्यमंत्रग्रंथस्यानुक्रमेणार्थमाह देवानांप्रथमइत्या दिद्व्यूनषष्टिश्लोकैः तथायोनारायणाख्योदेवानांप्रथमआदौपूज्यःपुरस्तात्पूर्ववर्त्तमानत्वात् यश्चसर्वदेहिनांहृदिस्थित्वासर्वाश्चित्तवृत्तीःप श्यति यश्चरुद्ररूपःसर्वऋषीणांगुरुर्ब्रह्माणंहिरण्यगर्भंजायमानमनुग्रहदृष्ट्यासर्वज्ञंकरोतिसोस्मान्शुभयाधियायुक्तान्करोत्वितिद्वयोरर्थः ॥ ५०३ ॥ ५०४ ॥ एवमिति एवमित्थंव्याख्यातमंत्रेणाधिकारिभिःस्तूयमानःसंस्तानधिकारिणःप्रतिएनमुत्तरश्लोकप्रतिपाद्यमात्मा नमात्मनःस्वरूपंदर्शयति कीदृशंस्वरूपं प्रतिवर्जितंतुल्यहीनमित्यर्थःप्रतिः सादृश्येइत्युपसर्गसूत्रेषूक्तं ॥ ५०५ ॥ सादृश्यहीनंरूपम भिनयति यस्मादिति परोभिन्नः परोधिकः वृक्षःस्थाणुस्तद्वन्निश्चलः दिविस्वप्रकाशस्वरूपे स्फुटमन्यत् ॥ ५०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्प्राप्तिहेतुश्चसर्वदृश्यत्यागएवेत्याह नकर्मणेति नृभिरधिकारिभिः ॥ ५०७ ॥ त्यागस्यनारायणलाभहेतुत्वसाधकावन्वयव्यतिरेकौदर्शयति पुरुषइतिद्वाभ्यां अयंनारायणाख्यःपुरुषोमोक्षसंज्ञकामृतत्वरूपोभवतितमेनंकेचिद्भाग्यवंतस्त्यागेनैवात्मरूपतःआत्मत्वेनप्राप्ताइतिसंबंधः ॥ ५०८ ॥ नकेवलंपूर्वेएवप्राप्ताःकिंत्विदानीमपितंज्ञानसमकालंयतयःप्राप्नुवंतीत्याह स्वर्गादिति स्वर्गान्नाकपदोक्तात्परमुत्कृष्टंबुद्धिगुहायांस्थितमानंदरूपमीश्वरंयतयस्त्यागिनोगुरुवाक्यदर्शितंविशंति येतुदेहादौतादात्म्याभिमानेनाभेददृष्टिरहितास्त्यागहीनाइतियावत् तेनविशंतीत्यर्थः ॥ ५०९ ॥ ननुकेषांचिद्यतीनामपीहब्रह्मसाक्षात्कारोनभवतीतिव्यभिचारेणत्यागस्यकथंहेतुत्वमितिचेन्न प्रतिबंधविशेषेणविलंबेपिब्रह्मलोकेतेषामवश्यंतल्लाभादित्याह वेदांतेति वेदांतवाक्येभ्योजातेनात्मविचारेणनिश्चितौतत्त्वंपदार्थौयैस्तेतथासंन्यासे

नकर्मणानप्रजयानधनेनकदाचन ॥ नारायणःपुमानेषलभ्यस्त्यागंविनानृभिः ॥ ५०७ ॥ पुरुषोमोक्षनामायमसृततत्त्वंप्रकीर्तितः ॥ त्यागेनैनंपुराकेचित्प्राप्ताआत्मस्वरूपतः ॥ वर्णिनांहिसहस्रेषुभाग्यवंतोनरोत्तमाः ॥ ५०८ ॥ स्वर्गादपिसमुत्कृष्टमानंदात्मानमीश्वरं ॥ स्वप्रकाशंसमायांतियतयोगुरुवाक्यतः ॥ नहितंस्वात्मनोबुद्धौतादात्म्याभेदवर्जिताः ॥ ५०९ ॥ वेदांतजात्मविज्ञानसुनिश्चितपदार्थकाः ॥ संन्यासयोगतःशुद्धचित्ताःशांत्यादिसंयुताः ॥ यतयोयत्रजीवंतःसाक्षान्नैवविजानते ॥ ५१० ॥ तेमृत्वाब्रह्मणोलोकेगत्वाब्रह्मसमाःसदा ॥ आत्मविज्ञानसंपन्नाःसंस्थिताःपरमामृते ॥ ५११ ॥ ब्रह्मणोदेहपातेथब्रह्मणास्वात्मनासह ॥ अमृताज्जीवआनंदादानंदात्मानमात्मना ॥ गत्वामायादिनिर्मुक्तामुच्यंतेसर्वएवते ॥ ५१२ ॥

नयोगेनचित्तवृत्तिनिरोधेनचशुद्धधियःशमादिसंपन्नत्वादेवंविधायेयतयःप्रतिबंधविशेषादिहजीवनावस्थायांयदिसाक्षात्कारंनलभंतेतथापितेब्रह्मलोकेगत्वाब्रह्मणाहिरण्यगर्भेणसाम्यंगताःसंतःपरमेऽमृतेमोक्षसाधनेज्ञानेस्थितास्तत्पराभवंतीतिद्वयोरर्थः ॥ ५१० ॥ ५११ ॥ ब्रह्मणइति ब्रह्मणोहिरण्यगर्भस्यपरपदोक्तस्यदेहांतकालेब्रह्मणाहिरण्यगर्भेणस्वात्मनाआत्मतयोपासितेनसहतेसर्वेमुच्यंते तत्रहेतुतयामहावाक्यार्थसाक्षात्कारंपरामृतपदोक्तमभिनयति अमृतादित्यादिनाविशेषणेन जीवस्वरूपेऽनुगतोयआनंदःसर्वांतरतयावस्थितःश्रुतावमृतपदोक्तस्तमादायानंदरूपंतत्पदार्थमात्मनाऐक्येनगत्वामायादिसकलबंधहीनाभवन्तीत्यर्थः ॥ ५१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतच्छ्रुत्वात्रजन्मनिसाक्षात्कारार्थंयत्नशैथिल्यंनकार्यंयतस्तत्रब्रह्मगत्वाप्ययमेवसाक्षात्कारोपायइत्यर्थपरतयादह्नमित्यादिमंत्रंयोजय ति अत्यल्पइतिचतुर्भिः यदिदंशरीररूपमेकादशद्वारंपुरंविश्वकर्मणेश्वरेणनिर्मितंतत्रयद्धृदयकमलमत्यल्पमङ्गुष्ठपरिमाणत्वात्तदात्मरूप स्यब्रह्मणोवेश्मभूतंतस्मिन्हृदाकाशसंज्ञःअणोरणीयानतिसूक्ष्मःपरमेश्वरोवर्ततेतंसाक्षात्कृत्यैवयतीनांमोक्षइतित्रयाणांसंबंधः ॥ ५१३ ॥ ॥ ५१४ ॥ ५१५ ॥ फलितमाह अत्रवापीति अत्रास्मिँल्लोकेतत्रब्रह्मलोकेवाआत्मज्ञानादेवमोक्षइतियदासिद्धंतर्हिहेयतयःअत्रैवसआ त्माज्ञेयः बह्वंतरायकब्रह्मलोकाशयानशैथिल्यंयुक्तमित्यर्थः ॥ ५१६ ॥ आत्मसाक्षात्कारायप्रणवालंबनंयोगंविदधतंमंत्रंपठति योवेदा

अत्यल्पेहृदयांभोजेस्वांगुष्ठेनसमेसदा ॥ विपापेपरमेवेश्मभूतेस्वात्मस्वरूपिणः ॥५१३॥ पुरएकादशद्वारेवि
हितेविश्वकर्मणा ॥ अणोरणीयांस्तस्यांतर्वर्ततेयःपुमान्परः ॥ ५१४ ॥ आनंदात्माहृदाकाशःस्वप्रभोदुःख
वर्जितः ॥ साक्षात्कृत्यैवतंतत्रब्रह्मलोकेयथाभुवि ॥ यतयःपरिमुच्यंतेनान्यथातेपिकर्हिचित् ॥ ५१५ ॥ अ
त्रवापिचतत्रायंसज्ञेयोयतयःसदा ॥ अत्रैवचततोज्ञेयःस्वात्मनःक्षेममिच्छता ॥ ५१६ ॥ योवेदादौस्वरः
प्रोक्तोवेदांतेचप्रतिष्ठितः ॥ तस्यप्रकृतिलीनस्ययःपरःसमहेश्वरः ॥ ५१७ ॥ स्वस्मिन्रमयतिस्वस्यजयशी
लान्महात्मनः ॥ ओंकारःस्वरएतस्मादुच्यतेवेदवादिभिः ॥ ५१८ ॥ निश्चलंनभवेच्चित्तंयदात्मश्रवणेनृणां ॥
ओंकारेणसदातेषामात्मज्ञानंश्रुतिर्जगौ ॥ ५१९ ॥ उच्चारितोयमोंकारःकारणेयत्रलीयते ॥ तस्मात्परंचिंतय
तआत्मज्ञानंविजायते ॥ ५२० ॥

दाविति ॥ ५१७ ॥ अस्यार्थमाह स्वस्मिन्निति त्रिभिः स्वस्मिन्नात्मतत्त्वेजयपरान्रमयतिक्रीडयतीतिव्युत्पत्त्यास्वरपदेनप्रणवउक्तइत्य र्थः ॥ ५१८ ॥ यस्यमहावाक्यश्रवणमात्रेणात्मसाक्षात्कारोनभवतितस्यप्रणवालंबनेनसभवतीत्यस्मिन्नर्थेश्रुतिजातंमानमित्याह निश्च लमिति श्रुतिस्तत्समूहः ॥ ५१९ ॥ प्रणवालंबनंध्यानमभिनयति उच्चारितइति अयंवेदस्याद्यन्तयोःपाठ्यःप्रणवउच्चारितःसन्लयाव स्थायांयत्रकारणेपराख्येलीयतेतस्मात्परंचिद्रूपंशुद्धंचिंतयतोध्यायतःस्वरूपसाक्षात्कारोभवतीत्यर्थः ॥ ५२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहस्रेत्यादियंथार्थमाह अणोरित्यादिना योयंसर्वहृदयेसन्निहितःपुरुषःअणोरणीयानित्युक्तःसमहतोपिमहीयान्बोध्यः यतःसहस्रमसंख्यातानिमस्तकानियस्यसतथाभूतःतत्रहेतुः सर्वेत्यादिः सर्वेदेहाइंद्रियाणिप्राणाश्चयस्यसतथा सर्वेषांकर्मिणांसुखस्यशंपदोक्तस्यतदुपलक्षितदुःखस्यचप्रापकः सर्वांतर्यामीसर्वफलप्रदश्चेतियावत् विश्वरूपःस्वयंज्योतिष्ट्वेनदेवपदोक्तोवक्ष्यमाणाभिर्व्युत्पत्तिभिर्नारायणपदोक्तश्चेतिद्वयोरर्थः ॥५२१॥५२२॥ नारायणपदस्यएकादशव्युत्पत्तीर्दर्शयंस्तत्राद्यामाह मायेति नयतिसन्निधिमात्रेणप्रवर्तयतीतिनरश्चिदात्मापुरुषस्तस्यदृश्येनसंबंधिनीमायानाराउक्ता अजादित्वाद्दाप् तस्यामायायाःकार्यंसूक्ष्मप्रपंचरूपंतयाउक्तव्युत्पत्त्यानारमित्युक्तं

अणोरणीयान्हृदयेपुरुषोयोत्रकीर्तितः॥ सहस्रमस्तकःसोयंमहतोपिमहान्यतः॥५२१॥ सर्वदेहेंद्रियप्राणःसर्वेषांसुखदुःखदः॥ विश्वरूपःस्वयंज्योतिर्नारायणइतीरितः ॥ ५२२॥ मायानारेतिसंप्रोक्तातत्कार्यंनारजंतथा ॥ तत्रायंवर्त्ततेयस्मात्तेननारायणःस्मृतः ॥ ५२३ ॥ आपोनाराइतिप्रोक्ताआपोवैनरसूनवः ॥ आधारस्ताविराजोयत्तेननारायणोहिसः॥५२४॥ अपांवायःसमाधारःसूत्ररूपीमहेश्वरः ॥ भूमेराधारभूतानांततोनारायणोथवा ॥ ५२५॥ स्थूलसूक्ष्मवपुर्योयंविराट्सूत्रंचवानरः ॥ महाभूतात्मकस्तस्यहेतुर्नारायणोथवा ॥ ५२६ ॥

तत्रमायातत्कार्यरूपयोर्नारपदार्थयोरुपाधिभूतयोर्यतोऽयतेप्रतिबिंबतयावर्तते नंद्यादित्वाल्ल्युः सईश्वररूपोहिरण्यगर्भरूपोवानारायणइत्युक्तइत्यर्थः ॥ ५२३ ॥ विराड्भावपरांद्वितीयांव्युत्पत्तिमाह आपइति प्रथमंनरेणस्रष्टागर्भोदकसंज्ञाआपोनाराइतिप्रोक्तास्तायतोविराड्रूपस्यभगवतआधारःअयनंभवंतितेनवासतथा ॥ ५२४ ॥ तृतीयामाह अपामिति प्रथमवापदंपूर्वान्वयिदर्शितं भूमेर्नौकासमायाआधारभूतायाआपोनरस्रष्टाएवतासांसूत्रभूतप्राणरूपेणविधारकत्वाद्वासतथा नाराणामयनंविधृतिर्येनेतिव्युत्पत्तेरितिभावः ॥ ५२५॥ चतुर्थीमाह स्थूलेति अथवास्थूलसूक्ष्मप्रपंचमहाभूतशरीरकोविराट्सूत्रात्मावानरपदेनोक्तस्तस्यनरस्येदंनारमयनंस्थानंयस्मिन्कारणेसतथेत्यर्थः ॥ ५२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचमीमाह नराणामिति अथवानरपदोक्तानांजीवानांप्रतिबिंबभूतानांसंबंधिअयनंनिरूपणंयस्माद्बिंबभूताद्भवतिसपरमेश्वरस्तेननिमित्ते ननारमयनंयतइतिव्युत्पत्त्यानारायणइत्युक्तइत्यर्थः ॥ ५२७॥ षष्ठीमाह पुंसइति अरोऽजिनेरंचक्राङ्गेइतिहैमस्तथाचपुंसोजीवस्यम्टगा जिनवत्स्वभावसिद्धाःकामादयोदोषागौण्याअरपदेनोक्तास्तेभ्यःकामादिभ्योजातंदुःखंतुआरंतस्याश्रयभूतमज्ञानादिजडजातमारायण मित्युक्तं नविद्यतेआरायणंयस्मिन्स्वयंप्रकाशानंदरूपेसाक्षिणीतिव्युत्पत्त्याशुद्धात्मानारायणइत्युक्तइतिद्वयोरर्थः ॥ ५२८ ॥ ५२९ ॥ सप्तम्यष्टम्यावाह अराइति अथवासंसाररूपचक्रस्यपंचक्लेशकर्मविपाकवासनारूपाअरास्तिर्यक्काष्ठरूपाःप्रसिद्धाः पुंस्त्वंतद्यथारथ

नाराणांवापिजीवानांस्थिरजंगमरूपिणां ॥ तादात्म्यादयनंयस्मात्तेननारायणोथवा ॥ ५२७ ॥ पुंसोनिसर्गसिद्धाःस्युःकामक्रोधादयोत्वराः ॥ आरंतज्जंभवेदुःखंयत्रतज्जडमुच्यते ॥ ५२८ ॥ आनंदात्मास्वयंज्योतिर्विपरीतोयतस्ततः ॥ नारायणइतिप्रोक्तएषवावेदवादिभिः ॥ ५२९ ॥ अराःसंसारचक्रस्यक्लेशकर्मादिकाःस्मृताः ॥ परिणामेनयस्तेषांमायासाश्रयउच्यते ॥ ५३० ॥ नारायणस्ततोभिन्नोविकारपरिवर्जितः ॥ परमात्मात्रमायायाआश्रयोवात्रकीर्त्यते ॥ ५३१॥ नरसंबंधिनीनित्यमभीष्टासर्वदेहिनां ॥ श्रीरियंसकलानानारूपात्यंतमनोरमा ॥५३२॥ सर्वदासुखदापुण्यकारिणांप्राणिनामिह॥ पापिनांदुःखदातद्वद्प्राप्त्यानिर्गमेनच॥५३३॥ स्थितायस्मात्परेपुंसिनिश्चलाततएवसः ॥ नारायणइतिप्रोक्तएषवाब्रह्मवादिभिः ॥ ५३४ ॥

स्याऽरेषुनिमिभिरर्पितानाभावराअर्पिताइतिश्रुत्यनुसारात् तेषामरात्मकानांक्लेशादीनांयःपरिणामेनाश्रयःपरिणाम्युपादानमितियावत् सातद्रूपामायाआरमयनंपरिणामेनस्थितिर्यत्राश्रयेइतिव्युत्पत्त्याआरायणइत्युक्तातततःपरिणामिनःकूटस्थत्वेनभिन्नःपरमात्मानारायण इत्युक्तः अथवानार्यामायारूपायाइदंनारंनारमयनमध्यासेनस्थितिर्यत्रेतिव्युत्पत्त्यामायायाआश्रयोधिष्ठानभूतःपरमात्मातथोक्तइति द्वयोरर्थः ॥ ५३० ॥ ५३१ ॥ लीलाविग्रहरूपांनवर्मीव्युत्पत्तिमाह नरेतित्रिभिः प्रथमनरस्यपुरुषविग्रहस्यपरमेश्वरस्यसंबंधिनीलक्ष्मीर्नारीतिपदेनोक्तातस्याइदंनारंनारमयनंस्थितिरूपंयत्रसतथा श्रियोविशेषणानिस्फुटानि तत्रसकलाकलाभिश्चतुःषष्टिकौशलैःसहिता निर्गमोऽपायः इतित्रयाणामर्थः ॥ ५३२ ॥ ५३३ ॥ ५३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यगात्मत्वपरांदशमीमाह नरसंबंधिनीवेयमिति अथवानरस्यद्रष्टुर्नानार्थदर्शनद्वारत्वेनसंबंधिनीबुद्धिर्नारीत्युक्तातदीयमयनंभानरूपं निर्वहणंयतश्चिद्रूपाद्भवतिसनारायणः एकादशीमाह अथवेत्यादिना अथवायस्माद्भिन्नंकिंचिन्नास्तिसनारायणःआराणांभिन्नसत्ताकानामयनंप्रवर्तनंयत्रसआरायणस्तद्भिन्नस्तथेतिव्युत्पत्तिसमन्वयादितिभावः ॥ ५३५ ॥ ५३६ ॥ तत्रहेतुतयाअक्षरत्वादिकमाह अयमेवेति अक्षरलक्षणंपंचमाध्यायेगार्गींप्रतियाज्ञवल्क्येनोक्तंबोध्यं तथायंसनातनःपुरुषोविश्वरूपोपिविश्वतःपरःत्रिपादस्यामृतंदिवीतिश्रुत्यंतरादित्यर्थः ॥ ५३७ ॥ हरिपदार्थमाह अविद्येति आदिपदेनकीर्त्तनादिग्रहः ॥ ५३८ ॥ पुरुषइति अयंपुरुषःसर्वात्मकोयतइदंविश्वं

नरसंबंधिनीवेयंबुद्धिःसर्वशरीरिणां ॥ नानार्थदर्शिकातस्याभासकःस्वस्यतेजसा ॥ ५३५ ॥ सत्यज्ञानादिरूपोयमानंदात्मास्वयंप्रभः ॥ नारायणोथवायस्मादन्यत्किंचिन्नविद्यते ॥ ५३६ ॥ अयमेवस्वयंज्योतिरक्षरंपरमंपदं ॥ विश्वतःपरमोनित्योविश्वरूपःसनातनः ॥ ५३७ ॥ अविद्यासहितान्क्लेशान्पापानिचमहांत्यपि ॥ स्मृत्यादिनाहरत्येषयतस्तेनहरिःस्मृतः ॥ ५३८ ॥ पुरुषोविश्वमेवेदंतंविश्वमुपजीवति ॥ पालयत्येषनिखिलंविश्वंयस्मात्पतिस्ततः ॥ ५३९ ॥ आप्नोतिचयतःसर्वंस्वात्मनात्माचतेनसः ॥ शिवःपरमकल्याणोमंगलानांचमंगलं ॥ आनंदात्मायदानंदलेशंब्रह्मोपजीवति ॥ ५४० ॥ च्युतिर्विनाशइत्युक्तःकालाद्भावेषुयोभवेत् ॥ अच्युतोमृत्युभयदःकालकालोयमीरितः ॥ ५४१ ॥

तमेवोपजीवतिततएवसत्तादिकंलभतेतथाअयंविश्वपालकत्वात्पतिरित्युक्तः ॥ ५३९ ॥ आप्नोतीति स्वात्मनासदादिरूपेणयतःसर्वंव्याप्नोतितेननिमित्तेनात्मसंज्ञः मंगलानामपितथात्वप्रयोजकत्वाद्यतःपरमकल्याणरूपस्ततःशिवइत्युक्तः यतश्चब्रह्माहिरण्यगर्भोप्यस्यानंदलेशमुपजीवतिततआनंदइत्युक्तः ॥ ५४० ॥ च्युतिरिति कालप्रयुक्तोभावानांनाशच्युतिरित्युच्यतेसाच्युतिरत्रेश्वरेनास्ति मृत्युभयप्रदत्वेनकालकालत्वेनचप्रसिद्धत्वात् तथाचव्याख्यातश्रुतिः मृत्युर्धावतिपंचमः ज्ञःकालकालइतिच तेनाच्युतइत्युक्तइत्यर्थः ॥ ५४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वनियंतृत्वादीश्वरसंज्ञःअन्यथाभावलक्षणापगमाभावात्शाश्वतसंज्ञश्चायंबोध्यइत्याह ईश्वरइति ॥ ५४२ ॥ महाज्ञेयपरायणपदयोर्थंपूर्वोत्तरार्द्धाभ्यामाह महद्भिरिति महद्भिरुत्तमाधिकारिभिः ॥ ५४३ ॥ ज्योतिषोरिति अर्चिर्वन्हिज्वालातत्प्रभृतिजडंज्योतिःस्वात्मशब्दवाच्यचिदाभासरूपंचेतनंज्योतिरनयोरुभयोर्ज्योतिषोरपेक्षयाअखंडचिद्रूपत्वेनोत्कृष्टत्वात्परमात्मापरंज्योतिरित्युक्तः अतएवब्रह्मेतिपरंतत्त्वमितिचोक्तइत्यर्थः ॥ ५४४ ॥ तस्यसर्वात्मत्वमेवश्रुत्युक्तमभिनयति ध्यातेतिद्वाभ्यां सर्वदर्शनपदेनकविपदार्थउक्तः स्फुटमन्यत्

ईश्वरोजगतोयस्मान्नियंताभगवानयं॥शाश्वतश्चयतोनायमपगच्छतिकर्हिचित् ॥ ५४२ ॥ महद्भिश्चसदैवायंज्ञेयोब्रह्मादिभिःपुमान्॥सर्वेषामपिभूतानामेषएवपरागतिः ॥ ५४३ ॥ ज्योतिषोर्चिरादेश्चस्वात्मशब्दाभिधस्यच॥परमात्मापरंज्योतिर्ब्रह्मतत्त्वंपरंतथा॥ ५४४ ॥ ध्याताध्यानंतथाध्येयंसर्वंनारायणात्मकं॥यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिवा ॥ ५४५ ॥ अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः ॥ अनंतोव्ययशून्यश्चस्वप्रभःसर्वदर्शनः ॥ ५४६ ॥ अगाधजलधेरस्यसंसारस्यजडात्मनः ॥ मायायांकारणेतिष्ठन्मायादिपरिवर्जितः॥५४७॥ एषसर्वगतोप्यात्माहार्दपद्मेत्रलभ्यते ॥ अणीयस्यात्मनोबुद्ध्याततोणुःपूर्वमीरितः॥५४८॥ यथैवाष्टदलंपद्मंसुरक्तंमुकुलीकृतं॥एवंहृदयपद्मंतल्लंबतेहृदयस्यके ॥५४९॥

॥ ५४५ ॥ ५४६ ॥ संसाररूपसमुद्रस्यातिकारणरूपेस्थितइत्याकारंसमुद्रंतमित्यस्यार्थंदर्शयति अगाधेति संसारस्यकारणेमायारूपेनियंतृतयातिष्ठन्नपिवस्तुतोमायादिहीनइतिसंबंधः ॥ ५४७॥ हृदयकमलवर्णनस्यप्रकृतोपयोगमाह एषइति एषपरमात्मासर्वगतोपिहृदयकमलांतर्गततयाऽतिसूक्ष्मयाबुद्ध्योपलक्ष्यत्वादणुरितिपूर्वमुक्तस्तत्स्फुटीभावायहृदयकमलमुच्यतेइतिभावः ॥ ५४८ ॥ दहरादिवियोपयोगिनंहृत्कमलस्वरूपंशाखांतरगुणोपसंहारेणश्रुत्युक्तमभिनयति यथैवेत्यष्टभिः यथालोकेऽष्टदलंरक्तवर्णमुकुलीकृतमीषद्विकसितंकमलंभवेत्तादृशंहृदयस्यकेशिरसिलंबमानमिदमांतरंकमलंबोध्यमित्यर्थः ॥ ५४९ ॥ ॥३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिरम्यमिति कीदृशंतत् रमणीयं पूर्वादिचतुर्दिक्षुमध्येचवर्त्तमानानिपंचच्छिद्राणियस्यतत्तथा वितस्तिर्द्वादशांगुलस्तत्परिमितेनाभेरूर्ध्वंदेशेस्थितमिति ॥५५०॥ तेषुच्छिद्रेषुवास्तव्यानिचक्षुरादीनिब्रह्मपुरुषत्वेनध्येयानीत्याह पूर्वमिति तथास्यकमलस्यमूलस्थानीयाजिव्हाबोध्या तथाउरसोवक्षसोंतरदेशमारभ्यगलपर्यंतोदेशोभूमित्वेनध्येयइतिद्वयोरर्थः ॥ ५५१ ॥ ५५२ ॥ मनइति तथेदंहृदयकमलं मनोनिवासत्वान्मानसमितिप्रसिद्धंसमानसीनआत्माजनानामित्यादिश्रुतिषु मानसेभवइतितदर्थः गलतःगलगतघंटिकाप्रदेशान्निर्गतत्वे

अतिरम्यंहिभूतानांपंचच्छिद्रमधोमुखं ॥ वितस्तिमात्रतोदेशेनाभेरूर्ध्वमवस्थितं ॥ ५५० ॥ पूर्वंछिद्रंतुचक्षुःस्यात्पश्चिमंवागिहेरिता ॥ श्रोत्रंचदक्षिणंछिद्रंमनउत्तरमीरितं ॥ ५५१ ॥ मध्यच्छिद्रंतथाघ्राणंजिव्हामूलंतथास्यच ॥ गलंभूमिरिहप्रोक्ताप्युरसोंतरतस्तथा ॥ ५५२ ॥ मनोयोगादिदंनित्यंमानसाख्यंप्रकीर्तितं ॥ गलतोप्यधएतत्स्याद्वितस्तिपरिमाणतः ॥ ५५३ ॥ सोमाग्निरविनक्षत्रविद्युद्वत्तेजसायुतं ॥ भातिविश्वस्य कृत्स्नस्यत्वाश्रयोयोगिनांसदा ॥ ५५४ ॥ विश्वस्यायतनंयस्मात्तस्मादेतन्महत्स्मृतं ॥ अत्यल्पमपिविद्वद्भिर्योगिभिःस्वात्मदर्शिभिः ॥ ५५५ ॥ नानाधातुशिलाप्रख्यैरस्थिभिर्वपुषिस्थितैः ॥ मांसादिधातुचित्रांगैःसर्वतःपरिवेष्टितं ॥ ५५६ ॥ प्राकारेणयथाराज्ञःसरःप्रासादसंश्रयं ॥ तस्यांतःसुषिरंसूक्ष्मंहृदिपद्मस्यवर्त्तते ॥ ५५७ ॥ तत्रस्थयाधियायोगादानंदात्मोपलभ्यते ॥ यस्मिन्प्रतिष्ठितंसर्वंरज्ज्वांसर्पादिकंयथा ॥ ५५८ ॥

ननिध्यापदोक्तादधोवितस्तिमात्रेदेशेस्थितमित्यर्थः ॥ ५५३ ॥ ज्वालेत्याद्यर्थमाह सोमाग्नीति सोमादिवदतितेजस्विविश्वस्यालंबनभूतं चेदंकमलमंतर्वर्त्याकाशद्वारेत्यर्थः यावान्वाऽयमाकाशइत्यादिश्रुतेः ॥ ५५४ ॥ विश्वस्येति यतोविश्वस्यायतनंततोल्पमपिमहदितियोगिभिरुक्तं ॥ ५५५ ॥ नानेति पुनःकीदृशं नानारजतादिधातुमयशिलास्थानीयैरस्थिभिर्मांसादिपंकलिप्तैर्वेष्टितमिति ॥ ५५६ ॥ प्राकारेणेति यथाचप्राकारवेष्टितप्रासादांतर्गतंराज्ञोविहारस्थानभूतंसरोभवेत्तादृशंतस्यपद्मस्यहृदिमध्येसुषिरंछिद्रंभवतितदाकारयाधियाआत्मसाक्षात्कारोभवतीतिद्वयोरर्थः ॥ ५५७ ॥ ५५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहृत्कमलेध्येयस्यविशेषणान्याह मध्येइति तस्यपद्मस्यमध्येपरमात्मातिष्ठति कीदृशः महानद्वितीयानंदः पुनःकीदृशः अग्निसमः स्व
यंप्रकाशत्वात् विश्वार्चिःविश्वस्मिन्सर्वस्मिन्नर्चिषश्चिदाभासरूपायस्यसतथा अतएवविश्वतोमुखःसर्वतःसन्निहितः बुद्ध्युपाधिकजी
वरूपेणसर्वविषयभोक्ताचेत्यर्थः ॥ ५५९ ॥ अग्निरिति पुनःकीदृशःसपरमात्मा प्राणात्मकोयोजाठराग्निस्तद्रूपेणआहारंभुक्तान्नादिकं
स्थूलमध्यमसूक्ष्मांशैश्छांदोग्यप्रसिद्धैर्विभजन्विभागंनयन्सन्सर्वेषांजठरेआस्तेस्थितइत्यर्थः ॥ ५६० ॥ तिर्यगिति तस्यपरमात्मनो
जाठराग्नेर्जाठराग्निरूपस्यरश्मयःकिरणास्तिर्यगूर्ध्वमधश्चतेजसासन्तताव्याप्ताःसंति कीदृशारश्मयः क्षुत्तृट्क्रोधादिरूपाः ताभिःसजा

मध्येहृदयपद्मस्यमहानग्निसमःपुमान्॥ आनंदात्मास्वयंज्योतिर्विश्वार्चिर्विश्वतोमुखः॥ बुद्ध्युपाधिंसमाश्रि
त्यभुंक्तेविषयजंसुखं॥५५९॥ अग्निःप्राणात्मकश्चास्तआहारंविभजन्निव ॥ स्थूलमध्यमसूक्ष्मांशैर्जठरेसर्व
देहिनां॥५६०॥ तिर्यगूर्ध्वमधश्चैवरश्मयस्तस्यसंतताः॥ संतापयतिदेहंसआपादतलमस्तकं॥ क्षुधादिरूप
मापन्नोजाठराग्नेस्तुतेजसा॥ ५६१ ॥ सत्यज्ञानादिरूपेणयदायंनोपलभ्यते॥ तदामुनाप्रकारेणचिंतनीयो
मनीषिभिः॥५६२॥ तस्यमध्येदीपशिखाहार्दांभोजस्यतिष्ठति॥ अणीयसीतथैवोर्ध्वंज्वलंतीनिश्चलासदा
॥५६३ ॥ नीलतोयदमध्यस्थाविद्युल्लेखेवभास्वरा ॥ नीवारशूकवत्तन्वीपीताभास्वत्यणूपमा॥ ५६४॥ म
ध्येतस्याःशिखायाःसपरमात्माव्यवस्थितः॥ ब्रह्मायंशिवएवायंहरिरेषसनातनः ॥ सएवेंद्रोक्षरंतद्वत्परमंस
स्वराट्प्रभुः ॥ ५६५ ॥

ठराग्निरूपःपरमात्मादेहमापादतलमस्तकंसंतापयतीतिसंबंधः ॥ ५६१ ॥ एवंध्यातोपियदिसत्यादिरूपेणपरमात्मानप्रादुर्भवतितदाऽमुना
वक्ष्यमाणेनप्रकारेणध्येयइत्याह सत्येति ॥ ५६२ ॥ अमुनेत्युक्तमभिनयति तस्येतित्रिभिः तस्यहार्दांभोजस्यमध्येऽतिसूक्ष्माऊर्ध्वंदेदी
प्यमानानिश्चलाचदीपशिखाध्येयेत्यर्थः ॥ ५६३ ॥ नीलेति पुनःकीदृशी नीलमेघघटागतविद्युल्लेखावद्दीप्ता श्यामाककिंशारुवत्तन्वी
सूक्ष्मापीतवर्णाअणूपमापिभास्वतीप्रभाशालिनीत्यर्थः ॥ ५६४ ॥ तस्यादीपशिखायामध्येपरमात्मासर्वात्माध्येयइत्याह मध्येइति स्व
राट्स्वेनैवराजमानः ॥ ५६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदित्योवाइत्यादेःउपतेनमइत्यंतस्यमंत्रवृंदस्यतात्पर्यार्थमाह आदित्यइति आदित्यइत्यादिमंत्रजातेनप्राणरूपोविराड्रूपश्चएषएवेश्वरोनानारूपैर्वर्ण्यतेयतोयंस्वराडद्वितीयोभवतीत्यर्थः ॥ ५६६ ॥ सत्यंपरमित्यादेरुपनिषदित्यंतस्यार्थंसंक्षिप्याह सत्यंतपइति सत्यादीनि मानसपर्यंतान्येकादशसाधनानिसत्फलकत्वेनस्तुत्वातेभ्यःसर्वेभ्योहिरण्यगर्भवद्रुत्कृष्टत्वोक्त्यासंन्यासोविहितः विधेयंहिस्तूयतेइतिन्यायादितिवाक्यार्थः तत्रप्रजातयःप्रजाः आहिताआधानसंस्कृताअग्नयः मानसंचित्तशुद्धिः स्फुटमन्यत् ॥ ५६७ ॥ संक्षेपेणोक्तस्य व्याख्यानंप्रजापतेरारुणिपृष्टस्यवक्तुरुपन्यासपूर्वकंश्रुत्यैवकृतंतद्विशदयति सर्वेत्यादिना अत्रग्रंथकृताधर्मस्यादौकीर्तनमार्थक्रमानुरो

आदित्योवाएषइतिप्रभृतिप्राणईश्वरः ॥ नानारूपःस्वराडेषविराडेवचकीर्त्यते ॥ ५६६ ॥ सत्यंतपोदमः शांतिर्दानंधर्मःप्रजातयः॥ आहिताअग्निहोत्रंचयज्ञामानसमेवच ॥ एकादशात्रसंस्तुत्यन्यासःश्रुत्याविधीयते॥ ५६७ ॥ सर्ववर्णाश्रमाणांस्यात्स्वधर्मःसाधनंपरं ॥ अर्थेकामेचमोक्षेचतेषामपिचसाधने॥५६८॥ धर्मतःसर्वमेवात्रदुष्करंचप्रसिद्ध्यति ॥ धर्मःसर्वस्यजगतःस्थितिहेतुरुदाहृतः ॥ ५६९ ॥ धर्मिष्ठमुपसर्पंतिप्रजाःसर्वामहातरुं ॥ सुसेव्यंफलपुष्पादिपूर्णमार्गस्थितंयथा ॥ ज्ञानाज्ञानकृतंपापंसर्वंधर्माद्विनश्यति ॥ ५७० ॥ सत्यंतपोदयादानंचतुष्पाद्धर्मईरितः॥ सर्वैरपिसदासेव्योजन्मतोमरणावधि॥ ५७१ ॥

धात्कृतं दमशमौदयारूपत्वेनैकीकृत्यधर्मात्पूर्वोपात्तानांतत्पादत्वेनविवक्षितत्त्वात् पादेभ्योविशेषस्थानीयेभ्यःपूर्वसामान्यात्मनोधर्मस्योपन्यसनीयत्वादितिवोध्यम् सर्वेषांपुरुषार्थचतुष्टयस्यतदुपकरणानांचपरमसाधनत्वाद्धर्मःश्रेयस्करइत्यर्थः ॥ ५६८ ॥ धर्मतइति धर्मोदुष्करमपिसाधयति किंचधर्मःप्रजानांस्थितिहेतुःपालनकरीसत्वमयीभगवतोमूर्त्तिरुक्ता अतएवधर्मपरंसर्वेआश्रयंतेपथिकाःसत्तरुमिव तथायंधर्मोज्ञात्वाऽज्ञात्वावाकृतानिपापानिहंतीतिद्वयोरर्थः ॥ ५६९ ॥ ५७० ॥ अस्यधर्मस्यसत्यादयश्चत्वारःपादाःसदासेव्या इत्याह सत्यमिति ॥ ५७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रसत्यलक्षणमाह सत्यमिति वाचनिकोवागिंद्रियेणानुष्ठेयःसत्यरूपोधर्मः तत्स्वरूपंतुयथादृष्टस्यभूतहितस्यकीर्तनंप्रतिज्ञातार्थादचलन चेत्यर्थः ॥ ५७२ ॥ अस्यसत्यस्यसर्वव्यवहारनिर्वाहकत्वंप्रसिद्धमित्याह सत्येति कालांतरेफलंयेषांतेषुकर्मसुलौकिकाव्यवहाराःसत्या पनादयोवैदिकाआर्त्विज्यादयःप्रवर्ततेइतिप्रसिद्धं सत्यापनंसाईइतिभाषायांख्यातं ॥ ५७३ ॥ तथायुधिष्ठिरादीनांसशरीरस्वर्गगमनं

तत्रचिरंस्थितिश्चसत्यबलेनैवप्रसिद्धेत्याह अजातेति ॥ ५७४ ॥ तथासत्यधर्मानुष्ठानबलेनैववाय्वादिदेवानांस्वस्वाधिकारनिर्वाहकत्वंप्र

सत्यंवाचनिकोधर्मोयथादृष्टार्थवेदनम् ॥ उक्तार्थतश्चाचलनमिदमुक्तंमनीषिभिः ॥ ५७२ ॥ सत्यवाक्यादिमे सर्वेलौकिकावैदिकाअपि ॥ व्यवहाराःप्रवर्ततेकालांतरफलेष्वपि ॥ ५७३ ॥ अजातशत्रुप्रमुखाःसत्यवा क्याद्दिवंगताः ॥ नच्यवंतेततोद्यापिसत्यवादपरायणाः ॥ ५७४ ॥ सत्येनवातिवातोयंसूर्यःसत्येनरोचते ॥ सत्येनविधृताभूमिःसर्वंसत्येप्रतिष्ठितं ॥ ५७५ ॥ शीतवातातपादीनांसहनंक्षुत्पिपासयोः ॥ संकल्पात्तद्वि विज्ञेयंतपोत्रान्नादिवर्जितं ॥ ५७६ ॥ तपसामुनयोदेवाःस्वर्गमायन्निजेप्सितम् ॥ सपत्नविजयंतद्वदिहलो केचमानवाः ॥ ५७७ ॥ सर्वमेवजगन्नित्यंतपस्येवप्रतिष्ठितं ॥ तपसायतएवायंशापानुग्रहकृद्भवेत् ॥ तपस्त तोतिदुर्धर्षसाधनंपंडितैःस्मृतं ॥ ५७८ ॥ दयादांत्याचशांत्याचनविनात्रप्रजायते ॥ यतोदमःशमश्चेतिद्वयं साधनमीरितं ॥ ५७९ ॥

सिद्धमित्याह सत्येनेति ॥ ५७५ ॥ धर्मस्यद्वितीयपादंतपोवर्णयति शीतेति संकल्पपूर्वकंयत्शीतादीनांक्षुधापिपासयोर्वासहनमन्ना दिवर्जनंचएतत्तपसःस्वरूपंव्यासप्रभृतिभिरुक्तमित्यर्थः ॥ ५७६ ॥ तत्फलमाह तपसेति आयनूप्राप्तवंतः ॥ ५७७ ॥ सर्वमेवेति सर्वंज गत्कार्यभूतंकारणभूतेतपसिस्थितं तथाहिविश्वामित्रोनूतनंजगत्स्रष्टवानितित्रिशंकूपाख्यानेरामायणेप्रसिद्धं सतपस्तप्त्वाइदंसर्वमसृजते

तिश्रुतिश्च दुर्धर्षंतेजस्वि ॥५७८॥ तृतीयःपादोदयारूपोदमशमाभ्यांदयायाअसाधारणकारणाभ्यांसूचितइत्याह दयेति यतोदांत्याशां त्याचविनादयानजायतेततोदयाप्रयोजकौदमशमौश्रेयःसाधनतयोक्तावित्यर्थः ॥ ५७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रदमलक्षणमाह बाह्येंद्रियाणामिति यथाप्रमत्तस्यवृषभस्यबन्धनेनविजयस्तथायइंद्रियाणांविजयःसदमउच्यतइत्यर्थः ॥ ५८० ॥ अस्यफलमाह ब्रह्मचर्यैति तेनदमेनबाह्येंद्रियनिग्रहंकुर्वतोब्रह्मचारिणोब्रह्मलोकंस्वर्गंवाबहवोगताइत्यर्थः ॥ ५८१ ॥ शमलक्षणमाह शमइति सर्वविषयाभिलाषान्हित्वाआनंदरूपात्ममात्राभिलाषःशमइत्युक्तइत्यर्थः ॥ ५८२ ॥ अयंशमःप्रत्याहारफलत्वेनयोगिभिरुक्तइतिदर्शयति यथेति यथाज्वरादिरोगवशेनविषयेष्विच्छायाअभावःअनुत्थानंतथाविषयदोषदर्शनेनतेष्विच्छायाअजनिरनुत्पत्तिर्जातायाइच्छायायदात्यंतिकंविवर्जनंवातद्रूपःशमउक्तः तथाचोक्तंयोगभाष्ये चित्तैकाग्र्यादप्रतिपत्तिरेवेतिजैगीषव्यइति चित्तैका

बाह्येंद्रियाणांविजयोदमउक्तोमनीषिभिः ॥ वृषभस्यप्रमत्तस्ययथाबंधनतोभवेत् ॥ ५८० ॥ ब्रह्मचर्यरतास्तेनबाह्येंद्रियविनिग्रहं ॥ कुर्वंतःस्वर्गमायांतिब्रह्मलोकमथापिवा ॥ परित्यज्याखिलंपापंसफलंमरणात्परं ॥ ५८१ ॥ शमउक्तोभिलाषोयमानंदात्मस्वरूपिणः ॥ हित्वाविषयजान्सर्वानभिलाषान्सदैवहि ॥ ५८२ ॥ यथाव्याध्यादिदोषेणविषयेच्छानजायते ॥ एवंविषयदोषेणविषयेच्छाजनिर्नया ॥ सशमःकथ्यतेपुंसोविषयेच्छाविवर्जनं ॥ ५८३ ॥ अरण्येशमसंपन्नामुनयःस्वार्थसाधकाः ॥ शांत्याकुर्वंतिभूतानांशिवंहिंसाविवर्जनं ॥ स्वर्गंचमुनयोयांतिकामक्रोधादिवर्जनात् ॥ ५८४ ॥ कामक्रोधादिसंपन्नःपुमान्शमविवर्जितः ॥ ज्ञानकर्मेंद्रियगणजयशून्यःप्रमादवान् ॥ ५८५ ॥ कर्मणामनसावाचाकुरुतेभूतहिंसनं ॥ हिंसकोनिर्दयःकोनुपुमान्कुर्याद्दयामयं ॥ ततःशमदमौज्ञेयौपरमंसाधनंनृणां ॥ ५८६ ॥

ग्र्यवलेनेंद्रियाणांविषयेष्वप्रवृत्तिरूपावश्यतैवप्रत्याहारफलमितिजैगीषव्यमुनेःसिद्धांतइतितदर्थः ॥५८३॥ अस्यशमस्यफलंलोकेवेदेच प्रसिद्धमित्याह अरण्यइति अरण्येऽसहायाअपिमुनयोऽनेनशमेनस्वार्थमनुष्ठितेनापिभूतानांसन्निहितानांव्याघ्रादीनांशांत्याधानेनशिवं हिंसानिवृत्तिरूपंकुर्वंतःप्रसिद्धाः तथाकामादिजयेनसद्गतिश्चतेषांशास्त्रेपूक्तेत्यर्थः ॥५८४॥ अनयोःशमदमयोर्दयाप्रयोजकत्वंव्यतिरेक मुखेनाह कामेति शमराहित्येनकामादिमान्दमराहित्येनेंद्रियजयशून्यश्चयोभवतिसशरीरादिभिर्हिंसांकुर्वाणएवप्रसिद्धस्तस्यहिंसक स्यनिर्दयत्वमपिप्रसिद्धं यतोयंहिसकोदयायाःसंभावनायाअपिनविषयः फलितमाह ततइत्यादिनेतिद्वयोरर्थः ॥५८५॥५८६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मचतुर्थपादस्यदानस्यस्वरूपमाह दानमिति वाक्चतुर्दशविद्यारूपा दास्यामीत्यादिप्रतिज्ञायतत्प्रभृतीनांपात्रेऽर्पणंदानमित्युच्यते तत्र शरीरदानंकुत्रचित्शरणागतत्राणादिविषयएवेत्याहुः ॥ ५८७ ॥ तत्फलंयशःप्रभृतिप्रसिद्धमित्याह प्रशंसंतीति कर्णत्वग्दानाद्बलिस्त्रिलोकीदानात् आदिपदेनशिबिप्रभृतीनांग्रहः वदान्याःप्रदातारः ॥ ५८८ ॥ यज्ञाइति दक्षिणाआत्मारूपंयस्यतथाभूतेनदानेनैवपूर्णताप्रसिद्धा तथादातासर्वभूतैःपितृवदाश्रयणीयोभवतीति ॥ ५८९ ॥ दानतइति दानेनवैरिणोपिवशेभवंति अतएवउपायज्ञःसामदानभेददंडानांबलाबलविचारकःकुशलएतान्वैरिणोदानेनैवनिहंतिजयतीत्यर्थः तथादानस्यसर्वजगत्स्थितिहेतुत्वंप्रसिद्धंदेवान्भावयतानेनतेदेवाभा

दानंवाचस्तथाबुद्धेर्वित्तस्यविविधस्यच ॥ शरीरस्यापिकुत्रापिकेचिदिच्छंतिपंडिताः ॥ ५८७ ॥ प्रशंसंतिप्रजानित्यंकर्णबल्यादिकानिह ॥ वदान्यादानतःस्वर्गंव्रजंतिसततंनराः ॥ ५८८ ॥ यज्ञाःसंपूर्णतांयांतिदानतोदक्षिणात्मनः ॥ दातारंसर्वभूतानिश्रयंतिपितरंयथा ॥ ५८९ ॥ दानतोवैरिणोपिस्युर्मित्राण्येवनसंशयः ॥ दानेनहिनिहंत्येतानुपायज्ञोनरोभुवि ॥ दानेसर्वमिदंविश्वंप्रतितिष्ठतिसर्वदा ॥ ५९० ॥ चतुष्पादेषधर्मःस्यात्सर्वेषामिहदेहिनां ॥ नवर्णमाश्रमंवापिनवयोवाप्यपेक्षते ॥ ५९१ ॥ गृहस्थत्वंवयश्चापित्यपेक्ष्यैवप्रजाजनिः ॥ मनुजानांभवत्यत्रसर्वेषामपिदेहिनां ॥ ५९२ ॥ कःकुमारःपुमानत्रजाययावाविवर्जितः ॥ उत्पादयेत्प्रजाधीमानुत्सुकोपिप्रजापतिः ॥ ५९३ ॥ प्रजावान्कीर्तिमाप्नोतिसुखंवैरिजयंतथा ॥ पितॄणामनृणोभूत्वा स्वर्गंयातिमृतःपुनः ॥ ५९४ ॥

वयंतुवइतिभगवद्गीतादिषु ॥ ५९० ॥ अयंसत्यादिपादचतुष्टयवान्धर्मःसर्वसाधारणत्वाद्वर्णाश्रमावस्थादिसापेक्षत्वाभावेनाभ्यर्हितत्वाच्चादौनिर्दिष्टइत्याह चतुष्पादिति पंचवर्षोध्रुवःसिद्धःकपोतोदानतस्तथा निदर्शनंतौधर्मस्यनैरपेक्ष्यंपरीक्षितुं ॥ ५९१ ॥ प्रजातिपदोक्तस्यसप्तमस्यापकृष्टत्वद्योतकंसापेक्षत्वंदर्शयति गृहस्थत्वमितिद्वाभ्यां प्रजाजनिर्हिगृहस्थत्वंयौवनावस्थांचापेक्ष्यैवमनुजादीनांभवति तद्व्यतिरेकेप्रजापतेरपिप्रजोत्पादनेऽशक्तत्वादितिद्वयोरर्थः ॥ ५९२ ॥ ५९३ ॥ संततेःफलंसांसारिकंसुखमेवेत्याह प्रजावानितिद्वाभ्यां स्पष्टं ॥ ५९४ ॥ ॥४२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्येति तस्मात्कीर्त्यादिहेतुत्वदर्शनात्प्रजाःसंततयःसंसारसंबंधिनिसुखएवकारणतयोक्ताः मोक्षरूपेनिष्कामतालभ्येसुखेत्वयंप्रजारूपोविघ्नउक्तः रागोत्पादकत्वात् पृथुसदृशींसंततिमभिप्रेत्याह प्रायशइत्यादि ॥ ५९५ ॥ अत्ररागिणांमतंपरिहारायानुवदति प्रजानामितित्रयस्त्रिंशताश्लोकैः केचिद्बालिशाअतत्त्वविदःकामज्वरवेगेनप्रलपंतःसंततेर्मोक्षहेतुतामाहुस्तत्रमोक्षहेतुत्वेइमांवक्ष्यमाणांयुक्तिंचाहुरिति ॥ ५९६ ॥ तत्रविषयभोगेनकामंक्षपयित्वैवमोक्षइतिवक्तुंदृष्टांतउच्यते आरुरुक्षुरिति यथोच्चप्रासादशिखरारोहणंसोपानद्वारैवसोपानारोहणमपिदंडाख्यतदवयवक्रमेणैवेत्यर्थः ॥ ५९७ ॥ एवंधर्मादिपुरुषार्थचतुष्टयमध्येउत्तरस्यप्राप्तिःपूर्वपूर्वप्राप्तिंविना

संसारस्यसुखेतस्मात्प्रजाःकारणमीरिताः॥ मोक्षाख्येप्रायशोविघ्नःकथितःपंडितैरयं ॥५९५॥ प्रजानांमोक्षहेतुत्वंकेचिदिच्छंतिबालिशाः ॥ उपपत्तिमिमांतत्रप्राहुःकामज्वरातुराः ॥ ५९६ ॥ आरुरुक्षुर्यथालोकेप्रासादंसप्तभूमिकं ॥ निःश्रेणिकंसमासाद्यशनैःप्रासादमस्तकं ॥ व्रजेत्सोपानपंक्तौचपदंन्यस्यक्रमात्पुमान्॥ ५९७॥ एवंधर्मस्तथाचार्थःकामोमोक्षश्चकीर्तितः॥ चतुर्विधःपुमर्थोयमुपर्युपरिसंस्थितः॥५९८ ॥ धर्मादर्थमवाप्नोतिपुमाँल्लोकद्वयेपिहि ॥ अर्थतश्चतथाकामंकामान्मोक्षंचधीधनः ॥ ५९९ ॥ दरिद्रंदुःखसंपन्नंपापिनंप्रवदंत्यतः॥ श्रीमंतंसुखसंपन्नंपुण्यात्मानंचलौकिकाः ॥ ६०० ॥ धर्मोत्रद्विविधःप्रोक्तोदृष्टादृष्टफलोन्नृभिः॥ यदिदृष्टफलोनायंकल्प्योऽदृष्टफलस्तदा॥ ६०१ ॥ पापिनामपिसोयंस्याज्जन्मांतरकृतोयतः॥ दृश्यंतेसुखिनःकार्यंनविनाकारणंभवेत्॥ ६०२॥

नभवतीत्याहुः एवमिति ॥ ५९८ ॥ क्रममेवस्फुटयति धर्मादिति अर्थंभोगसाधनजातं ॥ ५९९ ॥ तत्रधर्मस्यफलमर्थएवेत्युच्यते दरिद्रमितिचतुर्भिः अतोऽर्थाभावस्यधर्माभावप्रयुक्तत्वाल्लौकिकादरिद्रंपापिनंवदंतिश्रीमंतंपुण्यात्मानमिति ॥ ६०० ॥ ननुकेषांचित्श्रीमतामिहजन्मनिपुण्यानुष्ठानंनदृश्यतेतत्कथंतेषांपुण्यात्मतयाव्यवहारइतिचेत्कार्यद्वाराकारणानुमानादित्याह धर्मइति धर्मोद्विविधः दृष्टफलकोऽदृष्टफलकश्च तत्राद्यऐहिकफलमुद्दिश्यविहितःकारीर्यादिरूपोद्वितीयोजन्मांतरभाविफलकस्तत्रप्रथमाभावेद्वितीयःपापपरेष्वपिसुखदर्शनादनुमेयः यतस्तेपापिनःसुखिनोजाताः नहिकार्यंविषयसुखंकारणंधर्मंविनासंभवतीतिद्वयोरर्थः ॥ ६०१ ॥ ६०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुण्यात्मनइति ततोदुःखस्यपापफलत्वनिश्चयात्पुण्यात्मनइहजन्मनिपुण्यानुष्ठानपरस्यापिदुःखलिंगेनजन्मांतरीयंपापमनुमेयमितिफ
लितमाह सुखमिति वैषयिकमितिशेषः ॥ ६०३ ॥ अथार्थस्यविषयभोगएवफलमितिदर्शयति सुखंवैषयिकमित्यादिना प्रजाःसंत
तीः गृहस्थत्ववादंगृहस्थत्वेनप्रसिद्धिं तस्यापिधर्मात्मनोपि स्फुटमन्यत् ॥६०४॥ ६०५॥ अन्ननार्यादिकमिति अन्नप्रभृतिभोगसाधनं

पुण्यात्मनस्तथैवैतत्पापंजन्मांतरस्थितं॥ ऊहनीयंयतोदुःखंनविनातेनसंभवेत्॥ सुखंधर्मात्ततोनित्यंजाय
तेसर्वदेहिनां ॥ ६०३ ॥ सुखंवैषयिकंनार्थंविनाकस्यापिसंभवेत्॥ धर्मात्मापिविनानारींस्त्रीसुखंनाधिग
च्छति ॥ ६०४ ॥ नप्रजानगृहस्थत्ववादंलोकेषुकर्हिचित् ॥ अन्नंविनानतस्यापिक्षुधाशांतिंप्रयातिहि
॥६०५॥ अन्ननार्यादिकंसर्वंसुखदंविद्यतेनहि॥ निर्धनस्यततोनित्यमर्थःकामस्यकारणं ॥ ६०६ ॥ अर्थ
हीनंपतिंनारीत्यजेदपिपतिव्रता॥ पितरंप्राणतःस्निग्धमर्थहीनंसुताअपि ॥ ६०७॥ निर्धनंसर्वएवैतेश्वसं
तंपुरतःस्थितं ॥ अवजानंतिमित्राद्यामानवाधनगर्विताः ॥ ६०८ ॥ कुलंशीलंतथाविद्यागुणानानाविधा
अपि॥ निर्धनस्यनकार्यायक्षमंतेशववत्स्थिताः॥ ६०९॥ धनीभोगान्समाप्नोतिधनीस्वर्गंचगच्छति॥ वि
पुलांचतथाकीर्तिंगुणान्नानाविधानपि ॥ ६१० ॥ अर्थतस्ततएवायंकामोभोगाभिधोनृणां॥जायतेत्रवि
शेषेणनारीसंभोगसंभवः॥ ६११ ॥

निर्धनस्यविद्यमानमपियतःसुखदंनभवतिततोर्थःकामसुखनिदानमित्यर्थः ॥ ६०६ ॥ निर्धनस्यविषयसुखासंभवमेवस्फुटयति अर्थ
हीनमितित्रिभिः सुताअपित्यजंतीति ॥ ६०७॥ निर्धनमिति एतेबांधवामित्राद्याइतरेमानवाश्चअवजानंतिनाद्रियंते ॥ ६०८ ॥ कुल
मिति शववत्शवइव ॥ ६०९॥ व्यतिरेकमुक्त्वाऽन्वयमाह धनीति स्पष्टं ॥ ६१० ॥ तत्राप्यर्थस्यवैशेषिकंफलंस्त्रीसुखमेवेत्यनुवदति
अर्थतइतिततोर्थादयंकामोनारीसंभोगात्मकोजायतइति ॥ ६११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचब्रह्मचर्यादेवमोक्षाधिकारीकश्चिन्नसंभवतिसर्वस्यजगतःकामव्याप्तत्वादित्यनुवदति जातइतित्रिभिः अत्रसंसारेसाविषयसुखेच्छाकस्यनास्तियतोवृद्धादिरूपस्यसर्वस्यजगतःकामुकत्वंसर्वानुभवसिद्धमिति फलितमाह ततइति नुइतिवितर्के ॥ ६१२ ॥ ६१३ ॥ ॥ ६१४ ॥ वितर्कमेवाभिनयति रागाभावइति रागस्याभावोध्वंसस्तद्रूपाविरक्तिःकिंरागोत्पत्तिविनाभवतितदुत्पत्तौवा नाद्यः प्रतियोगिनोध्वंसकारणत्वेनप्रतियोगिजन्मविनाध्वंसासंभवात् नांत्यइत्याह उत्पन्नइत्यादिना यथाउत्पन्नाक्षुधाअन्नलाभेनैवशाम्यतितथारागोपिविषयभोगेनैवेत्यर्थः तथाचब्रह्मचारिणांविरक्त्यसंभवान्मोक्षोयमोनयुक्तइतिभावः ॥ ६१५ ॥ ननुजातमपिविषयरागंवि

जातःपुमानकामोयंकोपिनास्तिजगत्त्रये॥ सुखेच्छाकामउद्दिष्टःकस्यसात्रनविद्यते ॥ ६१२ ॥ वृद्धोबालोयुवावापिपुमान्वाप्यथवापशुः॥ स्त्रीवानपुंसकंवापिजंगमंस्थावरंतथा॥६१३॥ सर्वैःप्रदृश्यतेनित्यंकामुकंनिखिलंजगत् ॥ ततोविरक्तिःकस्यस्यात्सुखभोगंविनात्रनु ॥ ६१४ ॥ रागाभावोविरक्तिःस्यान्नरागस्यजनिंविना॥ उत्पन्नोत्रकथंरागस्तद्भोगमनवाप्यसः॥ विनश्यतियथालोकेक्षुधानान्नंविनाक्वचित् ॥ ६१५ ॥ अपिरागोत्रसंजातोविषयावाप्तिवर्जितः ॥ जननीमिवसंरुध्यशिशुश्चित्तंव्यवस्थितः ॥ ६१६ ॥ तस्मिन्सतिनयात्येवचित्तेत्रविषयांतरं॥ मुमुक्षाकुतएवैषादूरापास्ताभविष्यति॥६१७॥ मदप्रभिन्नकरटःकुंजरःषष्टिहायनः॥ अरण्यान्यायथैवैषसूक्ष्ममार्गप्रचारकः॥ निरुध्यद्वारतस्तिष्ठन्प्रवेशंनप्रयच्छति॥६१८॥

षयदोषदर्शनेननिरुद्ध्यविरक्तिर्मुमुक्षाचभविष्यतीत्याशंक्यनैवंसंभवतीत्याह अपिरागइति उदितोरागोयावद्विषयंनलभतेतावद्बुभोजनन्युदरमिवचित्तंनिरुद्ध्यावतिष्ठते तस्मिन्नेकविषयरागेचित्तगतेसतिगर्भांतरमिवविषयांतरंनप्रवेशार्हं तथाचालौकिकेमोक्षेइच्छासुतरांदुर्लभेतिद्वयोरर्थः ॥ ६१६ ॥ ६१७ ॥ अत्रदृष्टांतमाह मदेतिमदेनभिन्नःकरटोगंडस्थलंयस्यसतथाषष्टिहायनोयुवाचगजोयथाऽरण्यान्यामहारण्यस्यसूक्ष्मेषुदुर्लभेषुमार्गेषुविचरणपरस्तामरण्यानींद्वारदेशेनिरुद्ध्यतिष्ठन्सन्प्रवेशंपरस्यप्रतिबध्नातीत्यर्थः ॥ ६१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्ष्टांतिकेयोजयति एवमिति एवंविषयविशेषरागरूपोगजश्चित्तरूपेवनेस्थितःकथंमोक्षविषयकरागस्यावकाशदःस्यादित्यर्थः॥६१९॥ उक्तेर्थेकैमुत्यंदर्शयन्लौकिकविषयरागस्यलौकिकविषयांतररागंप्रत्यपिप्रतिबंधकत्वंरावणादौदृष्टमित्याह अपिसीतेतिचतुर्भिः सीतायांसमाविद्धःप्रयोजितोरागोयेनसतथाभूतोरावणस्त्रिलोकीवर्तिपदार्थांतरंनकामितवानितिद्वयोःसंबंधः ॥ ६२० ॥ ६२१ ॥ अत्र दमयंत्यप्युदाहरणंययास्वयंवरागताइंद्रादयोनलंविहायनवृताइत्याह नलेति ॥ ६२२ ॥ एकविषयरागेणविषयांतरविमुखाःशतशोऽतीतादिकालेषुप्रसिद्धाइत्याह एवमन्येपीति नगमिष्यंतिनभजिष्यंति ॥ ६२३ ॥ यदिकश्चित्प्रथममोक्षएवरागवान्स्यात्ससंन्यासाधि

एवंविषयसंभोगरागश्चित्तवनेस्थितः॥कथंरागांतरस्यायंप्रवेशंदातुमर्हति॥६१९॥ अपिसीतासमाविद्धरागोयोपिद्रूणस्थितः॥मंदोदरीपतिःश्रीमान्रावणोलोकरावणः॥ ६२० ॥ त्रैलोक्यैश्वर्यमतुलंबंधुमंडलमंडितं॥ चकमेनकथंनामपुमानन्यःसुखांतरं ॥ ६२१॥ नलसंलग्नहृदयादमयंतीप्रसंगतः॥शक्रादीनपिसंप्राप्तान्नववेपुरतःस्थितान् ॥ ६२२ ॥ एवमन्येपिबहवोरागांधधिषणाजनाः॥ नगमिष्यंतिनोयांतिनयाताविषयांतरं ॥ ६२३॥ अत्रापिविद्यतेनैवशक्तिर्येषांसुखांतरे ॥ अलौकिकेकथंमोक्षेशक्तिस्तेषांभविष्यति॥ ६२४॥ ततोमोक्षंपुमान्नैवगच्छेत्कामान्हृदिस्थितान्॥ अनवाप्यापिधीमान्योमंदधीःकिंपुनर्जनः॥६२५॥ अनधीत्यद्विजोवेदाननुत्पाद्यतथासुतान्॥ अनिष्ट्वाचैवयज्ञैश्चमोक्षमिच्छन्व्रजत्यधः॥६२६॥

कारीस्यादितिचेन्नन्यायविरोधेनासंबंधादित्याह अत्रापीति येषामत्रलौकिकेसुखांतरेसुखविशेषेसक्तिरासक्तिर्नास्तितेषांप्रथममेवालौकिकेमोक्षसंज्ञेसुखेसाकथंस्यादित्यर्थः योहिलौकिकंसुखंसम्यग्जानीयात्सस्वर्गसुखमिवमोक्षसुखमपिकामयेतेतिसंभवति इच्छायाइष्टतावच्छेदकप्रकारकज्ञानजन्यत्वात् नान्यथेतिभावः ॥ ६२४ ॥ तस्माद्बुद्धिमानपिसर्वान्कामान्पूरयित्वैवमोक्षायायतेतेत्याह ततइति धीमानपित्हृदिस्थान्कामानूअनवाप्यापूरयित्वामोक्षंमोक्षाश्रमंसंन्यासंगच्छेदित्यर्थः ॥ ६२५ ॥ अत्रमनुवाक्यंपठति अनधीत्येति स्पष्टम् ॥ ६२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति यःसर्वैशरीरीप्रथमइत्यादिवाक्योक्तप्रजापतिरूपःसर्वज्ञश्चप्रसिद्धःसमनुरिमंवर्णितंरागप्रभावंजानन्नूपूर्वैश्लोकंप्राहेत्यर्थः॥६२७ फलितमाह ततइति ॥ ६२८ ॥ एतन्मंदमतंपरिहरति इत्यादीत्यादिनात्रैवर्णिकानधीतांस्तानित्यतःपूर्वतनेनग्रंथेन एवंविधंवाक्यजातं येमंदावदंतितेपंडितैरुपेक्ष्याएव तद्वाक्येसंमतिकरणंविद्वत्सुनसंभाव्यतेइत्यर्थः ॥ ६२९ ॥ तत्रयत्तैःसुखदुःखेप्रतिपुण्यपापयोर्हेतुत्वमुक्तंत त्रनेतिनकुर्मःकिंतुतदंशमंगीकुर्मइत्याह सुखइति ॥ ६३० ॥ यत्त्वर्थस्यसुखहेतुत्वमुक्तंतद्व्यभिचाराद्वैपरीत्याच्चायुक्तमित्याह अर्थस्ये

एवंमनुरपिप्राहप्रथमोयःशरीरिणां॥इदंरागस्यमाहात्म्यंजानानःसर्ववित्पुमान्॥६२७॥ततःसर्वोपभोगे नक्षीणेरागेचसर्वतः॥विरक्तोमोक्षमार्गायमनःकुर्वीतपंडितः॥ ६२८ ॥ इत्यादिबहुशोमंदाःसर्वदाभोग लालसाः॥जल्पंतितद्वचःकोत्रगृह्णीयात्पंडितःपुमान् ॥ ६२९ ॥ सुखेपुण्यस्यहेतुत्वंदुःखेपापस्यचेरितं ॥ ए तत्तथेतिकोनामनेतीदंभाषतेपुमान् ॥ ६३० ॥ अर्थस्यसुखहेतुत्वंयदुक्तंतद्दथैवहि ॥ अर्थहीनाश्चसुखिनो दृश्यंतेबहवोयतः ॥ अर्थिनोदुःखिनश्चैवलोकेशतसहस्रशः ॥ ६३१ ॥ अर्थंविनापिभोगाप्तिर्मनुष्यादेर्मये रिता॥याज्ञवल्क्यस्यमैत्रेय्याःसंवादेपूर्वमेवते॥६३२॥प्रसिद्धाविदुषांयस्मादर्थादुःखस्यहेतवः ॥ तेभ्यः कथंसुखंनामभवेत्पंडितरूपिणां॥६३३॥वध्वादयोदरिद्रस्यविमुखाःस्युरितीरितं॥यत्तत्क्वाचित्कमेतत्स्याद्य तःसर्वत्रनैवतत्॥६३४॥सुखेच्छासर्वभूतानामीरितायातथैवसा ॥ तावताकामुकंकेनजगदेतद्भविष्यति ॥६३५॥ कामुकोविषयासक्तःपुमान्लोकेसमीरितः॥नसुखेच्छुस्ततोन्योयस्ततोयत्किंचिदीरितं॥६३६॥

ति ॥ ६३१॥ अर्थंविनाभोगाप्त्युदाहरणंसप्तमाध्यायेअपिवित्तविहीनायेश्रमराइत्यादिनाप्रपंचितमित्याह अर्थंविनेति ॥६३२॥ अर्था नामर्जनेदुःखमित्यादिजानतांसुधियांमतेऽर्थादुःखदाएवयेतुपंडितानांरूपमाकारंधारयंतितेषांसुखदाइत्यपिनएवजानंत्वित्याह प्रसिद्धा इति ॥६३३॥ यच्चदरिद्रंवध्वादयस्त्यजंतीत्युक्तंतदपिशिष्टवृत्तापरिज्ञानविलसितमित्याह वध्वादयइति ॥६३४॥ यच्चसुखेच्छाशालित्वेन सर्वजगतःकामुकत्वमुक्तंतदप्ययुक्तं कामुकत्वस्यजिह्वोपस्थपरेष्वेवलोकेप्रसिद्धत्वादित्याह सुखेच्छेति तथैवसर्वभूतसंबंधिन्येवसासुखे च्छायत्किंचित्तुच्छमितिद्वयोःसंबंधः॥ ६३५ ॥ ६३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागइति यच्चोक्तमेकस्मिन्विषयेजातोरागइतरविषयगोचररागंनिरुंध्यात्प्रतिबध्नीयादित्येतदस्माकंप्रतिकूलंनभवतिमोक्षविषयकरागेणे तररागप्रतिबंधस्यास्मदिष्टत्वादित्यर्थः ॥ ६३७ ॥ यच्चानधीत्येत्यादिकंमनुवाक्यमुपन्यस्तंतदपिनहिनिंदानिंदितुंप्रवर्ततेऽपितुविधेयंस्तोतु मितिन्यायेनाज्ञान्प्रतिकर्मप्रशंसापरमित्येवयुक्तमित्याह मनोरिति अमुनावादिनायामनोरुक्तिःसमुक्ताउपन्यस्तासामोक्षनिंदापरानभ वतीत्येवांगीकरणंशोभनंयुक्तमित्यर्थः ॥ ६३८ ॥ तदनुकूलंविपक्षबाधकंतर्कमभिनयति मोक्षइति यदिमोक्षार्थाप्रवृत्तिर्मनोरनिष्टाभ विष्यत्तदामनुस्मृतिषष्ठाध्यायेमोक्षधर्मंसनावदिष्यत् नचतस्मिन्भ्रमादयोदोषाः संभावनीयाः यद्वैकिंचनमनुरवदत्तद्भेषजमित्यादिश्रुति षुप्रसिद्धसार्वज्ञ्यादिमाहात्म्यस्यतदयोगादितिभावार्थः ॥६३९॥ सत्यंमोक्षोमनोरिष्टःपरंत्वेभ्योवेदाध्ययनादिभ्योनंतरत्वेनैवेतिकल्पना

रागएकत्रसंजातोनिरुंध्याद्विषयांतरे॥ रागमस्माकमेतच्चनानिष्टंमोक्षरागिणां ॥ ६३७॥ मनोरुक्तिःसमुक्तायामोक्षनिंदापरामुना॥ नसामोक्षस्यनिंदायांप्रवृत्तेतिहशोभनं ॥ ६३८॥ मोक्षोमनोरनिष्टश्चेत्षष्ठाध्यायेकथंहिसः॥ मोक्षधर्मंवदेत्प्राज्ञोमनुःसर्वार्थदर्शकः॥ ६३९॥ आनंतर्यंचतस्यैभ्योनेष्टंयुक्त्यावलोकिते॥ अनेकशतशाखानांभेदैर्नानाविधानिमान्॥ ब्रह्मायुरपिविद्वान्नःकोधीयीतजगत्त्रये॥ ६४०॥ पुत्राणांचबहुत्वंस्यात्त्रिषुवैकंपरंततः॥ अनंतेषुद्वयंचैतत्शक्यंकर्त्तुंनमानवैः॥ ६४१॥

पिनयुक्तेत्याह आनंतर्यमिति युक्त्यनुसारेणमनुवाक्येविचारितेसतितस्यमोक्षोद्यमस्यएभ्योवेदाध्ययनादिभ्यआनंतर्यमिष्टमितिनसि द्ध्यतीत्यर्थः तत्रहेतुतयाबहुवेदाध्ययनादीनामशक्यत्वमाह अनेकेत्यादिना ब्रह्मबृहत्आयुर्यस्यतथाविधोपिकस्त्रिलोकीवासीनोधिका रिणामन्यतमोनानाशाखाभिन्नान्बहून्वेदानध्येतुंशक्तोभवेदित्यर्थः ॥६४०॥ तथापुत्रेषुबहुत्वमप्यशक्यंकर्तुमित्याह पुत्राणामिति कपि जलाधिकरणेत्रित्वरूपंबहुत्वंप्रथमोपस्थितपरित्यागानर्हत्वादियुक्तिभिःसिद्धांततयोक्तं चतुष्ट्वादिभेदैरनंतेषुबहुत्वेष्वन्यतमरूपंतत्पूर्वपक्ष तयोक्तंतद्वदत्रपुत्राणांबहुत्वंत्रिषुपर्यवसन्नंस्यादथवाततस्त्रित्वात्परंवर्तमानेषुचतुष्ट्वादिष्वनंतेषुभेदेषुएकमन्यतमरूपंस्यादेतद्बहुत्वप्रकारद्व यमपिदृष्टादृष्टसामग्र्यधीनत्वान्मानवैःस्वातंत्र्येणकर्तुमशक्यमित्यर्थः ॥ ६४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति तथायज्ञैरितियज्ञगताबहुत्वसंख्यापिसात्रित्वरूपाचतुष्ट्वादिरूपावाएवंमानवैःस्वातंत्र्येणकर्तुमशक्यैवसदाप्रसिद्धा एतादृशाशक्यार्थविधानेशास्त्रस्याननुष्ठापकत्वलक्षणाप्रामाण्यापत्तिरित्यर्थः तदुक्तं प्रवृत्तिर्वानिवृत्तिर्वानित्येनकृतकेनवा पुंसांयेनोपदिश्येततच्छास्त्रमभिधीयतेइत्यादि ॥ ६४२ ॥ ननुबहुवेदाध्ययनादिष्वपूर्वविधिर्मनोर्नाभिप्रेतःकिंतुवेदपदेनस्वशाख.तदवयवाभिप्रायेणबहुवचनंचाभिप्रेत्यवेदाध्ययनादीनामन्वयव्यतिरेकसिद्धाकारणतामनुनानूद्यतेइत्याशंक्यान्वयव्यभिचारेणकारणत्वासंभवादनुवादोनयुक्तइत्याह त्रिपुत्राश्चेति यदित्रिपुत्रत्वादीनांमोक्षेच्छांप्रतिकारणत्वंस्यात्तर्हित्रिपुत्रत्वादिशालिनोमोक्षपराएवदृश्येरन्नतुतथादृश्यंतेकिंतुबहवःसंसारसक्तामोक्षविमुखाएवदृश्यंतइत्यर्थः ॥ ६४३ ॥ अस्तुतर्हिनियमविधिःपरिसंख्याविधिर्वामनुनाविवक्षितइत्यपिनशंक्यंमोक्षसौंदर्यज्ञानोत्थितायामोक्षेच्छायाव्यावर्त्तयितुमशक्यत्वादित्याह नियमइति नियमपरिसंख्यात्मकमेतद्विधेःप्रकारद्वयमपिनसंभवतितयोःफ

एवंयज्ञेषुविज्ञेयाबहुसंख्यासदैवसा ॥ अशक्यंविदधच्छास्त्रमशास्त्रंतत्प्रजायते ॥ ६४२ ॥ त्रिपुत्राश्चत्रियज्ञाश्चस्वशाखाध्यायिनोपिच ॥ मोक्षस्येच्छामकुर्वाणादृश्यंतेबहवोद्विजाः ॥ ६४३ ॥ नियमःपरिसंख्यावाद्वयमेतन्नसंभवेत् ॥ अशक्यत्वादिहेच्छांकोभवंतींविनिवारयेत् ॥ ६४४ ॥ एतत्त्रयंपुरामर्त्यःकृत्वैवेच्छेन्नचान्यथा ॥ नियमोममशक्यैर्थैव्यर्थएवप्रजायते ॥ ६४५ ॥ एतत्त्रयंचमोक्षेच्छास्वरूपेणद्वयंयदा ॥ तदेच्छायाःपरित्यागात्परिसंख्याप्रसज्जने ॥ ६४६ ॥

लस्यमोक्षेच्छाव्यावर्तनस्याशक्यत्वात् यतइहमोक्षेसौंदर्यज्ञानेनभवंतींजायमानामिच्छांकोवारयेदित्यर्थः ॥ ६४४ ॥ तत्रनियमविधिमभिनीयतद्वैयर्थ्यमाह एतत्त्रयमिति एतद्वेदाध्ययनत्रिपुत्रत्वत्रियज्ञत्वात्मकंत्रयंकृत्वैवमोक्षमिच्छेत् एतस्मात्पूर्वंप्रसक्तांमोक्षेच्छांनिरुद्ध्य एतदेवकुर्यादितियावत् एवमाकारोनियमस्तदोपपद्येतयदीच्छायांपुरुषस्यस्वातंत्र्यंस्यात् साइच्छात्वशक्यास्वातंत्र्यानर्हाभवतिततोयंनियमोव्यर्थइत्यर्थः ॥ ६४५ ॥ परिसंख्याविधिमभिनीयतत्रदूषणंस्फुटयति एतत्त्रयंचेतित्रिभिः द्वयोर्युगपत्प्रसक्तावेकव्यावृत्तिपरोविधिःपरिसंख्येत्युच्यते तथाचात्रएतदुक्तरूपंत्रयंएकाकोटिःमोक्षेच्छाचद्वितीयाकोटिःएवंविधस्वरूपयुक्तंकोटिद्वयंयदापुरुषेप्राप्नोतितदाएतत्त्रयमेवकुर्यादित्येवंवाक्यविपरिणामेनमोक्षेच्छायाःपरित्यागोवारणंक्रियतेतदापरिसंख्याभवतीत्यर्थः ॥ ६४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति एवंपरिसंख्याविधित्वेनमोक्षेच्छावारणेकृतेसतिमोक्षोनुपादेयोऽप्राप्यः पुंप्रयत्नानुद्देश्यइतियावत् तथाविधःस्यात् यत्रपक्षेदूषणं
सौंदर्यज्ञानेइच्छाया निरोद्धुमशक्यत्वेनव्याघातरूपंपूर्वमुक्तमेवतथेदंपरिसंख्याविधिपरत्वंक्त्वाप्रत्ययंप्रयुंजानस्यमनोरनिष्टमपिभवतीत्य
र्थः ॥ ६४७॥ मनोरनिष्टत्वमेवस्फुटयति क्त्वाप्रत्ययस्येति यदिमोक्षेच्छाव्यावर्त्यास्यात्तदावेदाध्ययनादिकंकृत्वामोक्षमिच्छेदित्येवंततो
वेदाध्ययनादिभ्यःपरत्वंकथमुच्येत तथाचक्त्वाप्रत्ययस्यवैयर्थ्यंकुर्वतीपरिसंख्याऽयुक्तेत्यर्थः ॥ ६४८॥ तस्मादिदंमनुवाक्यंकर्मप्रशंसामात्र
परत्वादर्थवादरूपमित्याह इच्छन्निति योवेदाध्ययनादिभ्यःपूर्वंमोक्षमिच्छतिसपततिअधोगच्छतिइत्येतदनेनवाक्येनोक्तंनैवभवतिबाधि
तमितियावत् यतःप्रत्यक्षंश्रुतिवाक्यंयदिवेतरथाब्रह्मचर्यादेवप्रव्रजेदित्यादिकंतद्धैतत्पूर्वेविद्वांसआहुःकिमर्थावयमध्येष्यामहइत्यादिकं

एवंमोक्षोनुपादेयःसर्वदैवभविष्यति॥ तत्रोक्तंदूषणंपूर्वमनिष्टंचमनोरपि॥ ६४७ ॥ क्त्वाप्रत्ययस्यवैयर्थ्यं
परिसंख्याकरोतिहि॥व्यावर्त्यायाःकथंतुस्यादिच्छायाःपरतातत‌ः ॥ ६४८ ॥ इच्छन्पततिचैवैतत्प्रत्यक्षं
नैवदृश्यते॥ अर्थवादस्ततोह्येषविध्यर्थासंभवाद्भवेत्॥६४९॥अनिच्छानविधेयात्रमोक्षस्याभावरूपतः॥
अभावोनहिकेनापिकर्तुंशक्यःपुरास्थितः ॥६५० ॥

चदृश्यतेइतिपूर्वार्द्धेयोजना ततोबाधितार्थत्वेनविधियोग्यस्यार्थस्यासंभवादिदंवाक्यमर्थवादमात्रंभवेदिति ॥६४९॥ नन्वत्रानिदार्थवादे
नेच्छानिषेधःसूच्यतेनिषेधवाक्येषुतुप्राभाकरैर्नकलंजंभक्षयेदित्यस्यकलंजभक्षणाभावविषयकंकार्यमितिबोधमभिलपद्भिरभावोविधे
यतयांगीक्रियतेतथात्रकिंनस्यादित्याशंकांवारयति अनिच्छेति मोक्षस्यानिच्छाइच्छायाअभावोनविधेयोनविधियोग्यः कुतः अभाव
रूपतःभावोधात्वर्थस्तद्भिन्नत्वात् धात्वर्थएवलिङर्थविधिसंबंधयोग्यइतिभावः यदितुदध्नाजुहोतीत्यादौधात्वर्थसंबद्धेप्रागभावात्यंताभा ॥४६॥
वान्योन्याभावानविधेयाःपूर्वमेवसिद्धत्वादित्याह अभावोनहीति ॥ ६५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुक्षेमसाधारणकारणतामभ्युपेत्यमोक्षेच्छाप्रागभावःकर्त्तव्यःसंरक्ष्यइतियावत् इत्येवंबोधोभविष्यतीतिचेत्स्यादेवंयदिब्रह्महत्यादिव न्मोक्षेच्छानिषिद्धास्यान्नतुतथादृश्यतेप्रत्युतक्षणमेकंक्रतुशतस्येत्यादिश्रुतिभिर्मोक्षेच्छाप्रशस्यतेइत्याह ब्रह्मेति ततइच्छायाःक्षणभंगुरत्वे नस्वतःसिद्धत्वादेवतदिच्छाध्वंसोपिनविधेयइतिद्वितीयदलार्थः ॥ ६५१ ॥ किंचमोक्षेच्छाध्वंसस्यविधानंव्यर्थंमोक्षसौंदर्यस्यलोक वेदप्रसिद्धस्यज्ञानेनपुनरिच्छोत्थानस्यावश्यकत्वादित्याह विहितोपीति ध्वंसइत्यनुषंगः ॥ ६५२ ॥ किमर्थंतर्हिमनुनातदिच्छानिन्द्यत इतिचेदज्ञान्प्रतिकर्मविधातुमित्याह कर्मणामिति ततइच्छाभावस्यविध्यनर्हत्वात्संसारसक्तानांकर्माधिकारितामालोच्यएषामोक्षेच्छा

ब्रह्महत्यादिवन्नायंमोक्षःशास्त्रैर्निषिध्यते॥ ध्वंसोपिचततोनायमिच्छायाःप्रविधीयते ॥ ६५१ ॥ विहितो पिभवेद्व्यर्थःपुनरिच्छाजनौनृणां॥ निसर्गसुंदरेमोक्षेप्रसिद्धेलोकवेदयोः ॥ ६५२ ॥ कर्मणांस्तुतिरेवैषाक्रि यतेमनुनाततः॥ संसाररागिणांवीक्ष्यकर्मणोत्राधिकारितां॥ ६५३॥ सर्वभूतेषुचात्मानंसर्वभूतानिचात्म नि॥ पश्यन्नात्मतयाजीवःस्वाराज्यमधिगच्छति॥ ६५४॥ एवंवदन्मनुर्धीमान्वेदांतार्थविशारदः॥ सर्वज्ञो मोक्षकामंतंकथमेषनिवारयेत् ॥ ६५५ ॥ ततोमनोरभिप्रायमज्ञात्वाबालिशैरिह ॥ उदाहृतंवचःकर्मस्ता वकंन्यायसंयुतं ॥ ६५६ ॥ सर्वभोगोपलाभेनवैराग्यंसमुपागतः ॥ मुक्तिमेतीतियत्प्रोक्तंतत्तुकामाग्निजृं भितं ॥ ६५७ ॥

निंदाद्वारिकाकर्मस्तुतिरेवमनुनाक्रियतेइत्यर्थः ॥ ६५३ ॥ किंचमोक्षेच्छानिषेधेमनोस्तात्पर्यंनभवतीत्येतन्मनुवाक्यादेवायातीत्याह स र्वेतिद्वाभ्यां यआत्मयाजीअंतःकरणशुद्ध्यर्थंसत्कर्मकारीवेदांतवाक्यैरात्मनःकारणतयासर्वत्रानुगमंसर्वभूतानामात्मनिकल्पितत्वंचसंप श्यतिसस्वाराज्यंगच्छतीत्यर्थकंवाक्यंद्वादशाध्यायेकथयंस्तमधिकारिणंमोक्षकामंकथंमोक्षेच्छातोवारयेदितिद्वयोरर्थः ॥ ६५४ ॥ ॥ ६५५॥ फलितमाह ततइति नहिनिंदेतिन्यायेनयद्वचःकर्मस्तावकंमनोरभिप्रेतंतदेवमोक्षनिषेधायोपन्यसद्भिर्बालिशत्वंस्वस्याविष्कृ तंमनोरभिप्रायाज्ञानादित्यर्थः ॥ ६५६ ॥ यच्चैतैरुक्तंसर्वविषयभोगेनैवमोक्षार्होभवतीतितद्दूषयति सर्वेत्यादिना कामाग्निजृंभितंकामा ग्नितापकृतधातुवैषम्यप्रयुक्तप्रलापरूपमित्यर्थः ॥ ६५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रसहस्रशोवेदांतानांशास्त्राणांचमोक्षपराणामप्रामाण्यापत्तिःस्यात्तदर्थस्यमुक्तिरूपस्यासंभवादित्याह सर्वेषामिति इहसर्वविषयेषु विरक्त्यातेनोक्तार्थांगीकारेणमुक्तेरसंभवःस्यादिति ॥ ६५८ ॥ असंभवमेवस्फुटयति अनंतेत्यादिना जंतूनांयोनयस्तावदनंतास्तासां योनीनांप्रत्येकंव्यक्तयःसुतरामनंताःप्रत्येकंव्यक्तीनामपिरुचिभेदेनविषयाःसुतमामनंतास्तेषांसर्वेषांमानुषदेहेलाभोऽसंभवीतिद्वयोरर्थः ॥ ६५९ ॥ ६६० ॥ किंचयथाकंटकभक्षणास्वादउष्ट्रजातावेवलभ्यस्तथासर्वविषयलाभार्थंनारकयोनिस्वीकारापत्तिःसर्वलोकभ्रम

सर्वेषांविषयाणांचेल्लाभान्मुक्तिर्नृणामिह॥ विरक्त्याजायतेतेनभवेन्मुक्तेरसंभवः॥ ६५८॥ अनंतभेदसंभिन्नाजीवानांयोनयःस्मृताः॥ तत्रापिशतधाभेदोवर्ततेवांतरस्त्विह ॥ ६५९ ॥ एकैकस्याःशरीरस्यव्यक्तेःसंतिसहस्रशः॥ विषयाःसंख्ययाशून्यास्तान्कथंसमुपाव्रजेत्॥ ६६० ॥ अपिमोक्षंयियासुःसन्पुमान्नरकमाव्रजेत्॥ नरकेपियतःसंतिविषयाबहुभेदिनः॥ ६६१ ॥ अपिस्वर्गादिसंस्थानाविषयादुर्लभाहिये ॥ सर्वेतेकेनलभ्याःस्युर्यज्ञानामयुतैरपि ॥ ६६२ ॥ हिरण्यगर्भसंप्राप्तौभोगःकोपिनशिष्यते॥ यस्मादस्मान्नकोप्यन्योभोग्योर्थोनेनदृश्यते॥ ६६३ ॥ हिरण्यगर्भसंप्राप्तिर्दुर्लभाप्रथमंत्विह ॥ साधनैर्विविधैःसत्यांचास्यांनास्तिप्रयोजनं॥ ६६४॥

णापत्तिश्चस्यादित्याह अपिमोक्षमिति स्पष्टंद्वयं ॥ ६६१ ॥ ६६२ ॥ ननुहिरण्यगर्भलोकप्राप्तिसंपादनेनसर्वविषयभोगंसंपादयिष्यामइतिशंकते हिरण्येति यतोऽस्मादेनंहिरण्यगर्भभावंप्राप्यकोपिभोग्यःपदार्थोऽनेनाधिकारिणास्वस्माद्भिन्नोनदृश्यतेइत्युत्तरार्द्धार्थः ॥ ६६३ ॥ एतांशंकांदोषद्वयेनपरिहरति हिरण्यगर्भसंप्राप्तिर्दुर्लभेति संभावितबहुविघ्नकत्वेनदुर्लभब्रह्मलोकप्रतीक्षयाऐहिकसुकरमोक्षयत्नपरित्यागेनोपहास्यत्वमेकोदोषः ब्रह्मलोकप्राप्तानांमोक्षस्यनांतरीयकत्वेनमोक्षशास्त्रस्यतदधिकारिकत्ववर्णनेननिष्प्रयोजनत्वलक्षणाप्रामाण्यापादनंद्वितीयोदोषइतिभावः ॥ ६६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचभोगेनकामोपशमंयेप्रतिपादयंतितेइतिहासादिविद्भिरुपहास्याइतिसूचयन्नितिहासादिवाक्यानुसारेणभोगेनकामोपशमाभावमाह नचकामइतित्रिभिः निगदव्याख्यातंत्रयम् ॥ ६६५ ॥ ६६६ ॥ ६६७ ॥ ततइति यतोभोगाभ्यासेनकामोवर्द्धतेततोभोगोविरागस्यहेतुर्नभवतिकिंतुरागस्यैवेति ॥ ६६८ ॥ फलितमाह ततोर्थतइति एवंसतियत्कामुकैरित्युक्तं इतिकिं अर्थस्यफलंभोगस्तस्यफलंवैराग्यद्वारा मोक्षइति तत्स्वप्रसिद्ध्यास्वकीयव्यामोहानुसार्येवोक्तंनतुप्रमाणानुसारीत्यर्थः ॥ ६६९ ॥ कस्तर्हिरागोपशमोपायइत्याकांक्षायांपूर्वंप्रपं

नचकामस्तुसंभोगाद्विनश्यतिकदाचन ॥ किंतुसंभोगतोभूयःपूर्वस्मादधिकोभवेत् ॥ ६६५ ॥ नजातुकामः कामानामुपभोगेनशाम्यति ॥ हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते ॥ ६६६ ॥ यत्पृथिव्यांव्रीहियवंयच्चास्ति वसुकिंचन ॥ एकस्यापिनपर्याप्तंतस्यैपुंसोत्रकामिनः ॥ ६६७ ॥ ततोविषयसंभोगोनविरागस्यकारणं ॥ किंतुरागस्यसततंसर्वेषामिहदेहिनां ॥ ६६८ ॥ ततोर्थतोभवेत्कामःकामान्मोक्षइतीरितं ॥ कामुकैरर्थलुब्धै श्वस्वप्रसिद्ध्यैवसर्वथा ॥ ६६९ ॥ उपायस्त्वेकएवात्रशांत्यैरागस्यविद्यते ॥ सर्वेषांदेहिनांतस्माद्विषयेदोषदर्शनं ॥ ६७० ॥ दोषदृष्टिश्चबहुधावर्णितातेपुरामया ॥ ऐतरेयादिविज्ञानेसंवादेप्यधिकारिणां ॥ संक्षेपतस्त्विमांभूयःशृणुवक्ष्यामितेधुना ॥ ६७१ ॥ विषयःसर्वएवायमनात्मानश्वरस्तथा ॥ दुःखोदर्कःपारतंत्र्यग्रस्तस्तिष्ठतिसर्वगः ॥ ६७२ ॥ नरकेब्रह्मलोकेवाशुनिवापरमेष्ठिनि ॥ समोदारादिसंभूतोविनाहंतांमनोगतां ॥ ६७३ ॥ पंचभूतात्मकोयद्वद्भूतावासःशुनोभुवि ॥ ब्रह्मलोकेपितद्वत्सब्रह्मणोव्यक्तजन्मनः ॥ ६७४ ॥

चितंदोषदर्शनमेवेत्याह उपायस्त्वेकइति ॥ ६७० ॥ यद्यपिविषयदोषदर्शनंप्रथमाध्यायेचतुर्थाध्यायेचप्रपंचितंतथापिसुबोधायपुनरुच्यतेइत्याह दोषेति ॥ ६७१ ॥ विषयइति सर्वगःसर्वलोकेषुभवःसर्वःसमस्तविधोविषयःअनात्मानिस्तत्त्वोनश्वरोविनाशीदुःखोदर्कउत्तरकालेदुःखरूपेणपरिणामीपराधीनश्चभवतीत्यर्थः ॥ ६७२ ॥ सर्वपदद्वयार्थमेवस्फुटयति नरकइति नरकादौदारादिभ्रयुक्तोविषयभोगःसमइत्यभिमानमात्रेणभेदः ॥ ६७३ ॥ तदर्थंशरीरसाम्यमाह पंचेति ॥ ६७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वानर्थसाम्यमाह जन्मेति परप्रथमशब्दौहिरण्यगर्भपरौ ॥ ६७५॥ विषयाणांदोषमयत्वंशिष्टप्रवृत्त्यास्फुटयति तस्मादित्यादीति तस्मा
द्विषयाणांनिःसारत्वादेवब्रह्मविदइत्यादिवर्णितविधंबहुदोषजातंमनसाविचिंत्यविविधान्भोगांस्त्यजंति कीदृशान्भोगान् धातुगान्धात
वःपृथिव्यादिलोकास्तद्गतान् धातूरसादौश्लेष्मादौश्वादिग्रावविकारयोः महाभूतेषुलोकेषुशब्दादावींद्रियेस्थनीतिहैमः ॥ ६७६ ॥ पर
मंफलितमाह ततःप्रजननमिति ततोरागप्रचयहेतुत्वेनसंसारप्रयोजकत्वादेतत्प्रजननमपत्योत्पादनंयद्यपिब्रह्मबोधस्योपायोनभवतित
थापिइहब्रह्मबोधनसाधनगणेकामुकस्यसकामस्याभ्युदयार्थंकीर्तितमिति ॥ ६७७॥ अस्यप्रकरणउपयोगस्तुदृष्टांतसंगत्येतिदर्शयति

जन्ममृत्यूश्रुनोयद्वत्तद्वत्पुंसःपरस्यच ॥सशरीरोयथादुःखीश्वातथाप्रथमःपुमान् ॥६७५॥ तस्मादित्यादिमन
साविचिंत्यबहुधातुगान् ॥ वांतवद्विविधान्भोगांस्त्यजंतिब्रह्मवादिनः ॥६७६॥ ततःप्रजननंनैतदुपायोब्रह्म
बोधने ॥ किंतुपुत्रादिलाभार्थंकामुकस्येहकीर्तितं ॥ ६७७॥ सत्यादयोभवंत्यत्रब्रह्मज्ञानस्यसाधनं ॥ यथा
प्रजननंलोकेसुखपुत्रादिसाधनं ॥ ६७८ ॥ अपिचैतत्स्वतःसिद्धमाहारादिसमंसदा ॥ पश्वादीनांकथं
नामवदेत्कार्यंश्रुतिस्त्विदं ॥ ६७९ ॥ अथवास्तुश्रुतिप्रोक्तंकार्यंप्रजननंत्विदं ॥ अत्रप्रवचनस्यार्थंविभ्र
लुब्ध्वंचलोकतः ॥६८० ॥

सत्यादयइति यथाप्रजननंलौकिकसुखसाधनंतथासत्यादयोब्रह्मबोधसाधनभूताइतिसंगतिरित्यर्थः ॥ ६७८॥ किंचास्मिन्प्रजननेशास्त्रे
णलोकानांप्रवर्त्तनमयुक्तंरागतएवभोजननिद्रादिवत्प्राप्तत्वादित्याह अपिचैतदिति एतत्प्रजननं सिद्धंप्राप्तम् ॥ ६७९ ॥ ननुनिःश्रेयससा
धनानांमध्येरागप्राप्तस्यकीर्त्तनमयुक्तमित्यस्वरसात्पक्षांतरमाह अथवेति अथवाइदंप्रजननपदंकार्यंविधेयप्रतिपादकमस्तु विधेयगणप्र
तिपादकश्रुत्यंतर्गतत्वात् कीदृशंप्रजननपदं प्रवचनपदस्यार्थमध्यापनरूपंबिभ्रत्प्रकृतोपयोगायाभिदधानं नचायमर्थोऽयुक्तः लोक
तोवंशोद्विधाविद्ययाजन्मनाचेत्यादिलोकप्रसिद्धितोलब्धत्वादित्यर्थः तथाचहैमः प्रजननंप्रगतेयोनिजन्मनोरिति तत्रप्रगतपदस्यप्रकृष्टं
गतंज्ञानमितिव्युत्पत्त्याध्यापनसामर्थ्यमर्थइति ॥ ६८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वध्यापनपरत्वमप्ययुक्तंजीविकार्थत्वेनयाजनप्रतिग्रहवद्ब्राह्मणंप्रतिवाक्यांतरैःप्राप्तत्वादितिशंकते यद्यपीति समाधत्ते तथापीति भवेदेषाशंकायद्यध्यापनमेवविधीयेततत्तुनविधीयते वेदांतस्यवेदसिद्धांतस्याद्वैतात्मतत्त्वस्यबोधकेत्रप्रकरणेअसंगतत्वात् किंतुततःप्रकरणानुरोधादध्यापनफलभूतंश्रुत्यर्थावधारणरूपंश्रवणमेवलक्षणयाएतत्प्रजननपदोक्तंभविष्यतीत्यर्थः ॥ ६८१ ॥ यदाऽयमर्थोविवक्षितस्तदाप्रजननस्यसापेक्षत्वंवयःप्रभृतिषुयदुक्तंतत्परित्यज्यसंन्याससापेक्षत्वंसंन्यस्यश्रवणंकुर्यादित्यादिवचनसिद्धंवर्णनीयमित्याह अस्मिन्निति अस्मिन्प्रजननस्यश्रवणरूपत्वात्मकेपक्षे ॥ ६८२ ॥ दारादिसापेक्षत्वंतुआहितादिपदोदितेषुत्रिषुयोज्यमितिदर्शयति त्रैवर्णिकानिति अ

यद्यप्यध्यापनंप्राप्तंवृत्त्यर्थंब्राह्मणस्यहि ॥ तथापिनविधेयंतदत्रवेदांतबोधने ॥ श्रवणंततएवैतत्पारिशेष्याद्भविष्यति ॥ ६८१ ॥ अस्मिन्पक्षेवयःस्त्र्यादिनापेक्ष्यंकेनचित्क्वचित् ॥ किंतुसंन्यासएवैकःशांत्यादिगुणसंयुतः ॥ विवेकिनोविरक्तस्यमुमुक्षोरप्यपेक्ष्यते ॥ ६८२ ॥ त्रैवर्णिकानधीतांस्तान्कृतदारानपेक्षते ॥ अग्न्यादित्रयमत्रैतद्वक्ष्यमाणंहिवैदिकं ॥ ६८३ ॥ जातपुत्रःकृष्णकेशस्त्रिवर्णीदोषवर्जितः ॥ विद्वान्सामर्थ्यसंयुक्तआदधीतविधानतः ॥ अग्नीन्पंचापिचत्रीन्वाश्रौतान्कर्मप्रसाधकान् ॥ ६८४ ॥

ग्नयःअग्निहोत्रंयज्ञाश्वएतद्रूपंत्रयंकर्तृअध्ययनदारसंबद्धान्विप्रक्षत्रियवैश्यान्स्वाधिकारितयासमाकांक्षतेइति अत्रकिंप्रमाणमित्यत आह अत्रैतदित्यादि अत्रउक्तार्थेवैदिकंवाक्यजातंवक्ष्यमाणमर्थतउपन्यस्यमानंमानमितिशेषः ॥ ६८३ ॥ तत्राग्नीनांतत्सापेक्षत्वादिप्रतिपादकंवाक्यजातमर्थतःसंगृह्णन्सफलंस्वरूपमाह जातेतित्रिभिः जातपुत्रकृष्णकेशपदाभ्यांत्रिंशद्वर्षरूपःकालोलक्ष्यते दोषाअंधत्वादयस्तद्वर्जितः विद्वान्कर्मोपयोगिमंत्रादिवेत्ता सामर्थ्यंकर्मोपयोगिद्रव्यसंपदादिरूपंतद्युक्तस्त्रैवर्णिकः पंचदक्षिणाग्निगार्हपत्याहवनीयसभ्यावसथ्यसंज्ञान् त्रीन्आहवनीयांतानेवयथाशास्त्रमादधीतआधानाख्यकर्मणाउत्पादयेत् कीदृशानेतानग्नीन् श्रुतिविहितान्श्रौतकर्मणांसाधकांश्चेत्यर्थः ॥ ६८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाययैवेति केचनाथर्वणिकाएकमग्निमेकर्षिसंज्ञकंश्रौतंवदंतितस्याधानंजायायाःसंयोगंविवाहकालमारभ्यैवतैरुक्तमितिप्रथमदलार्थः तेषांश्रौतानामग्नीनामाधानशक्त्यभावेतुस्मार्त्तमौपासनाख्यमेकमग्निमादधीतेतिगृह्यसूत्रकारावदंतीत्यर्थः ॥ ६८५ ॥ तत्फलमाह अग्निभिरिति उक्ताग्निभिःकेवलकर्मानुष्ठानेनस्वर्गोभवति ज्ञानिनामुपासनासमुच्चितकर्मपराणांतुब्रह्मलोकोभवति लोकद्वयेकीर्तिश्चते

षामित्यर्थः ॥ ६८६ ॥ अथाग्निहोत्रस्वरूपंसफलंवर्णयति अग्नीति सायंप्रातःकालयोरुक्ताग्निषुविधिवदाहुतिप्रक्षेपरूपमग्निहोत्राख्यं कर्मयावज्जीवनमनुष्ठेयमुक्तं यदिवैराग्यंसंन्यासाधिकारप्रयोजकंनजायेततदेत्यर्थः अत्राग्न्याश्रयमितिविशेषणेनाग्निसूक्तंसापेक्षत्वम

जाययैवतुसंयोगादेकमग्निंचकेचन॥स्मार्त्तंवदंतिमुनयस्तेषांशक्तेरभावतः॥६८५॥ अग्निभिःकर्मिणः स्वर्गंव्रजंतिज्ञानिनोपिच ॥ ब्रह्मलोकंतथाकीर्तिसर्वेलोकद्वयेपिच ॥ ६८६॥ अग्निहोत्राभिधंकर्मसायंप्रा तरुदाहृतं॥अग्न्याश्रयंविरागेणविनात्रमरणावधि॥६८७॥ गृहस्थानांगृहेनित्यंसूनाःपंचवसंतिहि ॥ कं डनीदलनीचुल्लीपेषणीमार्जनीतथा ॥ आभिःकृतस्यपापस्यस्पर्शोनैवाग्निहोत्रिणः॥ ६८८॥ अग्नौप्रास्ता हुतिःसम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाः ॥ इत्थंविश्वस्यहेतुःस्यादग्निहोत्रीपु मानिह ॥ ६८९ ॥

त्रापिसंबद्ध्यतेइतिसूचितम्॥६८७॥ अस्यफलंप्रपंचयति गृहस्थानामित्यादिना सूनाहिंसास्थानानिकंडनादीनिसंतितदुत्थपापस्यस्पर्शा भावोऽग्निहोत्रस्यैकंफलमितिसंबंधः तत्रकंडनीउलूखली दलनीविदारणसाधनं पेषणी पेषणसाधनंशिलोपलादि स्फुटमन्यत् यद्यपिम न्वादिभिर्दलनीसाक्षान्नोक्तातथापिपंचसूनागृहस्थस्यचुल्लीपेषण्युपस्करः कंडनीचोदकुंभश्चबद्ध्यतेयास्तुवाहयन्निितिमनुवाक्येउपस्क रपदेनगृहोपकरणत्वरूपेणप्रदर्शिता एतैस्तुउदकुंभस्योपलक्ष्यत्वमभिप्रेत्यस्फुटहिंसास्थानत्वेनदलन्येवोक्तेत्यविरोधः ॥ ६८८ ॥ मनूक्तं

विश्वतर्पणजन्यधर्मलाभरूपंफलंदर्शयति अग्नाविति हुताहुतिरग्निद्वारादित्यंगत्वावृष्ट्यादिपरिणामेनप्रजाततिहेतुर्भवतीत्येवमग्निहोत्री पुमान्विश्वकारणमुक्तइत्यर्थः ॥ ६८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाग्निहोत्रीदेवानांमातृसमउक्तइत्याह देवानामिति मातृसमत्वप्रतिपादकंवाक्यमर्थतःपठति यथेहेति ॥ ६९० ॥ अग्निहोत्रस्यदृष्टंफलं कीर्तिर्दर्शपूर्णमासादियज्ञाधिकारश्चेत्येवंरूपंबोध्यमित्याह अग्निहोत्रीजनइति ॥ ६९१ ॥ आमुष्मिकंतदाह नाकमिति परमनंतरं विद्वानुपासकश्चेद्विशेषः दशमेयज्ञरूपसाधनेतदेवफलंबोध्यंयद्दानउक्तमित्याह यज्ञेपीति ॥ ६९२ ॥ एकादशंमानसाख्यंसाधनंवक्तुमवतारयति साधनमिति एतदुक्तंदशविधंसाधनंतथावक्ष्यमाणंसंन्यासरूपंसाधनंचकस्यचिदेतद्भिन्नस्यसाधनस्ययोगात्पूर्वावस्थापेक्षयाकिंचिद्भूयोधिकंवीर्यवद्भवतीत्यर्थः ॥ ६९३ ॥ किंतदित्याकांक्षायांमानसपदोक्तंधैर्यशालिमनएवेत्याह साधनानीति एतानिउक्ता

देवानांजननीतुल्यःप्रोक्तोयंवेदवादिभिः ॥ यथेहक्षुधिताबालामातरंपर्युपासते ॥ अग्निहोत्रिणमेवंतेदेवानाकसमाश्रयाः ॥ ६९० ॥ अग्निहोत्रीजनःकीर्तिंधनमप्यधिगच्छति ॥ यज्ञानपिकरोत्येषदर्शादीनपरानपि ॥ ६९१ ॥ नाकंप्रयातिमरणात्परंदेवैर्नमस्कृतः ॥ विद्वांश्चत्रिदिवंगत्वाब्रह्मलोकंचगच्छति ॥ यज्ञेप्येतत्फलंप्रोक्तंयच्चदानेप्रकीर्त्तितम् ॥ ६९२ ॥ साधनंसर्वमेवैतद्वक्ष्यमाणंचसर्वदा ॥ अपेक्षयाभवेद्भूयःकस्यचित्किंचिदेवहि ॥ ६९३ ॥ साधनानिदशैतानित्यागेनसहितान्यपि ॥ एकस्मान्मानसान्नित्यंप्रभवंतिनचान्यथा ॥ ६९४ ॥ मनस्वीधैर्यसंपन्नःपुमान्पुण्यरतःसदा ॥ अनुतिष्ठतिसर्वंतन्नापरोदीनमानसः ॥ ६९५ ॥ मनोमूलमिदंसर्वंलौकिकंवैदिकंतथा ॥ प्रवृत्तंचनिवृत्तंचकर्मसिद्ध्यतिदेहिनां ॥ मानसंततएवैतदुक्तमेकादशंत्विह ॥ ६९६ ॥ प्रजापतिःपुरासृष्ट्वामनसैवजगत्त्रयम् ॥ पवित्रःप्रथमःपूज्यआसीत्सर्वशरीरिणां ॥ ६९७

निदशसाधनानित्यागःसंन्यासश्चएतत्सर्वंसाधनजातंमानसाधीनफलकमित्यर्थः ॥ ६९४ ॥ मानसस्यसर्वोपचयहेतुत्वमेवान्वयव्यतिरेकाभ्यांस्फुटयति मनस्वीत्यादिना मनस्वीत्यस्यव्याख्यानंधैर्यसंपन्नइति तत्श्रेयःसाधनजातं ॥ ६९५ ॥ मनोमूलमिति यतःसर्वंकार्यजातंलौकिकादिकंमनोऽधीनंततोमनसएकादशसाधनत्वेनोपन्यासःश्रुत्याकृतइत्यर्थः ॥ ६९६ ॥ मानसस्यसर्वमूलत्वेउदाहरणंहिरण्यगर्भएवतावदित्याह प्रजापतिरिति धैर्यशालिमनःप्रभावादेवहिरण्यगर्भोविश्वंसृजति पवित्रःस्मरणेनपापहंताप्रथमंपूज्यःश्लाघ्यश्चासीदिति ॥ ६९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजापतिर्यथेति नकेवलंप्रजापतिरेवतथाकिंत्वन्येपिमुनिप्रभृतयोमानसबलादभवन्पवित्राःपूज्याश्चेतिवचनविपरिणामेनसंबंधः॥ ६९८ फलितमाह इदमिति ततोविश्वमूलत्वान्मानसंसर्वतःश्रेष्ठंसाधनंस्वर्गादिगंतुमिच्छतामुक्तमित्यर्थः ॥ ६९९ ॥ अथसंन्यासस्यद्वादशसाधनस्योत्कर्षंयथाश्रुतिवर्णयिष्यंस्तद्भेदानूस्मृतिप्रसिद्धांस्तावदाह लिंगधारणेतित्रयोदशभिः संन्यासस्तावद्विविधः दंडादिलिंगधारणसहितस्तद्रहितश्च तत्राद्येविप्रस्यैवाधिकारोऽन्यत्रक्षत्रियादीनामित्यर्थः ॥ ७०० ॥ आद्यइति आद्योलिंगधारणरूपस्तुद्विविधःत्रिदं

प्रजापतिर्यथातद्वन्मुनयोदेवताअपि॥ मनुजाश्चाभवन्सर्वेमानसस्यप्रसादतः॥ ६९८॥ इदंततोधिकंसर्वसाधनेषुप्रकीर्तितम्॥ मानसंसर्वभूतानांस्वर्गमोक्षंचगच्छतां ॥ ६९९ ॥ लिंगधारणरूपोयंत्यागोब्राह्मणजन्मनः॥ अलिंगःक्षत्रियादेःस्यात्समएवात्रधर्मतः ॥ ७०० ॥ आद्यश्चतुर्विधःप्रोक्तोमुनिभिर्वेदवादिभिः॥ त्रिदंडोद्विविधस्तद्वदेकदंडोपितादृशः॥ ७०१ ॥ कुटीचकोबहूदश्चद्वौत्रिदंडौप्रकीर्तितौ ॥ हंसःपरमहंसश्चद्वावुक्तावेकदंडिनौ ॥ ७०२॥ पुत्रीगृहीधनीतद्वद्भार्ययाचविवर्जितः॥ जरसाव्याधिनाचैवग्रस्तःस्निग्धःसुतादिषु॥ ७०३ ॥ भिक्षायाभोजनेतद्वदशक्तोमृदुलःपुमान् ॥ त्रिदंडंधारयेदेषगृहेकृत्वाकुटींसदा ॥ ७०४ ॥ पुत्रदत्ताशनोनित्यंस्वधर्मपरिपालकः॥ कुटीचकोभवेद्भिक्षुःप्रणवादिजपेरतः॥ ७०५॥ विदारोयःपुनर्दारान्संपादयितुमक्षमः॥ ब्रह्मचर्यरतःकर्मश्रद्धावांश्चजरादिना ॥ ७०६ ॥ पुत्रादिषुगतस्नेहोवृद्धभार्योथवास्वयं॥ त्रिदंडंपरिगृह्यैषभवेद्विप्रोबहूदकः॥ ७०७॥

डएकदंडश्चेति तत्रत्रिदंडस्यभेदौकुटीचकबहूदकौ एकदंडस्यहंसपरमहंसाख्यावितिद्वयोरर्थः ॥ ७०१ ॥ ७०२ ॥ तत्रकुटीचकस्याधिकारिणंधर्मांश्चदर्शयति पुत्रीतित्रिभिः स्निग्धःस्नेहवान् मृदुलःक्लेशासहिष्णुः स्फुटमन्यत् ॥ ७०३ ॥ ७०४ ॥ पुत्रदत्तेति पुत्रेणदत्तमशनमन्नादिकंयस्मैसतथा ॥ ७०५॥ बहूदकाधिकारिणमाह विदारइतिद्वाभ्यां योमृतदारःपुनस्तत्संपादनेऽक्षमोऽनुत्सुकःकर्मसुसंध्योपासनादिषुश्रद्धावान्जरयापुत्रादिषुस्नेहहीनोवृद्धदारोवाभवेत्सबहूदकोभवेदितिद्वयोरर्थः ॥ ७०६ ॥ ७०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्धर्मानाह कमंडलुमिति शिक्यंभिक्षान्नधारणार्थं पात्रंभोजनार्थं पवित्रकंजलशोधनवस्त्रं वस्त्रपूतंजलंपिबेदितिवचनात् एताःपंचमात्राउपकरणानिदधानःकीटवन्मंदंमंदंभूमिपर्यटेदन्यांश्चयतिधर्मान्कुर्यादित्यर्थः मात्रापरिच्छदेइतिहैमः ॥ ७०८ ॥ हंससंन्यासस्यतानाह वैराग्यमिति यःपरमवैराग्यवानपिकर्मसुकिंचित्श्रद्धावानूभवतिसहंसोयतिर्भवेत् कीदृशः सामवेदाध्यायिब्रह्मचारिवद्विशिखोयज्ञोपवीतीच स्फुटमन्यत् ॥ ७०९ ॥ ७१० ॥ परमहंसस्यतानाह वैराग्यमिति प्रेप्सुःसाक्षाच्चिकीर्षुःकर्मवासनाहीनश्चयःसकरेणदंडंवै

कमंडलुंत्रिदंडंचशिक्यंपात्रंपवित्रकं ॥ दधानःपंचमात्रास्ताःकीटवत्पर्यटेद्यतिः ॥ यतिधर्मानशेषांस्ताननुतिष्ठेत्सदैवसः ॥ ७०८ ॥ वैराग्यंपरमंप्राप्तोयईषत्कर्मवासनः ॥ यज्ञोपवीतीविशिखःसामगोत्रयथावटुः ॥ ७०९ ॥ एकदंडधरोनित्यंकीटवत्पर्यटन्महीं ॥ प्रणवादिजपेयुक्तोभवेद्धंसोयतिःस्वयं ॥ ७१० ॥ वैराग्यंपरमंप्राप्तइहामुत्रसुखेयदा ॥ आनंदात्मानमेवैकंसंप्रेप्सुर्हृदयेस्थितं ॥ ७११ ॥ कर्मसंस्कारशून्योयःसभवेत्परमःसदा ॥ हंसोविधृत्यकरतएकदंडंहिवैणवं ॥ ७१२ ॥ एवंचतुर्विधःप्रोक्तश्चतुर्थाश्रमवासिनां ॥ न्यासश्चतुर्थस्तत्रापिसर्वोत्कृष्टउदाहृतः ॥ ७१३ ॥ भूतानांप्राणिनःश्रेष्ठाःप्राणिनांबुद्धिजीविनः ॥ चतुष्पादोबुद्धिमतांचतुष्पात्स्वपिगोगणः ॥ ७१४ ॥ उत्तमागोगणेभ्यश्चद्विपदाःसर्वजंतवः ॥ द्विपत्स्वपितथाप्रोक्ताःशूद्रावर्णसमाश्रमाः ॥ ७१५ ॥ शूद्रेभ्यश्चतथावैश्यावैश्येभ्यःक्षत्रवर्णिनः ॥ क्षत्रियेभ्यस्तथाश्रेष्ठाब्राह्मणाजन्मनाहिये ॥ ७१६ ॥

णवंधृत्वापरमहंसोभवेदितिद्वयोरर्थः ॥ ७११ ॥ ७१२ ॥ एषुचरमोतिश्रेष्ठइत्याह एवमिति स्पष्टं ॥ ७१३ ॥ न्यासस्यसर्वोत्कृष्टतांस्फुटयितुमुत्कृष्टपरंपरांपुराणादिप्रसिद्धामभिनयति भूतानामितिसप्तभिः भूतानांशरीरिणांमध्येप्राणिनःस्फुटप्राणव्यापारकाःश्रेष्ठाः तेभ्योपिस्फुटबुद्धयःसर्पादयःश्रेष्ठाः एवमग्रेपि चतुष्पादःपशवस्तेषुगावस्तथेति ॥ ७१४ ॥ उत्तमाइति कीदृशाःशूद्राः वर्णेनसमःसमानकालेप्राप्तआश्रमोयैस्तेतथाजन्मारभ्यामरणंशूद्रस्यएकवर्णत्वमेकाश्रमत्वंचद्विजत्वाभावइतियावत् ॥ ७१५ ॥ शूद्रेभ्यइति स्पष्टम् ॥ ७१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणैश्चेति अग्न्यादयोदेवामाननीयत्वेनब्राह्मणैर्भूदेवत्वेनप्रसिद्धैःसमाउक्ताःपुराणादिषु विद्वांसोविद्यावंतः तेष्वपिवेदपाठविज्ञोऽर्थविदो धिकाइतिभावः ॥७१७॥ विद्वत्स्वपीति आपाततोर्थविज्ञोपिमीमांसयाकृतावधारणाःश्रेष्ठाइत्यर्थः ॥ ७१८ ॥ निश्चितेष्वपीति शास्त्राव धारणपराणांमध्येपियेआश्रमाणांसंबंधिकर्मयथावत्कुर्वंतितेश्रेष्ठाः केआश्रमाइतिचेद्येचतुर्धाब्रह्मचर्यगृहस्थवनस्थसंन्यासभेदैरुक्ताइ त्यर्थः ॥ ७१९ ॥ आश्रमेष्वप्युत्तरोत्तरंश्रेष्ठत्वमित्याह बटुभ्यइति बटुभ्योगृहिणोधिकत्वंसर्वोपजीव्यत्वादिभिरुक्तंश्रुतौ सोयंयत्याश्र

ब्राह्मणैश्चसमादेवाअग्न्याद्याःपरिकीर्तिताः ॥ ब्राह्मणेष्वपिविद्वांसोवेदवेदार्थवेदिनः ॥ ७१७॥ विद्वत्स्वपित थैवस्युरुत्तमानिश्चिताहिये ॥ शास्त्रार्थैसंशयंहित्वावर्ततेनिश्चलाइव ॥ ७१८॥ निश्चितेष्वपिविज्ञेयाउत्तमा येत्रकर्मिणः ॥ आश्रमाणांविभेदेनचतुर्धायेप्रकीर्तिताः ॥ ७१९॥ बटुभ्योत्रगृहीज्ञेयउत्तमोगृहिणोपिच॥ वनीततोयतिःसोयंचतुर्धापरिकीर्तितः ॥ ७२० ॥ कुटीचकोबहूदश्चहंसःपरमहंसकः ॥ चतुर्विधोयतिःप्रो क्तोयोयःपश्चात्सउत्तमः ॥ ७२१ ॥ चतुर्थाःपरमाहंसावेदेब्रह्मविदःस्मृताः ॥ ब्रह्मनिष्ठायतस्तेषांन्यासःस्या दात्मवेदने ॥ ७२२ ॥ त्वंपदार्थविवेकायसंन्यासःसर्वकर्मणां ॥ प्रकुर्वाणःपतत्येषतंत्यक्त्वाकर्ममोहतः ॥ कु र्वाणश्चपरंब्रह्मभवत्येवनसंशयः ॥ ७२३ ॥

मः ॥ ७२० ॥ कुटीचकइति स्पष्टं ॥ ७२१ ॥ यत्याश्रमंचचतुर्थभेदंसर्वोत्कृष्टंदर्शयन्न्यासइतिब्रह्मेत्यादिश्रुतिग्रंथस्यार्थमाह चतुर्था इतिषड्भिः परमहंसाब्रह्मविदोब्रह्मनिष्ठाश्चोक्ताः यतस्तेषांसंन्यासपरिग्रहोब्रह्मसाक्षात्कारार्थमेवेत्यर्थः ॥७२२ ॥ ब्रह्मसाक्षात्कारार्थत्वेवा र्तिककृद्वचनमर्थतःसंगृह्णाति त्वंपदार्थेति त्वंपदार्थःसर्वांतरमात्मतत्त्वंतस्यसर्वोपाधिविवेकायैवसर्वकर्मणांसंन्यासःश्रुत्याविधीयतइतिशे षः तंविवेकंमोहेनत्यक्त्वाकर्मप्रकुर्वाणएषयतिःपततीतिसंबंधः एवमावश्यकत्वेपरमहंसोयतिरात्मज्ञानेनब्रह्मवेदब्रह्मैवभवतीतिश्रुतिप्रसिद्धं ब्रह्मभावंयात्येवेत्याह कुर्वाणइति आत्मविवेकमितिशेषः ॥ ७२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मभावेचसर्वात्मनःसर्वोत्कृष्टत्वमपिविदुषःसिद्धमित्याह ब्रह्मेति यतोब्रह्मणःसर्वात्मकत्वविज्ञानेनलाभश्चपूर्वमुक्तस्ततस्तेविद्वांसःसर्वंभवंतीतियुक्तमितिसंबंधः ॥ ७२४ ॥ सर्वपदार्थंस्फुटयन्फलितमाह कालात्मकमिति कालात्मकंकालोपाधिभूतंकार्यजातंअकालंनित्यंच एतत्सर्वरूपाःब्रह्मविद्याःब्रह्मणिविद्यायेषांतेतथाभूताभवंतिततस्तेभ्यउत्कृष्टंभूतादिकंनास्तिअतस्तेसर्वोत्कृष्टाइति ॥ ७२५ ॥ अतोविद्याद्वारासर्वोत्कृष्टत्वप्रयोजकत्वात्संन्यासोब्रह्मत्वेनपरःश्रुत्योक्तइत्याह ब्रह्मविज्ञानदइति यथाचब्रह्मापेक्षयासर्वंकार्यकारणजातमपरंतथाब्रह्मरूपतयोक्तान्न्यासात्सर्वमुक्तंसाधनजातमपरमितिसिद्धमित्याह परंचेत्यादिना ॥ ७२६ ॥ अथसंन्यासपरमत्वेउपपत्तिप्रपंचकस्य

ब्रह्मसर्वात्मकंयस्मात्पूर्वमेवसमीरितं ॥ विद्वांसोब्रह्मविज्ञानात्ततःसर्वंभवंतिते ॥ ७२४ ॥ कालात्मकमकालंचसदसच्चपरापरम् ॥ ब्रह्मविद्यास्ततस्तेभ्योनासीन्नास्तिनभाव्यपि ॥ उत्कृष्टंततएवैतेस्मृताःसर्वोत्तमाभुवि ॥ ७२५ ॥ ब्रह्मविज्ञानदोन्यासस्ततएवपरःस्मृतः ॥ परंचब्रह्मतस्माद्यदन्यत्स्यात्साधनंभुवि ॥ तपआदिनिकृष्टंतदयमेवाधिकस्ततः ॥ ७२६ ॥ न्यासेब्रह्मात्मकेसर्वजगतोहेतुतांद्विजाः ॥ विवक्षवइमांप्राहुर्युक्तिंवेदसमीरितां ॥ ७२७ ॥ न्यासाद्ब्रह्मात्मविज्ञानंविदुषांजायतेयतः ॥ ततोन्यासःपरंब्रह्मकारणंहेतुवर्जितं ॥ ७२८ ॥ यतःसूत्रमिदंजातंससूक्ष्मंपंचभूतकं ॥ हिरण्यगर्भइत्येतदुच्यतेवेदवादिभिः ॥ ७२९ ॥ अस्मात्प्रजापतिर्जातोविराट्संवत्सरश्चयः ॥ आदित्यइतिचाप्युक्तोवेदवादरतैर्द्विजैः ॥ ७३० ॥

न्यासइत्याद्युर्मनीषिणइत्यादिग्रंथस्यार्थमाह न्यासइति न्यासेब्रह्मरूपत्वंतत्प्रयुक्तांसर्वजगतोहेतुतांचविवक्षवोवक्तुमिच्छवःस्फुटीकर्तुमिच्छंतइतियावत् तथाभूताद्विजास्तित्तिरयइमांवक्ष्यमाणांयुक्तिमाहुरित्यर्थः ॥ ७२७ ॥ तत्रब्रह्मरूपतामुपपादयति न्यासादिति यतोन्यासाद्ब्रह्मात्मज्ञानंब्रह्मभावप्रयोजकंभवतिततोन्यासोमूलकारणात्मकब्रह्मरूपउपचारेणोक्तइत्यर्थः ॥ ७२८ ॥ ब्रह्मणोमूलकारणतांस्फुटयति यतइति यतोब्रह्मणइदंसूक्ष्मंस्थूलंचभूतपंचकंजातंतत्रसूक्ष्ममयोहिरण्यगर्भइत्युच्यतेसूक्ष्मकार्यस्थूलसमष्ट्युपाधिकस्तुप्रजापतिरितिविराडितिसंवत्सरइतिआदित्यइतिचनामभिरुक्तःश्रुताविति द्वयोरर्थः ॥ ७२९ ॥ ७३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्राप्यादित्यमंडलांतस्थस्यंभगवतोजगत्कारणत्वंप्रत्यक्षसिद्धान्वयव्यतिरेकाभ्यांनिश्चीयतेइत्याह आदित्येति ॥७३१॥ प्रत्यक्षेणकारणतासिद्धिमेवश्रुत्युक्तपरंपरयादर्शयति रश्मिभिरितिनवभिः यतोयमादित्यांतस्थःपुरुषःस्वशरीरोत्थकिरणैर्जलमाकृष्यमेघगतंकृत्वाचमुंचति कीदृशंजलं सर्वकारणं ॥ ७३२ ॥ कथंतत्सर्वकारणमित्यतआह स्थावराइति ततोवृष्टिजलादेवस्थावरजातयस्तत्रान्नहेतुत्वेनप्रधानभूताओषधिवनस्पतयश्चजायंतेतेभ्योन्नंतस्मात्प्राणधारणंचजंतूनांभवतीतिप्रसिद्धमितिद्वयोरर्थः ॥ ७३३ ॥ ७३४ ॥ एवमन्नस्यदृष्टसकलदृष्टहेतुत्वमादित्यमंडलांतस्थस्योक्त्मथतत्कार्येन्नेसकलाभ्युदयनिःश्रेयससाधनतोपन्यासेनादित्यमंडलस्थस्यब्रह्मणोविश्वहेतुत्वं

आदित्यमंडलेयोयंस्वर्णवर्णःपुमान्स्थितः॥सएवजगतोहेतुःप्रत्यक्षमिहदृश्यते॥ ७३१॥ रश्मिभिःस्वशरीरोत्थैर्यतोजलदसंश्रितं॥नीरंमुंचतिलोकेस्मिन्सर्वेषामिहकारणं॥ ७३२ ॥ स्थावरास्ततएवैतेजायंतेभूमिमाश्रिताः॥ओषध्यःकीर्तितायाश्चयेवनस्पतयोपिच॥ ७३३ ॥स्थावरेभ्योभवत्यन्नंविविधंप्राणिनामिह॥ अन्नतःसर्वजंतूनांप्राणाजीवनहेतवः ॥ ७३४ ॥ प्राणतश्चतथैवस्याद्बलंतत्कर्मकारणं ॥ बलतस्तपएतत्स्याद्यत्कृतंभृगुणापुरा ॥ ७३५ ॥ कर्मशुद्धंततःश्रद्धापरलोकास्तिधीरपि ॥ श्रद्धातोजायतेमेधायास्याद्वेदार्थधारिणी ॥ ७३६ ॥ मेधातोजायतेबुद्धिर्मनसोपिनियामिका ॥ यस्यानियमतोनित्यंशास्त्रार्थेतत्प्रवर्त्तते ॥ ७३७॥ मनीषयामनश्चैतज्जायतेशास्त्रसंस्कृतं॥ मनसोजायतेशांतिरात्मन्येवहियात्रधीः॥ ७३८॥

स्फुटयन्नन्नादभ्युदयनिःश्रेयसयोःसिद्धिपरंपरामाह प्राणइतिषड्भिः अन्नजेभ्यःप्राणेभ्यःकर्मकरणसामर्थ्यरूपंबलंभवति बलाच्चशुद्धकर्मरूपंतपोभवति यद्भृगुणावरुणोपदेशेनकृतमित्युक्तं ततःशुद्धकर्मरूपात्तपसःश्रद्धापरलोकास्तित्वबुद्धिरूपाभवति ततश्चशास्त्रार्थधारणक्षमबुद्धिरूपामेधाभवतीतिद्वयोरर्थः ॥ ७३५ ॥ ७३६ ॥ मेधातइति तस्यामेधातोबुद्धिर्मनसोनियमनसमर्थाबुद्धिवृत्तिर्जायतेयस्यानियमतोहेतोस्तन्मनोनियमेनइतराकारपरिहारेणशास्त्रार्थेप्रवर्ततेइत्यर्थः ॥७३७॥ मनीषयेति तयामनीषयाशास्त्रार्थवासनासंस्कृतांतःकरणावस्थामनःपदोक्ताजायते ततोमनसआत्माकारधीवृत्तिरूपाशांतिर्भवतीत्यर्थः ॥ ७३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शांत्याचेति उक्तरूपायांशांतौसत्यामात्मनआनंदादिविशेषनिर्णयोन्मुखांतःकरणवृत्तिरूपंचित्तंजायतेततश्चानंदत्वादिप्रतिपादकगुरूप दिष्टवेदवाक्यार्थगोचरास्मृतिर्भवतिततश्चशुद्धतत्त्वंपदार्थप्रकाशःस्मारपदोक्तोजायतेततःस्मारान्महावाक्यार्थभूतब्रह्मात्मज्ञानंपरोक्षंभव तिततश्चानंदात्मनोऽपरोक्षंसंन्यासप्रयोजकंजायतेइतिद्वयोरर्थः ॥ ७३९ ॥ ७४० ॥ एवमिति यतएवमुक्तविधयाब्रह्मरूपःसंन्यासो न्नस्यकारणंजनकंफलंचभवतितत्रादित्यांतस्थरूपेणवृष्टिद्वाराजनकंप्राणादिपरंपराजन्यसाक्षात्काराईत्वेनफलरूपंचभवतीतितस्माद्भुभ यतोब्रह्मसंबद्धमन्नंजानन्योन्नंददत्प्रयच्छन्भवतिसजनएतानिवर्णितान्यन्नस्यकार्याणिकारणानिप्रयच्छन्भवतीत्यर्थः दृष्टंहिकार्य

शांत्याचजायतेचित्तमात्मज्ञानोन्मुखंहियत्॥चित्तात्स्मृतिर्भवेद्वेदवाक्यार्थेगुरुकीर्त्तिते॥७३९॥स्मृत्यास्मारो भवेत्तस्यप्रकाशोवगमात्मकः॥स्माराद्ब्रह्मात्मविज्ञानंश्रवणादिसमुद्भवं॥आनंदात्मातततःसाक्षाद्भवतीहशरी रिणः॥ ७४० ॥एवंब्रह्मात्मकोन्यासोयस्मादन्नस्यकारणं॥ तस्मादन्नंददज्जंतुःसर्वाण्येतानियच्छति॥७४१ अन्नतःप्राणिनांप्राणःप्राणेभ्यश्चमनस्तथा ॥ विज्ञानंमनसोज्ञानात्सुखमत्रप्रजायते ॥ अन्नंपंचात्मकंत्र्ये वंपंचकोशेषुकीर्तितं ॥ ७४२ ॥ पंचमोज्ञानतोजातआनंदःसुखशब्दभाक् ॥ माययैवायमात्माख्योजाय तेनतुतत्त्वतः ॥ ७४३ ॥

दानेकारणदानंयथाम्रफलदानेतद्वृक्षदानंतथाकारणदानेकार्यदानमपियथागोर्दानेदुग्धदानमिति ॥ ७४१ ॥ तत्रान्नस्याध्यात्मप्रपं चकारणतांपूर्वोक्तकोशपंचकानुवादेनश्रुत्यादर्शितामभिनयति अन्नतइतिद्वाभ्यां अन्नादिशब्दाःकोशपराः ज्ञानाद्विज्ञानमयात्सुख मानंदमयाख्यंजायतेआविर्भवतीत्येवंपंचकोशरूपेणान्नमवस्थितमित्यर्थः ॥ ७४२ ॥ पंचमइति तेषुकोशेषुपंचमआनंदोज्ञानतोविज्ञा नमयाज्जातोभवतीतियदुक्तंतन्माययैवमायामयप्रियमोदादिविशिष्टरूपाभिप्रायेणैवेतिबोध्यं यतोऽयमानंदःपुच्छभूतशुद्धात्मरूपेणवा स्तवेनजायतेइत्यर्थः ॥ ७४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यवस्तुतोजन्मायोग्यतांस्फुटयितुंसएषइत्यादिश्रुत्युक्तामाधिदैविकींविभूतिमाह पुरुषइत्यादिना योयमानंदरूपःपुरुषःसत्रिलोक्यादि भिःपंचभीरूपैरूपवानितिप्रथमदलार्थः रूपपंचकमभिनयति लोकेति, पृथिवीअंतरिक्षंद्यौर्दिशःकोणाश्चएतैरूपैरधिदैवंपंचविधोजातइ त्यर्थः ॥ ७४४ ॥ नकेवलमेतान्येवास्यरूपाणिकिंतुसमस्तंजगदित्याह पुरुषेणेति अमुनापुरुषेणसर्वकालत्रयावच्छिन्नंजगत्ओतप्रोतंस र्वतोव्याप्तमित्यर्थः ॥ ७४५ ॥ जिज्ञासाकृतपदस्यकृतजापदस्यरयिष्ठपदस्यचार्थंदलत्रयेणाह जिज्ञासयेति विचाररूपयाजिज्ञासयाल भ्यः अवश्यभाविफलकत्वेनकृतपदोक्तात्कर्मणःसकाशात्फलरूपेणजातः समस्तसत्फलरूपइतियावत् तथारयिपदेनधनवाचकेनसुव

पुरुषोयस्त्रिलोक्याश्चदिशामपिचरूपभाक् ॥ लोकत्रयीदिशस्तद्वदवांतरदिशोपिच ॥ इत्थंपंचात्मकोजातःपु मान्भेदविवर्जितः ॥ ७४४ ॥ पुरुषेणामुनासर्वमोतप्रोतंजगत्त्रयं ॥ तंतुनेवपटोभाविभवद्भूतंतथापुमान् ॥ ७४५ ॥ जिज्ञासयासदागम्यःपुरुषोमननाख्यया ॥ कृतादेषपुमान्जातःफलरूपेणकर्मणः ॥ सुवर्णंत्रस मीचीनेवस्तुन्येषोवतिष्ठते ॥ ७४६ ॥ श्रद्धयातुतथासत्यादेषगम्योमहेश्वरः ॥ स्वयंज्योतिर्यतस्तेनतेजस्व्यपिच गीयते ॥ ७४७ ॥ तपसोभृगुणापूर्वंसमनुष्ठितरूपिणः ॥ वरोतिशयितोयस्माद्वरिष्ठस्तेनकथ्यते ॥ ७४८ ॥ एवंभूतंपुराप्रोक्तमानंदात्मानमीश्वरं ॥ हृदयस्थेनमनसाज्ञात्वाक्लेशविवर्जितः ॥ भूयोनमरणंगच्छेदेतद्देह स्यपाततः ॥ ७४९ ॥

र्णंसमीचीनंवस्तुलक्षितंतत्रसर्वत्रअंशांशेनस्थितइतिदलत्रयार्थः ॥ ७४६ ॥ श्रद्धादिपदत्रयार्थमाह श्रद्धयेति श्रद्धयासत्येनचलभ्य मानत्वात्श्रद्धासत्यपदाभ्यामुक्तः तथास्वयंप्रकाशत्वात्तेजस्वीतिकथ्यतेमहस्वत्पदेनेत्यर्थः ॥ ७४७ ॥ तपोऽपेक्षयावरिष्ठत्वमाह तपसइ ति भृगुणानुष्ठितंयत्तपस्तत्साधनांतरेभ्योवरंतस्मादपिसाधनभूतादभिव्यंग्यफलरूपतयाऽत्युत्कृष्टत्वादयंपुरुषस्तपसोवरिष्ठइत्युक्तइत्यर्थः ॥ ७४८ ॥ तद्विज्ञानफलमाह एवंभूतमिति एवंभूतंवर्णितगुणैरुपलक्षितंतत्स्वमेकाग्रेणमनसाज्ञात्वाक्लेशवर्जितोभवतिदेहपातानंतरंपुन र्नजायतेचेत्यर्थः ॥ ७४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णितात्मज्ञानंप्रत्यसाधारणकारणत्वाच्चन्यासस्योक्तसाधनेभ्यउत्कृष्टत्वंसिद्धमित्याह मृत्वेतिद्वाभ्यां यतोन्यासप्रभावादिहब्रह्मलोकेवा अज्ञाननाशकंब्रह्मात्मवेदनंप्राप्यमृत्वानम्रियतेमुच्यतेततोन्यासउक्तसाधनेभ्यःश्रेष्ठइतिद्वयोरर्थः ॥७५०॥७५१॥ न्यासलभ्यात्मनःप्रतिपत्तिस्वरूपमभिनयतोवसुरण्वइत्यादेःप्रणवांतस्यश्रुतिवाक्यस्यपदानामर्थंदर्शयति न्यासेनेतिनवभिः योयंन्यासेनगम्यआत्मासस्वयंप्रकाशानंदरूपत्वेनवित्तवन्निरतिशयप्रेमास्पदत्वाद्वसुपदेनश्रुत्योक्तः अन्यपदेनतस्यविभोर्वैलक्षण्यंसत्यत्वसूक्ष्मत्वरूपमुक्तं तथास्वांतःस्वस्यसंघातस्यांतःप्राणापानयोर्नियंतृत्वेनविशेषतोव्यवस्थितःसंस्तयोःसंधिव्यानरूपंकुर्वाणःपूर्वोक्तवामनसंज्ञोभवतिततःप्राणसंधातेत्युक्त

मृत्वानम्रियतेयस्मान्न्यासाद्ब्रह्मात्मवेदनं॥ अत्रैवब्रह्मलोकेवासंप्राप्याज्ञाननाशनम्॥७५०॥ तस्मान्न्यासंपरंप्राहुःसाधनंब्रह्मवादिनः॥ सत्यादीनांपुरोक्तानामेषांसाधनरूपिणां ॥ ७५१ ॥ न्यासेनगम्यतेयोयमानंदात्मास्वयंप्रभः॥ सत्यःसूक्ष्मोविभुःस्वांतःप्राणापानव्यवस्थितः ॥ संधिंतयोःप्रकुर्वाणोवामनोव्यानरूपतः ॥ ७५२ ॥ ब्रह्मरूपोत्रविश्वस्यधारकस्तेजसःप्रदः ॥ सूर्यादीनांतथावर्चोब्राह्मणादेःप्रयच्छति ॥ ७५३ ॥ तेजोदाहादिहेतुःस्याद्वर्चःसौष्ठवकारणं ॥ वर्चोददातिभगवान्जाठरोग्निःशरीरिणां ॥ पुरुषोदृश्यतेयेननीरोगःकांतिसंयुतः ॥ ७५४ ॥ द्युम्नंस्याद्भास्वरंवस्तुसूर्यस्यकिरणादिना ॥ जांबूनदादिसंजातंतदप्येषप्रयच्छति ॥ ७५५ ॥

इत्यर्थः ॥७५२॥ ब्रह्मेति पुनःकीदृशः ब्रह्मरूपःपूर्णत्वात् तथाविश्वस्यधारकःपोषकः सूर्यचंद्रादीनांतेजसःप्रदायकः ब्राह्मणादीनांवर्चसोदाता ॥ ७५३ ॥ तेजःपदस्यवर्चःपदस्यचार्थभेदमाह तेजइति दाहप्रकाशयोःप्रयोजकंतेजइत्युच्यते सौष्ठवस्यसौंदर्यस्यकारणंप्रयोजकंयज्ज्योतिस्तद्वर्चइत्युच्यते तत्रवर्चोदायकत्वंयद्भगवतउक्तंतज्जाठराग्निरूपेणबोध्यं यतोजाठराग्निकृतान्नपरिपाकवशादेवांगसौष्ठवंदृश्यतेइत्यर्थः ॥ ७५४ ॥ द्युम्नोदाइतिपदार्थमाह द्युम्नमिति सुवर्णदर्पणादिषुसूर्यकिरणसंपर्केणयद्भास्वरंपरप्रकाशकंज्योतिरुद्भवतितद्द्युम्नमित्युच्यतेतस्यदायकोप्ययमेवेत्यर्थः ॥ ७५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति अथवाद्युम्नपदेनसूर्यचंद्रयोस्तेजउच्यते अग्नेस्तेजस्तुवर्चइत्युच्यते तथाचअग्निसूर्यचंद्राणांतेजोयोददातिसपुमान्हृदयस्थःसं
न्यासेनलभ्यइतिद्वयोरर्थः ॥ ७५६ ॥ ७५७ ॥ उपयामगृहीतादिपदत्रयार्थमाह उपेति उपसमीपेयमाअहिंसासत्यादयोयस्येतिव्यु
त्पत्त्यासंन्यासउपयामपदेनोक्तःतेनगृहीतत्वाल्लुब्धत्वादयमात्माउपयामगृहीतइत्युक्तः अयंकः यःस्वप्रकाशत्वान्महःपदेनसत्यादिलक्षण
त्वाद्ब्रह्मपदेनचोक्तइतिद्वयोरर्थः॥ ७५८ ॥ ७५९ ॥ उत्तराध्यायजिज्ञासामुत्थापयन्प्रणवालंबनेनवर्णितपुरुषेचित्तैकाग्र्यंकुर्यादित्याह

अथवाद्युम्नमुद्दिष्टंतेजएवमनीषिभिः॥सूर्याचंद्रमसोस्तद्वदग्नेर्वर्चःप्रकीर्तितं॥ ७५६॥ अग्नेःसूर्यस्यसोमस्य
वर्चोद्युम्नंचयच्छति ॥ यःपुमान्सोत्रसंन्यासाल्लभ्यतेहृदयस्थितः॥ ७५७ ॥ उपयामोत्रसंन्यासोयमास्तस्य
समीपगाः॥यतस्तेनामुनादेवोगृहीतोवेदवादिभिः॥ ७५८ ॥ उपयामगृहीतोयमानंदात्मानिगद्यते ॥ स्वप्र
काशंपरंब्रह्मसत्यज्ञानादिलक्षणं॥ ७५९ ॥ जाबालादिश्रुतिप्रोक्तंन्यासंकृत्वाजितेंद्रियः ॥ तत्त्वमस्यादिवा
क्यार्थवाचकंप्रणवाक्षरं॥ ७६० ॥ हंसादिश्रुतिसंप्रोक्तंयोगमास्थायधैर्यवान् ॥ गुरूपदिष्टमार्गेणयुंजीता
त्मानमात्मना॥ ७६१ ॥ यएतांमहतींब्रह्मविद्यांमोहविनाशिनीं॥ देवानांगुह्यभूतांचनिधिवत्तैस्तुरक्षितां॥
जानीतेब्रह्मणःसोयंमहिमानंसमाप्नुयात्॥७६२॥ यस्मादयंपुमान्गच्छेन्महिमानममुंतया॥ तत्कामस्तत
एवायमेनांकुर्वीतसर्वथा ॥ ७६३॥

जाबालादीतिद्वाभ्यां जाबालाद्युपनिषदुक्तप्रकारेणन्यासंकृत्वातथामहावाक्यार्थस्यऐक्यस्यसोहमित्यत्रसकारहकारलोपनिष्पन्नतया
वाचकंप्रणवंविदित्वेतिशेषः तथाहंसाद्युपनिषदुक्तविधंयोगमास्थायावलंब्यधीरआत्मानंपरमात्मनायुंजीतऐक्येनचिंतयेदितिद्वयोरर्थः
॥ ७६० ॥ ७६१ ॥ उक्तज्ञानस्यफलमाह यएतामिति तैर्देवैर्वित्तवद्रक्षितत्वेनगुह्यभूतां ॥ ७६२ ॥ फलितमाह यस्मादिति यस्मात्पुमान ॥५४॥
धिकारीतयोक्तविद्यया‌अमुंब्रह्मसंबंधिनंमहिमानंगच्छतिततस्तत्कामोब्रह्ममहिमप्राप्तिकामोयमधिकारीएनांविद्यांसर्वप्रकारेणसंपादयेदि
त्यर्थः ॥ ७६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपनिषत्पदेनमुख्यवृत्त्याब्रह्मविद्यावाचकेनतदुपायभूतोयंथोलक्षणयोच्यतइत्याह सदेरिति उपनिइत्युपसर्गद्वयपूर्वकस्यसदिधातोरु दितःसमुद्भूतोयमुपनिषच्छब्दउपसान्निध्येननितरांसादयतिविशीर्णंकरोत्यबोधमितिव्युत्पत्त्याब्रह्मविद्यायाअभिधायकस्तेनसैवब्रह्मवि द्यैवोपनिषदितिवक्तव्यातस्याब्रह्मविद्यायाःप्रापकत्वाद्ग्रंथोपितथोक्तइत्यर्थः ॥ ७६४ ॥ उपसंहरति एषोपनिषदत्रेति अत्रदशमाध्याये तित्तिरिशाखागतारहस्याब्रह्मविद्याप्रोक्ताअतोवर्णितरूपायाविद्यायाअधिकाविद्याअस्मिंस्तित्तिरिशाखाग्रंथेनास्तीत्यर्थः ॥ ७६५ ॥ तस्यैवंविदुषइत्याद्यनुवाकस्ययज्ञांगानांसांगानांविद्वत्शरीरेसमारोपोपन्यासद्वारेणससंन्यासात्मविद्याप्रशंसनपरत्वांगीकारेतदुपासनंमं दैर्यज्ञादिबहिरंगसाधनवदंतःकरणशुद्ध्यर्थंकर्त्तव्यंनतुशमादिवदंतरंगसाधनत्वादुक्तात्मविद्यावतापिकर्त्तव्यमित्याशयेनाह पुरुषस्येति

सदेरुपनिपूर्वस्यशब्दोयमुदितःसदा ॥ ब्रह्मविद्याभिधस्तेनसैवोक्तोपनिषद्विजैः॥ तस्यास्तुवाचकःसोयंग्रंथो प्युपनिषन्मतः ॥७६४॥ एषोपनिषदत्रोक्तातित्तिर्युक्तामयाधुना ॥ ब्रह्मविद्याधिकानातोग्रंथेस्मिन्विद्यतेक्व चित् ॥ ७६५॥ पुरुषस्यात्रयोयज्ञस्तस्योपासनमीरितं ॥ मंदानामधिकारस्यसिद्ध्यैनैवात्मबुद्धये ॥ इतःपरंपु नःकिंत्वंश्रोतुमिच्छसितद्वद ॥७६६॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणश्रीशं करानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेतैत्तिरीयसारार्थप्रकाशोनामदशमोऽध्यायःसमाप्तः १०॥

अत्रनारायणीयांतिमानुवाकेपुरुषस्यउक्तात्मविद्यावतःसंवंधीयोयज्ञोज्ञाननिष्ठारूपस्तस्यकर्ममययज्ञांगानांयजमानपत्न्यादीनामात्मश्र द्धादिषुसमारोपरूपमुपासनंचित्तशुद्ध्यैमंदैःकर्त्तव्यमित्येतदर्थमुक्तंनत्वात्मसाक्षात्कारार्थमुक्तंयेनविदुषापिकर्त्तव्यंस्यादित्यर्थः अधिकमा करेष्वनुसंधेयं ॥७६६॥ यस्मिन्न्यस्तंमनोवस्थांभोगानौचित्यतोऽश्नुते वाचामगोचरंदेवंतंनारायणमाश्रये ॥१॥ अस्यार्थः॥ भगवतिन्यस्त चित्तानांकृतकृत्यत्वेनमनसाकृत्यंनास्ति भगवतोपिपूर्णकामत्वान्न्यासापहारदोषोपदेष्टृत्वाच्चनतेनकृत्यं तथाचानंदसिंधौभगवतिज्ञाना ग्निपरिप्लुतबीजभावेन्यस्तस्यचित्तस्यकानुगतिरितिभावः ॥ १ ॥ ॥ इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनूजरामकृ ष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतावात्मपुराणटीकायांसप्रसवाख्यायांदशमोध्यायः समाप्तः ॥ १०॥ ॥ ७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे दशमोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे एकादशाऽध्याय प्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ स्तुतीरावणदर्प्पारेर्हरेरक्षाधिमंथिनः ॥ एकादशावतारस्यतारिण्येकादशांबुधेः॥ १॥अस्यार्थः रावणदर्प्पहरस्यअक्षंरावणपुत्रमधिष्ठायमंथितुंशीलंयस्यतथाभूतस्यएकादशरुद्रावतारस्यचहरेर्हनुमतःस्तुतिरेकादशाध्यायरूपांसिधोस्तारिकेत्यर्थः श्रीरामचंद्रपक्षे रक्षयाक्रूष्यादिप्रजानामाधिमानसपीडांमंथितुंशीलंयस्यसतथातस्यदशावतारस्यचस्तुतिरेकाऽसहायातारिणीभवतियतोंऽबुधेरेकाविलक्षणादशाभीतावस्थाभूदित्यर्थःशंभुपक्षे कैलासोत्थापनोद्यतरावणस्यपदांगुष्ठनमनेनगर्वहरस्यतथाहरेर्विष्णोःसहस्राब्जैःपूजयतोयस्तत्संख्यापूरणार्थमक्षस्यनेत्रस्यार्पणेआधिःक्लेशस्तंमंथितुंपुण्डरीकाक्षनामसुदर्शनयोर्दानेनपरिहर्तुंशीलंयस्यसतथातस्य एकादशमूर्त्तेरतएवएकादशानांअम्बूनांगंगाप्रवाहाणामाधारस्यचस्तुतिरेकाअसहायातारिणीत्यर्थः मंथप्रमेयपक्षे रावणःनानाप्रलापहेतुर्योदर्प्पोदे

श्रीगणेशायनमः ॥ श्रुत्वैवंतित्तिरेर्ज्ञानंशिष्योविस्मयमागतः ॥ संन्यासंप्रष्टुकामःसन्निदंवचनमुक्तवान् ॥ १ ॥ ऐतरेयोद्विजश्रेष्ठस्तथाकौषीतकिर्मुनिः ॥ आदित्योभगवानेषसश्वेताश्वतरोपिच ॥ २ ॥ कठश्चतित्तिरिश्चैतेयज्ज्ञानंतिमहाधियः ॥ ज्ञानंतद्भवताप्रोक्तंदुःखसागरशोषकम् ॥ ३ ॥ गुरोर्यत्रश्रुताएताःकथाश्चित्रार्थसंयुताः ॥ प्रजानांमुनिभिःसार्द्धसंवादोब्रह्मबोधने॥ ४॥ तैरेववामदेवस्यगर्भस्थस्यमहात्मनः ॥ प्रतर्दनस्यशक्रेणविप्रस्याजातशत्रुणा ॥ ५ ॥

हाद्यभिमानःसएवारिःशत्रुस्तस्यहरेर्दत्त्यारूढरूपेणहारकस्यअक्षाणामिंद्रियाणामधिमंथिनोनियंतुरंतर्यामिणइतियावत् एकादशसंख्याभिर्जाबालादिभिरत्राध्यायउपात्तनामभिरुपनिषद्भिरवतारोबुद्धिप्रसरोयत्रतत्तथातस्यस्तुतिर्दशांबुधेःसंसारदशारूपांसिधोरेकाऽसहायातारिकेत्यर्थः ज्ञाबालगर्भब्रह्मपरमहंसहंसआरुणेयक्षुरिकाअमृतनादमहत्आत्मप्रबोधकैवल्येत्यादीन्युपनिषत्पदांतानिएकादशनामानिमूलेकीर्तयिष्यमाणानिबोध्यानि आरुणेयोपनिषदउपन्यासःसंवादोपन्यासेनैवकृतइतिभावः ॥ १ ॥ शिष्यप्रश्नमवतारयति श्रुत्वैवमिति ॥ १ ॥ संन्यासंसफलंसेतिकर्त्तव्यंचप्रष्टुकामोजिज्ञासुर्मेधावीसंक्षेपेणोक्तमनुवदति ऐतरेयइतिद्वाभ्यां ॥ २ ॥ ३ ॥ विशेषतोनुवादेहेतुमाह गुरोइति यत्रयस्यज्ञानस्योपबृंहणार्थमेताःकथाःश्रुताः एताःकाइत्यतआह प्रजानामित्यादि तैर्मुनिभिः संवादइतित्रिवारमनुषंगः ॥ ४ ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थार्थमनुवदति कांडेतिद्वाभ्यां शक्रनिरूपितागुरुता ॥ ६ ॥ ७ ॥ पंचमोक्तमनुवदति याज्ञवल्क्यस्येति पणीकृतापणवद्धारिता ज ल्पोविजिगीषयाकृतः ॥ ८ ॥ षष्ठार्थमनुवदति जनकेनेति वादोनिर्णयार्थः द्विवारंकूर्चब्राह्मणेतदुत्तरग्रंथेच ॥ ९ ॥ सप्तमादिचतुर्णाम र्थंदर्शयति मैत्रेय्येत्याद्यर्द्धचतुष्टयेन तस्ययाज्ञवल्क्यस्य अन्योपिनारायणीयाख्यः उपसंहरति एतदिति ॥ १० ॥ ११ ॥ प्रश्नबीजमा

कांडत्रयस्यवंशश्चभेदाभेदस्वरूपवान् ॥ अश्विभ्यामपिसंवादऋषेःसर्वार्थदर्शिनः ॥ ६ ॥ दध्यङ्ङाथर्वणस्या पिमाहात्म्यंगुरुतातथा ॥ शक्रस्यसाहसंतद्वदश्विनोस्तस्यशिष्ययोः ॥ ७ ॥ याज्ञवल्क्यस्यसंवादोमुनिभिर्ज ल्पसंज्ञितः ॥ विदग्धेनचयत्रेमेस्वस्यप्राणाःपणीकृताः ॥ ८ ॥ जनकेनचतस्यैववादसंज्ञोमहात्मनः ॥ द्वि वारंयत्रशास्त्रार्थःसकलोपिनिरूपितः ॥ ९ ॥ मैत्रेय्यापिचतस्यैवविरक्तस्यमहात्मनः ॥ मुनीनामपिसंवादःकार णस्यचनिर्णयः ॥ १० ॥ यमेनसहसंवादस्तथैवनचिकेतसः ॥ भृगोश्चवरुणस्यापिसंवादोन्योपिकश्चन ॥ एतत्सर्वंमयात्वत्तःश्रुतंब्रह्मावबोधनम् ॥ ११ ॥ अत्रतित्तिरिविज्ञानेसाधनानांपरंपरा ॥ न्यासांताकीर्तिता न्यासोबहुशश्चश्रुतस्तथा ॥ १२ ॥ चातुर्विध्यंचसंन्यासेतत्रैतद्भवतेरितं ॥ चतुर्थेपरमेहंसेजिज्ञासाममवर्त ते ॥ १३ ॥ पृच्छाम्यत्रचतत्पृष्ट्वाजाबालाद्यैःसमीरितम् ॥ न्यासंयोगंचहंसाद्यैस्त्वतस्तंपूर्वमीरय ॥ १४ ॥ कैर यंचरितःपूर्वैःकदाकस्याधिकारिणः ॥ किंवेद्यःकीदृशाचारःकिंफलोमुनिसत्तम ॥ १५ ॥ इत्युक्तोगुरुराहैतत् शिष्यंवाक्यमुदारधीः ॥ शिष्यबुद्धिंसमालोक्यपरंस्नेहमुपागतः ॥ १६ ॥

ह अत्रेति अत्रपूर्वाध्याये न्यासांतासंन्यासपर्यंता ॥ १२ ॥ १३ ॥ पृच्छामीति उत्कटजिज्ञासागोचरत्वेन तत्परमहंसस्वरूपंप्राधान्ये नपृष्ट्वाउपसर्जनतयाजावालाद्युक्तन्यासंहंसाद्युक्तंयोगंचपृच्छामि अतउत्कटजिज्ञासागोचरत्वात्तंपरमहंसंप्रथमंवर्णयेत्यर्थः ॥ १४ ॥ तत्प्रश्नमेवाभिनयति कैरिति अयंपरमहंसधर्मःकस्याधिकारिणोयोग्यइतिशेषः किंवेद्यंयस्मिन्सतथा ॥ १५ ॥ एवंकौशलेनपृष्टोगुरुः प्रीतःसन्नुवाचेत्याह इत्युक्तइति ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृद्धकुमारीवरन्यायेनभवतापारमहंस्यप्रश्नएवसर्वंसंगृहीतमित्याह प्रश्नेस्मिन्निति अस्मिन्नुक्तरूपेभवत्प्रश्नेसर्वंजाबालादिनानोपनिषत्प्र तिपादितंप्रष्टव्यमर्थजातंसम्यगवस्थितंसंगृहीतमितियावत् यथाकयाचिद्वृद्धयाकुमार्याइंद्रेणवरंब्रूहीत्युक्तेसुतामेदधिसंपृक्तमोदनंसुवर्ण पात्र्यांभुंजीरन्नितिवाक्येनसर्वमिदंसंगृहीतंतद्वदित्यर्थः तत्संग्रहमेवविशदयति जाबालाद्यैरिति यतःपरमहंसधर्माःजाबालब्रह्मारुणेयपर महंसाख्यासुउपनिषत्सुप्रपंचितास्तथायोगआत्मसाक्षात्कारोपयोगीहंसक्षुरिकादिषुतदुपयोगिवैराग्यंचगर्भोपनिषदिअतस्त्वत्प्रश्नसमा धानेसर्वासामेतासामर्थोवर्णनीयतामापन्नइतिभावः ॥१७॥१८॥ एतासामर्थप्रदर्शनमार्थक्रमेणयथाकांक्षमेकवाक्यतामापाद्यकरिष्य तेइतिसूचयन्संन्यासप्रतिपादिकासुजाबालादिषुकीर्तितानिप्रश्नकर्तॄणांवक्तॄणांचनामान्याह अत्रेतिद्वाभ्यां अत्रपरमहंसधर्मेजाबालोप

प्रश्नेस्मिन्भवतःसर्वंप्रष्टव्यंसमवस्थितं॥ जाबालाद्यैःपरोहंसोयतःसर्वैःसमीरितः ॥ १७ ॥ हंसाद्यैश्चतथा योगोब्रह्मात्मैक्यावबोधने ॥ उक्तःपरमहंसस्यफलसिद्धिर्यतोभवेत् ॥ १८ ॥ अत्रपूर्वंकृतःप्रश्नोजनकेनम हात्मना ॥ अत्रिणामुनिनातद्वद्याज्ञवल्क्यंप्रतिद्विजं ॥ १९ ॥ प्रजापतिंप्रतितथाकृतआरुणिनापुरा ॥ ना रदेनचतद्वत्सयथार्थंभवताकृतः ॥ २० ॥ ब्रह्मोपनिषदिस्पष्टःस्वयमेवसमीरितः ॥ अयंसपरमोहंसोजाबा लादिश्रुतावपि॥२१॥अतःसर्वैःसमुक्तंतंत्वत्प्रश्नार्थंमयेरितं॥ सावधानमनाभूत्वाशृणुवक्ष्यामितेधुना॥२२ बृहस्पतेःसुरगुरोर्भ्रातायस्तुसहोदरः॥ विप्रआंगिरसोनाम्नासंवर्त्तकइतीरितः॥ २३ ॥

निषच्चतुर्थखंडेजनकेनयाज्ञवल्क्यंप्रतिप्रश्नःकृतःपंचमखंडेत्वत्रिणाकृतइत्यर्थः ॥ १९ ॥ प्रजापतिमिति तथारुणेयोपनिषदिआरुणिना प्रजापतिंप्रतिसप्रश्नःकृतःपरमहंसोपनिषदितुनारदेनतंप्रतिसकृतः॥२०॥ब्रह्मोपनिषदीति तथायोयंजाबालादौपरमहंसःसमीरितःसब्रह्मो पनिषदिस्वयमेवंप्रश्नोपन्यासमंतरेणैववेदेनोक्तइत्यर्थः ॥ २१ ॥ फलितमाह अतइति सर्वैर्जाबालाद्यैःप्रपंचितंत्वत्प्रश्नगोचरमर्थंशृणु ति ॥ २२ ॥ अथफलार्थप्रवृत्ताइच्छासाधनमपिगोचरयतीतिन्यायेनसाधनानिनिरूपयिष्यंस्तावत्फलावस्थविद्वत्संन्यासशालिनःपर महंसान्जाबालपंचमखंडेदर्शितान्सहतद्धर्मैर्वर्णयति बृहस्पतेरित्यादिद्विचत्वारिंशताश्लोकैः तत्रसंवर्त्तोनामबृहस्पतेर्भ्रातायस्यमहिमा भारतेऽश्वमेधपर्वण्यपिवर्णितः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरुणस्येति द्वितीयःपरमहंसआरुणापत्यत्वादारुणिसंज्ञोयस्योद्दालकइतिनामांतरं तत्पुत्रःश्वेतकेतुसंज्ञस्तुतृतीयइत्यर्थः ॥ २४ ॥ चतुर्थपंचमौवर्णयति दुर्वासाइति शंकरस्यकालाग्निरुद्रस्यावतारोमहातपाश्चदुर्वासाःप्रसिद्धस्तथाऋभुर्ब्रह्मणोमानसःपुत्रःपुराणेषुख्यात इति ॥ २५ ॥ निदाघइति षष्ठःपरमहंसोनिदाघोनामयःकर्मासक्तोपिऋभुणाबहुशःप्रदर्शितात्मतत्त्वतयाविष्णुपुराणेवर्णितः तथा भरतःसप्तमोयोमृगयोनिव्यवहितेतीतजन्मनिराजाभूद्यन्नाम्नाभारतवर्षप्रसिद्धिरिति ॥ २६ ॥ अष्टमोदत्तात्रेयःप्रसिद्धोनवमस्तुरैवतक

आरुणस्यसुतोधीमानारुणिःसर्वशास्त्रवित् ॥ उद्दालकःसुतस्तस्यश्वेतकेतुश्चसत्तमः ॥ २४ ॥ दुर्वासाः शंकरस्यांशस्तपसांपतिरूर्जितः ॥ ऋभुःप्रजापतेःपुत्रोमानसःसनकादिवत् ॥ २५ ॥ निदाघःस्यादृभोः शिष्यःपुरायःकर्मठोभवत् ॥ भरतोजडनामापिभूपालोयोन्यजन्मनि ॥ २६ ॥ विष्णोरंशस्तथैवैषदत्तात्रेयो महामुनिः ॥ तथारैवतकःकश्चिद्ब्राह्मणोगुणसंयुतः ॥ २७ ॥ भारद्वाजादयश्चान्येविप्राःशास्त्रविशारदाः ॥ अहंब्रह्मेतिविज्ञानात्परिक्षीणात्मबंधनाः ॥ २८ ॥ नमुंडानैवजटिलानैकदंडादिधारिणः ॥ नश्वेतवसनानैवएतेतेरक्तवाससः ॥ २९ ॥ आचारोपितथैवैषामव्यक्तोब्रह्मवादिनां ॥ अव्यक्ताचारवान्नित्यंपुमानेवंव्यवस्थितः ॥ ३० ॥ अव्यक्तमतिरव्यक्ताकृतिरव्यक्तलिंगकः ॥ जातोऽपेक्षःससर्वत्रप्रसक्तइवचक्वचित् ॥ ३१ ॥ सर्वज्ञवत्क्वचिद्भातित्वज्ञवत्श्रुतहीनवत् ॥ बहुश्रुतवदेकत्रजडवन्मूकवत्क्वचित् ॥ ३२ ॥

नामाकश्चिद्ब्राह्मणोनतुक्षत्रियोब्राह्मणसाहचर्यविरोधादित्याह विष्णोरिति ॥ २७ ॥ श्रौतप्रभृतिपदेनभारद्वाजशुकादयोज्ञेयाइतिदर्शयंस्तेषांब्रह्मभावप्राप्ततामाह भारद्वाजादयइति॥२८॥तेषामव्यक्तलिंगतामाह नमुंडाइति मुंडाःमुंडिताः तेप्रसिद्धाः एतेनरक्तवाससः॥२९॥ तथैतेऽव्यक्ताचाराइत्याह आचारइति अव्यक्ताचारःकीदृशोभवतीतिचेदित्थमित्याह अव्यक्ताचारवानिति एवमित्थं ॥ ३० ॥ एवं पदार्थंप्रपंचयति अव्यक्तेत्यादिना अव्यक्ताअलक्षितामतिर्यस्यसतथा ॥ ३१ ॥ सर्वज्ञवदिति श्रुतंशास्त्रं श्रुतमाकर्णितेशास्त्रेइतिहैमः एकत्रक्वचित् ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागांधेति स्पष्टं ॥ ३३ ॥ यंनसंतंनचासंतंनाश्रुतंनबहुश्रुतं नसुवृत्तंनदुर्वृत्तंवेदकश्चित्सब्राह्मणइतिस्मृतावप्येषएवोक्तइत्याह अयमिति अयमव्यक्तलिंगःपुरुषः सन्सज्जनः असन्तद्विपरीतः सुवृत्तःसदाचारः ॥ ३४ ॥ ब्राह्मणोवेति अयंकुशलेनापिब्राह्मणादिवर्णैर्ब्रह्मचर्याद्याश्रमैश्वविशिष्टतयानज्ञातुंशक्यइति ॥ ३५ ॥ उक्तेर्थेंदत्तात्रेयवृत्तंदत्तात्रेयसंहितायांप्रसिद्धमुदाहरणतयाह दत्तात्रेयइतित्रिभिः रेवानर्मदा अर्जुनःसहस्रबाहुः ॥ ३६ ॥ रक्तांबरेति एकस्मिन्करेपानपात्रमन्यस्मिन्यतिचिन्हंदंडंधारयन् ॥ ३७ ॥ वामांगेइति वामांगे

रागांधवत्क्वचिद्भातिविरक्तइवचक्कचित् ॥ असतांचरितेसक्तःक्वचित्सुमहतामपि ॥ ३३ ॥ अयंसन्नथवाऽसन्वाप्यश्रुतोवाबहुश्रुतः ॥ सुवृत्तोवापिदुर्वृत्तोजनैर्ज्ञातुंनशक्यते ॥ ३४ ॥ ब्राह्मणोवाश्वपाकोवायतिर्वाप्यथवागृही ॥ निपुणेनापिनज्ञातुंशक्योवर्णाश्रमादिना ॥ ३५ ॥ दत्तात्रेयोयथापूर्वंरेवायांजलमध्यगः ॥ अर्जुनेनवितर्क्यापिनज्ञातश्चक्रवर्तिना ॥ ३६ ॥ रक्तांबरधरःश्रीमान्युवासूर्यसमप्रभः ॥ पानपात्रंकरेबिभ्रदेकस्मिन्दंडमन्यतः ॥ ३७ ॥ वामांगेवामनयनांमदघूर्णितलोचनां ॥ वीक्ष्यमाणोमुहुर्ब्रह्मवदन्वाचासनातनम् ॥ ३८ ॥ एतेषांपदवीमज्ञोगच्छन्शीघ्रमधोव्रजेत् ॥ इयंजन्मसहस्रांतेदुर्लभामानुषैःसदा ॥ ३९ ॥ एतेब्रह्मात्मविज्ञानाद्ब्रह्मीभूतायतीश्वराः ॥ पुण्यपापेउभेतीर्त्वावर्ततेपरमेपदे ॥ ४० ॥ एतेषुयेत्रसंप्रीताःपुरुषाभक्तिसंयुताः ॥ तेभ्यःस्वसुकृतंसर्वंप्रयच्छंतिसुखप्रदम् ॥ ४१ ॥ यएतेषुसदाद्वेषंदुरात्मानःप्रकुर्वते ॥ तेभ्यस्तेपातकंसर्वंप्रयच्छंत्यत्रदुःखदं ॥ ४२ ॥

स्थितांयोषितंपश्यन्सनातनंब्रह्मश्रुतिवाक्यैर्वदंश्चार्जुनेननज्ञातइत्यधस्तात्संबंधः ॥ ३८ ॥ लोकसंघट्टवारणार्थंदोषास्पर्शलक्षणविद्याफलाभिव्यक्तयेवाईश्वरैरेतादृशमाचरणंक्रियतेतथाप्यनीश्वरेणतथानकर्त्तव्यमरुद्रस्यविषादनवदनर्थहेतुत्वादित्याह एतेषामिति एतेषां सिद्धानां इयंसिद्धावस्था जन्मसहस्रांतेपीतिशेषः ॥ ३९ ॥ एषांत्वयुक्ताचरणेनदोषोब्रह्मविद्याप्रभावादित्याह एतेइति ॥ ४० ॥ एतेषां सुकृतंभक्तिमत्सुगच्छतिदुष्कृतंतुद्वेषवत्सुसुहृदःसाधुकृत्यांद्विषंतःपापकृत्यामितिश्रुतेरित्याह एतेष्वितिद्वाभ्यां एतेषुविद्यासिद्धेषु तेविद्वांसः इतिद्वयोरर्थः ॥ ४१ ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह एवमिति इत्थंफलसहितंकर्मजातंपरत्रक्षिप्त्वास्वयंलोकंकर्मफलमतिक्रामंतीत्यर्थः ॥ ४३ ॥ अथतेषामनुन्मत्तानामुन्मत्तव दाचरणमभिनयति आशांबराइतिचतुर्भिः आशांबरादिगंबराः ॥ ४४ ॥ क्वचिद्धसंतीति वल्गिताइत्यर्शआद्यजंतं तथाचवल्गितमश्वगति विशेषस्तद्वंतः इतस्ततःकूर्दंतइतियावत् आस्फोटनंस्फालनं ॥ ४५ ॥ अकारणमिति प्रताडिताबद्धाश्वगर्जंतीति ॥ ४६ ॥ एवमिति स्व तत्त्वेलोकानांव्यामोहार्थमुक्तविधचेष्टांकुर्वंतोप्येतेअनुन्मत्ताएव यमानामहिंसासत्यास्तेयब्रह्मचर्याणामलोपकत्वादित्यर्थः ॥ ४७ ॥

एवंपुण्यंतथापापंजन्मकोटिशतार्जितं ॥ दत्वाफलेनसहितंलोकातीताःसमासते ॥ ४३ ॥ आशांबराःक्वचिच्चै तेदुकूलवसनाःक्वचित् ॥ विण्मूत्रलेपनाःक्वापिक्वचिच्चंदनचर्चिताः ॥ ४४ ॥ क्वचिद्धसंतिसहसाक्वचिद्धायंति वल्गिताः ॥ आस्फोटयंतिधावंतिपिशाचाइवचक्वचित् ॥ क्रीडंतिबालकैःसार्धंक्वचिदेतेगतस्पृहाः ॥ ४५ ॥ अ कारणंरुदंत्येतेक्वचिल्लोकेप्रताडिताः ॥ बद्धाश्वसुखमागत्यगर्जंतिजलदाइव ॥ ४६ ॥ एवमुन्मत्तवच्चेष्टांकु र्वंतोलोकमोहकाः ॥ अनुन्मत्तामहाभागायमानामविलोपकाः ॥ ४७ ॥ तथाचरेतवैयोगीसतांधर्ममदूष यन् ॥ जनायथाऽवमन्येरन्गच्छेयुर्नैवसंगतिम् ॥ ४८ ॥ एतद्वचनमालोक्यप्रवर्ततेमहाधियः ॥ चेष्टासुवि विधास्वत्रसर्वचेष्टाविवर्जिताः ॥ ४९ ॥ यथाज्वलन्महावह्निःशुष्कमार्द्रंचनिर्दहेत् ॥ तथाशुभाशुभंकर्मतेषां ज्ञानाग्निरप्ययं ॥ ५० ॥

स्वतत्त्वगोपनार्थमेतादृशाचरणंयोगशास्त्रेविहितमितिदर्शयितुंतद्वचनंपठति तथेति धर्मंयमनियमादिरूपं अदूषयन्रक्षयन् ॥ ४८ ॥ ए तद्वचनमिति एतद्वचनानुसारेणैवविविधाःक्रियाःकुर्वंतिमहात्मानइत्यतएवदत्तात्रेयचरितेपानपात्रस्यकरेधारणमेवोक्तंनतुपानमित्यादि बोध्यम् ॥ ४९ ॥ एतेषांदोषस्पर्शाभावंसदृष्टांतमाह यथेति स्पष्टम् ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतेषामाचरणंदृष्ट्वामंदोपितथाचरन्पततीतिसदृष्टांतमाह सर्वेतिद्वाभ्यां तथाअग्निवत्सर्वभक्षणेप्रवृत्तोनश्यतिपतति एवंदत्तात्रयादिवद्वर्तमानोऽन्यःसाक्षात्कारहीनत्वेनतद्विलक्षणःपरमहंसोयतिःपततीत्यर्थः ॥ ५१ ॥ ५२ ॥ एतेषांतुशास्त्रातिक्रमेपिनदोषइत्यत्रहेतुतयाविधिगोचरत्वाभावमाह विदुषामिति विदुषांसाक्षात्कारवतामेषउक्तविधसंन्यासःस्वयंजातोविधिप्रयुक्तोनभवतिफलरूपत्वेनानुपादेयत्वात् कृतिसाध्यत्वलक्षणोपादेयत्वशालिहिविधेयंभवतीतिसिद्धांतः यथाचास्मिन्संन्यासेविधियोग्यतालक्षणाकर्तव्यतानास्तितथावहिरंगांतरंगेषुसाधनेष्वपिनास्तिफलोत्पत्तौसाधनैःप्रयोजनाभावादित्याह कर्त्तव्यतेति फलजन्मनिसतिअत्रसाधनजातेकर्तव्यता

सर्वभक्षंयथैवाग्निर्दृष्ट्वाकश्चिद्विमोहतः ॥ स्वयंतथाप्रवृत्तःसंस्तत्क्षणादेवनश्यति ॥ ५१ ॥ एवंपरमहंसानांवृत्तिमेतामलौकिकीं ॥ अन्योत्रपरमोहंसःसाक्षात्कारविवर्जितः ॥ कुर्वन्विनाशमायातिदुःखंलोकद्वयेपिसः ॥ ५२ ॥ विदुषामेषसंन्यासःस्वयंजातःफलात्मकः ॥ कर्त्तव्यतानकाप्यत्रविद्यतेफलजन्मनि ॥ ५३ ॥ त्रिसंध्यंनैवचस्नानंनसमाधिश्चविद्यते ॥ यतस्तेषांसदैवास्तिसमाधिर्ब्रह्मवेदिनां ॥ ५४ ॥ आसीनःसंविशंस्तिष्ठन्भुंजानःपर्यटन्पिबन् ॥ शयानोब्रह्मविन्नित्यंतिष्ठत्येवसमाहितः ॥ ५५ ॥ देहाभिमानेगलितेविज्ञातेपरमात्मनि ॥ यत्रयत्रमनोयातितत्रतत्रसमाधयः ॥ ५६ ॥ आपंचमाद्यथावर्षान्नविधिर्ननिषेधनम् ॥ शिशोस्तथैवविदुषांननिषेधोविधिर्नच ॥ ५७ ॥

कापिशास्त्रसिद्धान्यायसिद्धावानविद्यतेइत्यर्थः ॥ ५३ ॥ साधनेषुकर्त्तव्यताभावमेवस्फुटयति त्रिसंध्यमिति एतान्प्रतित्रिकालस्नानंनविधीयतेतत्फलस्यशुद्धेःसिद्धत्वात् नापिसमाधिस्तस्यस्वरूपतःफलतश्चसिद्धत्वादित्यर्थः ॥ ५४ ॥ तत्रसमाधेःस्वरूपतःसिद्धिमभिनयति आसीनइति आसीनोवद्धासनः संविशन्प्रसारितकायःतिष्ठन्नुत्थितः शयानोनिद्रितः एतास्ववस्थासुसमाहितःसमाधिमानेवविद्वांस्तिष्ठतीत्यर्थः ॥ ५५ ॥ अत्रार्थेसांप्रदायिकवाक्यंसंवादयति देहाभिमानइति ॥ ५६ ॥ एतेषुप्रमातृत्वाभिमानाभावादेवनप्रमाणप्रवृत्तिरितिसदृष्टांतमाह आपंचमादिति शिशोर्यथापंचमवर्षपर्यंतंविध्याद्ययोग्यत्वंतथाऽस्यापीत्यर्थः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुतयाप्रमातृत्वोपपादिकायाभेददर्शनलक्षणायाअविद्यायाअभावमाह निजमिति एतेपरमहंसाः स्वकीयदेहंशुनोमलंचविषमं नपश्यंतिअतएवतेहर्षादिरहिताइत्याह कर्मणेत्यादिना कर्मणाशरीरव्यापारेणवाङ्मनसव्यापारेणचतथादुकूलादिभिश्चाराधिताःकिंचिदपिनत्दृष्यंतीतिद्वयोरर्थः ॥ ५८ ॥ ५९ ॥ द्वेषाभावमाह छेदेइति देहनिष्ठेछेदनादौसतिनविषीदंतीति ॥ ६० ॥ लिंपेदिति वास्यातक्षोपकरणं तयोः पूजकच्छेदकयोःस्वदेहेप्रेमास्पदत्वेनप्रसिद्धेचसमंनिर्दोषमात्मतत्त्वमेवपश्यंतीत्यर्थः ॥ ६१ ॥ अतएवतेषांशत्रुमित्रादिकंनास्तीत्याह शत्रुरिति स्वःस्वकीयः ॥ ६२ ॥ अतएवतेद्वंद्वातीताइत्याह नशीतमिति ॥ ६३ ॥ मानापमानाविति मानापमानौनृ

निजंदेहंतथाविष्ठांशुनएतेद्वयंहितत् ॥ विषमंनैवपश्यंतिकर्मणामनसागिरा ॥ ५८ ॥ दुकूलैर्विविधैस्तद्वल्लेपनैश्चमनोरमैः ॥ सुगंधैःसुमनःसंघैरन्नाद्यैश्चापिपूजिताः ॥ अणुमात्रमिमेहर्षंनैवयांतिकदाचन ॥ ५९ ॥ छेदेभेदेतथादेहेबंधनेताडनेपिच ॥ भर्त्सनादौविषादंचमनसापिनयांतिते ॥ ६० ॥ लिंपेद्यश्चंदनैरेतांश्छिद्याद्योपिचवास्यया ॥ तयोस्तथास्वदेहेचसदातेसमबुद्धयः ॥ ६१ ॥ शत्रुर्मित्रमुदासीनःस्वःपरश्चनविद्यते ॥ तेषांब्रह्मात्मनांनित्यमभेदमनुपश्यतां ॥ ६२ ॥ नशीतंनापिचोष्णंवापिपासानक्षुधानच ॥ शोकमोहादयोनैवनजरामरणादयः ॥ ६३ ॥ मानापमानौद्वावेतौप्रीत्यप्रीतिकरौनृणां ॥ तेषामेतेचकुरुतोनैतेषांसमचेतसां ॥ ६४ ॥ एवंतेपरमाहंसाउक्ताएतेह्यलौकिकाः ॥ फलावस्थामहाभागाविद्वांसःसमदर्शिनः ॥ यैरयंचरितःपूर्वंधर्मोत्यंतंसुदुश्चरः ॥ ६५ ॥ कालेचनियतिर्नैवविद्यतेकस्यचित्क्वचित् ॥ एवंविरागंसंत्यज्यजातंसर्वत्रनिश्चितं ॥ ६६ ॥

णांप्रीत्यप्रीतिकरौप्रसिद्धौतेषांनृणांकार्यत्वेनसंबंधिनौमानापमानौएतेषांपरमहंसानामेतेप्रीत्यप्रीतीनकुरुतः समदर्शित्वादित्यर्थः ॥ ६४ ॥ फलावस्थपरमहंसवर्णनमुपसंहरति एवंतेइति तेसंवर्त्तादयः धर्मोज्ञाननिष्ठात्मकः ॥ ६५ ॥ अस्यसाधनंपरंवैराग्यमितिव्यतिरेकमुखेनाह कालेचेति विरागंसंत्यज्यवर्त्तमानेषुजनेष्वेवंनिश्चयोजातः एवंकथं यतःकालेकृतत्रेतादिरूपेनियतिर्व्यवस्थितधर्मप्रवर्तकत्वरूपाविद्यतेऽतइदानीमयंपारमहंस्यधर्मः क्वापिनास्तीत्यर्थः विरक्तास्तुतंधर्ममपरोक्षंकुर्वंतीतिभावः ॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशवैराग्यायचगर्भोपनिषदर्थोविचार्यइत्याह गर्भोपनिषदीति सपारमहंस्यप्रयोजकोविरागोपिशुद्धधियांगर्भोपनिषदुक्तशरीरव्य वस्थालोचनाद्भवतीत्यर्थः ॥ ६७ ॥ अथगर्भोपनिषदिशरीरस्थितिप्रतिपादकस्यपंचात्मकमित्यादिमंत्रस्यनवकपालमित्यादेरंत्यग्रंथस्य चार्थंश्लोकानांपंचषष्ट्युत्तरत्रिशतेनोपबृंहयंस्तत्रपंचात्मकत्वंपंचसुवर्तमानत्वंचस्थूलसूक्ष्मशरीरारंभकाणांभूतानामाह सर्वेषामित्यादि नाअयंपंचीकृतदेहइत्यतःपूर्वेणग्रंथेन हिरण्यगर्भशरीरमारभ्यशुनःशरीरपर्यन्तंसर्वदेहानांपंचभूतात्मकत्वंभौतिकैरिन्द्रियादिभिरधिष्ठित त्वंचसममित्यर्थः ॥ ६८ ॥ एतदेवस्फुटयति पृथिव्यापइति पृथिव्यादीनिपंचभूतानिप्रसिद्धानिएतन्मयान्येवसर्वाणिस्थूलानिसूक्ष्माणि

गर्भोपनिषदिप्रोक्तशरीरस्थितिबोधनात् ॥ प्रायःसंजायतेसोपिविशुद्धमनसांनृणां ॥ ६७ ॥ सर्वेषामपिदेहो यंब्रह्मणश्वशुनस्तथा ॥ पंचभूतात्मकोनित्यंभौतिकैःसमधिष्ठितः ॥ ६८ ॥ पृथिव्यापस्तथातेजोवायुराकाश मेवच ॥ महाभूतानिपंचैवकीर्तितानिमनीषिभिः ॥ ६९ ॥ एतानिकथितोदेहःस्थूलःसूक्ष्मश्चदेहिनां ॥ स्थूल सूक्ष्मस्वरूपेणवर्त्तमानानिसर्वशः ॥ ७० ॥ चक्षुःश्रोत्रंतथाघ्राणंरसनंस्पर्शनंत्वपि ॥ ज्ञानेंद्रियाणिपंचस्युः पंचकर्मेन्द्रियाण्यपि ॥ वागुपस्थौतथापायुःकरौपादौचपंचमौ ॥ ७१ ॥ अंतःकरणमत्रोक्तंद्विविधंवेदवा दिभिः ॥ ज्ञानस्यचक्रियायाश्चहेतुःसर्वत्रसंस्थितं ॥ ७२ ॥ क्रियाहेतुरयंप्राणःपंचधादशधापिवा ॥ प्राणो पानस्तथोदानःसमानोव्यानएवच ॥ नागःकूर्मश्चकृकलोदेवदत्तोधनंजयः ॥ ७३ ॥

चशरीराणीतिद्वयोरर्थः ॥ ६९ ॥ ७० ॥ तत्रसूक्ष्मभूतारब्धान्सूक्ष्मशरीरावयवानाह चक्षुरितिचतुर्भिः सात्विकभूतांशारब्धानिचक्षुरादी निराजसैस्तैरारब्धानितुवागादीनिकर्मेंद्रियाणीतिविभागः ॥ ७१ ॥ भूतानांसात्विकांशसमुदायाद्राजसांशसमुदायाच्चोत्पन्नत्वेनज्ञानश क्तिक्रियाशक्तिनामकंद्विविधमंतःकरणंबोध्यमित्याह अंतःकरणमिति अत्रसूक्ष्मशरीरेसर्वत्रसर्वस्मिन्घटकतयासम्यक्स्थितमंतःकरणं ज्ञानक्रियारूपकार्यद्वयहेतुत्वेनद्विविधमित्यर्थः ॥ ७२ ॥ तत्रक्रियाशक्तेः प्राणस्यभेदानाह क्रियाहेतुरिति पंचधाव्यानांतैर्भेदैः धनंज यांतैस्तुदशधेति ॥ ७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानशक्तेश्चातुर्विध्यमाह चतुर्विधमिति सर्वेषांदेहेयत्हार्दंपद्मंतस्यांतःस्थितमंतःकरणंमनःप्रभृतिभेदैश्चतुर्विधम् ॥ ७४ ॥ शरीरद्वयेसूक्ष्मस्थूलपदयोःप्रवृत्तिनिमित्तद्वयंदर्शयति सूक्ष्मैरिति सूक्ष्मैःसायंप्रातराहुत्यादिकर्मणांसूक्ष्मपरिणामात्मकैर्भूतैःपृथिव्याद्यैःसमंसहवर्तमानंतथासूक्ष्मंसूक्ष्मचक्षुराद्यवयवसमुदायात्मकंयतोभवतिततःसूक्ष्मसंज्ञमांतरंदेहंश्रृणुअवधारय स्थूलभूतसंपृक्तत्वादिंद्रियगोचरत्वलक्षणस्थूलत्वशालित्वाच्चबाह्यंस्थूलसंज्ञमित्यर्थः ॥ ७५ ॥ अनयोःशरीरयोःपंचीकरणवार्त्तिकाद्युक्तमध्यात्मादिविभागमाह अध्यात्ममितिपद्भिः अध्यात्मत्वाधिदैवत्वाभ्यामुक्तयोःशरीरयोःप्रत्येकंद्वैविध्यात्शरीरस्यभेदाश्चत्वारउक्तास्तत्रतत्पदार्थमधिकृत्योपाधितयावच्छि

चतुर्विधंभवेज्ज्ञानहेतुरंतःस्थितंचतत् ॥ हार्दस्यदेहेपद्मस्यसर्वेषामपिदेहिनां ॥ मनोबुद्धिस्तथाचित्तमहंकारइतीरितं ॥ ७४ ॥ सूक्ष्मैर्भूतैःसमंसूक्ष्मंसूक्ष्मदेहमिदंश्रृणु ॥ स्थूलैर्भूतैस्तथास्थूलंस्थूलंदेहंवदंत्यपि ॥ ७५ ॥ अध्यात्ममधिदैवंचभेदस्तुस्याच्चतुर्विधः ॥ सूक्ष्मंहिरण्यगर्भोयमधिदैवंसमीरितः ॥ स्थूलंतथाविराडेषपुमान् लोकवपुःस्थितः ॥ ७६ ॥ अतलंचैवपातालंवितलंसुतलंतथा ॥ रसातलंपंचमंस्यात्तत्रषष्ठंतलातलं ॥ महातलंसप्तमंतुपादद्वयमिदंस्मृतम् ॥ ७७ ॥ भूर्लोकोजघनंतस्यपुरुषस्यमहात्मनः ॥ अंतरिक्षंतथानाभिःस्वर्गोहृदयमीरितं ॥ ७८ ॥ महर्लोकोमुखादर्वाग्गलादारभ्यसंस्थितः ॥ मुखतोनेत्रपर्यंतंजनलोकइतिस्मृतः ॥ ७९ ॥ ललाटंतुतपःप्रोक्तंशिरःसत्यमितीरितं ॥ चतुर्दशानांलोकानामेवंस्थानंविराट्स्मृतः ॥ ८० ॥ अध्यात्मंसूक्ष्मसंज्ञंयत्तैजसंतत्प्रकीर्तितं ॥ विश्वंस्थूलंसमुद्दिष्टमात्मनासमधिष्ठितं ॥ ८१ ॥

द्यस्थितमधिदैवमित्युच्यते यथासूक्ष्मसमष्टिरूपोहिरण्यगर्भःस्थूलसमष्टिरूपोविराट्लोकमयशरीराभिमानीअधिदैवमित्युच्यतेइत्यर्थः ॥७६॥ तत्रविराजोलोकमयंशरीरमभिनयति अतलमितिचतुर्भिः अतलादिसंज्ञानिसप्तपातालानिविराजःपादत्वेनध्येयानीत्यर्थः ॥७७॥ भूर्लोकइति जघनंऊर्वोरंतरदेशः शिष्टंत्रयंनिगदव्याख्यातं ॥ ७८ ॥ ७९ ॥ ८० ॥ आत्मनित्वंपदार्थेउपाधितयाहमितिगृह्यमाणलक्षणमध्यात्मंसूक्ष्मंस्थूलंचनामभेदेनाह अध्यात्ममिति यत्सूक्ष्ममध्यात्मंव्यष्टिरूपेणाहमितिगृह्यमाणंतत्तैजससंज्ञंतथाभूतंस्थूलंतुविश्वसंज्ञमित्यर्थः ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तेष्वेवाधिभूतादिभेदांतर्भावइतिदर्शयति अधिभूतमिति देहस्यद्वंद्वंस्थूलसूक्ष्मरूपमध्यात्मवत्यथाध्यात्मावस्थातद्वदपरोक्षमिदंतयाभा समानतालक्षणविशेषवच्चयदाभवतितदाधिभूतमित्युच्यते भूतंविषयमधिकृत्यवर्तमानमितिव्युत्पत्तेरितिपूर्वदलार्थः तथाएषांशरीराणाम ध्यात्मत्वमधिभूतत्वंचमिलित्वाव्यवहारारूढंयदाभवतितदास्थिरजंगमभेदोभवतीत्यर्थः स्थावरजंगमानांशरीराणिहितदभिमान्यपेक्षया अध्यात्मतांभजंतेद्रष्टंतरापेक्षयात्वधिभूतत्वमितिभावः ॥ ८२ ॥ व्यष्टिस्थूलशरीराणामुद्भिज्जादिभेदेनचातुर्विध्यमपिप्रसिद्धमित्याह च तुर्विधाइति एतेस्थूलाः तत्रस्वबीजस्योर्ध्वाकारपरिणामप्रयोजकत्वेनउद्भिज्जसंज्ञानुदाहरति उद्भिज्जाइति स्थावराणांदेहाउद्भिज्जाइतिप्र सिद्धाःकेषांचिद्देवादीनांचदेहाउद्भिज्जाइतिसंबंधः केतेदेवादयः येपुण्योत्कर्षेणदेहधारणेयोनिव्यवधानंनसहंतेइत्यर्थः एतेनउद्भिज्जादेहा

अधिभूतंचदेहस्यद्वंद्वमध्यात्मवत्स्थितं ॥ अध्यात्ममधिभूतंचमिलित्वास्थिरजंगमं ॥ ८२ ॥ चतुर्विधाभवं त्येतेदेहाःसर्वशरीरिणां ॥ उद्भिज्जाःस्थावराणांस्युःकेषांचिच्चशरीरिणां ॥ देवादीनांनयेयोनिंप्राप्ताःपुण्या धिकाजनाः ॥ ८३ ॥ स्वेदजाश्चापिविज्ञेयामत्कुणाद्याःसहस्रशः ॥ अंडजास्तेपिकेचित्तुकेचिदन्येजलेचराः ॥ ८४ ॥ अंडजाःपक्षिणस्तद्वत्सर्पाद्याश्चबिलेशयाः ॥ जरायुजामानुषाद्याःप्रसिद्धाःसर्वदेहिनां ॥ ८५ ॥ तेषुसर्वेषुदेहेषुपृथिवीधारणेस्मृता ॥ आपःसंक्लेदनेतद्वत्तेजःपाकादिकर्मणि ॥ ८६ ॥ संयोगेचवियोगेच वायुराकाशईरितः ॥ अवकाशेसदाहेतुश्चक्षूरूपग्रहेतथा ॥ ८७ ॥ श्रोत्रंशब्दग्रहेतद्वत्घ्राणंगंधग्रहेतथा ॥ स्पर्शग्रहेत्वगुद्दिष्टारसनंतुरसग्रहे ॥ ८८ ॥

द्विविधाअधर्मजाधर्मजाश्च आद्यारक्षाणांनारकीयाणांच अंत्यादेवानां आदिपदग्राह्यकायव्यूहकृतांचेतिसूचितं ॥ ८३ ॥ स्वेदजादीनु दाहरति स्वेदजाइतिद्वाभ्यां मत्कुणःखट्वादिगतःप्रसिद्धस्तत्प्रभृतयःक्षुद्रजंतवःप्रायशःस्वेदजाभवंति अंडजास्तुकेचित्तेस्थलगतक्षुद्र जंतवोपिभवंतियथापिपीलिकादयः केचित्तुजलेचरायथामत्स्यादयः अन्येअंतरिक्षगायथापक्षिणः तद्वद्बिलेशयाःसर्पाद्याश्चअंडजाइ तिसंबंधः अंत्यंदलंस्फुटम् ॥ ८४॥८५ ॥ अथभूतानांपंचसुव्यापारेषुवर्त्तमानत्वंप्रपंचयन्भूतानांभौतिकानांचस्वस्वव्यापारान्दर्शयतिते ष्वितिपङ्क्तिः उक्तदेहेषुपृथिव्याधारणव्यापारोजलस्यक्लेदनमार्द्रीकरणंतेजसःपचनादिकंवायोःसंयोजनादिकमाकाशस्यावकाशदानमि ति तथाभौतिकेषुचक्षुरादिज्ञानेंद्रियाणांरूपग्रहणादिरूपाव्यापाराइतित्रयाणामर्थः ॥ ८६ ॥ ८७ ॥ ८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मेंद्रियाणांतानाह वक्तव्यइति वक्तव्येवचनेवागिंद्रियंहेतुः आदानेग्रहणेपाणींद्रियं प्रजोत्पादनेआनंदेचउपस्थेंद्रियं मलोत्सर्गेपाय्विंद्रियं गमनेपादेंद्रियंचहेतुरिति॥८९॥ प्राणाद्याइति तथाप्राणादीनामुच्छ्वासादयोऽसाधारणव्यापाराजीवनोत्क्रांत्यादिरूपाःसाधारणव्यापाराश्चप्रसिद्धाइत्यर्थः॥९०॥ अंतःकरणचतुष्टयस्यतानाह संशयादेरिति संशयादिरूपस्यमंतव्यस्यमननस्यहेतुर्मनोभवति अहंकरणेऽहंकारः सामान्याकारविज्ञानेचित्तं अवधारणेबुद्धिरिति॥९१॥ भूतानांस्वरूपलक्षणभूतांस्तटस्थलक्षणभूतांश्चयत्कठिनमित्यादिश्रुत्युक्तानूधर्मानाह कठिनेति काठिन्यंपृथिव्याःस्वरूपलक्षणं द्रवत्वस्नेहौजलस्य उष्णत्वप्रकाशौतेजसः चलनंवायोः छिद्रत्वमाकाशस्येति गं

वक्तव्येवाग्भवेद्धेतुर्हस्तावादानकर्मणि॥प्रजोत्पादेतथानंदेउपस्थःपरिकीर्तितः॥पायुर्विसर्गेसंप्रोक्तःपादौगत्यांसमीरितौ॥ ८९ ॥ प्राणाद्याःकथितादेहेसर्वेविविधकर्मणि॥जीवनेमरणेतद्वद्धेतवःसर्वदेहिनां॥ ९० संशयादेर्भवेद्धेतुर्मंतव्यस्यमनःसदा॥ अहंकर्तव्यहेतुःस्यादहंकारोवपुःस्थितः॥ चित्तंसामान्यविज्ञानेबुद्धिःसर्वत्रनिश्चये ॥ ९१ ॥ कठिनापृथिवीज्ञेयागंधादिगुणसंयुता॥ द्रवस्नेहयुताआपोरसादिगुणसंयुताः॥ ॥ ९२ ॥ उष्णप्रकाशवत्तेजोरूपादिगुणसंयुतम्॥ क्रियावान्कथितोवायुःस्पर्शशब्दगुणोहिसः॥ नभःसुषिरमुद्दिष्टंशब्दैकगुणमेवतत्॥ ९३॥ एकद्वित्रिचतुःपंचगुणयुक्ताउदाहृताः॥ विषयाःश्रोत्रमुख्यानांखानिलानलवार्भुवः॥ हस्तादीनांतएवस्युर्विषयानियतिंविना॥ ९४॥

धादयःशब्दांताःपंचपृथिव्यास्तटस्थलक्षणं एवंजलस्यरसादयश्चत्वारः तेजसोरूपादयस्त्रयः वायोःस्पर्शशब्दौ आकाशस्यएकःशब्दइतिद्वयोरर्थः॥ ९२॥ ९३ ॥ एकेति इत्येवमेकद्वित्रिचतुःपंचगुणयुक्ताआकाशादिभूपर्यंताभूतसंज्ञाःपदार्थाःक्रमेणश्रोत्रत्वक्चक्षुरसनघ्राणानांविषयाउक्तागुणगुणिनोस्तादात्म्यादितिभावः येचश्रोत्रादीनांक्रमेणविषयास्तएवहस्तादिकर्मेंद्रियाणांविषयाभवंतिनियतिंव्यवस्थांविना नहिहस्तेनपृथिव्येवादीयतेकिंतुजलादिकमपीतिभावः॥ ९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपंचात्मकमित्यादिमंत्रस्यसूत्रत्वेनानेकार्थसूचकत्वाविरोधात्प्रथमपादेनयथापंचभूतरूपेणधारणादिपंचव्यापारकंप्राणादिरूपेण प्राणनादिपंचव्यापारकंपंचेंद्रियरूपेणपंचविषयकंपंचभूतसात्विकांशमयांतःकरणरूपेणपंचभूतमयमंतव्यादिविषयकमित्येवंविधाअर्थाः संगृहीतास्तथापंचीकरणमपिसूच्यतेइतिदर्शयन्पंचीकरणमवतारयति भूतेतिद्वाभ्यां उक्तंभूतभौतिकानांद्वंदमधिदैवमध्यात्मंवासूक्ष्मदेहेघटकतयावर्त्तमानमतिसूक्ष्ममिंद्रियैर्ग्रहणायोग्यंभवतीत्यर्थः ॥ १५॥ सूक्ष्मतेति सूक्ष्मशरीरघटकानांयासूक्ष्मतातत्रहेतुःपंचीकरणाभावस्तस्यपंचीकरणस्यस्वरूपमप्येवंवक्ष्यमाणविधमिहप्रकृतमंत्रेकीर्तितमावृत्त्यासूचितमित्यर्थः ॥ १६ ॥ इदंशरीरंस्वकारणानांभूतानामेकैकस्यपंचमांशेनपंचात्मकेनपंचसुभूतेषुवर्त्तमानंसंपृक्तमितियोजनांसूचयन्पंचीकरणमभिनयति एकैकमिति प्रथममेकैकंभूतंपंचधापं

भूतभौतिकमेतत्स्यात्सूक्ष्मदेहेशरीरिणां ॥ अधिदैवादिभिन्नानामतिसूक्ष्मतमंसदा ॥ १५ ॥ सूक्ष्मतास्यतु विज्ञेयापंचीकरणवर्जनात् ॥ पंचीकरणमप्येवंभूतानामिहकीर्तितं ॥ १६ ॥ एकैकंहिमहाभूतंपंचधाप्रविभज्यच ॥ पंचमंपंचमंभागंसर्वेषांपंचधापुनः॥ विभज्यैकैकमेतेषांसर्वेषामर्पयेदिह ॥१७॥ एकविंशतिसंख्याकाभागाएवंभवंतिते ॥ एकैकस्यस्वकीयास्तुचतुर्णामपिचेतरे ॥ चत्वारश्चभवंत्यस्मादाधिक्यात्समता नच ॥ १८ ॥

चधाविभज्यतेषामवयवचतुष्टयपंचकमेकतोऽवस्थाप्यावशिष्टान्पृथिव्यादीनांपंचपंचमांशान्प्रत्येकंपंचधाविभज्ययथाक्रमंप्रथमावस्थापितेअवयवचतुष्टयसमुदायपंचकेयोजनंपंचीकरणमित्यर्थः एतेनत्रिवृत्करणवत्पंचीकरणस्याश्रौतत्वादप्रामाणिकत्वमितिकेषांचिदुक्तिःपरास्ता ॥ १७ ॥ यच्चपंचीकरणेकैश्चिद्दूषणमभ्यधायिवायोरपिरूपवदंशसंपर्कात्प्रत्यक्षत्वापत्तिरितितत्परिहरन्नितरांशानामनुद्भूतत्वप्रयोजकमल्पत्वमाह एकविंशतीति एवमित्थंयोजनेकृतेसतिप्रत्येकंभूतानांस्वरूपेस्वकीयाभागाएकविंशतिर्भवंति पूर्वावस्थापितानां चतुर्णामवयवानांप्रत्येकंपंचावयवयोगित्वात्एकस्यावयवस्यसंविभागतोलाभाच्च इतरेचत्वारोंशास्तुपरकीयाइत्येवंरूपात्स्वांशाधिक्यात्स्वपरांशानांसाम्यंनभवतीत्यर्थः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साम्याभावेफलितमाह ततएवेति ततःस्वांशानामधिकतरत्वात्पृथिव्यादौजलत्वादिप्रकारिकाधीर्नभवति ततःपदार्थमेवंस्फुटयति पंचीकृतेपीति ॥ ९९ ॥ निगमयति पंचविंशइति यतःपंचविंशेयथापंचविंशाख्यःस्तोमःपंचविंशतिकृक्समुदायरूपस्तथोक्तविधयापंचविंशत्यवयवसमुदायरूपेभूतेएकत्रभागएवावयवचतुष्टयात्मकोभूतांतरैःकृतः एकविंशतिभागास्तुस्वकीयाएवततोभूतांतरबुद्धिर्भूतांतरेनजायतइत्यर्थः ननुवार्त्तिकोक्तस्यस्वार्द्धाधिक्यस्यकथमुपपत्तिरितिचेदर्धशब्दस्यविषमांशपरत्वमादायेतिगृहाणउपेयप्रतिपत्त्यर्थाउपायाइतिन्यायेनानिर्वचनीयप्रपंचेप्रकारांतराभिधानेप्यदोषादितिभावः ॥ १०० ॥ षडाश्रयादिपदार्थमार्थक्रमेणदर्शयितुमुपक्रमते अयमिति अयंदेहःपंचीकृतभूतमयत्वेनस्थूलोऽनेकविधंरूपंतथारसादिकांश्चगुणानूधारयतीत्यर्थः ॥ १०१ ॥ तत्रश्रुतौधातुपदेनानेकार्थे

ततएवपृथिव्यादावन्यबुद्धिर्नजायते॥ पंचीकृतेपिबाहुल्यंस्वभागेषुयतःस्थितम् ॥ ९९ ॥ पंचविंशेयतोभागोभूतेभूतांतरैःकृतः॥ भूतांतराणितेनातोदृश्यंतेनपरत्रहि॥ १०० ॥ अयंपंचीकृतोदेहःस्थूलोरूपमनेकधा॥ दधातिमध्यतस्तद्वद्रसादीनपिदेहिनां ॥ १०१ ॥ शुक्लंरक्तंतथाकृष्णंधूम्रंपीतंतथैवच ॥ कपिलंबभ्रुशंशुक्लंरूपमस्मिन्हिवर्तते ॥ १०२ ॥ स्पर्शाश्चमृदुलास्तद्वत्कठिनामध्यमाअपि ॥ उष्णाःशीताद्वयंतद्वदनुष्णाशीतलाअपि ॥ १०३ ॥ गंधाःसुरभयस्तद्वत्प्रच्छन्नायेत्रयोगतः॥ भवंतिप्रकटादेहेभूरिपुण्यविपाकतः॥ दुर्गंधानित्यमेवैतेलभ्यंतेवदनादिगाः ॥ १०४ ॥

नरूपमुक्तमितिपरमतंसूचयन्रूपस्यसप्तविधतांदर्शयति शुक्लमिति तत्रशुक्लंगोक्षीरवत् रक्तंप्रवालवत् कृष्णमंजनवत् धूम्रंधूमवत् पीतंकनकवत् कपिलंकपिलगोवत् बभ्रुशंबभ्रुःकपिलवर्णःसवर्त्ततेऽस्मिंस्तत्तथाकपिलवर्णसंपृक्तमितियावत् तथाभूतंशुक्लंयथास्फटिकस्यइत्येवंसप्तविधंरूपमत्रशरीरेयथादृष्टंवर्त्ततेइत्यर्थः ॥ १०२ ॥ षड्भिःस्पर्शैःसहतथागुणेनगंधेनसहयोगेनउपायेनयुक्तमित्याकारंषड्गुणयोगयुक्तपदार्थंदर्शयति स्पर्शाइतिद्वाभ्यां कोमलकठिनमध्यमभेदेनत्रयउष्णःशीतइतिद्वयमनुष्णाशीतःषष्ठःइत्येवंषट्स्पर्शाअत्रेत्यर्थः॥ १०३॥ गंधाइति योगउपायस्ततोयःपुण्यस्यविपाकःफलाभिमुख्यंतस्माद्येप्रकटीभवंतितेसुगंधाअत्रदेहेप्रच्छन्नाःसंति दुर्गंधास्तुस्फुटाएवेत्यर्थः ॥ १०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षडाश्रयपदेनषड्रसाअत्रेत्युक्तमितिदर्शयति रसाश्चेति स्पष्टम् ॥ १०५ ॥ धातुशब्दस्यामरोक्तभूतगुणवाचकत्वपक्षमादायवाय्वाकाशगुणत्वेनवादिभिरभिमतान्ध्वनिवर्णात्मकान्शब्दान्देहेवर्तमानतयादर्शयति शब्दाश्चेतिद्वाभ्यां निषादादीनांस्वरूपंनारदेनोदाहृतंबोध्यं यथा षड्जंरौतिमयूरस्तुगावोनर्दंतिचर्षभं अजाविकौचगांधारंक्रौंचोनदतिमध्यमं पुष्पसाधारणेकालेकोकिलोरौतिपंचमं अश्वस्तुधैवतंरौतिनिषादंरौतिकुंजरइति ॥ १०६ ॥ सुगंधाइति तेउक्तविधाध्वनयःसुगन्धवत्पुण्येनसुविवेकाभवंति यएतेयोगिभिरनाहताख्यशब्दभेदत्वेनांतरनुभूयंतेगायकैश्चमुखेप्रदर्श्यंते तथावर्णात्मकाः शब्दाअपियोगिनामंतरन्येषांमुखेचप्रसिद्धाइत्यर्थः ॥ १०७ ॥ श्रुत्यागैरिकादिषुप्रयोगरूपहेतुनाधातुशब्दस्यद्रव्यवाचकत्वमेवसिद्धांतीकृत्यतत्पदार्थतयाप्रोक्तांस्त्वगादीन्सप्तदर्शयंस्तत्प्रसंगेनोपस्थितानांशरीरां

रसाश्चषड्विधास्तद्वदेतेसर्वशरीरगाः॥ कटुतीक्ष्णकषायाख्यक्षाराम्लमधुराअपि ॥ १०५ ॥ शब्दाश्चविविधाएतेप्राणिनांवपुषिस्थिताः ॥ निषादर्षभगांधारषड्जमध्यमधैवताः ॥ पंचमश्चेतिसंप्रोक्ताध्वनिरूपामनीषिभिः॥ १०६॥ सुगंधाइवतेलभ्याःपुण्यपुंजविपाकतः॥ अंतर्देहेयोगदृशांगायकानांहियेमुखे ॥ वर्णात्मकाश्चबहुशोवक्त्रेस्पष्टाभवंतिये ॥ १०७॥ त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणिधातवः ॥ सप्तदंतास्तथैवोक्ताद्वात्रिंशत्त्वस्थिभेदतः॥ १०८॥ आपादमस्तकंतद्वत्त्वचित्यष्टोत्तरंशतं ॥ मर्माणियैर्मृतिंगच्छेद्भिन्नैःशस्त्रादिनापुमान्॥ व्याधिंवादुःसहंयातिवैद्याजानंतिसर्वदा॥ १०९॥

तरपदार्थानांसंख्यांपरिमाणंचोपनिषदंतोक्तंवर्णयति त्वगसृगित्यादिना त्वग्रुधिरमांसानिप्रसिद्धानि मेदःश्वेतवर्णोमांसावस्थाविशेषस्तत्रैवचास्थिबंधनरूपस्यतदवस्थाविशेषस्यस्नायुपदोक्तस्यांतर्भावः अस्थीनिप्रसिद्धानि मज्जातदंतर्गतःस्नेहः शुक्रंरेतः एतानिसप्तधातुपदवाच्यानि तथादंतानांस्वरूपभूतान्यस्थीनिभेदेनद्वात्रिंशद्भवंतीत्यर्थः ॥ १०८ ॥ मर्मणांसंख्यांलक्षणंचाह आपादेति पादमारभ्यमस्तकपर्यंतंव्याप्तायांत्वचिअष्टोत्तरशतसंख्यानिस्थानानिमर्मसंज्ञानि तल्लक्षणंतुशस्त्रेणभेदनेकृतेसतिमरणदुर्वारव्याध्यन्यतरप्रयोजकत्वंतत्रवैद्यशास्त्रेप्रसिद्धमित्यर्थः ॥ १०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशीत्यभ्यधिकमिति अस्थ्नांसंधयःशरीरेअशीत्यधिकशतसंख्याभवंति स्थूलानांनाडीनांनवशतानिभवंतीत्यर्थः केशेति केशानांरोम्णां चसंख्याअशीतिःशतानिअष्टौसहस्राणीतियावत् तावत्यःकोटयइत्यर्थः अष्टसहस्राणिकोट्यइतिपाठमादायकेशादीनांसूक्ष्मावयवाभि प्रायेणयाज्ञवल्क्यवदुक्तं सार्द्धत्रिकोटिप्रसिद्धिस्तुरोमकूपाभिप्रायेणवस्तुतस्तुअर्द्धचतस्रइतिश्रुतिपाठःप्रायःपुस्तकेषुदृश्यते तथाचार्द्ध न्यूनाश्चतस्रइतिशाकपार्थिवादित्वेनव्युत्पत्तौप्रसिद्ध्याविरोधएवेतिबोध्यं ॥ ११० ॥ जिव्हेति मुखेदृश्यमानाकंठमभिव्याप्यस्थिताजिह्वा द्वादशपलपरिमिताभवति तथाहृदयमध्यस्यरक्तवर्णस्यपरिमाणमष्टौपलानि तदेवहृदयमध्यंहार्द्दंपद्ममितिप्रसिद्धमित्यर्थः ॥ १११ ॥ पित्तमिति पित्ताख्योधातुर्हृदयेबहुधास्थितत्वेनप्रसिद्धस्तस्यहिसर्वतोनाडीद्वारनिरोधकत्वेननिद्राप्रयोजकत्वंश्रुत्यादिषुप्रोक्तं अस्यपरि

अशीत्यभ्यधिकंतद्वच्छतंदेहेत्रसंधयः॥ अस्थ्नांनवचनाडीनांस्थूलानांस्युःशतानिवै ॥ केशरोम्णांतथैवस्यु रशीतिशतकोटयः॥ ११० ॥ जिह्वावक्रस्थितानॄणांपलानिद्वादशेरिता ॥ कंठेहृदयमध्यस्यरक्तोत्पलनिभ स्यहि॥ पलान्यष्टौतुविज्ञेयंपद्मंहार्दंसदैवतत् ॥ १११ ॥ पित्तंप्रस्थमितंप्रायोहृदयेसंस्थितंहितत्॥ श्लेष्मणो गलसंस्थस्यदेहेप्रस्थचतुष्टयं॥ ११२॥ सर्वांगसंश्रयंशुक्रंकंठेहृदिचमूर्द्धनि ॥ विशेषतःस्थितंयत्तुमथनेन विनिःस्रवेत् ॥ ११३ ॥ प्रस्थस्यचचतुर्थांशंतस्यदेहेवदंतिहि ॥ मेदसश्चापिसंप्रोक्तौप्रस्थौद्वौपरिमाणतः ॥ ११४॥ मूत्रंचैवपुरीषंचबस्तिसंग्रहणीगतं ॥ अन्नपानग्रहस्यात्रवृद्ध्याह्रासेनचानिशं ॥ ११५ ॥ वर्द्धते क्षीयतेयस्मात्तस्मान्नियतिवर्जितं ॥ पिप्पलादेनकथितंमुनिनासर्ववेदिना ॥ ११६॥

माणंप्रस्थः तस्यरूपंतुपंचगुंजात्मकोमाषस्तेमाषाःषोडशकर्षःकर्षचतुष्टयंपलंतच्चतुष्टयंकुडवस्तच्चतुष्टयंप्रस्थइति तथाकफधातोर्गलेस्फु टमनुभूयमानस्यदेहव्याप्तस्यपरिमाणंप्रस्थानांचतुष्टयमिति ॥ ११२ ॥ सर्वांगेति शुक्राख्यःसप्तमोधातुःसर्वांगसंस्थितोपिकंठहृदयमूर्द्ध सुविशेषेणस्थितःक्षोभेननिःसरणशीलःप्रस्थचतुर्थांशसंमितः मेदःसंज्ञधातोस्तुपरिमाणंप्रस्थद्वयमित्यर्थः ॥ ११३ ॥ ११४ ॥ मूत्रमिति वस्तिर्मूत्राशयःसंग्रहणीपुरीषाशयस्तद्गतयोर्मूत्रपुरीषयोःपरिमाणमनियतंयतोन्नपानग्रहणेनानियतेनतयोर्वृद्धिर्ह्रासौभवतः एवंविधं जिव्हादीनांपरिमाणंगर्भोपनिषद्द्रष्ट्रापिप्पलादाख्यमुनिनाप्रोक्तं रसरुधिरादिपरिमाणंतुनवांजल्यादिकंयाज्ञवल्क्याद्युक्तंद्रष्टव्यमितिभा वः ॥ ११५ ॥ ११६ ॥ ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथशाखांतरगुणोपसंहारन्यायेनप्राप्तान्देहस्यांतरान्विशेषानाह शरीरमित्यादिना सर्वेषांशरीरंपादाग्रमारभ्यकेशपर्यंतंदैर्घ्येस्वांगुलैस्तच्छरीरीयांगुलैर्मीयमानेसतिषण्णवत्यंगुलंषडधिकनवत्यंगुलिपरिमितंभवतीत्यर्थः देहइति अत्रदेहेद्वयोःपार्श्वयोःप्रत्येकंषोडशषोडशअस्थीनिगृहमण्डपस्यवंशभूतानितानिसंकलनेद्वात्रिंशद्भवंतीत्यर्थः ॥ ११७ ॥ प्रश्नोपनिषदुक्तांसूक्ष्मनाडीसंख्यामाह द्वासप्ततीतिद्वाभ्यां अत्रदेहेनाडीनांद्वासप्ततिःसहस्राणिद्व्यधिकसप्ततिसहस्रसंख्यानाड्यइतियावत् ताअत्रसंतीत्यर्थः किमेतावत्यएवनाड्यइतिचेन्नेत्याह संधितइत्यादिना प्रश्नेप्रश्नोपनिषदियानाडीनांशतंचैकेत्यादिश्रुतिप्रसिद्धानामेकाधिकसंख्यानांमध्येएकस्याएकस्याःसंधितोजातत्वेनशाखाभूताःशतंशतंनाड्यउक्तास्तासामेकैकस्याःप्रतिशाखात्वेनइमाद्वासप्ततिसहस्रसंख्याःस्मृताःप्रोक्ताइतिसंबंधः ताभिर्जीवस्य

शरीरंसर्वजंतूनांषण्णवत्यंगुलंस्मृतं ॥ स्वांगुलैःकेशपर्यंतंपादांतावधिदैर्घ्यतः ॥ देहेद्वात्रिंशदस्थीनिवंशाःस्युःपार्श्वयोर्द्वयोः ॥ ११७ ॥ द्वासप्ततिसहस्राणिनाडीनामपिसंधितः ॥ एकैकस्यास्तुनाडीनांशतमेकोत्तरंहियाः ॥ ११८ ॥ शाखाःप्रश्नेसमाख्याताःप्रतिशाखाइमाःस्मृताः ॥ तासांसर्वत्रदेहेस्मिन्व्याप्तिरापादमस्तकं ॥ ११९ ॥ शरीरादधिकःप्राणोद्वादशांगुलमानतः ॥ बहिर्नासिकयायातितस्मात्प्राणइतीरितः ॥ १२० ॥ चत्वारिंशत्तथैवाष्टावंगुलानिपदाग्रतः ॥ केशाग्राच्चाभवन्मध्यंशरीरस्यनृणामिह ॥ १२१ ॥

व्याप्तिःसर्वत्रशरीरेभवतीतिद्वयोरर्थः अयंहिप्रश्नवाक्यस्यग्रंथकृदभिमतोनिर्गलितार्थः एकामूलभूतानाडीतस्याःस्कन्धोपस्कन्धभूताःशतंनाड्यःअयुतंशाखानाड्यस्तासांसंबंधिन्यःप्रतिशाखाख्यानाड्योद्वासप्ततिकोटयोभवंतिसंकलनेद्वासप्ततिकोटयोदशसहस्रंशतमेकाचैतावत्योभवंतीतिसप्तदशेस्फुटीभविष्यतीति ॥ ११८ ॥ ११९ ॥ उक्तनाडीभ्योप्यधिकप्रचरणशालित्वादाध्यात्मिकवायोःप्राणत्वंयुक्तमित्याह शरीरादिति प्राणआध्यात्मिकवायुःशरीरात्षण्णवत्यंगुलादधिकोऽष्टोत्तरशतांगुलप्रमाणोभवति यतोनासिकाद्वारेणबहिर्द्वादशांगुलदेशेपिगच्छन्नुपलभ्यतेऽतएवचतस्यप्राणसंज्ञापि प्रकर्षेणाधिक्यलक्षणेनअनितीतिव्युत्पत्तिसमन्वयादित्यर्थः ॥ १२० ॥ देहेतेजःस्थानंदर्शयितुंतदुपयोगिमध्यदेशस्वरूपमाह चत्वारिंशदिति पादाग्रमारभ्यकेशाग्रमारभ्यवाअष्टचत्वारिंशदंगुलिमितोदेशोदेहस्यमध्यत्वेनबोध्यइत्यर्थः ॥ १२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रतेजःस्थानंदर्शयति देहमध्यइतिद्विपञ्चाशत्श्लोकैः तस्मिन्देहमध्येचतुरस्रंचतुष्कोणमग्निस्थानंभवति तस्याग्नेर्नाडीद्वाराव्याप्तिस्तुशिरःपर्यंतंतत्रापिमस्तकस्थितचंद्रमंडलपर्यंतंबोध्येत्यर्थः तथाचोक्तमागमेभगवतामहादेवेन सर्वेषामपिजंतूनांमूर्ध्निंतिष्ठतिचंद्रमाः अधोभागेरविःप्रोक्तोमृत्युकालेविपर्ययादिति ॥ १२२॥ चतुरस्रइति तस्मिश्चतुरस्रेस्थानेस्थितंतेजोदेहेंद्रियादिसामर्थ्यप्रयोजकत्वात्शक्तिसंज्ञंभवतिअतिसूक्ष्मत्वाद्दुर्लक्ष्यमौष्ण्यरूपेणजीवनलक्षणंचभवतीत्यर्थः जीवतःप्राणधारकान्नत्यजतीति ॥ १२३ ॥ तदेवतेजःस्थानंविशेषतोऽवधारयति गुदात्त्विति गुदात्पायुस्थानादूर्ध्वंद्व्यंगुलमितेदेशेतावत्येवचोपस्थादधोदेशेतत्तेजसःस्थानभूतंचतुरस्रंस्थितंभवतीत्यर्थः॥ १२४॥

देहमध्येशिखिस्थानंतप्तजांबूनदप्रभं॥ चतुरस्रंशिरोंतंतत्तिष्ठत्याचंद्रमंडलम् ॥ १२२ ॥ चतुरस्रेस्थितंतेजः शक्तिसंज्ञंसुदुर्गमं॥ अतिसूक्ष्मंसदाजंतूनूजीवतोनजहातिच ॥ १२३॥ गुदात्तुद्व्यंगुलादूर्ध्वंमेढ्राद्द्व्यंगुलतोप्यधः ॥ एकांगुलप्रमाणंतच्चतुरस्रमवस्थितम्॥ १२४॥ अत्रमध्येशरीरस्यत्व्यवकाशेनवांगुले॥ उत्सेधाच्चतथायामात्कंदोस्तिचतुरंगुलः ॥ १२५ ॥ नवांगुलपरीणाहोदंडाकारस्त्वगादिना ॥ वेष्टितोनाभिनालःस्यान्मूलभूतःशरीरिणां॥१२६॥ अस्यमध्यइदंनाभिचक्रमुक्तंमनीषिभिः॥ द्वादशारंतुतन्नित्यंदेहेनपरिवेष्टितम्॥ १२७॥ अत्रचक्रेभ्रमत्येषजीवोहृदयमाश्रितः॥ कर्मणातंतुजालस्थोयथाभ्रमतिलूतिकः॥१२८॥

एवंनाडीलतानांजनिस्थानस्यकंदस्यवृत्तमप्यागमेप्रपंचितंदर्शयति अत्रेति उक्तरूपेशरीरस्यमध्येयोवकाशोनवांगुलिमितस्तस्मिन्दैर्घ्यायामयोश्चतुरंगुलःकंदःकंदसमोमांसपिंडविशेषोस्तीत्यर्थः ॥ १२५ ॥ नवांगुलेति तस्मात्कंदादुत्थितोनाभिनालोनाभिचक्रात्मकपंकजस्यनालभूतोऽवयवोस्ति कीदृशः नवांगुलविस्तारकोदंडसदृशःशरीरिणांसकलशरीरावयवानांमूलभूतस्त्वगादिसप्तधातुभिर्वेष्टितश्चेत्यर्थः॥ १२६॥ अस्येति अस्यनाभिनालस्यमध्यइदंयोगिभिरनुभूयमानंनाभिचक्रंभवति कीदृशं द्वादशारंअरारथचक्रावयवविशेषास्तेद्वादशयस्यतत्तथा ॥ १२७ ॥ इदमेवचक्रंहार्दपद्मेंतर्भावितंश्रुत्यादिष्वित्याह अत्रचक्रइति हृदयवासित्वेनप्रसिद्धोजीवउक्तचक्रेकर्मरूपतंत्वाश्रितोलूताकीटवद्भ्रमतीत्यर्थः ॥ १२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यपिजीवः सर्वत्रदेहेप्राप्तस्तथापिविशेषाभिव्यक्तिविवक्षयाहृदयादीनांतत्स्थानत्वव्यवहारइत्याह नाभिश्चेति केनचिद्धेतुनाविशेषाभिव्यक्तिलक्षणेननाभ्यादीनिजीवस्यस्थानान्युच्यंतेइतिसंबंधः ॥ १२९ ॥ फलितमाह जीवस्येति तत्रजीवस्थानानांमध्येआद्येप्रथमेंआधाराख्येचक्रेचतुरस्रतयावर्णितेप्राणेनसहितोजीवः सर्वदास्तिसन्निहितइत्यर्थः ॥ १३० ॥ अत्रैवचक्रेकारणोपाधिप्रधानांकुंडलिनीसंज्ञामागमोक्तांब्रह्ममूर्तिवर्णयति नाभेरिति नाभिचक्रादधआधारचक्रादुपरिचदेशेभुजंगवत्रिवलयावस्थानात्तिर्यगवस्थिताकुंडलिनीसंज्ञाशक्तिः कारणरूपब्रह्मणोमूर्त्तिरस्तीत्यर्थः ॥ १३१॥ इयमेवाष्टमूर्त्तिरपरप्रकृतित्वेनगीतासुसप्तमाध्यायउक्तेत्याह भूमिरिति भूम्यादिरूपस्यवाह्यस्यमनःप्रभृतेरांतरस्यचार्थप्रपंचस्येयमेवहेतुरितिभावः ॥ १३२ ॥ शब्दप्रपंचस्यापीयमेवहेतुरित्याह इयमिति इयंकुंडलिनी

नाभिश्चहृदयंकंठश्चक्षुर्मूर्द्धाचपंडितैः॥ आपादमस्तकंदेहेस्थितस्यापिशरीरिणः ॥ हेतुनाकेनचिन्नित्यमुच्यंतेस्थानकानिहि॥ १२९॥ जीवस्याद्येमूलचक्रआधारइतिकीर्तिते॥ तत्रप्राणयुतोजीवश्चतुरस्रेस्तिसर्वदा ॥१३०॥ नाभेरधस्तथाधाराद्रूर्ध्वंतिर्यगवस्थिता॥ अस्तिकुंडलिनीशक्तिर्भुजंगीवशरीरगा॥१३१॥ भूमिरापोनलोवायुःखंमनोबुद्धिरेवच॥ अहंकारइतिप्रोक्तैस्तत्त्वैरष्टविधाकृता॥ १३२॥ इयंशब्दौघजननीवायुनास्फालितासती॥ अनयात्रनिरुद्धोयंवायुर्जठरगोमहान् ॥ १३३ ॥ आगत्यदशमद्वारंबहिरेवाभिधावति॥ सुषुम्नादशमद्वारेब्रह्मरंध्रंप्रतिष्ठिता॥ तस्यामुखंनिरुध्यास्तेस्वमुखेनेयमुज्ज्वला॥१३४॥ योगकालात्पवनतः प्रबुद्धाश्वासवह्नितः॥ स्फुरत्याहृदयाकाशंनागरूपामहोज्ज्वला॥ १३५॥

वायुनाप्राणेनताडितासतीशब्दवृंदस्यजनिका अस्याव्यापारांतरमाह अनयेति प्राणस्यवहिर्ब्रह्मलोकंप्रतिगमनप्रतिबंधोप्यस्याव्यापारइत्यर्थः ॥ १३३ ॥ एतदेवस्फुटयति आगत्येति यतोजाठरोवायुर्दशमद्वारंगत्वावहिर्गंतुमेवोद्यतोभवतिपरंतुतत्रनिःसरणपंथाःसुषुम्नाख्यनाडीरूपोभवति इयंकुंडलिनीतुतस्याःसुषुम्नायामुखंस्वमुखेननिरुध्योक्तदेशेतिष्ठतिशेतेइतियावत् इत्थमस्याःप्राणमार्गनिरोधकत्वमित्यर्थः ॥ १३४ ॥ कदाइयंप्रबुध्यसुषुम्नामुखंमुंचतीत्याकांक्षायामाह योगेतिद्वाभ्यां योगेनकालःकालनंचालनमितियावत्तद्यस्यतथाभूतेनप्राणवायुनायदाप्रबुद्धाभवतितदाहृदयाकाशमभिव्याप्यस्फुरतिदशमद्वारांतंप्रसरति कीदृशी शेषनागवदुज्ज्वलमूर्तिरित्यर्थः॥१३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वायुरिति तदाएषाकुंडलिनीप्रबुद्धासतीअस्याःसुषुम्नायामुखरोधंनकरोति तदाकदा यदासप्राणोवायुसखेनाग्निनाआन्तरेणसहसुषुम्नया मार्गभूतयाअन्तर्देहमध्यमेतिप्रविशतिसुषुम्नामुखरूपद्वारेणेत्यर्थः ॥ १३६ ॥ तत्तत्स्थानेप्राणस्थापनरूपप्रत्याहारस्यवसिष्ठोक्तस्योपयो गिनाडीनांस्वरूपादिकमाह कंदेतिसप्तदशभिः वर्णितकंदस्यमध्येसुषुम्नाख्यानाडीतिष्ठतितस्याःपरितःसमंतादन्यास्तिष्ठंतीत्यर्थः॥१३७॥ नाडीनांमध्येचतुर्दशमुख्याःसनामग्रहंदर्शयति नाडीनामिति त्रयंनिगदव्याख्यातं ॥ १३८ ॥ १३९ ॥ १४० ॥तास्विति तासुइतरापे क्षयामुख्यत्वेनदर्शितासुचतुर्दशसुतिस्रःसुषुम्नेडापिंगलाःप्रधानतमास्तास्वप्येकासुषुम्नासर्वोत्तमायतोज्वलंतीप्रसिद्धमाहात्म्याविश्वप्रपं

॥१०॥

वायुर्वायुसखेनैतिसहांतःससुषुम्नया॥ यदैषास्वमुखेनास्यामुखेरोधंकरोतिन ॥ १३६॥ कंदमध्येस्थिताना डीसुषुम्नेतिप्रकीर्तिता॥ तिष्ठंतिपरितःसर्वाश्चक्रेस्मिन्नाडिकाःपराः ॥ १३७ ॥ नाडीनामपिसर्वासांमुख्याः स्युस्ताश्चतुर्दश॥ सुषुम्नेडापिंगलाचपरातद्वत्सरस्वती॥१३८॥ कुहूश्चवारणाचैवसप्तमीचयशस्विनी ॥ पूषाप यस्विनीतद्वत्शंखिनीदशमीस्मृता ॥ १३९॥ गांधारीहस्तिजिह्वाचतथाविश्वोदरापिहि ॥ अलंबुषाचसर्वा सांमुख्याःप्रोक्ताश्चतुर्दश ॥ १४० ॥ तासुमुख्यतमास्तिस्रएकातास्वपिकीर्तिता ॥ मुक्तिमार्गःसुषुम्नासाज्व लंतीविश्वधारिणी ॥ १४१॥ कंदस्यमध्यमेभागेसुषुम्नासंप्रतिष्ठिता॥ पृष्ठमध्यस्थितेनाश्नासहमूर्द्धनिसाग ता॥ १४२॥ इडाचपिंगलातद्वत्तस्याःसव्येचदक्षिणे॥ पृष्ठतःपुरतस्तद्वन्नाडीनांहिद्वयंद्वयं॥ सुषुम्नेडापिंगला नांविज्ञेयंक्रमतःसदा ॥ १४३॥ सरस्वतीकुहूश्चैवगांधारीहस्तिजिह्विका ॥ पूषायशस्विनीचैवत्रिपंक्त्यान वनाडिकाः॥ १४४ ॥

चाधारत्वादित्यर्थः तच्चदहरादिविद्यासुप्रसिद्धमितिभावः ॥ १४१ ॥ एतासांसंस्थानमभिनयति कंदस्येत्यष्टभिः वर्णितकंदस्यमध्येसुषु म्नातिष्ठतिपृष्ठवंशाख्यपृष्ठमध्यगतास्थिरूपद्वारेणमूर्द्धानंगच्छतिचेत्यर्थः ॥ १४२ ॥ इडेति तस्याःसुषुम्नायाःसव्येवामतइडातिष्ठतिदक्षि णतःपिंगलेति एवंस्थितानांसुषुम्नेडापिंगलानांयथाक्रमंवक्ष्यमाणायुगलत्रयघटिकाःषण्नाड्यःपृष्ठेऽग्रेचबोध्याइत्यर्थः ॥ १४३ ॥ तद्यु गलत्रयंदर्शयति सरस्वतीति तत्रसुषुम्नायाःपृष्ठेसरस्वतीअग्रेकुहूः इडायाःपृष्ठेगांधारीअग्रेहस्तिजिह्वा पिंगलायाःपृष्ठेपूषाऽग्रेयशस्विनी ॥ १०॥ इत्येवंसंस्थानेऽग्रिममध्यमपश्चिमासुत्रिषुपंक्तिषुनवनाड्यउपविष्टाः त्रिपंक्त्याइत्यस्यत्रिविधायाःपंक्तेःसंबंधिन्यइत्यर्थः ॥ १४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंक्तित्रयमभिनयंस्तत्रपुरोवर्त्तिनाडीत्रिकमयींपंक्तिदर्शयति हस्तीति सव्यायाइतिपंचमील्यब्लोपे तथाचसव्यांवामामारभ्यपुरोवर्तिना डीमयीपंक्तिर्हस्तिजिह्वादिकेत्यर्थः हस्तिजिह्वाहिइडायाःपुरोवर्तिनी सुषुम्नायाःकुहूःपिंगलायायशस्विनीति मध्यपंक्तिमाह द्वितीयेत्या दिना सापंक्तिर्द्वितीयापितथैववामादिकैवभवति यतइडादित्रयंमध्यपंक्तिरूपेणस्थितमित्यर्थः॥ १४५॥ पृष्ठगताभिस्त्रिभिर्घटितांतृतीयां पंक्तिमाह गांधारीति तादृश्यांतृतीयायामपिपंक्तौइडापृष्ठगतागांधारीप्रथमासुषुम्नापृष्ठगतासरस्वतीद्वितीयापिंगलापृष्ठगतापूषातृतीया इत्यर्थः॥ १४६॥ वर्णितासुपंक्तिषुप्रथमायापंक्तिस्तस्यांविश्वोदरीवारणयोर्निवेशइत्याह कुह्वाइति ॥ १४७॥ तासुयातृतीयापंक्ति

हस्तिजिह्वाकुहूश्चैवतृतीयाचयशस्विनी॥ सव्यायाःप्रथमापंक्तिर्द्वितीयापितथैवसा॥ इडाचैवसुषुम्नाचपिंग लापंक्तितःस्थिता॥ १४५॥ गांधारीप्रथमातद्वद्द्वितीयाचसरस्वती॥ पूषापंक्तौतृतीयास्यात्तृतीयस्यांसदैव हि॥ १४६॥ कुह्वाश्चहस्तिजिह्वायामध्येविश्वोदरीस्थिता॥ कुह्वाश्चैवयशस्विन्यावारणामध्यतःस्थिता॥ १४७॥ पूषायाश्चसरस्वत्याःस्थितामध्येत्रशंखिनी॥ सरस्वत्याश्चगांधार्यामध्येस्तीहपयस्विनी॥ अलंबु षाचविज्ञेयाकंदमध्यादवःस्थिता॥ १४८॥ पुरतोऽपुरतःपंक्तावेवंनाड्योव्यवस्थिताः॥ पंचपंचचमध्येपिमु ख्याःस्युस्तिस्रएवहि॥ एकाकंदादधस्थानाताएवंस्युश्चतुर्दश॥ १४९॥ इडाचपिंगलातद्वद्गांधारीसहपूषया॥ नासाक्षिकर्णयुग्मस्थाशंखिनीचयशस्विनी॥ क्रमतःषडिमास्तद्वद्रसनेचसरस्वती॥ १५०॥

स्तस्यांशंखिनीपयस्विन्योर्निवेशइत्याह पूषायाइति एवंत्रयोदशनाडीनांस्थानंदर्शितमथपरिशिष्टायाअलंबुषायाःस्थानमाह अलंबुषे ति अवःअधस्तात्॥ १४८॥ फलितमाह पुरतइति एवंसतिपुरतोग्रतःस्थितायांपंक्तौपंचनाड्यःस्थितास्तथाऽपुरतःपृष्ठतःस्थितायाम पिपंक्तौपंचनाड्यःस्थिताः मध्यपंक्तौतुतिस्रएवइडाद्याः एकातुअधस्थानाकंदादधोगता एवंचतुर्दशस्थिताबोध्याइत्यर्थः तथाचेदंचक्रंफ लितम् पूसंशयंगां॥ १४९॥ एवंकंददेशेएतासांस्थितिरुक्ताथततउत्थाययत्रयत्रगत्वाविशेषतोव्यापारंकुर्वंतितानिस्थानान्याह इडाचे तिचतुर्भिः इडापिंगलयोर्वामदक्षिणनासापुटयोर्विशेषतोव्यापारः गांधारीपूषयोरक्षियुग्मेशंखिनीयशस्विन्योःकर्णयुग्मेसरस्वत्यास्तुर सनायामित्यर्थः॥ १५०॥

(१ इदंसंशयितं)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्तिजिह्वायशस्विन्योर्वामदक्षिणपादांगुष्ठयोःस्थित्वागतिप्रवर्तनंव्यापारइत्याह हस्तीति ॥ १५१ ॥ अलंबुषायाःपायौव्यापारः कु
ह्वास्तुमेढ्रे विश्वोदरावारणयोस्तुयथाक्रमंवामदक्षिणहस्तयोर्व्यापारइत्याह अलमिति ॥ १५२ ॥ सुषुम्नायास्तुदशमद्वारंगच्छंत्याविश्व
धारणरूपोव्यापारउक्तएवेत्यभिप्रेत्यउक्तानुक्तानांसर्वासांनाडीनांप्राणभ्रमणद्वारीभवनरूपःसाधारणोव्यापारइत्याह शेषाइति ॥ १५३॥
उक्तासुनाडीषुचरतांप्राणादीनांस्थानविशेषानाह प्राणइति यस्यप्राणस्यपरेऽपानादयोभेदाभवंतिसमुख्यःप्रधानभूतःप्राणाख्योवायु
र्मुखनासिकयोर्हृदयेनाभौपादांगुष्ठेचस्थितइतिसंबंधः ॥ १५४ ॥ नाभ्यादीति अपानाख्योवायुर्नाभिमारभ्यजंघापर्यंतंपायूपस्थयो

हस्तिजिह्वायशस्विन्यौवामदक्षिणपादयोः॥ अंगुष्ठतःस्थितेनित्यंसर्वदास्थितिहेतुके ॥ १५१ ॥ अलंबुषा
प्रयात्यत्रपायुंमेढ्रंकुहूस्तथा॥ विश्वोदरावारणाचवामदक्षिणहस्तयोः॥ १५२ ॥ शेषाःसर्वाश्चसर्वत्रनाड्यो
देहेत्रसंस्थिताः॥ असंख्याताहिवायूनांमार्गभूताव्यवस्थिताः ॥ १५३ ॥ प्राणोमुख्यतमोवायुःकंदस्याधःप्र
तिष्ठितः ॥ आस्यनासिकयोर्मध्येहृदयेनाभिमंडले ॥ पादांगुष्ठेचसततंयस्यभेदाःपरेस्मृताः ॥ १५४ ॥ ना
भ्यादिजानुजंघांतमपानोत्रव्यवस्थितः ॥ विशेषतःशिश्नपायुद्वारेतिष्ठतिसर्वदा ॥ १५५ ॥ द्वारद्वंद्वस्थितो
व्यानोगुल्फयोःपादहस्तयोः ॥ पृष्ठवंशेकटौतद्वदुरस्यपिशरीरिणां ॥ उदानःसर्वसंधिस्थःपादयोर्हस्तयोरपि
॥ १५६ ॥ समानःसर्वदादेहंसर्वंव्याप्यव्यवस्थितः ॥ भुक्तंसर्वंरसंगात्रेव्यापयत्यग्निनासह ॥ १५७ ॥ द्वास
प्ततिसहस्रेषुनाडीष्वपिचसंचरन्॥ समानवायुरेवैकोदेहंव्याप्यव्यवस्थितः॥ १५८॥ नागादिवायवःपंचत्वग
स्थ्यादिषुसंस्थिताः॥ श्वासोच्छ्वासादिकंकर्मप्राणस्यैतत्प्रकीर्तितं॥ १५९॥

श्चविशेषतःस्थितइत्यर्थः ॥ १५५ ॥ द्वारेति द्वारद्वंद्वंश्रोत्राक्षिरूपंतत्रगुल्फादिषुचव्यानःस्थितइत्यर्थः पृष्ठवंशःपृष्ठगतदीर्घास्थि तथाउ
दानःसर्वसंधिषुपादयोर्हस्तयोश्चस्थितइत्यर्थः ॥ १५६ ॥ समानइति द्वयंनिगदव्याख्यातं ॥ १५७ ॥ १५८ ॥ तथानागकूर्मादिवायव
स्त्वगादिषुयथायोगंस्थिताबोध्याइत्याह नागादीति उक्तानांवायूनांव्यापारान्क्रमेणाह श्वासोच्छ्वासादिकमिति श्वासःकोष्ठ्यस्यवायोर्ब
हिःकरणं उच्छ्वासोबाह्यस्यांतराकर्षणमिति ॥ १५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपानेति मलोत्सर्जनमपानस्यकर्म हानोपादानादिकंबलसाध्यंकर्मव्यानस्यबोध्यं देहस्योत्थापनादिकंतूदानस्यकर्मेति पोषणादीति प्राणस्पंदादिकंसर्वशरीरव्यापिकर्मसमानस्यबोध्यमितिद्वयोरर्थः॥१६०॥१६१॥ उद्गारादीति उद्गारादयोगुणाःप्रकारभूतायस्यतथाभूतं कर्मनागाख्यस्यवायोरुक्तं आदिपदेनहिक्कादिग्रहः निमीलनंनेत्रसंकोचः क्षुतंछिक्का तंद्रीजृंभणादिरूपा शोथादीत्यादिपदेनपिटकोदयादिग्रहः ॥ १६२॥ योगिभिःक्रियमाणस्यप्रत्याहारस्यप्राणस्थापनरूपस्योपयोगीन्यष्टादशस्थानानिवसिष्ठोक्तान्यनुवदति पादांगुष्ठाविति पादांगुष्ठः१गुल्फः२ जंघामध्यं ३ चितिर्जंघापृष्ठेमांसोपचयस्तदीयंमूलमुपचयप्रारंभदेशः४जानुप्रसिद्धं५ऊरुमध्यंच६ पायोर्मूलमधोदेशः ७ तथापायोःपश्चाद्वर्णितोदेहमध्याख्योदेशः ८ मेढ्रमध्यं ९ नाभिः १० हृदयं ११ कंठकूपोघंटिकाधोगतोगर्त्तः १२ तालुमू

अपानवायोःकर्मैतद्विण्मूत्रादिविसर्जनं॥ हानोपादानचेष्टादिव्यानकर्मेतिकीर्त्यते ॥ १६० ॥ उदानकर्मतत्प्रोक्तंदेहस्योन्नयनादियत्॥ पोषणादिसमानस्यशरीरेकर्मकीर्तितं॥ १६१ ॥ उद्गारादिगुणंयत्तन्नागकर्मेति कीर्त्यते॥ निमीलनादिकूर्मस्यक्षुतंतत्कृकलस्यच ॥ देवदत्तस्यतंद्रीस्यात्शोथादितुधनंजयात्॥ १६२ ॥ पादांगुष्ठौचगुल्फौचजंघामध्येतथैवच ॥ चित्त्योर्मूलेचजानूचमध्येचोरुद्वस्यच॥ १६३ ॥ पायुमूलंतथापश्चान्मध्यदेशश्चमेढ्रगः ॥ नाभिश्चहृदयंतद्वत्कंठकूपस्तथैवच ॥ १६४ ॥ तालुमूलंचनासायामूलंचाक्ष्णोश्चमध्यगं॥भ्रुवोर्मध्यंललाटंचमूर्द्धाअष्टादशस्मृताः ॥ अष्टोत्तरशतान्यत्रमर्माण्यंतर्भवंतिच ॥ १६५ ॥ पादांगुष्ठात्तुपादस्यपृथग्ज्ञानंनविद्यते॥पादात्तुमानंगुल्फस्यसार्द्धांगुलचतुष्टयं ॥ १६६ ॥

लं१३ नासामूलं१४अक्ष्णोर्मध्यंच १५ भ्रूमध्यं१६ललाटं१७ मूर्द्धादशमद्वारंच१८ एतेष्टादशदेशाःप्रत्याहारस्यस्मृताः यानिचाष्टोत्तरशतसंख्यानिमर्माणिवैद्यशास्त्रेप्रसिद्धानितान्यत्रएषुअष्टादशसुअंतर्भवंतिएतत्संनिहितत्वादितित्रयाणामर्थः अष्टोत्तरशतसंख्यात्वेनसंबंधियेषामितिविग्रहः ॥ १६३ ॥ १६४ ॥ १६५ ॥ पूर्वदेहस्यषण्णवत्यंगुलत्वंपादाग्रमारभ्यकेशांतंयावल्लोकदृष्ट्यनुसारेणोक्तमथतस्यवसिष्ठोक्तंप्रकारांतरमभिनयति पादांगुष्ठात्त्वितिनवभिः पादांगुष्ठमारभ्यपृथग्ज्ञानवर्णनंनयुक्तं पादत्वेनसर्वस्यपादावयवजातस्यसंग्रहात्किंतुपादमारभ्यैवमानवर्णनंयुक्तमितिपूर्वदलार्थः पादमारभ्यगुल्फस्यसार्द्धांगुलिचतुष्टयमितोदेशोबोध्यः एवमग्रेपि॥१६६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुल्फात्तुजंघयोरित्यादीनामष्टानांपदानिप्रसिद्धानि कानिचित्व्याख्यातानिच व्योमसंज्ञंमूर्द्धस्थानं एवमुक्तपरिमाणसङ्कलनेन॥१६७॥ ॥१६८॥१६९॥१७०॥१७१॥१७२॥१७३॥१७४॥ इत्थंकृतस्यशरीरवर्णनस्यविवेकवैराग्ययोःपर्यवसानंदर्शयति भूते

गुल्फात्तुजंघयोर्मध्यंतद्दशांगुलमीरितं॥ जंघामध्याच्चितेर्मूलंयत्तदेकादशांगुलं॥ १६७॥ चितिमूलात्तथैवैतज्जानुस्यादंगुलद्वयं॥ जानोर्नवांगुलंतत्स्यादूरुमध्यंहियत्स्मृतं ॥ १६८ ॥ ऊरुमध्यात्तथैवैतत्पायुमूलंनवांगुलं ॥देहमध्यंतथापायोर्मूलात्सार्द्धांगुलद्वयं॥ देहमध्यात्पुनर्मेढ्रंतद्वत्सार्द्धांगुलद्वयं ॥ १६९ ॥ मेढ्रान्नाभिश्चविज्ञेयातथासार्द्धदशांगुलं॥ चतुर्दशांगुलंनाभेर्हृन्मध्यमिहकीर्तितं॥ १७० ॥ षडंगुलेहिहृन्मध्यात्कंठकूपःप्रकीर्तितः॥कंठकूपात्तुजिह्वायामूलंस्याच्चतुरंगुलं॥ १७१ ॥नासामूलंतुजिह्वायामूलात्स्याच्चतुरंगुलं॥ नेत्रस्थानंचतन्मूलादर्द्धांगुलमितीष्यते॥ १७२॥ तस्मादर्द्धांगुलंतद्वद्भ्रुवोरंतरमात्मनः॥ ललाटाख्यंभ्रुवोर्मध्यादूर्ध्वंस्यादंगुलत्रयं॥ १७३॥ ललाटाद्व्योमसंज्ञंतदंगुलत्रयमेवहि॥ षण्णवत्यंगुलंत्वेवंवसिष्ठेनापिकीर्तितं ॥शरीरंसर्वतोनॄणांगृहीतंयदहंधिया ॥ १७४ ॥ भूतभौतिकरूपेणपिप्पलादेनकीर्तितं॥ गर्भोपनिषदीत्थंयत्सर्वेषामिहदेहिनां ॥ १७५ ॥ महाभूतानिविषयाःशब्दाद्याइंद्रियाणिच॥ तथांतःकरणंप्राणास्त्वगाद्याअपिधातवः॥ १७६॥नाड्योमर्माणिसर्वाणिदोषाःपित्तादयस्तथा॥कंठोत्हृदयपद्मंचजिह्वानालेनसंयुतं ॥ विण्मूत्रेचतथालोमगणाएतच्छरीरकं॥ १७७ ॥

तिदशभिः यदित्थंभूतभौतिकरूपावयववर्णनद्वारागर्भोपनिषदिपिप्पलादेनकीर्तितंतच्छरीरमेतावदवयवसमुदायात्मकमेवेतितृतीयेनाभिसंबंधः केतेऽवयवाइत्याकांक्षायांताननुवदति महाभूतानीत्यादिनालोमगणाइत्यंतेन कीदृशंहृत्पद्मं यस्याधोलंबिनीनालस्थानीयाजिह्वाभवति स्फुटमन्यत्॥ १७५॥ १७६ ॥ १७७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतावन्मात्रत्वेहेतुमुक्तेभ्यः पृथगनुपलभ्यमानत्वमाह एतेषामिति एतेषांभूतादीनांपृथक्त्वेन विवेकेकृतेसतिशरीरंनकिंचिदपीत्यर्थः तथा चात्मबुद्धिरयुक्तेत्याह आत्मेति यदायदिएतेषुलोमगणांतिष्वात्मबुद्धिः क्रियेततर्हिनरकेबीभत्सदेशेषुसात्मबुद्धिः किंनक्रियतइत्यर्थः १७८ एतदेवस्फुटयति आत्मेति यतोत्रएषुलोमांतिषुप्रत्येकंस्थितेषुमिलितेषुवात्मबुद्धिर्यथाभ्रमरूपापिनदृश्यतेततः सात्मबुद्धिः शरीरेकथंभवेदुपपद्येतेत्यर्थः ॥ १७९ ॥ केशेति अन्यदेहस्यशिरसिकंठोर्ध्वावयवेस्थितायेकेशादयस्तेमार्गेवाअन्यदेहेवास्थिताआत्मबुद्धिंनजनयंति विषयतयेत्यर्थः ॥ १८० ॥ किंचमरणमूर्छासुषुप्तिष्वदृश्यमानायादेहात्मबुद्धेरकस्मादुद्भवंत्यामिथ्यात्वंव्यक्तमेवेत्याह अपिदेहइति

एतेषांहिपृथक्त्वेकिंशरीरंनामविद्यते॥ आत्मबुद्धिर्यदैतेषुनरकेषुकुतोनसा ॥ विद्यंतेयतएतानिनरकेष्वपिसर्वशः॥ १७८॥ आत्मबुद्धिर्यथैवात्रप्रत्येकंमिलितेष्वपि ॥ नदृश्यतेयतः केनशरीरेस्मिन्हिसाभवेत्॥ १७९॥ केशदंतादयोमार्गेप्रत्येकंमिलिताअपि ॥ दृष्टाः कुर्वंतिनैवात्मबुद्धिंनापिशिरः स्थिताः ॥ अन्यदेहस्यनैवान्यदेहसंस्थाश्चकर्हिचित् ॥ १८० ॥ अपिदेहेमृतेतद्वच्छयानेमूर्छितेथवा ॥ नात्मबुद्धिंकुतोमध्यएषाजागरणेस्तिहि ॥ १८१ ॥ अपिव्रणेतिदुर्गंधेव्याधिशस्त्रादिसंभवे॥ जुगुप्साजायतेदेहेतद्वत्तौकेनसानहि॥१८२॥ वर्चस्केवाथवावांतेपूतिगंधेचिरस्थिते ॥ अन्नेयद्वद्भवेन्नृणांजुगुप्सादोषदर्शनात् ॥ १८३॥ तद्वदेवकुतोनैषादेहेन्नमयरूपिणि॥ नजायतेतिदुःखघ्नीममात्रेतिविवेकिनः ॥ इत्यादिचिंतयन्धीरोविरागमधिगच्छति ॥ १८४॥ अथवाचिंतयेदेवंगर्भोपनिषदीरितं॥ जन्मदुःखतमंनृणांविरागस्यात्रकारणं॥ १८५॥

॥ १८१ ॥ अथवैराग्येपर्यवसानंस्फुटयन्देहकार्येव्रणादौजुगुप्सांकुर्वतामपियद्व्रणाद्युपादानेदेहेनभवतीत्यतिचित्रमित्याह अपिव्रणइति तद्वत्तौव्रणाद्युपादाने ॥ १८२ ॥ वर्चस्केइति किंचदेहस्यकारणेऽन्नेवांतभावपुरीषभावादिदुर्गंधावस्थापन्नेयथाजुगुप्सानृणांभवति तथाममात्रदेहेन्नविकारेएषाजुगुप्साकुतोनजायते कीदृशस्यमम इतिउक्तविधयाविवेकिनोविवेकवतः कीदृशीजुगुप्सा अतिदुःखस्यसंसारमयस्यहंत्रीत्यर्थः ॥ १८३ ॥ १८४ ॥ अथवेति अथवागर्भोपनिषदुक्तंन्नृदेहस्यजन्मदुःखरूपत्वेनविरागप्रयोजकंचिंतयेदित्यर्थः ॥ १८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रबीजद्वाराशरीरस्यबीभत्सतामाह सप्तेति सर्वेषांयोनिजानांसंबंधिनोर्मातापित्रोर्देहःसप्तधातुमयःशुक्रशोणितबीजकश्चेत्यविवादं त
थाचतत्स्वभावत्वैवजायमानानांभवतीतिभावः ॥ १८६॥ अथपितृदेहप्रवेशेदुःखंस्फुटयितुमग्निभिःशीर्यमाणत्वात्शरीरत्वंश्रुतौप्रोक्तंवर्ण
यति पंचेतिचतुर्भिः योयंदेहोमर्मातंमर्माख्यावयवपर्यंतंयथाभवतितथावर्णितःसएवशरीरमित्युक्तः शीर्यमाणत्वात्प्रतिक्षणंविशरणंनीय
मानत्वादित्यर्थः ॥ १८७ ॥ कोस्यविशरणहेतुरितिचेदग्नित्रयमेवेत्याह तत्रेति तत्रदेहकोटरेंतर्ज्वलनशीलमग्नित्रयमुक्तं किंतदित्यतआह
जाठरइति जाठरऔदर्याख्यएकः मानसोमनसिभवोजिज्ञासादिरूपोद्वितीयः बाह्येंद्रियनिष्ठोविषयलोलुपत्वरूपस्तृतीयोग्निरित्यर्थः

सप्तधात्वात्मकोदेहःपितुर्मातुश्चदेहिनां ॥ योनिजानांहिसर्वेषांशुक्रशोणितसंभवः ॥ १८६ ॥ पंचभूतात्मको
योयंमर्मांतंपरिकीर्तितः ॥ शरीरंशीर्यमाणत्वाद्देहएषप्रकीर्तितः ॥ १८७ ॥ तत्राग्नित्रयमुद्दिष्टंज्वलदस्यहि
कोटरे ॥ जाठरोमानसश्चान्योबाह्येंद्रियसमुत्थितः ॥ १८८ ॥ मानसेशास्त्रजंतद्वदशास्त्रीयंचहूयते ॥ सुखंदुः
खंचशब्दाद्यास्तद्वदैंद्रियकेपिच ॥ १८९ ॥ चतुर्विधंतथैवान्नंजाठरेजातवेदसि ॥ लेह्यंपेयंतथाचोष्यंभोज्य
मित्येवकीर्तितं ॥ १९० ॥ पयःसोमाज्यमुख्यानामाहुतीनामशेषतः ॥ विकारःश्रद्धयायुक्तोयोग्निहोत्रादि
कर्मणि ॥ १९१ ॥ सोमंराजानमासाद्यभूमौपर्जन्यधारया ॥ समागतःसदैवान्नंनानाजीवसमाश्रयः ॥ १९२

॥१८८॥ तेषांक्रमेणहवींष्याह मानसइति तत्रमानसेग्नौशास्त्रजंशास्त्रानुसार्युपासनाद्यात्मकंज्ञानमशास्त्रीयंचततथासुखंदुःखंचहूयते
ऐंद्रियकेग्नौतुशब्दादयोविषयाययथायोगंहूयंतइत्यर्थः ॥ १८९ ॥ तृतीयेजाठराग्नौतुचतुर्विधमन्नंहूयतइत्याह चतुर्विधमिति लेह्यंमधुप्रभृ
ति पेयंदंतव्यापारमंतराभ्यवहार्यंदुग्धादि चोष्यमिक्षुप्रभृति भोज्यंभक्तादि ॥ १९० ॥ तत्रजाठराग्नौजनिष्यमाणस्यजीवस्यान्नसंपृक्त
स्यप्रवेशःपंचाग्निविद्योक्तविधयाभवतीत्याह पयइति दुग्धादिरूपाणामाहुतीनांयोविकारःसूक्ष्मावस्थाख्यःपरिणामःसोऽग्निहोत्रादिक
र्मगोचरश्श्रद्धासंस्कारसहितोजीवस्यकर्मिणःसमाश्रयश्चसंश्चंद्रलोकात्मकद्युसंज्ञमग्निंप्राप्यतत्रभोगांतेपर्जन्यस्यद्वितीयाग्नेर्धारयासहभू
मिंप्राप्यनानाविधमन्नंभवतीतिद्वयोरर्थः ॥ १९१ ॥ १९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितृभ्यामिति तदन्नंक्षुत्पिपासाप्रयुक्ताभ्यांमातापितृभ्यामद्यमानंभक्ष्यमाणंसज्जाठराग्नौपततीतिशेषः सजाठरोग्निस्तुप्राणेनप्रेरितःसंस्तद्भु
क्तंपीतंवान्नंभूतत्रयात्मकंत्रिधाभावंनयति जीवनहेतुत्वादितिद्वयोरर्थः तथाचच्छंदोगश्रुतिरन्नमशितंत्रेधाविधीयतेइत्यादिः ॥ १९३ ॥
॥ १९४ ॥ त्रेधाभावमभिनयति असारमिति सोग्निरीश्वरईश्वरेणांतर्यामिणाआविष्टःस्वस्मिन्पतितस्यान्नस्यासारांशंमलरूपंबहिः
क्षिपतिमध्यमांशंसप्तधातुरूपेणपरिणतंकरोतिसूक्ष्मांशेनतुप्राणादीनाप्याययतीत्यर्थः ॥ १९५ ॥ सप्तधातुरूपेणपरिणतिक्रमंप्रकृतश्रु
त्युक्तमभिनयति तत्रेतिचतुर्भिः तत्रतेषुभागेषुयोन्नस्यमध्यमांशःसरसेनरसत्वेनसंयुतोभवतीत्यर्थः रसशब्दस्यभावप्रधानत्वात् ततोन्ना

पितृभ्यामद्यमानंतत्क्षुत्पिपासासमाश्रयात् ॥ जाठरेजातवेदाःसकोष्ठवायुसमीरितः ॥ १९३ ॥ तेजोबन्ना
त्मकंभुक्तंपीतंवाखिलमेवतत् ॥ त्रिधानयतिदेहेस्मिन्सर्वेषांजीवनप्रदः ॥ १९४ ॥ असारंमूत्रविष्ठाख्यंबहिः
क्षिपतिनित्यशः ॥ मध्यमंधातुरूपेणपरिणामयतीश्वरः ॥ प्राणेंद्रियमनांस्येषसूक्ष्मादाप्याययन्सदा ॥ १९५ ॥
तत्रयोमध्यमोभागःपच्यतेरससंयुतः ॥ रसरूपात्ततःपूर्वंपित्रोःशोणितसंभवः ॥ १९६ ॥ शोणिताच्चघनी
भूतात्तयोर्मांसंप्रजायते ॥ पक्वान्मांसात्ततोमेदोनीरक्तंमांसमीरितं ॥ १९७ ॥ पक्वात्तस्मात्तुकठिनान्यस्थी
निचभवंत्यपि ॥ अस्थिभ्योजायतेमज्जायास्त्वामंतश्चसंस्थिता ॥ ईषद्विलीनसंशुद्धघृतवत्सापिकीर्तिता
॥ १९८ ॥ तस्मात्तुजायतेवीर्यंयतःकामाग्निदीपनं ॥ पितरिश्लेष्मसदृशंरक्ताभंतच्चमातरि ॥ १९९ ॥

द्रसरूपान्मातापित्रोःशोणितंजायतेइत्यर्थः ॥ १९६ ॥ शोणिताच्चेति घनीभूतात्शोणितान्मांसंतस्माच्चनीरक्तंरक्तवर्णहीनंयन्मांसंतद्रूपं
मेदोजायतेइत्यर्थः ॥ १९७ ॥ पक्वात्तस्मादिति तस्मान्मेदसोपिपक्वादंतर्गताग्निनाघनीकृतादस्थीनिभवंतीति धातुष्वग्निस्थितिप्रकारोमो
क्षधर्मेयाज्ञवल्क्यस्मृतावुक्तोवोध्यः तेभ्योमज्जाभवतियस्याआकारईषद्द्रुतघृतवद्भवतीति ॥ १९८ ॥ तस्मात्त्विति तस्मान्मज्जाख्यधातो
श्चरमधातुर्जायतेयस्यरूपंपितृदेहेश्लेष्मनिभंमातृदेहेरक्तसममित्यर्थः ॥ १९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजाठराग्निप्रवेशद्वाराचरमधातुप्रवेशःसर्वेषांयोनिजशरीरग्रहणायावश्यमपेक्षितइत्याह स्वर्गिणइतित्रिभिः स्वर्गादिलोकत्रय
वासिनःसर्वेपिजंतवःपूर्वदेहपरित्यागानंतरंयोनिजदेहलाभायोक्तविधयामातापित्रोर्वीर्यंविशंतीत्यर्थः॥ २०० ॥ नानेति तेषांमध्येकेच
नस्वर्गिणोनानाविधंसुखलेशंदुःसहंदुःखंचानुभूयेतिशेषः स्वर्गान्मेघजलद्वाराभूमिंगच्छंति केचित्तुभूमिगाएवदेशांतररूपांभूमिंजलधार
यागच्छंति तथानारकाअपि एवमन्नेप्रवेशःसर्वेषांसमानइत्यर्थः ॥ २०१ ॥ स्थावराइति स्थावरपदंस्वेदजानामप्युपलक्षणं तथाचय
द्यपिस्थावराःस्वेदजाश्चपूर्वदेहंपरित्यज्यस्थावरस्वेदजदेहग्रहेऽन्नभावंनापेक्षंतेतथापिदेहांतरस्यविजातीयस्ययोनिजाख्यस्यग्रहणेतेषाम
प्यन्नेप्रवेशआवश्यकइतिसर्वपदस्ययोनिजग्रहणयोग्यपरत्वेनशरीरांतरग्रहायसर्वेभक्ष्याभवंतीत्यवधारणमुपपन्नमिति ॥ २०२ ॥ तत्रपू

स्वर्गिणोनारकास्तद्वद्येचान्येभूमिसंश्रिताः ॥ पूर्वदेहपरित्यागाद्वीर्यंपित्रोर्व्रजंतिते ॥ २०० ॥ नानाविधंसुखं
तद्वद्दुःखंचात्यंतदुःसहं ॥ स्वर्गान्नीरेणसहिताभुवमायांतिकेचन ॥ भूमिगानारकास्तद्वदन्नंसर्वेभवंतिते
॥ २०१ ॥ स्थावराःकेचिदेवस्युःकेचित्स्थावरदेहगाः ॥ सर्वएवतुभक्ष्याःस्युःपित्रोर्देहांतरग्रहे ॥ २०२ ॥ नर
केभुविवादुःखंप्रसिद्धंचमृतौतथा ॥ स्वर्गेपिदुःखमखिलंप्राप्तंयत्सुखमत्रतैः ॥ अधिकारिशरीरेणबहुक्लेश
करेणहि ॥ २०३ ॥ इष्टंपूर्त्तंतथादत्तंकृत्वाक्लेशौघकारकं ॥ तपश्चविविधंकृत्वायांतिधूममनीश्वराः ॥ २०४ ॥
धूमाद्रात्रिंतथाकृष्णपक्षमस्माद्दिवौकसां ॥ रात्रिंततःपितृणांतंलोकंपिंडोपजीविनां ॥ २०५ ॥

र्वदेहत्यागानंतरंदुःखमनुभूयभुवमायांतीतियदुक्तंतद्विशदयति नरकेइति यथानरकेभुविमरणेचदुःखंप्रसिद्धंतथास्वर्गेपिबोध्यं यत्यतोत्र
स्वर्गेतैर्भोगिभिरधिकारिणाभोगार्हेणशरीरेणैवप्राप्तंशरीरंतुदुःखव्याप्यमेवेत्यर्थः ॥ २०३ ॥ स्वर्गिणांदुःखसत्त्वंपितृयाणप्रतिपादकच्छंदोगा
दिवाक्येनसंप्रदर्शितमितिसूचयंस्तदर्थमनुवदति इष्टमितिचतुर्भिः येऽनीश्वराईश्वरोपासनहीनाःकेवलमिष्टापूर्त्तादिकंकर्मैवकुर्वंतितेधूमो
पलक्षितंपितृयाणंपंथानंप्रविशंतीत्यर्थः अथवाकेवलकर्मिणोमरणकालेऽनीश्वराःपरतंत्राःसंतस्तंमार्गंयांतीतियोजना ॥ २०४ ॥ तंमार्ग ॥१४॥
मभिनयति धूमादिति धूमादिपदानितदभिमानिदेवतापराणि दिवौकसांरात्रिंदक्षिणायनंततःपितृलोकमिति ॥ २०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति तस्मात्पितृलोकादाकाशंगत्वाचंद्रंगच्छंति यंचंद्रंदेवाःकृष्णपक्षेभक्षयंतिशुक्लेवर्द्धयंतिचेति ॥ २०६ ॥ दासवदिति तस्य चंद्रस्यतादात्म्यंगतःकर्म्यपिदेवैर्भुज्यतेभोगोपकरणतांनीयतेयथालोकेदासः तथाचपारतंत्र्यादिदुःखंस्फुटमित्यर्थः ॥ २०७ ॥ शरीरित्वे नाक्षिप्तंदुःखांतरमपितत्रभवतीत्याह बंध्वादीनामिति बंधुर्दारादिस्तस्याऽप्राप्तिरूपाद्दैत्यावधिकभयरूपाद्वाहेतोरुत्थितंदुःखंतत्रभवति तथासंयोगाविप्रयोगांताइतिन्यायसिद्धोयोबंधुवियोगस्तज्जंदुःखंमरणादप्यधिकमित्यर्थः ॥ २०८ ॥ एवमिति अयंजंतुरेवंविधानिदुःखानिस्वर्गादिषुप्राप्यकालवशेनपितुरन्नभावद्वाराजठरंप्राप्यतातप्यतेऽतिशयेनतप्तोभवतीति ॥ २०९ ॥ तस्यतापमेवपितृतापपूर्वकमा

तस्माद्दाकाशतःसोमंराजानंदेवतागणाः ॥ अदंतिकृष्णपक्षेयंशुक्लेसंवर्द्धयंतिच ॥ २०६ ॥ दासवद्भुज्यते चायंतत्रदेवैःसवासवैः ॥ पारतंत्र्यंसदातत्रभीतिःकर्मक्षयादपि ॥ २०७ ॥ बंध्वादीनांतथाऽप्राप्त्याभीतेर्दैत्यगणादपि ॥ मरणादधिकंदुःखंबंधूनांचवियोगजं ॥ एवमादीनिदुःखानिस्वर्गेपिशतकोटिशः ॥ २०८ ॥ एवंदुःखान्ययंप्राप्यस्वर्गादौकालतःपुमान् ॥ अन्नभूतोत्रजठरेपितुस्तातप्यतेसदा ॥ २०९ ॥ अन्नादोत्रयुवाजंतुःकामग्रहवशंगतः ॥ शर्मनाप्नोतिहिविनास्त्रियंरेतःप्रधारिणीं ॥ २१० ॥ विण्मूत्रस्यनिरोधेनयावद्दुःखंप्रजायते ॥ निरोधेरेतसस्तावत्ततोवाप्यधिकंभवेत् ॥ २११ ॥ अग्निनापच्यमानोयंसप्तमंधातुमागतः ॥ पुष्पेभ्योत्रयथासारंनीरंयंत्रेविनिःसरेत् ॥ अग्निनापीड्यमानेभ्योज्वलतात्रदिशोदश ॥ २१२ ॥ पुंसस्तथैवरेतस्तत्सारभूतंवपुःस्थितं ॥ योनियंत्रेपतेत्सम्यग्योषिदग्निप्रपीडनात् ॥ स्वस्मादपिकरोत्येषपितुर्दीनतमांदशां ॥ २१३ ॥

ह अन्नादइतिचतुर्भिः यथाअन्नादःपुमान्कामग्रहेणस्त्रियंस्मरंस्तांविनाशर्मनाप्नोतितितप्यतेइतियावत् ॥ २१० ॥ तद्दुःखंदृष्टांतेनस्फुटयति विण्मूत्रस्येत्यादिनाभवेदित्यंतेन ॥ २११ ॥ रेतःप्रविष्टस्यतापमाह अग्निनेतिद्वाभ्यां अयंजीवःसप्तमंधातुंगतःपितृकामलक्षणेनतद्वुद्धीपकयोषिद्रूपेणवाऽग्निनातप्यमानःसन्यंत्रेपतेत् यथारक्तसेवंतीप्रभृतिपुष्पाणांनलिकायंत्रारूढानांरसोग्निसंपर्कवशात्पृथक्पात्रेपततितद्वदिति किंचपितृदैन्यदर्शनेनतत्प्रयोजकस्यदैन्यमनुमेयमित्याह स्वस्मादिति एषसप्तमधातुगोजीवःस्वस्मादात्मीयाद्दैन्याद्धेतोरधिकंदैन्यं करोतीत्यपिप्रसिद्धमितिद्वयोरर्थः ॥ २१२ ॥ २१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेवलंपितुरेवदैन्यंकरोतिकिंतुमातुरपिपरंतुसाविभ्रमेणतदानींदैन्यमभजमानापिपश्चाद्गर्भक्लेशादिनातापंगच्छतीतिनानादृष्टांतैःप्रतिपादयति हसंतीतिनवभिः रेतोरूपचंद्रस्यांतर्भावप्रयोजकत्वसाधर्म्यात्स्त्रीलक्षणस्यकुहूत्वं स्फुटमन्यत् ॥ २१४ ॥ तत्रदृष्टांतमाह बालइति कीदृशंसर्पं विलंबेमृत्युसदृशंत्वरायांमृत्युरूपमिति ॥ २१५ ॥ द्वितीयंदृष्टांतमाह चोराकुलितमिति तथासाकामिनीकामुकंप्राप्यप्राणसंशयंयातीतितृतीयदलयोजना ॥ २१६ ॥ एवंसतिदुःखदेव्यापारेनारींनियोजयतोनरस्यधार्ष्ट्यंव्यक्तमेवेतिसदृष्टांतमाह गाढमि

हसंतीसातदानारीबहुहर्षमुपागता ॥ रेतोऽग्निंस्वकुहूद्वारागृह्णातिपरिमोहिता ॥ २१४ ॥ बालोयथाहसन्नाशीविषंगृह्णातिहस्ततः ॥ स्वस्यमृत्युमिवापूर्वमथवामृत्युमेवतं ॥ २१५ ॥ चोराकुलितमध्वानंयथापांथोविमोहितः ॥ गच्छन्प्रयातिसहसातत्रसप्राणसंशयं ॥ कामिनीकामसंयुक्ताकामुकंयातिसातथा ॥ २१६ ॥ गाढमालिंग्यसुस्नेहायथाधूर्तःप्रयच्छति ॥ आशीविषंप्रसुप्तंतंहैमेपात्रेनिधायच ॥ २१७ ॥ सुगंधैश्चंदनैर्लिप्त्वापुष्पैरपिमनोरमैः ॥ समभ्यर्च्यस्वकार्यार्थीस्नेहंसंदर्शयन्मुहुः ॥ २१८ ॥ रेतोहिकामुकोप्येवंस्वयंसोढुमशक्नुवन् ॥ योषितंपरिमोह्यास्यादेहेपापरतःक्षिपेत् ॥ २१९ ॥ ब्रह्मस्वंसुखदंयद्वत्सेव्यमानंतदानृणां ॥ जठरस्थंतदेवैषामुदर्केदुःखदंभवेत् ॥ २२० ॥ रेतोहिसुखदंतद्वत्प्रवेशेयोषितामिदं ॥ जठराग्निर्गमेभूयोमरणादपिदुःखदं ॥ २२१ ॥ क्षीरंविषेणसंयुक्तंपानकालेयथासुखं ॥ कुर्वच्चमृतिहेतुःस्यादेवंरेतोत्रयोषितां ॥ २२२ ॥

तित्रिभिः यथाकश्चिद्धूर्त्तःसुष्ठुस्नेहसाध्यंगाढालिंगनंकस्यचित्कृत्वासुप्तंसर्पंहैमपात्रेनिधायगंधादिभिःसमभ्यर्च्यचतस्मैसमालिंगितायदद्यात् किंकुर्वन् स्वप्रयोजनविशेषायस्नेहसाध्यमुपकारंदर्शयन्नितिद्वयोरर्थः ॥ २१७ ॥ २१८ ॥ दार्ष्टांतिकेयोजयति रेतइति परिमोह्यचाटुभिर्विश्वांतांकृत्वा ॥ २१९ ॥ रेतसोनारींप्रतिदुःखदत्वंसदृष्टांतमुपपादयति ब्रह्मस्वमितित्रिभिः स्पष्टंद्वयं ॥ २२० ॥ २२१ ॥ क्षीरमिति चकारोप्यर्थे यथासविषंक्षीरंपानकालेसुखंकुर्वदपिमृतिहेतुस्तथेदंरेतोनारीणामिति ॥ २२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसतिकामुकस्यपापंन्यायप्राप्तमभिनयति विषस्येति विषवन्मरणप्रयोजकस्यरेतसोयोषिद्गर्भेनिषेक्तुर्विषदानसमंपापंन्यायादायातीत्यर्थः॥ २२३ ॥ कारेति कारावंधनागारंसूनावधस्थानंतन्निर्मातुर्यत्पापंतत्तुल्यंपुत्रादिदेहस्यतद्दुःखहेतोःकरणेपितुर्भवतीतिकीर्तितंनिवृत्तिशास्त्रेषुकीर्तितप्रायमित्यर्थः स्वदेहसंबंधस्यानर्थत्वप्रतिपादकैर्नहवैसशरीरस्यसतइत्यादिवाक्यैर्हिपरदेहसंबंधकरणस्यानर्थत्वंसूचितमेवेतिभावः ॥२२४॥ उक्तदोषप्रसंगंव्यतिरेकमुखेनस्फुटयति यद्ययमिति पितेतिपदंपूर्वार्द्धान्वयि ॥ २२५ ॥ ननुऋग्वेदब्राह्मणेहरिश्चंद्रोपाख्यानेपुत्रोत्पादनस्यप्रशंसनाद्विधेयत्वंगम्यतेविधिस्पृष्टेचनिषेधानवकाशात्कथंदोषावहत्वमितिशंकांतत्प्रकरणतात्पर्यप्रदर्शनेनपरिहरति अपुत्रस्येति यदपुत्रस्यप्राप्तियोग्यःकश्चिल्लोकोनास्तीत्यादिकमृग्वेदेप्रोक्तंतत्कामुकानामभिप्रायस्यैवकीर्त्तनमनुवादोवैराग्यायनतुपु

विषस्यदानतोयावत्पापंभवतिपापिनः ॥ जठरेरेतसोदातुर्योषितांतावदेवहि॥ २२३ ॥ कारासूनादिशालानांयावत्कर्त्तुर्हिपातकं ॥ पुत्रादिदेहजननेपितुस्तावद्धिकीर्तितं ॥ २२४ ॥ यद्ययंकुरुतेनैवमैथुनंकाममोहितः॥ पिताद्दुःखकरःकेनदेहःपुत्रस्यसंभवेत् ॥ २२५ ॥ अपुत्रस्यनलोकोस्तीत्यादिकामुककीर्त्तनं ॥ मातरंचस्वसारंचतेयांतीतियतोवदत् ॥ २२६ ॥ पशवःसर्वएवैतेविदुःपुत्रजनिंयतः ॥ ततःपुत्रेतिकिंनामभवतोत्रभविष्यति ॥ २२७ ॥ पुत्रस्योत्पादनाज्जायापत्युर्माताप्रजायते ॥ यथामातातथाभार्यास्प्रष्टव्यानैवकामतः ॥ २२८ ॥

त्रोत्पादनप्रशंसनं यतस्तद्वाक्यशेषइत्यवदत् इतिकिं तेपशवउक्ताभिप्रायेणमातृगमनादिकमपिकुर्वंतीति तदुक्तं तंपश्यंतिपशवोवयांसितस्मात्तेमातर्यपिमिथुनीचरंतीति तंपुत्रिणांलोकं तस्मात्तुपुत्रोमातरंस्वसारंचाधिरोहतीतिच ॥ २२६ ॥ किंचतत्रपश्वाचारस्यप्रमाणत्वेनोपन्यासान्निंदैवप्रतीयतेइत्याह पशवइति यतःसर्वेपशवःपुत्रजन्मावश्यकर्त्तव्यतांजानंतीतितत्रोक्तंततोहेनरभवतःपशुवृत्तमनुसरतआत्मावैपुत्रनामासीतिश्रुत्यनुसारात्प्राप्तपुत्रेत्याकारकंकिंनामनिंदासूचकत्वात्कुत्सितंनामभविष्यतीत्यर्थः ॥ २२७ ॥ पुत्रनामसूचितांनिंदामेषावोजननीपुनरित्यादिश्रुतिप्रदर्शितांविशदयति पुत्रस्योत्पादनादिति भार्याश्रुतिगतैषापदोक्तापुत्रस्योत्पादनाज्जायापदसूचितमातृत्वकाभवतिततःकामेननस्प्रष्टव्येत्यर्थः ॥ २२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह अवशइति कर्मवशोजीवस्यपुत्रभाविनोदुःखदगर्भप्रवेशःकर्मादिपरतंत्रतथाभवतुनामहेनरतवस्वतंत्रस्यपुत्ररूपेणजायागर्भप्रवेशोऽत्यंतमनुचितइत्येतावदेवहरिश्चंद्रोपाख्यानगतश्रुतिवाक्यस्यतात्पर्यमित्यर्थः अत्रवस्तुविचारे ॥ २२९ ॥ किंचपुत्रस्यलोकजयसाधनत्वांगीकारेपिमनुष्यलोकजयसाधनत्वमेवांगीकर्त्तव्यं पुत्रेणायंलोकोजय्यइतिबृहदारण्यकवाक्येनस्फुटीकरणादित्याह अपिपुत्रादिति अयंमनुष्यानुभवगोचरोविशेषतः स्पष्टम् ॥ २३० ॥ यानितुहरिश्चंद्रोपाख्यानादौकानिचित्तत्प्रशंसापराणिवाक्यानितानिवक्ष्य

अवशोऽत्रयथामातुगर्भंप्राप्नोत्रदुःखदं ॥ स्ववशस्त्वंतथामागाजायागर्भंकदाचन ॥ एतावानेवतत्रार्थः शास्त्रस्यात्रप्रतीयते ॥ २२९ ॥ अपिपुत्राद्भवेल्लोकोनपरःकर्हिचिद्यतः ॥ अयंलोकइतिप्राहश्रुतिःपुत्राद्विशेषतः ॥ २३० ॥ हरिश्चंद्रादिकानांस्यादाख्यानेयत्तुकीर्त्तनं ॥ तत्तुरागानुसारेणस्तुतिःपुत्रस्यजन्मनः ॥ २३१ ॥ ततोरागांधमालोक्यनिखिलंसचराचरं ॥ श्रुतिर्विद्वांसमाहैतद्रागस्यविनिवृत्तये ॥ २३२ ॥ मागच्छयोषितोवत्सतपःस्वार्थस्यनाशकाः ॥ इहामुत्रचतासांतेगमनाद्दुःखमद्भुतं ॥ २३३ ॥ विपाकेदेहकाराश्चजायंतेभवतादृशाः ॥ साधूनांसमचित्तानांनरकादपिदुःखदाः ॥ २३४ ॥

माणविधयागुडजिह्विकान्यायेनमूढान्सन्मार्गेसमानेतुमेवेत्याह हरिश्चंद्रादिकानामिति ॥ २३१ ॥ निवृत्तौश्रुतितात्पर्यमेवाभिनयति ततइत्यादिना विद्वांसंकिंचिद्विवेकिनंप्रतिएतद्वक्ष्यमाणप्रकारकंश्रुतिराहेति ॥ २३२ ॥ तत्रश्रुत्युपदिष्टंमुख्यंकल्पमभिनयति मागच्छेति हे वत्सतपोरूपवित्तस्यनाशप्रयोजकाःस्त्रियःप्रतितवगमनंनोचितं यतस्तासांस्त्रीणांगमनाल्लोकद्वयेदुःखंभवति कीदृशमद्भुतंवर्णयितुमशक्यं तथाविपाकेउक्तदुःखरूपफलारंभकालेतदुपयोगिदेहरूपाःकाराबंधनगृहाश्चभवंति यतोविवेकिनःअक्षिपात्रकल्पाअत्यंतंनरकवदुद्विजंतइतिद्वयोरर्थः ॥ २३३ ॥ २३४ ॥

(१ इदंसंशयितं)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतावतास्त्रीगमनप्रयोजककामस्ययद्बीजंरमणीयत्वाध्यासात्मकसंकल्परूपंतन्निरोधउपदिष्टोऽथतदशक्तौकामवेगंनिरुध्यापिब्रह्मचर्यंद हराद्युपासनांगंपरिपालयतेनतवाभीप्सितंपरलोकेपूरयिष्यामियतःशतमंजनहस्ताःशतंमाल्यहस्ताइत्यादिकौषीतकिशाखारूपमद्वचने नत्वामानेतुमप्सरसआगमिष्यंतितत्रचगर्भप्रयुक्तापीडानार्याःसुतद्वारातेपिचनभविष्यंतीत्येवंश्रुतिरुपदिशतीत्याह अथचेदितिद्वाभ्यां व धूरप्सरसआभ्योमानुषीभ्योधिकास्तुभ्यंदास्यामीति तासांगर्भाभावाच्चतत्प्रयुक्तानारीसुतादिद्वारिकापीडातेनभविष्यतीति ॥ २३५ ॥

अथचेद्भवतःकामोवर्ततेयोषितंप्रति॥ स्वर्गेवाब्रह्मलोकेवाभवतेब्रह्मचारिणे ॥ २३५ ॥ आभ्योरूपादिसं पन्नाअधिकाःकोटिशोगुणैः ॥ वधूरंजनमालादिहस्तादास्याम्यसंशयं॥ तत्रगर्भकृताहिंसानतेनारीसुतादि जा ॥ २३६ ॥ भविष्यतीतिसंप्रोक्तःकामुकश्चेन्नतिष्ठति ॥ तदैवंपुनरप्याहश्रुतिर्मातेववत्सला ॥ कामप्र सक्तंसततंनिविवृत्सुरुपायतः ॥ २३७॥ परदारान्नगच्छेद्धिकर्मणामनसागिरा ॥ तांगच्छन्भयमागच्छे दिहलोकेपरत्रच॥ २३८॥ ततस्त्वंकामुकश्चेत्स्याद्दारान्संपादयात्मनः॥ गृहस्थोभवतत्रापियज्ञदानादिकंकु रु॥ २३९॥ दिवानमैथुनंयाहिस्वदारेष्वपिकर्हिचित्॥ रात्रावपिचपर्वादिरात्रीर्वर्जयसर्वदा॥ २४०॥

॥२३६॥ अत्राप्यशक्तंप्रतिवक्ष्यमाणाकारमनुकल्पंश्रुतिरुपदिशतीत्याह भविष्यतीति प्रथमपदंपूर्वान्वयिदर्शितं चेत्यदिउक्तविधयासंप्रो क्तउपदिष्टोपिनतिष्ठतिनसंयतोभवतितदातंकामसक्तमुपायेनबालमिवफलोपन्यासरूपेणनिविवृत्सुर्विषयप्रवृत्तेर्निवर्तयितुमिच्छंतीश्रुति र्मातृसमैवमाहेत्यर्थः ॥ २३७॥ एवंकथमित्याकांक्षायामाह परदारानिति यतःशरीरादिभिःपरदारगमनंलोकद्वयेभयावहंततआलीयदा रसंपादनेनगृहस्थतांप्राप्ययज्ञादिकंकार्यमितिद्वयोरर्थः ॥ २३८ ॥ २३९ ॥ तत्रापिस्त्रीसेवायामयंनियमःपालनीयइत्याह दिवेति स्पष्टम् ॥ २४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्तइति एतावत्श्रुत्वायोधिकारीअनिषिद्धासुपर्वादिभिन्नासुरात्रिष्वेवस्त्रीषुसक्तोभवतितमपिनिरोद्धुंश्रुतिरित्थंनियमांतरमुपदिशति यतउपायज्ञाउपायस्यवालधीविषयाभिधानरूपस्यज्ञात्री इत्थंकथं ऋतुभिन्नकालेगमनंनयोग्यमिति किंकुर्वतीइत्थमुपदिशति वधूनामृतुकालस्यप्रशंसयाकामुकचेतसिलोभंजनयंतीवेतिद्वयोरर्थः ॥ २४१ ॥ २४२ ॥ तांप्रशंसामभिनयति ऋतावेवेतिद्वाभ्यां भार्यायांऋतौस्नातायांसत्यांसुदिनेशोभनवारादियुक्तएवकालेशास्त्रीयानाभ्युदयिकादिरूपान्संस्कारान्कृत्वानंतरंनिषिद्धाआद्याश्चतस्रोमघामूलयुक्ताविषमाश्चरात्रीर्वर्जयित्वापिचगंतव्यमित्यर्थः ॥ २४३ ॥ एवमिति एतादृशनियमानुष्ठानेतेपुत्रलाभःस्यात् अयंचपुत्रार्थीयत्नस्त्वया

एवमुक्तेऽनिषिद्धासुरात्रिष्वेवप्रवर्तते ॥ विद्वांस्तस्यनिरोधार्थमुपायज्ञेदमब्रवीत् ॥ २४१ ॥ अनृतौनैवगंतव्यंभवतास्त्रीषुकर्हिचित् ॥ प्रशस्यर्तुंवधूनांचलोभयंतीवकामुकम् ॥ २४२ ॥ ऋतावेवावगंतव्यंस्नातायांसुदिनेतथा ॥ कृत्वाशास्त्रीयसंस्कारान्ननिषिद्धासुरात्रिषु ॥ २४३ ॥ एवंतेपुत्रलाभःस्यात्पुत्रश्चैतादृशोयतः ॥ इत्यभिप्रायतःपुत्रप्रशंसांकुरुतेहिसा ॥ २४४ ॥ उत्पादनंनपुत्राणांविधत्तेकर्हिचित्क्वचित् ॥ अप्राप्तस्यविधानंस्यात्प्राप्तंनैवविधीयते ॥ २४५ ॥ योषितांसंगमात्पुत्रजन्मप्राप्तंसदैवहि ॥ विनाशास्त्रेणकामाच्चनारीसंगस्तथास्वयं ॥ २४६ ॥ पश्वादीनांविनाशास्त्रंम्लेच्छादेश्चैवदृश्यते ॥ प्रजोत्पत्तिश्चनारीणांसंगोप्यविदुषांतथा ॥ अतएवपशून्प्राहदृष्टांतेरागवेदिनः ॥ २४७ ॥

वश्यंकार्योयतःपुत्रएतादृशोहरिश्चंद्रोपाख्यानादौकीर्त्तितैःप्रख्यातिहेतुत्वादिभिर्गुणैर्युक्तइत्येवंनिवृत्तितात्पर्येणसाश्रुतिःपुत्रोत्पादनंप्रशंसतीत्यर्थः तथाचोक्तंभागवतैकादशेलोकेव्यवायेत्यादिना ॥ २४४ ॥ अपूर्वविधिस्त्वत्रनसंभवतिरागादितःप्राप्तत्वादित्याह उत्पादनमिति त्रिभिःस्पष्टम् ॥ २४५ ॥ योषितामिति यतःशास्त्रंविनापिनारीसंगिनांपुत्रजन्मप्राप्तंकामप्रयुक्तोनारीसंगश्चप्राप्तइत्यर्थः ॥ २४६ ॥ अत्रोदाहरणंमुख्याःपशवोऽजादयोमनुष्याकारकत्वेनगौणाःपशवोम्लेच्छादयश्चेत्याह पश्वादीनामिति शास्त्रहीनानांपशुपक्षिमत्स्यादीनांम्लेच्छादीनांचशास्त्रमविदुषांप्रजोत्पत्तिर्नारीसंगश्चदृश्यतेइत्यर्थः एतदभिप्रायेणैवश्रुत्यापशवोदृष्टांततयोपन्यस्ताः कीदृशाः रागवेदिनःरागंकामजांप्रवृत्तिस्वस्मिन्वेदयितुमनुभावयितुंशीलंयेषांतेतथा ॥ २४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवपतिर्जायांप्रविशतीत्यादिश्रुतिःपुत्रोत्पत्त्यनंतरंतत्संयोगवारणपरेत्याह पुत्रोत्पत्ताविति स्थिताउद्यतायाभार्यापूर्वमजायाजायाप दवाच्यानभवतिसापुत्रोत्पत्तौसत्यांजननीत्वसूचकेनजायापदेनोच्यतइति ॥२४८॥ फलितमाह ततइति ततःकामवशात्प्राप्तयोर्नारीसंग प्रजोत्पत्त्योर्विध्यनर्हत्वंस्फुटमितिभावः ॥ २४९ ॥ अयंकामस्तुश्रुत्याहेयतयैवविवक्षितोऽनर्थहेतुत्वादित्याह कामइति संसारलक्षणदुः खहेतुत्वंस्वरूपानंदावरणप्रयोजकत्वंचकामस्यप्रसिद्धमित्यर्थः ॥ २५० ॥ किंतर्हिश्रुत्याविधीयतेइतिचेत्कामविजयलक्षणंब्रह्मचर्यमेव परमपुरुषार्थरूपफलशालित्वादित्याह ब्रह्मचर्यादिति ब्रह्मचर्येणोपलक्षितरागाभावकस्याधिकारिणोंतर्हृदयेऽयमात्मायथावत्स्फुरती त्यर्थः ॥ २५१ ॥ एतद्ब्रह्मचर्यंयेनप्रकारेणश्रुतिरुपदिशतितमभिनयति सुखार्थिनइतिद्वादशभिः चतुर्विधान्जरायुजादीन्जंतून्सुखार्थं

पुत्रोत्पत्तौचसंयोगंपुनर्वारयितुंस्थिता ॥ अजायाजायतेजायेत्येवमाहश्रुतिःस्वयं ॥ २४८ ॥ ततःकामस्यम हिमाप्रजोत्पत्तिरिहास्तिया ॥ सर्वेषामपिजंतूनांनारीसंगादहर्निशं ॥ २४९ ॥ कामोत्रदुःखवृक्षस्यसंसारस्यैव कारणं ॥ आनंदात्मस्वरूपस्यहेतुरावरणेतथा ॥ २५० ॥ ब्रह्मचर्यादयंदेव आनंदात्मास्वयंप्रभः ॥ नीरागस्य स्फुरत्यंतःप्रदीपइवनिश्चलः ॥ २५१ ॥ सुखार्थिनोजनान्वीक्ष्यसुखशून्यांश्चतुर्विधान् ॥ शिरस्ताडमिवप्रा हदुःखिताविदुषःप्रति ॥ २५२ ॥ स्थावरानैवजानंतिमदुक्तंश्रोत्रवर्जिताः ॥ बुद्धिहीनास्तथैवैतेश्रोत्रयुक्ता श्चजंगमाः ॥ २५३ ॥ केचिन्मांनैवसर्पंतिलोकेयेनाधिकारिणः ॥ भवंतोगुणसंयुक्ताःसर्वएवाधिकारिणः ॥ २५४ ॥ त्रैवर्णिकाविशेषेणब्राह्मणायेबहुश्रुताः ॥ कामंत्यजथचित्तोत्थंयदियूयंसुखार्थिनः ॥ २५५ ॥

यजमानानपिसुखमलभमानान्वीक्ष्यदुःखितासतीश्रुतिरूपामाताविदुषोबोधाधिकारिणःप्रतिइत्थंप्राह कीदृशी कारुण्यदुःखातिशयसू चनायशिरस्ताडनमिवकुर्वतीतिशेषः ॥ २५२ ॥ इत्थंकथमित्यतआह स्थावराइति हेत्रैवर्णिकास्तत्रापिब्राह्मणाभवंतोयदिसुखार्थिन स्तर्हिमदुक्तंकामत्यागरूपंकुरुत गुणैर्बुद्ध्यादिभिर्युतत्वेनश्रवणक्षमत्वेनचभवतामेवमद्वचनानुष्ठानाधिकारित्वात् नहिमदुक्तानुष्ठानेस्थाव राणामधिकारः श्रोत्रहीनत्वेनमदुक्तस्यैवतैरपरिज्ञानात् तथाकेषांचित्पश्वादीनांजंगमानांश्रोत्रयुक्तानामपिनाधिकारोयतोबुद्धिहीनाः बुद्ध्याशास्त्रार्थावधारणशक्त्याहीनाः केचित्तुशूद्रादयोबुद्धिमंतोपिनाधिकारिणोयतस्तेप्रतिषेधेनमदुपसर्पणेप्ययोग्याइतित्रयाणांसंबंधः ॥ २५३ ॥ २५४ ॥ २५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामस्यहेयताप्रयोजकंबलवदनिष्टानुबंधित्वंदर्शयति कामबंधनमिति कामोबंधनंनिबंधनंप्रयोजकोयस्यतथाभूतमेवदुःखंलोकस्य य
तःसर्वत्रकामिनएवदुःखमायांतोदृश्यंतेअतःकामपरत्वंनप्रशस्तंकस्यापीत्यर्थः ॥ २५६ ॥ कामत्यागस्यपुरुषार्थहेतुत्वंतुतैत्तिरीयव्याख्या
नेपूर्वाध्यायेप्रोक्तमित्याह आनंदाइति येचसार्वभौमस्यसद्गुणस्यानंदमारभ्यहिरण्यगर्भानंदपर्यंताएकादशानंदाःशतगुणोत्तराउक्ता
स्तानमूंस्तत्रतत्रनिष्कामःप्राप्नोतीत्युक्तंपूर्वाध्यायेइत्यर्थः सार्वभौमएवादिःप्रथमस्तमारभ्यमानुषगन्धर्वदेवगन्धर्वपित्राजानजदेवकर्म
देवाऽऽधिकारिकदेवेन्द्रबृहस्पतिविराट्सूत्राणामानन्दाउक्ताः ॥ २५७ ॥ यस्तुपरब्रह्मणआनंदःसिंधुस्थानीयउक्तस्तंप्राप्तुंयोग्योनि

कामबंधनमेवेदंदुःखंसर्वशरीरिणां ॥ कामात्मताप्रशस्तानकापिकस्यापिदेहिनः ॥ कामिनोदुःखमायांति
यतःसर्वत्रसंस्थिताः॥२५६॥ आनंदाःसार्वभौमादेरेकादशसमीरिताः॥शतोत्कर्षानमूंन्सर्वानकामोयाति
सर्वतः॥ २५७॥ आनंदवारिधेर्यस्यलेशमात्रंसमीरिताः॥ आनंदोब्रह्मणोयोत्रपरमानंदईरितः ॥ अकाम
एवतंयातिब्रह्मचर्यादिसाधनः॥ २५८ ॥ पुत्रैषणादिकाःसर्वास्त्यक्तानानाविधैषणाः ॥ आनंदात्मानमंत
स्थमिच्छंत्यत्राधिकारिणः ॥ २५९ ॥ अन्यथाभवतांक्लेशःपापंचैवभविष्यति ॥ पश्वादीनांयथानारीप्रजा
नांबहुदुःखदं ॥ २६० ॥ उत्पादयंतिपशवःप्रायोगच्छंतियोषितः ॥ भवंतश्चतथाचेत्स्युर्विशेषोभवतांहि
कः ॥२६१ ॥

ष्कामएवोक्तोनतुसार्वभौमादयस्तद्योग्याइत्याह आनंदवारिधेरिति ॥ २५८ ॥ अस्यपरमानंदस्यसाक्षात्करणएवमानुष्यदेहस्यसाफ
ल्यमित्याह पुत्रैषणादिकाइति आदिपदेनलोकैषणावित्तैषणयोर्ग्रहः अत्रमनुष्यदेहेइच्छंतिज्ञातुमितिशेषः ॥ २५९ ॥ विपक्षेदोषमाह
अन्यथेति अन्यथाकामापरित्यागेभवतांक्लेशोदुःखंतथापापमश्लीलंकर्मभविष्यत्यनुष्ठेयतामापत्स्यतेपश्वादिवत् कीदृशंतत्पापंकर्म ना
र्याःसंततेश्चोक्तविधयादुःखप्रयोजकमित्यर्थः ॥ २६० ॥ ननुपशुसाम्येकोदोषइतिचेन्मनुष्यत्वात्परिच्युतिरेवेत्याह उत्पादयंतीति प्रायः
पशूनामुत्पादनंयोषिद्गमनंचव्यापारःप्रसिद्धःसएवभवतामपिचेत्तर्हिपशुत्वापत्तिर्वःस्यादित्यर्थः ॥ २६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुविधिवशात्पशुसाम्यमप्यंगीकरिष्यामइतिचेत्स्यादेवंयदिपुत्रोत्पादनादिविधीनांनित्यत्वमकरणेदोषावहत्वलक्षणंभवेत्तेषांतुकाम्य त्वान्नवीतरागस्यतदुल्लंघनेदोषइत्याह श्येनादीति यथावैरिमरणादिषुरागशालिनंप्रतिश्येनादिसंज्ञयागानांविधिः नचतदकरणेप्रत्यवाय स्तथापुत्रोत्पादादिविधयोपिरागिणंप्रत्येवप्रवर्त्ततेइत्यर्थः ॥ २६२ ॥ एवंतदंगभूतोविवाहादिनियमोपिकामिनंप्रत्येव अंगप्रधानयोःसमा नाधिकारकत्वादित्याह प्रजोत्पत्ताविति यश्चायंप्रजोत्पत्त्यर्थंविशेषोविवाहादिकोमंत्रकरणकसंस्काररूपस्तथाऋतुकालादिनियमश्च ससर्वोपिरागिणंप्रत्येवविधीयतेइत्यर्थः ॥ २६३ ॥ फलितमाह रागइति यतोरागःपशुपक्ष्याद्युदाहरणेनस्वस्त्रादिसंगप्रयोजकत्वादनर्थ

श्येनादिविधयोयद्वत्कीर्तिताराागिणंप्रति॥ प्रजोत्पत्त्यादिविधयस्तथैतेकामिनंप्रति॥ २६२ ॥ प्रजोत्पत्तौवि शेषोयंमंत्रसंस्कारलक्षणः॥ कालादिनियमस्तद्वद्विधेयोरागिणंप्रति ॥ २६३ ॥ रागोनर्थकरश्चायंस्वस्तमा त्रादिसंगदः॥ पश्वादिदर्शनादुक्तोवर्जनीयःसदान्टभिः ॥ २६४॥ रागांधधिषणःकुर्यात्स्वस्यानर्थंपरस्यच॥ तस्माद्दुःखमिदंकामीवध्वागर्भंसुदुःसहं॥ करोतिस्वात्मनःपापंदेहदुःखंसुतस्यच॥ २६५ ॥ रेतएतद्वधूगर्भ आर्तवेनचसंयुतम् ॥ उत्पादयतिजंतूनांदेहकारागृहंत्विदं ॥ २६६ ॥ रक्तस्यश्लेष्मणायोगेसद्योवर्णांतरंय था ॥ आर्तवेणभवेत्तद्वद्वैवर्ण्यंरेतसोपिच ॥ २६७ ॥

करउक्तस्ततोवर्जनीयइति ॥ २६४ ॥ नकेवलंशास्त्रएवकामस्यानर्थकरत्वमुक्तंकिंतुदृश्यतेपीत्याह रागांधेति यतोरागव्याकुलितमतौ सर्वानर्थकरत्वंसंभाव्यतेतस्मादिदमुपपन्नं इदंकिं कामीवध्वागर्भरूपंदुःखमात्मनःपापरूपंसुतस्यदेहसंबंधरूपंचदुःखंकरोतीति ॥ २६५॥ सुतदेहदुःखदत्वमेवकामिनःस्फुटयति रेतइति वधूगर्भंगत्वाआर्तवंरजस्तेनसंपृक्तमेतद्रेतोदेहरूपंबंधनागारंकरोतीति ॥ २६६ ॥ शुक्र शोणितसंयोगादित्यादेःक्रमादित्यंतस्यार्थमाह रक्तस्येत्येकविंशतिश्लोकैः रक्तस्यकफेनयोगेयथावर्णांतरंभवतितथायदार्त्तवस्यस्त्रीर जसोरेतसायोगाद्वैवर्ण्यंरूपांतरापत्तिलक्षणंतदेतच्छ्रुतौसंयोगपदेनोक्तमित्यर्थः तथाचोक्तरूपसंयोगनिमित्ताद्गर्भभावद्वाराजंतुःपुनःशरी रप्राप्तिलक्षणामावृत्तिंलभतेइतिश्रुत्यर्थः ॥ २६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तसंयोगात्पूर्वंरेतःसिचः पितुर्देहाद्रेतसो निर्गमप्रकारो हृदीत्यादिश्रुतिग्रंथेनोक्त इत्याह रेतस इति अस्य गर्भपरिणामिनो रेतसः पितुः शरीराद्येन क्रमेण निर्गमो भवति स क्रम इत्थमुक्त इत्यर्थः ॥ २६८ ॥ इत्थं कथमित्याकांक्षां पूरयति अन्नमित्यादिना उक्तविधया यूनः शरीरं प्राप्तमन्नं सप्तमधातुभावं प्राप्य आपादतलमस्तकं व्याप्नोतीति शेषः ॥ २६९ ॥ वधूस्मृत्यादीति तच्च रेतोभूतमन्नं नारीस्मृत्यादिरूपाग्निना तापितं सत्सर्वांगरूपपुष्पेभ्य आकृष्टरसस्थानीयतां गत्वा हृदि व्यवतिष्ठते तत्र स्थित्वा च तद्रेतो हृत्पद्मं कंपयतीव यथा महावायुर्वृक्षं कीदृशं तद्रेतः निरोधे बलशौर्यादिकारणमिति द्वयोरर्थः एतेन श्रुतौ व्यवस्थापयतीति पदस्य हृदये विशेषेणावस्थानं नयति प्राप्नोतीत्यर्थो ध्वनितः ॥ २७० ॥ २७१

रेतसो निर्गमे चास्य क्रम एष उदीरितः ॥ पितुः शरीरतो नित्यं सर्वेषामिह देहिनां ॥ २६८ ॥ अन्नं शरीरमायातं यूनउक्तप्रकारतः ॥ संप्राप्य सप्तमं धातुमापादतलमस्तकं ॥ २६९ ॥ वधूस्मृत्यादिसंजातकृशानुपरितापितं ॥ सर्वांगपुष्पसंजातरसरूपं हृदि स्थितं ॥ २७० ॥ बलशौर्यादिकृद्धार्दपद्मं कंपयतीव तत् ॥ महावायुर्यथा प्राप्तस्तरौ तं सर्वतो दिशं ॥ २७१ ॥ हृत्पद्मकंपनादेष धैर्यक्लेशविवर्जितः ॥ क्रीडामृगो वधूनां स्यात्स तां शोच्यश्च सर्वदा ॥ २७२ ॥ हार्दपद्मं गते शुक्रे पुंसि दुःखं हि यत्स्मृतं ॥ तदेव शुक्रसंस्थस्य गर्भस्यापि प्रजायते ॥ २७३ ॥ समुद्रस्याय यथा नौका महावातेन कंपनात् ॥ दुःखमायाति तद्वत्स देहस्थो हृदि कंपनात् ॥ २७४ ॥ एवं हृदयसंस्थानः प्राप्य दुःखं सुदारुणं ॥ ततो हृदयनाडीभ्यो गत्वा देहे स्थितिं पितुः ॥ अग्निधातुप्रतिष्ठानमापादतलमस्तकं ॥ २७५ ॥

ततः किं भवतीत्यत आह हृत्पद्मेति एष युवा हृत्पद्मे कंपिते सति वधूनां क्रीडामृगो धीराणां शोच्यश्च भवेत् यतो धैर्यप्रयोजकेण क्लेशेन विधारकप्रयत्नेन वर्जितः ॥ २७२ ॥ एतेन सूचितं रेतोगतस्य जीवस्य दुःखं वर्णयति हार्दमिति रेतसि हृत्पद्मं गते सति यथा पितुर्दुःखमनुभवसिद्धं तथा तद्रेतोगतजीवस्याप्यनुमेयमित्यर्थः ॥ २७३ ॥ तद्दृष्टांतेन संभावयति समुद्रस्येति देहस्थः पितृदेहे स्थितो जीवः ॥ २७४ ॥ एवं हृदये स्थित्वा तदंतर्गतमग्निस्थानं जीवो गच्छति ततश्च पित्तभावं ततो वायुभावं ततः पुनर्हृदयमिति श्रुतियोजनां दर्शयति एवमिति सप्तभिः एवं हृदये संस्थानं यस्य तथाभूतः सन् दुःखं प्राप्य ततो हृदयोत्थितनाडीमार्गेण पितुर्देहे स्थितिं सापादतलमस्तकं गत्वा तत्र धातुप्रतिष्ठानं सप्तधातुषु स्थितिमंतमग्निं गच्छतीति शेषः ॥ २७५ ॥ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निगतस्यदुःखंदर्शयति महाग्नाविति ॥ २७६ ॥ स्थित्वेति तत्राग्नौस्थित्वापित्तभावंगच्छतियत्पित्तंद्रुतताम्रसमानाकारमिति ॥२७७॥ पित्तभावदुःखमाह तस्मिन्निति तस्मिन्पित्ते ॥ २७८ ॥ पित्ताद्वातभावंतद्दुःखंचदर्शयतिद्वाभ्यां पित्तएवमिति वातंगच्छतीतिशेषः ॥ २७९ ॥ महागिराविति यथामहागिरिशिखरगतोमहावातकृतंदुःखमनुभवेत्तथायमपिदुःखमनुभवतीत्यर्थः ॥ २८० ॥ ततोवाताच्च पुनर्हृदयमागच्छतीत्याह हार्दमिति स्पष्टम् ॥ २८१ ॥ हृदयस्वरूपंनिर्धारयति हृदयमिति हृदयपदार्थोद्विविधःप्रसिद्धः अस्थिपंजरा

महाग्नौपतितस्तत्रदह्यमानोतिदुःखितः ॥ मरणंनाग्नितस्तस्मान्निर्गमंचाधिगच्छति ॥ २७६ ॥ स्थित्वातत्र चिरंदुःखमनुभूयातिदारुणं ॥ अग्नितःपित्तमायातिद्रुतताम्ररसोपमं ॥ २७७ ॥ तस्मिंस्तीव्रतमेतप्तेक्षारेति कटुकेतथा ॥ पतितोदुःखमायातिनरकादपिदारुणं ॥ २७८ ॥ पित्तएवंतदादुःखमनुभूयातिदारुणं ॥ वातं तीव्रतमंभूयोमहावातोपमंपुमान् ॥ २७९ ॥ महागिरौयथाशृंगेसमुन्नततमेस्थितः ॥ निरालंबेतिवातेनप्र कंपितवपुःपुमान् ॥ २८० ॥ हार्दपद्मंततोगच्छेद्धृदयस्यांतरस्थितं ॥ रक्तोत्पलसमंनित्यंभातियन्मुकुली कृतं ॥ २८१ ॥ हृदयंद्विविधंनित्यंप्राणिनांपरिकीर्तितं ॥ अस्थिपंजररूपंचपद्मरूपंतदंतरं ॥ उरोवक्षइति प्राहुर्बाह्यंयल्लौकिकाजनाः ॥ २८२ ॥ अद्यमानःपुमान्गच्छेदन्नेनसहसर्वदा ॥ पितुर्हृदयपद्मस्यसमीपंप्र थमंततः ॥ २८३ ॥ गच्छेद्देहगतंवन्हिमाहारपरिपाचकं ॥ आहारेणसमंतत्रपुनरूर्ध्वंप्रयात्यसौ ॥ समान वायुनानीतोरसैर्नानाविधैःसह ॥ २८४ ॥ जाठरात्पित्तमायातिपित्ताद्वायुंपुनश्वसः ॥ वायोःपद्मंशरीरस्य मध्येकंदुकवत्स्थितः ॥ २८५ ॥

त्मकःप्रथमः तदंतर्मांसमयपद्मात्मकोद्वितीयः तत्रप्रथमस्यउरइतिवक्षइतिचलोकेप्रसिद्धिरित्यर्थः ॥ २८२ ॥ वर्णितंक्रमंपुनर्विशदीकुर्व न्नाह अद्यमानइतित्रिभिः अन्नेनसहभक्ष्यमाणोजीवःप्रथमंपितुर्हृदयपद्मस्यसमीपंगच्छतिततआहारेणतेनभुक्तान्नेनसहजाठराग्निंग च्छतिततोरसैर्भुक्तान्नपरिणामैर्नानाविधैःसहसमानवायुनाऊर्ध्वंगच्छति एवंजाठराग्नेरूर्ध्वंगच्छन्पित्तभावंगच्छतिततोवायुभावंततःपुन र्हृदयमितित्रयाणामर्थः ॥ २८३ ॥ २८४ ॥ २८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यातायातमिति एवंपितुर्देहेऽधऊर्ध्वंयातायातंभ्रमणंकृत्वादुःखितःसन्कर्मवशेनरेतसासहबहिर्गच्छतीत्येवंरूपोऽध्वामार्गोदेहांतरग्रहणल
क्षणसंसरणार्थंप्रजापतिनानिर्मितत्वात्प्राजापत्यइत्युच्यतेइतिद्वयोरर्थः ॥ २८६ ॥ २८७ ॥ अथार्थक्रमेणद्वियोनिमितिमंत्रपदव्याख्या
नभूतस्यपितूरेतोतिरेकादित्यादेःप्रजायंतइत्यंतस्यश्रौतग्रंथस्यार्थंविंशतिश्लोकैरुपबृंहयंस्तदुपयोग्यागमोक्तंबीजत्रयंदर्शयति मलत्रयमि
तित्रिभिः इदंबुद्धिसंनिहितनामकंमलत्रयंसर्वयोनिजदेहानांकारणमुक्तमागमविद्भिरितिशेषः तथाचोक्तंप्रपंचसारे मायीयंनामयोषोत्थं
पौरुषंकार्मणंमलं आणवंनामसंप्रोक्तंमिलितंतन्मलद्वयमिति योषायामलंशोणितात्मकंमायीयमित्युच्यते पौरुषंमलंतुकर्मसंस्कृतत्वात्का
र्मणमित्युच्यते तदुभयंमिलितंसत्आणवमित्युच्यते जीवस्यशरीरावच्छिन्नत्वलक्षणाणुत्वप्रयोजकत्वादितितदर्थः प्रथमंद्वितीयंचानूद्य

यातायातंविधायैवमधऊर्ध्वंशरीरके॥ पितुर्दुःखंपरंप्राप्तःकर्मणापरिचोदितः॥२८६॥ रेतसासहनिर्यातिदे
हादस्मात्कथंचन॥ प्राजापत्योयमध्वास्यात्सदासंसरणेनृणां ॥ २८७ ॥ मलत्रयमिदंप्रोक्तंकारणंसर्वदेहि
नां ॥ रेतःपितुस्तथामातुस्तयोर्गर्भस्तृतीयकः॥ २८८ ॥ इतिकेचिद्वदंत्यन्येकर्मगर्भस्यतंद्विजाः॥ अवस्थैव
तृतीयेयमपरेप्राहुरुत्तमाः ॥ २८९ ॥ शुक्रंचशोणितंतद्वत्तयोर्योगाच्चतत्क्षणात्॥ वर्णांतरंतृतीयोयंमलउ
क्तोमनीषिभिः ॥ २९० ॥ क्लेशकर्माशयैःसार्द्धंमलत्रयमुपागतः ॥ पितुर्मातुश्चवायादृक्तादृग्देहंसमाप्नु
यात्॥ २९१ ॥

तत्रतृतीयस्यस्वरूपेमतत्रयंदर्शयति रेतइत्यादिना पितृसंबंधिरेतोरूपः प्रथमोमलोमातृसंबंधीद्वितीयोमलस्तयोर्मातृपितृमलयोर्गर्भःसंधि
स्तद्रूपस्तृतीयोमलइत्येवंकेचिदागमिकाद्विजाःप्रवदंति गर्भःकुक्षौशिशौसंधावितिहैमः अन्येतुगर्भस्यगर्भभावस्यप्रयोजकंकर्मादृष्टंतंतृती
यंमलंवदंति अपरेउत्तमाःकुशलास्तुइत्थमाहुः इत्थंकथं इयंआणवाख्यतृतीयमलरूपाप्रथमद्वितीययोर्मलयोरवस्थैवभवतीतिद्वयोरर्थः
॥ २८८ ॥ २८९ ॥ अवस्थात्वमेवस्फुटयति शुक्रमिति शुक्रंप्रथमोमलःशोणितंद्वितीयस्तयोर्योगेसतियद्वर्णांतरंतद्रूपस्तृतीयआणवा
ख्योमलःसिद्धांतविद्भिरुक्तइत्यर्थः तथाचतृतीयस्यप्रथमद्वितीययोरेवांतर्भावइतिभावः ॥ २९० ॥ फलितंदर्शयन्नक्षरार्थमाह क्लेशेत्या
दिना क्लेशैरविद्यादिभिःकर्मभिःशुभाशुभैराशयैर्वासनाभिःसहितोजीवउक्तमलत्रयसंबंधद्वारामातापित्रोःशरीरसदृशंदेहंप्राप्नोतीत्यर्थः
॥ २९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायीयकार्मणयोःसाम्येनपुंसकत्वंमायीयाधिक्येस्त्रीत्वंकार्मणाधिक्येपुंस्त्वंचभवतीत्याह मलद्वयमितिद्वाभ्यां अस्यदेहिनःपित्रोर्मलद्वयं यदातुल्यंभवतितदायंनपुंसकंदेहंगृह्णाति अनीश्वरःकर्मपरतंत्रः ॥ २९२ ॥ रेतइति मातूरेतःशोणितात्मकंबीजंयदाभूयोधिकंभवतितदा स्त्रीभवतियदातुपितूरेतोधिकंतदापुमानित्यर्थः ॥ २९३ ॥ गर्भस्येंद्रियादिसाकल्यप्रयोजकंदर्शयति सर्वेंद्रियेति यदास्त्रीपुंसयोःस्वस्थचित्तयोःसंयोगोभवतितदागर्भःसर्वेंद्रियैरनेकगुणैश्चसंपन्नोभवति तत्तद्वर्णैर्ब्राह्मणादिजातौ ॥२९४॥ यदाहीति यदातुद्वयोर्मातापित्रोरन्य

मलद्वयंयदातुल्यंपित्रोःस्यादस्यदेहिनः॥नपुंसकंतदादेहमयंगृह्णात्यनीश्वरः॥ २९२॥ रेतोमातुर्यदाभूयस्तदास्त्रीपरिजायते ॥ यदाभूयःपितुस्तत्स्यात्तदागर्भःपुमान्भवेत् ॥ २९३ ॥ सर्वेंद्रियगुणैर्युक्तोभवतिस्वच्छचित्तयोः॥ स्त्रीपुंसयोर्हिसंयोगाद्यथाशास्त्रमनिंदितात्॥ अनेकगुणसंपन्नस्तत्तद्वर्णेप्रजायते॥ २९४॥ यदाह्यन्यतरस्यस्याद्द्वयोर्वाव्याकुलंमनः॥ रेतस्तयोस्तदासम्यङ्नागच्छेत्सर्वगात्रतः ॥ २९५॥ आगतंवाविहन्येतकुहूमार्गविनिर्गमे॥ एकस्यवाद्द्वयोर्वापियुतंधात्वंतरेणच ॥ २९६॥ ततोगर्भोभवेत्खंजःपंगुर्वाविगतांगुलः ॥ हीनाधिकांगुलोवापिकुणिर्वैकपदादिकः ॥ २९७॥ इंद्रियैर्नयनाद्यैर्वावर्जितोन्यतरेणवा ॥ वामनोवातिकुब्जोवाद्राघीयान्वातिभीषणः ॥ अनेकत्वंतथागर्भःप्राप्नोत्येवंकदाचन ॥ २९८ ॥ पित्रोर्वायुद्वयंक्षुब्धंगतंगर्भाशयंप्रति ॥ वीर्यद्वयस्यसहसामिलितस्यात्मवेगतः ॥ विभागंकुरुतेतेनद्विव्याद्येःसंभवोभवेत् ॥ २९९ ॥

तरस्यमनोव्याकुलंभवतितदातयोरेतःसर्वांगेभ्योनागच्छति आगतंवाउक्तमार्गनिःसरणकालेविहन्यतेप्रतिरुध्यतेअथवाकफादिरूपधात्वंतरेणसंपृक्तंभवतीतिद्वयोरर्थः ॥ २९५ ॥ २९६ ॥ ततइति ततउक्तनिमित्ताद्गर्भःखंजत्वादिभिरनेकत्वंनानाविधत्वंप्राप्नोतीतिसंबंधः तत्र खंजश्चक्रपादः कुणिःश्यामनखः द्राघीयान्अतिदीर्घः स्फुटमन्यत् ॥ २९७ ॥ २९८ ॥ गर्भस्ययुग्मादित्वेनिमित्तमाह पित्रोरिति यदा पित्रोरपानाख्यवायुद्वयंनिमित्तविशेषवशेनक्षुब्धंसद्गर्भाशयंप्रतिगत्वाशुक्रशोणितयोर्मिलितयोर्विभागंकुरुतेतदाद्वयोस्त्रयाणांचतुर्णांवा बालानांसंभवउत्पत्तिर्भवतीतिसंबंधः ॥ २९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गर्भप्रवेशकथामुपसंहरति एवमिति कर्मवशेनप्राप्तैरुक्तविधनिमित्तैर्न्यूनत्वादिभाजिनोगर्भस्यमातुरुदरेस्थितिर्भवतीत्यर्थः ॥ ३००॥ अथकललादिगर्भावस्थाप्रतिपादकवाक्यानामर्थमाह एकेत्यादिना नद्यांवहंतोमंडलाकाराःफेनपुंजाःप्रसिद्धास्तत्रयथामंडलद्वयेवर्त्तमानयोःफेनयोःशुक्रशोणयोर्युगंमिश्रणेनकललंभवेत्तथातन्मातृजपितृजयोर्मलयोर्द्वयंसर्वस्ययोनिजस्यदेहिनोमातुर्जठरेसमागतंस

॥२१॥ देकरात्रेणकललावस्थंभवतितस्यपरिमाणमपिमातुरंगुष्ठतुल्यमुक्तं तदेवचमलद्वयंसप्तरात्रेऽतीतेफेनसाम्यंविहायबुद्बुदसाम्यंभजते तदेव विशदयति अंडाभमिति किंचिद्द्रवसमन्वितस्यमांसस्ययदंडवद्वर्त्तुलत्वमेतदेवबुद्बुदत्वेनात्रविवक्षितमितिद्वयोरर्थः ॥ ३०१ ॥ ३०२ ॥

एवंन्यूनाधिकैर्गात्रैरेकोवानेकएववा ॥ गर्भोमातुस्तुजठरेजायतेकर्मयोगतः ॥ ३०० ॥ एकरात्रेणकललंफेनवन्मंडलद्वये ॥ भवेज्जठरमायातंमातुःसर्वस्यदेहिनः ॥ ३०१ ॥ मातुरंगुष्ठमात्रेणमितमत्रतुतत्स्मृतम् ॥ फेनतांतुपरित्यज्यसप्तरात्रेणबुद्बुदं ॥ अंडाभंजायतेमांसंकिंचिद्द्रवसमन्वितं ॥ ३०२ ॥ पक्षेणद्रवतांत्यक्त्वापिंडतांप्राप्यतद्भवेत् ॥ चतुरस्रंहिसंपर्कात्स्वमात्मरुदग्निभिः ॥ ३०३ ॥ चतुरस्रेतुसंपन्नेतस्मिन्वीर्यद्वयेततः ॥ किट्टीभूतंद्वयंपूर्वंबीजयुग्मंपृथग्भवेत् ॥ ३०४ ॥

पक्षेणेति पंचदशदिनेष्वतीतेषुतद्बुद्बुदाकारंमांसंद्रवतात्यागेनपिंडतांप्राप्यचतुरस्रंचतुष्कोणंभवति तस्यपिंडीभावेहेतुः स्वस्यमलद्वयस्यमातुश्चयेंतर्गतामरुदग्नयस्तत्संपर्कः आधारभेदाद्वाय्वग्न्योर्बहुत्वमितिभावः ॥ ३०३॥ अस्मिन्कालेसुषुम्नादिनाड्युत्पत्तिमागमोक्तांदर्शयति चतुरस्रेइतिसप्तभिः तस्मिन्मायीयकार्मणसंज्ञेमातापित्रोर्वीर्यद्वयेमात्राहारपरिणामसंपर्केणचतुरस्रभावंगतेसतितस्मिंश्चतुरस्रेसमुदायरूपे ॥२१॥

घटकतयानुगतंतन्मातापितृसंबंधिमलद्वयंततश्चतुरस्रात्पृथग्भवेत् अंडकोशरूपेणेतिशेषः तत्रहेतुगर्भविशेषणंकिट्टीभूतमिति किट्टंमलोस्त्रियामित्यमरः किटगतावितिधातोरौणादिकेटप्रत्ययेनिष्पन्नेनकिट्टशब्देनाभिहितस्योद्गमशीलत्वंयुक्तमेवेतिभावः ॥ ३०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततःप्रथमंसुषुम्नानाडीजायतेइत्याह ऊर्ध्वमिति तस्मात्पृथग्भूतान्मलद्वयादांतरवायुनाऊर्ध्वाभिमुखंप्रेरितात्प्रथमंसुषुम्नानामनाडीजायते कीदृशी कंदमध्यस्थतयावर्णितासूक्ष्मादुर्लक्ष्यावृत्तावर्तुलाऋजुःसरलायानाभिहृदयगलतालुभूमध्यैरवच्छेदात्पंचपर्वाकीर्तिताआगमेष्वितिशेषः तदुक्तं पूर्वोक्तायाःसुषुम्नायामध्यस्थायाःसुलोचने नाभिहृत्कंठतालुभ्रूमध्यपर्वसमुद्भवा अधोमुखाःशिराःकाश्चिदित्यादि सासुषुम्नाअवाङ्मुखीवृक्षवदधोमुखीचबोध्या तस्याःसुषुम्नायाउभयोःपार्श्वयोरपरंनाडीद्वयंभवतीतिद्वयोरर्थः ॥ ३०५ ॥ ३०६ ॥ यावामेति तयोरपरनाड्योर्मध्येएकासानाडीज्ञेयायावाममुष्कदेशेसुषुम्नयाआश्लेषंसंपर्कंगतादक्षिणपार्श्वमार्गेणहृदयदेशंगच्छत्यतएव धनुर्वद्वक्राभवति ततोहृदयादुत्थायवामस्कंधस्यजत्रुसंज्ञगलाधस्थास्थ्नश्चांतर्गतेनमार्गेणअदक्षिणांवामांनासिकांगच्छतीत्यर्थः ॥३०७॥

ऊर्ध्वंतुमरुतानुन्नात्तस्मादपिमलद्वयात् ॥ जायतेकंदमध्यस्थासूक्ष्मावृत्ताप्यृजुस्तथा ॥ ३०५ ॥ सुषुम्नानामयानाडीपंचपर्वाप्रकीर्त्तिता ॥ अवाङ्मुखीसातस्याश्चभवेत्पार्श्वद्वयेद्वयं ॥ ३०६ ॥ यावाममुष्कसंबद्धासुषुम्नाश्लेषमागता ॥ दक्षिणंपार्श्वमागत्यधनुर्वक्राहृदिस्थिता ॥ वामांसजत्र्वंतरगानासांयाऽदक्षिणांगता ॥ ३०७ ॥ तथादक्षिणमुष्कोत्थानासायांवामरंध्रगा ॥ इडाचपिंगलाचैतेपूर्वमेवसमीरिते ॥ ३०८ ॥ नाभावेकास्थितानाडीसुषुम्नापूर्वसंभवा ॥ बहिर्वक्रासदामातुर्हृदिसंबद्ध्यतिष्ठति ॥ पुष्टिंगर्भोययागच्छेत्केदारइवकुल्यया ॥ ३०९ ॥ पुंसोमुष्कद्वयंव्यक्तमव्यक्तंतत्स्त्रियोपिच ॥ नपुंसकस्यकिंचित्तद्व्यक्तमुक्तंमनीषिभिः ॥ ३१० ॥

तथेति तयोर्द्वितीयानाडीतुसाबोध्यायादक्षिणमुष्कादुत्थायवामपार्श्वगतेनरंध्रेणपूर्ववद्वक्रेणमार्गेणनासांगतादक्षिणामितिशेषः तयोःक्रमेणनामनीइडापिंगलारूपेबोध्येइत्यर्थः ॥ ३०८ ॥ आप्यायनीसंज्ञायागर्भोपचयप्रयोजिकायानाड्याःस्वरूपंदर्शयति नाभाविति गर्भस्यनाभौसंबद्धाकाचिन्नाडीजायते कीदृशी सुषुम्नायाःपूर्वात्प्रथमात्पर्वणोनाभ्यवच्छिन्नरूपात्संभवउत्पत्तिर्यस्याःसातथा यस्यामुखंमातुर्हृदयेनसंबद्धंभवति अनयैवकुल्याकेदारन्यायेनमातृभुक्ताहारेणगर्भःपोष्यतेइत्यर्थः अस्यानामांतरंशंखवीनीत्यपिवदंतीतिबोध्यम ॥ ३०९ ॥ पुंसइति उक्तनाडीलतानांमूलग्रंथिस्थानीयमंडकोशयुगलंपुरुषाणांप्रस्फुटमेव नारीणांतदस्पष्टं नपुंसकस्यतत्किंचिद्व्यक्तमिति ॥ ३१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मासेति एकस्मिन्मासेऽतीतेसचतुरस्रःपिंडःकठिनःस्यात्तस्माज्जातमुष्ककात्कठिनात्पिंडान्मासद्वयेऽतीतेशिरउत्पद्यतेइति ॥ ३११ ॥ मासत्रयेणेति मासत्रयेऽतीतेचतुरस्रस्यकोणचतुष्टयात्क्रमेणद्वौहस्तौद्वौपादौचजायेते चतुर्थेमासेतुहस्तांगुलिप्रभृतयोऽस्थिपर्यंताअवयवाःप्रभवंतीत्यर्थः कटिश्चउरश्चजठरंचतेषांसमाहारस्तथा ॥ ३१२ ॥ पृष्ठवंशइति पंचममासेपृष्ठगतंदीर्घास्थिजायते षष्ठेनवद्वाराणितद्वतेंद्रियाणिचजायंते सप्तमेप्राणव्यापारःस्फुटोभवतीत्यर्थः ॥ ३१३ ॥ अष्टमइति अष्टममासेसर्वांगैःपूर्णश्चैतन्यानाविर्भावात्सुप्तइवगर्भोभवतिसचयदिदोषेणधातुवैषम्येणवर्जितःसन्गर्भान्निस्सरेत्तर्हिलोकद्वयमभ्युदयनिःश्रेयसरूपंसाधयितुंक्षमःस्यादिति एतेनात्रमासेजी

मासमात्रेणकठिनःस्यात्पिंडश्चतुरस्रकः ॥ समुष्कात्कठिनात्तस्माद्द्विमासाज्जायतेशिरः ॥ ३११ ॥ मासत्रयेणजायेतेहस्तौपादौचकोणतः ॥ चतुर्थेमासिजायंतेहस्तपादांगुलीगणाः ॥ कट्युरोजठरंतद्वत्पार्श्वास्थीनिचकानिचित् ॥ ३१२ ॥ पृष्ठवंशोभवत्यस्यपंचमेमासिसर्वदा ॥ षष्ठेद्वाराणिसर्वाणिसेंद्रियाणिभवंतिच ॥ सप्तमेप्राणसंयुक्तएषप्राणीप्रजायते ॥ ३१३ ॥ अष्टमेमासिगर्भोयंसुप्तदेहसमोभवेत् ॥ अंतर्बहिश्चसंपूर्णसर्वांगोदोषवर्जितः ॥ लोकद्वयंसाधयितुंसमर्थोनिर्गतोयदि ॥ ३१४ ॥ अनेनवपुषाकुर्यात्प्रणवादेरुपासनं ॥ निर्गुणंचतथाब्रह्मजानीयाच्चेत्सुधीःपुमान् ॥ ३१५ ॥ अतोष्टमस्यमासस्यनिर्गमेगर्भसंश्रितः ॥ नवमेमासिसंप्राप्तेसर्वज्ञोजायतेहिसः ॥ ३१६ ॥ विनीतश्चापिदांतश्चब्रह्मविज्ञानसाधनैः ॥ संपन्नःसर्वगंब्रह्मविजिज्ञासुरिवस्थितः ॥ ३१७ ॥

वनसंशयोध्वनितः ॥ ३१४ ॥ अभ्युदयादिसाधनक्षमत्वेहेतुमुपासननिर्गुणविद्ययोःक्षमत्वमाह अनेनेति अनेनमानुषेणदेहेनप्रणवाद्युपासनक्षमोयतोभवत्यतोलोकद्वयंसाधयितुंक्षमइतिसंबंधः अस्याष्टममासस्यनिर्गमेनवममासस्यप्रवेशेसतिसगर्भःसर्वज्ञोभवतीतिद्वयोरर्थः ॥ ३१५ ॥ ३१६ ॥ विनीतइति यथाकश्चित्साधनचतुष्टयसंपन्नोब्रह्मजिज्ञासयागुरुसमीपेतिष्ठेद्विनयादिमान्सन्तथायंगर्भासनेतिष्ठतीत्यर्थः ॥ ३१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यसर्वज्ञतामनुतापपर्यवसन्नांप्रतिपादयतांजातीरित्यादीनांपरमुक्तिप्रदायकमित्यंतानांवाक्यानामर्थमुपबृंहयति जन्मकोट्यर्जितमिति त्रिशताश्लोकैः असंख्यजन्मार्जितानिकर्माणिस्मृत्वाआत्मानंनिंदतीति॥ ३१८॥नकेवलंकर्माण्येवस्मरतिकिंतुनानाविधाजातीरपीत्याह नानेति नानाविधाअसंख्याताश्चयोनयोदेहामयालब्धाः केषांतेयोनिपदवाच्यदेहाइत्याकांक्षायामाह श्वसूकरेत्यादि प्रतिलोमाउत्तमवर्णायांमातरिअधमवर्णाज्जातायथाशूद्राद्ब्राह्मण्यांचांडालः अनुलोमास्तद्विपरीताःयथाब्राह्मणात्क्षत्रियायांमूर्द्धावसिक्तः विप्रादयोविप्रादिसजातीयायांसंस्कृतायांविप्रादेर्जाताः चतुष्पदपदेनजलजंतूनामुपलक्षणं एकानेकसंख्ययासंस्थाव्यवस्थातयाविशिष्टहस्तानामेकें

जन्मकोट्यर्जितंपूर्वंपुण्यंपापंशुभाशुभं ॥ स्मरन्निंदतिदुःखार्त्तमात्मानंक्लेशभाजनं ॥ ३१८॥ नानायोनिसहस्राणिपूर्वंप्राप्तान्यनेकधा॥ सुखदुःखकराण्यत्रसंसारेदुःखसागरे ॥ ३१९ ॥ श्वसूकरखरोष्ट्राणांगोजाविमृगपक्षिणां॥ गोधानामपिसर्पाणांकीटादीनांशरीरिणां॥ ३२० ॥ प्रतिलोमप्रजातानांचंडालादिशरीरिणां ॥ अनुलोमप्रजातानांविप्रादीनांचभूतले ॥ ३२१ ॥ स्थावराणांझषाणांचत्येकद्वित्रिचतुष्पदां ॥ अपादानांचसर्वेषांनानाभेदविभेदिनां ॥ ३२२ ॥ अहस्तानांसहस्तानामेकानेकादिसंस्थया ॥ एकेंद्रियाणांजीवानांनैकेंद्रियवतामपि ॥ ३२३ ॥ हस्तवत्स्वपितद्वच्चनेत्रश्रोत्रादिमत्स्वपि॥ ब्रह्मलोकेथवास्वर्गेगगनेवाभुवःस्थले ॥ ब्रह्मांडोदुंबरंचैतन्मद्देहैरिवपूरितम् ॥ ३२४ ॥ ग्राहंग्राहंत्यजन्नन्यंदेहंदैवेनचोदितं ॥ नरकेभुविवास्वर्गेवंभ्रमीमियथातृणं ॥ ३२५॥ कर्मपाशैर्दृढैर्बद्धोमायासूत्रविनिर्मितैः ॥ पुत्रदारादिकार्येषु पशुरत्रनियोजितः ॥ ३२६॥

द्रियकाणामनेकेंद्रियकाणांचयोनिसहस्राणीतिपंचानांसंबंधः स्फुटमन्यत् ॥ ३१९॥ ३२०॥ ३२१॥ ३२२॥ ३२३॥ हस्तवत्स्वपीति तथा प्रशस्तहस्तनेत्रादिशालिषुदेहेषुब्रह्मलोकादिषुचमयागतमितिशेषः नुइतिवितर्के एतद्ब्रह्मांडरूपोदुंबरफलंमदीयैरेवदेहैःकिंपूरितमित्यर्थः इवशब्दस्योत्प्रेक्षापरत्वात् ॥ ३२४ ॥ ग्राहमिति दैववशागतमन्यमन्यंदेहंगृहीत्वागृहीत्वानरकादौविभ्रमामितृणवदिति ॥ ३२५ ॥ कर्मेति मायारूपसूत्रनिर्मितैःकर्मरूपरज्जुभिर्बद्धत्वात्पशुभूतोहंबांधवकार्येष्वेवप्रवर्तितःकेनापिदेवेनेतिशेषः ॥ ३२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्रशस्तानीति तथानानाजातीयमातॄणांस्तनेभ्योनिर्गतानिपयांसिपूयसदृशानिपीतानिविवेकिदृष्ट्यातिदुःखमयानीति ॥ ३२७॥ आ
हाराइति बीभत्सस्यग्लानेर्जनकादेहांतरवर्तिनामिति ॥ ३२८ ॥ जातोहमिति सर्वत्रदेहेजातत्वंमृतत्वंचममाभूत्तत्रतत्रदेहेविद्यमानेस
तितत्सर्वंमात्रादिकमतिरम्यमभात् तद्देहांतेतुतेषांस्वरूपंरम्यत्वंचविगतमित्यर्थः ॥ ३२९ ॥ देहानांपित्रादीनांचासंख्यत्वंदर्शयति यावंतइ
ति ॥ ३३० ॥ जातस्यैवेति पिष्टपेषणन्यायेनायुक्तमपिपुनःपुनर्जननादिकमपिसहस्रधादृष्टमितिचित्रमित्यर्थः ॥ ३३१ ॥ जातोबाल
इति तथाजन्माद्यवस्थातितिरूपंघटीयंत्रंदुःखदंभोग्यत्वेनममस्तकेवर्त्ततेइति ॥ ३३२ ॥ सुखार्थमिति मयासर्वाणिकर्माणिसुखार्थमे

अप्रशस्तानिनारीणांपूयानीवस्तनाग्रतः॥ निर्गतान्यपिपीतानिकष्टंदुःखकराणिभोः॥३२७॥आहाराविवि
धाभुक्ताःस्थिरजंगमदेहजाः॥ बीभत्सजनकानित्यंयेदेहांतरसंश्रयात्॥ ३२८ ॥ जातोहंचमृतोहंचदेहेसर्व
त्रसर्वदा॥ मातापितासुतादाराबांधवाद्रविणादिकम्॥ देहेतिरम्यंतज्जातमंतेपिविगतंतथा॥ ३२९॥ यावं
तःपांसवोभूमौयावंत्योदिवितारकाः॥ तावन्ममात्रदेहेनसहपित्रादिचाभवत्॥ ३३० ॥ जातस्यैवजनिस्त
द्वन्मृतस्यमरणंपुनः॥ ममन्यायविरुद्धंतच्चित्रमासीत्सहस्रधा॥ ३३१ ॥ जातोबालोयुवावृद्धोमृतोजातइती
दृशं॥ चक्रंमन्मस्तकेनित्यंदुःखदंपरिवर्त्तते ॥ ३३२॥ सुखार्थंयानिकर्माणिकृतानिबहुधामया॥ ब्रह्मघ्नस्ये
वतान्यासन्दुःखदान्येवसर्वतः॥ ३३३ ॥ कर्मणांकरणेदुःखंपुण्यपापोभयात्मनां ॥ अत्रलोकांतरेवापिफ
लंपापस्यनिश्चितं ॥ ३३४ ॥ अत्युत्कटेयदास्यातांपुण्यपापेतदात्रसः॥ कर्त्ताफलंसमाप्नोतिमांद्येलोकांतरे
पितत्॥३३५॥ उदर्केसुखदंपुण्यंव्यर्थमेतत्समीरितं॥ सुखस्यनाशतोयस्माज्जायतेममदुःखदं॥ ३३६॥

वकृतानिपरंतुतानिदुःखदानिजातानि यथाब्रह्मघ्नेनऐहलौकिकसुखायकृताब्रह्महत्यालोकद्वयेदुःखयतीत्यर्थः ॥ ३३३ ॥ कर्मणांदुःख
त्वमेवस्फुटयति कर्मणामिति सर्वकर्मणामनुष्ठानेदुःखदत्वंतत्रपापानामामुष्मिकदुःखदत्वंचप्रसिद्धमेवेत्यर्थः ॥३३४॥ उत्कटपापस्येहा ॥२३॥
पिदुःखदत्वंदर्शयति अत्युत्कटेइति उत्कटत्वंविजातीयाभिभवक्षमत्वंतद्विपरीतंमांद्यमिति ॥३३५॥ पुण्यस्यापिफलगतपरिणामादिभिर्दुः
खदत्वंदर्शयति उदर्कइति पुण्यमुत्तरकालेसुखदमेवेतिनियमोनयुक्तःतत्फलनाशेदुःखस्यापिमयानुभूतत्वादित्यर्थः ॥३३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह दुःखोदधिरिति यतःपुण्यस्यापिफलनाशद्वारादुःखदत्वेतेनसंसारोदुःखसिंधुरितिसिद्धं अस्यदुःखस्यप्रतिक्रियांनिवृत्त्युपायं नपश्यामियेनपरःपारलाभःस्यादिति ॥ ३३७ ॥ जितमिति यद्यपिसाधनसंपन्नत्रैवर्णिकदेहलाभकालेइदंविषयकितवैःसहानादिकाल प्रवृत्तंद्यूतंमयाजितप्रायमासीत्तथापियत्तदाममइंद्रियरूपाक्षेषुपाशकेषुअकौशलमंभूत्ततोमयापराजितमिति ॥ ३३८ ॥ इतःपरमि ति तथापूर्ववत्प्रमादंनकरिष्यामिकिंतुइतःसंकटात्प्रमुच्यअष्टांगयोगेनब्रह्मविद्यामेवशीघ्रंसाधयिष्यामीतिद्वयोरर्थः ॥ ३३९ ॥ ३४० ॥

दुःखोदधिरयंतेनसंसारोमेप्रतीयते ॥ अहोदुःखोदधौमग्नोनपश्यामिप्रतिक्रियां ॥ परंपारंयतोयामिस्वस्य दुःखोदधेरहं ॥ ३३७ ॥ जितंद्यूतंमयापूर्वंत्रैवर्णिकवपुर्ग्रहात् ॥ पराजितंतदेवाक्षाकौशलेनप्रमादिना ॥ ३३८ ॥ इतःपरंतथानाहंकरिष्यामिकथंचन ॥ यदियोन्याःप्रमुक्तोहमिदानींपुण्यलेशतः ॥ ३३९ ॥ तथा ब्रह्मात्मविज्ञानंसर्वदुःखविनाशनं ॥ अष्टांगयोगतःस्वस्यकरिष्याम्येवशीघ्रतः ॥ ३४० ॥ अथवापार्वतीना थंजटिलंधूलिधूसरं ॥ शंकरंवामुकुंदंवाप्रपत्स्येहंश्रियःप्रियं ॥ ३४१ ॥ मयायत्स्वजनस्यार्थेकृतंकर्मशुभा शुभं ॥ एकाकिनंपरित्यज्यमांकृतघ्नागताहिते ॥ ३४२ ॥ मत्प्रसादादवाप्तंयैःसुखंलोकद्वयेपिच ॥ विष्ठावत्ते श्मशानेमांपरित्यज्यगृहंगताः ॥ ३४३ ॥ ममयेकुर्वतेनित्यंपादयोःशिरसानतिं ॥ मत्स्पर्शनात्कृतंस्नानंशुद्ध्य र्थंतैर्दुरात्मभिः ॥ ३४४ ॥ ममयेकृतवंतस्तुपूर्वंचंदनलेपनं ॥ अग्नौतेक्षिप्तवंतोमांनिर्घृणाःशूलहस्तकाः ॥ ३४५ ॥ नपितानापिमातावानदारानसुताअपि ॥ मयासहसमायाताःकस्मिन्नप्यत्रजन्मनि ॥ ३४६ ॥

तदशक्तौहरिहरयोराराधनंकरिष्यइत्याह अथवेति ॥ ३४१ ॥ बांधवार्थमायुर्व्ययंनकरिष्यइतिदर्शयंस्तेषामुपकारानर्हताप्रयोजिकां कृतघ्नतामाह मयायदिति यत्स्वजनस्ययस्यस्वजनवर्गस्यार्थेउपकाराय तेस्वजनाः ॥ ३४२ ॥ मत्प्रसादादिति यैर्मदनुग्रहाल्लोकद्वयंसा धितंतेमांदेहमलवत्श्मशानेप्रक्षिप्यगताइति ॥ ३४३ ॥ तेषामन्यमपकारंदर्शयति ममयेइति स्पष्टंद्वयं ॥ ३४४ ॥ ३४५ ॥ किंचबांधवा नामागमापायित्वात्स्नेहायोग्यत्वमित्याह नपितेति ॥ ३४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केवलंस्वार्थव्यामोहकत्वमेवतेषामित्याह अर्थहस्तमिति अर्थहस्तंधनिनं पापकारणंपापेप्रवर्त्तयितुं ॥ ३४७ ॥ तेचमदर्थसिद्धिकालेमां विमोक्षप्रच्युतंकृत्वातत्कर्मभोगकालेमांपरित्यज्यगताइत्याह विमोक्षेति दुःखंतत्कारितकर्मफलमहमेवप्राप्तइति ॥ ३४८ ॥ एवंगर्भदुःखं वर्णितमथश्रुतिप्रदर्शितंजन्मदुःखंवर्णयति एवमित्यादिना एवंविधांदुःखदांचितांकुर्वन्नसौगर्भस्थःप्रसूतिप्रयोजकैर्वायुभिरधोमुखःक्रियतेइत्यर्थः ॥ ३४९ ॥ मरुतामिति मरुत्कृतात्चलनाद्विपरीतभावात्मकात्क्षुब्धंधातुत्रयंयस्यतथाभूतोसौदुःखमग्नोनकिंचिज्जानातीति ॥ ३५० ॥ षण्णवत्यंगुलेइति वर्णितविधयाषण्णवत्यंगुलिमितेमातृदेहेचतुरंगुलिमितंयोनियंत्रंतत्रमार्गेतदधिकदेहोगर्भःप्रणीयतेप्राप्यते

अर्थहस्तंयथावेश्याअस्निग्धाःस्निग्धवत्स्थिताः॥ विमोहयंतितद्वन्मांबांधवाःपापकारणं ॥ ३४७ ॥ विमोक्षगणिकातुल्यामरणेव्यसनेसति॥ परित्यज्यगतादुःखमहमेकःसमाप्तवान् ॥ ३४८ ॥ एवंनानाविधांचिंतांप्राप्तोदुःखोदधिप्रदां॥ अधोमुखोसौक्रियतेप्रबलैःसूतिमारुतैः॥ ३४९ ॥ मरुतांचलनात्क्षुब्धधातुर्व्याकुलमानसः॥ नात्मानंनपरंचापिजानीतेभूरिदुःखितः॥ ३५० ॥ षण्णवत्यंगुलेदेहेयोनिःस्याच्चतुरंगुला॥ तत्रसंकीर्णमार्गेस्मिन्पृथुदेहःप्रणीयते॥ ३५१ ॥ मरुतांचलनान्मातुर्बस्तिसंग्रहणीद्वयं ॥ क्षुब्धंविष्ठांतथामूत्रंपातयेदस्यमस्तके ॥ ३५२ ॥ क्रकचेनयथैवस्याज्जठरस्यविदारणे ॥ दुःखंगर्भविमोकेस्याद्गर्भिण्याश्चशिशोस्तथा ॥ ३५३ ॥ योनियंत्रमुखंगच्छेज्जननींक्लेशयन्मुहुः ॥ आत्मानंचयथाकीटोमहानल्पव्रणस्थितः ॥३५४॥ विदारयतिमातुःसयोनिंस्वात्मसमागमात्॥ नानाकारोयथाच्छागीयोनिंकार्यउपस्थिते ॥३५५॥

सूतिमारुतेनेतिशेषः ॥ ३५१ ॥ मरुतामिति तदानीमुक्तवायुनाक्षुब्धामातुर्बस्तिर्मूत्राशयःसंग्रहणीपुरीषाशयएतद्द्वयकृतःस्वांतर्गतमलप्रक्षेपोप्यस्यजायमानस्यशिरसिसंभाव्यतेइत्यर्थः ॥ ३५२ ॥ गर्भनिःसरणदुःखमभिनयति क्रकचेनेति क्रकचेनजठरविदारणतुल्यंदुःखं गर्भविमोक्षकालेमातुःशिशोश्चस्यादिति ॥ ३५३ ॥ तत्रशिशोर्दुःखंस्फुटयतियोनीति मुखंद्वारं ॥ ३५४ ॥ मातृदुःखमाह विदारयतीति नानाकारःपश्चवयवानांविभागकर्त्तासौनिकश्छाग्याअजायायोनिमिवविदारयेत्तथेति ॥ ३५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रकचद्वयेति यथाक्रकचद्वयस्यमध्येराजादीनामपकारीनीयतेतथायमपीति ॥३५६॥ जरायुपटेति विश्लेषोविदीर्णत्वं ॥ ३५७ ॥ नवमइति नवमेदशमेवामासिकर्मानुसारेणयोनियंत्राद्बहिरागच्छेत् दीनःअतिदुःखितः यथादुर्गंधिव्रणात्कीटइतिद्वयोरर्थः ॥३५८॥३५९॥ गर्भानिलेति स्त्रीणांगर्भगतमारुतस्यबलेनप्रयुक्तंयद्धर्षणंतस्मात्तथादुःखस्यगाढत्वात्तथास्वपरपीडाद्वारायोनिमार्गाद्यदधःपतनंततश्चमूर्छितोयंजंतुर्नकिंचनवेत्तीति ॥ ३६० ॥ मूर्छानंतरंवैष्णववायुनाकृतांपूर्वविवेकविस्मृतिंदर्शयितुंतंवायुंवर्णयति वैष्णवइति गर्भाद्बहिर्वा

क्रकचद्वयमध्यस्थयंत्रेराजादिदूषकः॥बलाद्विनीयतेतद्वद्योनियंत्रेपिगर्भगः ॥ ३५६ ॥ जरायुपटविश्लेषात्सद्योतिम्हदुलस्तथा॥गर्भगोयोनिसंस्पर्शादग्निनेवप्रदह्यते ॥ ३५७ ॥ नवमेमासिसंपूर्णेदशमेवासमागते॥पूर्वकर्मोपभोगायविवशोबहिराव्रजेत् ॥ ३५८ ॥ स्त्रीयोनियंत्रतोजंतुर्दीनोदेहधरःसदा ॥ कंटकैरिवतुन्नांगःक्रकचैरिवदारितः ॥ पूतिव्रणाद्विपतितोधरण्यांकृमिकोयथा ॥ ३५९ ॥ गर्भाऽनिलबलात्स्त्रीणांधर्षितोदुःखसंकटः ॥ पीडांभुक्त्वाचदत्वाचसंकीर्णाद्योनिनिर्गमात्॥भूमौपतनतश्चायंवेत्तिकिंचिन्नमोहितः ॥ ३६० ॥ वैष्णवोयंबहिर्वायुर्योनेःसर्वत्रवर्त्तते॥संसारचक्रनिर्वाहकारकोनिर्मितोहियः ॥ ३६१ ॥ यद्भयान्नबहिर्यातःशुकोवैयासकिःपुरा॥ अष्टांगयोगसंपन्नोजित्वागर्भस्यमारुतं ॥ ३६२॥ अनेनवायुनास्पृष्टःसर्वज्ञोपीहमानवः॥ मतिभ्रंशंप्रयात्यत्रसद्यएवनसंशयः॥ ३६३ ॥ दुरौषधैश्चदुर्मंत्रैर्यथापापिप्रयोजितैः॥ सर्वज्ञोपिन्हमर्मज्ञोमूढोभवतितत्क्षणात्॥ ३६४॥

युर्वर्त्तते कीदृशः व्यामोहद्वारासंसारचक्रनिर्वाहार्थंविष्णुनानिर्मितत्वाद्वैष्णवाख्यः ॥ ३६१ ॥ एतद्भयात्शुकोमुनिर्गर्भेचिरंतस्थौयोगबलेनप्रसूतिमारुतंजित्वेत्याह यद्भयादिति स्पष्टम् ॥ ३६२ ॥ अस्यवायोःप्रभावमाह अनेनेति अनेनवैष्णवेन ॥ ३६३ ॥ मतिभ्रंशेदृष्टांतमाह दुरौषधैरिति यथाकश्चित्सर्वज्ञोन्हमर्मज्ञोनृणांमर्मणांवेत्तापिपापिभिःप्रयोजितैर्दुरौषधादिभिर्मूढोभवेत्तथायंवैष्णववायुनापीत्यर्थः ॥ ३६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेनेति तत्गर्भैविवेकवत्तयाकीर्तितंगर्भस्थस्यमानसमनेनवायुनास्पृष्टंसद्विवेकप्रवणतारूपमृजुभावंपरित्यज्यश्वपुच्छवद्वक्रंभवति ॥ ॥ ३६५ ॥ एवंचित्तेदूषितेतद्धर्माध्यासात्तत्साक्षीपुरुषोपिसदोषतयाव्यवह्रियतेइत्याह वक्रतामिति अलातोदग्धकाष्ठंतद्भ्रमणेयथाग्ने र्भ्रमणमिति ॥ ३६६ ॥ फलितमाह ततइति कोहंकोहमितिस्वतत्त्वेविस्मृतिर्दर्शिता ॥ ३६७ ॥ गर्भोपनिषदर्थविचारफलंदर्शयंस्तत्रैवो पयुक्तंकालज्ञानमृग्वेदेवसिष्ठसंहितायांचवर्णितमवतारयति एवमितित्रिभिः उक्तविचारस्यफलंयोविरागःसएवमरणावस्थानुसंधान स्यापिफलमित्यर्थः ॥ ३६८ ॥ मरणस्येति तत्रजंतुभिःस्वमरणनिश्चयोजातस्यहिध्रुवोमृत्युरितिस्मृत्युपन्यस्तन्यायात्स्वबांधवानांना

अनेनवायुनास्पृष्टंमानसंपुच्छवत्शुनः ॥ ऋजुभावंपरित्यज्यवक्रतामुपयातितत् ॥ ३६५ ॥ वक्रतांप्रतिया तेस्मिंश्चित्तेसंसारकारणे ॥ पुमानपिभवेद्वक्रोत्यलातस्योयथानलः ॥ ३६६ ॥ ततःपूर्वस्मृतंसर्वंविस्मृत्याशु सबालिशः ॥ अवशोदुःखमापन्नःकोहंकोहमितीरयेत् ॥ ३६७ ॥ एवंगर्भोपनिषदिप्रोक्तजन्मविचारतः ॥ विरागोजायतेपुंसोमरणस्यापिबोधनात् ॥ ३६८ ॥ मरणस्यभवेद्बोधोजन्मनानियतोनृणां ॥ जातस्यास्ति विनाशोयंसर्वस्यापिहिवस्तुनः ॥ स्वकीयपितृमात्रादिमरणादपिदेहिनां ॥ ३६९ ॥ आसन्नमरणज्ञानउपा योयमनेकधा ॥ ऐतरेयेणमुनिनावसिष्ठेनचकीर्तितः ॥ ३७० ॥ आदित्येदक्षिणेतद्वच्चक्षुष्येकःपुमान्स्मृतः ॥ आसक्तिमरणेप्राप्तेवियोगोजायतेतयोः ॥ ३७१ ॥

शदर्शनेननिश्चितव्याप्तिमूलकानुमानाद्वासंपाद्यइत्यर्थः ॥ ३६९ ॥ आसन्नेति ऐतरेयपदमृग्वेदशाखाप्रवर्त्तकानांकौषीतक्यादीनामुपल क्षणं तथाचसमीपागतस्यमरणस्यसूचकानिचिन्हान्यैतरेयादिमुनिभिर्ऋग्वेदेप्रोक्तानिवसिष्ठसंहितायांवसिष्ठमुनिनापीत्यर्थः ॥ ३७० ॥ तत्रकौषीतकिशाखायामारण्यकेषष्ठेध्यायेयश्चायमशरीरइत्यादिश्रुतिर्यथोक्तानिजाग्रतिदृश्यानितच्चिन्हानिवर्णयति आदित्येइतिद्वा दशभिः आदित्यमंडलेदक्षिणनेत्रेचैकएवपुरुषोविग्रहद्वयेनस्थितस्तयोर्विग्रहयोर्नाडीकरणद्वारेणपरस्परंसंपृक्तत्वंचप्रसिद्धंश्रुतिपुजंतोर्म रणआसक्तिसांनिध्यंप्राप्तेसतितुतयोःपुरुषविग्रहयोर्वियोगःसंपर्काभावोभवतीत्यर्थः ॥ ३७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्वियोगस्यलक्षणान्याह वियोगादिति तद्वियोगप्रयुक्तानीमानिमरणचिन्हानि इमानिकानि आदित्यस्यपूर्ववददर्शनंचंद्रवत्शीतलतयाभानमस्तमयकालवद्रश्मिशून्यतयाभानंसच्छिद्रतयाभानंमंजिष्ठरक्तवस्त्रवद्रक्तवर्णेआकाशेस्थितस्यभानंवेतिद्वयोरर्थः ॥ ३७२ ॥ ॥ ३७३ ॥ तथाविश्वस्यरक्तवर्णस्यभानंतल्लक्षणमित्याह दिशइति भानांनक्षत्राणांगणोभगणःसएवभागणः प्रज्ञादित्वात्स्वार्थिकोण्व्युत्पत्त्यंतरंतुदर्शितं मुमूर्षोःसंनिहितमरणस्य ॥ ३७४ ॥ मलोत्सर्गकालवत्पायुद्वारस्ययद्विवृतत्वमसंकोचनीयत्वंतदपिमुमूर्षोर्लक्षणमि

वियोगात्पूर्ववन्नायंसूर्यंपश्यतिदेहभाक्॥ चंद्रवद्भातिसवितामुमूर्षोःशीतलस्तदा॥३७२॥ मध्यान्हेरश्मिशून्योवायथैवास्तमयेतदा॥सच्छिद्रोप्यथवासोयंमंजिष्ठाकाशगोथवा॥३७३॥ दिशश्चप्रदिशस्तद्वदंतरिक्षंसभागणं॥ मुमूर्षोरक्तसदृशंप्रतिभातिदिवानिशं॥३७४॥ पायुर्मलविसर्गस्यकालेत्रविवृतोयथा॥ तथैवजायतेतस्यमुमूर्षोरत्रदेहिनः॥३७५॥ काकनीडंयथासांडंदुर्गंधमिहदृश्यते॥ तादृग्गंधधरंतस्यमुमूर्षोर्मस्तकंभवेत्॥ ३७६॥ आत्मनश्छिद्रसंयुक्तांछायांवैषप्रपश्यति॥ आदर्शेवाजलेचायंछायायामथवात्मनः॥ संदेहंशिरसःपश्येदभावंवाकदाचन॥३७७॥ कनीनिकागतंतद्वत्पुरुषमूर्ध्वपादकं॥ यःपश्येत्तस्यसंदेहमादर्शादौव्रजेच्चवा॥ ३७८॥ अंगुल्याचक्षुपस्तद्वद्दृश्यतेयस्यपीडनात्॥ तेजस्तदपिनैवायंमुमूर्षुःपरिपश्यति॥ ३७९॥ कर्णपिधानतोयोंतःश्रूयतेप्राणसंरवः॥ नश्टणोतितमप्येषमुमूर्षुःश्रोत्रपूरणात्॥ ३८०॥

त्याह पायुरिति ॥ ३७५ ॥ काकनीडमिति काकांडयुक्तनीडस्ययोगंधस्तत्तुल्यगंधस्यधरंधारकंमस्तकमपितल्लक्षणमिति ॥ ३७६ ॥ आत्मीयच्छायायांछिद्रदर्शनंतथाआदर्शादिगतप्रतिबिंबेच्छायायांवाशिरसःसंदेहोऽभावनिश्चयोवातल्लक्षणमित्याह आत्मनइति॥ ३७७॥ कनीनिकेति यःपरचक्षुषिप्रतिबिंबंविपरीतंपश्यति अथवातस्यप्रतिबिंबस्यदर्पणादौसंदेहंकरोतिसोपिमुमूर्षुर्बोध्यइत्यर्थः ॥ ३७८ ॥ अंगुल्येति तथाअंगुल्यानेत्रस्याक्रमणेकृतेसतियत्तेजःकिरणायमानंदृश्यतेतस्यादर्शनमपितल्लक्षणमित्यर्थः ॥ ३७९ ॥ कर्णपिधानेति अंगुलिभ्यांकर्णपिधानेकृतेयःप्राणजन्योघोषःश्रूयतेतदश्रवणमपितल्लक्षणमित्यर्थः ॥ ३८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयूरेति योमयूरकंठवन्नीलवर्णमग्निपश्यतियश्चमेघंविनाविद्युतंपश्यतिमेघेसतितुतांनपश्यतिसोपिमुमूर्षुर्बोध्यइत्यर्थः ॥ ३८१ ॥ वर्षुकेइति वर्षुकेवर्षणशीलेमेघेविद्युतंयोनपश्येत्यश्चऋष्याश्रमादिव्यतिरिक्तदेशभूमिंवन्हिशून्यामपिज्वलंतीमिवपश्येत्सोपिमुमूर्षुरित्यर्थः ॥ ३८२ ॥ अथवसिष्ठोक्तानिप्रत्यक्षाणितल्लक्षणान्याह संध्ययोरित्यादिना एकत्रदिनेप्रातःसायंचस्वकीयशिरसउत्थितंधूमंयःपश्येत्तस्यमहाभयमरणयोरन्यतरद्भवतीत्यर्थः ॥ ३८३ ॥ पंचाहमिति उक्तविधंधूमदर्शनंपंचाहंनिरंतरंचेद्भवेत्तदावत्सरत्रयोत्तरकालेमरणंस्यात् चतुर्दिनंतथाचेद्वत्सरद्वयोत्तरे त्रिदिनंचेदेकवत्सरोत्तरकालेतदितिद्वयोरर्थः ॥ ३८४॥३८५॥ कर्णेति कर्णघोषस्याश्रवणमपिवत्सरपर्य

मयूरकंठसदृशमग्निमेषप्रपश्यति ॥ अमेघेविद्युतंतद्वत्समेघेपिचतांनसः ॥ ३८१ ॥ वर्षुकेजलदेतद्वत्सूर्यरश्मींश्चपश्यति ॥ ज्वलंतीमिवभूमिंचवन्हिशून्यांविनाश्रमं ॥ ३८२ ॥ संध्ययोरुभयोस्तस्यमस्तकेयोविलोकयेत् ॥ धूमंतस्यभवेद्धूरिभयंवामरणंचवा ॥ ३८३ ॥ पंचाहंचेदविच्छिन्नंशिरोधूमंविलोकयेत् ॥ संध्ययोरुभयोस्तस्यमरणंवत्सरत्रयात् ॥ ३८४ ॥ एवंचतुर्दिनंचेत्स्यान्मरणंवत्सरद्वयात् ॥ एकस्माद्वत्सरान्मृत्युस्त्रिदिनंधूमदर्शनात् ॥ ३८५ ॥ कर्णघोषाश्रुतौतद्वन्मरणंवत्सरादिह ॥ कृशःस्थूलोभवेत्स्थूलःकृशोवाकोपनस्तथा ॥ शांतःशांतश्चकोपीवावत्सरान्मरणेसति ॥ ३८६ ॥ विण्मूत्रेक्षुत्पिपासेचमदेनसहितेयदि ॥ एकहेलंदिनेयस्मिंस्ततःस्याद्वत्सरान्मृतिः ॥ ३८७ ॥

न्तमरणसूचकं तथाऽनिमित्तंकृशस्यस्थूलत्वंस्थूलस्यकृशत्वंचतल्लक्षणं तथायःकोपनःकोपशीलःअकस्मात्शांतिशीलोभवेत्शांतोवाकोपशीलस्तस्यापिवत्सरान्मृतिरित्यर्थः ॥ ३८६ ॥ विण्मूत्रेइति हेलाविलासःप्रवृत्तिरितियावत् साएकायत्रभवनेइतिव्युत्पत्त्याएकहेलपदमध्याहृतभवनक्रियाविशेषणं तथाचयस्मिन्दिनेविण्मूत्रेपुरीषमूत्रोत्सर्गेक्षुत्पिपासेवाएकहेलंयुगपद्भवतस्तेचयुगलेयदिमदेनव्यामोहेनसहवर्त्तमानेस्यातांततोदिनाद्वत्सरेमृत्युर्भवेदित्यर्थः ॥ ३८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंधर्वेति यःकश्चनअकस्माद्वृक्षाग्रेगंधर्वनगरंपश्येदथवास्वंदेहंकृष्णपिंगलवर्णंपश्येद्यत्रदिनेततोवत्सरान्मृतिरितिपूर्वतोऽनुषंगः ॥ ३८८ ॥ गृध्राश्चेति यमभिलक्ष्यगृध्राःकाकादयश्चमांसस्यगृध्नवोलिप्सानिमित्तंधावंति अथवाखराउष्ट्राश्चविदंष्ट्रादंष्ट्राहीनावृश्चिकादयोवा राक्षसादयोवामांसाशिनस्तेषांमध्येएकोबहवोवाअभिधावंतितस्यापिवत्सरान्मृतिर्बोध्या एतेषामभिधावनस्यगतिःफलंजागरणेयथा भवतितादृक्फलंस्वप्नेतिभवतीत्यर्थः स्वमस्पर्शपदस्यस्वप्नांतार्थसमन्वयस्तुस्वप्नस्यस्पर्शोरुजिक्षीणतायांअंतेइतियावदितिव्युत्पत्त्याबोध्यः तथाचविश्वप्रकाशः स्पर्शःस्पर्शाक्षरेदानेस्पर्शनेस्पर्शकेरुजीति इतिद्वयोरर्थः ॥ ३८९ ॥ ३९० ॥ अरुंधतीमिति अरुंधतीध्रु

गंधर्वनगरंपश्येद्वृक्षाग्रेयदिकश्चन ॥ अकस्मादथवापश्येद्देहंस्वंकृष्णपिंगलं ॥ ३८८ ॥ गृध्राश्चकाकगोमायुसारसामांसगृध्नवः ॥ खरोष्ट्रावाविदंष्ट्रावाऽनिमित्तंदुष्टजंतवः ॥ ३८९ ॥ एकोवाप्यथवानेकेयंधावंतिमुहुर्मुहुः ॥ रक्षोभूतपिशाचावातथान्येपिशिताशिनः ॥ स्वप्नस्पर्शेपितादृक्स्याद्गतिर्जागरणेयथा ॥ ३९० ॥ अरुंधतींध्रुवंवापिसोमच्छायांमहापथं ॥ वीक्षमाणोपियोनैवपश्येदन्यैर्विलोकितं ॥ ३९१ ॥ प्रत्येकमत्रविज्ञेयंमरणंवत्सराद्ध्रुवं ॥ अर्वाग्वानैवजीवन्सतांतिथिंयातिवत्सरात् ॥ ३९२ ॥ असितंस्वात्मनोवस्त्रमुज्ज्वलंयःप्रपश्यति ॥ उज्ज्वलंचतथाकृष्णंषण्मासात्समरिष्यति ॥ ३९३ ॥ पतंतंभास्करंपश्येत्सोमंवानभसोहियः ॥ भूमिष्ठंवादिविष्ठंयोव्यस्तरूपमथापिवा ॥ ३९४ ॥

वौप्रसिद्धौ सोमच्छायापूर्णचंद्रमध्यगताश्यामता महापथोनिर्मलाकाशेदक्षिणोत्तरंदीर्घोमंदप्रभारूपःप्रसिद्धः एतेषामन्यतममन्यैर्विलोकितमपियोवीक्षमाणोदर्शनार्थंयतमानोपिनपश्येत् अत्रादर्शनेप्रत्येकसंबंधिनिसतिवत्सरात्ततोर्वाग्वामृतिर्बोध्या एतदेवावधारयति नैवेत्यादिना यस्यांतिथावुक्तनिमित्तंपश्यतितांतिथिंवत्सराद्उत्तरांजीवन्सन्नयातीतिद्वयोरर्थः ॥ ३९१ ॥ ३९२ ॥ अथषाण्मासिकमृत्युलक्षणान्याह असितमितिषड्भिः श्यामवस्त्रस्योज्वलत्वंश्वेतत्वंश्वेतस्यश्यामत्वंवापश्येत्सषण्मासान्म्रियतेइत्यर्थः ॥ ३९३ ॥ पतंतमिति योनभसःपतंतंसूर्यंचंद्रंवापश्येत् अथवाभूमिष्ठंपदार्थंदिविष्ठमाकाशगंपश्येत् दिविष्ठंतुभूमिष्ठमित्येवंविपर्यस्तरूपंपश्येत्सोपितथेत्यर्थः ॥ ३९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओष्ठाविति ओष्ठयोस्तालुनश्चशुष्कत्वंचक्रवद्देहभ्रमणंचयस्यभवत्यथवाअन्येषांपर्वतादीनांभ्रमणंपश्येदथवाचलतामन्येषामदर्शनंस्थिरत्वेनदर्शनमितियावत्तद्यस्यभवति एतानिसर्वाणिनिमित्तानिषाण्मासिकमरणसूचकानीत्यर्थः ॥ ३९५॥३९६ ॥ एकस्यापीति एतेषांनिमित्तानांमध्येएकस्यापिदर्शनंयस्यांतिथौभवतितांतिथिंषण्मासोत्तरांजीवन्सन्नपश्यतीत्यर्थः॥३९७॥ सुतरामिति सुतरांवादितायाघंटायानादस्याश्रवणं पंकवतिपांसुमतिवादेशेपादचिन्हस्यखंडितस्यभवनंतल्लक्षणमित्यर्थः ॥ ३९८ ॥ अपीड्यमानयोरिति अंगुल्यानेत्रायनाक्रमणेपिखद्योतद्युतितुल्यतेजःकणानांभानंत्रैमासिकमरणलक्षणमित्यर्थः ॥ ३९९ ॥ चक्षुरादींद्रियैःस्वस्वविषयाणांयथावद

ओष्ठौतालुश्चसंतापात्शुष्कतांयांत्यकारणात् ॥ चक्रवद्यस्यदेहस्यभ्रमणंस्यादकारणं ॥ ३९५ ॥ अन्येषांवापितत्पश्येद्गच्छतांवाप्यदर्शनं ॥ अत्रसर्वत्रविज्ञेयंषण्मासान्मरणंनृणां ॥ ३९६ ॥ एकैकस्याप्यरिष्टस्यदर्शनेसंशयंविना॥ षाण्मासिकींतिथिंतांतुपुनर्जीवन्नपश्यति ॥ ३९७॥ सुतरांनात्रघंटायानादंयःशृणुयादिह ॥ पंकेवापांसुलेवापियस्यखंडंपदंभवेत् ॥ अत्रापिमरणंज्ञेयमर्वाकूषण्मासतोनृणां ॥ ३९८ ॥ अपीड्यमानयोरेवनेत्रयोर्यदिपश्यति ॥ खद्योतद्युतिवत्तस्यत्रिमासान्मरणंभवेत्॥ ३९९ ॥ इंद्रियाणिनगृह्णीयुःस्वकीयान्विषयान्यदि ॥ मासांतेमरणंतस्यभविष्यतिनसंशयः ॥ ४०० ॥ प्रलपंतिगिरोयस्यशरीरेणविवर्जिताः॥ शिरोज्वलतिवासद्योवन्हिवज्वालयावृतं ॥ ४०१ ॥ दिवोल्कादृश्यतेयेननक्तंचेन्द्रधनुस्तथा ॥ अमेघेपितथाविद्युत्समेघेनैवसातथा॥ ४०२ ॥

ग्रहणंमासकालिकमरणलक्षणमित्याह इंद्रियाणीति॥४००॥अपराणिमासिकमरणसूचकानिदशनिमित्तान्याह प्रलपंतीतिपंचभिः शरीरेणविवर्जिताअनुपलभ्यमानशरीरकादेवादयःकर्त्तारोयस्यश्रवणार्हागिरोवचनानिप्रलपंतिकथयंतिवाअथवायस्यशिरोवन्हिवज्ज्वलतितस्यमासमात्रेणमरणमितिपंचमेनाभिसंबंधः एवमग्रेपि ॥ ४०१ ॥ दिवोल्केति दिवसेउल्कापातदर्शनंरात्राविंद्रधनुर्दर्शनममेघाकाशेविद्युद्दर्शनंसमेघाकाशेसाविद्युद्यदितथानदृश्यते एतन्निमित्तचतुष्टयंयस्यस्यात्तस्यतथेत्यर्थः ॥ ४०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्पणादाविति दर्पणादौप्रतिबिंबादर्शनंकाकादिमैथुनदर्शनंचेतिनिमित्तद्वयंयस्यतस्यतथेति शिखंडीमयूरः ॥ ४०३ ॥ रूक्षेति रूक्षादि पदार्थानांस्निग्धत्वादिरूपेणदर्शनंस्नानोत्तरंसर्वांगानामार्द्रत्वेपियद्धृदयस्यपादयोश्वशुष्कत्वमेतन्निमित्तद्वयमपियस्यस्यात्तस्यतथेत्यर्थः ॥ ४०४ ॥ मासेति प्रथमपदद्वयस्यपूर्वान्वयोदर्शितः उक्तानांदशनिमित्तानांमध्येएकंद्वयादिरूपेणसर्वाणिवाशुद्धांतःकरणस्यमुमूर्षोर्भ वंत्येवेत्यर्थः ॥ ४०५ ॥ अर्द्धमासिकमरणसूचकानितान्याह भूमीतिद्वाभ्यां अकस्माद्भूमौच्छिद्रदर्शनंछिद्रखाणांभूमिच्छिद्रोत्थितश ब्दानांश्रवणंवातल्लक्षणमित्यर्थः ॥ ४०६ ॥ सूर्यांशुरिति यस्यसूर्यकिरणाःशीताभासंतेचंद्रस्यतुउष्णास्तथायस्यमुखंरक्तवर्णंजिह्वाच

दर्पणादौतथाच्छायामात्मनोवानपश्यति ॥ पश्येच्चेन्मैथुनंवापिकाकहंसशिखंडिनां ॥ ४०३ ॥ रूक्षशीतो ष्णभावानांविपर्यासंतथैवच ॥ स्नानमात्रेणयस्यापिहृत्पादौचप्रशुष्यतः ॥ ४०४ ॥ मासमात्रेणमरणमु क्तानामेकमेववा ॥ सर्वाणिचभवंत्यस्यमुमूर्षोःशुद्धचेतसः ॥ ४०५ ॥ भूमिच्छिद्रमकस्माद्यःपश्येच्छि द्रवांस्तथा ॥ अर्धमासात्सवैपश्येद्धर्मराजंनसंशयः ॥ ४०६ ॥ सूर्यांशुर्यस्यशीतःस्यादुष्णश्चंद्रस्यवापि सः॥ रक्तपद्मोपमंवक्त्रंयस्यजिह्वाज्वलच्छविः॥ कर्णयुग्मंतथास्तब्धंकंपोहृन्नाभितालुजः ॥ ४०७॥ एतेषु चनिमित्तेषुसर्वेष्वेकैकशोपिवा ॥ अर्धमासाद्भवेदर्वाङ्मरणंसंशयंविना ॥ ४०८ ॥ यस्यांतिथौनिमित्ता निजायंतेतांपुनःपुमान्॥ पश्येत्पंचदशींनायंजीवन्निहकदाचन ॥ ४०९॥ यस्यवाऽऽकस्मिकीज्वालाज्वलं तीजायतेतनौ॥ सयातिसप्तदिवासान्मृत्योःस्थानंनसंशयः॥ ४१०॥

ज्वलदग्निवर्णाभवतिकर्णौचस्तब्धौतुरगकर्णवत्तथाहृदयादिषुकंपोभवतितस्यापितथेति ॥ ४०७॥ एतेष्विति एतेषुभूमिच्छिद्रदर्शना दिषुमध्येएकस्मिन्बहुषुवासत्सुअर्धमासादर्वागेवमरणंभवतीति ॥ ४०८ ॥ अर्वाक्त्वमेवस्फुटयति यस्यामिति यस्यांतिथावेतानिनिमि त्तानिभवंतिततःपंचदशींतिथिंजीवन्सन्निहलोकेनयातीति ॥४०९॥ सप्तदिवसभाविमरणसूचकान्याह यस्यवेति अकस्मात्सर्वत्रदेहेज्वा लोदयःसप्तदिवससमुदायादर्वाग्भाविनोमरणस्यसूचकः ॥ ४१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रहानिति ग्रहाआदित्यादिकेत्वंतसंज्ञास्तारामण्डलगताःप्रसिद्धास्तान् अथवास्वकीयांनासिकांजिव्हांचयोनपश्येत् अथवास्वयंकृ
तंकर्मविस्मरेत् यस्यचशरीरपूर्वार्द्धमुष्णमपरार्द्धंतुशीतंभवेत् नेत्रेचातिविकासेनमंडलाकारेस्यातां कर्णौशैथिल्येनस्थानच्युतौस्यातां ना
सिकाचवक्राभवेत् एतानिसप्तरात्रावांतरभाविमरणसूचकानीतिद्वयोरर्थः ॥ ४११ ॥ ४१२ ॥ सप्तरात्रावच्छिन्नतामेवस्फुटयति निमि
त्तेष्विति यस्मिन्वारेउक्तनिमित्तान्यतमंभवेत्सवारोजीवतापुनर्नलभ्यतेइत्यर्थः ॥ ४१३ ॥ यस्मिन्दिनेभवंतितस्मिन्नेवदिनेमरणसूचका
न्याह उत्तरस्थामितित्रिभिः सूर्यैदक्षिणतःस्थितेउत्तरतःस्थितियोग्यांस्वदेहच्छायांदक्षिणतःस्थितांयःपश्येत्तस्यसद्यस्तस्मिन्नेवदिनेमृ

ग्रहानृषींस्तथासप्तस्वघ्राणरसनेअपि ॥ नपश्यतिस्वयंकृत्वाविस्मृतिंचाधिगच्छति ॥ ४११ ॥ यस्यार्धमुष्णं
वपुषःशीतलंचार्द्धमेवच ॥ स्यातांमंडलवन्नेत्रेकर्णौस्थानाच्युतावपि ॥ नासिकावक्रवत्तद्वत्सप्तरात्रंहिजी
वति ॥ ४१२ ॥ निमित्तेष्वेषुकिंचित्स्यादेकंवानेकमेवच ॥ यस्मिन्वारेभवेत्तंतुपुनर्जीवन्नयात्ययं ॥ ४१३ ॥
उत्तरस्थांनिजांछायांदक्षिणेयोत्रपश्यति ॥ सद्यएवमृतिंसोयंशस्त्राद्यैर्हिगमिष्यति ॥ ४१४ ॥ यस्यान्नंभुज्य
मानंहिकयाचिद्भुज्यतेस्त्रिया ॥ भोजनस्यात्रकालेतुयःपश्येद्वृषवाहनं ॥ ४१५ ॥ पुरुषंमहिषस्थंवादंडपाणिं
भयप्रदं ॥ योषितंपाशहस्तांवामुक्तरक्तस्वमूर्द्धजां ॥ ४१६ ॥ सद्योमरणहेतूनिकथितानिमनीषिभिः ॥ एत
दन्यतमंपश्यन्नपश्येदुदितंरविं ॥ ४१७ ॥ स्वप्नाअपिभवंत्येतेमरणस्यात्रसूचकाः ॥ अचिरेणैवकालेनध्रुवं
स्वप्नावलोकिनः ॥ ४१८ ॥

त्युरिति ॥ ४१४ ॥ यस्यान्नमिति स्वस्यभोजनायोपन्यस्तमन्नंकयाचिद्वर्णयितुमशक्ययास्त्रियाभुज्यमानंयेनईक्ष्यते अथवाभोजनका
लेयोवृषभारूढंमहिषारूढंवादंडपाणिंभयानकंचपुरुषंमुक्तारक्तवर्णाःकेशाययातांपाशहस्तांयोषितंवापश्येत्सउत्तरदिनोदयकालपर्यंतं
नजीवेदुक्तनिमित्तानांसद्योमरणहेतुत्वादितित्रयाणांसंबंधः ॥ ४१५ ॥ ४१६ ॥ ४१७ ॥ अथस्वप्नाइत्यादिनाउक्तनामकश्रुतौवसिष्ठ
संहितायांचवर्णितानरिष्टसूचकान्स्वप्नानाह स्वप्नाअपीत्यादिना एतेवक्ष्यमाणरूपाःस्वप्नाअपिस्वप्नद्रष्टुर्मरणसूचकाबोध्याइति ॥ ४१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णेति कृष्णदंतस्यकृष्णवर्णस्यचनरस्यदर्शनमतिसंनिहितमरणसूचकमिति ॥ ४१९ ॥ वराहमिति यश्चात्मानमात्मीयंशरीरंभक्षयंतं वराहंमर्कटंवापश्येदथवाअनेनआत्मानंभक्षयताशुनानीयमानंपश्येत्तस्यषण्मासतोमृतिरितिसप्तमेनाभिसंबंधः ॥ ४२० ॥ खादित्वेति तथायःस्वप्नेसुवर्णानिपीतवर्णद्रव्याणिभक्षयित्वावमेत् मधुमाक्षिकंतत्प्रचुरमन्नंअथवाबिसानिकमलजटाःकोमलाःप्राश्नीयात्तस्यतथा फलमिति ॥ ४२१ ॥ पुंडरीकमिति पुंडरीकंश्वेतकमलंमस्तकेकंठादौवाधारयेत् गर्दभैर्वराहैरुष्ट्रैर्वायुक्तंयानंरथादिकमारोहेत्तेषुगर्दभादि

कृष्णदंतंकृष्णवर्णंपश्येत्स्वप्नेनरंयदा ॥ अविदूरेतदामृत्युःस्वप्नदृष्टुर्नसंशयः ॥ ४१९ ॥ वराहंमर्कटंवापिघ्नंतंखादंतमेववा ॥ आत्मानंवाशुनातेननीयमानंसमंततः ॥ ४२० ॥ खादित्वावासुवर्णानिवांतिंचकुरुतेपुनः ॥ अश्नातिमधुसंयुक्तंमृदुलानिबिसानिवा ॥ ४२१ ॥ पुंडरीकंतथैवैकंधारयेन्मस्तकादिषु ॥ खरैर्वापिवराहैर्वायुक्तमुष्ट्रैरथापिवा ॥ ४२२ ॥ अधिगच्छेदयंयानंतेषुवारोहणंव्रजेत् ॥ कृष्णांधेनुंकृष्णवत्सांव्रजंतींदक्षिणांदिशं ॥ ४२३ ॥ जपाकुसुमजांमालांशैवालींवोरसावहन् ॥ तैलाभ्यक्तोथवानग्नएकाकीवापियातितां ॥ ४२४ ॥ काकैर्गृध्रैश्चपरितोभक्ष्यमाणःकरेस्थितैः ॥ मुदितोरक्तवासाश्चरक्तगंधानुलेपनः ॥ ४२५ ॥ तैलाभ्यक्तस्तथाचान्यैर्बहुशोपित्युपद्रुतः ॥ त्वरितोदक्षिणामाशांव्रजेद्वाक्षुत्पिपासितः ॥ ४२६ ॥ कृकलासंचवापश्येद्यानंस्वस्यविरूपिणं ॥ इत्येवमादिचेत्पश्येत्स्वप्नेषण्मासतोमृतिः ॥ ४२७ ॥

ष्वेववारोहणंकुर्यात्कृष्णवर्णांगांसमानवर्णवत्ससहितांदक्षिणदिशंप्रतिगच्छंतींवापश्येदितिशेषः तस्यतथेतिद्वयोरर्थः ॥ ४२२ ॥ ४२३ ॥ जपेति जपाअतिरक्तःकुसुमविशेषस्तन्मयींशेवालमयींवामालांकंठेधारयंस्तैलाभ्यंगशालीनग्नोवाएकाकीतांदक्षिणांदिशंयोगच्छेदथवा करस्थितैःकाकादिभिर्भक्ष्यमाणोमुदितत्वादिविशेषणकःअन्यैःश्वप्रभृतिक्रूरजन्तुभिरुपद्रुतस्तांदक्षिणांदिशंव्रजेत्तस्यतथेतित्रयाणामर्थः ॥ ४२४ ॥ ४२५ ॥ ४२६ ॥ कृकलासमिति यःकृकलासंसरठंकुरूपंस्वस्यवाहनभूतंपश्येत्तस्यापितथेत्यर्थः आदिपदेनविवाहादिमंगलग्रहः ॥ ४२७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिनत्रयावच्छिन्नमरणसूचकंस्वममाह लोहेति यःपुमान्लोहदंडाद्युपलक्षितांयममूर्त्तिपश्येत्सदिनत्रयावच्छिन्नजीवनइत्यर्थः ॥४२८॥ दशदिनावच्छिन्नस्यतस्यसूचकमाह कृष्णांबरेति सद्यस्तद्दिनेअरुणोदयेतद्राव्यंतेवातथेति ॥ ४२९ ॥ उक्तविधस्वप्नानामदृष्टसामग्रीज न्यानामेवतत्तदर्थसूचकत्वमितिसूचयन्दृष्टसामग्रीजन्यस्यवैफल्यमाह वातइति कफादिधातूनांसाम्यातिक्रमेणदोषभावंगतानांयःस मुद्रेकोविकारारंभक्षमत्वंतज्जःस्वप्नोव्यर्थेति ॥ ४३० ॥ तथाकामादिप्रयुक्तोपिव्यर्थेत्याह कामादिति चिंतनंपुनःपुनःस्मरणं ॥ ४३१ ॥

लोहदंडधरंह्रस्वंनरंकृष्णपरिच्छदं॥ स्वप्नेपश्येत्पुमान्यस्तुत्रिदिनात्समरिष्यति॥ ४२८॥ कृष्णांबरधरानारी कृष्णगंधानुलेपना॥ आलिंगयतियंस्वप्नेसस्नेहमरुणोदये॥ अर्वाग्दशाहतोमृत्युर्भवेत्सूर्योदयेपिच॥४२९॥ वातःपित्तंतथाश्लेष्मादोषत्रयमुदीरितं॥ दोषत्रयसमुद्रेकात्स्वप्नोव्यर्थःप्रकीर्तितः॥ ४३०॥ कामात्क्रोधा त्तथालोभाद्भयाद्वानिशिचिंतनात्॥ दृष्टःस्वप्नोनफलदःप्राणिनामिहकर्हिचित्॥ ४३१॥ दोषकामाद्यभावेचे त्प्रथमेप्रहरेपुमान्॥ स्वप्नंविलोकयेत्तस्यफलंवत्सरतोभवेत्॥ ४३२ ॥ षण्मासतोद्वितीयेस्यात्तृतीयेतुत्रिमा सतः॥ चतुर्थेघटिकानांस्याद्भेदात्सूर्योदयावधि॥ मासात्पक्षाद्दिनेभ्योवास्यादेवास्माच्चवासरात्॥ ४३३॥ स्वप्नंदृष्ट्वायदास्वप्नंपश्येदेषपुनःपुमान्॥ व्यर्थःस्वप्नस्तदापूर्वइतिस्वप्नविदोविदुः॥४३४॥

रात्रिप्रहरभेदेनफलविशेषमाह दोषेति दोषाःवातादयः ॥ ४३२ ॥ षण्मासतइति द्वितीयेरात्रिप्रहरेतत्फलंषड्भिर्मासैर्भवति तृतीयेमास त्रयेण चतुर्थेतुघटीयुगलचतुष्टयभेदेनफलंबोध्यं तथाहि चतुर्थप्रहरस्यप्रथमघटीद्वयेमासात्फलं द्वितीयघटीद्वयेपक्षात्तृतीयेदशभिर्दिनै श्चतुर्थेघटीद्वयेतुतस्मिन्नेवदिनइत्यर्थः ॥ ४३३ ॥ स्वप्नवैयर्थ्यस्यप्रयोजकांतरमाह स्वप्नमिति यस्यस्वप्नस्यदर्शनादनंतरंस्वप्नांतरंदृश्यतेस पूर्वःस्वप्नोव्यर्थाभवतीतिस्वप्नमर्यादाविदोवदंतीत्यर्थः ॥ ४३४ ॥ ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचदोषशंकाकलंकितत्वेनस्वप्नस्यनावधारणहेतुत्वंकिंतुसंभावनात्मकसंशयहेतुत्वमेवेत्याह इत्यादीति इत्यादिदोषतोजातेनतेनव्य भिचारसंशयेनस्वस्यस्वप्नद्रष्टुःसूक्ष्मयाविवेकक्षमयाबुद्ध्यालोचनमंतरास्वप्नएकांततोनियमेनतत्तद्वर्णितविधंफलंप्रयच्छतीतिननिश्चितं जागरणकालिकनिमित्तंतुतत्फलंप्रयच्छतीतिनिश्चितं दोषशंकानुदयात् तथाचस्वप्नेतथासूचकत्वंकाचित्कंसव्यभिचारमितिन्यायंकार्य कारणभावव्यवस्थांजानतांमतमितिद्वयोरर्थः ॥ ४२५ ॥ ४२६ ॥ अरिष्टवर्णनस्यप्रकृतोपयोगिफलमाह आसन्नेति वीक्षितैर्जायति दृष्टैरपिशब्दात्स्वप्नदृष्टैश्चमरणसूचकैःकामुकस्यापिवैराग्यंभवतीति ॥ ४२७ ॥ परंतुउक्तोपायैर्जातंवैराग्यंमंदादिभेदेनापरमेवभवतिपरवै

इत्यादिदोषतस्तेनस्वप्नोनैकांततःफलं ॥ प्रयच्छतिविनासूक्ष्मदृष्ट्यास्वस्यविलोकनात् ॥ ४२५ ॥ तत्तज्जाग रणेयत्स्यान्निमित्तंतत्तुनिश्चितं ॥ क्वाचित्कंचतथास्वप्नइतिन्यायविदोविदुः ॥ ४२६ ॥ आसन्नमरणस्यैतैःसू चकैरपिवीक्षितैः ॥ कामुकस्यापिवैराग्यंप्रायोभवतिभूतले ॥ ४२७ ॥ हंसादिश्रुतिसंप्रोक्तंयोगमास्थायवा पुमान् ॥ लोकद्वयेपिवैराग्यंदृढमत्रप्रपद्यते ॥ ४२८ ॥ ब्रह्मचारीपुमान्दांतोजितबाह्येंद्रियःस्थिरः ॥ गुरुभक्तः सदायोगमभ्यसेद्रागनाशनं ॥ ४२९ ॥ स्ववर्णाश्रमसंप्राप्तानित्यनैमित्तिकाःक्रियाः ॥ कृत्वारण्यादिकेस्था नंशीतातपविवर्जिते ॥ ४४० ॥ वायुशून्येतथादेशेसर्वोपद्रववर्जिते ॥ मनसश्चदृशोस्तद्वन्नित्यमानंदकारि णि ॥ योगाभ्यासरतस्तत्रस्वासनंपरिकल्पयेत् ॥ ४४१ ॥

राग्यंतुयोगेनात्मसाक्षात्कारादेवेतिदर्शयन्योगप्रतिपादकहंसाद्युपनिषदर्थजिज्ञासामुत्थापयति हंसादीति स्पष्टं ॥ ४२८ ॥ तत्रोपो द्घातसंगत्याप्रचुरयोगांगप्रतिपादिकायाअमृतनामकोपनिषदोर्थमार्थक्रमेणद्विपंचाशताश्लोकैरुपबृंहयन्नादौयोग्यमधिकारिणंशास्त्रांत रप्रसिद्धमाह ब्रह्मचारीति ब्रह्मचारित्वेनाहिंसादियमसंपत्तिःसूचिता दांतत्वेनमनोनियमनंस्थिरत्वेनभगवद्गीतोक्तासात्विकीधृतिर्गुरुभ क्तत्वेनश्रद्धासंपत्तिश्चेति रागोविषयेषुगर्द्धः ॥ ४२९ ॥ योगस्ययोग्यंदेशंकालंचाह स्ववर्णाश्रमेतिद्वाभ्यां आश्रमसंबंधेनावश्यकर्त्तव्या निनित्यनैमित्तिककर्माण्यनुष्ठायारण्यंवनंतत्प्रभृतिकेरहस्येशीताभावादिविशेषणशालिनिचदेशेस्थानंकुत्र्यादिरूपंकृत्वातत्रयोगंचिकीर्षु रासनंस्थापयेदितिद्वयोःसंबंधः ॥ ४४० ॥ ४४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसनंवर्णयति दर्भानिति प्रथमंदर्भान्कल्पयेत्तदुपरिकृष्णाजिनंतदुपरिव्याघ्रादित्वचमन्यद्वस्त्रादिकंवाकल्पयेत्येनतस्यबाधातेनआस नेनकृतापीडानस्यादित्यर्थः ॥ ४४२ ॥ नात्युच्छ्रितमिति संविशेत्तिष्ठेत् ॥ ४४३ ॥ तत्रस्थित्वादौकर्त्तव्यस्यप्रतिपादकंगीतावाक्यंपठति सममिति कायपदेनदेहमध्यमुच्यते ग्रीवांतःसमाहारद्वंद्वः सममवक्रं प्राणायामान्कुर्वीतेतिवक्ष्यमाणेनसंबंधः ॥ ४४४ ॥ अहिंसामि ति अहिंसादिरूपान्यमांस्तपःप्रभृतीन्नियमांश्चसेवमानः ईशानप्रसादईश्वरेचित्तस्यतदाकारतालक्षणंवैशद्यं आदिपदेनसंतोषादिग्रहः ॥ ४४५ ॥ कृष्णाजिनालाभेपिदर्भासनमवश्यंसंपादयेदितिदर्शयन्योगिनायोगसंप्रदायप्रवर्तकस्यरुद्रस्याराधनंप्रतिबंधध्वंसायावश्यं

दर्भान्कृष्णाजिनच्छन्नांस्त्वचंकृष्णाजिनस्थितं ॥ अन्यद्वाम्रदुलंयेनबाधातस्यनसंभवेत् ॥ ४४२ ॥ नात्युच्छ्रितंनातिनीचंदेशेशब्दविवर्जिते ॥ परिकल्प्यासनंतत्रसंविशेद्योगदक्पुमान् ॥ ४४३ ॥ समंकायशिरोग्रीवंधारयन्नचलंस्थिरः ॥ संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलोकयन् ॥ ४४४ ॥ अहिंसांसत्यमस्तेयब्रह्मचर्यापरिग्रहान् ॥ सेवमानोयमान्नित्यंनियमानपिशक्तितः ॥ तपःस्वाध्यायकेशानप्रसादादीन्हिबुद्धिमान् ॥ ४४५ ॥ भूमौदर्भासनेरम्येसर्वदोषविवर्जिते ॥ यमीनियमयुक्तश्चस्थिरचित्तःशिवाश्रयः ॥ ४४६ ॥ पद्मकंस्वस्तिकंवापिभद्रासनमथापिवा ॥ बध्वायोगासनंसम्यगुत्तराभिमुखःस्थितः ॥ प्राणायामांस्तथाकुर्याद्योगीजितपरिश्रमः ॥ ४४७ ॥ जान्वोरंतरेसम्यक्कृत्वापादतलेउभे ॥ ऋजुकायःसुखासीनःस्वस्तिकंतत्प्रचक्षते ॥ ४४८ ॥

कार्यमित्याह भूमाविति ॥ ४४६ ॥ तथापद्मकाद्यन्यतममासनंकृत्वावक्ष्यमाणविधयाप्राणायामान्कुर्वीतेत्याह पद्मकमिति योगास नंयोगोपकारकमासनंपद्मकादिसंज्ञंकृत्वेत्यर्थः केचित्तुसिद्धासनं मेढ्रादुपरिविन्यस्यसव्यगुल्फंतथोपरि गुल्फांतरंचनिक्षिप्यसिद्धास नमिदंभवेदितिलक्षितस्यसिद्धासनस्ययोगासनपदेनपरिग्रहइतिवदंतितत्त्वग्रेतल्लक्षणानुपन्यासात्ग्रंथकृतोनसंमतमितिबोध्यम् ॥ ४४७ ॥ तत्रस्वस्तिकंलक्षयति जान्वोरिति जानुपदेनजान्वारभ्यजंघापर्यंतोदेशोलक्ष्यतेऊरुःप्रसिद्धस्तयोर्मध्येप्रथमंदक्षपादतलंकृत्वाततोवा मपादतलंतथाकुर्यादृजुदेहमध्यकश्चभवेदेतत्स्वस्तिकमित्युच्यतेइत्यर्थः ॥ ४४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्मकंलक्षयति अंगुष्ठाविति पादावूर्वोरुपरिकृत्वापृष्ठतःप्रहितेनदक्षहस्तेनदक्षमंगुष्ठंगृहीत्वातादृशेनवामेनवामांगुष्ठंगृह्णीयादृजुकायश्चभवेदेतत्पद्मासनमित्यर्थः ॥ ४४९ ॥ भद्रासनंलक्षयति गुल्फाविति पादगुल्फयोर्द्वयंवृषणाधःसीवन्याःपार्श्वद्वयेनसंस्पर्शियथास्यात्तथाकृत्वापार्श्वेपादयोःपृष्ठेपादौचपाणिभ्यांकच्छपाकाराभ्यांबध्वासमाक्रम्ययत्क्रियतेतद्भद्रासनमित्यर्थः तदुक्तंवाचस्पतिना पादतलेवृषणसमीपेसंपुटीकृत्यतस्योपरिपाणिकच्छपिकांकुर्यादेतद्भद्रासनमिति तस्यसंपुटस्यकच्छपिकापरस्परंमणिबन्धसंलग्नयोःकरयोर्योगः ॥ ४५० ॥ एतेषामिति एतेषांवर्णितासनानांमध्येयदासनमनेनयोगोन्मुखेनसुखेनकर्तुंशक्यंस्यात्तत्कृत्वाप्राणायामानृकुर्वी

अंगुष्ठौचनिबध्नीयाद्धस्ताभ्यांव्युत्क्रमेणतु ॥ ऊर्वोरुपरिपादौद्वौकृत्वापद्मासनंभवेत् ॥ ४४९ ॥ गुल्फौचवृषणस्याधःसीवन्याःपार्श्वयोःक्षिपेत् ॥ पार्श्वेपादौचपाणिभ्यांबध्वाभद्रासनंभवेत् ॥ ४५० ॥ एतेषांयदनेनस्यात्कर्तुंशक्यंसुखेनहि ॥ कृत्वातत्तुप्रकुर्वीतप्राणायामंहियोगवित् ॥ ४५१ ॥ प्राणायामस्तथाप्रत्याहारस्तकौंथधारणा ॥ ध्यानंचैवसमाधिश्चषडंगोयोगउच्यते ॥ ४५२ ॥ यथापर्वतधातूनांदह्यंतेधमतांमलाः ॥ तथेंद्रियकृतादोषादह्यंतेप्राणनिग्रहात् ॥ ४५३ ॥ सव्याहृतिंसप्रणवांगायत्रींशिरसासह ॥ त्रिःपठेदायतप्राणःप्राणायामःसउच्यते ॥ त्रिविधःसतुविज्ञेयोरेचपूरककुंभकैः ॥ ४५४ ॥

तेत्यर्थः ॥ ४५१ ॥ अत्रश्रुतौयोगस्यांतरंगतयाविवक्षितानिषट्साधनान्याह प्राणायामइति स्पष्टम् ॥ ४५२ ॥ तत्रप्राणायामंसपरिकरंपंचभिर्वर्णयन्नादौफलंदर्शयति यथेति यथाग्निसंयोगरूपंधमनंलोहादिधातूनांशोधकंतथाप्राणायामोबाह्यांतरिंद्रियाणांशोधकइत्यर्थः ॥ ४५३ ॥ शोधकप्राणायामस्यमंत्रमाह सव्याहृतिमिति आदौसप्रणवाभिःसप्तव्याहृतिभिःसहितांप्रणवेनसंयुक्तांगायत्रींत्रिपदांतस्याःशिरश्चोमापइत्यादिकं तथाचप्रणवव्याहृतिशिरोयुक्तगायत्र्यास्त्रिरावृत्तौषडशीत्यधिकशतसंख्यान्यक्षराणिभवंति द्वितीयव्याहृतेःसुवरित्याकारत्वात् यतिभिस्तुतावंतःप्रणवाजप्याइतिनिर्णीतमन्यत्र त्रिविधेप्राणायामेप्रत्येकंत्रिवारंपठेत् सप्राणायामउक्तफलकइत्यर्थः अंत्येसप्रणवंत्रैविध्यंस्फुटयति त्रिविधइति भेदैरितिशेषः रेचोरेचकः ॥ ४५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेचकादीनांलक्षणानियथाश्रुतिदर्शयति उत्क्षिप्येतित्रिभिः वायुंशारीरमुत्क्षिप्यआधारचक्रात्कुण्डलिनीमार्गेणऊर्ध्वंनीत्वाआकाशंशरीरबाह्यंनभोभागमपिशून्यं अस्यैवविवरणंनिरात्मकमिति निःस्वरूपमिवकृत्वाप्राणवायुंबहिर्देशेकारणलीनमिवकृत्वेतियावत् शून्यभावेन नीत्वा॥४५५॥वक्रेणेति यथाकमलनालद्वारामुखेनानायासेनजलमाकृष्यतेतथाबाह्यवायोराकर्षणेसतिपूरकोभवतीति॥४५६॥ गात्राणीति गात्रकंपाभावेसतियदाएवंविधंभावंप्राणस्यावस्थाविशेषंयुंजीतकुर्वीत एवंकथं नोच्छ्वसेत्प्राणस्यबहिर्गतिनिरुंध्यात् तथाननिःश्वसेत्अंतर्गतिनिरुंध्यात् प्राणंतप्तोपलनिक्षिप्तजलबिंदुवद्विलीनंकुर्यादितियावत् इत्थंकृतेसतिकुंभकोभवतीत्यर्थः ॥४५७॥ प्रत्याहारंलक्षयतिशब्दादीति शब्दस्पर्शादयःपंचविषयास्तदुपलक्षितानींद्रियाणीतियावत् तानितस्थेरकंमनश्चातिचंचलंप्रसिद्धं तत्रसर्वत्रनिर्विशेषात्मत

उत्क्षिप्यवायुमाकाशंशून्यंकृत्वानिरात्मकं ॥ शून्यभावेनयुंजीतरेचकस्येतिलक्षणं ॥ ४५५ ॥ वक्रेणोत्पलनालेनतोयमाकर्षयेद्यथा ॥ एवंवायुर्ग्रहीतव्यःपूरकस्येतिलक्षणं ॥ ४५६ ॥ गात्राणिचालयेन्नैवनोच्छ्वसेन्नचनिःश्वसेत् ॥ एवंभावंनियुंजीतकुंभकस्येतिलक्षणं॥ ४५७॥ शब्दादिविषयाःपंचमनश्चैवातिचंचलं॥ मनसस्तैरयोगोयःप्रत्याहारःसईरितः॥ आगमस्याविरोधेनव्यूहनंतर्कउच्यते॥ ४५८ ॥ मनःसंकल्परहितंसंक्षिप्यात्मनिबुद्धिमान् ॥ धारयेन्निश्चलंतत्रधारणासाप्रकीर्तिता॥ ४५९ ॥

त्वानुसंधानबलेनतैरिंद्रियैःसहमनसोयोऽयोगःप्रवृत्त्यनुकूलव्यापारवर्जनरूपः मनोनिरोधेनेंद्रियाणामप्रवृत्तिरितियावत् तद्रूपःप्रत्याहार इत्यर्थः आदित्याद्रश्मीनामिवदृश्यानामखंडचिदात्मनासहाभेददर्शनेनकरणोपसंहारात्मकत्वंप्रत्याहारस्ययाज्ञवल्क्येनाप्युक्तं यद्यत्पश्यतितत्सर्वंपश्येदात्मानमात्मनि प्रत्याहारःसचप्रोक्तोयोगविद्भिर्महात्मभिरिति तृतीयंतर्कंलक्षयति आगमस्येति वेदबाह्यमतानुसरणंपरित्यध्येयस्यज्ञेयस्यवातत्त्वस्यविशेषेणवेदतात्पर्यविषयत्वरूपेणयदूहनंचिंतनंतत्तर्कइत्युच्यतेइत्यर्थः ॥४५८॥ धारणादित्रयंलक्षयति मनइतित्रिभिः चौरवदनवेक्षितंसन्मनःसंकल्पलक्षणमनर्थंकरोतीतिविज्ञायतन्मनोऽपेक्षणबलेनसंकल्परहितंयथाभवतितथाआत्मनिमुख्येसत्यादिलक्षणेगौणेबुद्धिप्राणादिरूपेवासंक्षिप्यतदाकारंकृत्वानिश्चलंधारयेदवस्थापयेदेतद्धारणालक्षणमित्यर्थः ॥ ४५९ ॥ ॥३१॥

१ अत्रग्रंथस्त्रुटितइतिभाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धारणेति यत्रधारणाकृतातत्रविषयेतुल्यानांसमानाकाराणांबोधानांवृत्तीनांयःसंतत्याधारारूपेणसंभवः कीदृशः नैरंतर्यवशादन्येनविजातीयेनबोधेनागृहीतःअस्पृष्टः एतद्रूपंध्यानंभवतीत्यर्थः ॥४६०॥ ध्यात्रिति यत्रयस्यामवस्थायांसमभावात्समंब्रह्मतस्यभावःस्वभावआनंदस्तमादायध्यातृध्यानादिकंद्वैतजातंनलभ्यतेअनाद्रियतइतियावत् तदुक्तंगीतासु यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततइति अथवायथाशुद्धस्फटिकोजलेक्षिप्तस्तत्साम्यापत्त्यापृथङ्नलभ्यतेतथाचित्तस्यध्येयसाम्यापत्तेर्हेतोर्यत्रध्यात्रादिविभागोनज्ञायतेसावस्था

धारणाविषयेतुल्यबोधसंततिसंभवः॥ नैरंतर्यादन्यबोधागृहीतोध्यानमीरितम्॥ ४६० ॥ ध्यातृध्यानादिकं यत्रसमभावान्नलभ्यते॥ ससमाधिरितिप्रोक्तःपंडितैरात्मवेदिभिः॥ ४६१ ॥ भयंक्रोधमथालस्यमतिस्वप्नातिजागरं॥ अत्याहारमनाहारंनित्यंयोगीविवर्जयेत्॥ ४६२ ॥ प्राणायामक्रमंचेमंकथयंतिमनीषिणः॥ नासिकापुटमंगुल्यापिधायैकेनमारुतम्॥ आकृष्यधारयेद्वायुंमुंचेद्वापिशनैःशनैः॥ ४६३॥

समाधिरित्युक्तइत्यर्थः ॥ ४६१ ॥ योगिनोऽपथ्यवद्वर्ज्यान्याह भयमिति अतिस्वप्नमतिनिद्रां अतिजागरंअतिशयितंजागरणं अत्याहारंद्वौभागौपूरयेदन्नैरित्युक्तमर्यादामतिक्रांतंभोजनं अनाहारमुपवासम् ॥४६२ ॥ प्राणायामेति तत्रप्रथमप्रवृत्तंयोगिनंप्रतिइमंप्राणायामस्यक्रमंप्रथममनुष्ठेयंप्रकारमुपदिशंति इमंकं नासिकापुटंदक्षिणंप्रथममंगुल्याअंगुष्ठेनपिधायएकेनअपरेणवामेननासापुटेनवायुमाकृष्यांतर्धारयित्वादक्षिणपुटेनशनैःशनैर्मुंचेत् एवंवामपुटंपिधायदक्षिणेनाकृष्यवामेनमुंचेदिति एतेननासिकापुटेत्यादिमंत्रस्यपादत्रयंव्याख्यातम् ॥ ४६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथचतुर्थपादस्यौदर्याग्निनातादात्म्येनसहदृष्टंशब्दंप्रणवमेवावर्त्तयेदित्यर्थकस्यार्थमाह प्राणायाममिति अविचक्षणोयोगसिद्धांतेष्वकुशलोपिप्रणवमंत्रेणषोडशादिवारंजप्तेनप्राणायामंपूरकादिरूपंकुर्यादिति कीदृशं शनैःशनैर्याएकादिसंख्यावच्छिन्नायामात्रायावृद्धिस्तयोपलक्षितं मात्रानामपरिमाणं मात्राकर्णविभूषणेअक्षरावयववृत्तेमानेचाऽल्पेपरिच्छदइतिविश्वकोशात् तच्चमानंतत्रतत्रनानाविधमुक्तंतथाहि क्वचिद्द्वादशावृत्तनिमेषादिरूपं तदुक्तंमार्कण्डेयपुराणे निमेषोन्मेषणेमात्रातालोलघ्वक्षरंतथा प्राणायामस्यसंख्यार्थंस्मृतोद्वादशमात्रिकइति द्वादशमात्रिकोद्वादशगुणितोनिमेषःतालःकरतलशब्दः लघ्वक्षरोच्चारणंवा एतेपदार्थाःप्राणायामस्यसंख्यापरिच्छेदस्तदर्थत्वेनमात्रेत्युक्ताइतितदर्थः अथवापूरकादिषुयाप्रणवस्यषोडशादिवारावृत्तिःसैवमात्रापदेनोक्ता वसिष्ठसंहितायांपूरकादौषोडशमात्रयाचतुष्षष्टिमात्रयाद्वात्रिंशन्मात्रयेतिप्रयोगात् अथवायोगियाज्ञवल्क्योक्तरूपा अंगुलिमोक्षत्रितयंजानोःपरिमार्ज्जनंवापि तालत्रयमपितज्ज्ञामात्रासंज्ञंप्रशंसंतीति अंगुलिमोक्षश्छोटिकेतिप्रसिद्धः जानोःपरिमार्जनंहस्तस्यतदुपरिपरिवर्त्तनं तत्रकुंभकेप्रणवसंख्या

प्राणायामंप्रणवतःकुर्याद्वाप्यविचक्षणः॥ एकद्वित्रिचतुःपंचमात्रावृद्ध्याशनैःशनैः ॥ ४६४॥ खानिलानलवार्भूमीनामधीशत्वमीरितं ॥एकमात्रादिकेत्वस्मिन्प्राणायामेविचक्षणैः॥ ४६५ ॥

रूपमात्रायाअवधिरपिदर्शितः प्रातर्मध्यंदिनेसायमर्धरात्रेचकुंभकान् शनैरशीतिपर्यंतंचतुर्वारंसमभ्यसेदिति मांडूक्येप्रश्नेचप्रणवस्यावयवाअकारादयोऽर्द्धमात्रांताश्चत्वारोमात्रात्वेनोक्ताः नादबिंदौतुतासामकारादिलक्षणानांमात्राणांप्रत्येकमुदात्तादिनात्र्यवयवकत्वमभिप्रेत्यतासांद्वादशभेदाउक्ताइतितथापिप्रकृतेग्रंथकृताप्रणवस्यपूरकादौषोडशादिसंख्यस्यप्रत्येकोच्चारणेयस्तालत्रयावच्छिन्नःकालःसोत्रमात्रापदेनविवक्षितस्तस्यवृद्धिर्द्वैगुण्यत्रैगुण्यादिरूपा यद्यपिसांप्रदायिकास्त्रिमात्रंप्रणवमुच्चारयंतितथाप्युच्चारणविशेषात्तस्यपंचमात्रत्वमपिसंभवतीत्यर्थिकायास्तदुक्तेर्दीपिकायांदृश्यमानत्वादितिबोध्यं ॥ ४६४ ॥ एवमभ्यासकौशलेसतिपार्थिवःपंचमात्राणीतिमंत्रोक्तंपंचभूतवशीकारहेतुंयोगंकुर्यादितिदर्शयति खानिलेतिद्वाभ्यां अस्मिन्प्रणवमंत्रकेप्राणायामेएकांमात्रामनुसंधायानुष्ठितेसत्याकाशतत्त्वस्याधीशत्वंआधिपत्यंयोगिनोभवति मात्राद्वयानुसंधानेवायुतत्त्वस्य तासांत्रयानुसंधानेतेजस्तत्त्वस्य चतुष्टयानुसंधानेजलतत्त्वस्य पंचकानुसंधानेतुभूमितत्त्वस्यतदित्यर्थः कीदृशमधीशत्वं विचक्षणैरभ्यासकुशलैर्लभ्यमितिशेषः तथाचप्राणायामाभ्यासशैथिल्येभूतजयोयोगंनकुर्यादितिभावः ॥ ४६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तासुप्रणवमात्रासुसंख्यानियामकोध्येयतत्त्वधर्मारोपोपिकर्त्तव्यइत्याह प्रणवैरिति व्युत्क्रमोऽभ्यासआहार्यारोपरूपस्तंप्रणवैःसहविधायचिंत्यमानाःएताःशब्दादिविषयरूपामात्रास्तन्मात्राआकाशादिक्रमेणएकादिसंख्याकाअभ्यासस्यनूतनप्रयत्नस्योपयोगिन्योद्धारविधयाकथिताः एतासांचिंतनस्यफलरूपोऽभ्यासस्तुनिर्विशेषब्रह्मारोपगोचरोयोऽर्द्धमात्रात्मकःप्रणवस्तद्रूपएवेत्यर्थः तथाचपृथिवीतत्त्वधारणायांचिंत्यमानत्वात्पार्थिवःप्रणवःपृथिवीनिष्ठगंधादिपंचतन्मात्राभिस्तादात्म्यापन्नोध्येयः जलधारणायांचतसृभिर्मात्राभिस्तादा

प्रणवैर्व्युत्क्रमादेतामात्राअभ्यासहेतवः॥कथितामात्रयाहीनेपरोभ्यासःप्रकीर्तितः॥४६६॥प्राणादींश्चिंतयेद्वायंप्राणायामउपस्थिते॥ एवंप्रकारतोधर्माश्चित्तनैश्चल्यहेतवः॥४६७॥

त्म्यापन्नः एवंतैजस्यांतिसृभिर्वायवीयायांद्वाभ्यामाकाशीयायामेकयाशब्दरूपयातथेति एवंविधाभ्यासेनचित्तस्थैर्येसतिब्रह्मरूपार्द्धमात्रात्मकप्रणवचिंतनेपरंयत्नंकुर्यादितिमंत्रार्थः॥ ४६६ ॥ वक्ष्यमाणव्यापारादिविशिष्टानांप्राणापानादीनांध्यानमपिचित्तशुद्धिद्वारायोगोपकारकमित्याह प्राणादीनिति अथवाप्राणायामेउपस्थितेकर्तव्यतयोपक्रांतेसतिप्राणादीन्ध्यायेत् ननुकःप्राणादिचिंतनस्योपयोगइत्यतआह एवमिति एवंप्रकाराःप्राणचिंतनसदृशाधर्माश्चित्तस्याशुद्धिपरिहारद्वारानैश्चल्यप्रयोजकाभवंतीत्यर्थः॥ ४६७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशीतिःषट्शतंचेत्यादिमंत्रस्यहंसोपनिषदनुसारिण्यायोजनयासिद्धमर्थंदर्शयति व्यापाराइति तेषांप्राणादीनांप्रत्येकस्ययेव्यापारास्तेश्वासोच्छ्वासादिकंकर्मप्राणस्यैतत्प्रकीर्तितमित्यादिनागर्भोपनिषद्व्याख्यानेकथिताइतिपुनर्नवक्तव्याः अथप्रकृतेतेषांसमस्तानामेकोयोव्यापारःसउच्यतेइत्यर्थः देहस्यांतःषट्त्रिंशदधिकसहस्रसंख्याकानाड्योभवंति शतंचैकेत्यादिश्रुत्युक्तानांशतनाडीनांप्रत्येकंदशभेदसंकलनेसहस्रभावस्यशताधिकायाएकस्याइडापिंगलासुषुम्नारूपभेदानांप्रत्येकंद्वादशांगुलप्राणावच्छेदकत्वेनषट्त्रिंशत्संख्यायास्तावदुपपत्तिरिति तदुक्तं षट्त्रिंशदंगुलोहंसःप्रयाणंकुरुतेबहिरिति तासुसर्वासुनाडीषुचरतांपंचानांप्राणापानव्यानोदानसमानानांहंसमंत्ररूपएकोव्यापारः अस्यमंत्रस्यहकारादिपंचावयवकस्यसंख्यायद्यपिषट्शताधिकैकविंशतिसहस्ररूपाप्रसिद्धातथाप्यौपाधिकभेदेनप्रक्रांतश्रुत्युक्तासंख्याभवति तथाहि एतन्मंत्ररूपव्यापारशालिनांप्राणादीनांसंबंधिन्यापंचसंख्ययाएकविंशतिसहस्रगुणनेपंचसहस्राधिकंलक्षंभवति तयापंचसंख्ययाषट्शतगुणनेत्रीणिसहस्राणिभवंति संकलनेऽष्टसहस्राधिकंलक्षमिति तथानाडीनांसंख्ययाषट्त्रिंशदधि

व्यापाराःकथितास्तेषामेकैकस्यवपुष्यथ ॥ अंतःसहस्रनाडीषुषट्त्रिंशदधिकंतथा ॥ ४६८ ॥ हकारश्चमकारश्चअकारःसविसर्गकौ ॥ पंचानांहंसमंत्रेस्मिन्लक्षंसाष्टसहस्रकम् ॥ ४६९ ॥ त्रिंशदंगुलमानेनगुदादागलमांतरं ॥ सुषिरंसर्ववायूनामेकतांप्रतिकारणं ॥ ४७० ॥ हंसमंत्रस्ततःसर्ववायुव्यापारईरितः ॥ प्राणस्तत्रप्रधानंस्यादन्येस्युरुपसर्जनं ॥ ४७१ ॥

कसहस्ररूपयातन्निष्ठप्राणादीनांपंचसंख्यायागुणनेपंचसहस्राणिअशीत्यधिकंशतंचभवति सर्वसंकलनेलक्षंत्रयोदशसहस्राणिअशीत्यधिकंशतंचभवतीत्याशयः ॥ ४६८॥४६९ ॥ त्रिंशत्पर्वांगुलइतिमंत्रस्यापित्रिंशदंगुलिमितःप्राणस्यदेशोदेहस्यांतरस्तियत्रस्थितःप्राणोहंसमंत्रारंभरूपांप्रतिष्ठांगतोभवति एतन्मंत्रारंभेणपरमात्मसूचनरूपोत्कर्षादेवसएषबाह्योनात्मभूतोपिप्राणःप्राणपदेनोक्तः अस्यगोचरआश्रयस्तुसपरमात्मैवप्राणस्यप्राणमितिश्रुतेरितियोजनयासिद्धमर्थमाह त्रिंशदंगुलेतिद्वाभ्यां गुदमारभ्यगलपर्यंतमांतरंछिद्रंमीवायामुन्नतायांकृतायांत्रिंशदंगुलरूपमानावच्छिन्नंप्रसिद्धं तच्चसर्वेषांप्राणादिभेदभिन्नानामांतरवायूनांयाएकताएककार्यारंभकतातस्याःकारणंप्रयोजकमित्यर्थः ॥ ४७० ॥ हंसेति ततउक्तसुषिरस्यप्राणानामेकव्यापारप्रयोजकत्वाद्धंसमंत्रःसर्वेषांवायूनांव्यापारभूतःतत्रव्यापारेप्रधानत्वात्मकप्रकर्षान्नासादिसंचारीवायुःप्राणइत्युक्तः इतरेऽपानादयस्तुउपसर्जनत्वान्नप्राणपदेनाभिधानार्हाइत्यर्थः ॥ ४७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणादीनांस्थानानिरूपाणिचयथाश्रुतिदर्शयति प्राणइतिचतुर्भिः पंचानांप्राणानांमध्येप्रथमस्यप्राणस्यहृदयंस्थानं एवमग्रेपि॥ ४७२॥ प्राणादीनांरूपाणिदर्शयन्नुत्तरोत्तरस्यपूर्वपूर्वाधीनत्वमाह रक्तेतिद्वाभ्यां प्राणस्यरूपंरक्तमणिसमंध्येयम् तस्यप्राणस्यमध्येस्थितस्तद धीनइतियावत् तथाभूतोऽपानइंद्रगोपसमवर्णोध्येयस्तस्यापानस्यपूर्ववन्मध्येस्थितःसमानःक्षीरादिवत्स्निग्धश्वेतवर्णोध्येयः उदानस्तु ईषत्पांडुरोध्येयोव्यानोवन्हिशिखासमोध्येयइतिद्वयोरर्थः ॥ ४७३ ॥ ४७४ ॥ तत्रतत्रप्राणनयनोपायप्रतिपादकस्ययेनासावित्य स्यार्थमाह मनइति ज्ञानशक्तिक्रियाशक्त्योःसहचारित्वंसहह्येतेसमुत्क्रामतः सहतिष्ठतइतिकौषीतकिश्रुतौप्रसिद्धं एवंसतिमनोविज्ञा नशक्तिरूपंयत्रस्थानेमूलाधारादौतिष्ठतितत्रैवप्राणस्तिष्ठत्यतइमंप्राणस्यमनःसाहचर्यरूपंस्वभावंविज्ञाययोगीतमेवमार्गंध्यायेद्येनदेहा

प्राणआद्योहृदिस्थानेत्वपानस्तुपुनर्गुदे॥ समानोनाभिदेशेस्यादुदानःकंठमाश्रितः॥ व्यानःसर्वशरीरेषुत्वे वंसर्वेव्यवस्थिताः॥ ४७२॥ रक्तवर्णमणिप्रख्यःप्राणोवायुःप्रकीर्तितः॥ अपानस्तस्यमध्येस्यादिंद्रगोपस मप्रभः ॥ ४७३ ॥ समानस्तस्यमध्येस्याद्गोक्षीरस्फटिकप्रभः ॥ आपांडुरउदानश्चव्यानोत्व्यर्चिःसमप्रभः ॥ ४७४॥ मनोयत्रस्थितंपुंसःप्राणस्तत्रप्रधावति ॥ अतस्तंचिंतयेन्नित्यंयोमार्गोदेहनिर्गमे ॥ ४७५॥ पा योरुपरिनाभिःस्यान्नाभेरपिहृदंबुजं॥ हृदयंद्वारमुद्दिष्टंसुषुम्नामार्गमागतं॥ ४७६ ॥ वायोर्मार्गःसविज्ञेयो मोक्षस्यापिमहात्मनः॥ योगतोदशमद्वारंसुषुम्नाविवराभिदं॥ ४७७॥

न्निर्गम्यब्रह्मलोकंगच्छेदित्यर्थः ॥ ४७५ ॥ तमेवमार्गंप्रदर्शयतोहृद्वारमित्यादेर्मंत्रस्यार्थमाह पायोरितित्रिभिः पायोर्मूलाधारादुप रिनाभिचक्रंभवतितस्याप्युपरिहृदयकमलंप्रसिद्धंतच्चहृदयांबुजंद्वारत्वेनउद्दिष्टमुक्तंश्रुतौ यतःसुषुम्नारूपेणमार्गेणसंबद्धं ननुसुषुम्नाक स्यमार्गइत्याकांक्षायामाह वायोरिति सुषुम्नारूपोमार्गोवायोःप्राणस्यसंबंधीभवतितथामहात्मनोयोगिनोमोक्षस्यमोक्षार्थंप्रस्थितस्य मनसोपिसंबंधीभवति कीदृशःससुषुम्नात्मकोमार्गः योदशमद्वारंप्रतिगच्छन्प्रसिद्धः कीदृशंदशमद्वारं विवराभिदंविवरेणचसूर्यमंडलगते नमूर्द्धस्थितचन्द्रमण्डलगतेनबहिस्थच्छिद्रेणाभिदाअभेदोयस्यतत्तथा दशमद्वारेणोत्क्रान्तोहिरविमंडलंभित्वाब्रह्मलोकंगच्छतीतिप्रसिद्धे रितिद्वयोरर्थः एतेनहृद्द्वारंमनसोद्वारभूतंवायोर्द्वारभूतंचसुषुम्नारूपमूर्द्धद्वारमस्तियतोमोक्षद्वारभूतंबिलंदशमद्वारंचन्द्रमंडलरूपंसूर्यमंडल च्छिद्रंचलभ्यतेइतिश्रुतियोजनासूचिता ॥ ४७६ ॥ ४७७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेनमार्गेणगच्छन्नविरक्तोपिब्रह्मलोकेगत्वाविरज्यमुच्यतेसविरागश्चेदत्रोत्क्रमणकालेएवमुच्यतेइत्याह अध्वनानेनेति पूर्वोयत्प्राणादीनां सव्यापाराणांचिंतनमुक्तंतस्यापीदमेवफलंयत्सुषुम्नात्मकेमार्गेप्रवेशइतितृतीयदलार्थः ॥ ४७८ ॥ द्वितीयमंत्रार्थमवतारयति प्राणायाममिति प्रणवेनप्राणायामकरणेमात्राणामकारोकारमकारार्धमात्रात्मकानांतथापादानांक्रमेणतद्वाच्यानांवैश्वानरहिरण्यगर्भेश्वरतुरीयात्मकानामादिपदग्राह्यस्यदेवलोकादितादात्म्यस्यचचिंतनंकुर्यात् अथवाएवंवक्ष्यमाणप्रकारेणद्वितीयमंत्रप्रदर्शितेनप्रणवचिंतनंकुर्यादित्यर्थः ॥ ४७९ ॥ एवंपदोक्तमभिनयति ओंकारइतिद्वाभ्यां प्रणवोरथत्वेनध्येयः अभीष्टलोकगतिसाधनत्वात् विष्णुसंज्ञःपरमात्मांतर्यामित्वेनप्रेरकत्वात्सारथित्वेनध्येयः ब्रह्मलोकःकार्यब्रह्मरूपःशुद्धब्रह्मरूपोवागंतव्यत्वेनध्येयइत्यर्थः ॥ ४८० ॥ तत्रचभगवतोरुद्रस्यध्यानंतु

अध्वनानेनयोगच्छेद्विरक्तोपिमानवः॥ ब्रह्मलोकेविरक्तःसन्मुक्तोभवतिवात्रवा॥ प्राणादिचिंतनादत्रमार्गमेतंततोव्रजेत्॥ ४७८॥ प्राणायामंप्रणवतःकुर्वन्प्रणवचिंतनं ॥ मात्रापादादिभेदेनकुर्वीतैवमथापिवा ॥ ४७९॥ ओंकारोत्ररथःस्वस्यपरमात्माथसारथिः ॥ विष्णुस्तेनसगंतव्योब्रह्मलोकःपरोथवा ॥ ४८० ॥ रुद्रंसंचिंतयंस्तद्वत्पार्वतीशंसनातनं॥ अहमस्मीतिचध्यानाद्विघ्नैर्नैवाभिभूयते॥ ४८१ ॥ प्राणायामेषुवायोःस्यात्सूक्ष्ममाकर्षणंत्विदं ॥ पदांगुष्ठाग्रतःस्थूलमुक्तमत्रगुदाग्रतः ॥ ४८२ ॥

तरांविघ्नतूलप्रभंजनभूतमित्याह रुद्रमिति तच्चरुद्रध्यानमभेदेनकार्यमितितृतीयपादेनोक्तम् ॥ ४८१ ॥ एतावतापश्चाद्ध्यायेदितिमंत्रस्यप्रथमपादोव्याख्यातस्तत्रपूर्वोक्तपादेनरथादिभावस्यविवक्षितत्वात् अथद्वितीयपादेमंत्रपदेनप्रणवउच्यतेक्रमपदेनमंत्रोच्चारणप्रणवगोचरवन्ह्यभेदानुसंधानयोरनुपूर्वीकथितेत्यभिसंधायोत्तरार्धेस्थूलातिस्थूलसंज्ञायांमात्रायांप्राणाकर्षणमर्यादायामभ्यस्यमानायांनाभेरूर्ध्वमेववायोराकर्षणस्योपक्रमःप्रारंभःकर्त्तव्यइत्यर्थंदर्शयन्प्रतियोगिनिरूपणपूर्वकंस्थूलातिस्थूलमात्रामभिनयति प्राणायामेष्विति द्वाभ्यां प्राणायामकालेपादांगुष्ठाग्रमारभ्यवायोराकर्षणंसूक्ष्मंदुष्करत्वात् गुदाग्रान्मूलाधारादारभ्यतदाकर्षणंस्थूलंतदपेक्षयासुकरत्वात् नाभिचक्रमारभ्यतदाकर्षणंस्थूलातिस्थूलंभवतिसर्वैःसुकरत्वात् तदनुष्ठातॄणांबहुशोदर्शनाच्चेतिद्वयोरर्थः ॥ ४८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथानेनेत्यादिमंत्रद्वयप्रदर्शितंसिद्धिक्रमंदर्शयति अनेनविधिनेतिचतुर्भिः उक्तविधिनायोगाभ्यासंकुर्वतोयोगिनोमासत्रयेपूर्णेदूरस्थानामपिदिव्यविषयाणांज्ञानंजायते चतुर्भिर्मासैस्तुदेवानांदर्शनक्षमोभवति पंचभिर्मासैःसर्वेषुविषयजन्यसुखेषुहेयत्वेनविज्ञानरूपंवैराग्यंभवति षष्ठेमासेतुयोगप्रभावाच्छुद्धहृदयःसन्सर्वकर्माभिमानंपरित्यज्यगुरोःसकृच्छ्रुताद्वेदांतवाक्यादात्मसाक्षात्कारंलभतेततोजीवन्मुक्तोभवतीतिचतुर्णामर्थः ॥ ४८३ ॥ ४८४ ॥ ४८५ ॥ ४८६ ॥ अंधवदित्यादिमंत्रोक्तानिजीवन्मुक्तलक्षणान्याह जीवन्मु

अनेनविधिनासम्यङ्नित्यमभ्यस्यतःक्रमात् ॥ स्वयमुत्पद्यतेज्ञानंदूरेविषयसंभवं ॥ ४८३ ॥ मासैस्त्रिभिस्तथा देवांश्चतुर्भिरवलोकयेत् ॥ पंचभिःसर्वमेवैतत्सुखंदेवादिसंभवं ॥ ४८४ ॥ हेयत्वेनविजानातिषष्ठेयोगप्रसादतः ॥ संन्यस्यसर्वकर्माणिविशुद्धहृदयःपुमान् ॥ ४८५ ॥ गुरुवाक्यात्सकृत्श्रुत्वात्वात्मानंदात्मानमीश्वरं ॥ साक्षात्करोतिमनुजःसंशयादिविवर्जितः ॥ साक्षात्कृतेथतस्मिन्सजीवन्कैवल्यमाप्नुयात् ॥ ४८६ ॥ जीवन्मुक्तोत्ररूपाणिपश्यन्नपिनपश्यति ॥ शृण्वन्नपितथाशब्दान्नशृणोतिकदाचन ॥ शुष्केकाष्ठेस्वदेहेवानभेदमधिगच्छति ॥ ४८७ ॥ अत्रोपायेषुसर्वेषुज्ञातव्यमिदमेवहि ॥ उपेयाधिगतौप्रोक्ताउपायाःपंडितैःसदा ॥ ४८८ ॥ उपेयप्राप्तितोजह्यादुपायंक्लेशकारणं ॥ नावंयथापरेपारेगत्वापांथःपरित्यजेत् ॥ ४८९ ॥ एतत्त्वमृतनादोक्तंकथितंयोगसाधनं ॥ हंसोक्तमिदमद्यत्वंशृणुसम्यङ्मयेरितं ॥ ४९० ॥

क्तइति जीवन्मुक्तःसर्वत्राधिष्ठानात्मतत्त्वंपश्यन्सन्निन्द्रियैरुपस्थापितमपिविषयजातंनपश्यतियतोदेहोपितेनशुष्ककाष्ठवदुपेक्ष्यतेइत्यर्थः ॥ ४८७ ॥ एवंफलसिद्धौनानाशास्त्रप्रतिपादितंसाधनजातंपरित्यजेदित्याकारंप्रथममंत्रार्थमाह अत्रेतिद्वाभ्यां अत्रफलप्राप्तौसत्यांसर्वेषूपायेष्विदंवक्ष्यमाणविधंहेयत्वंज्ञातव्यं तांविधामभिनयति उपेयेति उपेयस्यफलस्याधिगतिःप्राप्तिस्तदर्थमेवोपायाविधीयंते उपेयलाभेतुउपायानांपरित्यागएवयुक्तः यथानदीतीर्णानावंपरित्यजंतएवदृष्टाइतिद्वयोरर्थः ॥ ४८८ ॥ ४८९ ॥ अमृतनादोपनिषदर्थमुपसंहरन्हंसोपनिषदर्थप्रदर्शनंप्रतिजानीते एतत्त्विति ॥ ४९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रवक्ष्यमाणोपयोगायमूलाधारादिचक्राणांस्वरूपाण्यागमप्रसिद्धानिदर्शयति गुदादारभ्येतिनवभिः नेत्रपदेनभ्रूमध्यंलक्ष्यते गुदोपांतदेशादारभ्यभ्रूमध्यंयावत्षट्चक्राणिदेहेप्रोक्तानितेषुप्रथममाधारचक्रंबोध्यंयत्पूर्वंदेहमध्यत्वेनोक्तं कीदृशं दलचतुष्टयवत्अलक्ताभंलाक्षारससमवर्णं पुनःकीदृशं वकारेणआदिपदग्राह्यैःशषसैश्चप्रदक्षिणक्रमेणदलचतुष्टयेवर्त्तमानैर्विराजितं कुंडलिनीरूपायाभुजंग्याः
॥३५॥ पुच्छेनसंवद्धंचेतिद्वयोरर्थः अत्रमूषकवाहनदेवतासंबद्धत्वंवर्णानांसबिंदुकत्वंचबोध्यमेवमग्रेपि ॥ ४९१ ॥ ४९२ ॥ तदुपरिलिंगमूलेप्रजापत्यधिष्ठितस्यस्वाधिष्ठानाख्यचक्रस्यस्वरूपमाह स्वाधिष्ठानमिति यवर्गस्याद्यास्त्रयःपवर्गस्यांत्याश्चत्रयःप्रादक्षिण्येनास्यषट्सुदलेषु

गुदादारभ्यनेत्रांतंचक्रषट्कंवपुःस्थितं ॥ आधारचक्रंदेहस्यमध्येयत्पूर्वमीरितं ॥ ४९१ ॥ चतुर्दलमलक्ताभंवादिवर्णचतुष्टयात् ॥ विराजितंकुण्डलिनीभुजंगीपुच्छसंश्रयं ॥४९२॥ स्वाधिष्ठानंतुतस्यस्यादुपरिष्टादवस्थितं ॥ षड्दलंपीतवर्णंचतेजसांराशिमूर्जितं ॥ यरलाबभमास्तत्रषड्वर्णादलसंस्थिताः ॥ ४९३ ॥ मणिपूरकसंज्ञंस्याच्चक्रंतस्योपरिस्थितं ॥ इंद्रनीलसमंसूर्यचंद्रतेजोविराजितं ॥ ४९४ ॥ डढणैस्तथदैस्तद्वद्धनपैःफैनचान्वितं ॥ वर्णैर्दशदलंतस्यस्यादुपर्यपरंपुनः ॥ ४९५ ॥ चक्रंयद्द्वादशदलमनाहतमितीरितं ॥ वर्णैःकाद्यैश्चठांतैस्तैर्युक्तंद्वादशभिस्तथा ॥ गोक्षीरसदृशंसम्यङ्मनोनयननंदनं ॥ ४९६ ॥ विशुद्धंषोडशदलंकंठदेशेव्यवस्थितं ॥ स्वरैःषोडशभिर्युक्तंचित्रवर्णमुदीरितं ॥ ४९७ ॥

स्थिताः स्फुटमन्यत् ॥४९३॥ तदुपरिनाभौमणिपूरकाख्यंचक्रमिंद्रनीलमणिवर्णमतितेजस्विविष्णुदैवतंडकारमारभ्यफकारांतैर्दशभिर्वर्णैर्विराजितदशदलंभवतीत्याह मणिपूरकेतिद्वाभ्यां द्वितीयस्यचतुर्थःपादोग्रिमान्वयी ॥ ४९४ ॥ ४९५ ॥ तस्योपरिहृदयेऽनाहताख्यंश्वेतवर्णंचक्रंद्वादशदलंरुद्रदैवतंककारादिठकारांतैर्द्वादशवर्णैःप्रादक्षिण्येनविराजितदलंचबोध्यमित्याह चक्रमिति ॥ ४९६ ॥ तदुपरिकंठदे ॥३५॥
शेविशुद्धाख्यंजीवस्थानंचित्रवर्णषोडशदलंचक्रंभवतियस्यदलेषुक्रमेणषोडशस्वराअकाराद्याअःकारांताःप्रतिष्ठिताइत्याह विशुद्धमिति ॥ ४९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रूमध्येआज्ञासंज्ञंद्विदलमीषद्रक्तंपरमात्मस्थानभूतंचक्रंभवतियस्यदलयोःसूर्यचंद्राभयोर्हकारक्षकारौस्थितावित्याह नेत्रेति ॥ ४९८ ॥ सहस्रदलंवर्णयति चंद्रेति अत्रदेहेशिरसियत्सहस्रदलंपद्ममस्ति कीदृशं चंद्रगर्भं चंद्रोऽमृतस्रावीगर्भेयस्यतत्तथा तस्यकर्णिकादशमद्वारंसंवद्धाबोध्या तथातस्यसुहितं भावप्रधानोनिर्देशः तदीयेनामृतेनकृतातृप्तिरितियावत् साषट्सुचक्रेषुबोध्या जीवस्तुतस्यपद्मस्यहंसत्वेनबोध्यःतन्मकरंदतृप्तत्वादिसाधर्म्यात् इतिईरितंप्रोक्तमागमेष्वित्यर्थः ॥ ४९९ ॥ अथार्थक्रमेणप्रकृतोपनिषदर्थसप्तविंशतिश्लोकैर्दर्शयंस्तत्रहंसइत्याकारस्यपुनःपुनःक्रियमाणस्यरुतस्यापिजीवस्यहंसत्वेलिंगत्वं पक्षिनाम्नांप्रायशोरुतानुसारितायाःप्रसिद्धेरितिसूचयन्नाह

नेत्रयुग्मेतुविज्ञेयमारक्तंद्विदलंसदा॥ हक्षवर्णद्वयस्थानंसूर्यसोमद्वयात्मकं ॥ ४९८ ॥ चंद्रगर्भंशिरस्यस्तिसहस्रदलमत्रयत् ॥ पद्मंतस्यहिसंप्रोक्ताशिरोद्वारंतुकर्णिका ॥ चक्रेषुषट्सुसुहितंहंसोजीवइतीरितं॥ ४९९॥ वायुनासहितस्तिष्ठन्हृदयाब्जेपिसर्वदा ॥ जीवोहंसइतिश्वाससहस्राण्येकविंशतिम् ॥ ५०० ॥ मुंचत्यहर्निशंसर्वःसर्वदाषट्शताधिकं ॥ यतस्ततोत्रहंसोयंकथ्यतेवेदवादिभिः ॥ ५०१ ॥ हंसइत्यस्यनाम्नःस्याद्वैयर्थ्यंनयथातथा ॥ कल्पयंत्यस्यतद्रूपंवेदवादरताद्विजाः॥ ५०२॥ अग्नीषोमौहिकथितौपक्षौहंसस्यपंडितैः॥ ओंकारःशिरउद्दिष्टमुरोबिंदुश्चकीर्तितं ॥ ५०३॥

वायुनेतिद्वाभ्यां यतोजीवःसर्वजातीयोहृदयाब्जेअपिशब्दाधारचक्रादिषुवायुनाप्राणेनसहितस्तिष्ठन्सन्हकारेणबहिर्यातिसकारेणाविशेत्पुनरित्युक्तविधयाहंसइतिमंत्रघटितान्षट्शताधिकैकविंशतिसहस्रसंख्यान्श्वासान्मुंचतिसृजतिततोऽयंहंसइत्युक्तइतिद्वयोःसंबंधः ॥५००॥५०१॥ तस्यध्यानमवतारयति हंसइत्यस्येति हंसइतिनाम्नोऽन्वर्थत्वायपक्षिरूपमेनंवैदिकाःप्रवदंतीत्यर्थः॥५०२॥ श्रौतंतद्रूपमभिनयति अग्नीषोमावितित्रिभिः हंसत्वेनकल्पितस्यत्वंपदार्थभूतस्यात्मनोऽग्नीषोमौभोक्तृभोग्यलक्षणौपक्षत्वेनध्येयौ प्रणवस्तुशिरस्त्वेन तथाबिंदुर्मूलशक्तेःक्रियाशक्तिप्रधानपरिणामविशेषः तदुक्तमागमे सातत्त्वभूताचिन्मात्रज्योतिषःसन्निधेस्तथा विचिकीर्षुर्घनीभूताक्वचिदभ्येतिबिंदुतामिति तद्रूपमुरोहृदयंहंसस्यध्येयमित्यर्थः ॥ ५०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिनेत्रस्येवेति यथात्रिनेत्रस्यशंभोर्वदनंसूर्याग्निसोमात्मकनेत्रत्रयशालितथास्यापीत्यर्थः अस्यएकश्चरणोरुद्रमयोऽपरोरुद्राणीमयो ध्येयइत्यर्थः ॥ ५०४ ॥ अस्यपरमहंसपदेनोक्तांतत्पदार्थरूपतामाह एषइति एषयस्त्वंपदार्थरूपउक्तःसोसौपरोक्षप्रभावोहंसःपरमोत्र

ह्मरूपोभवतिवृत्त्यारूढाद्वितीयरूपेणसविलासाज्ञानंहंतीतिहंसइतिव्युत्पत्तेः कीदृशः निरुपाधिकदृष्ट्यानिर्गुणःसोपाधिकदृष्ट्यातुसगुणः तत्रसगुणमस्यरूपंवामभागेऽग्न्यात्मकंदक्षिणभागेसोमात्मकमित्यर्थः पुनःकीदृशः असंख्यातरवितुल्यतेजाः एतंदेहंनखायपर्यंतमभिव्या प्यस्थितइत्यर्थः ॥ ५०५ ॥ अस्मिन्निति तस्यहंसस्यात्रदेहेसर्वत्रव्याप्तस्यापिमनोविशिष्टस्यविशेषतोवृत्तिःकार्यविशेषारंभप्रयोजकः संबंधोहृत्कमलदलरूपस्थानभेदादष्टधाभवति यस्याःप्रोक्तवृत्तेःप्रभावात्स्वप्नजागरणयोःपुण्यबुद्ध्यादीनांकार्याणामुत्पत्तिर्भवतीत्यर्थः

त्रिनेत्रस्येववदनंत्रिनेत्रात्मकमेवतत् ॥ चरणौकथितौरुद्रोरुद्राणीचमहात्मभिः ॥५०४॥ एषोसौपरमोहंसो निर्गुणःसगुणोपिच ॥ वामदक्षिणतोयोयमग्नीषोमात्मकःस्मृतः ॥ भानुकोटिप्रतीकाशोदेहंव्याप्यव्यवस्थितः ॥ ५०५ ॥ अस्मिन्देहेभवेत्तस्यवृत्तिरष्टविधासदा ॥ स्वप्नेजागरणेयस्याःपुण्यबुद्ध्यादिसंभवः ॥ ५०६ ॥ हार्दपद्मंयदेतत्स्यादष्टदिग्दलशोभितं ॥ तस्यपूर्वेदलेस्थित्वापुण्यबुद्धिःप्रजायते ॥ ५०७ ॥ आग्नेयेचतथैव स्युर्निद्रालस्यादयोगुणाः ॥ याम्येक्रौर्यमतिस्तद्वत्पापेनैर्ऋतदिग्गते ॥ ५०८ ॥ क्रीडारतिर्वारुणेस्याद्वायव्ये गमनेरतिः ॥ रतौप्रीतिर्भवेत्सौम्येदानेत्वीशानकोणगे ॥ ५०९ ॥ कर्णिकोपांतगोहंसोहंसोवैराग्यमिच्छति ॥ केसराणियदागच्छेत्तदाजागरणंस्मृतं ॥ ५१० ॥

॥ ५०६ ॥ एतदेवयथाश्रुतिस्फुटयति हार्दमित्यादिना हृत्पद्मस्याष्टदिगवच्छिन्नान्यष्टौपत्राणि तेषुपूर्वदलेस्थितिःपुण्यगोचरबुद्धिप्रयो जिका अग्निकोणगतदलेस्थितिर्निद्रादिप्रयोजिका याम्येदक्षिणेदलेसाक्रौर्यशालिमतेर्नैर्ऋतेतुपापगोचरमतेरितिद्वयोरर्थः ॥ ५०७ ॥ ॥ ५०८ ॥ क्रीडेति क्रीडायांविहारेरतिःप्रीतिःपश्चिमदलेस्थितस्यभवति रतौस्त्रीसंसर्गे सौम्येउत्तरदले स्फुटमन्यत् ॥ ५०९ ॥ कर्णिको पांतेति कर्णिकायाउपांतेषुदलाष्टकांतरालदेशेषुश्रुतौमध्यपदोक्तेष्वयंगतःसन्हंसोहंसोभवतिहंसस्ययत्कर्मक्षीरनीरविभागायमानंसदस द्विवेकरूपंतत्करोतीतियावत् यतस्तत्रगतोवैराग्यंलोकद्वयविषयवैतृष्ण्यरूपंगच्छतीत्यर्थः कर्णिकायाः परितोवर्त्तमानकेसरेषुस्थितस्य जागरावस्थाभवतीत्यर्थः ॥ ५१० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्णिकायामिति कर्णिकायांधत्तूरपुष्पाकारायांयोमंडलाकारोभागस्तत्रस्थितस्यस्वप्नावस्थावासनामयविषयोपलब्धिरूपाभवति यस्तु हृत्पद्मकर्णिकामध्यगतोलोहितोरक्तवर्णोरक्तस्यरुधिरस्यपिंडोस्तितत्रगतस्यहंसस्यसुषुप्त्यवस्थाभवतीत्यर्थः ॥ ५११ ॥ यदातुहृत्पद्मस्या विदुषांपरिच्छेदमहमिहैवास्मिजानानइत्यभिमानरूपंकुर्वतःपरित्यागंब्रह्मास्मीतिपरिपूर्णदृष्टिलक्षणंकरोतितदापूर्वोक्तजाग्रदाद्यवस्थात्र यमपेक्ष्यतुरीयत्वेनाभिधानयोग्याकाचिदवस्थाभवतीत्याह अहंब्रह्मेति ॥ ५१२ ॥ तुरीयातीताख्यांपंचमीमवस्थांस्फुटयंश्चतुर्थ्यास्ततो विशेषमाह चतुर्थ्यांहीति याचतुर्थीअवस्थाप्रोक्तातस्यांहिनिश्चयेनवेयंभवेत्वेत्तुःपृथगुपलभ्येत यतःससमाधितःसविज्ञानस्त्रिपुटीभेद ज्ञानवांस्तथानिर्विज्ञानोविलीनत्रिपुटीभेदश्चभवति तत्रहेतुःसमाधेःसंप्रज्ञातासंप्रज्ञातभेदेनद्वैविध्यमिति तत्रसंप्रज्ञातसमाधिनाब्रह्माकार

कर्णिकायांस्थितोहंसःस्वप्नमेतिनसंशयः ॥ कर्णिकायांहिरक्तस्यपिंडोयोलोहितोस्तिहि ॥ तत्रस्थितस्यसुप्तिःस्याद्धंसस्यपरमात्मनः ॥ ५११ ॥ अहंब्रह्मेतिविज्ञानाद्धार्दपद्मंयदात्यजेत् ॥ चतुर्थीसातदावस्थापूर्वापेक्षाप्रजायते ॥ ५१२ ॥ चतुर्थ्यांहिभवेद्वेद्यमवस्थायांसमाधितः ॥ द्वैविध्यात्ससविज्ञानोनिर्विज्ञानश्चजायते ॥ सविज्ञानस्तुरीयाख्योनिर्विज्ञानःपुमान्स्वयं ॥ ५१३ ॥ विलीयतेयदासर्वोध्यातृध्यानादिलक्षणः ॥ भेदोनादाभिधेनित्येपरब्रह्मणिनिर्द्वये ॥ ५१४ ॥ निर्विज्ञानस्तदासोयंतुरीयातीतलक्षणः ॥ उच्यतेयोविरक्तानांमध्येकस्यापिसंभवेत् ॥ ५१५ ॥

मनोवृत्तिप्रवाहोऽहंकृतिविनासंप्रज्ञातसमाधिःस्याद्ध्यानाभ्यासप्रकर्षतइत्युक्तलक्षणेनयदासविज्ञानोविद्यमानब्रह्माकारवृत्तिकोभवेत्त दातुरीयावस्थउच्यतेयोगीत्यर्थः ॥ ५१३ ॥ यदातुसावृत्तिरपिलीयते उक्तवृत्तेरपिविलयेनासंप्रज्ञाताख्यःसमाधिर्भवतितदानिर्विज्ञानो योगीतुरीयातीतउच्यतइत्याह विलीयतइतिद्वाभ्यां यदात्रिपुटीरूपोभेदोब्रह्मणिविलीयतेतदाविद्वांस्तुरीयातीतउच्यतइत्यन्वयः कीदृशे ब्रह्मणि नादाभिधेनादोभिधायस्यतत्तथातस्मिन् प्रणवस्यहिअकारोकारमकारबिंदुनादाःपंचावयवास्तेष्वाद्यास्त्रयोविश्वतैजसप्राज्ञानां वाचकाअंत्यावर्धमात्रात्मकौब्रह्मणोवाचकौतत्रापिबिंदुःसविशेषब्रह्मणोवाचकोनादस्तुनिर्विशेषस्येतिभावः तुरीयातीतभावस्यदौर्ल भ्यमाह यइति यस्तुरीयातीताख्योभावःसविरक्तानांकस्यापिप्रादुर्भवतीति तदुक्तंगीतासु यततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतइति ॥ ५१४ ॥ ५१५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंवस्तुवृत्तमभिधायाथतुरीयातीतभावप्राप्त्युपायभूतंयोगमभिनयति एवमिति एवमुक्तविधयाऽस्मिन्शरीरेसहचक्रैर्हंसस्वरूपेव्यव स्थितेविज्ञातेसतियोगीहंसंध्यातुरात्मनःस्वरूपंचिंतयेत् नादंवाचकेननादेनाभिन्नंपरमहंसंतुध्येयंकल्पयेत् तस्यनादस्यस्वरूपंचाधारच क्रमारभ्यब्रह्मरंध्रपर्यंतंव्याप्तमतिश्वेतवर्णंचचिंतयेदित्यर्थः ॥ ५१६ ॥ अस्मिन्निति अस्मिन्नादेमनोविनिक्षिप्यतत्परंकृत्वायोगीसर्वतः पादांगुष्ठाद्यमारभ्यवायुंप्रचालयेदाधारचक्रेसमानयेदितियावत् किंकृत्वा पायूपस्थरूपंद्वारद्वयंपदद्वंद्वसंबंधिपार्ष्णिद्वयनिपीडनेनसंको च्यविजितश्रमोजिताभ्यासइत्यर्थः ॥ ५१७ ॥ आधाराद्युत्थापितस्यवायोर्ब्रह्मरंध्रपर्यंतंनयनस्यविधांवर्णितचक्रमार्गेणदर्शयति आधारे

एवंव्यवस्थितेहंसेसचक्रेस्मिन्वपुष्यथ॥ कल्पयेद्व्यापकंहंसंध्येयंनादंतथैवच॥ आधाराद्ब्रह्मरंध्रांतंस्थितंश्वेत तमंसदा ॥ ५१६ ॥ अस्मिन्मनोविनिक्षिप्यवायुंयोगीप्रचालयेत्॥ संकोच्यचगुदद्वारंशिश्नद्वारसमन्वितं॥ पदद्वंद्वेनमेधावीसर्वतोविजितश्रमः॥ ५१७॥ आधारचक्रतोवायुंधीमानुत्थापयेच्छनैः॥ उत्थाप्यचततः पश्चात्स्वाधिष्ठानंसमानयेत्॥ स्वाधिष्ठानस्यकुर्यात्त्रिःपुमानत्रप्रदक्षिणं॥ ५१८॥ मणिपूरकमागच्छेत्ततश्च क्रंततोपिच॥ अनाहतंविनिर्भिद्यविशुद्धंशनकैर्व्रजेत् ॥ विशुद्धादाव्रजेदाज्ञामाज्ञातोब्रह्मरंध्रकं ॥५१९॥ एवंप्रकुर्वतोनित्यंचिंतनाद्धंसनादयोः ॥ ऋष्यादिसहितस्यास्यहंसमंत्रस्यसंजपात्॥ ५२० ॥ कोटिमात्रा त्ततोनादाभ्यासस्यप्रत्ययाइमे ॥ नादादशविधाअंतर्जायंतेवपुषःक्रमात् ॥ ५२१ ॥

तिद्वाभ्यां अत्रवायोरूर्ध्वनयने वायोस्त्रिवारंस्वाधिष्ठानस्यचक्रस्यपरितःप्रदक्षिणंभ्रामणंकुर्यादितितृतीयदलार्थः ॥ ५१८ ॥ मणिपूरक मिति ततःस्वाधिष्ठानान्मणिपूरकंप्राप्यततोमणिपूरकादनाहतविशुद्धाज्ञाख्यचक्रत्रयद्वाराब्रह्मरंध्रंगच्छेदित्यर्थः ॥ ५१९ ॥ एवमि ति उक्तविधयावायुचालनंकुर्वतोयोगिनोंऽतर्वपुषिइमेवक्ष्यमाणरूपानादाःप्रजायंते कुतः हंसनादयोर्ध्यायकत्वध्येयत्वाभ्यांचिंतनात् तथाहंसमंत्रस्यकोटिसंख्याकजपात् कीदृशस्यहंसमंत्रस्य हंसऋषिरव्यक्तगायत्रीछंदःपरमात्मादेवतापरमात्मप्राप्तौविनियोगइत्युक्तैर्ऋ ष्यादिभिर्युक्तस्य कीदृशास्तेनादाः नादाभ्यासस्यनादगोचराभ्यासस्यप्रत्ययाःफलसिद्धौविश्वासप्रयोजकाइतिद्वयोरर्थः ॥ ५२० ॥ ॥३७॥
॥ ५२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशनादानभिनयति चिणीतिद्वाभ्यां प्रथमंचिणीत्याकारकोनादोहृदिप्रादुर्भवति द्वितीयश्चिंणिचिणीत्याकारकः तृतीयोघंटाध्वनिसमः चतुर्थःशंखध्वनिनिभः पंचमोवीणाध्वनिनिभः षष्ठस्तालस्यकांस्यस्यध्वनितुल्यः सप्तमोवेणुध्वनिसमः अष्टमोभेरीध्वनिनिभः नवमोमृदंगध्वनिनिभः दशमोमेघनादाभइतिद्वयोरर्थः ॥ ५२२ ॥ ५२३ ॥ तत्रचरमेविशेषतःप्रणिधानंकर्त्तव्यंतस्यवैराग्यादिप्रयोजकत्वादित्याह मेघेति ॥ ५२४ ॥ तस्याभ्यासस्यवैराग्यादिहेतुतांस्फुटयन्फलवाक्यार्थमाह मेघनादस्यचेति लयंवैराग्येणनिर्विषयत्वं ततश्च संसारप्रयोजकानांसंकल्पादीनांमनोधर्माणांलयः तत्रसंकल्पोनामरमणीयमिदंममस्यादित्यभिलाषः विकल्पःसंशयः ॥ ५२५ ॥ ततश्च

चिणीतिप्रथमोनादोद्वितीयश्चिंणिचिणीतिच ॥ घंटानादस्तृतीयःस्याच्चतुर्थःशंखनादकः ॥ ५२२ ॥ तंत्रीनादःपंचमःस्यात्तालनादस्तथापरः ॥ सप्तमोवेणुनादःस्याद्भेरीनादस्तथाष्टमः ॥ मृदंगनादोनवमोदशमोमेघनादकः ॥ ५२३ ॥ मेघनादःसदाभ्यासाद्वैराग्यज्ञानकारणं ॥ नवनादांस्ततस्त्यक्त्वामेघनादंसमभ्यसेत् ॥ ५२४ ॥ मेघनादस्यचाभ्यासान्मनोलयमुपाव्रजेत् ॥ लीनेमनसिलीयेतेउभेतेपुण्यपातके ॥ संकल्पश्चविकल्पश्चधर्मायेन्येपिमानसाः ॥ ५२५ ॥ एतेषुप्रविलीनेषुस्वात्मनोदुःखहेतुषु ॥ आनंदात्मास्वचिच्छक्त्यासर्वदास्तेस्वभासया ॥ ५२६ ॥ एवंहंसोपनिषदिप्रोक्तोयोगःप्रकीर्तितः ॥ क्षुरिकायांयथाप्रोक्तस्तथावच्मिहितंशृणु ॥ ५२७ ॥ निःशब्देदेशमास्थायतत्रासनमुपाश्रितः ॥ कूर्मोंगानीवसंहृत्यमनोहृदिसहेंद्रियैः ॥ ५२८ ॥

निरर्गलमात्मतत्त्वभानमित्याह एतेष्विति एतेषुसंकल्पादिषुविक्षेपरूपेषुलीनेषुस्वप्रकाशचिद्रूपेणसर्वदाआस्तेआविर्भवतीत्यर्थः ॥ ५२६ ॥ उक्तोपसंहारपूर्वकंक्षुरिकाख्योपनिषदर्थप्रदर्शनंप्रतिजानीते एवमिति क्षुरिकाशस्त्रीतद्वद्द्वंधच्छेदिकायाधारणायाःप्रदर्शकत्वादुपनिषत्क्षुरिकेत्युक्ता ॥ ५२७ ॥ अस्याअर्थंविंशतिश्लोकैःप्रदर्शयन्प्रथमंयोगांगेषुयमनियमौसिद्धवत्कृत्वाआसनाद्यंगप्रदर्शकानांद्वितीयादिश्लोकानामर्थमाह निःशब्दमिति शब्दादिविक्षेपरहितेदेशेआस्थायउषित्वातत्रासनंचैलाजिनकुशोत्तरंविधायतत्रवर्णितपद्मासनादिभिस्तिष्ठेत् ततःसेंद्रियमनसोहृत्पुंडरीकेविषयेभ्यउपसंहारलक्षणंप्रत्याहारंकुर्यादिति ॥ ५२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मात्रेति मात्रासंज्ञैर्द्वादशभिरवयवैर्युक्तेनप्रणवेनशनैःशनैरत्वरयासकलंदेहंबाह्यवायुनापूरयेत् ततःसर्वंद्वारं जातावेकवचनं सर्वद्वाराणि निरुद्ध्यउरोहृदयंतत्प्रभृत्यंगजातंसमुन्नतंसमंकृत्वाअत्रएषुहृदयंकिंचित्समुन्नतंचिबुकस्पर्शिविधायतत्रहृदयेप्राणान्संधारयेत् कीदृशान् नासाद्वारेणैवाभ्यंतरप्रवेशशालिनः एतेनमुखेनवायोराकर्षणंनिषिद्धमितिद्वयोरर्थः मात्राद्वादशकंतुनादबिंदावुक्तं तथाहि अकारोकार मकारार्द्धमात्राःप्रत्येकमुदात्तादिभेदेनद्वादशभवंतितासांद्वादशनामानिघोषिण्यादीनितच्चिंतनफलानिभूमीश्वरत्वादीनिचतत्रैवोक्तान्यत्रे दमपरंसांप्रदायिकशासनंबोध्यं पूरकेयावंतःप्रणवाअष्टौद्वादशषोडशवाततश्चतुर्गुणाःकुंभकेजप्याद्विगुणास्तुरेचकेइति ॥ ५२९॥५३० ॥ एवंपूरककुंभकावुक्तावथरेचकमाह भूत्वेति तत्रदेहमध्येआयतप्राणोनिरुद्धप्राणोभूत्वाअथसर्वैरेवद्वारैःसमुत्सृजेद्रेचयेदिति श्रुतौतुप्राण

मात्राद्वादशयुक्तेनप्रणवेनशनैःशनैः ॥ पूरयेत्सकलंदेहंसर्वद्वारंनिरुद्ध्यच ॥ ५२९ ॥ उरोमुखकटिग्रीवंकिंचिद्वत्रसमुन्नतं ॥ प्राणान्संधारयेत्तस्मिन्नासाभ्यंतरचारिणः ॥ ५३० ॥ भूत्वातत्रायतप्राणःसर्वैरेवसमुच्छ्वसेत् ॥ स्थिरंवायुंदृढंकृत्वापादांगुष्ठेसमाहितः ॥ ध्यात्वाततःप्रकुर्वीतत्स्येवंमात्रांजपन्सदा ॥ ५३१ ॥ द्वे गुल्फयोःप्रकुर्वीततिस्रस्तिस्रस्तुजंघयोः ॥ जानुनोर्द्वेतथाचोर्ध्वेतिस्रस्तिस्रःप्रकीर्तिताः ॥ गुदेलिंगेचमात्रास्तुवायोःस्थापनकर्मणि ॥ ५३२ ॥

इत्यनंतरंतिष्ठतीतिशेषोबोध्यः कुंभकोद्विविधः पूरकादिसापेक्षोनिरपेक्षश्च तत्राद्यउक्तः द्वितीयंदर्शयन्वायोःस्थानविशेषेषुनिरोधंधारणाप्रत्याहारशब्दाभ्यांयोगियाज्ञवल्क्यादिभिर्व्यवहृतंदर्शयति स्थिरमित्यादिना दृढमित्यस्यविवरणंस्थिरमिति तथाचवायुंस्थिरंपूरकमनपेक्ष्यापिस्थितियोग्यंप्रथमंपादांगुष्ठयोर्ध्यानबलेनकृत्वासावधानःसंस्ततएवंवक्ष्यमाणविधयाधारणाःप्रकुर्वीत किंकुर्वन् मात्रांप्रणवाष्टकादिरूपांजपन्नित्यर्थः ॥ ५३१ ॥ तत्रधारणासंख्यांसूचयन्मात्रासंख्यामाह द्वेइति गुल्फयोर्वामदक्षिणयोर्वायोःस्थापनकर्मणि द्वेमात्रेउक्तरूपेप्रकुर्वीतजपेत् जंघयोःप्रत्येकंतिस्रस्तिस्रोमात्राजप्तव्यास्तत्रादिमध्यांतभागेषुधारणात्रयस्यकर्त्तव्यत्वात् जानुनोस्तथातदूर्ध्वंऊर्वोरितियावत्तेद्वेकुर्वीत गुदलिंगयोस्तुप्रत्येकंतिस्रस्तिस्रस्ताइत्यर्थः ॥ ५३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वायोरिति तत्रगुदलिंगयोर्मध्येवायोरायतनभूतोविशिष्टस्थलभूतःकंदोस्ति कीदृशः नाभिदेशेऊर्ध्वभागेनसंबद्धःतथासर्वेषांपृष्ठवंशस्यपृष्ठगतदीर्घास्थ्नःसुषुम्नायादशमद्वारगतौमार्गभूतस्यसमीपस्थः तंकंदंयोगीप्राणरूपेणसमागच्छेत् कीदृशः मात्राजयेनवशीकृतानिलः अथ तत्रकंदेवर्णितनामिकाभिर्दशनाडीभिर्वेष्टितासुषुम्नाऽन्वेष्येत्याह तत्रेति ॥ ५३३॥५३४ ॥ अत्रेति अत्रकंदेरक्तादिवर्णाःसूक्ष्माःलघ्व्यश्चान्यावह्व्योनाड्यःसंतिताःसर्वाःपरित्याज्याएकासुषुम्नाशुक्लवर्णासमाश्रयणीयेत्यर्थः ॥ ५३५ ॥ एतद्दृष्टांतेनस्फुटयति ऊर्णेति यथाऊर्णनाभिःस्वात्मनःप्रियेतंतौसंचरन्भवतिइतरानप्रियांस्तंतून्परित्यजतितथाइतरानाडीःपरित्यज्यकंदगतोयोगीसुषुम्नायांप्राणान्संचारयेदित्य

वायोरायतनंकंदोनाभिदेशेसमाश्रितः॥ पृष्ठवंशसमीपस्थःसर्वेषामिहदेहिनाम्॥ ५३३ ॥ समाव्रजेत्शनैर्धीमान्मात्रातोविजितानिलः ॥ तत्रनाडीसुषुम्नास्तिनाडीभिर्दशभिर्वृता ॥ ५३४ ॥ अत्रपीताश्चरक्ताश्चकृष्णास्ताघाविलोहिताः॥अतिसूक्ष्माश्चतन्व्यश्चविनात्याज्याःसुषुम्नया॥कंदमागत्यमेधावीसुषुम्नांचसमाश्रयेत्॥ ५३५॥ ऊर्णनाभिर्यथातंतौसंचरन्स्वात्मनःप्रिये ॥ परित्यज्येतरांस्तंतूंस्तत्रजालेस्थितानपि॥ एवंसंचारयेत्प्राणान्सुषुम्नायांहिकंदगः ॥ ५३६ ॥ ततोरक्तोत्पलाभासंहृदयेविततंमहत् ॥ अत्यल्पंपुंडरीकंतद्वेदांतेषु निगद्यते ॥ ५३७ ॥ तद्भित्वाकंठमायातिततोमूर्द्धानमाव्रजेत् ॥ आधारकंदतोनाडीमाशिरःपूरयेद्धितं ॥५३८॥ खड्गेनमनसावायुलोहगात्रेणयोगवित्॥ धीशाणकषितेनात्रच्छिंद्यान्मर्माणिदेहिनां॥ ५३९ ॥

र्थः ॥ ५३६ ॥ ततोदहराख्यंहृत्पुंडरीकमागच्छेदित्याह ततइति स्पष्टं ॥ ५३७ ॥ तद्भित्त्वेति तद्धृदयचक्रंभित्त्वाकंठगतंविशुद्धंप्राप्यतदपिभित्त्वाआज्ञाचक्रभेदनद्वारामूर्द्धगतंसहस्रारंगच्छेदित्यर्थः ततआधारगतचक्रमारभ्यआशिरःशिरोगतंसहस्रारंयावत्तांसुषुम्नाख्यांनाडींपूरयेदनुसंततांध्यायेदित्यर्थः ॥ ५३८ ॥ एवंषट्चक्रभेदनेकृतेसतितदनंतरंकर्त्तव्यमाह खड्गेनेति मनोरूपेणखड्गेनदीर्घक्षुरेणदेहाभिमानिनांबंधप्रयोजकानिमर्माणिच्छिंद्यात्शास्त्रदृष्ट्याबाधितानिकुर्यात् कीदृशेनमनोरूपेणखड्गेन प्राणरूपलोहमयंगात्रंशरीरंयस्यसतथातेन पुनःकीदृशेन धीःपरापरब्रह्मविद्यातद्रूपशाणतःकषितेननिर्मलीकृतेनेत्यर्थः ॥ ५३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादस्योपरीति पादस्य चरणतलस्योपरियन्मर्मअंगुष्ठगुल्फादिकंतच्छ्रुतौरूपपदेनोक्तंतच्छिद्यात् केन मनोधारास्थानीयंयस्यतथाभूतेनव शीकृतवायुरूपखड्गेनेत्यर्थः दीपिकाकृदनुसरणेतुपादस्यब्रह्मपादचतुष्टयस्यस्थूलसूक्ष्मकारणतुरीयात्मकस्योपरितद्घटकंयन्मर्मतुल्यंरू पंनामचेतिद्वयंतच्छोधितेनमनःक्षुरेणांच्छिद्यादित्यर्थः सचोत्तरग्रंथस्वारस्याद्ग्रंथकृतोनाभिमतइतिबोध्यम् ॥ ५४० ॥ इंद्रेति जंघानुगं जंघाप्रभृतियन्मर्मतदिंद्रवज्रपदेनश्रुतौप्रोक्तं अयोगिभिर्दुरतिक्रमत्वसाधर्म्यात् तदपिध्यानरूपबलशालिनामानसखड्गेनच्छिद्यादित्य र्थः ॥ ५४१ ॥ ऊर्वोरिति तथाऊरुदेशमध्येयन्मर्मतच्छ्रुतौप्राणविमोचनपदेनभंगेसतिप्राणोविमुच्यतेदेहाद्वियुक्तःक्रियतेऽनेनेतिव्युत्पत्ति

पादस्योपरियन्मर्मच्छिद्यात्तद्रूपनामकं॥ मनोधारेणतीक्ष्णेनस्वाधीनपवनासिना॥ ५४० ॥ इंद्रवज्रमिति प्रोक्तंमर्मजंघानुगंहियत् ॥ तद्ध्यानबलयुक्तेनमानसेननिकृंतयेत् ॥ ५४१ ॥ ऊर्वोर्मध्येतुयत्प्रोक्तंमर्मप्राण विमोचनं ॥ चतुरभ्याससंयोगाच्छिद्यादनभिशंकितः ॥ ५४२ ॥ गुदेशिश्नेचकंदेचहृदिपद्मेतथैवच ॥ कंठदेशेपिमर्माणिच्छिद्याद्योगबलात्सदा॥ ५४३ ॥ एकोत्तरंशतंमुख्यानाड्यउक्तामनीषिभिः ॥ द्वासप्ततिसह स्राणित्वेकैकस्याःप्रकीर्तिताः॥ शाखास्तत्रतुमुख्यैकासुषुम्नाब्रह्मरंध्रगा॥ ५४४॥ योगाभ्यासेननाडीस्ताःसु षुम्नापरिवर्जिताः ॥ छेदयेत्तुसुषुम्नायांपरिसंचार्यमारुतं ॥ ५४५ ॥ एवंछिन्नान्यनाडीकःपुमानस्मिन्हिज न्मनि॥ जन्मांतरेथवागच्छेद्विरक्तोवैष्णवंपदं॥ ५४६॥

केनोक्तंतदपिच्छिद्यात् केन चतुर्वारंप्रातर्मध्यान्हेसायंनिशीथेचयोभ्यासस्तद्वतायोगेन अत्रचनाहमत्रस्थितइत्याकारबाधलक्षणेमर्मच्छे दनेदेहपातशंकानकार्यादेहधारणस्यप्रारब्धायत्तत्वादित्यर्थः ॥ ५४२ ॥ ततोगुदादिदेशगतानिमर्माणिपूर्ववच्छेदयेदित्याह गुदइति स्प ष्टं ॥ ५४३ ॥ एवंमर्माणिच्छित्वानाडीश्छिद्यादितिवक्तुंनाडीसंख्यांस्मारयति एकोत्तरमिति एकोत्तरशतसंख्याःप्रधाननाड्यस्तासामेक स्याएकस्याद्वासप्ततिद्वासप्ततिसहस्राणिशाखाभूतानाड्यःप्रश्नोपनिषदीरितास्तासुसर्वासुमुख्यायांसुषुम्नायांप्राणंप्रवेश्येतराश्छेदयेदि तिद्वयोरर्थः ॥ ५४४ ॥ ५४५ ॥ उक्तयोगस्यफलमाह एवमिति उक्तविधयाछिन्नाःसुषुम्नेतरानाड्योयेनसतथाभूतइहजन्मनिजन्मांत रेवापरंवैराग्यमधिगम्यमुच्यतेइत्यर्थः ॥ ५४६ ॥ ॥३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह यतइति यतएवमुक्तविधंफलमतोलभ्यतेततएतन्नाडीनांछेदनंकुर्यात् केन योगेननिर्मलंयत्सारंमनस्तद्रूपेणक्षुरेण मनसःसारत्वंतुसात्विकभूतांशारब्धत्वादिति कीदृशेनअनलवर्चसाज्ञानाग्निदीप्तेनेत्यर्थः ॥ ५४७ ॥ उक्तयोगशीलिनोमोक्षप्रकारमभिनयति ततइतिद्वाभ्यां ततउक्ताभ्याससिद्ध्यनंतरंविरक्तचित्तएकांतदेशवासीसर्वसंगपरित्यागीसर्वेषांयोगानांमनःप्राणयोर्निरोधप्रकाराणांवेत्ताचमुनिःशनैःशनैरुक्तसाधनेष्वपिनिरपेक्षःसन्नाडीगणरूपाध्यात्मपरिच्छेदंविहायमोक्षंव्रजेत् तत्रसाधननिरपेक्षत्वेदृष्टांतोहंसः सहिप्रतिबंधाभावेउड्डयनव्यापारेवाकरणानपेक्षइतिद्वयोरर्थः ॥ ५४८ ॥ ५४९ ॥ एवंक्रममोक्षेदृष्टांतोऽभिहितोऽथसद्योमोक्षेतमाह यथेति य

यतएवंततोधीरश्छिद्यान्नाडीगणंसदा ॥ योगनिर्मलसारेणक्षुरेणानलवर्चसा ॥ ५४७ ॥ ततोविरक्तचित्तस्तुनिःशब्ददेशमास्थितः ॥ निःसंगःसर्वयोगज्ञोनिरपेक्षःशनैःशनैः ॥ ५४८ ॥ पाशंछित्वायथाहंसोनिर्विशंकःखमुत्पतेत् ॥ तथानाडीगणंछित्वापुमान्मोक्षंसमाव्रजेत् ॥ ५४९ ॥ यथानिर्वाणकालेतुदीपोदग्ध्वालयंव्रजेत् ॥ तथासर्वाणिकर्माणियोगीदग्ध्वालयंव्रजेत् ॥ ५५० ॥ प्राणायामसुतीक्ष्णेनमात्राधारेणयोगवित् ॥ वैराग्यकरणेनायंतंतूंश्छिद्यात्क्षुरेणहि ॥ इत्येवंक्षुरिकाप्रोक्तंयोगंचारुसमभ्यसेत् ॥ ५५१ ॥ वैराग्यंकरणंनित्यंसर्वेषामिहदेहिनाम् ॥ सर्वथैवतुसंपाद्यंवैराग्यंप्रथमंततः ॥ ५५२ ॥

थादीपस्यतेजोविशेषरूपस्योपशमकालेतेजःसामान्यभावेनविलयस्तथासर्वोपाधिविनिर्मुक्तस्ययोगिनोब्रह्मभावइत्यर्थः ॥ ५५० ॥ उक्तमर्थजातंसंक्षिप्याह प्राणायामेति क्षुरेणमनोरूपेणतंतून्नाडीरूपान्जालतंतुवद्बंधकान्छिद्यात् कीदृशेनमनोरूपक्षुरेण प्राणायामतःसूक्ष्मीकृतेन मात्राद्वादशप्रणवादिरूपाआधारआलंबनंयस्यसतथातेन वैराग्यंकरणंशाणवद्घर्षणसाधनंयस्यसतथातेन क्षुरिकार्थमुपसंहरति इत्येवमिति ॥ ५५१ ॥ अथसाधनभूतंसंन्यासंसपरिकरंत्रिंशच्छ्लोकैर्निरूपयन्नादौजाबालचतुर्थखंडेप्रोक्तंकालमधिकारिणंचाह वैराग्यमिति वैराग्यमेवकरणमसाधारणंकारणंपारमहंस्यस्येतिशेषः नित्यंसर्वास्ववस्थास्विति ततःसर्वैर्देहिभिःपारमहंस्यकामैःप्रथमंवैराग्यंसंपाद्यमितियोजना ॥ ५५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गवेदिति ततोवैराग्यात्पश्चादेवपरमहंसोयतिर्भवेत् वैराग्यस्यपारमहंस्यकालोपाधितामेवान्वयव्यतिरेकाभ्यांस्फुटयति यतइतिदलद्वये न ॥ ५५३ ॥ अत्रार्थेप्रमाणभूतांयदहरेवविरजेदित्यादिश्रुतिमर्थतःपठति यस्मिन्निति यदैववैराग्यंस्यात्तदैवबालोयुवावृद्धोवासंन्यसेत् विरागरहितस्तुतथानकुर्यात् फलितमाह ततइति ॥ ५५४ ॥ ५५५ ॥ विरागेकारणमिति अस्यवैराग्यस्योत्पत्तावेवोक्तंगर्भदुःखानुसंधानादिकंयोगांतरंगोपासनानिकर्माणिचोपयुक्तानीतिप्रतिपादयति विरागेइत्यादिना पूर्वमुक्तंगर्भदुःखचिंतनादिकं अविमुक्तोपासनमविद्यात्मं भ्रूमध्येअधिदैवंवैराजशरीरेचस्थितायावाराणस्याब्रह्मभावेनचिंतनरूपंजाबालेतापनीयेचोक्तं आदिपदेनहृदयमहः विज्ञेयंविरागकारणमित्यनुषंगः ॥ ५५६ ॥ उपासनानांसाक्षान्मुक्तिसाधनत्वंतुनबोध्यंविपर्ययघटितत्वेनबंधविरोधिप्रमाभिन्नत्वादित्याह उ

भवेत्परमहंसाख्योयतिःपश्चात्सुधीःपुमान् ॥ यतोविरागएवास्यकालोनान्यःकथंचन ॥ ततोविनात्रवैराग्यंकोपिनायंभवेद्यतिः ॥ ५५३ ॥ यस्मिन्दिनेक्षणेवास्याद्वैराग्यंसुदृढंहितं ॥ तदैवसर्वकर्माणिसंन्यसेदविचारयन् ॥ ५५४ ॥ बालोवाप्यथवावृद्धोविरागरहितःपुमान् ॥ नभवेत्परमोहंसोमनसापिकदाचन ॥ ततोविरागएवास्यकालउक्तोमनीषिभिः ॥ ५५५ ॥ विरागेकारणंपूर्वमुक्तंनानाविधंमया ॥ अनुक्तंवापिविज्ञेयमविमुक्ताद्युपासनं ॥ सर्वश्रुतिषुसंप्रोक्तंबहुभेदमनेकधा ॥ ५५६ ॥ उपासनानांहेतुःस्यादध्यासोत्रविपर्ययः ॥ आनंदात्मास्वयंज्योतिर्नामादिपरिवर्जितः ॥ नामरूपक्रियास्थानगुणैर्यस्मादुपास्यते ॥ ५५७ ॥ क्वचित्सएवकुत्रापिह्युपास्यास्तद्विभूतयः ॥ कार्यकारणरूपिण्योप्यधिदैवादिसंस्थिताः ॥ ५५८ ॥

पासनानामिति अत्रवस्तुतत्त्वेयोविपर्ययोविपरीतविज्ञानंतद्रूपोध्यासउपासनानांहेतुःस्वरूपनिर्वाहकोभवतियतोनामरूपादिवर्जितोपिस्वयंप्रकाशानंदरूपएकएवआत्मानामादिसंबद्धतयोपास्यतेइत्यर्थः यथादित्यमंडलांतःस्थस्यउदितिनाम सुवर्णवद्रूपं ऊर्ध्वलोकपालनंक्रिया आदित्यमंडलंस्थानंपरोवरीयःपदोक्तं सर्वापेक्षयाश्रेष्ठत्वंगुणः एवमन्यत्रापि ॥ ५५७ ॥ उपासनासुविशेषांतरमाह क्वचिदिति क्वचिद्दहरविद्यादौसपरमात्मैवसाक्षादुपास्यत्वेनोक्तः क्वचिदादित्योब्रह्मेत्यादेशइत्यादिषुतस्यपरमात्मनोविभूतयःकल्पितैकदेशाउपास्यतयोक्ताः कीदृश्यः काश्चित्कारणरूपाःसमष्टिरूपाअधिदैवस्थिताः यथाहिरण्यगर्भादित्यादयः काश्चित्तुकार्यरूपाव्यष्टिगताअध्यात्मस्थिताश्चयथाप्राणवागादयइत्यर्थः ॥ ५५८ ॥ ॥४०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वचित्प्रणवादिकैर्मंत्रैः सहतादात्म्यारोपेणतस्योपासनमित्याह क्वचित्प्रणवेति अभेदेनभेदेनचतादात्म्येनेतियावत् ॥ ५५९ ॥ मंत्रार्थयोस्तादात्म्यचिंतनेपिद्वयीगतिः क्वचिन्मंत्रस्यप्राधान्यंविशेष्यत्वरूपंक्वचित्त्वर्थस्येतिदर्शयंस्तत्रमंत्रप्राधान्येनोपासनंयासूपनिषत्सुविहितंतासांनामानिपठति अथर्वणइति अथर्वशिरःसंज्ञायामुपनिषदितथात्राथर्ववेदेवर्तमानायांशिखायांयोगशिखाख्यायांतापनीययोःपूर्वोत्तरयोर्मांडूक्यात्मबोधयोर्नारायणीययोरथर्वगतत्वतैत्तिरीयगतत्वेनद्विविधयोरमृतनादेआदिपदग्राह्याऽमृतबिंद्वादौचमंत्रस्यप्रणवस्यनृसिंहमंत्रादेश्चप्राधान्यंश्रुतेरिष्टमित्यर्थः ॥ ५६० ॥ प्रणवस्योपसर्जनतयायत्रोपासनविधानंताउपनिषदोदर्शयति प्रश्नइति प्रश्नोपनिषदादौप्रणवार्थस्यप्राधान्येनोपासनंप्रणवस्यतूपसर्जनतयेत्यर्थः ॥ ५६१ ॥ कुत्रचित्स्तुतिसहितापरमेश्वरोपासनाविहितायथारुद्रा

क्वचित्प्रणवमुख्यैस्तैर्मंत्रैर्नानाविधैरपि ॥ अभेदेनापिभेदेनदेवएषउपास्यते ॥ ५५९ ॥ अथर्वणःशिरस्यत्रशिखायांतापनीययोः ॥ मांडूक्येस्वात्मबोधेचतद्वन्नारायणीययोः ॥ तथैवामृतनादादौमंत्रप्राधान्यमिष्यते ॥ ५६० ॥ प्रश्नेचमुंडकेतद्वद्बृहदारण्यकेतथा ॥ छांदोग्येकठवल्ल्यादावोंकारस्याप्युपासनं ॥ ५६१ ॥ रुद्राध्यायेतथेशस्यमंडलब्राह्मणेपिच ॥ स्तुत्यादिसहितोपासासर्वासूपनिषत्स्वपि ॥ ५६२ ॥ सर्वोपनिषदोब्रह्मनिर्गुणंस्वात्मरूपतः ॥ प्रतिबोधयितुंनॄणांप्रवृत्ताआदरेणहि ॥ ५६३ ॥ मंदाधिकारिणोदृष्ट्वास्वबोध्यान्बुद्धिमाश्रिताः ॥ नानोपायैरिदंब्रह्मनॄणामावेदयंतिताः ॥ ५६४ ॥

ध्यायेमंडलब्राह्मणेपुरुषसूक्तादौचेत्याह रुद्राध्यायइति स्तुत्यादीत्यादिपदेनरहस्यनाम्नांमंत्राणांचग्रहः नकेवलमुक्तोदाहरणेष्वेवोपासनाविहिताःकिंतुसर्वशाखागतासूपनिषत्स्वपीतितुरीयपादार्थः ॥ ५६२ ॥ ननुनिर्विशेषवस्तुप्रदर्शनपरासूपनिषत्सूपासनविधानंकिमर्थमितिशंकते सर्वोपनिषदइति स्वात्मरूपतःप्रत्यग्रूपेणनिर्गुणंब्रह्मबोधयितुंयतःप्रवृत्तास्ततस्तासूपासनविधानमयुक्तमितिभावः ॥ ५६३ ॥ स्थूलारुंधतीन्यायेनमंदानुग्रहायतद्युक्तमितिसमाधत्ते मंदाधिकारिणइति ताउपनिषदःकत्र्योंमंदान्प्रत्यक्प्रवणताहीनानधिकारिणोपित्वेनउपनिषत्स्वरूपेणबोधनीयानालोच्यबुद्धिस्थूलारुंधतीन्यायसिद्धमुपदेशकौशलमाश्रितादधानाःसत्योनानाविधवर्णनरूपैरुपायैरिदंनिर्गुणंनॄणामधिकारिणांहितायावेदयंतिचेतस्यवतारयंतीत्यर्थः ॥ ५६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुब्रह्मणोनानाविधंवर्णनंनसंभवतितस्यैकरसत्वादित्याशंक्यकल्पितोपाधिनिबंधनंतस्यनानाविधंवर्णनंसंभवतीत्याह सर्वेति ब्रह्मयतः सर्वरूपंसर्वस्याधिष्ठानतयात्मभूतंततःसर्वत्रजगतिव्यवस्थितंरजतेशुक्तीदमंशवत्सद्रूपेणानुगतंभवतिततस्तेनकल्पितोपाधिसांनिध्येनतन्नि विशेषमपिब्रह्मनामरूपक्रियास्थानगुणैर्विशिष्टतयाप्रतिपादयंत्युपनिषदइत्यर्थः॥ ५६५॥ तत्रसविशेषप्रतिपादनेद्वेधाप्रवृत्तिर्बाधावसा नातदनवसानाच तत्रांत्यातदाभवतियदाश्रुतेरित्थमाशयः एतेऽधिकारिणःशुद्धचित्ताःसंतःस्वयमेवोपाधिसंबंधमपहायनिर्विशेषमवग मिष्यंतीति यदातुकारुण्यातिशयेनाधिकारिणामनुसंधानक्लेशंनसोढुंशक्नुवंतितदानिर्विशेषमपितावर्णयंतीत्याह क्वचिदिति ताउपनिष दःक्वचिदत्रसविशेषरूपएवसंलीनव्यापाराःसत्योनिर्विशेषस्यप्रतिपादनादुपरतिंविरामंयांति क्वापिपुनःक्वचित्तुप्रतिआभिमुख्येनबोधयि

सर्वरूपंयतोब्रह्मजगत्यस्मिन्व्यवस्थितम्॥ नामरूपक्रियाद्यैस्तुततस्ताबोधयंतितत्॥ ५६५॥ क्वचिदत्रैव संलीनव्यापाराःप्रतिपादनात्॥ प्रयांत्युपरतिंक्वापिप्रतिबोधयितुंपुनः॥ निर्गुणंब्रह्मशतधावदंतिहितकारि काः॥ ५६६॥ बृहदारण्यकाद्यास्ताव्याख्याताभवतेमया॥ शेषाश्चव्याकरिष्यामिप्रसंगात्सकलाअपि ॥५६७॥ एवंनानाविधोपायैरुपास्यपरमेश्वरम्॥ शुद्धचेताविरक्तोयंपुमानत्रप्रजायते॥ ५६८॥ अथ वाकर्मकांडोक्तंकुर्वाणःकर्मचाखिलं॥ निजवर्णाश्रमप्रोक्तंफलाशापरिवर्जितः॥ विरक्तोत्रपुमान्भूयात्का लतोनैवसंशयः॥ ५६९॥ ब्रह्मविज्ञानसिद्ध्यर्थमथवाकर्मकुर्वतः॥ विरक्तिर्जायतेपुंसोभोगेलोकद्वय स्थिते॥ ५७०॥

तुंनिर्गुणंब्रह्मशतधावर्णयंतियतोहितकारिकाअनुग्रहाकुलाइत्यर्थः॥ ५६६॥ तासांनिर्गुणप्रतिपादनप्रकारःप्रायशोबृहदारण्यकादीनां निर्दिष्टोऽवशिष्टानांतुप्रदर्शयिष्यतेइत्याह बृहदिति ताउपनिषदः व्याकरिष्यामिस्फुटाशयाःकरिष्यामि॥ ५६७॥ उक्तंविचारंप्रकृतेसं गमयति एवमिति एवंविधयाश्रुतिसिद्धैर्नानाविधोपासनारूपैरुपायैःपरमेश्वरमाराध्यविरागलक्षणांचित्तशुद्धिंप्राप्नोतिपुमानित्यर्थः ॥५६८॥ उपासनाऽशक्तौभगवद्गीतोक्तविधयानिष्कामकर्मानुष्ठानमपिविलंबेनचित्तशुद्धिहेतुरित्याह अथवेति स्पष्टम्॥ ५६९॥ अथवातमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनेत्यादिश्रुत्यासकलानिसत्कर्माणिब्रह्मज्ञानार्थतयाविहितानितदालोच्यब्रह्मवि द्यार्थतयायागादिकर्माणिकुर्वंश्चित्तशुद्धिंलभतेइत्याह ब्रह्मविज्ञानेति लोकद्वयस्थितेऐहिकेआमुष्मिकेच॥ ५७०॥ ॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवायत्करोषियदश्नासीतिगीतोक्तविधयेश्वरार्पणेनकर्मकुर्वतःसकामस्यापिचित्तशुद्धिर्भवतीत्याह ईश्वरेति स्पष्टम् ॥ ५७१ ॥ फलितमाह एवमिति एवमुक्तविधयानानाप्रकाराउपायाविरक्तेःप्रयोजकाःसंतितेषांमध्येयंकंचनोपायमास्थायालंब्याथतांविरक्तिंसंपाद्यसंन्यसेदित्यर्थः ॥ ५७२ ॥ तीव्रतरवैराग्यरूपस्यसंन्यासकालस्यवर्णनमुपसंहरंस्तदधिकारिणंवक्तुंप्रतिजानीते इतितेइति·अत्रसंन्यासेयोग्योयोधिकारीसर्वेषुमोक्षशास्त्रेषुवर्णितस्तंतेवदामीति ॥ ५७३ ॥ तत्रबृहदारण्यकेएषणाभ्योव्युत्थायाथभिक्षाचर्यंचरंतीतिवाक्येनोक्तंमुख्यमधिकारिविशेषणमाह वित्तेति वित्तंदैवंविद्यात्मकंलौकिकंहिरण्यादिरूपं लोकोदेवपितृमनुष्यसंबंधित्वेनत्रिविधः सुत

ईश्वरार्पणबुद्ध्यावाकर्मजातंप्रकुर्वतः ॥ पुंसोविरक्तिसिद्धिःस्यात्सर्वथैवापिकामिनः ॥ ५७१ ॥ एवंनानाविधोपायाविरक्तौतेषुकंचन ॥ आस्थायतांविधायाथकुर्यात्संन्यासमात्मवान् ॥ ५७२ ॥ इतितेकालआख्यातःसंन्यासेचवदामिते॥ अधिकारिणमत्रोक्तमोक्षशास्त्रेषुसर्वतः ॥ ५७३ ॥ वित्तलोकसुतानांस्युरिच्छानृणांहिसर्वदा॥ यास्ताभिःपरिशून्योयःसोधिकारीप्रकीर्तितः॥ ५७४॥ तासांसत्वेभवेत्पूर्वंब्रह्मचारीततोगृही॥ ततोवनीततोन्यासंहंसोऽतोनचतुर्थकः॥ ५७५॥ चतुर्थःपरमोहंसोलोकद्वयगतस्पृहः ॥ यःकश्चित्सतुविज्ञेयोमायापाशवशंगतः ॥ ५७६ ॥

पुत्रः एतेषांत्रयाणांयास्तिस्रइच्छाःपंचमाध्यायेवर्णितास्ताभिर्वर्जितत्वलक्षणंवैराग्यंमुख्यमधिकारिविशेषणमित्यर्थः ॥ ५७४ ॥ अथजाबालचतुर्थखंडवाक्यार्थंवर्णयंस्तत्रोक्तंविरागाभावेक्रमेणाश्रमचतुष्टयानुष्ठानंदर्शयति तासामिति तासांवित्तादिगोचरेच्छानांसत्वेतुब्रह्मचर्यंगृहस्थत्वंवनस्थत्वंचकृत्वाततोवनस्थत्वादनंतरंन्यासंकुर्यात् तत्रायंविशेषः अतएतमाश्रमचतुष्टयक्रममाश्रित्यचतुर्थोहंसःपरमहंसोनभवेत्किंतुकुटीचकादित्रयान्यतममेवन्यासंकुर्यादित्यर्थः ॥ ५७५ ॥ तत्रहेतुतयापारमहंस्यस्योत्कटवैराग्यमात्रतंत्रत्वमाह चतुर्थइति यतोलोकद्वयाद्गतस्पृहोयःसएवन्यासभेदेषुचतुर्थंपारमहंस्यंगंतुंयोग्योनांतःस्थकामजटइत्यर्थः ॥ ५७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वैराग्योत्कर्षेसतिक्रमनियमोनास्तिकिंतुब्रह्मचर्याद्याश्रमान्यतमानंतरमपिपारमहंस्यंश्रयेदित्याह ब्रह्मेति नैष्कर्म्यंमोक्षएवप्राप्ताप्रवृत्तास्यकस्पृहायस्यसतथा वित्ताद्येषणाविनिर्मुक्तश्चेत्स्यात्तर्हिब्रह्मचर्यानंतरमेवसंन्यसेदित्यर्थः अत्रब्रह्मचर्यस्यावधित्वोपन्यासेननततःपूर्वंन संन्यासाधिकारइतिसूचितं ॥५७७॥ वैराग्योत्कर्षस्यन्यासाधिकारसंपादकतांविशदयंस्तस्यविधुरादीनामपिन्यासयोग्यताप्रयोजकत्वमाह वर्णाश्रमादीति वर्णाश्रमाणामादयःकारणानिलिंगानियथाब्रह्मचर्यस्यगुरुकुलवासादिगृहस्थस्यदारसंयोगोवनस्थस्यजटाधारणादिकुटीचकादीनांत्रिदंडधारणादितैःसंयुक्तःसर्वेंद्रियसंपन्नश्चवाभवतुतद्विपरीतोवर्णाश्रमादिधर्महानिरूपविधुरत्ववानिंद्रियवैकल्यादिमांश्चवाभवतुसनिराशोविगतैषणःस्यांत्तर्हित्रपारमहंस्येऽधिकारवान्भवत्येवेत्यर्थः ॥ ५७८ ॥ संक्षिप्योक्तंप्रपंचयन्श्रौतानामव्र

ब्रह्मचर्याद्गृहाद्वापिवनाद्वाप्रव्रजेद्द्वयं॥ सर्वैषणाविनिर्मुक्तोनैष्कर्म्यप्राप्तसंस्पृहः॥ ५७७ ॥ वर्णाश्रमादिसंयु
क्तःसर्वेंद्रियगुणैर्युतः ॥ विपरीतोथवायस्मान्निराशोत्राधिकारवान् ॥ ५७८॥ वेदव्रतैर्विहीनोवासहितस्तै
श्चवापुमान् ॥ अधीत्यवेदंवेदौवावेदान्वास्नानमागतः ॥ एतदध्ययनाभावादथवास्नानवर्जितः ॥ ५७९ ॥
उत्सन्नाग्निर्निमित्तेनकेनचिद्वाप्यनग्निकः॥ श्रौतस्मार्त्ताग्निवित्तेषुस्वीकाराभावतश्चतौ॥ ५८० ॥ वैराग्यंप
रमंप्राप्तोत्यथवापिकुटीचकः॥ बहूदकोथवाहंसःपरोहंसोभवेदिह॥ ५८१ ॥

तीत्यादिपदानामर्थमपिदर्शयति वेदेति वेदव्रतानिवेदाध्ययनांगभूतानिव्रतानिब्रह्मचारिधर्मरूपाणितैर्युक्तोव्रतीत्युक्तस्तदभावोऽव्रतित्वमित्यर्थः उक्तव्रतैरेकंद्वौबहून्वावेदानधीत्ययःस्नानंसमावर्त्तनंप्राप्तःसस्नातकइत्युक्तस्तद्विलक्षणोवेदैकदेशमात्रपाठीत्वस्नातकएतेष्वन्यतमोपिसंन्यसेदितितृतीयेनाभिसंबंधः ॥ ५७९ ॥ उत्सन्नाग्निरिति केनचिद्दारमरणादिरूपनिमित्तेनसंगृहीतोप्यग्निर्यस्यविनष्टःसउत्सन्नाग्निरित्युक्तः तादृशनिमित्तेनापरिगृहीताग्निकस्त्वनग्निकइत्युच्यते अथवातौउत्सन्नाग्न्यनग्निपदवाच्यौश्रौतानांदक्षिणाग्न्यादीनांस्मार्तस्यौपासनाख्यस्यचाग्नेस्तद्ग्रहणोपयोगिनोवित्तस्यवास्वीकाराभावरूपनिमित्तकौबोध्यौ तत्रश्रौतस्मार्त्ताग्निस्वीकाराभावेउत्सन्नाग्नित्वं उत्सन्नःअलब्धमूलकःअग्निर्यस्यसतथेतिव्युत्पत्तिसमन्वयात् आधानसंस्कृताग्निर्हितत्तत्कर्मोपयुक्ताग्नीनांमूलमितिप्रसिद्धंयाज्ञिकानांवित्तस्वीकाराभावेत्वनग्नित्वमितिविवेकः॥ ५८० ॥ परवैराग्येकुटीचकादीनामपिपारमहंस्याधिकारइत्याह वैराग्यमिति स्पष्टम् ॥ ५८१॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपारमहंस्यग्रहणस्येतिकर्त्तव्यताविशेषंवक्तुमुपक्रमते विधानमित्यादिना अधिकारप्रसंगात्तेइत्यतःपूर्वग्रंथेन तत्रवर्णितकालाधिकारकेपारमहंस्यग्रहणेयद्विधानमितिकर्त्तव्यताख्यंतद्वदामीति आदौनांदीमुखश्राद्धंकर्त्तव्यतयाविहितं तथाचोक्तंवृद्धगर्गेण अग्न्याधानाभिषेकेषुइष्टापूर्त्तक्रियाकृतौ वृद्धिश्राद्धंप्रकुर्वीतचाश्रमग्रहणेतथेति सत्याश्वेति इहन्यासांगभूतेनांदीमुखेवसुसत्यनाम्नाविश्वेदेवाःपूज्याइतिद्वयोरर्थः ॥ ५८२ ॥ ५८३ ॥ श्राद्धाष्टकमिति तथात्रन्यासग्रहणांगेनांदीमुखेअंतर्गतंश्राद्धानामष्टकंभवति तन्नामानि शौनकेनोक्तानि दैवंचैवार्षकंचैवदिव्यंमानुष्यमेवच. भूतश्राद्धंपितृश्राद्धंमातृणामात्मनस्तथेति अस्यश्राद्धाष्टकस्यादौकर्त्तव्यंविश्वेदेवसंबंधिश्राद्धंनवमंभवतीत्यर्थः मातुरिति अंतेऽनुष्ठेयंदशममपिकेचित्शौनकादयोवदंति किंकृत्वा मातुरितिजातावेकवचनं मातृणांमा

विधानंतत्रवक्ष्यामिपरहंसाश्रमग्रहे ॥ संन्यासग्रहणात्पूर्वेदिवसेमंगलैर्युतः ॥ ५८२ ॥ विवाहादौयथा श्राद्धंकुर्यान्नांदीमुखंतथा॥ सत्याश्ववसवस्तद्वद्विश्वेदेवाइहेरिताः॥ ५८३ ॥ श्राद्धाष्टकंभवेदत्रनवमंवैश्वदैवकं ॥ मातुर्मातामहानांचविभेदाद्दशमंपुनः॥ ५८४ ॥ केचिदाहुःपरेत्वैक्यंमुनयःप्रवदंत्यपि ॥ अनयोस्तु कुलाचाराद्भेदाभेदौव्यवस्थितौ॥ ५८५ ॥ भेदेक्रमोयंविज्ञेयोह्यनयोःश्राद्धयोःसदा॥ मातापितामहीतद्वत्तृतीयाप्रपितामही ॥ ५८६ ॥ मातुःश्राद्धेवदंत्येकेकेचिन्मात्रासमन्विते ॥ मातामहीतृतीयाचप्रकृष्टासाचते उभे॥ ५८७॥ श्राद्धेमातामहेप्याहुःपुरुषांस्त्रीन्महाधियः॥ मातामहोद्वितीयःस्यात्प्रमातामहकस्तथा॥ ५८८॥ तृतीयश्चतथावृद्धप्रमातामहकःस्मृतः॥ इतिभेदेसमुद्दिष्टंत्रिकंश्राद्धद्वयेपिहि॥ ५८९॥

तामहानांचश्राद्धयोर्विभेदमभिसंधाय मूलेपंचमील्यब्लोपे परेआपस्तंबादयोमातृणांमातामहानांचैक्यमभेदंवदंति तथाचतन्मतेविश्वेदेवपूर्वकंश्राद्धाष्टकमेवेत्यर्थः एवंसत्यनयोर्मातृमातामहश्राद्धयोर्भेदेनाभेदेनचानुष्ठानंयथाकुलाचारंव्यवस्थितंव्यवस्थांगतमितिद्वयोरर्थः ॥ ५८४ ॥ ५८५ ॥ भेदपक्षेपिमातृश्राद्धदेवतानांभेदंदर्शयति भेदइति क्रमोनाम्नामानुपूर्वी मतभेदेनेतिशेषः मातृश्राद्धस्यदेवतामातृपितामहीप्रपितामह्यःकेषांचिन्मतेभवंति केषांचित्तुमात्रासमन्वितेतेउभे तेके मातामहीद्वितीयातृतीयातुसामातामहीप्रकृष्टाप्रमातामही तियावदितिद्वयोरर्थः ॥ ५८६॥ ५८७ ॥ मातामहश्राद्धेपिमातामहादयस्त्रयोदेवाइत्याह श्राद्धइति मातामहेमातामहसंबंधिनि भेदपक्षे विशेषप्रदर्शनमुपसंहरति इतीति ॥ ५८८ ॥ ५८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातृमातामहश्राद्धयोरैक्यपक्षेपिमतभेदेननामत्रयोच्चारणंव्यवस्थितमित्याह मात्रिति द्वैधंभेदः त्रिकस्यमातृश्राद्धदेवतात्रयस्यभेदोवैलक्षण्यं ॥५९०॥ त्रिकभेदमभिनयति मातेति मात्रादिप्रपितामह्यंतंत्रिकंकेषांचिन्मते केषांचित्तुमात्रादिप्रमातामह्यंतमिति तदनुष्ठानंयथाकुलाचारमितिद्वयोरर्थः॥५९१॥५९२॥ यस्तुविस्मृतकुलाचारकस्तेनापिवहूनामनुग्रहोन्याय्यइतिन्यायेनमातृपितामहीप्रपितामहीरूपंत्रिकमेवमातृश्राद्धेसमर्च्यमित्याह मातेति यतस्तत्प्रपितामह्यंतत्रिकानुष्ठानंजनेलोकेबहुलंबहुभिरनुष्ठितमितितुरीयपादार्थः ॥ ५९३ ॥ अथोक्तश्राद्धानांक्रमेणसंबंधीनिदेवतात्रिकाणिशौनकोदितान्यनुष्ठानसौकार्यायप्रदर्शयति ब्रह्मेति प्रथमानुष्ठेयेदेवश्राद्धेक्रमेणब्रह्मवि

मातृमातामहश्राद्धेयदाद्वैधंनविद्यते ॥ तदापित्रिकभेदःस्यात्कुलाचारस्यभेदतः॥ ५९० ॥ मातापितामही तद्वत्तृतीयाप्रपितामही ॥ एवमेकेत्रिकंप्राहुरन्यएवंवदंतिच ॥ ५९१ ॥ मातामातामहस्तद्वत्प्रमातामहकोऽपरः ॥ कुलाचारोत्रसर्वत्रप्रमाणंकीर्तितोद्विजैः ॥ ५९२ ॥ मातापितामहीत्यादिमातृश्राद्धेत्रिकंभवेत्[1] ॥ कुलाचारानभिज्ञत्वेबहुलंतद्यतोजने॥ ५९३ ॥ ब्रह्माविष्णुर्महेशश्चदेवश्राद्धेत्रयंस्मृतं॥ देवक्षत्रमनुष्याश्चऋषिश्राद्धेमुनीश्वराः॥ ५९४ ॥ वसुरुद्रादित्यसंज्ञादिव्यश्राद्धेप्रकीर्तिताः ॥ सनकःसनंदनःसनत्कुमारोमानुषेपिच ॥ ५९५ ॥ पृथिव्यादिमहाभूतपंचकंनयनादिकः॥ तथैवकरणग्रामःस्वेदजादिचतुष्टयम्॥ भूतश्राद्धेत्रिकंप्रोक्तमेतद्देवतयासदा ॥ ५९६ ॥ पितापितामहस्तद्वत्तृतीयःप्रपितामहः ॥ पितृश्राद्धेपिसंप्रोक्तमत्रेदंदेवतात्रयं॥ मातापितामहीत्यादिमातृश्राद्धेपुरेरितम्॥ ५९७॥

ष्णुमहेश्वरादेवताः द्वितीयेऋषिश्राद्धेतुदेवर्षयोराजर्षयोमनुष्यर्षयश्चदेवताइत्यर्थः ॥ ५९४ ॥ वस्विति तृतीयेदिव्येश्राद्धेक्रमेणवसवोरुद्राआदित्याश्चदेवताः तुर्येमानुषश्राद्धेतुसनकःसनंदनःसनत्कुमारश्चेत्येतेत्रयोमनुष्यत्वेनस्मृतिप्रसिद्धादेवाइत्यर्थः ॥ ५९५ ॥ पृथिव्यादीति पंचमेभूतश्राद्धेएतत्रिकंदेवतयादेवत्वेनोक्तं एतत्किं पृथिव्यादिभूतपंचकंप्रथमादेवता चक्षुरादिकरणग्रामोद्वितीयादेवता स्वेदजादियोनिचतुष्टयंतृतीयेति आदिपदेनजरायुजांडजोद्भिज्जानांग्रहणं ॥ ५९६ ॥ षष्ठेपितृश्राद्धेपितृपितामहप्रपितामहासप्तमेमातृश्राद्धेतुमातृपितामहीप्रपितामह्योदेवताबहुसंमतत्वादित्याह पितेति ॥ ५९७ ॥

१ अत्रपुस्तकांतरे मातामहीत्यादिमातृश्राद्धेत्रिकंभवेदितिपाठोदृश्यते,अयमेवटीकानुकूलइतिभाति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोदशमत्वेनोक्तंमातामहादित्रयप्रमातामहांतत्रयदेवताकंमातामहश्राद्धंकार्यंतस्यमातृश्राद्धोत्तरकालतायाःसर्वत्रसिद्धत्वादित्याह द शममिति मातामहसंबंधित्वेनोदितमुक्तंदशमस्थानेपूर्वंनिर्दिष्टंचयत्श्राद्धंतन्मातृश्राद्धात्परस्तादनंतरमेवस्यान्नपूर्वमित्यर्थः एतेनान्यत्रनां दीमुखेमातृश्राद्धस्यपितृश्राद्धात्पूर्वंभावित्वेपिन्यासांगभूतेतत्रपितृश्राद्धोत्तरत्त्वंस्मृतावुक्तमितिसूचितं ॥ ५९८ ॥ पूर्वमष्टमत्वेननिर्दिष्टमा त्मश्राद्धंत्वंतेकर्त्तव्यंशौनकादिभिस्तथोक्तेरितिदर्शयन्नस्येतिकर्त्तव्यतामाह सर्वांतइति आत्मनःस्वकीयं तत्रसंन्यासकर्त्तास्वकीयंना मप्रथममुच्चार्यततःपितुस्ततःपितामहस्यनामकीर्त्तयेदित्यर्थः ॥ ५९९ ॥ नवमत्वेनोक्तंवैश्वदेवश्राद्धंतुप्रथमंकृत्वावर्णितान्यष्टौनववा

दशमंतुयदाश्राद्धंपृथङ्मातामहोदितम् ॥ मातृश्राद्धात्परस्तात्स्यान्नतुपूर्वंकदाचन ॥ ५९८॥ सर्वांतेत्वात्म नःश्राद्धंकुर्यात्श्रद्धासमन्वितः ॥ आत्मनोयस्ययन्नामतन्नामपरिगृह्यहि ॥ अनंतरंपितुःस्वस्यपश्चात्पैताम हंतथा ॥ ५९९ ॥ वैश्वदेवंपुरःकृत्वाश्राद्धंदेवादिकंक्रमात् ॥ अष्टकंनवकंवापिकुर्याच्छ्रद्धासमन्वितः ॥ ६०० श्राद्धाष्टकेत्रपिंडाःस्युश्चतुर्विंशतिसंख्यकाः ॥ सप्तविंशतिसंख्याःस्युर्नवकंतुयदाभवेत् ॥ ६०१ ॥ यावत्योदे वताःश्राद्धेविश्वेदेवविवर्जिताः ॥ तावंतोत्रप्रदातव्याःपिंडाब्राह्मणसंन्निधौ ॥ ६०२ ॥ दधिलाजाक्षतास्तद्व त्कुवलानिमधूनिच ॥ दूर्वादिमंगलद्रव्यंपिंडांतेसंक्षिपेत्पुमान् ॥ ६०३ ॥ पिंडांतेमधुरंभूरिकुर्यान्नांदीमुखे सदा ॥ युग्मांश्चभोजयेद्विप्रान्सर्वदैवाप्रमादवान् ॥ ६०४ ॥ अष्टादशैवविप्राःस्युर्विंशतिर्वात्रसर्वदा ॥ ततो न्यूनाधिकानस्युःश्राद्धेनांदीमुखेत्रहि ॥ ६०५ ॥

श्राद्धानिकुर्यादित्याह वैश्वदेवमिति ॥ ६०० ॥ तत्रवैश्वदेवश्राद्धव्यतिरिक्तेष्वेवप्रत्येकंपिंडत्रयदानस्यविहितत्वादर्थसिद्धांपिंडसंख्यामा ह श्राद्धाष्टकइति ॥ ६०१ ॥ तत्रहेतुभूतंवैश्वदेवश्राद्धस्यपिंडराहित्यमाह यावत्यइति यतोवैश्वदेवभिन्नानामेवश्राद्धदेवानांपिंडदानार्ह त्वमतउक्तापिंडसंख्यायुज्यतएवेतिभावः ॥ ६०२ ॥ दधीति दध्यादिकंदूर्वांतमादिपदग्राह्यंकुंकुमादिकंचपिंडांतेपिंडमध्येनिक्षिपेदिति तत्रकुवलानिबदरीफलानि ॥ ६०३ ॥ पिंडांतेमधुरमिति तथात्रनांदीमुखेपिण्डमध्येमधुरंमधुशर्करादिभूरिप्रचुरंक्षिपेदित्यर्थः तथाप्रत्ये कंयुग्मब्राह्मणविधानान्नवसुश्राद्धेषुसत्सुअष्टादशदशसुतुविंशतिर्ब्राह्मणानिमंत्रयितव्याइत्याह युग्मानित्यादिना ॥ ६०४ ॥ ६०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शक्तौसत्यांदुकूलादिकमपिश्राद्धीयद्विजेभ्योदद्यादित्याह विभवइति परिवेदयेद्दद्यात् ॥ ६०६ ॥ अतिसंपत्तौभूमिप्रभृत्यपिदेयमित्याह अतिश्रीमानिति दारिद्र्यनाशनंपात्रस्यदारिद्र्यहरम् ॥६०७॥ श्राद्धांतेउच्छिष्टव्यतिरिक्तान्नेनदीनानाथादयोपितर्पणीयाइत्याह ब्राह्मणेष्विति स्पष्टंद्वयं॥६०८॥६०९॥एतच्चदेवादीनांनांदीमुखंस्वस्वगृह्यसूत्रानुसारेणपितृश्राद्धवत्कर्त्तव्यमित्याह स्वगृह्येति अविचारयन्देवादीनांपितृभ्योविशेषमपश्यन्नित्यर्थः ॥ ६१० ॥ एतस्मिन्निति एतन्नांदीमुखशालिनिदिनेएतदुक्तंदानादिकंकृत्वानिर्वृतिंप्रसादंप्राप्तःस

विभवेसतिविप्रेभ्योदुकूलवलयादिकं॥ छत्रोपानत्प्रभृत्यन्यत्स्वशक्त्यापरिवेदयेत्॥६०६॥ अतिश्रीमान्यदाकर्त्तातदाभूमिगृहादिकं॥ सर्वोपकरणैर्युक्तंदद्याद्दारिद्र्यनाशनं॥६०७॥ ब्राह्मणेषुतुभुक्तेषुपिंडदानादनंतरं॥ दक्षिणासुचदत्तासुत्यक्तोच्छिष्टंततोधनी॥ ६०८॥ यथाशक्तिप्रकुर्वीतत्त्यन्नदानमनेकधा॥ अन्यान्यपिचदानानिकुर्यात्सविभवेसति॥ ६०९ ॥ स्वगृह्योक्तप्रकारेणश्राद्धंकुर्याद्विचक्षणः ॥ नांदीमुखंहिदेवादेःपितृवच्चाविचारयन् ॥ ६१० ॥ एतस्मिन्दिवसेत्येतत्कृत्वानिर्वृतिमागतः ॥ स्वजनैःसहसंभाष्यदारादिसहितैरपि॥ ६११ ॥ दायंदत्वाचपुत्राणांहोमार्थंकिंचिदेवहि ॥ संस्थाप्यद्रव्यमात्मीयंकौपीनाच्छादनानिच॥ ६१२॥ पुण्याहंवाचयित्वाथभुंजीतस्वजनैःसह॥ अभावेव्यग्रतायास्तुवैयग्र्येवर्जयेद्भुजिं॥ ६१३॥ आघ्राणेनप्रकुर्वीतत्युपवासंविचक्षणः ॥ तस्मिन्नेवदिनेनोचेद्द्वितीयेदिवसेसुधीः ॥ ६१४ ॥ पिंडदानंदिनेतस्मिन्नुपवासःपरेहनि॥ मुख्यमेतज्जघन्यंस्यादेकस्मिन्दिवसेद्वयं॥ ६१५॥

न्भुंजीतेतितृतीयेनान्वयः दाराद्यैःस्वजनैःसहसंभाष्यपुत्रादिभ्योदायंविभज्यद्रव्यंदत्वापिकिंचिद्द्रव्यंहोमोपयोगितथाकौपीनादिकंसंस्थाप्येतिद्वयोरर्थः ॥ ६११॥६१२ ॥ पुण्याहमिति यदिव्यग्रताचेतसोनिवृत्तिसक्तानस्यात्तदापुण्याहवाचनपूर्वकंभुंजीत तादृशेवैयग्र्येतुसतिभुजिंभोजनंवर्जयेदित्यर्थः ॥ ६१३॥ यदाभोजनेरुच्यभावस्तदापिश्राद्धशेषस्याघ्राणंगंधग्रहंकृत्वोपवसेत् भोजनपक्षेतुद्वितीयदिवसइत्याह आघ्राणेनेति ॥ ६१४ ॥ द्वितीयदिवसोपवासपक्षएवतुमुख्यइत्याह पिंडदानमिति तस्मिन्पूर्वे ॥ ६१५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुख्यपक्षेप्रथमदिनकृत्यमुक्तं उपवासेति कक्षोपस्थगतलोमानिशिखांचविहायसर्वाणिकेशलोमानिमुंडयेदिति ॥ ६१६ ॥ स्नातइति ततःस्नानोत्तरंवस्त्रांतरंपरिधायहोमार्थस्थापितद्रव्यभिन्नंस्वकीयपरिग्रहमध्येयावत्संन्यासयोग्यंसंन्यासिनामप्यनिषिद्धपरिग्रहंयथाशालग्रामादि आदिपदेनपुस्तकादिग्रहः कंबलादीत्यादिनामृगाजिनादिग्रहः तत्सर्वंस्वापेक्षितमपितेनगुरुणाग्रहणांगीकारेकृतेसतितस्मैब्रह्म

उपवासदिनेप्राप्तेकक्षोपस्थशिखात्रयं ॥ वर्जयित्वातुवपनंकुर्वीतमतिमान्नरः ॥ ६१६ ॥ स्नातःशुचिस्ततोभूत्वापरिधायान्यदंबरं ॥ यावत्संन्यासयोग्यंस्याद्धोमद्रव्यविवर्जितं ॥ ६१७॥ शालग्रामादिकंतद्वद्वसनंकंबलादिच ॥ ब्रह्मनिष्ठायगुरवेबहुशोपिपरीक्ष्यच ॥ ६१८ ॥ संवत्सरादिकंकालंगुरुंसर्वगुणैर्युतं ॥ अंगीकृतेथतेनायमर्पयेदप्यपेक्षितं ॥ ६१९ ॥ आत्मनश्चविधायैवपृथकूशीतादिवारणं ॥ प्रक्षालितंततोदंडमव्रणंसौम्यदर्शनं ॥ ६२० ॥ वैणवंसंस्कृतंतद्वत्स्वात्मनासंमितंतथा ॥ कौपीनादियुतंधीमान्स्थापयेदग्निसंन्निधौ ॥ ६२१ ॥ रात्रौजागरणेहोमेदेशाःशस्ताइमेसदा ॥ महानद्यास्तटंतद्वद्देवतायतनंपुनः ॥ अरण्यंवापिगोष्ठंवागृहंवाजनवर्जितं ॥ ६२२ ॥

निष्ठायगुरवेऽर्पयेत् तंचगुरुंसंवत्सरादिकालेनसर्वगुणैर्युतंपरीक्ष्यैवदद्यादितिशेषः इतित्रयाणांसंबंधः ॥ ६१७ ॥ ६१८ ॥ ६१९ ॥ आत्मनश्चेति तथाआत्मनःस्वस्योपयोगिशीतवारणंकंथादिरूपंपृथक्गुरुसमर्प्यद्रव्याद्भिन्नंविधायअव्रणत्वादिशालिनंदंडंकौपीनादिकंचाग्निकुंडसमीपेस्थापयेदिति तत्रदंडस्यचस्वात्मनासम्मितत्वंसंन्यसितुमिच्छतःशरीरपरिमाणत्वं ॥ ६२० ॥ ६२१ ॥ अत्रदिनेरात्रौकर्त्तव्यस्यजागरणस्योपयोगिनोदेशान्दर्शयति रात्राविति गोष्ठंगोशाला स्फुटमन्यत् ॥ ६२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तदेशेगत्वाबौधायनाद्युदीरितंकर्त्तव्यमाह ब्रह्मेत्यादिना ब्रह्माचइंद्रश्चसोमश्चसूर्यश्चआत्मसंबंधीचतुर्व्यूहश्चएतैरभीष्टरूपैःस्वरूपिणं स्वरूपवंतंपरमेश्वरंस्मरेदितिशेषः तत्रात्मचतुर्व्यूहमभिनयति अंतरमिति अंतरंपरमंविज्ञानमित्येतानित्रीण्यात्मनोविशेषणानितथानिर्विशेषंविशेषणरहितमात्मस्वरूपंगृहीत्वाआत्मचतुर्व्यूहःप्रकीर्तितः तथाचआत्माअंतरात्मापरमात्माविज्ञानात्माइत्याकारताफलिता तत्रात्मपदेनसर्वाधिष्ठानमुच्यतेपदांतरैस्तस्यसर्वांतरत्वमद्वयत्वंचिद्घनत्वंचक्रमेणोक्तमितिविवेकः ॥ ६२३ ॥ मंत्रैरेवस्मर्त्तव्यमितिनियमादुक्तात्मस्मरणोपयोगिनोमंत्रानभिनयति ब्रह्मादीति आदिपदेनइंद्रसोमसूर्याणामात्मचतुर्व्यूहस्यचग्रहः आदौप्रणवमुच्चार्यततोब्रह्माद्यन्यतमंनामोच्चार्यांतेनमइतिब्रूयादेवमष्टौमंत्राभवंतितान्मनसैवजपेदित्यर्थः धियायदक्षरश्रेणिंवर्णस्वरविभूषितां उच्चरेदर्थसंस्मृत्यासउक्तोमान

ब्रह्मेंद्रसोमसूर्यात्मचतुर्व्यूहस्वरूपिणं ॥ अंतरंपरमंतद्वद्विज्ञानंचविशेषणम् ॥ आत्मनोनिर्विशेषंचचतुर्व्यूहःप्रकीर्तितः ॥ ६२३ ॥ ब्रह्मादिनामकान्मंत्रानष्टौतान्प्रणवादिकान् ॥ नमोंतांश्चचतुर्थ्याचसंयुतान्मनसा जपेत् ॥ ६२४ ॥ बध्वांजलिंचसंविश्यस्वासनेविजितेंद्रियः ॥ सक्तुमुष्टिंततःप्राश्यत्रिराचम्यचमंत्रयेत् ॥६२५॥ आत्मनेचतथैवायंप्रवदेदंतरात्मने ॥ प्रजापतयइत्येतंतृतीयंमंत्रमीरयेत् ॥ स्वाहांतंप्रणवादिस्यात्रयंनाभेस्तुमंत्रणे॥६२६॥पयोदधितथासर्पिस्त्रिवारंप्राशयेत्क्रमात्॥सक्तूनांचत्रयस्यास्यप्राशनेप्रणवेरणं ॥६२७॥ आचम्यचजपेत्पश्चात्संविश्यप्राङ्मुखःशुचिः॥ प्रणवंसहगायत्र्यायथाशक्तिद्विजोत्तमः॥६२८॥

सोजपइतिमानसजपलक्षणंव्यासोक्तं ॥ ६२४ ॥ बध्वांजलिमिति स्वासनेउपविश्यांजलिंबध्वाचमंत्रान्मनसाजपेदितिपूर्वेणसंबंधः ततोमुष्टिपरिमितसक्तून्प्राश्यभुक्त्वात्रिवारमाचम्यचनाभौनिधायचहस्तंमंत्रान्पठेदित्यर्थः ॥ ६२५ ॥ तान्मंत्रानाह आत्मनइति आत्मांतरात्मप्रजापतिपदानिचप्रत्येकंप्रणवादीनिस्वाहापदांतानिचसंतिनाभिमंत्रणोपयोगिमंत्रत्रयात्मकानिभवंतीत्यर्थः ॥ ६२६ ॥ पयइति ततःपयःप्रभृतित्रयंप्रत्येकंत्रिवारंभक्षणीयं पूर्वोक्तसक्तुभक्षणेअस्यत्रयस्यपयोदधिसर्पीरूपस्यचभक्षणेप्रणवरूपएवमंत्रउच्चार्यइत्यर्थः यद्यपिकल्पकारास्त्रिवृदित्यादिकंमंत्रंपठंतितथापितत्रत्रिवृदादिपदानांप्रणवपरत्वात्प्रणवस्यार्थविधयास्मरणंभवत्येवेतिभावः ॥ ६२७॥ ततआचम्यप्राङ्मुखेनद्विजेनप्रणवोगायत्रीचयथाशक्तिजप्येइत्याह आचम्येति अत्रोपवाससंकल्पस्यकर्त्तव्यतामाहुरितिबोध्यं ॥६२८॥ ॥४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओंकारमिति ततःसर्ववेदादित्वेनप्रसिद्धंप्रणवमुच्चार्याथवाखिलान्वेदादीन्त्रय्याआदिमान्मंत्रान्यथाइषेत्वेतियजुरादिःअग्निमीळइति ऋगादिः अग्नआयाहीतिसामादिः तानुच्चार्यअमुनावक्ष्यमाणविधिनासावित्रीप्रवेशमंत्रंपठेदित्यर्थः ॥६२९॥ अमुनेत्युक्तमेवाभिनयति भूरितिद्वाभ्यां भूरादिव्याहृत्यभिधानपूर्वकंसावित्रीकर्मकंप्रवेशंकरोमीत्यर्थकंवाक्यंद्विर्वारद्वयंवदेदितिशेषः तस्यचद्विरावृत्तमंत्रस्यव्याहृतित्रययोगेसतिषण्मंत्राभवंतीत्यर्थः ॥६३०॥ तेषुषट्सुमंत्रेषुगायत्रीपादानामुच्चारणक्रममाह त्रिपदामिति अत्रउक्तमंत्राणामाद्यमंत्रत्रये त्रिपदांगायत्रींपच्छःपादशस्तस्याएकैकंपादमितियावत्पठेत् चतुर्थेअर्धतःआद्यपादद्वयंपठेत् पंचमेपादतःतृतीयंपादंपठेत् षष्ठेतुसमग्रा

ओंकारंसर्ववेदादिंवेदादीनथवाखिलान्॥ उच्चार्यप्रविशेद्धीमान्सावित्रींविधिनामुना॥६२९॥ भूर्भुवःस्वरितिप्रोच्यव्याहृतीस्तिस्रआत्मवान् ॥ सावित्रींप्रविशामीतिद्विर्मंत्राःषट्समीरिताः ॥ ६३० ॥ त्रिपदामत्रगायत्रींपच्छोमंत्रद्वयेपठेत् ॥ अर्धतःपादतस्तद्वत्समग्रांचक्रमात्सुधीः ॥ ६३१ ॥ आदित्यास्तमयात्पूर्वंस्वगृह्योक्तप्रकारतः ॥ श्रौतंस्मार्तंतथैवाग्निंलौकिकंवापिनिक्षिपेत् ॥ कुंडेवास्थंडिलेवापिसावधानमनाःपुमान् ॥ ६३२ ॥ यथाशास्त्रंततःसायंहोमंसम्यग्विधायहि ॥ आज्यभागांतकंकर्मस्वगृह्योक्तप्रकारतः ॥ ६३३ ॥ कृत्वातस्मिंस्ततःकुर्यादग्नावाज्याहुतिंपुमान् ॥ भूःस्वाहेतिचसंपूर्णापूर्णाहुतिरितीरितम् ॥ ६३४ ॥ सायंसंध्यामुपास्याथवन्हेरुत्तरतस्ततः ॥ आस्तीर्यदर्भानासीनःकुर्याज्जागरणंततः ॥ तस्यांरात्रौजपन्ब्रह्मगायत्र्याख्यंसनातनं ॥ ६३५ ॥

मेवतांपठेत् एतंगायत्रीपाठक्रममनुसृत्यपूर्वोक्तमंत्रपाठइत्यर्थः ॥६३१॥ ततोब्रह्मान्वाधानाख्यंकर्मकर्त्तव्यतयाह आदित्येतित्रिभिः ततः सूर्यास्तमयात्पूर्वंश्रौतंत्रेताख्यंस्मार्त्तमौपासनाख्यंलौकिकंपवित्रस्थानानीतंवाग्निंकुंडेस्थंडिलेवाकरिष्यमाणहोमार्थंनिदध्यात् तत्रचाग्नौस्वगृह्यसूत्रानुसारेणसायंकालिकमग्निहोत्राख्यंहोमंकृत्वाथआघाराज्यभागपर्यंतमंगजातंविधायततओंस्वाहेतिमंत्रेणाज्याहुतिंदद्यात् तेनैवमंत्रेणपूर्णाहुतिरपिसंपूर्णानिष्पन्नाभवतिइत्येतत्कर्मब्रह्मान्वाधानसंज्ञमितीरितंप्रोक्तंस्मृतिष्वितित्रयाणामर्थः ॥ ६३२ ॥ ६३३ ॥ ॥ ६३४ ॥ ततःसायंसंध्यामुपास्याग्नेरुत्तरदेशेदर्भानास्तीर्योपविष्टोगायत्रीप्रतिपाद्यंब्रह्मस्मरेत्तस्यांरात्रौजागरणंचकुर्यादित्याह सायमिति ॥ ६३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यामेवरात्राविष्टिरपिकार्येतिदर्शयन्नग्न्यनुसारेणेष्टिव्यवस्थामाह अग्निहोत्रीति सयदिश्रुतिचोदितैःश्रौतैरग्निभिरग्निहोत्रीस्यात्तदानि जैरेवतैरग्निभिराग्नेयीमग्निदेवताकांवैश्वानर्याख्यामिष्टिंकृत्वात्रैधातवीराजाधिराजस्वराड्गुणविशिष्टदेवताकांत्रैधातवीसंज्ञामिष्टिंकुर्यात् सयदिऔपासनीऔपासनाख्यस्मार्ताग्निमान्तदाप्राजापत्याख्यामेवेष्टिंनिजेनस्मार्तेनाग्निनाकुर्यात् यस्तुविधुरःपूर्वाश्रमंसमाप्याग्रहीतोत्तराश्रमलक्षणःसोपितांप्राजापत्यामेवकुर्यात् केन विधुराग्निनाविधुरसंबंधिनापृष्ठोदिवीत्यादिमंत्रोत्पादितेनाग्निनेतिद्वयोरर्थः ॥६३६॥ ॥६३७॥ ब्रह्मचारिवानप्रस्थादिभिस्तुपवित्रस्थानात्हृतलक्षणलौकिकाग्नावेवप्राजापत्येष्टिरूपंकर्मकार्यमित्याह ब्रह्मेति ॥६३८॥ केचि

अग्निहोत्रीनिजैरेववन्हिभिःश्रुतिचोदितैः ॥ आग्नेयींप्रविधायैवकुर्यात्त्रैधातवींततः ॥ ६३६ ॥ इष्टिमौपासनीतद्वत्प्राजापत्यांसमाचरेत् ॥ निजाग्निनापिविधुरस्तामेवविधुराग्निना ॥ ६३७ ॥ ब्रह्मचर्यादयःसर्वे लौकिकेजातवेदसि ॥ स्थानात्पवित्रादानीतेकर्मकुर्युरिदंसदा ॥ ६३८ ॥ आहितानाहिताग्नीनामनग्नीनां चकेचन ॥ प्राजापत्याभिधामिष्टिमिच्छंतिनपरेतथा ॥ ६३९ ॥ इष्टिंकृत्वाथवाऽकृत्वासाग्निर्वापिनिरग्निकः ॥ वक्ष्यमाणमिदंकर्मकुर्यात्सर्वद्विजोत्तमः ॥ ६४० ॥ ब्राह्मेमुहूर्त्तउत्थायस्नात्वाविप्रोयथाविधि ॥ जलतोमंत्रतोवापिभस्मनावास्वशक्तितः ॥ ६४१ ॥ अग्नौततश्चरुंविद्वान्श्रपयेत्स्वात्मनःसदा ॥ प्रागुदग्वाथतंपक्वंचरुमुद्वासयेत्ततः ॥ ६४२ ॥

त्तुश्रौताग्निमतामपिप्राजापत्येष्टिःकर्तव्याइतिवदंति परेतुतथानवदंतिंकितूक्तांव्यवस्थामेवांगीकुर्वंतीत्याह आहितेति आहिताग्नयःश्रौताग्निमंतःअनाहिताग्नयःस्मार्ताग्नयः अनग्नयःअग्निहीनाविधुरादयः तेषामिति ॥६३९॥ इष्टिनिर्णयमग्रेकरिष्यामीत्यभिसंधायतद्व्यतिरिक्तंसंन्यासांगतयावश्यकर्तव्यंतृतीयदिवसकृत्यमाह इष्टिमित्यादिना तिष्ठत्विष्टिविचारस्तथापिसर्वैरिदंवक्ष्यमाणंतुकर्त्तव्यमेवेत्यर्थः ॥६४० ब्राह्मेइति ब्राह्ममुहूर्तेतुदर्भासनादुत्थायजलेनशन्नआपइत्यादिमंत्रैर्भस्मनावायथाशक्तिस्नात्वाआलीयेग्नौचरुपाकंकुर्यात् तंचपक्वमग्नेःप्रागुदग्वादेशउद्वासयेत्ततोऽग्नेरवतार्यनिदध्यादितिद्वयोरर्थः चरुर्नामअनास्नावितांतरूष्मपक्वओदनः ॥ ६४१ ॥ ६४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभिघार्येति तंचरुमभिघार्यक्षारितघृतंकृत्वाव्याहृतीःपुरुषसूक्तंसहस्रशीर्षेत्यादिषोडशर्चंवक्ष्यमाणमंत्रांश्चपठेदित्यर्थः ॥ ६४३ ॥ तन्मंत्रानाह इंद्रायेति इंद्रायस्वाहाप्रजापतयेस्वाहाविश्वेभ्योदेवेभ्यःस्वाहाब्रह्मणेस्वाहाइत्याकाराइंद्रादिप्रकाशकामंत्राजप्याइतिद्वयोरर्थः ॥ ६४४ ॥ ६४५ ॥ इदमिति ततःपूर्वदिवसेकारितमपिपुण्याहवाचनंपुनःकृत्वास्रुचिहोमपात्रविशेषेसंस्कृतंघृतंनिधायाग्नयेस्वाहेतिमंत्रेणाग्निमुखसंज्ञामाहुतिंजुहुयादित्यर्थः ॥ ६४६ ॥ प्रधानाहुतीर्दर्शयति प्राणेति भोजनादौक्रियमाणेप्राणाग्निहोत्राख्येकर्मणि विनियुक्तैःप्राणादिनामघटितैःस्वाहांतैःपंचभिर्मंत्रैस्तथास्वशाखापठितपुरुषसूक्तेनप्रत्यृचंजुहुयादित्यर्थः तत्रक्रमेणहोतव्यद्रव्याणितु

अभिघार्यजपेत्पश्चाद्व्याहृतित्रयमात्मवान्॥ तथापुरुषसूक्तंचमंत्रानेतांश्चधर्मवित् ॥ ६४३ ॥ इंद्रायप्रवदेत्स्वाहाथप्रजापतयेपिच॥ स्वाहाविश्वेभ्यएतेभ्योदेवेभ्योब्रह्मणेपिच ॥ ६४४॥ स्वाहांतंद्वयमप्येतदुच्चरेत्पूर्ववद्द्विजः ॥ चत्वारःकथितामंत्राएतइंद्रादिदेवताः ॥ ६४५ ॥ इदंसर्वंजपित्वाथपुण्याहंवाचयेत्पुनः ॥ स्रुच्याज्यंपरिगृह्याथजुहुयाद्द्विमुखाहुतिं ॥ स्वाहांतमग्नयेमंत्रमुच्चार्येदंसमाहितः ॥ ६४६ ॥ प्राणाहुतिसमुद्दिष्टैर्जुहुयान्मंत्रपंचकैः ॥ पौरुषेणापिसूक्तेनस्वशाखापठितेनहि ॥ समिदाज्यचरूंस्तद्वज्जुहुयात्क्रमतोद्विजः ॥ ६४७॥ अग्नयेजुहुयादाज्याहुत्यास्विष्टकृतेततः ॥ जपेच्चपौरुषंसूक्तंस्वशाखोक्तप्रकारतः ॥ ६४८ ॥ उपरिष्टात्ततस्तंत्रंविरजाहोमसंयुतम् ॥ पूर्णाहुत्याचसंयुक्तंप्रविधायचरुंततः॥ प्राशयेत्क्रमएषोत्रज्ञातव्यःशास्त्रवेदितः ॥ ६४९ ॥

समिदाज्यचरुलक्षणानीत्यर्थः ॥ ६४७॥ अग्नयेइति ततःस्विष्टकृतेऽग्नयेइतिमंत्रेणस्वाहांतेनजुहुयात्पुरुषसूक्तंजपेच्चेत्यर्थः ॥ ६४८॥ ततो विरजाहोमंसांगंकुर्यादित्याह उपरिष्टादिति उपरिष्टादुक्तहोमानंतरंपुनश्चरुंविधायविरजाहोमाख्येनकर्मणासंयुतंसंबद्धंतंत्रमंगजातरूपामितिकर्त्तव्यतांपूर्णाहुतिपर्यंतांप्रविधायहुतशेषंप्राशयेत् न्यासोद्यतंप्रत्याचार्यइतिशेषः अत्रसांगविरजाहोमेएषवक्ष्यमाणःक्रमोपिज्ञेयः कीदृशः शास्त्रेणविरजाहोमविधायकागमेनवेदितःप्रकाशितइत्यर्थः तंत्रंकुटुंबकृत्येस्यात्कारणेचपरिच्छदे इतिकर्त्तव्यतायांचेतिविश्वः ॥ ६४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंक्रममभिनयति आज्येनेतिद्वाभ्यां आज्यविशिष्टेनचरुणाविरजाहोमंकृत्वातच्छेषंसर्पिर्युक्तचरुरूपंसंप्राश्यभक्षयित्वाचम्यचओंस्वाहेतिमंत्रेणपूर्णाहुतिंकुर्यादितिद्वयोरर्थः ॥ ६५० ॥ ६५१ ॥ परिशिष्टमिष्टेर्विचारंप्रवर्त्तयंस्तत्रमतभेदंदर्शयति इष्टिरितित्रिभिः सर्वासर्वप्रकारापिइष्टिःसाग्नेःश्रौताग्निमतएवकार्यानेतरस्येतिकेषांचिन्मतं अन्येतुप्राजापत्याख्येष्टिपर्युदासेनप्रथममतमंगीकुर्वंति यतऔपासनाख्यस्मार्त्ताग्निसंयोगमात्रेणापिन्यासांगप्राजापत्येष्ट्यधिकारस्तैरिष्यतेइत्यर्थः ॥ ६५२ ॥ तृतीयंमतमाह वचनादेवेति यथानिषादस्थपतियाजयेदितिवाक्येनश्रौतकर्मधारयसमाससंरक्षणायसंकरजातीयस्यापिनिषादमुख्यस्येष्ट्यधिकारःकल्प्यतेतथाब्राह्मीमिष्टिंनिर्वपे

॥४७॥ आज्येनचरुणासार्द्धंविरजाहोमईरितः॥ विरजाहोमतःपश्चाच्चरुंसंप्राश्यसर्पिषा॥ ६५० ॥ आचम्यजुहुया
त्पश्चात्पूर्णाहुतिमतंद्रितः॥ ओंस्वाहेतिचमंत्रेणब्राह्मणोनियतःशुचिः॥ ६५१ ॥ इष्टिःसर्वापिसाग्नेःस्यान्निर
ग्नेर्नैवकाचन॥ इतिकेचिद्वदंत्यन्येप्राजापत्याविवर्जितं॥ औपासनाग्निसंयोगात्प्राजापत्येष्टिरिष्यते॥ ६५२
वचनादेवसर्वेषांचतुर्थाश्रमसंग्रहे॥ प्राजापत्येष्टिरुदितानिषादस्थपतीष्टिवत्॥ ततःसाग्नेर्निरग्नेःस्यादिष्टिरे
षेतिकेचन ॥ ६५३ ॥ एवमेतेत्रयःपक्षाःश्रौतेस्मार्तेचलौकिके ॥ वन्हाविष्टौमयोक्तास्तेविप्राणांमतभेदतः
॥ ६५४ ॥ त्रैधातवीतथाग्नेयीइष्टिरुक्ताग्निहोत्रिणः॥ भवेत्सापरहंसानांनान्यत्रेतिचकेचन॥ ६५५॥

दित्यादिश्रुत्या प्राजापत्यांनिरूप्येष्टिंसर्ववेदसदक्षिणां आत्मन्यग्नीन्समारोप्यब्राह्मणःप्रव्रजेद्गृहादितिस्मृत्याचइष्टिसंन्यासयोःसमानकर्तृकत्वनिर्देशेनानग्नीनामपिप्राजापत्येष्ट्यधिकारःकल्प्यतेइत्यर्थः ॥ ६५३ ॥ उक्तमतत्रयशालिनामाशयानाह एवमिति श्रौताग्नावेवप्राजापत्येष्टिर्भवतीत्याशयेनाद्यपक्षस्यप्रवृत्तिः स्मार्तेग्नावपिसाभवतीत्याशयेनद्वितीयस्यलौकिकेपिसास्यादित्याशयेनतुतृतीयस्येत्यर्थः ॥ ६५४ ॥ जाबालादिवाक्यानुसारित्वेनाभ्यर्हितंपक्षमाह त्रैधातवीतित्रिभिः त्रैधातवीसंज्ञाआग्नेयीवैश्वानरीसंज्ञाचेष्टिरग्निहोत्रिणःश्रौताग्निमतएवपरमहंसानांधर्मभूतेचतुर्थेसंन्यासेकरिष्यमाणेएवचकर्त्तव्याभवेन्नान्यत्रकुटीचकादिसंन्यासेइतिकेचनद्विजोत्तमाआहुरितितृतीयेनाभिसंबंधः ॥ ६५५ ॥ ॥४७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुटीचकादिन्यासग्रहणांगतयातुश्रौताग्निमद्भिरपिप्राजापत्यैवकार्यैतिवदंतीत्याह परहंसाश्रमादिति स्पष्टम् ॥ ६५६ ॥ एवमिति विषयतःन्यासविशेषरूपमग्निहोत्रिद्वपंचविषयमपेक्ष्यहिनिश्चितांव्यवस्थांकेचनद्विजोत्तमाःप्राहुः तेषांद्विजोत्तमत्वेहेतुगर्भेविशेषणद्वयंपौराणिकाइत्यादि पुराणानांप्राचीनानांश्रुत्यादिवाक्यानांवेत्तारः तेषांतर्ककुशलतामाह आहिताग्नेरिति आहिताग्निभिन्नस्येष्ट्यधिकारोनास्तीतिवदंतइत्यर्थः अयंभावः अग्निसाध्यानीष्ट्यादीनिकर्माण्यग्निमंतमधिकारिणंप्राप्यननिरग्नेरधिकारंकल्पयंति नहिनिषादस्थपतेरिवनिरग्नेरधिकारंविनाकस्याश्चिच्छ्रुतेरनुपपत्तिरिति ॥ ६५७ ॥ निगमयति त्रैधातवीति अग्निहोत्रिणःपारमहंस्यग्रहणकालेआग्नेयीत्रैधातव्योरनुष्ठानंतुजाबालवाक्यान्निश्चितमेव प्राजापत्यायास्तुश्रौताग्निमतापिकर्त्तव्यत्वंस्मार्ताग्निमतैवकर्त्तव्यत्वंलौकिकाग्नावपिकर्त्त

परहंसाश्रमादन्यंन्यासंचेदग्निहोत्रिणः ॥ कुर्युस्तत्रप्रकुर्वीरन्प्राजापत्येष्टिमादरात् ॥ ६५६ ॥ एवंविषयतः प्राहुर्व्यवस्थांहिद्विजोत्तमाः ॥ पौराणिकाआहिताग्नेरन्यत्रेष्टिनिवारकाः ॥ ६५७॥ त्रैधातवीतथाग्नेयीसर्वथैवाग्निहोत्रिणः ॥ प्राजापत्याकृतेवादोवर्ततेत्रद्विजन्मनां ॥ ६५८ ॥ मुखाहुतिमुखंचैतत्पूर्णाहुत्यंतमीरितं ॥ अविवादंपरेहंसेसर्वेषांचद्विजन्मनां ॥ ६५९ ॥ अग्नौश्रौतेतथास्मार्त्तेलौकिकेवाविधायतत् ॥ कर्मसर्वंततः कुर्यादौत्तरंपरिसेचनं ॥ ६६० ॥

व्यत्वमित्येवमाकारोविवादोनानापक्षपरिग्रहोद्विजानांश्रुत्यादिविदांवर्त्ततेसचयथासंभवंविकल्पेनसमाधेयइतिभावः ॥ ६५८ ॥ यच्चेष्टिव्यतिरिक्तंब्राह्मेमुहूर्त्तेचोत्थायेत्यादिनापूर्ववर्णितंतस्यसर्वेषांसंन्यासग्रहणादावनुष्ठानेतुकस्यापिनविवादइत्याह मुखेति मुखाहुतिमुखंअग्नयेस्वाहेतिमंत्रेणयाहुतिस्तत्प्रभृतिपूर्णाहुतिपर्यंतंचयत्कर्मोक्तंतस्यसर्वसाधारण्येनविवादइत्यर्थः ॥ ६५९ ॥ प्रकृतमनुसरति अग्नाविति श्रौताद्यन्यतमेऽग्नावुक्तंकर्मविधायततऔत्तरंउत्तरनारायणीयपाठेनानुष्ठेयं सेचनंजलाशयंपरिअभिलक्ष्यगृहान्निर्गमनं सपत्नपाठेउत्तरकालिकंपरिसेचनंसर्वतोनुग्रहरूपामृतदृष्टिंकुर्यादित्यर्थः ततउत्तरनारायणेनगृहान्निर्गच्छेत्ततस्तेभ्यआशिषंदद्यादितिहिपद्धतिकृद्भिरुक्तमितिभावः ॥ ६६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुग्रहमेवविशदयति ऋत्विग्भ्यइति ऋत्विग्भ्योऽध्वर्युप्रभृतिभ्योबलीवर्द्दगौर्दक्षिणेतिविहितंतथाकांचनंचरुशेषमाज्यशेषमन्यच्चान्ना दिकंयथाशक्तिदद्यात् ॥ ६६१ ॥ क्षमाप्येति तान्ऋत्विजोबंधूनन्यांश्चस्वकीयात्युक्त्याद्यपराधान्क्षमाप्यपुत्रादीन्संप्रतिसंन्न्यस्तकर्मानुष्ठानेना न्यांश्चआशीरादिभिरभिनंदनेनविसर्ज्ययतिवत्प्रैषोच्चारणानंतरंयथानिःसंगेनभवितव्यंतथापूर्वंभवेदित्यर्थः ॥ ६६२ ॥ बांधवैश्चतदागृ हान्प्रतिगंतव्यंतस्मिन्ममत्वंविहायतद्देशेवास्थातव्यमित्याह स्वजनाइति प्रेक्षकाइतिभविष्यतिण्वुल् कौतुकंदिदृक्षवइतितदर्थः ॥६६३॥ अग्नीनामात्मन्यारोपणस्येतिकर्त्तव्यतामाह प्रातरिति तत्रोक्तहोमदेशेप्रातर्होमंनित्यंयथाक्रियतेतथाकृत्वासमासिंचंतुमरुतःसमिद्धइत्या

ऋत्विग्भ्योदक्षिणांदद्याद्बलीवर्दंसकांचनं ॥ चर्वाज्ययोस्तथाशेषमन्यच्चापिस्वशक्तितः ॥ ६६१ ॥ क्षमाप्य तांस्तथाबंधूनन्यानपिविसर्ज्यच ॥ पुत्रदारादिकान्सर्वान्निःसंगोयतिवद्भवेत् ॥ ६६२ ॥ स्वजनाश्चततःसर्वे स्नेहमात्रविवर्जिताः ॥ स्वस्वस्थानानिगच्छेयुःप्रहृष्टमनसोपिवा ॥ स्थितिंतत्रैवतेकुर्युःप्रेक्षकाइवकौतुकं ॥ ६६३ ॥ प्रातर्होमादिकंतत्रकुर्यात्सस्नेहवर्जितः ॥ समासिंचंतुमेत्यादिमंत्रादग्नेरुपस्थितिं ॥ ६६४ ॥ कृ त्वायातेत्ययंतेवातयोरन्यतरेणवा ॥ त्रिवारंमंत्रतःस्वीयमग्निमारोपयेद्द्विजः ॥ ६६५ ॥ यदानविद्यतेवह्निः श्रौतःस्मार्त्तोपिलौकिकः ॥ अप्स्वेवात्रतदाहोमंकृत्वाकुर्यात्स्वरोपणं ॥ ६६६ ॥ उदरेस्वेसमारोप्यवह्नींश्चि त्वाततोद्विजः ॥ पूर्वमारोपितांतत्रसावित्रींसंस्मरेत्पुनः ॥ ६६७ ॥

दिमंत्रेणाग्नेरुपस्थितिमुपस्थानंविधाययातेअग्नेयज्ञियातनूरित्यादिनाअयंतेयोनिर्ऋत्वियोइत्यादिनावामंत्रेणत्रिवारंपठितेनस्वीयमग्नि त्वयमुत्पादितंश्रौताद्यन्यतममग्निमूष्मपानपूर्वकमुदरेसमारोपयेदित्यर्थः ॥ ६६४ ॥ ६६५ ॥ यस्यतुकोप्यग्निर्नास्तितेनजलएवसर्वमग्नि साध्यंकर्मकार्यमित्याह यदेति स्वरोपणंभावनामयस्याग्नेःस्वांतरारोपणंकुर्यादिति ॥ ६६६ ॥ उदरेइति बहिःस्थानग्नीन्स्वोदरेसमारोप्यत त्रआगमोक्तप्राणाग्निहोत्रेतिकर्त्तव्यतयाभावनामयकुंडेषुतानग्नींश्चित्त्वाव्यवस्थाप्यतत्राध्यात्मिकेवायूपाग्नौसावित्रीप्रवेशकालेसमारो पितांसावित्रींपुनःस्मरेत्प्रवेशमंत्रान्पुनःपठेदितियावत् सावित्रींस्ववाचाग्नौसमारोपयेदितिप्रोक्तंमुंडकोपनिषदि ॥ ६६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततइति ततोजलसमीपंगत्वानाभिपरिमितेजलेस्थित्वाऽमून्वक्ष्यमाणान्मंत्रान्जपेदित्यर्थः ॥ ६६८ ॥ प्राहेति तान्मंत्रानूर्ध्वबाहुःसन्नाहव्यक्तंवदेदित्यर्थः केतेमंत्राइत्याकांक्षायामाह अहमित्यादि अहंवृक्षस्येत्यादिवचइत्यंतंत्रिशंकोर्वेदानुवचनमित्यंतंजपेदितिसंबंधः तथायश्छंदसामितिशांतिमंत्रेनववाक्यानिभवंतितानिजपेत् तत्रसंवभूवेत्यंतंवाक्यद्वयंपरिशिष्टसप्तवाक्यानीतिविवेकः अथोतदनंतरंपुत्रैषणायावित्तैषणायाइत्यादिकंजपेदित्यर्थः ॥ ६६९ ॥ प्रैषमंत्रमाह एतदंतइति ततएकैकव्याहृतिपूर्वकंसंन्यस्तपदंत्रिवारमुच्चारयेत् क्रमेणमंदमध्यमोत्तमैःस्वरैरित्यर्थः तथाचनवधाप्रैषपाठइतिभावः ॥ ६७० ॥ आतुरसंन्यासस्तुश्राद्धादीतिकर्त्तव्यतां

ततोगत्वाजलाभ्यासंप्रातःसंध्यामुपास्यच॥नाभिदघ्नेजलेस्थित्वाजपेन्मंत्रानमूंस्ततः॥ ६६८ ॥ प्राहतानूर्ध्वबाहुःसन्नहंवृक्षस्यरेरिवा॥इत्यादिवचइत्यंतंतद्वयश्छंदसामिति॥नववाक्यान्यथोपुत्रैषणायाइतिवाजपेत्॥ ६६९ ॥ एतदंतेप्रकुर्वीतव्याहृतित्रयतःपुमान्॥ त्रिःसंन्यस्तंमयेत्येवंमंदमध्योत्तरस्वरैः ॥ ६७० ॥ आतुरस्यतुसंन्यासेप्रैषमात्रंहिकेवलं॥नश्राद्धादिनचान्यत्स्याज्जलमध्यादिसर्पणं ॥ ६७१ ॥ प्रैषंवक्तुमशक्तश्चेद्वाचासौमनसैवहि॥ प्रैषंकुर्यात्स्वयंधीरोमरणेसमुपस्थिते॥६७२॥ आतुराणांतुसंन्यासेनविधिर्नैवचक्रिया॥मानसाद्वाचकाद्वापिप्रैषादेवात्रजायते॥ ६७३॥ तनुंत्यजेद्द्वियोविप्रःकृत्वासंन्यासमात्मवान्॥ कालांतरेथवासद्योब्रह्मलोकंसगच्छति॥६७४॥

विनापिप्रैषोच्चारणमात्रेणैवसिद्ध्यतीत्याह आतुरस्येति स्पष्टम् ॥ ६७१ ॥ उच्चारणेप्यशक्तौसत्यांमनसैवोक्तंप्रैषमंत्रंपठेत् यद्यातुरःस्यान्मनसावाचासंन्यसेदितिश्रुतेरित्याह प्रैषमिति ॥ ६७२ ॥ आतुरस्यतावतैवसंन्यासपूर्तिःश्रुतेरिष्टायथागृहमेधीयेष्टेःपूर्तिराज्यभागौयजतीतिवाक्यविहिताज्यभागाभ्यामित्याशयेनाह आतुराणामिति विधिरुत्पत्तिविधिविहितंप्रधानकर्मजलेस्थित्वासंकल्परूपंक्रियातदुपकारकमंगजातंश्राद्धेष्ट्यादितत्सर्वंविनापिकेवलप्रैषवाक्योच्चारणादिनाअत्रआतुरदशायांजायतेसंन्यासइतिसंबंधः ॥६७३॥ संन्यासफलमाह तनुमिति सतिप्रतिबंधेकालांतरेतदभावेसद्यइतिविवेकः संन्यासाद्ब्रह्मणःस्थानमितिस्मृतेरितिभावः ॥ ६७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपिलवाक्यमर्थतःसंगृह्णाति संन्यस्तमितिद्वाभ्यां प्रयाणकालेपिसंन्यस्तपदोच्चारणेब्रह्मलोकेपूज्यत्वंतत्रहिरण्यगर्भमोक्षकालेतेनहिरण्य गर्भेणसहमोक्षश्चभवतीतिद्वयोरर्थः ॥६७५॥६७६॥दक्षवाक्यंपठति त्रिंशदिति त्रिंशत्संख्याकान्परान्त्रिंशच्चतेभ्योऽवरान्त्रिंशच्चतेभ्यःप रेभ्यःपरान्नवतिसंख्याकानितियावत् तावतःपितॄनतीतवंश्यान्नरकात्त्रायतेइत्यर्थः ॥६७७॥ शतंकुलानांपुरतोबभूवतथाकुलानांत्रिशतं समयं एतेभवंतिसुकृतस्यलोकेयेषांकुलेसंन्यसतीहविप्रइतिजाबालवाक्यमर्थतःसंगृह्णाति कुलानामिति कुलानांवंश्यपुरुषाणांशतंपूर्व मतीतंतथाकुलानांशतत्रयमपरंभविष्यत्एतत्सर्वंसुकृतसाध्येलोकेस्यात्तिष्ठेत्यत्यतःसंन्यस्तस्यकुलेवंशेभवतीत्यर्थः ॥६७८॥ संन्यासप

संन्यस्तमितियोब्रूयात्प्राणैःकंठगतैरपि ॥ ससूर्यमंडलंभित्वाब्रह्मलोकेमहीयते ॥ ६७५ ॥ ब्रह्मणोमरणेते नब्रह्मणासहधैर्यवान् ॥ महाभूतलयेप्राप्तेपरंब्रह्माधिगच्छति ॥ ६७६ ॥ त्रिंशत्परांस्त्रिंशदवरांस्त्रिंशच्चपर तःपरान् ॥ सद्यःसंन्यसनादेवनरकात्त्रायतेपितॄन् ॥ ६७७ ॥ कुलानांचशतंपूर्वमपरंचशतत्रयं ॥ एतत्स्यात्सु कृतेलोकेसंन्यस्तस्यकुलेस्तियत् ॥ ६७८ ॥ न्यासस्त्यागइतिप्रोक्तःसम्यक्त्वंतस्यचेदृशं ॥ सर्वथासर्वदासर्वं सर्वत्रत्यजनंस्मृतम् ॥ तच्चमुख्यंपरेहंसेजघन्यमपरत्रहि ॥ ६७९ ॥ परोहंसइतिज्ञानाद्द्विजस्तुम्रियतेयदि ॥ पु त्राद्यैरथयस्तस्यसंस्कारःपरिकीर्त्यते ॥ ६८० ॥ संपादयेद्रथंचित्रंविमानंचापिनिर्मलं ॥ आंदोलिकांचशि क्यंवाविस्तीर्णंमृदुलंध्रुवं ॥ ६८१ ॥

दार्थंवदन्परमहंसस्यमुख्यतामाह न्यासइति न्यासपदेनत्यागउच्यतेसंपदेनचतस्यत्यागस्यसम्यक्त्वमुच्यतेतच्चसम्यक्त्वमीदृशमेवमाकारंई दृशंकीदृशमित्याकांक्षायामाह सर्वथेति सर्वथाशरीरवाङ्मनोभिःक्रियमाणस्यत्यजनस्यसर्वदासर्वत्रसर्वदेशकालावच्छिन्नत्वंतथासर्व त्वंसर्वदृश्यविषयकत्वंयत्तदेवसम्यक्त्वमित्यर्थः ॥ ६७९ ॥ अथातुरन्यासप्रसंगेनपरमहंसस्यमृतौसत्यांतद्बांधवादिभिर्यत्कर्त्तव्यंशौनकबौ धायनादिभिर्दर्शिततंतत्प्रपंचयति परोहंसइतिपंचाशताश्लोकैः अयंद्विजःपरमहंसतांगतइतिज्ञानादनंतरंसपरमहंसोयदिम्रियेतअथत स्यपुत्राद्यैर्नृपतिपर्यंतैरधिकारिभिर्यत्तद्देहस्यसंस्कारादिकंकर्त्तव्यंतदुच्यतेइत्यर्थः ॥ ६८० ॥ संपादयेदिति तावत्तद्देहनयनार्थंरथायग्य तमंसंपादयेत्तत्रविमानमधोलग्नदंडसक्तस्कंधैर्बहुभिर्वाह्यं आंदोलिकामध्यप्रोतदंडाद्वाभ्यांवाह्या ध्रुवंदृढावयवं ॥ ६८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तव्यमुत्सवमभिनीयदर्शयति वादित्रेतिचतुर्भिः महादेवादिभक्तायथाशिवरात्र्यादौवादित्रादिकंकारयंतितथाकारयेत् तत्रवादित्रंवा द्यशब्दः घोषोवेदादिशब्दः ॥ ६८२॥ तांबूलेति वसंतोत्सवोहोलिकातत्रयथोत्सवंकुर्वंतितथास्नानादिशालिनःसंतउत्सवंकुर्युः हरिद्राचूर्णा दिमंगलद्रव्यैःसंयुक्तकराः तथाविभवेसतिगृहादयश्चंदनादिवारिभिःसिक्तागतपांसवःपरिहृतधूलिकाःकार्याइतित्रयाणामर्थः ॥ ६८३॥

वादित्रनृत्यघोषंचजयशब्दंचकारयेत् ॥ महादेवस्यविष्णोर्वाभक्त्यायद्वत्समुत्सवे ॥ स्नातादुकूलवसनास्तद्व च्चंदनचर्चिताः ॥ ६८२ ॥ तांबूलवदनाःसर्वेस्रग्विणोहर्षमागताः ॥ हरिद्राचूर्णदुग्धाद्यैःफलैर्नानाविधैर पि ॥ ६८३ ॥ सुगंधैःसुमनःसंघैरन्योन्यकरसंस्थितैः ॥ वसंतोत्सववत्कुर्युरुत्सवंविभवेसति ॥ ६८४ ॥ गृ हाश्चराजमार्गाश्चसर्वतःपरिमार्जिताः ॥ सिक्ताश्चंदनकर्पूरवारिभिर्गतपांसवः ॥ ६८५ ॥ पंचामृतेनतद्देहं स्नापयेच्छिववविष्णुवत् ॥ पुण्यैर्जलैःसुगंधैश्चलेपयेच्चंदनादिभिः ॥ ६८६ ॥ अलंकुर्यात्तुमालाभिःसर्वतःप्र तिमामिव ॥ चंदनागुरुकर्पूरैर्धूपयेच्चमुहुर्मुहुः ॥ नीराजनैःसकर्पूरैश्चित्रैर्नीराजयेदपि ॥ ६८७ ॥ संस्थाप्य पूर्वसंप्रोक्तयानेसम्यगलंकृते ॥ देववद्राजवच्चैनंवेदघोषैश्चसंयुतं ॥ निःसारयेयुःसंस्थानाद्वनादिस्थानकंप्र ति ॥ ६८८ ॥ पुण्यवृक्षेवनेगत्वानिर्जनेवावनस्पतौ ॥ देवालयेथवागोष्ठेमहानद्यास्तटेथवा ॥ अन्यत्रवा शुभेदेशेमलास्थ्यादिविवर्जिते ॥ ६८९ ॥ पुंप्रमाणांखनेद्भूमिंकूपवद्वर्तुलीकृतां ॥ पठेयुःखनितारश्चव्याहृ तीरसकृत्ततः ॥ ६९० ॥

॥ ६८४ ॥ ६८५ ॥ तद्देहपूजांदेवप्रतिमावत्कर्त्तव्यतयावर्णयति पंचामृतेनेति तद्देहंपरमहंसदेहं निगदव्याख्यातंद्वयं ॥ ६८६ ॥६८७॥ तन्नयनविधिमाह संस्थाप्येति पूर्वोक्तरथादिरूपेयानेवाहनेसंस्थाप्यसंस्थानान्मृतिदेशाद्वनादिदेशाभिमुखंनयेयुरिति ॥ ६८८ ॥ पु ण्येति पुण्याअश्वत्थादयोवृक्षायत्रतत्तथा तादृशवनादिदेशेगत्वापुरुषप्रमाणंखातंकूपसमंभूमौकुर्युरिति तत्खननकर्तृभिर्द्विजैर्व्याहृतयः पठनीयाइतिद्वयोरर्थः ॥ ६८९ ॥ ६९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तेति तत्खातंसप्तव्याहृतिभिःसंप्रोक्ष्यतत्रखातगतभूमौप्रणवमंत्रेणदर्भासनंस्थापयेदिति ॥ ६९१ ॥ सावित्र्येति तत्रखातबहिर्देशेतद्देहं सावित्रीमंत्रप्रयुक्तस्नानेनमलवर्जितंकृत्वापुरुषसूक्तेनविष्णुबुध्यास्नापयेद्गंधादिभिरलंकुर्याच्चेति ॥ ६९२ ॥ विष्णोइति ततस्तद्देहंत स्मिन्खातेविष्णोहव्यंरक्षस्वेतिमंत्रेणनिक्षिपेत्ततस्तदीयदंडंत्रिधाकृत्वादक्षिणेकरेदद्यात् यद्यप्यातुरस्यदंडोविधिनासम्पादितोनविद्यतेत थापितंदंडमिदंविष्णुविचक्रमइत्यनेनमंत्रेणसंपाद्यसंन्यासधर्मवित्कश्चित्तत्करेदद्यादितिद्वयोरर्थः ॥ ६९२॥६९३ ॥ हंसइत्यादीति तस्य

सप्तव्याहृतिभिःखातंसंप्रोक्ष्यात्रद्विजोत्तमः॥ दर्भासनंप्रकुर्वीतप्रणवेनभुवस्तले॥ ६९१ ॥ सावित्र्यातत्र तद्देहंप्रक्षाल्यमलवर्जितं ॥ पौरुषेणापिसूक्तेनस्नापयेद्विष्णुबुद्धितः ॥ गंधमाल्यादिभिश्चैतदलंकुर्याद्यथापु रा ॥ ६९२ ॥ विष्णोहव्यंरक्षस्वेतिमंत्रमुच्चार्यनिक्षिपेत्॥ खातेतस्मिंस्ततोदंडमर्पयेद्दक्षिणेकरे ॥ ६९३ ॥ त्रिधाकृत्वाभवेद्दंडआतुरस्यनविद्यते ॥ संपाद्यतंतदासद्योदद्यात्संन्यासधर्मवित् ॥ अमुनामंत्रतोविद्वानि दंविष्णुर्विचक्रमे ॥ ६९४ ॥ हंसइत्यादिकंमंत्रंजपेद्धृदयदेशतः ॥ भ्रूमध्येपौरुषंसूक्तंब्रह्मजेत्यादिमूर्द्धनि ॥ ६९५॥ भूमिर्भूमिमगादित्थंमंत्रतोदृढमश्मना ॥ भिंद्यान्मूर्द्धनिमध्येचमेधावीब्राह्मणोत्तमः ॥ ६९६ ॥ उच्चारयंतओंकारंव्याहृतीश्चद्विजोत्तमाः॥ अवटंपूरयेयुस्तेपाषाणैश्चमृदादृढं॥ ६९७ ॥ श्वसृगालादयोयद्व द्भक्षयेयुर्नतंतथा॥ कुर्युरेवंनचेदेवंदुर्भिक्षादिप्रजायते॥ ६९८॥

हृदयदेशेहस्तंनिधायहंसःशुचिषदित्यादिमंत्रंजपेत् भ्रूमध्येतंनिधायचपुरुषसूक्तंजपेत् मूर्द्धनिहस्तंनिधायचब्रह्मजज्ञानमित्यादिमंत्रंजपे दित्यर्थः ॥ ६९५ ॥ भूमिरिति ततोभूमिमगादित्यादिमंत्रेणतस्यमूर्द्धमध्येअश्मनापाषाणेनप्रहारंदद्यात्कुशलोविप्रइत्यर्थः ॥ ६९६ ॥ उ च्चारयंतइति ततःप्रणवंव्याहृतीश्चोच्चारयंतोद्विजास्तंगर्तंपूरयेयुरिति ॥ ६९७॥ श्वसृगालेति यथातद्देहंश्वानःसृगालादयश्चनभक्षये युस्तथाकर्त्तव्यं यतस्तद्देहस्यसृगालाद्यैर्भक्षणेदुर्भिक्षादिदेशोपद्रवाणामुत्पत्तिर्बौधायनेनोक्तेत्यर्थः ॥ ६९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संन्यासिनइति एषउक्तविधःसंस्कारःसंन्यासिनोमुक्तस्योपकारायनभवतिकिंतुकर्त्तॄणामेवतत्करणेऽभ्युदयःसत्फलान्निरकरणेप्रत्यवाय श्चभवतितत इदंसिद्धं इदंकिं यद्यपिविरक्ताइतीच्छंतियन्ममपरमहंसस्यदेहःश्वप्रभृतिभ्योदेयइतितथापिपरेअभ्युदयार्थिनोजनास्तथा भावंनेच्छंतीतिद्वयोरर्थः ॥ ६९९ ॥ ७०० ॥ फलितमाह यतइति यतःपरमहंसदेहस्योक्तविधयाभूमौखनित्वापूरणमन्येषांकर्त्तॄणां चातुर्वर्णिकानांवृद्धेरभ्युदयस्यकारणंतेनपूरणंप्रशस्तमित्यर्थः ॥ ७०१ ॥ अकरणेप्रत्यवायमभिनयति कुटीचकादयइति यद्यपिकुटीच

संन्यासिनोनकोप्येषसंस्कारःपरिकीर्तितः ॥ कर्त्तॄणाममुनायस्माद्भवेदभ्युदयःसदा ॥ प्रत्यवायोप्यकरणेत तस्तेष्वेवसंस्मृतः ॥ ६९९ ॥ देहःपरमहंसस्यदेयश्छित्वात्रखंडशः ॥ भूतेभ्यइतिचेच्छंतिविरक्तानपरेतथा ॥ ७०० ॥ यतःपरमहंसस्यपूरणंवृद्धिकारणं ॥ अन्येषांवर्णिनांतेनपूरणीयःससर्वदा ॥ ७०१ ॥ कुटीचका दयोदाह्याःपूरणीयाश्चवाद्विजैः ॥ दाहःपरमहंसस्यनैवकार्यःकथंचन ॥ ७०२ ॥ अस्मिन्दग्धेप्रदग्धाःस्युरा शिषःप्राणिसंश्रयाः ॥ भक्षितेभक्षितास्तद्वत्तस्मात्तंपूरयेत्सदा ॥ ७०३ ॥ अग्निनाग्निरितिप्रोच्यसूर्यातइति चापरं ॥ पठेन्मंत्रंहिसंपूर्णेखातेतस्मिन्द्विजोत्तमः ॥ ७०४ ॥ प्रहृष्टवदनाःसर्वेशोकक्लेशविवर्जिताः ॥ विवा हाद्युत्सवेयद्वत्तद्वदेवव्यवस्थिताः ॥ कुर्युःप्रदक्षिणंतद्वन्नमस्कारांश्चशक्तितः ॥ ७०५ ॥

कबहूदकादीनांदाहादिकमपिमुनिभिरुक्तंतथापिपरमहंसविषयेतैरेवदाहनिषेधात्तद्दाहोनकार्यःसर्वथाऽनिष्टसाधनमितियावत् तथाच कपिलः अनग्नेर्दहनंकार्यंपूर्वभिक्षोर्यथाविधि विदुषस्तुनतत्कार्यमेकोद्दिष्टादिकर्हिचित् पूर्वभिक्षुःकुटीचकः विद्वान्परमहंसः ॥ ७०२ ॥ ततःकिमनिष्टमित्यतआह अस्मिन्निति अस्मिन्परमहंसदेहेदेवप्रतिमावत्सर्वकामोपादानभूतेदग्धेसतिप्राणिनामाशिषएवदग्धाःस्युरित्यु पचारः एवमग्रेपि ॥ ७०३ ॥ पूरणानंतरंकर्त्तव्यमाह अग्निनेति अग्निनाग्निःसमिध्यतेत्यादिकंसूर्यातेइत्यादिकंचमंत्रंपूरणानंतरंद्विजो त्तमःपठेदिति ॥ ७०४ ॥ प्रहृष्टेति ततउत्सवइवप्रहृष्टाःसंतःप्रदक्षिणादिकंकुर्युरिति ॥ ७०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवटस्योर्ध्वमिति तस्यगर्तस्योर्ध्वमुपरिदेवालयमश्वत्थादिकंवाआस्थाप्यनिवेशयित्वातस्मिन्विष्णुप्रतिमाद्यन्यतमंप्रतिष्ठाप्यतत्पूजाप्रवर्तनीयामहामतिभिरितिद्वयोरर्थः ॥ ७०६ ॥ ७०७ ॥ महामतित्वेप्रयोजकमाह किंबहूक्त्येति यथातत्स्थानोपरिअशुचिद्रव्यसंपर्कोनस्यात्तथाकरणस्यावश्यकत्वात्तत्रदेवालयादिसंपादनेनतदिष्टसाधनंआम्राश्वसिक्ताःपितरश्चप्रीणीताइतिन्यायानुसरणेनमहामतित्वंस्फुटयतीतिभावः यथाकालांतरेप्यस्यपूरणस्थानस्योपरिष्टान्मलादिकंकथंचनापिनपतेत्तथाकुर्युरित्यन्वयः ॥ ७०८ ॥ ततःस्नानंतीर्थबुद्ध्याकार्यमित्याह प्रेतस्येति प्रेतस्यमृतशरीरस्यदर्शनेस्पर्शेचसतियास्वस्मिन्नशुचित्वबुद्धिःप्रसिद्धासानकार्यापरंकिंतुविष्णोःप्रतिमायाः

अवटस्योर्ध्वमास्थाप्यदेवालयमथापिवा ॥ अश्वत्थंवावटंवापिशस्यंवाऽन्यंवनस्पतिं ॥ ७०६ ॥ वैष्णवींप्रतिमांतत्रलिंगंवाशैवमेवच ॥ आदित्यंवागणेशंवाभवानींवाश्रियंतथा ॥ प्रतिष्ठाप्यचपूजांचतत्रकुर्युर्महाधियः ॥ ७०७ ॥ किंबहूक्त्यातथाकुर्युर्यथाकालांतरेपिच ॥ मलास्थ्यादिपतेन्नास्यत्द्युपरिष्टात्कथंचन ॥ ७०८ ॥ प्रेतस्यदर्शनात्स्पर्शाद्बुद्धिर्याजायतेनृणां ॥ नतांकुर्युःपरंविष्णोःस्पर्शदर्शनसंभवां ॥ ७०९ ॥ कृत्वास्नानंचकुर्वीरन्नाशुचित्वनिवारणं ॥ परंतत्स्नानसंभूततीर्थबुद्ध्यामनीषिणः ॥ कुर्युर्वाप्यथवानैवस्नानंस्वेच्छावशादिह ॥ ७१० ॥ प्राणनिर्गमनादूर्ध्वंप्रतिमावैष्णवीतुसा ॥ देहःपरमहंसस्यजीवन्विष्णुरयंस्वयं ॥ ७११ ॥ अतएवपुराणज्ञाएवमाहुर्मनीषिणः ॥ वैष्णवींप्रतिमांदृष्ट्वायतिंदृष्ट्वैवदंडिनं ॥ प्रणिपातमकुर्वाणोनरकंप्रतिपद्यते ॥ ७१२ ॥

स्पर्शादौयाबुद्धिस्तांकृत्वास्नानंतैःकर्त्तव्यंपरंतुतत्स्नानमशुचित्वस्यनिवारकंनभवत्यशुचित्वस्यैवाभावादितिभावः ततोमनीषिणस्तस्यपरमहंसस्यस्नानेनसंभूतंयत्तीर्थंतद्भावनयास्नानंकुर्युर्नवाकुर्युः यतइहपरमहंसदेहस्यस्पर्शादौस्नानस्येच्छैवनियामिकेतिद्वयोरर्थः ॥ ७०९ ॥ ॥ ७१० ॥ उक्तार्थेहेतुतयाअत्रिवाक्यद्वयं द्वेरूपेवासुदेवस्यचलंचाचलमेवच चलंसंन्यासिनांरूपमचलंप्रतिमादिकं देवताप्रतिमांदृष्ट्वायतिंदृष्ट्वैवदंडिनं प्रणिपातमकुर्वाणोनरकंरौरवंव्रजेदित्याकारमर्थतोनिबध्नाति प्राणेतिद्वाभ्यां परमहंसदेहःप्राणनिर्गमनोत्तरंविष्णुप्रतिमातुल्यःपूर्वंतुसाक्षाद्विष्णुरित्यर्थः ॥ ७११ ॥ अतएवेति पुराणज्ञाःपुरातनार्थस्मर्त्तारःअत्र्यादयः ॥ ७१२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भारतवाक्यंपठति दुर्वृत्तइति स्पष्टम् ॥ ७१३ ॥ अपमानेकृतेतेषांदेवाःसर्वेऽपकारिताइत्यादिनारदवाक्यानांतात्पर्यमाह ब्रह्मेतिचतुर्भिः स्पष्टंद्वयं ॥ ७१४ ॥ ७१५ ॥ भिक्षुरिति स्वदेहेस्वप्रतिमायांयथाविष्णुःसंनिहितस्तथाभिक्षुदेहेपीत्यर्थः ॥ ७१६ ॥ यतेर्देवप्रतिमासाम्यं स्फुटयति यत्किंचिदिति उत्तरार्धेतदितिशेषः अस्ययतेःशुभाशुभंस्तुतिनिंदादिरूपंयत्किंचिक्रियतेयच्चान्नपानादिकंदीयतेतदासयतिस्त त्सर्वंलोककृत्यंपुरुषोत्तमेविष्णौदद्यात्प्रापयेदित्यर्थः तत्फलंविष्णुरेवददातीतिभावः ॥ ७१७ ॥ यतेर्धर्मातिक्रमदर्शनेपिचातुर्वर्णिकैस्तद्दं डसंकल्पोनकार्यइतिपरिसंख्यामुखेनाह यतीनामिति यतीनांगुरूराजायमश्चेत्येतेत्रयएवप्रशास्तारस्तत्रधर्मसंदेहेगुरुःप्रशास्ता तदुक्तं

दुर्वृत्तोवासुवृत्तोवामूर्खःपंडितएववा॥ काषायदंडमात्रेणयतिःपूज्योद्विजैःसदा ॥ ७१३ ॥ ब्रह्माविष्णुश्चरु द्रश्चशक्रोलोकपसंयुतः ॥ वस्वाद्याश्चगणाःसर्वेयतिदेहेवसंतिहि ॥ ७१४ ॥ पूजितेपूजिताएतेसर्वएवसुरो त्तमाः॥भवंतिचतिरस्कारात्सर्वेपिचतिरस्कृताः॥ ७१५ ॥ भिक्षुर्यत्रचतत्रायंविश्वरूपधरोहरिः ॥ नित्यंति ष्ठतिसर्वात्मास्वदेहेइवचक्रधृक् ॥ ७१६ ॥ यत्किंचित्क्रियतेत्वस्यजनैरेतैःशुभाशुभं ॥ दीयतेचान्नपानादि सद्द्यात्पुरुषोत्तमे ॥ ७१७ ॥ यतीनांचगुरुःशास्ताशास्ताराजादुरात्मनां ॥ इहप्रच्छन्नपापानांशास्तावैव स्वतोयमः ॥ ७१८ ॥ एवंविज्ञायसततंकर्मणामनसागिरा ॥ अनुकूलंयथाशक्तिकुर्युःपुण्यार्थिनोजनाः ॥ ७१९ ॥ यतिमात्रस्यकिंभूयःपरहंसस्यसर्वदा ॥ जीवतोपिमृतस्यात्रस्वयंवृद्धिमभीप्सवः ॥ ७२० ॥

जमदग्निना अथवायद्गुरुर्ब्रूयात्तत्कार्यमविशंकया निग्रहेऽनुग्रहेचापिगुरुःसर्वत्रकारणमिति दुरात्मनांप्रस्फुटपापानांराजाशास्ता तदुक्तंद क्षेण पारिव्राज्यंगृहीत्वातुयःस्वधर्मेनतिष्ठति श्वपदेनांकयित्वातंराजाशीघ्रंप्रवासयेदिति इहलोकेप्रच्छन्नपापानांतुयमःप्रशास्तेतितुप्रस्फु टमेवेति ॥ ७१८ ॥ फलितमाह एवमिति एवमुक्तविधांशास्त्रसिद्धांमर्यादांविज्ञायपुण्यार्थिनोधर्मकामाःवृद्धिमभीप्सवःअभ्युदया र्थिनोवाजनाःयतिमात्रस्यसर्वप्रकारस्ययतेर्जीवतोमृतस्यवाशरीरादिभिरनुकूलमेवकुर्युःकिमुतपरमहंसस्यपुरुषोत्तमस्येतिद्वयोःसंबंधः ॥ ७१९ ॥ ७२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोस्येति ततोदाहायोग्यत्वादस्यपरमहंसस्यमरणेअशौचादिकंनास्ति तत्रउदकक्रियातिलांजलिदानं घृतप्राशनंघृतपानं ज्योतिःस्पर्शोग्निप्रतपनं आदिपदेननिंबपत्रभक्षणग्रहः तथाचबौधायनः नतत्रशेषसंस्कारइति ॥ ७२१ ॥ बौधायनोक्तंतद्दहनादौअश्वमेधफललाभंदर्शयति पदेइति तस्यपरमहंसस्यवहनेपूरणादिदेशप्रापणेप्रतिपादन्यासमश्वमेधफलंस्पर्शादौतुविष्णुप्रतिमास्पर्शादिजन्यफलसमं फलंभवेदिति ॥ ७२२ ॥ यतीनामिति मानसेनवाचिकेनापिवाप्रैषोच्चारणेनपारमहंस्यंप्राप्तानांमरणेखननमेवकार्यंनदाहइत्यर्थः ॥ ७२३ ॥ अत्रबौधायनवाक्यमेवपठति सर्वेति स्पष्टम् ॥ ७२४ ॥ अश्वमेधफलंसर्वेप्राप्नुवंतिपृथक्पृथगितिवाक्यार्थमाह येवहंतीति

ततोस्यमरणेनस्यान्नाशौचंनोदकक्रिया॥ नघृतप्राशनंज्योतिःस्पर्शनादिकदाचन ॥ ७२१ ॥ पदेपदेऽश्वमेधस्यफलंतद्दहनेभवेत्॥ स्पर्शनेदर्शनेविष्णोःस्पर्शदर्शनसंभवं ॥ ७२२ ॥ यतीनांपरहंसानांमनसावचसापिच॥ प्रैषेस्यात्खननंत्वेतदन्येषांदहनंभवेत्॥ ७२३ ॥ सर्वकर्मनिवृत्तस्यपरहंसस्यसर्वदा ॥ यतेर्नदहनंकार्यंनाशौचंनोदकक्रिया॥ ७२४ ॥ येवहंतिमहात्मानःस्पृष्ट्वाचैवचहर्षतः ॥ अश्वमेधफलंतेषांद्विजानांस्यात्क्षणेक्षणे ॥ ७२५ ॥ अनुगच्छंतियेत्ध्येनंवहंतिचखनंतिच ॥ पूरयंतिचतेसर्वेसदाशुद्धाःप्रकीर्त्तिताः ॥ ७२६ ॥ यतीनांनैवसंस्कारोनैवपिंडोदकक्रिया ॥ अहन्येकादशेप्राप्तेपुत्रःकुर्याद्धिपार्वणं ॥ ७२७ ॥ विष्णुनामसमुच्चार्यस्वपितुःस्नेहवर्जितः॥ संकल्पविधिनायद्वद्विवाहाद्युत्सवेतथा॥ ७२८ ॥ पुत्राद्न्येप्रकुर्वीरन्ज्ञातयोऽज्ञातयोपिवा॥ नारायणबलिंसर्वेपुरुषोत्तमतुष्टये ॥ ७२९ ॥

हर्षेणस्पृष्ट्वायेवहंतीतिसंबंधः ॥ ७२५ ॥ अनुगच्छंतीति स्पष्टं ॥ ७२६ ॥ यतेःसंस्काराणांदाहादीनामभावेप्येकादशाहेपुत्रेणपार्वणं कर्त्तव्यतयास्मृतिषूक्तमित्याह यतीनामिति ॥ ७२७ ॥ तत्रश्राद्धेविशेषमाह विष्णुनामेति विष्णुशब्दपूर्वकंपितुर्नामसमुच्चार्यविधिवत्संकल्प्यचविवाहाद्युत्सववदेकादशेन्हिपुत्रःपार्वणंकुर्यादितिपूर्वेणसंबंधः ॥ ७२८ ॥ पुत्रभिन्नास्तुपरमहंसभक्त्यानारायणबलिंवक्ष्यमाणविधयाविष्णुप्रीत्यैकुर्युरित्याह पुत्रादिति अज्ञातयइतिच्छेदः ॥ ७२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशइति तंचनारायणबलिंपुत्रोपिद्वादशेदिवसएवकुर्यात् किंकृत्वा आदौद्वादशात्प्रथमेएकादशेन्हिपार्वणंप्रतिदायविधायेति तद्वत्पुत्रवदन्येपिद्विजाद्वादशदिवसएवनारायणबलिमेवचकुर्युरितिसंबंधः ॥ ७३० ॥ बौधायनोक्तंनारायणबलिविधानंदर्शयति कृत्वेतिदशभिः विष्णोर्महतींषोडशाद्युपचारसंपन्नांपूजांकृत्वापायसमयंनैवेद्यंदद्यादथव्याहृतित्रयेणव्यस्तेनसमस्तेनचपायसंजुहुयात् एवंहोमेनसंस्कृतंविष्णोर्नैवेद्यभूतंपायसंब्राह्मणेभ्योदद्यादित्यर्थः॥७३१॥यतीनिति अत्रत्रयोदशप्राधान्येनपूज्याः तत्रायंक्रमः द्वादशावरान्द्वादशसंख्यातोन्यूनसंख्याहीनान्यतीन्साधुगृहस्थान्वागृहीत्वागृहेसमानीयकेशवादिद्वादशनामात्मकैर्नमोंतैर्द्वादशमंत्रैस्तान्गंधाद्युपचारैरारा

द्वादशेदिवसेप्राप्तेपुत्रोपिचतथैवसः ॥ पार्वणंप्रतिदायादौयेचान्येचद्विजातयः ॥ ७३० ॥ कृत्वाविष्णोर्महापूजांपायसंचनिवेदयेत् ॥ भूर्भुवःस्वरितिप्रोक्तैर्जुहुयात्पायसंपुनः ॥ संस्कृतंत्वथनैवेद्यंब्राह्मणेषुनिवेदयेत् ॥ ७३१ ॥ यतीन्गृहस्थान्साधून्वागृहीत्वाद्वादशावरान् ॥ आराध्यगंधपुष्पाद्यैर्मंत्रैर्द्वादशनामभिः ॥ ७३२ ॥ संपूज्यभोजयित्वाथवासांसिविविधानिच ॥ यतिभ्योत्रप्रदेयानिगृहिभ्योदक्षिणाअपि ॥ ७३३ ॥ त्रयोदशंयतींद्रंतमात्मज्ञंविजितेंद्रियम् ॥ संपादयेदभावेपियतीनामत्रसर्वथा ॥ ७३४ ॥ एकोनयदिलभ्येतयतिःपरमहंसकः ॥ तदागृहस्थंधर्मज्ञमुत्तमंसर्वसंमतं ॥ विष्णुबुद्ध्यासमभ्यर्च्यपाद्याद्यैश्चविधानतः ॥ ७३५ ॥ दद्यात्पुरुषसूक्तेनधूपादिकमनुक्रमात् ॥ वस्त्रालंकरणादीनियथाशक्तितथास्तिकः ॥ ७३६ ॥

ध्यमानपूर्वकंभोजयित्वाचतेयदियतयस्तदातेभ्योवासांसिदेयानियदितुगृहस्थाःस्युस्तदादक्षिणासहितानिवासांसिदेयानीतिद्वयोरर्थः ॥ ७३२ ॥ ७३३ ॥ त्रयोदशमिति द्वादशयतीनामभावेऽलाभेपित्रयोदशसंख्यापूरकंयतींद्रंसर्वथाऽवश्यंसंपादयेत्पूजार्थंसमानयेदित्यर्थः ॥ ७३४ ॥ एकोनेति यदितुएकोपिपरमहंसोयतिर्नलभ्येततदासर्वगुणसंपन्नंगृहस्थंद्विजोत्तमंत्रयोदशेस्थानेनिवेशयेत्तंचपुरुषसूक्तगतषोडशर्चमयमंत्रैर्विष्णुबुद्ध्यापाद्याद्युपचारैःसमभ्यर्च्यधूपादिकंवस्त्रादिकंचतस्मैक्रमेणदद्यादास्तिकःसन्नितिद्वयोरर्थः ॥ ७३५ ॥ ॥ ७३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उच्छिष्टेति ततस्तेषामुच्छिष्टसमीपदेशेदर्भानास्तीर्यजरायुजादिचतुर्विधभूतानांमध्येएकैकंनामक्रमेणगृहीत्वाप्रणवादिस्वधांतप्रत्येकव्या हृतिमयेनमंत्रत्रयेणतादृशसमुदितव्याहृतिमयेनचतुर्थमंत्रेणचबलिचतुष्टयंपायसमयंदद्यादित्यर्थः ॥ ७३७ ॥ विभवेति विभवस्यसा मर्थ्यस्याभावेसतित्रयोदशयतयएववसनाशनमात्रतोषिणोभ्यर्च्याः विभवेसतितुत्रयोदशस्थानेषुअलंकारादिदानयोग्यास्त्रयोदशविप्रा एवस्थाप्याः अतःशास्त्रस्यशक्त्यनुरोधित्वादत्रोक्तेषुपक्षेषुकश्चित्पक्षोनविधीयतेननियम्यतेइत्यर्थः ॥ ७३८ ॥ उक्तानुष्ठानेप्यशक्तौ

उच्छिष्टसन्निधौदर्भानास्तीर्यान्नैर्मनोरमैः ॥ चतुर्विधेभ्योभूतेभ्योबलिंव्याहृतिभिर्हरेत् ॥ प्रत्येकंतिसृभिः पश्चान्मिलिताभिःस्वधापुनः ॥ ७३७ ॥ विभवाभावतोप्यत्रयतयस्तुत्रयोदश ॥ विप्रावाविभवेस्थाप्या नात्रकश्चिद्विधीयते ॥ ७३८ ॥ यावतांवसनादीनांदानेशक्तिर्हिविद्यते ॥ तावतांसमसंख्यास्तेभोज्याःप्रथ ममेवहि ॥ ७३९ ॥ अनंतान्भोजयेत्पश्चान्मृष्टैरन्नैस्तुसादरं ॥ सर्वेभ्योपियथाशक्तिदद्यादेवात्रदक्षिणाः ॥ ७४० ॥ एवंयःकुरुतेविद्वान्नारायणबलिंद्विजः ॥ अभीष्टमर्थमाप्नोतिजीवन्नत्रनसंशयः ॥ विष्णुलोकं मृतोगच्छेत्स्वकीयैःपूर्वजैःसह ॥ ७४१ ॥ एवंपरमहंसस्यसंस्कारस्तेमयेरितः ॥ आतुरस्यप्रसंगेनप्रकृतंत्व मतःशृणु ॥ ७४२ ॥

शक्त्याधिक्येवायावतांवस्त्राद्यैर्विशेषपूजायांशक्तिस्तावतोयत्यादीन्प्रथमंभोजयित्वापश्चादनंताननियतसंख्याकान्मृष्टैःशुद्धैरन्नैःसदक्षि णंभोजयेदित्याह यावतामितिद्वाभ्यां स्पष्टंद्वयं ॥ ७३९ ॥ ७४० ॥ उक्तनारायणबलेःफलमाह एवमिति इहलोकेऽभीष्टसिद्धिःपरलो केपितृभिःसहविष्णुलोकाप्तिश्चफलमित्यर्थः ॥ ७४१ ॥ प्रासंगिकमुपसंहरन्प्रकृतांन्यासग्रहणेतिकर्त्तव्यतामनुसरति एवमिति आतु रसंन्यासप्रसंगेपरमहंसमरणोत्तरंकर्त्तव्यमुक्तमथप्रकृतमातुरसंन्यासवाक्यानंतरंजाबालोक्तंपरमहंससंन्यासग्रहणप्रकारमेवशृण्वित्यर्थः ॥ ७४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुटीचकइति कुटीचकस्त्रिदंडशिखाद्युपलक्षितःपुत्रगृहेभिक्षाशीलः बहूदकोपितादृशःसप्तागारभिक्षाशीलोदेशाटनपरः हंसस्त्वेकदंडःसशिखःसकृदष्टग्रासभोजीत्यादिलक्षणः एतेयदापारमहंस्यंपरवैराग्येणप्राप्तुमिच्छंतितदाएतैःश्राद्धादिकंनकार्यंकिंतुप्रैषोच्चारणमात्रेणसंन्यासःपूरणीयइतिद्वयोरर्थः ॥ ७४३ ॥ ७४४ ॥ तेषांप्रैषोच्चारणविधिमाह अभयमिति स्वांजलिंजलैःप्रपूर्याभयमित्यादिस्वाहांतमंत्रमेकैकव्याहृतिपूर्वकंमंदादिस्वरत्रयेणत्रिवारंकीर्त्तयेत् तथाचनववारंप्रयोगःफलितः ततउत्तरांप्राचींवादिशंव्रजेत् कीदृशः यथाजातवपुःयादृशंजातस्यरूपंतादृग्रूपोनग्नइतियावदितिद्वयोरर्थः ॥७४५॥७४६ ॥ यज्ञोपवीतादिप्रतिपत्तिंदर्शयन्नुक्तंस्फुटयति यज्ञोपवीतमि

कुटीचकोवहूदोवाहंसोवापियदाभवेत् ॥ यतिःपरमहंसाख्यःश्राद्धंहोमादिकंतदा ॥ ७४३॥ नकुर्यादातुरोयद्व
त्प्रैषमात्रात्प्रपूरयेत्॥संन्यासंतद्वदेतेपिपूरयेयुःसदैवहि॥ प्रैषमात्रेणविद्वांसःपरवैराग्यमाश्रिताः॥ ७४४॥अ
भयंसर्वभूतेभ्योमत्तःस्वाहेतिकीर्तयेत्॥ मंदमध्योत्तमैःशब्दैःप्रत्येकंव्याहृतित्रयात्॥ ७४५॥ त्रिःकृत्वाद्भिस्तु
संपूर्यस्वांजलिंत्युत्तरांदिशं॥ प्राचींवाप्रव्रजेद्विद्वान्यथाजातवपुर्नरः॥ ७४६॥ यज्ञोपवीतंसशिखमुत्कृत्यां
जलिसंस्थितं॥ विसृजेदप्सुभूमौवाततोगच्छेदुदङ्मुखः॥ नग्नोभूत्वाविरक्तोवागुरुमेकंपरिग्रहेत्॥ ७४७॥
पंचमुद्रात्मकंदंडंत्रिदंडंवापरित्यजेत्॥ ब्रह्मचर्याद्गृहाद्वापिवनाद्वाप्रव्रजेदिह ॥ ७४८ ॥

ति उत्कृत्यउद्धृत्यांजलिस्थंकृत्वाचभूःस्वाहेतिमंत्रेणजलेभूमौवाविसृजेत् ततोविरक्तोनग्नोभूत्वाउदङ्मुखोगच्छेत् तत्त्वजिज्ञासायांत्वेकंगुरुंपरिग्रहेत्आश्रयेदित्यर्थः परिग्रहेदितिविकरणव्यत्ययःश्रुत्यनुसारादितिबोध्यं ॥ ७४७ ॥ पंचेति दंडःकमंडलुःशिक्यंभिक्षापात्रंजलशोधनार्थंवितस्तिपरिमितवस्त्रात्मकंपवित्रंचएतानिपंचकुटीचकादीनांमुद्रास्थानीयानि भेदेप्रायश्चित्तलक्षणदंडप्रयोजकत्वात् एतादृशपंचमुद्राघटकमेकंदंडंहंसस्त्रिदंडंकुटीचकोवहूदकश्चपरित्यजेदित्यर्थः नागमुद्राशंखमुद्राधेनुमुद्रास्तथैवच ब्रह्मपरशुमुद्रेचपंचमुद्राःप्रकीर्तिताइत्युक्तास्तुनेहग्राह्याः तासामुपादेयत्वादितिबोध्यम् अयमेवचयज्ञोपवीतादिपरित्यागविधिर्ब्रह्मचर्याद्यनंतरंक्रियमाणेपारमहंस्येपिबोध्यइत्याह ब्रह्मेति इहपारमहंस्येप्राप्तव्येइत्यर्थः ॥ ७४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हंसस्यशिखायाअभावेपियज्ञोपवीतादेरेवभूरादिमंत्रेणत्यागस्तेनकार्यइत्याह यज्ञोपवीतमिति पूर्वेणहंसावस्थायांगृहीतेन एतदुपलक्ष
णंशिक्यादीनां ॥ ७४९ ॥ जाबालादौवीराध्वनादेहत्यागोयउक्तःसक्षत्रियादिसंन्यासाभिप्रायेणैवेतिदर्शयति क्षत्रियइतिनवभिः
॥५४॥ यदिक्षत्रियोवैश्योवायदासंन्यसतितदादंडादिसंन्यासलिंगवर्जितःसन्ननावृत्तिंपुनरावृत्तिहीनमध्वानंगच्छेदित्यर्थः कीदृशः जडादितुल्या
भःनग्नःअविद्वानिवदृश्यमानोवस्तुतोविद्वान्परवैराग्यशालीअविद्वान्वासन्नितिद्वयोरर्थः ॥ ७५० ॥ ७५१ ॥ नानेति यद्यपितुर्येपा
रिव्राज्यरूपेयोगप्रधानेआश्रमेनानाविधलिंगानांधारणमिष्टंप्रच्छन्नत्वायतथापिवैष्णवस्यलिंगस्यदंडरूपस्यधारणेविप्रएवाधिकारीत्य
र्थः तदुक्तं मुखजानामयंधर्मइत्यादि दंडेवैष्णवत्वंचषट्प्रभृतियंथिविशेषेणसुदर्शनादिसंज्ञत्वात् तदुक्तं षड्भिःसुदर्शनंप्रोक्तंवासुदेवंतथाष्ट

यज्ञोपवीतंपूर्वेणदंडेनसहहंसकः॥ भूःस्वाहेतिचमंत्रेणजुहुयादप्सुसादरं॥ ७४९ ॥ क्षत्रियोवापिवैश्योवा
संन्यसेत्तुयदातदा॥ अनावृत्तिंव्रजेदेषदंडादिपरिवर्जितः॥ ७५० ॥ जडोन्मत्तपिशाचाभोनग्नोविद्वानिवस्व
यं ॥ विद्वान्वाप्यथवाविद्वान्परंवैराग्यमाश्रितः ॥ ७५१ ॥ नानायोगाश्रमेतुर्येलिंगधारणमिष्यते ॥ वैष्णवं
धारयेल्लिंगंविप्रएवनचापरः ॥ ७५२ ॥ प्रार्थयेतापिनाध्वर्युरेनंयांतंदिगंबरं ॥ कौपीनादिनगृह्णीयादध्वर्यु
प्रार्थनांविना ॥ संन्यासेततएवस्यादनावृत्तिर्द्वयोरपि॥ ७५३॥ क्षत्रियोवापिवैश्योवासंन्यासीऋषभादिव
त्॥ वीरमार्गेणदेहंस्वंत्यजेदेवाविचारयन्॥ ७५४ ॥ अभीतःसर्वतोगच्छेच्छब्दाग्निजलदंष्ट्रितः॥ आनिपा
तंशरीरस्यवीरमार्गोयमीरितः ॥ ७५५॥

भिरित्यादीति ॥ ७५२ ॥ तयोरनावृत्तिपथगतौहेतुमाह प्रार्थयेतापीति अध्वर्युर्यजुर्वेत्ताऋत्विक्तत्कर्तृकंपादपतनपूर्वकंवक्ष्यमाणविधं
प्रार्थनंविप्रंप्रत्येवसंभवतीत्यतःसोध्वर्युरेनंक्षत्रियंवैश्यंवादिगंबरंयांतंसंतंनप्रार्थयेत लोकव्यवहारोपयोगिनांकौपीनादीनांग्रहणंचसंन्या
सिनाप्रार्थनांविनाक्रियमाणंसंप्रदायविरुद्धंततोद्वयोःक्षत्रियवैश्ययोरनावृत्तिःफलितेत्यर्थः ॥ ७५३ ॥ तथाचक्षत्रियादिःसंन्यस्यऋ
षभदेवादिवद्वीरमार्गेणशीघ्रंदेहंत्यजेदित्याह क्षत्रियइति आदिपदेनपांडवग्रहः ॥ ७५४ ॥ वीरमार्गंलक्षयति अभीतइति शब्दःसिंहना ॥५४॥
दादिर्दंष्ट्रिणोव्याघ्रादयस्तेभ्योभयरहितस्यशरीरपतनपर्यंतंयद्गमनमेतद्वीरमार्गपदेनोक्तमित्यर्थः ॥ ७५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रानुकूलस्यजाबालवाक्यस्यार्थमाह बुद्धीति जलपातेनवह्निपातेनान्नादिपरित्यागेनैकस्यांदिशिसततंबुद्धिपूर्वंगमनेनवादेहःसंन्यस्तक्षत्रियादिनापरित्यक्तव्यइत्यर्थः ॥ ७५६ ॥ एतादृशसंन्यासेनदेहत्यागेशूद्रादीनामप्यधिकारंदर्शयति श्राद्धादीति श्राद्धमारभ्यन्यास्तिघटितप्रैषमंत्रपर्यंतमितिकर्त्तव्यताजातंविनाकेवलंमानसंसंन्याससंकल्पंविधायस्त्रीशूद्रःसंकरजातीयोवापूर्वपुण्यलब्धवैराग्यशालीतथाक्षत्रियादिवत्स्वदेहनाशहेतौत्यागेअधिकारीभवतिकिमुतद्विजजातीयाइतिद्वयोरर्थः ॥ ७५७ ॥ ७५८ ॥ अथविप्रस्याध्वर्युप्रार्थनादिनादंडादिग्रहणप्रकारंदर्शयति यदेतिनवभिः विप्रस्तुपारमहंस्यंगृहीत्वापरितःसर्वतोवर्तमानैरहितउदङ्मुखोगच्छेत् ॥ ७५९ ॥

बुद्धिपूर्वंजलेचायंवन्हौवापिवपुःक्षिपेत् ॥ अन्नोदकपरित्यागादथवासततंगतैः ॥ एकस्यामेवदिश्यात्मदेहंधीरःपरित्यजेत् ॥ ७५६ ॥ श्राद्धादिप्रैषपर्यंतमकृत्वामनसैवहि ॥ संकल्प्यपरमंप्राप्तोविरागंपूर्वपुण्यतः ॥ ७५७ ॥ स्त्रीशूद्रादिरपिप्रायःकुर्यात्त्यागंतथासदा ॥ स्वदेहनाशहेतुंतंकिमुयेत्रद्विजातयः ॥ ७५८ ॥ यदाविप्रःपरोहंसोभूयान्नग्नउदङ्मुखः ॥ शिखायज्ञोपवीतादिरहितःपरितोव्रजेत् ॥ ७५९ ॥ अध्वर्युस्तुततोगत्वादंडवत्प्रणिपत्यतं ॥ प्रार्थयेत्तंकराभ्यांतत्पादौधृत्वामुहुर्मुहुः ॥ ७६० ॥ वेदविद्भगवान्विप्रःसर्वदेववपुर्यतः ॥ ततोवपुरिदंत्यक्तुंनत्वमर्हसिधर्मवित् ॥ ७६१ ॥ अपितेनवपुर्विप्रकिमुलोकस्यतद्यतः ॥ परकीयंकथंवित्तंविनाशयसिबुद्धिमान् ॥ ७६२ ॥ आत्मनःश्रवणंकृत्वामननंध्यानमेवच ॥ साक्षात्कारंहिसंपाद्यपश्चात्कुरुयथेप्सितं ॥ ७६३ ॥

अध्वर्युस्त्विति ततोध्वर्युःसंन्यासेतिकर्तव्यतायामाचार्यत्वेनवृतोऋत्विक्गत्वाधावित्वापादौधृत्वाचइत्थंप्रार्थयेत् ॥ ७६० ॥ तत्प्रार्थनामभिनयति वेदविदिति वेदवेत्ताविप्रोभगवानीश्वरोभवतियतःसर्वदेवनिवासभूतशरीरस्ततएतादृशप्रभावकस्यदेहस्यपरित्यागस्तवनोचितइत्यर्थः ॥ ७६१ ॥ किंचतवायंदेहोदर्शनश्रवणादिनाकृतार्थीभविष्यतांलोकानांस्वंभवतिततःपरकीयपदार्थस्यनाशनंतवानुचितमित्याह अपितेइति किमुकिंतुतत्तववपुर्यतोलोकस्यभवतीतिसंबंधः तद्वतइतिपाठेश्रद्धादिमतइत्यर्थकंलोकविशेषणं ॥ ७६२ ॥ अतस्त्वयानेनदेहेनामृतत्वसाधनंज्ञानंसंपाद्यमित्याह आत्मनइति स्पष्टम् ॥ ७६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचगुरुनिदेशादपित्वयादेहत्यागाग्रहान्निवर्तितव्यमित्याह गुर्विति यस्त्वयागुरुःसेवितःसमांप्रतिभवतोनिवारणानुकूलव्यापारानुष्ठानमाज्ञापितवांस्ततस्त्वंगुर्वाज्ञामेवात्मज्ञानहेतवेकुर्विति ॥ ७६४ ॥ इत्यादीति इत्थंसंप्रार्थ्यतिष्ठतिष्ठेतिकीर्तयन्सद्विजस्तस्मैपरमहंसायदंडादिकंदद्यात् ॥ ७६५॥ दत्तमिति सचपरमहंसस्तेनदत्तमृजुत्वमनोहरत्वशालिनंवेणुप्रभवंदंडमिंद्रस्यवज्रोसीत्यादिमंत्रेणगृहीत्वादोरादिकंतुप्रणवमंत्रेणगृहीत्वागुरुंप्रणम्यतंब्रह्मविद्यार्थंसेवेत तत्रदोरःसूत्रमयीरज्जुरितिद्वयोःसंबंधः ॥ ७६६ ॥ ७६७ ॥ संन्यासग्रहणविधिमुपसं

गुरुस्त्वयाचिरंकालंसेवितोब्रह्मवित्तमः ॥ अनुज्ञापितवान्मांसबहुशोपिनिवारणम् ॥ गुर्वाज्ञांततएवत्वंकुर्वात्मज्ञानहेतवे ॥ ७६४ ॥ इत्यादिवचनैर्भूरिसंप्रार्थ्यद्विजसत्तमः ॥ दद्याद्दंडादिकंतस्मैतिष्ठतिष्ठेतिकीर्तयन् ॥ ७६५ ॥ दत्तंदंडमृजुंसौम्यंसत्वचंवैणवंद्विजः ॥ इंद्रस्येत्यादिमंत्रेणगृहीत्वाप्रणवेनतु ॥ ७६६ ॥ दोरकौपीनवासांसिप्रणम्यगुरुमादरात् ॥ सेवेततंयथातद्वदात्मविद्यानलभ्यते ॥ ७६७ ॥ अधिकारप्रसंगात्तेसंन्यासविधिरीरितः ॥ एवंपरमहंसस्यशृणुवक्ष्यामितेधुना ॥ ७६८ ॥ दधानोवैणवंदंडंसौम्यंपूर्वोक्तलक्षणं ॥ शिखायज्ञोपवीताभ्यांरहितोविकसन्मुखः ॥ ७६९ ॥ कौपीनयुगलंकंथांतद्वच्छीतनिवारणीं ॥ भिक्षाटनायशाटींचत्यखंडांवापिखंडितां ॥ ७७० ॥ अलाबुंदारुपात्रंवावैणवंमृन्मयंचवा ॥ वहन्करेणशौचादिकार्यार्थंकार्यवर्जितः ॥ ७७१ ॥

हरन्परमहंसस्यधर्मान्श्रुत्यासिद्धान्वक्तुमुपक्रमते अधिकारेति संन्यासाधिकारिवर्णनेनश्रुतिस्मृत्यारूढःसंन्यासविधिरुक्तः अथएवंउक्तविधिनापरमहंसभावंगतस्यधर्मान्जाबालाद्युक्तान्शृण्विति ॥७६८॥ दधानइति पूर्वोक्तानिऋजुत्वादीनिलक्षणानियस्यतंदंडंदधानोभवेत् शिखादिराहित्येनमुंडःसदाप्रसन्नमुखश्चभवेदिति ॥७६९॥ अपरिग्रहत्वंपरिसंख्यामुखेनाह कौपीनेति वहन्नित्युत्तरादनुषंगः भिक्षाटनंकर्त्तुंशाटींकौपीनोपरिधार्यवस्त्ररूपां ॥७७०॥ पात्रभेदानाह अलाबुमिति अलाबुंतुंबिकां कार्यवर्जितःवस्तुतइतिशेषः ॥७७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपाणीति पाण्यादिचालनशीलोनभवेत् वाग्भेदःअन्यथोक्तस्यान्यार्थपरत्वेनयोजनंतत्प्रभृतिव्यापारलक्षणचापलशालीनभवेत् तथा गमनकालेयुगमात्रांचतुर्हस्तमितांभूमिंपश्येत् आसीनउपविष्टस्तुनासिकांपुस्तकंवापश्येदिति एतेनतिष्ठतोव्रजतोवापीत्यादिवाक्योक्तमंधत्वानुष्ठानंसूचितं ॥ ७७२ ॥ श्रुत्याद्युक्तानितस्यवासस्थानान्याह शून्यागारइति तृणकूटकंपलालादिपुंजः अग्निहोत्रकमग्निगृहं निष्कुटोगृहवाटिका गृहारामास्तुनिष्कुटाइत्यमरः सप्तम्यंतानांनिवासपदेनसंबंधः शेषंस्फुटंत्रिषु ॥ ७७३ ॥ ७७४ ॥ ७७५ ॥ प्रादक्षिण्येनेति स्वस्थानात्प्रचलितस्यप्रदक्षिणक्रमेणयेगृहाःसमायांतितेषुभिक्षांगृह्णीयात् उदरंपाणिंवापात्रंकृत्वातदशक्तावपरंवस्त्रादिमयमित्य

नपाणिपादचपलोनवाग्भेदादिचापलः ॥ गच्छन्विलोकयेद्भूमिंयुगमात्रांपुरःसदा ॥ आसीनोनासिकांतद्वत्पुस्तकंवाविलोकयेत् ॥ ७७२ ॥ शून्यागारेदेवगृहेवल्मीकेतृणकूटके ॥ वृक्षमूलेकुलालस्यशालायामग्निहोत्रके ॥ ७७३ ॥ पुलिनेषुनदीनांवागिरीणांकुहरादिषु ॥ कोटरेषुतरूणांवास्थंडिलेनिष्कुटेपिवा ॥ ७७४ ॥ निवासनिरतोनित्यंसदाशौचपरायणः ॥ भिक्षार्थंचव्रजन्ग्रामंप्रीतिमान्निर्जनेसदा ॥ ७७५ ॥ प्रादक्षिण्येनभिक्षायांगृहानेषव्रजेत्सदा ॥ उदरंवापिपाणिंवापात्रंकृत्वाथवापरं ॥ ७७६ ॥ यथौषधंतथैवान्नंप्राशयत्येषसर्वदा ॥ ननिंदतिनचस्तौतिकमप्येषकदाचन ॥ ७७७ ॥ अलाभेवापिलाभेवाभिक्षायाएकरूपभृत् ॥ असम्यक्केपिसम्यक्केविकारंनाधिगच्छति ॥ ७७८ ॥ सुखादिषुसमोनित्यमुपकार्यपकारिणोः ॥ नस्थूलोनकृशश्चायमाहारेणक्वचिद्भवेत् ॥ ७७९ ॥ केशश्मश्रुनखानांचकुरुतेवपनंसदा ॥ ऋतुसंधिषुवर्षासुकुरुतेवानवापिसः ॥ ७८० ॥

र्थः ॥ ७७६ ॥ यथौषधमिति तथाचारुणिकश्रुतिः औषधवदशनमाचरेदिति ॥ ७७७ ॥ अलाभेइति एकरूपभृत्समः असम्यक्त्वमादरेणरसादिगुणेनचराहित्यं विकारंमुखमालिन्यादिरूपं ॥ ७७८ ॥ सुखादिष्विति आदिपदेनदुःखशीतोष्णादिद्वंद्वग्रहः तथाउपकारिण्यपकारिणिचसमः तथाऽऽहारेणासमीचीनासमीचीनरूपेणप्रयुक्तंस्थूलत्वंकृशत्वंचनभवेदिति ॥ ७७९ ॥ तथामासद्वयपूर्तौपूर्णमास्यांक्षौरविधिंकुर्यात् श्रावणादिमासद्वयेतूक्तस्यक्षौरस्यैच्छिकोविकल्पइत्याह केशेति कक्षोपस्थगतकेशान्वर्जयित्वेतिशेषः ॥ ७८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आषाढपूर्णमास्यांविष्णुधर्मोत्तरविहिताव्यासपूजाकार्येत्याह आषाढ्यामिति तत्रपूजनीयानांदेवानांपंचव्यूहांस्तावद्दर्शयति कृष्णेत्यादिना मध्येस्थितोद्वैपायनःपूर्वादिदिग्गतैर्वैशंपायनसुमंतुजैमिनिपैलैर्वेष्टितःसन्व्यासउच्यते एवमग्रेपि॥ ७८१॥ मध्येस्थितःश्रीकृष्णःपूर्वादिगतैर्वासुदेवादिभिर्वेष्टितःकृष्णव्यूहइत्याह कृष्णमिति तत्रकृष्णपदेनसदानंदवाचिनानिरुपाधिकंपूर्णत्वंप्रतिपाद्यते पदांतरैस्तुतुरीयादिसमष्टयइतिनिर्णीतमन्यत्र॥ ७८२ ॥ पूर्वादिगतैर्विश्वरूपादिशिष्यैःसंवीतःशंकराचार्यआचार्यव्यूहइत्याह शंकरमिति प्रायोबहुधाप्रवृत्तेशांकरेश्रीशंकराचार्यसंबंधिनिमतेसंप्रदायेवर्तमानएतदाचार्यपंचकंपूजयेदितिसंबंधः॥ ७८३ ॥ तथापूर्वादिगतैःपरमगुरुपरमेष्ठिगुरु

आषाढ्यांपौर्णमास्यांचकुरुतेव्यासपूजनं॥ कृष्णद्वैपायनंपैलंवैशंपायननामकं॥ जैमिनिंचसुमंतुंचपूजयेद्व्यासपंचकं॥ ७८१॥ कृष्णंचवासुदेवंचसंकर्षणमथापरं॥ प्रद्युम्नमनिरुद्धंचपूजयेत्कृष्णपंचकं॥ ७८२॥ शंकरंविश्वरूपंचपद्मनाभंतथैवच॥ हस्तामलकनामानंतोटकाख्यंचपंचमं॥ आचार्यपंचकंप्रायःपूजयेच्छांकरेमते॥ ७८३॥ गुरुंचपरमंतद्वदात्मनःपरमेष्ठिनं॥ गोविंदंगौडनामानंपूजयेद्गुरुपंचकं॥ ७८४॥ आत्मानमंतरात्मानंज्ञानात्मानंपरात्मकं॥ आनंदात्मानमित्येतत्पूजयेदात्मपंचकं॥ ७८५॥ आत्माचार्यगुरुव्यासपंचकानिचतुष्टये॥ पूर्वादीनांदिशांमध्येकथितंकृष्णपंचकं॥ ७८६॥ आग्नेयादिविदिक्संस्थान्पूजयेच्चतुरोप्यमून्॥ गणनाथंतथादुर्गांदेवींचैवसरस्वतीं॥ क्षेत्रपालंमहेशानंसर्वारिष्टविनाशकान्॥ ७८७॥

गोविंदपादगौडपादैःसंवीतआत्मीयोगुरुर्गुरुव्यूहइत्याह गुरुमिति ॥ ७८४ ॥ तथापूर्वादिगतैरंतरात्मादिभिर्वेष्टितआत्माआत्मव्यूहइत्याह आत्मानमिति॥ ७८५॥ एतेषांपंचानांव्यूहानांपूजामंडलेदेशविशेषानाह आत्मेति मध्येकृष्णपंचकंविन्यस्यतदपेक्षयापूर्वादिदिशांचतुष्टयेआत्मपंचकादिकंपूजयेदिति कृष्णव्यूहात्पूर्वेआत्मव्यूहंदक्षिणेआचार्यव्यूहंपश्चिमेगुरुव्यूहंउत्तरेव्यासव्यूहंपूजयेदितियावत्॥ ७८६ ॥कृष्णपंचकस्याग्नेयादिकोणचतुष्टयेक्रमेणगणेशोदुर्गासरस्वतीक्षेत्रपालश्चेत्येतेपूज्याइत्याह आग्नेयादीति विदिक्कोणः महेशानंरुद्रावतारमितिक्षेत्रपालविशेषणं अमून्गणेशादीन्सर्वारिष्टविनाशकानग्न्यादिकोणचतुष्टयेपूजयेदित्यन्वयः॥ ७८७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनंदनमिति सनत्पदादिकंकुमारंसुजातकंचेतिसंबंधः एतान्सनंदनादीन्कृष्णपंचकंपरितःकृष्णपंचकस्यसर्वतःपरिवारत्वेनस्थितान्पूजयेदित्यर्थः ॥ ७८८ ॥ कृष्णपंचकस्याग्रेस्थितौनरनारायणौपूज्यौतस्यपृष्ठतस्तुब्रह्मविष्णुमहेश्वराःपूज्याइत्याह नरेति अस्यकृष्णपंचकस्य ॥ ७८९ ॥ शेषानिति शेषान्दिक्पालादीन्सांप्रदायिकप्रयोगग्रंथेषूक्तान्यथास्थानंविन्यस्यपूजयेत् तत्रनारदोनरनारायणयोरग्रेस्थितःपूज्यः एतेषुकृष्णंमूलमंत्रेणशेषान्प्रणवादिनमोंतनाममंत्रैःसंपूज्यमासद्वयंतच्चतुष्टयंवासंकल्पपूर्वकंवसेदित्यर्थः ॥ ७९० ॥ एकत्रवासप्रयोजकमहिंसापरिपालनरूपंदर्शयति वर्षेति समास्तीर्णाव्याप्ताभवति अपिशब्देनवासनियमविधिसंरक्षणसमुच्चयः रक्षार्थमपी

सनंदनंचसनकंकुमारंचसुजातकं॥सनत्पदादिकंकृष्णपंचकंपरितोर्चयेत्॥ ७८८ ॥ नरनारायणौकृष्णपंचकात्पुरतःस्थितौ॥ब्रह्मादित्रयमस्यैवपृष्ठतस्तुसमर्चयेत्॥ ७८९ ॥ शेषान्देवान्मुनीन्सर्वान्यथायोगंप्रपूजयेत्॥ नरनारायणाग्रस्थंनारदंमुनिसत्तमम्॥ एवंसंपूज्यवसतिमासौद्वौचतुरोपिवा ॥ ७९० ॥ वर्षाकालेमहीसर्वास्थिरजंगमदेहिभिः॥ निरंतरंसमास्तीर्णालक्षकोट्यादिसंख्यया॥ तेषांरक्षार्थमेषोपिवसत्येकत्रसर्वदा ॥ ७९१ ॥ नहिंसतिकमप्येषस्थिरजंगमदेहिनां ॥ वदत्यसत्यंनैवायंनचचौर्यंकरोतिसः ॥ ७९२ ॥ तृणस्यापिचनारीषुग्राम्यधर्मंप्रयातिन ॥ कामंनपरिगृह्णीयाद्भवेदत्रापरिग्रहः ॥ ७९३ ॥ तथासमायिकींचेष्टांनकुर्यान्नलपेन्नच ॥ नियमांश्चयथाशक्तिदेवनारायणादिकान्॥ कुर्वाणःप्राणरोधंचस्वात्मनोऽवसरेसति ॥ ७९४ ॥

तिसंबंधः एषयतिः ॥ ७९१ ॥ यमानुष्ठानंदर्शयति नहिंसतीतिद्वाभ्यां तृणस्यापिचौर्यंनकरोति ग्राम्यधर्मोमैथुनं कामंभोगसाधनजातंनपरिगृह्णीयात्संगृहीतंकुर्यात् अपरिग्रहत्वसंरक्षणायेतिद्वयोरर्थः ॥ ७९२ ॥ ७९३ ॥ नियमादीन्दर्शयति तथेत्यादिना मायादंभस्तद्वतींचेष्टांभावसंशुद्धिलक्षणशौचविपरीतांनकुर्यात् अनर्थकवाक्यरूपप्रलापंमौनलक्षणतपोविरोधिनंनकुर्यादिति तथादेवोमहादेवोनारायणश्चएतौआदीसंबंधित्वेनप्रयोजकौयेषांतेयमाःस्मरणकीर्तनादयस्तान्कुर्वाणः प्राणायामंचस्वात्मनःप्राणरोधस्यकालेऽपररात्रादौकुर्वाणोभवेदित्यर्थः ॥ ७९४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वेदांतेति वेदांतश्रवणंत्रिकालस्नानंयथागुरुःप्राहतथानुष्ठानरूपांगुरुभक्तिंचकुर्वाणोवर्षाकालभिन्नेकालेएकत्रनवसेत् तत्रवासदेशेराग द्वेषवर्जितोभवेत् स्फुटमन्यत् ॥ ७९५ ॥ ७९६ ॥ समइति स्पष्टं ॥ ७९७ ॥ कांताःकनकादीनिचकाकविष्ठावद्दूराद्धेयत्वेनपश्येदित्याह हिरण्यादीनीति ॥ ७९८ ॥ हेमनस्त्वंदोषनिलयस्यदेहस्यगर्वंतादात्म्याभिमानरूपंकिंधारयसीत्येवंसदाचिंतयेदित्याह विण्मूत्रेति ॥ ७९९ ॥ श्रवणाद्युपायैरात्मसाक्षात्कारायय्तेतेत्याह अहमिति अवबोधनमितिकरणेल्युट् ॥ ८०० ॥ आत्मसाक्षात्कारप्रतिबंधा

वेदांतश्रवणेस्नानंत्रिसंध्यादौतथैवच ॥ गुरुभक्तिंयथाप्राहवर्षाकालातिरेकतः ॥ ७९५ ॥ एकत्रचवसेन्नैवतत्ररागादिवर्जितः ॥ अलाभेनविषादीस्याल्लाभश्चैनंनहर्षयेत् ॥ ७९६ ॥ समःशत्रौचमित्रेचतथामानापमानयोः ॥ आत्मवत्सर्वभूतानांकर्मणामनसागिरा ॥ अनुकूलंहिकुर्वाणःप्रतिकूलंनचाचरेत् ॥ ७९७॥ हिरण्यादीनिवस्तूनिवधूस्तद्वन्मनोरमाः॥ विष्ठावन्मनसानित्यंभावयेन्नस्मरेच्चवा ॥ ७९८ ॥ विण्मूत्रसंभवोदेहोमलभांडोविनिर्मितः॥ कामाद्यनेकरोगार्त्तःसर्वावस्थासुनश्वरः॥ किमर्थंवहसेगर्वंमनोदेहस्यसर्वदा ॥ ७९९ ॥ अहंब्रह्मेतिवाक्यार्थंश्रृण्वानोगुरुवाक्यतः ॥ मननंचतथाध्यानंकुर्यादात्मावबोधनं ॥ ८०० ॥ यावन्नसाक्षादात्मायंज्ञायतेतेनसर्वगः ॥ ओंकारमपितावत्तुजपेच्छक्त्यनुसारतः ॥ ८०१ ॥ प्रणवाद्यविरोधेनमंत्रानन्यांश्चसंजपेत् ॥ आरोहेन्नैवयानेचनचकिंचित्परिग्रही ॥ ८०२ ॥ यावतानभवेद्देहत्यागोत्रवसनादिना ॥ स्वीकुर्यात्तावदेवायंनाधिकंतुकदाचन ॥ ८०३॥

पनयायप्रणवोपासनंफलपर्यंतंकुर्यादित्याह यावन्नेति ॥ ८०१ ॥ प्रणवादीति प्रणवस्यआदिपदग्राह्यस्यहंसमंत्रस्यचाविरोधेनोपसर्जनत्वेनेतरानपिमंत्रानूजपेत्प्राधान्येनप्रणवादिकमेवजपेदितियावत् यानेअश्वादिवाहनेआरूढोनभवेत् किंचिदपिपरिग्रहीपरिग्रहशालीनभवेदिति ॥ ८०२ ॥ परिग्रहाभ्यनुज्ञास्थलमाह यावतेति यावतावस्त्राशनादिनाविनादेहत्यागप्रसक्तिस्तावदेवस्वीकुर्यादित्यर्थः ॥ ८०३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमहंसोपनिषदुक्तान्धर्मान्प्रपंचयंस्तत्रपरमात्मात्मनोरेकत्वज्ञानेनसंध्यासंपत्तिरुक्तातांदर्शयति संध्यात्रयइति अयंपरमहंसःप्रातरादिषुत्रिषुसंध्यासुसमाधिस्थःसन्संधेःसंधौकर्त्तव्यायाःसंध्यायानाशनंविलोपंनकुर्यात् संभावनायांलिङ् किंतुसंध्यांकरोत्येवायं कुतः इह समाधौजीवस्यत्वंपदार्थस्यात्मनस्तत्पदार्थस्यचैक्यज्ञानेनात्मनोब्रह्मत्वस्यावधारणादित्यर्थः तथाचऐक्यनिष्ठारूपःसमाधिःसंध्याकालेऽवश्यंकार्यः अन्यथासंध्याविलोपदोषप्रसंगइतिभावः ॥८०४॥ निंदागर्वादित्यागंदर्शयति कस्यापीति सतांविद्यमानानामसतांवादोषाणांकीर्त्तनरूपांनिंदांकस्यापिनकुर्वीत आत्मनोयाइतरेभ्योऽधिकत्वेनवुद्धिर्ज्ञानंतद्रूपंगर्वंनकुर्यात् तथामानसंमनसाकृतंयत्परस्यविनाशनंकथमस्यापकर्षोभवेदित्याकारंमत्सरपदाभिधेयंतदपिनकुर्यादित्यर्थः ॥८०५॥ दंभस्त्याज्यइत्याह कर्मणेति शरीरवाङ्मनोभिःकृतंधर्मं

संध्यात्रयेसमाधिस्थोनकुर्यात्संधिनाशनं ॥ जीवात्मनोरिहैक्येनस्वात्मनोब्रह्मबोधनात् ॥ ८०४ ॥ कस्यापिनैवकुर्वीतसदसद्दोषकीर्त्तनं ॥ आत्मनोधिकवुद्धिंवामानसंवाविनाशनम् ॥ ८०५ ॥ कर्मणामनसावाचात्रिधाधर्मस्वयंकृतं ॥ परेभ्यःप्रकटंनैवकुर्याद्दंभोहितत्सदा ॥ ८०६ ॥ ऊहज्ञानेनकस्यापिपक्षंचैवनदूषयेत् ॥ अभिलाषंचकुत्रापिसुखेकुर्यान्नधीधनः ॥ दुःखेद्वेषंचतद्वत्सनकुर्याद्धिससाधने ॥ ८०७ ॥ मैथुनेच्छांचनैवायंकुर्यात्स्वप्नेपिकुत्रचित् ॥ कर्मणामनसावाचाभूतद्रोहंकदापिन ॥ ८०८ ॥ दैवाद्दृष्टंसुवर्णादिनगृह्णीयात्कदाचन ॥ अनात्मभूतेदेहादावात्मवुद्धिंचवर्जयेत् ॥ ८०९ ॥ सुखप्राप्तौप्रहर्षंचवर्जयेत्सर्वदायतिः ॥ दुःखप्राप्तौविषादंचतत्तेपूर्वमुदीरितं ॥ ८१० ॥

परानानुकूलयितुंप्रकटंनकुर्याद्धियतस्तद्धर्मस्यप्रकटनंदंभोभवतिसचनिषिद्धइति ॥८०६॥ भर्त्सनादिप्रवृत्तिप्रयोजकधीवृत्तिविशेषरूपंदर्पंनकुर्यादित्याह ऊहेति ऊहस्तर्कस्तत्प्रधानेनज्ञानेनपरपक्षखंडनंनकुर्यादितिप्रथमदलार्थः रागद्वेषयोर्हेयत्वमाह अभिलाषमितिदलद्वयेन दुःखेतत्साधनेचद्वेषंनकुर्यादिति ॥ ८०७ ॥ कामक्रोधलोभमोहानांपरित्यागमाह मैथुनेच्छामितिद्वाभ्यां नकदापीतियोजना व्यवायेच्छाकामः द्रोहोऽपकारः क्रोधोऽकार्यं सुवर्णादिग्रहणेप्रवृत्तिर्लोभः देहादावहंममाभिमानोमोहः तान्नकुर्यादितिद्वयोरर्थः॥८०८ ॥ ८०९ ॥ मदत्यागमाह सुखेति प्रहर्षोमदः दुःखप्राप्तौवैमनस्यलक्षणविषादत्यागोद्वेषपरिहाराभिधानेनोक्तप्रायइत्यर्थः ॥८१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुद्राणामिति क्षुद्राणामल्पेऽत्यादरवतांदेहिनांधर्मेषुविद्याभिजनादिषुयदसहिष्णुत्वंक्षमाराहित्यंगुणेषुदोषारोपात्मकाऽसूयाप्रयोजकंतन्न कुर्यात् तथादेहेदेहमध्येयोहंमानःपरिच्छिन्नोस्मीत्यभिमानस्तंतथाश्रुतिगतादिपदसंगृहीतंवस्त्रादिषुममत्वंस्वामित्वाभिमानंचनकुर्यात्य द्यात्मनःश्रेयइच्छेदित्यर्थः ॥ ८११ ॥ आदिपदार्थमेवप्रपंचयति अनृतमिति वचनंमानसंचयद्विषयैःकृत्वाऽनृतं असत्यार्थविषयकत्वे नानृततामापन्नमितियावत् तत्त्यजेदितिसंबंधः तथालोकानांयद्रंजनमनुकूलनेनस्वस्मिन्प्रणयोत्पादनंतत्प्रभृतीन्व्यापारान्नकुर्यात् त थाविवेकेनपरित्यक्तात्मभावंस्वंदेहंशवादिवद्दूराद्धेयंपश्येदित्यर्थः ॥ ८१२ ॥ शरीरात्पृथग्भूतस्यआशांबरत्वंसिद्धप्रायमित्यभिप्रेत्यनस्तुति

क्षुद्राणामसहिष्णुत्वंनकुर्याद्देहिनामिह॥ अहंमानंचदेहेस्वेममत्वंवसनादिषु॥ नैवकुर्वीतमेधावीक्षेममिच्छ न्निजात्मनः ॥८११॥ अनृतंवचनंतद्वन्मानसंविषयैरपि॥ लोकरंजनमुख्यांश्चत्यजेत्सर्वात्मनायतिः॥ वि ण्मूत्रकुणपैस्तुल्यंशरीरंस्वंविलोकयेत्॥ ८१२॥ नस्तुतिर्ननमस्कारोनिःस्वधाकारएवच॥ चलाचलनिकेत स्तुयतिर्यादृच्छिकोभवेत् ॥८१३॥ नचार्हेच्चप्रकुर्वीतनकस्यापिविवर्जनं॥ मंत्रांश्चनजपेन्नैवध्यानंकुर्वीत कस्यचित्॥ आत्मनोव्यतिरिक्तस्यनापिचोपासनंयतिः॥८१४॥ लक्ष्यंतस्यनकिंचित्स्याद्व्यापारेषुयतेःसदा॥ अलक्ष्यंचनकिंचित्तुबालवत्समदर्शिनः॥८१५॥

रित्यादिवाक्यार्थमाह नस्तुतिरिति नविद्यतेस्तुतिःकर्त्तव्यतयायस्यसतथा एवंननमस्कारइत्यत्रापि नैकधेतिवन्नशब्देनसमासः चलाच लोऽस्थिरोनिकेतोवासोयस्यतथाभूतत्वाद्यादृच्छिकोयदृच्छायाःस्वैरितायाहेतोःसमागतआकस्मिकइतियावत् एतादृशस्वभावोयति र्भवेदित्यर्थः ॥८१३॥ नचार्हेच्चेति कंचिदपिनचार्हेन्नपूजयेत् कस्यापिविवर्जनंनिषेधपर्यवसायिदोषकीर्त्तनंनकुर्यात् तथात्मव्यतिरिक्त स्यप्रकाशकान्मंत्रान्नजपेत् तस्यध्यानमुपासनंचनकुर्यादिति ॥ ८१४ ॥ लक्ष्यमिति व्यापाराणांकर्मणांमध्येकिंचिदपिलक्ष्यमवश्य ॥५८॥ मिदंमयाकर्त्तव्यमित्यभिप्रायविषयीभूतंनास्तिअलक्ष्यंहेयत्वाभिमतंचनास्तिसर्वस्यात्मत्वेनदर्शनादितिभावः ॥ ८१५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपृथगित्यादिवाक्यार्थमाह आत्मनइति आत्मनोव्यतिरिक्तमात्मव्यतिरिक्तभावावगाहिवेदनंज्ञानमस्यपरमहंसस्यनास्ति तथाऽभेदवद भेदावगाहिचवेदनंनास्ति तथास्यसमदर्शिनोऽखंडात्मदर्शिनःप्रयोजनमिष्यमाणंनास्ति अहमादिभेदराहित्यादित्यर्थः ॥ ८१६ ॥ अनि केतेस्वप्रतिष्ठेब्रह्मणिस्थितइतिव्युत्पत्तिकस्यानिकेतस्थितपदस्यार्थमाह सर्वेषामिति यत्स्वप्रतिष्ठंसर्वात्मकंब्रह्मतत्रैवास्यविदुषोब्रह्मभूतस्य स्थितिरित्यर्थः एतेनमठादौममत्वंनिषिद्धं ॥ ८१७ ॥ सुवर्णपात्रादिग्रहवारकवाक्यस्यार्थमाह सुवर्णादीनीति रागतोरागेण एतेनबिडा

आत्मनोव्यतिरिक्तंनवेदनंनाप्यभेदवत्॥ प्रयोजनंकिमप्यस्यविद्यतेसमदर्शिनः॥ अहंत्वंसर्वमित्यादिभेदो प्यस्यनविद्यते ॥ ८१६॥ सर्वेषामात्मभूतंयदाश्रयेणविवर्जितं॥ ब्रह्मतत्स्थितिहेतुःस्यादस्यनित्यंमहात्मनः ॥ ८१७॥ सुवर्णादीनिवस्तूनिसुवर्णंचविशेषतः॥ रागतोनस्पृशेन्नैवपश्येत्कुर्यान्नचग्रहम्॥ ८१८ ॥ स्प र्शनात्पुष्कसस्तस्यचंडालोदर्शनादपि॥ आत्महाचभवेदेवतत्परिग्रहतःसदा॥ ८१९ ॥ आत्मन्यत्रहतेसर्वंनि हतंस्याच्चराचरं॥ सर्वरूपोयतःस्वात्मासर्वेषामिहदेहिनाम्॥ ८२० ॥ दांतसर्वेंद्रियःशांतमानसोविगतस्पृ हः॥ उपवीतंशिखांतद्वज्ज्ञानमेवदधद्भवेत्॥ यस्माद्ब्रह्मोपनिषदिश्रूयतेन्यत्रचेदृशं॥ ८२१ ॥

लादिवत्प्रमादेनस्पर्शेनदोषइतिसूचितं ॥ ८१८॥ तत्रदोषमभिनयति स्पर्शनादिति रागेणहिरण्यादिस्पर्शात्पुष्कसोनिषादाच्छूद्र्यांजातः संकरजातिस्तत्तुल्योभवति चंडालोब्राह्मण्यांशूद्राज्जातः तत्परिग्रहतःसुवर्णादिसंग्रहाद्यतिरात्मघातीभवेदिति॥८१९॥ आत्मघातस्यसर्वा नर्थमयत्वंदर्शयति आत्मनीति आत्मनःसर्वरूपत्वात्तद्घातेसर्वहिंसांतर्भवतीत्यर्थः ॥ ८२० ॥ दांतेति वैराग्यशमदमैःसंपन्नःसन्परमहं सउपवीतस्थानेशिखास्थानेचतत्त्वज्ञानमेवदधद्धारयमाणोभवेत् नचेदंज्ञानरूपेणोपवीतशिखयोर्धारणमप्रामाणिकंब्रह्मोपनिषदितथा न्यत्रपरमहंसोपनिषदिआरुणिकोपनिषदिचश्रूयमाणत्वादित्यर्थः ॥ ८२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रब्रह्मोपनिषद्गतानामुक्तार्थपरवाक्यानामर्थमाह ह्रदिस्थाइत्येकादशभिः उपवीतस्योपादानभूतंसूत्रंस्मृतिषुत्रिवृत्त्रिधात्रिगुणत्त्वेननवतंत्वात्मकंप्रसिद्धंतद्विदुषोह्रदयनिष्ठतत्त्वात्मकमेव तथाहि सर्वाःसमष्टिरूपत्वेनसर्वात्मभूतादेवताईशसूत्रविराट्संज्ञाह्रदिह्रत्कमलेसन्निहिताः आत्मत्वेनवेदांतेषुतत्प्रसिद्धेः तथाप्राणापानौतत्संध्यात्मकोव्यानश्चेत्येवंत्रिविधःप्राणोपिह्रदिस्थितः तथास्थूलसूक्ष्मकारणलक्षणोपाधिभेदेनविश्वादिसंज्ञतामापद्यमानंपरंज्योतिश्चिदात्मतत्त्वमपिसर्वसत्ताप्रदत्वात्श्रुतौप्राणपदोक्तंह्रदिस्फुटं एवंप्रत्येकंत्रिविधानांदेवताप्राणज्योतिषांसमुदायोनवतंत्वात्मकसूत्ररूपःसिद्धइत्याशयः ॥ ८२१ ॥ यज्ञोपवीतमिति यथानवतंतुमयसूत्रात्प्रादुर्भूतोभावोयज्ञादिकर्मांगभूतंयज्ञोपवीतमित्युच्यते तथाप्रोक्तत्रिवृत्सूत्रानुसंधानेनप्रादुर्भूतमखंडंचैतन्यंज्ञानयज्ञांगभूतंयज्ञोपवीतमित्युच्यते यज्ञोपवीतंपरम

ह्रदिस्थादेवताःसर्वाह्रदिप्राणःप्रतिष्ठितः ॥ ह्रदिज्योतिःपरंतद्वत्त्रिवृत्सूत्रमिदंस्मृतं ॥ ८२२ ॥ यज्ञोपवीतं चैतन्यंह्रदितिष्ठतियत्ततः ॥ सशिखंवपनंकृत्वाबहिःसूत्रंत्यजेद्बुधः ॥ ८२३ ॥ यदक्षरंपरंब्रह्मतत्सूत्रमिति धारयेत् ॥ सूचनात्सूत्रमित्याहुःसूत्रंनामपरंपदं ॥ तत्सूत्रंविदितंयेनसविप्रोवेदपारगः ॥ ८२४ ॥

मित्यादिमंत्रस्यापितत्रैवमुख्यवृत्त्यासमन्वयात् तत्रहिसहजपदेनस्वाभाविकत्वमुक्तंप्रतिमुंचपदेनतूपाधिविमोकइति यद्यतश्चैतन्यरूपंयज्ञोपवीतंह्रदितिष्ठतीतिनिर्धारितंततःसुधीःशास्त्रोक्तसशिखवपनपूर्वकंबहिःसूत्रंबाह्यद्रव्यसाध्यमुपवीतंत्यजेदित्यर्थः ॥ ८२३ ॥ यदक्षरमिति बहिःसूत्रंतदुपलक्षितंदृश्यजातंचत्यक्त्वायदक्षरमाकाशांतप्रपंचाधिष्ठानभूतंपरंब्रह्मतदेवसूत्रमितिधारयेन्निश्चिनुयादिति कथंतत्रसूत्रपदप्रवृत्तिरित्याकांक्षायामाह सूचनादिति सूचनात्प्रकाशनाद्धेतोःसूत्रमितिनामप्राहुः लोकेतंतवोपिस्वांतर्गतपटप्रकाशनात्सूचयतीतिसूत्रमितिव्युत्पत्तिकेनसूत्रपदेनोक्तास्तथास्वांतर्गतजगत्पटप्रकाशकत्वात्परंपदंब्रह्मसूत्रसंज्ञमित्यर्थः एतद्विज्ञानफलमाह तत्सूत्रमिति वेदःशब्दराशिस्तस्यपारमगोचरमपिप्राप्तःसर्वज्ञइतियावत् ॥ ८२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूत्रशब्दस्यतंत्वादिषुरूढत्वेपिविधारकत्वलक्षणगुणेनचित्तत्त्वेप्रवृत्तिनिश्चित्यतत्परोभवेदित्याह येनेति येनसर्वाधारेणचिदात्मनासर्वंदृश्य जातंप्रोतंव्याप्तंयत्रस्थितमितिशेषः तद्वस्तुसूत्रत्वेनधारयेत्योगीतत्त्वंपदार्थैक्यदर्शी तत्रसाधनसंपत्तिमाह योगविदित्यादिपदद्वयेन योगोऽष्टांगःअमृतनादोक्तषडंगोवातद्वेत्ता तत्त्वदृष्टिर्नित्यानित्यवस्तुविवेकस्तद्वानितितदर्थः ॥ ८२५ ॥ उक्तवेत्तारंप्रशंसति बहिःसूत्रमिति उत्तममैक्यदर्शनलक्षणंयोगमास्थितआलंब्यस्थितोविद्वान्कुशलोयोबहिःसूत्रंत्यक्त्वाइदंवर्णितंसूत्रंधारयेत्सएवचेतनोलब्धचेतनत्व फलइतरेतुविद्वांसोपिरंगकुड्याश्मसमाइत्यर्थः कीदृशमिदंसूत्रं ब्रह्मभावंब्रह्मणोभावःप्रादुर्भावरूपासत्तायत्रतत्तथा ॥ ८२६ ॥ उक्तसूत्रेणसदापवित्रताभागेवभवतीत्याह धारणादिति येषामुक्तंसूत्रमंतर्गतंहृदिप्रकाशमानंभवेत्तेषांज्ञानयज्ञोपवीतिनांज्ञानमेवपरंप्रधा

येनसर्वमिदंप्रोतंसूत्रेमणिगणाइव ॥ तत्सूत्रंधारयेद्योगीयोगवित्तत्त्वदृष्टिमान् ॥ ८२५ ॥ बहिःसूत्रंत्यजन् विद्वान्योगमुत्तममास्थितः ॥ ब्रह्मभावमिदंसूत्रंधारयेद्यःसचेतनः ॥ ८२६ ॥ धारणात्तस्यसूत्रस्यनोच्छिष्टोनाशुचिर्भवेत् ॥ सूत्रमंतर्गतंयेषांज्ञानयज्ञोपवीतिनां ॥ ज्ञानमेवपरंतेषांपवित्रंज्ञानमुच्यते ॥ ८२७ ॥ अग्नेरिवशिखातद्वद्यस्यज्ञानमयीशिखा ॥ सशिखीत्युच्यतेविद्वान्नेतरेकेशधारिणः ॥ ८२८ ॥ कर्मण्यधिकृतायेवैवैदिकेब्राह्मणादयः ॥ तैर्विधार्यमिदंसूत्रंक्रियांगंतद्धिवैस्मृतं ॥ ८२९ ॥

नंनकर्म तेषांशारीरायेनसांपवित्रंशोधकमपिज्ञानमेवेत्यर्थः तथाचस्मृतिः नहिज्ञानेनसदृशमित्यादिः ॥ ८२७ ॥ उपवीतन्यायंशिखायांदर्शयति अग्नेरिवेति यथाग्नेःशिखाअग्नेःस्वरूपादन्यानभवतितथायस्यनित्यविज्ञानरूपाशिखास्वरूपादन्यानभवतिसएवमुख्यःशिखी ज्ञानस्यशिखात्वंचशिरसिमूर्द्धनिख्याताइतिव्युत्पत्त्यापृषोदरादित्वाच्चन्निष्पन्नेनशिखाशब्देनसर्वोत्तमत्वाभिधानादुत्तमत्वगुणयोगाद्वाबोध्यं इतरेज्ञानहीनास्तुनशिखिनः केशधारित्वस्यस्त्रीशूद्रादावतिप्रसक्तत्वेनशिखित्वाप्रयोजकत्वादित्यर्थः ॥ ८२८ ॥ तर्हिसर्वैर्बाह्यशिखोपवीतेहातव्येइतिचेन्न यादृशोयक्षइतिन्यायेनबाह्यकर्माधिकारिभिस्तत्तत्कर्मांगत्वेनबाह्योपवीतादीनांधारणमेवकर्त्तव्यमित्याह कर्मणीति विधार्यंविशेषेणधार्यं इदंबाह्यम् ॥ ८२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उपवीतस्यमुख्यत्वगौणत्वाभ्यांतत्प्रयुक्तब्राह्मण्यस्यापिमुख्यत्वगौणत्वेदर्शयन्मुख्यंब्राह्मण्यंज्ञानिनामाह शिखेति यस्यपुरुषस्यशिखा उपवीतंचेत्युभयंज्ञानमयंतस्यैवब्राह्मणत्वंसकलंपूर्णंमुख्यमितियावत्· इत्थंवेदतात्पर्यविदःप्राहुरिति ॥ ८३० ॥ तत्रहेतुतयाब्राह्मणपदस्यव्युत्पत्तिमात्मानंब्रह्मसर्वात्मकंवेत्तीत्याकारांसूचयन्नाह इदमिति इदंज्ञानरूपमुपवीतंपरमंसर्वोत्कृष्टंपरायणंब्रह्मरूपेणसर्वाधिष्ठानभूतंचयद्भवतितद्येनविदुषास्वात्मसाक्षात्कारलक्षणव्यापारेणविधृतंसविद्वानेवोपवीतीप्रशस्तोपवीतवान्भवेत् नकेवलमेतावदेवफलंकिंतु सर्वात्मभावोपीत्याह यज्वेति यतःसर्वदेहिकर्त्तृकयज्ञरूपस्तथायज्वायागांगकर्तृरूपश्चसविद्वान्भवेत् एतदुपलक्षणंपदार्थांतरात्मताया

॥६०॥

शिखाज्ञानमयीयस्यह्युपवीतंचतन्मयं॥ब्राह्मण्यंसकलंतस्येत्येवंब्रह्मविदोविदुः॥८३०॥इदंयज्ञोपवीतंतु परमंयत्परायणं॥सर्वदाविधृतंयेनविदुषास्वात्मबोधतः॥सविद्वानुपवीतीस्याद्यज्वायज्ञश्चदेहिनां॥८३१॥ संन्यासेपिकृतेतद्वद्विधृतेवैणवेपिच॥ दंडेनैवतुदंडित्वंमुख्यंज्ञानंविनाभवेत्॥ यस्मात्परमहंसाख्याश्रुतिरेव जगौहिसा॥८३२॥ज्ञानदंडोधृतोयेनएकदंडीसउच्यते॥काष्ठदंडोधृतोयेनसर्वाशीज्ञानवर्जितः॥सयाति नरकान्घोरान्महारौरवसंज्ञकान्॥८३३॥ यस्मादेवंततोज्ञानंकरणीयंसदामुना॥ आत्मनोब्रह्मणोयेनभेदधीर्नैवजायते॥८३४॥

अपीति ॥ ८३१ ॥ ज्ञानात्मकोपवीतादिलक्षणंब्राह्मण्यंपरमहंसेनावश्यंसंपाद्यमित्यर्थस्यदण्डोदाहरणेनप्रदर्शनपरंपरमहंसोपनिषद्वाक्यमवतारयति संन्यासेपीति संन्यासेप्रैषोच्चारणलक्षणेकृतेपिवैणवेदण्डेधारितेपिचसत्यस्ययतेर्ज्ञानंविनादंडित्वंदंडमात्रेणनभवति यतः परमहंसधर्मप्रतिपादिकाश्रुतिरुपनिषदेवमाहेति ॥ ८३२ ॥ एवंकथमित्याकांक्षायांतद्वाक्यंपठति ज्ञानेति ज्ञानरूपोदंडः एकदंडीपरमहंसः सर्वाशीविषयलंपटः स्फुटमन्यत् एतेनखल्वहंब्रह्मसूत्रमित्यादिकारुणिकवाक्यार्थोपिसंग्रहीतइतिबोध्यं ॥ ८३३ ॥ फलितमाह यस्मादिति यस्मादेवंश्रुतयःप्रतिपादयंतितस्मादमुनापरमहंसेनज्ञानंश्रवणादिद्वारासंपाद्यमिति तच्चज्ञानमैक्यविषयकमेवेत्याह आत्मनइति ॥ ८३४ ॥ ॥६०॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पारमहंस्यसंपाद्यस्यब्रह्मात्मैक्यज्ञानस्याभिनयपरंयत्सस्वयमेवावस्थितिरित्यादिपरमहंसोपनिषद्वाक्यंतस्यार्थमवतरणपूर्वकमाह आत्मनोब्रह्मेतिसप्तभिः कृतीकृतार्थः ॥८३५॥ अवतारितवाक्यार्थंदर्शयति अविद्ययेत्यादिना यन्नित्यबोधरूपत्वेनाविद्ययासदाहीनमितिकीर्तितंतद्ब्रह्मआनंदमयआत्मन्येवैक्येनसदास्थितंनतटस्थमित्यर्थः ॥ ८३६ ॥ अद्वयमिति कीदृशंतद्ब्रह्म प्रशांतसर्वभेदत्वाददद्वयं अतएवसर्वविकारैःक्रिययाचवर्जितमिति ॥ ८३७ ॥ इदमेवेति यदविद्ययासदाशून्यमित्यादिनावर्णिततंतदिदमपरोक्षंवस्त्वहमेवास्मिआत्मत्वादितिपूर्वेणसंबंधः ततआत्मरूपाद्भिन्नत्वेहिममानात्मत्वंस्यादितिभावः अभेदफलमाह एतन्मेइति तथेदमेवतत्त्वंममपरंसर्वोत्कृष्टंस्थानकंप्रियंस्थानं अनुकंपायांकन् सभूमाकस्मिन्प्रतिष्ठितःस्वेमहिम्नीतिश्रुतेः तथाइदंतत्पदार्थभूतंतत्त्वंमत्तोभेदविवर्जितंस्वयंप्रकाशत्वात् नहिप्रत्य

आत्मनोब्रह्मरूपत्वमसकृत्कथितंमया॥ तुभ्यंपुनश्चवक्ष्यामिज्ञानाद्यस्यकृतीभवेत्॥ ८३५॥ अविद्ययासदाशून्यंपरब्रह्मेतिकीर्तितं ॥ आनंदात्मस्वरूपंयत्स्वस्मिन्नेवसदास्थितं ॥ ८३६॥ अद्वयंभेदगंधेनरहिततंततएवहि॥ पूर्वदोषविनिर्मुक्तंनिश्चलंगगनोपमम्॥ ८३७॥ इदमेवाहमात्मास्मीत्येतन्मेस्थानकंपरं॥ इदमेवस्वयंज्योतिर्मत्तोभेदविवर्जितं॥ ८३८ ॥ इदंशिखोपवीतंचतथादंडकएवच ॥ नब्राह्मोवैणवोदंडोमुख्योमेद्यकदाचन॥ ८३९॥ पूर्णानंदैकरूपेस्मिन्यदैवमवतिष्ठते ॥ कृतकृत्यस्तदापश्येत्परंब्रह्मात्मरूपतः ॥ ८४० ॥ सूरयोयत्तुपश्यंतिव्यामंतत्परमंपदं॥ चक्षुर्वद्देहिनांज्योतिःस्वप्रकाशंहृदिस्थितं ॥ ८४१ ॥

ग्भिन्नस्यदृश्यस्यस्वयंप्रकाशत्वंसंभवतीतिभावः ॥ ८३८ ॥ नकेवलमुक्तंब्रह्मममस्वरूपमेवकिंतुममसर्वोपकरणात्मकंतदुपलक्षितसर्वप्रपंचात्मकंचेत्याह इदंशिखेति इदंब्रह्मैवज्ञानात्मकंममशिखादिरूपमित्यर्थः तत्रज्ञानरूपब्रह्मणएवसविलासाज्ञानदमनान्मुख्यंदंडत्वंकाष्ठमयस्यतुमनोनियमनस्मारकस्यगौणंतदित्याह नब्राह्मइति ब्राह्मःब्राह्मणंप्रतिधारणीयत्वेनविहितः॥८३९॥ उक्तभावनाफलंतुब्रह्मसाक्षात्कारएवेत्याह पूर्णेति कृतकृत्योनिवृत्तकर्माधिकारःसन्परंब्रह्मपश्येदात्मरूपतयेत्यर्थः ॥ ८४० ॥ तन्नित्यबोधइत्यस्यार्थमाह सूरयइति यद्ब्रह्मविदुषामपरोक्षंसर्वत्रव्याप्तमानंदरूपत्वेनपरमंसर्वोत्कृष्टंपदमन्वेषणीयंवस्तुयच्चाविदुषामपिहृदिस्थितंसज्ज्योतिःसर्वार्थप्रकाशकं तस्याज्ञायमानत्वलक्षणनिलीनत्वेनप्रकाशकत्वेदृष्टांतश्चक्षुः तद्धिस्वरूपसदेवप्रकाशयतीत्यर्थः ॥ ८४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वंपदार्थशोधनप्राधान्येनब्रह्मप्रतिपादिकायाब्रह्मोपनिषदोर्थंवर्णयति आत्मनइत्यूनत्रिंशत्श्लोकैः त्वंपदार्थस्यप्रत्यगूपस्यावगतिःस्फुट त्वंतदर्थंब्रह्मोपनिषदुक्ताश्चतस्रोऽवस्थाःशृण्विति ॥ ८४२ ॥ निरवस्थइति अयंचवस्तुतोनिरवस्थःअवस्थाख्यपरिणामरहितोपिमा यावशेनताःप्राप्नोतीत्यर्थः तत्रतुरीयस्यपरमार्थत्वेपितुरीयतायाःपूर्वापेक्षत्वेनकल्पितत्वमितिभावः ॥ ८४३ ॥ तासामिति तासामवस्था नांजाग्रदादीनांचतसृणांनाभ्यादीनिक्रमेणस्थानानिबोध्यानीत्यर्थः ॥ ८४४ ॥ नाभेरिति नेत्रस्थंजागरंविद्यादित्यन्यत्रोक्तेस्तदुपसंहा रेणनाभिनेत्रपर्यंतदेशेविज्ञानशक्त्युपाधिकोजीवोयदाविशेषतःस्थितोभवतितदाविश्वसंज्ञाप्रयोजिकांजागरावस्थांभजतेइतिप्रथमदला

आत्मनोस्यावगत्यर्थंत्वंपदार्थस्यतेधुना॥ ब्रह्मोपनिषदिप्रोक्ताअवस्थाःकथयाम्यहं॥८४२॥ निरवस्थःपुमा नेषआनंदात्मास्वयंप्रभः॥ मायामयीरवस्थास्ताश्चतुर्धायातिसर्वदा॥८४३॥तासांस्थानानिचैतानिकथिता निमनीषिभिः॥ नाभिश्चहृदयंतद्वत्कंठोमूर्द्धांतथैवच॥८४४॥ नाभेर्नेत्रांतमुद्दिष्टंस्थानंजागरणेसदा॥ सु प्तिस्वप्नतुरीयाणिहृदिकंठेचमूर्द्धनि ॥ ८४५॥ अत्रजागरणेस्वप्नेसुप्तौचैवतुरीयके॥ ब्रह्माविष्णुश्चरुद्रश्चप रमात्माचदेवताः॥ ८४६॥ परमात्माचतुर्थोवैसर्वदेवादिरूपभाक्॥ कार्यकारणहीनोयमवाङ्मनसगोच रः॥८४७॥ आनंदात्मास्वयंज्योतिःसउक्तोवेदवादिभिः॥यस्मिन्लोकाःकर्मफलंनलोकाभेदवर्जिते॥८४८

र्थः हृत्कमलेतिष्ठन्प्राज्ञत्वप्रयोजिकांसुषुप्तिंकंठेतैजसत्वप्रयोजकंस्वप्नंमूर्द्धनितुसमाधिनातिष्ठंस्तुरीयतांभजतइत्यर्थः ॥ ८४५ ॥ अत्रजा गरणइति क्रमोविवक्षितः देवताअधिदैवरूपाणि तथाचजागरणशालिनोविश्वस्यब्रह्माविराड्रूपोऽधिदैवंस्वप्नस्यविष्णुर्हिरण्यगर्भरूपःसु प्तेरुद्रस्तुरीयस्यपरमात्मेत्यर्थः ॥ ८४६ ॥ तत्रपरमात्मरूपंयथाश्रुतिप्रतिपादयत्युपादानाय परमात्मेत्यादिना यश्चतुर्थःपरमात्मासमाय यासर्वरूपोवस्तुतःकार्यादिविशेषरहितोवागाद्यगोचरश्चबोध्यइत्यर्थः ॥ ८४७ ॥ आनंदात्मेति तथासस्वयंप्रकाशानंदरूपउक्तः तत्रहे तुतयाऽद्वितीयत्वमाह यस्मिन्निति यस्मिन्कर्मफलरूपालोकाविषयाःनलोकाः लोकभावंपरित्यजंतिभेदवर्जितत्वादित्यर्थः ॥ ८४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवाइति यथालौकैरत्रतुरीयेस्वभावस्त्यक्तस्तथादेवादिभिरपिसत्यज्यते यतस्तेममत्वंपदार्थस्यसंबंधिनोऽध्यासाआरोपितरूपाभवंतिन वास्तवाइत्यर्थः ॥ ८४९ ॥ चंडालइति ब्राह्मण्यांक्षत्रियायांचक्रमेणशूद्राज्जातौचंडालपुष्कसौ चंडालांताजातयःसंन्यासादयआश्रमा श्चात्रतुरीयेमत्स्वरूपेनसंतीति ॥ ८५० ॥ अधमइति अधमादिःकर्तृविशेषरूपऐहिकामुष्मिकसुखादिसाधनरूपःसुखादिफलरूपश्चय स्यभेदउक्तःससंसारोमयितुरीयेनास्तीतिद्वयोरर्थः ॥ ८५१ ॥ ८५२ ॥ एकमिति निर्वाणंनिर्गतंवाणंशरीरंसविलासाज्ञानरूपंयस्मात्त न्निर्वाणसंज्ञंशुद्धधियांस्वयंज्योतिष्ट्वेनभातीति ॥ ८५३ ॥ ऋषयइति अत्रतुरीयेऋष्यादयःकेपिनईशतेनियमनंकर्तुंनशक्नुवंतीत्यर्थः

देवावेदास्तथायज्ञामातापिचपितापिच ॥ स्मृषेत्यादिममाध्यासानस्युस्तेप्यत्रलोकवत् ॥ ८४९ ॥ चंडालः पुष्कसस्तद्वत्संन्यासीचवनीतथा ॥ इत्यादिकोयमध्यासोममनास्तिस्वभावतः ॥ ८५० ॥ अधमस्तूत्तमो वाहमेतानिकरणानिमे ॥ दुःखस्यचसुखस्यापिइहवापिपरत्रच ॥ ८५१ ॥ सुखंवाप्यथवादुःखंभेदश्चैवप्र कीर्तितः ॥ संसारोयमपार्थोयंमयितुर्येनविद्यते ॥ ८५२ ॥ एकमेवतुतद्ब्रह्मपरंनिर्वाणसंज्ञितं ॥ विशुद्धचेत सांनित्यंभातिस्वेनैवतेजसा ॥ ८५३ ॥ ऋषयःपितरोदेवास्तथान्येपिमहौजसः ॥ तत्रकेपीशतेनैवतुर्येदेवेम हेश्वरे ॥ ८५४ ॥ यश्चजानातितंदेवंसर्वज्ञःकोपिकर्हिचित् ॥ ऋष्यादीनांभवेन्नैवकिंकरोयमनाथवत् ॥ ८५५ जगदीशस्तथाज्ञातात्वस्माभिःकल्पितंद्वयं ॥ वस्तुतोनैवतद्द्वैतंपुरुषेविद्यतेयतः ॥ ८५६ ॥ एकएवस्वयंज्यो तिर्गूढःकाष्ठाग्निवत्सदा ॥ चतुर्विधेषुभूतेषुकार्यकारणरूपिषु ॥ ८५७ ॥

॥ ८५४ ॥ प्रतिवुद्धादिपदद्वयार्थमाह यश्चेति यस्तंकोपिकर्हिचिज्जानातिससर्वज्ञःसन्सर्वविद्याफलमृष्यादीनांकैंकर्याभावरूपंप्राप्नोती त्यर्थः योयोदेवानांप्रत्यवुध्यतेत्यादिश्रुत्युक्तसर्वविद्यापदेप्रथमाद्द्वितीयार्थेइतिभावः ॥ ८५५ ॥ उपवीतग्रंथस्यप्रदर्शितार्थत्वात्तमतिक्र म्यएकोदेवइत्यादिमंत्रार्थमाह जगदीशइति जगच्चईशश्चज्ञाताभ्रमप्रमयोराश्रयोजीवश्चएवंरूपंद्वयंद्वैतमस्माभिर्मायामोहितैरेवकल्पितं वस्तुतस्त्वत्रपुरुषेनास्तियतोयंकाष्ठेष्वग्निवत्सर्वोपाधिषुगूढएकश्चभवति तस्योपाधयस्तुजरायुजादिचतुर्विधभूतरूपाः तत्रभूतविशेषण स्यकार्यकारणरूपित्वस्यायमर्थः दृष्टाऽदृष्टद्वारापूर्वदेहंप्रतिकार्यत्वमुत्तरदेहंप्रतिचकारणत्वमितिद्वयोरर्थः ॥ ८५६ ॥ ८५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेति आकाशवत्सर्वव्यापीबुद्धेरपिशब्दात्कारणशरीरस्याप्यंतरामध्येप्रत्यक्त्वेनस्थितस्तथासर्वभूतानिराजवदधिष्ठायवशीकृत्यअत्रएषु
भूतेषुस्थितः ॥ ८५८ ॥ मध्यस्थइति मध्यस्थःसाक्षी चेतृपदार्थमाह चिद्घनइति ॥ ८५९ ॥ तृचूप्रत्ययांतंचेतृपदंतस्यज्ञानरूपस्यज्ञाना
श्रयत्वंवक्तुंनक्षमतेप्रमेयतंत्रत्वान्निर्गुणपदसमभिव्याहाराच्चेत्याशयेनाह चेतनइति चेतनश्चैतन्याश्रयवाचकेनचेतृपदेनोक्तोपिचैतन्यं
च्छादिगुणाश्रयोनभवतिनिर्गुणत्वादद्वितीयत्वाच्चास्मिन्गुणगुणिभावस्यासंभवादित्यर्थः ॥ ८६० ॥ एकोवशीत्यादिमंत्रपूर्वार्द्धस्यार्थ
माह स्वामीति यत्यतःस्वरूपमेवबहुधाकुरुतेऽतःसर्वस्यस्वामीनियामकइतियावत् विकारस्यउपादानाधीनतायान्याय्यत्वादितिभावः

सर्वव्यापीयथाकाशोबुद्धेरप्यंतरास्थितः॥ अधिष्ठायचभूतानिवसत्यत्रसराजवत्॥ ८५८॥ मध्यस्थइवभू
तानांव्यापाराननुपश्यति॥ चिद्घनःकेवलोजाड्यलेशेनापिविवर्जितः॥ ८५९॥ चेतनोपिपुमान्नायंचैतन्या
दिगुणःसदा॥ स्वभावान्निर्गुणोयस्माद्भेदगंधविवर्जितः ॥ ८६० ॥ स्वामीसर्वस्यजगतःसर्वदायोनियाम
कः॥ एकमेवात्मनोरूपंकुरुतेबहुधाचयत्॥ ८६१ ॥ तस्यात्मनोत्रविज्ञानेउपायंप्राहुरीदृशं ॥ स्वदेहंवापिबु
द्धिंवाप्यरणिंप्रविचिंतयेत् ॥ चतुर्मात्रंतथोंकारमात्मानमुत्तरारणिं ॥ ८६२ ॥ मात्रापादाद्यभेदेनध्यानेन
मथनेनहि॥ अभ्यस्यतोयमात्मास्यान्निगूढःप्रकटःसदा॥ ८६३॥ अरण्योर्मथनाद्यद्वदग्निःसर्वप्रदाहकः ॥
अविश्वासोनकर्त्तव्यआविर्भावेनिजात्मनः॥ ८६४॥

॥ ८६१ ॥ आत्मानमित्यादेरर्थमाह तस्येति तस्यात्मनःसाक्षात्कारेऽयमुपायउक्तः अयंकः आत्मपदोक्तंदेहादिसंघातंबुद्धिंवाऽधरारणिं
चिंतयेत् अकारोकारमकारार्द्धमात्रारूपमात्राचतुष्टयशालिनंप्रणवमात्मानंमात्राभिर्विश्वेत्यादिचतुरवस्थस्यात्मनःप्रतिपादकमुत्तरार
णिंचिंतयेदिति ॥ ८६२ ॥ मात्रेति पादाविश्वादयस्तुरीयांताःप्रत्येकमधिदैवादिभिन्नामांडूक्येप्रोक्तास्तेषांमात्राभिर्यथाक्रममभेदेनचिंत
नमेवमथनं प्रकृत्यादित्वात्तृतीया तथाचोक्तध्यानात्मकमथनरूपाभ्यासेनायमात्मागूढोपिप्रकटःस्याद्त्रनसंशयइतिद्वयोरर्थः॥८६३॥ ॥६२॥
॥ ८६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिलेष्वित्यादेरर्थमाह यथेति यथायंत्रादिनानिपीडनमथनादिरूपोपायवद्भिस्तैलंघृतंचलभ्यतेतथातपःसत्यविवेकाद्युपायवद्भिर्बुद्धिसा क्ष्यात्मापिनिजात्मतःस्वरूपत्वेन निजात्मभिरितिपाठेनिजेस्वरूपेआत्मामनोयेषांतैस्तथातैरित्यर्थः ॥ ८६५ ॥ ऊर्णेत्यादेरर्थमाह जीवता मितिद्वाभ्यां अयमात्माऽविद्ययाजीवत्वंपरिगृह्यसंसारेजाग्रदादिरूपेभ्रमति ज्ञातस्तुपूर्वंजीवोपिसन्नजीवोब्रह्मरूपःप्रजायतेइत्यर्थः ॥ ८६६ ॥ जाग्रदादयोऽवस्थास्तद्गताःपदार्थाउपलक्षितास्तेऽनेनैवकल्पिताइतिसदृष्टांतमाह ऊर्णेति अत्तिसंहरति ॥ ८६७ ॥ ज्ञेयप्र तिपादकमंत्यवाक्यमवतारयति अजीवतेति यदाऽद्वयमात्मानंपश्येत्तदैवाजीवताब्रह्मताऽस्यभवतीत्यर्थः ॥ ८६८ ॥ अस्यात्मनोविज्ञानम

यथायंत्रादिपीडातउपायाल्लभ्यतेनृभिः ॥ तैलादिकंतथात्मापितपःसत्यादिसंयुतैः ॥ आत्मज्ञैर्लभ्यतेशश्वद्बु द्धौस्वस्यनिजात्मतः ॥ ८६५ ॥ जीवतांपरिगृह्यायमानंदात्मास्वयंप्रभुः ॥ संसारेवर्त्ततेज्ञातोजीवोऽजीवःप्र जायते ॥ ८६६ ॥ ऊर्णनाभिर्यथातंतून्सृजतेसंहरत्यपि ॥ जाग्रत्स्वप्नेतथाजीवःसृजत्यत्तिचसर्वदा ॥ ८६७ ॥ अजीवतातदातस्यजीवस्यास्यभविष्यति ॥ आनंदात्मानमात्मस्थंयदाऽयमवलोकयेत् ॥ ८६८ ॥ यतो वाचोनिवर्त्ततेअप्राप्यमनसासह ॥ आनंदत्वंचजीवस्यतज्ज्ञात्वामुच्यतेबुधः ॥ ८६९ ॥ सर्वव्यापिनमा त्मानंक्षीरेसर्पिरिवस्थितं ॥ आत्मविद्यातपोमूलंजीवोज्ञात्वाविमुच्यते ॥ मनसोनिग्रहेनित्यंनान्यथाजन्म कोटिभिः ॥ ८७० ॥

प्यविषयतयाआनंदरूपतयाचेत्याह यतइति वाचःवागादींद्रियाणिमनश्चएतान्यप्राप्याविषयीकृत्ययतोनिवर्त्तंते यतश्चज्ञाताज्जीव स्यानंदत्वमानंदरूपत्वंप्रकटीभवतितज्ज्ञात्वाबुधोविवेकीमुच्यतेमुक्तोभवतीत्यर्थः ॥ ८६९ ॥ उत्तराकांक्षामुत्थापयन्नुपसंहारवाक्यार्थ माह सर्वेति आत्मविद्याउपासनात्पःशास्त्रोक्तंकर्मताभ्यांकर्मोपासनफलात्मकःसंसारउपलक्ष्यतेतस्यसर्वस्यमूलंकारणंक्षीरेसर्पिरिव सर्वत्रानुगतमात्मानंज्ञात्वामनसोनिग्रहेकृतेसतिविमुच्यतेनान्यथेत्यर्थः क्षीरसर्पिर्दृष्टांतेनचमुक्तस्यपुनर्बंधाभावःसूचितः यद्वाआत्मवि द्याचतपश्चएतेमूलंप्रादुर्भावसाधनंयस्यतमिति तदुक्तं अविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुतेइति ॥ ८७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तार्थेमानभूतायाब्रह्मबिंदूपनिषदोऽर्थंगौडपादवाक्यादिभिस्त्रिचत्वारिंशदधिकश्लोकशतेनोपबृंहयितुंप्रतिजानीते एतत्तेइति एतदात्म
ज्ञानमनोनिग्रहयोर्मोक्षप्रयोजकत्वं अमृतबिंदुर्नामब्रह्मबिंदूपनिषत् अमृतब्रह्मशब्दयोःसमानार्थत्वात् तत्रयथाप्रतिपादितंतच्छृणु तत्रनि
ग्रहयोग्यंमनोनिर्धारयितुंतद्द्वैविध्यंसलक्षणमुच्यते मनोहीत्यादिना शुद्धिःसत्कर्मोपासनाभ्यांमलक्षयः तल्लक्षणंकामनिवृत्तिः कामोविष
यरागः ॥ ८७१ ॥ तत्रशुद्धस्यमोक्षोपयोगितामन्वयव्यतिरेकाभ्यामाह मनएवेति बंधोऽहंममेत्यादिरध्यासः मोक्षआत्मयाथात्म्याव
भासः निर्विषयंवीतरागंमोक्षेप्रयोजकमितिशेषः ॥८७२॥ फलितमाह यतइति यतोविषयरागलक्षणाऽशुद्धिहीनस्यमनसःफलभूताम्
क्तिरिष्टावेदविद्भिः ततःशुद्धमनसःसफलीकर्त्तुंनिर्विषयंनिरुद्धंकार्यमित्यर्थः ॥ ८७३ ॥ मनोनिरोधस्यमोक्षपर्यवसायितामेवदर्शयति

एतत्तेमृतबिंदूक्तमहंवक्ष्यामितच्छृणु ॥ मनोहिद्विविधंप्रोक्तंशुद्धंचाशुद्धमेवच ॥ अशुद्धंकामसहितंशुद्धंकामविवर्जितं ॥ ८७१ ॥ मनएवमनुष्याणांकारणंबंधमोक्षयोः ॥ बंधायविषयासक्तंमोक्षेनिर्विषयंस्मृतं ॥ ८७२ ॥ यतोनिर्विषयस्यास्यमनसोमुक्तिरिष्यते ॥ ततोनिर्विषयंनित्यंमनःकार्यंमुमुक्षुणा ॥ ८७३ ॥ निरस्तविषयासंगंसंनिरुद्धंमनोहृदि ॥ यदायात्यात्मनोभावंतदातत्परमंपदं ॥ ८७४ ॥ यथास्वप्नेद्वयाभासंस्पंदतेमाययामनः ॥ तथाजाग्रद्द्वयाभासंस्पंदतेमाययामनः ॥ ८७५ ॥ अद्वयंचद्वयाभासंमनःस्वप्नेनसंशयः ॥ अद्वयंचद्वयाभासंतथाजाग्रन्नसंशयः ॥ ८७६ ॥

निरस्तेति निरस्तोविषयेष्वासंगआसक्तिर्येनतत्तथाभूतंमनोयदाहृदिनिरुद्धंसदात्मनोभावंस्वभावंमहावाक्यप्रतिपाद्यमैक्यरूपंयातिअव
धारयतितदातन्मोक्षरूपंपरमंसर्वोत्कृष्टंपदंप्राप्यंफलंसिद्धमितिबोध्यमित्यर्थः ॥ ८७४ ॥ आत्माकारतयामनोनिरोधप्रकारंगौडपादैःसो
पपत्तिकमुक्तंतद्वाक्यानांप्रायशउपन्यासेनविशदयति यथास्वप्नइत्यादिनाअकथ्यंसुखमुत्तममित्यंतेनग्रंथेन यथास्वप्नावस्थायांमनःक
र्तृद्वयाभासंमिथ्याभूतग्राह्यग्राहकरूपद्वैताकारंसत्स्पंदतेविकारंभजतेतथाजाग्रत् सप्तमीलोपआर्षः जाग्रदवस्थायामपिबोध्यमित्यर्थः
॥ ८७५ ॥ द्वैतस्यमिथ्यात्वमेवस्फुटयति अद्वयमिति यथामनःस्वप्नेद्वयाभासमपिवस्तुतोऽधिष्ठानचिद्रूपेणाद्वयंद्वैतरहितमेवतथाजा
ग्रत्यपीत्यर्थः ॥ ८७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिष्ठानचित्तत्वदृष्ट्यैवचसविलासमनसोबाधरूपाअमनस्ताभवतीत्याह आत्मेति आत्मैवसत्यमधिष्ठानंतस्यानुबोधःशास्त्राचार्योपदेशानुसारेणसाक्षात्कारस्तेनयदानसंकल्पयतेद्वैताकारवृत्तीःपरित्यजतितदाद्वैताभावेसतिद्वैताग्रहणरूपाममनस्तांमनोरहिततांयातितत्त्वविदित्यर्थः॥८७७॥ तदानींकीदृशमात्मरूपमवशिष्यतेइत्याकांक्षायामाह अमनस्तेति यदातस्यभ्रमसिद्धस्यमनसःअमनस्ताबाधरूपानिवृत्तिर्भवतितदातद्बन्मनसोऽभाववत्तत्त्वमीदृशमेभिर्विशेषणैरुपलक्षितंप्रचक्षतेकथयंतितत्त्वविदइतिसंबंधः ईदृशंकीदृशं अकल्पकंसर्वकल्पनारहितंअजंजन्मादिविकारहीनंज्ञेयाभिन्नंस्वप्रकाशंचयज्ज्ञानंतद्रूपमिति तस्याकल्पकत्वादौक्रमेणहेतुगर्भंविशेषणत्रयंब्रह्मज्ञेयमित्यादिब्रह्मैवज्ञेयंयस्यतत्तथा तस्मादकल्पकंनित्यत्वादजंयतश्चाजेनतेनज्ञानेनाजंस्वरूपमेवविबुद्ध्यतेनत्वन्यत्ततोज्ञेयाभिन्नमितिसंबंधः॥८७८

आत्मसत्यानुबोधेननसंकल्पयतेयदा॥अमनस्तांतदायातिग्राह्याभावेतदग्रहं॥८७७॥अमनस्तायदातस्य
मनसस्तद्वदीदृशं॥अकल्पकमजंज्ञानंज्ञेयाभिन्नंप्रचक्षते॥ब्रह्मज्ञेयमजंनित्यमजेनाजंविबुध्यते॥८७८॥
सुषुप्तिवद्यदातत्स्यादमनस्तातदाभवेत्॥ केचिदेवंसमिच्छंतिनयुक्तंतद्विभेदतः॥ ८७९ ॥ निगृहीतस्यम
नसोनिर्विकल्पस्यधीमतः॥ प्रचारोजागरेचैवसुषुप्तेऽन्योनतत्समः॥ लीयतेहिसुषुप्तेतन्निगृहीतंनलीयते
॥ ८८० ॥

अत्रभ्रांतमतमनूद्यनिरस्यति सुषुप्तिवदिति तन्मनोयदासुषुप्तिवत्सुषुप्तौयादृशंभवतितादृशंभवेत्तदाअमनस्तासिद्धिर्बौद्धोतिकेचिद्वदंति तन्मतंनयुक्तंयतःसुषुप्तिनिरोधयोर्विभेदोविशेषोवक्ष्यमाणविधयाभवतीत्यर्थः ॥ ८७९ ॥ तमेवविशेषमभिनयति निगृहीतस्येति निगृहीतस्यनिरुद्धस्यअतएवनिर्विकल्पस्यकल्पनारहितस्यधीमतोमहावाक्यजविद्यासंस्कृतस्यचमनसोयएषोऽधिष्ठानावशेषरूपःप्रचारोऽवस्थाविशेषःसजागरेनिद्राभावेभवति सुषुप्तौतुयोमनसःप्रचारःसःअन्योविलक्षणस्तामसत्वात् अतउक्तःप्रचारोनतत्समोनसुषुप्तिसमइति यतःसुषुप्तेतच्चित्तंलीयतेकारणेसूक्ष्मभावेनावतिष्ठतेअत्रसमाधौतुबाध्यतेइत्यर्थः ॥ ८८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुप्तिसमाध्योर्विशेषांतरमाह तदेवेति तत्ग्राह्यग्राहकभेदरहितंनिरुद्धंचित्तंनिर्भयत्वादिशालिब्रह्मैवसंपन्नं सुषुप्तौतुतादृशंनिर्भयब्रह्माल
तामापन्नंचित्तंनभवतिदोषबीजाविद्याशबलेलयादितिभावः तत्रनिर्भयत्वंभयहेतुद्वितीयग्रहणाभावात् नचतत्रभासकापेक्षेत्युक्तंज्ञाना
लोकमिति स्वरूपभूतंज्ञानमेवालोकःप्रकाशोयत्रतत्तथा चिदेकरसमितियावत् समंततःसर्वतःस्थितंव्यापकमितियावत् अतएवाजंज
न्मादिविकारहीनं तत्रहेतुरुन्निद्रंनिद्रायाअबोधरूपायाउद्गतंनिष्क्रांतमतएवस्वप्नमरूपेणाध्यासजातेनहीनं तस्याविषयत्वमाह अनामक
मरूपकमिति नामरूपराहित्यात्सर्वेंद्रियाग्राह्यमित्यर्थः बाधितायाअविद्यायाःपुनरप्रसक्तेःसकृदेकवारमेवविभातमाविर्भूतमतएवसर्वज्ञं
सर्वंचतत्ज्ञंचैतन्यमात्रमित्यर्थः ॥ ८८१ ॥ अयंदुर्लभइत्याह अमनस्तामिति चित्तेमनसिभूरिपुण्यपरिपाकात्प्रतिबंधापहारेणामनो

तदेवनिर्भयंब्रह्मज्ञानालोकंसमंततः ॥ अजमुन्निद्रमस्वप्नमनामकमरूपकं ॥ सकृद्विभातंसर्वज्ञंसुषुप्तौनच
तादृशम् ॥ ८८१ ॥ अमनस्तांगतेचित्तेप्राप्योयंभूरिपुण्यतः ॥ सर्वाभिलापविगतःसर्वचिंतासमुत्थितः ॥
सुप्रशांतःसकृज्ज्योतिःसमाधिरचलोभयः ॥ ८८२ ॥ ग्रहोनास्मिन्नचोत्सर्गश्चिंतांवाकस्यचिद्वहेत् ॥ आ
त्मसंकलनादात्मायदानिश्चलतांगतः ॥ ८८३ ॥ आत्मरूपंभवेच्चित्तमजातिसमतांगतं ॥ तदासमाधिरेष
स्यादमनस्ताभवोमहान् ॥ वेदांतोदितसंगूढोदृश्यतेगुरुवक्रतः ॥ ८८४ ॥

भावंगतेसत्ययंसमाधिःप्राप्योभवति कीदृशः सर्वेऽभिलापाःशब्दावागिंद्रियविषयाविगतायस्मात्सतथा तथाचिंताअंतःकरणवृत्तय
स्ताभ्यःसमुत्थितोव्यावृत्तः शिष्टानिपदानिव्याख्यातानि ॥ ८८२ ॥ ग्रहइति अस्मिन्समाधौग्रहणत्यागौनस्तः द्वितीयाभावात् अत
एवचकस्यचिद्विषयस्यचिंतांनवहेत्नधारयेत् अस्यसमाधेर्निदानतात्मतत्त्वसाक्षात्कारएवेत्याह आत्मेति आत्मनःसंकलनंयाथात्म्यनि
र्धारणंतस्माद्धेतोरात्मायदानिश्चलतांदृश्यभानात्मकक्षोभराहित्यंगतोभवेत्चित्तंचात्मरूपमात्मनिबाधितंभवेत् कीदृशमजाति जातिभिः ॥६४॥
सकलविशेषैर्वर्जितमतएवसमतांपरमसाम्यंगतंचेतितदाएषसमाधिःस्यात् कीदृशोवेदांतवाक्यैर्गूढतयाउपदिष्टोपिगुरूपदेशात्साक्षात्कार्य
इतिद्वयोःसंबंधः ॥ ८८३ ॥ ८८४ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यदौर्लभ्यमेवस्फुटयति अस्पर्शेति अयंसमाधिरस्पर्शयोगसंज्ञःसर्वसंबंधराहित्यात्समाधित्वाच्चतथासर्वैर्वेदांतविज्ञानहीनैर्योगिभि र्दुःखेनद्रष्टुंशक्योयतस्तेऽस्माद्बिभ्यतिभयंयांतियतोऽभयेपिरहसिबालाइवभयंभयहेतुंपश्यंतीत्यर्थः ॥ ८८५ ॥ तेषांभयनिदानमपिस्वा ज्ञानमेवेत्याह जात्यंधाइति यथाजन्मांधास्तत्प्रसिद्धमपिरूपंनलभंतेतथातेयोगिनआंतरमप्यात्मानंस्वावबोधतःसाक्षात्कारेणअलब्ध्वा अप्राप्यसुप्त्याअतुल्यामपिअमनस्तांसुप्तितुल्यांवदंतीतिसंबंधः ॥ ८८६ ॥ नकेवलमविद्यैवभयकारणंकिंतुकुतर्काअपीत्याह भयकारण मिति एतेषामश्रौतयोगिनामुक्तसमाधितोभयस्यकारणंप्रथममाद्यंभ्रांतीनामध्यासानांदर्शनमुदयसाधनमज्ञानंभवति द्वितीयंतुतत्प्रयुक्ता

अस्पर्शयोगोनामायंदुर्दर्शःसर्वयोगिभिः॥ योगिनोबिभ्यतिह्यस्मादभयेभयदर्शिनः॥८८५॥जात्यंधाइव रूपंतन्नलभंतेकदाचन ॥ अलब्ध्वांतरमात्मानंवदंतिस्वावबोधतः ॥ अमनस्तांसुप्तितुल्यामतुल्यामपिसर्व दा ॥ ८८६ ॥ भयकारणमेतेषांप्रथमंभ्रांतिदर्शनं॥ पश्चान्नानाविधाप्रेक्षातज्जन्यामानवर्जिता॥८८७॥ आत्मासर्वेषुभूतेषुसर्वभेदविवर्जितः ॥ चिदानंदवपुश्चैकइतीदंनोपपद्यते॥ जन्मादीनांसुखादीनांव्यवस्था याश्चदर्शनात् ॥ ८८८ ॥ पुरुषास्ततएवैतेभिन्नाःसर्वशरीरगाः ॥ एकाप्रकृतिरित्यादिह्युत्प्रेक्षंतेततोबहु ॥ ८८९ ॥

याःशास्त्रजालप्रसिद्धाविविधाःप्रेक्षाःकल्पनास्तर्काइतियावत् तद्रूपमित्यर्थः ॥ ८८७ ॥ तेषांतर्कान्दर्शयन्नादौसांख्यानुयायियोगिनां तानाह आत्मेतित्रिभिः यदौपनिषदैरात्मनोभासमानानंदरूपत्वमद्वितीयत्वंचोच्यतेतन्नसंभवति जन्मादिविकाराणांसुखादिगुणानांच व्यवस्थायानियतात्मसंबंधस्यचकाराद्युगपत्प्रवृत्तेश्चदर्शनादनुभवादित्यर्थः ॥ ८८८ ॥ पुरुषाइति ततोव्यवस्थाद्यनुरोधात्प्रतिशरीरं पुरुषभेदस्तेषांभोगादिप्रयोजिकाएकाप्रकृतिश्चस्वीकार्येत्यादिकंबहुयथाभवतितथाकल्पयंतीत्यर्थः ॥८८९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाप्रकारांतरेणमोक्षंवदंतस्तेचित्तस्यबाधरूपमात्मनिलयंनस्वीकुर्वंतीत्याह मुक्ताविति साप्रकृतिरेकासर्वपुरुषसाधरणीबहुभीरूपैस्तता
पिमुक्तौविनाशमदर्शनंयाति यद्वाइयंप्रकृतिरित्थंप्रकाराबंधलक्षणानुलोमपरिणामशालिनीसत्यपिमुक्तौसाध्यायांरूपांतरंप्रतिलोमपरि
णामात्मकंयाति अथवाप्रकृतिःस्वरूपेणनबंधिकाकिंतुमनोरूपेण तथाचतन्मनएवमुक्तौरूपांतरंकृतार्थत्वेसतिकारणभावलयरूपंयातिए
तत्प्रकारत्रयंसंभवति यत्त्वौपनिषदैरुच्यतेआत्मनितादात्म्यंबाधरूपंमनोव्रजतीतितत्कथंसंभवेत् नह्यकारणेकार्यस्यलयोयुक्तइतिभावः
॥८९०॥ इत्यादिकमिति इत्यादिकंवर्णितकारणकंभयंदृष्ट्वाप्राप्यतांश्रुतिविद्वदनुभवसिद्धामुक्तामम नस्तांविमुच्यानंगीकृत्यताममनस्तांसु
प्तिसुषुप्तिरूपामनुभूयमत्वाचतेयोगिनःस्वीयमानंदरूपमात्मानंनलभंतइतितृतीयेनाभिसंबंधः यतस्तेऽविद्यायावशंगताइत्यर्थः ॥८९१॥

मुक्तौविनाशमायातिएकासाबहुधातता ॥ इयमित्थंप्रकारावारूपांतरमथापिवा ॥ मनःप्रयातिकेनैतदा
त्मतादात्म्यमाव्रजेत् ॥८९०॥ इत्यादिकंभयंदृष्ट्वात्यमनस्तांविमुच्यतां ॥ अनुभूयचतांसुप्तिमविद्यायावशं
गताः ॥ ८९१ ॥ योगिनःपंडितंमन्याभस्त्रावच्छ्वासधारिणः ॥ वृक्षवज्ज्ञानरहिताश्श्रमवन्निश्चलाअपि
॥८९२॥ आनंदात्मानमभयंसर्वदाहृदयेस्थितं ॥ स्वीयंलभंतेनैवैतेयद्वदंधाःकरेनिधिम् ॥८९३॥ सुप्रस
न्नंसदात्मानंज्ञानहीनंचकेचन ॥ पश्यंतःसुखविज्ञानेशून्येएववदंतिहि ॥ भ्रांताअपिचतेमोक्षममनस्तांवदं
तिहि ॥८९४॥

तेषांश्रमवैयर्थ्यंविशेषणैराह योगिनइति वृक्षवत्ज्ञानरहिताअपिआत्मानंपंडितंमन्यमानाःपाषाणवन्निश्चलाअपिभस्त्रावद्वृथाश्वासाः
॥ ८९२॥ आनंदात्मानमिति स्पष्टम् ॥८९३॥ इतरेषांतर्कान्संक्षिप्याह सुप्रसन्नमिति सुप्रसन्नंसाक्षिरूपंसर्वोपाधिविविक्तमप्यात्मानंज्ञा
नहीनंस्वाभाविकज्ञानरहितंपश्यंतःकेचनवैशेषिकामाध्यमिकाश्चसुखविज्ञानेसुखंविज्ञानंचएतेद्वेअपिशून्येअसतीवदंतिप्रतिपादयंतित
त्रवैशेषिकादीनांमतेमनःसंयोगविरहकालेतयोरसत्त्वंमाध्यमिकानांतुस्वतइतिविवेकः हियतस्तेभ्रांताः किंचतेअमनस्तांमोक्षकालिकीमे
ववदंतिमोक्षदशायामेवमनोविमोकआत्मनोभवतिनजीवतइत्याशयेनेत्यर्थः ॥ ८९४ ॥ ॥६५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिष्ठतुप्रासंगिकंमुमुक्षून्प्रतियःसांप्रदायिकैरुक्तोवर्णितविधोमनोनिग्रहस्तैःसएवकर्त्तव्यइत्याह मनसइति यतोमनोनिग्रहःसत्संप्रदायाध्वनासर्वेषामभयादिप्रयोजकस्ततःसर्वैःकर्त्तव्यइत्यर्थः यदितेकुयोगिनोपिसन्मार्गेणयतेरंस्तदातेपिमुच्येरन्नितिसर्वपदप्रयोक्तुराशयः ॥ ८९५ ॥ उक्तायाअमनस्तायालाभायमनोजयःकर्त्तव्यः नचसोऽशक्यः शास्त्रविहितत्वात्तत्सिद्धेर्विद्वदनुभवसिद्धत्वाच्चेत्याह जेतव्यमिति वदंतिविदधतिशास्त्राणिसिद्धमावेदयंतिचविद्वांसइत्यर्थः ॥ ८९६ ॥ तत्रचदृढउत्साहएवहेतुरित्याह उत्सेकइति कुशाग्रतुल्येनएकबिंदुग्राहकेणचंचुनाउदधेःसमुद्रस्योत्सेकोरिक्तीभावोयथाटिट्टिभेनकृतस्तथामनोनिग्रहोप्यपरिखेदतउद्वेगपरित्यागेनस्यादिति न

मनसोनिग्रहायत्तमभयंसर्वयोगिनां ॥ दुःखक्षयःप्रबोधश्चाप्यक्षयाशांतिरेवच ॥ यतस्ततोमनोरोधःसर्वेषामपिसंमतः ॥ ८९५ ॥ जेतव्यंमनएवादौस्वात्मनःक्षेममिच्छता ॥ जयंतस्यवदंत्येवदुर्जयस्यापिचेतसः ॥ ८९६ ॥ उत्सेकउदधेर्यद्वत्कुशाग्रेणैकबिंदुना ॥ मनसोनिग्रहस्तद्वद्भवेदपरिखेदतः ॥ ऐतिह्यतःसमुत्सेकउदधेरेवमत्रसः ॥ ८९७ ॥ सागरस्यपुराकूलेकल्लोलैःकठिनीकृते ॥ अंडानिटिट्टिभःकश्चिट्टिट्टिभीविनिवारितः ॥ मुमोचगर्वमापन्नःकदर्थीकृत्यसागरं ॥ ८९८ ॥ टिट्टिभीमेवमाहाथमाभयंतेस्तुभामिनि ॥ हरेद्यदिममांडानिसागरोमोहगर्वितः ॥ ८९९ ॥ तदाहंमदमस्तंतंकरिष्यामिगतोदकं ॥ सागरंपश्यमेसुभ्रूर्भयतःक्षीणवर्चसं ॥ ९०० ॥ एवमुक्तातमाहैषाअशक्यंबहुधेतिच ॥ क्वसमुद्रःक्वचात्वंचप्रोक्त्वावाक्यमुपारमत् ॥ ९०१ ॥

न्वत्रदृष्टांतेकिंप्रमाणंकिंचतत्स्वरूपमित्याकांक्षायामाह ऐतिह्यतइति सदृष्टांतीकृतउदधेरुत्सेकऐतिह्यतःपारंपर्योपदेशेनसिद्धः एवंवक्ष्यमाणरूपश्चबोध्यइत्यर्थः ॥ ८९७ ॥ एवंपदोक्तंटिट्टिभवृत्तमेवप्रपंचयति सागरस्येत्यादिना कठिनीकृतेगाढेपुनःपुनराक्रांतइतियावत् तादृशेकूलेटिट्टिभ्यावारितोपिकश्चिट्टिट्टिभोगर्वेणसागरंतुच्छंमत्वाअंडानिमुमोचनिदधौ ॥ ८९८ ॥ टिट्टिभीमिति हेभामिनिकोपनेममभयेनक्षीयमाणतेजसंसागरंपश्येति ॥ ८९९ ॥ ९०० ॥ एवमुक्तेति एषाटिट्टिभीइनिवाक्यंबहुधाप्राहउक्त्वाउपारमच्च इतिकिं एतदशक्यं तवसागरस्यचसुदूरंवैषम्यादिति ॥ ९०१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्तेति एवमुक्त्वामाभयंतेस्त्वित्यादिवाक्यंपुनरुक्त्वातत्रतीरएवांडानिमुमोचाथआहारार्थंगतोबभूवेति ॥ १०२ ॥ एवमुक्त्वागतइति श्रुतानिवाक्यानियेनसतथा गिरिवत्प्रवरमुच्चंतरंगंविधायजहार मानतोगर्वेणहसन् ॥ १०३ ॥ गृहीत्वेति व्यचारयत्चिंतमायास जानानःभयहेतुंमन्वानः ॥१०४॥ समुद्रस्यविचारमभिनयति स्थावराइतित्रिभिः सर्वजंतूनांपरमेश्वरविभूतित्वात्कस्यापिशक्तिःस्वरूपकालनिमित्तप्रकारैरवच्छिन्नानज्ञातुंशक्यासर्वशक्त्याश्रयभूतायास्तन्मायायादुर्घटकारित्वादित्यर्थः ॥ १०५ ॥ ततइति ततईश्वरविभूतित्वा

एवमुक्त्वामुमोचाथतान्यंडानिसटिट्टिभः ॥ तत्रैवजाययासार्द्धमाहारार्थंक्वचिद्गतः ॥ १०२ ॥ एवमुक्त्वागते तस्मिंष्टिट्टिभेजाययासह ॥ समुद्रःश्रुतवाक्यःसन्जहारांडानितस्यसः ॥ गिरिप्रवरकल्लोलःप्रहसन्निवमानतः ॥ १०३ ॥ गृहीत्वाचतदांडानिटिट्टिभस्यसरित्पतिः ॥ व्यचारयदिदंचित्तेजानानःपरमेश्वरं ॥ १०४ ॥ स्थावराजंगमाःसर्वेपरमेश्वरभूतयः ॥ ततोत्रकस्यकिंवास्यात्क्वदाकेनकथंचवा ॥ नज्ञायतेयतस्तस्यमायालोकेऽतिदुर्घटा ॥ १०५ ॥ ततोदेशोस्यकोनामतथामित्राणिकानिवा ॥ कःकालःकाचवाशक्तिःसचकोवेतिटिट्टिभः ॥ १०६ ॥ ननिश्चितंमयायस्मात्तस्माद्दंडानितस्यवै ॥ सुगुप्तानिक्वचिद्देशेस्थापयिष्यामिपक्षिणः ॥ १०७ ॥ इतिसंचिंत्यसंस्थाप्यतान्यंडानिमहोदधिः ॥ देशेसुरक्षितेगर्जन्यथापूर्वमवस्थितः ॥ १०८ ॥ पूर्णोदरोजगामाथतंदेशंजाययासह ॥ टिट्टिभःसहपुत्राणामंडानिजलधेस्तटे ॥ १०९ ॥ अदृष्ट्वातानिसंरक्तनयनःक्रोधमूर्छितः ॥ समुद्रशोषणायैवसचक्रेनिश्चयंतदा ॥ ११० ॥ टिट्टिभीतादृशंदृष्ट्वास्वपतिंहितकारणं ॥ उवाचवचनंसम्यक्जायायुक्तमनिंदितं ॥ १११ ॥

देवास्यदेशादिकंननिश्चितंतस्मादस्यांडानिसुरक्षितदेशेस्थाप्यानीतिद्वयोरर्थः ॥ १०६ ॥ १०७ ॥ इतिसंचित्येति सुरक्षितेदेशेसंस्थाप्येतिगर्जन्शब्दंकुर्वन्सन्पूर्ववत्स्थितः ॥ १०८ ॥ एवंसतितृप्तष्टिट्टिभआगत्यांडान्यदृष्ट्वासमुद्रशोषायनिश्चयंकृतवानित्याह पूर्णोदर इतिद्वाभ्यां स्पष्टंद्वयं॥ १०९ ॥ ११० ॥ टिट्टिभीति तादृशंशोषायोद्यतं हितकारणंहिताय युक्तंनीतिमत् ॥ १११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टिट्टिभीवाक्यमभिनयति क्वचेतिपंचदशभिः हेअंडजत्वंस्वस्मादतिविषमेणसमुद्रेणसहवैरंन्यायविरुद्धंकर्त्तुंकथंयोग्यः यतोमैत्रीवद्विवाहवच्चसमयोरेववैरंयुक्तं मैत्रीप्रतिद्वंद्वित्वेनमैत्रीसमानयोगक्षेमत्वात् अभावस्यप्रतियोगिसमानयोगक्षेमत्वप्रसिद्धेरितिभावः अहंतुल्यएवेतिमन्यमानंप्रत्याह समुद्रेणेत्यादि अत्रप्रत्यक्षादिसिद्धव्यवहारे ॥ ११२ ॥ ११३ ॥ तत्रहेतुतयादेशादिबलाभावमाह दैर्घ्यादितिदैर्घ्यंशिरःप्रभृतिपुच्छांतपरिमाणमालोच्यतवदेहःषोडशांगुलिमितोव्यवह्रियते तथातिर्यङ्मानेनहस्तमात्रोपिभवति यतःपक्षाणामायामोविस्तारःप्रतिपार्श्वंद्वादशांगुलोभवति तथाचवामपक्षाग्रमारभ्यदक्षिणपक्षाग्रंयावन्मानेहस्तमात्रतायुक्तेतिभावः ॥ ११४ ॥ चूतेति

क्वचत्वमंडजस्वल्पःक्वचायंसरितांपतिः॥ तेनसार्धंकथंवैरंकरोषिन्यायवर्जितं॥ ११२॥ मैत्रीचापिविवाहोवातुल्ययोरेवकीर्तितः॥ समुद्रेणकथंतुल्यस्त्वंभवस्यंडजोत्रहि ॥ ११३ ॥ दैर्घ्याद्धिभवतोदेहःषोडशांगुलमानतः॥ हस्तमात्रंचपत्राणामायामोद्वादशांगुलः॥ ११४॥ चूतवृंतसमंपादयुग्मंतेवर्ततेंडज॥ चंचुःकुशाग्रसदृशीपक्षौचमृदुलौतव ॥ ११५॥ द्वादशांगुलसंमानौचीरपिंडसमाविह॥ इतोधिकोनतेदेशोबाह्योवाप्यांतरोपिवा ॥ ११६ ॥ कालःसदैकरूपस्तेतिर्यग्योनिगतस्यहि ॥ देवदैत्यमनुष्यादौकालोवैषम्यकारणं ॥ ११७ ॥ मित्राणिनैवतेऽन्यानिमांविनादीनमानसां॥ धनानामायतेस्तद्वद्व्यापाराच्चभवंतिहि ॥ अमित्राण्यपिमित्राणिनतेतदपिपक्षिणः॥ ११८॥

आम्रफलस्ययद्वृंतंबंधनंतन्निभौपादौ ॥ ११५॥ द्वादशेति चीरंजीर्णवस्त्रंतत्पिंडवत्शिथिलौतेपक्षाविति त्वयाहिशरीरसमोदेशआक्रमणीयःसचैतावानेवेत्यर्थः ॥ ११६ ॥ नापितेकालबलंनिकृष्टजातिषुकालस्यैकरूपत्वात्देवाद्युत्कृष्टजातिष्वेवकालस्योत्कर्षादिप्रयोजकतायादर्शनादित्याह कालइति ॥ ११७ ॥ नापिमित्रबलं तेषांमांदीनांविनातवासत्वात् नापितेसंभावनायतउत्तरकालेधनलाभाशयातद्वतोधनघटितात्सत्कारादिव्यापाराच्चवैरिणोपिमित्राणिभवंतितद्धनंतुभवतोनास्तीत्याह मित्राणीति आयतिरुत्तरकालस्तस्मात् तद्वतोधनवतोव्यापारात्सेवादिरूपात् ॥ ११८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शारीरबलाभावमाह बाणेति बाणमात्रेयावतिवलवताप्रयुक्तोबाणःपततितावति नापिजातिबलमित्याह जन्मनेति॥ ११९ ॥ अथसमुद्रस्यदेशबलादिसंपत्तिमाह समुद्रस्येति अर्वाक्तीरेलक्षयोजनः परतीरेप्लक्षद्वीपस्पर्शिनितुद्विलक्षयोजनः अधस्ताच्चपातालपर्यंतोस्यदेशइत्यर्थः ॥१२०॥ संहारकालेतुसर्वात्रिलोक्यस्यदेशइत्याह अयमिति महींक्षेत्रभूमिं॥१२१॥ वित्तबलमाह यावंतीति भूतानिप्राणि

बाणमात्रेपिचाकाशेगंतुंशक्तोभवान्नहि ॥ जन्मनाटिट्टिभस्त्वद्भवानत्राण्डजाधमः ॥ ११९ ॥ समुद्रस्यास्यदेशोयंलक्षयोजनमायतः ॥ अर्वाक्तीरेपरेतद्वद्द्विलक्षमितिकीर्तितः ॥ अधस्ताच्चभुवोयद्वत्तावन्मानमुदीरितं ॥ १२० ॥ अयंसंहारकालेस्मिंस्त्रिलोकीमखिलामपि ॥ आप्लावयतिकल्लोलैःकुल्ययेवमहींसरः ॥ १२१ ॥ यावंतिभूमौभूतानितावंत्येवमहोदधौ॥ वसंतिसर्वदातस्मिन्रत्नानिविविधानिच॥ १२२॥ अस्यमित्राणिदेवाश्चमुनयोपितपोधनाः॥ अयंयच्छतिदेवानांमनुजानांचसर्वदा ॥ रत्नजातमशेषंचजातःसाक्षान्महेश्वरात् ॥ १२३ ॥ मैनाकाद्यामहाशैलाअनेकशतयोजनाः ॥ शक्राद्भीताश्चसंत्राताअमुनावारिराशिना ॥१२४॥ इत्थंत्वमात्मनःसर्वंसमुद्रस्यचचिंतय ॥ व्यर्थंविरोधंमाकार्षीरात्मनोनाशकारणं ॥१२५॥ हतपुत्राचयापूर्वंकृतामौर्ख्यादिहांडज ॥ तवनाशादिदानींमांमाकृथादीनदर्शिनीं ॥ १२६ ॥ इत्यादिबहुशःप्राहटिट्टिभीटिट्टिभंतदा ॥ क्रोधसंरक्तनयनंप्रस्फुरद्रोमकूपकम् ॥ १२७ ॥ श्रुत्वासटिट्टिभीवाक्यंटिट्टिभःकृतनिश्चयः ॥ इदंवचनमाहैतत्स्त्रियंदैन्यमुपागतां ॥ १२८ ॥

जातयस्तुरगगजादयः ॥ १२२ ॥ मित्रसंपत्तिमाह अस्येति आयतिंदर्शयति अयंयच्छतीति कुलबलमाह जातइति ॥ १२३ ॥ शारीरबलमाह मैनाकाद्याइति संत्राताःपालिताः ॥ १२४ ॥ फलितमाह इत्थमिति ॥१२५॥ अथेतवमौढ्येनपुत्रवियोगातुरांमांत्ववियोगेनदीनांमाकुर्वित्याह हतेति ॥ १२६ ॥ एवंजाययोक्तस्यटिट्टिभस्यवाक्यमवतारयति इत्यादीतिद्वाभ्यां प्रस्फुरंतश्चलंतोरोमकूपायस्यसतथातं ॥ १२७ ॥ श्रुत्वेति एतदुक्तविधंदैन्यमुपागतांप्राप्तां ॥ १२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंपदोक्तंटिट्टिभवाक्यमभिनयति संपत्कालइतिनवभिः स्पष्टम् ॥१२९॥ व्यसनेइति योदेहीयंव्यसनेविपदित्यजतिसत्यक्ताजायादिरूपोपितस्यत्यक्तस्यशत्रुरेवेत्यर्थः ॥ १३० ॥ तर्हिंकीदृङ्मित्रमित्याकांक्षायामाह पुण्यमिति पुण्याद्यन्यतमविषयकंकर्त्तव्यत्वभोग्यत्वान्यतरप्रकारकंनिश्चयंयोनुसरतिनप्रतिहंतिसलोकेमित्रत्वेनप्रसिद्धइत्यर्थः ॥ १३१॥ आत्मवत्संमतइति यःप्राज्ञत्वेनआत्मवद्विश्वासपात्रंसम्यङ्मतोनिश्चितोपिव्यसनकालेदर्पात्दर्पचित्तोत्साहमत्तिभक्षयतितत्तथाविधंवाक्यंकर्णस्यशल्यवद्बहुयथाभवतितथाभाषतेसशत्रुतुल्यइत्यर्थः॥१३२॥ आत्मनइति यआत्मनएवाभ्युदयंयोगक्षेममाकांक्षतेनतुसुहृदःसआत्मनोभ्युदयाकांक्षीतद्रूपंशत्रुंमित्रस्वरूपिणंमित्र

संपत्कालेचमित्राणिसंतिकोटिसहस्रशः॥ आपत्कालेतुयन्मित्रंतन्मित्रंपरिकीर्तितं॥ १२९ ॥ व्यसनेसमनुप्राप्तेयोयंत्यजतिदेहभाक्॥ सतस्यशत्रुर्विज्ञेयोह्यपिजायासुतादिकः ॥ १३० ॥ पुण्यंवाप्यथवापापंसुखंवादुःखमेववा॥ निश्चितंयोनुवर्तेततन्मित्रमितिकीर्तितं ॥ १३१ ॥ आत्मवत्संमतोदर्पाद्यःप्राज्ञोबहुभाषते॥ व्यसनेसमनुप्राप्तेसतुशत्रुसमोमतः ॥ १३२॥ आत्मनोभ्युदयाकांक्षिशत्रुंमित्रस्वरूपिणं॥ निहत्यप्रथमंहन्यात्साक्षात्शत्रुंततःपरं ॥ १३३॥ अतस्त्वंमित्ररूपापिशत्रुवत्प्रतिभाषसे ॥ अवध्यास्त्रीतिमत्वाहंनकरोम्यघपातकं ॥ १३४ ॥ अपिसप्तपदंमित्रंवदंत्यत्रविपश्चितः ॥ त्वयासहचिरंकालंस्थितोहंस्वस्थमानसः ॥ १३५॥ करिष्यामिकथंद्रोहंस्त्रियोमित्रस्यतेधुना॥ ततोयाहित्वमेतस्मात्स्थानादन्यत्रमाचिरं ॥ १३६ ॥

रूपेणप्रच्छन्नंप्रथमंहत्वापश्चात्साक्षात्प्रकटंशत्रुंहन्यादित्यर्थः ॥ १३३॥ अतस्त्वमिति यतस्त्वंशत्रुवद्भाषसेऽतोमित्राभासत्वेनज्ञातासितथापित्वद्वधरूपंपातकंयन्नकरोमि तत्रहेतुःस्त्रीअवध्येतिशास्त्रानुसंधानमेवेत्यर्थः ॥१३४॥ किंचतववधेहेतुर्लक्षणांतरेणप्राप्तंमित्रत्वमपीत्याह अपिसप्तपदमिति सप्तपदानिवाक्यानिपादन्यासावासहकृताःकारणंयस्यतत्तथाभूतंमित्रंमित्रपदार्थंवदंति के अत्रमित्रपदार्थेयेविपश्चितःकुशलाः त्वयासहचिरंस्थितेनमयात्वयिमित्रत्वस्यसुतरांज्ञेयत्वात्तवद्रोहंशारीरदंडंनकरोमिकिंतुपूर्वोक्तलक्षणैःशत्रुत्वंविज्ञायमत्संनिधेर्गच्छेत्युक्तिरूपंधिग्दंडमेवेतिद्वयोरर्थः ॥ १३५ ॥ १३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हिमांविनाकिंकरिष्यसीतिवदंतींप्रत्याह एकएवेति शोषणप्रकारमाह चंच्वेति बहिःप्रक्षिपन्निितिशेषः अंधकूपंतत्समं ॥ १३७॥ एवमु क्तेत्यादित्रयंनिगदव्याख्यातम् ॥ १३८ ॥ १३९ ॥ १४० ॥ चंचुद्वयेनेति यद्यपिचंचुद्वयेनपक्षैश्चनीरमादायगच्छतोस्तयोर्वेगोत्थि तान्मारुतादेवहेतोस्तदुपात्तंनीरंशुष्यतितथापितज्जलेसमुद्रजलेपुनःपुनर्गत्वातन्नीरंतौदंपतीबहिःक्षिपतःस्मेतिद्वयोःसंबंधः ॥ १४१ ॥

एकएवस्ववीर्येणशोषयिष्यामिसागरं॥ चंच्वापक्षद्वयेनापिसंगृह्यास्यजलंबहिः॥ अचिरेणैवकर्त्ताहमंधकूपंपयोनिधिं ॥ १३७॥ एवमुक्त्वाततोजायामुःप्लुत्यचनभस्तथा ॥ समुद्रशोषणायासौप्रवृत्तष्टिट्टिभस्तदा ॥ १३८ ॥ समुद्रशोषणेतस्यनिश्चयंवीक्ष्यसातदा ॥ पतिव्रताक्षमाप्यैनंतद्वदेवाकरोत्स्वयं॥ १३९॥ टिट्टिभीटिट्टिभश्चोभौदिवारात्रौचसर्वदा॥ समुद्रशोषणेयत्नंकुर्वातेश्रमवर्जितौ ॥ १४० ॥ चंचुद्वयेनपक्षैश्चनीरमादायसागरात्॥ गच्छतोर्मारुतादेवतन्नीरमुपशुष्यति ॥ १४१ ॥ तथापितज्जलेगत्वागत्वागत्वाप्यनेकशः॥ नीरमादायतद्भूमौक्षिपतस्तावनेकधा ॥ १४२ ॥ एवंप्रवृत्तौतौवीक्ष्यटिट्टिभीटिट्टिभौततः॥ टिट्टिभाअपरेप्रोचुस्तस्यास्तस्यनिवारणे ॥ वाक्यंबहुविधंतौचप्रोचतुष्टिट्टिभानिति ॥ १४३ ॥ सागरंशोषयिष्यावःसर्वथाचात्रपक्षिणः ॥ मित्रताचेत्सहायत्वंकुर्वत्वस्यविनाशने ॥ अथनैवंस्वनीडानिव्रजंतुचयथागतं ॥ १४४॥ एवमुक्तेतथासर्वेटिट्टिभाश्चक्रुरुद्यमं॥ समुद्रशोषणेयद्वत्पूर्वमेतौसमुद्यतौ ॥ १४५॥ अंडजाएवमेवैतेनानाभेदाःसमागताः॥ सर्वएवसमुद्रस्यशोषणायकृतोद्यमाः ॥ १४६ ॥

॥ १४२ ॥ एवंप्रवृत्ताविति एवंशोषणायप्रवृत्तौतौदंपतीवीक्ष्यतयोर्वारणार्थंवाक्यमपरेटिट्टिभाऊचुः तौचतान्प्रतीत्थमूचतुः इत्थंकथं यदियूयंमित्राणितर्ह्यत्रकर्मणिसाहाय्यंकार्यं अथपक्षांतरे एवमस्मद्वन्नक्रियतेतर्हिंभवंतःस्वनीडानिगच्छंत्वितिद्वयोरर्थः ॥ १४३ ॥ ॥ १४४ ॥ तयोरुक्तवाक्यनियंत्रिताःसर्वेटिट्टिभास्तथाप्रवृत्ताइत्याह एवमुक्तइति ॥ १४५॥ एवमन्यजातीयाअपिपक्षिणस्तैर्मित्रत्वसंबोधनेनस्वव्यापारेयोजिताइत्याह अंडजाइति ॥ १४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोनारदोमुनिरेत्यनिवारणानंगीकारेणतन्निश्चयदार्ढ्यंविज्ञायगरुडागमनरूपमुपायंतान्प्रत्युवाचेत्याह त्रिलोकीमिति क्कापिकुत्रचित्स मुद्रैकदेशेसमुदितान् एतन्निवारणांगीकरणंयदानचक्रुस्तदाएतान्प्रतिगरुडागमरूपमुपायमुवाचेतिद्वयोरर्थः ॥ १४७॥१४८ ॥ गतेष्विति तेषुपक्षिषुपक्षिराजंगरुडमानेतुंगतेषुसत्सुगरुडआगमत् तस्यदर्शनमात्रेणभीत्याविह्वलःसागरस्तान्यात्तानिगृहीतान्यंडान्यदादितिसंबंधः ॥ १४९ ॥ दार्ष्टांतिकेयोजयति एवमिति ॥ १५० ॥ निश्चयेत्विति दृढेनिश्चयेकृतेसतिदेवाःसहायिनःसाहाय्यकराअवश्यंभवंतीत्यत्रा प्युक्तमुदाहरणमित्यर्थः ॥ १५१ ॥ सजातीयएवानुगृह्णातियथाटिट्टिभस्यपक्षित्वेनगरुडइतिनभ्रमितव्यंयतोविजातीयानामपिसा

त्रिलोकींपर्यटन्क्कापिस्वेच्छयानारदोमुनिः॥ पक्षिणस्तान्निरीक्ष्याथबहुधाचन्यवारयत् ॥ १४७॥ निवारि तायदानैतच्चक्रुर्दुःखातुराःखगाः॥ तदोपायमुवाचैतान्गरुडस्यागमंप्रति ॥ १४८ ॥ गतेषुतेषुगरुडआगतो भयवर्द्धनः॥ तस्यदर्शनमात्रेणसागरोतीवविह्वलः॥ भीत्यावैटिट्टिभस्यात्तान्यदादंडानितानिसः॥ १४९ ॥ एवंखेदेनरहितःपुरुषोपिमनोजयं॥ कुर्वीतटिट्टिभोयद्वत्समुद्रस्यविशोषणं ॥ १५० ॥ निश्चयेतुकृतेपुंसोदेवा स्तस्यसहायिनः ॥ भवंतिटिट्टिभस्याभूत्सहायोगरुडोयथा ॥ १५१ ॥ पुण्येकर्मणिसाहाय्यंप्रायःसर्वेपिकु र्वते॥ रामस्यवानरायद्वत्स्वदारान्प्रतिविंदतः ॥ १५२॥ उद्यमःसाहसंधैर्यंबलंबुद्धिःपराक्रमः॥ षडिमेयस्य तिष्ठंतिससर्वंप्राप्नुयात्पुमान् ॥ १५३ ॥

हाय्यदर्शनात्यायासत्कर्मणिदृढाप्रवृत्तिःसासर्वापिदेवानुग्रहवतीत्येवव्याप्तिशरीरंलाघवेनविवक्षितमित्याह पुण्यइति सर्वेविजातिरू पाअपियथाभार्यार्तिहरणेप्रवृत्तस्यरघुपुंगवस्यवानररूपादेवाःसहायाइतिप्रसिद्धमित्यर्थः ॥ १५२ ॥ तत्राभीष्टसिद्ध्यर्थमेतेगुणाःसं पाद्याइत्याह उद्यमइति उद्यमःपौरुषं साहसंदमोयतेंद्रियत्वरूपः साहसंदमेदुष्कृतकर्मणीतिहैमः धैर्यंविघ्नेसत्यपिचित्तावैक्लव्यं बलंदृष्ट साधनसंपत्तिः बुद्धिःकौशलं पराक्रमोविक्रमः परस्यइतरस्यप्रकृतानुपयोगिनोव्यापारस्यअक्रमोऽनारंभोवा एतेषड्गुणायस्यसंतिससर्व मिष्टंसाधयेदित्यर्थः ॥ १५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्रपराक्रमंसिंहात्शिक्षेदित्याह प्रभूतमिति प्रभूतंबहुस्वल्पंवाकर्मयदारब्धंतन्नत्याज्यंयथासिंहःपुरतोनिहितंपादंशस्त्रादिसंपातेपिपृष्ठतो ननिदधातीतिप्रसिद्धमित्यर्थः॥ ९५४॥अंगीकृतापरित्यागेमहात्मानोबहवउदाहरणमित्याह कालकूटमिति तथाचप्रमुक्तकंपद्यं अद्यापी त्यादि॥ ९५५॥फलितमाह इत्यादीति इत्यादिन्यायजातम्॥ ९५६॥मनोनिग्रहःकथंकर्तव्यइत्याकांक्षामपिसांप्रदायिकवचनैरेवपरिहर ति उपायेनेतिचतुर्भिः उपायेनवक्ष्यमाणेनचित्तंनिगृह्णीयान्निरुंध्यात् कीदृशं कामभोगयोःकामेइच्छारूपेरजःकार्यैभोगेवैषयिकसुखा नुसंधानरूपेसात्विकेचविक्षिप्तंतत्परमित्यर्थः तथालयेनिद्रारूपेतामसेसुप्रसन्नंजायत्स्वमविक्षेपरहितमपिनिगृह्णीयादितिसंबंधः यतोय थाकामोनर्थहेतुस्तथालयोपिदोषबीजात्मकत्वादितिभावः ॥ ९५७ ॥ उपायमभिनयति दुःखमिति सर्वद्वैतजातंदुःखंपरितापादिभिर्यो गसूत्रप्रसिद्धैर्हेतुभिः ब्रह्मानंदाच्छादकत्वाद्वाडुःखरूपमितिशास्त्राचार्योपदेशानुसारेणचिंतयन्कामविशिष्टाद्भोगात् जातावेकवचनं नि

प्रभूतंवाथवास्वल्पमुपक्रांतंनसंत्यजेत्॥ कार्यंयथापदंसिंहःपृष्ठतोनिदधातिन॥ ९५४॥ कालकूटंहरस्तद्वत्स मुद्रोवडवानलं॥ कूर्मोभूमिंचसततंदधात्येवापरित्यजन्॥ ९५५ ॥ इत्यादिचिंतयित्वायंनिग्रहेमनसःपुमा न्॥ प्रवृत्तोननिवर्तेतमरणांतेपिसंकटे॥ ९५६ ॥ उपायेननिगृह्णीयाद्विक्षिप्तंकामभोगयोः॥ सुप्रसन्नंलयेचै वयथाकामोलयस्तथा॥ ९५७॥ दुःखंसर्वमनुस्मृत्यकामभोगान्निवर्त्तयेत्॥ अजंसर्वमनुस्मृत्यजातंनैवतु पश्यति॥ ९५८॥लयेसंबोधयेच्चित्तंविक्षिप्तंशमयेत्पुनः॥ सकषायंविजानीयात्समप्राप्तंनचालयेत्॥ ९५९॥

वर्त्तयेन्मनंइत्यनुषंगः एतेनवैराग्यंप्रथमउपायइत्युक्तमथज्ञानाभ्यासरूपंद्वितीयमुपायमाह अजंसर्वविकारहीनंब्रह्मैवसर्वमित्येवंतत्त्व स्यपुनःपुनःस्मरणेनजातंविकारिद्वैतंनैवपश्यतिविद्वानित्यर्थः ॥ ९५८ ॥ अनेनोपायद्वयेनचित्तस्ययोगविरुद्धास्तिस्रोऽवस्थालयविक्षेप कषायाख्याःप्रतिहन्याद्ब्रह्माकारतांचपरिपालयेदित्याह लयेइति लयेनिद्रारूपेप्रवर्त्तमानंचित्तंसंबोधयेत्उक्तबोधाभ्यासेतल्लग्नंकुर्या त् विक्षिप्तंकामभोगाकारंतुशमयेत्ततोव्यावर्त्तयेत् कषायोनामरागादिसंस्कारेणात्मानात्मोभयाकारताराहित्यरूपास्तब्धावस्थातत्सहि तंविजानीयादवेक्षेत अवेक्षितंचतंदोषमुक्तोपायेनयुगपत्प्रवृत्तेनपरिहरेदितिभावः यदातुमनःसमप्राप्तंब्रह्माकारंभवेत्तदानचालयेत्तामव स्थांपरिपालयेदितियावत् ॥ ९५९ ॥ ॥६९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नास्वादयेदिति यथातत्रसमाधिसत्वोत्कर्षात्प्रादुर्भवंतंसुखविशेषंनास्वादयेत्तत्रनसज्जेत् यदानिश्चलंब्रह्माकारमपिचित्तंनिश्चरद्बहिर्गमनाभिमुखंभवतितदाप्रयत्नविशेषेणैकीकुर्यात्ततोनिरुद्ध्यसन्मात्रतांनयेदित्यर्थः ॥ १६० ॥ मनसोब्रह्माकारतायालक्षणमाह यदेति यदालयविक्षेपाभ्यांचकारात्कषायेणचरहितंचित्तमनिंगनमिंगनेनचलनेनरहितंतथाऽनाभासमाभासेनकल्पितरूपेणदृश्यजातेनरहितंच भवतितदातद्ब्रह्मसंपन्नंब्रह्मभावंगतमितिबोध्यं ब्रह्मणःस्वरूपलक्षणमाह स्वच्छमित्यादिना स्वच्छंशुद्धं शांतंसर्वानर्थोपशमरूपं सनिर्वाणंमोक्षसहितंनित्यमुक्तमितियावत् अकथ्यंवागाद्यगोचरं उत्तमंसुखंभूमाख्यानंदरूपमित्यर्थः ॥ १६१ ॥ उक्ताभिप्रायेणैवतावदेवेत्यादिमंत्रेणनिरोधावधिरुक्तइतिदर्शयंस्तदर्थमाह तावदेवेतिषड्भिः मनोनिरोधस्यएतावानेवावधिर्यौहृदिहृदयसाक्षिणितस्यमनसःक्षयोबा

नास्वादयेत्सुखंतत्रनिःसंगःप्रज्ञयाभवेत् ॥ निश्चलंनिश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ॥ १६० ॥ यदानलीयते चित्तंनचविक्षिप्यतेपुनः ॥ अनिंगनमनाभासंनिष्पन्नंब्रह्मतत्तदा ॥ स्वच्छंशांतंसनिर्वाणमकथ्यंसुखमुत्तमं ॥ १६१ ॥ तावदेवनिरोद्धव्यंहृदियावत्क्षयंव्रजेत् ॥ क्षयोपिमनसःपूर्वंसमताभावईरितः ॥ १६२ ॥ एतज्ज्ञानमितिप्रोक्तंशास्त्रजन्यंमनीषिभिः ॥ ध्यानंचैतत्फलंतद्वन्नातोन्यद्विद्यतेधिकं ॥ १६३ ॥ शास्त्राण्यभ्यस्यतोनित्यंवाग्मित्वमधिकंभवेत् ॥ उरःकंठादिशोषश्चनैतस्मादधिकंपरं ॥ इदंविज्ञायमेधावीत्यल्पग्रंथेसुखीभवेत् ॥ १६४ ॥ ज्ञातोपिसुखदोनस्यात्शेषोग्रंथस्यविस्तरः ॥ मनसोनिग्रहंहित्वातस्मात्कार्यःसएवहि ॥ १६५ ॥

धःतत्प्रकारस्तुसमताभावोब्रह्मतालाभरूपःसांप्रदायिकवचनैर्दर्शितइत्यर्थः ॥ १६२ ॥ अयंनिरोधएवसांख्ययोगयोःफलभूतइत्याह एतदिति शास्त्रंवेदांतवाक्यंतत्फलभूतंज्ञानमप्येतदुक्तनिरोधात्मकमेव तथाध्यानंयोगोप्युक्तरूपएव यतउक्तनिरोधादधिकंफलंकिंचिन्नास्तीत्यर्थः ॥ १६३ ॥ शेषोन्यायस्यविस्तरइतिपाठंसूचयंस्तदर्थमाह शास्त्राणीत्यादिना यतएतन्निरोधंविहायशास्त्राभ्यासंकुर्वतोजनस्यवाग्मित्वंन्यायपदोक्तव्यवहारोपयुक्तंवाकौशलंभवेत्नचैतस्मान्निरोधात्परंभिन्नमधिकंकिंचित्फलंलभ्यते इदंनिरोधस्वरूपंविज्ञायत्वल्पग्रंथेपाठेनापिसुखीपरमपुरुषार्थंगतोभवेदित्यर्थः ॥ १६४ ॥ ज्ञातोपीति यतोमनसोनिग्रहंतदुपयोगिनंग्रंथभागंचहित्वाशेषोग्रंथःसुविज्ञातोपिनसुखदःविस्तरत्वात्शब्दप्रपंचमात्रत्वात् तस्मात्समनोनिग्रहएवसंपाद्यइत्यर्थः ॥ १६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ननुशेषग्रंथोक्तदानाद्यनुष्ठानादभीष्टसिद्धिःस्यादितिचेन्न तेषांमनःशांतिविनाकुंजरस्नानसमत्वादित्याशयेनाह दानमिति ॥ ९६६ ॥
तत्रहेतुतयालौकिकसत्फलानामपिचित्तैकाग्र्यंविनानप्रसिद्धिरित्याह मनइति सर्वंशुभंलोकद्वयवर्तिफलंमनःसंयमेनैवभवतीतिप्रसिद्ध
मित्यर्थः ॥ ९६७ ॥ अस्यमोक्षोपयोगितांनैवेत्यादिमंत्रेणब्रह्मस्वरूपावेदनपूर्वकमुक्तामभिनयति मोक्षार्थिनेति यदामोक्षकामेनमनोनि
 रुद्धंभवतितदापुमांस्तद्ब्रह्मानायासात्संपद्यतेऐक्येनलभते तत्किंयदचिंत्यादिरूपमितितृतीयेनाभिसंबंधः तत्रमनसाअचिंत्यंचिंताविषय
तांनेयंनभवतीत्याशयेनश्रुतौनैवाचिंत्यमित्युक्तं यतश्चविषयायथापरोक्षेनचिंत्यंतेतथानचिंत्यंकिंतुप्रत्यक्षेनचिंत्यमेव ततःश्रुतौनचाचिं
त्यमित्युक्तमित्यर्थः ॥ ९६८ ॥ अचिंत्यचिंत्यपदयोःक्रमेणपूर्वोत्तरार्धाभ्यामर्थमाह मनसात्रेति यतोमनसात्रसंसारेप्रवृत्तेनाचिंत्यंतेनजं

दानमिज्यातपःशौचंतीर्थंवेदाःश्रुतंतथा ॥ अशांतमनसःपुंसःसर्वमेतन्निरर्थकं ॥ ९६६ ॥ मनोनिरोधतः सर्वंलोकद्वयफलंभवेत् ॥ शुभंनिरोधेनविनानकिंचिदपिलभ्यते ॥ ९६७ ॥ मोक्षार्थिनायदासम्यङ्निरुद्धं तन्मनोभवेत् ॥ अचिंत्यंब्रह्ममनसानचिंत्यंविषयायथा ॥ ९६८ ॥ मनसात्रयतोऽचिंत्यंनचिंत्यंतेनजंतुभिः ॥ नचिंत्याविषयास्तेवैमनसातुमुमुक्षुभिः ॥ ९६९ ॥ शत्रुमित्रादिसंजातपक्षपातविवर्जितं ॥ अनायासात्पु मानेषब्रह्मसंपद्यतेतदा ॥ ९७० ॥ मनसश्चविशेषेणभावएवविशेषकं ॥ अविशेषात्मभावेनसतोभावोभ विष्यति ॥ ९७१ ॥

तुभिरविवेकिभिर्नचिंत्यमित्याशयेनाचिंत्यमित्युक्तं मुमुक्षून्विवेकिनःप्रतितुयुष्माभिर्विषयानचिंत्याइत्युपदेशायचिंत्यमित्युक्तमित्यर्थः
॥ ९६९ ॥ शत्रुमित्रेति यथाजीवानांशत्रुमित्रादिषुसंजायमानःपक्षपातःप्रसिद्धःसोत्रब्रह्मणिनास्ति सर्वत्रोपाधिषुसमत्वादित्यर्थः तथा
चश्रुतिःसमःप्लुषिणासमोमशकेनसमोनागेनेत्यादिः ॥ ९७० ॥ निरोधेमनसःशून्यतापत्तिभ्रमंव्युदस्यतःस्वरेणेत्यादिमंत्रस्यभावमाह
मनसश्चेतिमनसोयोयंविशेषेणशब्दार्थादिरूपेणसहभावःसंपृक्ततयासत्ताविद्यमानतेतियावत् एतदेवविशेषकंविशेषयतिव्यावर्तयतीति
तथा कर्त्तरिण्वुल् ब्रह्मणःसकाशात्व्यावर्त्तकोधर्मइतियावत् यदातुअविशेषात्मनोभावेनभावनयायुक्तंमनोभवेत्तदासतःसन्मात्रस्यब्र
ह्मणएवभावोभविष्यतिप्रादुर्भविष्यतिनशून्यत्वं नहिविशेषएववस्तुस्वरूपंकिंतुसामान्यमपीतिभावः ॥ ९७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तच्चावशिष्टंसामान्यस्वरूपंब्रह्मैवेत्याह अविशेषेति अविशेषेविशेषपरित्यागेयन्मनसाज्ञातंलब्धंस्वरूपंतदेवब्रह्मेत्यर्थः ॥ १७२ ॥ तद्ब्र ह्माहमिति अहंतद्ब्रह्मेतिज्ञानेनब्रह्मभावोभवति तत्किं यन्निर्विकल्पादिलक्षणंज्ञात्वाबुधःकुशलोमोक्षंबंधध्वंसंयातीतिसंबंधः हेतुदृष्टांता भ्यामुपलक्षितेनतर्केणवर्जितंतदयोग्यं अप्रमेयंप्रमायाःफलचैतन्यस्यागोचरं अनादेयमादातुमयोग्यंप्रत्यक्त्वादित्यर्थः ॥ १७३ ॥ ननि रोधइत्यादिमंत्रस्यसंगतिंदर्शयति तस्मिन्निति वर्णितात्मज्ञानेनविलीनचित्ततयानिर्मनस्कपदव्यवहार्यस्ययोगिनएषआत्माएवंभूतोव क्ष्यमाणविधयासर्वविशेषाभावरूपःप्रस्फुरतीत्यर्थः ॥ १७४ ॥ एवंभूतःकथमित्याकांक्षायामाह ननिरोधइति नाशोत्पत्त्युपलक्षितंजड मत्रनास्तीतिप्रथमपादार्थः तथाबंधःकर्तृत्वादिरूपसंसारित्वंसाधकत्वंयागादिबहिरंगसाधनानुष्ठातृत्वंमुमुक्षुत्वंशमाद्यंतरंगसाधनसंपन्न

अविशेषेहियज्ज्ञातंमनसापरमंपदं ॥ तदेवनिष्कलंब्रह्मनिर्विकल्पंनिरंजनं ॥ १७२ ॥ तद्ब्रह्माहमितिज्ञात्वा ब्रह्मसंपद्यतेध्रुवं ॥ निर्विकल्पमनंतंचहेतुदृष्टांतवर्जितम् ॥ अप्रमेयमनादेयंयज्ज्ञात्वामुच्यतेबुधः ॥ १७३ ॥ त स्मिन्नात्मनिविज्ञातेचित्तेचविलयंगते ॥ एवंभूतोविभात्येषनिर्मनस्कस्ययोगिनः ॥ १७४ ॥ ननिरोधोनचो त्पत्तिर्नबद्धोनचसाधकः ॥ नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थता ॥ १७५ ॥ एवंरूपंविजानातिस्थानत्रयविल क्षणं ॥ स्थानत्रयच्युतस्तस्यपुनर्जन्मनविद्यते ॥ १७६ ॥ एकएवहिभूतात्माभूतेभूतेव्यवस्थितः ॥ एकधाबहु धाचैवदृश्यतेजलचंद्रवत् ॥ १७७ ॥

त्वंमुक्तत्वंज्ञानभागित्वंचएतेधर्माअत्रनसंतीतिपरमार्थतावस्तुगतिरित्यर्थः ॥ १७५ ॥ ननुजाग्रदादिभेदेप्रत्यक्षसिद्धेकथंनिरोधाद्यभावो वसेयइतिचेन्न आगमापायित्वेनमिथ्याभूतंजाग्रदादित्रयंबाधित्वावस्थितेनोक्तार्थस्यसुज्ञेयत्वादित्याशयेनाह एवंरूपमिति उक्तमात्म रूपंस्थानत्रयादवस्थात्रयाद्विलक्षणंभवतितच्चसएवजानीयात्साक्षात्कुर्याद्यःस्थानत्रयाच्च्युतोव्यावृत्तोभवेत तस्यसाक्षात्कृतात्मनस्तु जन्मादिकंनसंभवतीत्यर्थः ॥ १७६ ॥ यद्येवमेकएवात्मातर्हिकथंतत्रभेदानुभवइत्याकांक्षायामाह एकएवेति यथाचंद्रउपाधिभूतज लपात्रैक्येएकधादृश्यतेतद्बहुत्वेतुबहुधातथायमात्माकारणरूपैकोपाध्यवच्छिन्नएकधादृश्यतेकार्योपाधिगतस्तुबहुधा स्वतस्तुसर्वविशे षहीनइत्यर्थः ॥ १७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यतात्पर्यंविशदयति एवंचेदिति एवमुक्तविधमेकएवेत्यादिकंवाक्यंगुरोःसकाशात्तात्पर्येणविज्ञातंयदिभवेत्तर्हितेनविदुषाजाग्रदादिकालेप्येकएवात्मामंतव्यःसंवीक्ष्योभवतियआत्मास्थानत्रयाद्व्यतीतःपरस्ताद्भवति ततःकिंफलमतआह स्थानत्रयव्यतीतस्येति स्थानत्रयहीनस्यात्मनोयोज्ञातासोपितथाज्ञेयवत्स्थानत्रयव्यतीतोभवेदितिद्वयोरर्थः ॥१७८॥१७९॥ घटेत्यादिमंत्रमवतारयति अथचेदिति यदासर्वभेदरहितआत्माअनेनपुंसाऽधिकारिणाज्ञायतेतदाजीवेसंलग्नंसंबद्धतयाभासमानंबहुत्वंयुक्त्याविचारेणनिवर्ततेसाचयुक्तिरेषावक्ष्यमाणाबोध्येत्यर्थः ॥१८०॥ घटसंवृतमिति घटेनसंवृतमवच्छिन्नमाकाशंप्रसिद्धंतच्चयथाघटगतंगमनादिकंनभजतेइत्यर्थः ॥ १८१ ॥

एवंचेत्तज्ञायतेपुंसावेदवाक्यंगुरोःसदा ॥ मंतव्यएकएवात्माजाग्रत्स्वप्नसुषुप्तिषु ॥ १७८ ॥ स्थानत्रयव्यतीतोयोवर्ततेसर्वदेहिनां ॥ स्थानत्रयव्यतीतस्यज्ञातासोपितथाभवेत् ॥ १७९ ॥ अथचेत्तज्ञायतेपुंसासर्वभेदविवर्जितः ॥ बहुत्वंजीवसंलग्नंयुक्तितोनाशमाव्रजेत् ॥ युक्तिरेषाविभात्यस्यविज्ञानेपरमात्मनः ॥ १८० ॥ घटसंवृतमाकाशंनीयमानेघटेयथा ॥ घटोनीयेतनाकाशंदेशाद्देशांतरंप्रति ॥ १८१ ॥ एवंदेहस्यगमनेत्व्यात्मादेहेनसंवृतः ॥ नकुत्रचिन्नयात्येषदेहोदेशांतरंव्रजेत् ॥ १८२ ॥ घटवद्विविधाकारोभिद्यमानःपुनःपुनः ॥ भेदंस्वस्यनजानातिजीवोजानातितंसदा ॥ १८३ ॥

एवमिति एषदेहएवस्थूलःसूक्ष्मोवादेशांतरंगच्छेदितितुरीयपादार्थः ॥ १८२॥ अयंदृष्टांतउपाधिधर्मास्पर्शएवनतुजडत्वेपीतिदर्शयन्जीवस्यचैतन्यंब्रह्माभेदयोग्यताप्रयोजकमाह घटवदिति जडत्वेनघटतुल्योदेहःपुनःपुनर्भिद्यमानोविनाशांतान्विकारान्भजमानःस्वस्यधर्मभूतंभेदंविनाशादिकंनजानाति जीवस्तुतंदेहधर्मभेदंविनाशांतंविकारंजानातिसाक्षितयापश्यतीत्यर्थः तथाचचिद्रूपेणदृष्टांतादाकाशाद्विशेषःसाक्ष्यवर्गात्पृथक्त्वंचजीवस्यसिद्धमितिभावः ॥ १८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यनिर्विकारब्रह्माभेदंसाधयति आत्मनइति किंजीवएकःस्वीक्रियतेनानाविधोवा आद्ये एकोदेवःसर्वभूतेषुगूढइत्यादिश्रुतिवर्णितादे कस्मादात्मनःकथंभिद्येत एकत्वलक्षणस्याविशेषात् अंत्येपिकथमात्मनोभिद्येत आत्माहिस्वरूपंतत्परिहारेनिःस्वरूपत्वापत्तेरितिपूर्वार्द्धार्थः नन्वनेकजीवपक्षेतदभिन्नस्यात्मनःकथमेकत्वमितिशंकांपरिहरति तद्भेदइति तेषांजीवानांभेदेप्यात्मनःसर्वानुगतस्यनभेदः नानाव्यक्त्यनुस्यूतायाजातेरिवेतिभावः वस्तुतस्तुएकएवनजीवोस्तिजीवानांराशयःकुतइतिसिद्धांतानुसरणेजीवभेदोदुर्वचइत्याह तस्यापीति तस्यजीवपदार्थस्यकोपिभेदःसंबंधीनभवतिकिंतूपाधीनामेवसइत्यर्थः यदातूपाधिभ्योप्यधिष्ठानसदंशविमोकःक्रियतेतदाकस्यापिभेदो नास्तीतितुशब्दाशयः ॥ १८४ ॥ भेदासंभवेहेतुतयाप्रकृतदृष्टांतान्यथानुपपत्तिमाह आत्माहीति हियतोघटादितुल्येसंघातेशरीरत्रय

आत्मनोनैषभिन्नोयंजीवोनानाविधोपिवा ॥ तद्भेदेनात्मनोभेदोनतस्यापितुकश्चन ॥ १८४ ॥ आत्माह्याकाशवज्जीवोघटाकाशइवोदितः ॥ घटादाविवसंघातेजातंचेदंनिदर्शनं ॥ १८५ ॥ घटादिषुप्रलीनेषुघटाकाशादयोयथा ॥ आकाशेसंप्रलीयंतेतद्वज्जीवाइहात्मनि ॥ १८६ ॥ यथैकस्मिन्घटाकाशेरजोधूमादिभिर्युते ॥ नसर्वेसंप्रयुज्यंतेतद्वज्जीवाःसुखादिभिः ॥ १८७ ॥

रूपोपाधौआत्मामहाकाशवज्जीवस्तुघटाकाशवदुदितःकथितस्ततोजीवस्यात्मनोभेदोनसंभवतीतिपूर्वेणसंबंधः नहिघटीयभेदमनादाय घटाकाशस्यमहाकाशाद्भेदोनिरूपयितुंशक्यइतिभावः नकेवलमनेनोदाहरणेनोक्तार्थःसूचितःकिंत्वर्थांतराण्यपीत्याह जातमिति इद मुदाहरणंनिदर्शनमर्थांतराणामप्युपलक्षणंजातमित्यर्थः ॥ १८५ ॥ अर्थोपलक्ष्यानर्थानाह घटादिष्विलत्यष्टादशभिः यथाघटाकाश मठाकाशादयउपाधिविवेककालएवमहाकाशतांप्राप्ताउच्यंतेतथाजीवाउपाधिविवेककालएवइहपरिपूर्णेआत्मनिलयंमोक्षरूपंयांतीत्यर्थः एतेनज्ञानसमकालिकीमुक्तिरितिसूचितम् ॥ १८६ ॥ तथाकर्तृत्वभोक्तृत्वादिसंसारधर्माणांव्यवस्थापिसूचितेत्याह यथैकस्मिन्निति एकस्मिन्घटाकाशेधूलिप्रभृतिभिःसंसृष्टेइतरेघटाकाशास्तथानभवंति तत्कुतः तद्धर्मिणामुपाधीनामननुगमात् तथाजीवेष्वपिबोध्यमित्यर्थः ॥ १८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपेति यथाचतत्रदृष्टांतेरूपाणिवर्त्तुलदीर्घादयआकाराः कार्याणिजलानयनधारणवासादीनि समाख्यायौगिकनामानिघटाकाशशरा
वाकाशमठाकाशादीनि तेषांभेदेपिनाकाशस्यभेदस्तथाजीवतत्त्वेपिबोध्यमित्यर्थः॥ १८८॥ एतेनजीवस्यविकारत्वमवयवत्वंचनिरस्तमि
त्याह आकाशस्येति यथामहाकाशस्यनिर्विकारस्यनिरवयवस्यचघटाकाशोविकारोऽवयवोवानैववक्तुंशक्यःतथाऽखंडात्मनिरूपितंवि
कारत्वमवयवत्वंचजीवेनैवेति॥ १८९॥तथाबंधादीनामारोपितत्वमपिदर्शितमित्याह यथाभवतीति बालानांमतेइतिशेषः स्फुटम्॥ १९०॥
तथानेनदृष्टांतेनजीवस्याजत्वमपिसिद्धमित्याह मरणइतिद्वाभ्यां यथाशरीराणांमरणादौसत्यपितद्गतआकाशोविलक्षणोविकारीनभव

रूपकार्यसमाख्याश्चभिद्यंतेतत्रवैयथा॥ आकाशस्यनभेदोस्तितद्वज्जीवेषुनिर्णयः॥ १८८॥ आकाशस्यघ
टाकाशोविकारावयवौयथा॥ नैवात्मनःसदाजीवोविकारावयवौतथा॥ १८९॥ यथाभवतिबालानांगग
नंमलिनंमलैः॥ तथाभवत्यबुद्धानामात्मापिमलिनोमलैः॥ १९०॥ मरणेसंभवेचैवगत्यागमनयोरपि॥
स्थितःसर्वशरीरेष्वप्याकाशोनविलक्षणः॥ १९१॥ यतएवंततोभिन्नःस्वात्मनोभिन्नएववा॥ नकश्चिज्जाय
तेजीवोदेहस्यैवजनिर्मृतः॥ जातोमृतइतिप्रोक्तोव्यपदेशोवृथैवतु॥ १९२॥ स्वप्नोमायामयोवापिजीवोवा
पिचकृत्रिमः॥ जायतेम्रियतेयद्वन्मृतिजन्मविवर्जितः॥ १९३॥ एवंजीवाअमीसर्वेमृतिजन्मविवर्जिताः॥
जायंतेचम्रियंतेचभ्रांतिदृष्ट्यावलोकिताः॥ १९४॥

त्येवमात्मापिभवतियतस्ततस्तस्मात्कश्चिदपिजीवोनजायते कीदृशोजीवः स्वात्मनःसकाशाद्भिन्नत्वेनाभिन्नत्वेनवामतः तत्रभिन्नत्वपक्षे
पियैरुपाधिभिरयंभिन्नस्तेउपाधयएवविकारैर्योग्यत्वादालंब्यंतेइतिभावः यतउक्तविधयादेहस्यैवजनिमृतीततोजीवेजातइत्यादिव्यव
हारोवृथामिथ्याइतिद्वयोरर्थः॥ १९१॥ १९२॥ तत्रभिन्नत्वपक्षेजीवस्यजन्माद्यभावमाह स्वप्नइति स्वप्नःस्वप्नेदृष्टोमायामयऐंद्रजालि
कदर्शितःकृत्रिमःप्रतिकृतिमयोवाजीवोजन्माद्याश्रयत्वेनभ्रांतैर्दृष्टोपियथावस्तुतोजन्मादिवर्जितइत्यर्थः॥ १९३॥ दार्ष्टांतिकेयोजय
ति एवमिति अमीव्यावहारिकाः॥ १९४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितंदर्शयन्नात्मनिजन्माद्यारोपप्रयोजकमुपाधिनिरूपयति जन्मादिकमिति तथाभूतंमरणाद्याकारतांभजत्सच्चित्तमेवस्वगतंमरणादिकमात्मनिदर्शयेत्प्रतीयमानंकुर्यादित्युत्तरार्धार्थः ॥ ९९५ ॥ एतदेवस्फुटयति एवमिति एवंसतिजीवाःस्वतोनिर्विकाराअपितत्तदात्मकाजातमृतादिरूपादृश्यंतेयतस्तथाभूताश्चित्ततादात्म्याध्यासंगताइत्यर्थः ॥९९६॥ उक्तार्थमलातशांतिप्रकरणगतैःसांप्रदायिकवाक्यैर्दृढीकुर्वन्वस्तुतोमनोपिपूतिकूष्मांडाभंचिन्मात्रमित्याह ऋजुवक्रेतिपंचभिः यथाऽलातस्यज्वलत्काष्ठस्यस्पंदितंभ्रमणादिरूपंचलनमृजुवक्रैर्दंडचक्राद्याकारैर्भासमानंप्रसिद्धंतथामनसःस्पंदितंमायाशबलादात्मनःसकाशादुन्मेषरूपंग्रहणग्राहकरूपेणमिथ्याभासते तत्रग्रहणपदेनकर्मकरणव्युत्पत्त्याविषयोज्ञानंचोक्तंग्राहकपदेनज्ञातेतित्रिपुटीसंग्रहः तत्रग्रहीतुर्मिथ्यात्वंविशेषणस्यग्रहणकर्तृत्वस्यमिथ्यात्वादितिबोध्यम्॥९९७॥वस्तुतश्चित्तंशांतंचिन्मात्ररूपमितिदृष्टांतेनाह अस्पंदमानमिति यथाअस्पंदमानंप्रोक्तस्पंदनरहितंतदालातं स्वार्थि

जन्मादिकंततोजीवःकोपिनैवप्रयातिहि ॥ किंतुचित्तंतथाभूतंदर्शयेन्मरणादिकं ॥ ९९५ ॥ एवंजीवाःसदाज्ञेयाजन्मादिपरिवर्जिताः॥ चित्तयोगात्तथाभूतादृश्यंतेतत्तदात्मकाः ॥ ९९६ ॥ ऋजुवक्रादिकाभासमलातस्पंदितंयथा॥ ग्रहणग्राहकाभासंमनसःस्पंदितंतथा ॥ ९९७ ॥ अस्पंदमानमालातमनाभासमजंयथा॥ अस्पंदमानंचित्तंस्यादनाभासमजंतथा ॥ ९९८॥ अलातेस्पंदमानेवैनाभासाअन्यतोभुवः॥ नततोन्यत्रनिष्पंदान्नालातंप्रविशंतिते ॥ ९९९ ॥ ननिर्गताअलातात्तेद्रव्यत्वाभावयोगतः ॥ मनस्यपितथैवस्युराभासस्याविशेषतः॥ १००० ॥

कोण् आभासैःकल्पितचक्रादिरूपैर्हीनंतथाअजंकल्पितरूपेणजन्मरहितंचभवतितथाचित्तमपीत्यर्थः ॥९९८॥ आभासपदोक्तानामागंतुकरूपाणांमिथ्यात्वमेवस्फुटयति अलातेइति तस्मिन्नलातेस्पंदमानेसतितेआभासाऋजुवक्राद्याकाराअन्यतोभुवःअन्यतआगत्यभवनशीलानभवंति आगमानुपलंभादितिभावः तथापुनर्निःस्पंदात्ततस्तस्मादलातात्तेनिर्गच्छंतीतिन तत्रैवालातेप्रविशंतीत्यपिन अनुपलंभादेवेतिभावः ॥ ९९९ ॥ ननिर्गताइति तेआभासाअलातान्निर्गत्यकचित्तिरोहिताःस्थिताइतिचनवक्तुंशक्यं द्रव्यत्वस्यवस्तुत्वस्याभावादित्यर्थः वास्तवानांप्रवेशनिर्गमादिकल्प्येततत्रतुवास्तवत्वमेवदुर्वचमितिभावः दार्ष्टांतिकेयोजयति मनस्यपीति आभासस्येतिभावप्रधानोनिर्देशः आभासत्वस्यमिथ्यात्वस्याविशेषात्तुल्यत्वादित्यर्थः ॥ १००० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्स्फुटयति मनसीति आभासायहणाद्याकाराएवमुक्तार्थमन्यत् ॥ १००१ ॥ तर्हिकथमेतेप्रतीयंतइतिचेद्दोषवशादित्याह नरीति यथा अत्यंतासत्यपिस्वप्नेर्थेज्ञानंशब्दःकरोतिहीतिप्रसिद्धप्रभावात्शब्दरूपदोषान्नरिमनुष्येश्टंगंप्रतीयतेमायारूपदोषाद्गंधर्वनगरंचतथैतद्वैतंशब्दमाययोर्वलात्प्रतीयते वस्तुतस्त्वात्मनोन्यदसदवेत्यर्थः ॥१००२॥ तथापिविश्वभावप्रयोजकयोर्मायाशब्दयोःकथमसत्त्वमितिचेद्वाचारंभणंविकारोनामधेयमितिश्रुत्युक्तस्यशब्दमात्रत्वरूपस्यमिथ्यात्वप्रयोजकस्ययोगादितिगृहाणेत्याशयेनाह मायापीति यस्मान्मायापिशब्दतःस्ववाचकंमायादिशब्दमाश्रित्यैवसतीशशश्टंगवन्नतुप्रमाणानुगृहीतंतर्कंसहतेतस्मात्सामायासतीनभवति शब्दश्चतथाशब्दोपिनाममात्रत्वान्नसन् नचात्मन्यतिप्रसक्तिः तस्यस्वयंप्रकाशस्यशब्दाद्यगोचरत्वादित्यर्थः अयंभावः ' वाचारंभणमित्यादिश्रुतौविकारपदेनपरापेक्षरूपविवर्त्तवाचकेनदृश्यजातमुद्दिश्यनाममात्रत्वमसत्वप्रयोजकंविधीयतेतच्चविवर्त्तत्वंशब्दमाययोरप्यविशिष्टमतस्तयोरप्यधिष्ठान

मनसिस्पंदमानेवैनाभासाअन्यतोभुवः ॥ नततोन्यत्रनिष्पंदान्नमनःप्रविशंतिते ॥ १००१ ॥ नरिश्टंगंयथाशब्दान्माययानगरंचखे ॥ प्रतीयतेतथासर्वमात्मनोन्यदसत्स्मृतं ॥ १००२ ॥ मायापिशब्दतोयस्मात्सतीतस्मान्नसासती ॥ शब्दश्चात्मातुनैवंस्यादवाङ्मनसगोचरः ॥ १००३ ॥ शब्दमायावृतोनात्मास्वात्मानमुपयात्ययं ॥ निगूढोनीरमध्यस्थोमहानपियथाघटः ॥ एतन्नाशात्स्वयंज्योतिरेकत्वमुपयातिहि ॥ १००४ ॥

विविक्तयोरसत्त्वं आत्मनिनिरपेक्षेतुविवर्तत्वस्योद्देश्यतावच्छेदकस्याभावान्नशब्दमात्रत्वमसत्त्वप्रयोजकंविधेयमवतरतीति श्रुत्यर्थस्तु विकारोविवर्त्तरूपंघटशरावादिकंवाङ्मयनाममात्रमेवनतत्रसत्त्वगंधोपिउपादानभूतंमृत्तिकाद्येवतुसत्यमिति ॥ १००३ ॥ अथशब्दमायेत्यादिनामान्तवाक्यानांक्रमेणार्थंद्वादशभिःसंगृह्णंस्तत्रासङ्गामपिशब्दमायाभ्यांपरमार्थस्याप्यात्मनोभानप्रतिबंधःप्राग्विवेकात्कृतइत्याह शब्देति शब्दःशब्दमात्रात्मकोविकारोमायाचतत्कारणभूताताभ्यामावृतआच्छादितोयमात्माजीवरूपःस्वात्मानंस्वंतत्त्वंनयातिनजानातिकिंतुनिगूढःसन्परिच्छिन्नरूपेणभाति तत्रमहतोप्यल्परूपेणभानेदृष्टांतोजलमध्यस्थोघटः सहिमहानपिस्वल्पउपलभ्यतेइत्यनुभवसिद्धं एतेनश्रुतौपुष्करशब्दोजलवाचकोगौण्यांतःकरणाद्युपाधौवर्त्ततेइतिसूचितं एतयोःशब्दमाययोर्नाशेबाधेतुस्वरूपभूतमेकत्वंलभतेइत्यर्थः ॥ १००४ ॥ ॥७३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकत्वस्योपलब्धिसाधनंयोगंसूचयन्नेकत्वमुपलक्षयति शब्दस्थमिति शब्देप्रणवेस्थितंवाच्यतयातादात्म्येनसंबद्धंपरंसर्वोत्कृष्टंब्रह्मस्थूल सूक्ष्मकारणसमष्ट्युपाधितस्मिन्मात्रात्रयवाच्येसहमात्राभिःक्रमेणक्षीणेसतियत्तुरीयमक्षरमविनाशिअवशिष्टंतदेवसर्वभेदाभावद्वाराएक त्वपदेनोक्तमित्यर्थः ॥१००५॥ तदेकत्वंजिज्ञासुःप्रथमंप्रणवादिशब्दतादात्म्यापन्नंब्रह्मचिंतयितुमभ्यसेदित्याह एकत्वमिति एकत्वंएकप देक्तं ॥१००६॥तत्रशब्दब्रह्मण्यप्यादरःपरब्रह्मवत्कर्त्तव्यइत्याह द्वेइति अधिकारिणाद्वेब्रह्मणीवेदितव्येआदरेणविज्ञेये द्वेके शब्दब्रह्मप्रण वादिरूपंपरंनिर्विशेषंच तत्रप्रथमंशब्दब्रह्मणिनिष्णातःकुशलःसन्नेवपरंसाक्षात्करोतीत्यर्थः ॥१००७॥ परब्रह्मविज्ञानेसतितुशब्दब्रह्मचिंत नाभ्यासोहेयइत्याह शाब्दमिति शाब्दंशब्दतादात्म्यापन्नंसमभ्यस्यसमीचीनस्यसत्फलस्याभ्यासस्यगोचरंकृत्वापरेब्रह्मणिज्ञातेसतित्य

शब्दस्थंयत्परंब्रह्मतस्मिन्क्षीणेयदक्षरं॥ तदेकत्वमितिप्रोक्तंसर्वभेदविवर्जितं ॥ १००५॥ एकत्वंपरमंब्रह्म ज्ञातुकामस्त्वतःपुमान्॥ शब्दब्रह्मपुराविद्वानवगच्छेद्गतश्रमः॥ १००६॥ द्वेब्रह्मणीवेदितव्येशब्दब्रह्मपरंच तत्॥ शब्दब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छति॥ १००७॥ शाब्दंब्रह्मसमभ्यस्यत्यजेज्ज्ञातेपरेसति॥ पला लमिवधान्यार्थीत्यजेद्ग्रंथमशेषतः ॥ १००८॥ गवामनेकरूपाणामेकरूपंपयथापयः॥ नानाविधानांदेहाना मेकआत्मातथेरितः॥१००९॥ अतःसर्वेषुभूतेषुएकआत्माव्यवस्थितः॥ मनसैवसविज्ञेयआत्मनःसुखमि च्छता॥१०१०॥दधिसर्वाणिभूतानिमनोमंथाःप्रकीर्तितः॥अहंब्रह्मेतिविज्ञानंनेत्रंमंथनकारणं॥१०११॥

जेत् तथायंग्रंथंशब्दप्रपंचंत्यजेत् पलालंव्रीहिकांडं धान्यार्थीव्रीहिकामइतिचेत्यर्थः॥१००८॥ ज्ञेयस्यात्मनःसर्वोपाधिष्वेकरूपत्वेदृष्टांतमा ह गवामिति कृष्णपीताद्यनेकरूपाणामपिगवांपयःशुक्लमेवयथातथानानाविधदेहानांमध्येज्ञानलक्षणआत्माएकरूपएवेत्यर्थः श्रुतौ लिंगिपदेनज्ञानलिंगचेष्टाधारवाचकेनजातावेकवचनांतेनचदेहाउक्ताइतिभावः ॥ १००९ ॥ तस्यविज्ञानसाधनंश्रवणादिसंस्कृतंमन एवेत्याह अतइति अतउक्तदृष्टांतसमन्वयात्सर्वत्रैकरूपेणस्थितोप्यात्मामनसैवतत्परेणज्ञेयइत्यर्थः ॥ १०१० ॥ अत्रश्रुत्युक्तंरूपकमभि नयति दधीति सर्वाणिभूतान्युपाधयोदधिस्थानीयाश्चित्याः मनस्तुमंथाःमंथनदंडाश्चित्यः तस्यावृत्तिरूपभ्रमणसाधनंब्रह्मात्मैक्यज्ञानं तुनेत्रंमंथनरज्जुस्थानीयंचित्यमित्यर्थः ॥ १०११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवनीतमिति अद्वयआत्मातुनवनीतस्थानीयःस्वात्मनःसंसाराद्यदुद्धरणंमोक्षाख्यंतदेवतस्यनवनीतस्योद्धरणस्थानीयमिति।चिंतयेदित्य
र्थः ॥ १०१२ ॥ एवमुद्धृतस्यतत्पदार्थरूपस्यनवनीतस्यत्वंपदार्थैक्यचिंतनरूपंतद्दधिधारणंतापोपशमायंकुर्यादित्याह निष्क्रयमिति
॥१०१३॥ वासुदेवइति तत्ब्रह्मवासुदेवसंज्ञंवैदिकैरुक्तं कीदृशैर्वैदिकैः एवंवक्ष्यमाणविधयातद्व्युत्पत्तिविवरणंकुर्वद्भिः ॥ १०१४ ॥ व्युत्प
त्तिदर्शयंश्वरमेवाक्यार्थमाह सर्वेति वसंत्यत्रभूतानीतिव्युत्पत्त्यावासुदेवपदेनसर्वभूताधिवासतयोक्तः वसतिसर्वत्रेतिव्युत्पत्त्यांतर्यामितया
चयउक्तोनारायणस्तद्रूपंब्रह्माद्वयलक्षणमहमस्मीतिबुद्ध्येतेत्यर्थः ॥ १०१४ ॥ ब्रह्मबिंदुव्याख्यानसमाप्तिंदर्शयन्नुत्तरग्रंथप्रवृत्तिप्रकार
माह इतितेइति मनोनिग्रहसंयुतंब्रह्मतत्त्वममृतबिंदौब्रह्मबिंदौयथोक्तंतथातुभ्यमभिहितं अथनारायणीयस्यतैत्तिरीयशाखागतस्यसंक्षे

नवनीतंततश्चैतदानंदात्मानमद्वयं ॥ उद्धरेदुद्धरंस्तस्मात्स्वात्मानंभवसागरात् ॥ १०१२ ॥ निष्क्रियंनिष्कलं
शांतंयदनेनसमुद्धृतं ॥ तद्ब्रह्मात्माहमस्मीतिसाक्षात्कुर्यात्सदापुमान् ॥ १०१३ ॥ वासुदेवस्तदैवैतत्पठ्यतेवेद
वादिभिः ॥ नाम्नस्तस्यनिरुक्तंचकुर्वाणैस्त्वेवमेवहि ॥ १०१४ ॥ सर्वभूताधिवासोयोयोभूतेषुवसत्यपि ॥ स
र्वानुग्राहकत्वेनतदेवास्म्यहमद्वयम् ॥ १०१५ ॥ इतितेमृतबिंदूक्तंमनोनिग्रहसंयुतं ॥ उक्तंब्रह्माथवक्ष्यामिपु
नःक्षुद्रतयेरितम् ॥ १०१६ ॥ नारायणीयसंज्ञेयेमहोपनिषदीरिते ॥ आत्मप्रबोधसंज्ञेचशृणुतत्त्वंक्रमादिह
॥ १०१७ ॥ येनपूर्णमिदंविश्वंयश्चायंसर्वदेहिनां ॥ शेतेपुरेषुभगवान्पुरुषःपुरुषोत्तमः ॥ १०१८ ॥ विराड्रू
पधरोयश्चान्तेलोकान्निखिलानपि ॥ संगृह्यशिशुवत्शेतेशेषार्द्धोज्वलमध्यगः ॥ १०१९ ॥

परूपेनारायणीयोपनिषत्संज्ञेग्रंथेतथामहोपनिषदितीरितेउक्तेग्रंथेतथात्मप्रबोधोपनिषत्संज्ञेग्रंथेचक्षुद्रतयासंक्षिप्ततयाब्रह्मेरितंवर्णितंतन्म
यावक्ष्यमाणंसावधानःक्रमेणत्वंशृण्वितिद्वयोरर्थः ॥ १०१६ ॥ १०१७ ॥ तत्रपुरुषपदव्युत्पत्तिंद्विधासूचयंस्तदर्थमाह येनेति यःसर्वं
विश्वपूरकत्वात्सर्वदेहरूपपूर्षुअंतर्यामित्वेनवासशीलत्वाच्चपुरुषइत्युक्तः पूरयतिपूर्षुवसतीतिवाव्युत्पत्तिसंभवादित्यर्थः॥१०१८॥ नारा
यणपदार्थमाह विराडितित्रिभिः योभगवान्विराड्रूपोंऽतेप्रलयेनिखिलान्लोकानुदरेसंगृह्यशेषस्यफणासहस्रेणच्छायाकर्त्तुर्यदर्द्धरूपमु
ज्ज्वलंमध्यंतदात्मकशय्यांगतःसन्नप्सुशेतेइत्यर्थः एतेननरसृष्टाआपोऽयनंवासस्थानंयस्यसतथेतिव्युत्पत्तिःसूचिता ॥ १०१९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिरण्यगर्भइति यश्च भगवान् हिरण्यगर्भरूपोजीवानांतैजसानांसूक्ष्मव्यष्ट्युपाधिकानांप्रतिबिंबकल्पानांबिंबस्थानीयोमायारूपेतल्पेश
य्यायांवर्त्ततेयथामातृगर्भरूपेशयनेशय्यायांशिशुरित्यर्थः एतेननरस्यजगत्कर्त्तुःशक्तिरूपतयासंबंधित्वान्नारंमायातत्त्वंतदयनंयस्यसत
था अथवानराणांजीवानांसमूहोनारंतस्यायनंस्वरूपलाभोयतोबिंबभूतात्सतथेतिव्युत्पत्तिद्वयंसूचितम् ॥ १०२० ॥ यश्चेश्वरइति यश्च
भगवान्वैषम्यनैर्घृण्यादिदोषरहितईश्वरोंऽतर्याम्यविद्यायाःकार्यकारणरूपायाःकंदुकवद्दूरतःप्रक्षेप्ताचसनारायणइत्युक्तइत्यर्थः तथा
चअराणांसंसारचक्रावयवानांरागादीनामयनंप्राप्तिर्यत्रनविद्यतेसतथा यद्वानराणांजीवानामयनंप्रवृत्तिर्यस्मादंतर्यामिणःसतथा अथ

हिरण्यगर्भोभगवान्जीवानांबिंबवच्चयः ॥ वर्त्ततेशयनेमायातल्पेगर्भेयथाशिशुः ॥ १०२० ॥ यश्चेश्वरो
त्रभगवान्वैषम्यादिविवर्जितः ॥ अविद्याकंदुकःसोयमुक्तोनारायणःपुमान् ॥ १०२१ ॥ अकामयतदेवो
यंसिसृक्षुर्निखिलंजगत् ॥ प्रजाःसृजेयेतिपुराह्येकएवव्यवस्थितः ॥ १०२२ ॥ संकल्प्येत्थंजगत्सर्वंसृष्ट
वान्पुरुषःपरः ॥ देवानिमांश्चनिखिलान्नानासामर्थ्यसंयुतान् ॥ १०२३ ॥ ब्रह्माशक्रस्तथादित्योरुद्राश्चव
सवस्तथा ॥ विश्वेदेवाश्चसाध्याश्चतथान्यादेवयोनयः ॥ १०२४ ॥ नारायणात्प्रजायंतेसहसर्वैश्चराचरैः ॥
वर्त्ततेतत्रलीयंतेतस्मिन्नेवमहात्मनि ॥ १०२५ ॥

वानरसंबंधिनोऽविद्यातत्त्वस्यअयनंप्रक्षेपोयतस्तुरीयत्वेनज्ञाताद्बदरिकाश्रमवासिगुरुरूपाद्वासतथेतिव्युत्पत्तित्रयंसिद्धं व्युत्पत्त्यंतराण्यपि
दशमेदर्शितानिस्मर्त्तव्यानीति ॥ १०२१ ॥ अकामयतेति अयंदेवःसृष्टेःपुराएकोऽद्वितीयोजगत्सिसृक्षुर्जगत्सृष्ट्यभिमुखःसन्नहंसृजेये
त्याकारांकामनांकृतवानित्यर्थः ॥ १०२२ ॥ संकल्प्येति इत्थंसंकल्प्यदेवादिकंसर्वंजगत्सृष्टवानित्यर्थः ॥ १०२३ ॥ देवानवयुत्यानुव
दति ब्रह्मेति यथाजायंतेतथातत्रनारायणेवर्त्ततेलीयंतेचेत्यर्थः ॥ १०२४ ॥ १०२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तथाचयथामृदोघटादयोनभिन्नास्तथासर्वंजगन्नारायणादित्याह यतएवमितित्रिभिः यतएवंनारायणाज्जन्मस्थितिभंगशालित्वंजगत
स्ततोनारायणोदेवएकोऽद्वितीयः एतत्सर्वंतुनारायणात्मकं एतत्किमतआह ब्रह्मेत्यादि ब्रह्मादयोगुणत्रयाभिमानिनः दस्रावश्विनौ सदस
द्गतंस्थूलसूक्ष्मावस्थागतं एतदेवस्फुटयति यदिति यदस्तिप्रत्यक्षं नास्तिपरोक्षमितित्रयाणामर्थः ॥ १०२६ ॥१०२७॥ १०२८ ॥ एवं
 कण्डिकाद्वयंव्याख्यातमथनित्यइत्यादेस्तृतीयकंडिकायाअर्थमाह यदात्मकमितिसपादचतुर्भिः ससर्वात्मानारायणोविनाशराहित्य
रूपनित्यत्ववान्प्राणादिषोडशकलाभिर्वर्जितश्च षोडशकलास्तुप्राणःश्रद्धाआकाशादिपंचभूतानिइंद्रियमनोऽन्नंवीर्यंतपोमंत्रःकर्मलो

यतएवंततोदेवएकोनारायणःस्मृतः ॥ ब्रह्माविष्णुश्चरुद्रश्चशक्रोन्येदेवतागणाः ॥ १०२६॥ आदित्याद्या
श्चदस्रौचयेचान्येदेवयोनयः॥ दिशश्चप्रदिशस्तद्वदधश्चोर्ध्वंचमध्यमं ॥ १०२७॥ महाभूतानिभूतानिस्था
वराणिचराणिच॥ भूतंभव्यंभवत्सर्वंसकलंसदसद्गतं॥ यदस्तियच्चनास्त्येतत्सर्वंनारायणात्मकं॥ १०२८॥
यदात्मकमिदंविश्वंपुमान्नारायणस्तुसः ॥ विनाशरहितस्तद्वत्प्राणाद्यैःपरिवर्जितः ॥ १०२९ ॥ कार्यजात
मिदंसर्वंविकल्पइतिकीर्तितं ॥ अज्ञानंकारणंतद्वत्ताभ्यांचपरिवर्जितः॥ १०३०॥ माययाजडरूपिण्यास
र्वशुद्धिविहीनया॥ कालत्रयेपिरहितःसर्वभेदविवर्जितः ॥ १०३१॥ अस्मान्नारायणाद्देवाद्भिन्नःकोपिन
वस्तुतः॥ शुद्धसत्वाद्वितीयोर्थोनासीन्नास्तिनभाव्यपि॥ १०३२॥

कानामचेतिप्रश्नोक्ताः ॥ १०२९ ॥ आख्यातवाच्यक्रियाराहित्यंरूपनिराख्यातत्वस्यार्थात्सिद्धिमभिप्रेत्यनिर्विकल्पादिपदद्वयार्थमाह
कार्येति सर्वंकार्यंविकल्पपदेनोक्तंतत्कारणमज्ञानंत्वंजनपदेनताभ्यामयंवर्जितोभवतीत्यर्थः ॥ १०३० ॥ शुद्धपदार्थमाह माययेति
सर्वशुद्धिविहीनयामलरूपयामाययातत्प्रयुक्तभेदैश्चरहितइत्यर्थः ॥ १०३१ ॥ अस्मादिति अस्मात्शुद्धसत्वात्मकाद्भिन्नःकोपिभावोन
भवति द्वितीयस्यासंभवादित्यर्थः ॥ १०३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति एवंयोवेदसविष्णुभावयोग्यइतिपूर्वेणसंबंधः कथमित्याकांक्षायांचतुर्थ्याअर्थंदर्शयति सइत्यादिना सविद्वान्रुरुंसंसारदुःखंद्रा
वयतिहरतीतिव्युत्पत्त्यारुद्रपदोक्तांश्रौतविज्ञानसंपन्नांबुद्धिंसारथिंकृत्वामननादिव्यापारकंमनःप्रग्रहमश्वरश्मिवत्सारथिवशंचकृत्वासं
यतेंद्रियरूपाश्वैर्युक्तेशरीररूपरथेस्थितोविष्णुपदंमोक्षरूपंगच्छेदितिद्वयोरर्थः ॥ १०३३ ॥ १०३४ ॥ पंचम्यर्थमाह एवमिति एवमु
क्तविधांनारायणस्यात्मत्वप्रतिपादिकांविद्यामुपनिषदंयोर्थतोवेदजानातिसोत्रजीवदवस्थायामापत्तरणपूर्वकमिष्टभोगान्प्राप्यांतेब्रह्म
लोकाभिद्वारामोक्षंगच्छेदित्यर्थः॥ १०३५ ॥ षष्ठ्याभावार्थमाह नमइतिपंचभिः नमआदिकोमंत्रःस्त्रीशूद्रपर्यंतानांसर्वेषांहितः द्विजैस्त्रै

एवंयोवेदपुरुषःसकृत्वासारथिंधियं॥ रुद्राभिधांस्वबोधाख्यांसोहमस्मीतिरूपिणीं॥१०३३॥ प्रग्रहंचमनः
शांतंशरीररथगोचरः॥ इंद्रियाश्वैर्भृशंदांतैर्गच्छेद्विष्णुपदंपरं॥१०३४॥ एवंनारायणस्यात्मविद्यांयोवेदवेद
वित्॥ तीर्त्वासआपदःसर्वाःप्राप्यभोगांस्तथेप्सितान्॥ अन्तेमृत्वाब्रह्मलोकंगत्वामोक्षंचविंदति॥१०३५॥
नमोनारायणायेतिमंत्रःसर्वार्थसाधकः ॥ देहिनांनिखिलानांसद्विजानांप्रणवादिकः ॥ १०३६ ॥ यादृ
ङ्नारायणज्ञानात्फलंतादृक्प्रकीर्तितं ॥ अस्यापिज्ञानतोयस्माज्ज्ञायतेपुरुषोमुना ॥ १०३७॥ उपायःप्रण
वोयद्वन्नारायणगतिंप्रति॥ तद्वदष्टाक्षरोप्येषउपायःसर्वदेहिनां ॥ १०३८ ॥ अमुंजपेन्नरोनित्यंनारीवापा
प्मनःक्षये॥ आनंदात्मानमात्मस्थंपश्येन्नारायणंपरं॥१०३९॥ किंपुनर्योधिकारीस्यात्सर्वपापविवर्जितः॥
संपश्यतिजपन्नेतदानंदात्मानमद्वयं॥ १०४० ॥ इतिनारायणीयायाब्रह्मविद्यासमीरिता॥ सोक्तामहोपनि
षदिप्रोक्तांतांश्शृणुनामतः॥ १०४१ ॥

वर्णिकैस्तुप्रणवादिकोजप्यइत्यर्थः ॥१०३६॥ अस्यमंत्रस्यनारायणसाम्यमाह यादृगिति ज्ञायतेलभ्यते अमुनाऽधिकारिणा ॥१०३७
अस्यप्रणवसाम्यमाह उपायइति गतिर्लाभः॥१०३८॥ जपफलमाह अमुमिति अमुंमंत्रंयदिनरोनारीवाजपेदर्थावबोधपूर्वकमभ्यसेत्त
र्हिप्रत्यग्रूपंनारायणंपश्येत्किमुताधिकारसंपन्नइतिद्वयोरर्थः॥१०३९॥१०४०॥ उपसंहरन्महोपनिषदर्थंप्रतिजानीते इतिनारायणीया
याइति नारायणीयायाउपनिषदोर्थभूताविद्यासमीरितेतितांविद्यांनामतोमहोपनिषदिमहोपनिषत्संज्ञेश्रुतिग्रंथेप्रोक्तांश्शृणिवति॥१०४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति पुराप्राचीनवृत्तंविद्वांसोजानंतोवैदिकाविप्राएवमाहुः एवंकथं पूर्वंनारायणएवासीत् पुरेत्यस्य विवरणंविश्वजनेःपुरेति ॥१०४२
तदेति तदासृष्ट्यादौब्रह्मादयोदेवानासन् तानिमहांतिभूतानिचनासन् तथाअन्यानिभूतपदस्यार्थांतररूपाणिस्थावरजंगमशरीराणिना
सन् तथापरंद्यावापृथिव्यादिकंकार्यजातंनासीदित्यर्थः ॥ १०४३ ॥ एकाकीति सपूर्वःसृष्टिपूर्वकालेस्थितःपुमान्पुरुषएकाकीसन्
नरेमेअरतिरूपंक्षोभंप्रापततोरतयेद्वितीयंध्यायतस्तस्यपुरुषस्यमायारूपयुवत्यानासिकोपलक्षितप्राणसूक्ष्मावस्थारूपत्वात्श्रुतौनस्तोम
पदोक्तयासहसंगोजातस्ततस्त्रयोदशसुताजाताएकाकन्याचासतीनानापुरुषाभिलाषिणीजाता कीदृशस्यपुरुषस्य वस्तुतःसतःनिर्दोष

एवमाहुःपुराविप्राविद्वांसोवेदवादिनः ॥ एकोनारायणःपूर्वमासीद्विश्वजनेःपुरा ॥ १०४२ ॥ तदाब्रह्माद
योदेवानासन्भूतानितानिच ॥ चरस्थिराणिचान्यानिनैवकिंचित्तथापरं ॥ १०४३ ॥ एकाकीसपुमान्पूर्वो
नैवरेमेनिरंजनः ॥ द्वितीयंध्यायतस्तस्यपुरुषस्यमहात्मनः ॥ १०४४ ॥ त्रयोदशसुतास्तस्यकन्याचैकाभवत्त
दा ॥ असंगस्यासतीमायायुवत्यासंगतःसतः ॥ १०४५ ॥ त्रिधासाकुरुतात्मानंकन्यापुरुषकांक्षिणी ॥ अ
धिदैवमथाध्यात्ममधिभूतंचभामिनी ॥ १०४६ ॥ वीक्षमाणःपुमानेकस्तामेतामसतींसुतां ॥ आत्मानं
बहुधामेनेतद्बहुत्वेनमोहितः ॥ १०४७ ॥

स्यासंगत्वादितिद्वयोरर्थः ॥ १०४४ ॥ १०४५ ॥ त्रिधेति साकन्याबुद्धिरूपानानापुरुषाभिलाषिणीआत्मानमधिदैवादिरूपैस्त्रिधा
ऽकरोदित्यर्थः कार्यविभागस्यबुद्धिमात्रतंत्रत्वादितिभावः नकेवलंकन्यैवत्रिधाजाताकिंतुतत्सुताअपीत्याह यथेति तत्राधिदैवत्वंसम
ष्टिघटकत्वं अध्यात्मत्वंव्यष्टिघटकत्वं अधिभूतत्वमिदंतयादृश्यमानत्वमितिवर्णितप्रायमित्यर्थः ॥ १०४६ ॥ वीक्षमाणइति एकोपि
सपुमान्तामसतींसुतांतादात्म्येनवीक्षमाणःपश्यन्सन्नात्मानंबहुरूपंमेने तस्याःकन्यायाबहुत्वलक्षणधर्माध्यासात् तत्राध्यासेहेतुस्तुमोहो
ऽविवेकएवेत्यर्थः ॥ १०४७ ॥

१ एतदग्रे यथाकन्यातथाजातास्त्रिविधास्तत्सुताअपीत्येवमर्थकमर्द्धमपेक्ष्यतइतिटीकानुरोधाद्भाति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषांचेति तेषांत्रयोदशसुतानांसुतायाश्चयानिकारणानिशरीरोपादानभूतान्यत्रव्यवहारेप्रसिद्धानितानिप्रथमंसृष्ट्वाततस्तान्सुतासहिता
न्सुतान्सृष्ट्वाचपश्चात्क्रियाशक्तिंसृष्टवान् कीदृशींक्रियाशक्तिं तेषांप्रथमसृष्टानांमध्येकेषांचित्कार्यभूतांकेषांचित्तुस्थितिकारणभूता
मित्यर्थः ॥ १०४८ ॥ तत्रकानिकारणानीत्याकांक्षायामाह पृथिव्यापइति प्रथमसृष्टतयायत्कारणजातमुक्तंतत्पृथिव्यादिपंचकरू
पंबोध्यं तच्चद्विविधं स्थूलंमहाभूताख्यंसूक्ष्मंचतन्मात्राख्यं तत्रसूक्ष्मस्यविशेषणंमध्यममिति मध्येभवंमध्यमंस्थूलस्यांतःस्थितिशीलमि
तियावत् एवंकारणद्वैविध्येसतितदुक्तंकार्यमपिस्थूलसूक्ष्मत्वाभ्यांद्विधाभवेदित्यर्थः ॥ १०४९ ॥ क्रियाशक्तिमित्यादिविवृणोति क्रिये
ति क्रियाशक्तिपदेनप्राणउक्तइतितत्रहेतुतयाप्राणेकार्यत्वकारणत्वयोरुक्तयोःसमुच्चयमाह कार्येति यःप्राणःपंचभूतानांकार्यरूपः अ

तेषांचकारणान्यत्रपूर्वंसृष्ट्वाचतान्प्रभुः॥ असृजच्चक्रियाशक्तिंतेषांकार्यंचकारणं ॥ १०४८ ॥ पृथिव्याप
स्तथातेजोवायुराकाशमेवच ॥ पंचकंकारणंप्रोक्तंस्थूलंसूक्ष्मंचमध्यमं ॥ तद्द्वैविध्यात्कारणस्यकार्यंचद्विवि
धंभवेत् ॥ १०४९ ॥ क्रियाशक्तिस्तुयाप्रोक्तासप्राणइतिकीर्तितः ॥ कार्यरूपोत्रभूतानांकारणंवापरस्यच
॥ १०५० ॥ अहंकारोमनश्चित्तमिंद्रियाणिदशैवहि॥ त्रयोदशसुताःप्रोक्ताःकन्याबुद्धिश्चतुर्दशी॥१०५१॥
हिरण्यगर्भःसंप्रोक्तोविभागस्याधिदैवकः॥ अधिभूतंविभागस्यजंगमानिस्थिराणिच ॥ भूतान्याध्यात्मिक
श्चायंप्रत्येकंसर्वदेहिनां ॥ १०५२ ॥

परस्यसुतादिप्रपंचस्यकारणंचभवतीत्यर्थः ॥ १०५० ॥ केत्रयोदशसुतत्वेनोक्ताःकाचसुतात्वेनेत्याकांक्षायामाह अहंकारइति अहंका
रादित्रयंज्ञानेंद्रियपंचकंकर्मेंद्रियपंचकंचएतेभावास्त्रयोदशसुतत्वेनोक्ताः बुद्धिस्तुनानारूपासुतात्वेनसाचचतुर्दशीत्यर्थः एतेनतन्मात्रपं
चकस्यभूतपंचकस्यएकस्यप्राणस्यचसंयोजनेपंचविंशकोगणःसंपन्नइतिसूचितं ॥१०५१॥ हिरण्यगर्भइति अस्यविभागस्यपंचविंश
कगणरूपस्यअधिदैवकःअधिदैवंरूपंकायतिशब्दयतिअभिमन्यतइतियावत् तथाभूतोहिरण्यगर्भोबोध्यः अधिभूतंस्थितस्यतुतस्यविभा
गस्याभिमंतृणिस्थिरजंगमानिभूतानिबोध्यानि तत्रैतावान्विशेषःअयमधिभूतत्वेनोक्तः प्रत्येकंतत्तच्छरीरिणंप्रत्याध्यात्मिकः अहमितिप्र
तीयमानत्वात् शरीर्यंतरंप्रतित्वधिभूतरूपएव इदंतयाप्रतीतेरित्याशयः ॥ १०५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नास्यप्रजाइत्यादिवाक्यस्यासंवत्सरपदोक्तकालसहिताएवप्रजाअजायंतेत्यर्थमभिसंधायाह कालश्चेति प्रजापतिसृष्ट्यवच्छेदकःकालो प्यनेनसृष्टइत्यर्थः ॥ १०५२ ॥ सृष्ट्वेति सूत्रात्मरूपःसन् एवंपूर्ववत् देवानांसूत्रात्मविभूतित्वेनबृहदारण्यकेप्रसिद्धानांसृष्टिमकरोदित्य र्थः ॥ १०५४ ॥ रुद्रसृष्टिमाह केनचिदिति विश्वकृन्नारायणःकेनचिद्वक्तुमशक्येननिमित्तेनविशिष्टंक्रोधमाहार्यइच्छामात्रेणसंपाद्यभृ कुटीविशिष्टात्स्वललाटाद्रुद्रंप्रादुरकरोदित्यर्थः अत्रभृकुटीशब्दःशैवव्याकरणेसिद्धः तदुक्तमभियुक्तैः याग्युज्जहारमाहेशाद्व्यासोव्याक रणार्णवात् तानिकिंपदरत्नानिमांतिपाणिनिगोष्पदेइति ब्रह्मभूमध्यजोहरइतिपुराणविरोधस्तुकल्पभेदेनसमाधेयः ॥ १०५५ ॥ रुद्रस्य

कालश्चसर्वभूतानांसृष्टिस्थितिविनाशकृत् ॥ पुरुषेणपरेणायंसृष्टःसर्वस्यहेतुना ॥ १०५३ ॥ सृष्ट्वातदखिलं विश्वंसूत्ररूपमुपाश्रितः ॥ पुरुषोदेवतासृष्टिमेवंनारायणोऽकरोत् ॥ १०५४ ॥ केनचिद्धिनिमित्तेनक्रोधमा हार्यविश्वकृत् ॥ भृकुटीकुटिलात्स्वस्यललाटाद्दीप्ततेजसः ॥ कोपाविष्टंस्वयंदेवोरुद्रंतमुदपादयत् ॥ १०५५ ॥ नीलकंठंलोहितांगंत्रिनेत्रंशूलधारिणं ॥ बिभ्रद्वीर्याणियस्यात्रनकोप्यस्तिसमःपुमान् ॥ १०५६ ॥ ऐश्वर्य स्यसमग्रस्यधर्मस्ययशसःश्रियः ॥ ज्ञानवैराग्ययोश्चैवएकएवसमाश्रयः ॥ १०५७ ॥ सत्यस्यब्रह्मचर्यस्यमन सोनिग्रहस्यच ॥ तपसश्चसमस्तस्यशब्दराशेस्तथैवच ॥ १०५८ ॥ अस्मादेवसमस्तानांदेवादीनांशरीरिणां ॥ ऐश्वर्याद्यागुणाःसर्वेजायंतेगुणराशितः ॥ १०५९ ॥

ध्येयांमूर्तिमभिनयति नीलेति वीर्याणिवलसाध्यानिकर्माणिबिभ्रद्धारयितापोषिताचयत्समोन्योनास्तीत्युत्तरार्धार्थः ॥ १०५६ ॥ त स्मिन्कोपलिंगानिनियमनायआहार्याणीतिदर्शयन्नैक्यस्फुटीकरणायनारायणगुणान्वर्णयति ऐश्वर्यस्येति ऐश्वर्यादीनांभगवद्गुणानांस माश्रयआधारएवयतएकोनारायणादभिन्नइत्यर्थः ॥ १०५७ ॥ सत्यस्येति सत्यादीनांचसमाश्रयइत्यनुषंगः मनसोज्ञानस्यइंद्रिय निग्रहलक्षणतपसश्च शब्दराशेर्वेदादिशास्त्राणां अंत्यचकारउत्तरान्वयी ॥ १०५८ ॥ अस्मादिति अस्माद्रुद्रादेवचगुणसिंधोःसकाशात् सर्वेषांसद्गुणलाभइत्यर्थः ॥ १०५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयंरुद्रएवचसर्वविद्यासंप्रदायप्रवर्तकइत्याह अयमिति स्पष्टम् ॥ १०६० ॥ एवंरुद्रस्यसृष्टिस्थितिहेतुत्वमुक्तमथभंगहेतुत्वमाह एन मिति एनंरुद्रं ॥ १०६१ ॥ अथकमलासनसृष्टिमाह पुनश्चेति पुनश्चसर्वदृग्देवोनारायणोध्यानरूपंतपोऽकरोत्तस्यतपसाश्रमंप्राप्त स्यललाटात्स्वेदस्यबिंदवोऽपतंस्तेस्वेदबिंदवएवब्रह्मांडस्यतदंतर्वर्तिलोकानांचसर्जनसमर्थनाराख्यजलरूपाःसंपन्नाइत्यर्थः ॥ १०६२॥ अप्स्विति सदेवोनारायणस्तासुस्वेदरूपास्वप्स्वालीयंयद्वीर्यंपरंसर्वोत्कृष्टंतेजोरूपंतदवासृजत्क्षिप्तवांस्तच्चब्रह्मांडाकारेणपरिणतमितिद्व योरर्थः ॥ १०६३ ॥ १०६४ ॥ अंडस्येति तस्यांडस्यमध्येनाभिसरोरुहाद्ब्रह्माऽजायतयोब्रह्माचतुर्मुखःप्रागादिमुखक्रमेणच्छंदसांगा

अयंसमस्तदेवानांमुनीनांचमहात्मनां ॥ नानाविधासुविद्यासुकथितःपरमोगुरुः॥ १०६०॥ एनंसंप्राप्य संहारकालेलोकत्रयीत्वियं॥तूलराशिर्यथावन्हिंप्राप्यनाशंव्रजेत्स्फुटं॥१०६१॥पुनश्चध्यानमाविष्टोदेवःस सर्वदृक्स्फुटं॥श्रांतस्यध्यानयुक्तस्यललाटात्स्वेदबिंदवः॥ब्रह्मांडजनिकाआपःशक्ताभुवनसर्जने॥१०६२॥ अप्सुस्वेदस्वरूपासुतासुवीर्यमवासृजत्॥ आत्मनोयत्परंतेजोदेवोनारायणःपुमान्॥ १०६३ ॥ वीर्यंतदं डमभवत्तत्रक्षिप्तंमहात्मना ॥ हैमंमनोरमंचित्रंसूर्यकोटिसमप्रभं ॥ १०६४ ॥ अंडस्यांतरभूद्ब्रह्माभूताना मादिमःस्मृतः ॥ छंदोव्याहृतिवेदानांहेतुर्योत्रचतुर्मुखः ॥ १०६५ ॥ पूर्वापरोत्तराऽसव्यवक्त्रतस्तऋगाद यः ॥ब्रह्मणोविश्वमेतद्विजातंसर्वंचराचरं ॥ १०६६ ॥ एवमेवजगत्स्रष्टाह्येकएवस्वमायया॥ नानाभव त्यनानातुभेदभ्रमविवर्जितः ॥ १०६७॥

यत्रीत्रिष्टुब्जगत्यनुष्टुभांव्याहृतीनांमहश्चतुर्थीकानांवेदानांचऋगादीनामथर्वांतानांहेतुरित्यर्थः ॥ १०६५ ॥ क्रममेवस्फुटयति पूर्वेति तेपूर्वोक्ताऋग्वेदादयःप्रतिलोमक्रमेणच्छंदोंताःपूर्वपश्चिमोत्तरदक्षिणमुखेभ्यउत्पन्नाज्ञेयाइत्यर्थः नकेवलमेतएवोत्पन्नाःकिंत्वन्यदपिवि श्वंब्रह्मणःसकाशात्स्वायंभुवादिरूपाज्जातमित्यर्थः ॥ १०६६ ॥ एवंजगज्जन्मादिलक्षणैर्नारायणोऽद्वितीयत्वेनज्ञेयइत्याह एवमेवेति तुश ब्दोऽवधारणे तथाचयद्यपिमाययासनानाभवतितथाप्यनानैववस्तुतोभेदभ्रमैःसनिदानैर्वर्जितत्वादित्यर्थः ॥ १०६७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयंविवेकेननारायणलाभविधिरुक्तस्तदशक्तौतुदशमेनारायणीयव्याख्यानेव्याख्यातेनसहस्रशीर्षमित्यादिनास्वराडित्यंतेनग्रंथेनप्रोक्तं योगंकृत्वातंसाक्षात्कुर्यादित्याह यदैवमितिद्वाभ्यां यदाएवमुक्तविवेकविधयाअयंनारायणोज्ञातुंनशक्यतेतदानारायणीयप्रकरणेउक्तंप्र दर्शितंसहस्रशीर्षमित्यारभ्यस्वराडित्यंतेनग्रंथेनात्रोपनिषद्यप्युक्तमुपायंयोगरूपमाश्रित्यएवंविवेकवदेवसनारायणोज्ञातव्यःसाक्षात्कर्त्त व्योऽधिकारिणाभवतीतिद्वयोरर्थः ॥ १०६८ ॥ १०६९ ॥ फलवाक्यतात्पर्यमाह अस्येति अस्यमहोपनिषत्संज्ञस्यमाहात्म्यंश्रोत्रिय त्वादिगुणप्रयोजकत्वलक्षणंविविधंबहुधोक्तंयदासिद्धंतदाफलभूतविज्ञानस्यदोषबीजाविद्यायाउच्छेदहेतोर्माहात्म्यंकिमुवक्तव्यमित्य र्थः ॥ १०७० ॥ उपक्रांतसमाप्तिंदर्शयन्ओंनमइत्यंतान्यात्मप्रबोधोपनिषद्वाक्यान्येकपंचाशच्छ्लोकैरुपबृंहयितुंप्रतिजानीते एवमिति

यदैवंशक्यतेज्ञातुंनैवायमधिकारिणा ॥ तदानारायणीयोक्तमुपायंचात्रकीर्तितं ॥ १०६८ ॥ सहस्रशीर्षमि त्यादिस्वराडंतोक्तमेवहि ॥ आश्रित्यैवंसत्त्वदयेज्ञातव्योत्राधिकारिणा ॥ १०६९ ॥ अस्यग्रंथस्यमाहात्म्यमप्य त्रविविधंस्मृतं ॥ विज्ञानस्यतुकिंभूयोयतोमायालयंव्रजेत् ॥ १०७० ॥ एवंमहोपनिषदिकथितंज्ञानमीरि तं ॥ आत्मप्रबोधेकथितंशृणुवक्ष्यामितेधुना ॥ १०७१ ॥ उपायंप्रथमंप्राहुरत्रोपेयस्यलब्धये ॥ आत्मावाप्त्या वुपायौद्वौप्रणवोष्टाक्षरस्तथा ॥ १०७२ ॥ प्रणवोवाचकस्तस्यप्रत्यगानंदरूपिणः ॥ अष्टाक्षरोपिनैवंवैवाच्य वाचकयोर्भिदा ॥ १०७३ ॥ अकारश्चाप्युकारश्चमकारोमिलितंत्रयं ॥ ओंकारस्तेनसहितोनमोनारायणा यच ॥ अष्टाक्षरस्तुसंप्रोक्तःसर्वसिद्धिविधायकः ॥ १०७४ ॥

॥ १०७१ ॥ तत्रादौमंत्रद्वयात्मकउपायोब्रह्मात्मज्ञानायोक्तइत्याह उपायमिति अत्रात्मप्रबोधोपनिषदिप्रथममुक्तमितिशेषः प्राहुःपठं ति उपेयस्यब्रह्मात्मविद्यारूपफलस्य ॥ १०७२ ॥ प्रणवइति तथाचप्रत्यगानंदःसर्वांतरमद्वितीयंचवस्तुतद्रूपस्यात्मनःप्रणवोवाचकएव मष्टाक्षरोपिवाचकः अत्रवाच्यवाचकयोर्भिदाभेदोनचिंत्यः श्रुतौसामानाधिकरण्यनिर्देशेनवाच्यवाचकयोरभेदानुसंधानस्यकर्त्तव्यता सूचनादितिभावः ॥ १०७३ ॥ मंत्रयोःस्वरूपमाह अकारइति संहताकारादिवर्णत्रयात्मकःप्रणवमंत्रस्तदादिकंनमःपदंचतुर्थ्यंतनाराय णपदंचएतदुभयात्मकोऽष्टाक्षरः एतन्मंत्रद्वयंसर्वेप्सितप्रदमित्यर्थः ॥ १०७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनयोःपरमपुरुषार्थेविनियोगमाह एतयोरिति एतयोरुक्तमंत्रयोर्जपात्तथाएतयोर्मंत्रविधयाकार्यभूतंयद्यजनंबाह्यांतरदेवतापूजनं तस्मात्तथाएतयोर्मात्रापादाद्यभेददर्शनाद्वृत्तिरूपोपासनाच्चब्रह्मतत्त्वनिश्चयउत्पद्यते ततःस्वमात्मानंब्रह्मत्वेनसाक्षात्कृत्यसयोगीमुच्यते इत्यर्थः ॥ १०७५ ॥ यावन्नेति अनयोर्मंत्रयोर्वाच्यस्यब्रह्मणोयन्निर्गुणंरूपं कीदृशं मोक्षस्यसविलासाज्ञानरूपबंधध्वंसस्यआलंबनमधिष्ठानमतएवाद्वयंतद्यावत्साक्षान्नभवेत्तावत्तस्यब्रह्मणःसगुणंरूपंध्यायेदित्यर्थः ॥ १०७६ ॥ तच्चसगुणंरूपंब्रह्मण्यइत्यादिमंत्रेणोक्तमित्याह सगुणमिति यद्यपिसगुणंब्रह्मविष्णुरुद्रादिरूपैर्बहुविधंप्रसिद्धंश्रुतिस्मृत्यादौतथापिइदंरूपंनारदाद्यैरत्यंतादरेणोक्तत्वान्निरतिशयमित्यर्थः ॥ १०७७ ॥ इदंकिमतआह यज्ज्योतिरिति यज्ज्योतिश्चिद्घनंदेवकीवसुदेवद्वारास्वस्मिन्नागतंप्रादुरकरोत् किमर्थं भौमस्य

एतयोर्जपतोयोगीयजनात्समुपासनात् ॥ ब्रह्मविज्ञानउत्पन्नेसंशयादिविवर्जिते ॥ मुच्यतेस्वंसविज्ञायजन्मसंसारबंधनात् ॥ १०७५ ॥ यावन्ननिर्गुणंब्रह्ममोक्षालंबनमद्वयं ॥ आविःस्याद्धृदयेतावत्सगुणंब्रह्मचिंतयेत् ॥ १०७६ ॥ सगुणंब्रह्मसंप्रोक्तंविष्णुरुद्रादिभेदतः ॥ नानाविधंनारदाद्यैरिदमत्यंतमादरात् ॥ १०७७ ॥ यज्ज्योतिर्देवकीदेवीवसुदेवादजीजनत् ॥ भौमस्यब्रह्मणोगुप्त्यैदीप्तमग्निमिवारणिः ॥ १०७८ ॥ घोरआङ्गिरसोयस्मैविद्यांतांपौरुषीमदात् ॥ सएषपुरुषःसाक्षाद्विश्वरूपधरोहरिः ॥ १०७९ ॥

भूलोकगतस्यब्रह्मणोवेदस्यब्राह्मणजातेस्तपसश्चवागुप्त्यैरक्षायैज्वलंतमग्निमरणिरिवेत्यर्थः ब्रह्मतत्त्वंतपोवेदाब्रह्माविप्रःप्रजापतिरित्यमरः ॥ १०७८ ॥ यत्कर्तृकपरिग्रहेणपुरुषविद्याच्छांदोग्यतृतीयप्रपाठकोक्तावैतृष्ण्यहेतुतालक्षणांप्रशंसांगतेत्याह घोरइति गोत्रेणांगिरसोघोरनामकःकश्चिद्ब्राह्मणोयस्मैदेवकीपुत्रायश्रीकृष्णायतांप्रसिद्धांविद्यांपौरुषींपुरुषेयज्ञभावनात्मिकांषोडशाधिकशतवर्षायुषोनिरंतरायताप्रयोजिकामदात् दत्तवानित्यर्थः किंचयस्यपरमेश्वरत्वायनप्रमाणान्वेषणाप्रत्यक्षसिद्धत्वादित्याह सएषइति साक्षात्प्रत्यक्षेणैवपुरुषःसिद्धसर्वात्मताकोयतोविश्वरूपधरः जनन्याकुरुभिःसख्याश्रोतंकमुनिनापियः विश्वरूपधरोऽलोकिनिरुद्धोपिसनोगतिः अतएवस्मृतिमात्रेणसमस्तानर्थहरइत्यर्थः ॥ १०७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अस्यप्रभावःस्मृतिषुवहुधाप्रसिद्धइत्याह वेदेति प्रथमपादेभारतादौ द्वितीयेश्रीभागवते तृतीयेपुराणेष्वागमेषुचेतिशेषः ॥ १०८० ॥ यद्यपीति यद्यपिसर्वादेवताअस्यैवश्रीकृष्णस्यविभूतयोरूपाणितथापिताःसर्वाःप्रतिबिंबस्थानीयाबिंबस्थानीयमेनंदेवकीसुतंविहायमायायावशंधर्मसंबंधंप्राप्ताः उपाधेःप्रतिबिंबपक्षपातित्वादित्यर्थः ॥ १०८१॥ मायावशगत्वमेवस्फुटयति क्वचित्कामइति क्वचिद्विभूतौपरमुक्तेभ्योन्यन्मदप्रभृतिदूषणं कृष्णेत्वेतदुक्तजातीयंदूषणंनकिंचिदस्तिकालत्रयेपीत्यर्थः ॥ १०८२ ॥ तत्रोक्तदोषाणामभावंप्रतिलोमक्रमेणलोकदृष्ट्याप्याह अर्जुनस्येति पार्थस्यसारथ्यान्नमदादिकं दुर्योधनंविहायपाण्डवपक्षपातान्नलोभः बलभद्रात्युक्तीरनुजत्वेनतितिक्षतःकःक्रोधः मदनतातेकिंमदनस्यबलमितिभावः किंचमहाभारतेस्कंदोपाख्याने मदीयांशक्तिनिखातामब्रह्मण्यःकःसमुद्धरेदिति

वेदव्यासेनकथितःशुकेनचमहात्मना॥ नारदाद्यैरनेकैश्चमुनिभिस्तत्त्ववेदिभिः॥१०८०॥ यद्यप्यस्यैवसर्वाःस्युर्नानारूपाविभूतयः॥ तथापिमायावशगास्ताविनादेवकीसुतं ॥ १०८१॥ क्वचित्कामःक्वचित्क्रोधःक्वचिल्लोभःक्वचित्परं॥ मदादिकंनकृष्णेस्तिकिंचिदेतत्कदाचन ॥ १०८२ ॥ अर्जुनस्यसहायोयंपांडवानांचदैवतं॥भ्राताचबलभद्रस्यकनिष्ठोमदनस्यच॥ पिताब्रह्मण्यइत्युक्तोनिखिलेपिजगत्त्रये॥ १०८३॥ देहेयस्यपरिक्षीणंकौशलंविश्वकर्मणः ॥ रूपलावण्यसौभाग्यगुणादिविषयोमहान्॥ १०८४॥

स्कंदेनोक्तेसतिइंद्रेतत्रबलक्षयेणमूर्छितेपिभगवतोपेंद्रेणवामहस्तेनतस्याःशक्तेश्चालनात्स्कंदस्यब्रह्मण्यतागर्वःपरिहृतइतिप्रसिद्धंतत्स्मारयन्नाह ब्रह्मण्यइति तथाचसत्यरूपतपसःसंरक्षणायदेवकीपुत्रतांभजतोहयग्रीवादिरूपैर्मधुप्रभृतिदैत्यान्वेदसंरक्षणायनिघ्नतोहरपूजायांसत्यपालनायाक्ष्णापुंडरीकसंख्यांपूरयतोविष्णुरूपेणभृगुपादांकंचधारयतःश्रीकृष्णात्कोन्योब्रह्मण्यइतिभावः ॥ १०८३ ॥ देहेइति विश्वकर्मणोविधातुःकौशलंयस्यदेहेपरिक्षीणंकुंठतांगतंनप्रवृत्तमितियावत् भगवदिच्छामात्रतंत्रत्वादितिभावः यश्चभगवान्रूपादिगुणानांविषयोनिवासः महान्सर्वोत्कृष्टः तत्ररूपंवर्णःलावण्यंमुक्तावदंगेषुकांतिः सौभाग्यंमनोहरत्वं ॥ १०८४ ॥ ॥७१॥

CC-0. In Public Domain. Digitization by eGangotri

किंचयस्मिन्कामादिनापिमनोलग्नंमोक्षफलंप्रसूतेइत्याह गोप्यइति यस्यविषयतयायत्संबंधिनःकामात्सक्तचित्तागोप्योदिवंगताइतिसंबंधः एवमग्रेपि चैद्यःशिशुपालः संबंधोबांधवत्वबुद्धिः स्नेहःसख्यं भक्तिराराध्यत्वबुद्धिः दिवमितिपदंविवृणोति वैकुंठमिति कीदृशंवैकुंठं ब्रह्मलोकेत्याकाराआख्याप्रसिद्धिर्यस्यसतथातं तथाचहिरण्यगर्भलोकसंस्पृष्टस्तदुपरिष्टाद्वैकुंठलोकइतिभावः यतोब्रह्मलोकाद्ब्रह्मणाहिरण्यगर्भेणसहपरब्रह्मभावंगतःसंन्यासीनावर्त्ततेपुनःसंसारेनपततीतिद्वयोरर्थः ॥ १०८५ ॥ १०८६ ॥ तस्यदेशंवर्णंसौभाग्यंचाह सदेवइति द्वारकायांमथुरायांगोपबालकत्वेनगोकुलादौचस्थितोध्येयइतिपूर्वदलार्थः उत्तरार्धंस्फुटम् ॥ १०८७ ॥ लावण्यमाह इंद्रेति अंगा

गोप्यःकामाद्भयात्कंसोद्वेषाच्चैद्यादयोनृपाः ॥ संबंधाद्वृष्णयःस्नेहात्पांडवाद्रौपदीतथा ॥ नारदाद्याश्चमुनयो भक्त्यायस्यदिवंगताः ॥ १०८५ ॥ वैकुंठंब्रह्मलोकाख्यंयतोनावर्त्ततेगतः ॥ ब्रह्मणासहसंन्यासीब्रह्मैवपरमं पदं ॥ १०८६ ॥ सदेवोद्वारकावासोमाथुरोगोपबालकः ॥ सजलोजलदोयद्वत्तद्वन्नीलोतिशोभनः ॥ १०८७ इंद्रनीलमणिप्रख्यःसूर्यकोटिसमप्रभः ॥ आजानुबाहुःसुशिराःकंबुग्रीवोमहाहनुः ॥ १०८८ ॥ कर्णांतनयनस्तीक्ष्णनासोरक्तोष्ठसुस्मितः ॥ सुललाटकपोलश्चसुकर्णोनीलकुंतलः ॥ १०८९ ॥ नखदंतसमुद्भूतभाभिर्भर्त्सितचंद्रमाः ॥ विशालोन्नतवक्षःस्थविप्रपादविराजितः ॥ १०९० ॥ वृत्तपीनोन्नतकरपादपद्मद्वयांचितः ॥ मांसलोगुल्फजान्वंसकूर्परादिस्थलेष्वपि ॥ १०९१ ॥

निवर्णयति आजान्वित्यादिना कंबुवत्त्रिरेखाग्रीवायस्यसतथा महाहनुरित्यनेनगण्डयोरुन्नतत्वंध्वनितंच ॥ १०८८ ॥ कर्णांतेति कर्णपर्यंतविस्तृतनयनः तीक्ष्णोन्नतानासायस्यसतथा रक्तयोरोष्ठयोःप्रतिफलितंस्मितंयस्यसतथा शोभनंललाटंकपोलेचयस्यसतथा ॥ १०८९ ॥ नखेति नखेभ्योदंतेभ्यश्चसमुद्भूनाभिर्दीप्तिभिश्चंद्रस्यजेता विशालमुन्नतंचयद्वक्षस्तद्गतेनविप्रस्यभृगोःपादांकेनविराजितः ॥ १०९० ॥ वृत्तेति वृत्तंमंडलाकारंपीनमुन्नतंचयत्करद्वयंपादद्वयंचतद्रूपाभ्यांपद्मद्वयाभ्यामंचितोराजितः गुल्फादिदेशेषुमांसलःपीनः कूर्परोभुजसंधिः ॥ १०९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृशोदरइति वज्रसंहननोघनांगविन्यासः युवाषोडशवर्षावस्थः पीनेनोन्नतेनमहाशोभेनचजघनेनविराजितः ॥ १०९२ ॥ अंगुलीर्व र्णयति वर्त्तुलाभिरिति स्पष्टम् ॥ १०९३ ॥ चतुर्भुजइति उदारंमहदंगंशरीरंयस्यसतथा उदारोदातृमहतोरित्यमरः कौशेयंकृमिकोशो त्थमितिच कांच्यागुणेसमाबद्धानांघंटिकानांमधुरःस्वरोयस्यसतथा ॥ १०९४ ॥ अनेकेति अनेकरत्नघटितानिवलयादीनिभूषणानि यस्यसतथा वलयंप्रकोष्ठभूषणं अंगुलीयान्यंगुलिभूषणानि कोटिशब्दोऽत्रत्वावसंख्यातवचनः ॥ १०९५ ॥ ग्रैवेयेणेति ग्रैवेयंग्रीवाभूष णंतेनसहकौस्तुभंकंठेदधानः मुक्ताहारंवनमालांपत्रपुष्पमयींमालांचवक्षसिदधानः मकराकारेकुंडलेचकर्णयोर्दधानः ॥ १०९६ ॥ मयू

कृशोदरोतिपीनांगोवज्रसंहननोयुवा ॥ पीनोन्नतमहाशोभजघनेनविराजितः ॥ १०९२ ॥ वर्तुलाभिःसुदीर्घाभिःस्वांगुलीभिश्चशोभितः॥ करयोःपादयोर्युग्मेशाखाभिरिवपादपः॥१०९३॥ चतुर्भुजउदारांगःपीतकौशेयवस्त्रधृक् ॥ कांचीगुणसमाबद्धघंटिकामधुरस्वरः॥ १०९४॥ अनेकरत्नसंयुक्तवलयांगदनूपुरः ॥ नानांगुलीयसंलग्नरत्नकोटिविराजितः ॥ १०९५॥ ग्रैवेयेणसमंकंठेदधानःकौस्तुभंमणिं॥ हारंवक्षसिमुक्तानांसहितंवनमालया ॥ कर्णयोर्दीर्घयोर्देवोबिभ्रन्मकरकुंडले ॥ १०९६॥ मयूरपिच्छसदृशंहेमरत्नादिनिर्मितं ॥ बिभ्राणोमुकुटंतद्वत्तिलकंचातिशोभनं ॥१०९७॥ रक्षांहेममयींचित्रवर्णाकारांचमूर्द्धनि ॥ धम्मिल्लेऽनेकपुष्पौघमध्यगांरत्नराजितां॥ बिभ्रल्लोकत्रयीनारीमनोनयननंदनः॥ १०९८॥ शंखंचैवगदांचैवपद्मंचक्रंतथैवच ॥ दक्षिणाधःकरात्कृष्णःप्रादक्षिण्याद्दधत्सदा॥ १०९९ ॥

रेति मयूरपक्षैःसदृशंप्रांततोव्याप्तं सदृशमितिपाठेसमानवर्णं हेमादिमयंमुकुटंतथाकेसरतिलकंचदधानः ॥ १०९७ ॥ रक्षामिति तथार क्षांकेशबंधिनींहेममयींतुलक्षणांमूर्द्धनिधम्मिल्लेबिभ्रदितिसंबंधः कीदृशींरक्षां चित्रवर्णआकारोयस्याःसातथा तस्याश्चित्रवर्णत्वेहेतुगर्भं विशेषणद्वयं अनेकेत्यादि नानाविधपुष्पप्रभयारत्नानांप्रभयाचचित्रामितिभावः त्रिलोकीवर्तिनारीणांमनोनयनयोर्हर्षदः ॥ १०९८ ॥ शंखमिति दक्षिणाधस्तनकरमारभ्यप्रदक्षिणक्रमेणशंखादिकंदधदितिसंबंधः तथाचदक्षिणेऽधस्तनेकरेशंखमूर्ध्वेगदांवामोर्ध्वेकरेपद्मंत धस्तनेचक्रमित्यर्थः ॥ १०९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोविप्रेति गवादीनामार्तिहरः दैत्यांशत्वेनदेवादिद्रुहांराज्ञामार्तिदः ॥ ११०० ॥ अवतारकालमाह यदेति यदायदासतामार्तिस्तदैवप्रादुर्भावशीलइत्यर्थः ॥ ११०१ ॥ फलितमाह एषइति एषदेवकीनंदनरूपः सर्वदेवविभूतिकउक्तमंत्रयोःप्रतिपाद्यःसगुणरूपस्तावद्ध्येयोयावन्निर्गुणब्रह्मरूपेणनसाक्षाद्भवतीत्यर्थः ॥ ११०२ ॥ अथेत्यादेःप्रकाशमित्यंतस्यार्थक्रमेणार्थमाह सूर्येतिद्वाभ्यां हृदयकमलेतदुपलक्षितेसूर्यमंडलमध्यदेशेगोकुलादिदेशेवास्थितंतत्तल्लीलादिगुणैर्युतमेनंध्यायतोयोगिनोहार्द्दपद्मगतेचित्तेआत्मतयास्थितःप्रयत्नमं

गोभूविप्रसतामार्तिनाशनश्चार्तिदस्सदा॥ धर्मदेवद्रुहांतद्वद्भुजांदैत्यजन्मनाम् ॥ ११०० ॥ यदायदाहि धर्मस्यग्लानिःस्याद्धितदातदा॥ अवतारमसौकृष्णःकुरुतेदेवकीसुतः ॥ ११०१ ॥ एषनारायणःसाक्षात्सर्वदेववपुःपुमान्॥ ध्येयःसगुणरूपोयंमंत्रयोरधिदैवतं॥यावन्ननिर्गुणंब्रह्मभातिचित्तेत्रयोगिनः॥११०२॥ सूर्यमंडलमध्यस्थेहृदिपद्मेथवापुनः॥ गोकुलादौचवाबाह्येदेशेतत्तद्गुणैर्युतं ॥ ब्रह्मण्यंदेवकीपुत्रंध्यायतोमधुसूदनम् ॥ ११०३ ॥ हार्द्दपद्मेयदाचित्तस्थितआत्मतयातदा ॥ दीपवत्स्वात्मनोभानेहेतुर्भवतिसर्वथा ॥ ११०४॥ एतद्ध्यानादयंयोगीसर्वभूतस्थितंहरिं॥ ब्रह्मैकंकारणंनित्यंशोकमोहविवर्जितं ॥ ११०५ ॥ यतआत्मतयायातिशुद्धांतःकरणःपुमान्॥ कृष्णंध्यायंस्ततोयोगीनसीदतिकदाचन ॥ ११०६॥ द्वैतमद्वैतमेवंस्याज्ज्ञातेद्वैतंनविद्यते ॥ संसारादपिसंसारंदुःखदादपिदुःखदं ॥ सयातिपुरुषोभेदंयआत्मनिविलोकयेत् ॥ ११०७॥

तरापिभासमानोभवेत्तदानिर्गुणात्मनोभानेदीपवद्धेतुर्भवतीतिद्वयोरर्थः ॥ ११०३ ॥ ११०४ ॥ सर्वभूतस्थमित्यादेःसीदतीत्यंतस्यार्थमाह एतदितिद्वाभ्यां यतएतस्यश्रीकृष्णस्यध्यानात्शुद्धांतःकरणःपुमान्सर्वांतरादिलक्षणंब्रह्मआत्मत्वेनयातिलभतेततइदंवाक्यमनुपचरितार्थमेव इदंकिं कृष्णंध्यायन्नसीदतीतिद्वयोरर्थः ॥ ११०५॥ ११०६॥ द्वैताद्वैतमित्यादेरर्थमाह द्वैतमिति एवंश्रीकृष्णध्यानस्यसंसिद्धौसत्यांसर्वद्वैतमद्वैतभावंगच्छेयतःपरमार्थेज्ञातेसतिद्वैतंनतिष्ठतिकल्पितत्वादित्यर्थः अद्वैतस्याभयतांस्फुटयितुंद्वैतस्यानर्थतामाह संसारादिति पुनःपुनःसंसारमतिदुःखदंसयातियआत्मनिभेदंपश्यतीत्यर्थः ॥ ११०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भेददर्शनस्यानर्थत्वमप्यन्नृतविधयेत्याह यतइति मायामयेमायाप्रधानेसगुणइतियावत् एतादृशेप्यत्रात्मरूपेकोपिभेदोनास्तिसर्वस्यात्मविवर्तत्वात्प्रकृतिविकाराभेदन्यायेनापिभेदस्यायुक्तत्वादितिभावः ततोभेदस्यकुत्राप्यसत्वाद्भेदविशिष्टमात्मरूपंपश्यन्सन्नतिदारुणंदुःखंयातीतियुक्तमित्यर्थः ॥ ११०८ ॥ युक्तमेवस्फुटयति विपरीतेति सर्वःसर्वजातीयोलोकोजनोविपरीतेनविषादावमृतत्वाद्यवगाहिनादर्शनेनदुःखंयातीतिप्रसिद्धं तथात्मन्यद्वैतस्वभावेद्वैतदर्शनमपिविपरीतंभ्रमरूपमित्यर्थः ॥ ११०९ ॥ अत्रयथापराधंदंडमाह मृत्योरिति द्वैतवद्भेदविशिष्टंयथाभवतितथात्मनिदर्शनशीलस्यपुनःपुनर्मृत्युःफलंभवति अयंभेददर्शिनंप्रतिप्रसक्तःपुनःपुनर्मृत्युरनुचितोऽन्याय्योनभवतियतोबीजस्वभावानुसार्येवफलंप्रसिद्धमित्यर्थः एतदुक्तंभवति गौणात्मानंपुत्रादिकंमिथ्यात्मानंदेहादिकंवापरस्यघ्नन्राज्ञाएक

यतोमायामयेप्यत्रभेदःकोपिनविद्यते ॥ भेदवच्चततःपश्यन्दुःखंयात्यतिदारुणं ॥ ११०८ ॥ विपरीतदृशा सर्वःक्लेशंलोकोधिगच्छति ॥ अद्वैतेद्वैतदृष्टिश्चविपरीताप्रकीर्तिता ॥ ११०९ ॥ मृत्योर्मृत्युस्ततस्तस्यद्वैतवद्दर्शिनोभवेत् ॥ नैवानुचितरूपोयंफलंबीजोपमंयतः ॥ १११० ॥ ततोत्हृदयपद्मस्यमध्येभेदविवर्जितं ॥ आनंदात्मानमद्वैतंसर्वबुद्धिप्रकाशकं ॥ ११११ ॥ आधारभूतंजगतांप्रकाशानांचकारणं ॥ एनमात्मतयाजानन्नदुःखंकिंचिदाव्रजेत् ॥ १११२ ॥ यआत्माकथितःप्रज्ञासएवेहनचापरः ॥ प्रज्ञायासाप्रतिष्ठास्याज्जगतोस्याखिलस्यहि ॥ प्रतिष्ठायत्रसंप्रोक्तातद्ब्रह्मपरिकीर्तितं ॥ १११३ ॥

वारंवधेनदंड्यतेमुख्यात्मानंविदारणात्मकेनभेदेनघ्नन्कथंनपुनःपुनर्मृत्युंगच्छेदिति तदुक्तं अन्यथासंतमात्मानमित्यादि ॥ १११० ॥ ततोस्यसर्वांतराद्वितीयरूपस्यकृष्णस्यात्मत्वेनदर्शनमेवसर्वदुःखप्रहाणहेतुरित्याह ततइति एनंश्रीकृष्णं ॥ ११११ ॥ १११२ ॥ महावाक्यार्थस्यप्रथमाध्यायेव्याख्यानंकृतमितिसूचयन्संक्षिप्याह यआत्मेति यआत्माप्रज्ञारूपःकथितःप्रथमेध्यायेसएवेहऐतरेयशाखागतायामात्मप्रबोधोपनिषदिप्रज्ञानेत्रमितिवाक्येनोक्तइत्यर्थः तथाचप्रज्ञासंविद्रूपानेत्रीनिर्वाहिकायस्यविश्वस्येत्यादिरक्षरार्थस्ततएवविस्तरेणज्ञेयइतिभावः येयंप्रज्ञासासर्वस्यप्रतिष्ठाआधारोयत्रचविश्वस्यप्रतिष्ठाकालत्रयेपिस्थितिरूपातद्ब्रह्मेतिप्रकीर्तितंलक्षितंवेदांतेष्वित्यर्थः ॥ १११३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रज्ञेति प्रज्ञारूपत्वेनसर्वांतरंप्रतिष्ठात्वेनाद्वितीयंचएतदुक्तमंत्रार्थभूतंब्रह्मयदात्मत्वेनज्ञातंतदासर्वांसर्वप्रकारांदेहाद्यनात्मस्वात्मधीरूपाम विद्यांपरित्यज्यब्रह्मभावंयातीत्युत्तरेणसंबंधः ॥ १११४ ॥ तस्यरागेणभावनाशैथिल्येक्रममुक्तिर्वीतरागस्यतुसद्योमुक्तिरितिद्वयींगति माह स्वर्गादीति असौविद्वान्सरागश्चेत्स्वर्गादिगतान्भोगानुपभुज्यापिब्रह्मणाहिरण्यगर्भेणसहपरंब्रह्मयातिकुशलस्त्विहैवतयातीत्यर्थः ॥ १११५ ॥ यत्रज्योतिरित्यादेरर्थमाह यस्मिन्नित्यादिना यस्मिन्ब्रह्मणिस्वयंप्रकाशंप्रज्ञारूपंज्योतिर्निरतिशयआनंदश्चस्वरूपतया तिष्ठतितस्मिन्ब्रह्मणिप्राप्तुमिष्टेसतिशांतइत्थंश्रीकृष्णंप्रार्थयेदित्यर्थः ॥ १११६ ॥ इत्थंकथमित्याकांक्षायामाह देहीति हेभगवन्वासु

प्रज्ञाप्रतिष्ठाब्रह्मैतज्ज्ञातमात्मतयायदा॥ तदासर्वांपरित्यज्यदेहाद्यात्मधियंपुमान् ॥ १११४ ॥ स्वर्गादिलो कसंस्थानान्कामान्नानाविधानपि॥ उपभुज्यपरंब्रह्मयात्यसौब्रह्मणासह॥ अत्रैववापरंब्रह्मगच्छेत्कुशलभा वनात् ॥ १११५ ॥ यस्मिन्ब्रह्मणितज्ज्योतिरजस्रंस्वप्रकाशनं॥ आनंदश्चसदैवैकरूपातिशयवर्जितः ॥ त स्मिन्ब्रह्मणिसोऽभीष्टंप्रार्थयेत्शांतधीःसदा॥ १११६॥देहिस्वरूपंभगवन्वासुदेवस्वरूपधृक्॥देवकीनयना नंदसर्वदानंदनंदन ॥ १११७॥ एवंसंप्रार्थ्यमेधावीभगवंतमधोक्षजं॥ एवंचजायतेबोधोब्रह्माहमितियो गिनः ॥ आत्मप्रबोधोपनिषदुक्तंब्रह्मसमीरितं॥ १११८ ॥ कैवल्योपनिषत्प्रोक्तंश्रृणुतत्त्वमिहाधुना ॥ आ श्वलायननामात्रपृष्टवान्यःस्वयंभुवं ॥ १११९ ॥ ब्रह्माणंसर्वपितरमाश्वलायनएत्यतं ॥ इदंपप्रच्छमेधा वीब्रह्मविद्येच्छयापुरा ॥ ११२० ॥

देवहेदेवकीनयनानंदहेनंदनंदनसर्वदासनातनमच्युतादिलक्षणंस्वरूपंदेहीत्यर्थः ॥ १११७ ॥ एवंप्रार्थनयामेधाधारणावतीबुद्धिर्जायते तथाब्रह्मबोधश्चेत्याह एवमिति मेधावीभवतीतिशेषः उपसंहरति आत्मेति ॥ १११८ ॥ हरिहरयोरैक्यंस्फुटयितुंहरिवद्धरस्यप्रभावबो धिकांनिगमनस्थानीयांकैवल्योपनिषदमांतग्रंथेनव्याख्यातुंप्रतिजानीते कैवल्योपनिषदिति यदाश्वलायननामाब्रह्माणंप्रतिपृष्टवांस्तत्कै वल्योक्तंतत्वंश्रृणिवत्यर्थः ॥ १११९॥ तत्रप्रथमायाऋचोर्थमाह ब्रह्माणमिति आश्वलायनोनामऋग्वेदाचार्योब्रह्माणंपितामहंजिज्ञास यैत्यप्राप्यइदंपृष्टवानित्यर्थः ॥ ११२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंकिमतआह जानीहीति ज्ञाधातुरंतर्भावितण्यर्थोयं तथाचब्रह्मणोविद्यांज्ञापयेत्यर्थः कीदृशीं सर्वविद्याभ्यःश्रेष्ठांसद्भिःशमादिसंपन्नै र्हृदयांबुजेसेव्यमानांनिगूढामनधिकारिभ्योगोपितांचेत्यर्थः ॥ ११२१ ॥ सर्वेति ययाविद्ययाजीवःसर्वपापंपरित्यज्यपराद्व्याकृतात्परं निर्विशेषंपुरुषंयातीत्यर्थः ॥ ११२२ ॥ तस्मैइत्यादेरर्द्धर्चस्यार्थमाह एवमितिद्वाभ्यां स्पष्टं ॥ ११२३ ॥ तत्रश्रद्धाभक्तिश्चित्तवृत्तेर्ब्रह्मा कारतालक्षणंध्यानंचएतानित्रीणिसाधनानीत्याह आस्तिक्येति ॥११२४॥ यथाचश्रद्धादीनित्रीणिसाधनानितथासंन्यासोपीत्याह न कर्मणेति कर्मणाश्रौतादिनाप्रजयापुत्रादिनाधनेनदैवमानुषवित्तेनचेदमपरोक्षंब्रह्मज्ञानंनजायतेकिंतुतैरुपायैर्जातमपिब्रह्मज्ञानंपरोक्षमेव

जानीहिभगवन्विद्यांब्रह्मणःश्रेष्ठरूपिणीं ॥ सेव्यमानांसदासद्भिर्निगूढांहृदयांबुजे ॥ ११२१ ॥ सर्वपापंप याजंतुरचिरात्प्रत्यपोह्य च ॥ परात्परंमहेशानंपुरुषंयात्यसंशयं ॥ ११२२ ॥ एवंपृष्टस्तदातेनभगवान्प्रपिता महः ॥ तस्माउवाचयांविद्यांतांवक्ष्याम्यहमद्यते ॥ ११२३ ॥ आस्तिक्यबुद्धिसंयुक्तोगुरुभक्तिसमन्वितः॥ आत्मनोध्यानयोगेनब्रह्मविच्चप्रजायते ॥ ११२४ ॥ नकर्मणानप्रजयानधनेनकदाचन ॥ ब्रह्मज्ञानमिदं किंतुपारोक्ष्येणैवजायते ॥ ११२५ ॥ स्वर्गादप्यधिकंप्रोक्तमानंदात्मस्वरूपकं ॥ स्वप्रकाशान्यतंयत्तुप्रयांति यतयोमलाः ॥ ११२६ ॥ वेदांतज्ञानसंपन्नानिश्चितार्थाःसदैवहि ॥ विशुद्धधिषणाब्रह्मलोकेवात्रनचा परे ॥ ११२७॥

जायतेइत्यर्थः कर्मत्यागलक्षणसंन्यासेनैवापरोक्षसिद्धिरितिभावः ॥११२५॥ तस्यसंन्यासलभ्यतामेवस्फुटयन्परेणेत्यादेरर्थमाह स्वर्गा दिति स्वर्गान्नाकात्परमप्यन्यतंब्रह्मगुहानिहितत्वेनस्वप्रकाशंभवति तथाचपरोक्षतयातज्ज्ञानंप्रमेयाननुगुणत्वाद्भ्रमएवेतिभावः अतःसर्व दोषहीनायतयएवतदपरोक्षयंतीत्याह यत्त्वित्यादिना अमलाःसर्वप्रतिबंधहीनायतयएवयद्ब्रह्मप्रयांतिसाक्षात्कुर्वंतीत्यर्थः ॥ ११२६ ॥ यतीन्विशिनष्टि वेदांतेति वेदांतामहावाक्यानितेषांज्ञानंतात्पर्यावधारणंतद्रूपश्रवणसंपन्नानिश्चितार्थामननसंपन्नाविशुद्धधिषणानिदि ध्यासनपराश्चतेयतयोब्रह्मलोकेच्छालक्षणप्रतिबंधसत्वेब्रह्मलोकेतदभावेत्विहैवतत्प्रयांतीतिपूर्वेणसंबंधः ॥ ११२७ ॥ ॥८२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रब्रह्मलोकेगतानांपरब्रह्मप्राप्तिस्तुहिरण्यगर्भांतकालएवभवतीत्याह ब्रह्मलोकइति ॥ ११२८ ॥ अथध्यानयोगाभिनयपराणांविविक्ते त्यादिवाक्यानामर्थमाह योगमेवमिति एवंवक्ष्यमाणविधया वित्तिर्लाभः अंगानिसूचयति एकांतइत्यादिना सुखंक्षोभनिमित्तरहितमा सनंचैलाजिनकुशोत्तरलक्षणं अत्रचतुर्थगतक्रियापदेनसंबंधः ॥ ११२९ ॥ शौचमिति यथाविधानंयथाशास्त्रं विगतश्रमःशौचाद्यनु ष्ठानश्रमादनुद्विग्नः शिरश्चग्रीवाचशरीरंदेहमध्यंचएतानिऋजूनिकृत्वायतोजितासनोवद्धपद्माद्यासनकः ॥ ११३० ॥ संन्यासीति

ब्रह्मलोकेयदायांतिपरंब्रह्मसनातनं॥ ब्रह्मणासहतेसर्वेंतदायांतिनचान्यथा ॥ ११२८ ॥ योगमेवंप्रकुर्वी तपुरुषोब्रह्मवित्तये ॥ एकांतेनिर्मलेदेशेसुखमासनमाश्रितः ॥ ११२९ ॥ शौचंयथाविधानंचविधायवि गतश्रमः॥ समंकृत्वाशिरोग्रीवाशरीरंचजितासनः॥११३०॥संन्यासीसंनिरुध्यैवसर्वंबाह्यांतरेंद्रियं॥ गुरुं चभक्तिसहितःप्रणिपत्ययथाविधि ॥ ११३१॥ हृत्पुंडरीकंविमलंविचिंत्यार्कादिसंयुतं ॥ रागद्वेषादिसंशू न्यंतन्मध्येचिंतयेत्पुनः ॥ ११३२ ॥ अशेषदुःखसंशून्यमानंदात्मानमद्वयं ॥ अचिंत्यमव्यक्तमजंशिवंमा याविवर्जितं॥ ११३३॥ अनंतंवेदजनकंमरणादिविवर्जितं॥ एकंतथास्वयंज्योतिःसर्वशक्तिसमन्वितं ॥ रूपादिरहितंतद्वदद्भुतंपरमेश्वरं॥ ११३४॥ एवंचिंतयितुंचेतोयदिशक्तंभवेन्नहि॥ तदैवंचिंतयेदेनंसगुणंपर मेश्वरं॥११३५॥उमाभगवतीयेयंब्रह्मविद्येतिकीर्तिता॥ रूपयौवनसंपन्नावधूर्भूत्वात्रसास्थिता॥ ११३६

स्पष्टं ॥ ११३१ ॥ हृत्पुंडरीकमिति अर्कादिसंयुतंसूर्यचंद्राग्निमण्डलैर्युक्तंरागादिभीराजसधर्मैर्मलैस्तामसैर्मोहादिभिश्चरहितंहृत्पुंडरी कंपंचच्छिद्रादिलक्षणंविचिंत्यध्यात्वातन्मध्येवक्ष्यमाणरूपंपरमेश्वरंचिंतयेत् ॥ ११३२ ॥ तत्रादौनिराकारंध्येयमाह अशेषेति अव्य क्तंशब्दादिभूतगुणरहितं स्फुटमन्यत् ॥ ११३३ ॥ अनंतमिति वेदस्यब्रह्मपदोक्तस्यनिःश्वासविधयाजनकं अद्भुतमाश्चर्यकरं ॥११३४॥ एवंनिराकारध्यानाशक्तौवक्ष्यमाणविधयासाकारंध्यायेदित्याह एवमिति ॥ ११३५ ॥ उमेति उमानामदेवीकेनोपनिषदिब्रह्मविद्या रूपत्वेनयावर्णितासात्रपरमेश्वरविग्रहेवधूरूपेणस्थितेत्यर्थः ॥ ११३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याआगमोक्तंरूपंवर्णयति नानेति सर्वानार्योयस्याःप्रतिबिंबभूतायाचसर्वशक्तिरूपासर्वमहदादितत्त्वरूपाच ॥ ११३७॥ यस्याइति यस्याअनुग्रहेणसर्वोऽभीष्टंलभते सर्वपदार्थविवरणंजंतुरित्यादिना जंतुर्निकृष्टः देवादिरुत्तमइत्यर्थः ॥ ११३८ ॥ ब्रह्मेति ब्रह्मादिपदैःसृष्ट्यादिकर्माणिलक्ष्यंते तथाचविश्वसृष्ट्यादिकमिंद्राद्यैश्वर्यंचसानुग्रहनिरनुग्रहयोर्यत्कटाक्षयोरधीनस्थित्यपायकमित्यर्थः॥११३९ पीनोन्नतेति प्रौढत्वंविशालत्वं जघनंनितंबपुरोभागः केशरूपभ्रमरैर्नेत्रालकमीनाभ्यांचविलसितमुखचंद्रत्वेनविस्मयजनिका॥११४०

नानाजातिवधूनांहिबिंबभूतामहेश्वरी॥ सर्वशक्तिमयीदेवीसर्वतत्त्वमयीतथा ॥ ११३७॥ यस्याःप्रसादतःसर्वःस्वर्गमोक्षंचगच्छति ॥ इहलोकेसुखंतद्वज्जंतुर्देवादिकोपिवा॥११३८॥ ब्रह्माविष्णुस्तथारुद्रःशक्राद्याःसर्वदेवताः॥ कटाक्षपाततोयस्याभवंतिनभवंतिच ॥ ११३९॥ पीनोन्नतस्तनीप्रौढजघनाचकृशोदरी॥ चंद्राननामीननेत्राकेशभ्रमरमंडिता ॥ ११४०॥ सर्वांगसुंदरीदेवीधैर्यपुंजविनाशिनी ॥ कांचीगुणेनचित्रेणवलयांगदनूपुरैः॥ ११४१ ॥ हारैर्मुक्तादिसंजातैःकंठाद्याभरणैरपि॥ मुकुटेनापिचित्रेणकुंडलाद्यैःसहस्रशः॥११४२॥विराजितात्यनौपम्यरूपाभूषणभूषणा॥जननीसर्वजगतोद्व्यष्टवर्षाचिरंतनी॥११४३ तयासमेतंपुरुषंतत्पतितद्गुणाधिकं॥ ब्रह्मादीनांप्रभुंनानासर्वभूषणभूषितं॥ ११४४॥ द्वीपिचर्मावृतंशश्वदथवापिदिगंबरं॥ भस्मोद्धूलितसर्वांगंब्रह्ममूर्द्धौघमालिनं॥११४५॥ तथैवचंद्रखंडेनविराजितजटातटं॥ गंगाधरंस्मेरमुखंगोक्षीरधवलोज्ज्वलम् ॥ ११४६॥

सर्वांगेति शंभोर्धैर्यहरा तृतीयांतानांविराजितेतितृतीयगतेनसंबंधः कांच्यागुणेनसूत्रेण ॥ ११४१ ॥ हारैरिति मुक्तादिरत्नमयैर्हारैः अनौपम्यमुपमानानर्हरूपंयस्याःसातथा भूषणान्यपिभूषयतीतिसातथा नंद्यादित्वाल्ल्युः सर्वजगज्जननीत्वात्चिरंतन्यपिषोडशवर्षवेषाइतिद्वयोरर्थः ॥ ११४२ ॥ ११४३ ॥ तयेति तयाउमयासमेतंसहितंतस्याःसकाशाद्गुणैरधिकंनानाविधैःसर्वांगगतैर्भूषणैर्युतं ॥११४४॥ ॥८३॥
द्वीपीति व्याघ्रचर्मांबरंदिगंबरंवा ब्रह्मणश्चतुर्मुखस्यसुतायाअनुगमनापराधेननानाकल्पेषुछिन्नानांमूर्ध्नांसमूहेनकलितमालालंकृतं ॥ ११४५ ॥ तथैवेति स्पष्टं ॥ ११४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंदर्पेति चतुर्थपादेस्त्वयमितिशेषः ॥ ११४७ ॥ पूर्णेन्द्विति पूर्णेंदुसममुखाब्जं सूर्यसोमाग्निषुलोचनभूतेषुवर्चःअतिशयितंतेजोयस्य सतथातं ॥ ११४८ ॥ आजान्विति नागःशेषोयज्ञोपवीतंयस्यतं पद्माख्येनऊरुस्थोत्तानचरणत्वलक्षणेनासनेनस्थितं नासाग्रदत्तदृष्टिंचे त्यर्थः ॥ ११४९ ॥ वामेति वामःसुंदरोदेवः अनुग्राहकत्वात् ईशानतत्पुरुषाघोरसद्योजातवामदेवाख्याःपंचमूर्तयःक्रमेणसृष्टिस्थिति संहारप्रवेशानुग्रहप्रयोजीकाइतिहिशैवागमेषुप्रसिद्धं महादेवंदेवसमष्टिरूपस्यप्राणस्यापिजनकत्वात् गुरूणांसनकादीनामपिगुरुंसच्चिदा

कंदर्पकोटिसदृशंसूर्यकोटिसमप्रभं ॥ सृष्टिस्थित्यंतकरणंसृष्टिस्थित्यंतवर्जितं ॥ ११४७ ॥ पूर्णेन्दुवदनांभोजंसूर्यसोमाग्निवर्चसं ॥ सर्वांगसुंदरंकंबुग्रीवंचातिमनोहरम् ॥ ११४८ ॥ आजानुबाहुंपुरुषंनागयज्ञोपवीतिनं ॥ पद्मासनसमासीनंनासाग्रन्यस्तलोचनं ॥ ११४९ ॥ वामदेवंमहादेवंगुरूणांप्रथमंगुरुं ॥ स्वयंज्योतिःस्वरूपंतमानंदात्मानमद्वयं ॥ ११५० ॥ यतोहिरण्यगर्भोयंविराजोजनकःपुमान् ॥ जातःसमस्तदेवानामन्येषांचनियामकः ॥ ११५१ ॥ नीलकंठममुंदेवंविश्वेशंपापनाशनं ॥ हृदिपद्मेथवासूर्येवन्हौवा चंद्रमंडले ॥ कैलासादिगिरौवापिचिंतयेद्योगमाश्रितः ॥ ११५२ ॥ एवंचिंतयतस्तस्ययोगिनोमानसंस्थिरं ॥ यदाजातंतदासर्वप्रपंचरहितंशिवं ॥ ११५३ ॥ प्रपंचकारणंदेवमवाङ्मनसगोचरम् ॥ प्रयातिस्वात्मनायोगीपुरुषंदिव्यमद्भुतं ॥ ११५४ ॥ तमसःस्वात्ममोहस्यपरंतेनविवर्जितम् ॥ साक्षिणंसर्वबुद्धीनांबुद्ध्यादिपरिवर्जितं ॥ ११५५ ॥

नंदघनंचेत्यर्थः ॥ ११५० ॥ यतइति यतःकारणरूपात्सूक्ष्मसमष्टिरूपोहिरण्यगर्भोजातोयःस्थूलसमष्टिजनकः सर्वदेवानांजात्यंतराणांचवशेस्थापयितेत्यर्थः ॥ ११५१ ॥ नीलकंठमिति अमुंदेवंहृदब्जाद्यन्यतमदेशेयोगीचिंतयेदिति ॥ ११५२ ॥ ध्यात्वेत्यादेरुत्तरार्द्धस्यार्थमाह एवमितित्रिभिः एवंध्यानेनयदामनःस्थिरंजातंस्थिरतामापन्नंतदायोगीप्रपंचाभावाद्युपलक्षितंनिर्विशेषंस्वात्मनाअभेदेनप्रयातिसाक्षात्करोतीतित्रयाणांसंबंधः तमसःश्रुतौतमःपदोक्तस्यस्वात्ममोहस्याज्ञानस्यस्वरूपात्परंपरतोवर्त्तमानंतेनमोहेनसदाहीनंसाक्षिरूपेणसर्वभासकंचेत्यर्थः ॥ ११५३ ॥ ११५४ ॥ ११५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्याद्वितीयतामेवस्फटीकुर्वतःसब्रह्मेत्यादेरर्थमाह उमेत्यष्टभिः यउमासहायरूपेणसगुणःप्रकीर्तितःसएवनिर्गुणउक्तः यतोन्यःकोपिना
स्तीत्यर्थः ॥ ११५६ ॥ ब्रह्मेति ब्रह्मादिकंयत्तत्सर्वंमहेश्वरएवेतिचतुर्थेनसंबंधः स्पष्टं ॥ ११५७॥ एकादशेति पंचप्राणाभूतपंचकस
हितादिशश्चप्रदिशःकोणाश्चउपरिष्टादूर्ध्वंअधःअधरंविराजःशरीरभूतंब्रह्मांडंचेति ॥ ११५८ ॥ ११५९ ॥ विराडिति विराट्चजीवघ
नाख्योहिरण्यगर्भश्चईश्वरश्चसदसत्स्थूलसूक्ष्मंच ॥११६०॥ अस्यसर्वभावंदृष्टांतेनस्फुटयति एकएवेति निगदव्याख्यातंद्वयं॥११६१॥

उमासहायोभगवान्सगुणःपरिकीर्तितः॥ निर्गुणश्चसएवायंनयतोन्योस्तिकश्चन॥ ११५६॥ ब्रह्माविष्णुस्त
थारुद्रःशक्रोदेवसमन्वितः॥ अग्निःसूर्यस्तथाचंद्रःकालःसृष्ट्यादिकारणं ॥ ११५७॥ एकादशेंद्रियाण्यंतः
करणंचचतुर्विधं॥ प्राणाःपंचमहाभूतपंचकेनसमन्विताः ॥ ११५८॥ दिशश्चप्रदिशस्तद्वदुपरिष्टादधोपि
च ॥ स्वेदजादीनिभूतानिब्रह्मांडंचविराड्वपुः ॥ ११५९ ॥ विराट्हिरण्यगर्भश्चजीवईश्वरएवच ॥ मायात
त्कार्यमखिलंवर्त्ततेसदसच्चयत् ॥ यच्चभूतंयच्चभव्यंतत्सर्वंसमहेश्वरः ॥ ११६० ॥ एकएवयथास्वप्नेपुमा
न्नानाविधोभवेत् ॥ एकएवतथादेवइहनानाविधःस्थितः ॥ ११६१ ॥ गंधर्वनगरंयद्वद्गगनेतद्विवर्जिते ॥
उत्पद्यतेलीयतेचदृश्यतेप्यवतिष्ठते ॥ आनंदात्मनिनिर्भेदएवंभिन्नमिदंजडं ॥ ११६२ ॥ अद्वितीयात्मवि
ज्ञानान्नान्यःपंथाविमुक्तये ॥ विद्यतेनाप्यभून्नैवभविष्यतिकदाचन॥ ११६३॥ सर्वभूतस्थमात्मानंसर्वभू
तानिचात्मनि ॥ संपश्यन्ब्रह्मपरमंयातिनान्येनहेतुना॥ ११६४॥ एवंचेदयमात्मानंपुमान्ज्ञातुंनशक्नुयात्॥
अमुनावाप्रकारेणविजानीयात्सबुद्धिमान् ॥११६५॥

॥ ११६२ ॥ उक्ताद्वैतज्ञानस्यमोक्षासाधारणकारणतामाह अद्वितीयात्मेति ॥ ११६३ ॥ ज्ञानाभिनयेनोक्तार्थविशदीकारकं
मंत्रंपठति सर्वेति प्रथमपादेनसर्वांतरत्वमुक्तंद्वितीयेनतुसर्वोपाधीनांकल्पितत्वसूचनद्वाराऽद्वितीयत्वमिति एवंपश्यन्नेवब्रह्मभावंयातीत्यर्थः
॥ ११६४ ॥ आत्मानमित्यस्यार्थमवतारयति एवंचेदिति उक्तविधयात्मज्ञानाशक्तौवक्ष्यमाणविधयाप्रणवालंबनेनतत्संपादयेदित्यर्थः
॥ ११६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदर्थमाह अधरारणिमिति श्रुतावालपदोक्तंस्वंदेहंसंघातमधरारणिरूपंचितयित्वाऊर्ध्वारणिरूपंप्रणवंचिंतयेत् ॥ ११६६ ॥ मंथानमिति तत्रमंथनदंडरूपंमनोध्यात्वाध्यानक्रियांचनेत्रमाकर्षणरज्जुभूतांचिंतयित्वाध्यानावृत्तिरूपंविलोडनंमंथनंकुर्यादिति एवमिति ततोऽद्वैतात्मरूपोग्निःसकृदेकवारमपिसंजातःप्रादुर्भूतःसन्सर्वान्कामादिरूपान्पाशान्दहेत्ततोब्रह्मभावेनतिष्ठतीतिद्वयोरर्थः ॥ ११६७ ॥ ॥ ११६८ ॥ एवंवर्णिततत्पदार्थपर्यवसन्नताप्रदर्शनेनत्वंपदार्थशोधनपरस्यसएवेत्यादिश्लोकचतुष्टयस्यार्थमाह पाशानित्यूनविंशतिश्लोकैः यउक्तविज्ञानाग्निनापाशदाहस्याधिकारीप्रोक्तःसजीवस्तत्पदार्थभूतकेवलब्रह्मरूपएवेतिकुतस्तस्यसंसारइतिचेत्स्वाभिन्नाश्रय

अधरारणिमात्मीयंदेहंकुर्वीतपंडितः॥ त्रिमात्रंप्रणवंतद्वदुत्तरारणिसंज्ञितं ॥ ११६६ ॥ मंथानंचमनोध्यानंनेत्रंकृत्वाविलोडयेत्॥ एवंविलोडनात्पुंसआनंदात्माभिधोनलः ॥ ११६७ ॥ सकृत्संजातमात्रोपिपाशान्कामादिनामकान्॥ दहेत्तेषुप्रदग्धेषुस्वयमेकोवतिष्ठते ॥ ११६८ ॥ पाशान्दहतियोजीवःस्वात्मनोब्रह्मबोधतः॥ नभिन्नोब्रह्मणःसोयंकिंतुब्रह्मैवकेवलं ॥ निगूढंमाययास्वस्यशयानःपुरुषोयया ॥ ११६९ ॥ जीवनंप्राप्यकर्माणिकुरुतेविविधानिहि ॥ कृत्वाचफलमात्मायंभुंक्तेजीवःकृतंस्वयं ॥ ११७० ॥ स्वप्नेजागरणेदेहान्गृह्णन्नानाविधानपि॥ तृप्तिंचविविधैर्भोगैर्यातितृप्तिविवर्जितः॥ ११७१॥ सुषुप्तोमूर्छितोभूत्वाविक्षेपणविवर्जितः॥ आनंदंस्वात्मनस्तावद्भुंजानोपिनवेत्त्ययं॥ ११७२ ॥

विषयकाज्ञानेनैवेत्याह निगूढमिति स्वस्यमाययानिगूढमावृतंब्रह्मैवजीवइतिसंबंधः कामायेत्याकांक्षायामाह शयानइति ययामाययाशयानआवृतःपुरुषोनानोपाधिषुवसनशीलश्चायमात्माव्यवह्रियतइत्यर्थः ॥ ११६९ ॥ तयापुरुषतांगतस्यसंसारंदर्शयति जीवनमिति ययेत्यनुषंगः जीवनंप्राणधारणंप्राप्यकर्मणांकर्त्तातत्फलानांभोक्ताचभवतीत्यर्थः ॥ ११७० ॥ तयाप्रयुक्तमवस्थात्रयंचभुंक्तेइत्याह स्वप्नइति स्वप्नावस्थायांजाग्रदवस्थायांचनानाविधदेहान्गृह्णन्संस्तत्तज्जातिगतैर्भोगैस्तृप्तिंचयाति कीदृशः तृप्तिवर्जितःवस्तुतआगंतुकतृप्तिरहितः नित्यतृप्तब्रह्मरूपत्वादित्यर्थः ॥ ११७१ ॥ सुषुप्तइति सएवतमसामूर्छासमांसुप्तिंगतःसन्विक्षेपलक्षणप्रतिबंधापायेनस्फुरंतंस्वरूपानंदंभुंजानोपिमयास्वरूपानंदोभुक्तइतिनजानातीत्यर्थः ॥ ११७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रसर्वत्रहेतुर्मूलाज्ञानमेवेतिसदृष्टांतमाह मंत्रौषधैरिति यथामंत्रौषधादिभिःस्वरूपविस्मृतिःप्रसिद्धातथासंसृतौसांसारिकसर्वावस्थास्वात्मनःस्वरूपविस्मृतिरित्यर्थः ॥ ११७३ ॥ नकेवलंस्वतत्त्वविस्मृतिर्मायाप्रयुक्ताकिंतुसकलःसंसारोपीत्याह निर्दोषइति यथानिर्दोषस्यापिचोरादिसंगाद्बंधादिकंभवेत्तथाऽस्यात्मनःसंसारोपिमायासंगादित्यर्थः ॥ ११७४ ॥ साचमायासंसारस्येवस्वस्यापिकल्पिकानचात्माश्रयः अनादित्वात् तदुक्तं मायायामेवचासित्वामायास्तीतिप्रकल्प्यते ब्रह्मदृष्ट्यात्वविद्येयंनासीदस्तिभविष्यतीति तदेतत्स्मारयन्नाह रूपेति आकाशेरूपमिवमायाप्यात्मनिकल्पिताभातीवमिथ्याभूतांकल्पनांयाति तत्रचमायाकल्पनेमायैवप्रयोजिकेत्यर्थः॥ ११७५

मंत्रौषधैर्यथामूढआत्मानंनैववेत्तिहि ॥ माययैवंविमूढोयंवेत्तिकिंचिन्नसंसृतौ ॥ ११७३ ॥ निर्दोषोपियथाकश्चिद्दोषवानिवसंगतः॥ मायासंगात्तथाजीवःसंसारीवप्रतीयते ॥ ११७४ ॥ रूपशून्येयथाकाशेरूपंवेत्तिविमोहितः॥ मायाशून्येतथाजीवेमायाभातीवमायया ॥ ११७५॥ विद्वानपियथामोहंस्वप्नेगच्छत्यमूढधीः॥ एवमात्मापिसंसारेमोहंगच्छत्यमोहितः ॥ ११७६ ॥ शयानःपुरुषोदुःखंयावन्निद्राक्षयंव्रजेत् ॥ यथातथात्रजीवोपियावन्मायाक्षयंव्रजेत् ॥ ११७७॥ यथाप्रबोधयेत्कश्चित्शयानंकरुणावृतः ॥ रुदंतंबहुहिक्कादिमुंचंतंबहुदुःखितं ॥ ११७८ ॥ गुरुस्तथाकृपाविष्टःसंसारस्वप्नपीडितं ॥ तापत्रययुतंकंचिद्बोधयेत्करुणावृतः ॥ ११७९ ॥

मिथ्याभूतमोहप्रयोजकत्वंमायायानिद्रादृष्टांतेनस्फुटयति विद्वानपीति यथाविद्वान्पंडितःसर्वशास्त्रार्थबोधेनामूढधीरपिनिद्रादोषेणमोहंगच्छतितथायंमाययेत्यर्थः ॥ ११७६ ॥ विक्षेपेदृष्टांतमाह शयानइति यथासुप्तःपुरुषोनिद्राक्षयपर्यंतंदुःखंस्वाप्निकविक्षेपंगच्छतितथात्मापिमायापर्यंतंसांसारिकंदुःखंयातीत्यर्थः॥ ११७७॥ तस्याश्चमायानिद्रायाःक्षयःकरुणातंत्रगुरूपदेशरूपभेरीशब्देनभवतीतिसदृष्टांतमाह यथेतिद्वाभ्यां यथाकश्चित्सुप्तंस्वप्नेविकृतंदृष्ट्वादुःखेनरुदंतमतएवहिक्काशब्दसदृशंरोदनशब्दंमुंचंतंकरुणयाबोधयेत्तथागुरुरपिमाययानिद्रयासंसारदुःखमनुभवंतमितिद्वयोरर्थः ११७८ ॥ ११७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथादृष्टांतेप्रतिबोधमात्रेणसर्वदुःखनाशस्तथात्रात्मबोधेपीत्याह प्रतिबुद्धइति स्वाप्नंस्वप्नसंबंधि एतत्सांसारिकं ॥ ११८० ॥ साप्रबोधावस्थातुरीयावस्थेत्युच्यतेइत्याह जीवस्येति स्पष्टं ॥ ११८१ ॥ अस्याः किमपेक्षयातुरीयत्वमतआह स्थूलमिति क्रमेणस्थूलाद्यभिमानरूपमवस्थात्रयंजीवविहारस्थानत्वेनपुरत्रयमित्युक्तंप्रबोधेनश्यतीत्यतस्तदपेक्षयातुरीयत्वंयुक्तमितिभावः ॥११८२॥ तुरीयाप्तेःपूर्वंपुरत्रयेक्रीडामभिनयति मारंमारमितित्रिभिः पुनःपुनर्मरणेनशरीरग्रहणंपुनःपुनर्ग्रहणपूर्वकंतत्त्यागंचकुर्वताजन्माद्यवस्थानांयत्परिशीलनं

प्रतिबुद्धोयथास्वाप्नंनरोदुःखंनपश्यति ॥ प्रतिबुद्धस्तथाजीवोनैतद्दुःखंप्रपश्यति ॥ ११८० ॥ जीवस्यप्रतिबोधोयोजायतेभाग्ययोगतः ॥ सावस्थादुर्लभानॄणांचतुर्थीकस्यचिद्भवेत् ॥ ११८१ ॥ स्थूलंसूक्ष्मंतथाऽज्ञानंपुरत्रयमुदीरितं ॥ जीवस्यतत्तुरीयाप्तौनाशमेतिनचान्यथा ॥ ११८२ ॥ मारंमारंचगृह्णीतेस्थूलंदेहंसदैवसः ॥ कर्मानुसारतस्तद्वद्ग्राहंग्राहंजहातिच ॥ ११८३ ॥ जातोबालोयुवावृद्धोमृतोजातःपुनस्तथा ॥ बंभ्रमीत्येषसंसारेघटीयंत्रसमोवशः ॥ ११८४ ॥ उच्चावचानयंदेहानात्मज्ञानविवर्जितः ॥ प्राप्नोत्येवानुभोगांतेनाशमेतिपुनःपुमान् ॥ ११८५ ॥ तुरीयंप्राप्यतेरूपंयज्जीवेनात्मनःसदा ॥ आधारभूतंनिर्देश्यमानंदात्मस्वयंप्रभं ॥ ११८६ ॥ सर्वस्यजगतोहेतुंकार्यकारणवर्जितं ॥ एतस्माज्जायतेप्राणोमनःकर्मेंद्रियाणिच ॥ खंवायुर्ज्योतिरापोवैभूमिर्विश्वस्यधारिणी ॥ ११८७ ॥

तदेवपुरत्रयेभ्रमणमितिद्वयोरर्थः ॥ ११८३ ॥ ११८४ ॥ इदंभ्रमणमज्ञानेसत्यवश्यंभवतीत्याह उच्चावचानिति अज्ञोनानादेहान्प्राप्नोत्येव अनु अस्यैवविवरणंभोगांतइति प्रारब्धभोगांतेनाशंमरणमेत्येवचेत्यर्थः ॥ ११८५ ॥ एवंवर्णितस्यत्वंपदार्थस्यतत्पदार्थेपर्यवसानंदर्शयति तुरीयमितिद्वाभ्यां यज्जीवेनतुरीयंस्वरूपंप्राप्यतेतत्स्वरूपंजगदाधारत्वेननिर्देश्यंप्रतिपाद्यंश्रुतिभिः अतएवस्वयंप्रकाशानंदरूपं अद्वितीयत्वात् ॥ ११८६ ॥ अद्वितीयत्वस्फुटीकारायतस्यजगदुपादानतामाह सर्वस्येति कार्याणांकारणैरुपकरणादिभिर्वर्जितंसहकार्यनपेक्षमितियावत् एतस्मात्तुरीयरूपादेवप्राणादिकंजायतेइत्यर्थः ॥ ११८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्परमित्यादिकृकूत्रयंशोधितपदार्थकंशिष्यंप्रतिपदार्थयोरैक्योपदेशरूपत्वान्महावाक्यस्थानीयमितिदर्शयन्नाह एतदिति एतत्पदार्थविधयोक्तमादिशंतिवाक्यार्थविधयाप्रतिपादयंतीति ॥ ११८८ ॥ तदेवपठति यत्परमितित्रिभिः यत्परंब्रह्म कीदृशं सर्वरूपंविश्वाधारत्वेन महत्परिच्छेदातीतंदुर्लक्ष्यंचतदेवसर्वांतरंतेस्वरूपंयच्चतेस्वरूपंतदेवतद्ब्रह्मणःस्वरूपमित्यर्थः ॥ ११८९ ॥ एतत्स्फुटयन्फलमाह जाग्रदिति जाग्रदादिप्रपंचंयत्प्रकाशतेप्रकाशयतितच्चैतन्यंब्रह्मैवयच्चब्रह्मतदहमितिज्ञानात्समूलबंधध्वंसइत्यर्थः ॥ ११९० ॥ चैतन्यस्यमाय

एतत्तुरीयंगुरवएवमात्मतयासदा॥ आदिशंतिमहात्मानःशिष्यान्विगतकल्मषान्॥ ११८८॥ यत्परंब्रह्मसर्वात्मविश्वस्यायतनंमहत् ॥ सूक्ष्मात्सूक्ष्मतरंनित्यंतदेवत्वंत्वमेवतत् ॥ ११८९ ॥ जाग्रत्स्वप्नसुषुप्त्याख्यप्रपंचंयत्प्रकाशते॥ तद्ब्रह्माहमितिज्ञात्वासर्वबंधैःप्रमुच्यते ॥ ११९० ॥ त्रिषुधामसुयद्भोग्यंभोक्ताभोगश्चयोभवेत् ॥ तेभ्योविलक्षणःसाक्षीचिन्मात्रोहंसदाशिवः॥ ११९१ ॥ एवंसद्गुरुणादिष्टमात्मानंप्रतिपद्यते ॥ अणोरणुतमंतद्वन्महतोपिमहत्तरम् ॥ ११९२॥ मय्येवसकलंजातंमयिसर्वंप्रतिष्ठितं ॥ मयिसर्वंलयंयातिविश्वमेतच्चराचरं॥ सर्वभेदविनिर्मुक्तंतद्ब्रह्माद्वयमस्म्यहं॥ ११९३॥

याप्रपंचरूपत्वेपिवस्तुतःशुद्धबुद्धमुक्तादिस्वभावतामाह त्रिष्विति एवंजानीहीतिशेषः एवंकथं त्रिषुधामसुजाग्रदाद्यवस्थासुयद्भोग्यंस्थूलंसूक्ष्ममानंदश्चभोक्ताविश्ववैश्वानरादिसंज्ञोभोगस्तदाकारवृत्तिलक्षणस्तेभ्योमलिनादिरूपेभ्यःशुद्धादिरूपेणविलक्षणोहंचिदेकरूपःसदासर्वदाशिवस्तुरीयएवास्मीति ॥ ११९१ ॥ एवमुपदिष्टस्याधिकारिणोमननाभिनयपरंमय्येवेत्याद्यृक्चतुष्टयमर्थतःसंगृह्णाति एवंसद्गुरुणेतिषड्भिः सद्गुरुणाआदिष्टउपदिष्टःशिष्योऽतिदुर्लक्ष्यंपरिपूर्णंचात्मानमेवंप्रतिपद्यतेमनुतइत्यर्थः ॥११९२॥ एवंकथमित्याकांक्षायामाह मय्येवेत्यादिना स्पष्टं ॥ ११९३ ॥ ॥८६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वरूपमिति द्वितीयांतानांमांवदंतिश्रुतयइतिशेषेणसंबंधः ज्ञानकर्मलक्षणव्यापारभेदेनद्वयात्मकैर्द्विविधैरिन्द्रियैस्तद्वत्प्राणादिभिश्चशून्यमितिसंबंधः निगदव्याख्यातमन्यत्त्रिषु ॥ ११९४ ॥ ॥ ११९५ ॥ ॥ ११९६ ॥ प्रपंचवर्जितत्वउपपत्तिमाह भूतेतिद्वाभ्यां यतःसर्वःप्रपंचआकाशेगंधर्वनगरवन्मय्यध्यस्तस्ततोमयिवस्तुतःकोपिभेदःकालत्रयेपिनास्तीतितदर्थः ॥ ११९७ ॥ ११९८ ॥ फलवाक्यार्थमाह एवमिति तथाचश्रुत्यंतरंब्रह्मवेदब्रह्मैवभवतीति ॥ ११९९ ॥ उक्तविज्ञानाशक्तस्यांतःकरणशुद्ध्युपायमाह सगुणमिति सगुण

विश्वरूपंपुराणंचपुरुषंतेजसांनिधिम् ॥ इंद्रियैःसकलैःशून्यंज्ञानकर्मद्वयात्मकैः ॥ ११९४ ॥ प्राणबुद्ध्यादिभिस्तद्वद्भगवंतंमहेश्वरं ॥ सर्वज्ञंद्वैतरहितमवाङ्मनसगोचरं ॥ ११९५ ॥ वेदैरनेकैःसंवेद्यंवेदांतार्थप्रकाशकं ॥ सर्वविद्यागुरुंदेवंप्रपंचेनविवर्जितं ॥ ११९६ ॥ भूतभौतिकरूपोयंमाययासहितोपिच ॥ आनंदात्मनिनिर्द्वैतेयतोध्यस्तोखिलोपिच ॥ ११९७ ॥ गंधर्वनगरंयद्वदध्यस्तंगगनेमले ॥ ततोनकोपिभेदोत्रभूतोभवतिभाव्यपि ॥ ११९८ ॥ एवंज्ञात्वापरंरूपमानन्दात्मानमद्वयम् ॥ सर्वबुद्धिस्थितंसर्वबुद्धिसाक्षिणमीश्वरं ॥ प्रयातिपुरुषःशुद्धंनित्यंसदसतःपरं ॥ ११९९ ॥ सगुणंब्रह्मचेज्ज्ञातुंनिर्गुणंचनशक्नुयात् ॥ पुरुषोनतदान्यासंकुर्वीताशुद्धमानसः ॥ १२०० ॥ किंतुनित्यंजपेदेतंरुद्राध्यायमनिंदितं ॥ सर्वपापहरंयस्माज्जपोनान्योधिकोस्तिहि ॥ १२०१ ॥ सजपाच्छुद्धहृदयोवैराग्यंपरमंगतः ॥ उपायैर्वापिपूर्वोक्तैश्चतुर्थाश्रममाव्रजेत् ॥ १२०२ ॥ तत्रापियावन्नैवस्यात्साक्षात्कारःपरात्मनः ॥ रुद्राध्यायंजपंस्तावदुमानाथंविचिंतयेत् ॥ १२०३

मुमासहायलक्षणंनिर्गुणमद्वयादिलक्षणंवाज्ञातुंसाक्षात्कर्तुंनशक्तोभवेत्तदाझटितिसाक्षात्कारकामनयासंन्यासंनकुर्यात्किंतुचित्तशुद्धयेयतेत चित्तशुद्धिसाधनानांमध्येनमस्तेइत्यादिरुद्राध्यायपाठसमंनास्तीत्यर्थः ॥ १२०० ॥ १२०१ ॥ वैराग्यातिशयलक्षणचित्तशुद्धिदार्ढ्येसतिसंन्यसेदित्याह सजपादिति १२०२ ॥ तत्रापीति तत्रसंन्यासग्रहणेपियावत्साक्षात्कारोनभवतितावदुमानाथध्यानमुक्तजपसहितमवश्यंकुर्यादित्यर्थः १२०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उमानाथध्यानस्यसाक्षात्कारद्वारामोक्षसाधनताप्रतिपादिकांश्रुतिंपठति उमेति भूतयोनिंसर्वोपादानत्वेनाद्वयंसमस्तसाक्षिरूपेणसर्वां तरंच श्रुतौनकारलोपश्छांदसः तमसोमूलाज्ञानात्परंचेति ॥ १२०४ ॥ यथाकालमिति आस्तिक्यंश्रद्धां ॥ १२०५ ॥ एवमिति ब्रह्मोपनिषत्प्रभृतिभिरुपदिष्टमंत्राध्यायेप्रदर्शितंज्ञानमुक्तोपायैःशुद्धांतःकरणस्यजायतइत्यर्थः ॥ १२०६ ॥ उत्तराकांक्षामुत्थाप यन्श्वेतकेतुरत्रोक्तविधसंन्यासेनात्मलाभेनिदर्शनभूतइत्याह श्वेतेति हिजाबालेपिप्रसिद्धः आत्मोपनिषदाआत्मतत्त्वप्रतिपादिकया

उमासहायंपरमेश्वरंप्रभुंचतुर्भुजंनीलकंठंप्रशांतं ॥ ध्यात्वामुनिर्गच्छतिभूतयोनिंसमस्तसाक्षिंतमसःपर स्तात् ॥ १२०४ ॥ यथाकालंहिवेदांतश्रवणादीनिसर्वदा ॥ कुर्वीतचगुरोर्भक्तिंपरमास्तिक्यमाश्रितः ॥ १२०५॥ एवंहिकुर्वतोनित्यंयतेरत्रप्रबोधनम्॥ ब्रह्मोपनिषदाद्युक्तंजायतेयदिहेरितं ॥ १२०६॥ श्वेत केतुर्हिसर्वज्ञोयतीनांप्रथमोहिसः ॥ विज्ञातवान्परंतत्त्वमात्मोपनिषदापिहि ॥ १२०७॥ तस्मादात्मैषविज्ञे यःपरहंसेनसर्वदा ॥ अस्यमुख्योयमाचारोजघन्योन्यःप्रकीर्तितः ॥ १२०८ ॥ इतितेकथितंसर्वंपृष्टंयद्धि त्वयाधुना॥ परहंसाश्रमेभूयःकिमन्यच्छ्रोतुमिच्छसि ॥ १२०९ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यानं दात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेगर्भाद्युपनिषत्सारार्थप्रकाशोना मैकादशोध्यायःसमाप्तः॥ ११ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

उपनिषदाछांदोग्यषष्ठाध्यायरूपयाअपिशब्दादुक्तसाधनैश्चावश्यकैःपरंतत्त्वंज्ञातवानित्यर्थः ॥ १२०७ ॥ तस्मादिति अस्यपरम हंसस्यअयंज्ञाननिष्ठारूपआचारोमुख्यआवश्यकः अन्यएतद्विरुद्धस्तुजघन्यःअपकृष्टत्वाद्धेयइत्यर्थः ॥ १२०८ ॥ उपसंहरति इति तेइति ॥ १२०९ ॥ उत्तीर्यांबुधिमादग्धासुरपत्तनरोचिषे ॥ प्रमोदिताधिनाथायनमोमारुतसूनवे ॥ १ ॥ इतिश्रीदत्तकुलतिलककृष्णचं द्रात्मजदिलारामसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतावात्मपुराणटीकायांसत्प्रसवाख्यायामेकादशोध्यायः समाप्तः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे एकादशोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे द्वादशाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ नवोक्तिस्फुरिताव्यक्तैस्त्रिभिरन्वयशालिनी ॥ वासुदेवतनूरान्ध्यंद्वादशेनायिताहरेत् ॥ १ ॥ अस्यार्थः ॥ नवःस्तुतिस्तद्रूपाभिरुक्तिभिर्वेदवचनैःस्फुरिताविभाता व्यक्तैर्वामनावतारेप्रकटैस्त्रिभिःपादैःसर्वत्रसंबद्धा द्वादशयेइनाःप्रभवोभक्तैराराध्याः केशवादिसंज्ञाद्वादशविग्रहास्तद्वदाचरंतीतद्रूपेणस्थितेतियावत् एतादृशीवासुदेवस्यमूर्तिरांध्यंप्रतिबंधकदुरितरूपंतमोहरत्विति इनःसूर्ये नृपेपत्यौचेतिकोशात् द्वादशाक्षरमंत्रपक्षेनवसंख्याउक्तयउच्यमानाअवस्थाअकारोकारमकारबिंदुनादकलाशक्त्यर्द्धमात्राशांताख्या यस्यसनवोक्तिःप्रणवस्तेनविभाता व्यक्तैःस्पष्टैःप्रणववद्दुरवगाहताहीनैस्त्रिभिःपदैर्नमःप्रभृतिभिर्युक्ता द्वादशभिरिनैःप्रभुभिःकेशवादिभिरादित्यैर्वाप्रतिवर्णमयितासमन्विता अयगताविति स्मृतेः तादात्म्यमापन्नेतियावत् वासुदेवस्यतनूर्मंत्रमयीमूर्तिस्तमोहरत्विति शंभुपक्षेनवोरुद्राध्यायरूपास्तुतिस्ततःस्फुरिता व्यक्तैःस्पष्टैस्त्रिभिर्नेत्रैरन्विता वंप्रचेतसिजानीयादितिकोशात्वोवरुणस्तस्यासुःप्राणभूता

श्रीगणेशायनमः॥ कथाश्चित्राइमाःश्रुत्वाशिष्यःश्रद्धासमन्वितः॥ श्वेतकेतोःकथांश्रोतुंपप्रच्छस्वगुरुंपुनः ॥ १ ॥ भगवन्भवताख्यातमितरातनयस्ययत्॥ ज्ञानंकौषीतकेस्तद्वदादित्यस्यमहात्मनः॥ २ ॥ सश्वेताश्वतरस्यापिकठस्यापिचतित्तिरेः॥ जाबालादिमुनीशानांयोगसंन्याससंयुतम्॥ ३ ॥ आख्यानान्यतिचित्राणि बहूनिविविधानिच॥ श्रुतानितानिसर्वाणिमयातेवदनाद्गुरो ॥ ४ ॥

ब्रह्मविद्यायाभृगवेपुत्रायैवतपस्तुष्टेनतेनदत्तातस्यादेवआवेशेनप्रवर्तकोमहादेवस्तस्यमूर्त्तिः यद्वामहोपनिषदुक्तविधयावासुदेवस्यनारायणस्यमूर्तिर्महादेवाख्या द्वादशेशय्यामहंद्वादशमेकआह्वरितिभागवतपंचमस्कंधेद्वादशत्वेनोक्तेऽहंकारेऽनायिताप्राणवदाचरंतीतदधिष्ठातृदेवतात्वात्तमोहरेदिति ग्रंथप्रमेयपक्षेतु नवावृत्तिकोक्तिशालिनामहावाक्येनविभाता व्यक्तैर्नामरूपाभ्यांव्याकरणंनीतैस्त्रिभिस्तेजोवन्नैःसहसंबद्धा मूलाज्ञानप्रहारेप्रलयकालिकद्वादशार्कवदाचरंती यद्वाद्वादशेनाध्यायेनायितालब्धा वासुदेवस्यपरमात्मनस्तनूर्मूर्त्तिःसल्लक्षणाआंध्यमावरणंहरेदिति ॥ १ ॥ उक्तानुवादपूर्वकंशिष्यप्रश्नंछांदोग्यपष्ठार्थगोचरमभिनयति कथाइतिचतुर्विंशतिश्लोकैः इतरातनयस्यऐतरेयस्य सश्वेताश्वतरस्यश्वेताश्वतरसहितस्यकठस्य षष्ठ्यंतानांज्ञानपदेनसंबंधः योगेत्यादिज्ञानविशेषणं नान्यत्तिरोहितं चतुर्षु ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रप्रथमाध्यायाख्यानमनुवदति प्रजानामितित्रिभिः यत्रप्रथमगताख्यानेमुनयःप्रजानांहितायब्रह्मात्मज्ञानमूचुः गर्भगोवामदेवश्च विचारतत्पराधिकारिणांहितायतदुक्तवानितिसंबंधः ॥ ५ ॥ करेति यत्रविज्ञानेसतिसंघातविलक्षणआत्माब्रह्मत्वेनज्ञायते ॥ ६ ॥ श्रवणादिति यत्रप्रथमाख्यानार्थेश्रवणानंतरंविवेकेनमननेनावधारितेसतिकामुकस्यापिसर्वशरीरेषुवैराग्यंजायते ॥ ७ ॥ द्वितीयगताख्यानमाह प्रतर्दनस्येति तृतीयार्थमाह गार्ग्यस्येति गार्ग्योबालाकिः ॥ ८ ॥ ९ ॥ चतुर्थार्थमाह अश्विभ्यामितिद्वाभ्यां मंत्रद्रष्टुर्दधीचिऋषेर

प्रजानांमुनयोयत्रकरुणाक्रांतचेतसः ॥ ऊचुर्ब्रह्मात्मविज्ञानंवामदेवश्चगर्भगः ॥ मीमांसाक्रांतचित्तानामुक्तवानधिकारिणां ॥ ५ ॥ करामलकवद्यत्रब्रह्मात्माज्ञायतेनृभिः ॥ देहादिजडसंघातात्सर्वदैवविलक्षणः ॥ ६ ॥ श्रवणाद्यत्रवैराग्यंकामुकस्यापिजायते ॥ स्वदेहेन्यशरीरेचविवेकादवधारिते ॥ ७ ॥ प्रतर्दनस्यगमनंदैवोदासेर्महात्मनः ॥ योद्धुकामस्यवैस्वर्गेविजयश्चास्यधीमतः ॥ ८ ॥ इंद्रतोपिवरप्राप्तिर्दुर्लभायाशरीरिभिः ॥ गार्ग्यस्यद्विजवर्यस्यसंवादोऽजातशत्रुणा ॥ ९ ॥ अश्विभ्यांचतथामंत्रद्रष्टुश्चित्रकथाश्रयः ॥ यस्यसंगात्त्वयावंशस्त्रिपर्वासससमीरितः ॥ स्त्रीपुंसयोरभिन्नोयंविभिन्नोपिचकुत्रचित् ॥ १० ॥ दध्यङ्ङाथर्वणोयत्रशक्रस्याप्युपकारकृत् ॥ शक्रेणनिहतःसाधुरर्थेसोश्विकुमारयोः ॥ ११ ॥ कथाजल्पाभिधाप्रोक्तायाज्ञवल्क्यस्यचद्विजैः ॥ वादोस्यापिचतेनैवभूभुजाजनकेनहि ॥ द्विवारंतस्यसंन्यासोमैत्रेय्याश्चोपदेशनं ॥ १२ ॥ कारणेष्वपिमीमांसाविप्राणांन्यासिनांतथा ॥ नाचिकेतसमाख्यानंवरैर्नानाविधैर्युतं ॥ १३ ॥

श्विभ्यांसंवादउक्तइत्यनुषंगः यस्याश्विभ्यांसहसंवादस्यप्रसंगात्त्रिपर्वात्रिविधाःपर्वस्थानीयाःपुरुषायत्रसतथास्त्रीपुंसयोःसंबंधी पुनःकीदृशः कुत्रचिदभिन्नःपरस्परसरूपाकारनामकः क्वचिदंशेतुविभिन्नोविरूपाकारनामकइतिद्वयोरर्थः ॥ १० ॥ ११ ॥ पंचमादित्रयार्थमाह कथेति द्विवारंजनकेनसंवादःषष्ठेउक्तः ॥ १२ ॥ अष्टमादिद्वयार्थमाह कारणेष्विति नाचिकेतसंनचिकेतसःसंबंधि ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमार्थमाह यजुषामितिद्वाभ्यां वरुणंप्रतीतिशेषः बह्वपंचवारान् ॥ १४ ॥ गंधर्वस्येति वेनस्यवेनसंज्ञस्यगंधर्वस्ययःस्वात्मनःस्वांतर्यामिणोनारायणस्यानुभवस्तस्यनानामंत्रैर्यदीरणंवामदेववत्प्रकाशनंतदुक्तं तथासत्यादिसाधनैःसहसंन्यासरूपंसाधनंसर्वोत्कृष्टत्वेनोक्तं परमउत्तमोंत्यइतियावत् तादृशेमंत्रेन्यासइतिब्रह्माइत्यादौवसुरण्यइत्यादौचतस्यसंन्यासस्यब्रह्मरूपतावगाहिन्याःस्तुतेरित्यर्थः ॥ १५ ॥ अनंतराध्यायार्थमाह जाबालइत्यादिना जाबालाख्येपरमहंसाख्येआरुण्याख्येचब्रह्मणिवेदेउपनिषदियःसमीरितःससंन्यासएकएवन

यजुषांकृष्णतावापिभक्षणाच्छर्दनादपि ॥ वरुणंपितरंतद्वद्गोश्वगमनंबहु ॥ १४ ॥ गंधर्वस्यापिवेनस्यस्वात्मनोनुभवेरणं॥सत्यादिसाधनैश्चैतत्साधनंन्याससंज्ञितं॥उक्तंपरममंत्रेतत्स्तुत्याब्रह्मात्मरूपया॥१५॥ जाबालेपरमेहंसेब्रह्मण्यारुणिसंज्ञिते ॥ शाखाभेदेपिसंन्यासएकएवसमीरितः ॥ योगंनानाविधंपूर्वमुक्त्वापिसनिमित्तकं ॥ १६ ॥ गर्भोपनिषदिप्रोक्तयोगस्येहप्रसंगतः ॥ वासिष्ठोपिचकोप्युक्तोयोगःपौराणिकोहियः॥ १७॥ अपियोव्यमृतेनादेहंसेचक्षुरिकाभिधे ॥ शाखाभेदेसमुक्तःसवर्णितोत्रपृथक्पृथक् ॥ १८ ॥ ब्रह्मोपनिषदिप्रोक्तंबिंदौचामृतसंज्ञके ॥ नारायणीयेचतथामहोपनिषदीरितम् ॥ आत्मप्रबोधेकैवल्येज्ञानंतच्चसमीरितं॥ १९॥ संवर्त्तकाद्याःसंन्यासेभवतात्रसमीरिताः॥ पूर्वसंन्यासिनःसर्वेलोकातीतामहाधियः ॥ २० ॥ वैराग्यंतस्यकालश्चसंन्यासस्यप्रकीर्तितः ॥ नानाविधैरुपायैश्चविरक्ताश्चाधिकारिणः ॥ २१ ॥

शाखाभेदेनभिन्नइतिदर्शितमितिशेषः किंकृत्वा नानाविधंयोगंमरणनिमित्तैःसहितमुक्त्वा ॥ १६ ॥ गर्भोपनिषदीति तथागर्भोपनिषदुक्तयोगोपयोगिपदार्थप्रदर्शनप्रसंगेनवसिष्ठोक्तोपिकोप्यद्भुतःपौराणिकःपुरातनसंहितागतोयोगउक्तइत्यर्थः ॥ १७ ॥ अपीति अमृतनादादिसंज्ञोपनिषद्ग्रंथेभिन्नभिन्नशाखागतेयउक्तोयोगःसोपिपृथक्पृथक्वर्णितइत्यर्थः ॥ १८ ॥ ब्रह्मोपनिषदीति तथाब्रह्मोपनिषदादिषुषट्सूपनिषत्सूक्तंज्ञानंसमीरितमिति ॥१९॥ संवर्त्तकाद्याइति संवर्तकोऽग्नेरवतारभूतःकश्चिद्ब्राह्मणस्तत्प्रभृतयःपरमहंसालोकविलक्षणाचाराःपूर्वपूर्वाध्यायादावेवभवताकीर्तिताः ॥ २० ॥ वैराग्यमिति तथासंन्यासोपयोगिनोवैराग्यकालाधिकारिणउक्ताः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संन्यासस्येति संन्यासविधिप्रभृतिपदार्थचतुष्टयंचोक्तं तस्यसंन्यासिनः ॥२२॥ शंकाबीजंस्मरति श्वेतेति पूर्वाध्यायस्यांतेश्वेतकेतुःकीर्तितस्तन्महिमातस्यप्रभावइत्ययंवर्तते इतिकिं यद्ब्रह्मात्मविज्ञानात्पुरापिसर्वज्ञःप्रसिद्धइति तंश्रोतुंकौतुकंवर्ततेऽद्भुतत्वादित्यर्थः ॥२३॥ एतदेव स्फुटयति भवतेति लोकातीतान्संवर्त्तादीनादौकीर्त्तयित्वातेष्वेवगणितःश्वेतकेतुःपुनःकुतःसमुदाहृतइति ॥ २४॥ फलितंप्रश्नमभिनयति सर्वज्ञइति सयदिसर्वज्ञस्तदातस्यजिज्ञासाप्रयोजकमज्ञत्वंकुतस्तस्योपदेष्टाचकस्तस्मैउपदिष्टंज्ञानंचकीदृशमित्यर्थः ॥२५॥ एतदिति स्पष्टं

संन्यासस्यविधिर्न्यासिमरणेसंस्क्रियापिच ॥ वेषस्तस्यतथाचारःकीर्तितोबहुधात्वया ॥ २२ ॥ श्वेतकेतुस्तथांतेसर्वज्ञोयःप्रकीर्तितः ॥ पुराब्रह्मात्मविज्ञानादितितन्महिमात्रभोः ॥ वर्ततेकौतुकंश्रोतुंयतआश्चर्यकारणम् ॥ २३ ॥ भवतापरमाहंसाःसंवर्त्ताद्याःप्रकीर्त्तिताः ॥ लोकातीताःश्वेतकेतुस्तेष्वेवसमुदाहृतः ॥ २४ ॥ सर्वज्ञोऽथाज्ञतांप्राप्तःकेनदोषेणधीधनः ॥ केनोपदिष्टश्चपुनस्तस्यज्ञानंचकीदृशं ॥ २५ ॥ एतत्सर्वंविस्तरतोवक्तव्यंभवतागुरो ॥ मत्यमास्तिक्ययुक्तायभवंतंसंश्रितायच ॥ २६ ॥ इत्थंसंप्रार्थितस्तेनशिष्येणामिततेजसा ॥ गुरुश्छांदोग्यकथितांकथामाहातिशोभनां ॥ २७ ॥ श्वेतकेतुःपुराबालःपितृभ्यामुपलालितः ॥ अतिक्रांतोपनयनकालःक्रीडावशंगतः ॥ आसीददांतवृषभतुल्योद्वादशवार्षिकः ॥ २८ ॥ भुंक्तेक्वचिन्नभुंक्तेवाबालक्रीडारतोद्विजः ॥ भर्त्सयन्बालकानन्यान्बहुशोपिचताडयन् ॥ २९ ॥ स्त्रियोविप्रांश्चपश्वादीन्संप्रयातिद्रुतंतथा ॥ बालएवजनंसर्वंदुःखयन्नत्यशिक्षितः ॥ ३० ॥

॥२६॥ गुरुवाक्यमवतारयति इत्थमिति अमितंप्रचुरंतेजःमेधात्मकसत्वलक्षणंयस्यसतथातेनच्छांदोग्येषष्ठप्रपाठकेकीर्तितां ॥२७॥ आत्मज्ञानात्पूर्वंसार्वज्ञ्यगाभिमानिकंनवस्तुतइतिदर्शयन्स्तब्धएयायेत्यंतग्रंथार्थमुपबृंहयति श्वेतेतित्रयोविंशतिश्लोकैः श्वेतकेतुर्नामसुनिबालोमातापित्रोर्लालनवशेनक्रीडापरत्वादतिक्रांतउपनयनकालोमुख्योयस्यतथाभूतोजातःअदांतोऽशिक्षितोयोवृषभस्तत्तुल्यः ॥ २८ ॥ क्रीडापरत्वमदांतवृषभतुल्यत्वंचस्फुटयति भुंक्तेइति स्पष्टंद्वयं ॥ २९ ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितुरिति तंकदाचिदुपागतमारुणिर्नामपिताप्रोक्तवान् कीदृशः स्नेहयुक्तहृदयः क्लेशंतद्दशालोकनजंचित्तक्षोभंप्राप्तः ॥ ३१ ॥ पितृवचनमभिनयति पुत्रेत्येकादशभिः हेपुत्रबाल्यमविवेकस्तद्धेतुकात्पुत्रस्नेहाद्यत्त्वंमयामात्राचलालितोसितत्तस्तेइदृशीदशेत्यर्थः ॥ ३२ ॥ लालनादिति यदितीत्थंनीतिविदोवदंतितत्सत्यं इतिकिं सुतादीनांलालनंबहुदोषहेतुस्ताडनंगुणहेतुरिति ॥ ३३ ॥ नीतिवाक्यान्येवार्थतः संगृह्णाति वैरिणीत्यादिना केवललालनपरौमातापितरौवैरिणौबोध्यौ यतोलालनजन्यदोषैःसुतस्यनरकादिदुःखमिति ॥ ३४ ॥ शि

पितुःसमीपमगमत्कदाचिद्विनयान्वितः॥ आरुणिस्तत्पिताप्राहसुतंतंस्वसमीपगं॥ स्नेहसंभिन्नहृदयःकिंचित्क्लेशमुपागतः ॥ ३१ ॥ पुत्रबाल्यात्सुतस्नेहाल्लालितस्त्वंमयातथा ॥ मात्राचतवतेनेमांदशामसिगतोधुना ॥ ३२ ॥ लालनाद्बहवोदोषाःशासनाद्बहवोगुणाः॥ शिष्यस्त्रीतनयादीनामितियंत्तन्मृषानहि ॥ ३३ ॥ वैरिणीसाचविज्ञेयामातायालालयेत्सुतं॥ पितापिचयतःपुत्रोलालितोनरकंव्रजेत्॥ ३४॥ आत्रिवर्षंसुतंमाताशिक्षयेच्चततःपिता॥ तथापिसहितोनित्यमागर्भजननाष्टमं॥३५॥अतऊर्ध्वंसदाचार्यःशिक्षयेत्तंचकुत्रचित्॥ आषोडशंततःसर्वेनिवर्त्ततेहियौवने॥ ३६॥ युवानंमित्रवन्नित्यंशिष्यंवाथसुतंचवा॥ शिक्षयेन्नैवदंडेननीतिरेषासनातनी॥ ३७॥ मातुःपितुश्चयःशिक्षामाचार्यस्यचनांधधीः ॥ गृह्णीयाद्यौवनेप्राप्तेसक्लेशंयातिदारुणं॥इहराजादिजाभीतिर्यमजापरजन्मनि॥ ३८॥

क्षाव्यवस्थामाह आत्रिवर्षमिति तृतीयवर्षपूर्तिपर्यंतंमाताशिक्षयेत्ततोगर्भाज्जननाद्वाअष्टमवर्षपर्यंतंपिताशिक्षयेत् कीदृशःपिता तथापिशिक्षकांतरसत्वेपिसहितःसंनिहितः ॥ ३५ ॥ ततःषोडशवर्षवर्यंतमाचार्यःशिक्षयेदित्याह अतइति यौवनेषोडशस्यवर्षस्यप्राप्तौ ॥ ३६ ॥ ततोवाचिक्येवशिक्षानताडनघटितेत्याह युवानमिति ॥ ३७॥ शिक्षोल्लंघनेसुतस्यानर्थंदर्शयति मातुरिति क्लेशंनिरूपयति इहेति ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्येति आचार्यादिकर्तृकाशिक्षासदानृणामुचिता तस्यांशिक्षायांसत्यामपिपुरुषांतरेणानुष्ठीयमानायामपिसाआचार्यादिकर्तृका शिक्षाआवश्यकीतिशेषः किमुतासत्वेइतिभावः अशिक्षणेस्फुटंदोषमाह तस्याइत्यादिना हेसुतयतस्तस्याःशिक्षायास्त्वद्विषयेअननुष्ठाने भवान्द्वादशवर्षोब्रह्मबंधुरपकृष्टब्राह्मणस्तद्वदस्मत्कुलेअनुत्पन्नइवभातीतिद्वयोःसंबंधः ॥ ३९ ॥ ४० ॥ तर्हिब्रह्मवर्चसकामंमामुपनी

यशिक्षयेत्यभिप्रायंतस्यालक्ष्याह मत्तइति यतोऽनयान्नयस्यनीतेरुपेक्षणादेतावंतंकालंलालितोस्यतस्त्वोपनयनंउपनीयशिक्षणंमत्तो मत्कर्तृकंदुर्लभमसंभवि लालकेमयित्वच्छ्रद्धायाअनवतारादितिभावः ततोऽन्यत्रअन्याचार्यसमीपेवासेनब्रह्मचर्यधर्मजातंजुषस्वेत्यर्थः

आचार्यपितृमातॄणांशिक्षातावत्सदानृणां ॥ सत्यामपिचतस्यांसातस्याअकरणेसुत ॥ ३९ ॥ भवान्द्वादशवर्षोत्रब्रह्मचर्यविवर्जितः ॥ ब्रह्मबंधुरिवाभातिनास्मत्कुलगतोयथा ॥ ४० ॥ मत्तस्त्वोपनयनंदुर्लभंत्वंयतोऽनयात् ॥ लालितोऽतोवसान्यत्रब्रह्मचर्यंद्विजोत्तम ॥ ४१ ॥ अन्यथातवदुष्कीर्तिर्नरकादतिदुःखदा ॥ भविष्यतिममाप्यत्रकुलेयस्येदृशोभवान् ॥ ४२ ॥ एवमुक्तोगतःसोपिप्राप्तबुद्धिर्महात्मनः ॥ विप्रान्कांश्चिद्गुरून्कृत्वा वेदांश्चचतुरोपिहि ॥ ४३ ॥ अधीत्यांगैःसमंतेषांमीमांसांप्रविधायच ॥ वेदांतरहितानांसस्नातोगात्स्वगृहंप्रति ॥ ४४ ॥ बुद्धिमानहमेवास्मिसर्ववेदौघपाठकः ॥ अर्थज्ञश्चपितानैवंममेत्येवंव्यचिंतयत् ॥ ४५ ॥ पितामेयदिवेदज्ञोमामन्यान्प्रतिचात्मनः ॥ सुतंसप्रेषयेत्केनततोयंस्वल्पवेदनः ॥ ४६ ॥

॥ ४१ ॥ अन्यथेति स्पष्टं ॥ ४२ ॥ एवमुक्तइति एवंविधवाक्येनविवेकंप्राप्तःश्वेतकेतुरन्यान्विप्रान्महात्मनोमहामतीनाचार्यान्कृत्वा शिक्षाद्यंगैःसहितांश्चतुरोवेदानधीत्यतेषांवेदानांवेदांतभागंविनामीमांसामर्थविचारंकृत्वास्नातःसमावर्तनाख्यंसंस्कारंप्राप्तःसन्गृहमागा

दितिद्वयोरर्थः ॥ ४३ ॥ ४४ ॥ बुद्धिमानिति सचागच्छन्सन्नितिव्यचिंतयत्चिंतितवान् इतिकिं वेदतदर्थज्ञानयोःपिताआरुणिर्नमत्सदृशः ॥ ४५ ॥ इतश्चसतथायतोमामन्यत्राध्ययनार्थंप्रेषितवानित्याह पितेति मामात्मानःसुतमन्यान्प्रतिकथंप्रेषयेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरूणामनुग्रहातिशयादप्यहमस्मादधिकइत्याह गुरवइति यतोगुरवःप्रीत्यासुतादप्यधिकंस्नेहंकृतवंतोऽस्माद्धेतोरहमतिशयवानितियोजना ॥ ४७ ॥ कदाचिदिति सस्नेहंसशपथंचयतोमांप्रतिकदाचिद्गुरवइत्थमुक्तवंतः इत्थंकथं अस्माभिःसर्वाविद्यातुभ्यमर्पितेति ततोप्यहमधिकइत्यर्थः ॥ ४८ ॥ शिशुरिति यथाआंगिरसोबृहस्पतिस्तत्सुतोऽजोवाविद्ययापितृप्रभृतिभ्योधिकोजातस्तथाहमपीत्यर्थः अजोहिशंयुनामांतरकःशुक्रान्मृतसंजीवनींविद्यामधिगत्यदेवानध्यापयामासेतिप्रसिद्धंशतपथादिषु मनुनाप्युक्तं अध्यापयामासपितॄन् शिशुरांगिरसःकविः पुत्रकाइतिहोवाचज्ञानेनपरिगृह्यतानित्यादिद्वितीयाध्याये ॥ ४९ ॥ इतिसंचिंत्येति इत्थंचिंतनजन्यगर्वदोषेणाज्ञो

गुरवोपिममस्नेहंकृतवंतःसुतादपि ॥ अधिकंयतएवास्मात्प्रीत्यातिशयवानयं ॥ ४७ ॥ कदाचिदुक्तवंतो मांसस्नेहंशपथैःसमं ॥ सर्वमेवात्मविज्ञानमस्माभिःकथितंहिते ॥ ४८ ॥ शिशुरांगिरसोयद्वद्वृद्धोभूद्विद्ययापुरा ॥ पितृभ्यःस्वस्यतद्वत्स्यामहंस्वस्यपितुःसदा ॥ ४९ ॥ इतिसंचिंत्यगर्वेणदोषेणाज्ञत्वमागतः ॥ नववंदेपितुःपादावागत्यस्वगृहंगतः ॥ उच्चासनेसमासीनःस्तब्धःस्तंभोपमःस्थितः ॥ ५० ॥ तादृशंतनयंदृष्ट्वापिताप्राहसुतंततः ॥ अनुग्रहायतस्यायंदोषलेशविवर्जितः ॥ ५१ ॥ श्वेतकेतोभवान्यस्मात्स्तब्धःस्थाणुरिवस्थितः ॥ वेदवेदार्थवेत्ताहमितिमंतामहामनाः ॥ ५२ ॥ पृष्टवानसिकिंनुत्वंप्रश्नमेतंगुरून्प्रति ॥ येनैकेनश्रुतेनस्याच्छ्रुतंसर्वंचराचरं ॥ ५३ ॥ अश्रुतंवाऽमतंतद्वदविज्ञातंचधीमता ॥ मनसात्रमतंतत्स्याद्विज्ञातंचधियापिहि ॥ ५४ ॥

मोहंगतःसन्पितुःपादावनभिवाद्योच्चासनेतिष्ठन्स्तम्भवत्स्तब्धोऽनम्रःस्थितइति ॥ ५० ॥ तस्याभिमानपरिहारार्थंपितृप्रयुक्तवाक्यस्यविज्ञातमित्यंतस्यार्थमाह तादृशमितिचतुर्भिः दोषाःकोपादयस्तल्लेशैरपिहीनःपिताकेवलानुग्रहायेदमाहेत्यर्थः ॥ ५१ ॥ श्वेतेति हेश्वेतकेतोयस्मादतिशयाद्भवान्स्तब्धस्तथासांगसर्ववेदानांतदर्थानांचवेत्तास्मीत्येवंमननशीलस्तथामहामनाःमहत्इतरैरसममात्मानंमन्यमानंमनोयस्यसतथात्वंभवसिसोतिशयःकइतिशेषः ॥ ५२ ॥ पृष्टवानिति नुइतिवितर्के किमेनंप्रश्नंप्रश्नयोग्यमर्थंश्रुतौकर्मव्युत्पत्त्यादेशपदोक्तंपृष्टवानसियस्यैकस्यश्रवणात्सर्वंश्रुतंशब्देनज्ञातंभवेत्तथायस्यमनसामननात्धियाविज्ञानाच्चसर्वममतमप्यविज्ञातमपिचमतंविज्ञातंचभवेदितिद्वयोरर्थः ॥ ५३ ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वेतकेतोःप्रश्नवाक्यमवतारयति इत्युक्तइति ॥५५॥ तदर्थमाह श्रुतइति यस्यएकस्यश्रवणादिनासर्वस्यश्रुतत्वादिकमतिचित्रंभवतितदे कंवस्तुमह्ममुपदिशेत्यर्थः ॥ ५६ ॥ वाचारंभणादिभागान्विहायपितृवाक्यस्यार्थमाह इत्युक्तेतमितिषड्भिः एवंप्रश्नेकृतेसतिपितातमुवा चहेश्वेतकेतोत्वंतावत्त्रिभिर्दृष्टांतैःसर्वंविश्वंतेजोजलपृथिवीगात्रमवधारयतथातदृष्टांतेनतत्त्रयस्यतेजोबन्नाख्यस्ययत्कारणंपरमात्माख्यं तन्मात्रंसमवधारयेत्यर्थः ॥५७॥ दृष्टांतत्रयंभूतत्रयाभिप्रायेणोक्तमितिदर्शयंस्तत्स्वरूपमाह मृदइत्यादिना यथामृदःपिंडस्यपिंडावस्थो पहितपृथिवीसामान्यरूपस्यकारणस्यावबोधात्परिचयात्तत्कार्यंघटादिसर्वंज्ञातंभवेत् यथावासुवर्णस्यतैजसस्यधातोःश्रुतौलोहपदो

इत्युक्तेक्षीणगर्वःस्वजनकंचाभिवाद्यसः ॥ आश्चर्यपरमंप्राप्तइदमाहवचस्ततः ॥ ५५ ॥ श्रुतेमतेचविज्ञातएकस्मिन्निखिलंकथं ॥ श्रुतंमतंचविज्ञातंभवेदेतद्वदाधुना ॥ ५६ ॥ इत्युक्तेतंततःप्राहतनयंजनकस्तदा ॥ तेजोबन्नात्मकंविश्वंतत्त्रयस्यापिकारणं ॥ दृष्टान्तैस्त्रिभिरेवत्वंसम्यगेवावधारय ॥ ५७ ॥ मृदोवापिसुवर्णस्य तैजसस्याथवासुत ॥ अयसोवापिपिंडस्यकारणस्यावबोधतः ॥ ज्ञातंकार्यंघटादिस्यात्कटकादितथापरं ॥ ५८ ॥ द्रवीभावाज्जलानांचजायंतेविविधाअपि ॥ केवलस्याथपिंडस्यकारणत्वंनलोकतः ॥ ५९ ॥ प्रसिद्धंतेनतत्रोक्तंस्वच्छंनखनिकृंतनं ॥ पयःपिंडसमंश्रुत्यात्तृतीयंहिनिदर्शनं ॥ ६० ॥

क्तस्यपिंडभूतस्यपूर्ववज्ज्ञानात्कटककुंडलादिविकारजातंज्ञायते यथावायसोनखनिकृंतनादिपिंडगतस्यज्ञानात्सर्वैलोहविकाराज्ञायं तेइत्यर्थः ॥५८॥ ननुनखनिकृंतनंनजलीयंतत्कथंजलीयदृष्टांताभिप्रायेणोक्तमित्याशंकांपरिहरति द्रवीभावादितिद्वाभ्यां यद्यपिजला नांद्रवीभावात्द्रुतावस्थानांसंपर्कादेवविविधाविकाराःपृथिव्यादेरपिजायंते तथाचजलानांकारणत्वंप्रसिद्धं तथापिकेवलस्यआप्यस्य जलीयस्यपिंडस्यकारणत्वंलोकेप्रसिद्धंनभवतीत्यतःश्रुत्यालोकबुद्धिमनुसरंत्यापयःपिंडसमंस्वच्छंहिमादिरूपजलपिंडवन्निर्मलत्वेनज लीयमिवदृश्यमानंनखनिकृंतनंतृतीयदृष्टांतेनोक्तमितिद्वयोरर्थः ॥ ५९ ॥ ६० ॥ ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमनूद्यदार्ष्टांतिकेयोजयति मार्द्दमितिद्वाभ्यां मार्द्दंमृत्पिंडगतंतैजसंसुवर्णादिपिंडगतंआप्यंद्रुतजलादिगतंकारणंमृदादिसामान्यरूपं ज्ञात्वासर्वंपार्थिवादिकार्यंजानीयात् अविचारयन् लक्षणेशता नह्येकवारंपार्थिवपरिचयेपार्थिवांतरंदृष्ट्वाइयंपृथिवीनवेतिसंदिग्धेइति एवंभूतत्रयस्यापिकारणंपरंतत्त्वंविज्ञायसर्वंज्ञायतेइतिद्वयोरर्थः ॥ ६१ ॥ ६२ ॥ एकविज्ञानेनसर्वविज्ञानंगौणतयानयतांभेदवादिनांमतं निरसितुमनुवदति स्थालीतिद्वाभ्यां अयंन्यायःस्थालीपुलाकेतिनाम्नाप्रसिद्धः अयंकः पाकाधारभांडेस्थालीसंज्ञेगतमेकंसिक्थंविक्लिन्न तंडुलरूपंपुलाकपदवाच्यंपक्वापक्वान्यतररूपेणविज्ञायसर्वंपुलाकगणंतद्वज्जानीयादित्यर्थः ॥ ६३ ॥ एनमिति उत्तरार्द्धेइतीतिशेषः त थाचकेचिद्विपश्चितएनंन्यायंविज्ञायमनसिनिधायइत्याहुः इतिकिं अत्रात्मनिज्ञातेसतिविज्ञानंविविधार्थगोचरंज्ञानमेवंस्थालीपुलाक

मार्द्दंतैजसमाप्यंचयथाज्ञात्वात्रकारणं ॥ तन्मयंसकलंकार्यंजानीयादविचारयन् ॥ ६१ ॥ एवंतत्त्वेपरेज्ञाते तेजोबन्नात्मकंजगत् ॥ ज्ञायतेसकलंपुंसांत्यज्ञातमपिपुत्रक ॥ ६२ ॥ स्थालीपुलाकनामायंन्यायउक्तोम नीषिभिः ॥ एकस्मिन्नेवसिक्थेचविज्ञातेभांडसंश्रये ॥ पक्वेवाप्यथवापक्वेसर्वंहिविदितंभवेत् ॥ ६३ ॥ एनं विज्ञायकेचित्तुनानामतविबोधनात् ॥ संजायतेत्रविज्ञानमेवमाहुर्विपश्चितः ॥ ६४ ॥ वक्तव्यास्तेभवद्भि स्तुच्येतदुत्प्रेक्ष्यतेकथं ॥ स्वबुद्ध्याश्रुतिबुद्ध्यावासंप्रदायबलेनवा ॥ ६५ ॥ पौरुषेयींधियंनात्रमन्यंतेवेदवादि नः ॥ विप्लुवंतेधियोयस्मात्पुरुषेयाव्यवस्थिताः ॥ ६६ ॥

वज्जायतइति तेषामेवमभिधानेहेतुस्तुनानामतानांभेदशालिमतानांविशेषेणादरनैरंतर्यरूपेणयद्बोधनंपरिशीलनंतदेवेत्यर्थः ॥ ६४ ॥ वि कल्पपूर्वकंतन्निरासप्रकारमौपनिषदान्प्रतिबोधयति वक्तव्याइति तेभेदवादिनोभवद्भिरौपनिषदैर्वक्तव्याइत्थंप्रष्टव्याः इत्थंकथं हेवादिनो भवद्भिरेतत्श्रुतेःस्थालीपुलाकन्यायेनैवसर्वविज्ञानपरत्वंयदुत्प्रेक्ष्यतेकल्प्यतेएतत्कल्पनंकथंकीदृशहेतुकमित्यर्थः तत्रकिंस्वस्यकल्पकपु रुषस्यबुद्धिरेवहेतुः श्रुतिप्रमाणजाबुद्धिर्वाहेतुःसंप्रदायउपदेष्टृगुरुपरंपरातस्यबलमानुकूल्यरूपंवाहेतुरित्यर्थः ॥ ६५ ॥ तत्रनाद्यः पौरुषे यबुद्धेरप्रामाण्यशंकास्कंदितत्वेनकथायांहेतुतयाऽनुपन्यसनीयत्वादित्याह पौरुषेयीमिति वैदिकाःपौरुषेयींकेवलपुरुषसमुत्थितांमतिं नमन्यंतेनाद्रियंते यतःपुरुषमतयोविप्लवंतेअर्थंव्यभिचरंतीत्यर्थः ॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याप्रमानत्वेकैश्रुतिकन्यायंसूचयति यतइति यतोमहात्मातार्किकेषुमुख्यःकपिलोबुद्धप्रभृतयश्चस्वोत्प्रेक्षामात्रेणयत्किंचिद्वदंतःपरस्परंविरोधिनोनिरस्तयुक्तिकादृष्टास्तद्धियामप्रामाण्येचसविरोधएवलिंगं यस्मादिहलोकेविरोधेनहेतुनाद्वयोर्मध्येकस्यापिप्रामाण्यंनावधारयितुंशक्यमितिप्रसिद्धमित्यर्थः तथाचद्वितीयःपक्षोभवद्भिरालंबनीयःपरन्तुतदालंबनंभवतांश्रुतावनाश्वासिनांदुष्करमित्याशयेनाह ततइति तद्बुद्धिपौरुषेयींबुद्धिंसंत्यज्यान्याऽपौरुषेयीबुद्धिरिष्यतामन्वेष्टुंयोग्येतिद्वयोरर्थः ॥ ६७॥ ६८ ॥ नतृतीयस्तस्यापिप्रथमपक्षांतर्भावेणतद्दोषैराक्रमणादित्याह संप्रदायादिति यतःकापिलबौद्धादिभिःसंप्रदायंस्वंस्वमालंब्यापिश्रुत्यर्थनिर्णयेकारणंनिमित्तंनैवलब्धं ततएवंविज्ञायतेयत्संप्रदायेसमाश्रितेसतिपुंसोबुद्धिःपौरुषेयीमतिरेवसमाश्रिताभवतिनचापरंनचपौरुषेयमतिभिन्नंकिंचित्प्रमाण

यतोमहात्माकपिलोबुद्धकाणादगौतमाः ॥ उत्प्रेक्षाबुद्ध्योदृष्टाःपरस्परविरोधिनः ॥ ६७॥ विरोधेनप्रमाणत्वंनकस्यापीहवादिनः ॥ ततस्तद्बुद्धिसंत्यागादन्याबुद्धिरिहेष्यताम् ॥ ६८॥ संप्रदायाद्यतोनैवकारणंश्रुतिनिर्णये॥ संप्रदायेततःपुंसोबुद्धिरेवनचापरम् ॥ ६९ ॥ अथचेत्संप्रदायोयंन्यायइत्यभिधीयते ॥ सन्यायः कोत्रसंपृष्टःकथयंत्विहवादिनः ॥ ७० ॥ पुरुषस्यधियंहित्वान्यायोनामात्रकश्चन॥ वर्णनीयःपृथग्येनसंप्रदायःपृथग्भवेत् ॥ ७१ ॥

माश्रितंभवतीत्यर्थः यदितत्तत्सांप्रदायिकाःश्रुत्यर्थोपयुक्तंप्रमाणमप्राप्स्यंस्तदाश्रुत्यर्थेविप्रतिपत्तिंनाकरिष्यन्निति भावः ॥ ६९ ॥ ननुसंप्रदायपदेनलक्षणयास्वार्थलभ्योन्यायउच्यतेतस्यनिर्णयसाधनतायाःप्रसिद्धत्वादितिशंकते अथेति तथाचतस्यनप्रथमपक्षांतर्भावइतिभावः इमांशंकांपरिहर्तुंकिंभूयोदर्शनजाबुद्धिर्न्यायपदेनविवक्षितातर्कोवाइतिविकल्पाभिप्रायेणपृच्छति सन्यायइति कःकिंरूपः॥७०॥ तत्रनाद्यः नहिभूयोदर्शनेनकृतापृथिवीलोहलेख्यादिधीरपौरुषेयीतस्याःप्रामाण्यापत्तेरित्याशयेनाह पुरुषस्येति अत्राद्यपक्षेपुरुषमतिविनानन्यायस्वरूपंवर्णयितुंशक्यंयेनन्यायस्वरूपभेदेनसंप्रदायपक्षःप्रथमपक्षाद्भिद्येतेत्यर्थः ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथद्वितीयपक्षंतर्करूपंप्रश्नोतराभ्यांनिरस्यति अथचेदित्यादिना यदितर्कोन्यायपदेनविवक्षतस्तदातंपक्षंवादिनःकथयंतुउपपादयंतु कुतोन्यायस्यतर्करूपत्वमितियावत् एवंपृष्टैर्यदीत्थमुच्यते न्यायोपिमानानुग्रहायोपन्यस्यतेतर्कोपिमानानुग्राहकत्वेनप्रसिद्धइत्यतःसन्यायस्तर्कस्तर्करूपएवेतितदातेइतिप्रष्टव्याः तेनतर्करूपन्यायेनमानोपर्यनुग्रहःकिंरूपःक्रियतेइतिवक्तव्यमित्यर्थः ॥ ७२ ॥ किंप्रामाण्यनिष्पत्तिरूपमनुग्रहंतर्कोमानस्यकरोतिकिंवाप्रतिद्वंद्विपरिहाररूपंअथवाप्रामाण्यव्यंजनरूपमितिविकल्पनाद्यःस्वतःप्रामाण्यवादेसंभवतीत्याह प्रमाणमितिद्वाभ्यां प्रामाण्यंहिप्रमाणस्यकर्मविषयप्रकाशनलक्षणंतस्यनिष्पत्तिंप्रमाणंस्वतःस्वयमेवकरोतियतःस्वतोमानंस्वरूपेणमानंभवति नहिदीपःस्वविषयसाधनेदीपांतरमपेक्षतेऽदीपत्वापत्तेः एवंप्रमाणस्यविषयसाधनेपरापेक्षायाममानत्वापत्तिः यद्येवं

अथचेत्तर्कउद्दिष्टोन्यायस्तंकथयंत्विह ॥ अनुग्रहकरोयस्मान्मानानांतर्कएषसः ॥ इतिचेत्तत्रकोनाममानानुग्रहईर्यताम् ॥ ७२ ॥ प्रमाणंचेत्स्वतोमानंतर्कस्तत्रकरोतिकिं ॥ अनुग्रहमतोन्यंवाज्ञेयंचेत्कुरुतेकथं ॥ मानानुग्राहकत्वंस्यात्तस्यतत्परमंस्थितं ॥ ७३ ॥ मानामानेयतोनित्येस्वरूपाश्रयभेदतः ॥ नत्वन्यस्याकृतिःकाचिदपरस्यात्रदृश्यते ॥ ७४ ॥ अथचेत्स्यात्सुप्रसिद्धमनिष्टस्यात्रकारणं ॥ अनुग्रहकरंस्वस्ययद्वत्तद्वदिहापि च ॥ ७५ ॥

तदातर्कोमानोपरिकिमनुग्रहंकरोतीतिवाच्यं यदिचमानविषयाद्विषयांतरमेवतर्कोज्ञेयंस्वविषयंकरोतितदापितर्कस्यमानानुग्राहकत्वंकथं स्यात् यतस्तस्यमानस्यतद्विषयभासनरूपंप्रामाण्यंपरमंपरानपेक्षत्वेनोत्कृष्टंस्थितंसिद्धमेवेत्यर्थः ॥ ७३ ॥ किंचतर्कस्यामानभूतस्यमानविषयेप्रवेशोभ्रमेणापिनभवतिकस्यापिसादृश्यस्यासंभवादित्याह मानामानेइति मानंचअमानंचएतेद्वेअपिस्वरूपभेदेनाश्रयभेदेनचनित्येसदाव्याप्तेसर्वथाविलक्षणेइतियावत् यतोऽनयोर्मध्येऽन्यस्यएकस्यआकृतिःसामान्यरूपाअपरस्यद्वितीयस्यनदृश्यतेइत्यर्थः ॥ ७४ ॥ अथद्वितीयंप्रतिद्वंद्विपरिहारपक्षंशंकते अथचेदिति अत्रलोकेयद्वत्स्वस्यानिष्टकारणंप्रसिद्धंतद्वदनिष्टपरिहारलक्षणस्यानुग्रहस्यकारणमपिप्रसिद्धंतथाइहप्रकृतेपिस्यादितिचेदितियोजना ॥ ७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतंपक्षंपरिहरति नैतदेवमितिचतुर्भिः एतन्मानविरोधिपरिहरणमेवंलोकवत्अत्रनसंभवति यतइदंमानामानयोर्युगलंनियतं एकदेशेमिलितंनदृश्यते एतदेवस्फुटयति मंडूकइत्यादिना यथामंडूकोमक्षिकारूपंग्रासंग्रसंस्तंकवलितमक्षिकंमंडूकंग्रसन्सर्पश्चप्रसिद्धस्तथामाप्रमात्वयोर्मात्वाऽमात्वयोस्तदुपलक्षितमानामानयोरपिचद्वित्वंद्वंद्वमन्यतरग्रासकंकिंप्रसिद्धमपितुनैवप्रसिद्धमित्यर्थः ॥ ७६ ॥ तत्रविषयैक्याभावंहेतुमाह एकस्मिन्निति यत्रसमानबलयोर्द्वयोरेकत्रविषयसन्निपातोनिवेशोभवेत्तत्रद्वित्वंप्रतिद्वंद्वीभावइष्यतेस्वीक्रियतेपरीक्षकैरित्यर्थः ॥ ७७ ॥ प्रकृतेतदभावायभिन्नविषयत्वमेवदर्शयति मानमिति मानंप्रमाणंवस्तुनिसत्यविषयएवयातिवर्त्ततेअमानंत्ववस्तुन्यनृतविषयएवयातितथातयोर्धर्मौमात्वामात्वरूपावपिपरस्परंविविक्ताश्रयकावेवेत्यर्थः ॥ ७८ ॥ किंचमानस्यविरोधीअमा

नैतदेवंयतोनात्रलभ्यतेनियतंत्विदं ॥ मंडूकोमक्षिकाग्रासंग्रसेत्सर्पोग्रसेच्चतं ॥ प्रसिद्धंद्वित्वमप्येतत्किमिदंमाप्रमात्वयोः ॥ ७६ ॥ एकस्मिन्विषयेयत्रसन्निपातोद्वयोर्भवेत् ॥ समानबलयोस्तत्रप्रसिद्धंद्वित्वमिष्यते ॥ ७७॥ मानंवस्तुनिचामानंसर्वदायात्यवस्तुनि ॥ मात्वामात्वेचवर्त्तेतेभिन्नयोरेवमानयोः ॥ ७८ ॥ अमानमितिविज्ञातेनियतंमृतमारणं ॥ मानाभिमानेनाप्यस्यनिरासस्तेनसंभवेत् ॥ ७९ ॥ परतोपियदामानंभवेत्तर्कस्यकस्तदा ॥ अनुग्रहोयतःसोयंन्यायात्माऽन्यपरोभवेत् ॥ ८० ॥

नत्वेनविज्ञायतर्केणनिरस्यतेमानत्वेनविज्ञायवा नाद्यःपिष्टपेषणत्वादित्याह अमानमितीति द्वितीयःपक्षस्तुतवदुराग्रहशीलस्यदुष्करइत्याह मानाभिमानेनेति अस्यमानविरोधिनोनिरासोनसंभवतितेमतेआग्रहपरित्यागेतुश्रुतिरेवकुतोनशरणीक्रियतइतिभावः ॥७९॥ प्रामाण्यस्यपरतस्त्वपक्षेपिप्रोक्तदोषमतिदिशति परतोपीति यदामानंप्रमास्वरूपंपरतःसामान्यसामग्रीभिन्नायागुणसंज्ञायाविशेषसामग्रीतोजायतइतिमतंतदापितर्ककर्तृकोमानोपर्यनुग्रहउपकारःकःकिमात्मकः यतोयमनुग्रहव्यापारमादायसोयंतर्कःअन्यपरःपरोपकारकोभवेत्व्यवह्रियेतेत्यर्थः अयंभावः नहिसोनुग्रहोविषयप्रकाशलक्षणः तस्यमानेनस्वयमेवकृतत्वात् नापिप्रमातृगतासंभावनानिवृत्तिरूपः तस्यादुरदृष्टप्रयुक्तायास्तद्विरोधिसुकृतप्रयोज्यत्वात् तत्करणेपिमानंप्रत्यनुग्राहकत्वस्यदुर्वचत्वान्नहिमानंप्रमातृरूपमिति ॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुग्रहासंभवमेवाभिनयति अमानस्येति यत्स्वयममानंविषयभासनाक्षमंतस्यमानत्वंतर्कशतेनापिकर्त्तुंनशक्यं यत्तुमानंतदीयमानत्वं पुनर्नकेनचित्क्रियतेसिद्धत्वादेवेत्यर्थः ॥ ८०॥ अथतृतीयंव्यंजकत्वपक्षमनूद्यनिरस्यति ज्ञानमित्यादिना यदितर्कोज्ञानंप्रामाण्यगोचरं प्रतिकर्ताप्रामाण्यव्यंजकइतियावत् इत्येवंमन्यतेतदापिइतिवक्तव्यं इतिकिं अयंतर्कःकःकिममानरूपःकिंवामानरूपः आद्येऽनेनतर्केण निरूपितंज्ञानस्यग्राह्यप्रामाण्याश्रयस्यमेयत्वंविषयत्वंशुक्तिरजतवदेवमिथ्यात्वप्रयोजकंस्यात् तथाचामानविषयस्यप्रामाण्यंसत्यकार णतावादिनस्त्वमतेव्याहतमितिभावः ॥ ८२ ॥ नद्वितीयः अपसिद्धांतापत्तेः प्रमाणानुग्राहकत्वप्रसिद्धिविरोधापत्तेश्चेत्याह मानतेति तर्कस्यमानताऽयुक्ताइतिशेषः यतःसर्ववादिनांनसंमता किंचात्रपक्षेप्रमाणत्वेनैवतर्कस्यसंग्रहात्तर्कोमानानुग्राहकइतिनवक्तव्यंस्यादि

अमानस्यनमानत्वंकर्त्तुंतर्कशतेनच॥ शक्यंमानस्यतन्नैवसिद्धत्वात्क्रियतेपुनः॥८१॥ ज्ञानंप्रतिभवेत्कर्त्ता तदाकोसावितीर्यतां ॥ अमानंसभवंस्तर्कोज्ञापकोत्रभवेद्यदि ॥ तेनज्ञानस्यमेयत्वंस्यात्सदाशुक्तिरूप्यवत् ॥ ८२॥ मानतानैवतर्कस्यवादिनांसंमतायतः॥ मानत्वेचप्रमाणोक्त्यान्यायउक्तोभविष्यति॥ ८३॥ प्रमा णानिचसर्वाणिसर्ववादिमतेनच ॥ किंतुकस्यापिकिंचित्तुतत्रन्यायःकईर्यतां॥ ८४ ॥ ननुयन्मेयतःस्वस्य व्यभिचारंनयातिहि॥ तदेवमानमित्युक्तंनेतरद्व्यभिचारियत् ॥ ८५ ॥

त्यर्थः ॥ ८३॥ किंचप्रत्यक्षेतर्कांतर्भावस्यव्याहतत्वादनुमानादावेवतदंतर्भावोवाच्यःसचननियंतुंशक्यः अनुमानादीनामेवप्रामाण्येसर्व वादिनामैकमत्याभावात् तथाहि लोकायतिकोऽनुमानादिकंतमन्यतेकणादःसुगतश्चशब्दादिकंनैयायिकोऽर्थापत्त्यादिकंप्राभाकरोऽनुप लब्धिमित्याशयेनाह प्रमाणानीति सर्ववादिनामैकमत्यगोचराणिसर्वाणिप्रमाणानिनसंतिकिंतुप्रतिवादिअनियतान्येव तेषुतर्करूपोन्या योंतर्भवन्कःकिमात्मकःस्यादितिवक्तव्यमित्यर्थः ॥ ८४ ॥ ननुआपाततःप्रमाणेंतर्भावितोपितर्कःपश्चाद्दर्थाव्यभिचाररूपलक्षणेनप्र माणपरीक्षायांसत्याममानतांयास्यतीतिनाविनिगमदोषइतिशंकते नन्विति स्वस्यस्वकीयान्मेयाद्व्यभिचारंविषयांतरपरत्वंनगच्छतितदेव मानंभविष्यतीत्यर्थः ॥ ८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाप्यविनिगमदोषान्ननिर्मोक्षइतिपरिहरति एवंचेदिति मात्रपदंकात्स्न्यै तथाचएवमुक्तलक्षणेनप्रमाणपरीक्षायांसत्यांचेद्यदिसर्वेषांप्रमाणानामनुपलब्ध्यंतानांमेयाव्यभिचारलक्षणंप्रामाण्यंस्यात्तथाचतथासत्येतत्सन्निहितमुक्तंदूषणंन्यायःकिंप्रमाणरूपोभवेदित्यविनिगमरूपमापतेत्प्रसज्जेतैवेत्यर्थः सर्वेषामनुपलब्ध्यंतानांस्वस्वविषयनियतंप्रामाण्यंभट्टपादादिभिर्व्यवस्थापितमेवेतिभावः ॥ ८६ ॥ अथतर्काभिनिवेशीअनुमानांतर्भावोपन्यासमुखेनसर्वप्रमाणांतर्भावंतर्कस्यशंकते अथन्यायइतिद्वाभ्यां अथेतिशंकापरं नानाप्रमाणरूपानुमानरूपोभवतुन्यायस्तर्कइतिप्रथमदलार्थः कथमनुमानरूपस्यनानाप्रमाणरूपतेत्यतआह आगमात्मेति पंचावयवकेऽनुमानेप्रथमोऽ

एवंचेन्मानमात्रस्यनमेयव्यभिचारिता॥ तथाचपुनरप्येतदुक्तदूषणमापतेत्॥ ८६॥ अथन्यायोनुमानंस्यान्नानामानस्वरूपकं॥ आगमात्माप्रतिज्ञास्यादनुमानंचसाधने॥ ८७॥ व्याप्तिःप्रत्यक्षमित्युक्तमुपमानंनिदर्शनम्॥ सर्वेषांसमुदायःस्याद्वाक्यंनिगमनंहियत्॥ ८८ ॥ इदमायुष्मतोवाक्यंशतदूषणदुर्द्धरं॥ ब्रह्मणश्चेद्वेच्चायुर्ममतेपिद्वयोरिह॥ ८९॥ तदास्यदूषणंसर्ववक्तुंज्ञातुंचशक्यते ॥ इहाशांदूषणस्यास्यवदामिन्यायवेदिने॥ ९० ॥ प्रमाणानिसदैवैककार्यकारीणिवान्यथा॥ अन्यथाचेदिहाप्येवंतस्मात्तानिनकुर्वते ॥ ९१ ॥

वयवःप्रतिज्ञाआगमप्रमाणरूपा साधनंद्वितीयोवयवोनुमानरूपः व्याप्तिः व्याप्तिप्रतिपादकमुदाहरणं प्रत्यक्षरूपंनिदर्शनंतथाचायमित्याद्याकारकउपनयउपमारूपः तस्मादित्यंशेनपूर्वोक्तसर्वसंग्राहकंनिगमनंसर्वप्रमाणरूपमितिद्वयोरर्थः ॥ ८७ ॥ ८८ ॥ एनांशंकांपरिहरन्दोषानंत्यंतावद्भंगिविशेषेणाह इदमिति इदंतवशंकावाक्यंदूषणशतेनदुर्धरंदुष्पूरं असंख्यदोषमितियावत् अस्यसमस्तदोषाभिधानंयद्यपिवक्तृश्रोत्रोर्विधातृसमेनायुषासाध्यंतथापीहप्रकरणेएतदीयदूषणानामाशांदिशंतुभ्यंन्यायाभिनिवेशिनेप्रदर्शयामीतिद्वयोरर्थः॥८९॥ ॥७॥
॥ ९० ॥ प्रमाणानीति किंप्रमाणानामेककार्यकारित्वंस्वभावः किंवाअन्यथानानाविधमेवकार्यंकुर्वंति अंत्ये इहानुमानाख्यतत्समुदायमध्येपितान्यागमादीनिप्रमाणानिएवंनानाविधमेवकार्यंकिंनकुर्वंतीत्यर्थः तथाचतेषामेकप्रमाणांतर्गतत्वोक्तिर्व्याहतेतिभावः ॥९१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आद्येआह एवंचेति एवमेककार्यकारित्वनियमेसतितुतेषामनुमानातिरिक्तप्रमाणानांमानताप्रामाण्यमनुमानंविनानस्यादितिशेषः इष्टापत्तिनिरस्यति नचेदिति अनुमानसापेक्षमेवसर्वेषांप्रामाण्यंतदास्याद्यदिस्वस्वविषयेसर्वेषांप्रामाण्यंनदृश्येतततुप्रदृश्यतेइत्यर्थः ॥ १२ ॥ साधनमिति यदिसाधनंहेतुसंज्ञोद्वितीयोऽवयवोप्यनुमानरूपस्तदातुमानस्यसर्वप्रमाणरूपतोक्तेर्व्याघातस्तन्मात्रेइतरेषामनुपलंभात् यदितस्याध्याहारादिनासर्वमानरूपतोपपाद्यतेतदातस्यपंचम्यंतलिंगवचनंहेतुरितिलक्षितायाःसाधनतायाःस्याद्व्याहतिरित्यर्थः ॥ १३ ॥ किंचपंचानामवयवानांवाक्यात्मकत्वेसमानेसतिप्रतिज्ञावाक्यस्यैवआगमप्रमाणरूपताभिधानमयुक्तमित्याह वचनेष्विति स्पष्टं ॥ १४ ॥ संदिग्धार्थप्रतिपादिकायाःप्रतिज्ञायानिश्चयात्मकप्रमाजनकमुख्येनागमेनसहाभेदाभिधानंकथंनव्याहतंस्यादित्याह संदिग्धमिति यआगमःससंदिग्धार्थगोचरंसंदेहरूपमर्थज्ञानंनजनयति नोचेत्संदिग्धंब्रूतेचेत्तदासएवनस्यात् आगमत्वादेवप्रच्यवेतेति

एवंचमानतातेषामनुमानंविनानहि॥ नचेत्प्रदृश्यतेचात्रमानतासर्वसंमता॥ १२ ॥ साधनंचानुमानंचेत्सर्वमानात्मकंकथं ॥ भवेच्चेत्सर्वमानत्वंतस्यसाधनताकुतः ॥ १३॥ वचनेषुचसर्वेषुस्थितेष्वागमताकुतः ॥ प्रतिज्ञावचनस्यास्यतदप्यत्रविचिंत्यतां॥ १४ ॥ संदिग्धंनागमोब्रूतेभवत्पक्षेपिकर्हिचित् ॥ नोचेत्सएवनैवस्यादित्याद्यत्रचदूषणं॥ सर्वावयवगंज्ञेयंव्याप्तौचद्विजसत्तमैः ॥ १५ ॥

भवत्पक्षेपिसिद्धं तथाचतद्विरुद्धंकथंप्रतिज्ञायाआगमत्वंस्यादित्यर्थः उपनयेतथापदंनिगमनेतस्मादितिपदंचव्याप्यसंबंधमात्रपरंनसादृश्यादिपरं तदनालोचनादिकंदूषणजातमन्यत्राप्यवयवेबोध्यं तथातर्कजीवनौषधभूतायांव्याप्तौकल्पनात्मिकायांप्रत्यक्षतानुपपत्त्यादिकंबोध्यं कल्पनामात्रत्वंचतस्याभट्टपादैरुक्तं तथाहि साहित्येमितदेशत्वात्प्रसिद्धेवन्हिधूमयोःव्यतिरेकस्यचादृष्टेर्गमकत्वंप्रकल्प्यतेइति अस्यार्थः मितदेशत्वात्प्रमितमहानसादिदेशवृत्तित्वेनवन्हिधूमयोः साहित्येसंबंधेप्रसिद्धेसतिसम्यग्ज्ञातेसतिव्यतिरेकस्यव्यभिचारस्यादर्शनशालिनापुरुषेणधूमगमकत्वंवन्हिबोधनसामर्थ्यभूतानियतसाहचर्यलक्षणाव्याप्तिःकल्प्यतेइति तथाचागमरूपंभास्वंतमुपेक्ष्यकल्पनानिदानेतर्कैत्यादरोदृष्टिमांद्यमेवस्फुटयतीतिभावः अतएवपक्षपातराहित्यबोधकंद्विजसत्तमैरित्युक्तं ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंतर्हिमीमांसारूपतर्कोमंतव्यइत्यादिश्रुतिप्रभृतिभिरादृतइतिशंकामुपसंहारमुखेनपरिहरति मीमांसेति एषन्यायस्तर्कोमीमांसायांगतआचार्यैरुपन्यस्तोपिवेदवाक्यंमूलभूतंविनानोपपद्यतेनार्थमवधारयितुंक्षमतेकिंतुश्रुत्याक्षिप्तएवतथा यथासंदिग्धेवाक्यशेषादित्यादितथाचवेदेनशुष्कतर्कस्यादरइतिभावः तस्मादुक्तदूषणग्रासात्स्वबुद्धिपक्षस्यसंप्रदायबलपक्षस्यचायुक्तत्वान्मध्यपक्षःश्रुतिबुद्धिरूपएवग्राह्यइत्यर्थः ॥ ९६ ॥ ननुश्रुतिबुद्धिरेवतर्कंविनाकथंस्यादितिचेन्न पदार्थान्व्याकरणादिलौकिकोपायैर्वाक्यार्थमर्यादांचोपक्रमोपसंहारादितात्पर्यलिंगैर्विज्ञायशुष्कतर्कमंतरापितस्याःसुलभत्वादित्याह श्रुतीति विज्ञेयालभ्या प्रकृतेतुस्थालीपुलाकन्यायमुपेक्ष्यैवश्रुतेःप्रवृत्तिरित्याह मृदइति मृत्पिंडपदेनलोहमणिपदेननखनिकृंतनपदेनचलक्षितमुपादानंकारणतत्त्वमुपादायानूद्यतेनसहोपादेयानांविकारा

मीमांसागतएषोपिन्यायोनैवोपपद्यते ॥ वेदवाक्यंविनातस्मान्मध्यपक्षोविशिष्यते ॥ ९६ ॥ श्रुतिबुद्धिस्तुविज्ञेयापदवाक्यार्थदर्शनात् ॥ मृदःपिंडंलोहमणिंतथानखनिकृंतनं ॥ उपादानंसमादायत्द्युपादेयैक्यमाहसा ॥ ९७॥ स्थालीपुलाकवत्तेननसर्वज्ञानमब्रवीत् ॥ उपरिष्टादिहाप्यस्याउक्तिर्यस्मान्नतादृशी ॥ ९८ ॥ ततोयथात्रविज्ञानाद्रज्ज्वाःसर्पादिकंभवेत् ॥ ज्ञातंतथात्मविज्ञानाद्विश्वंज्ञातंभवेदिह ॥ ९९ ॥ इत्यभिप्रायवान्श्वेतकेतुमारुणिरब्रवीत् ॥ दृष्टांतत्रयतोविश्वकारणंब्रह्मकेवलं ॥ १०० ॥

णामैक्यंभेदाभावंसाश्रुतिराहप्रतिपादयतीत्यर्थः ॥ ९७ ॥ फलितमाह स्थालीति तेनसाप्रकृताश्रुतिरुक्तन्यायेनसंभावनामात्ररूपंसर्वविज्ञानंनप्रतिपादयति यतस्तस्याउक्तिःपदसामानाधिकरण्यशालिनीकथनशैलीउपरिष्टादुत्तरग्रंथेइहवाक्येचतादृशीउक्तन्यायेनसाधर्म्याद्यवगाहिनीनभवतीत्यर्थः ॥ ९८ ॥ कथंतर्ह्यस्याःप्रवृत्तिरितिचेद्विवर्तवादगतेनरज्जुसर्पादिन्यायेनेतिदर्शयति ततइति ततउक्तप्रकारासंभवाद्यथाधिष्ठानरज्जुतत्त्वज्ञानेनसर्वैरज्जौकल्पिताःसर्पदंडजलधाराभूविवरादयस्तत्त्वतोज्ञाताभवंतितथाकारणविज्ञानात्सर्वविज्ञानमित्यर्थः ॥ ९९ ॥ अनेनाशयेनपित्राश्वेतकेतुंप्रतिब्रह्मबोधितमित्याह इत्यभिप्रायेति ॥ १०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणाद्द्वितीयत्वपरतायांहेतुप्रदर्शकत्वेनवाचारंभणादिभागार्थमाह उपपत्तिमितिचतुर्भिः कारणाद्भेदेनयत्कार्यवर्गस्यासत्त्वंकारणाद्वैतताप्रयोजकंतस्यसिद्धयेविशदीकरणायइमांवक्ष्यमाणांयुक्तिंपिताप्रोक्तवानित्यर्थः ॥ १०१ ॥ नामेति इदंघटादिरूपंकार्यंनामधेयंनाममात्रं यतोवाचावाङ्मात्रेणैवारभ्यतेस्पष्टत्वेनव्यवह्रियतेनत्वर्थतःकिंचिदप्यारभ्यते नहिमृदाघटआरब्धइतिवक्तुंशक्यं तस्यमृन्मात्रत्वात् कथंमृदामृदेवारभ्येत तार्किकाहिकपालभिन्नंघटंकपालारब्धंब्रुवतेइतिभावः तथाचसविशेषणेहीतिन्यायेनघटेव्यवह्रियमाणोमृद्भेदोनामोपाधिकएवेत्याह कारणादिति कार्यंयत्कारणावधिकभेदविशिष्टंप्रतीयतेतत्तद्वन्नामविशिष्टंसदेवप्रतीयतेनकेवलमित्य

उपपत्तिमिमांप्राहुःकार्यस्यासत्त्वसिद्धये ॥ कारणाद्व्यतिरेकेणसर्वत्रैवातिधीधनः॥ १०१ ॥ नामधेयमिदं कार्यंवाचैवारभ्यतेयतः॥ कारणाद्व्यतिरेकेणकार्यंतद्वत्प्रतीयते ॥ १०२ ॥ कोवापटगतांस्तंतून्पृथक्कृत्यातिबुद्धिमान्॥ पटंविलोकयेत्तद्वन्मृदंहित्वाघटादिकं॥ १०३॥ ततःकारणमेवैकंसत्यंयत्तुमृदादिकम् ॥ कार्यंस्यादनृतंयस्मान्नाममात्रात्प्रतीयते ॥ १०४ ॥ रज्ज्वांफण्यादिकंयद्वत्खेवागंधर्वपत्तनं ॥ मृषाप्रतीयतेतद्वद्विकारःकारणेखिलः ॥ १०५॥ कारणंकार्यरूपेणविक्रियासुप्रयातिचेत् ॥ क्षीरंदध्यात्मनायद्वद्ध्रुवंनाशंचतद्व्रजेत्॥ १०६॥ नहिदध्यात्मतांप्राप्तंक्षीरंनाशविवर्जितम्॥ पूर्ववल्लभ्यतेयद्वन्मृद्घटाद्यात्मतांगता॥१०७॥

र्थः तथाचनाम्नएवभेदइतिभावः ॥ १०२ ॥ एतद्दृष्टांतेनस्फुटयति कोवेति वाशब्दइवार्थः यथापटभावंगतांस्तंतून्पृथक्कृत्यातिबुद्धिमानपिकःपटंविलोकयेन्नकोपितथामृदादिकारणंहित्वाविविच्यकोघटादिकार्यंविलोकयेदित्यर्थः ॥ १०३ ॥ तस्मात्कारणमेवसत्यमित्याह ततइति स्पष्टम् ॥ १०४ ॥ कार्यस्यविवर्ततामेवप्रकटयति रज्ज्वामिति स्पष्टं ॥ १०५ ॥ नचेयंश्रुतिःपरिणामदृष्ट्यभिप्रायाकारणस्यसत्यतोक्तिविरोधादितिदर्शयन्परिणामवादंनिरस्यति कारणमितिनवभिः यदिकारणंक्षीरदधिन्यायेनपरिणमेततदाविनश्येतैव तथाचतत्सत्यत्वेननोच्येतेतिभावः ॥ १०६ ॥ परिणामिनाशमेववैधर्म्येणाह नहीति नेत्यावर्त्तते तथाचदध्यात्मतांप्राप्तंक्षीरमविनष्टमितिन यतोघटात्मतांप्राप्तामृद्यथापूर्ववल्लभ्यतेतथानलभ्यतेइत्यर्थः ॥ १०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यच्चपरिणामितदुपादानमेवनभवति कार्यानुगमरूपस्योपादानलक्षणस्याभावात् किंतुकार्याकारभ्रमेदोषविधयानिमित्तमेवेत्याह तत
इति ततोविनाशित्वात्क्षीरंदध्नःसाक्षादनुगतंकारणमुपादानाख्यंनभवति किंतर्ह्युपादानमितिचेत्पृथिव्यादिभूतत्रयमेवयत्सर्वत्रानुगतं
तत्तद्रूपैरुपलभ्यतइत्याह किंत्वित्यादिना येतेजोबान्नात्मकाःकेचिदवयवाघासेधेनुभक्ष्येप्रथमंस्थितास्तेक्षीरादीनामुपादानं वक्ष्यमा
णैःकृष्णादिरूपैःसर्वत्रोपलभ्यमानत्वादितिद्वयोरर्थः ॥ १०८ ॥ १०९ ॥ क्षीरस्यदधिप्रतिनिमित्ततांस्फुटयति मृत्पिंडइति यथाआका

ततोदध्नोत्रनैवस्यात्क्षीरंसाक्षाद्धिकारणं ॥ किंतुक्षीरस्यदध्नश्चतक्रस्यापिघृतस्यच ॥ १०८ ॥ कारणंपशुघा
सस्थास्तेजोवन्नस्वरूपिणः ॥ केचित्त्ववयवास्तेतुलभ्यंतेसर्वदैवहि ॥ १०९ ॥ मृत्पिंडोत्रयथैवस्यान्निमित्तं
घटजन्मनि ॥ आकारवान्मृदोभिन्नःक्षीरंदध्नस्तथास्मृतं ॥ ११० ॥ घटेजातेयथैवात्रमृत्पिंडोनैवलभ्यते ॥
दध्यादौचतथाक्षीरंकदाचिन्नैवलभ्यते ॥ १११ ॥ मृदेवलभ्यतेयद्वत्सर्वत्रैवघटादिषु ॥ घासस्थावयवास्त
द्वल्लभ्यंतेदेवताहिताः ॥ ११२ ॥ ततोयत्परिणामिस्यात्क्षीरवत्तन्नकारणं ॥ यच्चतद्वर्जितंतत्तुविज्ञेयंकार
णंसदा ॥ ११३ ॥

रविशेषशालीमृत्पिंडोघटस्यजन्मनिघटाकारभ्रमेनिमित्तमात्रं घटदशायामननुगमात् तथाक्षीरंदध्नइत्यर्थः॥११०॥ परिणामिनोऽननुग
मंनिदर्शयति घटेजातइति यथाघटोत्पत्तौसत्यांमृत्पिंडस्यानुपलब्धिस्तथादध्युद्भवेक्षीरस्येत्यर्थः ॥ १११ ॥ अधिष्ठानस्यकारणत्वंस्फुट
यितुमनुगममाह मृदेवेति यथाचूर्णपिंडादिरूपैर्हीनामृद्घटादिदशायामप्यनुगताकारणत्वयोग्यातथाघासेष्वप्यवयवभावेनस्थितास्ताः
पृथिव्यप्तेजोभिधादेवताःसर्वलौकिककार्येष्वनुगतालभ्यंतेयतस्ततस्ताएवदध्यादीनांकारणमित्यर्थः ॥ ११२ ॥ फलितमाह ततइति
ततःविनाशित्वाद्धेतोःपरिणामिवस्तुनोपादानत्वयोग्यं यच्चतद्वर्जितंपरिणामरहितंस्थिरंतदेवोपादानमित्यर्थः ॥ ११३ ॥ ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसतिश्रुतौलोहमणिनखनिकृंतनपदाभ्यांलक्षितयोःसुवर्णायसोरपिनपरिणामित्वेनदृष्टांततातथासतिसत्यत्वस्यसाधर्म्यस्यव्याघातात् किंतुविवर्तोपादानत्वेनैवेत्याशयेनाह परिणामीति यदिसुवर्णादिकमपिपरिणामिभवेत्तदाकुंडलाद्युत्पत्तौनोपलभ्येततत्तूपलभ्यतेतस्मात्परिणामिकारणत्वेननदृष्टांततयेष्टमित्यर्थः ॥ ११४ ॥ एवंकारणस्यसत्यत्वेवस्तुमहिम्नैवभेदाभेदमतनिरासपूर्वकमद्वैतंविकाश्यतेइत्याह भेदाभेदइति कार्योपादानयोर्यःसांख्यभट्टादिभिरभ्युपेतोभेदाभेदःसत्यभेदविशिष्टोऽभेदोयश्चवैशेषिकादिभिरभ्युपेतोभेदःकेवलस्तदुभयमप्ययुक्तमित्यर्थः तत्रभेदासंभवेहेतुतयातद्व्यापकस्यभिन्नदेशत्वस्याभावमाह भेदइति यत्रभेदस्तत्रभिन्नदेशत्वंदृष्टंयथागवाश्व

परिणामिसुवर्णादिभवेच्चेत्क्षीरवद्धितत् ॥ लभ्येतनपुनस्तस्मात्परिणामिनकारणं ॥ ११४ ॥ भेदाभेदोनभेदोवाकार्यकारणयोःक्वचित् ॥ भेदेगवाश्ववद्भिन्नदेशेस्यातामुभेअपि ॥ ११५ ॥ भिन्नदेशत्वमुभयोर्वादिभिःकल्पनाकृतं ॥ यस्मान्नगम्यतेसर्वलोकैर्घटपटादिषु ॥ भेदःस्यात्तावतानैवभेदाभेदोभविष्यति ॥ ११६ ॥ तस्मादभिन्नमेवैतत्कार्यंस्यात्कारणात्सदा ॥ सर्पादिकंयथारज्ज्वाःपृथगनुपलब्धितः ॥ ११७ ॥ रज्जुतत्त्वेचविज्ञातेसर्पादिर्नैवलभ्यते ॥ यथातथैवकार्याणिहेतुतत्त्वविनिर्णये ॥ ११८ ॥

योस्तदिहतंतुपटाभ्यांव्यावर्त्तमानंस्वव्याप्यंभेदमपिव्यावर्त्तयतीत्यर्थः ॥ ११५ ॥ ननुपटस्यतंतुदेशत्वंतंतूनांभूतलादिदेशत्वंचवदद्भिस्तार्किकैर्भिन्नदेशत्वंमन्यतएवेतिचेत्तल्लोकप्रतीतिविरोधादयुक्तमित्याह भिन्नेति वादिभिर्यदुभयोःकार्यकारणयोर्भिन्नदेशत्वमुच्यतेतत्कल्पितमेवोच्यतेनवस्तुगतंयतोलोकैर्भूतलादिवृत्तितामेवघटादीनामनुभवद्भिस्तन्नोपगम्यतइत्यर्थः भेदाभेदपक्षस्तुविरोधादेवायुक्तइत्याह भेदइति यदिभेदःस्यात्तदातावताभेदसत्तामात्रेणभेदाभेदपक्षोनैवभविष्यतिनोपपत्स्यतइत्यर्थः नहिविरुद्धयोःसमावेशःक्वापिदृष्टइतिभावः ॥ ११६ ॥ तथाचकारणस्यवास्तवैक्यंसिद्धमित्याह तस्मादिति पृथगनुपलब्धितोविवेकदृष्ट्यापृथक्त्वाभावादित्यर्थः ॥ ११७ ॥ एतत्कारणाद्वैतंविद्वदनुभवसिद्धमित्याह रज्जुतत्त्वइति ॥ ११८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सचतत्त्वनिर्णयोऽपरोक्षरूपएवभेदभ्रमस्यापरोक्षस्यापहारेक्षमइत्येतत्सदृष्टांतमाह अपरोक्षेति अपरोक्षोभ्रमःसाक्षात्कारेणैवनाशंव्रजेत् अन्यथापरोक्षज्ञानोदयेपिवर्तेतैवयथादिग्भ्रमइत्यर्थः ॥ ११९ ॥ एवंघटादिनिरूपितभेदाभावंतेजोबन्नेषुनिश्चित्यतेषामपिकार्यत्वेनतद्भेदाभावंपरमकारणेसतिजानीयादित्याह घटादिकमिति यथाघटादिकंकार्यंपरस्परविभक्तमविभक्तेनविभागहीनेनसर्वत्रानुगतेनहेतुनाकारणेननिरूप्यंतथातेजःप्रभृत्यपिविभक्तत्वलिंगेनकार्यंसत्तेनाविभक्तेनहेतुनैवनिरूप्यमित्यर्थः विभक्तत्वेनहेतुनाइतिपाठेतुस्पष्टं ॥ १२० ॥ ननुविभागोभेदरूपःकार्यत्वंनसाधयतिआत्मादावपिवर्त्तमानत्वेनव्यभिचारादितिचेन्न आश्रयसमानसत्ताकस्यैवभेदस्यजाड्यपर्यवसन्नस्यहेतुत्वेनविवक्षितत्वात् नाप्यविद्यादौव्यभिचारः कल्पितत्वलक्षणस्यकार्यत्वस्यतत्रापिसत्वादित्याशयेनाह विभागश्चेति कार्यत्वस्याध्यस्ततारूपस्यहेतुतयाउपन्यस्तोविभागस्तुजाड्यलक्षणचिदात्मभेदरूपएवेत्युक्तं तथाचानेनविभागरूपेणहेतुनाआत्मनोपि

अपरोक्षधियानाशमपरोक्षभ्रमोव्रजेत् ॥ विपर्ययेतुवर्त्तेतदिङ्मोहइवधीमतां ॥ ११९ ॥ घटादिकंयथाकार्यमविभक्तेनहेतुना ॥ तेजोबन्नात्मकंत्वेतत्कार्यंतेनैवहेतुना ॥ १२० ॥ विभागश्चात्मनोन्यत्वंजाड्यमेवसमीरितं ॥ ततोनैवात्मनोपिस्यात्कार्यतातेनहेतुना ॥ १२१ ॥ अथात्मनोत्रकार्यत्वेकारणंविद्यतेनवा ॥ कारणंनास्तिचेत्तस्यविश्वस्यापिनतद्भवेत् ॥ १२२ ॥ अथचेदस्तितस्यैतत्कारणंतच्चकीदृशं ॥ असच्चेत्कारणंतत्स्यात्कुतस्तस्मात्सतोजनिः ॥ संतोघटादयोयस्माज्जाताःसत्यान्मृदस्त्विह ॥ १२३ ॥

कार्यत्वप्रसक्तिर्नभवतीत्यर्थः ॥ १२१ ॥ ननुव्यंजकाभावेव्यंग्याभावइतिनियमाभावादुक्तहेतुरूपव्यंजकाभावेप्यात्मनःकार्यत्वंकिंनस्यादित्याशंकांवारयितुमात्मनःकार्यत्वानुपपत्तिप्रपंचयति अथेतिनवभिः अथउक्तसाधनंविनापियद्यात्मनःकार्यत्वमिष्यतेतदापीदंवाच्यं किमियमात्मनिष्ठाकार्यताकारणेनहीनासहितावा आद्येजगतोपिघटादेःकार्यतातथास्तु नचेष्टापत्तिः लोकानुभवविरोधादिनास्वभाववादनिरासस्याष्टमेप्रपंचितत्वादिति ॥ १२२ ॥ अंत्येकारणसाहित्यपक्षेपीदंविचार्यं किमात्मनःकारणमसद्रूपंसद्रूपंवा नाद्यः अनुपलब्धिविरोधात् यतःसत्याःसद्रूपायाम्मृदःसकाशात्संतःसद्रूपेणानुगताःशरावादयोजायमानाइहव्यवहारभूमावुपलभ्यंते यदित्वसत्कारणकाःस्युस्तदातेऽसद्रूपेणानुगताःस्युरित्याह अथचेदिति तस्यात्मनः कीदृशंअसद्वासद्वा आद्यंदूषयति असच्चेदित्यादिना सतःसद्रूपस्यात्मनः ॥ १२३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचसापेक्षरूपस्यासत्त्वस्यप्रतीतयेसद्वस्तुकिंचिदभ्युपेयंतथाचतद्धेतोरेवास्तुहेतुत्वंकिंतेनेतिन्यायेनतत्सदेवास्यात्मनोहेतुरस्त्वित्याह अ सत्त्वमिति असत्त्वमसतःस्वरूपंसप्रतियोगिकाभावरूपमेवभवतितच्चस्वप्रतीतौप्रतियोगिभूतंसंतमर्थंप्रतीयमानमपेक्षतेततःप्रतियोगितया सतआवश्यकत्वाद्यत्सद्वस्तुतदर्थमसत्प्रतीत्यर्थंस्यात्कल्प्येततदेवास्यात्मनःकारणमस्तुकिंतेनासतेत्यर्थः॥१२४॥किंचाभावरूपस्यासतःका रणत्वानुपपत्तौहेतवोऽष्टमाध्यायेप्रपंचिताःस्मर्त्तव्याइत्याह अभावइति स्पष्टम्॥ १२५॥ तस्यात्मनःकारणंसदेवेत्यंत्यपक्षेपीदंविचार्यं तत्किंपरिच्छिन्नमपरिच्छिन्नंवा तत्रप्रथमेलोकेपरिच्छिन्नस्यजाड्योपलंभाज्जडस्यकार्यत्वोपलंभाच्चतत्कारणांतरान्वेषणयानवस्थास्यात् तथाचतस्यसतःकार्यत्वाभावेजाड्याभावात्मिकाचिद्रूपतासर्वभेदराहित्यरूपमपरिच्छिन्नत्वंचपरिशेषादभ्युपेयमित्याह ततःसदेवेति

असत्त्वंचसतोभावःसंतमर्थमपेक्षते॥ततोयद्धितदर्थंस्यात्तदेवास्त्वस्यकारणं॥ १२४॥ अभावःकोपिक स्यापिकारणंनोपपद्यते॥ इदंतेकथितंपूर्वंकारणानांविचारणे॥ १२५॥ ततःसदेवतस्यस्याद्धेतुश्चेदात्म नोभवेत्॥ सत्तापिचेत्परिच्छिन्नाघटवत्साजडाभवेत्॥ १२६॥ जाड्येतस्याश्चकार्यत्वमेवंस्यादनवस्थि तिः॥ चिद्रूपिणीततःसत्तासर्वभेदविवर्जिता॥ १२७॥ आत्मनःकारणंसापिभवेच्चेन्नतुसात्मका॥ शय्या सनादिवत्सेयंसुखहेतुर्बलाद्भवेत्॥ १२८॥ तथात्वेजडतापिस्यात्तद्वदेवानिवारिता॥ ततश्चपूर्वंकथितंपुन रावर्त्ततेधुना॥ १२९॥

द्वाभ्यां ततःपरिशेषात्तस्यसद्रूपस्यात्मनोयदिहेतुःस्यात्तदासद्वस्तुरूपएवमंतव्यइति तस्यचपरिच्छिन्नत्वस्यजाड्यादिप्रसंगद्वारानवस्थितेःप्रयोजकत्वादपरिच्छिन्नत्वमेवयुक्तमितिद्वयोरर्थः अत्रद्वितीयदलेसत्तेत्युक्तिःसद्रूपकारणमेवकार्योत्पत्त्यनंतरंतत्प्रकारतामापन्नंवादिभिःसत्तेतिव्यवह्रियतेइतिसूचनायेतिबोध्यं ॥ १२६॥ १२७॥ तस्याएवात्मत्वंचाभ्युपेयमनात्मनःशय्यादिवत्परार्थत्वेनजाड्यस्य कार्यत्वव्याप्यस्यदर्शनादित्याह आत्मनइति प्रोक्तरूपासत्ताप्यात्मनःकारणंभवंतीयदिसात्मिकाआत्मत्वविशिष्टानभवेत्तदाशय्यादिवत्सुखहेतुःशेषभूतेतियावत् स्यात् तथात्वेपरार्थत्वेतुतस्यपरार्थत्वस्यव्यापकंजाड्यंकार्यत्वप्रयोजकंस्यात् ततउक्तदूषणमनवस्थारूपं पुनःप्रसज्जेतेतिद्वयोरर्थः॥ १२८॥ १२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंतस्यात्मत्वेतत्कार्यस्यपरिच्छिन्नत्वेनात्मत्वानर्हत्वात्सैवात्मेत्याह चिदानंदात्मकेति आत्मांताःशब्दाभावप्रधानाः तथाचचित्त्वमानंदत्वमात्मत्वंचकायत्यात्मनिख्यापयतीतिचिदानंदात्मकासासत्तैवकारणानपेक्षाआत्मनःकारणत्वेनमंतव्या तथासतितत्कार्यस्यपरात्मेनात्मत्वानर्हत्वाद्यत्तत्सत्तारूपंकारणंत्वयामतंसएवनऔपनिषदानामात्मास्तु फलितमाह तथाचेतिद्वयोरर्थः ॥ १२० ॥ १२१ ॥ अस्मिन्नर्थेनानाश्रुतीनामानुकूल्यमितिदर्शयन्प्रकृतश्रुतौसत्पदेनैतदात्मस्वरूपमुक्तमित्याह अजइति अजादिलक्षणआत्मानानाश्रुतिभिरुक्तःप्रकृतेतुसन्निितिपदेनोक्तइत्यर्थः ॥ १२२ ॥ सत्पदेनचिदादिरूपसंग्रहेउपपत्तिमप्याह आनंदेति आनंदादीनामात्मांतानांपदार्थानांप

चिदानंदात्मकासत्तासर्वभेदविवर्जिता ॥ आत्मनःकारणंसेयमेष्टव्याहेतुवर्जिता ॥ १२० ॥ यच्चतत्कारणंतस्यसनआत्मेतिगीयते ॥ तथाचजायतेनात्माकारणैरितिचस्थितं ॥ १२१ ॥ अजोनित्यश्चभगवान्सर्वकारणकारणं ॥ आनंदात्मास्वयंज्योतिर्निर्भेदःसन्नितीरितः ॥ १२२ ॥ आनंदज्ञानसत्तानामात्मनश्चयदाभिदा ॥ तदाजाड्यंपरिच्छेदाद्भवेत्तेषांघटादिवत् ॥ तथाचपुनरप्येतदुक्तदूषणमापतेत् ॥ १२३ ॥ सदानंदात्मविज्ञानेततोभेदोनकश्चन ॥ सदादयस्ततःशब्दाएकार्थाःपरिकीर्त्तिताः ॥ १२४ ॥ पौनरुक्त्यंनतेषांस्यादेकार्थत्वप्रदर्शनात् ॥ ज्ञायतेपूर्वमज्ञातंश्रुत्यासर्वैर्जनैरिह ॥ १२५ ॥ सतएवात्मनस्तस्मात्तेजोबन्नात्मकंजगत् ॥ उत्पद्यतेयथाकाशाद्गंधर्वनगरादिकं ॥ १२६ ॥

रस्परंभेदेसतिवस्तुपरिच्छेदेनतद्व्यापकंजाड्यंस्यात् तथाचोक्तकार्यत्वप्रसक्तिद्वारकमुक्तमनवस्थारूपंदूषणंस्यादित्यर्थः ॥ १२३ ॥ तथाचैषामैक्यमेवेत्याह सदानंदात्मेति विज्ञानांतपदानांसमाहारद्वंद्वऐक्यविशदत्वाय एकार्थाएकवस्तुप्रकाशकाः ॥ १२४ ॥ पौनरुक्त्यंपरिहरति पौनेति पूर्वार्द्धेननकारविमुक्तेनशंकोक्तिः असत्वदुःखत्वपरिच्छिन्नत्वादिभ्रमापोहेनाज्ञातात्मबोधस्यएभ्यःपदेभ्यःसर्वानुभवसिद्धत्वान्नपौनरुक्त्यमितिपरिहारउत्तरार्द्धेनोक्तः ॥ १२५ ॥ फलितमाह सतएवेति सतःसत्पदेनप्रदर्शितात् ॥ १२६ ॥ ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवर्त्तविषयासतःसकलप्रपंचोपादानत्वेनपरमसत्यतामेवनानोपपत्तिभिर्विशदयति घटादिष्विति षोडशभिः यथाघटशरावादिषुकार्येषुकारणरूपेणमृद्भातितथाआत्मनःस्वरूपभूतासत्तासर्वत्रभातीत्यर्थः ॥ १३७ ॥ ननुतस्याअधिष्ठानभूतायाःस्फूर्त्तौकथंसंसारात्मकाध्यासस्थितिरितिचेन्नत्यक्त्वादिविशेषाणामावरणस्यनिवृत्तिसामग्र्याअलाभादित्याह प्रतिभांत्यपीति यथाराजामनुष्यत्वेनभासमानोपिबालैराप्तोपदेशंविनाराजत्वेननज्ञायतेतथेयमात्मरूपासत्ताप्रतिभांतीसर्वत्रभासमानापिगुरूपदेशंविनाआत्मत्वेननज्ञायतेतदाऽज्ञानरूपमायाकार्यस्यसंसारस्यस्थितिःततोमायारूपकारणस्यस्थितेरेवबोध्येतिद्वयोरर्थः ॥ १३८ ॥ १३९ ॥ उक्तमायारूपदोषस्यगुरू

घटादिषुयथानित्यंभातिमृत्कारणात्मना॥ जगत्यस्मिंस्तथासत्ताभातिसर्वेषुवस्तुषु॥ १३७॥ प्रतिभांत्यपिसाचैवंनभात्यात्मतयानृणां॥ गुरूपदेशशून्यानांबालानामिवभूमिपः ॥ १३८॥ संसारस्ततएवायमविनष्टोत्रवर्त्तते ॥ आत्मनोमाययाजातोमायायानाशवर्जनात् ॥ १३९ ॥ यदैतत्सत्तयाभातंमाययापिविवर्जितं ॥ पुमानात्मतयादेवंगुरुवाक्यात्प्रपद्यते॥ १४० ॥ तदाविश्वमिदंनायंप्रपश्यतिकदाचन ॥ गंधर्वनगरंयद्वद्गगनेदोषवर्जिते॥ १४१ ॥ गगनाज्ञानतोयद्वद्गंधर्वनगरस्थितिः ॥ आत्माज्ञानात्तथाविश्वमुत्तिष्ठतिसदात्मनः॥ १४२॥ गंधर्वनगरंयद्वन्नामधेयात्प्रतीयते ॥ आदावंतेचमध्येचगगनेनैववस्तुतः ॥ १४३॥ नामधेयात्तथाविश्वंवस्तुशून्यंप्रतीयते ॥ आदावंतेचमध्येचसदानंदात्मनीश्वरे॥ १४४॥

पदेशेननिवृत्तौतुसंसारानुपलंभोविद्वदनुभवसिद्धइत्याह यदैतदिति एतदुक्तप्रकारकंयथाभवतितथासत्तारूपेणभातमपितत्पदार्थंदेवंगुरुवाक्यनपरिहृतमायावरणकमात्मत्वेनप्रपद्यतेलभतेतदाविश्वंनपश्यति यथादोषैर्नीहारपृष्ठगतसूर्यांशुसंपर्कादिभिर्वर्जितेगगनेगंधर्वनगरमितिद्वयोःसंबंधः ॥ १४० ॥ १४१ ॥ यथाचदृष्टांतेगगनत्वस्यापरिणामित्वस्याज्ञानमेवनगराकारतामापद्यतेतथात्रापीत्याह गगनाज्ञानतइति स्पष्ट ॥ १४२ ॥ यथाचगगनात्तस्यभेदोनाममात्रेणनवस्तुतःकालत्रयेपितथाब्रह्मणोजगतइत्याह गंधर्वेति स्पष्टंद्वयं ॥ १४३ ॥ १४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टांतेपिनीरादिदोषाणामविद्याक्षोभकत्वमेवगंधर्वनगरंप्रतिप्रधानकारणतातुगगनतत्त्वविषयकाविद्यायाएवतथाप्रकृतेपीतिदर्शयन् प्र
पंचस्यकल्पितत्वावेदकंप्रातिभासिकत्वमाह गंधर्वनगरमिति कालत्रयेअसदपिगंधर्वनगरंकस्यचिद्दोषाक्रांतदृष्टेर्यथामध्येज्ञानसमकाले
भातिज्ञानविषयोभवतितथासंसारःसर्वदास्वरूपेणासन्नप्यानंदात्मनिकस्यचिदस्यमध्येएवभातीतिद्वयोरर्थः ॥ १४५ ॥ १४६ ॥ अने
 नदृष्टांतेनबंधमोक्षव्यवस्थामपिस्फुटीकरोति माययेतिद्वाभ्यां यथापैर्मायामोहितैर्दृश्यमानमपिगंधर्वनगरंमायारहितोनिरस्ताविद्योनप
श्यतितथाऽज्ञैर्दृश्यमानमपिसंसारंमायाहानिलक्षणमोक्षशालीनपश्यतीतिद्वयोरर्थः ॥ १४७ ॥ १४८ ॥ बंधमोक्षकल्पनाधिष्ठानभूतआ

गंधर्वनगरंयद्वन्माययैवप्रतीयते॥ कालत्रयेप्यसन्मध्येकस्यचिद्दोषदर्शिनः॥ १४५॥ आनंदात्मनिसंसारो
माययैवप्रतीयते॥ तथामध्येत्रकस्यापिसर्वदासत्स्वरूपतः॥ १४६॥ माययारहितोयद्वद्गंधर्वनगरंपरैः॥ ग
गनेदृश्यमानंचनपश्यतिकदाचन॥१४७॥ आनंदात्मनिसंसारंदृश्यमानंतथापरैः॥ माययारहितोमुक्तोनप
श्यतिकदाचन ॥ १४८ ॥ एकएवयथास्वप्नेबद्ध्यतेचविमुच्यते ॥ एकएवतथाजीवोबद्ध्यतेचात्रमुच्यते
॥ १४९॥ बंधमोक्षौयथास्वप्नेविद्येतेनैववस्तुतः॥ तथाजागरणेप्येतौनतौवस्तुदृशासदा॥ १५०॥ बंधमो
क्षादिसंसारंयत्सदैकंप्रपश्यति॥ सत्यंतदेवविज्ञेयंतद्दृश्यमनृतंपुनः॥१५१॥ यदेतद्दृष्टरूपंस्यात्सत्यंतत्कारणं
मतं॥ दृश्यंकार्यमसत्यंस्याद्वाचैवारभ्यतेयतः॥१५२॥ इत्यभिप्रायवानेषश्वेतकेतुमभाषत॥ सत्यतांचमृदा
दीनांघटादीनामसत्यतां॥ १५३॥

त्मात्वेकएवेतिस्वप्नदृष्टांतेनाह एकएवेति बद्ध्यतेचविमुच्यतेकल्पितासुस्वव्यक्तिषुबंधमोक्षौपश्यति ॥ १४९ ॥ बंधेति वस्तुदृशावस्तुत
त्त्वालोचनेन ॥१५०॥ फलितमाह बंधमोक्षादीति यत्तत्त्वंबंधादिसंसारस्यसाक्षितदेवपरमंसत्यं तद्दृश्यंतेनभातंसर्वमनृतमित्यर्थः ॥१५१॥
यदेतदिति यदेतत्साक्षिरूपंतदेवसर्वकारणत्वात्परमंसत्यंदृश्यमानंतुतत्राध्यस्ततालक्षणकार्यत्वेनानृतंवाङ्मयनाममात्रत्वादित्यर्थः ॥१५२॥
एतद्दार्ष्टांतिकंसत्परमसत्यत्वंमनसिनिधायमृदादिदृष्टांतत्रयस्यस्वस्वविकारापेक्षंसत्यत्वंपित्राश्रुतायोपन्यस्तमित्याह इत्यभिप्रायेति स्पष्टं
॥ १५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमित्यारभ्योवाचेत्यंतस्यग्रंथस्यार्थमाह यथेतिदशभिः अनेनदृष्टांतत्रयेणइत्युदीरितंप्रदर्शितंभवति इतिकिं घटाद्यपेक्षयामृदादीनामिवविश्वकारणस्यात्मनःपरमंसत्यत्वमिति ॥१५४॥ सत्यसत्यइति सचात्मासत्यसत्यइतिनामोपन्यासादिभिर्वेदेप्रतिपादितोभवतावेदवादिनावेदपाठंदृष्टार्थंजानताज्ञातव्योवेदार्थतयावश्यमवधारणीयोपिसर्वविज्ञानहेतुविज्ञानकोपिचयन्निर्णयायगुरून्प्रतिनपृष्टस्तत्रहेतुस्तवमोहःप्रमादएवेत्यर्थः ॥ १५५ ॥ ततस्त्वयागुरून्प्रतिपुनर्गंतव्यमित्याह ततोगुरूनिति ॥ १५६ ॥ एवमुक्तइति ममगुरवइतिसंबंधः एवंभ

यथामृदादयःसत्याःस्वकार्यापेक्षयामताः॥ मृदाद्यपेक्षयातद्वत्सत्यआत्मेत्युदीरितं ॥१५४॥ सत्यसत्यःसआत्मायंज्ञातव्योवेदवादिना ॥ भवतामोहतोदेवोनपृष्टःस्वगुरून्प्रति ॥ येनज्ञातेनसततंज्ञातव्यंनावशिष्यते ॥ १५५॥ ततोगुरूनितोगत्वाप्रश्नंकुरुयथोचितं॥ विज्ञायात्मानमागच्छपुनरप्यत्रमाचिरं ॥ १५६ ॥ एवमुक्तःश्वेतकेतुःपितरंप्रत्यभाषत ॥ सर्वथागुरवोनैवंज्ञातवंतोममेश्वरं ॥ मयिस्निग्धतमाःकस्मान्नोचुर्मत्यंमहाधियः॥१५७॥ तेषांगोप्यतमंनैवविद्यतेमयिकिंचन॥ यावज्जानंतिगुरवस्तावत्तैःसत्यमीरितं॥१५८॥ पुत्रेभ्योपिप्रियस्तेषामहंशिष्यःसमाहितः॥ अतोनगमनेताततेषामर्थोत्रविद्यते॥१५९॥स्नातस्तेभ्यस्त्वनुज्ञांतांप्राप्यदेशमुपागतः॥ कथंपुनरहंगंताविश्वासरहितोयथा ॥ १६० ॥ भगवान्वचनंमत्यंकथयत्वात्मनेर्पितं ॥ यज्ज्ञानादखिलंज्ञातमज्ञातंज्ञायतेपिच ॥ १६१ ॥

वदुक्तविधयाईश्वरंनज्ञातवंतः यदितुज्ञातवंतस्तर्हिस्निग्धतमत्वेनस्नेहातिशयशालित्वेनतेषांमांप्रतितदनभिधानमनुपपन्नंस्यादित्यर्थः ॥ १५७ ॥ एतदेवस्फुटयति तेषामितित्रिभिः तावत्तैरीरितमितिसत्यमितियोजना ॥ १५८ ॥ पुत्रेभ्यइति तेषांसमीपइतिशेषः ॥१५९॥ स्नातइति तेषामनुज्ञांप्राप्यस्नातःसमावर्तनसंस्कारंप्राप्तःसन्देशमागतोहमविश्वस्तवत्पुनर्गंतागमनकर्त्ताकथंभवेयमित्यर्थः ॥ १६० ॥ भगवानिति तस्मात्पूज्योभवानेवआत्मनेआत्मानंबोधयितुमर्पितमुपन्यस्तंवचनंकथयतुविदितंकरोतुयदर्थविज्ञानादखिलंज्ञायते अखिलमित्यस्यविवरणंज्ञातमज्ञातंचेति ॥ १६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्तः पितेति अग्रेसरः मुख्यः ॥ १६२ ॥ आहेति हेसोमवत्प्रियदर्शनइत्येवंसुतंसंबोधयन्सन्निदमाह इदंकिं यत्श्रुत्युक्तंभवतापृष्टंच तद्वक्ष्यामित्वंगर्वंपरित्यज्यश्रृणिवित्यर्थः ॥ १६३ ॥ तत्रादौयद्विज्ञानात्सर्वविज्ञानंलभ्यतेतद्वस्तुनोऽखंडत्वंसर्वभेदराहित्यलक्षणंप्रतिपादयति यदिदमित्यूनविंशतिश्लोकैः यन्नामरूपक्रियात्मकंविश्वंदृश्यतेविषयीक्रियते कीदृशं सदसच्छब्दाभ्यांस्थूलसूक्ष्मवाचकाभ्यांतज्जन्यधियाचगम्यंस्वविषयकशब्दबुद्धिभ्यांसहितंचतत्सर्वंश्रुताविदंपदेनोक्तमित्यर्थः ॥ १६४ ॥ सदेवेति तदिदंपदोक्तंविश्वंसृष्टितःपुरापूर्वंसदेवसन्मात्रमासीत् कीदृशं सदसच्छब्दबुद्धिभ्यांभेदसापेक्षाभ्यांवर्जितं प्रातःकालेघटशरावादिकंमृन्मात्रमासीदितिवदियमुक्तिरितिसूचय

एवमुक्तःपितातेनसतामग्रेसरस्तुयः ॥ अंगीचकारनिखिलंवक्तुकामःसुतंप्रति ॥ १६२ ॥ आहचेदंसुतंश्वेतकेतुंसंबोधयन्हिसः ॥ वक्ष्यामिभवतापृष्टंसोमवत्प्रियदर्शन ॥ सावधानमनाभूत्वाश्रृणुगर्वविवर्जितः ॥ १६३ ॥ यदिदंदृश्यतेविश्वंनामरूपक्रियात्मकं ॥ सदसच्छब्दधीगम्यंशब्दबुद्धिसमन्वितं ॥ १६४ ॥ सदेवासीत्पुरातत्तुशब्दबुद्धिविवर्जितं ॥ नततोन्यज्जगत्सर्वंयदुक्तंतेपुरामया ॥ १६५ ॥ सत्तेयंभवताज्ञेयासर्वभेदविवर्जिता ॥ चिदानंदात्मिकानान्याजडायात्रघटादिषु ॥ १६६ ॥ जडानांहिविभक्तत्वाद्भवेज्जन्मघटादिवत् ॥ ततोविलक्षणासास्याःकारणंयात्रकीर्त्तिता ॥ १६७ ॥ सूर्योदयात्पुरायद्वत्तमस्तिष्ठतिसर्वतः ॥ विश्वोत्पत्तेःपुराप्येतदासीदव्याकृतंत्विदं ॥ १६८ ॥

न्नाह नततइति अत्रसत्पदेनवैशेषिकाद्यभिमताजातिरूपाव्यक्तिसापेक्षासत्तानविवक्षितेतिदर्शयंस्तत्रहेतुतयापूर्वोक्तंस्मारयति यदुक्तमित्यादिना यत्यतःपुरादृष्टांतत्रयाभिप्रायप्रदर्शनेतुभ्यमित्युक्तमित्यर्थः ॥ १६५ ॥ इतिकिमित्याकांक्षांपूरयति सत्तेयमितिद्वाभ्यां इयंविश्वकारणभूतासत्ताभवतासर्वभेदरहिताचिदादिरूपाज्ञेया यातुअत्रवैशेषिकादिमतेप्रसिद्धाघटादिषुसमवेताजडाचसानज्ञेया जडानांविभक्तत्वलिंगेनाध्यस्तत्वरूपकार्यत्वस्यनिश्चितत्वादित्यर्थः फलितमाह ततइति ततोजडेभ्यः इतिद्वयोरर्थः ॥ १६६ ॥ १६७ ॥ इदमेवसद्वस्तुतद्धेदंतर्ह्यव्याकृतमासीदित्यादिश्रुत्यंतरेष्वव्याकृतपदेनोक्तमित्याह सूर्योदयादिति सूर्योदयपूर्वकालिकतमःसदृशमायोपहितरूपेणैतदेवतत्त्वमव्याकृतमित्युक्तमित्यर्थः ॥ १६८ ॥ ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परंतुवक्ष्यमाणविधयामायायाद्वैतापादकत्वाभावात्तस्यनिर्विशेषतायानक्षतिरित्याह यत्रेति यद्वस्तुप्रागवस्थंकारणावस्थमभूदव्याकृतादिपदैर्व्यवहृतंतन्निर्गुणंब्रह्मैवयत्रविदुषामपिवाङ्मनसयोर्निवृत्तिरुच्यतेइतियोजना ॥ १६९ ॥ तत्रातीतकालोक्तिरपिकालवासनावासितशिष्यबुद्ध्यनुरोधेनैवेतिदर्शयंस्तस्यनिर्विशेषतामेवस्फुटयति देशइति भविताभविष्यति ॥ १७० ॥ तस्यस्वगतभेदवारणमेवकारकृतंसवैधर्म्यदृष्टांतमाह वृक्षइति यथैकोपिवृक्षःशाखादिभिःस्वगतभेदवान्प्रसिद्धस्तथायमात्मानभवतीत्यर्थः ॥ १७१ ॥ तथैकपदेन सजातीयभेदोव्युदस्तइत्याह व्यक्तेरिति सतिसत्पदोक्तेआत्मनि ॥ १७२ ॥ अद्वितीयपदेनतुविजातीयभेदोवारितइत्याह विजातीयादि

यत्रवाचोनिवर्त्ततेविदुषांमनसासह ॥ तदेवनिर्गुणंब्रह्मप्रागवस्थमभूत्तदा॥ १६९॥ देशःकालस्तथावस्तु सदसद्वानकिंचन ॥ आसीन्नैवास्तिनैवैतद्भविताथत्रवस्तुनि॥ १७० ॥ वृक्षोयथात्रनानात्माशाखास्कंधादिनाभवेत्॥ एकोपिनतथात्मायंस्वयंभेदविवर्जितः ॥ १७१ ॥ व्यक्तेर्व्यक्त्यंतराद्भेदोगवादीनांयथाभवेत्॥ सजातीयाच्चनतथासतिभेदोस्तिकश्चन॥ १७२॥ विजातीयाद्यथाभिन्नागवाश्वमहिषादयः ॥ नतथाकोपिभेदोत्रसतितस्मिन्हिविद्यते ॥ १७३॥ स्वसजातिविजात्युत्थभेदत्रयविवर्जितं ॥ यस्मादेतदतःसद्भिःसदेवेतिनिगद्यते ॥ १७४॥ मायाद्यपितस्मिन्स्याद्द्वितीयाकारणेसदा॥ तथापिमाययैवैषावर्त्ततेनतुवस्तुतः ॥ १७५॥ उलूकस्ययथारात्रिरुलूकस्यप्रसिद्धितः॥ सिद्ध्यत्यत्रतथामायामाययैवप्रसिद्ध्यति॥ १७६॥

ति स्पष्टं ॥ १७३ ॥ फलितमाह स्वसजातीति एतत्तत्त्वंयस्मात्सर्वभेदहीनमतःसन्मात्रमित्युक्तमित्यर्थः ॥ १७४ ॥ अथमाययासद्वितीयत्वमाशंक्यतस्याअवास्तवत्वेनपरिहरति मायेत्यादिना यद्यपितस्मिन्ब्रह्मणिकारणत्वोपपादिकामायाद्वितीयत्वेसंभाव्यतेतथापितस्यामायामोहितैरेवदृश्यत्वेनावास्तवत्वान्नतथात्वयोग्यतेत्यर्थः ॥ १७५ ॥ तस्यामाययैववर्त्तनेदृष्टांतमाह उलूकस्येति यथास्माकंदिनमुलूकस्यरात्रिरित्यत्रोलूकानुभवएवप्रमाणंतथामायायामप्यज्ञानुभवएवतथेत्यर्थः ॥ १७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाचमेरुपरपार्श्ववर्त्तिनिभगवतिसूर्येरात्रौमूढदृष्ट्यातमसःस्थितिस्तथामायापिमूढदृष्ट्यापरमात्मनिस्थितेत्याह सहस्रेति संस्मृतौविस्मृतौमूढदृष्ट्येतियावत् ॥ १७७ ॥ विद्वद्दृष्ट्यातदभावमुदाहरति नेत्रैरिति अत्रात्मनिवीक्षणान्महावाक्यजादनंतरमितिशेषः ॥ १७८ ॥ वस्तुतःपरमात्मनिमायासंगाभावंविशदयति कालत्रयेपीति स्पष्टं ॥ १७९ ॥ अज्ञगतायास्तत्पदार्थावरणेदृष्टांतमाह तमइति तमोमेघादिकंवाद्रष्टॄणांनेत्राण्याच्छाद्याकाशेसद्विद्यमानंरविमंडलमाच्छादयतीतियथाप्रसिद्धमित्यर्थः ॥१८०॥ एवमिति एवमज्ञानांबुद्धिरोधंकुर्वाणामायासर्वदोषहीनेप्यात्मनिगीयतेइति ॥ १८१ ॥ फलितमाह ततइति ततःसत्पदोक्तोभगवानात्मैवासीत् तद्भिन्नंसदादिकंस्थूलंसू

सहस्रकिरणेयद्वत्तमस्तिष्ठतिरात्रिषु ॥ आनंदात्मनिमायापितथातिष्ठतिसंस्मृतौ ॥ १७७ ॥ नेत्रैर्विलोक्यमानेस्मिन्नुदितेरविमंडले ॥ तमोनदृश्यतेयद्वत्तद्वन्मायात्रवीक्षणात् ॥ १७८ ॥ कालत्रयेपितमसास्पृश्यतेनदिवाकरः ॥ यथातथायमात्मापिमाययास्पृश्यतेनहि ॥ १७९ ॥ तमोमेघादिकंयद्वत्पुंसोनेत्रविरोधकं ॥ आवृणोतिसदाकाशेविमलंरविमंडलं ॥ १८० ॥ एवमात्मनिमायेयंसर्वदोषविवर्जिते ॥ बुद्धिरोधंहिकुर्वाणागीयतेतत्रसाद्विजैः ॥ १८१ ॥ ततःसदेवभगवानासीन्नान्यत्सदादिकं ॥ नमायात्रयतोनैववस्तुतोविद्यतेत्रहि ॥ १८२ ॥ एवंव्यवस्थितेतत्त्वेकेचिद्ब्रह्मवेदिनः ॥ सत्तायाःस्थानकेऽसत्तामभिषिंचंतिपंडिताः ॥ १८३ ॥ एवंवदंतःसत्ताकिंसतीवाप्यसतीचवा ॥ सतीचेत्सास्वयंतादृग्रूपावापरतोपिवा ॥ १८४ ॥

क्ष्मंविश्वंमायाचनासीत् यतएषामायात्रपरमात्मनिवस्तुतोनास्तीत्यर्थः ॥ १८२ ॥ अथश्रुत्यानिरासायोपन्यस्तमसत्कारणवादिमतंदर्शयति एवंव्यवस्थितइत्यष्टभिः एवमुक्तविधयाअखंडसत्तालक्षणेतत्त्वेकारणस्वरूपेव्यवस्थितेविशेषेणप्रमेयानुसारिसकलप्रमाणसंवादलक्षणेनदेदीप्यमानेपिसतिकेचिद्ब्रह्मबोधहीनाःपंडिताःसत्तास्थानेकारणत्वलक्षणेअसत्तामभिषिंचंतिस्थापयंतीत्यर्थः ॥ १८३ ॥ एवंवदंतइति कीदृशास्ते एवंवदंतस्तर्कयंतः एवंकथं इयंविश्वोपादानतयावर्णितासत्ताकिंसद्रूपाविपरीतावा आद्येतस्याःसद्रूपत्वंकिंस्वयंस्वरूपप्रयुक्तंकिंवापरतःपरयाधर्मभूतयासत्तयाकृतमित्यर्थः ॥ १८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमइति प्रथमेस्वयंसत्वपक्षेअस्याःसतायाअसत्तापेक्षयाकोविशेषःस्यान्नकोपि असत्तायाअपिस्वरूपेणसत्त्वंस्यादितिप्रसंगस्यप्र तिरोद्धुमशक्यत्वादितिपूर्वदलार्थः नचविधिप्रत्ययेनाऽस्तीत्याकारेणगम्यत्वंविषयीक्रियमाणत्वंसत्तायाविशेषः तस्यसत्तायामेवाव स्थानस्यकुलधर्मवद्वृद्धसंकेतमात्रप्रयुक्तत्वेनासत्तायामपिगमनेबाधकाभावात् नहिवृद्धसंकेतःपरानसत्तायामपिविधिप्रत्ययंकुर्वाणा न्निरोद्धुंशक्तस्तत्प्रत्ययस्यवैयधिकरण्यादित्याशयेनाह विधीति कुलधर्मतःकुलधर्मत्वेनैवसिद्धंनतुवस्तुस्वभावानुरोधीत्यर्थः ॥ १८५ ॥ किंचसृष्टिपूर्वकालिकभावस्यसद्रूपत्वंविधिप्रत्ययबलेनापिदुरवसेयंतदानींप्रमातृरूपाश्रयाभावेनविधिप्रत्ययस्यैवासंभवादित्याह विधि बोधइति विधेरस्तित्वस्यबोधोपिजगतःप्राक्कालंयतोनगच्छतिनवर्तितुंशक्तःअतोयंविधिबोधस्तदाप्राक्कालेस्वयंस्वरूपेणासन्नवर्त्तमानस्तां सत्तांकथंसाधयेदित्यर्थः ॥ १८६ ॥ परतइत्याद्यद्वितीयंपक्षंविकल्प्यदूषयति परतइति यदासत्तायाःसत्त्वोपपादनायपरासत्ताकल्प्या

प्रथमेकोविशेषोस्याअसत्तायाभविष्यति॥ विधिप्रत्ययगम्यत्वंकेवलंकुलधर्मतः॥ १८५ ॥ विधिबोधोपि जगतःप्रागवस्थांनगच्छति ॥ असन्स्वयंकथंनामगृह्णीयात्तामयंसदा ॥ १८६ ॥ परतश्चेदसंख्याताःस त्तास्तास्वत्रकाचन ॥ सत्तासिद्ध्येतसंख्यातावाज्ञातास्तत्रचांतिमा ॥ उक्तदोषपरिग्रस्ताव्यर्थमध्येप्रकल्पनं ॥ १८७॥ एकरूपापिसत्तेयमथवानेकरूपिणी ॥ आद्यासाऽसत्तयातुल्याद्वितीयाचघटादिभिः ॥ १८८ ॥ घटादिभिःसमानायाजगतःप्रागवस्थितिः॥ यदातदाऽपराद्धंकिंसर्वैरेवघटादिभिः॥ १८९ ॥

तदापिपरायाःसत्त्वोपपादनायान्यासाकल्प्येत्येवंकल्पनारूढाःसत्ताःकिमसंख्याताःसंख्यातावा तत्राद्येदूषणमुक्तंतास्वत्रकाचनसत्ता सिद्ध्येत अज्ञाताइति अस्यार्थ तास्वसंख्यातासुसत्तासुमध्येकाचिदेवसत्तासिद्ध्येतनसर्वाः यतःसर्वाअज्ञाताःक्रमेणयुगपद्वावर्तमानानो पलभ्यंतइति द्वितीयेपक्षेदोषमाह तत्रेत्यादिना तत्रसंख्यातानांसत्तानांमध्येअंतिमाअंत्याउक्तदोषेणविशेषाभावप्रयुक्ताऽसत्तासाम्याप त्तिरूपेणग्रस्तातस्याश्चसत्तांतरंविनापितद्व्यवहारसिद्धौततःप्राचीनानांसत्तानांकल्पनंव्यर्थमित्यर्थः ॥ १८७ ॥ किंचइयंविश्वोपादानभू तासत्ताकिमेकरूपानिर्विकारस्वभावाकिंवापरिणामिनी आद्येतादृश्याअसत्तायाःकोविशेषः अंत्येघटादिसाम्यमित्याह एकरूपेति आ द्याएकरूपा ॥ १८८ ॥ किंचांत्यपक्षेघटादितुल्यायाःसत्तायाःप्राक्कालेसत्त्वेघटादयोपितदानींस्युस्तथाचसृष्टिकालात्तत्कालस्यको विशेषइत्याह घटादिभिरिति ॥ १८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एकरूपत्वपक्षेयदसत्तासाम्यमुक्तंतदेवस्फुटयति प्रथमइति प्रथमेएकरूपत्वपक्षे तस्मादसत्वपक्षएवश्रेयानितिभावः ॥१९०॥ एतन्मतंश्रु तिसूचितप्रत्यक्षविरोधादियुक्तिभिःपरिहरति इत्यादिबहुशइतित्रयोदशभिः इत्यादिकुतर्कजातमसतःकारणत्वसिद्धयेयेवदंतितेतावदि त्थंप्रष्टव्याइत्यर्थः ॥ १९१ ॥ इत्थंकथमित्याकांक्षायामाह असतइत्यादिना सृष्ट्यादौअसतःकारणस्यकार्यंसद्रूपंवाऽभूत्असद्रूपंवा आद्येऽधुनापिअसतोऽविद्यमानात्कारणात्तंत्वादेस्तत्सद्रूपंपटादिकुतोनभवतिजायतेइत्यत्रनियामकंकिंचिद्वक्तव्यमित्यर्थः ॥ १९२ ॥ एतदेवस्फुटयति असतस्त्विति एतत्कार्यमसदसद्रूपमसतःसकाशान्नजायतेयथावंध्यापुत्ररूपात्कारणान्नरेपुरुषेवर्त्तमानंश्रृंगंकालत्रयेपिन

प्रथमेनामभेदोयंज्ञापितःसदसत्त्वयोः॥एकरूपंयतोऽसत्त्वमस्माभिरिहकीर्त्यते ॥ १९० ॥ इत्यादिबहुशो मंदायेवदंतीहतान्प्रति ॥ पृच्छामइदमेवाद्यपंडितंमन्यरूपिणः ॥ १९१ ॥ असतःकारणात्कार्यंसत्स्यात्तद थवाप्यसत्॥ असतःसद्भूत्पूर्वंयदितन्नकुतोधुना॥भवतीतिवदंत्वत्रकारणंतन्नियामकम्॥१९२॥असत स्त्वसदेवैतज्जायतेनकदाचन ॥वंध्यापुत्रान्नरेश्रृंगंभवेत्कालत्रयेपिन ॥ १९३ ॥ ततःकार्यंसदेवस्यात्सर्व थासर्ववादिनां॥सतश्चनासतोजन्मकथंचिदुपपद्यते॥ ततोविकल्पःसकलोव्यर्थएवात्रवादिनः॥१९४॥ अपिसत्तास्वयंसत्तांयदाप्नोतितदात्रकिं॥ दूषणंप्रतिबंदीनदूषणंन्यायवेदिनां ॥ १९५॥

जायतेइत्यर्थः ॥ १९३ ॥ तथाचप्रमाणज्येष्ठेनप्रत्यक्षेणविरोधाद्बाधितंभवतांमतमित्याह ततइति ततोऽनुभवबलात् असतःकार्यत्वस्यापिनृश्रृंगवद्व्याहतत्वाद्द्वितीयकोटिरपिनिरस्तेत्याशयेनाह ततोविकल्पःसकलइति ततोऽनुभवविरोधात् स्फुटमन्यत् ॥ १९४ ॥ अथ तैर्विकल्प्योपन्यस्तान्दोषान्परिहरति अपीत्यादिना किंचसत्तायाःस्वरूपेणैवसत्त्वसिद्धौकोदोषः ननुअसत्तायाअपितथासत्त्वापत्तिरित्युक्तमितिचेन्न असदुत्तरत्वादित्याह प्रतिबंदीति न्यायंपंचावयववाक्यंविदंतिप्रयोक्तुंजानंतियेतर्ककुशलास्तेषांवादिनांदूषणप्रयोगकालेप्रतिबंदीसंज्ञस्यसाम्येनयत्किंचिदापादनरूपस्योत्तरस्याभिधानंनसंमतं एतादृशस्योत्तरस्यन्यायमार्गात्स्खलत्पादैरेवक्रियमाणत्वादितिभावः ॥ १९५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दौर्बल्यप्रयोजकंव्याप्तिराहित्यंत्वदुक्तौस्पष्टमित्याह अपिव्याप्त्येति किंचस्वरूपेसत्तायाःसत्त्वेअसत्तायाअपितथास्यादित्याकारंदूषणं यत्त्वयोक्तंतद्व्याप्त्याविरहितंहीनं नहिस्वरूपत्त्वंसत्वादिव्याप्यं अन्यथास्वरूपेणतेजसउष्णत्वेजलस्यापितत्स्यादित्यापद्येतेतिभावः एत त्स्फुटयन्निर्व्याप्तिकवचनस्योपहास्यतामाह उदकेति अत्रवादिनिपंडितरूपिणिपंडिताभासेइतिइत्थंशतवारमपिप्रोक्तवाक्येउदीरितव चनकेसत्यस्यवादिनोहास्यतातालुकंठादीनांशोषणंचैतदेवद्वयंभवति इतिकिं पार्थिवत्वेनघटवल्लोष्टमपिजलानयनसाधनंस्यादितिद्व योरर्थः ॥ १९६ ॥ १९७ ॥ असत्त्वप्रतियोगितयापिभवद्भिःसत्तावश्यमंगीकर्त्तव्येतिदर्शयन्नितरव्यावृत्तिरूपोऽपोहएवपदप्रवृत्तिनि मित्तमित्याकारेणपरमतेनैवासत्तापदार्थंनिर्वक्ति सत्तेति सत्तायाःसतीत्वंसत्पदव्यवहार्यत्वंसत्पदार्थस्यभेदेनैवभवन्मतानुसरणेनापिसि

अपिव्याप्त्याविरहितंयदुक्तंदूषणंत्वया ॥ उदकाहरणंकुर्यात्पार्थिवोत्रघटोयदि ॥ लोष्टंपार्थिवमप्यत्रतन्नकु र्यात्कथंसदा ॥ १९६ ॥ शतकृत्वइतिप्रोक्तवाक्येपंडितरूपिणि ॥ जायतेहास्यतैवात्रताल्वादेश्चास्यशोषणं ॥ १९७ ॥ सत्तासतीतिविज्ञेयात्व्यसत्त्वस्यविभेदतः ॥ सत्ताभेदादसत्त्वंचस्यादसत्त्वेपिकेवलं ॥ १९८ ॥ अप्यनिष्टंनचास्माकंसत्तापादनमीरितं ॥ असतःकारणस्यास्यसत्ताहेतुत्ववादिनां ॥ १९९ ॥ एवंरूपम सत्प्रोक्तंपारंपर्यात्तथैवहि ॥ अनयोरेकरूपत्वेप्यस्तिभेदोमहानयं ॥ भावाभावात्मकोयोयंप्रसिद्धःसर्वदेहि नाम् ॥ २०० ॥

द्धंतथाअसत्वमसत्पदार्थोपिसत्ताप्रतियोगिकेनभेदेनैवत्वयानिरूप्यइत्यर्थः तथाचसत्तापलापोनयुक्तइतिभावः ॥ १९८ ॥ यच्चभवता स्वरूपबलेनासत्तायाअपिसत्त्वमापादितंतत्सत्कारणंप्रतिपादयतामस्माकमिष्टमेवेत्याह अप्यनिष्टमिति अस्यसत्तास्थानेऽभिषिक्तस्या सतःकारणस्ययत्सत्तापादनंतदस्माकमिष्टमितिसंबंधः ॥ १९९ ॥ यत्तुविधिगम्यत्वस्यकुलधर्मसाम्यमुक्तंतन्निषेधधीगम्यत्वेऽसल्लक्षणे पिसमानमित्याह एवंरूपमिति एवंनास्तीतिवेद्यत्वंरूपंयस्यतत्तथाविधमसदितियदुच्यतेतथाविधिगम्यत्ववत्पारंपर्यादेवस्यात् कथंत र्हिसदसतोर्वैलक्षण्यमितिचेदनुभवबलादेवेत्याह अनयोरिति तथाप्यनयोःसदसतोरैकरूप्यंनभवतिहियतोभावोयमयमभावइत्थंनिरू प्यमाणोभेदःसर्वानुभवसिद्धइत्यर्थः ॥ २०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंलौकिकतर्कप्रधानानांबाह्यानांलोकदृष्टिविरोधेनपरिहारउक्तः अस्मत्सिद्धांतभूतंसत्ताख्यमखंडाद्वैतंतुदिवांधैरंशुमद्बिंबमिवानाकलितंकथमपह्नियेतेतिसूचयन्विधिगम्यत्वलक्षणस्यदूषणप्रयासस्तेविफलस्तस्यलक्षणस्यास्माभिरेवानादृतत्वादित्याह विधीति स्पष्टम् ॥ २०१ ॥ किंतर्हिसद्वस्तुनःसिद्धांतिलक्षणमितिचेदविषयत्वमलक्ष्यत्वंवातदित्याह अवाङ्मनसेति नचैतदलीकेऽतिप्रसक्तं तत्रविषयत्वलक्ष्यत्वयोरभावाधिकरणतायाअप्यसंभवात् सङ्घामभावोनिरूप्यतेइतिसिद्धांतात् अविषयत्वेनप्रत्यगात्मतायाविवक्षितत्वाच्चेतिभावः ॥ २०२ ॥ एतदौपनिषदंतत्त्वंदूषयितुमुद्यताःस्वयमेवापकृताःस्युरितिरूपकेणाह ततइति ततस्तर्काविषयत्वादस्मिन्कारणतत्त्वेवे

विधिप्रत्ययगम्यत्वंयत्त्वयात्रनिराकृतम् ॥ नाचक्ष्महेवयंतस्यलक्षणंतत्कदाचन ॥ २०१ ॥ अवाङ्मनसगम्यत्वंलक्षणंतुसतःस्मृतं ॥ सर्वलक्षणशून्यत्वमथवास्त्वस्यलक्षणं ॥ २०२ ॥ ततोवेदोक्तसूर्येऽस्मिन्कुतर्करजआक्षिपन् ॥ वादिनोयेतएवासन्पांसुलास्याःसुदुर्धियः ॥ २०३ ॥ असत्तेषांवचोनैवस्वीकार्यंवेदवादिभिः ॥ किंतुपूर्वोक्तमेवात्रकारणंसद्भिरोदितम् ॥ २०४ ॥ असतःकारणात्कार्यंसद्यस्मान्नैवजायते ॥ तस्मात्सदेवविज्ञेयंसतःकार्यस्यकारणं ॥ २०५ ॥ कार्यंहिज्ञायतेलोकेकारणज्ञानतःसदा ॥ सर्वस्यजगतश्चैतत्कारणंसत्प्रकीर्तितं ॥ २०६ ॥

दोक्तसाधर्म्येणसूर्यरूपे तत्रसूर्यपक्षेवेदोक्तत्वंवेदत्वेनोक्तत्वंऋग्भिःपूर्वाह्णेयजुर्भिर्मध्यान्हेसामभिःसायंतपतीतिश्रुत्यनुसारात् प्रकृतेतुवेदप्रतिपादितत्वमितिबोध्यं अत्रयेवादिनःसुदुर्धियःकुतर्करूपंरजोधूलिपुंजंआक्षिपन्प्रक्षिप्तवंतस्तेएवपांसुलास्याधूलिव्याप्तमुखाआसन् नतुसूर्यस्यकाचिद्धानिरित्यर्थः ॥ २०३ ॥ श्रेयस्कामैस्तुतेषांतार्किकाणांमतंदूरतःपरित्यज्यशास्त्रदृष्टिलब्धंसत्तत्त्वरूपरविमंडलमेवविश्वकारणतयाज्ञेयमित्याह असत्तेषामिति ॥ २०४ ॥ असत्कारणत्वंह्युपलब्धिबाधितमित्याह असतइति ॥ २०५ ॥ सार्वज्ञ्यलक्षणफलवत्वाच्चसत्कारणंविज्ञेयमित्याह कार्यंहीति स्पष्टं ॥ २०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसतोऽद्वितीयत्वविशदीकरणायश्रुत्युपन्यस्तांसृष्टिप्रक्रियामभिनयति यथेत्यादिना तदद्वितीयत्वेनवर्णितंसत्तत्त्वंयथासमग्रंजगत्सृष्टव दसृजत्तंप्रकारंशृणु तत्सर्वभेदहीनंब्रह्मकर्तृएवमचिंतयत् कीदृशं वस्तुतःसर्वदामाययाऽसंस्पृष्टमपिकल्पितसंबंधेनमायावदित्यर्थः॥ २०७ एवंकथमित्याकांक्षायामाह बहुधेति अहंबहुधास्यांभवेयं कथं स्वयमेवप्रजायेयप्रकर्षेणनानाभेदैर्जन्मलभेयं यतोजन्मनैवमेबहुभावो भवेन्नान्यथाततइतिसंबंधः॥ २०८॥ तैत्तिरीयश्रुतेर्वाय्वाकाशावुपसंहरन्नाह इत्थमिति नकेवलंसर्वभूतसृष्टेःप्रागेवोक्ताकारंचिंतनम करोत्किंतुप्रत्येकभूतसृष्टेःप्रागपीत्याह एकैकेति कीदृशंतत्सत् एवंबहुधास्यामित्याद्याकारविचिंतनपूर्वकंप्रत्येकभूतरूपतांगतमित्यर्थः

यथाजगत्समग्रंतत्सृष्टवत्सत्तथाशृणु॥ सर्वभेदविहीनंतद्ब्रह्मैवसमचिंतयत्॥ माययापरिगूढंसदगूढमपिस र्वदा॥ २०७॥ बहुधास्यांप्रजायेयस्वयमेवयतस्ततः॥ जन्मनोबहुभावोमेभविष्यतिनसंशयः॥ २०८॥ इत्थंविचिंत्यभूतानिपंचतत्ससृजेक्रमात्॥ एकैकभूततांप्राप्तमेवमेवविचिंत्यच॥ २०९॥ आकाशश्चत थावायुःपंचीकरणकर्मणि॥ उपयुक्तौततोहित्वातौश्रुतिःसृष्टिमब्रवीत्॥ तेजोबन्नात्मनामेषांत्रिवृत्करणका म्यया॥ २१०॥ स्थूलांबुद्धिंसमाश्रित्यत्रिवृत्करणमीर्यते॥ सत्येवपंचीकरणेशिष्याणांसमनुग्रहात्॥ २११॥ तेजस्तदनुनीराणितान्यन्नंभूमिशब्दवत्॥ सूक्ष्माचाभूत्तुसर्वत्रब्रह्मतत्तत्स्वरूपवत्॥ २१२॥ इदानीमपिसं तापाद्दृष्टिरन्नंततोभवेत्॥ आदौयतस्त्रयंत्वेतदेकमेकस्यकारणं॥ २१३॥

॥ २०९॥ तत्रप्रकृतच्छंदोगश्रुत्याकाशवाय्वोःसृष्ट्यनभिधानेप्रयोजकमाशयंवर्णयति आकाशश्चेति बालैर्दुरवगमेपंचीकरणेउपयुक्त योर्वाय्वाकाशयोःसृष्टिमुपेक्ष्यानुग्रहेणशिष्याणांस्थूलांबुद्धिंसमाश्रित्यानुसृत्यात्रश्रुत्यात्रिवृत्करणमेवेर्यतेप्रतिपादयितुमिष्यते अतस्तेजः प्रभृतीनांत्रयाणामेवसृष्टिरुक्तेतिद्वयोरर्थः॥ २१०॥ २११॥ तत्रक्रममाह तेजइति ब्रह्मकर्तृप्रथमंतेजःसूक्ष्मातदनुतदनंतरंनीराणिसूक्ष्मातद नुतदनंतरंभूम्यपरनामकमन्नंचसूक्ष्मातत्तत्तादात्म्यंप्राप्तमभूदित्यर्थः॥ २१२॥ सएवसृष्टिक्रमोधुनाप्यनुभूयतेइत्याह इदानीमिति यतए तत्तेजोवन्नलक्षणत्रयांतर्गतमेकंप्रथममेकस्यान्यस्योत्तरस्यकारणमभूत् ततइदानीमपिसंतापादातपातिशयाद्वृष्टेर्भवनंततश्चान्नभवनंयु क्तमित्यर्थः॥ २१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहबीजानांजरायुजादिशरीराणांत्रैविध्यदर्शनेनापिप्रत्यक्षजगतःकारणत्रयमवधार्यमित्याकारकंतृतीयकंडिकाद्यवाक्यस्यार्थमाह ते
जोबन्नात्मकमितिषड्भिः यस्मादस्यजगतःकारणंतेजोबन्नलक्षणैस्त्रिभीरूपैस्त्र्यवस्थमासीत्ततस्तंकारणस्वभावमनुसृत्यैवैतानिवक्ष्यमाणा
॥१७॥ निशरीरिणांबीजानिसंततिप्रयोजकानिकारणानित्रिणित्रिविधानिसंपन्नानीत्यर्थः ॥ २१४ ॥ तानिगणयति जरायुजमिति जरायुजा
ख्याशरीरिजातिःप्रथमंशरीरिणांबीजं तस्यप्रथमत्वंचजरायोर्जठराग्निपाकजत्वेनतैजसत्वात् ततःस्वेदजंद्विविधंजायते तस्यद्वैविध्यमुपपा
दयति एकमित्यादिना यदेकंमशकादिरूपंस्वेदजमुद्भिज्जंभवति अपरंयूकादिरूपंत्वंडजमंडभावद्वाराजायमानत्वादित्यर्थः तथाचक्लेदज
स्योद्भिज्जांडजाभ्यांयथायोगमाप्यपार्थिवाभ्यांसंग्रहसंभवाज्जरायुजांडजोद्भिज्जाख्यानित्रीण्येवबीजानीतिप्रकृतश्रुतेराशयइतिभावः ॥

तेजोबन्नात्मकंयस्मात्त्रयमेवहिकारणं ॥ बीजानिततएतानिप्रोक्तानित्रीणिदेहिनां ॥ २१४ ॥ जरायुजंभू
तजातमादावेवप्रजायते ॥ स्वेदजंचततस्त्वेकमुद्भिज्जंचांडजंपुनः ॥ २१५ ॥ जलान्युद्भिद्यजायेतेभूमिंस्था
वरसंघवत् ॥ अंतर्भावंततस्तत्रवर्णयामाससूत्रकृत् ॥ पाराशर्योमहाभागोव्यासःसत्यवतीसुतः ॥ २१६ ॥
असत्त्वंहिचतुर्थस्यनिवारयतितत्प्रभुः ॥ नांतर्भावंकरोत्यत्रतात्पर्यंसर्वदर्शिनः ॥ २१७ ॥

२१५ ॥ तृतीयशब्दावरोधःसंशोकजस्येतितृतीयाध्यायप्रथमपादगतसूत्रेणोद्भिज्जएवांतर्भावोक्तिस्तुउद्भिद्यजायतइतिव्युत्पत्तिरंडजेयू
कादावपिसंभवतीत्येतावद्बोधयितुंनत्वंडजेंतर्भावंवारयितुमित्येवंविधंसूत्रकाराशयंदर्शयति जलानीतिद्वाभ्यां उद्भिज्जांडजलक्षणौद्वाव
पिस्वेदजस्यभेदौजलान्युपादानभूतान्युद्भिद्यऊर्ध्वंभित्त्वैवजायेतेउत्पद्येते यथास्थावरावृक्षादयोभूमिमुद्भिद्यजायंतेतद्वत् ततस्तमेनंव्युत्प
त्तिसमन्वयंमनसिनिधायभगवान्सूत्रकृत्तत्रउद्भिज्जेस्वेदजस्यांतर्भावमुवाचेत्यर्थः ॥ २१६ ॥ एवंव्याख्यानस्यतात्पर्यानुरोधितामाह अस
त्त्वमिति हियतस्तत्तेनोक्तसूत्रनिर्माणरूपव्यापारेणप्रभुःसूत्रकृच्चतुर्थस्यस्वेदजस्यऐतरेयोक्तस्यासत्त्वंवारयतितस्यासत्त्वंनास्तीत्येतावदेव
विवक्षतिनत्वत्रोद्भिज्जएवांतर्भावंकरोति यतस्तस्यमुनेरत्रवक्ष्यमाणेऽर्थेतात्पर्यं तत्रहेतुगर्भंविशेषणंसर्वदर्शिनइति ऐतरेयादिवाक्यानिलो ॥१७॥
कवृत्तंचप्रकृतश्रुतावेवकारंचपश्यतइतितदर्थः ॥ २१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रेत्युक्तंसर्वाविरोधिमुनितात्पर्यमभिनयति अंडजाइति आद्यपदेनयूकादीनामपिसंग्रहः अपिशब्देनमशकादीनांग्रहः स्फुटमन्यत् ॥ २१८ ॥ त्रित्वमिति यतोऽध्यात्मप्रपंचस्यबीजेत्रित्वंत्रैविध्यंदृष्टंततोविश्वकारणेपितेजोबन्नरूपैस्त्रैविध्यंबोध्यमितिशेषः एतद्विज्ञानस्य किंफलमितिचेत्परमकारणेसन्मात्रेबुद्धेरवतारएवेत्याह तत्स्थितमित्यादिना तेजोबन्नेषुस्थितंसद्रूपेणानुगतमस्मदादिभिरधिकारिभिर्दृश्य तामन्वेष्टव्यंस्यादित्येतदर्थमेतदुक्तमितिशेषः ॥ २१९ ॥ परमकारणस्यतेजःप्रभृतिष्वनुगमेश्रुत्युक्तंहेतुमाह कारणात्मतयेति तेजोबन्नेषु कार्येषुघटेषुमृद्वत्कारणभूतापरादेवताप्रविष्टेतिबोध्यं यतस्तल्लिंगंतस्याःपरायादेवतायाअसाधारणधर्मभूतमीक्षणंदृष्टंश्रुत्याप्रतिपादितं त·

अंडजाःपक्षिसर्पाद्याउद्भिज्जाःस्थावरा अपि ॥ शेषाजरायुजाज्ञेयाःसर्वएवापिजंतवः ॥ २१८ ॥ त्रित्वंबीजे यतस्तस्मात्तेजोबन्नेचतत्स्थितं ॥ कारणंसर्वजगतोदृश्यतामस्मदादिभिः ॥ २१९ ॥ कारणात्मतयापूर्वंते जोबन्नेषुदेवता ॥ प्रविष्टायतएवैतत्तल्लिंगंदृष्टमीक्षणं ॥ २२० ॥ तेजआपश्चतद्यद्दोक्षित्वास्त्रष्टिसिद्धये ॥ बहुधास्यांप्रजायेयेत्येवंदृष्टप्रवर्त्तनं ॥ २२१ ॥ प्रविष्टापिनतेष्वेषाप्रविष्टाजीवरूपतः ॥ प्राणानांधारकोयो यंसजीवइतिकथ्यते ॥ २२२ ॥

थाचश्रुतिः तत्तेजऐक्षतेत्यादिः ॥ २२० ॥ एतदेवस्फुटयति तेजइति तेजश्चआपःजलतत्त्वंचएतद्द्वयंयद्यस्मात्तद्वत्सदाख्यपरमकारणव द्बहुधास्यांप्रजायेयेत्येवमीक्षित्वादृष्टप्रवर्त्तनंदृष्टंप्रवर्त्तनंयस्यतथाभूतंजातमित्यर्थः ॥ २२१ ॥ एवंसद्विज्ञानेनतद्विकाराणांविज्ञानेपिजी वविज्ञानंकथमित्याशंकावारणायजरायुजादिशरीरविशिष्टरूपेणतद्विकारत्वंजीवानामुक्तंतेषांशुद्धरूपेणत्वैक्यमेवेतिसूचयितुंजीवरूपेण प्रवेशोवक्ष्यतेतमवतारयन्यदिपरादेवताकार्येष्वनुगतातर्हिकिमर्थंपुनर्जीवरूपेणप्रविष्टेतिशंकांपरिहरन्जीवतत्त्वंवर्णयति प्रविष्टापीति द्वादशभिः एषासदाख्यापरादेवताकारणत्वेनतेजःप्रभृतिषुप्रविष्टापिजीवरूपेणनप्रविष्टा तत्रहेतुतयाजीवधर्माणांप्राणधारणादीनांतदानी मभावंसूचयन्जीवंलक्षयति प्राणानामित्यादिना जीवप्राणधारणइतिस्मृतेः ॥ २२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणाइति बहुवचनदर्शितान्प्राणभेदान्कीर्तयन्संसारोनामादेहग्रहणरूपःफलंशुभाशुभरूपंमोक्षोबंधध्वंसएतत्त्रयमपिजीवलक्षणमित्या
हप्राणापानाविति यःसन्निधिमात्रेणप्राणादीन्दधातिव्यवस्थांनयतिसंसारादिफलभागीचभवतिसचिद्धातुर्जीवइत्यर्थः ॥ २२३ ॥ तस्य
संसारादिसंबंधप्रयोजकोयेनोपाधिनासंबंधस्तंलक्षणतयाह स्वांगुष्ठेनेति स्वपदेनतत्तच्छरीरग्रहः हृदयांबुजंहृदयमध्यच्छिद्रंतत्रहृदयां
बुजेज्ञानशक्तिमदंतःकरणंवर्त्ततेतेनांतःकरणेनसहतादात्म्याध्यासंयोभजतिसजीवइत्यर्थः ॥ २२४ ॥ यद्यंतःकरणमेवजीवोपाधि
स्तदासुषुप्तावंतःकरणनाशेनजीवनाशापत्तिरित्याशंकांपरिहरति नास्येति अस्यांतःकरणस्यसुषुप्तावपिसर्वथानाशोनभवतिकिंतुसंस्का
राख्यसूक्ष्मरूपेणतदानीमप्यंतःकरणंतिष्ठति यतोजागरणकालेतद्वत्सुषुप्तिपूर्वकालीनांतःकरणवदेवांतःकरणमस्तिउपलभ्यतेयदिनश्ये
त्तर्ह्युत्तरदिनेविजातीयमंतःकरणमुपलभ्येतनचतथोपलभ्यतेइत्यर्थः ॥ २२५ ॥ जीवस्यनित्यत्वमेकत्वंचोपपादयति कारणात्मनीति

प्राणापानावुभावेकोव्यानोदानसमानकान् ॥ दधातियःसजीवोयंसंसारफलमोक्षभाक् ॥ २२३ ॥ स्वांगुष्ठे
नमितंसर्वदेहिनांहृदयांबुजं ॥ तत्रांतःकरणंनित्यंवर्त्ततेज्ञानशक्तिमत् ॥ तादात्म्यंतेनयोगच्छेत्सजीवइति
गद्यते ॥ २२४ ॥ नास्यसर्वात्मनानाशःसुषुप्तावपिविद्यते ॥ यतःसंस्काररूपेणतद्वज्जागरणेस्तिहि ॥ २२५ ॥
कारणात्मनिचैतस्मिन्नस्यतादात्म्यमिष्यते ॥ ततोभवतिकार्येस्मिंस्तादात्म्यंनांतरीयकं ॥ २२६ ॥ ततोंतः
करणोत्पत्तौनाशेवानात्मनःक्वचित् ॥ उत्पत्तिनाशौभवतःसर्वदैवैकरूपिणः ॥ २२७ ॥

त्रिभिः एतस्मिन्सत्पदवाच्येकारणात्मनिविश्वबीजवासनासंभृतमायाविशिष्टेपरमेश्वरेअस्यांतःकरणतद्वासनाविशिष्टरूपस्यजीवस्यता
दात्म्यंकल्पितभेदविशिष्टाभेदरूपंमतंसांप्रदायिकैर्यतस्ततःकारणतादात्म्यभावादेवास्मिन्नंतःकरणादिरूपेकार्येतादात्म्याध्यासोनांतरीय
कोऽविनाभावीपृथक्साधनानपेक्षइतियावत्भवतिउपलभ्यते यद्यंतःकरणबीजेऽस्यजीवस्यतादात्म्यंनस्यात्तदांतःकरणोदयेनयौगपद्य
शालीतत्तादात्म्याध्यासोनोपलभ्येतेत्यर्थः ॥२२६॥ तथाचांतःकरणस्यप्रतिदिनंजनिक्षयशालित्वेपितद्बीजवासनाशालिनोऽज्ञानस्यत
त्त्वज्ञानपर्यंतंस्थिरस्यजीवोपाधितामभिसंधायजीवस्यनित्यतामेकतांचव्यवहरंतीत्याह ततइति आत्मनोजीवस्यएकरूपिणःएकंआधा
रसंख्यययाएकत्वेनविवक्षितंरूपंवासनात्मकउपाधिर्यस्यसतथातस्य यद्वावासनाधारेणाज्ञानेनएकेनरूपिणउपाधिमतः ॥ २२७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतइति अंतःकरणस्थस्तत्तदंतःकरणेषुभिन्नतयाप्रतीयमानोपिकारणेनबीजाधारेणतादात्म्यंसेवतएवततोवासनानामाधारैकत्वेनैकतां गतानामुपाधित्वमभिसंधायजीवएकउच्यतेकार्योपाधिरयंजीवइतिजीवलक्षणंवदद्भिरपीत्यर्थः ॥ २२८ ॥ अस्यजीवस्यमोक्षोपिस्थि रोपाधावज्ञानेस्थितानामज्ञानकर्मवासनानामाश्रयनाशप्रयुक्तनाशादेवभवतीत्याह अवस्थात्रयेति अवस्थात्रयस्यहेतवोनिमित्तभू ताःकर्मवासनाअंतःकरणस्यवृत्तिज्ञानरूपस्यहेतवःसंस्काराख्याज्ञानवासनास्तासांसर्वासांयदाश्रयस्यक्षयेणक्षयःस्यात्तदामोक्षइत्यर्थः ॥ २२९ ॥ वासनात्मकबीजाऽनाशनाशाभ्यांबंधमोक्षव्यवस्थांदृष्टांतेनस्फुटयति सत्यामितिद्वाभ्यां दृष्टांतेआश्रयनाशोवन्हिसंसर्गो षरत्वादिनाबोध्यः निगदव्याख्यातंद्वयं ॥ २३० ॥ २३१ ॥ इयंव्यवस्थाप्यबोधनिद्रासुप्तानांदृष्टिमनुरुध्यैवनपरमार्थतः एकए

यतोंतःकारणस्थोपिजीवस्तत्कारणात्मकः॥ एकएवततोजीवोविद्वद्भिःपरिपठ्यते॥ २२८॥ अवस्थात्रयहे तूनांवासनानांयदाक्षयः॥ अंतःकरणहेतूनांतदाजीवोविमुच्यते ॥ २२९॥ सत्यांभूमौयथामूलबीजनाशे तरुःक्षयं॥ कश्चित्प्रयातिनैवान्येवटाद्यास्तरवस्त्विमे ॥ २३०॥ एवंमायास्थितोजीवःकश्चिदेवविमुच्यते॥ यस्यांतःकरणस्यायंवासनानांपरिक्षयः॥ २३१॥ स्वप्नेयथाभवेद्बद्धोमुक्तश्चैकस्तथैवहि ॥ एकएवचजीवा त्माबद्धोमुक्तश्चमायया॥ २३२॥ यथास्वप्नक्षयेबंधमुक्तीस्वप्नगतेनहि ॥ एवमात्मनिविज्ञातेबंधमुक्तीनके अपि॥ २३३॥ सर्वगोपियथाकाशःप्रविशेद्धिघटादिषु॥ सर्वगोपितथात्मायंप्रविशेन्मनआदिषु॥ २३४॥

वनजीवोस्तिजीवानांराशयःकुतइतिसिद्धांतादितिदर्शयंस्तत्रस्वप्नव्यवहारंदृष्टांतयति स्वप्नइति ॥ २३२ ॥ प्रबोधेतुवास्तवैक्यप्रादुर्भावा न्नकापिव्यवस्थापेक्षेत्याह यथेति स्वप्नगतेस्वप्नप्रतीते ॥ २३३ ॥ एवंजीवस्यकल्पितोपाध्यवच्छिन्नरूपेणपरदेवतायाःसकाशाद्विशेष भाक्त्वेप्युपाधिविविक्तरूपेणैक्यमेवेतिदर्शितं अथनिरूपितविशेषभावलक्षणःप्रवेशःपरिपूर्णस्यापिसंभवतीतिदृष्टांतद्वयेनोपपादयन्नालो चनपूर्वकंप्रवेशत्रिवृत्करणयोःप्रतिपादकस्यवाक्यस्यार्थमाह सर्वगोपीतिसप्तभिः यथाघटादिदेशेपूर्वमपिसतआकाशस्यजायमानघ टादिप्रयुक्तावच्छेदलक्षणःप्रवेशःप्रसिद्धस्तथापरमात्मनोपिमनआदिषुमनसःसात्विकांशरूपेणकारणेषुभूतेषुईक्षणादिव्यवहारप्रयोजकः प्रवेशोबोध्यइत्यर्थः ॥ २३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाहंकाराद्यवच्छिन्नचिदाभासरूपेणपुनःप्रवेशेदृष्टांतमाह यथेति यथासुप्तपुरुषस्यजीवनव्यवहारान्यथानुपपत्त्याशरीरेसामान्यरूपेणप्रवेशांगीकारेपिजागरेणजाग्रदवस्थयाअभिव्यक्ताहंकारावच्छिन्नरूपेणविशेषतःप्रवेशःस्वीक्रियतेइत्यर्थः ॥ २२५ ॥ दार्ष्टांतिकेयोजयति तेजोबन्नेष्विति सापरमात्मसंज्ञादेवताअचिंतयद्वक्ष्यमाणाकारमालोचनंकृतवती ॥ २२६ ॥ आलोचनमभिनयति अनेनेति अनेनसाक्षादपरोक्षेणस्वात्मरूपेणस्वकीयशुद्धरूपेण कीदृशेन जीवस्थेनआध्यासिकसंबंधेनजीवानुप्रविष्टेनजीवकल्पनाधिष्ठानभूतेनेतिया

यथाशयानःपुरुषःप्रविष्टोपिकलेवरे ॥ विशेषतोजागरेणप्रवेशमधिगच्छति ॥ २२५ ॥ तेजोबन्नेषुतद्वत्साप्रविष्टापिचदेवता ॥ जीवात्मनाविशेषेणप्रवेशार्थमचिंतयत् ॥ २२६ ॥ अनेनस्वात्मरूपेणजीवस्थेनविशेषतः ॥ अत्राधुनास्त्रष्टिमनुप्रविष्टाजीवरूपतः ॥ तेजोबन्नात्मिकाःसर्वाइमास्तिस्रोपिदेवताः ॥ २३७ ॥ विविधंचतथास्पष्टंकरवाण्यद्यसर्वथा ॥ नामरूपंद्वयंत्वेतदुपायस्तस्यभातिमे ॥ २३८ ॥

वत् पुनःकीदृशेन अत्रविशेषतःएषुभूतेषुवर्तमानमहंकारादिकंविशेषंप्राप्यजीवरूपतःजीवभावंप्राप्तेन अधुनाअस्यैवविवरणंस्त्रष्टिमन्वति इमास्तेजःप्रभृतिलक्षणादेवताःसूक्ष्मास्तेजःप्रभृतिभूतानांव्यक्तीःप्रविष्टाःसंति अहंनामरूपंचेत्येतद्द्वयंविविधंस्पष्टंचकरवाणिकुर्यां तस्यनामरूपयोःस्पष्टीकरणस्यायंवक्ष्यमाणउपायोपिमयानुसंधीयतेइतिद्वयोरर्थः अत्रजीवरूपानुप्रवेशंविनाअहंममत्वाभिमानसाध्यस्तत्तज्जातीयव्यवहारः केवलेनपरमात्मनादुष्करइत्यतस्तदुक्तिः व्याकरणेकर्तृत्वंतुविश्वकर्त्तुःपरमात्मनएव संज्ञामूर्तिकॢप्तिस्तुत्रिवृत्कुर्वतउपदेशादितिसूत्रादितिबोध्यं ॥ २३७ ॥ २३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सचोपायस्त्रिवृत्करणरूपइत्याह तेजोबन्नात्मिकास्तिस्रइति त्रिवृत्पदस्य त्रिवृद्धहिष्टवमानंभवतीत्यादिवैदिकप्रयोगेनवसंख्याकवस्तुप्रतिपादकत्वस्यदर्शनाद्वैदिक्याकांक्षावैदिकेनैवपूर्यतेइतिन्यायानुकूल्याच्चएकादशोक्तपंचीकरणन्यायेनत्रिवृत्करणमिदं तथाहि प्रत्येकंभूतत्रयंत्रिस्त्रिर्विभज्यसर्वेषांतृतीयांशांस्त्रेधात्रेधाविभज्यसर्वत्रमेलयेत् इत्थंकृतेपरकीयंभागद्वयंस्वंस्वंभागसमकंचसिद्ध्यति अविभक्तप्रथमद्वितीयभागयोरपितृतीयभागतुल्यत्वादिति अत्रानुकूलयुक्त्यंतरंचैकादशोक्तंस्मर्त्तव्यं मूलान्वयस्तुतासुतिसृषुदेवतासुप्रविश्यनामरूपयोः स्फुटीकरणायप्रत्येकंनवधानवधाकरवाणीत्येवंविचिंत्यसापरादेवतासर्वंचिंतितमकरोदिति ॥ २३९ ॥ २४० ॥ चतुर्थींकंडिकांत्रिवृद्भावोदाहरणमुखेनापवादपरामवतारयति सृष्टिमिति उक्तविधत्रिवृद्भावेनरूपिणींदृश्यमानरूपांसृष्टिमध्यारोपभूतांप्रोच्यकथयित्वायथा

तेजोबन्नात्मिकास्तिस्रोवर्त्ततेयाश्चदेवताः॥ एकैकंकरवाण्येतानवधानवधापुनः॥ २३९ ॥ तासुप्रविश्यचैवंहिस्यातांस्पष्टेउभेअपि ॥ नामरूपेततःसर्वंजगदेतद्भविष्यति ॥ इतिसंचिंत्यसासर्वंस्वचिंतितमथाकरोत्॥ २४० ॥ सृष्टिमेवंस्वपुत्रायत्रिवृत्करणरूपिणीं ॥ प्रोच्यकारणरूपत्वंवक्तुंकार्यस्यसोवदत् ॥ उदाहरणरूपेणवन्ह्यादीनांचतुष्टयं ॥ २४१ ॥ सर्वंहिलोहितंरूपमग्नेरेवात्रनिश्चितम् ॥ अपांशुक्लंतथाकृष्णंपृथिव्याः परिकीर्तितं ॥ २४२ ॥ वन्हौसूर्येचंद्रमसिविद्युत्स्वपियथापृथक् ॥ रूपत्रयस्यकरणादग्न्यादिर्नोपलभ्यते ॥ २४३ ॥ तथाविश्वमिदंसर्वंरूपत्रयविनिर्गमात्॥ नलभ्यतेपृथग्यस्मात्तस्मान्मिथ्येतिकीर्त्यते ॥ २४४॥

कार्यस्यकारणमात्रात्मताऽपवादभूताप्रतिपादिताभवेत्तथाबोधयितुंवन्हिसूर्यचंद्रविद्युद्रूपंचतुष्टयमुदाहरणत्वेनपितापुत्रायावददित्यर्थः ॥२४१॥ तत्रवन्ह्यादौभूयस्त्वेनदृश्यमानंरक्तंरूपंतेजसःसप्तभागशालिनोबोध्यं शुक्लकृष्णरूपेतुप्रांतमध्ययोर्लेशतयावर्तमानेअबन्नयोरष्टमनवमभागशालिनोरेवेत्याह सर्वंहीति सर्वंप्रचुरं अग्नेस्तेजसः अत्रोदाहरणचतुष्टये ॥ २४२ ॥ एवंभूतत्रयसमुदायरूपाणांवन्ह्यादीनांभूतत्रयात्पृथक्करणात्मकेविवेकेक्रियमाणेवन्ह्यादेर्वाधाद्भूतत्रयमेवसत्यतयावशिष्यतइत्याह वन्हाविति रूपत्रयस्यउक्तरूपत्रयाश्रयस्यभूतत्रयस्यपृथक्करणाद्वन्ह्यादेःसत्यत्वमपगच्छतीत्यर्थः ॥ २४३ ॥ एवंजलीयभावेपुनद्यादिषुपार्थिवेषुपर्वतादिषुचभूतत्रयांशविवेकेनमिथ्यात्वंबोध्यमित्याह तथेति स्पष्टं ॥ २४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुमाह विकारइति यतोविकारोवन्ह्यादिर्नाममात्रात्मकः वाचैवारभ्यत्वान्निर्मातव्यत्वात् तत्त्वंचवस्तुतोऽर्थनिरूपणायामभावात् ततः सिद्धात्कारणावधिकपृथक्त्वाभावान्मिथ्येतिसंबंधः फलितमाह ततइति विकारजातस्यकारणंभूतत्रयमेवततोविकारजातापेक्षयासत्यमित्यर्थः ॥ २४५ ॥ इत्थंविकारत्वस्यमिथ्यात्वेनव्याप्तिमवधार्यतेनलिंगेनतेजःप्रभृतीनांकारणस्यसतएवपरमार्थत्वंबोध्यमित्याह एवमिति विकारस्यविभागलिंगेनविकारतयाज्ञातस्ययत्कारणंसद्वस्तुतदेवसत्यं यत्त्वन्यत्त्रयंतन्नसत्यंकार्यत्वात्विकारत्वादित्यर्थः ॥ २४६ ॥ अत्रार्थेविद्वदनुभवःश्रुत्योपन्यस्तस्तंवर्णयति एवंज्ञात्वेति एवमुक्तविवेकविधयाज्ञात्वाअत्रकारणतत्त्वेविद्वांसःकुशलाःकचित्पूर्वेद्विजाइत्थमाहुरित्यर्थः ॥ २४७ ॥ इत्थंकथमतआह अस्मदिति अस्माकंविद्यावंशेभवःकोप्यविज्ञातंकिंचिदपिवस्तुनवदिष्यतिकिंतुसर्वंविज्ञात

विकारोनामधेयात्माकारणान्नपृथग्यतः ॥ वाचैवारभ्यतेयस्माद्वस्तुतोनैवविद्यते ॥ ततोरूपत्रयंसत्यंयद्विकारस्यकारणम् ॥ २४५ ॥ एवंरूपत्रयस्यास्ययद्विकारस्यकारणम् ॥ सत्यंतदेवनान्यत्स्यात्कार्यंरूपंत्रयंहियत् ॥ २४६ ॥ एवंज्ञात्वात्रविद्वांसःपुराहर्षमुपागताः ॥ आहुरेवंहिमिलिताःक्वचित्तेद्विजसत्तमाः ॥ २४७ ॥ अस्मत्कुलेनकोप्यत्रजानन्कारणसत्यतां ॥ कार्यस्यासत्यतांतद्वदविज्ञातंवदिष्यति ॥ २४८ ॥ कारणाच्चपृथग्यस्मात्कार्यंकिंचिन्नविद्यते ॥ ततःकारणविज्ञानात्सर्वःसर्वज्ञतांव्रजेत् ॥ २४९ ॥ एतेरूपत्रयंयस्माज्ज्ञातवंतोमुनीश्वराः ॥ तेजोबन्नस्यतस्यापिकारणंयत्सदद्वयं ॥ २५० ॥ एवमुक्त्वापुनःप्राहतनयंस्नेहसंयुतः ॥ तद्धेतुत्वंविवक्षुःसन्मनसोवैसआरुणिः ॥ २५१ ॥

मेववदिष्यतिकारणसत्यत्वस्यविज्ञानादित्यर्थः ॥ २४८ ॥ कारणविज्ञानस्यसर्वविज्ञातृत्वप्रयोजकतांस्फुटयति कारणाच्चेति स्फुटम् ॥ २४९ ॥ इत्थंवदनंतेषांयुक्तमेवसद्विज्ञानेनविश्वतत्त्वस्यतैरपरोक्षीकृतत्वादित्याह एतेइति ॥ २५० ॥ एवंबाह्यप्रपंचस्यभौतिकतानिरूपणेप्याध्यात्मिकप्रपंचस्यस्थूलसूक्ष्मशरीरलक्षणस्यकथंभौतिकतेतिमंदशंकावारणायमनःप्रभृतीनांभौतिकतांसप्तमकंडिकांतग्रंथेनश्रुत्यावर्णितांविशदयति एवमुक्त्वेत्येकत्रिंशताश्लोकैः आरुणिरुद्दालकएवंतद्बाह्यप्रपंचस्यभौतिकत्वमुक्त्वाथमनसोमनःप्रभृतेराभ्यंतरप्रपंचस्ययद्धेतुत्वंभूतानांतद्द्वाराब्रह्मणश्चतद्विवक्षुर्वक्तुमिच्छन्निदंवक्ष्यमाणमर्थंप्राहेत्यर्थः ॥ २५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदनीयमिति त्रिवृत्कृतभूतात्मकंवाह्यंद्रव्यमन्नोदकाख्यंभक्षितंपीतंवासज्जाठराग्निसंपर्केणत्रिधापृथिव्यप्तेजोरूपैर्विभक्तंभवतिइतिवृत्तं सर्वेषामन्नादिसेविनांशरीरेषुसममित्यर्थः ॥ २५२ ॥ वागिति एवंत्रिधाविभक्तस्याशितादेर्यस्तैजसोभागःसोपित्रिधाभवतिसूक्ष्ममध्यमस्थूलरूपैस्तत्रसूक्ष्मोभागोवाग्रूपेणपरिणमतेमध्योमज्जारूपेणस्थूलोऽस्थिरूपेण जलीयभागस्यसूक्ष्मायाप्राणात्मनात्रिधाभूतस्यप्राणोरक्तंमूत्रंचेतियथाक्रमंपरिणामः पार्थिवस्यतुमनोमांसंपुरीषंचपरिणामइतिद्वयोरर्थः ॥ २५३ ॥ २५४ ॥ षष्ठकंडिकोक्तोदधिदृष्टांतोयांशंकांवारयितुमुक्तस्तामाह तेजोमयीतित्रिभिः वाक्प्राणमनांसियथाक्रमंतेजोबन्नानांकार्याणीतिप्रपद्यश्रुत्वाप्रयत्नवान्सोत्साहःपुत्रइदंचोद्यंप्रश्नमक

अदनीयंहिनिखिलंतेजोबन्नात्मकंयतः ॥ अशितंचतथापीतंततःसर्वंत्रिधाभवेत् ॥ शरीरेसर्वजंतूनामन्नपानानुसेविनां ॥ २५२ ॥ वाक्प्राणोमनइत्येतत्सूक्ष्मंकार्यमुदीरितं ॥ मज्जारक्तंतथामांसंमध्यमंचप्रकीर्तितं ॥ २५३ ॥ अस्थिमूत्रंपुरीषंचस्थूलंस्यात्क्रमतस्त्रयं ॥ तेजोबन्नत्रयस्यापिसूक्ष्मादिपरिभेदतः ॥ २५४ ॥ तेजोमयीहिवागुक्ताप्यम्मयोवायुरेवच ॥ अन्नात्मकंमनस्तद्वदितिपुत्रःप्रयत्नवान् ॥ प्रपद्यचपुनश्चोद्यमकरोत्पितरंप्रति ॥ २५५ ॥ विलक्षणमिदंसूक्ष्मंकथंतस्मात्स्थवीयसः ॥ तेजोबन्नात्प्रजायेतवाक्प्राणमनआत्मकं ॥ २५६ ॥ पुनरेवततोमांत्वमुपपत्तिसमन्वितं ॥ भगवन्वदयेनाहमधिगच्छामितत्त्वतः ॥ २५७ ॥ एवमुक्तःपुनश्चाहश्वेतकेतुंसुतंप्रति ॥ दधिस्थूलंयथात्रेधातक्रफेनघृतात्मना ॥ मथ्यमानंभवेदेवमन्नंजठरगंभवेत् ॥ २५८ ॥

रोदिति ॥ २५५ ॥ इदंकिमतआह विलक्षणमिति स्थवीयसःअतिस्थूलान्नादिरूपेणदृश्यमानात्तेजःप्रभृतेरुपादानात्सूक्ष्मत्वेनविलक्षणंवागादित्रयंकथंजायेतयतःसजातीयानांतंतुपटादीनामेवकार्यकारणभावोदृष्टइत्यर्थः ॥ २५६ ॥ पुनरेवेति स्पष्टं ॥ २५७ ॥ सामग्रीविशेषसहकृतात्स्थूलादपिसूक्ष्मसंभवोदृष्टइत्याशयेनपितुरुत्तरंदर्शयति एवमुक्तइत्यादिना यथाघनत्वेनदृश्यमानस्यापिदध्नोमंथनसहकृतस्यतक्रंफेनोघृतंचेत्येतानित्रीणिकार्याणिदधिभावकालेऽनुपलब्धान्यपिजायमानानिदृष्टानितथाजाठराग्निसंपर्केणतेजःप्रभृतेरपितत्कार्यत्रयंसंभवतीत्यर्थः ॥ २५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घृतमिति यथादृष्टांतेमथ्यमानाद्दध्नःसकाशात्सूक्ष्मांशोघृतरूपेणोर्ध्वंगच्छतितथातेजोबन्नानांत्रयाज्जठरगाद्वाक्प्राणमनसांसप्रत्येकस्यो पादानभूतोभागोप्यूर्ध्वंप्रयातीत्यर्थः ॥ २५९ ॥ फलितमाह वागिति मनोंतःसमाहारद्वंद्वःभूयइत्याद्युत्तरान्वयि ॥ २६० ॥ इत्युक्तइ त्युत्तरसमम्यापरिहार्यांशंकांप्रतिपादयति वाचइति इत्युक्तेर्थेसपुत्रोभूयःपुनःइतिअचोदयत्पृष्टवान् इतिकिं वाचस्तेजोमयत्वंयदु क्तंतत्प्रसिद्धंसंभाव्यते जलीयधातोःकफस्योद्रेकेसतिवाक्शैथिल्यस्यदर्शनात् तथापिप्राणस्याम्मयत्वंमनसोन्नमयत्वंचकथंसंभावितंत त्रान्वयव्यतिरेकयोरदर्शनादितिद्वयोरर्थः ॥ २६१ ॥ २६२ ॥ इत्युक्तइति इत्थंपृष्टःपितातस्माअन्वयादिकंदर्शयितुमिदमुक्तवानित्यर्थः

घृतंयथातिसूक्ष्मांशोदध्नऊर्ध्वंप्रयातिसः ॥ वाक्प्राणमनसांसोपितेजोबन्नत्रयात्तथा ॥ २५९ ॥ वाक्प्राण मनएतस्मात्सूक्ष्मंस्थूलात्प्रजायते ॥ तेजोबन्नात्मकाद्भूयइत्युक्तेसोप्यचोदयत् ॥ २६० ॥ वाचोयत्तैजसत्वं स्यात्तन्नामचभवेदिह ॥ यतःश्लेष्मसमुद्रेकात्तेजसोभिभवेसति ॥ नदृश्यतेऽतिविशदावागियंसर्वदेहिनां ॥ २६१ ॥ मनःप्राणौचकेनैतावन्नकार्यौभविष्यतः ॥ यतोनैवान्वयोनात्रव्यतिरेकश्चदृश्यते ॥ २६२ ॥ इत्यु क्तआरुणिस्तेनतस्मैचश्वेतकेतवे ॥ अन्वयव्यतिरेकौतौदर्शयन्निदमब्रवीत् ॥ २६३ ॥ दशेंद्रियाणिभूतानि पंचप्राणश्चषोडश ॥ पुरुषस्यकलाःप्रोक्तामनसोवृत्तयोद्विजैः ॥ २६४ ॥ एतद्विषयजास्तास्तुनिराहारस्यसंक्ष यं ॥ दिवसेदिवसेयांतिपुत्रसत्यंमयेरितम् ॥ २६५ ॥

॥२६३॥ इदंकिमतआह दशेंद्रियाणीति इंद्रियदशकंभूतपंचकंप्राणश्चेत्येतेषांयःसमुदायस्तत्प्रायःपिंडवच्चित्तादात्म्यमापन्नःसपुरुषइत्यु च्यतेतस्यपुरुषस्यमनसश्चंद्रदैवतकमनःप्रधानस्यकलाःपरिपोषापादकाभागाःषोडशद्विजैरुक्तास्ताकिमात्मिकाइत्यतउक्तं एतद्विषयजा वृत्तयइति एतत्पदेनान्नग्रहः तथाचान्नरूपाद्विषयात्प्रतिदिनमुपभुज्यमानाज्जातावृत्तयोमनोनिष्ठावृत्त्युत्पादनाशक्तयःषोडशदिनावच्छे देनषोडशसंख्यामनोमयपुरुषस्यषोडशकलाइत्युच्यंतेइत्यर्थः तास्तुताउक्तरूपाःकलास्तुनिराहारस्यअन्नंपरित्यजतःपुंसःप्रतिदिनंक्षीय माणाःषोडशभिर्दिनैःसर्वाःक्षीयंतेअत्रनसंशयइतिद्वयोरर्थः एतन्नीरोगवृत्तमुक्तं रोगेतुदोषाणामेवसाशक्तिर्याशक्तिःखलुलंघनेइत्यायुर्वे देविशेषोक्तेरितिध्येयं ॥ २६४ ॥ २६५ ॥ ॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रअन्वयव्यतिरेकपरीक्षणोपयोगिनःप्राणस्यसंरक्षणायजलपानंकुर्वताल्वयापंचदशदिनान्यन्नाशनंहेयमित्याह दिनेति प्राणोनीरंवि नाऽवस्थातुंदिनमात्रमपिनशक्तस्तस्मिन्प्राणेगतेसतित्वन्वयादिकंनैवभवेत्ज्ञायेत यस्मादेवंततोनीरंयथेष्टंपिबअन्नंतुपंचदशदिनानिमा शीर्माभुंक्ष्व ततएवइत्थंकरणादेवअन्वयव्यतिरेकौसुबोधौभविष्यतइतिद्वयोरर्थः ॥ २६६ ॥ २६७ ॥ एवमुक्तइति सश्वेतकेतुःपक्षमा त्रंपंचदशदिनान्यन्नंव्यवर्जयतत्यक्तवान् ततःपितुरंतिकमागात् ॥ २६८ ॥ ऋचइति पितातंक्षुत्क्षाममानसंक्षुधाक्षीणमनसंऋगादीन्पठि

दिनमात्रंविनानीरंनप्राणःशक्नुयात्क्वचित्॥ अवस्थातुंहितस्मिंश्चगतेनैवान्वयादिकं॥ २६६॥ भवेद्यस्मात्त तोनीरंपिवयावदभीप्सितं॥ अन्नंपंचदशाहानिमाशीस्त्वंततएवच ॥ अन्वयव्यतिरेकौतौजानीषेस्वयमेव हि॥ २६७॥ एवमुक्तेततःसोपिपक्षमात्रंव्यवर्जयत्॥ अन्नंपक्षांतआगत्यपितुस्तस्थौसमीपतः॥ २६८॥ ऋचोयजूंषिसामानिसार्थानिवदपुत्रक॥ एवंपितातंतनयंप्राहस्वस्यसमीपगं॥ २६९॥ क्षुत्क्षाममानसंसो यंनकिंचिच्चिंतयन्नपि॥ प्रतिपेदेप्यधीतंयद्दुर्मेधाहियथातथा ॥ २७० ॥ पितरंततएवायंप्राहाक्रोशेनसंयु तं॥ नतानिभांतियद्दृष्टंननुतातसुशिक्षितं ॥ २७१ ॥ भाग्यक्षयेयथापुंसोमंत्रआराधितोबहु॥ तद्वच्चनिष्फ लंजातमधीतंमेपुराभवत् ॥ २७२ ॥ एवमुक्तःपिताप्राहसुतंक्षुत्क्षाममानसं ॥ अशानततएवैतत्सर्वंज्ञास्य सिसुव्रत॥ २७३॥

तुंतदर्थंवेत्तुंचनियुक्तवान् सोयंसुतोपिचिंतयन्सन्नधीतमपिकिंचिन्नप्रतिपेदेनसस्मारदुर्मेधाद्दुर्बुद्धिर्यथानस्मरतितथेतिद्वयोरर्थः॥२६९॥ ॥ २७० ॥ पितरमिति ततोविस्मृतेरेवहेतोराक्रोशेनग्लान्यासहितोऽयंसुतःपितरमिदंप्राह इदंकिं हेतातततानिऋगादीनिममनभांतिज्ञा नंनारोहंति यत्पुरासुशिक्षितमधीतंदृष्टंसदःसुमानितमभवत्तन्निष्फलंजातंयथाबहुभृशमाराधितोमंत्रःपुंसोभाग्यक्षयेनिष्फलोभवतितद्व दितिद्वयोरर्थः २७१ ॥ २७२ ॥ एममुक्तइति अशानभुंक्ष्व ॥ २७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अधुनाविज्ञानसामर्थ्याभावेदृष्टांतमाह महतइतित्रिभिः यथामहतोप्यग्नेरिंधनक्षयेसतिखद्योतमात्रोंऽगारकणःशिष्यतेतेनखद्योतमात्रा वशेषेणाग्निनामहाकाष्ठचयदाहादिरूपंकार्यंकिंचिदपिनजायतेतथातवगनःपंचदशदिनाभोजनेनैककलारूपेणावशिष्टंसत्किंचिदप्य धिगंतुंस्मर्त्तुंनशक्तंतस्माद्भोजनेनोपचितमानसोभूत्वामत्समीपमागच्छेतित्रयाणामर्थः ॥ २७४ ॥ २७५ ॥ २७६ ॥ इत्युक्तइति तेन

महतोज्वलतोवन्हेर्यथेंधनपरिक्षये ॥ खद्योतसदृशोंगारःकश्चिदेवावशिष्यते ॥ २७४ ॥ नतेनपूर्ववत्कार्यं महाकाष्ठचयस्यहि ॥ दाहादिजायतेकिंचिद्यथातद्वत्तवापिहि ॥ २७५ ॥ कलामात्रंस्थितंचेतःकिंचिन्नैवा धिगच्छति ॥ अन्नेनरहितंतस्माद्भुक्त्वामामेहिपुत्रक ॥ २७६ ॥ इत्युक्तेभोजनंकृत्वापूर्ववत्पितरंपुनः ॥ आ गात्तेनाथसंपृष्टंसर्वमेषोभ्यभाषत ॥ २७७ ॥ पितापुनस्तथाहेदंव्यतिरेकावधारिणं ॥ अन्वयप्रतिपत्त्यर्थंव न्हिदृष्टांततःपुनः ॥ २७८ ॥ खद्योतसदृशोंगारश्चितःशुष्कैस्तृणैर्यथा ॥ शनैःशनैर्दहेत्सर्वंशुष्कमार्द्रंचसंच यं ॥ महांतमपिकाष्ठानामाधिक्यंप्राप्यदाह्यतः ॥ २७९ ॥ एवंतेमानसंशिष्टंकलामात्रमभूत्पुरा ॥ आहार ग्रहणाद्वीदंसर्वज्ञंपुनरप्यभूत् ॥ २८० ॥ अन्नात्मकंमनस्तेनभवताप्यवधारितं ॥ अम्मयश्चतथाप्राणस्त थातेजोमयीचवाक् ॥ २८१ ॥

पित्रा ॥ २७७ ॥ पितेति एतावताऽन्नाभावेमनसोभावइत्येवंविधव्यतिरेकंज्ञातवंतमपिसुतंप्रतिवन्हिदृष्टांतेनैवान्वयस्यबोधनायपितापु नरिदमाहेत्यर्थः ॥ २७८ ॥ खद्योतेति यथासूक्ष्मोप्यंगारःशुष्कतृणैश्चितःसंयोजितःसन्शनैःशनैर्दाह्यतोदाह्यभोगप्रयुक्तमाधिक्यंप्राप्य महांतमपिकाष्ठानांसंचयंसर्वंशुष्कमार्द्रंवादहेदित्यर्थः ॥ २७९ ॥ एवमिति एवंतेमनसोप्याहारेणोपचितस्यसर्ववेदनशक्तिःप्रादुरभूदि त्यर्थः ॥ २८० ॥ फलितमाह अन्नात्मकमिति स्पष्टं ॥ २८१ ॥

CC-0. In Public Domain. Digitization by eGangotri

एतावताद्वितीयलक्षणस्तत्पदार्थःशोधितोऽथतस्यप्रत्यक्त्लक्षणत्वंपदार्थतांबोधयितुमुद्दालकइत्यादेःश्रुतिग्रंथस्यप्रवृत्तिः तच्चात्मनःप्रत्यक्त्वंवेदांतेषुत्रेधाबोध्यते चिदाभासबिंबत्वेनदेहाधिष्ठानत्वेनइंद्रियवर्गाधिष्ठानत्वेनचेति तत्रप्रथमंप्रकारंश्रुत्याशकुनिदृष्टांतेनोपन्यस्तंविशदयति एवमित्यादिभिर्विंशतिश्लोकैः एवमुक्तविधयाविज्ञातस्तत्त्वभूतस्तत्पदार्थावच्छेदकभूतोर्थोविश्वोपादानताप्रयुक्ताद्वितीयतालक्षणोयेनसतथातंपुत्रंप्रतिस्वात्मनस्त्वंपदार्थस्यतस्यबोधःशुद्धिस्तदर्थंपिताउद्दालकःपुनराहेत्यर्थः ॥ २८२ ॥ तत्रचित्प्रतिबिंबाधारतयामनसःप्राधान्यंदर्शयति यदन्नमयमिति यन्मनःपूर्वमन्नमयत्वेनोक्तंतस्यमनसएवविलासभूतंसर्वंविश्वंबोध्यं येनहेतुनामनसिसतिपुमानात्मापुनःपुनर्मोहंकार्याविद्याख्यंविपर्ययंयातीत्यर्थः यदिमनोनस्यात्तर्हिकुतस्तत्रप्रतिबिंबलक्षणंमोहंव्रजेत्तदभावेरागाभावात्क

एवंविज्ञाततत्त्वार्थंवाक्प्राणमनसामपि ॥ पुत्रंपुनःपिताप्राहस्वात्मनोबोधसिद्धये ॥ २८२ ॥ यदन्नमयमुक्तंतेमनस्तस्यविजृंभणं ॥ तेजोबन्नात्मकंविश्वंयेनमोमुह्यतेपुमान् ॥ २८३ ॥ देहोस्यप्रथमःप्रोक्तोबंधनंसत्रिधास्मृतः ॥ स्थूलःसूक्ष्मःपरश्चेतिकारणात्मायईरितः ॥ २८४ ॥ कारणंनामसंप्रोक्तमज्ञानंसर्वदेहिनां ॥ साधारणंशरीरंयत्सर्वदुःखौघकारणं ॥ २८५ ॥ सुषुप्तौयत्सदानंदंसर्वैरेवानुभूयते ॥ सर्वदुःखविहीनंतद्विक्षेपपरिवर्जनात् ॥ २८६ ॥

थंचसंसरेदतोविश्वनिर्वाहकंमनःप्रधानमितिभावः ॥ २८३ ॥ अस्यमनसोपिबंधनमुपादानतयावशेस्थापकंकिमतआह देहइति प्रथमआद्योदेहःकारणाख्योऽस्यमनसस्तथेत्यर्थः तद्विशदयितुंदेहस्यत्रैविध्यंसंहारक्रमेणाह सत्रिधेति सदेहस्त्रिधा तत्रस्थूलश्चरमःसूक्ष्मोमध्यःपरःकारणत्वेनसर्वोत्कृष्टःप्रथमइत्यर्थः ॥ २८४ ॥ तत्रपरंदेहंवर्णयति कारणमितिद्वाभ्यां यदिदमज्ञानंतत्कारणंशरीरमुक्तं तस्यपरत्वंचैकत्वेनसर्वसाधारणत्वात्सर्वदुःखबीजत्वाच्चेत्यर्थः ॥ २८५ ॥ तच्चसुखमहमस्वाप्संनकिंचिदवेदिषमितिसुप्तोत्थितपरामर्शानुमितेनसर्वानुभवेनसिद्धमित्याह सुषुप्ताविति सद्भावरूपमानंदमानंदाकारवृत्तिशालिविक्षेपशक्तेस्तिरोभावात्सर्वदुःखहीनंचेत्यर्थः ॥ २८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्यंशरीरंवर्णयति तस्मादिति तस्मादुक्तरूपाज्ञानविशिष्टादात्मनःसूक्ष्माणिभूतानिभौतिकानिमनःप्रभृतीनिचजायंतेयत्समष्ट्यभिमानी हिरण्यगर्भइत्युच्यते अध्यात्मंतुमनइत्येवोक्तं मनःप्राधान्यप्रयुक्ततैजसनामकंप्रोक्तमितियावत् तद्भूतभौतिकंस्थूलंतुसमष्टिरूपेणविराड्भवतीत्यर्थः ॥ २८७ ॥ स्थूलव्यष्टीनांविश्वसंज्ञाप्रयोजकतांसूचयनूजागरणहेतुतामाह प्रातिस्विकमिति प्रतिस्वंभवंप्रतिद्रष्टारंस्फुटभेदमिति यावत् तादृशंयत्सर्वजातीयंस्थूलंशरीरंतज्जागरणावस्थायाःस्थानमित्यर्थः ॥ २८८ ॥ सूक्ष्मेत्विति सूक्ष्मेशरीरेतुस्वप्नावस्थायाःस्थानं साप्याश्रयस्यांतःकरणस्याभिव्यक्तत्वसंस्कारावस्थत्वलक्षणभेदेनद्विधा तत्राद्यास्वप्नसंज्ञयैवप्रसिद्धाअंत्यातुसुषुप्तिरित्युक्तेत्यर्थः ॥२८९ ॥ एवमवतारितयाःसुप्तेःप्रकृतोपयोगंदर्शयनूसर्वदुःखाभावेहेतुमाह आनंदात्मनीति यतस्तदासुषुप्तिकालेअयंजीवःप्रतिबिंबरूपःस्वस्मिन्

तस्मात्संजायतेसूक्ष्मंसमग्रंभूतभौतिकं ॥ हिरण्यगर्भोभगवानधिदैवंयदुच्यते ॥ अध्यात्मंमनइत्युक्तंस्थूलं तुतद्विराट्स्मृतं ॥ २८७॥ प्रातिस्विकंतुयत्प्रोक्तंसर्वेषामिहदेहिनां ॥ अत्रजागरणावस्थाशरीरेपरिकीर्तिता ॥ २८८॥ सूक्ष्मेतुकथितास्वप्नावस्थातांत्वंनिशामय ॥ सापिप्रोक्ताद्विधासद्भिःसस्वप्नास्वप्नवर्जिता ॥ द्वितीयासुप्तिरित्युक्तादुःखंयत्रलयंव्रजेत् ॥ २८९ ॥ आनंदात्मनिनिर्द्वंद्वेसर्वभेदविवर्जिते ॥ स्वस्मिन्नेषलयंयातितदाजीवोयतस्ततः ॥ २९० ॥ स्वपितीतिवदंत्येनामवस्थांनामतोद्विजाः॥ अपरेऽकारलोपेननामोक्तंपरमात्मनः॥ २९१॥

स्वकीयेबिंबभूतेपरमार्थस्वरूपेलयंयातिदर्पणस्थानीयस्यमनसोलयात् ततोदुःखंलयंव्रजेदितिपूर्वेणसंबंधःबिंबस्वरूपस्यसदैक्ययोग्यतासूचनायानंदात्मनीत्यादीनिविशेषणानि निर्द्वंद्वत्वंषडूर्मिराहित्यं तत्रहेतुःसर्वभेदराहित्यमिति ॥ २९० ॥ स्वपितीति एनामवस्थांलौकिकाःस्वपितीतितिङंतपदेनवदंति अपरेतत्त्वविदोद्विजास्तुइतिवदंतीत्यनुषंगः इतिकिं इदंस्वपितीत्याकारकंपरमात्मनएवनामोक्तंभवति परोक्षप्रियाइवहिदेवाइतिश्रौतन्यायसंरक्षणायविहितोयोऽकारयोर्लोपस्तेन अयंभावः लोपपदेनचश्लिष्टेननाशःशक्त्यामध्यन्ह्रस्वेनच विपरिणामोलक्षणयाप्रोच्यते तथाचपूर्वश्लोकोक्तरीत्यान्वर्थैस्वापीतेतिपरमात्मनाम्निस्वपदगतस्याकारस्यलोपेनपररूपाख्यनाशेनतकारगताकारस्यइकारभावापत्तिरूपविपरिणामेनचस्वपितीतिरूपसिद्धिरिति ॥ २९१ ॥ ॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रसुप्तिवर्णनांबिंबभूतात्मनःस्वरूपोपलक्षणायनसुषुप्तिमत्ववर्णनाय कूटस्थेतत्रपरिणामरूपावस्थानांदुर्वचत्वात् कस्यतर्हीयमवस्थेति चेत्संस्काराख्यपरिणामिनोमनसएवेतिदर्शयंस्तस्यसर्वावस्थाभागित्वमाह मनसइति सासुषुप्तिरपिमनसएवविकारःपरिणामोयतइदंमनः स्वप्नजागरणयोर्दशदिशःप्रतिधावनेनश्राम्यतीत्यर्थः तथाचयत्रमनसिभ्रमणंस्वप्नादिरूपंतत्रैवश्रमकार्यभूतलयरूपासुप्तिर्युक्तेतिभावः ॥ २९२ ॥ अत्रार्थेश्रुत्योपन्यस्तंशकुनिदृष्टांतंविशदयति ग्रासार्थमितिद्वाभ्यां यथापंजरेसूत्रेणकेनचिद्बद्धःशकुनिर्भक्ष्यकामःपंजरांतर्देशेएवपक्षचालनेनोड्डीयमानोग्रासस्यभक्ष्यस्यलाभेऽलाभेवायदाश्रांतोभवतितदापंजरेंतर्मध्येउपगम्यपादन्यासस्थानंप्राप्यपूर्वेणभ्रमकालिकेनदुःखेनविहीनोऽतिनिश्चलश्चसन्लीनइवभवतीतिद्वयोरर्थः ॥२९३॥२९४॥ दार्ष्टांतिकेयोजयति एवमिति एवंशकुनिवदिदंमनो

मनसःसापिविज्ञेयाविकारोदुःखदायिनः ॥ स्वप्नेजागरणेनित्यंमनोधावद्दिशोदश ॥ २९२ ॥ ग्रासार्थंशकुनिर्यद्वद्दुःखमेतिनिरंतरं ॥ बद्धोदृढेनसूत्रेणपंजरेकेनचित्सदा ॥ अप्राप्यप्राप्यवाग्रासंश्रमेणमहतायुतः ॥ २९३ ॥ पंजरेपुनरेवैषउपगम्यातिनिश्चलः ॥ पूर्वदुःखविहीनःसन्नास्तेलीनइवांततः ॥ २९४ ॥ एवंदुःखत्रयेणैतत्संतप्तंमानसंसदा ॥ कर्मसूत्रेणसंबद्धंस्वप्नंजागरणंव्रजेत् ॥ कर्मक्षयेप्रयात्यंतःसुप्तिंश्रमविनाशिनीं॥२९५॥ प्राणोपाधिःसदादेवआनंदात्मामहेश्वरः॥ विलीनकरणग्रामस्याश्रयोमनसोमतः॥२९६॥ अन्यदायतनंतस्यप्रबद्धस्येवपक्षिणः॥ नविद्यतेयतस्तस्मान्नचयातीदमेवहि ॥ २९७॥

पिकर्मरूपेणसूत्रेणसंघातलक्षणेपंजरेत्हृदयदेशेसंबद्धंबद्धपादंरागरूपक्षुधाप्रसूतैर्दुःखैःसंतप्तंसत्स्वप्नादौभ्रमतितच्चश्रांतंसत्कर्मरूपसूत्रस्यक्षयेबंधस्थानेंतर्हृद्देशेसुप्तिंश्रमापनयनाययातीत्यर्थः ॥ २९५ ॥ तदानींमनःकारणेलीयतेतद्गतंप्रतिबिंबंतुबिंबेपरमात्मनीत्याह प्राणोपाधिरिति प्राणपदेनस्वार्थसंबद्धंसौषुप्तंकारणाज्ञानंलक्ष्यतेतदुपहितआत्मामनसआश्रयोलयस्थानं कीदृशस्यमनसः विलीनोवशंगतःकरणग्रामोयस्यतत्तथातस्यइंद्रियसहितस्येतियावत् ॥ २९६ ॥ कारणोपाधिभिन्नस्यमनोनिरूपिताश्रयतायामयोग्यतामाह अन्यदिति यतःपंजरबद्धपक्षिसमस्यतस्यमनसस्तस्मात्प्राणोपाधिकादात्मनःसकाशादन्यद्भिन्नमायतनंनविद्यतेअतइदंप्राणोपाधिकभिन्नंवस्तुजातंसुप्तौनयातिनाश्रयतयावलंबतेइत्यर्थः ॥ २९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुतयाअन्यपदार्थस्यकार्यत्वेनतदानीमसत्वमाह आत्मनइति यदात्मनोव्यतिरिक्तंतत्सर्वंमनसःसकाशादपरंपश्चाद्भाविभवतितत्का र्यत्वादतस्तस्यमनसआश्रयः कथंस्यादित्यर्थः ॥ २९८ ॥ वर्णितस्यप्रकृतोपयोगमाह मनइति सप्रतिबिंबमनोविलयस्थानत्वेनप्रकृ तस्यसद्वस्तुनःसर्वांतरत्वंविज्ञेयमित्यर्थः ॥ २९९ ॥ सुषुप्तौपरमात्मलाभेपुनःसंसारःकथमित्याशंकांसुप्तिमुक्त्योर्विशेषप्रदर्शनेनपरिह रति संस्कारेति अत्रसुप्तौमनःसंस्कारशेषंलीयतेऽतःपुनरुत्पद्यते मुक्तौतुपुनर्नोत्पद्यते कारणस्यसंस्काराधारस्याज्ञानस्याभावाज्ज्ञानाग्नि नादाहात् एतयोःसुप्तिमुक्त्योरयंभेदोविशेषइत्यर्थः ॥ ३०० ॥ अस्मिन्नेकात्मवादेबंधमोक्षादिव्यवस्थायाअपिनानुपपत्तिः कल्पिता नांमनोरूपोपाधीनांभेदेनसर्वसामंजस्यंस्यादित्याह एकतेति सर्वशरीरिणामात्मनऐक्येपिसतियस्मान्मनसएकतानास्तितेनमनसामनेक

आत्मनोव्यतिरिक्तंयत्सदसद्वस्तुविद्यते॥ कार्यंतन्मनसःकेनभवेत्तस्याश्रयोऽपरं॥ २९८॥ मनोविलीयतेय त्रप्राणात्मनिमहेश्वरे ॥ सदेवैतत्तुविज्ञेयंतेजोबन्नादिकारणं॥२९९॥ संस्कारशेषमत्रैतल्लीनमुत्पद्यतेपुनः॥ नमुक्तौकारणाभावाद्भेदोयंततएतयोः ॥ ३०० ॥ एकतामनसोनास्तियस्मात्सर्वशरीरिणां ॥ अभेदेप्या त्मनस्तेनव्यवस्थासुस्थिताभवेत्॥ ३०१॥ एवंसुप्तिरियंमुक्तेःसमीपस्थासमीरिता ॥ अवस्थान्यापिमनसा कृताऽनंदात्मनोस्तिहि॥ ३०२॥ अशनायेतियत्रायमुदन्येतिचतद्वयं॥ नामावाप्नोतिनिर्नामास्वपितीतिय थापुमान्॥ ३०३॥

त्वेनव्यवस्थासुखीदुःखीबद्धोमुक्तइत्यादिरूपासुस्थितासम्यगुपपन्नाभवेदित्यर्थः ॥ ३०१ ॥ उक्तविचारमुपसंहरन्देहसंघाताधिष्ठानत्वे नसद्वस्तुनआंतरत्वमशनायादिनामोपन्यासमुखेनश्रुत्यादर्शितंनिरूपयति एवंसुप्तिरितिद्वादशभिः यथेयंसुषुप्तिर्मुक्त्यपेक्षयाकिंचिन्न्यू नामनोद्वारेणानंदात्मसंबद्धाचसम्यग्बिंबप्रतिबिंबैक्यबोधरूपफलशालित्वेननिरूपिता एवंविधाअन्यापिस्वप्नजागरणरूपाअवस्थाअ स्तिसापितत्तुल्यफलशालितयाबोध्येत्यर्थः ॥ ३०२ ॥ अशनायेति यत्रययोःस्थूलसूक्ष्मदेहाभिमानशालिन्योर्जागरणाद्यवस्थयोरय मानंदात्मापुमान्निर्नामापिसकलनामहीनोप्यशनायेत्याकारकमुदन्येत्याकारकंचनामावाप्नोतिपूर्वोक्तस्वपितीतिनामवदित्यर्थः॥३०३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनयोर्नाम्नोरात्मनिसंबंधेप्राणउपाधिरित्याह आत्मनइति अत्रसंघातेदृश्यमानाक्षुधातृषाचात्मनःअद्धासाक्षान्नविद्यतेकिंतुप्राणस्यैव तेविद्येतेयस्मात्सप्राणउदरंगतेअन्नादिकेनयतिनाडीद्वारासर्वांगेषुव्यापयति देहस्यांतस्ततत्वात्व्याप्तत्वात् तत्तस्माद्द्वयोरशनोदकयोर्नायकइत्याख्यायते अतोऽशनायइतिउदकनायइत्याकारकंनामद्वयंनिपातेनअशनायाउदन्येत्याकारकंसत्प्राणस्यमुख्यंनामभवतिप्राणद्वाराचात्मनोभवतीतिद्वयोरर्थः ॥ ३०४ ॥ ३०५ ॥ अशनायापदेकर्मसाधनमशनपदमितिसूचयन्प्राणस्यात्मापेक्षयामुख्यनामकत्वेप्यप्तेजसोरपेक्षयागौणनामकत्वमेवदर्शयितुमप्तेजसोस्तेनामनीमुख्येइत्याह अशनस्येति अशनस्यकर्मव्युत्पत्त्याऽशितस्यभक्षितस्ययन्नयनंतस्यकर्तॄणिकारकाणिउदकानिभवंतिद्रावकत्वात् पीतस्यद्रवस्ययन्नयनंतस्यकर्तृतुतेजोभवति तेनप्रवृत्तिनिमित्तेनउभेअप्तेजसीएतच्छ

आत्मनोनक्षुधानापिपिपासाऽद्धात्रविद्यते ॥ किंतुप्राणस्यसप्राणोनयेदन्नोदकेक्वचित् ॥ ३०४ ॥ देहस्यांतस्ततोयस्मान्नायकस्तद्द्वयोरपि ॥ तस्यैतन्नामविज्ञेयंतद्द्वाराचात्मनोभवेत् ॥ ३०५ ॥ अशनस्यात्रकर्तॄणिनयनस्योदकानिहि ॥ तेजःपीतस्यतेनैतच्छब्देतेकीर्तितेउभे ॥ ३०६ ॥ गवाश्वनायकायद्वत्तद्वदेतद्द्वयंस्मृतं ॥ अशनायेतिसंप्रोक्ताआपस्तेजःसमीरितं ॥ उदन्येतिचतद्द्वारानंदात्मापितथेर्यते ॥ ३०७ ॥ शरीरंप्रथमंकार्यंस्थूलमुक्तंमनीषिभिः ॥ अन्नंद्वितीयंभूमिश्चतृतीयंपरिकीर्तितं ॥ आपश्चतुर्थंतेजश्चपंचमंपरिकीर्तितं ॥ ३०८

ब्देउक्तनामकेबोध्येइत्यर्थः ॥ ३०६ ॥ एतच्छ्रौतदृष्टांतेनस्फुटयति गवाश्वेति यथालोकेगवांनेतारोगोनायाइतिकर्मण्यणंतनाम्नोच्यंतेअश्वनेतारस्तुअश्वनायाइतितथाआपउक्तविधेनअशनायेतिनाम्नाप्रोक्ताद्रावकत्वात् तथातेजस्तुउदन्येत्युक्तंशोषकत्वात् तद्द्वाराअप्तेजोनिरूपितपरंपरयात्वात्मापितदध्यासेनतथाउक्तनामकईर्यतेइत्यर्थः ॥ ३०७ ॥ आभ्यांनामभ्यांदेहस्यभौतिकत्वमितिसूचनद्वारासतःसर्वांतरत्वंयथाबोधितंतथादर्शयितुंकार्यकारणपरम्परांवर्णयति शरीरमितिद्वाभ्यां प्रथमादिशब्दाज्ज्ञानक्रमापेक्षया तथाचशरीरस्यकार्यत्वंप्रथमंबुद्धावारोहणीयंततस्तत्कारणस्यान्नस्यततस्तद्धेतोःपृथिव्यास्ततोऽपांततस्तेजसइत्यर्थः ॥ ३०८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदुक्तमिति तस्यपंचमकार्यस्यतेजसोमूलकारणंतुसद्वस्तुप्रोक्तंतत्तेजस्तुजलस्यजलंभूमेर्भूमिरन्नस्यान्नंतुजलतेजोभ्यांपरिणामंनीतंदेहस्यमूलमित्यर्थः ॥ ३०९ ॥ उक्तपरंपरायाःफलमाह देहाद्याइति देहादिरूपाविकाराअंकुरत्वेनोक्ताःश्रौतशुंगपदेनेतिशेषः अन्नादयःसत्पर्यंताःपदार्थास्तुमूलत्वेनप्रोक्ताः एवंसतियथालोकेअंकुररूपलिंगेनमूलमनुमीयतेतथादेहादिलिंगैस्तत्तत्कारणमन्विच्छन्सद्वस्तुनिर्मूलंकारणपरंपरापर्यवसानभूमिभूतंजानीहीत्यर्थः ॥ ३१० ॥ एवंविश्वोपादानत्वेनसर्वांतरत्वंसतःसिद्धमितिदर्शयति सर्वेषामिति सर्वेषामुत्पत्तिहेतुत्वेनमूलमितिस्थितिहेतुत्वेनायतनमितिलयहेतुत्वेनतत्प्रतिष्ठेतिचसद्वस्तुश्रुतावुक्तं कीदृशं स्वयंतैर्मुलादिभिर्वर्जितमित्यर्थः ॥३११

सदुक्तंतेजसोमूलमपांतेजस्तथेरितं ॥ आपोभूमेश्चभूर्मूलमन्नस्यापिप्रकीर्तिता ॥ अन्नंदेहस्यमूलंस्यात्सर्वक्लेशकरस्यहि ॥ ३०९ ॥ देहाद्याअंकुराःप्रोक्तामूलान्यन्नादयोपिच ॥ सदंताःसत्तुनिर्मूलंज्ञातंत्वंकुरुलिंगतः ॥ ३१० ॥ सर्वेषामपिभूतानांभौतिकानांचतत्स्मृतं ॥ उत्पत्तिस्थितिनाशानांहेतुस्तैस्तुविवर्जितं ॥ ३११ ॥ एवंजागरणेस्वप्नेक्षुत्पिपासातुरःसदा ॥ प्राणाद्युपाधिकोजीवोदुःखमायातिनित्यशः ॥ ३१२ ॥ स्वप्नेजागरणेसुप्तावेकएवातिसंचरन् ॥ ग्राहंग्राहंशरीराणिविमुंचतिविमोहितः ॥ ३१३ ॥ मुमूर्षोरस्यजीवस्यबहुशोप्यनुतप्यतः ॥ भूमावत्रशयानस्यकठिनायांसुदुःखितं ॥ ३१४ ॥ बांधवैःपरिवीतस्यहिक्काश्वासाकुलस्यच ॥ प्रसारितोर्ध्वनेत्रस्यलालालीढाननस्यच ॥ ३१५ ॥ इंद्रियैर्नवभिःसार्द्धंवाग्वृत्तिर्मनसिव्रजेत् ॥ मनोवृत्तिस्ततोयातिप्राणवृत्तौक्रियात्मनि ॥ ३१६ ॥

उक्तनामभ्यांक्षुत्पिपासोपलक्षितस्यस्वमादिकालिकसंसारस्यभोक्तृत्वप्रदर्शनद्वारापिसर्वांतरत्वंद्योतितमितिदर्शयति एवंजागरणइति स्पष्टम् ॥ ३१२ ॥ अथमरणावस्थायामिंद्रियवर्गाधिष्ठानत्वेनान्तरत्वसूचनपूर्वकंमहावाक्यप्रथमपर्यायस्यार्थमाह स्वप्नइतित्रयोदशभिः पूर्वोक्तावस्थात्रयचारीजीवोनानाशरीराणिगृहीत्वागृहीत्वात्यजति ॥ ३१३ ॥ कथंत्यजतीत्यपेक्षायामाह मुमूर्षोरिति मुमूर्षोःसंनिहितमरणस्यअनुतप्यतःस्वदुष्कृतस्मरणेनपश्चात्तापंकुर्वतोभूमिपाताद्युपलक्षितस्यचजंतोरितरेंद्रियैःसहितस्यवागिंद्रियस्यवृत्तिःकार्यक्षमत्वंमनसिलीयते व्यापारेसत्यपिवाग्व्यापारःशाम्यतीतियावत् एवंमनसोवृत्तिःप्राणव्यापारेतिष्ठंत्येवशाम्यतीतित्रयाणामर्थः ॥ ३१४ ॥ ॥ ३१५ ॥ ३१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सापीति साप्राणवृत्तिरपितेजःपदलक्षितेसूक्ष्मभूतपंचकवेष्टितेजीवेव्रजतितत्परतंत्रतयातिष्ठतीतियावत् तज्जीवरूपमपिसहभूतैःसुषुप्तिवत्सं स्कारशेषंमायोपाधौसतिआनंदरूपेयातिलीयतेइत्यर्थः अत्रवांगादिपदानांवृत्त्याद्यर्थेषुलक्षणायामूलभूताउपपत्तयस्तुशारीरकचतुर्थतृ तीयपादेद्रष्टव्याः संस्कारैरित्याद्युत्तरान्वयि ॥ ३१७॥ अतीतग्रंथेशोधितंपदार्थद्वयंस्मारयन्महावाक्यार्थंविशदयति सुषुप्तावित्यादिना श रीरिणःशरीरत्रयाभिमानवतःसुप्तिमृतिकालयोःसंस्कारमात्रात्मबंधशालिनश्चजीवस्ययल्लयकारणंलयस्थानं अयंजीवोयदात्मकोयद्रू पः यदेवजीवरूपेणोपाधिष्वनुप्रविष्टमितियावत् यच्चसद्रूपेणतेजःप्रभृतेर्जगतःकारणमुक्तं एतत्सदेवहेश्वेतकेतोतवआत्मामयोच्यते यःसू

सापितेजसिजीवाख्येसूक्ष्मेस्मिन्भूतपंचके॥ आनंदात्मनितद्यातिजीवरूपंसभूतकं ॥ संस्कारशेषंसंस्कारैर्बद्धस्यात्रशरीरिणः ॥ ३१७॥ सुषुप्तौचमृतौयत्तुजीवस्यलयकारणं ॥ यदात्मकश्चजीवोयंयच्चसत्कारणं स्मृतं॥ ३१८॥ सएषश्वेतकेतोतआत्मासोम्यमयेरितः॥ सूक्ष्मात्सूक्ष्मतमोनित्यंमहीयान्महतोपिच॥ ३१९॥ ऐतदात्म्यमिदंसर्वंतेजोबन्नात्मकंजगत्॥ रज्जुरूपंयथासर्वंसर्पधारादिरज्जुगं ॥ ३२० ॥ एतदेवात्मरूपंत्वमसिदेहादिकंचन ॥ बुद्धिसाक्षितयायत्तुनित्यंतत्रप्रतीयते ॥ ३२१ ॥ आनंदात्मस्वयंज्योतिर्जडवर्गस्यभासकं ॥ नकर्तानापिभोक्तात्वंनप्रमाताचकर्हिचित्॥ ३२२॥

क्ष्मात्सूक्ष्मोमहतोमहत्त्वेनप्रसिद्धादपिकालादेर्महानितिद्वयोरर्थः ॥ ३१८ ॥ ३१९ ॥ तस्यमहत्वेहेतुमाह ऐतदात्म्यमिति भूमशब्दवद्भ वितृप्रधानोनिर्देशःस्वार्थिकःष्यञ्वा तथाचसर्वंजगदेतदात्मकंएतत्सद्वस्तुआत्मापारमार्थिकंरूपंयस्यतत्तथा यथारज्जुगंसर्पधारादिरज्जु रूपं रज्जौकल्पितानिसर्पधारादंडभूविवराणिरज्जुमात्रात्मकानीत्यर्थः ॥ ३२० ॥ एवमुपाधीनामधिष्ठानदृष्ट्याबाधेसतिपरिशिष्टस्यत्व त्स्वरूपस्यसच्चिदानंदलक्षणस्यतेनैक्यंसिद्धमेवेत्याह एतदेवेति एतद्विश्वाधिष्ठानभूतमात्मतत्त्वमेवत्वंभवसि यत्साक्षितयाचिद्रूपमद्वयत्वे नानंदरूपंतदतिरिक्तस्यजडत्वेनचैतन्याभावेपितद्भानप्रयोजकत्वात्स्वयंज्योतिश्चभवति एवंसत्यौपाधिकाःकर्तृत्वादयोधर्मास्त्वयिनसंती तिद्वयोरर्थः ॥ ३२१ ॥ ३२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषहितोपदेशोपिगर्वहरत्वादादेशपदेनराजादिशासनवाचकेनोक्तइत्याह आदेशइति तुभ्यंप्रियायउपदेशभूतोप्ययंवाक्यप्रबंधो गर्वाधिकायगर्वेणाधिकमानिनेतंशमयितुमादेशःशासनरूपः यतोयादृशोभवांस्तादृशःस्तब्धत्वात् उद्धटत्वादित्यर्थः ॥ ३२३ ॥ उक्तविधात्मज्ञानमेवसार्वज्ञ्यफलकमुपन्यस्तमित्याह अमुनेति अमुनावर्णितेनात्मरूपेणश्रवणमनननिदिध्यासनानांगोचरतांनीतेनअश्रुतादिरूपमपिसर्वंश्रुतादिरूपंभवेदितिद्वयोःसंबंधः तत्रहेतुपदस्योपपत्तिवाचकस्यमतपदेनसंबंधः पुत्रकेत्यनुकंपायांकन् ॥ ३२४॥३२५ ॥ इत्थंशास्त्रार्थेसमाप्तेपितदनवधारणप्रयोजकानांसंशयानांपरिहारायद्वितीयादिपर्यायाणांप्रवृत्तिरितिदर्शयन्भूयइत्यादिवाक्यस्यतत्राष्टशउपात्तस्यार्थमाह एवमुक्तइति एवमुक्तउपदिष्टःश्वेतकेतुःपितरंप्रतिपुनःप्राहपप्रच्छ सपिता पिपुत्रंप्रतिनिर्णयजनकमुत्तरजातंप्राहेति ॥३२६॥

आदेशोयंमयाप्रोक्तउपदेशःप्रियायते॥ यादृशोहिभवान्स्तब्धस्तादृग्गर्वाधिकायहि ॥ ३२३ ॥ अमुनाश्रुतमात्रेणहेतुनापिमतेनवा॥ विज्ञातेनात्मरूपेणसर्वभूतात्मनासदा ॥ ३२४ ॥ श्रुतंमतंचविज्ञातंसर्वमेतद्भवेदिह॥ अश्रुतंवामतंतद्वदविज्ञातंचपुत्रक॥ ३२५॥ एवमुक्तःपुनःप्राहपितरंतनयस्ततः ॥ संदिग्धहृदयःसोपिपुत्रमाहविनिर्णयम् ॥ ३२६ ॥ इत्थमष्टौचकारासौप्रश्नांस्तावंतिचावदत् ॥ उत्तराणिसइत्याद्यंतान्यस्यानवबोधने ॥ ३२७ ॥ संशयेकारणान्यष्टौश्वेतकेतोरिमानिहि॥ अभूवन्क्रमतस्तस्यपितायानिनिराकरोत् ॥ ३२८ ॥

इत्थमिति इत्थंभूयोबोधयतुभवानित्येवंविधवाक्योपन्यासेनासौश्वेतकेतुरष्टौप्रश्नानकरोत् सपिताप्यस्यसुतस्यानवबोधनेअबोधेप्रश्नलिंगेनज्ञातेसतितावंत्यष्टावेवोत्तराण्यवदत् कीदृशान्युत्तराणि इत्याद्यंतानि इतिशब्दआदावंतेचयेषांतानि तथासोम्यशब्दपूर्वकमितिशब्दमुपक्रम्यतादृशेतिशब्दपर्यंतंग्रंथैरुक्तानीतियावत् सयएषोणिमेत्यादिभागास्तुअपवादापवादेउत्सर्गस्थितिरितिन्यायेनशंकापगमेनपूर्वोक्तसिद्धांतस्तथैवस्थितइत्येतावदेवबोधयंतीतिभावः ॥ ३२७ ॥ ननुप्रथमपर्यायेश्वेतकेतोरबोधएवकथंस्थितइतिचेत्संशयप्रयोजकतर्कलक्षणप्रतिबंधादितिदर्शयन्नाह संशयेइति हियस्मात्तस्यश्वेतकेतोःसंशयस्यकारणानिकुतर्करूपाणिइमानिवक्ष्यमाणानिअभूवन् यानिपिताक्रमशोद्वितीयादिपर्यायैःक्रमेणनिराकरोत्परिहृतवानित्यर्थः ॥ ३२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रद्वितीयपर्यायेणनिवर्त्यंतर्कमाह सुप्ताविति यदिसुप्तौमृतौवाजीवानांसतिगमनंभवेत्तदातत्प्राप्तंजानीयुः अतस्तस्यसतःअज्ञानेअत्रप्रसिद्धेअसंभावनावारकोयोदृष्टांतःसवक्तव्यइत्यर्थः ॥ ३२९ ॥ तृतीयपर्यायनिरस्यंतमाह अथागतानामिति सुप्तिकालेकरणानांज्ञानसाधनानांसंक्षयवशान्मायायामविद्यायांस्थितायांक्षेमभागिन्यामपिसत्यांयथागृहादागतस्यगृहादागतोस्मीत्यनुसंधानंभवतितथासतआगतानांजीवानामनुभूतिःसतआगतोस्मीत्याकारिकाकुतोनहिभवेदित्याशंकापरिहारायापिदृष्टांतोवक्तव्यइत्यर्थः ॥ ३२० ॥ चतुर्थपर्यायनिरस्यंतमाह सुषुप्तावितिद्वाभ्यां यदिनदीनिदर्शनान्नदीनांसमुद्रइवसुप्तौमरणेचजीवानांसतिलयस्तर्हितेषांनाशःस्पष्टोदृष्टांतेन

सुप्तौमृतौचजीवानांसतिचेद्गमनंभवेत् ॥ तस्याज्ञानेत्रकोनामदृष्टांतस्त्वंवदाधुना ॥ ३२९ ॥ अथागतानांतत्प्राप्तौकरणानांचसंक्षयात् ॥ स्थितायामपिमायायामनुभूतिःकुतोनहि ॥ दृष्टांतस्ततएवात्रवर्णनीयःपरोपिहि ॥ ३३० ॥ सुषुप्तौब्रह्मसंप्राप्तौजीवनाशोभविष्यति ॥ नदीनिदर्शनात्स्पष्टोमरणेचकथंततः ॥ ब्रह्मप्राप्तिर्भवेत्तस्यतत्रदृष्टांतमीरय ॥ ३३१ ॥ नदीनांनविलीनानांसमुद्रेपुनरुद्भवः ॥ नदीनिदर्शनात्तेनमनोमोमुह्यतेमम ॥ ३३२ ॥ अतिसूक्ष्मोयमात्मास्यात्कथंस्थूलसमाश्रयः ॥ अत्रापिकंचिद्दृष्टांतमनुकूलंपितर्वद ॥ ३३३ ॥ आस्तिक्याद्बुध्यतेस्वात्मातच्चकुत्रापिदर्शनात् ॥ अत्यंतानुपलब्धेर्थेनहिशब्दोस्तिकस्यचित् ॥ अतोत्रापिचदृष्टांतःपितर्वाच्यस्त्वयाममः ॥ ३३४ ॥

स्फुटीकृतःस्यात्तथाचब्रह्मप्राप्तिःकस्यस्यादित्येतच्छंकापनुत्त्यैअपिदृष्टांतोवक्तव्यः यतोलीनानांनदीनांपुनरुद्भवोनदृष्टःसन्नमेमनोव्यामोहंनयतीतिद्वयोरर्थः ॥ ३३१॥३२२ ॥ पंचमपर्यायनिरस्यंतमाह अतिसूक्ष्मइति अयमात्मातिसूक्ष्मोपिस्थूलस्यप्रपंचस्याधारःकथंस्यादित्यत्रापिकश्चिद्दृष्टांतोनिरूप्यइत्यर्थः ॥ ३२३ ॥ षष्ठव्यावर्त्त्यंतमाह आस्तिक्यादिति भवतापंचमपर्यायांतएतदुक्तं श्रद्धयायमात्मालभ्यइति तत्रश्रद्धैवदृष्टानुसारिणीकथंस्यात् यतोऽत्यंतमनुपलब्धेऽननुभूतचरेर्थेशब्दोपिनप्रवेष्टुंप्रभवतीत्यतोत्रापिसंभावनायैदृष्टांतोवक्तव्यइत्यर्थः ॥ ३३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सप्तमनिरस्यंतमाह लक्षणमिति लक्षणंवस्तुनःस्वरूपंयदिंद्रियैर्ग्राह्यंग्रहणयोग्यंभवतितदेवेंद्रियांतरेणापिगृह्यते यथाचक्षुरादिभिरगृहीतो
पिरसोरसनया आत्मात्विंद्रियैरगृहीतस्तैरग्राह्यत्वात्प्रत्यक्षेनतदयोग्यत्वात्तथापिसकेनोपायेनगृह्यतेइत्यत्रदृष्टांतोवाच्यइत्यर्थः ॥ ३३५॥
अष्टमेनपरिहार्यंतमाह विदुषइति यदिबहूनामज्ञानांजीवानांयथेंद्रियादिकंमरणकालेसूक्ष्मरूपेणतिष्ठतितथाविदुषोपितिष्ठेच्चेत्तदातस्य
 पुनर्जन्मकुतोनभवेदत्राप्युपपत्तिर्दृष्टांतोवाच्यइत्यर्थः ॥ ३३६ ॥ नवमपर्यायपरिहार्यंतर्कमाह सर्वात्मनेति यदिविदुषांवागादिकंसर्वा

लक्षणंहींद्रियैर्ग्राह्यंगृह्येतापींद्रियांतरात् ॥ अगृहीतोपींद्रियैर्यआत्माकेनात्रगृह्यते ॥ अग्राह्यइंद्रियैःसर्वै
स्तत्रदृष्टांतमीरय ॥ ३३५ ॥ विदुषोमरणेसर्वंतिष्ठेच्चेदिंद्रियादिकं ॥ पुनस्तस्यकुतोनस्यादुत्पत्तिर्बहुजंतुवत् ॥
उपपत्तिंततोमत्यंपितस्त्वंवर्णयात्रभोः ॥ ३३६ ॥ सर्वात्मनात्रवागादिविदुषांलीयतेयदि ॥ संसारवर्णनेन
त्वंदृष्टांतंवर्णयात्रभो ॥ ३३७ ॥ एवमेवचसंदेहाःश्वेतकेतुसमीरिताः ॥ क्रमशस्तान्पितासर्वानेवमेवनिरा
करोत् ॥ ३३८ ॥ नानावृक्षसमुद्भूतंयथामधुकरामधु ॥ मध्वपूपेनयंत्यैक्यंनानावृक्षसमुद्भवाः ॥ ३३९ ॥
नजानंतिरसास्तत्रस्वात्मानंमधुनिस्थिताः ॥ अहमेतस्यवृक्षस्यनाहमेतस्यचेतिते ॥ ३४० ॥

त्मनानिरवशेषंलीयतेतदाअविदुषामपितथाकिंनस्यादितिशंकावारणायअविदुषांयथासंसारउपपादितःस्यात्तादृशवर्णनेनसहितंदृष्टांतं
ब्रूहीत्यर्थः ॥ ३३७ ॥ एवंविधाअष्टौसंदेहजनकास्तर्काःपित्राद्वितीयादिपर्यायैःक्रमेणनिराक्रियंतेइत्याह एवमेवेति ॥ ३३८॥ तत्रद्विती
यपर्यायगतस्योत्तरभागस्यार्थमाह नानेतिपंचभिः यथामधुकरामध्वपूपेमधुनःअपूपाकारेआयतनेमधुकरानानावृक्षसमुद्भूतंमधुपुष्पर
सजातमैक्यंनयंतिमधुत्वेनपरिणतंकुर्वंतितेचमधुनिस्थितामधुभावंगतानानावृक्षजारसाइतिइत्थंस्वात्मानंनजानंति इत्थंकथं अहमेतस्या
म्रस्यरसोस्मिनजंबीरस्येतीतिद्वयोःसंबंधः ॥ ३३९ ॥ ३४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथादार्ष्टांतिकेयोजयति यथेति प्रथमपदंपूर्वान्वयि तथासुप्तौतेनानाजातीयाजीवाःसतिसत्त्वेसंपद्यप्राप्यतेनैक्यंगताःसंतआत्मानंविशेषरूपेणनविदुर्नजानंतीत्यर्थः अत्रेदंबोध्यं दृष्टांतेजडत्वस्याभाविकंदार्ष्टांतिकेत्वाविद्यकावरणप्रयुक्तंतदितिविशेषस्यअथवादृष्टांतेविवेकाभावोरसभिन्नप्रमातृनिष्ठोपिरसेष्वारोपितोदार्ष्टांतिकेतुजीवेष्वज्ञानाद्वतेषुमुख्यइतिविशेषस्यसत्वेपितदनादरेणनविदुरितिपदोक्तस्याज्ञानस्यसाधर्म्यमिति ॥ ३४१ ॥ यदितदासर्वेप्येकतांगच्छेयुस्तर्हिसुप्तोत्थितानांतज्जातीयशरीरप्राप्तिर्नस्यादितिशंकांमृद्भावगतमंडूकानामिवसंस्कारैःशिष्यमाणैर्व्यवस्थासंभवइत्याशयेनपरिहरति तामसाइतिद्वाभ्यां व्याघ्रादयस्तामसजातीयाः राजाद्याराजसजातीयाः विप्राद्याविद्याप्रधानाःसात्विकजातीयाश्चजंतवोयादृशयादृशशरीराःसुप्तौसतिसमायांतितादृशंशरीरमेवोत्थायप्राप्नुवंतियतःसर्वदाऽनादि

यथातथैवसंसुप्तौसतिसंपद्यतेविदुः॥ नजीवाःसर्वआत्मानंसतातादात्म्यमागताः ॥ ३४१ ॥ तामसाराजसास्तद्वत्सात्विकाअपिजंतवः॥ व्याघ्राद्याश्चापिराजाद्याविप्राद्याश्चात्मवेदिनः॥ ३४२ ॥ यच्छरीराःसमायांतितच्छरीराःपुनश्चते॥ भवंतिनापरेसर्वेसर्वदासंस्टतिस्थिताः ॥ ३४३ ॥ सत्प्राप्याप्यागताःसर्वेनजानंतिविमोहिताः॥ यथानानाविधानद्यःसागरंप्राप्यमेघतः॥ आगतानैवजानंतिसागराद्वयमागताः ॥ ३४४ ॥ एवंजीवाइमेसर्वेसतआत्मनआगताः॥ इत्थंजानंतिनैवैतेसतोवयमिहागताः॥ ३४५॥ आगताःपुनरेवैतेतएवस्युर्नतेपरे॥ अन्यथादेहसंपातोभवेत्तेषांदिनेदिने॥ ३४६॥

कालतःसंसारपातेनसूचितसंस्कारकाः यदिज्ञानकर्मसंस्कारानस्युस्तदातत्तद्योनिवृत्तकौशलासंभवेनसंसरणमेवनस्यात्तथाचैतैःसंस्कारैरत्रापिव्यवस्थासुसंपादेतिभावः॥३४२॥३४३॥ तृतीयपर्यायगतोत्तरंव्याचष्टे सत्प्राप्यापीति सद्ब्रह्मप्राप्यापितत आगताःसंतोवयंसतआगताइत्येवंतेजीवानजानंतियथानद्योब्धिंप्राप्यमेघद्वाराद्वष्टिरूपेणागताअपिवयंसमुद्रादागताइत्येवंनजानंतितद्वदिति तत्रहेतुर्विमोहिताइति येनमूलाज्ञानेनसत्प्राप्तिदशायांभानप्रतिबंधःकृतस्तदिदानीमपिननिवृत्तमितिभावः ॥ ३४४ ॥ ३४५ ॥ अथनदीनिदर्शनप्राप्तजीवनाशशंकावारकस्यचतुर्थपर्यायगतोत्तरस्यार्थमाह आगताइतिपंचभिः सतआगताजीवास्तएवभवंतियेसुप्ताः अपरेभिन्नजातीयानभवंति अन्यथातेषामेवानुत्थानेसुप्तौसल्लयमात्रेणदेहपातःस्यादित्यर्थः ॥ ३४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचजीवनाशोनकेनचिद्दृष्टः किंतुतत्परित्यक्तानामन्येषामेवेतिदृष्टांतेनस्फुटयति यथेति यथावृक्षस्यशाखानांमध्येयस्यायस्याजीवक
र्तृकस्यागस्तस्यास्तस्याःशोषणंदृष्टंनजीवनाशइत्यर्थः ॥ ३४७ ॥ सुप्तस्यमुक्तत्वेपिजीवांतरप्रवेशेनतच्छरीरमुत्तिष्ठेदितिशंकांवृक्षशा
॥२८॥ खादृष्टांतेनैवपरिहरति अन्येति चेद्यद्येकस्यजीवस्यनिर्गमनानंतरमन्यस्यजीवस्यप्रवेशोभवेत्तदाशाखासंशोषणंनव्रजेदिति ॥ ३४८ ॥
तथाजीवांतरप्रवेशेनजीवनव्यवहारसंतानात्कस्यापिदेहस्यनाशोनव्यवह्रियेतनचैवंदृश्यतेततःसएवोत्तिष्ठतीतिसिद्धमित्याह एवमिति
सुप्तेएकस्मिन्सुप्तामुक्तेसति ॥ ३४९ ॥ यएवम्रियतेसएवदेहांतरंगच्छतिनान्यइत्येवंनित्यस्यजीवस्याधिकारिणःसत्वान्नमोक्षशास्त्रवै

यथावृक्षस्यशाखानांत्यागात्तासांहिशोषणम् ॥ नहिजीवेनरहिताशाखाकाचिद्धिजीवति ॥ यांयांजहाति
जीवोयंसासाशुष्यतितत्क्षणात् ॥ ३४७ ॥ अन्यजीवस्यचेद्देहेप्रवेशःपरिनिर्गमात् ॥ भवेच्छाखानसंशोषं
कदाचनसमाव्रजेत् ॥ ३४८ ॥ एवंदेहस्यकस्यापिविनाशोनभविष्यति ॥ दृश्यतेनयतस्तेनसुप्तेनान्यःसमा
व्रजेत् ॥ ३४९ ॥ यथासुप्तेतथैवायंमरणादौचनापरः ॥ सएवचततोजीवोब्रह्मसंप्राप्यनिर्गुणम् ॥ पुनरुत्प
द्यतेतस्मात्कर्मपाशवशंगतः ॥ ३५० ॥ आनंदात्मनिसुप्तेस्मिन्नवाङ्मनसगोचरे ॥ यथातिष्ठतिविश्वंत्वं
दृष्टांतमवधारय ॥ ३५१ ॥ वटधानातिसूक्ष्मेयमाश्रयोमहतोयथा ॥ वटस्याप्यधुनाभेदेनैषनात्रप्रदृश्यते
॥ ३५२ ॥ तथात्मासूक्ष्मरूपोयंप्रपंचस्यसमाश्रयः ॥ प्रागुत्पत्तेर्यतस्तत्रसोस्तिशास्त्रदृशांयथा ॥ ३५३ ॥

यर्थ्यमित्याह यथेति स्पष्टं ॥ ३५० ॥ पंचमपर्यायगतंसूक्ष्मेस्थूलस्थितिदृष्टांतंवर्णयति आनंदात्मनीति यथासुप्तिप्रसिद्धेसत्यानंदरूपे
सूक्ष्मेजगत्तिष्ठतितथाबोधकंदृष्टांतंशृण्विति ॥ ३५१ ॥ वटेतिद्वाभ्यां यथावटस्यधानाबीजंतदवच्छिन्नंचैतन्यमितियावत् सूक्ष्ममपिम
हतोवटस्याश्रयोभवत्यसतोजन्मासंभवात्परंत्वधुनाबीजदशायामेषवटस्तत्रबीजेभेदेननदृश्यतइत्यर्थः ॥ ३५२ ॥ दार्ष्टांतिकेयोजयति
तथेति तथायमात्मातत्संस्कारशालिमायोपहितःसूक्ष्मोप्युत्पत्तेःपूर्वंप्रपंचस्याधारोभवतीतियुक्तं यतस्तत्रउत्पत्तिपूर्वकालेसआत्मास्तीति ॥२८॥
शास्त्रदृशांसदेवसोम्येदमग्रआसीदित्यादिशास्त्रचक्षुष्काणांयथाप्रसिद्धइत्यर्थः ॥ ३५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठपर्यायगतंदृष्टांतंश्रद्धासमुत्थानायप्राकृतोपायैरलब्धोप्यर्थउपायविशेषेणलभ्यतेइत्यावेदकंवर्णयति उपायादिति सचलौकिकप्रमाणैरनाविष्कृतोप्ययंविश्वोपादानभूतआत्माधीमताश्रद्धासंस्कृतमतिकेनदेहगःसंघातेप्रत्यक्त्वेनवर्तमानउपलभ्यते यथाजलगतंलवणंचक्षुराद्युपायैरलब्धमपिरसनासंयोगरूपोपायेनलभ्यतेइत्यर्थः ॥ ३५४ ॥ अत्ररसनासंयोगस्थानीयंपदार्थशोधनमितिसूचयन्दार्ष्टांतिके योजयति एवमिति एवंप्रपंचेवर्तमानोप्यात्मातदीयस्यचैतन्याख्यस्वरूपस्यसम्यक्सत्यत्वादिविशेषैःपरिचयाद्गुरुवेदांतवाक्यविश्वासवतैवलभ्यइत्यर्थः ॥ ३५५ ॥ प्रकृतेसउपायःकइतिचेदाप्तोपदेशएवेतिसूचयन्नुपायांतरैर्दुर्लभस्याप्युपदेशेनलाभेदृष्टांतंसप्तमपर्यायगतं

उपायादवगम्योयंधीमतासचदेहगः ॥ जलस्थंलवणंयद्वद्गम्यतेरसलाभतः ॥ ३५४ ॥ एवमात्माप्रपंचेस्मिन्जडेसर्वत्रवर्तते ॥ चैतन्यरूपसंलाभाज्ज्ञातव्योब्रह्मवेदिना ॥ श्रद्धावतासदैवायंनास्तिकेननकर्हिचित् ॥ ३५५ ॥ अपींद्रियैरलभ्यस्यलाभःस्याद्गुरुवाक्यतः ॥ गांधारस्ययथापुंसश्चोरैर्नीतस्यकाननं ॥ ३५६ ॥ पिधानंनेत्रयोःकृत्वागंधारेप्सातिदुःखिनः ॥ क्रोशतःस्वात्मवृत्तांतमरण्यानीगतस्यहि ॥ ३५७ ॥ कृपापरः पुमान्पांथोवदेत्कश्चिद्विमुच्यतत् ॥ पिधानंनेत्रयोरेतांदिशंयाहिसुखंनर ॥ एतस्यांदिशिगंधारदेशेभ्यश्चत्वमागतः ॥ ३५८ ॥

व्याचष्टे अपींद्रियैरितिसप्तभिः इंद्रियादिभिःपरिचितोपायैरलब्धस्याप्यात्मवस्तुनोगुरुवाक्यरूपापूर्वोपायेनलाभःसंभवति यथाकस्यचिद्गंधारदेशीयस्यचोरैर्नेत्रयोःपिधानंकृत्वाकाननंनीतस्यगंधारदेशविषयकयाईप्सयाअतिशयेनदुःखितस्यस्वात्मवृत्तांतंक्रोशतउच्चैर्वदतःअरण्यानींमहदरण्यंगतस्यप्राप्तस्यचतच्चोरकृतंनेत्रयोःपिधानंविमुच्यनिरस्यकश्चिद्दयालुरितिवदेत् इतिकिं हेनरत्वमेतांदिशंगच्छयतएतस्यांदिशिवर्त्तमानेभ्योगंधारदेशेभ्यआगतोसीतित्रयाणामर्थः ॥ ३५६ ॥ ३५७ ॥ ३५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सयथेति सउक्तविधोगंधारदेशीयएवमाप्तेनोपदिष्टस्तुष्टस्तद्वाक्येकृतविश्वासश्चसन्नमून्स्वदेशान्गच्छेत्एवमाचार्यवाक्येनविद्वान्कुशल आत्मनःस्वदेशस्थानीयस्यविज्ञानंप्राप्नुयात्ततोमननाद्यैःसंयुतत्वेनकामक्रोधादींश्चोरवत्संसारारण्यपातहेतून्विज्ञायप्रमादेनतद्वशंपुनर गच्छन्मायामूलाविद्यातद्रूपंनेत्रस्यसाक्षिस्वरूपस्यबंधनंमहृदनादिकामादिचौरैर्दृढीकृतंगुरुरूपदयालुपांथस्यवाक्यरूपहस्तोन्मोचितंप रित्यज्याद्वयत्वेनानंदरूपमात्मदेशंव्रजेदितित्रयाणांसंबंधः ॥ ३५९ ॥ ३६० ॥ ३६१ ॥ विदुषोमरणेइतरस्माद्यावत्यंशेविशेषोयावति चसाम्यंतत्सर्वंतस्यतावदेवेत्यादिभागापकर्षेणदर्शयतोऽष्टमपर्यायस्यार्थमाह वागादीनामिति पूर्वंप्रथमपर्यायेवागादीनांमनःप्रभृतिपुवृ त्तिरूपेणैवलयोभवतिनस्वरूपेणस्वरूपस्यतुसंस्कारात्मनावस्थितिरेवेतियदुक्तंतदविद्वदभिप्रायेणैवोक्तंविदुषस्तुसत्संपत्तिविलंबेप्रारब्धा

सयथात्रशनैस्तुष्टउपदिष्टोव्रजेदमून् ॥ देशान्गंधारकानेवंविद्वानाचार्यवाक्यतः ॥ ३५९ ॥ प्राप्नुयादात्मवि ज्ञानंमननाद्यैश्चसंयुतः॥ कामक्रोधादिकांश्चोरान्नेत्रबंधनकारिणः॥ ३६० ॥ अवमत्यव्रजेदेतमानंदात्मा नमद्वयं॥ परित्यज्यमहच्चैतन्मायाख्यंनेत्रबंधनम् ॥ ३६१ ॥ वागादीनांहिवृत्तेर्योलयोमरणमीरितः ॥ विदु षोनैषविज्ञेयःकिंतुसंसारिणोहिसः॥ ३६२ ॥ वृत्तयोवृत्तिमंतश्चवागाद्याःसर्वएवहि ॥ विदुषोलयमायांति ब्रह्मज्ञानप्रभावतः ॥ ३६३ ॥ मरणावसरेप्राप्तेज्ञातयोत्रोपतापिनं॥ उपासतेरुद्धकंठाःसाश्रुनेत्राःसमंततः ॥ ३६४ ॥ मातापिचात्मनःपुत्रजानीषेप्रियमांप्रियं॥ प्राणेभ्योपिचजानीषेभ्रातरंमांचवेत्सित्वं॥ ३६५ ॥ इ त्यादिवचनंयद्वदविद्वानवगच्छति ॥ लयंव्रजतियावच्चततऊर्ध्वंनकिंचन ॥ ३६६ ॥

वसानस्यावधीकरणाद्वागादिकरणजातंसहवृत्त्यादिप्रपंचेननिरवशेषंलीयतेअप्रतिबद्धविद्याप्रभावादितिद्वयोरर्थः तथाचसूत्रं अविभा गोवचनादिति ॥ ३६२ ॥ ३६३ ॥ अयंशास्त्रगम्योविशेषउक्तोलोकदृष्ट्यातुतत्साम्यमित्याह मरणावसरइति उपतापोरोगस्तद्वं तंमरणावसरेज्ञातयःसंबंधिनउपासतेपरिवेष्ट्यतिष्ठंति तत्रमाताअपिशब्दात्भ्रात्रादयश्चेत्थमाहुः इत्थंकथं हेसुतप्रेमास्पदत्वंमामात्मनो मातरमपिजानीषे भ्राताआह त्वंमांप्राणेभ्योपिप्रियंभ्रातरंवेत्सीति एवमन्येप्याहुरितिद्वयोरर्थः ॥ ३६४ ॥ ३६५ ॥ इत्यादीति इत्यादि वचनप्रभृतिविषयजातमविद्वान्वागादिलयपर्यंतमेवावगच्छतिततोवागादिलयादूर्ध्वंतुकिंचिदपिविषयजातंनावगच्छतीत्यर्थः ॥ ३६६ ॥

१ अस्मिन्पद्येजानीषेइत्यधिकंवेत्सित्वमित्यत्रछंदोभंगश्चदृश्यते तेनात्रकिंचित्पाठांतरंस्यादितिभाति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथावागादिलपर्यंतंविषयविज्ञानंतदुत्तरंविशेषविज्ञानोपरमश्चविदुषोपिसमानइत्याह वागादेरिति स्पष्टं ॥ ३६७ ॥ नन्वित्थंविद्वन्मरणे दृष्टसाम्येसतिपूर्वोक्तःशास्त्रीयोविशेषःकथंसंभाव्येतेतिशंकावारणंनवमेनपर्यायेणकृतमितिदर्शयंस्तमवतारयति देहेति एवमुभयोर्देहपा तेसमेसतिविद्वान्यत्पुनर्जन्मनगच्छतितत्प्रयोजकोविभेदोविशेषोऽयंवक्ष्यमाणोबोध्यइत्यर्थः ॥ ३६८ ॥ अयंकइत्यपेक्षायामाह अस्ये ति उभयोर्विद्वदविदुषोर्मध्येअस्यविद्वज्जन्माभावप्रयोजकस्यभेदस्यविशेषस्यहेतुःप्रयोजकोधर्मःसत्यएवात्मदृष्टिरूपःस्फुटोवर्त्तते यतइ तरोऽविद्वाननृतंशरीरत्रयमेवात्मत्वेनावगच्छतिअनुच्छिन्नाविद्यातत्संस्कारसंतानइतियावदित्यर्थः ॥ ३६९ ॥ एतदेवस्फुटयति विद्वा

वागादेर्लयतःपूर्वंविद्वानपितथावचः ॥ नानाविधंविजानातिलयेतस्यनकिंचन ॥ ३६७ ॥ देहपातेसमेत स्मिन्विदुषोऽविदुषश्चहि ॥ विभेदोयंयतोविद्वान्पुनर्जन्मनगच्छति ॥ ३६८ ॥ अस्यभेदस्यहेतुश्चत्खुभयोर्विघ तेस्फुटः ॥ एकःसत्यंविजानीतेत्यनृतंचतथापरः ॥ ३६९ ॥ विद्वान्सत्यात्मबोधेनमायापाशविवर्जितः ॥ वागा दिविलयाद्भूयःशरीरंनाप्नुयात्सदा ॥ ३७० ॥ अविद्वाननृतंसर्वंदेहांतंदुःखकारणं ॥ जानन्नात्मतयाभूयःसंस्का रैर्देहमाव्रजेत् ॥ ३७१ ॥ लोकेपिसत्यसंधोयोभवेन्मिथ्याभिशापितः ॥ समुच्यतेपरोदुःखंप्रयात्यनृतमानसः ॥ ३७२ ॥ यश्चचोरश्चसाधुश्चधृतौराजभटैर्बलात् ॥ चोराविमौनिहंतव्यावित्येवंनिश्चयेसति ॥ ३७३ ॥ उभाव पिसभामध्येक्रोशतश्चोरतानहि ॥ प्रत्येकंममचेत्येवंसंजातेसंशयेसति ॥ ३७४ ॥ सभासद्भिःसमेदिव्येउभ योःपरिकल्पिते ॥ ज्वालामालाकुलंतप्तमयःपिंडंवहन्करे ॥ साधुर्नदह्यतेत्वन्यश्चोरोत्रबद्धदह्यते ॥ ३७५ ॥

नितिद्वाभ्यां निगदव्याख्यातंद्वयं ॥ ३७० ॥ ३७१ ॥ सत्याभिप्रायोमोक्षहेतुरितिलोकेपिप्रसिद्धमित्याह लोकेपीति सत्येसंधाअभि प्रायोयस्यसतथा मिथ्याभिशापोऽनृतकलंकप्राप्तिरूपःसंजातोयस्यसतथा मुच्यतेशुद्धिंगच्छति अपरः अस्यैवविवरणमनृतमानसइति सुदुःखंयातीतिप्रसिद्धमिति ॥ ३७२ ॥ एतत्कथमित्याकांक्षायामुदाहरति यश्चेत्यादिना यथाकश्चिच्चोरःसाधुश्चेत्युभावपिचोरत्वेनदंड्य तयाराजभटैर्गृहीतौसभायांप्रत्येकंममचोरतानास्तीतिक्रोशंतौवीक्ष्यजातेनसंशयेनसद्भिर्धर्माधिकारिभिःसमेदिव्येउभयोरादिष्टेसतिसा धुस्तप्तलोहेनकरेधृतेननदह्यतेअन्यश्चोरस्तुदह्यतेइतित्रयाणांसंबंधः ॥ ३७३ ॥ ३७४ ॥ ३७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदग्धइति तयोःसाधुःसत्याभिप्रायकत्वलक्षणसत्याभिसंधित्वात्सत्यभाषणेनानुमितादग्धहस्तएवमुच्यतेइत्यर्थः ॥ ३७६ ॥ दग्धेति परश्चोरोऽनृताशयप्रभावादनृतभाषणानुमिताद्दग्धहस्तोबंधंनिगडमेतिवध्यतेशारीरादिदंडंचप्रामोतीत्यर्थः ॥ ३७७ ॥ फलितमाह विदुषइति वागादिविलयोनिरवशेषइतिशेषः अपरस्याविदुषस्तथानेति ॥ ३७८ ॥ चरमवाक्यार्थमाह नवेति एवंनववारंपित्रोपदिष्टःश्वेतकेतुरसंभावनानिवृत्तौसत्यामस्यपितुर्नवमेवचनेतत्प्रथमोक्तमेवतत्त्वंविजज्ञेसाक्षात्कृतवानित्यर्थः ॥ ३७९ ॥ अतीतकथांसंगमयति श्वेतेति तदनंतरंजाबालोक्तंतस्यपारमहंस्यंबोध्यमित्यर्थः ॥ ३८० ॥ उत्तराकांक्षामुत्थापयति सत्तायाइतिद्वाभ्यां श्वेतकेतो

अदग्धोमुच्यतेसाधुस्तस्मान्मिथ्याभिशापतः॥सत्याभिसंधिर्यस्मात्ससत्यमेवाभ्यभाषत॥३७६॥दग्धहस्तः परःसद्योबंधमेतिचवध्यते॥ अनृताशयतोयस्मादनृतंसोभ्यभाषत ॥ ३७७ ॥ विदुषोऽविदुषश्चैवसमाने मरणेसति॥ भवेद्वागादिविलयोविदुषोनापरस्यच॥ ३७८ ॥ नवकृत्वःश्वेतकेतुंसआत्मातत्त्वमस्यपि॥ पितोवाचविजज्ञेसनवमेवचनेपितुः॥ ३७९ ॥ श्वेतकेतुर्महातेजाःकंचित्कालंगृहेवसत्॥ आत्मज्ञानीविरक्तःसन्प्रवव्राजयथापिता॥३८०॥ सत्तायाःसुखरूपत्वमात्मनोनैनमैरयत्॥ आरुणिःश्वेतकेतुश्चपप्रच्छनचधीधनः॥ ३८१ ॥ सनत्कुमारोभगवान्नारदायसुखात्मतां॥ अपृष्टोपिपुराप्रश्नतोषितःसउवाचह॥३८२॥ इतितकथितंश्वेतकेतोरज्ञानकारणं॥ ज्ञानंचस्वपितुर्भूयःकिमन्यच्छ्रोतुमिच्छसि ॥ ३८३ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेच्छांदोग्यसारार्थप्रकाशेआरुणिश्वेतकेतुसंवादोनामद्वादशोऽध्यायः समाप्तः ॥ १२ ॥ ॥ छ ॥ ॥ छ ॥

धींधनत्वंस्वयंविज्ञानसामर्थ्यरूपंविज्ञायपितारुणिःसत्तायाःसुखरूपत्वंनऐरयत्नउक्तवान्यतःश्वेतकेतुस्ततोनापृच्छदित्यर्थः ॥ ३८१ ॥ नारदेनापृष्टोपिचसनत्कुमारएतन्नारदायोवाचेत्याह सनत्कुमारइति ॥३८२॥ उपसंहरति इतितेइति ॥३८३॥ द्वादशंकरणंशंभोभवतोव्यक्त्यलंकृतम् विकाशेनमुकुंदस्यशांतांधत्तेचमत्कृतिम् ॥ १ ॥ द्वादशंकरणमहंकाररूपंभवतःशोधितत्वंपदार्थरूपस्यमुकुंदस्यतत्पदार्थस्येत्यर्थः ॥ ॥ इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतावात्मपुराणटीकायांसत्प्रसवाख्यायांद्वादशोध्यायः समाप्तः ॥ १२ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे द्वादशोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे त्रयोदशाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः भूमानोमाल्पतापोहः सकलाकलनस्फुटः॥आशोत्तरधरःशश्वद्राजतेसत्रयोदशो॥ १॥अस्यार्थः भूःपृथिवी मानंवेदः उमा कीर्तिः उमाऽतसीहैमवतीहरिद्राकीर्त्तिकांतिष्विति विश्वप्रकाशकोशात् एषांपदार्थानांयाऽल्पताअसुरप्रभावात्संकोचरूपातामपोहतिअसुरनिरासेनहरतिसतथा सकलस्यस्वकीयपरिपूर्णरूपस्ययदाकलनंरावणवधानंतरंत्वंमहाविष्णुरसीतिविधातृवाक्येनानुसंधानंतेनस्फुटःपरित्यक्ताहार्याबोधनाढ्यइति आशादिदृक्षातद्धतामुत्तरकोसलवासिनांधरःसन्निधानेनत्राता सदासश्रीरामःसत्रयस्त्रयेणानुजानांत्रिकेण सहितः अदशेदशावर्त्तिस्तद्रहितोऽदशोहार्दज्योतीरूपदीपस्तस्यमध्येवन्हिशिखेतिमहोपनिषदिप्रसिद्धस्तदुपरिराजतेआराधकानामाविर्भवतीत्यर्थः श्रीकृष्णविग्रहपक्षे भुवोमानःपूजाप्रशंसारूपागर्वोवायतःसतथा पुनःकीदृशः अमाःप्रमाहीनाअज्ञायेअल्पाःक्षुद्रादुःशासनादयस्तत्कृतोयोद्रौपदीप्रभृतीनांभक्तानांतापस्तमूहतिजानातीतिसतथा पुनःकीदृशः सकलस्यककारलकारसहितस्यकामबीजस्याकलनेनजपेनस्फुटःप्रकटलीलः आशायागोप्यादिकामनायाउपशामकत्वेनउत्तरभूतस्यतदानुकूल्यस्यधारकःसवासुदेवःसत्रयःसंकर्षणा

श्रीगणेशायनमः एतच्छ्रुत्वाथशिष्योपिस्वात्मनोब्रह्मरूपतां॥ प्रष्टुकामःपुनःप्राहस्वगुरुंवचनंत्विदं ॥ १ ॥
भगवन्भवताख्यातमैतरेयेणकीर्तितं॥ ज्ञानमाख्यानसहितमेवंकौषीतकीरितं॥ २॥

दित्रयसहितः दशाःपरिणामरूपाअवस्थास्ताभिर्हीनत्वाददशेनिर्विकारस्वरूपेराजतेदेदीप्यतेइत्यर्थः श्रीशंभुपक्षे भूमान्ज्योतिर्लिंगरूपेणभूम्यानित्यसंबद्धः ओमाप्रणवेनअल्पतायाजीवनिष्ठपरिच्छिन्नतायाअपोहस्यबाधस्यकर्त्ता सकलस्यचंद्रकलासहितस्यविग्रहस्य आकलनेनधारणेनस्फुटोभक्तानांप्रसिद्धः आशादिकृतद्रूपस्यउत्तरस्यऊर्ध्ववस्त्रस्यधारकइतियावत्सः अदशेजाग्रदाद्यवस्थापरित्यागहेतौतत्त्वज्ञानेतदर्थंयत्सत्रंसत्रतुल्यंसंप्रदायप्रवर्त्तनरूपंकर्मतद्यातिप्राप्नोतिधारयतीतियावत् सतथा प्रमेयपक्षेतु भूमातत्संज्ञोनोस्माकमधिकारिणांमाल्पतामाप्रमातन्निष्ठायाल्पतापरिच्छिन्नविषयतातस्याःपरिहारकःपूर्णत्वात् सकलस्यद्वैतजातस्याऽकलनेविस्मरणेस्फुटः नामादीनांवक्ष्यमाणानांभावानांमध्येचतुर्दशीआशातस्याउत्तरःप्राणस्तस्याधारःअधिष्ठानभूतःसप्रसिद्धस्त्रयोदशोऽत्राध्यायेस्फुरतीत्यर्थः ॥ १ ॥ तत्रमेधाविनःप्रश्नंदर्शयति एतच्छ्रुत्वेत्यष्टादशभिः स्पष्टम् ॥ १ ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदित्यस्येति आदित्यविशेषणंमहेशस्येति षष्ठ्यंतानांज्ञानमित्यनेनप्राक्तनेनसंबंधः लब्धमित्यत्रचतदनुषंगः ॥३॥ मंत्रज्ञइति मंत्राणां सर्वात्मताबोधकानांद्रष्टावामदेवोगुरुत्वेनप्रथमेइंद्रस्तुद्वितीयेअजातशत्रुस्तृतीयेइति अथशिष्याउच्यंते प्रजाःप्रथमेतथाप्रतर्दनोद्वितीये बालाकिस्तृतीयेइत्यर्थः ॥ ४ ॥ चतुर्थगतान्शिष्यानाह भेदतइति त्रिविधानिपर्वाणिघटकपुरुषरूपाणियस्यसतथाविधोवंशोमंत्रदर्शिनांगुरुशिष्याणांपरंपरारूपउक्तः यत्रवर्तमानेआथर्वणेगुरौदस्रौशिष्यतयोक्तौयत्रतयोःशिष्यतायांशक्रःक्लेशमीर्ष्यारूपंप्राप्तः कीदृशःश

आदित्यस्यमहेशस्यसश्वेताश्वतरस्यच॥ कठस्यतित्तिरेस्तद्वत्जाबालादिद्विजन्मनां ॥ आरुणेःस्वपितुर्बाल्ये लब्धंचश्वेतकेतुना॥ ३॥ मंत्रज्ञोवामदेवश्चशक्रःकाश्यश्चभूपतिः॥ गुरवोयेत्रशिष्याश्चप्रवर्ततेप्रजास्तथा॥ बालाकिश्चतथादृप्तोगार्ग्यायःपरिकीर्तितः ॥ ४ ॥ भेदतोभेदतश्चापित्रिपर्वायत्रकीर्तितः ॥ महान्वंशोमंत्रदर्शीदस्रौचप्रतिकोपितः॥ ५ ॥ दध्यङ्ङाथर्वणेयत्रशक्रःक्लेशमुपागतः ॥ अश्विनोर्ब्रह्मविद्याचधैर्यमाथर्वणस्यच॥ ६॥ भूपतेर्यज्ञशालायामाश्वलाद्यैर्द्विजोत्तमैः॥ जल्पाख्योयत्रसंवादःशाकल्यमरणांतकः ॥ ७॥ द्विवारंपृथिवीपालंयत्रवाजसनेयकः ॥ गत्वावादकथांकृत्वाकृतकृत्यंचकारसः ॥ ८॥ संन्यस्यन्नपिमैत्रेयींजायांयत्राकरोन्मुनिः॥ कृतकृत्यांयाज्ञवल्क्योलोकातीतस्तपोधनः ॥ ९ ॥ कारणेयत्रजिज्ञासायतीनांचद्विजन्मनां ॥ धर्मराजोगुरुस्तद्वद्वरुणश्चतपोधनः॥ १० ॥ नचिकेताश्चयत्राभूत्शिष्यस्तद्वद्गुरुर्महान् ॥ गंधर्वस्यापिवेनस्यस्वात्मानुभवकीर्त्तनं॥ नानासाधनसंघेषुसंन्यासोयत्रचोत्तमः॥ ११॥

क्रः प्रतिकोपितःहितोपदेशेनप्रत्युतकोपंगतः तथादस्रयोर्विद्योपदेशस्तत्रमहाभयेपिगुरोर्धैर्यंचोक्तमितिद्वयोरर्थः ॥ ५ ॥ ६ ॥ पंचमाद्यध्यायत्रयार्थंक्रमेणानुवदति भूपतेरितित्रिभिः यत्रातीतग्रंथे शिष्टंनिगदव्याख्यातंत्रयं ॥ ७ ॥ ८ ॥ ९ ॥ अष्टमार्थमाह कारणेइति नवमदशमयोस्तमाह धर्मेत्यादिना नवमेधर्मराजोगुरुरुक्तोनचिकेतास्तुशिष्यः कीदृशोमहान्गुरुः अग्निविद्ययोःसंप्रदायप्रवर्त्तकत्वात् तथादशमेवरुणोगुरुरुक्तस्तपोधनोभृगुस्तुशिष्यउक्तः तत्रैवनारायणीयेवेनाख्यस्यगंधर्वस्यस्वानुभवःसर्वसाधनानांमध्येसंन्यासस्योत्तमत्वंचकीर्तितमितिद्वयोरर्थः ॥ १० ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादशवृत्तमाह कीर्तितइतिचतुर्भिः प्रथमपदंपूर्वान्वयिदर्शितं संन्यासस्यानुष्ठानंसंवर्तऋभुप्रभृतिकर्त्तृकंदर्शितंतथातस्यसंन्यासस्य स्वीकारकालोपाधिभूतस्यवैराग्यस्यजनिरुक्तेत्यर्थः ॥ १२ ॥ तस्याइति तस्यावैराग्यजनेर्हेतवोगर्भोपनिषदाद्युक्ताविवेकादयउक्ताः निमित्तानांमरणचिन्हानां ॥ १३ ॥ विरक्तइति अत्रसंन्यासेविरक्तोऽधिकारीप्रोक्तः तथाअस्यसंन्यासिनोबाह्योवेषःशिखादिराहित्य रूपस्तदाचारश्चोक्तः तद्वदाभ्यंतरोमुख्यआचारोऽहिंसादिरूपउक्तः ब्रह्मोपनिषदाद्युक्तंतत्त्वज्ञानंचवर्णितमितिद्वयोरर्थः ॥ १४ ॥१५ ॥

कीर्तितोनुष्ठितःपूर्वैःसंवर्त्ताद्यैर्महात्मभिः॥ तस्यस्वीकारकालश्ववैराग्यस्यजनिस्तथा॥ १२॥तस्यास्तुहेतवस्त द्वद्गर्भोपनिषदादिषु॥ विवेकोविविधोयोगोनिमित्तानांचबोधनं॥ १३॥ विरक्तोत्राधिकारीचसंन्यासीपरि कीर्त्तितः॥ शिखादिरहितस्यास्यवेषआचारईरितः॥ १४॥ बाह्यआभ्यंतरस्तद्वदहिंसादिस्वरूपकः॥ मुख्यो पिस्वात्मविज्ञानंब्रह्मोपनिषदादिषु॥ १५ ॥नवकृत्वःश्वेतकेतोर्हार्दांशंकांव्युदस्यंहि ॥ तत्त्वमस्येवमुक्तंतत्स म्यग्ब्रह्मावबोधने॥ १६॥ आत्मनःसुखरूपत्वमध्यायेस्मिन्प्रकीर्तितं ॥ उक्तंसनत्कुमारेणकिंतुतन्नारदायहि ॥ १७॥ तदहंश्रोतुमिच्छामिनारदाययदीरितं ॥ज्ञानंसनत्कुमारेणत्वत्तोद्यभगवन्गुरो॥ एवमुक्तेगुरुःप्राह शिष्यंवेदेस्थितांकथां ॥ १८ ॥ सनत्कुमारमासीनमेकांतेनारदोमुनिः ॥ संसारतापसंतप्तःकदाचिदिदमब्र वीत्॥ १९॥ भगवन्भवतासम्यक्ज्ञायतेत्रपरायणं॥ ब्रह्मयत्तत्परंज्ञानात्शोकंतरतिपंडितः॥ २०॥ शो कस्यतरणेयत्स्यात्कारणंब्रह्मवेदनं॥ तन्मेब्रूहिमहाभागशिष्यस्तेहंतपोधन॥ २१॥

अनंतरोक्तमनूद्यपृच्छति नवेतित्रिभिः निगदव्याख्यातंत्रयं तच्चवेदेछांदोग्यसप्तमाध्यायरूपे ॥ १६ ॥ १७॥ १८ ॥ तत्रनारदप्रश्नमव तारयति सनत्कुमारमिति एकांतेस्थितंमुनिंनारदइदंपप्रच्छेत्यर्थः॥ १९॥ इदंकिमित्याकांक्षायामाह भगवन्निति हेभगवन्यत्परायणंस र्वाधिष्ठानभूतमतएवपरंसर्वोत्कृष्टंब्रह्मयस्यचविज्ञानात्शोकंकर्तृत्वाद्यध्यासरूपंतरतितद्भवताज्ञायतेइत्यन्वयः॥ २० ॥ शोकस्येति त स्यशोकस्यतरणेकारणभूतंब्रह्मवेदनंयत्यादृशंभवतितन्मह्यंशिष्यायोपदेश्यमित्यर्थः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्तइति एवंप्रार्थितोमुनिर्नारदस्ययत्रांशेअबोधस्तदवधारणायेदमाह इदंकिं भवान्सर्वज्ञत्वेनप्रसिद्धोयावज्जानातितच्छ्रुत्वावक्ष्यामी तिद्वयोरर्थः ॥ २२ ॥ २३ ॥ एवमिति स्पष्टं ॥ २४ ॥ मंत्रब्राह्मणरूपेणप्रत्येकंद्विविधानृक्रगादिसंज्ञांश्चतुरोवेदानूजानामिब्रह्मणःपि

॥ २॥ तुःप्रसादादित्यर्थः ॥ २५ ॥ अत्रेति अत्रवेदेषुसंक्षिप्योक्ताइतिशेषः नानाविधाःकथाःसंति कीदृश्यः वृत्तलोककथाःअतीतजनविषय काःकथाःइतिहाससंज्ञाअपिवेद्मि तथाजगतःसर्गादिनिरूपणपरवाक्यरूपंपुराणंवेद्मि तथाशब्दापशब्दविज्ञानहेतुत्वेनवेदोपकारकत्वा द्वेदानांवेदमितिशब्दोक्तंव्याकरणंवेद्मि तथापित्र्यपदोक्तंश्राद्धादिविधिंवेद्मीतिद्वयोरर्थः ॥ २६ ॥२७ ॥ राशिमिति श्रुतौराशिमित्युक्तंग

एवमुक्तःसभगवन्नारदेनमहात्मना ॥ तदीयाज्ञाननाशार्थमिदमाहहसन्निव ॥ २२ ॥ भवान्यदत्रजानी तेसर्वज्ञोनारदोमुनिः ॥ तच्छ्रुत्वाशुततःपश्चादहंवक्ष्यामितेस्फुटं ॥ २३ ॥ एवंसनत्कुमारेणकथितोनारदोमु निः ॥ प्रांजलिःप्रणतोभूत्वासर्वमेवन्यवेदयत् ॥ २४ ॥ ऋचोयजूंषिसामानित्यथर्वांगिरसासमं ॥ मंत्रब्रा ह्मणरूपाणिवेद्मिब्रह्मप्रसादतः ॥ २५ ॥ अत्रनानाविधाःसंतिवृत्तलोककथाःशुभाः ॥ इतिहासाभिधास्तद्वत् पुराणंजगतोपिच ॥ २६ ॥ सर्गादिकथनंवाक्यमपिव्याकरणंतथा ॥ शब्दापशब्दविज्ञानंपित्र्यंश्राद्धादिकंहि यत् ॥ २७ ॥ राशिंगणितमित्युक्तंयत्रसंख्यावतिष्ठते ॥ उत्पातादितथादैवंनिधिशास्त्रंतथानिधिं ॥ २८ ॥ प्र श्नोतरंचकथितंवाकोवाक्यंमनीषिभिः ॥ तर्कशास्त्रंन्यायशास्त्रंनीतिशास्त्रंतथैवच ॥ २९ ॥

णितंवेद्मियत्रगणितशास्त्रेगुणनभाजनादिनासंख्यावतिष्ठतेस्फुटीभवतीति तथादैवपदोक्तमुत्पातादिनिर्णयशास्त्रंनिधिपदोक्तंभूमिनिखा तद्रव्यरूपनिधिशास्त्रंचवेद्मीति एवमग्रेपिद्वितीयांतानांवेद्मिपदसंबंधोद्रष्टव्यः ॥ २८ ॥ वाकोवाक्यपदार्थःकैश्चित्प्रश्नोत्तररूपोवेदभाग उक्तोभाष्यकारैस्तुतर्कशास्त्ररूपइत्यतस्तदुभयमाह प्रश्नोत्तरमिति किंस्विदावपनंमहदितिप्रश्नोभूमिरावपनंमहदित्युत्तरसेवंविधवेदभा ॥ २ ॥ गंवाकोवाक्यसंज्ञं न्यायशास्त्रमक्षपादप्रणीतंतद्रूपंतर्कशास्त्रमपितत्संज्ञं तथाश्रुतावेकायनपदोक्तंनीतिशास्त्रमिति ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेति निरुक्तेमहाभागादेवताइत्युपक्रम्यसर्वदेवानांसार्वात्म्यमुक्तंतदत्रदेवविद्यापदेनोक्तंपरिशिष्टं निरुक्तंशिक्षाकल्पौचेत्येतत्त्रयंवेदोपकारकत्वाद्वेदविद्येत्युक्तं तथाभूतानांप्राणिनांदृष्टोपकारहेतुत्वात्भूतविद्येत्युक्तमायुर्वेदसहितंसुश्रुतंवैद्यशास्त्रविशेषं तथानानाविधशांतिपुष्ट्यादिफलकान्मंत्रानित्यर्थः ॥ ३० ॥ धनुरिति क्षत्रविद्यापदोक्तामस्त्रविद्यासहितांधनुर्विद्यां तथानक्षत्रविद्यापदोक्तंज्योतिःशास्त्रंग्रहसंस्थादिप्रतिपादकमित्यर्थः ॥ ३१ ॥ सर्पेति सर्पेषुयेदेवनिकायादेवशरीरास्तद्वशीकारहेतुभूताविद्यागारुडविद्येतिप्रसिद्धातां तथासर्वजनानांमनोरंजकत्वेनोपकारकत्वाज्जनविद्येत्युक्तंगांधर्वशास्त्रंगीतादिप्रतिपादकंजानामीत्यर्थः ॥ ३२ ॥ एतत्सर्वमिति सर्वमेतदुक्तं

देवविद्यांनिरुक्ताख्यांवेदविद्यांपुनस्त्रयं॥ शिक्षांकल्पंनिरुक्तंचभूतविद्यांचसुश्रुतं ॥ आयुर्वेदेनसहितंमंत्रान्नानाविधानपि ॥३०॥ धनुर्विद्यांतथाक्षत्रविद्यामस्त्रसमन्वितां॥ ज्योतिःशास्त्रंतथाविद्यांनक्षत्राख्यांमुनीश्वर॥३१॥ सर्पदेवनिकायानांविद्यांतांगारुडाभिधाम्॥ गांधर्वंचविजानामिशास्त्रंसर्वोपकारकं॥३२॥ एतत्सर्वंविजानामिवेदगर्भस्थितंमुने॥ भगवन्नैवजानामिस्वात्मनोमोक्षकारणं॥ मंत्रवित्ततएवास्मिस्वात्मज्ञानविवर्जितः ॥ ३३ ॥ भगवत्सदृशेभ्यस्तुश्रुतपूर्वंमयाविभो ॥ आत्मवित्सकलंशोकंतरेदत्रसकारणम् ॥३४॥ ममास्तिचसदाशोकस्तापत्रयसमुद्भवः॥ वन्हिमंडलसंस्थस्यपंगोःपुंसोयथाभुवि॥ ३५॥

जानन्नप्यहंवेदस्यगर्भेतात्पर्यरूपेविषयतयास्थितंमोक्षकारणंनजानामीत्यर्थः मंत्रविदिति ततआनुषंगिकार्थविज्ञानेपितात्पर्यविषयस्याज्ञानादेवाऽहंमंत्रवित्मंत्रपाठवेत्तैवास्मिनतुमंत्रार्थवित् स्वात्मतत्त्वस्यतत्तात्पर्यगोचरस्याबोधादित्यर्थः ॥ ३३ ॥ आत्मतत्त्वस्यतत्तात्पर्यगोचरत्वेहेतुतयातज्ज्ञानस्यफलवत्त्वमाह भगवत्सदृशेभ्यइति युष्मत्तुल्येभ्यआप्तेभ्योमयेदंपूर्वंश्रुतं इदंकि आत्मवेत्तासकारणंसमूलंशोकंकर्तृत्वादिरूपंतरतीति ॥ ३४ ॥ तद्वाक्यार्थंमयिसमन्वितंविधेहीतिदर्शयन्स्वस्मिन्शोकंवर्णयति ममास्तीति यथावन्हिमंडलेत्रिकोणेपतितस्यपंगोःशोकःस्यात्तथाममाध्यात्मादिदुःखत्रयसंसर्गजःशोकोस्तीति ॥ ३५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनीशयाशोचतिमुह्यमानइतिश्रुत्युक्तंदैन्यरूपंशोकंनिदर्शनेनाह सोहमिति आत्मानंशोचामिकांगतियास्यामीत्याकारकशोकस्यगोचरतांनयामिबालापत्यत्वादिविशिष्टानारीवेतिद्वयोरर्थः ॥ ३६ ॥ ३७ ॥ शोचंतमिति तंमामात्मानंशोचंतंशोकाब्धेःपरपारेअभिलाषःसंजातोयस्यसतथातंनृभिर्दुस्तरेशोकाब्धौमज्जंतंचभगवत्त्वात्पूज्यःपरंपारंतीरंतारयतुप्रापयत्वितिद्वयोरर्थः ॥ ३८ ॥ ३९ ॥ एवमिति एवंनारदंवदंतंप्रार्थयंतंप्रतिस्थूलाऽरुंधतीन्यायेनपरंतत्त्वंबोधयितुंभगवान्मुनिःसनत्कुमारएवमाह एवंकथं हेनारदयत्किंचित्त्वमध्यगीष्ठाःअध्ययनेनज्ञातवानसिएतत्सर्वंनामैवशब्दरूपमेव तत्रोपपत्तिमाह वागादिकमिति यतोवागादिकंयथावत्प्रपंचस्यैकदेशभूतंवस्तुजातंतत्सर्वंनामत्वे

सोहंशोचामिसततमात्मानंदीनवत्सल ॥ शिशुपुत्राप्यपुत्रावायौवनेगतभर्तृका ॥ ३६ ॥ सर्वबंधुविहीनाच यथानारीपतिव्रता ॥ शोचत्यात्मानमनिशंभृशंदारिद्र्यपीडिता ॥ ३७ ॥ शोचंतंतमिहात्मानंतापत्रयवशंगतं ॥ शोकाब्धेरत्यगाधस्यपरपाराभिलाषितं ॥ ३८ ॥ भगवान्मांपरंपारंतारयत्वत्रसत्तमः ॥ मज्जंतंबहुधाशोकसागरेदुस्तरेनृभिः ॥ ३९ ॥ एवंवदंतंतंप्राहभगवान्मुनिसत्तमः ॥ यत्किंचिदध्यगीष्ठास्त्वंनामैतन्मुनिसत्तम ॥ ४० ॥ वागादिकंप्रपंचैकदेशभूतंवदंतितत् ॥ नामत्वेनेदमखिलमुपास्वाज्ञोसियावता ॥ ४१ ॥ नामब्रह्मेतियोलोकउपास्तेपुरुषोहिसः ॥ यावन्नाम्नायुतंविश्वंतावत्यस्ययथासुखं ॥ गतिर्भवतिसर्वत्रमहाराजस्ययादृशी ॥ ४२ ॥

ननामत्वरूपेणैववदंतिवदनकर्मतांनयंति यदिनामनस्यात्तर्हिकिंचिदपिवक्तुंनशक्येतातोनामसर्वात्मकमित्यर्थः फलितमाह इदमित्यादिना तस्मादिदंनामअखिलंसर्वात्मकंब्रह्मरूपमितियावत् उपास्वपुनःपुनश्चिंतय यावतेत्यव्ययंहेतौ तथाचयतोऽज्ञःद्वैतवासनाकुंठितचित्तोसिअतःचित्तस्यसाक्षाद्ब्रह्माकारतायोग्यत्वायाभ्यस्तेनाम्न्येवतावद्ब्रह्मभावनांकुर्वितिद्वयोरर्थः ॥ ४० ॥ ४१ ॥ नामोपासनस्यानुषंगिकंफलमप्याह नामेति योनामशब्दजातंब्रह्मत्वेनोपास्तेसपुरुषःपुरुषपुंगवः दिवंस्पृशतिभूमिंचशब्दःपुण्येनकर्मणा यावत्सशब्दोभवतितावत्पुरुषउच्यतेइतिभारतेयक्षोक्तेः तत्रहेतुमाह यावन्नाम्नेति यावद्विश्वंनाम्नासंबद्धंतावतिसर्वत्रास्योपासकस्यगतिःस्वातंत्र्यंभवतिस्वदेशेमहाराजस्येवेत्यर्थः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतस्मादिति नाम्निब्रह्मदृष्टिमात्रेणशोकोननिवर्त्ततेइत्यतएतस्मान्नाम्नोधिकंकिंचिदस्तिचेत्तद्वक्तव्यमित्येवंनारदेनसमीरितेपृष्टेसतिमुनीश्वरःसनत्कुमारस्ततोनाम्नोभूयोधिकंकिंचित्तत्त्वमुक्तवानित्यर्थः ॥४३॥ आशांतानीति उक्तरूपजिज्ञासयाचाधिकमधिकंनिरूपयन्नाद्यःस्वायंभुवानांप्रथमोमुनिर्वाचमारभ्यआशापर्यंतंत्रयोदशतत्त्वान्याह सर्वत्रवागादिपर्यायेषुउपास्वेतिशब्देनब्रह्मदृष्ट्यातदुपासनमाह तथातेनतेनवागादिनायुक्तेविश्वस्मिन्प्रपंचेगतिःस्वातंत्र्यंभवतीत्याकारकंफलमाहेतिद्वयोरर्थः ॥ ४४ ॥ ४५ ॥ तानित्रयोदशतत्त्वानिस्वरूपप्रदर्शनपूर्वकंनिरूपयति नाम्नइतिपंचभिः नामापेक्षयावागिंद्रियमधिकंकारणत्वात् तस्माद्वागिंद्रियादपिमनोधिकंतत्प्रेरकत्वात् य

एतस्मादधिकंकिंचिदस्तीत्येवंसमीरिते ॥ नारदेनततोभूयस्तस्मादाहमुनीश्वरः ॥ ४३ ॥ आशांतानिहितत्त्वानिवागादीनित्रयोदश ॥ उपास्वेत्येवसर्वत्रनामवत्तत्फलंतथा ॥ ४४ ॥ तेनतेनचसंयुक्तेविश्वस्मिन्गतिरित्यम् ॥ उक्तवान्नारदायाद्योमुनिःसर्वार्थदर्शकः ॥४५॥ नाम्नोवागिंद्रियंभूयस्तस्मात्संशयरूपभृत् ॥ मनस्ततोपिसंकल्पोयदिच्छेतीहगीयते ॥ ४६ ॥ चित्तंसंकल्पतोभूयःसामान्यज्ञानरूपकं ॥ तस्मादपिचचिंताथध्यानंज्ञानप्रवाहभृत् ॥ ४७ ॥

न्मनइच्छेतिलोकेगीयते इच्छयाहिवागिंद्रियंप्रेर्यतेइतिभावः तस्मादिच्छारूपान्मनसोपिसंकल्पोधिकः कीदृशः संशयरूपभृत्संशयस्यरूपंनानाकोटिकत्वंतस्यधारकः संकल्पाख्यांतःकरणवृत्तिर्हिकर्त्तव्याकर्त्तव्यलक्षणकोटिद्वयंविभागेनावगाहमानाइच्छांजनयतीतिप्रसिद्धमितिभाष्यानुसारिव्यवहितान्वयेनार्थः ॥ ४६ ॥ चित्तमिति उक्तरूपात्संकल्पादपिचित्तमधिकं तत्रहेतुगर्भविशेषणंसामान्येति सामान्यंसादृश्यंतस्यज्ञानरूपमित्यर्थः अनुसंधानात्मकेनचित्तेनहिहिताहितसाधनतयाऽनुभूतपदार्थानांसादृश्यंपुरोवर्तिषुयदाविषयीक्रियतेतदासंकल्पोभवतीतिभावः तस्माच्चित्तादपिध्यानंज्ञानसंततिलक्षणंचितारूपमधिकं चिंतायाःसंस्कारोद्बोधकत्वेनानुसंधानहेतुतायाःप्रसिद्धत्वादितिभावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यानादिति ध्यानमपितस्यैवकर्त्तुंशक्यतेयद्वस्तूपेक्षाभिन्नज्ञानरूपेणविशेषज्ञानेनविषयीकृतमित्यतोविशेषज्ञानरूपंविज्ञानंस्वकार्यात् ध्यानादधिकंतथाविज्ञानमपिअन्नाहारकृतावयवोपचयरूपबलशालिनैवमनसासाध्यमित्यतोविज्ञानात्कार्याद्बलमधिकंवैरिभयहेतुत्वे नापिप्रसिद्धत्वादिति तस्माद्बलादपितत्कारणमन्नंभूमिरूपमधिकं अन्नरूपायाभूमेरपितत्कारणभूतावृष्ट्यादिरूपाआपोधिकाइतिद्वयोर

॥४॥ र्थः॥४८॥४९॥ तेजइति ऊष्मरूपेणवृष्ट्यादिरूपजलहेतुतयाप्रसिद्धभूतंतेजोपिततोजलेभ्योधिकं अत्रवृष्टिहेतुतयाप्रसिद्धस्यबाह्यवायो स्तेजस्यंतर्भावोविवक्षितइतियोतयंस्तेजोविशिनष्टि पवनसंयुक्तमिति तस्मात्तेजसोपितदाधारभूतआकाशोधिकः आकाशादपिसु षुप्त्यंतेतत्सृष्टिनिमित्तभूतास्मृतिरधिका नहिस्रष्टव्यजातीयस्मृतिंविनाकिंचित्सृज्यते तस्याःस्मृतेरपिनिदानभूताआशाइदमेवंस्यादित्या

ध्यानादपिचविज्ञानंविशेषज्ञानरूपभृत्॥ विज्ञानाच्चबलंभूयोभीतायस्माद्विवैरिणः॥ ४८॥ बलादप्यधि कंप्रोक्तमन्नंभूमिसमुद्भवं॥ भूमेरन्नस्वरूपायाआपोथाभ्यधिकास्ततः॥ ४९॥ तेजःपवनसंयुक्तमाकाशश्च ततोमहान्॥ आकाशात्स्मरणंभूयस्तस्मादाशातिदीनता॥ ५०॥ एवमेतानितत्त्वानित्यधिकान्युत्तरोत्तरं॥ उक्तोपपत्तिमप्याहसएवमुनिसत्तमः॥ ५१॥ ऋगादयोत्रवाचैवज्ञायंतेयेत्वयेरिताः॥ अर्थानानात्मकास्त द्वल्लोकाःस्वर्गादयोपिच॥ ५२॥ पृथिव्यादीनिभूतानिपंचदेवादयस्तथा॥ जंगमाःस्थावराजीवाःशतकोटि विभेदिनः॥ ५३॥

कारिकाधिका नहिनिराशस्यक्षीणकामस्यकिंचित्स्मरणेप्रयोजनमित्यर्थः तथाचसंग्रहश्लोकः वाङ्मनःसंकल्पचित्तध्यानविज्ञानकंबलं अन्नाम्भेजांस्यथाकाशस्मराशाःस्युस्त्रयोदशेति ॥ ५०॥ अथनामादिभ्योवागादीनामाधिक्यंयाभिरुपपत्तिभिस्त्रयोदशपर्यायेषुश्रुत्यो पन्यस्तंताःप्रतिपादयितुंप्रतिजानीते एवमिति उक्तप्रकारेणएतानिवागादीन्युत्तरोत्तरमधिकानिप्रतिपाद्यतेषांप्रत्येकमाधिक्यसाधिकां युक्तिमपिसआद्योमुनिरेवप्राहेत्यर्थः॥ ५१॥ तत्रनाम्नोवाचआधिक्येतामाह ऋगादयइतिचतुर्भिः ऋग्वेदादयःशब्दविस्तरायेत्वयाना रदेनईरिताविदितत्वेनोक्तायेचतेषामृग्वेदादीनामर्थायेचस्वर्गादयोलोकास्तेसर्वेपदार्थावाचावागिंद्रियेणैवनिमित्तभूतेनपरैर्विज्ञायंतेव्यव ह्रियंतेइत्यर्थः ॥ ५२॥ पृथिव्यादीनीति तथापृथिव्यादीनिपंचभूतानिदेवाइन्द्रादयआदिपदग्राह्याअसुरादयश्चतथामनुष्यादयोजंग ॥४॥ मास्तृणादयःस्थावराश्चनानाभेदास्तेनैवविज्ञायंतेइति ॥ ५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मइति तथाएतदष्टकमष्टपदार्थानांत्वंदंवाचोऽभावेकोज्ञातुंशक्नुयात् एतत्किं सुखहेतुत्वेनप्रसिद्धोधर्मःप्रथमः यथायदनुभूतंतथातस्यभाषणरूपंसत्यंद्वितीयं सम्यक्परोपकारकंयद्वचस्तद्रूपंसाधुतृतीयं मनःप्रियंसद्योमनःप्रसादकंयद्वचस्तद्रूपंहृदयज्ञंचतुर्थं एतद्धर्मादिरूपंचतुष्टयं तद्विपरीतमधर्मासत्यासाध्वऽहृदयज्ञरूपंचतुष्टयंयत्तद्रूपमिति ततःसर्वनामव्यवहारहेतुत्वादेषावाक्ब्रह्मत्वेनोपास्यानामवत् एतदुपासनस्यफलंतुपूर्ववन्नामोपासनवदेवेतिद्वयोरर्थः ॥ ५४ ॥५५॥ अथवागपेक्षयामनसोऽधिकत्वेतामाह अक्षेवेतित्रिभिः द्वेअक्षेबिभीतकफलेकुवलेबदरीफलेवाआमलकेवायथामुष्टिर्गृह्णातिस्वस्मिन्नंतर्भावयतितथामनोप्युक्तरूपांवाचंनामचएतद्द्वयंगृह्णातिस्वस्मिन्नंतर्भाव

धर्मःसुखकरःसत्यंयथाभूतार्थभाषणं॥ साधुसम्यग्वचःप्रोक्तंहृदयज्ञंमनःप्रियं ॥ ५४ ॥ एतच्चतुष्टयंचास्माद्विपरीतंचतुष्टयं॥ वाचाविनात्रकोनामजानीयादष्टकंत्विदं॥ पूर्ववत्ततएवैषावाग्ब्रह्मेतीहनामवत्॥ ५५॥ अक्षेवाकुवलेवाद्वेयद्वदामलकेचवा॥ मुष्टिर्गृह्णातितद्वत्तुमनोवाचंचनामच॥ ५६॥ मनसाप्रविचार्यैववेदाध्ययनमाचरेत् ॥ कर्मणांकरणंतद्वदभिलाषंफलाश्रयं॥ इहलोकेपरेवापिकुरुतेसाधनेष्वपि॥५७॥ शरीरादिमनःप्रोक्तंसुखंनानाविधंतथा॥ ब्रह्मापिगम्यतेतेनयस्माद्ब्रह्ममतंततः॥ ५८॥ संकल्पवान्पुमान्कुर्याद्व्यापारंमानसंततः॥ वागिंद्रियसमुद्भूतंततःशब्दसमुत्थितं॥ ५९॥

यतीत्यर्थः नहिमनसोऽभावेवागादिकंदृश्यतेइतिभावः ॥ ५६ ॥ मनसेति यतोमनसाविचार्यैववेदाध्ययनंकर्मणांयागादीनांकरणमनुष्ठानंतथालोकद्वयवर्त्तिफलविषयकंतत्साधनविषकंवाऽभिलाषंचकुरुतेइत्यर्थः ॥ ५७ ॥ शरीरादीति शरीरमिंद्रियादिकंवायत्श्रुतावालशब्देनोक्तंतत्सर्वंमनएवतदन्वयव्यतिरेकानुविधानात् तथालोकशब्देनकर्मसाधनेनयदुक्तंतन्नानाविधंलौकिकंसुखमपिमनएव तथातेनमनसासंस्कृतेनब्रह्मपरंलभ्यतेइत्यतोपितन्मनोब्रह्ममतमित्यर्थः तथाचतस्यब्रह्मत्वेनोपासनंयुक्तमितिभावः ॥५८ ॥ संकल्पस्याधिक्यमुपपादयति संकल्पवानितिषड्भिः यउक्तरूपसंकल्पयुक्तःसएवमानसव्यापारंसर्वंकरोतिततोमानसव्यापारानंतरंचवाग्व्यापारंततोनामाख्यशब्दव्यापारंकरोतीत्यर्थः॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रशब्दव्यापारेसकलःकर्मविधायकोवैदिकादिःशब्दसमूहोन्तर्भवतितत्रशब्दसमूहेचतत्प्रकाशकानिसर्वाणिकर्माणितिष्ठंतीत्याह शब्दइ
ति ॥६०॥ एवमिति एवमुक्तपरंपरयासंकल्पएवसर्वेषांकर्मणांकारणंयतस्तेषामुत्पत्तिस्थितिसंहारेषुपंडितःकुशलइत्यर्थः॥६१॥ स्वर्गादि
काइति एवशब्दोभिन्नक्रमः तथाचस्वर्गादयोलोकाःपृथिव्यादीनिभूतानिचयच्चराचरंविश्वंसृजंतितद्विश्वसर्जनंसंकल्परूपेनिमित्तेसत्येव
भवतीत्यर्थः ॥६२॥ एतत्स्फुटीकरोति दृष्टिरिति लोकानांभूतानांचयेऽभिमानिनोदेवास्तेषांसंकल्पेनदृष्टिर्भवतिदृष्ट्यभिमानिदेवस्यसंक
ल्पेनचान्नंभवति एवमग्रेपिदेवरूपेणसंकल्पसंबंधोबोध्यः तथान्नसंकल्पाद्भूतानांप्राणाःसेंद्रियाःप्रभवंतितेभ्योमंत्राःस्मृत्यारूढरूपेणभवं

शब्दऐक्यंसमायातिवैदिकःशब्दसंचयः॥तत्रकर्माणितिष्ठंतिसुखदानिशरीरिणां॥६०॥एवंसंकल्पएवस्या
त्कर्मणांकारणंसदा॥उत्पत्तौसंहृतौतद्वत्स्थितावपिचपंडितः॥६१॥स्वर्गादिकास्तथालोकाअपिभूतानिपं
चवा॥संकल्पेसतिकुर्वंतिविश्वमेवचराचरं॥६२॥ दृष्टिरन्नंतथाप्राणामंत्राःकर्मचतत्फलं॥ क्रमेणजा
यतेकर्मफलात्स्वर्गादिमान्भवेत्॥६३॥संकल्पस्ततएवायंब्रह्मरूपउपासनात्॥ अस्यलोकानवाप्नोतिनि
र्दुःखानविनाशिनः॥स्वयंचतादृशोभूत्वासर्वातिशयवर्जितान्॥६४॥ यदासामान्यविज्ञानंसंकल्पोपित
दाभवेत्॥उक्तोयःकारणत्वेनसर्वस्यजगतोपिहि॥६५॥चित्तंततोत्रविज्ञेयंसंकल्पस्यापिकारणं॥ब्रह्मसं
कल्पवच्चात्रफलमुक्तंततोधिकं॥६६॥

तितेभ्यःकर्माणिततःफलमपूर्वाख्यंजायते एवंक्रमेणसंपन्नादपूर्वाख्यकर्मफलात्स्वर्गादिभोक्ताभवेदित्यर्थः॥६३॥संकल्पइति ततउक्तविध
याविश्वहेतुत्वादेवायंसंकल्पोब्रह्मभवति अस्यसंकल्पस्यतथोपासनान्निर्दुःखत्वाविनाशित्वनिरतिशयत्वैर्युक्तान्लोकान्स्वयमपितादृशो
निर्दुःखत्वादिशालीसन्नवाप्नोतीत्यर्थः ॥ ६४ ॥ अथचित्तस्यसंकल्पादाधिक्यमुपपादयति यदेतिपंचभिः योविश्वकारणत्वेनोक्तःससं
कल्पोपितदाभवतियदावर्णितात्मकसामान्यज्ञानरूपंचित्तंभवतिततःअन्वयव्यतिरेकाभ्यांसंकल्पस्यापिकारणंचित्तंब्रह्मविज्ञेयं अत्रचि
त्तोपासनेसंकल्पोपासनवत्ततःसंकल्पोपासनफलादधिकंचफलंध्रुवत्वादिशालिलोकप्राप्तिरूपंभवतीतिद्वयोरर्थः ॥ ६५ ॥ ६६ ॥ ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्तस्याधिक्यंलोकेपिप्रसिद्धमितिश्रुत्युक्तंवर्णयति सर्वज्ञोपीति सर्वज्ञतयाप्रसिद्धोपिपुरुषोयदाचित्तेनानुसंधानलक्षणेनहीनोभवतित दातंसर्वेसुतादयोऽवजानतेअनादरंनयंति कीदृशाः सुतादयः एवंवदंतः एवंकथं यद्ययंसर्वज्ञस्तर्हिकस्माद्धेतोश्चित्तवर्जितोदृश्यतेततोजडव च्चित्तशून्यत्वान्नसर्वज्ञइतिद्वयोरर्थः ॥ ६७ ॥ ६८ ॥ चित्ताभावेप्रशंसाव्यतिरेकोदर्शितोऽथान्वयमाह चित्तवंतमिति किंचिज्ज्ञानन्तम पिनरंपूर्वापरानुसंधानलक्षणचित्तशालिनंसततंमानवाअंगीकुर्वंतिसाक्षित्वादौ तथाततश्चित्तवतोमुखाल्लौकिकंवैदिकंवावचःशृण्वंतिच तेनेतिशेषः तथातेनचित्तवताविहितान्संबंधान्गुरुत्वोत्तमर्णत्वादीनप्यंगीकुर्वंतीतिव्यवहितान्वयः ॥ ६९ ॥ अथचित्ताद्ध्यानाधिक्यमु पपादयति स्वर्गादयइतित्रिभिः स्वर्गांतरिक्षभूमिसंज्ञास्त्रयोलोकाः पंचभूतानिचपर्वताश्चतद्वत्शमादिसंपन्नत्वेनदेवतारूपामनुष्याएतेसर्वे

सर्वज्ञोपियदाचित्तहीनोविद्वान्भवेदिह॥ तदाऽवजानतेसर्वेह्यपितंतनयादयः॥ ६७॥ एवंवदंतश्चैदेषसर्व ज्ञश्चित्तवर्जितः॥ कस्मात्ततोनसर्वज्ञश्चित्तशून्योजडोयथा ॥ ६८ ॥ चित्तवंतंनरंकिंचिज्ज्ञानन्तमपिमान वाः॥ अंगीकुर्वंतिसततंशृण्वंतिचततोवचः॥ लौकिकंवैदिकंवापिसंबंधान्विहितानपि ॥ ६९ ॥ स्वर्गादय स्त्रयोलोकाध्यायंतीवसभूतकाः॥ गिरयोदेवतास्तद्वन्मनुष्याअपिसर्वतः ॥ ७० ॥ मनुष्येषुमहांतोयेध्यानवं तइहात्रते ॥ मनुष्येषुचयेस्वल्पाःपरदूषणसूचकाः ॥ निंदाकरास्तथानित्यंकलहापकृतोद्यताः ॥ ७१ ॥ ध्यान शून्याःसदाक्षिप्तचेतसोनचतादृशाः॥ महांतःप्रभवोयद्वद्वर्त्तंतेध्यानसंयुताः॥ ७२॥

निश्चलत्वेनस्थिताध्यायंतीवध्यानंकुर्वंतइवलक्ष्यंतइत्यर्थः तथाचसर्वैर्महद्भिरभ्यस्यमानत्वाद्ध्यानंप्रशस्तमितिभावः ॥ ७० ॥ ध्यानस्य लोकेपिसत्फलत्वंप्रसिद्धमित्यन्वयव्यतिरेकाभ्यामाह मनुष्येष्विति अत्रलोकेयेमनुष्येषुमहांतोगुणैःपूज्यतांप्राप्तास्तेध्यानवंतइवध्यान फललेशंप्राप्ताइवेतिविज्ञायंते इहजन्मनिजन्मांतरेवाध्यानंविनामहत्त्वंनभवतीतिभावः एतेनश्रुतौध्यानापादांशपदस्यध्यानस्यआपादो ध्यानेनआसमंतात्पद्यमानंगम्यमानंफलंतदंशवंतइतिव्युत्पत्तिःसूचिता येषुमनुष्येषुअल्पाःक्षुद्राः तत्रहेतुगर्भंविशेषणत्रयंपरेत्यादि कल हेअपकृतेअपकारेचोद्यतास्तेध्यानशून्यत्वादेवसदाविक्षिप्तचित्ताभवंति तथातादृशामहांतःपूज्यानभवंतियद्वद्ध्यानसंयुताःप्रभवःसाम र्थ्यविशेषेणमान्यावर्ततंइतिद्वयोरर्थः ॥ ७१ ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यानाद्विज्ञानस्याधिक्यमुपपादयति यावदिति यावान्वाचोविषयउक्तऋग्वेदादिरत्तदयज्ञान्तस्तावानपिशब्दात्तदधिकोपिविषयोविज्ञा
नस्यश्रुतौप्रोक्तइतिप्रथमदलार्थः तत्राधिकंदर्शयति अदनीयमिति अदनीयंविविधमन्नंतद्गतंषड्विधंरसंचलोकयोर्व्यवहारजातंचविज्ञा
नादेवावगच्छतीत्यर्थः ततःप्रशस्तंविज्ञानंब्रह्मत्वेनोपास्यं तदुपासनाच्चविज्ञानेनशास्त्रार्थविषयकेनज्ञानेनव्यवहारकौशलरूपेणचसंपन्ना
नांलोकानांप्राप्तिर्भवतीत्यर्थः ॥ ७३॥ ७४॥ ततोपिबलाधिक्यमुपपादयति बलवानितिचतुर्भिः एकोपिबलवान्शतसंख्यानपिविज्ञान
युतान्स्वस्यबलेनकंपयतीतिप्रसिद्धं तथाबलिष्ठएवभूमेःसंश्रयोधारकोभूपतिरितियावद्भवतीतिच वीरभोग्यावसुंधरेतिन्यायात्॥ ७५ ॥

यावद्वाचाविजानातितावद्विज्ञानतोपिच ॥ अदनीयंरसंतद्वत्षोढाभिन्नमयंपुमान् ॥ ७३ ॥ लोकद्वयंचविज्ञा
नादवगच्छतिसर्वदा॥विज्ञानज्ञानसंपन्नान्लोकानेषसमाप्नुयात्॥ ७४॥ बलवानेकएवायंशतंविज्ञानसंयु
तान्॥ बलेनकंपयेत्स्वस्यबलिष्ठोभूमिसंश्रयः॥ ७५॥ बलवान्सर्वएवायमुत्तिष्ठतियतोयतः॥ उत्तिष्ठन्परि
चर्यायांगुर्वादेःशक्तिमान्भवेत्॥ ७६॥ उपसत्तिंहिकुरुतेपरिचर्यारतोनरः॥ उपसत्तिरतोद्रष्टाश्रोतामंतातथै
व च॥ बोद्धाकर्त्ताचविज्ञातापुमान्भवतिवैबलात् ॥ ७७ ॥ लोकत्रयीतथापंचभूतानिगिरयोपिच ॥ देवो
द्यानानिभूतानिजंगमानिस्थिराणिच॥ बलमाश्रित्यतिष्ठंतिबलंब्रह्मततःस्मृतम् ॥ ७८ ॥

बलस्यशास्त्रोक्तप्रक्रिययापिप्राशस्त्यमाह बलवान्सर्वइति यतोहेतोर्बलवानेवयतःसंयतःसन्नुत्तिष्ठतिउद्यमशालीभवतिततोगुरुप्रभृतीनां
सेवायांशक्तोभवतिततःपरिचर्यारतउपसत्तिंगुरुप्रभृतीनांसमीपगमनमप्रतिबंधेनकुरुतेततउपसत्तौरतःसन्द्रष्टाउपदेशकानांदर्शनस्यपरी
क्षणरूपस्यकर्त्ताभवतिततस्तदुक्तार्थानांश्रोताततोमंताउपपत्तिभिस्तच्चिंतनकर्ताततोबोद्धाएवमेवेत्यवधारणकर्ताततःकर्ताविहितानुष्ठा
ताततोविज्ञाताफलानांसाक्षात्कर्त्ताचभवति एतस्याःपरंपरायाबलप्रयुक्तत्वाद्बलंप्रशस्तमितिद्वयोरर्थः ॥ ७६॥७७ ॥ जगत्स्थितिहेतुत्वा ॥ ६॥
च्चतत्प्रशस्तमित्याह लोकत्रयीति यतस्त्रिलोक्यादिकंबलप्रभावादेवस्थितंततोबलंब्रह्ममतंब्रह्मत्वेनध्येयमित्यर्थः ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलादपितत्कारणमन्नमधिकमित्याह दशेति बलान्वितोपिदशरात्रमन्नालाभेसविक्षेपोनानाविक्षेपैःसहितोजीवन्मृतोवस्तुतोमृतोवाजायते यतइंद्रियव्यापारान्मानसव्यापारांश्चत्यजतीत्यर्थः॥७९॥ अन्नंप्राप्येति सएवचपुनरन्नप्राप्तौपूर्ववद्भवतितेनान्नस्यबलादधिकत्वंस्फुटमित्यर्थः ॥ ८० ॥ उपासनादिति इतोन्नेब्रह्मदृष्टिरूपादुपासनादन्नादिसंपन्नानांलोकानांप्राप्तिस्तैत्तिरीयादिश्रुत्यंतरेप्युक्ताततोन्नस्यब्रह्मत्वंयुक्तमित्यर्थः ॥८१॥ अथातोजलानामाधिक्यंवर्णयति आपइतिचतुर्भिः तासामपां ॥८२ ॥ अन्नाभावइति वृष्टिप्रयुक्तान्नभावाभावयोःप्राणिनांवृद्धिक्षययोर्दर्शनादन्नतोऽपामाधिक्यंस्फुटमित्यर्थः ॥ ८३ ॥ त्रिलोकाइति ऊर्ध्वाधोमध्यभावेनत्रिविधानिखिलालो

दशरात्रंयदाश्नीयान्नैवकश्चिद्बलान्वितः ॥ जीवन्मृतःसविक्षेपोजायतेम्रियतेथवा ॥ सर्वेंद्रियाणांव्यापारान्विमुंचतिचमानसान् ॥ ७९ ॥ अन्नंप्राप्यैवबलवान्सर्वेंद्रियमनोयुतः ॥ व्यापारवान्भवेत्तेनबलादन्नमिहाधिकं ॥ ८० ॥ उपासनादितोगच्छेदन्नपानसमन्वितान् ॥ लोकान्पुमान्यतस्तस्मादन्नंब्रह्मेतिकीर्त्यते ॥ ८१ ॥ आपोयदाप्रजायंतेवृष्टिरूपास्तदाभवेत् ॥ अन्नमप्यधिकंतासामभावेनैवकिंचन ॥ ८२ ॥ अन्नाभावेइमे प्राणाव्रजेयुःप्राणिनांक्षयम् ॥ सतितस्मिन्हिवृद्धिंचतस्मादापोधिकाःस्मृताः ॥ ८३ ॥ त्रिलोकानिखिलाःसर्वेस्थिरजंगमसंयुताः ॥ आपएवान्नभूताःस्युर्नततोन्यद्धिकिंचन ॥ ८४ ॥ आपोब्रह्मेतियोवेदसकामान्निखिलानपि ॥ आप्नुयात्तृप्तिमांश्चायंभवत्येवनसंशयः ॥ ८५ ॥ तेजःसंतापमतुलंदर्शयित्वात्रसर्वतः ॥ विद्युतश्चपुरोवातंसृष्ट्वापश्चात्प्रवर्षति ॥ ८६ ॥ तेजस्वीतेजसायुक्तोदीप्यमानःस्वयाश्रिया ॥ तमोलेशेनरहितस्तेजोब्रह्मविदांभवेत् ॥ ८७ ॥

कास्तथातद्वर्तिनःसर्वेप्राणिनश्चान्नरूपापन्नजलरूपाएवस्युर्बोध्याः यतस्ततोजलेभ्योन्यज्जलनिरपेक्षंकिंचिन्नास्तीत्यर्थः ॥ ८४ ॥ आपोब्रह्मेति यआपोजलानिब्रह्मेत्याकारेणोपास्तेसनिखिलान्कामान्प्राप्नुयात्सदातृप्तिंचेत्यर्थः ॥ ८५ ॥ अद्भ्योपितेजसोधिकतामुपपादयति तेजइतिद्वाभ्यां तेजःप्रवर्षतिवृष्टिरूपजलानिसृजति किंकृत्वा संतापमूष्मरूपंप्रदर्शयित्वाततोविद्युतोनानाविधाःपुरोवातंपूर्ववायुंचसृष्ट्वेतिप्रसिद्धमित्यर्थः ॥ ८६ ॥ तथाध्यात्ममपितेजसोमहिमाप्रसिद्धइत्याह तेजस्वीति तेजस्वीपुरुषःश्रीमत्त्वेनतमोदोषहीनत्वेनचप्रसिद्धस्ततोविदांविवेकिनांमतेतेजोब्रह्मभवेदित्यर्थः ॥ ८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोप्याकाशोधिकस्तत्प्रभृतिविश्वाधारत्वादित्याह तेजसइतित्रिभिः वायुःपुरोवातादिरूपस्तत्सहितात्तेजसआकाशोधिकः यतस्तेजः प्रभृतिविश्वंतत्रतिष्ठतीति ॥ ८८ ॥ सर्वेंद्रियाणामिति अध्यात्ममपिवागादिव्यापाराआकाशालंबनेनैवजनैःक्रियंतेतथासुखादिरूपकर्म फलभोगश्चक्रियतेइत्यर्थः ॥ ८९ ॥ अवकाशेति अवकाशोविस्तीर्णताप्रकाशःप्रभाताभ्यांसंपन्नानूकीर्तिशालिनश्चलोकान्सप्रयातिय आकाशंब्रह्मत्वेनवेदउपास्तेइत्यर्थः ॥ ९० ॥ ततोपिस्मरपदोक्तायाःस्मृतेरध्यासहेतुतयाप्रसिद्धायाआधिक्यमाह स्मरणादितिद्वाभ्यां अनुभूतप्रपंचस्मरणादेवहेतोर्यतआकाशादिकंजगदवगच्छंतिकल्पयंति इंद्रियव्यापारानप्यारभंतेइत्यर्थः ॥ ९१ ॥ ससाधनमिति स

तेजसोवायुसहितादाकाशोभ्यधिकोयतः ॥ तेजोनानाविधंवायुर्विश्वंचात्रैवतिष्ठति ॥ ८८ ॥ सर्वेंद्रियाणां व्यापारानाकाशेनैवकुर्वते ॥ सुखंदुःखंतथाकाशेसर्वोजंतुःप्रयातिहि ॥ ८९ ॥ अवकाशप्रकाशाभ्यांसंपन्नान्कीर्तिभाजिनः ॥ आकाशब्रह्मविल्लोकान्प्रयात्येवनसंशयः ॥ ९० ॥ स्मरणादवगच्छंतित्याकाशमपिमानवाः ॥ व्यापारानिंद्रियाणांचस्मरणादेवकुर्वते ॥ ९१ ॥ ससाधनंसुखंतद्वद्दुःखंचस्मरणात्पुमान् ॥ अवगच्छतिसर्वोयंयदुक्तंकर्मणःफलं ॥ ९२ ॥ आशाविष्टःपुमान्सर्वंकुरुतेपुण्यपातकं ॥ लोकद्वयेसुखंतद्वद्दुःखमेवससाधनं ॥ लोकद्वयंसमाप्नोतिनिराशोनस्मरन्नपि ॥ ९३ ॥ आशांब्रह्मेतियोवेदतस्यकामामनोगताः ॥ सिद्ध्यंतिसत्यसंकल्पःपुमानेषभवेद्धिसः ॥ ९४ ॥ त्रयोदशैवंप्रश्नास्तेभूयोविषयईरिताः ॥ एतेसनत्कुमारेण नारदायातिधीमते ॥ ९५ ॥

साधनस्यसुखादिरूपस्यकर्मफलस्यापिज्ञानंस्मृत्यधीनमतःस्मृतिराकाशादधिकातदुपासनफलंचतद्विषयेषुकामचाररूपंबोध्यमित्यर्थः ॥ ९२ ॥ ततोपिकामनारूपाआशाऽधिकेत्याह आशाविष्टइति कामरूपाशाविशिष्टएवपुरुषःस्मृत्याकर्माणिकुरुतेतत्फलभोगायलोकद्वयेभ्रमतिच यस्तुनिराशोनिष्कामःसस्मरन्स्मृतिकर्त्ताअपिशब्दात्व्यापारांतरकर्त्तावानभवतीत्यर्थः ॥ ९३ ॥ एवंविश्वहेतोराशाया ब्रह्मत्वेनोपासकःसर्वेप्सितसिद्धिलभतेइत्याह आशामिति स्पष्टं ॥ ९४ ॥ एवंनाम्नःकिंभूयइत्यादिप्रश्नगोचरास्त्रयोदशपदार्थावाचमारभ्याशांताःसनत्कुमारेणनारदायोक्ताइत्याह त्रयोदशैवमिति भूयोधिकंतद्रूपेविषयेयेप्रश्नास्तेएतेईरिताःसमाहिताः ॥ ९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलानीति यद्यपितत्तदुपासनजन्यानिफलान्यपिप्रलोभनायोक्तानितथापिएषनारदःसुतरांनिपुणःआशोपासनयासर्वकामितार्थप्राप्ति
रूपंफलंश्रुत्वापिप्रसन्नंमुनिपुंगवंप्रतितस्मादाशारूपतत्त्वादधिकंतत्त्वंपुनःपृष्टवानितिद्वयोरर्थः ॥ ९६ ॥ ९७ ॥ प्रश्नोत्तरेदर्शयति आशा
रूपंफलंश्रुत्वापि... याइति हेभगवन्आशायाःकिमधिकमित्येवंनारदेनोक्तःपृष्टोमुनिःसनत्कुमारआशायाःप्राणोऽधिकःसर्वैरात्मत्वेनदृश्यमानत्वादित्युक्त्वा
तत्रार्थेउपपत्तिसंभावनाप्रयोजिकांयुक्तिमप्येतांवक्ष्यमाणरूपामुक्तवानितिद्वयोरर्थः ॥ ९८ ॥ ९९ ॥ तामुपपत्तिंप्रपंचयति चक्रस्येत्य

फलानितत्रतत्रापिकथितानिह्युपासनात् ॥ प्रलोभनायमुनिनातथाप्येषोतिधीधनः ॥ ९६ ॥ पुनरप्यधिकं
तस्मात्प्रसन्नंमुनिपुंगवं ॥ सर्वकामसमाप्तिंतांफलंश्रुत्वापिपृष्टवान् ॥ ९७ ॥ आशायाभगवन्किंचिदस्त्यत्रा
भ्यधिकंपुनः ॥ एवमुक्तोमुनिःप्राहत्याशातोभ्यधिकंपुनः ॥ ९८ ॥ प्राणंयत्रात्मबुद्धिःस्यात्प्रायःसर्वस्यदेहि
नः ॥ उपपत्तिमपिप्राहसोप्येतांमुनिसत्तमः ॥ ९९ ॥ चक्रस्यनाभिसंस्थानाअरायद्वद्भवंतिहि ॥ तद्वत्सर्वमिदं
प्राणसंस्थानमवधारय ॥ १०० ॥ प्राणःप्राणेनलोकेस्मिन्प्राणमेवप्रयातिहि ॥ प्राणंददातिचप्राणःप्राणा
यैवेतिचस्थितिः ॥ १०१ ॥ पितामातातथाचार्योब्राह्मणःप्राणईरितः ॥ भ्रातास्वसास्नुषाजायापुत्रःसर्वेपि
जंतवः ॥ प्राणएवात्रविज्ञेयःप्राणान्नास्तीहचापरं ॥ १०२ ॥

ष्टभिः यथारथचक्रस्यअरास्तिर्यक्काष्ठरूपानाभिसंज्ञंमध्यकाष्ठंसंस्थानंस्थित्याधारभूतंयेषांतेतथा तद्वत्सर्वंविश्वंप्राणाश्रयकमित्यर्थः
॥ १०० ॥ तत्रहेतुतयासर्वकारकरूपतामाह प्राणइति देवदत्तोऽश्वेनगच्छतीत्यादिप्रयोगेषुयोगमनकर्त्तासप्राणरूपएवतस्यकरणभूतोऽ
श्वःकर्मभूतोयामश्चप्राणरूपएव तथासर्गांविप्रायददातीत्यत्रापिसर्वकारकरूपेणप्राणएवेत्येषास्थितिःसिद्धांतइत्यर्थः ॥ १०१ ॥ अत्रैवो
दाहरणांतरमाह पितेति तथापितृमातृब्राह्मणाचार्यादिपदार्थभूतःप्राणएवभवतियतःप्राणाद्भिन्नंलोकेकिंचिन्नास्तीत्यर्थः ॥ १०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतल्लौकिकान्वयव्यतिरेकाभ्यांसाधयति प्राणेसतीति यदाप्राणेविद्यमानेसतिप्राणिनांपित्रादीनांदेहान्वचसापिक्षिपेत्तिरस्कुर्यात्तदातंति रस्कर्त्तारंप्रत्येवंलोकवृत्तकुशलाःप्राहुः एवंकथं त्वंयस्यक्षेपंवाचिकंतिरस्कारंकरोषिअस्यत्वयावधएवकृतोयतउत्तमानांवधःशस्त्रानार व्धोऽयमधिक्षेपरूपएवप्रसिद्धः अतएवार्जुनेनगांडीवाधिक्षेपकर्त्तुर्वधप्रतिज्ञायुधिष्ठिरेतुंकारेणपूरितेत्युपाख्यायतेकर्णपर्वणीतिद्वयोरर्थः ॥ १०३ ॥ १०४ ॥ निर्गतेइति प्राणेनिर्गतेसत्यमुंपित्रादिदेहंशूलेनतीक्ष्णकाष्ठरूपेणविध्वाविध्वादहन्नपियदिभवतितदातंदाहादिकर्त्तारंपुण्यकर्त्तारमेवलोकेवदंतीत्यन्वयव्यतिरेकाभ्यांप्राणएवपित्रादिशब्दाभिधेयइत्यर्थः ॥१०५॥ एवमिति बाह्यैश्चक्षुरादिभिराभ्यंतरैर्मनः

प्राणेसतियदाकश्चिद्देहान्प्राणभृतांक्षिपेत् ॥ वचसापिचतंतत्रप्राहुरेवंहिलौकिकाः ॥ १०३ ॥ वधस्त्वयाकृतोत्यस्यक्षेपंयस्यकरोषिभो ॥ अशस्त्रोयंवधोनामज्ञेयउत्तमदेहिनां ॥ १०४ ॥ निर्गतेतुपुनःप्राणेविध्वाविध्वादहन्नपि ॥ शूलेनामुंपुण्यकृतंप्रवदंत्यखिलाअपि ॥ पितृमात्रादिरूपोतःप्राणएवनचापरः ॥ १०५ ॥ एवंसर्वेंद्रियैर्जानन्बाह्यैराभ्यंतरैरपि ॥ अतिवादीपुमानेषभवत्येवनसंशयः ॥ प्राणमेषयतोब्रूतेसर्वातिशयरूपिणम् ॥ १०६ ॥ ब्रूयुस्तंकेचिदेवंहनातिवादीभवान्हिकिं॥ तथाप्येवंनसब्रूयाद्विद्वत्तापन्हवंसदा॥ १०७॥

प्रभृतिभिश्चव्यवहारकालेयएवंजानन्प्राणःसर्वकारकरूपइत्याकारकानुसंधानवान्भवतिसएषपुमानतिवादीबोध्यः यतःप्राणंसर्वेभ्योऽतिशयितंवदतीत्यर्थः अयंभावः लोकेपरंप्रतितवपिताहमितिवदन्किमतिक्रम्यवदसीत्युपालभ्यतेपरंतुसमुख्योतिवादीनभवती आचार्यादीनांततोधिकानांशिष्यमाणत्वात् पित्रादिसर्वात्मकप्राणरूपोस्मीतिदृढनिश्चयेनवक्तातुमुख्योतिवादीसर्वातिशयशालिनःप्राणस्यात्मत्वेनवदनादिति ॥ १०६ ॥ ब्रूयुरिति द्वितीयपादगतस्यनशब्दस्यतृतीयपादगतेनएवंशब्देनसंबंधः तथाचतंप्राणात्मविदंप्रतिहप्रसिद्धं चेद्यदिकेचिदेवंब्रूयुःपृच्छेयुः एवंकथं भवान्किमतिवादीभवतीति तथापिसप्राणात्मवित्नइत्येवमाकारंविद्वत्तायाअपन्हवंप्रच्छादकंवचोनब्रूयात्किंतुस्फुटमतिवादीभवामीत्येववदेदित्यर्थः ॥ १०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतावत्श्रुत्वानारदस्यतूष्णींभावंसहेतुकमाह एवमुक्तइतिद्वाभ्यां एवमुक्तोनारदस्तूष्णींभूयप्रश्नादुपरराम निवृत्तोऽभूत् यतःप्राणात्परंतत्त्वं प्रष्टुमक्षमः तत्रहेतुरज्ञातत्वं सामान्यतोज्ञातमेवहिपृच्छ्यते तत्रहेतुगर्भंप्रमेयविशेषणंमनोवाचामगम्यमिति मनसांवचसांबोधहेतूनामगोचरमितितदर्थः ननुलोकतःकथंतन्नविज्ञातमित्यतउक्तंलोकस्याप्रसिद्धेरिति लोकाख्यस्यप्रमाणांतरस्याप्रसिद्धेरितितदर्थः तदुक्तंशारीरके नहिलोकोनामप्रमाणांतरमिति प्रत्यक्षादीनिप्रमाणान्येवहिमनोवागन्यतरव्याप्यानिसमाहृत्यलोकइत्याख्यायंते तथाचमनोवाचामगोचरस्यकथंततःप्रसिद्धिरितिभावः अथनारदेनप्राणोपासनस्यफलमेवकुतोनपृष्टमित्याशंकांपरिहरति उपास्वेति यदिमहामुनेःप्राण

एवमुक्तोमनोवाचामगम्यंप्रष्टुमक्षमः ॥ अज्ञातत्वेनलोकस्याप्रसिद्धेरपिनारदः ॥ १०८ ॥ उपास्वेत्युक्तिशून्यत्वाद्दुरुक्तिःस्यात्फलस्यच ॥ तूष्णींभूयततःसोपिप्रश्नादुपररामह ॥ १०९ ॥ तूष्णींभूतंतुतंवीक्ष्यभगवान्कृपयान्वितः ॥ नारदंस्वयमेवाहप्राणादधिपरंहियत् ॥ ११० ॥ नारदप्राणविज्ञानान्मामंस्थाअतिवादितां ॥ एषएवातिवादीस्याद्योब्रूतेसततंपुमान् ॥ १११ ॥

मुपास्वेत्युक्तिःस्यात्तदातत्फलंकिमित्युक्तिःसदुक्तिःस्यादत्रतुवैपरीत्यात्फलंप्रतिफलमभिलक्ष्ययाउक्तिःप्रश्नरूपासादुरुक्तिःस्यान्निरालंबनत्वादित्यालोचयन्नितिशेषः ॥ १०८ ॥१०९॥ ततःकिंवृत्तमित्याकांक्षायामाह तूष्णींभूतमिति तंनारदंप्रतिकरुणाप्लुतचित्तोभगवान् स्वयमेवापृष्टोपिप्राणादधिअधिकंपरंनिरतिशयंयत्तत्त्वंतत्प्राहेत्यर्थः ॥ ११० ॥ कथमाहेत्याकांक्षांपूरयति नारदेति हेनारदप्राणविज्ञानादेवातिवादिताभवतीतिमामंस्थानमंतव्यंनावधारय ततोधिकस्याप्यवशेषात् किंतुएषएवातिवादीमुख्योज्ञेयोयःसततंसत्यंब्रूतेइत्युत्तरात्स्यपदानुषंगेणार्थः ॥ १११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रसत्यपदार्थोंब्रह्मरूपोजिज्ञासाप्रतीक्षयामनस्येवमुनिनानिहितइत्याह सत्यमुक्तमिति सत्यंसत्पदार्थंपरंब्रह्मवक्ष्यामीतिशेषः कीदृशं परंब्रह्म उक्तंपूर्वाध्यायेवर्णितंसुखात्मकभूमरूपेणवक्ष्यमाणंच तथायद्ब्रह्मनामादिप्राणपर्यंतविश्वरूपंकीर्तितं व्याख्यास्यमानायामात्मनःश्रुतावित्यर्थः इत्येवंविधाभिप्रायवान्महामुनिर्नारदंप्रत्येवमाह एवंकथं हेनारदत्वयासत्पदार्थभूतंवस्तुविजिज्ञास्यमधिकारिणामवश्यविचार्यमविचार्यकृतकृत्यतयानस्थेयंनस्थातव्यमिति अथएवंविधोक्तेरनंतरंनारदःपुनरेवपूर्वंयथापृष्टवांस्तथाआह सत्यंज्ञातुमिच्छामीत्याकारंप्रश्नमकरोदितिद्वयोरर्थः ॥ ११२ ॥ ११३ ॥ यथासत्यविषयाजिज्ञासानारदस्योत्थापितातथाविज्ञानमननश्रद्धानिष्ठाकृतिसुखेष्वपिषट्सुजिज्ञासोत्थापितेत्याह षड्वारमिति एवंयथासत्यजिज्ञासोत्थापकंवाक्यमुक्तंतथाविज्ञानादिषुषट्सुजिज्ञासाजनकंवाक्यं

सत्यमुक्तंपरंब्रह्मभूमानंसुखरूपकं॥ नामादिकंतथाप्राणपर्यंतंयद्धिकीर्तितं॥ ११२ ॥इत्यभिप्रायवान्प्राह नारदंपुनरेवसः॥ सत्यंत्वयाविजिज्ञास्यमविचार्यंनकिंचन॥ ११३॥ कृतकृत्यतयास्थेयंपुरेवाहाथनारदः॥ षड्वारमेवमाहैतंविज्ञानादिषुसप्रभुः॥ पृष्टवान्सोपितेनोक्तस्तंतमर्थंतदामुनिः॥ ११४॥ ज्ञातुमिच्छाम्यहं सत्यंयत्त्वयापरिकीर्तितं॥ सत्यवच्चाखिलंभूयोविज्ञानादिसपृष्टवान्॥ ११५॥ सत्यंगम्यमिहप्रोक्तंसर्वदासुखरूपकं॥ गमकास्तुपरेसर्वेविज्ञानाद्याःप्रकीर्तिताः॥ ११६॥ जानन्नेवचसर्वोयंसत्यंब्रूतेनचान्यथा॥ मननात्सर्वएवायंविजानातितथैवच॥ ११७॥

षड्वारमेतंनारदंप्रत्याहउक्तवान्प्रभुःसनत्कुमारः ततश्रुत्वानारदःषड्वारंप्रश्नमकरोदित्यर्थः ॥ ११४ ॥ सत्यगोचरप्रश्नंपूर्वंकृत्वाकृतानांषट्प्रश्नानांप्रकारंदर्शयति ज्ञातुमिति अहंसत्यपदार्थंज्ञातुमिच्छामीत्येवंसत्यंपृष्ट्वापुनर्विज्ञानादिपदार्थेषुप्रश्नंकृतवान्सनारदइत्यर्थः ॥ ११५ ॥ तत्रपौनरुक्त्यपरिहारायप्रश्नविषयाणांपरस्परंविशेषमाह सत्यंगम्यमिति प्रथमप्रश्नविषयीभूतंसत्यंगम्यमुपेयमेव परेद्वितीयादिषट्प्रश्नविषयाविज्ञानादयस्तुगमकाःपूर्वपूर्वप्राप्तिसाधनत्वेनैवकीर्तिताइतिविशेषान्नपुनरुक्तिरित्यर्थः अत्रेदमपरंध्येयं सुखस्यकाम्यमानतारूपेणकृतिप्रयोजकस्यसाधनत्वंसिद्धरूपस्यतुसत्यभावेनोपेयत्वमेवेति ॥ ११६ ॥ अथविज्ञानादीनांस्वरूपाणिपूर्वपूर्वप्राप्तिसाधनतांचदर्शयति जानन्नेवेतित्रिभिः योहिसत्यस्वरूपंजानन्नवधारयन्भवतिसएवसत्यंब्रह्मतत्त्वंस्फुटंवदतिनान्यइत्यतःसत्यवदनेविज्ञानंप्रत्यक्षप्रमारूपमेवहेतुरित्यर्थः सत्यविज्ञानस्यहेतुर्मननंप्रमेयासंभावनावारकयुक्त्यनुसंधानरूपमित्याह मननादिति ॥ ११७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मननस्यापिहेतुरुपदेशविश्वासरूपाश्रद्धैवतांविनाश्रुतवेदांतानामपिमननेप्रवृत्त्यदर्शनादित्याह श्रद्धावानेवेति श्रद्धायाअपिकारणंप्रमाणासंभावनावारकयुक्तिचिंतनरूपानिष्ठैवेत्याह तात्पर्येति तात्पर्यावधारणहेतवोयुक्तयस्तात्पर्ययुक्तयस्ताश्चित्तेमनसियस्यसतथाविध एवश्रद्धालुर्भवेदित्यर्थः ॥ ११८ ॥ तस्यानिष्ठायाहेतुःसाधनानांयज्ञादीनांबहिरंगाणांशमादीनामंतरंगाणांचानुष्ठानरूपाकृतिरेवेत्याह कर्त्तैवेति कर्मणांद्विविधसाधनानांयःकर्त्तासएवचित्तशुद्धैकाग्र्याभ्यांसंपन्नोवेदतात्पर्यावधारणेनसहितोभवेदित्यर्थः तस्याःकृतेरपिहेतुःसुखकामनैवेत्याह कर्तापीत्यादिना साधनानांकर्त्तापिसएवभवतियःसुखलक्षणंपुरुषार्थंकामयतेनान्यइत्यर्थः दुःखाभावस्तुनस्वतःपुरुषार्थःसुखाभिव्यक्तिसाधनत्वेनैवेष्यमाणत्वादितिभावः ॥ ११९ ॥ एतावत्श्रुत्वानारदःसुतरांविरक्तःसांसारिकंसुखंदुःखपक्षे

श्रद्धावानेवमनुतेनकदाचिद्धिनास्तिकः॥तात्पर्ययुक्तिचित्तःसन्श्रद्धावांस्तुभवेत्पुमान्॥ ११८ ॥ कर्त्तैवकर्मणांलोकेपुमांस्तात्पर्यसंयुतः॥भवेत्कर्त्तापिलोकेस्मिन्सुखार्थीनापरःपुमान्॥ ११९॥ विज्ञेयंचसुखंतद्वत्सर्वदाक्षेमवर्तिना॥ दुःखमेवात्रविज्ञेयंयत्सुखंसंस्तौभवेत्॥१२०॥ नहिवैषयिकंनामसुखंभवतिवस्तुतः॥ आदावंतेचयद्दुःखंमध्येतद्धिकुतःसुखं ॥ १२१ ॥ ततोत्रमोहमात्रेणसुखंवैषयिकंसुखं ॥ दुःखमेवव्रणेयद्वत्सुखंशस्त्रप्रजायते॥ १२२॥ एवमुक्तेसुखेपृष्टेसुखमाहमहामुनिः॥ देशतःकालतोयत्तुवस्तुतश्चकदाचन॥ परिच्छेदंनयात्येतत्सुखमुक्तंमनीषिभिः॥ १२३॥

निक्षिपन्मुख्येसुखपदार्थेजिज्ञासामावेदयति विक्षेपमितित्रिभिः क्षेमवर्तिनाक्षेमंसदास्त्वितिकामनांचेतसिवर्तयतासुखतत्त्वमवश्यंविज्ञेयं नचतस्यसंसारेसत्वंतस्यदुःखमयत्वादित्याह दुःखमेवेति ॥ १२० ॥ एतदेवस्फुटयति नहीत्यादिना यदिसांसारिकंसुखंस्यात्तर्हितद्वियोगादिकालेदुःखतांनगच्छेत् नहिस्वभावोभावानामन्यथात्वंप्रपद्यतेइतिन्यायविरोधादितिभावः॥ १२१॥ फलितमाह ततइति मोहोऽविद्यातन्मात्रेणप्रयुक्तंवैषयिकसुखस्यदुःखरूपस्यसुखत्वंयथादुःखरूपमपिशस्त्रप्रहरणंपरिपक्वेव्रणेप्रयुक्तंसुखवद्भासतेइत्यर्थः तथाचवास्तवंसुखंवक्तव्यमितिनारदाशयः ॥ १२२ ॥ एवमिति उक्तेकृतिहेतुतयासनत्कुमारेणवर्णितेसुखेनारदेनैवंपृष्टेसतिभगवान्सनत्कुमारःसुखलक्षणमुक्तवानितिप्रथमदलार्थः लक्षणमभिनयति देशतइति देशादिपरिच्छेदैर्हीनंवस्तुसुखमित्युक्तमित्यर्थः ॥ १२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवस्फुटयति निखिलैरिति यद्वस्तुसर्वपरिच्छेदहीनत्वेनहेतुनाभूमशब्देनोक्तंतद्रूपमेवसुखंनेतरत्यतोदुःखत्वेनरूपेणमानितंमानेनगोच
रीकृतमित्यर्थः ॥१२४॥ भूमानमिति हेतपोधननारदयदिसुखंनिर्णेतुमिच्छसितर्हिभूमपदार्थंजिज्ञासस्वेत्येवंमहामुनिनोक्तेसतिसनारदो
भूमपदार्थमेवपप्रच्छेत्यर्थः ॥ १२५ ॥ तस्मैपृच्छतेनारदायभूमलक्षणमुक्तवानित्याह उक्तवानिति ॥१२६॥ भवितृप्रधानोभूमशब्दःप
॥१०॥ रिपूर्णवदतीतिसूचयंस्तल्लक्षणमाह स्वात्मनइति यत्रतत्त्वेप्रादुर्भूतेस्थितःसन्विद्वान्स्वस्माद्भिन्नंकिंचिदपिचक्षुरादिभिर्नपश्यतिद्वितीयाभा

निखिलैर्यत्परिच्छेदैर्वर्जितंभूमशब्दितं ॥ सुखंतदेवविज्ञेयमितरद्दुःखमानितं॥१२४॥ भूमानंचसदैवत्वंवि
जानीहितपोधन॥इत्युक्तेपृष्टवान्सोपिभूमानंनारदोमुनिः॥१२५॥ उक्तवांश्चततस्तस्मैपरिच्छेदविवर्जितं॥
सनत्कुमारोभगवान्पृच्छतेनारदायहि ॥ १२६ ॥ स्वात्मनोव्यतिरिक्तंहियत्रनान्यत्प्रपद्यते ॥ इंद्रियैरांतरैर्बा
ह्यैःसभूमासुखरूपभाक्॥१२७॥ आत्मनोव्यतिरिक्तंतुयत्रकिंचित्प्रपद्यते॥ बाह्येंद्रियैश्चमनसातदल्पंदुःख
मीरितम् ॥ १२८ ॥ मरणादिविहीनोयंभूमोक्तसुखरूपभाक्॥ मरणादिसमाक्रांतमल्पमुक्तंमनीषिभिः
॥१२९॥ अयंभूमायदाज्ञातोत्यतिवादीतदापुमान्॥ भवेन्नचान्यथातस्माज्ज्ञातव्यःसर्वदानृभिः ॥ अति
वादीपुमान्लोकेभवेन्नान्यःकथंचन॥ १३० ॥

वात्तत्त्वंभूमपदार्थःसुखशब्दार्थश्चेत्यर्थः ॥ १२७ ॥ एतदेवव्यतिरेकमुखेनाह आत्मनइति यत्रपदार्थेबुद्ध्यारूढेसतिस्वात्मनोव्यतिरि
क्तंकिंचिदपिभातितदल्पंदुःखरूपमित्यर्थः द्वितीयाद्वैभयंभवतीतिश्रुत्यंतरादितिभावः ॥ १२८ ॥ तत्रयद्भूमाख्यंतत्त्वंतन्मरणोपलक्षित
सर्वविकारहीनमितरदल्पंतुविकारास्पदमित्याह मरणादीति समाक्रांतमास्पदीकृतम् ॥ १२९ ॥ अस्यभूम्नोनिरतिशयत्वादेतदात्मदर्श्येव
मुख्योतिवादीनेतरःप्राणाद्यात्मदर्शीप्राणादीनामतिशयस्यसापेक्षत्वादित्याह अयंभूमेति तस्मादतिवादित्वहेतोः अयमवश्यंज्ञातव्यः ॥१०॥
॥ १३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यभूम्नःस्वाधारत्वेपरिच्छेदापत्त्यास्वरूपहानिर्निराधारत्वेतुकथंबुद्ध्युपारोहइतिचिंताव्याकुलस्यनारदस्यभूमाधारगोचरंप्रश्नंदर्शयति इत्युक्तइति इतिपूर्वोक्तप्रकारेणउक्तउपदिष्टःसनारदोभूम्नआधारंसनत्कुमारंप्रतिइत्थंपृष्टवान् इत्थंकथं हेभगवन्सभूमाकस्मिन्नाधारेप्र तिष्ठितःस्थितिंप्राप्तइतितेननारदेनउक्तइत्थंपृष्टःसनत्कुमारस्तुकिंव्यवहारमात्रोपयोगीतस्याधारःपृच्छ्यतेवास्तवोवाइतिविकल्प्यतत्राद्ये मायादिसकलप्रपंचरूपातद्विभूतिरेवमहिमपदोक्तातस्याधारइत्याशयेनस्वेमहिम्नीत्युत्तरंददावित्यर्थः॥१३१॥ नचतस्यस्वरूपहानिर्महि म्नस्ततोभेदाभावादित्याह महिमेति विभिन्नइत्यस्यैवविवरणंपृथगिति लोकेयथादेवदत्तस्यविभूतिर्गवाश्वक्षेत्रादिरूपादेवदत्तात्पृथग्भूता प्रसिद्धातदाश्रितश्चदेवदत्तउच्यतेतथात्रनमंतव्यंयतोऽयंभूमसंबंधीमहिमाततोभूम्नःसकाशाद्भिन्नोनभवतीत्यर्थः॥१३२॥ कथंतर्ह्यभेदेआ धाराधेयव्यवहारइत्याशंक्यस्वयंदासास्तपस्विनइत्यादिवद्विकल्पवशात्तदुपपत्तिरित्याशयेनाह किंत्विति सुखरूपिणोभूम्नोयःसर्वपरि

इत्युक्तोनारदोभूम्नआधारंपृष्टवान्पुनः॥ सनत्कुमारमित्थंसकस्मिन्नेषप्रतिष्ठितः॥भगवन्नितितेनोक्तःस्वेमहि म्नीतिसोऽब्रवीत्॥१३१॥ महिमालोकवन्नायंविभिन्नोस्तिततःपृथक्॥ गवाश्वादिर्यथालोकेदेवदत्तात्पृथक्स्मृ तः॥१३२॥किंतुस्वात्मैवमहिमास्वात्मनःसुखरूपिणः॥भूम्नःसर्वपरिच्छेदरहितस्तत्रसस्मृतः॥१३३॥ नान्य त्रस्वस्वरूपात्सभूमोक्ताद्युपतिष्ठते॥ स्वप्रतिष्ठस्ततःसोयंप्रतिष्ठारहितःस्मृतः॥१३४॥ दशदिक्षुसएवायंभूमा तिष्ठतिसर्वदा॥ तत्पदार्थोत्रतत्रैतद्विश्वंसदसदात्मकम्॥१३५॥अध्यस्तंदेशकालादिसर्वभेदविवर्जिते॥गंध र्वनगरंयद्वद्गगनेत्यंतनिर्मले॥ अतएवजगत्सर्वंसएवपरिगीयते॥१३६॥ च्छेदरहितःस्वात्मास्वरूपंसएवस्वात्मसंबं धीमहिमाभवतितत्रस्वरूपभूतेमहिम्निभूमाप्रतिष्ठितत्वेनस्मृतोविकल्पदृष्ट्येतिशेषः॥१३३॥वास्तवस्तदाधारस्तुनास्तीत्याह नान्यत्रेति स्व स्वरूपादुक्ताद्वर्णितादन्यत्रवस्तुतोभिन्नेआधारेयतोभूमानावतिष्ठतेततःसभूमा विकल्पांगीकारेणस्वप्रतिष्ठोवाच्यः विकल्पपरित्यागेनप्रति ष्ठयाआधारेणरहितोवावाच्यइत्यर्थः॥ १३४॥ कथंनिराधारस्यबुद्ध्युपारोहइत्याकांक्षांशमयन्सएवेत्यादिवाक्यस्यप्रथमंतत्पदार्थरूपे णभूम्नोबोधादेशकस्यार्थमाह दशदिक्ष्विति पूर्वादयश्चतस्रःकोणैर्युक्ताःसहाधरोर्ध्वाभ्यां दशसंमितादिशस्तुइत्युक्तासुदशदिक्षुयावत्कि चित्कालत्रयेस्थितंतत्सर्वरूपेणभूमैवतिष्ठतीत्यर्थकेत्रसएवाधस्तादित्यादिकेवाक्येतत्पदार्थउक्तइतिशेषः यतस्तत्पदार्थभूतेभूम्निसमस्तंजग त्गगनेगंधर्वनगरवत्कल्पितमितिद्वयोरर्थः तथाचसर्वाधिष्ठानतानुसंधानेनप्रथमंभूमाबुद्धावारोहणीयइतिभावः॥ १३५ ॥ १३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्ताटस्थ्यवारणायाहंपदोक्तत्वंपदार्थरूपेणभूमातथासर्वदिग्गतत्वेनानुसंधेयइत्याह अयमिति अयंसर्वगतोभूमाअहमस्मीत्येवंज्ञात
व्यः नन्वहंशब्दस्यपरिच्छिन्नाहंकारविशिष्टवाचकस्यकथंभूम्निप्रयोगइतिचेत्साधर्म्यमूलकयागौणलक्षणयेत्याह अहंशब्दादिति यद्य
प्यहमितिशब्दादहंकारःप्रतीयतेतथापिवाच्यार्थस्याहंकारस्ययत्सदृशत्वंवक्ष्यमाणरूपंतेननिमित्तेनभूमानमेषोहंशब्दःसंलक्षयेत्लक्षण
यावोधयेदित्यर्थः ॥ १३७॥ अहंकारात्मनोःसादृश्यमेवाभिनयति सर्वदिक्ष्विति सर्वदिग्गताःसार्वकालिकाश्चजीवादेहाभिव्यक्तौप्र
थममहमित्येवानुभवंतःसंतोवदंतिअभिवदनादिव्यवहारंकुर्वंति ततःसर्वजीवव्यवहाराणांनिदानत्वादहंकारोयथादिग्जातंभूतजातंचव्या

अयंभूमाहमस्मीतिज्ञातव्योमुक्तिमिच्छता ॥ अहंशब्दादहंकारोयद्यप्येषप्रतीयते ॥ तथापिलक्षयेदेषआ
त्मानंसदृशत्वतः ॥ १३७॥ सर्वदिक्षुस्थिताजीवायेभूतायेचभाविनः ॥ वर्त्ततेयेचतेसर्वेप्यहमेववदंतिहि
॥ १३८ ॥ अहंकारस्ततोयद्वज्जीवात्मैषव्यवस्थितः ॥ दिग्जातंभूतजातंचतद्व्याप्यवस्थितः॥१३९॥ अहं
शब्देनजीवात्मासर्वोपाधिविवर्जितः॥ लक्ष्यतेसर्वदायोयंभूम्नातादात्म्यमाव्रजेत्॥ १४० ॥ आत्माहंभूमरू
पोस्मीत्येवंयःप्रतिपद्यते॥ मनसापिधियासर्वकरणैर्मनुजत्ववत्॥ १४१ ॥

प्यस्थितस्तथातदाश्रयत्वेनजीवात्मापिदिग्जातादिकंव्याप्यस्थितोज्ञायतेइतिद्वयोरर्थः ॥ १३८॥ १३९ ॥ एवंविधाहंकारस्यचिच्छाया
व्याप्तस्यवाचकोहंशब्दऐक्यलक्षणवाक्यार्थनिर्वाहायसर्वांतरत्वलक्षणंजीवस्यशुद्धंस्वरूपमात्मशब्दप्रतिपाद्यंलक्षयतीत्याह अहंशब्देने
ति जीवात्माजीवस्यविशिष्टरूपस्यात्माशुद्धंरूपंयस्यभूम्नासहतादात्म्यमैक्यंमहावाक्येनप्रापणीयंतस्याहंशब्दोलक्षकइत्यर्थः ॥१४०॥
आत्मादेशादिवाक्येनमहावाक्यार्थानुभवोऽभिनीयतेइतिदर्शयंस्तद्वतोजीवन्मुक्तिवोधकानामात्मरत्यादिपदानामर्थमाह आत्माहमिति
यथामनोवुद्धींद्रियैर्व्यवहरंतोऽज्ञाःस्वस्यमनुजत्वंमनुष्यत्वंप्रतिपद्यंतेसंदेहविपर्ययपरिहारेणसदानुभवंतिएवंयोहंकाराद्युपाधीन्विस्मृत्या
त्मनोभूम्नासहैक्यंप्रतिपद्यतेसआत्मन्येवरत्यादिशालीभवतीत्युत्तरेणाभिसंबंधः ॥ १४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवन्मुक्तस्यव्यवहारशास्त्रचिंतनभेदेनद्विविधायांव्युत्थानदशायांयदात्मचिंतनंतद्रतिक्रीडापदाभ्यांगौण्यावृत्त्यानिदर्शितमित्याशयेनाह आत्मन्येवेति सविद्वान्अध्यात्मशास्त्रचिंतनकालेआत्मन्येवक्रीडन्बाह्यसाधनोपचितंविहारसुखमिव प्राप्तोभवतियथाबालकगोष्ठ्यां बालकइत्यर्थः स्नानभोजनादिकालेप्यत्रात्मन्येवरतिंचेतसःसक्तिंधारयन्भवति यथावाकामीविदेशादिगतोपिकांतायांमानसव्यापारंवहतितद्वदित्यर्थः ॥ १४२ ॥ सविकल्पनिर्विकल्पभेदेनद्विविधेसमाधौतुयदात्मचिंतनंतन्मिथुनानंदपदाभ्यांनिदर्श्यतेइत्याशयेनाह स्त्रीपुंसयोरिति यथासर्वव्यवहारंपरित्यज्यावस्थितयोःस्त्रीपुंसयोर्मिथुनत्वंमिथुनीभावःपरस्परंविषयानंदहेतुत्वेनप्रसिद्धस्तथाध्यातृध्येयभावेन मिथुनत्वमात्मन्येवास्यसविकल्पकसमाधिकालेआनंदहेतुर्भवतीत्यर्थः यथाचगांधर्वादिविषयप्राप्त्यनंतरंतत्फलस्यानंदस्यानुभवोनिर्वि

आत्मन्येवचसक्रीडन्बालकेष्विवबालकः ॥ अत्रैवरतिमागच्छन्युवत्यामिवकामुकः ॥ १४२ ॥ स्त्रीपुंसयोर्हिमिथुनंभवेत्तदितरेतरम् ॥ विषयानंदहेतुर्यस्तद्वदात्मनिसर्वदा ॥ मिथुनत्वंतथानंदोविषयप्राप्तिसंभवः ॥ १४३ ॥ अवगच्छन्हिनिर्द्वैतंसर्वदुःखविवर्जितः ॥ स्वराट्परानपेक्षःसन्विराडिवभवेद्दिसः ॥ तस्यसर्वेषुलोकेषुकामचारश्चसर्वदा ॥ १४४ ॥ एवंयेनविदुर्मंदाभूमात्मानंविमोहिताः ॥ पराधीनाःक्षीणलोकाःस्वेच्छाचारविवर्जिताः ॥ जायंतेचम्रियंतेचसततंदुःखजीविनः ॥ १४५ ॥

कल्पकःप्रसिद्धःपरीक्षकाणां तद्वदस्यविदुषोनिर्विकल्पकसमाधिकालेनिरतिशयानंदानुभवआत्मन्येवभवतीत्यर्थः ॥ १४३ ॥ तत्रहेतुभूतं परानपेक्षत्वंस्वराट्पदेननिरूप्यतेइतिदर्शयन्स्वराट्पदार्थमाह अवगच्छन्निति हियतोनिर्द्वैतंस्वरूपमवगच्छन्साक्षादनुभवन्जीवन्मुक्तः सर्वदुःखराहित्येपरानपेक्षःसन्विराट्समष्ट्यभिमानीश्वरस्तद्वत्स्वराट्स्वेनैवराजनशीलोभवतितथातस्यविदुषःसर्वात्मत्वेनसर्वेषुलोकेषुसत्कर्मफलेषुकामचारःअप्रतिबन्धेनप्राप्तिरूपोभवतीत्यर्थः ॥ १४४ ॥ उक्तविज्ञानहीनानामनर्थंततिमाह एवमिति येउक्तविधयाभूम्नआत्मानंदस्वरूपमद्वैतलक्षणंनविदुःकिंतुभेदमेवविदुर्जानंतिविमोहवशात्तेपराधीनाःस्वभिन्नत्वेनकल्पितानांराजादिरूपप्रभूणांवशेस्थिताःक्षीणाअंतवंतोलोकायेषांतेतथाविधाःस्वातंत्र्यहीनाश्चपुनःपुनर्जननमरणादिकंप्राप्नुवंतीति ॥ १४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तात्मविदस्तुईश्वरभावेनविश्वोपादानत्वमपिभवतीत्याकारमात्मनःप्राणइत्यादिवाक्यस्यार्थमाह एवंविजानतइति भूमात्मानंसाक्षादनुभवतःपुंसआत्मनःस्वरूपान्नामादीनिप्राणांतानिपंचदशतत्त्वानिस्त्रक्सर्पन्यायेनजायंतेइति ॥ १४६ ॥ एतेनशास्त्रयोनित्वंपरिशिष्टविश्वयोनित्वंचभवतीतिसूचितमितिदर्शयन्नाह मंत्रेति सकर्मकाःकर्मभिर्यागादिभिस्तत्प्राप्यैःफलैश्चसहिताः स्फुटमन्यत् ॥१४७॥ उक्तविद्याफलप्रदर्शकःश्लोकोपिबोध्यइत्याह अथात्मनइति विज्ञानेतत्फले श्लोकंमंत्रं ॥ १४८ ॥ तंपठति पश्यइति ॥ १४९ ॥ अस्यार्थमाह पश्योजीवइतिषड्भिः दृशधातोःशप्रत्ययेपश्यादेशेचसतिनिष्पन्नंपश्यपदंजीवात्मनोवाचकं तस्यसकलसंसारस्यमोक्षस्यचद्रष्टृत्वादि

एवंविजानतःपुंसआत्मनोभूमरूपिणः॥ नामादिप्राणपर्यंतंजायतेस्त्रजिसर्पवत्॥ १४६ ॥ मंत्रब्राह्मणरूपायेवेदास्तेपिसकर्मकाः॥ जायंतेकिंबहूक्तेनविश्वंसदसदात्मकं॥जायतेसकलंयद्वद्गंधर्वनगरंहिखात्॥ १४७॥ अथात्मनोत्रविज्ञानेश्लोकमेतंपठंतिहि॥ वैदिकाःसर्वदुःखानामभावेसर्वदेहिनां ॥ १४८ ॥ पश्योमृत्युंनपश्यतिनरोगंनोतदुःखतां ॥ सर्वंहिपश्यःपश्यतिसर्वमाप्नोतिसर्वगः ॥ १४९ ॥ पश्योजीवइतिप्रोक्तःसपश्येत्सर्वमेवयत्॥ शुभाशुभंचसंसारमोक्षंचस्वचितेर्बलात् ॥ १५० ॥ मृत्युर्मरणमित्युक्तंधर्मजातंशरीरगम्॥ जन्मादिकंहिकालेनजातंयद्व्याधिवर्जितं ॥ १५१ ॥ रोगोरसविपाकस्यवैषम्याद्यःप्रजायते ॥ अवस्थानमपेक्ष्यैवंसउक्तःपंडितैःसदा॥ १५२॥

त्यर्थः ॥ १५० ॥ मृत्युपदेनचमरणोपलक्षिताजन्मादयःशरीरधर्माउक्ताःपरंतुव्याधिःशरीरधर्मोप्यनेननोपलक्ष्यतेतद्वाचकस्यरोगपदस्यपृथक्सत्वादित्याह मृत्युरिति ॥१५१॥ रोगपदार्थमाह रोगइति रसआहारपरिणामस्तस्ययद्विपाकेपचनेऔदर्याग्निनाक्रियमाणेवैषम्यंतारतम्येनसंबंधस्तस्मान्निमित्ताद्योजायतेज्वरादिःसरोगपदेनोक्तः अस्यमृत्युपदेनासंग्रहेहेत्वंतरमाह अवस्थानमिति चिरावस्थानरूपंविशेषमपेक्ष्याभिप्रेत्यसरोगोमृत्युपदभिन्नपदोपन्यासेनोक्तइत्यर्थः जन्मादयस्तुनचिरस्थायिनइतिमृत्युपदेनाचिरस्थायिबोधकेनतएवसदशालक्षितुंशक्याइतिभावः ॥ १५२ ॥ ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःखपदार्थमाह दुःखमिति चतुर्विधदेहानामाधाराधेयभावसंबंधेनसंबंधिन्यामत्रनानाविशेषशालिन्यांबुद्धौप्रतिबिंबितत्वेनविभेदिनां विविधभेदवतांजीवानांयोनानाजन्मादिधर्मवतादेहेनसंबंधोऽहंममाध्यासरूपःसएवदुःखमित्यर्थः॥ १५३॥एवमुपनिषत्पूर्वार्द्धगतपदार्था उक्ताअथतेषामदर्शनेहेतुरध्यस्ततावगाहनरूपंसर्वदर्शनमित्याकारकंतृतीयपादार्थमाह सर्वमिति सर्वंद्वैतजातंसदसद्वपुरनिर्वचनीयमात्म न्यध्यस्तंकल्पितमेव तस्यचतावदेवस्थितिर्यावदध्यस्ततानवगाहनेनापरिपूर्णविज्ञानंजायेतभवेत् यदात्वध्यस्ततामप्यवगाहमानंपरिपूर्णं विज्ञानंभवेत्तदातस्याध्यस्तस्यपुनर्विलोकनंनस्यादित्यर्थः तथाचहियतःसर्वमध्यस्ततापर्यंतंपश्यतिविद्वांस्ततोमरणादिकंनपश्यतीतियु क्तमितितृतीयपादांतवाक्यार्थः ॥१५४॥ तुर्यपादोक्तांसर्वप्राप्तिमुपपादयति प्राप्तिश्चेति ज्ञानादनंतरमात्मनःसकाशाद्यत्तदनन्यत्वंतस्यदृ

दुःखंदेहेनसंबंधोनानाधर्मवतासदा॥ चतुर्विधानांभूतानांबुद्धावत्रविभेदिनाम् ॥ १५३ ॥ सर्वमात्मनिसं प्रोक्तमध्यस्तंसदसद्वपुः ॥ अध्यस्तत्वेनविज्ञानंतस्यनस्याद्विलोकनं ॥ १५४ ॥ प्राप्तिश्चस्वात्मनोज्ञानात्तदन न्यत्वमीरिता ॥ वेदार्थःसकलोप्यऽस्मिन्लोकेवेदसमीरिते ॥ अस्तियस्मादतस्तस्यविज्ञानात्सर्वविद्भवेत् ॥ १५५॥ आत्मविज्ञानसंपन्नःस्वात्मनोमाययासदा ॥ नानारूपोपिचैकात्माभवेद्भूमस्वरूपतः ॥ १५६ ॥ आत्मामायाचतत्कार्यमितिसोपित्रिधाभवेत्॥ भूतपंचकरूपेणपंचधाचमहेश्वरः ॥ १५७॥

श्यजातस्यान्यत्वाभावःकल्पितभेदबाधइतियावत् तद्रूपैवसर्वप्राप्तिरुक्तेत्यर्थः एतदेवस्फुटयति वेदार्थइति अस्मिन्भूमात्मरूपेलोकेअयमा त्माअयंलोकइतिश्रुत्यंतरप्रसिद्धेवेदसमीरितेवेदस्यमहातात्पर्यगोचरेसकलोयागलोकादिविशेषशालीवेदार्थोस्तिअंतर्भवतियतःतस्मात्त स्यात्मरूपलोकस्यविज्ञानात्सर्ववित्सर्वस्यलब्धाभवतीतिसंभवतीत्यर्थः ॥१५५॥ विदुषएकधाभावादिकंश्रुत्युक्तंविशदयति आत्मविज्ञा नेतिचतुर्भिः आत्मनोयाथात्म्यस्यवेत्तास्वकीयमाययानानारूपोभवेत् भूमस्वरूपेणत्वेकरूपइत्यर्थः ॥ १५६ ॥ आत्मामायेति तत्रक थंत्रित्वमितिजिज्ञासाआत्माचमायाचतत्कार्यंचेत्येतद्रूपत्रयमादायपूरणीया पंचभावाकांक्षातुपंचभूतपंचेंद्रियादिरूपमादायेत्यर्थः एव मग्रेपि ॥ १५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तेति लोकादीत्यादिपदेनकुलाचलादिग्रहः ग्रहाआदित्यादयः आदिपदेनांकनंदादिग्रहः ॥ १५८ ॥ इंद्रियेति आदिपदेनरुद्रादिग्र
हः एकादशेंद्रियाणांप्रत्येकंदशदशवृत्तिभेदमादायदशाधिकशतरूपोभवेत् तथातेषामेकादशरूपाणांसदासर्वस्मिन्कालेऽहोरात्ररूपेयो
भेदःप्रतिश्वासंपृथक्त्वंतमादायहंसस्यश्वासरूपस्ययावंतोयत्संख्याकाःप्रचाराःप्रवृत्तयस्तावद्भेदःकिंचिदधिकैकविंशतिसहस्ररूपइतिया
वत् स्फुटितमेतदेकादशाध्यायेहंसोपनिषद्व्याख्याने ॥ १५९ ॥ १६० ॥ उक्तात्मज्ञानसाधनतयाऽऽहारशुद्ध्यादिकंविदधाति इदमि
त्यादिना येसततंपुण्यात्मानःसदाबहिःपुण्यकर्मानुष्ठानपराअपिपापचेतसोमनसिपापास्तेषामपीदंज्ञानंदुर्लभंकिमुतबहिरपिपापपराणा

सप्तलोकादिरूपेणसप्तधाचसदाविभुः॥ग्रहादिरूपतस्तद्वन्नवधापिमहेश्वरः॥१५८॥ इंद्रियादिस्वरूपेणभवे
देकादशात्मकः॥एकादशेंद्रियाणांस्याद्वृत्तिभेदात्शतंपुनः ॥ १५९॥ दशाधिकंसदाभेदात्तेषामेकादशात्म
नां॥हंसप्रचारायावंतस्तावद्भेदश्चसंस्मृतः ॥ १६०॥ इदंसर्वात्मविज्ञानंदुर्लभंपापचेतसां ॥ पुण्यात्मनांच
सततंजन्मकोटिशतैरपि॥ १६१ ॥ आहारोयस्यशुद्धःस्यात्सर्वदाविषयग्रहः॥ स्ववर्णाश्रमसंप्रोक्तोभावयो
गात्कथंचन॥ सपुमान्पापरहितःशुद्धचेताःप्रकीर्तितः॥१६२॥ बीजेयोनौतथाऽऽहारेव्यवहारेचयःशुचिः॥
तस्यकष्टगतस्यापिनपापेरमतेमतिः॥ १६३॥ अपापमतिरव्यग्रमानसोनिर्मलाशयः॥ गुरूपदिष्टमात्मानं
भूमानंससमेतितं॥ १६४॥

मित्यर्थः ॥ १६१ ॥ कथंतर्हिचित्तशुद्धिरित्याकांक्षायामाह आहारइति स्ववर्णाश्रमानुसारेणप्राप्तानांविषयाणांग्रहणरूपआहा
रोभावस्यसाम्यावगाहनेनरागाद्यनास्कंदितस्यधीपरिणामस्ययोगेनसंतानेनयस्यपुंसःशुद्धोनिष्पापःस्यात्तस्यैवचित्तशुद्धिर्बोध्येत्यर्थः
॥ १६२ ॥ एतेनवृद्धकुमारीवरन्यायेनबीजशुद्ध्यादिकमाक्षिप्तमितिदर्शयन्नाह बीजइति बीजेपितृकुलेयोनौमातृवंशेआहारेविषयग्र
हेव्यवहारेदानादानादिरूपेएतेषुयःशुद्धश्छद्मरहितस्तस्यविपत्संततिंगतस्याऽपिपापकर्मणिरुचिर्नभवतीत्यर्थः ॥ १६३ ॥ तस्यशुद्ध
चित्तस्यभिल्लुपालितराजपुत्रन्यायेनगुरूपदेशादात्मस्मृतिर्भवतीत्याह अपापमतिरिति निर्मलाशयःपुमान्पापरूपप्रतिबंधाभावेनैकाग्र
मनाःसन्गुरूपदेशेनभूमरूपमात्मानंसमेतिसम्यक्स्मरतीत्यर्थः ॥ १६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदैनामिति यदाचएनांभूमात्मगोचरांस्मृतिलभतेतदाचिज्जडयोरध्यासरूपमेलनेनसिद्धत्वाद्ग्रंथिशब्देनोक्तान्कामादींश्छिनत्तितज्ज्ञाना सिनाइतिशेषः ॥ १६५ ॥ नारदस्यसर्वाधिकारिविशेषणसंपन्नत्वमाह आहारशुद्धीतित्रिभिः स्पष्टम् ॥ १६६ ॥ मृदितकषायपदार्थं वक्तुंकषायपदार्थमाह हरीतक्यादीति कषायरसवान्हरीतक्यादीनांद्रवोवस्त्रादौदृढरागप्रयोजकःकषायपदस्यमुख्योर्थः कषायोरस भेदेस्यादंगरागेविलेपनेइतिकोशात् तद्वच्चित्तरंजकत्वात्कामादयोपिगौण्यातेनोच्यंते तस्यकामादिरूपकषायस्यमर्दनेअपहरणेक्षारा दिवद्धेतवस्तुब्रह्मचर्यादयःशास्त्रोक्ताःप्रसिद्धास्तैर्ब्रह्मचर्यादिभिःसंपन्नोनारदस्तुमृदितकषायोऽभवत्संसाराद्भृशमुद्विग्नत्वादितिद्वयोरर्थः

यदैनांस्मृतिमाप्नोतिपुमान्कश्चिद्धिभाग्यतः ॥ कामक्रोधादिकान्ग्रंथींश्छिंद्यात्तत्क्षणतस्तदा ॥ १६५ ॥ आहारशुद्धिमान्सस्यान्नारदोमुनिसत्तमः ॥ शुद्धचेतास्ततःकामक्रोधादिपरिवर्जितः ॥ १६६ ॥ हरीतक्यादिसंजातोरसउक्तोमनीषिभिः ॥ कषायोयस्यसंपर्काद्वस्त्रंवर्णांतरंव्रजेत् ॥ यथातथात्रचित्तस्यकामादिःकथितोबुधैः ॥ १६७ ॥ तस्यास्यमर्दनंप्रोक्तंब्रह्मचर्यादिसाधनं ॥ नारदस्तैस्तुसंपन्नउद्विग्नोभवसागरात् ॥ १६८ तादृशायपरंपारंतमसोदुःखवद्विषे ॥ व्यदर्शयद्यतःशोकंनपुनर्यातिमानवः ॥ १६९ ॥ सनत्कुमारोभगवान् स्कंदोयोन्यत्रजन्मनि ॥ एवंकिलवदंत्यत्रकथांब्राह्मणसत्तमाः ॥ १७० ॥ कदाचिन्मुनयःसर्वेवाराणस्यांसमागताः ॥ गंगातटेमहाभागाःकृत्वापौर्वाह्णिकीःक्रियाः ॥ आसीनाब्रह्मपरमंचिंतयंतःस्वबुद्धिभिः ॥ १७१ ॥ अस्मिन्नवसरेदेवोदेव्यासहमहेश्वरः ॥ वीक्ष्यमाणोहृदंभोजेआनंदात्मास्वयंप्रभुः ॥ कृपयामासनेत्राणांदर्शनेभूज्जगत्पतिः ॥ १७२ ॥

॥ १६७ ॥ १६८ ॥ तादृशायेति तादृशायाहारशुद्ध्यादिगुणविशिष्टायनारदायतमसोमूलाज्ञानस्यपरंपारंभूमलक्षणंसनत्कुमारोव्यदर्शयत् यथाद्विषेशत्रवेदुःखंप्रदर्श्यतेतद्वदिति यःसनत्कुमारःस्कंदाख्यस्वामिकार्तिकेयरूपेणावतीर्णः अत्रार्थेएवंवक्ष्यमाणविधांकथांब्राह्मणसत्तमाइतिहासविदआहुरितिद्वयोरर्थः ॥ १६९ ॥ १७० ॥ तांकथांनिबध्नाति कदाचिदित्यादिना गंगातटेआसीनाअभूवन् ॥ १७१ ॥ अस्मिन्निति हृदंभोजेवीक्ष्यमाणोध्यानेनसाक्षात्क्रियमाणःप्रभुर्मांसमयनेत्राणांदर्शनेदृष्टिगोचरेअभूदतिष्ठदित्यर्थः ॥ १७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वेति तंदृष्ट्वासर्वेंआसनेभ्यउत्तस्थुःसमाधिनिष्ठंसनत्कुमारंविनेतिद्वयोरर्थः ॥ १७३ ॥ १७४ ॥ उत्थितामुनयइति तेमुनयोवेदपाठादिभिस्तथास्वकृतैःपरकृतैश्चस्तोत्रैर्भगवंतंप्रसाद्यस्थिताः ॥ १७५ ॥ व्यवस्थितेष्विति स्फुटं ॥ १७६ ॥ इतस्ततइति अथजाययासहगंतुकामोभगवांस्तान्मुनीन्सहितान्समुदितान्वीक्षयामास स्वार्थेणिच् अपश्यदित्यर्थः ॥ १७७ ॥ सनदिति कीदृशोभगवान्स्वयंपुरुषरूपेण सनत्कुमारस्थितौहर्षितोपिस्त्रीयवामभागरूपेणविपरीतइतिशेषः यतःसाप्रसिद्धाभवानीएवंविचार्यस्त्रीस्वभावेनपरंकोपमागता ॥ १७८ ॥

दृष्ट्वातंमुनयःसर्वेंसमुत्तस्थुःसमंततः ॥ आसनेभ्योऽतिसंहृष्टादेहाःप्राणागमेयथा ॥ १७३ ॥ सनत्कुमारमेकंतं परिहायात्मवेदिनं ॥ एकमेवायमात्मानंबहिरंतश्चपश्यति ॥ सर्वदैवविशेषेणसमाधिस्थस्तदाहिसः ॥ १७४ ॥ उत्थितामुनयःसर्वेनत्वास्तुत्वाचतंविभुं ॥ वेदपाठादिभिःस्तोत्रैःस्वैःपरैश्चकृतैर्मुहुः ॥ भवानीसहितंदेवंप्रसाद्यचव्यवस्थिताः ॥ १७५ ॥ व्यवस्थितेषुतेष्वेवंपरमात्मात्रिलोचनः ॥ भवानीसहितस्तेषांवरमिष्टमदाद्विभुः ॥ १७६ ॥ इतस्ततोविलोक्याथगंतुकामःसजायया ॥ सहितान्वीक्षयामासमुनीन्सर्वान्महेश्वरः ॥ १७७ ॥ सनत्कुमारमासीनंदृष्ट्वाहर्षमुपागतः ॥ स्वयंनैवभवानीसापरंकोपमुपागता ॥ एवंविचार्यमनसास्त्रीस्वभावमुपागता ॥ १७८ ॥ अयंपुराणपुरुषोयोगिनांहृदयेस्थितः ॥ अष्टांगयोगयुक्तेनपुंसाध्येयःसदैवहि ॥ १७९ ॥ अयंसमस्तविद्यानांकथितःपरमोगुरुः ॥ ब्रह्माविष्णुस्तथाशक्रोलोकपालास्तथापरे ॥ किंकराअस्यदेवस्यगर्भदासायथाभुवि ॥ १८० ॥ अयंसमस्ततत्त्वानांजनकःपालकस्तथा ॥ संहर्तापंचभूतानांस्थिरजंगमरूपिणां ॥ १८१ ॥

एवंकथमित्याकांक्षायांभवानीविचारमभिनयति अयमितिषड्भिः अयंभगवान्पुराणोऽनादिःपुरुषः ॥ १७९ ॥ अयंसमस्तेति कथितःमहोपनिषदादौ सर्वभेदप्रयोजिकायामायायाःसत्ताभानादिदानेनअनेनप्रभुणावशीकारलक्षणंक्रयंनीतत्वेसतितत्प्रयुक्ताब्रह्मादिदेवभेदाअस्यगर्भदासतामापन्नाः दास्यांक्रीयमाणायांतद्गर्भस्थितत्वंगर्भदासत्वमितिव्युत्पत्तिसमन्वयादितिभावः ॥ १८० ॥ अयंसमस्ततत्त्वानामिति तत्त्वानांमहदादीनांजननादिकर्त्ता स्थावरादिरूपाणांभूतानांचायंतथेत्यर्थः ॥ १८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानेनेति गुणैरनेनतुल्यइतोधिकोवाकोपिनास्ति ब्रह्मचर्यत्वस्यैवमदनदमनादेर्मुख्यमित्यर्थः ॥१८२॥ मयेति एवंसत्यपियतएषसनत्कुमारोब्रह्मचारीप्रभुंमत्त्वांनिध्यमात्रेणस्त्रैणंमत्वानोत्तस्थौततःशापार्हइत्यर्थः ॥ १८३ ॥ तत्रशापंचिंतयति कष्टेति कष्टाद्दुःखप्रचुरायोनिर्वासस्थानंयेषांततथातेषांमध्येमुख्याःप्रथमगण्याअश्वसेवनजीविनःप्रसिद्धाः तेषांवाजिशालायांपूतिगंधायांवासस्यसेवामहत्त्वेपिजीवनाल्पतायाश्चप्रसिद्धत्वात् योनिपदस्यस्थानवचनतातुयोनिष्टेइंद्रनिषदेइत्यादौप्रसिद्धा स्फुटमन्यत् ॥ १८४ ॥ इतिसंचिंत्येति निवारि

नानेनसदृशःकश्चिदासीदस्तिभविष्यति ॥ कुतोधिकोब्रह्मचर्ययुक्तश्चापिपुमानयं ॥ १८२ ॥ मयासहविलोक्यैषदुरात्मैनंजगद्गुरुं ॥ स्त्रैणंमत्वाब्रह्मचारीस्वयंगर्वाधिकोजडः ॥ नोत्तस्थौतेनदास्यामिशापमस्मैसुदारुणं ॥ १८३ ॥ कष्टयोनिषुमुख्याःस्युरश्वानांरक्षणेरताः ॥ तत्कुलेतवजन्मस्याद्भर्तुर्योमेवमानकृत् ॥ १८४ ॥ इतिसंचिंत्यसाशापंददौभर्त्रानिवारिता ॥ सोभवत्तादृशस्तत्रपरंसुखमुपागतः ॥ १८५ ॥ सब्रह्मकर्माभावेनचणकान्भक्षयन्सदा ॥ स्थूलदेहोऽश्वशालायाद्वारितिष्ठत्यहर्निशं ॥ १८६ ॥ तादृशंतंपुनर्देवीदेवेनसहितेक्षत ॥ वरंवरयस्वेत्युक्तेमलमूत्रविसर्जनं ॥ उपविष्टस्यदूरेस्यादितिमेस्तुवरःपरः ॥ १८७ ॥ उष्ट्रोभवेतिकोपेनसाशशापपुनश्चतं ॥ अभवत्सोपितद्देहोगृहेराज्ञोपिरक्षकैः ॥ १८८ ॥ शिक्षितोबहुशःपश्चात्त्यक्तोरण्येत्ववज्ञया ॥ अलसोयमितिज्ञात्वासोपितत्राभवत्सुखी ॥ १८९ ॥ करीरादिवनेभूरिकंटकादीन्यभक्षयत् ॥ पिबन्गंगाजलंभूरिमलमूत्रविसर्जनं ॥ आसीनएवकुर्वन्सपरंसुखमुपागतः ॥ १९० ॥

तापीतिशेषः ततःसमहामुनिस्तादृशःअश्वसेवकरूपस्तत्राश्वशालायांपरंसुखंप्राप्तोऽभवदिति ॥ १८५ ॥ तत्रहेतुमाह सब्रह्मेति यतोब्राह्मणजातिकर्मानुष्ठानक्लेशाभावेनाऽश्वान्नानांचणकानांभक्षणेनचस्थूलदेहःसन्नलसत्वात्कर्मांतरेऽनियुक्तोद्वारमात्ररक्षांकुर्वंस्तिष्ठतीत्यर्थः ॥ १८६ ॥ तादृशमिति तादृशंतत्रापितुष्टंतंमुनिंदृष्ट्वाप्रीतयादेव्यावरयेत्युक्तेसतियथामैत्रकर्मार्थंक्लेशोनभवेत्तथाविधेहीतिवब्रेइत्यर्थः ॥ १८७ ॥ ततःपुनःकोपेनदेव्यातस्योष्ट्रभावेदत्तेतत्रापिमुनेःसंतोषंवर्णयति उष्ट्रइतित्रिभिः अलसोयमितिज्ञात्वाऽरण्येरक्षकैस्त्यक्तइतिसंबंधः निगदव्याख्यातमन्यत्रिषु ॥ १८८ ॥ १८९ ॥ १९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पशुदेहान्सृजताहिरण्यगर्भेणसुकरत्वात्प्रथममुष्ट्रदेहएवनिर्मितइतिज्येष्ठतागुणमनुसंधायापिसमुनिस्तद्देहेतोषंगतइत्याह ब्रह्मणइति द्रुतं
शीघ्रमभवदुत्पन्नः अस्मादेतदालोच्य ॥ १९१ ॥ तत्रापितुष्टंतंप्रतिदेवीवरायआदिदेशेत्याह पूर्ववदिति ॥ १९२ ॥ सचमुनिस्तमेवदेहंतु
 ष्टावेत्याह कृतकृत्यइति ॥ १९३ ॥ सर्वत्रगुणंगृह्णातिपंडितइतिन्यायेनतद्देहगुणानाह वेदतइति स्पष्टम् ॥ १९४ ॥ यतोस्यदेहस्यज

ब्रह्मणोमानसाद्देहउष्ट्रस्यैवाभवद्द्रुतम्॥ सुखमुष्ट्रवपुष्यस्मादभूत्तस्याधिकंमुनेः ॥ १९१ ॥ पूर्ववत्तादृशंदेवी
देवेनसहितैक्षत॥वरंवरयस्वेत्याहपुनरेवतपोधनं ॥ १९२ ॥ कृतकृत्यःसतांप्राहवरोनान्योधिकोमम॥ भव
त्यादेवियद्दत्तमौष्ट्रंजन्मातिशोभनं॥ १९३ ॥ वेदतोलोकतोवापिभीतिर्लज्जानचात्रहि ॥ मलमूत्रेचदूरान्मे
पततोप्युपवेशने॥ १९४ ॥ शरीरंयदिकस्यापिभवेदुष्ट्रस्यतद्भवेत् ॥ यतःसुखंशरीरस्यजन्मन्यस्यप्रदृश्यते
॥ १९५॥ अनुभूतामयादेहाःसर्वजीवसमुद्भवाः॥ उच्चावचानोष्ट्रदेहसदृशःकोपिविद्यते ॥ १९६ ॥ एवमु
क्त्वाविचार्यैवमहेशेनसमंस्वयं॥ वव्रेवरंतमेषोपिदत्तवान्मनसेप्सितं ॥ १९७ ॥ सनत्कुमारोभगवान्स्कंद
नामाभवत्सुतः॥ शिवयोर्वरदानेनतत्रापिब्रह्मचर्यवान्॥ १९८ ॥इतितेकथितंसर्वंनारदायसमीरितम्॥
पुरासनत्कुमारेणभूमरूपंसुखंपरम्॥ १९९॥

न्मनिसुखंदृश्यतेततःसर्वस्यदेहप्रसंगेउष्ट्रदेहएवभवेदितिकामयेइत्याह शरीरमिति ॥ १९५ ॥ तत्रस्वानुभवमनुकूलयति अनुभूताइति
॥ १९६ ॥ तंनिरपेक्षंदृष्ट्वाभर्त्रासहविचार्यभवानीत्थंप्राह वरंनगृह्णासिचेत्परिपूर्णत्वात्तर्हिअस्मदीप्सितंदेहीति तेनमुनिनातथेत्युक्तेतस्य
स्वपुत्रभावंवव्रे ततःसस्कंदनामादेव्याःपुत्रोऽभवत् स्कंदतिकामंशोषयतिवशीकरोतीतियावत् इतिव्युत्पत्तेःसमन्वयात् तथाचस्कंदौस्कं
दिर्गतिशोषणयोरिति एतद्वृत्तंदर्शयति एवमुक्त्वाइतिद्वाभ्यां ॥ १९७ ॥ १९८ ॥ इतितेइति स्पष्टम् ॥ १९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तराकांक्षामुत्थापयति अवस्थेति यथाआत्मनःसद्रूपमारुणिनोक्तंसनत्कुमारेणचानंदत्वंतथास्यअवस्थात्रयेणसुप्यंतेनहीनत्वंब्रह्माइंद्रायविरोचनायचोक्तवान्परन्तुतदाइंद्रएवाविदत्तत्त्वबोधंप्राप्नोयतआहारशुद्ध्यादिमान्ग्रंथीनांमोचकःविमोक्षेयत्नवांश्चेत्यर्थः ॥२००॥ उपसंहरति इतितेइति ॥ २०१ ॥ भूम्नोभूमिविहीनस्याप्यधिष्ठानस्यविश्वतः गोचरेभ्यःपरंरूपमध्यक्षस्यास्तुगोचरः ॥ १ ॥ स्वयंभू

अवस्थात्रयनिर्मुक्तंब्रह्माशक्रायचाब्रवीत् ॥ विरोचनायचतथाशक्रएवतदाविदत् ॥ शुद्धाहारःशुद्धसत्वः स्मृतिमान्ग्रंथिमोचकः॥ २०० ॥ इतितेकथितंसर्वंयत्पृष्टंभवतात्विह ॥ आत्मनःसुखरूपत्वंकिमन्यच्छ्रोतुमिच्छसि ॥ २०१ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितेउपनिषद्रत्नआत्मपुराणेछांदोग्यसारार्थप्रकाशेसनत्कुमारनारदसंवादोनामत्रयोदशोध्यायः समाप्तः

॥ १३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

म्याआधारेणरहितस्यापिविश्वंप्रतिअधिष्ठानभूतस्यभूम्नोरूपं इंद्रियविषयानतिक्रांतंसाक्षादस्त्वित्यर्थः इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनुजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतौआत्मपुराणटीकायांसत्प्रसवाख्यायांत्रयोदशोऽध्यायः समाप्तः ॥ १३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे त्रयोदशोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे चतुर्दशाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ विद्युन्मेघोपमानस्यसंप्रसादपराकृतेः॥चतुर्दशाशापूरस्यगीयतेस्वंचतुर्दशे ॥१॥ अस्यार्थः तडिदन्वितमेघवत्कांतिशालिनःसम्यग्यःप्रसादोऽनुग्रहस्तत्पराआकृतिस्तनुर्यस्यसतथातस्य अथवासम्यक्प्रसन्निविवर्धंतेस्वधर्मेणयेऋषयःतेसंप्रसाः प्रसविस्तारेइत्यस्मात्पचाद्यचिसाधु तानदंतीतिसंप्रसादाराक्षसास्तेषांपराकृतेःविध्वंसरूपस्य चतुर्दशसंख्यलोकानामथवाचतस्रोवैखानसादिसंज्ञाःदशाअवस्थायेषांतेचतुर्दशाःदण्डकवासिमुनयस्तेषामाशामनोरथास्तत्पूरकस्यचश्रीरामस्यस्वंधनंयशोरूपंचतुर्दशेचतस्रोदिशएवदशाःप्रातभूतायस्यजगत्पटस्यतस्मिन्शौक्ल्यरूपेणसततंगीयतेमहाभागैः यइमेवीणायांगायंतिएतमेवतेगायंतीतिश्रुतेरित्यर्थः श्रीशंभुविग्रहपक्षे विगताद्युत्दीप्तिःप्रावल्यरूपायस्यसविद्युत्शारदोघनस्तद्वदवदातस्यानुग्रहपरस्य चतुर्दशमहारत्नकामनापूरकस्यचस्वंधर्मरक्षाप्रयुक्तयशोरूपंधनंचतुर्दशेलोकेसत्याख्येगीयते प्रजापतेःसुतायांधर्ममतिक्रामतःशासनात् प्रमेयपक्षेतु विद्युत्प्रभृतयोयथातिरोहिता

श्रीगणेशायनमः भूमरूपमिदंशिष्यःश्रुत्वावस्थात्रयातिगं ॥ श्रोतुकामःपुनर्वाक्यंगुरुमाहेदमात्मवान् ॥ १ ॥ भगवन्भवताख्यातंज्ञानंनानाविधंपुरा॥ ऐतरेयोहियद्वेदयच्चकौषीतकिर्मुनिः॥ २ ॥ आदित्योभगवान्यत्तुसश्वेताश्वतरोपियत् ॥ कठश्चतित्तिरिस्तद्वज्जाबालाद्यामुनीश्वराः ॥ आरुणिर्भगवान्यच्चकुमारेणाप्युदीरितम्॥ ३ ॥

अभिव्यंजकवर्षाकालागमेप्रादुर्भवंतितथात्मादेहादितादात्म्येनतिरोहितोपिमहावाक्यसांनिध्येनप्रकाशतेइत्येवंविद्युद्घनौतदुपलक्षितंवातादिकंचउपमानंयस्यसतथा संप्रसादःसुषुप्तिस्ततःपराआकृतिःशुद्धंरूपंयस्य दशआशादिशस्तासांपूरकस्यचविभुत्वात् एवंविधस्यपुरुषोत्तमस्यस्वंस्वरूपंचतुश्चतुर्वारंगीयतेप्रजापतिना चतुर्दशेचतसृणांदशानामवस्थानांजाग्रत्स्वप्नसुषुप्तितुरीयाख्यानांसमाहारेचतुर्दशसंख्यापूरकेत्राध्यायेवाइत्यर्थः ॥ १ ॥ छांदोग्याष्टमाध्यायगतेंद्रप्रजापतिसंवादंशुश्रूषतोमेधाविनःप्रश्नंदर्शयति भूमरूपमितिसप्तदशश्लोकैः स्पष्टं ॥ १ ॥ भगवन्निति हेभगवन्नैतरेयादिभिर्जाबालाद्यैःशाखाप्रवर्त्तकैर्मुनिभिर्दृष्टासुशाखासुवर्णितंज्ञानमेकादशाध्यायांतयंथेनोक्तंतत्रादित्यस्यापिवाजसनेयपंचदशशाखानामृषित्वंबृहदारण्यकाष्टमाध्यायेवंशब्राह्मणेप्रोक्तंतथाद्वादशत्रयोदशयोरारुणिसनत्कुमाराभ्यामुदीरितंतदुक्तमितिद्वयोरर्थः ॥ २ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रज्ञानेशिष्यत्वेनकीर्तितान्नुवदति यत्रेति यत्रज्ञानेप्रथमाध्यायमारभ्यपंचमनवमैकादशाध्यायानुपेक्ष्यप्रजादयोनारदांताःक्रमेण शिष्याउक्ताइतिद्वयोरर्थः ॥ ४ ॥ ५ ॥ अथोक्तशिष्याणांक्रमेणगुरून्दर्शयति गुरवइति मंत्रद्रष्टारऋषयःप्रथमेध्यायेगुरुत्वेनोक्ताः श क्रोद्वितीये एवमग्रेपि याज्ञवल्क्यःषष्ठसप्तमयोरितिविशेषः सनदीरितःसनत्शब्दपूर्वकमुक्तइतिकुमारविशेषणं ॥ ६ ॥ ७ ॥ एकादशोक्त

॥१॥ गुरुशिष्यानभिप्रेत्याह अन्येपीति चतुर्थविशेषवृत्तंकीर्त्तयति त्रिपर्वेति त्रिविधपर्वशालीवंशस्त्रिस्त्रिवारमुक्तस्तथादध्यङ्ङाथर्वणइत्या

यत्रशिष्याःप्रजास्तद्वद्दैवोदासिश्चवीर्यवान् ॥ बालाकिरश्विनौतद्वज्जनकोमिथिलेश्वरः ॥ ४ ॥ मैत्रेयीचापि यतयोभृगुश्चवरुणात्मजः ॥ श्वेतकेतुश्चभगवान्नारदःसर्वविन्मुनिः ॥ ५ ॥ गुरवोमंत्रवेत्तारःशक्रोलोकत्रयी पतिः ॥ अजातशत्रुर्भूपालोदध्यङ्ङाथर्वणोपिच ॥ ६ ॥ याज्ञवल्क्यश्चभगवान्सश्वेताश्वतरोपिच ॥ वरुणोप्या रुणिस्तद्वत्कुमारःसनदीरितः ॥ ७ ॥ अन्येपिगुरवस्तद्वत्शिष्याअपिचकेचन ॥ त्रिपर्वात्रिर्महान्वंशऋषेः स र्वज्ञतापिच ॥ शक्राच्चमरणंतद्वद्दध्यङ्ङाथर्वणस्यच ॥ ८ ॥ जल्पाभिधाकथाप्यत्रयाज्ञवल्क्यस्यधीमतः ॥ ब्राह्म णैश्चतथाशापःशाकल्यस्यप्रमादिनः ॥ ९ ॥ कारणानांचविज्ञानंवरोपिनचिकेतसः ॥ त्रिविधोयंमतोयत्रज्ञा नंवैराग्यसंयुतं ॥ १० ॥ स्वरूपेणचताटस्थ्याद्ब्रह्मणोलक्षणंद्वयम् ॥ पंचकोशविनिर्मोकात्पृथक्कृतस्यप्रदर्श नं ॥ ११ ॥ विदुषोपिचवेनस्यस्वात्मानुभवकीर्तनं ॥ सत्यादिसाधनेभ्यश्चसंन्यासाधिकृतेरिता ॥ १२ ॥

ख्यस्यऋषेःसर्वज्ञतादिकमुक्तमित्यर्थः ॥ ८ ॥ पंचमवृत्तमाह जल्पाभिधेति जल्पोविजिगीषुकथारूपःसब्राह्मणैःसहयाज्ञवल्क्यस्यो क्तः शाकल्यंप्रतितच्छापश्चेति ॥ ९ ॥ तथाष्टमेजगत्कारणनिर्णयः नवमेत्रिविधोवरोनचिकेतसायमाद्गृहीतोयद्बलाज्ज्ञानवैराग्येश्रुते इत्याह कारणानामिति स्पष्टम् ॥ १० ॥ दशमवृत्तमनुवदति स्वरूपेणेति सत्यज्ञानादिकंस्वरूपलक्षणमाकाशादिकारणत्वंतटस्थलक्ष णंचदर्शयित्वाकोशविवेकेनब्रह्मणोगुहाप्रवेशनंदशमपूर्वार्द्धेकृतं उत्तरार्द्धेतुवेनाख्यगंधर्वस्यानुभवःसंन्यासस्याधिकताचेरितेतिद्वयोरर्थः ॥१॥
॥ ११ ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादशादिषुवृत्तमाह संवर्त्ताद्यैरितित्रिभिः संवर्तादिमहात्मकर्तृकंतस्यसंन्यासस्यानुष्ठानमुक्तंतस्यसंन्यासस्यहेतुभूतंवैराग्यमुक्तंतस्यवैराग्यस्यहेतुत्वेनचयोगआदिपदग्राह्यस्मरणनिमित्तादिकंचोक्तंतस्ययोगस्यसंन्यासस्यचाधिकारीविरक्तोदर्शितस्तस्यबाह्यांतरभेदेनद्विविधोवेषश्चोक्तस्तत्रबाह्योयोवेषःसआचारनाम्नालोकसंग्रहार्थतयाप्रसिद्धोयस्त्वत्राभ्यंतरेवर्त्तमानःशमादिरूपआचारोबहुधोक्तःसब्रह्मात्मविज्ञानस्यमुख्यंकारणमितिद्वयोरर्थः ॥ १३ ॥ १४ ॥ तत्प्रसंगेनेति तस्याभ्यंतराचारस्यप्रसंगेनबहुभिःश्रुतिभिर्ब्रह्मोपनिषदादिभिरुदितंविज्ञानंकीर्तितं यस्यप्रसंगात्सामगाछांदोग्यषष्ठादिगताकथाअभूत् अनंतराध्यायद्वयेनवर्णितेत्यर्थः ॥ १५ ॥ पूर्वाध्यायांतोप

संवर्त्ताद्यैरनुष्ठानंतस्यपूर्वैर्महात्मभिः ॥ वैराग्यंतस्यहेतुश्चयोगादिस्तस्यचात्रहि ॥ १३ ॥ अधिकारीविरक्तश्चबाह्यआभ्यंतरस्तथा ॥ वेषआचारनामास्यादाचारोबहुधात्रयः॥ अहंब्रह्मेतिविज्ञानकारणंमुख्यमेवच ॥ १४ ॥ तत्प्रसंगेनविज्ञानंबहुश्रुत्युदितंपुनः॥ कीर्तितंचात्रयस्याभूत्प्रसंगात्सामगाकथा॥१५॥ अवस्थात्रयनिर्मुक्तंभूमानंब्रह्मणोमुखात्॥ इंद्रोविज्ञातवान्नैवज्ञातवांस्तुविरोचनः॥ १६ ॥ तदहंश्रोतुमिच्छामिचित्रमेतद्भवन्मुखात्॥ गुरोकथयमह्यंत्वंसर्वमेतद्यथाभवत् ॥ १७ ॥ एवमुक्तोगुरुःप्राहकथामष्टमकीर्त्तितां ॥ छांदोग्येसप्तमेषष्ठेप्रोक्तंप्रोच्यमहामतिः॥ १८ ॥ ब्रह्मलोकेतिमहतिसर्वदुःखौघहारिणि॥ गम्येसंन्यासिभिर्नित्यंमार्गतोप्यर्चिरादिना॥ प्रजापतीनांयेलोकास्तेभ्योप्युपरिसंस्थिते॥ १९॥

न्यस्तंप्रश्नवीजमनूद्यपृच्छति अवस्थात्रयेतिद्वाभ्यां निगदव्याख्यातंद्वयं ॥ १६ ॥ १७ ॥ एवंपृष्टोगुरुश्छांदोग्यस्यषष्ठसप्तमोक्तंप्रोक्तमित्यनुसंधायाष्टमाध्यायेदहरविद्याप्रदर्शनानंतरमुक्तांकथांप्राहेत्याह एवमिति स्पष्टम् ॥ १८ ॥ अथवक्ष्यमाणकथोपयुक्तंब्रह्मलोकस्वरूपंनानाशाखोक्तंवर्णयंस्तत्रवेदांतविज्ञानेत्यादिमुंडकवाक्यप्रदर्शितंविशेषमाह ब्रह्मलोकइति अतिविशालेसर्वदुःखविरोधिनिअर्चिरादिमार्गेणसंन्यासिभिर्वेदांतविज्ञानादिविशिष्टैर्गम्येप्रजापतीनांभृग्वादीनांयेलोकामहरादयस्तेभ्यउपरिस्थितेचब्रह्मलोकेतत्रहिरण्मयाख्यःप्रासादोस्तीतिचतुर्दशेनसंबंधः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मचर्यप्रसंगेसन्निहितवाक्येनोक्तान्विशेषान्दर्शयति ऐरंमदीयमिति यत्रब्रह्मलोकेइराअन्नंतद्रसमयत्वान्मदहतुत्वाच्चऐरंमदीयसंज्ञंसरोस्ति कीदृशं उपासनाबलात्क्षुद्रफलकपुण्यानांपापानांचक्षयेसतिलभ्यमित्यर्थः ॥ २० ॥ अश्वत्थइति अश्वत्थाकारःसोमस्यामृतस्यस्रावकत्वात्सोमसवनाख्यःकल्पद्रुमोपियत्रास्ति ॥ २१ ॥ वर्त्ततेइति एकोऽरसंज्ञोद्वितीयोण्यसंज्ञएतावर्णवतुल्यौतडागौयत्समीपेवर्त्तेतेइत्यर्थः ॥२२॥ अर्चिरादिमार्गप्रकाशकवाक्येनोक्तंविशेषमाह अमानवेनेति चंद्रलोकाद्विद्युल्लोकंप्राप्तउपासकस्तत्रागतेनअमानवेनमनुस्रष्टावनुत्पन्नेनपुरुषविशेषेणराजपुत्रवदादरेणयत्रब्रह्मलोकेनीयतेइत्यर्थः ॥ २३ ॥ अथकौषीतक्युक्तान्विशेषान्षष्ठाध्यायेचतुर्दशाधिकैकादशशतश्लोकोत्तरग्रंथेनव्याख्यातानपिब्रह्मणःप्रभावातिशयदर्शनायस्मारयति यत्रपंचेत्यादिना यत्रब्रह्मलोकेगतमुपासकंप्रतिअंबासंज्ञाअंबायवीयासंज्ञाश्चाप्सरसोब्रह्मणोयोग्यस्यालंकारस्यदेहशोभायानिर्मात्र्यःपंचशतसंख्याःप्रभोराज्ञयासोत्कंठाःसमायांतीतिद्वयोरर्थः नामव्युत्पत्तिःषष्ठादवगंतव्या ॥ २४ ॥ २५ ॥ तासामुपायनभेदेनविभागमाह मालेतिद्वाभ्यां अंजनंदेहचाकचक्यहेतुःसुगंधितैलादिरूपं चूर्णमभ्यंगमर्दनोपयुक्तम् अन्यत्षष्ठादवगंतव्यम् ॥ २६ ॥ २७ ॥ आरइति यत्रब्रह्मलोकेद्वारदेशेआराख्योह्रदोविरजाख्यानदीचवर्त्ततेययोर्ह्रदनद्योर्मध्येयेष्टिहसंज्ञामुहूर्ताभिमानिनोदेवास्तिष्ठंतीत्यर्थः व्युत्पत्तिःषष्ठेदर्शिता ॥ २८ ॥

ऐरंमदीयंयत्रास्तिसरःफुल्लसरोरुहं ॥ तापत्रयहरंनृणांपुण्यपापक्षयेसति ॥ २० ॥ अश्वत्थःसोमसवनोयत्र
कल्पद्रुमोमहान् ॥ मातेवसर्वभूतानांप्रयच्छतिमनोगतं ॥ २१ ॥ वर्त्तेतेयत्रसततंतडागौसागरोपमौ ॥ पयो
दधिघृतैःपूर्णावरण्याख्यौसमीपगौ ॥ २२ ॥ अमानवेनयत्रायंविद्युल्लोकात्परंपुमान् ॥ नीयतेपुण्यपापाभ्यां
रहितोराजबालवत् ॥ २३ ॥ यत्रपंचशतंब्रह्मप्रेरिताःसूर्यसंन्निभाः ॥ अंबाश्चांबायवीयाश्चनानात्यप्सरसःशु
भाः ॥ २४ ॥ आयांतिसंमुखंपुंसोब्रह्मालंकारकारिकाः ॥ तूर्यवादित्रनिर्घोषैःसोत्कंठास्तंदिदृक्षवः ॥ २५ ॥
मालाहस्ताःशतंतद्वत्शतमंजनपाणयः ॥ चूर्णहस्ताःशतंतद्वत्शतंवासःकराअपि ॥ २६ ॥ अलंकारक
राश्चान्याःशतंषोडशवार्षिकाः ॥ रूपयौवनसंपन्नामूर्तिमत्योयथाश्रियः ॥ २७ ॥ आरोह्रदश्चविरजानदीय
त्रातिदुस्तरा ॥ ययोर्मध्यगतायत्रतामुहूर्त्तायेष्टिहाभिधाः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपद्राव्येति तान्येष्टिहंसज्ञान्मुहूर्तान्दर्शनंविवेकस्तच्छालिनाआत्मीयमनोरूपसाधनेनअपद्राव्यपलायितान्कृत्वाऽऽह्वदनद्यौतीर्त्वाचय त्रब्रह्मलोकेगच्छेदिति ॥ २९॥ इल्येति यत्रलोकेइल्यसंज्ञंवृक्षंसंलक्ष्यतत्सन्निधावितियावत् आयांतमेनमुपासकंब्रह्मगंधोयाति संस्थानं नगरंशालज्याख्यंगतंतुब्रह्मरसोपियाति अपराजिताख्यमायतनंसंलक्ष्यगतंतुरूपाणिदिव्यानियांति तथासर्वतेजःसर्वस्यब्रह्मणस्तेजःप्र विशतीत्यर्थः व्युत्पत्तिःषष्ठे ॥ ३० ॥ ततस्तत्तेजसाभिभूताविंद्रप्रजापतीद्वारस्थौब्रह्मसंनिधिंगच्छतोऽस्योपासकस्यमार्गदायकौभवतइत्या ह इंद्रेति ॥ ३१ ॥ तत्रब्रह्मलोकेश्रुत्याहिरण्मयमित्युक्तःसभास्थलान्वितःप्रासादोस्तिब्रह्मणइत्याह हिरण्मयमिति ॥ ३२॥ विचक्षणेति

अपद्राव्यमुहूर्त्तांस्तान्दर्शनेनात्मचेतसा॥ ह्रदंनदींचसंतीर्यंयत्रगच्छेदुपासकः॥ २९॥ इल्यवृक्षंचसंलक्ष्यसं स्थानमपराजितं॥ यत्रयांत्येनमायांतंब्रह्मगंधरसावपि॥ रूपाणिप्रविशत्याशुसर्वतेजोप्युपासकं ॥ ३० ॥ इंद्रप्रजापतीयत्रद्वारपालौमहौजसौ॥ भीतवद्गच्छतोनित्यंयत्रमार्गंप्रयच्छतः ॥ ३१ ॥ हिरण्यमयंचतत्रा स्तिप्रासादःपरमेष्ठिनः॥ महाननेकरत्नौघराजितश्चसभान्वितः ॥ ३२ ॥ विचक्षणाभिधायत्रप्रज्ञोक्तावेदि काशुभा॥ सर्वलक्षणसंपन्नाजगन्निर्माणकारणं ॥ ३३ ॥ अमितौजाश्चपर्यंकोयस्यांप्राणाभिधःसदा॥ उद्गाताचतथोद्गीथोवागाद्यैर्यउपास्यते॥ ३४॥ भूतंभविष्यतासार्द्धंतत्पादौपूर्वदिग्गतौ॥ श्रीश्चेराचापितस्यो क्तौपादौपश्चिमदिग्गतौ॥ ३५॥

यत्रप्रासादेजगन्निर्माणहेतुभूताविचक्षणासंज्ञाचप्रज्ञाबुद्धिरासंदीपदोक्तपर्यंकाधाररूपावेदिकाप्रोक्ता तद्विन्यासःषष्ठेदर्शितः ॥ ३३ ॥अ मितौजाइति यस्यांप्रज्ञारूपवेदिकायाममितौजानामकःपर्यंकोभवति कीदृशः प्राणरूपः यःप्राणोवाजसनेयैरुद्गातृसंज्ञकऋत्विग्विशेषरू पेणोपास्यते छंदोगैस्तुउद्गीथःप्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्यानांसामभागविशेषाणांमध्येद्वितीयभक्त्यवयवप्रणवरूपउपास्यते स्फुटमेतद्भाष्येगुणोपसंहारपादे ॥ ३४ ॥ पर्यंकंवर्णयति भूतमितिचतुर्भिः तस्यपर्यंकस्यपूर्वदिग्गतौपादौभूतभविष्यज्जगद्रूपौबोध्यौ श्री र्लक्ष्मीःइरापृथिवीएतद्रूपौपश्चिमौपादावित्यर्थः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणोत्तरेति अत्रखड्वांगपदेनपट्टिकाग्रहणं तथाचबृहद्रथंतराख्येसामनीदक्षिणोत्तरायतपट्टिकारूपेबोध्ये भद्रयज्ञायज्ञीयाख्येतुतेपूर्वप
श्चिमायतपट्टिकारूपेभवतइत्यर्थः ॥३६॥ ऋचइति अत्रपट्टिकाःवितानोपयोगिन्यःसूत्रमय्योबोध्याः तथाचऋक्सामाख्यमंत्रात्मिकाः
पूर्वपश्चिमायतायजुःसंज्ञमंत्रात्मिकास्तुदक्षिणोत्तरायतास्ताःसंतीत्यर्थः ॥३७॥ सोमांशवइति चंद्रस्यकिरणाउपस्तरणवस्त्ररूपाःप्रोक्ताः
॥३॥ उद्गीथाख्यःसामभक्तिविशेषस्तस्योपस्तरणवस्त्रस्ययदंतरमाच्छादकंश्वेतवस्त्रंतद्रूपोबोध्यः लक्ष्मीस्तूपबर्हणंशीर्षोपधानंयत्तद्रूपा ॥ ३८ ॥

दक्षिणोत्तरखट्वांगेबृहत्तद्वद्रथंतरं ॥ भद्रंचयज्ञायज्ञीयमुक्तेतेपूर्वपश्चिमे ॥ ३६ ॥ ऋचःसामानिपूर्वस्यांदि
शिप्रोक्ताश्चपट्टिकाः ॥ दक्षिणोत्तरसंस्थानाउक्तास्तास्तुयजूंष्यपि ॥ ३७ ॥ सोमांशवस्तुसंप्रोक्तास्तस्योपस्त
रणंसदा ॥ उद्गीथश्चांतरंवस्त्रंश्रीःप्रोक्तातूपबर्हणं ॥ ३८ ॥ तत्रयःसर्वदैवास्तेजगत्पटसमावृतः ॥ पंचभूतौघ
पुष्टश्चसर्वजीववपुःपुमान् ॥ ३९ ॥ नीरंपिबतियोनित्यमंबयासरिदाश्रयं ॥ तेजःपुंजंसमासाद्यप्रतिरूपाचचा
क्षुषी ॥ यस्यप्रियामानसीचकथितासासरस्वती ॥ ४० ॥ देवदेवःसपत्नीकआसीनश्चसभागतः ॥ उपासि
तोमूर्त्तिमद्भिर्ब्रह्मांडस्थविभूतिभिः ॥ ४१ ॥ सर्वभूतहितंशश्वच्चिंतयन्निदमुक्तवान् ॥ केनचिद्विप्रसंगेनसर्व
भूतसुखाप्तये ॥ ४२ ॥

तत्रेति तत्रप्राणरूपपर्यंकेयोहिरण्यगर्भस्तिष्ठति कीदृशः जगद्रूपेणपटेनावृतःपृथिव्यादिपंचभूतैःपुष्टशरीरःसकलजीवसमष्टिरूपश्चेत्य
र्थः ॥ ३९ ॥ नीरमिति यश्चदेवःअंबयाशब्दोक्तासुउपासनात्मकनदीषुवर्त्तमानंनीरंपिबतियस्यचएकाप्रियाप्रतिरूपाख्या कीदृशी तेजः
पुंजंसमष्टिरूपंसमासाद्याभिमानगोचरीकृत्यवर्तमाना पुनःकीदृशी चाक्षुषीसर्वचक्षुषामुपादानभूता तथायस्यद्वितीयाप्रियामानसीसं ॥ ३ ॥
ज्ञायासरस्वतीरूपेणप्रसिद्धेत्यर्थः ॥ ४० ॥ देवदेवइति मूर्तिमद्भिर्देवैः कीदृशैः ब्रह्मांडेव्याप्ताविभूतयोयेषांतथाभूतैरुपासितोदेवदेवःसर्वहितं
चिंतयन्कुत्रचित्प्रसंगेइदमब्रवीदितिद्वयोरर्थः ॥ ४१ ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंपदोक्तंप्रजापतिवाक्यंसप्तभिर्विवृण्वंस्तत्त्वयत्पदार्थमाह अणोरिति अतिदुर्लक्ष्यत्वेनभूमरूपेणचपूर्ववर्णितःसर्वेषांप्रत्यक्षेनचप्रसिद्धइ तिप्रथमदलार्थः आत्मादिपदद्वयार्थमाह सर्वेति सर्वेभ्यःपराग्वस्तुभ्यऔपाधिकप्रेमास्पदेभ्योनिरतिशयप्रियत्वादात्मेत्युक्तोयतएनमहमो ऽहंकारादपिपरंवदंति पाप्माअनित्यफलकंकर्मतदाश्रयाभ्यांस्थूलसूक्ष्माभ्यांसंगराहित्यादपहतपाप्मायमुक्तः विजरादिपदसप्तकस्यार्थ माह षडूर्मीति॥४३॥४४॥तत्रषडूर्मिराहित्यंस्फुटयति जरेति जरामरणयोस्तदुपलक्षितजन्मादीनांचस्थूलदेहधर्मत्वात्शोकमोहयोस्तदु पलक्षितरागादीनांचमनोधर्मत्वात्क्षुत्पिपासयोःप्राणधर्मत्वाच्चतेभ्यःसाक्षित्वेनविविक्तत्वलक्षणकैवल्यशालिनआत्मनस्तेधर्मानवक्तुंश

अणोरणीयान्भूमायःप्रसिद्धःसर्वदेहिनां॥ सर्वप्रियतमोनित्यंप्रवदंत्यहमःपरं॥४३॥ आत्मापहतपाप्मा यंसर्वसंगविवर्जितः॥ षडूर्मिरहितस्तद्वत्सत्येच्छाज्ञानसंयुतः॥४४॥ जरामरणजन्माद्याधर्मादेहस्यनात्म नः॥शोकमोहादयस्तद्वन्मनसःकेवलस्यते॥क्षुत्पिपासेचसंप्रोक्तेप्राणस्यैवमनीषिभिः॥४५॥एतद्योगाच्चवि ज्ञानमिच्छयासहितंसदा॥ अनृतंविषयाभावाद्भवेत्संसारसंगतौ॥४६॥ अस्यसर्वस्यशून्यत्वेकामःसंक ल्पसंयुतः॥ नभवेदथचेत्सत्यएकएवात्मनोभवेत्॥४७॥

क्याइत्यर्थः॥४५॥ सत्येच्छाज्ञानत्वंविशदयति एतद्योगादितिद्वाभ्यां एतेषांदेहमनःप्राणानांयोगादध्यासरूपात्संसारसंगतौजन्मादि लक्षणसंसारसंबंधेसतियावद्विज्ञानमिच्छावाभवतितदुभयमनृतंमिथ्याभवतिविषयाभावात्तयोर्बाधितार्थत्वादित्यर्थः॥४६॥ अस्येति अस्यदेहादिसंघातस्यशून्यत्वेतत्त्वज्ञानेनबाधेसतितुकामादिकंनैवभवेत्जायेतअथयदिबाधितानुवृत्त्याभवेदाहार्यज्ञानविधयाजायेत तथापिनानृतमात्ममात्रतयानुसंधीयमानत्वेनसत्यत्वादित्यर्थः तथाचविदुषांकामादिकमुत्पत्तिदशायामधिष्ठानमात्रत्वेनदृश्यमानत्वाद नुत्पत्तौसन्मात्रतायाःसिद्धत्वाच्चसत्यमेवेतिभावः॥४७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितंदर्शयंस्तस्यान्वेषणीयतामाह सर्वेति सर्वैःसंसारधर्मभूतैरर्थैःपदार्थैर्वर्जितःअतएवबुद्ध्यादिविलक्षणश्चायमात्माविविधैर्ब्रह्मचर्यादि रूपैरुपायैर्लब्धेनविवेकसामर्थ्येनबहुधाबहुविधतर्कैरवधार्यसंभावनागोचरतांनीत्वान्वेषणीयः गुरुशास्त्रोपदेशैर्ज्ञातव्यइत्यर्थः ॥ ४८ ॥ उपायैरिति प्रथमपदद्वयंपूर्वान्वयिदर्शितं ततउपदेशानंतरंमीमांसांप्रमाणासंभावनावारकत्वेनश्रवणसंज्ञांकुर्वीतततःप्रमेयासंभावनावार कंमननंविपरीतभावनावारकंध्यानंनिदिध्यासनंचकुर्वीतेत्यर्थः ॥ ४९ ॥ उक्तविज्ञानफलमाह विवेकीति उक्तात्मविज्ञःसर्वात्मभावप्रा प्त्याभेदहीनःसन्सर्वान्लोकान्भूरादींस्तद्वर्तिनःकामान्काम्यमानान्विषयांश्चाप्नोतिस्वात्मबुद्धितःतेषांस्वात्ममात्रत्वेनज्ञानादित्यर्थः॥ ५०॥

सर्वसंसारधर्मार्थसंस्पर्शनविवर्जितः॥ अन्वेषणीयःसततंसबुद्ध्यादिविलक्षणः॥ विवेकतोवधार्यैनंबहुधै वपुनःपुनः॥ ४८॥ उपायैर्विविधैःपश्चाद्गुरूनाप्यसमाहितः ॥ मीमांसामपिकुर्वीतश्रवणापरनामिकां॥ म ननध्यानसहितांविवेकात्पुरुषःसदा॥ ४९॥ विवेकीयस्तमात्मानंपुरुषःश्रवणादिना॥ साक्षात्कुर्यात्ससर्वा त्मप्राप्त्याभेदविवर्जितः॥ सर्वाँल्लोकांस्तथाकामान्प्राप्नुयात्स्वात्मबुद्धितः॥५०॥ इदंप्रजापतेर्वाक्यंब्रह्मणःपर मेष्ठिनः॥ सभागतस्यश्रुतवद्देवासुरसभाद्वयं॥ ५१॥ सभायांब्रह्मणोनित्यंदेवादैत्याःसहस्रशः॥ वामदक्षि णभागस्थाब्रह्मणःपरमेष्ठिनः॥ आसतेचण्डनेत्रास्तेपरस्परविरोधिनः॥ ५२॥

तद्धोभयेइत्यादेरूषतुरित्यंतवाक्यस्यब्रह्मविद्यादौर्लभ्यावेदकस्यार्थमाह इदमित्यष्टादशभिः इदंव्याख्यातरूपंप्रजापतिवाक्यंस्वर्गादिस्था नगतंदेवासुराणांसभाद्वयंसमुदायद्वयंश्रुतवत्अश्रृणोदित्यर्थः ॥५१॥ तत्रहेतुतयाइंद्रविरोचनयोःसजातीयानांब्रह्मसभायांसत्त्वमाह स भायामिति यतःप्रजापतेःसभायांदेवादैत्याश्चसहस्रशआसतेतिष्ठंति कीदृशाः परमेष्ठिनोवामदक्षिणभागयोःस्थिताः तत्रासुराणांदक्षिण स्थितिनिर्देशोज्येष्ठत्वात् तथाचश्रुतिः द्वयाहवैप्राजापत्याज्यायांसोऽसुराःकनीयांसोदेवाइति तेषांपरस्परस्यद्वत्त्यज्ञानस्यवक्ष्यमाणेतरे तरवंचकत्वस्यचोपपत्तयेविशेषणद्वयं चंडेत्यादि चंडेऽत्युग्रतेजस्विप्रभावेनेत्राणियेषांतेतथापरस्परंविरोधिनश्च तथाचप्रभुमुखदत्तदृष्टि त्वाद्विरोधित्वाच्चपरस्परस्थितिंतेनजानंतीतिभावः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवानामिति ततइयंवर्णितरूपावाणीब्रह्मणोमुखान्निर्गतासतीतत्सभागतैर्देवैर्देवानांत्रिलोकीस्थानांसमीपेकथिताप्रापितेतियावत् एवम
सुरैरसुराणामिति यतःसापरमपुरुषार्थसाधनस्यप्रकाशिकेत्यर्थः ॥ ५३ ॥ देवेति ततोदेवाधिपइंद्रोदैत्यानांवंचनायतेभ्योगोपनाय
स्वीयान्देवान्वारयामास तथादैत्याधिपोविरोचनोदैत्यान्वारयामास किंकृत्वा यथावैरिणएतांवार्त्तांनजानीयुस्तथायतितव्यमित्युक्त्वा
नकेवलंवारणमेवतौचक्रतुःकिंतुस्वकीयैःसहसंमंत्र्यब्रह्मणःसभांप्रतिजग्मतुश्चेतित्रयाणांसंबंधः ॥ ५४ ॥ ५५ ॥ ५६ ॥ स्वीयैःसहसं

देवानांकथितादेवैरसुराणांतथासुरैः ॥ वार्तेयंब्रह्मणोवक्त्रान्निर्गतास्वार्थकारिणी ॥ ५३ ॥ देवदैत्याधिपौश्रु
त्वाहीमाविंद्रविरोचनौ ॥ वारयामासतुःस्वीयानितरेतरवंचकौ ॥ ५४ ॥ वैरिणोमाविजानंतुवार्त्तामेतांमहा
बलाः ॥ इत्युक्त्वाजग्मतुश्चोभौतदेवब्रह्मणःसभां ॥ ५५ ॥ उभाभ्यामप्यविज्ञातावुभाविंद्रविरोचनौ ॥ स्वकी
यैःसहसंमंत्र्यदेवैश्चैवासुरैस्तथा ॥ ५६ ॥ हंततंवयमात्मानमन्विच्छामोमहाबलाः ॥ यज्ज्ञानात्सकलाँल्लो
कान्कामांश्चापिलभेमहि ॥ ५७ ॥ वयंसर्वेयदातत्रयास्यामोब्रह्मणःसभां ॥ तदैववैरिणःसर्वेत्रिलोकींपरिव
र्जितां ॥ अस्माभिःस्ववशेकुर्युरस्मच्छिद्रगवेषिणः ॥ ५८ ॥ एकेनैवततोस्माकंगंतव्यंयोगुरुर्भवेत् ॥ परेषा
मितिसंचिंत्यराजानौतौविनिर्गतौ ॥ ५९ ॥ बलबुद्ध्यादिसंपन्नौधैर्यवंतौयशस्विनौ ॥ ब्रह्मविद्यार्थिनौदृप्तौ
परस्परजयैषिणौ ॥ समिदादिकरावेतावेककालंप्रजापतिं ॥ ६० ॥

त्रमभिनयति हंतेतित्रिभिः हंतेतिवाक्यारंभे यद्विज्ञानात्सर्वलाभस्तस्यात्मनोज्ञानंमहाबलैर्महोद्यमैरस्माभिःसंपाद्यमित्यर्थः ॥ ५७ ॥
तत्रसर्वेषांगमनंनयुक्तंवृद्धिमिच्छतोमूलमपिनष्टमितिन्यायप्रसंगादित्याशयेनतद्वचनमाह वयमिति यदिसर्वेवयंगच्छेमतदास्मत्त्यक्तांत्रि
लोकींछिद्रान्वेषिणोवैरिणआक्रमेयुरित्यर्थः ॥ ५८ ॥ फलितंदर्शयति एकेनैवेति अस्माकंमध्येतेनैवैकेनगंतव्यंयआगत्यपरेषामगतानां
स्वकीयानांगुरुःशिक्षितोपदेष्टास्यादित्येवंसंमंत्र्यताविंद्रविरोचनाख्यौराजानौदेवानांदैत्यानांचस्वस्वस्थानान्निर्गतावित्यर्थः ॥ ५९ ॥
बलेति प्रजापतिमुपस्थितावितिशेषः समित्प्रभृत्युपायनहस्तौ स्फुटमन्यत् ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घट्टेति यथाशुल्कग्राहिराजपुरुषान्वंचयितुंनिशिप्रस्थितानांवणिजांमार्गविभ्रमेणघट्टकुट्यांनदीतीरवर्तिशुल्कग्राहिकुटीसमीपेप्रभातं स्यात्तादृशंतद्देवासुराणांमुख्ययोस्तयोःप्रजापतिसन्निधिगमनमासीत् अभीप्सितपरस्पराविज्ञानलक्षणवंचनस्यासिद्धेरित्यर्थः ॥ ६१॥ श्रु तौआसंविदानावितिच्छित्वातस्यईषत्संविदंस्नेहाभासंकुर्वंतावित्यर्थंदर्शयन्नाह बुद्धिमंतावितिं कार्यसाधनेकुशलौतौतात्कालिकंकृत्रि

 ममाहार्यंस्नेहंकृत्वाभ्रातृव्यौशत्रूअपिभ्रातृवन्मिलितौसंतौप्रजापतिववंदतुःपप्रच्छतुश्चेतिद्वयोरर्थः ॥६२॥६३॥ भगवानपीति पूर्वजानां मन्वादीनांपूर्वजोभगवान्ब्रह्मापिसर्वाशयवित्तयोर्दोषप्रहाणायद्वात्रिंशद्वत्सरान्कार्यांतरव्यग्रवत्शृण्वन्नप्यशृण्वन्निवासीदिति ॥ ६४ ॥

घट्टकुट्यांप्रभातंतत्तयोरासीन्महात्मनोः॥ युक्तयोर्वंचनेराज्ञोर्देवासुरशिरस्थयोः ॥ ६१ ॥ बुद्धिमंतावुभौकृ त्वातत्रस्नेहंहिकृत्रिमं ॥ ऐक्यंप्राप्याप्यनेकौतावुभौस्वार्थप्रकाशकौ ॥ ६२ ॥ प्रजापतेःपदद्वंद्वंववंदातेसुशो भनौ॥ भ्रातृव्यौभ्रातृवद्भूत्वाविद्यांपप्रच्छतुश्चतौ॥ ६३ ॥ भगवानपिविज्ञाततत्त्वार्थश्चतुराननः॥ अशृण्व न्निवशृण्वन्सतस्थौपूर्वजपूर्वजः ॥ द्वात्रिंशद्वत्सरंकालंव्यग्रःकार्यांतरेष्विव ॥ ६४॥ देवासुराधिपौतत्रसर्व भोगविवर्जितौ॥ अवज्ञातौस्थितौतस्यसमीपेपरमेष्ठिनः ॥ ६५॥ दोषीकश्चिद्यथाराज्ञस्तिष्ठेत्स्निग्धःसमीप गः॥ अवज्ञातःसर्वभोगवर्जितोमुखवीक्षकः॥ ६६॥ भोजनादिक्रियानासीदेतयोःकालयोःक्वचित्॥ दूरा पास्तस्तुललनासंभोगःशोच्यवेषयोः॥ ६७॥ द्वात्रिंशद्वत्सरेकालेदुःखिनोर्ब्रह्मचारिणोः ॥ गतेनुपश्यतोर्वक्त्रं तयोर्ब्रह्माव्यलोकयत्॥ ६८॥

तथाचतयोरानुषंगिकंब्रह्मचर्यमसिद्ध्यदित्याह देवासुराधिपाविति अवज्ञातौउपेक्षारूपामवज्ञांप्राप्तौ ॥ ६५॥ दोषीति यथाराज्ञःस्नि ग्धःस्नेहपात्रभूतोपिकश्चिद्दोषीकृतमहापराधःसदस्युपेक्षितस्तिष्ठेत्तथातौस्थितावित्यर्थः ॥ ६६ ॥ भोजनादीति एतयोरिंद्रविरोचन योर्भोजनक्रियैवकालयोःसायंप्रातराख्ययोर्नासीत्कुतोऽन्यल्ललनादर्शनादिकं यतस्तौशोच्यवेषौ शोच्यत्वंजुगुप्सितत्वमिति ॥ ६७॥ द्वात्रिंशदिति द्वात्रिंशद्वत्सररूपेकालेगतेसतिब्रह्मातयोर्मुखंव्यलोकयत् कीदृशयोस्तयोरनुपश्यतोःकदानुग्रहीष्यतीत्याकारांप्रतीक्षांकु र्वतोः ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुग्रहपरेणप्रजापतिनाकृतंतयोःप्रयोजनप्रश्नमभिनयति किमर्थमिति हेइंद्रविरोचनौयुवांब्रह्मलोकेयुष्मद्योग्यस्थूलभोगहीनेदुःखे नागत्यकिमर्थंवासमकुरुतंकृतवन्तौ ॥ ६९ ॥ एवंगुरुणापृष्टाभ्यांकृतांप्रार्थनांदर्शयति इत्युक्ताविति देवौसुराणामसुराणांचराजानौतौ यआत्मापहतपाप्माइत्यादिश्रौतंप्रजापतिवाक्यमनूद्यतद्वत्पठित्वाएवमूचतुः एवंकथं हेभगवन्भवतासर्वलोकानांकामानांचज्ञानद्वारा दातृत्वेनवर्णितमात्मानंज्ञातुमिच्छंतौसंतौतौप्रसिद्धौआवांबहून्वत्सरान्वासंकृतवंतौस्वःभवावः कीदृशौ भवतावीक्ष्यमाणौसन्निहिताविति यावत् ॥ ७० ॥ ७१ ॥ इत्थंप्रार्थितःप्रजापतिस्ताभ्यांजाग्रत्साक्षिणमात्मानंचक्षुषिस्थितत्वेनोक्तवानित्याह एवमुक्तःसइति ॥ ७२ ॥

किमर्थंवामकुरुतंवासमिंद्रविरोचनौ॥ब्रह्मलोकेत्रदुष्प्रापेसर्वभोगविवर्जिते ॥ ६९ ॥ इत्युक्तौब्रह्मणादेवावूचतुस्तौमहेश्वरं॥ यआत्मेत्यादितद्वाक्यमनूद्यैवमहाधियौ ॥ ७० ॥ एवंभगवताप्रोक्तमात्मानंलोककामदम्॥ इच्छंतौकृतवंतौस्वोवासंतौवत्सराञ्छभौ ॥ वीक्ष्यमाणौब्रह्मचर्यसंयुक्तौशिष्यतांगतौ ॥ ७१ ॥ एवमुक्तःसभगवान्स्मितवक्रःप्रजापतिः॥ ऊचेजागरणावस्थमात्मानंचक्षुषिस्थितं॥ ७२॥ यएषदृश्यतेशास्त्रबुद्ध्यासर्वैश्चचक्षुषि॥ पुमानात्मायममृतोनिर्भयंब्रह्मनिर्गुणं॥ ७३ ॥ एवमुक्तेमहेशानमुभाविंद्रविरोचनौ॥ ऊचतुर्भ्रांतिमापन्नावशुद्धाशयसंयुतौ॥ ७४॥

भगवद्वाक्यमभिनयति यएषइति यएषप्रत्यक्षेणात्यंतंसन्निहितःपुमान्सर्वैरधिकारिभिःशास्त्रदृष्ट्याशास्त्रसंस्कृतयाप्रत्यक्प्रवणवृत्त्याचक्षुषिदृश्यतेअपगतावरणःक्रियतेअयमेवात्माऽमृतत्वादिलक्षणःअद्वयत्वेननिर्भयंयन्निर्गुणंब्रह्मतदेकरूपश्चेतिप्रजापतिवाक्यतात्पर्यार्थः ॥ ७३ ॥ यथामधुरोपिगुडःपित्तदूषितरसनैःकटुत्वेनगृह्यतेतथाप्रजापतिवाक्यंसत्परमपिताभ्यांदुष्कृताविद्यासंस्कारदूषितचित्ताभ्यामन्यपरत्वेनगृहीतमितिदर्शयति एवमुक्तेमहेशानमिति एवंब्रह्मणोक्तेसतितंमहेशानंप्रतितावित्थमूचतुः कीदृशौ अशुद्धैर्दुष्कृतगोपितैराशयैर्विपर्ययसंस्कारैःसंयुतचित्तत्वाद्भ्रांतिमापन्नौ ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तयोर्भ्रांतिप्रयुक्तंवाक्यमभिनयति छायात्मेतिद्वाभ्यां छायादेहप्रतिबिंबंतद्रूपआत्माचक्षुर्गोलकस्थितत्वेनभवताप्रोक्तः अस्माभिःस्वबु
द्धिबलेनतस्यतत्त्वमन्यत्रापिज्ञायते यथादर्पणेजलेखड्गादौचएषछायात्मादृश्यते ॥७५॥ दृश्यतेइति हेभगवन्भवताइत्युक्तं इतिकिं यो
दक्षिणेचक्षुषिदृश्यतेसआत्मेति तत्तुद्रष्टुरभिप्रायेणनभवतियतःस्वयंछायांदिदृक्षताऽऽदर्शादिकंविनावर्त्तमानेनस्वचक्षुषिनैवदृश्यतेकिंत्वा
दर्शादावेवदृश्यते एवंसतिस्वोत्प्रेक्षितोदाहरणगताश्छायात्मानःपरानपेक्षाःकिंगृह्येरन्किंवातत्रभवताभवतांनिदर्शितत्वाच्चक्षुर्वृत्तिरेवच्छा
यात्मायाह्यइत्याशयेनपृच्छतः कतमस्तेषुसंस्मृतइति तेषुआदर्शादिचक्षुरंतोपाधिभिन्नेषुच्छायात्मसुमंध्येकतमःसम्यक्त्वेनस्मृतइतितद

छायात्मायंत्वयाप्रोक्तःपुमांश्चक्षुषिसंश्रितः॥ आदर्शेवाप्सुवान्यत्रसएषपरिदृश्यते॥ ७५॥ दृश्यतेयइतिप्रा
हभवांश्चक्षुषिदक्षिणे॥ स्वचक्षुषिस्वयंचायंदृश्यतेनैवकेनचित् ॥ विनाऽऽदर्शादिकंतस्मात्कतमस्तेषुसंस्मृतः
॥ ७६॥ इत्युक्तेभगवान्प्राहसर्वत्रैवेतिसप्रभुः ॥ आनंदात्मास्वयंज्योतिर्यतःसर्वत्रसंस्फुरेत् ॥ ७७॥ स्फुरण
स्यैवचात्मत्वमुक्त्वानंदैकरूपिणः ॥ पूर्ववद्ब्रह्मसंबोधोनाभूदितिविचिंतयन् ॥ इदमाहपुनस्तौसब्रह्मालोकपि
तामहः॥ ७८॥ नीरपूर्णेशरावेस्मिन्नात्मानमवलोक्यहि॥ आगम्यचपुनर्मांभोब्रूतमिंद्रविरोचनौ॥ ७९॥

र्थः ॥ ७६ ॥ इत्युक्तइति इतिइत्थंताभ्यांपांडित्याभिमानेनप्रोक्तेपिभगवान्ब्रह्मातयोर्वैयात्यमुपेक्ष्यस्वानुभवानुसारेणसर्वत्रैवेत्याहतदु
पपन्नमेव यतआनंदरूपश्चिदात्मासर्वत्रोपाधिषुसाक्षिरूपेणभात्येवेत्यर्थः ॥ ७७ ॥ अथतयोरुदकशरावेप्रतिबिंबदर्शनोपदेशेप्रजापतेरा
शयंदर्शयति स्फुरणस्यैवेतिनवभिः आनंदरूपिणःस्फुरणस्यैवात्मतामुक्त्वाप्यनयोर्ब्रह्मबोधःप्रथमोपदेशइवनजातइतिचिंतयन्सन्ब्रह्मा
इदमाह इदंकिं भोइंद्रविरोचनौयुवांनीरपूर्णेशरावेमृन्मयपात्रेआत्मानंशरीरमवलोक्यमामागम्यचब्रूतंयज्ज्ञातंतन्निवेदयतमितिद्वयो ॥ ६ ॥
रर्थः ॥ ७८ ॥ ७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यभिप्रायवानिति कीदृशोब्रह्मा इत्यभिप्रायवान् इतिइत्थंविधेनाभिप्रायेणविशिष्टः इतिकिं छायायाउपाधिभेदेनपरिणामित्वादनात्मत्वंस्पष्टंसाक्षिणस्तुसर्वानुगतत्वेनतदुचितमितिविशेषेसत्यप्येतौमोहेनप्रमादलक्षणेनबालिश्येनसदुपदेशपराङ्मुखत्वलक्षणेनतथापांडित्यगर्वेणस्पर्द्धयाचदूषितचित्तत्वान्मदुक्तंचक्षुषिस्थितंसाक्षिरूपमात्मानमविज्ञायप्रत्युतविपरीतंछायैवात्मेतिगृहीत्वाएवंदृष्टवंतौस्योत्प्रेक्षितमदुक्तयोर्यात्मत्वसंदेहरूपंबोधंप्राप्ताविति त्रयाणामर्थः ॥ ८० ॥ ८१ ॥ ८२ ॥ अनयोरेषाविपरीतमतिःसाक्षाद्भ्रमत्वनिवेदनेननपरिहर्त्तव्यामानक्षयेणोत्तरोपदेशानर्हतापत्तेरित्याह विपरीतमिति यन्मयाईरितंतद्युवाभ्यांविपरीतंगृहीतमितिमयाकथितेसत्येताविंद्रविरोचनौ

इत्यभिप्रायवांश्छायाभेदंगच्छतिसर्वतः॥ नात्मनःस्फुरणंक्वापिबहिरंतश्चसर्वदा ॥ ८० ॥ एतौभ्रांतौमया प्रोक्तमात्मानंचक्षुषिस्थितं॥ स्फुरणैकस्वभावंतमविज्ञायातिमोहितौ ॥ ८१ ॥ छायात्मेतिगृहीत्वैवंदृष्टवंतौ हिबालिशौ॥ सर्वदापंडितंमन्यौस्पर्द्धमानौपरस्परम्॥ ८२॥ विपरीतंयुवाभ्यांतद्गृहीतंयन्मयेरितं ॥ इत्युक्ते लज्जयाखिन्नचित्तौमूढतमौपुनः॥ ८३॥ नकिंचिदवगच्छेतामुक्तमिंद्रविरोचनौ॥ तस्मादुपायतस्त्वेतौबोधयिष्यामिदुर्मदौ ॥ ८४ ॥ यादृशोत्रभवेत्शिष्योयद्बुद्धिःसोपितादृशः ॥ तद्बुद्धिश्चगुरुर्भूत्वाबोधयेत्तंसदाबुधः॥ ८५॥ इतिबुद्धिंसमास्थायशिष्यप्रियहितार्थकृत्॥ उक्तवान्भगवान्धातासर्वत्रैवेतितौप्रति॥ शरावेवीक्षणंतद्वत्स्वात्मनःस्फुरणात्मनः॥ ८६॥

मानक्षयप्रयुक्तलज्जयाखिन्नचित्तौसंतौकिंचिदपिमदुक्तंनबुद्ध्येतांतस्मात्केनचिदुपायेनोदाहरणोपन्यासरूपेणैवबोधनीयावितिद्वयोरर्थः ॥८३॥८४॥ गुरोःशिष्यस्वभावानुसरणस्यन्याय्यतामाह यादृशइति शिष्याःसत्वादिगुणैस्त्रिविधाः उत्तममध्यममंदभेदात् तेपिबुद्धेस्तीक्ष्णतामध्यतामृदुताभिःप्रत्येकंत्रिविधाः तत्रपांडित्यंकार्यसाधनमितिन्यायेनचिकिर्षितशिष्यबोधरूपंकार्यंसिषाधयिषतागुरुणाशिष्यानुरूपमाकारादिकंतद्बुद्ध्यनुरोधिनीबुद्धिश्चाहार्यज्ञानावगाहिनीधारणीयेत्यर्थः ॥ ८५॥ प्रजापतेस्तात्पर्यप्रदर्शनमुपसंहरति इतिबुद्धिमिति एवंविधाभिप्रायमालंब्यैवप्रजापतिस्ताविंद्रविरोचनौप्रतिसर्वत्रैवेत्याकारकमुत्तरंदत्तवान्नतुकिंभाम्यतोमयाप्रत्यग्वस्तूक्तमित्येवमुक्तवान् तद्वत्तेनैवाभिप्रायेणशरावेस्वात्मनोदर्शनमप्युक्तवानित्यर्थः ॥ ८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः किंवृत्तमित्याकांक्षायामाह ईक्षित्वेति ततस्तौगत्वाशरावेआत्मानमीक्षित्वाचसमागतौविदितौप्रजापतिनाद्वाःस्थमुखात्ज्ञातौसंतौप्रजापतेःसमीपेस्थितौ ततःप्रजापतिरित्थंतावपृच्छत् इत्थंकथं युवामत्रशरावेप्रतिबिंबदर्शनेकिंतत्त्वंज्ञातवंतावित्यर्थः ॥ ८७ ॥ ततइंद्रविरोचनौस्वाभिप्रायंपित्रेबालवत्प्रजापतयेनिवेदितवंतावित्याह देवासुराधिपाविति ॥ ८८ ॥ आवाभ्यामात्मसंज्ञोदेहएवाऽऽपादमामस्तकंच

॥ ७ ॥ विलोकितोयोब्रह्मचर्येणनखादिमानित्याकारंतयोर्वचनंदर्शयति आपादेति ॥ ८९ ॥ एवंविधंतयोर्भ्रांतिरूपकंवाक्यंश्रुत्वाआयासवैफल्येनखिन्नचेताःप्रजापतिर्वक्ष्यमाणविचाररूपंभाषणंतावुद्दिश्यमनसैवाकरोदित्याह एवमुक्तइति ॥ ९० ॥ प्रजापतिविचारमभिनय

ईक्षित्वाविदितौगत्वाब्रह्माणंसमुपस्थितौ ॥ ब्रह्मातौपुनरेवाहदृष्टवंतौकिमत्रभोः ॥ ८७ ॥ देवासुराधिपावेवमुक्तौब्रह्माणमूचतुः ॥ पितरंबालकौयद्वत्संमुग्धौकलभाषिणौ ॥ ८८ ॥ आपादमस्तकंदेहोनखकेशादिसंयुतः ॥ आत्माभिधःशरावेस्मिन्नावाभ्यामवलोकितः ॥ ८९ ॥ एवमुक्तःखिन्नचेताब्रह्मातौपुनरब्रवीत् ॥ विचारयन्निजेचित्तेशिष्यप्रियहितार्थकृत् ॥ ९० ॥ अनयोर्बुद्धिमोहोयंविद्यतेसुमहानिह ॥ यावेतौसर्वथैवैतदन्यथैवावगच्छतः ॥ ९१ ॥ छायात्मास्वीकृतःपूर्वंदृश्यतेचक्षुषीतिहि ॥ कीर्तितेपुनरप्येषसर्वत्रैवेतिचेरिते ॥ नीरेविलोकनात्तद्वद्देहआत्मेतिनिश्चितः ॥ ९२ ॥ आत्मच्छायांपरित्यज्यभिन्नादर्शादिसंश्रयां ॥ एवंविचार्यदुश्चित्तौदेहात्मत्वमुपागतौ ॥ ९३ ॥

ति अनयोरित्यष्टभिः अनयोरिंद्रविरोचनयोर्बुद्धिमोहकोदोषःसुमहान्विचित्ररूपोयद्बलादेतावेतन्मदुक्तंसर्वथासूक्ष्ममध्यमृदुप्रकारैःप्रवृत्तमप्यन्यथाविपरीतार्थपरतयैवावगच्छतोजानीतः ॥ ९१ ॥ एतदेवस्फुटयति छायात्मेति हियतःप्रथमंमयासूक्ष्मरीत्याचक्षुषिदृश्यतेइतिकीर्तितेसतिएताभ्यांछायात्मागृहीतःपुनरपिमध्यविधयासर्वत्रएतावतिवचनेमयाईरितेसत्येषच्छायात्मैवगृहीतःअथमृदुप्रकारेनीरविलोकनेउपदिष्टेसतिदेहआत्मत्वेनैताभ्यांनिश्चितइत्यर्थः ॥ ९२ ॥ परंतुएतावन्नीरविलोकनेफलंलब्धंयत्परिणामित्वदोषालोचनेनच्छायायामात्मबुद्धिपरित्यज्यततःप्रतीचिदेहआत्मबुद्धेरवतारइत्याह आत्मच्छायामितित्रिभिः एतौदुश्चित्तावेवंविचारेणभिन्नेष्वादर्शादिषुस्थितामात्मनोदेहस्यच्छायांपरित्यज्यदेहआत्मत्वमुपागतौनिश्चितवंतौ ॥ ९३ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपदोक्तंविचारप्रकारमभिनयति दृश्यतइति अयंदेहोभेदविवर्जितएवातएवैकश्वस्वात्मनोद्रष्टुर्देहात्परस्यदेहस्यचक्षुषिदर्पणेअंब्वादौज लादौचदृश्यतेतत्रतत्रप्रतिबिंबस्थानेषुयाछायासातुपरिमाणरूपादिभिर्भेदवतीस्यात्ततोदेहएवात्मायतोनेदृशश्छायावद्भेदशालीनभवती तिद्वयोरर्थः॥ ९४॥ ९५॥ अनुग्रहेणतयोर्देहादपिविवेकायोपायांतरंप्रजापतिश्चिंतयति छायेतित्रिभिः यथाआभ्यामिंद्रविरोचनाभ्यांछा यायांतत्त्वस्यआत्मत्वस्यपरित्यागःकृतः कुतः भेदस्यनानारूपत्वस्ययादृष्टिःप्रकारतयावगाहनंतच्छालिनोविलोकनाद्विशिष्टज्ञानात् त

दृश्यतेसर्वदादेहःस्वात्मनःपरचक्षुषि॥ आदर्शेचतथांब्वादावेकोभेदविवर्जितः॥९४॥ तत्रतत्रतुयाच्छाया सास्याद्भेदवतीसदा॥ परिमाणादिवैषम्यादात्मादेहश्चनेदृशः ॥ ९५ ॥ छायातत्त्वपरित्यागोभेददृष्टिविलो कनात्॥ आभ्यांकृतोयथातद्वत्कारयिष्येवपुष्यपि॥ ९६ ॥ नखकेशादिसहितंमलिनंचकुवाससं ॥ दृष्टवंतौ पुरादेहमेतौनीरशरावके॥ ९७॥ नखकेशादिरहिताविदानींस्नानसंयुतौ ॥ निरीक्ष्यभेदतोदेहआत्मत्वंत्यक्ष्य तस्त्विमौ॥ ९८॥ एवंविचार्यभगवानिदमाहप्रजापतिः॥ स्नातौसुवसनौभूत्वाकृत्तकेशनखावपि ॥ साध्व लंकारसंपन्नौयुवामिंद्रविरोचनौ॥ ९९॥ नीरपूर्णेशरावेस्मिन्नात्मानमभिवीक्ष्यहि॥ पुनरागत्यमांब्रूतंयुवा भ्यांदृश्यतेहियत्॥ १००॥

थादेहेप्यात्मत्वस्यपरित्यागमेताभ्यांकारयिष्यामीत्यर्थः ॥ ९६ ॥ कथमित्यपेक्षायामाह नखेति पूर्वमेताभ्यांब्रह्मचर्येणनखादिशाली देहोदृष्टइदानींक्षौरस्नानाभ्यांनखादिरहितौसंतौदेहंपश्येतांततःपूर्वावस्थातोभेदंनिरीक्ष्यपरिणामिनिदेहेआत्मभ्रमंत्यक्ष्यतस्त्यक्तंकरिष्य तइतिद्वयोरर्थः ॥ ९७ ॥९८॥ एवमालोच्यप्रजापतिनादत्तांतयोःपुनर्नीरविलोकनाज्ञामभिनयति एवंविचार्येति कृत्तंछिन्नंकेशादिकं याभ्यांतौतथा स्फुटमन्यद्द्वयोः ॥ ९९ ॥ १०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तयोस्तुदोषेणायमप्युपायःफलविपर्यासंनीतोदेहात्मदृष्टेरेवदृढीकरणादितिदर्शयति एवमुक्तइति तथास्नानादिपूर्वकंनीरशरावेआत्मदर्शनंकृत्वातेनचसुस्थितंदृढंदेहगतमात्मत्वंगृहीत्वापुनःप्रजापतिसमीपमेत्यइदमूचतुः इदंकिं यथाचदेहएवावयोरात्माप्रजायतेसिद्ध्यतितथा आवाभ्यांनीरपात्रेआत्मावीक्षितइतिद्वयोरर्थः ॥ १०१ ॥ १०२ ॥ एतत्श्रुत्वाप्रजापतेरुपायांतरसिद्ध्यर्थांचिंतामवतारयति प्रजापतिरिति तयोरज्ञत्वंभ्रमदार्ढ्यंपुनरपिदृष्ट्वाइदंमनस्येवचिंतितवान् ॥ १०३ ॥ इदंपदोक्तंप्रजापतिविचारंवर्णयति अन्वयेत्यष्टभिः अन्वयआत्मनःसर्वत्रानुगमोव्यतिरेकोदृश्यानामागमापायशालितातयोर्दर्शनंनैतौशिष्यौप्रत्यात्मबोधनंमयाप्रारब्धमित्यर्थः ॥ १०४ ॥ अन्य

॥८॥

एवमुक्तेतथाकृत्वापुनरेत्यप्रजापतिम्॥ ऊचतुर्देहआत्मत्वंसुस्थितंपरिगृह्यतौ ॥१०१ ॥ यथायमावयोरात्मादेहएवप्रजायते॥ तथानीरशरावेस्मिन्नावाभ्यामभिवीक्षितः ॥ १०२ ॥ प्रजापतिःपुनर्ज्ञात्वातयोरज्ञत्वमीश्वरः॥ इदंविचारयामासमनसैवमहामनाः॥ १०३ ॥ अन्वयव्यतिरेकाभ्यामात्मनःप्रतिपादनं ॥ मयैतयोरुपक्रांतंशिष्ययोरल्पमेधसोः॥ १०४॥ अन्यत्रैवात्रदेहस्यनखकेशादिभिःकृतः॥ सत्वेनवाप्यसत्वेनतथाताभ्यामनिश्चितः॥ प्रत्युतात्मैवदेहोयंविशेषादवधारितः॥ १०५॥ देहआत्मनियद्यद्धिक्रियतेसंस्क्रियादिकम्॥ छायात्मनोभवेत्तत्तन्नस्वतोऽस्यास्तिकिंचन ॥ १०६॥

त्रैवेति तथात्रनीरविलोकनोदाहरणेदेहस्यधर्मभूतैर्नखकेशादिभिःक्षौरपूर्वोत्तरकालयोःसत्वासत्वशालितयादर्शितैरात्मादेहादन्यत्रैवकृतःस्फुटंभिन्नतयानिरूपितइतियावत् परंतुएताभ्यांमच्छिष्याभ्यांतथादेहात्पृथक्त्वेनानिश्चितोनज्ञातःप्रत्युतविपरीतमयंदेहएवात्मत्वेनावधारितइत्यर्थः ॥ १०५ ॥ तथापिपरिगृहीतयोरनयोरनुपेक्ष्यत्वादिदानीमेवंक्रियतेयदेताभ्यांदेहधर्माणांछायायामारोपितत्वंविज्ञायच्छायायाआत्मत्वंविसृज्यदेहात्मत्वंगृहीतंतथायदीयाअमरत्वादिधर्मादेहेसमारोप्यंतेसआत्मेतिबोधयितुमात्मधर्मानमरत्वादीन्कीर्त्तयिष्यामीतिचिंतयति देहइत्यादिना संस्क्रियाचंदनलेपादिरूपाआदिपदेनमालिन्यग्रहः एतत्सर्वंछायास्वरूपेतदेवभवतियद्देहेक्रियतेनतुकिंचिदपिस्वतःस्वभावतोभवतीत्यर्थः ॥ १०६ ॥ ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मेति ततोवास्तवसंस्काराद्याश्रयत्वाद्देहएवात्माभवतिनच्छायायतःसाअनुकारस्यआरोपितपरधर्मसेवनस्यकर्त्री तथासुखसाक्षा त्कारलक्षणंफलमपिदेहेसत्येवदृश्यतेनच्छायायामित्येवंदेहोत्कर्षावगाहिनींबुद्धिसमाश्रित्यैताभ्यांदेहात्मतादृढास्वीकृताअतएनंतर्कंसमा लंब्यवर्त्तमानामनयोर्बुद्धिंसमाश्रित्यानुसृत्याप्यहमेतौशिष्यौदेहात्मतायाःप्रच्याव्यचलितौकृत्वास्फुरणरूपमुख्यात्माभिमुख्यंनयामी तिद्वयोरर्थः ॥१०७॥१०८॥ कथमित्यपेक्षायामाह देहइति यतोदेहःस्वभावतोजन्मादिविकारैर्भयेनपरिच्छेदेनचविशिष्टोदृश्यतेतस्या मरत्वादिकंचयत्तादात्म्यारोपेणभातितत्स्फुरणमप्युभाभ्यामेताभ्यांसर्वेषुमदुपदेशपर्यायेषुदृष्टमेव तत्रहेतुगर्भंविशेषणंदेहादिसंश्रयमिति

आत्माततोत्रदेहोयंनच्छायात्मानुकारकृत् ॥ देहेसतिचलोकेस्मिन्सुखंभवतिदेहिनां ॥ १०७ ॥ इतिबुद्धिंस माश्रित्यदेहआभ्यांदृढात्मता ॥ स्वीकृतातत्तयोर्बुद्धिंसमाश्रित्याप्यहंपुनः ॥ देहात्मतायाःप्रच्याव्यनयामिस्फु रणंप्रति ॥ १०८ ॥ देहोयंम्रियतेस्थूलोयतोजन्मादिधर्मवान् ॥ भयंचवैरिणोगच्छेत्परिच्छिन्नश्चदृश्यते ॥ १०९॥ अपरिच्छिन्नममृतमभयंस्फुरणंचयत् ॥ उभाभ्यांसर्वपर्यायदृष्टंदेहादिसंश्रयं ॥ ११० ॥ अतोधर्मा निमान्वक्ष्येदेहेऽसंभावितान्सदा ॥ वीक्ष्यतान्देहआत्मत्वंत्यक्ष्यतःस्वयमेवहि ॥ १११ ॥ इत्थंविचार्यतावूचेएष आत्माऽमृतोभयः ॥ ब्रह्मयत्सर्वपर्यायैर्युवाभ्यामनुभूयते ॥ ११२ ॥

देहादिष्वाध्यासिकसंबंधेनानुगतमितितदर्थः नहिस्फुरणभावंविनाकिंचिदपिभातीत्यर्थः ॥ १०९ ॥ ११० ॥ अतइति अतश्छायादेह विवेकन्यायस्यदेहस्फुरणयोर्योजयितुंशक्यत्वात् अधुनादेहेऽसंभावितानारोपमंतरानुपपद्यमानानमृतत्वादिरूपान्स्फुरणस्यधर्मान्वक्ष्ये प्रतिपादयामि यान्धर्मान्वीक्ष्यस्फुरणस्यस्वाभाविकानालोच्यएतौदेहेदृष्टमात्मत्वंत्यक्ष्यतःप्रहास्यतइत्यर्थः ॥ १११ ॥ एवंविचार्यप्रजा पतिनाप्रयुक्तंवाक्यमभिनयति इत्थमिति तौप्रतिऊचेउक्तवान्प्रजापतिः किमूचेइत्यतआह एषइत्यादि एषस्फुरणरूपआत्मामरणभय परिच्छेदैर्हीनोयतआत्मनःस्फुरणलक्षणंस्वरूपंसर्वैर्मदुपदेशक्रमैर्युवाभ्यामनुभूतमिवेतिशेषः तस्यविवेकेनाविज्ञानादित्यर्थः ॥११२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषोपिप्रजापत्युपदेशस्तयोर्देहात्मतामेवाद्रढयत् नचदेहेऽमृतत्वादीनामनुपपत्तिरुपायविशेषैस्तेषामपिताभ्यांसाध्यत्वस्यमन्यमानत्वा दितिदर्शयति एवमुक्ताविति तेनप्रजापतिनाएवंपुनरुक्तावपिप्रभूदेवासुरराजौदेहनिष्ठमात्मत्वंसर्वथैवप्रतिपन्नौनिश्चितवंतौ ह्रियतस्त स्यदेहस्यामृतत्वादिकमेवंवक्ष्यमाणप्रकारेणतौमेनातेस्वीचक्रतुरित्यर्थः ॥ ११२ ॥ ताभ्यांदेहात्मवादेप्रजापतिवाक्यानांयथासमन्वयः

कृतस्तंप्रकारंवर्णयति रसायनादयइत्यूनविंशतिश्लोकैः जरारोगहरमौषधंरसायनं तथाचविश्वप्रकाशः रसायनंविडंगेस्याज्जराव्याधि जिदौषधाविति आदिपदेनमंत्रकल्पादीनांग्रहः एतेउपायादेहस्यामृतत्वहेतवःसंति यतस्तैरुपायैरयंदेहोजरादिरहितोभवेत् अतोरसाय

एवमुक्तावुभौतेनप्रभूइंद्रविरोचनौ॥ प्रतिपन्नौपुनर्देहआत्मत्वंसर्वथैवतु॥ अमृतत्वादिकंतस्यमेनातेएवमे वहि॥ ११३॥ रसायनादयःसंतिदेहस्यामृतताकराः॥ उपायास्तैरयंदेहोजरामरणवर्जितः॥ ११४॥ भवेदतोऽ मृतत्वंस्यादस्यदेहस्यसर्वथा॥ तदर्थंततएवैषयत्नःकार्योमहात्मभिः॥ ११५॥ अमृतोनभयंगच्छेद्दैर्यादिभ्यः कथंचन॥ मृतिहेतोर्यतःप्रोक्तंभयंसर्वशरीरिणां ॥ ११६ ॥ अभयश्चभवेद्ब्रह्मयोगौषधनिषेवणात् ॥ पुमा न्भवेन्मृगोप्यश्वोहस्तीवामहिषःपुमान्॥ समहान्पर्वताकारःपर्वतोवाक्षणादयं॥ ११७॥ आत्माततोत्रदेहो यंसर्वपापविवर्जितः॥ विजरश्चविमृत्युश्चभवेदेषउपायतः॥ ११८॥

नाद्युपायैरमृतत्वमस्यस्थूलस्यापिदेहस्यसंभवतिततइहसंभवादेवतदर्थममृतत्वार्थंयत्नउक्तरूपःकार्यइतिद्वयोरर्थः ॥ ११४ ॥ ११५ ॥ अमृतत्वसिद्धौत्वभयत्वमर्थादेवसिद्ध्यतिनहिमृतिहेत्वभावेभयंयुज्यतेइत्याह अमृतइति ॥ ११६ ॥ ब्रह्मत्वंत्वस्यदेहस्याभयत्वेनबोध्यं बृहिधातूक्तवृद्धेःसंकोचाभावरूपत्वात्संकोचस्यचभयनिमित्तकताप्रसिद्धेः अथवानानारूपधारणसामर्थ्यरूपावृद्धिस्तदर्थः सापिसंभव तियोगौषधसेवाबलेनपुरुषमृगाश्वहस्तिमहिषादिरूपाणांपुरुषत्वेपिपर्वतसमाकारत्वस्यप्रसिद्धपर्वतरूपस्यवाधारयितुंशक्यत्वादित्याह अभयश्चेति ॥ ११७ ॥ उपक्रमेप्रजापत्युक्तलक्षणानामपिसंभवादयंदेहएवात्मेत्याह आत्मेति उपायतोयोगादिरूपान्निष्पापत्वादिक मप्यस्यसंभवतीत्यर्थः ॥ ११८ ॥ ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जरादिराहित्येविशोकत्वंमंत्रादिबलात्क्षुधादिराहित्यंचभवतीत्याह विशोकइति ॥ ११९ ॥ विजिज्ञासितव्यइतिपदेज्ञाधातुनाकृतिर्लक्ष्यतेसर्वलोककामाप्तिरूपफलसमभिव्याहारादितिदर्शयति एवंभूतमिति एवंभूतमस्रतत्वादिशालिनंदेहंयःकुर्यात्सस्वबलेनसर्वान्लोकान्कामांश्चजयेदित्यर्थः ॥ १२० ॥ चक्षुषिनीरशरावेप्रतिबिंबदर्शनोपदेशेनचप्रजापतिनादेहस्यैवनित्यत्वादिकंदृष्टांतेनोक्तमितितयोराशयंवर्णयति छायादीति छायायाआदिपदग्राह्यतत्कारणस्यचदर्शनाद्दुदाहरणाद्देहस्यमरणादिवर्जितत्वमेवप्रजापतिनोक्तमित्यर्थः ॥ १२१ ॥ कथमित्यपेक्षायांतदुपपादयति शस्त्रेति यथाशस्त्रादिप्रहारैर्नाशःपापंशोकश्चएतेपदार्थाश्छायायांनभवंतितथादेहेपिय

विशोकश्चभवेन्नित्यंजरामरणवर्जनात् ॥ क्षुत्पिपासादिरहितोमंत्रौषधबलादपि ॥ ११९ ॥ एवंभूतंयआत्मानंदेहंकुर्यात्पुमानिह ॥ सर्वान्लोकांस्तथाकामान्सआप्नोतिनसंशयः ॥ १२० ॥ छायादिदर्शनादात्मादेहोमरणवर्जितः ॥ पापशोकभयाद्यैश्वरहितोब्रह्मणेरितः ॥ १२१ ॥ शस्त्राद्यैर्नहिच्छायाविनश्यतिकदाचन ॥ नपापंचनशोकश्चभयंनास्याश्चविद्यते ॥ १२२ ॥ वर्द्धन्तीवभवेदेषासर्वदाप्रातरादिषु ॥ देहोपिचतथैवायंसर्वेषामिहदेहिनाम् ॥ १२३ ॥ हेतुनाशाद्यथाच्छायानाशमायात्यनश्वरी ॥ हेतुनाशात्तथादेहोनाशमायात्यनश्वरः ॥ १२४ ॥ हेतुर्यथात्मादेहोयंछायायाःपरिकीर्तितः ॥ देहस्यापितथाहेतुःकीर्तितंधातुसप्तकं ॥ १२५ ॥ दोषत्रयस्यसंक्षोभाद्वाह्यांतरनिमित्ततः ॥ विनाशयेदिमंदेहंसंक्षुब्धंधातुसप्तकम् ॥ १२६ ॥

थानस्युस्तथायतितव्यमित्यर्थः ॥ १२१ ॥ वर्द्धंतीवेति यथाचपूर्वाह्णेपराह्णेचच्छायावृद्धिंयातितथायोवर्द्धतेसदेहआत्मेतिदर्शितमित्यर्थः ॥ १२३ ॥ हेत्विति यथाचच्छायायाःस्वभावतोविनाशहीनायानाशोहेतुनाशोपाधिकस्तथादेहस्यापिबोध्यइत्यर्थः ॥ १२४ ॥ दृष्टांतेदार्ष्टांतिकेचहेतुत्वंदर्शयति हेतुर्यथेति यथाछायायाःकारणमात्मत्वेनप्रसिद्धोदेहस्तथादेहस्यकारणंत्वगसृगादिधातूनांसप्तकमित्यर्थः ॥ १२५ ॥ दोषेति तच्चधातुसप्तकंप्रहाररोगाद्यैर्वाह्यांतरनिमित्तैःकफवातपित्तानांक्षोभेसतिसंक्षुब्धमन्यथाभावंगतंसत्शरीरंविनाशयतीत्यर्थः ॥ १२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाचबिंबस्थैर्येणच्छायायाःस्थैर्यंभवतितथामंत्रौषधादिसेवयाप्रहारादीनांप्रतिबंधेकृतेसतिकफादिक्षोभाभावेनधातुसप्तकस्यस्थैर्यं संपाद्यमित्याह मंत्रौषधादीतिद्वाभ्यां निगदव्याख्यातंद्वयं ॥ १२७ ॥ १२८ ॥ ततोदेहस्यामृतत्वादिकंस्वयमेवसिद्ध्यतीत्याह यदेति ॥ १२९ ॥ योगादिनासिद्धदेहस्यदाहाद्ययोग्यतांस्फुटयति जलवदितित्रिभिः स्पष्टंद्वयं ॥ १३० ॥ १३१ ॥ पार्थिवादिधारणाभिर्वसिष्ठसंहिताद्युक्ताभिःशरीरस्यतत्तद्भूतसादृश्यमपितस्यामरतादिप्रयोजकमित्याह पंचभूतैरिति ॥ १३२ ॥ भूतसाम्येसतिफलद्वयंभवति

मंत्रौषधादिसेवातोनिमित्तप्रतिबंधनात्॥ वातपित्तकफाःक्षोभंनगच्छंतिकदाचन॥ १२७॥ तेषांक्षोभंविनानापिशस्त्राग्न्यादिसमागमः॥ त्वगादयोपिनक्षोभंव्रजंतीहकदाचन॥ १२८॥ यदानक्षोभमायांतित्वगाद्याःसप्तधातवः ॥ देहनाशस्तदानस्याद्दाहच्छेदभिदादिना ॥ १२९॥ जलवद्वह्निमध्येस्यात्शीतलोयंशरीरिणः॥ मंत्रौषधादिसिद्धस्यदेहोनीरेतथैवच॥ १३०॥ पाषाणवच्चभूमौस्याद्भूसमोनीरवच्चवा॥ वायौवायुसमस्तद्वद्गगनेगगनोपमः॥ १३१॥ पंचभूतैश्चसादृश्यंभूतानांधारणादिभिः॥ प्रयातिततएवायंशस्त्रैरपिनभिद्यते॥ १३२॥ बाणादीनांसहस्राणिभिंद्युर्यद्वज्जलादिकं ॥ भेदेपिचतथैवस्याद्देहःसिद्धस्यसर्वदा ॥ १३३॥ इत्यादिकुधियाविष्टौदृष्टशास्त्रविमोहितौ॥ देहस्यैवात्मतांसम्यग्बुबुधातेउभावपि॥ १३४॥ बुध्वादेहात्मतांदुष्टावुभाविंद्रविरोचनौ॥ प्रसन्नमानसौभूत्वाजग्मतुर्ब्रह्मणोगृहात्॥ १३ ॥ प्रजापतिंनमस्कृत्यकृतकृत्यौमहाबलौ॥ तावुभावननुज्ञातौब्रह्मणामौनिनाततः॥ १३६॥

शस्त्राद्यैरभेदोवाभेदेसतिपुनस्तथाभावोवेत्याह बाणादीनामिति यथाजलादिकंबाणाद्यैर्भिद्यमानंपुनस्तथाभवेत्तथायोगसिद्धस्यदेहोपीत्यर्थः ॥ १३३ ॥ एतादृशकुबुद्धियुक्तौतौदेहात्मत्वंदृढीकृतवंतावित्याह इत्यादीति दृष्टशास्त्रमर्थशास्त्रंकामशास्त्रंचतेनदूषितचित्ताविति ॥ १३४॥ बुध्वेति दुष्टौदूषितचित्तौतावेवंदेहात्मतांबुध्वाकृतकृत्यमानिनौप्रजापतिंनमस्कृत्यतेनप्रजापतिनामौनस्थितेनाननुज्ञातावेवब्रह्मणोगृहाज्जग्मतुःप्रतस्थतुरितिद्वयोरर्थः ॥ १३५ ॥ १३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्यांताविति तौनिर्गच्छंतौविलोक्यब्रह्माइदमाह इदंकिं इमौदेवासुरपतीमानस्पर्धामदैर्दूषितौदेहएवात्मत्वंविज्ञायनिर्यातौगतौअहोइ तिद्वयोरर्थः ॥ १३७ ॥ १३८ ॥ अनयोरिति अनयोर्निवारणंनकर्त्तव्यमनर्थांतरापातादित्याह अनयोरित्यादिनानिर्निमित्तमित्यंतमं थेन यदिचाहंसंप्रेर्यस्वपुरुषानाज्ञाप्यानयोर्निवारणंस्वथागमनबोधनरूपंकिंचिदपिकरिष्यामितदैतौराजसप्रकृतिकाविंद्रविरोचनावभि मानक्षयाद्धेतोर्जीवनेनिराशौस्यातां यस्मादल्पेपिमानक्षयदेमानक्षयप्रयोजकेवचनागमेवचनप्रसंगेसतिक्रोधवशंगच्छंतौताविमौदृश्येते इतिद्वयोरर्थः ॥ १३९ ॥१४०॥ अनयोःक्रोधेकिंस्यादितिचेद्युद्धेनभूतक्षयइत्याह देवासुरेति एतौक्रुद्धौसंतावतुलंयुद्धंकुर्वीतां कीदृशौ

निर्यातौवीक्ष्यभगवानिदंवचनमब्रवीत् ॥इमौहिपंडितंमन्यौदेवासुरपतीउभौ॥ महाबलौमहाप्राज्ञाविति लोकेप्रथांगतौ॥ १३७॥ परस्परंस्पर्द्धमानावभिमानगिरीइव ॥ नमस्कृत्यैवसहसामामपृष्ट्वाचदुर्मदौ॥ नि र्यातौदेहआत्मत्वंविज्ञायपरिमोहितौ॥ १३८ ॥ अनयोर्यद्यहंकिंचित्संप्रेर्य्यात्रनिवारणं॥ करिष्यामिततो मंदावभिमानक्षयात्भृशं॥ १३९ ॥ निराशौजीवितेस्यातामुभाविंद्रविरोचनौ॥ राजसौसर्वदायस्मात्कुत श्चिद्वचनागमे॥ अल्पेपिमानक्षयदेक्रोधशत्रुवशंगतौ॥ १४० ॥ देवासुरयुवश्रीमद्बंधुवैधव्यकारकौ ॥ पि शिताशिजनानंददायिनौसाधुभीतिदौ॥ कुर्वीतांयुद्धमतुलंचतुरंगक्षयप्रदं॥ १४१ ॥ ततोभूतक्षयोमाभूदे तयोरात्मवेदने॥ निर्निमित्तंस्वयंयस्मात्फलंस्यादेतयोरिह ॥ १४२ ॥

देवासुराणांयेयुवानःश्रीमंतश्चबंधवोदारसंज्ञास्तेषांपतिवधेनवैधव्यकरौपिशिताशिनांक्रव्यादानांजनानांपामराणांगृध्रादीनामानंददा यकौचसंतौअतुलंचतुरंगस्यहस्त्यश्वरथपादातरूपस्यक्षयकरंयुद्धंकुर्वीतांततश्चानयोरात्मवेदनप्रसंगेनिर्निमित्तमकस्माद्भूतानांक्षयःस्या त्सचमाभूदित्येतदर्थमनयोर्निवारणंनयुक्तमिति तर्ह्येतत्प्रवर्तितदेहात्मवादेनलोकोपप्लवःस्यादित्याशंक्यतत्प्रवृत्तिप्रतिबंधायदेहात्मविज्ञा नस्यदुष्फलंशापविधयाकीर्त्तयति स्वयमिति इतश्चनिवारणंनयुक्तंयस्मादिदंवक्ष्यमाणंफलमेतयोःसंबंधिनिदेहात्मवादेस्वयंकेनचिद नारब्धमपिस्यादितिद्वयोरर्थः ॥ १४१ ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदमित्युक्तंदेहात्मवादफलंदर्शयति देवइतित्रयोविंशतिश्लोकैः देवजातीयःअसुरजातीयःएताभ्यामितरोमनुष्यादिजातीयोवाभवति
यस्ययस्यैताविंद्रविरोचनौदेहात्मज्ञानसंपन्नौगुरूसाक्षात्परंपरयारहस्यत्वेनगृहीतस्यस्वज्ञानस्यप्रापयितारौभविष्यतस्तेसर्वेएतयोःशि
ष्याःपराभवंश्रेयोमार्गपरिभ्रंशरूपंयास्यंतिइहवर्त्तमानजन्मनिपरत्रभाविजन्मसुचेत्यर्थः ॥ १४३ ॥ तत्रइहपराभवंयत्नवैफल्येनदर्शय

ति इहेत्यूनविंशत्या यतस्तेमूढादेहमात्मानंमत्वातद्रक्षणोद्यमानांवैफल्येनदुःखिताभवंतीत्यर्थः ॥ १४४ ॥ तत्रहेतुतयादेहस्यविनाशशी
लतामाह उपायैरिति यथापक्वमन्नमोदनाद्यविनष्टंनतिष्ठेत्विविधोपायैरपिकृतैःकिंतुविनश्येदेवतथादेहोपीत्यर्थः अथवाअन्नंसस्यं त

देवोवाऽप्यसुरोवास्यादुभयोरितरोपिवा॥ देहात्मज्ञानसंपन्नौयेषामिन्द्रविरोचनौ ॥ गुरुत्वेपरिभूताःस्युरिह
वापिपरत्रवा॥ १४३ ॥ इहदेहात्ममानेनसर्वदादेहरक्षणे॥ उद्यमंविफलंकृत्वादुःखंयास्यंतिदारुणं॥ १४४॥
उपायैर्विविधैस्तिष्ठेत्पक्वमन्नंयथानहि ॥ अविनष्टंतथादेहोनतिष्ठेन्नाशवर्जितः ॥ १४५ ॥ यदाभूमिरियंभू
तधात्रीभूधरसंयुता ॥ विनश्यतिचशुष्यंतिसागरानीरपूरिताः ॥ १४६ ॥ नलभ्यतेत्रतेजश्चवायुनासहितं
चखं॥तदातिष्ठेत्कथंदेहःफेनबुद्बुदसन्निभः॥ १४७॥ मृत्युर्यस्यमहाव्याधिर्विसंधोन्नोदकैःसमं॥ वसत्यविर
तंदाहोजठरेरक्तवन्हिवत् ॥ १४८ ॥ बाह्यदेशेपिभूतानिसर्पादीनिसहस्रशः ॥ शस्त्रास्त्रादीन्यनंतानियस्यबा
ध्याश्चमृत्यवः॥ १४९ ॥ यथात्रकदलीस्तंभोनिःसारोविदितेसति॥ त्वगात्मकस्तथादेहःकथमेषोऽमृतोभवेत्
॥ १५० ॥

थाचश्रुत्यंतरं सस्यमिवमर्त्यःपच्यतेइति ॥ १४५ ॥ तत्रकैमुत्यंदर्शयति यदेतिद्वाभ्यां अत्रअधिष्ठानात्मतत्त्वे स्फुटमन्यद्द्वयोः ॥ १४६ ॥
॥ १४७ ॥ किंचविपक्षव्याप्तस्यामृततापक्षोव्याहतइत्याह मृत्युरिति विगतासंधासंधिर्यस्यसविसंधःशत्रुः तथाचमृत्युरूपोव्याधिरूप
श्चविसंधःशत्रुर्यस्यदेहस्यान्नोदकैःसहवसतितथायस्यजठरेऽतर्दाहःक्षुधारूपस्तिष्ठतिरक्तवन्हिवत्रक्तवर्णोऽगाररूपोवन्हिस्तत्समइत्यर्थः
तथायस्यबाह्यदेशेपिदाहस्तिष्ठतिसर्पवृश्चिकादिभूतरूपस्तथायस्यशस्त्रादिरूपामृत्यवोबहिश्चराःप्रसिद्धास्तथायोदेहोविदितेविवेकेक्रि
यमाणेनिःसारोयथाकदलीवृक्षस्त्वङ्मात्रात्मकत्वेननिःसारस्तद्वत्सएषविपक्षव्याप्तःस्वयंनिःसारश्चदेहःकथममृतःस्यादितित्रयाणामर्थः
॥ १४८ ॥ १४९ ॥ १५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचनश्वरनिमित्तोपादानकस्यामृततादुर्लभेत्याह अपीति कर्मनिमित्तकोभूतैरुपादानभूतैरारब्धोयःप्रसिद्धःसदेहस्तदपायेतेषांनिमित्तानामुपादानानांचापायेनाशेसतिकथंस्थायीस्थितिशीलःस्यादित्यर्थः ॥१५१॥ किंचआयुःप्रतानकत्वंकर्मणःशतसंवत्सरपर्यंतमेवनियतत्वात्शतोत्तरंकथममृतत्वंस्यादित्याह कर्मचेति अत्रदेहेकारणभूतंकर्मयद्यपिशतसंवत्सरपर्यंतमायुःप्रदंभवेत्तथापिततःशतसंख्यापूर्त्यनंतरंकथमायुर्दद्यात् यतआदिनियतंआदिनाजगत्कारणेश्वरेणनियतंव्यवस्थांनीतमित्यर्थः ॥ १५२ ॥ रसायनादिभिस्तदाशांवारयति रसायनादयइतिद्वाभ्यां देहधारणकालेरोगाद्यपचयरूपोपकारार्थमेवसृष्टानिरसायनादीनिनामृतत्वार्थं तथापृथिव्यादिभूतानिधारणया

अपिकर्मनिमित्तोयंदेहःसर्वशरीरिणां॥ आरब्धस्तदपायेस्यात्स्थायीकेनात्रहेतुना ॥ १५१ ॥ कर्मचात्रादिनियतंकारणंशतवत्सरं॥ आयुःप्रदमथाप्येतत्कथंदद्यात्ततःपरं ॥ १५२ ॥ रसायनादयोवादाःकेवलंदेहधारणे॥ उपकारायभूतानिबलवृद्ध्यैभयायच॥ १५३ ॥ रसायनादिभिर्नित्योदेहोयद्यत्रजायते ॥ रसायनादिकर्त्तारोमृतास्तेकेनहेतुना ॥ १५४ ॥ अपिजन्मवतांनाशोनियतःपरिकीर्तितः॥ घटादीनांतथादेहःकेननित्योभविष्यति॥ १५५ ॥ अपिप्रत्यक्षतोदृष्टोनाशःसर्वैश्चजंतुभिः ॥ स्वदेहस्यकथंतत्रनित्यताऽत्रभविष्यति ॥१५६॥

वशीकृतान्यपियोगिनोवलवृद्ध्यैएवभवंतिनामृतत्वाययतस्तानिभयायापिसृष्टानि भूतानांभयहेतुत्वंचयदाभूमिरियंभूतधात्रीत्युक्तकैमुत्यन्यायेनवोध्यं॥१५३॥तत्रहेतुतयारसायनधारणादिप्रवर्त्तकेष्वेवव्यभिचारमाह रसायनादिभिरिति कर्तारःप्रवर्त्तकाः॥१५४॥किंचजन्मरूपव्याप्यवतिव्यापकस्यमरणस्याभाववचनंन्यायविरुद्धमित्याह अपिजन्मवतामिति जन्मवतांघटादीनांनाशोनियतःअवश्यंभावीदृष्टःसदेहेपिजन्मवतिकथंनस्यादित्यर्थः॥१५५॥ बालकुमारादिरूपेणनाशप्रतियोगितयानुभूतस्यस्वदेहस्यवृद्धरूपेणामृतत्वाशाविफलेत्याह अपिप्रत्यक्षतइति यतःस्वदेहस्यैवनाशोवालादिरूपस्यसर्वैरनुभूतस्ततस्तस्यनित्यतानयुक्तेत्यर्थः ॥ १५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्स्फुटीकर्तुंबालाद्यवस्थाःपूर्वोत्तरीभूताःकथयति जंतुरिति बालःपंचहायनपर्यंतं ततःकुमारआषोडशं ततोयुवाषष्टिपर्यंतं ततोवृद्धः तस्यामरत्वेकाप्रत्याशेत्यर्थः ॥ १५७ ॥ मृत्युर्जन्मवतांवीरदेहेनसहजायते अद्यवाब्दशतांतेवामृत्युर्वैप्राणिनांध्रुवइतिपुराणवाक्यार्थंफ लितार्थत्वेननिबध्नाति जंतूनामिति देहेसतिविद्यमाने तस्यमरणस्यप्रतीकारःप्रतिबंधोपायोनास्तीत्यर्थः ॥ १५८ ॥ मृत्योर्बिभेषिकिंमूढ

भीतंमुंचतिकिंयमः अजातंनैवगृह्णातिकुरुयत्नमजन्मनि इत्युक्तोमोक्षोपायस्तुदेहात्मदर्शिनांदुर्लभइत्याह एकएवेति मृत्योःप्रतीकारए

जंतुःसर्वोपिबालःस्यात्कुमारःपंचहायनः ॥ कुमारोथयुवातद्वत्पूर्णःषोडशवार्षिकः ॥ युवावृद्धःकुतोवृद्धो नमरिष्यतिदेहभाक् ॥ १५७ ॥ जंतूनांमरणंतेनदेहेनसहजायते ॥ देहेसतिनतस्यस्यात्प्रतीकारःकदाचन ॥ १५८ ॥ एकएवप्रतीकारोमृत्योरस्यमहात्मनः ॥ देहस्याग्रहणंनान्यत्क्वचिल्लोकत्रयेपिहि ॥ १५९ ॥ देहआ स्थारताएतेनित्यंदेहात्मवादिनः ॥ मनसापिनगच्छंतिदेहाग्रहणकारणं ॥ १६० ॥ गृहीत्वात्मतयादेहमेतन्नि त्यंविनश्वरं ॥ विड्भस्ममृत्तिकारूपमंतेयत्सर्वदेहिनां ॥ १६१ ॥ प्राल्हादेरपिचेंद्रस्यदेहोन्तेतादृशस्सदा ॥ देवरा जस्यदेहोपिकिमुतान्यस्यदेहिनः ॥ १६२ ॥ देहमात्मतयामत्वानिर्गुणाःपापकारिणः ॥ भवंतिपरलोकश्चत तस्तेषांनसंभवेत् ॥ १६३ ॥ पापिनांपरलोकेस्मिन्सुखंक्वापिनविद्यते ॥ किंतुदुःखंबहुविधंयद्वक्तुंचनशक्य ते ॥ १६४ ॥

कएवयद्देहाग्रहणंनामेत्यर्थः ॥ १५९ ॥ देहेइति एतेदेहात्मवादिनोदेहमतेविड्भस्मादिरूपमात्मतयागृहीत्वादेहाग्रहणस्यकारणंतत्त्वबो धंगंतुंमनसापिनयतंतेयतआस्थारताइतिद्वयोरर्थः ॥ १६० ॥ १६१ ॥ देहस्यांतेविडादिभावेकैमुत्यमाह प्राल्हादेरपीति देहात्मवादिनां गुरूएतौप्राल्हादिःप्रल्हादपुत्रोविरोचनोदेवराजश्च चेद्यदिअनयोरपिदेहोंऽतेतादृशोविड्भस्मादिरूपस्तदान्यस्यकिमुतेत्यर्थः ॥ १६२ ॥ अथतेषांपरलोकेपराभवंस्फुटयति देहमितिद्वाभ्यां देहआत्माभिमानेनहेतुनानिर्गुणाविवेकसंतोषादिगुणैर्हीनाःसंतोयतःपापकारिणोभ वंतिततःपरलोकेहानिस्तेषांस्पष्टेत्यर्थः ॥ १६३ ॥ साचसुखाभावदुःखयोरात्यंतिकत्वरूपेत्याह पापिनामिति ॥ १६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइति यास्यतीतिपदमावर्त्तते तथाचायंदेहात्मवादोयद्यपियेषुजनेषुयास्यतिप्रवृत्तोभविष्यतितेलोकद्वयेपिदुःखंयास्यंति तथाप्येवमनर्थफलकोपियास्यतिप्रसरिष्यतीत्यतोदारुणोमहामोहमयइत्यर्थः ॥ १६५ ॥ इत्येवंलोकानांभाविफलपरिपाकंचिंतयापश्य न्नपिकिंचिदवदन्मौनीप्रजापतिरास्तेतिष्ठतिस्म इंद्रविरोचनौतुतावतागताविल्याह इतिनानेति ॥ १६६ ॥ तयोर्मध्येविरोचनवृत्तंवर्णय ति विरोचनइति स्वकीयांस्वसजातीयांतांप्रसिद्धामसुराणामिद्रियारामाणांसभांशीघ्रगत्याप्राप्तः विपर्ययेपितुष्टमनायतस्तामसस्वभा

ततोदेहात्मवादोयंदारुणोयेषुयास्यति ॥ लोकद्वयेपितेदुःखंप्राप्स्यंतिचतथापिते ॥ १६५ ॥ इतिनानाविधां चिंतांसंप्राप्यपरमेश्वरः ॥ वीक्षमाणोऽवदन्नास्तेगताविंद्रविरोचनौ ॥ १६६ ॥ विरोचनोतित्वरयाव्रजंस्तामा सुरींसभां ॥ स्वकीयामाशुगतवानतिसंतुष्टमानसः ॥ १६७ ॥ प्रकृत्यातामसोदैत्यारजसातमसावृताः ॥ स त्वलेशेनरहिताःसर्वदैवाविचारकाः ॥ १६८ ॥ आगत्यचसभांदैत्यैःसत्कृतःसूर्यसन्निभः ॥ महासनेसमासी नःसभायांदितिजन्मनाम् ॥ १६९ ॥ देहआत्मेतिविज्ञानमुक्तवांस्तान्यथास्वयं ॥ गृहीतवान्विमूढात्माब्रह्मलो केतिदुःखितः ॥ १७० ॥ तेसर्वेतामसानित्यंरजसाचसमावृताः ॥ अभावात्सत्त्वलेशस्यविचारपरिवर्जिताः ॥ जगृहुर्देहआत्मत्वंयत्स्वयंपूर्वमूहितम् ॥ १७० ॥ विरोचनोयथाशिष्यास्तथैवगुरुबुद्धितः ॥ विरोचनोपदिष्टं तेदेहात्मानंप्रपेदिरे ॥ १७२ ॥

वकः तत्रहेतुर्दैत्यइत्यादि यतोरजसाउपसर्जनेनविशिष्टंयत्तमस्तेनावृतत्वंसत्वगुणाभिभवोविचारराहित्यंचदैत्यानामुत्सर्गतोभवतीतिद्वयो रर्थः ॥ १६७ ॥ १६८ ॥ ततोदैत्यसदसिमानितःसंस्तानसुरान्प्रतिकष्टलब्धंस्वज्ञानमुक्तवानित्याह आगत्येतिद्वाभ्यां ॥ १६९ ॥ ॥ १७० ॥ तेचासुरास्तज्ज्ञानंस्वानुकूलंपुरापितर्केणसंभावितंचाधुनागुरुसंप्रदायलब्धंबुद्ध्याऽवधारणतोनिन्युरित्याह तेसर्वइतिद्वाभ्यां स्वयंस्वभावेनऊहितंतर्कितंयथाविरोचनःप्रपेदेनिश्चितवांस्तथातच्छिष्याअपिप्रपेदिरे ॥ १७१ ॥ १७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तत्रप्रजापत्युपदेशपरिपाटींश्रावयित्वाथतत्फलितार्थसंग्रहमुपनिषत्पदोक्तंप्रतिपादितवानित्याह विरोचनस्त्वितिसप्तचत्वारिंशच्छ्लोकैः उ
पदिश्यप्रजापत्युक्तंश्रावयित्वाइत्थमुक्तवान् इत्थंकथं हेदैत्याःदेहएवसर्वेषांशेषीप्रधानं अतएवात्मभूतःसर्वैरुपास्यः इतरेऽग्न्यादयस्तुत
स्योपकारकत्वेनशेषभूताउपेक्ष्याइत्यर्थः एतस्यसर्वोत्कृष्टत्वेनज्ञानमेवपूजनमितिभावः ॥ १७३ ॥ बाह्योपचारैःसत्करणमेवपरिचरणमि
 तिदर्शयति अस्यैवेति आदृतैरादरविशिष्टैर्गुरुवदस्यदेहस्यैवपरिचर्याकर्त्तव्येति ॥ १७४ ॥ परिचरणमभिनयंस्तत्फलमाह आत्मानमि

विरोचनस्तुतानित्थमुपदिश्योक्तवान्पुनः॥ पूजनीयःसदैवात्मादेहोयंनैवचापरं ॥ अग्निविप्रादिकंदैत्याआ
त्मनःशेषतांगतम्॥ १७३॥ अस्यैवपरिचर्याचकरणीयासदादृतैः॥ गुरोरिवमहाभागाःपुरुषेणसुखार्थिना
॥ १७४॥ आत्मानंदेहमेतंयोदुकूलैरतिशोभनैः॥ रत्नैर्नानाविधैःसार्द्धंजांबूनदसमुत्थितैः ॥ १७५ ॥ गज
कुंभादिसंजातैर्मुक्तैश्चादित्यसन्निभैः॥ नानालंकरणैस्तद्वत्पुष्पैश्चमृदुलैरपि ॥ १७६ ॥ सुरूपैश्चसुगंधैश्चचि
त्रमालादिरूपिभिः ॥ चंदनैर्हिमसंमिश्रैःकर्पूराद्यैश्चसंयुतैः ॥ १७७ ॥ पूजयेद्देहमात्मानंतद्वच्छय्यासनादि
भिः॥ अन्नपानैस्तथासम्यक्पूजयेच्चपरिच्छदैः॥ नित्यंपरिचरेच्चयंव्रजेल्लोकद्वयेसुखं॥ १७८ ॥ मरणंचनदे
हस्यदैत्येंद्राइहविद्यते॥ रसायनाद्युपायैर्हिसिद्धिंप्राप्तस्यसर्वदा॥ १७९ ॥

तिचतुर्भिः आत्मरूपंदेहंचर्यंसेवनीयंयोदुकूलादिभिःपूजनपूर्वकंपरिचरेत्सलोकद्वयेसुखंव्रजेदितिचतुर्णांसंबंधः जांबूनदसमुत्थितैःस्वर्ण
खचितैरत्नैःगजकुंभादिरूपाकरजातैर्मुक्तैर्मुक्तामयगुच्छैः आदित्यसन्निभत्वमलंकारविशेषणं चित्रमालारूपत्वांतानिपुष्पविशेषणानि
हिमंशीतलंजलं परिच्छदैरुपकरणैः॥ १७५॥ १७६॥ १७७॥ १७८॥ननुविनश्वरस्यकिंपरिचरणेनेतिशंकांवारयति मरणंचेति सिद्धस्यम
रणशंकैवनास्तीत्यर्थः ॥ १७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असिद्धस्यदेहेपिमूर्छितत्वभावनयामरणशंकानकार्येतिसदृष्टांतमाह अथेतित्रिभिः यदिमरणावस्थामूढैर्मन्येततथापिविवेकिनातस्यमृत बुद्ध्यादाहादिकंनकार्यंकिंतुसंग्रामेमूर्छितवत्शयानत्वेनमंतव्यइतित्रयाणामर्थः तत्ररथोपस्थोरथस्यक्रोडभूतमुपवेशनस्थानम् ॥१८०॥ ॥ १८१ ॥ १८२ ॥ मृतशंकागोचरशरीरेकर्त्तव्यंश्रुतौभिक्षयेत्यादिनाप्रदर्शितंवर्णयति ततइत्यष्टभिः ततोमरणस्यसांशयिकत्वात्तंमृत त्वाभिमतंदेहंतदीयोबांधवउत्तमजलैःस्नापयित्वाचंदनपुष्पादिभिरलंकरणंश्रुतौभिक्षापदोक्तंकुर्यादित्यर्थः ॥ १८३ ॥ वसनाद्यैरिति

अथचेन्मरणावस्थायदालभ्येतवैध्रुवं॥ तदायंमृतइत्येवनदाह्यःकर्हिचित्पुमान् ॥ १८० ॥ यथासंग्रामशालायांशस्त्रैरस्त्रैश्चपीडितः॥ वीरःक्षणंरथोपस्थेशेतेचेष्टाविवर्जितः ॥ १८१ ॥ एवमेषगतप्राणःशेतआत्माशरीरिणां॥ रसायनादिसिद्धीनामलाभेत्रमृतोपमः ॥ १८२ ॥ ततस्तंस्नापयेद्दिव्यैर्जलैस्तस्यात्रबांधवः ॥ अर्चयेच्चंदनैर्दिव्यैरलंकुर्याच्चसर्वतः॥ १८३॥ वसनाद्यैरलंकारैर्मालाभिश्चविमानगं॥ नानाभक्ष्याणिकृत्वावैप्रसार्यचसमंततः॥ सुगंधनीरपूर्णास्तुकरकांश्चबहूनपि ॥ १८४ ॥ भूगृहंतस्यकुर्वीतमृद्वास्तरणसंयुतं ॥ तूर्यघोषेणतंतत्रनयेद्बंधुजनावृतं॥१८५॥ शोधयित्वात्रोभयतअन्नपेयानिसर्वतः॥ भक्ष्यभोज्यानिचित्राणिमुंचेदस्यसमीपतः॥ १८६ ॥ महाराजस्ययेकार्याउपचाराःसदैवहि ॥ भोगाश्चनिखिलाःकार्याभूगृहेतस्यबंधुभिः॥ १८७॥

तथावसनादिभिरलंकुर्यादित्यनुषंगः तथातस्यवासयोग्यंभूगृहंभूमिखातरूपंगृहंकुर्यात् तत्रचतंदेहंविमानगंकृत्वातूर्यघोषेणबंधुभिश्च सहनयेत् किंकृत्वा नानाविधभक्ष्यवस्तूनिबहून्करकान्कमण्डलूंश्चसुगंधिजलपूर्णान्प्रसार्यविस्तृतान्कृत्वेतिद्वयोरर्थः ॥१८४॥१८५॥ शोधयित्वेति तच्चभूगृहंशुद्धंकृत्वाअस्यमृताभिमतदेहस्योभयतःपार्श्वद्वयेपितानिप्रसार्यानीतानिपेयानिचित्राणिभक्ष्यादीनिचमुंचेत्न्यसेत् ॥ १८६ ॥ महाराजस्येति उपचाराःशय्यादिरूपाण्युपकरणानि भोगाःभोग्यपदार्थाःसुरभिद्रव्यादयः एतेतस्यभूगृहगतस्यमहाराजवद्बंधुभिःकार्याइत्यर्थः ॥ १८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूगृहमिति तद्भूगृहंतथाविधंकुर्यात्यथाअत्रभूगृहेअस्यदेहस्यदीर्घनिद्रायांस्थितंस्थितिःनक्षयेत्क्षयंनगच्छेदित्यर्थः बांधवपदमुत्तरान्व
यि॥१८८॥ कुर्वीरन्निति तथातदीयाबांधवास्तस्यभूगृहस्यउपरिवेदिकांमंडपरूपांकुर्वीरन् यथातस्यभूगृहस्यचिरकालेनापिपतनंनस्या
त् तथानीरस्यवृष्ट्यादिजलस्यआतपस्यग्रीष्मतापस्यमलस्यपुरीषादेःआदिनाजंबुकप्रभृतीनांचप्रवेशोनभवेदिति ॥ १८९ ॥ इत्थंकरणे
तस्यउपकारःश्रुत्यालोकद्वयजयत्वेनोक्तःअधुनाम्लेच्छग्रंथेषुकीर्त्यमानश्चतंवर्णयति एवंकृतेइतिषड्भिः इत्थंरक्षाकरणेसत्यसौदेहस्तावत्
शेतेयावत्सर्वेषांपूर्वजोब्रह्मानलभ्योदुर्लभोदेहात्मवादस्यप्रवर्त्तकस्त्वशिष्यान्द्रष्टुंनायातीत्यर्थः ॥ १९० ॥ यदासआयास्यतितदातद्देहगंधे

॥१४॥

भूगृहंतत्तथाकुर्याद्यथाशक्त्यनुसारतः॥ नक्षयेद्दीर्घनिद्रायांस्थितमस्यात्रबांधवाः॥ १८८॥ कुर्वीरंस्तुशुभां
तस्यगृहस्योपरिवेदिकां ॥ यथाकालान्निपतनंभूगृहस्यभवेन्नहि ॥ नीरातपमलादीनांनप्रवेशश्चकर्हिचित्
॥ १८९ ॥ एवंकृतेचिरंकालंशेतेसौराजवत्सुखं॥ यावन्नायातिभगवान्नलभ्यःसर्वपूर्वजः॥ १९० ॥ आग
तेभगवत्यस्मिन्सुवायुर्वातिकश्चन॥ संपर्कात्तस्यनुम्हताउत्थास्यंतीहसर्वशः ॥ १९१ ॥ शस्त्रास्त्रविद्धोमूर्च्छा
स्थोवायुनाकेनचिद्यथा॥ स्पृष्टःक्षणादिहोत्तिष्ठेत्पूर्ववद्वैरिमर्द्दनः॥ १९२ ॥ एवंतउत्थिताःसर्वेपूर्वसंस्कारसं
स्कृताः॥ रसायनादिसिद्धीनांयतंतेप्राप्तयेपुनः॥ १९३॥ आप्यताअमृतत्वंचगच्छंत्येवनसंशयः॥ एवंनक
र्हिचिन्नाशोयोगिनोविद्यतेऽसुराः ॥ १९४ ॥ योगयुक्तास्ततःसर्वेभवंतिदितिजोत्तमाः॥ वैरिणांचक्षयंनि
त्यंकुर्वतेचात्रनिर्दयाः॥ १९५॥

नसर्वेमृताउत्थास्यंतीत्याह आगतइति अस्मिन्सर्वपूर्वजे ॥ १९१ ॥ तत्रदृष्टांतमाह शस्त्रास्त्रेति ॥ १९२ ॥ एवमिति एवंसंग्राममूर्छित
वत्तेभूगृहन्यस्ताःसमुत्थिताःसंतःपूर्वंयथारसायनाद्यर्थंयतितवंतस्तथापुनर्यत्नंकुर्वंति ॥ १९३॥आप्येति ताःसिद्धीःप्राप्यचामृताभवंत्येवे
ति एवमुक्तक्रमेणयोगिनोनाशायोग्यत्वंस्यात् हेअसुराः ॥ १९४ ॥ योगेति ततोदेहामृतत्वस्वरूपंप्रयोजनमभिसंधायैवदैत्यवरायोगा
भ्यासपराःसंतिवैरिणांदेवानांतत्पक्षाणांचक्षयंकुर्वतेयतोत्रक्षयकर्मणिनिर्दयादयारहिताः तदुक्तंगीतासु प्रभवंत्युग्रकर्माणःक्षयायजगतोऽ ॥१४॥
हिताइति ॥ १९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेचयेनाभिप्रायेणनिर्दयाभवंतिगीतायुक्तंतंवर्णयति केविप्राइति किंशब्दःक्षेपे तथाचयदासर्वेषांशरीरंसमंदृश्यतेतदाविप्रादिषुकेनमा नार्हतेत्यर्थः ॥ १९६ ॥ साम्यमेवकार्यकारणरूपयोःस्फुटयति द्विपद्भिरिति द्विपदांविप्रादीनामितरैर्द्विपद्भिःसाम्यंदृश्यते चतुष्पदांगवां चेतरैश्चतुष्पद्भिरिति नचकारणेविशेषोयेनैतेषांविप्रादीनामपिवपुरन्येषामिवकामप्रयुक्तशुक्रशोणितसंभूतमेवभवेत् नचासंभवः यतः पित्रोःकामःसंभवेत् नहिनिष्कामानांपितृत्वंसंभवतिव्याघातादित्यर्थः ॥ १९७ ॥ नचजगत्कर्तुःसर्वालकस्यचेश्वरस्यपक्षपातेनवि प्रादीनामाधिक्यंतल्लक्षणानांकामेसमन्वयेनतस्यैवाभावादित्याह कामेति हेमहाधियस्ततोदृष्टानुगुण्यात्कामएवविश्वस्यहेतुर्जनन्यादि

केविप्राःकाश्चगावोवाकेदेवाःकेचसाधवः॥ यदाशरीरंसर्वेषांसममेवोपलभ्यते॥१९६॥ द्विपद्भिर्द्विपदांसा म्यंचतुष्पद्भिश्चतुष्पदां॥ एतेषामपिपित्रोःस्यात्कामोयेनवपुर्भवेत्॥ शुक्रशोणितसंभूतमन्येषामिवकामतः ॥१९७॥ कामहेतुकमेवेदंततोविश्वंमहाधियः॥ कामःसर्वस्यजननीपिताकामस्तथेरितः॥ विप्रोगौर्देवता साधुःकामएवनचापरः ॥ १९८ ॥ब्रह्माद्विःसकलोजंतुःकामएवप्रकीर्तितः ॥ प्रतिग्रहीतादाताचबलतः स्वेच्छयापिवा ॥ १९९॥ कामश्चदेहएवैषसमुद्रसदृशोमहान् ॥ देवाद्याःकामकामायेवयंचदितिजेश्वराः ॥ २००॥ चेष्टांकुर्मस्तथैवान्येत्रिकालस्थाश्चदेहिनः॥ स्वदेहार्थंचकामोयंसर्वेषामिहदेहिनां॥ २०१॥

रूपश्च नहिनिष्कामस्यजननीत्वादिकंदातृत्वांतंसंभवतीतिद्वयोर्भावः ॥ १९८ ॥ १९९ ॥ एतादृशस्यापिकामस्यशेषित्वेनदेहःसर्वो त्कृष्टइत्याह कामश्चेति यथासर्वेषांजलानामंशभूतानामपेक्षयाअंशीसमुद्रउत्कृष्टस्तथादेहविषयकःकामःसर्वकामेभ्यइतिप्रथमदलार्थः एतदेवस्फुटयति देवाद्याइत्यादिना येदेवमुनिप्रभृतयोयेचवयंदैत्यायेचान्येकालत्रयवर्तिनस्तेसर्वेवयंकामकामाःकाम्यमानतत्तद्भोग्य पदार्थान्कामयंतएवसंतश्चेष्टांदेहव्यापारंकुर्मःसोयंनानाभोग्यगोचरोपिकामोदेहार्थंभवतीत्यर्थः तथाचसकलचेष्टाप्रयोजककामोद्देश्य त्वाद्भोग्यपदार्थाउत्कृष्टास्तेभ्योपिदेहोपाधिककामगोचरेभ्योदेहःपरमोत्कृष्टइतिभावः ॥ २०० ॥ २०१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंदेहस्यैवसर्वतःप्राशस्त्येसतिलोकेयत्प्रशस्तत्वेनरक्षणीयतयाप्रसिद्धंतत्तद्भावनांदेहेकृत्वासएवसंरक्ष्यइत्याह देहइति हेदैत्यास्ततोमुख्य प्राशस्त्याल्लोकेप्रशस्तत्वाभिमतायेविप्रादयस्तेस्वदेहरूपाएवमंतव्याः तथाचास्यदेहस्यैवरक्षणेप्रयत्नोयोग्यइत्यर्थः ॥ २०२ ॥ एतेनपुण्यादिस्वरूपमपिव्याख्यातमित्याह अस्येति लोकेहिइष्टानिष्टहेतूपुण्यपापत्वेनप्रसिद्धेतदुपचयहेतूदेवासुराविति तत्रदेहस्यैवेष्टत्वसिद्धौ तस्यदेहस्यसुखदंयत्कर्मपशुहिंसादितस्यपुण्यत्वंसिद्धं तद्दुःखदस्यप्रातःस्नानादेस्तुपापत्वं तथाएतदनुकूलत्वंदेवतात्वंसाधुत्वंचप्रतिकूलस्यतुपित्रादेरपिवध्यत्वप्रयोजकमसुरत्वमित्यर्थः ॥ २०३ ॥ प्रतिकूलेहिपितृत्वादिहानिर्लोकेपिप्रसिद्धेत्याह पितेति पितृप्रभृतिपुत्रपर्य

देहस्ततोत्रविज्ञेयोदैत्याःसर्वैःशरीरिभिः ॥ विप्रोगौर्देवतासाधुःसंरक्ष्योत्रप्रयत्नतः ॥ २०२ ॥ अस्ययत्सुखदंतत्स्यात्पुण्यंपापंचदुःखदं ॥ अनुकूलोभवेद्योस्यसदेवादिर्नचापरः ॥ असुरःप्रतिकूलश्चवध्यःसर्वोपिसर्वदा ॥ २०३ ॥ पितामातास्वसाभ्रातास्नुषाजायासुतोयदि ॥ प्रतिकूलोभवेत्स्वस्यनैवकिंतुपरोजनः ॥ २०४ ॥ ब्राह्मणादिवधेपापंपरदारादिसंगमे ॥ अन्यवित्तापहारेचयदुक्तंतन्मृषावचः ॥ २०५ ॥ पापंदुःखफलंप्रोक्तंदुःखंचानंतरंततः ॥ नलभ्यतेसुखंचात्रलभ्यतेतदनंतरं ॥ २०६ ॥ कालांतरेचदुःखंस्यान्नतत्तत्कारणंभवेत् ॥ नहिकालांतरेकर्मस्थातुमर्हतिकर्हिचित् ॥ २०७ ॥ कर्मणांस्थापनानात्रकल्पनीयाकदाचन ॥ दृष्टलाभेनचादृष्टंकल्प्यतेवेदवादिभिः ॥ २०८ ॥

तोजनोयदाप्रतिकूलोभवतितदास्वस्यआत्मीयइतिनाख्यायतेकिंतुपरःशत्रुरेवप्रसिद्धइत्यर्थः ॥ २०४ ॥ एवंस्वमतमुक्त्वापरमतंदूषयति ब्राह्मणादीति ब्रह्मवधादौपापंभवतीतियदुच्यतेवैदिकैस्तदयुक्तमित्यर्थः ॥ २०५ ॥ तत्रहेतुतयालक्षणासंभवमाह पापमिति यद्दुःखफलंतदेवपापमितिवाच्यं द्वेषिहिंसाद्यनंतरंतुसुखमेवलभ्यतेनदुःखमतस्तस्यपापत्वंकथंस्यादित्यर्थः ॥ २०६ ॥ कालान्तरीयदुःखस्यतत्फलत्वकल्पनानयुक्ताव्यवहितयोःकार्यकारणभावस्यासम्भवात्तावत्पर्यंतंक्षणिकस्यस्थायित्वकल्पनायाव्याहतत्वात् नाप्यदृष्टव्यापारकल्पनायुक्ता दुःखोदयंप्रतिदृष्टस्यापथ्यसेवनादेरेवहेतुत्वसंभवेतत्कल्पनावैफल्यादित्याह कालांतरेचेति तत्कालांतरीयंदुःखंतत्कारणंब्रह्मवधादिकारणंनभवेत् तावत्कर्मणःस्थित्ययोगात् स्थापनास्थितिः स्फुटमन्यत् ॥ २०७ ॥ २०८ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवंदुःखदस्यपापत्वनिश्चयेसतिसद्योदुःखदंतपोयागादिपापत्वेनहेयतामेवभजतइत्याह अहिंसेति अहिंसादिरूपंतपोयज्ञादिरूपंकर्मच एतेनपापलक्षणास्कंदनेनैवनिराकृतंहेयतयाबोधितंभवतीत्यर्थः ॥२०९॥ अत्रवैदिकप्रसिद्धिमनुकूलयति पापमिति दुःखफलकत्वेनपापंलक्षयंतोपिवैदिकास्तत्स्वरूपंनजानंतिवेदवादमोहितत्वात् वयंत्वर्थपरास्तदवगच्छामइतिभावः ॥२१०॥ स्वस्यवेदार्थवित्त्वंब्राह्मणादीनांतत्रभ्रांतत्वंचस्फुटयितुंवेदार्थोपदेशपरंपरायाद्वैविध्यमाह वेदानामिति अयंसंप्रदायःपरंपरोपदेशःपुरायेभीरवोहिंसादिकृतौकोऽनर्थआपतेदित्येवंभयदूषितचित्ताआसंस्तेषांहृदयंप्रविष्टः अयंकः सुखदुःखप्रदंविपरीतंसद्यःसुखप्रदंहिंसादिपापंसद्योदुःखप्रदंयागादिपु

अहिंसाब्रह्मचर्यादिक्लेशकारंतपोहियत् ॥ यज्ञादिकंतथाकर्मत्वेतेनैवनिराकृतम् ॥ २०९ ॥ पापंदुःखफलंयस्मात्पुण्यंसुखफलंतथा ॥ आहुःसर्वेमहात्मानोवेदवादरताःसदा ॥ २१० ॥ वेदानांसंप्रदायोयंभीरूणांहृदयंगतः ॥ विपरीतंतथाऽभीतेसुखदुःखफलप्रदम् ॥ २११ ॥ ततआरभ्यदैत्येंद्राद्विधायंपरिवर्त्तते ॥ धीराणामपिभीरूणांसंप्रदायोतिभेदवान् ॥ २१२ ॥ भीरूणांसंप्रदायोयंब्राह्मणाद्यैःकृतोमहान् ॥ वीराणांवर्त्ततेदैत्यामय्येवान्यत्रनकचित् ॥ २१३ ॥ एवंजानाम्यहंदैत्याब्रह्मादेवगुरुस्तथा ॥ रहस्यःसंप्रदायोयंनिंदितोज्ञैरनेकधा ॥ अशक्तैश्चमहाभागायुष्मानघसमागतः ॥ २१४ ॥

ण्यमितियावत् यस्तुपुराअभीतोभयदोषहीनआसीत्तस्मिंस्तुतथाअस्ययत्सुखदमित्यादिनामदुक्तरूपएवसंप्रदायःस्थितइत्यर्थः ॥२११॥ ततइति ततस्तान्पुराकालिकान्भीरूनभीरूंश्चारभ्येदानींतनेष्वपिद्वैरूप्येणैवायंसंप्रदायोवर्त्तते यतोधीरत्वभीरुत्वाभ्यामधिकारिभेदेसत्यतिभेदवान्ऐकरूप्यानर्हइत्यर्थः ॥ २१२ ॥ तत्रभीरुसंप्रदायोब्राह्मणैर्देवादिभिश्चबहुधाप्रवर्तितोदृश्यतेवीरयोग्योद्वितीयस्तुप्रजापतिशिष्येमय्येववर्ततइत्याह भीरूणामिति ॥ २१३ ॥ वीरसंप्रदायस्यप्रख्यात्यभावेहेतूनाह एवमिति यतोब्रह्मातच्छिष्योहंचैतौद्वावेवजानीवः इतरेजनास्त्वज्ञानदुःसंगाशक्तिभिर्दूषिताःकथमनुतिष्ठंतु हेदैत्याःससंप्रदायोमहाभागान्युष्मान्प्रतिमदुपदेशेनप्राप्तइत्यर्थः ॥ २१४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वबाहुबलतइति एनंसंप्रदायंभवंतःस्वबलेनजगत्त्रयेलोकत्रयेस्थापयंतुप्रसृतंकुर्वंतुयतोयंपुण्यकृत्पुण्यस्यसद्यःसुखदस्यहेतुः ॥ २१५ ॥
 अस्यस्थापनोपायःप्रतिपक्षनिरासएवेतिवक्तुंप्रतिपक्षान्कीर्तयति अस्येति अस्यवीरयोग्यस्यब्राह्मणादेवास्तथान्येदुर्बलाश्चप्रतिपक्षाःस्फु
अस्यस्थापनोपायःप्रतिपक्षनिरासएवेतिवक्तुंप्रतिपक्षान्कीर्तयति.अस्येति अस्यवीरयोग्यस्यब्राह्मणादेवास्तथान्येदुर्बलाश्चप्रतिपक्षाःस्फु

टमन्यद्द्वयोः ॥२१६॥२१७॥ एतेसर्वेवीरयोग्यस्यवेदोक्तमार्गस्यविरोधिनोविपर्यस्ताअस्मासुदितिजादिषुद्वेषशालिनश्चभवद्भिर्हंतव्याइ
॥१६॥ त्याह निघ्नंत्विति ॥२१८॥ उपसंहरति एवमिति इत्थंमदुक्तेकृतेसतियुष्माकमत्रेहलोकेतथापरलोकेचसुखंभविष्यति तत्रैषमदुपदेशसं

स्वबाहुबलतस्त्वेनंसर्वलोकसुखप्रदं ॥ स्थापयंतुमहावीर्याःपुण्यकृच्चजगत्त्रये ॥ २१५ ॥ अस्यमार्गस्यसत
तंब्राह्मणाःप्रतिपक्षिणः ॥ यज्ञादिनिरतास्तद्वद्ब्रह्मचर्यादिसाधनाः ॥ २१६ ॥ देवायेचनिसर्गेणस्युरस्माकंच
शत्रवः ॥ दुर्बलाःप्राणिनश्चान्यएनंपक्षमुपाश्रिताः ॥ अस्माकंवैरपक्षस्थाअस्मन्निंदापरायणाः ॥ २१७ ॥
निघ्नंतुसकलानेतान्वेदमार्गविरोधिनः ॥ अन्यथाज्ञानिनःपापानस्मासुचविरोधिनः ॥ २१८ ॥ एवंकृते
मयाप्रोक्तेसुखंवोत्रभविष्यति ॥ परलोकेचदैत्येंद्रादयांत्यजथसर्वथा ॥ २१९ ॥ एवमुक्तास्तदादैत्याःपापा
त्मानोनिसर्गतः ॥ निर्घृणाःक्रूरकर्माणःप्रभुणागुरुणाततः ॥ कृतवंतस्तथैवैतज्जगत्सर्वंसमाकुलं ॥ २२० ॥
संप्रदायोमहांस्तेषांब्राह्मणादिविरोधकृत् ॥ लभ्यतेत्रतथाचारोजीवनेमरणेपिच ॥ २२१ ॥

यहोयद्दयांपरदुःखेनदुःखितत्वरूपांभीरुसंप्रदायसंतानिकांत्यजथेति ॥ २१९ ॥ एवंविरोचनेनराज्ञागुरुणाचसताश्राविताेपनिषत्कास्तेदै
त्याःसाधून्निहत्यस्वमतंप्रवर्तितवंतइत्याह एवमुक्ताइति ॥ २२० ॥ तस्मादयत्वेपीत्यादिकंडिकाशेषस्यासुरमतापवादकस्यार्थमाह संप्र ॥१६॥
दायइतिचतुर्दशभिः तेषामसुराणांसंप्रदायोब्राह्मणादिविरोधप्रयोजकदंभदर्पादिलक्षणस्तथाचारोजीवनेशरीरपोषणपरत्वरूपोमरणेश
रीरालंकाररूपश्चात्रलोकेप्रायशोलभ्यतेदृश्यतेइत्यर्थः ॥ २२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अद्यापीति यतोऽसुरसंप्रदायोमनुष्यादिष्वप्यनुगतस्ततइदानीमपिपापरतंनास्तिकंयागदानादिसत्कर्मविमुखंमोक्षरहितंमोक्षेश्रद्धाहीनम तएवयथेष्टाचारिणंचजनंदृष्ट्वातेआस्तिकाःसज्जनाएवंवदंतीति ॥ २२१ ॥ एवंकथमित्याकांक्षायामाह आसुरइत्यादि अयंपापरतो जनआसुरःअसुरसंप्रदायवर्त्तीभवतियतआसुरमसुराणांप्रियंकर्महिंसादिसर्वदाकरोतीतिशेषः यद्येवंनस्यात्तदायंनास्तिक्येनयज्ञादिवि मुखःकुतःस्यादित्यर्थः ॥ २२३ ॥ तथामृतदेहालंकारेणपरलोकजयाशंसापिमोहमयीविनाऽसुरावेशंकथंस्यादित्याह मृतेसतीति मरणो त्तरंयत्प्रेतमलंकरोतितितोज्ञायतेऽयंस्वरूपाज्ञानरूपयामाययामूढइतीत्यर्थः ॥ २२४ ॥ अलंकारादिनेति यस्मादयमितिमन्यतेविश्वसिति

अद्यापितेमहात्मानोब्राह्मणादीर्घदर्शिनः ॥ एवमाहुःसदाचाराद्दृष्ट्वापापरतंजनं ॥ नास्तिकंमोक्षरहितंयथे ष्टाचारिणंसदा ॥ २२२ ॥ आसुरोजनएवायमासुरंकर्मसर्वदा ॥ कुतोयंनास्तिकोभूत्वायज्ञादिपरिवर्जितः ॥ २२३ ॥ मृतेसतितथाप्रेतंभक्ष्यवस्त्रादिनामुहुः ॥ अलंकरोतिबहुशोमूढोवैस्वस्यमायया ॥ २२४ ॥ अलं कारादिनाचैवंकृतेचप्रेतदेहके ॥ परलोकजयंयस्मान्मन्यतेयमतीवच ॥ २२५ ॥ अहोमौर्ख्यस्यमाहात्म्यंमं दस्यपरिवर्त्तते ॥ आत्मादेहस्ततोनान्योमृतश्चपुनरेवसः ॥ परलोकफलंगच्छेत्प्रेतालंकरणेनह ॥ २२६ ॥ त स्यदेहस्यकेनस्यात्पुनरुत्थानमेवयत् ॥ भूमिभावंगतेप्रेतेतत्रयत्नोपपद्यते ॥ महातडागसंस्थानांमंडूकानां निदर्शनं ॥ २२७ ॥

इतिकिं अलंकारादिनाप्रेतदेहेएवंकृतेपूजितेसतिअतीवातिशयेनपरलोकजयःस्यादिति ॥ २२५ ॥ एषोऽस्थानेविभ्रमःकथंमौर्ख्यंविना शोभेतेत्याहुः अहोइति माहात्म्यंविलासःपरिवर्ततेसंततोभवतियतःप्रथमंदेहआत्मत्वंभातिततःसदेहरूपआत्मामृतःसन्शवालंकरणेनपर लोकेसत्फलंभुंक्तेइतिभातीत्यर्थः ॥ २२६ ॥ उपपत्तिलेशोप्यत्रानुकूलोनास्तीत्याह तस्येति प्रेतेशवेभूमिभावंगतेसतितस्यविनष्टस्यैवदे हस्यपुनरुत्थानंकथंस्यात् ननुमृल्लीनमंडूकवत्स्यादितिशंकांपरिहरति तत्रेत्यादिना यत्यतस्तत्रार्थेमंडूकानांनिदर्शनंदृष्टांतीकरणंनोपप द्यतेनसंभवतीत्यर्थः ॥ २२७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्नहेतुतयावैषम्यमाह यतइति यतःसरसिशुष्केसतिसर्वांगैरविशीर्णैरुपेतामंडूकाजलवियोगेनमूर्छिताःसंतःपुनर्मेघनीरसांनिध्येनोत्ति
ष्ठंतीतिसंभवति अत्रतुविशीर्णावयवस्यदेहस्यपुनरुत्थानंकथंस्यात्यतस्तेदृष्टांतीकृतामंडूकाअपिकाकादिभिर्विदारितावयवायेभवंति
तेपुनर्नोत्तिष्ठंतीतिप्रसिद्धमित्यर्थः ॥ २२८ ॥ प्राजापत्यवायुसंसर्गप्रभावाद्विशीर्णोत्थानमाशंक्यतदीययुक्त्यैवोष्ट्रलगुडन्यायेनपरिहर
ति दृष्टेसतीति दृष्टेफलेसतिलभ्यमानेअदृष्टंतत्त्वंवस्तुस्वरूपंनस्यान्नकल्पनायोग्यमितियन्मतमास्तिकसंप्रदायनिरासायतार्कितंविरोचन
स्यासीत्तदेतद्दूषणंप्राजापत्यवायुवशान्मृतजीवनंकल्पयतोस्यविरोचनस्यैवमूर्द्धनिपतितमित्यर्थः ॥ २२९ ॥ यच्चभीरुप्रवर्त्तितत्वमा

यतःशुष्केसरस्येतेसर्वावयवसंयुताः ॥ मूर्छिताःपुनरुत्थानंप्राप्नुयुर्मेघनीरतः ॥ विनष्टसर्वावयवाःपुनर्जी
वंतिनैवते ॥ २२८ ॥ दृष्टेसतिनतत्त्वंस्याददृष्टमितियन्मतं ॥ तदस्यैवपरावृत्तमत्रैतन्मृतजीवने ॥ २२९ ॥ ना
रदाद्याश्चभृग्वाद्याःशक्रस्वायंभुवादयः ॥ महावीर्याःकथंनुस्युर्भीरवःसर्ववेदिनः ॥ २३० ॥ विरोचनस्ततोदै
त्यःकामज्वरवशंगतः ॥ जजल्पस्वात्महीनांस्तांस्तत्रयत्किंचिदेवयत् ॥ २३१ ॥ तन्मतात्कामुकोभूत्वानरकग्रा
ममार्गगः ॥ दुस्तर्कैरात्मनःपापंपुण्यंकर्तुंसमुद्यतः ॥ अकीर्तिमतुलांप्राप्यलोकेस्मिन्पापमोहितः ॥ २३२ ॥
परलोकेतथादुःखंप्रतीकारविवर्जितं ॥ यास्यतीत्यादिबहुशःप्राहुस्तेन्यायसंयुतं ॥ २३३ ॥

स्तिकपथस्योच्यतेतदांध्यविलसितमित्याह नारदाद्याइति नुइतिवितर्के ॥ २३० ॥ तस्मात्सर्वप्रमाणविरुद्धंवैरोचनंमतमुन्मत्तप्रलपि
तत्वेनहेयमित्याह विरोचनइति यद्यस्मात्स्वात्महीनानसुरान्प्रतितत्रदैत्यसभायांयत्किंचिदयुक्तमेवजजल्पकथितवांस्ततोहेतोःकाम
ज्वरेणव्यामोहितचित्तएवविरोचनोबोध्यइत्यर्थः ॥ २३१ ॥ येतुतन्मतमनुसरिष्यन्तितेआसुरींयोनिमापन्नाइत्यादिगीतोक्तंदुर्विपाकं
यास्यंतीत्याह तन्मतादिति यस्तुकामुकोनरकरूपग्रामस्यमार्गेप्रतिष्ठमानस्तन्मतात्तदासुरंमतमादायपापंहिंसादिकंपुण्यंकर्त्तुंपुण्यवद
नुष्ठेयतांनेतुंसमुद्यतोभवेत्सइहलोकेनिंदांप्राप्यपरलोकेदुःखधारांयास्यतीत्येवंयुक्तिमद्वचोयेशिष्टपुंगवास्तेवदंतीतिद्वयोरर्थः ॥ २३२ ॥
॥ २३३ ॥ ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह तस्मादिति सुखकारिभिः सुखकामैः ॥२३४॥ अथनवमकण्डिकोक्तमिंद्रस्यपुनरागमनवृत्तमाह इंद्रइतिद्वाविंशतिश्लोकैः ततोदुर्मतपरत्वात्तंविरोचनंतामसंविज्ञायार्द्धमार्गेशनैर्गतिमिषेणेंद्रस्त्यक्तवान् सुखवित्तयेसुखलाभाय ॥ २३५॥ तंत्यक्त्वेति तंविसृज्यदेवानप्राप्यक्वचिदेकांतेस्थितोदेवराडिंद्रएतद्वक्ष्यमाणरूपंभयंभयप्रयोजकंविपरीतात्मग्रहणगतंदोषंदृष्टवानालोचितवान् आत्मनिमनसि यतोबुद्धिमान्सात्विकइत्यर्थः ॥ २३६ ॥ यथाबृहदारण्यकसप्तमेदेवनरासुरैःश्रेयोमार्गंपृष्टेनप्रजापतिनादइत्यक्षरेउच्चारितेदमदानद

तस्माद्वैरोचनोमार्गोनगंतव्यःकदाचन॥ अपिकंठगतैःप्राणैःस्वात्मनःसुखकारिभिः ॥ २३४ ॥ इंद्रस्ततोत्र विज्ञायतामसंतंविरोचनं ॥ अर्द्धमार्गेशनैर्गच्छंस्त्यक्तवान्सुखवित्तये ॥ २३५ ॥ तंत्यक्त्वाक्वचिदासीनोदेवानप्राप्यदेवराट् ॥ दृष्टवान्भयमेतत्सबुद्धिमान्स्वयमात्मनि ॥ २३६ ॥ देहस्यजनिमृत्यादिधर्माःसंतिसहस्रशः ॥ सोऽमृतत्वादिगुणकःसत्सुतेषुभवेत्कथं॥२३७॥ घटादिवत्ततोदेहोनात्मास्यादत्रसर्वथा॥ छायात्मा ततएवायंचक्षुरादिषुसंस्थितः॥ अभयंचामृतंब्रह्मत्स्यात्मोक्तःपरमेष्ठिना॥ २३८॥

याःस्वस्वभावानुसारेणतैःश्रेयोहेतुत्वेनगृहीतास्तथात्रापिदृश्यतइतिपदघटितप्रजापत्युपदेशेलक्षणयादृश्यमानच्छायासदृशोदेहआत्मेतिविरोचनेनगृहीतंदोषातिशयादिंद्रेणतुश्रुत्यविघातेनच्छायात्मेतिगृहीतमासीदतस्तत्रैवदोषालोचनमिंद्रस्यदर्शयति देहस्येतिदशभिः यतश्छायायाःस्वरूपलाभायोपजीव्येदेहेजन्मादिविकाराणांस्फुटत्वाद्दुर्लभममृतत्वादिकंप्रत्युतघटादिवदनात्मत्वमेवविज्ञायतेततोहेतोस्तदुपजीविकाछायाचक्षुषिदर्पणादौवादृश्यमानाकथमात्मास्यात् हियतःअमृतत्वमभयत्वंब्रह्मत्वंचयत्रवस्तुनितस्यात्मत्वंप्रजापतिनोक्तमितिद्वयोरर्थः ॥ २३७॥ २३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रामृतत्वादिसत्वंशंकित्वापरिहरति मरणंचेति यद्यप्यत्रच्छायात्मनिमरणभयेस्वतोबिंबनैरपेक्ष्येणनदृश्येतेइत्यमृतत्वाभयत्वयोरुपप त्तिस्तथाप्रातःकालादौवर्द्धमानत्वरूपंब्रह्मत्वंचसंभवतितथाप्येषच्छायात्मादेहवत्आस्यःअसुक्षेपणेइतिस्मृतेःक्षेपार्होहेयइत्यर्थः आत्म त्वेननद्रष्टव्यइतियावत् यदिदेहधर्ममास्यतारूपंनगृह्णीयात्तदातस्यानुकारलक्षणःस्वभावोव्याहन्येतेतितर्कंसूचयंश्छायायादेहधर्मानु कारितांहेतुतयाह यतइति एषच्छायारूपआत्मायतोदेहस्यधर्मानूगुणदोषरूपानादत्तेतद्धारयतिततोहेयत्वमपिकथंनाददीतेतिद्वयोर र्थः ॥ २३९ ॥ २४० ॥ देहगुणदोषधारणमेवस्फुटयति देहइति देहेभूषणवस्त्रच्छत्रयुक्तेसत्ययंछायात्मापितथैवभातीत्यर्थः ॥ २४१ ॥ अंधेइति तथाबिंबेदेहेअंधेनेत्रद्वयविकलेसत्ययंछायात्माऽप्यंधोभवतितथाश्रुतौस्नामपदोक्तेश्लेष्मणेकफेनद्रुतनासिकेसतितथाभवति

मरणंचभयंवापिदृश्यतेऽत्रस्वतोनहि॥प्रातरादिषुकालेषुबृहत्ताचास्यदृश्यते॥२३९॥यद्यप्येवंतथाप्यस्यएष देहइवास्तिहि॥यतोदेहगुणानेषदोषांश्चाप्नोतिसर्वदा॥ २४०॥ देहेलंकरणैर्युक्तेच्छायात्मास्यादलंकृतः॥ सु वस्त्रेचसुवस्त्रोयंछत्रोछत्रिणिसर्वदा ॥ २४१ ॥ अंधेदेहेभवेदंधःश्लेष्मणेश्लेष्मणायुतः॥ हीनांगेचविहीनां गःस्वयंनायंहिकश्चन॥ २४२ ॥ जडेविनश्वरेचास्मिन्ननुकारस्वरूपिणि॥ भोगसंगत्यभावेनभोक्तृताचक थंभवेत्॥ २४३॥ लोककामादिभोगांस्तिनाहंपश्यामिकांचन ॥ अस्मिन्नात्मनितेनात्मास्यादस्मात्कोपिचा परः ॥ २४४ ॥

एवंहस्तादिविकलेसतितथाभवति ननुस्वाभाविकस्तत्रनकोपिदोषइतिचेन्मैवं निःस्वभावत्वस्यैवतत्रदोषराजत्वादित्याशयेनाह स्व यमित्यादि अयंछायात्मास्वयंस्वभावेनकोपिकेनापिरूपेणनिर्वचनार्होनभवतिपरापेक्षत्वेनमिथ्यात्वादित्यर्थः ॥ २४२ ॥ किंचास्मिं श्छायात्मनिविज्ञातेसतिप्रजापत्युक्तंसर्वलोककामाप्तिरूपंफलंश्रुतौभोग्यपदोक्तंनयुज्यतेअस्मिन्भोक्तृत्वस्यैवासंभवादित्याह जडइति द्वाभ्यां जडत्वाद्विनश्वरत्वादनुक्रियतेइत्यनुकारोबिंबंतत्सापेक्षस्वरूपत्वाच्चयोभोगानांसंगतेर्योग्यतायाअभावस्तेनास्यच्छायात्मनोभो क्तृतायतोनविद्यतेततोस्मिन्नात्मनिविज्ञातेकांचनापिलोकादिफलाप्तिंनपश्यामितस्माच्चैतद्भिन्नेनैवकेनचिदात्मनाभवितव्यमितिद्वयोर र्थः॥२४३॥ २४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाकृतनाशाभ्युपगमोपिप्रसज्जेतेत्याह देहेइति देहेनष्टेसतिच्छायात्मायतस्तंदेहमनुसृत्यनश्यतितदापरलोकगंताकश्चिदपरःकल्प्यःस्या त्तथाचकृतनाशापत्तिरित्यर्थः ॥ २४५ ॥ तस्माद्देहच्छायाभ्यांपृथक्केनसंभावितआत्मापुनःप्रजापतिप्रतिप्रष्टव्यइत्याह तमेतमिति ॥ २४६ ॥ सात्विकत्वादेवंविचार्योपायनहस्तइंद्रःपुनःप्रजापतिंप्राप्तइत्याह इत्थमिति ॥ २४७ ॥ तमागतमिति तामिंद्रंपुनरागतंवीक्ष्य मुदितचेताब्रह्माएतद्वचनमुक्तवान् ॥ २४८ ॥ एतत्किमतआह सार्धमिति हेमघवन्भवानस्मान्मत्समीपदेशात्तुष्टचेताःसन्गतवान्इदा नींतेपुनरागमनंकिंप्रयोजनकमित्यर्थः ॥ २४९ ॥ इत्युक्तइति इतिइत्थंउक्तःपृष्टइंद्रोदेहच्छाययोरात्मत्वेस्वयंतर्कितंदोषजातंश्राव

देहेनष्टेतमन्वेषच्छायात्मापिविनश्यति ॥ तथाचपरलोकस्यगंताकश्चित्परोभवेत् ॥ २४५ ॥ तमेतंपुनरेवाहं गत्वापृच्छामिदेहतः ॥ छायायाश्चपृथग्भूतमात्मानंपरमेष्ठिनं ॥ २४६ ॥ इत्थंविचार्यदेवेंद्रःसात्विकःपुनराव्र जत् ॥ प्रष्टुकामस्तमात्मानंब्रह्माणंजगतांगुरुं ॥ समिदादिकरोभूत्वाविनयेनसमन्वितः ॥ २४७ ॥ तमागतं पुनर्वीक्ष्यब्रह्मालोकपितामहः ॥ उक्तवान्वचनंत्वेतद्धृष्टचेताहसन्निव ॥ २४८ ॥ सार्द्धंविरोचनेनास्मान्मघ वन्गतवान्भवान् ॥ हृष्टचेताःकिमिच्छन्सन्पुनरप्यागतोधुना ॥ २४९ ॥ इत्युक्तःसर्वमेवाहदोषंस्वेनावधारि तं ॥ शक्रःप्रजापतिंसोपितमाहवचनंत्विदं ॥ २५० ॥ एवमेवभवानाहयद्देहच्छाययोरिह ॥ भोक्तृतानास्ति ताभ्यांतमेतमन्यंवदाम्यहं ॥ भूयःपूर्वंयउक्तस्तेसहप्राल्हादिनामया ॥ २५१ ॥ पूर्वंद्वात्रिंशतंवर्षान्कालमासी दबुद्धितः ॥ ब्रह्मचर्यमिदानींतुबुद्धिपूर्वंवसेहभोः ॥ तावंतमेवकालंत्वंततोवक्ष्यामितेपुनः ॥ २५२ ॥

यामासततःप्रजापतिरिदमाह इदंकिं हेमघवन्भवान्यदिदंदूषणंदेहच्छाययोराह इदंकिं अनयोर्भोक्तृताभोग्यग्रहणयोग्यतानसंभव तिजडत्वादितितदेवमेवयुक्तमेवपरंत्वनुक्तोपालंभसमोयंश्रमोयस्याविज्ञानात्कृतस्तमेतमात्मानंदेहच्छायाभ्यामन्यंविलक्षणंभूयोवदामि उपदेक्ष्यामि एतंकं यआत्मातेतुभ्यंप्राल्हादिनाविरोचनेनसहवर्तमानायोक्तइतिद्वयोरर्थः ॥ २५० ॥ २५१ ॥ परंतुचित्तशुद्धौताव त्कालंब्रह्मचर्यंकार्यमित्याह पूर्वमिति द्वात्रिंशद्वर्षरूपकालावच्छिन्नंब्रह्मचर्यंपूर्वमबुद्धिपूर्वमसंकल्पितमासीत् इदानींतुतद्विधिवत्कु र्वित्यर्थः ॥ २५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवमुक्तेइति इत्थंप्रजापतिनोक्तेसतिइंद्रस्तद्ब्रह्मचर्यंयथावच्चक्रेकृतवान् तस्मिंस्तावतिकालेकृतेप्रजापतिनानियतेगतेसतिप्रजापतिरिदंव
क्ष्यमाणंस्वप्नसाक्षित्वेनात्मनःप्रतिपादकंवचनमभाषताहेत्यर्थः ॥ २५३ ॥ दशमकंडिकार्थमाह पूज्यमानइतिसप्तभिः यःपूर्ववर्णितआ
 त्मासएवस्वप्नेस्वकीयविभूतिभूतैर्नानाविषयैःपूज्यमानस्तान्साक्षित्वेनानुभवन्नितियावत्चरतिवर्त्तते एषआत्मत्वेनज्ञेयइत्यर्थः ॥२५४॥
एवमुक्तेइति एवमुक्तेसतिसमघवान्पूर्ववद्गतवान् तथामार्गेस्वप्नद्रष्टरिइमंदोषंविचिंत्यपुनरागमदित्यर्थः ॥ २५५॥ तद्दोषचिंतामभिनय
ति शरीरेति यद्यप्येषस्वप्नद्रष्टादेहस्यस्थूलस्यदोषानांध्यरोगादींश्छायात्मवन्नभजतेतथाप्ययंवक्ष्यमाणभयमोहादिरूपोदोषःस्फुटोवर्त्त

एवमुक्तेतथाचक्रेसशक्रस्तद्यथोचितं॥ कृतेतस्मिन्गतेकालेधातेदंतमभाषत॥ २५३॥ पूज्यमानःपुमान्स्वप्ने
चरतिस्वात्मभूतिभिः॥ यःसआत्मेतिभवताज्ञातव्यःशक्रसर्वथा॥ २५४ ॥ एवमुक्तेसगतवान्पूर्ववद्धृष्टमा
नसः॥ मघवानागतस्तद्वद्दोषमेतंविचिंत्यहि॥ २५५॥ शरीरगुणदोषाभ्यांछायात्मेवनलिप्यते ॥ यद्यप्येष
तथाप्यस्यदोषोयंसुमहानिह॥ २५६ ॥ स्वप्नेघ्नंतीवतंकेचिद्वैरिणःश्वापदाअपि॥ उच्चाटयंतिहस्तीवकरमुद्य
म्यकोपितः॥ अप्रियाणांचवेत्तेवपुरुषःस्वप्नगोभवेत्॥ १५७॥ अमृतंनिर्भयंब्रह्मत्यानंदात्मेतिकीर्तितं॥ ब्र
ह्मणामत्यमेषोपिविपरीतस्ततोनसः॥ २५८ ॥ अस्मादन्येनकेनापिभवितव्यंत्विहात्मना ॥ ततःप्रजापतिं
भूयोगमिष्यामियथापुरा॥ २५९॥

तेइत्यर्थः ॥ २५६ ॥ तंदोषंवर्णयति स्वप्नइति तंस्वप्नद्रष्टारंकेचिद्वैरिणोघ्नंतीवहिंसंतइवप्रतीयंतेतथाश्वापदादृकव्याघ्रादयउच्चाटयंती
वपलयामानंकुर्वंतीवयथामत्तोहस्तीकोपितःसन्करंशुंडामुद्यम्योच्चाटयेत्तथेत्यर्थः तथाअप्रियाणांसुहृद्वियोगादीनांवेत्ताचकाराद्रोद
नादिकर्त्ताभवतीत्यर्थः अत्रसर्वत्रइवशब्दःप्रजापतिवचसिश्रद्दधानेनमघवतामभैवात्रव्यामोहइतिसूचयितुंप्रयुक्तइतिबोध्यं॥ २५७ ॥
प्रजापत्युक्तंलक्षणमत्रनसंभवतीत्याह अमृतमिति एषस्वप्नद्रष्टायतोविपरीतःप्रजापत्युक्ताद्विलक्षणस्ततःसउपक्रमोक्तआत्मानभवती
त्यर्थः॥२५८॥अस्मादिति अस्मात्स्वप्नद्रष्टुःसकाशादन्यःकश्चिदात्मासंभाव्यतेतन्निर्णेतुंभूयःप्रजापतिंगच्छामीत्यर्थः ॥ २५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिसंचिंत्येति इत्थंसंचिंत्यतंप्रजापतिंगत्वातेनप्रजापतिनापूर्ववत्पृष्टेसतिस्वाभिप्रायंश्रावयित्वाप्रजापतिवाक्येनद्वात्रिंशद्वर्षानवसत् तावतिकालेपूर्णेब्रह्मेदंसुषुप्तिसाक्षित्वेनतस्यात्मनोबोधकंवाक्यमाहेत्यर्थः ॥ २६० ॥ एकादशकंडिकार्थंत्रिशताश्लोकैःप्रदर्शयंस्तत्रसुषुप्तिसाक्षिपरस्यप्रजापतिवाक्यस्यार्थमाह यदेतित्रिभिः यदायंपुरुषःसुप्तोभवति कीदृशःसमस्तः अस्यैवविवरणंज्ञानवर्जितःअस्तंगतविशेषविज्ञानकः तदायत्रहार्दाकाशरूपेब्रह्मलोकेमायामात्रोपाधिकेएकतांप्राप्यदुःखलेशैस्तत्प्रयोजकैरिंद्रियैश्वरहितःसर्वविक्षेपरहितइतियावत् भवतितथायत्रहार्दाकाशेगतोजंतुस्तंहार्दाकाशंप्राप्तमप्यविज्ञायैवपुनःपुनरागच्छतिसएवहार्दाकाशोऽमृतादिलक्षणस्तेआत्मेतित्रया

इतिसंचिंत्यगत्वातंतेनोक्तेसंनिवेद्यच ॥ स्वाभिप्रायंयथापूर्वंन्यवसत्तस्यवाक्यतः ॥ द्वात्रिंशद्वर्षकेकालेगते ब्रह्माहतंपुनः ॥ २६० ॥ यदायंपुरुषःशेतेसमस्तोज्ञानवर्जितः ॥ दुःखलेशेनरहितएकतांप्राप्यचेंद्रियैः ॥ २६१ ॥ हार्दाकाशेब्रह्मलोकेमायामात्रशरीरिणि ॥ यत्रगत्वापिसर्वोयंयथापूर्वंसमाव्रजेत् ॥ २६२ ॥ नजानातिचसंततंस्वेनप्राप्तंकथंचन ॥ सतआत्मामृतंब्रह्मभयशून्यंपुरोदितं ॥ २६३ ॥ एवमुक्तेयथापूर्वंगतवानागतःपुनः ॥ अर्द्धमार्गइमंदोषंनिरीक्ष्येंद्रोतिसात्विकः ॥ २६४ ॥ आत्मानंनपरंचैषविजानातिविमोहितः ॥ अयंवाहंपरोवायमितियद्वत्पुमानिह ॥ विनाशमिवसंप्राप्तोविद्यमानोप्यसौतदा ॥ २६५ ॥ ततःकथंभवेदात्मात्वमृतत्वादिलक्षणः ॥ ततःप्रजापतिंभूयोगमिष्यामियथापुरा ॥ २६६ ॥

णामर्थः ॥ २६१ ॥ २६२ ॥ २६३ ॥ एवमुक्तइति एवंप्रजापतिनोक्तेसतितत्राप्यज्ञानविशिष्टात्मविभ्रमेणतुष्टइंद्रोगतवांस्तत्रार्द्धमार्गेगत्वाविमृशन्स्वयंगृहीतप्राज्ञसंज्ञकआत्मनिइमंवक्ष्यमाणंदोषमालोच्यपुनरागतइत्यर्थः ॥ २६४ ॥ दोषचिंतामभिनयति आत्मानमितिद्वाभ्यां एषसुषुप्तःपुमानहमयमेतादृशःपरोमद्भिन्नस्तादृशइत्येवमात्मानंपरंचनविजानातियद्वद्विमोहितोमादकैर्दूषितचित्तोनविजानातितद्वदितिमौढ्यंतथाविनष्टप्रायतापत्तिश्चेत्येतौदोषौस्फुटौ ॥ २६५ ॥ ततइति ततउक्तदोषयोगात्प्रजापत्युक्तलक्षणमात्मत्वमत्रनसंभवतीतिपुनस्तदवधारणायगुरोरंतिकेगंतव्यमित्यर्थः ॥ २६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थैइति अत्रइंद्रागमनसंबंधिनिपर्यायेक्रमेचतुर्थैसतिचतुर्थवारमागमने
 इतिसंचिंत्येति तच्छब्दार्थोब्रह्मा उक्तेपृष्टे ॥ २६७ ॥
सतीतियावत् विधाताब्रह्मानिवासेस्वस्थानेब्रह्मचर्यार्थंपंचैववर्षाणिअतिष्ठिपत्इंद्रंस्थापितवान्नतुपूर्ववद्द्वात्रिंशद्वर्षाण्युपदिष्टवानित्यर्थः
॥ २६८ ॥ इंद्रस्यब्रह्मचर्यवर्षाणिसंकलयति वर्षाणीतिद्वाभ्यां अयमिंद्रआदौविरोचनसहितःस्वयमनादिष्टोपिब्रह्मचर्यार्थंद्वात्रिंशद्व
॥२०॥ र्षाण्यवसदित्यर्थः तावंत्येवचवर्षाणिब्रह्मणोवाक्याद्द्विवारमवसत् एवंद्वात्रिंशतस्त्रिरावृत्तौवर्षाणांषडधिकानवतिर्जाता ॥ २६९ ॥
अधुनेति अधुनाचतुर्थेपर्यायेपंचवर्षाण्यवसत् एवंसर्वसंकलनेइंद्रस्यप्रजापतिसमीपेकृतस्यब्रह्मचर्यस्यकालएकोत्तरशतसंख्यवर्षरूपो

इतिसंचिंत्यगत्वातंतेनोक्तंसन्निवेद्यच ॥न्यवसत्पूर्ववत्तस्यवचनाद्ब्रह्मवित्तये ॥ २६७॥ चतुर्थेत्रहिपर्याये
पंचवर्षाण्यतिष्ठिपत्॥ निवासेब्रह्मचर्यार्थंविधातापूर्ववन्नहि ॥ २६८॥ वर्षाण्यादौस्वयंचायंद्वात्रिंशद्ब्रह्मच
र्यतः॥ द्विवारंब्रह्मणोवाक्यादेवंषण्णवतिर्ह्यभूत्॥ २६९॥ अधुनापंचवर्षाणित्येवमेकोत्तरंशतं॥ इंद्रस्याभू
द्ब्रह्मचर्यंप्रजापतिसमीपतः॥ २७०॥ ब्रह्मचर्येणसर्वोपिलभ्यतेदुर्लभंहियत्॥ब्रह्मचर्यंचसर्वाणियज्ञादीनिव
दंतिहि॥ २७१॥ यःकश्चिदात्मनोज्ञाताब्रह्मचर्यात्ससर्वदा॥जानीतेप्रियमात्मानंयज्ञस्तत्तेनकथ्यते॥ २७२॥

भूदित्यर्थः॥ २७०॥ अस्यब्रह्मचर्यस्यमहिमानमुत्तरग्रंथेनप्रपंचयन्प्रथममेतदध्यायपंचमकंडिकोक्तंतद्दर्शयति ब्रह्मचर्येणेतिनवभिः सर्वो
प्यधिकारीयद्यद्दुर्लभंतत्सर्वमतोलभते हियतएतद्ब्रह्मचर्यंसमीहितसाधनत्वरूपसाधर्म्येणसर्वयज्ञेष्टादिरूपंवदंतिवैदिकाइत्यर्थः ॥ २७१ ॥
नकेवलमुक्तसाधर्म्येणगौणमेवयज्ञादिरूपत्वमस्यकिंतुनिरुक्तालोचनेमुख्ययज्ञादित्वमस्यैवेतिदर्शयंस्तत्रयज्ञपदसमन्वयंकरोति यइति
पदांतरैरपिनिर्ब्रूयादितिनिरुक्तेयास्कोक्तविधयायज्ञपदनिर्वचनेक्रियमाणेयोयोज्ञाताकालत्रयेपितस्यसर्वस्यज्ञेयलाभहेतुरितिश्रुतिदर्शि
तवाक्यैकदेशभूतयकारज्ञकारयोःसमुदायोयथाब्रह्मचर्येनियमेनान्वर्थोनतथाज्योतिष्टोमादौतत्रविद्यांगत्वनियमाभावात् तथाचनियमे ॥२०॥
नज्ञानसाधनस्यब्रह्मचर्यस्यैवमुख्यंयज्ञत्वमित्यर्थः ॥ २७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथास्वर्गादीष्टसाधनत्वमादायदर्शादिषुप्रयुज्यमानइष्टशब्दोपितदपेक्षयाऽत्रैवमुख्योयतोदर्शादिलभ्येषुस्वर्गादिषुयदिष्टत्वंतद्ब्रह्मचर्यल भ्यात्मौपाधिकमेवेत्याशयेनेष्टपदसमन्वयंदर्शयति इष्टमिति सर्वापेक्षयाप्रियतमत्वेनेष्टशब्दस्यमुख्यार्थभूतमात्मानंयतोऽमुनाब्रह्मचर्येणै वलभतेततउपचारादपीइदमेवेष्टमितिवाच्यमित्यर्थः ॥ २७३॥ यज्ञेष्टपदयोःपर्यायत्वंवारयति ज्योतिष्टोमादिकंइति यज्ञेष्टशब्दार्थयोः कोशादिलौकिकप्रमाणवशाद्भेदेभेदाभावेपिसतीत्थंवैदिकप्रसिद्ध्यनुसारेणभेदोबोध्यः इत्थंकथं सोमपश्वादिद्रव्यसाध्योज्योतिष्टोमा दिर्यज्ञइत्युच्यते दर्शादिकमौषधद्रव्यकंत्विष्टमुक्तंमीमांसकैरित्यर्थः ॥२७४॥ सत्रसंज्ञमयनंसंघीभवनमितिव्युत्पत्त्यानानाकर्तृकयागवि शेषवाचकंसत्रायणशब्दंप्रकृतेयोजयति सत्रायणमिति सतस्त्राणस्यायनमितिपदांतरैर्निरुक्तस्यसत्रायणशब्दस्यार्थोब्रह्मचर्यमेवयतोमु

इष्टंयत्कथ्यतेलोकेतदप्येतन्नचापरं॥ इष्टंसर्वप्रियतममात्मानममुनायतः ॥ जानीतेततएवैतदिष्टमित्युच्य तेबुधैः॥ २७३॥ ज्योतिष्टोमादिकंयज्ञइष्टंदर्शादिरीरितम्॥ अभेदेपिभवेद्भेदइत्थंयज्ञेष्टयोःसदा॥ २७४॥ सत्रायणंचयस्माद्धुर्ब्रह्मचर्यंचतद्भवेत्॥ अमुनासंतमात्मानंयातिसंसारभीतितः॥ २७५ ॥ मौनंचब्रह्मचर्यं स्यान्मनुतेस्यप्रसादतः॥ यतःसर्वोपिचात्मानंनान्यथाजन्मकोटिभिः ॥ २७६ ॥ अनाशकायनंयच्चब्रह्मच र्यंहितत्स्मृतम्॥ अनेनलब्धआत्मायंननश्यतिकदाचन॥ २७७॥

नाब्रह्मचर्येणसत्पदार्थमात्मानंयातित्राणंनयतिसंसारादित्यर्थः ॥२७५॥ तथामुनेर्मननशीलस्यभावइतिव्युत्पत्तिकंमौनपदंवाङ्निरोधात्म केतपसिसंन्यासाश्रमेवाप्रसिद्धमपिब्रह्मचर्यस्यैववाचकमस्यचियालाभद्वारामननहेतुतायाःसमुत्कर्षादित्याह मौनमिति यतोऽस्यब्रह्मच र्यस्यप्रभावादेवात्मनोमननेक्षमोभवतिततइदमेवमौनपदवाच्यमित्यर्थः ॥ २७६ ॥ अशनमाशःसएवाशकस्तदभावोनाशकस्तस्यायनं धारणमितिव्युत्पत्त्याउपवासपरायणतावाचकमनाशकायनपदमपिनाशरहितात्मलाभसाधनतारूपार्थमादायास्यैववाचकमित्याह अ नाशकायनमिति अनेनब्रह्मचर्येणलब्धआत्मायतोननश्यतिनतिरोभवतिसविलासाज्ञानरूपप्रतिबन्धदाहात् ततोस्याऽनाशकायनत्व मित्यर्थः ॥ २७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथावनवासेप्रसिद्धमप्यरण्यायनपदमरेतिण्येतिचसंज्ञिताभ्यामर्णवतुल्यन्ह्रदाभ्यांयुक्तस्यब्रह्मलोकस्यप्राप्तिसाधनत्वरूपमर्थमादायब्र ह्मचर्यमेवप्रतिपादयतीत्याह ब्रह्मचर्यमिति ॥ २७८ ॥ सर्वलोकेषुकामचारोप्यस्यैवफलमित्याह ब्रह्मचर्येणेति अस्यप्रभावात्सर्वलोकेष्वव्याहतगतिरप्रतिबद्धगतिःसन्पुमांश्चरेत्यथानारदः ॥ २७९ ॥ अथयाज्ञवल्क्यादिस्मृतिप्रसिद्धंमहिमानमस्यवर्णयति क्षीरमिति

ब्रह्मचर्यंचसंप्रोक्तमप्यरण्यायनंहियत्॥ अरण्यादिपुतंयस्माद्ब्रह्मलोकंचगच्छति॥ २७८ ॥ ब्रह्मचर्येणसर्वस्मिन्नपिलोकेव्रसंचरेत्॥ इच्छयानारदोयद्वद्व्याहतगतिःपुमान् ॥ २७९ ॥ क्षीरंमधुतथासर्पिर्दधिचामृतमेववा॥ ब्रह्मचर्येणसंपन्नाःपिबंतिस्वेच्छयैवहि॥ सोमंचब्राह्मणाःशश्वत्सर्वभीतिविवर्जिताः॥ २८० ॥ मृत्युदुःखात्मकंसर्वंसंसारंचतरंतिते ॥ संप्राप्यस्वात्मरूपंतमानंदात्मानमव्ययम् ॥ २८१ ॥ किंबहूक्तेनलोकेस्मिन्साधनंयद्धिविद्यते॥ ब्रह्मचर्येतुतत्सर्वमंतर्भवतिसर्वथा ॥ २८२ ॥ यथागजपदेसर्वेपादाअंतर्भवंतिहि॥ नैतस्मादधिकंकिंचिद्ब्रह्मचर्याद्धिविद्यते॥ २८३ ॥

ब्रह्मचर्यसंपन्नाऋगाद्यध्ययनप्रभावेणक्षीरादिसोमरसांतद्रव्यैर्देवादींस्तर्पयंतस्तत्प्रसादेनस्वयमपिक्षीरादिकंयथाकामंभुञ्जतेइतितत्स्मृतावुक्तं ॥ २८० ॥ एतत्फलमानुषंगिकंमुख्यंतुविद्याद्वारासंसारतरणमेवेत्याह मृत्युदुःखात्मकमिति तेब्रह्मचर्यसंपन्नाः संप्राप्यज्ञात्वा ॥ २८१ ॥ यदाचैवंपरमपुरुषार्थमोक्षसाधकत्वमस्यतदासर्वेषामभीष्टसाधनानांफलद्वारात्रांतर्भावोबोध्यःसर्वेपादाहस्तिपादेनिमग्नाइतिन्यायादित्याह किंबहूक्तेनेतिद्वाभ्यां ॥ २८२ ॥ २८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोधकमभ्युदयदंवाब्रह्मचर्यमेवकर्तॄणामप्रतिबंधेनसद्गतिप्रयोजकत्वादित्याह ब्रह्मचर्यमिति शौचंशोधकं तपःअभ्युदयदं एददुभयरूपं ब्रह्मचर्यमेव यतएतद्वंतो दिविंमहर्लोकंबहवोगताः नकेवलंदिवमेवकिंतुब्रह्मलोकद्वारंदेवयानपंथानमपिगताइत्याह अष्टाशीतीति तेउत्तरं देवयानाख्यमपुनरावृत्तिफलकंमार्गमपिगताः कीदृशंतंमार्गं अष्टाशीतिसहस्रसंख्यानांमुनीनांतथाअर्यम्णःसूर्यस्यसंबंधिनं तथाचयाज्ञ वल्क्यस्मृतिः सप्तर्षिनागवीथ्यंतर्देवलोकंसमाश्रिताः तावंतएवमुनयःसर्वारंभविवर्जिताइति यथादक्षिणमार्गेकर्मकांडोपदेष्टारोऽष्टाशीति सहस्रसंख्यामुनयःस्थितास्तथानिवृत्तिमार्गोपदेष्टारोपितावत्संख्यामुनयःसप्तर्षीणांनागवीथ्याश्वाश्विन्यादिनक्षत्रत्रयात्मिकायामध्यदे

ब्रह्मचर्यपरंशौचंब्रह्मचर्यपरंतपः ॥ येस्थिताब्रह्मचर्येणब्राह्मणास्तेदिवंगताः ॥ २८४ ॥ अष्टाशीतिसहस्राणांमुनीनामूर्ध्वरेतसां ॥ आवृत्तिरहितंमार्गमर्यम्णश्चोत्तरंगताः ॥ २८५ ॥ सर्वसाधनसंपन्नाब्रह्मचर्यविवर्जिताः ॥ क्लेशंहिमुनयोभेजुर्विद्वांसोपिचकोटिशः ॥ २८६ ॥ समुद्रतरणेयद्वदुपायोनौःप्रकीर्तिता ॥ संसारतरणेतद्वद्ब्रह्मचर्यंप्रकीर्तितम् ॥ २८७ ॥ स्वर्गंमोक्षंतथाचायुरिहलोकेसुखंयशः ॥ ब्रह्मचर्येणसंपन्नःपुमान्नाप्नोत्यसंशयं ॥ २८८ ॥ नीरोगःकांतिसंपन्नःसर्वदुःखविवर्जितः ॥ ब्रह्मचारीभवेल्लोकेपाप्मनाचविवर्जितः ॥ २८९ ॥

शेतिष्ठंतीतितदर्थः सूर्यसंबंधस्तुसूर्यद्वारेणतेविरजाःप्रयांतीत्यादिश्रुतिप्रसिद्धएवेतिद्वयोरर्थः ॥ २८४ ॥ २८५ ॥ उक्तमहिमानंव्यतिरेकमन्वयंचदर्शयित्वाद्रढयति सर्वेतित्रिभिः एकस्यब्रह्मचर्यस्याभावेइतरेषांसाधनानांसत्वेपिक्लेशःपुरुषार्थप्रतिबंधरूपोदृष्टः अत्रोदाहरणंसौभरिप्रभृतयःकोटिशःप्रसिद्धाइत्यर्थः ॥ २८६ ॥ एतत्सत्वेतुदुःखध्वंसंबहवोगताइतिदृष्टांतेनाह समुद्रेति संसारोजननमरणसंततिरूपंदुःखंतस्यतरणंनिवृत्तिरूपंतदर्थंब्रह्मचर्यं ॥ २८७ ॥ नकेवलमेतद्दुःखंहिनस्तिकिंतुस्वर्गादिरूपंसुखमपिससाधनंकरोतीत्याह स्वर्गमिति मोक्षंनिरतिशयानंदाविर्भावलक्षणंआयुर्जीवनकालातिशयं तथाएतल्लौकिकंसुखं कीर्तिंचब्रह्मचर्यवान्लभते ॥ २८८ ॥ तत्रेहलोकेसुखंयशइत्येतदेवविवृणोति नीरोगइति दुःखैर्बाह्यैर्मानसैश्चवर्जितःपापराहित्याद्यशस्वीचसभवतीति ॥ २८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदाप्रोक्तमाहात्म्यंविज्ञायापिब्रह्मचर्यंस्थिरीकर्त्तुंनशक्नुयात्तदाअनेनविवेकेनस्थिरीकुर्यादित्याशयेनविवेकमुपदिशति अपिमातुरिति संश्लेषंभ्रंशंगच्छतिकरोति तथाचनारीणांमातृसाम्यमालोच्यब्रह्मचर्यंरक्षेदितिभावः ॥ २९० ॥ यन्मैथुनादिगृहमेधिसुखंहितुच्छंकंडूयनेनकरयोरिवदुःखदुःखमितिभागवतोक्तंवातदर्थमालोचयेदित्याह अपिमूत्रस्येति अल्पंपात्रंपात्रीतद्रूपांकुत्सितोवायुरपानाख्यस्तेनदूषितांचतांनारीयोनिंगच्छतःकिंसुखंनकिंचिदपीत्यर्थः ॥ २९१॥ ब्रह्मचर्यसंरक्षणार्थमीशप्रार्थनापरत्वेनयशोहमित्यादिवाक्यंचतुर्दशकंडिकागतमवतारयति एवंचेदिति यदिअतिशयितपापवशादेवंनारीसंसर्गहेयतावगाहीबोधोनजायेततदातत्सिद्ध्येइत्थमीश्वरंप्रार्थयेदित्यर्थः ॥ २९२ ॥ इत्थंकथमित्याकांक्षायामाह सर्वस्येति सर्वस्यब्राह्मणादेर्यद्यशःस्फीतंविस्तृतंतद्वन्निरतिशयप्रेमास्पदंब्रह्मभवितुमिच्छा

अपिमातुःप्रियायाश्चविशेषःकोस्तियेनसः ॥ ब्रह्मचर्यस्यसंश्लेषंपुमान्योषितिगच्छति ॥ २९० ॥ अपिमूत्रस्यपात्रींतांकद्वायुपरिदूषितां ॥ पुंसोभिगच्छतःकिंस्वित्सुखमत्रप्रदृश्यते ॥ २९१ ॥ एवंचेज्जायतेनात्रबोधःपुंसोतिपापतः ॥ तदैनंप्रार्थयेच्चैवमानंदात्मानमीश्वरम् ॥ २९२ ॥ सर्वस्याहंयशःस्फीतंब्रह्मचर्याभिलाषवान् ॥ नारीयोनिमिमांमागांयतोहंनिर्गतःपुरा ॥ २९३ ॥ पिच्छिलांलोमशांतद्वद्दल्कांव्रणसन्निभां ॥ दुर्गंधांक्लेशसंघस्यकारणंसर्वजन्मनि ॥ २९४ ॥ एवंसंप्रार्थ्यमानोयमानंदात्मामुमुक्षुणा ॥ प्रसनोत्यत्रवैराग्यंपुमान्येनकरोतिन ॥ २९५ ॥

मियतश्चर्यायांसत्पथस्थितौअभिलाषवानस्मि यदिब्रह्मभावंनेच्छेयंतदासत्पथेकिमर्थंतिष्ठेयमितिभावः चर्यात्वीर्यापथेस्थितिरित्यमरः ईर्याप्रशस्याब्रह्मविद्यातस्यामार्गेब्रह्मचर्याद्युपायेस्थितिश्चर्येत्युच्यतेइतितदर्थः हेभगवंस्तत्रेत्थमनुगृहाणयथाश्रुतौलिङ्गुपदोक्तांनारीयोनिमागांनगच्छेयंयामयागर्भान्निष्क्रामतानुभूतेत्यर्थः ॥ २९३ ॥ तामेवविशिनष्टि पिच्छिलामिति अदत्कांभक्षयित्रींबलविवेकवैराग्यादिगुणानामितिशेषः व्रणसन्निभत्वेनरक्तवर्णत्वंश्रुतौश्येतपदोक्तंदर्शितं सर्वजन्मनिनानायोनिषुवक्ष्यमाणविधयादुःखदामित्यर्थः ॥ २९४ ॥ एवंप्रार्थनस्यफलमाह एवमिति इत्थंप्रार्थ्यमानईश्वरस्तस्मैतादृशंवैराग्यमत्रवक्ष्यमाणेषुनार्याःस्मरणादिषुप्रसनोतिददाति षणुदानेइतिस्मृतेः येनवैराग्येणपुमांस्तानिनकरोतीत्यर्थः ॥ २९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानिस्मरणादीनिदर्शयति स्मरणमिति वधूनामितिप्रत्येकंसंबध्यते केलिःपरिहासः गुह्यभाषणंरहसिवाग्व्यापारः संकल्पोरमणीयत्वबुद्धिः निश्चयोविश्वासः एतेषांहेतूनांत्यागेकथंरतिःस्यादिति ॥ २९६ ॥ इत्थंब्रह्मचर्यंसिद्धौतत्त्वज्ञानद्वारासर्वयशोरूपस्यब्रह्मणःप्राप्तिर्मुक्तैवेत्याह ब्रह्मचर्यइति एनंयशोरूपेणवर्णितमात्मानं ॥ २९७ ॥ फलितंदर्शयन्विपक्षेसंसारपातंक्लेशसंघस्यकारणंसर्वजन्मनीत्युक्तं विशदयति ब्रह्मचर्यमितिषड्भिः अन्यथानारीस्मरणादित्यागरूपब्रह्मचर्याभावे अधोनानायोनिषु ॥ २९८ ॥ तत्रोपपत्तिमाह ब्रह्मचर्यविहीनायेति चतुर्थीतुमंतलोपापेक्षया तथाचआनंदरूपआत्मास्वयंप्रकाशत्वेनसदाभासमानोपिब्रह्मचर्यविहीनमुपकर्त्तुंनभाति चित्त

स्मरणंकीर्त्तनंकेलिःप्रेक्षणंगुह्यभाषणं॥ संकल्पोनिश्चयोवापिवधूनांरतिहेतवः॥ २९६॥ ब्रह्मचर्येरतश्चैनं प्राप्नुयाद्दुःखवर्जितं॥ आनंदात्मानमद्वैतंस्वयंज्योतिःस्वरूपिणं॥ २९७॥ ब्रह्मचर्यंततःसर्वैःकरणीयंमुमुक्षुभिः॥ अन्यथास्यादधःपातःप्रतीकारविवर्जितः॥ २९८॥ ब्रह्मचर्यविहीनायविषयासक्तचेतसे॥ आनंदात्मापिचित्तस्थोभातिनैवकदाचन॥ २९९॥ किंतुनारीसदाभातिबहिर्यामलसंचयः॥ तच्चित्तःसततंध्यानात्संस्कारोबलवान्भवेत्॥ वध्वाःस्वप्नादिकालेषुतामेवैषोत्रपश्यति ॥ ३०० ॥ पश्यंस्तामुदरेगच्छेद्योषितःपुरुषःसदा ॥ तस्याःपरस्यावाऽन्यस्यादिविवान्यत्रवाभुवि ॥ ३०१॥ जातःपुनश्चसंस्कारैस्तामेवैषोत्रपश्यति॥ मृतःपुनश्चतस्यांसजायतेपूर्ववत्सदा॥ ३०२॥

दोषरूपपुरुषापराधेनहिजातापिविद्यानोपकारायभवतीतिभर्ज्जुन्यायेनसिद्धं ॥ २९९ ॥ किंत्विति तस्यचेतसिमलरूपानार्येवभातियतएषब्रह्मचर्यहीनस्तच्चित्तोनारीसक्तमनास्तांनारीमेवस्वप्नमनोरथादौपश्यतिनत्वात्मानं सततध्यानजसंस्कारस्यबलवत्त्वादित्यर्थः ॥ ३०० ॥ ततश्चयंयंवापिस्मरन्भावमितिगीतोक्तविधयानारीगर्भप्राप्तिर्भवतीत्याह पश्यन्निति तांनारींपश्यन्ध्यायंस्तस्याअनुभूतायाःपरस्यास्तत्सजातीयायाअन्यस्यास्तद्विजातीयायावाउदरेइहपरलोकेवागच्छेदित्यर्थः ॥ ३०१ ॥ तत्रजन्मलाभेपूर्वसंस्कारप्राबल्येनपूर्ववन्नारीध्यानतदुदरगमनयोःसंततिर्भवतीत्याह जातइति ॥ ३०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह एवमिति हित्वाअलब्ध्वा ॥ ३०३ ॥ यतइत्थंब्रह्मचर्यस्यब्रह्मविद्याहेतुतान्वयव्यतिरेकाभ्यांसिद्धाऽतएवप्रजापतिनातदधि
कारसिद्धयेइंद्रंप्रतिब्रह्मचर्यमुपदिष्टमित्याह अतइति समाप्तयेसम्यग्लाभाय ॥ ३०४ ॥ अंतेतुदोषाल्पत्वमपेक्ष्यपंचैववर्षाण्यभ्यनुज्ञा
तवानित्याह विशुद्धेति स्पष्टम् ॥ ३०५ ॥ पंचमेइति पश्चान्निर्दिष्टब्रह्मचर्यवर्षाणांमध्येपंचमेवर्षेऽतीतेपूर्णेसतिप्रजापतिरमुनावक्ष्यमाण

रूपेणवचसातुरीयमात्मानमिंद्रंप्रत्याह प्रतिपादितवानित्यर्थः ॥ ३०६ ॥ अमुनेत्युक्तंद्वादशकंडिकारूपंप्रजापतिवाक्यंव्याचष्टे मघव
न्नितिचतुरूनसप्ततिश्लोकैः हेमघवन्नयमात्मामयाअशरीरःशरीरत्रयविलक्षणएवचक्षुरादिस्थानेषूक्तोयस्त्वयास्वाबोधवशादन्यथास्थू

एवंसंसारमागच्छेद्ब्रह्मचर्यविवर्जितः ॥ आनंदात्मानमात्मस्थंहित्वादुःखौघकारणं ॥ ३०३ ॥ अतोब्रह्माब्र
ह्मचर्यंबिडौजसेसमादिशत् ॥ द्वात्रिंशद्वर्षमानेनत्वानंदात्मसमाप्तये ॥ ३०४ ॥ विशुद्धचेतसेस्वल्पपापयुक्ता
यसप्रभुः ॥ अंतेवर्षाणिपंचैवब्रह्मचर्यंसमादिशत् ॥ ३०५ ॥ पंचमेवत्सरेतीतेशक्रमाहप्रजापतिः ॥ आनं
दात्मानमद्वैतममुनावचसाप्रभुः ॥ ३०६ ॥ मघवन्पूर्वमेवायमशरीरोमयेरितः ॥ चक्षुरादिषुचात्मायंयस्त्व
यास्वीकृतोन्यथा ॥ ३०७ ॥ त्रिविधंतच्छरीरंस्यादज्ञानादुत्थितंहियत् ॥ तत्रस्थूलंसदामर्त्यंयदेतदनुभूयते
॥ ३०८ ॥ मृत्युनाहिसदैवैतत्स्वीकृतंवर्त्ततेयतः ॥ मंडूकश्चयथासर्पैस्ततआत्मानतद्भवेत् ॥ ३०९ ॥

लादिशरीरतादात्म्यापन्नतयागृहीतः ॥ ३०७ ॥ तस्यसशरीरत्वमाविद्यकमितिदर्शयन्शरीरत्रयंसहधर्मैर्वर्णयति त्रिविधमितिषड्भिःत्रि
विधंशरीरमज्ञानमात्रप्रयुक्तं अज्ञानाभावेकार्यकारणाभावानुपलंभात् तत्रकल्पितत्वेनसर्वेषांमर्त्यत्वेमरणधर्मत्वेसमेपिस्थूलंसदामर्त्यं
व्यवहारदशायामपिविनाशसंबंधदर्शनादित्यर्थः ॥ ३०८ ॥ सदामर्त्यत्वेहेतुमाह मृत्युनेति यतएतत्स्थूलंशरीरंमृत्युनाप्रमादलक्षणेनसदा
स्वभक्ष्यत्वेनांगीकृतंभवतिसर्पैर्मंडूकवत् अतएवाजरामरादिलक्षणमात्मत्वंतस्यनसंभवतीत्यर्थः ॥ ३०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृत्युचिन्हंप्रियाप्रियसत्त्वलक्षणंदर्शयन्सूक्ष्मशरीरंव्यतिरेकमाह प्रियाप्रियेइति तत्रसूक्ष्मशरीरेप्रियमनुकूलमप्रियंप्रतिकूलमेतेउभेअ वश्यंवर्तमानतयाप्रसिद्धेस्थूलदेहइव आत्मात्वेवंप्रियाप्रियधर्मकोनभवति विशोकत्वेनोक्तत्वात् साक्ष्यस्यसाक्षिधर्मताबाधाच्च तत आत्मलक्षणाद्यसंभवात्तत्सूक्ष्ममप्यात्मत्वानर्हमित्यर्थः ॥ ३१० ॥ तृतीयेकारणशरीरेतुबीजविधयाऽनर्थानांसत्वात्तस्यानात्मत्वंस्फुटं नहिकूटस्थस्यात्मनोबीजत्वंसंभवतीत्याह अज्ञानेपीति अज्ञानाख्येतृतीयशरीरेप्यागामिभविष्यत्प्रादुर्भावकंदुःखंवर्त्तते कीदृशं सुप्तकी र्तितंसुप्तत्वेनप्रसुप्तत्वेनवर्णितं तथाचपतंजलिसूत्रं अविद्याक्षेत्रमुत्तरेषांप्रसुप्ततनुविच्छिन्नोदाराणामिति ॥ ३११ ॥ फलितमात्म स्वरूपंवर्णयति अशरीरइति देहत्रयेणवास्तवसंबंधाभावादशरीरोयमात्मायथादुःखेनरहितःतथाजन्यसुखेनापिरहितः तस्यजन्यसुख स्यदुःखसमानयोगक्षेमत्वादितिभावः ॥ ३१२ ॥ आत्मनिप्रियाप्रिययोर्मृत्युलक्षणयोर्भानंतुदेहत्रयतादात्म्याध्यासादेवनस्वतइत्याह

प्रियाप्रियेचतत्रापिवर्त्तेतेस्थूलदेहवत्॥ आत्मानैवंततस्तच्चनस्यादात्माकथंचन ॥ ३१० ॥ अज्ञानेपित्वती येस्मिन्शरीरेसुप्तकीर्तितं॥ आगामिवर्त्ततेदुःखंततस्तस्यापिनात्मता॥ ३११॥ अशरीरोयमात्मायंदेहत्रय विवर्जितः॥ दुःखशून्योयथातद्वज्जनिमत्सुखवर्जितः ॥ ३१२ ॥ प्रीत्यप्रीतिकरेएतेसुखदुःखेशरीरतः ॥ यो गात्शरीरहीनस्यदृश्येतेनकथंचन॥ ३१३॥ वाय्वादीनिचभूतानिविद्युदभ्रादयस्तथा ॥ प्रियाप्रियाभ्यांसं बद्धादेहहीनानकर्हिचित्॥ ३१४॥

प्रीत्यप्रीतीति शरीरतःशरीरेणयोगात्तादात्म्याध्यासादेवहेतोःसुखदुःखेअनुकूलप्रतिकूललक्षणेआत्मनिदृश्येतेनस्वतः समाधौशरीरत्रया भिमानत्यागेतददर्शनादित्यर्थः अत्रप्रियाप्रिययोर्मृत्युलक्षणत्वमुद्गीथब्राह्मणेवागादीनांरागद्वेषदोषेणासुरेभ्यःपराजयप्रतिपादकेवर्णितं बोध्यम॥३१३॥ अशरीरस्यप्रियाप्रियाभावइत्यत्रजडानिवाय्वादीनिदृष्टांतइत्याह वाय्वादीनीति श्रुतौवायुरित्युपलक्षणंतेजःप्रभृतीना मित्याशयेनादिपदं अभ्रादयइत्यादिपदेनस्तनयित्नुपदवाच्यस्यवर्षुकमेघस्यग्रहः अभ्रपदेनतुतित्तिरिपक्षाकारस्यनवमेघस्य एतेपदार्था यथादेहेनघनीभूतावयवलक्षणेनहीनावर्जिताःसंति नह्येतेषांदेहाःकुत्रचिद्देशेवसंतःकेनचिद्दृष्टाःकिंत्वदृष्टादिनिमित्तवशेनाकस्मादिवप्रा दुर्भूयवृष्ट्यादिकंकुर्वाणाउपलभ्यन्ते ततश्चदेहहीनत्वाद्रागद्वेषगोचरलक्षणाभ्यांप्रियाप्रियाभ्यांवर्जिताश्चप्रसिद्धास्तथात्मापिप्रियाप्रिय रहितोदेहहीनत्वादित्यर्थः ॥ ३१४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रयद्यपिदृष्टांतस्वरूपमित्थंभाष्यकारैर्लोकानुग्रहपरैर्व्याख्यातं वाय्वादयोयथावर्षादिप्रयोजनाभावेशरदादौभूताकाशेसूक्ष्मभावेनता
दात्म्यंगताअपिवर्षाकालादिनिमित्तेनप्रादुर्भवंतितथात्माप्यविद्ययादेहतादात्म्येनासद्भावमिवापन्नोवेदांतवाक्यरूपनिमित्तेनप्रादुर्भूतः
स्वरूपावस्थितोभवतीति तथापिप्रपंचविलयवादिनांप्राचांमतानुरोधीग्रंथकृत्अदःशब्दस्यपरोक्षवाचितामाकाशशब्दस्यब्रह्मपरत्वेआ
काशोवैनामेत्यादिवाक्यशेषानुकूल्यंचस्वपक्षेअनुसंधायविद्वत्प्रसिद्धैवदृष्टांतस्वरूपंवर्णयन्नात्मनःस्वरूपावस्थितिक्रमंदर्शयति वाय्वाद
योयथेत्यादिनातद्वदात्माशरीरिणामित्यंतेनग्रंथेन मायानिमित्तमात्रंब्रह्मैवविश्वोपादानमितिसिद्धांताद्वाय्वादीनामुपादानंब्रह्मैवलयस्था
नंतत्रलीयमानावाय्वभ्रादयःस्वंपारमार्थिकंरूपंचिद्घनलक्षणंप्राप्ययथाअद्वैतरूपेणतिष्ठन्तीत्यर्थः ॥ ३१५ ॥ एवमिति एवंसुषुप्तिसंबंधे
नसंप्रसादसंज्ञोऽयमात्माजीवःसोऽशरीरःपरित्यक्तशरीरत्रयाभिमानःसन्हार्दंहृदयाकाशरूपंतत्पदार्थभूतंज्योतिःप्राप्यस्वेनपारमार्थिकेन

वाय्वादयोयथास्वस्यकारणंज्योतिरद्वयं॥ प्राप्नुवंतःस्वरूपेणस्युरेतेभेदवर्जिताः ॥ ३१५॥ एवमात्माऽशरी
रोयंसुषुप्तौयःप्रकीर्तितः॥ हार्दंगच्छन्परंज्योतिःस्वेनरूपेणजायते॥ ३१६ ॥ कार्यंसर्वंव्रजेदेतद्विद्युदाद्याय्वादि
कंहियत्॥ परंज्योतिःपरंब्रह्मयतस्तस्मात्समुत्थितम्॥ ३१७॥ विलीयमानंकार्यंहिकिंगच्छेदात्मवर्जितं ॥
रूपांतरेणवाकेनगच्छेत्तत्स्वविवर्जितं॥ ३१८ ॥

रूपेणावस्थितोभवति ॥ ३१६ ॥ तत्रदृष्टांतमेवस्फुटयति कार्यमिति यद्दृष्टांतीकृतंवाय्वादिकंभूतजातंविद्युदादिकंभौतिकंचएत
त्सर्वंकार्यंविलयकालेज्योतीरूपंपरंब्रह्मैवव्रजेन्नान्यत् यतस्तद्ब्रह्मैवविश्वोपादानमित्यर्थः घटोलीयमानोमृदिलीयतेइतिमूढमतमात्मन्यु
पादानतायोग्येलीयतेइतितत्त्वविदांमतमितिभावः ॥ ३१७ ॥ तत्रहेतुतयाअन्यत्रविलयासंभवमाह विलीयमानमिति कार्यंघटादिवि
लीयमानंसदात्मनाविश्वसत्ताप्रदेनवर्जितंपरित्यक्तंकिंवस्तुप्रतिगच्छेत् नहिनिःस्वरूपेलयोयुक्तः तथाचमृदाद्युपहितचैतन्यएवघटादिल
यइतिभावः अनात्मनितुलयएवनसंभवतियथास्थितस्यताम्रस्यनसुवर्णभावःपूर्वरूपानिवृत्तेर्नापिनष्टस्यनष्टत्वादेवतथाइत्यभिप्रेत्याह
रूपांतरेणेति रूपांतरेणात्मलक्षणस्वरूपाद्भिन्नेनघटादिसंज्ञकेनस्वरूपेणकार्यंकर्तृकारणंकेनन्यायेनगच्छेन्नकेनापि यतआत्मनःपृथग्भा
वेस्वविवर्जितंनिःस्वरूपं नहिशशशृंगस्यकुत्रचिल्लयोनवानात्मनिपटेघटस्यलयःप्रसिद्धइत्यर्थः ॥ ३१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितंकैमुत्यमभिनयति जडान्यपीति यदाजडान्यपिस्वकीयविनाशकालेचिल्लक्षणात्मभावंयांतितदाचेतनोजीवःसदातेनपरमात्मना तादात्म्यमभेदंप्राप्तःपरस्यैवजीवभावेनप्रवेशश्रवणात्सलयेतद्रूपंचिदेकरसब्रह्मभावंगच्छेदितिकिमुवाच्यमित्यर्थः ॥ ३१९ ॥ तर्हिजीवस्यसंसारदशातःकोविशेषोमोक्षइतिचेत्कल्पितरूपपरित्यागएवेत्याह आत्मनइतित्रिभिः कर्तृत्वभोक्तृत्वादीन्यपराण्यागंतुकानिकल्पितानीतियावत् तादृशानिरूपाण्यात्मनोजीवस्यत्वंपदार्थस्यभवंति निजंवास्तवंरूपंतुस्वयंप्रकाशानंदलक्षणमेव यच्चत्वंपदार्थस्यशुद्धंरूपमेतदेवपरस्यतत्पदार्थस्यापिभवतीत्यर्थः ॥ ३२० ॥ अनयोरिति अनयोस्तत्त्वंपदार्थयोर्भेदप्रयोजकंस्थूलसूक्ष्मशरीरलक्षणविलास

जडान्यपियदास्वस्यरूपंतत्स्फुरणात्मकं॥आत्मप्रवेशआयांतितदात्माचेतनःकथं॥तद्रूपंचनगच्छेत्सतेनतादात्म्यमागतः॥३१९॥ आत्मनोऽपररूपाणिकर्तृत्वादीनिसर्वदा ॥ आनंदात्मास्वयंज्योतिर्निजंरूपंचतस्यतत्॥परस्यज्योतिषस्तच्चहृदयाकाशरूपिणः ॥३२०॥ अनयोर्भेदहेतुश्चसाज्ञानंहिवपुर्द्वयं॥तस्मिन्गतेनकोप्यत्रभेदःसंभाव्यतेऽनयोः ॥ ३२१ ॥ अहंब्रह्मेतिविज्ञानादज्ञानेविलयंगते ॥ कर्तृत्वादीनिरूपाणिस्वयंयांतिलयंततः ॥ ३२२ ॥ रज्ज्वज्ञानेविलीनेत्रयथाधर्माःस्वयंलयं ॥ सर्पस्यसर्पणाद्यास्तेयांतिहेतुविवर्जिताः ॥ ३२३ ॥ घटेयथाविलीनेतुघटाकाशोमहानयं॥स्वेनरूपेणसंपन्नआकाशोजायतेसदा॥ ३२४ ॥ कर्तृत्वादिविहीनःसन्परंज्योतिरुपागतः॥ एवंस्वेनैवरूपेणजीवात्माजायतेत्विह॥ ३२५ ॥

सहितमज्ञानमेव तस्याज्ञानस्यलयेसतिभेदोदुर्वचइत्यर्थः ॥३२१॥ तत्रहेतुतयानिरूपकाभावमाह अहमिति स्वयंयत्नमंतरापि॥३२२॥ तत्रदृष्टांतमाह रज्ज्वज्ञानइति रज्ज्ववच्छिन्नचैतन्यगोचरेऽज्ञानेविलीनेसतितत्रकल्पितस्यसर्पस्ययेसर्पणाद्याःसर्पणपदस्यांतर्भावितणिच्कत्वात्पलायनप्रयोजकत्वमर्थः आदिपदेनमोहप्रयोजकत्वादिग्रहः एतेधर्माःकारणनाशेनैवलयंयांतीत्यर्थः ॥ ३२३ ॥ जीवस्यपरिपूर्णस्वरूपावस्थितौनिदानभूतउपाधिविमोकएवेतिस्फुटीकरणायदृष्टांतांतरमाह घटइति यथाघटाकाशस्यमहाकाशाख्येनस्वरूपेणावस्थितौप्रयोजकोघटलक्षणोपाधिविमोकएवतथाकर्तृत्वस्यतदुपलक्षितभोक्तृत्वादीनांचादिनानिमित्तभूतेनशरीरत्रयेणहीनोविवेकंगतोजीवःस्वेनपूर्णरूपेणतिष्ठेदितिद्वयोरर्थः ॥ ३२४ ॥ ३२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्येवंब्रह्मभावोजीवस्यजडानांचसमस्तदाजडचेतनयोरुपमायाभेदसापेक्षायानिर्वाहकोविशेषःकइत्याशंकांपरिहरति रूपेणेतिद्वाभ्यां
यद्यपिपरस्याद्वयरूपस्यज्योतिषःप्राप्तिसमानकालिकास्वरूपेणनिष्पत्तिरवस्थितिर्जीवस्ययथेरितातथैवविद्युत्प्रभृतेर्जडस्याप्युदीरितात
थापितत्रदृष्टांतदार्ष्टांतिकयोःकार्यत्वाकार्यत्वलक्षणेनविभागेनवैलक्षण्येनप्रयुक्तोभेदःस्वयंश्रुत्युपदेशमंतरापिसिद्धोज्ञेयः तमेवस्फुटयति
 विद्युदादिरिति विद्युदादिरूपोदृष्टांतःकार्यत्वेनप्रसिद्धः तस्मात्कार्याद्विलक्षणस्तुजीवइतिद्वयोरर्थः ॥ ३२६ ॥ ३२७ ॥ जीवस्यकार्य
त्वाभ्युपगमेऽनिष्टधाराप्रसंगंदर्शयति कार्यतायामितित्रिभिः जीवस्यकार्यतायामंगीकृतायांसत्यांविनाशप्रसंगस्ततश्चप्रजापतेरात्मनो

रूपेणस्वेननिष्पत्तिःपरस्यज्योतिषोहिया॥ प्राप्तिरुक्तात्रजीवस्यविद्युदादेस्तथेरिता॥३२६॥ तत्रभेदःस्वयंज्ञे
यःकार्याकार्यविभागतः॥ विद्युदादिरिदंकार्यंजीवस्तस्माद्विलक्षणः ॥३२७॥ कार्यतायांविनाशःस्यात्तस्य
देहादिवत्ध्रुवं॥ प्रजापतेस्तथात्वेतुमृषावादित्वमापतेत्॥३२८॥ इंद्रस्यगमनंतद्वद्व्यर्थमेवपुनर्भवेत्॥ आत्म
नोनाशमन्वीक्ष्यसर्वत्रैषसमागतः॥ अत्रापिनाशउक्तश्चेत्कुतोनपुनराव्रजेत्॥३२९॥ नष्टानांनैवचप्राप्ति
र्भवेत्कुत्रापिकर्हिंचित्॥ स्वरूपेणाभिनिष्पत्तिर्दूरापास्ताचतत्रहि ॥३३०॥

विजरादिभावंप्रतिपादयतोमृषावादितास्यादित्यर्थः ॥ ३२८ ॥ इंद्रस्येति ततश्चपूर्वपूर्वात्मनिविनाशदोषमालोच्यागतेनेंद्रेणाविनाशि
नस्तत्त्वस्यालाभात्तदागमनंवृथास्यात् यतोत्रचतुर्थपर्यायेविनाशवानात्माउक्तोभविष्यत्तदासपुनरागमिष्यदित्यर्थः ॥ ३२९ ॥ त
थापरज्योतिःप्राप्तिपूर्वकस्यस्वरूपेणावस्थितिरूपस्यफलस्योक्तिरपिव्याहन्येतनहिनष्टानामसद्भावंगतानांप्राप्त्यादिकर्तृत्वंयुक्तमित्याह
नष्टानामिति नष्टकर्तृकायाःप्राप्तेरसंभवेतत्प्रयुक्तायाःस्वरूपावस्थितेःसुतरामसंभवइत्यर्थः ॥ ३३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्तुतस्तुनात्रोक्तविशेषापेक्षाव्यक्तिभेदमात्रेणापिदृष्टांतत्वसंभवादित्यभिप्रेत्यदृष्टांतेपिकार्यत्वंवस्तुतोनास्तीत्याह वाय्वादाविति यदि वाय्वभादौदृष्टांतीकृतेवैशेषिकादिमतसिद्धंवास्तवंकार्यत्वंस्यात्तदातस्यविनाशशीलस्यएततश्रुतौप्रसिद्धंत्रितयंसमुत्थानप्राप्तिस्वरूपावस्थितिरूपंसमानंसाधर्म्यभावेनोक्तंनस्यान्नोपपद्येत ततएतदालोच्यकारणमेवकार्यभावेनावस्थितंनकार्यंकारणात्पृथक्सत्मृषात्वादिति समास्थितंस्वीकृतंसंप्रदायविद्भिरितिशेषः अस्मिन्पक्षेअसत्वप्रयुक्तोदोषोनप्रसज्जतेकारणस्यसत्तामादायसर्वोपपत्तेरित्याशयेनाह कार्यमिति यदिकार्यंभवेत्कारणात्पृथक्त्वेनेतिशेषः तदातत्कार्यंनभवेद्विनाशेनासत्तामपिभजेत् तथाचोक्तानुपपत्तिःस्यात्अस्माभिस्तुतथानैवाभ्युपगम्यतइत्यर्थः ॥ ३३१ ॥ ननुदृष्टांतेकार्यत्वस्यमिथ्यात्वंयद्युच्यतेतदादार्ष्टांतिकगतस्यजीवस्यापितत्स्यादितिचेदिष्टापत्तिरित्या

वाय्वादावपिनैतत्स्यात्समानंत्रितयंततः॥ कारणस्यैवकार्यत्वंमृषैवेनिसमास्थितं॥ कार्यंयदिभवेन्नामतदातन्नभवेदपि॥ ३३१॥ कार्यवज्जीवतायांचेत्प्रतिबंदीग्रहोभवेत्॥ नानिष्टंजीवतातस्मिन्मृषायस्मात्समाश्रिता॥ ३३२॥ घटनाशेयथालोकेघटाकाशत्वधीर्मृषा॥ आनंदात्मनिजीवत्वंमृषातद्वत्समाश्रितम्॥ ३३३॥ आकाशोनमृषायद्वद्घटाकाशेव्यवस्थितः॥ आनंदात्मातथाजीवस्थितःसत्यतयेरितः॥ ३३४॥ ततःकार्येथवाजीवेमायांशेसत्यतायदा॥ तदाभवतुकोनामतस्याःसत्यत्वमीरयेत्॥ ३३५॥

ह कार्यवदिति प्रतिबंदीतुल्यतापादनंतत्रग्रहोहठश्चेत्तवस्यात्कार्यवज्जीवतापिमृषास्यादितितथाप्यस्माकंनानिष्टंतथास्वीकारादेवेत्यर्थः ॥ ३३२ ॥ मृषात्वेदृष्टांतमाह घटनाशइति यथाघटरूपोपाधिनाशेसतिघटाकाशत्वंस्फुटमृषात्वकंभवेत्तथाशरीरत्रयविवेकेजीवत्वमपीत्यर्थः ॥ ३३३ ॥ विशेष्यरूपस्यमोक्षयोग्यत्वायसत्यत्वमपितेनदृष्टांतेनाह आकाशइति यथाघटाकाशाख्येसंघातेविशेष्यतयास्थितआकाशःसत्यस्तथाजीवस्थितोजीवाख्येसंघातेस्थितआनंदात्मापीत्यर्थः ॥ ३३४ ॥ तथाचास्तिभातीत्यादिवाक्यप्रसिद्धेमायांशेमिथ्यात्वापादनेइष्टापत्तिरेवेत्याह ततइति ततउक्तविवेकात्कार्येवियुदादौदृष्टान्तेजीवेदार्ष्टांतिकेचगतोयोमायाभागोनामरूपलक्षणस्तद्गताअसत्यतामिथ्यात्वंयदिभवतितदाभवतुनामनहिवयंतस्यामायायाःसत्यत्वमीरयामइत्यर्थः ॥ ३३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितंसाधर्म्यमभिनयति आनंदात्मेति स्फुरणरूपेणसर्ववस्तुषुयोऽनुगतःसआनंदात्मैवसत्यःशरीरत्रयविशिष्टरूपेणप्रसिद्धोयोजीवःसतुततःतामानंदात्मसत्तामादायैवसम्यक्सत्योनस्वतइत्येतस्मिन्नंशेउपमालंकारस्यउपमानोपमेयसाधर्म्यवाचकरूपैश्वतुर्भिरवयवैर्युक्तस्यांशेसाधर्म्याख्येस्वीकृतेसतिविद्युदादेरुपमानस्यजीवेनोपमेयेनसहसंयोजनेविरोधोविघातहेतुर्दोषःकोपिनास्ति विद्युदादीनामपिसत्तायाअधिष्ठानपरतंत्रत्वादित्यर्थः॥३३६॥ कार्यतायामिति कार्यतारूपेसाधर्म्येस्थितेसतियत्साम्यमुपमाख्यंतदिहनस्यात् तथासतिकृतनाशाकृताभ्यागमप्रसक्त्याउक्तदोषःप्रजापतिमृषावादित्वादिरूपःप्रसज्जेतेत्यर्थः अपिचेत्युत्तरान्वयि॥३३७॥तर्हिघटादयएवकुतोनदृष्टां

आनंदात्मासदासत्यःस्फुरणंयोत्रवस्तुषु॥ यश्चजीवस्ततःसम्यगस्मिन्नंशेतुसर्वदा॥ विद्युदादेश्चजीवेनविरोधोनात्रकश्चन॥ ३३६ ॥ कार्यतायांनसाम्यंस्यादेतैर्जीवस्यकर्हिचित्॥ उक्तदोषसमापत्त्याकृतनाशादिनापिच॥३३७॥ अशरीरत्वसंपत्त्यैब्रह्मावाय्वादिकंत्विह॥ दृष्टांतमुक्तवान्नैवकार्यत्वेनकथंचन॥३३८॥ शरीरेऽसतिवाय्वाद्याःप्राप्नुयुर्नप्रियाप्रिये॥ यथातथैवजीवोयंशरीरेणविवर्जितः॥ प्रियाप्रियेकचिन्नैवगच्छेत्कालत्रयेपिहि॥३३९॥ परंज्योतिर्यथाप्राप्यवाय्वाद्याःप्रलयेसति॥ स्वरूपतोविनिष्पन्नाअशरीराःकदाचन॥ प्राप्नुयुर्नैवतेदुःखंतद्वदात्माशरीरिणां॥३४०॥

तीकृताइत्याशंकांपरिहरन्वायुविद्युदादेःप्रजापतिनादृष्टांततयाभिधानेप्रयोजनमाह अशरीरत्वेति ब्रह्माप्रजापतिर्यद्वायुविद्युदादिकंदृष्टांतत्वेनोक्तवांस्तत्प्रजापतिवचनंकार्यत्वेनकार्यत्वबोधरूपेणफलेनफलवन्नभवतिकिंत्वशरीरत्वस्ययासंपत्तिःप्रियाप्रियराहित्यप्रयोजकतारूपातद्बोधरूपफलेनैवफलवदित्यर्थः घटादीनांतुवाय्वादिवदशरीरतयावस्थानमेवनप्रसिद्धमतोननतेदृष्टांतीकृताइतिभावः॥३३८॥ उक्तंफलमेवविशदयति शरीरेऽसतीतिद्वाभ्यां यथाशरीरेघनीभूतावयवलक्षणेअसतिपरित्यक्तेसतिवाय्वभ्रादयःप्रियाप्रियसंपर्करहिताःप्रसिद्धास्तथात्मापिशरीरवर्जितइत्यर्थः ॥ ३३९ ॥ परंज्योतिरिति यथाचप्रलयकालेवाय्वादयःपरंज्योतिःसल्लक्षणंपरमकारणंप्राप्यस्वेनरूपेणनिष्पन्नाअवस्थिताःसंतोदुःखंसंसारधर्मंकमपिनप्राप्नुयुरशरीरत्वात्तथासर्वेषामात्मापीत्यर्थः ॥ ३४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मस्वरूपज्योतिषःपरमत्वंस्फुटीकरोति ज्योतिषइति ज्योतिषःपरमत्वंयदुक्तंतत्स्वप्रकाशतयाबोध्यं यतएतानिलौकिकानिज्योतींष्यादित्यादीनिस्वतःपरंभिन्नंज्योतिर्ज्ञानरूपमपेक्षंतेस्वयंज्ञानस्वरूपिणोब्रह्मणस्तुतत्स्वरूपभूतंज्ञानमेवंलौकिकज्योतिर्वज्ज्ञानांतरंनापेक्षतेइत्यर्थः ॥ ३४१ ॥ परसापेक्षत्वेदोषमाह ज्ञानमिति यदिज्ञानंस्वसिद्धयेज्ञातारमपेक्षेततदासज्ञातायाअज्ञानेनैवज्ञानवान्ज्ञानांतरेणवा आद्येआत्माश्रयः द्वितीयेतस्यापिस्वसिद्धयेप्रथमज्ञानापेक्षणेऽन्योन्याश्रयः स्वापेक्षणेत्वात्माश्रयउक्तएव अथतृतीयकल्पनेप्रथमापेक्षा

ज्योतिषःपरमत्वंयत्स्वप्रकाशतयाहितत् ॥ ज्योतींषियतएतानित्यपेक्षंतेस्वतःपरं ॥ ज्ञानांतरंनचैवंतत्स्वयंज्ञानस्वरूपिणः ॥ ३४१ ॥ ज्ञानंचेत्स्वप्रकाशायविज्ञातारमपेक्षते ॥ अनवस्थादयोदोषास्तदास्युरनिवारिताः ॥ ३४२ ॥ स्वयंज्योतिस्ततस्त्वेतत्परंज्योतिरितीर्यते ॥ आनंदात्मस्वरूपंयत्सर्वप्रियतमंसदा ॥ ३४३ ॥ संपत्तिरस्यविज्ञेयात्यहंब्रह्मेतिवेदनं ॥ स्वरूपेणाभिनिष्पत्तिरुक्तातत्त्वंपदार्थयोः ॥ विज्ञानाद्वैदराहित्यंफलंयत्स्वात्मबोधजं ॥ ३४४ ॥ फलप्राप्तावभिन्नंस्याद्यद्रूपंतत्त्वमर्थयोः ॥ उत्तमःपुरुषःसोयंविद्यतेनततःपरं ॥ ३४५ ॥

यांचकक्कं द्वितीयापेक्षायामन्योन्याश्रयः स्वापेक्षणआत्माश्रयः ततश्चतुर्थादिकल्पनेऽनवस्थास्यादित्यर्थः ॥ ३४२ ॥ फलितमाह स्वयमिति ॥ ३४३ ॥ ननुपरमज्योतिषोयाप्राप्तिःस्वेनैवस्वरूपेणावस्थितिस्तथाचपौनरुक्त्यंश्रुतौस्यादितिशंकांपरिहरति संपत्तिरिति महावाक्यार्थज्ञानंसंपत्तिपदार्थः तस्यज्ञानस्यफलंतुद्वैतराहित्यरूपंस्वरूपाभिनिष्पत्तिपदार्थः इतिनपुनरुक्तिरित्यर्थः ॥ ३४४ ॥ उत्तमपुरुषपदार्थमाह फलेति तत्त्वंपदाभ्यामुपलक्षितंयदैक्यलक्षणंस्वरूपंतदेवोत्तमपुरुषपदेनोच्यतेनान्यत्तस्यकार्यकारणाभ्यामुत्तमत्वात्सर्वोपाधिषुपरिपूर्णत्वाच्चेत्यर्थः ॥ ३४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतत्रपर्यैतीत्यादिनाद्वादशकंडिकांतग्रंथेनजीवन्मुक्तस्यस्थितिप्रकारउच्यतेइतिंदर्शयंस्तदर्थमाह उत्तमइतिपंचदशभिः एषमहावाक्या
र्थसाक्षात्कर्तृलक्षणउत्तमःपुरुषःप्रारब्धसमाप्तिपर्यन्तमेवमनेनप्रकारेणवसेत् एवंकथं श्रुतौतत्रपदोक्तेब्रह्मरूपेलोकेनिर्विकल्पसमाधिस्थः
सनूपर्यैतिविहरतिब्रह्मैवसर्वतःपश्यतीतियावत् व्युत्थानदशायांतुसमष्ट्यात्मदर्शीसंस्तत्रपदोक्तेषुसर्वलोकेषुपर्यैतिव्याप्नोतिमहाराजवत्स्व
तंत्रइतिद्वयोरर्थः ॥ ३४६ ॥ ३४७ ॥ अभक्ष्याणीति तथासर्वप्राणिरूपेणभक्ष्याभक्ष्याणिभुंजानःसंस्तथाबालवन्महाजनैरादृतःक्रीडन्
सन्निद्रादिप्रभुरूपेणवधूभिर्वाहनैःसखिभिःसंबंधिभिर्वारममाणःसन्निमंप्रसिद्धमविद्याकालोपात्तंदेहं कीदृशं मूढजनानांसमीपेविद्य

उत्तमःपुरुषस्त्वेषयावद्देहस्यधारणं॥ तावदेवंवसेत्तत्रब्रह्मलोकेथवापुमान्॥ ३४६ ॥ स्वेच्छयासर्वलोकेषु
ह्युत्तमःपुरुषःसदा॥ पर्यैत्यव्याहताज्ञःसन्महाराजइवापरः॥ ३४७॥ अभक्ष्याणिचभक्ष्याणिभक्षयन्दुःख
वर्जितः॥ क्रीडन्बालसमःसर्वैर्लाल्यमानोमहाजनैः॥३४८॥ रममाणोवधूभिर्वादेवेंद्रइवचापरः॥ यानैर्वा
विविधैरेषवयस्यैर्ज्ञातिभिश्चवा॥ ३४९॥ विद्यमानमिमंदेहंनायंजानातिकर्हिचित् ॥ यथाशयानःपुरुषः
शयानंस्वात्मनोवपुः॥ ३५०॥ यथाशयानेपुरुषेप्राणेनैवाभिरक्ष्यते॥ शयानस्यात्रदेहोयंतद्वन्मुक्तस्यतेनहि
॥ ३५१ ॥ रथोयथाशयानेपिसारथौशिक्षितैर्हयैः॥ नीयतेपूर्ववत्तद्वद्देहःप्राणैस्तथास्यहि॥ ३५२ ॥

मानंनविजानातिनस्मरतिसुप्तपुरुषःस्वशरीरमिवेतित्रयाणामर्थः अत्रविदुषःसर्वज्ञत्वेप्याविद्यकव्यवहारविस्मृतौदृष्टांतोभाष्यकारैरुक्तः
यथाकश्चिदुन्मादादिनाविपरीतंव्यवहरन्पश्चान्निवृत्तोन्मादउन्मादकालिकंवृत्तंविस्मरन्नपिनमंदधीरित्याख्यायतेतथाजीवन्मुक्तोपीति
॥ ३४८ ॥ ३४९ ॥ ३५० ॥ तर्हिकथंतस्यदेहस्थितिरित्याशंकांश्रौतदृष्टांतेनपरिहरति यथेति यथासुप्तस्यदेहेयोगक्षेमचिंताराहि
त्येपितस्यदेहःप्राणेनरक्ष्यतेतथातेनप्राणेनमुक्तदेहोपि ॥ ३५१ ॥ रथइति यथाचश्रुतौप्रयोग्यपदोक्तैर्हयैःसारथौसुप्तेपिरथोनीयतेतथा
स्यमुक्तस्यदेहःप्राणैः ॥ ३५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाप्रयोग्यपदेनप्रकर्षेणराजव्यवहारेयोग्यइतिव्युत्पत्त्याराजमंत्रीमाह्यइतिदर्शयन्नाह मंत्रिणेति रक्ष्यतेपाल्यते ॥ ३५३ ॥ यथाच देहरक्षाधिकारित्वेनप्राणउक्तस्तथाभोगाधिकारित्वेनेंद्रियाण्युक्तान्यथयत्रैतदित्यादिश्रुतिग्रंथेनेत्याह प्राणइति बाह्यंघ्राणादि आंतरंमनः ॥ ३५४ ॥ विदुषोभोगकालइतरेभ्योविशेषंभाष्योक्तमेवाह एकादशेंद्रियैरिति यथाबालःप्रमत्तोवाइंद्रियैर्विषयान्गृह्णन्नपिपश्चान्नस्मरतीति ॥३५५॥ मुक्तइति तथाजीवन्मुक्तोपिदैवचक्षूरूपेणवर्णितेनमनसासर्वान्विषयानधिगच्छन्नपिस्वात्मनोभिन्नंपदार्थजातंनैववि

मंत्रिणारक्ष्यतेराज्यंशयानेनृपतौयथा॥ मुक्तस्यचतथादेहःप्राणेनैवाभिरक्ष्यते॥ ३५३ ॥प्राणोयथात्रदेहस्यरक्षाहेतुःप्रकीर्तितः ॥भोगहेतुस्तथैवैतदुक्तंबाह्यांतरेंद्रियं ॥ ३५४ ॥ एकादशेंद्रियैर्बालोगृह्णन्नपियथाबहून्॥ विषयान्नस्मरेत्तद्वत्प्रमत्तोवात्रकश्चन॥३५५॥ मुक्तस्तद्वदिमान्सर्वानधिगच्छन्हिसर्वथा॥ मनसानैवजानातिस्वात्मनोन्यंकथंचन॥ ३५६ ॥ आसक्तिशून्योमुक्तोयंभोगान्गृह्णातिसर्वदा॥ मनआद्यैःप्रयुक्तैस्तैर्दैवतैस्तत्तदाश्रितैः॥ब्रह्मलोकादिलोकेषुसर्वदुःखविवर्जितः॥३५७॥ उत्तमःपुरुषोयोयंविद्वद्रूपःप्रकीर्तितः॥ एनमात्मतयानित्यंसर्वेदेवाउपासते॥उपासनैर्हिविविधैर्यावज्ज्ञानंतिनात्मना॥ ३५८॥ उपासतेयतश्चैनमात्मानंदेवमंजसा॥ सर्वेलोकास्ततःकामाःस्वाधीनाहिदिवौकसां॥ ३५९॥

जानातिअनुसंधत्तेइत्यर्थः ॥३५६ ॥ तेनाप्रयुक्तानामपींद्रियाणांप्रवृत्तावुपपत्तिमाह आसक्तीति अयंमुक्तआसक्तिशून्योब्रह्मलोकादिषुवर्तमानान्भोगान्मनःप्रभृतिभिरिंद्रियैर्गृह्णाति कीदृशैरिंद्रियैः तैरादित्याभिर्देवैःप्रयुक्तैःप्रेरितैः तत्रहेतुभूतंविशेषणं तत्तदाश्रितैरिति तांस्तान्चक्षुरादिप्रवर्त्तनरूपानधिकारान्धारयद्भिरितितदर्थः अतएवसर्वदुःखविवर्जितइति ॥ ३५७ ॥ तस्यविदुषोब्रह्मभावंस्फुटयन्सर्वदेवोपास्यतारूपंब्रह्मधर्मंतत्राह उत्तमइति योयमुत्तमपुरुषरूपोविद्वानुक्तएनंसर्वात्मभूतंसर्वेदेवाःशमादिसंपन्नलक्षणास्तैस्तैःसविशेषरूपैरुपासतेयावदात्मत्वेननसाक्षात्कुर्वंतीति ॥ ३५८ ॥ ततश्चसर्वलोककामेषुस्वातंत्र्यंदेवानामुपलभ्यतेइत्याह उपासतइति ॥ ३५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचेदानीमप्यात्मोपासकानांतत्फलंयुक्तमित्याह विज्ञायैवेति एतद्विज्ञानेनैवसर्वसत्फललाभइत्यर्थः ॥ ३६० ॥ त्रयोदशकंडिका यांमंत्ररूपायामुक्तंदहरोपासकस्यपापनिवृत्तिरूपंफलंकैमुत्येननिर्विशेषब्रह्मविदोपिसिद्धंदर्शयति आत्मायमिति अयंविश्वाधिष्ठानत योक्तआत्मातत्पदार्थोदुरवगाह्यतयाश्रुतौश्यामपदोक्तःसएवसर्वेषांहृदयाकाशरूपस्त्वंपदार्थःसन्संघातसंकीर्णत्वात्शबलइत्युक्तस्तयोरै

क्यंयःसाक्षात्कुरुतेससर्वैःपापैर्नलिप्यतेइत्यर्थः ॥ ३६१ ॥ तत्रहेतुतयासमाहितत्वेनपापासंभवमाह आत्मेति यस्यपरमार्थभूतःसाक्ष्येव ममात्मानविश्वादिरूपइतिनिरावरणंप्रतीयतेभातिसपापंकथंकुर्यात्तत्प्रवृत्तिहेतोर्द्वैतदर्शनस्यैवाभावादित्यर्थः ॥ ३६२ ॥ व्युत्थानदशा यामपिविषयरागाभावान्नतत्रप्रवृत्तिरित्याह आत्मानमिति यआत्मानमेववस्तुतःप्रियंवेदनविषयजातंसधीधनोविद्वान्केनहेतुनापापं

विज्ञायैवैनमात्मानंसर्वदास्वात्मरूपतः॥सर्वान्लोकांस्तथाकामान्सर्वान्प्राप्नोत्यसंशयं ॥ ३६० ॥ आत्मा यंसर्वभूतानांहृदयाकाशसंश्रयः ॥ आनंदरूपमेतंयोजानीतेस्वात्मरूपतः ॥ नसपापेनकेनापिलिप्यतेमह ताविच ॥ ३६१ ॥ आत्मायस्यहिसत्योयंबुद्धिसाक्षीप्रतीयते ॥ नासौपापानिकुरुतेपुमानद्वैतदर्शनः ॥ ३६२ ॥ आत्मानंयःप्रियंवेदसर्वदासुखरूपिणम् ॥ पापानिकुरुतेकस्माद्विवेकीसहिधीधनः ॥ ३६३ ॥ जायतेम्रिय तेचैकःफलंचैकःशुभाशुभं ॥ भुंक्तेचैतद्विजानन्सकिमर्थंपापमाचरेत् ॥ ३६४ ॥ सर्वभूतात्मभूतस्यसम्य ग्भूतानिपश्यतः ॥ मार्गेदेवाश्चमुह्यंतिह्यपदस्यपदैषिणः ॥ ३६५ ॥

कुर्वीतेत्यर्थः ॥ ३६३ ॥ अत्रकैमुत्यमाह जायतइति एकोन्यार्थइत्यमरः तथाचजननमरणादिविकारभागन्यएवनाहंतथाशुभाशुभक र्मफलभोक्ताप्यन्यएवनाहंसाक्षिमात्रात्मकत्वात्एतद्योविजानातिसभोक्तृत्वाभावेनसत्कर्मणामपियदानाधिकारभाक्तदापापेनतथेति किमुवाच्यमित्यर्थः ॥ ३६४ ॥ ननुव्यवहारेस्थितस्यापिविदुषःकथमीदृशोमहिमेत्याशंक्यविदुषःपंथादुर्लक्ष्यइत्यावेदयंतंभारतश्लोकंप ठति सर्वेति सर्वेषांभूतानामात्मभूतस्यप्रत्यग्भावंगतस्यतानिभूतानिसम्यगभिन्नत्वेनपश्यतोमहावाक्यार्थविदःपथिनिष्ठारूपेमुह्यंतिलो

काः यतोऽपदस्यपदंपादन्यासचिन्हंनविद्यतेयस्यसतथात्मस्तस्ययेपदंगम्यंतत्त्वंप्राप्तुमिच्छंतितेदेवाधन्याइतियावदितिवाचस्पत्युक्तयोजना लभ्योर्थः ॥ ३६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइति यतोयानिशासर्वभूतानामित्यादिगीतोक्तविधयादुर्लक्ष्यगतिस्ततः स्फुटमन्यत् ॥ ३६६ ॥ तस्यविदेहमुक्तौकःसंशय इत्याह एवमिति ॥ ३६७ ॥ चतुर्दशकंडिकागतस्यब्रह्मेत्यंतवाक्यस्यार्थंदर्शयन्प्रजापतींद्रसंवादमुपसंहरति एवमितिद्वाभ्यां स्पष्टम ॥३६८॥ सर्वेषामिति कीदृशंभूमानं हृदयाकाशरूपंनामरूपात्मकप्रपंचस्यविधायकंसत्तादिप्रदानेननिर्वाहकं यत्तेनामरूपेअंतराविना इतिश्रुत्यर्थोदर्शितउत्तरार्द्धेन चतुर्थपादस्यतृतीयपादविवरणात्मकत्वात् ॥ ३६९ ॥ अंत्यकंडिकार्थमाह एकइति अयमुक्तविद्यासंबंधी

ततोयंलभ्यतेनैवपापीपुण्योथवेतिच॥ पापगंधेनरहितोब्रह्मवित्पुरुषोत्तमः॥ ३६६ ॥ एवंयोभाग्ययोगेन पश्येत्पुरुषरूपिणं॥ आनंदात्मानमद्वैतंमुच्यतेसनसंशयः॥ ३६७॥ एवंप्रजापतिःप्राहपूर्वंशक्रायसर्ववित्॥ अवस्थात्रयनिर्मुक्तंभूमानंस्वात्मरूपतः॥ ३६८ ॥ सर्वेषांहृदयाकाशंनामरूपविधायकं ॥ नामरूपात्परंनि त्यंनामरूपविवर्जितम्॥ ३६९ ॥ एकोयंसंप्रदायोभूदिंद्रादन्यःस्वयंभुवः॥ यथेंद्रायोक्तवान्ब्रह्मामनवेचत थैवसः॥ मनुःप्रजाभ्यःसर्वाभ्योभूमौसप्रथमोगुरुः ॥ ३७० ॥ त्रैवर्णिकानिदंप्राहब्रह्मविद्याविवर्जितान्॥ आत्मज्ञानंनभवतांयावदत्रप्रजायते ॥ ३७१ ॥ चतुर्णांप्रविधायैवंतावदिष्टंनिजाश्रमम् ॥ तावत्कर्माणि कुर्वंतुस्वानिस्वानिसमाहिताः ॥ ३७२ ॥ वैराग्येसतिकर्त्तव्योब्रह्मज्ञानस्यहेतुकः ॥ संन्यासःपरहंसाख्योना न्यथार्कर्हिचित्क्वचित् ॥ ३७३ ॥

संप्रदायोगुरुशिष्यपरंपरारूपइंद्रमारभ्यएकःप्रवृत्तः द्वितीयस्तुस्वयंभूसंज्ञकान्मनोःप्रवृत्तः यतःप्रजापतिनायथेंद्रायेयंविद्योपदिष्टातथा मनवेपीत्यर्थः सचमनुर्भूमिलोकेआदिगुरुःप्रजाभ्यःसाधिकाराभ्यउक्तवानिति ॥ ३७० ॥ अशुद्धांतःकरणेभ्यस्तुसकर्मैवोपदिष्टवानि त्याह त्रैवर्णिकानिति ब्रह्मविद्ययावर्जितान्अधिकाराभावात्तान्प्रतीदमाह हेत्रैवर्णिकाभवंतश्चतुर्णामाश्रमाणांमध्येइष्टमाश्रमंकृत्वा यागादीनिकर्माणिकुर्वंतुसत्यांवैराग्यलक्षणायांशुद्धौसंन्यासमपिनान्यथेतित्रयाणामर्थः ॥ ३७१ ॥ ३७२ ॥ ३७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तराकांक्षामुत्थापयन्निंद्रशिष्यानाह इंद्रइति चतुर्थपादउत्तरान्वयी स्पष्टम् ॥ ३७४ ॥ साक्षादिति सइंद्रउमारूपायाब्रह्मविद्यायाअ
नुपहात्तप्रजापत्युपदिष्टंब्रह्मकचिद्देशेलीलाविग्रहमापन्नंसाक्षात्कृतवानपीति तथाग्निवायूचतत्साक्षात्कृतवंतौ देवान्प्रतिप्रादुर्भावेहेतुत

इंद्रःप्रजापतेःप्राप्यब्रह्मविद्यांसुदुर्लभां ॥ देवेभ्यस्तूक्तवान्सर्वांब्रह्मविद्याप्रसादतः ॥ ३७४ ॥ साक्षात्तत्कृत
वांस्तद्वदग्निर्वायुश्चसत्तमौ ॥ देवानांसात्विकत्वेनपक्षपातोमहानिह ॥ ब्रह्मणोविद्यतेयस्माद्दृष्टंब्रह्मात्रतैःक्व
चित् ॥ ३७५ ॥ इतितेसर्वमाख्यातंयत्पृष्टंभवतात्विह ॥ अवस्थात्रयनिर्मुक्तंकिमन्यच्छ्रोतुमिच्छसि ॥ ३७६ ॥
इतिश्रीपरमहंसपरिव्राजकाचार्यानंदपूज्यपादशिष्येणश्रीशंकरानंदभगवताविरचितेउपनिषद्रत्नेआत्मपु
राणेच्छांदोग्यसारार्थप्रकाशेप्रजापतींद्रविरोचनाख्यायिकानामचतुर्दशोऽध्यायःसमाप्तः ॥ १४ ॥ ॥ ७ ॥

यापरमेश्वरस्यदेवपक्षपातमाह देवानामिति स्पष्टम् ॥ ३७५ ॥ उपसंहरति इतितेइति ॥ ३७६ ॥ चतुर्दशेंद्रान्समनूनयत्कारुण्यंसमैदिध
तू काभीतिःश्रमतस्तस्यमन्मतेरुपबृंहणे इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपा
दानुगृहीतस्यकृतावात्मपुराणटीकायांसरससवाख्यायांचतुर्दशोध्यायःसमाप्तः ॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे चतुर्दशोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे पंचदशाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः देवःपंचदशेधेयःस्वाभिमानाक्षमाधरः॥शुक्लपंचदशीनाथकलासंकलितालिकः ॥१॥ अस्यार्थः क्षिप्तमूढविक्षिप्तैकाग्र निरुद्धसंज्ञाःपातंजलप्रसिद्धाःपंचदशाअवस्थायस्यतादृशेचित्तेदेवोदाशरथिर्ध्येयोधारणीयः कीदृशः स्वस्यसंमुखेवर्त्तमानोयोमानोगर्वो जामदग्न्यादिनिष्ठस्तत्राक्षमावान्असहिष्णुः शुक्लपंचदशीपूर्णिमातस्यानाथश्चंद्रस्तद्रूपयाकलयाअंशेनसंकलिताविशिष्टाआलिर्नामाक्ष रपंक्तिःश्रीरामचंद्रेत्याकारायस्यसतथा कलास्यान्मूलरैवृद्धौशिल्पादावंशमात्रकइतिविश्वः श्रीकृष्णविग्रहपक्षे प्रथमपादःसमः स्वेषांभ क्तानांगोपिकार्जुनादीनांयोभिमानःस्वात्मनिसर्वाधिकत्वमतिस्तत्परिहरणपरः शुक्लपंचदश्यांशारद्यांनाथकलयावशीकरणमंत्रेणवंशीगी तेनसंकलिताःसमुदितीकृताआलयःसख्योयेनसतथेत्यर्थः शंभुपक्षेपि प्रथमपादस्तथा स्वपदेनतुरावणोग्राह्यः पूर्णिमानाथस्यचंद्रस्यक

श्रीगणेशायनमः देवानांब्रह्मविद्यायाःप्रसादाद्ब्रह्मबोधनं ॥ श्रुत्वाशिष्योत्रतत्स्रष्टुंपुनराहगुरुंत्विदं ॥ १ ॥ भगवन्नैतरेयोक्तःप्रजानांमुनिभिःसदा ॥ संवादोवामदेवस्यतथानुभवकीर्तनं ॥ ज्ञानवैराग्यसंयुक्तंतेषा मप्यधिकारिणां ॥ २ ॥ तथाकौषीतकिप्रोक्तंयत्रचेंद्रप्रतर्दनौ ॥ अजातशत्रुगार्ग्यौचगुरुशिष्यौव्यवस्थि तौ ॥ ३ ॥

लयासंकलितंराजितमलिकंमस्तकंयस्यसतथेतिविशेषः प्रमेयपक्षे पंचदशपदमावर्त्तनीयं तथाचपंचविधादशाअवस्थायस्यकरणजात स्यकेनेषितेत्यादिप्रथममंत्रोपात्तनामकस्यमनःप्राणवाक्चक्षुःश्रोत्ररूपस्यतत्पंचदशंतत्रनियंतृत्वेनस्थितः स्वस्याभिमुखंप्रवृत्तेषुमानेष्व क्षमावान्अविषयस्वभावइतियावत् अथवास्वेषामिंद्रवाय्वादीनांयोभिमानःपरमेश्वरोपकृतिविस्मृतिरूपस्तत्रवक्ष्यमाणविधयाक्षमार हितएतादृशोदेवःपंचदशेअत्राध्यायेवर्णितोधेयःअवधारणीयः यस्यलीलाविग्रहश्चंद्रभूषितइत्यर्थः ॥ १ ॥ अथमेधाविनःप्रश्नंदर्शयति देवानामितिचतुर्दशभिः स्पष्टम् ॥ १ ॥ तत्रप्रथमाध्यायार्थमनुवदति भगवन्निति मुनिभिःसनकाद्यैस्तेषांवामदेवसतीर्थ्यानांज्ञानवैरा ग्येउक्तेइत्यर्थः ॥ २ ॥ द्वितीयतृतीयवृत्तमाह तथेति स्पष्टम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थवृत्तमाह आदित्यस्येतिद्वाभ्यां आदित्येनयाज्ञवल्क्यायोक्तंज्ञानंकीर्तितं यत्राभेदेनत्रिपर्वावंशःकीर्तितः कीदृशः महाशयान्महा
त्मनोमुनीन्पूर्वभूतानवांतरभेदतयावहन्धारयन्नित्यर्थः ॥४॥ अश्विभ्यामिति यत्रयस्यात्मज्ञानस्यस्फुटत्वार्थं यत्रसंवादे तौअश्विनौ त
त्कृतेअश्विहिताय व्यसनंदुःखम् ॥ ५ ॥ पंचमादित्रयार्थमाह जिगायेति यत्रपंचमेयत्रषष्ठेजनकायसप्तमेतुमैत्रेय्यैइतिविवेकः ॥ ६ ॥
॥ १ ॥ अष्टमादिद्वयवृत्तंकथयति यदिति हेतुसंश्रयंकारणविषयकंयज्ज्ञानंयतिभ्योद्विजेभ्यःश्वेताश्वतरःप्राह यत्रकठोक्तज्ञानेयमनचिकेतसौ

आदित्यस्यात्मविज्ञानंयत्रवंशःसमीरितः॥ त्रिपर्वाभेदतस्तद्वद्वहन्भेदान्महाशयान् ॥ ५॥ अश्विभ्यामपि यत्रायंसंवादोमंत्रवेदिनः॥ दध्यङ्ङाथर्वणोयत्रगुरुःशिष्यौचतावुभौ॥ तत्कृतेव्यसनंतद्वदिंद्रस्यासीन्मुनेरपि ॥ ५॥ जिगाययत्रसकलान्विप्रान्वाजसनेयकः ॥ शाकल्यायददौशापंसद्यःप्राणविमोचकं॥ जनकायच मैत्रेय्यैयत्रज्ञानमदाद्विभुः॥ ६॥ यत्श्वेताश्वतरःप्राहयतिभ्योहेतुसंश्रयम्॥ द्विजेभ्यश्चकठोयत्तुयमोयत्रगुरुःस्मृतः॥ नचिकेताश्चशिष्योपिबालःसर्वगुणान्वितः ॥ ७॥ तित्तिरेरपियज्ज्ञानंकोशपंचकतत्परं॥ वरुणश्चभृगुर्यत्रगुरुशिष्यौतपोधनौ॥८॥ गंधर्वोयत्रवेनाख्योब्रूतेस्वानुभवंनृणां॥ साधनेषुचयत्रायंसंन्यासःपरमःस्मृतः॥ ९॥ यत्प्रसंगेनजाबालमुख्यानामत्रकीर्तनं॥ संवर्तकाद्यायत्रैतेपूर्वेसंन्यासिनःस्मृताः ॥ १० ॥ वैराग्यंयत्रकालश्चयमादिस्तत्रकारणं॥ यत्राधिकारिणःप्रोक्ताविरक्ताःसर्वएवहि॥ वेषआचारसंयुक्तोयत्रन्यासश्चकीर्तितः ॥ ११ ॥

गुरुशिष्यौ ॥ ७॥ दशमवृत्तमाह तित्तिरेरितिद्वाभ्यां कोशपंचकंतनोतिसत्तादिदानेनविस्तारयतीतिकोशपंचकतत्पुच्छभूतंब्रह्मतदेवपरंगो
चरीभूतंयस्यतादृशंतित्तिरिमुनेर्ज्ञानमुक्तं यत्रज्ञाने ॥ ८ ॥ ९ ॥ एकादशवृत्तमाह यत्प्रसंगेनेतिद्वाभ्यां यस्यसंन्यासस्यप्रसंगेनजाबाला ॥ १ ॥
दिसंबंधिनिअत्रज्ञानेकीर्त्तनंकृतं यत्रज्ञानेपरिनिष्ठिताःसंवर्त्तकादयःकथिताः यत्रयदर्थंवैराग्यादयःसंन्यासस्वरूपांताःकीर्तिताइतिद्वयो
रर्थः ॥ १० ॥ ११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशादित्रयवृत्तमाह आरुणेरिति आरुणेर्ब्रह्मपुत्रस्यसनत्कुमारस्यब्रह्मणश्चज्ञानंश्वेतकेतुनारदेंद्रान्प्रत्युपदिष्टंविस्तरेणसमासेनचयत्की तिंतंतत्सर्वरूपंब्रह्मज्ञानमतीतग्रंथेप्रोक्तमित्यर्थः ॥ १२ ॥ प्रश्नबीजमनुभाषते तत्रेति तत्रपूर्वाध्यायेअंतेइदमुक्तं इदंकि अत्रदेवानांमध्ये इंद्राग्निवायूनांब्रह्मविद्यायाअनुग्रहाद्ब्रह्मणोज्ञानंविशेषतोजातमितितत्रावश्यंभाव्याश्चर्यश्रोतुमिच्छामीतिद्वयोरर्थः ॥ १३ ॥ १४ ॥ एवंपृष्टोगुरुःसामवेदीयत्वेनोपस्थितांकेनोपनिषदुक्तांकथांवक्तुमुपचक्रमेइत्याह एवमिति ॥ १५ ॥ अत्रयद्यपिभाष्यकारैर्गुरुशिष्ययोः सामान्यतएवोपन्यासःकृतस्तथापिच्छांदोग्याष्टमेप्रजापतिगृहीतविद्यायाविरोचनेनासुरान्प्रतिनिरूपणोक्तौसत्यांकथमिंद्रेणाऽपिसादे

आरुणेश्चतथाब्रह्मपुत्रस्यब्रह्मणोपिच ॥ ज्ञानंविस्तरशोयत्रसमासेनापिकीर्तितं ॥ तत्सर्वंभवताप्रोक्तंब्रह्मज्ञानमनेकधा ॥ १२ ॥ तत्रांतेभवताप्रोक्तंब्रह्मविद्याप्रसंगतः ॥ इंद्रादेर्ब्रह्मविज्ञानंजातमत्रविशेषतः॥ १३ ॥ तदहंश्रोतुमिच्छामिनूनमाश्चर्यमत्रभोः ॥ किंचिदस्तियतस्तेषांविशेषोभवतेरितः ॥ १४ ॥ एवमुक्तोगुरुःप्राहकेनेषितसमीरितां ॥ स्वशिष्यायकथामेतांब्रह्मविज्ञानकारिणीं ॥ १५ ॥ इंद्रादवाप्तविद्यास्तेदेवाःसर्वेमहौजसः ॥ मीमांसांचक्रिरेत्वेतामिंद्रंप्राप्यसभागतं ॥ १६ ॥ इंद्रियाणिदशैतानिमनसासहकोत्रभोः ॥ संप्रेषयतिसर्वेषामस्वतंत्रायतोजनाः ॥ १७ ॥ व्यापारमिंद्रियोत्थानंनकरिष्येऽमुनेत्ययं ॥ संकल्प्यापिकरोत्येवभूताविष्टइवातुरः ॥ ततःसर्वःपराधीनोजंतुरत्रेतिनिश्चितं ॥ १८ ॥

वान्प्रत्युक्तेत्याकांक्षायावैदिकवृत्तेनैवपूरणीयत्वाद्देवान्शिष्यत्वेनेंद्रंगुरुत्वेनचग्रंथकृदुपन्यस्यति इंद्रादिति इंद्रद्वाराप्रजापतेर्लब्धविद्यादेवाःशुद्धधियइंद्रसमीपेमीमांसांमननंचक्रिरेकृतवंतइत्यर्थः ॥ १६ ॥ तत्रशिष्यप्रश्नरूपस्यप्रथममंत्रस्यार्थमाह इंद्रियाणीतिपंचभिः वागाद्युपलक्षितानिदशेंद्रियाणिमनसातदुपलक्षितप्राणेनचसहितानिकःप्रेरयति नजीवास्तत्प्रेरकास्तेषांस्वातंत्र्याभावादित्यर्थः ॥ १७ ॥ अस्वतंत्रतामेवस्फुटयति व्यापारमिति यतोऽमुनाइंद्रियविशेषेणेंद्रियसाध्यंव्यापारंनकरिष्येइत्याकारंसंकल्पंकृत्वाप्ययंजनस्तंव्यापारं करोतिततःपारतंत्र्यंनिश्चीयतेइत्यर्थः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रेंद्रियस्वातंत्र्यमाशंक्यनिरस्यन्निषितपदसूचितंचेतनपारवश्यमिंद्रियाणामाह इंद्रियाणीति यथाजीवन्मुक्तस्येंद्रियाणिसुप्रसारथि
रथाश्वन्यायेनव्यापारान्स्वतःकुर्वंतीतिनियतंनियमशालिनभवंतियस्मात्कश्चिद्बहुलोजनोऽभिसंधायाऽऽलोच्यैवप्रवर्त्तमानोनिवर्तमान
श्चदृश्यतेइत्यर्थः अयंभावः प्रायशोदर्शनादभिसंधानाख्यचेतनव्यापारपूर्विकैवसर्वत्रप्रवृत्तिर्विज्ञायते नचमुक्तेंद्रियव्यापारेव्यभिचारःत
॥ २॥ त्रापिचक्रभ्रमिन्यायेनव्यवहितचेतनव्यापारानुमानादिति ॥ १९ ॥ चेतनइति ततोऽस्वातंत्र्यात्तेष्विंद्रियेषुप्रेरणकर्त्ताकश्चिच्चेतनोऽभ्युपे
यः नचेंद्रियाण्येवचेतनानीतिवाच्यं नानात्मताप्रसंगेनमतभेदेनदेहभंगापादकेनपूर्वंदूषितत्वादित्यर्थः यथाचजडत्वेननेंद्रियाणांस्वातं
त्र्यंतथाकर्मणोपिबोध्यमित्याह अतइति अतोजडत्वात् कर्मादृष्टं ॥ २० ॥ यतइति यतआलोचनपूर्विकैवप्रवृत्तिर्दृश्यतेततइंद्रियसंघा

इंद्रियाणिस्वतोनैवमुक्तस्येवेहकुर्वते ॥ व्यापारान्नियतंयस्मादभिसंधायकश्चन ॥ प्रवर्ततेथवाकश्चिन्निवृ
त्तिमपिगच्छति ॥ १९ ॥ चेतनस्ततएवायंप्रेरकस्तेषुकश्चन ॥ नतेषामिहचैतन्यंनानात्मत्वप्रसंगतः ॥ अतः
कर्मापिनैवस्यात्व्यापारेष्विहकारणं ॥ २० ॥ यतःप्रवर्ततेसर्वोविज्ञायैवततःपरः ॥ चेतनःकोत्रतेषांस्यादिं
द्रियाणांप्रवर्तकः ॥ २१ ॥ इतिपृष्टःसहस्राक्षस्तान्शिष्यानिदमब्रवीत् ॥ इंद्रियाणांहिसर्वेषामिंद्रियंमनसो
मनः ॥ २२ ॥ योवस्थात्रयनिर्मुक्तःप्रेरकःसपुमानिह ॥ इंद्रियाणांहिसर्वेषांसर्वेषामिहदेहिनां ॥ २३ ॥

तात्परश्चेतनःप्रेरकःकश्चित्संभाव्यतेसकइतिवक्तव्यमित्यर्थः ॥ २१ ॥ अथखंडद्वयगतमंत्रानूगुरुवाक्यत्वेनव्याचक्षाणस्तत्रेंद्रंगुरुत्वेनोप
न्यस्यद्वितीयमंत्रार्थमाह इतिपृष्टइतिपंचभिः इत्थंपृष्टइंद्रस्तान्देवानिदमाह इदंकिं हेदेवाःसपुमान्सर्वदेहिनांसर्वेंद्रियाणांसन्निधानमा
त्रेणप्रेरकः सकः यःसर्वेषामिंद्रियाणामिंद्रियभूतोमनसोमनोभूतश्च अयंभावः औपाधिकशब्दानामुपाधिरेवमुख्योर्थइतिप्रसिद्धंयथा
ग्निसंबंधादुदकेप्रवृत्तस्यदग्धृशब्दस्याग्निरेवार्थइति तथाचतत्रज्ञानकर्मसाधनवाचकानांश्रोत्रवागादिशब्दानांमननसाधनवाचिमनःपद
स्यचमुख्यार्थतायाजाग्रदादिदूषितेषुप्रसिद्धकरणेष्वसंभवात्सर्वशक्तःसर्वेषांसत्ताप्रदश्चात्मैवार्थतयाव्यवतिष्ठतइति यश्चजाग्रदाद्यवस्था ॥ २ ॥
त्रयाद्विविक्तःप्रजापतिनोक्तइतिद्वयोरर्थः ॥ २२ ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाजीवनादिप्रयोजकवाचिप्राणपदेनापिसएवाभिधेयइत्याह प्राणस्यापीति यइंद्रियमनसांप्रेरकउक्तःसएवैषआत्माप्राणस्यापिप्रेरकः तत्रप्रसिद्धप्राणत्वस्यजीवनहेतुत्वस्वरूपस्याप्याधारत्वात् अत्रानुकूलायास्तित्तिरिश्रुतेरर्थंनिबध्नाति प्राणतइति यतःप्राणापानौमर्त्यानां मरणधर्मणांजीवनप्रयोजकौनभवतःकिंत्वन्यएवयःप्राणस्यापिस्थितिप्रयोजकत्वेनप्राणभूतःसर्वेषांजीवननिदानमित्यर्थः ॥ २४ ॥ एतद्विज्ञानफलमाह एवमितिद्वाभ्यां हेसुराएवमिंद्रियादिप्रवर्त्तकत्वेनात्मानंगुरुमुखाद्विज्ञायश्रुत्वापश्चात्समाहितेनमनसादृष्ट्वाचावस्थात्रयलक्षणबंधनेभ्योमुक्ताःसंतःप्राणाद्यात्मानंप्राणादिभ्यआंतरंतत्त्वमद्वयरूपमायांतिअवधारयंतीत्यर्थः ॥ २५ ॥ अमृताइति ततउक्तवि

प्राणस्यापिसएवैषप्राणउक्तोमनीषिभिः ॥ प्राणतोऽपानतोनापिमर्त्योजीवतिकश्चन ॥ अन्यतःप्राणतःप्राणात्सर्वेजीवंतिजंतवः ॥ २४ ॥ एवंविज्ञायचात्मानंपूर्वंगुरुमुखात्सुराः ॥ दृष्ट्वापश्चात्स्वयंसर्वबंधनैःपरिवर्जिताः ॥ प्राणाद्यात्मानमायांतिसर्वभेदविवर्जितं ॥ २५ ॥ अमृतास्ततएवैतेजन्मादिपरिवर्जिताः ॥ तत्रगत्वापुनर्नैवकेचिदायांतिकर्हिचित् ॥ २६ ॥ यत्रेंद्रियाणिसर्वाणिज्ञानकर्मात्मकानिच ॥ कालत्रयेनयांत्येवमनसासहितान्यपि ॥ २७ ॥ एनंसामान्यतोनैवविशेषाच्चसुरोत्तमाः ॥ जानंतोपिनजानीमोभवतांगुरवोवयं ॥ २८ ॥ उपदेशंकथंनामगमिष्यामःसुरोत्तमाः ॥ भवतांसर्वकरणैरगम्यस्यमहात्मनः ॥ २९ ॥

ज्ञानादेतेविद्वांसोजन्मादिविकारराहित्यरूपममृतत्वंलभंतेयतस्तत्रब्रह्मणिगत्वापुनःसंसारंनागच्छंतीत्यर्थः ॥ २६ ॥ अस्याविषयत्वेनैववोधनंसंप्रदायसिद्धंनसामान्यादिरूपेणेतिप्रतिपादयतस्तृतीयमंत्रस्यार्थमाह यत्रेंद्रियाणीतित्रिभिः यत्रसर्वाणिज्ञानादिसाधकानींद्रियाणिमनसासहनप्रवर्तितुमुत्सहंते एनमात्मानंजानंतोपिवयंभवतांगुरवोलोकसिद्धसामान्यविशेषरूपाभ्यांकथयितुंनजानीमइतिद्वयोरर्थः ॥ २७ ॥ २८ ॥ तथाचलोकवासनावासितैर्भवद्भिरपेक्षितःसामान्यविशेषान्यतररूपेणतदुपदेशःकथंशक्यःस्यादित्याह उपदेशमिति हेसुरोत्तमाःसामान्यविशेषविलक्षणत्वेनभवतांसर्वकरणैरगम्यस्यपूर्णात्मनउपदेशव्यापारंकथंनामप्रसिद्धंगमिष्यामआचरिष्यामइत्यर्थः ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यलोकवैलक्षण्यंस्फुटयतश्चतुर्थस्यार्थमाह विदितेतिचतुर्भिः यद्भवद्भिःपृष्टंयच्चवक्तुंवयमुद्यतास्तदात्मनोरूपंविदितत्वेनप्रसिद्धादविदितत्वेनप्रसिद्धाच्चभिन्नमित्यर्थः ॥ ३० ॥ तत्रविदितभेदंस्फुटयति यच्चेति यत्तुलोकेपृथिवीत्वघटत्वादिलक्षणैःसामान्यविशेषैरूपैर्ज्ञायतेविषयीक्रियतेतत्सर्वंविदितमनात्मत्वाभेदगोचरत्वेनदुःखप्रयोजकत्वात्सुधीभिर्हेयंयथाघटादीत्यर्थः ॥ ३१ ॥ कदाचिदपिभानानर्हरूपम

॥३॥ विदितमपिनृशृंगादिवत्तुच्छत्वात्कथमात्मास्यादित्याह यच्चनेति तत्तुअसद्भवेदितिसंबंधः ॥ ३२ ॥ ईदृशमात्मरूपंपूर्वाचार्येभ्योवयंश्रु

विदिताविदिताभ्यांतदन्यदेवात्मरूपकम् ॥ पृष्टंब्रह्मभवद्भिर्यद्वक्तुंयच्चोद्यतावयं ॥ ३० ॥ यच्चविज्ञायतेलोकेसामान्याद्वाविशेषतः ॥ घटादिवदनात्मातद्धेयंपंडितरूपिभिः ॥ ३१ ॥ यच्चनज्ञायतेतत्तुभवेद्वंध्यासुतादिवत् ॥ असत्तदपिहेयंस्यादनात्मत्वेनहेतुना ॥ ३२ ॥ श्रुतवंतोवयंत्वेवंगुरुभ्यःस्वेभ्यईदृशं ॥ यैरयंकथितःस्वात्मात्वस्मभ्यंशास्त्रवेदिभिः ॥ ३३ ॥ वागाद्यैर्ज्ञायतेयत्तुनकदाचित्सुरोत्तमाः ॥ ज्ञानकर्मेंद्रियैःसर्वैर्मनसासहितैरपि ॥ प्राणेनापिक्रियाशक्त्यासर्वदेवैकरूपिणा ॥ ३४ ॥ यइंद्रियाणिसर्वाणिमनःप्राणौचवेत्त्यपि ॥ व्यापारैर्निखिलैःसार्द्धंतेषांतद्व्याप्रतिक्षमः ॥ ३५ ॥ तदेवब्रह्मजानीथयूयंसर्वेदिवौकसः ॥ उपासतेभवंतोयन्नतदात्माकदाचन ॥ ३६ ॥

तवंतइत्याह श्रुतेति स्पष्टं ॥ ३३ ॥ प्रत्यक्त्वेनात्मोपदेशप्रकारंपूर्वाचार्यैरनुष्ठितंयद्वाचेत्यादिमंत्रपंचकदर्शितंनिरूपयति वागाद्यैरितित्रिभिः सर्वैर्वागादिभिरिंद्रियैर्मनसाचयन्नविषयीक्रियतेतथासर्वैर्देवायस्यविभूतयस्तेनप्राणेनापिनविषयीक्रियतेइत्यर्थः ॥ ३४ ॥ यइंद्रियाणीति यश्चसर्वेंद्रियाणांमनःप्राणयोश्चतद्व्यापाराणांचसाक्षीतेषांसंनिधिमात्रेणतत्तद्व्यापारेषुप्रवर्त्तयिताचेत्यर्थः ॥ ३५ ॥ तदेवेति तत्प्रत्यग्वस्त्वेवब्रह्मबोध्यंहेदिवौकसःयत्तुपराग्रूपेणोपास्यतेतदात्मत्वेननबोध्यमितिप्रथमखंडार्थः ॥ ३६ ॥ ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथद्वितीयखंडेमननविधयाआत्मतत्त्वमुपदिश्यतेइतिदर्शयंस्तेइत्यंतवाक्यार्थमाह यन्मन्यतेइतिद्वाभ्यां इंद्रआहदेवगणोयदितिमन्यते स्वीकरोति इतिकिं आत्मतत्त्वंसुज्ञेयंसुखेनज्ञातुंशक्यंभवति अहरहरुपास्यमानत्वादितिभावः तत्तथानैवमंतव्यं यतस्तत्भवत्परिचितमात्मरूपंदहराकाशादिनामकंसर्वैर्देवैरुपास्यंध्येयमेवभवतिनज्ञेयं अहोइत्याश्चर्ये हेदेवाःज्ञेयंयदात्मरूपंतत्त्वमहंप्रभृतिशब्दैर्वर्जितंभवत्यतस्तल्लाभायसकलादेवाविचारयंत्वितिद्वयोरर्थः एतेनदेवेषुमध्येवर्त्तमानोपित्वंयद्दहरपर्यंतंब्रह्मरूपंमत्वासुवेदेतिमन्यसेतदयुक्तंयतोज्ञेयंरूपंज्ञातुकामस्त्वंत्वंपदादिकमस्यपरित्यजतदशक्तौविचारएवतवयुक्तइतिश्रुतियोजनासूचिता भाष्यविरोधस्तुप्रमेयाविरोधात्परिहार्यः ॥ ३७ ॥ ३८ ॥ तत्रहेतुंसुज्ञेयमित्यवधारणस्यप्रमेयाननुसारित्वंदर्शयन्वेदेत्यंतवाक्यावेदितंब्रह्मणःस्वभावचतुष्टयमाह आत्मेति यतो

यन्मन्यतेदेवगणःसुज्ञेयमितिनैवतत्॥ आत्मतत्त्वमुपास्यंतद्दहराकाशसंज्ञितं ॥ ३७॥ देवैःसर्वैरहोदेवास्त्वमहंशब्दवर्जितं ॥ विचारयंतुसकलाआत्मानंबुद्धिसाक्षिणं ॥ ३८ ॥ आत्मरूपंयतस्त्वेवंप्रवदंतिविपश्चितः॥ अज्ञेयंवापिविज्ञेयंसुज्ञेयंदुष्प्रबोधनं॥ ३९॥ अविज्ञातःसदैवात्मासर्वैरपिशरीरिभिः॥ सत्यज्ञानादिरूपेणविज्ञातश्चात्मरूपतः ॥ ४०॥ सुज्ञेयोगुरुवाक्येनभवेत्सुविदितोहिसः॥ दुर्विज्ञेयश्चतर्काद्यैस्ततोनविदितोहिसः ॥ ४१ ॥

विपश्चितोमन्येविदितमित्यादिश्रुत्यर्थविदएवंवक्ष्यमाणविधयाआत्मनोरूपमज्ञेयत्वादिस्वभावचतुष्टयशीलंवदंतीत्यर्थः तत्रेत्थंश्रुत्यर्थविभागः सुवेदेत्येवनमन्यइत्यनेनअत्यंताविषयत्वयत्नपूर्वकवेद्यत्वयोर्निषेधाद्विज्ञेयत्वसुज्ञेयत्वयोर्लाभोनोस्माकंसंप्रदायसिद्धंबोधप्रकारंचतुर्थपादोक्तंयोवेत्तिसएववेदेत्यनेनतर्कागम्यत्वरूपदुष्प्रबोधनत्वस्यमूढैरज्ञेयत्वस्यचलाभइति ॥ ३९ ॥ अज्ञेयत्वादिषुहेतूनाह अविज्ञातइतिद्वाभ्यां यतःसर्वैर्देहाभिमानिभिःसत्यज्ञानानंदादिरूपेणाविज्ञातस्ततोज्ञातुमशक्यत्वादेतत्रूपमविज्ञेयमित्युक्तंतथाहमित्यात्मरूपेणविज्ञातत्वात्तुविज्ञेयमिति यतश्चगुरुवाक्येनविदितोभवतिततःसुज्ञेयइति यतश्चतर्कमयैःशास्त्रैर्विदितोनभवतिततोदुर्विज्ञेयइत्युच्यतेइतिद्वयोरर्थः ॥ ४० ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्राविज्ञातत्वंविशदयति आनंदात्मानमितित्रिभिः सत्यादिलक्षणमानंदरूपमात्मानंहृदिवर्त्तमानमपिसुप्तौसर्वैर्लभ्यमपिजनःप्रायशोन
वेत्तिदेवमाययाविक्षेपावरणाभ्यांमोहितत्वात्श्रांतोंधःप्राप्तंनिधिमिवप्रत्युतततआत्मनोन्यदेवपश्यतियतोन्यदर्शनादियंदुःखसंततिरूपा
विनष्टिर्हानिर्वर्त्ततेइतित्रयाणामर्थः ॥ ४२ ॥ ४३ ॥ ४४ ॥ विज्ञेयत्वहेतुंविदितत्वंस्फुटीकरोति विदितश्चास्तीतिद्वाभ्यां अयमात्मासर्वे
॥४॥ षांविदितःप्रसिद्धोभवतियतोऽहमित्याकारयोर्धीशब्दयोर्विषयःसन्नेवव्यवह्रियतेइत्यर्थः॥ ४५ ॥ नकेवलमहमित्याकारयोर्धीशब्दयो

आनंदात्मानमप्येनंस्वयंज्योतिःस्वरूपिणं॥सत्यादिलक्षणंनित्यंसर्वप्राणिहृदंबुजे॥वर्त्तमानंसुषुप्तौचप्राप्यं सर्वैश्चजंतुभिः॥ ४२ ॥ कोपिनैवंविजानातियथांधःकरगंनिधिम् ॥ संसारश्रमसंतप्तोमोहितोदेवमायया ॥ ४३॥ अन्यमेवात्मनःसर्वमवगच्छतिदेहभृत्॥ ततोविनष्टिश्चैवेयंवर्त्ततेदेहिनांसदा ॥ ४४ ॥ विदितश्चा स्तिसर्वेषामात्माधीशब्दयोर्यतः॥ विषयोव्यवहारस्यहेतुर्भवतिसर्वथा ॥ ४५ ॥ सदादिविषयोदेवःस्वप्नेवै जागरेपिच॥ व्यवहारमिमंसर्वमर्हरूपंकरोतिहि॥ ततोत्रविदितोप्येषदेहिनांवर्त्ततेपुमान्॥ ४६॥ ब्रह्मचर्या दिसंपन्नःपुमान्जन्मशतायुतैः॥ कुशलस्यवचस्येतत्तद्ब्रह्मेत्यवगच्छति॥ ४७॥ यदातदासुखेनैतंस्फुरंतंहृद यांबुजे॥ आनंदात्मानमात्मस्थंसुखादेषोऽवगच्छति॥ ४८॥

रेवविषयःकिंत्वस्तिभातीत्यादिप्रतीतीनामपीत्याह सदादीति तथायमात्मास्वप्नजागरयोःसदाद्यवगाहिप्रतीतीनांविषयःसन्नेवसर्वव्यवहा
रमर्हरूपंयोग्यरूपंकरोति नहिसत्ताद्यंशविनिर्मोकेकश्चिदपिघटादीनांव्यवहारःशोभतेइति फलितमाह ततइति ॥ ४६ ॥
विशदयति ब्रह्मेति जन्मशतायुतसिद्धपुण्यैर्ब्रह्मचर्यादिसंपन्नःपुमान्कुशलस्याचार्यस्यवचसिमहावाक्यरूपेप्रवृत्तेसतिएतत्प्रत्यग्वस्तुतत्स ॥४॥
दार्थभूतंब्रह्मेतियदावगच्छतितदानिरावरणमात्मानंसुखरूपेणभान्तंसुखेनलभतेइतिद्वयोरर्थः ॥ ४७ ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्बोधताहेतुंतर्कैरविदितत्वंव्यक्तीकरोति सुखादयइति यदावैशेषिकादिमतावलंबीपुरुषोयत्रद्रव्येसुखादयोगुणाःसमवेताःसआत्मेतितर्का दवधारयितुंप्रवर्त्ततेतदाचिदात्मत्वमादिर्विषयविधयाकारणंयस्यतथाभूतंश्रुत्यनुगृहीतंतर्कंनिरीक्ष्यविभ्रांतचित्तोव्याकुलचित्तोभवतित स्यचात्मादुर्विज्ञेयोभवतीतिद्वयोरर्थः ॥४९॥५०॥ एवंहेतुनिष्पत्तौनिगमनमभिनयति देवाइतिद्वाभ्यां हेदेवायआत्माततोमायावृतत्वा त्सामान्यविशेषरूपाभ्यांसुज्ञेयोनैवभवतिससर्वदाविदितत्वात्सुज्ञेयश्चभवतीत्यर्थः शक्तौकृत्यप्रत्ययः ॥ ५१ ॥ स्वभावाच्चेति स्वभावात्स्व प्रकाशत्वरूपात्गुरुवाक्याच्चसुज्ञेयस्तर्कैर्दुर्ज्ञेयश्चबोध्यइति ॥ ५२ ॥ ननुमहाधियोलौकिकाःपरीक्षकाश्चस्वयमेवतंकुतोनजानीयुरित्या

सुखादयोगुणायत्रसंश्रितिाद्रव्यरूपिणि॥सआत्मेतियदातर्कात्ज्ञातुमेषप्रवर्तते॥४९॥तदाविभ्रांतचित्त स्यतर्कांतरसमागमात्॥चिदात्मत्वादिकादेषदुर्विज्ञेयःप्रजायते॥५०॥देवाआत्माततोज्ञेयोविदितःसर्व दाहियः॥सामान्येनविशेषाच्चसुज्ञेयोनैवजंतुभिः ॥५१॥ स्वभावाच्चगुरोर्वाक्यात्सुविज्ञेयःकदाचन ॥दु र्विज्ञेयःसदातर्कैःपुंबुद्धिपरिकल्पितैः ॥ ५२ ॥ आत्मरूपंसदादेवाविज्ञातुंनैवशक्यते ॥स्वयंयतोविशेषैर्यो जानीतेनैववेदसः॥विशेषैरहितंतद्वदवगच्छतियःपुमान्॥५३॥ गुरोर्मुखादवगतंजानीतेसर्वथैवसः॥य तःश्रुतिरियंप्राहस्वरूपंतस्यचेदृशं॥ ५४ ॥यस्यामतंतस्यमतंमतंयस्यनवेदसः ॥अविज्ञातंविजानतांवि ज्ञातमविजानतां॥५५॥

शंकावारकंयस्यामतमित्यादिश्लोकमवतारयति आत्मरूपमितिद्वाभ्यां हेदेवाएतदात्मतत्त्वंस्वयंब्रह्मनिष्ठाचार्यनिरपेक्षेणजनेननज्ञातुंश क्यंयतःसपूर्वसंस्कारैर्द्विधैववेत्स्यतिविशेषणरूपेणसामान्यरूपेणवातयोरेवसंसारेपरिचितत्वात्तत्रविशेषरूपेणयआत्मानंजानातिसनैव वेत्तितस्यनिर्विशेषत्वात्यश्चविशेषरहितंसामान्यरूपमितियावत्एतादृशमात्मानमवगच्छतिसोपिनैववेदनिरपेक्षस्यात्मनःपरसापेक्षसा मान्याभावादित्यर्थः ॥ ५३ ॥ गुरुणात्वनुपलब्धार्थबोधकवेदवाक्येनसबोध्यतेइत्याह गुरोरिति सजनोगुरोर्मुखाद्बुद्धमात्मानंजानीते साक्षात्करोत्येवयतइयंसन्निहिताश्रुतिस्तस्यात्मनःस्वरूपमीदृशंसामान्यविशेषभावविनिर्मुक्तंप्राहदर्शयतीत्यर्थः ॥ ५४ ॥ इयमित्युक्तां श्रुतिंपठति यस्येति ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्याआर्थक्रमेणार्थंषड्भिर्दर्शयंस्तत्रहेयावबोधकंद्वितीयपादंव्याचष्टे मंतुरितिद्वाभ्यां यस्यपुंसःसिद्धतिब्रह्ममतंभवेत् मतत्वंत्रिपुट्यवगा
हिज्ञानगोचरत्वं तदेवाभिनयति मंतुर्मानैर्मेयमिति तस्यपुंसएतद्ब्रह्ममतंविज्ञातंनभवतियस्मादेषपुमान्ब्रह्मस्वभावविपरीतंभेदंपश्यतीत्यर्थः
॥५६॥ भेदस्यप्रमेयविरोधमेवस्फुटयति नहीति अद्वैतस्वभावेब्रह्मणिमंतृमेयमानादिरूपात्रिपुटीभेदव्यामानवर्त्तते तत्रभेदाभावादित्यर्थः
॥५७॥ प्रथमपादार्थमाह एवमिति यस्तुनिर्द्वैतंत्रिपुटीलक्षणद्वैतरूपसतत्त्वहीनमात्मानंगुरुमुखात्ज्ञात्वामयाब्रह्ममतमितिमन्यतेसिद्धांत
यतितस्यविदुषोब्रह्ममतंविज्ञातमेवयथावदवबोधादित्यर्थः ॥ ५८ ॥ ननुब्रह्मविज्ञानस्याप्रमात्वेभेदावगाहित्वंप्रमात्वेतदनवगाहित्वंचालिं

मंतुर्यस्यमतंब्रह्ममेयंमानैर्भवेदिह ॥ नतस्यैतन्मतंयस्माद्भिदमेषोत्रपश्यति ॥ ५६ ॥ नहिब्रह्मणिनिर्द्वैतेमंता
मेयंचकिंचन ॥ अस्तिमानादिकंभिन्नंक्रियाकारकरूपवत् ॥ ५७ ॥ एवंनिर्द्वैतमात्मानंज्ञात्वायोमन्यतेमतं ॥
मतंतस्यभवेदेतद्भेदशून्यावबोधनात् ॥ ५८ ॥ उभयत्रश्रुतिप्रोक्तोहेतुरेषसनातनः ॥ जानंतिविविधंब्रह्मवा
दिनोयेत्रभेदतः ॥ प्रमात्रादिस्वरूपेणमाययापरिमोहिताः ॥ ५९ ॥ तेषामिदमविज्ञातंसर्वदाभेददर्शिनाम् ॥
नत्वभिन्नस्वभावंतद्भिन्नंभवितुमर्हति ॥ ६० ॥ विविधंयेनजानंतिज्ञातृज्ञेयादिभेदतः ॥ आनंदात्मानमगु
णंसर्वभेदविवर्जितं ॥ तेषांविज्ञानमेवैतत्सर्वदातत्त्वदर्शिनाम् ॥ ६१ ॥

गंयत्स्वयमुपन्यस्तंतदसिद्धमित्याशंकांवारयति उभयत्रेति उभयत्रप्रमात्वाप्रमात्वयोर्योहेतुर्द्विविधोऽस्माभिरुक्तःससनातनःश्रुत्यैवोत्तरा
र्द्धरूपयाप्रोक्तत्वादित्यर्थः तत्राप्रमात्वेहेतुंतृतीयपादोक्तंवर्णयति विविधमिति येवादिनोमायामोहितत्वात्प्रमात्रादिरूपभेदेनविविधंसद्ब्रै
तंब्रह्मेतिजानंतितेषांविविधज्ञानवतांबोधेअविज्ञातमनाविर्भूतमेवप्रसिद्धंब्रह्मस्वभावत्यागभयादितिद्वयोरर्थः तथाचप्रमेययाथात्म्यानव
गाहिनस्तज्ज्ञानस्याप्रमात्वशालिताप्रायशःप्रसिद्धेतिभावः ॥ ५९ ॥ ६० ॥ येयेपूर्वेसमाहिताद्वैतविस्मरणेनाविजानंतःस्थितास्तदीयबोधे
ब्रह्मणआविर्भूतत्वलक्षणविज्ञातत्वप्रसिद्धेरमतत्वदर्शनंप्रमैवेतिचतुर्थपादार्थमाह विविधंयेनेति स्पष्टं ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यक्त्वरूपाविषयतावगाहिन्येवमतिर्ब्रह्मप्रमाफलवत्त्वादितिप्रदर्शयतःप्रतिबोधेत्यादिवाक्यस्यार्थमाह अहमितिचतुर्भिः अहंब्रह्मेत्याकारकेणप्रत्यक्त्वावगाहिनाबोधेनयःप्रतिक्षणंजानीतेऽनुसंधत्तेतस्यमहात्मनःस्वात्मरूपंमतमेवेति यतएतज्ज्ञानादमृतत्वरूपमानंदंप्राप्तो जातइतिद्वयोरर्थः ॥ ६२ ॥ ६३ ॥ आत्मज्ञानेनामृतत्वलाभेउपपत्तिमाह मनसेति ब्रह्मचर्यादिसंपन्नोमहामनाःकार्पण्यरहितोधिकारीश्रुतावात्मपदोक्तेनमनसासमाहितेनगुरूपदिष्टविद्यारूपंवीर्यंबलंलभतेततश्चप्रमादरूपान्मृत्योःकृपणेषुशूरादस्यभयंनयुक्तंतथाचसिद्धममृतत्वमित्याह विद्ययेत्यादिना ॥ ६४ ॥ ६५ ॥ द्वितीयखंडांत्यमंत्रस्यार्थमाह अस्मिन्निति चतुर्दशभिः हेदेवाःयदिपुरुषोऽस्मिन्वर्त्तमा

अहंब्रह्मेतिबोधोयस्तेनयोत्रप्रतिक्षणं॥ जानीतेस्वात्मरूपंतन्मतंतस्यमहात्मनः ॥ ६२ ॥ एतज्ज्ञानाद्यतःसर्वःपुनर्मरणवर्जितं॥ आनंदात्मानमाप्नोतित्यमृतत्वंवदंतियं ॥ ६३ ॥ मनसाविंदतेविद्यांवीर्यशब्दांमहामनाः॥ ब्रह्मचर्यादिसंपन्नोगुरुवक्त्रारविंदतः॥ ६४॥ विद्ययालब्धयापश्चादमृतत्वंपुरोदितं ॥ अवाप्नोतियतो भूयोमरणंनाधिगच्छति॥ ६५ ॥ अस्मिन्जन्मनिदेवाश्चेज्जानीतेपुरुषोहितं ॥ ब्रह्मचर्यादिसंपन्नःस्वल्पात् क्लेशात्तदाफलं ॥ महद्देषसमाप्नोतिआनंदात्मानमद्वयं ॥ ६६ ॥ यदवाताववयंजीवोभवेदानंदवारिधिः॥ मायातत्कार्यदुःखौघफेनबुद्बुदवर्जितः॥ ६७ ॥ नातःपरंहिसंप्रार्थ्यंविद्यतेजन्मभाजिनः ॥ नातःपरस्तथा लाभःकश्चिदन्योत्रविद्यते॥ ६८॥ अस्मिन्जन्मनिमूढात्तविषयासक्तचेतनः ॥ नचेदेनंविजानातिमोहितो देवमायया॥ ६९॥ ततःकामादयस्त्वेनंकितवाजितभूमिकाः॥ दुरक्षदेविनोधूर्त्ताःकुर्युरस्यदुरात्मनः॥ विनष्टिंमहतींयस्माद्दुःखाद्दुःखतमंव्रजेत्॥ ७०॥

नेएवजन्मनिहितमनुसंधायविद्यासाधनंब्रह्मचर्यादिकमनुतिष्ठतितदास्वल्पयत्नेनमहत्सत्यपदोक्तमात्मानंदरूपंफलंलभतेइत्यर्थः॥ ६६ ॥ अस्यफलस्यमहत्त्वंविशदयति यदवाप्ताविति द्वाभ्यां निगदव्याख्यातंद्वयं ॥ ६७ ॥ ६८ ॥ विपक्षेदोषंद्वितीयपादोक्तंवर्णयति अस्मिन् जन्मनीतिपंचभिः यदितुमायामोहितत्वान्मूढसेवितेषुविषयेषुसक्तःसन्नेनंनजानीयात्तदाकामादिरूपाःकितवावंचकाधूर्त्ताःप्रगल्भाअक्षदेविनइंद्रियरूपपाशकचालकाजितभूमिकानानारूपग्रहणसमर्थाश्चास्यपुंसोमहतींविनष्टिंकुर्युः यस्माद्विनष्टिरूपहेतोःपुनःपुनरतिदुःखंव्रजेदितिद्वयोरर्थः ॥ ६९ ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विनष्टिमेवाभिनयति जीवन्निति द्वाभ्यां कामादिजितो हि निन्दाभाजनत्वाज्जीवन्मृतस्तथानानादेहग्रहणैर्जननमरणभाक्तथास्वरूपेणै
वकामनायादुःखरूपत्वात्सततंदुःखीभवतीत्यर्थः ॥ ७१ ॥ तथापारतंत्र्येणनष्टप्रायत्वंतस्यप्रसिद्धमित्याह आशेति कालादिवशःसदा
नष्टःनष्टप्रायोभवतीत्यर्थः ॥७२ ॥ नष्टइति प्रथमपदंपूर्वान्वयि फलितोक्तिस्तस्मादित्यादिना अभीतत्वंधैर्यशालित्वं स्फुटमन्यत् ॥७३ ॥
नचसफलात्मज्ञानमत्रदेहेदुर्लभमेवेतिवाच्यं विद्वदनुभवसिद्धत्वादित्याह अस्मिन्नेवेति एतेप्रसिद्धाउत्तमाधिकारिणोऽस्मिन्नेवदेहेस्थित्वा

जीवन्मृतश्चसततंनानादेहग्रहैरिह॥म्रियतेजायतेभूयःकामीदुःखीचसर्वदा॥७१॥ आशापाशशतैर्बद्धःक्रो
धलोभवशंगतः॥ उच्चावचेषुदेहेषुप्रतिक्षणविनाशिषु॥ व्रजन्नवाप्तभोगःसन्कालकर्मवशःसदा॥७२॥ न
ष्टस्तस्मादभीतेनपुरुषेणात्रसर्वदा॥ अस्मिन्नेवशरीरेसावात्माज्ञेयःसुरोत्तमाः॥७३॥ अस्मिन्नेववपुष्येतेस्थि
त्वाब्राह्मणसत्तमाः॥ ब्रह्मचर्यादिसंपन्नाःपरंधैर्यमुपागताः॥ ७४॥ आनंदात्मानमद्वैतंसर्वभूतनिवासिनं॥
नभोवत्सर्वगंदेवंस्वप्रकाशंचनिर्गुणं॥ ७५॥ विज्ञायात्मतयानित्यंजीविनोप्यथवामृताः॥ भवंत्यमृतरूपा
स्तेपुनर्जन्मविवर्जिताः॥ ७६॥ एकएवात्रभूतात्माभूतेभूतेव्यवस्थितः॥ एकधाबहुधाचैवदृश्यतेजलचंद्र
वत्॥ ७७॥ एवंविज्ञायमेधावीसर्वभूतस्थितंपरं॥ सर्वान्लोकांस्तथाकामानाप्नोतिसततंसुराः॥ ७८॥
वैरिणांविजयश्चास्यप्रभावान्नांतरीयकः॥ यथामृष्टान्नभुक्तेश्चपुष्टिःस्यान्नांतरीयकी॥ ७९॥

सर्वेभ्योभूतपदोक्तशरीरेभ्यउपाधिभ्योविवेचितमात्मानंविज्ञायजीवनावस्थायांमरणावस्थायांवाअमृतभावंबहवोगताइतित्रयाणामर्थः
॥ ७४ ॥ ७५ ॥ ७६ ॥ तस्मादिदानीमप्येकएवेत्यादिश्रुत्युक्तविधयाऐकात्म्यंविज्ञायस्थितस्यसर्वलोककामाप्तिरूपफललाभेनसंशयइ
त्याह एकएवेतिद्वाभ्यां तत्रप्रथमार्थोब्रह्मबिन्दूपनिषद्व्याख्यानेदर्शितएकादशे सुराइतिसंबोधनं ॥७७॥ ७८ ॥ अंतरंगबहिरंगवैरिविज
यरूपंफलंतुब्रह्मज्ञानस्यानुषंगिकमेवेत्याह वैरिणामिति नांतरीयकआनुषंगिकः तत्त्वंचइतरसाधकयत्नसाध्यत्वं मृष्टंस्वादु ॥ ७९॥

CC-0. In Public Domain. Digitization by eGangotri

तृतीयखंडस्यब्रह्मविद्यायाःशमादिलभ्यत्वंतद्वत्सुब्रह्मणःपक्षपातंचदर्शयतोर्थमुपबृंहयति एवंशक्रेत्यादिना एवमुक्ताथसाशक्रमित्यतःपूर्वग्रंथेन एवमिंद्रमुखात्श्रुतया विद्ययाब्रह्मीभूतादेवाःस्वर्गवासिनोवैरिविजयांतंतत्फलंप्राप्यस्वर्गभोगेषुस्थिताअपिब्रह्मानुसंधानपरायणाःसमभवन्निति द्वयोरर्थः॥८०॥८१॥ तेषामिति तेषांदेवानामात्मानंब्रह्मपश्यतांसांनिध्यादग्निपतंगन्यायेनासुराणांक्षयोभवत्॥८२॥ तत्रचासुरक्षयबीजंब्रह्मैवाभवदितिसदृष्टांतंस्फुटयति अयःपिंडइतित्रिभिः तेदेवाअयःस्थानीयाःपरब्रह्मरूपेणाग्निनादेदीप्यमानाअसुरानद

एवंशक्रमुखाच्छ्रुत्वादेवाब्रह्मसनातनं॥सर्वान्लोकांस्तथाकामान्वैरिणांविजयंतथा॥८०॥ अवाप्यस्वर्गसंस्थानादुःखलेशविवर्जिताः॥ आनंदात्मस्वरूपास्तेवर्ततेस्मापिनाकगाः॥८१॥ तेषांब्रह्मात्मरूपाणांसांनिध्यादसुराःसदा ॥क्षयंजग्मुर्यथावन्हेःसान्निध्याच्छलभाइमे॥८२॥ अयःपिंडोयथातप्तःशुष्कमार्द्रंचनिर्दहेत्॥एवंब्रह्माग्निसंदीप्ताअदहंस्तेऽसुरान्बहून्॥ ८३ ॥ अयःपिंडोयथावन्हिसामर्थ्याद्दाहकोभवेत्॥ ब्रह्मसामर्थ्यतोदेवादेहुस्तानसुरानपि॥८४॥ सामुद्रलक्षणबलाद्यथावृद्धिर्निधेर्भवेत्॥एवंब्रह्मबलात्तेषांसुराणांविजयोभवत्॥८५॥यथासर्वगतोप्येषभगवान्भास्करःसदा॥अभिमानंविशेषेणकुरुतेसूर्यकांतके॥८६॥एवंसर्वगतंब्रह्मदेवजातौविशेषतः॥अकरोदभिमानंतंदेवास्तेजस्विनस्ततः॥८७॥

हन्दग्धवंतइत्यर्थः॥ ८३ ॥ यथाचदृष्टांतेदाहशक्तिरग्नेरेवतथाऽसुरक्षयशक्तिर्ब्रह्मणएवेत्याह अयःपिंडोयथावन्हीति देहुर्भस्मीचक्रुः॥८४॥ सामुद्रेति यथाचसामुद्रिकोक्तसल्लक्षणान्येवधनसंपत्तेःप्रयोजकानितत्रचस्वयत्नसाध्यताभिमानोमूढानांतथाब्रह्मैवदेवानांविजयस्यप्रयोजकमभवदित्यर्थः॥८५॥ अत्रब्रह्मणोवैषम्यदोषंदृष्टांतैःपरिहरति यथासर्वगतोपीति यथासर्वत्रसमतेजोवर्षुकोप्यादित्यःसूर्यकांतेनैर्मल्यविशेषशालिनिविशेषतःप्रतिबिंबवत्तेतथाब्रह्मापिसत्वप्रधानेषुदेवेष्वभिमानंविशेषसंबंधंकृतवत्ततोहेतोर्देवास्तेजोऽतिशयवंतइतिद्वयोरर्थः॥ ८६ ॥ ८७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाजगत्सूत्रधारस्यलीलायांकेषुचिज्जयस्यावश्यंसंपाद्यत्वादशोकवनिकान्यायेनदेवेष्वेवजयःसंपाद्यतेइत्याह सूत्रेति असुरद्रुहांदे
वानां सूत्रधारःपुत्तिकानर्त्तकः ॥ ८८ ॥ अथवाबाललीलावदीशस्वभावस्यनकश्चित्पर्यनुयोगइत्याह बालकइति केषुचित्क्रीडनकेष्व
भिमानस्यैतदुत्कर्षेममैवोत्कर्षइतिबुद्धिरूपस्यकर्त्ता ॥ ८९ ॥ महिम्नइति तस्यवर्णितविधयादेवानुग्राहकस्यब्रह्मणःसंबंधीयोमहिमावि

भूतिस्ततोहेतोरेवदेवादैत्यान्जितवंतः ॥ ९० ॥ यथार्जुनस्यगीताशास्त्रविस्मृतिःकालभोगसंसर्गाभ्यांप्रयुक्ताअनुगीतोपदेशेनभगवताप

सूत्रधारोयथासूत्रैःपुत्तिकाश्चालयन्भृशं॥जयंददातिकासांचिदेवंब्रह्मासुरद्रुहां॥८८॥बालकोत्रयथाक्री
डन्केषुचित्त्वभिमानकृत्॥एवंब्रह्मादिसंसारेदेवेष्वेवाभिमानकृत्॥ ८९ ॥ महिम्नोब्रह्मणस्तस्यदेवादैत्यान
नेकशः॥जितवंतोत्रसंग्रामेबलवीर्यादिशालिनः॥ ९० ॥कालेनमहतातेपिदेवाब्रह्मविदोपिच ॥भोगसं
सक्तचेतस्त्वान्माययापरिमोहिताः॥ब्रह्मणोविजयंतेषांमेनिरेनबलाधिकाः ॥ ९१ ॥इंद्रोवायुश्चवह्निश्चत
थान्येनाकसंश्रयाः॥अस्माकमेवविजयइतितेनिश्चयंगताः ॥ ९२ ॥ मानवाआर्त्तिमापन्नायथादेवप्रसा
दतः॥कृतार्थारजसाविष्टाविस्मरंतीहतान्क्षणात् ॥ ९३ ॥पराजिताःपुरादैत्यैरेवंदेवाःसहस्रशः॥आर्त्ताब्र
ह्मप्रसादेनजितवंतोऽसुरान्बहून्॥ ९४ ॥रजसाविष्टहृदयाःपश्चाद्विस्मृतिमागताः॥विजयस्यात्मनोहेतुंब्र
ह्मतेनप्रपेदिरे॥ ९५ ॥

रिह्नतातथादेवानामपिस्वविस्मृतिःप्रादुर्भावेणेतिदर्शयितुमुपक्रमते कालेनेत्यादिना तेदेवाब्रह्मविदोपिकालवशोद्रिक्तरजःप्रधानमायया
जातेनभोगसंगेनमोहिताःसंतस्तेषामसुराणांजयोब्रह्महेतुकइतिनमेनिरेविस्मृतवंतइत्यर्थः ॥ ९१ ॥ इंद्रइति इंद्रवाय्वग्नयस्तथाअन्येचदे
वाःप्रत्युतजयंस्वप्रभावजमेवनिश्चितवंतइत्यर्थः॥९२॥ अत्रलौकिकंदृष्टांतमाह मानवाइति यथादेवमुन्याद्यनुग्रहेणार्त्तिमुत्तीर्णाःपुरुषाः
पुनर्वित्तादिमददूषितचित्तास्तान्देवादीन्विस्मरंतीतिप्रसिद्धं ॥ ९३ ॥ दार्ष्टांतिकेयोजयति पराजिताइति स्पष्टंद्वयं ॥ ९४ ॥ ९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतघ्नाइति कीदृशादेवाः कृतघ्नसदृशाः यतोयथाच्छलप्रधानद्यूतपरायणाःकितवावंचकाउपकारस्यकर्तारंविस्मरंतीतिशेषः तथैतेकृतार्थाःसंतःपरमेश्वरविषयिकांविस्मृतिंगताइति ॥ ९६ ॥ अहंमानश्चेति अयंवक्ष्यमाणरूपोभिमानश्चविनाशस्यपातित्यरूपस्यप्रयोजकस्तेषामभूदिति ॥ ९७ ॥ तमभिमानमभिनयति वयमितिसप्तभिः स्फुटंद्वयं ॥ ९८ ॥ ९९ ॥ अस्मत्तइति अस्मत्तोऽस्मदपक्षेयागणनायामिमेदैत्याःकेनकेपि येइतिएवंविधैर्वक्ष्यमाणविशेषणैःसमर्थाःस्युःसमर्थत्वेनसंभाविताः इतिपदपरामृष्टानिदैत्यविशेषणान्याह कालांजने

कृतघ्नाइवदुर्धूर्तदेविनःकितवाइव ॥ स्वोपकारस्यकर्त्तारंकृतार्थाविस्मृतिंगताः ॥ ९६ ॥ अहंमानश्चदेवानांतेषामासीदयंमहान् ॥ रजोगुणकृतोयेनविनाशंपुरुषोव्रजेत् ॥ ९७ ॥ वयंशांतास्तथादांतामहाकुलसमुद्भवाः ॥ रूपयौवनसंपन्नाविद्याविनयसंयुताः ॥ ९८ ॥ कीर्तिमंतोमहाभागाभोग्यैर्नानाविधैर्युताः ॥ लोकत्रयींपालयामःस्वशक्त्यानाकवासिनः ॥ ९९ ॥ अस्मत्तःकइमेदैत्याःसमर्थास्युर्जयेष्विति ॥ कालांजनगिरिप्रख्याःकालांतकयमोपमाः ॥ मायाविनोतिसंग्रामाःशौंडीरप्रतिवर्तिनः ॥ १०० ॥ बलवीर्याधिकाःसर्वेत्रिलोकीग्रासकारिणः ॥ एकैकस्यनकोनामयोधयेन्नोविहायतान् ॥ १०१ ॥ अहमिंद्रोवज्रपाणिर्वज्रेणशतपर्वणा ॥ शतधारेणतीक्ष्णेनत्यमोघेनात्मनोबलात् ॥ चूर्णीकरोमिसततमुन्नतान्पर्वतानपि ॥ १०२ ॥ अहंवायुर्जगत्सर्वंकुक्षौनिक्षिप्यचात्मनः ॥ ब्रह्मांडगोलकाद्बाह्येनयामित्वणतूलवत् ॥ १०३ ॥

त्यादिना अंजनगिरिवत्कालवर्णाः कालःसमयाभिमानीदेवःअंतकोमृत्युर्यमःसंयमनीपतिरेतैस्तुल्याः अतिशयितयुद्धपराः शौण्डीर्यंचपराक्रमइतिहैमकोशाच्छौंडीराःपराक्रमवंतस्तेषामभिमुखगंतारस्त्रिलोकीग्रसनक्षमाःयेषामेकमपिअस्मान्देवान्विनाकोपियोधयितुंनशक्तइतिद्वयोरर्थः ॥ १०० ॥ १०१ ॥ तत्रेंद्रस्यविशेषाभिमानंकीर्त्तयति अहमिंद्रइति शतंपर्वाणिग्रंथयोधारास्तीक्ष्णमुखानिचयस्यतत्तथातेन स्फुटमन्यत् ॥ १०२ ॥ वाय्वग्न्योरपितमाह अहंवायुरितिद्वाभ्यां बाह्येबहिर्देशे ॥ १०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहमग्निरिति मूर्त्तिमद्वनं ॥ १०४ ॥ एवमन्येपीति अन्येचवरुणादयः यतःस्वंस्वंकर्मैवाचिंतयन्नब्रह्मततोगर्विताः ॥ १०५ ॥ तेषामि ति तेषांदेवानांगर्वंनानानर्थप्रयोजकंविज्ञायपितृवद्धितचिन्तकंपरंब्रह्मकर्तृइत्थमालोचितवत् ॥ १०६ ॥ ब्रह्मकर्तृकांचितामभिनयति मत्प्रसादादितिसप्तदशभिः अहोएतेदेवामदनुग्रहादेवयोगक्षेमंप्राप्तामामेवोपकारकंविस्मृत्यस्थिताइतिद्वयोरर्थः ॥ १०७ ॥ १०८ ॥ अ स्यदोषस्यपरिहरणायतत्प्रयुक्तमनर्थजातंचिंतयति यन्निमित्तमिति यस्मादुन्नतिरुत्कर्षलाभस्तस्योपकर्त्तुर्विस्मरणेकृतेजन्मशतायुताव

अहमग्निर्जगत्सर्वंशुष्कमार्द्रंचमूर्त्तिमत् ॥ करोमिभस्मसाच्छीघ्रंतूलराशिमिवोन्नतं ॥ १०४ ॥ एवमन्येपिदे वास्तेनानाकर्मविधायिनः ॥ संप्राप्ताःपरमंगर्वंस्वस्वकर्मान्वचिंतयन् ॥ १०५ ॥ तेषांगर्वंसमालोक्यरजोगु णसमुत्थितं ॥ पापहेतुंचवीर्यस्यकीर्त्तेरपिविनाशनम् ॥ पितृवद्ब्रह्मपरममिदमत्रव्यचारयत् ॥ १०६ ॥ मत्प्र सादादिमेदेवाःसर्वलक्षणसंयुताः ॥ जाताविजयिनस्तद्वदिदानींवीर्यसंयुताः ॥ १०७ ॥ विस्मृताअपिमा मेतेकृतघ्नाइवबालिशाः ॥ स्वोपकारस्यकर्त्तारंमोहितामममायया ॥ १०८ ॥ यन्निमित्तंहियोगच्छेदुन्नतिं पुरुषःसचेत् ॥ विस्मरेत्तंततोगच्छेद्दुःखंजन्मशतायुतं ॥ १०९ ॥ स्वोपकारस्यकर्त्तारंमूढोयोनैवमन्यते ॥ स्मृ तःसविट्कृमिर्भूत्वाजायतेकल्पकोटिषु ॥ ११० ॥ अल्पमप्युपकारंयोनस्मरेत्केनचित्कृतं ॥ कृतघ्नःसतुलोके स्मिन्ब्रह्मघ्नादपिपापकृत् ॥ १११ ॥ प्रायश्चित्तंहिविहितंब्रह्मघ्नेवेदवादिभिः ॥ कृतघ्नेनैवतात्किंचिदस्यनिष्कृ त्यभावतः ॥ ११२ ॥ ब्रह्मघ्नेनिष्कृतिर्दृष्टाकृतघ्नेनास्तिनिष्कृतिः ॥ यतस्ततःकृतघ्नत्वमतिकष्टतमंस्मृतं ॥ ११३ ॥

च्छिन्नंदुःखंलभतेइत्यर्थः ॥ १०९ ॥ स्वोपकारस्येति स्पष्टं ॥ ११० ॥ अल्पमपीति यःकेनचित्कृतंस्वल्पमप्युपकारंनमन्यतेसकृतघ्नउ च्यतेतस्यब्रह्मघ्नादपिनीचत्वमित्यर्थः ॥ १११ ॥ तत्रहेतुतयाप्रायश्चित्तैरपरिहार्यत्वंसूचयन्प्रायश्चित्ताभावेहेतुंतदुपदेशाभावमाह प्राय श्चित्तमिति अस्यकृतघ्नत्वस्यनिष्कृतेःप्रायश्चित्तस्याभावादिति ॥ ११२ ॥ फलितमाह ब्रह्मघ्नेइति कष्टतमंअतिदुःखारंभकम् ॥ ११३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेवलमेतेषांकृतघ्नत्वमेवप्रसक्तंकिंतुस्वपरस्तुतिनिंदाभ्यामात्मघातविश्वघातदोषावपिप्रसक्तौगर्वेणवैषम्यदर्शनादित्याह अपियइति किं चयःस्वकीयंकर्ममनसापिस्तौतिपरकीयंनिंदतिचतेनस्वस्यपरस्यचहिंसाकृताभवतिअविवेकवशादित्यर्थः एतदुक्तंव्यतिरेकमुखेनगीतासु समंपश्यन्हिसर्वत्रसमवस्थितमीश्वरं नहिनस्त्यात्मनात्मानंततोयातिपरांगतिमिति ॥११४॥ एतत्स्फुटयति आत्मनोत्रेति स्पष्टं॥११५॥ आत्मघातस्यकृतघ्नत्वसाम्यमाह आत्मानमिति शास्त्रगाशास्त्रविहिता॥११६॥ गर्वेणस्वातिरिक्तस्यसर्वस्यापकर्षबोधनरूपनिंदायांविश्व

अपियःस्वात्मनःकर्ममनसापिप्रशंसति ॥ धिक्कुर्याद्वापरस्यापिकदाचिद्गर्वसंयुतः ॥ आत्मानंचपरंचापि सहन्यादविचारयन् ॥ ११४ ॥ आत्मनोत्रप्रशंसायामात्महत्याप्रकीर्तिता ॥ परस्यापिचनिंदायांपरहत्या मनीषिभिः॥ ११५॥ आत्मानंयोत्रवैहन्याल्लोकेपापतमोमतः ॥ आत्मघ्नेनिष्कृतिर्नास्तिकृतघ्नइवशास्त्रगा ॥ ११६ ॥ आत्मनोव्यतिरिक्तस्यसर्वस्यैतेविनिंदकाः ॥ विश्वहत्याततोमीषांजायतेनित्यमेवहि ॥ ११७ ॥ आत्मघ्नाश्चकृतघ्नाश्चविश्वघ्नाअपिवानराः॥ माययामोहिताजाताःकालपाशवंशगताः॥ ११८ ॥ एतेपाप रताःसर्वेमयाशक्यानिपातितुं॥ यद्यप्येवंतथाप्येतदुचितंमेनतद्भवेत्॥ ११९॥ आरोपितःस्वयंयस्माद्वर्द्धित श्चप्रयत्नतः॥ छेत्तव्योनस्वयंवृक्षोविषस्यापीहकर्हिचित्॥ १२० ॥

घातःस्पष्टएवेत्याह आत्मनइति ॥ ११७॥ नन्वेवंविधानर्थरूपेषुकर्मसुजनाःकिमितिप्रवर्तंतइतिचेन्न अविद्यादिदोषाणांस्वभावस्यापर्य नुयोज्यत्वादित्याह आत्मघ्नाइति मायामोहितानांकालपरवशानांचलोकानांक्षुद्रनिमित्तेनाप्यात्मघ्नत्वादिदोषत्रयांगीकारोनचित्रमि तिभावः ॥ ११८ ॥ एतेषांदंडेनशोधनंतुनयुक्तमित्याह एतेइति एतेदेवाययप्येवमसुखन्निपातितुंदंडयितुंशक्यास्तथाप्येतदेषांनि पातनंनयोग्यमित्यर्थः ॥ ११९ ॥ तत्रहेतुतयाविषवृक्षोपीत्यादिन्यायविरोधमाह आरोपितइति यस्माद्विषस्यवृक्षोपिस्वयमारोपितोव र्द्धितश्चस्वयंछेदनयोग्योनभवतिकिमुतसजातीयाइत्यर्थः ॥ १२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचक्रूरकर्मणापरनियमनंसाधूनांनयुक्तंस्वभावत्यागपिष्टपेषणयोःप्रसंगादित्याह नपापमिति पापाचरणवंतंदंडयितुंस्वयंपापाचरणवा
न्स्यात्साधुत्वभंगप्रसंगात् पापस्तुस्वयमेवहतःपापचिकीर्षायाःसावधानतालक्षणजीवनवत्यायोगादित्यर्थः ॥ १२१ ॥ एतेषांवधस्तुवि
डालीकर्मवत्पापरूपएवेत्याह एतेइति एतेदेवाममसत्वोपाधिकस्यसुताःपुत्राः ॥ १२२ ॥ तस्मात्केनचिदुपायेनैवैषांगर्वोऽपसार्योयोदो

षत्रयस्यालम्नत्वकृतम्नत्वविश्वम्नत्वरूपस्यप्रयोजकइत्याह उपायेनेति ततोगर्वपरिहारादेषांभद्रमस्त्विति ॥ १२३ ॥ एवमालोच्यतद्ब्रह्म

नपापंप्रतिपापःस्यात्साधुरेवसदाभवेत्॥ आत्मनैवहतःपापोयःपापंकर्तुमिच्छति॥ १२१॥ एतेममसुतादे
वाःपालितालालितामुहुः॥ कृताविजयिनस्तद्वत्कथंवध्यामयाधुना॥ १२२॥ उपायेनततोमीषांदोषत्रयक
रंपरं॥ अपनेष्याम्यहंगर्वमेभ्यःस्वस्तिभवेत्ततः ॥ १२३॥ एवंसंचिंत्यतत्तेषांदेवानांमांसनेत्रयोः ॥ प्रत्यक्ष
मभवत्सर्वपूज्यमद्भुतरूपधृक्॥ १२४॥ सहस्रमस्तकंदेवंसहस्रेंद्रियसंयुतं॥ सर्वजीवाननंसर्वभौतिकंसर्व
संयुतम् ॥ १२५ ॥ सर्वायुधधरंसर्वंसर्वमाल्यांबरादिकं॥ स्त्रियःपुंसश्चचिन्हेनसंयुतंचनपुंसकं॥ १२६ ॥
सभागतामहात्मानोददृशुस्तेतिधीधनाः ॥ किमिदंकिमिदंचेतिसमूचुश्चपरस्परं ॥ १२७॥ आकारैरिं
गितैर्गत्याचेष्टयाभाषणेनच ॥ नेत्रवक्त्रविकारेणयेजानंतिमनोपिहि ॥ तेपितद्वपुरन्वीक्ष्यनिश्चयंनप्रपेदिरे
॥ १२८ ॥

देवानांनेत्रगोचरीभूतमभूत् कीदृशं पूज्यंयक्षपदोक्तपूज्यताकं अद्भुतरूपंचेत्याह एवमिति मांसमयनेत्रयोरितिप्रत्येकाभिप्रायेणद्विवचनं
सर्वंसर्वरूपं ॥१२४॥ रूपाद्भुतत्वंविशदयति सहस्रेतिद्वाभ्यां सहस्रशब्दोऽसंख्यपरः सर्वजातीयजीवानामाननैर्विशिष्टं सर्वेभौतिकाःभूत
विकारायत्रतत्तथा स्त्रीपुंनपुंसकानांचिन्हधरं स्पष्टमन्यद्द्वयोः ॥ १२५ ॥ १२६ ॥ तद्दृष्ट्वादेवानांविस्मयंवर्णयति सभेति समूचुरुक्तवंतः ॥ ९ ॥
॥ १२७ ॥ आकारैरिति येदेवाआकाराद्यन्यतममात्रदर्शनेनपरकीयमनोवृत्तंजानंतिस्मतेपिव्यामोहंगताः तत्रेंगितमभिप्रायसूचिकाव
यवक्रिया चेष्टाअवयवविक्रिया विकारोन्यथाभावः इत्यपौनरुक्त्यम् ॥ १२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्मयाविष्टेति स्पष्टम् ॥ १२९ ॥ सभेति पूर्वमननुभूतरूपशालिनोजरायुजादिचतुर्विधशरीरलक्षणैर्विशिष्टस्यचतस्यदेवस्यदर्शनाद्दे वानांसदसिमहान्क्षोभोऽभवदिति ॥ १३० ॥ समीपमिति साध्वसंभयंतेनाविष्टंव्याप्तंहृदयंयेषांतेतथा अनिर्ज्ञातंविस्मृतमात्मनोरूपंप्रभा वोयैस्तेतथाविधाश्चदेवास्तदुपगंतुंनचक्षमिरे ॥ १३१ ॥ अग्निमिति ततस्तन्निर्णयायदेवाअग्निमाज्ञापितवंतः तत्रहेतुगर्भाणिविशेषणानि देवानामवमंकनिष्ठं तथाचशतपथश्रुतिः अग्निरवमोदेवतानांविष्णुःपरमोदेवतेति मुखभूतंप्रथमपूज्यंच एतद्बृहदारण्यकेतृतीयाध्यायेस्पष्ट म् ॥ १३२ ॥ कथमूचुरित्याकांक्षायामाह जातेति हेजातवेदस्त्वमेतत्परीक्षस्वकिंदेवानामनुकूलंप्रतिकूलंवेति ॥ १३३ ॥ एवमुक्तोगतइ

विस्मयाविष्टमनसउत्फुल्लनयनोत्पलाः ॥ रोमांचकंचुकादेवाःकिंकिमित्येवचोचिरे ॥ १२९ ॥ सभाक्षोभोम हानासीद्देवानांतस्यदर्शनात् ॥ अदृष्टपूर्वरूपस्यचतुर्विधशरीरिणः ॥ १३० ॥ समीपंतस्यतेगंतुंसमर्थानाभ वन्सुराः ॥ साध्वसाविष्टहृदयाअनिर्ज्ञातात्मरूपकाः ॥ १३१ ॥ अग्निमूचुस्ततःसर्वेदेवानामवमंसुराः ॥ मुख भूतंचसर्वेषांतेजसांराशिमूर्जितं ॥ १३२ ॥ जातवेदइमंयक्षंविजानीहिकिमात्मकं ॥ प्रतिकूलंसुराणांकि मनुकूलमथापिच ॥ १३३ ॥ एवमुक्तोगतोवन्हिस्तद्यक्षमविशंकितः ॥ तेनोक्तःकस्त्वमित्याहतद्यक्षमविशं कितः ॥ जातवेदाइतिख्यातोस्म्यहमग्निस्वरूपतः ॥ १३४ ॥ एवमुक्तेपुनःप्राहतद्यक्षंतंविभावसुं ॥ त्वयित स्मिन्हिकिंवीर्यमत्राग्नौजातवेदसि ॥ १३५ ॥ एवमुक्तःपुनर्वन्हिस्तद्यक्षमवदद्वचः ॥ मूर्त्तंविश्वमिदंसर्वंदहा मिक्षणतोस्म्यहं ॥ १३६ ॥

ति एवंदेवैःप्रेरितोवन्हिर्निःशंकंतस्ययक्षस्यसमीपंगतःअथतेनयक्षेणकस्त्वमित्येवंपृष्टःसंस्तद्यक्षंप्रतीत्युक्तवान् इतिकिं जातवेदाइतिनाम्ना जातंवेदोधनंयस्मादितिव्युत्पत्त्याधनदातृत्वाभिधायकेनजातेजातेविद्यतेइतिव्युत्पत्त्याव्यापकत्वाभिधायकेनवाप्रसिद्धोस्मि दृश्यमान स्वरूपेणत्वग्निर्देवानामग्रस्यहविर्भागदौत्यादिरूपस्यनेतास्मीत्यर्थः ॥ १३४ ॥ एवमुक्तेपुनरिति इत्थमग्निनोक्तेसतितद्यक्षंकर्तृअग्निंप्रती दंप्राह इदंकिं त्वयिवर्णितनामकेकिंबलमिति ॥ १३५ ॥ एवंपृष्टोग्निस्तस्मैयक्षायस्वस्यसर्वमूर्त्तद्रव्यदाहशक्तिंन्यवेदयदित्याह एवमु क्तइति ॥ १३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्तेथेति एवमग्निनोक्तेसतितद्यक्षंकर्तृस्मिताननंसदग्नेःपुरोमेएकंशुष्कंतृणंनिधायत्वमेतद्दहभस्मीकुर्वित्युक्तवदित्यर्थः ॥ १३७ ॥
इत्युक्तेसर्वेति एवंयक्षेणोक्तेसतिसर्वेणवेगेनसर्वेणयत्नेनचतत्पुरोनिहितंतृणंदग्धुंवन्हिःशक्तोनाभवत् आत्मायत्नोधृतिरित्यमरः ॥ १३८ ॥
अदग्ध्वेति तस्यतृणस्यादाहेनहतगर्वोवन्हिर्देवान्प्राप्येदमाह येनममबलंनाशितं अहोइत्याश्चर्ये तद्यक्षंदेवानुकूलत्वादिनापरीक्षितुंनाहं

शक्तोस्मितदर्थमन्यंकंचित्प्रेरयंतुभवंतइतिद्वयोरर्थः ॥ १३९ ॥१४० ॥ इत्युक्तइति इत्थमग्निनोक्तेसतितेदेवावायुंप्रेषितवंतःसचगतोऽमु

एवमुक्तेथतद्यक्षंशुष्कमेकंतृणंपुरः॥ निदधौनिर्दहेत्येवमाहतंचस्मिताननं ॥ १३७॥ इत्युक्तेसर्ववेगेनत्द्येत
न्निर्दग्धुमुद्यतः ॥ वन्हिःशशाकतद्दग्धुंनैवसर्वात्मनापिच ॥ १३८ ॥ अदग्ध्वातत्तृणंवन्हिर्गर्वलेशविवर्जि
तः॥ देवान्समागतःप्राहनाहंशक्तोत्रवेदितुं॥ १३९॥ देवानामनुकूलंवाप्रतिकूलमथापिच ॥ एतद्यक्षमहो
देवाअन्योगच्छतुकश्चन॥ ज्ञातुंशक्तोत्रयोयेनममवीर्यंविनाशितं॥ १४०॥ इत्युक्तेवायुमाहुस्तेपूर्वमग्निंय
थावदन्॥अग्निवद्गतवान्वायुःपृष्टःसोपितथामुना॥ मातरिश्वाभिधोवायुरहमस्मीत्यभाषत॥१४१॥ तस्मिं
स्त्वयीहकिंवीर्यंवायावितिसमीरिते॥ आहसोपिततोब्रह्मस्ववीर्यमविशंकितः ॥ १४२ ॥ विश्वंनयामिस
कलंबाह्यंब्रह्मांडगोलकात्॥ प्रक्षिप्यात्मनिबालोयंनयेद्यद्वत्तृणंमुखात्॥ १४३॥ इत्युक्तेब्रह्मतस्याग्रेवन्हेरि
वदधौतृणं॥ नयेतिसर्ववेगेननेतुंसोपिनचाशकत् ॥ १४४॥ वन्हिवद्भग्नमानःसन्देवानेवसमागतः॥ ऊ
चेतद्वच्चनाहंतज्ज्ञातुंशक्तोस्मिभोसुराः॥ १४५॥

नायक्षेणाग्निवत्पृष्टःसन्नाह मातरिआकाशेश्वयतेवर्द्धतेइतिव्युत्पत्त्यामातरिश्वसंज्ञोवातिवहतीतिव्युत्पत्त्यावायुसंज्ञश्चास्मीति ॥ १४१ ॥
तस्मिंस्त्वयीति पुनस्तेनयक्षेणत्वयिकिंबलमितिपृष्टेवायुस्तस्मैब्रह्मांडाद्बहिर्विश्वंनेतुंशक्तोस्मियथाबालोमुखेनतृणंनयेत्तथेत्युक्तवानितिद्व

योरर्थः ॥१४२॥१४३॥ ततस्तस्याग्निवन्मानभंगंदेवान्प्रत्यागमनंचाह इत्युक्तेइतिद्वाभ्यां ब्रह्मयक्षं नयप्रापय स्पष्टमन्यद्द्वयोः ॥१४४॥
॥ १४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंवायुनोक्तेसतिइंद्रंदेवास्तथाप्रेषयामासुरित्याह एवमिति॥१४६॥ एवंदेवैरुक्तेसतितौवन्हिवायूयथागतौतद्वदिंद्रोप्यद्भुतयक्षसमीपंगत इत्याह एवमुक्तेथेति॥१४७॥इंद्रस्याभिमानविशेषंपरिहर्त्तुमसंभाव्यत्वद्योतकमंतर्धानंचकारतद्यक्षमित्याह आगादिति हस्तप्राप्तवत्संनि हितदेशेस्थितमपितद्यक्षमंतर्दधेइत्यर्थः॥१४८॥ तथापींद्रस्तत्रैवस्थितइत्याह अंतर्हितमिति तद्यक्षरूपं॥१४९॥ ततउत्कंठातिशयेनशो धितदोषइंद्रस्तत्रयक्षांतर्धानदेशेकांचित्स्त्रियमपश्यदित्याह तस्मिन्नेवेति हिमवतःपर्वतस्यतनयां कीदृशींसर्वकल्याणगुणैःसल्लक्षणैश्वशो

एवमुक्तेततोदेवाइंद्रमूचुःसभागताः॥ मघवंस्त्वंविजानीहियक्षमेतदिहागतं॥ अस्माकमनुकूलंवाप्रति कूलमथापिच॥१४६॥ एवमुक्तेथशक्रोपिगतवांस्तौयथापुरा॥ वन्हिवायूगतौतद्वत्तद्यक्षंचित्रदर्शनं॥१४७॥ आगाच्छक्रोयदास्वस्यसमीपंतत्तदैवहि॥ अंतर्दधेमहद्यक्षंहस्तप्राप्तमिवस्थितं॥१४८॥ अंत र्हितंहितद्वीक्ष्यतदाशक्रःप्रतापवान्॥इतस्ततस्तुतत्रैववीक्षमाणोव्यवस्थितः॥१४९॥ तस्मिन्नेवतदाका शेबलवीर्यसमन्वितः॥व्यलोकयस्त्रियंकांचित्तरुणींरूपशालिनीं॥ हिमवत्तनयांसर्वगुणलक्षणशालिनीं॥१५०॥शोभमानांश्रियास्वस्याअनौपम्यवपुर्द्धरां॥ आत्मनिस्नेहमापन्नांमातरंभगिनीमिव॥ उमांभ वानींदेवींतांब्रह्मविद्येतिकीर्तिताम्॥१५१॥सौभाग्यमद्भुतंयस्याःप्राप्नुवंतित्रिलोकगाः॥ पुरुषाःसंपद स्तद्वत्स्वात्मचित्तस्थिताअपि॥१५२॥ अखंडितंब्रह्मचर्यंवेदाश्चब्रह्मचारिणः॥ गृहस्थत्वंगृहस्थाश्चलोकद्व यसुखप्रदम्॥१५३॥

भितां॥१५०॥ शोभमानामिति पुनःकीदृशींश्रियाकांत्याशोभमानां उपमातुमशक्यंवपुर्धारयंतीमात्मनिइंद्रेस्नेहंकारुण्यंजनन्या दिवत्कुर्वतींचेत्यर्थः तत्रभगिन्याउपादानंदयायाभगिनीमूर्तिरितिभारतानुसारात्॥१५१॥ तस्याअन्यच्चोक्तंमहिमानंकीर्तयति सौभा ग्यमितिसमभिः अस्याअनुग्रहात्त्रिलोकीगताःपुरुषाःसौभाग्यंसौंदर्यंतथाचेतसाचिंतिताःसर्वाःसंपदोलभंतेइत्यर्थः॥१५२॥ चातुर्व र्ण्यफलप्रदत्वमाह अखंडितमिति यदनुग्रहाद्ब्रह्मचर्याखंडितत्वंसहवेदैर्लभंतेब्रह्मचारिणः गृहस्थास्तुलोकद्वयोपकारिकांगृहस्थत्वसंप त्तिमिति॥१५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपश्चेति वनवासिनोयदनुग्रहात्तपोलभंते यतयस्तुब्रह्मलोकप्रापकंस्वधर्ममित्यर्थः ॥ १५४ ॥ आत्मानमिति सादेवीपरमहंसेभ्यआत्मानंब्रह्मविद्यारूपमेवददातियद्दर्शनादिमेप्रसिद्धामोहोऽविद्यातद्रूपाःकारागृहावंधनागाराणितत्रवर्त्तमानाःकामादिरूपाःश्रृंखलाश्चांतंगच्छंतीत्यर्थः ॥१५५॥ वामदेवेति वामःसुंदरोदेवःकामेश्वराख्योमहादेवस्तस्यमुखसौंदर्यंवीक्ष्ययासौंदर्येणसर्वेषांमनोमोहयंतीवसतीस्थिता ॥ १५६ ॥ सूर्येति प्रभातिशयेसूर्यकोटिर्यस्याउपमानंशांतरूपत्वेतुचंद्रकोटिः यादेहगतंलावण्यंमुक्तावदुज्वलत्वरूपमपेक्ष्यकंदर्पकोटिसदृशी श्रियाऐश्वर्येणतुलक्ष्मीरमातत्कोटिसमेतिकथ्यतेइत्यर्थः ॥१५७॥ देहवानिति क्वचिदप्रसिद्धदेशेक्वापिप्रसिद्धदेशेवास्थितोदेहवा

तपश्चतापसास्तद्वत्सम्यग्वननिवासिनः॥भिक्षवोपिस्वधर्मस्याब्रह्मलोकंयतोययुः ॥ १५४ ॥ आत्मानंपरहंसानांसाप्रयच्छतिमातृवत् ॥ दर्शनांताहियस्याःस्युर्मोहकारागृहाइमे ॥कामक्रोधादिरचिताःश्रृंखलाश्चातिदुस्त्यजाः॥ १५५॥वामदेवमुखंवीक्ष्यवामंयावामलोचना ॥ अमूढानपिसौंदर्यान्मोहयंतीवसंस्थिता॥ १५६॥सूर्यकोटिसमाभासाशीतलाचंद्रकोटिवत्॥ कंदर्पकोटिसदृशीलावण्याद्देहसंश्रयात् ॥ लक्ष्मीकोटिसमासास्यात्श्रियाविविधयापिच ॥ १५७॥देहवान्यःक्वचित्क्वापियस्यादृष्टिविलोकनात् ॥ सामर्थ्यंलभतेप्रायःसत्यंवेदोवदन्निव॥ १५८ ॥भक्तानामार्त्तिनाशार्थंसौम्यापिगुरुतांगता ॥ सहस्रचक्षुषांतेजोहरंतीस्वात्मदर्शनात्॥ १५९॥

न्यत्किंचित्सामर्थ्यंलभतेतत्रसर्वत्रहेतुर्यस्याःकृपाकटाक्षएवेतिसत्यमसंदिग्धं ननुवेदानुक्तेर्थेकथंसंदेहाभावइत्याशंकांपरिहरति वेदइति अमुंवर्णितविधमुमाप्रभावंवेदःप्रकृतश्रुतिरूपोवदन्कथयन्निवभवतीत्यर्थः अयंभावः श्रुतार्थापत्तेःश्रुतिसमानकक्षत्वस्यमीमांसकैःसिद्धांतितत्वाद्बहुशोभमानामितिबहुशब्देनासंकुचितवृत्तिनावर्णितंसर्वमाहात्म्यंसंगृहीतमिति ॥ १५८ ॥ भक्तानामिति याभक्तान्प्रतिसौम्याशांतरूपापीतरान्प्रतिगुरुतांतेजोतिशयेनदुर्विज्ञेयतांगताअतएवइंद्रस्यगर्वशेषपरिहारायेंद्रनेत्रसहस्रगतंतेजोदर्शनेनहरंतीसतीस्थितेत्यर्थः ॥ १५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदृष्टेति पुनःकीदृशी विडौजसाइंद्रेणत्रिलोक्यामदृष्टपूर्वापूर्वमदृष्टा गंधाद्यलंकृतवेषाच॥ १६०॥सर्वदेति ब्रह्मविद्यारूपेणोपनिषत्सुसमाहितयतिमानसेषुचवसंती॥ १६१॥ प्रमाणस्यप्रमेयतंत्रत्वात्प्रमेयेणसविशेषलीलाविग्रहांगीकारेकृतेसतीयमपितद्वामाङ्गेस्थितेत्याह वामदेवस्येति वसंतीतिपूर्वादनुषंगः ॥१६२॥ पृष्टवांस्तामिति तांवर्णितरूपांतत्रयक्षरूपेणब्रह्मणःप्रादुर्भावस्थानेस्थिताभिंद्रएवंपृष्टवान् एवंक

अदृष्टपूर्वायुवतीत्रिलोक्यांचविडौजसा॥ गंधमाल्यांबरधरामनोनयननंदिनी॥ सर्वाभरणसंयुक्तास्मितपूर्वाभिभाषिणी ॥ १६० ॥ सर्वदोपनिषत्स्वेववसंतीमानसेषुच ॥ यतीनांपरहंसानांब्रह्मचर्यादिभाजिनां ॥ १६१ ॥ वामदेवस्ययावामेभागेभर्तुर्महात्मनः॥ स्मरशत्रोस्त्रिनेत्रस्यब्रह्मणोयक्षरूपिणः ॥ १६२ ॥ पृष्टवांस्तांस्त्रियंशक्रोदृष्ट्वातत्रव्यवस्थितां ॥ अंबतत्किमिदंयक्षंयदत्राभूत्पुरास्थितम् ॥ मातस्त्वंयदिजानीषेतदामत्यंतदीरय ॥ १६३ ॥ एवमुक्ताथसाशक्रंप्राहब्रह्मेतिभामिनी ॥ वृत्तांतमखिलंतद्वद्यदर्थंतत्समागतं ॥ १६४ ॥ एवमुक्तोथशक्रोपिगतगर्वोवबुद्धवान्॥ स्वानुग्रहार्थंसंप्राप्तंब्रह्मतद्विजयप्रदम् ॥ १६५ ॥ सर्वंशक्रायसंप्रोच्यभवानीभवहारिणी ॥ तस्मिन्नेवनभस्यासीदंतर्धानमुपागता ॥ १६६ ॥ शिवौतौसनमस्कृत्यनभस्यंतर्हिंतावगात्॥ देवानिंद्रोथतागत्वासर्वमेवन्यवेदयत् ॥ १६७ ॥ देवाइंद्रमुखाद्ध्रुत्वावन्हिवायुपुरोगमाः॥ गतगर्वाविपाप्मानोत्यभवन्प्रकृतिस्थिताः॥ १६८ ॥

थं हेअंबमातस्त्वयक्षरूपमिहप्रादुर्भूतंकितदिति ॥ १६३ ॥ अथतुर्यखंडार्थंवर्णयन्ब्रह्मणःशंभोस्तत्त्वंतदागमनप्रयोजनंचोक्तवतीत्याह एवमुक्ताथेति ॥ १६४ ॥ इंद्रोपितदुपदेशेनशंभोस्तत्त्वंब्रह्मभावरूपंविस्मृतमपिपुनरवबुद्धवान्अस्मरदित्याह एवमुक्तोथेति॥ १६५॥ साचब्रह्मतत्त्वबोधनरूपेप्रयोजनेसिद्धेंतर्धानमगादित्याह सर्वमिति ॥ १६६ ॥ शिवाविति नभस्यंतर्धानंगतौशिवाख्यौदंपतीनमस्कृत्येंद्रःसिद्धार्थोदेवानगात्तेभ्योवृत्तमश्रावयच्चेत्यर्थः ॥ १६७ ॥ ततोदेवाअपिपूर्ववदासन्नित्याह देवाइति प्रकृतौस्वभावेस्थिताः ॥ १६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषांप्रकृतिस्थितत्वंविशदयति सात्विकाइतिद्वाभ्यां तेदेवाःसात्विकत्वात्स्वभावेनगर्वराहित्यादिशालिनःकालोद्दीपितमाययारजसावि मोहिताअपियक्षरूपेणब्रह्मणाउमारूपयाविद्ययाचप्रतिबोधितादोषापाकरणेनपुनस्तद्वत्कृताइतिद्वयोरर्थः ॥ १६९ ॥ १७० ॥ एताव
तातैःकिमवबुद्धमितिचेद्विश्वाभिन्ननिमित्तोपादानत्वेनविकासितमद्वयत्वरूपंब्रह्मत्वमेवेत्याह ब्रह्मविद्येति एवंकथमित्याकांक्षायामुत्त
॥१२॥ रार्द्धप्रवृत्तिः ॥१७१॥ अग्निरिति यतोऽन्यैर्दुर्लभंब्रह्मयक्षरूपेणागतंसामीप्येनप्राप्तवंतस्तस्मादग्निवाय्विंद्रादेवेष्वधिकाःप्रसिद्धाः ॥१७२॥

सात्विकास्तेस्वभावेनदेवाःसर्वेदिवौकसः ॥ गर्वक्रोधादिरहिताःप्रमादेनविवर्जिताः ॥ १६९ ॥ परीक्ष्यकारिणोनित्यंहिताहितविबोधिनः ॥ माययारजउत्पाद्यमध्येकालसहायया ॥ विमोहिताःपुनर्ब्रह्मविद्याभ्यांपरिबोधिताः ॥ १७० ॥ ब्रह्मविद्याप्रसादेनदेवाएवंव्यजानत ॥ ब्रह्मैतत्सर्वजगतःकारणंहेतुवर्जितं ॥ १७१ ॥ अग्निर्वायुस्तथाशक्रोदेवेभ्यश्चाधिकाःस्मृताः ॥ प्राप्तवंतोयतोब्रह्मयदन्यैःप्राप्यतेनहि ॥ १७२ ॥ इंद्रस्तत्रापिदेवेषुप्रोक्तःश्रेष्ठोधिकःसदा ॥ ब्रह्मविद्याप्रकाशेनयतोब्रह्मावबुद्धवान् ॥ १७३ ॥ प्राप्तंयदग्निवायुभ्यांयदिंद्रेणचनिश्चितं ॥ अधिदैवादिभावेनतदेवंब्राह्मणाविदुः ॥ १७४ ॥ हिरण्यगर्भोभगवान्सुतोयस्यविराडपि ॥ विश्वात्मातस्यदेहेस्मिन्नंतस्तिष्ठतिसर्वदा ॥ १७५ ॥ विद्युत्प्रकाशसदृशंविद्युतोपिविलक्षणं ॥ इंद्रियाणांचसर्वेषांप्रेरकंमनसासह ॥ १७६ ॥

तेषांत्रयाणामपिमध्येइंद्रोधिकउमामुखेनब्रह्मतत्त्वस्यसम्यगवबोधादित्याह इंद्रइति ॥१७३॥ प्राप्तमिति यदग्निवायुभ्यांप्राप्तमिंद्रेणनि श्चितंचतद्ब्रह्मब्राह्मणाएवंवक्ष्यमाणविधयाअधिदैवाध्यात्मरूपाभ्यांविदुरुपासतेइत्यर्थः ॥ १७४ ॥ श्रुतौआशब्दइवार्थःषष्ठ्यंतविद्युत्पदे नसंबद्धइतिदर्शयंस्तत्राधिदैवरूपमाह हिरण्यगर्भइतिद्वाभ्यां योहिरण्यगर्भोविराजोपिजनकोविश्वशरीरश्चप्रसिद्धस्तदीयदेहस्यांतर्मध्ये
सकृद्भानेनविद्युत्प्रकाशसदृशंचिद्रूपत्वेनजडायाविद्युतोविलक्षणंसर्वेंद्रियाणांमनसश्चसन्निधिमात्रेणप्रेरकंचयत्तत्त्वंतदधिदैवमितिद्वयोर ॥१२॥
र्थः ॥ १७५ ॥ १७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यात्मरूपमाह अधिदैवमिति यथातस्याधिदैवंरूपमुक्तंतद्वदध्यात्ममपिबोध्यं किंतत् यदिहसंघातांतर्गतबुद्ध्यवस्थानामनुसंधानेनसा क्षिभूतंप्रत्येकंप्रसिद्धंतत्त्वमित्यर्थः ॥ १७७ ॥ संसारेति तच्चसाक्षिरूपंसंसाररूपवनेप्रविष्टंब्रह्मैवसर्वांतरंभवतियतश्चएतत्प्रत्यग्वस्तुनिरति शयप्रेमास्पदत्वेनसर्वैर्भजनीयंभवतिततस्तस्यास्यनामवनमित्याकारंवेदवादिनआहुः वनसंभक्तावितिधात्वर्थानुगमात् योस्यनाम्नोब्रह्म विशेषणतयाउपासनंपुनःपुनश्चिंतनरूपंकरोतितंसर्वेजनाआराधनायकामयंतेइतिद्वयोरर्थः ॥ १७८ ॥ १७९ ॥ श्रुतौशिष्टग्रंथेनप्रथ मादिखंडत्रयवर्णितायाब्रह्मविद्यायाःसाधनानिविधीयंतइत्याह ब्रह्मेति पुराखंडत्रये ॥ १८० ॥ स्ववर्णाश्रमेति स्ववर्णाश्रमानुरूपंकर्म

अधिदैवंयथातद्वदध्यात्ममपिदेहिनां ॥ बुद्धिसाक्षिहिसर्वेषांप्रत्येकमवशिष्यते ॥ १७७ ॥ संसारवनमध्य स्थोब्रह्मात्मासर्वदेहिनां ॥ भजनीयंहितन्नामतस्याहुर्वेदवादिनः ॥ १७८ ॥ वनमित्यस्यनाम्नोयःपुमान्कुर्या द्रुपासनं ॥ अभिवांछंतितंसर्वेजंतवोभजनार्थिनः ॥ १७९ ॥ ब्रह्मविद्यापुरैवोक्तातुभ्यंतस्यास्तुसाधनं ॥ सं क्षेपेणवदाम्येतत्सावधानमनाःशृणु ॥ १८० ॥ स्ववर्णाश्रमसंप्रोक्तंकर्मसर्वस्यदेहिनः ॥ तपश्चविविधंतद्व दन्येशमदमादयः ॥ १८१ ॥ उपासनंचविविधंवेदेसर्वत्रकीर्तितं ॥ इदंचकरणीयंस्यादात्मज्ञानार्थिनासदा ॥ १८२ ॥ वाग्धेनोःकथिताःपादावेदाअंगानिसर्वशः ॥ अंगानिब्रह्मसत्यंयदाधारोभूसमःस्मृतः ॥ १८३ ॥

तथातपःकृच्छ्रादिशमादयश्चएतानिप्रतिबंधापायेनस्थितिप्रयोजकत्वेनप्रतिष्ठापदोक्तानिविद्यायाःसाधनानीत्यर्थः ॥ १८१ ॥ उपा सनमिति वेदोक्तंनानाविधमुपासनंचतस्याःसाधनमित्यर्थः तथाइदंप्रकृतश्रुतौशाखांतरगुणोपसंहाराभिप्रायेणोक्तंवेदवाग्रूपधेनोरुपास नमपिकर्त्तव्यमित्यर्थः ॥ १८२ ॥ वाग्धेनोरिति वाग्रूपायाधेनोःपादाश्चत्वारोवेदचतुष्टयरूपाबोध्याः वेदांगानिशिक्षादीनितुशिरःप्रभृ त्यंगरूपाणिध्येयानि तत्रस्तनचतुष्टयंस्वाहाकारवषट्कारहंतकारस्वधाकाररूपंबृहदारण्यसप्तमाध्यायोक्तमुपसंहार्यं तथाश्रुतौसत्यपदो क्तंयद्ब्रह्मतदाधारभूमित्वेनध्येयमित्यर्थः ॥ १८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एतदुपासनफलमाह एवमिति एतांवेदवायूपांधेनुंबोधस्यमनोवृत्तिरूपस्यबृहदारण्यकेवत्सरूपेणोक्तस्यमातरंयउक्तविधयावेदोपास्ते
सचित्तशुद्धिद्वारातत्त्वज्ञानलाभेनाद्वयब्रह्मरूपेसर्वोत्कृष्टेस्वर्गेप्रतिष्ठांस्थितिंगच्छतीत्यर्थः ॥१८४॥ पृष्टमिन्द्रवृत्तंनिगमयति ब्रह्मविद्येति
अबूबुधत्सम्यक्ज्ञातवान् ॥ १८५॥ उत्तराकांक्षामुत्थापयति प्रजापतेरिति यथाप्रजापतेरिंद्रःशिष्यउक्तस्तथाथर्वाख्यज्येष्ठपुत्ररूपोऽप

एवमेतांहियोवेदधेनुंबोधस्यमातरं॥ ब्रह्मज्ञानसमुत्पादादानंदात्मनिसोद्वये॥ प्रतितिष्ठतिनिर्दुःखंयस्मान्ना
वर्त्ततेपुनः ॥ १८४ ॥ ब्रह्मविद्याप्रसादेनशक्रएवमबूबुधत् ॥ प्रजापतेस्तुयःशिष्यःपूर्वाध्यायेप्रकीर्तितः
॥ १८५॥ प्रजापतेर्ज्येष्ठपुत्रोप्यथर्वाप्राप्तवान्मुनिः ॥ शिष्योयतःसंप्रदायाद्ब्रह्मविद्याधिकाभवत् ॥ १८६॥
इतितेकथितंसर्वंयत्पृष्टोहमिहत्वया॥ आत्मविद्याप्रसंगेनकिमन्यच्छ्रोतुमिच्छसि॥१८७॥इतिश्रीमत्परम
हंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणश्रीशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेतलव
कारोपनिषत्सारार्थप्रकाशोनामपंचदशोध्यायःसमाप्तः॥१५॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

रोपिशिष्योभवत् यतःप्रवृत्तात्संप्रदायाद्विद्याविस्तरंप्राप्तेत्यर्थः ॥ १८६॥ उपसंहरति इतितेइति स्पष्टं ॥१८७॥ संसारेकरुणासिंधोःशं
भोःकेनोपमीयताम् निरुपाधिहितारंभंचितनंस्वेषुभातियत् ॥ १ ॥ इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनूजरामकृष्ण
स्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतौआत्मपुराणटीकायांसत्प्रसवाख्यायांपंचदशोध्यायःसमाप्तः ॥ १५॥ ॥ ७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे पंचदशोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे षोडशाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ षोडशदलतूणीरेनिहितंषोडशकलंममात्मानम् ॥ गांगेयप्रहिताशुगमिवलक्ष्येत्वयिलगंतमीक्षित्वा ॥ १ ॥ षोडशसममभिरूपंसांमुख्यंनयमुकुन्दगोविन्द ॥ मुंडकगीतनवंधनुरादधतांध्रुवककलाहिनाथीया ॥ २ ॥ गीतिद्वयस्यायमर्थः प्रणवोधनुःशरोह्यात्माइत्यादिद्वितीयमुण्डकखण्डगतमंत्रसूचितयुद्धरूपकेलक्ष्यभूतोभगवान्मङ्गलायप्रणम्यते तथाहि षोडशदलंकंठ्यंचक्रंजीवस्थानमित्यागमेप्रसिद्धंतदेवतूणीरंशरायतनंतत्रनिहितं प्राणादयःप्रश्नप्रसिद्धाःषोडशसंख्याःकलाःशल्याद्यवयवभूतायस्यसतथातं कलास्यादंशशिल्पयोरितिहैमः एतादृशंमदीयात्मरूपंशरंगांगेयोभीष्मस्तेनसत्यपालनायप्रयुक्तंबाणमिवभवदीयवपूरूपेलक्ष्येलगंतंसंसज्जमानमालोक्यहेमुकुंदमुक्तोपसृप्यत्वेनतत्पदार्थभूतहेगोविंदसंसारदशायांसकलेंद्रियचालकत्वेनातिसंनिहितहेमुण्डकगीतप्रकृतशाखाध्येतृभिर्मुण्डशिरोभिर्निष्किचनयतिभिर्वागीयमानकीर्तेत्वंयथाभीष्मप्रतिज्ञापालनायषोडशवर्षमभिनिर्भयंचरूपंभीष्मसांमुख्यंनीतवानसितथेदानीमपिषोडशभिर्महाभूतैकादशेंद्रियरूपविकारैःसांख्यप्रसिद्धैःसममधिष्ठानतयातत्तादात्म्यापन्नंविश्वाधारमितियावत् अथवाअस्मिन्

श्रीगणेशायनमः ब्रह्मविद्याश्रितामेवंकथांश्रुत्वातिशोभनां ॥ अथर्वोक्तांब्रह्मविद्यांप्रष्टुंशिष्योभ्यभाषत ॥ १ ॥ भगवन्नैतरेयेणकथितासाकथाशुभा ॥ संवादोयत्रमुनिभिःप्रजानामतिशोभनः ॥ वैराग्यंचतथाज्ञानंवामदेवस्यचेरितं ॥ २ ॥ तथाकौषीतकिप्रोक्तायत्रचेंद्रप्रतर्दनौ ॥ अजातशत्रुबालाकीगुरुशिष्यौमहाधियौ ॥ ३ ॥

षोडशाध्यायेअग्निर्मूर्द्धेत्यादिनावक्ष्यमाणेनवैराजरूपेणसमंअभिअद्वितीयंतत्संमुखंकुरु भक्तप्रतिज्ञापूरणंतवयुक्तमेवेत्याह नवमित्यादिना नवंइतरविलक्षणप्रणवरूपंधनुर्धारयतांध्यानशूराणामागमापायिकलाकत्वेनचंद्रनिभानांयाध्रुवाख्याषोडशीकलासानाथस्यप्रभोरेवस्वरूपभूताभवति ध्रुवैवषोडशीकलेतिबृहदारण्यश्रुतेः तथाचयथाध्रुवाख्यकलावियोगंचंद्रोनसहतेतथात्वामंतराजीवनाक्षमाणांत्वत्तोलब्धसत्ताकानांबालानामप्यायहस्त्वयापूरणीयएवेतिभावः ॥ १ ॥ २ ॥ पूर्वमध्यायत्रयेणऋग्वेदकथाअध्यायसप्तकेनयजुःकथाएकादशेप्रकीर्णकथास्ततोध्यायचतुष्टयेनसामकथाश्चोक्ताःअथक्रमप्राप्ताअथर्वणकथाअध्यायत्रयेणदर्शयंस्तत्रमुंडकार्थजिज्ञासांमेधाविनःसानुवादांदर्शयति ब्रह्मविद्याश्रितामितिषोडशभिः स्पष्टं ॥ १ ॥ प्रथमाद्यध्यायत्रयार्थमनुवदति भगवन्नितिद्वाभ्यां यत्रऐतरेयकथायांमुनिप्रजासंवादेवैराग्यंज्ञानंचेरितंतथागर्भस्थवामदेवस्यज्ञानमीरितं द्वितीयतृतीययोःकौषीतकिकथायामिंद्रप्रतर्दनयोरजातशत्रुबालाक्योश्चसंवादउक्तः ॥ २ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थवृत्तमाह आदित्येनेतिद्वाभ्यां कथोक्तेत्यनुषंगः यत्रकथायांवंशईरितस्तथामंत्रद्रष्टादध्यङ्सईरितोयोश्विभ्यामात्मबोधनमु क्तातयोर्गुरुरभवदिंद्राद्दुःखंचप्राप्तवान् ॥ ४ ॥ ५ ॥ पंचमादित्रयार्थमाह याज्ञवल्क्यइतिद्वाभ्यां जिगायजितवान् जल्पकथावि जिगीषुवाक्प्रबंधः ॥ ६ ॥ जनकमिति संसाराब्धौमज्जंतोपिजनाःप्रायःपरपारंनेच्छंति एतौतुमज्जतांमध्येपरपारार्थिनौ उदतारयत्पारं नीतवान् ॥ ७ ॥ अष्टमनवमवृत्तमाह सश्वेताश्वेति यांकथामभ्यभाषतसाचोक्ता यत्रकठोक्तकथायांयमोगुरुर्नचिकेताश्चशिष्यइत्यु

आदित्येनचसंप्रोक्तायत्रवंशस्त्वयेरितः ॥ मंत्रद्रष्टातथाश्विभ्यामुक्तवान्स्वात्मबोधनं ॥ ४ ॥ दध्यङ्ङाथर्वणस्त द्वदश्विनोरभवद्गुरुः ॥ शक्राच्चदुःखमतुलंप्राप्तवानश्विहेतुतः ॥ ५ ॥ याज्ञवल्क्योमुनिर्यत्रजिगायमुनिमंडल म् ॥ शास्त्रज्ञोजल्पकथयाशाकल्यंचव्यमर्दयत् ॥ ६ ॥ जनकंचापिमैत्रेयींदुस्तराद्भवसागरात् ॥ परपारार्थि नौप्राप्तौमज्जतामुदतारयत् ॥ ७ ॥ सश्वेताश्वतरोविप्रोयोयतिभ्योभ्यषत ॥ कथांसाचकठेनापियाप्रोक्ताति मनोरमा ॥ यमोयत्रगुरुःसाक्षान्नचिकेताश्चबालकः ॥ ८ ॥ शिष्यस्तित्तिरिणाप्रोक्ताकथाचित्रार्थसंयुता ॥ वरुणश्चभृगुश्चैवगुरुशिष्यौमहाधियौ ॥ ९ ॥ यत्रवेनोपिगंधर्वोब्रह्माऽहानुभवन्नपि ॥ संन्यासांतानियत्र स्युःसाधनान्यात्मवित्तये ॥ १० ॥ जाबालादिश्रुतिप्रोक्ताःकथानानाविधाअपि ॥ यत्रसंन्यासिनःसर्वेसं वर्त्ताद्याउदाहृताः ॥ ११ ॥ वैराग्यकारणंन्यासस्तच्चयोगादिकारणं ॥ अधिकारीविरक्तश्चतद्वेषोमुंडनादि कः ॥ आचारोब्रह्मविज्ञानंकीर्तितोयत्रतस्यसः ॥ १२ ॥

त्तरादनुषंगः ॥ ८ ॥ दशमवृत्तमाह शिष्यइतिद्वाभ्यां प्रथमपदंपूर्वान्वयि तित्तिरिप्रोक्ताकथाचोक्तायत्रवरुणभृगुसंवादोवेनकर्तृकंब्रह्मा नुभवकीर्त्तनंसंन्यासान्तानिविद्यासाधनानिचोक्तानीतिद्वयोरर्थः ॥ ९ ॥ १० ॥ एकादशार्थमाह जाबालादीतिद्वाभ्यां तच्चप्रसिद्धंयोगा दिरूपंकारणंवैराग्यस्योक्तं तस्यपरमहंसस्यसःश्रुतिप्रसिद्धोब्रह्मविज्ञानरूपोमुख्यआचारश्चोक्तः स्फुटमन्यद्द्वयोः ॥ ११ ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततश्छांदोग्याध्यायत्रयकथाध्यायत्रयेणोक्तेत्याह सामाध्यायेति ॥ १३ ॥ अध्यायत्रयगतगुरुशिष्यानूकीर्तयति आरुणिरिति न्यासिनांमुख्यौस्मृतौजाबालेकीर्तितौ॥ १४॥ तथेति तलवकाराख्यासामशाखातदीयब्राह्मणगतोपनिषत्केनाख्यातस्यां॥ १५॥अत्रांतइति अत्रपूर्वाध्याये तस्याथर्वणःसंबंधिनीं आथर्वणत्वेनप्रसिद्धामितियावत् तस्मैसुतायसब्रह्माप्राहेत्यन्वयः॥ १६॥ तामिति सचाथर्वा ॥ १७॥नापृष्टःकस्यचिद्ब्रूयादितिन्यायमनुसरतःश्रीगुरोरुत्तरमवतारयति इत्युक्तइति अथर्ववेदांतर्गतमुंडकाख्यमंत्रोपनिषदिकीर्तितांकथांगुरुराह

सामाध्यायत्रयेयावत्कथाःकर्णसुखवहाः॥ गुरुशिष्याइमेयत्रक्रमादुक्तामहाधियः॥ १३ ॥ आरुणिःश्वेतकेतुश्चयावेतौन्यासिनौस्मृतौ॥ सनत्कुमारोभगवान्नारदश्चमुनीश्वरः ॥ ब्रह्मालोकगुरुस्तद्वदुभाविंद्रविरोचनौ ॥ १४ ॥ तथातलवकारणांब्राह्मणोपनिषद्यपि ॥ इंद्रस्यब्रह्मविद्यायाःप्रसादाद्ब्रह्मबोधनं ॥ एतत्सर्वंत्वयाख्यातंमह्यंशुश्रूषवेगुरो॥ १५॥ अत्रांतेब्रह्मणःपुत्रोज्येष्ठःशिष्यस्त्वयेरितः॥ अथर्वातस्ययांविद्यांब्रह्माप्राहसुतापसः॥ १६॥ तामहंश्रोतुमिच्छामिसचकेभ्योवदन्मुनिः॥ एतत्सर्वंमयापृष्टंगुरोमह्यंवदाधुना॥ १७॥ इत्युक्तोगुरुरप्याहकथांमुंडप्रकीर्तितां॥ आथर्वणींमनःश्रोत्रसुखदांब्रह्मबोधिनीं॥ १८॥ असीदिदंतमोभूतमप्रज्ञातमलक्षणं॥ अप्रतर्क्यमविज्ञेयंप्रसुप्तमिवसर्वतः॥ १९॥ अभावोपिपुरानासीदसन्योत्राभिधीयते॥ भावोपिचपुरानासीद्योत्रसन्निितिगीयते॥ २० ॥

॥ १८ ॥ प्राहेत्यंतस्यप्रथममंत्रस्यार्थंसप्तदशभिःप्रपंचयंस्तत्रब्रह्मणोहिरण्यगर्भस्यप्राथम्यंस्फुटयितुंमनूक्तांसृष्टिप्रक्रियामवलंब्यतदीयंसृष्टिपूर्वकालिकावस्थाप्रतिपादकंश्लोकंपठति आसीदिति इदंकार्यजातंसृष्टेःपुरातमोभूतंतमस्तुल्याव्याकृतादिसंज्ञाज्ञानोपहितसन्मात्ररूपमासीत् कीदृशंतदप्रज्ञातंप्रत्यक्षायोग्यं अलक्षणमनुमेयं अप्रतर्क्यंतर्कानर्हं अविज्ञेयंशब्देनानभिलप्यं सर्वतः प्रथमार्थेतसिः सर्वंप्रसुप्तमिवकार्यारंभाक्षममितितट्टीकाप्रसिद्धोर्थः ॥ १९ ॥ अत्रानुकूलंनासदासीन्नोसदासीत्तदानींकिंत्वभूत्तमइत्यादिनासदीयाख्यसूक्तवाक्यमर्थतःसंगृह्णाति अभावइतिचतुर्भिः लोकेसदसच्छब्दाभ्यांप्रसिद्धौभावाभावपदार्थौनाभूतामित्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथेदंलौकिकंतमःपंचभूतानिचनासन्कार्यत्वादित्याह तमःपटलमिति पूर्वतःसृष्टिपूर्वकाले ॥ २१ ॥ नदिवेति दिनंरात्रिःप्रातःसायरूपे संध्येतच्चिन्हभूतानिसूर्यादितेजांसिचजरायुजादयोदेहाश्चनासन्निति ॥ २२ ॥ किंतर्हितदासीदित्यतआह तमःस्तोममिति स्वात्मनोमोहस्यावरणस्यकर्तृत्वेनतमःपुंजसममिदंकारणतत्त्वमासीत् यन्मृत्युरूपेणामृतरूपेणवानविदितंनज्ञातं मृत्युर्हिसंहारकउच्यतेअमृतंत्वावृतिपरिणामरूपवृद्धिहेतुस्तदुभयमद्वैतदशायांनसंभवतीतिभावः ॥ २३ ॥ तदेवविशिनष्टि अव्याकृतमिति अव्याकृतमस्पष्टरूपत्वेनवेदांतेष्वव्याकृतमितिप्रसिद्धं जगतोनामादेर्हेतुः स्वयमहेतुकंकारणानपेक्षं एकमद्वितीयं शास्त्रेणापौरुषेयवाक्येनैवसंज्ञेयं लक्षणैर्लिंगैर्वर्जि

तमःपटलमप्येतन्नासीत्तेजोविरोधियत्॥ व्योमादीनिचभूतानिनासन्पंचापिपूर्वतः॥ २१॥ नदिवानापिरात्रिश्चउभेसंध्येचनैवते॥ नसूर्यादीनितेजांसिनापिदेहाश्चतुर्विधाः ॥ २२ ॥ तमःस्तोमसमंतस्मिन्कालआसीदिदंमहत्॥ मृत्युर्वानामृतंवापिविदितंस्वात्ममोहकृत् ॥ २३॥ अव्याकृतंजगन्नामरूपहेतुरहेतुकं ॥ एकंशास्त्रैकगम्यंतत्सर्वलक्षणवर्जितम्॥ २४॥ विद्यमानसमंचापिकारणंनचवस्तुतः॥ अनादिभावरूपंचस्वात्मबोधाच्चनश्यति॥ २५॥ असंगस्याक्रियस्यापिसंगकर्मादिकारणं॥ अस्वतंत्रंजडंचैवेत्यादिदुर्घटलक्षणम्॥ २६॥ तस्माद्बभूवभगवानात्मसन्निधिमात्रनः॥ हिरण्यगर्भोजीवेशोयोजीवघनईरितः॥ २७॥

तमनुमेयमित्यर्थः॥ २४॥ तस्यप्रसिद्धवैलक्षण्येनाप्रतर्क्यत्वंस्फुटीकरोति विद्यमानेतिद्वाभ्यां लोकेविद्यमानमेववास्तवमेवचकारणंप्रसिद्धंतत्तुविद्यमानसमंवस्तुतोऽविद्यमानमपिकारणं तथालोकेअनादिभावानामविनाशित्वंप्रसिद्धमेतत्त्वनादिभावरूपत्वेपितत्त्वज्ञाननाश्यमितिचित्रमित्यर्थः॥ २५ ॥ तथाजडत्वेनपरतंत्रमप्यसंगादिलक्षणस्यात्मनोबंधहेतुरित्याह असंगस्येति इत्यादिभिर्दुर्घटैरनिर्वचनीयताव्यापकैर्लक्षणैर्युक्तमिति ॥ २६ ॥ तस्मादव्याकृताच्छुद्धात्मनाप्रतिबिंबदानेनानुगृहीताद्धिरण्यगर्भोऽजायत योजीवव्यष्टीनामध्यक्षःसमष्ट्यभिमानित्वेनजीवघनसंज्ञश्चोच्यतेइत्याह तस्मादिति ॥ २७॥ ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यसप्तदशावयवंशरीरमाह एकादशेति अंतःकरणसहितान्येकादशेंद्रियाणिप्राणोद्वादशःसूक्ष्मभूतपंचकंचैतत्समुदायरूपेशरीरेअयं हिरण्यगर्भाख्यआत्मावसतीत्यर्थः ॥ २८ ॥ सचस्थूलानिभूतान्यसृजत्तेष्वभिमानेनविराट्संज्ञश्चाभवदित्याह उदपद्यंतेति उदपद्यंत जातानि ॥ २९ ॥ ततःसस्थूलभूतैर्ब्रह्मांडंनिर्मातुमैच्छदित्याह ततइति ॥ ३० ॥ सत्येति तस्यहिरण्यगर्भस्यसत्यसंकल्पवशात्तद्भूतजातंनीरोपरिस्थितंदेदीप्यमानसौवर्णाण्डरूपेणपरिणतं यत्रांडेसप्तलोकाभूरादयःपातालादिकंचसंवत्सरादिरूपःकालश्चकल्पितइत्यर्थः

एकादशेंद्रियगणःप्राणोभूतानिपंचच ॥ सूक्ष्माणितत्रनिवसन्नात्मायंपरिकीर्त्यते ॥ २८ ॥ उदपद्यंतवैतस्मात्स्थूलान्युक्तानियानिवै ॥ तत्राभिमानीभगवान्विराडित्येवगीयते ॥ २९ ॥ ततःस्थूलेषुभूतेषुवसन्ब्रह्मांडगोलकं ॥ स्वात्मनोत्रनिवासायचकमेलोकभावनः ॥ ३० ॥ सत्यसंकल्पतस्तस्यनीराणामुपरिस्थितं ॥ तदंडमभवद्धैमंसूर्यकोटिसमप्रभम् ॥ सप्तलोकादिसहितंकालेनचसमन्वितं ॥ ३१ ॥ तदंतःस्वयमेवायंब्रह्मालोकपितामहः ॥ भूपद्मकर्णिकामेरोरासीत्पूर्वजपूर्वजः ॥ ३२ ॥ देवानांप्रथमःसोयमिंद्रादीनांमहेश्वरः ॥ कर्त्ताविश्वस्यसर्वस्यगोप्ताचजगतःप्रभुः ॥ ३३ ॥ तस्यासीत्प्रथमःपुत्रोज्येष्ठोथर्वेतिकीर्त्तितः ॥ ब्रह्मविद्यामिमांतस्मैसर्वविद्याश्रितामदात् ॥ ३४ ॥ विद्यानानाविधाब्रह्मविद्यायामेवसर्वथा ॥ अंतर्भवंतिफलतस्तृप्तौयद्वद्रसाइह ॥ ३५ ॥

॥ ३१ ॥ तदंतरिति तस्यब्रह्मांडस्यांतर्भूमिरूपपद्मस्यकर्णिकाभूतोयोमेरुस्तस्माच्चतुर्मुखरूपेणसप्रादुरासीदित्यर्थः ॥ ३२ ॥ फलितंश्रुत्यर्थमाह देवानामिति सब्रह्मादेवानामिंद्रादीनांप्रथमआद्योमहेश्वरःपूज्यश्चतथाजगतःसृष्ट्यादिकर्त्ता ॥ ३३ ॥ तस्यब्रह्मणःपुत्रोज्येष्ठोऽथर्वानामाभूत्तस्मैएतांवक्ष्यमाणरूपांविद्यामदात् कीदृशीं मूलाज्ञानोच्छेदात्सर्वासांविद्यानामंतर्भावकत्वेनाधारभूतामित्यर्थः ॥ ३४ ॥ एतल्लाभेइतरविद्यास्वपेक्षाभावात्तासामस्यामंतर्भावइतिदृष्टांतेनस्फुटयति विद्याइति इतरविद्याःकिंचित्किंचित्प्रमेयंविकासयंत्यःसर्वप्रमेयद्योतिकायामस्यांफलरूपेणांतर्भवंतियथातृप्तिफलसिद्धौसर्वेकवलरसाइत्यर्थः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितियमंत्रार्थमाह अथर्वणइतिद्वाभ्यां तस्याथर्वणःशिष्यःअंगिरिरितिरकारांतनाम्नाप्रसिद्धोभूत् तस्यांगिर्नाम्नोभारद्वाजःसत्यवहापरनामकोभवत् तस्यभारद्वाजस्यअंगिरसितिसकारांतनामकःशिष्यआसीदित्यर्थः ॥ ३६ ॥ ३७ ॥ शौनकइत्यादेर्धीराइत्यंतस्यब्राह्मणवाक्यस्यार्थमाह शौनकइतिषोडशभिः अत्रलोकेमहाशालोबह्वन्नदानादिशालित्वेनमहागृहस्थःशौनकोंगिरसःशिष्योभवत् तस्माच्चान्येविप्राविद्यांप्राप्ताः ॥ ३८ ॥ द्वितीयमंत्रेऽवशिष्टस्यपरापदस्यार्थंदर्शयन्प्रकृतविद्याभिधानंप्रतिजानीते अथर्वेति अत्रमुंडकोपनिषदियाब्रह्मविद्यासाआदौब्रह्मणाहिरण्यगर्भेणसमीरितासतीअथर्वणोवदनंप्राप्यैवमुक्ताकारांशिष्यपरंपरांप्राप्तातांतुभ्यमहंवच्मीत्यर्थः तथा

अथर्वणस्तुशिष्योभूदंगिरित्यभिविश्रुतः॥ अंगिरोप्यभवत्शिष्योभारद्वाजाभिधोमहान्॥ ३६ ॥ यःसत्यवहइत्येवमत्रलोकेप्रथांगतः॥ भारद्वाजस्यशिष्योभूदंगिराइतिविश्रुतः॥ ३७॥ शौनकोत्रमहाशालःशिष्यस्त्वंगिरसोभवत्॥ शौनकस्याभवन्शिष्याःसर्वएवद्विजातयः॥ ३८॥ अथर्ववदनादेवंप्राप्ताशिष्यपरंपरां॥ ब्रह्मविद्याऽत्रयातांतेवच्मिब्रह्मसमीरिताम्॥ ३९॥ अंगिराःक्वचिदासीनःकृतपौर्वाण्हिकक्रियः॥ शौनकेनतुपृष्टोयंसंसारभयभीरुणा॥ ४० ॥ सब्रह्मवेदिनंदृष्ट्वाश्रोत्रियंविगतस्पृहं ॥ समिदादिकरोभूत्वापर्यपृच्छद्यथाविधि॥ ४१ ॥ भगवन्कस्यविज्ञानाज्ज्ञायतेसकलंजगत्॥ तदेकंवस्तुमत्र्यंत्वमंगिरःकथयाधुना॥४२॥

चतस्यपरस्मात्परस्मादवरेणावरेणप्राप्तेत्याकाराभाष्यकारोक्ताव्युत्पत्तिःसूचिता ॥ ३९ ॥ तत्रशौनकपृष्टस्यांगिरसोमुखेनास्याःप्रवृत्तिरित्याह अंगिराइति क्वचिदेकांतदेशे ॥ ४० ॥ कथंपृष्टइत्याकांक्षायामाह सब्रह्मवेदिनमिति सशौनकोभगवंतमंगिरसंश्रोत्रियंवेदविदंतत्प्रतिपाद्यब्रह्मविदंच नकेवलंब्रह्मविर्दांकितुतन्निष्ठावंतमपीत्याह विगतस्पृहमिति एतादृशंदृष्ट्वापरीक्ष्यसमित्प्रभृत्युपायनहस्तोविधिवदुपगम्यपर्यपृच्छत् ॥ ४१ ॥ किमपृच्छदित्यतआह भगवन्निति हेभगवन्नंगिरःकस्यविज्ञानात्सर्वंविज्ञातंभवतितत्सर्वविज्ञानहेतुविज्ञानकंयदेकंवस्तुतन्मह्यंवक्तव्यमित्यर्थः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्तइति एवंप्रार्थितोऽंगिराःशौनकंप्रतीदमाह इदंकिं एकस्मिन्नात्मरूपेवस्तुनिब्रह्मरूपेअद्वितीयेविज्ञातेसतिसकलंविज्ञायतेइत्यर्थः ॥ ४३ ॥ तद्विज्ञानलाभोपायस्तुशाब्दंब्रह्मेत्याह उपायइति परंब्रह्मोपेतुंप्राप्तुंशाब्दंब्रह्मज्ञानंसदुपायःकथितोब्रह्मविदूपनिषदीतिशेषः तद्वाक्यमेवपठति शाब्देब्रह्मणीति शाब्दंसांगवेदशरीरंयद्ब्रह्मतत्रनिष्णातःकुशलोयःसएवपरंब्रह्मजानातीत्यर्थः ॥४४॥ यतइति यतएवंशाब्दब्रह्मज्ञानस्यपरब्रह्मज्ञानसाधनत्वंसिद्धंततोमुमुक्षुणाद्वेविद्येविज्ञेयेसंपादनीयेययोर्मध्येएकाअपरासाधनत्वाद्वितीयातुपराफलात्मकत्वादिति तत्रप्रथमांविषयनिरूपणेननिरूपयितुंप्रतिजानीते अपरात्वियं तयोर्मध्येअपराविद्यात्वियंवक्ष्यमाणविषयनिरूप्येत्यर्थः॥४५॥ वेदाइति यजुरादयश्चत्वारोवेदाःसहशिक्षादिभिःषड्भिरंगैर्यस्याविषयःसाअपरा अनयाअपरविद्ययापराविद्याजायते तस्याःपरात्वंचब्र

इत्युक्तःशौनकंप्राहएकस्मिन्नात्मवस्तुनि॥ ब्रह्मभूतेत्रविज्ञातेविज्ञातंसकलंभवेत्॥ ४३ ॥ उपायःकथितः शाब्दंब्रह्मोपेतुंतथापरं॥ शाब्देब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छति ॥ ४४॥ यतस्ततोत्रविज्ञेयेविद्येद्वेचमुमुक्षुणा॥ अपराचपरातद्वत्तयोःप्रोक्ताऽपरात्वियम्॥ ४५॥ वेदाश्चत्वारएवोक्ताःषडंगसहिताअपि ॥ अनयातुपराविद्याजायतेसर्वदैवहि॥ ४६ ॥ ब्रह्मविद्यापराप्रोक्ताब्रह्मचाक्षरमीरितं ॥ अक्षरंचेदृशंप्रोक्तंसर्वदावेदवादिभिः॥ ४७॥ एकादशेंद्रियगणवर्जितंसर्वदैवयत्॥ प्राणानामपिभूतानांरहितंपंचकेनच ॥ ४८ ॥ शब्दस्पर्शरूपरसगंधैरपिचवर्जितं॥ वक्तव्यादानगमनविसर्गानंदकैरपि ॥ ४९॥ ततोज्ञानेंद्रियैरेतैर्दृश्यतेनापिगृह्यते॥ कर्मेंद्रियैश्चसकलैर्विषयत्वविवर्जितं॥ ५० ॥

ह्मविषयत्वात् ब्रह्मचाक्षरमितिश्रुतौव्यवहृतंतस्यलक्षणंचेदमनुसंधेयमितिद्वयोरर्थः ॥ ४६ ॥ ४७ ॥ इदंकिमित्याकांक्षायामक्षरलक्षणमतद्व्यावृत्तिमुखेनदर्शयति एकादशेंद्रियेतिषड्भिः श्रुतौचक्षुःश्रोत्राभ्यांविज्ञानसाधनानिपाणिपादाभ्यांकर्मसाधनानिचसहविषयैरुपादानैश्चोपलक्ष्यंते तथाचएकादशेंद्रियैःप्राणपंचकेनभूतपंचकेनशब्दादिविषयदर्शकेनचवर्जितत्वंसिद्धमितिद्वयोरर्थः ॥ ४८ ॥ ४९ ॥ ज्ञानकर्मेंद्रियविषयव्यावृत्तेश्चश्रुतिगतादृश्यपदोक्तमदृश्यत्वंज्ञानेंद्रियागोचरत्वरूपमग्राह्यत्वंतुकर्मेंद्रियागोचरत्वरूपमितिसिद्धमित्याह ततइतियतोविषयत्वविवर्जितंततोज्ञानेंद्रियैर्नदृश्यतेकर्मेंद्रियैर्नगृह्यतेपीतियोजना ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनइति तस्मादन्नपदोक्तान्मनःप्राणसमष्टिशरीरएषहिरण्यगर्भोबृहदारण्यकेमृत्युरितिव्यवहृतोजायतेतस्माच्चसत्यपदोक्तस्थूलपंचभूत शरीरोविराट्भवतीत्यर्थः सत्पदेनपृथिव्यप्तेजसांत्यत्पदेनवाय्वाकाशयोःपरोक्षयोरभिधानमित्युक्तंचतुर्थाध्याये ॥ ६३ ॥ तस्मिन्निति तस्मिन्विराजिसत्यपदोक्तेजातेसतितदाश्रिताःसप्तभूरादयोलोकाजातास्तेभ्यश्चतद्वासिजनाधिकारिकंवेदोक्तंकर्मजातंतस्मिन्कर्मणिस तितस्मात्कर्मणःफलंजातं कीदृशं यच्छ्रुताववश्यभावित्वेनामृतमित्युक्तमित्यर्थः ॥ ६४ ॥ एतावतापराविद्यासविषयासंक्षेपेणनिरूपिता अथापरविद्यांविषयंवैराग्यायदर्शयितुंसृष्टिप्रक्रियांसंक्षेपेणानुवदतोयःसर्वज्ञइत्यादिवाक्यस्यार्थमाह सामान्येनेति सामान्यरूपेणसर्व

मनःप्राणात्मकस्तस्मान्मृत्युरेषप्रजायते॥ ततोपिजायतेसत्यंविराडितियदीरितं॥ ६३॥ तस्मिन्लोकाःश्रि ताःसप्तवेदोक्तंकर्मचाखिलं॥ कर्मण्यप्यमृतंतद्वद्यदुक्तंकर्मणःफलं ॥ ६४॥ सामान्येनविशेषाच्चवेत्तियःस र्वमेवहि॥ ब्रह्मरूपात्ज्ञानचितात्तस्मादेवाक्षरात्मनः॥ नामरूपेस्थूलमिदमन्नंसूक्ष्मंचजायते॥ ६५॥ तदेत त्सकलंप्रोक्तंपंडितैःकर्मणःफलं॥ विश्वंहिरण्यगर्भादिशरीरंसत्यशब्दितं॥ ६६ ॥ अग्निहोत्रादिकंकर्मयागै र्दर्शादिभिःसमं॥ वेदोदरेस्थितंनानारूपंद्रव्यादिभेदतः॥ ६७॥

स्यज्ञानात्सर्वज्ञोविशेषरूपेणसर्वज्ञानात्सर्वविदितिचयउक्तस्तस्मादक्षरादिदंनामरूपात्मकंसूक्ष्मंब्रह्महिरण्यगर्भाख्यंस्थूलंतुविराडाख्यंय च्छ्रुत्यंतरेअन्नमितिव्यवहृतमेतदुभयंसर्वप्रपंचसंग्राहकंजायतेइत्यर्थः ॥ ६५ ॥ तदेतत्सत्यमित्यादेर्ब्रह्मलोकइत्यंतग्रंथस्यतात्पर्यंयावतिस फलकर्मप्राशस्त्येभवतितद्दर्शयति तदेतदितिचतुर्भिः तत्सूक्ष्मसमष्टिरूपंएतत्स्थूलसमष्टिरूपंवायद्विश्वंहिरण्यगर्भादिशरीरमयमेतत्पर्यंत मैश्वर्यंकर्मणःफलमुक्तं कीदृशंकर्मफलं सत्यशब्दितं कर्मानंतरमवश्यभावात्सत्यशब्देनोक्तमित्यर्थः ॥ ६६ ॥ कस्यकर्मणइदमैश्वर्यंफल मित्याकांक्षायांयद्वेदविहितमित्याह अग्निहोत्रादिकमिति अग्निहोत्रंसायंप्रातराहुतिरूपं आदिपदेनआदित्योपस्थानादिग्रहः एतत्प्रभृ तिकर्मदर्शादिसंज्ञैर्नित्यकाम्यादिभिन्नैर्यागैःसहितंवेदेनविहितं कीदृशं दध्याज्यादिद्रव्याणांआदिपदेनकर्तृमंत्रदेशानांचभेदेननानावि धमित्यर्थः ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिकारिणएतदकरणेदोषप्रतिपादकमनुवाक्यमर्थतःपठति अकुर्वन्निति वेदविहितकर्माकरणंतन्निषिद्धाचरणंविषयासक्तिश्चैतत्त्रयमधोगतिलक्षणमित्यर्थः ॥ ६८ ॥ निषिद्धपरिहारपूर्वकंविहितानुष्ठानेचहिरण्यगर्भलोकांतलोकेष्वैश्वर्यशालिदेहप्राप्तिर्भवतीत्याह यथोक्तमिति ॥ ६९ ॥ उक्तंकर्मद्विविधंस्वर्गाद्यर्थंचित्तशुद्ध्यर्थंचतत्राद्यस्यफलंदर्शितमथद्वितीयस्यफलभूतंवैराग्यमभिनयंतिप्लवाइत्यादयः पंचमंत्रास्तत्रप्रथमस्यार्थमाह अशरीरमित्येकादशभिः सकर्मीशरीरत्रयाभावशालिनंमोक्षमपिप्राप्नुयादित्याशानकर्त्तव्याकृतकत्वेनानित्यस्यैवकर्मलभ्यत्वान्मोक्षस्यतद्वैलक्षण्यादित्यर्थः ॥ ७० ॥ कर्माणीति अस्मादनित्यसाधनत्वादेवज्योतिष्टोमादीनिनिखिलानिक

अकुर्वन्वैदिकंकर्मनिषिद्धंचसमाचरन्॥ इंद्रियार्थैर्विमूढात्मापुमान्गच्छेदधोगतिं ॥ ६८॥ यथोक्तंकर्मकुर्वाणोनिषिद्धंचविवर्जयन्॥ पुमान्स्वर्गादिलोकेषुसुखदंदेहमाव्रजेत् ॥ ६९ ॥ अशरीरंनमोक्षंसविहितैरपिकर्मभिः॥ प्राप्नुयात्कृतकंयस्मादनित्यंकर्मणःफलं॥ ७० ॥ कर्माणिनिखिलान्यस्माज्ज्योतिष्टोमादिकानिच॥ भवाब्धेस्तुपरंपारंनरंनेतुंभवंतिन ॥ ७१ ॥ पयोनिधौयथाक्षुद्राःप्लवामत्स्यादिघातने॥ कृतास्तीरस्यविधयेनासतेत्वदृढाःस्वयं ॥ ७२ ॥ कल्लोलमालाकुलितामज्जंतइवसर्वदा ॥ नीरपूर्णाश्चकंपंतेआश्रितानांभयप्रदाः॥ ७३॥ एवंकर्मप्लवाएतेसंसारजलधौस्थिताः॥ कामक्रोधादिकल्लोलैःकंपितादार्ढ्यवर्जिताः॥ स्वर्गादिसुखमत्स्यानांप्राप्तयेपरिकल्पिताः॥ ७४॥

र्माणिभवाब्धेःपरंपारंतीरंनित्यमोक्षरूपंनेतुंप्रापयितुंनसमर्थानिभवंतीत्यर्थः ॥ ७१ ॥ अत्रदृष्टांतमाह पयोनिधाविति यथापयोनिधिजलेकृताःप्लवास्तृणकाष्ठनिर्मितानितरणसाधनानिमत्स्यघातनायैवोपयुज्यंतेपारस्यपारगमनस्यविधयेसाधनायतुनासतेनयोग्यतयातिष्ठंतिक्षुद्रत्वाददृढत्वाच्च तथाकल्लोलमालयाआकुलिताःसंतोमज्जंतइवभवंति नीरपूर्तिदशायांचकंपमानाआश्रितानांभयप्रयोजकाभवंतीतिद्वयोरर्थः ॥ ७२ ॥ ॥ ७३॥ दार्ष्टांतिकेयोजयति एवमित्यादिना इत्थंकर्मरूपाःप्लवाःसंसारजलधौस्वर्गसुखादिरूपमत्स्यानांप्राप्तयएवरचितानपरपाराय कीदृशाः कामादिरूपकल्लोलवेगैःकंपिताअदृढाःस्वल्पविघ्नेनापिप्रतिहतत्वादित्यर्थः ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुकर्मप्लवेषुक्षेपणीचालकधीवरस्थानीयाःकेइत्याकांक्षायामाह अध्वर्योरिति ल्यब्लोपेपंचमी अध्वर्युमारभ्यषोडशऋत्विजोयजमानस्तत्पत्नीचैतेऽष्टादशतेषांकर्मप्लवानांनेतारःप्रवर्तकाश्चालकाइतियावत् तत्रषोडशानामृत्विजांनामानियथा यजुर्विदःअध्वर्युप्रतिप्रस्थातृनेष्टृन्नेतारः ४ ऋग्विदोहोतृमैत्रावरुणाच्छावाकग्रावस्तुतः ४ सामविदउद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्याः ४ त्रयीविदोब्रह्मब्राह्मणाच्छंस्याग्नीध्रपोतारः ४ संकलने १६ ॥ ७५ ॥ श्रोत्रियब्रह्मनिष्ठगुरुलक्षणःकर्णधारोब्रह्मचर्यलक्षणःसन्मार्गावर्जितेश्वरलक्षणोवाऽनुकूलवातश्चकर्मरूपासुनौकासुनास्तीत्याह कर्णेति ॥ ७६ ॥ स्वयमिति स्वभावेनैवप्रतिक्षणविनश्वरानेतान्कर्मप्लवान्विश्वस्यआस्थयास

अध्वर्योर्यजमानोत्रपत्न्यापिसहितःसदा॥ ऋत्विजःकथितास्तेषांनेतारःषोडशापिच॥७५॥ कर्णधारोनकोप्यत्रकर्मनौषुभवार्णवे॥ अनुकूलोनवातश्चब्रह्मचर्यादिरूपभाक्॥ ७६ ॥ स्वयंचादृढरूपत्वात्प्रतिक्षणविनश्वरान्॥ एतान्विश्वस्यकोनामप्रविशेद्भवनीरधौ॥ ७७॥ सुखार्थिनाततःसर्वैतरीतुंभववारिधिं ॥ कदाचिन्नैवसंग्राह्याःस्वर्गमत्स्यसुखप्रदाः॥७८॥ एतान्कर्मात्मकान्हृष्टाःप्लवान्संगृह्ययेस्थिताः॥संसारजलधेर्नैतेभवेयुःपरपारगाः ॥७९॥ कामक्रोधादिकल्लोलैःप्लवेस्मिन्परिवर्त्तिते ॥ जरामरणनीरेस्मिन्नुन्मज्जंतिपतंतिच॥ शतशोदुःखसहिताःसंसारश्रमकर्शिताः ॥ ८० ॥ अविद्यानीररचितेसर्वदाभवसागरे॥ धीवराइववर्त्तंतेभूतोपद्रवकारिणः ॥८१ ॥ दुर्धियःपंडितंमन्याःस्वपरानर्थकारिणः ॥ यतस्ततोभ्राम्यमाणामायागर्त्तेगताभृशं॥८२॥

मालंब्यभवाब्धौकःप्रविशेन्निःशंकःप्रचरेदित्यर्थः ॥ ७७ ॥ फलितमाह सुखार्थिनेति स्वर्गादिमत्स्यानांयत्सुखंतल्लाभदाः ॥ ७८ ॥ एतानिति येमूढाएतान्कर्मरूपप्लवान्संगृह्यआलंब्यहृष्टाःस्थितास्तेभवाब्धिनतरंतिप्रत्युतकामादिकल्लोलवशात्कर्मप्लवेपरिवर्तितेविप्लुतेसतिशतशोचनिमज्जंतीतिद्वयोरर्थः॥ ७९ ॥ ८० ॥ तत्रद्वितीयार्थमाह अविद्येतिचतुर्भिः अविद्यैवयत्रनीरस्थानीयातादृशेभवसागरेधीवरवत्स्वंपरंचक्लेशयंतस्तेकर्मिणोवर्तंते ॥८१॥ दुर्धियइति कीदृशाः दुर्धियोप्यात्मानंपंडितंमन्यमानाःदुर्धीत्वेहेतुः स्वपरानर्थकारिणइति पुनःकीदृशाः यतस्ततोरोगाद्यनर्थैर्भ्राम्यमाणाविक्षेपंनीताःसंतोमायाप्रयुक्तेमोहमयगर्तेगताःपतिताः ॥ ८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूढाइति पुनःकीदृशाः कर्त्तव्यतायामनुष्ठेयव्यवस्थायांव्यामोहवंतः तेषांनिर्णयोगुरुभ्योपिनभवतिगुरूणामपितादृशत्वादित्याह स्वात्मेत्यादिना यद्वत्स्वकीयविवेकरहिताअंधाअंधेननीयमानादुःखसंततिमंतःस्युस्तथाएतेकर्मिणःस्वात्मज्ञानविवर्जितायाज्ञिकेनकर्मिणागुरुणानीयमानाःस्वर्गाभिलाषिणोघोरेभवार्णवेदुःखिताःस्युरितिद्वयोरर्थः ॥८३॥८४॥ तृतीयचतुर्थयोरर्थमाह स्वयमित्यादिना तादृशाजनाःस्वयंगुरुनिरपेक्षाआत्मीयंदुःखंतन्निवृत्त्युपायंवानजानंतिकामवशत्वेनातुरत्वाद्भूताविष्टवदित्यर्थः ॥ ८५ ॥ भूताविष्टसाम्यमेवस्फुटयति वयंकृतार्थाइति ॥ ८६ ॥ कामेति कलिद्रुमेपांचभौतिकदेहेचरूढियोगाभ्यांवर्तमानंभूतावासपदमावर्तनीयं तथाचाऽनिजेपरकीयेभूतावासेदेहएवभूतावासेकलिद्रुमेपरांसुखवुद्धिंप्राप्ताःदैवप्रातिकूल्यात् तत्रविशेषहेतुःकामरूपस्यग्रहस्यभूतस्यसमावेशएवेत्यर्थः ॥८७॥ तेषांकामग्रहप्रयुक्तचिंतयाव्याप्तचेतस्यात्मानुसंधानावकाशोनभवतीत्याह अयमितिद्वाभ्यां अयंशत्रुर्हतःअयंतुसपुनरुत्थितइतिशेषः स्फुटमन्यत् ॥८८॥ इत्यादीति विद्धाःसंव्याप्तचेतसः मृत्युःप्रमादःसएवग्राहस्तद्वशंगताश्च आत्मानंज्ञातुंनशक्नुवंतीत्यर्थः ॥८९॥ आत्मविस्मरणापराधेनतेअनित्यलोकाःस्युरित्याह कर्मैवेति येकर्मैवसम्यक्श्रेयइतिनिश्चित्यात्रसंसारेसंस्थिताःपरिनिष्ठितास्तेसर्वेसुकृतफलंसर्वमनुभूयकालेनक्षीणपुण्याःसंतोऽस्मात्स्वर्गात्सशोकाःपतंति ॥ ९० ॥

मूढाःकर्तव्यतायांतेस्वात्मज्ञानविवर्जिताः॥ अंधेननीयमानाःस्युर्यद्वदंधाःसहस्रशः॥८३॥ याज्ञिकेनैवमेवैतेस्वात्मज्ञानविवर्जिताः॥ स्वर्गाभिलाषिणोघोरेमायानीरेभवार्णवे॥८४॥ स्वयंचतादृशानित्यंकामक्रोधवशंगताः॥ आत्मदुःखंनजानंतिभूतग्रस्ताइवातुराः॥८५॥ वयंकृतार्थाइतिचमन्यंतेस्वल्पबुद्धयः॥ नृत्यंतोपिहसंतश्चपिशाचाइवकर्मिणः॥८६॥ कामग्रहसमावेशाद्भूतावासेऽनिजेतथा॥ परांचसुखबुद्धिंतेप्राप्तादैवविमोहिताः॥ ८७॥ अयंनोनिहतःशत्रुर्भाग्ययोगादयंपुनः॥ हंतव्योयमिदंमित्रंममोर्जितमभूदिह॥ ८८॥ इत्यादिचिंतयाविद्धामृत्युग्राहवशंगताः॥ आनंदात्मानमात्मस्थंनजानंतिविमोहिताः॥८९॥ कर्मैवयेऽत्रसंसारेसम्यगित्येवसंस्थिताः॥ तेसर्वेसुकृतंसर्वमनुभूयाथकालतः॥ क्षीणपुण्याःपतंत्यस्माद्दुःखशोकसमन्विताः॥ ९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषांस्वर्गपातकालेदुःखशोकसमन्वितत्वंस्फुटयति यथाचेति निगदव्याख्यातंद्वयं ॥ ११॥ १२ ॥ नकेवलंपातकालएवतेषांदुःखंकिंत्व न्यदापीत्याह स्वर्गेपीति अनीशताअधिकैश्वर्यलाभाक्षमत्वं यथाएतल्लोकेधनव्ययाद्दुःखंतथाभोगभूमौसुकृतस्यनाशाद्व्ययाद्दुःखमिति ॥ १३ ॥ कष्टंकर्मेतिन्यायेनकर्मणआदिमध्यावसानेषुदुःखरूपतामाह कर्मणामिति करणेनुष्ठानकाले फलाप्राप्तौपारतंत्र्यादिरूपंदुःखं पुनर्जन्मसंभवंपुनर्जन्मावधिकंदुःखमतिदारुणंभवतीति ॥ १४॥ पुनर्जन्मदुःखमेवस्फुटयति जायमानइति स्वर्गंप्राप्यपुनर्जायमानोजंतुः

यथाचधनिनोमृत्युकालेपुत्रादिसंवृताः ॥ दुःखिनःस्वर्गिणस्तद्वत्कालेकर्मक्षयात्मके ॥ ११ ॥ राज्ञोत्रमरणे यावद्दुःखंस्यात्सुखिनोमहत् ॥ कर्मक्षयेतथादुःखंस्वर्गिणोजायतेसदा ॥ १२ ॥ स्वर्गेपिसर्वदातेषांपारतंत्र्य मनीशता ॥ एतल्लोकेयथादुःखंधनिनांधननाशने ॥ स्वर्गनाशात्तथादुःखंस्वर्गिणामिहजायते ॥ १३ ॥ कर्म णांकरणेदुःखंफलप्राप्तौतथैवच ॥ फलक्षयेपुनर्जन्मसंभवंचातिदारुणम् ॥ १४ ॥ जायमानःपुमान्कोवा त्यत्रस्वर्गाद्भविष्यति ॥ उत्तमोमध्यमोवास्यादधमोनारकोथवा ॥ १५ ॥ कोनामकर्मणःपाकंतस्यजानाति भाविकं ॥ अयंदक्षिणमार्गःस्यात्स्वर्गिणोयेनयांत्यमी ॥ १६ ॥ उत्तरोपिद्वितीयोस्तिमार्गःसंसृतिमध्यगः ॥ परपारसमीपस्थःसतुकेषांचिदेवहि ॥ १७ ॥ आत्मनस्तूर्ध्वरेतस्त्वंसंकल्प्यनपुनःस्त्रियं ॥ देहेनानेऽनगच्छंतिते यांत्युत्तरमार्गतः ॥ उपासकागृहस्थाश्चयेचपंचाग्निवेदिनः ॥ १८ ॥

कोभविष्यतीतिभाविनंतस्यकर्मणोविपाकंकोजानाति एषाइष्टापूर्त्तपरायणानांगतिरुक्तेत्युपसंहरति अयमिति ॥ १५ ॥ १६ ॥ तपइ त्यादिमंत्रेणदेवयानवतांफलमुक्तंविशदयति उत्तरइतिपंचभिः द्वितीयउत्तरमार्गोपिसंसारांतर्गतएव सतुपरपारसमीपगतःकेषांचिद्विरता नामेवभवतीत्यर्थः ॥ १७॥ तत्रहेतुतयातत्साधनब्रह्मचर्यादीनांदुष्करत्वमाह आत्मनइति येतुऊर्ध्वरेतस्त्वंसंकल्प्यअनेनदेहेनस्त्रियंनगच्छं तितेनैष्ठिकास्तथादहराद्युपासकास्तथागृहस्थाअपिपंचाग्न्युपासकाएतेउत्तरमार्गेणगच्छंतीत्यर्थः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मलोकेपिमोक्षस्यपाक्षिकत्वमाह तत्रेति तत्रउत्तरमार्गगम्येब्रह्मलोकेयदिब्रह्मज्ञानंजायेततदाएतेउक्ताधिकारिणस्ततःकार्यब्रह्मणःपरं परस्ताद्वर्तमानंपरमात्मानंप्रयांति तत्रज्ञानेनपरमात्मलाभोभूमौब्रह्मलोकेचसमइत्याह यथेति ॥९९॥ अन्यथेति अन्यथातत्रतत्त्वज्ञानाभावेएतंमानवलोकंपुनरावर्त्तंतेपरिवृत्त्यागच्छंति परंत्वस्मिन्मन्वंतरेकल्पेवानायांतिकिंतुपरस्मिन्नेवेत्याह कालेइति तस्मिन्श्रुतौएतमितिपदेनविवक्षिते ॥ १०० ॥ फलितमाह उत्तरइति ॥ १०१ ॥ अथपरीक्ष्येत्यादेःकृतेनेत्यंतस्यार्थमष्टाविंशत्यावर्णयंस्तत्रपरीक्षामभिनयति वनिनामित्येकादशभिः विद्यांविदामुपासकानांवनिप्रभृतीनामधिकारिणांब्रह्मलोकादौयत्रकुत्रापिलोकेब्रह्मज्ञानमेवमोक्षहेतुरिति

तत्रापिब्रह्मविज्ञानंजायतेदैवयोगतः॥ततःपरंप्रयांत्येतेयथाभूमिस्थितानराः॥ ९९॥ अन्यथापुनरेवैतमावर्ततेयथागतम्॥कालेतीतेहिमहतितस्मिन्मन्वंतरादिके ॥ १०० ॥ उत्तरोपिततोमार्गोहेयोदक्षिणमार्गवत्॥ अत्रापियतएतत्स्याद्देहंकारागृहंपुनः॥ १०१॥ वनिनांन्यासिनांतद्वन्नैष्ठिकब्रह्मचारिणां॥ विद्याविदांतथैवैषांसर्वेषांगृहिणामपि ॥ १०२॥ ब्रह्मलोकेथवास्वर्गेपातालेनरकेथवा॥भूमौवाब्रह्मविज्ञानंमुक्तिहेतुरसंशयम्॥ १०३॥शरीरंदुःखदंतद्वत्सर्वत्रैवेतिनिश्चितं ॥ ब्रह्मलोकादिकोलोकस्ततोदुःखस्यकारणं॥ स्वर्गादिवदतोज्ञेयोविद्वद्भिर्नरकोयथा॥१०४॥राजार्थंरचितेयद्वत्प्रासादेसप्तभूमिके॥उपर्यधोवादुःखाप्तौभेदःकोपिनविद्यते ॥ १०५॥ हैमीलौह्यथवायद्वच्छृंखलाबंधनप्रदा ॥ दैवोवामानुषोवायंदेहोदुःखप्रदस्तथा॥ १०६॥

द्वयोरर्थः ॥ १०२ ॥ १०३ ॥ तथाशरीरस्यसर्वत्रदुःखमयत्वाविशेषाद्ब्रह्मलोकादिकंहेयमित्याह शरीरमिति ततोदेहसंबंधाद्ब्रह्मलोकादिरूर्ध्वलोकोपिस्वर्गादिवद्वर्णितविधयादुःखकारणंभवत्यतोहेतोर्विद्वद्भिर्नरकवज्ज्ञेयइत्यर्थः ॥ १०४ ॥ तत्रदेहानामवांतरवैषम्येपितत्फलदुःखसाम्यंसदृष्टांतमाह राजार्थमितिद्वाभ्यां यथाराजकीयप्रासादेयत्रकुत्रापिभूमौस्थितस्यज्वरादिदुःखंसमंतथोत्तमदेहेपीत्यर्थः ॥ १०५ ॥ यथाचशृंखलाहेममयीवाअस्तुलोहमयीवासर्वस्याबंधकत्वंसमंतथादेहस्यदुःखदत्वमित्याह हैमीति ॥ १०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रचतुर्थाद्युक्तंस्मारयति ब्रह्मणइति हिरण्यगर्भश्वदेहयोस्तदभिमानिनोश्वपांचभौतिकत्वेसाविद्यत्वेचविशेषोनास्तीत्यर्थः ॥ १०७ ॥
आभिमानिकमुत्कृष्टत्वमपिसर्वत्रसममित्याह योदेहइति स्थितंप्रपंचितम ॥ १०८ ॥ तत्रमूढानूशोचति हादैवमिति लोकस्यदैवमेवशो

च्यंयत्प्रभावाद्दुःखहेतुत्वद्दुर्गंधत्वाशुचित्वैर्युक्तोपिदेहःस्वस्मिन्स्वकीयेचेतस्येवंदुःखहेतुत्वादिरूपैर्नगृह्यतेइत्यर्थः ॥ १०९ ॥ कर्मेति कर्म
प्रारब्धफलंकामोरागस्तमःकार्याविद्याएतैःप्रच्छन्नदोषः ॥ ११० ॥ कर्मादित्रयंनिंदति धिगिति कर्मकामौधिक्अनादरणीयौ तथा
मायामविद्यांधिक् ययामाययामूढोयंजनःस्वकीयमुखगतंश्लेष्माणंलालागंडूषादिरूपंपिबति अन्यथापरकीयमुखश्लेष्मादिभ्यउद्वेगः

ब्रह्मणोपिचयोदेहोदेहोयश्चश्चुनोपिच ॥ नानयोर्विद्यतेभेदउभयोर्देहधारिणोः ॥ १०७ ॥ योदेहोयेनजीवेन
स्वीकृतस्तस्यसोधिकः ॥ न्यूनःपरोजगत्यस्मिन्सर्वत्रैवेतिचस्थितं ॥ १०८ ॥ हादैवंयदयंदेहोदुःखराशेस्तुका
रणं ॥ दुर्गंधोप्यशुचिस्तद्वत्स्वस्मिन्नेवंनगृह्यते ॥ १०९ ॥ कर्मकामतमश्छन्नदोषोदेहःशरीरिणां ॥ अमृतेन
समोभातिसर्वेषामपिसर्वतः ॥ ११० ॥ धिक्कर्मकामसहितंधिङ्मायांचापिमोहिनीं ॥ यथामूढःपिबेदेष
श्लेष्माणंस्वमुखस्थितं ॥ १११ ॥ पदार्थानरकेयेस्युर्देहेसंतितएवहि ॥ सर्वेषामपिपापेनविपरीताविभांत्य
मी ॥ ११२ ॥ इत्येवंमनसासर्वान्ब्रह्मलोकादिकानपि ॥ लोकान्विज्ञायमेधावीतेषुवैराग्यमाव्रजेत् ॥ ११३ ॥
मानसात्कर्मणःकेचित्कायिकादेवकेचन ॥ लोकान्नृभिरवाप्यंतेसर्वदैवनचान्यथा ॥ ११४ ॥

स्वदेहगतादनुद्वेगश्चकथंस्यादितिभावः ॥ १११ ॥ पदार्थाइति येपदार्थाःकफाऽसृगादयोनरकेवैतरण्यांप्रसिद्धास्तएवदेहगताःसंतःसौंद
र्येणभांतीत्यहोपापादिदोषमहिमेत्यर्थः ॥ ११२ ॥ इत्येवमिति ब्रह्मलोकप्रभृतीन्लोकानुक्तविधयानर्थमयत्वेनविज्ञायपरीक्ष्यमेधावी
कुशलोधिकारीवैराग्यंप्राप्नुयात् ॥ ११३ ॥ नकेवलंवर्णितदोषजातादेवलोकानांहेयत्वंकिंतुकर्मजत्वेनानित्यत्वादपीत्याह मानसादिति
द्वाभ्यां केचिल्लोकास्त्रिलोकीबाह्यामानसस्यकर्मणउपासनाख्यस्यफलभूताः केचित्तुत्रिलोक्यंतर्गताःकायिकस्यफलभूताः अयंनियमः
कालत्रयेपिनान्यथाभवतीत्यर्थः ॥ ११४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मजाइति ततोमानसकायिकव्यापारयोःकर्मत्वस्यानुगतत्वादेतेलोकाःकर्मजाएवकर्मजत्वस्यचानित्यत्वव्याप्यत्वंलोकेप्रसिद्धमित्यर्थः॥ ११५॥यथैतेलोकाःकर्मजास्तथामोक्षोनभवतिअनित्यत्वापातादित्याह कर्मजइति तत्रेष्टापत्तिंवारयति अनित्येहीति मोक्षेअनित्येसतितदर्थंदेहिनांयत्नोव्यर्थःस्यात् किंचवर्णितदोषव्याप्यंस्वर्गत्वमेवमोक्षस्यस्यादित्याह स्वर्गतइति अस्यमोक्षस्यकर्मजत्वेस्वर्गापेक्षयाविशेषोनस्यात्किंतुस्वर्गविशेषत्वमेवस्यादित्यर्थः॥ ११६॥स्वर्गवैषम्याभावमेवस्फुटयति नहीति विश्वजिदाख्यक्रतुसाध्यस्यज्योतिष्टोमाख्यक्रतुसाध्यस्यवास्वर्गस्ययत्किंचिदवांतरवैषम्येपितयोःस्वर्गत्वेतद्व्यापकानित्यत्वादौवाकिंचनवैषम्यंनास्तितथाप्रकृतेपिस्यादित्यर्थः

कर्मजास्ततएवैतेसर्वएवप्रकीर्त्तिताः ॥ कर्मजानामनित्यत्वंभवेत्तेषांघटादिवत्॥ कर्मजन्यंहिलोकेस्मिन्नित्यंकिंचिन्नदृश्यते ॥ ११५ ॥ कर्मजश्चेद्भवेन्मोक्षःसोप्यनित्योभविष्यति ॥ अनित्येहिसदामोक्षेश्रमोव्यर्थःशरीरिणां॥ तदर्थंस्वर्गतश्चास्यवैषम्यंचनसंभवेत्॥ ११६॥ नहिविश्वजितास्वर्गोज्योतिष्टोमेनवापिच॥ साध्यतेत्रचवैषम्यंतयोरस्तीहकिंचन॥ स्वर्गत्वेतद्वदेवस्यादत्रापिस्वर्गमोक्षयोः ॥ ११७ ॥ मोक्षस्यानित्यभावश्चेद्वैयर्थ्यंचप्रसज्जते ॥ अनावृत्तिश्रुतेस्तद्वत्प्रसिद्धेश्चमहात्मनां ॥ ११८ ॥ नान्यःपंथाइतिप्रोक्तंश्रुतेर्व्यर्थंवचोभवेत्॥ ब्रह्मवेदेतिचततोमोक्षोनस्याद्धिकर्मजः ॥ ११९॥ मोक्षोब्रह्मैवकथितंसर्वैरेवमहात्मभिः॥ अविद्यारहितंमायालोकेऽज्ञानंप्रकीर्त्तितं॥ १२० ॥

॥११७॥ मोक्षस्यानित्यतांश्रुतिगणोविद्वदनुभवश्चनसहतेइत्याह मोक्षस्येति मोक्षस्यानित्यत्वंयदिस्वीक्रियतेतदानसपुनरावर्त्ततेइतिश्रुतिवाक्यंमुक्तस्यानावृत्तिप्रतिपादकंव्यर्थंस्यात्तथामहात्मनांसकलतंत्राचार्याणांयामोक्षनित्यत्वप्रसिद्धिःसापिव्यर्थास्यात् ॥११८॥ नान्यःपंथाविद्यतेऽयनायेतिश्रुतिर्मोक्षस्यज्ञानैकलभ्यत्वंवदतितथाब्रह्मवेदब्रह्मैवभवतीतिश्रुतिः एतयोर्विरोधादपिमोक्षस्यानित्यत्वप्रयोजकंकर्मजत्वंनमंतव्यमित्याह नान्यइति ॥ ११९ ॥ मोक्षस्यज्ञानैकलभ्यतायामुपपत्तिमाह मोक्षोब्रह्मैवेतित्रिभिः अविद्यारूपावरणविमुक्तंब्रह्मैवमोक्षइत्युच्यते ज्ञातेद्वैतंनविद्यतेइत्यात्मप्रबोधश्रुतेः साचाविद्यामायाऽज्ञानादिनामभिःप्रसिद्धेत्यर्थः ॥ १२० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अज्ञानस्यज्ञानैकनाश्यत्वमज्ञाननाशकज्ञानस्याज्ञानसमानविषयकत्वंचप्रसिद्धंरजतप्रयोजकशुक्त्यज्ञानादावित्याह अज्ञानमिति अन्यथाकर्मरूपैरुपायैर्नविलीयते यस्ययद्विषयकमज्ञानंतद्विषयकज्ञानादेवचतल्लयइतिचप्रसिद्धं॥ १२१॥ब्रह्मात्मेति एतत्संसारप्रयोजकमज्ञानंब्रह्मात्मैक्यविषयकमेवातोब्रह्मात्मैक्यज्ञानादेवतस्यलयोयुक्तः तन्नाशेतत्प्रयुक्तस्यदुःखस्यलयस्तुस्वतएवभवतीत्यर्थः॥ १२२॥ येदुःखमज्ञानजंनाभ्युपगच्छंतितेषांमतेमोक्षार्थश्रमोव्यर्थेत्याह दुःखमिति यदिवैशेषिकादिमतानुरोधेनसाधनैःसमवायिकारणादिभिःसहितंदुःखंवस्तुभूतंसत्यंस्यात्तदातद्दुःखंसदासर्वदाभवेदात्मवदित्यर्थः ननुसत्यस्यापिघटादिवदनित्यत्वंमन्यतेइतिचेत्सुतरांमोक्षार्थश्रमवैयर्थ्यंस्यात् अनित्यभावनाशस्यचिरकुसूलनिहितधान्यवदवश्यंभावादित्याह अनित्यंचेदिति ॥ १२३ ॥ किंचभवतांमतेदुःखोच्छेदोनयु

अज्ञानंज्ञानतःसर्वंविलयंयातिनान्यथा ॥ यस्याज्ञानंहिलोकेस्यात्तज्ज्ञानात्तल्लयंव्रजेत् ॥ १२१ ॥ ब्रह्मात्माज्ञानमेतच्चब्रह्मात्मज्ञानतोलयं॥ व्रजेदज्ञाननाशेनतज्जंदुःखंविनश्यति॥ १२२॥ दुःखंससाधनंचेत्स्याद्वस्तुभूतंसदाहितत्॥ अनित्यंचेद्वृथैवस्यात्श्रमोमोक्षेत्ववादिनः॥ १२३॥ नित्यताकारणेचेत्स्यात्पुनस्तेनकुतोभवेत्॥ दुःखांतरंकुतोहेतौसतिकार्यंभवेन्नहि॥ १२४॥ दुःखस्यकारणंविश्वंविश्वंचेद्वास्तवंभवेत्॥ ईश्वरेणापिनाशोस्यकर्त्तुंशक्योनकर्हिचित् ॥ १२५॥ नहिविश्वस्यसंहारंकुर्वन्नेषमहेश्वरः ॥ पुनरुत्पत्तिरोधंहिकर्त्तुंशक्नोतिकर्हिचित् ॥ १२६ ॥ ततोऽज्ञानसमुत्थानंपुनरज्ञानसंक्षये ॥ दुःखमुत्पद्यतेनैवेत्येतदेवात्रशोभनम् ॥ १२७॥

क्तस्तत्समवायिकारणस्यात्मनोनित्यत्वेनपुनस्तत्प्रसंगादित्याह नित्यतेति यदिदुःखस्यकारणेनित्यतातदातेमतेतेनकारणेनपुनर्दुःखंकुतोनस्यात् हेतौसतिकार्यंनस्यादितिहिनयुक्तमित्यर्थः ॥१२४॥ एतदेवस्फुटयति दुःखस्येति विश्वंद्वैतंदुःखस्यकारणंतस्यसत्यत्वेदुःखनिवृत्तिरीश्वरेणापिकर्तुंदुःशकेत्यर्थः ॥ १२५ ॥ यदिसत्यनिवर्त्तनपरईश्वरःस्यात्तदासंहृतस्यजगतःपुनरुत्पत्तिंवारयेन्नचतथादृश्यतेइत्याह नहीति भवन्मतेसत्यत्वेनप्रसिद्धस्यजगतःसंहारंकृत्वातस्यपुनरुत्पत्तेःप्रतिरोधंप्रतिबन्धंकुर्यात् यदिसत्यस्यबन्धस्यनिवर्त्तनपरःस्यादीश्वरइत्यर्थः॥१२६॥ फलितमाह ततइति तस्माद्दुःखस्याज्ञानप्रयुक्तत्वंतन्निवृत्त्यानिवृत्तिरित्यौपनिषदंमतमेवयुक्तमित्यर्थः ॥ १२७ ॥ ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतद्दृष्टांतेनस्फुटयति रज्ज्वज्ञानेतिद्वाभ्यां निगदव्याख्यातंद्वयं ॥ १२८ ॥१२९ ॥ अस्यब्रह्मात्मज्ञानस्यगुरूपदेशमात्रलभ्यत्वंसगुरुमेवा भिगच्छेदित्यादिश्रुत्याप्रतिपाद्यतइत्याह आत्मनइति ब्रह्मरूपस्यात्मनोविज्ञानमाचार्यवाक्यादेवभवतियतःश्रुतिरेवंवक्तीत्यर्थः॥१३०॥ एवंकथमित्याकांक्षायांश्रुतिमर्थतःपठति तज्ज्ञानार्थमिति ततोमोक्षस्योपायांतरासाध्यत्वात्सोधिकारीसमित्पाणिरुपायनहस्तः ॥१३१॥ एतादृशशिष्यायचात्मबोधनंगुरुणावश्यंकर्तव्यमित्याह विधिवदिति तस्मैशिष्यायगुरुस्तांविद्यांवदेत् तांकां ययाशांत्यादिमान्पुमान् परमक्षराख्यंब्रह्माधिगच्छेदितिद्वयोरर्थः ॥ १३२ ॥ १३३ ॥ एवंप्रथममुंडकेपरापरविद्येसंक्षिप्यवर्णितेपरविद्याधिकारिष्वथपर

रज्ज्वज्ञानसमुत्थानंसर्वंदुःखंयथामहत्॥ रज्ज्वज्ञानेविलीनेस्मिन्पुनर्नैवप्रजायते॥१२८॥ आत्माज्ञानसमुत्थानमेवंदुःखमिदंमहत्॥ आत्माज्ञानेविलीनेस्मिन्पुनर्नैवप्रजायते ॥ १२९ ॥ आत्मनोब्रह्मणस्तस्यज्ञानमाचार्यवाक्यतः॥ भवेदेवंयतःप्राहश्रुतिःसर्वार्थदर्शिनी ॥ १३० ॥ तज्ज्ञानार्थंततोगच्छेच्छ्रोत्रियंब्रह्मवेदिनं॥ सगुरुंजातवैराग्यःसमिदादिकरःपुमान्॥ १३१॥ विधिवच्चोपसन्नायस्वशिष्यायमहात्मने॥ गुरुस्तस्मैवदेदात्मविद्यांदुःखौघनाशिनीं॥ १३२॥ ययाक्षरंपरंब्रह्मपुमानेषोधिगच्छति ॥शांतिदांत्यादिसंपन्नो ब्रह्मचर्यादिसाधनः॥ १३३॥ एतत्सत्यंपरंब्रह्मयद्वेदगुरुवाक्यतः॥ विरक्तोत्रमुमुक्षुःसन्नन्यत्सत्याभमीरितं ॥ १३४ ॥ सत्यादस्मात्सदैवैतद्विश्वमुत्पद्यतेतथा॥ अस्मिंस्तिष्ठतिचैवांतेलीयतेत्रैवसर्वथा॥ १३५॥ ज्वलतःपावकाद्यद्वन्महतोविस्फुलिंगकाः॥ उत्पद्यंतेत्रधूमाश्चसरूपाश्चविरूपकाः॥ १३६ ॥ चेतनाचेतनंसर्वमेवमस्मात्परात्मनः ॥उत्पद्यतेसर्वकालेजगदेतदनेकधा॥ १३७॥

विद्यांविस्तरेणाख्यातुंद्वितीयंमुंडकंप्रवृत्तंतस्यक्रमेणार्थमाह एतत्सत्यमित्यादिना विरक्तःपुमान्मुमुक्षुःसन्यद्वेदजानातिगुरुवाक्यतएतत्परंब्रह्मैवपरंमुख्यंसत्यमन्यद्द्वैतजातंतुपरसत्तोपजीवित्वात्सत्याभासमुक्तमित्यर्थः ॥१३४॥ तस्याद्वितीयत्वंस्फुटयितुंविश्वोपादानतामाह सत्यादिति अस्माद्ब्रह्मणःसत्यत्वेनवर्णिताद्विश्वमुत्पद्यतेऽत्रैवतिष्ठतिलीयतेचेत्यर्थः॥१३५॥ तत्रोत्पत्तौदृष्टांतमाह ज्वलतइति यथाज्वलतोग्नेःसकाशाद्विस्फुलिंगाःकणाःसरूपाज्योतिष्ट्वेनसमानरूपाधूमाश्चमलिनत्वेनविरूपाउत्पद्यंतेइत्यर्थः ॥ १३६ ॥ एवंचेतनंसरूपमचेतनंविरूपंचजगदस्मादात्मनोजायतेइत्याह चेतनाचेतनमिति ॥ १३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्स्वरूपावेदकंद्वितीयमंत्रंपठति दिव्यइति ॥ १३८ ॥ अस्यार्थंत्रिभिर्वर्णयंस्तत्रचतुर्थपादार्थमाह कारणमिति यत्यतउपाधेःपरंब्रह्म कारणमितिव्यवह्रियतेवैदिकैःसामायाकार्यापेक्षयाचिरस्थायित्वादक्षरमित्युक्ता तस्याःकार्यरूपजगदपेक्षयापरत्वंचयुक्तं तस्मान्माया रूपादक्षरादपियःपरःसपरमात्मेत्यर्थः ॥१३९॥ दिव्यइति स्वयंप्रकाशत्वेनलोकविलक्षणत्वाद्दिव्यइत्युक्तःसर्वगतत्वाच्चामूर्त्तइतिसर्वोपा धिषुबहिरंतःपरिपूर्णत्वात्तुपुरुषइत्युक्तइत्यर्थः ॥ १४० ॥ अजपदेनजन्माभाववाचकेनतस्यस्थूलदेहराहित्यमप्राणइत्यादिपदद्वयेनसू क्ष्मदेहराहित्यंशुद्धत्ववाचकशुभ्रपदेनचमायाख्यकारणशरीरराहित्यमुक्तमितिदर्शयति अजइति फलितमाह आनंदात्मेति अद्वयत्वेन

दिव्योह्यमूर्त्तःपुरुषःसबाह्याभ्यंतरोह्यजः॥ अप्राणोह्यमनाःशुभ्रोह्यक्षरात्परतःपरः ॥ १३८ ॥ कारणंय
त्परंब्रह्मगीयतेवेदवादिभिः ॥ अक्षरंकथितंमायापरंयज्जगतःसदा ॥ तस्मादपिपरःप्रोक्तःपरमात्मासनात
नः॥ १३९॥ दिव्यःस्वयंप्रकाशोयममूर्त्तःसर्वगःस्मृतः॥ अंतर्बहिश्चसंपूर्णःपुरुषःपरिकीर्त्तितः ॥ १४० ॥
अजःस्थूलेनदेहेनरहितःपरमेश्वरः ॥ अप्राणोह्यमनाःप्रोक्तःसूक्ष्मदेहविवर्जितः ॥ शुभ्रोमायाविरहितआ
नंदात्मासदास्फुरन्॥ १४१ ॥एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच ॥ खंवायुर्ज्योतिरापश्चपृथिवीविश्व
धारिणी ॥ १४२ ॥ अस्यदेवस्ययद्रूपंवैराजंतदिदंविदुः ॥ अग्निर्मूर्द्धाचंद्रसूर्यौनेत्रेश्रोत्रेदिशस्तथा॥ वे
दाःसर्वेचवाक्प्रोक्तावायुःप्राणोमहात्मनः ॥ १४३॥ हृदयंसकलंविश्वंपादौभूमिस्तथैवच॥भूतांतरात्मा
कथितोविराडेषद्विजोत्तमैः॥ १४४॥

भासमानानंदरूपइत्यर्थः ॥ १४१ ॥ तस्यवास्तवींसदाखंडतांस्फुटीकर्त्तुंततःसर्वांसृष्टिंप्रतिपादयंत्येतस्मादित्यादयोष्टौमंत्रास्तेषांक्रमे णार्थमाह एतस्मादितित्रयोदशभिः प्राणमनसीदशेंद्रियाणिपंचभूतानिचोक्तादात्मनोजायंतेइत्यर्थः ॥ १४२ ॥ एवंसप्तदशावयवस्य हिरण्यगर्भस्यसृष्टिर्दर्शिताअथविराजस्तामाह अस्येति अस्येश्वरस्यवैराजंरूपंतदेवंविधमाहुः एवंकथं अग्निर्द्युलोकस्तद्रूपंयस्यशिरश्चं द्रसूर्यौनेत्रेदिशःश्रोत्रेकर्णौयस्यवायूपाःसर्वेवेदाःकथितावाक्प्राणोवायुश्चयस्यप्राणःसर्वंजगद्यस्यहृदयंपृथिवीतुपादरूपाकथिताएषएवंवि धशरीरःसर्वेषांव्यष्टिभूतानामात्मभूतोविराट्कथितइतिद्वयोरर्थः ॥ १४३ ॥ ॥ १४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतस्माल्लोकवृद्धिहेतूनांपंचाग्नीनामुत्पत्तिमाह तस्मादिति उक्ताद्वैराजादग्निःप्रसिद्धोऽधिदैवरूपेणद्युलोकात्मकश्चजातः कीदृशः कर्मक रःआहवनीयादिरूपेणफलरूपेणचकर्मणांप्रवृत्तिहेतुः तथाश्रुतौसमित्पदोपलक्षितंसमित्प्रभृत्युपकरणद्रव्यवृन्दंजातं कीदृशं सूर्याद्य मादित्यादिरूपं द्युलोकाद्यग्नीनामादित्यादिसमित्प्रभृत्युपकरणंषष्ठाध्यायेचतुश्चत्वारिंशदधिकैकादशशततमश्लोकमारभ्योक्तमनुसंधे यं कलात्मकइत्युत्तरान्वयि ॥ १४५॥ सोमश्चेति सोमश्चंद्रश्चततोभवत् कीदृशः कलात्मकःअग्निहोत्राहुतिभिःकलारूपेणपरिणताभि रादित्यप्रसूताभिरुपचितशरीरः अतएवकर्मिभिरिष्टादिकारिभिःप्राप्यः तस्मात्सोमाच्चहुतात्पर्जन्याख्योद्वितीयोग्निर्भवति पर्जन्याच्चवृष्टि द्वारातृतीयाग्नेःपृथिवीरूपादोषधयोव्रीहिप्रभृतयोभवंति ओषधिभ्यश्चान्नरूपेणचतुर्थाग्निपुरुषंप्राप्ताभ्योरेतोभवति रेतश्चयोषितिपंचमा

तस्माद्वैराजतोरूपादग्निःकर्मकरोभवत् ॥ समिदादिद्रव्यजातंसूर्याद्यंचकलात्मकः ॥ १४५ ॥ सोमश्चभग वान्योयंप्राप्यतेकर्मभिःसदा ॥ सोमात्पर्जन्यएषोपिपर्जन्यादोषधीगणाः ॥ १४६ ॥ ओषधिभ्योत्रपुंसि स्याद्रेतोयोषितितद्धुतं ॥ गर्भरूपेणशतशःप्रादुर्भवतिताःप्रजाः ॥ भवंतिसकलोयाभिर्व्यवहारःप्रसिद्ध्यति ॥१४७॥यस्मादेवविराट्जातःपुरुषान्निर्गुणादिह॥ ऋगादयस्ततोवेदाख्यपरब्रह्मशब्दिताः॥१४८॥ ऋतवो दक्षिणाभिश्चसार्धनानाविधाअपि ॥ दीक्षाःसंवत्सरस्तद्वद्यजमानोभिलाषवान्॥ १४९ ॥ सोमोद्रव्यात्मक स्तद्वत्फलंचेहयईरितः॥जायतेसर्वमेवैतत्पुरुषात्परमात्मनः॥सूर्योलोकादिभिःसार्धंयच्चपूर्वंप्रकीर्तितं॥१५०

ग्नौगतंसद्गर्भरूपेणप्रादुर्भवतियतःप्रजाःसकलव्यवहारकर्त्र्योजायंतइतिद्वयोरर्थः ॥ १४६ ॥ १४७ ॥ यस्मादिति निर्गुणात्परस्माद्यतः पुरुषाद्विराजउत्पत्तिस्तस्मादेवनिःश्वसितन्यायेनऋगादिवेदानामुत्पत्तिरित्यर्थः ॥ १४८ ॥ तथायज्ञोपकरणानितस्मात्परमात्मनोजाता नीत्याह ऋतवइति ऋतवोवसंताद्यादक्षिणाभिरेकगवादिरूपाभिःसह तथानानाविधादीक्षाःकर्तृनियमविशेषरूपाः संवत्सरःकालः फल कामोधिकारीच सोमइति द्रव्यात्मकोलताविशेषरसरूपःफलंद्युलोकशरीरारंभकरूपश्चयःससोमः तथालोकैःकर्मफलैरादिपदमार्चि रातिवाहकादिभिःसहितःसूर्यःएतदृतवइत्यादिनोक्तंसर्वंपरमात्मनोजायतेयच्चपूर्वंप्रकीर्तितंवैराजशरीरादिकंतदपिजायतेइतिद्वयोरर्थः ॥ १४९ ॥ १५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विधानीति देवादीनीत्यतद्गुणसंविज्ञानोवहुव्रीहिः तथाचदेवावस्वादयःप्रथमंजातास्ततःसाध्यामनुष्याःपशवोवयांसीतिचतुर्विधानि भूतानिजातानि तथाप्राणाःपंचविधाः अपिशब्दात्व्रीह्यादयोन्नभेदाश्च तपःप्रसिद्धं श्रद्धाआस्तिक्यरूपा सत्यमित्यवश्यंभावित्वेनकर्म फलमुच्यते अपिशब्दाद्यथार्थभाषणंच ब्रह्मचर्यमुपस्थसंयमः विधिपदेनशास्त्रविहितंकर्मोच्यते एतैस्तपःप्रभृतिभिःसहप्राणास्ततोजाता इत्यर्थः ॥ १५१ ॥ १५२ ॥ सप्तधात्रेति एतच्चराचरंविश्वमत्राध्यात्मभागेलोकादिभेदैःप्रतिलोमक्रमेणसप्तधाविभक्तंमंत्रेकीर्तितंतत्स र्वंब्रह्मणोजातमितिसंबंधः तत्रसप्तप्राणाःशीर्षण्यानींद्रियाणिद्वेश्रोत्रे द्वेचक्षुषी द्वेघ्राणे एकावागिति अर्चिषस्तदीयवृत्तयः समिधस्त द्विषयाः होमाउपासनानि लोकागोलकानि एतेप्रत्येकंसप्तपदार्थाःप्रतिप्राणिभेदमुत्पन्नाइतिभाष्योक्तःश्रुत्यर्थोवधार्यः ॥ १५३ ॥ समु

चतुर्विधानिभूतानिदेवादीनिसहस्रशः ॥ प्राणाःसर्वेपितपसाश्रद्धयाचसमन्विताः ॥ १५१ ॥ अवश्यंभावि नातद्वत्कर्मणोपिफलेनच ॥ सत्येनब्रह्मचर्येणविधिनाशास्त्रकर्मणा ॥ १५२ ॥ सप्तधाऽत्रविभक्तंयद्विश्वमेत च्चराचरं ॥ लोकादिभेदतःसर्वंतदिदंब्रह्मणोभवत् ॥ १५३ ॥ समुद्रागिरयोनद्योयच्चात्रस्थिरजंगमं ॥ भव्यं भूतंवर्त्ततेवातत्सर्वमभवत्ततः ॥ १५४ ॥ इदंविश्वंपुमानेवयएतदुदपादयत् ॥ तपःकर्मचवेदाश्चामृतंब्रह्मपरं चयत् ॥ १५५ ॥ एवंसर्वगतंसर्वरूपमात्मानमव्ययं ॥ सर्वभूतहृदंभोजेवसंतंभेदवर्जितम् ॥ योवेदपुरुषः सस्यादविद्याग्रंथिवर्जितः ॥ १५६ ॥

द्राइति समुद्रादित्रयंयच्चओषधिपदोपलक्षितंस्थिरंस्थावरंरसपदोपलक्षितंचआहारपरिणाममयंशरीरंजंगममेतदुपलक्षितमन्यच्चजग त्कालत्रयवर्तिपरमात्मनउत्पन्नमित्यर्थः ॥ १५४ ॥ एवमध्यारोपितस्यजगतोऽपवादेनशुद्धतामात्मनोदर्शयति इदंविश्वमिति एतद्वि श्वंसपुरुषएवनततोन्यत् सकः यएतद्विश्वमुदपादयज्जनितवान् कीदृशंविश्वं तपःकर्मवेदाइत्येतत्रितयात्मकं तत्रतपउपासनाफलं कर्म यागादिफलं वेदास्तत्प्रकाशकाः फलितमाह अमृतमिति यत्परंब्रह्मामृतंकूटस्थमखंडंतदेवसर्वमित्यर्थः ॥ १५५ ॥ एवमिति एवंवर्णित ॥ ११ ॥
विधयासर्वगतत्वादिनावर्णितमात्मानंसर्वांतरमद्वयंचयोवेदजानातिसपुरुषोऽविद्याग्रंथिनाअहमज्ञइत्याकारेणविमुक्तःसर्वविद्भवतीत्य र्थः ॥ १५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तविधयासकृदुपदेशेनयस्याक्षरज्ञानंनोत्पद्येततंप्रतिससाधनमक्षरबोधंजनयितुंप्रवृत्तस्यद्वितीयमुंडकद्वितीयखंडस्यार्थंवर्णयतिक्रमेण स्वप्रकाशमित्यादिना स्वप्रकाशत्वेनसदाविर्भूतं अतिसन्निहितंबुद्धिगुहास्थितत्वात् महत्सर्वोत्कृष्टं अत्राधिकारिदेहएवप्राप्यं प्राणानामिंद्रियाणांचअरनाभिन्यायेनईशानमधिष्ठानं तथाहेतुभूतंसर्वेषांकंपनप्राणनादिव्यापारस्यसन्निधिमात्रेणनिमित्तंच एतद्वर्णितं ब्रह्मैवज्ञेयमवश्यज्ञातव्यमितिद्वयोरर्थः ॥ १५७ ॥ १५८ ॥ तदेवपुनर्विशिनष्टि सदसदितित्रिभिः माययास्थूलसूक्ष्मरूपतांप्राप्तमपि

स्वप्रकाशंसदास्वस्यसन्निधानमुपागतं॥ बुद्धिस्थितंमहत्प्राप्यमस्मिन्नेवकलेवरे ॥ १५७ ॥ प्राणेंद्रियाणांचेशानंहेतुभूतंसनातनं ॥ एतदेवसदाज्ञेयंबुद्धेःपरमुदाहृतं ॥ १५८ ॥ सदसद्रूपतांप्राप्तंसदसद्भेदवर्जितं॥ वरणीयंसदासद्भिर्वरिष्ठंसर्वदेहिनां ॥ १५९ ॥ दीप्यतेयत्स्वतोभासायदणुभ्योप्यणुस्मृतं ॥ यस्मिन्लोकाइमेविश्वेनिहिताःसंतिसर्वदा॥ १६० ॥ तदेतदक्षरंब्रह्मतत्प्राणेंद्रियरूपभृत् ॥ स्वर्गादिकंचमोक्षश्चतदेवोक्तंमनीषिभिः॥ १६१ ॥ धीरेणात्मनिविज्ञानकारिणाशिक्षितेनच॥ कामक्रोधादिशत्रूणांसर्वदाभयकारिणा॥ वेद्धव्यमेतदेवात्ररूपंसर्वमवासनं॥ १६२॥

वस्तुतस्तदुभयवर्जितंसद्भिर्विवेकिभिर्वरणीयंसर्वसंघातेषुप्रविष्टमतिप्रशस्तंवस्तु ॥१५९॥ दीप्यतइति स्वरूपभूतयाभासादेदीप्यमानंदुर्लक्ष्येभ्योपिदुर्लक्ष्यंयदाश्रिताःसर्वलोकाःसहलोकपैः ॥१६०॥ तदेतदिति यत्त्वयापृष्टंकस्यविज्ञानात्सर्वंज्ञायतइतितद्ब्रह्मएतदेव तथैवप्राणेंद्रियादिरूपं तथाएतदेवसत्यपदोक्तंस्वर्गादिरूपंकर्मफलंतथामोक्षरूपमित्यर्थः ॥ १६१ ॥ ध्यानयोगेनचैतदेवलभ्यमित्याह धीरेणेति धीरेणधैर्यशालिनाआत्मविषयकविवेकशालिनाकामादिरूपशत्रूणांपराभवकारिणाध्यानशूरेणैतद्वर्णितमेवात्मनोरूपंयदवासनंवासनाभिर्मुक्तंतुरीयमितियावत् वेद्धव्यंलक्ष्यतांनेयमित्यर्थः ॥ १६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेधनपरिकरमाह वेदांतोदरेति वेदांतमहावाक्यान्युदरस्थितानियस्यसतथा तदुक्तं सकारंचहकारंचलोपयित्वाप्रयोजयेत् संधिचपूर्व रूपाख्यंततोसौप्रणवोभवेदिति एतादृशःप्रणवोधनुरुक्तः शोधितोध्यातुरात्मैवशरउदीरितः महावाक्यार्थचिंतनंयत्तदेवाकर्षणस्थानीयं शुद्धंब्रह्मतुलक्ष्यं यत्रायंप्रत्यगात्माशरवत्तन्मयोभवेदितिद्वयोरर्थः ॥१६३॥१६४॥ यस्मिन्द्यौरित्यादेरर्थमाह यस्मिन्लोकत्रयीत्येकाद शभिः यस्मिन्त्रिलोकीपंचभूतानिप्राणादीनिभौतिकानिचएतत्सर्वंप्रतिष्ठितंतथाएतदुपलक्षितोवेदश्चयत्रप्रतिष्ठितोयःशब्दब्रह्मेतिकीर्त्यते तद्विश्वाधिष्ठानंब्रह्मैवविज्ञेयं अन्यास्तदितरप्रतिपादिकावाचश्चहेयाःश्रमहेतुत्वादितिद्वयोरर्थः ॥ १६५ ॥ १६६ ॥ फलितमाह विनोप निषदइति उपनिषदोविहायान्यावाचोनाभ्यसेन्मुमुक्षुः इतरासांद्वैतप्रतिपादकत्वेनामृतत्वरूपस्यमोक्षस्यानुपयोगित्वादित्यर्थः॥१६७॥

वेदांतोदरसंस्थानःप्रणवोधनुरीरितः॥ आत्मज्ञानेनसहितःशरआत्माचतस्यसः॥ १६३॥ ब्रह्मात्मत्वेनय द्ध्यानंधनुराकर्षणंहियत्॥ लक्ष्यंब्रह्मात्मरूपंचयत्रात्मायंशरोव्रजेत्॥ १६४॥ यस्मिन्लोकत्रयीसर्वासहभू तैश्चपंचभिः॥ प्राणाद्यैर्भौतिकैस्तद्वच्छब्दब्रह्मेतिकीर्त्यते ॥ १६५ ॥ एकंतदेवविज्ञेयंनतुतस्मात्परंहियत्॥ वाचश्चान्याविमोक्तव्यावाकृतालुगलशोषदाः॥१६६॥ विनोपनिषदोनैववदेद्वाश्रृणुयाच्चवा॥ नानाविधा हियावाचस्ताःस्युर्नैवात्रकर्हिचित्॥ अमृतत्वस्यमोक्षस्यप्राप्तयेपुरुषस्यहि ॥ १६७॥ किंतुधर्मप्रदाःकाश्चि त्काश्चिदर्थप्रदाअपि॥ कामप्रदाश्चकाश्चित्तुकाश्चिद्दुःखप्रदाःसदा ॥१६८॥ दुःखप्रदाःसदावाचोनवदंतीह धीधनाः॥ वारयंतिचतद्वक्तॄन्मृतान्वीक्षणकादयः॥ ततस्ताःस्वयमेवात्रनवक्तव्याइतिस्थितं ॥ १६९॥

तत्रान्यासांवाचांचतुर्विधत्वमाह किंत्विति किंतुताःकिमर्थाइतिचेत् धर्मार्थकामदास्तिस्रः चतुर्थ्यस्तुव्यर्थरूपादुःखदाइत्यर्थः ॥१६८॥ तत्रदुःखप्रदानांहेयतायाःप्रेक्षावतःप्रतिसिद्धत्वात्सानात्रविधीयतेकिंत्वर्थदत्वादिनाभिमतानांदुःखदत्वंश्रुत्याबोध्यतइत्याशयंदर्शयति दुःखप्रदाइतिपंचभिः धीधनाःकुशलादुःखप्रदान्शब्दान्स्वयंनवदंतितद्वक्तॄन्वारयंतिचेतिप्रसिद्धंततःशिष्टाचारादेवतादुःखप्रदावाचोनव क्तव्याइतिस्वयमेवश्रुत्युपदेशंविनापिस्थितंसिद्धं कीदृश्यस्तावाचः मृतान्वीक्षणकादयःनिंदितंयन्मृतानामन्वीक्षणंवृत्तांतप्रतिपादनंतत्प्र भृतिरूपाः आदिपदेनकाकदंतकथादिग्रहः यथाहुः काकस्यकतिवादंतामेषस्याण्डंकियत्पलं गर्दभेकतिरोमाणीत्येषामूर्खविचारणेति ॥ १६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतेतुकामदादीनांदुःखदत्वंबोध्यतइतिदर्शयंस्तत्रार्थकामौधनार्जनविषयभोगरूपौद्विविधौशास्त्राविरुद्धौतद्विरुद्धौच तत्राद्ययोर्वियोगादौदुःखरूपतायाःप्रसिद्धत्वात्तत्परवाचामपिदुःखदत्वंबोध्यमित्याह कामदाइति ॥ १७० ॥ शास्त्रविरुद्धयोस्त्विहनिंदादिनापरत्रनरकेणचदुःखदत्वमविवादमित्याह अशास्त्रीयाविति तास्तत्प्रतिपादिकावाचः ॥१७१॥ एवमभ्युदयार्थस्यधर्मस्यापिविनश्वरफलकत्वेन दुःखदत्वात्तद्वाचांदुःखदत्वमित्याह धर्मोपीति यत्‌यतः ॥ १७२ ॥ फलितमाह ततइति धर्मादीनांदायिकावाचोदुःखकारिकाएवस्थि

कामदाअपिवाचःस्युरर्थदायाश्चताअपि॥ दुःखदाअर्थकामाभ्यांवियोगेसतिसर्वदा॥ १७० ॥ अशास्त्रीयौयदास्यातामर्थकामौतदाहिताः॥ दुःखदाएवकोनामतावदेद्धीधनोजनः ॥१७१॥ धर्मोपिचयदालोकेसंसारसुखदोभवेत्॥ तदादुःखप्रदःसस्यात्तत्सुखंयद्विनश्वरं॥१७२॥ ततोधर्मार्थकामानांदायिन्योदुःखकारिकाः॥ वाचएवंस्थितास्ताश्चनवक्तव्याहिधीमता॥१७३॥ अमृतत्वंततोमोक्षोयाभिरात्मावगम्यते ॥ ताएवसर्वदासद्भिर्वक्तव्यानापराःक्वचित् ॥ १७४॥ आनंदात्मास्वयंज्योतिःसेतुवत्संस्थितोहिसः ॥ अमृतत्वेसुखंयस्यगृहीत्वापरमेश्वरः॥ १७५ ॥

ताविवेकतःसिद्धाधीमतामुमुक्षुणानवक्तव्याइत्युपदेशः ॥ १७३ ॥ किंत्वमृतत्वरूपमोक्षस्यसाधिकाएववाचोभ्यसनीयाःआसुप्तेरामृतेःकालंनयेद्वेदांतचिंतयेत्युक्तेरित्याह अमृतत्वमिति ॥ १७४ ॥ आत्मशास्त्रस्यावश्याभ्यसनीयत्वेहेतुतयात्मज्ञानमात्रसाध्यत्वंमोक्षस्याह आनंदात्मेति हियतःस्वयंप्रकाशानंदरूपआत्माअमृतत्वेमोक्षेतदर्थमितियावत् सेतुवत्‌स्थितः यथासेतुमार्गेणैवपारंलभ्यतेतथात्मविज्ञानेनामृतत्वंलभ्यतइत्यर्थः अत्रानंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनेतिश्रुतिमर्थतःसंवादयति सुखमिति यस्यात्मनःस्वरूपभूतंसुखंगृहीत्वाविज्ञायपरमेश्वरोनिर्भयोभवतीतिशेषः ॥ १७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनःप्रत्यक्त्वेनैवज्ञानंप्रणवालंवेनध्यानंवामुमुक्षोरावश्यकमितिविदधतःअराइत्यादेःपरस्तादित्यंतस्यमंत्रस्यार्थमाह वर्ततइतिपंच
 भिः अयमात्मासर्वेषांहृदयाकाशेवर्तते कीदृशः हृदयेहृदयकमलेअंतर्यदाकाशंदहराख्यंतद्रूपः तदेवलक्षयति यस्मिन्निति यस्मिन्हृद
यकमलेनाभिस्थानीयेअरास्तिर्यक्काष्ठानितद्रूपाःशतसहस्रसंख्यानाड्योहितासंज्ञाःसमर्पितास्तत्रहृदयांभोजेअंतर्मध्यावच्छेदेनायंवर्णि
 तःपरःपुमांश्चरति कीदृशः जायमानउपाधिजन्मनाजायमानत्वेनमन्यमानः घटजन्मनिघटाकाशवदितिद्वयोरर्थः ॥१७६ ॥ १७७ ॥
एवमुपदेशेनसाक्षात्काराभावेप्रणवेनचिंतयेदित्याह अहमिति ॥ १७८ ॥ प्रणवालंबनध्यानदीपेनपापरूपांधकारापहारेसाक्षात्कारः

वर्ततेहृदयाकाशेहृदयाकाशरूपभाक् ॥ यस्मिन्हिहृदयांभोजेनाड्यःशतसहस्रशः ॥ रथनाभावरायद्वत्तद्वदे
वसमर्पिताः ॥ १७६ ॥ अंतश्चरतितत्रायंभूतेभूतेपरःपुमान् ॥ जायमानोयथाकाशोघटजन्मनिजायते
॥ १७७॥ अहंब्रह्मेतिचेज्ज्ञातुंनशक्योत्रमनीषिभिः ॥ केनचित्प्रतिबंधेनतदोमित्येवचिंतयेत् ॥ १७८॥ चिं
तयन्नेवमात्मानंपुरुषःपापवर्जितः ॥ उत्पन्नब्रह्मविज्ञानोत्थविद्यायाःपरंव्रजेत् ॥ १७९ ॥ एवंपूर्वेमहात्मानः
स्वशिष्यान्प्रतिसर्वदा ॥ स्वस्तीतिचवदंतस्तेकथयंतिपुनःपुनः ॥ १८० ॥ सामान्येनविशेषाच्चयःसर्ववेत्तिस
र्वदा ॥ जगज्जन्मादिरूपश्चयस्यैषमहिमाभुवि ॥ दिव्येब्रह्मपुरेह्येषत्यात्माव्योम्निप्रतिष्ठितः ॥ १८१ ॥

सफलोभवत्येवेत्याह चिंतयन्निति एवंप्रणवालंबनेन ॥ १७९ ॥ गुरोराशिषापुनःपुनरुपदेशेनचप्रतिबंधापायइतिदर्शयति एवमिति ए
वमुक्तविधयामहात्मानोदयालवःशिष्यान्प्रतिपुनःपुनरुपदिशंति किंकुर्वंतः हेशिष्यायुष्मभ्यंस्वस्तितत्त्वज्ञानप्राप्तौविघ्नाभावोस्त्वित्येवंवदं
तः ॥ १८० ॥ आत्मनःसंक्षेपेणतत्त्वंप्रदर्शयतोर्यःसर्वज्ञइत्यादिमंत्रयोरर्थमाह सामान्येनेतिषड्भिः यःपरमात्मासामान्यरूपेणविशेषरूपे
णचसर्ववेत्तियस्यचमहिमाविभूतिर्जगत्सृष्ट्यादिरूपएषोऽपरोक्षोभुविभूरादिलोकेषुप्रसिद्धएषपरमात्माब्रह्मपुरेयद्दिव्यंव्योमतत्रप्रतिष्ठि
तइति ॥ १८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मपुरत्वादिकंस्फुटयति ब्रह्मणेति यथाजायमानएवघटआकाशेनपूर्यतेतथाशरीरंब्रह्मणापूर्यमाणत्वाद्ब्रह्मपुरमित्युच्यते तद्गतंदिव्यंव्योमतुदहराकाशाख्यंस्वयंप्रकाशात्मरूपंपरंब्रह्मैव तत्रस्वरूपेआत्मनःस्थितिस्तुसभूमाकुत्रप्रतिष्ठितःस्वेमहिम्नीतिवाक्यवदुपचारादेवोच्यत इत्यर्थः ॥ १८२ ॥ अस्याज्ञातस्यज्ञातस्यचस्वभावमाह मनइति सआत्माअज्ञातोयदातदामनःप्रधानःसन्प्राणानांदेहस्येंद्रियाणांचनेतातत्तद्व्यापारेषुप्रवर्त्तकोऽन्नपदोक्तेतस्मिन्जगद्बीजभूतेअव्याकृतेमूलाज्ञानेतादात्म्याध्यासेनतिष्ठति यावन्मोक्षोमोक्षहेतुर्ब्रह्मात्मज्ञानंनभवतीत्यर्थः ॥ १८३ ॥ यदाचएतत्तस्यरहस्यंब्रह्मचर्यादिसंपन्नाजानंतितदाएनमानंदरूपंपश्यंतीत्याह एवमिति ॥ १८४ ॥ अत्र

ब्रह्मणापूर्यतेयस्मात्शरीरंब्रह्मणःपुरं॥ दिव्यंव्योमस्वयंज्योतिरात्मैवपरिकीर्तितः॥ स्वेमहिम्निस्थितस्तत्रस्थितइत्यभिधीयते॥ १८२ ॥ मनःप्रधानःप्राणानांनेतादेहेंद्रियैःसह ॥ अन्नेत्यव्याकृतेतस्मिंस्तिष्ठत्यामोक्षमेवसः॥ १८३ ॥ एवंविज्ञानतोधीराब्रह्मचर्यादिसाधनाः॥ आनंदात्मानमात्मस्थंपरिपश्यंतिकेचन॥ १८४॥ सर्वैःसंसारसंबद्धैर्धर्मैर्नानाविधैरपि॥ विमुक्तंनिर्द्वयंयत्तज्ज्ञातृज्ञेयादिवर्जितं ॥ १८५॥ भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः ॥ क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे ॥ १८६ ॥ कामाऽऽद्योहृदयग्रंथिःसर्वदुःखौघकारकः॥ संशयःस्वात्मनोद्रष्टुःसंसारित्वंपरस्यच॥ ईश्वरत्वंद्विधानृणांतयोस्तादात्म्यसंशयः॥ १८७॥ अनारब्धफलान्यत्रकर्माण्युक्तानिभूरिशः॥ पुण्यपापात्मकान्येषयैरन्यंदेहमाव्रजेत् ॥ १८८ ॥

तपददर्शितंसर्वसंसारधर्मराहित्यंतस्यवर्णयति सर्वैरिति ॥ १८५॥ आत्मज्ञानस्यफलमभिनयंतंमंत्रंपठति भिद्यतेइति तस्मिन्परमात्मनिपरावरेपरंकारणमवरंकार्यंतदुभयरूपेसर्वात्मकइतियावत् ॥ १८६ ॥ तत्रहृदयग्रंथ्यादिपदानामर्थमाह कामाद्यइतित्रिभिः कामानामाद्यःकारणभूतोयोन्योन्याध्यासोहृदयेबुद्धावभिव्यक्तःसहृदयग्रंथिरुच्यतेइत्यर्थः संशयस्तुसोत्रनिवर्त्यतयाविवक्षितोयःस्वात्मनस्त्वंपदार्थस्यसंसारित्वमल्पज्ञत्वादिकंपरस्यतत्पदार्थस्यईश्वरत्वंसार्वज्ञ्यादिरूपंचद्रष्टातयोस्तत्त्वंपदार्थयोस्तादात्म्यसंश्रयऐक्यगोचरोऽसंभावनारूपःसचद्विधापदार्थगतयोर्विरुद्धधर्म्मयोर्निमित्तयोर्भेदादित्यर्थः ॥ १८७ ॥ कर्माणित्वत्रसंचितागामिरूपाणितथाविवक्षितानिप्रारब्धफलानांभोगैकनाश्यत्वादित्याह अनारब्धेति यैःसंचितादिरूपैः ॥ १८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनीश्वरत्वादिति सचयदातत्पदार्थरूपंसखायं कीदृशमनीश्वरत्वादपरंयतोयमनीश्वरोजातस्तावन्मात्रेणभिन्नमानंदरूपतयाप्रेमास्पदंचा
त्मत्वेनपश्येत्तदातदीयंमहिमानमद्वयत्वलक्षणंप्राप्नुयादितिद्वयोरर्थः ॥२०१॥२०२॥ एतदेवस्फुटयतोयदेत्यादेस्तृतीयमंत्रस्यार्थंवर्णयति
त्वंपदार्थइति यदात्वंपदार्थरूपोजीवस्तत्पदार्थंस्वप्रभंतप्तकांचनवद्देदीप्यमानमात्मनऐक्येनपश्येत्तदाविद्वान्सन्नामरूपरहितंतद्ब्रह्मवंव्रजेदि
त्यर्थः ॥२०३॥ चतुर्थार्थमाह प्राणोपाधिरितिचतुर्भिः अयंदेवःपरमात्माप्राणोपाधिकहिरण्यगर्भभावद्वारासर्वेषुभूतेषुव्यष्टिरूपेष्वनुगतः
सन् विभाति कीदृशः ईशानीशादिभेदपंचकविशिष्टरूपेणकल्पितः तंशोधितमात्मतयायदाजानातिश्रुतौनृपदोक्तःपुमान्तदाअतिवादीभ

अनीश्वरत्वादपरमात्मानंतत्पदाभिधम् ॥ आनंदवारिधिंपश्येत्परप्रेमास्पदंपरं ॥ २०१ ॥ यदातदासमाप्नो
तिमहिमानममुष्यसः ॥ भेदशून्योमुनाभूत्वासर्वदुःखविवर्जितः ॥ २०२ ॥ त्वंपदार्थोयदाजीवःस्वप्रभंतत्प
दात्मकं ॥ तादात्म्येनात्मनःपश्येत्तदाविद्वानयंव्रजेत् ॥ नामरूपविनिर्मुक्तंनामरूपविवर्जितः ॥ २०३ ॥ प्रा
णोपाधिरयंदेवःसर्वभूतव्यवस्थितः ॥ ईशानीशादिभेदेनकल्पितोयोविभातिहि ॥ २०४ ॥ एतमात्मतयाजा
नन्नतिवादीपुमान्भवेत् ॥ अतिवादित्वमस्यैतदुक्तंवेदार्थवादिभिः ॥ २०५ ॥ बालवत्सर्वदाविद्वान्क्रीडत्या
त्मनिनिर्द्वये ॥ युववद्रतिमागच्छेत्तस्मिन्नेवनिरंजने ॥ २०६ ॥ क्रियाचात्मनिसर्वास्यादस्ययाज्ञिकवत्स
दा ॥ अतिवादीब्रह्मविदांवरिष्ठःपरिकीर्तितः ॥ २०७ ॥

वति अस्यविदुषःअतिवादित्वंनिरतिशयात्मनिष्ठत्वमेतद्वक्ष्यमाणरूपंबोध्यमितिद्वयोरर्थः अत्रभाष्यकारैर्यद्यप्यतिवादीसनभवतिद्वितीयाभावादितियोजितंतथाप्यैतैरेषतुवाअतिवदतियःसत्येनातिवदतीतिच्छंदोगश्रुत्यनुसारात्नापुमानतिवादीभवतीतियोजनयापितस्यैवप्रमेयस्यसंग्रहादविरोधः ॥ २०४ ॥ २०५ ॥ तस्याद्वयत्वपर्यवसाय्यतिवादित्वंमंत्रोत्तरार्द्धानुसारिप्रकटयति बालवदिति तस्यबालवद्याक्रीडासाआत्मन्येवयुवायथायुवत्यांरतिंगच्छेत्तथास्यरतिरप्यात्मन्येव तथायाज्ञिकोयज्ञकर्त्तातस्येवनानाविधाःक्रियाअप्यस्यविदुषआत्मन्येव एवंसर्वदात्मतत्त्वानुसंधातायमतिवादीब्रह्मविदांमध्येवरिष्ठःकथितइतिद्वयोरर्थः ॥ २०६ ॥ २०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्येनेत्यादेर्विद्यासाधनसंपाहकस्यार्थमाह सत्यमिति सत्यमनृतत्यागः तपःसमनस्केंद्रियाणामैकाग्र्यं ब्रह्मचर्यमुपस्थसंयमः एतैस्त्रिभिः परिष्कृतेनात्मज्ञानेनपदार्थशोधनरूपेणायंमहावाक्यार्थभूतआत्मालभ्यः यस्यापारोक्ष्येक्रोधादिदोषपरिहारेणसंन्यासोपिप्रयोजकइत्यर्थः ॥ २०८ ॥ तेष्वपिसत्यस्यप्राधान्यंवदतःषष्ठस्यार्थमाह सत्येति यतःसत्यवाक्यरूपस्यसत्यस्यब्रह्मज्ञानहेतुतयासर्वोत्कर्षःसिद्धस्ततःसत्यादैहिकादिसुखलाभोनचित्रमित्यर्थः ॥ २०९ ॥ वृहच्चेत्यादिमंत्रत्रयेणात्मनोदुर्ज्ञेयताप्रतिपाद्यतेइतिदर्शयंस्तदर्थमाह सत्यंयदितिषड्भिः यत्सत्यरूपंब्रह्मविज्ञानान्महावाक्यार्थगोचराज्जायतेप्रादुर्भवतितद्ब्रह्मबृहतआकाशादेरपिबृहत्तदाधारत्वात् सूक्ष्मादण्वादेरपिसू

सत्यंतपोब्रह्मचर्यमात्मज्ञानस्यकारणं ॥ आत्मज्ञानेनलभ्योयंसर्वैरेवशरीरिभिः ॥ यंपश्यंतीहयतयःक्षीणदोषाःस्वचेतसि ॥ २०८ ॥ सत्यवाक्यंयतोहेतुर्ब्रह्मज्ञानस्यजायते ॥ ततःसत्यंसुखस्यस्यादैहिकस्येहकारणं ॥ स्वर्गस्यापितथाब्रह्मलोकस्यापिनसंशयः ॥ २०९ ॥ सत्यंयद्ब्रह्मविज्ञानाज्जायतेबाधवर्जितं ॥ बृहतोपिबृहत्तद्धिसूक्ष्मात्सूक्ष्मतमंतथा ॥ २१० ॥ स्वप्रकाशंचमनसाशक्यंचिंतयितुंनच ॥ दूराद्दूरतरंयस्मादंतिकादपिचांतिकं ॥ २११ ॥ भातंचनविभात्येतदात्मरूपेणकर्हिचित् ॥ एकादशेंद्रियगणोनप्रकाशयतीहयत् ॥ २१२ ॥ सर्वबुद्धिस्थितंसर्ववस्तुजातप्रकाशकं ॥ उपायैर्विविधैश्चापिनयद्भातिकदाचन ॥ एकंविहायविज्ञानंब्रह्मणःस्वात्मरूपतः ॥ २१३ ॥ यत्रप्राणःस्थितोनित्यंसर्वेंद्रियविधारकः ॥ चेतसासहितोनैषसुगमोदेहधारिणां ॥ २१४ ॥

क्ष्मंतदांतरत्वात् ॥ २१० ॥ स्वप्रकाशमिति तथास्वप्रकाशत्वेनलोकविलक्षणत्वाद्दिव्यंमनसाचिंतयितुंविषयीकर्त्तुमशक्यंच पराङ्मुखानांदूराद्दूरं समाहितानामतिसन्निहितम् ॥ २११ ॥ भातंचेति चिद्रूपेणसदाभातंभासमानमपिप्रत्यग्रूपेणलोकेनभातिचक्षुरादींद्रियाणामगोचरत्वादित्यर्थः ॥ २१२ ॥ सर्वेति सर्वेषांबुद्धिगुहासुसन्निहितंसर्वभासकंचतद्विदुषःप्रतीतिशेषः यत्तत्त्वंब्रह्मणस्तत्पदार्थस्यस्वात्मतादात्म्येनयज्ज्ञानंश्रुतिगतज्ञानप्रसादशब्दवाच्यमेतद्विहायेतरैरुपायैर्नभातिनाविर्भवतीत्यर्थः ॥ २१३ ॥ यत्रेति सर्वेंद्रियाणामध्यक्षःप्राणःसहचेतसायत्रसन्निधिमात्रेणप्रेरकेअधीनोवर्ततेसआत्मादेहिनांसुगमोनभवतीत्यर्थः ॥ २१४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकएवतद्दर्शनोपायइत्याह शास्त्रेति दोषशून्यतःरागादिदोषशून्येनशास्त्रंमहावाक्यंतदर्थविज्ञानजसंस्कारवताचचेतसामननादिसंपन्नः पुमानेतदवलोकयेत्तदीयचेतसितत्प्रादुर्भवतीतियावत् ॥ २१५॥ यंयमित्यादेस्तृतीयखंडांत्यमंत्रस्यार्थमाह शुद्धचेताइतिचतुर्भिः यःशुद्धचेताःपुमानात्मानमवलोकयेत्सईशभावाविर्भावेणेशवत्सर्वविश्वसृष्ट्यादौशक्तोभवेदित्यर्थः ॥ २१६॥ कर्मणामिति यदायंविद्वान्सकलकर्मणांफलप्रदत्वंप्राप्तस्तदाआशिषांकामितपदार्थानांदाताभवतीतिकिमुवाच्यं यतोस्यविदुषआज्ञयैवैतेसकलजनसंबंधिनोभोगावर्तंतेतथाप्राणेंद्रियादयःसर्वेप्यस्याज्ञयावर्त्ततेइत्यर्थः ॥ २१७ ॥ शापेति एषब्रह्मवित्शापादौक्षमोभवति अस्यविदुषःअवनात्सेवनान्मा

॥१६॥ शास्त्रसंस्कारसहितचेतसादोषशून्यतः॥ मननध्यानसंपन्नःकथंचिदवलोकयेत्॥ २१५॥ शुद्धचेताःपुमानेषआत्मानमवलोकयेत्॥ ईशवत्सकलंविश्वंकर्त्तुंहंतुंप्रभुर्भवेत्॥ २१६॥ कर्मणांफलदाताचकिमुतायमिहाशिषां॥ वर्तंतेआज्ञयास्यैतेभोगाःप्राणादयोपिच॥ २१७॥ शापानुग्रहयोरेवंसमर्थोब्रह्मवित्सदा॥ अस्यावनात्सुखंयांतिमानवाःपुण्यकारिणः॥ अवज्ञयातथादुःखंप्राप्नुवंत्यपिपापिनः॥ २१८॥ भूतिकामस्ततस्त्वेनमर्चयेत्सर्वदापुमान्॥ नावज्ञांमनसाप्यस्यकुर्यात्स्वप्नेपिबुद्धिमान्॥ २१९॥ यएतंब्रह्मविद्वांसंगतकामाउपासते॥ तेगच्छंतिपरंब्रह्मसर्वदुःखविवर्जितम्॥ २२०॥ यस्मादयंपरंब्रह्मवेदब्राह्मणसत्तमः॥ उपास्तेचात्रविधिवत्सर्वदासुखरूपकं॥ तज्ज्ञानात्तेपिविद्वांसःस्फुटंतेनसमाःसदा॥ २२१॥

नवाःपुण्यशालिनःसंतःसुखंयांति अवज्ञयाचपापिनःसंतोदुःखमित्यर्थः॥२१८॥फलितमाह भूतिकामइति भूतिमैश्वर्यमिच्छन् एनंब्रह्मविदं ॥ २१९॥ तृतीयमुंडकद्वितीयखंडाद्यस्यसवेदेत्यादेर्मंत्रस्यनिष्कामविद्वदाराधकानांप्रशंसापरस्यार्थमाह यएतमितिद्वाभ्यां येविवेकिनएतंब्रह्मविदंनिष्कामाःसंतोभजंतेतेब्रह्मैवभवंति॥२२०॥तत्रोपपत्तिमाह यस्मादिति यस्मादयंब्रह्मविदत्रदेहेपिस्थितःपरंब्रह्मसुखरूपंवेदसाक्षादवगच्छतिउपास्तेचतन्निष्ठतयावतिष्ठतेचततोहेतोस्तेब्रह्मविद्भक्तास्तज्ज्ञानात्तस्यब्रह्मीभूतस्यविज्ञानादाराधनाद्विद्वांसःसंतस्तेनाराधितेनब्रह्मविदासमाभवंतीतिस्फुटंप्रकृतश्रुतावितिशेषः तत्रनृबीजपदोक्तस्यगर्भप्रवेशस्याभावरूपातिक्रमोक्तेरितिभावः ॥ २२१ ॥ ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामनिंदापूर्वकंनिष्कामस्यमुक्त्यवश्यंभावप्रतिपादकस्यद्वितीयस्यार्थमाह कामानितिद्वाभ्यां यःकामान्विषयान्कामयतेरमणीयतया मन्यतेसनानादेहग्रहणेनदुःखसंततियात्यतःकामोदुःखनिदानमित्यर्थः ॥ २२२ ॥ निष्कामानामिति निर्गताःकामायेभ्यस्तेतथातेषां तत्रहेतुःस्वात्मरूपेणलब्धकामत्वरूपंकृतार्थत्वंतत्रचब्रह्मज्ञानमिति एतेषांलोकद्वयवर्तिदुःखंनभवतिब्रह्मभावाप्तेरितिभावः ॥ २२२ ॥ आत्मलाभस्यप्रकृष्टंसाधनमवधारयतोनायमित्यादेरर्थमाह अध्यापनादिति अध्यापनंप्रवचनपदोक्तंपाठनं अध्ययनंश्रुतपदोक्तंपठनं मेधाधारणावतीधीः एतैरुपायैःसद्गुरुनिरपेक्षैर्नलभ्योयमात्मा ॥ २२४ ॥ गुरुणेति एषविद्ययाब्रह्मभूतोगुरुरेवंयंशिष्यमनुगृह्णातितंशि

कामान्यःकामयेतासौकामैस्तैस्तत्रसर्वशः॥ शरीरंपरिगृह्णातिभूरिदुःखप्रदंसदा॥ कामस्ततोतिदुःखानांकारणंपरिकीर्तितः ॥ २२२॥ निष्कामानांकृतार्थानांभवेद्दुःखंनकिंचन ॥ ब्रह्मज्ञानवतांपुंसामिहवात्रपरत्रवा ॥ २२३ ॥ अध्यापनादध्ययनान्मेधातोपिनकर्हिचित् ॥ आत्मायंलभ्यतेकिंचिद्गुरुवाक्याद्धिलभ्यते ॥२२४॥ गुरुणानुगृहीतश्चेच्छिष्योयंब्रह्मरूपिणा॥ ब्रह्माप्यनुग्रहंतस्यकुरुतेस्वात्मदर्शनात् ॥२२५॥ बलहीनेनपुंसायमात्मालभ्योनकर्हिचित्॥ मनःकर्मेंद्रियाणांतद्बलंधैर्याभिधंसदा॥ येनपश्येत्पुमान्यस्यनाशान्नाशंव्रजेदयं॥२२६॥ प्रमादादाश्रमैस्तद्वद्वर्जितात्तपसोपिच॥ आत्मायंलभ्यतेनैवलभ्योयोगुरुवक्त्रतः॥ कदाचिद्धैर्यविभ्रंशःप्रमादइतिगीयते॥ २२७॥ अप्रमादयुताद्धैर्यात्तपसःस्वाश्रमात्ततः॥ जायतेब्रह्मविज्ञानंतस्मादात्मात्रलभ्यते॥ २२८ ॥

ष्यंप्रतिस्वस्वरूपप्रादुर्भावेणब्रह्मपरमेश्वरोप्यनुगृह्णातीत्यर्थः ॥ २२५ ॥ तत्रधैर्यादीन्यपिसहकारीणीतिप्रतिपादयतोधामांतमंत्रस्यार्थमाह बलेतित्रिभिः बलंकामादिशत्रुभिरनभिभाव्यतालक्षणंतद्रहितेनात्मालब्धुंनशक्यः बलस्वरूपमेवस्फुटयति मनइति विवेकप्रवणानांमनःप्रभृतीनांयद्धैर्यमप्रकंप्यत्वंतद्बलमित्युच्यते येनधैर्येणयुक्तःपुमान्पश्येदात्मदर्शनक्षमोभवति यस्यधैर्यस्यनाशात्पुमान्लोकेपिनष्टइत्याख्यायते ॥ २२६ ॥ प्रमादादिति तथाप्रमादआश्रमरहितंपाखंडरूपंतपश्चएतयोर्ब्रह्मबोधंप्रतिप्रतिबंधकत्वंबोध्यं तत्रप्रमादोनामविषयसन्निधानेधैर्यहानमित्यर्थः ॥ २२७ ॥ फलितमाह अप्रमादेति भ्रंशरहितंधैर्यमाश्रमधर्मसहकृतंतपश्चएतद्द्वयंब्रह्मविद्योपकारकमित्यर्थः ॥ २२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्राप्येत्यादिमंत्रचतुष्टयेनजीवन्मुक्त्यादिविद्याफलव्यवस्थानिरूप्यतइतिदर्शयंस्तदर्थमाह आनंदात्मानमित्यष्टभिः येयेपूर्वेमुनयःप्र
त्यग्रूपमानंदलक्षणमात्मानंप्राप्यनिर्वृताआनंदमग्नाअभवंस्तेतेज्ञानसमकालंब्रह्मप्राप्ताः यद्ब्रह्मप्राप्यसंसारेनपुनःपततीत्यर्थः ॥ २२९ ॥
अत्रेति येषांयतीनांब्रह्मलोकेच्छादिरूपप्रतिबंधादिहजन्मनिब्रह्मसाक्षात्कारोनभवतितेषामपिब्रह्मलोकंगत्वातद्ब्रह्मविज्ञानंभवेदेवेत्यर्थः
॥ २३० ॥ तत्रापियादृशानांविद्ययाब्रह्मभावोयत्रचसमयेतदुभयंदर्शयति वेदांतेति वेदांतामहावाक्यानितदर्थनिर्णयशालिनःशुद्धांतः
करणाश्चयतयोब्रह्मलोकंप्राप्यब्रह्मणोहिरण्यगर्भस्यमरणकालेपरांतपदोक्तेहिरण्यगर्भवद्ब्रह्मभावंयांतीत्यर्थः ॥ २३१ ॥ मोक्षप्रकारमा

आनन्दात्मानमात्मस्थमेनंसंप्राप्यनिर्वृताः॥ मुनयोब्रह्मतज्जग्मुर्यतोनावर्त्ततेगतः॥ २२९॥ अत्रचेद्ब्रह्मवि
ज्ञानंप्रतिबंधान्नजायते॥ यतीनांपरहंसानांब्रह्मलोकेतुतद्भवेत् ॥ २३० ॥ वेदांतज्ञानसंपन्नायतयःशुद्ध
मानसाः॥ ब्रह्मवद्ब्रह्ममरणेयांतिब्रह्मसनातनं॥ २३१॥ ब्रह्मलोकेथवाप्यत्रयदाविद्वान्प्रमुच्यते॥ प्राणाद्या
नामरहिताःकलाःपंचदशास्ययाः॥२३२॥ स्वकारणंप्रयांत्येतादेवावन्ह्यादयोपिच॥ आत्माविज्ञानरूपोयं
बुद्ध्युपाधिःपरात्मनि॥ २३३॥ एवंसर्वमिदंगच्छेदेकतांविदुषःसदा॥ कार्यंसकारणंसोयमेकएवावशिष्य
ते॥ २३४॥ यथानद्योत्रसर्वासुदिक्षुसंतिसहस्रशः॥ समुद्रंप्राप्यजहतिनामरूपेनिजेसदा॥ नामरूपेविहा
यैवंविद्वान्ब्रह्मणिचाव्रजेत्॥ २३५॥

ह ब्रह्मेत्यादिना विदुषोनामरहिताःप्राणाद्याःपंचदशकलाः प्राणाःश्रद्धाखवादिभूतपंचकंचेंद्रियंमनः अन्नंवीर्यंतपोमंत्राःकर्मलोकाश्च
ताःकलाइतिविद्यारण्यैःसंगृहीतनामिकास्तायथायथंकारणानिप्रतिगच्छंतितथाध्यात्मवागादीनांदेवावन्ह्यादयःस्वंस्वमधिदैवरूपंगच्छं
ति यश्चबुद्ध्युपाधिर्विज्ञानमयाख्योजीवःसपरमात्मनिलीयते एवंकार्यकारणोपाधिविलयेसविद्वानद्वैतरूपेणतिष्ठतीतित्रयाणामर्थः ॥१७॥
॥ २३२ ॥ २३३ ॥ २३४ ॥ तत्रविज्ञानमयस्यलयेदृष्टांतउच्यते यथेति जहतित्यजंति स्फुटमन्यत् ॥ २३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडश्यांनामाख्यकलायांविशेषमाह वामेति यथावामदेवस्यमुक्तत्वेपितदीयंनामलोकानांवचसिवाग्व्यवहारेस्थितत्वादविनष्टमिवदृश्य तेऽतोलोकबुद्ध्यनुसारात्श्रुत्यापंचदशकलानामेवलयउक्तइत्यर्थः ॥ २३६ ॥ परब्रह्मविद्यानंतरन्तुमोक्षेप्रतिबंधःकोपिनास्तीत्यादिदर्श यतःसयोहेत्यादेरर्थमाह ब्रह्मविद्वानित्यादिना यथाप्रोक्तविधयाविदुषोब्रह्मभावउक्तस्तथातद्विज्ञानमनुसरतामन्येषामपिसएवभवती त्यर्थः ॥ २३७ ॥ ब्रह्मयइति तथाविदुषोवंशेविद्यामयेजन्ममयेवावर्तमानाज्ञाननिष्ठाभवंतीत्यर्थः ॥ २३८ ॥ पापमिति अयंब्रह्मवित् बोधप्रभावात्सकारणंपापंतीर्त्वाकामादिदोषहीनःसन्नैक्येनब्रह्मलभतेइत्यर्थः ॥ २३९ ॥ उक्तविद्योपदेशाधिकारिणमवधारयति नैतदि

वामदेवादिवन्नामसर्वलोकवचःस्थितं ॥ विलीनमपिमुक्तस्यलयशून्यमिवास्तितत् ॥ २३६॥ ब्रह्मविद्वा न्यथाब्रह्मज्ञानाद्ब्रह्मभवेदिह॥ एवमन्योपितज्ज्ञानाद्ब्रह्मैवेहप्रजायते ॥ २३७॥ ब्रह्मयोवेदपुरुषस्तस्यशि ष्योनकर्हिचित्॥ अब्रह्मविद्भवेत्कश्चित्सुताद्योप्यपरोपिवा॥ २३८॥ पापंतरेदयंसर्वंसाज्ञानंब्रह्मबोधतः ॥ सर्वशोकविनिर्मुक्तःकामादिपरिवर्जितः॥ आनंदात्मानमम्रृतंतादात्म्यादाप्नुयादयं ॥ २३९॥ नैतद्ब्रह्मात्म विज्ञानंवक्तव्यंयस्यकस्यचित् ॥ किंतुशांत्यादियुक्तायतस्मैवाच्यंमहात्मने ॥ मंत्रार्थोप्यत्रमुनिभिर्लभ्यते त्येवमेवहि ॥ २४० ॥ श्रोत्रियायेक्रियावंतोवन्हिशुश्रूषणेरताः ॥ चीर्णव्रतामहात्मानोब्रह्मचर्याश्रमेहिये ॥ २४१ ॥शांतिदांत्यादिसंपन्नास्तेभ्यएववदेदिमां॥ ब्रह्मविद्यांसदासद्भिःसेव्यमानांसुदुर्लभां ॥२४२॥ए तांपुरामुनिःप्राहशौनकायमहात्मने॥ अंगिराब्रह्मणःप्राप्तांयांत्वंमांपरिपृष्टवान्॥ २४३॥

ति यस्यकस्यचिदपरीक्षितस्यपुरतएतद्विज्ञानंनवक्तव्यंकिंतुशांत्यादिगुणशालिनेएववक्तव्यं यतइमंनियमंमंत्रोपिक्रियावंतइत्यादिर्वदती त्यर्थः ॥ २४० ॥ मंत्रार्थमेवदर्शयति श्रोत्रियाइतिद्वाभ्यां श्रोत्रियावेदविदः क्रियावंतोयथोक्तकर्मानुष्ठानशुद्धचित्ताः वन्हेरेकर्षिनाम कस्याराधकाः ब्रह्मचर्याश्रमेचीर्णव्रताःचीर्णकृतंशिरस्यग्निधारणारूपंव्रतंयैस्तेतथायएतादृशाःशांत्यादिसंपन्नामहात्मानएतेभ्यएवप्रकृत शाखोक्तांविद्यांवदेदितिद्वयोरर्थः ॥ २४१ ॥ २४२ ॥ प्रकृतकथांनिगमयति एतामिति ब्रह्मणःप्रजापतेःप्राप्तांपरंपरयालब्धां ॥२४३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 उत्तराकांक्षांजनयति पिप्पलादइति पिप्पलादनामामुनिःषड्भिःप्रश्नैर्विशदीकृतामिमामथर्वणोक्तांविद्यामार्त्तेभ्यःसंसाराडुद्विग्नेभ्यःसुके
शादिनामकेभ्यःषड्भ्यःशिष्येभ्यउक्तवान् ॥ २४४ ॥ उपसंहरति इतितेइति ॥ २४५ ॥ उपचारैःषोडशभिःपूजनयापीहयःसमुप

पिप्पलादइमांविद्यांषट्प्रश्नामुक्तवान्मुनिः॥ मुनिभ्यःषड्भ्यआर्तेभ्यःसुकेशादिभ्यईश्वरः ॥ २४४ ॥ इतिते
सर्वमाख्यातंयत्पृष्टोहमिहत्वया॥ ब्रह्मज्ञानमथर्वोक्तंकिमन्यच्छ्रोतुमिच्छसि ॥ २४५ ॥ इतिश्रीमत्परमहंस
परिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेमुंडकसारार्थ
प्रकाशेंऽगिरःशौनकसंवादोनामषोडशोऽध्यायःसमाप्तः॥ १६॥ ॥ ७ ॥ ॥ ७ ॥

चरितः विगतोपचारमाविष्कुरुतेस्वंतंशरण्यमवलंबे ॥ १ ॥ इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनूजरामकृष्णस्यश्री
विश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतावात्मपुराणटीकायांसत्प्रसवाख्यायांषोडशोध्यायःसमाप्तः ॥ १६ ॥ ॥ ७ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे षोडशोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे सप्तदशाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ भिन्दन्सप्तदशोतीस्तनुतेतारेऽनुषङ्गवान्वर्णे ॥ देवःससाप्तदश्यंधृत्वानःसप्तदशमलङ्कुर्यात् ॥ १ ॥ गीतिरस्याःश्रीराम चंद्रपक्षेऽयमर्थः योदेवःसप्ततालान्तथादशरावणशिरांसिचभिन्दन्सन्ऊतीर्लीलास्तनुतेविस्तारयति कीदृशः तारेशुद्धेवर्णेब्राह्मणजाता वितियावत् अनुषङ्गवान्स्नेहवान्सदेवःससाप्तदश्यंसाप्तदश्येनओश्रावयेत्यादिमंत्राक्षरसंख्यारूपेणसहितंयज्ञंधृत्वापोषयित्वावर्त्तमानोनो स्माकमाराधकानांसप्तदशंसूक्ष्मंशरीरावयवानामिंद्रियदशकप्राणपंचकमनोबुद्धिरूपाणांसप्तदशसंख्यापूरकंबुद्धितत्त्वंप्रादुर्भावेणभूषये दिति तत्रयज्ञस्यसप्तदशावयवमंत्रसाध्यत्वं चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदत्विति भारतेप्रोक्तं अस्यव्याख्याचभागवतव्याख्यायांचतुर्थस्कंधेसप्तमाध्यायेद्रष्टव्येति श्रीकृष्णविग्रहपक्षे सप्तस्वरान्वंशीनादगतान्भिन्दन्व्यंजयन्दशा याःकौमाराद्यवस्थायाःसंबंधिनीर्लीलास्तनुते कीदृशः तारेअत्युच्चेवर्णेगोपिकाकृतस्तुतिरूपगीतावनुषंगवान्स्निग्धः तदेवध्रुवमुन्निन्ये तस्यैमानंचबद्धदा दितिरासपंचाध्यायुक्तेःवर्णोद्विजादौशुक्लादौस्तुताविति विश्वः सदेवःकृष्णःशशेनाप्तमंकितंदश्यंचकोरैरास्वादनीयंच

श्रीगणेशायनमः श्रुत्वायर्वोक्तविज्ञानंशिष्योगुरुमभाषत पिप्पलादेनसंप्रोक्तंश्रोतुकामोगुरोर्मुखात् ॥ १ ॥

यत्सुधाकरीयमम्रतंतत्ससाप्तदश्यं यमकश्लेषचित्रेषुशसयोर्बवयोर्नभिदित्यभियुक्तवचनात् तद्वंशीरवेधृत्वानोधियमलंकुर्यादितिपूर्ववत् अत्रदश्यमितिदंशदशनेइतिनिर्देशेनक्वचिदकूङित्यपिनलोपसूचनात्साधु तथाहिदर्शितममरटीकायांभानुजीदीक्षितेन शंभुपक्षे नृत्तका लिकविग्रहेणसप्तलोकान्भिन्दन्क्षोभयन्दशसंख्याऊतीर्लीलारूपकाख्यनाटकभेदात्मिकास्तनुते जगद्रक्षायैत्वंनटसिननुवामैवविभुते त्यभियुक्तोक्तेः नाटकंसप्रकरणंभाणःप्रहसनंडिमः व्यायोगसमवकारौवीथ्यंकेहाम्रगाइत्येतन्नामकानांनाटकभेदानामभिनेतानीलकंठ इत्युक्तंदशरूपके तारेशुद्धेवर्णेशुक्लरूपेस्निग्धःसदेवोमहादेवःसाप्तदश्येनावयवसप्तदशकेनसहितंप्रजापतिंनृत्तक्षोभेनोद्विग्नमपिधृत्वाधृति मंतंकृत्वानोमतिमलंकुर्यादितिपूर्ववत् प्रमेयपक्षे सप्तदशात्मकंप्रजापतिंभिदन्संवत्सरादिरूपेणाग्नीषोमलक्षणेनविभजन्सन्ऊतीःसृष्ट्या दिलीलास्तनुते ताराख्येवर्णेप्रणवेअनुषंगवान्तादात्म्यवान् सनोजिज्ञासूनांदेवःपरमात्मासाप्तदश्यंवक्ष्यमाणषोडशकलायोजनयासप्त दशसंख्यांधृत्वासप्तदशमध्यायंप्रादुर्भावेणभूषयेदिति ॥ १ ॥ अथमुण्डकाख्यमंत्रोपनिषदोविवरणभूतब्राह्मणरूपायतःप्रश्नोपनिषत्ततः क्रमप्राप्तंप्रश्नार्थंदिदर्शयिषुस्तत्रमेधाविनःशिष्यस्यजिज्ञासांसानुवादांदर्शयति श्रुत्वेतिषोडशभिः स्पष्टम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवन्निति यदैतरेयेणोक्तमेतन्मह्ममाख्यातमितिपंचदशेनसंबंधः वर्तनेनप्रकाशनेन॥२॥ द्वितीयतृतीययोर्वृत्तमाह तथेति संबंधःपूर्ववद
 येपिबोध्यः यत्रकौषीतक्युक्ते ॥२॥ चतुर्थवृत्तमाह आदित्यस्येति यत्रादित्यविज्ञानें एतत्कृतेअश्विनोरर्थे ॥३॥ पंचमादित्रयवृत्तमाह
याज्ञवल्क्येतिद्वाभ्यां यत्रादित्यविज्ञानेएव यथाउदयंगच्छन्भानुर्मंदेहाख्यान्दैत्यांस्तिरस्करोतितथेर्ष्यादिदोषेणदैत्यायमानान्मुनीन्या
 ज्ञवल्क्योभानुस्तिरस्कृत्यजित्वाविदग्धाख्यशाकल्यरूपंतमोव्यनाशयत् यथाचभानुःस्वकीयैर्गोभिःकिरणैःस्वस्यस्वरूपानुगतंब्रह्मदर्श

भगवन्नैतरेयेणयदुक्तंब्रह्मवेदिना ॥ प्रजासंवादसहितंवैराग्यज्ञानकारणं॥ वामदेवानुभूतिश्चवर्तनेनसम
न्वितं॥ २॥ तथाकौपीतकिप्रोक्तंयत्रशक्रप्रतर्दनौ ॥ अजातशत्रुबालाकीगुरुशिष्यौमहाधियौ ॥ ३ ॥ आ
दित्यस्यापिविज्ञानंयत्रवंशस्त्वयेरितः॥ अश्विनोर्यत्रसंवादोमंत्रद्रष्टामहात्मना ॥ दध्यङ्ङाथर्वणोयत्रक्लेश
मेतत्कृतेस्वगात् ४ याज्ञवल्क्यादिधोभानुर्मुनिर्दैत्याननेकशः ॥ तिरस्कुर्वन्विदग्धाख्यंतमोयत्रव्यपा
करोत् ॥ ५ जनकस्यचमैत्रेय्याः स्वगोभिर्ब्रह्मसंततं यदर्शयन्म हातेजाःस्वस्यास्तमयतःपुरा॥ ६॥ श्वेता
श्वतरनामापियतीन्द्रानभ्यभाषत कठस्वहिजशाईत्तत्तित्तिरिस्तथा हामनाः॥ ७॥ यमोयत्रगुरुःशिष्योनचि
केताश्चधीधनः वरुणश्चभृगुस्तद्वदेनानुभवकीर्तनम् सर्वसाधन संघातेभूयान्संन्यासइत्यपि॥ ८॥ जाबा
लादेश्चवि ज्ञानं संन्यासादि समाश्रयं संवर्त्तादेस्चकरणं संन्यासस्य महात्मभिः॥ ९॥

यतिस्मारयति यदादित्यगतंतेजइत्यादिगीतास्मृतेः तथायाज्ञवल्क्योपिस्वस्यास्तमयात्संन्यासरूपात्पुरास्वगोभिर्वाग्भिर्जनकस्यमैत्रेय्या
श्चहितायस्वरूपभूतंब्रह्मसंततमदर्शयदितिद्वयोरर्थः ॥ ५ ॥ ६ ॥ अष्टमादित्रयवृत्तमाह श्वेताश्वेतिद्वाभ्यां अभ्यभाषतयदितिशेषः क
ठतित्तिरीचयदभ्यभाषेतामेतदुक्तमितिसंबंधःपूर्ववत् ॥ ७ ॥ यमइति यत्रकठोक्तेयमनचिकेतसौगुरुशिष्यौयत्रचतित्तिरिप्रोक्तेवरुणभृगूत ॥ १ ॥
थावेनाख्यगंधर्वानुभवःसंन्यासस्याधिक्यंचोक्तमित्यर्थः ॥ ८ ॥ एकादशवृत्तमाह जाबालादेरितिद्वाभ्यां समाश्रयपदंगोचरार्थकम् क
रणमनुष्ठानं ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वैराग्यमिति तस्यसंन्यासस्य तस्यवैराग्यस्य अत्रसंन्यासे तथाब्रह्मज्ञानांमहान्प्रशस्तोब्रह्मचर्यादिरूपआचारश्चोक्तइत्यर्थः ॥ १० ॥ सामेति यैरेतैर्द्वादशादिभिस्त्रिभिरध्यायैःसाम्नश्छांदोग्यस्ययत्षष्ठाद्यध्यायत्रयंतस्यार्थउक्तइतिशेषः यत्रैतेमुनिसत्तमाःक्रमेणगुरवः शिष्याश्च तानेवाह आरुणिरित्यादिना द्वादशेआरुणिश्वेतकेतूगुरुशिष्यौ त्रयोदशेसनत्कुमारनारदौ चतुर्दशेब्रह्मागुरुरिंद्रविरोचनौचशिष्यौ ॥ ११ ॥ १२ ॥ पंचदशवृत्तमाह इंद्रस्येति ॥ १३ ॥ अनंतरवृत्तमाह अथर्वणइति यस्याथर्वणःशौनकपर्यंताशिष्यपरंपरावेदेउक्तासाक्षान्निरूपितातदुत्तरभाविनीतुसोपलक्षितेत्यर्थः ॥ १४ ॥ मह्यमिति हेगुरोपुनःपुनःपृष्टेनभगवताएतद्वर्णितंमह्यमुक्तं इदानींत्विदं

वैराग्यंतस्यकालश्चयोगादिस्तस्यकारणं॥ विरक्तोत्राधिकारीचवेषोदंडादिधारणं ॥ आचारोब्रह्मचर्यादिर्ब्रह्मज्ञानांमहांस्तथा॥ १० ॥ सामाध्यायत्रयस्यार्थोयैरेतैर्मुनिसत्तमाः॥ गुरवोपिचशिष्याश्चत्वारुणिःश्वेतकेतुकः॥ ११ ॥ सनत्कुमारोभगवान्नारदोदेवदर्शनः॥ ब्रह्मालोकगुरुस्तद्वद्धभाविंद्रविरोचनौ ॥ १२॥ इंद्रस्यब्रह्मविद्यायाःप्रसादादात्मबोधनं॥ विचित्रंस्वात्मविज्ञानंयच्चकेनेषितेरितं॥ १३॥ अथर्वणेचयद्ब्रह्माप्रोक्तवान्स्वसुतायहि॥ शौनकांताहियस्योक्तावेदेशिष्यपरंपरा॥ १४॥ मह्यमेतत्समाख्यातंसर्वंविस्तरशोगुरो॥ त्वयापुनःपुनःश्रोतुमिदमिच्छाम्यहंविभो ॥ १५॥ पिप्पलादोमुनीनाहषट्प्रश्न्याउत्तरंहियत् ॥ अंतेप्रोक्तंत्वयामत्यंपूर्वाध्यायस्यशोभनं ॥ १६॥ इत्युक्तोगुरुरप्याहकथांप्रश्नसमीरितां ॥ ब्रह्मज्ञानकरींसम्यङ्मनःश्रोत्रसुखावहां ॥ १७ ॥ कदाचित्कुत्रचिद्देशेमुनयोमिलिताइमे॥ आसन्परस्परंस्निग्धाःकृतपौर्वाह्णिकक्रियाः ॥ १८ ॥

श्रोतुमिच्छामियत्पूर्वाध्यायांतेएतत्प्रोक्तं एतत्किं पिप्पलादःषण्मुनीन्प्रतिषट्प्रश्न्याःप्रश्नषट्कस्यउत्तरजातंप्राहेतिद्वयोरर्थः. ॥ १५ ॥ ॥ १६ ॥ अत्रगुरोरुत्तरमवतारयति इत्युक्तइति प्रश्नसमीरितांशौनकीयशाखागताप्रचुरप्रश्नत्वात्प्रश्नाख्यायोपनिषत्तस्यांवर्णितां स्फुटमन्यत् ॥ १७॥ तत्रविद्यास्तुत्यर्थाख्यायिकाप्रदर्शकस्यवक्ष्यामइत्यंतग्रंथस्यार्थमाह कदाचिदितिपंचदशभिः इमेवक्ष्यमाणरूपाःषण्मुनयःकुत्रचिद्देशेमिलिताआसन् कृताःपौर्वाह्णिकीःप्रातःसंध्यादिरूपाःक्रियायैस्तेतथा ॥ १८ ॥

CC-0. In Public Domain. Digitization by eGangotri

तान्षड्गणयति भारद्वाजइतिद्वाभ्यां गोत्रेणभारद्वाजोनाम्नासुकेशाप्रथमः इदंनामनकारांतमितिवृत्तिकृत् नाम्नासत्यकामःशिबेरनंतरापत्यभूतःशैब्योद्वितीयः वृद्धेत्कोशलाजादाञ्यङितिञ्यङ् तथासूर्यस्यापत्यत्वात्तिकादित्वात्फिनिसौर्यायणिसंज्ञोगोत्रेणगार्ग्यश्चतृतीयः श्रुतौदीर्घस्तुच्छांदसइतिभावः कोशलस्यानंतरापत्यत्वात्कौशल्यसंज्ञःअश्वलगोत्रत्वान्नडादिफकिआश्वलायनइत्युक्तश्चतुर्थः ॥ १९ ॥ वैदर्भिरिति विदर्भस्यानंतरापत्यत्वाद्वैदर्भिर्नामतोभृगुगोत्रत्वाद्भार्गवःपंचमः कतस्ययुवापत्यत्वात्कात्यायनइत्युक्तःकबंधिसंज्ञएषामृषीणांषष्ठइति ॥ २० ॥ तेषांविद्याधिकारद्योतनायविशेषणान्याह षडंगेति षडंगवेदरूपंब्रह्माध्ययनेनलब्ध्वातत्पराःसंतस्तदुक्ताःसगुणब्रह्मो

भारद्वाजःसुकेशाचसत्यकामोपिशैब्यकः ॥ गार्ग्यःसौर्यायणिस्तद्वत्कौशल्यश्चाश्वलायनः ॥ १९ ॥ वैदर्भिर्भार्गवस्तद्वत्सतुकात्यायनोपिच ॥ कबंधीषष्ठएतेषांसर्ववेदार्थवेदिनाम् ॥ २० ॥ षडंगसहितान्वेदानधीत्यविविधाःक्रियाः ॥ कुर्वाणाःपरमंब्रह्मसमिच्छंतोयशोऽन्विताः ॥ २१ ॥ इदंविचारयामासुरस्मभ्यंकोऽत्रवक्ष्यति ॥ ब्रह्मिष्ठःश्रोत्रियोस्मत्तोगुणैरप्यधिकश्चयः ॥ २२ ॥ इतिचिंतयतांतेषांपिप्पलादोमुनीश्वरः ॥ भगवान्स्वेच्छयैवायात्तंदेशंब्रह्मवित्तमः ॥ २३ ॥ तमायांतंविलोक्याथदूरतस्तेमुनीश्वराः ॥ इदमूचुर्हृष्टचित्ताएषसर्वंहिवक्ष्यति ॥ २४ ॥ तस्मिन्समागतेसर्वेस्वासनेभ्यःसमुत्थिताः ॥ बद्धांजलिपुटाऊचुर्नमस्कृत्यचतंविभुं ॥ समिदादिकराभूत्वायथाशास्त्रंमहाधियः ॥ २५ ॥ भगवन्सर्वएवैतेवयंसंसारतापतः ॥ भीतास्त्वांशरणंप्राप्ताःशाध्यस्मान्शरणागतान् ॥ २६ ॥

पासनरूपाःकर्मसमुच्चिताःक्रियाःकुर्वाणाःपरमंनिर्विशेषंब्रह्मजिज्ञासमानाश्चातएवयशोन्विताः ॥ २१ ॥ इदमिति तेसर्वइदंविचारितवंतः इदंकिं योब्रह्मिष्ठादिलक्षणोऽस्मत्तोगुणाधिकश्चपरंब्रह्मवदेत्सकइत्यर्थः ॥ २२ ॥ इत्थंचिंताकुलानांतेषामनुग्रहायपिप्पलादाख्योमुनिस्तत्रागतइत्याह इतीति ॥ २३ ॥ तमायांतमिति सर्वमस्मत्प्रश्नजातंवक्ष्यतिसमाधास्यतीति ॥ २४ ॥ तस्मिन्निति तस्मिन्पिप्पलादेसमीपमागतेसतितमभ्युत्थानादिनापूजयित्वाशास्त्रानुसारेणसमित्प्रभृत्युपायनहस्ताइदमूचुः इदंकिं हेभगवन्संसारभयेनशरणागतान्नःशाधिउपदिशेतिद्वयोरर्थः ॥ २५ ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सचमुनिस्तान्प्रतीदमुक्तवानित्याह एवमुक्तइति ॥ २७ ॥ पिप्पलादस्यमुनेर्वचनमभिनयति श्रद्धावतेपीतिचतुर्भिः श्रद्धावानपिशिष्यो यदिसंवत्सरवासेनापरीक्षितोभवेत्तदातस्मैनब्रूयान्नोपदिशेत्तदेतन्मर्यादारहस्यंभवद्भिरपिगम्यतेज्ञायतेइत्यर्थः ॥ २८ ॥ ततइति ततउक्तमर्यादावशात्भवतांस्वभावतस्तापसत्वादिशालित्वेपिपुनःसंवत्सरपर्यंतंतपःश्रद्धाब्रह्मचर्यान्वितैर्मत्समीपेवासःकर्त्तव्यइतिद्वयोरर्थः ॥२९॥ ॥ ३० ॥ ततोहमिति ततःसंवत्सरवासानंतरं वक्ष्यामिसमाधास्यामियथामति तदेतन्मद्वचोयदिभवद्भ्योरोचतेभवतःप्रीणयतितदानुष्ठे

एवमुक्तोथतैर्विप्रःपिप्पलादोमुनीश्वरः॥इदंवचनमाहैतान्मुनीन्सर्वान्महामतिः ॥ २७॥ श्रद्धावतेपिनब्रूयादसंवत्सरवासिने॥ गुरुःशिष्यायविप्रास्तद्भवद्भिरपिगम्यते ॥ २८॥ ततोभवंतोमुनयोयद्यपिस्युःस्वभावतः ॥ तापसाब्रह्मचर्यादिनिरताःसर्वदैवहि ॥ २९ ॥ तथापिभूयएवापिसमीपेमेऽत्रवत्सरं॥ ब्रह्मचर्यादिनिरतावासंकुर्वंतुतापसाः॥ ३०॥ ततोहंभवतांप्रश्नान्सर्वान्वक्ष्यामिसर्वथा ॥ यावज्ज्ञानंभवद्भ्यश्चेद्रोचते तद्विधीयतां॥ ३१ ॥ एवमुक्तेतथाचक्रुस्तेसर्वेश्रद्धयान्विताः॥ प्रणिपत्यमहात्मानंवत्सरेविगतेसति॥ ३२॥ कात्यायनःकबंधीचसमागम्येदमब्रवीत्॥ भगवन्कुतएवेमाःप्रजाःकारणतोजनिं ॥ प्राप्नुवंतीहतन्मह्यंवद त्वंमुनिसत्तम॥ ३३॥ एवमुक्तेविराजःसस्रष्टिमाहमुनीश्वरः॥ परित्यज्यमहास्रष्टिंविज्ञातांतेनशाश्वतः॥३४॥

यमित्यर्थः ॥३१॥ एवंतेनोक्तेसतिसर्वैतदुक्तंचक्रुरित्याह एवमिति चतुर्थपादउत्तरान्वयी ॥ ३२ ॥ मुंडकेपरापरभेदेनद्वेविद्येप्रदर्शितेतत्रापरविद्यायाःकर्मोपासनभेदेनद्विविधायाःफलंस्रष्टिमुखेननिर्णेतुंप्रथमप्रश्नंकबंध्याख्यःकात्यायनश्चकारेत्याह कात्यायनइति वत्सरेव्यतीतेसतिकात्यायनःपिप्पलादमित्यपृच्छत् इतिकिं हेभगवन्प्रजाःकुतःकारणतोजनिंप्राप्नुवंतीति ॥ ३३ ॥ एवमुक्तइति एवंपृष्टेसतिसपिप्पलादमुनिस्तस्मैकात्यायनायविराजःप्रजापत्याख्यायाजगतःस्रष्टिस्तामेवोक्तवान् ईश्वरावधिकामहास्रष्टिःपंचमहाभूतहिरण्यगर्भादिसंबंधिनीस्रष्टिःसाऽनेनकात्यायनेनशाश्वतोविज्ञातैवेतितामुपेक्ष्येत्यर्थः ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राजापत्यांसृष्टिमभिनयति प्रजापतिरित्येकादशभिः प्रजापतिर्विराट्सिसृक्षुःसृष्टिवृद्धिमिच्छन्नग्नीषोमौभोक्तृभोग्यलक्षणौससर्ज किं
 कृत्वा एतौमिथुनरूपेणविविधांसृष्टिकर्तुंक्षमावितिविचार्येत्यर्थः ॥ ३५ ॥ तत्रभोक्तृरूपस्याग्नेःसर्वात्मतामथादित्यइत्यादिब्राह्मणंविश्वे
त्यादिमंत्रश्चवदतितयोरर्थमाह अग्निरितितयोर्मध्येयोऽग्निःसोध्यात्मंप्राणरूपः प्राणस्यसंघातवशीकारलक्षणभोक्तृत्वस्यस्फुटत्वात् तथा
 धिदैवमादित्यरूपः तत्रादित्यस्यभोक्तृत्वस्फुटीकारायविशेषणानि सर्वदिक्करणइत्यादीनि सर्वासांदिशांकरणंविभजनमुदयादिनायस्यस
तथा एतेनप्रकाशद्वारासर्वत्रव्याप्तिर्भोक्तृत्वोपयोगिनीसूचिता अतएवपुमान्सर्वस्यप्रकाश्यस्यभोक्तेत्यर्थः सर्वात्मत्वाद्विश्वरूपः श्रुतौहरि
णपदेनमरीचिमद्वाचकेनतत्प्रकांचनाभत्वंसूचितमित्याह सुवर्णाभइति जातवेदोज्ञानरूपंधनंयस्मात्सतथा एतेनसर्वज्ञेयव्याप्तिर्दर्शिता सह

प्रजापतिःपुरासृष्टिंसिसृक्षुर्जगदीश्वरः ॥ पर्यालोच्यससर्जादावग्नीषोमौमहामतिः ॥ ३५ ॥ अग्निःप्राणस्त
थादित्यःसर्वदिक्करणःपुमान् ॥ विश्वरूपःसुवर्णाभोजातवेदाःपरायणं ॥ ज्योतिरात्मासहस्रार्चिर्बाह्यःप्राणः
शतात्मकः ॥ ३६ ॥ संवत्सरार्धसंज्ञंयत्कथितंचोत्तरायणं ॥ आस्तिकायेनगच्छंतिह्युपास्यात्मानमंजसा
॥ ३७ ॥ एतंभित्वामहात्मानमादित्यममितौजसं ॥ तापसाब्रह्मचर्यादिसंपन्नायत्प्रयांत्यदः ॥ ३८ ॥ प्राणाय
तनमेतद्धिकथितंवेदवादिभिः ॥ अमृतंचाभयंचैतत्स्थानकंपरमंतथा ॥ ब्रह्मलोकाभिधंसूर्यात्परतोयद्धिव
र्त्तते ॥ ३९ ॥

स्रकिरणरूपेणज्योतिरात्माप्रकटज्योतीरूपः तथासर्वप्रजानांबाह्यःप्राणः पुनःकीदृशः शतात्मकःअनेकधाव्यष्टिप्राणिरूपैर्वर्तमानइत्यर्थः
॥३६॥ प्राणरूपस्याग्नेःसंवत्सराख्यकालरूपेणस्रष्टृत्वबोधनायतावदुत्तरायणादितदवयवात्मकत्वमाह संवत्सरार्धेति संवत्सरार्द्धनामकंयदु
त्तरायणंप्रसिद्धंतदपिकथितंवर्णिताग्निरूपतयेतिशेषः तत्रहेतुतयाउत्तरायणस्यसूर्यद्वारप्रापकत्वमाह आस्तिकाइति येनोत्तरायणरूप
मार्गेणादित्यंभित्वाब्रह्मचर्यादिसंपन्नास्तापसागच्छंतीत्यर्थः यदित्याद्युत्तरान्वयीतिद्वयोरर्थः ॥३७॥३८॥ प्रसंगेनोपासनाफलंदर्शयति ॥३॥
प्राणायतनमिति यच्चसूर्यमंडलभेदनेनअदःपरोक्षंस्थानंप्रयांति एतत्स्थानंवैदिकैःप्राणायतनंप्राणसमष्टिरूपस्यहिरण्यगर्भस्यवासस्थानं
यथामृत्युभयाभ्यांवर्जितंब्रह्मलोकसंज्ञंचोक्तंयदिदंस्थानंसूर्यमंडलात्परस्ताद्वर्त्ततेइत्यर्थः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यस्थानस्यक्रममुक्तिप्रयोजकत्वमहंग्रहोपासनलभ्यत्वंचाह अस्मिन्निति ब्रह्मणःसगुणस्यविज्ञानमभेदेनोपासनंतद्वंतऊर्ध्वरेतसोब्रा ह्मणाअस्मिन्नुक्तेसूर्यमण्डलात्परस्मिन्स्थानेगत्वापुनरत्रसंसारमंडलेनागच्छंतीत्यर्थः यथाचसूर्यमंडलप्रापकत्वादुत्तरायणंप्राणलक्षणा ग्निरूपतयोक्तंतथामासघटकःशुक्लपक्षःपक्षघटकोदिवसश्चाग्निरूपोबोध्यः देवयानमार्गघटकत्वस्यानयोरपिसमत्वादितिभावः ॥ ४० ॥ यथाग्नेःसूर्यादिरूपाणिदर्शितानितथाभोग्यलक्षणस्यसोमस्याप्याह सोमात्मकइति अयंचंद्रमाभोग्यामृतादिरूपत्वात्सोमात्मकोबोध्यः तथादक्षिणायनमपिसोमात्मकंबोध्यं तत्रहेतुंचंद्रप्रापकत्वंदर्शयन्कर्मिणांगतिमपिसूचयति येनेति येनदक्षिणायनेनधार्मिकाइष्टादिका रिणश्चंद्रलोकंगच्छंतीत्यर्थः ॥४१॥ कृष्णेति यथाचदक्षिणायनंसोमात्मकमुक्तंतथाकृष्णपक्षोरात्रिश्चसोमात्मतयाबोध्या तत्ररात्रेःसोमा

अस्मिन्गताःपुनर्नैतेआवर्त्ततेकदाचन ॥ ब्रह्मविज्ञानसंपन्नाब्राह्मणाह्यूर्ध्वरेतसः ॥ शुक्लपक्षोपिदिवसःप्रो क्तोग्निःप्राणरूपधृक् ॥ ४० ॥ सोमात्मकोयंभगवांश्चंद्रमादक्षिणायनं ॥ येनयांतिमहात्मानोधार्मिकाःश्र द्धयान्विताः ॥ ४१ ॥ कृष्णपक्षस्तथारात्रिर्यस्यांरतिमुपेयुषां ॥ ब्रह्मचर्यंभवेन्नित्यंगृहस्थानांस्वयोषिति ॥ ४२ ॥ अग्नीषोमात्मकंयत्तुमिथुनंवत्सरोहिसः ॥ पंचर्त्तुरूपीभगवान्मासद्वादशरूपभृत् ॥ ४३ ॥ ऋतुषट्कार आसीनःसूर्यश्चक्रेसदैवयः ॥ द्युलोकस्योत्रपर्जन्यहेतुरुक्तःपिताहियः ॥ ४४ ॥

त्मकत्वेहेतुंरतिकालत्वमाह यस्यामिति यस्यांरात्रौस्वयोषितिरतिंभजतांगृहस्थानांब्रह्मचर्याविप्लवउक्तइत्यर्थः एतेनदिवसस्यप्राणरूपा ग्न्यात्मकत्वात्तत्ररतिसेविनांनकेवलंब्रह्मचर्यहानिःकिंतुप्राणहानिरपीतिसूचितं॥४२॥ उत्तरायणदक्षिणायनरूपयोःशुक्लकृष्णपक्षरूपयो रहोरात्ररूपयोश्चाग्नीषोमयोर्यद्वैतन्मिथुनत्रयमुक्तंतत्समुदायःसंवत्सरःप्रजापत्यात्माबोध्यइत्याह अग्नीषोमात्मकमिति मिथुनंयुगलं अ यमर्थःपंचपादमित्यादिनामंत्रेणाप्युक्तइतिसूचयंस्तदर्थमाह पंचर्तुरूपीतिदलत्रयेण भगवान्प्रजापतिःसंवत्सरात्मकोहेमंतशिशिरावेकी कृत्यपंचभिर्ऋतुभिःपादभूतैरूपीरूपवान् ऋत्ववयवैर्द्वादशमासैश्चरूपभृत्घटितावयवः पुनःकीदृशः यश्चक्रेशिशुमाराख्ये कीदृशे ऋतुष ट्कमेवारस्थानीयंयस्यतथाभूतेसूर्यरूपेणसदैवस्थितः पुनःकीदृशः द्युलोकस्यस्वर्गलोकस्योपरिस्थितः पर्जन्यस्यमेघस्यहेतुत्वेनजगतःपि ताचेत्यर्थइतिद्वयोरर्थः ॥ ४३ ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रजगत्पितृत्वंस्फुटयति अग्नीषोमात्मकस्येति अस्येत्यनंतरंकार्यमितिशेषः तथाचसूर्यचंद्रदक्षिणायनोत्तरायणादिरूपैरग्नीषोमात्मक
स्यास्यमहात्मनःप्रजापतेःकार्यंवृष्टिद्वारानवान्नंस्यात्ततोन्नात्संधुक्षिताज्जाठराग्निपाचिताद्रेतोद्वाराविविधाःप्रजाजायंते एवमग्नीषोमद्वा
राप्रजापतेःकारणत्वमित्यर्थः ॥४५॥ अथोपास्यस्यप्राणस्यप्रथमप्रश्नेसूर्यादिरूपैरधिदैवंवर्णितप्रभावस्याप्यध्यात्मंतत्प्रभावनिर्णयायद्वि
तीयप्रश्नमुत्थापयति अथोपरतइति तस्मिन्कात्यायनेउपरतेतूष्णींभूतेसतिभार्गवोवैदर्भिःपिप्पलादमपृच्छत्हेभगवन्अस्याध्यात्मसंघात
रूपस्यजगतोविधारकाधारणकर्त्तारःकतिकियंतोदेवाःसंतितेष्वपिप्रकाशस्यकर्त्तारःकतिसंतितथाएतेषुसर्वेषुपुमान्कीर्त्यतिशयवान्अ

अग्नीषोमात्मकस्यास्यनचान्नंस्यान्महात्मनः॥ अन्नात्संधुक्षिताद्रेतोरेतसश्चप्रजाइमाः॥ जायंतेविविधाए
वमग्नीशोमौहिकारणं॥ ४५॥ अथोपरतएतस्मिन्विदर्भिर्भार्गवोब्रवीत्॥ देवाःकत्येवभगवन्जगतोस्यवि
धारकाः॥ ४६॥ कतरेवात्रकर्त्तारःप्रकाशस्यचकःपुमान्॥ एतेषुश्रेष्ठएतन्मेसर्वंवदमहामुने॥ ४७॥ एवमु
क्तोथतंप्राहपिप्पलादोमुनीश्वरः॥ पंचभूतानिवागाद्याउक्ताएकादशैवते॥ प्राणश्चसर्वदेहानांधारकाःपरि
कीर्त्तिताः॥ ४८॥ ज्ञानेंद्रियाणिपंचापितत्प्रकाशस्यहेतवः॥ विशेषतोमनस्तत्रप्रकाशेकारणंस्मृतं॥ ४९॥
श्रेष्ठोविधारकश्चैषपंचवृत्तिर्वपुःस्थितः॥ प्राणस्तेनविनिर्मुक्तेशरीरेनास्तिधारणं॥ ५०॥

तएवश्रेष्ठःकःएतन्मज्जिज्ञासितमर्थत्रयंवदप्रतिपादयेतिद्वयोरर्थः ॥ ४६ ॥ ४७ ॥ एवमुक्तइति एवमुक्तःपृष्टःपिप्पलादआहआका
शादीनिपंचभूतानिवागादीनींद्रियाणिमनःसहितान्येकादशसंकलनेषोडशसप्तदशःप्राणइत्येतेसप्तदशदेवाःसर्वशरीराणांधारकाइत्यर्थः
॥ ४८ ॥ ज्ञानेंद्रियाणीति तेष्वपिज्ञानेंद्रियपंचकंतदध्यक्षंमनश्चएतानिषट्प्रकाशकानीत्यर्थः ॥ ४९ ॥ श्रेष्ठइति एतेषांविधारकाणां
मध्येएषश्रेष्ठोयःपंचभिर्वृत्तिभिःप्राणापानव्यानोदानसमानाख्यैरूपैर्वपुषिस्थितःप्राणनामायतस्तेनप्राणेनविमुक्तेदेहेधारणंस्थितिर्नदृश्य
तेइति ॥ ५० ॥ ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुतयाइतरेषांस्थितंःप्राणस्थित्यन्वयव्यतिरेकावाह प्राणेसतीति अत्रदेहेप्राणेसतिस्थितिमतिवागादिःकरणगणस्तिष्ठति तत्रप्राणे निर्यातेसतितुवागादिगणोनिर्गच्छति यथामधुमक्षिकामधुकरराजाख्यस्यश्रेष्ठस्यस्थितिगत्यधीनस्थितिगतिकाइत्यर्थः ॥ ५१ ॥ दृष्टांत मेवस्फुटयति प्रधानेति तत्रमधुदेशेयदिप्रधानमक्षिकामधुकरराजाख्यातिष्ठतितदामक्षिकागणःसंस्थितिंव्रजेत् तस्यांप्रधानमक्षिकायां व्रजंत्यांसत्यांतुमक्षिकागणोव्रजेदिति ॥ ५२ ॥ अन्वयेति प्राणस्थितौचक्षुरादीनांसंवत्सरप्रवासेपिसंघातजीवनमन्वयःप्राणोत्क्रमणप्रक्र मेसर्वेषामाकुलत्वंव्यतिरेकस्ताभ्यांश्रुत्युक्ताभ्यांप्राणस्यश्रेष्ठत्वंविधारकत्वरूपंयतोनिश्चितंततस्तेसर्वेदेवाश्चक्षुराद्यभिमानिनःप्राणस्यस्तु

प्राणेसतिशरीरेस्मिन्वागादिरवतिष्ठते॥ निर्गच्छंतिचनिर्यातेमधुनीवेहमक्षिकाः॥ ५१ ॥ प्रधानमक्षिका तत्रयदितिष्ठतिसंस्थितिं ॥ तदाव्रजेद्व्रजंत्यांतुसंव्रजेन्मक्षिकागणः ॥ ५२ ॥ अन्वयव्यतिरेकाभ्यांवागाद्यैर पिनिश्चितं॥ विधारकत्वंप्राणस्यततस्तेकुर्वतेस्तुतिं ॥ ५३ ॥ अग्निःसूर्यश्चपर्जन्योविद्युदादिसमन्वितः ॥ मघवापंचभूतानिसोमोपिसदसच्चयत्॥ ५४ ॥ विश्वंत्वमसितत्सर्वंनामरूपक्रियात्मकं ॥ त्वय्येवरथचक्र स्यनाभौयद्वदराःस्थिताः ॥ ५५ ॥ चतुर्विधानांभूतानांरूपतस्त्वंप्रजायसे ॥ विराट्हिरण्यगर्भश्चभवानेव नचापरः ॥ ५६ ॥

तिवक्ष्यमाणरूपांकुर्वतेस्मेत्यर्थः ॥५३॥ एषोग्निरित्यादिमंत्रर्थथेननिरूपितांस्तुतिमभिनयति अग्निरितिपद्भिः हेप्राणअग्न्यादिरूपंयद्विश्वं तत्त्वमेवासीतिसंबंधः तत्रपर्जन्योवर्षुकोब्दः विद्युदादीत्यादिपदेनअनुकूलवातादिग्रहः मघवाइंद्रः भूतानिपृथिव्यादीनि सोमोभोग्यल क्षणः सन्मूर्तं असदमूर्तं चकारादमृतस्यदेवभोग्यस्यवेदस्यचग्रहः सर्वात्मत्वेहेतुतयासर्वाधारत्वमाह तत्सर्वमित्यादिना यतस्तत्सर्वंविश्वंत्व य्येवस्थितंयथारथचक्रावयवेनाभौअराःस्थितास्तद्वदितिद्वयोरर्थः ॥ ५४ ॥५५॥ चतुर्विधानामिति जरायुजादिभेदेनचतुर्विधानांभूता नांप्राणिनांरूपतःस्वरूपैस्त्वमेवजन्मभजसेतथाश्रुतौप्रजापतिपदोक्तोविराट्हिरण्यगर्भश्चभवानेवभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभूतीति हेप्राणयान्यत्रलोकेविभूतिमंतिऐश्वर्यशालीनिसत्वानिप्राणिजातानिसंतियथादेवेषुवन्हिःपितृषुनांदीमुखाऋषिषुसत्यपराअं गिरसामथर्वेत्यादयस्तानिस्वधापितृमोदिकास्वाहादेवमोदिकाएताभ्यांसहितानितवैवरूपाणीत्यर्थः॥ ५७॥ सर्वेंद्रियेति हेप्राणयातेतनु र्मूर्तिश्चक्षुरादिषुबलमादधानातिष्ठतितांशिवामनुकूलपरिणामवतींकुरुवयंसर्वेतेत्वदीयाःस्मभवामःअतोस्मदपराधंक्षमित्वाकदाचिदपिमा उत्क्रमीरुत्क्रमणंमाकुर्वित्यर्थः ॥ ५८ ॥ प्राणस्येदमिति त्रिदिवेस्वर्गोपलक्षितेलोकत्रयेवर्तमानंसर्वंप्राणस्यतववशेभवति एवंजानतो स्मान्पुत्रान्मातृवद्रक्ष तथाश्रियंवेदत्रयीरूपांब्राह्मींक्षात्रियांहिरण्यादिरूपांविधेहिकुरु तथाप्रज्ञांसन्मतिमस्माकंकुर्वित्यर्थः॥ ५९ ॥

विभूतिमंतिसत्वानिजगत्यस्मिन्हियानिभोः॥ स्वधास्वाहान्वितान्यत्रप्राणरूपाणितानिवै॥५७॥ सर्वेंद्रिय गतायातेतनुःप्राणाऽवतिष्ठते॥शिवांतांकुरुतेस्मातोमोत्क्रमीःकर्हिचिद्विभो॥५८॥प्राणस्येदंवशेसर्वंत्रिदिवे यत्प्रतिष्ठितं ॥ मातेवपुत्रान्रक्षत्वंश्रियंप्रज्ञांविधेहिनः ॥ ५९ ॥ प्राणंश्रेष्ठंविनिश्चित्यतस्मिन्नुपरतेसति ॥ आश्वलायननामासकौशल्यःपृष्टवान्मुनिं ॥ ६० ॥ भगवन्पिप्पलादायंकुतःप्राणोविजायते ॥ शरीरेवा कथंगच्छेदात्मानंचकथंहिसः ॥ विभज्यसर्वदेहेषुप्राणस्तिष्ठतितद्वद ॥ ६१ ॥ केनायमुत्क्रमंगच्छेत्कथंचै षविधारयेत्॥ बाह्यमाध्यात्मिकंसर्वंजगदेतच्चराचरं॥६२॥

एवंश्रेष्ठत्वेनावधारितस्यप्राणस्योपासनांविधातुंतदीयोत्पत्तिस्थित्यादिनिर्णयहेतुंतृतीयंप्रश्नमवतारयति प्राणमिति तस्मिन्भार्गवेप्राणश्रेष्ठ ताविनिर्णयेनतूष्णींभूतेसतिकौशल्यआश्वलायनस्तंमुनिमपृच्छदिति ॥६०॥ अमुंप्रश्नंषड्विधमभिनयति भगवन्नितिद्वाभ्यां प्राणस्यकुत उत्पत्तिरितिप्रथमःप्रश्नः सप्राणःशरीरेकथंगच्छेत्अस्यशरीरेणसंबंधेकिंनिमित्तमितिद्वितीयः सप्राणआत्मानंविभज्यसर्वदेहेषुकथंतिष्ठती ॥५॥
तितृतीयइत्यर्थः ॥ ६१ ॥ केनायमिति तथाअयंप्राणःकेनद्वारेणवृत्तिविशेषेणवानिमित्तेनवाउत्क्रममस्माच्छरीरान्निष्क्रमणंगच्छेदिति त्रिधाचतुर्थः एषप्राणोबाह्यमधिभूताधिदैवरूपंकथंधारयतिसंबद्ध्यपोषयतीतिपञ्चमः कथंवाध्यात्मंधारयतीतिषष्ठइत्यर्थः ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपृष्टइति तमाश्वलायनं अतिप्रश्नानन्यदीयप्रश्नमतिक्रांतान् अतिसूक्ष्मानितियावत् एतादृशानिमान्प्राणोत्पत्त्यादिरूपानर्थान्भोमुनेय त्त्वंपृच्छसिततोहेतोरत्रमुनिसमाजेब्रह्मिष्ठोलक्ष्यसे अतिशयेनब्रह्मवान्ब्रह्मपरोब्रह्मिष्ठः तुभ्यमुत्तमाधिकारिणेतत्त्वत्पृष्टमर्थजातंवक्ष्यामी त्यर्थः ॥६३॥ तत्रप्रथमप्रश्नोत्तरमाह आत्मनइति यथादेहाच्छायाप्रतिबिंबादिरूपादर्पणसांनिध्यादिरूपनिमित्ताज्जायतेतथैवजीवरूपः प्राणोप्यात्मनःपरमार्थसत्याद्बिंबात्प्रतिबिंबभूतोजायते एतेनप्रतिबिंबस्यबिंबाद्यथापृथक्सत्ताहीनत्वेनतन्मात्राश्रितत्वंतथास्यप्राणस्या त्ममात्राश्रितत्वमितिसूचितं द्वितीयप्रश्नोत्तरंप्रपंचयति मनःकृतैरित्यादिनापालकइत्यंतग्रंथेन अयंजीवरूपःप्राणस्तत्तद्देहंयद्व्रजतितेन तेनदेहेनयत्संबद्ध्यतेतत्रनिमित्तभूतानिमनसाविज्ञानात्मकेनकृतानिकर्माण्येवेत्यर्थः इयंपूर्वदलटीका ॥ ६४ ॥ तत्रहेतुतयामनसएवकर्तृ

एवंपृष्टस्तदाप्राहपिप्पलादोथतंप्रति॥ अतिप्रश्नानिमान्यस्मात्पृच्छसित्वंमुनेत्रभोः ॥ ब्रह्मिष्ठोसिततस्तुभ्यं वक्ष्याम्येतत्त्वयेरितम्॥ ६३॥ आत्मनोजायतेप्राणःसदाच्छायेवदेहतः॥ मनःकृतैःकर्मभिश्चसर्वदेहमयंव्रजेत्॥ ६४॥ मनोत्रकुरुतेकर्मशुभंवाऽशुभमेववा॥ भुंक्तेतदेवनिखिलंफलमात्मप्रसादतः॥ ६५॥ तस्यैव कर्मणाप्राणःशरीरपरिरक्षकः॥ शरीरंचाप्नुयान्नित्यमात्मनोयोजनिंगतः ॥ ६६॥ कर्माणित्रिविधान्यत्रपु ण्यपापात्मकान्यपि॥ देहेंद्रियमनोहेतुत्रैविध्यात्सर्वदेहिनां ॥ ६७॥ इंद्रियाणिचदेहोपिनस्वतंत्रःकदाचन॥ कर्मकर्तुंप्रभुःकिंतुमनसासमधिष्ठितः॥ ६८ ॥

त्वभोक्तृत्वयोराधारत्वमाह मनोत्रेति आत्मनःप्रसादेनप्रतिबिंबरूपेणचेतनायमानंमनएवात्रसंसारेशुभादिकर्मणांकर्तृतत्फलभोक्तृचे त्यर्थः ॥ ६५॥ तस्यैवेति तस्यमनसएवकार्यभूतेनमानसाख्येनकर्मणानिमित्तेनप्राणस्तत्तच्छरीरंव्याप्नोति कीदृशः शरीररक्षकत्वेनप्र सिद्धः यस्यचोत्पत्तिरात्मनउक्ता ॥ ६६ ॥ ननुशारीरवाचिकयोरपिकर्मणोःसंसारनिमित्ततयान्यत्रोक्तेःकथमत्रमानसस्यैवसंसारनि मित्ततोच्यतेइतिशंकते कर्माणीति अत्रशास्त्रेदेहवाङ्मनोरूपाणांहेतूनांत्रैविध्यात्पुण्यादीनिकर्माणिशारीरादिभेदेनत्रिविधान्येवसर्वेषांप्र सिद्धानीत्यर्थः ॥ ६७ ॥ तथापिकारणप्राधान्यमादायमानसकर्मणःप्राधान्यमित्याह इंद्रियाणीति इंद्रियसहितोदेहःकर्मकर्तुंस्वतंत्रोन भवतिकिंतुमनसाधिष्ठितएवकर्तुंप्रभुःसमर्थोभवतीत्यर्थः ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचमनोव्यापारमंतराकृतेकर्मणिफलारंभकतावच्छेदकस्यपुण्यत्वादेरेवाभावात्कथंसंसारहेतुतेत्याह अमनस्कस्येति मनसाननुगृहीत
स्यदेहादेर्यत्कर्मतत्पुण्यत्वेनपापत्वेनवाक्वचिदपिनोक्तमित्यर्थः ६९॥कथंतर्हिमनोव्यापारंविज्ञानमंतराकृतानामेवब्रह्महत्यादीनांप्रायश्चि
त्तविधिर्विज्ञानकृतानांचप्रायश्चित्तत्रैगुण्यमितिधर्मशास्त्रमर्यादेत्याशंकामनूद्यपरिहरति यद्यपीति यद्यप्यबुद्धिपूर्वाणामालोचनंविनैव
कृतानांपापकर्मणांप्रायश्चित्तिर्विहितातथापिसाप्रायश्चित्तिर्मानसव्यापारयोगादेवानुष्ठीयतेनान्यथेत्यर्थः ॥७०॥ एतदेवस्फुटयति अ
बुद्धीति सोऽबुद्धिपूर्वकारीयदाअबुद्धिपूर्वंमयाकृतमित्येवंमनसाविचारयतितदैवप्रायश्चित्ताधिकारीभवतिनान्यथातथाननुसंधानेपीत्य

अमनस्कस्ययत्कर्मदेहेंद्रियगणस्यच ॥ नतत्पुण्यंचपापंवाशास्त्रेषुपरिपठ्यते ॥६९॥ यद्यप्यबुद्धिपूर्वाणांप्रा
यश्चित्तिर्हिकर्मणां ॥ उक्तातथापिमनसायोगेसत्येवसाभवेत्॥७०॥ अबुद्धिपूर्वंहिकृतंमयेत्येवंविचार्यसः॥
मनसाकुरुतेपश्चात्प्रायश्चित्तंनचान्यथा ॥७१॥ मनोयोगात्ततस्तस्यपुण्यंपापंचतद्भवेत्॥ अनुष्ठितमबुद्ध्या
यन्नान्यथाकर्हिचित्क्वचित्॥ ७२ ॥ आत्मनोनैवकर्तृत्वंभोक्तृत्वंवापिविद्यते॥ अविक्रियत्वतस्तस्मात्सर्वंत
न्मनसिस्थितं॥ ७३ ॥ मनएवततःपापंपुण्यंवाकुरुतेसदा॥ ताभ्यांचसर्वमेवेदंभवेद्देहेंद्रियादिकं॥ प्राणोपि
चततस्ताभ्यांदेहमायातिपालकः॥ ७४ ॥ आत्मानंप्रविभज्यैषपंचधादेहसंश्रितः॥ नियुंक्तेमंत्रिणोयद्वद्राजें
द्रियगणंतथा॥ तत्रतत्रनियुंक्तेसौप्राणोव्यापारकारकः॥ ७५॥

र्थः ॥ ७१ ॥ मनोयोगादिति ततोमनोव्यापारंविनाप्रायश्चित्तादर्शनाद्यत्कर्मबुद्ध्यानुष्ठितंतन्मनोयोगादेवपुण्यतांपापतांवाप्रतिपद्यतेइ
त्यर्थः ॥ ७२ ॥ किंचशुद्धात्मनोनिर्विकारत्वेनकर्तृत्वाद्ययोगाद्देहादीनांपारतंत्र्यस्योक्तत्वाच्चकर्तृत्वादिभागिनिमनस्येवपुण्यादिकंस्थित
मित्याह आत्मनइति ॥७३॥ फलितमाह मनएवेति ताभ्यांमनःकृतपुण्यपापाभ्यांभवेत्जायेतततःकर्मवशादेवप्राणस्तत्तद्देहेनसंबद्ध्यत
इत्यर्थः ॥७४॥ तृतीयप्रश्नोत्तरंप्रपंचयति आत्मानमितिसप्तभिः एषप्राणोदेहसंस्थितःसन्नात्मानंपंचधावक्ष्यमाणैःपंचभिःप्रकारैर्विभज्य
इंद्रियगणंतत्रतत्रव्यापारेनियुंक्तेप्रेरयतियथाराजामंत्रिणःप्रेरयतितद्वत् कीदृशःप्राणः क्रियाशक्तिमयत्वेनव्यापारकारकइत्यर्थः॥७५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणादिभेदांस्तत्स्थानानि चाह पायूपस्थेति अपानाख्यःप्राणभेदःपायूपस्थयोःस्थित्वापुरीषादिविभागंकुर्वन्वर्त्तते प्राणःप्रधानभूतस्तु सप्तसुनासिकाश्रवणनयनयुगलमुखरूपेषुमूर्द्धन्यच्छिद्रेषुतिष्ठति समानाख्योभेदस्तुभुक्तपीतसमीकर्तृत्वेनसर्वदेहव्यापकोपिमूर्द्धन्यच्छिद्राणामाधारचक्रस्यचमध्येविशेषतस्तिष्ठतीत्यर्थः ॥ ७६ ॥ अथव्यानाश्रयदेशंवक्तुंतद्भावयोग्यानांनाडीनांपरमसंख्यामाह कोट्यइति द्वासप्ततिकोटयोदशसहस्राणिएकोत्तरंशतंचेत्येतावत्योहृदयेस्थितानाड्यइत्यर्थः ॥ ७७ ॥ उक्तसंख्यांवृक्षरूपकेणोपपादयति एकेति तत्रतासांनाडीनांमध्येएकासुषुम्नाख्यानाडीमुख्यामूलस्थानीयातस्यादशनाड्यःस्कंधभूतास्तासांस्कंधभूतानांदशानांप्रत्येकस्यनव

पायूपस्थगतोऽपानःप्राणःसप्तसुषिस्थितः॥ मूर्द्धन्याधारयोर्मध्येसमानःसर्वदेहगः॥ ७६ ॥ कोट्योद्वासप्तति स्तद्वत्सहस्राणिदशैवच॥ शतमेकाधिकंनाड्योहृदयस्थाहिदेहिनां॥ ७७ ॥ एकातत्रतुमुख्यास्यात्तथास्कंधा दशापराः॥ दशानामपिशाखाःस्युःप्रत्येकंनवसंख्यया ॥ ७८ ॥ स्कंधशाखासमेतानांनाडीनांतुशतस्यहि॥ प्रधाननाडींहित्वाचप्रत्येकंस्यात्शतंशतं ॥ ७९ ॥ प्रत्येकशतकानांतुतासांप्रत्येकमेवच॥ द्वासप्ततिसहस्राणिनाड्यःप्रोक्तामनीषिभिः ॥ ८० ॥

नवशाखाःस्थूलशाखायालोकेस्कंधशाखेत्युच्यतेतत्स्थानीयाःस्युरित्यर्थः ॥ ७८ ॥ स्कंधेति एवंसतिप्रधाननाडींसुषुम्नांविनास्कंधशाखाभूताभिर्नवतिसंख्याभिःसहितानांस्कंधभूतदशनाडीनांसंकलनेशतसंख्याभवतितस्यनाडीशतस्यप्रत्येकंशाखाभूताःशतंशतंनाड्यः स्युरित्यर्थः तथाचएकामुख्याशतंस्कंधशाखारूपानाड्योदशसहस्रंतासांशाखाइतिभावः ॥ ७९ ॥ प्रत्येकेति प्रत्येकंशतत्वेनकथितानां तासांशाखाभूतनाडीनांप्रत्येकस्यउपशाखाभूताद्वासप्ततिसहस्रसंख्यानाड्यःस्युरित्यर्थः तथाचद्वासप्ततिसहस्रसंख्ययादशसहस्रसंख्यागुणनेद्वासप्ततिकोटयोभवंतीतिभावः एतेनभाष्यटीकायांसमस्तनाडीसंख्यायांद्वासप्ततिलक्षाणामेकस्यशतस्यचाधिकत्वेननिर्देशोनयुक्तः मूलभूतायाएकस्याःशाखोपशाखासंबंधस्यलोकविरोधादितिसूचितम ॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वमुख्याभिन्नास्वेषप्राणापानसंधिरूपत्वेनबलवत्कर्मसाधकत्वेनचश्रुत्यंतरोक्तोव्यानश्वरतिवर्त्ततेतया
तास्विति तासुवर्णितसंख्यासुनाडीषुमुख्याभिन्नास्वेषप्राणापानसंधिरूपत्वेन एतेनकेनद्वारेणकेनवृत्तिविशेषेणवाइतिद्विधाचतुर्थःप्रश्नःसमाहितः सुषुम्नाद्वारे
सुषुम्नयातुउदानएवचरतियःसदोर्ध्वगमनशीलइत्यर्थः एतेनकेनद्वारेणकेनवृत्तिविशेषेणवाइतिद्विधाचतुर्थःप्रश्नःसमाहितः सर्वेषांसुषुम्नामार्गेणब्रह्मलोकगतिर्यतोनभवतितद्दर्शय
णउदानवृत्त्याचोत्क्रमणाभिधानात् ॥ ८१ ॥ केननिमित्तेनेतिजिज्ञासांशमयन्सर्वेषांसुषुम्नामार्गेणब्रह्मलोकगतिर्यतोनभवतितद्दर्शय
ति सुखदमिति अयमुदानोमरणकालेपुण्यतःपरिच्छिन्नफलकस्येष्टापूर्त्तादिपुण्यस्योदयेसुखदंस्वर्गादिलोकंनयतिपापतस्तुदुःखदंनरकं
॥७॥ नयतिउभाभ्यांपुण्यपापाभ्यामुदिताभ्यांमनुष्यलोकंनयति एतादृशप्रतिबंधकाभावेतुब्रह्मलोकंनयतीतिभावः ततःक्षीणकर्मणांतत्त्ववि
दामुत्क्रमणादर्शनात्तस्यप्राणस्यउत्क्रमउत्क्रमणंकर्मनिमित्तकमेवेत्यर्थः ॥ ८२ ॥ कथंवाह्यांतर्विधारकत्वमितिपंचमषष्ठप्रश्नयोरुत्तरमा

तासुव्यानश्चरत्येषमुख्यांनाडींविहायतां ॥ एकयायमुदानोयंव्रजत्यूर्ध्वंसदैवसः ॥ ८१ ॥ सुखदंपुण्यतो लोकंनयेत्पापाच्चदुःखदं ॥ सुखदुःखप्रदंतद्वदुभाभ्यामपिदेहिनः ॥ कर्मणैवततस्तस्यत्युत्क्रमोदेहतःस्मृतः ॥ ८२ ॥ एतैःप्राणादिभिर्भेदैश्चक्षुराद्यैश्चसर्वदा ॥ अंतर्विधारयेदेषआदित्याद्यैश्चबाह्यतः ॥ ८३ ॥ चक्षुरादित्ययोर्भेदोनैवप्राणस्वरूपयोः ॥ पृथिव्यपानयोस्तद्वदिहाकाशसमानयोः ॥ व्यानवाय्वोस्तथैवस्यात्तथातेजउदानयोः ॥ ८४ ॥

ह एतैरिति एषप्राणएतैरुक्तैः प्राणापानसमानव्यानोदानाख्यैर्भेदैश्चक्षुर्वागादिगौणरूपैश्चअंतःअध्यात्मंस्थित्वाविविधंजगद्धारयेत् त
थावाह्यतोवाह्यैरादित्यपृथिव्यादिभीरूपैर्जगद्धारयेदित्यर्थः ॥ ८३ ॥ प्राणादीनांक्रमेणबाह्यरूपाण्याह चक्षुरिति चक्षुषआदित्यस्यचभे
दोनास्ति उभयोःप्राणस्वरूपत्वात्तदभिन्नाभिन्नस्यतदभिन्नत्वमितिन्यायानुगुण्यात् तथाचप्राणाख्यभेदस्यबाह्यंरूपमादित्यइतिभावः
तथाअपानाख्यभेदस्यबाह्यंरूपंपृथिवी पृथिव्याऽपानाकर्षणदर्शनात् तथासमानस्यदेहमध्यस्थस्यस्वर्गपृथिव्योर्मध्यवर्त्तीआकाशोबा
ह्यंरूपं मध्यवर्तित्वसाम्यात् तथाव्यानस्यसकलनाडीव्यापकस्यवायुर्बाह्यंरूपं व्यापकत्वसाम्यात् तथाउदानस्यतेजोबाह्यंरूपं उद्गमनस्व ॥७॥
भावसाम्यादित्यर्थः अत्रेदंबोध्यं षष्ठोपदर्शितहृदयपंचच्छिद्रोपासनायामपानादेरग्न्यादिदेवताकत्वमुक्तंतथापिरूपभेदोपोद्बलितशाखा
भेदेनप्रकृतविद्यायास्ततोभेदान्नदोषइति ॥ ८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदानतेजसोरभेदउपपत्तिःश्रुत्यादर्शितातामभिनयति तेजसीति यस्माज्ज्ञानोष्मादिस्वरूपिणि ज्ञानमंतःकरणवृत्तिरूपं ऊष्मास्पर्शेनोपलभ्याउष्णता आदिपदेननेत्रनिमीलनोपलभ्यानांमयूरपिच्छाकाराणांकेशोड्रकाणांग्रहः एवंविधरूपेदेहसंबद्धेतेजस्युपरतेशांतेसत्ययंजीवःप्राणंप्रयातिऊर्ध्वोच्छ्वासरूपप्राणवृत्तिप्रधानोभवतिसचप्राणोऽम्मयःआपोमयःप्राणइत्यादिश्रुतिषुजलमयत्वेनप्रसिद्धोप्यत्रमरणकालेउदानवृत्त्यातेजोरूपयासंयुतःसन्लोकांतरंनयेदित्यर्थः तथाचतेजोव्यतिरेकेउदानस्थितेरुच्छेददर्शनादुदानतेजसोरभेदइतिभावः ॥ ८५ ॥ सप्राणःकंलोकांतरंनयतीत्याकांक्षायांतमेवजीवमित्याह अंतेइति योजीवोंऽतेमरणकालेअनेनतत्तदर्थाकारेणकर्मरूपतः कर्मानुसारिरूपंपरिणामोयस्यतथाभूतेनचचेतसासंस्कृतोमरणकालोद्भूतकर्मवशाद्भाविशरीराकारविज्ञानजन्यसंस्कारवानितियावत्

तेजस्युपरतेयस्माज्ज्ञानोष्मादिस्वरूपिणि॥ प्राणंप्रयातिजीवोयंप्राणोलोकांतरंनयेत्॥ तेजसोदानरूपेण संयुतोत्राम्मयोपिच ॥ ८५ ॥ अंतेयश्चेतसानेनसंस्कृतःकर्मरूपतः॥ मानसेनात्मनाचैकइंद्रियैःसंगतेनच ॥८६॥ प्राणमेवंमयोक्तंयोजानीयात्पुरुषःसदा॥ तस्यविद्यादिरूपेयंसंततिर्नप्रहीयते॥ ८७॥ अमृतश्चात्मविज्ञानात्प्राणविद्यासमुत्थितात्॥ भवेद्दुःखंयतोभूयोनव्रजेत्कर्हिचित्क्वचित्॥ ८८ ॥ अथतस्मिन्नुपरते गार्ग्यःसौर्यायणिर्वचः॥ इदमाहविनीतात्मापिप्पलादंमुनीश्वरं॥ ८९॥

तस्योत्क्रमणयोग्यताबोधनायविशिनष्टि मानसेनेति पुनःकीदृशोजीवः इंद्रियैःसहितेनमानसेनमनसाआत्मनाप्राणेनचएकस्तादात्म्यापन्नस्तंलोकांतरंप्राणोनयतीतिपूर्वेणसंबंधः ॥ ८६ ॥ उक्तविज्ञानफलमाह प्राणमिति परमात्मनउत्पन्नःकर्माधीनशरीरसंबद्धस्तत्तत्स्थानेषुस्थितःसकलाध्यक्षोऽधिदैवमध्यात्मंचसर्वसंबद्धःप्राणोस्मीत्येवंयःप्राणमुपास्तेतस्यविद्यारूपःशिष्यपरंपरात्मकोजन्मरूपःपुत्रपौत्राद्यात्मकश्चवंशोनविनश्यतीत्यर्थः ॥ ८७॥ अमृतश्चेति तथाप्राणोपासनयाचित्तशुद्धिद्वाराजनितादात्मविज्ञानादमृतश्चभवतियतःपुनःसंसारदुःखंनव्रजतीत्यर्थः ॥ ८८ ॥ एवंसगुणविद्याविषयःप्रश्नत्रयेणोक्तोऽथनिर्गुणविद्यागोचरमवधारयितुंचतुर्थंप्रश्नंपंचविधमवतारयति अथतस्मिन्निति तस्मिन्नाश्वलायनेउपरतेतूष्णींभूतेसतिसौर्यायणिर्गार्ग्यःपिप्पलादंप्रतीदंवक्ष्यमाणजातीयंप्रश्नपंचकरूपंवचआहेत्यर्थः ॥ ८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचविधंप्रश्नमेवाभिनयति स्वपंतीति कानिस्वपंतिव्यापारोपरमरूपशयनस्याश्रयाःकेइतिप्रथमप्रश्नः अस्यप्रयोजनंजाग्रदाश्रयनिर्णयः यद्व्यापारोपरमेजाग्रन्निवृत्तिरूपंशयनंतस्यैवजाग्रदाश्रयतायाअर्थसिद्धत्वात् एवंकानिजाग्रतिसदास्वव्यापारारूढानीतिद्वितीयः प्रश्नः अस्यप्रयोजनंशरीररक्षकनिर्णयः सदासावधानस्यैवरक्षकत्वयोगात् स्वप्नान्कःपश्येदितितृतीयःप्रश्नःस्वप्नावस्थाश्रयनिर्णयफलकः स्वप्नावस्थायांसावधानस्यैवतदाश्रयत्वयोगात् तथासुखंसुषुप्तिकालिकंकोव्रजतिभुंक्तेइतिचतुर्थःप्रश्नःसुषुप्त्यवस्थाश्रयनिर्णयाय तथातर्हिसुषुप्तिकालेसर्वेमीप्राणादयःकुत्रकस्मिन्नाधारेतिष्ठंतीतिपंचमःप्रश्नस्तुरीयस्याक्षरस्यनिर्णयार्थइतिविभागः ॥ १० ॥ एषांक्रमेणोत्तराणिपिप्पलादउक्तवानित्याह एवंपृष्टइति तंगार्ग्यं स्वप्नदर्शनेस्वप्नावस्थायांचक्षुरादीनिदशेंद्रियाणिमनसासहएकतांतादात्म्यंगत्वास्वपंतिनिवृत्तव्यापाराणिभवंति सुषुप्तौतुसमनांसितानिस्वपंति तथाचइंद्रियविशिष्टंमनोजाग्रदवस्थायाआश्रयइतिभावः ॥ ११ ॥

॥८॥ स्वपंतिकानिवपुषिकानिजाग्रतिसर्वदा ॥ स्वप्नान्पश्येच्चकतरोदेवःकश्चसुखंव्रजेत् ॥ प्राणादिकाश्चसर्वेमी आधारेकुत्रतर्हिवै ॥ १० ॥ एवंपृष्टस्तदातेनपिप्पलादस्तमब्रवीत् ॥ चक्षुरादीनिसर्वाणिस्वपंतिस्वप्नदर्शने ॥ गत्वैकतांमनस्यत्रसुषुप्तौसमनांस्यपि ॥ ११ ॥ प्राणापानादयःपंचजाग्रत्यग्निसमन्विताः ॥ पच्यतेशयनेयस्मादन्नंजठरसंस्थितं ॥ १२ ॥ प्राणआहवनीयाख्योगार्हपत्योप्यपानकः ॥ व्यानोन्वाहार्य्यपचनःसमानोपिसमोग्निषु ॥ १३ ॥

कानिजाग्रतीतिद्वितीयंसमाधत्ते प्राणेति प्राणापानव्यानोदानसमानाख्याःपंचप्राणभेदाअग्निनाजाठरेणसहिताअतएवाग्निभावापन्नाइतियावत्तेसुषुप्तौजाग्रति यतस्तदानींभुक्तमन्नंपच्यतेइत्यर्थः तथाचतएवशरीररक्षकाइतिभावः ॥ १२ ॥ अत्रविदुषःसुप्तस्यापिश्रौताग्निहोत्रसंपत्तिःश्रुत्यादर्शितातामभिनयति प्राणइति अग्निहोत्रिणांगार्हपत्याख्योग्निर्ध्रुवःआहवनीयस्तुहोमार्थंगार्हपत्यात्प्रणीयते उद्धृत्यप्रज्वाल्यतेइतिप्रसिद्धंतथाप्रकृतेअपानादंतःप्रविशद्वायुरूपात्प्राणोबहिर्गच्छद्वायुरूपःप्रणीयतेउन्नियतेइतियावत् अनेनसाधर्म्येणप्राणाख्योभेदआहवनीयाग्निरूपः अपानस्तुगार्हपत्याग्निरूपः तथाव्यानाख्योभेदोऽन्वाहार्यपचनः अन्वाहार्यमोदनविशेषःसपच्यतेस्मिन्नितिव्युत्पत्त्यादक्षिणाग्निस्तद्रूपोव्यानाख्यभेदः दक्षिणतःस्थितत्वसाम्यात् यथादक्षिणाग्निर्हिदक्षिणतःकुंडेस्थितस्तथाव्यानोपिहृदयपंचच्छिद्राणांमध्येदक्षिणच्छिद्रेस्थितइतिभावः समानाख्योभेदस्त्वग्निषुगार्हपत्यादिषुसमःपक्षपातरहितोहोताबोध्यः यजमानेकार्यांतरव्यग्रेयजमानप्रतिनिधित्वेनशिष्यादिर्होताप्रसिद्धस्तत्स्थानीयोत्रसमानइत्यर्थः ॥ १३ ॥ ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रहेतुमाह उच्छ्वासमिति यद्यस्मादयंसमानउच्छ्वासनिःश्वासरूपेद्वेआहुतीसमेउत्कर्षापकर्षहीनेनयेत्प्रापयेदित्यर्थः पंचमोभेदउदान स्त्वस्यविद्वत्संबंधिनोग्निहोत्रस्यफलरूपः प्रसिद्धाग्निहोत्रेपिफललाभस्यउदानसाध्येनोत्क्रमणेनलभ्यत्वादितिभावः ॥ १४ ॥ प्रकृता ग्निहोत्रस्ययजमानमाह यजमानइति तत्रप्राणाग्निसाध्येग्निहोत्रेमनएवयजमानस्थानीयंयतस्तंमनोरूपयजमानंप्राणरूपाअग्नयोदि वारात्रौवाजातायांसुषुप्तौहृदंबुजमध्यस्थंब्रह्मलोकरूपंस्वर्गंनयंति प्रसिद्धाग्निहोत्रफलमप्यग्निभिर्दीयतेइतिप्रसिद्धंमुण्डके ॥ १५ ॥ फ लितंतृतीयचतुर्थप्रश्नयोरुत्तरमाह मनएवेति यतःस्वमावस्थायांमनोजाग्रद्दृष्टंसुषुप्तौचयजमानस्थानीयंततोमनएवचित्प्रतिबिंबवशाद्दे

उच्छ्वासमपिनिःश्वासमाहुतीयन्नयेदयं ॥ समेअस्याग्निहोत्रस्यह्युदानःफलमीरितः ॥ १४ ॥ यजमानोमन स्तत्रसुषुप्तौतमहर्निशं ॥ प्राणाग्नयोब्रह्मलोकेगमयंतिहृदंबुजे ॥ १५ ॥ मनएवततःस्वात्मचैतन्यपरिदीपितं ॥ पश्येत्स्वप्नंसुखंगच्छेत्सुप्तौसंसारवत्स्थितं ॥ १६ ॥ मनःस्थितोयआत्मायंचैतन्यवपुरीरितः ॥ प्राणादिकंजग त्सर्वंतस्मिन्नेवावतिष्ठते ॥ १७ ॥ वासवृक्षेयथालोकेपक्षिणोनेकदिग्गताः ॥ पृथिव्यादीनिभूतानिगुणैःस वैर्निजैःसह ॥ १८ ॥ चक्षुरादीन्यपितदाज्ञानकर्मेंद्रियाणिहि ॥ चतुर्विधांतःकरणंप्राणाःपंचविधाअपि ॥ १९ ॥

दीप्यमानंसत्स्वप्नान्पश्येत्स्वप्नावस्थाश्रयःतथासुषुप्तिकालिकंसुखंपश्येत्सूक्ष्मरूपेणसुषुप्तेरप्याश्रयः यतस्तदानींसंसारवत्स्पष्टसंसारानुप लंभेपितद्बीजरूपेणस्थितमित्यर्थः ॥ १६ ॥ पंचमंप्रश्नंसमाधत्ते मनःस्थितइत्यादिना मनसिस्थितःप्रतिबिंबरूपेणानुगतश्चैतन्यलक्षण श्चयआत्मासएवप्राणादिकस्यसर्वस्यजगतआधारइत्यर्थः ॥ १७ ॥ एतदेवस्फुटयति वासेतिद्वाभ्यां यथालोकेसायंकालेअनेकदिग्ग ताःपक्षिणोवासयोग्येमहतिवृक्षेतिष्ठंतितथापंचभूतानितद्गुणागंधादयश्चक्षुरादीनिदशेंद्रियाणिचतुर्विधमंतःकरणंपंचप्राणाश्चैतेपदार्थाः सपरिकराउक्तात्मन्यवतिष्ठंतइतिद्वयोरर्थः ॥ १८ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेवलंजडप्रपंचएवतत्रस्थितःकिंतुविशिष्टरूपेणजीवोपीत्याह सजीवइति इंद्रियांतःकरणप्राणानांव्यापारैर्विशिष्टरूपेणजीवोप्यत्रशु
द्धआत्मनिस्थितइत्यर्थः वस्तुतस्तुतस्यपरेणैक्यमेवेत्याह सोयमित्यादिना सोयमात्माविविधैरिंद्रियैःसहमिलित्वाव्यापाराणांदर्शना
दीनांकर्तृत्वाद्द्रष्टृत्वस्प्रष्टृत्वश्रोतृत्वादिगुणकःसन्जीवसंज्ञोपिवस्तुतःपरमेश्वरोयतोविज्ञानरूपेणभेदवर्जितइतिद्वयोरर्थः ॥ १०० ॥ १०१ ॥
उक्तविज्ञानफलमाह यस्त्वेवमिति यउक्तविधंसर्वोपाधिषुपरिपूर्णमानसंविशेषतोमनस्यभिव्यक्तंसर्वाधिष्ठानंशरीरत्रयेणरहितंस्वप्रका
शानन्दरूपंसंतमक्षरंचजानीतेआचार्योपदेशेनसाक्षात्कुरुतेससर्वंसामान्यरूपेणविशेषरूपेणचजानीतेसंसृतितापान्मुक्तश्चभवेदितिद्वयो

आत्मन्यत्रस्थितःसोयमिंद्रियैर्विविधैरपि ॥ १०० ॥ व्यापाराणां
सजीवइंद्रियादीनांव्यापारैरपिसंयुतः ॥ द्रष्टृत्वादिगुणोजीवसंज्ञोपिपरमेश्वरः ॥ १०१ ॥ यस्त्वेवंपुरुषंसंतंमानसंस
हिसर्वेषांकर्त्ताभेदविवर्जितः ॥ स्थूलसूक्ष्मशरीराभ्यांरहितंमाययापिच ॥ १०२ ॥ अक्षरंस्वप्रकाशाख्यमानंदात्मानमीश्वरं ॥
र्वसंश्रयम् ॥ जानीतेसंसृतेस्तापाद्विमुक्तश्चभवेत्सदा ॥ १०३ ॥ यत्रजीवस्तथा
जानीतेसतुसर्वंहिसामान्याच्चविशेषतः ॥ स्थितायोवेदतंगच्छेत्सर्ववित्सपरंपदं ॥ १०४ ॥ सत्यकामोथशैब्योमुंपप्रच्छा
प्राणाभूतेंद्रियसमन्विताः ॥ कतमंतेनलोकंसजयेदेतद्वदाधुना ॥ १०५ ॥ इत्यु
नंतरंमुनिं ॥ भगवन्मरणान्तंयओंकारध्यानसंयुतः ॥ ब्रह्मणःपरमस्यायमपरस्यचसर्वदा ॥ अभिधानमभिन्नःसन्नोंकार
क्तःपिप्पलादस्तमिदंवचनमब्रवीत् ॥
इतिगीयते ॥ १०६ ॥

र्थः ॥ १०२ ॥ १०३ ॥ एतदेवसंक्षिप्याह यत्रेति यत्राक्षरेजीवस्तदुपाधयःप्राणादयश्चस्थितास्तंपरमात्मानंयोवेदससर्ववित्सन्परं
पदंब्रह्मभावंगच्छेदिति ॥ १०४ ॥ वर्णितमक्षरंसकृदुपदेशेनावधारयितुंयोनशक्नोतितंप्रतिप्रणवालंबनंतदुपासनंविधातुंपंचमंप्रश्नमुत्था
पयति सत्येति अथअमुंपिप्पलादमिदमपृच्छत् इदंकिं हेभगवन्यःपुमान्मरणपर्यंतमोंकारंध्यायतिसलोकानांमध्येकंलोकंजयतीति
॥ १०५ ॥ इत्युक्तइति इत्थंपृष्टःपिप्पलादउक्तवान् योवर्णओंकारइतिगीयतेसोयंपरमस्याक्षराख्यस्यापरस्यप्राणाख्यस्यवाब्रह्मणोभि
धानंनामभवति कीदृशः अभिन्नः वाच्यवाचकयोरभेदस्यलोकेपिसिद्धत्वादितिभावः अथवादेवतायाःप्रतिमावत्प्रतीकत्वादभेदेनद्रष्टव्य
इत्यर्थः अन्यत्रान्यदृष्ट्यालंबनंहिप्रतीकइत्युच्यते ॥ १०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमुनेति आमुनाप्रणवेनध्यातेनपरब्रह्मदृष्ट्याअपरब्रह्मदृष्ट्यावाचिंतितेनपरमपरंवाब्रह्मप्राप्नुयात्ध्याताहेसत्यकाम तथाएतद्वक्ष्यमाणंफलंयथाकामंभवेदित्यर्थः ॥ १०७ ॥ अत्रचफलेनकेवलंकामनाभेदःप्रयोजकःकिंतुमात्राभेदोपीत्याह मात्रेति मात्राअकाराद्यास्तिस्त्रस्तासामेकस्याद्वयोस्तिसृणांवावेदादितादात्म्यानुसंधानस्यविशेषात्अयंफलभेदोबोध्यः अयंकः एकस्याःप्रथमायामात्रायास्त्रयींतिस्त्रोवृत्तीरित्यादिवाक्यदर्शितवेदादितादात्म्यानुसंधानादुपासकोभूलोकमृग्वेदाभिमानिभिर्देवैर्नीयते एवंद्वयोस्तथानुसंधानाद्यजुरभिमानिदेवैःस्वर्लोकंतिसृणांतथानुसंधानाच्चसामाभिमानिदेवैर्ब्रह्मलोकमित्यर्थः ॥ १०८ ॥ अत्रैकादिमात्रोपासनविधानेनतात्पर्यंकिंतुत्रिमात्रोपासनएवेत्याह ब्रह्मलोकमिति अनावृत्तिःसंज्ञिताचेतितायतोभवतिसतथा संज्ञास्याच्चेतनेत्यमरः एतादृशंब्रह्मलोकंयतस्त्रिमात्रप्र

अमुनाब्रह्मपरममपरंवापुमान्व्रजेत्॥ ध्यातेनसत्यकामैतद्यथाकामंफलंव्रजेत्॥ १०७॥ मात्राभेदात्फलेभेदःकथितोवेदवादिभिः॥ एकद्वित्रिक्रमाद्भूस्वर्ब्रह्मलोकाःफलानिहि॥ ऋग्यजुःसामभिर्नीतःक्रमात्प्राप्नोत्युपासकः॥ १०८॥ ब्रह्मलोकंत्रिमात्रेणयतोनावृत्तिसंज्ञितं॥ व्रजेत्तेनत्रिमात्रोयंमुमुक्षोःशस्तईरितः॥ १०९॥ त्रिमात्रःकथितःसोयमोंकारोब्रह्मलोकदः॥ मात्राद्वयंतुसंसारसुखदंपरिकीर्तितं॥ ११०॥ भूमिमृग्भिर्यजुर्भिःस्वर्ब्रह्मलोकंचसामभिः॥ ओंकारात्सर्वमेवैतियतस्तस्मादयंमहान्॥ १११॥ भारद्वाजःसुकेशाख्यःपप्रच्छैनमथागते॥ स्वस्यावसरआत्मानंपिप्पलादंमुनीश्वरं॥ ११२॥

णवेनव्रजेत्ततस्त्रिमात्रएवमुमुक्षुणाजप्यइत्यर्थः ॥ १०९ ॥ एतदेवस्फुटयति त्रिमात्रइति मात्राद्वयंप्रथमादिकंसंसारःपुनरावृत्तिस्तत्सहितंभूस्वर्लोकभवसुखंददातीत्यर्थः ॥ ११० ॥ एषमात्रागुणप्राधान्येनोपासितःप्रणवउक्तंफलंददातिअर्द्धमात्राप्राधान्येनसमालंबितस्तुब्रह्मसाक्षात्कारमितिसूचयन्फलितमाह भूमिमिति प्रथममात्राप्राधान्येनोपासनायामृग्भिर्ऋगभिमानिदेवैर्भूमिलोकमेति एवमग्रेपि अत्रप्रकरणेस्वःपदेनांतरिक्षलोकःप्रसिद्धस्वर्गविशिष्टउच्यते ओंकारादुपसर्जनीभूतमात्रात्रितयकात्तुसर्वंसर्वात्मकंब्रह्मैवैतियतएवंप्रभावःततोयंप्रणवोमहान्सर्वमंत्रेभ्यउत्कृष्टइत्यर्थः ॥ १११ ॥ अथषष्ठंप्रश्नंचतुर्थप्रश्नेवर्णिताक्षरस्यप्रत्यक्त्वावधारणफलकमुपक्रमते भारद्वाजइत्यादिना अथसुकेशनामकोभारद्वाजःस्वस्यावसरेआगतेसतिएनंपिप्पलादंमुनिवरंप्रत्यात्मानंप्रत्यग्वस्तुपप्रच्छेतिसंबंधः ॥ ११२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यप्रश्नमभिनयति भगवन्नितिषड्भिः हेभगवन्षोडशकलपुरुषनिर्णयार्थंबहुवारंविचारंकृतवानस्मीति ॥ ११३ ॥ हिरण्येति अत्रांत
रेकोसलदेशाधिपतिर्हिरण्यनाभनामाएतमेवषोडशकलंपुरुषंप्रष्टुंमत्समीपमागतवान् ॥ ११४ ॥ तेनेति तेनहिरण्यनाभेनपृष्टःसन्नहमेनं
राजानंप्रतीदमुक्तवान् इदंकिं हेभूपतेअहमेतंपुरुषंनजानामीति ॥ ११५ ॥ तत्प्रत्ययार्थंयदुक्तवांस्तदपिश्रावयति स्वप्नेपीति हेभूपतेअ
हमनृतभाषणस्यदारुणदुःखरूपंफलंपश्यन्विजानन् हेतौशता स्वप्नेप्यनृतंनवच्मीति ॥ ११६ ॥ तत्फलंदर्शयति समूलइति सपुरुषरूपो
वृक्षोलोकद्वयात्मकंफलमप्राप्यसमूलोमूलस्थानीयैर्भाग्यैःसहशुष्यतिक्षीयतेयोनृतंवदतीत्यर्थः ॥ ११७ ॥ इत्युक्तइति इतिमयोक्तः

भगवन्षोडशकलआत्मायःपरिकीर्त्तितः॥ तदर्थमहमत्यर्थंमननानिसमाप्तवान् ॥ ११३ ॥ हिरण्यनाभोनृ
पतिःकोसलानांकदाचन॥ मामगात्प्रष्टुमात्मानमेनंविनयसंयुतः॥ ११४ ॥ तेनपृष्टोहमप्येनमिदंवचनमु
क्तवान् ॥ पुरुषंषोडशकलंनाहंजानामिभूपते॥ ११५ ॥ स्वप्नेपिभूपतेनाहमनृतंवच्मिकर्हिचित् ॥ पश्यन्न
नृतवाक्यस्यफलंदुःखंसुदारुणं॥ ११६॥ समूलएवशुष्येत्सलोकद्वयफलंविना ॥ अनृतंयोवदेत्कापिपुरुषः
परिमोहितः ॥ ११७ ॥ इत्युक्तोराजपुत्रःसतूष्णींभूतोगतस्ततः ॥ मह्यंतंपुरुषंब्रह्मन्व्याख्यातुमधुनार्हसि
॥ ११८॥ एवंपृष्टस्तदाप्राहपिप्पलादोमुनीश्वरः॥ भारद्वाजंपुमानेषनदूरेकस्यचित्क्वचित् ॥ ११९ ॥ इहैवां
तःशरीरेस्मिन्पुमानास्तेमहेश्वरः॥ यस्मिन्संतिकलानित्यंषोडशापिमहात्मनि ॥ १२० ॥ सोयमंतःशरीरस्थः
पुरुषोजगदीश्वरः॥जगदुत्पत्तितःपूर्वमीक्षांचक्रेसिसृक्षया॥ एवंजरायुनिर्माणंकर्तुकामोमहेश्वरः॥१२१॥

सराजपुत्रोगतस्ततआरभ्यत्वद्धृदयशल्यभूतजिज्ञासागोचरंतंपुरुषंहेब्रह्मन्वक्तुमर्हसि ब्रह्मेतिपाठेब्रह्मरूपमित्यर्थः ॥ ११८ ॥ एवंपृष्टोमुनि
स्तस्यप्रत्यग्भावमुक्तवानित्याह एवंपृष्टइतिद्वाभ्यां एषत्वत्पृष्टःपुरुषोदूरेपराग्भावेनतिष्ठतिकिंतुइहास्मिन्शरीराख्येसंघातेअंतःप्रत्यक्त्वेन
तिष्ठति कीदृशोमहेश्वरः विश्वनियंतासकलप्रपंचात्मकानांषोडशकलानामधिष्ठानत्वादितिद्वयोरर्थः ॥ ११९ ॥ १२० ॥ तस्याद्वय
त्वस्फुटीकारायषोडशकलास्रष्टृत्वमाह सोयमित्यादिना सोयंमहेश्वरोजगदुत्पत्तितःपूर्वमेवमीक्षांचक्रेआलोचनंकृतवान् कीदृशः सिसृ
क्षामिषेणजरायोर्गर्भस्यजरायुवद्बंधकस्यउपाधेर्निर्माणंचिकीर्षुरित्यर्थः ॥ १२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंकथमित्यतआह अहमिति अहमत्रदेहेस्थितोपिसर्वगतोविक्रियावर्जितश्चउत्क्रांतिर्देहान्निष्क्रमणमादिर्येषांगत्यादीनांतेगुणाःप्रकारा यस्यास्तथाभूतांसंस्रृतिंकेनोपाधिनागंतागमिष्यामीत्यर्थः ॥ १२२ ॥ एवमिति इत्थमालोच्यसप्रभुरीश्वरोभगवान्ज्ञानादिसंपन्नःअतए वध्याताआलोचयिताप्रथमंप्राणंप्रथमकलारूपंसृष्टवान् कीदृशं उत्क्रांत्यादयोहेतवःप्रयोजनानियस्यसतथातंपंचात्मकंपंचरूपकमिति ॥१२३॥ प्राणोपाधिरिति प्राणविशिष्टःसन्नयंदेवोमृत्युरूपश्चतुर्थाध्यायेऽशनायाशालितयामृत्युरितिवर्णितःश्रद्धाख्यांद्वितीयांकलांसस र्ज कीदृशीं शुभकर्मप्रवर्त्तकास्तिक्यशालिबुद्धिरूपामिति ॥१२४॥ पंचेति ततःकर्मकृतिफलभोगयोराधारभूतानियान्याकाशादीनिपं चभूतानितद्रूपंकलापंचकमसृजत्ततोज्ञानकर्मसाधनंदशविधंचर्यादिद्रियंतद्रूपामष्टमींकलामसृजत्तन्नियंतृमनोरूपांनवमींतत्स्थितिप्र

अहंसर्वगतोदेहेस्थितःकेनात्रसंस्रृतिं॥ उत्क्रांत्यादिगुणांगंताविक्रियापरिवर्जितः॥ १२२॥ एवंविचिंत्यभ गवान्स्वस्योत्क्रांत्यादिहेतुकम्॥ प्राणंपंचात्मकंध्यातासृष्टवान्प्रथमंप्रभुः ॥ १२३ ॥ प्राणोपाधिरयंदेवोमृ त्युरूपोमहेश्वरः॥ धियमास्तिक्यरूपांतांश्रद्धांपूर्वंससर्जसः ॥ १२४ ॥ पंचभूतानितदनुज्ञानकर्मेंद्रियाणि च॥ मनसासहितान्यन्नमन्नाद्वीर्यंशरीरिणां॥ १२५॥ ततस्तपश्चकर्माणिलोकवेदाश्रितानिच ॥ वेदाध्य यनमप्येतत्पूर्वंयत्कर्मणांभवेत् ॥ १२६ ॥ वेदामंत्रादिरूपाश्चप्राणादेवविनिर्गताः ॥ अन्नादिनातातास्ते पिस्युरन्नादेर्विनिर्गताः॥ १२७॥

योजकान्नरूपांदशमींतज्जन्यंयद्वीर्यंसामर्थ्यंतद्रूपामेकादशींचकलामसृजदित्यर्थः ॥ १२५ ॥ ततस्तपश्चेति ततोवीर्यात्तपःशोधकंत थाकर्माणिलौकिकानिवैदिकानिजातानितथाश्रुतौमंत्रपदोक्तंवेदाध्ययनंचजातंयद्वेदाध्ययनंकर्मणांमध्येपूर्वंप्रथमं कर्मणइतिपाठेयत् श्रुतौकर्मणःपूर्वंपठितंतद्भवेदित्यर्थः तथाचतपोद्वादशीवेदाध्ययनंत्रयोदशीकर्मचतुर्दशीकलेतिभावः ॥ १२६ ॥ मंत्रपदस्यवेदाध्ययने लक्षणायांवीजमाह वेदाइति मंत्रब्राह्मणरूपायेवेदास्तेसाक्षात्प्राणादेवप्रादुर्भूताअस्यमहतोभूतस्यनिःश्वसितमेतदित्यादिश्रुत्यंतरात्नतुवी र्यात्परंत्वन्नादिनाअन्नमादिःकारणंयस्यतथाभूतेनवीर्येणतपसाचततताअध्ययनाद्यारोहरूपंविस्तारंगताइत्यतोऽध्ययनद्वारैवतेवेदाअ न्नादेर्वीर्यादितोविनिर्गताःस्युर्नसाक्षादतोयुक्तालक्षणेत्यर्थः ॥ १२७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मभ्यइति तेभ्यः कर्मभ्योलोकाःकर्मफलानिसुखादिलक्षणानिपंचदशकलारूपाणिजातानितेषुतत्तच्छरीरावच्छिन्नसंबंधिदेवदत्तादि रूपंनामषोडशकलात्मकंजातंयन्नामप्रलयपर्यंतमविनाशित्वादनंतमितिगीयतेश्रुतिष्वित्यर्थः ॥ १२८ ॥ यथाचैताःकलाःपरमात्मनए वोत्पत्तेर्नद्वैतावहास्तथातत्रविलयाच्चनद्वैतावहाइतिसूचयन्विदुषोमुक्तावस्थांवर्णयति मुक्तस्यैताइति मुक्तस्तत्त्ववित्तद्दृष्ट्याएताःप्राणा दिकाःषोडशकलाःस्वकारणंस्वकल्पनाधिष्ठानंनिर्गुणंपुरुषंप्राप्यविनश्यंतिअदर्शनंयांतिनदीसमुद्रन्यायेनेत्यर्थः ॥ १२९॥ नद्यइति य थानद्यःस्वकीयेनामरूपेविहायसमुद्रस्यैवनामरूपेधारयंतितथामुक्तस्यैताःकलाःस्वकीयाभ्यांनामरूपाभ्यांवर्जिताःसत्योनिर्विशेषस्य

कर्मभ्योनिखिलालोकाःसुखदुःखात्मकाहिये॥ लोकेषुनामयन्नाशंमुक्तस्यापिनगच्छति ॥ आसर्वभूतवि लयमनंतमितिगीयते॥ १२८॥ मुक्तस्यैताःकलाःसर्वाःपुरुषंप्राप्यनिर्गुणं ॥ स्वकारणेविनश्यंतिसमुद्रमि वसिंधवः ॥ १२९ ॥ नद्योयथास्वकीयानिरूपाणिसहनामभिः ॥ त्यक्त्वायांतिसमुद्रस्यनामरूपेसमुद्रगाः ॥ १३० ॥ मुक्तस्यैताःकलाःस्वस्यनामरूपविवर्जिताः ॥ पुंसएवप्रयांत्येतानामरूपेमहात्मनः॥ नामरूपवि हीनस्यनिष्कलस्यपरात्मनः ॥ १३१ ॥ आनंदात्मापुमानेषस्वप्रभोनिष्कलोमृतः ॥ रथनाभावरायद्वत्कला स्तस्मिंस्तथास्थिताः॥ १३२ ॥ एवंविजानतांपुंसांनपुनर्मृत्युजंभयं ॥ भवेदेतच्छरीरस्यपाततःपरतःक्वचि त् ॥ १३३ ॥ भारद्वाजमिदंप्रोच्यपुनःसर्वानभाषत ॥ पिपासादोषमिलितान्षडपिद्विजसत्तमान् ॥ १३४॥ एतावदेवजानामिद्विजाब्रह्माहमव्ययं ॥ नातःपरंकिमप्यस्तिनजानाम्यतएवतत् ॥ १३५॥

पुरुषस्यैवनामरूपेयांतीतिद्वयोरर्थः ॥ १३० ॥ १३१ ॥ तंपुरुषंलक्षयति आनंदात्मेति रथावयवनाभौयद्वदराःस्थितास्तद्वद्यस्मिन्नेताः कलाःस्थिताएषपुमान्स्वयंप्रकाशानंदरूपोनिर्विकारश्चेत्यर्थः ॥ १३२ ॥ अस्यपुरुषस्यात्मत्वेनविज्ञानाच्चप्रमादरूपान्मृत्योर्भयंनभव तीत्यतएतद्विज्ञानंभवतामप्यस्त्वित्याह एवमिति एतच्छरीरस्यपाततःपरतःप्रारब्धसमाप्त्यनंतरमित्यर्थः ॥ १३३ ॥ भारद्वाजमिति एता वद्भारद्वाजायसुकेशायउक्त्वापुनःसर्वान्प्रतीदमुक्तवान्पिप्पलादः कीदृशान् पिपासातद्वागमृतपानेतृष्णातद्वतः॥ १३४ ॥ एतावदेवेति हे द्विजाअहमेतावदेवब्रह्मरूपंतत्त्वंजानामिअस्यमज्ज्ञानस्यएतावत्त्वंनपरिच्छेदात्किंत्वधिकविषयाभावादित्याह नातइति अतोमद्विज्ञात तत्त्वात्परंपृथगवशिष्टंकिमपिनास्तीत्यतःपरंनजानामीत्यर्थः ॥ १३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्ताइति तेसर्वेइत्येवमुक्ताःकथिताःसंतस्तंपिप्पलादंमुनिंदेववदर्चयामासुः कीदृशंतं यशोरूपसाधर्म्यैणदेवदेवसममितियावत् तंचप्र तीदंवाक्यमुक्तवंतः ॥१३६॥ आचार्यप्रार्थनावाक्यमभिनयति छिन्नाइतिचतुर्भिः स्पष्टं ॥१३७॥ अद्येति हेब्रह्मन्अद्यवयंत्वत्तोजाताब्र ह्मरूपेणेतिशेषः यतोब्राह्मणोत्तमाःस्मःसब्रह्मणःकेनस्यादित्यादिबृहदारण्यकश्रुतौब्रह्मविद्ययैवमुख्यब्राह्मणस्यदर्शितत्वादितिभावः तत स्त्वमेवास्माकंमातापिताचनापरः मिथ्यात्मनःशरीरस्योत्पादकत्वात् तदुक्तंमनुना उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदःपिता ब्रह्मजन्महिविप्र स्यप्रेत्यचेहचशाश्वतमिति अन्यत्रापि शरीरमेतौकुरुतःपितामाताचभारत आचार्यदत्तायाजातिःसानित्यासाजरामराइति॥१३८॥त्वादृ

इत्युक्ताअर्चयामासुस्तंमुनिंतेद्विजोत्तमाः॥देववद्यशसादेवमभाषंतचतंप्रति ॥१३६॥ छिन्नास्तेसंशया ब्रह्मन्कृतार्थाश्चवयंकृताः॥ दर्शितंचपरंब्रह्ममायातःपरतोहियत्॥१३७॥ अद्यब्रह्मन्वयंजातास्त्वत्तोमीब्रा ह्मणोत्तमाः॥ ततोमातापिताचत्वमस्माकंनापरःक्वचित्॥ १३८॥ त्वादृशेभ्योनमस्कारोस्त्वस्माकंभवतात्स दा॥ भवताकर्णधारेणतारितादुस्तरंवयं॥ अविद्यावारिधिंयत्रग्राहाःकामादयःश्रिताः॥ १३९॥ एवमुक्ते थतान्सर्वान्पिप्पलादोव्यसर्जयत्॥ यथासुखंयथान्यायंस्वयंचगतवान्मुनिः॥ १४०॥ आत्मज्ञानमिदंशु द्धचेतोभिःसात्विकैःसदा॥ प्राप्यतेब्रह्मनिष्ठेनमहतागुरुणेरितं ॥ १४१॥ नृसिंहोपासकायद्वद्देवाःसंशुद्धमा नसाः॥ प्राप्तवंतःपुराब्रह्मगुरुणाब्रह्मणेरितं॥ १४२॥

शेभ्यइति भवताकर्णधारेणकर्णोपदेशकेनकामादियाहाकुलमविद्यावारिधिंतारिताःपारंनीताः अस्योपकारस्यास्माकंप्रत्युपकारमपश्य तामुपायनभूतोभवादृशान्गुरुन्प्रीणयितुंनमस्कारएवास्त्वित्यर्थः ॥ १३९ ॥ एवमुक्तइति एवंतैरुक्तेसतितान्यथान्यायमाशीःप्रयोग पूर्वकंपिप्पलादोव्यसर्जयत् स्वयंयथासुखंगतवान् ॥ १४० ॥ उत्तराकांक्षांजनयन्ब्रह्मविद्यायायोगक्षेमप्रयोजिकाचित्तशुद्धिरेवोपा सनाजन्येत्याह आत्मेतिद्वाभ्यां एतज्ज्ञानंमहतागुरुणेरितमपिसात्विकैरेवावाप्यते यथानृसिंहोपासकादेवास्तत्प्रजापतिरूपगुरुणेरितं प्राप्ताइतिद्वयोःसंबंधः ॥ १४१ ॥ १४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरति इतितेइति ॥१४३॥ नमःसप्तदशायास्तुषोडशापेक्ष्यकल्पिता कलानविद्यतेयत्रविभातेपरमात्मना ॥१॥अत्रकलापदमावर्त्त
तेतत्रैकंवर्णितार्थंपूर्वान्वयिद्वितीयंपरिच्छेदार्थकमुत्तरान्वयि परमत्वंकेवलत्वं स्फुटमन्यत् इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारा

इतितेकथितंसर्वंपिप्पलादेनकीर्त्तितम् ॥ ज्ञानंयद्भवतापृष्टंकिमन्यच्छ्रोतुमिच्छसि ॥ १४३ ॥ इतिश्रीमत्पर
महंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितउपनिषद्रत्नआत्मपुराणेप्रश्न
सारार्थप्रकाशेपिप्पलादसुकेशसंवादोनामसप्तदशोऽध्यायःसमाप्तः ॥ १७॥ ॥ ६ ॥ ॥ ६ ॥

मसूरितनूजरामकृष्णस्यश्रीविश्वेश्वराश्रमपूज्यपादानुगृहीतस्यकृतावात्मपुराणटीकायांसत्प्रसवाख्यायांसप्तदशोध्यायःसमाप्तः ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे सप्तदशोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथात्मपुराणे अष्टादशाऽध्यायप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमानासुरवारवारणपटुर्घोषो
श्रीगणेशायनमः भक्तत्राणेपरापेक्षामाममास्त्वितिचिंतया ॥ नूनंसर्वात्मभूतायश्रीनृकेसरिणेनमः ॥१॥ यदीयोद्धुतःक्षोणीध्रानपिचालयन्शकलयन्द्वीपांस्तथाष्टादश ॥ प्रह्लादोदयहेतुरेवभगवानेषस्वरूपाद्बहिःकश्चित्कर्त्तुमशक्नुवन्मुनिवरैरष्टादशेवर्ण्यते ॥२॥ अथमेधावीशिष्योगुरोरुपदेशायाससाफल्यंदर्शयन्सविस्तरमुक्तमनूद्यपृच्छति श्रुत्वेतित्रिंशताश्लोकैः चोप्यर्थैभिन्नक्रमः तथाचतृप्तिमुपागतोपिशिष्यआश्चर्यंनृसिंहोपासकदेवदत्तरूपंश्रुत्वापुनःप्रश्नायमनःकृतवान् ॥ १ ॥ उवाचचेति एतद्वक्ष्यमाणं चेतसःप्रमोदेनविकासितवदनइतियावत् ॥ २ ॥ भगवन्निति मुनीनामैतरेयादीनांभावितस्तपसोद्योतितआत्मामनोयेषांतेतथा सुराणामिंद्रा

श्रीगणेशायनमः श्रुत्वानानाविधंज्ञानंशिष्यस्तृप्तिमुपागतः॥श्रुत्वाचाश्चर्यमतुलंपुनःप्रष्टुंमनोदधे ॥ १ ॥ उवाचचवचस्त्वेतत्स्वगुरुंहृष्टमानसः ॥ उत्फुल्लवदनांभोजःकृतकृत्येनचेतसा ॥ २ ॥ भगवन्भवतानेकमुनीनांभावितात्मनां ॥ सुराणामपिविज्ञानंबहुशोमत्यमीरितम् ॥ ३ ॥ गतंतमस्ततःसर्वंघोरसंसारकारणं ॥ आनंदात्माचभात्येषस्वप्रभश्चनिरंतरम् ॥ हृदयेकामिनांयद्वत्कामिनीदुष्टचेतसाम् ॥ ४ ॥ अद्याहंकृतकृत्योस्मिभवतोवाक्यगेमया ॥ प्रष्टव्यंनात्मविज्ञानेकिंचिदप्यवशिष्यते ॥ ५ ॥ परंकौतूहलंकिंचिद्वर्त्ततेबालभावतः ॥ लालितोभवतायस्मादहंनानाविधोक्तिभिः ॥ ६ ॥ मत्स्यंयस्मात्त्वयाप्रोक्तमैतरेयसमीरितम् ॥ ज्ञानमाख्यानसहितंदुर्लभंयद्द्विजन्मनां ॥ ७ ॥ श्रोतारश्चापिवक्तारोभाग्यवंतोत्रकेचन ॥ एतत्श्रुत्वापिजीवंतिमादृशास्त्वादृशाअपि ॥ ८ ॥

कामिनीति
दित्यादीनाम् ॥ ३ ॥ गतमिति ततोविज्ञानात्तमआवरणंगतमतएवात्मायथावद्भाति तस्यनिरतिशयप्रेमगोचरतायांदृष्टांतः कामिनीति ॥ ४ ॥ अद्येति वाक्यगेवाक्यलब्धेआत्मनिर्णयेप्रष्टव्यंसंदिग्धंकिंचिन्नास्तीत्यर्थः ॥ ५ ॥ परमिति तथापीत्यादिः तथापिएकंकौतूहलंकुत्राप्यर्थेजिज्ञासारूपंममवर्त्ततेबालभावमादाय बालभावादानेहेतुःपुनःपुनःप्रश्नेपिविनोद्वेगमुत्तरोक्तिरूपंलालनमित्यर्थः ॥ ६ ॥ लालनरूपतयातीतकथाप्रबंधंवर्णयति मत्स्यमित्यादिना आदौऐतरेयविज्ञानमुक्तं यद्द्विजानांदुर्लभं ॥ ७ ॥ दुर्लभत्वमेवस्फुटयति श्रोतारश्चेति अत्रद्विजानांमध्येयेएतद्विज्ञानंश्रुत्वाजीवंतिप्राणधारणमिवमन्यंतेतेमादृशाभाग्यवंतःश्रोतारःकेचनविरलाएवतथात्वादृशावक्तारोपिकेचनैवेतिसंबंधः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कौषीतकेस्त्विति कौषीतकिमुनिसंबंधिज्ञानमप्युक्तंयदिदानीमुच्छिन्नंलुप्तसंप्रदायमिववर्त्ततेयतःकेषुचिद्विरक्तेष्वेवदृश्यते देश्येषुदेशसंबं
धेनप्रसिद्धेषुजनेषुनास्ति अमुकदेशेएतच्छाखाध्यायिनइतिप्रसिद्धिर्नास्तीतियावत् ॥ ९॥ इन्द्रेति यत्रकौषीतकिविज्ञानेइंद्रप्रतर्दन
योर्वृत्तंश्रुतंतथाश्चर्यकारणभूतोबुद्धिवर्द्धकश्चाजातशत्रुवालाक्योःसंवादःश्रुतइत्यर्थः ॥१०॥ चतुर्थादीनांचतुर्णामध्यायानामर्थमनुवद
ति ज्ञेयमितिनवभिः अयंयाज्ञवल्क्यःस्वस्यस्मृतौस्वकर्तृकेस्मृत्याख्यग्रंथेसंन्यासिनःप्रतिइत्यवदत्उपदिदेश इतिकिं ज्ञेयंचारण्यकमहंय
दादित्यादधीतवानिति यन्मयादित्यादधीतंतद्बृहदारण्यकमपिमुमुक्षुणाज्ञेयमर्थतोऽवधार्यमितितदर्थः ॥११॥ त्रिकांडमिति तत्अवश्यज्ञे

कौषीतकेस्तुयज्ज्ञानमुच्छिन्नमिववर्त्तते॥ विरलेष्वेवविप्रेषुक्वचिद्देशेषुनास्तियत् ॥९॥ इंद्रप्रतर्दनाख्यानंश्रु
तंतद्रोमहर्षणं॥ अजातशत्रोर्बालाकेःसंवादउभयोरपि॥ आश्चर्यकारणंयत्रबुद्धिवृद्धिश्चजायते॥१०॥ ज्ञे
यंचारण्यकमहंयदादित्यादधीतवान् ॥ याज्ञवल्क्यइतिस्वस्यस्मृतौसंन्यासिनोवदत् ॥ ११ ॥ त्रिकांडंतच्च
विविधमुपासनविवर्जितं॥ त्रिभिर्वंशैश्चसहितंमधुब्राह्मणसंस्थितं ॥ १२ ॥ मंत्रायेत्रतदर्थानामाविष्क
रणतोमहान्॥ मधुकांडस्यसर्वस्यमंत्रार्थःप्रकटीकृतः॥ १३॥ खिलकांडस्यचाप्यर्थस्तत्रांतर्भावमागतः॥
दध्यङ्ङाथर्वणोयत्रगुरुःशिष्यौतथाश्विनौ॥ १४ ॥ शक्रोप्यनर्थहेतुश्चजीवनंचपुनर्मुनेः॥ अश्विनोरग्रतस्त
त्रमंत्रद्रष्टुर्यतोद्भुतम्॥ १५॥ याज्ञवल्क्यीयकांडेपिजल्पवादकथाद्विधा ॥ प्रवृत्ताध्यायभेदेनब्रह्मज्ञानकरी
सदा ॥ १६ ॥

यतयोक्तआरण्यकेप्रोक्तंविज्ञानं कीदृशं त्रिकांडंमधुकांडयाज्ञवल्क्यकांडखिलकांडैःप्रकाशितंनानारूपवंशत्रयसहितंमधुब्राह्मणेसंस्थि
तंप्राधान्येनपर्यवसन्नंचतदुपासनवर्जितमुक्तमित्यर्थः ॥ १२ ॥ मंत्राइति यत्रारण्यकीयविज्ञानेमधुकांडस्यसर्वस्यमहानर्थःप्रकटीकृतः
कथं अत्रमधुकांडेयेमंत्रास्तेषामर्थाविष्करणमुखेनेत्यर्थः ॥ १३ ॥ खिलेति तत्रमधुकांडीयमंत्रार्थैखिलकांडीयोर्थोप्यंतर्भावेणोक्तः
यत्रमधुकांडार्थेदध्यङ्गुरुरुक्तःअश्विनौचशिष्यतयोक्तावित्यर्थः ॥ १४ ॥ शक्रइति तथायत्रमंत्रद्रष्टुर्मुनेःशक्रोनर्थहेतुरुक्तस्तथाश्वि
नोरग्रतस्त्वस्यमुनेःपुनर्जीवनमुक्तमित्यर्थः ॥ १५ ॥ याज्ञवल्क्यीयेति याज्ञवल्क्यीयेकांडेपंचमषष्ठाध्यायरूपेक्रमेणजल्परूपावादरूपा ॥१॥
चयाकथाप्रवृत्तासाध्यायभेदेनोक्तेत्यर्थः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रपंचमेजल्पकथोक्तेत्याह आश्वलादीतिद्वाभ्यां आश्वलादीनांगार्ग्याश्चहृदयेस्थितायेसंशयाबलात्तर्कादिरूपादापतिताःप्रकाशिताइतियावत् तेयाज्ञवल्क्येनविभिन्नाजल्पकथयानिरस्ताः शाकल्यस्यतुवर्त्तमानशरीरेणसहतेसंशयाःपुनर्यथानभवंतितथाविभिन्नाइतिद्वयोरर्थः ॥ १७ ॥ १८ ॥ वादकथयातुषष्ठेजनकःसंसाराद्बहिष्कृतःसप्तमेमैत्रेयीचसंसाराद्बहिष्कृतेत्याह जनकइति अमुनायाज्ञवल्क्येनसंसाराद्भीतोजनकस्ततोबहिर्नीतोमोचितस्तादृशीसंसारभीतास्वस्यभार्याचमोचितेत्यर्थः ॥ १९ ॥ अष्टमादित्रयार्थमाह श्वेताश्व

आश्वलादिमुनींद्राणांसंशयाहृदयस्थिताः ॥ विभिन्नाअपिगार्ग्याश्चबलादापतिताहिये ॥ १७ ॥ याज्ञवल्क्येनमुनिनाशाकल्यस्यपुनस्त्विमे ॥ अनेनवपुषाभूयोनभवंतियथातथा ॥ १८ ॥ जनकोमिथिलानाथोभीतःसंसारकाननात् ॥ बहिर्नीतोमुनैवापिभार्यास्वस्यचतादृशी ॥ १९ ॥ श्वेताश्वतरनामापियद्यतिभ्योऽवदत्पुरा ॥ द्विजेभ्योपियदब्रूतामुभौतौकठतित्तिरी ॥ २० ॥ यमोयत्रगुरुःशिष्योनचिकेताविवेकवान् ॥ वरुणश्चभृगुस्तद्वद्वेनानुभवभाषणं ॥ संन्यासःपरमंयत्रसत्यादीनांचसाधनम् ॥ २१ ॥ जाबालादिश्रुतिप्रोक्तंज्ञानंनानाविधंमहत् ॥ पूर्वेसंन्यासिनोयत्रसंवर्ताद्यामुनीश्वराः ॥ २२ ॥ हेतुस्त्यागस्यवैराग्यंतस्ययोगादिकंतथा ॥ अधिकारोविरक्तानांतस्यवेषश्चयत्रसः ॥ २३ ॥ शिखायज्ञोपवीतादिरहितोप्येकदंडवान् ॥ आचारोब्रह्मचर्यादिरात्मज्ञानंपरंतथा ॥ २४ ॥

तरेतिद्वाभ्यां तदप्युक्तमितिशेषः ॥ २० ॥ यमइति यत्रकठोक्तेयमनचिकेतसौगुरुशिष्यौतित्तिर्युक्तेचवरुणभृगूतथावेनानुभवःसत्यादीनांमध्येसंन्यासःपरमंसाधनमितिचोक्तमित्यर्थः ॥२१॥ एकादशार्थमाह जाबालादीतित्रिभिः यत्रजाबालाद्युक्तविज्ञानेसंवर्त्ताद्याःपूर्वेप्राचीनाःपरमहंसाउक्ताः ॥ २२ ॥ हेतुरिति तस्यपारमहंस्यरूपस्यत्यागस्यहेतुर्वैराग्यंयोगादिकंचोक्तं तथाविरक्तानांतस्यत्यागस्याधिकारइत्युक्तं तथात्यागिनांवेषश्चशिखादिरहितत्वेसत्येकदंडत्वलक्षणउक्तः तेषामेवब्रह्मचर्यादिरूपआचारःपरंज्ञानंचोक्तमितिद्वयोरर्थः ॥ २३ ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामेतिद्वाभ्यां साम्नश्छांदोग्यस्ययत्षष्ठाद्यध्यायत्रयंतस्यार्थःशोभनज्ञानमयोऽध्यायत्रयेणोक्तः यत्रारुण्या
 द्वादशादित्रयवृत्तमाह केनेषोत्थमिति केनेषःकेनोपनिषत्तदुत्थंतत्प्रतिपादितंज्ञा
दयोगुरवःश्वेतकेत्वादयःशिष्याश्चोक्ताः ॥ २५ ॥ २६ ॥ पंचदशादिवृत्तमाह अथर्वणइति अथर्वाणंप्रतियाविद्याब्रह्मणोक्तायेचषट्
नमुक्तंयत्रेंद्रोब्रह्मविद्यानुग्रहेणयक्षरूपंब्रह्मव्यलोकयदित्युक्तमित्यर्थः ॥ २७ ॥ ततोहमिति ततउक्तप्रश्नोत्तरैर्लालनात्किंचिदपरम
 प्रश्नायच्चतेषांप्रश्नानामुत्तरंपिप्पलादेनोक्तमेतत्सर्वंत्वयामह्यमुक्तमित्यर्थः ॥ २८ ॥ अवधार्येति हेगुरोतत्प्रश्नेप्रवर्तनंमेममसर्वंत्वदनुकीर्तितमवधार्यैवनतुपूर्वंवि
पिप्रष्टुमिच्छामि एतच्चममप्रश्नेप्रवर्त्तनंनांधरज्जुन्यायेनेत्याह

सामाध्यायत्रयस्यार्थोयत्रज्ञानंसुशोभनं ॥ आरुणिःश्वेतकेतुश्चगुरुशिष्यौमहामुनी ॥ २५ ॥ सनत्कुमारो
भगवान्नारदश्चतथैवतौ ॥ यत्रब्रह्मागुरुःशिष्यौतद्वदिंद्रविरोचनौ ॥ २६ ॥ केनेषोत्थंचविज्ञानमिंद्रोयत्रव्य
लोकयत् ॥ ब्रह्मविद्याप्रसादेनयक्षंब्रह्मसनातनं ॥ २७ ॥ अथर्वणेचयाविद्याब्रह्मणोक्तातिशोभना ॥ षट्प्र
श्नाउत्तरंतेषांपिप्पलादेनकीर्तितं ॥ सर्वमेतत्त्वयाप्रोक्तंयद्यत्पृष्टंमयागुरो ॥ २८ ॥ ततोहमधुनाकिंचित्प्रष्टुमि
च्छामिबालकः ॥ अवधार्यगुरोतन्मेसर्वंत्वदनुकीर्तितं ॥ २९ ॥ भवताकथितंदेवाब्रह्मणोब्रह्मबोधनम् ॥
प्राप्तास्तदहमिच्छामिश्रोतुंब्रह्मावबोधनं ॥ ३० ॥ इत्युक्तोगुरुरप्याहकथामेतांसुशोभनां ॥ उपासकान्नृसिंह
स्यदेवायेकीर्त्तितामया ॥ तइमेसर्वभूतानांचक्षुरादिषुसंस्थिताः ॥ ३१ ॥ नृसिंहोभगवान्क्रुद्धःसर्वसंहार
कारकः ॥ ब्रह्माचसर्वजनकोविष्णुरप्येषपालकः ॥ ३२ ॥

एवंपृष्टोगुरुराथर्वणीमिमांनारसिंहींकथामुक्तवानित्याह इत्युक्तइ
स्तृत्येत्यर्थः ॥ २९ ॥ फलितंप्रश्नंदर्शयति भवतेति स्पष्टम् ॥ ३० ॥ उपासकाइति ॥ ३१ ॥ उपास्यतत्त्वंवर्णयति नृसिंहइ
ति तत्रोपासकत्वेनयेनिर्दिष्टास्तेचक्षुरादीनामधिष्ठातारआदित्यादयोबोध्याइत्याह क्रुद्धःसर्वसंहारकारकइति क्रोधेनसर्व
ति नाचासौसिंहश्चसतथाभगवान्परमेश्वरउपास्यइतिशेषः तत्रसिंहभावानुकूलंतस्यरुद्रत्वमाह ब्रह्माचेति तथाचपूर्वतापत्तीयश्रुतिः सब्रह्मास ॥२॥
संहारकत्वादयमेवरुद्रइतिभावः नृभावानुकूलांब्रह्मविष्णुरूपाभ्यांसृष्टिस्थितिहेतुतामाह
शिवःसहरिरिति ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथापूर्वतापनीयेउमापतिःपशुपतिरित्यादिनारुद्राभेदउक्तस्तंस्फुटयन्समानायामांगिरसाख्यशाखायांगतायाअथर्वशिरोनामकोपनिषत्तस्यांरुद्रचरितमित्यंतग्रंथेनवर्णितंमहिमानंपूर्वतापनीयार्थान्तर्भावेणप्रतिपादयति अथर्वशिरसीत्येकचत्वारिंशताश्लोकैः योनृसिंहोऽथर्वशिरसिवर्णितरुद्ररूपोयोरुद्रःपुमान् पातेर्डुम्सुन् शरणागतानांपालकोदेवानांकैलासरूपंसत्वद्गत्तिरूपंवास्वर्गंप्राप्तानांत्वंकोसीत्यात्मानंपृच्छतांचगुरुःसन्नात्मानंसर्वव्यापिनंप्रतिपाद्यतथांतरादंतरंनितरांप्रत्यग्भावंगत्वाबोधयित्वातान्पश्यतोदेवाननादृत्यांतर्दधेलीलाविग्रहंतिरोहितंचक्रइत्यर्थः ॥ ३३ ॥ ब्रह्मादयइति तथायस्यदेवस्यब्रह्माहिरण्यगर्भआदिर्यासांविष्णुस्कंदादीनांसत्यमंतेयासांतास्तथा

अथर्वशिरसिप्रोक्तोरुद्रोयोदेवतागुरुः ॥ सर्वव्यापिनमात्मानमुक्त्वाचांतर्दधेपुमान् ॥ अंतरादंतरंगत्वापश्यतांत्रिदिवौकसां ॥३३॥ ब्रह्मादयस्तुयस्यैताःसत्यांताश्चविभूतयः ॥ विश्वरूपस्यदेवस्यत्युमाभर्त्तुर्महात्मनः ॥ ३४ ॥ दृष्ट्वासोमंयमात्मानंहृष्टचित्ताःसमुत्सुकाः ॥ एवमाहुःसदैवान्याननुग्रहकरान्नृणां ॥ ३५ ॥ अपामसोमममृतंनेत्राभ्यांपुण्यकारिणः ॥ अमृतावयमेतस्माद्भूमेश्वरयाजकाः ॥ ३६ ॥ अयामपरमंज्योतिरानंदात्मानमद्वयं ॥ नित्यमात्मतयासोमंसर्वदुःखविवर्जिताः ॥ देवानिंद्रादिकान्सर्वान्नविघ्नःस्वात्मरूपतः ॥ ३७ ॥

विभूतयोयोवैइत्यादिकैर्मंत्रैरथर्वशिरसिप्रोक्ताइत्यर्थः ॥३४॥ अपामेत्यादिमंत्रस्यार्थमाह दृष्ट्वेतिपंचभिः यंरुद्ररूपमात्मानंसोममुमासहितंदृष्ट्वातेदेवाअन्यान्स्वमुपगतान्प्रत्येवमाहुर्वदंतिलोकानुग्रहायेत्यर्थः ॥ ३५ ॥ एवंकथमित्याकांक्षायांतद्वाक्यान्याह अपामेत्यादिना वयंदेवाःपुण्यकारिणोमहाभागाःस्मयतउमासहितंशंभुरूपममृतंनेत्राभ्यांनेत्ररूपपात्रैरपामपीतवंतः अतएवामृताअमरणधर्माणोऽभूमजाताइत्यर्थः ईश्वरेत्याद्युत्तरान्वयि ॥ ३६ ॥ अपामेति वयंयतईश्वरस्ययाजकाआराधकाअतएवानंदरूपंपरंज्योतिःसोमात्मकमात्मतयाअयामप्राप्ताः इदानींमिद्राद्यभिमानंनकुर्मइत्याहुः देवानिति इंद्रादिदेवानात्मत्वेननविघ्नः सोमस्यैवात्मतयादर्शनादितिभावः एतेनश्रुतौअविदामेत्यकारोनिषेधार्थकइतिसूचितम् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारीति यैरस्माभिःसोमआत्मतयाप्राप्तोदृष्टस्तेषामस्माकमरातिःशत्रुभूतःकामःक्रोधादिश्चकिमपकरिष्यतिनकिमपीति कीदृशःकामः धूर्त्तःशठः तुच्छेननारीसंज्ञशवेनपण्यतयोपन्यस्तेनजगतोधर्मादिरूपसर्वस्वापहारकत्वादितिद्वयोरर्थः ॥ ३८ ॥ ३९ ॥ हृदिस्थाइत्यादेरर्थंदर्शयति हृदीति ताःप्रसिद्धाःसर्वादेवताअस्माकंहृदितिष्ठंति यतःसर्वदेवात्मकःसोमःशंभुरस्माकंहृदिस्थितइत्यर्थः ॥ ४० ॥ तस्यहृदिस्थितावुपपत्तिमाह प्रणेति प्राणापानरूपंयद्द्वयंतस्यमध्यस्थस्तयोःप्राणापानयोर्नियमनायतथात्रिमात्रात्प्रणवात्स्थूलसूक्ष्मकारणरूपवाच्यतादात्म्यापन्नात्परतःपरोयोवर्त्ततेतुरीयरूपेणेत्यर्थः ॥ ४१ ॥ रुद्रचरितमित्यतउत्तरग्रंथस्यतात्पर्यगोचरंतस्यप्रत्यग्भावंविशदय

नारीकुणपपण्येनजगतोयोत्रवंचकः ॥ धूर्त्तःकामस्तथारातिःक्रोधादिर्विविधोपियः ॥ ३८ ॥ किंकरिष्यति भक्तानामस्माकंसोमआत्मनि ॥ नित्यमात्मतयाप्राप्तोह्यस्माभिर्यैरयंपुमान् ॥ ३९ ॥ हृदितिष्ठंतिनिखिला देवतानःसदैवताः ॥ सोमोहृदयगोयस्मात्सर्वदेवात्मकोहिनः ॥ ४० ॥ प्राणापानद्वयांतस्थस्तयोर्योत्रनियामकः ॥ ओंकाराच्चत्रिमात्राद्यःपरतोस्तिपुमान्सदा ॥ ४१ ॥ मनसोलिंगदेहस्यसर्वदैवावभासकः ॥ जगच्चित्रपटस्यास्यवासनावासितस्यहि ॥ ४२ ॥ वासनायत्रसंत्येताःशतकोटिसहस्रशः ॥ क्षुत्तृष्णाकाममुख्यानांयतोविश्वंप्रवर्त्तते ॥ ४३ ॥ यस्यनामानिचैतानिसर्वदाप्रणवात्मनः ॥ ओंकारःप्रणवःसर्वव्याप्यनंतश्चतारकः ॥ ४४ ॥ सूक्ष्मःशुक्लोवैद्युतश्चपरब्रह्मैकएवच ॥ एकोरुद्रस्तथेशानोभगवांश्चमहेश्वरः ॥ महादेवस्तथा विष्णुर्ब्रह्माचैवप्रजापतिः ॥ ४५ ॥

ति मनसइतिद्वाभ्यां मनसोमनःप्रधानस्यलिंगाख्यस्यसूक्ष्मदेहस्ययोदेवोभासकःसाक्षी कीदृशस्यलिंगदेहस्य जगत्स्थूलप्रपंचस्तद्रूपंचित्रंप्रत्याधारपटभूतस्यअतएवतल्लेखाभूतवासनाभिर्वासितस्यांकितस्येत्यर्थः ॥ ४२ ॥ वासनाश्रयत्वमेवस्फुटयति वासनाइति यत्रलिंगदेहेएतास्तत्तदर्थविषयिकाःक्षुधातृषाकामक्रोधादीनांवासनाःसूक्ष्मावस्थारूपाःसंतिवर्त्ततेयतोयाभिर्वासनाभिर्विश्वंसंसारःप्रवर्त्ततइत्यर्थः ॥ ४३ ॥ यस्येति यस्यदेवस्यप्रणवात्मनःप्रणवेनसार्धत्रिमात्रेणतादात्म्यमापन्नस्यैतान्योंकारादीनिप्रजापत्यंतान्यष्टादशनामानि वैदिकैरुक्तानितत्रएकोरुद्रइत्येकंनामततःपरंनामान्तरमितिद्वयोरर्थः ॥ ४४ ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषांमहेश्वरांतनाम्नांव्युत्पत्तयोथर्वशिरस्येववर्णितास्ताःप्रदर्शयति उच्चार्यमाणइत्यादिना यस्मादयंप्रणवउच्चार्यमाणःसन्भूतानांप्राणि नांवपुस्तत्प्राणरूपमूर्ध्वंशिरोदेशमुत्कृष्टलोकरूपंवानयतिप्रापयतिततःप्रवृत्तिनिमित्ताल्लोकानामुन्नतिकरत्वरूपादयमोंकारइत्युच्यतेइ त्यर्थः ऊर्ध्वंकरोतीतिविगृह्यऊर्ध्वशब्दस्यओभावोनिपातनादितिभावः ॥ ४६ ॥ द्वितीयंप्रणवेतिनामव्युत्पादयति शब्देतिद्वाभ्यां श्रुतौब्रह्मपदोक्तंसुखं कीदृशं शब्दब्रह्मऋगादिवेदचतुष्टयरूपं अथवानानाविधंमानुषानन्दमारभ्यहिरण्यगर्भानन्दान्तंतदात्मनआराध्या दन्यत्रभिन्नेष्वाराधकेषुब्राह्मणेषुप्रापयतितदधीनीकरोतीतियावत्तेननिमित्तेनप्रणवइत्युच्यते प्रकर्षेणनमयतीतिव्युत्पत्तिकस्यप्रणवश

उच्चार्यमाणोभूतानामूर्ध्वंनयतितद्वपुः॥ ओंकारस्ततएवायंलोकोन्नतिकरत्वतः॥ ४६॥ शब्दब्रह्ममयंवापि सुखंनानाविधंतथा॥ प्रापयत्यात्मनोन्यत्रप्रणवस्तेनगीयते॥ ४७॥ प्रणवःप्रलयोवापिनामांतरतउच्यते॥ पाप्मनोदुःखयुक्तस्यसर्वस्यापिलयोयतः॥ भक्तानांप्रलयस्तस्मात्प्रणवःपरिकीर्त्तितः॥ ४८॥ घृततैलादि कःस्नेहस्तिलपिष्टादिकंयथा॥ व्याप्नोतिनिखिलंद्रव्यंस्वात्मनांतर्वहिस्तथा॥ ४९॥ एवंविश्वमिदंदेवःसर्वं व्याप्नोतिचात्मना॥ सर्वव्यापीततःसद्भिःकथ्यतेप्रणवाभिधः॥ ५०॥

व्दस्यमकारस्थानेवकारनिपातनादितिभावः ॥ ४७ ॥ अथवाविकाराणांपापरूपाणांनमनंकारणेआत्यंतिकोलयस्तद्धेतुत्वादस्यप्रणव त्वमित्याह प्रणवइति अथवाप्रणवपदेनप्रलयत्वमुच्यतेयतोभक्तानांदुःखयुक्तस्यपाप्मनोयोलयःसआत्यन्तिकत्वात्प्रलयरूपोभवति तस्माद्भक्तानांसनिदानदुःखप्रलयरूपत्वादयंप्रणवउक्तव्युत्पत्त्याकथितइत्यर्थः ॥ ४८ ॥ तृतीयंसर्वव्यापीतिनामव्युत्पादयति घृतेतिद्वा भ्यां पिष्टंतिलपिंडःश्रुतौपललपिण्डपदेनोक्तं आदिपदेनदधिघनपिंडादियहः तद्रूपंद्रव्यंयथातैलरूपोघृतरूपोवास्नेहःस्वरूपेणांतर्बहिश्च निखिलंव्याप्नोतितथाप्रपंचेसर्वथाव्यापनाद्देवोयंसर्वव्यापीत्युक्तइतिद्वयोरर्थः ॥ ४९ ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिविधपरिच्छेदराहित्यात्तस्यानंतइतिचतुर्थनामेत्याह देशतइति संसारवारिधिजन्मजरादिदुःखमयंयतस्तांरयतिभक्तांस्तत्पारंप्रापयति ततस्तारेतिपंचमंनामेतिद्वयोरर्थः ॥ ५१ ॥ ५२ ॥ षष्ठंसूक्ष्मेतिनामव्युत्पादयति सूक्ष्मइति सर्वेषुदेहेष्वल्पेनदुर्लक्ष्येणजीवरूपेणयतःस्थितस्ततःसूक्ष्मइत्युच्यते अत्रश्रुत्यंतरमनुकूलयति वालाग्रेति वालाग्रस्ययःशततमोभागस्तस्यापियःशततमोभागस्तद्वद्यंजीवरूपेणसूक्ष्मोवस्तुतस्तुमहतोपिमहानित्यर्थः ॥ ५३ ॥ अथवापरकीयनाडीप्रभृत्यंगव्याप्तिसाध्यत्वेनसूक्ष्मस्यपरकायप्रवेशादिरूपव्यापारस्यहेतोः प्राणादप्ययंसूक्ष्मस्ततोयंप्रणवरूपईश्वरःसूक्ष्मइत्युच्यतइत्याह परकायेति यःप्राणोयोगिनःपरकायप्रवेशादिहेतुस्ततःप्राणादपिसूक्ष्मत्वा

देशतःकालतस्तद्वद्वस्तुतश्छेदवर्जितः ॥ प्रतीयतेसदैवैषनृणामात्मन्युपासनात् ॥ ५१ ॥ अनंतस्ततएवायं कथ्यतेवेदवादिभिः ॥ संसारवारिधेरेषतारकस्तारईरितः ॥ ५२ ॥ सूक्ष्मःसर्वेषुदेहेषुसंस्थितोत्यल्परूपतः ॥ वालाग्रशतभागस्यभागोयद्वत्तथापुमान् ॥ सूक्ष्मस्ततोयमुदितोमहीयान्महतोहियः ॥ ५३ ॥ परकायप्रवेशादिहेतुर्वायोगिनोपियः ॥ ततोपिसूक्ष्मरूपोयमुच्यतेवेदवादिभिः ॥ ५४ ॥ क्लमःक्लेशःसमुद्दिष्टःपंचधायोव्यवस्थितः ॥ तस्यशुद्धिकरोदेवःशुक्लएषप्रकीर्त्तितः ॥ ५५ ॥ अंतर्बहिःप्रकाशाभ्यांनिर्गुणःसगुणस्तथा ॥ वर्ततेसहदेवोयंवैद्युतस्तेनकथ्यते ॥ ५६ ॥

दयंसूक्ष्मउक्तइत्यर्थः ॥ ५४ ॥ सप्तमंशुक्लेतिनामव्युत्पादयति क्लमइति क्लमपदमविद्यादीनांयोगप्रसिद्धानांपंचक्लेशानांवाचकंतेषांशुद्धेरात्यंतिकनिवृत्तेःकर्त्ताभगवान्शुक्लइत्युच्यतइत्यर्थः शुद्धोनिवृत्तःक्लमोयेनेतिव्युत्पत्तिकस्यशुद्धक्लमशब्दस्यमध्यांतवर्णयोर्लोपेशुक्लपदसिद्धिरिति श्रुतिसमन्वयस्तुक्लंदतेरोदयतियःक्लेशस्तंक्लामयतिग्लानिमंतंकरोतीतियोजनयाबोध्यः तथाचक्लदिआव्हानेरोदनेचेतिस्मृतिरितिभावः ॥ ५५ ॥ अष्टमंवैद्युतेतिनामव्युत्पादयति अंतरिति अयंदेवोनिर्गुणःसन्नंतःसंघातस्यांतरेणप्रकाशनव्यापारेणसहवर्तते सगुणस्तुबहिरादित्यादौस्थित्वाप्रकाशनव्यापारेणसहवर्त्ततेतेननिमित्तेनवैद्युतइत्युक्तः विद्युताप्रकाशेनसहितइतिव्युत्पत्तिसमन्वयादितिभावः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परंब्रह्मेतिनवमंनामव्युत्पादयति बृहत्त्वादिति एषरुद्रःप्रणवाख्यःपरंब्रह्मेतिप्रकीर्तितः यतःसर्वोत्कर्षहेतुकबृहत्त्वात्तथाबृंहणत्वात्सत्ताप्रदानेनवृद्धिहेतुत्वात्संततःसर्वत्रव्याप्तइत्यर्थः तथाचबृहत्त्वात्परत्वंबृंहणत्वाद्ब्रह्मत्वंचादायपरंब्रह्मेतिनामसिद्धमितिभावः ॥ ५७ ॥ एकेतिदशमनाम्नोर्थमाह सृष्टीति यतोयंदेवएवसृष्ट्यादिकारणत्वाद्विश्वरूपोव्यवस्थितस्ततोभेदवानिवकल्पितभेदशालितयोपलभ्यमानोपिवस्तुतोनिर्भेदस्तेनभेदराहित्येनैकइत्युक्तइत्यर्थः ॥ ५८ ॥ एकादशमेकोरुद्रइतिनामव्युत्पादयति एकइति ततोनिर्भेदत्वादत्रभगवानेकोरुद्रइतिव्यपदिश्यतेश्रुतिषु तथाचश्रुतिः एकोरुद्रोनद्वितीयायतस्थाविति तत्रैकत्वंवर्णितं रुद्रत्वंतुरुत्दुःखंद्रातिक्षीणंकरोतीतिप्रसिद्धव्यु

बृहत्त्वाद्बृंहणत्वाच्चसर्वोत्कर्षेणसंततः॥ प्रणवाख्यंपरंब्रह्मरुद्रएषप्रकीर्तितः ॥ ५७॥ सृष्टिस्थित्यंतकरणाद्विश्वरूपोव्यवस्थितः ॥ भेदवानिवनिर्भेदएकस्तेनप्रकीर्तितः ॥ ५८ ॥ एकोरुद्रश्चभगवांस्ततएवनिगद्यते ॥ पालयन्नखिलंविश्वंस्वशक्त्यामाययासदा ॥ तुरीयंचपदंदत्वायोगिनांदुःखहायतः॥ ५९ ॥ ससंकोचविकासाभ्यांपटवत्संस्थितःपुमान् ॥ स्रष्टासर्वात्मबुद्धीनांबुद्धिधर्मविवर्जितः ॥ ईशानएषकथितोरुद्रःसर्वैश्वहेतुभिः ॥ ६० ॥

त्पत्त्या अथवाऋषिभिःशुद्धैरस्यरूपंद्रुतंलभ्यतइनिश्रुतिदर्शितव्युत्पत्त्याऋषिशब्दस्यरूभावेद्रुतशब्दस्यद्रभावेचकृतेबोध्यमितिदर्शयन्नाह पालयन्नित्यादिना स्वशक्तिभूतयामाययाविश्वंपालयन्सन्लोकस्यदुःखहातुरीयपददानेनचयोगिनांदुःखहायतस्ततएकोरुद्रइत्युक्तइत्यर्थः ॥ ५९ ॥ द्वादशमीशानेतिनामव्युत्पादयति ससंकोचेतिचतुर्भिः सईश्वरःकदाचित्प्रलयेसंकोचवान्कदाचित्सृष्टिकालेतुविकासवान्सन्पटवत्स्थितः तथापुमान्पालकः तथासर्वेषामात्मनांजीवानांयाबुद्धयस्तासांकारणोपहितरूपेणस्रष्टा तथाबुद्धिधर्मैरागद्वेषादिभीरहितश्चयतोभवतिततईशानइत्युक्तः अभिन्ननिमित्तोपादानत्वादांतरत्वाद्वैषम्याद्यभावाच्चास्येशानत्वंमुख्यं एतद्विपरीतेजीवेतुगौणं अनीशयाशोचतिमुह्यमानइत्यादिषुजीवस्यपरतंत्रतायाःप्रसिद्धत्वादितिभावः ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अत्रसंवादायश्रुत्याअभित्वाशूरेत्यादिमंत्रउपन्यस्तस्तस्यार्थमाह स्तूयमानइत्यादिना यतोविश्वनियामकःअतएवैषभगवान्सद्भिर्विद्वद्भि
रेवंस्तूयमानोभवति एवंकथं भगवान्शूरोभवतियतोरणरंगगुणःअसुरैःसहयोरणस्तत्रविकासमानागुणायस्यसतथा तथास्वात्मदर्शनरू
पवलेनकामादीनामांतरशत्रूणांघस्मरोभक्षकोयतःस्मरस्यमदनस्यदेहंदहतीतिस्मरदेहधक् धृगितिपाठेस्मरदेहेधृष्णोतिप्रगल्भतेइत्यर्थः
 ॥ ६१ ॥ त्वामिति हेभगवंस्त्वांसर्वेषांहृदयपंकजेषुवसंतंवाग्भिःस्तुतिरूपाभिर्वयंशरणार्थिनःस्तुमआराधयामः कीदृशं स्वकीयास्तुतिः
प्रियाप्रीतिहेतुर्यस्यसतथातं ॥ ६२ ॥ तवस्तुतयःफलप्रदानायस्वयमेवास्मानाव्हयंतीत्यस्मिन्नर्थेअदुग्धाइत्यादिमंत्रभागस्यतात्पर्यमिति
दर्शयन्नाह स्तुतयइति हेदेवेशयथाघटोध्न्यःघटवदूधःक्षीरायतनंयासांतथाभूताधेनवोनवप्रसूतागावःअदुग्धायासांदोहनंनकृतंतथाभू

स्तूयमानःसदासद्भिरेवंविश्वनियामकः ॥ रणरंगगुणःशूरोभगवान्स्वात्मदर्शनः ॥ कामक्रोधादिशत्त्वोघ
घस्मरःस्मरदेहधक्॥ ६१ ॥ त्वांसर्वजगतोनित्यंहृदयाब्जनिवासिनं॥ स्वकीयाभिर्वयंवाग्भिःस्तुमआत्मस्तु
तिप्रियं॥ ६२ ॥ स्तुतयस्तवदेवेशघटोध्न्यइवधेनवः ॥ अदुग्धाःस्वात्मनाभक्तवत्सान्भूमिपयोजुषः ॥ आ
कारयंतिहुंकारान्स्नेहाद्दुःखापहारकाः॥ ६३॥ ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः॥ ज्ञानवैराग्ययोस्तद्व
द्भगस्यायंसमाश्रयः॥ भगवांस्ततएवायमुच्यतेविश्वपालकः ॥ ६४ ॥ महतामत्रभूतानांपंचानामपिसर्व
दा॥ सृष्टिस्थित्यंतकरणादीश्वरोयंमहेश्वरः॥ ६५॥

ताश्चहुंकारान्स्नेहशब्दान्कृत्वावत्सानाकारयंतिआव्हयंतितथातवस्तुतिरूपागावोभक्तरूपवत्सान्भूमिपयोजुषःभूमयस्तास्ताःफलाव
स्थास्तद्रूपंपयःकामयमानान्प्रेम्णास्वात्मनास्वयमेवाकारयंतिनतुवत्सप्रयत्नमपेक्षंतेयतोदुःखस्यवैक्लव्यरूपस्यापहरणपराइत्यर्थः॥ ६३॥
त्रयोदशस्यभगवदितिनाम्नोर्थमाह ऐश्वर्यस्येति पूर्णैश्वर्यादिगुणषट्कस्यभगपदवाच्यस्याश्रयत्वादयंभगवानित्युक्तः तत्रश्रीःकांतिरूपा
॥ ६४ ॥ चतुर्दशंमहेश्वरेतिनामनिर्वक्ति महतामिति अन्येईश्वरास्तटस्थार्यत्किंचिद्देशीयप्राणिरूपाल्पभूतानांप्रसिद्धाः अयंत्वाकाशा
दीनांमहाभूतानामीश्वरस्तेषांसृष्ट्यादिनिदानत्वेनाभिन्ननिमित्तोपादानभूतश्च अतोस्ययुक्तंमहेश्वरत्वमित्यर्थः ॥ ६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचदशंमहादेवेतिनामपूर्वतापनीयेउमापतिरितिनामनिर्देशेनसूचितनिरुक्तिकमुमायाब्रह्मविद्यारूपायाःपत्युरेवदेवस्यमुख्यमहत्त्वयोगादितिसूचयंस्तदर्थमाह आनंदात्मेतिद्वाभ्यां आनंदादिलक्षणःशुद्धआत्मामहानसंकुचितमहत्त्वशालीप्रोक्तः एनंवर्णितमात्मानंयतएषदेवःस्वरूपतयासदापश्यत्युमापतित्वात्ततोमहादेवइत्युक्तइतिद्वयोरर्थः॥ ६६ ॥ ६७॥ षोडशंविष्णुनामनिर्वक्ति विशत्येषइति एषपरमात्मायतःसर्वदृश्यजातंसदादिरूपेणप्रविशति अथवायोगिनाआराधकेनतादात्म्येनप्रविश्यतइतिविशधातुघटितव्युत्पत्त्याविष्णुरित्युक्त

आनंदात्मामहान्प्रोक्तःस्वप्रकाशःसदाद्वयः॥सत्यज्ञानादिरूपोयंसर्वभेदविवर्जितः॥ ६६ ॥एनमात्मतया यस्मात्सर्वदैवप्रपश्यति॥ महादेवस्ततःप्रोक्तउमापतिरयंप्रभुः॥६७॥विशत्येषसदासर्वंसद्रूपस्फुरणप्रदः॥ एनमात्मतयायोगीविशेत्तादात्म्यरूपतः ॥ विष्णुस्तेनायमुदितःसर्वगःपरमेश्वरः ॥ ६८ ॥ ब्रह्मसर्वाधिकत्वेनप्रकाशस्यप्रभुत्वतः ॥ विष्णुश्चतापनीयेयःपूर्वस्मिन्परिकीर्तितः ॥ एकादशपदेमंत्रेनरसिंहोहिदैवतम् ॥ ६९ ॥

इत्यर्थः ॥ ६८ ॥ पूर्वतापनीयेतुविष्लृव्याप्ताविति धात्वर्थानुगमेनयद्ब्रह्मत्वंव्यापकत्वरूपंतेनयत्सर्वाधिकत्वंतेननिमित्तेनविष्णुत्वमुक्तं प्रकाशस्ययत्प्रभुत्वंनियामकत्वंतदादायमहःपदंनिपातेनाकारांतंकृत्वाविष्णुपदात्पूर्वंप्रयुक्तमित्याह ब्रह्मेति ब्रह्मपदंभावप्रधानं तथाचब्रह्मत्वप्रयुक्तसर्वाधिकत्वेनसर्वत्रप्रकाशप्रयोजकत्वेनचयोयंदेवोविष्णुश्चकारान्महेतिचोक्तोमहाविष्णुरितिनिर्दिष्टइतियावत् कुत्र पूर्वतापनीयेहियतस्तत्रव्युत्पादितेमंत्रेउंग्रमित्यादिकेएकादशाऽहमंतानिपदानियस्यतथाभूतेनरसिंहउक्तरूपएवदैवतंप्रतिपाद्यइत्यर्थः ॥ ६९ ॥

१ उग्रवीरंमहाविष्णुंज्वलंतंसर्वतोमुखं ॥ नृसिंहंभीषणंभद्रंमृत्युमृत्युंनमाम्यहं ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 आनुष्टुभेचेति कीदृशेतत्रमंत्रे आनुष्टुभेअनुष्टुपूद्वात्रिंशदक्षरंछंदस्तद्वति पुनःकीदृशे साामाख्येसाम्नास्वरविशेषरूपेणाख्यासमुच्चारणंय
स्यसतथातस्मिन् पुनःकीदृशे प्रणवादिभिरंगैर्युक्ते आदिपदेनसावित्र्याद्यंगमंत्रग्रहः तथाचप्रणवेनहृदयंसावित्र्याष्टाक्षरेणशिरोयजुर्ल
क्षणाशिखानृसिंहगायत्र्याकवचंमहाचक्रमंत्रैरस्त्रमितिपंचांगन्यासःसूचितः अथवाप्रणवेनहृदयंकृत्वामंत्रस्यपादचतुष्टयेनशिखादिक
 मस्त्रांतमंगचतुष्टयंकुर्यादितिदर्शयन्मंत्रंपुनर्विशिनष्टि चतुष्पादीति चत्वारःपादायस्यसचतुष्पाद्तस्मिन्नित्यर्थः नकेवलमयंदेवोमंत्रार्थत्वे
नोपास्यःकिंतुमहाचक्रेषट्कोणस्थसुदर्शनवसुदलप्रोल्लासिताष्टाक्षरंबाह्येद्वादशवर्णपत्रकमलंततूषोडशार्णच्छदंद्वात्रिंशन्मनुवर्णपत्रकमलं
वृत्तोल्लसन्मातृकंमध्यस्थध्रुवमुर्वीवीजवलयंचक्रंनृसिंहाव्हयमित्याचार्यैःसंगृहीतस्वरूपेयोदेवःप्रणवरूपोनाभित्वेनज्ञायतेउपास्यतइत्य
र्थः अयमत्रसंग्रहः तारंविलिख्यततोवहिःषट्कोणंसुदर्शनमंत्राक्षरान्वितकोणंलिखेत्ततोष्टदलंनारायणाष्टाक्षरभूषितंततोद्वादशदलंवा
सुदेवद्वादशाक्षरांकितंततःषोडशदलंमातृकादिषोडशस्वरभूषितंततोद्वात्रिंशद्दलमनुष्टुबक्षरभूषितंविलिख्यमायाबीजेनभूवलयेनचमातृ

आनुष्टुभेचसामाख्येप्रणवाद्यंगसंहिते॥ चतुष्पादिमहाचक्रेनाभिर्विज्ञायतेहियः॥ ७० ॥यमुपास्यमहात्मा
नंस्थितंक्षीरार्णवादिषु॥ घोरंभवार्णवंसंतस्तरेयुर्गोष्पदंयथा॥ ७१ ॥ ब्रह्मायःप्रथमःप्रोक्तोभगवांश्चतुरान
नः॥ देहिनांप्रथमोदेहीहैमेब्रह्मांडगोलके॥ ७२ ॥ भूपद्मेसर्वदैवास्तेमेरुपर्वतकर्णिके ॥ अनुग्रहकरोदेवो
देवानांसत्यलोकगः ॥ ७३ ॥

कावर्णैश्चबहिर्वेष्टयेत् सबिंदुकेकारेणचषट्कोणादीनांषोडशदलांतानांप्रत्येकंवेष्टनमिति आनुष्टुभस्यैकादशपदस्यमंत्रस्योद्धारस्त्वित्थ
माचार्यैःप्रपंचसारेलिखितः उग्रंवीरयुतंमहांतिकमथोविष्णुंज्वलन्तान्वितंसंप्रोच्याथचसर्वतोमुखनृसिंहार्णास्तथाभीषणं भद्रंमृत्युयुतं
चमृत्युमपितत्रोक्त्वानमाम्यायुतंभूयोहंपदमुद्धरेन्मनुमिमंमंत्रीसमस्तार्थदमिति ॥ ७० ॥ यमुपास्येति यमेनंनरसिंहंक्षीरार्णवगतशे
षभोगगतंहृदयादिगतंवाध्यानादिनासमाराध्यगोष्पदवद्भवाब्धिंसन्तस्तरंतीत्यर्थः ॥ ७१ ॥ सप्तदशाष्टादशेब्रह्माप्रजापतिरित्याकारेना
मनीवर्णितमंत्रेऋषिभूतस्यचतुराननरूपस्यभगवतोबोद्ध्येइत्याह ब्रह्मेति यःप्रथमःसृष्टिकर्त्ताभगवांश्चतुराननरूपःसब्रह्माप्रोक्तःसएवदे
हिनांस्थूलव्यष्टिशालिनांप्रथमःसमष्टिरूपेणयःसन्प्रजापतिरितिचोक्तइतिशेषः सचहैमेहेममयेब्रह्मांडरूपेगोलकेयद्भूमिरूपंपद्मंमेरुःक
र्णिकाभूतोयस्यतथाभूतंतत्रसत्यलोकेचदेवोपकारायस्थितइतिद्वयोरर्थः ॥ ७२ ॥ ७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंनामनिरुक्तिप्रसंगेनपूर्वतापनीयदर्शितायाःप्रणवोपसर्जनानुष्टुप्प्रधानायाःसगुणविद्यायाःस्वरूपंसूचितमथानुष्टुबुपसर्जनप्रणवप्रधानायाःकेवलप्रणवप्रधानायाश्चसगुणविद्यायास्तुरीयप्रणवप्रधानायानिर्गुणविद्यायाश्चस्वरूपंप्रदर्शयंत्याउत्तरतापिन्याअर्थंदर्शयितुंतत्रदेवानांजिज्ञासांदर्शयति एकदेतिषड्भिः कदाचित्तंप्रजापतिममितौजःसंज्ञकेषष्ठेवर्णितेपर्यंकेमानसीतिसंज्ञितयाप्रिययासहसमासीनंपरममुत्कृष्टशोभंब्रह्मेतिनामांतरशालिनंचप्रत्यग्न्यादयोदेवाःप्रणिपत्येदमूचुः कीदृशादेवाः तस्यप्रजापतेर्वपुषिविराडाख्येस्थितास्तथामंत्रराजस्यानुष्टुभस्यविद्यायांतस्यप्रजापतेःशिष्यत्वेनकुशलाइदानींप्राधान्येनप्रणवसंबंधिनींविद्यांबुभुत्सवःप्राप्तुमिच्छंतःपूर्वविद्ययाशुद्ध

एकदातंसमासीनंपर्यंकेत्वमितौजसि॥ मानस्याप्रिययासार्द्धंपरमब्रह्मशब्दितं ॥ ७४ ॥ अग्न्यादयोमहात्मानोदेवास्तस्यवपुःस्थिताः॥ मंत्रराजस्यविद्यायांकुशलाःपरमेष्ठिनः॥ ७५॥ शिष्यास्तथैवदेवस्यप्रणवस्यबुभुत्सवः॥ विद्यांविशुद्धमनसोब्रह्मात्मत्वप्रबोधिनीं॥ प्रणिपत्येदमूचुस्तेकृतांजलिपुटाअपि ॥ ७६ ॥ भगवन्भवतास्मभ्यंमंत्रराजःसमीरितः॥ सांगःसबीजशक्तिश्चसामोपासनसंयुतः॥ ७७॥ महाचक्रेणसहितोमृत्युभीतिनिवारणः ॥ चतुष्पात्तत्रसंप्रोक्तःसंक्षेपात्प्रणवस्त्वया ॥ ७८ ॥ आत्माभिन्नस्तमात्मानमणीयांसमणोरपि॥ अस्मभ्यंब्रूहिसंसारतप्तेभ्यश्चतुरानन॥ ७९ ॥

धियश्चेतित्रयाणामर्थः ॥ ७४ ॥ ७५ ॥ ७६ ॥ इदंकिमित्याकांक्षायांश्रुतपूर्वानुवादसहितंतेषांप्रश्नमभिनयति भगवन्निति हेभगवन् भवताऽस्मभ्यंपूर्वतापनीयेमंत्रराजआनुष्टुभउक्तः कीदृशः सांगःअंगमंत्रैःसहितः बीजेनरेफौकारबिंदुविशिष्टक्षकाराक्षररूपेणशक्त्याइकाररूपयाचसहितः साम्नःपादादिभेदेनयदुपासनंध्यानविशेषरूपंतत्सहितश्चेत्यर्थः ॥ ७७ ॥ महेति पुनःकीदृशोमंत्रराजः महाचक्रंनारसिंहंतत्सहितः मृत्युभीतिनिवृत्तिफलकश्च तत्रमंत्रराजप्रपंचेत्वयाप्रणवश्चतुष्पात्पादचतुष्टयवानुक्तः कीदृशः आत्माभिन्नःवाच्यभूतेनचतुर्विधेनात्मनातादात्म्यापन्नः अधुनातंप्रणवंतत्प्रतिपाद्यमात्मानंचातिदुर्लक्ष्यमस्मभ्यंसंसारानलतप्तेभ्यस्तत्प्रशमायोपदिशेतिद्वयोरर्थः॥ ७८ ॥ ७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपृष्टस्यप्रजापतेरुत्तरतयाउत्तरतापनीयाथर्वखंडपंचकस्यतात्पर्यार्थमार्थक्रमेणसंक्षिप्याह इत्युक्तइतिषोडशभिः इत्थंपृष्टःप्रजापति स्तान्देवान्प्रतीदमाह इदंकिं हेदेवाभवद्भिर्यउपासितोमंत्रराजएषचतुष्पाद्भवत्यतस्तंमंत्रराजंचतुर्धाविभज्यविभक्तंकृत्वाप्रणवस्यमात्राच तुष्टयेनवक्ष्यमाणरूपेणसहयथाक्रमंतादात्म्यंगमयेत्पंचमखण्डोक्तविधयामेलयेदितिद्वयोरर्थः ॥ ८० ॥ ८१ ॥ ततःकिंकुर्यादतआह एकादशेति योनरसिंहःपूर्वतापनीयमंत्रस्यैकादशपदानांसविशेषरूपेणार्थभूतउक्तस्तमिदानींपदेपदेप्रतिपदंपदार्थातीतस्तुरीयस्तद्रूपि णंपदार्थंलक्ष्यमितियावत्एवंविधंविज्ञायात्मनश्चतुर्भिःकल्पितैःपादैर्यथाक्रमंप्रणवमात्राचतुष्टयस्यमंत्रपादचतुष्टयस्यचवाच्यभूतैःसह

इत्युक्तस्तानुवाचायंब्रह्मालोकपितामहः ॥ अनुष्ठितोभवद्भिर्योमंत्रराजःसएषहि ॥ ८० ॥ चतुष्पात्तंचतुर्द्धे वविभज्यप्रणवस्यहि ॥ मात्राचतुष्टयेनैवतादात्म्यंगमयेत्पुमान् ॥८१॥ एकादशपदार्थोयोनरसिंहःप्रकीर्ति तः ॥ पदेपदेपदार्थंतंपदार्थातीतरूपिणं ॥ चिंतयेदात्मनःपादैश्चतुर्भिःपरिकल्पितैः ॥८२॥ नाभौचहृदयेतद्वद्भ्रू मध्येद्वादशांतके ॥ तत्तद्रूपंप्रकल्प्यायमथवायत्रकुत्रवा ॥८३॥ प्रणवस्यचतस्रःस्युर्मात्राएताःसुशोभनाः ॥ अकारोपितथोकारोमकारोनादनामकः ॥८४॥ एकैकापिचतुर्धास्यात्स्थूलादिपरिभेदतः ॥ वाचिस्थूलात थासूक्ष्माद्धृदयेकुंडलीगता ॥ बीजरूपाचतुर्थीस्याद्व्यापिनीसर्वसाक्षिणी ॥ ८५ ॥

तादात्म्यापन्नंचिंतयेदित्यर्थः तत्रनरसिंहस्यपदार्थातीतरूपेणपदार्थत्वमित्थमुक्तं सर्वसंहारसमर्थत्वरूपमुग्रत्वंपरमार्थस्यतुरीयस्यैवसंभव तिनान्यस्य एवंवीरादिपदार्थानांतुरीयपरत्वंद्वितीयखंडेतद्व्याख्यायांचद्रष्टव्यम् ॥ ८२ ॥ नाभौचेति तथातृतीयखंडोक्तविधिनातंनरसिं हंब्रह्मविष्णुरुद्रसर्वेश्वररूपंप्रकल्प्ययथाक्रमंनाभ्यादिस्थानचतुष्टयेष्वधिकारीतैर्मंत्रैःपूजयेदितिशेषः तत्रद्वादशांतःदशमद्वारं पूजनविधेर नन्तरंतदैक्यानुसन्धानविस्तरश्चतुर्थखण्डेपद्धतौचद्रष्टव्यः ॥ ८३ ॥ प्रथमखण्डोक्तंप्रणवमात्राचतुष्टयमाह प्रणवस्येति स्पष्टम् ॥ ८४ ॥ एकैकापीति एतासांचतसृणांप्रणवमात्राणांमध्येएकैकास्थूलादिभिर्वैखर्यादिसंज्ञैर्भेदैश्चतुर्धाबोध्येत्यर्थः द्वितीयखण्डोक्तंस्थूलादिभेद मेवस्फुटयति वाचीति स्थूलावर्णावस्थावैखरीसंज्ञावाचितिष्ठतिततःसूक्ष्मामध्यमाख्याद्वितीयावस्थाहृदितिष्ठतितृतीयापश्यंतीसंज्ञावस्था बीजरूपाकुंडलीगताबोध्या चतुर्थीत्ववस्थासाक्षिरूपेणव्यापिकेत्यर्थः ॥ ८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकारादेरिति एवमकारादीनांप्रत्येकंचतुर्विधत्वेतत्समुदायरूपस्यप्रणवस्यषोडशावयवत्वंबोद्धमित्यर्थः अथवाअकारादीनांचतुर्विधत्वं प्लुतादिभिर्भेदैर्विज्ञेयं तत्रचतुर्थोभेदःअविषयत्वात्साक्षिसंज्ञइत्यर्थः ॥८६॥ यथाचवाचकस्यप्रणवस्यषोडशभेदास्तथातद्वाच्यस्यात्मनोपि तानूदर्शयति आत्मनोपिचेतिद्वाभ्यां स्थूलसूक्ष्मकारणोपहितरूपाविश्वादयस्त्रयस्तेषांसाक्षीचतुरीयाख्यएतेचत्वारःप्रणवमात्राचतुष्टये नाभिधेयाआत्मनश्चत्वारःपादाअध्यात्मंबोध्याः तथाधिदैवमप्यवस्थितस्यतस्यस्थूलाद्युपहितस्यसाक्षिरूपस्यचात्मनोविराट्हिरण्यग र्भईशःपरमात्माचेत्येतानिनामानियथाक्रमंबोध्यानीतिद्वयोरर्थः ॥ ८७ ॥ ८८ ॥ एकैकस्येति एतेषांविश्वादीनामधिदैवरूपा

अकारादेरवस्थेयमेवंषोडशधास्मृता ॥ प्लुतदीर्घह्रस्वसाक्षिभेदैर्वापरिकीर्तिता ॥ ८६ ॥ आत्मनोपिच पादाःस्युश्चत्वारःपरिकीर्तिताः॥ विश्वश्चतैजसस्तद्वत्प्राज्ञोपिचतुरीयकः ॥ ८७॥ अध्यात्ममधिदैवंचनामा न्येतानितस्यहि ॥ विराट्हिरण्यगर्भेशपरमात्मानआत्मनः ॥ ८८॥ एकैकस्यचतुर्धात्वंभवेद्विश्वादिकस्य हि॥ तीव्रमध्यममंदाख्यैर्भेदैरैक्येनचात्मनः॥८९॥

भिन्नानांमध्येएकैकस्यतीव्रादिभिर्भेदैश्चतुर्विधत्वंबोध्यं तत्रैक्यंनिर्विशेषत्वरूपंतुरीयत्वं तथाहि जाग्रद्रूपोविश्वश्चतुर्विधः तत्रेंद्रियैर्विषया न्गृह्णंस्तीव्रोमनोरथपरोमध्योमोहेनतूष्णींभूतोमंदःसमाहितस्तुनिर्विशेषतामापन्नस्तुरीयएतद्विश्वभेदचतुष्टयंक्रमेणअकारस्यवैखर्यादिसं ज्ञावस्थाचतुष्टयस्यवाच्यं एवंस्वप्नद्रष्टृरूपस्तैजसोपिचतुर्विधः तत्रस्वप्नेमंत्रादिकमबाधितंगृह्णंस्तीव्रःस्वप्नंस्वप्नत्वेनजानन्मध्यमःस्वप्नेप्या मूढोमंदःसमाहितइति तथाप्राज्ञोपिचतुर्विधः तत्रसात्विकवृत्तिप्रधानस्तीव्रोराजसवृत्तिप्रधानोमध्यमस्तामसवृत्तिर्मंदइति तुरीयभेदच तुष्टयंतुस्वयमेवानंतरमुदाह्रियतइति ॥ ८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणवस्यचतुर्थीमात्रानादरूपावर्णितातस्याश्चबीजाबिंदुशक्तिशांताख्याश्चतस्रोवस्थाउक्तास्तासांक्रमेणवाच्यांस्तुरीयात्मनश्चतुरोभेदानो तादिसंज्ञांस्तीव्रादिभावेनोदाहरति ओतइत्यादिना सर्वगतःअंगारेग्निवत्सर्वत्रविश्वशरीरघटकेषुस्थूलसूक्ष्मकारणेषुभासकतयानुगतोयः सर्वेषामात्मायेनसकलःस्थूलपर्यंतःप्रपञ्चःस्वस्वरूपेणज्ञायतेभास्यतेसआंतरव्याप्तत्वेनओतसंज्ञोद्विजैर्वेदविद्भिस्तुरीयस्यसप्रथमस्तीव्रा ख्योभेदउच्यतेइत्यर्थः ॥ १० ॥ प्रपंचस्यस्वमवदध्यस्ततयाभानेअध्यस्तस्यस्वतःसत्ताविरहात्तस्यसत्तादिकमनुजानन्मदीयमेवसत्ता दिकमस्यास्त्विति चिंतयतीतियावत् एवंविधआत्माअनुज्ञातृसंज्ञस्तुरीयस्यद्वितीयोभेदइत्याह अनुज्ञातेति एषआत्माध्यातृध्यानादिभेद वान् ध्यात्रादिभेदंस्वसत्तादिदानेनानुगृह्णन्नितियावत् सअनुज्ञातृनामातुरीयस्यमध्यमाख्योद्वितीयभेदउच्यतेइत्यर्थः ॥ ११ ॥ अथा

ओतःसर्वगतःप्रोक्तआत्मासर्वशरीरिणां ॥ प्रपंचोपिचयेनायंज्ञायतेस्वात्मरूपतः ॥ स्थूलभेदस्तुरीयस्यती व्रोयंकल्पितोद्विजैः ॥ १० ॥ अनुज्ञाताभवेदेषध्यातृध्यानादिभेदवान् ॥ मध्यमोत्रतुरीयस्यभेदःसर्वशरीरिणां ॥ ११ ॥ अनुज्ञास्वात्मनोरूपंजानीतेयत्रकेवलं ॥ तुरीयस्यतृतीयोयंभेदोमंदइतीरितः ॥ १२ ॥ अविकल्प श्चतुर्थाख्योयत्रशून्यमिवाखिलं ॥ भातिविश्वंतथात्माचयोगिनःपुण्यसंचयात् ॥ १३ ॥

ध्यस्तंसत्ताकर्षणेनविलाप्यात्मानमद्वितीयंजानन्नात्माअनुज्ञेत्युच्यतेयेनसर्वत्रसत्तादिकंदत्तंसइदानीमनुज्ञामात्ररूपेणावशिष्टः अनुज्ञा याविषयादिकमिदानींनास्तीत्यत्रार्थेपर्यवसानात्सआत्मातुरीयस्यतृतीयोभेदउच्यतेमंदाख्यइत्याह अनुज्ञेति स्वात्मनोरूपंकेवलंजान न्ननुज्ञासंज्ञआत्मातद्रूपस्तुरीयभेदेषुतृतीयोमंदाख्योभेदइत्यर्थः ॥ १२ ॥ यत्रस्वरूपेबाधितद्वैतस्यस्फूर्तिरपिनास्तितदात्मरूपंयोगिनापु ण्यसंचयात्सकलप्रतिबंधहीनेनलभ्यमविकल्पपदोक्तंतुरीयस्यचतुर्थभेदत्वेनज्ञेयमित्याह अविकल्पइति चतुर्थाख्योभेदस्तुरीयस्याविक ल्पसंज्ञः यत्राविकल्पेऽखिलंविश्वंद्वैतंशून्यमिवभवतिनतुशून्यंयतआत्मैवभातियोगिनंपुण्यसंचयशालिनंप्रति ॥ १३ ॥ ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यतुरीयस्यपरमपुरुषार्थरूपतामाह तुरीयमिति तत्अविकल्पाख्यंतुरीयमानंदरूपमवस्थाचतुष्टयेऽनुस्यूतमधिष्ठानतयानुगतंविभाति यद्यतःसत्तास्फुरणादिप्रदाद्धेतोरेतद्वर्णितंषोडशविधमात्मनोरूपंभाति तत्रतुरीयस्यकल्पितत्वंविशेषणीभूततुरीयतायाःपरसापेक्षत्वान्नतु विशेष्यांशइतिभावः ॥ ९४ ॥ तत्रहेतुतयाविश्वाधिष्ठानतामाह यस्मिन्निति इदंदृश्यजातरूपंजगद्यस्मिन्नविकल्पेभाति भासमान मध्यस्तमुक्तंनिर्मलेगगनेगंधर्वनगरवदित्यर्थः ॥ ९५ ॥ एतदिति स्पष्टम् ॥ ९६ ॥ उक्तात्मज्ञानाधिकारिणःषष्ठखंडेवर्णितान्निरूपयति

तुरीयंसुखरूपंतत्सदावस्थाचतुष्टये॥ अनुस्यूतंविभात्येतद्रूपंयत्षोडशात्मकं॥ ९४ ॥ यस्मिन्नध्यस्तमखिल मिदंजगदुदीरितं॥ गगनेनिर्मलेभातिगंधर्वनगरोपमम्॥ ९५॥ एतत्सर्वभयैःशून्यंजन्मादिपरिवर्जितं ॥ अणोरणीयएतच्चमहतोपिमहत्तथा ॥ ९६ ॥ एतज्जिज्ञासवःसर्वेब्राह्मणाद्याःशरीरिणः ॥ कुर्वंतिविहितं कर्मनिषिद्धंवर्जयंतिच ॥ ९७॥ सत्यंतपोदयादानंब्रह्मचर्यमहिंसनं ॥ इत्यादीन्यपिकर्माणिकुर्वंतिचविवे किनः॥ ९८॥ब्राह्मणाएतमिच्छंतिएषणात्रयवर्जिताः॥ भिक्षाचर्यंचरंत्यत्रव्युत्थायश्रमकर्मतः ॥ ९९॥ एतंविज्ञायविद्वांसोप्यंधवन्मूकवन्महीं ॥ विहरंत्यपिसर्वज्ञाअविज्ञाताजनैरिह ॥ संवर्तकादिवत्सर्वेलोका तीतामहाधियः ॥ १०० ॥

एतज्जिज्ञासवइतिचतुर्भिः एतदविकल्पमात्मरूपंज्ञातुमिच्छंतोब्राह्मणाद्याविहिताचरणंनिषिद्धवर्जनंचकुर्वंति ॥ ९७ ॥ सत्यमिति तथा सत्यादिचतुष्टयरूपान्धर्मपादानहिंसादिरूपान्यमांश्चकुर्वंति तत्रब्रह्मचर्यस्यपृथङ्निर्देशःश्रुतिष्वत्यादरात् ॥ ९८ ॥ एवंमंदामध्यमाश्चा धिकारिणउक्ताअथोत्तमानाह ब्राह्मणाइति येएषणात्रयेणलोकवित्तपुत्रगोचरेणवर्जिताःसंतोगृहस्थादिविहितकर्मतोव्युत्थायतत्परि त्यज्येतियावत् भिक्षाचर्योपलक्षितंपारमहंस्यंधारयंतितेएतमात्मानमिच्छंतीत्यर्थः ॥ ९९ ॥ तेष्वपिविदुषांलक्षणमाह एतमिति एतमा त्मानंविज्ञायचांधादिवल्लोकेविचरंतिअतएवलोकैरलक्षितायथापूर्वेसंवर्त्तारुण्यादयश्चरंतिस्मतद्वदिति ॥ १०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमात्मेतिसप्तभिः एव अथषष्ठेसप्तमेचदर्शितंमंत्रराजोपसर्जनप्रणवोपासनस्यकेवलस्यचतुष्पात्प्रणवोपासनस्यचस्वरूपमभिनयति अयमात्मेतिसप्तभिः एव मविकल्परूपेणयदिपापरूपप्रतिबंधवशाद्विज्ञातुंनशक्यतेतदाप्रतिबंधापहारायोपायःकर्त्तव्यइत्यर्थः ॥ १०१ ॥ कोसावुपायइत्यतआह उपायोमंत्रेति योमंत्रराजश्चतुष्पादुक्तस्तस्यचतुरात्मनाचतुष्पादेनप्रणवेन कीदृशेन आत्मनाविश्वादिचतुर्विधात्मवाचकेनसहयदेकीकर णमुक्तंतद्रूपउपायइत्यर्थः ॥१०२॥ तत्रप्रणवस्यमात्राविभूतिस्तृतीयखंडोक्ताध्येयाइत्याह ब्रह्माद्यैरिति ब्रह्मास्रष्टा आदिपदेनमाम्राव सुगायत्रीगार्हपत्यपृथिवीऋग्मंत्रऋग्वेदाः एतेअकाररूपाः एवंविष्णुरुद्रत्रिष्टुप्दक्षिणाग्नियजुर्मंत्रयजुर्वेदांतरिक्षरूपउकारः रुद्रादित्यजग

अयमात्मायदानैवंज्ञायतेप्रतिबंधतः॥ कुतश्चिदमरास्तर्हिविज्ञातव्यउपायतः॥ १०१ ॥ उपायोमंत्रराजा स्यश्चतुष्पाच्चतुरात्मना॥ प्रणवेनात्मनासार्द्धमेकीकरणमीरितं ॥ १०२ ॥ ब्रह्माद्यैर्बहुभिर्भेदैरकाराद्याअने कधा॥ भिन्नामात्रायथाशास्त्रंविज्ञायगुरुवक्त्रतः ॥ १०३ ॥ एकीकुर्यात्सदाविद्वान्मंत्रराजंविहायवा ॥ सर्वत्रैवप्रकारोयंपादादिविलयेभवेत् ॥१०४॥ पूर्वंविनिःक्षिपेद्विद्वानुत्तरत्रततोपितत्॥ उत्तरस्मिन्नातुरीयं तुरीयंमनसाजपन् ॥ १०५॥

त्याहवनीयस्वर्गसाममंत्रसामवेदरूपोमकारः विराट्मरुतएकर्षिरूपाग्निप्रणवाथर्वणमंत्राथर्ववेदसंवर्त्तकाग्निसोमलोकरूपोनादइत्येवं विधाःप्रणवमात्रागुरुमुखाद्विज्ञायतामंत्रराजपादचतुष्टयेनमिलिताःकेवलावाएकीकुर्याद्विलापयेत् तत्रसर्वत्रपादानांमंत्रराजसंबंधि नांप्रणवसंबंधिनांवातदर्थानांचविलयेविलापनेअयंप्रकारोबोध्यइतिद्वयोरर्थः ॥१०३॥ १०४ ॥ अयंकइत्याकांक्षायामाह पूर्वमिति पूर्वपादंपादावयवंवाउत्तरत्रानंतरेविनिक्षिपेद्विलापयेत्ततस्तदुत्तरमपिततउत्तरस्मिन्विलापयेत् एवंआतुरीयंतुरीयपर्यंतंधावेत् ततस्तुरीयं प्रणवंबीजबिंदुशक्तिशांताख्यावस्थाशालिनंमनसाजपन्ननुसंदधानोभवेदित्यर्थः ॥ १०५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतासांकलानांविलापनयोग्यतादर्शनायशुद्धात्मनितदभावमाह कलाइति याएताःपुंसःप्रणववाच्यस्यषोडशकलाउक्तास्ताःषोडशात्मनिषोडशावयवेप्रणवेतादात्म्येनस्थिताः सर्वभेदविवर्जितेईशानेपरमात्माख्येआत्मनितुनसंतीत्यर्थः ॥ १०६ ॥ अत्रश्रुतावर्थात्सूचितंप्रकारांतरंदर्शयति मंत्रेति एवंप्रत्येकंचतुरवयवकपादचतुष्टशालिनाप्रणवेनपादशोमेलनेसतिमंत्रराजस्यनारसिंहस्यषोडशभागाःफलिताःस्युः अष्टाक्षराणांपादानांचतुरवयवकप्रणवमात्राभिःसमानार्थत्वेप्रतिपादावयवंद्वयोर्द्वयोरक्षरस्यवाचकतायाःपर्यवसानात्ताएताःषोडशावस्थाःशनैःशनैर्जेतव्याश्चेतसादृढमालंबनीयाइत्यर्थः ॥१०७॥ जितामिति तासुयायाभूमिर्जिताभानेप्रतिबंधशून्याभवतितांविहायोत्तरामुत्तरामाश्रयेत् यदाचतुरीयस्यतुरीयमविकल्पाख्यंभाग्योत्कर्षात्प्राप्तंभवतितदाध्वंसःसविलासाज्ञानस्यभवतिततःपरंकिंचित्कर्त्तव्यं

कलाःषोडशपुंसोयाःषोडशात्मनिताःस्थिताः ॥ प्रणवेनात्मनीशानेसर्वभेदविवर्जिते ॥ १०६ ॥ मंत्रराजस्यचैवंस्युःप्रकाराःषोडशैवहि ॥ उभाभ्यामपिवर्णाभ्यांकृतेभागेसदाधिया ॥ भूमिकाःषोडशैवैताजेतव्याःस्युःशनैःशनैः ॥ १०७॥ जितांजितांविहायैतामाश्रयेदुत्तरोत्तरां ॥ तुरीयस्यतुरीयेस्मिन्संप्राप्तेदैवयोगतः ॥ ध्वंसस्ततःपरंनैवकिंचिदत्रावशिष्यते ॥ १०८ ॥ एतत्तुर्यशरीराख्यमवाङ्मनसगोचरम् ॥ प्रष्टुंवक्तुंचकेनापिशक्यतेनैवकर्हिचित् ॥१०९॥ मौनेनैववदंत्येतंब्राह्मणास्तत्त्वदर्शिनः ॥ आत्मानंसच्चिदानंदंपृष्टाःशिष्यैर्महाधियः ॥ ११० ॥ आत्मन्यस्मिन्सदैवैकरूपेब्रह्मणिनिर्द्वये ॥ सर्वावस्थास्वनुगतेनैवकिंचित्प्रवर्त्तते ॥ १११ ॥

ज्ञेयंचनावशिष्यतेइत्यर्थः ॥ १०८ ॥ अथसप्तमखंडेब्रह्मैवेदमित्यादिनापरमानंदइत्यंतग्रंथेनब्रह्मस्वभावाभिव्यंजिकाउपपत्तयःसूचितास्ताःप्रतिपादयति एतत्तुर्येतिचतुरधिकनवतिश्लोकैः पुंसश्चत्वारिशरीराण्युक्तानिस्थूलसूक्ष्मकारणतुरीयभेदात् तत्रतुर्यशरीरेणाख्यानिरूपणमुपलक्षणरूपंयस्यतत्तथाविधमेतदविकल्पंतत्त्वंवागादेरविषयत्वात्प्रष्टुंप्रश्नगोचरीकर्त्तुंवक्तुमुत्तरस्यगोचरीकर्त्तुंचनशक्यमित्यर्थः ॥ १०९ ॥ अतएवशिष्यैःपृष्टाअपिमहात्मानएतमविकल्परूपमात्मानंसच्चिदानंदलक्षणंमौनेनैववदंतिसूचयंतीत्याह मौनेनैवेति स्पष्टम् ॥११०॥ तत्रहेतुतयावदनीयताव्यापकस्यवाह्यांतरकरणगोचरत्वस्याभावमाह आत्मन्यस्मिन्निति अस्मिन्नात्मनिकिंचिदपिप्रवर्त्तितुमेनंविषयीकर्त्तुंनशक्तमित्यर्थः ॥ १११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रकर्मकर्तृत्वविरोधमाह अधिष्ठितानीति अनेनैवात्मनाधिष्ठितानिप्रेरितानिकरणानिमनःप्रभृतीनिकार्याणिशरीरादीनिअन्यत्रप्रवर्त्तंते अत्रैवप्रवर्तकेकथंप्रवर्तैरन् कर्तृभावेनावस्थितस्यकर्मत्वायोगादितिभावः ॥ ११२ ॥ विशेषतोवाग्विषयत्वाभावेहेतुंतद्व्यापकाभाव माह वाचइति वागिंद्रियंशब्देष्वेववर्ततेतानेवविषयीकरोतितेशब्दाश्चानात्मरूपानर्थांस्तानेवगोचरयंतियेबाह्याभ्यंतरभेदेनद्विविधानामिं

द्रियाणांव्यवस्थितानियतागोचराःनतुसर्वानित्यर्थः तथाचेंद्रियविषयतायाःसामान्यतोवच्छेदकस्यानात्मत्वस्यविशेषतोवच्छेदकस्यरू पादेश्चाभावेइंद्रियविषयत्वाभावस्ततश्चतद्व्याप्यस्यशब्दगोचरत्वस्याभावइतिभावः ॥ ११३ ॥ गोचराणांव्यवस्थितत्वमेवस्फुटयति रू

अधिष्ठितान्यनेनैवप्रवर्तंतेशरीरिणां ॥ करणानिसकार्याणिह्यात्मनासर्वहेतुना ॥ ११२ ॥ वाचःशब्देषुवर्तं तेशब्दाश्चार्थेषुसर्वदा ॥ अर्थाअनात्मरूपास्तेइंद्रियाणांहिगोचराः ॥ बाह्यांतरस्वरूपाणांसर्वदैवव्यवस्थि ताः ॥ ११३ ॥ रूपादयःसुखंतद्वद्दुःखंचमनसासदा ॥ गृह्यतेतैश्चरहितःकथमात्मात्रगृह्यते ॥ ११४ ॥ आ त्मनीशेसदानंदेरूपाद्याश्चनकेचन ॥ सुखदुःखेचसततमध्यस्तेस्रजिसर्पवत् ॥ ११५ ॥ अधिष्ठानंभवेदकं कल्पितानांसदाजनैः ॥ सर्पधारादयोयस्माद्रज्जावेवप्रकल्पिताः ॥ ११६ ॥

पादयइति रूपादिषुसुखादिषुचबाह्यांतरिंद्रियाणांविषयत्वंनियतमित्यर्थः ॥ ११४ ॥ आत्मनित्वेतेइंद्रियविषयतानियामकागुणानसं तीत्याह आत्मनीति किंचप्रातिभासिकग्रहणस्यसाक्षिमात्रसाध्यत्वात्सुखादीनांप्रातिभासिकानांग्रहणायमनसोनपेक्षितत्वात्सुखदुः खेनमनसोविषयावच्छेदकेइत्याह सुखदुःखेइति सुखादिकमध्यस्तत्वादात्ममात्रभास्यंनात्मनःपरनिरूपितविषयतांसाधयतीत्यर्थः ॥ ११५ ॥ अथाधिष्ठानत्वस्येंद्रियविषयत्वाभावव्याप्यत्वात्तेनहेतुनाप्यविषयत्वंसूचयन्नात्मनःसर्वाधिष्ठानत्वंसाधयति अधिष्ठानमि

ति भ्रमोपादानाज्ञानगोचरत्वमधिष्ठानत्वंतच्छालिवस्तुलोकेप्येकंप्रसिद्धंयथैकस्यांरज्जौसर्पजलधारादंडभूबिलान्यारोप्यमाणानिदृष्टा नीत्यर्थः ॥ ११६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुलोकेरूप्यादीनांयान्यधिष्ठानानितेषांसर्पाद्यधिष्ठानाद्रज्जुरूपाद्भेदएवप्रसिद्धइतिकथमधिष्ठानैक्यमितिचेत्स्यादेवमापाततोविचारकालेतुजडस्याज्ञानगोचरत्वानर्हत्वात्सर्वत्रानुगतस्यचित्सामान्यस्यैवाधिष्ठानत्वमितिदर्शयितुंस्थूलारुंधतीन्यायेनेदंतासामान्यस्याधिष्ठानत्वंतावच्छंकासमाधानाभ्यांसाधयति यद्यपीतिपंचभिः यद्यपिसर्पाधिष्ठानाद्रूप्यरंगादेरधिष्ठानंशुक्त्यादिकंभिन्नमितिप्रसिद्धंतथापीदंविचार्यं इदंकिं कल्पितमारोपितंकुत्रकस्मिंस्तादात्म्यसंबंधेनाश्रितेविभातिभानंलभतेइत्यर्थः ॥ ११७ ॥ तत्राधारपर्यायस्याधिष्ठानपदस्यप्रकृतेतादात्म्यसंबंधेनविशेष्यताभाग्वस्तुरूपोऽर्थःपर्यवस्यतीत्याह सामानाधिकरण्येनेति यद्वस्तुयेनागंतुकेनसहसामानाधिकरण्येनतादात्म्यलक्षणेनसंबंधेनप्रतीयतेभ्रमकालेपिसंबद्धंभासतेतदेवतस्यागंतोरधिष्ठानभावार्हमित्यर्थः ॥ ११८ ॥ इदंलक्षणंशुक्तिकादौनसंभ

यद्यप्यन्यदधिष्ठानंरूप्यादेरिहदृश्यते ॥ तथापिकल्पितंकुत्रविभातीतिविचार्यतां ॥ ११७ ॥ सामानाधिकरण्येनयद्धियेनप्रतीयते ॥ अधिष्ठानंभवेत्तस्यतदेवान्यन्नकर्हिचित् ॥ ११८ ॥ शुक्तीरूप्यंरज्जुरहिरितिनैवप्रतीयते ॥ इदंरूप्यमयंसर्पःकिंतुतद्धिप्रतीयते ॥ ११९ ॥ बाधायांनैवरूप्यादितत्रकिंचनविद्यते ॥ ततोविकल्पमात्रेणप्रत्ययोत्रप्रजायते ॥ १२० ॥ रज्जूरोषणइत्यादौबाधायांशास्त्रवेदिनां ॥ इदंताततएवैषासर्वाधिष्ठानमीरिता ॥ १२१ ॥

वतिकिंत्विदंतायामेवसंभवतीत्याह शुक्तीरूप्यमिति रूप्येणसहशुक्तेस्तादात्म्यमहिनासहरज्जोश्चतादात्म्यंभेदाभेदरूपंनानुभूयतेइदंपदार्थेनतुतदनुभूयतेइत्यर्थः ॥ ११९ ॥ ननुबाधाध्यासविशेषणैक्यभेदेनचतुर्विधस्यसामानाधिकरण्यस्यविशेषेबाधासामानाधिकरण्येचोरोयंस्थाणुःसर्पोयंरज्जुरित्याकारेरज्जोरपिसामानाधिकरण्यंदृष्टमित्याशंक्यतत्रसर्वस्यासत्वेनतज्ज्ञानस्यविकल्पमात्रत्वान्नाधिष्ठानतासाधकत्वमित्याह बाधायामिति शास्त्रवेदिनांयोयंबाधाकालेरोषणःक्रोधनःसर्पोरज्जुरित्याकारःप्रत्ययोजायतेसततःशब्दज्ञानानुपातीवस्तुशून्योविकल्पइतिलक्षणसमन्वयाद्विकल्पमात्ररूपोयतस्तदानींरूप्यादिकंनास्तीति फलितमाह इदंतेति इदंतापुरोवर्तिसामान्यंतदेवाधिष्ठानतायोग्यमितिद्वयोरर्थः ॥ १२० ॥ १२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेमामिदंतांब्रह्मभावंनेतुमस्याभेदराहित्यमाह इदंतायामितिसप्तभिः योयमिदंताख्येसामान्येनोऽस्मान्प्रतिभेदोभातिसशब्देनैवनि
मित्तेनभातिनत्वर्थतोयस्माद्वस्तुन्यर्थेसामान्यरूपेकोपिभेदोनलभ्यतेइत्यर्थः ॥ १२२ ॥ अस्तुतर्हिशब्दभेदादेवार्थेभेदइतिचेन्न शब्द
भेदस्यार्थैक्येपिदृष्टस्यव्यभिचारिणोर्थभेदसाधनेअक्षमत्वादित्याह अयमिति अयमित्यादयोभवदंताअपिशब्दादन्येचपूर्वादयःशब्दा
वस्तुतोर्थस्यभेदंविनाप्येकत्रप्रवर्त्तमानादृष्टाययथासर्वःसर्वजातीयःपुमान्प्रत्येकंवीक्षणेएकएकसंख्याकएवसन्नेतानयंत्वमहमित्यादिरू
पान्शब्दान्विषयतयाभजते यतःकश्चित्तमयमितिवदतिकश्चित्त्वमितिकश्चिद्देवदत्तोहमेवेतिस्नेहेनवक्तिकश्चित्तुदेवदत्तोममसर्वोबांधव

इदंतायांचशब्देनभेदोनःपरिभात्ययं ॥ भेदोवस्तुनिकोप्यत्रयस्मान्नैवप्रतीयते ॥ १२२ ॥ अयंत्वमहमेषो
स्मिसर्वोविश्वोभवानपि ॥ शब्दभेदाइमेदृष्टावस्तुभेदविवर्जिताः ॥ १२३ ॥ एकएवपुमान्यस्मात्प्रत्येकंस
र्वएवहि ॥ वक्तृभेदादिनाशब्दभेदानेतान्समाप्नुयात् ॥ १२४ ॥ प्रातिस्विकंयदैकंस्यात्तदाभेदःकथंभवेत् ॥
शब्दभेदादर्थनिष्ठोगंधर्वनगरोपमः ॥ १२५ ॥ अर्थभेदश्चकेनायंगृह्यतेतद्विचार्यतां ॥ यतःशब्दभटोभग्नो
भेदराजानुगोहियः ॥ १२६ ॥

इतिवक्तीत्येवंवक्तृभेदमपेक्ष्यनानाशब्दभागित्वेपिपुंसःस्वभावतएकस्यनभेदोदृष्टइतिद्वयोरर्थः ॥ १२३ ॥ १२४ ॥ किंचएकत्वस्य
सर्वत्रस्वाभाविकत्वेवहिरंगोपाधेःशब्दादिरूपादर्थेप्रसक्तोभेदःकल्पितएवसिद्ध्यतीत्याह प्रातिस्विकमिति प्रतिस्वंप्रतिस्वरूपंभवनशीलंय
दैकत्वंसिद्धंतदाशब्दभेदमादायार्थनिष्ठोभेदःकथंस्यान्नकथमपि यदिस्यात्तदापिगंधर्वनगरसमएवस्यादित्यर्थः ॥ १२५ ॥ किंचया
हकप्रमाणाभावादप्यर्थतत्त्वेभेदासिद्धिरित्याह अर्थभेदश्चेति अयमर्थस्यइदंतारूपस्यभेदःकेनमानेनसाध्यतेइतिविचार्यं यतोऽर्थाच्छ
ब्दरूपोमहाभटोभग्नःपराहतोभेदरूपस्यराज्ञोनुचरत्वादित्यर्थः अत्रहिस्वाभाविकाभेदेनभेदस्यतिरस्कारेतदनुसारेणार्थेप्रवेशमिच्छतःश
ब्दस्यकोवकाशः एवंसतिशब्दोविकल्पमात्रात्मकंभेदमादायतुष्टइतिभावः ॥ १२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथापुरोदेशेयथाकथंचिदर्थसत्तामात्रग्राहिणइंद्रियगणस्येतरव्यावृत्त्यात्मकभेदग्रहणेनसामर्थ्यमित्याह चक्षुरादींद्रियेति इंद्रियगणो वस्तुनःस्वरूपमात्रंगृहीत्वाकृतकृत्योभवतियथादुष्टंचक्षुःशुक्तौरजतमस्तीत्येतावताकृतकृत्यंनतुतस्यभेदमपिग्रहीतुंशक्नोति तद्ग्रहणेपुरोवर्तिभेदावगाहनेनभ्रमोलुप्येतेतिभावः ॥ १२७ ॥ वस्तुतस्तुकालत्रयाबाध्यत्वरूपसत्तारूपाइदंतापींद्रियैर्यदांदुर्ग्रहातदातस्याभेदःसुतरांदुर्ग्रहइत्याह इदंताचेदिति इतइंद्रियगणात्स्वाभिकेंद्रियवदाभिमानिकव्यवहारसाधनाच्चेयदीदंतापिनस्फुरेन्नसिद्ध्येत्तदातस्याइदंताया इंद्रियतोभेदःसिद्ध्येदितिकुतःस्यादितिपूर्वदलार्थः तत्रहेतुतयाइदंतायाःसत्तातोभेदाभावमाह इदमिति इदंशब्दःसत्शब्दश्चएतौलोके

चक्षुरादींद्रियगणोवस्तुमात्रंप्रगृह्यसः ॥ कृतकृत्योयथाशुक्तिरजतग्रहणादिह ॥ १२७ ॥ इदंताचेदितोनैं पास्फुरेत्तस्याःकुतोभिदा॥ इदंसदितिलोकेऽस्मिन्पर्यायोदृश्यतेयतः ॥ १२८ ॥ अनुस्यूतेपरेतत्त्वेभेदःकेनभविष्यति ॥ इदंतामात्ररूपेस्मिन्सर्वभेदविवर्जिते ॥ १२९ ॥ सत्ताचस्फुरणादन्यानैवकाचित्प्रदृश्यते ॥ स्फुरणंचयदैवैतत्स्वप्रकाशंसमीरितम् ॥ १३० ॥ अचैतन्यंहिचैतन्यबलतोत्रप्रतीयते ॥ वादिनामविवादंतत्सर्वेषामपिसर्वदा ॥ १३१ ॥

पर्यायतयासमानार्थतयाप्रसिद्धौ इदंशब्दोहिसन्निकृष्टमभिधत्ते सन्निकृष्टंसदेवभवतीतिभावः ॥ १२८ ॥ यदाचेदंतायामेवंभेदोनसिद्धस्तदेदंतापियस्यविशेषस्तत्रपरमात्मनिभेदःकेनसिद्ध्येदित्याह अनुस्यूतइति इदंतामात्रंसर्वाइदंतारूपंविशेषोयस्यतथाभूते ॥ १२९ ॥ इदंतारूपायाःसत्तायाभानेपरानपेक्षतांदर्शयितुंस्फुरणाभेदमाह सत्ताचेति दृष्टिसृष्टिसिद्धांतेअभासमानस्यसत्ताऽसंभवात्सत्तास्फुरणरूपैव तच्चस्फुरणंस्वप्रकाशमितिप्रपंचितमधस्तादित्यर्थः ॥ १३० ॥ स्वप्रकाशत्वेकांचिदुपपत्तिमप्याह अचैतन्यमिति चैतन्यहीनं वस्तुचैतन्येनसिद्ध्यतीत्यत्रनकस्यापिविवादइत्यर्थः ॥ १३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चैतन्यमपीति यदिचैतन्यमपितेनचैतन्येनप्रतीयेतेतिमन्यतेतदाइतिवक्तव्यं भास्यतयाभिमतंचैतन्यंस्फुरणविलक्षणंवास्फुरणात्मकमेव
आ.पु. वा आद्येआह कुतोपरमित्यादिनिष्फलमित्यंतं अपरंस्फुरणविलक्षणंयत्तच्चैतन्यंभवतीत्येवएतैर्वादिभिःकुतःकल्पितं नहिभास्यस्यपर
सापेक्षस्यचैतन्यरूपताकल्पनेकिंचित्प्रमाणंपश्यामः नवाफलं तद्भासकेनैवसर्वनिर्वाहेभास्यस्यचैतन्यस्यवैयर्थ्यादित्यर्थः अंत्येतस्यसर्वा
॥१२॥ तरत्वेनात्मरूपस्यस्वप्रकाशत्वेकःसंशयइत्याह स्फुरणंचेदिति यदितच्चैतन्यंस्फुरणरूपंतदासर्वधीवृत्तिसाक्षिभूतआत्मैवतत् नचतस्यप
रापेक्षाअनात्मत्वप्रसंगादित्यर्थः ॥ १३२ ॥ एवंसच्चिद्रूपआत्मासाधितोऽथतस्यपरप्रेमास्पदत्वादानंदत्वंदर्शयति आत्मेति सच्चिद्वपुरात्मा

चैतन्यमपिचेत्तेनप्रतीयेतकुतोपरं॥ चैतन्यंकल्पितंत्वेतैरप्रमाणंचनिष्फलं ॥ स्फुरणंचेत्तदात्मैवसर्वबुद्धिप्र
काशकः॥ १३२॥ आत्मासर्वप्रियतमःसर्वेषामिहदेहिनां ॥ आनंदरूपस्तेनायंसच्चिद्वपुरुदीरितः॥ १३३॥
आत्महानेत्रसंप्राप्तेयतोहातुंसमिच्छति॥ सुखंचततएवायंसुखादप्यधिकंसुखं ॥ १३४ ॥ सुखंत्यजंतिधी
मंतःस्वल्पमप्यधिकेसति॥ नान्यथाततएवायंपरमानंदरूपभाक्॥ १३५॥ सच्चिदानंदमात्मानमवाङ्मन
सगोचरं॥ मौनेनचेन्नजानंतिशिष्याअल्पधियस्तदा॥ एवंतानुन्मुखान्प्राहुर्धर्मानारोप्यकांश्चन ॥ १३६॥

यतःसर्वस्मात्प्रियतमस्ततआनंदरूपइतियोजना ॥ १३३ ॥ तस्यपरमानंदत्वेउपपत्तिमाह आत्महानइति यदालोकेआत्मत्वाभिमतोदे
होवाहातव्यःअमुकंवैषयिकंसुखंवाहातव्यमितिविचारःप्रसज्जतेतदाधीमंतःसुखमेवत्यजंतोदृश्यंतेतदाचात्मापेक्षयासुखमल्पमेवमत्वात्य
जंतीतिन्यायसिद्धं तथाचात्मनःपरमानंदत्वंसिद्धमितिद्वयोरर्थः ॥ १३४ ॥ १३५॥ उक्ताभिप्रायेणमौनेनात्मनःसदादिरूपत्वेदर्शिते
पियदिशिष्याबोद्धुंनशक्नुवंतितदातान्शिष्यानुन्मुखान्ज्ञातुमुत्कंठितानित्थंवक्ष्यमाणविधयाबोधयेत्कारुणिकोगुरुरित्याह सच्चिदानंद ॥१२॥
मिति ॥ १३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंकथमित्यतआह वचसइति लोकेवचसोविषयोवचसास्पष्टमभिधेयंवस्तुसदित्युच्यतेमनसैवानुसंधेयंत्वसदिति आत्मनःस्वरूपंतूभाभ्यांस्वभावाभ्यांनिर्मुक्तंरहितंभवत्यतःसदसत्त्वविनिर्मुक्तआत्मनिसदसत्त्वरूपंधर्मद्वयमारोप्यविकल्प्यइत्युपदेशरूपंवाग्व्यवहारंकुर्यात् इतिकिं हेसोम्यसःअनुभवसिद्धःसच्चिद्रूपआत्मात्वमसीतिद्वयोरर्थः ॥ १३७ ॥ १३८ ॥ किंसदिति सशिष्योयदिकिंरूपंसदितिपृच्छेत्तदाएनंप्रतिइतिवदेत् इतिकिं यत्सर्वत्रइदमिदमित्याकारेणसन्निहितंभासतेतदेवसद्वस्त्वित्यर्थः ॥ १३९ ॥ स्थूलारुंधतीन्यायेनेदंतायांनिहितामात्मतांमुख्येनयति अवाङ्मनसेति वाङ्मनसातीतरूपेयस्मिन्स्फुरणेइदंतापिकल्पितातदेतत्स्फुरणमेवानुभूतिरितिप्रसिद्धंतु

वचसोमनसश्चापिविषयःसदसत्स्मृतम् ॥ सदसत्त्वविनिर्मुक्तंस्वरूपंचात्मनःसदा॥ १३७॥ सदसत्त्वंसमारोप्यसदसत्त्वविवर्जिते॥ सच्चिदानंदआत्मासत्वमसिक्लेशवर्जितः ॥ १३८ ॥ किंसदित्येवचेन्मांत्वंपृच्छस्यत्यंतमंदधीः॥ सर्वत्रेदमिदंयत्तुतत्सदित्यवधारय॥ १३९॥ अवाङ्मनसरूपेस्मिन्यत्रेदंतापिकल्पिता ॥ तदेवैतत्सदुक्तंतेमयानैकस्वरूपकं ॥ १४० ॥ स्फुरणंयत्सदासद्भिरनुभूतिरितीर्यते ॥ कैषेतिचेदिमांप्राहभवांस्तांतेवदाम्यहम् ॥ १४१ ॥ बुद्धौसर्वत्रेयमियंभातियानुगतात्रचित्॥ सोक्तावाङ्मनसातीताहीदंताप्यत्रवर्जिता॥ १४२ ॥ एवमेवहियच्छिष्याःपृच्छंत्येतान्महाधियः॥ एतद्वदंतिसकलमारोप्यैवसदात्मनि॥ १४२॥

भ्यंसदित्युक्तमितिदलत्रयार्थः यदिचएषासदात्मकानुभूतिःक्वतिष्ठतीतिमांपृच्छसितदातामनुभूतिमुपलब्धिस्थानविशिष्टांतुभ्यंवदामीत्यर्थः ॥ १४० ॥ १४१ ॥ बुद्धाविति बुद्धौप्रतिबिंबितासर्वत्रविषयेष्वियंचिदियंचिदित्येवमनुगताचयाचित्प्रसिद्धासांनुभूतिरित्युक्ता यस्याःस्वरूपइदंतापिवर्जिताबाधिताभवतीत्यर्थः ॥ १४२ ॥ अयमेवोपदेशप्रकारःसांप्रदायिकइत्याह एवमेवेति एतान्गुरून्महामतीन् यदाशिष्याःपृच्छंतितदाएतद्वागादियोग्यंधर्मजातंसर्वमात्मनिसमारोप्यैववदंतीतियत्तदेवमेवयुक्तमित्यर्थः ॥ १४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भासमाना वाङ्मनसप्रवृत्तेरध्यासमूलकत्वादध्यासंविनाआनंदादीनामात्मरूपाणांवाचाभाषणंमनसाज्ञानंचाशक्यमित्याह आनंदेति
नंदरूपःसद्रूपश्चिद्रूपश्चयआत्मोदाहृतःसोध्यासंविनोपदेष्टुंज्ञातुंचनशक्यइत्यर्थः ॥ १४४ ॥ आत्मस्वभावस्यावक्तव्यत्वेकैमुत्यन्यायंदर्श
यति अपिसर्वेंचेतिषड्भिः किंचलोकेप्रसिद्धायेभावाःसुखादिहेतवःससाधनाःसहकारिभिःसहिताश्चपलाःप्रतिक्षणपरिणामिनःसंतितेपि
केनवर्णयितुंशक्याः ॥ १४५ ॥ उदाहरति मुक्तेति यथामुक्ताफलदुग्धचंद्रकुंदपुष्पाणांरूपेश्वेतत्वसामान्येसत्यपियोऽवांतरोरूपेविशे
षःसदुर्वचः ॥ १४६ ॥ यदेति यदाइमेभावाःसाक्षात्त्वेनेंद्रियैर्गृह्यमाणाअपिनवक्तुंशक्यास्तदातींद्रियस्यात्मनोवक्तव्यत्वंकिमुवाच्यमिति

आनंदस्फुरणात्मायंसच्चिद्रूपुरुदाहृतः ॥ अवाङ्मनसगम्यःसउपदेष्टुंनशक्यते ॥ ज्ञातुंवात्रविनाध्यासमध्या
सपरिवर्जितः ॥ १४४ ॥ अपिसर्वेंचयेभावाःसुखदुःखप्रदाभुवि ॥ ससाधनाश्चचपलाःशक्यंतेकेनभाषि
तुं ॥ १४५ ॥ मुक्ताक्षीरेंदुकुंदानांरूपेश्वेतेमहानिह ॥ भेदोत्रवर्त्ततेनासौशक्योधात्रापिभाषितुं ॥ १४६ ॥ य
दाभावाइमेसर्वेंगृह्यमाणाइवेंद्रियैः ॥ शक्यंतेनैववदितुंसाक्षात्त्वेनापिकर्हिचित् ॥ अनिंद्रियस्तदाकेनशक्य
आत्मात्रभाषितुं ॥ १४७ ॥ सुखमैंद्रियकंयत्तुतत्तुजानातिमानसं ॥ अतींद्रियंसुखंकेनागच्छेत्तच्चापिदुर्गमं
॥ १४८ ॥ अपिमानसगम्यंयत्सुखंविषयसंभवं ॥ स्वेनैवज्ञायतेतच्चनपरेणकथंचन ॥ १४९ ॥ आनंदात्मा
कथंत्वेषसर्वदागुरुभिःस्वयं ॥ ज्ञायमानोपिशिष्याणामग्रेवक्तुंहिशक्यते ॥ १५० ॥

॥ १४७ ॥ अयोग्यत्वान्मनसैवयस्यनग्रहणंतत्रवाचःकथंप्रवृत्तिरित्याह सुखमिति इंद्रियसंगजमेवसुखंमनसोयोग्यंयच्चातींद्रियंदुर्ग
मंतपःप्रभृतियत्नैरलभ्यंचतदात्मसुखंकेनहेतुनाआगच्छेत्मनोविषयमितिशेषः ॥ १४८ ॥ किंचऐंद्रियकस्यापिसुखस्यवक्तुमशक्यताप्र
सिद्धावात्मसुखस्यसाकिमुवाच्येत्याह अपिमानसेति यद्विषयसुखंमानसगम्यंप्रसिद्धंतदपिस्वयंविज्ञायतएवनपरंप्रतिवाचाबोधयितुंश
क्यतेतदाऽविषयस्यात्मनोवक्तुमशक्यतागुरुभिःकिमुवाच्येतिद्वयोरर्थः ॥ १४९ ॥ १५० ॥ ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलितमाह ततइति ततःसाक्षादवक्तव्यत्वात्परमानंदरूपआत्माधर्मानारोप्यैवतैरारोपितैर्धर्मैर्विशिष्टतयागुरुभिरुपदिश्यते कीदृशान्धर्मान्भावाभावात्मकान् तत्रभावरूपाधर्माःसत्यत्वादयःअभावरूपाअस्थूलत्वादयः ॥१५१॥ शिष्यैरिति श्रवणोत्तरंशिष्यैरप्यात्मामननध्यानाभ्यांव्यक्तेनस्वानुभवेनैवगंतव्यःप्राप्यइत्यर्थः ॥१५२॥ स्वानुभवैकवेद्यतांस्फुटयन्सर्वेषामात्मनिनिष्प्रपंचतारूपंब्रह्मधर्ममाह निष्प्रपंचइति ननुदृश्यमानेजाग्रदादिप्रपंचेकथंनिष्प्रपंचतेतिचेत्तस्यदृष्टिसृष्टिन्यायेनप्रातिभासिकस्यवास्तवनिष्प्रपंचतयाविरोधाभावादित्याशयेनाह प्रपंचमिति प्रतिदिनंसृष्टस्यसंहृतस्यचप्रपंचस्यनद्वैतापादकत्वमितिभावः ॥ १५३ ॥ तत्रदृष्टिसृष्टिविधयासृष्टिमाह

ततःपरमआनंदोभावाभावात्मकान्मुहुः॥ धर्मानध्यस्यतैर्धर्मैर्गुरुभिःसर्वदेर्यते॥ १५१ ॥ शिष्यैःस्वानुभवेनैवसगंतव्योमहात्मभिः ॥ भावाभावविनिर्मुक्तोमननाद्ध्यानतोपिच ॥ १५२॥ निष्प्रपंचःसदात्मायंसर्वेषामिहदेहिनां॥ प्रपंचंकुरुतेनित्यंसंहरत्यपिसप्रभुः॥ १५३ ॥ यदाजागरणंगच्छेत्तदैतत्कुरुतेविभुः ॥ देहात्स्थूलाद्बहिःसार्द्धंतेनदेहेनसर्वदा ॥ १५४ ॥ यदास्वप्नंतदासूक्ष्माद्देहाद्बहिरहर्निशं ॥ सूक्ष्मेणवपुषासार्द्धंकुरुतेसर्वंकृतुमान् ॥ १५५ ॥ स्वप्नजागरणावस्थंप्रपंचंसंहरत्ययं ॥ स्वप्नेजागरणेऽशेषद्वयंसुषुप्तौमहेश्वरः ॥ १५६॥ संहारज्ञानमात्मस्थंयेनजानातिनैवसः॥ आनंदात्मानमात्मस्थंयेनजानातिनैवसः॥ आनंदात्मातमोद्वैतंतत्तुरीयेविनाशयेत्॥ १५७॥

यदेतिद्वाभ्यां यदायमात्माजाग्रदवस्थामेतितदाएतज्जागरणंतथास्थूलदेहाद्बाह्यंपदार्थंस्थूलदेहसहितंकुरुतेसृजति ॥ १५४ ॥ यदास्वप्नमिति यदाचस्वप्नंगच्छतितदासूक्ष्मदेहाद्बाह्यपदार्थजातंसूक्ष्मदेहसहितंसृजति॥ १५५ ॥ यदाचयन्नपश्यतितदातत्संहरतीत्याह स्वप्नेति स्वप्नप्रपंचंजागरणेसंहरतिजागरणप्रपंचंस्वप्नेसंहरतिअशेषंचद्वयंस्वप्नंजागरणंचसुषुप्तौसंहरतीत्यर्थः ॥ १५६ ॥ सुषुप्तौशिष्टमज्ञानमपिसमाधौसंहरतीत्याह संहारेति आनंदरूपआत्माकर्त्तातत्तमोरूपंद्वैतंतुरीयेस्वरूपेविनाशयति तत्किं येनतमोरूपेणद्वैतेनमोहितःसंहारस्यज्ञानंसाक्षिरूपमात्मनिवर्तमानमपिनजानातियेनचस्वरूपभूतमानंदमपिनजानातीत्यर्थः ॥ १५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्कारणशरीरभूताज्ञानस्यतुरीयेविलापनंगुरुप्रसादमंतरानभवतीत्याह गुरुप्रसादतइति अज्ञानस्यहरणेतुरीयेविलापनरूपेगुरुप्रसादत
एवप्रभवेत्शक्तोभवेत् नतंविनाईश्वरोपिशक्तइत्यर्थः ॥ १५८ ॥ ईश्वरस्याप्यत्रगुरुप्रसादापेक्षतांस्फुटयति ईश्वरस्यापीति ईश्वरस्यहिर
ण्यगर्भस्याप्यात्मज्ञानंतुस्वतंत्रंनाभवत्किंतुस्मृताद्वेदरूपाद्गुरोरेवाभवत् ततस्तस्यज्ञानस्यकारणंगुरुरेवेतिसिद्धमित्यर्थः ॥ १५९ ॥ इदा

नीमस्यपुंसःस्मृतवेदरूपाद्गुरोर्ज्ञानाभावेप्रयोजकश्चित्तशुद्ध्यभावंएवनत्वीश्वरत्वाभावोजाग्रदादौसृष्ट्यादिकर्तृतारूपस्येश्वरलक्षणस्यात्रा
पिवर्णितत्वादित्याशयेनाह ईश्वरस्येति सोपिइदानींतनोपियदिहिरण्यगर्भवद्विशुद्धमतिस्तदास्यापितथाज्ञानंस्यादेवेत्यर्थः ॥ १६० ॥

गुरुप्रसादतोऽज्ञानहरणेप्रभवेत्पुमान् ॥ नान्यथापरमेशोपिसर्वशक्तियुतोहियः ॥ १५८ ॥ ईश्वरस्यापिहिज्ञा
नंवेदरूपाद्गुरोरभूत् ॥ नस्वतंत्रंततस्तस्यकारणंगुरुरीरितः ॥ १५९ ॥ ईश्वरस्ययथाज्ञानमन्यस्यापितथाभ
वेत् ॥ यदीश्वरसमःसोपिविशुद्धधिषणःपुमान् ॥ १६० ॥ अज्ञानहरणंहित्वास्वतंत्रोयंसदापुमान् ॥ सृष्टा
वपिचसंहारेजगतोस्यपरेश्वरः ॥ १६१ ॥ स्वतंत्रईश्वरःसृष्टावपरोनकथंचन ॥ इतियत्तन्मृषानैवयतआ
त्मासदेहिनां ॥ १६२ ॥ एकएवपुमानीशःसजीवश्चापिकीर्त्यते ॥ उपाधेस्तुविशेषेणरामकृष्णौयथापृथक्
॥ १६३ ॥

अस्येश्वरत्वमेवस्फुटयति अज्ञानेति अज्ञानहरणंगुरुपरतंत्रमुक्त्वाअस्यजगतःसृष्टिसंहारयोःस्वतंत्रत्वादयंप्रसिद्धःपुमान्परमेश्वरएवेत्यर्थः
॥१६१॥ यच्चवेदांतेष्वीश्वरस्यैवसृष्ट्यादिकंकर्मेतिप्रसिद्धिःसईश्वरादतिरिक्तआत्मैवनास्तीत्यभिप्रायेण तथाचांतर्यामिब्राह्मणश्रुतिः ना
न्योतोस्तिद्रष्टाइत्यादिरित्याह स्वतंत्रइति ईश्वरएवसृष्ट्यादौस्वतंत्रइतियदुच्यतेवेदांतेषुतत्सत्यमेवयतःसईश्वरएवसर्वेषांनआत्माइत्यर्थः ॥१४॥
॥ १६२ ॥ एकात्मतामेवस्फुटीकरोति एकएवेत्यादिना पुमान्संघातानांपालकएकोदेवउपाधेःसमष्टिव्यष्टिरूपस्यविशेषेणभेदेनईशइ
तिजीवइतिचव्यपदिश्यतेयथारावणारितांकंसारितांचापेक्ष्यरामावतारःकृष्णावतारश्चपृथक्व्यपदिश्यतेतद्वदित्यर्थः ॥ १६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मभेदेनभेदाशंकांपरिहरति ईशानीशेति एकस्मिन्नीश्वरएवईशइतिअनीशइतिव्यवहारः यथारावणंहंतुंसमर्थत्वाद्दाशरथिःश्रीरामचंद्र ईशइत्युच्यते जलशायीसमुद्रेशेषभोगशायीभगवान्रावणहननेऽसमर्थःअनीशइत्युक्तइत्यर्थः ॥ १६४ ॥ यथादाशरथिकृत्यमकुर्वाणो पिजलशायीस्वकीयविचित्रकार्यापेक्षयाईश्वरएवतथाव्यष्टिष्वपिबोध्यमितिसूचयन्सर्वेषांविचित्रकार्यकारितामाह अलौकिकानीति अलौकिकानिआश्चर्यकराणि यतःपरस्परापेक्षयाचित्राविलक्षणाशक्तिर्यस्यतथाभूतोलोकः ॥१६५॥ चित्रशक्तितामभिनयति वक्ता

ईशानीशविभागोयमेकस्मिन्नीश्वरेसदा॥ यथादाशरथौतद्वद्देवेचजलशायिनि॥ १६४॥ अलौकिकानि कर्माणिसर्वेषामपिसंतिहि ॥ एकैकापेक्षयायस्माच्चित्रशक्तिरयंजनः ॥ १६५ ॥ वक्तारोमानवास्तद्वत्ख गाआकाशगामिनः ॥पातालतलगाःसर्पावृक्षानिश्चलजीविनः ॥ १६६ ॥ अंतर्धानादिशक्तीनामाश्रया अमरादयः ॥ एवमन्येपिसंत्यत्रजीवानानाविधाअपि॥ १६७॥ जातिगोत्रकुलादीनांभेदैर्भिन्नाःसहस्र शः॥ नानाशक्तियुताश्चान्यैरशक्यालंक्रियाःसदा॥ १६८॥ मानवेषुयथाकेचित्शूराःकेचिन्नराधिपाः ॥ मं त्रिणःकेचिदपरेब्राह्मणावेदपारगाः ॥ १६९ ॥ शास्त्राणामपिकर्त्तारोवक्तारश्चापरेपिच ॥ अनुष्ठानरताः केचिदुपविद्यारताःपरे ॥ १७० ॥ कामक्रोधादिमंतश्चकेचित्शांत्यादिसंयुताः ॥ केचिदेवंविचित्रेयंसर्व शक्तिरलौकिकी ॥ १७१ ॥

रइति वक्तृत्वशक्तिर्मनुष्येष्वेव आकाशगमनशक्तिःपक्षिष्वेव स्वल्पेपिभूविवरेप्रवेशशक्तिःसर्पेषु निश्चलतयास्थितिशक्तिर्वृक्षेष्वेव एवमये पि ॥ १६६ ॥ अंतर्धानादीति स्पष्टम् ॥ १६७॥ जातीति जात्याद्यवच्छेदेननानाशक्तियुताअपिजीवाःसंतीतिपूर्वेणसंबंधः कीदृशास्ते जीवाः अन्यैरशक्यालंक्रियाःकर्त्तुमशक्याअलंक्रियावारणंअहमेवतत्कार्यंकरिष्यामिकिंतैरित्याकारंयेषांतेतथा ॥ १६८ ॥ सन्निहिते पुमानवेष्वेवविचित्रशक्तितांदर्शयति मानवेष्विति उपविद्यागांधर्वनाट्यादयः स्फुटमन्यद्द्वयोः ॥ १६९ ॥१७०॥ कामेति उत्तरार्द्धेकेचि दितिपूर्वान्वियि सर्वस्यपरमेश्वरस्यशक्तिस्तत्तदुपाधिष्वित्थंविचित्रेत्यर्थः ॥ १७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वपुष्यपीति सैवैश्वरीशक्तिर्ऋषीणांवरादिशक्तानांदेहेष्वपितिष्ठतितथास्त्रीप्रभृतिशरीरेषुशरीरघटकेंद्रियच्छिद्रेषुचेत्यर्थः ॥ १७२ ॥ इंद्रियादिनिष्ठतांस्फुटयति घ्राणेति नासिकादिपायुपर्यंतेषुच्छिद्रेषुवहिर्वाह्यतःसाम्येनोपलभ्यमानेष्वस्यंतर्विशेषाधायकंकिंचित्यद्वशात्तद्गतं नासिकादिस्थितंकर्मगंधग्रहणादिरूपंपरस्परविलक्षणंदृश्यतेइत्यर्थः ॥ १७३ ॥ फलितमाह अचिंत्येति तेनवैचित्र्यदर्शनेनेदंसिद्धंसर्वे भावाअचिंत्यशक्तित्वाद्दुर्भणाअनिर्वचनीयप्रभावाविचित्रशक्तिमताईश्वरेणैकेनाधिष्ठिताश्चेत्यर्थः ॥ १७४ ॥ तस्मादेकस्यैवोपाधि

वपुष्यपिऋषीणांयावर्ततेकाचिदैश्वरी॥ स्त्रीपुंसादिशरीरेषुचेंद्रियादिसमाश्रया ॥१७२॥ घ्राणकर्णमुखोपस्थपायुच्छिद्रेषुकोवहिः ॥ भेदोत्रविद्यतेयेनविषमंकर्मतद्गतं ॥ १७३ ॥ अचिंत्यशक्तयःसर्वेभावास्तेनात्रदुर्भणाः॥ एकेनैवात्मनानेनसर्वदासमधिष्ठिताः॥ १७४॥ ईशोजीवःपुमान्विप्रःपंडितोमूर्खएवच॥ स्त्रीगौस्तरुस्तथापक्षीचतुष्पाच्चद्विपादपि॥ १७५॥ पादहीनस्त्रिपात्तद्वद्बहुपादप्यनंतपात् ॥ इत्यादिनामवान्योयमानंदात्मामहेश्वरः ॥ १७६॥ पुमान्स्त्रीकुंजरोवाजीतरुःसर्पोवृषादयः ॥ एतानिदेहनामानिपुंसोनैवात्रकिंचन ॥ १७७॥ आनंदात्मास्वयंज्योतिःसर्वभेदविवर्जितः ॥ सत्यज्ञानादिगुणकोनिर्गुणोपिनिरंजनः ॥ १७८॥ अनादिमाययाकृत्वाकार्यंनानाविधंत्विदं॥ तत्रस्थितोविभात्येषईशानीशादिभेदवान् ॥१७९॥ महाकाशोगृहाकाशोघटाकाशःपरोपिच॥ एकएवयथाकाशोभवेत्तत्तद्विभेदवान् ॥ १८० ॥

मात्रभेदेनेशादीनिनामानीत्याह ईशइति त्रयःपादायस्यसत्रिपात् ॥१७५॥१७६॥ विचारकालेत्वेतानिनामान्युपाधीनामेवपर्यवस्यंतीत्याह पुमानिति वृषादयःशब्दाइतिशेषः देहस्योपाधेरेवनसाक्षिरूपस्यपुंसः ॥१७७॥ स्वतस्तुपुरुषस्यसर्वोपाधिषुनिर्विशेषत्वमेवेत्याह आनंदात्मेति कल्पितभेदेनसत्यज्ञानादयोगुणायस्यवस्तुतस्तुनिरंजनोनिरुपाधिश्च ॥ १७८ ॥ वस्तुतोनिरंजनत्वंस्फुटयितुंतस्यैवोपाधीनांस्रष्टृत्वमाह अनादीति ॥ १७९॥ औपाधिकभेदेदृष्टांतमाह महाकाशइति यथाएकएवाकाशोमहाकाशगृहाकाशघटाकाशकरकाकाशादिसंज्ञस्तत्तदुपाधिभेदमादायभवेत्तथात्मापीत्यर्थः ॥ १८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपाधीनांकल्पितत्वबोधनायदृष्टांतांतरमाह गंधर्वेति अयथामिथ्याभूतंभेदं ॥१८१॥ दार्ष्टांतिकेयोजयति आनंदात्मनीति तद्देहादिरूपंद्वैतंतस्यस्वोपहितस्यात्मनोनानाविधंभेदंकुर्यादिति ॥ १८२ ॥ एवंसत्युपाधिभेदेनकर्मव्यवस्थोपपन्नेत्याह घटाकाशइति गृहाकाशस्यक्रियांकुसूलादिधारणरूपांयथाघटाकाशोनकरोतितथेश्वरस्यसमष्ट्युपाधेःकर्मजीवोनकरोति ॥ १८३ ॥ यथाचानयोर्घटाकाशगृहाकाशयोर्भेदउपाधिभ्यांघटगृहाभ्यामेवतथाकार्यकारणरूपोपाधिभ्यामेवजीवेशयोरित्याह अनयोरिति ॥ १८४ ॥ यथाचोपहि

गंधर्वनगरंयद्वन्माययापरिकल्पितं॥नभसोस्यायथाभेदंकुर्यान्नानाविधंबहु॥ १८१ ॥ आनंदात्मनितद्वैतमेवमत्रप्रकल्पितं॥भेदंनानाविधंतस्यकुरुतेसर्वदैवहि ॥ १८२॥ घटाकाशोयथानैवगृहाकाशक्रियांक्चित्॥कुरुतेत्रतथाजीवईशकर्मकरोतिन॥ १८३॥ अनयोर्हियथाभेदोगृहेनचघटेनच॥कारणेनचकार्येणतयोर्भेदस्तथैवहि॥ १८४॥नाममात्रंयथाभेदोनभसोस्तद्वदेवहि ॥जीवेशयोरयंभेदोनाममात्रान्नवस्तुतः॥ १८५॥ततःसर्वशरीरेषुपरमात्मात्रसंस्थितः॥ भेदगंधविनिर्मुक्तईश्वरोयंपरःपुमान्॥ १८६ ॥ ईश्वरत्वाच्चसर्वेपिधीमंतोत्रशरीरिणः॥सृष्टिंचसंहृतिंतद्वत्कुर्वतेहर्निशंसदा॥ १८७ ॥ जगतस्तंतमेवैतमुपाधिंसमुपाश्रिताः॥स्वस्यस्वस्यचदृश्यस्यदर्शनादप्यदर्शनात्॥ १८८॥

तेआकाशेभेदोनाममात्रंविकल्पमात्रंवस्तुतोऽभावात्तथाजीवेशानुगतेआत्मनीत्याह नाममात्रमिति नभसोर्घटाकाशगृहाकाशयोः ॥१८५॥ फलितमाह ततइति स्पष्टम् ॥ १८६ ॥ एवंसर्वेषामीश्वरत्वेसतिईश्वरत्वमादायसर्वेशरीरिणःसदाजगतःस्वकीयस्वकीयदृश्यरूपस्यदर्शनादर्शनाभ्यांसृष्टिसंहृतिचकुर्वतेकुर्वंतितंतंमानुषादिशरीररूपमुपाधिमाश्रिताअपीत्याह ईश्वरत्वाच्चेतिद्वाभ्यां व्याख्यातंद्वयं ॥ १८७॥ १८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुशारीरकचतुर्थाध्यायेचतुर्थपादेअहंग्रहेणसगुणोपासकानांजगद्व्यापारंसृष्ट्यादिकंवर्जयित्वापरमेश्वरैश्वर्यलाभोभवतीतिजगद्व्यापार
वर्जमितिसूत्रेणोक्तंतत्सर्वेषांसृष्ट्यादिहेतुतांगीकारेविरुद्धेतेत्याशंक्यतत्सूत्रमुपासनात्मकयोगस्यफलपरिच्छेदपरंनतुतत्तदुपाधिप्रविष्टेश्वर
स्यस्वाभाविकसृष्ट्यादिशक्तिपरिच्छेदपरमित्याह जगद्व्यापारेति मुनिर्बादरायणोयज्जगद्व्यापारवर्जमित्यभ्यधादुक्तवांस्तदभिधानंयोगि
नांयोगजवुद्धिप्रयुक्तायांसृष्टावेवनियमनपरंपरत्रईश्वरत्वप्रयुक्तायांसृष्टौतुननियामकमित्यर्थः ॥ १८९ ॥ एतदेवस्फुटयति योगर्द्धि
मिति योगस्यर्द्धिफलसंपत्तिप्राप्तायदातेस्युस्तदातेषांयोगर्द्धेरियत्तापरिच्छेदरूपाइहसूत्रेकथितेत्यर्थः ॥ १९० ॥ वामदेववत्शास्त्रज
न्यदृष्ट्याब्रह्मात्मतावगाहिन्यासहितास्तुयोगिनोपीश्वरवत्सर्वकर्त्तारोभवंतीत्याह सर्वेति सर्वेषूपाधिषुसाधारणएकरूपेणावस्थितःपुमा

जगद्व्यापारवर्जंयद्भगवान्मुनिरभ्यधात् ॥ योगिनांबुद्धिपूर्वायांसृष्टौतन्नपरत्रहि ॥ १८९ ॥ योगर्द्धिसमनु
प्राप्तायोगिनःस्युर्यदातदा ॥ इयत्ताकथितातस्यायोगर्द्धेर्योगिनामिह ॥ १९० ॥ सर्वसाधारणोयद्वत्प्रपंच
करणेस्थितः ॥ पुमान्करोतितद्वत्तुयोगिनोपिप्रकुर्वते ॥ ब्रह्मज्ञानप्रसादेनकार्योपाध्याश्रिताअपि ॥ १९१ ॥

नीश्वरःप्रपंचस्यकरणेसृष्टौस्थितःप्रवृत्तोयद्वत्करोतिविशेषरूपेणसामान्यरूपेणचसृष्ट्यादिकंनिर्मिमीतेतद्वदीश्वरवत्ब्रह्मज्ञानप्रभावेणयो
गिनोपिप्रपंचंसामान्यविशेषरूपंप्रकुर्वतेकुर्वंत्येव कीदृशायोगिनः कार्योपाधौजीवतानियामकेस्थिताअपीत्यर्थः अयंभावः कर्मोपास
नफलानामादौपरमेश्वरेणनियतत्वात्तत्रकर्तृत्वाद्यभिमानिनोयावत्तावद्व्यवस्थितमेवकार्यंयोगिप्रभृतयःकुर्वंति यदातुब्रह्मविद्ययापरि
च्छेदाभिमानंत्यजंतितदाभेदवाधाद्यावदीश्वरकर्मतद्विदुषांभवति ईश्वरस्तुव्यष्टिशरीरेस्थित्वापिसमष्ट्युपाधेःकार्यंकर्त्तुंशक्तः यथाविश्वा
मित्रशरीरेवस्थायत्रिशंकुहितायस्वर्गांतरंनिर्ममेइतिप्रसिद्धंरामायणादौतथाविचित्रापैरैर्दुष्कराचजायत्प्रपंचादिसृष्टिरपीश्वरस्यैवकर्मेति ॥ १६ ॥
नकेनचिद्वारयितुंशक्यमिति ॥ १९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाजगद्व्यापारवर्जमितिसूत्रस्यसमष्ट्युपाधिकस्याधिक्यवर्णनपरत्वंनतुव्यष्ट्युपाधीनामनीश्वरताबोधकत्वंवाक्यभेदप्रसंगादित्याह तथापीति तथापिब्रह्मविद्याबलेनयोगिनांपरमेश्वराभेदेपितेभ्यईश्वरोऽधिकःसदासर्वकर्तृत्वात् एतेतुनतथाविद्यातःपूर्वमेतेषुसर्वकर्तृताप्रादुर्भावाभावात् इत्याशयेनैववैषम्यस्यपरमेश्वराधिक्यस्यकारणंतत्रजगद्व्यापारेत्यादिसूत्रेभगवताव्यासेनोक्तं एतज्जीवानांयोगिप्रभृतीनांप्रातिस्विकमीश्वरत्वंतुनवारितंननिषिद्धंवाक्यभेदापत्तेरितिभावः ॥ १९२ ॥ तत्रसृष्ट्यादिकंस्वल्पंबहुवादृश्यमानंस्वकर्तारमीश्वरमनुमापयतीत्याह सृष्टीति शरीरिणांयत्सृष्ट्यादिकरणंस्वस्यस्वस्यप्रत्येकंदृश्यमानंतत्सर्वेणपरमेश्वरेणसाधारणंसमानं नकेवलंजीवानामेवकिंत्वीश्वरस्यापीतियावत् यथाप्रजापालनरूपश्चक्रवर्तिनोव्यापारोयादृशस्तद्वत्तादृशएवसामंतानांतदधीनभूपानांभवतितदनुसारीचग्रामाध्य

तथापीशोधिकस्तेभ्योयतस्तेनिखिलंजगत् ॥ नकुर्वंतिकरोतीशइतिवैषम्यकारणं ॥ उक्तंभगवतातत्रनचैतद्विनिवारितम् ॥ १९२ ॥ सृष्टिसंहारकरणंस्वस्यस्वस्यशरीरिणां ॥ सर्वसाधारणंयद्वद्व्यापारश्चक्रवर्त्तिनः ॥ १९३ ॥ सामंतानांचतद्वत्स्यान्मंडलंमंडलंप्रति ॥ तथैवाधिकृतानांस्यात्प्रत्येकंनगरादिषु ॥ १९४ ॥ एवमीशस्यकार्यंस्यादधिदैवंपुमानिह ॥ हिरण्यगर्भोभगवानंतर्बहिरवस्थितः ॥ अस्यकार्यंविराडस्यकार्यंस्थावरजंगमं ॥ १९५ ॥ अज्ञानाद्भेदमापन्नायईशादात्मनस्त्विमे ॥ तेषांकार्यमिदंनित्यमवस्थात्रयमीरितं ॥ १९६ ॥

क्षादीनांसव्यापारोभवतितथेतिद्वयोरर्थः तथाचयथासामंतादीनांप्रभुत्वेषुचक्रवर्तिनःप्रभुत्वमनुगतंतथाजीवकर्तृत्वेषुपारमेश्वरंकर्तृत्वमितिभावः ॥ १९३ ॥ १९४ ॥ अत्रसचक्रवर्त्तीदृष्टांतोयोयोगबलेनस्वयमेवसामंतादिभावमापन्नइतिदर्शयन्नीश्वरस्यसाक्षात्परंपराभ्यांसर्वत्रकारणतामाह एवमिति यथायंदृष्टांतएवमीशस्यचक्रवर्तिस्थानीयस्यसाक्षात्कार्यमधिदैवंसमष्टिभावेवर्त्तमानःपुमान्हिरण्यगर्भाख्यःसामंतस्थानीयः अस्यहिरण्यगर्भभावापन्नस्यईशस्यकार्यविराट्स्थूलसमष्टिरूपः अस्यविराड्भावापन्नस्यचतस्यकार्यंस्थावरादयोव्यष्टिदेहाइत्यर्थः ॥ १९५ ॥ अज्ञानादिति येचइमेकार्योपाधयःस्वरूपभूतादपीशादज्ञानवशेनभेदंप्राप्तास्तेषामिदंजाग्रदाद्यवस्थात्रयंकार्यमित्यर्थः ॥ १९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अत्रदृष्टिसृष्टिंस्फुटयति योयामिति यःप्रमातायामवस्थांपश्यतिसएवतामवस्थांस्वसंबंधिनींसृजतिदृष्टिरूपांसृष्टिंनयति यांचावस्थांन
पश्यतितांसंहरतिस्वस्मिन्विलापयतीत्यर्थः ॥ १९७॥ एतद्दृष्टिसृष्टिप्रक्रियारूपंमोक्षद्वारंवेदांतेषुरहस्यतयास्थापितमितिदर्शयन्भूतादि
कारणतादृष्टिमंदधियामनुग्रहायेत्याह यद्यपीति ततोदृष्टिसृष्टेःश्रुत्यानुभवसिद्धत्वात्यद्यपिस्थूलदेहःशुक्रादिसंभवःसूक्ष्मदेहईशात्का
 रणोपाधेःप्रसूतइतिप्रसिद्धंलोकेशास्त्रेचतथाप्यसौदेहोदृष्ट्यभावभावाभ्यांमृतोजातश्चभवतीतिमंतव्यं कथंतथानलक्ष्यतेइत्यतआह स
मइत्यादि यतःपूर्वसृष्टेनसमःसमानाकारस्ततःस्वयंकल्पकेनपुंसानदृष्टोनलक्षितइत्यर्थः ॥ १९८ ॥ एतदेवविशदयति आत्मनइति आ

योयांपश्यतितांस्वस्यसकरोतिनचापरः ॥ अपश्यंश्चात्मनस्त्वेतांसंहरत्येवसर्वथा ॥ १९७॥ यद्यपिस्यात्त
तःस्थूलोदेहःशुक्रादिसंभवः ॥ सूक्ष्मईशात्प्रसूतश्चस्वस्यवापिपरस्यवा ॥ तथाप्यसौमृतोजातःसमोदृष्टो
नचस्वयं ॥ १९८ ॥ आत्मनोजन्ममरणेयोगायोगौप्रकीर्तितौ ॥ देहस्यतौचकथितौदर्शनादर्शनेसदा
॥१९९॥ ततोयद्वत्रयःपश्येत्तत्तदाकुरुतेहिसः ॥ नपश्येद्यद्यदावस्तुसतदासंहरेद्धितत्॥ २००॥ एवंसर्वइ
मेजीवाअवस्थात्रयगामिनः ॥ देहेंद्रियात्मविषयान्संहरंतिसृजंतिच ॥ २०१ ॥ यदाऽज्ञानमिदंनाशंव्रजे
दात्मावबोधनात्॥ अवस्थात्रयनिर्मुक्तंतदागच्छेत्परंपुमान्॥ २०२॥

त्मनोवस्तुतोजस्यामरस्यचदेहेनसहयोगस्तादात्म्याध्यासरूपोभिमानःसएवजन्म अयोगस्तस्याभिमानस्यक्षयस्तुमरणं देहादीनांदृश्या
नांतुदर्शनादर्शनेएवजन्ममरणेइत्यर्थः १९९॥ फलितमाह ततइति यःप्रमाताअत्रसंसारदशायांयद्विषयजातंपश्यतितदादर्शनकालए
वतत्सृजतिअन्यथातुसंहरतीत्यर्थः ॥ २००॥ एवमिति एवंवर्णितदृष्टिसृष्टिविधयासर्वेजीवाअवस्थात्रयेसृष्टिसंहारौकुर्वंतोप्यात्मान
मीश्वरतयानजानंत्यतोजीवाइत्युच्यंतेइतिभावः ॥ २०१॥ यदेति यदातुगुरुप्रसादलभ्येनात्मबोधेनेदमवस्थात्रयप्रयोजकमज्ञानंनश्य
तितदातुरीयरूपंपरंपदंगच्छतीत्यर्थः ॥ २०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतुरीयप्रणववेद्यआत्मायथोपदेष्टव्यआचार्येणयथाचप्रतिपत्तव्यःशिष्येणतंप्रकारंस्फुटीकर्तुंप्रवृत्तस्याष्टमखंडस्यार्थंवर्णयति एवंसामान्यतइत्यादिश्लोकशतत्रयेण इत्थंब्रह्मणोमुखात्सामान्यतःप्रणवादविविक्ततयाआत्मानमुपायैःशमादिभिःसहितं अथवाउपायशब्दोभावप्रधानः तथाचनिर्विशेषलाभस्योपायभूतंवर्णितमात्मानंश्रुत्वाऽथतंकेवलोपेयरूपंप्रष्टुंपुनर्ब्रह्माणंप्रतीदमूचुरित्यर्थः ॥ २०३ ॥ ओंकारइति भवताप्रणवरूपआत्माउपायत्वेनसहितउक्तोऽथतमात्मानंकेवलमुपेयरूपंवर्णयेत्यर्थः ॥ २०४ ॥ एवमुक्तइति वागाद्यतीतमपितमात्मानमारोपितधर्मैर्वाक्प्रवृत्तियोग्यंकृत्वातंप्राहेतिशेषः ॥२०५॥ प्रजापतिरुवाच देवाइति हेदेवाःश्रृणुतअहमवाङ्मनसगो

एवंसामान्यतःश्रुत्वाब्रह्मणोवक्त्रतःसदा ॥ उपायसहितंभूयउपेयंप्रष्टुमुद्यताः ॥ ऊचुर्ब्रह्माणमागत्यपूर्ववद्विनयान्विताः ॥ २०३ ॥ ओंकारोभवतायोयमात्मोपायसमन्वितः ॥ कथितस्तमुपेयंत्वमात्मानंसम्यगीरय ॥ २०४ ॥ एवमुक्तस्तदाप्राहब्रह्मालोकपितामहः ॥ अवाङ्मनसगम्यंतंधर्मानारोप्यभूरिशः ॥ २०५ ॥ देवाःश्रृणुतचात्मानमवाङ्मनसगोचरं ॥ नानाविधैरहंधर्मैर्वक्ष्येबोध्योयतोधुना ॥ २०६ ॥ सच्चिदानंदरूपोयआत्मापूर्वंमयेरितः ॥ नृसिंहस्तत्पदार्थोयंत्वंपदार्थैक्यमागतः ॥ २०७ ॥ सामीप्येनचसर्वेषामानंदात्मास्वरूपतः ॥ सर्वासामपिबुद्धीनांद्रष्टाबुद्धिविवर्जितः ॥ २०८ ॥

चरमप्यात्मानंनानाविधैरारोपितैर्धर्मैर्वक्ष्येवाग्व्यापारगोचरंकरिष्यामियतआत्माअधुनाभवतांचित्तशुद्ध्यनंतरंबोध्यःअवश्यंज्ञापनीयोभवति ॥ २०६ ॥ तत्रादौशुद्धत्वाविष्करणायतस्योपद्रष्टृतांस्फुटयति सच्चिदानंदेति योनृसिंहाख्यआत्मासच्चिदानंदलक्षणोमहावाक्यगततत्पदार्थतयोक्तःसत्वंपदार्थेनऐक्यंप्राप्तःसन्सर्वेषांप्रमातॄणांसामीप्येननिरतिशयसांनिध्येनसर्वप्रकाराणांबुद्धीनांद्रष्टाभवतियतोबुद्ध्याविषयभूतयावर्जितोसंस्पृष्टइति तस्यत्वंपदार्थैक्येहेतुरानंदात्मास्वरूपतइति यतस्त्वंपदार्थोपिस्वरूपेणानंदरूपोभवतिततइतिद्वयोरर्थः ॥ २०७ ॥ २०८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतश्चउपद्रष्टैवनकर्त्तातितोऽनुमंतेत्याह यदात्रेति अत्रसंघातेपुंसोजनस्यमनोयदाशुभमशुभंवाकुरुतेतदासआत्माअनुमनुतेवारणाभावरूपामनुमतिकरोतियतःपंगुवत्शक्त्यासामर्थ्येनरहितत्वान्मध्यस्थउदासीनोभवतीत्यर्थः ॥ २०९ ॥ अनुमतिकर्तृत्वेनतस्यविकारप्रसक्त्यभावेहेतूंश्चिद्रूपत्वादीनाह चैतन्येति उपलब्धासाक्षी ॥ २१० ॥ अस्याद्वयतामाह एकेति अयमात्मासदादिलक्षणएकरूपोयतोस्मिन्द्वैतंनदृश्यते एतत्कुतः यतस्तस्यद्वैतस्यसिद्धिःसत्ताअस्मादात्मनोभेदेननास्तियतःसर्वंद्वैतंतत्रात्मनिमायाकल्पितमित्यर्थः॥२११॥ अथसर्वानर्थहेतोर्विवेकभीरोश्चमायायाःस्वरूपंवर्णयति प्रमाणैरित्यादिना यास्वयंप्रमाणैर्नदृश्यतेयस्याःकार्यंत्वक्षादिगोचरतांगच्छ

यदात्रकुरुतेकिंचिन्मनःपुंसःशुभाशुभं॥ तदानुमनुतेसोपिमध्यस्थःशक्तिवर्जितः ॥ २०९ ॥ चैतन्यरूपःसततंविक्रियालेशवर्जितः॥ उपलब्धेवबुद्धीनांसुखदुःखविवर्जितः॥ २१० ॥ एकरूपोहिसर्वत्रसच्चिदानंदरूपवान्॥ अस्मिन्नदृश्यतेद्वैतंतस्यसिद्धिर्नकर्हिचित्॥ अस्माद्भेदेनसर्वंयन्माययातत्रकल्पितं ॥ २११ ॥ प्रमाणैर्यानसिद्धास्याद्यातिचाक्षादिगोचरं॥ यस्याःकार्यंचसामायादुर्घटोक्तामनीषिभिः ॥ २१२ ॥ स्वयंयानसतीतस्याःकार्यंनामकथंहिसत् ॥ ततोद्वैतमिवैतस्यान्मायाकार्यमिहात्मनि ॥ २१३ ॥ गंधर्वनगरंयद्वद्व्योतन्नैवविचारतः॥ गगनेस्तितथाद्वैतमात्मन्यत्राविचारतः ॥ २१४॥ यएषसर्वजंतूनामवस्थात्रयगःपुमान्॥ सएवात्मापरःप्रोक्तःसच्चिदानंदरूपवान् ॥ २१५॥ यथाप्राज्ञःसुषुप्तिस्थोदुःखंवेत्तिनकिंचन ॥ आत्मातथासदैवायंवेत्तिदुःखंनकिंचन॥ २१६ ॥

तिसादुर्घटामायेत्युक्तेत्यर्थः ॥ २१२ ॥ दुर्घटत्वेहेतुमाह स्वयमिति यामायासतीसत्त्वेनप्रतीतानभवतितस्याःकार्यंसत्सद्रूपेणभासमानंकथंस्यात् परंतुतथाभासतएव ततउपपत्त्यसहत्वादात्मनिदृश्यमानंद्वैतमिवमिथ्यैवद्वैतंनवास्तवमित्यर्थः ॥ २१३ ॥ द्वैतस्यमायामयत्वेहेतुमविचारसिद्धत्वमाह गंधर्वेति यथाविचारंविनैवगगनेगंधर्वनगरंतथात्मनिद्वैतमिति ॥ २१४ ॥ तस्मादात्मनोब्रह्मत्वेनकाचिदनुपपत्तिरित्याह यएषइति यएषसन्निहितःसर्वेषामात्मासपरआत्मैवप्रोक्तःसदादिरूपत्वादित्यर्थः ॥ २१५ ॥ आत्मनःसर्वदुःखराहित्यंसौषुप्तात्मवत्सर्वदाबोध्यमित्याह यथाप्राज्ञइति यथासौषुप्तआत्मादुःखरहितस्तथासर्वदादुःखरहितइत्यर्थः ॥ २१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंतर्हिदुःखोपलब्धिरितिचेदविद्ययैवेत्याह आनंदात्मेति आनंदात्मातत्पदार्थस्तेनसहवस्तुतऐक्यान्निर्दुःखस्यात्मनोदुःखभानेहेतुरविद्यैवेत्यर्थः ॥ २१७ ॥ तत्राविद्यापदस्यनिरुक्तिमाह अहंब्रह्मेति अहंब्रह्मेतिविज्ञानरूपयाविद्ययाविरुद्धत्वमविद्यात्वमित्यर्थः ॥ २१८॥ विरुद्धत्वमभिनयति अनादिरिति अहमत्रसंघातएवास्मिनसर्वत्रेत्याकारेणसर्वेषांदेहिनामनुभवसिद्धाआदिशून्यासदसद्भ्यांरूपाभ्याम निर्वाच्यत्वाद्दुर्घटाअसंसारिण्यपिसंसारकारणभूताचेत्यर्थः ॥ २१९ ॥ अस्याःकारणशरीरभूतायाआत्मनासहतादात्म्याध्यासंश्रुतावात्मैवद्रष्टेत्युक्तंहेतूकृत्यास्वतंत्रत्वमाह आत्मनइति साअविद्याजडत्वादिनाआत्मनोभिन्नापिभिन्नत्वेननगृह्यते तथासतिअस्वतंत्रापरा

आनंदात्मस्वरूपस्यनिर्दुःखस्यमहात्मनः ॥ अविद्ययैवदुःखंतज्जायतेनतुवस्तुतः ॥ २१७॥ अहंब्रह्मेतिविज्ञानंविद्याप्रोक्तामनीषिभिः ॥ विरुद्धायानयासेयमविद्यादुःखकारिणी ॥ २१८॥ अनादिरहमत्रास्मीत्येवं भातिशरीरिणां ॥ दुर्घटासदसद्रूपाप्रपंचस्यास्यकारणं ॥ २१९॥ आत्मनोपिचभिन्नासानभिन्नागृह्यतेतथा ॥ अस्वतंत्रास्वतंत्राचस्वात्मनोदुःखदायतः ॥ २२० ॥ अनयात्माविभात्येषभेदवानिवनिर्द्वयः ॥ आनंदात्मास्वयंज्योतिर्निर्गुणःपरमेश्वरः ॥ २२१ ॥ आत्मानंसर्वदाजानन्ममाययापरिमोहितः ॥ अजानन्निवदेवेशश्चित्प्रकाशवपुःसदा ॥ २२२ ॥ स्वप्नेजागरणेनित्यंविपरीतावलोकनात् ॥ नजानात्येनमात्मानंसुप्तावज्ञानतस्तथा ॥ २२३ ॥ सुषुप्तेप्यज्ञतायेयंसासत्येवात्मरूपिणि ॥ चैतन्येविषयाभावान्नतुचैतन्यनाशनात् ॥ २२४ ॥

धीनेत्यर्थः शत्रुवद्दुःखदत्वाच्चस्वतंत्रेत्युक्तेत्याह स्वतंत्रेति ॥ २२० ॥ अस्यादुःखदत्वंचभेदभानप्रयोजकत्वादित्याह अनयेति ॥२२१॥ दुःखदत्वेस्वरूपाच्छादनमपिद्वारमस्याइत्याह आत्मानमिति आत्मानमानंदादिरूपंप्रेमाद्यन्यथानुपपत्त्यासर्वोलोकोजानात्येवेतिविज्ञायतेतथाप्ययंदेवेशश्चिल्लक्षणप्रकाशरूपोयदजानन्निवदृश्यतेतत्रहेतुर्माययैवेत्यर्थः ॥ २२२ ॥ तत्रस्वप्नजागरणयोर्भ्रमाख्याकार्याविद्याव्यामोहिकासुषुप्तौतुकारणाविद्येत्याह स्वप्नइति ॥ २२३ ॥ तत्रसुषुप्तिकालेयदज्ञत्वमात्मनस्तत्स्वरूपभूतेचैतन्येसतिवर्तमानेपिविषयाभावादेवनतुचैतन्यनाशात् नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेइतिश्रुत्यंतरादित्याह सुषुप्तेपीति आत्मरूपिणिआत्मनःस्वरूपभूतेचैतन्येसति ॥ २२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चैतन्यनाशेबाधकंदर्शयति अन्यथेति अन्यथाचैतन्यनाशेअयमात्माअज्ञानमपितमोरूपंनजानीयात् तत्त्ववश्यंजानाति यतःसुप्तोत्थि
तोनैवकिंचिदज्ञासिषंज्ञातवानस्मीतिजानीतेपरामृशतीत्यर्थः ॥ २२५ ॥ अज्ञानस्यतुच्छत्वादिकंप्रतिलोमक्रमेणविवृणोति सुप्तावित्या
 दिना यदेतत्सुप्तावनुभूयमानत्वेनसाधितमात्मभिन्नंजडंतमोरूपंचाज्ञानंतन्निर्मानत्वात्प्रमाणैरग्राह्यत्वात्तुच्छमित्युक्तमित्यर्थः ॥ २२६ ॥
तत्रलौकिकंतुच्छपदार्थमाह तुच्छमिति यत्कालत्रयेसत्ताहीनंनिःस्वरूपत्वात् अतएववस्तुनाविषयेणहीनंयथाभवतितथानाममात्रज
न्यप्रतीतेर्विषयीभवतितत्तुच्छमित्युच्यतेयथानृशृंगादिकंतथाज्ञानमपिशब्दतोनाममात्रादेवप्रतीयतेइतिद्वयोरर्थः ॥ २२७॥ २२८ ॥

अन्यथायंनजानीयान्मायांसुप्तौतमोमयीं ॥ जानीतेऽज्ञासिषंचाहंनैवकिंचिदितीवहि ॥ २२५॥ सुप्तौयद्दृश्य
तेतेनस्वात्मनोन्यज्जडंतमः ॥ तदेतत्तुच्छमित्युक्तंनिर्मानंचमहात्मभिः ॥ २२६ ॥ तुच्छंकालत्रयेयत्स्यात्स
त्ताहीनमरूपकं॥ प्रतीयतेनाममात्राद्वस्तुहीनंसदानृणां ॥ २२७॥ नरशृंगंयथावंध्यासुतोवाशब्दमात्रतः॥
प्रतीयतेतथैवैतदज्ञानमपिशब्दतः ॥ २२८॥ एतादृशंचयद्धेतुःसंसारस्यभवेत्ततः ॥ दुर्घटंकथितंनित्यंवेद
वादरतैर्द्विजैः ॥ २२९ ॥ भावरूपस्यविश्वस्यकारणंयत्ततोद्विजाः ॥ वदंतिभावतांचास्यतुच्छस्यापिमहा
धियः॥ २३० ॥ कालत्रयेप्यसत्त्वेनतुच्छंतत्परिकीर्त्यते ॥ भावरूपस्यहेतुत्वाद्भावश्चैतन्निगद्यते ॥ अनिर्वा
च्यमतःप्रोक्तंभावस्तुच्छंचतद्यतः॥ २३१ ॥ प्रपंचस्यास्यहेतुर्यन्मोहकृत्स्वात्मनोपिच ॥ जडताचास्यसंप्रोक्ता
स्वात्मनोव्यतिरेकतः ॥ २३२ ॥

एतादृशमिति एतादृशंतुच्छमपिसद्यतःसंसारस्यहेतुर्भवतीत्यतोदुर्घटमनिर्वचनीयमित्युक्तमित्यर्थः ॥ २२९ ॥ अज्ञानस्यभावत्वेनव्य
वहारेहेतुमाह भावरूपस्येति भावत्वेनप्रतीयमानस्यविश्वस्यहेतुत्वाद्भावत्वेनास्यव्यवहारइत्यर्थः ॥ २३० ॥ तुच्छत्वभावत्वयोःसमु
च्चयानुपपत्तिमवेक्ष्यचानिर्वचनीयमित्युच्यतेइत्याह कालेति सार्वदिकासत्त्वेनतुच्छत्वंभावहेतुत्वेनभावत्वंचात्रयतःस्थितमतोऽनिर्वाच्य
मित्युच्यतेइत्यर्थः ॥ २३१ ॥ जडत्वेहेतुमाह प्रपंचस्येति यद्यतोऽस्यजडरूपस्यप्रपंचस्यहेतुरात्मनोमोहस्यावरणस्यकारकंचभवत्यतः
स्वात्मनश्चिद्रूपाद्व्यतिरेकंवैलक्षण्यमपेक्ष्याज्ञानस्यजडतोक्तेत्यर्थः ॥ २३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्युक्तमनंतत्वंस्फुटयति अनंततेति अंतःप्रागभावप्रतियोगित्वरूपःकालिकपरिच्छेदस्तदभावादस्यानंतता तदेतदुक्तं आदिशून्येनहेतुनेति आदिशून्यपदंभावप्रधानं अत्रोपपत्तिमाह भवेदित्यादिना यदाअस्याज्ञानस्यादिःकारणंभवेत्कल्पेततदातस्याज्ञानकारणतयाक्लृप्तस्यापिकारणंकल्प्यंस्यात्तदाचतद्धेतोरेवास्तुहेतुत्वंकिंतेनेतिन्यायात्प्रथमाज्ञानस्यवैयर्थ्यंस्यात् यदेतस्यप्रथमाज्ञानस्यकारणंकल्पितंतेनैव सर्वनिर्वाहादित्यर्थः ॥ २३३ ॥ अथवेति अथवाअनंतप्रपंचंप्रतिकारणत्वरूपाद्धेतोरस्याज्ञानस्यानंतत्वंबोध्यमित्यर्थः ॥२३४॥ एतदेवस्फुटयति अनंतोयमिति अनंतोऽगृह्यमाणांतोऽयंप्रपंचःपरिच्छिन्नात्कारणात्केनकथंभवेज्जायेत अज्ञानंतुतस्यानंतप्रपंचस्यकारणंभ

अनंतताचविद्वद्भिरादिशून्येनहेतुना॥ भवेदस्ययदैवादिस्तदातस्यापिकारणं॥ भवेद्व्यर्थंतदाचैतत्कारणंपरिकल्पितं॥ २३३॥ अथवानंतताचास्यभवेदेवंजडस्यहि॥ अनंतस्यास्यविश्वस्यकारणत्वेनहेतुना॥२३४॥ अनंतोयंपरिच्छिन्नात्कारणात्केनसंभवेत्॥ प्रपंचःकारणंतस्यस्यादनंतंततोहितत्॥ २३५॥ ब्रह्मज्ञानंविनाचांतंनैतद्यातिकुतोपिहि॥ कारणानांशतात्तस्मादनंतमितिगीयते ॥ २३६ ॥ मोहात्मकत्वमेतस्यकथ्यतेवेदवादिभिः॥ आवृणोतियतश्चैतदानंदात्मानमद्वयं॥ स्वप्रकाशविनिर्भातंसर्वमोहविवर्जितं॥ २३७ ॥ आत्मन्येषासदाविद्यानासीन्नैवभविष्यति ॥ नवर्त्ततेनिवृत्तैवसर्वदास्मादियंस्थिता ॥ एवंभूतापिचात्मानंमोहयत्यात्मनोबलात्॥ २३८॥

वतिततस्तदज्ञानमनंतमित्येवमुक्तमित्यर्थः ॥ २३५ ॥ ब्रह्मेति अथवाब्रह्मज्ञानंविनाकारणत्वेनोपन्यस्तानांशतादपरिमितसमुदायादपिएतदज्ञानमंतंनाशंनयाति एतस्मान्निमित्तादनंतमित्युच्यतेइत्यर्थः ॥ २३६॥ अथमोहरूपतांश्रुत्युक्तामभिनयति मोहात्मकत्वमिति यतश्चानंदादिलक्षणमात्मानमावृणोत्याच्छादयतिततोस्याज्ञानस्यमोहकत्वमुक्तमित्यर्थः ॥ २३७॥ अस्यनित्यंनिवृत्तत्वेप्यचिंत्यप्रभावेणमोहकरत्वंलोकानुभवसिद्धमित्याह आत्मन्येषेतित्रिभिः एषाअविद्याआत्मनिस्वभासकेकालत्रयेनवर्तते यतःप्रकाश्यस्यप्रकाशकनिष्ठत्वंक्वापिनदृष्टमित्युपपत्त्याअस्मादात्मनःसकाशात्सर्वदानिवृत्तैवेयमविद्यास्थितासाधिता एतादृश्यपिचस्वकीयबलादचिंत्यशक्तिरूपादात्मानंमोहितंकरोतीत्यर्थः॥ २३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहस्वरूपंवर्णयति अहमिति भूतजांशेपंचभूतानांकार्यभागेस्थूलेसूक्ष्मेवाद्विधाभूतेप्रत्यक्पराग्भावेनस्थितेयथाक्रममहमित्याकारांममे
त्याकारांचद्विमर्यींद्विविधांबुद्धिभावनामेषआनंदादिलक्षणोप्यात्माऽधिगच्छतिप्राप्नोति तत्रयंभौतिकांशंप्रत्यक्त्वेनमन्यतेतत्राहमितिबु
द्धिकरोति यंचपराक्त्वेनमन्यतेतत्रममेतीतिविभागः॥२३९॥ परिच्छेदेइति तथातस्यभौतिकांशस्यैवधर्मभूतेपिपरिच्छेदेपरिच्छिन्नत्वेएष
॥२०॥ आनंदादिलक्षणआत्माअतिमोहितःपरिच्छेदस्यात्मनिष्ठत्वदर्शनरूपमतिशयितंमोहंप्राप्तोभवतियतोनयामाययामूढआवृतस्वरूपोपिमो
हितःअधिकंमोहायप्रेरितइत्यर्थः ॥२४०॥ अज्ञानस्यसिद्धत्वासिद्धत्वहेतुकेसत्त्वासत्त्वेदर्शयति अस्येति अस्यवर्णितमायारूपस्यविश्व

अहंममेतिद्विमर्यींबुद्धिमेषोधिगच्छति ॥ भूतजांशेद्विधाभूतेस्थूलेसूक्ष्मेचसर्वदा ॥ २३९ ॥ परिच्छेदेच
तस्यापिसुखदुःखकरेपुमान्॥ आनंदात्मासदाद्वैतशून्योसौनिर्गुणःपरः ॥ अनयामोहितोमूढोभवत्येषोति
मोहितः ॥ २४० ॥ अस्यमायात्मनोमोहकारणस्यसदात्मनः ॥ तुच्छस्यजडरूपस्यहेतोर्विश्वस्यसर्वदा
॥ २४१ ॥ अनादेरप्यनंतस्यसत्त्वासत्त्वेउदीरिते॥ पंडितैर्यददःसिद्धमसिद्धंचैवदृश्यते॥ २४२॥ सिद्धंकार्य
स्वरूपेणत्वसिद्धंस्वस्वरूपतः ॥ सिद्धंचानुभवेनैतदसिद्धंचविचारतः ॥ २४३ ॥ असिद्धमस्वतंत्रंस्यात्स्वतं
त्रंसिद्धमीरितं॥इतिवातद्भवेत्सिद्धमसिद्धंचात्रकारणं ॥ २४४ ॥

प्रपंचहेतोःकीदृशस्यात्मनःसदामोहकस्यतुच्छस्यजडस्यानादेरनंतस्यचेति एतस्यसत्त्वासत्त्वेपंडितैरुक्ते यद्यतःअदोऽज्ञानंसिद्धत्वासिद्ध
त्वाभ्यांवक्ष्यमाणरूपाभ्यांविशिष्टंदृश्यतेइत्यर्थः॥२४१॥२४२॥ सिद्धत्वासिद्धत्वेउपपादयति सिद्धमिति सिद्धत्वमक्षादिगोचरत्वंतदज्ञा
नेपिकार्यरूपेणास्तिअतस्तत्सिद्धमित्युच्यते स्वरूपेणत्वज्ञानस्याज्ञानादिगोचरत्वाभावात्तदसिद्धमिति अथवाएतदज्ञानमनुभूयमानत्वात्
सिद्धमित्युक्तंविचारेणबाधितत्वाच्चासिद्धमितीत्यर्थः ॥ २४३ ॥ असिद्धमिति अथवाइतिइमांलोकप्रसिद्धिमनुसृत्यतदज्ञानंजगतःकार ॥२०॥
णंसिद्धमसिद्धमितिचोच्यते इमांकां परतंत्रमसिद्धंस्वतंत्रंतुसिद्धमित्युक्तांलौकिकैरित्यर्थः ॥ २४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रस्वातंत्र्यमज्ञानस्यस्फुटयति स्वातंत्र्यमितिचतुर्भिः एतस्याज्ञानस्यइदंस्वातंत्र्यंस्वतंत्रस्यकर्मपश्यत इदंकिं यत्स्वात्मरूपतःस्वरूपेणज डंतुच्छमपिचसदनाद्यनंतमितिप्रसिद्धंतथानंदात्मानंद्वैतमोहाभ्यांहीनंमोहयतीत्यर्थः ॥ २४५॥ प्रकारांतरेणस्वातंत्र्यंदर्शयति भानाविति यथामध्यान्हार्केतमोदुर्घटमसंभवस्थितिकंतथाआनंदरूपेआत्मनिदुःखकारिणीमायादुर्घटा इतएतद्वृत्तमालोच्यएतस्यामायायाःस्वा तंत्र्यमेतदेवाभिधीयते एतत्किं यदानंदरूपात्मनिवर्तनमितिद्वयोरर्थः ॥ २४६ ॥ २४७ ॥ तथास्वयंयस्याधीनातस्यात्मनएववशी करणंतृतीयंस्वातंत्र्यमित्याह अहोइति किमपिअद्भुतं यत्तन्नामात्मोच्यते ॥ २४८॥ अथास्याःपारतंत्र्यंविशदयति परेतिपंचदशभिः

स्वातंत्र्यमिदमेतस्यकथितंवेदवादिभिः॥ अनाद्यनंतंचजडंतुच्छंचस्वात्मरूपतः ॥ आनंदात्मानमद्वैतममो हंमोहयत्यपि॥ २४५ ॥ भानौयथाप्रभाकीर्णेस्थितेस्याद्दुर्घटंतमः ॥ आनंदात्मनितद्वत्स्यान्मायेयंदुःखका रिणी॥२४६॥ इतःस्वातंत्र्यमेतस्याइदमत्राभिधीयते॥ चिदानंदात्मरूपेस्मिन्वर्त्तनंयन्निजाद्बलात्॥२४७॥ अहोअस्याःकिमप्येतत्स्वातंत्र्यमपिदुर्घटं ॥ यदधीनास्वयंतच्चकुरुतेस्वात्मनोवशे॥ २४८ ॥ परतंत्रासदा विद्यायतःसिद्ध्यतिकुत्रचित्॥ विषयेवाश्रयेनित्यंनतुतौपरिहायहि॥ २४९ ॥ अविद्यायाश्चविषयोनाविद्यै वकदाचन॥ तमसोहितमोनैवविषयःकर्हिचित्क्वचित् ॥ २५० ॥ यस्ययोतिशयंकुर्यात्सतस्यविषयोमतः॥ स्वस्मिन्स्वेनचकोनामकरोत्यतिशयंत्विह ॥ २५१॥

इयमविद्यापरतंत्रापिभवति यतआश्रयंविषयंचापेक्ष्यैवसिद्ध्यति तौविषयाश्रयौविहायोपेक्ष्यनसिद्ध्यतीत्यर्थः ॥२४९॥ नन्वविद्यायाः स्वरूपमेवाश्रयतांविषयतांचभजिष्यतीतिकथंपरापेक्षेतिशंकांपरिहरति अविद्यायाइत्यादिना अविद्यायाविषयःअविद्यैवनसंभवति य थातमसातमएवनविषयीक्रियतेइत्यर्थः ॥२५०॥ तत्रहेतुतयाविषयलक्षणासंभवमाह यस्येति यःपदार्थोयस्यपदार्थस्यसंबंधिर्नयन्निष्ठ मितियावत् एतादृशमतिशयंफलंकुर्यात्सफलाश्रयस्तस्यफलकर्त्तुर्विषयइत्युच्यते स्वस्वरूपेचस्वेनैवातिशयःकेनापिकर्त्तुंनशक्यइत्य र्थः॥ २५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविद्ययाचावरणविक्षेपरूपमज्ञोस्मिदुःखीचेत्यनुभूयमानंफलंभासमानानंदरूपेआत्मन्येवक्रियतेऽतआत्मैवतस्याविषयइत्याह चिदा
नंदात्मनीति ॥ २५२ ॥ अविद्ययाश्रयत्वेनाप्ययमात्मापेक्ष्यतइत्याह आश्रयश्चेति यःपदार्थःस्वस्माद्भिन्नोऽधिकश्चभवतिसएववस्तुनःप
दार्थजातस्याश्रयःप्रसिद्धस्तथाअविद्यातोभिन्नोऽधिकश्चात्मैवसंभवतियतःपरमेश्वरश्चिद्रूपत्वेनभासकत्वात्तयाअविद्ययाविहीनोऽस्पृष्टः
अतःसाविद्यातत्रात्मन्येववर्त्ततेयथारूप्यंरजतंतद्भ्रमवतिपुरुषेशुक्तिगोचरमज्ञानंवर्त्ततइतिप्रसिद्धंतद्वदितिद्वयोरर्थः ॥ २५३ ॥२५४॥ अ
त्रपूर्वविरोधमाशंक्यपरिहरति यद्यपीति यद्यप्यत्रशुक्त्यज्ञानोदाहरणेआश्रयःपुमान्विषयःशुक्तिरितिविषयाश्रययोर्भेदःप्रसिद्धस्तथा

चिदानंदात्मनिसदाक्रियतेतिशयस्त्वयं॥ अज्ञोदुःखीतितस्मात्सविषयोस्याःप्रकीर्तितः॥ २५२॥ आश्रय
श्चसदैवस्यात्स्वस्मादन्योत्रवस्तुनः॥ अधिकश्चतथात्मायंमायायाःपरमेश्वरः॥ २५३ ॥ चिद्रूपस्तद्विहीनश्च
ततःसातत्रवर्तते॥ शुक्त्यज्ञानंयथापुंसिवर्ततेरूप्यदर्शिनि॥ २५४॥ यद्यप्यत्रभवेदन्योविषयःस्वाश्रयात्स
दा ॥ शुक्त्यज्ञानेतथाप्यत्रपरिशेषप्रमाणतः ॥ आत्मैवविषयस्तस्मादन्यद्येननविद्यते ॥ २५५ ॥ शुक्ताव
पिनशुक्तिःस्याद्विषयोत्रविचारिते॥ इदंतार्थोयतोयत्तुस्फुरणंशुक्तिकागतं॥ २५६॥

पितत्रशुक्त्युदाहरणेप्यात्मैवविषयत्वेनमंतव्यः कुतः परिशेषात्प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगात्परिशिष्यमाणेसंप्रत्ययइत्युक्तलक्षणादनु
मानात् परिशेषमेवदर्शयति तस्मादिति यतश्चिद्रूपआत्मैवावरणयोग्यस्तस्मादात्मनोन्यत्शुक्त्यादिकंजडत्वादावरणयोग्यंनास्तीत्यर्थः त
थाचलोकभ्रांत्यनुसारेणप्रसक्तस्यसन्निहितस्यशुक्त्यादेःप्रतिषेधेसत्यन्यत्रव्यवहितेप्रसंगएवनभवतीतिशुक्त्याद्यंतर्गतआत्मैवविषयोभव
तीतिभावः ॥ २५५ ॥ एतदेवस्फुटीकरोति शुक्ताविति अत्रवर्णितेशुक्तिरूप्योदाहरणेपिविचारितेसतिशुक्तिर्जडाविषयोनस्यात्यतोय
त्स्फुरणंचैतन्यंशुक्तिकायांगतमनुप्रविष्टंयदिदंतापदार्थतयानिरूपितंतदेवविषयत्वार्हमित्यर्थः ॥ २५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंतार्थस्यचैतन्यस्यसामान्यभूतस्यशुक्तिकावच्छिन्नात्मनाविशेषरूपेणाज्ञानविषयत्वाद्विषयावच्छेदकत्वेनशुक्तेरज्ञानविषयत्वव्यवहारइत्याह सामान्यइति हियतोऽस्मिन्निदंतार्थतयावर्णितेस्फुरणेसामान्यभूतेशुक्तिकयाअभिधानिरूपणंयस्यतत्तथाविधंशुक्त्यवच्छिन्नचैतन्यंविशेषरूपंतादात्म्येनतिष्ठतितंविशेषंयतआवृणोतीदमज्ञानंततोवच्छेदकतयाशुक्तेरवगाहनादेतत्शुक्त्यज्ञानमितिप्रचक्षतेव्यवहरंतीत्यर्थः ॥ २५७ ॥ शुक्त्यवच्छिन्नस्यचैतन्यस्यात्मत्वाच्चसर्वत्राज्ञानस्यात्मविषयत्वमेवेत्याह स्फुरणमिति यच्चबहिर्बाह्यार्थेष्वपिस्फुरणंतदप्यंतरात्मैववेदवादिभिरौपनिषदैःकथितमस्तिभातिप्रियमित्यादिवाक्येन तथाचतत्रशुक्त्याद्युदाहरणेपिसःअंतरात्मैवविषयइत्यर्थः

सामान्येस्फुरणेत्वस्मिन्विशेषंशुक्तिकाभिधं॥ आवृणोतियतस्तेनशुक्त्यज्ञानंप्रचक्षते॥ २५७॥ स्फुरणंयद्बहिस्तत्तुकथितंवेदवादिभिः॥ अंतरात्मेतितत्रापिविषयःस्यात्सएवहि॥ २५८ ॥ अज्ञानानांचसर्वेषामाश्रयत्वेनिजात्मनः॥ विवादोवादिनांनास्तिविषयत्वेतुवारितः ॥ २५९ ॥ तस्मादात्मैवविषयआश्रयश्वसदाभवेत्॥ अविद्यायाश्चिदानंदस्तयापिपरिवर्जितः॥ २६०॥ विषयाश्रयसंबंधादस्वातंत्र्यंव्यवस्थितं॥ अविद्यायाजडाचेयंस्वतंत्रास्यात्कथंत्विह ॥ २६१ ॥ रथाद्यानजडाःक्वापिस्वतंत्राश्चेतनंविना ॥ प्रवर्त्ततेक्रियाचात्रगवाश्वादेरपेक्षणात् ॥ २६२ ॥ अचेतनंततःसर्वमस्वतंत्रमुदीरितं ॥ अचेतनातथामायास्वतंत्रास्यात्कथंत्वियं॥ २६३॥

॥२५८॥ एवमज्ञानविषयत्वस्यानात्मगतत्वभ्रमोवारितआत्माश्रयत्वंत्वज्ञानस्यसर्वैःसंमतमेवेत्याह अज्ञानानामिति ॥ २५९ ॥ फलितमाह तस्मादिति तयाअविद्ययापरिवर्जितोपिचिदानंदरूपआत्मैवाविद्यायाआश्रयोविषयश्चेतिसिद्धमित्यर्थः ॥ २६० ॥ ततश्चविषयत्वेनाश्रयत्वेनचात्मनासंबद्धायाअविद्यायाःपारतंत्र्यंसिद्धमित्याह विषयेति किंचजडत्वमप्यस्याःपारतंत्र्यंप्रकटयतीत्याह जडाचेयमित्यादिना ॥ २६१ ॥ तत्रजडत्वस्यपारतंत्र्येणव्याप्तिंदर्शयति रथाद्याइति अत्ररथादौयाक्रियासागवादिचेतनसंबंधादेवनस्वतइत्यर्थः ॥ २६२ ॥ अचेतनमिति ततःपरापेक्षक्रियकत्वात्सर्वंजडमस्वतंत्रंप्रसिद्धमितितथारथादिवत्अचेतनामायापिपरतंत्रैवविज्ञायतेइत्यर्थः ॥ २६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमस्वतंत्रत्वस्य सिद्धौतद्बलेनासिद्धत्वादिकमप्यवधार्यमित्याह अस्वतंत्रेति सामायायतोऽस्वतंत्राततोऽसिद्धेतिबोध्या असिद्धिरसत्वम सतःशशश्रृंगादेर्दृष्टमित्यतोस्यामायायाअसत्तापिव्यवस्थितासिद्धेत्यर्थः ॥ २६४॥ कथंतर्हितस्याःसिद्धत्वादिकमप्युक्तमित्याकांक्षायांव्यापकाभावेनासत्त्वादेरभावमाह अस्वतंत्रेति कार्यानारंभकत्वमसत्त्वव्यापकंतस्यास्यांपुरुषव्यामोहंकुर्वत्यामभावादियंसतीजाता एवमसत्त्वाभावेतद्याप्यस्यासिद्धत्वस्याभावस्ततश्चास्वतंत्रत्वस्याभावादियंसिद्धास्वतंत्राचविज्ञातेतिद्वयोरर्थः ॥२६५॥ २६६॥ अनया कृतमात्मनोव्यामोहमभिनयति अज्ञइतित्रयोदशभिः योयमहमज्ञोदुःखीत्याकारोबोधोदृश्यतेसआगंतुकत्वात्कार्यभूतःकारणेनविना

अस्वतंत्रायतस्तेनसाऽसिद्धेतिप्रकीर्तिता॥ असिद्धिरसतस्तस्मादसत्ताऽस्याव्यवस्थिता॥ २६४ ॥ अस्वतं
त्रात्थाऽसिद्धासत्तालेशविवर्जिता ॥ मोहयत्येनमात्मानमसंगंनिर्गुणंपरम् ॥ २६५ ॥ पुराणंपुरुषंसे
यंसासतीवाभवत्सदा॥ चिदानंदात्मसंमोहात्स्वतंत्रासिद्धतांगता॥ २६६॥ अज्ञोदुःखीतिबोधोयंयस्माद
स्मिन्हिदृश्यते॥सहिकार्यंविनाकेनकारणेनभविष्यति॥२६७॥ कारणंचास्यनैवान्यदविद्यायाश्चलभ्यते॥
वस्तुतःस्वप्रकाशोयमानंदात्माकथंभवेत्॥ अज्ञोदुःखीतिचततोमायेयंपरिकल्प्यते॥ २६८॥ कल्प्यमाना
तुसातत्रनीचवद्बलसंश्रया॥ तिरस्कृत्याश्रयंस्वस्यस्वयमेवावतिष्ठते॥ २६९ ॥ चिदानंदात्मरूपोयआत्मापुं
सोप्यसत्समः॥ मायायावैभवान्नित्यंपश्यतोजगदीशितुः॥ २७० ॥

कथंस्यादित्यर्थः ॥ २६७ ॥ कारणंचेति अस्यबोधस्यकार्यस्यासंभवतःकारणमविद्यामघटितघटनापटीयसींविनान्यन्नसंभवतियतोवस्तुतःस्वप्रकाशानंदरूपेऽयंबोधोनसंभवतिततःपरिशेषादियमविद्यारूपामायैवकल्प्यतेइत्यर्थः ॥ २६८ ॥ साचकल्पितासतीआदृतोनीचःशिरस्यधिरोहतीतिन्यायेनसास्वाश्रयंतिरस्कृत्यस्वयमेवावतिष्ठतेविलसतीत्याह कल्प्यमानेति ॥२६९॥ आश्रयतिरस्कारमेवाभिनयति चिदानंदेति जगदीशितुःसर्वाधिष्ठातुरस्यपुंसःपश्यतोपिभासमानानंदरूपःसर्वांतररूपश्चात्मामायायाःप्रभावादसत्समोजातइत्यर्थः ॥ २७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलासिन्याइति इत्येषःअसत्त्वापादनरूपोऽत्यद्भुतश्चप्रथमोविलासोऽस्याविलासिन्याःकथितोयत्परआत्मापश्यंतंभासमानमप्यात्मानं विस्मृतोविस्मरन्जातइत्यर्थः ॥ २७१ ॥ एनमिति एनमसत्त्वापादनरूपमस्याविलासंपश्यन्नन्यानपिविक्षेपरूपान्विलासान्पश्यति ता नभिनयति जातइत्यादिना धर्मीत्याद्यभिमानरूपंवहुदुःखंपश्येत्तथातस्यजातत्त्वाभिमानस्यसंबंधाद्योगान्ममत्वाकुलोभवतिततःपित्रा दिरूपांस्तान्मायाविलासान्संसारस्थितिहेतून्पश्येदितित्रयाणामर्थः ॥ २७२ ॥ २७३ ॥२७४॥ देहेति ततश्चदेहरूपंबंधनागारंप्राप्तःका

विलासिन्याविलासोयंप्रथमःपरिकीर्त्तितः॥ अहोपश्यंतमात्मायमात्मानंविस्मृतःपरः॥ २७१ ॥ एनंपश्यं स्ततःपश्येद्विलासानपरानपि ॥जातोबालोयुवावृद्धोमृतोदुःखीसुखीतथा॥ २७२ ॥ स्वर्गीचनरकीचास्मि तथास्त्रीपुंनपुंसकः॥ पापीधर्मीचैवमादिवहुदुःखमनेकधा॥ २७३॥ तस्यसंबंधतश्चाभून्ममतासक्तचेतनः॥ पितृमात्रादिरूपांस्तान्संसारपरिरक्षिणः ॥ २७४ ॥ देहकारागृहंप्राप्तःकामक्रोधादिशृंखलः ॥ प्रार्थनारक्ष्य माणांगोमूढोजन्मनिजन्मनि ॥ २७५॥ आनंदात्मानमात्मानंस्वयंज्योतिषमद्वयं ॥ अपश्यन्दुःखमनिशंब हुकर्मसमुत्थितं ॥ प्राप्नुवन्यातिसंसारंविद्यमानोप्यसत्समः ॥ २७६ ॥ अतोमायाविचित्रेयंदुर्घटादुःख कारिणी ॥ संसारविषवृक्षस्यजननीदुर्जयानृभिः ॥ २७७॥ अहमज्ञस्तथादुःखीब्राह्मणोहंमहाकुलः ॥ इ त्यादिवहुमन्वानोनिमज्जतिभवार्णवे ॥ २७८ ॥ बीजभूताहिसाप्रोक्तावासनाकोटिगर्भिणी॥ पटवद्याति संकोचंविकासंचदिनेदिने ॥ २७९ ॥

मादिरूपशृंखलाभिर्वद्धश्चसन्प्रार्थनयामानभूवमित्याद्याकारयारक्ष्यमाणंतत्तदंगंशरीरंयेनसतथाविधोमूढोनानाजन्मसुस्वरूपमपश्य न्वहुदुःखंपश्यंश्चसंसारेभ्रमतीतिद्वयोरर्थः ॥ २७५ ॥ २७६ ॥ फलितमाह अतइति अतोविचित्रेयंमायासंसारविषवृक्षजनकत्वाद्भृशं व्यामोहिकायत्प्रभावादयंनानाविपर्ययैराकुलःसंसारेनिमज्जतीतिद्वयोरर्थः ॥ २७७ ॥ २७८ ॥ अथास्यावटवीजादिवद्यवस्थांश्रुत्यु क्तांवर्णयितुमस्याःसंसारवृक्षस्यवीजतांपरिणामशीलतांचाह बीजभूताहीति साअविद्यासंसारवृक्षस्यवीजस्थानीयावासनानांज्ञानकर्म संस्काराणांकोटिभिर्गर्भिणीगर्भवतीतथापटादिवत्संकोचविकासशीलेत्यर्थः ॥ २७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्याःसंकोचादिकालानाह सुषुप्ताविति सुप्तिमूर्छामरणप्रलयेष्वस्याःसंकोचःपरत्रोक्तेतरकालेषुतुविकासइत्यर्थः ॥ २८० ॥ तत्र विलासोऽस्याःपुंसोनितांतंदुःखदइत्याह विकासैरिति देहेदेहेनानादेहेषुनित्यंप्रतिदिनमयंपुमानूअवशःपरतंत्रःसनूविलासैरस्यादुःखितो भवतीति ॥ २८१ ॥ संकोचकालेचनीडलीनपक्षिवत्पूर्वश्रमपरित्यागेपिभाविदुःखबीजसंपर्काद्दुःखीतिव्यवह्रियतेइत्याह क्षीणइति कर्मणिजाग्रदादिभोगप्रदेक्षीणेसतिसासंकोचंयातितदाचश्रांतोजीवःश्रमंपरित्यज्ययद्यपिशेतेतथापियतःअज्ञानमोहितोमायारूपेबीजेइतःप्राप्तस्ततोदुःखंयातीत्यर्थः ॥ २८२ ॥ एवमिति एवमुक्तरूपसंकोचविकासाभ्यामेषाऽविद्यासंसारस्यहेतुर्याशरीरिणामनुभव

सुषुप्तौचापिमूर्छायांमरणेपिमहालये॥ संकोचमुपयात्येषाविकासंवापरत्रहि ॥ २८० ॥ विकासैर्दुःखमायातितस्याएषपुमानिह॥ स्वप्नेजागरणेनित्यंदेहेदेहेवशःपुमान् ॥ २८१ ॥ क्षीणेकर्मणिसंकोचंश्रांतःपक्षीवनीडगः॥ श्रमंसर्वंपरित्यज्यशेतेज्ञानविमोहितः॥ मायाबीजइतोभूयोयातिदुःखंसदारुणं॥ २८२॥ एवमेषात्रसंसारहेतुरुक्तामनीषिभिः॥ अविद्यादुर्घटानित्यंदृश्यतेयाशरीरिभिः॥ २८३॥ आनंदात्मातथाऽविद्याहेतूसंसारमोक्षयोः॥ अतत्त्वतत्त्वरूपाभ्यांविज्ञातौसर्वदेहिनां॥ २८४॥ अप्रतीतिश्वसंसारेविप्रतीतिश्ववाभवेत्॥ आत्मनोपिचमायायामोक्षएवंहिसाभवेत्॥ २८५॥ एकैवेयमविद्याख्यामायेत्यपिचकीर्त्तिता॥ विभिन्नापिविभात्यत्रवटधानायथानृणां॥ २८६॥

सिद्धादुर्घटाचेति ॥ २८३ ॥ यथाचेयंविलसंतीसंसारहेतुस्तथात्मास्वरूपेणविलसनूमोक्षहेतुरित्याह आनंदात्मेति तत्त्वंपरमार्थस्तद्रूपतयाविज्ञातःप्रसिद्धआनंदात्मामोक्षस्यहेतुः असत्यमनृतंतन्मय्यविद्याचसंसारस्यहेतुः तत्रसंसारेआत्मनःस्वरूपस्याप्रतीतिर्विपरीताप्रतीतिर्वासर्वेषांभवतिएवंमोक्षेमायायाःसाअप्रतीतिर्भवेदितिद्वयोरर्थः ॥ २८४ ॥ २८५ ॥ नन्वेकस्यामायायाःकथंनानाप्रमातृव्यवहारनिर्वाहकत्वमित्याशंक्यतस्याएकत्वंनानात्वंचवटबीजदृष्टांतेनाह एकैवेयमिति इयंमायाअविद्यासंज्ञाविविधंभिन्नापिभातिवटधानावत् ॥ २८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टांतंस्फुटयति वटेति यथावटस्यधानासुबीजेष्वनुगतंयत्सामान्यंजातिरूपंतदेववटानांहेतुःकारणं ताधानाव्यक्तयस्तुनसर्वत्रहेतुतायो ग्यानाशादिशालित्वेनाननुगमादित्यर्थः ॥ २८७ ॥ दार्ष्टांतिकेयोजयति हेतुरिति यथावटधानागताजातिःसर्ववटानांहेतुस्तथासर्वेषां कार्याणांकारणेष्वनुगतंसामान्यंमायेत्युच्यतेइत्यर्थः ॥ २८८ ॥ दृष्टांतेनसाधर्म्यांतराणिवर्णयति वटधानास्विति यथावटधानाव्यक्ति षुनष्टास्वपितद्गताजातिरविनाशिनीतथाकार्याणांसुप्त्यादौनाशेपितत्कारणसामान्यरूपामायानविनश्यतीत्यर्थः॥२८९॥ वटधानागतेति यथाचसावटधानागताजातिस्तत्तद्वटविशेषप्रयोजिकानांतत्तद्धानानांविभेदंविशेषंस्वावच्छेदकमाश्रित्यविभिन्नाभिन्नभिन्नकार्यकरी

वटधानासुसर्वासुहेतुःसामान्यमीरितं ॥ वटानांनतुताधानास्तासांनाशस्यदर्शनात् ॥ २८७ ॥ हेतुर्यथात्र सामान्यंवटधानासुकीर्तितं ॥ तथाकार्यौघसामान्यहेतुर्मायेतिकीर्तिता ॥ २८८॥ वटधानासुनष्टासुसामा न्यंनविनश्यति ॥ यथातथैवमायेयंकार्यनाशेननश्यति ॥ २८९ ॥ वटधानागताजातिर्वटधानाविभेदतः ॥ विभिन्नामीयतेयद्वत्तद्वन्मायाप्रकीर्तिता ॥ नानासंस्कारभेदेनभिन्नाविश्वस्यकारणं ॥ २९० ॥ वटधानाय थानाशंवटोत्पत्तौव्रजंतिहि ॥ संस्काराअपिमायायाःकार्योत्पत्तौतथैवते ॥ २९१ ॥ वटधानायथैवैकावटो त्पादादनेकधा ॥ कोटिकोटिगुणाभूत्वापुनरेकाविजायते ॥ २९२ ॥

भवतितथामायापितत्तत्कार्याणांयेयेसंस्काराःसूक्ष्मावस्थारूपास्तानवच्छेदकतयाश्रित्यनानाविश्वस्यकारणंभवतीत्यर्थः ॥ २९० ॥ यथाचवटधानासामान्यस्याविनाशेपिवटधानाव्यक्तीनांतत्तद्वटोत्पत्तौनाशस्तथामायायाअविनाशेपितत्तत्संस्काराणांतत्तत्कार्योत्पत्तौ विनाशइत्याह वटधानायथेति ॥ २९१ ॥ वटधानायथैवैकेति यथाचैकापिवटधानावटरूपेणपरिणम्यफलितात्ततोवटादनेकधावा रंवारंप्रतिवसंतमृतुंकोटिकोटिगुणाअपरिमेयव्यक्तिकासतीविजायतेउत्पद्यतेताश्चबीजव्यक्तयःप्रत्येकंवटजननक्षमाइत्याह पुनरेकेति ता सुवटोत्पन्नधानाव्यक्तिष्वेकापिपुनरेवंवटोत्पादनद्वाराकोटिगुणत्वेनजायतेइत्यर्थः ॥ २९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दार्ष्टांतिकेयोजयति कार्योत्पत्ताविति तथासामान्यरूपामायापिस्वव्यक्तिभूतैःसंस्काराख्यैरूपैरनेकधाविजायते कुतः कार्योत्पत्तौवि श्वोत्पादात् एकस्यकार्यस्योत्पत्तौततोविश्वस्यनानाविधकार्यजातस्योत्पादात्संतानात्तासुचनवोत्पन्नव्यक्तिष्वेकाव्यक्तिःपुनरेवंजाय तेततःसंसारस्यानंत्यंफलितमित्यर्थः ॥ २९३ ॥ सामान्यस्थानीयायामायायाव्यक्तिस्थानीयान्संस्कारानंनतानपिराशिचतुष्टयेऽव स्थापयति संस्काराइति मायायाःसामान्यरूपायाविशेषभूतायेसंस्कारास्तेचतुर्विधाः तत्कार्याणांदेहत्वेंद्रियत्वक्रियात्वभोगत्वरूपैश्चतु र्विधत्वादित्यर्थः ॥ २९४ ॥ एतेषांसंस्काराणांतत्कार्याणांचव्यक्त्यानंत्यंप्रवाहरूपेणदर्शयति अनादाविति एतेषांसंस्काराणांतत्कार्यभू

कार्योत्पत्तौतथामायाविश्वोत्पादादनेकधा॥ विजायतेपुनश्चैकाततोनंतोभवार्णवः॥ २९३॥ संस्काराविविधाएतेमायायायेप्रकीर्त्तिताः॥ चातुर्विध्यंचसंक्षेपात्तेषुप्रोक्तंमनीषिभिः॥ देहेंद्रियक्रियाभोगहेतवोत्रचतुर्विधाः॥२९४॥ अनादाविहसंसारेबीजांकुरसमास्थितिः॥ कारणत्वेसदातेषांनैवकिंचिद्व्यवस्थितं॥ २९५॥ वर्त्ततेत्रिविधाःप्रोक्ताउत्तमाधममध्यमाः॥ चतुर्विधेषुभूतेषुनानाभेदेषुसर्वदा॥२९६॥ तत्तज्जातीयजंतूनां मध्येसर्वत्रसंस्थितं॥ त्रैविध्यंनैवकेनापिशक्यंवक्तुंकदाचन॥ आनंत्याद्ब्राह्मणेष्वेतदुदाहृत्यप्रदर्श्यते॥२९७॥ भूदेवःपुण्यपापाभ्यांसमाभ्यांप्रायशोभुवि॥ जायतेसर्वएवायंसुखदुःखोपभोगवान् ॥ २९८॥

तदेहादीनांचपरस्परस्यकारणत्वेस्थितिरवस्थानंबीजांकुरवज्ज्ञेयंयतएतेषांसंस्काराणांतत्कार्याणांचमध्येकिंचिदपिव्यवस्थितंस्थिरंनवर्त तेइत्यर्थः ॥ २९५ ॥ तत्रकार्याणांभेदानुपलक्षयितुंश्रुत्युक्तंत्रैविध्यमाह वर्त्ततइति प्रथमपदंपूर्वान्वयिदर्शितं जरायुजत्वादिनाचतुर्वि धेषुप्राणिभेदेषुअवांतरभेदैर्नानाविधेष्वपिएतेदेहेंद्रियक्रियाभोगाः प्रत्येकमुत्तमत्वादिनात्रिविधाइत्यर्थः ॥ २९६ ॥ तत्रसर्वजंतुषूदाहृ त्यदर्शयितुमशक्यत्वात् ब्राह्मणजातावुदाहृत्यप्रतिपाद्यतेइत्याह तत्तज्जातीयेति ॥ २९७ ॥ त्रैविध्ययोग्यतांतावद्ब्राह्मणस्याह भूदेवइति भूलोकेजातत्वात्सुखदुःखोभयोपभोगशालित्वाच्चभूदेवाख्याब्राह्मणजातिरपिपुण्यपापोभयारब्धेत्यर्थः ॥ २९८ ॥ ॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहस्येति तत्रब्राह्मणजातावप्युत्तमत्वमनेकनिमित्तप्रयुक्तं तथाहि पित्रादेःकुलविद्यातपःप्रभृतिभिरुत्कर्षात्पुत्रादेरुत्तमत्वं तथावीर्ययोर्मातापित्रंशयोरवस्थाविशेषेणपरिपाकात् गर्भात्कालपरिपूर्त्यानिर्गमनात् रूपंगौरत्वं लावण्यंचाकचक्यं शीलंसदाचारः आदिपदेनसल्लक्षणग्रहः एतैर्गुणैश्चदेहस्योत्तमत्वमितिद्वयोरर्थः ॥ २९९ ॥ ३०० ॥ इंद्रियाणामुत्तमत्वमाह उपलब्धेश्चेति उपलब्धिर्विषयग्रहणंतत्रवैशद्यास्फुटत्वात् संस्थानंरचनाविशेषस्तस्मात् मानंविस्तारादिरूपं यथानेत्रयोःकर्णांतत्वंततश्चेंद्रियोत्तमत्वमित्यर्थः ॥३०१॥ क्रिया

देहस्यतत्रविज्ञेयमुत्तमत्वमनेकधा॥ पितृतोमातृतस्तद्वदाचार्याच्चमहात्मनः ॥ २९९ ॥ वीर्ययोःपरिपाकाच्चकालनिर्गमनादपि॥ रूपलावण्यशीलाद्यैर्गुणैर्योगाच्चसर्वदा॥ ३०० ॥ उपलब्धेश्चवैशद्यात्संस्थानाच्चापिमानतः॥ उत्तमत्वंसदैवैतदिंद्रियाणांप्रकीर्त्तितं॥ ३०१ ॥ कर्मणामुत्तमत्वंस्यान्मेलनात्प्रज्ञयापिच॥ विहितानामनुष्ठानान्निषिद्धानांचवर्जनात्॥ ३०२॥ भोगानामुत्तमत्वंस्यात्पित्रादेश्चसुशीलतः॥ विद्यायोगात्तस्त्वेषामाधिव्याधिविवर्जनात् ॥ पुण्यस्यसंचयाच्चापितथास्वस्यापिबुद्धितः ॥ ३०३॥

याउत्तमत्वमाह कर्मणामिति प्रज्ञादेवताध्यानादिरूपातयामेलनात्तथाविहितस्यकरणान्निषिद्धपरिहाराच्चकर्मणउत्तमत्वमित्यर्थः ॥ ३०२ ॥ भोगस्यतदाह भोगानामिति भोगानामुत्तमत्वंपितृमात्रादेर्विद्यमानत्वात् बांधवानांस्वस्यचसुशीलत्वात्तदुपयुक्तविद्यानांयोगात्एषांबांधवानांततोविद्याबलेनमानसशरीरपीडयोरभावात्स्वस्यचतथात्वंकैमुत्येनदर्शितं पुण्यसंचयाविरोधात्स्वकीयबुद्धिकौशलाच्चबोध्यमित्यर्थः ॥ ३०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्यैति आचार्यादयःसर्वेसंबंधिनोस्यजंतोर्भोगहेतवइतिकेचिदाहुः सद्धियस्तुउभयस्यदंपत्यादिरूपस्ययुगलस्यपरस्परंभोगहेतुतां वदंतिश्रुत्यनुसारात् तथाचश्रुतिर्नवाअरेपत्युःकामायपतिःप्रियोभवतिनवाअरेजायायैकामायजायाप्रियाभवतीतिदंपत्योरेवप्रसक्तंभोग हेतुत्वंनिराकरोत्नपित्रादाविति भावः अथवाएकलस्यभोगोनसंभवतीत्युभयमपेक्षितमित्यत्रतेषांतात्पर्यमिति अथवाआचार्यादयः शिष्यादीनांभोगहेतवस्तददृष्टारब्धाइतिकेचिद्वदंति केचित्तुसद्धियउभयस्यगुरुशिष्यरूपस्यपितृपुत्रादिरूपस्यवापरस्परमुपकारकत्वद र्शनादुभयंपरस्परंभोगहेतुरितिवदंतीत्यर्थः वस्तुतस्त्वाचार्यपितृप्रभृतयोभोगहेतवइतिकेषांचिदापातदर्शिनांमतं सद्धियस्तुतेषामुभयंध र्मार्थरूपंप्रतिहेतुतांवदंतीत्यर्थः आचार्यादयोहिसदुपदेशादिनाधर्मविद्यारूपंदैववित्तंतद्द्वारालौकिकंवित्तंचप्रयोजयंतीतिभावः अपिश

आचार्यपितृमात्रादेःकेचिद्भोगस्यहेतुताम् ॥ मन्यंतेचोभयस्यापिकेचिदिच्छंतिसद्धियः ॥ ३०४ ॥ देहादा वुत्तमत्वेयेहेतवःपरिकीर्त्तिताः ॥ तेषामभावेकेषांचिन्मध्यमत्वंप्रकीर्तितं ॥ सर्वेषांवैपरीत्येस्यादधमत्वमसं शयं ॥ ३०५ ॥ देहेंद्रियक्रियाभोगाएवंतेत्रिविधाःस्मृताः ॥ एकाशीत्यादयस्तुस्युर्भेदाःसूक्ष्माअनेकधा ॥ एतेषामुत्तमत्वादावानंत्यात्तेनचेरिताः ॥ ३०६ ॥

ब्देनउपसर्जनतयाभोगंप्रतितेषांहेतुतेतिसूचितम् ॥ ३०४ ॥ मध्यमाधमत्वेनिरूपयति देहादाविति देहादीनामुत्तमत्वेयेहेतवउक्तास्ते षांमध्येकेषांचिदेवाभावेसतिमध्यमत्वंसर्वेषामभावेत्वधमत्वमित्यर्थः ॥ ३०५ ॥ देहेंद्रियेति इत्थमुत्तमत्वादिनादेहादयस्त्रिविधाःस्युरिति एतेनैतेषामुत्तमत्वादित्रयस्यप्रत्येकमुत्तमत्वादित्रयेणयोजनेनवभेदास्तेषामपिमृदुमध्याधिमात्रत्वैर्योजनेसप्तविंशतिभेदाभवंतीतिसूचि तं अधिमात्रत्वमुत्कटत्वं मृदुमध्याधिमात्राणामपिप्रत्येकंमृदुत्वादिभिर्योजनेसप्तविंशतित्रिकरूपाएकाशीतिभेदास्तेषामपिकर्मद्वाराकृत ॥२५॥ कारितानुमोदितत्वैःसंबंधेत्रिचत्वारिंशदधिकशतद्वयसंख्याभेदाःस्युस्तेचसूक्ष्मावर्णयितुमशक्याइत्याह एकाशीत्यादयइति एतेषांदेहा दीनामुत्तमत्वादौयेएकाशीतिप्रभृतयःसूक्ष्माभेदास्तेआनंत्यात्केनापिनवर्णिताइत्यर्थः ॥ ३०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथदेहेंद्रियक्रियाभोगानांतत्संस्काराणांचपरस्परंबीजांकुरन्यायेनकारणतांनिरूपयंस्तत्रदेहस्यप्राधान्यमाह देहेति देहानांसंस्कारभ्यो देहाजायंतेततोदेहेभ्यश्चतुर्विधादेहादीनांचतुर्णामपिजनकाःसंस्काराःप्रभवंतियतोहेतोस्ततोदेहात्सर्वंदेहेंद्रियादिकंप्रजायतेप्रादुर्भवतीत्यर्थः॥३०७॥ देहात्सर्वसंभवंदर्शयति देहीति योदेहीभवतिसइंद्रियैर्युक्तैर्वशेस्थितैःसहितःकर्मीयागादिकर्तातत्फलभोगीचभवतिततोदेहित्वादिभावानंतरंतेपुनर्देहित्वादिप्रयोजकाःसंस्काराःप्रभवंतितेभ्यश्चपुनर्देहादिकंभवति यथादेहःसर्वस्यप्रयोजकस्तथेंद्रियंभोगश्चकर्मादि

देहसंस्कारतोदेहास्ततस्तेपिचतुर्विधाः॥संस्काराद्देहसंबंधाद्यतःसर्वंप्रजायते॥ ३०७॥ देहीस्यादिंद्रियैर्युक्तैःकर्मीभोगीचमानवः॥ततस्तेपिचसंस्कारास्तेभ्योदेहादिकंपुनः॥ जितेंद्रियंचभोगश्चकारणान्येवमेवहि॥३०८॥पुण्यपापरतोजंतुरिंद्रियैःसंयुतोभवेत्॥देहेनचततोभोगंगच्छेत्सर्वत्रसर्वदा॥३०९॥ भोगीक्रियावान्सततंवश्यैरेतैरसंशयं॥इंद्रियैःसहितोदेहीभोगीकर्मीनसंशयः॥ ३१०॥ भोगानामत्रसर्वेषांसर्वदानुभवेसति॥ वृद्धिःप्रत्यक्षतोदृष्टाकर्मणांकरणेतथा॥ ३११॥ योहियंविषयंजंतुःप्राप्नुयात्सतुतंपुनः॥ इच्छतीहभृशंकर्मकुरुतेचास्यलब्धये॥ ३१२॥

द्वारासर्वस्यसंघातस्यप्रयोजकोबोध्यः तत्रेंद्रियस्ययुक्तत्वंजितत्वंचविशेषणं इंद्रियलोलुपेषुकस्यापिकर्मणःपरिपूर्त्यदर्शनादिति॥३०८॥ कर्मणःसर्वसंभवमाह पुण्येति स्पष्टं॥ ३०९॥ भोगात्सर्वसंभवमाह भोगीति क्रियावान्कर्मक्षमस्तथावश्यैरेतैरिंद्रियैःसहितश्चभोग्येव भवतियतोदेहीभोग्येवंकर्मीप्रसिद्धइत्यर्थः॥ ३१०॥ तत्रानुभवंप्रमाणयति भोगानामिति सर्वजातीयानांभोगानांभोग्यपदार्थानामनुभवोत्तरंकर्मानुष्ठाननिष्ठावृद्धिरतिशयरूपाप्रत्यक्षेणदृष्टेत्यर्थः ॥३११॥ तत्रहेतुतयाभोगानुभवस्येच्छाजनकतामाह योहीति योजंतुर्यज्जातीयंविषयंप्राप्नोतिसतज्जातीयंविषयमिच्छत्येव इच्छोत्पत्तौचास्येच्छागोचरस्यलब्धयेकर्मकुरुतेइत्यर्थः॥ ३१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रसजातीयेच्छानियममभिनयति देवांगनास्विति नृणांदेवांगनास्विच्छानभवति तासांमनुजदेहैरलब्धत्वात् एवंशुनांशुनीरेवानुभवतां तत्रैवेच्छाभवति एवंस्वर्गीयान्नपानादौस्वर्गिणामेवेच्छाततस्तएवतदर्थंयतंतेइतिभावः ॥ ३१३ ॥ ३१४॥ ततइति ततोन्वयव्यतिरेकदर्शनात्एतेषांभोगानामनुभवस्तदर्थकर्मणांवृद्धौकारणमेवेतिसंबंधः भोगानुभवेनतत्रवैराग्योदयाशातुनकर्त्तव्येत्याह कुशलएवेत्यादिना जनोविषयान्प्राप्नुवन्संस्तद्भोगेषुकुशलएवभवति तदुक्तंयोगभाष्ये भोगाभ्यासमनुविवर्द्धंतेकामाःकौशलानिचेंद्रियाणामिति ॥३१५॥

देवांगनासुमनुजैरप्राप्तासुकथंचन॥इच्छानजायतेनृणांनारीष्वेवप्रजायते ॥ ३१३ ॥ शुनामेवंननारीषु हीच्छाकिंतुशुनीष्विह ॥ एवंस्वर्गान्नपानादौविज्ञेयंसर्वदानृभिः ॥ ३१४ ॥ ततोनुभवएतेषांभोगानांकारणंमतः ॥ वृद्धौकुशलएवस्याद्विषयान्प्राप्नुवन्जनः॥ ३१५ ॥ यथाकामीधनीचैतान्बलवान्प्राप्नुवन्मुहुः॥ कामेत्रकुशलःकाममिच्छन्नेवपुनःपुनः ॥ अन्नपानादिलाभेषुद्रष्टव्यंत्वेवमेवहि ॥ ३१६ ॥ यथाभोगास्तथाकर्मदेहेंद्रियगणाअपि ॥ पुंसोनुभवमापन्नाःकारणंयान्समीहते ॥ इच्छासंस्कारसहितास्ततस्तान्शतधा व्रजेत् ॥ ३१७॥

अत्रोदाहरणंलोकेकामिनोबलवंतश्चधनिकाइत्याह यथेति एतान्भोगान्प्राप्नुवन्धनीबलीचकामुकःअत्रप्राप्तेकामेभोगेकुशलःसन्कामं तज्जातीयमिच्छन्नेवदृश्यतेइति एवंक्षुद्रलाभेष्वपिद्रष्टव्यमित्यर्थः ॥ ३१६ ॥ यथाचभोगाःस्वानुभवेनेच्छोत्पादनद्वारासंसारहेतवस्तथादेहादयोपीत्याह यथाभोगाइति यथाभोगाअनुभवमापन्नाःकारणंकर्मादिहेतुभूताउक्तास्तथाकर्मदेहइंद्रियगणश्चैतेप्यनुभवमापन्नाः कारणंयदीयान्देहादीनिच्छासंस्काराभ्यांसहितान्समीहतेरागपूर्वकंभजतेतांस्तज्जातीयांस्ततइच्छादिवशाद्व्रजतिशतधाअनेकवारानित्यर्थः ॥ ३१७ ॥ ॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहेंद्रियेति एवमुक्तविधयादेहादीनामनुभवेच्छासंस्कारैःप्रयुक्तत्वेसतिदेहादयोजनौजनौवृद्धिंव्रजंतःसंतोननियताएतद्देहोत्तरमयमेवे त्याकारकनियमरहिताः तद्धेतूनामनुभवादीनामनियमादितिभावः एतेनयोन्यंतरलाभोपिजन्मांतरीयानुभवोत्थसंस्काराणांमरणकाले समुन्मेषादितिसूचितम् ॥ ३१८ ॥ अत्रसंस्कारैर्देहादिजननेदृष्टांतःपूर्वोक्तएवेत्याह वटाइति इंद्रियादिभिःसहितादेहावटस्थानीयाःसं स्कारास्तुबीजस्थानीयाइत्यर्थः ॥ ३१९ ॥ सर्वेषुसंस्कारेषुगतंयत्सामान्यंतन्मायेत्युच्यतइत्याह संस्कारेष्विति स्पष्टं ॥ ३२० ॥ बीजां कुरेष्विति यथाचबीजेष्वंकुरेषुचानुगतंयत्सामान्यंतदविनश्वरमतएवकारणभूतंस्थायित्वात् तथाऽद्वयंतद्विशेषभूतयोर्बीजांकुरयोस्त

देहेंद्रियक्रियाभोगाएवंननियताःसदा ॥ वृद्धिंव्रजंतःसततंजंतूनांहिजनौजनौ ॥ ३१८ ॥ वटाएतेसमुद्दि ष्टाःप्राणिदेहाश्चतुर्विधाः ॥ सहेंद्रियक्रियाभोगैर्बीजंसंस्कारईरितः ॥ ३१९ ॥ संस्कारेषुचसर्वेषुसामान्यंप रिकीर्तितं ॥ मायासर्वानुगाकार्यहेतुभूतासनातनी ॥ ३२० ॥ बीजांकुरेषुयद्वत्स्यात्सामान्यमविनश्वरं ॥ कार णंत्वद्वयंकार्यंकारणंचविनश्वरं ॥ ३२१ ॥ बीजाद्वटोवटाद्बीजंप्रवाहेणयथाभवेत् ॥ संस्कारदेहयोस्तद्वत्प्रवा हेणजनिर्भवेत् ॥ ३२२ ॥ पार्थिवावयवायद्वद्वटबीजद्वयानुगाः ॥ पृथिवीचाप्यनुस्यूतातेषुनैवविनश्यति ॥ ३२३ ॥ यथातथैवमायेयंदेहानुष्ठानगामिनी ॥ नविनश्यतिचैवात्मविज्ञानंपरिहाययहि ॥ ३२४ ॥

तोभेदाभावात् यच्चपरस्परंकार्यकारणभूतंबीजांकुरयोर्युगलंतद्विनश्वरमित्यर्थः तथासंस्कारदेहयोर्विनाशेपिमायाऽविनश्वरीतिभावः ॥ ३२१ ॥ संस्काराणांदेहादीनांचप्रवाहेणव्यक्त्यनुच्छेदलक्षणेनकार्यकारणभावेपिसएवदृष्टांतइत्याह बीजाद्वटइति ॥ ३२२ ॥ मायायाः कार्यकारणयोरुभयोरनुगमेदृष्टांतमाह पार्थिवेति यद्वद्वटबीजरूपेद्वयेकार्यकारणभूतेपार्थिवाःपृथिवीसंबंधिनोऽवयवाअनुगतास्तेषुचपृ थिवीअनुस्यूताऽनुगतावटबीजयोर्नाशेपिननश्यतिप्रलयाग्निविनेत्यर्थः ॥ ३२३ ॥ यथेति अनुष्ठानपदेनकरणव्युत्पत्त्यासामग्रीप्रोच्यते तथाचदेहेषुअनुष्ठानेषुतदारंभकेषुचानुगतामायादेहादिनाशेपिब्रह्मबोधरूपकालाग्निविनाननश्यतीत्यर्थः अत्रपार्थिवावयवस्थानीया मायायाअवयवावक्ष्यमाणपरिणामविशेषरूपाबोध्याः ॥ ३२४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माययाब्रह्मणोन्यथासिद्धिवारणायोभयोःस्वरूपंविविच्यदर्शयति कार्येतिषड्भिः सर्वेषुकार्येषुकारणेषुचानुगतोयःपरिणामभागःसमा
येत्युच्यतइत्यर्थः ॥ ३२५ ॥ एतयोरिति एतयोःकार्यकारणयोस्तस्यतयोरनुगतस्यएतस्यपरिणामस्यवायत्स्मरणमनुसंधानविधया
भासकंस्फुरणंसद्रूपंतदात्मेत्युच्यते ततोदृग्दृश्यभावेनभेदस्यस्फुटत्वान्मायासतआत्मनोभिन्नेतिव्यवहारइत्यर्थः ॥ ३२६ ॥ तथाचपरिणा
मरूपेणमायायाःसत्तारूपेणब्रह्मणश्चसर्वत्रानुगमदर्शनादुभयोर्जगदुपादानत्वमित्याह परिणामश्चेति परंतुब्रह्मणस्तत्रविवर्तोपादानत्व

कार्यकारणरूपेषुपरिणामोत्रयोभवेत्॥ सतुसामान्यरूपोयंमायेत्येवनिगद्यते ॥ ३२५॥ एतयोस्तस्यवैत
स्यस्मरणंयत्सदात्मकं॥ तदात्मेतिततोमायास्वात्मनोन्येतिकीर्त्यते ॥ ३२६॥ परिणामश्चसत्ताचदृश्यतेकार्य
मात्रके॥ ततोब्रह्मचमायाचद्वयंहेतुःप्रकीर्त्यते॥ ३२७॥ सत्तैवचेदेकरूपाकार्येषुस्यात्ततोभवेत् ॥ नमाया
कारणंनैवंपरिणामोत्रकेवलः ॥ ३२८ ॥ यदिस्यात्कारणंतर्हिब्रह्मनैवात्रकारणं ॥ भवेद्द्वयंचदृष्टंतत्कारणं
तेनतद्द्वयं ॥ ३२९ ॥ परिणामस्यसामान्यंमायाप्रोक्तामनीषिभिः ॥ ततोब्रह्मचमायाचत्वसंकीर्णेव्यव
स्थिते ॥ ३३० ॥

मितिध्येयम् ॥ ३२७ ॥ उभयोर्हेतुतामेवस्फुटयति सत्तैवेति एकरूपाअन्यथाभावहीनासत्तैवयदिकार्येषुस्यादनुगतादृश्येततदामा
याकारणंनभवेत्एवंकेवलसत्तानुगमस्तुनदृश्यते तथायदिकेवलःपरिणामःकारणंकारणत्वेनानुगतःस्यात्तर्हिब्रह्मकारणंनैवभवेत् परंतुद्व
यमेवसर्वत्रानुगतंदृष्टंतेनोभयोःसममनुगमदर्शनेनद्वयोरेवहेतुत्वमितिद्वयोरर्थः ॥ ३२८ ॥ ३२९ ॥ ततःपरिणामसामान्यरूपायामाया
याश्चिद्रूपब्रह्मणोविवेकःसुकरइत्याह परिणामस्येति ॥ ३३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जडानांविकाराणांमायास्वरूपाद्यतिरेकाभावंसदृष्टांतमाह वटेतिद्वाभ्यां एवमुभयोःकारणत्वेसतिसर्ववटबीजेष्वनुगतंयत्सामान्यंतद्बी जेष्वनुगतस्यसत्तारूपब्रह्मणःशक्तिभूतंसत्स्वस्मात्सामान्याद्व्यतिरिक्तान्नानाविधान्वटान्जनयतितथामायापिपरब्रह्मणःशक्तिभूताप रिणामलक्षणाअनेकंदेहादिरूपंविश्वंजनयेत् कीदृशंविश्वं स्वात्मनःकारणादव्यतिरिक्तंबीजांकुरन्यायेनकार्यकारणरूपंचेतिद्वयोरर्थः ॥३३१॥३३२॥ व्याप्यव्यापकभावेनावस्थितंमायायारूपत्रयंदर्शयति एकैकस्मिन्नितिद्वाभ्यां यथाएकैकस्मिन्वटेसदापरिपूर्णकार्यश क्त्याख्यंसामान्यमन्यत् एकैकस्मिन्बीजेनुगतंचसामान्यमन्यत् वटबीजस्येतिसमाहारः तथाचउभयोर्वटबीजयोर्यत्संबंधित्वेनस्मृतमुभ

वटबीजस्यसामान्यमेवंशक्त्यात्मकंसदा॥वटाननेकान्जनयेत्स्वतोभेदविवर्जितान्॥३३१॥परिणामात्मि काशक्तिस्तथासामान्यरूपिणी ॥ अनेकंजनयेद्विश्वंनानादेहादिरूपकं ॥ स्वात्मनोभेदरहितंकार्यकारणरूप धृक् ॥ ३३२ ॥ एकैकस्मिन्वटेयद्वद्बीजेवास्तिसदैवहि ॥ परिपूर्णंतुसामान्यंवटबीजस्ययत्स्मृतं ॥ एकंस्थि तंचयत्तद्वद्धेतुःस्याद्वटबीजयोः ॥ ३३३ ॥ वटानामपिसामान्यंबीजानामपिचद्विधा॥ स्थितमेकंचतद्वत्सा मायाप्रोक्तामनीषिभिः ॥ ३३४ ॥ कार्येऽकार्येचसंपूर्णाविभिन्नेवचसंस्थिता॥ एकैवजीवपरयोर्भेदस्या पिचकारणं ॥ ३३५॥

येत्रैकंसमंसत्स्थितंचतत्तृतीयं नचतस्यवैयर्थ्यमित्याह यत्तद्वदित्यादिना यथावटबीजेपरस्परंहेतुभूतेतद्वद्यत्तृतीयंसामान्यंपृथिवीरूपमुभ योर्वटबीजयोर्हेतुःप्रयोजकमित्यर्थः॥३३३॥ वटानामिति इत्थंयत्सामान्यंवटानांबीजानांचसंबंधेनद्विधास्थितमुभयानुगामित्वेनएकंस त्स्थितंचयथादृष्टंतद्वत्सकलकार्यानुगामिनीसकलकारणानुगामिनीउभयानुगामिनी चसाशक्तिरूपामायामनीषिभिरुक्तेत्यर्थः॥३३४॥ इयंमायाकार्यावच्छिन्नशक्तिरूपाजीवभेदस्यहेतुःकारणावच्छिन्नशक्तिरूपाचईशभेदस्येत्याकारंजीवेशावित्यादिमंथार्थमाह कार्येका र्येइति अकार्येइतिच्छेदः इयंव्यापकरूपेणैकापियतःकार्येतथाअकार्येकारणेसंपूर्णाव्याप्तास्थिताअतोविभिन्नेवसतीजीवेशयोर्भेदस्य प्रयोजिकाभवतीत्यर्थः ॥ ३३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकस्याःस्वव्याप्यरूपाभ्यांभेदकत्वंदृष्टांतेनस्फुटयति एकैवेति यथैकाभूमिर्घटरूपागृहरूपाचसतीघटाकाशगृहाकाशयोर्भेदिकाजने लोकेप्रसिद्धातथामायापिस्वकीयाभ्यांकार्यकारणरूपाभ्यांजीवेशयोर्भेदिकेतिद्वयोरर्थः ॥ ३३६ ॥ ३३७ ॥ मायायाःस्वयंनानानामधारणंदृष्टांतेनविशदयति यथेति निगदव्याख्यातंद्वयं ॥ ३३८ ॥३३९॥ मायायाःश्रुत्युक्तानिचित्रत्वादीनिविशेषणानिस्फुटीकरोति सैषेत्यादिना सापरिणामसामान्यरूपाएषाजीवादिभेदिकाचमायाअत्यद्भुतशरीरानानासंस्कारलक्षणैश्चित्रैर्विचित्रायथारजकैर्द्विपटीसंज्ञंवस्त्रंचित्र्यतेतद्वदेतद्दृश्यमानप्रपंचरूपंचित्रंयस्यामायायाधर्मभूतेनसंस्कारात्मकेनचित्रेणबीजितंबीजंसंजातंयस्यतत्तथाभूतंजातं

एकैवचयथाभूमिःस्थिताघटगृहात्मना॥ गृहाकाशघटाकाशभेदेहेतुर्जनेभवेत्॥ ३३६ ॥ एवमेकैवमायेयंस्वात्मनोरूपभेदतः॥ जीवेशयोर्विभेदस्यहेतुर्भवतिसर्वदा॥३३७॥ यथाभूमिरिलाधात्रीकुःपृथ्वीधरणीक्षमा॥इत्यादिनामधेयानिव्रजेदेकैवसर्वदा॥३३८॥ परिणामात्मिकाशक्तिरेवमेकैवदुर्भणा॥ मायाऽविद्यातमोमोहोऽज्ञानंभ्रांतिर्विपर्ययः ॥ इत्यादीनिचनामानिप्राप्नोत्येषासनातनी ॥३३९॥ सैषामायातिचित्रांगीचित्रिताद्विपटीयथा॥एतच्चित्रात्मकंविश्वंयस्याश्चित्रेणबीजितं॥३४०॥ दृढाविनाशशून्येयंमायामूलबलान्वितः ॥ महानजोपिनैवैतामुन्मूलयितुमर्हति ॥ ३४१ ॥ महांतःश्रुतशास्त्राश्चविद्वांसोत्रदृढव्रताः ॥ अस्याविनाशनेयुक्ताभग्नदंष्ट्राःसमासते॥ ३४२॥

॥ ३४० ॥ तत्रदृढत्वंव्युत्पादयति दृढेतिसप्तभिः इयंमायादृढा दृढत्वस्यविवरणंविनाशशून्येति यतोमहान्सर्वोत्कृष्टःअजईश्वरोप्येतामुन्मूलयितुमुच्छिन्नांकर्त्तुंनार्हतिनक्षमोभवतियतोमायामूलेनबलेनान्वितः परास्यशक्तिरित्यादिश्रुतेरित्यर्थः तथाचईश्वरंनित्यसिद्धविज्ञानवंतंप्रतिमायायाअपकारकत्वाभावात्प्रत्युतेशितव्यादिनिर्माणेनईश्वरत्वसाधकत्वान्नतेनेयंहंतव्येतिभावः ॥३४१॥ जीवेषुशास्त्रविदएनामनर्थहेतुंविज्ञायोच्छेत्तुंक्षमाःपरंतुतेअनयाकुंठितोपकरणाःकृताइत्याह महांतइति भग्नामायाहननव्यापारात्पराहतादंष्ट्रादंष्ट्रावद्विदारिकामतिर्येषांतेतथासमासतेतिष्ठंति विद्वांसःप्रायशोऽनयाविषयप्रवणधियःकृताइतियावत् ॥ ३४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तार्थस्फुटत्वायमहाटवीत्वेनमायांवर्णयति अविद्येयमित्यादिना महदरण्यमरण्यानीतद्रूपेयमविद्यायतोनानाजातीयैर्जीवैश्चिदाभास लक्षणैर्व्याप्ता पंचमहाभूतभेदरूपैस्तरुभिःपूर्णा ॥ ३४३ ॥ स्नेहेति स्नेहोविषयरागस्तदात्मकानिमूलानियस्यांसातथा दुःखानिफलानि यस्यांसा पुत्रादयोरमणीयत्वाशाप्रयोजकत्वादिसाधर्म्येणप्रसूनभूतायस्यांसा तथापित्रादीति प्रसवसूचकत्वसाधर्म्यात्पितृप्रभृतयःप ल्लवायत्र विस्तारप्रयोजकत्वाद्बंधवःशाखायत्र सुखंभविष्यतीत्याकारादीर्घाशैवबीजंयत्र कालोमृत्युःसदावाग्निभूतोयत्रेति ॥ ३४४ ॥ कामेति एतस्याअरण्यान्याश्छेदकानांविवेकराजसैन्यानांशमादीनांभक्षकैःकामादिरूपसिंहैरक्षिता दुर्जनरूपैःसर्पैःकंटकैश्चव्याप्तमा र्गा नारीरूपैःपिशाचैःसंयुता जन्मादयएवदृश्चिकायत्रसा ॥ ३४५ ॥ विद्वांसइति यद्यपिविद्वांसोविद्यावंतःकारणैर्ध्यानयोगादिभि

अविद्येयमरण्यानीनानाजीवसमाकुला ॥ पंचभूतौघतरुभिःसर्वतःपरिपूरिता ॥ ३४३ ॥ स्नेहमूलादुःख फलापुत्रदारप्रसूनका ॥ पित्रादिपल्लवैःपूर्णाबंधुशाखासमाकुला ॥ सुखाशाबीजसंपूर्णाकालदावाग्न्युपद्रु ता ॥ ३४४ ॥ कामक्रोधादिभिःसिंहैःसर्वतःपरिरक्षिता ॥ भूरिदुर्जनसर्पौघकंटकावृतमार्गका ॥ नारीपि शाचसंपूर्णातथाजन्मादिवृश्चिका ॥ ३४५ ॥ विद्वांसःकारणैश्चैनामुन्मूलयितुमीशते ॥ प्रायःसर्वेपिते नित्यमनयैवकदर्थिताः ॥ ३४६ ॥ ब्रह्मविद्भद्रजात्युत्थःकश्चिदेवकरीत्विह ॥ उन्मूलयेदिमांतेनदृढेयमिति गीयते ॥ ३४७ ॥

रेनामरण्यानींक्षपयितुंसमर्थाःपरंतुप्रायशस्तेविद्वांसोऽनयामायारण्यान्याकदर्थितादीनतांनीताइत्यर्थः ॥ ३४६ ॥ ब्रह्मविदिति ब्र ह्मवेदउपनिषद्रूपस्तमर्थतोवेत्तीतिब्रह्मवित्तद्रूपोभद्रजातिःकरीसइमांमूलहीनांकर्तुंक्षमःपरंतुतस्यविरलत्वादियंदृढेत्युक्तेत्यर्थः । गजास्त्रि विधाभद्रमंद्रमृगभेदेन तत्रभद्रलक्षणंयथा प्रतिमानेसुविपुलश्चारुपृष्ठायताननः मुखेसुरभिनिःश्वासस्ताम्रजिव्हौष्ठतालुकः तथास्यतुल्य संस्थानौदंतौशुभ्रौविशेषतः मधुपिंगलनेत्रश्चमहाकायोमहाबलः पुरस्तादुच्छ्रितश्चापिपश्चादवनतस्तथा धनुर्विततवंशश्चसमपादतलःशु भः विंशत्याचनखैर्युक्तोयोष्टादशभिरेवच विद्युद्दावाग्निसिंहेभ्योनबिभेत्यंकुशादपि अन्वर्थवेदीशूरश्चक्षमावान्नचकर्कशः कल्याणमेधा स्तेजस्वीसभद्रःपरिकीर्तितइति अत्रप्रतिमानपदेनदंतयोरंतरालमुच्यते प्रतिमानंप्रतिच्छायागजदंतांतरालयोरितिविश्वप्रकाशात् वंशः पृष्टास्थि निगदव्याख्यातमन्यत् तत्रनिर्भयत्वादिकंसाधर्म्यंब्रह्मविदिविवक्षितमितिबोध्यं ॥ ३४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायायावद्वंकुरत्वंगुणभिन्नत्वंसर्वत्रब्रह्मादिव्याप्तत्वंचप्रकृतरूपकानुकूल्येनाह नानेतिषोडशभिः नानादेहानामंकुरामरणकालिक्योभा विशरीरभावनास्तद्रूपैरंकुरैर्युक्ता तथात्रिगुणात्मकपदार्थैर्नानाविधासतीस्थिता तस्यांमायारण्यान्यांमहत्सर्वत्रव्यापकंवृक्षत्रयंब्रह्मविष्णु शिवसंज्ञंतिष्ठति अनेकफलदानेनसर्वेषांसुखदमित्यर्थः॥३४८॥ एतेषांब्रह्मविदावश्याश्रयणीयत्वेप्रयोजकमाह अस्याइति अस्याउक्तार ण्यान्याःसकाशात्निर्गंतुंशक्तोविद्वान्ब्रह्मवित्तद्रूपोमहान्भद्रजातिःकरीयदिकामादिरूपैःसिंहैःकालरूपेणाग्निनाचोपद्रुतोभवेत्तदाप्रोक्त वृक्षत्रयमध्येएकमाश्रयेदुपासीततत्प्रभावादमुमुपद्रवजन्यंतापंत्यजेदितिद्वयोरर्थः ॥ ३४९॥ ३५० ॥ एतदाश्रितस्यतापाभावेहेतु

नानादेहांकुरैःपूर्णास्वयंभिन्नेवसंस्थिता॥ महावृक्षत्रयंतस्यांब्रह्मविष्णुशिवात्मकं॥ तिष्ठत्यनेकफलदंप्राणि नांसुखकारकं ॥ ३४८॥ अस्यानिर्गमनेशक्तोयदिविद्वान्महाकरी॥ उपद्रुतश्चकामादिसिंहैःकालाग्निनापि च ॥ ३४९ ॥ तत्रवृक्षत्रयस्यैकमाश्रयेदाश्रयंचयः ॥ ततस्तापममुंजत्यात्सदातद्वृक्षसंश्रयात् ॥ ३५० ॥ अत्रकामादयःसिंहास्तथाकालाग्निरेवच ॥ शक्नुवंतिप्रवेष्टुंननराश्चात्यंतभीरवः॥ ३५१ ॥ सरस्वतीतथा लक्ष्मीर्भवानीचेतिकीर्तितं॥ लतात्रयंक्रमात्तेषुत्रिषुवृक्षेषुसर्वदा॥ ३५२ ॥एकःकनकवर्णोयंतमालश्या मलोपरः॥ क्षीरवर्णस्तथान्योपिमनोनयननंदनः॥ श्वेतापीतातथाश्यामालतास्ताअपिवर्णतः ॥ ३५३ ॥

माह अत्रेति अत्रवृक्षत्रयेऽद्वितीयरूपेकामादयःसिंहाःकालाग्निर्नरामनुष्यादेहाभिमानिनइतियावत् एतेसर्वेनप्रवेष्टुंशक्तायतोत्यंतात् अंतपरिच्छेदमतिक्रांतादेतेषांस्वरूपाद्भीरवः नहिपरिपूर्णरूपेकामादीनांसंभवोव्याघातादितिभावः ॥ ३५१ ॥ एतैःसंपृक्तभावेनयथाक्र मंध्येयंदेवीत्रयंलतारूपेणवर्णयति सरस्वतीति स्पष्टं ॥ ३५२ ॥ वृक्षत्रयस्यवर्णानाह एकइति एकःप्रथमोब्रह्माकनकवर्णः अपरोद्विती यः अन्यस्तृतीयः लतानांवर्णानाह श्वेतेति सरस्वतीश्वेतालक्ष्मीपीताभवानीश्यामेत्यर्थः ॥ ३५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतेषांवृक्षांतरेभ्योविशेषमाह अवर्णाइति अवर्णानिर्विशेषरूपेणसर्ववर्णाविश्वरूपत्वात् अफलादांभिकान्प्रति सफलाःशरणागतान्प्रति निर्बीजाअनादित्वात् सबीजामंत्रमयबीजशालित्वात् आद्यंतहीनाःसर्वप्रपंचबीजभूतानित्याश्चेत्यर्थः ॥ ३५४ ॥ एतेषांपरोपकारार्थमेवावस्थानंसर्वत्रसन्निहितत्वंदुर्लक्ष्यत्वंचाह श्रमापहाइति आश्रितानांसंसारश्रमहराः यथेप्सितरूपाणांधारकाः महतांगणनायांमहीयांसोतिशयेनमहांतः सूक्ष्मगणनेत्वतिसूक्ष्माइत्यर्थः ॥ ३५५ ॥ अविद्येयमिति यद्यपीयमविद्यारूपारण्यानीघोरदुःखप्रदातथाप्यनेनब्र

अवर्णाःसर्ववर्णाश्चलतावृक्षाश्चसर्वदा॥ अफलाःसफलास्तद्वन्निर्बीजाश्चसबीजकाः॥ अनाद्यनंतानिखिलबीजभूताःसनातनाः॥ ३५४॥ श्रमापहाआश्रितानांसर्वदाकामरूपिणः॥ महतांहिमहीयांसोप्यणीयांसोप्यणीयसां॥ ३५५॥ अविद्येयमरण्यानीघोरदुःखप्रदायिनी ॥ यद्यप्येतत्तरुच्छायाप्राप्तानेनतथापिसा ॥३५६॥ एतेचैतन्यसंदीप्ताभासयंतिदिशोदश ॥ एतत्प्राप्तःसदाजंतुर्निस्तमस्कःप्रजायते ॥ ३५७॥ आनंदात्मानएवैतेस्वप्रकाशवपुर्धराः॥ तरवोजंगमाश्चैतेस्थावराश्चभवंतिहि ॥ ३५८ ॥ धर्मार्थकाममोक्षाणांचतुर्णांचफलात्मनां॥ दातारश्चित्तसंस्थानांसर्वेषामपिदेहिनां॥ ३५९ ॥ एतेकल्पद्रुमाःप्रोक्ताइमाःकल्पलताअपि॥ एतान्समाश्रितोजंतुर्नैवसीदतिकर्हिचित्॥ ३६०॥

ह्मविद्रूपेणकरिणावर्णिततरूणांछायाकांतिःसाप्रसिद्धाप्राप्ताआश्रिताइत्यतोनदुःखदेतिशेषः ॥ ३५६ ॥ तत्रहेतुतयाएतत्कांतिरविद्याभिभावकत्वमाह एतेइति एतेतरवोलताश्चचैतन्यरूपप्रकाशेनदेदीप्यमानाःसर्वंविश्वंभासयंति अतएतानाश्रितोजनस्तमसास्वरूपावरणेनहीनोभवतीत्यर्थः ॥ ३५७॥ आनंदात्मानइति एतेतरवःस्वतःस्वप्रकाशानंदरूपाएवभावानुसारेणचजंगमरूपाःस्थावररूपाश्चभवंतीत्यर्थः॥ ३५८ ॥ धर्मार्थेति पुरुषार्थचतुष्टयरूपफलानामाराधकैश्चिंतितानांदातारइति ॥ ३५९॥ एतेइति यतएतानाश्रितोजनःअवसादंवैक्लव्यंनप्राप्नोतिततएतेकल्पतरवउक्ताः ॥ ३६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 फलितमाह उन्मूलयेदिति ब्रह्मविज्ञानरूपःकरःशुंडायस्यसतथाभूतोब्रह्मविद्रूपःकरीअत्रवनेजातइमामविद्यारूपामरण्यानींदृढंमूलंस्ने हरूपंयस्यास्तथाभूतामप्युन्मूलांकुर्यात् यावद्ब्रह्मवित्स्वकीयंब्रह्मविज्ञानरूपकरंबालत्वेनकामादिसिंहकृतोपद्रवेणवादुर्बलंपश्येत्तावद्दु क्तान्वृक्षानाश्रित्यतिष्ठेदितिद्वयोरर्थः॥ ३६१ ॥ ३६२ ॥ तस्मादित्यादेर्मायेत्यंतस्यग्रंथस्यार्थमाह यस्मादितिविंशतिश्लोकैः यस्मा न्मायारूपायामरण्यान्यामेतद्ब्रह्मविष्णुशिवरूपंदक्षत्रयंमंडलंमंडलवत्सर्वंव्याप्यावस्थितंभवतितस्मात्तदीयस्वभावस्यसर्वत्रानुगमादेतत्स र्वंजगदधिदैवाध्यात्माधिभूतरूपंत्रिविधंजातं सर्वत्रैवहिस्रष्टृत्वंब्रह्मस्वभावःपालकत्वंविष्णुस्वभावःसंहर्तृत्वंरुद्रस्वभावश्चदृश्यतइतिभावः

उन्मूलयेदरण्यानींदृढमूलामिमांसदा॥ अविद्यांब्रह्मविज्ञानकरकस्तुकरीवने॥३६१॥ यावद्दृढंकरंनैनंप्राप्नु यात्तावदात्मवान्॥ वृक्षानमून्समाश्रित्यतिष्ठेद्विगतसाध्वसः॥ ३६२॥ यस्मादेतत्त्रयंमायारण्यान्यांचैवमं डलं॥ त्रिविधंसर्वमेवैतदधिदैवादिभेदवत्॥ ३६३॥ आत्मापित्रिविधःप्रोक्तोभवेदवस्थात्रयेस्थितः॥ अ भिमंतातथाहंताकर्तापिचनियामकः॥ विराट्हिरण्यगर्भाख्यईश्वरश्चेतिकीर्तितः॥ ३६४॥ विराड्जाग रणावस्थोजीवउक्तोमनीषिभिः॥ यस्यभेदस्त्रिधाध्यात्ममवस्थात्रयकारिणः॥ विश्वश्चतैजसस्तद्वत्प्राज्ञश्चप रमेश्वरः॥ ३६५॥

॥ ३६३ ॥ आत्मापीति यदाचमायाब्रह्मादिसंबंधेनगुणत्रयेणत्रिविधाजातातत्स्तत्संबंधेनात्मापित्रिविधोजातोयोजाग्रदाद्यवस्थात्र यरूपेभवेअभिमंता कथमस्यत्रित्वमतआह हंतेति हंतासंहारकःकर्त्तास्रष्टानियामकःपालकइति अस्यात्मनोऽधिदैवंवर्त्तमानस्यस्थूल सूक्ष्मकारणोपाधिकस्यक्रमिकंनामत्रयमाह विराडिति ॥ ३६४ ॥ हिरण्यगर्भस्यजीवत्वमीश्वरत्वंचेतिसिद्धांतंप्रकटयंस्तत्रविराडादि भावसामानाधिकरण्येनविश्वादिभावंदर्शयति विराडितिचतुर्भिः जागरणावस्थोविराड्बोध्यः यस्यजीवघनस्याध्यात्मंवर्त्तमानंजाग्रदा द्यवस्थात्रयंकुर्वतोविश्वतैजसप्राज्ञनामकस्त्रिविधोभेदः परमेश्वरइतिचप्राज्ञविशेषणमभेदमादायेत्यर्थः ॥ ३६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वादिभेदमेवस्फुटयति स्थूलइति स्थूलेसमष्टिरूपेऽभिमानंकुर्वन्नात्मातदासर्वस्यशरीरत्रयस्याभिमंतृत्वाद्विश्वइत्युक्तोविविधंराजमानत्वाच्चविराडित्युक्तः एवंसूक्ष्मेभिमंताहिरण्यगर्भइतिशुद्धोपाधिकत्वात्तैजसइतिचोक्तः केवलाज्ञानेभिमंताचनिर्विक्षेपसाक्षिरूपज्ञानशालित्वात्प्राज्ञइतिविश्वकारणत्वादीश्वरइतिचोक्तइत्यर्थः ॥ ३६६ ॥ जीवघनस्यहिरण्यगर्भस्यसर्वत्राहंताकरणशीलतामाह हिरण्यगर्भइति अधिदैवस्यस्थितौमर्यादायांयोभगवान्हिरण्यगर्भइत्युक्तःससर्वत्रजगत्यहंतामहमित्यभिमानंकुरुतइत्यर्थः ॥ ३६७ ॥ तस्यैवात्मनःकारणोपाधेर्नियंतृत्वमंतर्यामित्वरूपमुक्तमित्याह अधिदैवमिति नियच्छतिमर्यादायांस्थापयति ॥ ३६८ ॥ हिरण्यगर्भाख्यजी

स्थूलेदेहेभिमंतायंविश्वोजीवाभिधोविराट्॥ हिरण्यगर्भोभगवान्सूक्ष्मेहंतांप्रपद्यते ॥ अज्ञानेप्राज्ञनामायमीश्वरोविश्वकारणं ॥ ३६६ ॥ हिरण्यगर्भोभगवानधिदैवस्थितौहियः ॥ अहंतांसहिसर्वस्मिन्जगत्याप्नोतिसर्वदा ॥ ३६७ ॥ अधिदैवंहियस्त्वीशोनियंतासप्रकीर्तितः ॥ नियच्छतियतःसर्वमेकएवमहेश्वरः ॥ ३६८ ॥ अधिभूतमथाध्यात्ममधिदैवंचसंस्थितः ॥ त्रिरूपोजीवएकोयमीशवद्भातिसर्वतः॥ ३६९॥ आनंदात्मास्वयंज्योतिरयंस्फुरतिसर्वदा ॥ ईश्वरःसर्वगस्तद्वज्जीवोप्येषमहेश्वरः ॥ क्रियाज्ञानात्मकःप्राणबुद्धिरूपोप्यरूपभाक्॥ ३७० ॥ अविद्योपाधिकोयोयमानंदात्मामहेश्वरः ॥ हिरण्यगर्भोभगवान्सएवपरिकीर्तितः॥ ज्ञानक्रियाशक्तिसंस्थोविक्षेपबहुलःपुमान्॥ ३७१ ॥

वस्याधिभूताध्यात्माधिदैवाख्यैरूपैस्त्रिरूपत्वमीशसाम्यंचाह अधिभूतमिति अयंहिरण्यगर्भाख्यएकोजीवःकार्योपाधिरधिभूतादिषुसर्वत्रस्थितत्वेनत्रिरूपईशेनकारणोपाधिनासमइत्यर्थः ॥ ३६९ ॥ तत्रहेतुतयालक्षणसाम्यमाह आनंदात्मेति स्वयंप्रकाशानंदरूपत्वंव्यापकत्वंचयथेश्वरेतथास्मिन्नपीति यद्यप्ययंक्रियाशक्तिज्ञानशक्तिरूपाभ्यांप्राणबुद्धिभ्यांरूपवानुपहितस्तथाप्यरूपभाक्स्वतःसिद्धविज्ञानेनात्मानमरूपंनिर्विशेषंमन्यतेइत्यतईशसाम्यंयुक्तमित्यर्थः ॥ ३७० ॥ तच्चसाम्यमात्यंतिकत्वादैक्यरूपमितिसूचयन्परमेश्वरस्यैवहिरण्यगर्भरूपेणावस्थानमाह अविद्येति योऽविद्याख्यमायोपाधिकईशउक्तःसएवज्ञानक्रियाशक्त्युपाधिःसन्हिरण्यगर्भउक्तोयत्रमायाकृतोविक्षेपःप्रचुरोदृश्यतइत्यर्थः ॥ ३७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपाध्योरपिकार्यकारणविधयाअभेदइतिदर्शयन्ज्ञानक्रिययोःसकलप्रपंचात्मकयोरीश्वरोपाधेरविद्यायाःसकाशादुत्पत्तिमाह अविद्येति मायैवावरणंकुर्वतीअविद्येत्युक्तायस्याःसकाशात्ज्ञानक्रिययोर्जनिरुत्पत्तिस्तयोरुत्पत्त्याचविश्वोत्पत्तिः यतःसर्वेप्राणादयोबुद्ध्यादयोवापदार्थाविश्वपदेनोक्ताज्ञानक्रियाशक्तिरूपाएव नहिज्ञानंक्रियांवाऽजनयंतःकेपिभावादृष्टाइतिभावः॥३७२॥ अविद्यायाःस्वरूपं प्रागुक्तंस्मारयति अविद्येति परिणामेष्वनुगतंयत्सामान्यंतद्रूपाअविद्याईश्वरोपाधिरित्यर्थः॥ ३७३॥ तस्यामायायाःसामान्यरूपाया व्याप्यंयत्सामान्यंज्ञानक्रियात्मककार्यनिष्ठंकार्यशक्तिसंज्ञंतद्धिरण्यगर्भस्योपाधिरित्याह ज्ञानेति ज्ञानशक्तिक्रियाशक्तिसंज्ञंयन्माया

अविद्यावरणात्मोक्तायस्याज्ञानक्रियाजनिः॥ ज्ञानक्रियात्मकाःसर्वेप्राणबुद्ध्यादयोपिहि॥ पदार्थाःपंचभिर्भूतैःसहिताविश्वशब्दिताः॥३७२॥ अविद्यापरिणामस्थंसामान्यंपरिकीर्तितं॥ उपाधिरीश्वरस्येयमेकैवानेकरूपिणी॥३७३॥ ज्ञानक्रियात्मिकाशक्तिर्मायाकार्यंयदीरितं॥ पूर्वंहिरण्यगर्भस्यसउपाधिःप्रकीर्तितः॥३७४॥ हिरण्यगर्भोपाधेर्यत्सदृशंचित्ररूपधृक्॥ ततोजातमनेकंतज्जीवोपाधिरितीरितं॥३७५॥ वटबीजेतुसामान्यंप्रत्येकंपरिवर्तते॥ परिपूर्णतयातद्वन्मायासर्वत्रसंस्थिता॥ ३७६॥ ज्ञानक्रियाशक्तिरूपेबाह्येकार्येपरत्रवा॥ मृद्यस्मात्सर्वकार्येषुवर्ततेसर्वरूपिणी॥३७७॥

याःकार्यमुक्तंतत्प्रथमंहिरण्यगर्भस्योपाधित्वेनोक्तमित्यर्थः॥३७४॥ अस्त्वेवंहिरण्यगर्भस्यपरमात्मनैक्यंव्यष्टिजीवानांतुतत्कथमित्याशंकांपरिहरन्व्यष्ट्युपाधीनामपितथात्वमाह हिरण्येति हिरण्यगर्भोपाधिःसमष्टिलिंगशरीरंतत्तुल्यरूपंनानासंस्कारसंभृतत्वेनविचित्रंचयल्लिंगशरीरमनेकविधंततोमायातोजातंतद्व्यष्टिजीवानामुपाधिभूतमित्यर्थः॥ ३७५॥ तथाचमायायास्तादात्म्यंयथाहिरण्यगर्भोपाधौतथाव्यष्ट्युपाधावपीत्याह वटेति यथावटेषुतद्बीजेषुजनकतारूपंसामान्यंप्रत्येकंपरिपूर्णतयावर्ततइत्युक्तंतद्वन्मायासर्वत्रकार्येपरिपूर्णतयास्थिता कीदृशेकार्ये ज्ञानक्रियाशक्तिरूपेबाह्येअधिदैवाधिभूतरूपेपरत्रअध्यात्मरूपेवा स्वकीयकार्येषुमृद्वदितिद्वयोरर्थः॥ ३७६॥ ॥३१॥
॥३७७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain, Digitization by eGangotri

फलितमाह सर्वमिति तस्मात्सर्वोपाधीनांसर्वशक्तिमायातादात्म्यात्सर्वमुपाधिजातंसर्वात्मकंततश्चसर्वेपिजीवास्तादृशाहिरण्यगर्भसदृशास्तद्वत्परमात्मैक्यभाजइतियावत् यतोविद्यारूपोपाधौउपहितेचिदात्मनिवाभेदोनास्तिततोजीवेव्यष्टिरूपेकार्येतदुपाधौचभेदःकेननिमित्तेनस्यादित्यर्थः॥३७८॥ कथंतर्हिव्यष्टिषुपरिच्छेदानुभवइतिचेद्बुद्ध्यादितादात्म्याभिमानादित्याह अवस्थात्रयमिति जाग्रदाद्यवस्थात्रयंप्राप्तायइमेजरायुजादयोजीवास्तेसर्वेहिरण्यगर्भसंज्ञोयईशस्तत्तुल्यरूपाःसंतोयद्यपिमहतांमहीयांसोभवंतितथापिबुद्धेरणुरूपायायोगेनाल्पाःपरिच्छिन्नाजाताःघटादिसंबंधेनतदवच्छिन्नाकाशवदितिद्वयोरर्थः ॥ ३७९ ॥३८०॥ सर्वेषांवस्तुतोब्रह्मत्वेहेतुंपरमात्मनएवसर्व

सर्वंसर्वमयंतस्मात्सर्वेजीवाश्चतादृशाः ॥ अविद्यायांनभेदोस्तिनचिदात्मनिकश्चन ॥ ततोजीवेपिकार्येवा वैषम्यंकिंकृतंभवेत् ॥ ३७८ ॥ अवस्थात्रयमायाताजीवाःसर्वेचतुर्विधाः ॥ हिरण्यगर्भेशरूपायद्यप्येतेतथापिहि ॥ ३७९ ॥ महतांहिमहीयांसोप्यल्पाःस्युर्बुद्धियोगतः ॥ घटाकाशादयोयद्वत्संबंधेनघटादिना ॥ ३८० ॥ सच्चिदात्मायउक्तोयंमयापूर्वंसुरोत्तमाः ॥ हिरण्यगर्भईशश्चसएवपरमेश्वरः ॥ ३८१ ॥ विराजं चैवतंसृष्ट्वावन्ह्याद्यांश्चसहेंद्रियैः ॥ महाभूतानिकोशांश्चपंचाप्यन्नमयादिकान् ॥ ३८२ ॥ प्रविश्यसकलंस्ये तदहंताकंचुकःपुमान् ॥ आनंदात्मास्वयंज्योतिरमूढोमूढवत्स्थितः ॥ ३८३ ॥ व्यवहारानिमान्सर्वान्कार्यकारणजान्सदा ॥ पश्यन्नात्मनिमन्वानोभेदाभेदविवर्जितः ॥ ३८४ ॥

त्रप्रविश्यावस्थानमाह सच्चिदात्मेतिचतुर्भिः हेसुरोत्तमाःयःसच्चिदानंदलक्षणआत्मापूर्ववर्णितःसएवाज्ञातःपरमेश्वरोहिरण्यगर्भाख्यःपरमेश्वरोभूत्वाविराजंवन्ह्यादीन्देवानिंद्रियाणिभूतानिपंचकोशानेतद्रूपंसकलंजगत्सृष्ट्वातत्रप्रविश्यचअहंताअहमित्यभिमानःसएवस्वरूपावरकत्वेनकंचुकीभूतोयस्यसतथाभूतः वस्तुतःस्वयंप्रकाशानंदरूपोप्यमूढोपिचमूढइवस्थितइतित्रयाणांसंबंधः ॥ ३८१ ॥ ३८२ ॥ ॥ ३८३ ॥ ततश्चव्यवहारान्शरीरत्रयवर्तिनःसाक्षितयापश्यन्सन्नात्मनिमन्वानोभवतिवस्तुतोभेदाभेदकल्पनारहितइत्याह व्यवहारानिति ॥ ३८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतादृशभानेनिदानंतुमायैवेत्याह अस्येति अस्यप्रतीयमानस्यजीवादिभेदस्यहेतुःप्रयोजिकामायैव कीदृशी वश्याचित्परतंत्रासनात नीअनादिःनिर्भिन्नाभिन्नाद्भेदान्निष्क्रांतास्वतःपृथक्सत्ताहीनेतियावत् यतोवस्तुतस्तुच्छा ॥३८५॥ प्रपंचस्यमिथ्याभूतमायामयत्ववर्णनेनफलितान्यात्मनोऽद्वयत्वादीन्येकरसत्वांतानिलक्षणानिप्रतिपादयति यस्मादितित्रयोदशभिः यस्मादत्रात्मनिकोपिभेदोनास्तियतःसभेदोमायायास्तुच्छरूपायाएवकार्यंभवतितेनहेतुनायमानंदरूपआत्मावेदविद्भिर्ब्राह्मणैरवधारणेनएवकारप्रयोगेणसहितंयथाभवतितथाद्वयइत्युक्तइत्यर्थः ॥ ३८६ ॥ अत्रोपपत्तिमाह नहीति यतःस्वप्नावस्थाभवेननानाविधेनभेदेनदृष्टेनापितद्द्रष्टुःकोपिभेदोनास्तीत्यर्थः

अस्यसर्वस्यहेतुःस्यान्मायावश्यासनातनी ॥ जीवेश्वरादिभेदस्यनिर्भिन्नातुच्छरूपिणी ॥ ३८५ ॥ यस्माद्भेदोत्रमायायाःकार्यंनैवास्तिकिंचन ॥ आनंदात्मनितेनायमद्वयःपरिकीर्तितः ॥ अवधारणपूर्वंसविद्वद्भिर्ब्राह्मणोत्तमैः ॥ ३८६ ॥ नहिस्वाप्नेनभेदेननानाजीवेश्वरादिना ॥ दृष्टेनभेदःकोपिस्यात्स्वप्नद्रष्टुर्महात्मनः ॥३८७॥ सच्चिदानंदरूपाणांभेदस्यपरिवर्जने ॥ सन्मात्रएवसिद्धोयमानंदात्मामहेश्वरः ॥ ३८८ ॥ सत्तायानविनाशोस्तिमतेकस्यापिवादिनः ॥ ततोनित्यःपुमानेषनाशकारणवर्जनात् ॥ ३८९ ॥ अशुद्धंनाशमायातिजडंयद्धटादिकं ॥ तस्माद्विलक्षणःशुद्धःकुतोनाशंगमिष्यति ॥ ३९० ॥

तथाचमायामयंभेदजातंनद्वैतावहमितिभावः ॥ ३८७ ॥ सन्मात्रत्वंव्याचष्टे सच्चिदानंदेति यदाचात्मनःस्वरूपलक्षणभूतानांसदादिपदार्थानामपिपरस्परंभेदाभावःभेदांतरंचपूर्वमेवनिरस्तंततोयमात्मासन्मात्रएवेतिवाच्यइत्यर्थः ॥ ३८८ ॥ ततश्चनित्यत्वंसिद्धमित्याह सत्तायाइति सत्तायाविनाशःकेनापिवादिनानसंमतः सतःक्षणिकत्वंवदंतोबाह्याअपिधर्मिणएवक्षणिकत्वंवदंतिनतेष्वनुगतायाःसत्तायाइतिभावः ततःसत्तारूपआत्मानाशकारणहीनोनित्यइत्युच्यतेइत्यर्थः ॥ ३८९ ॥ ततश्चशुद्धत्वसिद्धिरित्याह अशुद्धमिति यतोजडत्वेनाशुद्धस्यैवनाशोदृष्टः अयमात्मातस्माज्जडाद्विलक्षणत्वेननाशायोग्यः तस्मान्नाशाभावायजडवैलक्षण्यस्यावश्यमपेक्षणात्शुद्धइत्युक्तइत्यर्थः ॥ ३९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जडवैलक्षण्येनैवबुद्धत्वमपिसिद्धमित्याह आनंदात्मेति स्वयंप्रकाशरूपेणसर्वदास्वरूपंयतोवेत्तिअनुसंदधातिततोहेतोर्जडाशुद्धरूपाज्जगतोविलक्षणःसन्नात्माबुद्धइत्युक्तइत्यर्थः ॥ ३९१ ॥ सत्यत्वंविवृणोति मिथ्येति यद्यन्मिथ्याभूतंतदनानंदात्मकमानंदभिन्नंदृष्टंयथाशुक्तिरजतं अयमात्मातुस्वयंज्योतिरित्युक्तस्ततआनंदभिन्नान्मिथ्यावस्तुनोविलक्षणआनंदरूपोभवतिततोसद्वैलक्षण्यात्सत्यइत्युक्तइत्यर्थः ॥ ३९२ ॥ सत्यवस्तुनश्चमिथ्याभूतैर्बंधनादर्शनाद्यतःसत्यस्ततोमुक्तइतिवक्तव्यइत्याह सत्यंनबध्यतइति सत्यंवस्तुस्वस्मिन्कल्पितैर्नबध्यतेनबंधनीयतेयथानानाद्रष्टृकल्पितसर्पदंडेनरज्जुर्नबध्यतेइतिप्रसिद्धंततश्चसत्यइत्युक्तआत्मामुक्तइतिसिद्धमित्यर्थः ॥ ३९३ ॥ ततोनिरंजनत्वसिद्धिंविवृणोति जायमानस्येति बंधस्यकारणमंजनमित्युच्यतेअयमात्मातुयतःस्वाभाविक्यांमुक्तौहेतुवर्जितोऽनपेक्षितसाधनकः

आनंदात्मास्वयंज्योतिःसर्वदास्वात्मविद्यतः॥ ततोविलक्षणोबुद्धोजडाशुद्धस्वरूपतः॥३९१॥ मिथ्यायद्दृश्यतेशुक्तिरजतादिस्वरूपकं॥ अनानंदात्मकंतस्यात्स्वयंज्योतिरितीरितः॥तस्माद्विलक्षणोयस्मात्तस्मात्सत्यःप्रकीर्तितः ॥ ३९२ ॥ सत्यन्नबध्यतेमिथ्याभूतैःस्वात्मनिकल्पितैः॥ रज्जुर्यथैवसर्पाद्यैःसत्योमुक्तस्ततःपुमान् ॥३९३॥ जायमानस्यबंधस्यत्व्यंजनंकारणंभवेत् ॥ यथासर्पस्यरज्जुःस्यान्मुक्तौहेतुविवर्जितः ॥ यतस्ततःपुमानुक्तोनित्यमुक्तोनिरंजनः॥ ३९४॥ कार्याणांहिपरिच्छेदोभवेद्धेतुमतामिह॥ अहेतुःपरमात्मातोविभुरुक्तोमनीषिभिः॥३९५॥ आनंदात्माद्वयस्तस्मात्सर्वतोपिपरःस्मृतः॥ अधिष्ठानंयतोध्यासात्परमुक्तंमनीषिभिः॥३९६॥प्रत्यगभ्यंतरस्तद्वद्बुद्ध्यादेःपरिकीर्त्तितः॥ ईदृक्कान्नयनंयद्वद्घटादेरांतरंस्मृतं ॥ ३९७॥

बंधस्यैवाभावेनतन्निवृत्तिसाधनानामनुपयोगादितिभावः यतएवंततोनिरंजनइत्युक्तः तत्फलंपूर्वंमुक्तत्वेनोक्तस्यापिनित्यमुक्तत्वेनव्यवहारइत्यर्थः ॥ ३९४ ॥ परिच्छेदस्यकार्यत्वव्याप्यत्वादहेतुरकार्यभूतोयतआत्माततःपरिच्छेदाभावाद्विभुरित्युक्तइत्याह कार्याणामिति ॥ ३९५ ॥ परत्वमुपपादयति आनंदात्मेति यतोधिष्ठानमध्यासादारोपितात्परमुत्कृष्टंप्रसिद्धंतस्मात्सर्वाधिष्ठानत्वाद्धेतोरयमद्वयत्वेनानंदरूपआत्मापरउक्तइत्यर्थः ॥ ३९६ ॥ प्रत्यक्त्वंवर्णयति प्रत्यगिति अयमात्मातद्वत्तथाप्रत्यगित्युक्तः यतोबुद्ध्यादेरभ्यंतरआंतरः कुतः तेषांबुद्ध्यादीनामीदृक्त्वादिदंत्वेनपराग्भावेनप्रतीयमानत्वात् अयंचतद्भासकत्वेनतद्विलक्षणोभवतीतिभावः यथाघटादेर्भास्यात्तद्भासकंनयनमांतरंसप्रत्यगुच्यतेइतिभावः ॥ ३९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकरसत्वंविवृणोति यतइति यतश्चस्वरूपभूताःसत्ताचिदानंदपदार्थाःपरस्परंभेदविवर्जितास्ततएकरसइत्युच्यते यथानानावर्णानामपिग
वांक्षीरंमधुरत्वेनैकरसमित्युच्यतेइत्यर्थः ॥३९८॥ अथप्रमाणैरेतैरवगतइतिवाक्येएतत्पदेनाद्वयादिपदानांप्रसिद्धबोधानांवापरामर्शेप्रमाण
भूतैरेतैरद्वयादिपदैःसकलबोधैर्वावगतोबोधितइत्यर्थः तत्रसकलबोधैरात्मनोबोधनेहेतुःस्फुरणरूपत्वमिति यदात्वेतत्पदंप्रमाणपदार्थविशेष
णीभूतंसत्प्रत्यक्षादिरूपतांप्रमाणानांबोधयतितदासर्वैरेतैःप्रत्यक्षादिभिःप्रमाणैःस्फुरणरूपेणबोधितइत्यर्थः एतत्सर्वंबोधयन्नाह एतैरिति अ
यमात्माएतैर्व्याख्यातैःसर्वैरद्वयादिपदैःप्रमाणभूतैरवगतः अथवाएतैर्दृश्यमात्रगोचरैःसर्वैर्बोधैःस्फुरणरूपैरवगतः अथवासर्वैःप्रमाणैःसर्व
लोकैरवगतइत्यर्थः ॥ ३९९ ॥ तत्रसर्वप्रमाणैरवगतत्वेहेतुत्वेनात्मनःस्फुरणरूपेणसर्वप्रमाणैःसंबंधमाह प्रमायाइति द्वितीयंप्रमाणपदंभा
वव्युत्पत्त्याप्रमापरं तथाचप्रमाहेतोरेवप्रमाणत्वंसर्वैर्वादिभिःपरीक्षकैरभ्युपगतंतत्रप्रमाणंप्रमारूपंतुस्फुरणमेवप्रायशोवादिभिरुक्तं कैश्चि
त्तुस्फुरणस्यहेतुरभिव्यंजिकायावृत्तिःसाप्रमेत्युक्तमित्यर्थः उभयथापिप्रमाणानांस्फुरणेनैवसंबंधइतिभावः ॥ ४०० ॥ स्फुरणस्यसत्तारू

यतःसत्ताचिदानंदाःसर्वभेदविवर्जिताः॥ततएकरसोयद्वत्क्षीरंमधुरमेवहि॥३९८॥एतैःसर्वैःपदैर्वायंबोधैः स्फुरणरूपतः॥ सदैवावगतःसर्वैःप्रमाणैर्देहधारिभिः ॥ ३९९॥ प्रमायायद्भवेद्धेतुःप्रमाणंतद्धिवादिनां॥ प्रमाणंस्फुरणंप्रोक्तंहेतुर्वास्फुरणस्यहि ॥४००॥ स्फुरणंचसदासत्तापूर्वमेवनिरूपिता ॥ प्रमाणंवाप्रमाणं वानियतंनैवकिंचन॥ यतोत्रागमयत्ज्ञानमेकमन्यंतुबोधयेत् ॥ ४०१ ॥

पेणसर्वत्रबोधेष्वनुगमंदर्शयितुंतस्यसत्तारूपतामाह स्फुरणंचेति सदासर्वकालेषुवर्तमानंस्फुरणंसत्तारूपमितिप्राङ्निरूपितंसत्ताचस्फुरणा
दन्यानैवकाचनविद्यतेइतिग्रंथेनेत्यर्थः एतेनसर्वबोधेषुअव्यभिचारेणस्वतोभासमानंस्फुरणमेवावरणाभिभाविकानांवृत्तीनांविषयइत्यु
पचर्यते अत्रार्थेतस्माच्चसत्तारूपाद्यतिरिक्तस्यकस्याप्यभावइतिहेतुःसत्तामात्रंसर्वमितिश्रुत्युक्तोयुक्तइतिसूचितं एतत्स्फुटयन्सत्ताव्यति
रिक्तार्थज्ञानानांप्रामाण्यादिव्यवस्थानुपपत्तिमाह प्रमाणमिति अत्रसत्ताव्यतिरिक्तेघटपटादिरूपेर्थेकिंचनापिज्ञानंप्रमाणमितिअप्रमाण
मितिवानियतंनियमेनविशिष्टंनैववक्तुंशक्यं तत्रहेतुंमीमांसकमतेव्यक्तीनामवाच्यत्वइवव्यभिचारमाह यतोत्रेति यतएतत्घटादिज्ञानंक
र्तृएकंघटविशेषमगमयदवोधयदेवसदन्यंघटविशेषंबोधयतीतिसिद्धमित्यर्थः तथाचप्रामाण्याप्रामाण्यप्रयोजकाभ्यांबोधकत्वाबोधक ॥३३॥
त्वाभ्यांसर्वबोधेषुदृश्यमानाभ्यांपरस्परविरोधेनप्रामाण्याप्रामाण्ययोरन्यतरन्नावधारयितुंशक्यंघटादिव्यक्तयश्चव्यभिचारेणनविषयीभ
वनार्हाइतिभावः ॥ ४०१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुत्रतर्हिसर्वमानानांमानत्वमितिचेद्यथाव्रीह्यादिशब्दाःसामान्यमसंदिग्धंबोधयंतस्तस्यैववाचकाःप्रज्ञायंतेमीमांसकैस्तथास्माभिःसर्वबोधोत्तरंसत्तासामान्यस्यैवावधारणदर्शनात्तत्रैवसर्वबोधानांमानत्वमित्याशयेनाह यद्धीति यदक्षादिकंयदर्थगोचरंबोधमवधारणज्ञानंजनयेत्तत्रैवार्थेतदक्षादिकंमानमितिकीर्तितंसर्ववादिभिरितिशेषः तथाचसर्वेलोकानांबोधामानामानाभिधाःप्रमारूपेणाप्रमारूपेणवाप्रसिद्धाःसत्तामात्रगोचराइतितत्रैवमानत्वमित्यर्थः घटोस्तीतिविज्ञानेहिघटोपलक्षितसत्तायाएवावधारणंघटांशेतुधर्मधर्मिणोरभेदन्यायेनघटाभिन्नगुरुत्वादीनामनवबोधेनसंदेहानिवृत्तिरितिभावः तदुक्तंवार्तिककृद्भिः ततोनुभवएवैकोविषयोज्ञातलक्षणः अक्षादीनांस्वविषयेयत्रतेषांप्रमाणतेति अनुभवःस्फुरणरूपासत्तैवाज्ञानगोचरत्वादक्षादीनांविषयोयतस्तद्बोधेनैवतेषांप्रामाण्यलाभइतितदर्थः ॥ ४०२ ॥ ननुपटोस्तीतिविज्ञानेघटस्याऽसत्ताव्यावृत्तिरपिप्रतीयतेतथाचाभावएवसर्वमानगोचरोस्त्वितिशंकांपरिहरति असत्ताम

यद्धियद्बोधयेद्वस्तुमानंतत्तत्रकीर्तितं॥ बोधाइत्येवजंतूनांसर्वेषामपिसर्वदा॥मानामानाभिधाःसर्वेसत्तामात्रैकगोचराः ॥ ४०२ ॥ असत्तामपियद्बोधानिषेधेयुःप्रतिष्ठिताः ॥ तेपिसत्येवगत्वांतेपर्यवस्यंतिकेवले ॥४०३॥ वंध्यायास्तनयोनास्तीत्युक्तेसतिविचार्यतां॥ कुत्रेत्यस्यास्तिवाकांक्षाप्यथवानैवसास्तिहि॥४०४॥ नास्तीतिचसमुक्तेस्मिन्वचनेसाहसंभवेत्॥ आकांक्षादृश्यतेयस्मादस्माभिःस्पष्टरूपिणी॥४०५॥

पीति येबोधविशेषाअसत्तामपिनिषेधेयुर्वारयेयुः असत्तांव्यावर्त्तयंतःप्रसिद्धाइतियावत् तेप्यंतेगत्वासतिवस्तुन्येवपर्यवस्यंतिसंबद्ध्यंतेयतस्तत्रसतिप्रतिष्ठिताः लब्धालंबनाइत्यर्थः अयंभावः निरधिष्ठानोनभ्रमइतिप्रसक्तंहिप्रतिषिद्ध्यतेइतिचसिद्धांतमनुसृत्यकुत्रचित्प्रसक्ताअसत्तावारणीया तथाचतद्वारणोत्तरंसतोधिष्ठानस्यस्फूर्तिकोवारयेदितिभावः ॥४०३॥ सतिपर्यवसानंस्फुटीकर्त्तुंसर्वत्राधाराकांक्षांदर्शयति वंध्यायाइति असत्ताप्रतिपादकत्वेनप्रसिद्धेवंध्यापुत्रोनास्तीतिवाक्यएवतावदितिविचार्यं इतिकिं अत्रवाक्येकुत्रेत्याकारकस्याधारवाचकपदस्याकांक्षास्तिनवेति ॥ ४०४ ॥ तत्रांत्यपक्षोनुभवापलापप्रसंगेनायुक्तइत्याह नास्तीतिचेति आधाराकांक्षानास्तीतिवचनाभिधानंसाहसमविमृश्यकृतिरूपंभवतियतःसाऽऽकांक्षानुभूयतइत्यर्थः ॥ ४०५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आद्येपक्षेपरिशेषेणसत्तायाःसिद्धिरित्याह आकांक्षितइति तस्मिन्कुत्रेत्याकारकेपदेसमाकांक्षितेसतितस्यपदस्ययोर्थोलोकाप्रसिद्धत्वाद
द्भुतःस्फुरतिसोयंपरिशेषेणसत्तैवभवति कीदृशीसत्ता सर्वस्यालंवनप्रदा तथाचयत्रलौकिकपदार्थआधारतयाप्रतीयतेतत्रतदाधारतयास
त्तायाःस्फूर्तिर्यत्रतुलौकिकाधारवाधस्तत्रसाक्षादेवसत्तायाआधारतयाप्रतीतिरितिभावः ॥४०६॥ फलितमाह सन्मात्रइति ततआधारत
यासत्तायाःसर्वत्रापेक्षणादेतत्तत्तदर्थविषयकत्वेनानुभूयमानंज्ञानमात्रंसर्वजातीयंज्ञानंसन्मात्रेसद्वस्तुनिव्यवस्थितंप्रतिष्ठांगतंसदेवप्रमाणं
भवतितच्चसद्वस्तुआत्मरूपमितिप्राक्प्रतिपादितमतोहेतोःसर्वैबोधाआत्मनिमानमितिसिद्धमित्यर्थः ॥ ४०७॥ अतइतिपदार्थविवृण्वन्स
देवपुरस्तादितिवाक्यार्थमाह इदंसर्वमिति यतःसर्वंदेहादिकंद्वैतंयत्राध्यस्तंसमारोपितंतत्सत्तामात्रमेवाधिष्ठानतयापारमार्थिकंभवतितच्च

आकांक्षितेपदेतस्मिन्नर्थआश्चर्यरूपभाक्॥ प्रतीयतेभवेत्सोयंसत्तासर्वाश्रयप्रदा ॥ ४०६॥ सन्मात्रेततए
वैतज्ज्ञानमात्रंव्यवस्थितं॥ प्रमाणमतएवैतेबोधामानमिहात्मनि ॥४०७॥ इदंसर्वंयतोध्यस्तंसदेहंभूतभौ
तिकम्॥ सत्तामात्रमधिष्ठानरूपंस्यात्परमार्थतः॥ ४०८॥ अधिष्ठानंपुराब्रह्मसदेवेतिचकीर्तितम्॥ सच्चिदा
नंदरूपंयत्सर्वभेदविवर्जितम्॥ ४०९॥ सिद्धमेतदतोऽद्वैतंद्वैतानुभववर्जनात्॥ अद्वैतानुभवाभावेतत्रद्वैतंक
थंभवेत्॥ अद्वैतानुभवेप्येतत्समभेवव्यवस्थितं॥ ४१०॥ यस्माद्द्वैतंनवाद्वैतंविदुषोऽविदुषोपिच ॥ कदाचि
त्कुत्रचिद्वापिप्रतीतिमुपगच्छति॥ ४११॥

सत्तामात्ररूपमधिष्ठानंब्रह्मात्मरूपंसर्वभेदराहित्यादितिपूर्वमुक्तमितिद्वयोरर्थः ॥ ४०८ ॥४०९॥ सिद्धमित्यादिग्रंथस्यार्थमाह सिद्धमि
त्यादिना अतएतांसत्सामान्यदृष्टिमादायावस्थितस्यद्वैतानुभवोयतोनभवतिततोऽद्वैतमेतत्सर्वाधिष्ठानभूतंसिद्धमपन्होतुमशक्यमित्यर्थः न
नुद्वैतविरोधात्कथमद्वैतसिद्धिरितिचेन्न अद्वैतद्वैतभानयोर्भिन्नकालिकत्वेनविरोधस्यैवाभावादित्याह अद्वैतेति येषामज्ञानामद्वैतस्यानुभ
वएवनास्तितैर्दृश्यमानंद्वैतंतत्राद्वैतरूपाधिकरणेसंसृज्यमानंकथंस्यात् येषांतुविदुषामद्वैतस्यानुभवस्तेषांमतेप्येतद्द्वैतस्याद्वैतरूपाधिकरणे
ऽसत्वंसममेवव्यवस्थितंसिद्धंविद्वद्भिर्द्वैतस्यादर्शनादेवेत्यर्थः ॥ ४१० ॥ तत्रहेतुंस्फुटयति यस्मादिति यस्माद्विदुषःप्रतीतिंद्वैतंनगच्छति अ
विदुषःप्रतीतितुअद्वैतंनगच्छतितत उक्तोऽद्वैतेद्वैताभावउपपन्नइतिपूर्वेणसंबंधः ॥ ४११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसतिभ्रांतप्रतीत्यासिद्धेनद्वैतेननाद्वैतस्यास्मदनुभवारूढस्यबाधइत्याह यदीति केषांचिदविदुषांयदिद्वैतानुभवोभवतितर्हिभवतुतावता अद्वैतेकिमनिष्टमायातंप्राप्तंस्यान्नकिमपि यतस्तदद्वैतंवस्तुतोवस्तुनोऽधिष्ठानस्यसंस्पर्शिनभवतीत्यर्थः ॥ ४१२ ॥ द्वैतस्यवास्तवत्वाभावे मायामयत्वंफलितमित्याह द्वैतमिति यतोद्वैतंनिराश्रयमधिष्ठानासंस्पर्शिविचारासहिष्णुचततोमायामयमित्यर्थः ॥ ४१३ ॥ तथापिद्वैताभावेनैवाद्वैतक्षतिरित्याशंक्यकल्पिताभावोऽधिष्ठानात्मकइतिसिद्धांतेनपरिहरति अभावोपीति खमाकाशमादिर्यस्यप्रपंचस्यसखादिः ससंश्रयःप्रतियोगितासंबंधेनाश्रयोयस्यसतथाभूतोऽभावःप्रपंचाभावोभावात्माअधिष्ठानभावरूपोऽतःप्रतियोगिनःप्रपंचस्यमायामय

यदिकेषांचिदेवायंद्वैतस्यानुभवोभवेत्॥ अस्तुनामकिमायातमद्वैतेस्यान्नवस्तुतः ॥ ४१२ ॥ द्वैतंनिराश्रयंयस्मात्प्रतीतमविचारितं॥ तस्मान्मायामयंतत्स्याद्द्वैतेपरिकल्पितं ॥ ४१३ ॥ अभावोपिचभावात्माद्दृष्टोऽतःखादिसंश्रयः॥ द्वैताभावोपितेनैतदद्वैतंतावदेवहि॥ ४१४॥ नासीन्नास्तिनभाव्येतद्द्वैतमात्मनिकेवले॥ अद्वैतस्ततएवात्मापंडितैःपरिकीर्तितः॥ ४१५॥ गंधर्वनगरंयद्वद्गगनेपरिकल्पितं॥आनंदात्मनितद्वत्स्याद्द्वैतजालंप्रकल्पितं ॥ ४१६ ॥ चिदानंदात्मरूपेस्मिन्स्वप्रकाशेऽद्वयेतथा ॥ अनेकविक्रियालेशरहितेसर्वसाक्षिणि ॥४१७॥ कथंभवेदविद्येयंविशीर्णाचततःस्वयं॥ वस्तुतोऽतोमाययैवतस्याः सत्त्वंनवस्तुतः॥ ४१८॥

त्वादृष्टःसंमतः तेनसिद्धांतेनद्वैताभावोप्यद्वैतस्यविघातकइत्यर्थः ॥ ४१४ ॥ यदाचद्वैतंकालत्रयेप्यात्मनिनसंभवतिततोयमात्माऽद्वैतइत्युक्तइत्याह नासीन्नास्तीति ॥ ४१५ ॥ आत्मनिद्वैतस्यकल्पितत्वमेवेतिदृष्टांतेनस्फुटयति गंधर्वेति ॥ ४१६ ॥ अथप्रपंचेनद्वैताभावेपितत्प्रयोजिकयामाययातुद्वैतंस्यादित्याशंकांवारयति चिदानंदेति भासमानानंदरूपेअस्मिन्नात्मनिद्वैतहीनेसर्वसाक्षित्वेनसर्वविकारहीने आदित्यवत्प्रकाशमानेचतमोरूपाअविद्यायतोनसंभवतिततइयमविद्यावस्तुनआत्मरूपवस्तुनःप्रभावात्स्वयमेवविशीर्णाप्रतिहताअतोमायायाःसत्त्वंस्थितिर्मायादृष्ट्यैवनवस्तुदृष्ट्येतिद्वयोरर्थः ॥ ४१७ ॥ ४१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मायामयत्वेनमायायाःसिद्धौदृष्टांतस्तुतमएवतद्धितेजसानसिद्ध्यतिविरोधात्किंतुतमसैवेत्याह तमसैवेति यथाघूकैःकल्पितंतमोंधकार स्तत्प्रत्यगात्मनितस्मात्तमसःप्रत्यग्विपरीतआत्मास्वरूपंयस्यतथाभूतेआदित्येवर्त्तमानस्तमसैवघूककल्पिततमोबलेनैवसिद्ध्येन्नादित्यतेज साविरोधात्तथामायापीत्यर्थः ॥ ४१९ ॥ तस्मात्हेसुराःवस्तुतोऽसंभवन्मायायाःस्वरूपंमायाकार्यवदात्मनिकल्पितमेवेतिभवद्भिर्ज्ञेय मित्याह मायायाइतिद्वाभ्यां ॥ ४२० ॥ मायाकार्यमिति तथाजडामायाप्यानंदात्मन्यध्यस्ता कीदृशी आनंदरूपेणात्मनाधिष्ठानेन रूपिणीलब्धसत्ताकेत्यर्थः ॥ ४२१ ॥ एवंसर्वस्यद्वैतस्याध्यस्तत्वेसतिबाधासामानाधिकरण्येनसर्वत्रपरमेश्वरदृष्टिःकर्त्तव्येत्याह सदा

॥३५॥ तमसैवयथासिद्ध्येत्तमस्तत्प्रत्यगात्मनि॥माययैवतथामायासिद्ध्यत्यात्मनिनिर्द्वये॥४१९॥ मायायाअपिय द्रूपमात्मन्येवप्रकल्पितं॥इत्येवतत्सुराज्ञेयंनिर्मायेप्रत्यगात्मनि॥ ४२० ॥ मायाकार्ययथाध्यस्तमस्मिन्नात्म निनिर्द्वये॥मायापिचतथाध्यस्ताजडानंदात्मरूपिणी॥ ४२१ ॥ सदानंदात्मरूपोयंचिद्वपुःस्वप्रभःपुमान्॥ मा ययासहितंविश्वंब्रह्मविष्ण्वादिकंचयत्॥स्थावरंजंगमंसर्वंतदिदंपरमेश्वरः ॥ ४२२ ॥ सिद्धोप्यसिद्धवद्भा तिमाययासर्वदेहिनां ॥ अधिष्ठानंसदासत्योबाधलेशविवर्जितः ॥ स्वप्रकाशसुखोप्येषदुःखेविपरिवर्त्तते ॥४२३॥ माययासहितोयोयंप्रपंचःपरिकल्पितः ॥ नैषोप्यसन्कुतस्तस्यस्यादसत्ताश्रयोहिसः॥ ४२४॥

नंदात्मेति यःपरमेश्वरःसदानंदादिरूपउक्तःसएवसर्वंविश्वमितिसंबंधः विष्ण्वादिकमित्यादिपदेनेशानेंद्रादिग्रहः ॥ ४२२ ॥ एतदात्मरूपंस र्वान्प्रतिद्वैतानुसंधानपूर्वक्षणेसिद्धमपिमायाबलेनासिद्धतामिवगतमित्याह सिद्धोपीति परमेश्वरपदस्यपूर्वादनुषंगः अधिष्ठानभावेनस दाकालत्रयेपिसत्योध्रुवस्तथायंस्वप्रकाशसुखरूपोदुःखेदुःखरूपेदेहादौकल्पितेसतिविपरिवर्त्ततेअन्यथाप्रतीयतेइत्यर्थः ॥ ४२३ ॥ अ स्यात्मनोलाभोपायश्चसर्वत्रतद्दृष्टिरित्यतःप्रपंचस्यापिसत्त्वंसाधयति माययासहितइति मायासहितःप्रपंचोयःकल्पिततयावर्णितएषो प्यसन्नलीकात्मकोनभवति तथात्वेहितस्यप्रपंचस्यासत्तारूपोधर्मोपिकुतःस्यात् हियतःसःअसत्तारूपोधर्मोप्याश्रयेकुत्रचिदालंबनेए वभवतीत्यर्थः ॥ ४२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथापिसर्वत्रसादृष्टिर्दुष्करान्तृश्रृंगादौवाधादित्याशंकांपरिहरन्फलितमाह असतामिति असतामसत्पदार्थतयाप्रसिद्धानामपिसद्रूपत्वमुक्तंनञः पर्युदासार्थमाश्रित्य यथाऽनश्वपदगतोनञ्अश्वभिन्नमश्वसदृशंचभावमेवाभिधतेतथाप्रसिद्धसज्ञःकार्यक्षमेभ्यःकार्याक्षमत्वेन विलक्षणंवस्तुसूक्ष्मरूपंवुद्धिस्थरूपंवाअसदित्युच्यतेइति आत्मसत्तामादायसत्वंतुसर्वस्यसममेवेतिवर्णितंप्रथमाध्यायेततःसर्वस्यसदात्मकत्वेनकाचित्क्षतिरित्यर्थः ॥ ४२५ ॥ इत्थंसर्वस्यसद्रूपत्वेपिमायादिजडप्रपंचआत्मनःस्वरूपत्वेननबोध्यः याचितमंडनन्यायेनसत्तादौपरसापेक्षत्वात्स्वरूपत्वस्यनिरपेक्षतानियमादित्याह नहीदमिति इदंजडंसविलासमायारूपंवस्तुतआत्मनोरूपंनभवति यत्यतस्ततस्तत्रैवात्मनिप्रकल्पितमध्यस्तंपरसत्ताद्युपजीविभवतीत्यर्थः ॥ ४२६ ॥ किंतर्ह्यात्मनःस्वरूपमितिचेयत्सदानंदादिलक्षणंपूर्वोक्तमित्याह स

असतांचसदात्मत्वमनश्वादिवदीरितं ॥ ततःसदात्मकंसर्वमुक्तमेवव्यवस्थितम् ॥४२५॥ नहीदमात्मनोरूपं भवेद्वस्तुस्वरूपतः ॥ जडंमायास्वरूपंयत्ततएवप्रकल्पितं ॥ ४२६ ॥ सदानंदात्मरूपंयत्स्वप्रकाशचिदात्मकं ॥ सर्वसाक्षितदेवात्मरूपमेतत्पुरोदितं ॥ ४२७ ॥ नित्यमन्यत्ततोयत्स्यात्तदनित्यमितीरितं ॥ किंतन्नित्यमिति प्रश्नोमंदानांव्यर्थएवहि ॥ नित्यआत्मायतःपूर्वमस्माभिःपरिभाषितः ॥ ४२८ ॥ संदेहस्ततएवात्रनकर्तव्यः सुरोत्तमाः ॥ आत्मनैवयतःसर्वंजडजातंप्रसिध्यति ॥४२९॥ वुद्ध्यायदीक्ष्यतेबुद्धेर्वीक्षकेणैवसर्वदा ॥ विक्रियालेशशून्येननिर्मायेनमहात्मना ॥ ४३० ॥

दानंदेति ॥ ४२७ ॥ तत्रहेतुभूतस्यनिरपेक्षत्वस्यस्फुटीकारायनित्यत्वंसिद्धत्वंचसाक्षिरूपस्यवर्णयति नित्यमितिचतुर्भिः तदात्मनोरूपंनित्यंध्रुवंनिरपेक्षमितियावत् यतस्तद्व्यतिरिक्तमनित्यमितिप्रसिद्धंश्रुत्यादौ तत्रनित्यपदार्थावधारणायप्रश्नोनयुक्तः आत्मनइतरत्रपरसापेक्षत्वेनविशरणशीलेनित्यत्वप्रसक्तेरेवाभावादित्याह किंतन्नित्यमिति ॥ ४२८ ॥ संदेहइति ततइतरत्रनित्यत्वासंभवादेवसंदेहःकोटिद्वयालंवनरूपोनकार्योयतोजडजातमात्मवलेनैवसिद्ध्यतीतिस्फुटानित्यत्वकमित्यर्थः ॥ ४२९ ॥ कथमात्मनैवसिद्ध्यतीत्याकांक्षायामाह बुद्ध्येति यद्यस्मात्वुद्धेर्वीक्षकेणसाक्षिणाआत्मनावुद्ध्याचवृत्तिद्वारासर्वंवीक्ष्यतेप्रकाश्यतइत्यर्थः ॥ ४३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसर्वसाधकस्यसिद्धत्वंनकेनाप्यपलपनीयमित्याह बाह्यांतरमिति यतोयंपुमान्बाह्यांतररूपंसर्वंस्पष्टंसमीपंचयथाभवतितथावीक्षते वीक्षणेनसाधयतितथापिसर्वसंगविवर्जितश्चभवतिततोवैदिकैःसिद्धोनित्यश्चेतिकथ्यतेइत्यर्थः ॥ ४३१ ॥ ब्रूतेत्यादिग्रंथार्थंदर्शयितुमुपक्रमते अमराइति भोअमरायोमयोक्तःप्रतिपादितःसोयमात्माभवद्भिरवधारितोनवेत्येवंतेनगुरुणाब्रह्मणाउक्तेपृष्टेसतितंब्रह्माणंप्रतीदमूचुरित्यर्थः अंत्यंपदद्वयमुत्तरान्वयि ॥ ४३२ ॥ इदंकिमित्याकांक्षायांपूर्वोपदेशेनचिदाभासमात्मानंमन्वानैर्देवैरुक्तंवाक्यमभिनयति व्य

बाह्यांतरमिदंसर्वंवीक्षतेसौयतःपुमान् ॥ अतिस्पष्टंसमीपंचसर्वसंगविवर्जितः ॥ सिद्धस्ततोयंनित्यश्चकथ्यतेवेदवादिभिः ॥ ४३१ ॥ अमराःसोयमात्माकिंभवद्भिरवधारितः ॥ मयोक्तइतितेनोक्तेब्रह्मणादेवसत्तमाः ॥ ऊचुस्तंपरमेशानंब्रह्माणंदृष्टईदृशः ॥ ४३२ ॥ व्यवहारेणशून्योयमवाङ्मनसगोचरः ॥ बुद्ध्युपाधिस्तथैवाल्पोत्यस्मभ्यंभवतेरितः ॥ ४३३ ॥ इत्युक्तेतानुवाचेदममरान्सप्रजापतिः ॥ सुराअल्पोमयानायमात्मायुष्मभ्यमीरितः ॥ ४३४ ॥ किंतुसाक्ष्यविशेषात्माद्यनन्योभवदादिभिः ॥ सुखदुःखादिरहितोनिर्द्वयःपरमःपुमान् ॥ ४३५ ॥

वहारेणेति हेभगवन् अस्माभिरीदृशोयमात्मादृष्टः ईदृशःकीदृशः लौकिकानांव्यवहारानारूढः अतएववागाद्यतीतोबुद्ध्यवच्छिन्नत्वेनाल्पश्चभवतावर्णितइति ॥ ४३३ ॥ इत्थंतैरुक्तेसतिप्रजापतिस्तेषांभ्रमंवारयंश्चिदाभासेऽसंभवद्भिर्विशेषणैरात्मानंवर्णयामासेत्याह इत्युक्तेइति हेसुराःमयात्माअल्पतयानोक्तःकिंतुसाक्षिरूपउक्तः कीदृशः अविशेषात्माविषयप्रयुक्तैर्विशेषैर्हीनआत्मास्वरूपंयस्यसतथा भवत्प्रभृतिभिःप्रमातृभिरनन्यःअधिष्ठानतयातादात्म्यशालीसुखादिधर्मैर्वर्जितःअद्वयःपरःसर्वोत्कृष्टःपुमान्सर्वसंघातानांपालकश्चेतिद्वयोरर्थः ॥ ४३४ ॥ ४३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वज्ञइति यथासर्वज्ञःसर्वभेदराहित्यादनंतश्चप्रसिद्धः तत्रतस्यात्मनःसर्वज्ञत्वंकादाचित्कज्ञानेननबोध्यंकिंतुकालत्रयेपिवर्त्तमानेनस्वप्र काशचिद्रूपेणैवेति याचउक्तरूपेभ्योविपरीतताअन्यथात्वंप्रतिभातितत्रप्रयोजकोमायायायोगःकल्पितसंबंधएव ततोविपरीततायामा याप्रयुक्तत्वात् अस्यत्वंपदलक्ष्यस्यमहात्मनस्तत्पदार्थपर्यवसन्नस्यवर्णितंरूपंसुस्थितमेवेतिद्वयोरर्थः ॥ ४३६ ॥ ४३७ ॥ यूयमे वेति समयावर्णितोभवतोयुष्मान्प्रतिकिंदृष्टोनवेतिपृष्टश्चयआत्मासयूयमेवभवतांस्वरूपमेवयतस्तस्मादात्मनोन्यत्किंचिदपिनास्तीत्यर्थः ॥ ४३८ ॥ एवमुक्त्वेति एवंसुरान्प्रत्युक्त्वोपदिश्यप्रजापतिस्तान्सुरानिदमपृच्छत् इदंकिं अद्वयोद्वितीयाभावेनसूचितस्वप्रकाशताकआ

सर्वज्ञश्चतथानंतःसर्वभेदविवर्जनात् ॥ सर्वज्ञत्वंचतस्यैवस्वप्रकाशचिदात्मना ॥ ४३६ ॥ कालत्रयेपिमाया यायोगात्तद्विपरीतता ॥ प्रतिभातिततस्तादृग्रूपमस्यमहात्मनः ॥ ४३७ ॥ यूयमेवसआत्मायोमयादृष्टइतीरि तः ॥ भवतोनततोन्यद्धिकिंचिदत्रतुविद्यते ॥ ४३८ ॥ एवमुक्त्वासुरान्ब्रह्मातानपृच्छत्किमद्वयः ॥ दृष्टआत्मे तितेप्रोचुर्ब्रह्माणंपरमेष्ठिनं ॥ स्वप्रकाशःकुतश्चात्मेत्येवमुक्तोब्रवीद्धितान् ॥ ४३९ ॥ स्वप्रकाशेयतोमायात मोरूपानतिष्ठति ॥ मायाभावाच्चनद्वैतंतस्मिन्नात्मनितिष्ठति ॥ ४४० ॥ द्वित्वाभावात्परोनास्मिन्प्रकाशःकोपि विद्यते ॥ स्वयंज्योतिस्ततःसोयंपुरुषोमाययाविना ॥ ४४१ ॥ अद्वैतताततस्तस्यपुरुषस्यप्रकीर्तिता ॥ अद्वैत त्वाच्चपुरुषोनिर्मायश्चस्वयंप्रभः ॥ ४४२ ॥

त्माकिंदृष्टोनवेति तेचसुराद्वैतानुभवेनात्मनःस्वप्रकाशतामसंभावयंतोब्रह्माणंप्रतीदमूचुः इदंकिं आत्मनःस्वप्रकाशतैवकथमिति एवंसुरै रुक्तःपृष्टोब्रह्मातान्सुरानिदमब्रवीदित्यर्थः ॥ ४३९ ॥ श्रुतौप्रजापतिनायूयमेवेत्युक्तंद्वितीयाभावेनस्वप्रकाशत्वमभिनयति स्वप्रका शेतिचतुर्भिः यतोस्मिन्नात्मनिस्वस्यमायास्वरूपस्यप्रकाशकेमायानतिष्ठति यद्यात्मनिस्थितास्यात्तर्ह्यात्मनानप्रकाश्येतचक्षुषास्वस्थि तांजनवदितिभावः ततश्चमायाप्रयुक्तद्वैताभावेनपरस्यप्रकाशकस्यासंभवात्स्वयंज्योतिष्ट्वंफलितमितिद्वयोरर्थः ॥ ४४० ॥ ४४१ ॥ अ द्वैततेति ततउक्तविधयास्वप्रकाशतासूचनायैवश्रुतौअद्वैतताकथिता अद्वैतत्वोक्त्याचनिर्मायत्वंस्वप्रभत्वंचपुरुषस्यसिद्धमित्यर्थः ॥ ४४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंद्वैताभावेचयुष्माकमेवस्वरूपंस्वप्रकाशादिलक्षणंपरिशिष्टमित्याह यत्रेति यत्रपरमार्थनिरूपणायांसमस्तद्वैताभावस्तत्रयूयमेवपरिशिष्टाइति ॥ ४४३ ॥ अथब्रूह्येवभगवन्नितिदेवप्रश्नस्याभिप्रायमाह अद्वयत्वेनेतित्रिभिः यदाचात्मनोऽद्वयत्वमुच्यतेतदासंगादिदोषदुष्टायाःसविलासमायायाअप्यात्मनःस्वरूपेस्वप्रकाशतयोक्तेप्यवस्थितिःप्रवेशःस्यात् तथाचससंगस्यकथंस्वप्रकाशत्वमितिस्वीकृत्याभिप्रेत्यदेवाःपुनःपप्रच्छुरित्यर्थः ॥ ४४४ ॥ प्रश्नमभिनयति असंगतेति जडप्रपंचेनसहतादात्म्यरूपोयःसंगस्तेनयुक्तस्यातएवास्माभिर्दृश्यस्यास्माकंद्रष्टॄणांदृश्यभावमापन्नस्यईशितुर्मायोपाधिकत्वेनेश्वरसंज्ञस्यचात्मनोऽसंगत्वस्वप्रकाशत्वेकथंस्याताामित्यर्थः ॥ ४४५ ॥ इ

यत्राद्वैतंनकिंचित्स्याद्यूयमेवव्यवस्थिताः ॥ सर्वभेदविनिर्मुक्ताःस्वप्रभाःसुखरूपिणः ॥ ४४३ ॥ अद्वयत्वेन मायायाःस्वप्रकाशेप्यवस्थितिं ॥ स्वीकृत्यचोदयामासुःपुनर्देवाःप्रजापतिं ॥ ४४४ ॥ असंगतास्वप्रकाशरूपताचकथंभवेत् ॥ तादात्म्यसंगयुक्तस्यदृश्यस्यास्माभिरीशितुः ॥ ४४५ ॥ इत्यभिप्रायतश्चोद्येकृतेतान्पुनरेव हि ॥ अब्रवीद्भगवान्धाताशिष्यस्नेहसमन्वितः ॥ ४४६ ॥ युष्माकंयदिभेदःस्यादात्मनःकोपिकर्हिचित् ॥ तदानयोश्चतादात्म्ययोगात्संगोपिसंभवेत् ॥ ४४७ ॥ यूयमेवयदास्वात्मरूपाःस्वेनैववीक्षिताः ॥ तदासंगःकुतो वास्यादात्मनोनिर्द्वयस्यहि ॥ असंगस्ततएवात्माभवतांचस्वयंप्रभः ॥ ४४८ ॥

त्यभिप्रायतइति एवंदेवैश्चोद्येप्रश्नेकृतेसतिइतिवक्ष्यमाणरूपेणाभिप्रायेणब्रह्माकारुणिकोयूयमित्यारभ्ययूयमेवेत्यंतग्रंथेनोत्तरंददावित्यर्थः ॥ ४४६ ॥ प्रजापतेरभिप्रायमेवाभिनयति युष्माकमिति माययैवभवतामात्मासद्वयत्वेनप्रथतेनवस्तुतः तस्यसद्वयत्वेनप्रदर्शनन्तुमौढ्यलिङ्गं यदिचवस्तुतोयुष्माकमात्मनःस्वरूपस्यकोपिभेदःसंभवेत्तदाअनयोर्दृग्दृश्ययोस्तादात्म्यरूपाद्योगात्संगःपरप्रकाश्यत्वंचभवेदेवेत्यर्थः ॥ ४४७ ॥ परंतुवस्तुतःकोपिभेदोनास्तीत्याह यूयमेवेति यदाचहेदेवायूयमेवस्वात्मरूपाःसुष्ठुशोधितआत्मासर्वांतरोभावःस्वरूपंयेषांतेतथाततइतरस्याभावाच्चस्वेनैववीक्षिताःस्वप्रकाशाइतियावत् एतादृशाःस्थतदासंगदोषआत्मनःकथंस्यात् तथाचपूर्वोक्तंस्वयंप्रकाशत्वमुपपन्नमित्यर्थः ॥ ४४८ ॥ ॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेतिहोचुरित्यादेर्देवप्रश्नस्यार्थमाह इत्युक्तेइतिद्वाभ्यां इत्येवंब्रह्मणोक्तेसतितंब्रह्माणंसुराइत्यूचुः इतिकिं अस्माकंस्वप्रकाशत्वंनसंभवति यतोज्ञानेनसंविदाख्येनआत्मानमेवप्रपंचभावापन्नंजानीमोविषयीकुर्मोघटादिवत् ॥४४९॥ तत्रहेतुतयाअसंगत्वप्रयोजकतयोपन्यस्त मद्वयत्वमाहुः असंगाइति हेब्रह्मन्यतोनिर्द्वयाःततोयतःअसंगाभवामःअतआत्मानमेवप्रपंचरूपंविषयीकुर्मःयतोऽद्वयत्वेनैवजगच्छरीरा दीश्वरादप्यस्माकमभेदआपादितइत्यर्थः तथाचाद्वयत्वेपिविषयविषयीभावानिवृत्तिरितिभावः॥४५०॥ यावदद्वयत्वंनभासतेतावदेवस विलासमायास्थित्याद्वैतोपलंभः अद्वयत्वबोधेमायोपमर्दकेजातेतुविषयविषयीभावएवभवतांस्वरूपेकथमवशिष्टइत्यभिप्रायकस्यकथं

इत्युक्तेतंसुराऊचुःस्वप्रकाशावयंनहि॥ ज्ञानेनयतआत्मानंजानीमोत्रघटंयथा ॥ ४४९ ॥ असंगास्तुयतो ब्रह्मन्भवामोनिर्द्वयायतः॥ अस्मत्तोनैवभिन्नोस्तियतोयंजगदीश्वरः॥ ४५० ॥ एवमुक्तेथतान्प्राहब्रह्मालो कगुरुःसुरान्॥ यूयंयदाद्वयात्मानस्तदाज्ञानात्कथंसुराः ॥ पश्यंत्यात्मानमत्रैतंभवंतोद्वयवर्जिताः॥ ४५१ ॥ एवमुक्तेसुराऊचुर्ब्रह्माणंपुनरेवतं॥ उपपत्तिंवयंब्रह्मन्जानीमोनात्मबोधने ॥ आत्मानमपिजानीमःप्रमाणं भगवानिह ॥ ४५२॥

पश्यंतीतिप्रजापतिवाक्यस्यार्थमाह एवमुक्तेइति एवंदेवैरुक्तेसतितान्प्रतिब्रह्मासर्वलोकगुरुरिदमाह इदंकिं हेदेवायदायूयमद्वयाःसंपन्ना स्तदाभवंतोज्ञानेनात्मानमेवकथंपश्यंतिविषयीकुर्वंति तदानीमात्मनोविषयीकरणमसंभविद्वयवर्जितत्वादेवेत्यर्थः॥४५१॥ ततोनविद्मइ तिवाक्यस्यार्थमाह एवमुक्तेसुराइति एवंब्रह्मणोक्तेसतितंब्रह्माणंपुनरिदमाहुः हेब्रह्मन्वयमात्मनोऽद्वयस्यबोधनेज्ञानेनविषयीकरणेउपप त्तिसंभावकयुक्तिनजामीमःपरंत्विदानीमपिप्रपंचभूतात्मानंजानीमः इहस्वानुभवशास्त्रोपदेशयोर्विरोधेनव्याकुलत्वेसतिनोस्माकंभग वानेवप्रमाणं यद्भगवान्वदिष्यतितदेवावधारयिष्यामइत्यर्थः ॥ ४५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वैतानुभवोयुष्माकंभ्रमइत्यावेदकस्यततोयूयमित्यादेरद्वयमित्यंतस्यप्रजापत्युत्तरवाक्यस्यार्थमाह एवमुक्तेपुनरितिचतुर्दशभिः स्वस्कंधारोहणइवस्वात्मनएवबोधनेविषयीकरणेकाचिदप्युपपत्तिर्भवतांमहामतीनामपियदानप्रतिभातिअतएवात्मनःस्वप्रकाशत्वमद्वयत्वेनोक्तमवधारयत विषयतयोपलंभेत्वनात्मज्ञत्वप्रसक्तिरुक्तैवेतिद्वयोर्भावः ॥४५३॥४५४॥ यदिसंविद्रूपेणतद्विषयरूपेणचात्मनःस्वरूपेभेदोवास्तवोऽभविष्यत्तदाविषयविषयीभावेकाचिदुपपत्तिर्भवतामस्फुरिष्यदेव इदानींतुसंविदेकरूपतयावधारितस्यात्मनोविषयत्वेउपपत्तेरस्फुरणाद्विषयतायाअभावएवेत्याह आत्मनइति यद्यात्मपदार्थस्यसंवित्पदार्थस्यचवास्तवोभेदःस्यात्तदातयोर्विषयविषयीभावेभवता

एवमुक्तेपुनर्ब्रह्मज्ञातान्सुरानब्रवीद्गुरुः॥ उपपत्तिंयतोनैवभवंतःस्वात्मबोधने॥ ४५३॥ पश्यंतिबुद्धिमंतोपि सर्वशास्त्रविशारदाः॥ ततोयूयंस्वप्रकाशाःसर्वभेदविवर्जिताः॥ ४५४॥ आत्मनःसंविदोवापियदाभेदोभ वेत्तदा॥ उपपत्तिःकथंनामनभायाद्भवतामिह ॥ ४५५॥ आनंदात्मास्वयंज्योतिरद्वयोभगवान्परः ॥ नच भेदोत्रकोप्यस्तितस्मिन्नद्वयरूपिणि ॥ ४५६ ॥ यदायमहमस्मीतिज्ञायतेद्वयवर्जितः ॥ आत्मातदानको प्येषभेदोभातिस्वयंप्रभे ॥ ४५७ ॥ अवाङ्मनसगम्योयंसर्वभेदविवर्जितः॥ व्यवहार्योनकस्यापिभवेदा त्माकथंचन॥ ४५८ ॥ अतएवतमात्मानंगुरवोमौनतःसदा॥ आदिशंतिनिजान्शिष्यान्व्यवहारविवर्जि तं ॥ ४५९ ॥

मुपपत्तिर्भायात्स्फुरेदेवेत्यर्थः ॥ ४५५॥ अत्रतुसंविदेकरूपेआत्मनिनकोपिभेदइत्याह आनंदात्मेति स्पष्टम् ॥४५६॥ अत्रभेदाभावेनुभवंप्रमाणयति यदायमिति अयमात्मायदाअहमितिअस्मीतिवाप्रत्यग्रूपेणभासतेद्वैतस्फुरणप्रथमक्षणेसमाधौवातदास्मिन्विषयविषयीभावःकेनदृष्टइत्यर्थः ॥ ४५७ ॥ नचव्यवहारबलेनात्रभेदापादनंयुक्तं आत्मनिव्यवहारयोग्यतायाएवाभावादित्याह अवाङ्मनसेति व्यवहारकारणाभ्यांवाङ्मनसाभ्यांपरत्वात्तद्विषयेणभेदेनचवर्जितत्वादयमात्माकेनापिनव्यवहार्यइत्यर्थः ॥ ४५८ ॥ नचोपदेशानुपपत्तिमौनेनापितत्संभवादित्याह अतएवेति अतोऽव्यवहार्यत्वादेव आदिशंतिउपदिशंति ॥ ४५९ ॥ ॥३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवाङ्मनसगम्यत्वेहेतुंस्थूलसूक्ष्मप्रपंचाभ्यांसदसत्पदवाच्याभ्यांविविक्तत्वमाह वचसइति॥४६०॥ किंचाव्यवहार्यपदेनावस्थात्रयविवेकःसूचितइतिदर्शयितुंपूर्वोक्तंकारणाद्यवस्थात्रयमधिदैवादिभावेनव्यवहार्यंस्मारयति असत्यविद्येतिपंचभिः इयंकारणशरीरभूताअविद्यास्वतस्तुच्छापिकार्यमुत्पादयंतीसतीवभवति साचस्वतःसत्ताहीनाप्यात्मानमाश्रित्यसत्तादिकंलभमानाततःकार्यारंभाच्चव्यवहारयोग्याभवतीत्यर्थः ॥ ४६१ ॥ तत्रेति तत्रतस्यामविद्यायांस्थितःप्रतिबिंबितआत्माईश्वरइतिव्यवह्रियते सएवेश्वरःस्वात्मबुद्धितईक्षणेनकदाचिदुत्पन्नेनरूपवान्प्राणाद्युपहितःसन्जीवपदेनव्यवहार्यईरितइत्यर्थः ॥ ४६२ ॥ हिरण्येति सप्रथमंकार्यमितिप्रसिद्धोहिरण्य

वचसोमनसस्तद्वत्प्रवृत्तिःसत्यसत्यपि॥ सदसद्रूपनिर्मुक्तेकथमात्मनिसाभवेत्॥ ४६०॥ असत्यविद्यातुच्छेयंसतीवस्यात्स्वकार्यतः॥ आत्माश्रयत्वाच्चततोव्यवहार्याहिसाभवेत्॥ ४६१ ॥ तत्रस्थितस्तुभगवानीश्वरः स्वात्मबुद्धितः॥ व्यवहार्यःकदाचित्सरूपवान्जीवईरितः॥४६२॥ हिरण्यगर्भःप्रथमंकार्यमाधिक्यमागतः॥ यःसदेवोत्रजीवःस्यादीश्वरश्चातिशक्तिमान्॥ विराडपितथाप्रोक्तोभगवान्भूतभावनः॥ ४६३ ॥ तत्रायंसर्वदाध्यात्मरूपएवंप्रकीर्तितः॥ प्राज्ञश्चतैजसस्तद्वद्विश्वावस्थाचयास्थिता॥ ४६४॥ अवस्थात्रयगोदेवोजीवइत्यभिधीयते॥ शब्दभेदात्ततस्त्वेतेजीवईशादिकाःस्मृताः॥४६५॥ अवस्थात्रयनिर्मुक्तंपरंरूपंतदेवहि॥ आनंदात्मस्वयंज्योतिस्तुरीयमितिगीयते॥ व्यवहारप्रसिद्ध्यर्थमवाङ्मनसगोचरः ॥ ४६६ ॥

गर्भाख्योजीवःसएवेश्वरश्चेत्युच्यतेयतआधिक्यंस्वतःसिद्धज्ञानादिरूपमागतःप्राप्तः अतिशयितशक्तिशालीचभवतीति तथासएवस्थूलसमष्ट्युपाधिर्विराडित्युक्तइत्यर्थः ॥ ४६३ ॥ तत्रायमिति तत्रवर्णितेउपाधित्रयेयदध्यात्मंव्यष्टिरूपंतदुपहितरूपःसन्नयमात्माप्राज्ञादिसंज्ञउक्तइत्यर्थः ॥ ४६४ ॥ अवस्थेति यतःसएवात्माअवस्थात्रयेसुषुप्त्यादौगतःसन्जीवइत्युक्तस्ततएतेईश्वरहिरण्यगर्भादयःशब्दाएकस्मिन्जीवेजीवपदलक्ष्येचैतन्येएववर्ततेइतिसिद्धमित्यर्थः ॥ ४६५ ॥ व्यवहारप्रयोजकोक्तावस्थात्रयविमुक्तमात्मस्वरूपंतुरीयमित्युक्तमित्याह अवस्थात्रयेति अस्यतुरीयत्वेनव्यवहारोप्यवस्थात्रयनिरूपितंभेदमपेक्ष्यैवनस्वतइत्याह व्यवहारेति ॥ ४६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वव्यवहार्यस्योपदेशएवभवताकथंकृतइत्याशंकांपरिहरति मयापीति एवंतुरीयत्ववत्कांश्चनधर्मानारोप्यैवभवतामादिष्टइति॥४६७॥ ज्ञातोवैषइत्यादिग्रंथोक्तेप्रश्नोत्तरेवर्णयति भवद्भिरितिद्वाभ्यां हेदेवाःसमदुक्तआत्माकिंभवद्भिर्ज्ञातोनवेतिब्रह्मणोक्तेपृष्टेसतिअथतंब्रह्माणंसुराइतिप्रोचुः इतिकिं हेभगवन्तुभ्यंगुरवेपृच्छतेअवश्यंवक्तव्यत्वेपिज्ञातत्वाज्ञातत्वयोर्मध्येऽन्यतरत्किंब्रूमउभयोर्बाधात् यतोभवदुक्तआत्माविदिताज्ज्ञानगोचरादविदितादभासमानाच्चपरोविलक्षणोभवतिततउभयवैलक्षण्यादेवंवदामः अयमात्माज्ञातोपिभासमानोपिनज्ञातइववर्त्ततेअविषयत्वादितिद्वयोरर्थः ॥ ४६८ ॥ ४६९ ॥ एवंदेवैस्त्वंपदार्थतयायथावदात्मनिविज्ञातेसत्यथब्रह्मातद्वाएतदि

मयाप्येवंसमादिष्टोभवतांसमहेश्वरः॥ अवाङ्मनसगम्योपिधर्मानारोप्यकांश्चन ॥ ४६७॥ भवद्भिःसतु देवाःकिंज्ञातोनज्ञातएववा ॥ इत्युक्तेतमथप्रोचुर्ब्रह्माणंसकलाःसुराः॥ किंब्रूमोभगवन्नत्रतुभ्यंहिगुरवेवयं ॥४६८॥ विदिताविदितादन्योयतआत्मात्वयेरितः॥ ज्ञातोपिततएवायंनज्ञातइववर्तते ॥ ४६९॥ एवमुक्तेपुनर्ब्रह्मातानुवाचसुरान्विभुः॥ अद्वयंनित्यशुद्धादिगुणंपूर्वमुदीरितम् ॥ ४७० ॥ ब्रह्मविद्भिर्हिविज्ञानमुपदेष्टुंमहेश्वरः॥ पुनःपुनर्यदात्मायंशिष्येभ्यउपदिश्यते ॥ ४७१ ॥ तदातुवासनात्यागाद्दृढंतैरवगम्यते ॥ ततोब्रह्मातमात्मानमुक्तवांश्चपुनःपुनः॥ ४७२॥

त्यादिग्रंथेनतत्पदार्थतयातमेवात्मानंदेवेभ्यउवाचेत्याह एवमुक्तेइति एवंदेवैरुक्तेउत्तरेदत्तेसतितान्सुरान्प्रतिउदीरितंपूर्ववर्णितमेवात्मानमद्वयादिलक्षणंपुनरुवाचेत्यर्थः ॥ ४७० ॥ दुरवगमस्यात्मनःपुनःपुनरभिधानेपिजामिताख्यस्यपुनरुक्तिरूपदोषस्यनप्रसक्तिः अनेकविपर्ययवासनानांक्षयरूपफलेनसफलत्वादित्याह ब्रह्मविद्भिरिति विज्ञानमुपदेष्टुंप्रवृत्तैर्ब्रह्मविद्भिर्यदायमात्माशिष्येभ्यःपुनःपुनरुपदिश्यतेतदातैःशिष्यैरनादिविपर्ययदुर्वासनारूपप्रतिबंधापायेनदृढंयथातथात्मज्ञानंलभ्यतेततस्तदेतत्फलमभिसंधायब्रह्मापुनःपुनरात्मानमुक्तवानितिद्वयोरर्थः ॥ ४७१ ॥ ४७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनःपुनरुपदेशवत्पुनःपुनश्चतुष्पादेनप्रणवेनात्मनोनुसंधानमपिदुर्वासनाक्षयहेतुरित्यालोच्यदेवेभ्यःप्रणवेनात्मानुसंधानमपिप्रजापति रुपदिदेशेत्याह अभिध्यायेति तमात्मानमभिध्यायस्वयंप्रणवेनानुसंधायब्रह्मापुनरिदंवाक्यंसुरान्प्रत्याह इदंकिं हेदेवायूयंतमात्मानंओंकारेचतुष्पदिपरिपूर्णंचतुष्पाद्रूपेणतादात्म्यापन्नंपरिसमंतात्पश्यतअविषयत्वेनध्यायततदाएतद्ध्यानपरिपाककालेकाश्चकाअपिदुर्वासनावोयुष्माकंनभविष्यंति क्षयंगमिष्यंतीत्यर्थः ॥ ४७३ ॥ ततश्चप्रतिबंधापायेनब्रह्मभावाविर्भावोवःसेत्स्यतीत्याह भवतामिति ॥ ४७४ ॥ ब्रह्मभावाविर्भावेचसकलदुःखोच्छेदःस्यादित्याह आत्मनइति यदाभवंतओंकारस्यओंकारतादात्म्यापन्नस्यात्मनःसंबंधि

अभिध्यायपुनश्चैतमिदमाहसुरान्प्रति ॥ ओंकारपरिपूर्णंतमात्मानंपरिपश्यत ॥ तदादुर्वासनाःकाश्चनभविष्यंतिवःसुराः ॥ ४७३ ॥ भवतामात्मनोज्ञानात्क्षीणाद्दुर्वासनायदा ॥ तदाभवंतस्तद्ब्रह्मभविष्यंतिनसंशयः ॥ ४७४ ॥ आत्मनोत्रयदाज्ञानमोंकारस्यास्यकुर्वते ॥ भवंतस्तर्हिमाखेदमवगच्छंतिकर्हिचित् ॥ ४७५ ॥ व्यवहार्योहमायोयंभवद्भिरमरोत्तमाः ॥ आत्मासएवसत्यंतद्ब्रह्मयत्कीर्तितंमया ॥ ४७६ ॥ यद्ब्रह्मनतदन्यत्स्यादात्मनोस्मात्कथंचन ॥ इतिसर्वात्मनात्मानमवगच्छतसर्वथा ॥ अत्रवःसंशयोमाभूत्कदाचिदमरोत्तमाः ॥ ४७७॥ ओंकारःसत्यरूपोयआत्माब्रह्ममयेरितः ॥ अमुमात्मतयानित्यंपंडिताएवजानते ॥ ४७८ ॥

ज्ञानंसाक्षात्कारंकुर्वतेसंपादयंतोभविष्यथतदाखेदंदुःखजातंनावगमिष्यथेत्यर्थः ॥ ४७५॥ तथैक्यरूपमहावाक्यार्थपर्यवसायिव्यतिहारेणचिंतनमपिबोधद्रढिम्नेकर्त्तव्यमित्याह व्यवहार्यइतिद्वाभ्यां अहमाअहंशब्देनभवद्भिर्योव्यवहार्यःअयंत्वंपदार्थरूपआत्मासएवसत्यपदेनप्रसिद्धतत्पदार्थभूतब्रह्मरूपइत्यर्थः ॥ ४७६ ॥ यद्ब्रह्मेति यच्चतत्पदार्थभूतंब्रह्मतदस्मादहंपदव्यवहार्यादात्मनोन्यत्कथंचिदपिनस्यादित्यर्थः इत्यमुनाप्रकारेणआत्मानंपरिपूर्णरूपेणावगच्छतजानीतअस्मिन्नर्थेसंशयश्चनकर्त्तव्यइत्यर्थः ॥ ४७७॥ एवंमहावाक्येनाखंडतयावर्णितस्यात्मनोनिर्विशेषतास्फोरकानुसुविभातत्वांतान्धर्मान्व्याचष्टे ओंकारेतिपंचभिः यओंकाररूपःसत्यरूपश्चात्मावर्णितःअमुमात्मत्वेनपंडिताःसूक्ष्मधियएवजानतेनस्थूलदर्शिनइत्यर्थः ॥ ४७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदात्मेति उक्तमात्मनोरूपंशब्दाद्यैर्भूतगुणैर्ज्ञानेंद्रियाणांकर्मेंद्रियाणांचयेविषयाव्यापाराश्वतैश्ववर्जिततंथामनसःप्राणबुद्ध्यादीनांच व्यापारैर्वर्जितमित्यर्थः ॥ ४७९ ॥ इंद्रियैरिति तथेंद्रियादिभिर्मायातैःपदार्थैःशून्यःसर्वधर्मवर्जितश्चेत्यर्थः ॥ ४८० ॥ औपनिषदत्वं विवृणोति सच्चिदानंदेति युष्मान्प्रतियःसदादिलक्षणआत्मावर्णितःसएवंभूतःस्वप्रकाशोपिवेदांतेषूपनिषत्स्वेवप्रतिपाद्यइत्यर्थः ॥४८१॥ सुविभातादिपदत्रयार्थमाह स्वप्रभइति अयमानंदरूपोमहेश्वरोयतःस्वप्रभस्ततःसुविभातइत्युक्तः यतश्चब्रह्मविज्ञानात्सकृदेकवारमेव विभातिनिरावरणोभवतिपुनरावरणस्यानादेरनुत्पादात्ततःसकृद्विभातइत्युक्तः यतश्चवृत्तिज्ञानप्रतिबिंबितरूपेणपुनःपुनर्भातिततःसर्वतः

एतदात्मस्वरूपंयत्शब्दाद्यैःपरिवर्जितं ॥ ज्ञानकर्मेंद्रियाणांयेविषयाःपरिकीर्तिताः ॥ व्यापारैरपिसर्वेषांम
नःप्राणादिजैरपि ॥ ४७९ ॥ इंद्रियैश्चतथाबुद्धिमनःप्राणादिकैरपि ॥ पंचभिश्चमहाभूतैर्भौतिकैरपरैरपि ॥
माययाचतथाशून्यःसर्वधर्मविवर्जितः ॥ ४८० ॥ सच्चिदानंदरूपोयःपूर्ववःपरिकीर्तितः ॥ एवंभूतोपिसत
तंवेदांतेष्वेवगम्यते ॥ ४८१ ॥ स्वप्रभोब्रह्मविज्ञानात्सकृदेवविभातिसः ॥ असकृत्ज्ञानरूपोयमानंदात्माम
हेश्वरः ॥ ४८२ ॥ एवंसर्वगुणैर्युक्तमात्मानंनिर्द्वयंसुराः ॥ अहंसएवसोहंचसर्वभेदविवर्जितः ॥ पश्यतैव
सदात्मानंयूयंसर्वात्मबोधतः ॥ ४८३ ॥ एवमुक्त्वापुनःप्राहतान्सुरान्भगवान्हिसः ॥ एषआत्माकिंभवद्भिर्द
ष्टोऽदृष्टोथवासुराः ॥ ४८४ ॥ पूर्ववत्तेपितंप्राहुर्विदिताविदितात्परं ॥ तेषांबुद्धिंसविज्ञातुंब्रह्मातान्पृष्टवानि
दं ॥ ४८५ ॥

पुरतोविभातइत्युक्तइत्यर्थः ॥ ४८२ ॥ अद्वयमित्यादिग्रंथस्यक्रमेणार्थमाह एवमित्यादिना एवंवर्णितविधमात्मानंद्वैतरहितंतत्त्वंपदार्थयोर्व्यतिहारेणयूयंपश्यतैवसाक्षात्कुरुतैव कथंभूतायूयं सर्वात्मनोबोधेनसर्वभेदविवर्जिताइतिसंबंधः ॥ ४८३ ॥ एवमुक्त्वेति सभगवानूब्रह्मातान्देवानिदंपप्रच्छ इदंकिं हेदेवाएषमदुपदिष्टआत्माभवद्भिःकिंदृष्टःसाक्षात्कृतोनवेति ॥ ४८४ ॥ पूर्ववदिति एवंपृष्टादेवाःपूर्ववदेवात्मनोविदिताविदिताभ्यांवैलक्षण्यमुत्तरत्वेनाहुरितिप्रथमदलार्थः ततःपुनःप्रजापतिर्देवानांबुद्धिंपरीक्षितुमिदंवक्ष्यमाणविधंपप्रच्छेति ॥ ४८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयोपदिष्टेति यामयोपदिष्टात्मनःस्वरूपभूताअनुभूतिःसाकुत्रकस्मिन्नाधारेतिष्ठतीति ॥४८६॥ एवमुक्तेथेति एवंगुरुणापृष्टेसतिदेवाउत्त रमाहुः हेभगवन्पूर्वंनिराश्रयंनिराधारमात्मानमुपदिश्याधुनातस्याधारंकथंपृच्छसि कीदृशमाधारं स्वयंपूर्वमनुक्तमित्यर्थः॥४८७॥ ततः पुनःप्रजापतिस्तेनविज्ञातेनात्मनाकिंफलमितिपप्रच्छेत्याह एवमुक्तेति॥४८८॥नकिंचनेत्याकारमुत्तरंदेवानांविवृणोति एवमुक्तेसुराइति ज्ञातआत्मैवफलंतस्यफलांतरंनास्तिफलत्वादेव यतोलोकेपिफलावस्थादाम्रादेःफलांतरंजायमानंनदृष्टंकिंत्वंकुरवृक्षाद्यवस्थादेवेत्यर्थः

मयोपदिष्टाभवतांयानुभूतिःस्वयंप्रभा॥ आनंदात्मस्वरूपेयंकुत्रतिष्ठतिभोसुराः ॥ ४८६॥ एवमुक्तेथतेप्रा हुःस्वगुरुंदेवसत्तमाः॥ निराश्रयंपुरोक्त्वातमाधारमधुनाकथम्॥ अस्मान्पृच्छसिहेब्रह्मन्ननुक्तंपूर्वमात्मना ॥ ४८७॥ एवमुक्त्वापुनःप्राहपरीक्षार्थंमहामतिः॥ आनंदात्मास्वयंज्योतिर्मयावःपरिकीर्त्तितः॥ निर्दुःखोनि र्द्वयस्तेनविज्ञातेनफलंहिकिम् ॥ ४८८ ॥ एवमुक्तेसुराःप्राहुर्ब्रह्माणंस्वगुरुंप्रति ॥ फलात्मन्यात्मनिज्ञातेनै वकिंचित्फलांतरं ॥ अस्माकंविद्यतेयस्मान्नफलेस्तिफलांतरं ॥ ४८९ ॥ पुनश्चैतानुवाचाथपरीक्षार्थंमहा मतिः॥ यूयमाश्चर्यरूपाभोदेवाब्रह्मात्मकायतः ॥ ४९० ॥ एवमुक्तास्तमूचुस्तेवयमेवनतादृशाः॥ आश्चर्य मखिलंयस्माद्द्वयंद्वयवस्थितं॥ ४९१॥ पुनरेतानुवाचाथविधाताससुरोत्तमान्॥ एवंचेदंतयाज्ञातमत्या श्चर्यस्वरूपवत्॥ ओमित्येवततःकस्माज्ज्ञातइत्येवनोच्यते॥ ४९२॥

॥ ४८९ ॥ पुनश्चैतानिति एतान्देवांस्तद्विज्ञानपरिपूर्तिपरीक्षार्थंपुनरेवमुवाच एवंकथं भोदेवायूयमाश्चर्यरूपाःस्थ अत्याश्चर्यरूपमाया याअपिब्रह्मरूपेणसत्ताप्रदत्वादित्यर्थः ॥ ४९० ॥ एवमुक्ताइति ततोदेवैरिदमुक्तं सर्वस्यापिपदार्थजातस्यब्रह्मरूपेणतथात्वादस्मास्वेवत थावधारणमयुक्तमितीत्यर्थः ॥ ४९१ ॥ पुनरेतानिति इत्थंवदतोदेवान्प्रतिपुनरिदंब्रह्माप्राह हेदेवाएवंसतिदृश्यपदार्थानांघटादीनाम पिब्रह्मरूपेणाश्चर्यतयाज्ञातत्वेसत्याश्चर्यरूपवद्ब्रह्मइदंतयापिभवद्भिर्ज्ञातमित्यायाति ततश्चप्रणवानुसंधानपूर्वकमस्माभिर्ज्ञातआत्मेत्येवंक स्मान्नोच्यतेइत्यर्थः ॥ ४९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्ताइति इत्थंपरीक्षायैपुनःपृष्टादेवाएनंब्रह्माणमिदमूचुः इदंकिं एकत्वात्सर्वत्रैदृकूस्वभावोयमात्माज्ञातोनभवत्यविषयत्वात् अवि
ज्ञातोनभासमानत्वात् उभयात्माज्ञातत्वाज्ञातत्वयोःसमुच्चयवांश्चनविरोधात् ततोज्ञातत्वादेरन्यतरावधारणसमुच्चययोरसंभवादमुमा

त्मानंज्ञातइत्याकारेणकथंवदामोवक्तुंप्रभवामइत्यर्थः तथाचबाधासामानाधिकरण्येनसर्वत्रब्रह्मत्वमुक्तमितिनप्रत्यक्षव्याघातइतिभावः
॥ ४९३ ॥ एवमुक्तइति तर्हिस्वानुभवसिद्धोयमस्माकमात्मेत्येवंवदतेतिब्रह्मणोदितेकथितेसतितेदेवाअवधारिततत्त्वकाएतद्वाक्यंप्राहुरि
तिसंबंधः ॥ ४९४ ॥ एतत्किमतआह जानीमइति अद्वयत्वेनानंदरूपमात्मानमात्मस्थंप्रत्यग्भावेनस्थितंजानीमोभेदेनविषयविष

इत्युक्ताःपुनरेवैनमूचुस्तेदेवसत्तमाः॥ नज्ञातोनाप्यविज्ञातोमोभयात्मायतःपुमान् ॥ ततःकथममुंब्रह्मन्व
दामोज्ञातइत्यपि॥ ४९३॥ एवमुक्तःपुनःप्राहतथैवंवदतामराः ॥ स्वात्मानुभवसिद्धोयमस्माकमितिचेरि
ते॥ ब्रह्माणंतेपुनःप्राहुरेतद्विज्ञाततत्त्वकाः॥ ४९४॥ जानीमोवयमात्मस्थमानंदात्मानमद्वयम्॥ नजानीम
श्चभेदेनततोवक्तुंवयंकथं॥ ४९५ ॥ प्रभवामोनमस्तेस्तुगुरोलोकपितामह ॥ परीक्षार्थंत्वमस्माकंपृच्छसी
तिसुनिश्चितं ॥ अस्मानज्ञसमोभूत्वासर्वज्ञोजगदीश्वरः ॥ ४९६ ॥ परीक्षांकुरुमाऽतस्त्वंकृतार्थाहिवयंकृ
ताः॥ त्वयातुभ्यंनमस्तेस्तुचिदानंदात्मदायहि॥ ४९७॥ प्रसीदास्माकमनिशंशिष्याणांभगवन्गुरो॥ अस्मा
भिर्दुर्लभंलब्धंत्वत्प्रसादान्महेश्वर॥ ४९८ ॥ एवमुक्तोपिदेवैःसपुनरेवपितामहः॥ प्राहैतान्सुदृढज्ञानप्राप्त्यर्थं
हिपरीक्षयन्॥ ४९९ ॥ प्रार्थनाचनमस्कारोभवद्भिस्तुकृतोहियत् ॥ मांप्रतीहामरास्तेननभेतव्यंकदाचन
॥ ५०० ॥

यीभावलक्षणेनतुनजानीमइत्यतोविषयत्वप्रसंजकमात्मनोविशेषणंकिमपिवक्तुंकथंप्रभवामःशक्नुमइत्यर्थः ॥ ४९५ ॥ प्रभवामइति
प्रथमंपूर्वान्वयि निगदव्याख्यातंत्रयं ॥ ४९६ ॥ ४९७॥ ४९८॥ एवमुक्तइति एवंकृतकृत्यताबोधकानिदेववाक्यानिश्रुत्वापिब्रह्माए
तान्देवान्ज्ञानदार्ढ्यायपरीक्षयन्सन्निदंप्राह ॥ ४९९ ॥ इदंकिमित्यतआह प्रार्थनाचेति यद्यतोभवद्भिर्मांप्रतिप्रार्थनानमस्कारौकृतौतेन
हेतुनाममप्रसादातिशयात्पुनःप्रश्नेभवद्भिर्नभेतव्यंत्रसितव्यमित्यर्थः ॥ ५०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचत्वद्धतःशंकाशूकोपिवारयितव्यइत्याह यूयमिति ॥५०१॥ एवमुक्तेसुराइति एवंब्रह्मणोक्तेसतितंब्रह्माणंस्वकीयंगुरुंदेवाइदमाहुः हेभगवन्सिद्धरूपस्यात्मनोवर्णनप्रसंगेसाध्यरूपेणात्मनाव्यतिरिक्ताविलक्षणाएषानुज्ञाअनुजानीध्वमित्याकारिकाअपूर्वाप्रकृतासंगता समीरितेत्यतोनोस्माकंपूर्वोक्तेर्थेसंशयोभवतीत्यर्थः ॥ ५०२ ॥ इत्युक्तस्तानिति एवंप्रार्थितोब्रह्माप्राह मयासाध्यरूपाअनुज्ञानोक्ताकिं त्वद्वैतात्मरूपैवोक्तायतोद्वैतविस्मरणायशक्त्याख्यप्रणवावस्थावाच्योऽनुज्ञारूपआत्मानुसंधेयइतिमयोक्तमित्यर्थः ॥ ५०३ ॥ एताव च्छ्रुत्वादेवाःप्रकारांतरेणगुरोःप्रतिकर्त्तुमशक्तानमस्कारेणस्वात्मानमेवार्पितवंतइत्याह इत्युक्ताःपूर्ववदिति स्वेषांसर्वदेवानांगुरवेब्रह्मणेन तिचक्रुःप्रसीदभगवन्निितिचोचुरित्यर्थः ॥ ५०४॥ देवैर्महतायत्नेनब्रह्मणोलब्धेयंविद्येतिदुर्लभत्वंसूचयन्नुपसंहरति एवंपुरेति आदिष्टवान्

यूयंपृच्छतयश्चास्तिसंशयोत्वदिसंस्थितः॥भवतांतमहंसर्वंछेत्स्याम्येवनसंशयः ॥ ५०१ ॥ एवमुक्तेसुराः प्राहुस्तंगुरुंस्वात्मनस्तदा ॥ आत्मनोव्यतिरिक्तेयमनुज्ञाकात्वयेरिता ॥ अस्मान्प्रत्यनुजानीध्वमितिनःसंश योस्तिहि॥५०२॥ इत्युक्तस्तानुवाचायंब्रह्मालोकपितामहः ॥ यानुज्ञाभवतांप्रोक्तामयानैषात्मनःपृथक् ॥ अनुज्ञारूपआत्मायंभवद्भ्योत्रप्रकीर्त्तितः ॥ ५०३ ॥ इत्युक्ताःपूर्ववद्देवाःकृतवंतोनमस्क्रियां ॥ब्रह्मणेगुरवे स्वेषांप्रसीदेतिवचोन्विताः॥५०४॥ एवंपुरासुरान्ब्रह्मादिष्टवान्परमेश्वरः॥ कौतूहलंहियत्राभूद्भवतःस्वात्म वेदिनः॥ ५०५ ॥ संसारशूलमूलस्यनाशनंज्ञानमीरितं॥ इदंयत्पृष्टवानादौभवान्मांश्रद्धयान्वितः॥५०६॥ यदुक्तंविस्तरग्रंथात्संक्षेपात्तद्वदाम्यहं ॥अहमज्ञइतिप्रोक्तामायादृश्यातदुत्थितं॥५०७॥ दृश्यंसूक्ष्मंतथास्थू लंदेहद्वयमुदीरितं॥भूतभौतिकरूपंतदधिदैवादिभेदवत्॥५०८॥

उपदिदेश यत्रार्थेभवतोमदंतेवासिनःपूर्वग्रंथेनविज्ञातात्मतत्त्वस्यापिकौतूहलमुत्कटजिज्ञासारूपमभूदित्यर्थः ॥ ५०५॥ एतदध्यायो क्तविज्ञानस्यमुमुक्षूणामवश्यसंपादनीयत्वंदर्शयन्नाह संसारेति संसाररूपशूलस्यमूलभूतंयदज्ञानंतस्यनाशकमेतज्ज्ञानमुक्तंयत्त्वयायंथा दौपृष्टमित्यर्थः ॥ ५०६ ॥ ओतमित्यादेश्वरमश्लोकस्यार्थमुपबृंहयति यदुक्तमितित्रयोदशभिः विस्तरशालिनाग्रंथेनयदुक्तंतत्संक्षेपेण श्रूयतां अहमज्ञइतिदृश्यानुभूयमानामायाकारणशरीरमित्युक्तातस्याःसमुत्थितंजातंदृश्यंतुस्थूलसूक्ष्मदेहभूतंद्विविधंयद्भूतभौतिकरूपम धिदैवादिभेदशालिचेतिद्वयोरर्थः ॥ ५०७॥ ५०८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानिचस्थूलसूक्ष्मकारणानियथाक्रमंजागरणादिरूपाणिहेयानीत्याह स्थूलमिति ॥ ५०९ ॥ एतत्त्रयादिति उक्तावस्थात्रयाद्विमुक्तंत
त्त्वंतुतुरीयमित्युक्तंतदप्योतादिभेदैश्चतुर्विधमित्यर्थः ॥५१०॥ तत्रौतंलक्षयति देहाभिमानइति अधिदैवसाक्षिणोऽशेताओताद्याअवस्थाः
तल्लाभेचशरीरत्रयाभिमानःप्रतिबंधकइत्यतउक्तंदेहाभिमानेगलितेइति तथाचयदापुमान्विद्वान्देहत्रयाभिमाननिवृत्त्युत्तरंव्युत्थानद
शायांवर्तमानोबाह्यांतररूपंयथास्थितंविश्वंब्रह्मेत्यनुभवतितद्विश्वभासकंचैतन्यमोतमितिविदुः कीदृशमोतं तुरीयभेदानांमध्येप्रथममित्य
र्थः ॥ ५११ ॥ अखिलंमिथ्यात्वेनसविकल्पकसमाधौभासयच्चैतन्यमनुज्ञातेतिपुंल्लिंगनाम्नोच्यते स्वसत्तादानरूपानुग्रहेणगौरवशालि

स्थूलंजागरणंप्रोक्तंसूक्ष्मंस्वप्नइतीरितं॥ अविद्यासुप्तिरित्युक्तात्रयंहेयमिदंसदा ॥ ५०९ ॥ एतत्त्रयात्परंयत्त
त्तुरीयमितिकीर्तितं॥ चतुर्धातदपिप्रोक्तमत्रवेदांतवादिभिः॥ ५१० ॥ देहाभिमानेगलितेबहिरंतर्यदापुमा
न् ॥ विश्वंब्रह्मेतिजानीयादोतंतत्प्रथमंविदुः॥ ५११ ॥ अहंब्रह्मेतिचयदाविश्वंभेदविवर्जितं ॥ ध्यातृध्या
नादिभेदेनसमाधिस्थःप्रपद्यते ॥ अनुज्ञाताऽतदैवंतद्वितीयमितिगीयते ॥ ५१२ ॥ यदावैतत्त्वमात्मानंस्वप्र
काशःस्वयंपुमान् ॥ ध्यातृध्यानादिभेदंतंतिरस्कृत्याधिगच्छति ॥ तदानुज्ञेतिभेदोयंतृतीयःपरिकीर्त्तितः
॥ ५१३ ॥

त्वात्सतुरीयस्यद्वितीयोभेदइत्याह अहंब्रह्मेतिचेति भेदविवर्जितंवाधितभेदंविश्वंब्रह्मरूपंप्रपद्यतेभासयति कीदृशः ध्यातृध्यानादिभेदशा
लिसविकल्पसमाधिस्थः एवंसर्वानुग्राहकत्वेसतितच्चैतन्यमनुज्ञाताइतिवाच्यंतदेतत्तुरीयरूपेषुद्वितीयमितिगीयतेइत्यर्थः ॥ ५१२ ॥ यदा
स्वसत्ताकर्षणेनासत्तामापन्नस्यद्वैतस्याभावंनिर्विकल्पकसमाधिस्थःप्रपद्यतेतदातच्चैतन्यमनुज्ञेतिदर्शितव्युत्पत्तिकेननाम्नाभिधीयतेसतृ
तीयस्तुरीयभेदइत्याह यदावैइति तत्त्वंपरमार्थभूतमाकृष्टविश्वसत्ताकमितियावत् एतादृशमात्मानमधिगच्छति किंकृत्वा ध्यात्रादिभे ॥४२॥
दंतिरस्कृत्यापोह्य सोयमनुज्ञाख्यस्तृतीयोभेदइत्यर्थः ॥ ५१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुरीयस्यतुरीयभेदमविकल्पाख्यंवर्णयति ब्रह्मज्ञानाग्निनेतित्रिभिः ब्रह्मज्ञानरूपेणाग्निनादुःखशूलमूलभूतस्याज्ञानस्यदाहेसतियदावागा यतीतंभासमानानंदरूपमात्मानंपश्यन्नपिनपश्यति अविषयत्वेनपश्यतीतियावत् स्वःपरइत्यादिरूपंभेदंतदभावंवाजीवन्नस्मिमृतोस्मीत्या दिविशेषंवानाधिगच्छति इदंचैतन्यरूपमविकल्पाख्यंतुर्यस्यतुरीयस्यतुर्यरूपमितित्रयाणामर्थः ॥ ५१४ ॥ ५१५ ॥ ५१६ ॥ यथाच भेदशालितारूपदोषेणजागरणादित्रयंहेयं तथातुरीयभेदेषुओतादित्रयमपितेनैवदोषेणहेयमित्याह त्यजेदिति ॥ ५१७ ॥ चरमरूपमेव

ब्रह्मज्ञानाग्निनादुःखशूलमूलविनाशने ॥ यदावाङ्मनसातीतंपश्यन्नपिनपश्यति ॥ ५१४ ॥ आनंदात्मान मद्वैतंस्वप्रभंपरमेश्वरं ॥ आत्मानंवापरंवापिभेदंवाऽभेदमेवच ॥ ५१५ ॥ जीवन्वापिमृतोवापिकदाचि न्नाधिगच्छति ॥ अविकल्पइतिप्रोक्तंतुर्यतुर्यमिदंतदा ॥ ५१६ ॥ त्यजेज्जागरणादीनियथाभेदात्मकानि हि ॥ ओतादीन्यपितद्वत्तुत्यजेत्त्रीण्यपिसर्वदा ॥ ५१७ ॥ अविकल्पमिमंदेवमवाङ्मनसगोचरं ॥ आनंदात्मा नमद्वैतंसदाद्वारवतीस्थितं ॥ ५१८ ॥ सर्वाश्रयविहीनंतंसर्वभेदविवर्जितं ॥ अमायंस्वप्रभंनित्यंभासमानं त्वद्वंबुजे ॥ पश्येदपश्यन्नेवेदमितिज्ञानमिदंस्मृतं ॥ ५१९ ॥ गंधर्वनगरंयद्वद्गगनेपरिकल्पितं ॥ आनंदात्मनि मायादितथैवेहापिकल्पितम् ॥ ५२० ॥ गगनस्ययथाभागेगंधर्वनगरस्थितिः ॥ अज्ञानादात्मनस्तद्वन्माया द्युस्थितिरीरिता ॥ ५२१ ॥

चालंबनीयमित्याह अविकल्पमिममिति द्वारवत्यांतनूरूपायांस्थितंसदाराजमानंपश्येत् किंकुर्वन् इदमित्याकारेणपराग्भावेनापश्यन्सन् इदंपरमफलभूतज्ञानस्वरूपंमतमिति स्फुटमन्यद्वयोः ॥ ५१८ ॥ ५१९ ॥ इदमेवचज्ञानमस्यशास्त्रस्यप्रयोजनमितिवक्तुमत्रविज्ञानेऽसं भावनांदृष्टान्तैर्वारयति गंधर्वेत्येकादशभिः कल्पितमारोपितं मायादिमायाप्रभृतिद्वैतं इहवर्णिते आनन्दात्मनि ॥ ५२० ॥ यथाचगग नस्यकल्पितएकदेशेगंधर्वनगरकल्पनागगनस्वरूपाज्ञानप्रयुक्तातथाआत्मनःकल्पितैकदेशेमायादिदृश्यस्येत्याह गगनस्येति ॥ ५२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाचगगनतत्त्वज्ञानाद्गंधर्वनगरस्यलयोबाधस्तथेहाप्यात्मज्ञानाद्दृश्यजातस्येत्याह गगनेत्रेति लयंव्रजेदितिसंबंधः ॥ ५२२ ॥ तत्त्व
ज्ञानान्नकेवलंविकाराणामेवलयःकिंतुतन्मूलाज्ञानस्यापीत्याह गगनेति अथापरोक्षभ्रमबाधायापरोक्षज्ञानमेवापेक्षितमित्यत्रदृष्टांत
माह परोक्षेति दिङ्मोहोदिग्भ्रमः ॥ ५२४ ॥ एकएवात्मामायाख्येनस्वरूपाज्ञानेनानेकधाभातीत्यत्रदृष्टांतमाह यथेति शयानःस्वप्नाव
स्थआत्मनःस्वरूपस्याज्ञानान्महेश्वरोप्यनेकोजातइत्यर्थः ॥ ५२५ ॥ ननुभासमानात्मनिकथमज्ञानस्थितिरितिचेदघटितघटनाक्षमा
त्तत्स्वभावादेवेत्याह मायैषेति एषाऽज्ञानरूपा बलंसामर्थ्यं ॥ ५२६ ॥ एवंविधायाअपिनिवृत्त्युपायमाह आनंदात्मनीति आनंदरूपेदे

गगनेत्रयथाज्ञातेगंधर्वनगरंलयं ॥ व्रजेदात्मनिविज्ञातेतथामायादिकंलयम् ॥ ५२२ ॥ गगनज्ञानतोयद्व
द्गगनाज्ञानसंक्षयः ॥ आत्मज्ञानात्तथैवात्माज्ञाननाशोपिनिश्चितः ॥ ५२३ ॥ परोक्षज्ञानतोयद्वद्दिङ्मोहो
त्रानुवर्त्तते ॥ परोक्षज्ञानतस्तद्वन्मायादिरनुवर्त्तते ॥ ५२४ ॥ यथाशयानःपुरुषएकएवव्यवस्थितः ॥ आत्मा
ज्ञानादनेकःस्यादेवमेवमहेश्वरः ॥ ५२५ ॥ मायैषादुर्घटातद्वद्दुस्तराचातिदुःखदा ॥ संसारशूलजननीस्वब
लेनैवसिद्ध्यति ॥ ५२६ ॥ आनंदात्मनिदेवेशेप्रतिभेदविवर्जिते ॥ सर्वज्ञश्रुतिविज्ञानाद्विनश्यतिनचान्य
था ॥ ५२७ ॥ आत्मनोपिभयंनैषाकदाचिदधिगच्छति ॥ आत्मजाच्छ्रुतिविज्ञानाद्भीतस्तिष्ठतिसर्वदा ॥ ५२८ ॥
अनाद्यनंतरूपायामायायाःपंडितैःसदा ॥ उपायस्त्वेकएवायंदृष्टोनाशायनापरः ॥ ५२९ ॥

वानांचक्षुरादीनांसन्निधिमात्रेणईशेनियंतरिप्रतिभेदविवर्जितेप्रत्यग्रूपेणभेदवर्जितेआत्मनियद्वेदांतवाक्यजन्यंज्ञानमखंडाकारवृत्तिरूपं
तस्माद्दर्भभूतादेषामायावृश्चिकीवनश्यतीत्यर्थः ॥ ५२७ ॥ पूर्वंसाक्षित्वेनास्याःसाधकोप्यात्मावृत्त्यारूढरूपेणबाधकोभवतियथाकाष्ठ
स्यभासकोप्यग्निर्लोहारूढोभेदकत्वेनदृष्टइत्यावेदयन्नाह आत्मनइति एषामायाआत्मनःसाधकान्नबिभेतितज्जात्प्रतिबिंबात्श्रौतविज्ञा
ननिष्ठात्तुबिभेतीत्यर्थः ॥ ५२८ ॥ एतदेवस्फुटयति अनाद्यनंतेति अनादेरनंतायाब्रह्मबोधंविनाअंतहीनायाश्चमायायाः प्रक्षयायश्रौत
विज्ञानरूपएवोपायःपंडितैर्दृष्टइति ॥ ५२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमुमर्थंरूपकेणद्रढयति मायापिशाचीति भूतानांप्राणिनांजनिमृतिप्रवाहरूपस्यभयस्यकर्त्रीमायारूपापिशाचीवर्त्ततेसाचब्रह्मज्ञानात्म करहस्यमंत्रेणैवनश्यतीत्यर्थः ॥५३०॥ फलितमाह शांत्यादीति ततःशांत्यादिगुणशालीमुमुक्षुर्मायापिशाचीभीतोभावनयाचित्तैकाग्र्ये णआदिपदग्राह्यगुरूपसत्त्यादिनाचयुक्तःसन्निदमुक्तरूपंज्ञानंसंपादयेत् एतदस्यवेदांतशास्त्रस्यप्रयोजनमित्यर्थः ॥ ५३१ ॥ एतावदे वेतिमुमुक्षोःपुरुषस्यकर्त्तव्ययत्नोद्देश्यमेतावदुक्तज्ञानसिद्धिपर्यंतमेवातोज्ञानाभ्यासात्परमन्यत्तुनकर्त्तव्यंयतोन्यकरणेपुनःसंसारपातइत्य र्थः ॥ ५३२ ॥ गुरुःशिष्यायोपदेशपरिपूर्तिमाह इतितेइति विद्यमानानामुपलभ्यमानग्रंथानांवेदांतानामुपनिषदांप्रतिपाद्यभूतमात्मज्ञा नमित्थंतुभ्यमुक्तं कथं उपासनाप्रतिपादकवेदांतभागार्थप्रदर्शनरहितंयथाभवतितथेतिवचनरूपक्रियाविशेषणं कीदृशमात्मज्ञानं सदा

मायापिशाचीभूतानांभवभीतिकरीसदा॥ आत्मज्ञानाभिधंमंत्रंदृष्ट्वानाशंप्रयातिसा॥ ५३०॥ शांत्यादि गुणसंपन्नोमुमुक्षुःसर्वदाततः॥ मायापिशाचीभीतःसन्भावनादिसमन्वितः॥ संपादयेदिदंज्ञानमितिशा स्त्रार्थईरितः॥ ५३१॥ एतावदेवकर्त्तव्यंपुरुषेणमुमुक्षुणा ॥ नातःपरंपरंकुर्वन्पतत्येवनसंशयः॥ ५३२॥ इतितेविद्यमानानांवेदांतानांमयेरितं॥ उपासनाविरहितमात्मज्ञानंसदाघनं॥५३३॥ अतःपरंनकिंचिद्धि प्रष्टव्यमवशिष्यते॥ चिदानंदात्मविज्ञानेवक्तव्यंवाकथंचन॥५३४॥ श्रुत्वैतत्सकलंशिष्यःसर्ववेदांतसंस्थि तं॥ निर्गुणस्वात्मविज्ञानमुपासादिविवर्जितं॥ ५३५॥ कृतकृत्योगुरुंस्वस्यनत्वास्तुत्वाप्रहृष्टधीः॥ उक्तवा न्निजशिष्येभ्योयैरिदंबहुलीकृतं॥लभ्यतेकलिकालेस्मिन्बहुदुःखप्रदेनृणां॥ ५३६॥

घनंसर्वकालेषुघनोदार्ढ्यंयस्यतत्तथा घनःसांद्रेदृढेदार्ढ्येइतिविश्वप्रकाशः ज्ञानांतरंहिसदोषविषयकत्वाद्विषयदोषव्यक्तौशैथिल्यमप्रमा त्वरूपमवश्यंयाति प्रकृतंज्ञानंतुशुद्धात्मगोचरत्वात्सदादृढमेवेतिभावः॥ ५३३॥ एवंज्ञानपरिपूर्तौसत्यांकिमन्यच्छ्रोतुमिच्छसीतिपूर्ववत्प्र श्नोनयुक्तइत्याह अतःपरमिति एतदुत्तरमात्मविज्ञानार्थंप्रष्टव्यंवक्तव्यंवानास्तीति ॥ ५३४॥ एवमुपदेशेनकृतकृत्यतांनीतःशिष्यःपरा नपिकृतकृत्यतांनिनायेत्याह श्रुत्वैतदिति उपासनकर्मविचाररहितंनिर्गुणात्मविज्ञानंसर्ववेदांतप्रतिपादितंश्रुत्वाकृतकृत्यःसन्नतिस्तुतिभ्यां गुरुंप्रपूज्यनिजशिष्येभ्यउक्तवान् यैःशिष्यैर्बहुलीकृतमिदंज्ञानमस्मिन्कलिकालेपिलभ्यतेइतिद्वयोरर्थः॥ ५३५॥ ५३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यवहुलीकृतत्वेहेतुतयाआत्मपुराणरूपेणतस्यपरिणमनमाह संसारेति हियतइदंपूर्वोक्तंविज्ञानमात्मपुराणंसत्प्रवृत्तंपरिणतं कीदृश
मात्मपुराणं वेदार्थघटितत्वान्मीमांसान्यायेनवेदतुल्यं तदुक्तं मीमासासंज्ञकस्तर्कःसर्ववेदसमुद्भवः सवेदोतोरुमांप्राप्तंकाष्ठांवुलवणंयथे
ति यथारुमांलवणाकरंप्राप्तंकाष्ठादिलवणमेवभवतितथासर्ववेदोत्थितामीमांसावेदएवेतितदर्थः एतेनस्त्रीशूद्रादेरत्रानधिकारइतिसूचितं
॥ ५३७ ॥ अस्मिन्प्रसिद्धंपुराणलक्षणंसमन्वितंकरोति सृष्टिरिति सर्गपदोक्ताविश्वस्यसृष्टिस्तदुपलक्षितास्थितिश्चतथाप्रतिसर्गःसंहा
रोऽस्मिन्ग्रंथेतिष्ठतिप्रतिपाद्यतेतथाभूतानामाकाशादीनांभौतिकानांविराडादीनांचवंशोत्रतिष्ठतीत्यर्थः ॥ ५३८ ॥ मन्वंतरसत्वमप्यत्रद
र्शयति स्वायंभुवस्येति स्वायंभुवमनोःकीर्त्तनमुत्पत्त्यादिवर्णनमत्रचतुर्थाध्यायेत्रयोदशाधिकत्रिशततमश्लोकमारभ्याविद्यतेयेनतद्विभू

संसारशूलमूलानांमायादीनांविनाशनं ॥ इदमात्मपुराणंहिप्रवृत्तंवेदसंमितं ॥ ५३७ ॥ सृष्टिःस्थितिश्चसं
हारोविश्वस्यास्मिन्हितिष्ठति ॥ भूतानांभौतिकानांचवंशोपिचमहानयं ॥ ५३८ ॥ स्वायंभुवस्यचमनोःकी
र्त्तनंचात्रविद्यते ॥ यस्मिन्मन्वंतरंसर्वमंतर्भवतिसर्वदा ॥ ५३९ ॥ व्यापाराअपिवंश्यानांभूतादीनांमहात्म
नां ॥ राज्ञांयशांसिकीर्त्यंतेपुराणेस्मिन्ननेकधा ॥ ५४० ॥ अस्मिन्नल्पोपिनैवार्थोवेदमूलविवर्जितः ॥ वि
द्यतेब्रह्मसूत्रादौकीर्त्तितोयोत्रसस्मृतः ॥ ५४१ ॥ इदंगुरुःस्वशिष्यायकावेरीतीरवासिने ॥ उक्तवान्श्रद्धया
नायस्नेहादेवचकेवलात् ॥ ५४२ ॥

तिभूतानांसर्वेषांमनूनांकीर्त्तनंकृतप्रायंभवति तदेतदुक्तंयस्मिन्मन्वंतरमित्यादिना ॥ ५३९ ॥ वंश्यानुचरितंवंशभवानांव्यापारःसोप्यत्र
विद्यते आकाशादीनांभूतानांतद्विकाराणामिंद्रियादीनांतथामनुवंशानांतथामनुवंश्यानांप्रतर्दनादीनांराज्ञांचयेव्यापारास्तेषामत्रकीर्त्त
नादित्याह व्यापाराअपीति ॥ ५४० ॥ तथावेदार्थोपवृंहकत्वंपुराणधर्मोत्रस्फुटइत्याह अस्मिन्निति वेदोयत्रमूलत्वेननसंबद्धस्तादृशो
र्थोत्रस्वल्पोपिनकीर्त्तितोयतउपनिषदर्थबाह्यः सएवार्थःस्मृतोयोब्रह्मसूत्रतद्भाष्यस्मृत्यादिषुकीर्त्तितइत्यर्थः ब्रह्मसूत्रादीनांवेदमूलकत्वंतुप्र ॥४५॥
सिद्धमेवेतिभावः ॥ ५४१ ॥ अस्यग्रंथस्योत्पत्तिदेशमाह इदंगुरुरिति स्नेहोनुग्रहः ॥ ५४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतद्ग्रंथनाम्नआत्मपदघटितत्वेप्रयोजकमाह राजादीनामिति पुराणादौपुराणेतिहासादौराजादिसंबंधिनीरात्मव्यतिरिक्तार्थप्रतिपादि
काःकथाःश्रुत्वाताभ्योविरक्तएषशिष्यःसंसारशूलेनसंतप्तःपुराणादौअस्यपुराणस्यप्रारंभेयतइदंसंसारशूलमूलोच्छेदकमात्मज्ञानमेवपृष्ट
वानतःश्रोतुरजिज्ञासितत्वादनात्मसंबंधिनीकाचिदपिकथानप्रकीर्त्तिताततोस्यात्मपुराणेतिनामयुक्तमितिद्वयोरर्थः ॥५४३॥५४४॥ अ
स्यमुख्याधिकार्यपितादृशशिष्यसमएवेत्याह अत्रेति अनात्मकथाविषयकेणरागेणवर्जितः ॥५४५॥ ननुतादृशोधिकारीवेदांतेभ्यएवा
त्मज्ञानंसंपादयेदित्यस्यवैयर्थ्यमित्याशंकांपरिहरति वेदार्थइति यतो वेदार्थोगहनोऽसंभावनादिशालिभिर्दुष्प्रवेशइत्यतोऽधिगंतुमवधार

राजादीनांकथाश्चित्राअनात्मप्रतिपादिकाः॥ पुराणादौपुराणादौश्रुत्वाशिष्योगुरुंनिजं ॥ ५४३ ॥ संसारशू
लसंतप्तइदमेषोत्रपृष्टवान् ॥ अतोऽनात्मकथाःकाश्चित्पुराणेनप्रकीर्तिताः ॥ ५४४ ॥ अत्राधिकारीयोऽ
नात्मकथारागविवर्जितः ॥ संसारशूलसंतप्तोविरक्तःपरिकीर्त्तितः ॥ ५४५ ॥ वेदार्थोगहनोयस्मात्सर्वैरेवन
शक्यते॥ अधिगंतुंततस्तेनपुराणंपरिकीर्तितं ॥ ५४६ ॥ आत्मावबोधकंनास्मादधिकंविद्यतेभुवि ॥ पुरा
णंसर्ववेदांतसारार्थपरिकीर्त्तनम् ॥ ५४७॥ जातंयःशृणुयादेतदपिरागीबहिर्मुखः॥ विरक्तोंतर्मुखोभूत्वा
सोपिज्ञानंसमाप्नुयात्॥ ५४८ ॥ अस्यवक्तागुरुव्याजाद्देवःसाक्षात्त्रिलोचनः ॥ यस्यवाचिवसत्येषानित्य
मेवसरस्वति॥ सर्वदेवमयोयश्चब्रह्माविष्णुश्चगीयते॥ ५४९ ॥

यितुंनशक्यस्ततस्तदधिगमप्रतिबंधकापाकरणार्थंतेनगुरुणाइदंपुराणंकृतमित्यर्थः॥५४६॥ तच्चफलमस्मिन्नदृश्यतेइत्याह आत्मावबोधक
मिति अस्मादधिकमात्मावबोधकंकिंचिन्नास्तियतइदंपुराणंसर्ववेदांतानांसारार्थस्यप्रतिपादकमित्यर्थः ॥ ५४७॥ एवंमुख्याधिकार्युद्दे
शेनजातंप्रवृत्तमेतदन्योपिश्रृण्वन्वैराग्यलाभादिद्वारात्मज्ञानंलभेतेत्याह जातमिति ॥ ५४८ ॥ अस्यग्रंथस्यकर्त्तापिगुरोःशंकरमात्मत्वे
नसाक्षात्कुर्वतःशरीरेस्थितःशंकरएवसमर्थत्वादित्याह अस्येति गुरोःकावेरीतीरवासिशिष्योपदेष्टुर्व्याजेनतच्छरीरजवनिकास्थितत्वेनत्रि
लोचनोदेवएवास्यवक्ताकर्त्ता तत्रहेतुंतस्यैवक्षमत्वमाह यस्येति यस्यत्रिलोचनदेवस्यवाचिसरस्वतीवसति सरस्वतीसंबंधेनुपपत्तिपरिह
र्तुंयश्चब्रह्मेत्याद्युक्तं तत्रापिहेतुःसर्वदेवमयत्वमिति ॥ ५४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततइति ततोऽस्यकर्त्रादिगौरवादिदंपुराणंश्टण्वन्जनोमेधावीधारणाशालिमतिकःप्राज्ञआत्मविच्चजायते अत्रनसंशयःकार्यः फलस्यदृ
ष्टत्वात्सद्योजायमानत्वात् ॥ ५५० ॥ अस्यविषयसंबन्धयोर्निरूपणमिषेणसमाप्तौमंगलंकुर्वन्नीशावास्योपनिषदर्थप्रदर्शनमारभते प्र
तिपाद्यइति अत्रग्रंथेईशावास्यवर्णितोभगवान्प्रतिपाद्यः यन्मयंसकलंजगदित्यर्थः ॥ ५५१ ॥ तत्रप्रथममंत्रस्यार्थमुपबृंहयति इदंदृष्ट्वे
तिसप्तभिः इदंविश्वस्यईश्वरात्मत्वंस्वयंदृष्ट्वाविज्ञायविद्वांसइत्थंशिष्यान्प्रत्युपदिशंति इत्थंकथं सर्वंजगदीश्वरेणाभिन्ननिमित्तोपादानभूते
नवासितमाच्छादितंव्याप्तमितियावत् ॥ ५५२ ॥ व्याप्तौदृष्टांतानाह घटादिकमिति यथामृदाउपादानभूतयाघटादयोविकाराव्याप्ता

ततःपुमानिदंश्टण्वन्मेधावीचप्रजायते॥ प्राज्ञश्चसंशयोनात्रप्रत्यक्षंहियतःफलं॥ ५५० ॥ प्रतिपाद्योत्रभग
वानीशावास्यसमीरितः॥ यदात्मकमिदंविश्वंजगदेतज्जडाजडं ॥ ५५१ ॥ इदंदृष्ट्वात्रविद्वांसःस्वशिष्यान्प्र
वदंतिहि॥ ईश्वरेणजगत्सर्ववासितंसचराचरं ॥ ५५२ ॥ घटादिकंयथासर्वंमृदाहेतुस्वरूपया॥ राज्ञाचवा
सितंयद्वत्स्वकीयंनगरादिकं॥ ५५३ ॥ पटेनवासितंवापिनृणांयद्वत्कलेवरं ॥ पुष्पैर्वावासितंयद्वन्नीरमत्रसु
शीतलं॥ वासनाभिर्वायथास्याद्वासितंहिमनोनृणां॥ ५५४ ॥

स्तथेश्वरेणापिजगदित्यर्थः निमित्ततयाव्याप्तौदृष्टांतमाह राज्ञेति यथालोचनद्वाराराजकीयंनगरंराज्ञाव्याप्तंतथेक्षित्राईश्वरेणजगदित्य
र्थः ॥५५३॥ बहिर्व्याप्तौदृष्टांतमाह पटेनेति यथापटोबहिःस्थितःशरीरमाच्छादनेनव्याप्नोतितथाविभुरीश्वरोजगदिति अंतर्व्याप्तौदृष्टांत
माह पुष्पैरिति यथापुष्पाणिसौरभ्याधारस्वांशैर्नीरंव्याप्नुवंतिसंतितद्रमणीयतांनयंतितथेशोपिसत्ताभानादिरूपैर्जगद्व्याप्नुवन्जगद्रमणीय
तांनयतीत्यर्थः प्रवृत्तिहेतुरूपेणव्याप्तौदृष्टांतमाह वासनाभिरिति वाऽथवायथानृणांमनोवासनाभिःप्रवृत्तिहेतुभिर्व्याप्तंस्यात्तथांतर्यामि
णेश्वरेणसर्वंजगदित्यर्थः यथास्यादित्यत्रसितास्यादितिपाठेतन्मनोविशेषणंसितंमौनेनबद्धमास्यंमुखंयस्यससितास्योमौनीतमप्यत्तिभ
क्षयतीति प्रसिद्धाहिमौनिनांसंकल्पतत्याऽनर्थततिरितिभावः ॥ ५५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईशात्मकमिति स्वकीयत्वादिनाभिमतंसर्वंयोषिदादिपदार्थजातंततउक्तयुक्त्यायतईशात्मकमीश्वरात्पृथक्सत्ताहीनंततईशस्यैवनजीवस्येतिविदुषांमतमित्यर्थः ॥ ५५५ ॥ यद्धियदात्मकंतत्तदीयमेवव्यवह्रियतेयथागगनमयंगंधर्वनगरंगगनस्यैवोच्यतेतद्वदित्याह गंधर्वेति ॥५५६॥ तथाचयथालोकस्वामिनिराजादौतदीयधनादौवायथेष्टविनियोगार्हत्वरूपस्वत्वदृष्टिःकुशलैर्नक्रियतेतथापदार्थजातंतमीश्वरमीशोयमित्याकारेणविज्ञायाथवेश्वरस्येत्याकारेणेश्वरसंबंधित्वेनविज्ञाययोषिदादिकामनांत्यजेदित्याह ईशोयमिति तत्रत्यागस्वरूपमुक्तंस्वत्वविवर्जितइतिविशेषणेन ॥ ५५७॥ तत्राद्यदृष्टौप्रपंचस्यबाधात्तत्रस्वत्वपरित्यागेपरिशेषेणनिर्गुणब्रह्मविज्ञानंफलितंभवतिद्वितीयदृष्ट्यातुसगुणब्रह्मविज्ञानमितिसूचयन्दृष्टांतद्वयमाह गंधर्वेति यथागंधर्वनगरेगगनदृष्ट्याबाध्यमानेस्वत्वाशादुःखदाश्रमावहत्वात् यथावाराजकीयेयोषिदादौस्वत्वाशादुःखदाअनर्थावहत्वात् तथास्वकीयत्वादिनाभिमतस्ययोषिदादिपदार्थजातस्याप्याशादुःखदा तथाचसकलकामनाःपरित्यज्यसर्वाधिष्ठानभूतईश्वरआत्मतयावाद्रष्टव्यःसर्वाध्यक्षतयावाआराध्यइतिभावः अत्रार्थेश्रुतिसमन्वयस्तुत्यक्तेनत्यागेनात्मारक्षितव्यः त्यागस्वरूपंतुराजकीयधनादाविवकामनावर्जनमित्यर्थात् भाष्यकारैरुक्तःसंन्यासविधिस्तुमुख्यार्थोपयोगित्वेनार्थाक्षिप्तइतिबोध्यं ॥ ५५८ ॥

ईशात्मकंततःसर्वंयोषित्पुत्रधनादिकं॥स्वकीयंपरकीयंवासर्वमीशस्यतत्स्मृतं॥ ५५५ ॥ गंधर्वनगरंयद्वद्दृश्यतेगगनात्मकं ॥ गगनस्यैवतद्वत्स्यादीश्वरस्याखिलंजगत् ॥ ५५६ ॥ईशोयमितितंज्ञात्वास्वयंस्वत्वविवर्जितः॥ईश्वरस्येतिवाधीमांस्त्यजेद्योषिद्धनादिकं॥ ५५७॥ गंधर्वनगरेयद्वद्दाशानैवसुखप्रदा॥ योषिद्धनादौवाराज्ञस्तद्वदस्यापिकीर्त्तिता॥ ५५८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयमंत्रार्थंदर्शयति यदिवइतिपंचभिः भोशिष्याःयदियुष्माकंचित्तशुद्ध्यभावेनब्रह्मविज्ञानेसगुणनिर्गुणविषयत्वेनद्विविधेधिकारोना स्तिअथापितथापियोषिद्धनादिकमीश्वरस्यैवनममेतिविज्ञायलोकान्कर्मफलभूतांस्त्यजथततश्चमनःप्रभृतिसाध्यंकर्मयथाश्रमंभवंतःकु र्वंत्वितिद्वयोरर्थः श्रुतावेवकारेणफलकामनाव्यावर्त्यतेइतिभावः ॥ ५५९ ॥५६०॥ एवंनिष्कामकर्माचरणेनयदायुष्माकमत्रपरत्रवाज न्मनिचित्तशुद्धिःसेत्स्यतितदाभवंतोब्रह्मज्ञानद्वारादुःखवर्जिताभविष्यन्तीत्याह कर्मतदिति तन्निष्कामंविहितंचकर्मकुर्वतांवःपापक्षयचि त्तशुद्धिब्रह्मज्ञानदुःखाभावाअंतेफलावस्थायांभविष्यंतीत्यर्थः ॥ ५६१॥ श्रुतावितःपदेनप्रथममंत्रसूचितौज्ञानोपासनरूपौमार्गौद्वितीय

यदिवोब्रह्मविज्ञानेनाधिकारोत्रविद्यते ॥ त्यजथाथापिलोकांश्चसर्वंयोषिद्धनादिकं ॥ ५५९ ॥ ईश्वरस्येति विज्ञायमनसाकर्मणागिरा ॥ कुर्वंतुस्वाश्रमप्राप्तंयावज्जीवंमहाधियः॥ ५६० ॥ कर्मतत्कुर्वतांपापंभवतां नभविष्यति ॥ ततःशुद्धधियोब्रह्मज्ञानाद्दुःखविवर्जिताः॥ भविष्यंतिभवंतोंतेजन्मन्यत्रपरत्रच ॥५६१॥ त्रे धायंविहितोमार्गःस्वर्गमोक्षकरोनृणां ॥ दक्षिणश्चोत्तरस्तद्वत्तृतीयोब्रह्मवेदनं ॥ इतोन्यथानकोप्यस्तिनृणां मार्गःसुखप्रदः॥ ५६२॥ इतोन्यथाभिगच्छंतःपापकर्मप्रचोदिताः॥ दुःखमेवप्रयांत्येतेसर्वएवाल्पमेधसः ॥ ५६३ ॥ ब्रह्मज्ञानविहीनानांस्वर्गिणामपिदेहिनां॥ ब्रह्मलोकस्थितानांचसुखंनैवास्तिकिंचन ॥ ५६४ ॥ आत्मज्ञानविहीनत्वादात्महंतारईरिताः॥ तेसर्वेंत्यात्महंतॄणांदुःखमेतच्छ्रुतंयतः॥ ५६५॥

मंत्रोक्तःकर्ममार्गश्चपरामृश्यतेइत्याह त्रेधायमिति अयमभ्युदयनिश्रेयसयोःस्वर्गादिरूपयोःसाधकोमार्गस्त्रिविधस्तत्रप्रथमोदक्षिणइष्टा दिशालिनांपितृयाणाख्योद्वितीयउत्तरोदेवयानाख्यउपासकानांतृतीयोब्रह्मज्ञानाख्यःशुद्धधियामिति एतेभ्योन्यःसुखदःपन्थानास्ती त्यर्थः ॥ ५६२ ॥ येतूक्तंमार्गत्रयंविहायचरंतितेषांदुष्कर्मलेपोदुःखभोगरूपःस्यादेवेत्याह इतोन्यथेति ॥५६३॥ तेष्वपितृतीयएवमार्गः श्रेष्ठइतिप्रतिपादयंतंतृतीयमंत्रमवतारयति ब्रह्मज्ञानेति ब्रह्मज्ञानहीनानांदेवानामपिवस्तुतःकिंचित्सुखंनास्तीत्यर्थः ॥ ५६४ ॥ कुतइत्या कांक्षायामाह आत्मेति महतांहितिरस्कारएवहननंप्रसिद्धं तथाचयेयेआत्मज्ञानहीनास्तेसर्वेआत्मानमवजानंतआत्महनइत्युच्यंते तेषा मात्महंतॄणामेतत्संसारात्मकंदुःखंफलंभवतियतःश्रुतंश्रुत्यातृतीयमंत्ररूपयाप्रोक्तमित्यर्थः ॥ ५६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंमंत्रंपठति असुर्याइति तेशुभाशुभकर्मजन्यालोकाअसुर्याइत्युच्यंते सुष्ठुरमंतेइतिसुराआत्मारामाविद्वांसस्तेभ्यइतरेअसुरास्तेषांयोग्याइ तिव्युत्पत्तेः यतोंधेनावरकेणतमसास्वरूपाज्ञानेनव्याप्तास्तानुक्तामूलोकानात्महनोगच्छंतीत्यर्थः ॥५६६॥ यद्विज्ञानाच्चासुर्यलोकगति र्नभवतितस्यात्मनःस्वरूपंप्रदर्शयतोश्चतुर्थपंचममंत्रयोरर्थमाह आत्मरूपमितिचतुर्भिः हेशिष्याइदमसुरैरज्ञातमात्मनःस्वरूपमद्भुतंयतःस्व यंक्रियाहीनमपिमनसोऽपेक्षयाजवीयःअतिवेगवत् मनोगम्येषुप्रथममेवपूर्णत्वादितिभावः तथाइंद्रियैरगम्यमपिब्रह्मज्ञानेनगम्यंभवती त्यर्थः ॥५६७॥ तिष्ठतीति तथातदात्मरूपंस्वयंगिरिवन्निश्चलमप्यन्यानिश्चलानूशीघ्रगमनशालित्वेनधावतोधावनकर्तृतयाप्रसिद्धान्

असुर्यानामतेलोकाअंधेनतमसावृताः॥ मृत्वातेतान्प्रयांत्येवयेकेचात्महनोजनाः ॥ ५६६ ॥ आत्मरूपमि दंशिष्याआश्चर्यमिवसंस्थितं ॥ क्रियाहीनंचमनसोजवीयोनेंद्रियैःक्वचित् ॥ गम्यतेगम्यतेचापिब्रह्मज्ञाना न्मनीषिभिः ॥ ५६७॥ तिष्ठतिगिरिवत्तुयात्यन्यान्परिहायहि ॥ धावतःशीघ्रगमनान्वाय्वादीनपिसर्वदा ॥ ५६८॥ तस्मिन्दधातिभगवानपोवायुःसनातनः ॥ पर्जन्यादिस्वरूपाभिर्याभिर्विश्वमिदंभवेत्॥ ५६९ ॥ कंपतेतदकंपंसत्सुदूरेचांतिकेचतत्॥ अंतर्बहिश्चतत्प्रोक्तमस्यसर्वस्यसर्वदा॥ ५७० ॥

वाय्वादीन्परिहायोल्लंघ्ययातीत्यथः ॥ ५६८ ॥ तस्यांतर्यामितांसकलकर्मदातृतांचाह तस्मिन्निति तस्मिन्वर्णितात्मतत्त्वेआलंबनेसत्ये ववायुःसूत्रात्मसंज्ञोऽपःजलप्रचुरक्षीरदध्यादिसाध्यान्यग्निहोत्रादीनिकर्माणिदधातिधारयति तत्प्रेरितएवसूत्रात्मासकलसंघातेषुकर्मक्ष मइतियावत् याभिरग्निहोत्राद्याहुतिपरिणामात्मिकाभिःपर्जन्यादिभावापन्नाभिरिदंनानाकर्मफलरूपंविश्वंभवतीत्यर्थः तथाचतदेवस कलकर्मफलव्यवस्थापकमितिभावः ॥ ५६९ ॥ कंपतेइति तदात्मतत्त्वमेवकंपतेसकलक्रियाशालिरूपंवस्तुतस्त्वकंपंनिष्क्रियंसदपीति तथातदविदुषांदूरेपिविदुषामन्तिकेभवति तथास्यदृश्यजातस्यबहिरन्तश्चभवतीत्यर्थः ॥ ५७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णितात्मानंप्रत्यक्त्वेनजानतांफलप्रदर्शनपरत्वेनषष्ठादिमंत्रत्रयस्यार्थमाह यस्त्वितिपंचभिः योविवेकीअत्रजीवनावस्थायामेवसर्वाणि आब्रह्मस्तंबपर्यंतानिभूतानिशरीराणिस्वात्मनिवर्णितेस्वरूपेअध्यस्तानीतिपश्यतितथातेषुभूतेषुआत्मानमेवानुगतंपश्यतिसदुःखंग्लानिप्रयोजकंकिंचिदपिनपश्यतीत्यर्थः ॥५७१॥ तत्रहेतुतयाविद्यावस्थायांदुःखप्रयोजकयोरावरणविक्षेपयोरभावमाह यस्येति यस्यपुरुषस्यविजानतोविद्यावतःसर्वाणिभूतानिबोधेनात्मभावमेवगतानिस्युस्तस्याधिष्ठानस्वभावमेकत्वंशास्त्राचार्योपदेशानुसारेणपश्यतःसाक्षात्कुर्वतोमोहआवरणरूपःकःतथाशोकोविक्षेपरूपश्चकः किंशब्दआक्षेपे एतौनसंभवतइत्यर्थः ॥ ५७२ ॥ तत्रापिहेतुतयाविशुद्धेशतत्त्व

यस्तुसर्वाणिभूतानिस्वात्मन्येवात्रपश्यति ॥ सर्वभूतेषुचात्मानंसदुःखंनाधिगच्छति ॥५७१॥ यस्यसर्वाणि भूतानिस्वात्मैवाभूद्विजानतः ॥ तस्यमोहश्चशोकःकएकत्वमनुपश्यतः ॥ ५७२॥ आनंदात्मानमीशंयएकमेवानुपश्यति॥ स्वयंज्योतिषमात्मानंसर्वतःसोधिगच्छति॥५७३॥ स्थूलसूक्ष्मशरीराभ्यामज्ञानेनचवर्जितं॥ निर्गुणंनिष्कलंप्रार्थ्यःसईशोपिचजायते ॥ ५७४॥ क्रांतदर्शीचसर्वज्ञःपरितोदुर्जयःपुमान्॥ स्वयंभूःकारणैःशून्यःसर्वकारणकारणं ॥५७५॥

स्यसर्वतःपरिस्फूर्तिमाह आनंदात्मानमिति यःस्वयंप्रकाशानंदरूपमीशमेकत्वेनाभेदेनसाक्षात्कुरुतेससर्वतोव्याप्तमात्मानमेवपश्यति कीदृशमात्मानंस्थूलसूक्ष्मकारणाख्यैस्त्रिभिःशरीरैर्वर्जितंनिर्गुणंनिष्कलंच तथासोपाधिकदृष्ट्यासविद्वानेवप्रार्थ्यआराध्यईश्वरोपिभवतीतिद्वयोरर्थः ॥ ५७३ ॥ ५७४ ॥ क्रांतेति कीदृशईश्वरः क्रांतदर्शीक्रांतमसंकुचितंद्रष्टुंशीलंयस्यसतथा सर्वज्ञःसर्वमनोवृत्तवेत्ता परितःसर्वतोदुर्जयःअज्ञानादिशत्रूणामभिभावकइतियावत् तथाकारणहीनत्वात्स्वयंभूरित्युक्तः सर्वेषांलोकव्यवस्थाहेतूनांकारणभूतश्चेत्यर्थः ॥ ५७५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंधमित्यादेर्मंत्रषट्कस्यवर्णितात्मज्ञानलाभायकर्मोपासनसमुच्चयविधायकस्यार्थंषड्भिर्दर्शयति अस्येति अस्यवर्णितस्यात्मनोयदनुवि ज्ञानंशास्त्राचार्योपदेशानुसारिसाक्षात्करणंतदुत्पत्त्यर्थोयउपायश्चित्तशुद्धिद्वारकंसाधनंतदुपासनसहितकर्मरूपंबोध्यमित्यर्थः ॥५७६॥ असंभूतिरिति प्रकृतमंत्रेष्वसंभूतिपदमविद्यापदंचकर्मवाचकं संभूतिपदंविद्यापदंचतस्यतत्तदुपाधिकस्येश्वरस्ययदुपासनंतस्यवाचकमि त्यर्थः नचैवमर्थकरणेमंत्रेषुपुनरुक्तिप्रसंगः मंत्राणांजामितानास्तीतिभाष्यकारैरेवोक्तत्वादविद्यापदेनकारतोपकर्षःकर्मणउच्यतेअपकृ ष्टासंभूतिःफलसिद्धिर्यतइतिव्युत्पत्त्याचासंभूतिपदेनफलतोऽपकर्षःकर्मणउच्यते एवंसम्यग्भूतिरैश्वर्यंयतइतिव्युत्पत्त्यासंभूतिपदेनफलत

अस्यात्मनोऽनुविज्ञानउपायःपरिकीर्तितः॥ विद्धितंकर्मनिखिलमुपासनसमन्वितं॥५७६॥ असंभूतिरवि द्याचकर्मप्रोक्तंमनीषिभिः॥संभूतिश्चतथाविद्याप्रोक्तातस्याप्युपासनं॥ ५७७॥ कर्मणापुत्रदारादिसक्ताः स्वर्गादिगामिनः ॥ रागद्वेषादिसंयुक्ताजनिमृत्युवशंगताः ॥ ५७८ ॥ उपासनरतायेस्युस्तेभ्योप्यधिकमेव ते॥ ऐश्वर्यासक्तहृदयास्तमोयांत्यपिदारुणं॥५७९॥ विहितंकर्मसंत्यज्ययउपासनतत्पराः ॥ कर्मत्यागस्य दोषेणह्यैश्वर्यासक्तितस्तथा॥ कर्मिणोप्यधिकंदुःखंततएवप्रयांतिते ॥५८०॥

उपासनोत्कर्षोविद्यापदेनतुदेवताविज्ञानरूपकारणतस्तस्योत्कर्षइतिविशेषसंभवाच्च भाष्यव्याख्यानविरोधस्तुउपासनवाक्यार्थप्रदर्शने यंथकर्तुरनत्यादरात् वृत्तिकारादिप्राचीनानुरोधेनयथाश्रुतार्थनिरूपणेपिनायातितत्रपूर्वपक्षतयास्योपयोगसंभवादितिबोध्यम्॥५७७॥ तत्रसमुच्चयंविधातुंकेवलंकर्मनिंदति कर्मणेति केवलेनकर्मणासांसारिकफलेसक्ताजनिमृत्युप्रवाहंयांतीतिभावः ॥ ५७८ ॥ केवलोपा सनंनिंदति उपासनेतिद्वाभ्यां येचकेवलोपासनएवरतास्तेऐश्वर्यरूपोपासनफलासक्तहृदयाःसंतस्तेभ्यःकर्मिभ्योऽधिकंदारुणंचतमोयां तीति ॥ ५७९ ॥ अत्रोपपत्तिमाह विहितमिति केवलोपासकेषुद्वावनर्थहेतूविहितकर्मत्यागऐश्वर्यासक्तिश्चतद्बलात्तेकेवलोपासकाःक र्मपिक्षयाअधिकंदुःखंयांतीतियुक्तमुक्तमित्यर्थः ॥ ५८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्समुच्चितमेवकर्मोपासनंकार्यमित्याह ततइति यत्किंचिदुपासनमुक्तमेतत्कर्मसमेतमेवभवेदनुष्ठेयंस्यात् परंकर्मासमुच्चितंतुदुःखदमि
त्यर्थः ॥ ५८१ ॥ अथांत्यमंत्रचतुष्टयस्यसप्रयोजनमर्थंदर्शयति कर्मोपासनेत्येकादशभिः कर्मोपासनाभ्यांसमुच्चिताभ्यांयुक्तःपुरुषस्त
त्त्वज्ञानकामआदित्यगतमानसःसन्नादित्यंनृणामधिकारिणांमुक्तेःक्रममोक्षस्यप्राप्तयेद्वारस्यतत्त्वमंडलच्छिद्ररूपस्यदातारंबहुधापुनःपुनः
प्रार्थयेत् केन हिरण्मयेनेत्यारभ्यपश्यामीत्यंतेनेतिद्वयोःसंबंधः अस्यमंत्रस्यार्थस्त्वग्रेवक्ष्यते ॥ ५८२ ॥ ५८३ ॥ योसावित्यादेःप्र

ततःकर्मसमेतंयद्भवेत्किंचिदुपासनं ॥ उक्तमेतत्परंक्लेशकारकंपरिकीर्त्तितं ॥ ५८१ ॥ कर्मोपासनसं
युक्तोज्ञानार्थीपुरुषःसदा ॥ प्रार्थयेततमादित्यंमुक्तिद्वारप्रदंनृणां ॥ ५८२ ॥ हिरण्मयेनपात्रेणेत्यादिनाब
हुधाचहि ॥ पश्यामीत्यंततोधीमानादित्यगतमानसः ॥ ५८३ ॥ एवंप्रार्थयमानस्यबुद्धिरस्यमहात्मनः ॥
आदित्येयःपुमान्सोयंभवाम्येवनसंशयः ॥ ५८४ ॥ नदेहेंद्रियसंघातःपंचभूतात्मकोयतः ॥ भस्मांतःसक
थंनामस्यामहंस्वात्मवित्सदा ॥ ५८५ ॥

णवपर्यंतस्यार्थमाह एवंप्रार्थयमानस्येति अस्यसमुच्चयानुष्ठायिनोमहात्मनःकार्पण्यंत्यजतउक्तमंत्रेणादित्यंप्रार्थयमानस्यचैवंविधाबु
द्धिर्भवति एवंविधाकीदृशी यआदित्यमंडलांतस्थःपुरुषःसएवाहंभवामि सएवममपारमार्थिकंरूपमितियावत् देहादिसंघातरूपस्त्वहं
नभवामि यतःसदेहादिसंघातःपंचभूतात्मकोभस्मांतोभस्मादिरूपपरिणामीचभवतिततःसममप्रणववाच्यमात्मानंजानतःस्वरूपंकथंस्या
दितिद्वयोरर्थः ॥ ५८४ ॥ ५८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थस्मरपदांतवाक्यस्यार्थमाह मनइति समुच्चयानुष्ठायीपुरुषःकलेवरविषयकवैराग्यवान्स्वकीयंमनश्चित्तंप्रतिएतद्वदति एतत्किं हेमनः त्वयायत्रदेशेकालेवायद्यत्प्राप्तंतत्सर्वंपुराकृतेनपुरातनस्वकीयशरीरनिर्मितेनकर्मणैवप्राप्तं कीदृशेनकर्मणा संकल्पोमानसव्यापारस्तत्सहितयो तेन अधुनातदनुभूतंकर्मसंकल्पयोर्माहात्म्यंकिमितिविस्मृतं ततस्त्वमधुनाकर्मणोविहितस्यसंकल्पस्यचोपासनरूपस्यानयोःसमुच्चितयोर्माहात्म्यंस्मृत्वातन्निष्ठोभवेतिद्वयोरर्थः॥५८६॥५८७॥ उक्तविधप्रार्थनायाःफलमाह एवमिति इत्थंमनःप्रार्थयमानस्तथाउक्तेनहिरण्म

मनःप्रतिवदत्येतद्विरक्तःसकलेवरे॥कर्मणायत्रयत्प्राप्तंसंकल्पसहितेनच॥५८६॥ पुराकृतेनतत्कस्मादधुनाविस्मृतंत्वया॥ संकल्पंचततःकर्मस्मरत्वमधुनापुनः ॥ ५८७॥ एवंप्रार्थयमानःसन्मनःपापविवर्जितः ॥ आदित्यंचोक्तमंत्रेणवचनैर्वापिलौकिकैः ॥ गच्छेद्ब्रह्मपरंचैवप्रार्थनातश्चवन्हितः ॥ ५८८ ॥ अग्नेमांनयमार्गेणदुःखहीनेनसर्वदा ॥ उज्वलेनसदासर्वचित्तज्ञस्त्वमसीहभो ॥ अस्माकंद्वेषिणःसर्वान्विनाशयनमोस्तुते ॥ ५८९ ॥

येनेत्यादिनामंत्रेणलौकिकैर्वैदिकैःस्तोत्रैश्चादित्यंप्रार्थयमानःसंस्तथावक्ष्यमाणविधयावन्हिप्रार्थनातश्चपापवर्जितोभूत्वापरंब्रह्मक्रमेण गच्छेदितिद्वयोरर्थः ॥ ५८८ ॥ तत्रांत्यस्याग्निप्रार्थनामंत्रस्यार्थमाह अग्नेइति भोअग्नेदेवत्वंमांशोभनमार्गेणउज्वलेनप्रकाशवतादेवयानाख्येनब्रह्मलोकंनयप्रापय तथास्माकंद्वेषिणःशत्रून्पापप्रयोजककामादिरूपान्सर्वान्नाशय नचतेतवाविदिताःयतस्त्वंसर्वेषांचित्तवृत्तस्यज्ञातासि अतश्चतवप्रत्युपकर्त्तुमशक्तानामस्माकंत्वयिप्रव्हीभावोस्त्वित्यर्थः ॥ ५८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदित्यप्रार्थनामंत्रंदर्शयितुंप्रतिजानीते सूर्यस्येति अयंकइत्याकांक्षायांतंपठति हिरण्मयेनेति हिरण्मयमिवहिरण्मयंज्वलत्सुवर्णवद्देदीप्यमानंयत्पात्रंपिधानपात्रसमंतेजोमंडलंतेनसत्याख्यस्यादित्यमंडलांतःस्थस्यब्रह्मणोमुखंप्राप्तिद्वारभूतंछिद्रंपिहितमाच्छादितंवर्त्ततेहेपूषन्जगतःपोषकसूर्यतन्मुखपिधानमपावृणुअपसारय किमर्थं सत्यंसत्यपरत्वंधर्मोयस्यतंमांसंसारात्त्रातुंयाद्दृष्टिःप्रादुर्भावस्तदर्थमित्यर्थः ॥५९०॥यदिति हेपूषन्यत्त्वदीयंरूपंकल्याणतमंस्मृतिमात्रेणसकलानर्थहरंसत्परमार्थभूतंतदहंयथापश्यामितथाकुर्वित्येवंविधःसप्रसिद्धः

सूर्यस्यप्रार्थनामंत्रस्त्वयमुक्तोमनीषिभिः ॥ हिरण्मयेनपात्रेणसत्यस्यपिहितंमुखं ॥ पूषन्नपावृणुत्वंतत्सत्यधर्मायदृष्टये॥ ५९० ॥ यत्कल्याणतमंतेग्ररूपंसत्तदहंविभो ॥ पश्यामीतिचमंत्रार्थःकथितःसवितुर्हिसः ॥ ५९१ ॥ इतियस्याप्तयेविद्याईश्वरस्यसदैवहि॥ कथयंतिसईशानःपुराणेस्मिन्समीरितः॥ ५९२ ॥ सर्वत्रनापरंकिंचित्ततएतत्पठन्पुमान्॥ शृण्वन्वदन्विजानन्वैमुच्यतेभवसंकटात्॥ ५९३ ॥

सवितृसंबंधिमंत्रस्यार्थःकथितइत्यर्थः॥५९१॥ अस्यग्रंथस्यनिरावरणेशतत्त्वपरायणत्वेनविश्वोद्धारक्षमत्वमितिदर्शयन्नुपसंहरति इतियस्येतिद्वाभ्यां यस्येश्वरस्याप्तयेलाभायइतिएवंविधाविद्याःकथयंतिउपदिशंतिवैदिकाःसभगवानीश्वरएवास्मिन्निबंधनेसर्वत्रसर्वावयवावच्छेदेनकीर्त्तितः कीदृशेस्मिन्पुराणेपुरासर्वतःप्रथमःप्रथमंभासमानःपरमात्मैवअनःप्राणोयस्यतत्तथेत्यन्वर्थनामके ततोस्यभगवदेकपरत्वादेतत्पुराणकर्मकानिपठनश्रवणकीर्त्तनानुसंधानानिमूलाज्ञानहरणेनमोक्षप्रयोजकानीतिद्वयोरर्थः ॥ ५९२ ॥ ५९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईशावास्यमितिश्रुतेर्भगवतःसर्वंकिमेषोर्पयेदित्येतांमनसोव्यथांश्लथयतेजातेदृशीशेमुषी॥ किंचेशादपरंसमर्पणमितःसन्मंगलत्वत्पदेगौर
श्यामरुचेसमंगलतनुष्टीकाऽऽहितैषाऽव्यये ॥ १ ॥ सूनोःश्रीठाकुरीदेव्याःकृतिर्विश्वेश्वरेर्पिता॥सतामन्वीक्षमाणानांप्रमोदंजनयेत्सदा ॥ २॥
सर्वेभवंतुसुखिनःसर्वेसंतुनिरामयाः॥शमातनोतुसर्वेषांविद्यादानेनशङ्करः ॥३॥ नमस्तस्मैहनुमतेयस्यवारिधिलंघनं॥ संसारसंकटोत्तारतर
णिःस्मरतांभवेत् ॥ ४ ॥ एषांचतुर्णामयमर्थः ईट्ईश्वरस्तेनईशासर्वंविश्वंवास्यंआच्छाद्यंव्याप्यमितियावत् इत्याद्यर्थकयाव्याख्यातश्रु
त्यासर्वपदार्थजातंभगवतएवसंबंधित्वेननिश्चितं एवंसतिकिंवस्तुएषजनःसमर्पयेत्भगवतेदातुंशक्नुयान्नकिमपिस्वत्वाभावादितिभावः इ
त्येवमाकारांव्यथांचितांमनसःसमर्पणोद्यतस्यधर्मभूतांतत्पार्श्ववर्तिनीईदृशीशेमुषीमतिःशिथिलीकरोति ईदृशीकीदृशी किंसमर्पणव्यापा
रोयमीश्वरादपरःपृथक्सत्ताकः अपितुन तथाचभगवद्वाक्यंगीतासुब्रह्मार्पणंब्रह्महविरित्यादि अतएतदालोच्यहेभगवन्हेगौरश्यामरुचेह
रिहराख्यलीलाविग्रहरूपेणश्वेताश्यामाचरुचिःकांतिर्यस्यतत्संबोधनं तथाहेसन्मंगलसंतिवर्त्तमानानिमंगलानियतःसतथामङ्गलविशिष्टे

इतिश्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्येणशंकरानंदभगवताविरचितउपनिषद्रत्न
आत्मपुराणेअष्टादशोऽध्यायःसमाप्तः॥ १८ ॥ समाप्तंचात्मपुराणम् ॥ ॥ ॥ ॥

तिवातत्संबोधनं तथात्वत्पदेभवतःपादेएषासत्प्रसवाख्याटीकाआहितासमर्पिता यतःसामंगलतनुःनानामंगलशालित्वेनभवतोयोग्येत्यर्थः
एतेनज्योतिर्वित्संमतंमंगलवत्याविष्णुमूर्त्यर्पणंमंगलिनेवरायवाऽर्पणमित्युभयमनुष्ठितंश्लेषेणध्वन्यते हरिहरात्मकविश्वेश्वरस्यविष्णुमूर्त्ति
त्वात्समंगलत्वाच्च नचतदर्पितायाःकाचिद्धानिशंकाविश्वेश्वरस्याव्ययत्वादितिभावः तदुक्तंज्योतिःसारसंग्रहे कर्त्तव्यंगुणबाहुल्येकुजेवा
तादृशेद्वयोः गुणाधिकेभौमदोषोनैर्वाचत्योविचक्षणैरिति समर्पणमितिशेषः द्वितीयेमातृनामनिर्देशेनउक्तार्थवैशद्यं तृतीयेसदाशीःप्रार्थनं
चस्फुटं चतुर्थेहनुमतोवारिधिलंघनरूपोव्यापारोविचित्रोयःस्मरतांसंसारतरणायतरणीभूतइत्युक्तमितिशिवम् बाणनागाहिविधुभिर्मितेव
र्षेकेविक्रमात् नभसःसितपंचम्यांकाश्यांपूर्त्तिमियंगता इतिश्रीदत्तकुलतिलककृष्णचंद्रात्मजदिलारामसूरितनूजरामकृष्णस्यश्रीविश्वेश्व
राश्रमपूज्यपादानुगृहीतस्यकृतावात्मपुराणटीकायांसत्प्रसवाख्यायामष्टादशोध्यायःसमाप्तः ॥१८॥ समाप्तश्चायंग्रंथः॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणे अष्टादशोऽध्यायः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्यात्मपुराणं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu